

परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

जिनवाणी-महोत्सव

सहस्रग्रन्थसंग्रह

❊ जन्मदिवस 19–03–1971 ❊ मुनिदीक्षा–11–05–1989 ❊ आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणाः–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

वाचस्पत्यम्

भाग – 01

लेखक
श्री तारानाथ भट्टाचार्य

प्रकाशक
चौखम्बा संस्कृत सीरीज
वाराणसी (उत्तरप्रदेश)

(परम्परानायक)



परम पूज्य चारित्र-चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)



परम पूज्य तीर्थभक्त-शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)



परम पूज्य सिद्धान्त-चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)



परम पूज्य तपश्चर्या-चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्रायः होता है। फलतः उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तृत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि-परिवार

वाचस्पत्यम्

वृहत् संस्कृताभिधान

प्रथमखण्डम्

गवर्णमेण्टसंस्कृतविद्यालयस्थ-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण

सङ्कलितम्

तेनैव संस्कृतम्

१८७८ संवत्सरे मुद्रितम्

VACHASPATYA

A

COMPREHENSIVE SANSCRIT DICTIONARY

IN TEN PARTS.—PART. I.

COMPILED BY

TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy in the

Govt. Sanscrit College of Calcutta.

CALCUTTA

PRINTED AT THE KAVYA PRAKASHA PRESS.

1873
198 14

To be had from Pandit Jibananda Vidyasagara B. A.
Sanscrit

वाचस्पत्याभिधाने प्रतिपाद्यानि

ग्रन्थारम्भप्रयोजनादि ।
सवृत्त्युदाहरणं पाणिनीयलिङ्गानुशासनम् ।
पाणिनीयप्रत्ययपरिनिष्ठितरूपम् ।
उणादिप्रत्ययपरिनिष्ठितरूपम् ।
रूढयौगिकादिशब्दभेदनियमविशेषाः ।
शब्दानां पूर्व्वोत्तरपदयोः परिवृत्तिसहत्वासहत्वे ।
डाक्तर उदयचन्द्र सेन-प्रणीताभिधान-शब्दकल्पद्रुमाभिधान-प्रदर्शितशब्दानां व्युत्पत्तयस्तदर्थाश्च ।
यथासम्भवं तेषामर्थभेदेषूदाहरणानि ।
तत्रानुक्तानां जरमणीयसंस्कृताभिधानोक्तानां, वैदिकानां च शब्दानां व्युत्पत्तयस्तदर्थाश्च ।
तत्राप्यनुक्तानां बह्वनां वैदिकशब्दानाम् निरुक्तनिर्दिष्ट चार्व्वाकादिपरिभाषितशब्दानाञ्चार्थाः ।
चार्व्वाकपरिभाषितानां शब्दानामर्थास्तन्मतञ्च ।
माध्यमिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
योगाचारपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
वैभाषिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
सौत्रान्तिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
आर्हतपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
रामानुजपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
माध्वपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पाशुपतपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
शैवदर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
प्रत्यभिज्ञादर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
रसेश्वरदर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
कणादपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
गौतमन्यायपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
जैमिनीयपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पाणिनीयपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
सांख्यपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पातञ्जलपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
वेदान्तपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
आश्वलायनादिश्रौतगृह्यसूत्रपरिभाषितानामर्थाः ।
महाभारतप्रतिपाद्यविषयाः ।
पुराणादिषु प्रसिद्धराजर्षीणां संक्षेपेणेतिवृत्तानि
देशविशेषलक्षणतत्स्थानानि ।
हठयोगशास्त्रपरिभाषितशब्दानामर्थाः ।
सुश्रुतादिवैद्यकपरिभाषितशब्दानामर्थाः ।
तदुक्तशरीरादिसंस्थानम् ।
तदुक्तद्रव्यत्वचादिलक्षणानि ।
ज्योतिषस्य चतुःषष्टिरङ्गानि ।
तेषु परिभाषितशब्दानामर्थाः ।
तत्र सिद्धान्तशिरोमणिपरिभाषितशब्दानामर्थाः
भूमेः स्थिरत्व तस्य, चलत्वे चार्य्यभट्टस्य मतम् ।
सौरागमपरिभाषितशब्दानामर्थाः ।
भूगोलसंस्थानप्रमाणादि ।
खगोलसंस्थानप्रमाणादि ।
वृहत्संहिताप्रतिपाद्यविषयास्तच्छब्दार्थाश्च ।
वाशिष्ठादिपरिभाषितशब्दानामर्थाः । [च ।
नरपतिजयचर्य्यापरिभाषितानामर्थास्तत्र चक्राणि
शकुनशास्त्रप्रसिद्धशब्दानामर्थाः ।
ताजिकपरिभाषितशब्दानामर्थाः ।
वास्तुशास्त्रादिप्रसिद्धगृहकुड्यादिलक्षणानि ।
सर्व्वदेवमूर्त्तिलक्षणानि ।
तन्त्रशास्त्रपरिभाषितशब्दानामर्थाः ।
तन्त्रोक्तषट्चक्रस्वरूपणि ।
शारदातिलकादिपरिभाषितशब्दानामर्थाः ।
नीतिशास्त्रपरिभाषितशब्दानामर्थाः ।
अश्वशास्त्रपरिभाषितशब्दानामर्थाः ।
धनुर्व्वेदपरिभाषितशब्दानामर्थाः ।
गान्धर्व्ववेदपरिभाषितशब्दानामर्थाः ।
शिल्पापरिभाषितशब्दानामर्थाः
कल्पपरिभाषितशब्दानामर्थाः ।
छन्दःशास्त्रोक्तशब्दानामर्थास्तल्लक्षणभेदाश्च ।
अलङ्कारशास्त्रपरिभाषितानाममर्थाः ।
शब्दार्थालङ्काराणां लक्षणोदाहरणानि । [णानि च ।
दशरूपकादिपरिभाषितानामर्थास्तल्लक्षणोदाहर
सैन्यव्यूहादिलक्षणानि ।
सैन्यपरिमाणभेदाः ।
पाकशास्त्रपरिभाषितशब्दानामर्थास्तत्प्रकारभेदाश्च ।

ओं तत्सत् ।

ग्रन्थारम्भः ।

श्रीगौरीतनुसम्भवं सुरवरैर्वन्द्याङ्घ्रिपद्मद्वयम् दन्तीन्द्राननमेकदन्तमुमुखं सिन्दूरशोभान्वितम् ।
विघ्नध्वान्तनिवारणैकतरणिं सर्व्वार्थसिद्धिप्रदम् वन्दे भक्तिसमन्वितो विमलधीर्हेतुं हृदब्जे सदा ॥ १ ॥
व्युत्पार्थाधिगमं सर्व्वप्रकृतिप्रत्ययाभिधम् । अलिङ्गं बहुलिङ्गञ्च शब्दब्रह्माहमाश्रये ॥ २ ॥
वाचामधीश्वरीं देवीं भक्त्या नत्वा वितन्यते । तारानाथद्विजेनेदं वाचस्पत्यसमाक्षयम् ॥ ३ ॥
यो बबन्ध विना सूत्रं शब्दरत्नस्रजं धिया । अशेषशेमुषीदात्रे तस्मै शेषात्मने नमः ॥ ४ ॥
निःशेषं नाशयन्त्वेनः शेषाशेषमुखानि नः । यतः शब्दविशेषाणां रूपार्थाभ्यां प्रकाशनम् ॥ ५ ॥
सूत्रवार्त्तिकभाष्याणां कारकान् मुनिसत्तमान् । पाणिन्यादीन् प्रणम्येह व्युत्पत्तिर्दर्श्यते मया ॥ ६ ॥
निघण्टुकारिणां ग्रन्थास्तद्व्याख्याकारिणां तथा । मच्चित्ते द्योतयन्त्वर्थान् प्रकाशन्तां सदाऽखिलाः ॥ ७ ॥

मुखबन्धविज्ञापने ।

इह खलु पुरुषा यां काञ्चित् भाषामभ्यसितुमीहमानाः प्रयतन्ते तदर्थज्ञानसाधनं तत्तद्भाषाव्याकरणं कोषञ्चाधिगन्तुम् । तत्र व्याकरणात् प्रायोयौगिकशब्दसाधूनामर्थज्ञानं, कोषात् पुनः रूढ़ानां शब्दानां केषाञ्चित् यौगिकानामपि । कोषो नाम शब्दानामर्थबोधकं शास्त्रम् । तच्च संस्कृतकोषे प्रायेण लिङ्ग-सहितस्यैवार्थबोधनम् । तच्च यद्यपि संस्कृतभाषयैव विजातीयभाषयापि भवितुमर्हति, तथापि भाषान्तरेण भाषान्तरस्यार्थज्ञापने, सम्पूर्णतात्पर्य्यार्थस्यास्फुरणात् एकविधभाषयैवार्थस्य ज्ञापने तु भावार्थस्य स्फुटं स्फुरणात्, समानभाषयापि प्रकृतिप्रत्ययविभागमप्रदर्श्य अखण्डार्थस्य बोधने तदवयवार्थस्याबोधात् खण्डशस्तथा बोधने तु अवयवशब्दार्थस्यापि सुखेन ग्रहाच्च अवयवार्थप्रदर्शनपूर्ब्बकम् एकविधभाषयैवार्थ-बोधनं युक्तम् । किन्तु प्रसिद्धेषु संस्कृताभिधानेषु अमरकोषादिषु केवलम् अखण्डार्थस्यैव प्रतिपादनात् शब्दानां सर्व्वेषामर्थानामप्रतिपादनाच्च तत्र कीर्त्तितानामपि शब्दानाम् अकारादिक्रममतिक्रम्यैव पाठे-नार्थप्रतिपादनात् व्युत्पत्त्यनामतीव दुर्गमत्वेन न तेषां समीचीनता । किञ्च तत्रोक्तानामपि शब्दानाम-वयवार्थज्ञानमसुलभमेव । नानाकोषपठितानां शब्दानामेकत्र सङ्कलनेन पाणिन्यागममनुसृत्य विविध-विद्यावता डाक्तरोपाधिना 'उद्भिसन्' साहेबेन, वेदादिशास्त्रादिषु विशेषतः शब्दकल्पद्रुमाभिधाने कृत-श्रमाभ्यां विद्वद्भ्यां बोधलिङ्गराभ्यां च प्रणीतयोः संस्कृताभिधानयोः प्रकृतिप्रत्ययविभागप्रदर्शनपूर्ब्बकं सुपरिपाट्या बहुत्वेऽपि तैः स्वस्वभाषयैव संस्कृतशब्दस्यार्थानां बोधनात् संस्कृतभाषयार्थबोधनमन्तरेण संस्कृत-शब्दानामर्थजातस्य अवयवार्थग्रहेण विशेषतोऽपरिचिततत्तद्भाषाणां सुतरामेव न सुग्रहः । अतः संस्कृतभाषाशब्दानामभिधानं संस्कृतभाषयैव व्याख्यानयुतं प्रकृतिप्रत्ययादिविभागसहितं सुपरिपाटीक-

मेकमभिधानं व्युत्पित्सुनामवश्यमपेक्षितमिति निश्चित्य तथाविधाभिधानसङ्कलने ममातितरां सङ्कल्पो ऽवर्त्तत। किन्त्वसौ सङ्कल्पस्तत्प्रचारोपयोगिव्ययार्थार्थसार्थविरहेण निरर्थकतया मुकुलित इव ममजनि।

अथ तथाविधाभिधानप्रचारार्थं मुद्राव्यापारोपयोगिधनवाञ्छया एतद्देशाधिपसंस्थापितविद्यासमाज-विभाग-प्रधानाध्यक्षम् (डिरक्टर) इति पदेऽभिषिक्तम् (एमे) इत्युपाधिकं श्रीयुक्तम् (एइच् उड्रो) इति नामकं साहेबं प्रत्यावेदितम्। मदावेदितेन च विविधविद्यानुरागवता विद्यावृद्धिविषये एकान्तोत्साहिना तेन प्रोत्साहितः वङ्गवर्णमेष्टः अयुतं मुद्राः एतत्पुस्तकमुद्राव्ययसाहाय्यार्थं दातुमङ्गीचकार।

एवमेतद्देशाधिपतिनाऽङ्गीकृते प्रचारोपयोगिव्ययानुकूल्ये चिरमुकुलितोऽपि स संकल्पः पुनः फल्गोन्मुखीबभूव। अथ तथाविधसंस्कृताभिधाननिर्म्माणाय वेदस्मृतिपुराणमीमांसादिदर्शनज्योतिषतन्त्रवैद्यकव्याकरणालङ्कारादीनि शास्त्राणि समालोड्य बङ्गलाः शब्दाः सङ्कलिताः उदाहरणानि च नानाशास्त्रेभ्य उद्धृत्य दर्शितानि। आदौ च पाणिनीयलिङ्गानुशासनमुद्धृत्य व्याख्यायोदाहरणजातं प्रादर्शि। ततः पाणिन्यादिविहितप्रत्ययागमानां परिनिष्ठितरूपाणि च दर्शितानि। यौगिकशब्दविशेषे पूर्व्वोत्तरपदयोः परिवृत्तियोग्यताबोधनाय नियमविशेषश्चात्राभिहितः।

अत्र च शब्दानां स्थूलाक्षरेण प्रथमं स्वरूपप्रदर्शनम्, ततः सङ्केतविशेषेण लिङ्गप्रदर्शनम्, ततोऽवयवार्थप्रदर्शनम्, ततः व्याकरणप्रक्रिया; ततोऽर्थविशेषकथनम्, यदर्थविशेषे लिङ्गभेदः प्रकृतिप्रत्ययभेदश्च तत्र परतो दर्शिताः यद्यदर्थविशेषे येये शब्दा ग्रन्थान्तरे प्रयुक्तास्तत्तद्ग्रन्थनाम समुल्लेखि। 'नाम च धातुजमाह निरुक्ते' इत्युक्तेः सर्व्वशब्दानां धातुमूलतया पाणिनीयगणसूत्रपठितधातूनपि स्थूलाक्षरेण शब्दक्रममध्ये एव निवेश्य तेषाम् धातूनामर्थविशेषः, उपसर्गभेदेनार्थविशेषः, गणभेदः, पदनियमः, इट्शून्यतादि, सकर्म्मकत्वादि, लटि लुङि प्रसिद्धकृत्सु च रूपञ्च दर्शितम्। यद्यपि अर्थविशेषोत्कीर्त्तनं संस्कृतभाषयैव सर्व्वत्र कृतं, तथापि यत्र वङ्गभाषयापि अर्थकथने प्रकृतार्थस्य स्फुटं प्रतीतिर्भवेत् तत्र क्वचित्क्वचित् ग्रन्थबहिर्भूतताम्रचक्रेण वेष्टनाकाररेखाद्वयेन वेष्टितया वङ्गभाषयाप्यर्थप्रकाशनं कृतम्।

अत्र च यावता प्रयत्नेन अतीव सुगमता भवेत् तथा प्रयत्नः कृतः। अतिप्रामाणिकतया पाणिनीयागमानुसार्य्येव प्रत्ययादिसंज्ञादिकमत्राद्रतम्।

एतस्य ग्राहकाणां सम्पूर्णपुस्तकस्य एकदा प्रचारे तत्क्रयार्थम् एकदैव बहुद्रव्यापेक्षा स्यादिति अल्पवित्तानां कष्टं भवेत् तन्मा भूदित्यनया धिया खण्डश एव प्रचारे यतमानेन मया प्रथममिदं खण्डं प्राचारि।

सम्भावयामि एतत् पुस्तकं प्रायः दशभिः खण्डैः संपूर्णं स्यादिति। प्रयतिष्यते च तथा, यथा षड्भिः षड्भिर्मासैरेकैकं खण्डं प्रचारमियादित्यत्र।

एतस्य सङ्कलने शोधने च भूयान् परिश्रमः स्वीकृतस्तथापि अत्र यत्किञ्चिन्मम स्खलनं सुधीभिः समुल्लाल्येत तच्च तैः निजगुणेन परिशोधनीयम्। शिवमस्तु श्रीं तत्सत्।

प्रतिशब्दं लिङ्गविशेषाणामग्रे वक्ष्यमाणत्वेऽपि शब्दभेदानां प्रत्ययविशेषान्तप्रकृतिविशेषाणाञ्च
सामान्यतो लिङ्गविशेषज्ञाने सौकर्य्यं भवतीति पाणिनीयलिङ्गानुशासनसूत्राणि
प्रदर्श्य व्याख्यायोदाहरणदर्शनेन लिङ्गविशेषास्तत्रादौ निरूप्यन्ते ।

तत्र लिङ्गमित्यधिकृत्य पाणिनिनाऽनुशिष्टम् ।

स्त्री । १ ।

इत उत्तरं वक्ष्यमाणाः शब्दाः स्त्रीलिङ्गाः स्युरित्यधिकारः । तत्तद्-
प्रवादस्तत्तत्सूत्रे वक्ष्यते तथाच विशेषैरबाधिता एव स्त्रीलिङ्गाः ।

ऋकारान्ता मातृदुहितृपोतृस्वसृननान्दरः । २ ।

ऋकारान्ता अमी पञ्चैव स्त्रीलिङ्गा नान्ये। अन्येषाम् "अचेऽभ्यः"
इति ङीच्विधानेन ईकारान्तत्वात् स्वस्यादेरेव ङीब्निषेधेन
ऋदन्तत्वात्, तिसृचतसृभ्यां स्त्रियामादेशतया प्रकृतिरूपत्वा-
भावेन ऋदन्तत्वेऽपि न नियमव्याघातः । माता दुहिता स्वसा
पोता ननान्दा ।

अन्यूप्रत्ययान्तो धातुः । ३ ।

अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः सरणिः
रजनिरित्यादि । तत्र च "ऋदिकारादक्तिनः" इति पक्षे ङीप्
अवनी रजनी चेत्यादि । चमूः बधूरित्यादि । प्रत्ययान्तः किम् ?
दिव्यतेः क्विप् द्यूः अयं विशेष्यलिङ्गः ।

अशनिभरण्यरण्यः पुंसि च । ४ ।

एते स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । अनिप्रत्ययान्ततया स्त्रीत्वे
प्राप्ते पाक्षिकपुंस्त्वविधानार्थं सूत्रम् । इयमयं वा अशनिः
भरणिः अरणिः । स्त्रीत्वपक्षे ङीप् वा अशनीत्यादि

नित्यन्तः । ५ ।

धातुरित्यनुवर्त्तते । नित्प्रत्ययान्तः नित्प्रत्ययान्तश्च धातुः स्त्रियां
स्यात् । भूमिः ग्लानिः क्ष्मानिः धुनिः । अत्रापि वा ङीप्
भूमी ग्लानी क्ष्मानी धुनी इत्यादि ।

वह्निरण्यग्नयः पुंसि । ६ ।

नित्प्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं
वह्निः क्ष्मणिः अग्निः ।

श्रोणियोन्यूर्म्मयः पुंसि च । ७ ।

एते शब्दाः स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । एतेषां नित्यन्तत्वेन
प्राप्तौ विकल्पः । अयमियं वा श्रोणिः योनिः ऊर्म्मिः । स्त्रीत्वपक्षे
वा ङीप् श्रोणी योनी ऊर्म्मी ।

क्तिन्नन्तः । ८ ।

क्तिन्प्रत्ययान्तो धातुः स्त्रियां स्यात् । कृतिः बुद्धिः दृष्टिः ।
"अक्तिनः" इति निर्देशात् अत्र न पक्षे ङीप् ।

ईकारान्तश्च । ९ ।

ईप्रत्ययान्तो धातुः स्त्रियां स्यात् । चकारोधात्वधिकारनिवृ-
त्त्यर्थः । एतत्सूत्रपर्य्यन्त एव धातुरनुवर्त्तते नाग्रिमसूत्रे ।
अवीः, तन्त्रीः, तरीः, लक्ष्मीः ।

ऊङुभ्यामन्तश्च । १० ।

ङीब्ङीष्ङीनां ग्रहणाय ङीग्रहणं टाप्चापोर्ग्रहणायापो
ग्रहणम् । ऊङन्तः ङ्यन्तः आबन्तश्च शब्दः स्त्रीलिङ्गः स्यात् ।
ऊङादीनां स्त्रियां विहितत्वेऽपि एकत्र सर्व्वेषां ग्रहणे लिङ्गज्ञानस्य
सुगमतार्थमिह ग्रहणम् । एवमन्यत्रापि । ऊङ् । कुरुः कर्कन्धूः
ङी । कर्त्री गौरी ब्राह्मणी । आप् विद्या भिदा त्वरा जरा
इत्यादि ।

यन्तमेकाक्षरम् । ११ ।

एकाक्षरः ईकारान्तः ऊकारान्तश्च अस्ति विशेषे स्त्रीलिङ्गः
स्यात् । श्रीः भूः । दीव्यतेः क्विपि तु विशेषलिङ्गता ।
एकाक्षरं किम् ? बहुव्रीहौ पृथुश्रीः प्राग्भूः विशेष्यलिङ्ग एव ।

विंशत्यादिरा नवतेः । १२ ।

विंशतिप्रभृतयः नवतिपर्य्यन्ताः संख्यासंख्येयवाचकाः स्त्रियां स्युः ।
इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः
नवतिः । ऋदिकारान्तत्वाभावात् विंशत्यादिभ्यो न पक्षे ङीप् ।
एकविंशत्यादेस्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति स्त्रीत्वमेव
एकनवत्यादेः नवतिलिङ्गानतिक्रमेणावधित्वव्याघातः । आ
नवतेः किं ? शतं सहस्रम् । विंशत्यादयः किम् ? एकदशादेर्विशेष्य-
लिङ्गत्वम् ।

दुन्दुभिरत्वेषु । १३ ।

अत्वार्थको दुन्दुभिशब्दः स्त्रीलिङ्गः स्यात् । इयं दुन्दुभिः पक्षे
ङीप् दुन्दुभी । अत्वादन्यत्र न स्त्रीत्वम् किन्तु पुंस्त्वम् ।

नाभिरत्रियें । १४ ।

क्षत्रियार्थकभिन्नो नाभिशब्दः स्त्रीलिङ्गः स्यात् । इयं नाभिः (अवावयवः) वा ङीप् नाभी ।

उभावन्यत्र पुंसि । १५ ।

उभौ दुन्दुभिनाभिशब्दौ क्रमेण नाभिभिन्ने क्षत्रिये च वर्त्तमानौ पुंलिङ्गौ स्याताम् । अयं दुन्दुभिः (वाद्यभेदः असुरभेदो वा) अयं नाभिः (क्षत्रियः) "लिङ्गमशिष्यं लोकाश्रयत्वात्" इत्युक्तेः क्वचित् व्यभिचारः । तेन अवयववाचकस्य पुंस्त्वमपि "ससङ्गसत्पङ्कजपत्रकोमलैरुपाहितश्रीरुपनीविनाभिभिः" इत्यत्र पुंस्त्वम् । अत एव रभसः

सख्यराट् क्षत्रिये नाभिः पुंसि प्राग्ग्रन्थिके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥

इत्याह स्म ।

तल्लक्षः । १६ ।

भावाद्यर्थे विहिततलप्रत्ययान्तः स्त्रीलिङ्गः स्यात् । शुभस्य भावः शुभता एवं जडता मृदुता । ब्राह्मणस्य कर्म्म भावो वा ब्राह्मणता । जनानां समूहः जनता ग्रामता । देव एव देवता "स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इत्युक्तेः प्रकृतिभिन्नलिङ्गत्वम् ।

भूमिविद्युत्सरिन्नतावनिताभिधानानि । १७ ।

भूम्यादिपर्य्यायशब्दाः स्त्रीलिङ्गाः स्युः । अचला अनन्ता विश्वम्भरा इत्यादयः । विद्युत् तड़ित् सौदामनी चपला चञ्चला । सरित् निम्नगा आपगा । लता वल्ली वल्लरी व्रततिः । वनिता योषित् अबला ।

यादो नपुंसकम् । १८ ।

यादःशब्दः सरिद्वाचकोऽपि क्लीवलिङ्गः स्यात् । पूर्व्वसूत्रापवादः । इदं यादः (नदी) ।

भास्स्रुक्स्रग्दिग्दृगुष्णिगुपानहः । १९ ।

एते स्त्रियां स्युः । इयं भाः स्रुक् स्रक् दिक् दृक् उष्णिक् उपानत् ।

स्थूणोर्णे नपुंसके च । २० ।

स्थूणोर्णाशब्दौ स्त्रियां नपुंसके च स्तः । स्थूणा स्थूणम् (काष्ठमयी द्विकर्षिका) । ऊर्णा ऊर्णं (मेषादिलोम) ।

गृहशणाभ्यां क्लीवे । २१ ।

गृहपूर्व्वकः स्थूणाशब्दः शणपूर्व्वकश्च ऊर्णाशब्दः क्लीवलिङ्ग एव स्यान्न तु स्त्रियाम् । परवल्लिङ्गतापवादः । गृहस्थूणम् शणोर्णम् ।

प्रावृड्विप्रुड्रुड्विट्त्विषः । २२ ।

एते शब्दाः स्त्रियां स्युः । इयं प्रावृट् विप्रुट् रुट् विट् त्विट् ।

दर्विविदिवेदिध्वनिशाण्यभ्रिवेणिक्रुषीषध्यङ्गुलयः । २३ ।

एते शब्दाः स्त्रीलिङ्गाः स्युः । पक्षे ङीप् । इयं दर्विः विदिः वेदिः ध्वनिः शाणिः अभ्रिः वेणिः क्रुषिः ओषधिः अङ्गुलिः । पक्षे ङीप् सर्वत्र दर्वीकरः, "अङ्गुलीरङ्गजत्वा" इति कालिदासः ।

तिथिनाडिरुचिवीचिनालिधूलिकिकिकन्निच्छवि-रात्र्यादयः । २४ ।

एते स्त्रीलिङ्गाः स्युः । इयं तिथिः । अस्य पुंस्त्वमपि "तिथयोर्द्वयोः" इत्यमरोक्तेः । "निखिलास्विपि पूर्णमासीतिथीनां" इति नैषधम् नाड़िः रुचिः इत्यादि । रात्र्यादय इत्यादिपदात् नक्तदोषाभक्षा रात्रिपर्य्याया गृह्यन्ते । सर्व्वत्र पक्षे ङीप् । नाड़ी रुची वीची इत्यादि ।

शष्कुलिराजिकुरुवनिवर्त्तिभ्रुकुटिवुटिबलि-पङ्क्तयः । २५ ।

एते शब्दाः स्त्रियां स्युः । इयं शष्कुलिः राजिः इत्यादि । बलिभ्यः पक्षे ङीप् । "अवलम्बितकर्णयष्टीकलमीकम्" इति नैषधम् । "राजीवराजीवगलोल रङ्गम्" इति भाषः । बलिरुदरावयवः ।

प्रतिपदापत्तिसंपच्छरत्समंहःपरिषदुषःसंवित् क्षुदयुन्मुत्सृमयः । २६ ।

एते शब्दाः स्त्रियां स्युः । इयं प्रतिपत् आपत् विपत् इत्यादि । उषाः प्रातरधिष्ठात्री देवता "उषा उषानि" इति वेदमन्त्रः ।

आशीर्धूःपूर्गीर्दारः । २७ ।

एते स्त्रियां स्युः । इयमाशीः धूः पूः गीः द्वाः ।

अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च । २८ ।

अप्प्रभृतीनां पञ्चानां स्त्रीत्वं बहुवचनान्तत्वं च स्यात् । इमा आपः । इमाः सुमनसः । पुष्पसामान्यवाचित्वेनास्य बहुत्वं तेन सुमना मालती जातिरित्यादौ एकत्वम् । देववाचकस्य तु पुंस्त्वमेव । बहुत्वं चैषां प्रायिकम् अत एव अर्थवत्सूत्रभाष्ये, "एका च सिकता तैलदानेऽसमर्था" इति प्रयुक्तम् । "समां समां विजायते" इति सूत्रभाष्ये समायां समायामिति प्रयुक्तम् । "विभाषा पाग्रामेट्" इति सूत्रव्याख्यायाम् आग्रामातां सुमनसाविति करदत्तेन च प्रयुक्तम् ।

शुक्लवर्ज्यौगवाग्नेयौष्णिचः । २९ ।

एते शब्दाः स्त्रियां स्युः । इयं शुक् स्वक् ज्योक् धाक् ।

तटिभीमासंबध्याः । ३० ।

एते शब्दाः स्त्रियां स्युः । तटिः पक्षे ङीप् सीमा संबध्या ।

चूल्लिवेणिखार्य्यश्च । ३१ ।

एते शब्दाः स्त्रियां स्युः । इयं चूल्लिः वेणिः खारिः पक्षे ङीप् ।

तारधाराज्योत्स्नादयश्च । ३२ ।

एते शब्दाः स्त्रियां स्युः । तारा धारा ज्योत्स्ना ।

शलाका स्त्रियां नित्यम् । ३३ ।

शलाकाशब्दो नित्यस्त्रीलिङ्गः । इयं शलाका ।

स्त्रीत्वाधिकारे पुनः स्त्रीग्रहणमधिकारनिवृत्त्यर्थम् । नित्यग्रहणमन्येषां व्यभिचारसूचनार्थम् । यत्र यत्र च व्यभिचारः तत्तत् पूर्व्वमुक्तम् ।

अत्र सूत्रपाठाद्यनुसारेण किञ्चिदवशिष्यते । स्त्रियां क्तिन् (३,३,९४) इत्यधिकारे ये विहिताः क्यबादयः प्रत्ययास्तदन्ता अपि स्त्रियां स्युः । यथा व्रजयजोर्भावे क्यप् (३,३,९८ सू०) प्राज्ज्या इज्या । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः (३,३,९९) । समज्या सभा, निषद्या आपणः, निपत्या पिच्छिला भूमिः, मन्या गलपार्श्वशिरा, विद्या, सुत्या अभिषवः, शय्या, भृत्या, इत्या यिविका । क्रञः श च (३,३,१००) क्रिया क्रत्या । इच्छा (३,३,१०१) इच्छा । परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानमिति तत्पत्यवार्त्तिकम् । परिचर्य्या पूजा, परिसर्य्या, मृगया, अटाट्या । जागर्त्तेरकारो वा (वा०) जागरा जागर्य्या । अ प्रत्ययात् (३,३,१०२, सू०) जिगमिषा विविदिषा पुत्रकाम्या । गुरोश्च हलः (३,३,१०३, सू०) ईहा ऊहा, मूर्च्छा । भिद्विदादिभ्योऽङ् (३,३,१०४, सू०) जरा तपा लज्जा भिदा छिदा । चिन्तिपूजिकथिकुम्बिवर्त्तेश्च (३,३,१०५, सू०) चिन्ता पूजा कथा कुम्बा चर्चा । आतश्चोपसर्गे (३,३,१०६) उपधा उपमा, उपदा । अटन्तरोरुपसंख्यानम् (वा०) अन्तर्द्धा अन्तर्द्धा । व्यासश्रन्थो युच् (३,३,१०७, सू०) कारणा यातना पीडना आसना श्रन्थना । कृवृन्दिविदिभ्यश्च (वा०) वर्त्तना वन्दना वेदना । इषेरनिच्छार्थस्य (वा०) अन्वेषणा । परेर्वा (वा०) पर्य्येषणा । रोगाख्यायां ण्वुल् बहुलम् (३,३,१०८) प्रच्छर्दिका प्रवाहिका विचर्चिका । धात्वर्थनिर्देशे ण्वुल् वक्तव्यः (वा०) आसिका शायिका । सङ्ज्ञायाम् (३,३,१०९) उद्दालपुष्पभञ्जिका । विभाषाख्यानपरिप्रश्नयोरिञ् च (३,३,११०) कां कारिं कारिकां क्रियां क्रत्यां क्रातिं वा त्वमकार्षीरिति प्रश्ने सर्व्वां कारिं कारिकां वाऽकार्षमित्युत्तरम् एवं गणिं गणिकां गणनाम् । पाचिं पाचिकां पचां पक्तिम् । पर्य्यायार्हर्णोत्पत्तिषु ण्वुच् (३,३,१११) भवत आसिका पर्य्यायेणासना, अर्हं भवानिक्षुभक्षिकामर्हति । क्षणे इक्षुभक्षिकां मे धारयसि । उत्पत्तौ इक्षुभक्षिका उदपादि । आक्रोशे नञ्यनिः (३,३,११२) अजीवनिस्त्व भूयादिति । अनिप्रत्ययान्ततया एतस्य प्राप्तावपि स्त्र्यधिकारपतितयोऽत्रोक्तम् । कर्म्मव्यतिहारे णच् स्त्रियाम् (३,३,४३) इति णचि "णचः स्त्रियामञ्" इति (५,४,१४) स्वार्थिकेऽपि व्यावक्रोशी व्यावुक्षी ।

तलन्त इति (१७) सूत्रे तलग्रहणं समूहाद्यर्थादीनामुपलक्षणम् अत एव "तलन्तेन येनिकद्यूता वैरमैथुनकादिवुः" इत्यमर आह च । तस्य समूहः (४,२,३७) इत्यधिकारे पाशादिभ्यो यः (४,२,४९) इति ये पाश्या वन्या वात्या धन्या हन्या । खलगोरथात् (४,२,५० सू०) खल्या गव्या रथ्या । इनित्रकट्यचश्च (४,२,५१, सू०) खलादिभ्य इनिर्वक्तव्यः (वा०) खलिनी डाकिनी कटिम्भिनी । गोत्रा, रथकट्या । द्वन्द्वाद्वुन् वैरमैथुनिकयोः (४,३,१२५) वैरे काकोलूकिका । मैथुने अतिभारहाजिका, आदिना "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्चेति" दण्डव्यवसर्गयोश्चेति (५,१,२७,२८) वुनो ग्रहणम् द्विपादिकां ददाति दण्डितो द्वौ द्वौ पादौ ददातीत्यर्थः । द्विशतिकां त्यजति । वुग्रहणात्वुजोऽपि ग्रहणम् तेन "गोत्रचरणात् श्लाघात्याकारेत्यादि (५,२,१३४) वुजो ग्रहणम् गार्गिकया काठिकया वा श्लाघते । द्वन्द्वमनोज्ञादिभ्यश्चेति (५,१,१३२) वुञस्च ग्रहणम् । शैष्योपाध्यायिका मानोज्ञिका । तदस्यां प्रहरणमिति क्रीडायां णः (४,२,५७) इति खान्तोऽपि स्त्रियाम् । दण्डः प्रहरणमस्यां क्रीडायाम् दाण्डा मौसला । घञः सास्यां क्रियेति ञः (४,२,५८) इति विहितञान्तश्च स्त्रियां स्यात् । दाण्डपाता तिथिः । श्येनम्माता मृगया, तैलम्माता स्वधा ।

एतद्भिन्ना अन्येऽपि केचन, शब्दाः स्त्रीलिङ्गतयाऽमरेऽभिहिताः यथा तिन्दुकी कणिका, भङ्गिः सुरङ्गा सूचिः सातिः काकिनी (णी) चूर्णिः, घाणी द्रुणिः दरत् । कन्था आसन्दी (प्रतिनासूपवेशनासनम्) झल्लरी चर्चरी, पारी क्षौरा लङ्घा पिप्पला लाला लिक्षा गण्डूषा, गटप्रसी चमसी मसी । इत्यादयः

इति स्त्रीलिङ्गानुशासनम् ।

पुमान् । १ ।

वक्ष्यमाणाः शब्दाः असति बाधके पुंलिङ्गाः स्युः ।

घञन्ताः । २ ।

घञन्तः अवनश्च धातुः पुंलिङ्गः स्यात् । घञ्—पाकः त्यागः ।

अप्—करः गरः तरः शरः । घञादयो भावार्थका एवेह गृह्यन्ते । भावे विहिताभ्यां क्तक्त्वाड्भ्यां नपुंसकत्वस्य, क्तिन्नादिभिश्च स्त्रीत्वस्य बाधनात् तद्बाध्यतया भावार्थकतैवोचिता । तेन कर्मादौ घञाद्यन्ता विशेष्यलिङ्गा एव । अत एव भाष्यकारेण सम्बन्धमनुवर्त्तिष्यते इति सम्बन्धशब्दस्य कर्मार्थकत्वेन नपुंसकतया प्रयोगः कृतः ।

घाजन्तश्च । ३ ।

घान्तः अच्प्रत्ययान्तश्च धातुः पुंसि स्यात् । विस्तरः गोचरः चयः जयः नय इत्यादि ।

भयलिङ्गभगपदानि नपुंसके । ४ ।

अजाद्यन्तत्वेन पुंस्त्वे प्राप्ते अपवादार्थः सूत्रम् । एते शब्दा नपुंसकलिङ्गाः स्युः । इदं भयं लिङ्गं भगं पदम् ।

नङन्तः । ५ ।

नङ्प्रत्ययान्तः शब्दः पुंसि स्यात् । यत्नः प्रश्नः इत्यादि ।

याञ्ञा स्त्रियाम् । ६ ।

नङ्प्रत्ययान्तत्वेन पुंस्त्वे प्राप्तेऽपवादोऽयम् । याच्ञाशब्दः स्त्रियां स्यात् । इयं याचञा ।

क्यन्तो घुः । ७ ।

किप्रत्ययान्तो घुः (दा धा) पुंसि स्यात् । आधिः उदधिः (घटः) । व्याधिः निधिः । घुः किं चक्रिः जक्षिः विशेष्यलिङ्ग एव ।

इषुधिः स्त्री च । ८ ।

क्यन्तत्वेन पुंस्त्वे प्राप्ते वा स्त्रीत्वार्थं सूत्रम् । इयमयं वा इषुधिः ।

देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्क्त्यभिधानानि । ९ ।

देवादिपर्य्यायशब्दाः यथासम्भवं तद्भेदवाचिनश्च असति बाधके पुंलिङ्गाः स्युः । देवाः सुराः । भेदाः ब्रह्मा विष्णुः शिवः शक्रः । असुराः दनुजाः । भेदाः बलिः कालकेयः नेमिः । आत्मा चेतनः । स्वर्गः नाकः । गिरिः नगः पर्व्वतः । भेदाः हिमालयः सुमेरुः । समुद्रः उदन्वान् सिन्धुः । भेदाः क्षीरोदः लवणोदः । नखः नखरः करजः । केशः कचः बालः । दन्तः दशनः । स्तनः कुचः पयोधरः । भुजः प्रकोष्ठः । कण्ठः गलः । खड्गः असिः । शरः सायकः मार्गणः । पङ्क्तिः कर्दमः ।

त्रिपिष्टपं त्रिभुवने नपुंसके । १० ।

तृतीयभुवनवाचकत्रिपिष्टपशब्दः क्लीवे स्यात् । स्वर्गवाचित्वेन पुंस्त्वे प्राप्ते अयमारम्भः । इदं त्रिपिष्टपम (स्वर्गः) ।

द्यौः स्त्रियाम् । ११ ।

द्योदिवोस्तन्त्रेण ग्रहणम् । स्वर्गाभिधायित्वेन पुंस्त्वे प्राप्तेऽयमारम्भः । द्योशब्दः दिव्शब्दश्च स्त्रियां स्यात् । इयं द्यौः इमे भूदिवौ ।

इषुबाह्वौ स्त्रियाञ्च । १२ ।

इषुबाह्वशब्दौ पुंसि स्त्रियाञ्च स्याताम् । शरवाचित्वेन भुजवाचित्वेन पुंस्त्वे प्राप्ते पक्षे स्त्रीत्वविधानार्थमारम्भः । इयमयं वा इषुः बाहुः ।

बाणकाण्डौ नपुंसके च । १३ ।

एतौ पुंसि नपुंसके च स्याताम् । शरवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीवत्वार्थमारम्भः । अयमिटं वा बाणः बाणं काण्डः काण्डम ।

नन्तः । १४ ।

न इत्येतदन्तः पुंसि स्यात् । या तत्ता यया उक्ता । चर्म्मवर्म्मादयस्तु "मन् ब्रह्मचक्रोऽकर्नरि" इति परस्मैपदेनास्य बाधात् क्लीवलिङ्गाः । तत्र "ह्यचकः" इत्युक्तेः पृथिमा महिमा इत्यादयो नन्तत्वेन पुंस्येव ।

क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । १५ ।

क्रत्वादिपर्य्यायशब्दाः यथासम्भवं तद्विशेषशब्दाश्च पुंसि स्युः । क्रतुः अध्वरः । भेदः उक्थः अग्निष्टोमः । पुरुषः नरः । कपोलः गण्डः । गुल्फः प्रपदः । मेघः नीरदः जलधरः । भेदः पुष्करः आवर्त्तकः ।

अभ्रं नपुंसकम् । १६ ।

मेघवाचित्वेन पुंस्त्वे प्राप्ते तदपवादः । अभ्रम् ।

उकारान्तः । १७ ।

उकारान्तः शब्दः पुंसि स्यात् । विभुः विधुः रिपुः । इदञ्च विशेषैरबाधितविषयम् । अत एव "हनुर्हनुविलासिन्यां न्त्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे" इति मेदिनिः । "करेणुरिभ्यां स्त्री नेभे" इत्यमरः । तथा च सर्वजातीयकविशेषाभाव एव सूत्रं प्रवर्त्तते एतदभिप्रायेण "लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इत्युक्तममरसिंहेन । एवमन्यत्रापि ।

धेनुरज्जुकुक्षुरयुतनुरेणुप्रियङ्गवः स्त्रियाम् । १८ ।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम् । एते शब्दाः स्त्रियां स्युः । धेनुः रज्जुः कुक्षुः । अत्र अप्राणिजातित्वात् पक्षे

ऊङ् । कुह्वः सरयूः तनूः रेणूः प्रियङ्गूः । धेनोः प्राणित्वात् रज्जोश्च पर्य्युदासान्नोङ् ।

समासे रज्जुः पुंसि च । १९ ।

समासान्तस्थः रज्जुशब्दः पुंसि, चात् स्त्रियाम् । कर्कशरज्ज्वा कर्कशरज्जुना वा बध्नाति ।

श्मश्रुजानुस्वाद्वश्रुजतुत्वपुतालूनि नपुंसके । २० ।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादाय सूत्रम् । एतानि क्लीबे स्युः । श्मश्रु जानु स्वादु अश्रु जतु त्वपु तालु ।

वसु चार्थवाचि । २१ ।

अर्थवाचिवसुशब्दः क्लीबे स्यात् । वसु धनम् । अर्थवाचीत्युक्तेः वसुर्मयूखाग्निधनाधिपेषु देवभेदे च पुमान् ।

मद्गुमधुशीधुभानुकमण्डलूनि नपुंसके च । २२ ।

एते शब्दाः पुंसि नपुंसके च स्युः । पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम् । अयं मद्गुः इदं वा मद्गु मधुः मधु । अनस्थितविकल्पाश्रयेण वसन्ते चैत्रे दैत्यभेदे च पुमानेव क्षौद्रवाचि तु नपुंसकमेव ।

रुवन्तः । २३ ।

रुकारान्तः लुकारान्तश्च पुंसि स्यात् । उकारान्तत्वेनैव प्राप्ते प्रपञ्चार्थः । मेरुः मेलुः हेतुः ।

दारुकसेरुजतुवस्तुमस्तूनि नपुंसके । २४ ।

पूर्वसूत्रापवादः । एते शब्दाः क्लीबे स्युः । दारु कसेरु जतु वस्तु मस्तु ।

सक्तुर्नपुंसके च । २५ ।

त्वन्तत्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम् । चात् पुंसि । सक्तुः सक्तु ।

प्राग्रश्मेकारान्तः । २६ ।

इत ऊर्ध्वं रश्मिशब्दघटितसूत्रपर्य्यन्तमकारान्तोऽधिक्रियते ।

कोपधः । २७ ।

ककार उपधाभूतो यस्य तथाभूतोऽकारान्तः पुंसि स्यात् । स्तवकः करकः कोरकः । कारकपाठकादयस्तु विशेषणशब्दत्वेन लिलिङ्गाः । अत्र च प्रकरणे प्रायः विशेष्यशब्दानामेव लिङ्गमनुशिष्यते न तु विशेषणशब्दानामिति न व्यभिचारः ।

चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके । २८ ।

कोपधतया पुंस्त्वे प्राप्तेऽपवादः । एते शब्दाः क्लीबे स्युः । चिबुकं शालूकं प्रातिपदिकमित्यादि ।

कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतटाकनिष्कशुल्कवर्चस्कपिनाकभाण्डककटकदण्डकपिटकतालकफलककक्कपुलाकानि नपुंसके च । २९ ।

एते शब्दाः पुंसि क्लीबे च स्युः । पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम् । कण्टकः कण्टकम् अनीकः अनीकमित्यादि ।

टोपधः । ३० ।

टोपधः अकारान्तः पुंसि स्यात् । घटः पटः ।

किरीटमुकुटललाटवटवीटशृङ्गाटकरटलोष्टानि नपुंसके । ३१ ।

पूर्वसूत्रापवादः । एते शब्दाः क्लीबे स्युः । किरीटं मुकुटं ललाटमित्यादि ।

कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च । ३२ ।

एते शब्दाः नपुंसके पुंसि च स्युः । कुटं कुटः कूटं कूटः कपटं कपट इत्यादि ।

णोपधः । ३३ ।

णोपधोऽकारान्तः पुंसि स्यात् । गुणः शुणः पाषाणः ।

ऋणलवणपर्णतोरणरणोष्णानि नपुंसके । ३४ ।

पूर्वसूत्रापवादः । ऋणं लवणम् पर्ण तोरणमित्यादि ।

अमरस्तु "तोरणोऽस्त्री" इत्युक्तवान् तन्मूलं चिन्त्यम् । उष्णशब्दस्य सर्वथाक्लीबे एव क्लीबता तद्धिते तु गुणवचनत्वेन लिलिङ्गत्वम् । उष्णः वह्निः उष्णा यवागूरित्यादि ।

कार्षापणसुवर्णव्रणचरणदृषणविषाणचूर्णतृणानि नपुंसके च । ३५ ।

एते शब्दाः क्लीबे पुंसि च स्युः । कार्षापणं कार्षापण इत्यादि ।

थोपधः । ३६ ।

थकारोपधः अकारान्तः पुंसि स्यात् । रथः अर्थः ।

काण्डपृष्ठरिक्थोक्थानि नपुंसके । ३७ ।

पूर्वसूत्रापवादः । एते शब्दाः क्लीबे स्युः । काण्डम् उक्थं (सामावयवभेदः) ।

काष्ठा दिगर्था स्त्रियाम् । ३८ ।

दिग्वाचककाष्ठाशब्दः स्त्रियां स्यात् । काष्ठा दिक् । दिशि रूढ्यनेनेष्टसिद्धौ सीमार्थेऽपि स्त्रीत्वार्थमर्थग्रहणं तेन "स्वयं विशीर्ण-द्रुमपर्णवृत्तिता परा हि काष्ठा" इति कालिदासप्रयोग. ।

तीर्थप्रोथयूथानि नपुंसके च । ३९ ।

चादधिकारात् पुंसीत्येवानुषज्यते न तु स्त्रियामिति । तेन "प्रोथमस्त्रियाम्" इत्यमरोक्तिः । तीर्थं तीर्थः प्रोथं प्रोथ.

नोपधः । ४० ।

अदन्तो नोपधः पुंसि स्यात् । द्रुनः पोनः ।

जघनाजिनतुहिनकाननवनवृजिनविपिनवेतन-शासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । ४१ ।

पूर्व्वसूत्रापवादः । शासनशब्दः परित्यक्तुं शक्यते ल्युडन्तत्वेन क्लीवत्वस्य वक्ष्यमाणत्वात् । एते शब्दाः क्लीवे स्युः । जघनम् अजिनं तुहिनं काननमित्यादि ।

मानयानाभिधाननलिनपुलिनोद्यानशयनासन-स्थानचन्दनालानसम्मानभवनवसनसंभावनविभावन-विमानानि नपुंसके च । ४२ ।

एते शब्दाः पुंसि क्लीवे च स्युः । मानादिषु केषाञ्चिन्नान्तत्वेन पुंस्त्वे केषाञ्चिच्च ल्युडन्ततया तद्बाधकसूत्रत्वेण क्लीवत्वे प्राप्ते च उभयलिङ्गतार्थं सूत्रम् । मानः मानं यानः यानम् । वस्तुतः "करणाधिकरणयोर्ल्युट्" इति वक्ष्यमाणसूत्रत्वेण त्रिलिङ्गत्व-प्राप्तौ पूर्व्वापवादेन नपुंसकत्वमेवेति तदपवादार्थं सूत्रम् ।

पोपधः । ४३ ।

अदन्तः पोपधः पुंसि स्यात् । धूपः दीपः यूपः ।

पापरूपोडुपतापपिल्यपुष्पशष्पसमीपान्तरीपाणि नपुंसके । ४४ ।

पूर्व्वसूत्रापवादः । एते शब्दाः क्लीवे स्युः । पापम् रूपम्

भूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । ४५ ।

एते शब्दाः पुंसि क्लीवे च स्युः । भूर्पः भूर्पमित्यादि ।

भोपधः । ४६ ।

अदन्तः भोपधः पुंसि स्यात् । करभः कुम्भः शलभः ।

तलभं नपुंसकम् । ४७ ।

पूर्व्वसूत्रापवादः । तलभम् ।

जृम्भं नपुंसके च । ४८ ।

जृम्भं जृम्भः । अङि तु स्त्रीत्वात् जृम्भा ।

मोपधः । ४९ ।

अदन्तः मोपधः पुंसि स्यात् । सोमः स्तोमः भीमः (मध्यम-पाण्डवः) भीतिहेतुवाचित्वे विशेष्यलिङ्ग एव ।

रुक्मसिध्मयुग्मे भगुल्माध्यात्मकुङ्कुमानि नपुंसके । ५० ।

पूर्व्वसूत्रापवादः । रुक्मं सिध्मम् । आत्मनीति विभक्त्यर्थेऽव्ययीभावे अनन्तत्वेनाच्समासान्ते टिलोपेऽदन्तत्वम् तस्य चाव्ययत्वेऽपि नपुंसकत्वकथनम् अदन्तमोपधत्वेन प्राप्त पुंस्त्वापवादार्थम् । वस्तुतः अध्यात्मशब्दः प्रत्याख्यातुं शक्यते ।

संग्रामदाड़िमकुसुमाश्रमक्षेमक्षौमक्षोमोद्दामानि नपुंसके च । ५१ ।

एते शब्दाः नपुंसके चात् पुंसि च स्युः । संग्रामं संग्रामः । दाड़िमं दाड़िमः । उद्दामशब्दः प्रबन्धवाची । उद्दामो दामाया इति विग्रहे तु विशेष्यलिङ्ग एव ।

योपधः । ५२ ।

अदन्तः योपधः पुंसि स्यात् । क्रयः गवयः समयः ।

किसलयेन्द्रियहृदयोत्तरीयाणि नपुंसके । ५३ ।

पूर्व्वसूत्रापवादः । इदं किसलयम् इन्द्रियम् ।

गोमयकषायमलयान्वयाव्ययानि नपुंसके च । ५४ ।

एते शब्दाः नपुंसके चात् पुंसि च स्युः । गोमयं गोमयः । कषायस्तु रसवाची "त्रुवरस्तु कषायोऽस्त्री" इत्यमर. । तद्वति तु लिलिङ्गः । अव्ययशब्दः क्लीववाची । व्ययाभाववाची तु नास्य विषयः व्ययशब्दस्याजन्ततया पुंस्त्वेन ततो नञ् तत्पुरुषेऽपि पुंस्त्वमिति ततोऽर्थाभावेऽव्ययीभावे क्लीवतेति भेदः ।

रोपधः । ५५ ।

अदन्तः रोपधः पुंसि स्यात् । क्षुरः अङ्कुरः ।

द्वाराग्रस्कारतक्रवक्रवप्रक्षिप्रक्षुद्रक्षिद्रपारतीर-दूरक्रूरभ्रासशुभ्रभीरगभीरक्रूरचित्रकेयूरकेदारी-दराजशरीरकन्दरमन्दरपञ्जराजरजठराजिर-वैरचामरपुष्करगङ्करकुटीरकुलीरचत्वरकाश्मीरनी-राम्बरग्निग्निरतन्त्रयन्त्रचेत्रचत्रमित्रकलत्रच्छत्रसुच-

वक्त्रनेत्रगोत्राङ्कुलिचतनुचास्त्रशस्त्रशास्त्रवस्त्रपत्त्रपात्रनक्षत्राणि नपुंसके । ५६ ।

पूर्ब्बसूत्रापवादः । एते शब्दाः नपुंसके स्युः । इदं द्वारम् । अत्र स्कारशब्दो रोगभेदवाची प्रकाशवाची तु विशेष्यलिङ्गएव। चक्रशब्दः नद्याः पुटभेदेवाची कुटिलवाची तु विशेष्यलिङ्गः । क्षिप्रः शीघ्रार्थे तद्वति विशेष्यलिङ्गः । क्षुद्रशब्द उपद्रवभेदे तद्वति विशेष्यलिङ्गः । दूरशब्दो दूरत्वे, क्रूरशब्दः क्रूरत्वे तद्वति तु विशेष्यलिङ्गः । गभीरशब्दो गाम्भीर्य्ये तद्वति विशेष्यलिङ्गः । क्रूरं क्रौर्य्ये क्रौर्य्यवति त्रि० । चित्रं वर्णे तद्वति त्रि० । अजस्रं सातत्ये तद्वति त्रि० । शिशिरं शीतलस्पर्शे तद्वति त्रि० ।

शुक्रमदेवतायाम् । ५७ ।

देवभिन्नार्थे शुक्रशब्दः क्लीवे स्यात् । शुक्रं रेतः । शुभ्रवर्णवाची तु गुणवचनत्वात् विशेष्यलिङ्गः । देवे तु पुमान् ।

चक्रवच्चान्धकारसारावारपारचीरतोमरशृङ्गारशृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ।५८।

एते शब्दाः क्लीवे चात् पुंसि च स्युः । चक्रं चक्रः । शिशिरशब्दस्तु क्षिप्रे स्पर्शे च पुंनपुंसकलिङ्गः स्पर्शवति त्रिलिङ्गः ।

षोपधः । ५९ ।

अदन्तः षोपधः पुंसि स्यात् । दृषः दृक्षः यक्षः ।

शिरीषजोषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके । ६० ।

पूर्ब्बसूत्रापवादः । शिरीषं जोषम् । अम्बरीषं भर्ज्जनपात्रभेदेः क्षत्रियभेदे तु पुमान् । कल्माषं शबलभेदे वर्णभेदे च तद्वति तु त्रिलिङ्गः ।

यूषकरीषमिषविषवर्षाणि नपुंसके च । ६१ ।

एते क्लीवे चात् पुंसि च स्युः । यूषं यूषः । वर्षं वर्षः (वृष्टिः) वत्सरे ऋतुभेदे च स्त्री ।

सोपधः । ६२ ।

अदन्तः सोपधः पुंसि स्यात् । वत्सः वायसः महानसः ।

मानसविसवृसाहसानि नपुंसके । ६३ ।

पूर्ब्बसूत्रापवादः । एते क्लीवे स्युः । मानसं विसमित्यादि ।

चमसशरसनिर्य्यासोपवासकार्षापणवासमासकासकांसमांसानि नपुंसके च । ६४ ।

एते पुंनपुंसकयोः स्युः । चमसं चमस इत्यादि ।

कंसश्चाप्राणिनि । ६५ ।

अप्राणिनि कंसशब्दः क्लीवे पुंसि च स्यात् । कंसं कंसः पानभोजनम् मथुरान्दमे तु कंसः । चकारोऽदन्ताधिकारसमाप्त्यर्थः ।

रश्मिदिवसाभिधानि । ६६ ।

रश्मिदिवसपर्य्यायशब्दाः पुंसि स्युः । रश्मिर्मयूखः किरणः । दिवसो वत्सः ।

दीधितिः स्त्रियाम् । ६७ ।

पूर्ब्बसूत्रापवादः । इयं दीधितिः ।

दिनाह्नी नपुंसके । ६८ ।

दिवसाभिधानत्वे पुंस्त्वे प्राप्ते तदपवादः । दिनम् अह्नः ।

मानाभिधानानि । ६९ ।

मीयतेऽनेनेति मानं तद्विशेषाभिधानानि पुंसि स्युः । कुडवः प्रस्थः ।

द्रोणाढकौ नपुंसके च । ७० ।

मानविशेषवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीवतायै सूत्रम् । द्रोणः द्रोणम् आढकः आढकम् ।

खारीमानिके स्त्रियाम् । ७१ ।

पुंस्त्वापवादार्थं सूत्रम् । इयं खारी इयं मानिका ।

दाराश्चतलाजानां बहुत्वञ्च । ७२ ।

दारशब्दस्य स्त्रीत्वे प्राप्ते रोपधत्वेन पुंस्त्वसिद्धावपि बहुत्वार्थं अन्ययोरप्राप्तौ बहुत्वार्थञ्च सूत्रम् । एते शब्दाः पुंसि नित्यबहुवचनान्ताश्च स्युः । इमे दाराः । अक्षताः लाजाः ।

नाड्यपजनोपपदानि व्रणाङ्गपदानि । ७३ ।

नाडीपूर्ब्बपदः व्रणान्तशब्दः अपपूर्ब्बकोऽङ्गशब्दः जनपूर्ब्बः पदशब्दश्च पुंसि स्यात् । परवल्लिङ्गत्वेन क्लीवादिलिङ्गत्वे प्राप्ते नित्यपुंस्त्वार्थमारम्भः । नाडीव्रणः । अपाङ्गः नेत्रान्ते, अङ्गापगते तु त्रिलिङ्गः । जनपदो (देशे) जनानां पदे तु क्लीवलिङ्गः ।

मरुद्गरुदुत्तरदृत्विजः । ७४ ।

एते शब्दाः पुंसि स्युः । अयं मरुत् गरुत् (पक्षः) । उत्तरत् उत्पूर्ब्बात् तरतेरतिप्रत्ययान्तः शतप्रत्ययान्तस्तु त्रिलिङ्गः । तरन् तरन्ती तरत् । अयम् ऋत्विक् ।

ऋषिराशिष्टतिप्रहिक्रिमिध्वनिबलिकौलिमौलिरविकविमुनयः । ७५ ।

एते शब्दाः पुंसि स्युः । अयमृषिः राशिः । बलिः पूजोप-

हारे राजग्राह्ये करे दानवभेदे एव पुमान् उदरावयवे तु स्त्रीलिङ्गाधिकारस्थेन (२५) स्तनेष स्त्रीलिङ्ग इति भेदः ।

ध्वजगजमुञ्जपुञ्जाः । ७६ ।

एते पुंसि स्युः । ध्वजः पताका "ध्वजमस्त्रियाम्" इत्यमरोक्तिः अपाणिनीयतयोपेक्ष्या । मूलं वा तस्य मृग्यम् ।

हस्तकुन्तान्तवातव्रातदूतधूर्त्तसूतचूतमुङ्क्तार्ताः । ७७ ।

एते पुंसि स्युः । हस्तः सूतः सारथौ प्रसूते तु लिलिङ्गः । "सूतसूर्त्तोऽस्त्रियाम्" इत्यमरोक्तिश्चिन्त्यमूला ।

षण्डमण्डकरण्डभरण्डरण्डवरण्डतुण्डगण्डमुण्ड-पाषण्डशिखण्डाः । ७८ ।

एते पुंसि स्युः । षण्डः मण्डः गण्डः । एतद्विरुद्धाभिधायिनी अमोक्तिश्चिन्त्यमूला ।

वंशांशपुरोडाशाः । ७९ ।

एते पुंसि स्युः । वंशः अंशः पुरोडाशः (हविर्भेदः) ।

हृदकन्दकुन्दबुद्बुदशब्दाः । ८० ।

एते शब्दाः पुंसि स्युः । हृदः कन्दः कुन्दो हृद्यः पुष्पे तु कुन्दम् । शब्दः ।

अर्घपथिसख्यूभुक्षिस्तम्बनितम्बपूगाः ।८१ ।

एते पुंसि स्युः । एषोऽर्घः । सामगैस्तु अर्घ्यमित्येव यदन्ततया प्रयोज्यं तच्च क्लीवलिङ्गम् ।

पल्लवपल्ललकफरेफकटाहनिर्व्यूहमठमणितरङ्ग-गन्धस्कन्धस्तदङ्गसङ्गसमुद्गपुङ्गाः ।८२ ।

अयं पल्लवः । "पल्लवोऽस्त्री" इत्यमरोक्तिश्चिन्त्यमूला ॥

सारथ्यतिथिकुक्षिवस्त्यञ्जलयः । ८३ ।

एते पुंसि स्युः । अयं सारथिः अतिथिरित्यादि ।

अथालावधिष्टम् । नौ ण चेति (३,३,६० सू०) धञादेः सन्नन्तात् अदेः णप्रत्ययोऽपि पुंसि स्यात् । ण्यादः । स्तम्बे क च (३,३,८३ सू०) स्तम्बोपपदात् हन्तेः कप्रत्ययः पुंसि स्यात् स्तम्बघ्नः । ह्वितोऽनुच् (३,३,८९ सू०) एतद्विहितोऽनुजन्तः पुंसि स्यात् । वेपथुः वमथुः । पूर्ववदश्ववडवौ (२,४,२७ सू०) निर्देशात् परवल्लिङ्गतापवादेन पुंस्त्वमेव अश्ववडवौ द्वित्व मविवक्षितम् । अश्ववडवाः

एतद्विन्नाः केचित् शब्दाः "कान्तः सूर्येन्दुपर्यायपूर्व्वोऽयः पूर्व्वकोऽपि" चेत्यमरसिंहेन पुंलिङ्गतया विहिताः । सूर्य्यकान्तः तरणिकान्तः चन्द्रकान्तः इन्दुकान्तः अयस्कान्तः लौहकान्तः इत्यादयः । श्रीवेष्टः श्रीवासः धूकधूपः गुग्गुलुः कसेरुः सिल्हकः इत्यादयः इत्यनिर्यासभेदाः, पुङ्गः न्युङ्खः पिण्डः शौण्डः पिचण्डः गडुः लगुडः दंतिः कामगर्दः अर्बुदः (रोगभेदः) गोलः हिङ्गुलः पुङ्गलः वेतालः मल्लः भल्लः पट्टिशः पतद्गृहः ।

इति पुंलिङ्गाधिकारः ।

नपुंसकम् । १ ।

इत ऊर्द्धं वक्ष्यमाणा बाधमन्तरेण क्लीवलिङ्गाः स्युरित्यधिकारः ।

भावे ल्युडन्तः । २ ।

भावार्थकल्युट्प्रत्ययान्तः धातुः क्लीबे स्यात् । गमनं क्रमणम् । भावे किं ? पच्यतेऽनेनेति करणे ल्युट् पचनो दर्वीऽग्निः । इध्मवचनः कुठारः, पाषाणदारणः टङ्कः ।

निष्ठा च । ३ ।

भावार्थकनिष्ठान्तो धातुः क्लीबे स्यात् । स्मितं गीतं हसितम् ।

त्वष्यञौ तद्धितौ । ४ ।

भावे इत्यनुवर्त्तते । भावे विहितौ ये त्वष्यञौ तद्धितौ तदन्ताः क्लीबे स्युः । भावे—शुभ्रत्वं शौभ्रम्, जडत्वं जाड्यम् । यञः पित्त्वसामर्थ्यात् पक्षे स्त्रीत्वमपि तेन पित्कौरादिभ्यश्चेति ङीषि य लोपे, औचिती औचित्यं, माधुरी माधुर्य्यं, चातुरी चातुर्य्यम् ।

कर्म्मणि च ब्राह्मणादिगुणवचनेभ्यः । ५ ।

ब्राह्मणादिभ्यो गुणवचनेभ्यश्च कर्म्मणि चात् भावे यौ विहितौ त्वष्यञौ तदन्ताः क्लीबे स्युः । ब्राह्मणस्य कर्म भावो वा ब्राह्मणत्वं ब्राह्मण्यम् । "चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानमिति" वार्त्तिकोक्तेः स्वार्थे ष्यञ् चातुर्वर्ण्यं लौकिकं चातुर्वैद्यं षाड्गुण्यम् "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इति भाष्योक्तेः प्रकृतिलिङ्गवचनातिक्रमः ।

ययदढग्यगञ्ण्वुञ्क्वाञ्च भावकर्म्मणि । ६ ।

भावे कर्म्मणि चार्थे विहिता ये ययदादयस्तदन्ताः क्लीबे स्युः । भावकर्म्मणोरिति गुणार्थं स्वार्थनिर्देश्यार्थम् । स्तेनस्य भावः कर्म्म वा "स्तेनाद्यन्नलोपश्चेति" (५,१,१२५) यति स्तेयम् । सखुर्भावः कर्म्म वा "सखुर्य इति" (५,१,१२६) ये सख्यम् । कपेर्भावः कर्म्म वा भावादि "कपिज्ञात्योर्ढगिति" (५,१,१२७) ढकि कापेयम्

ज्ञातेयम् । सेनापतेर्भावादि "पत्यन्तपुरोहितादिभ्यो यगिति" (५,१,१२८) यकि सैनापत्यम् आधिपत्यं पौरोहित्यम् । उष्ट्रस्य भावादि "प्राणिष्टज्जातिवयोवचनोद्गात्रादिभ्योऽञिति" (५,१,१२९) अञि औष्ट्रम् तस्य प्राणधारिजातिवचनत्वात्, शैशवं कौमारं वयोवचनात्वात्, औद्गात्रं चातुर्होतृकम् । द्विहायनस्य भावादि "हायनान्तयुवादिभ्योऽण् इति (५,१,१३०) अणि द्वैहायनं यौवनम् । वयोवचनत्वेन प्राप्तावपि णित्त्वरार्थं वचनम् । इगन्ताच्च लघूपधात्" (५,१,१३१) अण् सौभ्रवम् भार्ह्वं पाटवम् । "योपधाद्गुरूपोत्तमाद्वुञ् (५,१,१३२) रमणीयस्य भावादि रामणीयकं कामनीयकम् । "होत्रादिभ्यश्छ इति (५,१,१३५) छे अच्छावाकीयम् अच्छावाको होत्रविशेषः अनुक्तसमुच्चय शकारः समुच्चयाय परिशिष्टे दर्शयिष्यन्ते ।

अव्ययीभावः । ७ ।

अव्ययीभावसमासनिष्पन्नः क्लीवलिङ्गः स्यात् । अधिस्त्रि स्त्रियामिति विगृह्ये विभक्त्यर्थेऽव्ययीभावे तदन्तस्य क्लीवतया ह्रस्वः । उपनदि पक्षे अच्समासान्ते उपनदम् ।

द्वन्द्वैकत्वम् । ८ ।

समाहारद्वन्द्वनिष्पन्नः शब्दः क्लीवे स्यात् । पाणिपादम् धवखदिरम् ।

अभाषायां हेमन्तशिशिरावहोरात्रे च ।९।

संस्कृतभाषाभिन्ननियमके वेदे हेमन्तशिशिरूपो द्वन्द्वसमाहारः नैकवत् क्लीवलिङ्गो वा । किन्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युक्तेः परवल्लिङ्गता द्विवचनान्तता च । तथा अहोरात्रशब्दो द्वन्द्वनिष्पन्नः क्लीव एव "रात्राह्नाहाः पुंसीति" पुंलिङ्गापवादः । अभाषायामित्युक्तेः भाषायां हेमन्तशिशिरम् अहोरात्रइत्येव ।

अनञ्कर्मधारयस्तत्पुरुषः । १० ।

इतः परं नञ्कर्मधारयभिन्नस्तत्पुरुषोऽधिक्रियते

अनल्पे छाया । ११ ।

बहुसम्बन्धिनी या छाया तदन्तस्तत्पुरुषः क्लीवे स्यात् । नपुंसकत्वेन आपो ह्रस्वः । इक्षूणां छाया इक्षुच्छायम् । "इक्षुच्छायानिशादिभ्य, इति तु आनिशादिभ्य इत्याङ्प्रश्लेषेण समर्थनीयम् । शराणां छाया शरच्छायम् ।

राजाऽमनुष्यपूर्वा सभा । १२ ।

राजपर्यायपूर्वः मनुष्याभिन्नमनुष्यसदृशतुल्यपूर्वश्च छायान्तस्तत्पुरुषः क्लीवे स्यात् । कपीनां सभा कपिसभम् । द्यूतसभम् राजपर्यायपूर्वस्यैवेष्यते न तु राजसरूपविशेषपूर्वस्य । तेन राजसभा चन्द्रगुप्तसभा । भाष्यकृता चन्द्रगुप्तसभेतिप्रत्युदाहरणात् चन्द्रगुप्तस्य भाष्यकारसमकालत्वं ततः प्राक्कालत्वं वा प्रतीयते । अमनुष्येति पर्युदासात् तत्सदृशरक्षःपिशाचादिपूर्वकस्यैव, तेन रक्षःसभं पिशाचसभम् । तत्पूर्वकस्य किम् ? स्वसभा वृषलसभेत्यादि ।

सुरासेनाच्छायाशालानिशाः स्त्रियाञ्च । १३ ।

एतदन्तस्तत्पुरुषः स्त्रियां चात् क्लीवे च स्यात् । यवसुरं यवसुरा ब्राह्मणसेन ब्रह्मणसेना । अवङ्सम्बन्धार्थं छायाशब्दग्रहणम् । कुड्यच्छाया कुड्यच्छायम् । गोशालं गोशाला । स्वनिशं स्वनिशा । तत्पुरुष इत्यधिकारात् बहुव्रीहौतिलिङ्गः । दृढसेनः दृढसेना दृढसेनमित्यादि । अनञ्कर्मधारय इत्युक्तेः असेना परमसेना इत्यादि स्त्रियामेव । "अशाला च (२,४,७४) पा० सू०) शालाभिन्नार्थकसभान्तस्तत्पुरुषः क्लीवे स्यात् । स्त्रीसभम् स्त्रीसंघात इत्यर्थः । शालायां धर्म्मसभा धर्म्मशालेत्यर्थः । संज्ञायां कन्योशीनरेषु (२,४,२०) पा० सू०) कन्यान्तस्तत्पुरुषः क्लीवे स्यात् । सा चेत् कन्या उशीनरदेशोत्पन्नायाः कन्यायाः संज्ञा । सुभगस्यापत्यानि सौभगयस्तेषां कन्या । संज्ञायां किं वीरणकन्या । उपज्ञोपक्रमान्तः तदाद्याचिख्यासायाम् (२,४,२७सू० पा०) उपज्ञान्त उपक्रमान्तश्च तत्पुरुषः नपुंसके स्यात् । तयोरुपजायमानोपक्रम्यमाणयोरादिः प्राधान्यं चेदाख्यातुमिष्यते । उपजायते इत्युपज्ञा कर्मणि अङ् । पाणिनेरुपज्ञा पाणिन्युपज्ञम् । उपक्रम्यते इत्युपक्रमः नन्दस्य उपक्रमः नन्दोपक्रमं द्रोणः । भाष्यकारस्य तथोदाहरणात् नन्दात्पूर्वाचीनत्वं भाष्यकृत इति प्रतीयते ।

परवत् । १४ ।

उक्ताभिन्नस्तत्पुरुषः परवल्लिङ्गः स्यात् । राजपुरुषः राजमहिषी राजधनम् ।

रात्राह्नाहाः पुंसि । १५ ।

कृतसमासान्तरात्राद्यन्तस्तत्पुरुषः पुंस्येव स्यात् परवल्लिङ्गतापवादः । तदन्तद्वन्द्वोऽपि पुंसि स्यात् सूत्रपाठे "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युपक्रमेण एतदपवादसूत्रे द्वन्द्वपदस्य यत्नवत्त्वात् । पूर्वरात्रः अपररात्रः पूर्वाह्णः अपराह्णः द्व्यहः । द्वन्द्वे अहश्च रात्रिश्च अहोरात्रः ।

संख्यापूर्वा रात्रिः । १६ ।

संख्यावाचकपूर्वपदः रात्रान्तस्तत्पुरुषः क्लीवे स्यात् । पुंस्त्वापवादः । त्रिरात्रं पञ्चरात्रं गणरात्रम् ।

अपथपुण्याहे नपुंसके । १७ ।

अपथपुण्याहशब्दौ नपुंसके स्तः । अपथम् । तत्पुरुष इत्येव अन्यत्र अपथोद्देशः । पुण्याहस्य तु पुंस्त्वे प्राप्तेऽयमारम्भः स तु तत्पुरुष एव बहुव्रीहौ समासान्तापसक्तेः वार्त्तिके "पुण्यसुदिनाभ्यामहः क्लीवता" इत्युक्तेः । सुदिनाहम् । अपथेति निर्देशात् क्तसमासान्त एव स्तवं प्रवर्त्तते नेह अपन्थाः ।

द्विगुः स्त्रियाञ्च । १८ ।

द्विगुसमासनिष्पन्नः स्त्रियां चात् नपुंसके च स्यात् । व्यवस्थितविभाषेयं व्यवस्था च स्तवपाठेन वार्त्तिकपाठेन दर्शिता यथा स नपुंसकम् २,४,१७ सू० भा०) स समाहारद्विगुर्नपुंसकलिङ्गः स्यात् । परवल्लिङ्गतापवादः । पञ्चगवम् । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः (वा०) । पञ्चमूली, त्रिलोकी, "आबन्तो वा (वा०) आबन्तो द्विगुः स्त्रियां क्लीवे च स्यात् । पञ्चखट्वी पञ्चखट्वम् । अनो नलोपश्च वा च द्विगुः स्त्रियाम्, (वा०) अचन्न द्विगोर्वा नलोपः । नलोपपक्षे स्त्रीत्वं पक्षे क्लीवतेत्यर्थः । पञ्चतक्षी पञ्चतक्षम् । पात्राद्यन्तस्य न, (वा०) न स्त्रीत्वमपि तु "स नपुंसकम्" इति क्लीवत्वमेव । अदन्तत्वेन स्त्रीत्वे प्राप्ते तपवादार्थं वार्त्तिकम् । पञ्चपात्रं त्रिभुवनम् ।

इसुसन्तः । १९ ।

इस्प्रत्ययान्त उस्प्रत्ययान्तश्च शब्दः क्लीवे स्यात् । हविः धनुः ।

अर्चिः स्त्रियाञ्च । २० ।

इसन्तत्वेन क्लीवत्वे प्राप्ते वचनम् । इदमियं वा अर्चिः ।

छदिः स्त्रियामेव । २१ ।

इसन्तत्वेऽपि छदिशब्दः स्त्रियां स्यात् न तु क्लीवे । इयं छदिः एवमनुशासने स्थिते पटलं छदिरित्यमरव्याख्यातारः पटलसाहचर्यात् छदिषः क्लीवतां वदन्तः उपेक्ष्याः ।

मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनाम्नामिधानानि । २२ ।

एतद्वाचकानि क्लीवे स्युः । मुखम् आननम् । नयनं लोचनम् । लोहं कालम् अयः । वनं गहनम् विपिनम् । मांसमामिषं पलम् । रक्तं रुधिरं शोणितम् असृक् । कार्मुकं शरासनम् । विवरं छिद्रं बिलम् । जलं सलिलं वारि । हलं लाङ्गलम् । धनं द्रविणं वसु । अन्नमशनम् इत्यादि ।

सीरार्थोदनाः पुंसि । २३ ।

पूर्वसूत्रापवादः । एते शब्दाः पुंसि स्युः । सीरः । अर्घः "रायोहलीति" सूत्रनिर्देशात् रैशब्दस्य धनवाचित्वेऽपि पुंस्त्वमेव । क्लीवत्वे रैशब्दस्य तुस्ते रिण इति स्यात् । ओदनः ।

वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । २४ ।

एते शब्दाः पुंसि चात् क्लीवे च स्युः । वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्यः अरण्यम् । गाण्डीवः गाण्डीवम् ।

अटवी स्त्रियाम् । २५ ।

वनवाचित्वेऽपि अटवीशब्दः स्त्रियां स्यात् । इयमटवी ।

लोपधः । २६ ।

तूलादीनाम् अदन्तानामपवादतया परसूत्रे निर्देशेन अदन्ता एवेह प्रकरणे गृह्यन्ते । एवं सर्वत्र । अदन्तो लोपधः क्लीवे स्यात् । कूलं कूलम् स्थलम् । व्याख्यातमेव अकारान्तमभूमौ न लोऽभिधानसामर्थ्यात् स्त्रीत्वमेव । तेन स्थली अकारान्ता भूमिः ।

तूलोपलतालकुसुमतरलकम्बलदेवलशृणालाः पुंसि । २७ ।

पूर्वसूत्रापवाद । तूलः उपलः । तालः गानक्रियामानम् । इत्यवाचकस्य जातित्वात् द्विलिङ्गता अत एव क्रियाकर्त्रापि परत्वात् द्विलिङ्गता न विरुध्यते । तरलः हारमध्यगमणिः । चञ्चलपर्यायस्तु त्रिलिङ्गः क्रियोपाधित्वात् ।

शीलमूलमङ्गलमालकमलतलमसलकुण्डलपलाशबालगलपलालविडालविलमूलाः पुंसि च । २८ ।

एते शब्दाः पुंसि चात् क्लीवे स्युः । लोपधत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् । शीलं शीलः मूलं मूलः मूलमित्यादि ।

शतादिसंख्या । २९ ।

शतादिशब्दाः संख्यासंख्येययोः क्लीवे स्युः । शतं शतानि । शतादिः किम् ? एको द्वौ बहवः । संख्या किम् ? शतः (शतशब्दपर्यन्तः) ।

शतायुतप्रयुताः पुंसि च । ३० ।

एते शब्दाः पुंसि चात् क्लीवे । अयं शतः इदं शतम् । अयुतः अयुतम् प्रयुतः प्रयुतम् । संख्यावाचकत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् ।

लक्षाकोटी स्त्रियाम् । ३१ ।

एते स्त्रियां स्तः । लक्षा कोटिः । इकारान्तत्वात् पक्षे ङीप् कोटी । लक्षशब्दस्य क्लीवत्वमपि विप्रतिषेधेऽपरं कार्यमिति

परिभाषया तथात्वम् अत एव "वा लक्षा नियुतञ्च तत्" इत्यमरः ।

सहसः पुंसि च । ३२ ।

अयं पुंसि चात् क्लीबे स्यात् । क्लीबत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् । सहसः सहस्रम् ।

मन् ब्रुच्कोऽकर्त्तरि । ३३ ।

कर्त्तृभिन्नार्थकमन्प्रत्ययान्तः ब्रुच्कश्चेत् क्लीबे स्यात् । कर्म चर्म शर्म, नर्म, । ब्रुच्कः किम् ? अणोर्भावः अणिमा एवं लघिमा । नन्तत्वेन पुंस्त्वम् । अकर्त्तरि किम् ? ददातीति दामा ।

ब्रह्म पुंसि च । ३४ ।

ब्रह्मन्शब्दः पुंसि चात् क्लीबे च स्यात् । व्यवस्थितविभाषेयम् वेदे सत्ये तपसि परात्मनि च क्लीबम् चतुर्मुखे पुमानिति ब्रह्मा ।

नामरोमणी नपुंसके । ३५ ।

एते क्लीबे स्तः । मन्ब्रुच्क इत्यस्य प्रपञ्चः । नाम रोम ।

असन्तो ब्रुच्कः । ३६ ।

अकर्त्तरीत्यनुवर्त्तते । अकर्त्रर्थकोऽस्प्रत्ययान्तः ब्रुच्कश्चेत् क्लीबे स्यात् । यशः तपः मनः । अकर्त्तरीत्यनुवृत्तेर्नेह । वेधाः । ब्रुच्कः किम् ? पुरोधाः चन्द्रमाः ।

अप्सराः स्त्रियाम् । ३७ ।

प्रायेणायं बहुवचनान्तः । इमाः अप्सरसः । प्रायेणेत्युक्तेः अप्सरा वै रूपिणी मेनेति भाष्यप्रयोगः सङ्गच्छते । इदं स्त्रीलिङ्गे निर्देष्टुमुचितम् असन्तत्वेन प्राप्तावपि ब्रुच्कत्वाभावेन प्राप्त्यभावात् तदपवादत्वासंभवात् ।

त्रान्तः । ३८ ।

रोपधत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम् । त्रप्रत्ययान्तः क्लीबे स्यात् । पत्त्रम् छत्त्रम् दात्रं कलत्रम् गोत्रम् । गोत्रशब्दस्य भूमिपर्यायतया स्त्रीत्वमेव गोत्रशब्दस्य तु गिरिपर्यायतया पुंस्त्वमेव। नेत्रशब्दस्य विशेषविधानात् पुंनपुंसकता ।

यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । ३९ ।

एते शब्दाः स्त्रियां स्युः । त्रान्तत्वेन क्लीबताप्राप्तौ तदपवादार्थं सूत्रम् । दंश्यतेऽनया दन्दशूकः इत्यत्र भिन्नेऽपि न क्लीबम् सूत्रे दंष्ट्रेति निर्देशात् । यात्रा मात्रा भस्त्रा दंष्ट्रा वरत्रा ।

ऋचामित्रच्छात्रपुत्रमन्त्रवृत्रमैचाः पुंसि । ४० ।

त्रान्तत्वेन क्लीबत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं सूत्रः । न मित्रम् अमित्रः मित्रशब्दस्य त्रान्ततया क्लीबत्वेन नञ्तत्पुरुषे परवल्लिङ्गतया तल्लिङ्गत्वापत्तौ ग्रहणसामर्थ्यात् पुंस्त्वम् । "तस्य मित्रायमित्रास्ते" इति "स्यातामसित्रौ मित्रे च" इति च माघः । मित्रशब्दस्य सूर्यार्थे रोपधत्वेन पूर्वविप्रतिषेधेन, देवविशेषवाचित्वेन च पुंस्त्वमेव। मित्रात् स्वार्थेऽण् मैत्रः वचनसामर्थ्यात् न प्रकृतिलिङ्गता ।

पत्रपात्रपवित्रच्छत्राः पुंसि च । ४१ ।

त्रान्तत्वेन क्लीबत्वे प्राप्ते पक्षे पुंस्त्वार्थम् वचनम् । पत्रं पत्रः । पात्रं पात्रः । पवित्रं पवित्रः । अनुक्तसमुच्चयचकारेण स्त्रीत्वमप्यस्य । "पवित्रासि वैष्णवी" इति वेदमन्त्रः ।

बलकुसुमशुल्वपत्तनरणाभिधानानि । ४२ ।

एतेषां पर्यायशब्दाः क्लीबे स्युः । बलं सहः वीर्यं सामर्थ्यम् । कुसुमं पुष्पम् । सुमनःशब्दस्य विशेषाभिधानात् स्त्रीत्वम् । रणं युद्धम् आयोधनम् । युत्समिधोर्विशेषाभिधानात् स्त्रीत्वम् ।

पद्मकमलोत्पलानि पुंसि च । ४३ ।

पद्मादिशब्दाः क्लीबे पुंसि च स्युः । पद्मं पद्मः । "भाति पद्मः सरोवरे" इत्यादावालङ्कारिकैस्तु अप्रयुक्तादोषोद्धरणतयाऽस्य पुंस्त्वमनुशासनसिद्धमित्यभ्युपगतम् । अत एव अर्द्धर्चादिसूत्रे पद्मं नपुंसकमेवेति वृत्तिग्रन्थोऽप्रयुक्तादोषदृष्ट्यैवेत्युन्नेयः । कमलं कमलः इत्यादि ।

आहवसंग्रामौ पुंसि । ४४ ।

रणपर्यायतया क्लीबत्वे प्राप्ते तद्बाधनार्थं सूत्रम् । आहवः संग्रामः ।

आजिः स्त्रियामेव । ४५ ।

रणवाचित्वेन प्राप्तक्लीबताबाधनार्थं सूत्रम् । इयम् आजिः पक्षे क्लीबे आजी ।

फलजातिः । ४६ ।

फलप्रधानवृक्षजातिवाची शब्दः क्लीबे स्यात् । आमलक्याः फलम् अण् "फले लुक्" इति लुकि "लुक् तद्धितलुकि" इति "ङीषो लुकि क्लीबत्वम् । आमलकम् आम्रम् । तथा च विकारावयवप्रत्ययलुग्विषये एवास्य प्रवृत्तिः नान्यथा, तेन "जम्बू वा" इति जम्बूशब्दात् अपि "लुप् चेति" तस्य लुप्पक्षे स्त्रीत्वमेव लुक्पक्षे क्लीबता तदुभयाभावपक्षे प्रत्ययस्थितिः । तेन जम्बूः जम्बु जाम्बवम् । अत एव "जम्बूः स्त्री जम्बु जाम्बवम्" इत्यमरः । "फले लुक्" इत्यत्र फलतीति व्युत्पत्त्या फलशब्दः प्रसवमात्र-

वचनः । अत एव "द्विहीनं प्रसवे सर्व्वं हरीतक्यादयः स्त्रियाम्" इत्यमरः ।

वृक्षजातिः स्त्रियामेव । ४७ ।

क्वचिदित्यध्याहार्य्यम् । हरितक्यादिप्रसववाचकशब्दः स्त्रियामेव । हरीतक्याः फलम् "हरीतक्यादिभ्यश्च" इति फलार्थकप्रत्ययस्य लुपि स्त्रीत्वम् "हरीतक्यादिषु व्यक्तिः" इति वार्त्तिके हरीतक्यादीनां प्रकृतितिलिङ्गत्वोक्तेः । स च गणः "हरितकी कोशातकी नखरजनी, शल्लकखडी, दाडी दोडी श्वेतपाकी अर्জ্জुनपाकी द्राक्षा, काला ध्याक्षा, गभीका कण्ठकारिका पिप्पली चिञ्चा भेक्षालिका" इति । वृक्षजातिरित्युक्तेः फलप्राधान्याभावेऽपि पुष्पप्रधानजातिवाचिनः पुष्पपरत्वेऽपि स्त्रीत्वम् । मालती मल्लिका । लुप् चेति (४,२,१६६) सूत्रे "फलपाकशुषासुषसंख्यानम्" इति वार्त्तिकोक्तेः व्रीहीणां फलानि-व्रीहयः सुप्ताः माषाः । "पुष्पमूलेषु बहुलम्" इति वार्त्तिकोक्तेः बहुलग्रहणात् क्वचित् लुप् क्वचिच्चेति द्योतितम् तेन मल्लिकायाः पुष्पं मल्लिका एवं मालती । विदार्य्या मूलं विदारी । बहुलग्रहणात् क्वचिन्न पाटलानि पुष्पाणि, शाल्वानि मूलानि । बाहुलकात् पुष्पे मूले च वाच्ये क्वचित् लुक् । अशोकम् करवीरम् ।

वियज्जगत्सलकत्कषत्पृषच्छकृद्यकृद्दुदस्रितः । ४८ ।

एते शब्दाः क्लीवे स्युः । वियत् जगत् । सलत् ।

नवनीतावतान्नृताम्नतनिमित्तवित्तपित्तव्रतरजतपलितानि । ४९ । [भिन्ने त्रि० ।

एते शब्दाः क्लीवे स्युः । नवनीतम् अवतम् अन्नतं (सुधा) नृत

आङ्कुलिग्रपीठकुण्डाङ्गदधिसक्थ्यक्ष्यास्यदाकाग्रकण्ववीजानि ।५० [अपेः नपुंसकत्वोक्तेः, कण्वं (पापम्)

एते शब्दाः क्लीवे स्युः । आङ्कं कुलिग्रम् । आकाग्रः परित्याज्यः

दैवं पुंसि च । ५१ ।

दैवशब्दः पुंसि चात् क्लीवे स्यात् । दैवः दैवम् ।

धान्याज्यशस्यरूप्यपण्यवर्षाधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यग्निक्यकुद्यमद्यहर्म्यतूर्य्यसैन्यानि ।५२।

योपधत्वेन पुंस्त्वे प्राप्तेऽपवादार्थं सूत्रम् । एते शब्दाः क्लीवे स्युः । धान्यम् आज्यं शस्यम् ।

द्वन्द्ववर्हदुःखवडिग्रपिच्छविश्वकुटुम्बकवचकवरवृन्दारकाणि । ५३ ।

एते शब्दाः क्लीवे स्युः । द्वन्द्वं (मिथुनम्) वर्हम् इत्यादि ।

अक्षमिन्द्रिये । ५४ ।

इन्द्रियार्थे अक्षशब्दः क्लीवे स्यात् । अक्षम । इन्द्रिये किम् ? रथाङ्गे इक्षभेदादौ मा भूत् ।

अथ नपुंसकावशिष्टमुच्यते तत्र भावे ल्युट्मा इत्युपलक्षणं कृत्यादीनाम्, तेन भावार्थककृत्याद्यन्ताः नपुंसके स्युः । भवितव्यम् भवनीयम् भव्यं भाव्यं कृत्यं ब्रह्मभूयम् । भावे इत्युक्तेः कर्म्मणि कर्तरि च तिलिङ्गा एव । कर्म्मणि—चेतव्यः चयनीयः चेय इत्यादि । कर्त्तरि—नेयः भव्य इत्यादि । कृत्यादयश्च "अभिविधौ भावे इनुण्" (२,२,४४, भा०) इतीनण्, तदन्तात् अस्तिनुणः इति (५,४,१५) स्वार्थे ष्णि भावादिषु साङ्कुटिनम् । भावे खल्—दुर्भवं दुःशयम् । व्यासौ युच् (२,२,२८) सुस्नानम् दुर्म्लानम् ।

तस्य समूहः (४,२,३७) इत्यधिकारे ये माणवादयः शिलालयस्तदन्तात्तदन्ता नपुंसके स्युः । यथा—कार्षे नास्तम् । भिक्षादिभ्योऽण् (४,२,३८) भैक्षम् गार्भिणम् । गोत्रादिभ्यो यञ् (४,२,३९) औपगवकम् द्रौणकम् द्रौह्मकम् द्रौरुक्मम् राजकम् राजन्यकं राजपुत्रकम् मानुष्यकम् याज्ञकम् । केदाराद् यञ् च (४,२,४०) कैदार्य्यम् कैदारकम् । गणिकाया ण्यिति (वा०) गाणिक्यम्, ठञ् क्वचिदन्यत्र (४,२,४१) गाणिकम् कैदारिकम् । ब्राह्मणमाणवकवाडवात् (४,२,४२) ब्राह्मण्यम् माणव्यम् वाडव्यम् पर्शवाद्यस् (वा०) पार्श्वम् । व्यनुदात्तादेरञ् (४,२,४४) कापोतम् मायूरम् । खण्डिकादिभ्यश्च (४,२,४५) खाण्डिकम् सैनम् औलुकमित्यादि । चरणेभ्यो धर्म्मवत् (४,२,४६) आन्दोग्यं काठक्यम्, क्वचित्तु हस्तिधेनोरक् (४,२,४७) हास्तिकम् हास्तिकम् धैनुकम् । केशाश्वाभ्यां यञ्छावित्रौ (४,२,४८) कैश्यं कैशिकम् आश्वीयं आश्वम् । "सामान्ये नपुंसकम् (वा०) क्रियाव्ययानां भेदकानि नपुंसकलिङ्गानि स्युः । मृदु पचति कमनीयम् प्रातः । एतल्लिङ्गाः क्वचिच्छब्दा नपुंसकतयाऽमरे परिगणिताः यथा उक्थं (सामावयवभेदः) तोदम् (छन्दोभेदः) । चोषम् (तान्त्रफलम्, तदीयफलस्यगणाकारपदार्थो वा) । पिच्छं (भक्षणंभूतमत्स्यः) । तिरीटम् (वेतनम्) । राजसूयं राजमेयं यज्ञविशेषत्वेऽपि अनेन बाधाच्च पुंस्त्वम् । गद्यं पद्यं (कविकृतौ) । भाण्डिकम् भाण्डं सिन्दूरं चीरं चीवरं, लोकायतं चरितालम् विदलं (वंशपात्रभेदः स्थाली वा) ।

इति नपुंसकलिङ्गानुशासनम् ।

स्त्रीपुंसयोः । १ ।

इत ऊर्द्धं वक्ष्यमाणाः स्त्रीपुंसलिङ्गाः स्युः । इत्यधिकारः ।

गोमणिर्यष्टिमुष्टिपाटलिवस्तिशाल्मलिचुटिमसिमरीचयः । २ ।

एते पुंसि स्त्रियां च स्युः । तत्र गोशब्दस्य पशुविशेषवाचित्वे स्त्रीपुंसलिङ्गता स्वर्गवाक्किरणनेत्रवाचित्वे पुंसि, भूमिदिग्वाग्वाचित्वे स्त्रियामिति व्यवस्था । इयं गौः अयं गौः, इयमयं वा मणिः स्त्रीत्वपक्षे वा ङीप् मणी एवं सर्वत्र ।

मन्युशीधुकर्कन्धुसिन्धुकण्डुरेणवः । ३ ।

एते स्त्रियां पुंसि च स्युः । इयमयं वा मन्युः शीधुः । कर्कन्धुः अप्राणिजातित्वात् स्त्रीत्वपक्षे जङ् कर्कन्धूः ।

गुणवचनमुकारान्तं नपुंसकञ्च । ४ ।

गुणवचना उकारान्ताः शब्दाः नपुंसके चात् स्त्रीपुंसयोः स्युः । तेन त्रिलिङ्गाः । पटुः पट्वी पटु । मृदुः मृद्वी मृदु । उदन्तत्वविशेषणात् तद्भिन्नानां गुणवचनानां गुणपरत्वे पुंस्त्वम् गुणिपरत्वे त्रिलिङ्गता । शुभ्रः शुक्रः शुचिः वर्णे, तद्वति शुक्लं वस्त्रं शुक्लः पटः शुक्लाः शाटी । एतत् सूत्रं परित्यक्तुं शक्यते गुणवचनश्चेति त्रिलिङ्गस्यसूत्रेण परेणास्य बाधात् । तेन शुक्लं शुचि वा वस्त्रमित्युकारान्तत्वाभावेऽपि तेनैव त्रिलिङ्गता ।

अपत्यार्थतद्धिताः । ५ ।

अपत्यार्थे विहिता ये तद्धितास्तदन्ताः स्त्रीपुंसयोः स्युः । औपगवः औपगवी । दाक्षिः दाक्षी, गार्ग्यः गार्गी, वैदः वैदी । अमरेण तु

"स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाखाद्याश्च स्त्रीयोगे सहस्रकः ॥"

इत्युक्तम् । तथा च द्विपदाः, चतुष्पदाः, षट्पदाः, उरगवाचिनः जातिविशेषवाचिनः पुरुषाख्याये स्त्रीयोगे एव ते च स्त्रीलिङ्गास्तेन पुंपरत्वे पुंस्त्वं, स्त्रीपरत्वे स्त्रीत्वमिति त्रिलिङ्गता । तत्र द्विपदाः—मानुषः मानुषी, विप्रः विप्रा, शूद्रः शूद्रा, वर्कः वर्की, हंसः हंसी इत्यादि । चतुष्पदाः—मृगः मृगी, सिंहः सिंही, वृषभः वृषभी, इत्यादि । षट्पदाः—भ्रमरः भ्रमरी, मधुकरः मधुकरी, उरगः उरगी, सर्पः सर्पा, अबाधिता इत्येव तेन लतामक्षिकाशिशवानां नित्यस्त्रीत्वमेव । जातिभेदवाचिनः—मनुष्यः मनुष्यी, शकुलः शकुली । पुमाख्याः—कुम्भकारः स्त्रीयोगे कुम्भकारी (कुम्भकारस्य भार्या) ।

अमरे केचित् शब्दा अपि त्रिलिङ्गतया पठिताः । मक्षिकः मक्षिका, शुनिः शुनी, वराटकः वराटिका, स्वातिः स्वाती, वर्षिकः वर्षिका, भाटलिः भाटली, मनुः मनावी-मनायी, मूषः मूषा, सूपाटिः सूपाटी, यष्टिः यष्टीः, कटिः कटी, कुटिः कुटी ।

इति स्त्रीपुंसलिङ्गानुशासनम् ।

पुंनपुंसकयोः । १ ।

अधिकारोऽयम् । इत ऊर्द्ध वक्ष्यमाणाः पुंनपुंसकलिङ्गाः स्युः ।

घृतभूतमुक्तच्छेलितैरावतपुरुषवृक्षलोहिताः । २ ।

एते शब्दाः पुंनपुंसयोः स्युः । इदं घृतम्, अयं घृत इत्यादि । भूतशब्दस्य अतीते भवनकर्त्तरि च त्रिलिङ्गता । पिशाचे जन्तुमात्रे च पुंसि । पृथिव्यादिषु पञ्चसु क्लीवता, युक्ते यथार्थे नपुंसकतेति व्यवस्था । अमरेण तु "युक्ते च्छादादृते भूतं प्राग्व्यतीते समे त्रिषु" इत्युक्तम् । तथा च भूतशब्दस्य त्रिलिङ्गताविषयभिन्ने एवास्य सूत्रस्य विषयः । लोहितं लोहितः (रुधिरम्)

शृङ्गार्द्रनिदाघोद्यमशल्यदृढाः । ३ ।

एते पुंनपुंसकयोः स्युः । अयं शृङ्गः इदं शृङ्गम् । "अर्द्रं नपुंसकम्" (२,२,२,) सूत्रात् समांशवाचिनो नपुंसकता खण्डवाचिनस्तु पुंस्त्वमिति व्यवस्था । दृढशब्दस्य गुणवचनत्वे त्रिलिङ्गता विश्रब्धवाचित्वे एतत्सूत्रविषयता ।

व्रजकुञ्जकुथकूर्चप्रस्थदर्पोर्द्धर्चपुच्छाः । ४ ।

एते पुंनपुंसकलिङ्गाः स्युः । व्रजः व्रजम् । अर्द्धर्चाः पुंसि चेति (२,४,३१) सूत्रे अर्द्धर्चादीनां प्राप्तत्वेऽपि पुनरर्द्धर्चग्रहणं तत्रपठितानां केषाञ्चित् वैदिकविषयत्वसूचनाय अत एव इह घृतादीनां केषाञ्चित् पाठो लौकिकप्रयोगेऽपि पुंनपुंसकतार्थः ।

अर्द्धर्च गोमय कषाय कार्षापण कृतघ्न कृपण कपाट शङ्ख गुण यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म्म कर्म्मन् मोदक यतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु प्रधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीय (पात्रीर) मस्तिक वारवाण प्रोथ कपित्थ शुष्क शाल शील शुल्क शीधु कवच रेणु कृष्ण करट शीकर मुसल सुवर्ण वर्ण पूर्व्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल मिधन निर्य्यास जन्म दत्त पुत्र वृत्त च्छेदित शृङ्ग निगड खल मधु मूल मूलक स्थूल शराव नाल वज्र विमान सुख प्रभेद शूल वज्र कटक कण्टक कपर्द्द शिखर कल्क नाट मस्तक वलय कुसुम

हरण पङ्क कुण्डल किरीट कुसुद अर्बुद अङ्कुश तिमिर आश्रम भूषण दूष्यास सुकुल वसन्त तडाग पिटक विटङ्क विडङ्ग पिण्याक माष कोश(ष) फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास विशाल चषाल खण्ड दर विटप रण बल मक मृणाल हस्त आर्द्र हल सूत्र ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल कुल पुर राष्ट्र बिम्ब अम्बर कृत्रिम कुक्कुट कुडप कबुद खण्डल तोमर तोरण मस्तुक पङ्क पुङ्ख मध्य बाल व्याल वल्मीक वर्ष वस्त्र वस्तु देह उद्यान उद्योग स्नेह स्तेन स्तन स्वर संगम निष्क क्षेम यूक क्षत पवित्र यौवन कलुष पालक मूषिक मण्डल वल्कल कुञ्ज विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शर्प तीर्थ लोमश तमाल लोह दण्डक शपथ प्रतिसर दारु धनुष् मान वर्त्मन् क्रूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल । अर्द्धर्चादिः ।

अत एव "अर्द्धर्चादौ इतादीनां पुंस्त्वार्थं वैदिकं ध्रुवम् तथोक्तमिह लोकेऽपि तच्चेदस्त्रस्तु शेषवत्" इत्यमरेणोक्तमतो यथोक्तविषयत्वमवगम्यते तत्र इतादीनामिहोक्तेस्तेषां लौकिक-प्रयोगविषयत्वमपीति अमरोक्तं चिन्त्यमूलमिति भेदः ।

कबन्धौषधायुधान्ताः । ५ ।

कबन्धः कबन्धम् औषधः औषधम् आयुधः आयुधम् अन्नः अन्नम्

दण्डमण्डखण्डाग्रसैन्यवपार्श्वकाशाङ्कुराकाशकुश-कुलिशाः । ६ ।

एते पुंनपुंसयोः स्युः । दण्डः दण्डम् "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशस्थले" इत्युक्तार्थेषु पुमान् शलाकावाची तु स्त्रियां जानपदादित्वात् (४,१,४२) अयोविकारे ङीष्विधानात् कुशी । अयोविकारभिन्ने तु टाप् कुशा । अत एव "अतः ककमीत्यादि (१,२,४८)सूत्रे कुशाकर्षीति, शारीरकसूत्रे च "क्षानौ तृणावनगद्धर्वेषत्वात् कुशाच्छन्दः" इति स्त्रीत्वप्रयोगः ।

गृहमेहदेहपट्टपटहाष्टापदार्बुदकुदाश्च । ७ ।

एते उक्तलिङ्गाः स्युः । गृहं गृहः । मेहः मेहम् इत्यादि ।

इति पुंनपुंसकलिङ्गानुशासनम् ।

स्तवलता स्त्रीनपुंसकलिङ्गं विधिष्य नोक्तम् अमरसिंहेन तु स्तवस्वरत्वात् तदवशिष्टतयाऽभिहितं तदिहाभिधीयते ।

"स्त्रीनपुंसकयोर्भावक्रिययोः अज् क्वचिच्च वुञ्" । इति भावकर्मणोर्विहितप्रत्ययान्तस्य स्त्रीनपुंसकलिङ्गत्वं तच्च प्रथमं सूत्रमपि अक्षरप्राप्तत्वया ज्ञानलोकार्थमिह पुनरुच्यते । गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ्प्रकरणात् भावे विहितः ष्यञ् वुञ् च क्वचित् स्त्रीनपुंसकयोः स्यात् । उचितस्य भावः कर्म वा औचित्यं औचिती एव चातुर्यं चातुरी माधुर्यं माधुरी । क्वचिदित्युक्तेः अर्हतो भावः आर्हन्त्यं तत्र-अर्हतो डुम् चेति डुम् । वुञ् आर्षोपुरुषिका लौकिका त्रैयो-पाध्यायिका, गार्गिकया श्लाघते इति । क्वचित्तुक्तेः रामणीयकं कामनीयकमित्यादौ "योपधाद्गुरूपोत्तमात्" (५,१,१२४) इति वुञन्तस्य स्त्रीत्वमेव । भावकर्मणोरित्युक्तेः स्त्रीलिङ्गे ष्यञ् क्वचिदेव चातुर्वर्ण्यं त्रैलोक्यम् ।

"षड्यन्तप्राक्पदाः सेनाद्याया शालासुरानिशा इति"

षष्ठीसमासनिष्पन्नाः सेनाद्यन्ताः स्त्रीनपुंसकलिङ्गाः स्युः । मनुष्यसेना मनुष्यसेनम्, हंसश्रेणया हंसश्रेणम्, सासुरा यवसुरं, गोशाला गोशालम्, अग्निशा अग्निशम् ।

"आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नञ् लुक्" इति च । आबन्तं अनन्तञ्च उत्तरपदं यस्य तादृशो द्विगुः स्त्रीनपुंसकयोः तत्र च अनन्तस्य नञ् लुक् च । त्रिसप्तं त्रिसप्ती । त्रिनवं त्रिनवी । एतच्च पूर्वं प्रायेणोक्तम् अप्रधाणमिहोपन्यस्तम् ।

स्त्रीनपुंसकलिङ्गानुशासनम् ।

अविशिष्टलिङ्गम् । १ ।

नास्ति विशिष्टं लिङ्गं तत्कार्यं च यस्य । इत ऊर्ध्वं यस्य-माणाः शब्दा विशिष्टलिङ्गकार्यशून्याः विशिष्टलिङ्गशून्याश्च तेन त्रिलिङ्गाः स्युः ।

अव्ययडतियुष्मदस्मदः । २ ।

चादयोऽव्ययशब्दाः डतिप्रत्ययान्ता, युष्मदस्मच्छब्दौ च विशिष्ट-लिङ्गकार्यशून्याः स्युः । उच्चैः तरुः लता, मन्दिरं वा । इति पुरुषाः स्त्रियः वस्तूनि वा । त्वं पुमान् त्वं स्त्री त्वं नपुंसकम् । अहं पुमान् स्त्री, कुलं वा ।

ष्णान्ता संख्या । ३ ।

धान्तनान्तसंख्यावाचकाः शब्दाः अविशिष्टलिङ्गकार्याः स्युः । पञ्च षट् पुरुषाः स्त्रियः कुलानि वा । ष्णान्तेति विशेषणात् द्विष्णाः संख्याः त्रिलिङ्गाः विशिष्टलिङ्गकार्यवन्तः । एकः पुमान् एका स्त्री एकं कुलं द्वौ द्वे द्वे । त्रयः तिस्रः तीणि वा ।

गुणवचनञ्च । ४ ।

गुणवाचकाः शब्दाः गुणिपरत्वे त्रिलिङ्गाः स्युः । शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् । गुणपरत्वे तु यथाप्राप्तं शुक्ल इत्यादावेव अत एव "गुण शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इत्यमरः ।

क्त्वाद्यञ्च । ५ ।

क्त्वा इति बहुवचनं क्तसामान्योपलक्षणं तच्चासति बाधके कर्त्राद्यर्थे त्रिलिङ्गाः स्युः । तथा च भावे विहितक्तिन्नादेः स्त्रीत्वस्य, घञादेश्च पुंस्त्वस्य विशिष्योक्तेस्तेनास्य बाधः । तत्र कर्तरि-भव्यः गेयः पाठकः गायक इत्यादयः त्रिलिङ्गाः । कर्मणि-स्तोतव्यः स्तवनीयः स्तुत्य इत्यादयः । अत एव "क्तः कर्तर्य-संज्ञायां क्त्वाः कर्मणि कर्तरि" इत्यमरोक्तिः । तत्र क्त-इत्यत्र उत्तरवाक्यस्थं कर्मणीति पदमाकृष्यते । तथा च कर्तरि कर्मणि च क्तः तत्सदृशे क्त्वाश्च त्रिलिङ्गाः स्युः ।

करणाधिकरणयोर्ल्युट् । ६ ।

करणे अधिकरणे च विहितल्युडन्तास्त्रिलिङ्गाः स्युः । ल्युडन्त-त्वेनक्लीवत्वे प्राप्ते त्रिलिङ्गतार्थं सूत्रम् । तत्र करणे—देव-यजनः, प्रमाणी, साधनम् प्रमाणम् । अधिकरणे पशुसंज्ञपनो यज्ञः दृष्टौ स्त्री ङीप् । सत्रे नपुंसकम् ।

सर्वादीनि सर्वनामानि ।

सर्वविश्वेत्यादीनि सर्वनामसंज्ञकानि त्रिलिङ्गानि स्युः । सर्वः सर्वा सर्वम्, विश्वः विश्वा विश्वम् । युष्मदस्मदोस्तु सर्व-नामत्वेऽपि विशेषाभिधानात् न लिङ्गविशेषकार्यमिति भेदः ।

अमरवार्तिकाद्यनुसारेण अत्रेदमधिकमुच्यते ।
"परं लिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ।
अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्व्वाः परोपगाः ।
तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।
बहुव्रीहिरदिङ्नाम्नामुक्तेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥

तत्र परवल्लिङ्गं "द्वन्द्वतत्पुरुषयोः" (२,४,२६ सू०) इति द्वन्द्वतत्पुरुषयोः उत्तरपदलिङ्गसमानलिङ्गत्वविधानेऽपि "स नपुं-सकम्" (२,४,२७ सू०) इति समाहारद्विगुद्वन्द्वयोर्नपुंसकत्वस्य विधानात् स्वप्रधान इत्युक्तम्, समाहारे तु तयोः संघातस्यैव प्राधा-न्यात् न स्वघटकपदार्थप्राधान्यमिति न तत्र परवल्लिङ्गता । "अर्थेन नित्यसमासो विशेष्यलिङ्गता च" (२,१,३६ वा०) इति द्विजाय अयमियमिदं वेति विग्रहे द्विजार्थः विशेष्यलिङ्गः ।

कुगतिप्रादयः (२,२,१८) प्रादिभिर्नित्यसमासनिष्पन्न-शब्दाः विशिष्टलिङ्गाः । तत्रत्यवार्तिकानि "प्रादयो गताद्यर्थे प्रथमया" (वा०) प्रगत आचार्य्यं प्राचार्य्यः प्रकृष्टा पितामही प्रपितामही प्रकृष्टं बलम् प्रबलम् सुबलमित्यादि । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) अतिक्रान्तः अतिक्रान्ता अतिक्रान्तं वा राजानम् अतिराजः अतिराजी अतिराजम् । परवल्लिङ्गतापा-वादः । एवमन्यत्राऽपि "अवादयः क्रुष्टाद्यर्थे तृतीयया" (वा०) अवक्रुष्टः कोकिलया अवकोकिलः अवकोकिला अवकोकिलम् । "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या" (वा०) परिग्लानोऽध्ययनाय पर्य-ध्ययनस्त्रिलिङ्गः । "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" (वा०) निष्क्रान्तो गृहात् इति विग्रहे निर्गृहः निर्गृहा निर्गृहम् । इतिवार्तिकोक्तार्थविशेषे प्रादिसमासनिष्पन्ना अपि परगामिन-स्त्रिलिङ्गाः । अलंपूर्व्वोऽपि त्रिलिङ्गः । अलं कर्म्मणे, अलं-कर्म्मा त्रिलिङ्गः । "प्राप्तापन्ने च जीविकया" (२,२,४) इति विहितः प्राप्तापन्नपूर्व्वकजीविकान्वितपुरुषस्त्रिलिङ्गः । प्राप्त-जीविकः प्राप्तजीविका प्राप्तजीविकम् एवम् आपन्नजीविकः । तद्धितार्थे द्विगुः पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यादिस्त्रिलिङ्गः । संख्यासर्वनाम्नां त्रिलिङ्गत्वं सूत्रकृतैव पूर्व्वं दर्शितम् । तदन्ता-नाममरेऽधिकोक्तिः परित्यक्तुं शक्यते तत्पुरुषे द्वन्द्वे च पर-वल्लिङ्गतयैव त्रिलिङ्गतापाप्तेः बहुव्रीहेस्त्रिलिङ्गत्वस्य अग्रे वक्ष्यमाणत्वाच्च । "अनेकमन्यपदार्थे" २,२,२४ सू०) बहु-व्रीहेरन्यपदार्थबोधकतया तल्लिङ्गत्वौचित्यात् "दिङ्नाम्नान्य-न्तराले" (२,३, २६ सू०) इति दिङ्नामवाचित्वात् स्त्रीत्व-मेवेन तु त्रिलिङ्गत्वम् । उत्तरपूर्व्वा । गुणद्रव्यादियोग उपाधिः शब्दप्रवृत्तौ निमित्तं येषां तादृशाः शब्दास्त्रिलिङ्गाः तच्च गुण-वचनानां, "गुणवचनञ्चेति" क्रियावचनानां च "क्त्वाद्यञ्च" इत्यनेन सूत्रकृतैवोक्तम् द्रव्यसंबन्धोपाधिकास्त्रिलिङ्गाः इत्येवाधिकम् दण्डोऽस्यास्तीति इनिः दण्डी दण्डिनी दाण्डिक, धनवान् धनवती धनवत् इत्यादि ।

अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ।

इत्यमरोक्तिः "तेन रक्तं रागात्" (४,२,१) इति रक्ताद्यर्थे रञ्जनद्रव्यवाचिन उत्तरे विहिताण्णाद्यन्ताः त्रिलिङ्गाः स्युः । कषायेण रक्तमित्यर्थे काषायः पटः काषायी शाटी काषायं वस्त्रम् । आदिपदात् तदधिकारे "लाक्षारोचनाट्टक्" (४,२,२,) इति ठगादयो गृह्यन्ते । लाक्षिकः रौचनिक-स्त्रिलिङ्गः । रक्तादीत्यादिपदात् क्रियाविशेषकर्म्मणि तत्कर्तरि वा ये अणादयो विहिता ये च सम्बन्धार्थे विहितास्ते सर्व्वेऽपि गृह्यन्ते । "नक्षत्रेण युक्तः कालः" (४,२,३) इत्यण् पुष्येण युक्तं पौषं त्रिलिङ्गम् । "इदं साम" (४,२,७) अण् वसिष्ठेन इदं

साम, वासिष्ठं साम वासिष्ठी ऋक् वासिष्ठो मन्त्रः "कलेर्ढक्" (४,२,८) कलिना दृष्टं काळेयम्। "वामदेवाड्ड्यड्ड्यौ"(४,२,९) वामदेव्यम्। "परिवृतो रथः"(४,२,१०)वस्त्रेण परिवृतो वास्त्रः। "तदधीते तद्वेद" (४,२,५९) व्याकरणमधीते वेद वा वैयाकरणः, इत्येवमध्ययनवेदनरूपक्रियादिकर्तरि विहितास्त्रिलिङ्गा एव "साम्न देवता" (४,२,२४) इत्यादिना विहिताण्यादयः पाशुपतम् वायव्यम् ऐन्द्रम्। "तदस्य पण्यम्" (४,४,५१) अपूपं पण्यमस्य आपूपिक इत्यादयो भाज्याः।

इति अविशिष्टलिङ्गत्रिलिङ्गानुशासनम्।

इति पाणिनीयं लिङ्गानुशासनं समाप्तम्।

अकारादिक्रमेण पाणिन्यागमसिद्धप्रत्ययागमानां प्रयोगे परिनिष्ठितरूपाणि दृष्टप्रयोजनसहितानि सोदाहरणानि प्रदर्श्यन्ते।

अ

अ अ भावार्थे कृत्प्रत्ययः। जिगमिषा चिकीर्षा।
अकङ् अक् आगमः अन्तादेशः। सौधातकिः वैयासकिः।
अकच् अक आगमः अन्तोदात्तता। सर्वकः उच्चकैः।
अकार अ अपत्यबहुत्वे तद्धितः। उडुलोमाः। भावे कृत्। जागरा।
अङ् अ भावे कृत्प्रत्ययः गुणाभावादि। भिदा छिदा।
अच् अस्त्यर्थे तद्धितः, अन्तोदात्तः। अर्थसः, कर्तरि कृत् प्रकृतिप्रत्ययसमुदायान्तोदात्तः। पचः देवः।
अञ् अ अपत्याद्यर्थे तद्धितः आदिवृद्धिः आद्युदात्तता। वैदः स्त्रियां ङीप् वैदी। औत्सः।
अट् अ आगमः आद्यवयवः। अभवत् अभूत् अभविष्यत्।
अठच् अठ घटाद्यर्थे तद्धितः अन्तोदात्तः। कर्मठः।
अण् अ अपत्याद्यर्थे तद्धितः आदिवृद्धिः। शैवः स्त्रियां ङीप् शैवी। कर्तरि कृत् वृद्ध्यादि। कुम्भकारः स्त्रियां टाप्।
अत् अ विभक्त्यर्थे तद्धितः स्वरितः अव्ययः। क्व। [उच्चरतः।
अतसुच् अतस् प्रथमाद्यर्थे तद्धितः अन्तोदात्तः। दक्षिणतः।
अति अत् परिमाणार्थे वर्गे तद्धितः। पञ्चत् दशत् वर्गः।
अतृन् अत् कर्तरि कृत् आद्युदात्तता तुम्। जरन् स्त्रियां ङी।
अथुच् अथु भावे कृत् समुदायान्तोदात्तता। वेपथुः श्रमथुः।
अदुक् अद् आगमः अन्तावयवः। एकाद्रिंशतिः एकाद्विंशतिः।
अद्ड् अद् आगमः टिलोपः। कतरत् कतमत्।
अध्यै(न्) अध्यै तुमर्थे कृत्। पूतध्यै। निम्बे आद्युदात्तता। [भीत्या रक्षः भीलम्।
अन् अ भागाद्यर्थे तद्धितः, आद्युदात्तता। द्वितीयो भागः।
अनङ् अन् समासान्तः, अन्तादेशः। पुष्पधन्वा।
अनि अनि भावे कृत् स्त्रियाम्। अजीर्णिः।
अनिच् अन् समासान्तः, अन्तोदात्तः। सुधर्मा विधर्मा।
अनीयर् अनीय भावकर्मार्थोः कृत् उभोसमोदात्तः। भवनीयम्।
अप् अ समासान्तः अनुदात्तः। कल्याणधर्मा, अनन्तर्भावे कृत्। करः गरः भवः प्रभवः।
अम् अम् वेदे एवागमः। नितरं डीके ना नितराम्।
अयङ् अय आगमः, अन्तादेशः। पथ्यते पथ्या।
अयच् अय अवयवे तद्धितः, अन्तोदात्तः। उभयम् द्वयम्।
असि अस् प्रथमाद्यर्थे तद्धितः अव्य०। पुरः अधः अतः।
असिच् अस् समासान्तः अन्तोदात्तः। अप्रजाः सुप्रजाः।
असुक् अस् आगमः अन्तावयवः। दध्यस्यति।
असुक् अस् आगमः अन्तादेशः। पुमांसौ पुमांसः।
असे(न्) असे तुमर्थे कृत् निम्बे आद्युदात्तः। मरदो जीवसे।
अस्तात् अस्तात् प्रथमाद्यर्थे तद्धितः अव्ययः। अधस्तात्।

आ

आकिनिच् आकिन् असहायार्थे तद्धितः अन्तोदात्तः। एकाकी। [उत्तरा।
आङ् आ प्रथमाद्यर्थे तद्धितः अन्तोदात्तः अव्य०। दक्षिणा।
आट् आ आगमः आद्यावयवः। आतीत्।
आटच् आट मत्वर्थे तद्धितः अन्तोदात्तः। वाचाटः।
आति आत् प्रथमाद्यर्थे तद्धितः अव्य०। दक्षिणात् उत्तरात्।
आनङ् आन् आगमः अन्तादेशः। पिता खसा ऊधसः।
आनुक् आन् आगमः अन्तावयवः। दूरूणी वरूथिनी।
आपुक् आप् आगमः अन्तावयवः। सत्यापयति अर्थापयति।
आम् आम् आगमः। एधाञ्चकार एधामास।
आमिनिच् आमिन् मत्वर्थे तद्धितः अन्तोदात्तः। खामी।
आमु आम् आगमः अव्य०। नितराम् सुतराम् पर्याप्तमाम्।
आय आय स्वार्थे धात्वंशप्रत्ययः। गोपायति धूपायति।
आय्य आय्य प्रीत्यर्थे कृत् उपादि इत्येके। कृपायाः।

आरकन् आरक मत्वर्थे तद्धितः आद्युदात्तः । ऋङ्कारकः ।
आरक् आर अपत्यार्थे तद्धितः आदिर्ञ्णिः अन्तोदात्तता ।
गौधारः । जाडारः ।
आरि आरि वर्षे ऋत्वर्थे तद्धितः अव्ययः । परारि ।
आरु आरु शीलार्थे कर्त्तरि क्रत् । पराराः वन्दारुः ।
आलच् आल मत्वर्थे तद्धितः अन्तोदात्तः । वाचाल ।
आलुच् आलु शीलार्थे कर्त्तरि क्रत् समुदायान्तोदात्तता ।
सृकृयालुः । मत्वर्थे तद्धितः अन्तोदात्तः । कृदयालुः ।
आहि आहि प्रथमाद्यर्थे तद्धितः अव्य० । दक्षिणाहि ।

इ

इक् इ धातुनिर्देशे क्रत् गुणवृद्ध्यभावः । पविः भिदिः ।
इकट् इक चौरे तद्धितः । ऐकागारिकः स्त्रियां ङीप् ।
इच् इ समासान्तः अन्तोदात्तः अव्य० । दण्डादण्डि ।
इञ् इ प्रश्राख्यानार्थे क्रत् दृङ्प्रादि आद्युदात्तः । कांकरि-
मकार्षीः । अपत्याद्यर्थे तद्धितः आदिर्ञ्णिः । काण्विः ।
इट् इ आगमः आद्यावयवः । भविता रोदिति । [स्तवकितः
इतच् इत अस्य जातेरर्थे तद्धितः अन्तोदात्तः । तारकितः ।
इत्नु इत्नु शीलार्थे कर्तरि क्रत् । स्तनयित्नुः गदयित्नुः ।
इथुक् इथ् डटि आगमः अन्तावयवः । यावतिथः तावतिथः ।
इन इन नासिकानत्वर्थे समासान्तः । चिक्किनम् ।
इन् इ कर्तरि क्रत् आद्युदात्तः । स्तम्बकरिः नाथहरिः ।
इनङ् इन् ढकि आगमः अन्तादेशः । कल्याणिनेयः ।
इनच् इन मत्वर्थे तद्धितः अन्तोदात्तः । फलिनः ।
इनि इन् शीलार्थे कर्तरि क्रत् । प्रजवी । मत्वर्थे तद्धितः ।
धनी ज्ञानी । [आदिर्ञ्णिः । सांराविणम् ।
इनुण् इन् अभिव्याप्तौ भावे क्रत् दृङ्प्रादिः । ततः स्वार्थे अण्
इम इम तज्जाते तद्धितः । पाकिमः त्यागिमः । [लघिमा ।
इमनिच् इमन् भावे कर्मण्यि च तद्धितः अन्तोदात्तः । महिमा ।
इयङ् इय् अन्तादेशः । स्त्रियः धियः गिरियतुः ।
इल इल चतुरर्थ्यां तद्धितः । काशिलः गुहिलः मट्टिलः ।
इलच् इल मत्वर्थे तद्धितः अन्तोदात्तः । फेनिलः पिच्छिलः ।
स्वार्थे तद्धितः पूर्वपदलोपश्च । दन्तिलः ।
इष्ठन् इष्ठ स्वार्थप्रकर्षे तद्धितः आद्युदात्तः । लघिष्ठः करिष्ठः ।
इष्णुच् इष्णु शीलार्थे कर्तरि क्रत् समुदायान्तोदात्तः । निरा-
करिष्णुः अलङ्करिष्णुः ।

ई

ईकक् ईक प्रकरणाद्यर्थे स्वार्थे च तद्धितः आदिर्ञ्णिः
अन्तोदात्तः । शाल्मीकः । कौहितीकः स्फाटिकीकः ।
ईकञ् ईक स्वार्थे तद्धितः आदिर्ञ्णिः । आद्युदात्तः ।
हैतोयीकः तार्तीयीकः ।
ईकन् ईक परिमाणार्थे तद्धितः आद्युदात्तः । खारीकम् ।
अर्द्धखारीकम् ।
ईट् ई आगमः आद्यावयवः । अचेतीत् ब्रवीति स्रवीति ।
ईमसच् ईमस मत्वर्थे तद्धितः अन्तोदात्तः । मलीमसः ।
ईयङ् ईय धात्वंशप्रत्ययः गुणवृद्ध्यभावः । क्रतीयते ।
ईयसुन् ईयस् स्वार्थप्रकर्षे तद्धितःआद्युदात्तः । श्रेयान्
स्त्रियां ङीप् ।
ईरच् ईर मत्वर्थे तद्धितः अन्तोदात्तः । आण्डीरः ।
ईरन् ईर मत्वर्थे तद्धितः आद्युदात्तः । काण्डीरः ।

उ

उ उ कर्तरि क्रत् । जिगमिषुः आशंसुः भिक्षुः विन्दुः इच्छुः ।
उकञ् उक कर्तरि क्रत् वृङ्प्रादिः । पाठकः स्यायुकः ।
उण उ संप्रदानापादानभिन्ने कर्त्रादौ क्रत् वृद्ध्यादिः । कारुः ।
उति उत् वर्षे ऋत्वर्थे तद्धितः अव्ययः । परुत् ।
उम् उ आगमः अन्त्यादचः परः । अवोचत् ।
उरच् उर मत्वर्थे तद्धितः अन्तोदात्तः । दन्तुरः ।
उवङ् उव अन्तादेशः । भुवः । लुलुवतुः ।
उसि उस् करणादौ क्रत् । वक्षुः यजुः ।

ऊ

ऊक ऊक शीलार्थे कर्त्तरि क्रत् । जागरूकः दंदश्नूकः ।
ऊङ् ऊ स्त्रीप्रत्ययः ङित् चिक्षार्थः । कुरुः कर्कन्धूः ।
ऊठ् ऊ आदेशः । अव-ऊः ज्वर-जूः दिव-द्यूतम् ।
ऊलच् ऊल समूहाद्यर्थे तद्धितः अन्तोदात्तः । वात्सल्यः बालूलः ।

ए

एण एण भवाद्यर्थे तद्धितः । प्राट्येण्यः ।
एत्य एत्य भवाद्यर्थे तद्धितः । दूरेत्यः ।
एद्यवि एद्यवि अह्नीत्यर्थे तद्धितः अव्ययः । परेद्यवि ।
एद्युसुच् एद्युस् अह्नीत्यर्थे तद्धितः अन्तोदात्तः अव्ययः ।
परेद्युः अन्येद्युः उभयेद्युः । [द्वेधा लेधा ।
एधाच् एधा प्रकारार्थे तद्धितः अन्तोदात्तः अव्ययः ।
एनप् एन प्रथमासप्तम्यर्थे तद्धितः अव्ययः अनुदात्तः ।
दक्षिणेन उत्तरेण ।
एलु एलु असहनार्थे तद्धितः । क्रिमेलुः ।

ऐ

ऐ ऐ ङीपि स्त्रियाम् आदेशः । पूतक्रतायी अग्नायी ।
ऐरक् ऐर अपत्यार्थे तद्धितः आदिर्ञ्णिः अन्तोदात्तः । चाटकैरः

औ

औ औ-स्त्रियां ङीपि आदेशः । मनावी ।

क

क अ कर्तरि कृत् गुणाभावादि । किरः ग्नः प्रस्थः । घञर्थे भावे कृत् । उपघ्नः निघ्नः । चतुरर्थ्यादौ तद्धितः न कित् । अश्मकः शरकः । अज्ञाताद्यर्थे—अश्वकः । कुत्सिते—अश्वकः । स्वार्थे—अधिकः । शीले—तूष्णीकः ।

कक् क चतुरर्थ्यां तद्धितः आदिवृद्धिः अन्तोदात्तः । वाराहकः । [स्त्रियां ङीप् ।

कञ् अ कर्मकर्तरि कृत् गुणाभावादि आद्युदात्तः । अन्याहशः

कटच् कट समूहाद्यर्थे तद्धितः न कित् अन्तोदात्तः । समूहे अविकटम् । स्वार्थे सङ्कटम् विकटम् । [रथकट्या ।

कट्यच् कट्य समूहार्थे तद्धितः न कित् अन्तोदात्तः स्त्रियाम् ।

कथे(न्) अर्थ तुमर्थे कृत् गुणाभावादि निच्चे आद्युदा० अव्ययः । आङ्वर्थे ।

कन् क अज्ञाताद्यर्थे तद्धितः न कित् । मद्रकः देवदत्तकः ।

कप् क समासान्तत्वात् तद्धितत्वेन न कित् अनुदात्तः । व्यूढोरस्कः अनर्थकः । नदीमातृकः ।

कमुल् अम् तुमर्थे कृत् प्रत्ययात् पूर्वसुदात्तः । प्रलुपं नाशकत् प्रलोपितुमित्यर्थः ।

कल्पप् कल्प ईषदसमाप्त्यर्थे तद्धितः न कित् अनुदात्तः । पटुकल्पः । तिङन्तु उत्कर्षे । पचतिकल्पम् ।

कसुन् अस् तुमर्थे कृत् आद्युदात्तः । ईश्वरो विलिखं विलिखितुमित्यर्थः । [म्रियसे ।

कसेन् असे तुमर्थे कृत् आद्युदात्तः अव्ययः । भवानिदं

काण्ड काण्ड समूहार्थे तद्धितः न कित् । दूर्वाकाण्डम् ।

कानच् आन लिङ्वत् न गुण; कृत् सप्तदायान्तोदात्तः । चक्राणः ।

काम् का आगमः अन्त्यादचः परं स्वार्थे तद्धित; अव्ययः । तूष्णीकाम् । [दात्तः । पुत्रकाम्यति ।

काम्यच् काम्य इच्छार्थे धात्वंशप्रत्ययः न कित् सप्तदायान्तो-

कार कार स्वरूपार्थे तद्धितः न कित् । अकारः ककारः ।

कि(न्) इ कर्तरि कृत् लिड्वत् गुणाभावादि । निच्चे आद्युदात्तः । पपिः जग्मिः चक्रिः । कर्तरि कृत् । दधिः ददिः । कर्मण्युपपदेऽधिकरणार्थे कृत् । जलधिः ।

कुक् क् आगमः अन्त्यावयवः । स्वकीयं परकीयम् । वातकी अतीसारकी । [अवकुटारम् ।

कुटारच् कुटार अर्वाचीनार्थे तद्धितः न कित् अन्तोदात्तः ।

कुणच् कुण पाकार्थे तद्धित न कित् अन्तोदात्तः । पीलुकुणः ।

कुरच् उर कर्मकर्तरि कृत् गुणाभावादि सप्तदायान्तोदात्तः । विदुरः भिदुरः । [पशुकामः पचति

क्त्वसुच् क्त्वस् क्रियापौनःपुन्ये तद्धित; न कित् अन्तोदात्तः ।

केन्य क्त्यार्थे कृत् गुणाभावादि आद्युदात्तः अव्ययः । अयमार्थे

केन्य एन्य क्त्यार्थे कृत् गुणाभावादि अव्य० । दिवसेयम्यः ।

केलिमर् एलिम कर्मकर्तरि कृत् गुणाभावः । उपोत्तमो-दात्तः । भिदेलिमः ।

क्त त कर्मभावादौ कृत् गुणाभावादि । भूतं जातं विदितं । अधिपि संज्ञायाञ्च । देवदत्तः विष्णुरातः ।

क्तवतु तवत् कर्तरि कृत् गुणाभावादि स्त्रियां ङीप् । गतवान् ।

क्तिच् ति आशीर्वादे संज्ञायां कृत् गुणाभावः सप्तदायान्तो-दात्तः । रन्तिः, भूतिः ।

क्तिन ति भावे कृत् गुणाभावादि आद्युदात्तः । कृतिः मतिः ।

क्ति ति तज्जातेऽर्थे कृत् गुणाभावादि ततः स्वार्थे अणु अनुदात्तः । उष्णिमः पक्किमः ।

क्त्वा त्वा प्रकृत्यर्थे कृत् गुणाभावादि । कृत्वा भूत्वा ।

क्नु नु शीलार्थे कर्तरि कृत् गुणाभावः । स्नुः स्नुः स्नुः ।

क्मरच् मर शीलार्थे कर्तरि कृत् गुणाभावः सप्तदायान्तो-दात्तः । सूमरः । धयारः ।

क्यच् य, इच्छार्थे धात्वंशप्रत्ययः सप्तदायान्तोदात्तः । पुत्रीयति

क्य(ङ्)ष् य आचाराद्यर्थे धात्वंशप्रत्ययः ङित्त्वे आत्मने-पदम् । भृशायते । णिच्चे उभयपदम् । लोहितायते-ति

क्यप य, भावकर्मादौ कृत् गुणाभावः अनुदात्तः । कृत्यम् स्तुत्यः । भावे स्त्रियाम् । कृत्या ।

क्रु रु शीलाद्यर्थे कृत् गुणाभावः । भीरुः ।

क्रुकन् रुक शीलाद्यर्थे कृत् गुणाभावः आद्युदात्तः । भीरुकः

क्लुकन् लुक शीलाद्यर्थे कृत् गुणाभावादि आद्युदात्तः । भीलुकः

क्वनिप् वन् शीलाद्यर्थे कृत् गुणाभावादि अनुदात्तः । सुदामा सुधीवा ।

क्वरप् वर शीलाद्यर्थे कृत् गुणाभावः अनुदात्तः । कृत्वरः इत्वरः गत्वरः । स्त्रियां ङीप् । [मेधिवान् ।

क्वसु वस् लिङ्वत् कृत् गुणाभावादि स्त्रियां ङीप् । जग्मिवान्

क्विन्(प) व् तस्य लोपः कर्तरि कृत् गुणाभावादि । निच्चे आद्युदात्तः क्त्वस् । ब्रुक् स्रुक् । णिच्चे अनुदात्तः । प्रस्रुः भावाधिकरणादौ स्त्रियाम् । संपद् संसद् ।

केस से तुमर्थे कृत् गुणाभावः । प्र-इण प्रेषे ।

ख

ख ख-ईन भवाद्यर्थे तद्धित; न खित् । कुलीनः ।

खच् अ कर्त्तरि क्त् ससुदायान्नोदात्तः सुम् । प्रियंवदः । स्तनन्धयः ।

खञ् ख-ईन भवार्थे तद्धितः न खित् आदिर्वृद्धिः आद्युदात्तः । माहाकुलीनः गौष्ठीनः स्त्रियां टाप् ।

खण्ड खण्ड समूहार्थे तद्धितः न खित् । इक्षुखण्डः ।

खमुञ् अम् अभूततद्भावे आक्रोशे भावादौ क्त् खित् सुम् आद्युदात्तः वृद्धिः । चौरङ्कारमाक्रोशति । [करम् ।

खल् अ, भावादौ क्त् पूर्वसदात्तः । दुर्भवं सुकरम् ईषत्-

खश् अ कर्त्तरि क्त् खित् सुम् । जनमेजयः नाडिन्धमः ।

खिष्णुच् ष्णु शीलाद्यर्थे क्त् खित् सुम् ससुदायान्नोदात्तः । आढ्यम्भविष्णुः । [प्रियम्भावुकः ।

खुकञ् उक शीलाद्यर्थे क्त् खित् सुम् वृद्धिः आद्युदात्तः ।

ख्युन् यु-अन करणभावयोः क्त् खित् सुम् आद्युदात्तः । भद्रङ्करणम् ।

ग

गोयुगच् गोयुग स्थानार्थे तद्धितः न गित् अन्नोदात्तः । गोगोयुगम् । [गोगोधम् ।

गोष्ठच् गोष्ठ स्थानार्थे तद्धितः न गित् अन्नोदात्तः ।

ग्मिनि ग्मिन् मत्वर्थे तद्धितः न गित् । वाग्मी ।

ग्लुस्नु ग्लु-शीलाद्यर्थे क्त् गित् गुणाभावः । जिष्णुः स्नाग्लुः ।

घ

घं अ भावादौ कर्त्तरि च क्त् । गोचरः उरम्बदः । देवताद्यर्थे तद्धितः न घित् घ-इय । मनेन्द्रियम् यन्त्रियम् । [यम्

घच् घ-इय चिकित्स्यार्थे तद्धितः न घित् अन्नोदात्तः । क्षेत्रि-

घञ् अ-भावादौ क्त् चजोः कुः अन्नोदात्तः वृद्धादिः । पाकः त्यागः ।

घन् घ-इय देवताद्यर्थे तद्धितः न घित् आद्युदात्तः । शुक्रियम् । [भक्तम् । कत्तियम् ।

घस् घ-इय अस्य प्राप्तेऽर्थे तद्धितः भेदे, न घित् सित्त्वात्

घिनुण् इन् शीलाद्यर्थे क्त् वृद्धादि चजोः कुत्वम् । त्यागी रागी योगी भोगी । [दात्तः । भङ्गुरम् ।

घुरच् उर शीलाद्यर्थे क्त् चजोः कुत्वम् । ससुदायान्नो-

ङ

ङीन् ई धारङ्गवादिभ्यः स्त्रीप्रत्ययः । ससुदायान्नोदात्तः । धारङ्गरवी नारी । [स्त्री ।

ङीप् ई स्त्रीप्रत्ययः अनुदात्तः । कर्त्री भेषुषी गतवती ।

ङीष् ई स्त्रीप्रत्ययः षित् स्त्रिकार्थः । कल्याणी धारङ्गी ।[यज्वा ।

ङ्वनिप् वन् भूते कर्तरि क्त् गुणाभावादि अनुदात्तः । सुत्वा

च

चण्प् चण विद्यार्थे तद्धितः वकारप्रश्लेषात् न चित् अनुदात्तः । विद्याचणः ।

चरट् चर भूतपूर्व्वार्थे तद्धितः वकारप्रश्लेषात् न चित् स्त्रियां ङीप् । आढ्यचरः । [निघ्नानः ।

चानश् आन शीलाद्यर्थे क्त् ससुदायान्नोदात्तः । भुञ्जानः ।

चाप् आ यङन्तात् स्त्रीप्रत्ययः चित् अन्नोदात्तः कारीषगन्ध्या । आवश्या । [अभावि ।

चिण् इ-आगमः वृद्धादि ससुदायान्नोदात्तता । अदायि

चुञ्चुप् चुञ्चु विद्यार्थे तद्धितः वकारप्रश्लेषात् न चित् । अनुदात्तः । विद्याचुञ्चुः ।

चृफञ् फ-आयन अपत्यार्थे तद्धितः वृद्धिः चित्त्वात् अन्नोदात्तः । कौञ्जायनः ।

च्वि वि, तस्य लोपः अभूततद्भावे तद्धितः अव्ययः चित् अन्नोदात्तः । श्वेतीभवति । भस्मीकरोति ।

छ

छ छ-ईय भवार्थे तद्धितः न छित् । त्वदीयः ।

छण् छ-ईय अपत्यार्थे तद्धितः न छित् वृद्धिः । पैतृष्वस्रीयः ।

छस् छ-ईय भवार्थे तद्धितः न छित् सित्त्वात् पूर्वस्य पदत्वम् । भवदीयः ।

ज

जातीयर् जातीय प्रकारे तद्धितः वकारप्रश्लेषात् न जित् उपोत्तमोदात्तः । पटुजातीयः ।

जाहच् जाह-मूलार्थे तद्धितः वकारप्रश्लेषात् न जित् अन्नोदात्तः । कर्षजाहम् ।

ञ

ञ अ भवार्थे तद्धितः वृद्धिः आद्युदात्तः । पौर्वशालः ।

ञिठ ठ-इक भवार्थे तद्धितः वृद्धिः आद्युदात्तः । काशिकः ।

ञ्य य-भवार्थे तद्धितः वृद्धिः आद्युदात्तः । कौविदार्य्यं गाम्भीर्यं पाञ्चजन्यः प्रागाद्यः ।

ञ्यङ् य-भवार्थे तद्धितः वृद्धिः आद्युदात्तः । सौवीर्य्यः कौसल्यः । ङित्करणं यङ्स्थेति चाप्विधानार्थम् ।

ट

ट अ-कर्तरि क्त् स्त्रियां ङीप् । कुरुचरः सेनाचरः पुरःसरः ।

टक् अ-कर्तरि क्त् गुणाभावादि स्त्रियां ङीप् । सामगः सुरापः ।

टच् अ समासान्तः स्त्रियां ङीप् । अन्नोदात्तः । बह्वराजः ।

टाप् आ स्त्रीप्रत्ययः अनुदात्तः । अजा जिगमिषा । [भिक्षः ।

ट्विन् ठ-इक, दानसंप्रदानार्थे तद्धितः आद्युदात्तः । औद-

टीटच् टीट-नासिकानतार्थे तद्धितः व्रश्चेषात् न टित् अन्तोदात्तः । अवटीटम् । [वार्कीयः ।

टेण्यन् एण्य स्वार्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् ।

ण्य ण य-देवतार्थे तद्धितः आदिवृद्धिः स्त्रियां ङीए । सौम्यम् ।

ण्यु(ल्) यु-अन भवार्थे तद्धितः तुडागमः स्त्रियां ङीप् लित्त्वे पूर्वोदात्तः । सायन्तनः चिरन्तनः ।

ठ

ठ ठ-इक स्वार्थे तद्धितः न ठित् । देवदत्त एव देविकः दत्तिकः ।

ठक् ठ-इक अपत्याद्यर्थे तद्धितः आदिवृद्धिः अन्तोदात्तः स्त्रियां ङीप् । रैवतिकः रौचनिकः ।

ठच् ठ-इक चतुरर्थ्यां तद्धितः अन्तोदात्तः । कुसुदिकः ।

ठञ् ठ-इक इस्, उस्, ड, ट, इत्यस्मात् परः क, भवाद्यर्थे तद्धितः स्त्रियां ङीप् आद्युदात्तः । दैनिकः नैशिकः धैनुकम् पैटकम् ।

ठन् ठ-इक मत्वर्थादौ तद्धितः आद्युदात्तः । धनिकः गतिकः ।

ड

ड अ कर्तरि कृत् अभत्वेऽपि टिलोपः । अन्तगः दूरगः ।

डच् अ समासान्तः तद्धितः अन्तोदात्तः । द्वित्राः पञ्चधाः ।

डट् अ पूरणाद्यर्थे तद्धितः स्त्रियां ङीप् । एकादशः द्वादशः ।

डण् अ परिभाषार्थे तद्धितः वृद्धिः । लैंगं चात्वारिंशम् ।

डतमच् अतम बहूनां मध्ये एकोत्कर्षे तद्धितः आद्युदात्तः । कतमः । [कतरः ।

डतर अतर द्वयोर्मध्ये एकोत्कर्षे तद्धितः अन्तोदात्तः ।

डति अति पूरणार्थे तद्धितः बहुवचनान्तः । कति यति तति ।

डर अर शीलार्थे कर्तरि कृत् । आखरः ।

डवतुप् अवत् कर्तर्थे कृत् अनुदात्तः स्त्रियां ङीप् । भवान् ।

डाच् आ अभूततद्भावादौ तद्धितः अन्तोदात्तः अव्ययः । पटपटाकरोति वीजाकरोति ।

डाप् आ स्त्रीप्रत्ययः अनुदात्तः । सीमा सीमे सीमाः ।

डामच् आमह-पितर्यर्थे तद्धितः अन्तोदात्तः । पितामहः मातामहः ।

डिनि इन् स्तोमेऽर्थे तद्धितः । पञ्चदशी (पक्षः) त्रिंशी (मासः)

डिमच् इम भवार्थे तद्धितः अन्तोदात्तः । आदिमः ।

डु उ कर्तरि कृत् । विभुः प्रभुः ।

डुपच् उप क्षुद्रार्थे तद्धितः अन्तोदात्तः । कुतपः ।

डुमसुन् उमस् कर्तरि कृत् आद्युदात्तः अभत्वेऽपि टिलोपः । पुनातीति पुमान् पुंसः ।

डुलच् उल भ्रातर्थे तद्धितः अन्तोदात्तः । मातुलः ।

डुमतुप मत् चतुरर्थ्यां तद्धितः स्त्रियां ङीप् अनुदात्तः । कक्षुद्मान्

ड्य(त्) य दृष्टसामार्थे तद्धितः तित्त्वे स्वरितः । वामदेव्यम् ।

ड्यण् य साध्वाद्यर्थे वेदे तद्धितः आदिवृद्धिः । पाथ्यः नाद्यः ।

ड्वलच् वल मत्वर्थे तद्धितः अन्तोदात्तः । नड्वलः ।

ड्वुन् वु-अक-आर्हीयस्तद्धित आद्युदात्तः । विंशकः त्रिंशकः ।

ढ

ढ ढ-एय साध्वर्थे तद्धितः न टित् । समेयः । त्रिणेयः ।

ढक् ढ-एय अपत्याद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः स्त्रियां ङीप् । भाङ्गेयः गाङ्गेयः कादवेयः । नादेयः ।

ढकञ् ढ-एयक अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् । बाह्वलेयकः । [ङीप् । माठेयः ।

ढञ् ढ-एय अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् ।

ढिनुक् ढिन्-एयिन् मोक्षाख्येतरि बन्धने तद्धितः वृद्धिः अन्तोदात्तः । आगलेयिनः । [नादेयः ।

ढ्रक् ढ्र-एर-अपत्यार्थे तद्धितः वृद्धिः अन्तोदात्तः । गौधेरः

ण

ण अ कर्तरि कृत् वृद्ध्यादि । व्याजः याज्ञः दायः ।

ण्च अ भावे कृत् वृद्ध्यादि स्त्रीलिंग तदन्तात् स्वार्थे अञ् आद्युदात्तः ङीप् । व्याकोशी व्यातिङ्गी ।

ण्मुल् अम भावे कृत् वृद्ध्यादि अव्ययः । कारंकारम् । अभ्यसानामाद्युदात्तः । विकीर्षिविकीर्षम् । [पर्युसंघः)

ण्यङ् अ समूहार्थे तद्धितः वृद्धिः स्त्रित्वात् न भत्वम् । पार्श्वम्

ण्यिङ् इ पुच्छादितः धात्वंगप्रत्ययः आत्मनेपदम् । उत्पुच्छयते संचीवरयते । [कारयति भारयति ।

ण्यिच् इ प्रेरणे धात्वंगप्रत्ययः वृद्ध्यादि समुदायान्तोदात्तः ।

ण्यिनि इन् कर्तरि कृत् वृद्ध्यादि । याची स्यायी पायी ।

ण्य य अपत्याद्यर्थे तद्धितः वृद्धिः । दैत्यः सांकाश्यः ।

ण्यत् य कर्मभावयोः कृत् वृद्ध्यादि स्वरितः । कार्यम् हास्यम् वाच्यम् । क्वचित् कुलम् । वाक्यं भोग्यम् ।

ण्युट् यु-अन कर्तरि कृत् वृद्ध्यादि स्त्रियां ङीप् । गायनः ।

ण्वि वि-तस्य लोपः कर्तरि कृत् वृद्ध्यादि । सुखभाक् ।

ण्विन् वि-तस्य लोपः कर्तरि कृत् आद्युदात्तः वृद्ध्यादि । श्वेतवाही उक्थशासौ अध्वर्यौ ।

ण्वुच् वु अक पर्यायाद्यर्थे भावे कृत् वृद्ध्यादि समुदायान्तोदात्तः स्त्रियाम् । भवत आसिका ।

ण्वुल् वु अक रोगाख्यायां भावे कृत् वृद्ध्यादि अभ्यसानामाद्युदात्तः स्त्रियाम् । प्रवाहिका विचर्चिका ।

त

त त मत्वर्थे तद्धितः । भन्तः कन्तः ।

तप् त मत्वर्थे तद्धितः अनुदात्तः । पर्व्वतः मरुत्तः ।
तमट् तम-डटि आगमः आद्यवयवः । एकविंशतितमः । षष्टितमः । [विद्वत्तमः । पटुतमः ।
तमप् तम बह्वनां मध्ये एकोत्कर्षे तद्धितः अनुदात्तः ।
तरप् तर द्वयोर्मध्ये एकोत्कर्षे तद्धितः अनुदात्तः । पटुतरः मृदुतरः । विद्वत्तरः । [जनता ।
तल् त-भावसमूहाद्यर्थे तद्धितः पूर्व्वस्योदात्तता । शुक्लता देवता
तवेङ् तवे तुमर्थे कृत् अव्ययः गुणाभावादि । स्रुतवे ।
तवेन् तवे तुमर्थे कृत् अव्ययः आद्युदात्तः । कर्त्तवे । [तवै ।
तवै(न्) तवै तुमर्थे कृत् अव्ययः निच्चे आद्युदात्तः । स्रुच्छि-
तव्यत् तव्य-भावकर्म्मणोः कृत् स्वरितः । भवितव्यं चेतव्यः ।
तसि तस् पञ्चम्याद्यर्थे तद्धितः अव्ययः । क्षणतः प्रति । एकदिग्वर्थे च । मौलमूलतः । [सर्व्वतः ततोभवान् ।
तसिल् तस् पञ्चम्याद्यर्थे तद्धितः अव्ययः पूर्व्वस्योदात्तता । कुतः
तातिल् तति स्वार्थे प्रशंसार्थे च तद्धितः पूर्व्वोदात्तता । सर्व्वतातिः । वृकतातिः । [स्त्रीप्रत्ययश्च । युवतिः ।
ति ति मूलार्थे मत्वर्थे च तद्धितः । पङ्क्तिः । कन्तिः शन्तिः
तिकन् तिक प्रशंसार्थे तद्धितः आद्युदात्तः । स्रक्तिका ।
तिथुक् तिथ् डटिआगमः अन्त्यावयवः । बहुतिथुः ।
तीय तीय पूरणार्थे तद्धितः । द्वितीयः तृतीयः ।
तु तु मत्वर्थे तद्धितः । शन्तुः कन्तुः ।
तुक् तृ क्ति पिति आगमः अन्त्यावयवः । संयत् कृत्यम् ।
तुट् तृ आगमः (शुटुतोः) आद्यवयवः । सायन्तनः ।
तुमुन् तुम् भावे क्रियार्थक्रियादौ कृत् आद्युदात्तः । भोक्तुं याति भोक्तुमिच्छति । [भोक्ता स्त्रियां ङीप् ।
तृच् तृ-कर्त्तरि कृत् सप्तदायान्तोदात्तः । कटस्य कर्त्ता अन्नस्य
तृन् तृ शीलाद्यर्थे कृत् आद्युदात्तः । कटम् कर्त्ता ।
तैलच् तैल स्नेहार्थे तद्धितः अन्तोदात्तः । तिलतैलम् ।
तोसुन् तोस् तुमर्थे कृत् अव्ययः आद्युदात्तः । ईश्वरो विचरितोः विचरितुमीश्वर इत्यर्थः ।
त्न त्न भवार्थे तद्धितः । चिरत्नः पुरत्नः ।
त्नप् त्न स्वार्थे तद्धितः अनुदात्तः । नूत्नं प्रत्नम् ।
त्यक् त्य-भवाद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः । दाक्षिणात्यः पाश्चात्यः । [अधित्यका
त्यकन् त्यक आसन्नाद्यर्थे तद्धितः आद्युदात्तः । उपत्यका
त्यप् त्य-भवाद्यर्थे तद्धितः अनुदात्तः । तत्यः इदृत्यः ।
त्र त्र समूहार्थे तद्धितः स्त्रियाम् । गोत्रा । [तत्रभवान् ।
त्रल् त्र सप्तम्याद्यर्थे तद्धितः अव्ययः पूर्व्वोदात्तता । यत्र तत्र ।
त्रा त्रा देयाद्यर्थे तद्धितः अव्ययः । देवाय देयं करोति देवत्राकरोति ।
त्व त्व-भावकर्म्मार्थे तद्धितः । देवत्वं ब्राह्मणत्वं शुभ्रत्वम् ।
त्वन् त्व कृत्यर्थे कृत् आद्युदात्तः । कर्त्तव्यम् ।

थ

थकन् थक-कर्त्तरि कृत् आद्युदात्तः । गाथकः ।
थट् थ पूरणार्थे तद्धितः स्त्रियां ङीप् । पञ्चथः दशथः ।
थमु थम् प्रकारेऽर्थे तद्धितः अव्ययः । कथम् इत्थम् ।
था था प्रकारेऽर्थे तद्धितः अव्ययः । यथा तथा सर्व्वथा ।
थाल् था इत्यर्थे वेदे तद्धितः अव्ययः पूर्व्वसुदात्तः । प्रत्यथा पूर्व्वथा ।
थुक् थ् आगमः डटः अन्त्यावयवः । षष्ठः चतुर्थः कतिथः ।
थ्यन् थ्य हितार्थे तद्धितः आद्युदात्तः । अजथ्या यूथिः अविथ्या

द

दघ्नच् दघ्न उन्माने तद्धितः अन्तोदात्तः स्त्रियां ङीप् । ऊरुदघ्नः गजदघ्नः ।
दा दा कालेऽर्थे तद्धितः अव्ययः । सर्व्वदा तदा यदा ।
दानीम् दानीम् कालेऽर्थे तद्धितः अव्ययः । तदानीम् इदानीम् ।
दुक् दृ आगमः अन्त्यावयवः । अन्यदाशीः अन्यदीयः ।
दूस दूस दुग्धार्थे तद्धितः । अविदूसम् (अविदुग्धम्) ।
देशीयर् देशीय देशदेशसमाप्तेऽर्थे तद्धितः उपोत्तमोदात्तता । पटुदेशीयः ।
देश्य देश्य देशदेशसमाप्तेऽर्थे तद्धितः । पटुदेश्यः ।
द्य द्य दिनेऽर्थे तद्धितः अव्ययः । अस्मिन् दिने अद्य ।
द्यस् द्यस् दिनेऽर्थे तद्धितः अव्ययः । समानेऽह्नि सद्यः ।
द्युस् द्युस् दिनेऽर्थे तद्धितः अव्ययः । उभये दिने उभयद्युः ।
द्वयसच् द्वयस उन्माने तद्धितः अन्तोदात्तः स्त्रियां ङीप् । ऊरुद्वयसम् गजद्वयसम् ।

ध

धमुञ् धम् प्रकारेऽर्थे तद्धितः अव्ययः वृद्धिः आद्युदात्तः । द्वैधम् त्रैधम् । स्वार्थेऽपि द्वैधः ।
धा धा क्रियाप्रकारेऽर्थे तद्धितः अव्ययः । चतुर्द्धा पञ्चधा [पचति ।
धुना धुना कालेऽर्थे तद्धितः अव्ययः । अस्मिन् काले अधुना ।
धेय धेय स्वरूपार्थे तद्धितः । नामधेयं भागधेयम् ।
ध्यमुञ् ध्यम् प्रकारे तद्धितः वृद्धिः आद्युदात्तता अव्ययः । ऐकध्यम् ।

न

न न मत्वर्थे तद्धितः । यामन: अङ्गना ज्योत्स्ना । पुरा-णेऽर्थे च । प्रथम् ।

नङ् न भावे क्रत् गुणाभावादि । यज्ञः प्रज्ञः यत्नः ।

नजिङ् नज् शीलाद्यर्थे क्रत् गुणाभावादि । खञ्क् ष्ठ्यञ्क् ।

नन् न भावे क्रत् आद्युदात्तः । खञ्नः ।

ना ना असहायार्थे पृथग्भावे स्वार्थे तद्धितः अव्ययः । विना ।

नाञ् ना असहायार्थे पृथग्भावे तद्धितः वृद्धिः अव्ययः आद्यु-दात्तः । नाना ।

नाटच् नाट वासिकनतार्थे तद्धितः अन्तोदात्तः । अवनाटम् ।

नि नि भावे क्रत् स्त्रियाम् । ग्लानिः क्षानिः ।

निङ् नि समासान्तः अन्तादेशः । युवजानिः ।

नीग् नी आगमः अन्त्यावयवः । वनीवच्चीति ।

नुक् नू आगमः अन्त्यावयवः । धूनयति धीनयति ।

प

पटच् पट-विस्तारे तद्धितः अन्तोदात्तः । अविपटः ।

पाशप् पाश कुत्सितार्थेत० अनुदात्तः । मिश्रकपाशः ।[तिलपिञ्जः]

पिञ्ज पिञ्ज निष्फलेऽर्थे तद्धितः । तिलपिञ्जः । वेदे तु ङित् ।

पिटच् पिट-नासिकानतार्थे तद्धितः अन्तोदात्तः । चिपिटम् ।

पुक् प् आगमः अन्त्यावयवः । स्थापयति यापयति ।

पेज पेज निष्फलेऽर्थे तद्धितः । तिलपेजः ।

फ

फक् फ-आयन अपत्याद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः । नाडायनः । [स्त्रियां ङीप् । वात्स्यायनः आश्वलायनः ।

फञ् फ-आयन गोत्रार्थे युनि तद्धितः वृद्धिः आद्युदात्तः

फिञ् फि-आयनि अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः । शैकायनिः । [कायनिः ।

फिन् फि-आयनि अपत्यार्थे तद्धितः आद्युदात्तः । स्फुञ्-

ब

ब(व) ब(व) मत्वर्थे तद्धितः । शंबः शम्बः इत्यव इति कौसुदी-सम्मतम् । [ब(व)ह्वुङ्वः ।

ब(व) ङच् ब(व)ह्वु ईषदसमाप्तेऽर्थे तद्धितः अन्तोदात्तः ।

भ

भ भ मत्वर्थे तद्धितः । शम्भः कम्भः ।

भक्तल् भक्त चतुरर्थाम् तद्धितः पूर्वपदात्तः । ऐषुकारिभक्तम् ।

भटच् भट-नासिकानतार्थे तद्धितः अन्तोदात्तः । अवभटम् ।

म

म म-भवार्थे मत्वर्थे च तद्धितः । आदिमः मध्यमः । दुमः ।

मट् म डट् आगमः आद्यावयवः । पञ्चमः दशमः ।

मण् म भवार्थे तद्धितः वृद्धिः स्त्रियां ङीप् । माध्यमः ।

मतुप् मत् अस्त्यर्थे तद्धितः स्त्रियां ङीप् अनुदात्तः । अग्नि-मान् श्रीमान् । अकारादितस्तु मस्य वः । धनवान् लक्ष्मी-वान् यशस्वान् विद्वान् ।

मनिन् मन्-शीलाद्यर्थे कर्तरि क्रत् आद्युदात्तः । क्षुत्तमा ।

मप् म जातार्थे क्त्रिप्रत्ययान्तात्स्त्रियां मप् तद्धितः अनुदात्तः । पक्ष्मिमम् ।

मयट् मय तद्रूपविकारे प्राचुर्यार्थे च तद्धितः स्त्रियां ङीप् । वाङ्मयः यवमयी यवागूः । अन्नमयो यज्ञः । (अन्नविकारः)

मरीसच् मरीस-दुःखेऽर्थे तद्धितः अन्तोदात्तः । अतिमरीसम्

मात्रच् मात्र प्रमाणसामान्ये तद्धितः स्त्रियां ङीप् अन्तोदात्तः । प्रस्थमात्रः गजमात्रम् । कात्स्न्र्ये च तावन्मात्रम् ।

मिनि मिन् मत्वर्थे तद्धितः । मीमी ।

मीय मीय भवार्थे तद्धितः । मध्यमीयः ।

मुक् मु आगमः अन्त्यावयवः । यममानः । [स्त्रियः ।

मुम् मु आगमः क्षिति अन्त्यावयवः । क्षितिभ्वः । काम-

य

य य भावाद्यर्थे क्रत् वेदे । भिक्ष्यं: दैवकृतः । लोके तु यत् । समूहार्थे तद्धितः स्त्रियाम् । माया ताता मया । साध्वाद्यर्थे च ङित् । सभ्यः ।

यक् य-धात्वंशप्रत्ययः । कण्डूयते । विकरणः । क्रियते नूयते । भावकर्माद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः । यौव-ह्नित्यम् सैनापत्यम् ।

यङ् य पौनःपुन्याद्यर्थे धात्वंशप्रत्ययः । ङित् धात्वंशपदं गुणाभावादि । बोभूयते बोभूयते । [वातूयः ।

यञ् य-अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः । गार्ग्यः

यत् य भावाद्यर्थे क्रत् स्वरितः । भव्यं भव्यः, गेयं गेयः, चेयं चेयः ।

यल् य-मत्वर्थे तद्धितः पूर्वोदात्तः । वेणोभाव्यः यवोभाव्यः ।

यस् य मत्वर्थे तद्धितः सित्त्वात् पूर्वस्य पदस्य अनुस्वारादि शंयुः शय्युः संयुः सय्युः । उर्वायुः ।

र

र र मत्वर्थादौ तद्धितः । शुक्लरः मधुरः । स्वार्थे कुक्षीरः । र प्रकृतिविकृतता ।

शीलाद्यर्थे क्तृप्रत्ययः । हिंस्रः कत्रः नम्रः ।

रण् र शरणेऽर्थे तद्धितः इञ्प्रः । अग्नीध्र-आग्नीध्रम् ।

रदानुक् रदानु कर्तरि क्तृ । क्तृ-जीव-जीरदानुः ।

रिक् रि आगमः अन्तावयवः । कृ-चरिकरीति ।

रिङ् रि अन्तादेशः । कृ-क्रियते क्रिया ।

रिल् रि प्रथमाद्यर्थे तद्धितः अव्ययः पूर्व्वोदात्तः । उपरि ।

रिष्टातिल् रिष्टात् प्रथमाद्यर्थे तद्धितः पूर्व्वोदात्तः । उपरिष्टात् ।

रीक् री आगमः अन्तावयवः । कृ-चरीकरीति ।

रीङ् री अन्तादेशः । भात्रीकरोति धात्रीकरोति । [धारुः ।

रु र् आदेशः । हरिः अहः । रु शीलाद्यर्थे क्तृप्रत्ययः । दारुः ।

रुक् र् आगमः अन्तावयवः । कृ-चर्करीति ।

रुट् र् आगमः आद्यवयवः । श्री—श्रेरते, सम्+विद्—संविद्रते ।

रूपप् रूप-प्राशस्त्ये तद्धितः अनुदात्तः । पटुरूपः पचतिरूपम् ।

रूप्य रूप भूतपूर्व्वसम्बन्धाद्यर्थे तद्धितः । क्षणरूप्या गौः ।
भवार्थे-समरूप्यः ।

र्हिल् र्हि सप्तम्यर्थे तद्धितः अव्ययः पूर्व्वोदात्तः । कर्हि तर्हि ।

ल

ल ल चक्षुःक्लेदार्थे तद्धितः न लित् । चिल्लः चुल्लः पिल्लः ।

लच् ल मत्वर्थे तद्धितः अन्तोदात्तः । चूडालः मांसलः अंसलः ।

ल्यप् य आनन्तर्य्यार्थे क्तृ अव्ययः पूर्व्वोदात्तः । प्रभूय प्रकृत्य ।

ल्यु यु-अन कर्तरि क्तृ पूर्व्वोदात्तः । नन्दनः विचक्षणः ।

ल्युट् यु-अन भावादौ क्तृ पूर्व्वोदात्तः । भवनम् । स्त्रियां
ङीप् । प्रमाणी ।

व

व व मत्वर्थे तद्धितः । केशवः गार्ग्यिव(वत्सो)वः अजगवः । शंवः
शवँः कौण्डीमते वत्सादिरयम् न वत्सादिः ।

वति वत् क्रियादिदृक्षार्थे तद्धितः अव्ययः । देवदत्तवत्
पचति । रामवत् कृष्णस्य चरितम् वृक्षवत् वने वसति ।

वतुप् वत् परिमाणार्थे तद्धितः अनुदात्तः ङित्कार्य्यम् ।
यावान् तावान् । किमः इदमश्च परस्य यश्च यत्तस्य इयः ।
कियान् इयान् । [यश्च रश्च । धीवरी ।

वनिप् वन् भूते कर्तरि क्तृ अनुदात्तः । यज्वा । स्त्रियां ङीप्

वय वय भागार्थे तद्धितः । द्व्यवयम् ।

वरच् वर शीलाद्यर्थे क्तृ समुदायान्तोदात्तः । स्थावरः ईश्वरः ।

वलच् वल चतुरर्थ्यां मत्वर्थे च तद्धितः अन्तोदात्तः । शिखावलः ।
रजस्वला । [उपयट् उक्षपाः विश्वपाः ।

विच् वि तस्य लोपः कर्तरि क्तृ समुदायान्तोदात्तः ।

विट् वि तस्य लोपः कर्तरि क्तृ । अध्वगाः उदधिक्रीः ।

विडच् विड संहतार्थे तद्धितः अन्तोदात्तः । निविडम् ।

विधल् विध-विषयार्थे तद्धितः पूर्व्वोदात्तः । भौरिकिविधः ।

विनि विन् मत्वर्थे तद्धितः स्त्रियां ङीप् । तेजस्वी यशस्वी ।

विरीसच् विरीस संहतार्थे तद्धितः अन्तोदात्तः । निविरीसः ।

वुक् वु अक भवाद्यर्थे तद्धितः । कन्थिकम् । व् आगमः
अन्तावयवः । भू—अभूवन् बभूव ।

वुच् वु-अक स्वार्थे तद्धितः अन्तोदात्तः । उपकः (उपेन्द्रदत्तकः)

वुञ् वु अक शीलाद्यर्थे क्तृ इञ्चादि । निन्दकः ।
हिंसकः । समूहार्थे तद्धितः । औष्ट्रकम् औरभ्रकम्
राजन्यकम् राजकम् ।

वुन् वु-अक साधुकार्य्यर्थे क्तृ आद्युदात्तः । प्रवकः सरकः
लवकः । वेदनादिकर्त्रर्थे तद्धितः । पदकः क्रमकः ।

व्यत् व्य-अपत्यार्थे तद्धितः स्वरितः । भ्रातव्यः (भ्रातृपुत्रः) ।

व्यन् व्य सपत्नार्थे तद्धितः आद्युदात्तः । भ्रातव्यः (रिपुः)
भ्रातृव्यर्थे तद्धितः । पितव्यः (पितृभ्राता ।

श

श अ भावे क्तृ स्त्रियाम् । कृ-क्रिया । कर्तरि क्तृ अ ।
विद्—विन्दः । मत्वर्थे तद्धितः न शित् । रोमशः लोमशः ।

शङ्कटच् शङ्कट स्वार्थे तद्धितः अन्तोदात्तः । विशङ्कटः ।

शतृ अत् न गुणादि ङित्कार्य्यम् । पचन्तम् विदन् विदती ।

शध्यै(न्) अध्यै तुमर्थे क्तृ नित्त्वे आद्युदात्तः । मदयध्यै पिबध्यै

शस् शस् दोषाबोधके कारके तद्धितः अव्ययः । बहुशो ददाति ।

शाकट शाकट चेलेऽर्थे तद्धितः न शित् । इक्षुशाकटम् ।

शाकिन शाकिन चेलेऽर्थे तद्धितः न शित् । इक्षुशाकिनम् ।

शानच् आन कर्तृकर्म्मादौ क्तृ समुदायान्तोदात्तः । पचमानः
क्रीयमाणः भूयमानम् । [यजमानः ।

शानन् आन शीलाद्यर्थे कर्तरि क्तृ आद्युदात्तः । पवमानः

शालच् शाल वैपुल्ये तद्धितः अन्तोदात्त । विशालः ।

शतिप् ति धातुस्वरूपार्थे क्तृ अनुदात्तः । भवतिः बिभर्त्तिः ।

ष

ष अ समासान्तः स्त्रियां ङीष् । द्विमूर्द्धः तिमूर्द्धः । [दीर्घसक्थः ।

षच् अ समासान्तः स्त्रियां ङीष् अन्तोदात्तः । पञ्चास्याः

षड्गवच् षड्गव पशुघट्टकार्थे तद्धितः अन्तोदात्तः ।
गोषड्गवम् महिषषड्गवम् । [वराकः जल्पाकः ।

षाकन् आक-शीलाद्यर्थे कर्तरि क्तृ स्त्रियां ङीष् आद्युदात्तः ।

षिकन् इक अध्येतृत्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष् ।
शतपथिकः सप्तपथिकः । [मनु-मानुषम् ।

षुक् ष् आगमः अन्तावयवः । जतु-जातुषम् तप्-तापुषम्

षेण्यन् एण्य आधानार्थे तद्धितः इद्धिः आद्युदात्तः। सामिधेन्यः। स्त्रियां ङीष् सामिधेनी ऋक्। [पथिकः।

ष्कन् क गच्छतीत्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष्।

ष्टरच् तर अल्पार्थे तद्धितः अन्तोदात्तः। उच्चतरः। स्त्रियां ङीष्, वत्सतरी।

ष्ट्रन् त्र करणाद्यर्थे कृत् आद्युदात्तः। योत्रम्। स्त्रियां क्वचित् ङीष्। नप्त्री। क्वचिन्न। दंष्ट्रा। [ङीष्। कुसीदिकः।

ष्ठच् ठ-इक गर्हेंऽ प्रयच्छतीत्यर्थे तद्धितः अन्तोदात्तः स्त्रियां

ष्ठन् ठ-इक गर्हेंऽ प्रयच्छतीत्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष्। कुसीदिकः। चरतीत्यर्थे च। पर्षिकः। [आकर्षिकः।

ष्ठल् ठ-इक चरतीत्याद्यर्थे तद्धितः पूर्वसुदात्तम् स्त्रियां ङीष्।

ष्फ फ-आयन यञन्तात् तद्धितः स्त्रियां ङीष्। कात्यायनी कौरव्यायणी। [दात्तः। कापिशायनः।

ष्फाक् फ-आयन भवाद्यर्थे तद्धितः इद्धिः स्त्रियां ङीष् अन्तो-

ष्यङ् ब-गोत्रार्थे तद्धितः णित्त्वेऽपि यङन्वाप्। क्रौड्या वावराह्या।

ष्यञ् य भावकर्मादौ तद्धितः इद्धिः आद्युदात्तः। चातुर्य्यम्। स्त्रियां ङीष्। चातुरी।

ष्ल्रञ् ल विकाराद्यर्थे तद्धितः इद्धिः स्त्रियां ङीष्। श्यामीलम्।

ष्वुन् वु-अक कर्तरि कृत् आद्युदात्तः स्त्रियां ङीष्। नर्त्तकः रजकः।

स

स स चतुरर्थ्यां तद्धितः। दक्षसः पर्णसः। प्राशस्त्ये तद्धितः। श्रेष्ठा।

सण् अ समूहार्थे तद्धितः इद्धिः सित्त्वात् न भत्वम्। पार्श्वम् (परशुसंघः)। सण इत्यस्य सकारस्य दकारप्रसक्तेः वार्त्तिककृता तत्परिवर्त्तनेन णस् इति पठितम्।

सन् स इच्छार्थे धात्वंशप्रत्ययः। कृ-चिकीर्षति, गम्-जिगमिषति।

समसण् समस् वत्सरार्थे तद्धितः इद्धिः अव्ययः। ऐषमः।

सात् सात् कात्स्न्यैन सम्पन्नाद्यर्थे तद्धितः अव्ययः। अग्निसात्-करोति।

सुक् स् आगमः अन्तावयवः। दधिस्यति। [लिःपचति।

सुच स् क्रियावृत्तिगणने तद्धितः अव्ययः अन्तोदात्तः। द्विरसि

से(न्) से तुमर्थे कृत् नित्त्वे आद्युदात्तः। वक्षे वक्तुमित्यर्थः।

सोढ सोढ दुग्धार्थे तद्धितः। अविसोढम् (अविदुग्धम्)।

स्कन्भच् स्कम्भ समूहार्थे तद्धितः अन्तोदात्तः। गजस्कन्धः।

स्न स्न प्राशस्त्ये तद्धितः। श्रेष्ठा।

स्नञ् स्न अपत्याद्यर्थे तद्धितः इद्धिः आद्युदात्तः। पौंस्नः।

ह

ह ह सम्पन्नार्थे तद्धितः अव्ययः। अग्निहम् दत्त, कर्मणि [illegible]

विभक्तिस्वरूपादिकं तु प्रसिद्धत्वान्न प्रदर्शितम्।
इति पाणिनीयप्रत्ययादिपरिनिष्ठित-
रूपादिविवरणम्।

अथाकारादिक्रमेण उणादिप्रत्ययपरिनिष्ठित-रूपादिविवरणम्।

अ

अ अ। रिफ-रेफः (कृत्सितः)।

अङ्कुच् अकुङ् समुदायान्तोदात्तः। वच-वयकुनः। (शिः पार्श्वो वः)

अङ्गच् अङ्ग समुदायान्तोदात्तः। पत-पतङ्गः। कृ-तरङ्गः। विडादिभ्यः तस्य किच्चं तेन न गुणः। विङ्गः। मृदङ्गः। कृ-उच्चे कुरङ्गः। भृञ्वृजभ्यां गित्त्वम्। भारङ्गः। वारङ्गः।

अच् अ समुदायान्तोदात्तः। उदृ+भृ-उदरम्।

अच अच। कु-कवचम्। [संप्रसारणं च। पृषोदरः।

अजि अज्। पारि+अजि-पारक् (सुवर्णम्)। प्रथः किच्चं

अटच् अट समुदायान्तोदात्तः। भट-भरटः।

अटन् अट आद्युदात्तः। शक-शकटः, कंकि-कङ्कटः।

अटि अट्। कृ-सरट्।

अठ अठ। क्रम-क्रमठः। जृ-जरठः। रम-वृद्धिः। रामठम्।

अण्डच् अण्ड समुदायान्तोदात्तः। क-कारण्डः। भृ भरण्डः।

अतच् अत समुदायान्तोदात्तः। भृ-भरतः, कृ-करत इत्यादि।

अति अत् शतृवत् उगित्कार्य्यम्। पृष्-पृषन्ति। मह महान् महती वृह-बृहन् बृहती।

अति अति। क्रम-क्रमतिः रम-रमतिः।

अतन् अत आद्युदात्तः। क्रम-क्रमतम्, यज-यजता।

अत्रिन् अत्रि नित् आद्युदात्तः। पत-पत्रिः।

अथ अथ। थो-ग्रथ्नः थप-ग्रथ्नः रप-रप्रथ इत्यादि।

अदि अद्। गृ-गरद् इ-इरद् भस-भसद्। त्यजाहेः तस्य क्षित्त्वम्। त्यज-त्यद् तन-तद् यज-यद् सर्व्वनाम।

अन् अ नित् आद्युदात्तः। क्लिश-क्लेशनः क्लेशः। [यक्ष्णिः

अनि अनि स्त्रियाम्। कृ-अरणिः स्मृ-सरणिः भृ-धरणिः यक्ष-

अनुङ् अन् गुणाभावादि। नद-नदनुः क्षिप-क्षिप्नुः। [गम्यम्।

अन्य अन्य। राज-राजन्यः (वह्निः)। कृ-कृत्यम् रम-रम-

अन्युच् अन्यु सप्तदायान्तोदात्तः । सृ-सरंगणुः (मिघः वातश्च) ।
अप अप । सृ-सृक् च सर्पः ।
अभच् अभ सप्तदायान्तोदात्तः । कृ-करभः भृ-शरभ इत्यादि ।
अम अम । कल-कलमः कर्ह-कर्हमः अव-अवमः अध-अधमः ।
अमच् अम सप्तदायान्तोदात्तः । प्रथ-प्रथमः चर-चरमः ।
अम्बच् अम्ब सप्तदायान्तोदात्तः । क्व-करम्बः कद-कदम्बः ।
अयु(यू) अवु(यू) । सृ-सरयुः सरसूर्वा ।
अर(च) अर । कृ-अररम् कृच्छ्र-कृच्छ्रा जर्ज-जर्जरः । चित्वे सर्वान्तोदात्तः । अव-अवरः । [तुट्च अन्तः ।
अरन् अर आद्युदात्तः । प्र+आ+अत-प्रातः । अमः
अरु अरु । कृ-अरुः ।
अल् अ पूर्वोदात्तः । उद्+कृ-उदरम् ।
अलच् अल सप्तदायान्तोदात्तः । मगि-मङ्गलम् ।
अलिच् अलि सप्तदायान्तोदात्तः । अञ्ज-अञ्जलिः ।
अवक अवक । स्था-तादेशः किच्च च स्तवकः ।
अस अस । अर्पि-अर्पसः (अपमांसम्) ।
असच् अस सप्तदायान्तोदात्तः । अत-अतसः चम-चमसः ।
असानच् असान सप्तदायान्तोदात्तः । शृ-शरसानः जृ-जरसानः
असि अस् । सु+तप-सुतपाः, जात+विद-जातवेदाः ।
असि असि । सन-सानसिः नि० वृद्धिः । वृ-नुक् वर्णसिः ।
असुन् अस् आद्युदात्तः । चित-चेतः सृ-सरः तप-तपः ।

आ

आ आ अव्ययः । वि+सो-विषा (बुद्धिः) । वि+हा-विहा (स्वर्गः) । [पताका ।
आक आक । खज-खजाका वल-वलाका शल-शलाका पत-
आगूच् आगू सप्तदायान्तोदात्तः । यु-यवागूः ।
आणक आणक । लू-लवाणकः धू-धवाणकः ।
आतु आतु । जीव-जीवातुः ।
आतकन् आतक आद्युदात्तः । जीव-नि० वृद्धिः जैवातकः ।
आनक आनक । भी-भयानकः भी-भयानकः ।
आनच् आन सप्तदायान्तोदात्तः । सम्+सु+संस्त्यानः । सुध-कित् सुधानः, एवं लुध-लुधानः बुध-बुधानः ।
आनुक् आनु गुणाभावः । क्षय-क्षयानुः ।
आन्य आन्य । वद-वदान्यः ।
आय्य आय्य । सृदि-सृदय्यः ।
आरन् आर आद्युदात्तः । अगि-अङ्गारम्, मद-मदारः ।
आल आल । मद्य-मद्यलोपः वस्य लादेशे मरालः ।
आलच् आल सप्तदायान्तोदात्तः । स्था-स्थालं स्थाली ।
आनञ् आन वृद्धिः आद्युदात्तः । चत-वागमः चात्वालः पत-पातालम् चडि-चण्डालः ।
आलीयच् आलीय सप्तदायान्तोदात्तः । मृज-मार्जालीयः ।
आस आस । यु-यवासः (दुरालभा) ।
आसि आसु । दृण-अयाः अव्ययः । (वह्निः) ।

इ

इ इ । रु-रविः कु-कविः पु-पविः रु-अरिः कृ-किञ्च । किरिः, एवं भृ-गिरिः ।
इकन् इक आद्युदात्तः । क्री क्रयिकः । आ+पण-आपणिकः । आ+पत-आपतिकः ।
इजि इज् । पण-पस्यादेशः णिक् । वप-कित् उशिक् ।
इञ् इ वृद्धिः आद्युदात्तः स्त्रियां वा ङीप् । वप वापिः वापी । यज-याजिः याजी । वस-वासिः वासी ।
इण् इ वृद्धिः । जन-जनिः अज-आजिः अत-आतिः ।
इत इत । कुस-कुसितः (जनपदः) । [पलितम् ।
इतच् इत प्रकृतिप्रत्ययसप्तदायान्तोदात्तः । फल-फस्यादेशः
इतन् इत आद्युदात्तः । हृ-हरितः श्यै-श्येतः ।
इति इत् । सृ-सरित् हृ-हरित् रुह-रोहित् युष-योषित् ।
इत्नुच् इत्नु-सप्तदायान्तोदात्तः । स्तनि-स्तनयित्नुः ।
इत्व इत्व । अश-अशित्वम् वह-वहित्वम् भृ-भरित्वा ।
इत्वन् इत्व आद्युदात्तः । जन-जनित्वः ।
इथिन् इथि आद्युदात्तः । अत-अतिथिः ।
इन् इ आद्युदात्तः । पच-पचिः बल-बलिः यज-यजिः ।
इनच् इन सप्तदायान्तोदात्तः । श्यै-श्येनः, शृ-हरिणः, स्त्यै-स्त्येनः, अव-अविनः ।
इनण् इन वृद्धिः । मह-माहिनम् ।
इनन् इन आद्युदात्तः । दृ-दृक्षिणम् दक्ष-दक्षिणः-दक्षिणा ।
इनि इन् । गम-गमी । आङि णित् । आगामी । [भृ-भरिमा ।
इमनिच् इमन् सप्तदायान्तोदात्तः । हृ-हरिमा सृ-सरिमा
इमनिन् इमन् आद्युदात्तः । जन-जनिमा भृ-भरिमा ।
इलच् इल-सप्तदायान्तोदात्तः । सल-सलिलम् कल-कलिलम्
इ(ष्ट)ष्ठच् इ(ष्ट)ष्ठ सप्तदायान्तोदात्तः । अञ्ज-अञ्जि(ष्ठः)ष्ठः ।
इष्णुच् इष्णु-सप्तदायान्तोदात्तः । गै-गेष्णुः दा-देष्णुः ।
इसन् इस आद्युदात्तः । अर्पि-अर्पिसः (अपमांसम्) ।
इसि इस् । अर्च-अर्चिः शुच-शोचिः हु-हविः रुप-सर्पिः ।
इसिन् इस् आद्युदात्तः । द्युत आदेर्जः ज्योतिः ।

ई

ई ई । अव-अवीः तॄ-तरीः तॄ-स्तरीः तन्त्रि-तन्त्रीः ।

ईकन् ईक आद्युदात्तः । कष-कषीका, दूषि-दूषीका ।
ईचि ईचि । मृ-मरीचिः कण-कणीचिः ।
ईद ईद । कुस-कुसीदम् । [धृ-धरीमा ।
ईमनिच् ईमन् सप्तदायान्तोदात्तः । हृ-हरीमा मृ-मरीमा
ईरच्(न्) ईर चित्त्वे सप्तदायान्तोदात्तः नित्त्वे आद्युदात्तः । हिंसेरः । [(फलम्) ।
ईरन् ईर-आद्युदात्तः । कॄ-करीरः, शॄ-शरीरम् पॄ-परीरम्
ईषन् ईष आद्युदात्तः । कॄ-करीषम् तॄ-तरीषः ।

उ

उ उ । भृ-भरुः शी-शयुः मृ-मरुः तॄ-तरुः चर-चरुः ।
उकन् उक आद्युदात्तः । सम्+कस-सङ्कसुकः ।
उडच् उड सप्तदायान्तोदात्तः । गृ-गरुडः । [खादुः ।
उण् उ वृद्ध्यादि । कृ-कारुः या-पायुः वा-वायुः खद-
उति उत् । मृ-मरुत् गॄ-गरुत् ।
उत्र उत्र । त्रै-त्रोत्रम् वृ-वरुत्रम् ।
उन उन । यक-यकुनः । [दारि-दारुणः ।
उनन् उन आद्युदात्तः । कॄ-करुणः करुणा । वृ-वरुणः,
उनसि उनस् । दम-दसुनाः ।
उनि उनि । यक-यकुनिः ।
उन्त उन्त । यक-यकुन्तः ।
उन्ति उन्ति । यक-यकुन्तिः ।
उम उम । कुस-कुसुमम् ।
उम्भ उम्भ । कुस-कुसुम्भम् । [चत-चतुरः ।
उरच् उर सप्तदायान्तोदात्तः । मन्द-मन्दुरा, मथ-मथुरा,
उरन् उर आद्युदात्तः । असु-असुरः, मसु-मसुरा ।
उरिन् उरि आद्युदात्तः । जसु-जसुरिः सह-सहुरिः ।
उल उल । तडि-तण्डुलः ।
उलच् उल सप्तदायान्तोदात्तः । हर्ष-हर्षुलः चट-चटुलः ।
उलन् उल आद्युदात्तः । वृ-वरुणः ताडि-तण्डादेशः तण्डुलः ।
उलि उलि । अगि-अङ्गुलिः ।
उशच् उश सप्तदायान्तोदात्तः । अकि-अङ्कुशः । [कलुषः ।
उषच् उष सप्तदायान्तोदात्तः । पॄ-परुषः नह-नडुषः कल-
उ(ऊ)धन उ(ऊ)ध आद्युदात्तः । ऋ-अर्(ऋ)धः ।
उसि उस । जन-जनुः । अस्य नि० उदन्तत्वमपि ।
उसिन् उस् आद्युदात्तः । ऋ-अरुः, पृ-परुः, वप-वपुः ।

ऊ

ऊ ऊ । क्षप-कर्षूः चम-चमूः तन-तनूः ।
ऊक ऊक । मृ-मरूकः, वल-वलूकः मडि-मण्डूकः ।
ऊकण् ऊक दृद्ध्यादि । कण-कणूकः, मल मालूकम् ।
ऊख ऊख । मा-मयादेशः मयूखः ।
ऊथन् ऊथ आद्युदात्तः । जॄ-जरूथम्, यू-यवूथः ।
ऊम ऊम । गुध-गोधूमः ।
ऊर ऊर । खर्ज्ज-खर्ज्जूरः, क्षप-कर्पूरः, वल्ल-वल्लूरम् ।
ऊरन् ऊर आद्युदात्तः । भी-भयूरः । स्यन्द-सम्भारणम् सिन्दूरम् । मस-मसूरा ।
ऊलच् ऊल सप्तदायान्तोदात्तः । पिजि-पिञ्जूलम्, कम कुङ्कूलः ।

ऋ

ऋ ऋ । दिव-देवा देवरौ ।
ऋतिन् ऋत् आद्युदात्तः । यक-यकृत् । [मन्दा मन्दरौ ।
ऋन् ऋ आद्युदात्तः । सु+अस-स्वमा स्वमारौ । न+मन्द-

ए

एणु एणु । कॄ-करेणुः, वॄ-वरेणुः ।
एन्य एन्य । इ-वरेण्यः । [गवेरः ।
एरक् एर गुणाभावादि । पत-पतेरः, कठ-कठेरः, गद-
एलिमच् एलिम सप्तदायान्तोदात्तः । मथ-मथेलिमः ।
एणुक् एणु गुणाभावादि । गै-गेणुः ।

ओ

ओतच् ओत सप्तदायान्तोदात्तः । कप-कपोतः ।
ओलच् ओल सप्तदायान्तोदात्तः । पट-पटोलः । कपि-
नलोपः कपोलम् ।
ओरन् ओर आद्युदात्तः । कठ-कठोरः, चक-चकोरः ।

क

क अ गुणाभावादि । स्तु-स्तुवः । वि+आ+घ्रा-आघ्रः ।
क क वकारप्रश्लेषात् न कित् । कॄ-कर्कः, रा-राका कल कल्कः ।
कक् क अन्तकित्त्वेन नादेः किच्चयम् । ह-वृकः, भू भक ।
कङ्कण कङ्कण वकारप्रश्लेषात् न कित् । सङ्क-सङ्कणः (शिशुः)
कण कण वप्रश्लेषात् न कित् । चित-कान्तादेशः गुणाभावश्च नि० चिक्कणः ।
कतु अत गुणाभावादि । कॄ-कर्तुः । [(यज्ञसम्पादकः) ।
कत्रिच् अत्रि गुणाभावादि सप्तदायान्तोदात्तः । कॄ-कत्रिः
कचन् अत्र गुणाभावादि आद्युदात्तः । सु+विद-सुविदत्रम् ।
कन् अ गुणाभावादि आद्युदात्तः । क्षिप-नि० क्षीणायः ।
कन् क वप्रश्लेषात् न कित् आद्युदात्तः । एक-एकः भी-भेकः
कनसि अनस् गुणाभावादि । वप-उपनाः ।
कनिन् अन् गुणाभावादि आद्युदात्तः । यु-युवा, क्षप-क्षपा ।

क्न्यन् अन्य कित् आद्युदात्तः । हर्य्य-हिरादेशः हिरण्यम् ।
क्न्युच् अन्यु गुणाभावादि सप्तदायान्तोदात्तः । क्षिप-क्षिपण्युः
कप अप गुणाभावादि । कृण-संप्रसारणं कृणपः (शवः) ।
कपन् अप गुणाभावादि आद्युदात्तः । उष-उषपः कुट-कुटपः।
कमिन् अम् कित् आद्युदात्तः । इदि-नलोपः, इदम् सर्व्वनाम
कयन् अय गुणाभावादि आद्युदात्तः । तन-तनयः ।
करन् कर न कित् आद्युदात्तः । शृ-शर्करा ।
कल अल गुणाभावादि । तृप-तृपला, तृफ-तृफला ।
कलन् कल न कित् आद्युदात्तः । पुष-पुष्कलः ।
काकु आकु गुणाभावादि । कट-कटाकुः कुष-कुषाकुः (सूर्य्यः)।
कालन् आल गुणाभावादि आद्युदात्तः । विड-विडालः ।
किकन् इक कित् आद्युदात्तः । अश्व-वृश्चिकः क्षप-क्षपिकः ।
कितच् इत कित् सप्तदायान्तोदात्तः । रुच-रुचितं वच-
उचितम् । [पुलिन्दः ।
किन्दच् इन्द कित् सप्तदायान्तोदात्तः । कुल-कुलिन्दः पुल-
किरच् इर कित् सप्तदायान्तोदात्तः । दृष-दृषिरः ।
किष्यन् इष्य कित् आद्युदात्तः । रुच-रुचिष्यः भुज-भुजिष्या ।
कीकन् ईक कित् आद्युदात्तः । ऋज-ऋजीकः मृड़-मृड़ीकः ।
कीटन् ईट कित् आद्युदात्तः । क्र-किरीटं तृ-तिरीटम् ।
कु उ गुणाभावादि । भृ-पुरुः भिद-भिदुः व्यध-विधुः ।
कुक् कु अन्त्यकित्त्वाच्चादिकित्त्वम् । ह्वो-ह्वीकुः ।
कुकन् उक गुणाभावादि आद्युदात्तः। प्रथ-संप्रसारणम् पृथुकः
कुषन् उष गुणाभावादि आद्युदात्तः । भृ-पुरुषः ।
कू ऊ गुणाभावादि । स्तृ-स्तूः हृध-हृधूः ।
कृत्य एय गुणाभावादि । स्तु स्तुत्येयः (वेद एषायम्) ।
क्त त गुणाभावादि । अक-अक्तः घृ-घृतम् कृ-कृतम् ।
क्तन्, तु गुणाभावादि । क्र-क्रतुः हन-हतुः ।
क्त्र त्र गुणाभावादि । अम-अम्त्रं चि-चित्रं मिद-मित्रम् ।
क्थन् थ गुणाभावादि आद्युदात्तः । हन-हथः कुष-कुथः ।
क्थिन् थि गुणाभावादि आद्युदात्तः । अस-अस्थि सक-सक्थि
क्न न गुणाभावादि । लृह-हलोपः लृणम् । [लूनि ।
क्निन् नि कित् स्त्रियां आद्युदात्तः न ङीप् । स्तृ-स्तृणिः ।
क्मलन् मल कित् आद्युदात्तः । कुट कुड्मलम् कष-कष्मलम् ।
क्यु यु-अन गुणाभावादि । कृ-किरणः भृ-पुरण्यः ।
क्युच् यु-अन गुणाभावादि आद्युदात्तः । ऋ-उत् उरणः ।
क्युन् यु-अन गुणाभावादि सप्तदायान्तोदात्तः । भू-भुवनम् ।
क्रन् र कित् आद्युदात्तः । सु-सुरः स्तृ-स्तूरः धा-धीरः ।
क्रच् रर गुणाभावादि सप्तदायान्तोदात्तः । कु-कुररः ।
क्रि रि गुणाभावादि । स्तृ-स्तरिः ।
क्रिन् रि गुणाभावादि आद्युदात्तः । अद्-अद्रिः भू-भूरिः ।
शुभ-शुभ्रिः ।
क्रुकन् रुक गुणाभावादि आद्युदात्तः । भी-भीरुकः । [शत्रुः ।
क्रुन् रु गुणाभावादि आद्युदात्तः । रु-रुरुः शाति-शुनः ।
क्ल ल गुणाभावादि । मू-मूलम् शक-शक्लः अम-अम्लः ।
क्वन व गुणाभावादि आद्युदात्तः । अश्व-अश्वः मुष-मुष्वः ।
क्वनिप् वन् गुणाभावः अनुदात्तः । ग्री-ग्रीवा क्रुश-क्रुश्वा ।
क्विन् वि, इकाराख्यानुनासिकत्वाभावाच्च लोपः । क्र-कीर्विः
भृ-गीर्विः जागृ-जागृविः ।
क्विप् वि तस्य लोपः अनुदात्तः कित् । वच-दीर्घः वाक् ।
क्वुन् वु-अक कित् आद्युदात्तः । चर-चरकः ।
क्सरन् सर कित् आद्युदात्तः । तन-तसरः, क्षप-क्षत्तरः ।
क्सि सि गुणाभावादि । मुष-मुक्षिः, कृष-कृक्षिः, शुष-शुक्षिः
क्सु सु गुणाभावादि । दृष-दक्षुः ।
क्ष्ण क्ष गुणाभावादि । क्षत्-क्षत्क्षम्, अश्-अक्ष्णम् ।

ख

ख ख वकारप्रश्लेषात् न खित् । शम-शङ्ख' सुह-सुरादेशे मूर्खः ।

ग

ग ग वकारप्रश्लेषात् न गित् । भृ-गर्गः ।
गक् ग वकारप्रश्लेषात् न गित् गुणाभावादि । सृद-सृङ्गः ।
गण् ग वकारप्रश्लेषात् न गित् दृद्यादि । भृ-भृट् भार्ङ्गः ।
गन् ग वकारप्रश्लेषात् न गित् आद्युदात्तः । गम-गङ्गा ।

घ

घथिन् अधि कुत्वम् आद्युदात्तः । नि+सञ्ज+निषङ्क्थिः ।

च

चट् च वप्रश्लेषाच्च चित् स्त्रियां ङीप् । कु-दीर्घः कूची ।
चतु अत सप्तदायान्तोदात्तः । एध-एधतुः, वह-वहतुः ।
चिक् च वकारप्रश्लेषात् न चित् गुणाभावादि । स्नु-स्नुक् स्नुचौ

ज

ज्झच् झ-अन्त सप्तदायान्तोदात्तः । जृ-जरन्तः विश-वेशन्तः ।
ज्झिच् झि अन्ति तेन न झित् सप्तदायान्तोदात्तः । भू-भवन्तिः ।

ञ

ञुन् उ दृद्यादिः आद्युदात्तः । दृ-दारु, सन-सानु ।

ट

ट(न्) अ स्त्रियां ङीप् । निच्चे आद्युदात्तः । दनुय-नख
आ दाघः, दनुस-दासः । [मह-माहिषः ।
टिषच् इष सप्तदायान्तोदात्तः स्त्रियां ङीप् । अव-अविषः

ठ

ठ ट वप्रश्लेषात् न ठित् । कण-कण्टः ।

ड

ड अ अभत्वेऽपि टिलोपः । जर्णु-जर्ण्डा ।

ड ड वप्रश्लेषात् न डित् । कुण-कुण्डम्, गु-गुडः ।

डउ अड अभत्वेऽपि टिलोपः । तन-सन्वत् तितउः डउ इत्यसन्धिनिर्देशाच्च सन्धिः ।

डट अट अभत्वेऽपि टिलोपः । नम-नटः ।

डति अति अभत्वेऽपि टिलोपः । पा-पतिः । [भवती ।

डवतुप् अवतु टिलोपः उगित्कार्यम् अनुदात्तः । भा-भवान्

डिमि इम् टिलोपः । कै-किम् । अस्य इदमश्च मान्तत्वेन क्रन्भेजन्तत्वव्ययत्वप्रसङ्गेऽपि चिरव्ययमिति नियमादुणादौ चिप्रत्ययान्तत्वे एवाव्ययत्वं नान्यथा ।

डुतच् उत टिलोपः समुदायान्तोदात्तः । अद्+भू-अद्भुतम् ।

डुन् उ टिलोपः आद्युदात्तः । ग्लन्+श्री-ग्लस्नुः, न+श्री अस्नुः । [वार्त्तिकेऽप्ययं प्रत्ययः ।

डुमसुन् उमस् टिलोपः आद्युदात्तः । पा-पुमान्, पुंसः ।

ड् ऊ टिलोपः । भ्रू-भ्रूः । [डिमिप्रत्यये ।

डै ऐ टिलोपः । रा-रै-राः रायौ । यथा नाव्ययत्वं तथोक्तं

डैसि ऐस् टिलोपः । उद्+चि-उच्चैः नि-दीर्घैः नीचैः ।

डो ओ टिलोपः । गम-गो-गौः, गवा । नाव्ययत्वसूत्रम् ।

डोसि ओस् टिलोपः । दम्-दोः दोषौ दोषः ।

डौ औ टिलोपः । ग्लै-ग्लौः नुद-नौः नाव्ययत्वसूत्रम् ।

ड्ट् र टिलोपः स्त्रियां ङीप् । स्त्रै-स्त्री ।

ड्रि रि टिलोपः । कृ-त्रि-तवः ।

ढ

ढ ढ वप्रश्लेषात् न ढित् । शम-शठढः ।

ण

णित्वन् इत्व इद्भिः आद्युदात्तः । भू-भावित्वं वद-वादित्वम् ।

णुं णु वप्रश्लेषाच्च णित् । स्था-स्थाणुः अज-वेणुः वृ-वर्णुः

णुकन् उक इवार्थादि आद्युदात्तः । यव-कादेये पाकुकः ।

ण्य एय वप्रश्लेषात् न णित् । दृष अकारस्य इत्वं शिष्यम् ।

त

त त । स्त्री-ष्ट्र स्रुघ्नः सिघ्नम् (सिघ्नम्) ।

तकन् तक आद्युदात्तः । दृष-दृष्टका, अश-अष्टका ।

तन् त आद्युदात्तः । कृस-कृत्तः, मृ-मर्त्तः, गृ-गर्त्तः ।

तनन् तन आद्युदात्तः । वी-वेतनम् ।

तश्नन् तश आद्युदात्तः । दृण-दतशः (ब्राह्मणः) ।

तशसुन् तशस् आद्युदात्तः । दृण-दतशाः (शिशः) ।

ति ति । वि+तस-वितस्तिः सु+अस सुस्ति स्वरादि ।
सूत्रपाठे स्वस्तीतिनिर्देशात् न भूभावः । [अस्तिका ।

तिकन् तिक आद्युदात्तः । वृत-वर्तिका । क्षत-क्षिप्तम-

तु त । कम-कन्तुः जन-जन्तुः गै-गातुः हि सेतुः ।

तुन् त आद्युदात्तः । सि-सेतुः तन-तन्तुः मन-मन्तुः ।

ष्टच् ट समुदायान्तोदात्तः । चद-चत्ता मन्-मन्ता ।

ष्टन् ट आद्युदात्तः । शंस-शंस्ता ।

ष्ठण् ठ वृद्ध्यादि । च्यु-च्यौत्नः । (अवद्यजः, श्रीमद्भागवत)

त्युक् त्यु-गुणाभावादि । मद-मत्युः ।

त्र त्र । गु-गोत्रं गोत्रा । यच-यन्त्रं यभ-यन्त्रम् ।

त्रन् त्र आद्युदात्तः । छद-छात्रं या-यात्रा श्रु श्रोत्रम ।

त्रिन् त्रि आद्युदात्तः । अद-अत्रिः ।

त्रिन् त्रिन् आद्युदात्तः निघ्नेलुक्तेः न त्रित् । यद यत्रा अत्रिणौ ।

त्रिप् त्रि-अनुदात्तः । रा-रात्रिः यद-यत्रि (रात्रौ) ।

त्वन् त्व आद्युदात्तः । दात्वः (दात्रा) ।

थ

थक् थ गुणाभावादि । दृष-दृषं यू-यूथं गृ-गृथम ।

थन् थ आद्युदात्तः । उथ-ओथः कृथ-कोथम् गा-गाथा ।

द

द द । या-यादः (जम्बालः यक्षश्च) ।

दन् द आद्युदात्तः । यभ-यद्भः अव-अवदः ।

ध

धुक् धु गुणाभावादि । धी-धीधुः ।

न

न न । धा-धाना (भृष्टयवः) पृ-पर्णम् वस-वस्नः ।

नक् न गुणाभावादि । दृण-दृनः । सि-सिनः ।

नि नि । वी-नि० यत्वं वेणिः । व्या-व्यानिः ।

नु नु । दा-दानुः भा-भानुः ।

प

प प । या-यापम् । नी-नेपः नि० नीपः । विश-विप्रम ।

पास पास । कृ-कर्पासः ।

फ

फक् फ गुणाभावादि । अल-अल्गोत्वं शुल्फः गल-गुल्फः ।

भ

भ भ । दृ-दर्भः दल-दल्भः (ऋषिपक्षश्च) ।

भन् भ आद्युदात्तः । मृ-अर्भः गृ-गर्भः ।

म

मक् म गुणाभावादि । द्रुघ-द्रुग्धः युध-युद्धः भी-भीमः ।
मदिक् मद् गुणाभावः । सु-सुमद्-त्वम् । अस-अस्मद्-अहम् सर्वनाम ।
मन् म आद्युदात्तः । कृ-अर्म्मः स्तु-स्तोमः सु-सोमः ।
मनि मन् । सु+मृ-सुशर्म्मा ।
मनिण् मन् वृद्धिः । अत-आत्मा ।
मनिन् मन् आद्युदात्तः । सो-सामन् कृ-कर्म्मन् वृ-वर्म्मन् ।
मि मि । नी-नेमिः भू-कित् भूमिः ।
मिनि मिन् । हु-होमी ।
मुक मुक । उष-लान्तादेशः गुणाभावः उल्मुकः । (ज्वलद-ङ्गारम्) ।

य

य य । यज-यज्यम् ।
यक् य गुणाभावः । जन-जन्यं (युद्धम्) जन्या बधूः ।
यत् य स्वरितः । पु-पुक् पुण्यम् धा-धुक् धान्यम् ।
यतुच् यत् सप्तदायान्तोदात्तः । तन-तन्यतुः ।
यक् यु गुणाभावः । भुज-भुज्युः (भोजनम्) । [जन्युः ।
यच् यु न अनादेशः सप्तदायान्तोदात्तः । मन-मन्युः जन-
युन् यु-अन आद्युदात्तः । हन-आद्यन्तयोर्घतौ घतनः ।

र

र र । रोङ्-स्तुखः पुट् च रिप्रम् (कुत्सितम्) ।
रक् र गुणाभावः । स्फाय-स्फारम् । क्षिप-क्षिप्रम् स्पृ-स्पृप्रः ।
रन् र आद्युदात्तः । वृदि-वृन्दः वज-वज्रः । भी-भेरः ।
रु रु । भी-भेरुः पी-पेरुः पा-पारुः । जत-जत्रुः ।

ल

लक् ल कित् । श्री-श्रीलम् ।

व

व व । कृ-कर्वः मृ-गर्वः मृ-मर्वः बधादिरित्येके ।
वन् व आद्युदात्तः । दृश-एव, खरादिः । श्री-श्रेवः ।
वन् वन् न निष्पं ज्ञापकात् । कृ-अर्वा (कुत्सितः) ।
वनिप् वन् अनुदात्तः । स्ना-स्नावा कृ-अर्वा (तुरङ्गगर्हयोः) ।
वरट् वर स्त्रियां ङीप् । अश-उपधाया ऐत्वम् ऐश्वरः ।
वलच् वल सप्तदायान्तोदात्तः । दल-दल्वलः पल-पल्वलः ।
वलञ् वल वृद्धिः । श्री-श्रैवलः । [दरादित्वात् सैवालश्च ।
वालञ् वाल वृद्धिः आद्युदात्तः । श्री-श्रैवालः । पृषो-
वालन् वाल आद्युदात्तः । श्री-श्रेवालः नि० वस्य पः, श्रेपालश्च ।
वि वि ज्ञापकस्य न लोपः । कृ-कर्विः बधादिरित्येके ।
विन् वि-अनुदात्तत्वप्रतिज्ञाभावात् नास्य वृद्धित्वं तेन न विलोपः । कृ-कर्विः । बधादिरित्येके ।
वुन् वु अक-आद्युदात्तः । कृ-करकः करका ।

श

शक् श वकारप्रश्लेषात् न शित् गुणाभावः । वृ-वृशः ।
शुन् शु आद्युदात्तः । सृप-सृभावः पर्शुः (आयुधम्) ।
श्वण् श्व वृद्धिः । सृप-सृभावः पार्श्वः ।

ष

षवन् अव आद्युदात्तः स्त्रियां ङीष् । प्रथ-संप्रसारणे पृथ्वी ।
षिवन् इव आद्युदात्तः स्त्रियां ङीष् । प्रथ-सम्प्रसारणे पृथिवी
ष्ट्रन् त्र-आद्युदात्तः । वस-वस्त्रं शस-शस्त्रम् अस-अस्त्रम्
स्त्रियां ङीष् । नद्री । [मृ-मर्व्वरी ।
ष्वरच् वर सप्तदायान्तोदात्तः स्त्रियां ङीष् । वृ-वर्वरः

स

स स । वृ-वर्षम् । तृ-तर्षः । वस-वत्सः । हन-हंसः ।
सन् स आद्युदात्तः । अम-अंसः ।
सरन् सर आद्युदात्तः । अश-अत्तरम् । वस-वत्सरः ।
सिकन् सिक आद्युदात्तः । हन-हंसिका (हंसयोषित्) ।
स्नान् स्ना आद्युदात्तः । सूच-सूच्यम् ।
स्थ स्थ । मद-मत्स्थः ।
स्थन् स्थ आद्युदात्तः । मद-मत्स्थः ।

इत्युणादिप्रत्ययस्वरूपादिप्रदर्शनम् ।

शब्दविभागनियमादि ।

शब्दास्तावत् चतुर्विधाः रूढ्यौगिकयोगरूढपारिभाषिक-भेदात् । यत्र अवयवशक्तिमनपेक्ष्य समुदायशक्त्या कस्यचिद्वि-शिष्टार्थस्य बोधः ते रूढाः । यथा आखण्डलमण्डपघटा-दयः तत्र अवयवार्थाबोधनेनैव समुदायेन विशिष्टार्थस्य बोधनात् ।

द्रव्यगुणक्रियासम्बन्धरूपावयवार्थयोगेन तत्तद्विशिष्टार्थबोधका यौगिकाः । यथा धनवान् दण्डी रूपवान् रसवान् पाचकः गन्तेत्यादयः । तेषाञ्च धनादिद्रव्यस्य, रूपरसादिगुणस्य, पाकादि-क्रियायाश्च संबन्धस्य यथाक्रमं बोधकता । एवञ्च प्रकृतिप्रत्य-याभ्यां तत्तदर्थयोरुपस्थाप्यत्वेन तद्योगरूपसम्बन्धविशिष्टस्य बोध-कत्वात् तेषां यौगिकत्वम् । यौगिका अपि कृदन्ततद्धितान्तसमा-सजभेदात् त्रिविधाः । तत्र पाचकादयः कृदन्ताः, काषायादयः तद्धितान्ताः, राजपुरुषादयः समासजाः । तत्रायं विशेषः कृदन्ताः

क्रियासम्बन्धमात्राभिधायकाः तथा हि पाचक इत्यादौ धातुना पाकस्य, खलादिना कर्त्रादेर्बोधनात् विशिष्टार्थबोधकत्वेन क्रियासम्बन्धबोधकत्वम् ।

तद्धितान्तास्तु द्रव्यगुणक्रियासम्बन्धाभिधायकाः । तत्र धनवान् दण्डीत्यादौ द्रव्यसम्बन्धस्य, रूपवान् रसवान् ज्ञानवान् इत्यादौ रूपादिगुणसम्बन्धस्य, गतिमान् क्रियावान् स्पन्दनवानित्यादौ च गत्यादिक्रियासम्बन्धस्य मत्वर्थादिभिर्बोधनात् तथात्वम् । तत्र सम्बन्धाश्च नानाविधाः स्वस्वामिभावादिरूपाः, तत्तत्सूत्रलोपात्ततत्तत्क्रियाकारकादिभावादिरूपाश्च तत्र धनवानित्यादौ स्वस्वामिभावादिः । काषायः लाक्षिक इत्यादौ रञ्जनकर्म्म, शाल्विक इत्यादौ वेदनकर्म्म, पञ्चपुरित्यादौ क्रयकर्म्म, पथिक इत्यादौ गमनकर्त्ता, इत्येवमादयोऽर्थाः अणादिप्रत्ययेन बोध्यन्ते ।

समासजा अपि द्रव्यगुणक्रियासम्बन्धबोधकभेदेन प्रथमं त्रिविधाः । तत्रापि द्रव्ययोः, द्रव्यगुणयोः, द्रव्यक्रिययोः, गुणयोः, गुणक्रिययोः, क्रिययोश्च सम्बन्धबोधकत्वेन ते पुनः षड्विधाः । तत्र राजपुरुषः राजधनमित्यादौ द्रव्ययोः, पटरूपं विप्रज्ञानमित्यादौ द्रव्यगुणयोः, रथगतिः, पादक्रियेत्यादौ द्रव्यक्रिययोः, नीललोहितः कृष्णरक्त इत्यादौ गुणयोः, गतिरोधः, भोजनज्ञानमित्यादौ गुणक्रिययोः, स्नातानुलिप्तः पक्वभुक्त इत्यादौ क्रिययोश्च सम्बन्धस्य साक्षात्, परम्परया वा बोधनात् तथात्वम् ।

तत्र कृतः, तद्धिताः समासाश्च नानाविधाः तेषां स्वरूपभेदाः अर्थविशेषाश्च व्याकरणत एवावगन्तव्याः ।

यत्र अवयवशक्त्या प्रकृतिप्रत्ययार्थयोरुपस्थापनेन तद्योगविशिष्टस्य समुदायशक्त्या रूढ्या वृत्त्या कस्यचित् पदार्थस्य बोधनं ते योगरूढाः । यथा पङ्कजमनोजादयः, ते च अवयवशक्त्या उपस्थापितेन पङ्कजनिकर्त्तृत्वरूपेणार्थेन सहितस्य रूढ्या वृत्त्या पद्मत्वादिविशिष्टस्य बोधनात् योगरूढाः । तेन पङ्कजशब्दादितः न कुमुदादीनां बोधः ।

अन्ये तु पङ्कजनिकर्त्तृत्वरूपार्थस्य कुमुदादिषु सद्भावेऽपि पङ्कजशब्दप्रयोगे पद्मत्वमुपाधिरिति प्रयोगनियमेन पद्मत्वादिकस्य तत्र उपाधित्वमङ्गीकृत्य न कुमुदादिषु तत्प्रयोगस्तथाच पङ्कजादिशब्दादीनां यौगिकेष्वेवान्तर्भाव इत्युररीचक्रुः ।

वैयाकरणास्तु समासनिष्पन्नानामपि शब्दानाम्

"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।"

इति पङ्कजशब्दवत् योगरूढत्वमेव स्वीचक्रुः ।

समासानां सम्बन्धवाचकत्वेऽयं विशेषः द्विगावविकल्पार्थक भिन्नबहुव्रीहेर्भेदसम्बन्धपाचकत्वम् । यथा पीताम्बरः पङ्कधनः इत्यादयः पीताम्बरादिभेदसम्बन्धबोधकाः । द्विगावसमासे उत्तरपूर्व्वा पूर्व्वदक्षिणेत्यादौ, द्विता पञ्चधा इत्यादौ विकल्पार्थकसमासे च न भेदसम्बन्धबोधकत्वं किन्तु कर्म्मधारयवत् अभेदसम्बन्धबोधकत्वम् बहुव्रीहेरपि भेदसम्बन्धबोधकत्वेऽयं विशेषः, क्वचित् कर्म्मत्वादिकारकसम्बन्धः क्वचिच्च स्वस्वामिभावादिसम्बन्धः बोध्यते तत्र आरूढवानरादौ कर्म्मत्वादिसम्बन्धस्य पीताम्बरादौ च स्वस्वामिभावसम्बन्धस्य बोधः । यथा आरूढो वानरोऽयम् प्राप्तमदकं यमिति विग्रहे आरूढवानरप्राप्तोदकपदार्थौ वानरकर्म्मकारोहणकर्म्मणः उदककर्त्तृकप्राप्तिकर्म्मणश्च बोधकौ । एवम् जितो रथो येन इति विग्रहे अक्षरथशब्दादेः रथरक्षणकरणस्य, दृष्टो रथो येनेति विग्रहे दृष्टरथादेश्च रथदर्शनादिकर्म्मणश्च बोधकत्वम् । उपहृतः पशुर्यस्मै इति विग्रहे उपहृतपशुशब्दादेः पशुरूपस्य सम्प्रदानस्य, पतितं पत्रं यस्मादिति विग्रहे पतितपत्रादेः पत्र पतनापादानस्य, निहितो घटो यत्रेति विग्रहे निहितघटादि शब्दस्य, घटनिधानाधिकरणस्य च बोधकत्वम् । [illegible] द्वन्द्वेष्वपि भेदसम्बन्धबोधकत्वमूह्यम् । द्वन्द्वस्य एकक्रियान्वयिरूपसम्बन्धबोधकत्वात् तथात्वं अव्ययीभावस्य तु तथात्वं प्रसिद्धमेव

तत्पुरुषेऽपि पूर्व्वपदार्थस्य उत्तरपदार्थे, क्वचिच्च उत्तरपदार्थस्य पूर्व्वपदार्थे सम्बन्धबोधकता । यथा राजपुरुष इत्यादौ राजादिपूर्व्वपदार्थस्य उत्तरपदार्थे पुरुषादौ, ग्रामगत इत्यादौ च ग्रामादेरुत्तरपदार्थस्य अव्ययादिपूर्व्वपदार्थे, सम्बन्धो बोध्यते । स च सम्बन्धः स्वस्वामिभावः कारकरूपश्च । तत्र राजपुरुषादौ स्वस्वामिभावस्य, ग्रामश्रितादौ, अधर्णकर्म्मणः रामकृतमित्यादौ कर्त्तुः अश्वगतमित्यादौ गतिकरणस्य व्याघ्रभीत इत्यादौ भयापादानस्य, ग्रामस्थित इत्यादौ स्थित्यधिकरणस्य यथायथं पूर्व्वपदार्थस्य उत्तरपदार्थेऽन्वयः । द्विगौ, कर्म्मधारये, समानाधिकरणबहुव्रीहेरयान्तरपदार्थयोश्चाभेदेनैवान्वयात् कर्म्मधारयस्य द्विगोः समानाधिकरणबहुव्रीहेश्च स्वघटकपदार्थाभेदबोधकत्वमिति विवेकः । उपपदसमासस्य तु तत्पुरुष एवान्तर्भावः अव्ययं यथासम्भवमूह्यनीयम् ।

शास्त्रकारसङ्केतविशेषेण तत्तदर्थबोधकाः शब्दाः पारिभाषिकाः । यथा "कर्त्तुरीप्सिततमं कर्म्म," "साधकतमं करणम्" योगश्चिक्षत्तिनिरोध इत्यादयः । तत्तच्छास्त्रकारैः, कर्म्मशब्दः कर्त्तुरीप्सिततमं, करणशब्दः साधकतमं, योगशब्दः चित्तवृत्तिनिरोधं बोधयितुमीप्सितो विशेषरूपपरिभाषात्मकसङ्केतेन तत्तदर्थानां बोधनात् तथात्वम् ।

परिभाषायाश्च आधुनिकसङ्केतत्वेन सादित्वात् अनादिसङ्केतवतो रूढ्यादुभेदः ।

तेषां सङ्केतविशेषकरणञ्च तत्तच्छास्त्रेषु तत्तच्छब्देन तत्र तत्र पारिभाषिकार्थानामेव ग्रहणार्थम् । अत एव "कृत्रिमाकृत्रिमयोर्मध्ये कृत्रिमे कार्य्यसंप्रत्ययः" इति परिभाषया कृत्रिम सङ्केतवत एव ग्रहणमुक्तम् तेन "कर्म्मण्यण" "कर्म्मणि द्वितीया" इत्यादौ स्वशास्त्रे पारिभाषिकार्थानामेव कर्म्मादीनां ग्रहणं न तु "कर्म्म क्रिया" इति कोषोक्तक्रियादीनां ग्रहणम् ।

केचित्तु, सङ्केतवत्त्वसाम्यात् पारिभाषिकस्य रूढेष्वेवान्तर्भावमिच्छन्ति ।

यत्किञ्च अस्माकं शब्दादयमर्थो बोध्य इत्यारकोच्चा । सा च सम्प्रदायप्रवर्तकस्य ईश्वरस्य तत्तत्स्थानापन्नत्वेन कल्पितस्य तथाविधस्य अपरस्य वेत्यवधेयम् । तथा च सम्प्रदायप्रवर्तकस्य इदानीमसुलभतया कस्य शब्दस्य कोऽर्थः ? इति जिज्ञासायां पूर्व्वपूर्व्वसम्प्रदायानुसारेण आप्तप्रायैः अमरादिभिः स्वस्वकोषेषु, बाहुल्येन रूढानां, केषाञ्चित्च यौगिकानां शब्दानाम्, पाणिन्यादिभिश्च सूत्रपाठादिषु बाहुल्येन यौगिकानां, केषाञ्चित्च रूढानामर्थविशेषा दर्शिताः । अत एवोक्तम्

यत्किञ्चन व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति

अमरकोषादिषु च एकैकग्रन्थेषु सर्व्वशब्दानामनुक्तेः यावत् कोषज्ञानस्य इदानीन्तनैरवश्यतया तेषामसुलभतया च, यौगिकशब्दज्ञानोपयोगिनश्च पाणिन्यागमस्य प्रायशः दुर्बोधतया तत्तद्ग्रन्थानां च एकैकपुरुषेण बहुकालसाध्यपाठतया, पठितानामपि भद्रा स्मरणाभावेन, तत्तद्ग्रन्थानाञ्च सुपरिपाटीकत्वाभावेन कथङ्कारं सर्व्वशब्दार्थज्ञानम् सुकरं भवेत् इत्यतः वेदपुराणेतिहासतन्त्रशास्त्रदर्शनशास्त्रज्योतिषनीतिशास्त्रवैद्यकव्याकरणादिशास्त्रेषु प्रयुक्तशब्दानां तत्र तत्र पारिभाषिकशब्दानाञ्च अर्थज्ञानाय नानाकोषादिभ्यः शब्दानां सङ्कलनेन सुपरिपाटीकतया एतद्रचनायामस्माभिः प्रवृत्तम् ।

यानि यानि च शास्त्रान्तरालोच्य तत्तदर्थविशेषावधारणं कृतम् उदाहरणतया च तत्तत्सामान्यत्र तत्तच्छब्दार्थदर्शनावसरे प्रदर्शयिष्यन्ते प्रदर्शयिष्यन्ते चात्र तेषां ग्रन्थानां समष्टीकृत्य नामानि ।

यौगिकशब्दानामपि अनन्तभेदतया दिङ्मात्रतयाऽत्र प्रदर्शनं कृतम् अन्यथा एकैकधातोः एकैकप्रत्ययान्ततया शब्दभेदकल्पनेऽनन्तशब्दाः सुखसंग्रहणे च वृथा ग्रन्थबाहुल्यमात्रसम्पादनमनर्थकप्रयोजनञ्च । अत एवोक्तम्

वृहस्पतिर्दिव्यं वर्षशतमभिध्याय शब्दपारायणं
जगौ नैवान्तं जगामेति ।

तथा च प्रतिपदशब्दार्थकथनापेक्षया प्रकृतिप्रत्ययविभागेन शब्दसाधुतासम्बोधनाय लघूपायतया व्याकरणमारब्धं तन्त्रकारैः । तच्च तत एवागन्तव्यम् । किन्तु पाणिन्यागमानामिदानीम् असुलभतया बहूनाञ्च तद्ज्ञानेन तेषां बोधनार्थं ततः सारमाकृष्य अपेक्षितयौगिकशब्दानामर्थविशेषोऽत्राभिधास्यते ।

किञ्च यावन्तः शब्दास्तावन्त एव नञ्योगेन शब्दाः स्युरिति नञ्योगेन शब्दबाहुल्यसम्पादनमकिञ्चित्करमेवेति नञ्युक्तशब्दा अस्माभिः आधुनिककोषकृद्भिरिव नादृताः किन्तु यत्र यत्र अर्थविशेषः यथा असुरः अब्राह्मण इत्यादिषु तत्रैव संग्रहीष्यन्ते ।

अपरञ्च यौगिकशब्दानां पूर्व्वोत्तरपदयोः परिवर्त्तनेन नानारूपता स्यात् तेषां प्रत्येकं ग्रहणे च वृथानन्तभेदकल्पनेन ग्रन्थबाहुल्यमात्रसम्पादनं अर्व्वाचीनानामिव वृथा स्यात् न च तत्र प्रयोजनाधिक्यमित्यतः प्रथमं कश्चित् नियमविशेषोऽभिधीयते यद्बलात् पूर्व्वोत्तरपदपरिवर्त्तनेन तत्तत्समानार्थकशब्दार्थग्रहः सुकरो भवेत् ।

नियमो यथा

स्वत्वविशिष्टपूर्व्वपदात्, पाल, धर, भुग् धारिन् भृत्, पति, नेतृशब्दास्तत्समानार्थकशब्दा मतुबादयश्च यदा प्रयुज्यन्ते तदा तत्स्वामी बोध्यते । यथा भूपालः भूधरः भूभुक् भूधारी भूभृत् भूपतिः भूनेता इत्यादयः, भूमान् इत्यादयश्च भूमिपतिवाचकाः अत्र समानार्थकशब्दैः पूर्व्वपदपरिवर्त्तने उत्तरपदपरिवर्त्तने च स एवार्थोऽभिधीयते । यथा भूमिपालः भूमिरक्षकः इत्यादिषु ।

जन्यवाचकपूर्व्वपदात् कृत्-कर्तृ सू-सृट्-सृष्ट-विधातृ कारक-प्रभृतिशब्दास्तत्पर्य्यायशब्दाश्च प्रयुक्ताः तज्जनकबोधकाः । यथा विश्वकृत् विश्वकर्त्ता विश्वसृः विश्वसृट् विश्वसृष्टा विश्वविधाता विश्वकारकइत्यादयः सर्व्वकृत् सर्व्वकर्त्तेत्यादयश्च चतुर्मुखस्य वाचकाः ।

जनकवाचकपूर्व्वपदात्, योनि, ज, रुह, जन्मन्, भू, भव इत्यादयस्तत्पर्य्यायाश्च तज्जन्यबोधकाः । यथा भूमियोनिः भूमिजः भूमिरुहः भूमिजन्मा भूमिभूः भूमिभवः इत्यादयः क्ष्मायोनिः क्ष्माज इत्यादयश्च । तथा अपत्यभवार्थे अण्यादयश्च जन्यवाचकाः । यथा भौमः माहेयः इत्यादयः ।

धार्य्यशस्त्रादिवाचकपूर्व्वपदात्, पाणिशूलमौलि, भूषण, भृच्छालिन् शेखर, धर्त्र, धारकप्रभृतयः तत्पर्य्यायशब्दाः मत्वर्थीयप्रत्ययाश्च तद्धारकवाचकाः । यथा शूलपाणिः शूलाङ्कः चन्द्रमौलिः चन्द्रभूषणः शूलभृत् शूलशाली चन्द्रशेखरः शूली शूलवान् इत्यादयः । द्वयांस्तु विशेषः । यत्र यत्रावयवे धार्य्यत्वं प्रतीयते तत्तद्वाचकशब्दा एव उत्तरपदे निवेशनीयाः । यथा शूलहस्तः चन्द्रमस्तक इत्यादि ।

भोज्यवाचकपूर्व्वपदात् अन्न, भुग्, व्रत, भिद्, पायिन्, प,

अग्र, अग्रनाद्यः उत्तरपदस्थाः तद्भक्तकवाचकाः । यथा मध्वन्नः मधुभुक् मधुव्रतः मधुलिट् मधुपायी मधुपः मध्वगः मध्वगन इत्यादयः पूर्व्वोत्तरशब्दपरिवर्त्तनेन तत्पर्य्यायशब्दाश्च भ्रमरवाचकाः ।

पतिवाचकात् कान्ता प्रिया, बधू प्रणयिनी इत्यादयः उत्तरपदस्थाः तद्भार्य्यावाचकाः । यथा हरकान्ता हरप्रिया हरबधूः हरप्रणयिनी इत्यादयः पूर्व्वोत्तरशब्दपरिवर्त्तने तत्तत्पर्य्यायशब्दाश्च दुर्गावाचकाः ।

भार्य्यावाचकात् वर, रमण, प्रणयिन्, प्रिय, प्रभु, नाथादयः उत्तरपदस्थाः तत्पतिवाचकाः । यथा रमावरः रमारमणः रमाप्रणयी रमाप्रियः रमाप्रभुः रमानाथ इत्यादयः कमलावरादयश्च विष्णुवाचकाः ।

सखिवाचकपूर्व्वपदात् सखिवाचकाः शब्दाः सख्यन्तरवाचकाः यथा शिवसखः शिवसुहृत् शिवमित्रम् इत्यादयः कुबेरवाचकाः ।

वाहनशस्त्रपूर्व्वपदात् गामिन्—यानासनप्रभृतयः शब्दाः तद्वाह्यबोधकाः । यथा हयगामी हययानः हयासन इत्यादयः ।

जन्मनिमित्तकसम्बन्धविशिष्टपूर्व्वपदात् स्वस्रादयः, दुहित्रादयः, आत्मजादयः, अपजादयः, अवरजादयश्च तत्सम्बन्धवाचकाः । यथा शमनस्वसा शमनभगिनी शमनसहोदरेत्यादयः एकसूर्य्यतेजन्मत्वेन यमुनाबोधकाः । सूर्य्यदुहिता सूर्य्यनन्दिनी सूर्य्यतनया सूर्य्यपुत्रीत्यादयः तज्जन्मसम्बन्धत्वेन यमुनाबोधकाः । शिवतनयः शिवसुतः शिवात्मज इत्यादयः शिवतो जन्मवत्कार्त्तिकेयादिवाचकाः । यमुनाग्रजः यमुनाभ्राता यमुनासहोदर इत्यादयः यमुनासमानजन्मसम्बन्धत्वेन यमबोधकाः । रामानुजः रामावरज इत्यादयः रामपश्चाज्जन्मभाग्वासुदेववाचकाः ।

आश्रयवाचकपूर्व्वपदात् शय, वासिन्, सद्मन्, स्थित, सद्, स्थितादिशब्दाः तदाश्रितवाचकाः । यथा भूमिशयः भूमिवासी भूमिसद्मा भूमिस्थितः भूमिसद् भूमिस्थितः इत्यादयः ।

बधवाचकपूर्व्वपदात् भिद् द्वेषिन् छिद् घ्रग् जिद् घातिन् घ्रुग् रिपु ध्वंसिन् शासनादयः अन्तकदमनदर्पहन् मथनादयश्च तद्घातकवाचकाः । यथा कामभित् कामद्वेषी कामच्छित् कामघ्रक् कामजित् कामघाती कामघ्रुक् कामरिपुः कामध्वंसी कामशासनः इत्यादयः । एवं कामान्तकः कामदमनः कामदर्पहा कामसूदन इत्यादयः शिववाचकाः ।

अथ च प्रायशोऽतिदेशेन तत्तच्छब्दानां तत्तदर्थवाचित्वं यथावसरं दर्शयिष्यते दिङ्मात्रमिहोदाहरणमुक्तम् ।

एवमुक्तप्रकारेण पूर्व्वोत्तरपदयोः परिवर्त्तनेन बहवः शब्दास्तत्तदर्थवाचका भवन्ति । तत्राप्यं विशेषः । वृषादेरुक्षत्वविवक्षायां वृषवाहनादयः प्रयोज्याः, बलविवक्षायां वृषपतिः वृषस्वामी वृषवान् इत्यादयः, चिह्नत्वविवक्षायां वृषाङ्कः वृषलाञ्छन इत्यादयः । अंशादेर्बाहुत्वविवक्षायाम् अंशुमानी अंशुभृत् अंशुधर इत्यादयः, स्वत्वविवक्षायाम् अंशुपतिः अंशुमानित्यादयः । सर्पादेर्वध्यत्वविवक्षायां सर्परिपुः सर्पारिः सर्पघ्ना इत्यादयः । भक्ष्यत्वविवक्षायां सर्पभुक् सर्पभोजनः सर्पाशन इत्यादयः यथायथं प्रयोज्याः ।

द्रव्यजातिवाचकशब्दा अपि चिह्नत्वविवक्षायां तन्निर्मितवस्तुनो वाचका भवन्ति । यथा अर्गलास्त्रिघ्ना दक्षिणाशा, मकरचिह्नः कामः इत्यादयः ।

अयुग्मायुग्विषमादिशब्दाः पूर्व्वपदस्थाः त्रिपञ्चमप्रभृतिवाचकाः । यथा अयुग्मनेत्रः अयुग्मनेत्रः त्रिपञ्चमनेत्र इत्यादयः त्रिनेत्रवाचकाः । अयुग्मबाणः अयुग्मबाणः त्रिपञ्चमबाण इत्यादयः पञ्चबाणवाचकाः । अयुग्मच्छदः अयुग्मच्छदः त्रिपञ्चमच्छद इत्यादयः सप्तच्छदवाचकाः ।

अथ पूर्व्वोत्तरपदयोः परिवृत्तिमहत्त्वाभहत्त्वनियमः ।

तत्र भूभृदादिशब्देषु उभयपदयोः परिवृत्तिमहत्त्वम् । यथा भूभृत् भूमिभृत् क्ष्माभृत् भूधरः भूमिधरः क्ष्माधरः क्ष्मापाल इत्यादयः ।

वारिधिप्रभृतिशब्देषु पूर्व्वपदस्यैव परिवृत्तिमहत्त्वं नोत्तरपदस्य । यथा वारिधिः जलधिः तोयधिः वार्धिः पयोधिः । किन्तूत्तरपदस्य छदन्ततया उपसर्गमात्रेणैव व्यवधानमात्रम् । यथा वारिधिः वारिनिधिः पयोधिः पयोनिधिः जलधिः जलनिधिः इत्यादयः इयांस्तु विशेषः वाहशोपसर्गशब्दपूर्व्वपदस्य प्रयोगोऽस्ति तादृशपूर्व्वकस्यैव न तु सर्व्वोपसर्गपूर्व्वकाणाम् ।

वाड़वाग्न्यादिषु उत्तरपदस्यैव परिवृत्तिमहत्त्वम् । यथा वाड़वाग्निः वाड़वानलः वाड़वादहन इत्यादयः । इत्थंभूताः सर्व्वेऽपि शब्दाः यौगिका एव ।

गोर्व्वाणादिषु उभयोः पदयोर्न परिवृत्तिमहत्त्वमिति तेषां योगरूढ़त्वमेव ।

नञ्पूर्व्वपदा इतरोत्तरपदाश्च गुणवाचकशब्दाः विरोध्यर्थवाचकाः । यथा असितः अशुक्लः इत्यादयः, एवं सितेतरः शुभ्रेतरः इत्यादयः, शुभ्रत्वविरोधिकृष्णत्ववाचकाः एवं अनुष्ण उष्णेतरः इत्यादयः उष्णविरोधिशीतस्पर्शबोधकाः सुखेतरत् असुखमित्यादयः सुखविरोधिदुःखवाचकाः एवम् अपुण्यम् पुण्येतरदित्यादयः पुण्यविरोधिपापबोधकाः ।

इत्येवं नियमावली ज्ञानसौकर्यार्थमादौ प्रदर्शिता यत-दनुसन्धानेन अत्रानुक्ता अतिदिष्टतया तत्तदवसरे उक्तप्रायाश्च शब्दा यथायथम् ऊहनीयाः ।

गुणवाचकशब्दमध्ये शुक्लादिरूप-मधुरादिरस-खरादिस्पर्श-शीघ्रादिवेग—वाचकशब्देभ्यः यथाप्राप्तं विहितमत्वर्थीयस्य तद्धितस्य लुकि व्यक्तेः (विशेष्यस्य) लिङ्गानुसारित्वम् तथा च शुक्लादयः रूपवाचकाः शब्दा गुणपरत्वे पुंलिङ्गाः तदुत्तरात् मत्वर्थप्रत्ययस्य लुका गुणवत्परत्वे विशेष्यलिङ्गाः । यथा गुणे शुक्लः नीलः पीतः रक्त इत्यादि गुणिनि शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् एवं नीलः नीला नीलं पीतः पीता पीतमित्यादि । एवं स्पर्शविशेषे खरादयः क्लीवलिङ्गाः तद्वति त्रिलिङ्गाः । यथा खरं तिग्मं तीक्ष्णमित्यादि तद्वति खरः किरणः खरा दीधितिः खरं तेज इत्यादि । एवं स्पर्शे शीतं शीतलं शिशिरमित्यादि तद्वति शीतस्पर्शः शीता हिमानी शीतं जलमित्यादि । तथा वेगे शीघ्रं त्वरितमित्यादि वेग-वति शीघ्रोऽश्वः शीघ्रा वडवा शीघ्रं यानमित्यादि । एवं रसे मधुरः कटुः अम्ल इत्यादि तद्वति मधुरो गुडः मधुरा द्राक्षा मधुरं क्षौद्रमित्यादि एवं कटु. कट्वी कटु इत्यादयः बोध्याः ।

स्त्रीपुंसवाचकशब्दा अपि अल्पत्वविवक्षायां स्त्रीलिङ्गाः स्युः । यथा घटी पटीत्यादयः खल्पघटादिवाचकाः ।

बहुभिः कोषकारैः शब्दानां लिङ्गानुशासनम् कृतं तदनु-सारेण प्रायेणास्माभिस्तत्तच्छब्दप्रदर्शनसमये लिङ्गान्युक्तानि किन्तु तानि अमूलकानि समूलकानि वा तत्प्रदर्शनाय प्रथमतः पाणि-नीयलिङ्गानुशासनसूत्राणि प्रदर्शितानि तानि च समालोक्य तत्तत्कोषोक्तलिङ्गानां प्रामाणिकत्वाप्रामाणिकत्वे सुधीभिर्विवे-चनीये इति दिक् ।

•

अथ शब्दव्युत्पत्तिदर्शने कारणादि ।

धातुपाठ-गणपाठ-संयुतं
सूत्रपाठमखिलं सवार्त्तिकम् ।
भाष्यमस्य सरहस्यमर्थतो
ये विदन्ति खलु केऽपि ते विदः ॥ १ ॥
उत्तरङ्गो महानक्रवक्रोक्तिचक्रभीषणः ।
शब्दसिन्धुः सदुर्गम्यो दुस्तरोऽकृतबुद्धिभिः ॥ २ ॥
येषां सद्गुरुकर्णधारभजनं प्रज्ञावहित्वागमो-
ऽभ्यासश्चानुगुणो मरुत् प्रतिदिनं शब्दागमाम्भोनिधौ ।
पारं यत्नवशादवाप्य नितरां रत्नानि लभ्यानि तै-
र्दूरात् तीरगतैस्तु दर्शनमिदं क्षीदद्भिराप्यानि किम् ?३
भाष्याद्यागमवारिधौ गुरुहरिप्रोत्साहनाशालिभिः
प्रज्ञावासुकिरज्जुकर्षणयुजा यत्नौघमन्थाद्रिणा ।
उत्मार्हैर्गुरुकैयटादिवचनैरालोड़िते तत्सुधाम्
व्युत्पत्तिं सुमनोभिरेत्य सुतरां चित्ते परं निर्वृतम् ॥४॥
नो चक्षुषापि कलिता किल कौमुदी यै-
र्भाष्यादिदीपनिवहोऽधिगतो न वा यैः ।
येषाञ्च पाणिनिमतार्कसमागमो नो
तेषां तमःप्रचय एव न चास्य शान्तिः ॥ ५ ॥
यैर्वीक्षिता नोज्ज्वलदक्षवृत्ति-
र्नो काशिकावृत्तिरथाध्यगामि ।
नालोकिता यैर्गणरत्नवृत्ति-
स्तेषां तमःशान्तिरुदेति कस्मात् ? ॥ ६ ॥
पाणिन्यागमसूर्य्येण शब्दाकाशो विकाश्यते
न तु खद्योतमात्रेण खल्पव्याकरणादिना ॥७॥
कल्पद्रुमात् फलचयो यदि सौरभं वा
लभ्येत वाञ्छितमथार्थकदम्बकं वा ।
शब्दानुशासनमृते न तदंशबोध-
स्तच्चापि पाणिनिमतन्तु भिन्नशास्त्रम् ॥ ८ ॥
भाष्याद्यागमनामगन्धमपि ये नाघ्रातवन्तो मनाक्
ते व्युत्पत्तिनिदर्शने यदि रताः किन्नाम ? चित्रं ततः ।

आस्तां तव कुमारभाववशतः प्रौढ्या प्रवृत्तिर्हठात्
दौर्भाग्यं वत वङ्गभूमिवसतेस्तत्रादरो यन्मनाक् ॥ ९ ॥
कथञ्चित् मुग्धबोधस्य पाठमात्रमदीक्षितैः ।
काव्यमात्रसमालोकात् व्युत्पत्तेर्दर्शनं कथम् ? ॥ १० ॥
उक्तशास्त्रैकशरणाः हरिसौरभलोभतः ।
कुमाराश्चेत् प्रवर्त्तेरन् प्रवर्त्तन्तां हठान्विताः ॥
तदाकर्ण्यादरकृतः शोचनीया परं जनाः ।
दौर्भाग्यात् वत वङ्गानां बालवाक्ये समादरः ॥ ११ ॥

अत एव प्राचीनैरुक्तम्—

"अहह्व भाष्यकारस्य कुशाग्रीयधियावभौ
नेव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः" ॥ इति ।
पदवाक्यप्रमाणज्ञा ये रायमुकुटादयः ।
प्रमत्तास्तेऽपि यत्रासन् बालास्तत्रालमद्भुतम् ॥ १२ ॥
अहोचित्रमहोचित्रमहोचित्रमहोदयः ।
पाणिन्याद्यनभिज्ञैर्यैः व्युत्पत्तीनां प्रदर्शनम् ॥ १३ ॥
दुग्धभात्तसुबालानां महाहिखेलनं यथा ।
अज्ञातशास्त्रतत्त्वानां शब्दव्युत्पादनं तथा ॥ १४ ॥
कोषालोकादर्थजातं काव्यालोकादुदाहृतेः ।
दर्शयेयुः कुमाराश्चेत् न च तत्र चेतिर्मनाक् ॥ १५ ॥
शास्त्रे व्युत्पादिताः शब्दा अन्यथा दर्शिता यदि ।
विश्वासात् खलु तदाकर्ण्येष्वन्येषां महती क्षतिः ॥ १६ ॥
सभीरुकारिणो ये तु लज्जाभीतिसमन्विताः ।
यथाज्ञानं प्रवर्त्तन्ते नाज्ञातविषये क्वचित् ॥ १७ ॥
कल्पद्रुमादिकर्त्तारः स्वज्ञानाद्यनुसारतः ।
शब्दार्थदर्शने रक्ता न तु व्युत्पत्तिदर्शने ॥ १८ ॥
येषां चित्ते भृशं लज्जा हासभीतिश्च वर्त्तते ।
न ते तथा प्रवर्त्तन्ते प्रवृत्ता बालका यथा ॥ १९ ॥
पाणिन्याद्यनुसारेण शब्दसाधनतत्पराः ।
भवेयुश्चेत् तदा लोके शोभन्ते नान्यथा क्वचित् ॥ २० ॥
यदि बालाश्रमे चित्ते न मनाग्जायते घृणा ।
तदान्यचक्षुषमार्गेण धावनं परिशोभते ॥ २१ ॥
स्वयमज्ञाततत्त्वानामन्यचक्षुषपथश्रिताम् ।
लेशतोऽतिक्रमः क्लृप्तो हासाय खलनाथ च ॥ २२ ॥
परोत्कीर्णपथक्रान्था आत्मानं दूरसाधनात् ।
मूलचर्चातरुच्छायारहित्वात् निर्वृतिः कुतः ? ॥ २३ ॥
अन्धानामिव मार्गयानविषय येषां परोक्षं परं
मूलं, ते खलु मार्गदर्शननिधावन्यस्य शक्ताः किम् ? ।
येषां तद्वचने समादरवरस्ते कोऽपि लाजाधमा
जाता अन्यतमास्ततोऽद्य वसुधा प्रायोऽन्यतामेष्यति ॥ २४ ॥
यस्मिन् रुचिर्भवेत् यस्य स तत्रैव प्रवर्त्तताम ।
निरङ्कुशरुचिर्लोको न वाग्वश्यो हि कस्यचित् ॥ २५ ॥

परिशेषे इदमपि स्मार्य्यते—

"प्रायः शास्त्रमधीते कश्चन तनुते निबन्धमपरं ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः"
अनेके चेत् कोषकाराः स्वस्वबुद्धिप्रभावतः ।
चक्रुः कोषानपि तथा गतार्थो न मम श्रमः ॥ २६ ॥

तत्रेदं प्राचीनपद्यं स्मार्य्यते—

"परिष्कुर्वन्त्वर्थान् महदयपुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्राः संक्षोभं विदधति पयोधेः पुनरमो
किमेतेनायासो भवति ? विफलो मन्दरगिरेः" ॥
भाष्याद्याशयबोधनैकसरणिं वाक्यप्रदीपं महद्
दृष्टीदृग्द्योतसमन्वितं सुविपुलं भाष्यप्रदीपं तथा ।
पाणिन्यादिकशाकटायनकृते वृत्त्यादिते वार्तिकं
पर्य्यालोच्य समादरादिह मया व्युत्पत्तिरादर्शिता ॥ २७ ॥
रूढ़ानामपि रूपसाधनकृते कोषादिटीका मया
बङ्गीदृग्वृतता समाहृतवता तामप्यहं सारं परम् ।
लोकानां हितकाम्यया रचितो ग्रन्थः श्रमात् सुक्रमो
विद्वांसोऽस्य विलोकने यदि रताः स्यान्मे श्रमः सार्थकः ॥ २८ ॥
जिज्ञासूनां बोधनार्थं सम्यग्व्युत्पत्तिसंयुतम् ।
नानाशब्दान् समाहृत्य वाचस्पत्यं मया कृतम् ॥ २९ ॥
सुगमं सुक्रमं वेद—लोकशब्दार्थबोधकृत् ।
वाचस्पत्यमदो वीक्ष्य वाचस्पत्यमवाप्यताम् ॥ ३० ॥

वाचस्पत्यम्।

अ पु०अवति रक्षति अतति सातत्येन तिष्ठतीति वा अव-अत-वा ड। विष्णौ "अकारोविष्णुरुद्दिष्टउकारस्तु महेश्वरः। मकारस्तु स्मृतोब्रह्मा प्रणवस्तु त्रयात्मक" इति। अस्य (विष्णोः) अपत्यम् अत इञ् इः (कामः) अस्य (विष्णोः) पत्नी ङीप् ई (लक्ष्मी)।

अ अव्य० अव-प्रीणनादौ ड स्वरादिपाठाद्व्ययत्वम्। अभावे, प्रतिषेधे सदृशेऽर्थे अनुकम्पायां, सम्बोधने, अ अनन्त!। अधिक्षेपे, अ पचसि त्वं जाल्म!। "उपसर्गस्वरविभक्ति-प्रतिरूपकाश्चेति" स्वरादिगणसूत्रे अ इति सिद्धान्त-कौमुद्यामुदाहृतं मनोरमायाञ्च अ संबोधने अधिक्षेपे निषेधे चेति व्याख्यातम्। "अभावे नञ्नोन" इत्यमर-टीकायां नञादेशोऽयमित्युक्तम्। स च आदेशः नखनसुच्या-दिभिन्नशब्दघटके उत्तरपदस्थे हलादौ शब्दे परे भवति। स तु नञर्थे एव स्यानित्यल्पार्थकत्वादादेशस्य। नञर्थाश्च

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

इत्युक्तेः षड्विधाः। तत्र अब्राह्मणमित्यादौ ब्राह्मणसादृश्य-वत्त्वेन क्षत्रियादीनां बोधकता, अघटमित्यादौ घटा-भावस्य, अपटमित्यादौ पटभिन्नस्य, अनुदरा कन्येत्यादौ अल्पोदरत्वस्य, अपशवो वै अन्ये गोऽश्वेभ्यइत्यादौ गवाश्व-भिन्नपश्वनामप्राशस्त्यस्य, असुरः असितइत्यादौ च सुरसित विरोधस्य बोधकता। तत्रायं विशेषः नञः सर्व्वत्र अभावे भेदे च शक्तिः सादृश्यादौ तु निरूढलक्षणा। तत्र अघट-मित्यादौ अव्ययीभावे, अधन इत्यादौ बहुव्रीहौ भाव इदन्तोत्तरपदके "अभेदः अज्ञानमित्यादौ" नञ्तत्पुरुषे च अभावबोधकता। भावक्तदन्तभिन्नोत्तरपदनञ्तत्पुरुषे तु अघट इत्यादौ भिन्नत्वबोधकतेति। अतोदं बोध्यम्। समासे हलादौ उत्तरपदे नञः स्थाने अ इत्यादेशविधानेन समासएवास्य नञर्थकस्य अइत्यस्य प्रयोगः नान्यथा, सम्बो-धनादेरर्थकस्य तु पृथक्प्रयोगः किन्तु "नञोनलोपस्त्रिङि क्षेपे" इति वार्त्तिकेन तिङन्तपदे परेऽपि नञादेशस्य विधा-नात् तस्यैव पृथक्प्रयोगः। अधिकं नञ्शब्दार्थावसरे वक्ष्यते। अजीवनिरित्यादौ अधिक्षेपार्थकता अजसुमित्यादौ उप० स०। तस्य च क्रियायोगात् प्रतिषेधार्थकता।

अक्षणिन् त्रि० न क्षणी नञ् त० क्षकारस्यात् हलन्त्वा-भ्युपगमात् न नुट् नलोपमात्रम्। क्षणिभिन्ने, क्षणशून्ये,।

दिवसाष्टमे भागे शाकं पचति यो नरः।
अक्षणी चाप्रवासी च स वारिचर! मोदते इति भारतम्

हलन्तानाश्रयणे नुटि अक्षणीत्यपि तत्रैवार्थे।

अंश विभाजने अद० चु० उभ०। अंशयति ते आंशिशत् त। अङ्गापयतीतिवत् आधुकि अंशापयतीत्येके। अच् अंशः उ-अंशुः णिनि अंशी क्त अंशितः।

अंश पु० अंश-भावेऽच्। विभागे "सकृदंशो निपतति सकृत्-कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत् सकृदिति स्मृतिः। कर्म्मणि अच्। विभाज्ये "द्व्यंशौ प्रतिपदोत विभजन्नात्मनः पितेति" "द्व्यंशहरोऽङ्गहरो वा पुत्रवित्तार्জ্জनात् पितेति" च स्मृतिः। संख्याशून्यकाङ्क्षाविभाज्ये तथाङ्के, च "अन्योन्यहाराभिहतौ हरांशाविति" अंशाहृति-श्छेदवधेन भक्तेति" भजेश्छिदोऽशैरथ तैर्विभिन्नैरिति च श्रीधा०। करणे अच्। अवयवे "अंशुरंशुष्टे देव! सोमाप्यायस्वेति" यजु०। अंशुरंशुः सर्व्वोप्यवयव इति वेद-दीपः। "अंशिनः स्वांशगात्यन्ताभावं प्रति स्वत्वात्तेति" वेदान्तपरि०। "अंशो नानाव्यपदेशादिति" शारीरक सूत्रम्, जीवस्य निरवयवब्रह्मावयवत्वाभावमाशङ्क्य भाष्य-कृता अंश इवेति व्याख्यातम्। तत्प्रमाणार्थकं "ममैवांशो जीवलोके जीवभूतः सनातन" इति गीतावाक्यम्। "चतु-र्द्दश्यष्टमांशे च क्षीणो भवति चन्द्रमाः अमावास्याष्टमांशे च ततः किल भवेदृणमिति, स्मृतिः। विशेषावयवे, राशि-चक्रस्य षष्ट्युत्तरशततमयथा विभाजके भागे, राशेस्त्रिंशद्भा-

विभाजके अवयवे, "अत्तस्त्रांशाः समाख्याताः षष्ठ्युत्तरशतत्रयमिति "क्षेत्रं क्षेत्रा च द्रेक्काणं नवांशोद्वादशांशकः। त्रिंशांशश्चेति विज्ञेयः षड्वर्ग इति च ज्योतिषम् नवमितोऽंशः (राशेस्त्रिंशभागः) नवांशः एवं द्वादशांशादयः। स च अंशः षष्टिकलात्मकः कला तु षष्टिविकलात्मिका। नवभिर्विभक्ते राशेः त्रिंशात्मके नवांशे च। "द्विभर्तृका मेषनवांशके स्यात्" इत्युपक्रम्य "निःस्वा वृषांशे" इति, "त्रिगुणा घटांशे" इति च व्यवहारचमत्कारः। ६, १, २०३ पा० सू० इषादिषु पाठात् अस्य आद्युदात्तत्वम्।

अंशक त्रि० अंश-स्वार्थे कन्। विभाजके। स्त्रियाम् अंशिका। ज्ञातौ दायादे पु० अंश+स्वार्थे कन्। अंशशब्दार्थे "त्रिंशांशकस्तथा राशे र्भाग" इत्यभिधीयते इति ज्योतिषम् नवमिते राशित्रिंशभागात्मके नवांशे, "द्विभर्तृका मेषनवांशके स्यात् इत्युपक्रम्य" "वृषांशके सा पशुशीलयुक्ते"ति सिंहांशके सा पित्तवासंस्थितेति, च ज्यो० सौरदिने न०।

अंशल त्रि० अंश+बलोपाधिके मत्वर्थे लच्। बलवति। अंशं लाति ला+क। अंशग्राहके त्रि०।

अंशसवर्णन न० समानोवर्णः योगवियोगयोग्यता सवर्णः ततः करणार्थे णिचि भावे ल्युट् सवर्णनम् अंशयोः अतुल्यच्छेदयोः राश्योः समच्छेदकरणम् ६त०। लीलावत्युक्ते अतुल्यच्छेदराश्योः योगवियोगयोग्यतासम्पादके समच्छेदसाधने क्रियाविशेषे, तत्प्रादर्शनमत्रोदाहरणम् "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवमिति लीलावत्युक्तम्।

अंशहर त्रि० अंशं हरति हृ-अच्। अंशहारके "द्वंशहरोऽर्द्धहरो वा पुत्रविभाज्जनात् पितेति" स्मृतिः। अनुद्यमने एव हृञोऽच् इति नियमात् अन्यत्र अण्। भारहारः।

अंशावतरण न० ६त०। भारते आ०प०६४अ० उक्ते देवानां स्वस्वभागविशेषेण वासुदेवादिरूपेण पृथिव्यामाविर्भावेन नरदेहग्रहणरूपे अवतरणे।

अंशिन् त्रि० अंश-णिनि। अंशकारके "पुनर्विभागकरणे सर्वे वा स्युः समांशिन" इति स्मृतिः अंश+मत्वर्थे इनि। अवयविनि। "अंशिनः स्वांशगात्यन्ताभावं प्रति स्वात्मतेति" वेदान्तपरिभाषा।

अंशु पु० अंश-कृग० कु। किरणे रश्मौ सूर्यांशे प्रकाशे प्रभायां वेगे च "अंशवोऽत्र पतिता रवेः किम्"? इत्युद्भटः "सूर्यांशुभिर्भिन्नमिवारविन्दमिति" कुमा०। तत्र स्वपरप्रकाशकस्य तेजःपदार्थस्य समन्तात् प्रसृतः सूर्यतेजस्यः किञ्चिच्चिविडः सूक्ष्मांशविशेषः किरणः, स च प्रायशः सूर्यस्य, तस्य तेजसा प्रदीप्तचन्द्रादेश। तदपेक्षया अल्पस्थानप्रसारी किञ्चिद्विरलः स्वर्गायोग्यः तेजःसूक्ष्मांशः प्रभा, सा च रत्नादिरूपः। चन्द्रादेस्तु अन्यापेक्षयाऽधिकप्रसृतत्वात् किरणसञ्ज्ञः अतएव तत्र शीतांशुः सितकिरण इत्यादिप्रयोगः। स्वर्गयोग्यः तेजःपदार्थस्य किरणादपि निविडः सूक्ष्मांशः आतपः, किरणापेक्षया अतिविरलप्रसारी स्वर्गायोग्यः परप्रकाशसाधनसमर्थसूक्ष्मांशविशेषः आलोकः। प्रभायाम् आलोके वा न स्वर्गीऽभिधीयते। तत्र अंशुशब्दस्य किरणवाचित्वे सहस्रांशुः उष्णांशुः शीतांशुरित्यादयः। प्रभापरत्वे रत्नांशुः मणांशुरित्यादयः। "अजस्रमाश्रितरत्नांशुगतोऽस्माद्भुजगांशुभिन्नयेति" "द्विजावलीबालविभाकरांशुभिरिति" च माघः। सूत्रांशुपरत्वे अंशुकं पट्टांशुकं कौशेयांशुकमित्यादयः। प्रकाशपरत्वे उपांशु मन्त्रमकारणत्वाच्चास्य गुप्तत्वं प्रतीयते तत्रार्थिकम्। मूलावयवभागपरत्वे प्रांशुः प्रोन्नतापयत्वाच्चास्य दीर्घत्वं प्रतीयते तत्रार्थिकम् इति।

अंशुक न० अंशवः सूत्राणि विद्यतेऽस्य अंशु+अर्शआदि० क। वस्त्रे। "यत्तांशुकाक्षेपविलिप्तमानमिति" कुमारः। सूक्ष्मवस्त्रे उत्तरीयवस्त्रे पत्ते (तेजपात) शुक्लवस्त्रे च। अंशु+स्वार्थे कन्। अंशुशब्दार्थे पु०।

अंशुधर पु० धृ-अच् ६त०। सूर्ये अंशुभटादयोऽत्र किरणादिधारके वेगधारके च त्रि०।

अंशुपट्ट न० अंशुना सूक्ष्मसूत्रेण पट्टं पट्टम्। सूक्ष्मसूत्रघटितपट्टवस्त्रे। "श्रीफलैरंशुपट्टानामिति" विश्वः।

अंशुपति पु० ६त०। सूर्ये, तस्य सर्वतेजस्विनां किरणाधायकत्वात् चन्द्रादिप्रहादौ तेजोदायकत्वाच्चास्य तथात्वम् अतएवोक्तं बृहत्संहितायाम् "सकिलमये यस्मिन् रवेर्दीधितय" इति "मूर्तित्वे परिकल्पितः ग्रहगणे" इति बृहज्जातके च। "अस्मिं वायादित्यः सायं प्रविशतीति" "उद्यन्तं वायादित्यमस्मिन्नुपसमारोहतीति" च श्रुतौ अग्नौ सूर्यांशुप्रवेशाभिधानम्। अत एव मांसे तस्य स्थितं प्रतिपन्नं तस्मात्तमये तासामनुसरणार्थं व्यञ्जनप्रवेश उक्तः। यथा "कविधाग्नि भर्तरि भूयं विभजाः परलोकमभ्युपगते विविशुः। व्यञ्जनं त्विय इति"। एवं अंशुस्वामी त्विट्पतिप्रभृतयोऽप्यत्र।

अंशुमत् पु० अंशु+अस्त्यर्थे मतुप्। सूर्ये, अंशुमाद्भादयो-

त्व। सूर्य्यवंश्ये असमञ्जःपुत्रे दिलीपजनके राजभेदे तत्कथा रा०आ०४३अ०। अंशुमति पदार्थमात्रे त्रि०।

अंशुमती स्त्री० अंशु रूक्षं पत्रमस्याः अंशु+मतुप्+ङीप्। शालपर्य्याम् (शालपान्)।

अंशुमत्फला स्त्री० अंशुमानिव रक्तं फलं मोचकं यस्याः जातिवाचकत्वेऽपि फलान्ततया नङीष् अजा०टाप्, अंशुमानिव समन्तात् प्रसृतं फलतीति फल-अच् वा। कदलीवृक्षे।

अंशुमालिन् पु० अंशुभिर्मलते संबध्नाति मल-णिनि ३त०, अंशवः मालेव ततः अस्त्यर्थे इनि वा। सूर्य्ये, द्वादश संख्यायाञ्च। किरणादिजालवति त्रि० स्त्रियां ङीप्।

अंशुल पु० अंशुं प्रभां बुद्धिप्रतिभां लाति ला-क। चाणक्ये मुनौ, मुनिमात्रे च। अंशुग्राहके त्रि०।

अंशुहस्त पु० अंशुः किरणोहस्त इव जलाद्याकर्षणसाधनं यस्य। सूर्य्ये। "शरैरहस्तैरिवोदीच्यान् उदरिष्यन् रसानिवेति" रघौ सूर्य्यकिरणानां रसाकर्षकत्वस्य द्रष्टान्तविधयोक्तत्वादस्य किरणस्य रसाकर्षकत्वाङ्गत्वम्। तस्य च सहस्रांशूनां रसाकर्षकत्वमग्रे सहस्रांशुशब्दे वक्ष्यते।

अंश्वादि पु०। ब०। स्वरविशेषार्थं पाणिनिगणपाठोक्ते शब्दसमूहे, "प्रतेरंश्वादयस्तृतीयायाम्" (६,३,१९३ पा०) स च गणः अंशु जन, राजन्, उष्ट्र, खेटक, अजिर, आर्द्रा श्रवण, कृत्तिका अर्द्धपुर।

अंस विभाजने अद०चु०उभ०अंसयति ते आंसिसत् त। आधुकि अंसापयतीत्येके। वि+विश्लेषकरणे प्रच्यावने च "व्यंसयामास तत् सैन्यमिति" भारतम्। अच् अंसः।

अंस पुं अंस-कर्म्मभावादौ अच्। अंसयत्यर्थे, स्कन्धे च। "अंसनिषक्तबाहुः" "अंसारोपितचामेनेति" शान्तोऽपि स्कन्धे।

अंसत्र न० अंसं स्कन्धं त्रायतेत्र-क। स्कन्धावरके कवचभेदे।

अंसकूट पुंन० अंसः कूट इव दृढत्वात्। दृढत्वस्कन्धे "राजन्योऽसांसकूटक्रथनपटुरटद्घोरधारः कुठार इति प्रबोध०

अंस(से)भार पु० अंसे धृतः भारः ष०त० वा अलुक्। स्कन्धधृतभारे। [इन्। स्कन्धभारहारके, स्त्रियां ङीष्।

अंस(से)भारिक त्रि० अंस(से) भारेण हरति भक्षा०

अंसल त्रि० अंस+बलोपाधिके अस्त्यर्थे लच्। बलवति।

अंस्य त्रि० अंसे भवः अंस+यत्। स्कन्धभवे, "ये अंस्या ये अङ्ग्याः सूचिका" इति वेदः। अंस-कर्म्मणि यत्। विभाज्ये त्रि०।

अंह भासने अद० चु० उभ०। अंहयति ते आंजिहत् त।

अंहति स्त्री० हन्ति दुरितमनया हन-अति, अंहादेशः। दाने।

अंहस् न० अमति गच्छति प्रायश्चित्तेन अम-असुन् हुक् च। पापे "सङ्कल्पंहस" इति वेदः स्वधर्म्मत्यागे "लोभोऽनृतं चौर्य्यमनार्य्यमंहो ज्येष्ठा च माया कलहश्च दण्ड" इति भागवते कलिं प्रति परीक्षिद्वाक्यम् अंहः स्वधर्म्मत्यागः इति श्रीधरस्वामिरघुनन्दनादयः।

अंहिति स्त्री० अहि-क्तिन् पृषोदरादित्वात् दृट्। दाने।

अंहु त्रि० अहि-मुम० कु। पापकारिणि। "आ वोऽर्वाचो सुमतिर्वृत्वादंहोश्चिद्या" इति (व० ८, ७) "अंहोः" पापकारिणः हननशीलस्येति वेददीपः।

अंहुर त्रि० अहि-मङ्गुरादि० उरच्। गतियुक्ते "सप्त मर्य्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्" इति वेदः।

अंहि पु० अंहति गच्छत्यनेन अहि-वङ्ग्रादि० क्रिन्। पादे वृक्षादीनां मूले, तेन अंहिपो वृक्षः। चतुःसंख्यायाञ्च।

अंहिप पु० अंहिणा मूलेन पिबति सिक्ततोयम् पा-क। वृक्षमात्रे। [उपरिभागे च।

अंहिस्कन्ध पु० अंहेः स्कन्धइव। गुल्फेऽङ्गुष्ठाङ्गुलिमध्यभागस्थ

अक वक्रगतौ भ्वा० प० घटादि। अकति आकीत्। अकयति।

अक न० न कम् सुखम् गुणवचनस्य नञ्योगे विरोध्यर्थाभिधायिता न० त०। दुःखे। नास्ति कं सुखं यस्मात्। पापे। नाकशब्दे अकं दुःखं पापं वा।

अकच पु० अकाय दुःखाय चायते चाय-ड। केतुग्रहे तस्य चोदयेन लोकोपप्लवस्य शास्त्रप्रसिद्धिः केतुशब्दे विस्तरः। "उपप्लवाय लोकानां धूमकेतुरिवोत्थित इति कुमा०। नास्ति कचोयस्य। केशशून्ये (टाकरोगयुक्ते) त्रि०।

अकडम न० अ,क,ड,म, इत्यादिक्रमेण आद्यकोष्ठादौ वर्णसङ्घातोऽस्त्यत्र अच्। शास्त्रगोपालमन्त्रस्य शुभाशुभविचारोपयोगिनि चक्रभेदे। तत्स्वरूपं यथा रुद्रयामले—"रेखात्रयं पूर्ब्बपरे मध्ये रेखात्रयं लिखेत्। चतुष्कोणे चतूरेखाऽकडमं चक्रमण्डलम्। भ्रामयित्वा महाचक्रं निर्म्माय वर्णमालिखेत्। अकारादिक्षकारान्तान् क्लीवहीनान् लिखेत्ततः। एकैकक्रमतो लेख्यान्मेषादिकटधान्तकान्। वामावर्त्तेन गणयेत् क्रमशो वीरवल्लभ!। दक्षमार्गेण गणयेन्नामादिवर्णकादिकान्। मेषादितोऽहि नामान्तं क्रमशः मन्त्रपण्डितः। सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादिकान् पुनः। नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके। सुसिद्धस्त्रिसप्तनौ रुद्रे वेदाष्टद्वादशे रिपुः" इति। (क्लीववर्णाः ऋ ॠ ऌ ॡ वर्णाः)

"गोपालेऽस्मिन् स्मृतमिति" तत्रैवोक्तम्। एतच्च गोपालमन्त्रविषये सिद्धादिचक्रत्वेन व्यवह्रियते।

अकथह न० अ,क,थ,ह, इत्यादिवर्णसंघक्रमेण वर्णसमुदायोऽस्यस्मिन् अच्। तन्त्रोक्तमन्त्रग्रहणार्थं तत्तन्मन्त्राणां शुभाशुभविचारोपयोगिनि चक्रभेदे तत्स्वरूपं यथा रुद्रयामले। "वक्ष्येऽकथहचक्राख्यं सर्व्वचक्रोत्तमोत्तमम्। यस्य विचारमात्रेण कामरूपी भवेन्नरः॥ तत्प्रकारं वीरनाथ। क्रमशः क्रमशः शृणु। चतुरस्रे लिखेत् वर्त्तान् चतुःकोष्ठसमन्विते॥ चतुःकोष्ठ-चतुष्कोष्ठचतुष्टं हसमन्वितम्। मन्दिरं षोड़शं प्रोक्तं सर्व्वकर्म्मार्थसिद्धिदम्॥ चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्। पुनश्चतुष्कं तत्रापि लिखेद्वीमान् क्रमेण तु॥ सर्व्वेषु शृष्टमध्येषु प्रादक्षिण्य क्रमेण तु। अकारादिक्षकारान्तान् लिखित्वा गणयेत्ततः॥ चन्द्रमग्निं रुद्रवर्णं नवमं युगलन्तथा॥ वेदमङ्कं दश रसं वसुं षोड़शमेव च। चतुर्दशं भास्करं च सप्तपञ्चदशेति च॥ वह्नीन्द्र कोष्ठगं वर्णपञ्चाशैकं मयोदितम्। एतदङ्कस्थितान् वर्णान् गणयेत् तदनन्तरम्॥ नामाद्यक्षरमारभ्य यावत् मन्त्रादिमाक्षरम्। चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥ पुनः कोष्ठगकोष्ठेषु सध्यतो नामकादितः। सिद्धः साध्यः सुसिद्धोऽरिः क्रमशो गणयेत् वर्णौ॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः। सुसिद्धो भक्षणाज्ज्ञानी शत्रुर्हन्ति चिरायुषम्। सिद्धस्तु बान्धवः प्रोक्तः साध्यः सेवक उच्यते। सुसिद्धः पोषकः प्रोक्तः शत्रुर्घातक उच्यते। सिद्धकोष्ठस्थिता वर्णा बान्धवाः सर्व्वकामदाः। जपेन बन्धुः सिद्धः स्यात् सेवकोऽधिकसेवनात्॥ पुष्णाति पोषकोऽभीष्टं घातको नाशयेत् ध्रुवम्। सिद्धो यथोक्तकालेन द्विगुणात् सिद्धसाध्यकः॥ तत्सुसिद्धोऽर्द्धजप्येन सिद्धारिर्हन्ति बान्धवान्। साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः॥ तत्सुसिद्धो द्विगुणजपात् साध्यारिर्हन्ति गोत्रजान्। सुसिद्धसिद्धोऽर्द्धजपात् तत्साध्यो द्विगुणाधिकात्। तत्सुसिद्धो भक्षादेव सुसिद्धारिः सगोत्रहा॥ अरिसिद्धः सुतान् हन्यात् अरिसाध्यस्तु कन्यकाः। तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्ति साधकमिति"॥ एतच्च सर्व्वमन्त्रेषु सिद्धादिचक्रत्वेन व्यवह्रियते।

अकनिष्ठ पु० अके वेदनिन्द्यरूपे पापे निष्ठाऽस्य। बुद्धे। न० त०। कनिष्ठभिन्ने ज्येष्ठे मध्यमादौ च त्रि०।

अकनिष्ठप पु० अकनिष्ठान् बुद्धान् पातीति पा-क। बुद्धाधिपभेदे। न० त०। कनिष्ठभिन्नपालके त्रि०।

अकम्पित पु० कम्पितं बुद्धिदृष्टेश्चालनं तन्नास्ति यस्य। बुद्धभेदे। कपि-कर्त्तरि क्त न० त०। सङ्कल्पितवस्त्वव्यऽनुपरते दृढ़ाध्यवसाये त्रि०। भावे क्त न० ब०। कम्पनशून्ये त्रि०।

अकरण न० कृ-भावे ल्युट् अर्थाभावे न० त०। करणाभावे निदर्शनौ "अकरणे प्रत्यवायानुवन्धित्वं नित्यत्वमिति" मीमांसकादयः। "अकरणात् मन्दकरणं श्रेय" इति स्मार्त्ताः अकरणञ्च नञ्यादिमते करणाभावः, मीमांसकमतेऽन्तिमते निदर्शनम्। अत एव अदृष्टयां मांसं नाश्नीयादित्यादौ सर्व्वत्र निषेधसमभिव्याहृतक्रियाविषयकनिवृत्तावेव विध्यर्थान्वयः इत्युक्तं मीमांसकैः। शङ्कराचार्य्येण च "नासतो विद्यते भावोनाभावो विद्यते सतः" इति गीता श्लोकभाष्ये महता प्रबन्धेन सत्पदार्थादभावोत्पत्तिं निरस्यता निषेधस्य निवृत्तिरूपत्वमुररीकृतम्। निवृत्तिस्य प्रवृत्तिविरोधी भावरूपोधर्म्मविशेषः। नास्ति करणं देहेन्द्रियादिकमस्य। सर्व्वकरणशून्ये परात्मनि पु०। "अपाणिपादोजवनोग्रहीतेत्यादि" श्रुतौ तस्य सर्व्वकरणशून्यत्वमुक्तम्।

अकरणि स्त्री० नञ्+कृ-ञ्याक्रोशे अनि। करणं मा भूदित्याक्रोशात्मके शापे। "तस्माकरणिरेवास्तु" इति।

अकरा स्त्री० अकं दुःखं सेवनात् लोकानां राति ददाति नाशयतीति रा-क। आमलक्याम्। नास्ति करोऽस्य। करशून्ये त्रि०। न करोति कृ-अच् न० त०। कारकभिन्ने करणशून्यभिन्ने निदर्शनपरे च त्रि०।

अकरुण त्रि० नास्ति करुणा यस्य यत्र वा। दयाशून्ये दैन्यशून्ये च।

अकर्कश त्रि० न कर्कशः। कार्कश्यविरोधिमृदुत्वयति बोधके

अकर्ण त्रि० नास्ति कर्णोऽस्य। अवणेन्द्रियशून्ये "पश्यत्यकर्ण" इति श्रुतिः। सर्पे पु० तस्य चक्षुषैव श्रवणात्तदिन्द्रियशून्यत्वम्। राधेयः कर्णः तद्भृत्ये त्रि०। "अमर्षणमकर्णं वा जगदद्येति निश्चितमिति" भारतम्।

अकर्त्तन त्रि० उन्नस्यं नासं कर्त्तितुं शीलमस्य कृत-ल्युच् न० त०। उन्नविरोधिक्षुद्रत्ववति खर्वे। कृत-भावे ल्युट् न० ब०। छेदनाकर्त्तरि त्रि०।

अकर्त्तव्य त्रि० कृ-कर्म्मादौ तव्य न० त०। करणानर्हे निषिद्धे पदार्थे। भावे क्त न० ब०। क्रियाशून्ये कूटस्थे चैतन्ये न०। "न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चनेति" गीतायामीश्वरस्य सर्व्वक्रियानिषेधात् तथात्वम्।

अकर्त्तृ त्रि० कर्त्तृ+न० त०। कर्त्तृभिन्ने कर्त्तृसदृशे कारके

"अकर्त्तरि च कारके" पा० । कर्त्तृभिन्ने, क्रियाशून्ये च "पुरुषोऽकर्त्ता भोक्ता" चेति सांख्यमतम् ।

अकर्म्मक त्रि० नास्ति कर्म्म यस्य ब० कप् । व्याकरणोक्ते कर्म्मशून्ये धातौ, "अकर्म्मणि च भावे चाकर्म्मकेभ्य इति" पा० । "फलव्यापारयोरेकनिष्ठतायामकर्म्मक इति" हरिः । स्त्रियां टापि कापि अतइत्त्वम् अकर्म्मिका । "प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति" हरिः ।

अकर्म्मण्य त्रि० न कर्म्मणे प्रभवति कर्म्मन्+यत् न०त० । कर्म्मानर्हे "अकर्म्मण्य' तिथिमलं विद्यादेकादशीं विनेति" त्रि०त० ।

अकर्म्मन् अ० अपत्यादिवत् अर्थाभावे न० त० । कर्म्माभावे "कर्म्मणोऽपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः । अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणोगतिरिति" गीता अकर्म्मणः अक्रियाया इति तट्टीकायाम् । दुष्टं कर्म्म अप्राशस्त्ये न० त० । दुष्टकार्य्ये अकर्म्मादावभिरत इति स्मृतिः । न०ब० । कार्य्यशून्ये त्रि० "अकर्म्मा दस्युरभित" इति वेदः ।

अकल पु० नास्ति कलाऽवयवोऽस्य । निरंशे परमात्मनि "चिन्मयस्याद्वितीयस्य निष्कलस्ये"त्युक्तेरस्य तथात्वम् । गीतादिकलाशून्ये, अवयवशून्ये च त्रि० ।

अकल्कन त्रि० कल्कनं दम्भः न०ब० । दम्भरहिते "अकल्कनो निरारम्भः" इति गीता । वैद्यकोक्तौषधपाकविशेषः कल्कनं, तच्छून्ये च । नास्ति कल्कोऽस्य ब०कप् । अकल्ककोऽप्यत्र । अत एव गीतायामकल्कक इत्यपि क्वचित् पाठः ।

अकल्का स्त्री० न कल्कः मलोऽस्यस्य न० ब० । निर्म्मलत्वेन शुभ्रायां ज्योत्स्नायाम् । मलादिशून्ये त्रि० ।

अकल्य त्रि० कल्याय साधुः कला+यत् कल्यः निरामयः न० त० । अस्वास्थ्यवति । कल्यते इति कल-यत् कल्यं कल्पनीयं मिथ्याभूतं न० त० । सत्ये "अपि त्वनीनयदघं नीताशेषशल्यमकल्यसन्ध इति दण्डि० । अकल्यसन्धः सत्यसन्ध इत्यर्थः ।

अकवा त्रि० न कव्यते वर्ण्यते कव-आ न०त० । अवर्ण्यनीये "प्र प्रजायन्ते अकवा मरुद्भिरिति" वेदः ।

अकस्मात् अव्य० न कस्मात् किञ्चित्कारणाधीनत्वं यत्र अलुक् स० । कारणानधीने अतर्कितोपनते । "कथमयमकस्मादाकाशगमनचारिणामाकाशे करुणध्वनिः श्रूयते" इति नाटकम् "सामान्यलक्षणा कस्मादकस्मात् परिलुप्यते" इति यक्षधरः । "अकस्मात् नगरोद्याने कथं धूमायते चितेति" काशा० । पा० चार्वादिगणे तथा पाठात्र न पञ्चम्या लुक् तेन आपतितभवार्थे ठञि टिलोपे आकस्मिक इति ।

अकाण्ड त्रि० न०त० । अनवसरे अनुचितकाले "तातस्यकाण्डे एव प्राणहरप्रतीकारमुपक्रममिति" काद० । अस्य नि० एतदन्तत्वमिति केचित् । ब० । स्तम्बशून्ये वृक्षे पु० ।

अकाम त्रि० न कामयते काम-णिङ्-अच् । इच्छाशून्ये "नाकामो दातुमर्हतीति" स्मृतिः । कामनाविषयफलानभिसन्धायिनि । "अकामो विष्णुकामोवेति" स्मृतिः स्वरविकारशून्ये च । "भयादकामाऽपि हि दृष्टिविभ्रममिति" शक्र० ।

अकामतस् अ० अकाम+पञ्चम्यास्तसिल् । अनिच्छात इत्यर्थे "अकामतः कामचारे चैरवद्दण्डमर्हतीति" स्मृतिः ।

अकाय पु० नास्ति कायोऽस्य । कायशून्ये राहौ तस्य चाक्षुताहरणकाले विष्णुना च्छिन्नमस्तकत्वेऽपि अमृतप्राशनेन अमरणमित्यन्यत्रेयम् । "अमृतास्वादनविशेषाच्छिन्नमपि शिरः किलासुरस्य दृश्यम् । प्राणैरपरित्यक्तं अमृतं यातं वदन्त्येके इति" बृहत्सं० । देहशून्ये त्रि० । परमात्मनि पु० । निष्कलस्याशरीरिणश्चेत्युक्तेरस्य तथात्वम् ।

अकार पु० अ+स्वरूपार्थे कार । अक्षरूपे वर्णे एवमिकारादयोऽपि तत्तद्वर्णस्वरूपेषु । कारः करणं न० ब० । क्रियारहिते त्रि० ।

अकारण त्रि० नास्ति कारणं हेतुरुद्देश्यं वा यस्य । हेतुरहिते उद्देश्यरहिते च "किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते" इति कुमा० "ततोऽकारणवैरी नः "कारणादपरे परे इति" नैषधम् । निष्प्रयोजने च । न० त० । कारणभिन्ने "अकारणगुणोत्पन्ना" इति भाषा० ।

अकारिन् त्रि० अ-णिनि न०त० । कर्त्तृभिन्ने, करणाद्यिच्छे च ।

अकार्पण्य त्रि० नास्ति कार्पण्यं यस्य । दैन्यशून्ये, कृपणताशून्ये च ।

अकार्य्य न० अप्रशस्तं कार्य्यम् अप्राशस्त्ये न० त० । कुत्सितकार्य्ये निषिद्धकार्य्ये च । "अकार्य्यमिव पश्यामि स्वमांसमिव भोजने" । "किमकार्य्यं कदर्य्याणामिति" हितो० । कर्त्तव्यभिन्ने त्रि० ।

अकाल पु० अप्राशस्त्ये न०त० । अप्रशस्तकाले विहितकर्म्मसु पर्य्युदस्तायामभिहिते गुरुशुक्राद्यस्तकालादौ, स च मलमास, गुरुशुक्रबाल्यवृद्धत्वास्तमय, सिंहमकरान्यतरगुरुस्थिति, पूर्व्वराश्यनागतातिचारिगुरुकवत्सर, पूर्व्वराशिसंक्रमिष्यमाणातिचारिगुरुकप्रथमत्रय, वक्रगुरुकाष्टाविंशतिदिवस, भूमिकम्पाद्भुतसप्ताह, सिंहादित्य, गुर्वादित्य, पौषमासचतुष्टयान्य--

तमैकद्वित्रितदधिकान्यतमदिनदृत्त्याकालिकदृष्ट्युत्तरैकत्रिसप्ताहान्यतमदिनादि, रूपो मलमासतत्त्वादयुक्तः तत्तद्विहितकर्म्मसु पर्य्युदस्ततयाऽभिहितः कालः एतत्प्रमाणानि सम्प्रति प्रसवं मलमासतत्त्वशुद्धितत्त्वचिन्तामण्यादौ द्रष्टव्यानि "अकाले वीक्षितो विष्णुर्हन्ति पुण्यं पुराकृतमिति" पु० । अप्राप्तः अनुचितः कालः श०त० । अप्राप्तकाले "नाकाले म्रियते कश्चित् प्राप्ते काले न जीवतीति" पुराणम् । "अकालजलदोदय" इति रघुः । "अकालमृत्युहरण"मिति तन्त्रम् । "वर्त्त्याधारस्नेहयोगात् यथा दीपस्य संस्थितिः । विक्रियापि हि दृष्टैवमकाले प्राणसंक्षय" इति याज्ञ० । "अकालजन्तु विरसं न धान्यं गुणवत् स्मृत"मिति, वैद्य० । "नाकालदृष्टौ कुर्व्वीत व्रतबन्धशुभक्रियामिति" स्मृतिः अनुचितकाले दृष्टाविति तदर्थः । "वरमेकाब्दृतिः काले नाकाले लक्षकोटयः इति ति०त० । नास्ति कालोपाधिजन्यजातमत्र । जन्यशून्ये प्रलये । "अकालकालमेघमेदुरेति काद० । अप्राप्तः कालो यस्य प्रादिभ्यः धातुजस्येति ब० अन्त्यलोपश्च । अप्राप्तकाले अनुचितकाले पदार्थे त्रि० । कालः कृष्णः न०त० । कृष्णविरुद्धशुभवर्णे पु० । कृष्णविरोधिशुभत्ववति त्रि० ।

अकिञ्चन त्रि० नास्ति किञ्चन यस्य मयूर०त० । निर्धने, "अकिञ्चनः सन् प्रभवः स सम्पदा"मिति कुमा० । दरिद्रे, "अकिञ्चने किञ्चननायिकाङ्के किमारकूटाभरणेन न स्त्रिय" इति नैषधम् ।

अकिञ्चनता स्त्री० अकिञ्चनस्य भावः तल् । संन्यासाङ्गे सर्व्वद्रव्यत्यागरूपे यमविशेषे "व्रतं दानं परिव्रज्या तपसा नियमस्थितिः । अहिंसाऽस्तेयतास्तेयब्रह्माकिञ्चनता यम" इति स्मृतिः ब्रह्म वेदमन्त्रः ईश्वरमननं वेत्यर्थः । निर्द्धनत्वे च । भावे त्व । तत्रैवार्थे न० । "स्थाने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्तीति" रघुः ।

अकिञ्चिज्ञ त्रि० न किञ्चित् जानाति ज्ञा-क अश्राद्धभोजीतिवत् असमर्थस० । किञ्चिदनभिज्ञे, किञ्चिज्ज्ञानशून्ये, अल्पज्ञाने, ज्ञानशून्ये च ।

अकिञ्चित्कर त्रि० न किञ्चित् करोति कृ-अच् असमर्थस० । किञ्चिदकारके क्रियाशून्ये, निष्प्रयोजने च ।

अकुण्ठ त्रि० नास्ति कुण्ठा यस्य । प्रतिबन्धशून्ये, कर्म्मदक्षे च ।

अकुतोभय त्रि० नास्ति कुतोऽपि भयं यस्य मयू०स० । कुतश्चिदपि भयशून्ये ।

अकुप्य न० कुप्यते निखताव्यञ्जकतया-लज्जाकरत्वात् कुप क्यप् नि० कस्य पः कुप्यं रैत्यादि न०त० । स्वर्णे, रूप्ये च ।

अकुमार त्रि० न कुमारः । अतीतकौमारार्धस्थे तरुणे ।

अकुल त्रि० अप्रशस्तं कुलमस्य न० ब० । अप्रशस्तकुले "कुलान्यकुलतां यातीति" मनुः ।

अकुशल त्रि० न कुशलं मङ्गलमस्य । मङ्गलविरोध्यमङ्गलयुक्ते । न०त० । कुशलविरोधिनि अभद्रे न० । दक्षभिन्ने त्रि० ।

अकूपार पु० न कूपमर्हति कूप-अण् । दृक्कत्कक्षमे । न कूं पृथ्वीं पिपूर्त्ति पृ-पालनपूरणयोः अण् वा० दीर्घः, न कृत्सितं पारं गन्तव्यदेशो यस्य वा, पृ०दीर्घः । मङ्कापारे समुद्रे, दूरगामिनि सूर्य्ये च पु० । पृ० । अकूपारोऽप्यत्र ।

अकृत त्रि० कृ-कर्म्मणि क्त न०त० । कृतभिन्ने अन्यथाकृते । "कृताकृतावेक्षणादौ ब्रह्मा ऋत्विक् नियुज्यते" इति याज्ञिकप्रसिद्धिः । "अकृतव्यूहाः पाणिनीया" इति परिभाषा । न कृतो व्यूहः विशेषेण कर्त्तव्यैः विनाशोन्मुखं दृष्ट्वा कृतमपि कार्य्यं नाशयन्तीति तदर्थः सि०कौ० । बलपूर्व्वकृते कृष्णलेख्यपत्रादौ च "सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" मनुः । "बलात् कारितं यानि मनुष्यैस्तान्यकृतानि वः । सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" नैषधम् । पुत्रिकात्वेन अकल्पितायां दुहितरि स्त्री । "अकृता वा कृता वापि यं विन्देत् सदृशात् सुतमिति" स्मृतिः । भावे क्त अभावार्थे न०त० । करणाभावे निवृत्तौ "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चनेति" गीता ।

अकृतज्ञ त्रि० न कृतं जानाति ज्ञा-क असम०स० । कृतोपकाराद्यारके, कृतघ्ने, "आत्मारामाः पूर्णकामाः अकृतज्ञा गुरुद्रुह" इति भागवतम् ।

अकृतिन् त्रि० कृतमनेन कृत+इनि न०त० । कार्य्यालसे क्रियासु पाटवरहिते ।

अकृत्य न० कृ-क्यप् अप्राशस्त्ये न०त० । दुष्टकार्य्ये चौर्य्यादिकरणे । न कृत्यमस्य न०ब० । कर्म्मरहिते त्रि० ।

अकृत्रिम त्रि० न कृत्रिमः न०त० । कृत्रिमभिन्ने स्वाभाविके । "कृत्रिमाकृत्रिमयोर्मध्ये कृत्रिमे कार्य्यसंप्रत्यय" इति परि: "भाषा अकृत्रिमस्नेहरसानुविद्धमिति" ।

अकृत्वा अ० न कृत्वा न+कृ-क्त्वा । करणानन्तर्ये "अकृत्वा कुलसन्ततिमिति" मनुः ।

अकृष्टपच्य त्रि० अकृष्टे क्षेत्रे पच्यते पच-क्यप् ७त० । कृष्टाद्यकृष्टक्षेत्रे पच्यमाने नीवारादौ शस्ये ।

अक्रष्ण पु० नास्ति क्रष्णः मलो यस्य । निष्कलङ्के चन्द्रे "चन्द्रमा वै ब्रह्माऽक्रष्ण" इति श्रुतिः । न०त० । क्रष्णत्व-विरोधिशुभ्रत्वे पु० । तद्वति, शुद्धे च त्रि० । [पुण्यशीले ।

अक्रष्णकर्म्मन् त्रि० न क्रष्णं शुद्धं कर्म्म यस्य । शुद्धकर्म्मकारिणि

अकेतु पु० नास्ति केतुश्चिह्नं यस्य । चिह्नरहिते अज्ञाने, "केतुं क्रण्वन्नकेतवे" इति वेदः य० (२९,३७) अकेतवे अज्ञानायेति वेददीपः । चिह्नध्वजाभ्यां रहिते त्रि० ।

अकौशल त्रि० न-कुशलः अकुशलस्तस्य भवादौ अण् आद्य-चो वा न वृद्धिः । अकुशलभवादौ । आद्यचो वा वृद्धौ आकौशलोऽप्यत्र । कुशलस्य भावः अण्+न०त० । असौष्ठवे न० । [कायति कै क या । मातरि जनन्याम् ।

अक्का स्त्री अक-क, अच्यते इत्यक् अञ्च-क्विप् गतिः तस्यै

अक्त त्रि० अज्यते अनुज-कर्म्मणि क्त । क्षताङ्गने, "अक्तं रिक्तारणां व्यन्तु वय इति" "अक्ताः शर्करा उपदधातीति" च श्रुतिः परिमिते, व्याप्ते, सङ्गते च ।

अक्तु पु० अनुज-तुन् । रात्रौ, तदुपलक्षिते तमसि च "रुद्र दिवा वर्द्धया रुद्रमक्तौ" इतिवेदः ।

अक्त्र न० अनज-बा० क्त्र । वर्म्मणि । [इतिवेदः ।

अक्त्र त्रि० अञ्चु गतौ रक् । स्थिरे । "उदु स्वस्तनवजा नाक्रः"

अक्रम त्रि० नास्ति क्रमः परिपाटी पादः क्रमणं वाऽस्य । परिपाटीशून्ये व्यक्रमे एककाले । "तत्त्वार्थक्रियाचारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्तीति" सर्व्वद० पादशून्ये आक्रमणशून्ये च । क्रम-भावे वज् अभावार्थे न०त० । क्रमणाभावे पु० । अ-व्ययीभावः । क्रमाभावे अव्य० ।

अक्रान्ता स्त्री न क्रम्यते स कथङ्काद्यतत्वात् क्रम-क्त न० त० । इडृत्याम् । क्रान्तभिन्ने विष्णुना क्रान्ते च त्रि० ।

अक्रतु त्रि० नास्ति क्रतुर्यज्ञः संकल्पोवा यस्य । यज्ञरहिते संकल्परहिते च परमात्मनि पु० "व्यक्रतूयधिनो क्रत्वावच" इति वेदः ।

अक्रिया स्त्री० अभावार्थे न०त० । क्रियाभावे "प्रधानस्या-क्रिया यत्र साङ्गं तत् क्रियते पुनः । तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रियेति" "अक्रिया त्रिविधा प्रोक्तेति" च श्रुतिः । न०ब० । कर्म्मशून्ये गुणादौ च त्रि० । सर्व्वकर्म्मशून्ये परमात्मनि पु० । [वंश्ये क्षत्रियभेदे पु० ।

अक्रूर त्रि० न क्रूरः । क्रूरभिन्ने करुणे, स्वनामप्रसिद्धे वृष्णि-

अक्रोध पु० न क्रोधः अभावार्थे न०त० । क्रोधाभावे यमभेदे "अहिंसा सत्यमक्रोधः सत्याकांक्षेयपरिग्रहः" इति पुरा-णम् । "अक्रोधं शिक्षयन्त्यन्ये क्रोधना ये तपोधना इति नैष० न० व० । क्रोधशून्ये त्रि० ।

अक्रम पु० न क्रमः अभावार्थे न०त० । अभावे । न० ब० । क्रमशून्ये त्रि० ।

अक्लिष्ट क्लिश-भावे क्त न०७ब० । क्लेशरहिते कर्म्मादौ । क्लिश-कर्त्तरि क्त न०त० । आन्तभिन्ने त्रि० । [शून्ये त्रि० ।

अक्लेश पु० अभावार्थे न०त० । क्लेशाभावे । न०ब० । क्लेश-

अक्ष व्याप्तौ संहतौ च भा० प० वेट् । अक्षति अक्ष्णोति आक्षीत् आक्षाम् आक्षिष्टाम् आनक्षे । क्त अक्षः क्तिन् अक्षिः शतृ अक्ष्णुवन् । क्विप् अक्षि-कनिन् अक्ष ।

अक्ष न० अश्नुते व्याप्नोति विषयान् स्ववृत्त्या संयोगेन वा अश-स । इन्द्रिये, "अक्षाणि पण्डितजना विदुरिन्द्रि-याणि" उ० नेत्रे, अधोऽज इति । हृत्थे (हुँते) सौवर्चले च । ज्योतिषोक्ते राशिचक्रावयवभेदे । "शङ्कुर्नरोना कथितः सएव खार्द्राद्रवेर्या विषुवद्दिनार्द्धे । नतः पलोऽज्यस्य सएव तज्ज्ञैस्तलोन्नतियोंख सएव लम्ब इति" सिद्धान्तशिरोमणिगणिताध्यायोक्ते विषुवद्दिनार्द्धे खार्द्धमेत्रया नतिरूपे पलांशभेदे पु० । एतद्विवरणम् भास्कराचार्य्येण प्रमिताक्षरायां स्वयमेव कृतम् । यथा "निरक्षदेशे (लङ्का-विभागे) यदेव विषुवन्मण्डलं तदेव सममण्डलं ततः क्षितिजादन्यदुन्मण्डलं नाम वलयं नास्ति तत्र ध्रुवौ च क्षितिजसंस्थौ, अथ निरक्षदेशात् दृष्टा यथा यथा उत्तरतो गच्छति तथा तथा उदक्ध्रुवमुन्नतं पश्यति तथा यैर्भागै ध्रुवोन्नतस्तैरेव भागैः अक्षसंस्थैः खस्वस्तिकात् दक्षिणतोविषुवन्मण्डलं नतं पश्यतीति" । "चन्द्रार्कि १२ निघ्ना पलभार्द्धिता च लङ्कावधिः खार्दृक् दक्षिणोऽज्ञ" इति भास्करी । "उदग्दिशं याति यथा यथा नरस्तथा तथा खात्तदमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तद-न्तरे योजनजाः पलांशका इति सिद्धान्त शि० गोलाध्यायः यदि भूपरिधि (४९६७) योजनैश्चक्रांशाः (३६०) लभ्यन्ते तदापमारयोजनैः किमिति, यदुन्नतपरिधिना (३६०) भूप-रिधिः (४९६७) लभ्यते तदा अक्षांशैः किमिति, त्रैराशिकेन फल निरक्षदेशलङ्कास्वदेशयोरन्तरयोजनानि स्युरिति, स्वयमेव प्रमिताक्षरायां व्याख्यातम्, तथैव गोलाध्यायोक्तं दर्शितम् । "योजनसंख्या भांशै (३६०) र्गुणिता स्वपरिधि (४९६७) हृता भवन्त्यंशाः (अक्षांशाः) । अक्षांशेभ्यो भूमौ कक्षायां (क्रान्ति ३६० कक्षायाम्) वा योजनानि च व्यस्तमिति" । व्यस्तमिति भूपरिधिगुणिता भांशहृता

अक्षसंख्या (योजनसंख्या) भवतीति । निरक्षदेशात् क्षितिचतुर्थांशे किल मेरुस्तत्र नवतिः पलांशाः (अक्षांशाः) इति च तत्रैवोक्तम् । पाशके कर्षपरिमाणे च न० विभीतकवृक्षे (बयडा) तुषे, आत्मनि रुद्राक्षे सर्षे जातास्थे गरुडे च पु० । तत्र रुद्राक्षे अक्षमाला । कर्षे अनुभवति धाराभिरक्षमात्राभिरिति, विभीतके "यथा वै द्वे आमलके, द्वे वा कोले द्वौ वाक्षौ इति" श्रुतिः । व्यवहारे अक्षदर्शकः । रावणसुतभेदे पु० । तत्कथा रामा० सु० ४३ अ० ।

अक्षक पु० अक्षदृव कायति कै-क । तिनिशवृक्षे । स्वार्थे-कन् । अक्षशब्दार्थे प्रकृतिलिङ्गम् । [कन् । तत्रैव ।

अक्षकूट पु० अक्षस्य चक्षुषः कूटदृव । नेत्रतारायां, स्वार्थे

अक्षक्षेत्र न० अक्षनिमित्तं क्षेत्रम् श० त० । ज्योतिषोक्तेषु अक्षसाधनार्थं क्षेत्रतया कल्पितेषु अक्षभवेषु अष्टसु क्षेत्रेषु । तानि च सिद्धान्तशिरोमणौ गणिताध्याये दर्शितानि यथा । "भुजोऽक्षभा कोटिरिनाङ्गुलो ना कर्णोऽक्षकर्णः १ खलु मूलमेतत् क्षेत्राणि यान्यक्षभवानि तेषां विद्येव मानार्थयशःसुखानाम् ॥ लम्बज्यका कोटिरथाक्षजीवा भुजोऽत्र कर्णस्त्रिभुजे २ त्रिभज्या । कुज्या भुजः कोटिरपक्रमज्या कर्णोऽज्यका च त्रिभुजं तथैदम्३ ॥ तथैव कोटिः समदृक्तगङ्गु-रया भुजस्तद्धृतिरत्र कर्णः४ । भुजोऽपमज्या समना च कर्णः कुज्योनिता तद्धृतिरत्र कोटिः५॥ अग्रादिखण्डं कथिता च कोटिरुन्नता दोः श्रवणोऽपमज्यार्है । उद्धृता कोटि-रथाग्रकाग्रखण्डं भुजस्तच्छ्रवणः क्षितिज्या७ ॥ खण्डं यदूर्ध्वं समदृक्तगङ्गो र्यस्तद्धृतेस्तावथ कोटिकर्णौ । अग्रादि-खण्डं भुज ८ एवमष्टौ क्षेत्राण्यमून्यक्षभवानि तावत् ॥" क्षेत्राणि दर्शयेत्, "तत्र दक्षिणोत्तरमण्डले विषुवद्धृत्तसम्पा-ताद्धो यावाँल्लम्बः क्षितिजसमसूत्रपर्यन्तः सा तत्र कोटिः, लम्बनिपातकुमध्ययोरन्तरं साऽक्षज्या तत्र भुजः, भूमध्या-क्षम्याग्रगामिसूत्रं त्रिज्या सा तत्र कर्णः, इदमग्रक्षेत्रम्, इष्टाहोरात्रवृत्तं यत्र क्षितिजे लग्नं तस्य प्राक् क्षस्ति-कस्य चान्तरमग्रा (चापांशाः) तेषां ज्याज्या तावती च प्रत्यक्क्षितिजे अग्राग्रयोर्निवद्धं सूत्रसुदग्याग्रसूत्रम् अहो-रात्रवृत्तोन्मण्डलसम्पातस्य प्राच्यपरसूत्रस्य च यदन्तरं सा क्रान्तिज्या, सा तत्र कोटिः, अग्रा कर्णः, तदग्रयोरन्तरं सा कुज्या स भुजः इदमक्षक्षेत्रं, तथाहोरात्रवृत्तसममण्डल-सम्पातादधोवलम्बः, समवृत्तगङ्गुः सा कोटिः, अग्रा भुजः, अहोरात्रवृत्ते ज्याखण्डं तद्धृतिः कर्णः, इदमक्षक्षेत्रं, तथा कुज्योनिता तद्धृतिरहोरात्रवृत्ते ज्याखण्डं सा कोटिः, उन्मण्डले क्रान्तिज्या स भुजः, समवृत्तगङ्गुः कर्णः, इदमक्ष-क्षेत्रम्, तथाहोरात्रोन्मण्डलयोः सम्पातादग्रसूत्रम् उन्मण्डल-गङ्गुः स भुजः, उन्मण्डलवृत्ते क्रान्तिज्या कर्णः, उन्म-ण्डलगङ्गमूलस्य प्राच्यपरसूत्रस्य च यदन्तरं तदग्रादि-खण्डं सा तत्र कोटिः, इदमक्षक्षेत्रं, तथोन्मण्डलगङ्गुः कोटिः, गङ्गुमूलोदयास्तसूत्रदोरन्तरमग्राग्रखण्डं स भुजः, कोटि-भुजाग्रयोरन्तरसूत्रं सा कुज्या स तत्र कर्णः, इदमक्षक्षेत्रं, तथोन्मण्डलगङ्गुना हीनः समगङ्गुस्तन्मगङ्गोर्ध्वं खण्डं सा कोटिः, कुज्योना तद्धृतिस्तद्धृतेरूर्ध्वखण्डं स कर्णः, अग्रादिखण्डं स भुजः, इदमक्षक्षेत्रम् एतान्यष्टौ तावत्संख्या-तानि एवमन्यान्यपि भवन्ति ।

अक्षज न० अक्षात् इन्द्रियसन्निकर्षात् जायते जन-ड । इन्द्रियविषयसन्निकर्षोत्पन्ने प्रत्यक्षज्ञाने यज्ञे अग्निष्टोमा-यवजातत्वात्तस्य तत्त्वम् । प्रायुक्ताक्षार्थजाते त्रि० । ज्योतिषोक्ते अक्षभवे क्षेत्रादौ च ।

अक्षणिक त्रि० न क्षणिकं न० । स्थिरे निश्चले च । "क्षणि-वीक्षणाक्षणिकचक्षुषेति" भाषः । अक्षणिकचक्षुषा स्थिर दृष्ट्या स्तिमितनेत्रयेत्यर्थः इति मल्लिनाथः ।

अक्षण्वत् त्रि० अक्षअस्यास्ति मतुप् मस्य वः । नेत्रयुक्ते "पश्य दक्षण्वाञ्च विवेद" इति "अक्षण्वन्तःकर्मण्वन्तः समर्था" इति च वेदः ।

अक्षत पु०ब० न क्षताः । "अक्षताश्च यवाः प्रोक्ता इति का० स्मृत्युक्ते यवे । नपुंसकमिति कोचित् "दूर्वाक्षतानि" चेति पुराणम् । तण्डुले, "अक्षतैर्नार्च्चयेद्विष्णुं न तुलस्या विना-यकमिति" तन्त्रम् । क्षयमात्रे न० । क्षययुक्तभिन्ने क्षत-कर्मान्विते अविदारिते च त्रि० । "अक्षता वा क्षता वा पीति" मनुः । क्षण-भावे क्त न० त० । क्षयाभावे न० । "अक्षतञ्चारिष्टं चा स्तु" इति आशीर्विषयभीप्ये क्षतकर्मणो-ऽक्षयप्रार्थना ।

अक्षदर्शक पु० अक्षाणाक्षणादानादिव्यवहाराणां दर्शकः दृश-ण्वुल् तुक् त० । विवादनिर्णेतरि धर्माधिकरणाध्यक्षे । द्यूतदर्शके त्रि० ।

अक्षदृश् पु० अक्षान् व्यवहारान् पश्यति दृश-क्विन् तुगागमः । अक्षदर्शकशब्दार्थे । अक्षार्थदृष्टरि त्रि० ।

अक्षदेविन् त्रि० अक्षैर्दीव्यति दिव-णिनि इत्त० । पाशकादि-द्यूतक्रीडाकारके । [कारके ।

अक्षद्य त्रि० अक्षैर्दीव्यति दिव-क्विप् जट् । पाशकादिद्यूत-

अच्चद्यूत न० अच्चैर्द्यूतम् ३त० । पाशकादिक्रीड़ायाम् ।

अच्चद्यूतादि पु० ब० । "निर्दृत्तेऽच्चद्यूतादिभ्य" इति णिन्युक्ते ठक्प्रत्ययनिमित्ते शब्दसमूहे । अच्चद्यूत, जानुप्रहृत-जङ्घाप्रहृत जङ्घाप्रहत, पादखेदन, कण्टकमर्द्दन, गतानुगत, गतागत-यातोपयात, अनुगत इति । अच्चद्यूतेन निर्वृत्तम् आच्चद्यूतिकं वैरमित्यादि ।

अच्चधर पु० अच्चं चक्रं रथावयवं तत्कीलकमिव कण्टकं वा धरति धृ-अच् ई॰त० । विष्णौ चक्रे शाखोटकवृक्षे च चक्रधारकमात्रे त्रि० । [समा० । चक्राग्रे चक्रभारे च ।

अच्चधुर् स्त्री० अच्चस्य चक्रस्य धूरयं भारोवा ई॰त० न अ

अच्चधूर्त्त त्रि० अच्चे तद्व्यवने धूर्त्तः । द्यूतकुशले द्यूतकारिणि च (जुवारि) । [शकटवाहनकर्त्तरि इये ।

अच्चधूर्त्तिल पु० अच्चस्य शकटस्य धूर्त्तिं भारं लाति ला-क ।

अच्चन् न० अच्च-बाहु० कनिन् । नेत्रे "दक्षिणेऽच्चन्" इति बृह० उप० "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा" इति वेदः ।

अच्च(क्षि)पटल न० अक्ष्णः नेत्रस्य पटलमिवाच्छादकत्वात् । नेत्रस्थावरके कोषभेदे नेत्ररोगभेदे (छानि) च । पटलस्थरोगभेदादि शुश्रुते उक्तं यथा

"सभूरदलमात्रान्तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाक्ष्णोर्वाह्येन विवराकृतिम् । शीतसात्म्यां नृणां दृष्टिमाहुर्नयन चिन्तकाः ॥ रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्षते । पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम् ॥ शिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरे भृशम् । प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः ॥ अव्यक्तानि स रूपाणि सर्व्वाण्येव प्रपश्यति । दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते । मक्षिकाः मशकान् केशान् जालकानि च पश्यति । मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥ परिस्रवांश्च विविधान् वर्षमभ्रं तमांसि वा । दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् । यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ अर्द्धं पश्यति नाधस्ताच्छृतीयं पटलं गते । महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥ कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते ॥ यथादोषञ्च रज्यते दृष्टिर्दोषे बलीयसि ॥ अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते । पार्श्वस्थिते तथा दोषे ऽपार्श्वस्थानीव पश्यति ॥ समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति । दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥ द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते । तिमिराख्यः स वै दोषश्चतुर्थपटलङ्गतः ॥ रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशः स उच्यते । तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥ स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" इति ।

अक्षाणां व्यवहाराणां पटलमस्यस्य अच् ई॰त० । अक्षदर्शके धर्म्माध्यक्षे पु० ।

अच्चपरि अव्य० अच्चेण पाशकेन विपरीतं वृत्तम् । अच्चशलाकेत्यादिना परिणा अव्य० । पाशकक्रीड़ायां यथा गुटिकापाते जयोभवति तद्विपरीतपातने ।

अच्चपाटक पु० अच्चे व्यवहारे पाटयति दीव्यते पट दीप्तौ-ण्वुल् । व्यवहारनिर्णेतरि धर्म्माध्यक्षे ।

अच्चपाद पु० अच्चं नेत्रं दर्शनसाधनतया जातः पादोऽस्य । न्यायसूत्रकारके गौतमे मुनौ, स हि स्वमतदूषकस्य व्यासस्य सुखदर्शनं चक्षुषा न कर्त्तव्यमिति मत्वा ज्ञाय पश्चात् व्यासेन प्रसादितः पादे नेत्रं प्रकाश्य तं दृष्टवानिति पौराणिकी कथा । "अच्चपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽर्थ इति" पद्मपुराणम् ।

अच्चपीड़ा स्त्री० अच्चस्मिन्द्रियं रसनारूपं पीड़यति आस्वादनात् पीड-अच् । यवतिक्तालतायाम् । पीड-भावे अङ्+ई॰त० । इन्द्रियपीड़ायाम् ।

अच्चम त्रि० न च्चमते च्चम-अच् न० त० । असमर्थे । च्चम-भावे अङ् अभावार्थे न० त० । च्चमाभावे ईर्ष्यायाम् स्त्री । "अच्चमा भवतः कोयमिति" भारतम् । न० ब० । च्चमारहिते त्रि० ।

अच्चमाला स्त्री अक्षाणां रुद्राक्षाणां माला । रुद्राक्ष बीजग्रथितमालायाम् । अकारादिक्षकारान्तः अक्ष स्तुत्यता तत्प्रतिनिधीभूता वा माला ष० त० । एकपञ्चाशद्वर्णमालायाम् तत्प्रतिनिधीभूतायां स्फटिकादिग्रथितायाम् बाह्यमालायाञ्च "शोध्यमाणपुष्करबीजं मध्यमनाच्चमालमिति" काद० । "विभान्तमच्छस्फटिकाच्चमालयेति" माघः । तद्विवरणम् । "क्रमोत्क्रमगते माला मातृकार्णे च्चमेरुके । लावसानैः साध्ववर्णैरन्तर्यजनकर्म्मणीति" सनत्कुमारीये । "पद्मबीजादिभिर्माला वह्नियोगे प्रशस्यते ताः । रुद्राक्षशङ्खपद्माक्षपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा । रजतैः कुशमूलैश्च गृहस्थस्याक्षमालिकेति" तन्त्रसारे एतद्विस्तारस्तत्रैवागन्तव्यः । अच्चस्य

नक्षत्रचक्रस्य मालेव भूषणत्वात्। अरुन्धत्यां, सा हि उत्तरस्यां दिशि गगने सप्तर्षिमण्डलचक्रे वसिष्ठसमीपे-मालारूपेण वर्त्तते सर्व्वेभ्यश्च उज्ज्वलत्वात्तस्या मालारूपेण स्थितत्वाच्च नक्षत्रचक्रभूषणत्वम्।

अक्षय त्रि० नास्ति क्षयोऽस्य। क्षयरहिते सर्व्वदा वर्त्तमाने "गयायामक्षयवटे पितॄणां दत्तमक्षयमिति" वायुपुराणम् "अभिजिद्रोहिणीदत्ते यदत्र दीयते जन्तोस्तदक्षयसदाहृतमिति" स्मृतिः। परमात्मनि पु०। क्षयोवासः, तच्छून्ये अनिकेतने संन्यासिनि, दरिद्रे च। अक्षयं पुण्यमस्यास्ति अच्। अक्षयपुण्यसाधने तिथिभेदे च "अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण अक्षयादपि चाक्षयेति" भविष्यपुराणम्।

अक्षयतृतीया स्त्री कर्म्म०। वैशाखशुक्लपक्षतृतीयायाम्। "वैशाखे मासि राजेन्द्र! शुक्लपक्षे तृतीयिका। अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता। तस्यां दानादिकं सर्व्वमक्षयं सप्तदाहृतमिति"। "या शुक्ला कुरुशार्दूल! वैशाखे मासि वै तिथिः। तृतीया साक्षया लोके त्रिदशैरभिवन्दितेति" च भविष्यपुराणम्। "वैशाखस्य सिते पक्षे तृतीयाऽक्षयसंज्ञितेति" स्कन्दपुराणम्।

अक्षय्य त्रि० क्षेतुं शक्यं क्षि-यत् नि० न०त०। क्षयानर्हे। अक्षये च "तेषां पिण्डो मया दत्तोह्यक्षयमुपतिष्ठतामिति" वायु०

अक्षय्योदक न० नक्षय्य मक्षय्य मुदकं यत्र आद्धे पिण्डदानानन्तरं देये मधुतिलमिश्रिते उदके। "अक्षय्योदक दानन्तु अर्घ्यदानवदिष्यते। षष्ठ्यैव नित्यं तत् कुर्य्यात् न चतुर्थ्यां कदाचनेति" कल्पोगप०।

अक्षर न० न क्षरतीति क्षर-चलने अच् न०त०। परमब्रह्मणि कूटस्थे चैतन्ये "अक्षरं परमं ब्रह्मेति" गीता। क्रियाशून्ये त्रि० जीवे परमात्मनि च पु०। "क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति" च गीता। क्षरणशून्येऽपि स्थिरे त्रि०। अश्नुते व्याप्नोति वेदादिशास्त्राणि अश-सरन्। अकारादिवर्णे न० "अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य चेति" गीता। वर्णस्मारकलिपिसन्निवेशे, "अक्षरं वर्णनिर्म्माणं वर्णमप्यक्षरं विदुः। अक्षरं न क्षरं विद्याद्व्याप्तेर्वा सरेरक्षरमिति" उज्ज्वल०। उदके मोक्षे च न०।

अक्षरचणा त्रि० अक्षरेण वर्णविन्यासलिप्या चित्तः अक्षर+चणप्। लेखनाजीवके। [चु(च)क्षुप्। लेखनाजीवके।

अक्षर(चु)चञ्चु त्रि० अक्षरेण वर्णविन्यासलिप्या चित्तः अक्षर+

अक्षरच्छन्दस् न० अक्षरेण वर्णसंख्यया ज्ञातं छन्दः। वर्णवृत्ते "छन्दस्तु द्विविधं प्रोक्तं वृत्तं जातिरिति द्विधा वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" छन्दोम० तस्य च तत्कृतत्वात्तथात्वम्। अक्षरं निश्चलं छन्दोऽभिप्रायोऽस्य ब०। परमेश्वरे पु० दृढाध्यवसाये त्रि०।

अक्षरजननी स्त्री अक्षराणां जननीव। लेखन्याम् (कलम्)।

अक्षरजीवक त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-ण्वुल् ३त०। अक्षरलेखनोपजीवके।

अक्षरतूलिका स्त्री अक्षराणां तल्लिपिलेखानां तूलिकेव साधनत्वात्। लेखन्याम् (कलम्)।

अक्षरन्यास पु० अक्षराणि तत्स्मारकाकारविशेषा न्यस्यन्ते अत्र+नि+अस-आधारे घञ् ६त०। लिप्याम्, पत्रिकायाम्। भावे घञ् ६त०। अक्षरस्मारकरेखाद्याकारविशेषलेखने, हृदयाद्याधारस्पर्शपूर्व्वकं तत्तदक्षराणां स्मरणोच्चारणरूपे तन्त्रप्रसिद्धे वर्णन्यासे, "संयिन्नून् वा न्यसेदेतान् निर्विन्नून् वा यथाक्रममिति" तन्त्रम्। विस्तारः मातृकाशब्दार्थे द्रष्टव्यः। अक्षरविन्यासोऽप्युक्तार्थेषु। [पयोऽस्य। लिपिलेखनोपजीविषि।

अक्षरजीविक त्रि० अक्षरं तल्लिपिलेखनं जीविका वर्त्तनो-

अक्षरजीविन् त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-णिनि ३त०। अक्षरलेखनेन वृत्तिनिर्व्वाहकारके। स्त्रियां ङीप्।

अक्षरमुख त्रि० अक्षराणि तन्मयानि शास्त्राणि वा मुखे यस्य। शास्त्राभिज्ञे अक्षराभिज्ञे च ब०। अकाररूपे वर्णे न०

अक्षरशस् अव्य० अक्षरमक्षरमिति वीप्सायां शस्। प्रत्यक्षरमित्यर्थे, "पञ्च अक्षरशः इति" भट्टौम्।

अक्षरसंस्थान न० अक्षराणां तत्स्मारकरेखाविशेषाणां संस्थानमत्र ब०। वर्णस्मारक-रेखाविशेषयुक्त-लिप्याम्। "लिखिताक्षरसंस्थानमित्यमरः"।

अक्षराङ्ग न० अक्षराणामङ्गं तत्स्मारकरेखाविशेषाणामवयवः ६त०। लिप्याम्, लेखनसाधनद्रव्ये च।

अक्षराज पु० अक्षेण तत्क्रीडया राजेव। द्यूतासक्ते।

अक्षरी स्त्री अश्नुते गगनाभोगं मेघैः अश-सरन् गौ० ङीष्। वर्षायाम्

अक्षवती स्त्री अक्षा पाशकाः साधनत्वेन विद्यन्तेऽत्र अक्ष+मतुप् मस्य वः ङीप्। द्यूतक्रीड़ायाम्।

अक्षवाट पु० अक्षाणां पाशकक्रीडानां वाटः वासस्थानम्।

द्यूतस्थाने, पाशकाधारे फलके च। अक्षस्य रथचक्र
ध्रुवस्थानस्येव वाटः। मल्लभूमौ तत्र हि रथचक्रध्रु-
वांशुसदृशपांशुसत्त्वात् तत्सदृशत्वम्।

अक्षविद् त्रि० अक्षं पाशककीडां व्यवहारं वा वेत्ति विद्-क्विप्। अक्षविद्याभिज्ञे व्यवहाराभिज्ञे च अक्षवेत्रादयो ऽप्यत्र। स्त्रियाम् अक्षवेत्री।

अक्षविद्या स्त्री ई॰त०। पाशकादिद्यूतविद्यायाम्।

अक्षवृत्त न० अक्षं राशिचक्ररूपं वृत्तं वेष्टनाकारं कोण शून्यं क्षेत्रम्। राशिचक्ररूपे वृत्तक्षेत्रे। अक्षे पाशक क्रीडायां वृत्तः व्याप्तः ७त०। पाशकक्रीडासक्ते "यदक्ष-वृत्तमनु दत्तं न एतदिति" श्रुतिः। [द्यूतक्रीडाकुशले।

अक्षशौण्ड पु० अक्षेषु तत्क्रीडायां शौण्डः प्रवीणः ७त०।

अक्षसूच न० अक्षस्य जपमालायाः सूत्रम्। जपमालाश्रय साधने सूत्रे "साक्षसूत्रकमण्डलुरिति" पुराणम्।

अक्षाग्रकीलक न० अक्षस्य रथनाभिक्षेत्रस्याग्रगं कीलकम्। ६त०। चक्रनाभिक्षेत्राग्रगते कीलके।

अक्षानह् न० अक्षे चक्रे आनह्यते बध्यते आ+नह्-क्विप्। चक्रसंबद्धे काष्ठभेदे। "अक्षानहो नह्यतनोत सौम्या" इति वेदः। [क्रोधेच। न०ब०। क्षमाशून्येत्रि०।

अक्षान्ति स्त्री० क्षम-क्तिन् विरोध्यर्थे न०त०। ईर्ष्यायां,

अक्षारलवण त्रि० क्षारेण उपरक्षत्तिकया निर्वृत्तं अण् क्षारं कृत्रिमं लवणं न०त०। अकृत्रिमलवणे "सुन्य-क्षानि पयः सोमोमांसं यच्चानुपाकृतम्। अक्षारलवणाश्चै-तेति" मनुः। "चतुर्थकालमश्नीयादक्षारलवणं तथेति" मनुः अक्षारलवणमकृत्रिमलवणमितिप्राय० रघु०। क्षार-लवणभिन्ने सैन्धवलवणे न०। "नैतस्यां रात्रावक्षं मचेयुस्त्रिरात्रमक्षारलवणाश्नीयुः सुर्यादयरात्रं मक्षा-गुरुष्वितिं, आश्वलायनगृह्यम्। अक्षारलवणं क्षार-मृत्तिकादि-कृतलवणभिन्नं सैन्धवं सम्भारि चेति शु० रघु०। "गोक्षीरं गोघृतञ्चैव धान्यमुद्गास्तिलायवाः। साक्षुद्रं सैन्धवञ्चैव अक्षारलवणं स्मृतम्" इति स्मृत्युक्ते गोघृतादि-द्रव्यगणे च।

अक्षावपन न० अक्षान् पाशकान् आवपति क्षिपत्यस्मिन् आ+वप-आधारे ल्युट् ६त०। पाशकपातनाधारे फलके।

अक्षावली स्त्री ६०त०। जपसाधन-रुद्राक्षबीजावली जप-मालायाम् "रुद्राक्षावलीमिवाक्षावलीं कण्ठेनोद्वहन्ती"तिकाद०।

अक्षावाप त्रि० अक्षान् पाशकान् आवपति क्षिपति आ+वप-घञ् उप०स०। द्यूतकारके, तदध्यक्षे च।

अक्षि न० अश्नुते विषयान् अश-क्सि। नेत्रे, इन्द्रियमध्ये तस्यैव विषयदेशं प्राप्य विषयग्राहकत्वं सर्व्ववादिसम्मतमन्ये-षान्तु सर्व्वमते न तथात्वमतोऽस्य विषयव्यापकता। एतदन्त बहुव्रीहेः स्वाङ्गपरत्वे षजन्तता पद्माक्षः पद्माक्षी, अस्वाङ्ग-परत्वे अजन्तता दीर्घाक्षा वेणुयष्टिः, अव्ययीभावे अजन्तता प्रत्यक्षं समक्षमित्यादि तत्पुरुषे ऽस्वाङ्गपरत्वेऽजन्तता गवाक्षः। इदञ्च शब्दादिषु बाह्येन्द्रियग्राह्यविशेषगुणेषु मध्ये रूपस्यैव ग्राहकतया तैजसं नेत्रगोलकेऽधिष्ठितं किञ्चित् वस्तु। तैजसत्वाच्चास्य सूर्य्यादिकिरणवदाशुदूरपर्य्यन्ता-नुधावनमागमनञ्च। तच्च परमाणुतुल्यमिति नैयायि-कादयः तदपेक्षया स्थूलमिति सांख्यादयः। उभयमते-ऽपि न तस्य प्रत्यक्षयोग्यता। तदाधारगोलके द्वे बाह्ये आन्तरेऽपि च चत्वारि कोशवत् पटलानि, मांसादयः पञ्चांशाः, पक्ष्मादीनि पञ्च मण्डलानि षट् सन्धयश्च सन्ति। तद्विवरणं यथा "विद्याद्द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसन्निभम्। द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषग्नयनबुद्बुदम्॥ सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम्। पलं भुवो, ऽग्नितो, रक्तं, वातात् कृष्णं, सितं जलात्॥ आकाशाद्भ्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे। दृष्टिश्चात्र तथा वर्त्म यथावादीद्विशारदः॥ नेत्रायामस्त्रि-भागस्तु कृष्णमण्डलमुच्यते। कृष्णात् सप्तमसिच्छन्ति दृष्टिं दृष्टिविशारदाः॥ मण्डलानि च सन्धींश्च पटलानि च लोचने। यथाक्रमं विजानीयात् पञ्च षट् च षडेव च॥ पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां (५) मण्डलानि तु। अनुपूर्व्वन्तु तन्मध्यात्त्वारोऽन्ये यथोत्तरम्॥ पक्ष्मवर्त्मगतः सन्धिर्वर्त्म शुक्लगतोऽपरः। शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः॥ सतः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः। द्वे वर्त्मपटले विद्यात्त्वार्य्यन्यानि चाक्षणि। जायते तिमिरं येषु व्याधिः परमदारुणः। तेजोजलान्वितं वाह्यं तेष्वन्यत् स्निग्धितान्वितम्॥ मेदस्तृतीयं पटलमाश्रितन्त्वक्षि चापरम्। पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते इति शुश्रुते॥

अक्षिक पु० अक्षाय चक्रावयवाय हितम् ठन्। रज्जनद्धे (आतइच)। [तारायाञ्च।

अक्षिकूटक न० अक्ष्णः कूट इव कन्। नेत्रगोलके नेत्र-

अक्षिगत त्रि० अक्षि गतः सर्व्वदाभावनावशादत्यासन्न-कृष्टोऽपि उपस्थित इव। द्वेष्ये अलौ नेत्रगोचरे च। "त्वयि किलाक्षिगते नयनैस्त्विमिरिति नै०। [तुल्यत्वम्।

अक्षितर न० अक्षीव तरति तॄ-अच्। जले निर्म्मलत्वान्नेत्र

अक्षिभू स्त्री अक्ष्णः भूर्विषयः। चक्षुर्गोचरे प्रत्यक्षे, सत्ये

नेत्रदृष्टवस्तुन एव सत्यतासंवादितया तस्य सत्यत्वम् । "सत्यस्याक्षिभुवो यथा, इति श्रुतिः । [वृक्षे ।

अक्षिभेषज न० ६त० नेत्ररोगविशेषनिवारके पटिकालोध्र-

अक्षिभ्रुव न० भ्रुवौ च अक्षिणी च समा०द्व० । राजदन्तादि० अक्षिशब्दस्य बह्वृचत्वेऽपि पूर्वनि० अच्समा० । भ्रूनेत्रसंघाते "सौमित्रिरक्षिभ्रुवमुज्जिहान" इति भट्टिः ।

अक्षिव पु० अक्षि वाति प्रीणाति अञ्जनेन वा-क । (सजना) शोभाञ्जनवृक्षे सामुद्रलवणे च ।

अक्षिविकूणित न० अक्ष्णः विकूणितं लज्जादिना सम्यक् प्रसाराभावात् सङ्कोचोयत्र । अपाङ्गदर्शने कटाक्षपाते

अक्षीव न० न क्षीवते माद्यति क्षीव-क, क्ष वा न०त० । शोभाञ्जने (सजना) सामुद्रलवणे च । मत्तभिन्ने त्रि० । बान्तोयमित्यन्ये । [इति वेदः ।

अक्षु न० अक्ष-उ । ग्रीवे । "जूर्णौ मक्षुयाहंसोयजला"

अक्षुध्य त्रि० अक्षुधे हितम् अक्षुध्+यत् । क्षुधाभावसाधने द्रव्ये । "अक्षुध्या अक्षण्वास्ते गृहामाक्षद्भिर्भीतनेति"वेदः ।

अक्षेत्र न० अप्रशस्तं क्षेत्रं न०त० । प्रशस्तोत्पादके क्षेत्रे उपदेशानर्हे शिष्ये, अपात्रे च । "अक्षेत्रे बीजमुप्तमन्तरैव विनश्यतीति" पुरा० ।

अक्षेत्रविद् त्रि० क्षेत्रं देहतत्त्वं तत्त्वतो न जानाति विद्-क्विप् अस० स० । क्षेत्रतत्त्वानभिज्ञे आत्मत्वेन देहाभिमानिनि जीवे । "अक्षेत्रविदु क्षेत्रमिदं ह्यप्राट् प्रैति क्षेत्रविदानुशिष्ट" इति वेदः ।

अक्षेत्रिन् पु० क्षेत्रं शस्योत्पत्तिस्थानं कलत्रं वा अत्यर्थे इनि न०त० । क्षेत्रस्वामिभिन्ने । "येऽक्षेत्रिणो बीजवन्तः परक्षेत्रे प्रवापिन इति" स्मृतिः ।

अक्षोट पु० अक्ष-ओट, अक्षस्य विभीतकस्येव उटानि पर्णान्यस्य वा । पर्व्वतीयपीलुभेदे (आखरोट) स्वार्थे कन् तत्रैव ।

अक्षोड पु० अक्ष-ओड अक्षः विभीतक इव ओडति पत्रैः संछन्यते उड-अच् वा । पर्व्वतीयपीलुवृक्षे (आखरोट) स्वार्थे कन् तत्रैव ।

अक्षोभ्य त्रि० क्षोभ्यते विचाल्यते क्षुभ-णिच् कर्म्मणि यत् न० त० । भ्रमयितुमशक्ये "इक्ष्वाकुबलमक्षोभ्यमिति" पुरा० । तन्त्रोक्ते द्वितीयविद्यामन्त्रोपासके तद्देवतायाः शिरसि नागरूपेण स्थिते ऋषिभेदे पु० । "अक्षोभ्योऽस्याऋषिः प्रोक्त, इति तन्त्रम् ।

अक्षोभ्यकवच न० अक्षोभाय हितमक्षोभ्यं कर्म्म० । तन्त्रोक्ते कवचभेदे तच्च तन्त्रसारे द्रष्टव्यम् ।

अक्षौहिणी स्त्री अक्षः समूहः संघिकल्पकत्वात् वा मोऽस्यास्ति इनि, अक्षाणां रथानां सप्तसंख्याभिरिन्द्रियाणाम् "वा अक्षहिनीशत्वं वृद्धिश्च । रथगजतुरङ्गपदाति संख्याभेदान्विते सेनासमूहे । "अक्षौहिण्यामित्यधिकः सप्तत्या चाष्टभिः शतैः । संयुक्तानि सहस्राणि गजानामेकविंशतिः । एवमेव रथानान्तु संख्यानं कीर्त्तितं बुधैः । षष्ट्यधिकः सहस्राणि षट् शतानि दशैव तु । संख्यातास्तुरगास्तज्ज्ञैर्विना रथ्यतुरङ्गमैः । नृणां शतसहस्रं तु सहस्राणि नव वै तु । शतानि त्रीणिचान्यानि पञ्चाशच्च पदातय इति । रथाः २१८७० । गजाः २१८७० । रथयायिकाभिन्नाः अश्वाः६५६१० । पदातयः १०९३५० ।

अक्ष्ण त्रि० अश्नुते व्याप्नोति अश-क्त्र । व्याप्ते अक्षणाऽक्षे काले न० अक्ष्णया दक्षिणेऽंसे श्रेण्यां श्रेण्यांसे, इति वेदः ।

अखट्ट पु० खट्ट-अच् न०त० । पियालवृक्षे (पियाशाल)

अखट्टि स्त्री खट्ट-इ न०त० वा ङीप् । अभिधध्याधारे ।

अखण्ड त्रि० खडि-घञ् न०त० । संपूर्णे, सकले "अखण्डसाम्राज्यपतितत्वमेतीति" जातकम् खण्डभिन्ने पु०न० ।

अखण्डन पु० न खण्ड्यते निरवयवत्वात् खडि-ल्युट् न०त० खण्डनानर्हे परमात्मनि, पूर्णे त्रि० । [च ।

अखण्डित त्रि० खडि-क्त न०त० । सम्पूर्णे, "खण्डितभिन्ने

अखण्डितर्तृ पु० अखण्डितः ऋतुः तत्सम्बन्धात् पुष्पादिप्रसवरूपा यत्र पुष्पादि-सर्वसम्बन्धुक्ते ऋतुकाले ।

अखलीकार पु० न खलः अखलस्य कारः अखल+च्वि-कृ-घञ् । सप्रयोजनताविधाने अखलान्यधासम्पादने ।

अखेटिक पु० न खेटत्यस्मात् खिट-भये घिकन् । वृत्तभाते ।

अखात पु०न० खन-क्त न०त० । देवखाते, मनुष्याद्यखाते च । खातभिन्ने त्रि० । "खातमखातमुत सन्तमिति" वेदः ।

अखाद्य त्रि० खाद-अर्हार्थे यत् न०त० । भोजनानर्हे गोमांसादौ, भक्ष्यभिन्ने च ।

अखिट्ट त्रि० खिट्-रक् न०त० । खेदरहिते "मरुतोयातेमखिट्टयामभिरिति" वेदः ।

अखिन्न त्रि० खिद्-भावे क्त न०त० । क्लेशरहिते अनायासाध्ये कर्म्मणि खेदरहिते कर्त्तरि च । कर्त्तरि क्त न०त० । अक्लिष्टे ।

अखिल त्रि० न खिल्यते न कणशआदीयते खिल-क न०त० । समग्रे । खिलाभिन्ने क्षेत्रभूम्यादौ स्त्री । नास्ति खिलमवशिष्टं यस्य शेषभूम्नो "वेदोऽखिलोधर्ममूलं स्मृतिशीले च तद्विदामिति" मनुः । तेन सिद्धार्थ

मेतन्मखिलं वारिमण्डलमिति" रघुः। "न निशाखिल-यापि वापिका प्रससाद मखिलेव मानिनीति" नै०।

अग इदित् गतौ भ्वादि० पर०। अङ्गति। आङ्गीत्। ल्युट् अङ्गनम् असुन् अङ्गः। [यति।

अग वक्रगतौ भ्वादि०पर०घटादि। अगति आगीत्। अग-

अग पु० न गच्छतीति गम-ड न०त०। वृक्षे, पर्व्वते, च। गमनाकर्त्तरि शूद्रादौ त्रि०। न गच्छति वक्रगत्या पश्चिमम्। सूर्य्ये तस्य हि वक्रगत्यभावः ज्योतिषप्रसिद्धः। "वक्रशीघ्रगतिस्त्वेव भवेत् भौमादिपञ्चके" इत्युक्तेः आर्य्यभट्ट मते तु पृथिव्याएव गतिमत्त्वेन दिनरात्रिसम्भवात् सूर्य्यस्य न गतिमत्त्वम्। सप्तसंख्यायाञ्च कुलाचलानां सप्तत्वेन तेषाञ्च प्राधान्यात् "प्रधानेन व्यपदेशाभवन्तीति" न्यायात् तथात्वम्।

अगच्छ पु० गम-बा० ग न०त०। वृक्षे।

अगज न० अगात् पर्व्वतशिलातो जायते जन-ड। शिला-जतुद्रव्ये। पर्व्वतजातमात्रे त्रि०।

अगण्य त्रि० गणयितुमशक्यम् गण-शक्यार्थे यत् न० त०। गणयितुमशक्ये असंख्ये। "गुणैरगण्यैरतिशीलशालिभि-रिति"। अर्हे यत् न०त०। गणनानर्हे, अकिञ्चित्करे त्रि०।

अगति स्त्री गम--क्तिन् न०त०। उपायाभावे। बहु०। गतिशून्ये, उपायशून्ये च त्रि०। स्वार्थे कन्, भेषाद्वा कप् तत्रैवार्थे त्रि० "मामगतिकमिति" भट्टाराचार्य्यः।

अगद पु० नास्ति गदो रोगो यस्मात् ५ब०। औषधे ६ब०। "औषधान्यगदोविद्या दैवी च विविधा स्थितिः। तपसैव प्रसिध्यन्तीति" पुराणम्। रोगशून्ये त्रि०। गद-भावे अच्-न०त०। अकथके त्रि०। [दीत्।

अगद नीरोगत्वे कण्ड्वा० पर०। अगद्यति आगद्यीत्-आग-

अगदङ्कार पु० अगदं करोति अगद+कृ-अण् मुम् च। वैद्ये। [न्तरि त्रि०।

अगम पु० न गच्छतीति गम-अच् न०त०। वृक्षे। अग-

अगम्य त्रि० न-गन्तुमर्हति गम-यत् न०त०। गमनानर्हे "अगम्या सा भवत्तव यत्राभूत् स मरुत्पथ इति" चण्डी। अन्यजातिस्त्रियां स्त्री। "अगम्यां च स्त्रियं गत्वेति" "अगम्यागमनञ्चैव जातिभ्रंशकराणि षडिति" च स्मृतिः दुर्गोत्सवे "योगिनामप्यगम्योऽसाविति" पुराणम्।"

अगरी स्त्री नास्ति गरो विषं यस्याः ५ब० गौ०ङीष्। मूषिक-विषहारिणि देवताडवृक्षे। विषहारिणि द्रव्यमात्रे त्रि०।

अगरु न० न गिरति गृ-ड न०त०। खनामप्रसिद्धे अगुरु-चन्दने। "कौसुमस्तजमेताञ्च चन्दनागरुचर्चितामिति" दुर्गापूजामन्त्रः "चन्दनागुरु" इति पाठान्तरम्।

अगर्हित त्रि० न०त०। निन्दितभिन्ने शुद्धे, "यत्किञ्चित्-स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितमिति" स्मृतिः।

अगस्ति पु० अगं विन्ध्याचलम् अस्यति अस्-क्तिच् वक्र-म्बादि०। अगस्त्यनामके मुनौ। अगस्त्यस्यापत्यानि बहुषु यञोलुक्। तद्गोत्रापत्येषु ब०व०। तत्सम्बन्धित्वात् दक्षिणस्यां दिशि। अगस्त्यजन्मकथा च। "तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् रेतश्चस्कन्द तत् कुम्भे न्यपतद्वायतीवरे तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ, अगस्त्यश्च वशिष्ठश्च तावृषी संबभूवतुः। बहुधा पतितं रेतः कलसे च जले स्थले। स्थले वशिष्ठस्तु मुनिः संभवर्षिसत्तमः। कुम्भे-त्वगस्त्यः सम्भूतः जले मत्स्यो महाद्युतिः। उदियाय ततोऽगस्त्यः क्षणमात्रे महातपाः इति" पुराणम्। तस्य च विन्ध्याचलस्तम्भनकथा काशीखण्डेऽनुसन्धेया। इदृत्-सङ्ख्यायामस्य गगनमण्डले दक्षिणस्यां तारारूपेण स्थिति-रुक्ता तत्र अगस्त्यचारशब्दे द्रष्टव्यम्।

अगस्तिद्रु पु० अगस्तिप्रियः द्रुर्वृक्षः शाक० त०। वकवृक्षे। अगस्तिवृक्षादयोऽप्यत्र।

अगस्त्य पु० अगं विन्ध्याचलं स्त्यायति स्तम्भाति स्त्यै-क। अगस्त्यनामके मुनौ। अगस्त्यचरितमाद्यां प्रतस्थे दिग्-जिगीषयेति" रघुः। यस्या०यञ्। आगस्त्यस्तदपत्ये।

अगस्त्यगीता स्त्री अगस्त्येन गीता विद्याभेदः। भारते शान्तिपर्व्वणि प्रसिद्धे विद्याभेदे।

अगस्त्यचार पु० अगस्त्यस्य नक्षत्ररूपेण दक्षिणस्यस्य चारः शुभाशुभसूचकगत्यादि। वराहसंहितोक्ते अगस्त्यनामक-नक्षत्रस्य उदयादौ। यथा "विन्ध्यस्तम्भयदश्च तस्योदयः श्रूयताम्" इत्युपक्रम्य। "उदये च पुनरगस्त्यनाम्नः क्षु—समा-योगमलप्रदूषितानि। हृदयानि सतामिव स्वभावात् पुन-रम्बूनि भवन्ति निर्म्मलानि॥ पार्श्वद्वयाधिष्ठितचक्रवाकामा-पुण्डती सखनहंसपङ्क्तिम्। ताम्बूलरक्तोत्कषिताग्रदन्ती विभाति योषेव सरित्प्रहासा॥ इन्दीवरासङ्गसितोत्पलाङ्कि-ता सरिद्भ्रमत्षट्पदपङ्क्तिभूषिता। सम्भूलताचेपकटाक्ष-वीक्षणा विदग्धयोषेव विभाति सत्वरा॥ इन्दोः पयोदवि-गमोपहितां विभूतिम् द्रष्टुं तरङ्गवलया कुमुदं निशासु। उन्मीलयत्यलिनिलीनदलं सुपक्ष्म वापी विलोचनमिवा-सिततारकान्तम्॥ नानाविचित्राम्बुजहंसकोककारण्डवा-पूर्णतडागहस्ता। रत्नैः प्रभूतैः कुसुमैः फलैश्च भूर्यच्छती

वाधमगस्त्यनाम्नः ॥ सलिलममरपात्रेणोद्धृतं यद्वनपरिवेष्टितमूर्त्तिभिर्भुजङ्गैः । क्षणिजनितविषाग्निसम्प्लुष्टं भवति शिवं तदगस्त्यदर्शनेन ॥ स्मरणादपि पापमपाकुरुते किमुत ? स्तुतिभिर्वरुणाङ्गरुहः । मुनिभिः कथितोऽस्य यथार्थविधिः कथयामि तथैव नरेन्द्रहितम् ॥ संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः । तच्चोज्जयिन्यामगतस्य कन्यां भागैः खराख्यैः स्फुटभास्करस्य ॥ दैवत्प्रभिन्नेऽरुणरश्मिजालैर्नैशेऽन्धकारे दिशि दक्षिणस्याम् । सांवत्सरावेदितदिग्विभागे भूपोऽर्घमर्घ्यां प्रयतः प्रयच्छेत्" ॥ इत्युद्वाह्ये उपसंहृतं यथा "दृश्यते स किल हस्तगतेऽर्के रोहिणीसुपगतेऽस्तमुपेतीति" ।

अगस्त्यसंहिता स्त्री अगस्त्यनिर्मिता संहिता । रामचन्द्रविष्णुवामनादिपूजेतिकर्त्तव्यताबोधके शास्त्रभेदे ।

अगस्त्योदय पु० अगस्त्यस्य नक्षत्रस्येव दक्षिणस्यस्य उदयः। अगस्त्यनक्षत्रोदये तस्य च नक्षत्रस्य दक्षिणस्थितत्वेन उत्तरदिग्वासिनां सर्वदा दर्शनयोग्यता नास्ति, तस्योदयश्च भाद्रशेषे भवति "यस्तु भाद्रपदे मासि उदिते कलसोद्भवे इति" पुराणम् । तद्विवरणम् अगस्त्यचारशब्दे दर्शितम् ॥ तस्योदये जलादीनां प्रसन्नत्वं "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः इति" रघावुक्तम् ।

अगाध त्रि० गाध-प्रतिष्ठायाम् घञ्-न०ब० । अतिगभीरे । छिद्रे न० । गाधः निम्नसीमा स नास्ति यस्येति । नीचसीमारहिते "सास्रागाधे भये मग्नेति" पुरा० दुर्बोधे च । "अगाधस्त्वनघागुणा" इत्यमरः । [ह्रदे ।

अगाधजल पु० अगाधं जलमत्र । अतिगभीरजले

अगार न० अगम् न गच्छन्तमृच्छति प्राप्नोति अग+ऋ-अण् । गृहे । "तत्रागारं धनपतिगृहानिति मेघ० ।

अगिर पु० न गीर्यते दुःखेन गृ-बा० क न०त० । स्वर्गे ।

अगिरौकस् पु० अगिरः स्वर्ग ओकोवासस्थानं यस्य । देवे ।

अगु पु० न गौः किरणोऽस्य । राहुभेदे सूर्य्यालोकाभावे तमसि । गोशून्ये त्रि० ।

अगुण पु० न०त० । गुणविरोधिनि दोषे । "तद्दः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणमिति" स्मृतिः न०ब० । गुणरहिते त्रि० "भक्तिप्रीतिप्रणयसहितं मानदम्भाद्यपेतं चेतोऽस्माकं गुणवदगुणं गोत्रभिद्देहमेतत्" इत्युद्धवदूतः ।

अगुरु न० न गुरुर्यस्मात् । स्वनामप्रसिद्धे, अगुरुचन्दने "धूपैश्चागुरुगन्धिभिरिति" शिंशपा वृक्षे (शिशु) च । गुरुभिन्ने, उपदेशकशून्ये त्रि० । गुरुवर्णभिन्ने लघुवर्णे पु० "अगुरुचगुष्कं भवति गुरू द्वौ यनकचयुग्मे, शशिदेवताविति" श्रुतबोधः । गौरवरहिते गौरवविपरीतलाघवयुक्ते त्रि० ।

अगुरुशिंशपा स्त्री अगुरुःसारो यस्याः 'साऽगौ शिंशपा मध्यपदलोपित० । (शिशु) इति प्रसिद्धे शिंशपावृक्षे ।

अगूढगन्ध न० न गूढो गन्धो यस्य ईषत्० । हिङ्गुवृक्षे । तन्निर्यासस्योत्कटगन्धत्वात्तथा । अगुरुसौरभे द्रव्यभाते त्रि० ।

अगृभीत त्रि० न गृहीतम् छान्दसत्वात् हस्य भः । अगृहीते, "जयजय जह्यजामगृभीतगुणामिति, भाग० ३ । ।

अगौकस् पु० अगः पर्वत ओकः स्थानं यस्य । शरभे पर्वतवासिनि त्रि० ।

अग्नामरुत् पु० द्वि० ह० आनङ् । एकर्षिदेवद्वयोस्तन्नाम्नोर्देवयोः । तौ देवते अस्य अण् । आग्निमारुतं हविः । [देवयोः ।

अग्नाविष्णु पु० द्वि०ह० आनङ् । एकर्षिदेवौ तन्नाम्नोर्देवयो

अग्नायी स्त्री अग्नि+ऐङ् ङीष् । अग्नेर्योषिति स्वाहाख्यायाम् । "वरुणानी नचाग्नायी तस्याः सिमन्तिनी समेवि" भट्टिः । सा च दक्षकन्या तस्याश्चाग्निप्रियसाकथा महाभारते "दक्षस्याहं प्रिया कन्या स्वाहा नाम महाभुज ! ॥ बाल्याद् प्रभृति नित्यञ्च जातकामा कृताञ्जलिः । स नमेकामनां पुत्र ! समग्रं जानाति पावकः । इच्छामि शाश्वतं वासं वस्तुं पुत्र ! सकाशिनाम् । स्वाहेत्युक्त्वा सशुश्रूषं । अद्य प्रभृति दास्यन्ति सवृत्ताः सत्पथे स्थिताः । एवमग्निस्त्वया सार्द्धं सदा वत्स्यति शोभने" ! वन० मार्क० प० ।

अग्नि पु० अङ्क्ति ऊर्द्ध्वं गच्छति अगि-नि नलोपः । अग्नौ स्वनामप्रसिद्धे तेजोभेदे, तेजसि आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी, इति" श्रुतिः । तत्र तेजःपदार्थस्तावद्द्विविधः सूक्ष्मः स्थूलश्च । सूक्ष्मवायुसंभूतः सूक्ष्मवायुसंभूतः सूक्ष्मः पञ्चीकृतस्तु स्थूलः "तासां त्रिवृतं त्रिवृतमेकैकां करोतीति" श्रुतौ त्रिवृत्करणस्य पञ्चीकरणस्याप्युक्तत्वात्तम् । पञ्चीकरणप्रकारश्च पञ्चीकरणशब्दे वक्ष्यते । तथा च भूतान्तराद्धभागमिश्रितेन स्वस्वार्द्धभागेन जन्यमानः पञ्चीकृतः । तस्य च पञ्चात्मकत्वेऽपि "तेजोबाहुल्याद् इति" शारीरकोक्तेः भूयस्त्वात् तैजसत्वव्यवहारः । सोऽयं स्थूलो वह्निः प्रकारान्तरेण त्रिविधः भौमः

दिव्यः जाठरश्चेति भेदात् । तत्र पार्थिवकाष्ठादि प्रभवः भौमः महानसाद्यग्निः, जलवाय्वादिभवः दिव्यः विद्युदुल्कावज्रादिः । उभावपि जर्जज्वलनस्वभावः । उदरे भवस्तृतीयः । त्रयोऽप्यमी स्वसंयुक्तपाकदाहप्रकाशन समर्थाः । सर्वेऽप्यमी लोके शास्त्रे च वह्न्यादिशब्देन व्यवह्रियन्ते तेषां विशेषगुणाः शब्दस्पर्शरूपाणि "योयो-यावतिथश्चैषां स स तावद्गुणः स्मृतः" इति मनुना भूतमध्ये तृतीयस्य तेजसः त्रिगुणत्वमुक्तं व्यक्तमुक्तं महाभारते शब्दः स्पर्शश्च रूपञ्च तेजसोऽथ गुणास्त्रय-इति "अत एव "वह्नौ भृगभुगध्वनिरिति" पञ्चदश्यामुक्तम् वह्नेश्च तेजोजलभूम्यात्मकत्वेन लोहितशुक्लरूपत्वम् अत एव छान्दोग्ये त्रिवृत्करणानन्तरम् वह्नेस्त्रिरूपत्वमुक्तं यथा "यदग्नेः रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्येति" विवृतञ्चैतद्भाष्यकृता "यश्च-ह्येतासां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते । उदा-हरणं नामैकदेशप्रसिद्ध्यावयवप्रसिद्ध्यर्थमुदाह्रियत इति । तदेतदाह यदग्नेः त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदग्नित्रिवृत्कृतस्य तेजसो रूपमिति विद्धि । तथा यच्छुक्लं रूपमग्नेः तदपामग्नित्रिवृत्कृतानामेव यत् कृष्णं तत्त्वैवाग्नेः रूपं तदन्नस्य पृथिव्या अग्नित्रिवृत्कृतायाः इति विद्धीति" । अत एव तन्त्रशास्त्रकाव्यादिषु वह्नेरुष्णरूपतया वर्णनं दृश्यते । अग्निमूर्त्तिध्याने च अरुणरूपत्वमनुपदं दर्शयि-ष्यते । लोके चारुणत्वेनैव प्रत्यक्षेणासावुपलभ्यते एवञ्च नैयायिकोक्तं तेजसः शुक्लभास्वररूपत्वं प्रत्यक्षवेदविरुद्धत्वा-दुपेक्ष्यमेव । तत्र भौमदिव्ययोः प्रायशोलोकसिद्धत्वेन दिव्य-स्याग्नेः दिव्यशब्दे वक्ष्यमाणत्वाच्च जाठरे वह्नौ विशेषो-ऽभिधीयते । "नाभेरूर्द्धं हृदयादधस्तादामाशयमाचक्षते तद्धतं सौरं तेजः पित्तमित्याचक्षते" इति भाष्यविवरणे आनन्दगिरिः वैद्यकवचनत्वेनोवाच । अत एव तस्य कौक्षेय इति संज्ञा । छान्दोग्ये च "या हृदयस्य नाड्यस्ताः पिङ्गलाश्चाणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः एष शुक्ल एष नील एष पीत एष लोहित इति" । व्याख्यातञ्चैतत् भाष्यकृता । "अथ या एता वक्ष्यमाणा हृदयस्य पुण्डरीकाकारस्य ब्रह्मो-पासनस्थानस्य सम्बन्धिन्यो नाड्यो हृदयमांसपिण्डात्सर्वतो विनिःसृता आदित्यमण्डलादिरश्मयस्त्वैताः पिङ्गलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव तिष्ठन्ति वर्त्तन्त इत्यर्थः । तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्य्यम् । सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन सम्भर्कात्पिङ्गलं भवति, सौरं तेजः पित्ताख्यम् । तदेव वातभूयस्त्वान्नीलं भवति । तदेव च कफभूयस्त्वाच्छुक्लं, कफेन समतायां पित्तम्, शोणितबाहुल्येन लोहितम् । वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः । कथं भवतीति ? श्रुति-स्मृत्यादित्यसम्बन्धादेव, तत्तेजसो नाड़ीष्वनुगतस्यैते वर्ण विशेषा" इति । कथमसौ वाऽदित्यः पिङ्गलो" ? वर्णत एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव, तस्य चान्नरसस्य धात्वन्तरसम्पर्कवशात् वर्णविशेष" इत्यानन्दगिरिः । अस्यैवजाठरस्य पिपासाहेतुत्वं छान्दोग्ये उक्तं यथा "अथ यत्रैतत् पुरुषः पिपासति नाम तेज एवै-तत् पीतं नयते इति" । व्याख्यातञ्च भाष्यकृता द्रवकृतस्या-शितस्यान्नस्य नेत्रः आपोऽन्नमशुङ्गं देहं क्लेदयन्त्यः शिथि-लीकुर्य्युः अब्बाहुल्यात्, यदि तेजसा न शोष्येत । तित-राञ्च तेजसा शोष्यमाणास्वप्सु देहभावेन परिणममानास्वप्सु पातुमिच्छा पिपासा पुरुषस्य जायते तदा "पुरुषः पिपा-सति नाम, तदेतदाह "तेज एव तत्तदा पीतमवादि शोष-यत् देहलोहितादिभावेन नयते परिणमयतीति" । तस्य रसपाकप्रकारमाह योगार्ण्णवे । "आयुष्यं भुक्तमाहारं स वायुः कुरुते द्विधा संप्रविश्यान्नमध्यन्तु पृथक् किट्टं पृथग् जलम् (किट्टम् अन्नमलभेदम्) । अग्नेरूर्द्धं च संस्थाय तदन्नं च जलोपरि । जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते घनैः (धमते संधुक्षयति) वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् । अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः । द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम् । रसेन तेन ता नाडीः प्राणः पूरयते पुनः । प्रत्यर्पयन्ति सम्पूर्णारसानि ताः समन्तत इति" । एवं रस-पाकोत्तरं धातुपाकोऽभिहितः पदार्थादर्शे । यथा "त्वग-स्रृग्मांसमेदोऽस्थिमज्जशुक्राणि धातवः । सप्त क्षुत्तत्र चोक्ता त्वक् रक्तजोदरवह्निना । यकाङ्गवेदश्चरसादेवं रक्ता-दिभिस्तथा । स्वस्वकोष्ठाग्निना पाकात् प्रजायन्ते त्वगा-दय इति" । एतन्मूलमेव "तस्य षोढा शरीराणि षट् त्वचो धारयन्ति चेति" याज्ञवल्क्यवचनव्याख्यायां मिताक्षराकृता षट्त्वमुक्तम् यथा तस्यात्मनोयानि जरायुजाण्डजादीनि शरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरि-पाकहेतुभूतषडग्निस्थानयोगित्वेन । तथाहि अन्नरसो-जाठरवह्निना पच्यमानो रक्ततां प्रतिपद्यते, रक्तः स्वकोष्ठ-

स्थाग्निना पच्यमानं मांसरसम्, मांसञ्च स्वकोशस्थानलपरिपक्वं मेदस्त्वम्, मेदोऽपि स्वकोशवह्निना पक्वमस्थितास्, अस्थ्यापि स्वकोशशिखिपरिपक्वं मज्जत्वम्, मज्जापि स्वकोशपावकपरिपच्यमानं चरमधातुतया परिणमते इति" जाठरस्य प्रकारान्तरेण पाचनादिदशविधकर्म्मकारित्वात् दशविधत्वमुक्तं पदार्थादर्शे यथा "भ्राजकोरञ्जकश्चैव क्लेदकः स्नेहकस्तथा धारको बन्धकश्चैव स्नावकाख्यश्च सप्तमः। व्यापकः पाचकश्चैव श्लेष्मको दशधा मत इति"। वैद्यकेचास्य चतुर्विधकार्य्यविशेषकारित्वाच्चातुर्विध्यमुक्तम्। विषमश्च समस्तीक्ष्णो मन्दश्चेति चतुर्विधः। कफपित्तान लाधिक्यात् तत्साम्याज्जाठरोऽनलः। विषमो वातजान् रोगान्, तीक्ष्णः पित्तसमुद्भवान्, करोत्यग्निस्तथामन्दो विकारान् कफसम्भवान्। समाः समोऽग्निरशितमात्राः समाक् पचत्यसौ" इति॥ अग्नेरतितीक्ष्णत्वे भस्मकसंज्ञा स हि समग्राहाराभावे शोणितादिधातूनपि पाचयित्वा आशु देहं नाशयतीति रत्नितः आह्निक। अधिकं कायशब्दे वक्ष्यते। वाह्यस्य भौमस्याग्नेः कर्म्मविशेषे नामान्युक्तानि विधानपारिजाते। यथा

"लौकिके पावकोऽग्निः प्रथमः परिकीर्त्तितः। अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्त्तितः॥ पुंसवे चमसो नाम शोभनः शुभकर्म्मसु। (शुङ्गकर्म्मणीति रघु०)। तस्य सीमन्तान्तर्गतकर्म्मभेदः। सीमन्ते कृन्नलो नाम प्रगल्भो जातकर्म्मणि॥ पार्थिवो नामकरणे प्राशनेऽस्य वै शुचिः। सभ्यनामा तु चूड़ायां व्रतादेशे समुद्भवः॥ गोदाने सूर्य्यनामा स्यात् केशान्ते याजकः स्मृतः। वैश्वानरो विसर्गे स्याद्विवाहे वलदः स्मृतः॥ चतुर्थीकर्म्मणि शिखी धृतिरग्निस्तथाऽपरे। (अपरे कर्म्मणि) आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः। ब्रह्माग्निर्गार्हपत्ये स्याद्दक्षिणाग्निरधेश्वरः। विष्णुराहवनीये स्यादग्निहोत्रे त्रयोमताः॥ लक्षहोमेऽभीष्टदः स्यात् कोटिहोमे महाशनः। एके घृतार्चिषां प्राहुरग्निध्यानपरायणाः॥ रुद्रादौ तु रुद्रो नाम शान्तिके शुभदस्तथा। आदिशब्दात् लघुरुद्रयतरुद्रातिरुद्रा लक्ष्यन्ते। (पूर्णाहुत्यां रुद्रो नामेति रघु०)। पौष्टिके वरदश्चैव क्रोधाग्निस्त्वभिचारके। वश्यार्थे वशदः प्रोक्तो वनदाहे तु शोषकः। उदरे जठरो नाम क्रव्यादः शवभक्षणे। समुद्रे वाडवो ज्ञेयो निर्ऋतेः संवर्त्तकस्तथा॥ सप्तविंशतिसंख्याता अग्नयः कर्म्मसु स्मृताः। तं तमाकृत्य होतव्यं यो यत्र विहितोऽनलः॥ अन्यथा विफलं कर्म सर्व्वं तद्राक्षसम्भवेत्। आदित्यादिग्रहाणां च सामान्यं ह्यग्निरुच्यते॥ आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते। भूमिजस्य तथा भौमे जठरोऽग्निर्बुधे स्मृतः॥ हव्यभुग्धी शिखी नाम शुक्रे भवति हाटकः। शनैश्चरे सप्ततेजा राहौ केतौ कृताशनः इति॥" यस्मादौ तु पञ्च भेदाः "आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्यो गार्हपत्य इत्येते पञ्च वह्नयः" इति शा०राघ०। "पञ्चाग्नयो ये च त्रिणाचिकेता" इति श्रुतिः। अग्नेर्ध्येयरूपं यथा "रुद्रतेजःसमुद्भूतं द्विमूर्द्धानं द्विनासिकम्। षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम्। याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम्। स्रुवं स्रुचञ्च शक्तिं च अक्षमालां च दक्षिणे। तोमरं व्यजनं चैव घृतपात्रन्तु वामके। बिभ्रतं सप्तभिर्हस्तैर्द्विहस्तं सप्तजिह्वकम्। दक्षिणञ्च चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखम्। द्वादशकोटिमन्त्राख्यं द्विपञ्चायुत्कलायुतम्। स्वाहास्वधा वषट्कारैरङ्कितं मेषवाहनम्। रक्तमाल्याम्बरधरं रक्तं पद्मासनस्थितम्॥ रौद्रं तु वह्निनामानं वह्निमायाह्वयामहम्"। इति रुद्रकल्पः। अग्नेर्भौतिकत्वेऽपि कर्म्माङ्गहोमसाधनतया एवं ध्यातव्यता।

अग्न्यभिमानिनि चेतनाधिष्ठिते शरीरादावपि उपचारात् अग्निशब्दप्रयोगः। अग्न्यधिष्ठातरि देवभेदे "अग्निं दूतं वृणीमहे होतारं विश्ववेदस" मित्यादौ वेदे तस्यैव आह्वानपूर्वकोपास्यत्वमुक्तम्। तदधिष्ठितदेहभेदेऽपि, स एव विश्वनराज्जन्मासाद्य अग्निलोकाधिपत्यं 'चकारेति काशीखण्डे उक्तं तत्कथा वैश्वानरशब्दे वक्ष्यते। अग्निदेवताके ऋक्षिकानक्षत्रे "अश्वियमदहने"त्यादिना ज्योतिषे ऋक्षिकानक्षत्रस्य तत्स्वामिकत्वोक्तेः तद्देवताके धृतिपक्षियौ वृक्षे-स्तदाधिपत्यं तिथिशब्दे वक्ष्यते। तस्य भक्षस्थेऽपि वेदत्रयभेदेन दक्षिणाग्निगार्हपत्याहवनीयनामतया प्राधान्येन त्रित्वात् "प्रधानेन व्यपदेशा भवन्तीति" न्यायात् तत्संख्यासदृशसंख्याके त्रित्वसंख्यान्विते, खोदयात् खाग्निलब्धं (३०) "यदुभुक्तं भोज्यं रवेस्तदुजोदिति" नीलकण्ठः। चित्रकक्षत्रे (चित्रे) स्वर्भे तस्य तत्तेजोजातत्वात्तथा तत् कथा अग्निरेतःशब्दे वक्ष्यते भल्लातकवृक्षे (भेला) त्रिस्रुक वृक्षे (नेमु) पित्ते धातौ तस्य तदुत्पन्नत्वात्तथा यथा च तस्य तदुत्पन्नत्वं तथोक्तं प्राक्। तत्स्वामिके अग्निकोणे च। एवमग्निवाचकाः सर्व्वेऽपि शब्दाः ऋक्षिकानक्षत्रादौ वर्त्तन्ते। त्रिस्रं अक्षणि कार्य्यसिद्धिरस्त्रा यत्रे स्रुतायै भयमिति तिथित०। "स्रुतायै अग्निकोणे" अनन्तविधुयता-

ख्येति" ज्योतिषम् । (अनलः कृत्तिका) एवं यथायथमुदाहार्यम् ।

अग्न्यभिमानिनश्च देवाः कुत उत्पन्नाः? कस्मिन् कस्मिन् । कर्म्मणि? वा तेषामधिष्ठातृत्वं तदुक्तं भारते ।

अङ्गिराउवाच कुरु पुत्रं प्रजासर्गे भवाग्निस्त्विमिरापहः । मां च देव! करुष्वाग्ने! प्रथमं पुत्रमञ्जसा ॥ तच्छ्रुत्वाऽङ्गिरसो वाक्यं जातवेदास्तदाऽकरोत् । राजन् !। बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः । ज्ञात्वा प्रथमजं तन्तु वह्नेराङ्गिरसं सुतम् । उपेत्य देवा पप्रच्छुः कारणं तत्र भारत । स तु दृष्टस्तदा देवैस्ततः कारणमब्रवीत् । प्रत्यगच्छंस्तु देवाश्च तद्वचोऽङ्गिरसस्तदा । तत्र नानाविधानग्नीन् प्रवक्ष्यामि महाप्रभान् । कर्म्मभिर्व्वैदुषैः ख्यातान्नानार्थान् ब्राह्मणेष्विह । व०मार्क० स० २१६ अध्या०

अङ्गिरो यस्तृतीयस्तु पुत्रः कुरुकुलोद्वह! । तस्याभवत् शुभा भार्य्या प्रजासर्गाञ्च मे शृणु । बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः । बृहन्मन्यो बृहद्भासस्तथा राजन् ! बृहत्सतिः । प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाऽभवत् । देव! भानुमती नाम प्रथमाऽङ्गिरसः सुता । भूतानामिव सर्वेषां तस्यां रागस्तदाऽभवत् । रागाद्रागेति यामाहुर्द्वितीयाऽङ्गिरसः सुता । यां कपर्द्दिसुतामाहुर्दृश्यादृश्येति देहिनः । तनुत्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता । पश्यत्यर्च्चिष्मती भाभिर्हविर्भिश्च हविष्मती । महामखेष्वाङ्गिरसी दीप्तिमत्सु महामते ! । महायतीति विख्याता सप्तमी कथ्यते सुता । यान्तु दृष्ट्वा भगवती जनः कुङ्कुकुरायते । यकानंशेति तामाहुः कुहूमङ्गिरसः सुताम् । २१७ अ० बृहस्पतेश्चान्द्रमसी भार्य्याऽभूद्या यशस्विनी । अग्नीन् साऽजनयत् पुत्रान् षडेकाञ्चापि पुत्रिकाम् । आहुतिष्वेव यस्याग्नेर्हविषाज्यं विधीयते । सोऽग्निर्बृहस्पतेः पुत्रः संयुर्नाम महाव्रतः । चातुर्म्मास्येषु यस्येष्ट्वामश्वमेधेऽयजः पशुः । दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान् । संयोरप्रतिमा भार्य्या सत्याऽसत्याऽथ धर्म्मज! ॥ अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः । प्रथमेनाज्यभागेन पूज्यते योऽग्निरध्वरे । अग्निस्तस्य भरद्वाजः प्रथमः पुत्र उच्यते । मौर्ख्यभाक्षेषु सर्वेषु हविषाज्यं स्रुचोद्यतम् । भरतो नामतः सोऽग्निर्द्वितीयः संयुतः सुतः । तिस्रः कन्या भवन्त्यत्रा वार्षा स भरतः पतिः । भरतस्तु सुतस्तस्य भरत्यैका च पुत्रिका । भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः । महानत्यर्थमर्चितस्तथा भरतसत्तमः । भरद्वाजस्य भार्य्या तु वीरा वीरस्य पिण्डदा । प्राहुराज्येन तस्याज्यां सोमस्यैव द्विजाः शनैः । हविषा यो द्वितीयेन सोमेन सह युज्यते । रथप्रभूरथाध्वानः कुम्भरेताः स उच्यते । सरव्यां जनयन् सिद्धिं भानुं भाभिः समावृणोत् । आग्नेयं मानवश्चित्यमाधाने हविरेष स्मृतः । यस्तु न च्यवते नित्यं यशसा ब्रह्मसा श्रिया । अग्निर्निच्यवनो नाम पृथिवीं स्तौति केवलम् । विपाप्मा कलुषैर्मुक्तो विशुद्धार्च्चिषा ज्वलन् । विपापोऽग्निः सुतस्तस्य सत्यः समयधर्म्मकृत् । अक्रोशतां हि भूतानां यः करोति हि निष्कृतिम् । अग्निः स निष्कृतिर्नाम शोभयत्यभिसेवितः । अनुकूजन्ति येनेह वेदनार्त्ताः स्वयं जनाः । तस्य पुत्रः स्वनो नाम पावकः स रुजस्करः । यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति । तं प्राहुरध्यात्मविदो विश्वजिन्नाम पावकम् । अन्तरग्निः स्मृतो यस्तु भुक्तं पचति देहिनाम् । स जज्ञे विश्वभुङ्नाम सर्वलोकेषु भारत ! । ब्रह्मचारी यतात्मा च सततं विपुलव्रतः । ब्राह्मणाः पूजयन्त्येनं पाकयज्ञेषु पावकम् । पविला गोतमी नाम नदी यस्याऽभवत् प्रिया । तस्मिन् कर्म्माणि सर्वाणि क्रियन्ते धर्म्मकर्तृभिः । वडवाग्निः पिबत्यम्भो योऽसौ परमदारुणः । ऊर्द्ध्वभागूर्द्ध्वभाङ् नाम कविः प्राणाश्रितस्तु यः । उद्गधारं हविर्यस्य गृहे नित्यं प्रदीयते । ततः स्विष्टं भवेदाज्यं स्विष्टकृत् परमः स्मृतः । यः प्रयान्तेषु भूतेषु मनुष्यर्भवति पावकः । क्रुद्धस्य तरसा जज्ञे मनन्त्री चाथ पुत्रिका । खाहेति दारुणा क्रूरा सर्वभूतेषु तिष्ठति । त्रिदिवे यस्य सदृशो नास्ति रूपेण कश्चन अतुल्यत्वात् स्मृतो देवैर्नाम्ना कामस्तु पावकः । संहर्षाद्वारयन् क्रोधं धन्वी खड्गी रथे स्थितः समरे नाशयेच्छत्रू नमोघो नाम पावकः । उक्थो नाम महाभाग । त्रिभिरुक्थैरभिष्टुतः । महावाचन्यजनयत् समाम्नासं हि यं विदुः । २१८ अ०

काश्यपो बृहच्च वाग्विष्टः प्राणश्च प्राणपुत्रकः । अग्निरङ्गिरसश्चैव च्यवनस्त्रिसुवर्च्चकः । अचरत् स तपस्तीव्रं पुत्रार्थे ब्रह्मवार्षिकम् । पुत्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् । महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ । जज्ञे तेजो महार्च्चिष्मान् पञ्चवर्णः प्रभावनः । समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा । खड्नेत्रे च सुवर्णाभे कर्णे जज्ञे च भारत ! । पञ्चवर्णः स तपसा ऋतस्तैः पञ्चभिर्जनैः । याज्ञजन्यः श्रुतो देवः पञ्चवर्ण-

करस्तु सः। दश वर्षसहस्राणि तपस्तप्त्वा महातपाः। जनयत् पावकं घोरं पितॄणां स प्रजाः सृजत्। बृहद्रथन्तरं मूर्ध्नो वक्षाद्वा तरसा हरी। शिवं नाभ्यां बलादिन्द्रं वाय्वग्नी प्राणतोऽसृजत्। बाहुभ्यामनुदासौ च विश्वाभूतानि चैव ह। एतान् दृष्ट्वा ततः पञ्च पितॄणामसृजत् सुतान्। बृहद्रथस्य प्रणिधिः कश्यपस्य महत्तरः। भानुरङ्गिरसो धीरः पुत्रो वर्च्चस्य सौभरः। प्राणस्य चानुदात्तस्तु व्याख्याताः पञ्चविंशतिः। देवान् यज्ञसुषश्चान्यान् सृजत् पञ्चदशोत्तरान्। सुमीममतिभीमञ्च भीमं भीमबलाबलम्। एतान् यज्ञसुषः पञ्च देवानां ह्यसृजत्तपः। सुमित्रं मित्रवन्तञ्च मित्रज्ञं मित्रवर्द्धनम् मित्रधर्म्माणमित्येतान् देवानभ्यसृजत्तपः। सुरप्रवीरं वीरञ्च सुरेशं सुरवर्च्चसम्। सुराणामपि हन्तारं पञ्चैतान सृजत्तपः। त्रिविधं संस्तिता ह्येते पञ्च पञ्च पृथक् पृथक्। सुषुवुस्तत्र स्थिता ह्येते स्वर्गतो यज्ञयाजिनः। तेषामिष्टं हरन्त्येते निघ्नन्ति च महद्विषः। स्वर्द्वया हव्यवाहानां निघ्नन्त्येते हरन्ति च। द्यां वह्निर्वै तदादानं कुशलैः संप्रवर्त्तितम्। तदेते नोपसर्पन्ति यत्र चाग्निः स्थितो भवेत्। चिताग्नेरुद्वहन्त्याज्यं पक्षाभ्यां तत् प्रवर्त्तितम्। मन्त्रैः प्रशमिता ह्येते नष्टं सुषुवुरध्वरम्। बृहद्रुक्थस्तपस्यैव पुत्रो भूमिसुपाश्रितः। अग्निहोत्रे हूयमाने पृथिव्यां सङ्गिरिज्यते। रथन्तरस्य तपसः पुत्रोऽग्निः परिपठ्यते। मित्रविन्दाय वै तस्मै ऋषिरध्वर्य्यवो विदुः। सुषुवे परमप्रीतः सह पुत्रैर्महायशाः। २१९ अ०

गुरुभिर्नियमैर्जातो भरतो नाम पावकः। अग्निः पुष्टिमतिर्नाम तुष्टः पुष्टिं प्रयच्छति। भरत्येष प्रजाः सर्वास्ततो भरत उच्यते। अग्नेर्यस्य शिवो नाम शक्तिपूजापरश्च सः। दुःखार्त्तानाञ्च सर्वेषां शिवकृत् सततं शिवः। तपसस्तु फलं दृष्ट्वा सम्भवन्तं तपो महत्। उद्वर्त्तुकामो मतिमान् पुत्रो जज्ञे पुरन्दरः। जज्ञे चैवोशनो जज्ञे सोऽग्निर्भूतेषु गण्यते। अग्निश्चापि मनुर्नाम प्राजापत्यमकारयत्। यमुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः। आवसथ्यं द्विजाः प्राहुर्द्वीप्तमग्निं महाप्रभम्। अर्च्चिष्करान् हव्यवाहान् सुवर्णसदृशप्रभान्। ततस्तपो ह्यजनयत् पञ्च यज्ञसुतानिह। प्रधान्नोऽग्निर्महाभाग। परिधान्नो गवाम्पतिः। असुरान् जनयन् घोरान्मर्त्यांश्चैव पृथग्विधान्। तपसश्च क्रतुं पुत्रं भानुश्चाप्यङ्गिराः सृजत्। बृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः। भानोर्भार्य्या सुप्रजा तु बृहद्भासा तु सूर्य्यजा। असृजेतान्तु षट् पुत्रान् शृणु तेषां प्रजाविधिम्। दुर्ब्भलाभान्तु भूतानामसृजत् यः सम्भयच्छति। तमग्निं बलदं प्राहुः प्रथमं भानुतः सुतम्। यः प्रशान्तेषु भूतेषु मन्युर्भवति दारुणः। अग्निः स मन्युमाख्याम द्वितीयो भानुतः सुतः। दर्शे च पौर्णमासे च यस्येह हविरुच्यते। विष्णुर्नामेह योऽग्निस्तु धृतिमान् नाम सोऽङ्गिराः। इन्द्रेण सहितं यस्य हविराप्यायणं स्मृतम्। अग्निराप्यायनो नाम भानोरेवाभ्यजस्तु सः। चातुर्म्मास्येषु नित्यानां हविषां यो निरूपकः। चतुर्भिः सहितः पुत्रैर्भानोरेवाभ्यजस्तु सः। निशा यजनयत् कन्यामग्नीषोमावुभौ तथा। भानोरेवाभवद्भार्य्या सुषुवे पञ्च पावकान्। पूज्यते हविषाग्नेय चातुर्म्मास्येषु पावकः। पर्जन्यसहितः श्रीमानग्नियैश्वानरस्तु सः। अस्य लोकस्य सर्व्वस्य यः प्रभुः परिपठ्यते। सोऽग्निर्विश्वपतिर्नाम द्वितीयो वै मनोः सुतः। ततः स्विष्टं भवेदाज्यं स्विष्टकृत् परमस्तु सः। कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता। कर्म्मणाऽभौ बभौ भार्य्या स वह्निः स प्रजापतिः। प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम्। तस्य सन्निहितो नाम शब्दरूपस्य साधनः। शुक्लकृष्णगतिर्द्वेधा यो बिभर्त्ति हुताशनम्। अकल्मषः कल्मषाणां कर्त्ता श्रोधाश्रितस्तु सः। कपिलं परमर्षिञ्च यमाहुर्यतयः सदा। अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्त्तकः। अयं यज्ञन्ति भूतानां येन भूताभि नित्यदा। कर्म्मस्विह विचित्रेषु सोऽध्वर्य्युर्वह्निरुच्यते। इमानग्न्यान् समसृजत् पावकान् प्रथितान् भुवि। अग्निहोत्रस्य दुष्टस्य प्रायश्चित्तार्थमुत्थितान्। संसृष्टेषुर्यदाऽन्योऽन्यं कथञ्चिद्धावुनाऽग्नयः। दृष्टिरेताकपालेन कार्य्या वै शुचयेऽग्नये। दक्षिणाग्निर्यदा ह्याभ्यां संसृजेत तदा किल। दृष्टिरेताकपालेन कार्य्या वै वीतयेऽग्नये। यद्यग्नयो हि सृज्येयुर्निर्हवस्या दवाग्निना। दृष्टिरेताकपालेन कार्य्या तु शुचयेऽग्नये। अग्निं रजस्वला वै स्त्री संसृजेदग्निहोत्रिकम्। दृष्टिरेताकपालेन कार्य्या दस्रमतेऽग्नये। मृतः सूयेत यो जीवः परेद्युः प्रथवो यदा। दृष्टिरेताकपालेन कार्य्या सुरभतेऽग्नये। आर्त्तो न जुहुयादग्निं विद्वान् यस्तु ब्राह्मणः। दृष्टिरेताकपालेन कार्य्या साधुसराग्नये। दर्शञ्च पौर्णमासञ्च यस्य तिष्ठेत् प्रतिष्ठितम्। दृष्टिरेताकपालेन कार्य्या रतिपतेऽग्नये।

स्रुतिकाऽग्नियंदा चाग्निं संस्कृयेदग्निहोत्रिकम्। दृष्टि-रक्षाकपालेन कार्या चाग्निमतेऽग्नये। २२० अध्या०
आपस्य दुहिता भार्या सहस्य परमा प्रिया। भूपति-र्भुवभर्त्ता वाजनयत् पावकं परम्! भूतानाञ्चापि सर्वेषां यं प्राहुः पावकं पतिम्। आत्मा भुवनभर्त्तेति सान्वयेषु द्विजातिषु। महताञ्चैव भूतानां सर्वेषामिह यः पतिः। भगवान् स महातेजा नित्यं चरति पावकः। अग्नि-र्वैश्वपतिर्नाम नित्यं यज्ञेषु पूज्यते। हुतं वहति यो हव्यमस्य लोकस्य पावकः। अपां गर्भो महाभागः सत्त्व-भुग्यो महाद्युतः। भूपतिर्भुवभर्त्ता च महतः पतिरुच्यते। दहन्भूतानि भूतानि तस्याग्निर्भरतोऽभवत्। अग्निष्टोमे च भियतः क्रतुश्रेष्ठो भरस्य तु। स वह्निः प्रथमो नित्यं देवैरग्निष्यते प्रभुः। आयान्तं नियतं दृष्ट्वा प्रविवेशार्णवं भयात्। देवास्तमाधिगच्छन्ति मार्गमाणा यथादिशम्। दृष्ट्वा त्वग्निरथर्वाणं ततो वचनमब्रवीत्। देवानां वह हव्यं, त्वमहं वीर! सुदुर्बलः। अथ त्वं गच्छ मध्वक्षं प्रियमेतत् कुरुष्व मे। प्रेष्य चाग्निरथर्वाणमन्यं देशं ततोऽगमत्। तस्यास्तस्य समाचख्युः क्रुद्धस्तानग्निरब्रवीत्। भक्षा वै विविधैर्भावैर्भविष्यथ शरीरिणाम्। अथर्वाणं तथा चापि हव्यवाहोऽब्रवीद्वचः। अनुनीयमानो हि भृशं देव-वाक्याद्धि तेन सः। नैच्छद्दोढुं हविः सर्वं शरीरञ्चापि सोऽत्यजत्। स तच्छरीरं सन्त्यज्य प्रविवेश धरान्तदा। भूमिं स्पृष्टाऽहजज्ञातून् पृथक् पृथगतीव हि। पूयात् स गन्धं तेजश्च अस्थिभ्यो देवदारु च। श्लेष्मणः स्फटिकं तस्य पित्तान्मारकतं तथा। यत्तत् कृष्णायसं तस्य तिभि-देव प्रभुः प्रजाः। नखास्तस्याभ्रपटलं शिराजालानि विद्रुमम्। शरीरादिविधास्तस्य धातवोऽस्याभवन्नृप!। एवं त्यक्त्वा शरीरञ्च परमे तपसि स्थितः। भृग्वङ्गिरादिभि-र्भूयस्तपसोत्थापितस्तदा। भृशं जज्वाल तेजस्वी तपसा-प्यायितः शिखी। दृष्ट्वा ऋषिं भयात्त्रापि प्रविवेश महा-र्णवम्। तस्मिन्नष्टे जगन्नीतमथर्वाणमथाश्रितम्॥ अर्च्चया मासुरैवेनमथर्वाणं सुरादयः। अथर्वा त्वसृजल्लोका-नात्मनालोक्य पावकम्। मिषतां सर्वभूतानामुन्ममाथ महा-र्णवम्। एवमग्निर्भगवता नष्टः पूर्वमथर्वणा। आहूतः सर्वभूतानां हव्यं वहति सर्वदा। एवं त्वजनयद्विप्रान् वेदोक्तान् विविधान् बहून्। विचरन् विविधान् देशान् भ्रममाणस्तु तत्र वै। सिन्धुं नदं पञ्चनदं देविकाऽथ सरस्वती। गङ्गा च यमुनाञ्चा च सरयूगण्डकाह्वया चर्म्मण्वती सती चैव भेध्या मेधातिथिस्तदा। ताम्रावती वेत्रवती नद्यश्चिक्षोऽथ कौशिकी। तमसा नर्मदा चैव नदी गोदावरी तथा। वेरोपवेरा भीमा च वडवा चैव भारत॥ भारती सुप्रयोगा च कावेरी सुप्रभा तथा। तुङ्गवेणा कृष्णवेणा कपिला शोण एव च। एता नद्यस्तु विप्राणां मातरो याः प्रकीर्त्तिताः। अङ्गस्य प्रिया भार्या तस्य पुत्रो विभूरसिः। यावन्तः पावकाः प्रोक्ता सोमास्तावन्त एव तु॥ अत्रेश्चाप्यन्वये जाता ब्रह्मणो मानसाः प्रजाः। अत्रिः पुत्रान् सृष्टुकामांस्तानेवात्मन्यधारयत्। तस्य तद्ब्रह्मणः कायाच्चिक्षरन्ति हुताशनाः एवमेते महात्मानः कीर्त्तिता-स्तेऽग्नयो मया॥ अप्रमेया यथोत्पन्नाः श्रीमन्तस्तिमिरा-पहाः। अङ्गस्य तु महाभाग यथा वेदेषु कीर्त्तितम्। तादृशं विद्धि सर्व्वेषामेको ह्येष हुताशनः। एक एवैष भगवान् विज्ञेयः प्रथमोऽङ्गिराः। बहुधा निःसृतः कायात् ज्योतिष्टोमक्रतुर्यथा। इत्येष वंशः सुमहानग्नीनां कीर्त्तितोमया। योऽर्च्चितो विविधैर्मन्त्रैर्हव्यं वहति देहिनाम्। भा० व० मार्क० २२१ अध्या०।

साम देवतेति—ढक् आग्नेयमग्निदेवताके ऋविरादौ त्रि०। अग्निना दृष्टं साम ढक्। आग्नेयं साम। आग्नेयी ऋक् त्रि०। अग्नये हितं ढक्। आग्नेयमौषधम् त्रि०।

लौकिकप्रयोगानुसारेण "अङ्गेर्नलोपश्चेति" औणादिकसूत्रेण अग्निशब्दस्य व्युत्पत्तिर्दर्शिता वैदिकप्रयोगे तु अग्निशब्दस्य प्रवृत्तिनिमित्तभेदोपयोगित्वो यास्केन बहवो व्युत्पत्तयो-दर्शिताः। यथा "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मात्प्रणीर्भवत्यग्रं यज्ञेषु प्र-णीयतेऽङ्गं नयति संनममानोऽङ्गोपनो भवतीति स्थौला-ष्ठीविर्नङ्गोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति" यास्कपूर्णिरितादङ्गाद्दग्धाद्वा नीनात् खल्वेतेरकार-मादत्ते गकारमनङ्गोर्वा दहतेर्वा नीः परस्तस्यैषा भवतीति" अग्निमीळे इति"। अस्यायमर्थः। सामान्येन सर्व-देवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितमतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यायते। कस्मात्-प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत? इति प्रश्नस्या-थणीरित्यादिकमुत्तरम्। देवसेनानाम्ने स्वयं नयतीत्य-थणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्। "अग्निर्वै देवानां सेनानीरिति"। एत-देवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति। "अग्नि-

मुखं प्रथमो देवतानामिति" मन्त्रः। "अग्निर्वै देवानामवम इति" ब्राह्मणम्। तथा तैत्तिरीयाश्चामनन्ति। "अग्निरग्ने प्रथमो देवतानामिति" मन्त्रः। "अग्निरवमो देवतानामिति" च। वाजसनेयिनस्त्वेवमामनन्ति। "स वा एषोऽग्ने देवतानामजायत तस्मादग्निर्नामेति"। यज्ञेऽग्निहोत्रेष्टिपशुसोमरूपेष्वयं पूर्व्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात्प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम्। यज्ञमानः समक् स्वयमेव प्रह्वीभगवद्भक्तं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम्। स्थूलाक्षीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदक्रोपन इत्यग्निशब्दं निर्वक्ति। तत्र न क्रोपयतीत्युक्तो न स्नेहयति किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्वाद्दग्निशब्दनिष्पत्तिं मन्यते। इतः इण् गतौ इति धातुः। अक्तोऽञ्जु व्यक्तिम्रक्षणगतिषु इति धातुः। दग्धो दह भस्मीकरणे इति धातुः। नीतो णीञ् प्रापणे इति धातुः। अग्निशब्दो हकारगकारनिशब्दानपेक्षमाण एतिधातोरौत्तमाद्यनशब्दाद्कारमादत्ते। अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते। यद्वा दहति धातुजन्याद्दग्धशब्दाद्गकारमादत्ते। नीरिति नयतिधातुः स च हुरुको भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाग्निशब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविःपाके च प्रेरयतीति समुदायार्थः। तस्माग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन श्रुतिदर्शनायैषाग्निमीळे इत्यृग्भवतीति" ऋग्वेदभाष्ये माधवाचार्य्यः एतस्य वैश्वनरादिशब्दप्रवृत्तिनिमित्तदर्शनेनानेकाश्रुतयो यास्केन दर्शितास्ताश्च तत्तच्छब्दावसरे दर्शयिष्यन्ते।

अग्निक पु० अग्निवत् कायति प्रकाशते कै-क। इन्द्रगोपकीटे।

अग्निकण पु० अग्नेः कणः ६त०। अग्निच्युतक्षुद्रांशे।

अग्निकर्म्मन् न० अग्नौ कर्म्म ७त०। होमे अग्निहोत्रादौ "अग्निकर्म्म ततः कृत्वेति" स्मृतिः अग्निकार्य्यादयोऽत्र न०।

अग्निकला स्त्री ६त०। अग्नेरवयवभेदे। सा च दशविधा तासाञ्च वह्निजान्वर्णदेवतात्वं यथोक्तं शारदातिलके। "धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी। सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि। वह्नीनां दशवर्णानां कला धर्म्मप्रदा अमूः" इति।

अग्निकारिका स्त्री अग्निं करोति आधत्ते करणे ण्वुल्त्वोपचारात् कर्त्तरि ण्वुल्। अग्न्याधानसाधनेऽग्नौ भावाच्चि। सा च अग्निं दूतं पुरोदधे, इत्यादौ यजुर्वेदे एवमन्यवेदेऽप्यनुसन्धेया।

अग्निकाष्ठ न० अग्नेः उद्दीपनं काष्ठम् शा० त०। अगुरुकाष्ठे।

अग्निकुक्कुट पु० अग्नेः कुक्कुटइव रक्तवर्णस्फुलिङ्गवत्त्वात्। ज्वलदग्निव्याप्तदग्धपुञ्जे (हुडा) इति ख्याते।

अग्निकुण्ड न० अग्नेराधानार्थं कुण्डम्। अग्न्याधानार्थे स्थानभेदे तत्स्थानविवरणं कुण्डशब्देऽनुसन्धेयम्।

अग्निकुमार पु० ६त०। कार्त्तिकेये तस्याग्निरेतोजातत्वञ्च महाभारते वनपर्वणि २२३ अध्याये सप्तर्षिपत्नीरूपदर्शनात् जातस्मरविकारस्याग्नेस्तेषां गार्हपत्य-प्रवेशेन अग्निं तद्दर्शनेन जाताधिकविकारं तयानिर्वेदपूर्व्वकं वनगमनमुपक्रम्य, "स्वाहा तं दक्षदुहिता प्रथमं कामयत्सदा ॥ सा तस्य चिरमन्वैच्छच्चिरात् प्रभृति भाविनी। अप्रमत्तस्य देवस्य न चापश्यदनिन्दिता ॥ सा तं ज्ञात्वा यथावत्तु वह्निं वनसमाश्रया गतम्। तत्त्वतः कामसन्तप्तं चिन्तयामास भामिनी ॥ अहं सप्तर्षिपत्नीनां कृत्वा रूपाणि पावकम्। कामयिष्यामि कामार्त्ता तासां रूपेण मोहितम् ॥ एवङ्कृते प्रीतिरस्य कामावाप्तिश्च मे भवेत् ॥ २२३ अध्या०

मार्कण्डेय उवाच। शिवा भार्य्या स्वङ्गिरसः शीलरूपगुणान्विता। तस्याः सा प्रथमं रूपं कृत्वा देवी जनाधिप। जगाम पावकाभ्यासं तञ्चोवाच वराङ्गना ॥ मामग्ने! कामसन्तप्तां त्वं कामयितुमर्हसि। करिष्यसि न चेद्देवं वृथा मामुपधारय ॥ अहमङ्गिरसो भार्य्या शिवा नाम हुताशन!। शिष्टाभिः प्रकृता प्राप्ता मन्त्रविद्या विनिश्चयम् ॥ अग्निरुवाच। कथं मां त्वं विजानीषे कामार्त्तं मितरः सदृक्। यास्त्वया कीर्त्तिताः सर्व्वाः सप्तर्षीणां प्रियाः स्त्रियः ॥ शिवोवाच। अरुन्धतीं त्वं प्रियो नित्यं विभीमस्तु पत्नी तव। त्वच्चित्तमिङ्गितैर्ज्ञात्वा प्रेषितास्मि तवान्तिकम् ॥ मैथुनायेह संप्राप्ता कामं प्राप्नुं वृतं चर। यातरो मां प्रतीक्षन्ते गमिष्यामि हुताशन! ॥ मार्कण्डेय उवाच। ततोऽग्निरूपयेमे तां शिवां प्रीतिसदायुतः। प्रीत्या देवी समायुक्ता शुक्रं जग्राह पाणिना ॥ अग्निस्वयम्भेदं ये रूपं कृत्स्नन्ति कानने। ते आङ्गिरसीनामकृतं दोषं वक्ष्यन्ति पावके ॥ तस्मादेतद्वृजमाणा गर्भजो संभवाम्यहम्। वनाग्निगमनञ्चैव सुखं मम भविष्यति ॥ मार्कण्डेय उवाच। सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्। अपश्यत् पर्वतं श्वेतं शरस्तम्बैः सुसंवृतम् ॥ दृष्टिविषैः सप्तभिर्वेष्टितं

भोगिभिरङ्गतैः । रक्षोभिश्च पिशाचैश्च रौद्रैर्भूतगणैस्तथा राक्षसीभिश्च संपूर्णमनेकैश्च मृगद्विजैः ॥ सा तत्र सहसा गत्वा शैलपृष्ठं सुदुर्गमम् । प्राक्षिपत् काञ्चने कुण्डे शुक्रं सा त्वरिता शुभा ॥ शिष्टानामपि सा देवी सप्तर्षीणां महात्मनाम् । पत्नीस्वरूपकं कृत्वा कामयामास पावकम् ॥ दिव्यं रूपमरुन्धत्याः कर्तुं न शकितं तया । तस्यास्तपः प्रभावेन भर्तृशुश्रूषणेन च ॥ षट्कृत्वस्तत्र निक्षिप्तमग्नेरेतः कुरूत्तम ! । तस्मिन् कुण्डे प्रतिपदि कामिन्या स्वाहया तदा ॥ तत् स्वाहं तेजसा तत्र संहृतं जनयत् सुतम् । ऋषिभिः पूजितं स्वाहमनयत् स्वान्तां ततः । षट्शिरा द्विगुणश्रोत्रो द्वादशाक्षिभुजक्रमः । एकग्रीवैकजठरः कुमारः समपद्यत ॥ वन० भा० स० २२३ अध्यायः

अग्निकुमारत्वेऽपि तस्य रुद्रकुमारत्वं तदुक्तं तत्रैव "ततो ब्रह्मा सहस्राक्षं प्रजापतिरथाब्रवीत् । अभिगच्छ महादेवं पितरं त्रिपुरार्दनम् ॥ रुद्रेणाग्निं समाविश्य स्वाहामाविश्य भीमया । हितार्थं सर्व्वलोकानां जातस्त्वमपराजित ! ॥ उभाभ्यान्तु रुद्रेण शुक्रं सिक्तं महात्मना अग्निनु गिरौ निपतितं मिञ्जिकामिञ्जिकं ततः ॥ सम्भूतं लोहितोदे तु शुक्रमेषमथापतत् । सूर्य्यरश्मिषु चाप्यन्य दन्यच्चैवापतद्भुवि । आसक्तमन्यद्वृक्षेषु तदेवं पञ्चधापतत् ॥ इति २२४ अध्याये । अग्नितनयाग्निसुतादयोऽत्र ।

अग्निकेतु पु० अग्नेः केतुरिव । धूमे तस्याग्निप्रभवत्वेन तच्चिह्नीभूतत्वम् गगने उड्डूयमानत्वात् तत्पताकत्वञ्च ।

अग्निकोण पु० अग्नेः अग्निदेवताकः कोणः अन्तरालदिक् इत० । अग्निदैवत्ये पूर्व्वदक्षिणयोर्मध्ये दिग्भागे । "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेरईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्तेः तस्य पूर्व्वदक्षिणदिशोर्मध्यदिक्पतित्वम् । उपचारात् तत्स्वामिनोऽग्नेर्वाचका अपि अत्रैव । "प्रतिपत् नवमी पूर्व्वा रामरुद्रौ च पावके" इति ज्योतिषे "अग्नेः कृताग्ने भयमिति" च अग्निकोणपरतया पावकादिशब्दः प्रयुक्तः ।

अग्निगर्भ पु० अग्निरिव जारको गर्भोऽस्य । अग्निजारवति । अग्निर्गर्भोऽस्य । सूर्य्यकान्तमणौ (आतसि) तस्य सूर्य्यकिरणसम्पर्कात् अग्न्युत्पादकत्वात्तथात्वम् । अग्निमन्थन काष्ठरूपारण्यौ च । अग्निः स्थितो गर्भोऽस्याः । शमीलतायाम् स्त्री । "अग्निगर्भां शमीमिवेति" रघुः । शमीगर्भेऽग्निस्थितिकथा भा० आनुशा० प० ८५ अध्याये "रुद्रस्य रेतःप्रस्कन्नमग्नौ निपतितञ्च यत् तत्तेजोऽग्निर्महद्भूतं द्वितीयमिव पावकम् । वधार्थं देवशत्रूणां गङ्गायां जनयिष्यतीति" ब्रह्मवाक्यानन्तरं कार्त्तिकेयोत्पत्त्यर्थमग्निमाणस्य कुतश्चित् कारणेन गुप्तस्याग्नेः "नष्टात्मानि संलीनं नाधिजग्मुर्हुताशनमित्यनेन" देवैस्तस्यानासादने उक्ते नानास्थानेऽन्वेषणात् परिशेषे शमीगर्भे प्राप्तिरुक्ता, यथा "अश्वत्थाद्गिर्गतोवह्निः शमीगर्भमुपाविशदिति" । शमीगर्भेचास्य स्थितिं कथयतः शुकस्य जिह्वापरिवृत्तिरूपशापदानस्तुत्या देवैस्तस्मै वरान् दत्त्वा शमीगर्भे वह्निरलक्ष्यत इत्युक्त्वा च "इत्युक्त्वा तं शमीगर्भे वह्निमालक्ष्य देवताः तदेवायतनं चक्रुः पुण्यं सर्व्वक्रियास्वपि । ततः प्रभृति चाग्निः स शमीगर्भेषु दृश्यते । उत्पादने तथोपायमधिजग्मुश्च मानवा" इति ।

अग्नेः सकाशात् गर्भोऽस्याः पृथिव्यां स्त्री । वह्निना गङ्गायामासिक्तगर्भस्य धारयितुमशक्यस्य पृथिव्यां सुमेरौ गङ्गया निक्षेपणमुक्तं तत्रैव । "सा वह्निना वार्य्यमाणा देवैरपि सरिद्वरा । ससृत्सर्ज तं गर्भं मेरौ गिरिवरे तदेति, उक्ता "तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्व्वतेषु च तत् सर्व्वं काञ्चनीभूतं समन्तात् पुत्यदृश्यत । पृथिवी च तदा देवी ख्याता वसुमतीति च स तु गर्भो महातेजाः गाङ्गेयः पावकोऽभवः दिव्यं शरवणं प्राप्य वर्द्धेऽद्भुतदर्शनः इति भा० आनु० ८५ अ० । अतएव श्रुतौ "यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी" इत्युक्तम् । अग्निरिव गर्भोमध्यभागोऽस्याः । अग्निदीप्तायां महाज्योतिष्मतीलतायाम् स्त्री ।

अग्निगृह न० अग्निकार्य्यार्थं गृहं या० त० । होमार्थे गृहे इत० । श्रौतस्मार्त्ताग्निकृत्याधारे गृहे न । अग्न्यागारादयोऽत्र । "वसंश्चतुर्थोऽग्निरिवाग्न्यगारे" इति रघुः ।

अग्निग्रन्थ पु० अग्निप्रतिपादकः ग्रन्थः या० त० । अग्निहोमादि-प्रतिपादके शास्त्रे "अग्निग्रन्थपर्य्यन्तमधीते" सि० कौ० अग्निग्रन्थः अग्निप्रतिपादकः ग्रन्थ इति तत्त्वबो० । एवमेव मत्कृतसरलायाञ्चकम् ।

अग्निघृत न० अग्न्युद्दीपनं घृतं या० त० । वैद्यकोक्ते घृतभेदे यथा चक्रदत्तः ।

"पिप्पलीपिप्पलीमूलं चित्रको हस्तिपिप्पली । हिङ्गुचव्याऽजमोदा च पञ्चैव लवणानि च ॥ द्वौ क्षारौ क्षवुधा चैव दद्यादर्द्धपलोन्मितान् । दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च । आर्द्रकं रसं प्रस्थं घृतप्रस्थं विपाचयेदिति । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते इति" ॥

"भल्लातकसहस्रार्द्धं जलद्रोणे विपाचयेत् । अष्टभागावशेषञ्च कषायमवतारयेत् । घृतप्रस्थं समादाय कल्कानीमानि दापयेत् । व्योषं पिप्पलीमूलं चित्रको हस्तिपिप्पली ॥ हिङ्गुचव्याजमोदा च पञ्चैव लवणानि च । द्वौ चारौ हपुषा चैव दद्यादर्द्धपलोन्मितान् ॥ दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च । आर्द्रकं सरसञ्चैव शोभाञ्जनरसस्तथा ॥ तत् सर्व्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते" इति च ।

अग्निचयन पु० अग्निश्चीयते आधीयते अनेन चि-करणे ल्युट् ६त० । अग्न्याधानसाधने मन्त्रभेदे, भावे ल्युट् ६त० । अग्न्याधाने न० ।

अग्निचित् त्रि० अग्निं चितवान् चि-भूतार्थे क्विप् । मन्त्रपूर्ब्बकश्रुतवह्निस्थापने अग्निहोत्रिणि । भावे क्विप् । अग्न्याधाने ।

अग्निचित्या स्त्री अग्नेश्चित्या चि-भावे क्यप् नि० स्त्रीत्वम् । अग्निचयने अग्न्याधाने "उपविशेदग्निमुच्छ्रस्य सामिचित्यायामिति" गृह्यम् । "चित्याग्निचित्ये" चेति पा० ।

अग्निचित्वत् त्रि० अग्निचित् अग्निचयनमस्त्यस्मिन् मतुप् मस्य वः तान्तत्वान् न पदत्वम् । अग्निचयनयुक्तेषु यज्ञेषु "अध्वरेष्वग्निचित्वत्सिति" भट्टिः स्त्रियां ङीप् ।

अग्निज पु० अग्नये अग्न्युद्दीपनाय जायते सेवनात् प्रभवति जन-ड ३त० । अग्निजारवृक्षे । अग्नेर्जायते जन-ड ५त० । स्वर्णे न० । कार्त्तिकेये पु० । तत्कथाऽग्निकुमारशब्दे द्रष्टव्या । अग्निजातमात्रे त्रि० "अग्निजा-औषधिजा महीनामिति श्रुतिः" "अग्नीश्वरस्य भक्तानां न भयं विद्युदग्निजमिति" काशीखण्डः ।

अग्निजन्मन् पु० अग्नेर्जन्माऽस्य ५त० । कार्त्तिकेये तद्विवरणम् अग्निकुमारशब्देऽनुसन्धेयम् । स्वर्णे न० ।

अग्निजार पु० जारयति जृ-णिच्-कर्त्तरि अण् अग्निरिव जारः । स्वनामख्याते वृक्षे, औषधभेदे च । रक्ष० तत्वे अग्निजालोऽत्र ।

अग्निजिह्व त्रि० अग्निर्जिह्वेवास्यादसाधनं यस्य । अग्निमुखे देवे "ये अग्निजिह्वा उत वा यजत्रा" श्रुतिः अग्निरेव जिह्वाऽस्य । वराहमूर्त्तिधारणकाले विष्णोर्वराहरूपे "अग्निजिह्वो दर्भरोमेति वराहरूपवर्णने विष्णुः । ६त० । अग्निजिह्वायां स्त्री सा च सप्तविधा तासां नामानि यथा "कराली धूमिनी श्वेता लोहिता नीललोहिता सुवर्णा पद्मरागा च जिह्वाः सप्त विभावसोरिति" कथं तासामग्निमुखे स्थितिस्तच्च अग्निशब्दे तदुध्याने दर्शितम् अग्नेर्जिह्वेव शिखाऽस्याः ब० । लाङ्गलीवृक्षे स्त्री ।

अग्निज्वाला स्त्री अग्नेर्ज्वालेव शिखाऽस्याः । गजपिप्पलीवृक्षे । (विषलाङ्गला) ६त० । अग्निशिखायाम् ।

अग्नितप् त्रि० अग्निना तप्यते तप-क्विप् । अग्निना तपस्याकारके "परावीरास एतनमर्य्यास भद्रजानयः । अग्नितपो यथा सधेति, श्रुतिः ।

अग्नितपस् त्रि० अग्निभिः सम्मुखस्थसूर्य्यसहितचतुर्दिक्स्थपावकैस्तप्यते तप-असुन् ३त० । "ग्रीष्मे पञ्चाग्निमध्यस्थ" इति स्मृत्युक्ततीव्रतपस्याकारके । तपतीति तपाः अग्निरिव तपाः । अग्निसदृशोष्णस्पर्शवति । "यदा बलमप्रतीयतोजसुभेदृहस्पतिरग्नितपोभिरकैरिति" श्रुतिः ।

अग्नितेजस् त्रि० अग्नेरिव तेजोऽस्य । अग्नितुल्यतेजस्के पदार्थे "अग्निलोकोऽग्नितेजस, इति काशी० । "विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंशितो अग्नितेजा इति" श्रुतिः । ६त० । अग्नेस्तेजसि न० ।

अग्निचय न० चीयतेऽसौ चीयते वा चि+अयट् ६त० । यथाविधानेन कृताधाने अग्नित्रितये । पित्रादीन्यपक्रमात् "एतएव त्रयोलोका एतएव त्रयोऽग्नयः । पिता गार्हपत्याग्निर्माता दक्षिणाग्निः, आचार्य्य आवसथीय इति" विष्णूक्ते गार्हपत्यदक्षिणाग्न्यावसथीयत्रितयरूपे पित्रादौ च । अस्य वा स्त्रीत्वे ङीप् अग्नित्रयीत्यत्र ।

अग्निद त्रि० अग्निं गृहादौ दाहार्थं ददाति दा-क । गृहादौ दाहार्थं वह्निदायके आततायिभेदे "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिन इति" स्मृतिः ।

अग्निदग्ध त्रि० अग्निना अग्न्येष्टिविधानेन दग्धः दह-कर्म्मणि क्त । शास्त्रविधानेन संस्कृताग्निना कृतदाहे "अग्निदग्धास्तु ये जीवा येऽप्यदग्धाः कुले मम, इति वायु पु० । अग्निना कृतदाहे पदार्थमात्रे त्रि० । "अग्निदग्धाविमौ पक्षाविति" रामा० ।

अग्निदग्धी स्त्री अग्निर्दह्यतेऽनया दह-णिच्-करणे ल्युट् ६त० ङीप् । कण्टकारिकायाः वृक्षे-कण्टकारिकाशब्दे गुच्छस्यगुप्रकारवति (गछियारी) इति ख्याते क्षुपभेदे ।

अग्निदाह स्त्री० अग्निं विधानेन ददाति दा-क्त । अन्त्येष्टिविधानेन दाहकारके "यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् सएव हि" इति स्मृतिः । स्त्रियां ङीप् ।

अग्निदीपन त्रि० अग्निं जठरस्थानलं दीपयति दीप-णिच्-ल्यु ६त० । जठरानलोद्दीपके पदार्थभेदे औषधभेदे न० ।

अग्निदीप्ता स्त्री अग्निर्जठरानलोदीप्तः सेवनात् यस्याः । ज्योतिष्मतीलतायाम् ।

अग्निदूत पु० अग्निर्दूत इव यस्मिन् यस्य वाऽऽवाहकत्वात् । अग्न्याधानानन्तरमाहूतदेवके यज्ञादौ, "यमं ह "यज्ञो गच्छत्यग्निदूतो अरं कृत" इति वेदः तत्राहूते देवे च अतएव यज्ञे अग्नेर्दूतत्वमग्निस्थापने मन्त्रे "अग्निं दूतं पुरोदधे इति, 'अग्निं दूतं वृणीमहे इति' च श्रुतावुक्तम् ।

अग्निदेवा स्त्री अग्निर्देवोऽस्याः । कृत्तिकातारायाम् "अश्वियमदहनगणिकमलजम्बूलभद्रदितिजीवकर्णिपितर इति" ज्योतिषे अश्विन्यादीनां क्रमशोऽश्व्यादिदेवतात्वकथनात् तत्क्रमात् कृत्तिकाया अग्निदैवत्वम् ।

अग्निध् पु० अग्निं दधाति मन्त्रविधिना स्थापयति धा-क्विप् त्रि० आरोपः ६त० । अग्न्याधानकर्त्तरि । "अध्वर्युं वा मधुपार्किं सुहृत्तमग्निधं वा धृतदक्षं दमूनसमिति" वेदः ।

अग्निधान न० अग्निर्विधिना धीयतेऽस्मिन् धा-आधारे ल्युट् ६त० । अग्निहोत्रगृहे "पदं क्षणुते अग्निधाने" इति वेदः । [तारावह्नितारकादयोऽश्वत्थ ।

अग्निनक्षत्र न० ६त० । अग्निदैवत्ये कृत्तिकानक्षत्रे अग्नि-

अग्निनयन न० अग्नेर्नयनं मन्त्रविधिना संस्कारः नी-भावे ल्युट् ६त० । अग्निसंस्काररूपे विधिना अग्निप्रणयने ६त० । अग्निनेत्रे न० । [अग्निजारवृक्षे ।

अग्निनिर्यास अग्नेः जठरानलस्यैव दीपको निर्यासोऽस्य ।

अग्निनेत्र पु० अग्निर्नेता हुतहविःप्रापयिता यस्य अच् समा० । देवतामात्रे । "हव्यं वहति देवानामिति" श्रुतौ हि तस्य देवेभ्यो हव्यवाहकत्वमुक्तम् । ६त० । वह्निनयने न० ।

अग्निपद न० ६त० । अग्न्याधानस्थाने अग्निबोधकशब्दे च । तत्र दीयते इत्यर्थे भुवादित्वात् अण् आग्निपदम् ।

अग्निपरिक्रिया स्त्री अग्नेः परिक्रिया परिचर्य्या परि+कृ-भावे श ६त० । अग्निचर्य्यायां होमादिकरणे । [पर्व्वतभेदे ।

अग्निपर्व्वत पु० अग्निसाधनं पर्व्वतः । खतः अग्निसम्भवो

अग्निपुच्छ पु० न० अग्नेरग्न्याधानस्थानस्य पुच्छ इव । आहिताग्निस्थानात् पृष्ठभागे । "दक्षिणत आवसथ्यस्योपविशेदग्निपुच्छस्य सान्निध्यायामिति" श्रुतिः ।

अग्निपुराण न० अग्निना प्रोक्तं पुराणम् । वेदव्यास प्रणीतेषु अष्टादशसु महापुराणेषु मध्येऽष्टमे वह्निनोक्ते पुराणभेदे तद्विवरणं यथा ।

"आग्नेयमष्टमं कृतमिति" भागवते । "परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् । चतुर्द्दश सहस्राणि परं पञ्चशतानि च" इति ब्रह्मवैवर्त्ते । तत्राभिधेयसंक्षेपः । भगवतोऽवतारः, सृष्टिप्रकारः, विष्णुपूजा, अग्निपूजा, सुद्रादिलक्षणम्, दीक्षा, अभिषेकः, मण्डपलक्षणम् कुशमार्जनाविधिः, पवित्रारोपः, देवतायतनादिनिर्म्माणप्रकारः, द्वारस्थामलक्षण—पूजे, देवप्रतिष्ठानियामकदीक्षा, देवप्रतिष्ठाविधिः, ब्रह्माण्डस्वरूपं, गङ्गादितीर्थमाहात्म्यं, द्वीपवर्णनम् अधोलोकवर्णना, ज्योतिश्चक्रस्वरूपम् । युद्धजयोपायषट्कर्म्मविधानम्, यन्त्रमन्त्रौषधप्रकारः कुञ्जिकार्च्चनाविधिः, कोटिहोमविधानम्, ब्रह्मचर्य्यधर्म्मः, आह्निकल्पः सूर्य्यार्च्चः, वैदिकस्मार्त्तकर्म्माणी, प्रायश्चित्तम्, तिथिभेदे व्रतभेदः, वारव्रतनक्षत्रव्रते, मासव्रतम्, दीपदानविधिः, नूतनव्यूहारम्भादि, नरकनिरूपणम्, दानव्रतम्, नाडीचक्रम्, सन्ध्याविधिः, गायत्र्यर्थः, शिवस्तोत्रं, राज्याभिषेकः, राजधर्म्मः, राजाश्वमेधयागस्तम्, शुभाशुभशकुनादि, मण्डलादि, रत्नदीक्षाविधिः, श्रीरामनतिः, रत्नलक्षणम्, धनुर्विद्या, व्यवहारविधिः, देवासुरयोर्युद्धम्, आयुर्वेदः, गजादिचिकित्सा, पूजाप्रकारः । शान्तिविधिः, छन्दःशास्त्रम्, साहित्यं, शिष्टानुशासनम्, सृष्ट्यादिप्रलयवर्णने, शारीरकरूपं, नरकवर्णनम्, योगः, ब्रह्मज्ञानम्, पुराणमाहात्म्यञ्च ॥

एते विषयाः संक्षेपेण दर्शिता विस्तरस्तस्यैव द्रष्टव्यः ॥

अग्निप्रणयन न० अग्नेः प्रणयनं मन्त्रपूर्व्वकं संस्कारः प्र+नी-भावे ल्युट् ६त० । शास्त्रोक्तविधानेन वह्निसंस्कारभेदे "दक्षिणत आहवनीयेऽवस्थितस्याग्नेः सौमिकायामुत्तरवेद्यां नयनं यदस्ति तदेतदग्निप्रणयनमिति" भट्टभाष्यम् ।

अग्निप्रस्कन्दन न० ६त० । यथाविधानमग्निकार्य्यरूपहोमाचरणे "प्रजाश्च यौवनं प्राप्य विनश्यिष्यन्त्यनो ! तव । अग्निप्रस्कन्दनपरस्त्वमाप्येवं भविष्यसीति, पुरुमन्तं प्रति ययातिवाक्यम् भार० आदि प० ।

अग्निप्रस्तर पु० अग्निं प्रस्तृणाति स्तृ-अच् अग्नेर्वा प्रस्तरः । (चकमकीति) ख्याते वह्न्युत्पादके प्रस्तरखण्डे ।

अग्निबाहु पु० अग्नेर्बाहुरिव दीर्घशिखत्वात् । धूमे ।

अग्निभ न० अग्निरिव भाति भा-क । स्वर्णे अग्नितुल्यवर्णत्वात् तस्य तथात्वम् । वह्नितुल्यवर्णपदार्थे त्रि० । भ० नक्षत्रं ६त० । अग्निदैवत्ये कृत्तिकानक्षत्रे न० ।

अग्निभू पु० अग्नेर्भवति भू-क्विप् । कार्त्तिकेये अग्निकुमार

शब्दे तदुद्भवकथा । अग्निसम्भवे त्रि० । स्वर्णे न० कृष्णान्तः । अग्निभवादयोऽर्थवत् ।

अग्निभूति पु० अग्निरिव भूतिः तेजस्वित्वादैश्वर्य्यमस्य । बौद्धभेदे हेत० । पावकविभूत्यां तद्वीर्य्ये च स्त्री । हेव० । वह्निसम्भवे त्रि० ।

अग्निभ्राजस् त्रि० अग्निरिव भ्राजते भ्राज-असुन् । वह्नितुल्यदीप्तियुक्ते । 'अग्निभ्राजसोविद्युतो गर्भस्य इति' वेदः ।

अग्निमणि पु० अग्नेरुत्तापकोमणिः ष० त० । सूर्य्यादितैजसद्रव्यसम्पर्कात् अग्न्युत्तापके सूर्य्यकान्ताभिधे मणौ (आतशी) (चक्मकीति) ख्याते प्रस्तरे च ।

अग्निमत् पु० अग्निराधानादस्यास्ति मतुप् । यथाविधानेनाहिताग्निके साग्निके द्विजे "दारास्त्रग्निं विनिःक्षिप्य प्रवसेदनग्निमान् द्विजः" इति स्मृतिः ।

अग्निमथ् पु० अग्निं मथ्नाति अरणिद्वयघर्षणेन निष्पादयति मन्थ–क्विप् नलोपः । अग्न्याधानार्थमरणिद्वयघर्षणेन वह्निसम्पादके याज्ञिके । करणे क्विप् । अग्निमन्थसाधने मन्त्रे, अरणिकाष्ठे च त्रि० ।

अग्निमन्थ पु० अग्निर्मथ्यतेऽनेन मन्थ-करणे घञ् । गणिकारीवृक्षे (गणियारि) तत्काष्ठयोर्घर्षणे हि आशु वह्निरुद्भाव्यते । तन्मन्थनसाधने मन्त्रे च । करणे ल्युट् हेत० । अग्निमन्थनोऽप्युक्तार्थे त्रि० स्त्रियां ङीप् ।

अग्निमान्द्य न० अग्नेर्जठरानलस्य मान्द्यं पाचनकृच्छ्रता । धातुवैषम्येण जठरानलस्य पाचनशक्तिराहित्ये "अग्नीश्वरस्य भक्तानां न विद्युदग्निजं भयम् अग्निमान्द्यभयं नैवेति" काशीखण्डः । अग्निमान्द्येऽजीर्णता स्यात् तत्काल्यभोजनं कार्य्यं यथा । 'सुकुमारकुरजीर्णेऽपि भोज्यमस्योपकल्पयेत् इति चक्र० । तत्कारणमुक्तम् । स्त्रेहपीतस्य वान्तस्य विरिक्तस्य स्नुताक्रुजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमलदुर्बलाग्निश्चादितोऽग्निरिवेन्धनैः ॥ सचाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥ कृतदोषप्रमाणेन सदाहारविधिःस्मृतः इति सुश्रुते ।

अग्निमारुति अग्निश्च मरुच्च तयोरपत्यं वाह्वादेराकृतिगणत्वादिञ् ततो वृद्धिः देवताद्वन्द्वे च आनङ् वाधित्वा 'वृद्धाविति' वृत् "देवताद्वन्द्वे च" इति द्विपदद्वन्द्वौ पृ० पूर्व्वपदस्य ह्रस्वः । अगस्त्ये मुनौ तस्य च कल्पान्तरे ताभ्यामुत्पत्तिरनुसन्धेया ।

अग्निमुख पु० अग्निर्मुखमिव यस्य । देवे । हुतद्रव्यं हि देवैरग्निरूपमुखद्वारैवाश्नुते । "हव्यं वहति देवानामिति" श्रुतेस्तत्रैव तात्पर्य्यात् । "अग्निमुखा वै देवा" इति "अग्निर्मुखं प्रथमं देवतानामिति च" श्रुतिः । अग्निर्मुखेऽग्रेऽस्य । देवे, "अग्निरग्रे प्रथमं देवतानामिति" श्रुतौ वह्नेरेव देवानामग्रोत्पत्तेस्तथात्वम् । यथा चाग्नेर्देवमुखत्वं तदादित्वञ्च तथाऽग्निशब्दे निरुक्तव्याख्याने ऋग्वेदभाष्ये प्राक् दर्शितम् अग्निधिकमग्निहोत्रशब्दे वक्ष्यते । अग्निर्मुखं प्रधानसाधनं यस्य । अग्निहोत्रिणि द्विजे । अग्निः दाहकत्वात् यागाग्निर्मुखे यस्य । विप्रे "वाग्वज्रा वै विप्रा" इति श्रुतौ तेषां वाग्वज्रत्वकथनात् अग्निमुखत्वम् । अग्निरिव स्वार्थात् दुःखदायकं सुखमग्रमस्य । भल्लातकवृक्षे (भेला) चित्रकवृक्षे च । तन्निर्य्यासस्पर्शेन हि देहे व्रणोत्पत्तेस्तथोक्तत्वम् । अग्नेः जठरानलस्य सुखं द्वारम् । वैद्यकोक्ते चूर्णभेदे न० यथा "त्रिकुभागो भवेदेको यवा च द्विगुणा भवेत् । पिप्पली त्रिगुणा चैव सर्व्वतुल्यं चतुर्गुणम् ॥ यमानिका पञ्चगुणा षड्गुणा च हरीतकी । चित्रकं सप्तगुणितं कुर्य्याच्चाष्टगुणं भवेत् ॥ एतच्चानकरं चूर्णं पीतमात्रं प्रसन्नकृत् । पिबेदेनं मस्तुना वा सुरया कोष्णवारिणा ॥ सोदावर्त्तभजीर्णञ्च श्लीपानाहसुदारुणा अङ्गानि यस्य शीर्य्यन्ते विषं वा येन भक्षितम् ॥ अर्शोहरं दीपनञ्च श्लेष्मघ्नं गुल्मनाशनम् । कांस्यं त्रासं निहन्त्याशु तथैव यकृन्नाशनम् ॥ चूर्णमग्निमुखं नाम न क्वचित् प्रतिहन्यते" इति चक्रदत्तः ।

अग्निमुखी स्त्री अग्निरिव मुखमग्रं यस्याः गौरादित्वात् ङीष् । (भेला) भल्लातकवृक्षे, नाकुलिकाख्ये (विषखापरा) अग्निरेव मुखं मुखत्वेन कल्पितं यस्याः गौरा० । गायत्रीमन्त्रे । "कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् । गायत्राग्निमुखी यस्मात्तस्मादुत्थाय तां जपेदिति" गोभिलः । तस्माच्च "सोऽकामयत यज्ञं सृजेयेति स मुखतएव निरूपमसृजत तं गायत्री छन्दोऽन्वसृज्यतामिन्द्रदेवता ब्राह्मणोमनुष्योवसन्तऋतुस्तस्मात् तिस्रः स्त्रीणां सुखं, गायत्री ऋच्सामाग्निर्देवानमिति" श्रुतौ । अग्निना सर्वमन्नादिसुखजातत्वात् तथात्वम् । अग्निरिव पक्षे । अग्नेरिव सुखं प्रजापतिसुखं सुखमुत्पत्तिद्वारमस्या इति विग्रहः गौरा० । गायत्रीमन्त्रश्च गायत्रीशब्दे वक्ष्यते । विप्रे तु पु० । अग्निरिव उष्णं मुखं यस्याः गौ० ङीष् । याज्ञायाम् स्त्री अग्निर्मुखमाद्यो यस्य अग्निप्रभृतौ देवे त्रि० ।

अग्निरक्षण न० अग्निः रक्ष्यतेऽनेनात्र वा रक्ष-ल्युट्। राक्षसादिभ्योऽग्निरक्षाकारके मन्त्रभेदे, अग्निहोत्रे, अग्निहोत्रगृहे च। भावे ल्युट्। अग्न्याधाने।

अग्निरजस् पु० अग्निरिव रज्यते दीप्यते रन्ज् असुन् नलोपः। रक्तवर्णे इन्द्रगोपनामककीटे। ६त०। अग्निवीर्ये, स्वर्णे च न०।

अग्निरहस्य त्रि० अग्नेः रहस्यं तदुपासनाद्यङ्गजातमत्र। अग्नेरुपसनाबोधके शास्त्रे अग्निकल्पे।

अग्निरुहा स्त्री अग्निरिव रोहति रुह-क। मांसादन्यां तदङ्कुरस्य वह्नितुल्यवर्णतयोत्पन्नत्वात् तथात्वमस्याः।

अग्निरूप त्रि० अग्नेरिव रूपं वर्णोऽस्य, अग्निरिव रूपतेऽसौ रूप-कर्मणि अच् वा। वह्नितुल्यवर्णे अग्निसदृशमात्रे च ६त०। अग्नेर्वर्णे अग्निशब्दोक्ते वह्नेर्ध्येयरूपे च न०।

अग्निरेतस् न० ६त०। अग्निशुक्रे, तज्जातत्वात् सुवर्णे च तत्कथा च प्रह्लादरुद्रशुक्रस्य अग्निसंक्रान्तस्याग्निना देवता प्रार्थनया गङ्गायामाहितस्य तया च वोढुमसमर्थया "सस्तम्भसञ्ज्ञं तं गर्भं मेरौ गिरिवरे तदेत्यनेन" मेरौ पातने कृते तस्य तेजसैव मेरुस्थं सर्व्वं वस्तु सुवर्णीकृतं यथोक्तभानुभाससिके प० भा०। "तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्द्रव्यं परिसंस्पृष्टं पृथिव्यां पर्व्वतेषु च। तत् सर्व्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत" इति। अन्ते च "तस्मात् सुवर्णं माङ्गल्यं रत्नानामुत्तमोत्तमम्। सहजं कार्त्तिकेयस्य वह्नेस्तेजः परं मतमिति" ८६ अध्याये।

अग्निलोक पु० ६त०। अग्न्यधिष्ठिते मेरुशृङ्गाधःस्थे भुवनभेदे। स च। 'सप्तलोकाश्चमयं शिखरत्रयं च मेरोर्ऽरारिकपुरारिपुराणि तेषु। तेषामधःपतनखण्डनान्नकानां रक्षोऽम्बुपानिलयशीघ्रपुराणि चाष्टौ" इति सि० शि० गोलाध्याये दर्शितः। अयमेव पक्षः युक्तियुक्तः। पुराणे तु अन्तरीक्षएव तस्य स्थितिरुक्ता। काशीखण्डे, विमानयानेन गच्छता शिवशर्म्मणा पृष्टाभ्यां विष्णुदूताभ्यां सूर्य्यलोकादूर्द्धं शक्रपुरीवर्णनोत्तरं तद्दक्षिणस्थाम् अग्निलोको वर्णितः यथा

"एतस्या दक्षिणे भागे येयं पूर्दृश्यते शुभा। इमामर्चिष्मतीं पश्य वीतिहोत्रपुरीं शुभाम्। जातवेदसि ये भक्ता ते वसन्त्यत्र सुव्रताः। अग्निप्रवेशं कुर्व्वन्ति ये दृढसत्वा जितेन्द्रियाः। स्त्रियो वा सत्यसम्पन्नास्ते सर्व्वत्राग्नितेजसः। अग्निहोत्ररताविप्रास्तथाग्निब्रह्मचारिणः। पञ्चाग्निव्रतिनो ये वै तेऽग्निलोकेऽग्नितेजसः। शीते शीतापहन्त्र्यै यस्त्विध्मभारान् प्रयच्छति। कुर्य्यादग्नीष्टिकां वापि स वसेदग्निसन्निधौ। अनाधस्याग्निसंस्कारं यः कुर्य्याद्दा दयान्वितः। अशक्तः प्रेरयेदन्यान् सोऽग्निलोके महीयते। जठराग्निविदह्यै योदद्यादाग्नेयमौषधम्। मन्दाग्नये स पुण्यात्मा वह्निलोके वसेच्चिरम्। यज्ञोपस्करवस्तूनि यज्ञार्थं वृत्विणन्तु वा। यथाशक्ति प्रदद्याद्यो वृत्विग्भ्यां वसेत् स वै। अग्निरेको द्विजातीनां निःश्रेयसकरः परः। गुरुर्देवो व्रतं तीर्थं सर्व्वमग्नेर्विनिश्चितम्। अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित्। पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः। अपि वेदं विदित्वा यस्त्यक्त्वा वै जातवेदसम्। अन्यत्र बध्नाति रतिं ब्राह्मणो न स वेदवित्। अन्तरात्मा हृदयं साक्षान्निश्चितो वृत्रशुक्लयिः। मांसप्यासान् पचेत् कुक्षौ स्त्रीणां नो मांसमेशिकाम्। तैजसी शाम्भवी मूर्त्तिः प्रत्यक्षा दहनात्मिका। कर्त्री हन्त्री पालयत्री विनैनां किं विलोक्यते। चित्रभानुरयं साक्षान्नेत्रं त्रिभुवनेशितुः। अन्धन्तमोमये लोके विनैनङ्कः प्रकाशकः। धूपप्रदीपनैवेद्यपयोदधिघृतैश्चयम्। एतङ्कुर्व्वं निषेवन्ते सर्व्वं दिवि दिवौकसः" इति।

अग्निवत् त्रि० अग्निरस्त्यस्य अग्नि+मतुप् वेदे मस्य वः। साग्निके विप्रे, "यदुर्वयस्तु चरुरग्निवाँ इव" इति वेदः। तुल्यार्थे वति। अग्नितुल्यक्रियायादौ अव्य०।

अग्निवधू स्त्री ६त०। स्वाहायाम् दक्षकन्यायाम्। अग्नायीशब्दे विवरणं द्रष्टव्यम्।

अग्निवर्चस् त्रि० अग्नेर्वर्च इव वर्चो दीप्तिरस्य। अग्नितुल्यदीप्तिमति, "स्यन्दनेनाग्निवर्चसा" इति भार०। ६त०। अग्नितेजसि न०।

अग्निवर्द्धक त्रि० अग्नेर्जठरानलस्य वर्द्धकः वृध+णिच्-ण्वुल्। जठराग्न्युद्दीपके औषधभेदे, पथ्याहारे च।

अग्निवर्ण त्रि० अग्नेर्वर्ण इव वर्णो रूपं यस्य। अग्नितुल्यवर्णे, "ब्राह्मणस्तु सुरां पीत्वा अग्निवर्णां सुरां पिबेदिति" स्मृतिः। सूर्य्यवंश्ये नृपतिभेदे पु० तत्कथा रघौ १८स०। ६त०। अग्नेः रूपे पु०। [अग्निप्रिये त्रि०।

अग्निवल्लभ पु० अग्नेरतिशयेन वल्लभः सुखेन दाह्यत्वात्। सालवृक्षे।

अग्निवासस न० अग्निरिव शुद्धं वासो वस्त्रम्। अग्नितुल्यशुद्धे वस्त्रे। ६ब०। तादृग्वस्त्रवति त्रि०।

अग्निवाह पु० अग्निं वाहयति गमयति अनुप्रापयति वा वाहेः अण्। छागे, धूमे च। वह्निवाहकमात्रे त्रि०।

अग्निवाहन न० ६त०। छागे, "रक्तां जटाधरं वह्निं कारयेद्वृक्षवासस्थम्। ज्वालामालाकुलं सौम्यं त्रिनेत्रं भस्मधारिणम्। चतुर्बाहुं चतुर्हस्तं देवेशं वायुसारथिम्। चतुर्भिश्छागकैर्युक्तो वायुचिह्ने रथे स्थितम्" इति पुराणे छागवाहनत्वसुक्तम्।

अग्निविद् पु० अग्निं विन्दते विन्द-क्विप्। अग्निहोत्रिणि साग्निके। अग्निरहस्यं वेत्तीति विद-क्विप्। अग्निरहस्यशास्त्राभिज्ञे पु०।

अग्निविन्दु पु० अग्नेर्विन्दुरिव। विस्फुलिङ्गे अग्निकणे।

अग्निवीज न० ६त०। अग्नेर्वीजे तद्देवोजातत्वात् उपचारात् स्वर्णे। "रुद्रतेजःसमुद्भूतं हेम वीजं विभावसोरिति" स्वर्णदानमन्त्रः। तत्कथा अग्निरेतःशब्दे द्रष्टव्या। तन्त्रोक्ते रकारवर्णे "अग्निवीजं समुद्धृत्य सुखदक्षसमन्वितमिति" तन्त्रम्।

अग्निवीर्य्य न० अग्नेर्वीर्य्यम्। वह्निरेतसि, तत्सदृक्षे च। तद्वीर्य्यजातत्वादुपचारात् स्वर्णे। ब०। अग्नितुल्यपराक्रमवति त्रि०

अग्निशरण न० ६त०। अग्न्याधानगृहे अग्निहोत्रगृहे।

अग्निशर्म्मन् त्रि० अग्निरिव हृष्यति तीव्रकोपत्वात् हृष-मनिन्। तीव्रकोपान्विते। ऋषिभेदे पु०। बाह्वादि० इञि आग्निशर्म्मिः तदपत्ये। नडादि० फक्। आग्निशर्म्मायणः तन्नीत्रापत्ये।

अग्निशाला स्त्री अग्नीनां शाला गृहम्। अग्न्याधानस्थाने अस्त्री वा नपुंसकत्वम्। "हविर्धानमग्निशालं पत्नीनां सदनम्" इति वेदः।

अग्निशिख पु० अग्नेरिव अग्निरिव वा शिखा यस्य। कुङ्कुमवृक्षे, कुसुम्भवृक्षे, अग्नितुल्यशिखे-जाङ्गलीवृक्षे च॥ अग्नितुल्यजटावति त्रि०। अग्निशिखेव शिखाऽस्यस्य। जाङ्गलिकावृक्षे स्त्री (विषजाङ्गला) अग्नितुल्यारुणभागे त्रि० "वाणैरग्निशिखैरिवेति" पुरा०। स्वर्णे कुसुम्भपुष्पे च न०। ६त०। अग्निज्वालायां स्त्री "शरैरग्निशिखोपमैरिति, भार०। [होमे।

अग्निशुश्रूषा स्त्री ६त०। वह्नेः विधानेन सेवोपयोगिनि

अग्निशेखर पु० अग्निरिव शेखरमस्य यस्य। कुङ्कुमवृक्षे, कुसुमवृक्षे, जाङ्गलीवृक्षे च। अग्नितुल्यारुणवति त्रि०।

अग्निष्टुत् पु० अग्निः स्तूयतेऽत्र स्तु-आधारे क्विप् तत्वम्। अग्निष्टोमस्य विकृतिभूते एकाहसाध्ये यागभेदे। सामसंहिताभाष्ये संशयपूर्वकं तच्च कर्म्मान्तरमिति सायणाचार्य्येण निर्णीतम् यथा। "उक्थाग्निष्टुतमेतस्य वारवन्तीय-साम हि। रेवतीष्वृक्षु स्तुतेति श्रुतं पशुफलाप्तये। रेवत्यादिगुणः कर्म्म पृथग्वा पूर्ववद्गुणः। रेवती-वारवन्तीय-सम्बन्धाख्यः पशु-प्रदः। सामोऽत्र फल-कर्म्मभ्यां सम्बन्धे वाक्य-भिन्नता। तेनोक्त-गुण-संयुक्तमन्यत् कर्मोच्यते फले"॥ "त्रिष्टदग्निष्टोमस्तस्य वायव्यासु ऋक्षु एकविंशाग्निष्टोम-साम कृत्वा ब्रह्मवर्चस-कामो यजेत"-इत्यस्य सन्निधौ श्रूयते—"एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशु-कामोह्येतेन यजेत" इति। "अस्यायमर्थः। प्रकृतौ तृतीयसवने अभिप्लव-पवमानस्तोपरि यज्ञायज्ञीयं साम गीयते, तेन च सामा अग्निष्टोमयागस्य समाप्यमानत्वादग्निष्टोम सामेत्युच्यते, तच्च प्रकृतौ "यज्ञायज्ञीयो वा अग्नेः" इत्याद्याग्नेयीष्वृक्षु गीयते अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चसकामेन वायव्यास्वृक्षु तत् साम गातव्यम्, तच्च प्रकृतावेकविंश-स्तोम-युक्तम्। पशुकामस्य तु "रेवतीर्नः सधमादे" इत्यादिषु रेवतीष्वृक्षु "वारवन्तीयं" साम गायेदिति, तत्र रेवतीनामृचां वारवन्तीयनामकेन साम्ना यः सम्बन्धः सोऽयं पशु-फलायाग्निष्टुति विधीयते, एतस्यैवेति प्रकृतपरामर्शकेनैतच्छब्देनान्य-व्यावर्त्तकेनैवकारेण चाग्निष्टुतः समभ्यभाणत्वात् यथा पूर्वाधिकरणे इन्द्रियफलाय प्रकृताग्निहोत्रे दधि-गुणोविहितः तद्वत्, इति प्राप्ते, ब्रूमः—विषमो दृष्टान्तः, दध्नोहोम-जनकत्वं न शास्त्रेण बोधनीयं तस्य लोकतोऽवगन्तुं शक्यत्वात्। फल-सम्बन्धः एकएव शास्त्रबोध्यः इति न तत्र वाक्यभेदः, इह तु रेवत्यृगाधारकवारवन्तीय-साम्नोऽग्निष्टुत्-कर्म्म-साधनत्वं फल साधनत्वं चेत्युभयस्य शास्त्रैक बोध्यत्वाद् दुर्वारोवाक्य-भेदः तेन पशुफलकं यथोक्तगुण-विशिष्ट-कर्म्मान्तरमत्र विधीयते। एतच्छब्दः एवकारश्च विधीयमान-कर्म्मान्तर-विषयतया योजनीयौ इति"। "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा,। अभिजिद्विश्वजिद्भ्यां वा त्रिष्टताग्निष्टुतापि वा" इति स्मृतिः।

अग्निष्टुभ् पु० अग्निस्तुभ्यतेऽत्र क्विप् तत्वम्। यज्ञभेदे।

अग्निष्टोम पु० अग्नेः स्तोमः स्तुतिसाधनं ऋक्समुदायोऽवसानेऽत्र। यागविशेषे स च यागः ताण्ड्यब्राह्मणे षष्ठाध्याये "प्रजापतिरकामयत बहु स्यां प्रजायेयेति सएतमग्निष्टोममसृजत" इत्युपक्रम्य "अथ वाव यज्ञोयदग्निष्टोम" इति "एकधा अग्नौ यज्ञः कामाव्याप्नियते सर्व्वेभ्योऽग्निष्टोम" इति चाग्निष्टोमं स्तुत्वा "द्वादश

स्तोत्रागण्यग्निष्टोम" इत्यादिना सप्रपञ्चं दर्शितः। अग्निष्टोम शब्दस्य व्युत्पत्तिर्भाष्यकृता सायणाचार्य्येण दर्शिता यथा "यज्ञायज्ञीय इत्यस्यामाग्नेय्यामृचि यज्ञायज्ञीयं साम गीयते तेन साम्ना समाप्ते ज्योतिष्टोम इतिनाम सम्पद्यते इति"। तद्विधानपरिपाटी च बौधायनीये कात्यायनेन दर्शिता तत एव साऽवगन्तव्या। ताण्ड्ये षष्ठाध्याये च "अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणी"त्युक्त्वा अष्टमाध्यायपर्य्यन्तं यानि स्तोत्राणि शस्त्राणि वा प्रयोज्यानि तान्यभिहितानि तानि च तत एवावगन्तव्यानि तेषां स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते तत्र अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रं प्रगीतमन्त्रसाध्या तु स्तोत्रमिति तयोर्भेदः। एकाहसाध्ये अग्निष्टुच्नामके यज्ञे च तत् प्रमाणम् अग्निष्टुच्छब्दे। अग्निष्टोमस्य व्याख्यानः कल्पः ठक्। आग्निष्टोमिकः अग्निष्टोमबोधककल्पे।

अग्निष्टोमसाम न० अग्निष्टोमे अवसाने विहितं साम गानविशेषः। अग्निष्टोमयज्ञसमापके तृतीयसवने विहिते "यज्ञायज्ञीय" इत्यस्यामाग्नेय्यामृचि गीयमाने सामवेदे "प्रकृतौ (अग्निष्टोमे) तृतीयसवने आर्भवपवमानस्योपरि यज्ञायज्ञीयं साम गीयते तेन च साम्ना अग्निष्टोमस्य समाप्यमानत्वादग्निष्टोमसामेत्युच्यते इति सा० भा०। "ब्रह्मणो वा एष रसो यद्यज्ञायज्ञीयं स्तुवन्ति ब्रह्मणएव रसे यज्ञं प्रतिष्ठापयन्तीति" ताण्ड्यब्राह्मणम् तत्र साम यज्ञायज्ञीयशब्दे वक्ष्यते।

अग्निष्ठ पु० अग्नौ स्थातुमर्हति स्था–क षत्वम्। वह्नौ स्थिति योग्ये लौहमये कटाहादिपात्रे।

अग्निसंस्कार पु० अग्निना संस्कारः मन्त्रपूर्ब्बकदाहः। विधानेन अग्निहोत्रदाहे। "अनाथस्याग्निसंस्कारं यः कुर्य्याद्वा दयान्वितः" इति काशी०।

अग्निसङ्काश त्रि० अग्निरिव सङ्काशते काश–दीप्तौ अच्। अग्नितुल्यवर्णे तत्तुल्यतेजस्के च।

अग्निसम्भव पु० अग्निरिव सम्भवति सम्+भू–अच्। अरण्यकुसुम्भे। ५त० स्वर्णे न०। अग्निसम्भूतमात्रे त्रि०।

अग्निसहाय पु० अग्निना सह अयते अय–अच् ३त०। वायौ, धूमे च। अग्निसहायधूमवद्वर्णवत्त्वात् शीघ्रगतित्वाच्च वनकोपते च।

अग्निसाक्षिक त्रि० अग्निःसाक्षी यत्र कप्। वह्निं साक्षीकृत्य कृते कर्म्मणि। "सख्यं कृत्वाग्निसाक्षिकमिति" रामा०।

अग्निसार न० अग्नौ सारो यस्य अत्यन्तानलोत्तापनेऽपि सारग्राहित्वात्। रसाञ्जने ङीप्। वह्निसारे तु अस्त्री।

अग्निस्तम्भ पु० अग्निः दाहशक्तौ निरुध्यते अनेन। अग्निदाहनशक्तिनिरोधके मन्त्रे, ओषधे च। ई॰त०। अग्नेर्दाहशक्तिप्रतिरोधे पु०।

अग्निष्वा(स्व)त्त पु० ब०व० अग्नितः (आहवनीयविप्रकरूपानलात्) सुष्ठु आत्तं गृहीतं येषां आ-दा–क्त षत्वमिति बहवः। मरीचिपुत्रे पितृगणविशेषे। "अग्निष्वा(स्वा)त्ताः बर्हिषदः ऊष्मपा आज्यपास्तथेति" मनुः। तैत्तिरीयब्राह्मणे तु अन्यथा निरुक्तं यथा "अग्निष्वात्ता-न्हतुमतो हवामहे। नराशंसे सोमपीथं य आशुः। ते नो अवन्तः सुहवा भवन्तु। यज्ञो भवन्तु द्विपदे शं चतुष्पदे" इति "अग्निष्वात्ता अग्निष्वात्तनामकाः पितरः पितृविशेषाः। ते च चातुर्मास्यगतपितृयज्ञब्राह्मणे स्पष्टमभिहिताः, "ये वा अयज्वानो गृहमेधिन स्ते पितरोऽग्निष्वात्ता" इति। मनुष्यजन्मन्यग्निष्टोमादियागमकृत्वा आर्त्तकर्म्माग्निष्टाः सन्तो मृत्वा च पितृत्वं गताः। तानग्निष्वात्तान्" इति तद्भाष्ये माधवाचार्य्यः।

अग्निहुत् पु० अग्निं हुतवान् हु–क्विप् ई॰त०। हुताग्निहवने अग्निहोत्रिणि।

अग्निहोत्र न० अग्नये हूयतेऽत्र हु–त्र ४त०। मन्त्रकरणवह्निस्थापनपूर्ब्बतदुद्देश्यकहोमे। अग्निहोत्रसम्बन्धित्वात् हविषि, वह्नौ पु०। काण्वादाख्यायिकासुपक्रम्य अग्निहोत्रशब्दनिरुक्तिविधानाद्युक्तं तैत्तिरीयब्राह्मणे "सोऽग्निरबिभेत् आहुतिभिर्वैतमाप्नोतीति स प्रजापतिं पुनः प्राविशत् तं प्रजापतिरब्रवीत् जायस्वेति सोऽब्रवीत् किं भागधेयमभिजनिष्य इति त्वय्येवेदं हूयाता इत्यब्रवीत् सएतद्भागधेयमभ्यजायत। यदग्निहोत्रम्" इति सुरा प्रजापतेस्तायं दृष्ट्वा पलायनादुपरतोऽग्निः प्रजापतेस्त्वक्प्रक्रमागत एव, ततः प्रजापतिस्तस्मिन्नग्नौ पूर्ब्बोक्तं घृतं स्वाहाकारेण यामाहुतिं प्रथममजुहोत्। तदाहुतिसामर्थ्येन पुरुषमसृजत। तथा द्वितीयाद्याहुतिभिः अश्वादीनसृजत। ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं सुस्थितम्। तदानीमग्निर्भीतोऽभूत्। तस्यायमभिप्रायः। प्रजापतिः पुनः पुनराहुतिभिरेव मां प्राप्नोति न तु भागं प्रयच्छति। तास्वाहुतीर्देवा एव गृह्णन्ति। तस्माद्भागरहितः सेवितुं न शक्नोमीति विचार्य्य पूर्ब्ववत् पलायनमकृत्वा तस्मिन् प्रजापतावेव प्रविष्टः। स च प्रजायस्वेति पुनः पुनरग्निमब्रवीत् सचाग्निस्तदुदर एव स्थित्वा भागरहितोऽहं क्षुधितः सेवितुं न शक्नोमि भागो मेऽभेक्षितः। किं भागमभिलक्षयसि-

सुत्पत्त्या इत्युक्तम् । अग्निना उक्तः प्रजापतिरिदमग्निहोत्रगतं हविस्तुभ्यमेव हूयाता इति भागं दत्तवान् । ततोऽग्निहोत्रहवि.स्वरूपं भागधेयमभिलक्ष्याग्निरुत्पन्नः । तस्मादग्नये होत्रं होमोऽस्मिन् कर्म्मणीति बहुव्रीहिव्युत्पत्त्या अग्निहोत्रमिति कर्म्मनाम । अग्नये होत्रमिति तत्पुरुषव्युत्पत्त्या हविर्नाम" इति तद्भाष्यम् । तत्कालश्च तत्रैवोक्तः "तद्भूयमानमादित्योऽब्रवीत् । मा हौषीः । उभयोर्वै नावेतदिति सोऽग्निरब्रवीत् । कथं नौ होष्यसीति । सायमेव तुभ्यं जुहवन् प्रातर्मह्यमित्यब्रवीत् । तस्मादग्नये सायं हूयते सूर्य्याय प्रातः" इति । तद्विरग्न्यर्थं प्रजापतिना हूयमानं दृष्ट्वा मा हौषीरित्येवमादित्यो निवारयामास । हेतुञ्चैवमवोचत् । योऽयमग्निर्यस्याहं तयोरुभयोरावयोरेतद्विः, न त्वेकस्याग्नेः इति । तदानीमुभयोर्भागव्यवस्था जाता । अग्निना पृष्टा या कालभेदेन व्यवस्था तामुवाच । तस्मादग्नये सायं जुहुयात्, सूर्य्याय प्रातर्जुहुयात्" इति तद्भाष्यम् ।

तच्च नित्यं कामाच्च "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या नित्यस्य "उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीति" श्रुत्या च कामस्य विधानसूत्रम् । अस्य यजुर्वेदोक्तत्वेऽपि सर्ववेदिभिः कर्त्तव्यता "यद्वाग्नातं स्वशाखायां पारक्यमविरोधि च विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्म्मवदिति" कल्पतरौ कात्या० । "अग्निहोत्रं त्रयोवेदास्त्रिदण्डो भस्मधारणम् । बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिरिति" चार्वाकमतम् ।

अग्निहोत्रहवनी स्त्री अग्निहोत्रोऽग्निः हविर्वा हूयतेऽनया हु-करणे ल्युट् ङीत० । अग्निहोत्रहविर्यज्ञसाधनुचि ।

अग्निहोत्रिन् पु० अग्निहोत्र+मत्वर्थे इनि । अग्निस्थापनपूर्वकं प्रातरादिकाले अग्निहोत्रहोमकर्त्तरि साग्निके ।

अग्नीध् पु० इध्यते इन्ध-भावे क्विप् ङीत० । अग्न्युद्दीपने "अग्नीधः शरणे रण् भवेति" कात्या० वा० । शरणार्थे रणि आग्नीध्रः । कर्त्तरि क्विप् । अग्न्याधानकर्त्तरि ।

अग्नीध्र पु० अग्निम् आदधाति धृ-क दीर्घः । यज्ञाधानकारके ब्रह्मापरपर्य्याये ऋत्विग्भेदे । अग्निं धारयत्यस्मै सम्प्रदाने घञर्थे क दीर्घः । अग्निकल्पे होमादौ पु० ।

अग्नीन्द्र पु० द्वि० इन्द्र० इन्द्रपरत्वात् । एतन्नामकयोरेकहविर्भोक्तृदेवयोः ।

अग्नीन्धन क्ली० अग्निरिध्यतेऽनेन इन्ध-ल्युट् ङीत० । मन्त्रभेदे । स्त्रियां टित्त्वात् ङीप् । भावे ल्युट् । अग्निकृत्ये न० । [सन्निकृष्टस्थाने ।

अग्नीय त्रि० अग्नेरदूरभवं स्थानादि-छत्करा० छ । यज्ञ-

अग्नीवरुण पु० द्वि० इन्द्र० ईत् । एतयोरेकहविर्भोक्तृदेवयोः ।

अग्नीषोम पु० द्वि० इन्द्र० ईत् षत्वञ्च । एतन्नामकयोरेकहविर्भोक्तृदेवयोः । "अग्नीषोमीयं पशुमालभेतेति" श्रुतिः ।

अग्नीषोमप्रणयनी स्त्री अग्नीषोमौ प्रणीयेते संस्क्रियेते अनया अत्र वा प्र+नी-करणे आधारे वा ल्युट् ङीप् । तयोः संस्कारिकायामृचि पात्रान्तरे च । भावे ल्युट् । तयोः संस्कारे न० ।

अग्नीषोमीय त्रि० अग्नीषोमौ देवते अस्य छ । तद्देवताके पश्वादौ कपालरूपपात्रादिसंस्कृते हविर्भेदे च "अग्नीषोमीयमेकादशकपालं निर्वपतीति" "योऽग्नीषोमीयस्य पशोरश्नातीति" च श्रुतिः ।

अग्न्यगार न० अग्नेः अग्निहोत्रसंबन्धिवह्नेरगारं ईत० । अग्निहोत्रगृहे "वसंश्चतुर्थोऽग्निरिवाग्न्यगारे" इतिरघुः । अग्निगृहाद्योष्यत्र ।

अग्न्याधान न० अग्नेराधानम् आ-धाञ्-ल्युट् ईत० । वेदमन्त्रद्वारा वह्निस्थापने । ७बहु० । अग्निहोत्रयागे ।

अग्न्याधेय पु० अग्निराधेयो येन । अग्निहोत्रिणि साग्निके द्विजे तत्प्रकारश्च "पुरस्तमेवादधीताग्निमित्युपक्रम्य कात्यायनसंहितायां दर्शितः कल्पग्रन्थे च विस्तरो द्रष्टव्यः ।

अग्न्यागार पु० अग्नेरागारः आ+गृ आधारे अच् ईत० । वेदमन्त्रद्वारा वह्निस्थापनयोग्ये गृहे, तदाधारे-कुण्डे, स्थण्डिले च ।

अग्न्याहित पु० अग्निराहितो येन आ+धाञ्-कर्म्मणि क्त, या परनिपातः । अग्निहोत्रिणि साग्निके द्विजे ।

अग्न्युत्पात पु० अग्निना दिव्यानलेन कृत उत्पातः (अनिष्टसूचकोपद्रवः) उद्+पत-घञ् ३त० । आकाशस्थानल विकारसूचितोपद्रवे, उल्कापातादावशुभसूचके, धूमकेतुप्रभृतिविकारे च । स च नाभस उत्पातः उल्कादिरूपः पञ्चविधः विष्णुरोल्काशनिविद्युत्तारभेदात् । तेषां लक्षणादिकं फलसहितम् बृहत्संहितायामुक्तं ३२ अ० यथा "दिवि भुवि सभ्रमफलानां पततां रूपाणि यानि तान्युल्काः ।

धिष्ण्योल्काशनिविद्युतारा इति पञ्चधा भिन्नाः ॥ उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः । विद्युद्दण्डोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्ण्या । तिस्रः सम्पूर्णफला विद्युदुल्काशनिश्चेति ॥ अशनिः खनेन सहता नगजाश्वद्रुगाश्मवेश्मतरुपशुषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ॥ विद्युत्प्रतापवर्षं जनयन्ती तटतटस्वना सहसा । कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता ॥ धिष्ण्या क्षणाल्पपुच्छा धनूंषि दश दशतेऽन्तराभ्यधिकम् । ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन ॥ तारा हस्तं दीर्घा शुक्ला ताम्राऽतन्तुरूपा वा । तिर्यगधश्चोर्ध्वं वा याति वियत्युल्कामानेन । उल्का गिरसि विशाला निपतन्ती वर्धते प्रतनुपुच्छा । दीर्घा भवति च पुरुषा भेदा बहवो भवन्त्यस्याः ॥ प्रेतप्रकटपखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः । गोधाहिधूमरूपाः पापा या चोभयशिरस्काः ॥ ध्वजभवनकरिगिरिक्रमलेखातुरगसन्निभारजतहंसाभाः । श्रीवत्सवज्रशङ्खस्वस्तिकरूपाः शिवस्तुभिक्षाः ॥ अम्बरमध्यात्क्षुब्धो निपतन्यो राजराष्ट्रनाशाय । बभ्रुमती गगनोपरि विभ्रममाख्याति लोकस्य ॥ संसृजती चन्द्रार्कौ तद्विसृता वा सभ्रकम्पा च । परचक्रागमभद्रपबध-दुर्भिक्षादृष्टिभयजननी पौरेतरप्रसुखापसव्यकरणं दिवाकरेन्दुभ्यां । उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥ शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णाभा । क्रमशश्चैतान् हन्युर्मेघैः पार्श्वपुच्छस्थाः ॥ उत्तरदिगादिपतिता विप्रादीनामनिष्टदा क्रमशः । स्निग्धाखण्डा नीचोपगता च तद्वृद्ध्यै ॥ श्यामा वाक्षणभीलाऽरुग्दृङ्नासितभस्मनिभा क्रमशः । सन्ध्यादिनजा वक्त्रादक्षिता च परागमभयाय ॥ नक्षत्रत्रयहते तद्भक्तीनां भयाय निर्दिष्टा । उदये मृती रवीन्दू पौरेतरक्षत्रवेऽस्ते वा ॥ भान्यादित्यधनिष्ठामूलेषूल्काकृतेषु युवतीनाम् । विप्रक्षत्रियपीडा पुष्यानिलविष्णुदैवेषु ॥ ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु चौराणाम् । क्षिप्रेषु कलाविदुषां पीडा साधारणे च कृते ॥ कुर्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् । यत्रोपरि नृपतीनां वस्त्रेषु ततूस्वामिनां पीडाम् ॥ आयायव्योपघाते तद्देश्यानां खले क्षतिरतानाम् । चैत्यतरौ सम्पतिता सत्कृतिपीडां करोल्मुका ॥ द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः । ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनो गोष्ठे ॥ क्ष्वेडास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा । उल्का निपातसमये भयाय राष्ट्रस्य सन्दृष्टा ॥ यस्याद्विरं तिष्ठति खेऽनुषङ्गे दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुतते व खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥ श्रेणिनः प्रतीपगा तिर्यगा नृपाङ्गनाः । छिन्नाधोमुखी नृपान् ब्राह्मणानथोर्द्वगा ॥ वह्निपुच्छरूपिणी लोकसङ्क्षया वहा । सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ छिन्ति मण्डला पुरं ऋत्विक् पुरोहितम् । वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ व्यालशूकरोपमा विस्फुलिङ्गमालिनी । खण्डशोऽथ वा गता सस्वना च पापदा ॥ सुरपतिचापप्रतिमा राज्ञां नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिष्टसा वा ॥ अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः" ॥ तत्कारणसूत्रं गर्गसंहितायाम् "अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः । नरापचाराच्चियतमुपसर्गः प्रवर्त्तते । ततोऽपराधाच्चियतमपवर्जन्ति देवताः । ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभौमजान् । त एव त्रिविधा लोके उत्पाता देवनिर्मिताः । विचरन्ति विनाशाय रूपैः संबोधयन्ति च" इति । अनिष्टसूचकरूपभेदाश्च बृहत्संहितावाक्ये प्राक् दर्शिताः । तल्लक्षणं काश्यपेन सामान्यत उक्तम् "बृहच्छिखा च रूक्षाभा रक्तनीलशिखोज्ज्वला । पौरुषेय प्रमाणेन उल्का नानाविधा स्मृतेति" ।

अग्न्युद्धार पु० अग्नेः आधानार्थमुद्धारः अरणिमन्थनेन उत्पादनम् । अरणिद्वयघर्षणेनानलोत्पादने । तत्प्रकारस्तु "अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः । तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्वगापि वा ॥ अरणिस्तन्मयी प्रोक्ता तन्मध्येवोत्तरारणिः । सारवद्दारवज्जातमोविली च प्रशस्यते ॥ संसक्तमूलो यः शमाः स शमीगर्भ उच्यते । अलाभे स्वशमीगर्भादुद्धरेदविलम्बितः ॥ चतुर्विंशतिरङ्गुष्टदैर्घ्यं षड्पि पार्थिवम् । चत्वार उच्छ्रये मानमरण्योः परिकीर्त्तितम् ॥ अष्टाङ्गुलः प्रमन्थः स्याज्जातं स्याद्दशाङ्गुलम् । ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ॥ अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र बृहत्पर्व्व ग्रन्थिभिर्मितुयात् सदा ॥ गोबालैः घृणसंमिश्रैस्त्रिवृत्तमसलात्मकम् । व्यामप्रमाणं नेत्रं स्यात् प्रमथ्यस्तेन पावकः ॥ मूर्द्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।

अङ्गुष्ठमात्राण्येतानि हृदङ्गुष्ठं वच्च उच्यते ॥ अङ्गुष्ठमात्रं हृदयं तदङ्गुष्ठमुदरं स्मृतम् । एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥ जङ्घे जङ्घे च पादौ च चतुस्त्र्यैकै र्यथाक्रमम् । अरत्नवयवाख्येते यान्त्रिकैः परिकीर्त्तिताः ॥ यत्तद्धृदयमिति प्रोक्तं देवयोनिस्तु सोच्यते । अस्यां यो जायते वह्निः स कल्याणकदुच्यते ॥ अन्येषु ये तु मथ्नन्ति ते रोगभयमाप्नुयुः । प्रथमे मन्थने त्वेष नियमो नोत्तरेषु च ॥ उत्तरारणिनिघ्नश्चः प्रमन्थः सर्व्वदा भवेत् । योनिमद्वरदोषेण युज्यते हन्त्यमन्थकृत् ॥ आर्द्रा सशुषिरा चैव घर्षाङ्गी पाठिता तथा । न छिद्रा यजमानानामरणिश्चोत्तरारणिः ॥ परिधायाऽहतं वासः प्राङ्मुत्व च यथाविधि । विघट्टयात् प्राङ्मुखो यन्त्रमाहृता वल्लभाग्नया ॥ चतस्रश्चप्रमन्थाग्रं गाढं कृत्वा विचक्षणः । कृत्वोत्तराग्रा मरणिं तद्वध्नमुपरि न्यसेत् ॥ चत्वारः कीलकाग्रस्थामोविलोमुदगग्रकाम् । विघट्टयाद्वारयेद्यन्त्रं निष्कम्पं प्रयतः शुचिः" इति कात्या० स० ॥

अग्न्युपस्थान न० अग्निरुपस्थीयतेऽनेन उप+स्था ल्युट् ६त०। वह्नेरुपासनमन्त्रे। स्त्रियां ङीप्। भावे ल्युट् ६त०। वह्नेरुपासने न०।

अग्र न० अङ्ग-रक् नलोपः। उपरिभागे, शेषभागे, आलम्बने पूर्व्वभागे, उत्कर्षे समूहे च। प्रधाने, अधिके, प्रथमे च त्रि०। तत्र पूर्व्वभागे अग्रकायः "अथाग्रहस्ते सुकुलीकृताङ्गुलाविति" कुमा०। जङ्घे "शङ्खाग्नि यस्याग्रसरोरुहाणि इति" कु०। आलम्बने, "मनुमेकाग्रमासीनमिति" मनुः प्रधाने "अथाग्रमहिषी राज्ञ" इति प्रथमे अग्रहायणेष्टिरिति। पुरोऽर्थे, अग्रसरः। शेषभागे, "हर्म्याग्र्यरूढेषु हरिणाङ्गुरेखिति" रघुः। "सूच्यग्रेण न दातव्यं विना युद्धेन केशवेति" "बालाग्रशतभागस्य शतधा कल्पितस्य चेति" "आराग्रमात्रोह्यपरोऽपि दृष्टः इति" च श्रुतिः। अधिके "अथाग्रयशालिनेति"। श्रेष्ठे, "कैलासाग्रसमासीनमिति" तन्त्रम् उत्कर्षे, अग्रादग्रं रोहतीति ता० ब्रा० अग्रमुत्कर्षमिति माधवाचार्य्यः अधिके "साग्रं वर्षशतमिति" रामा० अग्रशब्दपरिमाणे (ज्योतिषोक्तस्य अग्रशब्दपरस्य परिमाणार्थेऽंशभेदे) च। अग्रशब्देनसाधनार्थायां सिद्धान्तशिरोमणयुक्तायाम् अग्रशब्देनकर्णेन गुणितायां स्वकोट्या हृतायां क्रान्तिज्यायां स्त्री। "क्रान्तिज्यके कर्णगुणे विभक्ते कोट्या भुजेनाग्रमितायुक्ता स्यात्" इति वि० गि०। "क्रान्तिज्या अग्रश्रुतिकर्णेन गुणिता हृतः स्याष्या एवत्र स्वकोट्या भक्ता सती अग्रा भवतीति" ग्रन्थिता०। "रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा। दृष्टच्छायाविषुवतोर्मध्यमध्याभिधीयते" इति सूर्य्यसिद्धान्तपरिभाषितेऽर्थे च स्त्री। विवृतश्चैतत् रङ्गनाथेन यथा "अथाग्रानार्थमाह। तस्मिंश्चतुरस्रे पूर्वापररेखात उत्तरभागे विषुवद्भाग्रगाग्रभागप्रदेशस्याग्रभाकुलान्तरितेत्यर्थः। प्राच्यपरा रेखा पूर्वापररेखानुकारा रेखा तथा सर्वतस्तुल्यान्तरेण यथेष्टच्छायाग्ररेखाभज्ञान्तरेण कार्य्या। अनन्तरमिष्टच्छायाविषुवतोरिष्टच्छायाग्ररेखाग्रभाग्ररेखयोरित्यर्थः। मध्यं चतुरस्रेऽङ्गुलात्मकमन्तरालं सर्वतस्तुल्यम्। अथा कर्णदृक्साधनोच्यते। अत्रोपपत्तिः। भुजस्य कर्णदृक्साधना पलभासंस्कारेणाग्रा उक्ता तद्विक्षणगोले पलभाधिकोत्तरभुजसङ्गतेन पलभोनो भुजोऽग्रेति, प्राच्यपरस्त्रत्वादुत्तरभागेऽग्रभाग्ररेखा भुजमध्ये भवतीति द्वयो रेखयोरन्तरमग्रा पलभोनभुजरूपा। एवमुत्तरगोल उत्तरभुजस्य पलभाल्पत्वाद्भुजोनपलभाग्रेति पलभारेखा प्राच्यपरस्त्रत्वादुत्तरभागस्था भुजरेखातोऽग्रभाग्ररेखोत्तरदिग्गतेति द्वयो रेखयोरन्तरं भुजोनपलभारूपं कर्णदृक्साधना। एवं दक्षिणभुजस्य पलभोनाभावात् पलभाधुतोऽग्रेति प्राच्यपरस्त्रत्वाद्भुजाग्रपलभाग्ररेखयोः क्रमेण याम्योत्तरत्वात् तयोरन्तरालं पलभाभुजैक्यरूपमग्रा पलभायाः शङ्कुतलानुकल्पत्वात् सदोत्तरत्वं छायासम्बन्धादुक्तम्" इति। "अथवाऽस्त्रावयवरूपैकदेशपरत्वे हस्ताग्रं तद्वत्परत्वे अग्रहस्त" इति यत्तोक्तम् वामनेन, "हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदादिति"। अग्र+भवार्थे यत्। अग्र्यः। घ अग्रियम्। कृत्याग्रमिव छ। कृत्याग्रीयः। स्वार्थे प्राग्रादि० य अग्र्यः॥ अग्रः ऋषिभेदस्तद्गोत्रापत्ये गर्गादि० फक्। आग्रायणः। तत्तदर्थेषु। [यत् कर्म्म०। देहपूर्व्वभागे।

अग्रकाय पु० अग्रः कायः अवयवावयविनोरभेदात् अग्रहस्त०

अग्रग त्रि० अग्रे गच्छतीति गम-ड ७त०। पुरोगामिनि।

अग्रगण्य त्रि० अग्रे गण्यते गण-यत् ७त०। अग्रगणनीये, प्रधाने च।

अग्रगामिन् त्रि० अग्रे गच्छति गम-णिनि ७त०। पुरोगामिनि। "प्रष्ठोऽग्रगामिनीति" पा०। अन्नाग्रत्वनिर्देशात् अग्रगामिनेत्यादौ न षत्वम्। स्त्रियां ङीप्।

अग्रज पु० अग्रे पुरस्तात् जायते जन-ड। अग्रजाते स्त्रियाम्। "जगादाग्रे गजाग्रजम्" इति भाग०।

ज्येष्ठभगिन्यां स्त्री। वर्णेषु मध्ये अग्रजातत्वात् विप्रे। [स०। जङ्घाग्रभागे।

अग्रजङ्घा स्त्री अग्रा जङ्घा अवयवावयविनोरभेदात् क०

अग्रजन्मन् पु० अग्रे जन्म यस्य जन-मनिन् व्यधि० बहु०। ज्येष्ठभ्रातरि, विप्रे च। अग्रजातमात्रे त्रि०। अग्रात् प्रधानाङ्गात् मुखात् जन्मास्य व्य०ब०। ब्रह्मणोमुखोत्पन्ने विप्रे, तस्य तन्मुखोत्पत्तिश्च ताण्ड्यमहाब्राह्मणे उक्ता यथा "सोऽकामयत यज्ञं सृजेयेति स मुखत एव त्रिवृतमसृजत तं गायत्र्योच्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणोमनुष्यो वसन्त ऋतुस्तस्मात्त्रिवृत् स्तोमानां मुखं, गायत्री छन्दसाम्, अग्निर्देवतानां, ब्राह्मणो मनुष्याणां, वसन्त ऋतूनां, तस्माद्ब्राह्मणो मुखेन वीर्य्यङ्करोति मुखतो हि सृष्टः" इति। व्याख्यातञ्चैतत् भाष्ये "सः प्रजापतिरकामयत् किमिति"? सर्व्वं साधकं यज्ञं सृजेयेति स एतमग्निष्टोममपश्यत् तमाहरदित्युक्तञ्चैवेदं विवरणं सः प्रजापतिः मुखत आत्मनो मुखादेव त्रिवृतमाहृत्य त्रित्वसाध्यमेतत्साधकं स्तोमसृजत तं त्रिवृतमनु पश्चाद्गायत्री-छन्दः गायत्रं नाम छन्दोऽसृज्यत तदनु अग्निर्देवताऽसृज्यत तमनु मनुष्यो ब्राह्मणोऽसृज्यत तथा तमनु वसन्ताख्यश्च ऋतुरसृज्यत यस्माद्देते मुखतएव सृष्टाः तस्मादेते त्रिवृदादयः स्वसजातीयानां मध्ये मुख्या अभवन् त्रिवृदादीनां मुख्यानां मध्ये ब्राह्मणस्य मुख्यत्वप्रयुक्तं वीर्य्यं लोकसिद्धं दर्शयति तस्मान्मुखसृष्टत्वेन मुख्यत्वात् ब्राह्मणो मुखेनेदानीमपि वीर्य्यं स्वाध्यायप्रवचनादिजन्यं सामर्थ्यं करोति तस्मादित्युक्तं विवृणोति हि यस्माद्ब्राह्मणो मुखतः सृष्टस्तस्मादित्यर्थः। एवमुक्तमर्थं यो वेद सोऽपि मुखेन वीर्य्यं करोति मुखसाध्येन स्वाध्यायप्रवचनादिनैवाभीष्टं साधयति इत्यर्थः" इति। "ब्राह्मणोऽस्य मुखमासीत्" पुरुषसूक्तम् अत एव विप्रस्य मुखजातत्वेन मुखसाध्यस्वाध्यायाभ्यसने एव वीर्य्यं भवतीत्युक्तम् अतएव मनुना "वेदमेव सदाभ्यसेत्" इत्युक्तम् हारीतसंहितायां तु "षट् कर्म्माणि, निजान्याहुर्ब्राह्मणस्य महात्मनः। तैरेव सतत यस्तु वर्त्तयेत् मुखमेघते अध्यापनं चाध्ययनं याजनं यजनं तथा। दानं प्रति ग्रहश्चेति षट् कर्म्माणीति चोच्यते" इति "वेदञ्चैव सदाभ्यसेत् शुचौ देशे समाहितः धर्म्मशास्त्रं तथा पाठ्यं ब्राह्मणैः गुरुमानसैः वेदवत् पठितव्यञ्च श्रोतव्यञ्च दिवानिशि श्रुतिहीनाय विप्राय क्षत्रियहीने तथैव च दानं भोजन मन्यच्च दत्तं कुलविनाशनम्। तस्मात् सर्वप्रयत्नेन वेद शास्त्रं पठेत्,,द्विज इति" च। "सत्त्वप्रधाना वप्राः स्युरिति भारतोक्तेः विप्रस्य सत्वप्रधानतया "ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप!। कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजमिति" गीतायां सात्विकधर्म्माएवास्य स्वाभाविका इत्युक्तम्। विवृतञ्चैतत् श्रीधरस्वामिना "तत्र ब्राह्मणस्य स्वाभाविकानि कर्म्माण्याह शम इति, शमश्चित्तोपरमः (बाह्यविषयाच्चित्तनम्) दमो-बाह्येन्द्रियोपरमः (स्वस्वविषयाच्चित्तनम्) तपः पूर्व्वोक्तं (सगुणब्रह्मोपासनादि) शौचं बाह्यमाभ्यन्तरञ्च। क्षान्तिः (शीतोष्णादिद्वन्द्वसहिष्णुता) आर्जवम् अवक्रता (बाह्याभ्यन्तरयोः कापट्याभावः) ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यम् अस्ति परलोक इति निश्चयः। एतत् शमादि ब्राह्मणस्य स्वभावात् जातं कर्म्मेति"। "सुखजातादयोयत्र अग्रे प्रथमं जन्म यस्य। चतुर्मुखे ब्रह्मणि, "यो वै ब्रह्माणं विदधाति पूर्व्वं यस्मै वै प्रहिणोति वेदमिति" "हिरण्यगर्भः समवर्त्तताग्रे" इति च श्रुतौ परब्रह्मसकाशात् तस्य प्रथमोत्पत्तिरुक्ता, तदुत्पत्तिप्रकारस्तु मनुना "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधा प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह" इत्यनेनोक्तः।

अग्रजात पु० अग्रे जातः जन-क्त ७त०। ज्येष्ठभ्रातरि, विप्रे च। ज्येष्ठभगिन्यां स्त्री। पूर्व्वजातमात्रे त्रि०।

अग्रजाति पु० अग्रा श्रेष्ठा जातिर्यस्य, जन-क्तिन् कर्म्म०। विप्रे।

अग्रजिह्वा स्त्री अग्रा जिह्वा अग्रहस्तवत् क०। जिह्वाग्रभागे।

अग्रणी त्रि० अग्रे नीयतेऽसौ नी-क्विप् ७त० णत्वम्। प्रभौ श्रेष्ठे च। अग्रं नयति देवेभ्य इति। वह्नौ पु० यथा-चास्याग्रणीतं तथाग्निशब्दे निरुक्तव्याख्यायामुक्तम्।

अग्रतस् अव्य० अग्रे अग्राद्वा अग्र+तसिल्। पूर्व्वदेशौ, पूर्व्वभागाधिके च। [अग्रगामिनि। स्त्रियां ङीप्।

अग्रतःसर त्रि० अग्रतः सरति गच्छति सृ-ट ७त०।

अग्रदानिन् पु० अग्रे दानं उद्देश्यत्वेकार्य्यस्य अग्रदान+इनि प्रेतोद्देशेन ब्रह्मणे दीयते तत्प्रतिग्राहिणि "अग्रदानीति" ख्याते विप्रे। "लोभो विप्रस्य मूढाग्रमग्रे दानं जहीतवान्। यद्दर्शात्तिलदानानामग्रदानी बभूव सः" इति पुरा०।

अग्रदानीय पु० अग्रे दानमर्हति छ। अग्रदानिविप्रे।

अग्रनख पु० अग्रो नखः अग्रहस्तवत् क०। नखाग्रे।

अग्रनासिका स्त्री अग्रा नासिका अग्रहस्तवत् क० । नासिकाग्रभागे ।

अग्रन्थिक पु० नास्ति ग्रन्थिर्वस्त्वग्रन्थिः संसारबन्धग्रन्थिर्वाऽस्य । निर्ग्रन्थिके सुक्तकच्छे जैनभेदे आत्मज्ञे च "भिद्यते हृदयग्रन्थि" रित्यनेन तस्य संसारग्रन्थिशून्यत्वोक्तेस्तथात्वम् । ग्रन्थिशून्ये त्रि० ।

अग्रपर्णी स्त्री अग्रे पर्णं यस्याः जातित्वात् ङीप् । (आस्फुगोति) ख्याते वृक्षे ।

अग्रपूजा स्त्री अग्रे पूजा । प्राथमिकपूजायाम् । "अग्रेपूजामिह स्थित्वा गृह्णाणेमामिति" पुरा० ।

अग्रभाग पु० भज्यते इति भागः एकदेशः भज-घञ् अग्रः पूर्व्वः भागः कर्म्म० । आद्यादौ प्रथमसृष्टत्य देये द्रव्ये अवयविनः शेषभागे च । यथा शराग्रभागः ।

अग्रभुक् त्रि० अग्रे देवपित्रादिभ्योऽदत्त्वा भुङ्क्ते भुज-क्विप् ७त० । औदरिके ।

अग्रभू पु०अग्रे भवति उत्पद्यते भू-क्विप् ७त० । पूर्वजाते ज्येष्ठभ्रातरि विप्रे च ज्येष्ठभगिन्यां स्त्री । पूर्वजाते त्रि० ।

अग्रमहिषी स्त्री कर्म० । प्रधानस्त्रियाम् । "अथाग्रमहिषी राज्ञ" इति ।

अग्रमांस न० अग्रं प्रधानं भक्ष्यत्वेन मन्यते मन्-स, दीर्घः कर्म्म० । हृदयस्थे पद्माकारे (फुलका) इति नामके मांसे । केचित् युक्त्याग्रमांसमेकं नामेत्याहुः । (अग्रमास) इति प्रसिद्धे रोगभेदे च ।

अग्रमुख न० अग्रं मुखम् अग्रहस्तवत् कर्म्म० । मुखाग्रे ।

अग्रयण न० अग्रमयनात् उत्तरायणात् ल्युट् णत्वम् शक० तत्विधानकालोऽस्य अच् । मार्गे मासि साग्निककर्त्तव्येनवशस्येष्टिरूपे यज्ञभेदे । निरग्निकर्त्तव्ये नवान्नमात्रे च । "अक्षतायग्रयणञ्चैव धान्यजातं द्विजोत्तमेति" वज्रप्राशे स्मृतिः । "अक्षतायग्रयणमक्षतनवशस्येष्टिमात्रं यथायोग्यं साग्निकनिरग्निपरमिति" आह्निकतत्त्वे रघुनन्दनः ।

अग्रयान न० अग्रे यानं यस्य या-ल्युट् संज्ञायां ह्रस्वणत्वम् । पुरोगामिनि सैन्ये । अग्रगामिमात्रे त्रि० ।

अग्रयायिन् त्रि० अग्रे यास्यति या-णिनि ७त० । पुरोगामिनि "पुत्रस्य ते रणशिरस्यग्रयायीति" भट्टिः च ।

अग्रयोधिन् पु० अग्रे स्थित्वा युध्यति युध-णिनि ७त० । सैन्यानामग्रे स्थित्वा योद्धरि । [चिल्लोति प्रसिद्धे शाकभेदे ।

अग्रलोहिता स्त्री अग्रमुपरिभागः लोहितं यस्याः ब० । तरुखण्डरूढे (कलम) इतिप्रसिद्धे काण्डजाते तरुभेदादिवृक्षे ।

अग्रसन्धानी स्त्री अग्रे फलोत्पत्तेः प्राक् सन्धीयते आयतेऽनया कार्य्यं सम्+धा-करणे ल्युट् ङीप् । यमपञ्जिकायाम् । यत्र हि प्राणिवर्गस्य प्राग्भवीयकर्म्मानुसारेण शुभाशुभसूचकं सर्व्वं लिख्यते सा यमपञ्जिका, । केचित् यमपट्टिकेति सा कथ्यते । अग्रसन्धानकारिणि त्रि० ।

अग्रसन्ध्या स्त्री अग्रं सन्ध्यायाः, "सर्वोऽप्येकदेशः कालवाचिना समस्यते, इत्युक्तेः एक०त० । सन्ध्याग्रपूर्व्वसमये । अग्रा पूर्व्वा सन्ध्या इति कर्म० । प्रातःसन्ध्यायाम् "कर्कन्धूना सुपरि तृह्निं रञ्जयत्यग्रसन्ध्येति" शकुन्तला ।

अग्रसर त्रि० अग्रे सरति गच्छति सृ-ट ७त० । अग्रगामिनि । "युङ्नायाग्रसरोऽभवदिति" स्त्रियां ङीप् ।

अग्रसारा स्त्री अग्रं शीर्षमात्रं सारोऽस्याः । फलशून्यशिखायां मञ्जर्य्याम् । अग्रात् अग्रमारभ्य सारोऽस्य । वंशादौ पु० ।

अग्रह पु० ग्रहः परिग्रहः न०त० । परिग्रहाभावे । बहु० । परिग्रहशून्ये सन्यासिप्रभृतौ, ज्ञानशून्ये त्रि० ।

अग्रहर त्रि०अग्रे ह्रियते दीयतेऽसौ अग्र-हृ-अच् । अग्रदेये वस्तुनि, भागाग्रे पु० अग्र-हृ-कर्त्तरि अच् । अग्रहारिणि त्रि० "ग्रामाग्रहरः कुमार" इति ।

अग्रहस्त पु० अग्रश्चासौ हस्तश्चेति गुणगुणिनोरभेदात् कर्म्म० । हस्तस्याग्रभागे "अथाग्रहस्ते सुकुमारतामुक्तावितिं" कु० ।

अग्रहायण पु० अग्रः श्रेष्ठः हायनोऽत्रीष्टिरत्वं णत्वम् । मार्गशीर्षे मासि । तस्य च "मासानां मार्गशीर्षोऽहमीति" गीतायां भगवद्विभूतिरूपत्वोक्तेः श्रेष्ठधान्यवत्त्वाच्च तथात्वम् ।

अग्रहायणेष्टि स्त्री अग्रा प्राथमिकी हायनसिद्धिसा इष्टिः । नवशस्येष्टौ यागभेदे ।

अग्रहार पु० अग्रं प्रथमं ह्रियते उत्पन्नशस्यादृत्य स्वाम्यते हृ-कर्म्मणि घञ् । क्षेत्रोत्पन्नशस्यादृत्य ब्राह्मणो देवेन स्वाम्ये धान्यादौ शुल्कलाभादात्मब्रह्मचारिणे देये क्षेत्रादौ, ग्रामभेदे च "स कस्मिंश्चिदग्रहारे काञ्चीं नामैकक्षेति" दशकु० । अग्रं हरति-अण् । अग्रहारके त्रि० ।

अग्राह्नि न० अग्रञ्च तदह्नि चेति शुणगुणिनोरभेदात् कर्म्म० खाङ्गपरत्वात् माच्समा० । मेलाग्रे अपाङ्गे "अग्राह्णा वीक्षमाणासु तिर्य्यग्भ्रातरमब्रवीदिति रामा० ।

अग्राणीक न० अग्रञ्च तदनीकं चेति शुणगुणिनोरभेदात्

कर्म्म० णत्वम् । अग्रयायिसैन्ये । "अग्रयाणीकं रघुव्याघ्रौ रात्तमानां बभञ्जतुः इति" रामा० ।

अग्रायणीय न० अग्रं श्रेष्ठमयनं ज्ञानं तत्र साधु छ । बौद्धागमसिद्धे प्रवादभेदे "उत्पादपूर्व्वमग्रायणीयमथ वीर्य्यता प्रवादः स्यात् इति" हेमचन्द्रः ।

अग्रावलेहित न० अग्रं प्रथमभाग उद्धृत्यावलेहितमास्वादितं यस्य । श्राद्धाद्यर्थप्रस्तुताच्चादग्रभागस्योद्धृत्यास्वादनेन श्राद्धं दानाद्यनर्हतापयोजकदोषदुष्टे अन्नादौ "द्विःखिन्नं परिदग्धञ्च तथैवाग्रावलेहितमिति" श्राद्धवर्ज्ये ब्रह्मपुराणम् "अग्रावलेहितं श्राद्धार्थोपकल्पितं सकृदुपभुक्ताग्र्यभागमिति" रघु० ।

अग्रासन न० अग्रमर्घादिदानात् पूर्व्वं कल्पितमासनम् । श्राद्धान्नभोजनार्थं अर्घदानादितोऽग्रे कल्पिते विप्रस्योपवेशनार्थे आसने "मामग्रासनतोऽवकृष्टमयमिति" भट्टा० ।

अग्राह्य त्रि० अग्रह-ण्यत्-न० त० । अग्रहणायोग्ये शिवनिर्म्माल्यादौ प्रतिग्रहायोग्ये तिलाज्यादौ च । "अग्राह्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलमिति" पुरा० । "ब्राह्मणः प्रतिगृह्णीयाद्वृत्त्यर्थं साधुतस्तथा । अन्यस्मादपि मातङ्गतिलनीरांश्च वर्ज्जयेत् । कृष्णाजिनहयगृह्णी न भूयः पुरुषोभवेत् । शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च । नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा" । तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति । आतुराद्दुष्टदुष्टेभ्यस्तु तत् कथं ? वै तरिष्यति" । "एतदादिद्रव्यादानं गर्हितदोषजनकम्" इति रघु० । "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः । अन्यत्र कुलटापण्डपतितेभ्यो द्विषस्त्रयेति" मनुः । तेन कुलटादिद्रव्यम् अग्राह्यम् । शौचादौ कर्म्मणि अनुपादेयमृत्तिकायाम् स्त्री । "अन्तर्जले देवगृहे वल्मीके मूषिकस्थले । कृतशौचावशिष्टे च अग्राह्याः पञ्च मृत्तिका" इति स्मृतिः । अविचारणीये त्रि० "अग्राह्यस्त्वनिवेदित" इति स्मृतिः । आवेदनकालेऽनिवेदितः पश्चात् निवेदितोऽपि व्यवहारे न विचारणीयः इति तदर्थः ।

अग्रिम पु० अग्रे भवः अग्र+डिमच् । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे च त्रि० । "वीराणामग्रिमो भूत्वा युयुधे पार्थिवैः सहेति" पुरा० ।

अग्रिय पु० अग्रे भवः अग्र+घ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे, अग्रजातमात्रे च त्रि० । "सन्ध्या अग्रिया भवन्तीति ता० ब्रा० ।

अग्रीय पु० अग्रे भवः अग्र+छ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे च त्रि० । "अग्रीयभागं ददतेऽस्य दैत्या" इति वेदः ।

अग्रु(ग्रू) स्त्री अगि-क्रु नलोपः वा ऊङ् । नद्यामङ्गुल्याञ्च । निरुक्तौ तन्नामोरेतस्का उक्तेस्तदर्थत्वम् । "जनीयन्तोन्यग्रुव" इति वेदः ।

अग्रेग त्रि० अग्रे गच्छतीति गम-ड अलुक् स० । पुरोगन्तरि ।

अग्रेगा त्रि० अग्रे गच्छति गम-विट् अलुक् स० । पुरोगन्तरि ।

अग्रेगु त्रि० अग्रे गच्छतीति गम-डु अलुक् स० । पुरोगामिनि सेवके ।

अग्रेदिधिषु (षू) पु० दिधिं धैर्य्यं स्यति निरस्यति, सो-कू षत्वम् दिधिषूः द्विरूढा पुनर्भूयोषित् अग्रे गणनीया दिधिषूर्यस्य अलुक् स० कबभावः षू० वा ह्रस्वः । पुनर्भूविवाहकारिणि । प्रागनूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां स्त्री । "ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा तु दिधिषूः स्मृतेति, मनुः एतत्पक्षे च अग्रे ज्येष्ठाविवाहात् पूर्व्वं दिधिषूः ज्येष्ठाविवाहकाला सहनरूपधैर्य्यलोपकारिणीति विग्रहः । दीर्घान्त एवायम् ।

अग्रेदिधिषूपति पु० ६त० । अनूढज्येष्ठायां भगिन्याम् सत्यां कनिष्ठायाभगिन्या वोढरि "यस्याग्रे दिधिषूपतिरिति" स्मृतिः ।

अग्रेपा त्रि० अग्रे स्थित्वा पाति पा-किप् अलुक् स० । पुरतो भूत्वा पालके "अग्रेपा ऋभवो मन्दसाना" इति वेदः ।

अग्रेपू त्रि० अग्रे कृत्वा पूयते पू-किप् अलुक् स० । पुरः पवित्रकारके "सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुव" इति वेदः ।

अग्रेवण वनस्याग्रं-राज०पूर्व्व० अलुक् स० णत्वम्, नि० एदन्तत्वम् । वनाग्रभागे । [गामिनि । स्त्रियां ङीप् ।

अग्रेसर त्रि० अग्रे सरति सृ-ट-अलुक् स० ।

अग्रेसरिक त्रि० सृ-भावे-अप् अलुक् स० अग्रे सरे अग्र गतौ प्रकृतः ठन् । पुरोगामि-सेवके ।

अग्र्योपहरणीय त्रि० अग्रमुपहृियते यस्मै उप+हृ-सम्प्रदाने अनीयर् । श्राद्धाद्यर्थमुपकल्पितस्याद्यादेरन्ये दानोद्देश्ये वास्तुदेवादौ । अग्रे उपहृियते कर्म्मणि अनीयर् । प्रथमदानार्हे द्रव्ये । ["दृश्यते त्वग्र्यया बुद्ध्या" गीता ।

अघ पु० अग्रेजातः यत् । ज्येष्ठे भ्रातरि । श्रेष्ठे त्रि०

अघ ऋदित् गतौ भ्वादि० आत्म० सक० सेट् । अङ्घते । आङ्घिष्ट । क्रि-अङ्घिः असुन् अङ्घः ।

अघ पापकरणे अदन्तचुरा० उभय० अक० । अघयति-ते । आजिघत् त । अघ्-अघम् अघः ।

अघ न० चुरा०अघ-भावे अच्। पापे "हरत्यघं सम्प्रति हेतुरैश्वत" इति माघः। कर्त्तरि अच। पापकारके त्रि० "अघायुरिन्द्रियारामो मोघं पार्थ! स जीवतीति" गीता अघं हेतुत्वेनास्त्यस्य अर्श०अच्। व्यसने दुःखे च न०तयो पापजन्यत्वात्तत्त्वम्। तत्र व्यसने "कच्चित् खगीणामनघा प्रसूतिरिति" रघुः। "अनघा अव्यसनेति" मल्लिनाथः। "न वर्त्तयेदघाहानीति" "अघाहेषु निवृत्तेषु सुखाताः कृतमङ्गला इति" च स्मृतिः अघस्य व्यसनस्य दृष्टवियोग-रूपस्य तज्जन्यदुःखस्य वा अहानि अवाहादिति तदर्थः। दुःखे, "उपस्तुतमघोघेन नात्मानमवबुध्यते इति' दुःखौघेनेत्यर्थः "दयालुमनघस्रष्टं पुराणमजरं विदुरिति" माघः। परदुःखेन दुःखित्वे एवतत्परहरणाय दयालोरिच्छा, ईश्वरस्य तु दयालुत्वेऽपि न दुःखसम्पर्कः आनन्दस्वरूपत्वादिति, तत्तात्पर्य्यार्थं "स्वयशांसि विक्रमवतामवतां न वधूष्वघानि" इति भा०। अघानि व्यसनानीत्यर्थः। पूतनावकासुरयो-र्भ्रातरि असुरभेदे पु०। "कृष्णचरितमिवाघनाशन मिति" श्लेषः। एतत्कथा चाघनाशनशब्दे द्रष्टव्या।

अघकृत् त्रि० अघं पापं सततं करोति कृ-कर्त्तरि क्विप् तुक्। पापकारिणि, सततपापशीले च।

अघन त्रि० न०त०। निबिडतावित्यर्थेऽव्ययीभावयुक्ते।

अघनाशन त्रि० अघं नाशयति नश-णिच्-ल्यु। पाप-नाशके जप्यदानादौ "जपेत् सञ्चाघनाशनमिति" स्मृतिः। स्त्रियां ङीप्। अघस्यासुरभेदस्य नाशनः। श्रीकृष्णे, स हि अजगररूपेण जिघांसन्तं तं हतवान् तत्कथा भागवते "अथावनाम्भ्यपतन्महासुरस्तेषां सुखक्रीड़न-वीक्षणाक्षमः। नित्यं यदन्तर्निजजीवितेप्सुभिः पीता-मृतैरप्यमरैः प्रतीक्ष्यते॥ दृष्ट्वार्भकान् कृष्णमुखान्बकासुरः कंसानुशिष्टः स बकीबकानुजः। अयन्त मे सोदरनाशकृ-त्तयोर्द्वयोर्नेष्यमिमं सबलं हनिष्ये। एते यदन्तस्तनुहृदोस्तिलापाः कृतास्तदा नष्टसमा प्रजौकसः। प्राणे गते वर्ष्मसु कानुचिन्ता प्रजासवः प्राणभृतोहि संयते॥ इति व्यवस्याजगर वपुर्महद्बृहत् स योजनायाममहाद्रिपीवरम्। धृत्वाद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः" ॥ इत्यम् अघनामकेऽसुरे स्थिते तदुदरे गोवत्सवत्सपालेषु गतेषु स्वयमपि हरिः प्रविश्य अन्तः स्वदेहवर्द्धनेन तं हतवान् इत्यर्थः। "तच्छ्रुत्वा भगवान् कृष्णस्त्वव्ययः सार्भवत्सकम्। चक्रेऽक्षिकीर्षो-रात्मानं तरसा वृद्धये गले॥ ततोऽतिकायस्य निरुद्ध-मार्गिणोहृद्दीर्णदृशोभ्रमत्खिलस्ततः। पूर्णोन्तरङ्गे पवनो-निरुद्धोमूर्द्धन्विनिर्भिद्य विनिर्गतो बहिः" इति॥ "कृष्ण-चरितमिवाघनाशनमिति" श्लेषः।

अघभोजिन् त्रि० अघं पापफलकभुङ्क्ते भुज-णिनि तुक्। देवपितृतिथ्युद्देशाभावेन स्वार्थपाचके। "अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्" इति विष्णुः। "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति गीता।

अघमर्षण न० अघं पापं मृष्यते उत्पन्नत्वेऽपि नाशनेन कर्म्मात्मत्वात् सह्यतेऽनेन मृष-ल्युट् तुक्। उत्पन्न-पापनाशार्थं जप्ये मन्त्रभेदे तच्च द्रुपदादिवेत्यादि, घृतञ्च सत्यञ्चेत्यादि आपोहिष्ठेत्यादि सूक्तञ्च। तच्च अन्तर्जले जप्यम् तत्फलञ्चोक्तं ब्राह्मणसर्व्वस्वे। यथा "बौधा-यनः "ऋतञ्च सत्यञ्चाद्यघमर्षणम् त्रिरन्तर्जले जपन् सर्व्वस्मात् पापात् प्रमुच्यते"। योगियाज्ञवल्क्यः "हत्वा लोकानिमांस्त्रीन् हि त्रिः पठेदघमर्षणम्। यथाश्वमेधा-वभृथमेवं तन्मनुरब्रवीत्" इति। हारीतः "मातृकोपपा-तकमहापातकानामेकतमसन्निपातेऽघमर्षणमेव जपेत्" इति। वृद्धविष्णुः "यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः। तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम्" इति। योगियाज्ञ-वल्क्यः "स्नानमृष्ट्वैतैर्मन्त्रैर्मार्जनं प्राणसंयमः। अघ-मर्षणसूक्तेन अश्वमेधावभृत्समम्" इति। यमः "अन्तर्जले-ऽघमर्षणं त्रिरावर्त्तयन् सर्वपापेभ्यो मुच्यते" इति। अत्रिः "अपि चाप्सु निमज्ज्यित्वा त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथं तथैतन्मनुरब्रवीत्" इति। वसिष्ठः "अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षणम्। यथाश्वमेधा-वभृथं ताद्दृगं मनुरब्रवीत्" इति। आपस्तम्बः "अपि चाप्सु निमज्ज्यित्वा त्रिः पठेदघमर्षणम्"। यथाश्व-मेधयज्ञो हि मनुस्तादृगमाह तत्" इति। बौधायनः "त्रिरातं चाप्युपस्पृश्य त्रिरभ्युपयन्नपः। प्राणानायम्य त्रिः संयम्य त्रिः पठेदघमर्षणम्। "यथाश्वमेधावभृथ-मेवं तन्मनुरब्रवीत्" इति। योगियाज्ञवल्क्यः "त्रयं वोपवसेद् यस्तु त्रिरभ्युपयन्नपः। मुच्यते पातकैः सर्वैः जप्त्वा त्रिरघमर्षणम्' इति। दक्षोऽपि वृद्धमनुः "मातरं भगिनीं गत्वा भ्रातृपत्नीं सखीं सना-भ्याञ्च अगम्यागमनं कृत्वा अघमर्षणसू क्तमन्तर्जले त्रिरा-वर्त्त्य एतस्मात् पापात् पूतो भवतीति"। तथा "गुरुतल्पसमं कृत्वा अघमर्षणमन्तर्जले त्रिरावर्त्त्य एतस्मात् पापात् पूतो

भवतीति" । अत्र पापगौरवमाकलय्य संयतेन मासेकं यावत् तत्तन्मन्त्रावृत्त्याघमर्षणस्तोत्रं त्रिरावर्त्य स्नातव्यम् । तथा च लघुयमः "महापातककर्त्तारमत्यन्तारण्य विशेषतः । अग्निं प्रविश्य शुद्ध्यन्ति स्नात्वा वाघ इति ऋतौ । रहस्यकरणे चैव नाममन्त्रस्य पौरुषम् । अघमर्षणसूक्तं वा सूक्तं शुध्येच्चान्तर्जलेस्थितः" इति । दक्षयमः "अथ ब्रह्मकल्पां कृत्वा प्राचीं वा उदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेनेन्धनेनाग्निं प्रज्वाल्याघमर्षणं चाष्टसहस्रमावर्त्य जुहुयात् तस्मात् प्रपापात् पूतो भवतीति" । क्रतुरपि "अन्तर्जले त्रिरावर्त्य सुव्रते ब्रह्महत्ययेति" । शङ्खोऽपि "अकार्य्यकरणे चैव अभक्ष्यस्य च भक्षणे । अघमर्षणसूक्तेन मोक्षयेत् पापः शुध्यते नरः" । वशिष्ठः "मनसा पापं कृत्वा अघमर्षणं जपेत्" इति । शङ्खोऽपि "स्त्रीयागमने वैश्यागमने चैव तापसीम् । त्रिरावर्त्य विशुद्धः स्यात् शूद्रागाभ्यघमर्षणम्" इति । तापसीमिति तापसीम् ऋचमित्यर्थः यङ्गलिखितौ "ब्रह्महा त्रिरात्रोपोषितोऽन्तर्जलेऽघमर्षणं त्रिरावर्त्तयेत्" इति । याज्ञवल्क्यः त्रिरात्रोपोषितोजत्वा ब्रह्महा त्वघमर्षणम् । अन्तर्जले विशुद्ध्यर्थं दत्त्वा गान्तु पयस्विनीम्" इति । प्रकाशविषये गौधायनः "तीर्थं गत्वा ततः शुचिरात्मा उदङ्मुखो स्थण्डिले उद्धृत्य सकृच्छिन्नवाससा सकृत् पूर्णेन पाणिना आदित्याभिमुखः अघमर्षणमध्यायमधीयीत इति" ।

षडङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षिणहस्तेन जलमाच्छाद्य ॐ यं रं लं वं इति त्रिरभिमन्त्र्य मूलमुद्धरन् गलितोदकबिन्दुभिस्तत्त्रयेण सप्तधा मूर्द्धानमभ्युक्ष्य शेषजलं दक्षिणहस्ते समादाय तोयरूपं ध्यात्वा कृष्णाक्ष्य देहान्तःपापं प्रक्षाल्य कृष्णवर्णं तज्जलं ध्यात्वा पिङ्गलया विरेचय पुरः कल्पितवज्रशिलायां पतिति मन्त्रेण पापपुरुषस्वरूपं तज्जलं निःक्षिपेदित्यघमर्षणम् इति तन्त्रसारे तान्त्रिकाघमर्षणमुक्तम् तत्प्रमाणं तु तत्रैवावगन्तव्यम् ।

अघमार त्रि० अघं मारयति मृ-णिच्-अण् उप० । पापनाशके देवादौ, "यमोऽस्युरुघमारो निर्ऋत" इति वेदः ।

अघरुद् त्रि० अघं रोदिति स्वकर्म्मान्वितया यस्मात् रुद-अपादाने क्विप् ह्रस्व० । पापापनोदनहेतौ, पापनाशने मन्त्रे । "मा त्वाघरुदोरुदन्" इति वेदः । अघं व्यसने रोदिति नन्तु तत्प्रतीकाराय घटत रुद+कर्त्तरि क्विप् । रोदनेनैव व्यसनोत्तारके तत्प्रतीकारार्थमनुद्यते त्रि० ।

अघर्म्म पु० न०त० । उष्णविरोधिशीते तद्वति त्रि० । "अघर्म्मे काल" इति काद० ।

अघल त्रि० अघं लाति गृह्णाति, नाशयतीति ला-क । पापापनोदके । "कृत्योर्वे अघलादूता" इति वेदः ।

अघवत् त्रि० अघमस्यस्य मतुप् मस्य वः । पापवति सम्बोधने अघोः-अघवन् । "अघोयजेति" मुग्धबोधम् ।

अघविष पु० अघं व्यसनकारि-विषं यस्य । सर्पे ।

अघशंस पु० अघमनिष्टं शंसति कथयति शंस-अण् उपस० । अनिष्टसंपादके चौरे "अघाघशंसंसुदतामरातिमिति" वेदः । भावे अच् ह्रस्व० । व्यसनसूचने पु० ।

अघशंसिन् त्रि० अघं शंसति सूचयति शंस-णिनि ह्रस्व० । व्यसनसूचके "व्यसनाशंसाकर्त्तरि "वचः क्रूरं मयोक्तमघशंसिनेति । स्त्रियां ङीप् ।

अघाय् त्रि० अघं पापं परव्यसनं वा कर्त्तुमिच्छति अघ+क्यच्-उ । पापाचरणेच्छावति, परव्यसनचिकीर्षके च । "त्वा दक्षा अघायवोविदन्" इति यजु० । परस्याघं कर्त्तुमिच्छन्तीति वेददीपः । अघमायति आ+या उ ह्रस्व० । हिंसानिरते । "बधोऽघायूनामिति" ता० ब्रा० ।

अघायुस् त्रि० अघं पापसाधनमायुरस्य । सर्व्वावस्थासु पापकारके "अघायुरिन्द्रियारामोमोघं पार्थेति" गीता ।

अघारिन् त्रि० अघं व्यसनमृच्छति कृ-णिनि । व्यसनयुक्ते स्त्रियां ङीप् । "अघारिणीविकेश्योरुदत्य" इति वेदः ।

अघासुर पु० कर्म्म० । असुरभेदे अघनाशनशब्दे तत्कथा ।

अघाह पु० अघस्य व्यसनस्याहः अच्समा० । व्यसनदिने अशौचदिने "अघाहं नैव वर्द्धयेदिति" "अघाहेषु निवृत्तेषु सुस्नाताः कृतमङ्गलाः । आशौचाद्विप्रमुच्यन्त इति" च स्मृतिः ।

अघोर त्रि० न घोरः भयानकः । भयानकभिन्ने सौम्यरूपे "या ते रुद्र! "शिवा तनूरघोरा पापकाशिनी" इति वेदः । "अघोरा सौम्या अत एव पापकाशिनी शिवा च इति" वेददीपः । नास्ति घोरो यस्मात् । अतिभयानके त्रि० । रुद्रमूर्त्तिभेदे पु० । "ईशानाघोरनामानौ, वामदेवस्ततः परम् । सद्योजात इति प्रोक्तः क्रमशोऽर्चनकर्म्मणीति पुरा० । अघोरः शिव उपासकत्वेनास्यास्ताम् अघोर+अच् । भाद्रकृष्णचतुर्दश्यां स्त्री । "भाद्रे मासि सिते पक्षे ह्यघोराख्या चतुर्दशी । तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवमिति" पुरा० ।

अघोष पु० नास्ति घोषोऽस्यात् वा । वर्णोत्पादनार्थे वाह्य

प्रयत्नभेदे तत्प्रयत्नयुक्तेषु वर्णेषु च । ते च वर्णाः "खयां यमाः खयः+कँपौ विसर्गः शर एवच । एते श्वासानुप्रदाना अघोषाश्चेत्युक्ताः वेदितव्याः । विवरणं मत्कृतशब्दार्थरत्ने सूचीपत्रे द्रष्टव्यम् । शब्दशून्ये त्रि० ।

अघोषवत् त्रि० अघोषः वर्णोच्चारणवाह्यप्रयत्नः अस्त्यस्य मतुप् मस्य वः । "खयां यमाः-खय+कँपौ विसर्गः शरश्चेत्युक्तेषु वर्णेषु ।

अङ्गा पु० न हन्ति सृष्टिकर्त्तृत्वात् न+हन-यक् निपातनात् साधु । प्रजापतौ । न हन्यते स्त्रीहत्यायाः, "अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपीति" निषिद्धत्वात् कर्म्मणि नि० । हननकर्म्मताशून्यायां स्त्रियां गवि स्त्री । अङ्गा "गवां पतिरङ्गा" इतिवेदः । "पतिं वो अङ्गानामिति" वेदः "गावः प्राञ्चन्त्यङ्गा इति" च वेदः ।

अङ्गेय त्रि० न घ्रातुं शक्यः अर्हः वा घ्रा-शक्यार्थे यत् न० त० । घ्राणानर्हे दुर्गन्धे वस्तुमात्रे, मद्ये न० । "मदिराघ्राणमात्रेण ब्राह्मण्यादेव हीयते" इति स्मृतौ मद्यस्य घ्राणनिषेधात् तस्य तथात्वम् ।

अङ्क (नृक) संख्याकरणे चिह्नयुक्तकरणे अदन्तचुरादि० उभ० सक० सेट् । अङ्कयति-ते ते आङ्किक-त्-त । अङ्कापयति ते इति केचित् । "प्रेयांसमाङ्कयदसौ न विधौ कलङ्क" इत्युद्भटः । "पुक चेत्यङ्कापयत्यपीति" कामधेनुः । अच् अङ्कः । क्त अङ्कितः ल्युट् अङ्कनम् असुन् अङ्कः ।

अङ्क पु०न० अङ्क-करणे, कर्त्तरि वा अच् । चिह्ने "रतिवलयपदाङ्के चापमासज्य कण्ठे" इति कुमा० । कलङ्के, "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्क" इति कुमा० । दृश्यकाव्याङ्गभेदे तल्लक्षणं यथा "प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः । भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ विच्छित्त्यावान्तरैकार्थः किञ्चित्संलग्नविन्दुकः । युक्तो न बहुभिः कार्य्यैर्बीजसंसूतिमान् न च ॥ नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । आवश्यकानां कार्य्याणामविरोधाद्विनिर्म्मितः ॥ नानेकदिननिर्व्वर्त्त्यः कथया सम्प्रयोजितः । आसन्ननायकः पात्रैर्युक्तश्चित्तरसैस्तथा ॥ दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः । विवाहो भोजनं शापोत्सर्गौ मृत्यूरतं तथा ॥ दन्तच्छेद्यं नखच्छेद्यमन्यद्वा व्रीडाकरञ्च यत् । शयनाधरपानादि नगराद्युपरोधनम् ॥ स्नानानुलेपने चैर्भिर्वर्जितो नातिविस्तरः । देवीपरिजनादीनामसाम्यबणिजामपि ॥ प्रत्यक्षचित्तचरितैर्युक्तो भावरसोद्भवैः । अत्यनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः" इति सा० ॥ दृश्यकाव्यरूपकभेदे च पु० । यथा "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" इति विभज्य "उत्सृष्टिकाङ्क एकाङ्कोनेतारः व्याप्टता नराः । रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ॥ प्राख्यातमितिवृत्तञ्च कविर्बुद्ध्या प्रपञ्चयेत् । भाणवत् सन्धिवृत्त्याद्यान्यस्मिन् जयपराजयौ ॥ युद्धञ्च वाचा कर्त्तव्यं निर्वेदवचनं बहु" । इति लक्षितम् "इमञ्च केचित् नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थम् उत्सृष्टिकाङ्कनामानम्" आहुः । अन्ये तु "उत्क्रान्ता विलोमरूपा सृष्टिर्यत्रेति उत्सृष्टिकाङ्कः" इति सा० । पर्व्वते, समीपे, युद्धभूमौ, देहे, अपराधे, स्थाने, चिह्नयुद्धे परम्परासम्बन्धे चिह्ने च पु० । क्रोडे पु० न० "अनन्यनारीकनीयमङ्कमिति" कुमा० । "अङ्के निधाय तं बालं पुनः संस्कारमर्हतीति" स्मृतिः । "पुनरङ्कमयत्नी भयामि ते" इति कुमा० । "प्रेम्णोपकण्ठं सुतरङ्कभाजो रत्नावलीरम्बुधिराबबन्धेति" माघः । "अङ्कः समीपस्य उत्सङ्गे च" इति मल्लिनाथः । एकत्वादिसंख्याबोधकरेखासन्निवेशे- "अङ्कयुतिः किल सङ्कलिताख्येति" लीला० । नव-संख्यायाञ्च पु० ।

अङ्कतन्त्र न० अङ्कानामेकादिपरार्द्धान्तसंख्याबोधकरेखादिन्यासानां प्रतिपादकम् तन्त्रं शास्त्रम् । अङ्कशास्त्रे व्यक्ताव्यक्तरूपे, पाटीगणितबीजगणितादौ ।

अङ्कति पु० अन्च-गतौ अति कुत्वम् । वाते । पूजनार्थात् कर्म्मणि अति । अग्नौ, अग्नीध्रे, अग्निहोत्रिणि च । गन्तरि त्रि० स्त्रियाम् वा ङीप् अङ्कती च ।

अङ्कधारण न० ६त० । चिह्नधारणे तप्तमुद्रादिदैवपैत्र्यचिह्नधारणे च । धृ-णिच् भावे युच् । अङ्कधारणाभावे स्त्री ।

अङ्कन न० अङ्क-करणे ल्युट् । अङ्कनसाधनद्रव्ये गदा(गमीति) प्रसिद्धे । भावे ल्युट । चिह्नकरणमात्रे न० । "अन्यलाङ्कनलक्षाभ्यां वाहनिर्भोचने" इतिस्मृतिः । अङ्कनं तिम्भूजादिचिह्नकरणमिति प्रा० रघु० । भावे युच् । अङ्कनाभावे स्त्री ।

अङ्कपादव्रत न० व्रतभेदे ।

अङ्कपालि स्त्री पा-अलि ६त० वा ङीप् । क्रोडप्रान्ते । अङ्केन पालयतीति पालि-क ३त० । उपमानादि (धात्वमा) इति प्रसिद्धायाम् । अङ्कस्य पालिरिव । आलिङ्गने ।

अङ्कपाली स्त्री अङ्कपालि+ङीप् । अङ्कपालिशब्दार्थे वेदिकाक्षणभङ्ग्यां च ।

अङ्कपाश पु० अङ्कः पाश इव बन्धनेनेव पातनहेतुत्वात् । लीलावतीप्रसिद्धे एकाद्यङ्कानां स्थानविनिमयेन संख्याभेदबोधके, तदैक्यसंख्यासङ्कलनोपयोगिनि च प्रक्रियाभेदे "स्थानान्तमेकादिकयावघातः संख्याविभेदो नियतैः खुरङ्कैः । भक्तोऽङ्कमित्याङ्कसमासनिघ्नः स्थानेषु युक्तोमितिसंयुतिः स्यादिति" । यथा १, २, एतयोरङ्कयोः स्थानद्वये, स्थितिः तयोः स्थानविनिमये कति भेदा, भेदभिन्नानाञ्च संख्यैक्यमितिः केति १ च पृष्टे अनेनैव प्रकरणेन १२, २२, एतौ द्वौ भेदौ ऐक्याङ्कमितिः" २२ एतत्प्रत्तरं तत्रानेनैव भवति । "न गुणो न हरो न क्षतिर्न धनः पृष्टस्तथापि दुष्टानाम् । गर्वितगणकबटूनां स्यात् पातोऽयमङ्कपाशेऽस्मिन्निति" लीलावतौ ।

अङ्कपूरण न० अङ्कयोस्तत्संख्ययोः पूरणं गुणनम् । अङ्कयोर्गुणने । [परितोऽङ्कस्य बन्धनम् ।

अङ्कबन्ध पु० अङ्कस्य बन्धः । क्रोड़बन्धे । यथा पर्य्यङ्कबन्धः ।

अङ्कलोड्य पु० अङ्केन लोड्यतेऽसौ लोड-ण्यत् ७त० । चिह्नोड़दण्डे ।

अङ्कलोप पु० अङ्कस्य वियोज्यसंख्याया दृष्टसंख्यातो लोपः वियोजनम् । दृष्टसंख्यातः कस्याचित् संख्याया वियोजने यथा नवाङ्कसंख्यातः पञ्चाङ्कसंख्याया वियोजने चतुःसंख्याऽवशिष्यते । एवम् अन्यत्रापि ।

अङ्कस् न० अञ्च-असुन् कृत्वम् । चिह्ने, शरीरे च । "यथामङ्कांस्यापनीफलदिति" वेदः ।

अङ्कस न० अङ्को ऽस्मिन्नस्ति अच् । चिह्नयुक्ते । "श्येनस्येव ध्रजतोऽङ्कसं परीति" यजुः । अङ्कसं वस्त्रमाप्रपदिकमिति ।

अङ्काङ्क न० अङ्के मध्ये अङ्काः शतपत्रादिचिह्नानि यस्य । जले "आपो वै अङ्काङ्काः सन्द्" इति, अङ्काङ्कं सन्द् इति च श्रुतिः । [कारैरङ्कितं मेघवाहनमिति" वह्निध्यानम् ।

अङ्कित त्रि० अङ्क-क्त । चिह्नयुक्तीकृते, "खाहाखधावषट्-

अङ्किन् त्रि० अङ्कः आलिङ्गनस्थानत्वेन अस्यास्ति अङ्क+इनि । अङ्केनालिङ्ग्य वादनीये मृदङ्गादिवाद्यभेदे, क्रोड़विशिष्टे च । "यायायामङ्किनो ये चरन्तीति" वेदः ।

अङ्किनी स्त्री अङ्कानां चिह्नानां समूहः खलादि० इनि ङीप् । चिह्नसंघाते । अस्त्यर्थे इनि ङीप् । अङ्कयुक्तस्त्रियाम् ।

अङ्कुर अस्त्री० अङ्क-उरच् । बीजादभिनवोत्पन्ने, क्षितिमात्मद्विद्य जाते तृणवृक्षादौ "इमाश्चियरूढेषु तृणाङ्कुरेष्विति" रघुः । जले, बीजोत्पत्तिसाधनत्वात् रुधिरे, लोम्नि च सुश्रुते च "भूताङ्कुराख्यादकषायकण्ठ" इति कुमा० ।

अङ्कुरक पु० अङ्कयते तृणादिना सञ्जीयतेऽसौ अनुच-घुरच् ततः क । पद्मादीनां वासस्थाने (वासा इति) ख्याते ।

अङ्कुरित त्रि० अङ्कुरः जातोऽस्य ता० इतच् । जाताङ्कुरे ।

अङ्कुश अस्त्री० अङ्क-उशच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहास्त्रभेदे (डाङश) इति ख्याते । "तिरोगतं साङ्कुशमुद्वहन् शिर" इति माघः । "सन्निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशमिति" रघुः । प्रतिबन्धे च "निरङ्कुशाः कवय इति" मल्लिनाथः पक्षा० फक् । आङ्कुशायनः अङ्कुशस्थानीयस्थाने त्रि० ।

अङ्कुशग्रह पु० गृह्णातीति ग्रह-अच् ६त० । अङ्कुशधारिणि निषादिनि । "अन्वेतुकामोऽवमताङ्कुशग्रह" इति माघः ।

अङ्कुशदुर्द्धर पु० दुःखेन धार्य्यते व्यवस्थाप्यते दुर्-धारि-खल् तुस्य अङ्कुशेन-दुर्द्धरः ३त० । दुर्दान्तहस्तिनि ।

अङ्कुशधारिन् पु० अङ्कुशं धारयति धारि-णिनि । हस्तिपालके ।

अङ्कुशमुद्रा स्त्री अङ्कुशाकारा मुद्रा । "ऋज्वीञ्च मध्यमां कृत्वा तस्याध्यपर्व मूलतः । तर्ज्जनीं किञ्चिदाकुञ्चेत् सा मुद्राऽङ्कुशसंज्ञितेति" तन्त्रोक्ते तीर्थावाहनाद्यर्थं कल्पिते अङ्गुलिसन्निवेश रूपेमुद्राभेदे ।

अङ्कुशी स्त्री अङ्कुशः चित्तनागरोधनोपायः विवेकः अस्त्यस्याः अच् गौ० । जैनीयदेवीभेदे । [तृणवृक्षादौ ।

अङ्कूर पु० अङ्क-खर्जूरादित्वात् अरच् । अभिनवोत्पन्ने

अङ्कुष अस्त्री० अङ्क-अषच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहमयेऽस्त्रभेदे (डाङश) ।

अङ्कोट(ठ) (ल) पु० अङ्कयते लक्ष्यते कीलाकारकण्टैः । अङ्क-ओट (ओठ) (ओल) वा । पीतवर्णसारे गन्धयुक्तपुष्पे दीर्घकण्टकयुक्ते रक्तवर्णफले (आकोड) इति ख्याते वृक्षे ।

अङ्कोलक पु० अङ्कोल+स्वार्थे-क । आकोड इति ख्याते वृक्षे ।

अङ्कोलिका स्त्री वल-अच् नि० संप्रसारणे-उलः अङ्काय तद्वानाय उलः स्वार्थे क । आलिङ्गनक्रियायाम् । [विषभेदे ।

अङ्कोलसार पु० अङ्कोलस्य सारः ६त० । अङ्कोटवृक्षजाते

अङ्कोलिका स्त्री । पृ० साधुः । अङ्कोठवृक्षे ।

अङ्क्य पु० अङ्के क्रोड़े स्थापयित्वा वाद्यतेऽसौ यत्, अङ्के साधुः अङ्क+य वा । "षाड्गं तालत्रयायामः चतुर्द्वारं शाङ्कुखाननः । हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि वाद्यते इत्यतो" क्रोड़े स्थापनपूर्व्वकं वादनीये मृदङ्गादौ । अङ्कनीये त्रि० ।

अङ्ग चिह्नयुक्तकरणे अदन्तचुरादि उभय० सकर्म्मकः सेट् । अङ्गय-ति ते आङ्गिग-त् त । मतान्तरे अङ्गापयति ते ।

अङ्ग न० अम-गत्यादौ वा०गन् । चित्ते (अङ्गजः कामः) "क्विरण्यगर्भाङ्गभुवमिति" देहे "हस्तेनस्पर्शं तदङ्गमिन्द्रं" इति कुमा०। अङ्गशब्दस्य चेष्टावदन्यावयविरूपावयवविवाचित्वेऽपि तदवयवेऽपि हस्तपादादौ व्यवहारः अवयवत्वसामान्यात् तेषाञ्च प्रत्यङ्गशब्देनापि व्यवहारः। तत्राङ्गशब्दस्य देहार्थत्वे तदीयस्वरूपं तदवयवभेदाश्च सुश्रुते दर्शिताः। यथा "शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकार-समूर्च्छितं गर्भ इत्युच्यते तञ्च चेतनावस्थितं वायुर्विभजति, तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्त्याकाशं विवर्द्धयति। एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीर-मिति संज्ञां लभते तञ्च षडङ्गं शाखाश्चतस्रो, मध्यं पञ्चमं, षष्ठं शिर इति।

"अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभि-ललाटनासाचिबुकबस्तिग्रीवा इत्येता एकैकाः। कर्ण-नेत्रनासाभ्रूअंसगण्डकक्षस्तनहृषणपार्श्वस्फिग्जानु-बाहूरु-प्रभृतयो द्वे द्वे, विंशतिरङ्गुलयः। स्रोतांसि च वक्ष्य-माणानि। एष प्रत्यङ्गविभाग उक्तः॥ तस्य पुनःसङ्ग्रा-नम्। त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्चा रज्जवः सेवन्यःसङ्गाताः सिमन्ना अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि शिरा धमन्यो योगवहानि स्रोतांसि च॥

त्वचः सप्त। कलाः सप्त। आशयाः सप्त। धातवः सप्त। सप्त शिराशतानि। पञ्च पेशीशतानि। नव स्नायुशतानि। त्रीण्यस्थिशतानि। द्वे दशोत्तरे सन्धि-शते। सप्तोत्तरं मर्म्मशतम्। चतुर्विंशतिर्धमन्यः। त्रयो दोषाः, त्रयो मलाः। नव स्रोतांसीति समासः इति"॥

अवयवे "येषाङ्गनिर्म्माणविधौ विधातुरिति" कुमा०। अपाङ्ग इति।

उपाये, "सर्व्वकार्य्यशरीरेषु सङ्गाङ्गस्तम्भपञ्चकमिति" "मन्त्रो योधदृवाधीरः सर्व्वाङ्गैः संवृतैरपीति" च माघः। प्रधानोपयोगिनि उपकारके, "फलवत्सन्निधावफलं तदङ्गमिति" मीमांसा। "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः तदङ्गस्याक्रियायान्विति" स्मृतिः। "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमिति" सम्बोधने अव्य०। "त्वमङ्ग यस्याः पतिरब्भिरक्षक" इति नैषधम्। अङ्गमस्यस्य अच्। अङ्गवति "येनाङ्गविकार इति" पा० अङ्गस्याङ्गिन इत्यर्थः अन्तिके च त्रि०। जन्मादिलग्ने न० "अङ्गाधीशः खगेहे बुधगुरुकविभिः संयुतो वीक्षितो वेति" जातकम। देशभेदे पु०। तस्य विवरणम् अङ्गाधिपशब्दे। "अङ्गेषु वङ्गेषु खसेषु योज्या" इति "अङ्गवङ्गखसेष्वेवेति" च ज्योति-षम् अङ्गानां राजा आङ्गः बहुत्वे अङ्गाः। अङ्गदेशे भवः अण्। आङ्गः। बहुत्वे अङ्गाः। अङ्गेन देहेन निर्वृत्तः ठक्। आङ्गिकः। अङ्गदेशस्तद्राजानो वा भक्तिरस्य अण् आङ्गः। अङ्गस्येदम् अङ्गीयः। "यस्मात् प्रत्ययविधि-स्तदादि प्रत्ययेऽङ्गमिति" पाणिनिपरिभाषिते प्रत्ययावयवि-भूते शब्दभेदे, "दृशः क्षीध्वं लुङ्लिटां धोऽङ्गात्" इति "पा०। अङ्गादागतम् अण्। आङ्गः अङ्गनिमित्ते कार्य्ये "यथो-दाङ्ग बलीय इति" परिभा०। उपकरणानि च यथा यथसुहृदानि दिङ्मात्रमत्रोच्यते। तत्र "स्वाम्यमात्यसुहृत्कोषो राष्ट्रं दुर्गं बलानि च राज्याङ्गानीत्युच्यन्ते" "स्वाम्य-मात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा। सप्त प्रकृतयो ह्येता सप्ताङ्गं राज्यमुच्यते" इत्युक्तानि राज्याङ्गानि। दर्शादौ च प्रयाजादीनि, वैदिककर्म्मणाञ्च तत्तत्क्रिया-कलापाः तत्तद्द्रव्याणि चाङ्गानि "साङ्गाहि वैदिककर्म्मणः फलावश्यम्भाव इति" मीमां०। वेदस्य व्याकरणादीनि अङ्गानि, "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसाचितिः। ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु इति"। एतेषाञ्च लक्षणादिकमग्रे वक्ष्यते। एतेषां वेदार्थज्ञानोपयोगित्वा-दङ्गत्वम् अतएव श्रुतौ "ब्राह्मणेन निष्कारणः षडङ्गः वेदः स्तोवेदोध्येतव्य" इत्युक्तम् शिक्षायां तेषां वेदार्थज्ञानोपयो-गित्वा दङ्गत्वं दर्शितम् यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामय-नं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं तस्माद्द्माङ्गमधीत्यैव ब्रह्मलोके महीयते इति" अतो वेदार्थज्ञानोपयोगितया एतेषां तत्त्वानां वेदाङ्ग-त्वम्। "द्वे विद्ये वेदितव्ये" इत्युपक्रम्य "परयाचापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषमिति या परा ययाक्षर-मधिगम्यते" इति श्रुतौ व्याकरणादीनामपरविद्यात्वेन कीर्त्तनं "तेषाञ्च साधनभूतधर्म्महेतुत्वात् षडङ्गवचितानां धर्म्मसाधनत्वेनापरविद्यात्वमिति" भाष्ये उक्तम्। आयु-र्वेदादीनामुपवेदत्वं न्यायादीनामुपाङ्गत्वं यथा च तेषां तथात्वं तथा तत्तच्छब्दे दर्शयिष्यते।

तथा ज्योतिषस्याङ्गानि नानाविधानि तत्र प्राधान्यात् त्रिविधानि यथोक्तं वराहसंहितायाम्। "ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कात्स्न्र्योपनयस्य नाम मुनिभिः सङ्क्षीर्त्यते संहिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानन्वसौ होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः" इति।

नरपतिजयचर्यायान्तु षड्विधान्याङ्गानि समासेनोक्त्वा तेषां विस्तारो दर्शितो यथा

"स्वरचक्राणि चक्राणि भूबलानि बलानि च। ज्योतिषं शकुनश्चैव षडङ्गान्यत्र वक्ष्यहम् ॥ यामलेषु च सर्वेषु यान्युक्तानि स्वरोदये। विंशतिःस्वरचक्राणि तन्नामानि वदाम्यहम्। मात्रार्णो ग्रहोजीवो राशिर्भं पिण्डयोगकौ। द्वादशाब्दोऽयनं चक्रं वर्षायनर्तुमासकम् ॥ पक्षाहं नाडिकं चक्रन्तिथिनक्षत्रयोगकम्। तत्कालेन्दुफलङ्काश्चस्वरन्देहोऽवलम्बनथा ॥ (इति स्वरचक्रनामानि)। पूर्वशास्त्रेषु शास्त्रेषु मया ज्ञातानि यानि च चतुरशीतिचक्राणि तेषां नामानि वक्ष्यग्रहम् ॥ एकाशीतिपदञ्चक्रं शतपत्रं नवांशकम्। छत्रं सिंहासनं चक्रं कूर्म्मपञ्चविधात्मकम् ॥ भूदैवं नगरं छत्रं गृहकूर्म्मञ्च पञ्चकम्। पद्मचक्रं फणी शास्त्रं राहुकालानलन्त्रिधा ॥ सूर्य्यकालानलं चक्रं चन्द्रकालानलन्तथा। घोरकालानलं प्रोक्तं गूढकालानलं बलम् ॥ राशिसूर्य्यसमायोगे चक्रं कालानलं मतम्। संघट्टकं सप्त ज्ञेयं सप्त कालानलानि च ॥ तिथिवारञ्च नक्षत्रं त्रिधा चैव कुलाकुलम्। कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसम्भवम् ॥ प्रस्तारञ्चक्रवेधाख्यैः प्रभेदैस्तु चरन्त्रिधा। भूचरं खेचरं, मान्यं नाडीचक्रं त्रिधा मतम् ॥ कालचक्रं फणिहन्नं सूर्य्याख्यं चन्द्रजन्तथा। कविचक्रं द्विधा प्रोक्तं स्थानसाम्यं ऋपूर्व्वकम् ॥ खलकाख्यं द्विधा चैव क्षत्रिकास्थानभादिकम्। कोटचक्राष्टकं प्रोक्तञ्चतुरस्रादिभेदतः ॥ गजमस्त्रं रथं व्यूहं कुन्तं खड्गं छुरीन्धनुः। सौरिं सेवां नरश्चिन्नभस्त्रिसार्गायदृश्चिकम् ॥ सप्तरेखोद्भवञ्चक्रं पञ्चरेखेन्दुभास्करम्। त्रिविध मालिकाचक्रं विजयं श्येनतोरणम् ॥ अखिलाङ्कबीजोत्पिवर्षाख्यं सप्तनाडिकम्। चक्रं संवत्सरञ्चैव स्थानचक्रं तथैव च ॥ एतानि सर्वचक्राणि ज्ञात्वा युद्धं समाचरेत्। जयेदिह न सन्देहो शत्रुपक्षेऽपि भूभुजि ॥ (इति चक्रनामानि)। स्वरोदयैश्च चक्रैश्च यतुर्यत्र समोऽधिकः। तत्र युद्धे बलं ज्ञेयं भूबलैर्विजयार्थिनाम् ॥ तेषां नामान्यहं वक्ष्ये ख्यातानां ब्रह्मयामले

चतुरशीतिसंख्यानां यत्नतेन जयी रणे ॥ उड्डी जालन्धरी पूर्णा कामकीलेकवीरका। शिलिन्ध्री च महामारी क्षेत्रपाली च वंशजा ॥ रुद्रकालानला काली कालरेखा निरामया। जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी ॥ बाली योगेश्वरी चण्डी जानुबन्धकर्त्तरी। शार्दूली सिंहली तन्वी महामाया महेश्वरी ॥ देवकोटी शिवा शक्ती धूम्रवाणा वराटिका। त्रिखण्डा मत्सरी धर्म्माऽमृताष्टाऽक्षया जया ॥ दुर्मती प्रवरा गौरी काली नरहरी बला। खेचरी भूचरी गुह्या द्वादशी विष्टकेवला ॥ त्रैलोक्यविजया घोरी कराली वड़वामुखा। रौद्री च गिरिभातङ्गी अभेद्या दहनी मता ॥ बज्रबला वर्गभूमी कपाली चानिलानला। चन्द्रार्कबिम्बभूमी च ग्रहभूराशिलग्नगा ॥ राहुकाला नलीभूमी स्वरभूमि र्द्विधा मता। रुद्रक्षिमासिकश्चैव राहुचाष्टविधस्तथा ॥ चन्द्रः सप्तविधः सूर्य्यश्चतुर्द्धा योगिनी त्रिधा। कालबलन्त्रिभेदञ्च तिथिनक्षत्रवारजम् ॥ इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे। अरयस्तस्य नश्यन्ति मेघा वातहता यथा ॥ (इति भूबलानि)। यतोः समाधिके नाम्नि स्वरैश्चक्रैश्च भूबलैः। स्थानसेनाधिके यत्नौ बलविज्ञानसंयुते ॥ अभङ्गे चाप्यभेदे च दुःसाध्ये दुर्जये रिपौ। जयोपायमहं वक्ष्ये मन्त्रयन्त्रादिकं बलम् ॥ रणाभिषेचनं दीक्षा रणार्चा रणकङ्कणम्। वीरपट्टं रणेपट्टं जयपट्टस्य बन्धनम् ॥ मेखलाकवचं न्यासं मुद्रारक्षां च कङ्कणम्। औषधन्तिलकं धरणाशुटिकां च कपर्द्दिकाम् ॥ योगेघटितशस्त्राणि शस्त्ररक्षाय मोहनम्। शस्त्रलेपांश्च विविधान् बाणानामभिमन्त्रबन्धनम् ॥ शस्त्रलङ्कारकवचं सुरजस्त्राधारणम्। मारणं मोहनं स्तम्भविद्वेषोच्चाटनं वशम् ॥ पताकापिच्छकं यन्त्रात्मरविद्याविनाशम्। शान्तिकं निजसैन्यस्य सर्वोपद्रवनाशनम् ॥ बलान्येतानि योज्ञात्वा संग्रामं कुरुते नृपः। असाध्यस्तस्य नैवास्ति यतुःको पि महीतले ॥ (बलाबलनामानि)। गणितं व्यवहारञ्च होराज्ञानं परिस्फुटम्। त्रिस्कन्धं ज्योतिषं वक्ष्ये जयचर्य्यां स्वरोदये ॥ खेचरानयनं स्पष्टं पञ्चाङ्गं तिथिसाधनम्। उदयास्तमनञ्चक्रक्रान्तिं वक्ष्ये यथामति ॥ नतोन्नतप्रमाणञ्च भावसन्धिप्रसाधनम्। ग्रहाणां षड्बलं वक्ष्ये राशिभावबलान्वितम् ॥ राशिसंज्ञाप्रभेदञ्च खेचराणां तथैव च। नृणां जन्मफलं वक्ष्ये चक्ररान्ध्रंग्रलग्नजम् ॥ फलञ्चद्रार्कयोगानां ग्रहाणां खोच्चनीचकम्। आयुर्द्दायं दशाश्चैव तासाङ्कालप्रवेशनम् ॥ तत्कालग्नं ग्रहान् स्पष्टान्दशान्तर्द्दशयोः

फलम् । अहवर्गाष्टकं स्पष्टं तच्चाह्निफलं वदेत् ॥ ताजिकाब्जन्मलग्नस्य साधनञ्च परिस्फुटम् । वर्षमासदिवालग्नन्तद्दशान्तर्फलन्ततः ॥ छायोत्पत्तिं त्रिधा वक्ष्ये विषुमध्ये दिनेष्टकम् । दिनमानं दिनं भुक्तसुदयभं घटीषु च सिद्धच्छायात्रिषष्टिञ्च दुष्टमासप्तविंशति । लग्नोदयान्खदेशीयान् तेभ्योलग्नस्य साधनम् ॥ लग्नमानन्तथा होरादे्रष्काणं सप्तमांशकम् । नवांशं द्वादशं त्रिंशम् उदये सप्तसाधनम् ॥ तिथेः प्रकरणं वक्ष्ये वारनक्षत्रयोगजम् । योगाख्यं करणाख्यञ्च मुहूर्त्तान् संक्रमोद्भवम् ॥ चन्द्रतारा-बलञ्चैव पक्षभेदेन संयुतम् । शुभाशुभांश्च योगांश्च तिथिवारर्क्षयोगजान् ॥ सिद्धं संवर्त्तकञ्चैव तथा वारशुभाशुभम् । अवसन्निदिनं वक्ष्ये ततो योगन्निपुष्करम् ॥ यमघण्टं यमदंष्ट्रां ऋक्षवारर्गलपातकान् । कुमारन्नरणं दग्धं शूलातिशूलयोगिनीम् ॥ वारशूलन्तथा कालं कालवेलां परिस्फुटम् । कालहोरार्द्धयामञ्च कुलिकार्द्धप्रहरद्वयम् ॥ फलं ग्रहस्य विष्णोश्च वत्सभार्गवयोः फलम् । दृशां चान्द्रीं स्थूलां वक्रातिचारयोः फलम् ॥ पीडास्थानानि खेटानां ग्रहावस्थां तथैवच । भावफलं सन्धिफलं ग्रहाणां वेधमुपग्रहान् ॥ शीघ्रवक्रग्रहोद्देशक्षोचरं गोचरव्यधम् । विवाहञ्च प्रतिष्ठाञ्च दीक्षायात्राप्रवेशनम् ॥ वास्तुदीपोर्द्धविन्यासं कालविशेषकांस्तथा । जलयोगार्थकाण्डञ्च वर्षमासदिनार्द्धजम् ॥ तिथ्यादिपञ्चकं खेटञ्चन्द्रन्तत्काल सम्भवम् । अवस्थाञ्चाष्टसृष्टिञ्च लोकचिन्तां वदाम्यहम् ॥ अङ्गस्पन्दादि सर्वाणि कालचिह्नानि यानि च । दुष्टरिष्टान्यहं वक्ष्ये तथा तेषाञ्च शान्तिकम् ॥ ज्योतिरङ्गमिदं सर्वं ये जानन्ति मनीषिणः । दीपवत्तान्विजानीयान्मोहान्धकारनाशने" इति ॥

गर्गसंहितायां तु चतुर्विंशतिसंख्यानि अङ्गानि उपाङ्गानि चत्वारिंशदिति ज्योतिरङ्गानि चतुःषष्टिविधान्युक्तानि यथा "यथैव वेदस्याङ्गानि षडुक्तानि मनीषिभिः । चतुःषष्टिस्तथाङ्गानि ज्योतिषस्य विदुर्बुधा" इत्युपक्रम्य गणितस्कन्धपूर्व्वकं तज्ज्ञानमावश्यकमित्युक्त्वा तद्विभागा दर्शिता यथा "तस्मात् कृत्स्नमधीत्याग्रे वेदाङ्गं कालसाधनम् । ज्योतिषामयनाङ्गानि चतुःषष्टिन्ततः पठेत् । येषामग्रे कर्मगुणौ चन्द्रलग्ने त्वनन्तरम् । नक्षत्रकेन्द्रभे चैव द्विवर्गः प्रथमः स्मृतः । राहौ दृङ्मस्तकौ शुक्रे, धूमकेतौ मनैश्चरे । अङ्गारके बुधेऽर्के च चारान्तष्टौ ततः पठेत् । चक्रेष्वनन्तरं चक्रं ऋगचक्रं तथैव च । स्वचक्रं वातचक्रं च चक्राङ्केषु चतुष्टयम् । वास्तुविद्याङ्गविद्या च वायसानां तथैव च । ज्ञेयास्तिस्रस्तु विद्यैता दृङ्मार्गमताः शुभाः । स्वातीयोगं तथाषाढारोहिणयायोगमेव वा । एतान् कृत्स्नान् विजानीयात् भयोगान् वै विशेषतः । रहस्यं चेतीहाङ्गानि चतुर्विंशतिरीरिताः । अतऊर्द्धं प्रवक्ष्यामि उपाङ्गानीह नामतः । अनुपूर्व्याहिधानेन चत्वारिंशच्च नामतः । ग्रहकोशो ग्रहयुद्धं ग्रहदृङ्नाटकं तथा । कृत्स्नं ग्रहेश्वराणाञ्च ग्रहपाकास्तथैव च । विषघात्याग्निवर्षाश्च सेनाव्यूहस्तथैव च । मयूरचित्रोपनिषदुपहारप्रमाणयः । तत्वान्तिके तुलाकोशोद्भवन्तत्रोपधारयेत् । सर्व्वभूताहितांचैव तथा पुष्पलतां विदुः । उपानहोस्तथा च्छेदोमस्तच्छेदस्तथैव च । कृत्स्नोभुवनकोशश्च गर्भाधानादिकं तथा निर्घातो भूमिकम्पस्य परिवेषास्तथैव च । अनुलक्षभावाः सन्त्येवं तथोल्काश्चोपधारयेत् । सांवत्सरस्तथा युद्धः शास्त्राणां देशकोभवेत् । बलाबलं तु विज्ञेयं यच्च यत्र बलं वदेत् । चतुःषष्ट्यङ्गमेतत्तु संवत्सरमताद्भुतमिति" । एवञ्च गणितादित्रयं प्रधानाङ्गत्वात् स्कन्धसंज्ञम् अन्यानि तु अप्रधानान्यङ्गानीति क्वचित् संक्षेपत उक्तानि, क्वचिच्च विस्तरत इति विशेषः । गर्गोक्तविभागाभिप्रायेणैव मुहूरात्नसे "कृतपरिश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिषे" इति सूत्रधारवाक्यम् । बृहत्संहितायां तु गर्गोक्तान्येव प्रायशोऽङ्गानि प्रदर्शितानि तेषां स्वरूपादिकं तत्तच्छब्दे वक्ष्यते ।

दृश्यकाव्ये मुखप्रतिमुखगर्भविमर्शोपसंहृतिरूपसन्धिपञ्चकस्य चतुःषष्टिरङ्गानि यथोक्तं साहित्यदर्पणे "उपक्षेपः परिकरः परिन्यासो विलोभनं । युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥ उद्भेदः करणं भेदः एतान्यङ्गानि वै मुखे"(इति मुखस्य १२) "विलासः परिसर्पश्च विधूतं तापनं तथा । नर्म्म नर्म्मद्युतिश्चैव तथा प्रगमनं पुनः ॥ विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् । पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि" (इति प्रतिमुखस्य १३)॥ "अभूताहरणं मार्गो रूपोदाहरणं क्रमः । संग्रहश्चानुमानञ्च प्रार्थनाभिरिमे च ॥ क्षोटकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा (इति गर्भस्य १३) । "अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः । प्रसिद्धिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥ प्ररोचना विमर्शे स्यादादानं द्रवं तथा (इति विमर्शस्य १३) । "सन्धिर्विबोधो अथनं निर्णयः परिभाषणम् । क्षतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ॥ भाषणं पूर्व्ववाक्यञ्च काव्यसंहार एव च । प्रशस्तिरिति संहारे त्रयोविंशत्यङ्गानि मतः" (उप-

र्णकारस्य १४) ॥ चतुःषष्टिविधं हेतदङ्गं प्रोक्तं मनीषिभिः । कुर्य्यादनियते तस्य सन्भावपि निवेशनम् । रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता । इपरिच्छेदे

अङ्गकर्म्मन् न० अङ्गस्य कर्म्म मर्द्दनानुलेपनादि परिकर्म । मर्द्दनादिदेहसंस्कारे व्यापारे ।

अङ्गग्रह पु० अङ्गस्य रोगादिना ग्रहः ६त० । देहवेदनायाम् ।

अङ्गज पु० अङ्गात् जायते जन–ड । पुत्रे दुहितरि स्त्री । "अङ्गादङ्गं सम्भवति पुत्रवद्दुहिता स्मृतामिति" स्मृतिः । देहजातमात्रे त्रि० । रुधिरे न० । रोगे पु० । लोमनि न० । "तयोत्तरीयं करिचर्म्म साङ्गजमिति" भार० । अङ्गजन्मादयोऽप्युक्तार्थे । अङ्गं मनः तस्मात् जाते कामे पु० ।

अङ्गज्वर पु० अङ्गमङ्गम् अधिकृत्य ज्वरः । राजयक्ष्मरोगे । "निरवोचमहं यक्ष्म अङ्गज्वरमिति" वैद्यकम् ।

अङ्गण(न) न० अगि–गतौ अङ्गते गच्छन्ति अस्मिन् गम्यते अत्र ल्युट् पु० वा णत्वम् । अजिरे, चत्वरे, (उठान) इति ख्याते स्थाने "अजनि प्रकुरुष्वाङ्गनिजाङ्गणमिकणेऽमीति" नैषधम् । दन्त्यनान्तत्वमपि । "प्रकटाङ्गनोपभोगाध्यखण्डितचरितेति" काद० । अङ्गनं चत्वरमङ्गना स्त्री चेति तदर्थः । करणे ल्युट् । याने ।

अङ्गति पु० अङ्गति यात्यनेन अगि–करणे अति । वाहने स्त्रीत्वमपीत्येके वा ङीप् । अङ्गते गम्यते सेवादिना कर्म्मणि अति । ब्रह्मणि, अग्नौ च । कर्त्तरि अति । अग्निहोत्रिणि पु० ।

अङ्गद न० अङ्गं दायति शोधयति दै–क । (ताड़, बाजु) इति प्रसिद्धे बाहुभूषणे । वालिपुत्रे–वानरे पु० । सच किष्किन्धाधिपस्य वानरराजस्य वालिनस्तारागर्भजः पुत्रस्तच्चरितं रामायणे सुन्दरकाण्डादुत्तरकाण्डयोर्विस्तीर्णम् । अङ्गदानकर्सरि त्रि० । दक्षिणदिग्गजकरिण्यां स्त्रीत्वेऽपि । अङ्गं ददाति समर्पयति दा–क । अङ्गदानकर्सरि त्रि० योषिति स्त्री ।

अङ्गना स्त्री प्रशस्तमङ्गमस्ति अस्याः अङ्ग + न । अङ्गसौष्ठववत्यां योषिति, योषिन्मात्रे च, "अङ्गना वामनस्य स्यात्" इति कैमोक्तेः वामनदिग्गजयोषिति च ।

अङ्गप्रिय पु० प्री–क ६त० । अशोकवृक्षे तत्पुष्पस्य हि स्त्रियः स्वाङ्गं भूषयन्तीति लोकसिद्धम् । योषित्प्रियमात्रे तु त्रि० । दक्षिणदिग्गजे वामने पु० ।

अङ्गदनिर्व्यूह अङ्गदस्य केयूरस्य निर्व्यूह इव । केयूरशीर्षस्थे चूड़ाकारेऽवयवे ।

अङ्गन्यास पु० अङ्गेषु हृदयादिषु मन्त्रभेदस्य न्यासः । मन्त्रविशेषस्य उच्चारणपूर्व्वकं करस्पर्शेन कर्त्तव्ये तन्त्रोक्ते न्यासभेदे "अङ्गन्यासं करन्यासं बीजन्यासन्तथैव चेति" तन्त्रम् ।

अङ्गपालि स्त्री अङ्गं पाल्यते सम्बध्यतेऽत्र अङ्ग–पाल–इ । आलिङ्गने ।

अङ्गपालिका स्त्री अङ्गं देहं पालयतीति पालि–ण्वुल् ६त० । (धाइ मा) इति ख्यातायाम् उपमातरि । अङ्गपालनकारके त्रि० ।

अङ्गप्रायश्चित्त न० अङ्गस्य देहस्य शुद्ध्यर्थं प्रायश्चित्तम् । अशौचेषु पञ्चगव्याजन्यदुरितक्षयार्थं कार्य्ये "दशाहात्तु परं स्नात्वा विप्रोऽधीयीत धर्म्मवत् । "दानञ्च विधिवद्देयं मनुभाषितारकं हि तदिति" स्मृत्युक्ते दानरूपे प्रायश्चित्ते ।

अङ्गभू पु० अङ्गात् देहात् मनसो वा भवति भू–क्विप् । पुत्रे, मनोजे कामे च देहमनोजातमात्रे त्रि० । "हिरण्यगर्भाङ्गभुवं मुनिं हरिः" इति माघः । नारदस्य तन्मनोजातत्वात् ब्रह्माङ्गभूत्वम् । अङ्गानामङ्गमन्त्राणां भूः । कृताङ्गन्यासे त्रि० । "ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मेति" कुमा० ।

अङ्गमन्त्र पु० अङ्गेषु हृदयादिषु षट्सु न्यासो मन्त्रः । तन्त्रोक्ते षडर्द्दीर्घभाजि मन्त्रभेदे ।

अङ्गमर्द्द पु० अङ्गं मर्द्दयति संवाहयति मृद–णिच् अच् ६त० । देहसंवाहके–सेवके । अङ्गमर्द्दनकारके त्रि० । भावे घञ् । देहमर्द्दने पु० ।

अङ्गमर्द्दक पु० अङ्गं मर्द्दयति मृद–णिच्–ण्वुल् ६त० । देहसंवाहके–सेवके । देहमर्द्दनकारके त्रि० ।

अङ्गमर्द्दिन् पु० अङ्गं मर्द्दयति मृद–णिच्–णिनि ६त० । अङ्गमर्द्दके सेवके । अङ्गमर्द्दनकारके त्रि० स्त्रियां ङीप् ।

अङ्गयज्ञ पु० अङ्गीभूतः प्रधानयज्ञोपकरणीभूतः यज्ञः । "नवश्राद्धमखं कृत्वा ततः कर्म्म समाचरेदि"त्युक्ते कर्म्मभाङ्गे अन्वयागादौ, दर्शाद्यङ्गे समिदुयागादौ च ते च "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति, इत्येवं पञ्चविधाः । एतेषाञ्च सकृदनुष्ठानेनैव तन्मन्त्यायेन प्रधानयागानामाग्नेयादीनामुपकारितेति मीमांसा । अङ्गयागादयोऽत्र । "अङ्गान्यथाचोदभितः प्रधानमिति" भट्टिः ।

अङ्गरक्त न० ष० अङ्गेऽवयवे रक्तः रञ्ज–क्त ७त० । कम्पिल्लदेशजाते रक्तवर्णचूर्णवति (गुड़ारोचना) इति वाणिजेषु वैद्येषु च प्रसिद्धे द्रव्यभेदे । ६त० रक्ताङ्गमात्रे त्रि० ।

अङ्गरचणी अङ्गं रच्यतेऽनया रच–करणे ल्युट् ६त० ङीप् ।

लौहजालमये अङ्गरक्षणसाधने वर्म्मभेदे अङ्गरक्षणसाधनमात्रे त्रि० । भावे ल्युट् । देहत्राणे न० ।

अङ्गराग पु० अङ्गं रज्यतेऽनेन रञ्ज–करणे घञ् । अङ्गलेपने कुङ्कुमादौ । भावे घञ् । अङ्गस्य विलेपने पु० ।

अङ्गराज पु० अङ्गानां जनपदानां राजा अच् समा० । अङ्गदेशाधिपे, कर्णे च तत्कथा अङ्गाधिपशब्दे दृश्या । अङ्गबन्धादयोऽस्यत्र ।

अङ्गराज् पु० अङ्गेषु तन्नामकदेशेषु राजते राज–क्विप् ७त० । अङ्गदेशाधिपे कर्णे, तद्देशराजमात्रे च ।

अङ्गरुह न० अङ्गे रोहति रुह–क्विप् ७त० । देहजे लोमकेशादौ । "विहङ्गराजाङ्गरुहैरिवायतैरिति" माघः ।

अङ्गलेप पु० अङ्गं लिप्यतेऽनेन लिप–करणे घञ् ६त० । अङ्गरागद्रव्ये । भावे घञ् ७त० । देहे चन्दनाद्यनुलेपने ।

अङ्गव न० अङ्गे स्रावयते वाति अन्तर्भवति अतिशोषणात् सङ्कुचिताङ्गमिव भवति वा–ड ७त० । शुष्कफले ।

अङ्गविकल त्रि० अङ्गेन विकलः । देहव्याकुलतायुक्ते ।

अङ्गविकृति पु० वि–कृ–क्तिन् अङ्गस्य विकृतिश्चालनादिर्यस्मात् ५त० । (मृगीनाडा) इति ख्याते अपस्माररोगे । ६त० । अङ्गस्य विकारे स्त्री ।

अङ्गविक्षेप पु० वि–क्षिप–घञ् अङ्गस्य विक्षेपः चालनं यत्र ब० । अङ्गुल्यादिविन्यासभेदेन देहचालनरूपे नृत्ते । तल्लक्षणादि यथा । "देहरूच्या प्रतीतो यस्तालमानसमाश्रयः । सविलासोऽङ्गविक्षेपोऽन्वर्थमित्यभिधीयते । ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते । भेदलिङ्गस्तु ताण्डवं द्विविधं मतम् । अङ्गविक्षेप बाहुल्यं तथाभिनयशून्यता । यत्र सा भेदलिप्सेति नाम लोकतः । छेदनं भेदनं यत्र बहुरूपा सुखावहा । ताण्डवं बहुरूपत्वात् दारुणात् गलभूर्द्वतः । द्रुतं योवतमेति लास्यं द्विविधमुच्यते । यत्राभिनयभावाद्यै रसैराद्यैश्चतुष्टयैः । नायिकानायकौ रङ्गे नृत्यतस्तद्द्रुतं हि तत् । मधुरं बहुलीलाभिर्नवीभिर्यत्र नृत्यते वशीकरणविद्याभं तल्लास्यं यौवतं मतम् । गेयानुक्तिक्षते ह्याद्यं वाद्यानुक्तिक्षते लयः । लयतालसमारब्धं ततोनृत्यं प्रवर्त्तते इति सङ्गीतदामोदरः । भावे घञ् । अङ्गचालने ।

अङ्गविद्या स्त्री अङ्गरूपा व्याकरणादिशास्त्ररूपा विद्या ज्ञानसाधनम् । ज्ञानसम्बन्धे व्याकरणादिशास्त्रे । प्रश्नकाले अङ्गानां देहावयवानां चेष्टादिना शुभाशुभबोधके ज्योतिरङ्गे शास्त्रे च । सा च विद्या हरिवंशसंहितायां दर्शिता यथा "अथाङ्गान्यूर्वोष्ठस्तनहृषणपादं च दशना भ्रुवौ हस्तौ गण्डौ कचगलनखाङ्गुष्ठमपि यत् । सशङ्खं कक्षांसश्रवणगुदसन्धीति पुरुषे, स्त्रियां भ्रूनासास्फिग्वस्तिकटिसुलेखाङ्गुलिचयम् ॥ जिह्वा ग्रीवा पिण्डिके पाणिशुष्कं जङ्घे नाभिः कर्णपाली ललाटी । वक्षः पृष्ठं जत्रुजान्वस्थिपार्श्वं हृत्तालुक्षौ मेहनोरस्तिकं च ॥ नपुंसकाख्यं च शिरो ललाटम् आस्वादाद्यैस्तैरपरैश्चिरेण । सिद्धिर्भवेज्ज्ञात्र नपुंसकैर्नो कृत्स्नैस्तैर्भग्नकृतैश्च पूर्वैः ॥ स्पृष्टे वा चालिते वापि पादाङ्गुष्ठेऽस्थिरग् भवेत् । अङ्गुल्यां दुःखितः शोकं शिरोधत्ते नृपाद्भयम् ॥ विप्रयोगसुरसि स्वगात्रतः स्पृष्टा हृतिरनर्थदा भवेत् । स्वात्मियाग्निरभिघट्टय कर्परं पृच्छतश्चरणपादयोजितः ॥ पादाङ्गुष्ठेन विलिखेद्भूमिं चेतोत्यचिन्तया । हस्तेन पादौ करञ्जेत्तस्य दासीभया च सा ॥ तालभञ्जपटदर्शनेऽशुकं चिन्तयेत्कपतुपाग्निभक्षणम् । व्याधिराश्यति रज्जुजालकं वल्कलं च समवेक्ष्य बन्धनम् ॥ पिप्पलीमरिचशुण्ठिधात्रिदैलीभ्रकृष्णसमाम्बुजीरकैः । गन्धमांसिगतपुष्पया यदेत् पृच्छतश्चगरकेण चिन्तनम् । स्त्रीपुरूषदोषमोक्षितसर्वाभ्वस्तार्थधान्यतनयानाम् । द्विचतुःषट्पदक्षितीनां विनाशतः कीर्त्तिनेर्दृष्टैः ॥ व्यग्रोधसप्तपर्णेन्दुकजम्बूप्लक्षाम्रदरिआतिफलैः । धनकनकपुरुषलोहांशुकरूप्योदुम्बरामिरपि करणैः ॥ धान्यपरिपूर्णपात्रं कुम्भः पूर्णः कुटुम्बवृद्धिकरौ । गजगोशुनां पुरोधं धनयुवतिसुहृद्विनाशकरम् ॥ पशुहस्तिमहिषपङ्कजरजतव्याघ्रैर्लभेत सन्दृष्टैः । अविधनविवसनमनयज कौशेयाभरणसङ्घातम् ॥ पृच्छा दृङ्मात्रावकसुपरिज्ञाद् दर्शने नृभिर्विहिता । भिलद्यतार्थभया गणिकानृपसूतिकार्थकृता ॥ शाक्योपाध्यायार्हतनिर्ग्रन्थिनिभिक्षनिगमकैवर्तैः । चौरचमूपतिवणिजां दासयोधापणस्थबध्यानाम् ॥ तापसे यौगिके दृष्टे प्रोषितः पशुपालनम् । द्रुतं पृच्छकस्य स्वादुच्छदौ विपन्नता ॥ दृष्ट्वामि प्रभु भण पश्यत्यार्यः समादिशेत्युक्ते । संयोगकुटुम्बोत्था लाभैश्वर्योन्नता चिन्ता ॥ निर्दिशेति गदिते जयाध्वगा, प्रत्यवेक्ष्य मम चिन्तितं वद । आशु सर्वजनसभ्यगं त्वया दृश्यतामिति च बन्धुचौरजा ॥ अन्तःस्थेऽङ्गे खलजनोदितो बाह्यजे बाह्य एवं पादाङ्गुष्ठाङ्गुलिकखलया दासदासीजनः स्यात् । जङ्घे प्रेष्यो भवति भगिनी नाभितो वृत्तभार्या पार्श्वाङ्गुष्ठाङ्गुलिचयजतर्जनेऽ

पुत्रमन्ये ॥ मातरं जठरे, मूर्द्धि गुरुं, दक्षिणवामकौ । भ्रातृ भ्रातारौ तत्पत्नी स्पृष्ट्वैवं चोरमादिशेत् ॥ अन्तरङ्गमवसुप्य वाङ्मनसगमनं यदि करोति पृच्छकः । श्लेष्मभूतमातङ्गस्यजङ्घः पातयेत्करतलस्थवस्तु चेत् ॥ भ्रशभवनामिताङ्गपरिमोटनतोऽथवा, जनभृतरिक्तभाण्डमवलोक्य च चोरजनम् । क्षुतपतितच्छताक्षुतविनष्टविभग्नगतोन्मुखितक्षुताद्यनिष्टवतो लभते न क्षुतम् ॥ निगदितमिदं यत्तत् सर्वं तुषास्थिविषादिकैः सह स्फुटिकरं षोडार्तानां समं कृन्तनृतैः । अत्ययमपि स्पृष्टान्तास्यं दृढं मरुदाहरेद् आसिक्तु तदा भुक्ताद्यं संस्थितः सुस्थितो वदेत् ॥ ललाटस्पर्शनाक्षुत्कदर्शनान्यालिमोटनम् । उरःस्पर्शात् षष्टिकाद्यं शीर्षस्पर्शे च यावकम् ॥ कक्षिकूचजठरजानुस्पर्शे माषाः पर्यस्तिलयवाग्वः । आस्वादयतश्चौष्ठौ लिहतो मधुरं रसं श्लेष्मम् ॥ विस्फुटके स्फोटयेज्जिह्वामस्ते वक्त्रं विकूणयेत् । कटुतिक्तकषायोष्णैश्चिकेत्, शीतेन्द्रियैर्वे ॥ श्लेष्मत्यागे शुष्कातिक्तं तदल्पं, श्रुत्वा क्रव्यादं प्रेक्ष्य वा मांसमिश्रम् । भुक्तशौचस्पर्शने शाकुनं तद् भुक्तं तेनेत्युक्तमेतन्निमित्तम् ॥ मूर्धगलकेशहनुश्रुक्कर्णजङ्घं वस्तिं च स्पृष्ट्वा । गजमहिषमेषशूकरगोशशमृगमांससयुग्भुक्तम् ॥ दृष्टे श्रुते ध्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम् । गर्भिण्याः गर्भस्य च निपतनमेवं प्रकल्पयेत्प्रश्ने ॥ पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमिते पुरःस्थिते स्पृष्टे ! तज्जन्म भवति यानात्पुष्पफलदर्शने च शुभम् ॥ अङ्गुष्ठेन भ्रूदरं वाङ्गुलिं वा स्पृष्ट्वा पृच्छेद्भर्भचिन्ता तदा स्यात् । मध्याद्याद्यैर्मरत्नप्रवालैरप्यस्यैवं भावधात्र्यात्मजैश्च ॥ गर्भयुता जठरे करणे स्याद् दुष्टनिमित्तवधात्तदुदासः । कर्षति तज्जठरं यदि पीठो तृपीड़नतः करणे च करेऽपि । प्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत् । वामे द्वौ कर्णं एवं भा द्विचतुर्भिः श्रुतिस्तने ॥ वेणीमूले त्रीन् सुतान् कन्यके द्वे कर्णे सुतान् पञ्च हस्ते त्रयं च । अङ्गुष्ठान्ते पञ्चकं मातृपूर्व्या पादाङ्गुष्ठे पार्ष्णियुग्मेऽपि कन्याम् ॥ सव्यामव्योरसंस्पर्शे कृते कन्यास्तुतद्वयम् । स्पृष्टे ललाटमध्यान्ते चतस्रिस्तनयान् वदेत् ॥ शिरोललाटभ्रूकर्णगण्डकृकरदा शनम् । सव्यापसव्यस्कन्धस्य हस्तौ चिबुकनासिकम् ॥ उरः कुचं दक्षिणमध्यसव्यं कृत् पार्श्वमेवं जठरं कटिश्च । स्फिक् प्रायुसन्ध्यूरुयुगं च जानु जङ्घे च पदाविति क्षत्तिरादौ ॥ इति निगदितमेतत्तात्कालसंस्पर्शलक्ष्म प्रकटमभिहताद्यै र्वीक्ष्य वाक्षाणि सम्यक् । विपुलमतिरुदारो वेत्ति यः सर्वमेतच्चरपतिजनताभिः पूज्यतेऽसौ सदैव ॥ इति दृक्तत्संहितायामङ्गविद्या प्रकरणम् । "वास्तुविद्याङ्गविद्या चेति" गर्गः । अङ्गविद्याया व्याख्यानो ग्रन्थः कृगयना० अण् । आङ्गविद्यस्तद्व्याख्यानग्रन्थे ।

अङ्गविधि पु० अङ्गस्य प्रधानोपकारिणः विधिः विधानम् । गुणविध्यपरपर्याये विधिभेदे । तथाहि दृष्टसाधनताकार्थत्वादिबोधकवाक्यं विधिः । स च प्रमाणान्तरैरप्राप्तस्यैव बोधकतयोत्पत्तिविधिः "विधिरत्यन्तमप्राप्तौ" इत्युक्तेः । तथा च प्रमाणान्तराप्राप्तकर्म्माणि दृष्टसाधनताकार्थतादिबोधकं वाक्यं प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् उत्पत्तिविधिः । यत्र तु प्राप्तस्यैव कर्म्मणोऽनुवादेन तस्य द्रव्यदेवतादौ दृष्टसाधनतादिकं बोध्यते सोऽयमङ्गविधिः स च स्वविषये प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् विधिरेव । किन्तु प्रधानविधिविधेयकर्म्मणोऽङ्गबोधकतया अङ्गविधिरित्येव विशेषः यथा, अग्निहोत्रं जुहोतीत्युत्पत्तिविधिवाक्येन प्राप्तस्याग्निहोत्रस्य गुणविधानाय प्रवृत्तं दध्ना जुहोतीति वाक्यं प्राप्ताग्निहोत्रानुवादेन दधिकरणत्वमात्रं बोधयत् दधि दृष्टसाधनताबोधनेन तत्र प्रवर्त्तयतीति दध्ना जुहोतीति वाक्यं गुणविधिरङ्गविधिरिति च उच्यते । एवमन्यान्युदाहार्य्याणि । तच्चाङ्गं क्वचित् कालः क्वचित् द्रव्यं क्वचित् देवतादि इति नानाविधम् अतएवोक्तं "काम्यसन्निहितं नैव बुद्धौ विपरिवर्त्तते । शब्दात्तु तदुपस्थानमुपादेये गुणो भवेदिति" भट्टैः । विवृतञ्चैतत् रघुनन्दनेन प्रमाणान्तरासन्निहितं कर्म प्रथमं बुद्धौ न विषयीभवति प्राथमिकी शब्दादेव तस्य कर्मणः उपस्थितिरिति उपादेये विधेये कर्म्मणि तिथ्यादिर्गुण इति" ।

अङ्गवैकृत न० विकृतस्य भावः विकृत+अण् अङ्गेन अङ्गचेष्टया वैकृतं हृदयभावो ज्ञाप्यते यत्र बहु० । आकार इति ख्यातायाम्-हृदयगतभावावेदकचेष्टायाम् । ईत० । अङ्गस्य विकारे न० ।

अङ्गवैगुण्य न० अङ्गस्य प्रधानोपकारिणः वैगुण्यमन्यथाकरणम् । प्रधानकर्म्माङ्गीभूतद्रव्यादेरन्यथाकरणे यद्दोषनिवारणार्थं विष्णुस्मरणं कर्त्तव्यतया विहितं "यदमाङ्गं कृतं कर्म जानता वाप्यजानता साङ्गं भवतु तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः । अतएव आङ्गादिपदवतौ कर्म्मान्ते यत् किञ्चिदङ्गवैगुण्यं जातं तद्दोषप्रशमनाय विष्णुस्मरणमहं करिष्ये इत्यभिलापवाक्यम् ।

अङ्गशुद्धि स्त्री शुद्ध्यतेऽनया इति शुध-करणे क्तिन् ६त०। स्नानादौ देहसंस्कारसाधने। भावे क्तिन्। देहशोधने।

अङ्गस् न० अनज-असुन् कुत्वञ्च। पक्षिणि कृत्युज्ज्वलदत्तः।

अङ्गसंस्कार पु० अङ्गं संस्क्रियतेऽनेन सम्-कृ+करणे घञ् सुट्। देहसंशोधनादिसंस्कारकारणे स्नाने गोधूमचूर्णादिनाङ्गमर्द्दने च। भावे घञ् ६त०। अङ्गस्य संस्कारे विलेपनादौ। अङ्गं संस्करोति सम्+कृ-कर्त्तरि अण् ६त०। देहसंस्कारके नरमात्रे त्रि०।

अङ्गसंक्रिया स्त्री ६त०। अङ्गसंस्कारे।

अङ्गस्पर्श पु० अङ्गस्य अशौचिदेहस्य इतरैः स्पर्शस्तद्योगता। इतरकर्त्तृकस्पर्शयोग्यतायाम्। अशौचिनाम् देहस्पर्शनिषेधे "चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः। ततः सञ्चयनादूर्द्धमङ्गस्पर्शो विधीयते" इति दक्षस्मृतौ चतुर्थदिवसे अशौचिदेहस्य स्पर्शयोग्यताभिधानात् चतुर्थदिवसे देहस्पर्शयोग्यता। एतच्च "यावन्नोत्तमसंस्पृश्य"मित्याद्युक्तव्यतिरिक्तविषयं महापुरुषनिपाते पुत्रादिभिन्नविषयञ्च तत्त्वाङ्गास्पृश्यत्वशब्दे वक्ष्यते।

अङ्गहार पु० अङ्गं ह्रियते चाल्यतेऽत्र हृ-आधारे घञ् ६त०। अङ्गुल्यादिविन्यासभेदेन नृत्ये। तत्त्वाङ्गविक्षेपशब्दे दर्शितम्। भावे घञ् ६त०। अङ्गस्य हरणमात्रे पु०।

अङ्गहानि स्त्री अङ्गस्य प्रधानोपकारिणः कर्म्मणः हानिः प्रधानकर्म्मोपयोगिनः गुणादेरन्यथा सम्पादनेऽसम्पादने च। "दैवाद् अमात् प्रमादाच्चेदङ्गहानिः प्रजायते। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति" पुरा०।

अङ्गहारि पु० अङ्गानि ह्रियन्ते अत्र हृ-बा० णि। अङ्गहारार्थे स्थले रङ्गभूमौ।

अङ्गहीन त्रि० अङ्गेन हीनम्। साधनीभूतद्रव्यकालाद्यङ्गकरणगुणे कर्म्मणि "अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद् भवेत्। सत् सर्व्वं पूर्णतामेतु भास्करस्य प्रसादतः" इति स्मृतिः। "अङ्गहीनो दक्षेद्राद्धं मन्त्रहीनस्तु ऋत्विजम्। यजमानमदक्षिणो नास्ति यज्ञसमो रिपुः" इति पुरा०। विकले, छिन्नदेहे च त्रि०। अङ्गेन देहेन हीनः रहितः। काये पु०। तस्मादङ्गत्वात्तत्त्वम्। अङ्गं हीनं यथोचितप्रमाणादल्पं यस्य। ह्रस्वपादाद्यवयवस्य यथोचितपरिमाणाभावयुक्ते त्रि०। "धान्यचौरोऽङ्गहीनत्वमतिरेक्यञ्च मिश्रक इति" मनुः। वा परनिपातेऽङ्गहीनाङ्गोऽन्यत्रार्थे। अङ्गस्य हीनतायां कारणमुक्तं सुश्रुते।

"द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते। दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताननमनक्षं वा नारी सुतं जनयति। तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत्। लब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति॥ भवन्ति चात्र॥ इन्द्रियार्थांस्तु यान्यान् सा भोक्तुमिच्छति गर्भिणी। गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्। सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम्। अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥ येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना। जायेत तत् सुतस्यार्त्ति-स्तस्मिंस्तस्मिंस्तथेन्द्रिये" इति॥

अङ्गाङ्गिभावः पु० अङ्गस्य अङ्गिनश्च भावः। गौणमुख्यभावे उपकार्य्योपकारकभावे च यथा दर्शादीन् प्रति प्रयाजादीनामङ्गत्वं, प्रयाजादींश्च प्रति दर्शादीनामङ्गित्वम्। "अङ्गाङ्गिभावसम्बन्धा कथं सामर्थ्यमन्यथ" इति च मीमा०।

अङ्गाधिप पु० अङ्गस्य देशभेदस्य अधिपः। अङ्गदेशाधिपे प्रसिद्धतया कर्णे तस्य तद्राज्यप्राप्तिः भारते आ०। "यद्ययं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति। तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते॥ वैशम्पायन उवाच। ततस्तस्मिन् रथे कर्णः सलाजकुसुमैर्वटैः। काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः। अभिषिक्तोऽङ्गराज्ये स श्रिया युक्तो महाबल इति सर्व्व देशः मगधदेशस्थगिरिव्रजात् सञ्चिकटः पूर्व्वस्यां दिशि स्थितः। सभापर्व्वणि मगधदेशवर्णने गिरिव्रजसुपर्वत्यं "अङ्गवङ्गादयश्चैव राजानश्च महाबलाः। गोतमाश्रममभ्येत्य रमन्ते च पुरार्जुनेति" अङ्गवङ्गदयाणां सन्निकटत्वमुक्तम्। भीमप्राच्यदिग्विजये च "विजित्य युधि कौन्तेयो मागधानमयाबली॥ दण्डञ्च दण्डधारञ्च विजित्य पृथिवीपतीन्। तैरेव सहितः सर्व्वैः गिरिव्रजसुपाद्रवत्। जारासन्धिं समर्थयित्वा करे च विनिवेश्य च। तैरेव सहितः सर्व्वैः कर्णमभ्यद्रवद्बली॥ स कम्पयन्निव महीं बलेन चतुरङ्गिणा। युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना॥ स कर्णं युधि निर्जित्य वशे कृत्वा च भारत। ततो विजिग्ये बलवान् राजः पर्व्वतवासिनः॥ अथ मोदागिरौ चैव राजानं बलवत्तरम्। पाण्डवो वाहुवीर्य्येण निजघान महाद्युते इति" ॥ एतच्च गिरिव्रजात् पूर्व्वं मोदागिरेः पश्चात् च देशः। ह्रस्वसंहितायान्तु तस्य भारतवर्षे आग्नेय्यां स्थितिरुक्ता। यथा "अग्नेय्यां दिशि कोशल कलिङ्गवङ्गोपवङ्गजठराङ्गा" इति। अङ्गस्य ज्योतिःशास्त्रोक्तलग्नस्य अधिपः। तस्याधिपे पु०। "अङ्गाधिपे बलनि सर्व्व विभूतिसम्पदिति" ज्योति०।

अङ्गाधीश पु० ई॰त०। अङ्गदेशाधिपे कर्णे लग्नाधिपे च "अङ्गाधीशः खगेहे बुधगुरुकविभिः संयुत" इति जातकम्। अङ्गाधीश्वरादयोऽप्यत्र।

अङ्गार अस्त्री० अङ्ग-आरन्। अङ्गदग्धे-अग्निसंक्रान्ते अग्निपूर्णे वा (आङ्गार) इति प्रसिद्धे काष्ठखण्डे। "इतकुम्भसमा नारी तप्ताङ्गारसमः पुमानिति" "ज्वलदङ्गारसन्निभमिति" "अङ्गारे शतधौतेऽपि मालिन्यं नैव गच्छतीति"। "उष्णो दहति चाङ्गारः शीतः कृष्णायते करमिति" च पुरा०। "असौ वावादित्योऽग्निर्दिवोऽङ्गारा" इति श्रा०आ०। "व्यङ्गारे भुक्तवज्जने" इति स्मृतिः। "अङ्गिरा अङ्गार" इति यजु०। "येऽस्याङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति" ऐत० ब्रा०। भौमपक्षे पु० रक्तवर्णे न० तद्वति त्रि०। पाया०यत् अङ्गार्य्यां स्त्री तत्पुत्रे।

अङ्गारक अस्त्री अङ्गार+स्वार्थे कन्। अङ्गारे "अङ्गारकस्तवन्त्याङ्गेति" पुरा०। "अङ्गावङ्गारको तथेति" ज्योतिषम्। "अङ्गारको कुमारश्च बुधे नारायणं तथेति" पुरा०। अस्य चारो यथा

"यद्युदयर्क्षाद्वक्रं करोति नवमाष्टमसप्तमर्क्षेषु। तद्वक्रशुष्कमृदये पीडाकरमग्निवार्त्तानाम्॥ द्वादशदशमैकादशनक्षत्राद्वक्रितः कुजोऽशुखम्। दूषयति रसानुदये करोति रोगानदृष्टिं च॥ व्यालं त्रयोदयर्क्षाच्चतुर्दशाद्वा विपच्यते ऽस्तमये। दंष्ट्रिव्यालसृगेभ्यः करोति पीडां सुभिक्षं च॥ रुधिरानलभिति वक्रं पञ्चदशात् षोडशाच्च विनिष्टत्ते तत्काले सुखरोगं सभयं च सुभिक्षमावहति॥ असिसुखलं सप्तदशादष्टादशतोऽपि वा तदनु वक्रे। दस्युगणेभ्यः पीडां करोत्यदृष्टिं सशस्त्रभयम्॥ भाग्यार्यभोदितो यदि निवर्त्तते वैश्वदैवते भौमः। प्राजापत्येऽस्तमितस्त्रीनपि लोकान्पीडयति॥ अवणोदितस्य वक्रं पुष्ये मूर्धाभिघातपीडाकृत्। यच्छिक्यृक्षेऽभ्युदितस्तद्विगुणभूतान् जनान् हन्ति॥ मध्येन यदि मघानां गतागतं लोहितः करोति ततः। पार्थिवो नृपो विनश्यति यक्षोद्योगाक्षयमदृष्टिः॥ भित्त्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम्। मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति॥ दक्षिणतो रोहिण्याचरन् महीजोऽधदृष्टिनिमित्तकृत्। धूमायन् वामतो वा विनिहन्यात् पारियात्रस्थान्॥ प्राजापत्ये अवणे मूले तिसृषूत्तरासु याम्ये च। विचरन् धनिनिवहानासुप्रघातकरः क्षमातनयः॥ चारोदयाः प्रथक्ताः श्रवणमघादित्यमूलकृत्तिकासु। एकपदाश्विविशाखाप्राजापत्येषु च कुजस्य॥ विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः स्फुटरुचिरमयूखस्तप्ताच्यप्रभाभः। विचरति यदि मार्गं चोत्तरं मेदिनीजः शुभमदवनियानां क्षार्त्तिदश्च प्रजानाम्॥" इति बृहत्संहिता।

तस्य भक्तिदेशादि बृहज्जातकाध्याये तत्रैवोक्तं यथा

"शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्धस्थाः। निर्विन्ध्या वेत्रवती सिप्रा गोदावरी वेणा॥ मन्दाकिनी पयोष्णी महानदी सिन्धुमालतीपाराः। उत्तरपार्श्वप्रभृतेन्द्राद्रिविन्ध्यमलयोपगाश्चोलाः॥ द्रविडविदेहान्ध्राभ्रकभासापुरकौङ्कणाः समन्त्रिगयकाः। कुन्तलकोरलदण्डककान्तिपुरश्लेच्छसङ्कटजाः॥ नासिक्यभोगवर्धनविराटविन्ध्याद्रिपार्श्वगा देशाः। ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम्॥ नागरकाधिकरपारतङ्काणनाजीविश्वस्तवार्त्तानाम्। आटविकदुर्गकवटवधकनृशंसावलिप्तानाम्॥ नरपतिकुमारकुञ्जरदाम्भिकडिम्भाभिधातपशुपानाम्। रक्तफलकुसुमविद्रुमचमूपयुङ्मद्यतीक्ष्णानाम्॥ कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षुचौराणाम्। षष्ठदीर्घवैरबद्धायिनां च वसुधासुतोऽधिपतिः" इति। अङ्गारमिव इवार्थे कन्। रक्तवर्णत्वात् कुरण्टकवृक्षे, (भीमराज) इति ख्याते-भृङ्गराजवृक्षे च पु०। अल्पार्थे कन्। विस्फुलिङ्ग इति विख्याते-अङ्गारक्षुद्रांशे न०। "दूर्वा लाजा हरिद्रे द्वे भङ्गिश्छेन्द्रवारुणी। दहती सैन्धवं कुष्ठं राजा मांसी शतावरी। आरनालाढकेनैव तैलप्रस्थं विपाचयेत्। तैलमङ्गारकं नाम सर्वज्वरविनाशनमिति" चक्रदत्तवैद्यकोक्ते तैलभेदे न०। [विक्रयार्थमङ्गारकारके।

अङ्गारकारिन् त्रि० अङ्गारं करोति कृ-णिनि। काष्ठं दग्ध्वा

अङ्गारकमणि पु० अङ्गारकस्य प्रियः मणिः। प्रवाले तस्य च रक्तवर्णत्वात् तत्प्रियत्वं "माणिक्यं भास्करे देयं चन्द्रे शङ्खं प्रदापयेत् प्रवालञ्च कुजे दद्या"दित्यादिना तत्कृताशुभप्रतीकाराय प्रवालदानोक्तेः तत्प्रियत्वम्।

अङ्गारकुष्ठक पु० अङ्गारवर्णं कुष्ठमिव कन्। क्षितावलीनामकौषधिभेदे।

अङ्गारधानी स्त्री अङ्गाराणि धीयन्तेऽस्याम् धा-आधारे ल्युट् ङीप्। (आङ्ठा) इति ख्याते अङ्गाराधानपात्रेऽपि स्वार्थे कन्। अङ्गारधानिकाप्यत्रैव।

अङ्गारपरिपाचित न०अङ्गारेण (ज्वलदग्निव्याप्तकाष्ठखण्डेन) परिपाच्यते परि+पच-स्वार्थे णिच्-क्त इत०। (कबाब) इति प्रसिद्धे-पक्वमांसादौ।

अङ्गारपर्ण न० अङ्गारमिव पर्णमस्य। वनभेदे। अस्यार्थे अच्। तत्स्वामिनि चित्ररथगन्धर्वे पु०। भारते चैत्ररथे प०। चित्ररथगन्धर्वस्य अर्जुनादीन् प्रति उक्तिः। "आरात्तिष्ठत मा मह्यं, समीपमुपसर्पत। कस्मान्मां नाभिजानीत प्राप्तं भागीरथीजलम्। अङ्गारपर्णं गन्धर्वं वित्त मां खननाश्रयम्। अहं मानी तथैषोऽस्य कुबेरस्य प्रियः सखा। अङ्गारपर्णमित्येवं ख्यातं चेदं वनं ममेति"। [ख्यातपात्रे।

अङ्गारपात्री स्त्री ङीप्त० अङ्गारधान्यामु (आङ्टा) इति

अङ्गारपुष्प पु० अङ्गारमिव लोहितवर्णं पुष्पं यस्य ब०। (जिँयापुति) इति ख्याते क्षुद्रौषधे।

अङ्गारमञ्जरी स्त्री अङ्गारा रक्तवर्णा मञ्जरी ब० समासान्तकबभावाद्ङीषभावे संज्ञात्वात्। (करमचा) इति ख्याते रक्तकरञ्जवृक्षे।

अङ्गारवल्ली स्त्री अङ्गारा इव रक्तफलत्वात् रक्तावल्ली कर्म्म०। रक्तवर्णफलवत्यामु (कुँच) इति प्रसिद्धायामु गुञ्जालतायां करञ्जवृक्षे च। स्वार्थे कन्। अङ्गारवल्लिका तत्रैव।

अङ्गारवेणु पु० अङ्गारवर्णोवेणुः। वंशभेदे। तज्जाते ठक् अनुशतादि० द्वियदृद्वृद्वः। आङ्गारवैणुकं, तज्जाते त्रि०।

अङ्गारशकटी स्त्री शकोति वोढुं शकटम्, अल्पं शकटं, शकटी, षच्यादिवत् अल्पार्थे ङीप् अङ्गारस्य शकटीवृत०। (आङ्टा) (धुनाचीति) च प्रसिद्धे अङ्गाराधारे पात्रभेदे।

अङ्गारावचेषण न० अङ्गारमवचिन्वतेऽनेन करणे ल्युट्। अङ्गारचेषणसाधने पात्रे। भावे ल्युट्। अङ्गारचेषणे।

अङ्गारि स्त्री अङ्गार+मत्वर्थे ठन् पृषोदरादित्वात् कलोपः। अङ्गाराधारे (आङ्टा) इति प्रसिद्धे पात्रभेदे।

अङ्गारिका स्त्री अङ्गारं विद्यतेऽस्याः अङ्गार+मत्वर्थे ठन् टाप्। (आङ्टा) इति ख्याते अङ्गारपात्रे।

अङ्गारिणी स्त्री० अङ्गार+मत्वर्थे इनि। अङ्गारधानिकायाम् (आङ्टा इति) ख्याते पात्रे। अङ्गारवति त्रि०।

अङ्गारित पु० अङ्गारमिवाचरतीति अङ्गार+क्विप् ततः कर्त्तरि क्त। पलाशकलिकायाम्। अङ्गारं करोतीत्यर्थे णिचि कर्म्मणि क्त, अङ्गार+तारका० इतच् वा। दग्धप्राये काष्ठादौ त्रि०। [अङ्गारप्रकृतिभूते काष्ठादौ।

अङ्गारीय त्रि० अङ्गारेभ्य एतानि प्रकृतिरूपार्थे अङ्गार+छ।

अङ्गिका स्त्री अङ्गम् आच्छादयति अङ्ग+इनि—स्वार्थे कन् स्त्रियां टाप्। (आङ्राखा) इति प्रसिद्धे कञ्चुकवस्त्रे।

अङ्गिन् त्रि० अङ्ग+इनि। अवयववविशिष्टे, देहवति च। "येनाङ्गविकार इति" सूत्रस्य "येनाङ्गेन विकृतेनाङ्गिनो विकार इति" वृत्तिः। अङ्गिनं नाङ्गबाधेन कुर्य्यादपि कदाचनेति" मीमा०। प्रधाने, "एकएव भवेदङ्गी सङ्गारो वीर एव वेति" "ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मन इति" च साहि०।

अङ्गिरस् पु० अङ्गति अगि-गतौ असि इरुट्। ब्रह्मणोमानसपुत्रे खनामख्याते मुनिभेदे। भारते वन० मार्क०। "ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः" इति "त्वमग्ने प्रथमोऽङ्गिरा ऋषिर्देवानामिति" श्रुतौ अग्नेरङ्गिरस्त्वसङ्गः तत्कथा भारते वन० मार्क०।

"यदा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः॥ तदा च भगवानग्निः स्वयमेवाङ्गिराभवत्। सन्तापयंश्च प्रभया साधर्यं तिमिराणि च॥ पुराङ्गिरा महाबाहो! चचार तप उत्तमम्। आश्रमस्थो महाभागो हव्यवाहं विशेषयन्। तथा स भूत्वा तु तदा जगत् सर्वं व्यकाशयत्॥ तपश्चरंस्तु हुतभुक् सन्तप्तस्य तेजसा। भयं ग्लानश्च तेजस्वी न स किञ्चित् प्रजज्ञिवान्॥ अथ यज्ञिन्नयाभास भगवान् हव्यवाहनः। अन्योऽग्निरिह लोकानां ब्रह्मणा संप्रकल्पितः॥ अग्नित्वं विप्रनष्टं हि तप्यमानस्य मे तपः। कथमग्निः पुनरहं भवेयमिति चिन्त्य सः। अपश्यदग्निवल्लोकांस्तापयन्तं महासुनिम्॥ सोऽपासर्पच्छनैर्भीतस्तमुवाच तदाङ्गिराः। शीघ्रमेव भवज्ञाग्नित्वं पुनर्लोकभावनः। विज्ञातस्त्वयि लोकेषु त्रिषु संस्थानचारिषु॥ त्वमग्निः प्रथमं सृष्टो ब्रह्मणा तिमिरापहः। स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद!॥ अग्निरुवाच। नष्टकीर्त्तिरहं लोके भवान् जातो हुताशनः। भवन्तमेव घास्यन्ति पावकं न तु मां जगाः॥ निश्चिताग्रहणमग्नित्वं त्वमग्निः प्रथमो भव। भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च॥ अङ्गिरा उवाच। कुरु पुत्रं प्रजासर्गं भवाग्निस्तिमिरापहः। मानुं देव! कुरुष्वाग्ने! प्रथमं पुत्रमञ्जसा॥ मार्कण्डेय उवाच। तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत्। राजन् बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः इति"॥

तस्य च यथा अग्निपुत्रत्वं येन येन रूपेण च आविर्भावस्तथोल्लेखोऽग्निशब्दे। अन्यौ च। "शिवो भव प्राजापत्यो मानुषीभ्यामङ्गिरः इति य० अङ्गिरोभिः ऋषिभिः सम्भादितत्वात् अङ्गसौष्ठवाद्वा अङ्गिरा अग्निरूपः

हे अङ्गिरः ! अग्निरूपेति" वेददीपः । अङ्गिरसः गोत्रापत्यम् शिवा० अण् । आङ्गिरसः बहुषु लुक् । अङ्गिरसस्तद्गोत्रापत्ये ब० व० । "सर्व्वे सान्ता अदन्ताः स्युः" इत्यादेः पृ० सलोपे अङ्गिरशब्दोऽयत्र, "येनानवन्धे अङ्गिरे" इति वेदः । मन्वत्रिविष्णुहारीत याज्ञवल्क्योशनोऽङ्गिरा इति याज्ञ० "एवं त्यक्त्वा शरीरं स्वं परमे तपसि स्थितः । भृग्वङ्गिरादिभिर्भूयस्तप-साप्यायितस्तदेति" भार० ।

अङ्गिरस्वत् पु० अङ्गिरा अग्निः सहायत्वेन विद्यतेऽस्य मतुप् मस्य वः सान्तत्वात् न पदत्वम् । वायौ "यमाय त्वाङ्गिर-स्वते पितृमते स्वाहेति" यजुः । "अङ्गिरोयुक्ताय वाता-येति" वेददीपः ।

अङ्गीकार पु० अनङ्गम् अस्वोपकरणं अस्वकीयम् अङ्गं क्रियते अङ्ग+च्वि+कृ घञ् । स्वीकारे अभ्युपगमे । "अङ्गीकुरु दृशोर्भङ्गीमङ्गीभवतु मन्मथ" इति "नवाङ्गी कुरङ्गीदृगङ्गी-करोत्विति" जगन्नाथः । "अङ्गीकुर्वन्तु स्वमाहात्म्यं भयं अस्याश्च मायकं" इति पुरा० ।

अङ्गीकृत त्रि० अङ्गीति चूर्णं तत्पूर्व्वकात् कृञः क्त । स्वीकृते "अङ्गीकृतं सुकृतिनः परिपालयन्ती"तिचौरपञ्चा-शिका । "नाङ्गीकृतसुतृप्तजनीति" नीतिसा० ।

अङ्गु पु० अगि-उन् । पाणौ हस्ते "अङ्गुष्ठः" ।

अङ्गुरि(री) स्त्री अङ्ग-उलि-रलयोरैक्यं स्मरणात् रत्वम् । (आङ्गुल) इति प्रसिद्धायाम् हस्तपादशाखायाम् वा ङीप् । आर्त्तवार्थे "अङ्गुरीवोरगक्षतेति" रघुः ।

अङ्गुरीय न० अङ्गुरौ भवम् अङ्गुरि+छ मात्वमूलादित्वात् वा रत्वाभावः । अङ्गुलिभूषणे (आङ्गुटीति) प्रसिद्धे ।

अङ्गुरीयक न० अङ्गुरीय+स्वार्थे कन् । अङ्गुलिभूषणे (आङ्गु-टीति) ख्याते भूषणभेदे ।

अङ्गुल पु० अङ्ग-उल । हस्तपदशाखायाम् (आंगुल) इति ख्यातायाम् । वात्स्यायनमुनौ च । "यवोदरैरङ्गुलमष्टसंख्यै-रिति" भास्कराचार्य्योक्ते अष्टयवोदरपरिमाणेऽस्य न० । अङ्गौ पाणौ लीयते वा क । अङ्गुले न० । "समन्तादङ्गुलोत्सेधं हस्तमात्रं तु स्थण्डिलमिति" पुरा० ।

अङ्गुलि स्त्री अङ्ग-उलि । हस्तपदशाखायाम् (आङ्गुल) इति ख्यातायाम् । अङ्गुलिं यन्थिभेदस्य लेदयेत् प्रथमे अहे"इति स्मृतिः (हात गुडा) इति ख्याते गजकर्णि-काद्रुमे, गजशुण्डाग्रे च । पुंस्त्वमपि "संदंशाधरोष्ठमङ्गु-लिनेति" भट्टिः ।

अङ्गुलितोरण न० अङ्गुलेः तोरणमिव कृतम् । चन्द-नादिद्वारा कृते ललाटस्थार्द्धचन्द्राकृतितिलके ।

अङ्गुलित्र न० अङ्गुलिं त्रायते त्रै-क इत० । (चामा-टीति) प्रसिद्धे ज्याकर्षणकृतखेदवारणार्थम् अङ्गुलिबद्धे चर्म्मणि "बद्धगोधाङ्गुलित्रे" इति भट्टिः ।

अङ्गुलित्राण अङ्गुलित्रायतेऽनेन त्रै-क इत० । (चामाटीति) प्रसिद्धे ज्याकर्षणकृतखेदनिवारणार्थम् अङ्गुलिबद्धे चर्म्मणि ।

अङ्गुलिमुद्रा स्त्री अङ्गुलेः मुद्रं राति रा-क इत० । धारयितुर्नामाक्षरसूचासहिते (आङ्गुटीति) प्रसिद्धे अङ्गुली-भूषणे । "उपस्थितमूर्तिरङ्गुलिमुद्रयेति" शकु० ।

अङ्गुलिमोटन न० अङ्गुल्योर्मोटनं मर्दनं यत्र ब० । अङ्गुलि-द्वयमर्दनजाते (तुड़ि) इति प्रसिद्धे शब्दे ।

अङ्गुलिषङ्गा स्त्री अङ्गुलौ सङ्गो यस्याः षत्वम् ७ब० । (याउ) इति प्रसिद्धे अङ्गुलिसंक्षेपकारके यवागूद्रव्ये ।

अङ्गुलिसंज्ञा स्त्री अङ्गुल्या संज्ञा संज्ञेतसाधनङ् । अङ्गु-लिचेष्टाभेदेन अभीष्टकर्म्मणि देये सङ्केतविशेषे "सुखार्पितैका-ङ्गुलिसंज्ञयैवेति" कुमा० ।

अङ्गुलिसन्देश पु० अङ्गुल्या अङ्गुलिध्वनिना सन्दिश्यते सम्+दिश-भावे घञ् । अङ्गुलिध्वनिद्वारा संज्ञादाने ।

अङ्गुलिस्फोटन न० अङ्गुल्योः स्फोटनं ताड़नं यत्र ७ब० । (तुड़ि) इति प्रसिद्धे अङ्गुलिद्वयमर्दनजाते शब्दे इत० । अङ्गुलिस्फोटनमात्रे च ।

अङ्गुली स्त्री अङ्गुलि+वा ङीप् । अङ्गुलिशब्दार्थे "च्युतमपि लब्धपदं यदङ्गुलीभ्यामिति" शकु० "तर्जयन्नङ्गुलीभिरिति" ।

अङ्गुलीपञ्चक न० अङ्गुलीनां पञ्चकम् पञ्चसंख्या । हस्त-स्थानामङ्गुलीनां समुदाये तासु अङ्गुष्ठतर्जनीमध्यमानामिका कनिष्ठाः ।

अङ्गुलीय न० अङ्गुरीयकवत् वा रत्वाभावः । (आंगुटीति) प्रसिद्धे अङ्गुलिभूषणे । "तव सुचरितमङ्गुलीय ! नूनमिति" शकु० । स्वार्थे कन् । तत्तुल्यपरिणाहवत्त्वात्तत्रैव न० ।

अङ्गुलीसम्भूत पु० अङ्गुल्यां सम्भूतः ७त० । नखे । अङ्गुलीसम्भूतमात्रे त्रि० ।

अङ्गुल्यादि पु० ६ब० । पाणिन्युक्ते स्वार्थे विहितकन्प्रत्यय-निमित्ते शब्दगणसमूहे । सच गणः "अङ्गुलि भरुज बभ्रु वल्गु भण्डर भण्डल शब्कुली फरि कपि सुनिरूढ खल उदश्वित् गोणी उरस् कुलिश इति । अङ्गुलीव+कन् अङ्गुलीयकमित्यादि ।

अङ्गुष्ठ पु० अङ्गौ पाणौ प्राधान्येन तिष्ठति स्था-क ७त०

त्वम् । दृङ्गाङ्गुलौ । "अस्माञ्चेति" सूत्रेऽङ्गशब्दप्रयोगात् अङ्गशब्दः हस्तवाचीत्यापितम् । "अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजते" इति स्मृतः ।

अङ्गुष्ठमात्र त्रि० अङ्गुष्ठ+परिमाणार्थे मात्रच् । अङ्गुष्ठमध्यपर्वपरिमिते । "अङ्गुष्ठमात्रोऽङ्गवरोऽपि दृष्ट" इति श्रुतिः । "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलादथ" इति भारतम् । "अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र दृहत्पर्वग्रन्थिभिर्मिनुयात् सदेति" काल्या० ।

अङ्गुष पु० अगि-जषन् । नकुले वाणे च ।

अङ्गुस् न० अङ्गते नरकमनेन अगि-गतौ असुन् । पापे "युग्मच्छासनलङ्घनाङ्गुसिमया मग्नेन नाम स्थितमिति" वेणी० ।

अङ्गारि पु० कृ-इण् ईत० ६त० । दोग्धिशीले । "कविरसि "अङ्गारिरसीति" यजु० । "अङ्गारिर्दोग्धिशील इति" वेददीपः ।

अङ्गि पु० अधिगतौ-इन् । पादे, वृक्षमूले च ।

अङ्ग्रि पु० अधि-गतौ करणे क्रिन् । चरणे, वृक्षमूले, "अधारि पद्मेषु तदङ्घ्रिणा द्वयेति नै० । अङ्घ्रिपः (पादपः) छन्दसां चतुर्थभागे च । "प्रथमाङ्घ्रिसभोयस्येति" वृत्त० ।

अङ्घ्रिप पु० अङ्घ्रिणा मूलेन पिबति सिक्तजलम् पा-क ३त० । वृक्षभाते ।

अङ्घ्रिपर्णिका स्त्री अङ्घ्रौ मूले तदारभ्य वा पर्णमस्याः जातौ ङीप् स्वार्थे कन् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति ख्याते वृक्षे । काभावे अङ्घ्रिपर्णीत्यपि तत्रैव ।

अङ्घ्रिवल्लिका स्त्री अङ्घ्रेरारभ्य वल्लीव पर्णवत्त्वेन, ततः स्वार्थे के हृस्वे टाप् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति प्रसिद्धे वृक्षे । काभावे ॥ अङ्घ्रिवल्लीत्यपि तत्रैव ।

अच अविस्पष्टकथने गतौ च उभय० भ्वादि० सक० सेट् क्ता वेट् । अचति ते । आचीत् आचिष्ट । क्त अक्तः क्ता अचित्वा-अक्ता "स्वाङ्गायत्तमित्यङ्गस्त्री अचते" इति काल्या० । "अचते सङ्कोचयति" इति वेददीपः ।

अच(अनूच) गतौ पूजायाञ्च प० सक० सेट् । तत्र अच इदित् ओदित्च (अनूच) अभ्यक्तवन्दे च । आञ्चति आञ्चीत् अनूच-गतौ आत्मात् पूजायामञ्चात् । क्त अक्तः पूजायाञ्चभयोः अञ्चितः अचि-वर्त्तमाने क्त अञ्चितः । अनूच-क्ता अञ्चित्वा-अक्ता अचि-अञ्चित्वा । "अयमञ्चति पञ्चशराननुचर" इति सा० टी० । प्र+प्रकर्षे पूर्वदिक्कालवृत्तौ च प्राञ्चति प्राङ् (पूर्वकालः) प्राची (पूर्वा दिक्) परा+प्रतिगतौ, आभिमुख्याभावे, पश्चाद्भावे, बहिर्भावे च पराञ्चति (परागच्छति) पराङ् (बाह्यः) । अप+अपसरणे अपाञ्चति । सम्+सुन्दरगमने, यथोचितगमने च समञ्चति समङ् । अव+पश्चाद्गतौ । अव्यञ्चति अव्यङ् । उद्+ऊर्द्धगमने, उत्तरदिग्वृत्तौ च उदञ्चति (उद्गच्छति) "उदक्प्रोमाङ्गमिति" उदङ् देशः उदीची (उत्तरा दिक्) । परि+समन्ताद्गतौ । पर्य्यञ्चति । प्रति+प्रतीपगतौ, पश्चाद्गतौ, पश्चाद्वर्त्तित्वे च प्रत्यञ्चति (प्रतीपं गच्छति) । प्रत्यङ्, प्रतीची (पश्चिमा दिक्) । आत्मनि व्याप्त्यर्थकप्रतिमा योगात् प्रत्यक्शब्दः तस्य सर्वविषयव्यापकत्वात् प्रत्यक्त्वम् । नि+न्यूनीभावे न्यञ्चति न्यङ् न्यग्भावः न्यक्कारः । अव+अधोगतौ, दक्षिणदिग्वृत्तौ च । अवाञ्चति अवाङ् (अधोमुखः) अवाची (दक्षिणा दिक्) यथा च उत्तरदक्षिणयोः ऊर्द्ध्वाधोभावरूपया अवाक्शब्दे वक्ष्यते ।

अच गतौ पूजायाम् इदित् उभ० सक० सेट् क्ता वेट् । आञ्चति ते आञ्चीत् आञ्चिष्ट । क्ता अक्त्वा-अञ्चित्वा । उपसर्गात् अनूचवत् । "न्यञ्चते प्रत्यहं मोहो यथाभ्यङ्गेन चारय" इति कविर० ।

अचक्षुस् त्रि० न० ब० । मन्दनेत्रे, नेत्रहीने च । "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवेति" श्रुतिः । न० त० । चक्षुर्भिन्ने न० ।

अचतुर त्रि० न सन्ति चत्वारि यत्र त्रि० अचतुरा० । चतुःसंख्याशून्ये । चतुरोनिपुणः न० त० । वृक्षभिन्ने अपटौ त्रि० ।

अचपल त्रि० न चपलः । चापल्यविरोधिस्थैर्य्ययुक्ते ।

अचर त्रि० न चरति चलति-चर-अच् न० त० । चरत्वविरोधिस्थैर्य्यवति स्थावरे स्थितिशीले पृथिव्यादौ "चराणामचमचरमिति" मनुः । चलनशून्ये त्रि० । ज्योतिषोक्ते मेषकर्कटतुलामकरराशिकृत्तिकरराशिभिन्नेषु स्थिरराशिषु वृषसिंहवृश्चिककुम्भराशिषु न० ।

अचरम त्रि० न० त० । अन्तिमत्वविरोधिमध्यत्वाद्यवस्थावति "वयस्यचरमे" इति पा० । अचरमं वयः मौमादित्वं ।

अचल पु० न चलः । (गो'अ)इति ख्याते वृक्षे । पर्व्वते, "अचलाः सागराः ग्रामाः प्रासादध्वजाः गढ़ाः धारितं च त्वयासर्वमिति" पृथिवीप्रार्थनामन्त्रः । "अचलएव भवानिव राजते" इति माघः । पृथिव्यां स्त्री । भूभेरचलत्वादिकल्पात् सि० मि० गो० "भूभेः पितृव्यः प्रथमोऽचलश्च विरविक्तजेऽथार्किनक्षत्रकक्षाष्टसैद्धान्तो यतः सनु सद्-

निलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वयमथ वै वियति नियतं तिष्ठतीहास्य दृष्टे निर्वं विश्वं च यच्चत्सद्-नुजमनुजादित्यदैत्यं समन्तात्। सर्वतः पर्वतारामधाम-चैत्यवर्यैश्चितः। कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव। यथोष्णतार्कानलयोश्च, शीतता विधौ, द्रुतिः के, कठिनत्वमश्मनि। मरुस्थलो भूरचला स्वभावतो यतो विचित्रा वत वस्तुशक्तयः। आकृष्टशक्तिश्च मही तया यत् स्वस्थं गुरु स्वाभिमुखं स्वशक्त्या। आकृष्यते तत्पततीव भाति समे समन्तात् क्व? पतत्वियं खे" इति। आर्य्यभट्टमते तु अस्याश्चलत्वेऽपि अचलाः पर्वताः सन्त्यत्र अस्त्यर्थेऽच्। अचलत्वात् स्वकक्षातो बहिर्गमनाभावाद्वा अचलत्वम्। तेन च तस्याचलत्वं ब्रह्मादिविधयोक्तं तच्च विस्तरतो भूगोलशब्दे वक्ष्यते। चलनशून्ये त्रि०। "तस्मात्त्वमचलोभवेति" अचलस्थापनमन्त्रः। "तस्मान्मम गृहे नित्यं सन्तिष्ठ! त्वमचला भवेति" पुरा०। "समाधावचला बुद्धिरिति, गीता, अचला भक्तिरीश्वरे" इति पुरा०। न चलति स्वभावात्। शिवे पु० तस्य स्थाणुत्वात् तथात्वम्। ब्रह्मणि न०। "निष्कलं निष्क्रियं शान्तमिति" श्रुत्या अस्य सर्वक्रियाशून्यत्वेनाक्षरचलत्वम्। आत्मनि पु० "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन" इति गीता।

अचलकन्या स्त्री अचलस्य हिमाचलस्य कन्या। पार्वत्यां, सा हि हिमाचलेन मेनायामुत्पादिता। तत्कथा च "प्रसूतिरभवत्तस्य मेनाया. कन्यका सुतेति" शिवपुराणे ब्रह्मणेन दर्शिता। तन्मूलं कुमारे चोक्तम् "अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्व्वपत्नी। सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे। सा भूधराणामधिपेन तस्यां समाधिमत्यागुदपादि भव्येति" इति अचलसुता-दयोप्यत्र।

अचलकीला स्त्री अचलाः कीला इव यस्याः। पृथिव्याम्। अचलस्य सुमेरोः कील इव, अचलः कीलइवाव-ष्टम्भकत्वाद्वा। किष्कुमत्पर्वतेषु मन्दरादिषु पु०। ते च सुमेरुसमवर्णाः, "विष्कम्भशैलाः खलु मन्दरोऽस्य सुगन्धशैलो विपुलः सुपार्श्व इति" सि०शि०गो० दर्शितास्तेषां स्वरू-पादि तत्तच्छब्दे वक्ष्यते।

अचलजा स्त्री अचलात् हिमालयात् जायते जन-ड ५त०। पार्वत्यां, तत्कथा पूर्व्वशब्दे उक्ता। पर्वतजातमात्रे त्रि० अचलजातादयोऽप्यत्र।

अचलत्विष् पु० अचला मरुप्रक्षालनेनापि मालिन्यानपगमात् स्थिरा त्विट् कान्तिर्यस्य। कोकिले। स्थिरकान्तिमति त्रि०। कर्म्मधा०। स्थिरायां कान्तौ स्त्री।

अचलद्विष् पु० अचलेभ्यः द्वेष्टि द्विष-क्विप् ६त०। इन्द्रे तस्याचलपक्षच्छेदकत्वात्तथात्वं तत्कथा गोत्रभिच्छब्दे वक्ष्यते। अचलरिप्वादयोऽप्यत्र पु०। पर्व्वतजाते त्रि०।

अचलपति पु० ६त०। हिमाचले। यथा तस्य तत्पतित्वं तथाचलराजशब्दे वक्ष्यते।

अचलभ्राट पु० बौद्धभेदे।

अचलराज पु० अचलानां राजा अच् समा०। हिमाचले "शैलानां हिमवन्तं च नदीनाञ्चैव सागरम्। गन्धर्व्वाणा-मधिपतिं चित्ररथं विद्धीति" ब्रह्मपुराणे तस्या-चलराजत्वमुक्तम् अचलाधिपादयोप्यत्र।

अचापल न० चपलस्य भावः अण् न०त०। चाञ्चल्यविरोधि-स्थिरतायाम्। ब०। चाञ्चल्यशून्ये स्थिरे त्रि०।

अचापल्य न० चपलस्य भावः ष्यञ् न० त०। चाञ्चल्य विरोधिस्थिरतायाम् व०। ब०। चाञ्चल्यशून्ये त्रि०।

अचिक्कण त्रि० न चिक्कणः। चिक्कणतविरोधिरूक्षत्ववति।

अचित्त त्रि० नास्ति चित्तं यस्य। चित्तशून्ये चेतना रहिते "अचित्तहस्तिधेनोष्ठगिति" अचित्तादेशकाला ट्ठगिति" च पा०। स्थावरादीनान्तु न चित्तशून्यत्वं किन्तु विशिष्टचेतनाराहित्यमेवेति अचेतनशब्दे वक्ष्यते।

अचिन्तनीय त्रि० चिन्तयितुं अनुमापकहेत्वभावेन तर्क-यितुमशक्यः चिति—शक्यार्थे कर्म्मणि अनीयर् न०त०। अनुमापकहेत्वभावेन तर्कयितुमशक्ये। "अचिन्तनीय स्तु तव प्रभाव इति" रघु०। तदर्थे यत्। अचिन्त्योऽ-प्युक्तार्थे त्रि० "अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः" इति स्मृत्यं०।

अचिन्तित त्रि० न चिन्तितः। पूर्व्वरूपादिकारणानु-सन्धानादिकमन्तरेण अतर्किते "विधेर्नियोगादेतन्मे अचिन्तितमुपस्थितमिति" पुरा०।

अचिर न० न चिरम्। अल्पकाले, अल्पकालस्थायिनि वस्तुमात्रे त्रि०। "अचिरेणैव कालेन वंशनाशो भवेद्-ध्रुवमिति पुरा०। अचिरांशुः अचिरप्रभा अचिरद्युतिः।

अचिरत्विष् स्त्री अचिरा अल्पकालस्थायिनी त्विट् कान्ति-र्यस्याः। विद्युति। अल्पकालकान्तियुक्ते त्रि०।

अचिरद्युतिः स्त्री अचिरा अल्पकालस्थायिनी द्युतिर्यस्याः। विद्युति। अल्पकालस्थायिद्युतिमति त्रि०। कर्म्म०। अल्पकालस्थायिन्यां कान्तौ स्त्री।

अचिरप्रभा स्त्री अचिरा अचिरस्थायिनी प्रभा यस्याः। विद्युति। "च्युता दिवः स्थास्नुरिवाचिरप्रभेति" भट्टिः। अल्पकालस्थायिप्रभावति त्रि०। कर्म्म०। अचिरायां दीप्तौ स्त्री।

अचिरभास् स्त्री अचिरा अल्पकालस्थायिनी भाः यस्याः। विद्युति। अल्पकालस्थायिदीप्तिमति त्रि०।

अचिररोचिस् स्त्री अचिरं रोचिर्यस्याः। विद्युति। अचिरकान्तिमति त्रि०। कर्म्म०। अचिरकान्तौ न०।

अचिरस्य अव्य० चिरस्येत्यव्ययेन न० त०। स्वल्पकाले।

अचिरांशु स्त्री अचिरा अंशवोऽस्याः। विद्युति। "अचिरांशुसमप्रभेति" पुरा०। अल्पकालस्थायिकिरणवति त्रि०। कर्म्म०। अचिरकिरणे पु०। [लम्बे च।

अचिरात् अव्य० अचिरम् अततीति क्विप्। शीघ्रे, अवि-

अचिराभा स्त्री अचिरा आभा यस्याः। विद्युति।

अचिराय अव्य० न चिराय। स्वल्पकाले शीघ्रे च।

अचिरेण अव्य० चिरेणेत्यव्ययस्य न० त०। अल्पकाले शीघ्रे च।

अचिष्णु(ष्टु) त्रि० अच-गतौ वा० ष्णु(ष्टु)च्। गमनशीले। "त्वष्टा दधक्ष्मग्निन्द्राय ष्णेऽपाकोऽचिष्णु(ष्टु)रिति" यजु० अचि(ष्टु)ष्णुः सर्व्वगत इति वेददीपः।

अचेतन त्रि० चेतना ज्ञानम् न०ब०। चेतनाशून्ये। चित-ल्यु न०त०। ज्ञानविशिष्टभिन्ने। ज्ञानञ्च द्विविधं विषयाकारमनोवृत्तिरूपं तत्फलितचैतन्यरूपञ्च तत्र वृत्तिरूपं ज्ञानं चित्तस्यैव धर्म्मः "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" श्रुतौ तस्य चित्तधर्म्मत्वावगमात्। द्वितीयं तदुज्ज्वलितचैतन्यमात्मधर्म्मः। प्रकाशरूपचैतन्यस्य सर्व्वदा स्थितावपि वृत्तिसहकारेणैव तद्गताज्ञाननिवारणे चैतन्यं समुज्ज्वलति नान्यथा अतएव "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तमिति वेदान्तिनः। सांख्यास्तु विषयोपरक्ता वृत्तिश्चितौ प्रतिबिम्बति तेनैव विषयावभासः "तस्मिंश्चिद्रूपेण स्फारे समस्ता वस्तुदृश्यः। द्रुमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमा" इति मन्यन्ते। नैयायिकास्तु सांख्यवेदान्तिमतसिद्धं यत् वृत्तिरूपं ज्ञानं तत्स्थानीयमात्मनश्चैतन्यसुररीचक्रुः। तादृग्वृत्तौ तत्स्थानीयज्ञाने च आत्मनः संयोगादयः कारणानि। आभ्यन्तरसुखादिविषयग्रहणे मनःकरणम्, इन्द्रियाणि तु खल्वाह्यविषयग्रहणे करणानि, "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति" गौतमसूत्रे "प्रतिविषयाध्यवसाय इति" सांख्यसूत्रे च तथैव स्वस्वविषयेन्द्रियाणां व्याहृतता उक्ता। तच्च तत्तच्छब्दावसरे दर्शयिष्यते। एवञ्च आभ्यन्तरे सुखादौ मन एव, बाह्येषु शब्दादिषु श्रोत्रादीनि असाधारणकारणानि। मनस्तु बाह्येषु सर्व्वत्र साधारणकारणमिति भेदः। एवञ्च ज्ञानकारणेन्द्रियसमूहे एवाचेतनशब्दस्य प्रवृत्तिः। अतएवोक्तं "सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनमिति"। एवञ्च वृक्षादीनामपि अन्तःकरणादिमत्त्वमस्त्येव। अन्यथा सुखदुःखानुभवो न स्यात्। तेषां हि स्वकर्म्मानुसारिदुःखभोगार्थमेव धर्म्मेणैव स्थावरत्वप्राप्तिः। अतएव "महापातकजान् घोरान् नरकान् प्राप्य दारुणान्। कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह" इत्युपक्रम्य "तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पगः" इति याज्ञवल्क्येन चेतनस्यैव पापावशेषभोगार्थं तृणादिरूपेण जन्मोक्तम् "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इति च सामान्यतः शारीरिकपापात् वृक्षादिरूपस्थावरजन्म तेनैवोक्तमतस्तेषां दुःखभोगार्थमेव वृक्षादिरूपत्वप्राप्तौ इन्द्रियाभावे कथञ्चारं ते दुःखमनुभवेयुरित्यवश्यं तेषु इन्द्रियादिमत्त्वमस्त्येव। अतएव पद्मं सरोऽन्तरं गच्छति, शाखा छिन्नापि चेतनसंयोगात् पुनः प्ररोहतीत्युपलभ्यते। अतएव च श्रुतौ "अथ जीवो यां जहाति सा शुष्यती"त्युक्तम्। तेन तेषां जीवसंबन्धोऽस्त्येव किन्तु विशिष्टचेतनाशून्यत्वादेव तेषु "अचेतनत्वव्यवहार इति भेदः। पदार्थादर्शे "देहश्चतुर्विधो ज्ञेयो जरायुजमुखादितः। उद्भिज्ज जन्मजोऽण्डोत्थस्वेदजश्च जरायुज" इति स्थावराणां देहसम्बन्ध उक्तः। "चेतनाधिष्ठिते भोगायतननिर्म्माणमन्यथा भूतिभावप्रसङ्ग" इति सांख्ये च चेतनसम्बन्ध एव भोगायतनरूपदेहोत्पत्तिरुक्ता। तेषाञ्च भोगायतनदेहवत्त्वेऽपि सर्व्वेन्द्रियस्थानगोलकादेरभावात् न दर्शनादि किन्तु त्वाचप्रत्यक्षं प्राणजप्रत्यक्षं च भवत्येव अतएव अग्नप्रादिस्वरतरकिरणस्पर्शे तेषां मूर्च्छा, ओषधिविशेषजधूमादिसम्पर्के च तदुग्राणात् मुखमण्डोत्पत्तिः। अत एव तेषां द्वीन्द्रियत्वेन व्यवहारः यथोक्तम् "सर्व्वेन्द्रिया मनुष्याद्याः सपर्य्याप्तचतुरिन्द्रियाः। त्रीन्द्रियाः कृमिकीटाद्या द्वीन्द्रिया वृक्षजातय" इति। मनसो विद्यमानत्वेऽपि हृदयरूपविशिष्टस्थानाभावात् न स्पष्टमवबोधः। श्रूयते हि हृदयस्थानश्रवणे "तद्धृदयं विशिष्टचेतनाश्रयमित्युक्तम्" तेन तेषां विशिष्टचेतनाश्रय-

इदंतयभानशून्यत्वात् विशिष्टचेतनावत्त्वं नास्ति सुख-दुःखानुभवमात्रं तु तेषां जायते एवेति विशेषः तेनैव स्वस्वकर्म्मफलानुरूपदुःखानुभवात् स्वस्वकर्म्मफलभाक्-त्वम् इति सुस्थितम्। चेतनाशून्ये पदार्थमात्रे त्रि०। "अचेतनं चेतनावदिव लिङ्गमिति" सा०का०। तत्तद्विशेषज्ञानशून्ये च। "तन्तु दुःखाभिसन्नं विल-पन्तमचेतनमिति पुरा०। अत्र दुःखानुतप्तत्वेन तदनुभवस्योक्तेः तथाभूतेऽपि चेतने अचेतनत्वोक्तिः विवेकज्ञानशून्यत्वपरत्वेनैव, एवमन्यत्रापि। "अहङ्कारलये सुप्तौ भवेद्देहोऽप्यचेतन" इत्युक्तिस्तु देहस्य चैतन्यप्रकाशा-श्रयच्छेदकतया, जागरे स्वप्ने च चैतन्यसुपपाद्य सुषुप्तौ श्रयच्छेद्याहङ्काररूपमनसो लयात् कथमश्रयच्छेदकत्वं? व्याहतित्यतोऽचेतनत्वमित्येवंपरा। अन्यथा "शरीरस्य न चैतन्यं श्रुतेषु व्यभिचारतः" इत्युक्तेः देहे सदा चैतन्याभावस्य सिद्धत्वात् सुषुप्तौ तथात्वकथननर्थकं स्यात्। सुषुप्तावपि इन्द्रियाणां मनसश्च विशिष्टव्यापारराहित्येन लयत्वोपचारः किन्तु आत्मनि तदापि चैतन्यमस्त्येव। "आनन्दभुक् चेतोमुखः प्राज्ञ" इति श्रुतेः सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति" सुषुप्तोत्थितस्य परामर्शाच्च आनन्दा-नुभवस्य तत्रापि सत्त्वात् सुतरां देहस्य तदनुभवज्ञानाव-श्रयच्छेदकत्वमस्त्येवेति विशेषः। विस्तरस्तु सुषुप्तिशब्दे वक्ष्यते।

अचेतस् त्रि० न चेतति चित-असुन् न० त०। चेतनाशून्ये अचेतने घटादौ, तत्तद्विषयज्ञानरहिते च। "गतसंज्ञम-चेतसमिति" पुरा०। नास्ति चेतोऽस्य। चित्तरहिते त्रि०।

अचेतान त्रि० चित-आनच् वेदे न लुक् न० त०। चैतन्यरहिते "अचेतानस्य मा मथो वि दुक्षः इति" वेदः।

अचेष्ट त्रि० नास्ति चेष्टा यस्य। चेष्टारहिते। चेष्टा च "आत्म-जन्या भवेदिच्छा-इच्छा जन्या भवेत् कृतिः। कृतिजन्या भवे-च्चेष्टा चेष्टाजन्या भवेत्क्रिया" इत्युक्तेः यत्नसाध्या क्रिया-जनकव्यापाररूपा। चेतनाधिष्ठितदेहेष्वेव कर्म्मविशेषः न तदनधिष्ठिते तथा च यस्मिन् देहे आत्मनो यत्नो भवति तद्देहावच्छेदेनैव चेष्टा जायते नान्यस्मिन् सा च उद्यम-रूपैव। मनोवायुभिन्नद्रव्यस्य न स्वतःक्रिया सम्भवति किन्तु गुरुद्रव्याद्याघातनोदनादिनैव क्रिया भवति नान्यथा। तथा च हस्तादिचालनदर्शनात् तत्कारणी-भूतनोदनादिकमनुमीयते तच्च नोदनम् आत्मकर्त्तृकमेव अन्यस्यानुपलब्धेः। अधिकं चेष्टाशब्दे वक्ष्यते।

अचेष्टता स्त्री अचेष्टस्य भावः। चेष्टाराहित्ये।

अचैतन्य त्रि० नास्ति चैतन्यं चेतना यस्य। चैतन्य-शून्ये। "अचैतन्यमिदं विश्वं दैवं चैतन्यमेव यदिति"। न०त०। चैतन्यभिन्ने न०।

अच्छ अव्य० न च्छ्यति दृष्टिं सम्मुखत्वात् छो-क न०त०। आभिमुख्ये। "अच्छा न्वच्छा असरत् पवित्रे इति" वेदः। "अच्छ गत्यर्थवदेष्विति" सूत्रे "अच्छगत्य अच्छोद्य इत्यु-दाहृत्य अभिमुखं गत्वा अभिमुखमुक्त्वेति" व्याख्यातम् सि०कौ०।

अच्छ त्रि० न छ्यति दृष्टिम्, छो-क न०त०। स्वच्छे निर्म्मले। निर्म्मले हि वस्तुनि दृष्टिः प्रसरति न तु समले आभ्यन्तर-पर्य्यन्तं धावतीति निर्म्मलस्यैव तदप्रतिबन्धकत्वात्तथात्वम्। "स्वच्छन्दोच्छलदच्छकच्छकुहरेति काव्यप्र०। स्फटिके पु०। न छ्यति भक्षयति नाशितसत्त्वं छा-भक्षणे क न०त०। भल्लुके पु०। अच्छभल्लुकशब्दयोरेकं नामेत्यन्ये।

अच्छन्दस् त्रि० नास्ति अध्येयत्वेन छन्दोवेदोऽस्य तुक्। वेदाध्ययनशून्ये अनुपनीते बालके, सर्व्वथा तच्छून्ये शूद्रादौ च। नास्ति छन्दो इत्तानुसारी, परिमितमात्रा-क्षरादिसन्निवेशविशेषो यत्र ७त० तुक्। छन्दःशून्ये गद्यात्मके, चूर्णके वा शब्दसमूहे। नास्ति छन्दोभिप्रायो यस्य ब० तुक्। अभिप्रायशून्ये। वा कपि। अच्छ-न्दस्कोऽप्युक्तार्थेषु।

अच्छावाक पु० अच्छं निर्म्मलम् अच्छ आभिमुख्येन वा वक्ति शंसति वच-कर्त्तरि संज्ञायां घञ्(निपातस्य चेति) दीर्घः। शंसनकर्त्तरि होत्रसहकारिणि सोमयागसम्बन्धिनि ऋत्विग्-भेदे। स च आश्वलायनेन दर्शितः। "प्रागपि सोमेनैके, इत्युपक्रम्य, "तस्यार्त्विजः, चत्वारस्त्रिपुरुषाः, तस्य तस्योत्तरे त्रयः, होता, मैत्रावरुणोऽच्छावाकोग्नीध्रश्चेति, अध्वर्युः, प्रति-प्रस्थाता नेष्टोन्नेता, ब्रह्मा, ब्राह्मणाच्छंस्याग्नीध्रः पोता, उद्गाता, प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्यस्य इति, एतेऽहीनैकाहैर्या-जयन्ति, एत एवाहिताग्नय इष्टप्रथमयज्ञा ऋत्विपतिसम्प्रदा दीक्षित्वा समाप्याग्नींस्तन्मुखाः सत्राण्यासते" इति। "अस्या-यमर्थः, दर्शपूर्णमासाभ्यामिष्ट्वा पशुना तदङ्गभूतः पुरस्ताद्वा सोमेन यजेत तस्य सोमयागस्य होताध्वर्युर्ब्रह्मोद्गातेति चत्वारः ऋत्विजो मुख्याः ते च प्रत्येकं त्रिभिः त्रिभिः पुरुषैरुपेता व्यतस्तस्य तस्य एकैकस्योत्तरे त्रयः पुरुषा भवन्ति, त एते होत्रादिनामकाः षोड़शर्त्विजो द्विरात्रादिभिरहीनसंज्ञकै-रग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति। एतएव होत्रादयः षोड़शर्त्विजः स्वयमप्याहिताग्नयः प्रथमयज्ञेनाग्निष्टोमे-

नेष्ट्वा ऋत्विक्पतिसंज्ञकेन सप्तदशसंख्यापूरकेण सहिता द्वादशाहादिसत्रार्थं दीक्षित्वा स्वस्वसम्बन्धिनोऽग्नीनेकत्र स्थापयित्वा तत्प्रधानाः सत्राण्युपतिष्ठेयुः इति" भाष्यम् । "यदच्छावाकमनुसन्तिष्ठते इति" ता० ब्रा० । अच्छावाकशब्दोऽस्यास्त्र ऋ । अच्छावाकीयम् तच्छब्दयुक्ते सूक्तभेदे, तच्च सूक्तम् "अच्छावाक ! वदखेत्युक्तोऽच्छा वो अग्निमवस इति ऋचमन्वाहेत्यादिना" दर्शितम् । अच्छावाकस्येयम् यत् । अच्छावाक्या । अच्छावाकर्त्विक्-पाठायाम्ऋचि । "एषा होत्रा यदच्छावाक्या" इति ता० ब्रा० । "अच्छावाक्या अच्छावाकसम्बन्धिनी होत्राशंसनरूपा क्रियेति" तद्भाष्यम् ।

अच्छावाकसामन् न० अच्छावाकेन गेयं साम । "य एक ऋद्दिदयत इति ऋचे गेये सामभेदे एतस्यैव नामान्तरमुद्गंथीयमिति" "त्रैककुभं चोद्गंथीयञ्चान्ततः प्रतिष्ठाप्ये इति" ताण्ड्य० ब्रा० । "त्रैककुभं ब्रह्मसाम भवति, उद्गंथीयमच्छावाकसामेति, "य एक ऋद्दिदयते इति" ऋचे गेयं साम उद्गंथीयमेते सामनी इति" तद्भाष्यम् ।

अच्छावाकीय न० अच्छावाकस्य ऋत्विग्भेदस्य कर्म्म भावो वा "होत्राभ्य" इति छ । शंसनरूपे अच्छावाककर्म्मणि, तद्भावे च ।

अच्छिद्र त्रि० न छिद्रं तत्तत्कार्य्येषु प्रमादादिना स्खलनं, रन्ध्रं वा यत्र । प्रमादादिना स्खलनरहिते । "अच्छिद्रेण विचेतव्या देशाः सगिरिकन्दराः" इति रा० । "यच्चच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम अच्छिद्रमस्तु तत्सर्वमिति" "अच्छिद्रं तु भवत्वेतत् सर्वेषाञ्च शिवाय नः" इति च पुरा० । "तत्तथा क्रियतां राजन् यथाऽच्छिद्रः क्रतुर्भवेदिति" भार० । रन्ध्ररहिते च ।

अच्छिन्न त्रि० छिद्-भावे क्त न० ब० । खण्डनरहिते, छेदनरहिते, सन्तते च "वसुधारां प्रकुर्वीत अच्छिन्नघृतधारयेति" पुरा० । कर्म्मणि क्त न० त० । छिन्नभिन्ने त्रि० ।

अच्छिन्नपत्र पु० अच्छिन्नं सन्ततं पत्रमस्य । शाखोटकवृक्षे सन्ततपत्रयुक्तवृक्षमात्रे च । अच्छिन्नपर्णादयोऽस्यार्थे ।

अच्छेदिक त्रि० छेदनं नार्हति ठन् । छेदनानर्हे ।

अच्छेद्य त्रि० न छेत्तुमर्हति छिद्-अर्हार्थे कर्म्मणि यत् । छेदनानर्हे । आत्मनि पु० "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति" गीता । आत्मनश्च अवयवाभावात् अवयवद्वैधीकरणरूपच्छेदनानर्हत्वात् तथात्वम् ।

अच्छोद न० अच्छं निर्म्मलमुदकं यस्य उदादेशः । हिमालय प्रदेशस्थे कादम्बरीप्रसिद्धे सरोवरभेदे । "आह्लादनं दृष्ट्वा, अच्छोदं नाम सरो दृष्टवानिति" कादं० । नदीभेदे स्त्री । अरिष्टपात्नादीन् प्रक्रम्य, "एतेषां मानसी कन्या अच्छोदा नाम निम्नगा" इति पुरा० ।

अच्युत पु० स्वरूपसामर्थ्याच्च च्युतो न भवति न भविष्यते वा च्यु-कालसामान्ये कर्त्तरि क्त न० त० । परमेश्वरे "शाश्वतं शिवमच्युतमिति" श्रुतिः । "यस्मात्र च्युतपूर्व्वोऽहमच्युतस्तेन कर्म्मणेति" भगद्वाक्यम् । "तेन च्युत्यभावरूपप्रवृत्तिमित्तेने"त्यानन्दगिरिः । तदवतारभेदे वासुदेवे "इयमच्युतलीलाढ्या सङ्कृता जातिशक्तिभीति" छन्दोमञ्जरी अच्युतस्य लीला अच्युता अस्खला लीला च । मङ्गभावविकाररहिते च "अच्युतः प्रथितः प्राण" इति सहस्रनामभाष्ये तथैव व्याख्यातम् । नारायणे च "गरुडमूर्त्तिरिवाच्युतस्थितिरमणीयेति" काद० । अच्युतस्य विष्णोः स्थितिः अच्युता अस्खलिता च स्थितिरिति तदर्थः । स्खलनरहिते अस्खलिते स्थिरे त्रि० । "अस्तितमसि अच्युतमसीति" वेदः । द्वादशसर्गयुक्ते काव्यभेदे पु० क्षेमेन्द्रः । न च्योतति क्षरति च्युत-क न० त० । क्षरणशून्ये त्रि० ।

अच्युताग्रज पु० अच्युतस्य वासुदेवस्य उपेन्द्रस्य वा अग्रजः ६त० । बलदेवे । वसुदेवाज्जन्मकाले बलदेवस्य ततोऽग्रजननात् तथात्वम् । इन्द्रे । वामनावतारजन्मकाले च अदितेरग्रजत्वोत्पन्नत्वात् तस्य तथात्वमिति भेदः । तयोश्च तदग्रजत्वं सङ्कर्षणशब्दे इन्द्रावरजशब्दे च वक्ष्यते ।

अच्युताग्रज पु० अच्युतस्य वासुदेवस्य अग्रजः । ब्राह्मणत्वे प्राधान्यात् कामदेवे । [जात इति भा० १० स्कन्धे ।

अच्युतात्मज पु० दैत० कामदेवे । स हि रुक्मिण्यां ब्राह्मणात्

अच्युतावास पु० अच्युतेन ओघ्यतेऽत्र आ-वस आधारे घञ् दैत० । अश्वत्थवृक्षे । "अश्वत्थः सर्ववृक्षाणामि"त्युक्तेरस्य तत्रोपपत्तेस्तादृशवासत्वम् । [च्युतिशून्ये त्रि० ।

अच्युति स्त्री च्यु-क्तिन् न० त० । क्षरणाभावे । बहु० ।

अज गतौ क्षेपणे च भ्वादि० पर० सक० सेट् । अजति । अजैषीत्-आजीत् । तृच् अजिता-नेता । घञ् । आजः । "अजन्ति यज्ञिं सदनाय्यच्छ" इति वेदः ।

अज दीप्तौ इदित् चुरादि० उभय० सेट् अक० । अञ्जयति ते । आञ्जिजत् त ।

अज पु० न जायते जन ड न० त० । ईश्वरे, "न जातो न जनिष्यते" इति श्रुतेः "न हि जातो न जायेऽहं न जनिष्ये कदाचन । लोकाः सर्वभूतानां तथाहमजरामरः" इति भगवद्वाक्यात् तथात्वम् । "अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति श्रुतेः "अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति भगवद्वाक्यात् तथात्वम् । ब्रह्मणि पु० । "अजो ह्येकोऽनुशेते अस्य गात्रे" इति श्रुतेः । विष्णौ "अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति भगवद्वाक्यात् तथात्वम् ।

इति भार० । जीवे च "अजोनित्य शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति गीता । "जह्यात्येनां भुक्तभोगामजोऽन्य इति" श्रुतिः । स हि स्वोपाधिभूत बुद्धिनिष्ठकर्म्मभिरारब्धदेहमधिष्ठाय बुद्धिनिष्ठकर्तृत्वादिक-मात्मन्यभिमन्यमानः जीव इति व्यवह्रियते "न जायते म्रियते वा कथञ्चित् नायं भूत्वा भविता वा न भूय" इति गीतायां तस्य जन्मादिशून्यत्वस्योक्तं तच्च "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति' यास्कोक्तषड्भाव-विकाराणामुपलक्षणमात्रत्वात् तयोः जन्मनाशरूपविकारयो रभा-वकथनेन तदन्तःपातिनामपि सन्दंशपतितन्यायेन अक्षणा-श्यत्वात् । स च ब्रह्माभिन्न एवेति वेदान्तिमतम् बुद्धिरूपो-पाधीनां नानात्वात् न सर्वव्यवहारमाङ्क्यम् । बह्वच इति माठ्खादयः "जन्मादिव्यवस्थात पुरुषबहुत्वमिति" पुरुष-स्योपाधिभूतबुद्धिभेदेऽपि "उपाधिर्भिद्यते न तु तद्वानिति" न्यायेन उपाधिभेदेऽपि उपहितस्यैकत्वेन न भेदः, विशिष्ट-स्यानतिरिक्ततया न जन्मादिव्यवस्थेति पुरुषबहुत्वमङ्गी-चक्रुः कर्तृत्वादिकं बुद्धिगतमपि स्वोपाहितचैतन्ये एव प्रतिबिम्बति तेन तद्विविक्तचैतन्ये तदवभासात् पुरुषस्य भोगः, "चिदवसानोभोग इति" सूत्रे तथैव प्रतिपादनात् एवञ्च यावत्यः बुद्धिव्यक्तयस्तावन्त एव पुरुषाः स्वस्वोपाधिकृतं कर्म्मादिकं स्वकर्तृकतया अभिमन्यमानास्तत्प्रयुक्त सुख-दुःखादिकमात्मीयत्वेन अभिमन्यमानाः भोक्तारश्चेति व्य-वह्रियन्ते अतएवोक्तम् "बुद्धेर्भोग इवात्मनीति" । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति" श्रुतेः ज्ञानादिवृत्तीनां मनोजन्यत्वात् मनोधर्म्मत्वम् सांख्यवेदान्तिनोस्तुल्यम् जीवस्य विभुत्वाङ्गी-कारेऽपि स्वोपाधिबुद्ध्यधिष्ठानदेह एव विशेषसंयोगात् तत्रैव आत्मत्वाभिमानः नान्यदेहेषु, तेषां स्वभोगार्थं स्वोपाधिबुद्धिकृतकर्म्मारब्धत्वाभावात् । एवं सुखदुःखानुस-न्धानमपि स्वोपाधिकृतकर्म्मविशेषादेवेति तत्तद्भेदव्यवस्थेति । ज्ञानकारणमनसाञ्च पुरुषभेदेन भिन्नत्वात् न परानुसन्धा-नेनापरस्यानुसन्धानप्रसङ्ग इति सांख्यभेदान्नयोस्तुल्यम् । विशिष्टस्यातिरिक्तत्वानतिरिक्त एव तयोर्विसंवादः । नैया-यिकवैशेषिकादयस्तु ज्ञानादयो जीवधर्म्माः जीवाश्च बहवः नित्या विभवश्च कर्तृत्वं भोक्तृत्वञ्च जीवाना-मेव धर्म्माः, तेषां विभुत्वेऽपि स्वाङ्गारब्धदेहेष्वेव संयोग-विशेषः सएव जन्म, तद्वियोगश्च मरणमित्येव विशेषः न तु स्वतो जन्ममरणावितीच्छक्रुः । तेन तन्मतेऽपि न अज-त्वव्याघातः । एवं सर्व्वदर्शनाङ्गीकृतसरणावजत्वम् । माध्वास्तु जीवस्याणुत्वमीश्वरादुत्थितत्वञ्च "एतस्यैव विस्फुलिङ्गाव्युच्चरन्तीति" श्रुतेस्तत्रैव तात्पर्य्यात् "बाला यतधारस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेय' इत्युक्तेश्च जीवस्याणुत्वम् अणुत्वेऽपि तेषां सर्व्व-देहगतसुखाद्यनुसन्धानं गुणद्वारैव, यथा घटैकदेशस्थितं कस्तूरीप्रभवसुगन्धिद्रव्यं सौरभेण सर्वं गृहमामोदयति एवं हृदयस्थं विस्फुलिङ्गरूपं चैतन्यं सर्वदेहगतं प्रकाशं कुर्वत् शब्दादीन् विषयांश्चावभासयत् सर्वव्यापीत्युच्यते न तु स्वरूपतः "अणोरणीयान् महतो महीयानिति" श्रुतेः स्वरूपगुणाभ्यां अणुत्वमहत्त्वयोः सम्भवपरतायामेव तात्-पर्य्यात् । अजत्वव्यपदेशस्तु भूतारब्धत्वाभावकृतं गौणमतो-ऽज अजशब्दो भाक्त एव इत्युरश्चोचक्रुः । चार्वाकमते तु आत्मनो नाजत्वं देहाकारपरिणतभूतचतुष्टयस्यैव तेषां मते जीवत्वात् तद्विवरणं चेतनशब्दे वक्ष्यते । सौगतादिमते तु जीवानां संविदनतिरिक्ततया सर्व-संविदनुसूतत्वात् जन्मान्तरभाविनः अपवर्गरूपफलादेः स्वीकाराच्च नित्यत्वं, नित्यत्वाच्च अजत्वमिति भेदः । "सत्वं रजस्तम इति प्रकृते र्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञा"मित्यु-क्तेश्च ईश्वरस्यैव स्वोपाधिमायागतसत्वरजआद्युपाधिभिः जन्मस्थितिनाशनरूपकार्य्यकरणार्थमायाविर्भावात् अजस्वरू-पाननतिरेकात् तेषामजत्वं तेन ब्रह्मणि, विष्णौ, हरे च पु० । न जायते इत्यजा । सांख्यमतसिद्धप्रधानापरपर्य्याये साम्यावस्थापन्नसत्वरजस्तमोरूपगुणत्रयात्मके स्त्री । "अजा-मेकां लोहितशुक्लकृष्णवर्णाः सरूपाः बह्वीः प्रजाः सृज-मानामिति" श्रुतिः । सत्वादिगुणानुसारेण श्वेतादिरूप-युक्तबहुकार्य्यसृष्टत्वाच्च तस्याः नानावर्णत्वमिति सांख्याः । वेदान्तिनस्तु एतां श्रुतिं तेजोऽबन्नरूपपरतया व्याचक्रुः । तथा हि "हन्ताहमिमास्तिस्रो देवता अनेन जीवेना-त्मनानुप्रविश्य नामरूपे व्याकरवाणीति" तेजोऽबन्नाभि-मानिनीस्तिस्रो देवता अनुप्रविश्येत्युक्तेः प्रक्रान्ततेजोऽ-बन्नानामेव भौतिकस्थूलोपादानत्वावगमात् तासामेव प्रकृतित्वेन अजत्वम्, तासाञ्च लोहितादिरूपाणि तत्प्रक-रणशेषे उक्तानि "यल्लोहितं रूपं तत्तेजसो रूपं, यच्छुक्लं तदपां, तत् कृष्णं तदन्नस्येति" । एवञ्चोक्तश्रुयुक्तलोहिता-दिरूपाणामेवेह श्रुतौ प्रत्यभिज्ञानात् अजाशब्देन तेजोऽ-बन्नरूपप्रकृतेर्ग्रहणमिति" तेन अजामित्यादिश्रुतौ अजा-

शब्देन तादृशप्रकृतिरेव बोध्यते । तथा च तादृश्यां तेजोब्रह्माभिमानिदेवतायां स्त्री । अजाशब्दोक्ता नानावर्णाः सन्त्यस्य अच् । छागे तस्य नानावर्णत्वात्तथात्वम् । छाग्यां स्त्री जातित्वेऽपि अजादित्वात् टाप् । "अजागलस्तनच्छायेति" ज्योतिषम् । द्वादशधा विभक्तस्य राशिचक्रस्य मेषरूपे प्रथमे राशौ "जीवार्किभानुजेज्यानां क्षेत्राणि क्षुरजाद्यवदृति" ज्योतिषम् तस्य मेषरूपत्वेऽपि मेषस्य अजतुल्याजाधिष्ठितरूपाभ्यां तत्त्वम् । मेषे च अजेन ब्रह्मणा दक्षयज्ञभङ्गसमये मेषरूपधारणेन पलायमानत्वात् अजाधिष्ठितरूपवत्त्वात् मेषस्य उपचारात् अजत्वम् । मात्रिकधातौ पु० । जननशून्ये गगनादौ त्रि० । आत् विष्णोर्जायते इति । चन्द्रे कामे, च पु० । "चन्द्रमा मनसो जात इति" श्रुतौ विष्णोर्मनोजन्यत्वाच्चन्द्रस्य अजत्वम् ॥ कामस्य वासुदेवात् रुक्मिण्यां जातत्वं भागवते प्रसिद्धम् दशरथपितरि रघुराजपुत्रे रामचन्द्रस्य पितामहे सूर्यवंश्ये नृपभेदे च । तस्याजत्वञ्च अजरूपब्रह्मणो मङ्कुर्नाजातत्वात् यथोक्तं रघौ "ब्राह्मेण मङ्कुर्नाम तस्य देवी कुमारकल्पं सुषुवे कुमारम् । अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजंचकारेति" तच्चरितञ्च तत्रैव पञ्चमाद्यष्टमसर्गान्ते द्रष्टव्यम् । छागतुल्याकारत्वात् औषधिविशेषे स्त्री । तल्लक्षणं "अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी । अजा महौषधी श्वेता शङ्खकुन्देन्दुपाण्डरेति" वैद्यकम् । ऋषिभेदे पु० । गर्गा० यञ् । आज्यः तदपत्ये । बह्वृषु लुक् । अजाः । ब्रह्मा० फक् । आजायनः तद्गोत्रापत्ये । उपमानतया पूर्वनिर्देशे तदन्तपादस्य नान्त्यलोपः । अजपादः स्त्रियान्तु कुम्भ्यादौ० ङीप् अन्त्यलोपः पदादेशश्च । अजपदीति भेदः । एकादशरुद्रमध्ये प्रथमे रुद्रे पु० । तद्विवरणम् अजैकपादशब्दे दृश्यम् ।

अजकर्ण पु० अजस्य कर्ण इव पर्णं यस्य । छागतुल्यलम्बायमानपत्रयुक्ते (साल) इति ख्याते वृक्षे मरिचवृक्षे च । कै० छागकर्णे । [कै-क । (साल) इति ख्याते वृक्षे ।

अजकर्णक पु० अजकर्ण इव कायति पत्रद्वारा प्रकाशते

अजकव अक्षी० अजो विष्णुः को ब्रह्मा तौ वाति तिपुरासुरवधद्वारानेन वा+करणे क कै० । शिवधनुषि । शिवो हि अनेनैव धनुषा तिपुरासुरस्य वधेन विष्णुं ब्रह्माणं च प्रीणितवान् इति तस्य धनुषोऽजकवत्वम् अजकौ अवतीति । अजकावमप्यत्र । "धनुश्चजगवं युग्यमजकावमजीकवमिति" शब्दार्णवः । अजकं छागं वाति प्रीणाति वा-क । (वावुद इति) ख्याते वर्वरीवृक्षे पु० । तद्वृक्षणे तस्य प्रीत्याधिक्यात्तथात्वम् ।

अजका स्त्री अजस्य विकारः अवयवः गलस्तनः पुरीषं वा कन् । अजागलस्थे स्तनाकारे मांसखण्डे, तत्पुरीषे च ।

अजकाजात पु०ष्ठ०त० । अजकेव जातः । "अजापुरीषप्रतिमो रजावान् सलोहितो लोहितपिच्छिलास्रः । विदार्य कृष्णं प्रचयोऽभ्युपैति तं चाजकाजातमिति व्यवस्येदिति" वैद्यकोक्ते रोगभेदे ।

अजकाव न० अजका अजागलस्तनइव वाति प्रकाशते वा-क । अजागलस्तनाकारकाण्डावयवयुक्ते वैजयन्तीयपात्रभेदे, "अजकावं दुर्ग्रहीकं तिरोदर्धे" इति वेदः । अजैव अजका तत्पुरीषं वा तद्वत् वाति प्रकाशते वा-क । अजकाजाताख्ये रोगभेदे पु० । शिवधनुषि न० ।

अजक्षीर न० अजायाः क्षीरं कै० षष्ठ्यलुक् । छागीस्तन्यदुग्धे "अजक्षीरेण पाचयेदिति" वैद्यकम् ।

अजग न० अजं विष्णुं गच्छति शरत्वेन गम-ड । शिवधनुषि । अजेन ब्रह्मणा गम्यते गीयते वा कर्म्मणि गम-ड-गै-क वा । विष्णौ पु० । अजेन गच्छति, अजं छागंयन्त्राकृत्येव वा गच्छति गम-ड । वह्नौ पु० । प्रज्ञा० स्वार्थे अण् आजगमपि शिवधनुषि "स्थाणोर्धनुष्याजगमित्यमरभाष्ये ।

अजगन्धा स्त्री अजस्य गन्ध इव गन्धोऽस्याः । (वनजोयान) इति ख्यातायां वनयामान्याम् अजमोदायाम् ।

अजगन्धिका स्त्री अजस्य गन्ध इव गन्धो यस्याः ब० अप् । कापि अत इत्त्वम्, अजस्य गन्ध इव गन्धः अस्त्यस्य ठन् वा । (वावुद इति) प्रसिद्धे वर्वरीशाके ।

अजगन्धिनी स्त्री अजस्य मेषस्य गन्धो लेशः एकदेशः यदवयवमिति यावत् सोऽस्याः फलाकारेणास्तीति अजगन्ध+इनि ङीप् । (गाडरशिङ्गा) इति प्रसिद्धे अजशृङ्गीवृक्षे ।

अजगर पु० अजं छागं गिरति गिलति गॄ-अच् । हृहत्सर्पे । अजगरं अगरत्वयापात् हृहत्सर्पभावापन्नं मनुष्यभक्षितं क्षतो मन्थः अण् । आजगरम् अजगरकथायाम् न० । तत्र वनपर्व्वणि आजगरोपाख्यानरूपम् ।

अजगव पु० अजगो विष्णुः शरत्वेन त्रिपुरासुरवधकालेऽस्यास्ति अजग+अस्त्यर्थे व । शिवधनुषि "शिवोऽप्यजगवं चापं विधुन्वन् तरसा दधे" इति पुरा० । [शिवधनुषि ।

अजगाव पु० अजगं विष्णुमवति अव-अण् उप० स० ।

अजघन्य त्रि० न जघन्यः अधमः न० त० । अधमभिन्ने

भेदे च। "तृष्णा च द्वादशीविष्णुरजघन्योजघन्यज" इति भार०।

अजजीविक त्रि० अजएव क्रयविक्रयादिभ्यां पालनादिना वा जीविका जीवनोपायोऽस्य। छागक्रयविक्रयादिना जीविकार्जनात्।

अजटा स्त्री नास्ति जटा शिफा यस्याः। (भुंइआमला) इति प्रसिद्धे शिफारहिते वृक्षभेदे। गुण०। अजडाभ्यत्र

अजडा स्त्री अजडयति स्वर्गमात्रादङ्गमर्दनार्थं चालयति अजड+णिच्-ततः अच्। (आलुकगोति) प्रसिद्धे वृक्षे-जडरहिते जाग्रारोधिचाङ्गुल्यादि त्रि०।

अजथ्या स्त्री अजानां समूहः अज+ष्यञ् स्त्रीत्वात् टाप्। अजसमूहे। तद्वत्त्राणवर्णत्वात् स्वर्णयूथिकायाञ्च।

अजदण्डी स्त्री अजस्य ब्रह्मणोदण्डोऽग्रः ६ब० गौरा० ङीष्। ब्रह्मदण्डीवृक्षे ब्रह्मणो यज्ञार्थदण्डस्य तदीयकाष्ठेन करणात्तथात्वम्।

अजदेवता पु० ईत०। छागाधिदेवे वह्नौ "रौद्री धेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते" इति शु० विष्णुध०।

अजनन स्त्री न+जन-आक्रोशे अनि। आक्रुश्यमाने जन्माभावे। "तस्माज्जननिरेवास्तु जननीत्येवकारिणीति" माघः। वा ङीष् अजननीत्यत्र। अर्थाभावे अव्ययी०। जनन्याअभावे अव्य०।

अजन्मन् पु० नास्ति जन्म यत्र। जन्मनिवृत्तौ मोक्षे "तस्मात् सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मतीर्" रिति रघुः। ईत०। जन्मरहिते त्रि०।

अजन्य स्त्री लौकिकैर्हेतुभिर्न जन्यते जन-णिच्-यत् न०त०। शुभाशुभरूपके दैवकृते भूकम्पादावुत्पाते। जन्यभिन्ने त्रि०।

अजप पु० अजन्तं जपति निन्दार्थे मध्य, जप-अच्। कुपाठको अजं पाति रक्षति पा-क ईत०। छागपालके त्रि०।

अजपति पु० ईत०। छागश्रेष्ठे, मेषराशिपतौ मङ्गले च।

अजपथ पु० अजस्य तच्चरणयोग्यः पन्थाः अजेन ब्रह्मणा निर्मितः पन्था वा अप्समा०। छागचरणयोग्यपथे गगनस्थे पथाकारे सेतौ च (यमनाला) छायापथे।

अजपथ्य त्रि० अजपथ इव देवपथा० इवार्थे यत्। सङ्कीर्णपथे गगनसेतुतुल्ये च। [रुद्रभेदे।

अजपद पु० अजस्येव पदं चरणोऽस्य। अजैकपाद्नामके

अजपा स्त्री प्रयत्नेन न जप्या अप्रयत्नोच्चारितत्वात् जप-कर्मणि अच्। श्वासप्रश्वासयोः बहिर्गमनागमनाभ्याम् अक्षरनिष्पादनरूपे जपे, स च हंसः, सोऽहमित्याकारश्चैव, तदाकारमन्त्रे च। "उच्छ्वासैरेव निश्वासैर्हंस इत्यक्षरद्वयम् तस्मात् प्राणश्च हंसाख्य आत्माकारेण संस्थितः। नाभेरुच्छ्वास निश्वासात् हृदयाग्ने व्यवस्थितः। षष्टिश्वासै र्भवेत् प्राणः षट् प्राणा नाडिका मता। षष्टिर्नाड्यस्त्वहोरात्रम् जपसंख्याक्रमोमतः। एकविंशतिसाहस्रं षट्शताधिकमीश्वरि! । जपति प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्। विना जपेन देवेशि! जपो भवति मन्त्रिणः। अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी" तन्त्रम्।

अजपाद पु० अजस्य पाद इव पादोऽस्य हस्वा० न अन्याकारलोपः। रुद्रभेदे तद्देवताकत्वात् पूर्वभाद्रपदनक्षत्रे च। पाच्छब्देन तु समासे अजपादपि उक्तार्थे पु०।

अजपाल त्रि० अजान् छागान् पालयति पा+णिच्-अण् ईत०। छागपालके।

अजबन्धु पु० अजस्य बन्धुरिव मूर्खत्वात्। अजतुल्यमन्दबुद्धौ। "सिताची नाम कानीना अजबन्धुः पिता तवेति"।

अजभक्ष पु० अजैर्भक्ष्यतेऽसौ भक्ष-कर्मणि घञ् ईत०। (वाबुइ इति) प्रसिद्धे वर्वरीवृक्षे तत्पत्रं हि अजैरतिप्रीतितो भक्ष्यते।

अजमार पु० अजं मारयति विक्रयार्थं मृ-णिच्-अण् उप०। (कषाइ) इति अजमांसविक्रयोपजीवे, तत्प्रधानदेशे च। भवादौ कुर्मा० सक। आजमार्थ्यस्तद्भवादौ त्रि०।

अजमीढ पु० अजेमीढः यज्ञे सिक्तः यत्र ब०। (आजमीर) प्रसिद्धे देशे। राजनि अण्। आजमीढः तद्देशाधिपे प्रसिद्धतया युधिष्ठिरे।

अजमुख पु० अजस्य मेषस्य मुखमेव मुखत्वेन कल्पितमस्य। दक्षे प्रजापतौ, तस्य हि शिवद्वेषे मुखेन शिवनिन्दाकरणात् दक्षयज्ञे शिवाज्ञया वीरभद्रेण तस्योत्पाटने कृते पश्चात् शिवप्रसादने पुनस्तदुत्पादनाय वीरभद्रे नियोजिते अजमुखेनैव तन्मुखं कल्पितं तच्च काशीखण्डे विस्तृतं यथा। "वीरभद्रोऽपि तत् सर्वं सर्वाज्ञां प्रतिपद्य च। विना दक्षस्य वदनं यथापूर्वमकल्पयत्। ईश्वरं ये हि निन्दन्ति ते मूकाः पशवो ध्रुवम् ततो मेषमुखं दक्षं वीरभद्रोऽव्यकल्पयदिति"।

अजमोदा स्त्री अजस्य मोद इव मोदो गन्धो यस्याः अजं मोदयति आनन्दयति मोदि-अण् वा। अजगन्धवत्यां, वनयमान्याम् यमानीभावे च।

अजम्भ पु० नास्ति जम्भो दन्तोऽस्य ब०। भेके सूर्ये च। दन्तशून्ये त्रि०। अजातदन्ते अवस्थाभेदे च।

अजय पु० वीरभूमिनगरसन्निधाने (अजय) इति नामके नद-विशेषे इति कल्पद्रुमः। तन्मूलं सृग्यं संस्कृतशास्त्रे तन्न दृश्य कुत्राप्यनुल्लेखात्। अजेन छागेन याति या-क ३त०। छागवाहने अग्नौ पु०। जि-अच् न०त०। जयाभावे "लाभालाभौ जया जयाविति" गीता। ब०। जयशून्ये त्रि०। अव्ययी०। जयाभावे अव्य०। नास्ति जयो यादृक्त्वेनास्याम्। (सिद्धि, भाङ्ग) इति च प्रसिद्धनायिकायाम् विजयायाम् स्त्री।

अजय्य त्रि० जि-शक्यार्थे यत् न०त०। जेतुमशक्ये दुर्जये शत्रौ मर्षे च। "दैवैरजय्यान् दितिजान् विजिग्ये" इति भार०। "तत्राजय्यं जिगाय तान्" इति सुश्रु०।

अजरा त्रि० नास्ति जरा ऽस्याः। (घृतकुमारी) इति प्रसिद्धे वृक्षे तस्य जराभावात्तत्त्वम्। अव्ययीभावे अच् समा० अजरसम् जराभावे अव्य०। नास्ति जरा यस्य, देवे। तेषां षड्भावविकारमध्ये जायतेऽस्ति वर्द्धते इति तिसृणामेव दृशानां सद्भावात् तदुत्तरवर्त्तिनीनां "विपरिणमते अपक्षीयते नश्यतीति" तिसृणामभावादजरत्वम्। जराशून्ये त्रि०। "अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेदिति" नीति०। ब्राह्मणजातौ स्त्री। "सा सत्या ऽसाऽजरामरेति पुरा०। न जीर्यति क्षीयते जॄ-अच् न० त०। परब्रह्मणि न०। वृक्षदारकनामवृक्षभेदे पु०। गृहगोधिकायाम् स्त्री।

अजर्य्य न० न जीर्यति न+जॄ-कर्त्तरि यत्। सौहार्दे "तेन सङ्गतमर्य्येण रामाजर्यं कुरु द्रुतमिति" भट्टिः।

अजलक्षन न० अज इव लक्ष्यते दृश्यते कृष्णवर्णत्वात् कर्म्मणि ल्युट्। स्रोतोऽञ्जने।

अजलोमन् पु० अजस्य लोमेव लोम (मञ्जरी) यस्य ब०। (भूकदम्बे) इति ख्याते अजलोमवन्मञ्जरीविशिष्टे वृक्षभेदे। वा ङाप् वा ङीप् च। अजलोमा-अजलोमी चेत्यत्र स्त्री। [जविनीभिर्विटस्थन्" इति वेदः।

अजवस् पु० जु-असुन् न०त०। वेगशून्ये। "अजवसो

अजवसि स्त्री अजस्य वस्तिरिव वस्तिरस्य। वृक्षभेदे। गर्गा० अपत्यार्थे ढक्। आजवसेयः तदपत्ये पु० स्त्री। स्त्रियाम् आजवसेयी। यस्कादिपाठात् बहुषु लुकि। अजवसयः तदपत्येषु।

अजवाह पु० अजं वाहयति यत्र आधारे घञ् वैत०। देशभेदे। कच्छादि० भवार्थे अण्। आजवाहः तद्देश जातादौ त्रि०।

अजवीथी स्त्री अजेन ब्रह्मणा निर्म्मिता वीथी पदं या०त०। गगनसेतुरूपे (यमनाला) इति ख्याते छायापथे। यामारभ्य अगस्त्यस्थानपर्य्यन्तं पितृयानपथः। "पितृयानोऽजवीथ्यास्तु यदगस्त्यस्य चान्तरमिति" पुरा०।

अजशृङ्गी स्त्री अजस्य मेषस्य शृङ्गमिव फलमस्याः ब०। (गाड़लशिङ्गा) इति प्रसिद्धे मेषशृङ्गतुल्यफलवत्यां मेषशृङ्ग्याम्।

अजसुन्द न० अजस्य तुन्दमिव तुन्दमस्मिन् तन्नगरवासिनामित्यर्थात् सुट्। नगरभेदे। "अजसुन्दं नाम नगरमिति" सि०कौ०।

अजस्र न० न+जस र। सन्तते विच्छेदरहिते। तथाभूतकालस्थायिनि वस्तुमात्रे त्रि०। "अजस्रमाश्रावितयज्ञकीशुखेति" माघः "अजस्रदीक्षाप्रयतस्य मन्त्रैरिति" रघुः।

अजहत्स्वार्था स्त्री न जहत् स्वार्थौ यस्याम् हा-शतृ न०ब०। स्वार्थापरित्यागेन परार्थावबोधिकायां लक्षणायाम्। यथा श्वेतो धावतीत्यादौ श्वेतगुणापरित्यागेन तद्वति लक्षणा। "जहत्स्वार्थाजहत्स्वार्थे हे वृत्ती तु पुनस्त्रिधा" इति हरिः।

अजहल्लिङ्ग पु० न जहत् लिङ्गं यस्य हा-शतृ न०ब०। नियतलिङ्गके विशेष्यस्यान्यलिङ्गकत्वेऽपि स्वलिङ्गात्यागेन स्वलिङ्गपरे विशेषणशब्दे। तथा चान्यत्र विशेषणस्य विशेष्यानुसारिलिङ्गत्वनियमेऽपि अस्य न तथा नियमः। यथा वेदः श्रुतिर्वा प्रमाणम्। [कर्णाति] ख्याते वृक्षे।

अजहा स्त्री न जहाति यूकाम्। हा-घ न०त०। (आल्-

अजागर पु० जागरयति जागरः न जागरो यस्मात् ब०। सेवनेन निद्राराहित्यकारके "यदपेक्षयाऽन्यस्मिन् जागरयकर्त्तृत्वं नास्ति" तादृशे (भीमराज) इति ख्याते वृक्षराजे। "वृक्षराजः सुजागर" इति रभसवाक्यात् तस्यात्यन्तनिद्राराहित्यकारित्वम्।

अजाजि(जी) स्त्री अजेन छागेन जीयते गन्धोत्कटत्वात् त्यज्यते अज-इन् वीभावाभावः ङीत०। सर्वभक्ष्येष्वपि छागेन गन्धोत्कटतया त्यज्यमाने, (जीरा) इति प्रसिद्धे जीरके वृक्षे। काकोदुम्बरिकावृक्षे च (मेआरा)॥

अजाजीव पु० अजेन तद्रक्षणपोषणादिना तत्क्रयविक्रयादिना वा आजीवति आ+जीव-अच् ३त०। छाग पालके तत्क्रयविक्रयाभ्यामाजीविनि च।

अजातकक्षुद् पु० न जातं कक्षुदसंस्कृतं यस्य न-ब० कक्षुदशब्दस्यान्यादारलोपः। अपूर्णकक्षादि अल्पवयस्के गवादिवत्से।

अजातदन्त त्रि० न जातो दन्तोऽस्य, यस्मिन् वयसि वा। दन्तजननशून्ये, अवस्थाभेदे च। "अजातदन्ता ये केचिद् ये च गर्भे प्रपीड़िता" इति वायुपुरा०। "अजातदन्तमरणे पितोरेकाहमिष्यते" इति शु० कूर्मपुरा०। तत्कालश्च दन्तां वत्सास्याभ्यन्तरमिति शुद्धितत्त्वे सपद्यं निरूपितम्। पश्चादीनान्तु प्रधानदन्तोत्पत्त्यभावे एवाजातदन्तत्वव्यवहारः (आदाँता) इत्यादि लोके प्रसिद्धिः। स च प्रायेण द्विवर्षीयसरकालपर्य्यन्तः।

अजातपक्ष त्रि० न जातौ उड्डयनसामर्थ्ययुक्तौ पक्षावस्य। अनुद्भिन्नपक्षके पक्षिणि। "अजातपक्षाः शकुना इवाबभुरिति भार०।

अजातशत्रु पु० जातस्य जन्तुमात्रस्य न शत्रुः अश्राद्धभोजीत्यादिवत् नञो व्यवहितेन शत्रुशब्देनान्वयात् असमर्थसमासः, न जातः शत्रुरस्य वा। युधिष्ठिरे राजनि। "न ह्येहि यज्ञमनसस्त्वमजातशत्रुः, इति" वेणी०। एवमजातारिरपि तत्रैव। "हन्त जातमजातारेः प्रथमेन त्वयारिणेति" भाषः। [शून्ये, न्यायोक्ते-जात्यादौ, नित्ये च त्रि०।

अजाति स्त्री जन-क्तिन् न०त०। अनुत्पत्तौ। ब०। जाति-

अजादनी स्त्री अजैस्तृप्त्याद्यर्थैरसौ अन्येन दुःखसाध्यत्वेऽपि अजै-राद्यते इति अद-कर्म्मणि ल्युट् ई०त०। दुरालभा इति (विचिति) इति च प्रसिद्धे स्वयंन दुःखदायके वृक्षभेदे।

अजादि पु० ई०त०। ङीष्बाधकटाबनिमित्ते पाणिन्युक्ते शब्दसमूहे स च गणः। एडका, कोकिला, चटका, अश्वा मूषिका, बाला, क्रोड़ा, वत्सा, पाका, मन्दा विधाता, पूर्व्वापड़्क्षा, अपरापड़्क्षा (सद्यस्त्राजिनयणपिण्डेभ्यः फलात्)। (सद्यश्काण्डप्रान्तयतैकेभ्यः पुष्पात्)। (मूलात्रजः) (शूद्रा यामहत्-पूर्व्वा जातिः) ज्येष्ठा कनिष्ठा मध्यमा (डुंयोगेऽपि) क्रुञ्चा उष्णिक्हा देवविशा दंष्ट्रा। [जायारहिते।

अजानि पु० नास्ति जाया यस्य ब० जायाया निङादेशः।

अजानिक त्रि० अजेन तद्विक्रयपालनादिना आनो जीवनम् अस्यस्य ठन्। अजाजीविनि। तस्य कर्म्म भावो वा युरोहिता० यक्। आजानिक्यम् तत्कर्म्मणि तद्भावे च न०।

अजानेय पु० अजेऽपि विक्षेपेऽपि आनेयो यथास्थानं प्रापणीय आरोही येन अज-विक्षेपे अप् वीभावाभावः आ+नी-कर्म्मणि यत् ततः ३त०। अङ्कुशशस्त्रप्रहारप्रतिरोधेऽपि निर्भयेन यथास्थानमारोहिणः प्रापके अश्वे, उत्तमाश्वे च निर्भये त्रि०।

अजान्त्री स्त्री अजस्यान्त्रमिव अन्त्रं तदाकारवती मञ्जरी अस्याः गौ० ङीष्। नीलवृक्षायाम् (नीलवोना)।

अजापक्व न० "छागयकृद्रसमत्स्यक्षीरैर्दध्ना च साधितं सर्पिः। सञ्चारं यच्छ्वहरं कासश्वासोपशान्तये परमिति" चक्रदत्तोक्ते घृतभेदे न०। [उप०। अजपालके, तेनाजीवके च।

अजापालक त्रि० अजान् आपालयति आ+पा-णिच् ण्वुल्

अजि त्रि० अजति अज-इन् व्यभावः। गतिशीले। पदाजिः। भावे इन्। गतौ, क्षेपे च स्त्रियां वा ङीप्।

अजित त्रि० न०त०। जितभिन्ने पराजितभिन्ने। जिधातोर्द्विकर्म्मकत्वात् अनिर्जितयत्नौ, अपराजितदेशादौ चास्य प्रवृत्तिः एकस्य कर्म्मणोऽविवक्षायामन्यस्य विवक्षायां तत्रैव कर्म्मणि क्तः। भूरिप्रयोगस्तु अनिर्ज्जितयत्नावेव तथा च "गौणे कर्म्मणि दुहादेरित्युक्तेः गौणकर्म्मण्येवाभिधाननियमात् तस्यैव जयकर्म्मतायां क्तेनाभिधातुं योग्यत्वम्। "न च तेऽस्यजितं किञ्चिदिति पुरा०, नास्येषामजितो देश" इत्यादौ गौणकर्म्मणोऽविवक्षयैव जयप्राप्य देशादौ जितशब्दप्रयोगात् ततोगञ्समास इति भेदः। रागादिभिर्जितत्वाभावात् शिवे, विष्णौ, बुद्धे च पु०।

अजिन न० अजति क्षिपति रजआदि, आवरणेन अज-इनच् न व्यादेयः। चर्म्मणि, चर्म्मोद्भतत्वादेव रजआदीनां न देहप्रवेश इत्यतस्तर्म्मणोरजोविक्षेपसाधनत्वात्तथात्वम्। "चेलाजिनकुशोत्तरमिति" स्मृतिः। "ऐणेनाजिनेन ब्राह्मणमिति" शतपथम्। "गजाजिनं शोणितबिन्दुवर्षि चेति" "अथाजिनाषाढ़धर इति" च कुमा०। अदूरभवादार्थे छण्या० छण्। आजिनीयः तददूरभवादौ त्रि०।

अजिनपत्रा(त्री) (त्रिका) स्त्री अजिनं चर्मैव सुश्लिष्टं पत्रं पक्षो यस्याः ब०। (चामचिका) इति प्रसिद्धे पक्षिभेदे गौ० ङीष् (त्री) तत्रार्थे। ततः स्वार्थे के ह्रस्वे टापि-पत्रिकापि तत्रार्थे।

अजिनफला स्त्री अजिनं चर्मविकारत्वात् भस्त्रा इव फलं यस्याः अजिनपूर्व्वकत्वेन जातिलक्षणं ङीषं बाधित्वा अजा० टाप्। (टेपारी) इति प्रसिद्धे, भस्त्राकारफले वृक्षभेदे।

अजिर न० अज-किरन् वीभावाभावः। (उठान) इति ख्याते चत्वरे। शीघ्रगन्तरि त्रि०। "श्येना अजिरा इति" ता० ब्रा० "अजिराः क्षिप्रगमनशीला इति" भाष्यम् अत एव क्षिप्रनामसु निरुक्ते अजिरमिति पठितम् शीघ्रवेगव-

त्वात् नद्यां स्त्री । निरुक्ते च अजिरेति नदीनामसु पठितम् ऋषिभेदे पु० तदपत्यम् युवा० ढक् । आजिरेयः तदपत्ये पु० स्त्री । उत्करा० छ । अजिरीयः तत्सम्बन्धिनि त्रि० ।

अजिरादि ब० पाणिनिना संज्ञायां मत्वपि दीर्घविधौ पर्य्युदस्ते शब्दसमूहे सच गणः अजिर, खदिर, पुलिन, हंस, कारण्डव, चक्रवाक इति । अजिरवती । तद्भिन्ने तु अमरावतीति ।

अजिह्म त्रि० हा-मन् द्विलोपौ ततः न० त० । सरले "अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकामिति" पुरा० ।

अजिह्मग पु० अजिह्मं सरलं गच्छति गम-ड । बाणे । "वेगवद्भिरजिह्मगैरिति" । सरलगामिनि त्रि० । "अजेहिंसमजिह्मग" इति ।

अजिह्व पु० जि-वनु ङित् च जिह्वा रसना सा नास्ति यस्य ब० । भेके । तेषां जिह्वाशून्यत्वमुक्तं भारते आदि० । "उवाच देवान् मण्डूको रसातलतलोत्थितः । रसातलतले देवा! वसत्यग्निरिति प्रभो!। सन्तापादिह सम्प्राप्तः पावक प्रभवादहम् । स संतप्तो जले देवा! भगवान् हव्यवाहनः । अपः सं स्तभ्य तेजोभिस्तेन सन्तापिता वयम् । तस्य दर्शनमिष्टं वो यदि देवा! विभावसोः । तत्तेनमधिगच्छध्वं कार्य्यं वो यदि वह्निना । गमयितां साधयिष्यामो वयं ह्यग्निभयात्सुराः!। एतावदुक्ता मण्डूकस्त्वरितो जलमाविशत् । ऊतायनस्तु बुबुधे मण्डूकस्य च मैथुनम् । शशाप स तमासाद्य न रसान् वेत्स्यसीति वै । तं वै संयुज्य शापेन मण्डूकं त्वरितो ययौ । अन्यत्र वासाय विभुर्न चात्मानमदर्शयत् । देवास्त्वनुपदञ्चक्रुर्मण्डूकानां भृगूत्तम!। यत्तच्छृणु महाबाहो! गदतो मम सर्वशः । अग्नियापाद्जिह्वापि रसज्ञानवहिष्कृताः । सरस्वतीं बहुविधां ययुक्षोभयिष्यथ । विषवासगतांश्चैव निराहारानचेतसः । शतान्यपि संयुक्तान् भूमिः सन्धारयिष्यति । तमोघनावासमपि वै निशायां विचरिष्यथ इति" । जिह्वाशून्ये त्रि० ।

अजीकव अज्यते शरक्षेपणेन कं ब्रह्माणं वाति प्रीणाति वा-क । शिवधनुषि । [आजीगर्त्तसदपत्ये पुंस्त्री ।

अजीगर्त्त अज्यै गमनाय गर्त्तमस्य । सर्पे । बाह्वा० इञ् ।

अजीर्ण न० जॄ-भावे क्त न० त० । जठराग्निमान्द्येन भुक्ताद्यपाके, न० ब० । रोगभेदे । "भवेदजीर्णं प्रति यस्य भुक्तं स्निग्धस्य जन्तोर्विगतोऽन्नकाले । मूर्द्धं सशुद्धौ मलवायुशान्तौ संभाव्य भुञ्जीत हितं हि पथ्यमिति" चक्र० । "अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदमिति" वैद्यकम् । कर्त्तरि क्त जीर्णोऽन्नः । तद्भिन्ने त्रि० ।

अजीव त्रि० नास्ति जीवो जीवनं वा यस्य । जीवरहिते घटादौ, मृते, जन्तुमात्रे च ।

अजीवनि स्त्री न+जीव-अनि । आक्रुश्यमाने जीवनाभावे निन्दितजीवने च "अजीवनिस्त्व भूयात्" इति सुश्रु० । "तस्य भूयादजीवनिरिति" ।

अजुर त्रि० अज-कुरच् अभावः । वेगशीले बलवति "अवक्रक्षिणं वृषभं यथाजुरमिति" वेदः ।

अजेय त्रि० जेतुमशक्ये जि-यत् न० त० । जयायोग्ये । अजेयाख्ये वृते न० । "पिवेद्वृतमजेयाख्यमिति" वैद्यकम् ।

अजैकपाद (द्) पु० अजस्य छागस्य एकः पाद इव पादो यस्य उपमा० ब० न पादस्यान्याकारलोपः । रुद्रविशेषे, तद्देवताके पूर्व्वभाद्रपदनक्षत्रे च । माघशब्देन समासे अजैकपादपि तत्रार्थे । "वीरभद्रश्च १ धनुश्च २ गिरीशश्च ३ महायशाः । "अजैकपाद (४) हिर्बुध्नः ५ पिनाकी ७ चापराजितः ७ । भुवनाधीश्वरश्चैव ८ कपाली च ९ विराजते ! स्थाणु १० र्भगश्च ११ भगवान् रुद्राख्येकादश स्मृता" इत्युक्तेषु एकादशसु रुद्रेषु मध्ये चतुर्थे रुद्रे । अन्यत्र तु अजैकपादहिर्बुध्न्य २ विरूपाक्षश्च ३ रैवतः ४ । हरश्च ५ बहुरूपश्च ६ त्र्यम्बकश्च ७ सुरेश्वरः ८ । रुद्रा एकादश प्रोक्ता जयन्त १० श्चापराजितः ११ इत्येवं तद्भेदाः । एतेषामेव ध्यानादि वक्ष्यते । तेन अज इति नामान्तरं एकपादिति च नामान्तरमिति द्रष्टव्यम् । "तेन अजनामा महारुद्रम्" इत्यादि अजस्य ध्यानम् । "एकपादाभिधो विप्रेत्यादि" एकपादस्य ध्यानमिति वक्ष्यते

अज्जूका स्त्री अर्जयति या सा अर्ज्ज-अक, पृ० रकारस्य जत्वम् । वेश्यायाम् । नाद्य एवास्य प्रयोगः साध्यत्व ।

अज्झटा स्त्री अजति दीप्तं क्षिपति अज्-क्विप् झटति संहन्यते झट-अच् ततः कर्म्म० पृ० ह्रस्वदीर्घाभावाभावः । (भंड आमला) इति प्रसिद्धे वृक्षे ।

अज्झाल न० अञ्चति क्विप् अञ् कृन्तति विशिनष्टि कृत-अच् कर्म्म० पृ० न ह्रस्वम् । चर्म्मादिमये प्रतियोधायुधभेदे (ढाल) इति ख्याते फलके ।

अज्ञ त्रि० न जानाति ज्ञा-क न० त० । ज्ञानशून्ये चैतन्यशून्ये, विशेषज्ञानशून्ये, मूर्खे, वेदान्तिमतसिद्धाज्ञानरूपपदार्थवति च । तत्रि अज्ञस्य इत्यनुभवस्य अज्ञानविषयत्वं क्रियते अज्ञानस्य न ज्ञानाभावः किन्तु पदार्थान्तरं

तज्ज्ञानशब्दे विस्तरेण वक्ष्यते । प्राज्ञः प्रकर्षेणाज्ञः सुषु प्तावस्थायां जीवे तदानीं विशेषज्ञानाभावात् प्राज्ञत्वम् । अचेतने, जडे, "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्येति" सांख्यका० । अल्पज्ञे, किञ्चिज्ज्ञे च ।

अज्ञात त्रि० न ज्ञातः । ज्ञानाविषयीभूते पदार्थे । "अज्ञातकुलशीलस्य वासोदेयो न कस्यचित्" इति क्षितोप० ।

अज्ञान न० न ज्ञानम् । ज्ञानाभावे, ज्ञानविरोधिनि तदभावे "तत्वाज्ञानं धिया नश्येदिति" वेदान्तिमतसिद्धे पदार्थान्तरे च "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव" इति गीता । "अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकयेति, गुरुनुतिः । अज्ञानञ्च ज्ञानाभाव इति नैयायिकाः । पदार्थान्तरमिति वेदान्तिनः । तथाहि अहं न जानामि अकृतमस्य इत्यादिविधिष्टानुभवः सार्वलौकिकः स च ज्ञानाभावविषय इति नैयायिकैर्यदुक्तं तन्न युक्तं विधिष्टबुद्धौ विशेषण ज्ञानस्य हेतुतायाः सर्ववादिसिद्धतया आत्मधर्मिकज्ञानाभावप्रकारकज्ञाने जनयितव्ये तद्विधिष्टज्ञानाभावघटकज्ञानरूपस्य विशेषणस्य ज्ञानं पूर्व्वमपेक्षितम् आत्मनि तादृशे ज्ञाने च तदानीं सति कथङ्कारं ज्ञानाभावविधिष्टबुद्धिः स्यात् यस्मिन् धर्म्मिणि ज्ञानमस्ति तत्र ज्ञानाभावज्ञानस्य बाधितत्वमेव अभावबुद्धेः प्रतियोगिज्ञानरोधितायाः सर्वसम्मतत्वात् । किञ्च ज्ञानाभावः किं ज्ञानसामान्याभाव उत तत्प्रागभावः अथ तद्ध्वंसो वा तत्र विषयो भवति, नाद्यः पूर्व्वोक्तयुक्त्या ज्ञानाभावानुभवासम्भवेन प्रत्याख्यातत्वात् । न द्वितीयः प्रागभावस्य सामान्यधर्म्मावच्छिन्नप्रतियोगिताकतया तत्तज्ज्ञानप्रागभावस्यैव विषयता वाच्या सा च न सम्भवति सामान्याकारेण ज्ञानाभावस्यैव प्रतीयमानत्वात् अन्यथा ज्ञानवत्यपि पुरुषे तादृशप्रतीतिः स्यात् अपि अजनिष्यमाणतत्तज्ज्ञानप्रागभावानामात्मनि सत्त्वेऽपि तेषाञ्च तत्तज्ज्ञानप्रतियोगिकत्वेन ज्ञानसामान्यविशिष्टबुद्धौ विरोधितासम्भवात् । नान्त्यः प्रागभावरीत्या तस्यापि प्रत्याख्यातत्वात् । अतस्तादृशानुभवस्य विषयरक्षार्थं ज्ञानाभावातिरिक्तमज्ञानं कल्पनीयम् । तच्चानुमानेनैव । अनुमानञ्चेत्थम् । प्रमेयविवरणोपन्यासे । विवादाध्यासितं ज्ञानं स्वप्रागभावातिरिक्तस्वविषयावरकसविषयकावस्तुपूर्व्वकं भवितुमर्हति प्रकाशत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । यथा अन्धकारे प्रथमोत्पन्ना प्रदीपप्रभा स्वविषयस्य घटादेरावरकतमोरूपपदार्थपूर्व्विका एवं ज्ञानमपि प्रकाशत्वसाम्यात् स्वविषयस्य घटादेरावरकं कञ्चित् पदार्थं समानविषयकं नियतम् पूर्व्वमपेक्षते । उत्पन्ने च ज्ञाने प्रदीप्यप्रभया तम इव तन्निवर्त्तते ज्ञानप्रागभावेन सिद्धसाधनतावारणाय स्वप्रागभावातिरिक्तेति विशेषणम् । तच्च अज्ञानं ज्ञानविरोधि सत्त्वासत्त्वाभ्यामनिर्व्वचनीयम् । तच्च शुक्तिकाद्यज्ञानं शुक्तौ रजतादिकमिव ब्रह्मणि प्रपञ्चमुत्पादयति । अतएव तद्भावरूपं भावस्यैव भावपदार्थोपादानत्वसम्भवात् । अभावस्य तु अधिकरणस्वरूपत्वाङ्गीकारात् न भावस्याभावोपादानत्वव्याघातः । तस्य भावरूपत्वेऽपि न त्रैकालिकाबाध्यत्वरूपम् सत्त्वं तत्त्वज्ञानेन बाध्यत्वात् नापि प्रातीतिकरजतादिवत्सत्त्वम् व्यवहारयोग्यत्वात् । अतः सदसद्भ्यामनिर्व्वचनीयं व्यवहारिकसत्त्ववत् यत् किञ्चित् भावरूपं पदार्थान्तरमेवाज्ञानमिति सुस्थितम् । अस्य चाज्ञानस्य द्वे शक्ती आवरणं विक्षेपश्च तत्र या कदाचित् स्वविषयमावृणोति (विषयत्वसंप्राप्त्यनर्हं करोति) सा आवरणशक्तिः या तु स्वकार्य्यबुद्धिवृत्त्या इन्द्रियादिद्वारा विषयदेशं प्राप्य विषयगतं स्वकारणनिष्ठावरणशक्तिं नाशयति सा विक्षेपशक्तिः यथोक्तं "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येत् आभासात्तु घटः स्फुरेदिति" । यथा च शुक्तिविषयाज्ञानं स्वविषयशुक्तिमात्रत्व स्वशक्त्यैव तत्र उत्पादितं रजतं विषयीकृत्य तत्तत्सावरणशक्तिं नाशयति एवं ब्रह्मविषयकाज्ञानं स्वशक्त्यैव ब्रह्मणि उत्पादितं प्रपञ्चं विषयीकृत्य तत्तदाकारबुद्धिवृत्तिरूपा विक्षेपशक्तिः तत्तदावरणशक्तिं निवारयतीति दृष्टानुसारिणीयं कल्पना । अधिकमाकरे द्रष्टव्यम् । नास्ति विधिष्टज्ञानमस्य । विधिष्टज्ञानाभाववति अत्रे त्रि० ।

अज्मन् स्त्री अजति गच्छति स्वर्गं दानेनास्या अजकारणे मनिन् न वीभावः । गवि, इति निरुक्तकारः ।

अञ्जति पु०न०अनुच-गतौ कर्त्तरि अति । वायौ, गन्तरि त्रि० ।

अञ्चल पु० अञ्चति प्राप्नोति अनुच-अलच् । वस्त्रप्रान्ते "स्त्रीणाञ्चलमिव पीनस्तनजघनायाः कुलीनायाः" इति "भ्रूवौ दृष्ट्वा पदमिह समाधेहि चेलाञ्चलेऽस्मिन्निति च उद्भटः । प्रान्तभागे "दृगञ्चलैः पश्यति कोवलं मनागिति" उद्भटः ।

अञ्चित त्रि० अनुच-क्त । पूजिते, आकुञ्चिते च । "अपि खञ्जनमञ्जनाञ्चितमिति" नैष० । "अञ्चितस्व्यपाद इति" भट्टिः । "अञ्चितः शूलपाणिरिति" पुरा० । ग्रथिते च "अङ्गैश्चिता सलरसुस्थितायां इति रघुः ।

अञ्जन न० अञ्जतेऽनेन अनुज-करणे ल्युट्। कज्जले। "अपि खञ्जनमञ्जनमञ्जनाञ्चितमिति" नैष०। "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्व्वाह्णएव कुर्व्वीतेति" स्मृतिः। "विलोचनं दक्षिणमञ्जनेन संभाव्येति" रघुः। अञ्जनविशेषाश्च सुश्रुते दर्शिता यथा

"चत्वार एते योगाः स्युरुभयोरञ्जने हिताः। कुज्जकाशोकशालाम्रप्रियङ्गुनलिनोत्पलैः॥ पुष्पैर्हरेणुकृष्णाह्वापथ्यामलकसंयुतैः। सर्पिर्मधुयुतैश्चूर्णैर्वेणुनाह्यामवस्थितैः॥ अञ्जयेद्द्वावपि भिषक् पित्तश्लेष्मविभावितौ। आम्रजम्बूद्भवं पुष्पं तद्रसेन हरेणुकाम्॥ पिष्ट्वा चौद्राज्यसंयुक्तां प्रयोज्यमथ वाञ्जनम्। नलिनोत्पलकिञ्जल्कगैरिकैर्गोशकृद्रसैः॥ गुडिकाञ्जनमेतद्वा दिनरात्रम्भयोर्हितम्। रसाञ्जनरसक्षौद्रतालीशस्वर्णगैरिकम्॥ गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये। शीतं सौवीरकं वापि पिष्ट्वाथ रस॰ भावितम्॥ कूर्म्मपित्तेन मतिमान् भावयेद्रौहितेन वा। चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये॥ काश्मरीपुष्पमधुकदार्व्वीलोध्ररसाञ्जनैः। सक्षौद्रमञ्जनन्तद्वद्वितं नेत्राभये सदा॥ स्रोतोजं सैन्धवं कृष्णां रेणुकाञ्चापि मेषयेत्। अजमूत्रेण ता वर्त्तीः क्षणदान्ध्याञ्जने हिताः॥ कालानुसारिवां कृष्णां नागरं मधुकं तथा। तार्क्षीपत्रं क्षणदे गाङ्गेयञ्च शकृद्रसे॥ कृतास्ता वर्त्तयः पिष्ट्वा क्षायाम्लुप्ताः सुखावहाः। मनःशिलाभयाव्योषबलाकालानुसारिवाः॥ सक्षौद्रा वर्त्तयः पिष्टास्त्वागवीरसमन्विताः। गोमूत्रपित्तमदिराग्निशकृद्वातीरसे पचेत्॥ क्षुद्राञ्जनं रसे चान्यद्वकृतस्त्वैफलेऽपि वा। गोमूत्राज्याश्वमलपिप्पलीक्षौद्रकट्फलम्॥ सैन्धवोपहितं क्षुद्राच्चिहितं वेणुगह्वरे। मेदोयकृद्दृतच्छागं पिप्पल्यः सैन्धवं मधु॥ रसमामलकञ्चापि पक्वं समृद्धनिधापयेत्। कोशे खदिरनिर्म्माणे तद्वत्क्षुद्राञ्जनं हितम्॥ हरेणुमगधाजास्थिमज्जैलायकृदन्वितम्। शकृद्रसेनाञ्जनं वा श्लेष्मप्रहृतदृष्टये॥ विपाच्य गोधायकृदर्द्धपाटितं सुपूरितं मागधिकाभिरग्निना। निषेवितं तत्सकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु॥ तथा यकृच्छागभवं हुताशने विपाच्य सम्यग्मगधासमन्वितम्। प्रयोजितं पूर्व्ववदाशसंशयं जयेत् क्षपान्ध्यं सकृदञ्जनक्रियाम्॥ क्षीरा यकृच्छाग्यपभक्षिते उभे प्रकल्प्य मूल्ये घृततैलसंयुतम्। ते सार्षपक्षे रसमायुतेऽञ्जनं नक्तान्ध्यमाशैव हृतः प्रयोजिते। नदीजमिश्लीकटुकान्यथाञ्जनम्मनःशिला द्वे च निशे यकृद्रसे। स चन्दनेयं गुटिकाथ वाञ्जनं प्रशस्यते यै दिवसेष्वपश्यताम्" इति॥ सौवीरे, रसाञ्जने च। अञ्जनवर्णोऽस्यास्य। अर्श॰ अच्। ज्येष्ठदिग्गजे पु० उत्तरदिग्गजयोषिति केशरियोषिति वानर्य्यां च स्त्री०। "अञ्जनागर्भसम्भूतो वायुपुत्रो महाबल इति" तन्त्रम्। भावे ल्युट्। मिश्रीकरणे, लेपने व्यक्तिकरणे मालिन्ये च न०। "निरञ्जनं दिव्यमुपैति साम्यमिति" निरवद्यं निरञ्जनमिति" च श्रुतिः। अञ्जणिच्-युच्। शब्दलक्ष्यार्थातिरिक्तार्थबोधके आलङ्कारिकोक्ते व्यञ्जनाद्वत्तिरूपे शब्दशक्तिभेदे स्त्री॰ "अन्यार्थधीकृत् व्यापृतिरञ्जनेति" काव्यप्रकाशः। तत एव भावे ल्युट् तत्तदर्थे न०।

अञ्जनकेशी स्त्री अञ्जनमिव केशो यस्याः ५त०। केशसंस्कारके हृद्वृत्तिविलासिनीनामके ग्रन्थद्वये। यत्संयोगात् केशसमूहतीव कृष्णता स्यात्।

अञ्जनशलाका स्त्री अञ्जनसाधनं शलाका। अञ्जन दानार्थं शलाकायाम् "स्नानाञ्जनशलाकयेति" स्मृतिः।

अञ्जनागिरि पु० अञ्जनवर्णो गिरिः किंशुका॰दीर्घः। नीलपर्व्वते तद्विवरणं नीलगिरिशब्दे।

अञ्जनाद्रि पु० अञ्जनमिव कृष्णः अद्रिः। नीलपर्व्वते "अञ्जनाद्रिनिभां श्यामामिति" कालीध्यानम्।

अञ्जनाधिका स्त्री अञ्जनादधिका कृष्णत्वात् ५त०। (आजनाड) इति ख्याते कीटभेदे।

अञ्जनावती स्त्री अञ्जनं विद्यतेऽस्याः अधिकक्षणवर्णत्वात् अञ्जन+मतुप् वत्वं दीर्घः। ऐरावतकोणस्थ दक्षिणस्याम्। कालाञ्जनवृक्षे पु०।

अञ्जनिका स्त्री अञ्जनवर्णोऽस्यस्याः ठन् कापि पूर्व्वीकारस्य इत्वम्। (आजनाड) इति प्रसिद्धे अञ्जनाख्ये कीटभेदे। अञ्जना स्वार्थे कन्। प्रतीकदिग्गजस्त्रियाम्। पृषोदि॰ यक्। आञ्जनिक्यम् तद्भावे न०।

अञ्जनी स्त्री अञ्जते चन्दनकुङ्कुमादिभिरसौ अनुज-कर्म्मणि ल्युट् ङीप्। कुङ्कुमाद्यनुलिप्तायाम् स्त्रियाम्। करणे ल्युट्। काटुकाख्ये, काषाञ्जनवृक्षे च। "अञ्जनीदारुकाभयस्तस्माः मैत्रावरुणः" इति याज्ञिकाः व्याख्यायां स्त्रियाञ्च।

अञ्जलि पु० अनुज-अलि। संयुतकरपुटे, "अवणाञ्जलिपुटमेयमिति वेणी०। "न्यायप्रसूनाञ्जलिरिति" उदयनः कुडवपरिमाणे च अञ्जलिपरिमितद्रव्ये च "प्रकीर्णैः पुष्पाणां हरिचरणयोरञ्जलिरयमिति" वेणी०। [आलम्बिकायाम्।

अञ्जलिका स्त्री अञ्जलिरिव कायति प्रकाशते कै-क टाप्।

अङ्क्षस् न० अनक्ति गच्छति मिश्रयति वाऽनेन अनज्-गतौ मिश्रणे च असुन्। वेगे, बले, औचित्ये च। "अङ्क्षस उपसंख्यानमिति" वार्त्तिकात् तृतीयायाः अलुक्। अङ्क्षसा-कृतम्। "अङ्क्षः सस्रुद्रमपजग्मुराप" इति वेदः।

अङ्क्षस त्रि० अनज्-असच्। सरले अवक्रे।

अङ्क्षसा अव्य० अनज-भावे अच् अङ्क्षं गतिं विलम्बं वा स्यति सो-बा०का। विलम्बात्यये, शैघ्र्ये, याथार्थ्ये च। "रसोऽङ्क्षसा यासता रज" इति वेदः।

अङ्क्षि पु० अञ्चतेऽनेन अनज-करणे इन्। तिलकादौ चिह्ने "अग्नयेऽनीकवते रोहिताक्षिरनङ्क्षानिति" य० रोहितो रक्तोऽक्षिस्तिलकोऽस्येति वेददीपः। "तस्मै दन्ताङ्क्षिवे इति" भवदेवे वेदमन्त्रः। [(ष्णा)च्। सूर्य्ये।

अङ्क्षिष्ठ(ष्णु) पु० अनक्षि स्वभावेनेति विश्वस्। अनज-इष्ठ-

अङ्क्षी स्त्री० अङ्क्षि+वा ङीप्। प्रेषणयन्त्रे, भङ्गले च।

अङ्क्षीर पु० अनज-बा० ईरन् (पेयारा) इति ख्याते वृक्षे।

अट गतौ भ्वादि० सक० पर० सेट्। अटति आटीत्। "भो वटो भिक्षामटेति" सि०कौ। परि+परितो भ्रमणे पर्य्यटन्।

अट गतौ इदित् भ्वा०आत्म०सक०सेट्। आटते आटिष्ट।

अटनि(नी) स्त्री अटति मौर्व्वीमू अट-अनि वा ङीप्। धनुरग्रे गुणारोपणस्थाने।

अटरू(रू)ष पु० अटति भ्रमति अट-अच् तं रोषति हिनस्ति रूष-क, अटैः अटङ्गिर्वा रूष्यते न युज्यते रूष-क वा। (वासक) इति ख्याते वृक्षे।

अटवि(वी) स्त्री अटन्ति चरन्ति वन्यपशवो यत्र अट-अवि वा ङीप्। वने। विन्ध्याटवीति का० विन्ध्यगिरिसन्निकृष्ट प्रसिद्धवनम्। "आन्ध्रारण्यप्रदेशेष्वटवीषु चेति" रा०।

अटा स्त्री अट-बा० अङ्। पर्य्यटने।

अटाट्या स्त्री अट-यङ्-भावे अ स्त्रीत्वात् टाप्। परि-भ्रमणे, इतस्ततो गमने च। यङ्लुकि। अटाटाट्यते।

अट्ट अतिक्रमे बधे च भ्वादि० आत्म० सक० सेट्। अट्टते। आट्टिष्ट। दोषधोऽयं तेन अट्टिटिषते आट्टिटत्। क्विपि अत्। दोषधस्य तु आटिट्टिषते अटिट्टत् क्विप् अट्।

अट्ट अनादरे चुरादि० उभय० सक० सेट्। अट्टयति ते। आटिट्टत्।

अट्ट पु० अट्टयति अनाद्रियतेऽन्यद्यत्र अट्ट-आधारे घञ्। प्रासादस्योपरिगृहे, प्राचीरोपरिस्थसैन्यगृहे, च यत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते, यस्मिन् वसतश्च अन्योत्कर्षेऽनादरः। उच्चे गृहे च त्रि०। अट्टे "अट्टमूला जनपदाः शिवमूलास्ततश्रया" इति भार०। "अट्टमन्नं गुडं विक्रेयं येषामिति" नीलकण्ठः गुडे च न०। चौमवस्त्रे प्रासादे च पु०। "सुधाधवलाट्टहासेति" काद०। "दृष्ट्वे नगरी लङ्का साट्टप्राकारतोरणेति" रामा०। गृहशब्दे प्रासादलक्षणादि वक्ष्यते।

अट्टट्ट अव्य० अट्टोऽनादरः अट्टप्रकारः अट्टस्य गुणवाचितया प्रकारे द्वित्वम् यकनुध्वादि० पररूपम्। अत्युच्चे, "अट्टट्ट हासमशिवं शिवदूती चकार हेति" चण्डी

अट्टन न० अट्ट्यतेऽनाद्रियते रिपुरनेन अट्ट-करणे ल्युट्। चक्राकारफलकास्त्रे। भावे ल्युट्। अनादरे न०।

अट्टस्थली स्त्री अट्टप्रधाना स्थली मा०त०। प्रासादप्रधाने देशभेदे धूमा० बुञ्। आट्टस्थलकः तद्देशभवे त्रि०।

अट्टहास पु० अट्टेनातिशयेन हासः हस-घञ् ३त०। उच्चहासे।

अट्टहासक पु० अट्टहास इव कायति कै-क। कुन्दवृक्षे तस्य शुभ्रपुष्पत्वात् उच्चहासतुल्यत्वम्। [उच्चहासिनि त्रि०।

अट्टहासिन् पु० अट्टमुच्चैर्हसति हस-णिनि। शिवे।

अट्टाट्ट पु० अट्टवत् न पररूपम्। अत्युच्चे सर्व्वोत्कर्षे अना-दराधिक्ये।

अट्टालक पु० अट्ट इव प्रासादवृत्तमिव अलति पर्य्याप्तो भवति अल-अच्। प्रासादोपरिस्थे गृहे। स्वार्थे कन्। तत्रार्थे "गोपुराट्टालकवतीं हर्म्यप्राकारशोभनामिति" रा०।

अट्टालिका स्त्री अट्टाल+स्वार्थे कन्। इष्टकादिनिर्म्मिते राजगृहे।

अट्टालिकाकार पु० अट्टालिकां करोति रचयति कृ-अण् उप०। (राज) प्रासादकारके "कुलटायां च शूद्रायां चित्रकारस्य वीर्य्यतः। भवेदट्टालिकाकारः पतितो जारदोषत" इत्युक्ते सङ्कीर्णजातिभेदे।

अठ गतौ भ्वादि० पर० सक० सेट्। अठति। आठीत्।

अठ गतौ इदित् आ० भ्वादि० सक० सेट्। अठते। आठिष्ट।

अड अदमे भ्वादि० पर० सक० सेट्। अडति आडीत्।

अड व्याप्तौ स्वादि० पर० अक०सेट्। वेद एवास्य प्रयोगः। अड्नोति। आडीत्।

अडु अभियोगे, समाधाने च भ्वादि०पर०सक०सेट्। अडुति। आडुीत्। दोषधोऽयम् अडिडिषति आडिडत्। क्विप् अत्। दोषधस्य तु आडिडिषति आडिडत् अट्

अण शब्दे भ्वादि० पर० अक० सेट्। अणति। आणीत्।

अण जीवने दिवा० आत्म० अक० सेट्। अण्यते आणिष्ट।

अण (न) क त्रि० अणति यथेच्छम् नदति अण-अच् ततः कुत्सायाम् क। अधमे, निन्दिते च। "पाषाणके कुत्सितैरिति पा०"। अणक कुलालः सि० कौ०। दन्त्रमध्यश्चायमित्यन्ये।

अणव्य त्रि० अणोः सूक्ष्मशस्यचीनादिकस्य भवनं क्षेत्रम् अणु+यत्। चीनकादिसस्योत्पत्तियोग्ये (सुनाभूमि) क्षेत्रे।

अणि पु० स्त्री० अणति शब्दायते अण-इन्। (आरा) इति ख्याते रथचक्राग्यस्थिते कीलके, सूच्याद्यग्रभागे च। स्त्रीत्वे वा ङीप्। अत आदेर्दीर्घतापीष्यते। तेन आणिः आणी।

अणिमन् पु० अणोर्भावः अणु+इमनिच्। सूक्ष्मत्वे सूक्ष्मपरिमाणे, ऐश्वर्यभेदे च यद्बलात् सूक्ष्मीभूय सर्व्वत्र गन्तुं शक्नोति। ऐश्वर्य्याणि च। "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्तानि। एतेषां स्वरूपाणि ऐश्वर्यपदार्थनिरूपणे वक्ष्यन्ते। "यथा केशः सहस्रधा भिन्नस्तावत्यणिम्नीति" वेदः।

अणिष्ठ त्रि० अतिशयेन अणु-इष्ठन्। अणुतरे अतिसूक्ष्मे। "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं, यन्मध्यस्तन्मासं, योऽणिष्ठस्तन्मन" इति छा० उ०।

अणीमाण्डव्य पु० अणी शूलाग्रं तच्चिह्नितः माण्डव्यः। तन्नामके मुनिभेदे। तस्य तत्प्रोतत्वकथा भार० आ० प०। "बभूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः। धृतिमान् सर्व्वधर्म्मज्ञः सत्ये तपसि च स्थितः॥ स आश्रमपदद्वारि वृक्षमूले महातपाः। ऊर्द्ध्वबाहुर्महायोगी तस्थौ मौनव्रतान्वितः॥ तस्य कालेन महता तस्मिंस्तपसि वर्त्ततः। तमाश्रमपदं प्राप्ता दस्यवो लोभ्रहारिणः॥ अनुसार्य्यमाणा बहुभी रक्षिभिर्भरतर्षभ!। ते तस्यावसथे लोभ्रं दस्यवः कुरुसत्तम!। निधाय च भयाद्गोनासस्तैवानागते वने॥ तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम्। आजगाम ततोऽपश्यंस्तमृषिं तस्करानुगाः॥ तमपृच्छंस्ततो राजंस्तथातत्त्वं तपोधनम्। कतमेन पथा याता दस्यवो द्विजसत्तम!। तेन गच्छामहे ब्रह्मन्! यथा शीघ्रतरं वयम्॥ तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः। न किञ्चिदुचनं राजन्नवोत् साध्वसाधु वा॥ ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमम्। ददृशुस्तत्र लीनांस्तांश्चौरां स्तद्द्रव्यमेव च॥ ततः श्रुत्वा समभवद्रक्षिणां तं मुनिं प्रति। संयमैनं ततो राज्ञे दस्यूंश्चैव न्यवेदयन्॥ तं राजा सह तैश्चौरैरन्वशाद्वध्यतामिति। स रक्षिभिस्तैरनीतः शूले प्रोतो महायशाः॥ ततस्ते शूल आरोप्य तं मुनिं रक्षिणस्तदा। प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ॥ शूलस्थः स तु धर्म्मात्मा कालेन महता ततः। निराहारोऽपि विप्रर्षिर्म्मरणं नाभ्यपद्यत। धारयामास च प्राणान्दृष्ट्वा सन्तापयत्। शूलाग्रे तप्यमानेन तपस्तेन महात्मना। सन्तापं परमं जग्मुर्मुनयस्तपसान्विताः॥ ते रात्रौ पक्षिणो भूत्वा सन्निपत्य तु भारत!। दर्शयन्तो यथाशक्ति तमपृच्छन् द्विजोत्तमम्॥ श्रोतुमिच्छामहे ब्रह्मन्! किं पापं कृतवानसि। येनेदृक् समनुप्राप्तः शूले दुःखभयं महत्॥ वैशम्पायन उवाच। ततः स मुनिशार्दूलस्तानुवाच तपोधनान्। दोषतः कं गमिष्यामि न हि मेऽन्योऽपराध्यति॥ तं दृष्ट्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि। न्यवेदयंस्तथा राज्ञे यथावृत्तं नराधिप!॥ श्रुत्वा च वचनं तेषां निशम्य सह बन्धुभिः। प्रसादयामास तदा शूलस्थमृषिसत्तमम्॥ राजोवाच। यन्मयापकृतं मोहादज्ञानादृषिसत्तम!। प्रसादये त्वां तत्सर्व्वं न मे त्वं क्रोद्धुमर्हसि॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः। कृतप्रसादं राजा तं ततः समवतारयत्॥ अवतार्य्य च शूलाग्रात्सूक्ष्मं निष्कर्षं ह। अग्रमुत्पाट्य निष्क्रान्तं शूलं मूले स चिच्छिदे॥ स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः। तेनातितपसा लोकान् विजिग्ये दुर्ज्जयान् परैः। अणीमाण्डव्य इति च ततो लोकेषु गीयते" इति॥

अणीयस् त्रि० अतिशयेन अणुः अणु+ईयसुन्। अणुतरे अतिसूक्ष्मे "अणोरणीयान् महतो महीयान् इति" श्रुतिः। स्त्रियां ङीप्।

अणु त्रि० अण-उन्। क्षुद्रे, सूक्ष्मपरिमाणयति, द्रव्ये, वेगे च। (त्रिना, काङ्क्षी, श्यामा) प्रभृति सूक्ष्मधान्ये पु०। "अणणुः दृश्यमांशोऽणुश्चैकादशांश" इति लीला०। अणुशब्दोहि परिमाणविशेषवाची। तत्र परिमाणञ्च चतुर्विधा स्थूलसूक्ष्मादीनि चतुष्टयस्वरूपाः "अथादेशोनेतिनेति" इत्युपक्रम्य "अस्थूलमनण्वह्रस्वमदीर्घमित्यादि" श्रुत्या चतुर्विधपरिमाणस्यैव ब्रह्मणि निषेधेन परिमाणचातुर्विध्यलाभः एतन्मूलकमेव शारीरकभाष्ये, वैशेषिकसूत्रे, न्यायकदल्याञ्च उक्तभेदमादायैव परिमाणचातुर्विध्यमुक्तम्। तत्रारम्भकद्रव्यभूयस्त्वाभूयस्त्वाभ्यां स्थूलसूक्ष्मत्वे दृष्टदीर्घत्वे तु तत्तच्छब्दे वक्ष्येते। एवञ्च सूक्ष्मपदार्थे आरम्भकाल्प-

त्वात् अणुत्वं यत्र चारम्भकद्रव्यान्तरं नास्ति स तादृगपरिमाणवत्त्वात् परमाणुरित्युच्यते। एवञ्च अणुशब्दस्य शुक्लादिशब्दवत् अणुत्वपरिमाणविशिष्टद्रव्यवाचकत्वम्। अणुत्वञ्च सूक्ष्मत्वम् अतिसूक्ष्मत्वञ्च। तत्र सूक्ष्मपरत्वेन सर्षपचीनकादिद्रव्याणामारम्भकद्रव्यात्वात् तत्र प्रवृत्तिः। तदभिप्रायेणैव "अनणुषु दृश्यमानोऽणुत्वधर्मकादणीयः" इति लीला०। श्रुतौ च "अणोरणीयानिति" निर्देशः। अतिसूक्ष्मपरत्वे च "नित्या स्यादणु लक्षणेति" भाषा० तस्य नित्यत्वञ्च आरम्भकावयवाभावात् "अनित्या च भवेदन्या सैवावयवयोगिनीति" भाषापरिच्छेदेऽवयवयोगेनैवानित्यत्वकथनात् परमाणोस्तदभावेनैव नित्यत्वं भङ्गयोक्तमिति नैयायिकाः। वेदान्तिनस्तु सूक्ष्मभूतानामपि ब्रह्मण उत्पत्तिश्रुतीरीचक्रुः। यथा च एतन्मतयोः युक्तायुक्तत्वे तथा आरम्भवादशब्दे वक्ष्यते। सूक्ष्मार्थमाश्रित्येन अणुबुद्धिरित्यादौ, अणुजीव इत्यादौ च दुर्ज्ञेयत्वेन तत्तैतस्य भाक्तत्वम्। एवञ्च अणुत्वपरिमाणरूपगुणमादाय तद्वत्येवास्य प्रवृत्तिः तेन तत्र त्रि० स्त्रियान्तु गुणवचनतया वा ङीप्। अणवी। "अणप्रोमात्राविनाशिन्यो दयाद्रीनाञ्च याः स्मृता इति मनुः।" अस्थूलमनणु इत्यादि" श्रुतिः अत्र नञ्तत्पुरुषसमासनिष्पन्नस्य अनणुशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति" पाणिन्युक्तेः परवल्लिङ्गत्वेन अणुशब्दस्यापि नपुंसकत्वमित्यवसीयते। अधिकं परमाणुशब्दे वक्ष्यते।

अणुक त्रि० अणुप्रकारः अणु-स्थूला० कन्। अणुप्रकारे स्वार्थे कन्। अणुशब्दार्थे चीनकादिधान्ये पु०।

अणुत्व न० अणोर्भावः। अणुपरिमाणे।

अणुधर्म्म पु० अणुः सूक्ष्मो दुर्विज्ञेयो धर्म्मः। "दुर्बोधे धर्म्मे "नहि सुबोधोऽणुरेव धर्म्म इति" स्मृतेः।

अणुभा स्त्री अणवी सूक्ष्मा भा दीप्तिर्यस्याः ब०। विद्युति।

अणुमात्र त्रि० अणुः परिमाणमस्य अणु+मात्रच्। अल्पपरिमाणे "स अणुमात्रेण न संबध्यते" इति शारीरकभा०।

अणुरेवती स्त्री अणुः सूक्ष्मा रेवती तारेव। दूनिदृक्षे।

अणुवीक्षण न० अणुः सूक्ष्मो वीक्ष्यतेऽनेन करणे ल्युट्। सूक्ष्मपदार्थदर्शनसाधने यन्त्रभेदे, भावे ल्युट्। सूक्ष्मपदार्थालोचने न०।

अणुश्रीहि पु० कर्म०। सूक्ष्मधान्ये श्यामादौ चीनकादौ च।

अण्ड न० अमन्ति संप्रयोगं यान्ति अनेन अम-ड टवर्गादित्वेऽपि डस्य नेत्त्वम्। पुंसोऽवयवभेदे शुक्रे, पक्षिडिम्बे, "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः। "ब्रह्माण्डभाण्डोदरभ्राम्यदिति" वीर०। वीर्य्ये च। स्वार्थे कन्। तत्रैव। अस्मिन् कुक्ष्वादीनां पुंवत्। कुक्कुटाण्डम्।

अण्डकटाह न० अण्डं ब्रह्माण्डं कटाहमिव प्राणिजातकृतकर्मपाकसाधनत्वात्। शुभाशुभकर्मपाकसाधने ब्रह्माण्डगोलके। "तद्ब्रह्माण्डकटाहसंपुटतटे" इति सि०शि०गो०।

अण्डकोटरपुष्पी स्त्री० अण्डमिव कोटरे मध्ये पुष्पं यस्याः जातित्वात् ङीप्। नीलवृक्षाद्वृक्षे।

अण्डकोष(श) पु० अण्डस्य शुक्रस्य कोष(शः) इवावरकत्वात्। अण्डाकारे चर्म्मादिते पुंचिह्नभेदे।

अण्डज पु० अण्डात् डिम्बात् जायते जन-ड। अण्डजाते पक्षिणि, सर्पे, मत्स्ये, (कांकलासे) इति ख्याते छकलासे च। अण्डजातमात्रे त्रि०। स्तनाभिकसूर्य्यान्तु स्त्री "अण्डजास्तु पक्षिणः सर्पा नक्रा मत्स्याः कच्छपा" इत्यादयः सर्व्व एवाण्डजातत्वात् "अण्डजाः। तेषामुत्पत्तिप्रकारः पदार्थादर्शे दर्शितो यथा "अण्डतो वर्त्तुलीभूताच्छुक्रयोणितसंयुतात् कालेन भिन्नात् पूर्णात्मा निर्गच्छन् प्रक्रमिष्यतीति"। अण्डजातादर्शोऽत्र।

अण्डालु पु० अण्डः अण्डसस्य अण्ड+आलुच्। डिम्बविशिष्टे मत्स्ये।

अण्डीर पु० अण्डः पुमवयवभेदः अस्त्यस्येति अण्ड-ईरन्। विशिष्टसामार्थ्यवति पुरुषे, समर्थे च।

अत बन्धने ऋदित् भ्वा० पर०सक०सेट्। अन्तति। आनीत्। "समन्तति कपोत इव गतधिमिति" वेदः।

अत बन्धने भ्वादि० पर०सक० सेट्। अतति। आतीत्।

अत प्रापणे, सातत्ये, गतौ च भ्वादि० पर० सक०सेट्। अतति। आतीत्। क्त अतितः। क्नु (पदातिः) "अग्निधिरभ्यतति रुक्षान् प्रति" इति वेदः।

अत् अव्य० अत-क्विप्। आश्चर्य्ये। अर्य्यादि०। अद्भुतम्।

अतक पु० अतति सततं गच्छति अत-कन्। पथिके।

अतट पु० तट्यते आहन्यतेऽम्भसा इति तटं जलाघातस्थानं तन्नास्ति यस्य ब०। (आड़रीरि) प्रसिद्धे आलम्बनस्थानशून्ये, "मनोरथानामतटप्रपातः" इति। पर्व्वताद्युच्चस्थाने, भूमेरधोभागे च।

अतथोचित त्रि० न तथारूपमुचितं यस्य। यस्य यद्रूपमुचितं तद्विरोधिरूपापन्ने।

अतद्गुण पु० "तद्भूयानवहारस्तु हेतौ सत्यप्यतद्गुण इति"

दर्पणोक्ते अर्थालङ्कारभेदे, "हन्त सान्द्रेण रागेण भृतेऽपि हृदये मम। गुणगौर! निमग्नोऽपि कथं ? नाम न रज्यसीति। अत्रातिरक्तहृदयसंबन्धात् उचितमपि रक्तत्वं न निष्पन्नमिति हेतुसद्भावेऽपि तद्भूयानुहरणात्तथात्वम्।

अतद्गुणसंविज्ञान पु० न तस्य गुणीभूतस्य सम्यक् ज्ञानं यत्र। शाब्दिकोक्ते बहुव्रीहिभेदे। यथा लब्धकर्षमादायेत्यादौ गुणीभूतकर्षादेरपि धर्म्मिद्वारा आनयनेऽन्वयस्तथा दृष्टसद्भावमानयेत्यादौ गुणीभूतस्य सद्भावस्य नानयनेऽन्वयः इत्यतः लब्धकर्षइत्यादिस्तद्गुणसंविज्ञानः दृष्टसद्भाव इत्यादिश्च अतद्गुणसंविज्ञानः बहुव्रीहिरिति भेदः। एवमुदाहरणान्तराणि ज्ञेयानि।

अतन्त्र त्रि० न तन्त्रं कारणं तदधीना विवक्षा वा यस्य। कारणानधीने विवक्षायन्ये च। "हृत्स्वयग्रहणमतन्त्रमिति" सिद्धान्तकौ०। [निष्कारणिके, अनलसे च।

अतन्द्र त्रि० नास्ति तन्द्रा निद्रा, तत्सदृशम् आलस्यं वा यस्य।

अतन्द्रित त्रि० तन्द्रा जातोऽस्य तारं० इतच् न०त०। अजातनिद्रे अनलसे च "अतन्द्रिता सा स्वयमेव दृष्टकान्" इति कुमा०।

अतप्ततनु(नू) त्रि० न तप्ता पयोव्रतादिना तनुरस्य। पयोव्रतादिना देहकार्श्यकारके। दीर्घान्तपाठोऽथवैव "विश्वतोऽतप्ततनूर्न तदाम" इति ता०ब्रा०। न तप्ता तप्तमुद्रया तनुरस्य। तप्तमुद्रया अङ्कितचिह्ने त्रि० "मातप्ततनुरिति" श्रुतिस्तत्परतयैव वैष्णवैर्व्याख्याता। [निर्हेतुके, तर्कहीने च।

अतर्क त्रि० तर्क्यतेऽनेन तर्कस्तर्कहेतुः स नास्ति यस्य।

अतर्कित त्रि० न तर्कितम्। तर्कहेतुव्यापारानुसन्धानेन हठादागते, अनुमितभिन्ने च। "अतर्कितमुपस्थितमिति" पुरा०।

अतल न० अस्य भूखण्डस्य तलं पृषो० इदमोऽत्वम्। सप्तपातालमध्ये प्रथमखण्डे भूमेरधोभागे। तल्लोकाश्च सप्त, अतल, वितल, सुतल, तलातल, महातल, रसातल, पाताल-संज्ञका अधोधस्तिष्ठन्ति तेषां निवेशस्थानञ्च "खादूदकान्तर्बडवानलोऽसौ पातालसंज्ञाः पृथिवीपुटानीति" सि०शि० गो०उक्तम्। विशेषस्तत्तच्छब्दे वक्ष्यते। तलशून्ये त्रि० नास्ति तलः प्रतिष्ठा यस्य। अप्रतिष्ठे त्रि०। [गभीरे।

अतलस्पर्श त्रि० न तलस्याधोभागस्य स्पर्शो यत्र ब०। अति-

अतलस्पृश् त्रि० न तले स्पृश्यते कर्म्मणि क्विन्। अगाधे।

अतस् अव्य० इदम्+असिल्। एतच्छब्दार्थे "अथातो ब्रह्म जिज्ञासेति" सूत्रे अतःशब्दो हेत्वर्थ इति भाष्यम्। "अथातो धर्म्मजिज्ञासेति" जै०। "अतश्चराचरं विश्वमिति" कुमा०।

अतस पु० अत-गतौ असच्। वाते। सातत्यार्थकात् अतः असच्, आत्मनि। गौरादित्वात् ङीषि अतसी। (तिसि, मसिना) इति ख्याते वृक्षे स्त्री। "तस्यातसीसूनसमानभास" इति माघः। "अतसीपुष्पवर्णाभेति" दुर्गाध्याने अतसी मण इति आर्त्तौक्तेः मणवृक्षे च। तत्सूत्रजाते क्षौमवस्त्रे न०।

अति अव्य० अत-इ। पूजायाम्, उत्कर्षे, अतिक्रमणे, च। स्वभावोल्लङ्घितिरिच्यते "तेषु हार्दी तथाप्यतीति" चण्डी०। तत्पुरुषपूर्व्वपदस्थः अतिक्रान्तार्थे "अत्यादयः क्रान्ताद्यर्थे द्वितीययेति" वा०। अतिराजो अतिश्वो। उत्कर्षार्थे कुगतिप्रादयश्चेति समासे अतिधनमतिबलमिति। "विक्रमातिक्रमाबुद्धिभृशार्थातिशयेष्वतीति" गणरत्नोक्तेश्च विक्रमादिषु तत्र, विक्रमे अतिरथः, (रथाधिकविक्रमवान्) अतिक्रमे, अतिमति (बुद्ध्यतिक्रमः) अबुधौ अतिगहनम् (बुद्धेरविषयः) भृशे अतितप्तम् (भृशतप्तम्) अतिशये अतिवेगः (अतिशयितो वेगः) एवमन्यान्यप्युदाहार्य्याणि। अस्य क्रियायोगे उपसर्गता अतिक्रमे पूजायाञ्च कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीयादि तत्रातिक्रमे राजानमति, पूजायाम् अतिस्तुतमित्यादौ उपसर्गत्वबाधाच्च षत्वम्।

अतिकथ त्रि० अतिक्रान्तः कथाम्। कथनायोग्ये, अश्रद्धेये, नष्टे च। [भाषणे च।

अतिकथा स्त्री अत्युत्कटा कथा। अत्युत्कटवर्णने, व्यर्थ-

अतिकन्दक पु० अतिरिक्तः कन्दः यस्य कप्। कृत्रिमकन्दमाभके वृक्षे। [अत्यन्ताकर्षणे च।

अतिकर्षण त्रि० अत्यन्तं कर्षति कृष-ल्यु। अत्यन्ततादायके,

अतिकश त्रि० अतिक्रान्तः कशाम् तत्प्रहारमनाहत्य स्वेच्छानुसारेण प्रवृत्तत्वात् अत्या० त०। कशाप्रहारमनुल्लङ्घ्य यथेच्छव्याप्टते दुर्दान्ते अश्वे।

अतिकाय त्रि० अत्युत्कटः कायोऽस्य। विकटदेहे, रावणसुते राक्षसभेदे पु० तत्कथा लङ्काकाण्डे "भुकोप स महातेजा ब्रह्मदत्तवरो विभुः अतिकायो महावीर्य्य" इत्युपक्रम्य "आरुरोह ततो हृष्टो महातेजा रामाय रावणानुजः। दशग्रीवो महातेजाः राजा वैश्रवणात्मजः। तस्य पुत्रो ह्यसौ वीरो रावणप्रतिमोरणे इति" तस्य सामर्थ्यं विभीषणेन निवेदिते लक्ष्मणेन सह तस्य युद्धमासीत् तेन च तस्य शिरश्छिन्नमिति "तदातिकायस्य शिरो जहारेति" रामा०लङ्का०।

अतिकुण्ठ त्रि० अति+कुण्ठ-अ-किच्च। अतिकोणे।

अतिकृच्छ्र न० अतिक्रान्तं कृच्छ्रं प्रजापत्यं तदधिकदुःख-

साध्यत्वात् "अत्यादयः क्रान्ताद्यर्थे द्वितीययेति" स०। द्वादशरात्रसाध्ये प्रायश्चित्तरूपे व्रतभेदे "एकैकं ग्रासमश्नीयात् त्रिरहाणि त्रीणि पूर्ब्ववत्। त्रिरह्नोपवसेदन्य मतिकृच्छ्रं चरन् द्विज" इति मनुः। "त्रिरहाणि त्रीणि त्रयाङ्गानि पूर्ब्ववत् प्रातःसायमयाचितैः प्राजापत्यवदिति" रघुनन्दनः। प्रजापत्ये हि "त्रिरहं प्रातरश्नीयात् त्रिरहं सायं, त्रिरहमद्यादयाचितमिति" मनुनैव प्रातःकालादौ भक्षणमुक्तं पूर्ब्ववदित्यनेन तद्धर्म्मातिदेशः। अस्य पुंलिङ्गत्वमपि "अतिकृच्छ्रः पर्णकृच्छ्रः सोमप्रः कृच्छ्रातिकृच्छ्रक" इति विश्वामित्रवचने पुंस्त्वनिर्देशात्। "अवगुर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने इति" मनुः। अतिशयितं कृच्छ्रं प्रा० स०। अतिकष्टे। तद्वति त्रि०।

अतिकृत त्रि० मर्य्यादातिक्रमेण कृतम्। मर्य्यादातिक्रमेण कृते पदार्थे "सर्व्वत्रातिकृतं लोके व्यसनायोपकल्पते" इति पुरा०।

अतिकृति स्त्री अति+कृ-क्तिन्। मर्य्यातिक्रमेण करणे। अत्या०स०। उत्तरत्राकरोक्ते "तथातिकृतिरुत्कृतिरिति" पञ्चविंशत्यक्षरपादके वर्णवृत्तभेदे।

अतिकेशर पु० अतिरिक्तानि केशराण्यस्य ब०। कुजकवृक्षे।

अतिक्रम पु० अति-क्रम-घञ् तुक्च। उल्लङ्घने। अतिक्रान्तः क्रममिति अत्या०स०। लङ्घितक्रमे त्रि०। इर्+अति+क्रम-कर्म्मणि खल्। दुःखेनातिक्रमणीये त्रि०। "कालो हि दुरतिक्रम" इति "स्वभावो दुरतिक्रम" इति च पुरा०। भावे ल्युट्। अतिक्रमणम् अत्रैव न०। भावे क्तिन्। अतिक्रान्तिरत्रार्थे स्त्री।

अतिक्रुद्ध पु० प्रा०स०। "अष्टाविंशत्यक्षरोत्थ एकत्रिंशदधापि वा। अतिक्रुद्धः स विज्ञेयो निन्दितः सर्व्वकर्म्मसु इति" तन्त्रोक्तमन्त्रभेदे। अतिक्रोधान्विते त्रि०।

अतिक्रूर पु० प्रा०स०। "क्रूरा वक्रा अतिक्रूरा" इति ज्योतिषपरिभाषिते" वक्रगत्यापन्ने भौमशनिरूपक्रूरग्रहे। अत्यन्तक्रूरे त्रि०। "त्रिंशदक्षरको मन्त्रस्त्रयस्त्रिन्द्यदधापि वा। अतिक्रूरः स विज्ञेयो निन्दितः सर्व्वकर्म्मसु" इति तन्त्रोक्ते मन्त्रभेदे पु०।

अतिगण्ड पु० अत्या०स०। "अतिगण्डः सुकर्म्मा चेति" ज्योतिषपरिभाषिते विष्कुम्भावधि षष्ठे योगे। "गण्डातिगण्डयोर्नाड़ीषट्कं परिवर्ज्य योदिति" ज्यो०। अतिदुष्टगण्डोगण्डोगलः। दुष्टगण्डे पु०। प्रा० ब०। अतिदुष्टगण्डवति त्रि०।

अतिगन्ध पु० अतिशयितो गन्धो यस्य ब०। चम्पकवृक्षे। अतिशयितगन्धवति त्रि०। [यामु राजनिघ०।

अतिगन्धालु पु० अतिगन्ध+मत्वर्थे आलुच्। पुत्रदात्रलता

अतिगर्वित त्रि० अत्यन्तं गर्वितः। अत्यन्तगर्व्वयुक्ते अत्यभिमानिनि गर्व्वश्च आत्मनि असतो गुणादेरुत्कर्षाभिमानः तस्यात्यन्तत्वमन्यस्मिन् अपकर्षज्ञानपूर्ब्वकत्वम्।

अतिगव त्रि० अतिक्रान्तो गां बुद्ध्या षच्समा०। अत्यन्तमूर्खे, अतिक्रान्तः गां वाचम्। वाक्पथातीते अवर्णनीये च त्रि०।

अतिगह्वर त्रि० अतिक्रान्तो गह्वरं दुर्बोधत्वेन प्रवेशायोग्यत्वात् अत्या० स०। दुर्बोधे अतिगहने।

अतिगुण पु० अतिशयितो गुणः। अतिशयविनयदाक्षिण्यादौ। अतिक्रान्तो गुणम्। गुणहीने त्रि०। अतिशयितो गुणोऽस्य प्रा०ब०। उत्कृष्टगुणवति त्रि०।

अतिगुरु पु० अतिशयितो गुरुः पूज्यतमत्वात् प्रा० स०। "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माताचार्य्यश्चेति" विष्णुके पितादौ। अत्यन्तगुरुत्ववति पारदादौ द्रव्ये त्रि०। स्त्रियां वा ङीप्। अतिगुर्वी। [पर्ण्याम्।

अतिगुहा स्त्री अतिक्रान्तो गुहां मध्यावकाशेन। पृश्नि-

अतिग्रह त्रि० अतिशयितः ग्रहो ज्ञानं, स्वकार्य्यस्य ग्रहणं वा येषाम्। स्वस्वविषयग्राहकेषु नेत्रादिषु ज्ञानेन्द्रियेषु, आदानादिस्वस्वकार्य्यकारकेषु वागादिषु कर्म्मेन्द्रियेषु च। अतिक्रान्तो ग्रहम्। अत्यन्तदुर्बोधे त्रि०। अतिशयितो ग्रहो ज्ञानम्। सर्व्वथा समग्रज्ञाने पु०। अतिग्रहणादयोऽप्युक्तार्थेषु। [सन्धिज्ञे सुखावस्थाभेदे।

अतिघ्नी स्त्री अतिशयेन हन्ति दुःखं हन-टक्। दुःखा-

अतिचरा स्त्री अतिक्रम्य स्वस्थानं सरोऽन्तरं चरति गच्छति चर-अच्। पक्षिण्याम्, तत्तुल्याकारवत्त्वात् स्थलपक्षिण्यां, पद्मचारिण्यां लतायाञ्च। अतिक्रमणकारिणि त्रि०।

अतिचारः पु० अतिक्रम्य स्वस्वभोगकालमुल्लङ्घ्य चारः राश्यन्तरगमनम्। ज्योतिषोक्ते भौमादिपञ्चकस्य स्वस्वाक्रान्तराशिषु भोगकालमुल्लङ्घ्य राश्यन्तरगमने। अतिचारश्च ग्रहगतिशब्दे वक्ष्यमाणेन "रविर्मासं निशानाथः सपादद्विदसद्वय" मित्यादिनोक्तभोगकालभेदोल्लङ्घनेन ग्रहाणां अतिशीघ्रगतया अल्पकालेनैव आक्रान्तराशिमुपभुज्य राश्यन्तरगमनम्। तच्च विस्तरेण ग्रहगतिशब्दे वक्ष्यते। "यदातिचारं सुरराजमन्त्रीति" "अतिचारं गते जीवे" इति "गोऽजाजिकुम्भेतरगोऽतिचारग" इति च ज्योतिषम्। गुरोरतिचारे कालाशुद्धिश्च अकालशब्दे दर्शिता। अतिक्रम्य गमने च।

अतिचारिन् त्रि० अति+चर-णिनि । पूर्व्वोक्तातिचारवति यज्ञे । "अतिचारी यदा जीव" इति ज्योतिषम् । अतिक्रम्य अतिशयेन वा गन्तृमात्रे त्रि० ।

अतिच्छत्र पु० अतिक्रान्तश्छत्रम् तत्प्राकारेण अत्या०स० । (छातिया) इति प्रसिद्धे स्थलक्षणविशेषे, (तालमाखना) इति प्रसिद्धे जलक्षणभेदे च । स्वार्थे कन् । अतिच्छत्रकोऽप्यत्रार्थे, छत्राकारपत्रपुष्पवति (खुलफा) इति प्रसिद्धे शाकभेदे तु स्त्री । क्षीरस्वामिमते छत्रा इत्येव नाम । छत्रातिक्रमकारिणि त्रि० । अतिक्रमेऽव्ययी० । छत्रातिक्रमे अव्य० ।

अतिच्छन्दस् न० अतिक्रान्तः छन्दः इत्तानुसारिवर्णविन्यासभेदम् अत्या०स० । उक्ष्यादिछन्दोऽतिक्रमेण विन्यस्तेऽक्षरविन्यासभेदे "प्राजापत्या अच्छन्दस" इति "अच्छन्दसः शंसतीति" च वेदः । छन्दो वेदोऽभिप्रायो वा । तदतिक्रान्तरि वेदोक्तकर्म्माकरणे, अतिक्रान्ताभिप्राये च त्रि० ।

अतिजगती स्त्री अतिक्रान्ता जगतीं द्वादशाक्षरपादामेकाक्षराधिक्यात् अत्या०स० । त्रयोदशाक्षरपादके छन्दोभेदे । जगतीं भुवनमतिक्रान्तवति त्रि० । पुंसि स्त्रीत्वे च ङीष्यन्तः ।

अतिजव त्रि० अतिशयितो जवोयस्य ब० । अतिवेगवति द्रुतगामिनि च । प्रा०स० । अतिशयितवेगे पु० । "सगरसन्ततिसन्तरणेच्छया प्रचलितातिजवेन" इत्युद्भटः ।

अतिजागर पु० अतिशयितो जागरो निद्राराहित्यं यस्य ब० । नीलवके पक्षिणि तस्य सर्व्वदा जागरूकत्वात्तत्त्वम् । निद्राराहित्यवति त्रि० । [अतिदीर्घगमने ।

अतिडीन न० अतिक्रान्तं डीनं गतिभेदं अत्या०स० । पक्षिणाम्

अतित(रा)राम् अव्य० अति+तर(र)प् आम् । अत्यन्ते "वेगवानतितरामायाति चेन्नारुत" इत्युद्भटः ।

अतितार त्रि० अतिशयितस्तारः । तक्षादेरतिशयशुद्धौ "अतितारक्षारेति" कादम्ब० । अत्युच्चशब्दे पु० तद्वति त्रि० ।

अतितीक्ष्ण त्रि० अतिशयेन तीक्ष्णः कटुरसो यस्य ब० । मरीचादौ (सजना) इति प्रसिद्धे शोभाञ्जने पु० । अतितिक्ते पु० । तद्वति त्रि० ।

अतिथि पु० अतति गच्छति न तिष्ठति अत-इथिन् । अध्वयोगेन आगन्तुके गृहागते, "एकरात्रं हि निवसन् ह्यतिथिर्ब्राह्मणः स्मृतः । अनित्यास्थितिर्यस्मात्तस्मादतिथिरुच्यते" । नैकपामीषमतिथिं विप्रं याज्ञवल्किकं तथेति विष्णुस० । तस्य च वैश्वदेवबलेः प्रागेव भूयज्ञता परत्र आहारदानमात्रं यथोक्तं मनुना "वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् तस्यान्नं यथाशक्ति प्रदद्यादिति" किन्तु तस्याप्यतिथित्वमेव यथोक्तं "श्रियो वा यदि द्वेष्यो मूर्खः पण्डित एव वा । संप्राप्तो वैश्वदेवान्ते विप्रः सोऽतिथिरिष्यते" इति स्मृत्या । अतिथिप्रतीक्षणञ्च मुहूर्त्तार्द्धभागपर्य्यन्तम् । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनम् मुहूर्त्तस्यार्द्धं भागमुदीक्ष्योक्तातिथिर्भवेत्" इति मार्क० । विषये च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुभूयते । "प्रथमं पथि लोचनातिथिमिति" नैष० ।

अतिथिपूजा स्त्री ६त० । गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते नृयज्ञरूपेऽतिथिपूजने अतिथिसत्कारादयोऽत्यत्र ।

अतिदान न० अतिशयितं दानम् प्रा० स० । अत्युत्कटदाने "अतिदाने बलिर्बद्ध" इति नीति० ।

अतिदिष्ट त्रि० अति+दिश-क्त । अतिदेशविषये यथा "प्रकृतिवत् विकृतिः कर्त्तव्येति" वाक्येन प्रकृतीभूतदर्शयागादेरङ्गकार्य्याणि प्रयाजादीनि विकृतौ पशवादियागेऽतिदिश्यन्ते । अतिदेशोनाम इतरधर्म्मस्य इतरस्मिन् प्रयोगाय आदेशः इति मीमांसायां स्थितम् ।

अतिदीर्घ पु० अतिशयेन दीर्घते अति+दीर्घ-कर्त्तरि यत् । रक्तचित्रके (लालचिता) इति ख्याते वृक्षे ।

अतिदेव पु० अतिक्रान्तोदेवान् अत्या०स० । सर्व्वदेवश्रेष्ठे रुद्रे "द्रावणाच्चातिदेव इति" वेदः ।

अतिदेश पु० अतिक्रम्य स्वविषयसङ्कोचं अन्यत्र विषये देश उपदेशः अतिदिश्यते वा करणे कर्म्मणि वा घञ् । "अन्यत्रैव प्रणीतायाः क्रतुस्थाया धर्म्मसंहतेः । अन्यत्र कार्य्यतः-प्राप्तिरतिदेशः स उच्यते । प्राकृतात् कर्म्मणो यस्मात्तत्-समानेषु कर्म्मसु । धर्म्मप्रवेशो येन स्यादतिदेशः स उच्यते" इत्यधिकरणमालाधृताभियुक्तवाक्योक्तौ अन्यत्रप्राप्तेऽन्यधर्म्मे तत्प्रापके शास्त्रभेदे च । यथा "प्रकृतिवत् विकृतिः कर्त्तव्येत्यादिः" स चातिदेशः पञ्चविधः शास्त्रातिदेशः, कार्य्यातिदेशः, निमित्तातिदेशः, व्यपदेशातिदेशः, रूपातिदेशश्च । एतस्य उदाहरणादिकमाकरे द्रष्टव्यम् । अतिदेशश्च प्रायेण श्रुवदार्दिसादृश्यवाचकशब्देन यथा प्रकृतिवत् विकृतिरित्यादि अयञ्च वैदिककर्म्मणीव व्याकरणादिशास्त्रे, लौकिके व्यवहारे च विद्यते यथा "दृषद्दिव, दृषत्यव व्याकरणे रूपातिदेशः" "कर्म्मणा कर्म्मवत्कर्त्तृत्रिय" इत्यादौ, पुंवदित्यादौ च कार्य्यातिदेशः, लिङ्वदित्यादौ निमित्तातिदेशः, व्यपदेशिवद्भावकृत्यादौ संज्ञाति-

देश इत्येवं प्रकारा अतिदेशाःसन्ति ॥ लोके च गोसदृशो-गवयत्वादौ रूपातिदेशत्वादि । अतएवोपमानरूपप्रमाणे अस्यातिदेशवाक्यस्य करणत्वं सदृशकारिभावेत्यादि तत्त्व-ज्ञानस्वकारैरङ्गीकृतम् अतिदेशेन निर्वृत्तम् ठक् । आति-देशिकं त्रि० । "आतिदेशिकविधिरनित्य" इति परिभाषा ।

अतिधन्वन् पु० अत्युत्कृष्टं धनुर्यस्य प्रा०ब० धनुषोऽनङ् । उत्कृष्टधनुर्युक्ते योधे । धन्वा मरुः अत्या०स० । मरुस्थ-लातिक्रमकारिणि त्रि० ।

अतिधृति स्त्री अतिक्रान्ता धृतिम् अक्षादयाक्षरपादिकां वृत्ति-मेकाक्षराधिक्यात् अत्या० स० । जनविंशत्यक्षरपादके छन्दोभेदे । धृतिर्धैर्य्यं सन्तोषो वा । तदतिक्रमकारिणि त्रि० ।

अतिन्(नी) त्रि० अतिक्रान्तोनायम् अत्या०स० ह्रीवे ह्रस्वः । नोऽतिक्रमकारिणि । एषि स्त्रियां च अतिनीः ।

अतिनिद्र अव्य० निद्रा सम्पति न युज्यते अव्ययी० । निद्राया अयोग्यकाले । अतिक्रान्तो निद्राम् अत्या०स० । अतिक्रान्तनिद्रे निद्रारहिते त्रि० । अतिशयिता निद्रा-ऽस्य । दीर्घनिद्रे त्रि० । प्रा०स० । दीर्घनिद्रायां स्त्री ।

अतिपत्ति स्त्री अति+पत-क्तिन् । अतिपतने, अति-क्रमे । "कालातिपत्तौ द्विगुणामिति" स्मृतिः । पद-क्तिन् पत्तिर्निष्पत्तिः अत्या०स० । अनिष्पत्तौ स्त्री । "लिङ्निमित्ते लङ् क्रियातिपत्तावि"ति पा० । क्रियातिपत्तिः क्रियाया अनिष्पत्तिरिति वृत्तिः । पत्तिं सेनामतिक्रान्ते त्रि० ।

अतिपत्र पु० अतिरिक्तं वृहत्पत्रमस्य । हस्तिकन्दवृक्षे ।

अतिप(थ)यिन् पु० अतिशयितः सुन्दरः पन्थाः प्रा०स० अतेः पूजार्थत्वात् न समा० । सत्पथे । अतीतपथे तु समा० ।

अतिपद त्रि० अतिक्रान्ताः पदं चरणम् । वर्णवृत्तानुसारिपादा-तिक्रान्ते "अतिपदा गायत्री अतिपदा जगतीति" ।

अतिपन्न त्रि० अति+पद-क्त । अतिक्रान्ते । "तथातिपन्न-मिगुसंस्कारावेति" वृहद्धर्म्मपु० ।

अतिपरोक्ष त्रि० अतिक्रान्तम् परोक्षम् । प्रत्यक्षे, तद्विषये च ।

अतिपात पु० अतिक्रम्य पातः गतिः अति+पत-घञ् । "अतिक्रमे "न वेतु कार्य्यातिपातः" इति शब्दर० ।

अतिपातक न० अतिक्रान्तोऽत्यन्तदुष्टत्वेनान्यत् पातकं अत्या० स० । पुंसां मातृस्वसृगुरुदुहितृगमनजन्ये, स्त्रीणाञ्च पुत्र-पितृस्वसृगुरुगमनजन्ये पातकविशेषे । "मातृगमनं, दुहितृ-गमनं, स्वसृगमनञ्चेत्यतिपातकानीति" "अतिपातकि-नस्तेते प्रविशेयुर्हुताशनमिति" "एतेष्वक्षतप्राय-श्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते" इति च विष्णुस० । "सद्योऽग्निप्रवेशनतिपातकिन" इति हारीतः । "अथ नरकानुभूतदुःखानां तिर्य्यक्त्वसुत्तीर्णानां मानुष्ये लक्षणानि कुष्ठातिपातकीति" विष्णुस० । पातक-मतिक्रान्तवति पुण्यशीले त्रि० ।

अतिप्रगे अव्य० अतिप्रगीयतेऽस्मिन् काले अति+प्र+गै-के । अत्यन्तप्रातःकाले । "नातिप्रगे नातिसायं न निशीथे न चोषसीति" स्मृतिः ।

अतिप्रमाण त्रि० अतिक्रान्तः प्रमाणम् अत्या० स० । प्रमा-णातिक्रान्ते यस्य यत्प्रमाणमुचितं ततोऽधिकप्रमाणवति । प्रा० स० । अत्यन्तप्रमाणे वृहत्प्रमाणे न० ।

अतिप्रवृद्ध त्रि० अत्यन्तं प्रमाणातिरेकेण प्रवृद्धम् । प्रमाणाति-रेकेण वृद्धिमति । अतिप्रवृद्धिश्च नद्यादेर्जलस्य तीरादातिक्रमेण, क्षत्रियादेः स्वकर्त्तव्यतामूढतया मर्य्यादाद्यतिक्रमेण वीर्य्याधिक्येन वा वृद्धिः "तस्यातिप्रवृद्धस्य ब्राह्मणान् प्रति अनादर" इति । "अतिप्रवृद्धं प्रहितास्त्रवृष्टिभिरिति" रघुः ।

अतिप्रश्न पु० अतिक्रम्य मर्य्यादां प्रश्नः । मर्य्यादातिक्रमेण प्रश्ने सदुत्तरे जातेऽपि पुनर्जिज्ञासायाम् । यथा वृह-दारण्यके याज्ञवल्क्यं प्रति वाक्यातिप्रश्नः तत्र ब्रह्ममी-मांसायाम् तेन कृतायामपि दृथातिप्रश्नकरणात् तस्य सद्यःपतनं सूर्य्यवरात् जातमिति वृहदारण्यकेऽनुसन्धेयम् ।

अतिप्रसक्ति स्त्री अति+प्र+सृज-क्तिन् । अत्यन्तासक्तौ, प्रसङ्गमतिक्रम्यान्यत्र सम्बन्धे अतिप्रसङ्गे च । लक्ष्ये लक्षण-सम्बन्धः प्रसङ्गः, अलक्ष्ये तत्सम्बन्धोऽतिप्रसङ्गः । "अति-प्रसक्त्यनापादकेति" जगदीशः ।

अतिप्रसङ्ग पु० अति+प्र+सृज घञ् । अतिप्रसक्तिपदार्थे । प्रसङ्गमतिक्रान्तवति त्रि० । [स्तभूमिते च ।

अतिप्रसिद्ध त्रि० अति+प्र+सिध-क्त । अतिविख्याते

अतिप्रौढा स्त्री प्रकर्षेण वृहतेऽत्र प्रौढः विवाहकालः प्रा०ब० अतिशयिता वा प्रौढा वृद्धियुक्ता । विवाहयोग्यकालायाम् अतिशयवृद्धियुक्तायाञ्च स्त्रियाम् स्त्रीणान्तु दशवर्षा-तीतकाल एव अतिप्रौढ़कालः । "अतिप्रौढ़ा च या नारीति" स्मृतिः अतिप्रवृद्धे त्रि० ।

अतिबल त्रि० अतिशयितं बलं यस्याः ५ब० । अत्यन्तबलाधायि कायां पीतवर्णायां (वेड़ियाला) इति ख्यातायां लतायां, विश्वामित्रेण रामाय दत्ते अस्त्रविद्याभेदे च स्त्री । यथा "गृहाण त्वं महे वत्से विद्ये बलामतिबलां तथा । न ते श्रमो जरा वाभ्यां भविता राजवैक्लवम् ॥ न च सुप्तं प्रमत्तं

वा धर्षयिष्यन्ति नैर्ऋताः । न च ते सदृशो राम ! वीर्येणान्यो भविष्यति । सदेवनरनागेषु लोकेष्विह पुमांस्त्विषु । न सौभाग्ये, न दाक्षिण्ये, न बुद्धिश्रुतिपौरुषे ॥ नोत्तरे प्रतिपत्तव्ये त्वत्तुल्यो वा भविष्यति । एतद्विद्याद्वयं प्राप्य यशश्चाव्ययमाप्स्यसि ॥ बलामतिबलां चैव ज्ञानविज्ञानमातरौ । क्षुत्पिपासे च ते राम ! नात्यर्थं पीडयिष्यतः ॥ जयश्च दुर्गकान्तारप्रदेशेष्वटवीषु च । सारतां त्रिषु लोकेषु गमिष्यसि च राघव ! ॥ पितामहसुते हेते विद्ये चायुर्बलावहे । मातं त्वमसि काकुत्स्थ ! विद्ययोर्ग्रहणेऽनयोः ॥ स्वभावजैर्गुणैर्दिव्यैः कर्म्मजैश्चलैर्वृतः । भूयस्त्व गुणोत्कर्षमेते विद्ये करिष्यतः ॥ ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः । प्रतिजग्राह ते विद्ये विश्वामित्रात् तपोधनादिति" । अतिशयितं बलम् प्रा० स० । अत्यन्ते बले, सामर्थ्ये, सैन्ये च न० । अतिरिक्तं बलमस्य । अत्यन्तबलयुक्ते त्रि० "जयत्यतिबलो रामो लक्ष्मणश्च महाबल" इति रामा० । अतिरथे च भारते अतिरथविषयएव,"एष ह्यतिबलोमत" इति भीष्मेण भूरिशः प्रयुक्तत्वात् बलकार्य्यत्वाच्च तस्य तथात्वम् ।

अतिबाला स्त्री अतिक्रान्तो बालं बाल्यावस्थाम् । द्विवर्षवयस्कायाम् "वर्षमाता तु बाला स्यादतिबाला द्विवार्षिकीति" स्मृत्युक्तायाम् गवि "अतिवृद्धामतिक्रूराममतिबालां च रोगिणाम् हत्वा चरेदिति" स्मृतिः । अत्यन्तबाले त्रि० ।

अतिब्रह्मचर्य्य पु० अतिक्रान्तो ब्रह्मचर्य्यम् अत्या० स० । स्त्रीसङ्गमकारिणि ब्रह्मचर्य्यत्यागिनि ।

अतिभारः पु० अत्यन्तोभारः गुरुत्वम् स्वकार्य्यकरणे क्षमताविशेषो वा । अत्यन्तगौरवे अत्यन्तभारे, "न चातिभारः समर्थानामिति" । अतिशये "सा सक्तकण्ठं व्यसनातिभारात् चक्रन्द विग्ना क्रुररीव भूय" इति रघुः । वेगे च ।

अतिभारग पु० अतिभारेण वेगेन गच्छति गम–ड ३त० । खरे अश्वतरे गर्द्दभादुष्ट्रवाजाते अश्वभेदे ।

अतिभी स्त्री अतिबिभेत्यस्याः दर्शनात् अति+भी–क्विप् । वज्रज्वालायाम् । तद्दर्शने हि लोकानामतिभीतिर्लोकसिद्धा ।

अतिभूमि स्त्री अतिशयिता भूमिर्मर्य्यादा प्रा० स० । अतिमर्य्यादायाम्, आधिक्ये च । "प्राप्य मन्मथमदादतिभूमिं दुःसहस्तनभराः सुरतेति" माघः । अतिक्रमेऽव्ययी० । मर्य्यादातिक्रमेऽव्य० । भूमिं मर्य्यादां वाऽतिक्रान्ते त्रि० ।

अतिभोजन न० अत्यन्तं मर्य्यादामतिक्रम्य भोजनम् । यस्य यावत् भोजनमुचितं तदतिक्रमेण भोजने ।

अतिमङ्गल्य पु० अतिमङ्गलाय हितम् अतिमङ्गल+यत् । बिल्ववृक्षे । प्रा० ब० । अतिमङ्गलहिते त्रि० ।

अतिमर्य्याद अव्य० । अतिक्रमे अव्ययी० । मर्य्यादातिक्रमे । अतिक्रान्तो मर्य्यादाम् अत्या० स० । "मर्य्यादामतिक्रान्तवति । यस्य वस्तुनः यावती सीमा तदतिक्रान्ते निर्मर्य्यादे त्रि० ।

अतिमात्र त्रि० अतिक्रान्तो मात्रामल्पं अत्या० स० । अतिशयिते, मात्रातिक्रमकर्त्तरि च । अतिशयिता मात्रा प्रमाणमस्य । भूयार्थे त्रि० । "सुनिग्रहैस्तामतिमात्रकर्षिणामिति" कुमा० । अतिक्रान्तोमात्रां प्रमाणम् अत्या० स० । दृढ़तरप्रमाणे त्रि० । [दृष्टिशब्दोऽर्थे ।

अतिमात्रशस् अव्य० अतिमात्र+शस् । अतिप्रमाणकारके

अतिमान पु० अत्यन्तः मानः अभिमानः । अनुचिताभिमाने "अतिमाने च कौरव" इति भाष्यकृतः । अतिक्रान्तोमानं प्रमाणम् अत्या० स० । प्रमाणाधिके त्रि० ।

अतिमानुष त्रि० अतिक्रान्तो मानुषचरित्रम् अत्या० स० । मनुष्यायोग्ये दिव्ये कर्म्मादौ । "कर्म्म तस्यातिमानुषमिति" पुरा० । तथाभूते कृपादौ च ।

अतिमित्र न० अत्यन्तं परममित्रम् । अत्यन्तबान्धवे "जन्मसम्पद्विपत् क्षेमं प्रत्यरिः साधकोबधः मित्रं परममित्रञ्चेति" ज्योतिषोक्ते नृणां जन्मतारायधि नवभाद्दशमभूविंशात्मके परममित्रतारके च ।

अतिमुक्त त्रि० अतिशयेन मुक्तः विदेहकैवल्यं गतः अति+मुच–कर्त्तरि क्त । निर्व्वाणमुक्तिमति । अतिक्रान्तो मुक्तां औभ्रत्वात् अत्या० स० । माधवीलतायां, तिनिशवृक्षे च पु० ।

अतिमुक्तक त्रि० अतिमुक्त+स्वार्थे कन् । निर्व्वाणमुक्तिमति अतिशयितमुक्ते च । मुचा भावे क्त अतिशयेन मुक्तं बन्धहीनता यस्य कप् । तिन्दुकवृक्षे, तालवृक्षे च पु० ।

अतिमुक्ति स्त्री अत्यन्ता मुक्तिः । विदेहकैवल्ये तत्त्वज्ञानानन्तरम् "तस्य तावदेव चिरं यावन्न विमोक्ष्य इति" श्रुतिदर्शिते शरीरत्यागे, अतिमोक्षादयोऽप्यत्रार्थे पु० ।

अतिमृत्यु पु० अतिक्रान्तो मृत्युम् अत्या० स० । मोक्षे "तमेव विदित्वाऽतिमृत्युमेति नान्यःपन्था विद्यते" इति श्रुतिः । खाद्यादिभिः शरीरसंबन्धोहि जन्म, तद्वियोगश्च मरणम् तदभिमानिनोजीवस्य । सति च ज्ञाने तन्मूलाज्ञाने निवृत्ते तद्धेतुकशरीरसंबन्धादिकं तन्तुदाहे पटदाहवत् स्वयं निवर्त्तते अत एव ज्ञानवतो देहादिसंबन्ध' श्रुतिर्निरास "अशरीरं

वावसन्तं प्रियाप्रिये न स्पृशत इति"। तथा च देहसंबन्धाभावे कथं मरणसम्भवः। "न जायते म्रियते वा कथञ्चिदिति" गीतावाक्येन तस्य मरणनिषेधात्। "न तस्य प्राणाहुत्क्रामन्ति इहैव समवलीयन्ते" इति श्रुत्या तत्त्वज्ञानिनः प्राणोत्क्रमणरूपमरणनिषेधेन ज्ञानिनो न मृत्युरिति वेदान्तसिद्धान्तः। अन्यमते तु एतद्देहात् प्राणोत्क्रान्तावपि न पुनर्देहसम्बन्धोत्तरं पुनर्मरणमिति तदाहित्यमेव मोक्ष इति भेदः। अतएवोक्तं श्रुत्वा "मृत्युमुखात् प्रमुच्यते" इति तेन पुनर्मृत्युकारणीभूतादृष्टक्षय एव ज्ञानेन जन्यते "ज्ञानाग्निः सर्वकर्माणीति" भाष्येण प्रारब्धकर्मातिरिक्तकर्मत्रयस्यैव ज्ञानेन साध्यतायाः सर्वसम्मतत्वात् विदुषश्च एतद्देहारब्धकादृष्टवत् एतद्देहविगमादृष्टस्यापि प्रारब्धफलतया न तस्य नाश इति। अधिकमाकरे द्रष्टव्यम्।

अतिमैथुन न० अत्यन्तं स्वयञ्चमतिक्रम्य मैथुनं स्त्रीसङ्गमः। स्वयञ्चमतिक्रमेण स्त्रीसङ्गमे। "अतिमैथुनादमैथुनाद्वेति"

अतिमोदा स्त्री अतिशयितो मोदोगन्धः यस्याः ब०। नवमल्लिकायाम्। अत्यन्तामोदवति त्रि०।

अतिरक्त त्रि० अत्यन्तः रक्तः रक्तवर्णः अनुरागयुक्तो वा। अतिलोहितवर्णे, अत्यन्तानुरक्ते च। अत्यन्तरक्तवर्णे पु०।

अतिरथ पु० अतिक्रान्तो रथं रथिनम् अत्या०स०। "अभितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः" इत्युक्तलक्षणे योधविशेषे। "ये रथाः पृथिवीपाल! तथैवातिरथाश्च ये" इत्युपक्रम्य "कृतवर्म्मा ह्यतिरथः" इति "भद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः" इत्यादिना भद्रवोऽतिरथा भा० उद्यो० रथातिरथासंख्याने दर्शिताः। रथातिक्रमकारके त्रि०। [ख्यातायां मूर्च्छितायाम्।

अतिरसा स्त्री अतिशयितो रसो यस्याः ब०। (राखा) इति

अतिराज त्रि० अतिक्रान्तो राजानम् टच् समा०। अतिक्रान्तराजे। स्त्रियां ङीप्। [निषेधात् न टच्। पूजार्थकपतौ।

अतिराजन् पु० अतिशयितः पूजितो राजा "न पूजनादिति

अतिरात्र पु० अतिशयिता रात्रिः ततः अस्त्यर्थे अच्। एकरात्रसाध्ये यागभेदे। स च गवामयने प्रथमसंस्थः यथोक्तं ताण्ड्यब्राह्मणे। "प्रजापतिर्वा इदमग्र आसीत् सोऽकामयत बहु स्यां प्रजायेयेति सएतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयदिति" गवामयनसत्रमुपक्रम्य, "अथास्य सत्रस्य पूर्व्वोक्तान्यङ्गानि क्रमेण विधास्यन् अतिरात्रसंस्थम् प्रथमं विधातुमाहेति" भाष्ये अवतरणिकां दत्त्वा व्याख्यातं यथा "स एवं कामयमानः प्रजापतिः स्वप्रायत्वेन एतं गवामयनस्याद्यमतिरात्रमपश्यदिति"। तच्च स्तुतिपूर्व्वकं विधित्सन्नाह। "यदेषोऽतिरात्रो स एवाहोरात्रे एव प्रजनयन्तीति" "एष प्रजापतिना दृष्टोऽतिरात्रः गवामयनस्य प्रथममहर्भवतीति यत् तेन सत्रानुतिष्ठन्तो यजमाना अहोरात्रे एव प्रजनयन्ति उत्पादयन्ति स्वार्थे कुर्व्वन्तीति" भाष्यम्। इत्युपक्रम्य चतुर्थाध्यायप्रथमखण्डपर्य्यन्ते तत्र विहितानि स्तोत्रशस्त्रादीन्युक्तानि। "अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीति" श्रुत्यन्तरम्। षोडशी पात्रभेदः।

अतिरि न० अतिक्रान्तं रायं क्लीवत्वात् ह्रस्वः। धनातिक्रान्ते कुलादौ। तृतीयाद्यचि तु अतिरिणा अतिरिणे इत्येवमेकैकमेव रूपं, न पुंवद्भावः तस्य इगन्ताङ्गत्वाभावात्। पुंसि, स्त्रियाञ्च अतिरिः अतिरायावित्यादि।

अतिरिक्त त्रि० अति+रिच्-क्त। अतिशयिते, श्रेष्ठे, भिन्ने, शून्ये च। भावे क्त। अतिशये, आधिक्ये च न०। तत्र भेदे "अतिरिक्तमथापि यद्ब्रवेदिति" भाषा०। "न वृत्तवृत्ति व्यतिरिक्तचेष्टितं" कुमा०। यस्य यावत्प्रमाणं शुक्लं ततोऽधिकत्वे "हीनाङ्गीमतिरिक्ताङ्गीमिति" स्मृतिः।

अतिरुच् पु० रोचते इति रुच् स्त्रीयामूरुदेशः अतिक्रान्तो रुचम् अत्या०स०। जानुदेशे। अतिक्रान्तकान्तिके त्रि०। प्रा०स०। अतिशयितकान्तौ स्त्री।

अतिरूक्ष त्रि० अतिशयितः रूक्षः प्रा०स०। अत्यन्तरूक्षे स्नेहशून्ये च। तथाभूते कङ्कोद्रवादिधान्ये पु०। अतिक्रान्तोरूक्षम्। अतिशयस्निग्धे त्रि०।

अतिरूप पु० अतिक्रान्तो रूपम्। रूपवर्জ্জिते परमेश्वरे। "अशब्दमस्पर्शमरूपमव्ययमिति" श्रुत्वा तस्य रूपहीनताप्रतिपादनात्तथात्वम्। शुक्लादिरूपहीने वाच्यादौ त्रि०। अतिशयितं रूपम् प्रा०स०। सुन्दररूपे न०। "अतिरूपवती कन्या"।

अतिरेक पु० अति+रिच्-घञ्। अतिशये, भेदे, प्राधान्ये, आधिक्ये च। "संपूर्णमेतयोर्द्वैधमतिरेके परेऽहनीति" तिथित०। [प्रा०ब०। अत्यन्तरोगयुक्ते त्रि०।

अतिरोग पु० अतिशयितो रोगः प्रा०स०। ज्वररोगे

अतिरोधान न० न तिरोधानम्। प्रकाशे, व्यवधानाभावे च।

अतिरोमश पु० अतिशयितं रोम अतिरोमन्+अस्त्यर्थे मत्। वनजाते छागे, वृहद्वानरे च। अत्यन्तरोमाढ्ये त्रि०।

अतिरोहित त्रि० न तिरोहितः। प्रकाशिते स्फुटेऽर्थे "अतिरोहितार्थमब्रवीदिति" प्रभिता०। अव्यवहिते च।

अतिलोमश पु० अतिरोमवत् । वनजाते क्षुपे दृढद्रुमरे च । अतिलोमयुक्ते त्रि० । नीलवृक्षायां स्त्री ।

अतिवक्त त्रि० अति+वच–तृच् । वाचालुके, वाचोयुक्तिदक्षे च ।

अतिवक्त्र पु० ब्रा०स० "अतिवक्त्रा नगाष्टके" इति ज्योतिषोक्ते सूर्य्यस्य सप्तमाष्टमस्थितिवशात् पूर्व्वगतिविपरीतपश्चाद्गतिशालिनि भौमादिपञ्चपञ्चके । अत्यन्तकुटिले त्रि० ।

अतिवयस् त्रि० अतिक्रान्तो वयः कालकृतावस्थां, वयसं पक्षिणं वा । प्राप्तवार्द्धके, अतिक्रान्तपक्षिणि च ।

अतिवर्णाश्रमिन् पु० अतिक्रान्तो वर्णानामाश्रमिणश्च अत्रा० स० । ब्राह्मणादिवर्णभिन्ने ब्रह्मचर्य्याद्याश्रमिभिन्ने च "यो वेदान्तमहावाक्यश्रवणेनैव केवलम् आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवे"दित्यादृक्तलक्षणे एकात्मज्ञानिनि

अतिवर्त्तन न० अति+वृत-ल्युट् । अतिरेके । अतिक्रमण दण्डं वर्त्तन्ते कर्त्तरि ल्यु । यानसारथ्यादेः, दण्डाभावप्रयोजके लिङ्गनखादिदशके मनुना "यानस्य चैव यातुश्च यानस्वामिन एव च दशातिवर्त्तनान्याहुरित्युपक्रम्य, लिङ्गनखे भग्नयुगे तिर्य्यक्प्रतिसुखागते अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च । छेदने चैव यन्त्राणां यन्त्ररश्मौ तथैव च । आक्रोशे चाप्यपैहीति न दण्डं मनुरब्रवीदिति" दण्डाभावकारणानि दश दर्शितानि ज्ञेयानि । अत्रा० स० । अतीतजीवनोपाये त्रि० ।

अतिवर्त्तिन् त्रि० अतीत्य वर्त्तते अति+वृत–णिनि । अतिक्रमशीले, अत्यगे च ।

अतिवर्त्तुल पु० अतिशयितः वर्त्तुलः । (वाटुलाकलाइ) इति ख्याते वर्त्तुलाकारके कलाये । अत्यन्तवर्त्तुले त्रि० ।

अतिवाद पु० अति+वद–घञ् । अत्युक्तौ, "अतिवादरता ये च" इति पुराणम् । "अतिवादं मंस्यतेऽतिवादेन" इति वेदः । कठोरवाक्ये, अप्रियवाक्ये च ।

अतिवादिन् त्रि० सर्व्वानतीत्य वदतीति अति+वद–णिनि । सर्व्वानतिक्रम्य वदनशीले, सर्व्वमतखण्डनेन स्वमतव्यवस्थापके च । "विजानन् विद्वान् भवते नातिवादीति" श्रुतिः ।

अतिवाह पु० अतीत्य देहमन्यदेहे वाहः प्रापणम् ७त० । ऐहिकभोगसाधनादृष्टक्षये सूक्ष्मभूतमात्रासहितसूक्ष्मशरीरावच्छिन्नजीवस्य देहान्तरादिसंयोगाय नयने, अतियापने च । अतिवाहे नियुक्तः ठक् । आतिवाहिकः तन्नियुक्ते त्रि० ।

अतिवाहक पु० अतीत्यैतं देहं वाहयति देहान्तरं प्रापयति अति+वह–ण्वुल् । ईश्वरनियोजिते अर्चिरादयभिमानिदेवभेदे । तथाहि "अर्चिषोऽहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षण्मासान् उदङ्एति तान् मासान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्यात्चन्द्रमसं चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः सएनं ब्रह्म गमयतीति" श्रुतौ वाक्यशेषे अमानवपुरुषस्य ब्रह्मलोकप्रापकत्वश्रुतेः तत्पूर्व्वेषामपि अर्चिरादीनां चेतनत्वमिति "आतिवाहिकास्तल्लिङ्गादिति" सूत्रे निर्णीतम् । "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति" गीताव्याख्यायाञ्च अर्चिरादयस्तदभिमानिनो देवता"इति श्रीधरस्वामिभिरप्युक्तम् युक्तञ्च अतिवाहिकेन्द्रियादिकसूक्ष्मशरीरस्य स्थानान्तरनयनं चेतनकर्त्तृकं विनाऽतुपपन्नमित्यतस्तदानीं तस्य स्थानान्तरगमनसिद्धये कल्पितचेतनानामेव प्रेरकत्वमिति । अन्यत्र, "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं" मित्युक्तस्य भोगसाधनस्य निखेषस्य सूक्ष्मशरीरस्य तदधिष्ठितजीवस्य च स्थानान्तरनयनमाश्रयभूतेन विना न सम्भवतीति तदाश्रयभूतं भूतपञ्चकं च कल्प्यते यथोक्तं मनुना "अक्षयोमात्राविनाशिन्यो दशार्द्धानाञ्च ताः स्मृताः । ताभिः सार्द्धम्"इत्युक्तम् शारीरकसूत्रे च "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त इति" भूतमात्रोपष्टब्धस्यैव संसरणमुक्तं सांख्ये च "चित्रं यथाश्रयमृते स्थाणुादिभ्यो विना यथा च्छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गमिति, संसरति निरुपभोगं भावैरतिवासितं लिङ्गमिति" चोक्तम् । अतिवाहप्रकारस्तु उत्क्रमणशब्दे विशेषेण वक्ष्यते । अति+वह–णिच् ण्वुल् अतिवाहकारके, अतियापके च त्रि० ।

अतिवाहिक त्रि० अतिवाहः अस्त्यस्य ठन् । अतिवाहयोग्ये अतिवाहशब्दोक्ते सूक्ष्मशरीरे । [अग्निशे च ।

अतिवाहित त्रि० अति+वह–णिच्–क्त । यापिते, अति-

अतिवाह्य त्रि० अति+वह–णिच् कर्म्मणि–यत् । अतिवाहयोग्ये कालादौ । [अतिवराहे त्रि० ।

अतिविकट पु० अतिशयेन विकटः । दुष्टकृमिणि ।

अतिविषा स्त्री अतिक्रान्ता विषम् अत्रा० स० । (आतइच्) इति ख्यातायाम् लतायाम् ।

"त्रिविधाऽतिविषा श्वेता शुक्ला कृष्णा तथाऽरुणा । रक्षोघ्नी विषरोगेषु त्रिदोषेव गुणाधिकेति" वैद्यकम् । विषातिक्रमकारके त्रि० । [क्वान्ते "तद्युक्तमतिदृष्टमिति" माघ० ।

अतिवृत्त त्रि० अतिक्रम्य वर्त्तते वृत–क्त । अतिक्रमिते, अति-

अतिवृत्ति स्त्री अति+वृत-क्तिन्। अतिक्रमे। वृत्ति-जीविका तामतिक्रान्ते त्रि०।

अतिवृद्ध त्रि० अत्यन्तं वृद्धः। अत्यन्तवृद्धियुक्ते, अतिजरति च। तृणादिच्छेदनासमर्थायां गवि स्त्री। "अतिवृद्धामतिक्षयामिति" स्मृतिः "अतिवृद्धाम् तृणच्छेदनासमर्थामिति" रघु०। "चतुःशतं समारभ्य यावद्वर्षसहस्रकम्। अतिवृद्धः स मन्वन्तु सर्वशास्त्रेषु वर्जितं इति तन्त्रोक्ते मन्त्रभेदे पु०।

अतिवृष्टि स्त्री अति+वृष-क्तिन्। अत्यन्तवृष्टौ शस्योपघातकोपद्रवरूपे "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाश्चेत्याद्युक्ते" ईतिभेदे "निरीतिभावं गमितेऽतिवृष्टय" इति नैष०।

अतिवेध पु० अत्यन्तोवेधः सम्पर्कः। "अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकाद्वयम्। अतिवेधोद्विघटिका प्रभासन्दर्शनात्रवेः" इतिकालतत्त्वे एकादश्याः दशमीसम्पर्कभेदे, "यातुधानं व्रतं योगे, मरुत्वेधे तु राक्षसम्। जम्भासुरस्यातिवेधः" इति ब्रह्मवै० जम्भासुरस्य फलदायकं न तु कर्त्तुः फलदम् तेन निन्द्यत्वात् सा एकादशी नैवोपास्येति।

अतिवेगित त्रि० अतिवेगो जातोऽस्य तारा० इतच्। जाताधिकवेगे "भौमाद्ययोऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः देवतैरपलभ्यन्ते सुदूरमतिवेगिताः" इति सूर्य्य०।

अतिवेल त्रि० अतिक्रान्तो वेलां मर्य्यादां कूलं वा अत्या०स०। अतिशयिते, निर्मर्य्यादे, समुद्रादिकूलातिक्रमकारके च। अतिक्रमे अव्ययी०। वेलातिक्रमे अव्य०।

अतिवोढृ त्रि० अति+वह-तृच्। अतिवहनकर्त्तरि प्राणके "अग्निर्वै पशोरतिवोढा स एतानतिवहतीति" श्रुतिः। स्त्रियां ङीप्।

अतिव्यथन न० अति+व्यध-णिच्-ल्युट् षटा० तत्स०। अत्यन्तपीड़ने, "सपत्नक्षिपत्नादतिव्यथने" इति पा०।

अतिव्यथा स्त्री अत्यन्ता व्यथा। अत्यन्तपीड़ायाम्।

अतिव्यय त्रि० अतिशयितोव्ययः। अपरिमितव्यये यस्य यावान् व्ययउचितस्ततोऽधिकव्यये व्ययनियमत्व, "पादेन तस्य धारकं कुर्य्यात् सञ्चयमात्मवान्। अर्द्धेन वाऽभरणं नित्यनैमित्तिकं तथा पादार्द्धेन सर्वस्य मूलभूतं विवर्द्धयेत् प्रयत्नतः पुंसामर्थः साफल्यमश्नुतेति" मार्क०पुरा०। "अतिव्ययात् स्वल्पकालात् क्लिश्येदर्थपरिक्षयादिति" नीति०।

अतिव्याप्ति स्त्री अतिशयेन लक्ष्यमलक्ष्यञ्चाविशिष्य व्याप्तिः व्यापनम्। अतिशयव्यापने (लक्ष्यस्येवालक्ष्यस्यापि व्यापने)। तथा च यत्र यस्य स्थितिरुचिता ततोऽन्यत्रापि तस्य सम्बन्धे प्रसक्ते अतिव्याप्तिः। यथा पृथिव्याः गन्धो लक्षणं तत्रैव तस्य स्थितिरुचिता तस्य वाय्वादौ सत्त्वप्रसङ्गे अतिव्याप्तिः। यथा वा धूमे वह्नेर्व्यापकता न तु जले, तत्र प्रसक्तौ अतिव्याप्तिः। एवञ्च पृथिव्या रूपवत्त्वं लक्षणम् जलादावतिव्याप्तम्। "परिगणनं कर्त्तव्यमव्याप्त्यतिव्याप्तिदोषवारणायेति" सिद्धा०कौ०।

अतिशक्करी पु० अतिक्रान्ता शक्करीमेकाक्षराधिक्यात्। पञ्चदशाक्षरपादके वृत्तभेदे "शक्करी सातिपूर्वा स्यादिति,वृत्त०।

अतिशक्ति स्त्री अतिशयिता शक्तिः कर्म्मसाधनं सामर्थ्यम् देहजं बलम् वा मा०स०। अतिशयिते सामर्थ्ये, अधिकवीर्य्ये च "स वीर्य्यमतिशक्तिभागि"त्यमरः। अतिक्रान्तः शक्तिम् अत्या०स०। सामर्थ्यातिक्रमकारके त्रि०। अतिशयिता शक्तिर्यस्य ब०। अतिशयबलवति त्रि०। अतिक्रमेऽव्ययी०। शक्त्यतिक्रमे अव्य०।

अतिशय पु० अति+शीङ्-अच्। आधिक्ये, अतिरेके च। अतिक्रान्तः शयं वृत्तम् अत्या०स०। वृत्तातिक्रमकारके त्रि०। अतिशय+अस्त्यर्थे अच्। अतिशयवति। "अतिशयरयशालिनेति" काद०। द्वारे व्यापारे च "चिरध्वस्तं फलायालं न कर्म्मातिशयं विले"त्युदयनः।

अतिशयन न० अति+शी-भावे ल्युट्। अतिरेके अतिशयार्थे। अतिक्रान्तं शयनम् अत्या०स०।

अतिशयित त्रि० अति+शीङ्-क्त। अधिके, अतिक्रान्ते च।

अतिशयिन् त्रि० अति+शी-इनि। अतिशयान्विते स्त्रियां ङीप्। "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यादिति" काव्यप्र०।

अतिशयोक्ति स्त्री अतिशयेन उक्तिर्निर्देशः यत्र। अलङ्कारभेदे (सा० १० परि०) "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते भेदेऽभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ। पौर्वापर्य्यात्ययः कार्य्यहेत्वोः सा पञ्चधा मते"त्युक्तलक्षणे अर्थालङ्कारभेदे यथा "विश्लेषदुःखादिव बद्धमौन"मित्यत्र चेतनगतं मौनित्वमन्यत्, अचेतनगतञ्चान्यदिति द्वयोर्भेदेऽपि अभेदः। "अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पद" इत्यत्र लावण्यादेरभेदेऽपि अन्यशब्देन भेदः कृति" "अस्याः सर्गविधौ प्रजापतिरभूच्छ्रद्धो नु? कान्तिप्रद" इत्यादौ श्लोके "वेदाभ्यासजडं कथं नु? विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवे"दित्यादिना विधातुः स्रष्टृत्वसम्बन्धेऽपि तदसम्बन्धः। "यदि स्यान्मयुखले यत्तमिन्दोरिन्दीवरद्वयम् तदोपमीयते तस्या वदनं चारुलोचनमिति" यदि शब्दबला-

दाकृतसम्भावनायैव सम्बन्धात् तद्विपर्य्ययः। "समभेव समाक्रान्तं इयं हिरदगामिना तेन सिंहासनं पितमखिलस्वारिमण्डल"मित्यत्र कार्य्यकारणयोः पौर्ब्बापर्य्याभावः।*

अतिशायन न० अति-शीङ् ल्युट् "अतिशायने इष्ठ"नित्यादिस्थलनिर्देशात् नि० दीर्घः। आधिक्ये, प्रकर्षे च। "भूमनिन्दाप्रशंसायां नित्ययोगेऽतिशायने इति" कारिका।

अतिशीत न० अतिशयितं शीतम् प्रा०स०। अत्यन्तशीतलस्पर्शे। तद्विशिष्टे त्रि०।

अतिशेष पु० अतिशिष्यते कर्म्मणि घञ्। खल्वावशिष्टे, "स हि खादित्वातिशेषान् जायाया आजहारेति"। [श्रेष्ठे च।

अतिशोभन त्रि० अति+शुभ-ल्यु। अत्यन्तशोभान्विते,

अतिश्वन् त्रि० अतिक्रान्तः श्वानं वक्षेन यच् समा०। वराहादौ। सेवायां स्त्री, सेवायाः कुक्कुरवत् पराधीनवृत्तित्वात् तथात्वम्। अतएव मनुना "न श्वदत्त्या कदाचनेति" सेवायाः कुक्कुरवृत्तित्वेन निषेधः कृतः।

अतिश्वन् पु० अतिशयितः श्वन्दरः श्वा अतेः पूजार्थत्वात् न समा०। उत्तमककुरे तद्दूरदेशादौ पक्षा० फक्। आतिश्वायनः तद्दूरदेशादौ त्रि०।

अतिष्ठा त्रि० अतीत्य सर्व्वान् तिष्ठति स्था-किप्-यत्वम्। सर्व्वातीते। "अतिष्ठा वा एषा छन्दसां यदतिच्छन्दा अतिष्ठा अश्वमेधो यज्ञानामिति" श्रु०उ०।

अतिसञ्चय पु० अतीत्य आवश्यकत्वं सञ्चयः। मधुमक्षिकादीनामिव स्वपरवञ्चनेनातिमात्रसञ्चये।

अतिसन्ध त्रि० अतिक्रान्तः सन्धां सन्धानं मर्य्यादां वा अत्या० स०। सन्धानवर्জ্জिते, अतिक्रान्तमर्य्यादे च।

अतिसन्धेय त्रि० अतिकष्टेन सन्धेयः अनुसन्धेयः संयोज्योवा। कष्टानुसन्धेये, कष्टेन संयोजनीये च।

अतिसन्ध्या स्त्री अत्यासन्ना सन्ध्या यस्याः ब०स०। पूर्व्वदिवसीयरात्रिशेषदण्डादिपरदिनसूर्य्योदयपर्य्यन्तः, सूर्य्यास्तात् पूर्व्वोत्तरदण्डात्मकश्च कालः सन्ध्या। तस्याः आसन्ने काले। "नातिसन्ध्यासमीपत" इति स्मृतिः।

अतिसर त्रि० अतीत्य खगतिमुल्लङ्घ्य सरति अति+सृ-अच्। अतिचारिणि, अयसरे च यां "असावतिसरांस्कारेति

अतिसर्ग पु० अति+सृज-घञ्। दाने। "सद्भुर्वरातिसर्गांस्तु मया तस्य दुरात्मनः" इति रघुः। सर्गं सृष्टिमति क्रान्तरि, त्रिक्ते, मुक्ते च त्रि०। अतिसृज्यते यथेष्टं कर्म्म क्रियतेऽनेन। कामचारानुज्ञायाम् यथेष्टं क्रियतामित्याद्यभिलाषरूपायाम् "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रैषातिसर्गेति" पा०। अतिसर्गः कामचारानुज्ञेति वृत्तिः।

अतिसर्জन न० अति+सृज-ल्युट्। दाने, वधे, विप्रलम्भे, अतिशयदाने च। "ज्वलनातिसर्জनादिति" कुमा०।

अतिसर्व्व त्रि० अतिक्रान्तः सर्वान् अत्या०स० गौणत्वान्न सर्वनामता। सर्वातिगे सर्वातीते। "अतिसर्वाय सर्वायेति" मुग्ध०।

अतिसान्तपन न० अतिक्रान्तं सान्तपनमधिकदिनसाध्यत्वात् अत्या० स०। "गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकाहं द्वितीयमुपवसेत्तत् सान्तपनम्, तत्राहाभ्यस्तेऽतिसान्तपनमिति" विष्णुक्ते व्रतभेदे।

अतिसाम्या स्त्री अत्यन्तं साम्यं मधुनाऽस्याः। मधुयष्टिलतायाम्। प्रा०स०। अत्यन्तसादृश्ये न०।

अतिसायम् अव्य० अत्यासन्नं सायम् यस्य ब०स०। सायंकालसमीपे काले "नातिप्रगे नातिसायमिति" स्मृतिः।

अति(ती)सार पु० अतिसारयति मलम् दूरीकृत्य अति+सृ-णिच्-अच् वा अतेः दीर्घः। रोगभेदे उदरामये। तस्य निदानादि सुश्रुते उक्तं यथा "गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः। विरुद्धाध्यशनाजीर्णिविषमैश्चापि भोजनैः। क्लेदादीरतियुक्तैश्च मिथ्यायुक्तैर्विकल्पकैः। शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यस्तुपर्य्ययैः। जलाभिरमणैर्वेगविघातैः क्षमिद्दोषतः। स्रष्टा भवत्यतीसारो सप्तधा तस्य वक्ष्यते। (तस्य संप्राप्तिः) "संशम्यापां धातुरग्निं प्रदुष्टः प्रक्लिन्नाम्बो वायुनाधः प्रणुन्नः। सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति। एकैकशः, स सर्वशश्चापि ४ दोषैः शोकेनान्यः५ षष्ठ आमेन ६ सप्तः॥ (तस्य पूर्व्वरूपम्) हृन्नाभिपायूदरकुक्षितोद गात्रावसादाग्निसदिरोधाः। विट्सङ्ग आध्मानमथाऽविपाको भविष्यतस्तस्य पुरःसराणि। (वातजः) भूताविषः सक्तमलोऽल्पमूत्रो सस्तापानः सशकृच्छूलजङ्घः। वर्चोसृजन्नल्पमलं सफेनं रूक्षं श्यावं सानिलं मारुतेन। (पित्तजः) दुर्गन्ध्युष्णं वेगवन्नातिसतोयमल्पं भिन्नं सिक्षद्देहोऽतितीक्ष्णम्। पित्तात्तीतं नीलमाक्षोहितं वा हृत्वा मूर्च्छां दाहपाकज्वरार्त्तोः (कफजः) तन्द्रानिद्रागौरवोत्क्लेशसादी वेगावस्थो श्लेष्मविट्कोऽपि भूयः। शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं भक्तद्वेषी निष्ठनं श्लेष्मरोमा॥ (सन्निपातजः) तन्द्रायुक्तो दोषलक्षणदोषी वर्चः कृष्णं श्लेष्मवर्णं हृत्पार्श्वैः। सर्व्वैर्भूतैः सर्वलिङ्गोपपत्तिः कृच्छ्रत्राणं वाग्यतस्त्वेकसाध्यः॥ (शोकजः) तैस्तैर्भावैः शोचतोऽत्यायतस्य वाजो वेगः पक्वाशयाविध्य-

जनोः। कोष्ठं गत्वा क्षोभयन् यस्य रक्तं तच्चाधस्तात्काकनलोमप्रकाशम् ॥ वर्च्चोमिश्रं निःपुरीषं सगन्धं निर्गन्धं वा सार्य्यते तेन कोष्ठात्। शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥ (आमजः) आमाजीर्णैः प्रदुताः क्षोभयन्तः कोष्ठं दोषाः सम्प्रदुष्टाः सभक्तम्। नानावर्णं नैकशः सारयन्ति कृच्छ्राज्जन्तोः षड्भमेनं वदन्ति ॥

अति(ती)सारकिन् त्रि० अतिसारो रोगोऽस्यास्ति अतिसार+इनि-कक्-च्। अतिसाररोगवति। [अतिसाररोगे।

अतिसारिन् पु० अत्यन्तं सारयति मलम् अति+सृ-णिनि।

अतिसृज्य त्रि० अति+सृज-क्यप्। त्याज्ये, सर्जनीये च।

अतिसृष्ट त्रि० अति+सृज-क्त। दत्ते, प्रेरिते च।

अतिसौरभ पु० अतिशयितं सौरभमस्य ब०। अत्यन्तामोदयति आम्रे। सौरभान्विते वस्तुभाते त्रि०। प्रा०स०। अत्यन्तसुरभिगन्धे न०। [माधवरेदिति" कृतिः।

अतिसौहित्य न० प्रा०स०। अत्यन्ततृप्तौ "नातिसौहित्य-

अतिस्तुति स्त्री अति+स्तु-क्तिन् अतेः पूजार्थत्वाद्दुपसर्गत्व बाधाच्च षत्वम्। अविद्यमानगुणानुकीर्त्तने।

अतिस्पर्श त्रि० अतिक्रान्तः स्पर्शं वर्णोच्चारणप्रयत्नभेदं दानं वा। जिह्वाग्रादेः सम्पूर्णस्पर्शाभावेन ईषत्स्पर्शभावेन उष्माणं यरलवात्मके वर्णे स्वरवर्णे च "अचोऽस्पृष्टा य ण-म्भीषध्मेऽस्पृष्टाः शलस्तथेति" शिक्षायां तेषामुच्चारणेऽस्पर्शं षत्स्पर्शयोरुत्कर्षत्वात्। दानहीने कृपणे अधमे च। "अतिस्पर्शो वर्वरता च रेफे" इति। प्रा०स०। अत्यन्तस्पर्शे।

अतिस्फार त्रि० प्रा०स०। अत्यन्तस्फूर्त्तिशालिनि, अतिदृढे च।

अतिहसित न० अति+हस-क्त। उच्चहासे। षत्व्। अतिहासोऽप्यत्र पु०। [अति+हस+णि-अतिहसयति।

अतिहस्ति नामधातुः हस्तो निरस्यति हस्तिनाऽतिक्रामति वा

अतीक्ष्ण त्रि० न०त०। तीक्ष्णत्वविरोधिमृदुत्ववति। विषयुङ्मलोहरूपतीक्ष्णशब्दार्थभिन्ने न०।

अतीत त्रि० अति+इण-क्त। अतिक्रान्ते, भूतकाले च। तद्वृत्तौ आरब्धपरिसमाप्ते पदार्थमात्रे त्रि०। अतीतस्य वर्त्तमानध्वंसप्रतियोगी। भवति च अपचदित्यादौ पाकादेर्वर्त्तमानध्वंसप्रतियोगित्वम्। स च कालो द्विविधः अद्यतनः अनद्यतनश्च अद्यतनस्तु अतीतायाः रात्रेः पश्चार्द्धेन, आगामिन्याः पूर्व्वार्द्धेन च सङ्कितः कालः। तत्र वृत्तिध्वं सप्रतियोगी अद्यतनातीतः तदरिक्तः अनद्यतनः। तत्रानद्यतने भूते लङ् (अपचत्) "अनद्यतने लङिति" सूत्रात् तस्यैव वक्तुरपारोक्ष्यविवक्षायां लिट् (पपाच) "परोक्षानद्यतने लिडिति" सूत्रात्। भूतसामान्ये लुङ्। अपाक्षीत्। स्वयञ्ज्यादियोगे लटोऽपि भूतत्वमर्थः। कालस्तु क्रियान्वयी सर्वत्र, "क्रियाभेदाय कालस्त्विति" हर्य्युक्तेः। अतीतत्वादिकन्तु सर्वत्र प्रयोगकालमादायैव व्यवह्रियते इत्यादिकमाकरे द्रष्टव्यम्। अतीतकाले, "शीतेऽतीते वसनमशनमिति" "कालातीता वृथा सन्ध्येति" "संवत्सरे व्यतीते तु पुनरागमनाय चेति" तत्कालवृत्तौ "अलमतीतवार्त्तयेत्यादि"।

अतीन्द्र पु० अतिक्रान्त इन्द्रम् गुणैः अत्या०। इन्द्रगुणातिगे विष्णौ इन्द्रातिगमात्रे त्रि० "अतीन्द्रमतिरुद्रं च भवतश्चरितं परमिति" पुरा०।

अतीन्द्रिय त्रि० अतिक्रान्तमिन्द्रियं तद्विषयत्वात् अत्या० स०। इन्द्रियायोग्ये अप्रत्यक्षे, "नेत्रश्रोत्रनासिकारसनात्वक्चेतांसीन्द्रियाणि तैर्ज्ञातुमशक्ये विषये। "ज्ञानं यच्चिर्विकल्पाख्यं तदतीन्द्रियमिष्यते" भाषा०। "यत्तत् सूक्ष्ममतीन्द्रियमिति" गीता। ईश्वरे च तस्य तथात्वम् बाह्येन्द्रियायोग्यत्वेनैव अन्यथा "मनसैवानुद्रष्टव्य" इति श्रुतौ ज्ञानविषयत्वमुक्तं विरुध्येत। "यन्मनसा न मनुते" इत्यादिकं तु अशुद्धमनसोऽविषयत्वपरम्। अत एव "विशुद्धचेतसा गम्यमिति" वाक्यान्तरम्। किञ्च वेदान्तिमते ज्ञानं द्विविधं वृत्तिरूपं तदवच्छिन्नमनोवृत्तिप्रतिबिम्बितचैतन्यरूपञ्च तत्र बाह्येन्द्रियाणां रूपादिष्वेव ग्राह्यत्वमीश्वरस्य रूपादेरभावेन बाह्येन्द्रियायोग्यत्वाभावेऽपि मनोवृत्तिविषयत्वमस्त्येव अतिसूक्ष्मत्वाच्च नाशुद्धमनोविषयत्वमित्येव भेदः। किन्तु मनोवृत्तिविषयत्वेऽपि तदवच्छिन्नचैतन्याविषयत्वात्तस्य मानसाविषयत्वम् अतएवोक्तमभियुक्तैः "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति"। अन्यथा विषयगताज्ञाननिवृत्तिं प्रति स्वविषयकमनोवृत्तेः कारणतया तदभावे कथंकारं? तद्गताज्ञाननिवृत्तिः स्यात् एतत्पक्षेऽप्यतीन्द्रियत्वं तज्जन्यवृत्त्यवच्छिन्नचैतन्याविषयत्वेन द्रष्टव्यम्।

अतीव अव्य० अत्येव-इवः अवधारणे प्रा०स०। अवधृतातिशयेऽत्यन्तातिशये च। अतीव विव्यधे" इति भार०। "अतीव सुकुमाराङ्गीति"। "उच्चैःशिरसामतीवेति" कु०।

अतुल पु० नास्ति तुला शुभ्रपुष्पतायामस्याः। तिलकवृक्षे तुलारहिते त्रि०। "रामस्त्वतुलविक्रम" इति रामा०।

अतुल्य त्रि० न तुल्यः । असदृशे असमाने "अतुल्यमहसा-सार्द्धं रामेण मम विग्रहं" इति भट्टिः ।

अतुष त्रि० नास्ति तुषोऽस्य । अवघातादिना निस्तुषीकृते धान्यादौ "अतुषानिव यवान् कृत्वेति" ।

अतुहिनरश्मि पु० न तुहिनः अहिम उष्णो रश्मिरस्य । उष्णरश्मौ सूर्य्ये । न०त० । उष्णरश्मौ पु० ।

अतूतुजि पु० न+तुज-कि द्वित्वदीर्घे । अदातरि । "अतूतुजिं चित् तूतुजिरग्निमदिति" ऋ०तूतुजिर्दातेति भा० ।

अतूर्त्त त्रि० न तूर्यते तुरी हिंसायाम् क्त इदित्त्वादिट् न । अहिंसिते । "अतूर्त्तोः राजा श्व इच्छसान इति ऋ० । अतूर्त्तः अहिंसित इति भा० ।

अतृणाद त्रि० न तृणमत्ति अद-अण्-उप० न०त० । तृणाभक्षके दुग्धमात्रपोष्ये गवादिवत्से । "अथ वत्सं जातमाहुरतृणादमिति" वेदः । [मनर्हे पर्वते ।

अतृदिल पु० न तृद्यते बध्यते तृद-किलच् न०त० । हन्तु-

अतृप्ति स्त्री तृप्तिः सन्तोषः अभावार्थे-न०त० । तृप्त्यभावे ब० । तृप्तिरहिते, असन्तोषिणि, लोलुपे च त्रि० ।

अतेजस् न० न तेजः विरोधे न०त० । तेजोविरोधिनि तमसि छायायाम् । नास्ति तेजोऽस्य वा न कप् । तेजोरहिते त्रि० कपि । अतितेजस्कोऽयत्र त्रि० ।

अत्क पु० अतति सततं विस्तृतिम् अत-कन किच्चम् । शरीरावयवे "स्तरीनात्कं व्युतं वसानेति" श्रुतिः । अततिं सततं गच्छति । यान्ये त्रि० ।

अत्तवे अव्य० अद-तुमर्थे तवेङ् । अत्तुमित्यर्थे "हविषेऽत्तवे इति" यजु० । "अत्तवे हविर्भक्षितुमिति" वेददीपः ।

अत्ता स्त्री अतति सततं सम्बध्नाति अत-तक् टडभावः । मातरि, स्त्रियाः-श्वश्वाञ्च । स्वार्थे के कापि अत इत्त्वे । अत्तिकायत्र ।

अत्ति त्रि० अद्यते सर्व्वदा सम्बध्यते कर्म्मणि क्तिन् । मातरि, ज्येष्ठभगिन्यां, स्त्रियाः—श्वश्वाञ्च । स्वार्थे कन् । तत्रैवार्थे ।

अत्तृ पु० अद्-तृच् । परमेश्वरे, "अत्ता चराचरग्रहणादिति" शारीरकसूत्रम् तस्य अत्तृत्वञ्च "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनो मृत्युर्यस्योपसेचनमिति" श्रुतौ सर्व्वभक्षकत्वेनोक्तेः । अधिकमदितिशब्दे वक्ष्यते भक्षणकर्त्तृमात्रे त्रि० स्त्रियां ङीप् । "अरक्षितारमत्तारं रूपं विद्यादधोगतिमिति" भार० ।

अत्न न० अतति जयपराजयावत्र अत-न । युद्धे । निरु०

अत्नु पु० अत-नु । वायौ । सततगन्तरि । पथिके त्रि० । उणा०

अत्य त्रि० अतति शीघ्रं गच्छति कर्त्तरि यत् । शीघ्रगेऽश्वे, "अश्वोऽस्यत्योऽसि मयोसीति" ता० ब्रा० । "अशुमत्यं न वाजिनमिति" वेदः ।

अत्यग्निष्टोम पु० अतिक्रान्तोऽग्निष्टोममधिकफलत्वात् अत्या० स० । "अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी राजसेयोऽतिरात्रोऽप्तोर्याम इति" गवामयनसंस्थयज्ञभेदे ।

अत्यङ्कुश पु० अतिक्रान्तोऽङ्कुशं तत्प्रयोक्तुमनादृत्य यथेष्टं प्रवृत्तत्वात् अत्या० स० । अङ्कुशाघातानादरेण यथेच्छं प्रवृत्ते उत्कटे दुर्दान्ते गजे । [अङ्कुलिपरिमाणाधिके ।

अत्यङ्गुल त्रि० अतिक्रान्तोऽङ्गुलिं तत्परिमाणम् अच् समा० ।

अत्यध्व त्रि० अतिक्रान्तोऽध्वानम् अत्या० स० अच् समा० । अतिक्रान्तपथे प्रा० स० । अतः पूजनार्थत्वान्न समा० । अत्यध्वन् । सुपथि पु० ।

अत्यन्त न० अतिक्रान्तोऽन्तं सीमाम् अत्या० स० । अतिशये । तद्युक्ते सर्व्वपरिच्छेदातिक्रान्ते त्रि० । अतिक्रमेऽव्ययी० । परिच्छेदातिक्रमे नाशातिक्रमे च अव्य० । "किं वा तयात्यन्तवियोगदुःखे" इति रघु० "अत्यन्तहिमोत्तरानिला इति" कुमा० । "सुखमत्यन्तमश्नुते" इति गीता । "शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" च पुरा० । "अत्यन्ते भवः ठक् आत्यन्तिकः । अत्यन्तभवे वस्तुनि त्रि० । नाशातिक्रान्ते त्रि० "अत्यन्तं निर्जगद्गोमीति" पञ्चदशी ।

अत्यन्तकोपन त्रि० अत्यन्तं भृशं कुप्यति अति+कुप-ल्यु । भृशकोपान्विते अतिकोपयुते ।

अत्यन्तगामिन् त्रि० अत्यन्तम् अन्तात्ययं अति+अन्त-अत्यये अव्ययीभावः तद्गच्छति गम-कर्त्तरि णिनि । आत्यन्तिके अतिशयगमनशीले च । स्त्रियामत्यन्तगामिनी ।

अत्यन्तनिवृत्ति स्त्री अत्यन्ता निवृत्तिः । स्वप्रतियोगिजातीयप्रागभावासमानाधिकरणे ध्वंसे । यस्यां सत्यां स्वप्रतियोगिजातीयस्याप्यस्य पुनरुत्पत्तिर्न भवेत् तादृशी निवृत्तिरत्यन्तनिवृत्तिः "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इति" सांख्यसूत्रम् । सा च मोक्षावस्थायामेव, मोक्षे हि विवेकेनाविद्यानिवृत्तौ तत्कार्य्यस्य दुःखादेः सुतरां समूलमुच्छेद इति तत्र न पुनर्दुःखोत्पादः अतस्तत्र दुःखात्यन्तनिवृत्तिः ।

अत्यन्तसंयोग पु० अत्यन्तेन साकल्येन संयोगः संबन्धः व्याप्तिरिति यावत् अन्तमवसानमतिक्रान्तः संयोगो वा । सन्ततसम्बन्धे, व्याप्तौ च । "कालाध्वनोरत्यन्तसंयोग" इति पा० । [द्वये राजनि० ।

अत्यन्तसुकुमार पु० अत्यन्तं सुकुमार इव । (काञ्ची) कञ्जनी

अत्यन्ताभाव पु० अत्यन्तः अन्तमतिक्रान्तः नित्यः अभावः कर्म्म० । नास्तीति वाक्याभिलप्यमाने नाशप्रागभावभिन्ने संसर्गाभावे । यथा न्यायमते भूतले घटाभावः प्रतीयते स च भूतले घटोनास्ति इति वाक्येन अभिलप्यते सोऽयमभावः, न नाशः, नापि प्रागभावः तयोः समवायि देशवृत्तित्वनियमात् भूतलादेश्च तदभावात् । नाशप्रागभावयोस्तु न अत्यन्तता प्रतियोगिकाले तयोरसत्त्वात् । नापि तयोर्नित्यता प्रागभावस्य प्रयोगिनाश्यत्वात् ध्वंसस्य च प्रतियोगिजन्यत्वात् । भेदस्य नित्यत्वेऽपि संसर्गाभावत्वाभावात् न तथात्वम् । अत्यन्ताभावस्य नित्यत्वेऽपि प्रतियोगिसत्त्वकाले न तत्प्रतीतिः अभावप्रत्यक्षे योग्यानुपलब्धेर्हेतुतया योग्यस्य घटादिरूपप्रतियोगिन उपलब्धौ तदनुपलब्धेरभावात् । नापि एकस्मिन् भावाभावयोः सत्त्वं विरुद्धम् एकस्मिन्नपि हृदे कपिसंयोगतद्भावयोरवच्छेदभेदेन सत्त्वदर्शनात् तथा च एकस्मिन्नपि भूतलेऽवच्छेदभेदेन तयोः सत्त्वं न विरुध्यते । द्रव्यादौ गुणतद्भावयोः कालरूपावयवच्छेदभेदेन स्थितिरपि न विरुद्धा । तथा च प्रतियोगिसत्त्वकाले द्रव्ये गुणात्यन्ताभावबुद्धिः प्रतिबन्धकसङ्गावेन परं नोदेति इत्येव विरोधमात्रम् । अधिकमभावशब्दे वक्ष्यते । "प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव चेति" भाषा० ।

अत्यन्तिक त्रि० अत्यन्तं गच्छति अत्यन्त+ठन् । अतिशयितगमनकारिणि । अतिशयितमन्तिकं निकटं प्रा० स० । अतिनिकटे न० । तद्वृत्तौ त्रि० । नाहैवात्यन्तिके सोदूरे तत् स्थापयेदिति । अत्या०स० । अतिक्रान्तसामीप्ये दूरे न० । तद्वृत्तौ त्रि० ।

अत्यन्तीन त्रि० अन्तमत्ययः अत्यन्तम् अत्यये व्ययी० अत्यन्तं गामी अत्यन्त+ख । अतिशयितगतिशीले । "लक्ष्मीं परम्परीणां त्वमत्यन्तीनत्वसङ्गयेति" भट्टिः ।

अत्यम्ल पु० अतिशयितोऽम्लोरसः फलपत्रादौ यस्य ब० । (तेतुल) इति प्रसिद्धे तिन्तिड़ीवृक्षे । अत्यन्ताम्लरसवति वस्तुमात्रे त्रि० । वनबीजपूरे (टाबालेबु) इति प्रसिद्धे वृक्षे स्त्री । अम्लरसस्य लक्षणादुक्तं सुश्रुते यथा "यो दन्तहर्षमुत्पादयति मुखस्रावं जनयति श्रद्धाञ्चोत्पादयति सोऽम्ल इति" अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही वह्निप्रीतः क्लेदनःप्रायशो हृद्यश्चेति स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्षनयनसंमीलनरोमसंवेजनकफविलयनशरीरशैथिल्यान्यादयति तथा क्षतार्भिहतदग्धदष्टभग्नशूलरुग्णप्रच्युताऽवमूत्रितविसर्पितच्छिन्नभिन्नविड्भेदादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति" । अम्लद्रव्याणि च तत्र कानिचित् प्राधान्येन दर्शितानि यथा । दाड़िमामलकमातुलुङ्गाम्रातक-कपित्थकरमर्दवरकोलप्राचीनामलकतिन्तिड़ीकक्रोशाम्लभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठदर्धितक्षुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लवर्ग इति ।

अत्यम्लपर्णी स्त्री अत्यम्लं पर्णं यस्याः जातित्वात् ङीप् । अत्यम्लपत्रयुक्ते वनबीजपूरे (टाबालेबु) इति ख्याते वृक्षे ।

अत्यय पु० अति+इण-अच् । अतिक्रमे, अभावे, विनाशे, दोषे, कृच्छ्रे, अतिक्रमण गमने, कार्य्यस्यावश्यम्भावाभावे च । "प्राणात्यये च सम्प्राप्ते योऽन्नमत्ति यतस्ततः । न स पापेन लिप्येत पद्मपत्रमिवाम्भसेति" स्मृतिः । "क्षुरस्य धारा निशिता दुरत्ययेति" श्रुतिः । अत्ययं कालातिक्रमं न सहते ठक् आत्ययिकः । विलम्बाक्षमे कार्य्ये त्रि० । "आत्ययिकेषु कार्य्येषु सद्य एवाधिवासयेदिति" पुराणम् ।

अत्यर्थ न० अतिक्रान्तमर्थमनुरूपस्वरूपं अत्या०स० । अतिशये । तद्वति त्रि० । अत्यये अव्ययी० । अर्थाभावे अव्य० ।

अत्यल्प त्रि० अतिशयितोऽल्पः प्रा०स० । अत्यन्ताल्पे अणुतरे च । [कृत्यादिति" ।

अत्यशन न० अतिशयितमशनम् । अतिभोजने "नचैवात्यशनं

अत्यष्टि स्त्री अतिक्रान्ता अष्टिं षोड़शाक्षरपादिकां वृत्तिमेकाक्षराधिक्यात् अत्या०स० । सप्तदशाक्षरपादके छन्दोभेदे ।

अत्याकार पु० अतिशयेन आकारः तिरस्कारः अति+आ+कृ-घञ् । तिरस्कारे । "स्वाधात्याकारतदर्थेतेष्विति" पा० अतिशयित आकारो मूर्त्तिः प्रा०स० । वृक्षदृदेहे पु० । अतिशयित आकारो यस्य ब० । तद्विशिष्टे त्रि० ।

अत्याग पु० न त्यागः अभावार्थे न०त० । त्यागाभावे "उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनादिति" स्मृतिः ।

अत्यागिन् त्रि० त्यज-घिणुन् सन्द्यर्थे नञ् त० । कर्म्मफलाननुसन्धानेन कर्म्मानुष्ठायिनि, त्यागिभिन्ने च ।

अत्याचार पु० अत्युत्कट आचारः प्रा०स० । अनुचिताचरणे । अतिक्रमे अव्ययी० । अचारातिक्रमे अव्य० ।

अत्याज्य न० न त्यक्तुं शक्यम् शक्यार्थे ण्यत् न कृत्यम् । त्यागाशक्ये त्यागानर्हे च ।

अत्यादान त्रि० अतिक्रान्तम् आदानम् । आदानातिक्रान्ते अतिशयितमादानम् प्रा०स० । अत्यादाने ।

अत्याधान न०अति+आ+धा-ल्युट्। अतिक्रमणे, सम्बन्धमात्रे, उपरिस्थापने च। अत्यये अव्ययी०। आग्नाधानातिक्रमे अव्य०। अतिक्रम्य ज्येष्ठमाधानम्। ज्येष्ठातिक्रमेण अग्नाधाने न०।

अत्याय पु० अति+अय-घञ्। अतिक्रमे, "प्रजाहं तिस्रो "अत्यायमीयुरिति" श्रुतिः। अतिक्रान्तलाभे त्रि०। प्रा०स०। अतिशयिते लाभे पु०।

अत्यायु न० अति+आ+या-कु। यज्ञियपात्रभेदे। "मूर्द्धन्यत्यायु पात्रमसीति"ता०। "अत्यायुनामाभिधेयमिति" भाष्यम्। [विख्यातातिशये अतिप्रसिद्धौ च।

अत्यारूढि स्त्री अति+आ+रुह-क्तिन्। आरोहणातिशये।

अत्याल पु० अतिशयेन समन्तात् अलति पर्य्याप्नोति अति+आ+अल-अच्। (लालचिता) इति ख्याते रक्तचित्रकवृक्षे, तस्य अत्यल्पकालेन समन्तात् व्यापनात् तत्त्वम्।

अत्याशा स्त्री प्रा०स०। अपूरणीयधनादितृष्णायाम्। अत्या० स०। आशातिक्रान्ते त्रि०।

अत्याश्रम त्रि०अतिक्रान्त आश्रमान् तद्विहितधर्म्मान् अत्या० स०। सर्व्वाश्रमत्यागिनि परमहंसाश्रमिणि संन्यासिनि। अत्यात्याश्रमिन् इत्यपि। अतिशयित आश्रमः प्रा०स०। उत्तमाश्रमे संन्यासे पु०।

अत्याहित न० अत्यन्तमाधीयते तद्विवारणार्थं मनो दीयतेऽस्मिन् आ+धा-आधारे क्त। अत्यन्तभीतौ, प्राणहानिशङ्काकरे अनर्थे च। "किमत्रात्याहितमिति" नाटकम्।

अत्युक्ति स्त्री अतिशयेन अनौचित्येन वा उक्तिः अति+वच-क्तिन्। अतिशयोक्तौ, अन्याय्योक्तौ, निर्गुणस्य जड़स्य वा आरोपितगुणेन स्तवने। "अत्युक्तौ न यदि प्रकुप्यसि स्वभावादस्य नो मन्यसे" इत्युद्भटः।

अत्युक्ता(क्था) स्त्री उक्ता(क्था) एकाक्षरपादिका वृत्तिः ताम् अतिक्रान्ता अत्या०स०। द्व्यक्षरपादके छन्दोभेदे। अत्युक्थस्तु उक्थनामकसामभेदातिक्रान्तरि त्रि०।

अत्युच्छ्रित त्रि० अत्यन्तमुच्छ्रितः। अत्यन्तोन्नते उन्नतेः परमसीमापन्ने।

अत्युत्कट त्रि० अत्यन्त उत्कटः। अत्यन्तोग्रे। "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" इति पुरा०।

अत्युत्कृष्ट त्रि० अत्यन्तमुत्कृष्टः। परमसीमापन्नोत्कर्षयुते।

अत्यूमशा अव्य० अर्य्यादिगणोक्ते अनुकरणशब्दे हिंसायाद्योतकोऽयमित्यन्ये अत्यूमशाऽत्य। गणरत्ने तु अयं न दृश्यते गणपाठे तु दृश्यते इति विवेच्यम्।

अत्यूह पु० अतिशयेन ऊहते शब्दायते अति+ऊह-अच्। कालकण्ठे (डेओ) इति प्रसिद्धे दात्यूहे पक्षिणि। अतिशयेन ऊहस्तर्कः प्रा०स०। अतिशयितवितर्के। (नील) इति ख्यातौषधौ नीलिकायां स्त्री। अत्ययेऽव्ययी०। वितर्काभावे अव्य०।

अत्र अव्य० अस्मिन् एतस्मिन् वा इदम्+एतद्-वा सप्तम्यास्त्रल् प्रकृतेरभावश्च। अस्मिन् एतस्मिन् वेत्यर्थे। "कोऽत्र भूमिवलये जनान् सुधेति" माघः। न त्रायते केनापि त्रै-बा० कर्म्मणि क। अन्यत्राणायोग्ये त्रातिये "प्राणः क्षणितोः प्रत्यत्रमत्रमाप्नोतीति" श्रुतौ न त्रायते केनचिदत्र अत्रं प्राप्नोत्यर्थः।

अत्रप त्रि० नास्ति त्रपा यस्य। निर्लज्जे।

अत्रभवत् त्रि० अयमित्यर्थे अत्र "अन्येभ्योऽपीति" प्रथमार्थे त्रल् ततः कर्म्म०। पूज्ये, "जयमत्रभवान्नूनमरातिर्व्यभिलाषुक" इति भार०।

अत्रस्त त्रि० न त्रस्तः। त्रासरहिते त्रासोपाधिरहिते च "जगोगात्मानमत्रस्त" इति रघुः। त्रासोपाधिमन्तरेणेत्यर्थः मल्लिनाथः। [त्रासशून्ये त्रि०।

अत्रास पु० न त्रासः अभावार्थे न०त०। त्रासाभावे न०ब०।

अत्रि(त्रि) पु० अद-त्रिन् "मरीचिरत्रङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। ब्रह्मणोमानसाः पुत्रा वशिष्ठश्चेति सप्त ते इत्युक्ते सप्तर्षिमध्ये मुनिभेदे। "अग्निरत्रिं धर्म उक्षदत्न इति श्रुतिः"। अत्र पक्षे वा तलोपे अत्रिरित्यपि। त्रिभिन्ने त्रि० बहुवचनान्तः। अस्य उत्तरदिशि तारारूपेणापि स्थितिः बृहत्संहितायामुक्ता यथा "एकावलीव राजति सप्तर्षीणामलमालिनी सप्तैव। नाथवतीव च दिव्यैः कौवेरी सप्तभिर्मुनिभिः॥ ध्रुवनायकोपदेशाच्चरीनक्षत्रीवोत्तरा सदाभिमुखम्। यैश्चारमकं तेषां कथयिष्ये वृद्धगर्गमतात्॥ आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च॥ एकैकस्मिन्राशौ शतं शतं ते चरन्ति वर्षाणाम्। प्राग्दक्षरतश्चैते सदोदयस्ते समाश्लेषाः॥ पूर्वे भागे भगवान् मरीचिरपरे स्थितो वशिष्ठोऽत्रिः। तस्यांगिरास्ततोऽतिस्तस्यामश्चः पुलस्त्यश्च॥ पुलहः क्रतुरिति भगवानासन्नात्क्रमेण पूर्व्याद्याः। तत्र वशिष्ठं मुनिवरमुपाश्रिताऽरुन्धती साध्वी॥ उल्कापतिधूमाद्यैर्नैता विवर्णा विरश्मयो नृपाः। हन्युः स्वं स्वं वर्षं विपुलाः स्निग्धाश्च तदूर्द्ध्वं" इति॥ अत्रेर्वंशश्च तत्रैवोक्तो यथा

"अत्रेः कान्तारभवा" इति । अधिकं सप्तर्षि शब्देदृश्यम् । अद-त्रिनि । अत्तीत्यत्र उणादि० ।

अत्रिजात पु० अत्रेर्नेत्रात् जातः जन-क्त ५त० । चन्द्रे, चन्द्रोहि प्रजासर्गार्थं तपस्तप्तोऽत्रेर्नेत्रात् जातोयथा । "पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवान्ऋषिः । ब्रह्मणो मानसात् पूर्व्वं प्रजासर्गे विधित्सतः । तत्रात्रिः सर्व्वभूतानां तस्थौ खतनयैर्वृतः । कर्म्मणा मनसा वाचा शुभान्येव चचार सः । अहिंस्रः सर्वभूतेषु धर्म्मात्मा संयतव्रतः । काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः । अनुत्तरं नाम तपो येन तप्तं महत् पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति ह नः श्रुतम् । ततोर्द्ध्वरेतसस्तस्य स्थितस्यानिमिषस्य ह । सोमत्वं तनुरापेदे महासत्त्वस्य भारत । ऊर्द्धमाचक्रमे तस्य सोमत्वं भावितात्मनः । नेत्राभ्यां वारि सुस्राव दशधा द्योतयन् दिशः । तं गर्भविधिना कृत्वा दश देव्यो दधुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् । स ताभ्यः सप्तसैवाथ दिग्भ्यो गर्भः प्रभाभितः । पपात भासयन् लोकान् शीतांशुः सर्वभावनः । यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः । ततस्ताभिः सहैवासु निपतत वसुन्धराम् । पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया । स हि वेदमयस्तात ! धर्म्मात्मा सत्यसङ्गरः । युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतम् । तस्मिन्निपतिते देवाः पुत्रेऽत्रेः परमात्मनि । सप्तब्रह्मर्षयः पुत्रा मानसाः सम्प्रवे श्रुताः इति हरिवंशे ।

अत्रिदृग्ज पु० अत्रेर्दृग्योनेरब्जायते जन-ड ५त० । चन्द्रे अत्रिनेत्रजादयोऽप्यत्र । तद्विवृतिरत्रिजशब्दे दृश्यम् ।

अत्रिभारद्वाजिका स्त्री अत्रिभारद्वाजयोरपत्ययोः मैथुनम् "इन्द्राहुनं वैरमैथुनयोरिति" वुन् "वैरमैथुनकाद्विषु" स्त्रियामरोक्तेः स्त्रीत्वम् । तद्वंशजातयोः स्त्रीपुंसयोर्मैथुने ।

अत्रिसंहिता स्त्री अत्रेः संहिता स्मृतिः । वर्णाश्रमाचारादिबोधके अत्रिप्रणीते धर्मशास्त्रभेदे ।

अत्वरा स्त्री न त्वरा शीघ्रम् अभावार्थे न०त० । त्वराभावे "तीक्ष्णे आशे प्रशंसन्ति शौचमक्रोधमत्वरामिति" स्मृतिः ।

अत्सरुक पु० नास्ति त्सरुरिव सृष्टिबन्धनस्थानं यस्य । सृष्टिबन्धनस्थानशून्ये खड्गाकारे यज्ञियपात्रभेदे चमसे ।

अथ अव्य० चु०-अर्थ-ड पृषो० रलोपः । संशये, आरम्भे आनन्तर्य्ये, प्रश्ने, विकल्पे, प्रकरणे, समुच्चये पक्षान्तरे च । मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्या मङ्गलसाधनं भवति । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभा" वित्युक्तेस्तस्य श्रवणेन मङ्गलसाधनत्वम् अतएव शारीरकभाष्ये "अर्थान्तरप्रयुक्तोऽथशब्दः श्रुत्या मङ्गलमारचयती" त्युक्तम् । तत्र "अथातो ब्रह्मजिज्ञासेत्यादौ" साधनचतुष्टयानन्तर्य्यार्थे "अथ प्रजानामधिप" इत्यादौ चानन्तर्य्ये, "अथ योगानुशासन" मित्यत्र अधिकारारूपारम्भे "शब्दोनित्यः अथा नित्य" इत्यादौ संशये, संशयश्च एकधर्म्मिकं कोटिद्वयज्ञानं तत्र कोट्युपस्थापनस्य संशयहेतुत्वात् प्रकृते तस्यैव संशयशब्दार्थता विकल्पस्य संशयविशेष एव । "अथ शक्नोषि भोक्तुमित्यादौ" प्रश्ने, "अथ शब्दानुशासनमित्यत्र मङ्गलार्थतयोपादानमर्थस्तु अधिकार एव "अथ मरणमवश्यमेव जन्तोरिति" वेण्यां, "अथ चेत्त्वमिमं धर्म्म्यं संग्रामं न करिष्यसीत्यादौ गीतायां च पक्षान्तरे, अथातोधर्मं व्याख्यास्याम इत्यादौ कात्स्न्र्ये, "भीमोऽथार्জ্জুन" इत्यादौ समुच्चये, स्वरादिपाठादव्ययत्वम् ।

अथकिम् अव्य०अथ+कायतेः कवतेर्वा बा०डिमि । स्वीकारे । स्वीकारश्चेह नादानं, किन्तु अन्योक्तपदार्थस्य वक्तुः तथात्वेनाभ्युपगमात्मकज्ञानम्, तत्र द्योतकत्वमस्य शब्दस्य, यथा कस्यचित् "इत्थं वृत्तमिति" प्रश्ने अथकिमित्यादिना पृष्टवस्तुनः यथावृत्तत्वाभ्युपगमः स च वक्तुरेव ।

अथर्वण पु० अथर्वा तदुक्तविद्याऽस्यास्ति ज्ञातत्वात् अच् पृ० न टिलोपः । शिवे, त्रिकाण्ड० ।

अथर्ववेणि पु० अथर्ववेणि तदुक्तयज्ञादौ कुशलः बा० इञ् सित्त्वेन भत्वाभावात् न टिलोपः । अथर्ववेदोक्तकर्म्माभिज्ञे ब्राह्मणे पुरोहिते च मेदिनिः ।

अथर्वन् पु० अथ+ऋ-वनिप् यक० । अथर्वनामकऋषिविशेषे, स च कल्पभेदे ब्रह्मणो ज्येष्ठः पुत्रः यथोक्तं सृष्टौ । "ब्रह्मा देवानां प्रथमं संबभूवे"त्युपक्रम्य ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेत्युक्तम्" "अनेकेषु ब्रह्मणः सृष्टिप्रकारेषुअन्यतमस्य सृष्टिप्रकारस्य मुखे अयमथर्वा सृष्ट" इति भाष्यम् । "अथर्वणे यां प्रवदेत ब्रह्माथर्वा पुरोवाचाङ्गिरे इति" अथर्वायेत्युक्तेः अथर्वशब्दोऽदन्तोऽपि "सर्वे नान्ता अदन्ताः स्युरित्युक्तेः" पृषो० नलोपः । अथर्वणाऽधीतत्वात् वेदवेदे पु० । ततः तदेदाधीते वा ठक् आथर्वणिकः, अथर्वणा दृष्टं साम अण् आथर्वणम् । तेन प्रोक्तम् अधीयते कृतठको लुक् । अथर्वाणः । तत्प्रोक्ताध्यायिप्रभृतिष्वर्थेषु ।

अथर्ववित् पु० अथर्ववेदं तदुक्तं कर्म्म वा वेत्ति विद्-क्विप्। अथर्ववेदस्य "अग्नो देवीरभीष्टय" इत्यादिकस्य, तद्विहिताभिचारादिकर्म्मणश्च वेत्तरि वशिष्ठादौ। "गुरुणाऽथर्ववित्कृतक्रिय" इति रघुः।

अथर्ववेद पु० कर्म०। वेदभेदे तद्विहतिः "अथर्वस्य नव शाखाः, पैप्पलादा शौनकी दामोदा औह्मा ब्रह्मदा पथशौनकी देवदर्शी चारणविद्या चेति तेषामध्ययनं द्वादशैव सहस्राणि तस्य पञ्च कल्पा भवन्ति कल्पे कल्पे पञ्च शतानि भवन्ति नक्षत्रकल्पो, विधानकल्पः संहिताविधिकल्पः, अभिचारकल्पः, शान्तिकल्पश्चेति" चरणव्यूहोक्ता। तस्याध्ययनप्रचारभेदादि विष्णुपुराणेऽभिहितं यथा

"अथर्वाणामथो वक्ष्ये संहितानां समुच्चयम्। अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः॥ शिष्यमध्यापयामास कबन्धं सोऽपि तद् द्विधा। कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान्॥ देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा। शौक्लायनिः पिप्पलादस्तथान्यो मुनिसत्तम!॥ पथ्यस्यापि त्रयः शिष्याः कृता वेदद्विज! संहिताः। जाजलिः कुमुदादिश्च तृतीयः शौनको द्विजः॥ शौनकस्तु द्विधा कृत्वा ददावेकान्त बभ्रवे। द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने॥ सैन्धवस्तुञ्जकेशाभ्यां भिन्ना वेदा द्विधा पुनः। नक्षत्रकल्पो वेदानां संहितानां तथैव च॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः। वेदास्त्वथर्वणामेते संहितानां हि कल्पकाः इति"॥ एतस्य उपनिषदः एकत्रिंशत् तासां नामानि यथा प्रश्नः १ मुण्डकं २ माण्डूक्यम् ३ अथर्वशिरः ४ अथर्वशिखा ५ बृहज्जाबालिः६ क्षुरिकोपनिषत् ७ नारदपरिव्राजकः ८ सीता ९ शरभः१० नारायणः ११ रामरहस्यम् १२ रामतापनी १३ शाण्डिल्यः १४ परमहंसपरिव्राजकः १५ अन्नपूर्णा १६ सूर्य्यात्मा १७ पाशुपतम् १८ परब्रह्म १९ त्रिपुरातापनी २० देवी २१ भावना २२ भस्म २३ जाबालिः२४ गणपतिः २५ महावाक्यम् २६ गोपालतापनी २७ कृष्णतापनी २८ हयग्रीवः२९ दत्तात्रेयः ३० गरुडः ३१ एतास्च प्रायशः ब्रह्मविद्यातदुपासनाप्रतिपादिकाः मुक्तिकोः।

अथर्वशिखा स्त्री अथर्वणः वेदस्य शिखेव ब्रह्मविद्याप्रतिपादकत्वेन श्रेष्ठत्वात्। तद्वेदीये ब्रह्मप्रतिपादके तन्नामके उपनिषद्भेदे। [श्रेष्ठत्वात् स्वनामख्याते अथर्वोपनिषद्भेदे।

अथर्वशिरस् न० अथर्वणः शिरइव ब्रह्मविद्याप्रतिपादकतया

अथर्वाङ्गिरस पु० अथर्वा चाङ्गिराश्च नि०अच्। एतयोर्मुन्योः। उपचारात् तद्दृष्टमन्त्रादिभेदे च "अथर्वाङ्गिरसं नीलरुद्रं देव्यपराजितेति" तन्त्र। "अथर्वाणं पितरं देवबन्धुं मातरमिं पितरमुं युवानम्॥ यत्रमं यत्रं मनसा चिकेत प्रणो वोचस्तमिहेह ब्रुवः इति"।""अङ्गिरसोनः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ अङ्गिरोभिर्यज्ञियैरागहीह यम वैरूपैरिह मादयस्व। विवस्वन्तं हुवे यः पिता तेऽस्मिन् बर्हिष्या निषद्य॥ इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः संविदानः। आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषो मादयस्व॥ इतएत उदारुहन् दिवस्पृष्ठान्यारुहन्। प्रभुर्ज्ञयो यथा पथा द्यामङ्गिरसो ययुरिति" सूक्तञ्च॥ अथ० १८,१,५८,६१, [वेदराशित्युक्ते" बुधे।

अथर्वाधिप पु०ऐत०। "सामवेदाधिपो भौमः शशिजोऽथर्व-

अथर्वी स्त्री न+थुर्व अच् पृ० उलोपः गौ० ङीष्। अङ्गिरसिकायाम् "याभिर्विश्वलां धनसामथर्व्यमिति" वेदः।

अथवा अव्य० अथेति वायते अथ+वा-का। पक्षान्तरे "अथ वा कृतवाग्द्वारे इति" "अथवा मृदु वस्तु हिंसितुमिति" च रघुः। "अथवा हेतुमच्छिन्नविरक्षाप्रतियोगिनेति" भाषा०।

अथो अव्य० अथ-डो पृषो० रलोपः। अथशब्दार्थे आरम्भादौ। "अथाथो संशये ख्यातामधिकारे च मङ्गले विकल्पानन्तर प्रश्नकात्स्न्यारम्भसमुच्चये इत्युक्ते" अथशब्दार्थे।

अद बन्धने भ्वा०पर० इदित् सक०सेट्। अन्दति आन्दीत्।

अद भक्षणे च अदा०पर०सक० अनिट्। अत्ति अद्यात् जघास अत्ता अत्स्यति। सनि जिघत्सति। क्त-ओदनार्थे अन्नम् अन्यत्र जग्धम् घञ् घसः-व्यादः क्तिनु अज्झिः। "योऽन्नमत्ति यतस्तत" इति श्रुतिः। "अत्ता चराचरग्रहणादिति" भा०सू०। "किमदन्ति भद्रा" इति।

अदंष्ट्र पु० नास्ति दंष्ट्रा दशनसाधनदन्तविशेषः यस्य। भग्नादीदन्ते सर्पे। प्रधानदन्तरहिते त्रि०।

अदक्ष त्रि० विरोधार्थे न०त०। दक्षत्वविरोधिमात्यवति।

अदक्षिण त्रि० दक्षिणोऽनुकूलः कुशलश्च विरोधार्थे न०त०। दक्षिणत्वविरुद्धनैपुण्यप्रतिकूलत्ववति, वामाङ्गे च। नास्ति दक्षिणा कर्म्मसमाप्तौ देया यत्र। दक्षिणाशून्ये यज्ञादौ। दक्षिणादानस्य नित्यत्वं दक्षिणाशब्दे वक्ष्यते "कृतयज्ञस्य दक्षिणामिति"।

अदग्ध त्रि० शास्त्रविधिनाग्निना न दग्धः। शास्त्रविधिना-

ऽक्षताग्निसंस्कारे। "अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले ममेति" आद्धमन्त्रः। दग्धभिन्ने त्रि०।

अदण्ड्य त्रि० न दण्डमर्हति यत्। दण्डानर्हे "अदण्ड्यान् दण्डयन्नराजा दण्ड्यांश्चैवाप्यदण्डयन्निति" याज्ञ०। "अपि भ्राता सुतोऽधीती वा श्वशुरोमातुलोऽपि वा नादण्ड्यो नाम राज्ञोऽस्ति धर्म्मात् प्रचलितः स्वकादिति" मनुः। स्मृत्यादौ कर्मविशेषे दण्डः तदभावश्च उक्तोऽनुसन्धेयः तत्र केचिददण्ड्याः संगच्छन्ते। "अनिर्द्दशाहां गां सूतां दृषान् देवपशूंस्तथा। समाप्तान् वा विपाप्तान् न दण्ड्यान् मनुरब्रवीत्"। यानयाचकदण्डाभावे प्रयोजकसूक्तम् अति वर्त्तनशब्दे, क्षेत्रे देयप्रावरणविशेषसूक्ता तदकरणे दण्डाभावो मनुनोक्तः यथा "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति" "मक्षोत्थोतृष्टपशवः सूतिकागन्तुकादयः पालोवेषाश्च ते भोज्या दैवराजपरिप्लुता" इति "अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः। अदण्ड्याः काणकुण्डाश्च वृषभः क्षतलक्षण इति" स्मृतिः।

अदत्ता स्त्री दा-क्त न०त०। परिणयार्थमदत्तायां स्त्रियाम्। "अदत्तायां मृतायान्तु तत्प्रदाच्छुध्यन्ति बान्धवा" इति स्मृतिः अदत्तमात्रे त्रि०। अप्राशस्त्ये न०त०। अदत्तन्तु भयक्रोधेत्यादाभिहितलक्षणे दानाभासेनार्पिते दत्त्वापि प्रत्याहर्त्तुं योग्ये त्रि०। तच्चोक्तं नारदेन यथा "अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः। तथोत्कोचपरीहासव्यत्यासच्छलयोगतः॥ बालमूढ़ास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदङ्कर्मेति प्रतिलाभेच्छया च यत्। अपाले पालमित्युक्तौ कार्ये वा धर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति"। अस्यार्थः भयेन वन्दिग्राहादिभ्यो दत्तम्। क्रोधेन यत्नादिवैरनिर्य्यातनायान्यस्मै दत्तम्। पुत्रविक्रीनतादिनिमित्तशोकाविष्टेन दत्तम्। उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्। परिहासेनोपहासेन दत्तम्। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति व्यत्यासः। छलयोगतः शतदानमभिसन्धाय सप्तकमिति परिभाष्य ददाति। बालेनाप्राप्तषोड़शवत्सरेण मूढ़ेन, शोकवेदानभिज्ञेन अस्वतन्त्रेण पुत्रदासादिना, आर्त्तेन रोगाभिभूतेन, मत्तेन मदनीयप्रमत्तेन, उन्मत्तेन, वातिकाद्युन्मादयस्तेन वा अपवर्जितं दत्तम्। तथाऽन्यं मदीयमिदं कर्म्म करिष्यतीति प्रतिलाभेच्छया दत्तम्। अचलवेदाय चलवेदोऽहमित्युक्त्वते दत्तम्। यत्तं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि दत्तमदत्तमित्युच्यते प्रत्याहरणीयत्वात्। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम्। "स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात्। अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशय" इति कात्यायनस्मरणात्। तथेदमपरं संक्षिप्तार्थवचनं सर्वविवादसाधारणम्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यस्य वाप्युपधिं पश्येत् तत् सर्वं विनिवर्त्तयेत्" इति। योग उपाधिः। योगेनोपाधिविशेषेणाधिक्रियदानप्रतिग्रहाः कृतास्तदुपाधिविगमे तान् विक्रयादीन् विनिवर्त्तयेदिति। यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति, यश्चादेयं प्रयच्छति, तयोर्दण्डो नारदेनोक्तः। "गृह्णात्यदत्तं यो लोभात् यश्चादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छुकः" इति। मिताक्षरा०।

अदत्तादायिन् त्रि० अदत्तमादत्ते आ+दा-णिनि ई त०। अदत्तस्य ग्राहके "अदत्तादायिनो हस्तात् लिप्सेत ब्राह्मणो धनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" इति स्मृतिः।

अदत्र त्रि० अद-बा० अत्रन्। अदनीये "अदत्रया दयते वार्य्याणीति" ऋ०५, ४६, ३, अदत्रया, अदनीयानीति भा०।

अदद्रुच् त्रि० असुमञ्चति अदस्+अन्च-क्विप् अद्रुआगमः। अदोगते, स्त्रियाम् अदद्रोची असर्वनामस्थानाद्यचि तु अदद्रोचः इत्यादि। अस्य दस्वा मत्वोच्चे अमुद्रुङ् अमुसुयङ् इत्यादयोऽत्र।

अदन्त पु० नास्ति दन्तोऽस्य। पूषरूपे आदित्यभेदे वा कप् तत्रैव। "यद्यप्यदन्तकः पूषा पैष्टमत्ति सदा ह्यजमिति" छन्दोगप०। तस्मादन्तता च दक्षयज्ञभङ्गसमये वीरभद्रेण कृता यथा भागवते ४ स्कन्धे। "पूष्णो ह्युपातयद्दन्तान् कालिङ्गस्य यथा बलः। शप्यमाने गरिमणि योऽहसद्दर्शयन् दतं" इति। अतएव तस्मादन्ततया पिष्टभुक्त्वं तदपि तत्रैवोक्तम् ब्रह्मप्रसादितेन शिवेन पश्चात् दत्तादि वरदानसमये "पूषा तु यजमानस्य दृष्ट्विर्जयित्व पिष्टभुगिति" श्रुतावपि "प्रपिष्टभागोऽदन्तको हि तं देवा अध्यगामिति" अदन्तकत्वेन पिष्टकभागित्वसूक्तम्। दन्तहीने, अजातदन्ते च त्रि०। "येऽप्यदन्ताः कुले ममेति" वायु०। दन्तानां दन्तजननकालस्तु षण्मास एव शुक्लितत्वे निर्णीतः पञ्चमान्तु "वर्षभाजा तु बाला स्याद-

तिवाला द्विवार्षिकी। अतः परन्तु सा गौः स्यात्तरुणी दन्तजन्मनीति" अङ्गिरोवचने द्विवर्षोत्तरकाले गवां दन्तजन्मकथनं पशुमात्रोपलक्षणम् अतैव काले (आँदाता) इति लोके प्रसिद्धिः सा च गवामिव महिषाश्वादीनामपि तथैव। अत् अन्ते यस्य ब०। अकारान्तशब्दे पु०।

अदभ्र दनुभ-क्र न०त०। अहिंसिते "अदब्भेभिः पायुभिः पाह्यक्षानिति" ऋ०१,९५९, अदब्भैरहिंसितैरिति भा०। "अदब्धासुर्व्राजमानोह्येव" इति वेदः।

अदभ्रायु पु० अदभ्रेन अहिंसनेन आयौति आ-या-कु-इत०। अहिंसायुक्ते "अग्नेऽदभ्रायो अशीततमेति यजु० अदभ्रायो। अहिंसित! यजमान इति वेददीपः।

अदभ्र त्रि० न दभ्यते कर्म्मणि बा०क। अहिंसे "ताहधन्नावतु द्यून्नर्त्ताय देवावदभा" इति ऋ०५,८६,५ अदभौ अहिंसकौ इति भा०।

अदभ्र त्रि० दनुभ-रक् दभ्रमलं न०त०। अनल्पे "अदभ्रदर्भमधिशय्य स स्वप्नीमिति" भारविः।

अदभ्र पु० अभावार्थे न०त०। दम्भाभावे। नास्ति दम्भो यस्य। दम्भरहिते त्रि०। "अदभ्रं यतते हीनं कर्म्म कुर्य्यादलोलुप" इतिपुरा०।

अदभ्र त्रि० न दभ्नुतेऽसौ। अदमनीये। गवामेकवर्षपर्य्यन्त कालेऽदभ्रता "पादस्याप्राप्नके देय इति"स्मृतिः अप्राप्नकः अप्राप्तदभ्रावस्थ इति" रघु० तेन "एकवर्षे गवि हृते कृच्छ्रपादो विधीयते" इत्येकवाक्यतया एकवर्षकालपर्य्यन्तकाल एव वत्सानामदभ्रत्वं प्रतीयते।

अदर्शन न० न दर्शनम् अभावार्थे न०त०। दर्शनाभावे लोपे, विनाशे च "लोपोऽदर्शनमिति" पा०। नास्ति दर्शनं यस्याः ब०। दर्शनाविषये दृष्टिशून्ये च त्रि०।

अदल पु० दल्यते भिद्यते इति दलं पत्रं दल-कर्म्मणि घञ् न०ब०। दलशून्ये (छिजल) इति ख्याते वृक्षे। पत्रशून्ये वृक्षमात्रे त्रि०। धृतराष्ट्रभार्य्यां स्त्री। दलः खण्डः। तच्छून्ये त्रि०।

अदस् त्रि० न दस्यते उत्क्षिप्यतेऽङ्गुलियत्र इदमस्या निर्द्धारणाय पुरोवर्त्तिन्येवाङ्गुलिनिर्देशः सम्भवति नापुरोवर्त्तिनि। न+दस्-क्विप्। अपुरोवर्त्तिनि परोक्षे ख्याते वस्तुनि। सर्व्वनामता। "अस्तुश्य विद्या रसनाग्रनर्त्तकीति" नैषधम्। परलोके "नचाश्नुत फलप्रद इति" पुरा०। "इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदोरूपम्। अदस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादित्युक्तौ" विप्रकृष्टे एवास्य प्रयोगः। यच्छब्दाकाङ्क्षितत्तच्छब्दाप्रयोगेऽस्य तदर्थबोधकता। यथा "आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्यादौ"। अतएवोक्तं काव्यप्रकाशे इदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्ते इत्युक्तम्" यच्छब्दस्य तु निकटस्थितत्वे तच्छब्दस्यापि प्रसिद्धपरामर्शित्वेति वदता च तेन तच्छब्दस्येव इदमदःशब्दयोरपि प्रसिद्धार्थकता तत्रैवोक्ता। यथा "करवालकरालदोःसहायो युधि योऽसौ विजयार्জ্জुनैकमल्लः। यदि भूपतिना स तत्र कार्य्यः" इत्यादौ प्रसिद्धार्थकता। अन्यथा स इत्यनेन पुनरुक्तत्वापत्तेः अतएव दर्पणकृता "आनन्दयति ते नेत्रे योऽसौ शम्भुः समागत" इति पद्ये यच्छब्दस्य सन्निकृष्टतया तच्छार्थावाचकत्वमाशङ्क्य आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्येवं पाठःपरिवर्त्तितः। यच्छब्दे नानाकाङ्क्षितत्वे तु न तच्छब्दार्थाभिधायित्वं किन्तु प्रसिद्धाद्यभिधायकता यथा "असौ मरुन्मुखितचारुकेशर इत्यादौ" नात्र तच्छब्दार्थप्रतीतिरिति काव्यप्रकाशे उक्तम्। तथा च यच्छब्देनाकाङ्क्षास्थले एव यच्छब्दस्यासन्निकृष्टतयोपात्तस्यादःशब्दस्य तच्छब्दार्थकता नान्यथेति सुस्थितम्। "अदोऽनुपदेशे इति"सूत्रनिर्देशात् अनुपदेशे अदसः गतिसंज्ञा तेन अदः कृत्वादः कृतमित्यादौ गतित्वेन समासे ल्यप्। परं प्रति उपदेशे तु अदः कृत्वा अदःकृत्व इत्यादौ न गतित्वम्। अस्य गतिसंज्ञात्वे नाव्ययत्वमपि। तेनाव्ययपूर्ब्बकतया ल्यप् अर्थस्तु अदःशब्दस्येव।

अदाढ त्रि० न०त०। दाढर्य्यभिन्ने "अदाता वंशदोषेणेति" पुरा०। "अदाता पुरुषत्यागी धनं संत्यज्य गच्छतीति" नीति०। स्त्रियां ङीप्।

अदान न० न दानमभावार्थे न०त०। दानाभावे। नास्ति दानं त्यागोमदजलं वा यस्य। दानशून्ये त्रि०। मदजलशून्ये गजे पु०। "सदा दानपरीणः शक्तएव करीश्वरः। अदानः पौनकायस्तु निरुद्यतएव गर्हभ" इति।

अदान्त त्रि० न०त०। इन्द्रियदमनाकारके अविनीते च "अदान्तोविषयासक्त" इति पुरा०।

अदाभ्य त्रि० दम्भ यत् नञोपोपधावृद्धी न०त०। अहिंसे। "यत्ते सोमादाभ्यं नाम जागृवीति य० ७,२,के सोम! ते तदीयमहिंसितं जागृवि जागरणशीलमिति वेददीपः।

अदाय त्रि० नास्ति दायो येषाम्। दायानर्हेपतितज्ञात्यादौ। "अदायाश्च स्त्रियोमता" इति स्मृतिः।

अदायाद त्रि० दायं पित्रादिधनं सम्बन्धितया अदन्ति भुञ्जते अद-अण् ६त० न०त० । सम्बन्धिधनभोक्तरि पतितादि सपिण्डभेदे "अदायादाश्च परिगणितमात्रादिभिन्नाः स्त्रियः, "अदायाश्च स्त्रियोमताः" स्मृतेः । द्वादशविधान् पुत्रानुक्त्वा "कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवा इति मनूक्ताः कानीनादयश्च वेदितव्याः तथा विभागानार्हा अपि क्लीवादयोऽदायादा इत्यवसरे वाच्यम् । सपिण्डभिन्ने च ।

अदायिक त्रि० दायमर्हन्ति दाय+ठक्-न०ब० । दायाद-भूम्ये "अदायिकं राजगामीति" स्मृतिः दायभाग्-जपुत्रादिशून्यं तदर्थः ।

अदाह्य त्रि० न दग्धुमर्हति दह-अर्हार्थे ण्यत् न०त० । शास्त्रोक्तविधिना अग्निसंस्कारानर्हे पतितादौ ते च स्मृतौ दर्शिता यथा । "ब्रह्मक्षत्रियविड्योनिविषवह्निस्त्रियाजलैः । आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां स्मृतस्तु यः । नागानां विप्रियं कुर्वन् दग्धसाध्यश्च विद्युता । निग्रहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित् । परदारान् रमन्तश्च द्वेषात्तत्पतिभिर्हताः । असमानैश्च संकीर्णैश्चाण्डालादयश्च विप्लवम् । कृत्वा वैनिर्हता ये तु चाण्डालादीन् समाश्रिताः । गरान्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः । क्रोधात् प्राणं विषं वह्निं शस्त्रसङ्घभ्रनं जलम् । गिरिपृष्ठप्रपातञ्च ये कुर्वन्ति नराधमाः । कृषिघ्नजीविनश्चैव स्त्रीनालङ्कारकारिणः । सुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहताश्चैव ये च वै ब्राह्मणैर्हताः । महापातकिनोये च पतितास्ते प्रकीर्त्तिताः । पतितानां न दाहः स्याद्ब्राह्मान्यैर्द्विजैरग्निसङ्गयः । नचाश्रुपातः पिण्डं वा कार्य्यं श्राद्धादिकं क्वचित् । एतानि पतितानाञ्च यः करोति विमोहितः । तत्प्रेतस्योर्द्धदेहेनैव तस्य मुद्विर्नचान्यथा" इति । दग्धुमयोग्ये निरवयवत्वात् परमात्मनि । "नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः" स्मृत्युपक्रमस्थ "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएव चेति" गीतायां तस्यादाह्यत्वोक्तेस्तथात्वम् ।

अदिति स्त्री न दीयते खण्ड्यते दो-क्तिच् न०त० । दातुं छेत्तुं नयोग्यायां पृथिव्याम् "चतुरदितावसनमिति" ता०ब्रा० "अदितो पृथिव्यामिति" भाष्यम् । वाचि निरुक्त० । दितिर्दनुजमाता विरोधार्थे न०त० । तद्विरोधित्वं देवमातरि "प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश । अदितिर्दितिर्दनुःकाष्ठा अनायुः सिंहिका तथा । क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च मनुजव्याघ्र ! दक्षकन्यैव भारतेति" भारतम् आदिप० । एता एव कश्यपाय दत्तेन दत्ता यथोक्तं तत्रैव "दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाङ्गवान्मुनिः ब्रह्मणः पृथिवीपाल ! शान्तात्मा सुमहातपाः । वामाद्जायताङ्गुष्ठाद्भार्य्या तस्य महात्मनः । तस्यां पञ्चाशतं कन्याः स एवाजनयत् प्रभुः । ददौ स दश धर्म्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना देव ! कश्यपाय त्वयोदशेति" अदितिरदीनादेवमातेति निरु० । तद्देवताके पुनर्वसुनक्षत्रे । अत्ति प्राणिजातम् अद-इतिच् । सर्वनाशके मृत्यौ, परमेश्वरे च पु० । "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्, सर्वस्यैतस्यात्ता भवति सर्वमस्यात्तं भवति य एवमेतददितेरदितित्वं वेदे"ति वृ०उ० दितिः खण्डनम् । तच्छून्ये अखण्डे । "चतियासियजियाखदितिरसीति" यजु० "अदितिरखण्डितेति" वेददीपः ।

अदितिज पु० अदितेर्जायते जन-ड । देवे । "द्वादशैवादितेः पुत्राः शक्रमुख्याः नराधिप ! । तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिता इति" भारतम् द्वादश आदित्याः शक्रादयः शक्रमुख्याश्च देवास्तेत्यर्थः ।

अदितिनन्दन पु० ६त० । देवे अदितिस्तुताद्योऽयत्न ।

अदीन त्रि० दी-क्त न०त० । अकातरे कातर्यरहिते ।

अदुष्ट त्रि० न०त० । स्मृत्युक्तदुरदृष्टसाधनताकपदोषरहिते । "अदुष्टा सन्तता धारा" इति स्मृतिः "दुष्टानि च दुष्टशब्दे वक्ष्यन्ते ।

अदूर न० न०त० । दूरत्वविरोधिसामीप्ये "अदूरे जगदम्बायाः भारदीयो महोत्सव" इति पुरा० । तद्वति त्रि० । "परस्पराश्लिष्टमदूरोन्नतवर्त्मखिति" रघुः ।

अदूषित त्रि० न०त० । दूषितभिन्ने स्मृत्युक्ते दोषानर्हे द्रव्यभेदे च । दूषितञ्च असंस्कृतस्वेन, पर्य्युषितत्वेन, विरसत्वेन, दोषजनकादृष्टविशेषहेतुत्वेन च स्मृत्यादौ दुष्टत्वेन कीर्त्तितम् तस्यैव क्वचिद्विषये प्रतिप्रसवः स्मृतावुक्तस्तादृशपदार्थएवादूषितम् । दूषितविवरणं दुष्टशब्दे वक्ष्यते ।

अदृग् त्रि० नास्ति दृक् दृष्टिरस्य । अन्धे चक्षुरिन्द्रियशून्ये । न पश्यति दृश-कर्त्तरि क्विप् न०त० । अदर्शके त्रि० ।

अदृश्य त्रि० न०त० । दृश्यभिन्ने । न द्रष्टुमर्हति । दर्शनानर्हे, परमेश्वरे च । "यत्तदद्रेश्यमग्राह्यमिति" श्रुतिः ।

अदृष्ट न० दृश-क्त न०त० । पुण्यापुण्यरूपे भाग्ये,

इन्द्रियायोग्यत्वात् तस्मादृष्टत्वम्। अदृष्टसत्त्वे प्रमाणञ्च। "सापेक्षत्वादनादित्वात् वैचित्र्यात् विश्वदृष्टितः। प्रत्यात्मनियमात् भुक्तेरस्ति हेतुरलौकिक" इति "चिरध्वस्तं फलायालं न कर्म्मातिशयं विनेति" चेति कुसु०। अस्याभिप्रायः। इह हि जगति उच्चावच विचित्राः सुखदुःखानुभवरूपा भोगाः प्रत्यात्मवेदनीयाः, ते च न नित्या उत्पत्तिविनाशयोगित्वात् अतएव न सदातनाः किन्तु कादाचित्का एव, सति च तेषां कादाचित्कत्वे हेतुसापेक्षत्वमेव तथा हि विमता भोगव्यक्तयः हेतुसापेक्षाः कादाचित्कत्वात् घटवत्। यद्यत् कादाचित्कं तत्तत् हेतुसापेक्षं यथा घटः भवन्ति च भोगव्यक्तयः कादाचित्काः तस्मात् हेतुसापेक्षा इति पञ्चावयवन्यायेन भोगानां हेतुसापेक्षत्वसिद्धिः स च हेतुः न लौकिकप्रत्यक्षादिविषयः कश्चित् सम्भवति तदन्वयव्यतिरेकाभावात् न च कालस्यैव तद्धेतुत्वेनार्थान्तरापातः। कालस्य साधारणकारणतया विचित्रभोगं प्रत्यनियामकत्वात् अन्यथा कालस्यैकरूपतया सर्व्वदा सर्व्वभोगप्रसङ्गः। एतेन तत्तत्कालत्वेन कारणताकल्पनेऽपि न निस्तारः तत्तत्कालव्यक्तीनां पुरुषमात्रसाधारण्येन प्रत्यात्मविचित्रभोगोपपादकत्वानुपपत्तेः। अतो विचित्रभोगान्यथानुपपत्त्या तदाधायकमलौकिकं कारणं यत् कल्पनीयं, तदेवादृष्टम्। एवमनुमानेन आगमप्रामाण्यानभ्युपगन्तॄन् प्रति अलौकिकादृष्टसाधनम्। आगमेन तु तत्सिद्धिरेवमभियुक्तैरभ्युपेता "स्वर्गकामो यजेतेति" वाक्ये समभिव्याहृतस्वर्गसाधनत्वं यागे विधिप्रत्ययेन बोध्यते तच्च न सम्भवति, स्वर्गादेः कालान्तरभावितया आशुविनाशिनो यागादेस्तदानीमसत्त्वेन कारणत्वासम्भवात् अतो विधिबोधितं यागादेरिष्टसाधनत्वं फलकालपर्य्यन्तस्थायिस्वजन्यव्यापारं विनानुपपन्नमित्यनुपपत्तिज्ञानेन द्वारीभूतमपूर्व्वं कल्प्यते। तदभिप्रायेणैव चिरध्वस्तमित्याद्युक्तम्। अतएव "पौरुषं दैवसम्पन्ना काले फलति पार्थिव!। तयमेतन्मनुष्यस्य निष्पिष्टं सद्यात् फलावहमिति" शास्त्रान्तरे कार्य्यजननसामग्र्यां दैवपदाभिधेयापूर्व्वस्य कीर्त्तनम्। तस्मादृष्टं द्विविधं पुण्यं पापञ्च विहितानुष्ठानजन्यं पुण्यं, निषिद्धानुष्ठानजन्यं पापम्, तदुभयमपि त्रिविधं, प्रारब्धं फलदानोन्मुखं सञ्चित मिति। देहाद्यारम्भकमदृष्टं प्रारब्धं, बहूनामदृष्टानां चिरसञ्चितानां मध्ये फलविपाकाय उन्मुखं फलदानोन्मुखं, तद्भिन्नं सञ्चितम्। तत्र "ये सप्तार्णा जगत्सृष्टिसंहारकारकाः। तेऽपि कालेन लीयन्ते इति" शास्त्रात् "कलनात् सर्व्वभूतानां काल इत्यभिधीयते" इत्युक्तेश्च कालस्य सर्व्वनाशकत्वेऽपि नादृष्टनाशकत्वम् "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति" शास्त्रान्तरात् किन्तु भोगादेव क्षयः। तथा पुण्यस्य कर्म्मनाशाजलस्वर्गादितोऽपि नाशः, पापस्य प्रायश्चित्तादिना नाशः। प्रारब्धातिरिक्तपुण्यापुण्यकर्म्मणां तत्त्वज्ञानात् नाशः। "ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्জुनेति" गीतादिशास्त्रात्। इदमदृष्टं वेदान्तिभिर्म्मायानुसन्धत्ते तैर्हि कर्म्मणः कृच्छ्रावस्थापन्नसंस्कारविशेष एवादृष्टस्थानीयतयाङ्गीक्रियते इति भेदः। तच्चानुभयमस्ते विस्तरतो वाच्यम्। तस्मादृष्टमात्मधर्म्म इति नैयायिका वैशेषिकादयश्चाभ्युपगच्छन्ति। वेदान्तिसाङ्ख्यपातञ्जलास्तु बुद्धिधर्म्म इति भेदः। तेषां मते हि कर्त्तृत्वस्य बुद्धिधर्म्मतया "शास्त्रदेशितं फलमनुशेतरीति" न्यायात् तत्रैवादृष्टोत्पत्तेरुचितत्वम् अन्यकृतकर्म्मणा अन्यस्यादृष्टोत्पत्तौ अतिप्रसङ्गात् "कृतहानाकृताभ्यागमप्रसङ्ग्येति" सूत्रेण च तथैव प्रतिपादितत्वादधिकमाकरे द्रष्टव्यम्। अस्य च अदृष्टशब्दवाच्यत्वे "प्रत्यक्षनिमित्तं विद्यमानोपलम्भनत्वादिति" जैमिनिसूत्रं मानम्। तस्यायमभिप्रायः "नोदनालक्षणोऽर्थोधर्म्म" इति धर्म्मो वेदैकसमधिगम्यत्वमुपपिपादयिषुः तस्य दृष्टीकरणार्थमिदं सूत्रं प्रवृत्तम्। "अनुष्ठानादूर्द्धमुत्पद्यमानस्य धर्म्मस्य पूर्व्वमविद्यमानत्वात् न प्रत्यक्षयोग्यतास्ति उत्तरकालेऽपि रूपादिराहित्यान्नेन्द्रियैरवगम्यता। अतएवादृष्टमिति सर्व्वैरभिधीयते" इति शा० भाष्यम्। सूत्रार्थस्तु प्रत्यक्षं चक्षुरादि न तदुपलक्षणे निमित्तं तेषां विद्यमानोपलम्भहेतुत्वात् धर्म्मस्य च प्राक् अविद्यमानत्वात्। लिङ्गराहित्याच्च नानुमानविषयत्वमस्यास्ति। सुखदुःखयोश्चानुमकत्वेन लिङ्गत्वसम्भवेऽपि तयोर्लिङ्गत्वज्ञानमपि वेदैकगम्यं, "कस्य कर्म्मणः? किं फलं? मित्यध्यवसायस्य वेदैकसमधिगम्यत्वात् सुखदुःखाभ्यां सामान्येन धर्म्माधर्म्मसामान्यानुमानेऽपि तद्विशेषप्रतिपत्तौ वेदस्यैव साधनत्वादिति प्रतिपादितं धर्म्मस्य नोदनामात्रप्रमाणकत्वं सुस्थितमिति। दृष्टभिन्ने ति०। "सर्व्वमदृष्टं गृह्णीति" ऋत्यन्तरम्। "अदृष्टमस्यर्षेरदृष्टवैभवात् करोति सुस्निग्धदधीनातिथिमिति" मेघ०। अज्ञातमात्रे ति०। "अदृष्टविरहव्यथमिति"। स्त्रियो०। "अदृष्टभङ्गिनिर्विण्णमिति" स्मृतिः "अदृष्टघातमङ्गाभिरक्षातमिति" रघु०। अदृष्टहेतुके भयादौ च। दैविकाग्निभयादेरदृष्टसाध्यत्वाददृष्टत्वम्।

अदृष्टपूर्व्व त्रि० न पूर्व्वं दृष्टः सह सुपेति स० परनि०। पूर्व्वमदृष्टे। "अदृष्टपूर्व्वं हृषितोऽस्मि दृष्ट्वेति" गीता।

अदृष्टि स्त्री विरुद्धा दृष्टिः विरोधार्थे अभावार्थे वा न०त०। क्रूरदृष्टौ, सरोषवक्रदृष्टौ, दर्शनाभावे च। ब०। दृष्टिशून्ये त्रि०।

अदेय त्रि०न०त०। देयभिन्ने दानायोग्ये च। दानायोग्यञ्च पुत्रादि—"स्वं क्रुटुम्बाविरोधेन देयं दारसुतादृते नान्वये सति सर्व्वस्वं यज्ञान्यस्मै प्रतिश्रुतमिति" याज्ञ०। "अन्वाहितं याचितकमाधिः साधारणञ्च यत्। निक्षेपः पुत्रदाराश्च सर्व्वस्वान्वये सति। आपत्स्वपि च कष्टासु वर्त्तमानेन देहिना। अदेयान्याहुराचार्य्या यज्ञान्यस्मै प्रतिश्रुतम्" इत्येवं स्मृतिनिषिद्धदाने वस्तुनि "योऽदत्त्वं प्रतिगृह्णाति यश्चादेयं प्रयच्छतीति" तदादानमपि स्मृतौ निषिद्धम्। "अद्यमदेयमप्रेयमस्याहुरिति" श्रुतिः।

अदेवत्र त्रि० न देवान् त्रायते प्रीणाति अनेन त्रै—करणे क। देवप्रीणनासाधने अन्नादौ "अदेवत्रादराधस" इति श्रुतिः।

अदेवमातृक पु० न०त०। देवमातृकदेवभिन्ने नदीदृष्ट्यम्बु सम्यक्प्रीक्षिपाक्षितदेशे। "वितन्वति क्षेममदेवमातृका" इति भार०। ["अयज्वानमदेवयुमिति" ऋ० ५,६,११।

अदेवयु त्रि० न देव यौति प्राप्नोति या—कु। देवाप्रापके।

अदेश पु० न०त०। गर्हितदेशे अयोग्यदेशे च। "नादेशे तर्पणं कुर्य्यात् न सन्ध्यां नापि पूजनमिति" स्मृतिः। "स्त्रियं स्मृतेदेशेय" इति स्मृतिः। गर्हितदेशाश्च स्मृतौ दर्शिताः केचित् संगृह्यन्ते। "मातुर्वर्ण्यव्यवस्था तु यस्मिन् देशे न वर्त्तते। तं म्लेच्छदेशं जानीयादार्य्यावर्त्तं ततःपरम्" इति विष्णुः। "आनर्त्तकाङ्गमगधाः सुराष्ट्राः दक्षिणापथः। तथा च सिन्धुसौवीरा एते सङ्कीर्णयोनय इति" "पङ्क्त्यां स कुरुते पापं यः कस्मिंश्चान् प्रयच्छति। ऋषयो निष्कृतिस्तस्य प्राजापत्यं हविरिति" बौधा०। "अङ्गवङ्गकलिङ्गांश्च तीर्थयात्रां विना व्रजन्। प्रायश्चित्तं प्रकुर्वीतेति" स्मृतिः। दुष्टदेशेऽपि केचित् श्राद्धतर्पणादौ विशेषतोवर्ज्याः यथा "क्रूरं क्रमियुतं क्लिन्नं सङ्कीर्णानिष्टगन्धिकम्। देयं त्वनिष्टगन्धञ्च वर्ज्यं येत् श्राद्धकर्म्मणीति"। "न म्लेच्छविषये श्राद्धं कुर्य्यान्नृपे म्लेच्छुतं तथा नेष्टकाचरिते पितॄन् तर्पयेदिति" ब्रह्मवैवर्त्ते। "परकीयगृहे यस्तु पितॄन् संतर्पयेदपि। तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलादिति" एवमन्येऽपि गर्हितत्वबोधकाः स्मृत्याद्युक्ता वेदितव्याः। "अदेशकाले यद्दानं—तद्दानं तामसं विदु"रिति गीता।

अदैव न०दैवं वैश्वदेविकश्राद्धं तन्नास्ति यत्र। वैश्वदेविकश्राद्धशून्ये नित्यश्राद्धे। तस्य पार्व्वणेतिकर्त्तव्यतया वैश्वदेवश्राद्धप्राप्तौ "अदैविकन्तु तत् कार्य्यमिति" स्मृतौ पर्य्युदासाश्रयात् वैश्वदैविकम् धिक्यं नित्यश्राद्धशब्दे वक्ष्यते। अदैविकमत्र। दैवं भाग्यम्। तच्छून्ये, दुर्भाग्यवति च त्रि०।

अदोष पु० दोषः स्मृत्युक्तदुरदृष्टसाधनत्वम् अभावार्थे न०त०। स्मृत्युक्तदुरदृष्टसाधनत्वदोषाभावे। न०ब०। दोषशून्ये त्रि०। अलङ्कारोक्तदोषशून्ययोः शब्दार्थयोः "तद्दोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति" काव्यप्र०। "अदोषं गुणवत् काव्यमिति" सरस्वतीक०।

अद्म न०अद्यते देवैः अद्—कर्म्मणि मनु। पुरोडाशे उज्ज्वलद०।

अद्धा अव्य० अद्यते अतं तं सन्तं गमनं ज्ञानं वा दधाति क्विप्। याथार्थ्ये, साक्षात्कारे, स्फुटे, अवधारणे, अतिशये च। "अद्धा श्रियं पालितसङ्गरायेति" रघुः। "यस्य स्यादद्धा न विचिकित्सास्तीति" श्रुतिः। अयं स्वरादिः, चादिश्च तेनोभयस्वरता। साक्षादादिषु पाठात् अद्धाक्षत्येत्यादौ समासे ल्यप्।

अद्भुत न० अततीत्यत् अव्ययमाकस्मिकार्थे तथा भाति भा—डुतच्। आकस्मिके उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसभेदे यथोक्तम् "अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः॥ पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्। गुणानां तस्य महिमा भवेदुद्दीपनं पुनः॥ स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः। तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः॥ वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः इति"। यथा "दोर्दण्डास्त्रितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतष्टङ्कारध्वनिराश्चर्य्यबालचरितप्रस्तावनाडिण्डिमः। क्रान्तब्रह्मकपालसंपुटगलद्ब्रह्माण्डभाण्डोदरभ्राम्यद्भूरिविखण्डितचण्डिमा कथमहो? नाद्यापि विश्राम्यति" इति॥ तद्वति त्रि०। "कस्माद्यज्ञुतमसाष्टे इति" ज्योति०। अद्भुतस्वरूपविभागादि "प्रकृतिविरुद्धमद्भुतवचनम् प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति" ज्योतिषतत्त्वे आर्थवणवाक्ये। "आपज्ज्ञानाय भूम्यादीनां पूर्व्वं स्वभावभ्यावः देवकर्त्तृकोऽद्भुत" इति रघुः। तेषां तैर्विध्यादि अग्न्युत्पातशब्दे उक्तम्। "उदयति यः तदद्भुतमालिभिरिति" नैष०। "तमसद्भुतं बालकमम्बुजेक्षणमिति" भाग०।

अद्भुतस्वन पु० अद्भुतः स्वनो यस्य ब०। महादेवे। कर्म्म०। आश्चर्य्यशब्दे। ब०। तथाभूतशब्दवति त्रि०।

अद्मनि पु० अत्ति सर्वान् अद-मनिन् । अग्नौ ।

अद्मर त्रि० अद-कर्त्तरि क्मरच् । भक्षणशीले ।

अद्य अव्य० अस्मिन्नहनि इदमशब्दस्य निपातः सप्तम्यर्थे । अस्मिन् दिवसे । "कण्व ! त्वदीयपदपङ्कजपिञ्जरान्ते अद्यैव मे विशतु मानसराजहंस इत्युद्भटः । अद्यत्वे इत्यादिभाष्यप्रयोगात् तद्वृत्तावपि अस्य बोधकता । तेनाधारार्थत्वेऽपि अस्य समासान्तरघटकता "अद्यदिन मारभ्य इति" "अद्यप्रभृत्यवनताङ्गीति" कुमारः । एवञ्च वर्त्तमाने काले वर्त्तमानकालवृत्तौ च वृत्तिः "अद्यावधि भवद्गतो भिक्षोऽस्मिति" वेणी० ।

अद्यतन त्रि० अद्य भवः अद्य+ट्यु तुडागमश्च । अद्यभवे वस्तुमात्रे । स्त्रियामद्यतनी । अद्यतनश्च अतीतो भविष्यश्चेति द्विधा । तत्र अद्यतनभूते लुङ् अपाक्षीत् । अद्यतनभविष्यति लृट् । पक्ष्यति । अनद्यतनभूते तु लङ्-अपचत् अनद्यतने भविष्यति लुट् पक्ता । [वृत्तिस्तु वर्त्तमानत्वे ।

अद्यत्व न० अद्य तद्वृत्तेर्भावः अद्य+त्व । एतर्हि वस-

अद्यश्वीना स्त्री अद्य श्वः परदिने वा प्रसोष्यते अद्य-श्वस्+ख टिलोपः । आसन्नप्रसवायां प्रौढगर्भिण्याम् । "अद्यश्वीनावष्टब्धे" इति पा० ।

अद्रव पु० अभावार्थे न०त० । द्रवाभावे । न०ब० । द्रवशून्ये त्रि० "अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजमिति" महाभाष्य० ।

अद्रव्य न० अप्राशस्त्ये न०त० । अप्रशस्तद्रव्ये अयोग्यपदार्थे "नाद्रव्ये निहिता काचित् क्रिया फलवती भवेदिति"

अद्रि पु० अद-क्रिन् । पर्व्वते, तदवयवे प्रस्तरे आवणि । वृक्षे, सूर्य्ये, मेघे, परिमाणभेदे च तच्छब्देऽस्य परिमाणशब्दे वक्ष्यते तत्र आवणि, अद्रिसुतः, मेघे "अद्रिमाता, पर्वते, दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्यामिति" कुमा० ।

अद्रिकर्णी स्त्री अद्रिः अद्रिनामिका गिरिर्बालमूषिका तस्याः कर्णः कर्णतुल्यं पुष्पान्तःस्थं पत्रं यस्याः गौरादित्वात् ङीष् । बालमूषिकाकर्णतुल्यपुष्पाभ्यन्तरपत्रायां अपराजितायाम् ।

अद्रिकीला स्त्री अद्रयः कुलाचलाः पर्वताः कीलाः शङ्कव इव यस्याः ब० । पृथिव्याम् । अद्रेः सुमेरोः कील इव वा । विष्णुशैलपर्व्वते पु० । तद्विवरणं अचलकीलाशब्दे दृश्यम् ।

अद्रिज न० अद्रौ जायते जन-ड ७त० । (गिरिजात) इति खनामप्रसिद्धे गन्धद्रव्ये । (शैलेय) इति प्रसिद्धे उपधातौ इति केचित् । पार्व्वत्यां स्त्री । पर्व्वतभवमात्रे त्रि० । सैंहलीद्वीपे स्त्री राजनि० । अद्रिजातादयोऽभ्युक्तार्थेषु पर्वतजाते दवानले, स्वर्णजे हंसे, रूपे आत्मनि च पु० ।

अद्रितनया स्त्री ६त० । पार्व्वत्यां तद्विवृतिः अचलकन्या शब्दे द्रष्टव्या अद्रिसुतादयोऽप्यत्र । "अद्रिसुतासमागमोत्क" इति कुमा० ।

अद्रिद्विष् पु० अद्रिभ्यः द्वेष्टि द्विष-क्विप् । इन्द्रे । तस्य तद्द्वेष्टृत्वं गोत्रभिच्छब्दे दृश्यम् ।

अद्रिदुग्ध पु० अद्रिभिर्गावोऽभिदुग्धाः अभिषुतः ३त० । आवाभिषुते सोमे, "तिरो रोम पवते अद्रिदुग्ध" इति ऋ० । ९, ९७, ११, "अद्रिदुग्धः आवाभिषुत" इति भा० ।

अद्रिद्रोणि स्त्री अद्रेर्द्रोणिरिव । पर्व्वतभवनद्याम् "अद्रिद्रोणीरनपसारमार्गा" इति दश० ।

अद्रिपति पु० ६त० । हिमाचले तद्विवरणम् अचलराजशब्दे ।

अद्रिबर्हस् त्रि० अद्रेर्बर्ह इव बर्होऽस्य । अद्रिसारे अतिकठिने "पीवूषं द्यौरदितिरद्रिबर्हा" इति ऋ० १०, ६३, ३ ।

अद्रिबुध्न पु० उपमा० ब० । अतिकठिने । "अयं निधिः सरमे अद्रिबुध्न इति" ऋ० १०, १०८, ७, ।

अद्रिभिद् पु० अद्रिं भिनत्ति भिद-क्विप् ६त० । इन्द्रे । गोत्रभिच्छब्दे तद्भेदेन विवरणम् ।

अद्रिभू स्त्री अद्रावपि भवति भू-क्विप् ७त० । अपराजितालतायाम् तस्याः पर्वतेऽत्यतिकठोरभूमिके जायमानत्वात्तथात्वम् । पार्व्वत्यां स्त्री । पर्व्वतजातमात्रे त्रि० ।

अद्रिमाद पु० अद्रिर्मेघस्तज्जलं मिमीते मा-क्विप् । मेघजलमितरि 'स्वर्वित् कोशं दिवो अद्रिमातरमिति' ऋ० ९, ८९, ३ ।

अद्रिराज पु० अद्रीणां राजा ट्चसमा० । हिमाचले । अद्रिषु राजतेक्विप् अद्रिराड्पि अत्रैव पु० । विवरणमचलराजशब्दे ।

अद्रिषुत पु० अद्रिभिः आवभिः सुतः अभिषुतः ३त० अन्वम् । आवाभिषुते सोमे । "ऋभूतो अद्रिषुतोवर्द्धमीति" ऋ० ९, ७२, ४ अद्रिषुतः आवभिरभिषुत इति भाष्यम् ।

अद्रिसंहत पु० अद्रिभिः संहतम् अभिषुतम् । आवाभिषुते सोमे "रसारो अद्रिसंहतावितिः" ऋ० ९, ९८, ६, अद्रिरिव संहतः कठिनः । अतिकठिने त्रि० ।

अद्रिसार पु० अद्रेः सार इव । लौहे । अद्रेरिव सारोऽस्य अतिकठिने त्रि० ।

अद्रिसारमय त्रि० अद्रिसारात्मकः । अत्यन्तकठिने ।

अद्रीश पु० अद्रीणाम् अद्रेर्वा ईशः ६त०। हिमाचले, शिवे च।

अद्रुक्वन् त्रि० द्रुह्-क्वनिप् न०त०। द्रोहकर्त्तरि—"ता वां समद्रुक्वाणेषमिति" ऋ० ५,७०,२, "हे अद्रुक्वाणा अद्रोग्धारावित्ति" भाष्यम्।

अद्रोघ त्रि० द्रुह्-घञ् वेदे धत्वम् न०ब०। द्रोहरहिते "त्वं देहि सहस्रिणं रयिं नोऽद्रोघमेषेति" ऋ०२,३२,६, "अद्रोघमेषं द्रोहरहितेनेति" भा०। न०त०। द्रोहाभावे पु०।

अद्रोघावित त्रि० अद्रोघः अवितो येन। अद्रोहरक्षके। "क्षणुत धूमं दृषणं सखायोऽद्रोघाविता" इति वेदः।

अद्रोह पु० अभावार्थे न०त०। द्रोहाभावे "अद्रोहोनाभिमानितेति" "अद्रोहः सर्वभूतानामिति" च पुरा०।

अद्वय न० न द्वयम्। द्वित्वाभावे। नास्ति द्वयं द्वित्वं तज्ज्ञानं वा यस्य। सर्वात्मतया आत्मनि ब्रह्मात्मैक्यज्ञे, अभेदे च। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत" इति वे०सा०। ब्रह्मा-द्वयं पश्यत इति अद्वयं विज्ञानाभेदः पदार्थानामसत्यत्वादकत्वेन अस्त्यर्थे अच्। बौद्धभेदे ते हि "सङ्घोपालम्भनियमादभेदो नीलतद्धियोरित्यनेन" पदार्थानां संविद्-भिन्नत्वं वदन्ति विवरणं बौद्धशब्दे द्रष्टव्यम्।

अद्वयवादिन् पु० अद्वयं वदति सर्व्वमेव वस्तु चित्स्वरूपं नान्यदतो द्वितीयमस्तीति वदतीति वद्-णिनि। अद्वैत-वादिनि वैदान्तिके, वाक्यार्थाभावेन ज्ञानात्मकं सर्वं वस्तु स्वीकुर्वति बौद्धे च।

अद्वयस् त्रि० नास्ति द्वयं द्वित्वमस्य ब० योगविभागात् असिच् समा०। द्वित्वरहिते। "सखा सख्येवो अद्वया इति" ऋ० १,१८७,१, "अद्वया द्वयरहित" इति भाष्यम्।

अद्वयानन्द पु० नास्ति द्वयं द्वित्वं भेदः तज्ज्ञानं वा यस्य यत्र वा तादृश आनन्दः। ब्रह्मरूपानन्दे अद्वैता-नन्दे। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत इति" वे०सा०।

अद्वयाविन् त्रि० अद्वयमस्त्यर्थे विनि छन्दसि दीर्घः देव-पितृयानरूपमार्गद्वयरहिते। "मृतस्य पाथः पदम-द्वयाविन" इति ऋ० १,४ १५६, २, अद्वयाविनः मार्ग-द्वयरहितस्येति भाष्यम्।

अद्वयु त्रि० द्वयं द्विप्रकारोऽस्यास्य वा० उ न०त०। द्वि-प्रकारकपक्षद्वयशून्ये अन्तर्बाह्यैकरूपे "उप द्वयुक्षाद्वयुक्ष वसव इति" ऋ०८, १८, १५।

अद्वार न० निन्दितं द्वारम्। प्रवेशानर्हे गुप्तद्वारे "अद्वारेण प्रवेशनमिति" "अद्वारेण न जातीयाद्ग्रामं वा वेश्म वा पुरमिति" च पुरा०। नास्ति द्वारमस्य ब०। प्रवेशायोग्ये दुष्प्रवेशे, अगम्ये अनुपाये च त्रि०।

अद्वितीय त्रि० द्विधा कृतं भेदं गतम् द्वीतम् तस्य भावः द्वैतं तन्नास्ति यस्य ब०। सजातीयादिभेदशून्ये केवले परमा-त्मनि। वस्त्वद्वितीयमिति भा० "एकमेवाद्वितीयं ब्रह्मेति" श्रुतिः। "अत्र एकम्, एव, अद्वितीयमिति" पदत्रयेण ब्रह्मणि भेदत्रयराहित्यमुक्तम्। तथाहि भेदस्त्रिविधा स्वगतभेदः सजातीयभेदः विजातीयभेदश्चेति। वृक्षादीनां त्वक्पत्रशाखादिभ्यो भेदः स्वगतभेदः, घटात् घटान्तरस्य भेदः सजातीयभेदः, घटस्य पटादितो भेदः विजातीयभेदः। ब्रह्मणश्च "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण स्वकार्य्यात् घटादितोऽनन्यत्वात् न स्वगतभेदः। घटादेर्व्यव-हारिकसत्त्ववत्त्वेन पारमार्थिकसत्त्ववतो ब्रह्मणः विजातीय-त्वेऽपि ततोऽभेदएव तद्विच्छेदाभावात् "सर्वं खल्विदं ब्रह्मेति" श्रुत्यन्तरात् तत्सजातीयवस्त्वन्तराभावादेव तद्भेदः सिद्धएवेत्यादिकमाकरे दृश्यम्। द्वितीयशून्ये, असहचरे त्रि०।

अद्विषेण्य त्रि० द्वेष्टुं शीलमस्य, द्विष-एण्यत्-किच्च न०त०। प्रियरूपे, "मयोभुरद्विषेण्यः सखेति" ऋ० १,१८७,३, अद्वेषिण्यः अद्वेष्यरसः प्रियरस इति भाष्यम्।

अद्वेष पु० न द्वेषः अभावार्थे न०त०। द्वेषाभावे। ब०। द्वेषरहिते त्रि०। "अद्वेषो हस्तयोर्दधे" इति ऋ० १, २४,४, "अद्वेषः द्वेषरहितः नास्ति द्वेषोऽस्येति" भाष्यम्। एतेन अद्वेषःशब्दे एतन्मन्त्रस्योदाहरणत्वेनोपन्यासः केषाञ्चित् भाष्यादर्शनमूलकः।

अद्वेषस् त्रि० द्विष-असुन् न०त०। द्वेषानास्पदे द्वेषाकर्त्तरि "अद्वेषो मरुतो गातुमेतनेति" ऋ० ५,८७,८, "अद्वेषः अद्वेषसं" इति भाष्यम्।

अद्वैत न० द्विधा कृतम् द्वीतं तस्य भावः द्वैतं भेदः अभावार्थे न०त०। अभेदे, "अद्वैतं सुखदुःखयोरनुगुणं सर्व्वास्वव-स्थासु यदिति" उत्तरचरितम्। नास्ति द्वैतं भेदो यत्र। भेदरहिते त्रि० ब्रह्मणि न०। "अद्वैततत्त्व इव सत्य-तरेऽपि लोके" इति नैषधम्।

अद्वैतसिद्धि पु० अद्वैतस्य जगतो ब्रह्माभेदस्य सिद्धिरत्र। स्वनामख्याते वेदान्तप्रकरणभेदे ६त०। तत्सिद्धौ स्त्री।

अध अव्य० अथ वेदे "सुपांसुलुगित्यादिना" वर्णव्यत्ययः। अथ-शब्दार्थे "अधा निबद्ध उत्तर" इति ऋ०४,१८,६, अधा "अथानन्तरमिति" भा०। अधापीपस्य पीपेषेति य० १२,८, अधेति अव्ययम् अथार्थे "निपातस्य चेति" पा० दीर्घ इति वेददीपः।

अधःकाय पु० अधः अधरं कायस्य एकदेशिस०। नाभेरधः-प्रदेशे नेत्यनुदत्तौ "कोशाम्बीविमधःकायं संस्कृशन् धरणीमपीति" स्मृतिः। "अधःकायं नीवेरधःप्रदेशमिति" रघु०।

अधःकार पु० अधरमित्यर्थे अधः तस्य कारः। न्यूनीकरणे, तिरस्कारे, अधरीकरणे च।

अधःक्षिप्त त्रि० अधोमुखेन क्षिप्तम् क्षिप—क्त शाक०त०। अधोमुखतया स्थापिते न्यञ्चिते न्युब्जीकृते, अधस्ताच्चिक्षिते च।

अधःपुष्पी स्त्री अधोमुखं पुष्पं यस्याः (अनन्तमूल) गोजिह्वायाम् अवाक्पुष्प्याम् (भाटुर) इति ख्याते वृक्षे अत्यन्ये।

अधः(धस्)शय्या स्त्री अधोवर्त्तिनी शय्या वा सत्यम्। खट्टावर्जनेन भूमिशय्यायाम् "अग्नीन्धनं भैक्षचर्य्यमधःशय्यां गुरोर्हितम्। आ समावर्त्तनात् कुर्य्यादिति" मनुः।

अधन त्रि० नास्ति धनमस्य। धनहीने दरिद्रे स्वातन्त्र्यरहिते च। "अधनो हि धनं लब्ध्वा तृणवत् मन्यते जगदिति" नीतिः। "भार्य्या पुत्रस्य दासस्य त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यत्तैते तस्य तद्धनमिति" मनुः। "स्वातन्त्र्यराहित्यपरमिति" दायभागः।

अधम त्रि० अव—अम—धादेशः। कुत्सिते, हीने च। "सर्वत्र त्रिविधा भेदा उत्तमाधममध्यमा" इति। "अधमसमधरिष्ठान्यर्कोन्द्रःदिसंस्थे मधिनि विनयविज्ञानधीनैपुणानामिति" ज्योतिषोक्ते नृणां विज्ञानादिषु अधमत्वसूचके रविचन्द्रयोः स्थितिविशेषरूपे योगभेदे।

अधमशतक पु० कर्म्म०। "उत्तमस्त्रायुधीयोऽत्र मध्यमस्तु क्षणीबलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृत इति" स्मृत्युक्ते, पञ्चविधशूद्राणामध्ये भृतकभेदे।

अधमर्ण त्रि० ऋणं अवश्यदेयम् तत् अधमं गोध्यं यस्य ब०। अवश्यदेयर्णशोधके (खातक) इति प्रसिद्धे ऋणग्रहीतरि।

अधमर्णिक त्रि० अधमस्यर्णमवश्यदेयं दाढ्यत्वेनास्यास्य ठन्। अधमर्णशब्दार्थे। "अदीता च क्रमाद्ग्राह्यो धनिनामधमर्णिक" इति याज्ञ० "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः। तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकमिति" मनुः। अस्त्यर्थे इनि। अधमर्णीत्यत्रैव त्रि० स्त्रियां ङीप्।

अधमाङ्ग न० अधमम् अङ्गम् कर्म्म०। चरणे। तस्य सर्व्वाङ्गापेक्षया अधरस्थलात् अधमत्वम्।

अधमार्द्ध न० अधमम् अर्द्धम्। नाभेरधोभागे। ततः भवादौ यत्। अधमार्द्धम् तद्भवादौ, तत्सम्बन्धिनि च त्रि०।

अधर पु० न म्रियते मृङ्—अच् न०त०। (ठोट) इति ख्याते अधो-जत्रौ, नीचे वा ओष्ठे। "पिबसि रतिसर्वस्वममरमिति" शक०। "निर्म्मृष्टरागोऽधर" इति सा०दर्प०। "उमामुखे बिम्बफलाधरोष्ठे" इति कुमा०। "अधरं खलु बिम्बनामकं फलमाभ्यामिति भव्यमन्वयम्। लभतेऽधरबिम्बकृत्यदः पदमस्या रदनच्छदे वदन्निति" नैष०। धरणं धरः ब०। तत्सम्बन्धरहिते हीने, पु० ब०। तले, नीचे च त्रि० मन्दिरे स्त्रीचिह्नभेदे पु० न०। हीनवादिनि त्रि०। अयं सर्वनामकार्य्यभाक्। तत्रायं विशेषः पूर्व्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायामिति (पा०ग०)। दृत्युक्तेः व्यवस्थायामेवास्य सर्वनामता-व्यवस्था च स्वाभिधेयापेक्षोऽवधिनियमः। अवधित्वञ्च दैशिकं कालिकञ्च तत्र "पूर्व्वापरादिशब्दानां क्वचिदाद्यं प्रविभागतः। सामान्येनाभिधानेऽपि प्रवृत्तिर्देशकालयोरित्य" भियुक्तोक्तेः क्वचिदाद्यमेव उभयावधित्वनियमः न सर्व्वेषाम्, तथाहि पूर्व्वापरावरपरोत्तरशब्दा सुख्यवृत्त्या दिक्कालयोर्वर्त्तन्ते तदवच्छिन्नदेशग्रामादौ च। तत्र पूर्व्वस्यां दिशि वसति, पूर्व्वस्यादिश आगतः पूर्व्वदिक्सम्बन्धात् पूर्व्वो ग्रामी। एवं पूर्व्वस्मिन् मासे वसति पूर्व्वस्मात् मासादागतः। तत्कालसम्बन्धात् पूर्व्वो गुरुः पूर्व्वस्मिन् गुरोरागतः पूर्व्वस्मात् प्रासादादागत इत्यादि। एवम् अपरावरपरशब्दत्रयस्यापि "ते च विनापि दिक्कालसम्बन्धं देशवृत्तिभेदतः इति भेदः। अपरदेशसम्बन्धादपरो ग्रामः अवरो वा। अपरस्मिन् अवरस्मिन् वा पर्व्वते वसति। सन्निकर्षे विप्रकर्षे च सर्व्वासु दिक्षु तुल्योऽयं व्यपदेशः। न तु ते दिग्मातसम्बन्धेन तत्तदर्थं बोधकाः एकस्यामेव दिशि स्थितयोर्निकटानिकटयोः परावरादिव्यपदेशप्रवृत्तेः। एतच्छब्दामेत्राया सख्यवृत्त्या वक्ष्यमाणकारिकायां देशपदेनम् सार्थकं अन्यथा तु स्वतो देशवृत्तित्वम्। सन्निकर्षासन्निकर्षयोर्देशयत् कालोऽप्याश्रयः। तेन परः अपरः अवरो वा कालः। अतएव परकालसम्बन्धात् परःपाणिनिः अपरकालसंबन्धादपरः वैयटादिरिति। दक्षिणाधरशब्दौ तु दिशि दिगवच्छिन्ने पर्व्वतादौ च वर्त्तेते न तु काले, नापि कालावच्छिन्ने इति भेदः। दक्षिणस्यां वसति, दक्षिणे पर्व्वते वा वसति, अवरस्यां दिशि वसति अधरदिक्सम्बन्धात् अधरप्रासादे वा वसति इति। तेन "स्वस्वप्राधिकेऽन्यस्मिन् कालदिग्देशवृत्तयः। पूर्व्वापरावरधरापराश्च दक्षिणोत्तरौ" इति गणरत्ने सर्व्वेषां कालादिवृत्तित्वोक्तावपि दक्षिणाधरयोस्तु न कालवृत्तित्वमिति तेनैव स्वातन्त्र्याज्ञानरूपे गणरत्नमहोदधौ स्थिरीकृतम्। दक्षिणस्यां दिशि

स्त्री० दक्षिणदिशश्च भूगोले यथाधरत्वं तथा उदक्शब्दे वक्ष्यते। सर्वनाम्नां दक्षौ पुंवद्भावात् अधरस्यां भवः अधरतन इत्यादि अधरस्यां वर्त्तते अधरदक्षिः अधरा अधरस्याः अधरस्यामित्यर्थे अधरत इत्यादि। [अधोभागे इत्यर्थे।

अधरतस् अव्य० अधर—तसिल्। प्रथमापञ्चमीसप्तम्यर्थेऽक्षौ

अधरत्तात् अव्य०अधर+अत्तति गृ०। अधरत इत्यर्थे। "पुरस्तात् सवितोत्तरत्तादधरत्तादिति"ऋ० १०,३६,१४,

अधरमधु न० अधरस्य मधुव आस्वादातिशयात्। अधरस्थे। [रतदृश्यर्थे

अधरस्तात् अव्य० अधर+सप्तम्यादयर्थे अस्तति। अध-

अधराच् त्रि० अधरां दक्षिणां दिशमञ्चति क्विप्। दक्षिण दिग्गन्तरि। "प्राङ् वा उदङ् वाऽधराङ् वा प्रथमायीताभिनद्धात्" इति श्रा० उ०। स्त्रियामधराचीति। सा च दक्षिणस्यां दिशि च।

अधराधीन त्रि० अधराधि भवः अधराच्+ख। अधःप्रदेशभवे। "अधराधीनमक्षणोदपासप" इति ऋ० २,१७,५,

अधराच्य त्रि० अधरस्यां भवः यत्। दक्षिणदिग्भवे अधोदिग्भवे च। "अरसं प्राचंत्र विषमरसं यदुदीचम् अर्पैकमधराचमिति" वेदः।

अधरात् अव्य० अधर+अस्त्यर्थे अति। अधरतइत्यस्यार्थे। "पश्चादोत्तरादधरादापुरस्तादिति"ऋ० ६,६,६, अधरात् दक्षिणत इत्यर्थः।

अधरीण त्रि० अधरे भवः अधर+ख। अधरभवे।

अधरेण अव्य० अधरस्मिन् देशे, दिशि वा अधर+एनप्। प्रथमासप्तमीद्वयौ आसन्ने नीचे देशादौ, सन्निकृष्टदक्षिणादिशि च। [तसुपचारात्। अधरदिवसे।

अधरेद्युस् अव्य० अधरे द्युनि अधर+एद्युस्। कालवृत्ति-

अधरोत्तर न० अधरश्च उत्तरश्च समा०द्व०। न्यूनाधिक्यवति निर्णीते। "अद्यात् काकः पुरोडाशंश्चर्मचिह्नाद्व्रतस्थया स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरमिति" मनुः।

अधर्म पु० म्रियतेऽनेन मृ—मनिन् विरोधे न०त०। धर्मविरोधिनि वेदादिनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च। "नोदनालक्षणोऽर्थोधर्म" इति सूत्रकारेण निषेधलक्षणोऽनर्थोऽधर्म इति तल्लक्षणं सूचितम् तत्र वेदप्रतिपाद्योऽर्थोधर्म, तन्निषेधप्रतिपाद्योऽनर्थः अधर्मः। स च निषिद्धकर्म्माधीनः पापनामा अदृष्टभेदः। अनर्थश्च अनिष्टसाधनम्। तत्सम्बन्धयुक्तिस्तु "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणाम् नरः पतनमृच्छतीति"। "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इत्यादिना शास्त्रेण कर्म्मणामाशुविनाशिनां कालान्तरभाविनरकादिजन्मविशेषान् प्रति हेतुत्वोक्तावपि तथात्वं मध्यस्थद्वारीभूतमदृष्टं विना न सम्भवतीति तत् कल्प्यते अतः 'चिरध्वस्तं फलायालमित्यादिना" अदृष्टशब्दे दर्शितयुक्तेश्च पापसत्त्वसाधनम्। "अधर्मेणैधते तावत् ततो भद्राणि पश्यति। ततः सपत्नान् जयति समूलस्तु विनश्यतीति" मनुः। "अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति" गीता। अधर्म्मभेदात्गतिविशेषोक्तेश्चाधर्मसत्त्वम् यथा

"कर्म्मभिर्नियतैर्देही जन्तुर्दुःखान्युपाश्नुते। येन येन तु भावेन कर्म्मणा पुरुषो गतिम्। प्रयाति परुषां घोरां तत्ते वक्ष्यामृतः परम्। अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः। पतितात् प्रतिगृह्याथ खरयोनौ प्रजायते। खरो जीवति वर्षाणि दश पञ्च च भारत!। खरो मृतो बलीवर्दः सप्त वर्षाणि जीवति। बलीवर्दो मृतश्चापि जायते ब्रह्मराक्षसः। ब्रह्मरक्षश्च मासांस्त्रीन्ततो जायेत ब्राह्मणः। पतितं याजयित्वा तु ऋक्षियोनौ प्रजायते। तत्र जीवति वर्षाणि दश पञ्च च भारत!। ऋक्षिभावाद्विमुक्तस्तु ततो जायेत गर्दभः। गर्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकरः। कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः। श्वा वर्षमेकं भवति ततो जायेत मानवः। उपाध्यायस्य यः पापं शिष्यः कुर्य्याद्बुद्धिमान्। स जीव इह संसारान् क्लीनान्नेति न संशयः। प्राक् श्वा भवति राजेन्द्र! ततः क्रव्यात्ततः खरः। ततः प्रेतः परिक्लिष्टः पश्चाज्जायेत ब्राह्मणः। मनसापि गुरोर्भार्य्यां यः शिष्यो याति पापकृत्। स उग्रान् प्रेति संसारानधर्म्मेणेह चेतसा। श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति। तत्रापि निधनं प्राप्तः ऋक्षियोनौ प्रजायते। ऋक्षिभावमनुप्राप्तो वर्षमेकन्तु जीवति। ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते। यदि पुत्रसमं शिष्यं गुरुर्हन्याद्कारणे। आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते। पितरं मातरञ्चैव यस्तु पुत्रोऽवमन्यते। सोऽपि राजन्! मृतो जन्तुः पूर्व्वं जायेत गर्दभः। गर्दभत्वन्तु सम्प्राप्य दश वर्षाणि जीवति। संवत्सरन्तु कुक्षीरस्ततो जायेत मानवः। पुत्रस्य मातापितरौ यस्य वृत्तावुभावपि। गुर्व्वध्यानतः सोऽपि मृतो जायेत गर्दभः। खरो जीवति मासांस्तु दश श्वा

च चतुर्दश। विडालः सप्त मासांस्तु ततो जायेत मानवः। मातापितरावाक्रुश्य सारिकः सम्प्रजायते। ताड़यित्वा तु तावेव जायते कच्छपो नृप!। कच्छपो दश वर्षाणि त्रीणि वर्षाणि शल्लकः। व्यालो भूत्वा च षण्मासांस्ततो जायेत मानुषः। भर्तृपिण्डमुपाश्नन् यो राजद्विष्टानि सेवते। सोऽपि मोहसमापन्नो मृतो जायेत वानरः। वानरो दश वर्षाणि पञ्च वर्षाणि मूषिकः। श्वाऽथ भूत्वाऽथ षण्मासांस्ततो जायेत मानुषः। न्यासापहर्त्ता तु नरो यमस्य विषयं गतः। संसाराणां शतं गत्वा कृमियोनौ प्रजायते। तत्र जीवति वर्षाणि दश पञ्च च भारत!। दुष्कृतस्य क्षयं कृत्वा ततो जायेत मानुषः। असूयको नरश्चापि मृतो जायेत शार्ङ्गकः। विश्वासकर्त्ता च नरो मीनो जायेत दुर्मतिः। भूत्वा मीनोऽष्ट वर्षाणि मृगो जायेत भारत। मृगस्तु चतुरो मासांस्ततस्त्यागः प्रजायते। छागस्तु निधनं प्राप्य पूर्णे संवत्सरे ततः। कीटः प्रजायते जन्तुस्ततो जायेत मानुषः। धान्यान् यवांस्तिलान् माषान् कुलत्थान् सर्षपांश्चणान्। कलायानथ सुद्गांश्च गोधूमानतसीस्तथा। यस्यान्यस्य हर्त्ता च मोहाज्जन्तुरचेतनः। स जायते महाराज! मूषिको निरपत्रपः। तत्र प्रेत्य महाराज! मृगो जायेत शूकरः। शूकरो जातमात्रस्तु रोगेण म्रियते नृप!। श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव!। भूत्वा श्वा पञ्च वर्षाणि ततो जायेत मानवः। परदाराभिमर्षन्तु कृत्वा जायेत वै बकः। श्वा ग्रहगालस्ततो गृध्रो व्यालः कङ्को वकस्तथा। भ्रातृभार्य्यान्तु पापात्मा यो धर्षयति मोहितः। पुंश्चोकिलत्वमाप्नोति सोऽपि संवत्सरं नृप!। सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्यान्तथैव च। धर्षयित्वा तु कामाय मृतो जायेत शूकरः। शूकरः पञ्च वर्षाणि दश वर्षाणि वै बकः। विड़ालः पञ्च वर्षाणि दश वर्षाणि कुक्कुटः। पिपीलकस्तु मासांस्त्रीन् कीटः सप्तमासमेव तु। एतानासाद्य संसारान् कृमियोनौ प्रजायते। तत्र जीवति मासांस्तु कृमियोनौ चतुर्दश। ततोऽधर्म्मक्षयं कृत्वा पुनर्जायेत मानवः। उपस्थिते विवाहे तु यज्ञे दानेऽथवा विभो!। मोहात्करोति यो विघ्नं स मृतो जायते कृमिः। कृमिर्जीवति वर्षाणि दश पञ्च च भारत!। अधर्मस्य क्षयं कृत्वा ततो जायेत मानवः। पूर्व्वं दत्त्वा तु यः कन्यां द्वितीये दातुमिच्छति। सोऽपि राजन्! मृतो जन्तुः कृमियोनौ प्रजायते। तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर!। अधर्म्मसङ्क्षये सुक्षत्ततो जायेत मानुषः। देवकार्य्यमकृत्वा तु पितृकार्य्यमथापि वा। अनिर्व्वाप्य समश्नन् वै मृतो जायेत वायसः। वायसः शतवर्षाणि ततो जायेत कुक्कुटः। जायते व्यालकश्चापि मासं तस्मात्तु मानुषः। ज्येष्ठं पितृसमञ्चापि भ्रातरं योऽवमन्यते। सोऽपि मृत्युमुपागम्य क्रौञ्चयोनौ प्रजायते। क्रौञ्चो जीवति मासांस्तु दश द्वौ सप्त पञ्च च। ततो निधनमापन्नो मानुषत्वमुपाश्नुते। दृषलो ब्रह्मणीं गत्वा कृमियोनौ प्रजायते। ततः सम्प्राप्य निधनं जायते शूकरः पुनः। शूकरो जातमात्रस्तु रोगेण म्रियते नृप!। श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव!। श्वा भूत्वा कृतकर्म्माऽसौ जायते मानुषस्ततः। तत्रापत्यं ससुत्पाद्य मृतो जायेत मूषिकः। कृतघ्नस्तु मृतो राजन्! यमस्य विषयं गतः। यमस्य पुरुषैः क्रुद्धैर्ब्भृशं प्राप्नोति दारुणम्। दग्धं सशस्त्रं शूलैश्च भिन्नभिन्नञ्च दारुणम्। असिपत्रवनं घोरं वालुकां कूटशाल्मलीम्। एतांश्चान्यांश्च वह्नीः स यमस्य विषयं गतः। यातनाः प्राप्य तत्रोग्रास्ततो बध्यति भारत!। ततः कृतघ्नः स तत्रोग्रैर्भरतर्षभ!। संसारचक्रमासाद्य कृमियोनौ प्रजायते। कृमिर्भवति वर्षाणि दश पञ्च च भारत!। ततो गर्भं समासाद्य अत्रैव म्रियते शिशुः। ततो गर्भशतं जन्तुर्व्वृक्षभिः सम्प्रपद्यते। संसारांश्च बहून् गत्वा ततस्तिर्य्यक् प्रजायते। ततो दुःखमनुप्राप्य बहुवर्षगणानिह। अपुनर्भवसंयुक्तस्ततः कूर्म्मः प्रजायते। दधि हृत्वा बकश्चापि भवो मत्स्यानसंस्कृतान्। चोरयित्वा तु दुर्ब्बुद्धिर्भिधुदंशः प्रजायते। फलं वा मूलकं हृत्वा अपूपं वा पिपीलिका। चोरयित्वा तु निष्पावं जायते फलगोलकः। पायसं चोरयित्वा तु तित्तिरित्वमवाप्नुते। हृत्वा पिष्टमयं पूपं कुम्भोलूकः प्रजायते। अयो हृत्वा तु दुर्ब्बुद्धिर्वायसो जायते नरः। कांस्यं हृत्वा तु दुर्ब्बुद्धिर्हारीतो जायते नरः। राजतं भाजनं हृत्वा कपोतः संप्रजायते। हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते। पत्नीर्थं चोरयित्वा तु क्रकरत्वं स गच्छति। कौशिकन्तु ततो हृत्वा नरो जायेत वर्त्तकः। अंशुकं चोरयित्वा तु शुको जायेत मानवः। चोरयित्वा तु कूलन्तु मृतो हंसः प्रजायते। क्षौमः कार्पासिकं हृत्वा मृतो जायेत मानवः। चोरयित्वा नरः पट्टं त्वाविकञ्चैव भारत!। क्षौमञ्च वस्त्रमादाय मृगो जन्तुः प्रजायते

वर्णान् हत्वा तु पुरुषो मृतो जायेत वर्हिणः। हत्वा रक्तानि वस्त्राणि जायते जीवजीवकः। वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः। छुच्छुन्दरित्वमाप्नोति राजन्! लोभपरायणः। तत्र जीवति वर्षाणि ततो दश च पञ्च च। अधर्मशस्त्रं क्षयं कृत्वा ततो जायेत मानवः। चोरयित्वा पयश्चापि बलाका सम्प्रजायते। यस्तु चोरयते तैलं नरो मोहसमन्वितः। सोऽपि राजन्! मृतो जन्तुस्तैलपायी प्रजायते। अशस्त्रं पुरुषं हत्वा सशस्त्रः पुरुषाधमः। अर्थार्थी यदि वा वैरी स मृतो जायते खरः। खरो जीवति वर्षे द्वे ततः शस्त्रेण बध्यते। स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायत। मृगो बध्यति शस्त्रेण गते संवत्सरे तु सः। हतो मृगस्ततो मीनः सोऽपि जालेन बध्यते। मासे चतुर्थे सम्प्राप्ते श्वापदः सम्प्रजायते। श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च। ततस्तु निधनं प्राप्य कालपर्यायनोदितः। अधर्मशस्त्रं क्षयं कृत्वा ततो जायेत मानुषः। स्त्रियं हत्वा तु दुर्बुद्धिर्यमस्य विषयं गतः। बध्यक्लेशान् समासाद्य संसारांश्चैव विंशतिम्। ततः पश्चान्महाराज! कृमियोनौ प्रजायते। कृमिर्विंशतिवर्षाणि भूत्वा जायेत मानुषः। भोजनं चोरयित्वा तु मक्षिका जायते नरः। मक्षिकासङ्घशबलो बहून् मासान् भवत्युत। ततः पापक्षयं कृत्वा मानुषत्वमवाप्नुते। धान्यं हृत्वा तु पुरुषो लोमशः सम्प्रजायते। तथा पिण्याकसंमिश्रमशनं चोरयन्नरः। स जायते वस्तुसमो दारुणो मूषिको महान्। दशन् वै मानुषं नित्यं पापात्मा स प्रजायते। घृतं हृत्वा तु दुर्बुद्धिः काकमद्गुः प्रजायते। मत्स्यमांसमधो हृत्वा काको जायेत दुर्मतिः। लवणं चोरयित्वा तु चौरिकाकः प्रजायते। विश्वासेन तु निक्षिप्तं यो वै निह्नौति मानवः। स गतायुर्नरस्ताक्ष्यं मत्स्ययोनौ प्रजायते। मत्स्ययोनिमनुप्राप्य मृतो जायेत मानवः। मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते। पापानि तु नरः कृत्वा तिर्यग् जायेत भारत!। न चात्मनः प्रमाणज्ञे धर्मं जानन्ति किञ्चन। ये पापानि नराः कृत्वा निरस्यन्ति व्रतैः सदा। सुखदुःखसमायुक्ता व्याधितास्ते भवन्त्युत। असंवासाः प्रजायन्ते क्लेशा अपि न संशयः। नराः पापसमाचारा लोभमोहसमन्विताः। वर्जयन्ति च पापानि जन्मप्रभृति ये नराः। अरोगा रूपवन्तश्च धनिनश्च भवन्त्युत। स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः। एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः। परस्वहरणे दोषाः सर्व एव प्रकीर्तिताः। एतद् वै लेशमात्रेण कथितं ते मयाऽनघ!। अपरान् मत्कथायोगे भूयः श्रोष्यसि भारत!। एतत्क्रया महाराज! ब्रह्मणो वदतः पुरा। सुरर्षीणां शुभे मध्ये पृष्टश्चापि यथातथम्। मयाऽपि तच्च कात्स्न्र्येन यथावदनुवर्णितम्। एतच्छ्रुत्वा महाराज! धर्मे कुरु मनः सदा॥ इति॥

"महापातकजान् घोरान्नरकान् प्राप्य दारुणान्। कर्म्मचण्डात् प्रजायन्ते महापातकिनस्त्विह। मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। खरपुक्कसवेणानां सुरापो नात्र संशयः। कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्। तृणगुल्मलतात्वञ्च क्रमशोगुरुतल्पग" इति। "श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्। चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति। कृमिकीटपतङ्गानां विड्भुजाञ्चैव पक्षिणाम्। हिंस्राणाञ्चैव सत्वानां सुरापो ब्राह्मणो व्रजेत्। लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम्। हिंस्राणाञ्च पिशाचानां स्तेनोविप्रःसकृत्स्वयः। तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि। क्रूरकर्म्मकृताञ्चैव शतशोगुरुतल्पग" इति। "ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः। हेमहारी च कुनखी दुश्चर्मा गुरुतल्पगः। यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते। अन्नहर्त्तामयावी स्यान्मूकोवागपहारकः। धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः। तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः। यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः। अवश्यं याति तिर्य्यक्त्वमश्नुत्वा चैवाऽऽर्त्तं हविरिति"। "परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः। हीनजातौ प्रजायेत पररत्नापहारकः। पलाशकं शिखी हृत्वा, गन्धान् छुच्छुन्दरिः शुभान्। मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः। विविधानि च रत्नानि जायते हेमकर्त्तृष्विति"। "मूषिको धान्यहारी, स्याद्यानसञ्जः, कपिः फलम्। जलं प्लवः, पयः काको, घृतहारी ह्यपस्करम्। मधु दंशः, पलं गृध्रो, गां क्रोधा, ऽग्निंवकस्तथा। स्त्रियं वस्त्रं, स्वा रसन्तु, चोरी लवणहारकः। प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्म्मणि। द्रव्यप्रकाराहि यथा तथैव प्राणिजातयः" इति। "द्रव्यस्यापह्रियमाणस्य यादृशाः प्रकारास्तादृश एव प्राणिजातयः स्तेयकर्म्मण्यपहर्त्तारो भवन्ति यथा कांस्यहारी हंस इति। अथवा यत्फलसाधनन्द्रव्यमपहरति तत्साधनविकलो यथा पङ्गुतामश्वहारक इति" सिता०। "ब्रह्महा

कुष्ठी, तैजसापहारी मण्डली, देवब्राह्मणाक्रोशकः खलति, गेरदाग्निदावुन्मत्तौ, गुरुप्रतिघ्नापस्कारी, गोघ्नश्चान्धो, धर्म्मपत्नीं शुल्कान्यत्र प्रदत्तः यद्वेधी प्राणिविशेषः, कृष्णाशी भगभक्षो, देव-ब्राह्मण-स्वापहारी पाण्डुरोगी, न्यासापारी च काणः, स्त्रीपण्योपजीवी षण्ढः, कौमारदारत्यागी दुर्भगो, मिष्टैकाशी वातगुल्मी, अभक्ष्यभक्षको गण्डमाली, ब्राह्मणीगामी निर्वीजी, क्रूरकर्म्मा वामनो, वस्त्रापहारी पतङ्गः, शय्यापहारी क्षपणकः, शङ्खशुक्त्यपहारी, कपाली दीपापहारी कौशिको, मितभुक् क्षयी, मातापितोराक्रोशकः खञ्जन" इति अन्तरवागुल्वणो, सुरूर्मुरुःसंलग्नवाक् जलोदरी, दारत्यागी कूटसाक्षी श्लीपदी, उच्छूनजङ्घाचरणो, विवाहविघ्नकर्त्ता छिन्नोष्ठः, अवगुरणः छिन्नहस्तो, मातृघ्नोऽन्धः, क्षुधागामी, वातदूषणः, चतुष्पथे विण्मूत्रविसर्जने मूत्रकृच्छ्री, कन्यादूषकः षण्ढः, ईर्ष्यालुर्मशकः, पित्रोर्विद्यमानोऽपस्कारी,न्यासापहार्यनपत्यो, रत्नापहार्यत्यन्तदरिद्रोविद्याविक्रयी पुरुषद्वगः, वेदविक्रयी द्वीपी, वक्रयाजकोजलप्लवः, अयाज्ययाजकोवराहः, अनिमन्त्रितभोजी वायसः, मिष्टैकभोजी वानरः, यतस्ततोऽन्नाजीरः, कत्तृवनदहनात्खद्योतः, दारकार्य्योत्सुखविगन्धिः, पर्युषितभोजी क्रिमिः, अदत्तादायी बलीवर्दो, मत्सरी भ्रमरः, अग्न्युत्सादी मण्डलकृष्णी, शूद्राचार्य्यःश्वपाकः, गोहर्त्ता सर्पः, स्त्रीहापहारी क्षयी, अन्नापहार्य्यजीर्णी, ज्ञानापहारी मूर्खः, चण्डालीयुक्तसीगमनेऽजगरः, प्रव्रजितागमने मत्कुणिशाचः, शूद्रागमने दीर्घकीटः, सवर्णाभिगामी दरिद्रः, जलहारी मत्स्यः, क्षीरहारी बलाका, वार्द्धुषिकोऽकृपीनः, अविक्रेयविक्रयी वटः, राजमहिषीगामी नपुंसकः, राजाक्रोशकोगर्दभः, गोगामी मण्डूकः, अनध्यायाध्ययने शृगालः, परद्रव्यापहारी परप्रेष्यः, मत्स्यवधेगर्भवासी" इत्येवं नानाकृति वचनैः गतिविशेषो मिताक्षरायां दर्शितस्तेन तत्कालपर्य्यन्तस्थायिताऽधर्म्मस्येति गम्यते। न० अनिच्छसमा० अधर्म्मा। पुण्यरूपधर्म्मशून्ये त्रि०। नास्ति निष्टप्तः धर्म्मो यस्य अनिच्छसमा० अधर्म्मा। क्षीणपुण्ये त्रि०। "तारकावर्षमिवाधर्मविनाधपिशुनमिति" काद०। गुणाद्यपरपर्य्यायः अधर्मस्तद्वहिते ब्रह्मणि न०।

अधर्म्मचारिन् त्रि० न धर्मं चरति अनुतिष्ठति चर+णिनि इत० न०त०। धर्मकृत्यानुष्ठायिनि, पापानुष्ठायिनि च स्त्रियां ङीप्।

अधर्म्मतस् अव्य० अधर्म+तसि। अधर्मात्, "अधर्मतो निवर्त्तेत" मनुः।

अधर्म्मप्रचुर त्रि० अधर्मेण प्रचुरः प्राचुर्य्यार्थे मयट्। पापप्रचुरे। स्त्रियां ङीप्। [पापाचारिणि।

अधर्म्मात्मन् त्रि० अधर्मप्रधानः आत्मा यस्य। प्राधान्येन

अधर्म्मास्तिकाय पु० आर्हतमतसिद्धेषु जीवादिपञ्चकास्तिकायेषु मध्ये स्थितिस्वभावके पदार्थभेदे विवरणमर्हच्छब्दे द्रष्टव्यम्। [ङीप्।

अधर्म्मिन् त्रि० अधर्मः पापमस्त्यस्य इनि। पापवति स्त्रियां

अधर्म्मिष्ठ त्रि० अतिशयेन अधर्म्मी इष्ठन् मत्वाट्टिलोपः। भूयःपापयुक्ते।

अधर्म्म्य त्रि० न धर्म्माय हितं यत्। पापापादके, "पञ्चानां तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह" मनुः।

अधवा स्त्री न विद्यमानो धवो भर्त्ता यस्याः। मृतभर्तृकायां विधवायाम् स्त्रियाम्। [भागगन्तरि त्रि०।

अधश्चर पु० अधःखनित्वा चरति अच्। चौरे, अधो-

अधश्चौर पु० अधोभागे खनित्वा चोरयति चुर--अच् स्वार्थे अण्। सन्धिं कृत्वा चौर्य्यकारके। (सिन्धियाल)।

अधश्शिरस् न० अधोवर्त्ति शिरः यस्य यत्वम् वा। अवाङ्मस्तके।

अधस् अव्य० अधर+असि अधरशब्दस्थाने अधादेशश्च। पातले, अधस्थानमात्रे च। तत्रापि अर्थवशात् प्रथमाद्वितीयासप्तम्यर्थाः उच्चेयाः। तत्र प्रथमार्थे अधोरत्नं, द्वितीयार्थे अधोदृष्टात् पतति, सप्तम्यर्थे अधोदृष्टे गोते इत्यादि। "अधः कथञ्चिद्भूतभूमिभागमिति" दुर्गा०। "पतत्यधोधाम विसारि सर्व्वतः, इति माघः।

अधस्तन त्रि० अधोभवः अधस्+ष्ण ट्युट् च। अधोभवे स्त्रियां ङीप्। "एवमागामियागीयमख्यकालादधस्तनः स्वकालादुत्तरो गोणः कालः पूर्वस्य कर्मण इति" श्रुतिः। "अधस्तनः पूर्वतनः दृश्यश्चास्त्रेषु व्यवहार" इति न्यायादिति" रघुनन्दनोक्तेः पूर्वतनेऽपि।

अधस्तरा(रा)म् अव्य० अतिशयेन अधः, तर(म)प् आद्यु। अत्यन्ताधरे। द्रव्ये तु नाद्यु। अधस्तरोदेयद्रव्यादि।

अधस्तात् अव्य० अधर+अस्तातिं अधादेशः। अधःशब्दार्थे। अयञ्च प्रथमाषष्ठीसप्तम्यर्थे एव "धर्म्मेण गमनमूर्द्धं गमनमधस्ताद् भवत्यधर्म्मेणेति" ४४ सांख्यका०।

अधस्पदम् न० अधोवर्त्ति पदं वा यत्वम्। निम्नपदे।

अधामार्ग पु० न धीयते अधाः तादृशं मार्गं वाति वा-क। अपामार्गे इति क्षीरस्वामी।

अधार्म्मिक त्रि० धर्मं चरति आसेवते ठक् विरोधार्थे न०त०।

अधर्म्मौ-स्वारसिकप्रवृत्तिमति "अधर्म्माच्चेति वक्तव्यमिति" ठकि तु आधर्म्मिक इत्यप्यत्र त्रि०।

अधि अव्य० न+धा-कि। अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिकृत्येत्यर्थे, उपरि, आधिक्ये, अतिशये च। अस्य ऐश्वर्य्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति। "अधिः अध्ययनैश्वर्यवशित्वस्मरणाधिकेषु" इति गणरत्ने उक्तम् तत्रोपाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिद्योतकः। ऐश्वर्य्ये अधिपतिः, वशित्वे अधीनः, अधिगतमिनमु अत्या०स०। स्मरणे मातुरध्येति इकः स्मरणार्थत्वमधिद्योतयति। अधिके, अधिकमिति अधि+कन्। "अधिपरी अनर्थकाविति" पा० उक्तेः आनर्थक्ये गतित्वाभावात् नोपसर्गत्वं तेन अध्यागच्छति इत्यादौ गतिसंज्ञाबाधात् "गतिर्गताविति" पा० निघातो न। अतएव अस्य धात्वर्थमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अनर्थकत्वव्यवहारः विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन "तस्मिन्नात्मवतुर्भागे प्राङ्नाकमधितस्थुषीति" रघौ न षत्वम् सति च क्रियाविशेषद्योतकत्वे अधितष्ठावित्यादाविव उपसर्गत्वेन षत्वमिति भेदः। मुग्धबोधे तु "नात्यर्थायां स्वतो नातिक्रमेऽतिः पर्य्यधी गताविति" गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गतवतीत्यर्थकतयोपसर्गत्वाभावाच्च षत्वमिति विवेकः। तथा अधिके, "इतो वा सातिमीमहे दिवो वा पार्थिवादधि" इति ऋ० १,६,१० "अधीमहे आधिक्येन स्याधामहे" इति भाष्यम्। उपरि "ये नाकस्याधि रोचने दिवीति" ऋ० १,१६,६, "नाकस्य दुःखरहितस्य स्वर्गस्य उपरीति" भाष्यम्, अधिकारे "यदत्र सामधिकरिष्यतीति" सि० कौ०। विभाषा कृञीति पा०। वा गतित्वमत्र विनियोक्तुरीश्वरत्वं गम्यते अधिकारो विनियोगः। आधिक्ये "अधिगत्य जगत्यधीश्वरादिति" नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थत्वद्योतकत्वात् उपसर्गत्वम् "धात्वर्थं बाधते कश्चित् कञ्चित्तमनुवर्त्तते, तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्विधे"त्युक्तेः विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप्। "अधिगतं विधिवद् यदयाचयदित्यादौ" दायत्वेन लब्धमित्यर्थः। एवमन्यत्रापि विशेषार्थद्योतकता विज्ञेया। आधीयते दुःखमनेनेति आ+धा-कि वा पृ०। दुःखम्। मनःपीड़ायाम् पु०।

अधिक त्रि० अध्याढ्य एव स्वार्थे कन् उत्तरपदलोपश्च। प्रधाने अतिरिक्ते, "जनं न सत्वेष्वधिको बबाधे" इति रघुः। आधिक्यं च योग्यपरिमाणातिक्रमः अतिशयवृत्तिश्च। तत्तानुरूपातिक्रमे "अकालप्रसवा नार्य्य इत्युपक्रम्य "हीनाङ्गीमधिकाङ्गीञ्च जायन्ते यदि वा त्वय" इत्यरिष्टसूत्रमुदाहार्य्यम्। "हीनाङ्गमधिकाङ्गञ्च श्राद्धभोज्ये विवर्ज्जयेदिति" स्मृतिः। "द्व्यमधिकमनोज्ञा वल्कलेनापि तन्वीति" शकु०। "अधिकं फलमश्नुते" इति पुरा०। असाधारणे च। "ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति" गौतमः "ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। "निर्विष्टं वैश्यशूद्रयोरिति"। अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषिगोरक्षादिलब्धन्निर्विष्टन्तदसाधारणं, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धन्तदसाधारणम्। एवमनुलोमजानामतिलोमजानाञ्च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं सूतानामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वेषामपि भृतिरूपत्वात्, "निर्वेशो भृतिभोगयोरिति" त्रिकाण्डीस्मरणात्। तत्तदसाधारणं वेदितव्यम्" इति मिताक्षरा। दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे "आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते"। "किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरियत्र। अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि" इत्यत्राश्रयस्य। "युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत। तनौ वसन्तस्य न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः" इति माघे तु आश्रितस्याधिक्यम्। भावार्थे ष्यञ्-आधिक्यम्। उचितप्रमाणातिरेके न०। [अत्यन्तोत्कृष्टे च।

अधिकतर त्रि० अधिक+तरप्। द्वयोर्मध्ये उत्कृष्टे एकस्मिन्,

अधिकतम त्रि० अधिक+तमप्। बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च।

अधिकमास पु० कर्म्म०। मलमासे तद्विरूपमधिमासशब्दे।

अधिकरण न० अधि+कृ-ल्युट्। आधारे, व्याकरणशास्त्रे "कर्त्तृकर्म्मव्यवहितमसाक्षाद्धारयत् क्रियाम्। उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति" कविरहस्यपरिभाषिते अधिकरणसंज्ञके कर्त्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गेहस्य कर्त्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गेहादेः। "आधारोऽधिकरणमिति" "सप्तम्यधिकरणे इति" पा०।

अधिकरणं च यस्य गुणादेर्यो धर्म्मी स एव। यथा गुणकर्मजातीनां द्रव्यम्, द्रव्यस्य च संयोगादिसम्बन्धेन द्रव्यान्तरं, तत्राधिकरणस्यैवाधिकरणत्वं यथा कुण्डादेर्बदरादीनामधिकरणत्वम् घटादेर्घटादीनां, न तु वैपरीत्ये। द्रव्यादिषु गुणादेरेव, समवायेन तादात्म्येन वा मतभेदेन अधिकरणत्वं नतु गुणादीनां द्रव्याधिकरणत्वमित्येव मन्तव्यम्। क्रियते निर्णयार्थं विचारोऽस्मिन्। पूर्व्वोत्तरमीमांसायाञ्च प्रसिद्धे एकार्थप्रतिपादके विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयात्मकपञ्चाङ्गबोधकवाक्यसमुदाये न्याये। तथा हि "विषयोविषयश्चैव पूर्व्वपक्षस्तथोत्तरं निर्णयश्चेति"सिद्धान्तः शास्त्रेऽधिकरणं स्मृतमिति" मीमांसा। तत्र विचारार्हं वाक्यं विषयः, तस्यार्थविषये विषयः इदमित्थं न वेति विकल्पः। तत्र सन्दिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्व्वपक्षवाक्यं, पूर्वपक्षोक्तां युक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शनवाक्यम् सिद्धान्तः। ततश्चेत्याद्यभिलापेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णायकवाक्यमिति यथा "स्वाध्यायोऽध्येतव्य" इत्यादिवाक्यं विचारार्थत्वेन विषयः। किमाध्ययनमक्षरव्यक्षणमात्रम्? अर्थज्ञानपर्य्यन्ताध्ययनं? वेति संशयः। तत्र अक्षरव्यक्षणमात्रमध्ययनमिति पूर्व्वपक्षः। अर्थज्ञानसहिताक्षरव्यक्षणमिति सिद्धान्तः। तेन विधिवाक्यस्य सार्थवेदाध्ययनमेव फलितोऽर्थ इति निर्णय इत्थं तत्प्रतिपादकावयवपञ्चात्मकोन्यायोऽत्रावसीयते। एवमन्यदप्युदाहार्य्यम्। उत्तरमीमांसायामपि एतानि यथायथं योज्यानि विशेषस्तस्यं वेदान्ते पञ्चावयवा अन्यविधा यथोक्तं माधवाचार्य्येण। "तत्रैकैकमधिकरणं पञ्चावयवं विषयः सन्देहः सङ्गतिः पूर्व्वपक्षः सिद्धान्तश्चेति पञ्चावयवा इति" सङ्गतिश्च "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरुह्यता 'मित्यनेन सङ्गतित्रैविध्यं तेनैव दर्शितं तद्विवरणे सङ्गतिशब्दे वक्ष्यते। तत्र वेदान्ताधिकरणं यथा "अथातो ब्रह्मजिज्ञासेति प्रथमाधिकरणम् "अविचार्यं विचार्यं वा ब्रह्माध्यासनिरूपणात्। असन्दिग्धफलत्वाभ्यां न विचारं तदर्हति। अध्यासोऽहंवृत्तिसिद्धोऽसकृं ब्रह्म श्रुतीरितम् सन्दिग्धान्यूनभावाभ्यां विचार्यं ब्रह्म वेदत" इति माधवः। व्याख्यातञ्चैतत् खेनैव यथा "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इत्यत्र आत्मदर्शनं फलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि तात्पर्य्यं निर्णेतुमनुकूलोन्यायविचारः तदेतद्विचारविधायकं वाक्यं विषयः। न चायं विषयः श्लोकयोर्न संगच्छेत, सन्देहसंशयकेशैवार्थात् तत् संगच्छतीतिः ब्रह्मविचारात्मकन्यायनिर्णयात्मकशास्त्रमनारभ्याधीयमारभ्याधीयं वेति सन्देहः। पूर्वोत्तरपक्षयुक्तिश्चयं सर्वत्र सन्देहधीजमुच्चेयम्। तत्रानारभ्यमिति तावत्प्राप्तं विषयप्रयोजनयोरभावात्। संदिग्धं हि विचारविषयोभवति ब्रह्म त्वसन्दिग्धं तथा हि तत् किं ब्रह्माकारेण सन्दिह्येत? आत्माकारेण? वा, नाद्यः "सत्यं ज्ञानमनन्तं ब्रह्मेति"वाक्येन ब्रह्माकारस्य निश्चयात्। न द्वितीयः अहंप्रत्ययेनात्माकारस्य निश्चयात्। अध्यासात्मविषयत्वेन भ्रान्तोऽयं प्रत्यय इति चेत् न अध्यासानिरूपणात् तमःप्रकाशयोर्द्वितस्वभावयोर्जाड्यजाड्ययोर्देहात्मनोर्युक्तिरजतवदन्योन्यतादात्म्याध्यासेन निरूपयितुं शक्यते। तस्माद्भ्रान्ताभ्यां श्रुत्यहंप्रत्ययाभ्यां निश्चितस्यासदिग्धत्वाच्च विचारस्य विषयोऽस्ति। नापि प्रयोजनं पश्यामः। उक्तप्रकारेण ब्रह्मात्मनिश्चयेऽपि मननदर्शनात् तस्माद्ब्रह्म न विचारमर्हति अतः शास्त्रमनारभ्याधीयमिति पूर्वपक्षः। यत्नोच्यते। शास्त्रमारभ्याधीयं विषयप्रयोजनसद्भावात् श्रुत्यहंप्रत्ययोः सन्दिग्धब्रह्मात्मत्वे। "अयमात्मा ब्रह्मेति" श्रुतेरसङ्गं ब्रह्मात्मत्वेनोपदिशति। अहंमनुष्यदेवादिबुद्धिर्देहादितादात्म्याध्यासेनात्मानं गृह्णाति, अध्यासस्य दुर्निरूपत्वमलङ्काराय, तस्मात् संदिग्धं वस्तु विषयः तस्मिन्नेव सकिलत्वाणं प्रयोजनं श्रुत्या, विद्वदनुभवेन च सिद्धम्। तस्माद्वेदान्तवाक्यविचारसाध्येन ब्रह्मणो विचारार्हत्वाच्छास्त्रमारभ्याधीयमिति सिद्धम् इति"। अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकपदे च। "समानाधिकरणस्तत्पुरुषः कर्मधारय"इति पा०। समानाधिकरणः अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकपदघटितस्तत्पुरुषः कर्मधारय इत्यर्थः "तादृशपदघटितत्वेनान्यपदार्थे समानाधिकरणशब्दप्रवृत्तिः पीतमम्बरं यस्येति वाक्ये पीताम्बर इत्यादि। अभेदान्वयिपदार्थबोधकभिन्नपदघटितत्वे व्यधिकरणशब्दप्रवृत्तिरिति यथा पद्मं नाभौ यस्येति वाक्ये पद्मनाभः। सप्तम्यन्तेषु द्वात्रिंशत्तत्पुरुषेषु तत्तद्युक्तिभेदे च तत्तद्युक्तिशब्दे तद्विवरणम्।

अधिकरणविचाल पु० अधिकरणस्य विचालः अन्यथाकरणं वि-चल घञ् ईत०। द्रव्यस्य अवस्थान्तरकरणेन संख्यान्तरकरणे, विचालो नाम अहेकमनेकं क्रियते अनेकं वैकं क्रियते इति। एकस्य रज्वेः पञ्चधा विभागे, पञ्चानामपि वा एकधा विभागे च अधिकरणस्य संख्यायाः विचालः। "अधिकरणविचाले चेति" पा०।

अधिकरणिक पु० अधिकरणम् धर्म्माधिकरणम् आश्रयतयाऽस्यास्य ठन्। विचारकरणाय धर्म्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ। तत्र नियुक्तः ठक्। आधिकरणिकोऽप्यत्र पु०।

अधिकर्म्म(न्) अव्य०कर्म्मणि विभक्त्यर्थेऽव्ययी०वा अच्समा०। कर्म्माधिक्यस्येत्यर्थे। अधिकं कर्म्म प्रा०स०। अधिककर्म्मणि। न०ब०। अधिककर्म्मयुक्ते त्रि०।

अधिकर्म्मकर त्रि० अधिकं कर्म्म तत्करोति क—आनुलोम्यादौ ट। शूद्रूपकभेदे दासभेदे। क्विप् अधिकर्मकदभ्यत त्रि०।

अधिकर्म्मकृत त्रि० अधिकं कर्म अधिकर्म तत् कृतं येन निष्ठान्तस्य परनि०। "सर्वेष्वधिकृतो यः स्यात् कुटुम्बस्य तथोपरि। सोऽधिकर्मकृतो ज्ञेयः" इति स्मृत्युक्ते शूद्रूषकभेदे।

अधिकर्म्मिक पु० अधिकृत्य कृतं कर्मणेऽस्मै अधिकर्म—ठन्। कृष्टाध्यक्षे, कृष्टस्यवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते।

अधिकाङ्ग न० अधिकोऽङ्गात्। वर्मधरैर्योधैर्हृदयमध्ये वर्मदार्ढ्यार्थं वस्त्रपट्टिकादौ। ब०। अधिकाङ्गवति त्रि०। "अजाविघातने चैव अधिकाङ्गः प्रजायते" इति ज्ञाता०।

अधिकार पु० अधि+कृ—घञ्। आरम्भे, यथेष्टं क्रयविक्रयादिकर्त्तृत्वसम्पादके स्वामित्वे, "अधिकारः फले स्वामप्यधिकारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्मणादेः, राज्ञां प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽयं प्रायश्चित्ताधिकारः" इति मिताक्षरा। स्वामित्वे—"सर्व्वे स्वरधिकारिणः" इति स्मृतिः। तत्र च वैदिकादिकर्म्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधिकारः। यथा याजनादौ ब्राह्मणस्येत्यादि। शूद्रस्य नाध्ययनादिष्वधिकारः यथोक्तं "निषेकादिश्मशानान्तो यस्य वेदोदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन्नाम्नस्यैव कदाचनेति" मनुना। न केवलम् अध्ययने शूद्राणामधिकारः यागादावप्यनधिकारः यथोक्तं जैमिनीयसूत्रभाष्यादौ। "चातुर्वर्ण्यमविशेषात्" इत्याशङ्क्य "निर्देशाद्वा त्रयाणां स्यादग्नाधेये कृत्सम्बन्धः क्रतुषु ब्राह्मणस्मृतिरित्यात्रेय" इति। "वाशब्दः पक्षं व्यावर्त्तयति, "त्रयाणाम्" अधिकारः स्यात् कुतः ? अग्नाधेये निर्देशात् अग्नाधेये त्रयाणां निर्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः" इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्निः शूद्रः असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम्। तस्मात् "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादिषु शूद्रस्य प्राप्तिका श्रुतिर्नास्ति। ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीयादीनाम्। तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्रः इत्याचार्येः मन्यते स्म" इति भा०। तथा कर्मप्रतिपादक सर्वशास्त्र विहितकर्मसु मनुष्याणामेवाधिकारः न तिरश्चां न वा देवादीनां यथोक्तं तत्रैव "फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" इत्याशङ्क्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते" इति सू०। "वाशब्दः पक्षं व्यावर्त्तयति। न चैतदस्ति तिर्यगादीनामपि अधिकारः इति। कस्य तर्हि ?। यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम्। न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्म्माभिनिर्वर्त्तयितुम्, तस्मात् एषां न सुखसाध्युपायः कर्म, कथं यो न शक्यते कर्त्तुम्, सोऽभ्युपायः स्यात् ? इति। न देवानां, देवतान्तराभावात्- न हि आत्मानम् उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात् न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम्। "अपि च तिर्यञ्चो न कालान्तरफलेन अर्थिनः, आसन्नं हि कामयन्ते। "ननु च उक्तं, कालान्तरफलार्थिनः तिरश्चः पश्यामः, पुनः श्येनांश्चतुर्दशाम् अष्टमसप्तां च उपवसतः" इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति। 'कथं अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदुः, "इदं कर्म कृत्वा, इदं फलमवश्यं प्राप्नोति इति" न चैते वेदमधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्यः अवगच्छन्ति, तस्मात् न विदन्ति धर्मम्। अविद्वांसः कथम् अनुतिष्ठेयुः, तस्मात् न धर्म्माय उपवसन्ति इति। किमर्थञ्च तर्ह्येषाम् उपवासः ?। उच्यते, रोगात् अरुचेरेषाम्। कथं पुनर्नियते काले रोगो भवति ?। उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकाश्चातुर्थकाश्चेति। तस्मात् मनुष्याणाम् अधिकारः इति। न च तिरश्चां द्रव्यपरिग्रहः, न हि ते द्रव्यं स्वेच्छया उपयुञ्जना दृश्यन्ते, तस्मात् अनीशाना धनस्य। यत्तु, देवाग्रामो हस्तिग्रामः इति, उपचारमात्रं तत्। तस्मात् अपि न तिरश्चाम् अधिकारः इति। यानि पुनर्लिङ्गानि, "देवा वै सत्रमासत" इत्येवमादीनि, अर्थवादाः ते विधिप्ररोचनार्थाः। विद्यते हि विधिरन्यः तेषु सर्वेषु,

न च विधेर्विधिनैक्यवाक्यभावो भवति, वचनव्यक्तिभेदात्। स्तुतिस्तु सा, इत्थं नाम सत्त्वानि आसितव्यानि, यत् कृतकृत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्या" इति भा०। ब्रह्मविद्यायान्तु सर्वेषां देवादीनामधिकार इति "तदुपर्यपि बादरायणः सम्भवात्" इति भा०सूत्रेण व्यवस्थापितं, व्याख्यातञ्चैतत् भाष्यकाराचार्येण यथा "वाढं मनुष्यानधिकारोऽत्र शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मविज्ञाने नियमोऽस्ति तेषां मनुष्याणामुपरिष्टात् ये देवादयस्तान व्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते कस्मात् ? सम्भवात्। सम्भवति हि तेषामप्यर्थित्वाद्यधिकारकारणम्। तत्रार्थित्वं तावत् मोक्षविषयं देवादीनामपि, सम्भवति विकारविषयविभूत्यनित्यतालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां सम्भवति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विद्यफलवत्त्वाद्यवगमात्। नच तेषां कश्चित् प्रतिषेधोऽस्ति। नचोपनयनादिश्रौतेनैषामधिकारो निवर्त्तितः उपनयनस्य वेदाध्ययनार्थत्वात् तेषाञ्च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्यापरिग्रहार्थं ब्रह्मचर्य्यादि दर्शयति "एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमुवास" "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद अधीहि भगवो! ब्रह्मेत्यादि"। यदपि कर्मस्वनधिकारकारणमुक्तम्, न देवानां, देवतान्तराभावात्। न ऋषीणामार्षेयान्तराभावादिति। न तद्विद्यास्ति न ह्येन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चित् कृत्यमस्ति न च भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्य्येत ? इति"। ततश्च विद्वत्त्वकर्मफलार्थित्व-तत्तत्कर्मकरणसमर्थत्वापर्युदस्तत्वानि अधिकारप्रयोजकानीति सिद्धम् तत्रापि विधानेन सर्वकर्मत्यागरूपे सन्न्यासे द्विजमात्राणामधिकार इति सर्वस्मृतिसम्मतम् द्विजमात्राणामधिकार इति केषाञ्चिन्मतम्। अधिकमाकरे दृश्यम्। क्वचिच्चाधिक्षतत्वादधिकारः। यथा दर्शाद्यधिक्षतस्य प्रयाजादिष्वधिकारः "प्रधानाधिकारो ह्यङ्गाधिकारो भवतीति" न्यायात्। "ताच्छीलाधिकारो दक्ष इति" क्षिरो०। "शूलाधिकारां मल्लिनामिति" श्रुतिः। कर्मणि घञ्। "कर्त्तव्ये "स्वाधिकारे प्रमत्त" इति भेद०। प्रकरणे, व्याकरणशास्त्रे। पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवर्त्तने। "अधिकारोऽवश्यं आ पञ्चमाध्यायसमाप्तेरिति" सि०कौ०। तत्राधिकारस्य प्रत्ययादिकर्माद्यर्थसूत्तरोत्तरसूत्रेषु पूर्वसूत्रोपात्तशब्दस्यानुवर्त्तनम्। यथा "प्रत्ययः, परश्च" इति सूत्रोपात्तप्रत्ययपरशब्दयोः आ पञ्चमाध्यायसमाप्तेः सर्व्वत्र सूत्रेषु अनुवर्त्तनम्। स चाधिकारः त्रिविधः "सिंहावलोकितं चैव मण्डूकप्लुतमेव च। गङ्गाप्रवाहवच्चापि अधिकारस्त्रिधा मतः" इत्युक्तभेदत्वात्। तदुदाहरणन्तु व्याकरणेऽवगम्यम्। नियोज्यतया विषयीकरणे, "सर्व्वाधिकारं शास्त्रमिति" जै०सू०। तदभिप्रायेण "वाढं मनुष्यानधिकारोऽत्र शास्त्रं"मिति मनुष्याधिकारित्वाच्छास्त्रस्येति" च भ०भा०। सर्वमधिकरोति कर्म्मगणपदे अण् एवमेव मनुष्याधिकारत्वादित्यत्रापि

अधिकारविधि पु० अधिकारे फलस्वाम्ये विधिर्विधानम्। मीमांसकोक्ते विधिभेदे कर्मजन्यफलभोक्तृताबोधके विधौ यथा स्वर्गकामो यजेत इत्यनेन यागजन्यफलभोक्ता स्वर्गकामीति बोध्यते। तत्र नियोज्यप्रवर्त्तनाविधिः अधिकारः यथा "राजा राजसूयेन यजेतेति" तत्र राजसूयं राज्ञ एव नियोज्यतया तत्र प्रवर्त्तनात्तस्य तथात्वम् स्वस्वकर्मणि नियोगे च।

अधिकारिता स्त्री अधिकारिणो भावः तल्। विहितफलार्थित्वकर्म्मकरणशक्तिमत्त्वापर्युदस्तत्वप्रयोज्ये अधिकारे "भार्य्यापुत्रविहीनस्य-नास्ति यज्ञेऽधिकारितेति" स्मृतिः। भावार्थे त्व। अधिकारित्वम् अत्रैवार्थे न०।

अधिकारिन् त्रि० अधिकरोति अधि+कृ णिनि। स्वामिनि विहितकर्मफलभोक्तरि, शास्त्रेण कर्त्तव्यतोपदेशेन नियोजिते, कामनाविषयफल-तदुपायोपदेशेन प्रवर्त्तिते च स्त्रियां ङीप्। वेदान्तमतसिद्धे अनुबन्धचतुष्टयमध्ये अनुबन्धभेदे वेदान्तसारे वेदान्तशास्त्रालोचनहेतुभूतानुबन्धचतुष्टयनिरूपणाय "अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थः इह जन्मनि जन्मान्तरे वा काम्यप्रतिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाते"त्युक्तम्। स चाधिकारी उत्तममध्यमाधमभेदेन त्रिविधः "अधिकारिस्त्रिधोक्तः स्यात्" इति "अधिकारिभेदाच्च नियम" इति च सांख्यसूत्राभ्यां तथोक्तेः। तत्र उत्तमाधिकारिणः विधानेन विहितसर्वकर्मसंन्यासपूर्व्वकं निराकारब्रह्मज्ञानेऽधिकारः, मध्यमाधिकारिणः विहितवर्णाश्रमादिकर्मकरणपूर्व्वकं सोपाधिब्रह्मोपासने, अधमस्य तु वर्णाश्रमविहितकर्म्मविधानपूर्व्वकं साकारब्रह्मोपा-

सने "ये मन्दास्ते तु सज्जन्ते ब्रह्मणोरूपकल्पने" इत्युक्तेः। अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे-प्रदेयमेतत् सततं सुसूक्ष्मवे" इति। अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्तेः वर्णाश्रमविहितं कर्म्मानुष्ठेयमेवेत्युक्तं भा० स्मृतिकृताऽपि "विहितत्वादाश्रम कर्म्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगः कर्म्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षोः यथोक्तकर्म्माधिकारः उक्तः "कषाये कर्म्मभिः पक्वे ततो ज्ञानं प्रजायते" इत्यनेन कषायशब्द-वाच्यचित्तदोषक्षयार्थं कर्म्मावश्यकतेत्युक्तम्। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकरसोपाधिकयोः द्वयोर्ब्रह्मणोर्वेद्यतोक्ता। गीता-यामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ! ज्ञानयोगेन सांख्यानां, कर्म्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्म्मणोरधिकार इत्युक्तम्। "समक्षं संसाधनं कर्म्म कर्त्तव्यमधिकारिणा। निष्कामेन सदा पार्थ! कामं तु कामान्वितेन चेति" भवि०पु०। "अधिकारिणाऽर्थिना विदुषा समर्थनेति" रघु० तेन विद्वत्त्वं तत्तत्कर्म्मजन्यफलार्थित्वम् तत्तत्कर्म्मकरणयोग्यत्वम् अपर्य्युदस्तत्वञ्च अधिकारिताप्रयोजकम्। तत्र फलार्थि-त्वञ्च सति कामे एव, सुसूक्षुत्वे तु न फलार्थित्वावश्यकतेति भेदः। मार्कण्डेयपुराणे रुचिवाक्येन "पितृयज्ञसखे दिवि ये च मूर्त्ताः स्वधाभुजः कामप्रकामाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेष्विति" अनेन फलार्थिनं प्रति तत्तत्फलदातृत्वं, तदनर्थिनं सुसूक्षुं प्रति मुक्तिदातृत्वमिति अष्टधोक्तम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम्। अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः। अधिकारोऽस्यास्ति इनि। स्वामित्ववति "सर्वे खल्वधि-कारिण" इति स्मृतिः स्त्रियां ङीप्। "कृतात्र देवी वचनाधिकारिणीति नैष०।

अधिकार्थवचन न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपि-तस्य वस्तुधर्म्मादतिरिक्तस्य गुणस्य वचनम्। स्तुत्यर्थवादे, निन्दार्थवादे च। यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकमेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिः गम्यते "स्तुत्यैरधिकार्थवचने" इति पा०।

अधिकाम पु० अधिकः कामः। अत्यन्ताभिलाषे। ब०। तद्वति त्रि०। कामे विभक्त्यर्थे अव्य०। काममधिकृत्येत्यर्थे अव्य०।

अधिकृच्छ्र पु० अधिकं कृच्छ्रं कष्टं साधनतयाऽस्यास्य अच्। "विल्वैरामलकैर्वापि कपित्थैरथवा शुभैः। मासेन लोके ऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (शङ्खस०) उक्ते मास-साध्ये व्रतभेदे। प्रा०स०। अधिककष्टे न०। तद्वति त्रि०।

अधिकृत पु० अधि+कृ-क्त। आयव्ययाद्यवेक्षके, अध्यक्षे कर्म्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि०। "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधि-श्रीरिति" रघुः।

अधिकृति स्त्री अधि+कृ-क्तिन्। अधिकारे। [आरोहणे।

अधिक्रम पु० अधि+क्रम-भावे घञ् अमन्तत्वान्न वृद्धिः।

अधिचित् त्रि० अधि+भावे कर्त्तरि वा क्विप्-तुक् च। परि-क्षये, तत्कारिणि च। "विशामासामभयानामधिचित्तम् ऋ० १०,९२,२४।

अधिक्षिप्त त्रि० अधि+क्षिप-क्त। स्थापिते, निन्दिते, कृता-धिक्षेपे, प्रेरिते, तिरस्कृते च।

अधिक्षेप पु० अधि+क्षिप-भावे घञ्। तिरस्कारे, स्थापने, प्रेरणे च।

अधिगत त्रि०अधि+गम कर्म्मणि-क्त। प्राप्ते, ज्ञाते च। "अधिगतं विधिवत् यदपालयदिति" रघुः "अधिगतसकलकलाकला-पकमिति" काद०। अधिगताखिलवेदार्थ" इति वे०सा०।

अधिगम पु० अधि+गम-घञ्। ज्ञाने, प्राप्तौ, स्वीकारे च। "अध्यात्मयोगाधिगमेनेति" गीता। निध्यादेः प्राप्तौ च। "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेष्विति" गौत०। "अधिगमो निध्यादेः प्राप्तिरिति" मिता०।

अधिगव अव्य० गवि विभक्त्यर्थे अव्ययी० वेदे अच् समा०। गवीत्यर्थे "स्वादीयो यदधिगवं चीरमिति" वेदः।

अधिगुण पु० अधिको गुणः प्रा०स०। अतिशयितविनयादि-गुणे। ब०। तद्वति त्रि०। "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति नीति०। गुणे-विभक्त्यर्थे अव्ययी०। गुणमधिकृत्येत्यर्थे अव्य०। अधिगतो गुणो येन। ज्याधिरूढे धनुषि न०।

अधिजिह्व पु० अधिका जिह्वा यस्य। द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अकृताखादाशया कुशविलेखनात्। यथोक्तं भा०आ०प०। "यत्तैतदकृतञ्चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय कृतं सर्पाः प्रतिमायाकृतञ्च तत्। सोमस्थान-मिदञ्चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधाकृता जिह्वा सर्पाणां तेन कर्म्मणा। अभवंश्चाकृतस्तस्माद्दर्भांस्तेऽथ पवि-त्रिणः। एवं तदकृतं तेन कृतमाकृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना" इति।

अधिजिह्विका स्त्री जिह्वेव इवार्थे कन् अधिरूढा जिह्विका वा । (आल्जिभ) उपजिह्वायाम् ।

अधिज्य न० अध्यारूढा ज्या यत्र प्रा०ब०, अधिगतं ज्यां वा अत्या०स० । आरोपितगुणके धनुषि "त्वयि चाधिज्यकार्मुके" इति रघु० ।

अधिज्योतिष अव्य० ज्योतिषि विभक्त्यर्थे अव्ययी० अच् समा० । सूर्य्यतारकादिज्योतींष्यधिकृत्येत्यर्थे ।

अधित्यका स्त्री अधि+त्यकन् । पर्वतस्योपरिभूमौ । "आरूढं स्थलमधित्यकेति" सि०कौ० । "स्थाणुं तपस्यन्तमधित्यकायामिति" कुमा० । "अधित्यकायामिव धातुमय्यामिति" रघुः ।

अधिदन्त पु० अध्यारूढो दन्तम् अत्या०स० । दन्तोपरि जातदन्ते (गजदाँत) । प्रा०ब० । तद्वति त्रि० । दन्ते विभक्त्यर्थे अव्ययी० । दन्तमधिकृत्येत्यर्थे अव्य० ।

अधिदेव पु० अधिकृतोदेवः येन गुणातिशयात् प्रा०ब० । सर्वदेवाधिपे परमेश्वरे । देवे विभक्त्यर्थे अव्ययी० । देवमधिकृत्येत्यर्थे अव्य० । अधिदेवं भवः ठञ् । अनुशतिका० द्विपदद्वद्विः । आधिदैविकं देवेभ्यो जाते दुःखादौ त्रि० ।

अधिदेवता स्त्री अधिष्ठात्री देवता या०त० । अधिष्ठात्र्यां देवतायाम् । देवतानाम् अधिष्ठातृत्वञ्च सन्निधानमात्रेण तत्तत्पदार्थानां तत्तत्कर्म्मसु नियन्तृत्वरूपम् । तच्च साक्षात् परमेश्वरस्यैव यथोक्तम् बृ०उ० अन्तर्यामि ब्राह्मणे । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ योऽप्सु तिष्ठन्नद्भ्योऽन्तरो, यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो, यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वायौ तिष्ठन्वायोरन्तरो, यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिवि तिष्ठन्द्दिवोऽन्तरो, यं द्यौर्न वेद, यस्य द्यौः शरीरं, यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं, य आदित्यमन्तरो, यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो, यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो, यश्चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं, यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आकाशे तिष्ठन्नाकाशादन्तरो, यमाकाशो न वेद, यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तमसि तिष्ठंस्तमसोऽन्तरो, यं तमो न वेद, यस्य तमः शरीरं, यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तेजसि तिष्ठंस्तेजसोऽन्तरो, यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम् । अथाधिभूतम् यः सर्व्वेषु भूतेषु तिष्ठन्सर्व्वेभ्यो भूतेभ्योऽन्तरो, यं सर्व्वाणि भूतानि न विदुर्यस्य सर्व्वाणि भूतानि शरीरं, यः सर्व्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम् । अथाध्यात्मम् यः प्राणे तिष्ठन्प्राणादन्तरो, यं प्राणो न वेद, यस्य प्राणः शरीरं, यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वाचि तिष्ठन्वाचोऽन्तरो, यं वाङ्न वेद, यस्य वाक् शरीरं, यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो, यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो, यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं, यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो मनसि तिष्ठन्मनसोऽन्तरो, यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्त्वचि तिष्ठंस्त्वचोऽन्तरो, यं त्वङ्न वेद, यस्य त्वक् शरीरं, यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो विज्ञाने तिष्ठन्विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं, यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो रेतसि तिष्ठन्रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं, यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टा,ऽश्रुतः श्रोता,ऽमतो मन्ता,ऽविज्ञातो विज्ञाता, नान्योऽतोऽस्ति द्रष्टा, नान्यतोऽस्ति श्रोता, नान्यतोऽस्ति मन्ता, नान्यतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्त्तम्" इति । तत्तद्वायुविशेषेणाविर्भूतानां दिगाद्यभिमानिदेवानामिन्द्रियाधिष्ठातृत्वं यथा "वैकारिकादहङ्काराद्देवा वैकारिका दश । दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" इति भार० । "यत्तिषामर्थाद्विकृतपरमेश्वरादुत्पन्नत्वेनाऽहङ्कारस्य तद्-

नृपश्चदेवाभाश्च वैकारिकत्वमिति" राघवभट्टेन व्याख्यानम् । "वैकारिका दिगाद्याश्च चन्द्रेणैकादश स्मृताः । इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तिः । तथा च श्रोत्रस्य दिक्, त्वचो वातः, नेत्रस्य अर्कः, रसनायाः वरुणः, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्निः, हस्तस्य इन्द्रः, पादस्य उपेन्द्रः, पायोः मित्रः, उपस्थस्य (कः) प्रजापतिः, मनसः चन्द्रः, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः । "ईश्वरं भास्करे विद्यादुमां विद्यान्निशाकरे । स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः । गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते । शनैश्चरे यमं विद्याद्राहोः कालं तथैव च । चित्रगुप्तोऽधिपः केतोरित्येते यक्षदेवताः" इति (मत्स्यपुरा०) उक्ता यक्षाणामधिदेवाः । एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यपदिश्यन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते । अधिदेवताप्यत्रैव । "आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवता" इति मत्स्यपु० । "यथाङ्गमूर्त्तेरधिदेवताकृतिरिति" भट्टिः । चन्द्राधिदेवता उमा ।

अधिदैवत न० अधिष्ठातृ दैवतम् प्रा०स० । अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निप्रत्यधिदैवतमिति" "विचिन्त्यो माधिदैवत"मिति च विष्णुध०पु० । दैवते विभक्त्यर्थे अव्ययीभावः । दैवतमधिकृत्येत्यर्थे अव्य० । "अथाधिदैवतम् आदित्यो वा" इति छन्दो० उ० "इत्यधिदैवतमिति इ०उ०" । अधिदैवमप्यत्र अव्य० । "अधिदैवं किमुच्यते इति" गीता ।

अधिनाथ पु० अधिको नाथः प्रा०स० । अधीश्वरे । "तत्राधिनाथमधिकृत्य दिवस्पथाधिति" नैष० ।

अधिनाथ पु० अधिनीयते वायुना गन्धाधारस्पृक्षांघ्रयनयनद्वारा सत्तत्स्थानं क्षिप्यतेऽसौ अधि+नी-घञ् । गन्धे ।

अधिप पु० अधिपाति अधि+पा-क । प्रभौ ईश्वरे । "अथ प्रजानामधिपः प्रभाते" इति रघुः । "श्रियः कृष्णामधिपस्येति" भार० ।

अधिपति पु० अधिकः पतिः, अधि+पा-डति वा । ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुतिः । "सर्वस्याधिपतिर्हि सः" इति मनुः । "ततो भुजङ्गाधिपतेः फणाग्रैरिति" कुमा० । पत्यन्तत्वात् भावादौ यक् आधिपत्यम् । अत्यन्तैश्वर्ये न० । "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा० । सपूर्वपदकत्वात् स्त्रियां ङीष् नद्यादेयः । "दक्षिणेनैं दिशामधिपतीमिति यजु० १४,५, अधिपतीं स्वामिनीमिति" दीपः ।

अधिपा स्त्री० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "स्वर्यद्वयञ्चधिपा उ अन्योऽभि" ऋ०७,८८,२ ।

अधिपु(पू)रुष पु० अधिकः उत्तमः पु(पू)रुषः प्रा०स० । परमेश्वरे । पु(पू)रुषे विभ० अव्ययी० । पु(पू)रुषमधिकृत्येत्यर्थे अव्य० । [बहुप्रजायां स्त्री ।

अधिप्रज त्रि० अधिका प्रजा यस्य । बहुप्रजायुक्ते । प्रा०स० ।

अधिभू पु० अभिभवति स्वामीभवति स्वामृर्थेऽत्राधिः अधि+भू-क्विप् । प्रभौ ।

अधिभूत अव्य० भूतेषु विभ० अव्ययी० । भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यत" इत्यर्जुनप्रश्ने "अधिभूतं क्षरोभाव" इति भगवदुत्तरम् इति गीता । "भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधरः । अधिभूतं भवः अनुशतिका० द्विपदर्थेऽधिः आधिभौतिकम् । भूतान्यधिकृत्य जाते दुःखादौ त्रि० ।

अधिभोजन न० अधिकमत्यन्तं भोजनम् प्रा०स० । अत्यन्तभोजने । भोजनं निरुक्तौ धननामसु पठितम् अधिकं धनं मूल्यं यस्य । अतिमूल्यलभ्ये वस्तुनि त्रि० । "दश वस्त्राधिभोजना इति ऋ०६,४७,२३ अधिभोजना अधिकं धनं मूल्यं येषां तादृशानि दश वस्त्राणीति भाष्यम् ।

अधिमन्थ पु० अधिकं मथ्यतेऽनेन अधि+मन्थ-करणे घञ् । "उत्पाद्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा । शिरसोऽर्द्धं तु तं विद्यादधिमन्थं खलक्षणैः" इत्युक्ते अरणिकाष्ठमन्थनावयवभेदे ।

अधिमांस न० अधिकं मांसमत्र । "विस्तीर्णं बहु बहुलं यत्तत्प्रकारं श्लथं वा तदधिमांसजातं विद्यादिति" वैद्यकोक्ते रोगभेदे ।

अधिमांसक पु० अधिको मांसो यत्र ब० कप् । "हनूस्थे पश्चिमे दन्ते मक्षाशोथो मक्षारुजः । कालान्तायी कफक्लेदी विज्ञेयः सोऽधिमांसक" इति वैद्यकोक्ते दन्तरोगविशेषे ।

अधिमात्र त्रि० अधिका मात्रा यस्य, अधिकं प्रमाणमस्य मात्रच् वा । अधिकप्रमाणे ।

अधिमास पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मासः प्रा०स० । सलमासे "असंक्रान्तिमासोऽधिमासो निरुक्त"इतिस्मृत्युक्तो रविसंक्रान्तिवर्जितो मासोऽधिमासः । तथा हि "मीनादिस्थो रविर्यैर्मासारम्भः प्रथमे क्षणे । ते चैत्राद्या" इत्युक्तादिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भः स चैत्रः एवं मेषस्थरवारब्धो वैशाख

इत्येवं स्थिते यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न जातः, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मध्ये रवौ स्वारस्यात् उभयोरपि वैशाखता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम् । यथा मलमासतत्त्वे लघुहारीतः॥ "इन्द्राग्नी यत्र ऋयते"इत्युक्ता "तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन । आद्योमलिम्लुचोज्ञेयोद्वितीयः प्रकृतः स्मृतः । तस्मिंस्तु प्रकृते मासि कुर्यात् श्राद्धं यथाविधि । तथैवाभ्युदयं कार्यं नित्यमेकं तु सर्वदा" । "यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्व्वमासान्त्यक्षणदत्तिराश्रिस्थः सन् सूर्य्योऽतिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत्तदाद्योऽतिक्रान्तोमासोमलिम्लुचोज्ञेयः"।ज्योतिषे।"अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् मलमासः स विज्ञेयोविष्णुः स्वपिति कर्कटे" । "अमावास्याद्वयं अमावास्यान्त्यक्षणद्वयं रविसंक्रान्तिभ्यां क्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शान्त्यक्षणद्वययोरेव क्रियोत्पत्त्युत्तरसंयोगाभ्यां यथाक्रमं संयोगेनाधिमासः । संक्रान्तेरेकत्वे क्रियोत्पत्तिरपरत्वे पूर्व्वसंयोगनाशः उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वयदत्तित्वमिति मीमांसकसिद्धान्तात्" । वटेश्वरसिद्धान्तज्योतिःपराशरौ । "रविणा लङ्घितोमासश्चान्द्रः ख्यातोमलिम्लुचः । तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत् पराशरः । "पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते । तदा तन्मासविहितमुत्तरे मासि कारयेत्" । अत्र लङ्घनमसंक्रमणञ्च रवेस्तदा भवति यदा तन्मास तत्पूर्व्वमासान्त्यक्षणयोरेकराश्यवस्थितस्य तन्मासानन्तरसंयोगः, न त्वेकराशिस्थितस्य मासव्यापनमात्रं तथात्वे चतुर्दश्यामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणेऽपरराशौ, तत्परराशौ च द्वितीयायां प्रतिपदि वा रवेः संयोगेऽपरस्मिन् मलमासता स्यात्"। अतएव ज्योतिषे "अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम् । मलमासं विजानीयाद्गर्हितं सर्वकर्म्मसु । तस्यार्कोदर्शकश्चैकराशौ दर्शद्वयातिगः" । "अत्रैकराशिस्थार्कस्य दर्शद्वयातिगत्वमुक्तम् । एतच्च पूर्व्वोपदर्शितयोर्मासयोः पूर्व्वस्मिन्नेव सम्भवति न परस्मिन्" । मलमासकारणन्तु ज्योतिषे । "दिवसस्य क्रमत्यर्कः षष्टिभागकृतौ यदा । करोत्येकमहश्चेदं तथैवैकञ्च चन्द्रमाः । एवमङ्गैतृतीयानामब्दानामधिमासकम् । यीष्मे जनयतः पूर्व्वं पञ्चाब्दान्ते तु पश्चिमम" । "तेन दिवसस्य तिथेः षष्टिभागं दग्धुमेकं रविर्हरति छेदयति उत्तरे छेदमित्यभिधानात् । ततश्च कृतौ मासद्वये षष्टिनाड़ीच्छेदादङ्गस्थितेभ्यश्चेदमाकर्षणं करोति । एवं चन्द्रोऽपि । एवमित्युक्तक्रमेण वर्षे द्वादशतिथ्यात्मककालाकर्षादङ्गतृतीयानामन्ते अङ्गं तृतीयं येषां ते तथा । यीष्मे माधवादिषु षट्सु पूर्व्वं माधवादित्रिकपतितं, पञ्चाब्दान्ते तु पश्चिमं श्रावणादित्रिकपतितं मलमासश्चन्द्रार्कौ जनयतः"। मिहिरः । "माधवादिषु षट्सेषु मासि दर्शद्वयं यदा । द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः।"सिंघुनोपगतो भानुरमावासाद्वयं स्पृशेत् । द्विराषाढः स विज्ञेयोविष्णुः स्वपिति कर्कटे" । "अमावास्याद्वयं तदन्त्यक्षणद्वयं स्पृशेत् संयुज्यात् न तन्मध्ये राश्यन्तरसंयोग इत्यर्थः" । "कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत् । आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्" ॥ यद्यपि "यां तिथिं समनुप्राप्य तूलां गच्छति भास्करः॥ तस्यैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति" इति "राजमार्त्तण्डवचनात्तुलादिषण्मासे तिथिषट्कभावाद्यैर्द्वादशषट्किरनुपपन्ना तथापि "मध्ये विष्णुशयोर्भानुर्यान्यहानि तु वर्द्धयेत् । तैः सम्भूयाधिकोमासः मतस्तेन त्रयोदशः" इति "वटेश्वरसिद्धान्ते विष्णुशयोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिषट्किरुक्ता अर्कगणने मेषादिषण्मासे मन्दभुक्त्या सप्तदिनषट्किस्तुलादौ शीघ्रभुक्त्या दिनद्वयह्रासः"इति तथा च ज्योतिःशास्त्रम् "मेषादीनामर्कर्क्षेन्दूनां षण्णां सप्ताष्टचन्द्रकम् (१८७) । तुलादीनामष्टसप्तचन्द्रकन्तु(१७८) लिखेत् पृथक्" ।"चन्द्र एकः "अङ्कस्य वामा गतिः" इत्यङ्कविदां समयात् व्युत्क्रमेणाङ्का बोध्याः । तेन दिनषट्कि ५ क्रमसञ्चयाभ्यां हि मेषादिषट्के एव एकादशतिथिषट्किः" । एवञ्च "गतेऽब्दद्वितये सार्द्धे पञ्चपक्षे दिनद्वये । दिवसस्याष्टमे भागे मतस्तेनोऽधिमासकः" । इति "राजमार्त्तण्डोक्तः सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वयेऽधिमासः । स च सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासस्वङ्गनासस्वात् सावनमानेन ज्ञेयः इति"। सिद्धान्तशिरोमणौ तु ४३२०००००० कल्पप्रमाणवर्षेषु १५८३३००००० एतन्मिता अधिमासाभवन्तीत्युक्तम् यथा "लक्षाहता देवनवेषुचन्द्राः कल्पेऽधिमासाः कथिताः सुधीभिरिति" । "अतोपपत्तिः प्रकृतास्तावद्रविमासास्तेभ्यश्चान्द्रमासा यावद्भिरधिकास्तावन्तोऽधिमासा" इति । तदेवाह । "रवेः कोटिगुणाः लताऽरेन्द्ववाणाः" ५१८४०००००० "शुराग्न्यब्धिरामेषवो लवनिघ्नाः५२४३३३००००० ।

भगणाङ्कसंज्ञा मासाः पृथक् स्फुटार्कमासैर्विहीनासु कल्पेऽधवा तेऽधिमासाः स्फुटा"॥ स्फुटार्थेऽधिमासानयनं तत्रैवोक्तं यथा "कथितकल्पगतार्कसमागणो रविगुणो गतमाससमन्वितः। खदहनै (२०) र्गुणितस्तिथिसंयुतः पृथगतोऽधिकमाससमाहतात् (१५९३३०००००)॥ रविदिना (१५५५२००-०००००)प्रगताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः" इति। अत्र वासना कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्तिथ्यङ्कघ्ना स्फुटमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः एवन्ते सौरा जातास्तेभ्यः पृथक् स्थितेभ्योऽधिमासानयनं त्रैराशिकेन, यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति फलम् गताधिमासाः ते दिनीकृतैः पृथक् स्थितः सौराहर्गणसहितश्चान्द्रो भवति यतः सौरचान्द्रान्तरमधिमासदिनान्येव" इति। सूर्यसिद्धान्तेऽप्युक्तम्। "भवन्ति यस्मिन्नो मासाः सूर्येन्दुभगणान्तरम्। रविमासोनितास्ते तु शेषाः स्युरधिमासकाः" इति॥ सूर्यचन्द्रभगणयोरन्तरं चन्द्रस्य मासा भवन्ति ते चान्द्रमासा रविमासोनिताः सन्तः शेषा अवशिष्टा ये चान्द्रमासास्तेऽधिकमासा एव भवन्ति नान्ये। अनेन चान्द्रत्वमधिमासानां स्पष्टीकृतम्। अत्रोपपत्तिः। तिथ्यत्तिथ्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रस्य, द्वादशराशिमितेन सूर्येन्वन्तरेणैव सिद्धिः अथमन्यथा दर्शान्ते जातस्य मन्दशीघ्रयोः सूर्येन्वोर्योगस्य पुनर्दर्शान्ते सम्भवः। द्वादशराश्यन्तरं त्वेकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः। सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति।

अधियज्ञः पु० अधिगतोयज्ञो यस्मात् प्रा०ब०। परमेश्वरे। "अधियज्ञः कथं? कोऽत्रे"त्यर्जुन प्रश्ने। "अधियज्ञोऽहमेवात्र देहे देहभृतां वर!" इति भगवदुत्तरम् गीतायाम्। "अत्राप्यस्मिन् देहेऽन्तर्यामित्वे न स्थितोऽहमधियज्ञः यज्ञादिकर्म्मप्रवर्त्तकस्तत्फलदाता चेति" श्रीधरः। यथा च तस्य सर्व्वान्तर्यामित्वं तथा अधिदेवताशब्देऽन्तर्यामिब्राह्मणे पुरस्ताद्दर्शितम्। यज्ञे विभ० अव्ययी०। यज्ञमधिकृत्येत्यर्थे अव्य०। अधियज्ञं ब्रह्म जपेदिति मनुः, यागे विभ० अव्ययी०। अधियागमप्युक्तार्थे अव्य०। अधिकः अधिकाङ्गत्यागः प्रा०स०। अधिकाङ्गे यागे पु०।

अधियोग पु० अधिकोयोगः प्रा०स०। ज्योतिषप्रसिद्धे यात्रिकशुभयोगे। स च गमनसमयलग्ने–तस्माद्वा चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे, वा अत्यतमस्थाने बुधजीवभार्गवानां मध्ये द्वयोः स्थितौ सत्यां भवति। "योगे क्षेममथाधियोगमने क्षेमं विषूणां वध इति" मुहू०।

अधियोध पु० आधिक्येन युध्यति अधि+युध–अच्। अतियोद्धरि। विभ०अव्ययी०। योधे इत्यर्थे अव्य०।

अधिरथ अध्यारूढः रथं रथिनम् अत्या०स०। अतिरथे। कर्णपितरि पु०। "विवेशाधिरथोरङ्कं यष्टिप्राणो ह्ययञ्चिवेति" भा० आदि०। तस्यापत्यम् इञ्। आधिरथिः कर्णे पु०। कर्णपर्वणि भूरिप्रयोगोऽस्य।

अधिराज् पु० अधिराजते अधि+राज–क्विप्। साम्राज्यवति, नृपे, सम्यक्नृपे च "प्रायोपविष्टो गङ्गायामनाहत्याधिराट् श्रियमिति" भाग०। अधिकशोभान्विते त्रि०।

अधिराज पु० अधिको राजा टच् स०। अधीश्वरे साम्राज्यवति, नृपे च। "शैलाधिराजतनया न ययौ न तस्थावितिं" "हिमालयोनाम नगाधिराज" इति च कुमा०।

अधिराज्य न० अधिकं राज्यं प्रा०स०। साम्राज्ये। "अल्पान्यान् पृथिवीपालान् पृथिव्यामधिराज्यभागिति"।

अधिराष्ट्र न० अधिकृतं राष्ट्रमत्र प्रा०ब०। राज्ये। विभ० अव्ययी०। राष्ट्रमधिकृत्येत्यर्थे अव्य०।

अधिरुक्म त्रि० अधिगतं रुक्ममाभरणं येन प्रा०ब०। अधिगतसुवर्णाभरणे मानवे। अधिरुक्मा विनीयते" इति ऋ० ८,४६,३३, अधिरुक्मा अधिकरुक्माभरणेति" भाष्यम्।

अधिरूढ त्रि० अधि+रुह–कर्त्तरि–क्त। उपरिभागे आरोहणकर्त्तरि, अतिवृद्धिमति च। [यत्नेनारोपिते।

अधिरोपित त्रि० अधि+रुह–णिच्–युक् कर्मणि क्त। अति-

अधिरोहण न० अधि+रुह भावे–ल्युट्। उपर्य्यारोहणे। घञ्। अधिरोहोऽप्यत्र पु०।

अधिरोहणी स्त्री अधिरुह्यतेऽनया अधि+रुह–करणे ल्युट्। (सड़) इति, (सिड़ि) इति च प्रसिद्धे काष्ठवंशादिनिर्म्मिते उच्चस्थानारोहणसाधने सोपानवृन्दे। अधिरोहः साधनत्वेनास्त्यस्याः इनि। अधिरोहिणीत्यप्यत्र इति शब्दकल्पद्रुमः तन्मूलं चिन्त्यम्। रायमुकुटादिभिः ल्युटैवतत्पदसाधनाच्चास्य चिन्त्यता।

अधिलोक अव्य० लोके विभ० अव्ययी०। लोके इत्यर्थे।

अधिवक्तृ त्रि० अधि+वच–तृच्। पक्षपातेन वक्तरि। "विश्वाहेन्द्रो अधिवक्ता" इति ऋ० १,१००,१०, अधिवक्ता पक्षपातेन वचनयुक्त इति भा०। स्त्रियां ङीप्।

अधिवचन न० अधि+वच–ल्युट्। पक्षपातेन कथने। "अधिक्षवचनं पक्षपातेन वचन"मिति माधवाचार्य्यः।

अधिवस्त्र त्रि० अध्यावृतं वस्त्रं येन प्रा०व०। उपरिनिहित वस्त्रे। "यत्रेभिरावृतोऽधिवस्त्रा बधूरिवेति" ऋ० ८,२ ६,१३, अधिवस्त्रा उपरिनिहितवस्त्रेति भा०।

अधिवाक पु० अधि–वच–घञ्। पक्षपातेन वचने। "तस्मिन्वनेषु हितेष्वधिवाकायहरन्ति" इति ऋ०८,१५,५, "अधिवाकाय पक्षपातवचनायेति" भा०।

अधिवास पु० अधि+वस निवासे–घञ्। निवासे "श्रीः कैटभारिहृदयैककृताधिवासेति" देवीमा०। अधि+वास सुरभीकरणे भावे घञ्। सौरभे "कक्षुद्भिकन्यावल्लान्तर्वासलब्धाधिवासयेति" माघः "अधिवासस्सृहयेव मारुत" इति रघुः। अधिवासयति देवता अनेन अधि+वस–णिच् करणे घञ्। यज्ञारम्भपूर्व्वदिवसे देवतास्थापनादिकर्म्मणि। "अधिवासः परेऽह्नीति" स्मृतिः "मध्यरात्रेऽधिवासयेदिति" स्मृत्युक्तेस्तस्य पूर्व्वेद्युर्मध्यरात्रे कर्त्तव्यता। "आत्ययिकेषु कार्य्येषु सद्यएवाधिवासये"दित्युक्तेर्यागदिनेऽपि क्वचित् कर्त्तव्यता। गन्धमाल्यादेः संस्कारे च।

अधिवासन न० अधिवासयति स्थापयति देवता अनेन अधि+वस–णिच् ल्युट्। यागपूर्व्वदिने देवताद्यावाहनपूर्व्वकपूजनादिकर्म्मभेदे। अधिवास्यते सुरभीक्रियते अधि+वास सुरभीकरणे भावे ल्युट्। गन्धमाल्यादिभिः सुरभीकरणरूपसंस्कारभेदे तद्द्रव्याणि च "मही गन्धः शिला धान्यं दूर्व्वा पुष्पं फलं दधि। घृतं स्वस्तिकसिन्दूरं शङ्खकज्जलरोचनाः। सिद्धार्थं काञ्चनं रौप्यं ताम्रचामरदर्पणम्। दीपः प्रशस्तिपात्रञ्च विज्ञेयमधिवासने" इति स्मृत्युक्तानि वेद्यानि। "सायं षष्ठ्यान्तु कर्त्तव्यं पार्व्वत्या अधिवासनमिति" पुरा०।

अधिवासित त्रि० अधि+वास–सुरभीकरणे कर्म्मणि क्त। सुरभीकृते गन्धमाल्यादिभिः कृतसंस्कारे। अधि+वास–निवासे णिच् कर्म्मणि क्त। कृताधिवासने देवादौ।

अधिवाहन न० अधि+वह–णिच्–ल्युट्। उपरि प्रापणे वाहने, च। विभ०अव्ययी०। वाहनं यानमधिकृत्येत्यर्थेऽव्य०।

अधिविकर्त्तन न० अधि+वि+कृत–छेदने ल्युट्। अत्यन्तच्छेदने "आयासनं विनाशनमधो अधिविकर्त्तनमिति" ऋ० १०,८५,३५।

अधिविद्य अव्य० विद्यायां विभक्त्य० अव्ययी०। विद्यामधिकृत्येत्यर्थे। "अधिविद्यं प्रकाशते इति" वाक्यपदीयम्।

अधिविन्ना स्त्री अधि+विद–लाभे कर्म्मणि क्त। कृताधिवेदनायां कन्यायां उपरि विवाहान्तरं कृतं तस्यां स्त्रियाम् "अधिविन्नासु या नारी निर्गच्छेदुषिता गृहादिति" मनुः। अधिविन्नस्त्रियै देयमाधिवेदनिकं समामिति" याज्ञ०।

अधिवेत्तृ पु० अधि+विद–लाभे कर्त्तरि तृच्। विवाहोत्तरं विवाहान्तरकर्त्तरि।

अधिवेद अव्य० वेदे–विभक्त्य०अव्ययी०। वेदमधिकृत्येत्यर्थे। अधि+विद–भावे घञ्। विवाहोत्तरं विवाहान्तरकरणे पु०

अधिवेदन न० अधि+विद–लाभे भावे ल्युट्। विवाहोपरिविवाहान्तरकरणे। तत्र नियुक्तादि ठक्। आधिवेदनिकम् अधिवेदनविषयनियुक्ते तत्तल्ये च धनादौ त्रि०। "अधिविन्नस्त्रियै देयमाधिवेदनिकं समामिति" याज्ञ०। "आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्त्तितमिति" स्मृतिः। अधिवेदनकालनिमित्ते तु मत्कृतवरकविवाहवादे विस्तरत उक्ते ततएवावसेये।

अधिवेदनीय स्त्री अधि+विद–लाभे कर्म्मणि–अनीयर्। यद्विवाहोपरि विवाहान्तरकरणयोग्यं ताडङ्क्यां स्त्रियाम्। कर्म्मणि यत्। अधिवेद्याप्यत्र स्त्री। "बन्ध्याष्टमेऽधिवेद्याब्दे" इति मनुः। [ल्युट्। पाचने।

अधिश्रपण न० अधि+श्रा–पाके णिच्–युक् कर्त्तरि भावे

अधिश्रय पु०अधि+श्री–पाके भावे अच्। चूल्लादुपरिस्थापनरूपे विक्लित्तिहेतुभूते व्यापारे, पाके।

अधिश्रयण न० अधि उपरि श्रयणं पाकार्थं स्थापनं श्रीञ्–भावे ल्युट्। चूल्ल्या उपरि स्थापने, तत्पूर्व्वकपाके च। अधिश्रीयते पच्यतेऽत्र, आधारे ल्युट् ङीप्। चूल्लाम् (आका) इति, (चूला), इति च ख्यातायाम् स्त्री।

अधिश्रयणीय त्रि०अधिश्रयणाय पाकाय हितम् छ। पाकसाधनपात्रे। अधिश्रयितुमर्हति अधि+श्री–पाके अर्हार्थे कर्म्मणि अनीयर्। पाकार्हे वस्तुनि त्रि०।

अधिश्रयितवै अव्य० अधि+श्री–पाके वेदे तुमर्थे तवै। पचनीये "गौरेव दुग्धमधिश्रयितवै ब्रूयादिति" वेदः।

अधिश्री त्रि० अधिका श्रीर्यस्य। अधिकशोभान्विते अधिकसम्पत्तिमति च "इयं महेन्द्रप्रभृतीनधिश्रिय" इति कुमा० "समादिदेशाधिकृतानधिश्रीरिति" रघुः।

अधिषवण न० अधिषूयते सोमः यत्र अधि+षू अभिषवे आधारे ल्युट्। सोमाभिषवसाधनचर्म्मादिपात्रे। "अंशूनिव यावाभिषवणे" इति वेदः। भावे ल्युट्। अभिषवे।

अधिषवणा त्रि०अधिषवणाय हितम् यत्। अभिषवसाधने पात्रे। "यत्र द्वाविव अधवनाधिषवणा कृता" इति ऋ० १,२८,३, अधिषवणा उभे अधिषवणपात्रके इति भा०।

अधिष्ठातृ त्रि० अधि+स्था–तृच् षत्वम् । अध्यक्षे, नियमितकार्य्यविशेषाकरणेन कृताकृतावेक्षके, नियन्तरि च । "आत्मेन्द्रियाद्यधिष्ठातेति" भाषा० । अधिदेवे च । "इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति पुरा० । ते च अधिदेवताशब्दे दर्शिताः सर्वाधिष्ठाता तु परमेश्वर एव तदपि तत्तैरान्तर्यामिब्राह्मणेन दर्शितम् । "तत्सान्निध्यादधिष्ठातृत्वं मणिवदिति" सांख्यसू० । यथायस्कान्तमणेः सान्निध्यमात्रेण अल्पनिष्कर्षकत्वं न सङ्कल्पादिना तथैवादिपुरुषस्य संयोगमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनम् । इदमेव च सोपाधिस्रष्टृत्वमित्यर्थः । तथाचोक्तम् । "निरिच्छे संस्थिते रत्ने यथा लोहः प्रवर्त्तते । सत्तामात्रेण देवस्य तथा चेयं जगज्जनिः । अत आत्मनि कर्त्तृत्वमकर्त्तृत्वं च संस्थितम् । "निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति सां० भा० । स्त्रियां ङीप् ।

अधिष्ठान न० अधि+स्था–ल्युट् । नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रेण नियमनाय, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । वेदान्तिनाञ्च अध्यासस्याङ्गमधिष्ठानं यथा तथाऽध्यासशब्दे वक्ष्यते । अधिकरणे ल्युट् । पुरे आधारमात्रे, आश्रये च । "तदधिष्ठानाश्रयदेहे तद्वाद इति" सां० सू० । "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतसूक्ष्मं तस्याश्रये षाट्कौशिके देहे इति भाष्यम्" । करणे ल्युटि । चक्रे, प्रभावे च चक्रेण, प्रभावेन च हि प्रवृत्तस्य भ्रमणादिसम्भवः । अधिष्ठानञ्च नियन्तृत्वं यथोक्तं सांख्ये । "संहतपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानादिति" "इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत् सर्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मेति" सा० कौ० । भावे ल्युट् । सन्निधिमात्रे । "अत्राधिष्ठानं कुर्विति" आवाहनमन्त्रः । "भोक्तुरधिष्ठानाद्भोगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्गात्" इति सांख्यसू० "भोक्तुः प्राणस्याधिष्ठानात् व्यापारादेव भोगायतनस्य शरीरस्य निर्म्माणं भवति । अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् कृतदेहवदित्यर्थः । तथाच रसरक्तादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भाव इति भा० । ननु प्राणिनः निर्व्यापारस्याधिष्ठाने प्रयोजनाभाव इति तत्राह । "भृत्यद्वारा स्वामिनाधिष्ठितिर्नैकान्तात्" इति सां० सू० । "देहनिर्म्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यैकान्तात् अपेक्षा नास्ति किन्तु प्राणरूपभृत्यद्वारा यथा राज्ञः पुरनिर्म्माण इत्यर्थः । तथा च प्राणस्याधिष्ठातृत्वं साक्षात्, पुरुषस्याधिष्ठातृत्वं प्राणसंयोगमात्रेणेति सिद्धम् । कुलालादीनां घटादिनिर्म्माणेष्वप्येवम् । विशेषस्त्वयं तत्र चेतनस्य बुद्ध्यादेश्चाप्युपयोगोऽस्ति बुद्धिपूर्व्वकं स्रष्टृत्वादिति । यद्यपि प्राणाधिष्ठानादेव देहनिर्म्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देहनिर्म्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम् इति भा० । अधिक्रीयते कर्म्मणि ल्युट् । अधिष्ठिते रुद्विधिमात्रेण नियन्त्रिते । "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते" इति गीता ।

अधिष्ठित त्रि० अधि–स्था–कर्म्मणि क्त । अध्युषिते "विलोक्य दृङ्मोक्षमधिष्ठितं त्वयेति" कुमा० । सन्निधिमात्रेण नियोजिते "ईश्वराधिष्ठिताः सर्वे स्वं स्वं कार्य्यं हि कुर्वते इति पुरा० ।

अधिहरि अव्य० हरौ, विभ० अव्ययी० । हरिमधिकृत्येत्यर्थे

अधीकार पु० अधि+कृ–घञ् उपसर्गस्य दीर्घत्वम् । अधिकारशब्दार्थे "सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" इत्युपपातकगणनायां मनुः । "स्वागतं स्वानधीकारानिति" कुमा० ।

अधीत न० अधि+इङ–भावे क्त । अध्ययने, कर्म्मणि क्त । कृताध्ययने अभ्यस्ते च त्रि० "ईषदीषदनधीतविद्येयेति" कुमा० । "अधीतवेदवेदाङ्गत्वेनेति" वे० सा० ।

अधीति स्त्री अधि+इङ् अध्ययने क्तिन् । अध्ययने "अधीतिबोधाचरणप्रचारणैरिति" नैष० । अधि+इक–स्मरणे क्तिन् । स्मरणे "नू ते पूर्व्वस्य वसो अधीतौ हतीये" इति ऋ० २, ४, ८, "अधीतौ स्मरणे" इति भाष्यम् ।

अधीतिन् त्रि० अधीतमनेन अधीत+इनि । कृताध्ययने । "त्वयुत्तराषङ्क्वतीमधीतिनीमिति" कुमा० । एतद्विन्यन्तयोगे च कर्म्मणि सप्तमी वेदेऽधीतोत्यादि किन्तु कर्म्मार्विवक्षया प्रथमं भावे एव क्तः पश्चात् कर्म्मणा योगः कृतपूर्व्वी कटमित्यत्रेव । यथोक्तं हरिणा । "अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि । पश्चात् क्रियावता कर्त्ता योगो भवति कर्म्मणेति" । विस्तरः मत्कृतसरलायां द्रष्टव्यः ।

अधीन त्रि० अधिगतमिनं प्रभुम् अत्या० स० । आयत्ते । विद्याधीन इत्यादौ तु विद्ये अधि–इति वाक्ये समासे अध्युत्तरपदात् ख । "क्व नु मां त्वदधीनजीवितामिति" कुमा० ।

"दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह" इति मनुः। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" इति रघुः।

अधीर त्रि० धीरः धैर्य्यान्वितः न०त०। चञ्चले, "कान्तस्याधरमणिम् अधीरमाचुचुम्बेति" दशकु०। कातरे, रोगादिनाकुलचित्ते च। विद्युति, नायिकाभेदे च स्त्री। तल्लक्षणं नायिकाशब्दे वक्ष्यते

अधीवास अधि+वस आच्छादने करणे घञ्। सर्व्वतआवरके महाकञ्चुके वस्त्रभेदे। "अधीवासं परिसुच्योष्णीषं संवेश्य निवीते" इति कात्या० १५,५,१३, उपरि सर्वतः संछाद्यतेऽनेनेत्यधीवासः महाकञ्चुक इति तद्व्याख्या। "अधीवासेन प्रच्छादयतीति" कात्या० २०,६,१५, "उपरिष्टादावरकं वासोऽधीवास" इति वेददीपः।

अधीश त्रि० अधिक ईशः प्रा०स०। सार्वभौमे अधिपतौ च। "अङ्गाधीशः खगेन्द्रे बुधगुरुकविभिः संयुत" इति जात०।

अधीश्वर त्रि० अधिक ईश्वरः प्रा०स०। स्त्रियां ङीष्। राजनि "अधिगत्य जगत्यधीश्वरादिति" नैष०। प्रभौ च।

अधीष्ट न० अधि+दिवा०इष–भावे क्त। सत्कारपूर्व्वकनियोगे, "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति" पा० "अधीष्टं सत्कारपूर्व्वकव्यापार" इति सि०कौ०। कर्म्मणि क्त। सत्कारपूर्व्वकं नियोजिते त्रि०।

अधुना अव्य० अस्मिन् काले इदमशब्दस्य न०। संप्रतीत्यर्थे "प्रमदानामधुना" विडम्बनेति कुमा०। अधुना भवार्थे ठञ्। आधुनिकः इदानीन्तने त्रि०। [स्त्रियां ङीप्।

अधुनातन त्रि० अधुना+भवार्थे ट्युल् तुट् च। इदानीम्भवे

अधुर नास्ति धूः चिन्ता भारो वा यस्य अच्समा०। भारशून्ये चिन्ताशून्ये च, न०त०। अधूः–अभारे अचिन्ते च। अन्ये तु नाच्समा०। अधूरत्नः इति।

अधूमक पु० नास्ति धूमो यत्र कप्। धूमशून्ये ज्वलदग्नौ।

अधृत पु० न धृतः। सर्वेषां धारकत्वेन केनापि न धृते परमेश्वरे, श्रुतौ "स भगवः! कस्मिन्नु प्रतिष्ठितः?" इति प्रश्ने "स्वे महिम्नी"त्युत्तरम् तेनान्याधृतत्वात् स्वप्रतिष्ठत्वाच्च तस्य तथात्वम्। "अधृतः स्वधृतः स्वास्य इति विष्णुसहस्र०।

अधृति स्त्री धृतिर्धारणं धैर्य्यं वा अभावार्थे न०त०। धारणाभावे, धैर्य्याभावे, च।

अधृष्ट त्रि० धृष–निर्लज्जत्वे क्त न०त०। लज्जाशीले। धृष–अभिभवे क्त न०त०। अनभिभूते "यन्तं नो मित्रावरुणावधृष्टमिति" ऋ०६,६७,२, अधृष्टमनभिभूतमिति भा०। अहिंसिते च। "दूतासोवसवोऽधृष्टा" इति ऋ० ६,५०,४, "अधृष्टा अहिंसिता" इति भा०।

अधृष्य त्रि० न धृष्यः न०त०। अनभिभवनीये "अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णव" इति रघुः। धृष निर्लज्जत्वं भावे क्यप् तन्नास्ति यस्य। अप्रगल्भे, लज्जाशीले च त्रि०।

अधेनु स्त्री न०त०। दोहनशून्यायां गवि। "अधेनुं दक्षा स्तार्य्यमिति" ऋ० १,११७,२०, "अधेनुम् अदोग्ध्रीमिति" भा०। [शून्ये त्रि०।

अधैर्य्य न० अभावार्थे न०त०। धैर्य्याभावे। ब०। धैर्य्य-

अधोअञ्च त्रि० अधः अञ्चस्य, अधस्तात् अञ्चति अश्नुते वा अञ्च–अच्, अश–स वा वेदे अतोलोपाभावः। अधस्ताद् व्यापके। "अधोअञ्चा सिन्धवः स्रोत्याभिरिति" ऋ० २ ६३,६, "यदापः अञ्चन्त्यधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते" इति भा०। [अधादेशश्च। परिधानवस्त्रे।

अधोऽंशुक न० अधरमंशुकम् अधर+प्रथमार्थे असि अधरस्य

अधोऽञ्च न० अधरमञ्चं यत्र मार्गे अधर+प्रथमार्थे असि स०। कविधानाच्चाधोमार्गे। "दक्षिणस्याञ्चं प्राञ्चो निष्क्रामतीति" का० १२, ४, १४, दक्षिणकविधानाच्चाधोमार्गेण प्राङ्मुखा निःसरन्तीति" वेददीपः।

अधोऽज्ज पु० अञ्चात् इन्द्रियात् जायते जन ड ५त०। अञ्चजं प्रत्यक्षज्ञानम् अधरं आहकत्वाभावाद्धीनं यस्य अधर–प्रथमार्थे असि अधादेशश्च। इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोऽज" इत्युक्तलक्षणे, वा विष्णौ। "व्याप्नो वायुरधोऽज" इति विष्णुसह०। "द्यौरज्ञं पृथिवी चाधस्तयोर्यस्मादजायत। मध्ये वैराजरूपेण ततोऽधोऽजदृश्यते" इति भाष्ये तथा च अण्डकपालद्वयमध्ये विराड्रूपेण जातत्वादस्य तथात्वम्। अधोभूते स्वस्वविषयेभ्यो निवर्त्तनेन प्रत्यक्प्रवाहिते अन्तर्गते जायते प्रकाशते इति अधोऽज इति वा। तत्रार्थे।

अधोगति स्त्री अधरस्मिन् अधस्तात् नरकादौ गतिः नरकादिगमने "साधकानां त्वधोगतिरिति" तन्त्र०। नरकस्य च पापफलत्वेन पुण्यादधरत्वात् अधरत्वम् "और्व्वे च सर्वे नरकाः सदैव" इति (शि०गिरो०) और्व्वस्थाने एव नरकस्थितिश्रुत्या और्व्वस्थिति च। "खादूदकान्तर्बडवानलोऽसौ पातालशोकाः पृथिवीपुटानी"त्यनेन पातालसन्निकृष्टे तत्रैवोक्ता। अतो नरकानामधःस्थत्वम्, भूगोलशब्दे विवरणं द्रष्टव्यम्। "जघन्यगुणवृत्तस्थास्तु अधोगच्छन्ति तामसा इत्युक्तेः तामसानामधोगतित्वम्। अधोगतित्वञ्च पापादेव। अधःप्रदेशमात्रे गमने च "मूढा-

मामधोगतिरिति" काद०। अधोऽधस्तात् गतिर्यस्य ब०। नरकगामिनि त्रि० "अनपेक्षितमर्य्यादं नास्तिकं विप्रलुम्पकम् अरक्षितारमत्तारं नृपं विद्यादधोगतिमिति" मनुः ८,३९, ४१, अधोगतिं नरकगामिनमिति कुल्लूकभट्टः।

अधोगामिन् त्रि० अधरस्मिन् अधः गच्छति गम–णिनि। नरकगामिनि, अधोभागे–गन्तरि च। स्त्रियां ङीप्।

अधोघण्टा स्त्री अधरात् अधस्तादारभ्य घण्टेव तदाकारफलवत्त्वात्। अपामार्गे रत्नमाला।

अधोजानु न० अधरं जानुनः प्रथमार्थे असि। जानुनोऽधरे ब्राह्मणादीनां प्रमाणविशेषमभिधाय "सर्वेषां वाधोजानु इति का० २१,४,१८, "वा विकल्पार्थे सर्वेषां जानुनोरधस्तात् अधोजानुनि" तद्व्याख्या।

अधोजिह्विका स्त्री अल्पा जिह्वा जिह्विका अल्पार्थे कन् अधोऽधरा जिह्विका कर्म्म०। (आलजिभ) इति ख्यातायाम् तालुस्थजिह्विकायाम्।

अधोदारु न० अधरं दारु अधर+प्रथमार्थे असि। काष्ठमयद्वारस्याधरकाष्ठे (गोवराट्)।

अधोदिश् स्त्री अधरा दिश् अधर+प्रथमार्थे असि कर्म्म०। दक्षिणस्यां दिशि। अस्या अधरत्वञ्चोदक्शब्दे वक्ष्यते।

अधोदृष्टि त्रि० अधरस्मिन् अधः दृष्टिरस्य। योगाभ्याससमये नासिकाग्रमात्रदर्शनयुक्ते, तत्प्रकारस्तु "किञ्चित् प्रकाशस्तिमितोन्मतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः। नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्मीकृतध्राणमधोमयूखैरिति' कुमारे "करणान्यवहिष्कृत्य स्थाणुवच्चिरचलात्मकः। आत्मानं हृदये ध्यायेच्चासाग्रन्यस्तलोचन" इति योगसारे "गीतायामपि "सम्प्रेक्ष्य नासिकाग्रं स्वमित्यादिना" दर्शितः। अधोदर्शनयुक्तमात्रे त्रि०। "अधोदृष्टिर्नैकृतिक" इति मनुः ४,१९६। कर्म्म०। अधस्थदृष्टौ स्त्री।

अधोऽधस् अधस्+अधस्तात् सामीप्ये द्वित्वम्। समीपाधोदेशे "नवानधोधोदृहतः पयोधरानिति" माघः।

अधोपहास पु० अधः अधोभागस्य शरमन्दिरस्य उपहासः सन्निश्चान्द्रसः। स्त्रीणामधोभागस्योपहसने। "यश्चैवं विद्वानधोपहासं चरत्यासां, स्त्रीणां सुकृतं दुष्कृतं" इति बृ०उप०। दुष्कृते आवर्ज्जयतीति भाष्यम्।

अधोभक्त न० अधरं भक्तं यस्मात् अधर+प्रथमार्थे असि ब्रुत०। भक्तभोजनान्ते पीयमानजले।

अधोभाग अधरोभागः अधर+प्रथमार्थे असि कर्म्म०। अधरभागे "पूर्ब्बभागो गुरुः पुंसामधोभागस्तु योषितामिति"।

अधोभुवन न० अधरमधः भुवनम् लोकः। सप्तसु पातालेषु। तत्स्थानञ्च 'भूमेरधस्ताच्छतयोजनान्तरे सप्तप्रभेदास्तलसंज्ञकास्तथा। भूमेरधस्तात् खलु सप्तकेऽस्मिन् पातालसंज्ञे विवरेषु सप्त। अतलं वितलं नितलं गभस्तिमत्कं महाख्यं सुतलं पातालं चेति। तत्रैव कृष्णस्य हरेर्महात्मनो विष्णोर्महामायविनिर्म्मितानि। पुराणि दैत्यादिनिवासभूतान्यतीव रम्याणि सुखप्रदानि। तेषु प्रधानं किल दानवेन्द्रो मयो महात्मा बलवान् बभूव। स निर्म्मितं तत्र पुरं सुरम्यं मयेन मायाबलमाश्रितेन। सभा च दिव्या सकलैर्महार्घैः सर्व्वर्द्धिभिः सर्व्वसमृद्धिभिश्च। तस्मिन् पुरे दानवदैत्यसङ्घा मयेन मायाबलमाश्रितेन। सम्पूजिताः सर्व्वसमृद्धिभिश्च सुखं वसन्ति स्म सदा महात्मन्

र्थे वा अव्ययी०। अग्नौ अग्निसमीपे वेत्यर्थे। तत्र स्थाने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न०। स्मृतिशास्त्रे चास्मिन्नर्थे पारिभाषास्त्र कृता यथा "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्त्तितमिति" कात्या०। "अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्म्मणि भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" मनुः। "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितमिति याज्ञ०। "विवाहकालेऽग्नावधिकृत्य मातुलादिदत्तमिति"मिताक्षरा। अध्यग्निकृतमित्येकं पदं दत्तमध्यग्न्युपागतमित्येकवाक्यत्वात् कृतं दत्तमित्यर्थः इत्येके।

अध्यक्ष् त्रि० अधि+अक्ष्–क्विप्। अधिगन्तरि।

अध्यण्डा स्त्री अधिकमण्डमिव बीजं यस्याः दैत०। अधिकबीजयुक्तायाम् (भुंइ आमला) इति ख्यातायाम्, भूम्यामलक्याम्।

अध्यधिक्षेप पु० अधिकोऽधिक्षेपः प्रा०स०। अत्यन्तनिन्दायामतिशयतिरस्कारे च "गुरूणामध्यधिक्षेप" इति।

अध्यधीन त्रि० आधिक्येन अधीनः। अत्यन्ताधीने गर्भदासे तस्य जन्मावधि दासत्वात् क्रयविक्रयार्हत्वाच्च तथात्वम्।

अध्यय पु० अधि–इङ्–क्विप् वा भावे अच्। अध्ययने स्मरणे च।

अध्ययन न० अधि+इङ–ल्युट्। पठने, गुरुमुखोच्चारणानुसारिणि उच्चारणे च। अध्ययनञ्चाक्षरमात्रपाठ इति वैदिकाः सार्थाक्षरग्रहणमिति मीमांसकाः। "इज्याध्ययनदानानि तपः सत्यं क्षमा दमः। अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृत" इति "अब्राह्मणादध्ययनमापत्काले विधीयते" इति "श्रुताध्ययनसम्पन्न" इति च स्मृतिः अध्ययनं च वेदाध्ययनं तत्र च त्रैवर्णिकानामधिकारः यथोक्तं मनुना। "अध्यापनमध्ययनं यजनं याजनं तथा, दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥ प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः। पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च" इति मनुः। वेदाध्ययनञ्च ब्रह्मयज्ञत्वेनाभिधीयते तच्च ब्रह्मयज्ञशब्दे वक्ष्यते तच्च सार्थाध्ययनमेव प्रशस्तं यथोक्तं ब्राह्मणसर्व्वस्वे "कूर्म्मपुराणे। न वेदपाठमात्रेण सन्तोषं कारयेद्गुरुः। पाठमात्रावसन्नस्तु मङ्क्षु गौरिव सीदति। योऽधीत्य विधिवद्द्विजोवेदार्थं न विचारयेत् स शान्वयः शूद्रसमः पालतां न प्रपद्यते"। व्यासः "वेदस्याध्ययनं कार्य्यं धर्म्मशास्त्रस्यापि यत्। अजानतार्थं तत् सर्वं तुषाणां कण्डनं यथा" तथा "यथा पशुर्भारवाही न तस्य भजते फलम्। द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते"। तथा "पाठमात्रवतां चित्तं द्विजातीनार्थवर्ज्जितान्। पशूनिव च तान् प्राज्ञो वाङ्मात्रेणापि नार्च्चयेत्। श्रुतहीनमधीतं यच्चेह नासुत्र तद्भवेत्। श्रुतन्तु कोलमपि सत्तुद्धाराय कल्पते"। स्थाणुरयं भारहारः किलाभूद्धीत्य वेदं न विजानाति योऽर्थम्। अर्थवित् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। व्यासः। "योऽधीते सार्थतत्त्वज्ञस्तस्य तद्धारणं दृढम्। भारवाहीव भूतकः केवलं क्लेशभाग्भवेत्। तस्मादर्थपरिज्ञाने यत्नः कार्य्योविजानता"। व्यासः। "ज्ञानं कर्म्म च संयुक्तं सत्यर्थं कथितं यथा। अधीतं श्रुतसंयुक्तं तथा ह्यर्थं न केवलम्" व्यासः। "अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः। स्वर्गलोकमवाप्नोति धर्म्मानुष्ठानविद्द्विजः"। मनुः "वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्। इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते"। व्यासः। "मन्त्रश्चितं श्लोकमपि श्रुताधीतं विशिष्यते। चतुर्णामपि वेदानां केवलाध्ययनात् द्विजात्"। बृहद्व्यासः "अनूचानाग्र्यान्निधनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः। धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्योऽप्यध्यात्मचिन्तकाः" इति॥ एतच्च स्वाध्येयोऽध्येतव्य" इति श्रुतौ मीमांसकैः विस्तरतो व्यवस्थापितम्।

अध्यर्द्ध त्रि० अधिकमर्द्धं यस्य ब०। सार्द्धेन सहिते वस्तुमाने। "एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुज" इति मनुः। एकाधिकमंशं द्वावंशाविति यावत् ज्येष्ठपुत्रो गृह्णीयात् अधिकमर्द्धं यत्रांशे सार्द्धमंशं इति कुल्लू०। अर्द्धशब्दः रूपकार्द्धे रूढः तेन सार्द्धरूपके च। अध्यर्द्धपूर्व्वात् क्रीतार्थे "अध्यर्द्धपूर्व्वद्विगोर्लुगसंज्ञायामिति" पा० अध्यर्द्धपूर्व्वात् द्विगोश्छीयस्य टजो लुक्। अध्यर्द्धकंशम्। "विंशतिकात्खः" इति पा०। खविधाश्च लुक्। अध्यर्द्धविंशतिकीनं "खार्य्यादिकम्" पा०। अध्यर्द्धखारीकम् "षण्णादमाषशताद्यत्" पा०। अध्यर्द्धपणं अध्यर्द्धमाद्यम् अध्यर्द्धमाष्यम् अध्यर्द्धशतम् "माणाढेति" पा० यत् ठञ् तस्य लुक्च नेति अध्यर्द्धमाणाढ्यम् अध्यर्द्धमाणम्। इत्यादयः यच्छब्दाः तत्क्रीतार्थे त्रि०। अध्यूढोति यत्र अधि+ऊढ–आधारे भज्। वार्यौ। "कत्थेव देवा याज्ञवल्क्य! इति" याज्ञवल्क्यं प्रति शाकल्यवाक्ये तत्र याज्ञवल्क्येन 'अध्यर्द्ध" इत्युत्तरं (इ०उ०) दत्तम् तत्र विशेषज्ञानाय

"कतमोऽध्वर्यु" ? इति पुनः शाकल्यप्रश्ने, "योऽयं पवत" इत्युक्ता तत्र पवत इत्यनेन वायुरुक्तः। "तदाहुर्यदयमेकएष पवते अथ कथमध्वर्यु"? इति। वायोरेकत्वेन अध्वर्यु-शब्दार्थस्य सार्वत्वासम्भवे पुनराक्षिप्ते "यदस्मिन् इदं सर्वमध्वार्धोत् तेनाध्वर्यु" इत्युत्तरम् तेन अधिकदृद्धिहेतुत्वात् वायोरध्वर्युत्वात् तथात्वम् अधि+ऋध–लङ् अध्वार्धोत्।

अध्यवसाय पु० अधि+अव–सो–घञ्। इदमेवमेवेति विषयपरिच्छेदे निश्चये। स चात्मधर्म इति नैयायिकाः बुद्धिधर्म इति सांख्यादयः। "उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यवसाय इति वृत्तिरिति चाख्यायते" इति सांख्यतत्त्वकौमुदीपरिभाषितलक्षणः, "कर्त्तव्यमिति योऽयं निश्चयः चित्सान्निध्यात् प्राप्तचैतन्याया बुद्धेः परिणामः सोऽयमध्यवसाय" इत्युक्तलक्षणो वा निश्चयः। "प्रतिविषयाध्यवसायो दृष्टमिति सां०का०। उत्साहे च। उत्साहश्च कर्म्मसु सुकरत्वेन ज्ञानात् उद्यममेदः।

अध्यवसायित त्रि० अध्यवसायो जातोऽस्य तारा० इतच्। जाताध्यवसाये। [निश्चयवति च।

अध्यवसायिन् त्रि० अधि+अव–सो–णिनि। उत्साहान्विते

अध्यवहनन न० अधि–उपरि अवहननम्। पूर्व्वावघातेन विदलीकरणेऽपि पुनरवघाते। तेन च "व्रीहीनवहन्तीति" नियमपालनम्।

अध्यशन न० अधिकमशनम्। "साजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते" इति सुश्रुतोक्ते अजीर्णेऽपि अधिकाशने। "यथोक्तैः प्रकोपणैर्विरुद्धाध्यशनस्त्रीप्रसङ्गेत्यादि" सुश्रुतम्।

अध्यस्त त्रि० अधि+अस–कर्म्मणि क्त। कृताध्यासे आरोपिते, अध्यासशब्दे वक्ष्यते तद्विषये मिथ्याभूते पदार्थे। शुक्तौ रजतमध्यस्तम् ब्रह्मणि जगदध्यस्तमित्यादि।

अध्यात्म अव्य० आत्मानं देहमिन्द्रियादिकं क्षेत्रज्ञं ब्रह्म वाऽधिकृत्य टच् समा०। देहमिन्द्रियादिकम् आत्मानं ब्रह्म वाधिकृत्येत्यर्थे। तत्र देहाधिकारे "अध्यात्ममिति" इ०उ० अधिदेवताशब्दे दृश्यम्, तत्र प्राणाद्यधिकारेण अन्यथा-भित्वमुक्तम्। क्षेत्रज्ञाधिकारे "अध्यात्मयोगाधिगमेनेति"। "अध्यात्मरतिरासीनो निराकाङ्क्षो निरामिष" इति मनुः। "आत्मानं ब्रह्माधिकृत्येति" कुल्लू०। "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलमिति" गीता। "ते जनाः परं ब्रह्म कृत्स्नमध्यात्मञ्च विदुः ये तत् प्राप्तव्यं देहादिव्यतिरिक्तं शुद्धमात्मानञ्च जानन्तीति" श्रीध०। "अक्षरं परमं ब्रह्म स्वभावोऽध्यात्मसुच्यते" इति गीता। "स्वयैव ब्रह्मण एवांशतया जीवस्वरूपेण भावोभवनं स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्त्तमानोऽध्यात्मशब्देनोच्यते" इति श्रीधरः। तेन देहाधिकारेण भोक्तृतया ब्रह्मणोऽंशस्य जीवभवनेऽस्य पारिभाषिकत्वं सूचितम् "अध्यात्मविद्या विद्यानां वादः प्रवदतामहमिति" गीता सा च विद्या न्याय वैशेषिकमते देहभिन्नत्वेन, सांख्यादिमते प्रकृतिभिन्नत्वेन आत्मनः स्वरूपादिप्रतिपादिका। वेदान्तिमते तु ब्रह्माभिन्नत्वेनेति भेदः। सर्व्वेषां मतेऽध्यात्मतत्त्वज्ञानरूपत्वात्तस्या अध्यात्मविद्यात्वम्। तत्र नैयायिकवैशेषिकमते आत्मा द्विविधः जीवात्मा परमात्मा च। तत्र जीवात्मानमधिकृत्य उदयनाचार्य्येण आत्मतत्त्वविवेकरूपप्रकरणं, परमात्मानमधिकृत्य च कुसुमाञ्जलिनामकमपरं प्रकरणं निरमायि। सांख्ये ईश्वरानभ्युपगमेन पुरुषस्य प्रकृत्यादिभ्यो विवेकज्ञानाय षड्ध्यायीरूपं कपिलमुनिना, तन्मूलकमीश्वरकृष्णेन च सांख्यकारिकाः सम्प्रतिः निरमायिषत, वाचस्पतिना च ता व्याख्याताः ततएव विस्तरोऽवसेयः। पातञ्जले तु जीवानामीश्वरस्य च भेदस्वीकारेऽपि ईश्वरप्रणिधानेन पुरुषस्य प्रकृत्यादिभ्यो भेदसाक्षात्कार इति भेदः। अधिकं तत्तच्छब्दे वक्ष्यते। "मयि कर्म्माणि सर्व्वाणि संन्यस्याध्यात्मचेतसेति" गीता। "अध्यात्मचेतसा विवेकबुद्धया"। अध्यात्मं जातः ठञ्। अनुगतिका० द्विपदवृद्धिः। आध्यात्मिकं दैहिके मानसिके च दुःखादौ त्रि०।

अध्यात्मदृश् त्रि० अध्यात्मं पश्यति दृश–क्विन्। आत्मनि विषयत्यागेनात्ममात्रदर्शके।

अध्यात्मयोग पु० आत्मानं क्षेत्रज्ञमधिकृत्य योगः। विषयेभ्यः प्रतिसंहृत्य चेतसआत्मनि समवधाने। "अध्यात्मयोगाधिगमेनेति"।

अध्यात्मरामायण न० आत्मानमधिकृत्य कृतं रामायणं यत्र। वाल्मीकिप्रणीते अध्यात्मज्ञानप्रतिपादके प्रसङ्गतो रामचरितज्ञापके स्वनामख्याते ग्रन्थभेदे।

अध्यात्मशास्त्र न० अध्यात्म प्रतिपादकं शास्त्रम्। आत्मस्वरूपादि प्रतिपादकग्रन्थे।

अध्यापक पु० अध्यापयति अधि+इङ् णिच्–ण्वुल्। अध्ययनकारयितरि, उपाध्याये च। "भृतकाध्यापकोयस्तु भृतकाध्यापितस्तथेति" मनुः। अस्य अकान्तत्वेऽपि याजकादिगणे पाठात् षष्ठीसमासः तेन वेदाध्यापकः न्याया-

ध्यापक इति। अध्यापकश्च द्विविधः आचार्य्य उपाध्यायश्च यथोक्तं विष्णुना "यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्य्यं विद्यात्। यस्त्वेनं मूल्येनाध्यापयेदंकदेशं वा तमुपाध्यायमिति"।

अध्यापन न० अधि+इङ्–णिच्–भावे ल्युट्। पाठनायाम्। "याजनाध्यापनं तथेति" मनुः। "अध्यापनञ्च त्रिविधं धर्म्मार्थमन्नकृत्यकारणम् शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितमिति" हारीतसंहितोक्तेस्त्रिविधमध्यापनम् अध्यापनप्रकारादि यथा "नापरीक्षितं याजयेत् नाध्यापयेत् नोपनयेत॥ योऽधर्मेणाह यश्चाधर्म्मेण पृच्छति तयोरन्यतरः प्रैति, विद्वेषं वाधिगच्छति॥ धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा। तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे। विद्याह वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्तेऽहमस्मि। असूयकायानृजवेऽयताय न मां ब्रूया वीर्य्यवती तथा स्याम्॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्। यस्ते न द्रुह्येत् कतमाच्च नाह तस्मै मां ब्रूया निधिपाय ब्रह्मन् इति"॥ युचि तु स्त्रीत्वात् टापि, अध्यापना तत्प्रत्ययेऽर्थे स्त्री।

अध्यापित त्रि० अधि-इङ्–णिच् कर्म्मणि क्त। पाठिते "अध्यापितस्योपनयनादपि नीतिरिति" कुमा०।

अध्याप्य त्रि० अधि इङ्–णिच्–कर्म्मणि यत्। पाठनीये अध्यापयितुमर्हे ज्ञाते "ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रिय" इति मनुनाध्यापनीयार्हता दर्शिता।

अध्याय पु० अधि+इङ्–घञ्। अध्ययने, कर्म्मणि घञ्। वेदादिशास्त्रस्य एकार्थकविषयसमाप्तिद्योतके विश्रामस्थाने अंशविशेषे, "सर्गोवर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च। स्थानं प्रकरणञ्चैव पर्व्वोल्लासाङ्किकानि च। पुराणादौ परिच्छेदा अनेके परिकीर्त्तिता" इत्युक्तान्यतमप्रकारे च "संकल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः अध्याय प्राप्य विरमेच्च तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पुनः पठेदिति" भ० क्रि० "स्वाध्यायोऽध्येतव्य" इति श्रुतिः।

अध्यारूढ त्रि० अधि+आ+रुह कर्म्मणि कर्त्तरि वा क्त। आक्रान्ते, अध्यारोहणकर्त्तरि उपरिष्टात् आरोहणकर्त्तरि, समारूढे, अधिके च।

अध्यारोप पु० अधि+आ–रुह–णिच्–घञादेशः घञ् अतस्मिन् तद्बुद्धिरारोपः मिथ्याज्ञानम् किञ्चिद्धिष्ठानमधिकृत्य तादृगारोपः अध्यारोपः यथा असर्पभूतां रज्जुमधिकृत्य सर्पारोपः तथैव अजगद्रूपे ब्रह्मणि जगद्रूपारोपः। तादृशे मिथ्याज्ञाने। "स एष बीजाङ्कुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारककलाध्यारोपलक्षणोऽनादिरनन्त" इति बृ० उप० भाष्यम्।

अध्यारोपण न०अधि+रुह–णिच् ल्युट्। अतिशयेनारोपणे घान्यादेर्वपने।

अध्यावाप पु० अधि+आ+वप–घञ्। अधिवपने सस्यानामावापे। आधारे घञ्। तदाधारक्षेत्रे।

अध्यावाहनिक न० अध्यावाहनं पितृगृहात् भर्तृगृहागमनं तत्काले लब्धम् अधि+आ+वह–ल्युट् ततः लब्धार्थे ठन्। "यत् पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावाहनिकं नाम स्त्रीधनं परिकीर्त्तितमिति" मलमासतत्त्वे पितृकुलात् भर्तृकुलगमनकाले तेभ्यः प्राप्ते स्त्रीधने। "अध्यग्न्यध्यावाहनिक स्त्रीधनं पतिदं त्रिधं स्मृतमिति" स्मृतिः।

अध्यास पु० अधि+अस–घञ्। मिथ्याज्ञाने "आह कोऽयमध्यासो? नामेति प्रश्ने "स्मृतिरूपः परत्र पूर्व्वदृष्टावभास" इति शा० भाष्यम्। स्मृतेः रूपमिव रूपमस्य संस्कारप्रभवत्वात्। परत्र अन्यस्मिन् स्वभिन्ने स्वाभाववति च पूर्व्वदृष्टस्य पूर्व्वानुभूतस्यावभासो ज्ञानम्। यथा शुक्तौ रजतभिन्नायां पूर्व्वदृष्टस्य रजतस्याभेदज्ञानम्, स्वाभाववति च स्फटिके पूर्व्वानुभूतस्य लोहितरूपस्य वा ज्ञानम्। तथाभूते मिथ्याभूतज्ञाने। तत्र चाध्यासे अधिष्ठानशुक्त्यादौ इन्द्रियसंप्रयोगे सत्यपि तस्य विशेषरूपेणाज्ञानात् सामान्याकारेण इदन्त्वादिरूपेण ज्ञानं, सादृश्यज्ञानम्, आरोप्यमाणस्य संस्कारश्चेति कारणत्रयं सति च तस्मिन् चाक्षुषत्वादिदोषविशेषात् अधिष्ठानविशेषज्ञानं प्रतिरुध्य, रजतादिसंस्कारे चोद्बोधिते तत्रानिर्वचनीयं रजतादिकं शुक्त्याद्यज्ञानेनोत्पद्यते तदाकारवृत्तिश्च जन्यते तत्र आविद्यिकरजताद्यनुत्पत्तौ इदं रजतं पश्यामीत्याद्यनुभवानुपपत्तिः नच कारणेन तस्योपपत्तिः कारणस्य विषयाप्रवर्त्तकत्वात् तदुत्तरं प्रवर्त्तते च तत्तदुपकृताय सर्वैः। नापि अलौकिकप्रत्यक्षरूपता साक्षात्करोमीत्यनुभवस्य साक्षात्कारविषयत्वात् अन्यथानुमानादीनामपि अलौकिकप्रत्यक्षत्वापत्तेः तत्पूर्व्वं नियतं तत्तज्ज्ञानस्यावश्यम्भावेन विधिशतालौकिकप्रत्यक्षापत्तेर्दुर्निवारत्वात् अतः तत्तदुपकृताय प्रवर्त्तकस्य तत्तज्ज्ञानस्य प्रत्यक्षत्वसमर्थनाय अनिर्वचनीयं रजतादिकमु अधिष्ठानाज्ञानेन तत्राधिष्ठाने उत्पद्यते इति कल्प्यं प्रत्यक्षे हि विषयसन्निकर्षः कारणत्वेन कल्पः

देशान्तरस्थरजतादिकं तु न इन्द्रियसन्निकृष्टमित्यगत्या तथा कल्प्यते । अतएव श्रुतौ "यत्र ह्येतमिव भवति तदितर इतरत् पश्यतीति" "अथ रथान् रथयोगान् पथः सृजते" इति च जागरे ह्येतस्य इवशब्देन मिथ्यात्वं सूचितम् । स्वप्नेच रथादेः सृष्टं सृष्टिरूपा । तथाच ब्रह्मणि जगदादेरनिर्वचनीयस्य तदज्ञानेनोत्पत्तिः । इयांस्तु विशेषः रजतादेः स्वप्नरथादेश्च प्रतीतिसमकालत्वं, वियदादेस्तु व्यवहारिकत्वम् । "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादियुक्तेः व्यवहारकाले वियदादिप्रमेयाणां सत्यत्वं, "परमार्थदृष्ट्या तु मिथ्यात्वमिति" "अन्यदार्त्तमित्यादि"श्रुत्या च ब्रह्मभिन्नानां मिथ्यात्वावगमात् । अधिकमाकरे दृश्यम् ।

अध्यासन न० अधि+आस–उपवेशे ल्युट् । निवासे । विभ०अव्ययी० । आसने इत्यर्थे अव्य० ।

अध्यासित त्रि० अधि+आस आधारस्य कर्मसंज्ञायां कर्मणि क्त । अधिष्ठिते । "धेन्वा तदध्यासितकातराक्ष्येति" रघुः ।

अध्याहार पु० अध्याहृयते ज्ञानायानुसन्धीयते अधि+आ+हृ-घञ् । आकाङ्क्षाविषयपदानुसन्धाने, जल्पे, तर्के, अपूर्व्वोत्प्रेक्षणे च । जल्पस्वरूपमूहशब्दे तर्कस्वरूपं च तर्कशब्दे वक्ष्यते । [क्त । अधिष्ठिते स्थानादौ ।

अध्युषित त्रि० अधि+वस–आधारस्य कर्मसंज्ञया कर्मणि

अध्युष्ट त्रि० अधिगतमुष्ट्रं वाहनत्वेन अत्या०स० । उष्ट्रवाहनयुक्ते शकटादौ । (उठगाड़ि) ।

अध्यूढ त्रि० अधि उपरि ऊढ़ । अवलम्बनत्वेन उपरिभावेण अवलम्बिते । "तस्मादृच्यध्यूढं साम गीयते" इति छा० उप० । ऋचमवलम्ब्यैव सामो गीयमानतया ऋच्यध्यूढत्वम् । अधिकरूढियुक्ते, सम्बद्धे च । क्रतुसारपल्लिकायां प्रथमायां "यस्या उपरि विवाहान्तरं कृतं" तादृश्यां स्त्रियाम् स्त्री ।

अध्यूधी स्त्री अधिकमूधोयस्याः अनुङ् ङीप् च । सद्यःप्रसूतायां धेन्वाम् "अध्यूधीं दोहते प्रयच्छतीति श्रुतिः अवधाध्यूधीवनिष्णुषु सप्तस्वय इति का० १,८,८१ ।

अध्येतव्य त्रि० अधि–इङ कर्मणि क्त । पाठे "स्वाध्यायोऽध्येतव्य इति" श्रुतिः । अर्हार्थे तव्य । अध्येतुमर्हे "श्रोतव्यमिह सूत्रेण नाध्येतव्यं कदाचनेति" स्मृतिः ।

अध्येषण न० अधि–इष–प्रेरणे ल्युट् । सत्कारपूर्व्वकमाचार्य्यादेः प्रेरणे, प्रवर्त्तनमात्रे च । युचि टाप् तच्चिन्तेवार्थे स्त्री । अधिका एषणा प्रार्थना । अधिकप्रार्थने स्त्री ।

अधृ त्रि० न–धृ–क्विप् । अधृते । न+धृष–ड्रि, अधृष्ये ।

अध्रिगु त्रि० अध्रि+गम–कू–डिच्च अडादेशो वा । अधृतगमने । "यदध्रिगावोऽध्रिगू इदाचिद्भो अश्विना" इति ऋ० ८,२२, ११, "अध्रिगावोऽधृतगमना अध्रिगू–अधृतगमनाविति" भा० ।

अध्रिज त्रि० अध्रिमधृतमधृष्यं वा जनयति जन–अन्तर्भूतण्यर्थे, ड । अधृतजनके अधृष्यजनके च । "इति चिन्न्युभ्रिज इति ऋ०५,७,१० "अध्रिजः अधृतमन्यैः अग्निव्यतिरिक्तैः अधृष्यं वा जनयिता" इति भा० ।

अध्रुव त्रि० न०त० । अनिश्चिते, चञ्चले, अस्थिरे च । "योऽध्रुवाणि परित्यज्य ध्रुवाणि निषेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि" इति हितो० ।

अध्रुष पु० "शोथः स्थूलस्तोददाहप्रकाशो रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्य इति" सुश्रुतोक्ते विक्षतरक्तादिजे ज्वरकारके शोथरोगभेदे ।

अध्वग पु० अध्वन्+गम–ड । पथिके. अध्वगमनप्रकारश्च विष्णुसंहितायामुक्तः । यथा "नैकोऽध्वानं प्रपद्येत नाधार्मिकैः सार्द्धम्, न दृषलैः, न द्विषद्भिः, नातिप्रत्यूषम्, नातिसायम्, न सन्ध्ययोः, न मध्याह्ने, न सन्निहितपानीयम्, नातितृणम्, न रात्रौ, न सन्तत व्याधितार्त्तैर्वाहनैः, न क्लीनाङ्गैः, न रोगिभिः, न दीनैः, न गोभिः, नादान्तैः, यवसोदकैर्वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदने न कुर्य्यात् । न चतुष्पथमधितिष्ठेत्, न रात्रौ वृक्षमूलम्, न शून्यालयं, न तृणम्, न पशूनां बन्धनागारम्, न कोशतृषकपालास्थिभस्माङ्गारान्, न कार्पासास्थि । चतुष्पथं प्रदक्षिणीकुर्य्यात् देवताश्च । प्रज्ञातांश्च वनस्पतीन्, अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वजपताकाश्रीवृक्षवर्द्धमाननन्द्यावर्त्तांश्च, तालदन्तचामराग्निगजाजगोदधिक्षीरसर्षपसिद्धार्थकांश्च, वीणाचन्दनायुधार्द्रगोमयदुग्धशुक्लकगोरोचनादूर्वाप्ररोहांश्च, उष्णीषालङ्कारमणिकनकरजतवस्त्रासनयानाभिधांश्च, भङ्गारोदकृतोदरारज्जुमद्यपशुकुमारीमीनांश्च दृष्ट्वा प्रायादिति । मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत वान्तविविक्तमुण्डमलिनवसनजटिलवामनांश्च, कषायिप्रव्रजितमलिनांश्च, तैलगुडशुष्ककगोमयेन्धनतृणकुशपलाशभस्माङ्गारांश्च, लवणक्षीरासवनपुंसककार्पासरज्जुनिगडसुक्तकेशांश्च, वीणाचन्दनार्द्रकायोष्णीषालङ्करणकुमारीः प्रस्थानकालेऽभिवन्द्येदिति । देवब्राह्मणगुरुदीक्षितानां छायां नाक्रामेत्,

निष्ठूतवान्तरुधिरविण्मूत्रस्नानोदकानि वा। न वल्मतन्त्रीं लङ्घयेत्। प्रवर्षति न धावन्, न तृषा नदीं तरेत्। न देवताभ्यः पितृभ्यश्च कामं प्रदाय, न बाहुभ्याम्, न भिन्नया नावा। न कच्छमधितिष्ठेत्। न कूपमवलोकयेत्, न लङ्घयेत्। तृणभारिन्यपस्नातस्त्रीरोगिवरचक्रिणाम् पन्थादेयो न्यस्तेषां मान्यः स्नातश्च भूपतेरिति"। "सन्तानकतरुच्छायसुप्तविद्याधराध्वगमिति" कुमा०। सूर्य्ये, उष्ट्रे, च। पथिगाम्यकर्मणि त्रि०। गङ्गायां स्त्री अश्वतरे पु०।

अध्वगत् त्रि० अध्वानं गच्छति क्विप्। पथिके।

अध्वगभोग्य पु० अध्वगेन अतिसौलभ्यात् अयत्नलभ्यफलत्वाच्च भोग्यः ३त०। (आमड़ा) इति प्रसिद्धे आम्रातवृक्षे। अनायासेन तत्फलस्य भोग्यत्वात्तस्य तथात्वम्।

अध्वजा स्त्री अधूनि जायते जन–ड ७त०। (सोना) इति ख्याते स्वर्णपुष्पीवृक्षे।

अध्वन् पु० अक्ति बलम् अद–क्वनिप् धादेशः। पथि, "अपि लङ्घितमध्वानं बुबुधे न बुधोपमः" इति रघुः। अध्वानमध्वान्तविकारलङ्घ" इति कु०। "नैकोऽध्वानं गच्छेदिति विष्णु स०। आकाशे पु० निरुक्तकारः। अधिकदूरारोहणे च। सर्वभक्षत्वात् काले, हिंसे च। अद्यते खण्ड्यो भक्ष्यतेऽनेनेति करणे क्वनिप्। अवयवे। प्रा०स०। उपसर्गपूर्वादच्समा०। व्यध्वःदुरध्वः (कुपथः) प्रा०ब०। कादेशः कदध्वा। अवयवश्च वेदस्य शाखाऽपि यथा "एवंविधत्वध्वयुक्तस्यग्वेदस्यषयो विदुः। सहस्राधा सामवेदो यजुरेकशताध्वकमिति।

अध्वनीन त्रि० अध्वानमलं गच्छति अध्वन्+ख। पथिके। पथिगमनक्षमे।

अध्वन्य त्रि० अध्वानमलं गच्छति अध्वन्+यत्। पथिके। पथि क्षिप्रगमनक्षमे शीघ्रगामिनि। "क्षिप्रं ततोऽध्वन्यतुरङ्गयायीति" भट्टिः।

अध्वपति त्रि० ७त०। मार्गपालके। सूर्य्ये पु० दिवैव पथिकानां गमनात् रात्रौ च "न रात्राविति" विष्णुना गमननिषेधात् सूर्य्यस्य तत्पालकत्वम् "अध्वनामध्वपते! प्रसातिर स्वस्ति मेऽस्मिन् देवयाने पथीति यजुः। "अध्वपते! मार्गपालकरवे" इति वेददीपः।

अध्वर पु० अध्वानं सत्पथं राति रा+क। यज्ञे। "अध्वरेष्विष्टिमां पातेति" भट्टिः। "तमध्वरे विश्वजिति क्षितीशमिति" रघुः। आकाशे निरुक्तकारः। अध्वसुमध्ये हितीयवसौ च। न भ्वरति कुटिला न भवति भ्वृ–अच् न०त०। अकुटिले च। दैव्या होतारा ऊर्द्धमध्वरं न इति २७,१८ "इमं यज्ञमवतामध्वरं न" इति यजु०। २७,१७ अध्वरं "अकुटिलं शास्त्रोक्तमिति" वेददीपः। सावधाने त्रि० नडा० फक्। आध्वरायणः।

अध्वरकर्मन् न० अध्वरएव कर्म। यज्ञरूपकर्मणि।

अध्वरमीमांसा स्त्री अध्वरस्य यज्ञस्य कर्त्तव्यताज्ञानाय मीमांसा विचारः। जैमिनीयप्रोक्ते "अथातो धर्मजिज्ञासेत्यादि धर्ममीमांसाख्ये शास्त्रे।

अध्वरथ पु० अध्वैव रथो यस्य ब०। पथिप्रस्थे दूते। अध्वने हितः पर्य्याप्तो रथो यस्य ब०। पथिगमनोपयुक्ते रथे। चक्रविशिष्टोरथस्तावत् क्रीडार्थः, देवयानार्थः विनयार्थः पथिगमनार्थः गन्त्रीरथश्चेति भेदात् पञ्चविधः। इति हेमचन्द्रः।

अध्वर्य्यु पु० अध्वरमिच्छति अध्वर+क्यच्–युच् ततोऽन्याकारलोपः। यजुर्वेदज्ञे होमकारिणि ऋत्विजि। "निर्मिमीते क्रियासङ्कैरध्वर्य्युर्यज्ञियं वपु"रिति सा०भा०। सोमयागे षोड़शसु ऋत्विक्षु चतुर्षु प्रधानेषु मध्ये ऋत्विग्भेदे तद्विवरणम् अच्छावाकशब्दे द्रष्टव्यम्। "होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीति" सि०कौ०। "त्वमध्वर्य्युरुत होतासि पूर्व्याः प्रशास्तापोता जनुषा पुरोहित" इति ऋ० १,९४,६। योषधत्वात् स्त्रियां न ङीप्। अध्वर्योर्भावः कर्म उक्षा० अण् आध्वर्य्यवम् तद्भावादौ न०।

अध्वशल्य पु० अध्वनि शल्यमिवाचरतीति क्विप्+अच्। पथिकानां पादवस्त्रादौ शल्यवद्वेधकारके (आपाङ्) इति ख्याते अपामार्गवृक्षे।

अध्वसीन त्रि० ध्वंस–सनिन् किच्च न०त०। ध्वंसरहिते "अध्वसीभिः पथिभिः स्वाजदृष्य" इति ऋ० २,२४,५, अध्वसीभिः ध्वंसरहितैरिति भा० अध्वसानोदिधिषतीति ऋ०१२०४०।

अध्वाति पु० अध्वानमतति अत क् ईत०। पथिके। अङ्गा निश्चयमतति अङ्गेति दोषदो धान्तः। मेधाविनि निरुक्त०।

अध्वान्तशातव पु० अध्वान्तस्य मार्गसीमायाः शातव इव। सीमाकर्त्तरि। ईत०। मार्गसीमारिपौ पु०।

अध्वायन न० अध्वनि अयनं गतिः। यात्रायाम् "अध्वायनञ्च ग्रहचारकर्म सौरेण मानेन सदाध्यक्षे"दिति विष्णुध० पुरा०। "अध्वायनमध्वगमनं यावदिति" रघु०।

अन जीवने अदा०पर० अक०सेट्। अनिति आनीत्। घञ् आनः, अच् अनः, ल्युट् अननम्। आनयति अनिनिषति। क्विप् अत् "सर्वं खल्विदं ब्रह्म तज्जलानिति विश्व च-नेदना ऋ० ४ ३०,३, अना प्राणेनेति भा० छा०उप० "यद्येष आकाश आनन्दो न स्यात् कोऽह्येवान्यात्? कः प्राण्यात्? इति श्रुतिः "प्राणिवस्तव मानार्थमिति" भट्टिः। प्राद्युपसर्गतोविशेषगत्यर्थता। प्र+प्राग्गतौ, प्राणः अप+अधोगतौ अपानः, उद्+ऊर्द्धगतौ उदानः, वि+आ+विष्वग्गतौ व्यानः, सम्+समन्ताद्गतौ समानः। "यद्वै प्राणिति स प्राणः यदपानिति सोऽपानः" इति श्रुतिः। जीवनं च प्राणधारणं तेन धात्वर्थगृहीतकर्मकत्वादकर्मकः यस्य संयोगात् देहनिर्म्माणमित्युक्तमधिष्ठानशब्दे। उप-सर्गनिमित्तात् हलन्तत्वेऽप्यस्य णत्वं प्राण्।

अन जीवने दिवा० आत्म०अक० सेट्। अन्यते आनिष्ट।

अन पु० आ+नी–बा०ड पृ० आङो ह्रस्वः अन–बा० अच् वा। आनयने प्राणने च "प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण इति" छ०उप०। "अथ प्राण उच्यते। प्राणो मुखनासिकसञ्चार्य्यहृदयवृत्तिः। प्रण-यनात् प्राणः। अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्तिः आ-नाभिस्थानः। व्यानो व्यानयनकर्म्मा, व्यानः प्राणापानयोः सन्धिर्वीर्य्यकर्म्महेतुश्च। उदान उत्कर्षोर्द्धगमनादिहेतुरा-पादतलमस्तकस्थान ऊर्द्धवृत्तिः। समानः समं नयनाद्भुक्तस्य पीतस्य च कोष्ठस्थानोऽन्नपक्ता। अन इत्येषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टासम्बन्धिनी वृत्तिरेवं यथोक्तं प्राणादिवृत्तिजातमेतत् सर्वं प्राण एवेति" भा०। प्राणे च "स होवाच किं मेऽन्नं भविष्यतीति" यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदन्नाद्यमनो ह वै नाम प्रत्यक्षमिति छा०उ० "स होवाच मुख्यः प्राणः, किं मेऽन्नं भविष्यतीति" मुख्यप्राणं प्रष्टारमिव कल्पयित्वा वागादीन् प्रतिवक्तॄनिव कल्पयन्ती श्रुतिराह। यदिदं लोकेऽन्नजातं सर्वप्रसिद्धमा श्वभ्य आ श्वभिः सह, आ शकुनिभ्यः सह शकु-निभिः सर्वं प्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति। प्राणस्य सर्वभक्षं प्राणोऽत्ता सर्वस्यान्नस्येत्येवंप्रतिपत्तये कल्पिताख्यायिकारूपाद्याद्यत्वेन श्रुतिरूपेणाह। तद्वै एत-द्यत्किञ्चिल्लोके प्राणिभिरन्नमद्यते अनस्य प्राणस्य तदन्नम् भा०

अनंश त्रि० नास्ति अंशोदायग्रहणाधिकारोऽस्य। अंशानधि-कारिणि श्रुयुक्ते क्लीवपतितादौ। तेच "सर्वे हि धर्म्मयुक्ता भागिनो द्रव्यमर्हन्ति यस्तधर्म्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीतेति" आप०। "सवर्णाजोऽगुणवा-न्नार्हः स्यात् पैतृके धने। तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते। उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः। अतस्तद्विपरीतेन नास्ति तेन प्रयोजनम्। तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः। शास्त्र-शौर्य्यार्थरहितस्तपोविज्ञानवर्ज्जितः। आचारहीनः पुत्रस्तु मूत्रोच्चारसमस्तु स इति दक्ष०। "आद्वादेः पुत्रकर्तृकतया महाफलश्रुतेस्तत्कर्म्मवेतनं धनसम्बन्धित्वं अतस्तदकुर्व्वतः कुतो वेतन? मिति दा०भा०। अतएवाह मनुः। "सर्व-एव विकर्म्मस्था नार्हन्ति भ्रातरो धनम्"। तथा "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः इति। "पतितस्तत्सुतः क्लीवः पङ्गुरुन्म-त्तको जड़ः। अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरं-शका" इति कात्या०। देवलः "ऋते पितरि न क्लीवकुष्ठ्युन्म-त्तजड़ान्धकाः। पतितः पतितापत्यं लिङ्गी दायांशभागिनः। तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते। तत्सुताः पित्र-दायांशं लभेरन् दोषवर्ज्जिता" इति। बौधायनः। "अतीतव्यवहारान् प्रासाच्छादनैर्बिभ्रयुः, अन्धजड़क्लीव-व्यसनिव्याधितादींश्चाकर्म्मणः पतिततज्जातवर्जम् इति"। "पित्रर्द्विट् पतितः षण्डो यश्च स्यादौपपातिकः। औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः? इति" नार०। "अक्रमोढासुतश्चैव सगोत्राद्यस्तु जायते। प्रव्रज्यावसितश्चैव न रिक्थं तेषु चार्हति। अक्रमोढा-सुतस्तृक्थी सवर्णश्च यदा पितुः। असवर्णप्रसूतश्च क्रमोढायाश्च यो भवेत्। प्रतिलोमप्रसूतोयस्तस्याः पुत्रो न रिक्थभाक्। प्रासाच्छादनमात्रं तु देयं तद्बन्धुभिर्मतम् बन्धूनामभावे तु पित्र्यं द्रव्यं तदाप्नुयात्। स्वपित्र्यं तद्धनं प्राप्तं दापनीया न बान्धवा इति कात्या०। एवं दर्शिताः। अंशः अवयवः। तच्छून्ये निरवयवे आका-शादौ, परमेश्वरे च। [यस्याः। कदल्याम् जटाधरः।

अनंशुमत्फला स्त्री न अंशुमत् शोचकाभ्यन्तरस्थत्वात् फलं

अनक पु० अणकवत्। अधमे, कुत्सिते च।

अनक्ष् त्रि० न अक्ष्णोति व्याप्नोति विषयमिन्द्रियेण अक्ष–क्विप् न०त०। अन्धे चक्षुरिन्द्रियशून्ये। "प्रतिश्रोणः स्था व्यन-गचष्टेति" ऋ०२, १५, ७, "पूर्व्वमन्धः अधुना चक्षुर्लाभात् व्यचष्टेति भा०।

अनक्ष त्रि०नास्ति अक्षं चक्रं नेत्रादिकमिन्द्रियं वा यस्य ब०।

चक्षुश्शून्ये, चक्षुरादीन्द्रियशून्ये च। "अयानक्षासो बधिरा अहासत" इति ऋ० ६,७३,६, अनक्षासश्चक्षुर्वर्জ्जिताः इति भा० वेदे सौभ्रास इति वत् अनक्षास इति। रूपसिद्धिः।

अनक्षर न० अप्रशस्तान्यक्षराणि यत्र ब०। सद्गुणसमाक्षेपके दोषोद्घोषकवाक्ये, अवाच्ये निन्द्यवचने, (गालि) इति प्रसिद्धे दुष्टवचने च। न सन्ति अक्षराणि ज्ञेयत्वेनास्य। अक्षरज्ञानशून्ये मूर्खे त्रि०।

अनक्षि पु० अप्रशस्तं मन्दमक्षि न०त०। मन्दनेत्रे। ब०। षच्समासान्तः। तत्र अनक्ष इत्येव। तद्वति। स्त्रियां ङीष्।

अनगार त्रि०नास्ति अगारमस्य। गृहशून्ये। अनिकेतने। प्रव्रजिते, सन्यासी च पु०।

अनग्न त्रि० न नग्नः। अदिगम्बरे आच्छादनवति च "यज्ञोनवसना अनग्ना" इति ऋ० १,१,६,। "स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको यथा वासो भवत्यनग्नो ह भवतीति छा०उ०। "तस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो भोक्ष्यमाणा भुक्तवन्तश्च आच्छाद्या विद्वांस एतत्कुर्वन्ति। किं अङ्गिर्वासस्थानीयाभिः पुरस्ताद्भोजनात्पूर्व्वंपरिष्टाच्च भोजनादूर्द्ध्वं च परिदधति परिधानं कुर्व्वन्ति सुखस्य प्राणस्य लम्भुको लम्भनशीलो वासोभवति। वाससो लब्धैव भवतीत्यर्थः। अनग्नो भवति। वाससो लम्भुकत्वेनार्थसिद्धैवानग्नता इत्यनग्नो ह भवतीत्युत्तरीयवान् भवतीत्येतत्" इति भाष्यम्।

अनग्नि पु० नास्ति अग्निः श्रौतः स्मार्त्तो वाऽस्य। श्रौतेन स्मार्त्तेन वा विधिना अनाहिताग्नौ गृहस्थभेदे, सर्व्वथा अग्निशून्ये, प्रव्रजिते च। "अनग्निरनिकेतश्च मुनिर्मूलफलाशन" इति मनुः। न०त०। अग्निभिन्ने पु०। "अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति" स्मृतिः। ७ब०। अग्निचयनरहिते यज्ञे च। "अनग्नावुत्तरवेदिम्, कात्या० २६,७,११, "अनग्नौ अग्निरहिते अनग्नि चित्ये यज्ञे, उत्तरवेदिं प्रतिगच्छतीति" तद्व्याख्या।

अनग्नित्रा न अग्निं त्रायते रक्षति असम०स०। अग्निरक्षणाकरे पापिष्ठे "अनग्नित्रा अभ्यमन्त क्षत्रीः ऋ० १,१८६,३, "अनग्नित्राः पापिष्ठाः क्षत्रियः प्रजा" इति भा०।

अनग्निदग्ध त्रि०न अग्निना दग्धः अस०स०। ब्रह्मयानकर्म्मणि अग्निसंस्कारहीने "ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः इति ऋ० १०,१५,१४, "अनग्निदग्धाः ब्रह्मयानकर्म्म न प्राप्ता" इति भा०। विप्राणां पितृभेदे "अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्देशेदिति" मनुः। वह्निना अदग्धे च।

अनघ त्रि० नास्ति अघं पापं दुःखं व्यसनं कालुष्यं वा यस्य। पापशून्ये, दुःखहीने, व्यसनशून्ये, मलशून्ये, स्वच्छे च। विष्णौ पु० "अनघो विजयो जेतेति" वि० सह०। "स आत्माऽपहतपाप्मेत्यादि" श्रुतौ तस्य पापराहित्योक्तेस्तथात्वम्। तत्र दुःखशून्ये, "दयालुमनघस्रष्टमिति" माघः। दोषरहिते "अगाधस्नानघा गुणा" इत्यमरः। व्यसनरहिते "कच्चित् सुतीनामनघा प्रसूतिः? इति" रघुः।

अनङ्ग न० नास्ति अङ्गमाकारो यस्य। आकाशे, चित्ते च। कन्दर्पे पु०। अङ्गशून्यमात्रे त्रि०। तत्राकाशस्य निरवयवत्वात्, न्यायवैशेषिकनये चित्तस्याणुत्वेन च निरवयवत्वात्तथात्वम्। कामस्य हरनेत्रेण दग्धाङ्गत्वात् अनङ्गत्वम्। तत्कथा च शिवपुराणे 'कामोधनुषि संयोज्य पुष्पबाणं तदा मुने! पार्वतीसम्मुखे स्थाणौ मोक्षकामो व्यवस्थितः। हरस्तु धैर्य्यमालम्ब्य किमेतदिति चिन्तयन्। ददर्श पृष्ठतः कामं पुष्पबाणधनुर्धरम्। विष्टब्धमन्योन्यास्याथ तृतीयनयनान् मुने!। स्फुरच्छ्रुदर्च्चिरग्निस्तु पपात मदनोपरि। क्रोधं संहर हे देव! इति यावत् वदन्ति खे। इन्द्रादिसकला देवास्तावद्भस्मीचकार तम्" इति॥ "त्वमनङ्गः कथमभवता रतिरिति" "तनुतां दुःखमनङ्ग! मोक्ष्यतीति" च कुमा०। अङ्गसुपकरणं न०त०। अङ्गभिन्ने। न०ब०। तच्छून्ये त्रि०।

अनङ्गक्रीड़ा स्त्री अनङ्गेन क्रीड़ा। कामहेतुकक्रीड़ायाम्। "अष्टावङ्गे गा द्वाभ्यस्ता यस्याः सानङ्गक्रीड़ेत्युक्तेति" (वृत्त०) उक्ते मात्रावृत्तभेदे च।

अनङ्गलेख पु० अनङ्गस्य तद्व्यङ्ग्यको लेखः। कामव्यङ्ग्यकलेखे। "अनङ्गलेखक्रिययोपयोगमिति" कुमा०।

अनङ्गशेखर पु० क्रमेण लघुगुरुनिवेशवति दण्डकभेदे, छन्दोविशेषे। यथा "लघुर्गुरुः क्रमेण यत्र बध्यते सुधीभिरिक्षया स दण्डकस्त्वनङ्गशेखरः स्मृतः" इति छन्दो०।

अनङ्गासुहृत् पु० ऐत०। शिवे तस्य तद्देहभस्मीकरणात्तथात्वम्।

अनच्छ त्रि० न अच्छः निर्म्मलः न०त०। कलुषे, अप्रसन्ने च।

अनञ्जन न० न अञ्ज्यते लिप्यते अनेन अञ्ज-अधिकरणे ल्युट् न०त०। निःसङ्गे, आकाशे, परब्रह्मणि च। "निरञ्जनं सामभिरुपैति दिव्यमिति" श्रुत्या तस्य सङ्गसम्बन्धराहित्योक्तेस्तथात्वम्। अञ्जनं दोषस्तद्रहिते नारायणे पु०। तथाभूतवस्तुमात्रे

त्रि० । कज्जलशून्ये त्रि० । "नेत्रे दूरमनञ्जने पुलकिते" सा०द० ।

अनडुज्जिह्वा स्त्री अनडुहोजिह्वेव । गोजिह्वायाम् (अनन्तमूल) । तस्या गोजिह्वाकृतिपत्रत्वात्तथात्वम् ।

अनडुह् पु० अनः शकटं वहतीति नि० । (एड़े) इति प्रसिद्धे गवि । स्त्रियां गवि ङीपि अनडुही, अनड्वाहीति च । कृच्छ्रादि० क । अनडुत्कः अनडुदासन्नदेशादौ त्रि० । ऋषिभेदे । तन्नोत्रापत्ये गर्गा० यञ् । आनडुह्यः तदपत्ये पु० स्त्री ।

अनणु पु० न अणुः । स्थूलधान्ये "अनणुषु दशमांशोऽणुष्वर्धैकादशांशः" लीला० । अणुभिन्ने स्थूले त्रि० स्त्रियां ङीप् ।

अनतिक्रम न० न०त० । अतिक्रमाभावे । [ङ्नीये ।

अनतिक्रमणीय त्रि० न०त० । अतिक्रमणीयभिन्ने अनुल्ल-

अनतिद्भुत त्रि० सर्वाणि अतिक्रमम् न भवति अति—भू—डुतच् न०त०पु० । सर्वातिक्रमेणाभूते यथार्थभूते । "ब्रह्मा ते कुन्द्र ! गिरयः क्रियन्ते अनतिद्भुता" इति ऋ० ८,९१,२, अनतिद्भुता सर्वानतिक्रमम् न भवन्ति कुन्द्रगुणव्यापकानि यथार्थभूतानीति" भा० ।

अनतिप्रश्न त्रि० अतिप्रश्नमर्हति यत् न०त० । अतिप्रश्नानर्हे वस्तुनि । "सहोवाच गार्गि ! मातिप्राक्षीः मा ते मूर्द्धा व्यपप्तदनतिप्रश्नां वै देवतामतिपृच्छसीति" बृ०उ० ।

अनतिरिक्त त्रि० न० । अधिके । "न्यायोक्ते खानधिकरणवृत्तिभिन्ने च "अनतिरिक्तवृत्तित्वमवच्छेदकत्वमिति" गदा० ।

अनतिविलम्बिता स्त्री न अतिविलम्बिता अभावार्थे न०त० । अतिविलम्बाभावे वाग्गुणभेदे च । वाग्गुणाश्च हेमचन्द्रे दर्शिताः यथा "संस्कारवत्त्वमौदार्यमुपचारपरीतता । मेघगाम्भीर्यनिर्घोषप्रतिनादविधायिता दक्षिणत्वमुपनीतरागत्वं च महार्थता । अव्याहतत्वं श्लिष्टत्वं सभयानामसम्भवः । निराकृतान्योत्तरत्वं हृदयङ्गमिताऽपि च । मिथः साकाङ्क्षता प्रस्तावौचित्यं तत्त्वनिष्ठता । अप्रकीर्णप्रकृतत्वमसंक्षाप्यान्यनिन्दिता । आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता । अमर्मवेधितौदार्यं धर्म्मार्थप्रतिबिम्बता । कारकाद्यविपर्य्यासोविभ्रमादिवियुक्तता चित्रवृत्तत्वमद्भुतत्वं तथानतिविलम्बिता अनेकजातिवैचित्र्यमारोपितविशेषता । सत्वप्रधानता वर्णपदवाक्यविविक्तता । अव्युत्पत्तिरखेदित्वमस्खलितंच्च वाग्गुणाः" इति ।

अनड्वा अव्य० न अड्वा । अनिश्चये "अनड्वा वैतद्यदिमाल्लोकानतीति" वेदः । नञ्—क्त न०त० । अपरिवृढे त्रि० ।

अनड्वापुरुष न अड्वा स्वकार्थे निश्चयो यस्य तादृशः पुरुषः । देवपितृकार्य्यविसृष्टे । "अनड्वापुरुषमीक्षते" इति का० १६,३,१३, "अनड्वापुरुषं देवपितृकार्य्ये विसृष्टमध्यर्युमिति" वेददीपः ।

अनद्य पु० न अद्यं भक्ष्यम् अप्राशस्त्ये न०त० । गौरर्षभे राजनिघ० । भक्ष्यभिन्ने त्रि० ।

अनद्यतन पु० न अद्यतनः । अद्यतनभिन्ने भूते भविष्यति च काले "अनद्यतने लङि"ति "अनद्यतने लुङिति" च पा० । अनद्यतने भूते लङः अपचत्, अनद्यतने भविष्यति लुट् पक्तेति "परोक्षानद्यतने लिडिति" पा० पपाच । तत्कालवृत्तौ त्रि० । अद्यतनश्च "अतीतायारात्रेः पश्चार्द्धेन, आगामिन्याः रात्रेः पूर्व्वार्द्धेन सहितोदिवसोऽद्यतन" इति सि०कौ० तद्भिन्नः कालः ।

अनधिकार पु० न अधिकारः अभावार्थे न०त० । अधिकाराभावे । ब० । अधिकारशून्ये ।

अनधिकारचर्चा स्त्री अनधिकारस्य चर्च्चा चिन्ता । यत्र यस्याधिकारो नास्ति तस्य तद्विषये चिन्तायाम् ।

अनधिकारिन् त्रि० न अधिकारी । अधिकारिभिन्ने ।

अनधिकृत त्रि० न अधिकृतः । अधिकृतभिन्ने ।

अनधिगत त्रि० न०त० । गतभिन्ने, प्राप्तभिन्ने, ज्ञातभिन्ने च अनधिगताबाधितार्थज्ञानत्वेन प्रमाणत्वमिति वे०प० ।

अनधिष्ठित त्रि० न अधिष्ठितः । अधिष्ठितभिन्ने ।

अनधीन त्रि० न अधीनः परस्य । स्वाधीने । संज्ञायाम् कन् । कौटतत्रे । स हि कस्यां वसन् न कस्यचित् अधीनः

अनध्यक्ष न० अध्यक्षम् अभावे न०त० । प्रत्यक्षाभावे "मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्" इति भाषा० द्रव्यप्रत्यक्षं प्रति आश्रयमहत्त्वसहकारत्वेन मनसश्च "अयौगपद्याज्ज्ञानानां तस्याणुत्वमिष्यते इत्युक्तेः अणुत्वेन ज्ञानादिप्रकारक अहंजानामीत्याद्याकारं ज्ञानं प्रत्यक्षं न स्यात् ज्ञानाश्रयत्वेन अभिमतस्य मनसो महत्त्वाभावादिति तदाशयः । ब० । अध्यक्षरहिते त्रि० ।

अनध्याय पु० अध्यायोऽध्ययनमभावार्थे न०त० । अध्ययनाभावे । न अधीयतेऽस्मिन् काले इति अधिकरणे घञ् । अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयादौ स्वातिषूक्तानध्यायकाले "अष्टकासु च संक्रान्तौ शयने बोधने हरेः । अनध्यायं प्रकुर्व्वीत तेत्याद्युक्ते काले, "निर्घाते भूमिचलने" इत्याद्याकालिकानध्यायकाले च । अनध्यायकालाश्च स्मृतौ

दर्शिताः यथा "प्रेकोचैचा द्वितीयास्ताः प्रेतपक्षे गते तु या । या तु कोजागरे याते चैत्रावल्याः परेऽपि या । चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः । पराखेताखनध्यायः पुराणैः परिकीर्त्तितः" इति राजमार्त्तण्डः । "चैत्रकृष्णद्वितीयायां तिस्रष्वेवाष्टकासु च मार्गे च फाल्गुने चैव आषाढे कार्त्तिके तथा । पक्षयोर्मासमासस्य द्वितीयां परिवर्ज्जयेदिति" भुजबलः । "मन्वादौ च युगादौ च शिष्याच्चाध्यापयेद्बुधः" । निर्णयाब्धते "रात्रौ यामद्वयादर्वाक् सप्तमी च त्रयोदशी । प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः ॥ रात्रौ नवसु नाड़ीषु चतुर्थी यदि दृश्यते । प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हित" इति ॥ निर्णयसिन्धौ प्रजापतिः । "षष्ठी च द्वादशी चैव अर्द्धरात्रोननाड़िका । प्रदोषे त्वनधीयीत तृतीया नवनाड़िका" ॥ वृद्धगर्गः । "स्मृतिपूक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम् । पक्षयोर्मासमासस्य द्वितीयां परिवर्जयेत्" इति । अनध्यायास्तु द्विविधा नित्या नैमित्तिकाश्चेति तत्र नित्याः । "आषाढ़े फाल्गुने ज्यैष्ठे या द्वितीया विधुक्षये । चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः" ॥ गर्गोऽपि ॥ "कृष्णपक्षे द्वितीयायां फाल्गुनाषाढ़कार्त्तिके । शुक्लाश्वयुग्द्वितीयायां नैवाध्ययनमाचरेत्" इति ॥ "एतायुगादयः प्रोक्ताः स्वाध्यायं वर्जयेद्बुधः" इति उशः । गौतमः । "चातुर्मास्यद्वितीयासु, मन्वादिषु युगादिषु । अष्टकासु च संक्रान्तौ शयने बोधने हरेः । अनध्यायं प्रकुर्वीत तथा सोपप्लवासु चेति" । सोपप्लवास्तु । "सिता ज्यैष्ठे द्वितीया च आश्विने दशमी तथा । चतुर्थी द्वादशी माघे एताः सोपप्लवाः स्मृता इति" गर्गोक्ताः । वृद्धमनुः "पक्षद्वये चतुर्दश्योरष्टमीद्वितीये तथा । पक्षादावपि पक्षान्ते ब्रह्म नाधीयते नरैः ॥ अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी । अमावस्योभयं हन्ति प्रतिपत् पाठमात्रतः" इति । मनुः नैमित्तिकानध्यायानाह स्म । "सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने । व्रतबन्धं न कुर्व्वीत" इति ॥ तथापस्तम्बः ॥ "उल्कायामग्न्युत्पाते च सर्वासां विद्यानामाकालिकमिति" ॥ स्मृत्यन्तरे ॥ "विद्युद्गर्जितवृष्टीनां सन्निपातोयदा भवेत् । अनध्यायं प्रकुर्व्वीतेत्यादि" । "व्रतेऽग्नि पूर्वसन्ध्यायां वारिदो यदि गर्জ্জति । तर्हि नं स्यादनध्यायं व्रतं तत्र विवर्जयेत् ॥ "सायं सन्ध्यास्तनिते, प्रातःसन्ध्यास्तनिते अहोरात्रौ, विद्युत्यपररात्रावधि विद्युति, नक्षत्रेष्वपररात्रादिति गौत० । स्मृतिरत्नावल्याम् "काम्यव्रते च तत्कालसमाप्ते च त्रिरात्रकम् । अतिमात्राधवा दृष्टिर्नाधीयीत दिनत्रयम् । अनुराधर्क्षमारभ्य त्रीड़ृक्षर्क्षेषु भास्करः । यावच्चरति चैतावत्कालं सुनयो विदुः ॥ तथा च वराहः । मार्गान्नासात् प्रभृति सुनयोव्यासवाल्मीकिगर्गाश्चैत्रं यावत् प्रवर्षणविधौ नेतिकालं वदन्ति । नाड़ीजङ्घः सुरगुरुस्तनिः प्राह दृष्टेरकालौ मासावेतावशुभफलदौ पौषमाघौ न शेषाः" । तत्राकालदृष्टौ पशुमर्त्यचरणाङ्कितायामेव दोषोनान्यथा उक्तञ्च मुहूर्त्तचिन्तामणौ "यदि माघ्यां चतुर्षु पौषमासादिषु भवेदकालदृष्टिः । पशुमर्त्यचरणाङ्कितायां यावद्वसुधा नहि तावद्दोष" इति । तत्र दिनसंख्यायुक्ता तत्रैव । एकैनैकमहः प्रोक्तं द्वितीयेन त्रिरात्रकम् । तृतीयेन तु सप्ताहं दशरात्रमतः परमिति, पौषे दिनत्रयं वर्জ्यं माघे चैव दिनद्वयम् । फाल्गुने दिनमेकन्तु चैत्रे तु घटिकाद्वय" मित्यावश्यककार्य्यविषयम् । "अनध्यायस्य पूर्व्वेद्युस्तस्य चैवापरेऽहनि । व्रतबन्धं विसर्गञ्च विद्यारम्भं न कारयेत्, इति नैमित्तिकानध्यायः । मनुरपि नित्याद्यनध्यायमाह स्म । "एतान्नित्यानध्यायानधीयानो विवर्जयेत् । अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम् ॥ कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने । एतौ वर्षासनध्यायावध्ययज्ञाः प्रचक्षते । विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे । आकालिकमनध्यायमेतेषु मनुरब्रवीत् । एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु । तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने । निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्জ্জने । एतानाकालिकान् विद्यादनध्यायान्ततावपि । प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने । सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा । नित्यानध्यायएव स्याद्ग्रामेषु नगरेषु च । धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा । अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ । अनध्यायो रुद्यमाने समवाये जनस्य च । उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্जने । उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् । प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् । तत्राहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके । यावदेकानुद्दिष्टस्य गन्धो लेपश्च तिष्ठति । विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् । श्मशानः प्रौढ़पादश्च कृत्वा चैवाग्न्युपासनम् । नाधीयीतामिषं भुक्त्वा सूतकान्नाद्यमेव च । नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः । अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च । अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी । अष्टाष्टका-

शौर्णमासौ तस्मात्ताः परिवर्जयेत् । पांशुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुवति षड्गौ च न पठेद् द्विजः । नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा । वमित्वा मैथुनं वासः आद्धिकं प्रतिगृह्य च । प्राणि वा यदि वा प्राणिं यत्किञ्चिच्छ्राद्धिकं भवेत् । तदालम्भ्याप्यनधीयानः पाण्यासो हि द्विजः स्मृतः । चौरैरुपद्रुते ग्रामे संभ्रमे चाग्निकारिते । आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च । उपाकर्मणि चोत्सर्गे त्रिरात्रं त्वपरं स्मृतम् । अष्टकासु त्वहोरात्रमूर्ध्वमासु च रात्रिषु । नाधीयीताश्वमारूढो न वृक्षं, न च हस्तिनम् । न नावं, न खरं, नोष्ट्रं, नेरिणस्थो, न यानगः । न विवादे, न कलहे, न सेनायां, न सङ्गरे । न भुक्तमात्रे, नाजीर्णे, न वमित्वा, न सूतके । अतिथिञ्चानुज्ञाप्य, मारुते वाति वा भृशम् । रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते । सामध्वनावृग्यजुषी नाधीयीत कदाचन । वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च" इति । याज्ञवल्क्यस्तु । "त्र्यहं प्रेतेऽनध्यायः शिष्यर्त्विग्बन्धुबान्धवे । उपाकर्मणि, चोत्सर्गे, स्वशाखश्रोत्रिये मृते । सन्ध्यागर्जितनिर्घात भूकम्पोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च । पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसन्धिषु भुक्त्वा वा आद्धिकं प्रतिगृह्य च । पशुमनुष्यकुक्कुरबिडालाखुसूकरैः । क्षतेऽन्तरे त्वहोरात्रं, शवपाते, त्रिधोच्छ्रये । श्वक्रोष्टुगर्दभोलूकसामवाणार्त्तनिस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वार्द्रपाणिरम्भोऽन्तरर्द्धरात्रेऽतिमारुते । पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौदुरुहेरिणरोहणे । सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुः" इति । वशिष्ठः । "तस्मानध्यायः सन्ध्यास्तमिते खुस्तत्र श्वे दिवाकीर्त्तौ नगरेषु कामं गोमयपर्य्युक्षिते परिलिखिते वा श्मशानान्ते शयानस्य आद्धिकस्य । मानवत्वात् श्लोकमुदाहरन्ति । फल्गुन्यापस्तिलान् भक्ष्यमथान्यच्छ्राद्धिकं भवेत् । प्रतिगृह्याप्यनधीयानः पाण्यासो, ब्राह्मणाः स्मृता इति ॥ धावतः पूतिगन्धिप्रस्रुतेरिणवृक्षमारूढस्य, नावि, सेनायाञ्च, भुक्त्वा चार्द्रपाणे, वाग्यच्छे, चतुर्दश्यामभावास्यायामष्टम्यामष्टकासु प्रसारितपादोपस्थस्योपाश्रितस्य गुरुसमीपे मिथुनव्यपेतायां वाससा मिथुनव्यपेतेनानिर्मुक्ते न ग्रामान्तेऽर्द्धितस्य, मूत्रितस्योच्चरितस्य, यजुषाञ्च सायंग्रहे, वाजीर्णे निर्घातभूमौ च न चन्द्रसूर्य्योपरागेषु, दिङ्नादग्रर्वतनादकस्मप्रयातेषूपलरुधिरपांशुवर्षेष्वाकालिकम् । उल्काविद्युत्सज्योतिषमपर्त्वाकालिकं वा । आचार्य्ये च प्रेते त्रिरात्रमाचार्यपुत्रशिष्यभार्य्यासहोदरात्रम् । ऋत्विग्योनिसम्बन्धेषु च" इति । शङ्खोऽप्याह । अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः । चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम् । उल्कापातं महीकम्पमशौचं ग्रामविप्लवम् । इन्द्रप्रयागं सुरतं घनसंघातनिस्वनम् । वाद्यक्रोशाहतं युद्धमनध्यायं विवर्जयेत् । नाधीयीताभियुक्तोऽपि प्रयत्नाच्च वेगतः" इति । "यद्दिनमहः क्रियते तद्दिनमनध्याय" इत्युक्तेः देवोत्सवादिदिनेऽपि अनध्याय इति केचित् तेन सारस्वतोत्सवे श्रीपञ्चमीदिवसे रथयात्रोत्सवादौ चानध्यायः । "महानवम्यां द्वादश्यां भरण्यामपि पर्वसु । तथाऽन्वष्टतीयायां शिष्याञ्चाध्यापयेद्बुधः । माघमासे तु सप्तम्यां रथाख्यायाञ्च वर्जयेदिति" हारीतः । एवं नानाऋत्युक्तेष्वेषु च येन सर्वसंग्रहस्तथाचरणीयम् ।

अनन न० अन–भावे ल्युट् । जीवने, गतौ च "प्राणनवान् प्राण" इत्यादि वे०सा० ।

अननुगत त्रि० न अनुगतः । अनुगतभिन्ने अनुगतस्य तुल्याकारप्रतीतिप्रयोजको धर्मभेदः यथा घट इति बुद्धौ घटत्वम् एवं पटत्वम् तस्य सर्वत्र एकरूपेण प्रतीयमानत्वात् । अननुगतञ्च तत्तद्व्यक्तित्वादिकं तस्य सर्वत्र प्रतीत्यभावात् । अपस्वाङ्गते, अनधीने च ।

अननुगम पु० न अनुगमः अभावार्थे न०त० । अनुगमाभावे अनुगमस्य तुल्यप्रतीतिप्रयोजकधर्मानुसरणम् एतस्य न्यायादिदर्शनेषु भूरिप्रयोगः ।

अनन्त पु० नास्ति अन्तः गुणानां यस्य ब० । "गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां जानन्ति तेनानन्तोऽयमुच्यते" इत्युक्तलक्षणे विष्णौ, अनन्त ! "संसारमहासमुद्रे मग्नान् समभ्युद्धर वासुदेव !" इति भविष्यपुरा० । "विष्णुर्वीरोऽनन्त" इति विष्णुस० । मेघे । बहुशीर्षकत्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च । अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च नास्ति यस्य । तस्मिन् परब्रह्मणि न० "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुतिः । "न व्यापित्वाद्देशतोऽन्तो नित्यत्वाद्यपि कालतः । न वस्तुतोऽपि सर्वात्मादानन्त्यं ब्रह्मणि त्रिधा । देशकाल्यवस्तूनां कल्पितत्वाच्च मायया । न देशादिकृतोऽन्तोऽस्ति

ब्रह्मानन्तं ततः स्फुटमिति" पञ्चदशी। आकाशे च। बहुविस्तारवति सिन्धुवारवृक्षे पु०। अवधिशून्ये, इयत्ता-शून्ये वस्तुमात्रे, सकले च त्रि० "अनन्तरत्नप्रभवस्य यस्येति" कुमा०। जिनभेदे पु०।

अनन्तचतुर्दशी स्त्री अनन्तस्य विष्णोराधनार्था चतुर्दशी। भाद्रपदशुक्लचतुर्दश्याम्।

अनन्तजित् अनन्तानि भूतानि जितवान् जि–क्विप्। सर्वभूत-जयिनि वासुदेवे। "सहस्रजिदनन्तजिदिति" विष्णुसह०। अनन्तान् चित्तदोषान् जयति। जिनदेवभेदे पु०।

अनन्ततीर्थङ्कृत् पु० अनन्तानि अनेकानि तीर्थानि शास्त्राणि करोति कृ–क्विप्। जैनभेदे। बहुतीर्थगन्तरि त्रि०।

अनन्ततृतीया स्त्री "नभस्ये वाथ वैशाखे मार्गशीर्षेऽथवा पुनः। शुक्लपक्षतृतीयाया"मित्युपक्रम्य पद्मपुराणे तत्त-दन्यतमतिथिषु व्रतविशेषमभिधाय "उक्तानन्ततृतीयैषा हुता-नन्तफलप्रदा" इत्यनेन परिभाषितायां भाद्रमार्गवैशाखा-न्यतममासीयशुक्लतृतीयायाम् हेमा०व्रत०। [परमेश्वरे च।

अनन्तदृष्टि पु० अनन्ता दृष्टयो नेत्राणि यस्य। इन्द्रे

अनन्तदेव पु० अनन्तो देव इव। शेषनागे, अनन्ते शेषनागे दीव्यति दिव–अच्। शेषशायिनि नारायणे।

अनन्तमूल पु०अनन्तानि मूलान्यस्य। स्वनामख्याते मूलप्रधाने वृक्षभेदे।

अनन्तर त्रि० नास्ति अन्तरं व्यवधानं यत्र। अव्यवहिते, व्यवधानञ्च द्विविधं दैशिकं कालिकञ्च। तत्र दैशिके "विष-यानन्तरो राजा भवतु"रित्यमरः। "एष ब्रह्मर्षिदेशो वै आर्य्यावर्त्तादनन्तर" इति मनुः। कालिके। "तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनमिति" कुमा०। "पितुरनन्तरसुत्तरकोशलामिति"रघुः। कालिकमपि द्विविधं पूर्व्वापरकालकृतव्यवधानभेदात् उत्तरकालकृतसङ्कोदारणे "अनन्तरोदीरितलक्ष्मभाजाविमौ"त्यत्र पूर्व्वकालावधिकृतम्। मध्यशून्ये, अवकाशशून्ये, अवधिशून्ये च। "तदेतद्ब्रह्मा-पूर्व्वमनपरमनन्तरमबाह्यमिति" श्रु यथा "सैन्धवघनोऽन-न्तरोऽबाह्य" इति च छ०उ०। अव्यवहितकाले। "पुराण-पत्रापगमादनन्तरं–लतेव सञ्जातमनोज्ञपल्लवा" इति रघुः। तत्र व्याप्तौ द्वितीया। तत्कालवृत्तिसंजन्यक्रियाविशेषणतया क्लीवत्वादि। एवमन्यत्र एवञ्च एतस्य क्लीवो-क्तिरर्वाचीनानां ग्रामादिको। एतेन अनन्तरस्याभावः अभावार्थेऽव्ययीभाव इत्याशयेन मान्तत्वकल्पनमपि तत्तदुदा-हरणेषु अनन्वयादुपेक्ष्यमेव। उक्तोदाहरणेषु "अथास्य गोदानविधेरनन्तरमिति" "अनन्तरं भर्त्तुरुपस्थितो-दयेति" च रघौ "योगाच्छान्तिरनन्तरमित्यादौ" च व्यव-धानाभावार्थकत्वे समभिव्याहृतपदार्थानां हि नान्वयः तस्य देशकालादिबोधकत्वाभावेन व्याप्त्यर्थे द्वितीयाया अप्यस-म्भवः। अतः बहुव्रीहिबलात् कालबोधकतया उक्तोदा-हरणादिषु व्याप्त्यर्थे द्वितीयेति बोध्यम्। न०त०। अन्तर-भिन्ने त्रि० तस्य अपुरि सर्व्वनामता। अनन्तरे भवः गहा०छ। अनन्तरीयः अविलम्बभवे त्रि०।

अनन्तरज पु०स्त्री अनन्तरस्याः अनन्तरवर्णायाः जायते जन–ड पुंवद्भावः। क्रमोढाजे पुत्रादौ। अनन्तरं जातः। ज्येष्ठे कनिष्ठे च भ्रातरि। तथाभूतभगिन्यां स्त्री।

अनन्तरय पु० अन्तरयति दूरीकरोति अन्तर+कृत्यर्थे णि भावे अच् अन्तरयः दूरीकरणम् अभावार्थे न०त०। अपरित्यागे। "यदुक्थो यज्ञक्रतोरनन्तरायेति" ऋ० ४,१, ६, "अनन्तरयाय अपरित्यागायेति" भा०।

अनन्तराय त्रि० नास्ति अन्तरायः प्रतिबन्धको यस्य। निष्प्र-तिबन्धके निर्विघ्ने "तायतानवानन्तरायमन्त्रेति" छ०उ०।

अनन्तराशि पु० अनन्तस्य आकाशरूपशून्यस्य राशिः। बीजगणितोक्ते शून्यभागहारात्मके परिकल्पिते राशौ।

अनन्तरूप पु० अनन्तानि रूपाण्यस्य। परमेश्वरे विष्णौ "अनन्तरूपोऽनन्तश्रीरिति" वि०स०। "इन्द्रोमायाभिः पुरुरूपईयत" इति श्रुत्या तस्य बहुरूपत्वप्रतिपादनात्तत्त्वम्।

अनन्तर्गर्भिन् अन्तर्गर्भोऽस्य अस्त्यर्थे इनि न०त०। अन्त-र्गर्भशून्ये पवित्रार्थे कुशे। "अनन्तर्गर्भिणं साग्रं कोशं द्विज-लम्भेव चेति" आ०तत्त्वे छन्दो०प०। अनन्तर्गर्भिणमन्त-र्गर्भशून्य"मिति रघुनन्दनः।

अनन्तविजय पु० अनन्तान् विजयतेऽनेन धृनिद्वारा। युधि-ष्ठिरशङ्खे "अनन्तविजयं नाम कुन्तीपुत्रोयुधिष्ठिरः" इति गीता।

अनन्तवीर्य्य पु०। ब०। जैनभेदे।

अनन्तव्रत न० अनन्तस्य व्रतस्योपासनार्थम् व्रत०। भाद्र-शुक्लचतुर्दश्यां कर्त्तव्ये स्वनामख्याते व्रते। "अनन्तव्रतमेतद्वि सर्वपापहरं शुभम्" इत्युपक्रम्य "तथा शुक्लचतुर्दश्यां भाद्रे भाद्रपदे भवेदिति" भवि० पुरा०।

अनन्तशक्ति पु० अनन्ता अपरिच्छेदा शक्तिरस्य। परमेश्वरे "पराऽस्य शक्तिर्विविधैव श्रूयते" इति श्रुतौ तस्य बहुशक्ति-श्रवणात् तथात्वम्।

अनन्तशीर्षा स्त्री अनन्तानि बहूनि शीर्षाणि यस्याः।

वासुकिपत्न्याम् । वासुकौ परमेश्वरे च पु० "सहस्रशीर्षा पुरुष" इति श्रुत्या तस्य बहुशीर्षत्वोक्तेस्तथात्वम् ।

अनन्तश्री पु० अनन्ता अपरिमिता श्रीः परा शक्तिरस्य । परमेश्वरे "पराऽस्य शक्तिर्विविधैव श्रूयते इति" श्रुत्या तस्य बहुशक्तिप्रतिपादनात्तथात्वम् ।

अनन्ता स्त्री नास्ति अन्तोऽस्याः ब० । विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पातालगरुड्याम्, पृथिव्याम्, दुरालभायां, दूर्वायां, हरितक्यां, आमलक्याम्, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां, नीलदूर्वायाम्, श्वेतदूर्वायां, शारिवोषधौ च ।

अनन्त्य न० अनन्तस्येदम् यत् । हिरण्यगर्भपदे ।

अनन्द त्रि० न नन्द्यति नन्द्–णिच्–अच् न०त० । आनन्द्यितृभिन्ने "अनन्दा, नाम ते लोका इति कठ०व० ।

अनन्न न० न०त० । अदनीयभिन्ने । "न किञ्चिदनन्नं भवति आ श्वभ्यः आ शकुनिभ्य" इति छा०उ० ।

अनन्य त्रि० न अन्यः सर्वना० । अन्यभिन्ने स्वस्मिन् "अनन्यरतिरासीन" इति मनुः अनन्यस्मिन् स्वस्मिन् रतिरनुरागोऽस्येति तदर्थः । नास्ति अन्यो यस्य उपास्यत्वेन विषयत्वेन वा । अन्यासेवके "अनन्याश्चिन्तयन्तोमामिति" अनन्यविषये च । "पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्ययेति" च गीता । अस्य नञ उत्तरत्व पदान्तरसत्त्वे असमर्थसमासाश्रयणात् तदर्थेनैवान्वयः । यथा "अनन्यदृष्टिः सवितारमैक्षतेत्यादौ" अन्यत्र दृष्ट्यभावस्य, अनन्यचेता इत्यादौ अन्यत्र चेतोऽभावस्य, अनन्यकाम इत्यादौ अन्यत्र कामाभावस्य च बोधनमेवमन्यत्र ।

अनन्यगतिक त्रि० नास्ति अन्या गतिरस्य कप् । अन्योपायरहिते तन्मात्राश्रये च । "अनन्यगतिको जने विगतपातको चातको" इत्युद्भटः ।

अनन्यज पु० नास्ति अन्यदस्मात् सर्व्वस्वस्मादनां तदात्मकत्वात् अनन्यो विष्णुः तस्मात् जायते जन–ड ५त० । कामदेवे । तस्य कृष्णात् रुक्मिण्यां जन्मेति भाग० १०स्क० "तस्याञ्च ताद्दशीमवस्थां गतायां जनस्यानन्यजेनेति" दशकु० ।

अनन्यदेव पु० न अन्यदस्मात् सर्व्वात्मकत्वात् तादृशोदेवः । परमेश्वरे विष्णौ "सर्व्वदेवमयोहरिरित्युक्तेस्तथात्वम् ।

अनन्यपूर्व्वा स्त्री न अन्यः पूर्व्वो यस्याः सा अन्यपूर्व्वा न भवति । अन्याभुक्तायां स्त्रियाम् "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यनन्यपूर्व्वैव तस्मिन्नासीद्वसुन्धरेति" रघुः ।

अनन्यभाज् त्रि० न अन्यम् अन्यां वा भजते भज–क्विप् अस० स० पुंवद्भावः । अन्यस्यान्यस्या वा सेवनाकारिणि । "भजते मामनन्यभागिति" गीताः "अनन्यभाजं पतिमाप्नुहीति" कुमा० ।

अनन्यवृत्ति त्रि० न अन्या विभिन्ना एकरूपा वृत्तिर्मनोवृत्तिरस्य । एकतानचित्ते । न अन्या वृत्तिर्जीवनोपायोऽस्य । एकमात्रजीवने त्रि० ।

अनन्यसाधारण त्रि० न अन्यस्यान्यधर्म्मस्य साधारणः सदृशः । अन्यधर्म्मासदृशे "अनन्यसाधारणमेव कर्म्मेति" कुमा० ।

अनन्वय त्रि नास्ति अन्वयो यत्र ब० । अन्वयशून्ये । शाब्दबोधे परस्परं संसर्गशून्ये अन्वयस्यान्वयशब्दे वक्ष्यते अर्थालङ्कारभेदे पु० । तल्लक्षणं यथा "उपमानोपमेयत्वे एकस्यैव त्वनन्वय" इति सा०द० । "राजीवमिव राजीवं जलं जलमिवाजनी"त्यादौ च अनन्वयात् तदलङ्कारत्वं तथा हि उपमानोपमेयभावे सादृश्यज्ञानावाश्यकत्वेन तस्य बोधने नियते तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्व रूपसादृश्यस्य भेदगर्भिततया स्वप्रतियोगिकभेदस्य स्वस्मिन्नसम्भवेनापाततोऽनन्वय एव तात्पर्य्येण तु इतरसादृश्याभावपरत्वलक्षणयान्वयस्तथा च राजीवं राजीवेतरासदृशमिति बोधात्तस्योत्कर्षो व्यज्यते । एवं "रामरावणयोर्युद्धं रामरावणयोरिवे"त्यत्रापि ।

अनप त्रि० न सन्ति आधिक्येनापो यत्र नञ्पूर्व्वकत्वेऽपि बहुव्रीहौ अच्समा० । खल्वजले पल्वलादौ ।

अनपकर्म्मन् न० अपकर्म्म अपाकरणं अभावार्थे न०त० । त्यागाभावोपलक्षिते दत्तस्य आदाने "दत्तस्यानपकर्म्म चेति" मनुः अपकर्म अपाते पातबुद्ध्या क्रोधादिना वा दत्तस्यानपकर्म, पुनर्ग्रहणम् । "ऋणस्यापकर्म चेति" स्मृतिः । अनपकर्म अपाकरणाभावः अशोधनमित्यर्थः । अनपक्रियाप्यत्र स्त्री । अपाकरणाभावे । "ऋणानामनपक्रियेति" स्मृतिः ।

अनपच्युत त्रि० अप+च्यु–भावे क्त न०ब० । विनाशरहिते "स्वर्यं सुवज्जमनपच्युतमिति" ऋ० ४,१७,४, अनपच्युतं विनाशरहितमिति" भा० ।

अनपत्य त्रि० नास्ति अपत्यं यस्य । अपत्यशून्ये । न हितमपत्यानामिति, पतनाय पतनाय हितं पत+यत् वा न०त० ततः न०त० । अपत्याहिते, पतनकारणे च "युयोत नो अनपत्यानीति ऋ० ३, ५४,१८, अनपत्यानि अपत्यानां पुत्राणामहितानि, पतनकारणं न भवत्यपत्यं तदन्यानि पतनकारणानीति" भाष्यम् ।

अनपत्रप त्रि० नास्ति अपत्रपा अन्यहेतुका लज्जा यस्य। अन्यहेतुकलज्जाहीने।

अनपभ्रंश पु० न अपभ्रंशः न०त०। अपभ्रंशभिन्ने व्याकरणप्रतिपाद्यसंस्कारवति साधुशब्दे "अनपभ्रंशता-नादिर्यद्वाभ्युदयोन्यता। व्याक्रियाव्यञ्जनोया वा जातिः कापीह साधुतेति" हरिः।

अनपाकर्म्मन् न० अपाकर्म अपाकरणम् अभावार्थे न०त०। अपाकरणाभावे क्षुण्णादेरयोधने।

अनपायिन् त्रि० न अपैति अप-इण-णिनि न०त०। निश्चले स्थिरे "अनपायिनि संश्रयद्रुमे गजभग्ने इति"कुमा०।

अनपावृत् त्रि० अपावर्त्तनमपावृत् अप+आ+वृत-भावे क्विप् न०ब०। पुनरावृत्तिशून्ये। "इत्या सृजानाः अनपावृद-र्थमिति ऋ० ६,३,५, "अनपावृत् अपावृत् अपावर्त्तनम् पुनरागमनं न भवतीति" भा०।

अनपिहित त्रि० न अपिहितमावरणं भावे क्त तन्नास्ति यस्य। आवरणशून्ये। "एष वानपिहितस्तस्यैव तदपिधानं यच्छिखेति श्रा० "अनपिहित आवरणशून्य" इति रघु०।

अनपेक्ष त्रि० न अपेक्षते अनुरुध्यते अच् न०त०। अपेक्षा-शून्ये अननुरोधिनि। "उत्सृज्य प्रमदामेतामनपेक्षो यथासुखमिति" रामा०।

अनपेत त्रि० न अपेतः बहिर्गतः अपगतो वा। अबहिर्गते अपेतभिन्ने अनुगते। "धर्मपथ्यर्थन्यायादनपेते" इति पा० "धर्म्मादनपेतम् धर्म्यमित्यादि" सि०कौ०।

अनग्न त्रि० न आग्नः वेदे ष्टु० ह्नुस्वः। आग्नभिन्ने। "अनग्न-मश्नु दुष्टरमिति" ऋ० ८, १६,३, "अनग्नं शत्रुभिरनाग्न-मिति" भा०।

अनग्नस् त्रि० नास्ति अग्नो रूपं यस्य। रूपहीने "जन्मायो अनग्नस इति" ऋ० २,३,८, "अनग्नसः कर्म्महीना" इति भाष्योक्तेः कर्म्महीने च।

अनघा पु० (चन्द्रात्)"रविवर्ज्जं द्वादशगैरनघेति" दीपिकोक्तेः योगभेदे "सच्छीलं सुखान्वितं प्रभुं ख्यातियुक्तमन-घायामिति" दीपिका।

अनभिज्ञ त्रि० न अभिजानाति। अत्रे ज्ञानशून्ये।

अनभिधेय न० न अभिधेयः। अवाच्ये।

अनभिभव पु० न अभिभवः अभावार्थे न०त०। अभिभवा-भावे पराजयाभावे।

अनभिभवनीय त्रि० न अभिभवनीयः। अपराजेये।

अनभिभूत त्रि० न अभिभूतः। अपराभूते।

अनभिमत त्रि० न अभिमतः। असम्मते, विमते च।

अनभिम्लातवर्ण त्रि० अभि+म्ला-क्त न अभिम्लातः म्लीनोवर्णो यस्य। दीप्यमाने। "सो अपां नपादनभि-म्लातवर्ण" इति ऋ०२,३५,१३ अनभिम्लातवर्णः दीप्यमान इति भा०। शिवा० अण्। आनभिम्लातः तदपत्ये पु०स्त्री।

अनभिलाष पु० न अभिलाषः अभावे न०त०। अभिलाषा-भावे। न०ब०। अभिलाषशून्ये त्रि०।

अनभिव्यक्त त्रि० न अभिव्यक्तः न०त०। अपरिस्फुटे।

अनभिशस्त त्रि० अभि+शंस-क्त न०त०। अनिन्दिते। "परास्यानभिशस्ता दिव्या" इति ऋ० ६,८८,७, "अन-भिशस्ता अनिन्दिता" इति भा०। परिवादाप्रस्ते च।

अनभिशस्त्र त्रि० अभिशस्तिं निन्दामर्हति अभिशस्यः न०त०। अनिन्दनीये प्रशस्ये निरुक्तकारः।

अनभिसंहित त्रि० न अभिसंहितः न०त०। अभि-सन्धिना फलोद्देशेन अकृते "विसृष्टिदा येऽनभिसंहिते-ष्विति" रुचि०।

अनभिहित त्रि० न अभिहितः। अनुक्ते प्रत्ययादिना उक्तार्थभिन्ने "अनभिहिते इति पा० अस्य उपकादिगणे पाठात् तत्कार्य्यम्। [वातरंहागमनमनाभिति" का०द०।

अनभीष्ट त्रि० न अभीष्टः। अभीष्टभिन्ने "अनभीष्टदक्षिण-

अनभ्यावृत्ति स्त्री न अभ्यावृत्तिः अभ्यासः अभावार्थे न० त०। अभ्यासाभावे। "मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमीति" माघः।

अनभ्यासमित्य त्रि० न अभ्यासे निकटे इत्यः इण-कर्म्मणि क्यप् तुम्। दूरतः परिहर्त्तव्ये सि० कौ०।

अनमित्र त्रि० नास्ति अमित्रोऽस्य। शत्रुशून्ये "इन्द्रोयां चक्रे आत्मने अनमित्रां शचीपतिरिति" अथ० १२,१, रूपभेदे पु०।

अनमीव त्रि० अमीवः रोगः न०ब०। रोगहीने "अनमीवा इषस्करदिति" ऋ० ३,१६२,१४, अनमीवा "रोग-वर्जितानि इषोऽकरोत्" भा० "प्रदानमीवस्य शुश्रिय" इति ता०आ०। "अरोगोऽमीवस्तद्रहितस्येति" भा०।

अनम्बर पु०नास्ति अम्बरं कक्षसहितं यस्य। बौद्धभेदेऽस्य शुक्ल-कक्षतया तथात्वम् दिगम्बरशब्देऽस्य विवरणम्। नग्ने त्रि०।

अनय पु० अयः शुभावहो विधिस्तदन्यः न०त०। अशुभ-दैवे। नयोद्यूते दक्षिणावर्त्तेन शारीणामिष्टस्थान-नयनं विरोधे न०त०। (डगडीति) ख्याते द्यूतभेदे शारीणा वामावर्त्तेनाभीष्टस्थाननयने पु०। नयोनीतिः

नी–अच् न०त०। नयाभावे अनीतौ दुर्नये, दुष्टे, कर्म्मणि च। "विजानतोऽपि ह्यनयस्य रौद्रतेति" भार०। न० ७ब०। आपदि "जीवेदेतेन राजन्यः सर्वेषामनयं गत इति" मनुः। "सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः" इति मनुः "अनयमापदमिति" कुल्लू०। ईब०। नयहीने त्रि०। [स हि रावणेन परिभूतो मृतः।

अनरण्य पु० सूर्य्यवंश्ये नृपभेदे तत्कथा रामा० उत्तराकाण्डे

अनर्काभ्युदित पु० न ईषत्, अर्कोऽभ्युदितो यस्मिन्। ईषदर्कोदयकाले। "अनर्काभ्युदिते काले माघे कृष्णचतुर्दशी-इति" यमः "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" इत्यनेनैकवाक्यत्वात् नञ ईषदर्थता।

अनर्गल त्रि० नास्ति अर्गलं प्रतिबन्धकं यस्य। अप्रतिबन्धके प्रतिबन्धकशून्ये "तुरङ्गसुतसृष्टमनर्गलं पुनरिति" रघुः।

अनर्घ त्रि० अर्घो मूल्यं न०ब०। अमूल्ये। [नाटकभेदे।

अनर्घराघव न० राघवचरितख्यापके मुरारिमिश्ररचिते

अनर्घ्य त्रि० न अर्घ्यः पूज्यो यस्य, यस्माद्वा। अन्यपूज्यशून्ये अत्यन्तपूजनीये च "अनर्घ्यमर्घेण तमद्रिनाथ" इति कुमा०।

अनर्थ पु० अर्थः प्रयोजनं विरोधे न०त०। अनिष्टे। "एकैकमप्यनर्थाय किमु तत्र चतुष्टयमिति" हितो०। "नोदनालक्षणोऽर्थो धर्म्मः" इति सूत्रे निषेधलक्षणोऽनर्थोऽधर्म इति भङ्ग्या सूचिते नरकादिसाधनत्वादनिष्टहेतावधर्म्मे च। "दातुर्भवत्यनर्थाय परत्वादातुरेव चेति" मनुः। ब०। अभीष्टरहिते विष्णौ पु० आप्तकामत्वात्तत्त्वम्। अर्थोऽभिधेयः प्रयोजनं वा नास्ति यस्य ब० कप्। अर्थरहितमात्रे त्रि०।

अनर्थक न० अर्थोऽभिधेयोऽप्राप्तस्थे न०ब० कप्समा०। समुदायार्थशून्ये प्रलापे, असम्बद्धे वाक्ये च। व्यर्थे त्रि०। "धिगिदं जीवितं लोके किमु? सार्थमनर्थकमिति"।

अनर्थलुप्त त्रि० दृष्टेनार्थेन अलुप्तः असम०स०। दृष्टार्थेनालुप्ते "अनर्थलुप्ता इति" काल्या० ६,१०,२०,।

अनर्थान्तर त० अन्योऽर्थः अर्थान्तरं मयूर०त० ततः न० त०। अभेदे, एकार्थे।

अनर्व त्रि० ऋ–व अर्वः गतिः शैथिल्यं स नास्ति यस्य। अशिथिले "त्रिनाभि चक्रमजरमनर्वमिति ऋ० १,१६४,२, "अनर्वमशिथिलमिति" भा०।

अनर्वन् त्रि० अर्व–हिंसायां कनिन् "अर्वा भ्राष्टव्य" इति श्रुतेः अर्वा सम्पन्नः न० त०। शत्रुभिन्ने। "जनोऽनर्वाणं तं परित" इति ऋ० १,१३६,५, "अनर्वाणमहेष्यमिति" भा०। अर्वा अश्वः। तच्छून्ये त्रि०। न लादेशः।

अनर्विश् त्रि० अनसा शकटेन विशति प्राप्नोति विश–क्विप् ३त० अहरा० रुः, ऋ–कर्म्मणि विच् अरं गन्तव्यं प्रति विशति विश–क्विप् वा न०त०। शकटेन काष्ठाद्याहरणाय वनप्रवेशिनि, गन्तव्यं स्थलं गन्तुमशक्ते च। "अनू द्यूनमनर्विशे पश्विषे तुराय इति" ऋ० १,१२१,७,

अनर्शराति त्रि० अनर्शाय अपापिष्ठाय रातिर्दानं यस्य। अपापिष्ठे दातरि 'अनर्शरातिं वसुदामुपस्तुहीति ऋ० ८, ६६,४, अनर्शरातिमनश्लीलदानमश्लीलं पापमिति निरुक्त०

अनर्ह न अर्हः। अयोग्ये। "तान् कृत्यकृत्ययोर्विज्ञाननर्हान् मनुरब्रवीदिति" मनुः।

अनल पु० नास्ति अलः पर्य्याप्तिर्यस्य बहुदाह्यदहनेऽपि वह्नेरभावात् न०ब०। वह्नौ, "व्यभिचार न तापकरोऽनल" इति नैषधम् अनलः नलाभावोवह्निश्च अनुपलब्धवदभावार्थे न०त०। अव्ययीभावसिद्धत्वे क्लीवता स्यात्। "अचे नलोऽयमिति तं प्रति चित्तमेकं ब्रूतेऽस्य चान्यदनलोऽवमितीदमीयमिति" "आवर्ज्जनं तमनु ते ननु साधु नाम्याहं मयानलमुदीरितमेतदत्र" इति "सैवानले सहजरागभरादिति" च नैषधम् "वयोभिः खादयन्त्यन्ये प्रच्छिपन्त्यनलेऽप्यु वेति" स्मृतिः। जठरानलश्च पित्तजातत्वात् देहस्थे पित्तधातौ च। अष्टवसुमध्ये यज्ञभे वसौ, मेदिनिः तच्च "धरोध्रुवः सोमनामा तथाऽपोऽग्निर्निलोनल" इति वसुभेदबोधकवचने नलशब्दलानलशब्दकारग्रन्थेष्वन्यैर्वोक्तं किन्तु वसूनां स्वरूपख्यापके विष्णुधर्म्मोत्तरवचने "स्रुवाज्यमालिके दक्षे वामे यज्ञिकपालभृत् सव्योर्द्वादिक्रमाद्योऽसौ नलाख्यस्तु वसुः स्मृत" इति नलनामत्वेनैव प्रतीतेर्नलएव वसुभेद इत्यवधेयम्। अनलदैवतत्वात् कृत्तिकानक्षत्रे "अनलविधिगताख्येति ज्योति०। (चिता) इति ख्याते चितके दग्धे, पु०। तस्य सर्व्वतः पर्य्याप्तत्वेऽपि पर्य्याप्तेः सीमाभावात्तत्त्वम्, (भेला) इति ख्याते भल्लातके वृक्षे च। अन–कलच्। षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे षष्टिवर्षगणनानामभेदादि वर्षशब्दे वक्ष्यते। पितृदेवभेदे 'कव्यवालोऽनलः सोमः यमश्चैवार्य्यमा तथा अग्निष्वात्ताः बर्हिषदः सोमपाः पितृदेवता' इति वायु पुरा०। अनान् प्राणान् लाति आत्मत्वेन अनलः जीवः। तद्रूपेण सर्वान्तर्यामितया स्थिते विष्णौ शब्द–गन्धे बन्धे वा न नलति न बध्यते वा अच्। गन्धशून्ये परमेश्वरे विष्णौ "अगन्धनस्य धर्म्मं रस" इति "तथा रसं नित्यमगन्धवच्चेति"

च श्रुतेस्तस्य गन्धशून्यत्वात् तथात्वम्। अल पर्य्याप्तौ अच् न०त०। अपर्य्याप्ते अपरिमिते परमेश्वरे "पवनः-पावनोऽनल" इति वि०सह०। भाष्यकृता च उक्तव्युत्पत्तिः विष्णुविषयत्वे दर्शिता।

अनलदीपन त्रि० अनलं जठरानलं पित्तधात्वग्निवर्द्धनेन दीपयति वर्द्धयति दीप-णिच्-ल्यु। जठरानलोद्दीपके "मधुरो मधुरः पाके दोषघ्नोऽनलदीपन इति" "सौगन्ध्यात् पूतिकोष्णः सौक्ष्म्याच्चानलदीपन" इति च सुश्रुतोक्ते द्रव्यभेदे। [नासिकायां लतायाम्।

अनलप्रभा स्त्री अनलस्य प्रभेव प्रभा यस्य ब०। ज्योतिष्मती-

अनलप्रिया स्त्री ६त०। स्वाहाख्यायां दक्षकन्यायाम् वह्निपत्न्याम्।

अनलि पु० अनिति अन-अच् अनः अलिर्यत्र ब० शक०। वकवृक्षे तत्पुष्पस्य बङ्गमधुमक्ष्येण तन्मधुभिर्भ्रमराणां जीवनधारणात्तथात्वम्।

अनल्प त्रि० न अल्पः। प्रचुरे भूयिष्ठे। [शून्ये त्रि०।

अनवकाश पु० न०त०। अवकाशाभावे। ब०। अवकाश

अनवगीत त्रि० अव+गै-क्त न०त०। अनिन्दिते।

अनवग्रह त्रि० नास्ति अवग्रहो यस्य। प्रतिबन्धशून्ये "अवग्रहभव्येष्वनवग्रहमुक्तेति" नैष०। न०त०। दृष्टिप्रतिबन्धाभावे।

अनवद्य त्रि० न अवद्यं निन्द्यम्। निन्द्यभिन्ने दोषशून्ये च "अनवद्यत्वणार्हिणो स्तुगागमिति" नैष०। "अनवद्यविद्योद्द्योतेनेति" दायभा०। "अनवद्योरिशादा" इति ऋ०६,६६,१०, "अनवद्योगर्हारहित" इति भा०। "अग्निः गर्भमनवद्यं युवानमिति" ऋ० १,७१,८।

अनवधान न० न अवधीयते मनः संयुज्यते कर्त्तव्यकर्म्मणि यथावस्थितं प्रवर्त्तयतेऽनेन अव+धा-करणे ल्युट् अवधानम् चित्तवृत्तिभेदः अभावे न०त०। अवधानाभावे मनःसंयोगविशेषाभावे प्रमादे, न०ब०। तद्वति त्रि०।

अनवधानता स्त्री अवधानं नास्ति यस्य तस्य भावः। प्रमादे। कर्त्तव्येऽकर्त्तव्यताबोधेन ततोनिवृत्तिः, अकर्त्तव्ये कर्त्तव्यताबोधेन तत्र प्रवृत्तिश्च प्रमादः। "कर्त्तव्याकरणं यत्नाकर्त्तव्यसाधना क्रिया। उच्यते द्वितयं तत्र प्रमादोऽनवधानतेति"।

अनवपृक्त त्रि० अव+पृच् संपर्के क्त दृडभावादि छान्दसम् न०त०। असम्पृक्ते। "अनवपृक्ता वितता वसानमिति" ऋ० १,१५२,४।

अनवभ्रव पु० अव+भ्रू-अच् न वचादेशः न०त०। अपवादवर्जिते "विजेष कृदिन्द्र एवानवभ्रवोऽस्माकमिति" ऋ० १०,८४,५।

अनवभ्र त्रि० न भ्रंशते वा०ड। अवभ्रंशशून्ये "प्रस्कण्वदेष्णा अनवभ्ररायस" इति ऋ० १,१६६,७। "अनवभ्ररायसः अनवभ्रष्टहविरादिधना" इति भा०।

अनवम त्रि० न अवमः। न्यूनताहीने श्रेष्ठे "सुधर्म्मानवमां सभामिति" रघुः।

अनवर त्रि० न अवरः। अवरभिन्ने श्रेष्ठे अजघन्ये "सोऽयमिन्द्रादनवरो वासुदेवश्च भारतेति भार०।

अनवरत त्रि० अव+रम+भावे क्त अवरतम् विरामः तन्नास्ति यस्य ब०। निरन्तरे विश्रामशून्ये।

अनवरार्ध्य त्रि० अवरस्मिन् अर्द्धे भवः यत् न०त०। उत्कृष्टे श्रेष्ठे च गौर्घभागे स्थापनीयतयास्य तत्त्वम्।

अनवलम्ब त्रि० नास्ति अवलम्बो यत्र। आलम्बनहीने। "न परं पथि पक्षपातिताऽनलम्बे किमु? मादृशेऽपि खेति" नैष०।

अनवलोभन न अवलुभ्यते पुमान् येन अव+लुभ-ल्युट् पृ० यस्य भः। गर्भसंस्कारभेदे। "उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनश्चेति" आ० गृ०।

अनवस त्रि० अव-प्रीणनादौ असच् अवसः भोजनं प्रीतिकरत्वात् न०ब०। पथ्याशनहीने "अनवसो अनभीशू" इति ऋ०६,६६,७, "अनवसः पथ्याशनरहित" इति भा०।

अनवसर त्रि० अवसरः उचितः कालः नास्ति यस्य ब०। उचितकालविहीने। "अतर्कयैश्वर्य्ये त्वयनवसरदुःस्थाकृतधिय इति महि० स्तो०। न०त०। अवसराभावे।

अनवसित त्रि० अवसितः समाप्तो निश्चितो वा न०त०। अनिश्चिते असमाप्ते च। "अनवसितान्यौ भ्नौ गुरुरन्ते-इति (वृत्त०) उक्ते छन्दोभेदे स्त्री।

अनवस्कर त्रि० अवस्क्रियते शोध्यते अव-कृ-अप् सुडागमः अवस्करो मलः स नास्ति यस्य ब०। मलहीने।

अनवस्था स्त्री अव+स्था-अङ् अवस्थितिः न०त०। अवस्थाभावे, तर्कदोषविशेषे उपपाद्यस्य समर्थनाय उपपादकस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्तिर्नास्ति तादृशतर्कस्थानवस्थादोषः तत्र च तर्को न साधुः। अधिकं तर्कशब्दे वक्ष्यते "प्रामाणिकी अनवस्था न दोषायेति" जग०। नास्ति अवस्था यस्य। अवस्थितिशून्ये त्रि०। "अशरीरं शरीरेषु अनवस्थेष्ववस्थितमिति"।

अनवस्थान न० अव+स्था–ल्युट् न०त० । अवस्थानाभावे । व० । वायौ पु० । चञ्चलमात्रे त्रि० ।

अनवस्थित त्रि० न अवस्थितः । चञ्चले, अस्थिरे "दयितास्वनवस्थितं ह्यणामिति" कुमा० । व्यभिचारवति च । "चतुर्णामपि वर्णानां नारीर्हत्वानवस्थिता" इति मनुः अनवस्थिताव्यभिचारिणीरिति कुल्लू० । व्यभिचारिण्याञ्च पत्न्यौ नितान्तावस्थानाभावात् तथात्वम् । अवस्थातु मत्तमे च "प्रस्थितं तमनवस्थितं प्रिया" इति रघुः अनवस्थितम् अवस्थातुमशक्तमिति मल्लि० । [नाभावे ।

अनवस्थिति न० न अवस्थितिः । अभावार्थे न०त० । अवस्था-

अनवक्रर त्रि० अव+कृ–कौटिल्ये अच् न०त० । अकुटिले सरले "सचेते अनवक्रमिति" ऋ० २,४१,६ । "अनवक्रमकुटिलमिति" भा० ।

अनवाप्त त्रि० न अवाप्तः । अप्राप्ते "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चनेति" गीता ।

अनवाय त्रि० अव+इण् घञ् अवायः अवयवः न०ब० । निरवयवे "अनवायं किमीदिने" इति ऋ० ७,१०४,२ ।

अनवेक्षक त्रि० न अवेक्षकः न०त० । पर्य्यालोचनाहीने सदसद्विवेकहीने । [अपेक्षाभावे ।

अनवेक्षा स्त्री न अवेक्षा अपेक्षा अभावार्थे न०त० ।

अनशन अश–ल्युट् न०त० । भक्षणाभावे, उपवासे, स च भोजनविषयनिवृत्तिरूपः व्रतभेदः अहोरात्रभोजनाभाव एव तस्य प्रयोगोपाधिता । तेन यत्किञ्चित्क्षणे अभोजनेऽपि न उपवासपदप्रयोगः । त्रिरात्रादिपदसमभिव्याहारे तु भोजनाभावमात्रपरतेति भेदः । न०ब० । भोजनशून्ये त्रि० ।

अनश्वर त्रि० न नश्वरः । अनश्वरभिन्ने, स्थायिनि, नित्ये च ।

अनस् न० अनिति प्राणयते अन–असुन् । शकटे "दूरादनसा रथेन" ऋ० २,३३,१० । अनिति जीवत्यनेन करणे ल्युट् । ओदने, ओदनस्थाने, पितरि च मातरि स्त्री । उत्तरपदस्थः अव्ययी० शरदा० टच्समा० । अध्यनसम् तत्पुरुषेऽपि संज्ञायां जातौ च टच्समा० । उपानसं महानसम् अनोऽत्र भक्तस्थानम् । "अपोषा अनसं" इति ऋ० ४,३०,१० ।

अनसूय त्रि० नास्ति असूया यस्य । परगुणेषु दोषारोपशून्ये "श्रद्दावाननसूयश्चेति" गीता "श्रद्दधानोऽनसूयश्चेति" मनुः ।

अनसूयक न असूयकः । असूयाशून्ये "यथा तथा हि सद्वृत्तमतिदुर्लभमनसूयक" इति मनुः ।

अनसूया स्त्री असु–कण्ड्वादित्वात् यक्–भावे अङ् असूया गुणेषु दोषारोपः अभावार्थे न०त० । "न गुणान् गुणिनोऽन्ति स्तौति चान्यगुणानपि । न हसेच्चान्यदोषांश्च साऽनसूया प्रकीर्त्तिते" युक्तलक्षणे असूयाभावे । "एकमेव तु शूद्रस्य प्रभुः कर्म्म समादिशत् । एतेषामेव वर्णानां शुश्रूषामनसूयया" "यत्किञ्चिदपि दातव्यं याचितेनानसूयया" इति च मनुः । अतिसुनिपत्यां च शकुन्तलासहचरीभेदे शकु० ।

अनसूयु त्रि० असु–उपतापे कण्ड्वा० यक् उ न०त० । असूयाशून्ये "इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" इतिगीता ।

अनस्तमित त्रि० न अस्तमितः गतः असम०स० । अस्तमप्राप्ते ।

अनस्थ पु० नास्ति अस्थि यस्य बा० अच्समा० । अस्थिवर्जिते अवयवे "पुरस्तादनस्य शरुरवरंबमाण" इति ऋ० ८,१,२४, अस्थि अवयवः । तच्छून्ये निरवयवे सांख्यप्रसिद्धे प्रधाने, ईश्वरमायायाञ्च "यदनस्था बिभर्त्ति" ऋ० १,१६४,४, "अनस्था निरवयवा प्रकृतिरीश्वरायत्तमायेति" भा० । समासान्ताभावे अनस्थि । अस्थिशून्ये त्रि० ।

अनस्वत् त्रि० अनः शकटमस्यास्ति मतुप् मस्य वः सान्तत्वाच्च पदत्वम् । शकटयुक्ते "अनस्वन्तः श्रव एधन्त पज्राः ऋ० १,१२६,५ ।

अनहङ्कार पु० न अहङ्कारः अभावार्थे न०त० । अहङ्काराभावे । ब० । तच्छून्ये त्रि० अहङ्कारस्याहङ्कारशब्दे वक्ष्यते ।

अनहङ्कारिन् त्रि० । अहमिति गर्वं करोति अहम्+कृणिनि । न०त० । गर्वशून्ये ।

अनहंकृत त्रि० अहमिति कृतमहङ्कारः, भावे क्त न०ब० । अहङ्कारशून्ये "शुद्ध वाग्यनहङ्कृत" इति मनुः ।

अनहङ्कृति स्त्री अहमिति क्रियते भावे क्तिन् न०त० । अहङ्कारामावे न०ब० । अहङ्कारशून्ये त्रि० ।

अनहंवादिन् त्रि० अहमिति गर्वेण न वदति वद–णिनि, गर्वरहिते "मुक्तसङ्गोऽनहंवादीति" गीता ।

अनाकार त्रि० नास्ति आकारोऽस्य । अवयवहीने आकाशादौ, ईश्वरे च ।

अनाकाल पु० आ समन्तात् अन्नादिसस्यनिःकालः आकालः न०त० । शस्यादिसस्यनकालभिन्ने दुर्भिक्षे काले ।

अनाकुल त्रि० न आकुलः न०त० । अव्यग्रे, एकाग्रे, स्थिरे, असङ्कीर्णवाक्ये च ।

अनाकृत न० नेत्यनेन कृतः नाकृतः निराकृतः न०त० ।

अनिवारिते "न वक्ता जरणा अनाक्षत" इति ऋ० १,१४१,७, "अनाक्षतः अनिवारित" इति भा० ।

अनाक्रान्ता स्त्री आक्रमितुमयोग्या सर्वतःकण्टकावृततत्वात् आ+क्रम–क्त न०त०। कण्टकावृतक्षेत्रे। आक्रान्तभिन्ने त्रि०।

अनाक्षारित न० न आक्षारितः अपक्षतः। अनपक्षते। "अनाक्षारितपूर्व्वीय" इति कात्यासं०। "अनाक्षारितोऽनपक्षत" इति प्रा०विवेकः।

अनाग त्रि० न आ सम्यगगच्छति खर्गमनेन नागः अधर्म्मः न०ब०। पापरहिते "मित्रोनो अत्वादितिरनागान्" ऋ० १०,१२,६, "अनागान् अपापान्" इति भा०।

अनागत त्रि० न आगतः। भविष्यत्कालवर्त्तौ, "क्षेयं दुःखमनागतमिति पा०सू० आगतभिन्ने च "अनागतार्त्तवे" त्यमरः "तावद्भयस्य भेतव्यं यावद्भयमनागतमिति" हितो० "अनागतादिलिङ्गेन न स्यादनुमितिस्तदेति" भाषा०।

अनागतविधातृ त्रि० अनागतस्य भविष्यतः अनिष्टस्य विधाता प्रतिविधानकर्त्ता। आगामिदुःखस्य लिङ्गद्वारानुमानेन तन्निवारणोपायानुष्ठातरि "अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्योविनश्यतीति" हितो०।

अनागताबाध अनागतः आबाधः दुःखम्। भाविदैहिकादिदुःखे। यदाचरणेन भाविदुःखानुत्पादस्तादृशा उपायाः सुश्रुते दर्शिता यथा "अथातोऽनागतावाधप्रतिषेधनीयं व्याख्यास्याम"त्युपक्रम्य। "उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता। धीमता यदनुष्ठेयं तत् सर्व्वं सम्प्रवक्ष्यते॥ तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरिणाहमृजुपर्वोपशोभितम्। अयुग्मग्रन्थि यत्नापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत्॥ कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बस्य तिक्तके श्रेष्ठः, कषाये खदिरस्तथा॥ मधूको मधुरे श्रेष्ठः, करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च॥ चूर्णेन तेजोवत्यास्य दन्तान्निर्म्लं विशोधयेत्,। एकैकं वर्षयेद्दन्तं मृदुना कूर्चकेन च॥ दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्॥ सहौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमग्न्यभिवृद्धिं सौमनस्यं करोति च॥ न खादेत्कठिनाल्लोष्टजिह्वारोगप्रसङ्गवे। अथास्यपाके श्वासे च कासक्रिमावमीषु च॥ दुर्ब्बलो जीर्णभक्तश्च मूर्च्छार्त्तो मदपीडितः। शिरोरुग्गार्त्तसृषितः श्रान्तः पानक्लमान्वितः॥ अर्दितो कर्णशूली च दन्तरोगी च मानवः,। जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्त्तमेव च॥ तन्मलापहरं शस्तं मृदु स्निग्धं दशाङ्गुलम्। सुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं सुखम्॥ दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम्। क्षीरवृक्षकषायैर्व्वा क्षीरेण च विमिश्रितैः॥ भिक्षोदकक्वाथेन तथैवामलकस्य वा। प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा॥ निलीकां मुखशोषञ्च पिड़कां व्यङ्गमेव च। रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत्॥ सुखं लघु निरीक्षेत दृढं पश्यति चक्षुषा,। मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्॥ दाहकण्डूमलघ्नञ्च दृष्टिक्लेदरुजापहम्,। अक्ष्णोरुपावहञ्चैव सहते मारुतातपौ॥ न नेत्ररोगा जायन्ते तस्मादञ्जनमाचरेत्। भुक्तवान् शिरसा स्नातः श्रान्तस्कर्दनवाहनैः॥ रात्रौ जागरितश्चापि नाञ्जयाज्जरित एव च,। कर्पूरजातिकक्कोलसयष्टिकटुकाह्वयैः॥ सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभम्। सुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्॥ कृमिदन्तखरमलजिह्वेन्द्रियविशोधनम्। प्रसेकशमनं हृद्यं गलामयविनाशनम्। पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे। रक्तपित्तश्रमश्लेष्मतृष्णामूर्च्छापरीतिनाम्॥ कृच्छ्रदुर्ब्बलमर्त्यानां न हितं चास्रशोषिणाम्,। शिरोगतांस्तथा रोगान् शिरोऽभ्यङ्गोऽपकर्षति॥ केशानां मार्द्दवं दैर्घ्यं बलत्वं स्निग्धकृष्णताम्। करोति शिरसस्तृप्तिं सुखक्रमपि चाननम्॥ सन्तर्पणं चेन्द्रियाणां शिरसः प्रतिपूरणम्। मधूकं क्षीरशुक्ला च सरलं देवदारु च। चूर्णकं पञ्चनामानं समभागानि संहरेत्। तेषां कल्ककषायाभ्यां चक्रतैलं विपाचयेत्॥ सदैव शीतलं जन्तोर्मूर्द्धि तैलं प्रदापयेत्,। रोगप्रसाधनी रोक्षा रजोजन्तुमलापहा,॥ कृमिमन्याशिरःकर्णशूलघ्नं कर्णपूरणम्,। अव्यङ्गो मार्द्दवकरः कफपातनिरोधनः॥ धातूनां पुष्टिजननो मृजावर्णबलप्रदः,। सेकः अभ्यङ्गोऽभिहतविहतानां रुजापहः। जलसिक्तश्च वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः॥ तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते। शिरास्नायुरोमभूपैर्धमनीभिश्च तर्पयन्॥ शरीरबलमाधत्ते युक्तः स्नेहोऽवगाहने। तत्र प्रकृतिसात्म्यर्त्तुदेशदोषविकारवित्॥ तैलं घृतं वा मतिमान् युञ्जाद्भ्यङ्गसेकयोः। केवलं सामदोषेषु न कथञ्चन योजयेत्॥ तरुणज्वरशीर्णी च नाभ्यङ्क्यौ कथञ्चन। तथाविरिक्तो वान्तश्च निरूढो यश्च मानवः॥

पूर्व्वयोः कृच्छ्रता व्याध्योरसाध्यत्वमथापिवा । श्लेष्माणं तदहः प्रोक्ता अग्निमान्द्यादयोगदाः ॥ सन्तर्पणसमुत्थानां रोगाणां नैव कारयेत्, । शरीरायासजननं कर्म व्यायामसंज्ञितम् ॥ तैत् कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः । शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ॥ दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा । अमक्लमपिपासोष्णशीतादीनां सहिष्णुता ॥ आरोग्यं चापि परमं व्यायामादुपजायते । न चास्ति सदृशं तेन किञ्चित् स्थौल्यापकर्षणम् ॥ न च व्यायामिनं मर्त्यं मर्दयन्त्यरयो भयात् । नचैनं सहसाक्रम्य जरा समधिरोहति ॥ स्थिरीभवति मांसञ्च व्यायामाभिरतस्य च । व्यायामजुष्टगात्रस्य पद्भ्यामुद्वर्त्तितस्य च ॥ व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव । वयोरूपगुणैर्हीनमपि कुर्य्यात् सुदर्शनम् ॥ व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् । विदग्धमविदग्धं वा निर्दोषं परिपच्यते ॥ व्यायामो हि सदा पथ्योबलिनां स्निग्धभोजिनाम् । स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥ सर्व्वेष्वृतुष्वहरहः पुरुषैरात्महितैषिभिः । बलस्यार्द्धेन कर्त्तव्यो व्यायामो हन्यतोऽन्यथा ॥ हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते । व्यायामं कुर्वतो जन्तोस्तद्बलार्द्धस्य लक्षणम् ॥ वयोबलशरीराणि देशकालाशनानि च । समीक्ष्य कुर्य्यात् व्यायाममन्यथा रोगमाप्नुयात् ॥ क्षयस्तृष्णारुचिच्छर्दिरक्तपित्तभ्रमक्लमाः । कासश्वासज्वरश्वासा अतिव्यायामसम्भवाः ॥ रक्तपित्ती क्षयः शोषी श्वासकासक्षतातुरः । भुक्तवान् स्त्रीषु च क्षीणो श्रमार्त्तश्च विवर्जयेत्" ॥ उद्वर्त्तनं वातहरं कफमेदोविलापनम् । स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ॥ शिरासुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम् । उद्वर्षणोत्सादनाभ्यां जायेयातामसंशयम्, ॥ उत्सादनाद्भवेत् स्थौल्यं विशेषात् कान्तिमद्वपुः । प्रहर्षसौभाग्यमृजालाघवादिगुणान्वितम्, ॥ उद्वर्षणन्तु विज्ञेयं कण्डूकोटानिलापहम् । जर्ब्बोः सञ्जनयत्याशु फेनकः स्थैर्य्यलाघवे कण्डूकोटानिलस्तम्भमलरोगापकृच्च सः । तैजनं त्वग्गतस्याग्नेः शिरासुखविरेचनम् ॥ उद्वर्षणन्त्विष्टिकया कण्डूकोटविनाशनम् । निद्रादाढ्यश्रमहरं स्वेदकण्डूतृषापहम् ॥ हृद्यं मलहरं श्रेष्ठं सर्वेन्द्रियविशोधनम् । तन्द्रापापोपशमनं तुष्टिदं पुंस्त्वकर्द्धनम्, ॥ रक्तप्रसादनं चापि स्नानमग्नेश्च दीपनम् । उष्णेन शिरसः स्नानं सहितञ्चक्षुषः सदा ॥ शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत् । श्लेष्मारुतकोपे तु ज्ञात्वा व्याधिबलाबलम् ॥ कामतुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत् । अतिशीताम्बुशीते च श्लेष्मारुतकोपनम् ॥ अत्युष्णतुष्णकाले च पित्तशोणितवर्द्धनम् । तज्ज्वातिसारज्वरितकर्णशूलानिलार्त्तिषु ॥ आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम्, । सौभाग्यदं वर्णकरं प्रोत्थोजोबलवर्द्धनम् ॥ खेददौर्गन्ध्यवैवर्ण्यश्रमघ्नमनुलेपनम् । स्नानं येषां निषिद्धन्तु तेषामभ्यनुलेपनम् । रजोघ्नमथ चौजस्यं सौभाग्यकरमुत्तमम्, । सुमनोऽम्बररत्नानां धारणं प्रीतिवर्द्धनम् ॥ सुखालेपाद्दृढं चक्षुःपीनगण्डं तथाननम् । अव्यङ्गपिडकं कान्तं भवत्यभ्युक्षसन्निभम्, ॥ पक्ष्मलं विशदं कान्तममलोच्चलमण्डलम् । नेत्रमञ्जनसंयोगाद्भवेच्चामलतारकम्, । यशस्यं स्वर्य्यमायुष्यं धनधान्यविवर्द्धनम् । देवतातिथिविप्राणां पूजनं गोत्रवर्द्धनम्, ॥ आहारः प्रीणनः सद्योबलस्यहेहधारकः । आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः, ॥ पादप्रक्षालनं पादमलरोगश्रमापहम् । चक्षुःप्रसादनं हृद्यं रजोघ्नं प्रीतिवर्द्धनम् ॥ निद्राकरो देहसुखश्चक्षुष्यः श्रमसूदनः । पादत्वङ्मृदुकारी च पादाभ्यङ्गः सदा हितः ॥ पादरोगहरं हृद्यं रजोघ्नं प्रीतिवर्द्धनम्, । सुखप्रचारमौजस्यं सदा पादत्रधारणम् ॥ अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत् । पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणाम्, ॥ पापोपशमनं क्षेत्रनखरोमापमार्जनम् । हर्षलाघवसौभाग्यकरमुत्साहवर्द्धनम् ॥ बाणवारं मृजावर्णतेजोबलविवर्द्धनम्, । पवित्रं क्षेत्रसुखीषं वातातपरजोऽपहम् ॥ वर्षानिलरजोघर्मक्षुदादीनां निवारणम् ॥ वर्ण्यं चक्षुष्यमौजस्यं यष्टेरं छत्रधारणम् ॥ शुनः सरीसृपव्यालविषाग्निभ्यो भयापहम्, । श्रमस्खलनदोषघ्नं स्थविरे च प्रशस्यते ॥ सत्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनम् । अवष्टम्भकरञ्चापि भयघ्नं दण्डधारणम्, ॥ आस्था वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा, । अश्रद्धा वर्णकफस्थौल्यसौकुमार्य्यविनाशनः, । अत्यश्रद्धा विपरीतोऽस्थाज्जरादौर्ब्बल्यकृच्च सः ॥ यत्तु चंक्रमणं नातिदेहपीड़ाकरं भवेत्, । तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥ श्रमानिलहरं हृद्यं पुष्टिनिद्राष्टतिप्रदम् । सुखं शय्यासनं दुःखं विपरीतगुणं मतम्, ॥ व्यालव्यजनमौजस्यं मक्षिकादीनपोहति । शोषदाहश्रमस्वेदमूर्च्छाम्लो व्यजनानिलः, ॥ प्रीतिनिद्राकरं हृद्यं कफवातश्रमापहम् । संवाहनं मांसरक्तत्वक्प्रसादकरं श्रम्, ।

प्रवातं रोक्ष्यवैवर्ण्यस्तम्भकृद्वाहपक्तिनुत्। स्वेदमूर्च्छा-पिपासान्नमप्रवातमतोऽन्यथा, ॥ सुखं वातं प्रसेवेत ग्रीष्मे शरदि मानवः। निवातं हृद्यायुष्ये सेव्यमारोग्याय च सर्वदा, । आतपः पित्ततृष्णाग्निस्वेदमूर्च्छाश्रमापहृत्, । दाढ्यवैवर्ण्यकारी च छाया चैतानयोहति, । अग्निर्वात-कफस्तम्भशीतवेपथुनाशनः । आमाभिष्यन्दजरणो रक्त-पित्तप्रदूषणः, । पुष्टिवर्णबलोत्साहमग्निदीप्तिमतन्द्रिताम्। करोति धातुसाम्यञ्च निद्राकाले निषेविता, ।

तत्रादित एव नीचनखरोष्मणा शुचिना शुक्लवाससा लघू-ष्णीषच्छत्रोपानत्केन दण्डपाणिना काले हितमितमधुरपू-र्वाभिभाषिणा बन्धुभूतेन भूतानान्तु, गुरुवद्वानुमतेन सुस-ह्यायेनानन्यमनसा खलूपचरितव्यं, तदपि न रात्रौ न केशास्थिकण्टकाम्रतुषभस्मोत्करकपालाङ्गारामेध्यस्थानव-लिभूमिषु, न विषमेन्द्रकीलचतुष्पथश्वभ्राण्डपरिष्टात्, । न राजद्विष्टपरुषैर्शून्यान्तानि वदेत् न देवब्राह्मण-पितृपरिवादांश्च। न नरेन्द्रद्विष्टोन्मत्तपतितक्षुद्रनीचाचारा-नुपासीत। दृश्यपर्वतप्रपातविषमवल्मीकदुष्टवाजिकुञ्जराद्य-धिरोहणानि परिहरेत् पूर्णनदीसङ्कटाविदितपल्वलश्वभ्रकू-पावतरणानि, भिन्नशून्यागारश्मशानविजनारण्यवासा-ग्निसंभ्रमव्यालभुजङ्ग-कीटसेवाव्यायामाघातकलहशस्त्रसन्निपा-तान्निसंभ्रमव्यालसरीसृपपक्षिसन्निकर्षांश्च ॥ नाग्निगो-गुरुब्राह्मणप्रेङ्खादम्पत्यन्तरेणाभियायात्। न शवमनु-यायात्। देवगोब्राह्मणचैत्यध्वजरोगिपतितपापकारि-णाञ्च छायां नाक्रमेत्। नास्तं गच्छत्सुखन्तं वादित्यं वीक्षेत। गायन्तीं परशस्यं वा चरन्तीं परकर्म न कर्म-चिदाचक्षीत, न चोल्कापातेन्द्रधनूंषि। नाग्निं मुखेनोप-धमेत्। नापो भूमिं वा पाणिपादेनाभिहन्यात् ॥ न वेगान् धारयेत्। न वह्निवेर्गान् श्मशानगरदेवतायतनभूशान चतुष्पथसलिलाशयपथिसन्निकृष्टानुत्सृजन्नप्रकाशं न वाय्व-ग्निसलिलसोमार्कगोगुरुप्रतिरूपम् ॥ न भूमिं विलि-खेत्। नाप्रीतसुखः सदसि जृम्भोद्गारश्वासक्षवथूनुत्-सृजेत्। न पर्यस्तिकावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्यात्। न बालकर्णनासास्रोतोदशनविवराण्यभिकृष्णी-यात्। न वीजयेत् क्रोधक्षुत्खनश्रमव्यस्तगात्राणि। न गात्र-नखवस्त्रादिनं कुर्यात्। न काष्ठलोष्टतृणादीनभिहन्या-द्विन्द्याद्वा। न प्रतिवातातपं सेवेत। न भुक्तमात्रोऽग्नि-मुपासीत, नोत्कटुकासितः। नात्युच्चासनमध्यासीत। न ग्रीवां विषमं धारयेत्। न विषमकायः क्रियां भजेत् भुञ्जीत वा। न प्रततमीक्षेत विशेषाज्ज्योतिर्भास्कर-सूक्ष्मचलभ्रान्तानि। न भारं शिरसा वहेत्। न स्वप्न-जागरणशयनासनचङ्क्रमणयानवाहनप्रधावनप्लवनप्लवन-प्रतरणहास्यभाष्यव्यवायव्यायामादीनुचितानत्यतिसेवेत ॥ उ-चितादप्यहितात् क्रमशो विरमेत् हितमनुचितमभ्यासेवेत क्रमशो न चैकान्ततः पादहीनात् ॥ नावाक्शिराः शयीत। न भिन्नपात्रे नाञ्जलिपुटेनापः पिबेत्। काले हितमित-स्निग्धमधुरप्रायमाहारं वैद्यप्रत्यवेक्षितमश्नीयात्। ग्राम-गणगणिकापणिकयत्नुगठपतितभोजनानि परिहरेत् शेषाण्यपि चानिष्टरूपरसगन्धस्पर्शयुक्तसानसान्यन्यान्येवं-गुणान्यपि वा संभूय दत्तानि तान्यपि भक्तिकाबालोप-हतानि, । नाप्रक्षालितपाणिपादो भुञ्जीत मूत्रोच्चार-पीड़ितो न सन्ध्ययोर्नोपाश्रितो नातीतकालं क्षीणमति-मात्रश्चेति न भुञ्जीतोद्धृतस्नेहम् ॥ नोदके पश्येदात्मानं, न नग्नः प्रविशेज्जलम्। न नक्तं दधि भुञ्जीत न वाप्यूषत-र्कारम् ॥ नासक्तयूषं नाक्षौद्रं नोष्णैर्नामलकैर्विना। अन्यथा कुष्ठीसर्पादिं जनयेत्। द्यूतमद्यादिसेवाप्रतिभू-साक्षित्वसमाह्वानगोष्ठीवादित्वानि न सेवेत। सजक्कतो-पानद्भ्यौ कनकमतीतवासांसि न चार्म्यैर्धृतानि धारयेत्। ब्राह्मणमग्निं गाञ्च नोच्छिष्टः स्पृशेत् ॥ भवन्ति चात्र ॥ सुखमात्रं समासेन सद्वृत्तस्यैतदीरितम्। आरोग्यमायुरर्थो वा नासद्भिः प्राप्यते नृभिः ॥ यस्मिन् यस्मिन्मृतौ ये ये दोषाः कुप्यन्ति देहिनाम्। तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ वर्षासु न पिबेत्तोयं पिबेच्छरदि मात्रया। वर्षासु चतुरो मासान्मात्रावदुदकं पिबेत् ॥ उष्णं हैमे वसन्ते च कामं शीते तु शीतलम्। शेषमन्ते च वसन्ते च सीध्वरिष्टौ पिबेन्नरः ॥ शृतशीतं पिबेत् शीते प्रावृट्-काले रसं पिबेत्। यूषं वर्षति तच्छान्ते प्रपिबेच्छीतलं जलम् ॥ खस्य एवमतोऽन्यस्तु दोषाहारमतानुगः। स्नेहं सैन्धवचूर्णेन पिप्पलीभिश्च संयुतम् ॥ पिबेदग्निविव-र्धनं न च वेगान्विधारयेत्। अग्निदीप्तिकरं नृणां रोगाणां शमनं प्रति ॥ प्रावृट्शरद्वसन्तेषु सम्यक् स्नेहादिमाचरेत्। कफे प्रच्छर्दनं, पित्ते विरेको, वस्तिरीरणे ॥ शस्यते शिशिरेऽपि सदा व्यायामो दोषनाशनः। भुक्तं विदग्धमम्लं व्यायामान्न प्रकुप्यति ॥ उत्सर्गमैथुनाहारशोधने स्यात्तु तन्मनाः। नेच्छेद्रोगभयात्राज्ञः पीड़ां वा कायमानसीम् ॥ अति-स्नेहप्रयोगाच्च रुजेदात्मानमात्मवान्। शूलकासज्वरश्वास-कार्श्यप्लीहोदरभयानि ॥ अतिव्यायाच्छ्रमयन्ति रोगाश्चा-

क्षेपकादयः । आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ॥ स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः । त्रिभिस्त्रिभिरहोभिर्हि समीयात् प्रमदां नरः ॥ सर्वेष्वृतुषु धर्म्येषु पक्षात्पक्षात् व्रजेत् बुधः । रजस्वलामकामाञ्च मलिनामप्रियां तथा ॥ वर्षीयसीं वयोदृद्धां तथा व्याधिप्रपीडिताम् । हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम् ॥ सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि । सन्ध्यायर्क्षसगम्याञ्च नोपेयात् प्रमदां नरः ॥ गोसर्गे चार्द्धरात्रे च तथामध्यन्दिनेषु च । लज्जासमावहे देशे विद्वतेऽशुद्ध एव च ॥ क्षुधितो व्यथितश्चैव क्षुब्धचित्तश्च मानवः । वातविण्मूत्रवेगी च पिपासुरतिदुर्बलः ॥ तिर्य्यग्योनावयोनौ च प्राप्तशुक्रविधारणम् । दुष्टयोनौ विसर्गन्तु बलवानपि वर्जयेत् ॥ रेतसश्चातिमात्रन्तु मूर्द्धावरणमेव च । स्थितावुत्तानशयने विशेषेणैव गर्हितम् ॥ क्रीड़ायामपि मेधावी हितार्थी परिवर्जयेत् । रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः ॥ दृष्ट्वायुस्तेजसां हानिरधर्मश्च ततो भवेत् । लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्वसु ॥ दृष्ट्वा च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः । गर्भिण्यां गर्भपीड़ा स्याद्व्याधितायां बलक्षयः ॥ हीनाङ्गीं मलिनां द्वेष्यां कामं बन्ध्यामसंशयम् । देशेऽशुद्धे च शुक्रस्य मनसश्च क्षयो भवेत् ॥ क्षुधितः क्षुब्धचित्तश्च मध्याह्ने दूषितोऽबलः । स्थितस्य हानिं शुक्रस्य वायोः कोपञ्च विन्दति ॥ अतिप्रसङ्गाद्भवति शोषः शुक्रक्षयावहः । व्याधितस्य रुजा पीड़ा मृत्युर्मूर्च्छा च जायते । प्रत्यूषस्यार्द्धरात्रे च वातपित्ते प्रकुप्यतः ॥ तिर्य्यग्योनावयोनौ च दुष्टयोनौ तथैव च । उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ॥ उच्चारिते मूत्रिते च रेतसश्च विधारणे । उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यास्तु सम्भवः ॥ सर्वं परिहरेत्तस्मादेतल्लोकहिते हितम् । शुक्रं चोपस्थितं भोक्तृ सन्तत्यर्थं कथञ्चन ॥ वयोरूपगुणोपेतां तुल्यशीलां गुणान्विताम् । अभिकामोऽभिकामान्तु दृष्टो दृष्टामलंकृताम् ॥ सेवेत प्रमदां युक्त्या वाजीकरणसंहिताः । भक्ष्याः शर्करा क्षीरं सर्पिः, रस एव च ॥ स्नानं सव्यजनं स्वप्नो व्यवायान्ते हितानि तु इति" । एतेषामन्यथाचरणे यथायथं दुःखान्युत्पद्यन्ते ।

अनागतार्त्तवा स्त्री स्त्रीपुष्पविकारभेदम् आर्त्तवम् न आगतमार्त्तवं यस्याः । स्त्रीधर्मशून्यायां नग्निकायां कन्यायाम् ।

अनाघ्रात त्रि० न आघ्रातः आघ्रातः । अनाघ्राते, "सर्वदोषानाघ्रातं प्रतिवचनमाहेति" दृ०उ०भा० ।

अनागम पु० नास्ति आगमः स्वत्वहेतुः क्रयादिर्यत्र । स्वत्वहेतुक्रयादिशून्ये "अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपीति" स्मृतिः अधिकमागमशब्दे वक्ष्यते ।

अनागस् त्रि० नास्ति आगोऽपराधः पापं वा यस्य । अपराधशून्ये पापशून्ये च "आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसीति" शकु० । "अनागसे शंसति बालचापलमिति" नैष० । "अनागसः तमदितिः कृणोतु ऋ० ४,३६,३, "अनागसं पापरहितमिति" भा० । "तवानागसो अदितये स्याम" ऋ० १,२४,२५, "अनागसः अपराधरहिताः स्यामेति" भा० ।

अनाचार पु० अप्राशस्त्येऽभावे वा न०त० । कदाचारे, आचाराभावे च । "सर्वदेशेष्वनाचारः पथि ताम्बूलचर्वणमिति" स्मृतिः । "अनाचारोद्विविधः विहितस्यानुष्ठानाभावः निषिद्धस्याचरणञ्च । तत्र आचारशब्दे वक्ष्यमाणा भावाभावरूपाः शास्त्रे कर्त्तव्यतया ये विहितास्तेषामननुष्ठानम् अनाचारः । निषिद्धशब्दे वक्ष्यमाणानि वर्জ্জनीयतया शास्त्रे यानि उक्तानि तेषामनुष्ठानमप्यनाचारः । तत्रायं विशेषः यत्र देशे परम्पराप्रसिद्धः योऽनाचारः स, अल्पदोषाधायकः यथोक्तं माधवीये बौधायनेन "पञ्चधा विप्रतिपत्तिर्दक्षिणत उर्णाविक्रयो, अनुपनीतेन भार्य्यया च सह भोजनम्, पर्य्युषितभोजनम्, मातुलपितृष्वसृदुहितृपरिणयनम्, तथोत्तरतः सीधुपानमुभयतोदद्भिर्व्यवहार" इत्यादिकमभिधाय "इतर इतरस्मिन् कुर्वन् दुष्यति देशग्रामाम्नायादिति" । "इतरोदाक्षिणात्य इतरस्मिन् उत्तरदेशे मातुलसुतादिसम्बन्धं कुर्वन् दुष्यति न स्वदेशे, तथा इतर उदीच्य इतरस्मिन् दक्षिणे देशे सीधुपानादिकं कुर्वन् दुष्यति न स्वदेशे कुतः देशग्रामाम्नायात् देशनिबन्धनत्वादाचारप्रमाण्यस्येति" माधवः । देवलः "यस्मिन् देशे न आचारः न्यायदृष्टः सुकल्पितः । स तस्मिन्नेव कर्त्तव्यो न तु देशान्तरे स्मृतः इति । यस्मिन् देशे पुरे ग्रामे विविधे नगरेऽपि वा । यो यत्र विहितो धर्म्यस्तं धर्मं न विचालयेदिति" । "देशानुशिष्टं कुलधर्मसत्यं स्वजातिधर्मं न हि संत्यजेच्चेति" स्मृत्यन्तरं दृष्ट्वातिरपि "परम्पराविरुद्धानाचारान् देशविशेषाह स्म । "उद्वृत्ते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः । मत्स्यादाश्च नराः पूर्व्वे व्यभिचाररताः स्त्रियः । उत्तरे मद्यपाश्चैव दृष्ट्वा नार्यां रजस्वला इति" एवमन्येऽनाचारा

देशभेदे परम्परागताः तत्तत्स्मृतिपूक्ता वेद्याः । ब० । आचारहीने त्रि० ।

अनाम्नात त्रि० न आम्नातः । सम्यग्ज्ञानाविषयीभूते "आम्नातं यदनाम्नातं यत्तस्मात् क्रियते मिथ" इति यजु० ।

अनातप पु० आ+तप–अच् न०त० । आतपस्य रौद्रस्याभावे, छायायां च । अनातपविशेषान्वितमिति" वैद्यकम् छायाशुष्कमिति तदर्थः । ब०। आतपशून्ये त्रि०।

अनातुर त्रि० न आतुरः । आतुरभिन्ने स्वस्थे अरोगे च "यद्देवाः धर्म्मशरणं यद्भद्रं यदनातुरमिति" ऋ०८,४७,१०, "भेजे धर्ममनातुरः" इति रघुः ।

अनात्मक त्रि० नास्ति आत्मा स्थिरः यत्र कप् । क्षणिकविज्ञानमते, स्थिरात्मशून्ये जगति च । नैरात्म्यवादे हि चेतयिता स्थिर आत्मा न स्वीक्रियते किन्तु क्षणिकविज्ञानेनैव सर्व्यव्यवहारसिद्धिरित्यतः परामिमतात्मशून्यत्वम् जगतः । विस्तरः क्षणिकविज्ञानशब्दे द्रष्टव्यः ।

अनात्मज्ञ त्रि० आत्मानं यथास्वरूपं न जानाति ज्ञा–क अस०स० । आत्मस्वरूपानभिज्ञे आत्मचेष्टितानभिज्ञे स्वपरविवेचनाशून्ये च ।

अनात्मन् पु० न आत्मा अप्राधान्ये भेदार्थे च न०त० । "अप्राप्तः प्राप्यते योऽयमत्यन्तं त्यज्यतेऽथवा । जानीयात्तमनात्मानं बुद्धान्तं वपुरादिकम्" इत्येवं प्रतिपादिते आत्मभिन्ने अपकृष्टात्मनि देहादौ "अनात्मनि देहादौ आत्मेति या बुद्धिः साऽविद्येति वे०प्र० । "देवाश्च असुराश्च उभयएवानात्मान" इति श्रुतिः "अनात्मन्यात्मबुद्धिर्या साऽविद्या परिकीर्त्तितेति" पुरा०।

अनात्मवत् त्रि० आत्माऽन्तःकरणं वश्यत्वेनास्त्यस्य मतुप् मस्य वः न०त० । अजितेन्द्रिये । "अनात्मवन्तःपशुवद्भुञ्जते येऽप्रमाणत" इति सुश्रुतम् ।

अनात्म्य न० आत्मन इदं आत्मन्+यत् आत्मम् शरीरं न०ब० । अशरीरे "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते इति तै०आ० "अनात्म्ये अशरीरे" इति भा० ।

अनाथ त्रि० नास्ति नाथः प्रभुरस्य । प्रभुहीने "किं नाथा सदनाथमिति" ऋ० १०,१०,११, । विलपन्तमनाथवदिति भार० ।

अनादर पु० आदरः गौरवहेतुका सम्मानना विरोधे न० त० । परिभवे, तिरस्कारे, अवज्ञायाम् च तेषामादरविरोधित्वात्तथात्वम् । "द्यूतेषु रागो व्यसनेष्वनादरः" नीति० । ब० । आदरशून्ये त्रि० ।

अनादि पु० आदिः कारणम् पूर्व्वकालो वा स नास्ति यस्य परमेश्वरे । नास्ति आदिः प्राथमिकोयस्मात् ५ब० । हिरण्यगर्भे पु० तस्य च "हिरण्यगर्भः समवर्त्तताग्रे" इति श्रुतौ सृष्टेः प्रागुत्पत्तुप्रत्ययत्वात् । आदिशून्ये त्रि० । "जगदादिरनादिस्त्वमिति" कुमा० । "अनादिनिधनं ब्रह्म शब्दतत्त्वं प्रचक्षते" इति हरिः । "अनादिनिधना देवी वागुत्सृष्टा स्वयम्भुवेति" पुरा० । "अनादिर्भूर्भुव इति" विष्णु स० । "अनादित्वात् निर्गुणत्वादिति" गीता ।

अनादिमत् आदिमत् कार्य्यं तल्लिङ्गः । कार्य्यभिन्ने ।

अनादिष्ट त्रि० न आदिष्टः विशेषरूपेण उपदिष्टः । विशेषरूपेणाकथिते "अस्य पापस्य, इदं प्रायश्चित्त" मित्यादिरूपेण विशेषतोऽनिर्दिष्टे प्रायश्चित्ते "उपपातकयुक्तानामनादिष्टेषु चैव हि । प्रकाशे च रहस्ये च" इति विश्वामित्रः ।

अनादृत न० आदृतम् आदरः भावे क्त अभावार्थे न०त० । आदराभावे अवज्ञायाम् । कर्म्मणि क्त न०त० । आदृताभिन्ने अवज्ञाते तिरस्कृते च त्रि० ।

अनादेय न० न आदेयः । अत्यादिषु निषिद्धतया आदानानर्हे वस्तुनि "अनादेयस्य चादानादादेयस्य च वर्जनादिति" मनुः । अप्रतिग्राह्ये च अप्रतिग्राह्यद्रव्याणि च अप्रतिग्राह्यशब्दे वक्ष्यन्ते । ["मन्त्रानादेये गायतीति' श्रुतिः ।

अनादेश पु० न आदेशः अभावे न०त० । उपदेशाभावे ।

अनाद्य त्रि० न आद्यं भक्ष्यम् । अभक्ष्ये स्मृतिनिषिद्धतया भक्षणानर्हे । "एषोऽनाद्यादनसंज्ञोक्तो व्रतानां विविधोविधिरिति" "ज्ञानाज्ञानकृतं कृत्स्नं भ्रूणहत्यानाद्यभक्षणे" इति च मनुः । अनाद्यानि च अभक्ष्यशब्दे दर्शयिष्यन्ते । आद्यशून्ये अनादौ त्रि० ।

अनाधार त्रि० नास्ति आधारो यस्य । आश्रयशून्ये "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिष्यते" (भाषा०) उक्तेः न्यायमते नित्यद्रव्यभाले, आश्रयशून्यत्वात् युक्तमनाधारत्वम् "अस्य रात्रस्य दृष्टे"त्यादि या० स्मृतेश्च अक्षरपर्य्यन्तानां सर्वेषामाधारत्वमीश्वरस्येति नाक्षरादौ अनाधारत्वं किन्तु ब्रह्मण एवेति वेदान्तिनः ।

अनाधृष्य त्रि० आ+धृष–क्त न०त० । अनभिभूते आधर्षणारहिते "देवतीरनाधृष्यः सिषासव" इति अथ० ६,२,२ ।

अनाधृष्ट त्रि० न आधृष्टः पराभूतः । अपरिभूते "मही न आयन्नाधृष्ट" इति ऋ० ७,१५, १४, । कार्य्यमनाधृष्टं रक्षसिना, ऋ० ८,२२,१८ ।

अनाधृष्य त्रि० आ+धृष–कर्म्मणि क्यप् न आधृष्यः न०त० । अनभिभवनीये "अनाधृष्यं वृषभं तुग्र्यमिन्द्रमिति" ऋ० ४, १८,१०,"तव देवैरनाधृष्यमिति" रामा० ।

अनानुद त्रि० अनुददाति अनु+दा–क न०त० पृ० दीर्घः । समानदातृशून्ये अतुल्यदातरि । "अनानुदो वृषभोदोधत" इति ऋ० २,२१,४, "प्रभूतधनदानेन अन्यः समानो दाता नास्तीति" भा० ।

अनाप्ति त्रि० आप्यते आप–कर्म्मणि क्तिन् आप्तिराप्तौ बन्धुत्व न०ब० । आप्तशून्ये । "अनाप्तिरत्ता अस्यजात्यामतिरिति" ऋ० १०,३९,६, "अनाप्तिरबन्धुरिति" भा० "अश्नातव्यो अना त्वमनाप्तिरिन्द्र" इति ऋ० ८,२१,१३।

अनाप्त त्रि० आप्तो बन्धुः यथार्थज्ञानवान्, प्राप्तस्तु न०त० । बन्धुभिन्ने, अप्राप्ते, "यस्यानाप्तः सूर्य्यस्येव ऋ०१,१००,२, "अनाप्तः परैरप्राप्तः" इति भा० । यथार्थनिश्चयवञ्चिन्ने "युग्यस्याः प्राजकोऽनाप्ते सर्वे दण्ड्याः शतं शतमिति" मनुः ।

अनाभयिन् त्रि० आबिभेति आ+भी–उणा० इनि न०त० । सम्यग्भीतभिन्ने । "अनाभयिन्नरिमा ते" ऋ०८,२,१, ।

अनाभू त्रि० आभिमुख्येन भवति आभूः स्तोता न०त० । स्तोतृभिन्ने आभिमुख्याप्राप्ते च । "इन्द्रःअथयन्नाभुव" इति ऋ० १,५१,६, ।

अनामन् न० अननमनः अनं जीवनम् अमयति रुजति अम–कनिन् । अशौरोगे । नास्ति नामाख्य नामभूते मलमासे पु० तस्य वैदिककर्म्मानर्हतयाऽनामत्वात्तत्त्वम् । नामभून्ये त्रि० अनामिकायामपि पु० शब्दरत्ना० । स्वार्थे कन् । तत्रार्थे ।

अनामय पु० अम–घञ् आमं तापं यात्यनेन या–क आमयो रोगः न०त० । रोगाभावे आरोग्ये । "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयमिति" मनुः । न०५ब० । बाह्याभ्यन्तरपीड़ानिवारके विष्णौ पु० "पुण्यकीर्त्तिरनामय" इति विष्णुस० । रोगशून्ये त्रि० । "जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयमिति" गीता ।

अनामयित्नु अम–णिच्–वा० इत्नुच् न०त० । व्यथकभिन्ने "हस्ताभ्यामनामयित्नुभ्यामिति" ऋ० १०,१३७,७, ।

अनामा स्त्री ब्रह्मणः शिरश्छेदनसाधनतया ग्रहणायोग्यत्वात् नास्ति नाम ग्रहणयोग्यं यस्याः, नास्ति अङ्गुष्ठतर्जन्यादिवत् विशेषनामास्य या मनन्तत्वात् डाप् । स्वनामप्रसिद्धायां मध्यमाकनिष्ठयोः मध्यगायामङ्गुल्याम् । स्वार्थे कन् । अनामिकायत्व । तथा हि शिवेन ब्रह्मशिरश्छिन्नमिति पुराणे प्रसिद्धम् तेन तस्या अपवित्रजातीयता अतएव तस्याः पवित्रीकरणार्थं यज्ञादौ पवित्रनामकदर्भधारणं तत्र क्रियते । "अनामिकाङ्गुष्ठता दर्भा हैत्रकानामिकयापि वा, द्वाभ्यामनामिकाभ्यां तु धार्य्यौ दर्भपवित्रकौ" इति छन्दो०प० ।

अनामृग त्रि० आमृणाति हिनस्ति आ+मृण–क न०व० । हिंसकरहिते । "अनामृणः कुविदादस्य ऋ० १,३३१, ।

अनायत्त त्रि० न आयत्तः । अवशे अनधीने । "एतावज्जन्मसाकल्यं यदनायत्तवृत्तितेति" हितो० ।

अनायन न० न आयनं चालनम् यत्र । एकान्ते हेम० एकान्तानायनमित्येकं नामेति केचित् ।

अनायास पु० आ–यस घञ् अल्पार्थे न०त० । प्रयत्नाभावे, अल्पप्रयासे, अक्लेशे च । "शरीरं पीड्यते येन शुभेनाप्यशुभेन वा । अत्यन्तं तत्र कुर्वीत अनायासः स उच्यते" अत्रि० । ब० । प्रयत्नशून्ये त्रि० । "समाप्येऽकस्मिन्नायासे कर्मणि सहायेन भवता भवितव्यमिति" भक्तु० ।

अनायासकृत न० अनायासेन अल्पप्रयत्नेन कृतं न०त० । अल्पायासेन साध्ये क्षुद्रे कार्य्ये ।

अनायुष्य न० आयुषे हितम् आयुस्+यत् न०त० । आयुरहितकरे अतिभोजनादौ । "अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम्" इति "नह्येतदृशमनायुष्यं लोके किञ्चन विद्यते यादृशं पुरुषस्यैव परदारोपसेवनमिति" च मनुः । "तत्र प्रथमदिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसामिति" सुश्रुतम् एवमन्यान्यपि बह्वनि अनायुष्याणि तत्र स्थाने स्थाने दर्शितानि । तत एव तानि बोध्यानि ।

अनारत न० आ+रम–क्त आरतं विरतिः अत्यन्ताभावे न०त० । सन्ततौ, अविरामे अविच्छेदे च । "अनारतं तेन पदेषु लक्षिता" इति भार० । ब० । तद्वति त्रि० ।

अनारभ्य अव्य० आ+रभ–ल्यप् न आरभ्य । किञ्चिदनधिकृत्येत्यर्थे । "अनारभ्याधीतत्वादिति" मीमांसा । न आरभ्यः न०त० । आरभ्यभिन्ने त्रि० । अनारभ्यत्वादिति का० १,८,३, "नैवायमारम्भणीय" इति व्याख्या ।"अनारभ्यत्वाच्चेति" इति कात्या० २०,८,२६, ।"तस्मादनारभ्योऽयमर्थ" इति व्याख्या ।

अनारभ्याधीत त्रि० न आरभ्य किञ्चित् अधीतः । किञ्चिदनधिकृत्य अधीते, येषां मन्त्राणां कर्म्मविशेषे विनियोगो नोक्तस्तेषां मन्त्राणामनारभ्याधीतत्वात् ब्रह्मयज्ञे एव विनियोग इति मीमांसायां स्थिरीकृतम् । "सामान्येन तु विनियोगो यद्यपि ब्रह्मयज्ञविशेष" इति ऋ०भा० माधवः ।

अनारम्भः पु० न आरम्भः अभावार्थे न०त०। आरम्भाभावे अनुष्ठानाभावे। "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते इति" गीता।

अनारोग्य न० न आरोग्यम्। "आरोग्याभावे। नास्ति आरोग्यं यस्मात् ब्व०। आरोग्यासाधने "अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनमिति" मनुः।

अनार्जव पु० ऋजोर्भावः आर्जवं सरलता स्वाच्छन्द्यं वा न० ७त०। रोगे। अभावार्थे अव्ययी०। ऋजुत्वाभावे अव्य०। ईव०। कुटिले त्रि०।

अनार्त्तव त्रि० ऋतुरस्य प्राप्तः ऋतु+अण् न०त०। स्वकालरूपे-ऋतौ-अनुत्पन्ने कुसुमादौ। ऋतोः स्त्रीकुसुमस्येदम् विकाशनम् आर्त्तवं तच्चास्ति यस्याः। अदृष्टरजस्कायां स्त्रियां स्त्री।

अनार्य्य पु० न आर्य्यः न०त०। आर्य्यभिन्ने असच्चरिते। "अनार्य्य इति मामार्य्या इति" रामा०। न० ७त०। आर्य्यानाम्ये देशे।

अनार्य्यक न०। न आर्य्यो यत्र देशे तत्र आर्य्यावर्त्तादिभिन्ने द्वीपान्तरादौ भवः अनार्य्य+कन्। अगरुकाष्ठे।

अनार्य्यज न०। अनार्य्ये देशे जायते जन-ड। अनार्य्यदेशजाते अगरुकाष्ठे। तद्देशजातमात्रे त्रि०।

अनार्य्यतिक्त पु० अनार्य्यप्रियस्तिक्तः शाक० त०। (चिरात) इति ख्याते भूनिम्बे वृक्षे।

अनार्ष त्रि० ऋषिजुष्टत्वादृषिर्वेदस्तत्रोक्तः आर्षः न०त०। अवैदिके वेदाप्रयुक्ते। "संवृङो शाकल्यस्येतावनार्षे" इति पा०। "अनार्षे अवैदिके" इति सि०कौ०। ऋषिणा दृष्टम् अण् आर्षम् न०त०। ऋषिणाऽदृष्टे। "अग्निओरनार्षयोर्गुरूपोत्तमयोरिति" पा०। "अनार्षयो किं? वाग्मिष्टेति" सि०कौ०।

अनालोचि(डि)त त्रि० न आलोचि (डि) तः। अविवेचिते। "अनालोचितकार्य्यस्य यागज्ञातं वाग्मिनो वृथेति" माघः अनिर्लोचितेति वा पाठः।

अनाविल त्रि० न आविलः। प्रसन्ने स्वच्छे कालुष्यरहिते।

अनाविद्ध त्रि० न आविद्धः। अबाधिते। "अनाविद्धया तन्वा त्वाजय" ऋ० ६,७५,१।

अनावृत्त त्रि० न आवृत्तः अभ्यस्तः। अपुनर्गते प्रथमगते च। "मलमासेऽप्यनावृत्तां तीर्थयात्रां विवर्जयेदिति" स्मृतिः।

अनावृत्ति स्त्री न आवृत्तिः पुनर्गमनम्। अभ्यासाभावे, आगमनाभावे च "अनावृत्तिः शब्दादिति" पा० सू०। "तत्र प्राप्तविवेकस्यानावृत्तीति" सां०सू०। ब०। तद्वति त्रि०।

अनावृष्टि स्त्री आ+वृष-क्तिन् "अभावार्थे न० त०। "अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृता" इत्युक्ते ईतिभेदे "द्वादशवार्षिक्यामनावृष्ट्यामिति" स्मृतेः।

अनाशक पु० आ सम्यक् यथेच्छम् आशः अशनम् आ+अश घञ् न०व०कप् नञ्श्नति नश-ण्वुल् न०त०वा। यथेच्छभोगशून्ये, अनश्वरे च "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसाऽनाशकेनेति" श्रुतिः। फलकामनाशून्यत्वेन, भोगाय फलाजनकत्वात् तादृशकर्मणश्च भोगेन क्षयाभावाच्च तथात्वम्।

अनाशकायन न नश्यति अनाशक आत्मा तस्यायनं प्राप्त्युपायः। आत्मज्ञानसाधने ब्रह्मचर्य्यभेदे, "अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्य्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते" इति छा०उ०।

अनाशस्त त्रि० आ+शस्तु स्तुतौ-क्त न०त०। अस्तुते। "अनाशस्त इवासि" ऋ० १,२६,१,।

अनाशिन् त्रि० न नश्यति नश-णिनि, कर्म्मफलमश्नुते अश-णिनि वा न०त०। अनश्वरे आत्मनि, ईश्वरे च, "अनाशिनोऽप्रमेयस्येति" गीता "अन्योऽनश्नन्नभिचाकशीति" श्रुतेरीश्वरस्य फलभोक्तृत्वाभावात्तथात्वम्। नाशरहिते त्रि० "नश्यतो विनिपातेनाविनिपाते त्वनाशिनौ" मनुः।

अनाशु त्रि० नञ्-उण्-अश-व्याप्तौ कर्मणि उण् वा न०त०। विनाशरहिते, अव्याप्ते च। "धन्वन् विद्धि अनाशवे" ऋ० १,१३५,६, "अनाशवः विनाशरहिताः अव्याप्ता वा इति भा०। न आशुः शीघ्रः न०त०। शिघ्रभिन्ने। "अविघ्ने चिद्यथोदधदनाशुनेति ऋ० ६,४५,२, "अनाशुना अशिघ्रगमनेनेति" भा०।

अनाश्रमिन् पु० न आश्रमी न०त०। गृहस्थाद्याश्रमशून्ये "अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विज" इति स्मृतिः।

अनाश्रय त्रि० नास्ति आश्रयो यस्य। आलम्बनरहिते।

अनाश्वस् त्रि० अश-भोजने क्वसु त्रि०। भोगशून्ये "उपेयिवाननाश्वानमूचानश्वेति" पा० "घृतजयश्वतेरनाशुष" इति भारविः।

अनाश्वास पु० अभावार्थे न०त०। आस्थाभावे विश्वासाभावे "प्रत्यक्षपूर्व्वकत्वादनुमानस्य सर्व्वत्रानाश्वासप्रसङ्गादिति" वृ०उ० भा०।

अनास् त्रि० आस्यते निरास्यते ऽोवनमनेन आ+अस-क्षेपे करणे क्विप् आः सुखं नास्ति तत् साधनत्वेनास्य । आस्य-व्यापारशब्दरहिते । "अनासोदसँ रुद्रेण" इति ऋ०५,२६, १०, "अनासः आस्यरहितानि तद्व्यापारशून्यानीति" भा०।

अनासिक त्रि० नास्ति नासिकाऽस्य । भग्ननासिके विकृत नासिके च ।

अनास्था स्त्री आ+स्था-अङ् आस्था आदरः अभावार्थे न०त० । अनादरे । "स्त्री पुमानित्यनास्थैषा दृक्तं हि महितं सतामिति" कुमा० "अनास्थया स्नूनकरप्रसारिणीमिति" नैष० । न०व० । आदररहिते त्रि० ।

अनास्थान त्रि० आस्थीयतेऽस्मिन् आ+स्था-आधारे ल्युट् आस्थानोभूप्रदेशः न०त० । आस्थानायोग्ये जलादौ । "अनारम्भणे तदवीरयेथामनास्थाने" इति ऋ०१,११६,५ । आस्थानं सभा । तच्छून्ये च ।

अनास्राव आ+स्रु-वेदे घञ् न०ब० । क्लेशरहिते । लोके तु अप् अनास्रव इति । "तेषामपि त्वसुत्तममनास्रावमरोगणमिति अथ० २,३,२ ।

अनाह पु० नह-घञ् न०त० । मलादिबन्धाभावोपलक्षिते-ऽहणीरोगे ।

अनाहत न० आ-हन-भावे क्त आहतं क्लेदो भोगो वा न० ब० । क्लेदभोगादिरहिते नवीने वस्त्रे । तन्त्रशास्त्रे प्रसिद्धे हृदयस्थिते सुषुम्णामध्यस्थे द्वादशदलपद्मे "शब्दो ब्रह्ममयः, शब्दोऽनाहतो यत्र दृश्यते अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितमित्युक्तलक्षणे । नाभिस्थं मणिपूरं चक्रं वर्णयित्वा "तदूर्द्धेऽनाहतं पद्मसुद्यदादित्यसन्निभम् । कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् । तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् । आनन्दसदनं तत्तु पुरुषाधिष्ठितं परमिति" तन्त्रसारे उक्तम् । अस्मिन् पक्षे च आहतमाघातः कण्ठताल्वाद्यभिघातः तन्नास्ति साधनत्वेनास्य तादृशः शब्दः अस्तीति अर्श आदित्वात् अच् । अनाहतशब्देन च परा, पश्यन्ती, मध्यमा, वैखरीतिप्रसिद्धानां वाग्वृत्तीनां मध्ये मध्यमा वाक् कथ्यते तस्याश्च हृदयपद्मे कण्ठादिस्थानमनाहत्यैवोत्पन्नत्वादनाहतत्वम् अधिकं मध्यमाशब्दे वक्ष्यते । ब० । आघातरहिते वस्तुमात्रे त्रि० ।

अनाहार पु० न आहारः अभावार्थे न०त० । भोजनाभावे "अनाहारेणात्मानं तव द्वारि व्यापादयिष्यामीति" हितो० । "अनाहारेण देहिन" इति पुरा० ।

अनाहार्य्य त्रि० आहार्य्यः कृत्रिमः आहरणीयश्च न०त० । अकृत्रिमे स्वाभाविके, आहरणीयभिन्ने च ।

अनाहिताग्नि पु० न आहितः अग्निर्येन । विधिना अकृताग्न्याधाने निरग्नौ द्विजभेदे । "योऽनाहिताग्निः शतगुरयज्वा तु सहस्रगु"रिति मनुः । 'अनाहिताग्निश्रुतेश्चेति' कात्या० ४,१,२६, "अनाहिताग्नेरपि पिण्डपितृयज्ञः श्रूयते" इति तद्व्याख्या सा च श्रुतिस्तत्रैव दर्शिता "अथनाहिताग्निना कार्य्य इति" "यदि स दर्शाङ्गं स्यात् अनाहिताग्ने र्दर्शपौर्णमासाभावाच्च श्रूयेतेति" तद्व्याख्या ।

अनिकेत पु० नास्ति निकेतः नियमेन निवासो यस्य ब० । नियतनिवासशून्ये परिव्राजके । "अनग्निरनिकेतः स्यान्मुनि र्मूलफलाशन" इति "अनग्निरनिकेतः स्याद्ग्राममन्नार्थ माश्रयेदिति" च मनुः "अनिकेतः स्थिरमतिरितिः" गीता अनिकेतनोऽप्युक्तार्थे ।

अनिक्षु न० न इक्षुः सादृश्ये, अप्राशस्त्ये वा न०त० । इक्षुसदृशे गुड़हेतौ (नटा) इति ख्याते काशभेदे ।

अनिगीर्ण त्रि० न निगीर्णः । अनपह्नुतभेदे, "विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिलक्षणं सारोपा स्यादिति" सा०द० । (अनिगीर्णस्य) अनपह्नुतभेदस्य (विषयस्य) आरोपविषयस्य आरोप्यमाणस्य, (अन्यस्य) आरोपाश्रयस्य तादात्म्यभेदस्तत्प्रतीतिलक्षणं तद्बोधसाधनं वृत्तिः सारोपा लक्षणेति तदर्थः यथा अश्वः श्वेतो धावतीत्यादौ श्वेतगुणवानश्वोऽनपह्नुतभेदः सन् स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते इत्यतस्तत्र सारोपा लक्षणा ।

अनिच्छा स्त्री न इच्छा अभावार्थे न०त० । इच्छाभावे "स्फुटामनिच्छां विवरीतुमुत्सुकामिति" नैष० । "चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छयेति" मनुः ।

अनित्य त्रि० न नित्यः । नश्वरे, जन्ये च । "नित्याऽनित्या च च सा द्वेधा नित्या स्यादणुलक्षणा । अनित्या तु तदन्या स्यादिति" भाषा० । "यदि नित्यमनित्येन निर्मलं मलवाहिना । यशः कायेन लभ्येतेति" हितो० "रजस्वलमनित्यञ्च भूतावासमिमं त्यजेदिति" मनुः । अस्थिरे "अनित्योविजयो यस्मात् दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेदिति" मनुः । कृताकृतप्रसङ्गि नित्यं विरोधे न०त० । कृताकृतप्रसङ्गशून्ये वैकल्पिके, "समासान्तविधेरनित्यत्वमिति" पा०भा० । यावदाश्रयमवस्थानायोग्ये, "वर्णे चानित्ये" इति पा० । अव्यवस्थिते, (यावदाश्रयमदनवस्थिते) "इह खलु द्रव्यं व्यवस्थितं न रसादयः, यथा आमे फले, ये रसादयस्ते

पक्षे न सन्ति, नित्यत्वाच्च नित्यं द्रव्यम् अनित्या गुणा यथा कल्कादिप्रविभागः, सएव सम्भूतरसगन्धो व्यापन्नरसगन्धो वा भवतीति" सुश्रुतम् अतएव "सत्वे निविशतेऽसैति पृथग्जातिषु दृश्यते । आधेयशक्रियाजन्यसोऽसत्वप्रकृतिर्गुणः" इति गुणलक्षणे गुणानामुत्पादविनाशोक्तिः । सदातनभिन्ने काले च । "अनित्यं हि स्थितिर्यस्मात्तस्मादतिथिरुच्यते" इति मनुः । अनित्यमित्यत्र व्याप्तौ, कालाधिकरणे वा द्वितीया न मान्तावयवत्वमस्य तथात्वे प्रमाणाभावात् । सदाकालवृत्तिपरत्वेऽपि धातूपस्थाप्यसाध्यक्रियाविशेषणत्वेन सञ्चारोरतिमन्दिरावलीत्यादिवत् द्वितीयेति बोध्यम् । नित्यम् मान्तमव्ययम् न०त० । केचित् ।

अनिद्रा स्त्री न निद्रा अभावार्थे न०त० । निद्राभावे "क्षुद्व्यथहृल्लौल्यमनिद्रा क्लम्भ" इति सुश्रुतम् । निद्राराहित्ये च रोगविशेष एव कारणम् । नास्ति निद्रा यस्य । निद्ररहिते आलस्यरहिते त्रि० "अनिद्रो षड्होरात्रं तपोवनमरक्षतामिति "प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिता" इति च रामा० । "अनिद्रेण अनलसेनेति" तदर्थः ।

अनिन्दित त्रि० न निन्दितः । निन्दारहिते प्रशस्ते "अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजेति" मनुः ।

अनिन्द्र त्रि० न इन्द्रोयाज्योयस्य । इन्द्रोपासनाशून्ये "मामनिन्द्राः कृणवन्नुकृथाः ऋ० ५,२,३, "अनिन्द्रा इन्द्रमयजन्त" इति भाष्यम् ।

अनिबद्ध त्रि० न निबद्धः । अनायत्ते, "अनायतो अनिबद्ध" इति ऋ० ४,१३,५ । अयितभिन्ने च ।

अनिबाध त्रि० नास्ति निबाधः संबाधा यस्य । संबाधरहिते "उरौ महाँ अनिबाधे ववर्द्ध" इति ऋ० ३,१,१२, अनिबाधे असंबाधे इति भा० ।

अनिभृत त्रि० न निभृतः न०त० । चञ्चले "भुवमनिभृतवेलेति" भा० । "वेलाश्चञ्चला" इति मल्लि० ।

अनिभृष्ट त्रि० नि+अनृष क्त नि० न०त० । अबाधिते । अनिभृष्टतविषिर्हन्त्योजसा "ऋ०२,२५,४, अनिभृष्टतविषिः अबाधितबल" इति भा० ।

अनिमक पु० अन-जीवने अच्छे च भावे वा० ङमन् "अनिमः जीवनं तेन कायति प्रकाशते कै-क । भेके । तस्य मरणेऽपि पुनरुज्जीवनात्तथात्वम् । कोकिले, भ्रमरे च तयोः मधुरशब्देन प्रकाशमानत्वात्तथात्वम् । अनिमाय जीवनाय कं जलं यस्य । पद्मकेशरे । अनिमाय कं सुखं यस्मात् । मधूके (महुआ) वृक्षे मेदिनिः ।

अनिमान त्रि० नि+मा-भावे ल्युट् न०ब० । परिच्छेदरहिते "स नो महाँ अनिमानो धूमकेतुः ऋ०१,२७,११ "अनिमानः अपरिच्छिन्न" इति भा० ।

अनिमित्त न० न निमित्तम् । निमित्ताभावे कारणाभावे "अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः" इति मनुः न०ब० । कारणशून्ये त्रि० ।

अनिमिष् त्रि० नि+मिष-भावे क्विप् स नास्ति यत्र । स्पन्दशून्ये दर्शने "दृभे दिवो अनिमिषा" इति ऋ०७, ६०,७, "मित्रः कृष्टीरनिमिषा" इति ऋ०३,५६,१, अनिमिषा निमिषरहितेनेति भा० ।

अनिमि(मे)ष पु०नास्ति निमि(मे)षः चक्षुःस्पन्दनं यस्य मिष षञ् कुटादि० न गुणः, मिष—स्वादि षञ्-वा, । चक्षुःस्पन्दनशून्ये देवे "सुरेषु नापश्यदवैक्षताक्षणोर्न्मिषे निमेषं निजसम्मुखे सेति" नैषधे सुराणां निमेषशून्यत्वमुक्तम् "अस्रग्रजो अनिमिषा" इति २,२७,६ संस्पन्दनो अनिमिष एकवीर इति च ऋ० १०१०३,१ । मत्स्ये च । निमिषो दृष्टिप्रतिबन्धस्तच्छून्ये विष्णौ च । 'नैमिषाऽनिमिषक्षेत्रे' इति भाग० 'अनिमिषः विष्णुः अनुन्मेषदृष्टित्वात् तस्य क्षेत्रे इति श्रीधरः । न निमिषति चलतीति नि+मिष —क न०त० । महाकाले । क्रियाशून्ये वस्तुमात्रे त्रि० । स्पन्दनशून्ये त्रि० । "यतैस्तमक्षणामनिमेषवृत्तिभिरिति" रघुः ।

अनियत त्रि० न नियतः । नियमेनैकरूपशून्ये, अनित्ये अस्थायिनि "रत्नादयोऽप्यनियते रसे खुर्व्यभिचारिण" इति सा०द० । नियतकारणात्यन्तभेदे च "रिक्तं त्रिविधं सुनयोनियतमनियतं योगजञ्चेति" ज्योति० । अनियन्त्रिते च । [उच्छृङ्खले च ।

अनियन्त्रित त्रि० नि+यन्त्र चु० क्त न०त० । अनियमिते

अनियम पु० न नियमः अभावार्थे न०त० । नियमाभावे । "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठे पादे गुरु ज्ञेयं श्लोकेष्वनियमोऽयत" इति छन्दो० ।

अनिरा स्त्री नास्ति इरा अन्नं यस्याः ५ब० । अतिदृष्टादौ देवौ । "अश्वन् विश्वा अनिरा" इति यजु० ११,४७, अनिराः अतिदृष्टाद्या इति वेददीपः । न ईरयितुं शक्यते ईर-क पृ० तृक्षः न०त० । प्रेरयितुमशक्ये । "अपत्या अस्युरनिरा" इति ऋ० ८,४८,११, 'अनिरा प्रेरयितुमशक्या" इति भा० । ७ब० । अन्नरहिते दारिद्र्ये च "युयुतमस्मद्दारिद्र्यमिति" ऋ०७,७१,२, "अनिरामस्मद्दारिद्र्यमिति" भा० ।

अनिराकरण न निराकरणमभावार्थे न०त०। निवारणाभावे "अनिराकरणात् कर्तुस्त्यागाङ्कर्मणोऽस्थितमिति" हरिः।

अनिरुक्त त्रि० अनिष्क्रान्तं उक्तमवयवार्थं निर्वक्तुमुक्तमवयवार्थो येन वा निरुक्तं निर्वचनम् न०त०। विशेषरूपेण निर्वचनशून्ये "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते" इति श्रुतेः। निर्वचनञ्च निरुक्ते यास्केन दर्शितं यथा "अथ निर्वचनम् तदेषु पदेषु स्वरसंस्कारौ समर्थौ, प्रादेशिकेन गुणेनान्वितौ स्यातां, तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्ष्येत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्याद्विर्ब्रूयात् नत्वेव न निर्ब्रूयाद्न संस्कारमादद्रियेत विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभक्तीः संनमयेत्प्रत्तमवत्तमिति धात्वादौ एव शिष्येते। अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीति, अथाप्यन्तलोपो भवति गत्वा गतमिति, अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति, अथाप्युपधाविकारो भवति राजा दण्डीति, अथापि वर्णलोपो भवति तत्त्वा यामीति अथापि द्विवर्णलोपः टृच इति, अथ व्यादिविपर्ययो भवति ज्योतिर्धनो विन्दुर्वाच्य इति अथाद्यन्तविपर्ययो भवति स्तोको रज्जुः सिकतास्तर्कु इति अथाद्यन्तव्यापत्तिर्भवति" इति॥ तथा प्रकृतिप्रत्ययानपेक्ष्यैव समुदायेन विशिष्टार्थबोधकमपि निरुक्तं यथोक्तम् ऋ० भा० माधवेन यथा "प्रकृतिप्रत्ययार्थमनपेक्ष्य विशिष्टैकार्थबोधकं पदं निरुक्तमिति"। अनिर्दिष्टे "अनिरुक्तप्रातःसवनः प्रथम" इति काल्या० २२,५,७, "अनिरुक्तं प्रातःसवनं यस्यासौ प्रथम" इति तद्व्याख्या।

अनिरुद्ध पु० न केनापि युद्धेन निरुद्धः नि+रुध-क्त न०त०। कामदेवसुते, उषापतौ, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहस्थ परमेश्वरस्य कथमप्यनिषेध्यस्य अत्यन्तबलस्य चेतसोऽधिष्ठातरि अनिरुद्धाख्ये अंशे च अनिरुद्धः सुरानन्द" इति विष्णु० स०। "न केनापि प्रादुर्भावेषु निरुध्यते" इति भा० 'अनिरुद्धोऽप्रतिरथ" इति विष्णु सह०। "चतुर्षु व्यूहेष्वनिरुद्ध" इति भा० "संकर्षणोवासुदेवः प्रद्युम्नश्चानिरुद्धकः। व्यूहस्तुर्विधो ज्ञेयः सूक्ष्मं सम्पूर्णषड्गुणमिति" रामा० दर्श०। विवरणं रामानुजशब्दे वक्ष्यते। अप्रतिरुद्धे त्रि०।

अनिरुद्धपथ न० न निरुद्धः पन्था यत्र ब०। आकाशे तत्र हि कस्यापि गतिरोधनाभावः। रुद्धवर्त्मभिन्ने त्रि०।

अनिरुद्धभाविनी स्त्री ईत०। उषायां बाणकन्यायां तस्यास्तत्पतिभवनकथा च उषापतिशब्दे दृश्या।

अनिर्ज्ञात त्रि० न निर्ज्ञातः निश्चितो प्राप्तो वा। अप्राप्ते, अनिश्चिते च "क्रिया हि अनिर्ज्ञातकालादिक्रियायाः परिच्छेदकत्वात् लक्षणं भवतीति" प्रौ० मनो०। अनिर्ज्ञातप्रार्थ्यं प्रतीक्षणं प्रतीक्षेति कठ०ड०भा०। प्राप्तं हि यथा स्वरूपं ज्ञातुं शक्यते नाप्राप्तमित्यतोऽप्राप्तस्यानिर्ज्ञातत्वम्। [धारणाभावे।

अनिर्णेय न निर्णयः अभावे न०त०। निश्चयाभावे अव-

अनिर्दश त्रि० न निर्गतानि दश दिनानि यस्य ब०स०। अनपगतदशाहे। "उद्यात्तं सूतिकात्तञ्च पर्य्याचान्तमनिर्दशमिति" अनिर्दशञ्च प्रेतान्नमिति, "तावत् स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशमिति" "विगतं तु विदेशस्थं श्रुत्वाद्यो ह्यनिर्दशमिति" "अनिर्दशायाः गोःक्षीरमौष्ट्रमेकयर्क्षं तथेति च" मनुः। अनिर्दशाहमप्यत्र त्रि०। "अनिर्दशाहां गां सूतामिति" मनुः।

अनिर्देश्य त्रि० न निर्देश्यं जातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यम् निर्+दिश्-शक्यार्थे ण्यत् न०त०। निर्विशेषे निर्धर्मके परमात्मनि तस्य जातिगुणाद्यभावेन "इदं तदिति" निर्देशायोग्यत्वात्तत्त्वम्। "यत्तत् सूक्ष्ममनिर्देश्यमिति" श्रुतिः। "ब्रह्मन्! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तय" इति भाग० १०म स्कन्ध०। अनिर्देश्यवपु श्रीमानिति विष्णु स०। "इदं तदिति निर्देष्टुं यच्च शक्यते परस्मै, स्वयं वेद्यत्वादिति" भाष्यम्। [स्थिते।

अनिर्द्धारित त्रि० न निर्द्धारितः। अवधारितभिन्ने अनि-

अनिर्माल्या स्त्री निर्-मल-ण्यत् न०त०। पृक्कानामकौषधौ शब्दरत्ना०।

अनिर्वचनीय पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनम्। एवंरूपतया निर्वक्तुमशक्ये परमात्मनि। सत्त्वासत्त्वाभ्यामेकतररूपेण निर्वक्तुमशक्ये वेदान्तिमते जगति, अज्ञाने च न०। "अज्ञानञ्च सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति" वे०सा०।

अनिर्वचनीयसर्वस्व न० अनिर्वचनीयं सर्वस्वं यस्य। श्रीहर्षप्रणीते खण्डनखण्डखाद्यापरपर्य्याये ग्रन्थभेदे तत्र हि सर्व्वेषां पदार्थानामिदन्नया निर्वक्तुमशक्यता व्यवस्थिता।

अनिर्वृति स्त्री न निर्वृतिः स्वाच्छन्द्यभावार्थे न०त०। स्वाच्छन्द्याभावे तद्रूपोपलक्षिते दारिद्र्ये च "अनिर्वृति-

निशाचरी मम मट्टान्तरालं गते" व्युत्पटः । ब० । तद्वति त्रि० ।

अनिर्वेद पु० न निर्वेदः अभावार्थे न० त० । निर्वेदाभावे वैराग्याभावे अवैराग्ये, असन्तोषे च "अनिर्वेदः श्रियोमूलमनिर्वेदमयं सुखम् "अनिर्वेदो हि सततं सर्वार्थेष्वनुवर्त्तते" इति रामा० ।

अनिल पु० अनित्यनेन अन—इलच् । वायौ, तेनैव सर्वेषां प्राणधारणात्तत्त्वम् । "तप्तलक्ष्मं चरन् विप्रो जलक्षीरहृतानिलान्"इति सोमाग्न्यर्कानिलेन्द्राणां वित्ताग्न्योर्यमस्य चेति" मनुः । "स सखा दीप इवानिलाहृत" इति कुमा० । अनिलश्च मायासहकृतेन ब्रह्मणा वियदुत्पाद्य तद्रूपाविष्टेन ततोदृश्यांशत उत्पादितः द्रव्यभेदः "तस्मादेतस्माद्वा आत्मन आकाशः संभूतः आकाशात् वायुः वायोरग्निरित्यादिश्रुतिः, स च स्वाभाविकशोषस्पर्शगतिवेगाख्यगुणवान् वियत उत्पन्नत्वात् शब्दगुणवांश्च । यथोक्तं पञ्चदश्यां "माया सत्त्वैकदेशस्था यथा तत्रैकदेशगम् । वियत्, तत्राप्येकदेशगतो वायुः प्रकल्पितः । शोषस्पर्शगतिर्वेगो वायुधर्मा इमे मताः । त्रयः स्वभावात् सन्मायाव्योम्नां ये तेऽपि वायुगाः । वायुरस्तीति सद्भावः, ततोवायो पृथक्कृते । निस्तत्त्वरूपो मायायाः स्वभावो वियतोध्वनिरिति "पुराणोक्तं तारतम्यं दशांशे भूतपञ्चके" इति च । तदाविष्टेनैव ब्रह्मणा वह्निरुत्पादित इति वेदान्तिमतम् सांख्यमते सतु स्पर्शतन्मात्रादुत्पन्नः । वैशेषिकमते तु स्पर्श, संख्या, परिमाण, पृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुणकोऽनिलः ईश्वरादेव अदृष्टवशादुत्पद्यते इति भेदः स च स्थूलः सूक्ष्मश्च । तत्र स्थूलः सप्तविधः सप्तस्कन्धाश्रितः यथोक्तं विद्वान्शिरमणौ "भूवायुरावह इह प्रवहस्तदूर्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च । अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्मात्वाह्यः परावह इमे पवनाः प्रसिद्धाः । भूमेर्बहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम् । तदूर्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्त्वस्य तु मध्यसंस्था । नक्षत्रचक्रा खचरैः समेतो यस्मादतस्तेन समाहृतोऽयम् । भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन इति" । भूवायौ विद्युदादय उत्पद्यन्ते इत्युक्तम् तेषां स्वरूपादि तट्टीकायामुक्तं श्रीपतिवाक्येन । "निर्घातोल्काघनसुरधनुर्विद्युदन्तः क्वचायोः संदृश्यन्ते खनगरपुरीवेषपूर्वं तथान्यत्" इति । तत्र विद्युतः । "सुजलजलधिमध्ये वाडवोऽग्निः स्थितोऽस्मात् सलिलभरनिमग्नादुत्थिता धूममाला: । वियति पवनलोला: सर्वतस्ता द्रवन्ति द्युमणिकिरणतप्ता विद्युतस्तत्स्फुलिङ्गाः" । करकाः । "उद्भूतैः पांसुभिर्भूमेः प्रचण्डपवनोद्धतात् । मेघमण्डलमानीतैर्मालिन्यपरिवर्जितैः । मिश्रणाज्जलबिन्दूनां पिण्डभावो भवेदिह । दृषद्विपतन्त्येते द्रवन्ते च पुनःक्षितौ"। विद्युत्पातसंभवस्तु । "अकस्माद्विद्युतं तेजः पार्थिवांशकमिश्रितम्। वात्यावद्भ्रमदाघाते प्रतिकूलानुकूलयोः । वाय्वोस्तत् पतति प्रायो ह्रकालं प्राप्य वर्षणे । यतः प्रावृषि नैवैते पांसवः प्रसरन्ति हि । तत् त्रेधा पार्थिवं चाप्यं तैजसं, तत्तदुत्थितः । गतो निर्झरदाहैश्च भूमिस्थैरनुभूयते" । इन्द्रधनुः । "सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः, । परिवेषः । "संमूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः । नानावर्णाक्षतयस्तन्मध्ये व्योम्नि परिवेषः" । उल्का । "यासां गतिर्दिवि भवेद्गणितेन गम्यास्तास्तारकाः सकलखेचरतोऽतिदूरे । तिष्ठन्ति या अनियतोद्गतयश्च ताराश्चन्द्रादधो हि निवसन्ति तदाश्रितास्ताः । शीतांशुवज्जलमयास्तपनात् स्फुरन्ति ताश्चावहप्रबलमारुतसंधिसंस्थाः । पूर्वानिलैस्तिमितभावमुपागतेऽस्मिंस्तारा: पतन्ति कुहचिद्बहुतावशेन" । अथ रजःसंकृतिः । "वर्षान्ते निर्जला मेघा वायुना विरलीकृताः । रविद्वाष्पावशेषास्तु पतन्ति वसुधातले । धूमावयवरूपैस्तैरुत्थादन्ये गिरयो द्रुमाः । रामारामादयस्ते तु पुनरर्कांशुशोभिताः । भूवायुना विशीर्णास्तु विलीयन्ते नभस्तले । तद्रजःसंकृतिर्धेनुमक्षिणोक्षीरनाशकृत्" । संध्यारागः । "भूम्युत्थितैः रजोधूमैर्दिगन्तव्योम्नि संस्थितैः । सूर्यांशुकिरणैर्भिन्नैरारक्तमवभासते । विरलावयवं वस्तु यदुदृष्टेर्व्यवधायकम् । तेनाभ्रमरुणीभूतं दृश्यते शक्रचापवत् । संध्यारागः स विज्ञेयो दिनादौ च दिनात्यये । रात्र्यां तु निशावक्त्रे तथैवेन्दूदयेऽपि" इति । तदधिष्ठातृदेवोत्पत्तिर्मन्वन्तरभेदेन वामनपुराणादौ दर्शिता यथा "पुलस्त्य उवाच । प्रविश्य जठरं शुक्रोदैत्यमातुः पुरन्दरः । ददर्शार्भ्रुणं बालं कटिन्यस्तकरं भृशम् ॥ नैनैव गर्भं दितिजं वज्रेण शतपर्वणा । चिच्छेद सप्तधा ब्रह्मन् ! स रुरोद सुविस्वरम् । शक्रोऽपि प्राह मा मूढ! रुदस्वेति सप्तधा । इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा ॥ ते जाता मरुतो नाम देवादित्याः शतक्रतोः । मातुरेवाप्यभावेन बलवीर्यपुरस्कृताः इति ॥ "यदसौ भवता प्रोक्ता मरुतोदिति सम्भवाः । तत् केन पूर्वमासन् वै मरुन्नामेन कथ्यतामिति" नारद-

प्रश्ने पुलस्त्योक्तिः। "शृणुताम् पूर्व्वमरुतामुत्पत्तिं कथयामि ते। स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम्॥ स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः। तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः॥ यस्तत्पपातार्थ स कामचारी समं महिष्या वसुमानपुत्रया। रराम तन्व्या सह कामचारी ततोऽम्बरात् प्राच्यवतास्य शुक्रम्॥ पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम्। तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदाहृतम्॥ पीतमात्रेण शुक्रेण पार्थिवेन्द्रोभङ्गवेन च। ब्रह्मतेजोविहीनास्ता जाताः पत्यस्तपस्विनाम्॥ सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम्। तेषां रुदितशब्देन सर्व्वमापूरितं जगत्॥ अथाजगाम भगवान् ब्रह्मलोकात् पितामहः। समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः!॥ मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः। इत्येवमुक्ता देवेशो ब्रह्मा लोकपितामहः॥ तानादाय वियच्चारी मारुतानादिदेश ह। ते चासन् मरुतश्चाद्या मनोः स्वायम्भुवान्तरे"॥ स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद!। स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः॥ तस्य पुत्राभवन् सप्त सप्तार्च्चिःप्रतिमा सुने!। तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः॥ आराधयन्तो ब्राह्मणं पद्मैन्द्रमथेश्वरः। ततो विपश्चिन्नामा स सप्तखाञ्जो भवान्तरः॥ घृतनामश्चरोसुख्यां प्राह नारद! वाक्यवित्। यथा हि तपसो विघ्नं तेषां भवति सुन्दरि!॥ तथा कुरुष्व मा तेषु, सिद्धिर्भवतु वै यथा। इत्येवमुक्ता शक्रेण घृतना रूपशालिनी॥ तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः। आश्रमस्याविदूरे तु नदीमन्दोदवाहिनी॥ तस्यां स्नातुं समायाताः सर्व्वएव सहोदराः। सा तु स्नातुं सुचार्वङ्गी त्ववतीर्णा महानदीम्॥ दृष्ट्वा सप्त ऋषयः स्नातुं ततश्चक्षुभिरे सुने!। तेषाञ्च प्राच्यवत् शुक्रं, तत् पपौ जलचारिणी॥ अङ्गिनी याहुकस्यस्य महाशङ्खस्य वल्लभा। ते वै विनिष्टतपसो जग्मू राज्यन्तु पैतृकम्॥ अथो बहुतिथे काले सा याही शङ्खरूपिणी। ससुतुता महाजालैर्मत्स्यबन्धेन मानिनी॥ स तां दृष्ट्वा महाशङ्खीं स्वसस्यां मत्स्यजीवनः। निवेदयामास तदा क्रतुध्वजसुतेषु वै॥ तथाभ्येत्य महात्मानो योगिनो योगधारिणः। नीत्वा स्वमन्दिरं सर्वे पुरव्याप्यां ससुतं न्यजन्॥ ततः क्रमाच्छङ्खिनी सा सुषुवे सप्त वै शिशून्। जातमात्रेषु पुत्रेषु मोक्षभावमगान्न सा॥ अमाहत्पिटका बाला जलमध्य विचारिणः। स्नान्यार्थिनो वै रुरुदुरथाभ्यागात् पितामहः॥ मा रुदध्वमिति प्राह मरुतो नाम पुत्रकाः!। यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः॥ इत्येवमुक्त्वादाय सर्व्वांस्तान् दैवतान् प्रति। नियोज्य च मरुन्मार्गे वैराजभवनं गतः॥ एवमासंश्च मरुतो मनोः स्वारोचिषान्तरे। औत्तमे मरुतो ये च तान् शृणुष्व तपोधन!॥ औत्तमस्यान्ववाये च राजासीच्चिषधाधिपः। वसुमानिति विख्यातो वसुधा भास्करोपमः॥ तस्य पुत्रो गणस्तेजो ज्योतिष्मान् धार्म्मिकोऽभवत्। स पुत्रार्थी तपस्तेपे नदं मन्दाकिनीमनु॥ तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा। तपश्चरणयुक्तस्य बभूव परिचारिका॥ तेजोयुक्ता सुचार्व्वङ्गी दृष्ट्वा सप्तर्षिभिर्व्वने। तां तथा चारु सर्व्वाङ्गीं दृष्ट्वाथ तपसा श्रियम्। पप्रच्छुस्तपसो हेतुन्तस्यास्तर्च्चुरेव च। साऽब्रवीत्तनयार्थाय आवाभ्यां वै तपः क्रिया॥ ते चाहुर्वरदा ब्रह्मन्! जाताः सप्त महर्षयः। व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः॥ युवयो र्गुणसंयुक्ता महर्षीणां प्रसादतः। इत्येवमुक्ता जग्मुस्ते सर्व एव महर्षयः॥ सोऽपि राजर्षिरगमत् सभार्य्यो नगरं निजम्। ततो बहुतिथे काले सा राज्ञो महिषी प्रिया॥ अवाप गर्भं तन्वङ्गी तस्मात् नृपतिसत्तमात्। गुर्विण्यामथ भार्य्यायां समारासौ नराधिपः॥ सा चाभ्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता। निवारिता तदामात्यैर्न तथापि व्यतिष्ठत॥ तं समालिङ्ग्य भर्त्तारं चितायामारुरोह सा। ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने!॥ साम्भसा सुखशीतेन संसिक्ता सप्तधाऽभवत्। तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनोः॥ तामसस्यान्तरे ये च मरुतोऽभवन् पुरा। तानहं कीर्त्तयिष्यामि गोतन्तत्यकलिप्रिय!॥ तामसस्य मनोः पुत्र ऋतध्वजैं इति श्रुतः। स पुत्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा॥ अस्थीनि रोम केशांश्च स्नायुमज्जायकृद्वृक्कम्। शुक्रं च विससो राजा सुतार्थी चेति नः श्रुतम्॥ सप्तार्च्चिर्मध्याच्च ततः शुक्रपातादनन्तरम्। सा मा क्षिप स्वेत्यसरत् शब्दः सोऽपि नृपो हुतः॥ ततस्तस्माद्भुतवहात् सप्त तत्तेजसोपमाः। शिशवः समजायन्त ते रुदन्तश्च तन्मुने!॥ तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः। समागम्य निवार्य्याथ स चक्रे मरुतः सुतान्॥ ते त्वासन्मरुतो ब्रह्मँ स्तामसे देवतागणाः। येऽभवन्नैवते तांश्च शृणुष्व त्वं तपोधन!॥ रैवतस्यान्ववाये तु राजासीद्विभु-

जिह्वलो। रिपुजिन्नाम स ख्यातो न तस्यासीत् सुतः क्वित ॥ स समाराध्य तपसा भास्करं तेजसां निधिम्। अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥ तस्यां पिहगृहे ब्रह्मन् ! वसत्यां च पिता मृतः। सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥ ततस्तां वारयामासुर्ऋषयः सप्त मानसाः। तस्यामासक्तचित्तास्तु सर्व्व एव तपोधनाः॥ अपारयन्ती तद्दुःखं प्रज्वाल्याग्निं विवेश ह। ते चापश्यन्त ऋषयस्तच्चित्ता भावितास्तथा ॥ तां मृतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः। प्रजग्मुर्ज्वलनाच्चापि सप्तजायन्त दारकाः ॥ ते च मात्रा विना भूता रुरुदुस्तान् पितामहः। निर्मारयित्वा कृतवान् लोकनाथो मरुद्गणान्॥ रेवतस्यान्तरे जाता मरुतोऽमी तपोधन!। शृणुष्व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥ आसीन्महोति विख्यातो तपस्वी सत्यवाक् शुचिः। सप्तसारस्वते तीर्थे सोऽतप्यत महत्तपः ॥ निघ्नार्थं तस्य तपसो देवाः सम्भ्रमयन् वधूम्। सा चाभ्येत्य नदीतीरं क्षोभयामास भाविनी ॥ ततोऽस्य प्राच्यवच्छुक्रं सप्तसारस्वते जले। तां चैवाययुरप्सूढां मुनिर्मोहनिको वधूम् ॥ गच्छालज्जेऽतिमूढे! त्वं पापस्यास्य फलं महत्। विध्वंसयिष्यति हृयो भवतीं यज्ञसंसदि ॥ एवं श्रुत्वा ऋषिः श्रीमान् जगामाथ स्वमाश्रमम्। सरस्वतीभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन्। एते तवोक्ता मरुतः पुरा यथा जाता वियद्व्याप्तिकरा महर्षे!। येषां श्रुते जन्मनि पापहानिर्भवेच्च धर्म्माभ्युदयो महान्वै" ॥ अतःपरं प्रवक्ष्यामि मरुतोऽग्नीन् पितॄन् महान्। आवहो निवहश्चैव उद्वहः संवहस्तथा ॥ विवहः प्रवहश्चैव परिवाहस्तथैव च। अन्तरीक्षे च वाहेऽमी ते पृथङ्मार्गविचारिणः॥ महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः। सूर्य्याग्निश्च शुचिर्नाभा वैद्युतः पावकः स्मृतः ॥ निर्मथ्य पचमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः। अग्नीनां पुत्रपौत्राश्च चत्वारिंशच्चतुर्दश ॥ मरुतामपि सर्वेषां विज्ञेयाः सप्त सप्तका इति" ॥ तेषां नामान्युक्तानि वह्निपुराणे यथा

"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च। एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः॥ इन्द्रश्च सत्यजिच्चैव तत्रश्च ततः प्रतिसक्तृपरः। मितश्च सम्मितश्चैव सुमितश्च महाबलः॥ ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा। अन्तिमितोऽनमित्रश्च पुरुमित्रोऽपराजितः॥ ऋतश्च ऋतधाम्नश्च धर्त्ता च धरुणो ध्रुवः। विधारणो नाम तथा देवदेवो महाबलः॥ दैवक्षत्राद्यदक्षश्च एते दश मिताग्नयः। व्रतिनः प्रसदश्चैव सभरश्च महायशाः॥ धाता दुर्गोधितिर्भीमस्त्वभियुक्तस्त्वपात् सखः। धृतिर्धुरुनाथोऽथ वासः कामो जयो विराट्॥ इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसम्भवाः स्मृति"॥ एवञ्च अनिलस्य जरूपत्वाच्छङ्खेदवत्त्वेन सप्तभेदवत्त्वेन च गणदेवतात्वम् अयञ्चानिलाधिष्ठाता दिक्पालभेदः तस्य च गन्धवतीनामिका पुरी मेरोः पूर्व्वस्यां वरुणकुबेरपुरयोर्मध्येऽस्ति। तस्य पूर्व्वादिदिग्भेदेन वर्णभेदेन च शुभाशुभसूचकत्वमुक्तं "पूर्व्वैः पूर्वसमुद्भवीचिशिखरप्रस्फालनाघूर्णितचन्द्रार्कांशुसटाभिघातकलितो वायुर्यदाकाशतः। नैकान्तस्थितनीलमेघपटलां शारद्यसंवर्धितां वासन्तोत्कटसस्यमण्डिततलां विद्योतदा मेदिनीम्॥ यदाग्नेयो वायुर्मेलयशिखरास्खलनपटुः प्लवत्यस्मिन्योगे भगवति मतङ्गे प्रवसति। तदा नित्योद्दीप्ता ज्वलनगिरिशखरालिङ्गिततला खगालोकोच्छ्वासैर्वमति वसुधा भस्मनिकरम्॥ तालीपत्रलतावितानतरुभिः शाखामृगाचर्तयन् योगेऽस्मिन् प्लवति प्लवन् सुपरुषो वायुर्यदा दाक्षिणः। सर्व्वौद्योगसमुद्यताश्च गजवत्तालाम्बुभिर्घट्टिताः कीनाशा इव मन्दवारिकणिकान्मुञ्चन्ति मेघास्तदा॥ स्वच्छैलोलमलीलयङ्गनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः। क्षुत्क्षुण्णाश्चतमानुषास्थिपयकलप्रस्कारभारच्छदा सत्ता प्रेतवधूरिवोच्चपलता भूमिस्तदा लक्ष्यते॥ यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रयातः पश्चार्धे दिनकरकरापातसमये। तदा सस्योन्मेता प्रवरुदयरावङ्गसमरा धरा स्याने स्याने ष्वविरतवसामांसरुधिरा॥ आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपन्नो वायव्यो दृढवेगः प्लवति घनरिपुः पन्नगादानुकारी। जालीयाद्वारिधारा-प्रस्रुदितसुदितं सस्यमण्डूकवद्वां सस्योद्भासैकचिह्नां सुखबद्धलतया भाग्यसेमामिवोर्वीम्। मेरुश्चस्मरीविभक्तलते श्रीश्रावसाने रवौ वाय्वाशोदिग्दवगन्धसुरभिर्वायुर्यदा चोत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः॥ ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् सुस्नागागुरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः। आपूर्णोदकयौवना वसुमती सस्यप्रसवाकुला धर्म्मिष्ठाः प्रथातारयो ऋतवो रक्षन्ति वर्षास्तदा" इति बृहत्संहितायाम्॥ अथ वेदाक्तो दिग्भववायुगुणाः। "प्राग्वातो मधुरः क्षारो वह्निसान्ध्यकरो गुरुः। वेरस्य गौरवोष्णानि करोत्यूष्मोपधीषु च॥ भग्नोत्पिष्टक्षतार्द्रेषु रागस्रवधुदाहृतः। सन्नि-

पातज्वरश्वासतृग्दोषार्शोविषक्रमान् ॥ कोपयेदामवातञ्च घनसंघातकारणम्, ॥ दाक्षिणो मारुतोबल्यश्चक्षुष्यः शस्त्रघातकः । मधुरस्वाम्लदाही च कषायानुरसो लघुः ॥ रक्तपित्तप्रशमनो न च मारुतकोपनः । गण्डूपदादिकीटानां जनकः प्राणकारकः, ॥ पाश्चिमोऽग्निबपुर्वर्णबलारोग्यविवर्द्धनः । कषायः शोषणः स्वर्यो रोचनो विशदो लघुः ॥ अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः । सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ॥ व्रणसंरोपणस्वच्छो दाहशोथतृषापहः, ॥ औत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च । कषायानुरसः शीतः सर्व्वदोषप्रकोप(णः)नः ॥ क्षीणक्षत विषार्त्तानां क्षितोदाहृत्तृषापहः । शीताधिकः सनीहारः स विद्युत्स्तनयित्नुमान्, ॥ विध्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत् । सर्व्वर्त्तुनिन्दको हन्ता क्षत्योत्पातपुरःसरः" इति ॥ तालादिव्यजनवायुगुणाः । मूर्च्छादाहृत्तृषाखेदश्रमघ्नो व्यजनानिलः । तालवृन्तमयो वातश्लेष्मदोषशमनो लघुः । वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः । बालव्यजनसौभाग्यं मक्षिकादीन् व्यपोहति ॥ मायूरा वल्गजा वैत्रा वाता दोषत्रयापहा" इति ।

सूक्ष्मस्तु वायुः शरीरस्थः प्राणादिभेदेन दशविधः दशविधकार्य्य करणात् । यथोक्तम् वैद्यके

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः । नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ॥ प्राणस्तु प्रथमो वायुर्नराणामधिपः प्रभुः । नित्यमास्यापयेत् सर्व्वान् प्राणिनासुरसि स्थितः ॥ निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः । प्रसाराकुञ्चनो वायुः प्रकाशो धारणस्तथा ॥ प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः । प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः । प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः । प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥ इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि । नष्टे न दृश्यते सर्व्वं तस्मात् प्राणन्तु रक्षयेत्, ॥ रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः । गुणवद्वस्तथा जीवः प्राणापानेन कृष्यते, ॥ अपानयंस्तथाहारं मनुजानां यतोऽधमः । शुक्रमूत्रव्रजे वायुरपानस्तेन कीर्त्तितः, ॥ पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् । समं नयति गात्रेषु समानो नाम मारुतः ॥ समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्व्वतः । अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥ स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोप(नः)णः, । उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोप(नः)णः । प्रीतेर्विनाशकश्चायं वार्द्धकोत्पादकस्त्रिधा इति ॥

प्राणादीनां स्थानानि । "शिरसो नासिकाग्रान्तमुदानस्थानमुच्यते । नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥ शरीरव्यापको व्यानः प्राणः सकलनायकः । उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥ क्षुधिते चैव देवदत्तो विजृम्भिते । धनञ्जयस्थितो मेढ्रे मृतस्यापि न मुञ्चति ॥ भूतावाप्तिस्ततस्तस्माज्जायतेन्द्रियगोचरात् ॥ उत्सादोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा । समो मोक्षे गतिमतां वायोः कर्म्मविकारजम्" इति सुखबोधः ॥ प्राणादयश्च पञ्चसूक्ष्मभूतरजोगुणेभ्यः समस्तेभ्य उत्पद्यन्ते इति वेदान्तिमतम् सकलेन्द्रियाणां व्यापार एव प्राणो न पदार्थान्तरमिति सांख्यमतं विवरणं प्राणशब्दे द्रष्टव्यम् ।

उदानादीनां कर्म्मविशेषा उक्ता यथा "उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः । तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ॥ ऊर्द्धजत्रुगतान् रोगान् विदधाति विशेषतः ॥ यो वायुः प्राणनामासौ मुखं गच्छति देहभृत् ॥ सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ॥ आमपक्वाशयचरः समानो वह्निसंगतः । सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥ स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि । पक्वाशयालयोऽपानः काले कर्षति चाशयम् ॥ समीरणः शुक्रमूत्रयुक्तगर्भार्त्तवान्यधः । कुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥ शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् । कृत्स्नदेहचरो व्यानो रससंव्यूहनो यतः ॥ स्वेदासृक्स्रावणञ्चापि पञ्चधा चेष्टयत्यपि । गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ॥ प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् । प्रस्कन्दनं चोद्वहनं पूरणञ्च विरेचनम् ॥ धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ता नभस्वतः । क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥ युगपत् कुपिता एते देहं भिन्युरसंशयम् इति च वैद्यके उक्तम् ।

तत्र देहस्थस्य वायोर्विकारहेतुलक्षणादिकमुक्तं वैद्यके "व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागरात् वेगानाञ्च विधारणादतिशुचः शैत्यादतित्रासतः । रूक्षान्नारुषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत् वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च" ॥ विकृतवायुलक्षणम् ।

"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः करण्ड-ध्वंसावसादौ श्रमकविलपनं श्वासशूलप्रभेदाः । पारुष्यं कर्णनादो विषमपरिणतिश्चंसदृष्टिप्रमोहा विस्रन्दोद्वृत्त-नादिग्लपनमनशनं ताड़नं पीड़नञ्च ॥ नाभीवामौ विषादो भ्रमपरिषदनं जृम्भणं रोमहर्षो विक्षेपाक्षेपशोष-ग्रहणशुषिरता क्लेदनं वेष्टनञ्च । वर्णः श्यावोऽरुणो वा दृढ़पि च महती स्रापविश्लेषसङ्गा विद्यात् कर्म्माण्यस्मिन् प्रकुपितपवने स्यात् कषायो रसश्च" ॥ किञ्च "वदनविरसता स्याद्वर्चसः कर्कशत्वं भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः । त्वचि च परुषता स्यात् स्याच्च वैषम्यमग्नेरिति पवनविकारे लक्षणं प्रोक्तमेतत्" ॥ तत्-प्रशमनकारणम् यथा । "रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः । विपरीतगुणैर्द्रव्यैर्मारुतः संप्र-शाम्यति" ॥ "स्निग्धोष्णस्थिरदृष्यवस्त्यलवणस्वाद्वम्लतैला-तपस्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोन्मर्द्दनैः । स्निग्ध-स्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं पानाहार-विहारभेषजमिदं वातं प्रशान्तं नयेत्" ॥ ऋतुभेदेन विहारादिना च तस्य प्रकोपप्रचयप्रशमाद्युक्तं यथा "ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति । प्रावेणोपशमं याति स्वयमेव समीरणः ॥ शरत्काले वसन्ते च पित्तं प्रावृड्तौ कफः । चयकोपशमान्दोषान् विहाराहार सेवनैः ॥ समासैर्योज्यकालेऽपि विपरीतैर्विपर्ययः" इति ॥ नरपतिजयचर्य्योक्तमनिलचक्रन्तु चक्रशब्दे वक्ष्यते । अना-हृतचक्रस्थवायुमण्डलविवरणं तन्त्रोक्तं षट्चक्रशब्दे द्रष्टव्यम् । तद्देवताके स्वातिनक्षत्रे, अष्टवसुमध्ये पञ्चमे वसौ च । "धरोध्रुवः सोमनामा तथापोऽथनिलो नलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिता" इति विष्णुधर्म्मो० पुरा० । विष्णौ, तस्य प्राणात्मना सर्वदेहधारणात् तथात्वम् "अग्निः संवर्त्तको वह्निरनिलो धरणीधरः" इति विष्णु० स० । शरीरस्थे धातुभेदे च । तस्य विवरणसङ्क्षेपायम् । "पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥ वायुरायुर्बलं वायु-र्वायुर्धाता शरीरिणाम् । वायुर्विश्वमिदं सर्वं प्रभुर्व्यायुः प्रकीर्त्तितः ॥ वाङ्मयमण्डलचक्रेषु यथा राजा प्रशस्यते । तथा शरीरमध्येऽपि वायुरेकः परो विभुरिति" वैद्यकम् ॥ दोषधातुमलादीनां नेता धीरः समीरणः ॥ रजोगुणमयः सूक्ष्मो रूक्षशीतो लघुश्चलः ॥ उत्साहोच्छ्वासनिःश्वासचेष्टा-वेगप्रवर्त्तनैः । सत्यगात्रा च धात्वग्निन्द्रियाणाञ्च पाटवैः ॥ अनुगृह्णात्यविकलो हृदयेन्द्रियचित्तधृक् । सरो मृदुर्योग-वाही संयोगादुभयार्थकृत् । दारुहृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥ विभागकरणाद्वायुः प्रधानं दोषसंग्रहैः । पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ॥ स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः" इति ।

अनिलघ्नक पु० अनिलं वातरोगं हन्ति हन्+क ततः संज्ञायां कन् । (वयड़ा) इति ख्याते वृक्षे तत्फलस्य हि वात-नाशकत्वम् ।

अनिलसख पु० अनिलस्य वायोः सखा टच् । वह्नौ । अनिल बन्ध्वादयोऽप्यत्र "सखा विशाखानिलबन्धवेति" ज्योति० ।

अनिलान्तक पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+णिच्-ण्वुल् । (जीयापुति) इति ख्याते वृक्षे ।

अनिलामय पु० अनिलजन्य आमयः शाक० त० । वातरोगे ।

अनिवर्त्तिन् त्रि० न निवर्त्तते नि-वृत-णिनि न० त० । कार्य्यान्नगत्वा अनिवृत्ते । संग्रामेष्वनिवर्त्तिनामिति "रामा० न निवर्त्तते कृतसेतु अलुप्तयत्नक्रियत्वात् ईश्वरे, विष्णौ च पु० संग्रामादनिवर्त्तित्वात्तथात्वम् "अनिवर्त्ती निवृत्तात्मेति" विष्णुसहस्रनाम ।

अनिविशमान त्रि० न निविशमानः । निवेशनरूपस्थिति-शून्ये सर्वदा गन्तरि, "पुनाना यत् मनसानिविशमाना" इति ऋ० ७,४६,१, अनिविशमानाः सर्वदा गच्छन्त्य इति भाष्यम् ।

अनिश त्रि० निशा तद्धेतुकत्वेनोपचारात् चेष्टाविनाशः सा नास्ति यस्य ब० । अविरते, निरन्तरे, सदाभवे वस्तुनि, रात्रिवर्ज्जिते च । "तदुभयोरनिशं हि विरोधिता कथ-मनो समता मम तापने" रघुवृद्धः ।

अनिशम् न निशेतेऽत्र नि+शी-बा० डस् न० त० । सातत्ये खरादेराकृतिगणत्वेन तस्य तत्र पाठ इति प्रौ० म० ।

अनिशृग्रस्थ त्रि० निर्+शनृच्-क्त न० त० । अनिन्दिते "न वोऽसीदमामानिःशस्ता" इति ऋ० ४,३४,११, "अनिशस्ता अनिन्दिता" इति भा० ।

अनिष्ट त्रि० इष-क्त विरोधे न० त० । दुःखस्य सुखादे-र्विरोधिनि प्रतिकूलवेदनीये दुःखे, तत्साधने-पापे, विषादौ, अपकारे च । "दुष्टनाशादनिष्टाप्तेः करु-णाख्यो रसोभवेदिति सा० द० । "ध्यायत्यनिष्टं तद्धर्म्मे यातिपापाकृष्ट मेवसेति" "एवं यद्यप्यनिष्टेषु वर्त्तन्ते" इति ऽनिष्टं वा यानिष्टेषु तं धर्म्मं न विद्मात्रवेदिति" मनु-

सानिष्टचिन्तनमिति" च मनुः। नागवल्लायां स्त्री। यज–क्त न०त०। अकृतयागे देवादौ।

अनिष्टिन् त्रि० न इष्टमनेन यज–भावे क्त ततः इनि न०त०। कृतयागभिन्ने। "अनिष्टिनोवाजपेयेन" इति कात्या० १५,१,२।

अनिष्पत्र न० निःसृतं पत्रं पक्षोऽत्र तादृशं न भवति। अनिसृतपक्षकशरेण वेधनादौ। "विशाख्यां वा स्तोर्णसुच्छ्रितं वा विध्यन्त्यनिष्पत्रमिति" कात्या० १३,३,१२, "अनिष्पत्रमित्यनिःसृतपत्रकं विध्यन्ति क्षत्रिया" इति तद्व्याख्या।

अनीक पु०न० अनित्यनेन अन–ईकन् अर्त्तिचर्चादि। सैन्ये, तस्य हि जीवनरक्षकत्वम्। न नीयते अपसार्य्यतेऽस्मात्। नी–क्विप् ब० कप् ह्रस्वाभावः। युद्धे, ततोहि प्रायोमरणान्नपुनरावृत्तिः। "रथेषु वोऽनीकेष्वधिश्रिय" इति ऋ०८,२०, १२ अनीकेषु सेनासुखेष्विति भा०। "दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदेति" गीता मुखे, तस्य प्राणवायुनिःसारणद्वारत्वात् तथात्वम् "अग्नेरनीकमप्यविवेशेति" यजु० ८,२४, "अनीकं मुखमिति" वेददीपः।

अनीकस्थ त्रि० अनीके युद्धे तिष्ठति स्था–क। युद्धगते सैन्ये।

अनीकिनी स्त्री अनीकानां संघः अनीकं युद्धं प्रयोजनतया अस्त्यस्याः वा अनीक+इनि। सेनासंघे हस्त्यादिसंख्याविशेषवत्यां सेनायाञ्च तत्संख्या चोक्ता भारते "एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः। तीणि सेनामुखान्येको गुल्म इत्यभिधीयते॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। सृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥ चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनीति"। ततश्च हस्तिनः २१८७। रथाः २१८७। अश्वाः ६५६१। पदातयः १०९३५ समुदिताः २१८७०।

अनीश पु० नास्ति ईशो नियन्ता यस्य ब०। सर्वनियन्तरि विष्णौ, स्वामिशून्ये त्रि०। न०त०। ईश्वरभिन्ने "भजेरन् मातृकं रिक्थमनीशास्ते हि जीवतोरिति" मनुः। अस्वतन्त्रे, "एकोह्यनीशः सर्वत्रेति" व्यास स्मृतिः। ईश–भावे अञ् न०त०। दीनभावे स्त्री "निमग्नोऽनीशया शोचसीति" मु०उ०। दीनभावोऽनीशेति भा०।

अनीश्वर न० न ईश्वरः नियन्ता यत्र। नियन्तृशून्ये सांख्यादिमते जगति "जगदाह्यनीश्वरमिति" गीता ईश्वरस्य न भवति असम०स०। ईश्वरसम्बन्धिभिन्ने "ध्यानेनानीश्वरान् गुणानिति" मनुः। नियन्तृशून्ये, स्वामिशून्ये च।

अनीह त्रि० ईह–भावे अङ् न०ब०। स्पृहाशून्ये, निश्चेष्टे च।

अनु अव्य० अन–उ। "अनु वेदाध्ययनानुष्ठानसामीप्यपश्चाद्भावानुबन्धसाम्याभिमुख्यविसर्गलक्षणेष्विति" गणरत्नोक्तेषु अर्थेषु तत्र वेदे अनुवाक इति। अध्ययने अन्वधीते, अनुष्ठाने, अनुतिष्ठति, सामीप्ये अनुमेघं वर्षति, पश्चाद्भावे तदनु, अनुबन्धने, अनुयेते अनुययः, साम्ये, अनुकरोति, आभिमुख्ये अनुमातरं वत्सोधावति, हीने अनु हरिं सुराः विसर्गे (प्रदत्तप्रतिबन्धे) अनुजानीते, लक्षणे अनु वनमग्निर्गतः"। "अनुर्लक्षणे" इति "तृतीयार्थे" इति (सहार्थे) "हीने" इति, लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनव इति, च (पा०) उक्तेषु अर्थेषु, तत्र लक्षणे, जपमनुप्रावर्षत्। "हेतुभूतजपोपलक्षितम् वर्षणम्" सि०कौ० सहार्थे, नदीमनु अवसिता सेना, "नद्या सह संबद्धा सेना" सि०कौ० हीने, हरिमनु सुराः हरेर्हीना इत्यर्थः, लक्षणे इत्थम्भूते अनु विद्योतते विद्युत्, तत्र च इत्थम्प्रकारेण विद्युद्विद्योतदेशज्ञापनात् इत्थो लक्षणमिति प्रौ०मनो०। (इत्थम्भूतः) कश्चित् प्रकारं प्राप्तः आख्यायते अनेन, इत्थम्भूताख्यानं प्रकारविशेषनिरूपकं तत्किञ्चार्थे, यथा भक्तोहरिमनु, हरेरित्थम्भूतः, भक्तिविशेषयुक्त इत्यर्थः। भागे भागोऽस्यास्ति अर्शआद्यच् भागस्वामिनि, हरिमनु लक्ष्मीः, हरिस्वामिकभागवतीत्यर्थः। वीप्सायां, विषयभूतायां, वृक्षं वृक्षमनु सिञ्चति, यावद्वृक्षव्यापकः सेकः। इयांस्तु भेदः अन्यत्रानुशब्दः तत्तदर्थस्य द्योतकः अत्र तु द्विवचनेनैव व्याप्तिबोधनात् अनोस्तद्विषयत्वमात्रम्। पाणिन्युक्तेष्वेवेष्वर्थेष्वस्य कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीया एवं कर्म्मप्रवचनीयसंज्ञया सत्युपसर्गसंज्ञयोर्बाधनात् न षत्वादि न वा अनुव्यचलदित्यादौ गतिर्गतावित्यादिना निघातः। "अनुर्यत् समया इति" "यस्य चायाम इति च" (पा०) उक्ते सामीप्ये, अनुवनमग्निर्गत इति वनसमीपं गत इत्यर्थः आयामे, अनुगङ्गं वाराणसी, गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षिता वाराणसीत्यर्थः नित्यसमासः योग्यत्वे च। अनुरूपम्। "रूपादियोग्यमिति" सि०कौ०, अनुक्रमम्। क्रमानतिक्रमे अत्रापि नित्यसमासः एतेषामुदाहरणानि शास्त्रान्तरेषु द्रष्टव्यानि दिङ्मात्रमुदाह्रियते। तत्र पश्चादर्थे "तदनु नय यासौ ब्रूहि यातोऽध्वदक्षेति" लीला०। "तदनु जलनं मदर्पितमिति" कुमा०। असौ "कुमारस्तमजोऽनु-

जात" इति रघुः। "रत्या च सागङ्कमनुप्रयात" इति कुमा० अनुष्ठाने, "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा० सादृश्ये, "अनुगर्जितसन्दिग्धा" इति कुमा०। अनुगर्जितं गर्जनसदृशं प्रतिरूपगर्जितमित्यर्थः। अनुगताद्यर्थे नित्यसमासः। तथैव सोऽभूदन्वर्थो "राजा प्रकृतिरञ्जनादिति" रघुः। तत्र अन्वर्थः अनुगतोऽर्थो यस्येति प्रा०ब०वा अनित्यसमास उत्तरपदलोपो वा इति तत्र अनुगतार्थोपीति भेदः। एवमेव अनूप इत्यादावपि। उपासने च "अन्वासितमरुन्धत्येति" रघुः "पश्चादुपवेशनपूर्ब्बकसेवायां धातोर्लक्षणायामनुद्योतकः। एवम् एतद्योगे वसतेः आधारस्य कर्म्मता अनुवसति यामं देवदत्तः "मथुरामनूध्येति" सु०बो० क्रियासमभिव्याहृतस्यानुशब्दस्य तत्तत्क्रियासदृशतत्तत्क्रियायां लक्षणाद्योतकत्वं तत्र आद्यक्रियाश्रयस्य कर्मत्वम् यथा मातरमनुरोदितीत्यादौ मातूरोदनसदृशरोदनस्य बोधनेन प्रथमरोदनाश्रयस्य मातुः कर्मत्वमेवमन्यत्र। कर्मणि तिङाद्युक्ते तु प्रथमा।

अनुक त्रि० अनुकामयते अनु+कामतर्यथे कन्। कामुके "अनुकाभिकाभीकाः कमयितेति" पा० "वाचमनुकामात्मनोऽकुरुतेति" कौ० ब्रा०।

अनुकम् अव्य० अनुकामयते अनु-कम-क्विप्। वितर्के। चादेरादिकृतिगणत्वात् अस्य चादिगणे पाठः इति प्रौ०मनो०।

अनुकम्पक त्रि० अनुकम्पते दयते अनु-कम्प-ण्वुल्। दयाकारके। "सर्व्वभूतानुकम्पक" इति मनुः।

अनुकम्पन त्रि० अनु+कम्प-युच्। दयाशीले। "सर्वभूतानुकम्पन" इति रामा०। भावे ल्युट्। दयायां न०।

अनुकम्पा स्त्री अनु+कम्प-अङ्। दयायाम्, दयया हि दुःखहेतुकान्यकर्म्म दृष्ट्वा तत्सदृशकर्म्मकरणात् दयायास्तथात्वम् अतएवानुकम्पधातोरनुरोदनवत् सकर्म्मकत्वम्। दया च परदुःखप्रहरणेच्छा अनुपूर्ब्बकम्पतेस्तदर्थपरत्वमित्येके धात्वर्थसङ्कीर्तकर्म्मकत्वेन तत्राकर्म्मकत्वमिति भेदः। "तेषामेवानुकम्पार्थं प्रदेयं प्रीतिपूर्ब्बकमिति" स्मृतिः। "भूतानुकम्पा तव चेदियं गौरिति" रघुः। किञ्चिन्नमने च।

अनुकम्प्य त्रि० अनुकम्पमर्हति अनुकम्प+यत्। तरक्षिणि वेगवति। अनुकम्प्यते अर्हार्थे यत्। दयार्हे त्रि०। "दुःखितस्मनुकम्प्यामद्विरादाय दोर्भ्यामिति" कुमा०।

अनुकरण न० सादृश्ये अनु+कृ-ल्युट्। सदृशक्रियादिकरणे। तच्च गुणक्रियावयवादिभिः सदृशीकरणम्। अनुक्रियतेऽनेनेति करणे ल्युट्। सदृशीकरणसाधने। यथा पटत्वांप्रभृतिशब्दाः अव्यक्तशब्दानुकरणानि। "अव्यक्तस्यानुकरणस्यात इतौ" इति पा०।

अनुकर्ष(ण) पु० अनुकृष्यते स्वसंबन्धेन चक्रेण अनु+कृष-घञ्। रथाधःस्थिते चक्रोपरि बद्धे काष्ठे। कर्त्तरि ल्यु। नान्योऽप्यर्थे। भावे ल्युट्। पूर्ववाक्योपात्तपदादेरुत्तरत्रान्वयार्थमाकर्षणे, आकर्षणमात्रे च न०।

अनुकल्प पु० कल्प्यते विधीयते इति कृप-णिच्-अच् कल्पो विहितः हीनः कल्पो मुख्यकल्पादधमः प्रा०स०। गौणकल्पे, प्रतिनिधौ। "एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेय" इति। "प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते" इति च मनुः "समर्थः प्रथमे कल्पे योऽनुकल्पे प्रवर्त्तते" इति स्मृतिः। "भार्य्याः कार्य्याः सजातीयाः सर्वेषां श्रेयस्यस्तरितमुख्यः कल्पस्ततोऽनुकल्पास्तत्रोद्वाह्याश्चतस्रोब्राह्मणस्येत्यादि" पैठीनसिः स्मृतिः। अनुकल्पस्य मुख्यद्रव्याद्यभावे मुख्यसदृशद्रव्यान्तरादि प्रतिनिधिरूपम्। यथा "यवाद्यभावे गोधूमाः मध्वाद्यभावे गुडादयः। एवं उपवासासामर्थ्ये नक्तं "हविष्यान्नादि स्मृतिपूक्तं वेदितव्यम्। अनुगतं कल्पं वेदाङ्गभेदम् अत्या०स०। कल्पानुगते ग्रन्थे अनुकल्पप्रतिपादकग्रन्थे च तद्वेत्तरि उक्थादि०ठक्॥ आनुकल्पिकः अनुकल्पग्रन्थवेत्तरि त्रि०।

अनुकाम पु० अनुरूपः कामः प्रा०स०। योग्याभिलाषे। सदृशं कामस्य सादृश्यार्थे काममनतिक्रम्य यथार्थे वा अव्ययी०। कामसादृश्ये यथाकामे च अव्य०। अनुकामं तर्पयेथामिति ऋ० १,१७,१, "अनुकामं परा दा इति" ऋ०८,४८,८, "अनुकामं यथाकाममिति" भा०। अनुकामयते अनु+काम-अच्। अतिकामुके त्रि०।

अनुकामीन त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सादृश्येऽव्ययी० ततः गच्छतीत्यर्थे ख। यथेष्टगमनशीले। "अनुकामीनतां त्यजेति" भट्टिः। [विवरणमनुकरणशब्दे द्रष्टव्यम्

अनुकार पु० अनु-कृ-घञ्। गुणक्रियादिभिः सदृशीकरणे।

अनुकारिन् त्रि० अनुकरोति अनु+कृ-णिनि स्त्रियां ङीप्। गुणक्रियादिभिः सदृशीकारके। "अनुकारिणि पूर्ब्बेषां युक्तरूपमिदं तव" इति रामा०।

अनुकार्य्य अनुक्रियतेऽसौ अनु+कृ-कर्मणि अर्हार्थे वा ण्यत्। अनुकरणीये सदृशीकरणार्हे पश्चात्करणीये च। "यः पश्चात् पूर्ब्बकार्य्याणि कुर्य्यादैश्वर्य्यमोहितः पूर्ब्बं चैवानुकार्य्याणीति" रामा०।

अनुकाल अव्य० कालस्य योग्यम् यथार्थे अव्ययी०। काल-

योज्यते।"भोजनाच्छादनं दद्यादनुकालं विशेषत" इति।

अनुकीर्त्तन न० अनु+कृत–णिच्–ल्युट् कीर्त्तादेशः। कथने "साङ्गं भवति तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः।

अनुकूल त्रि० कूलमावरणं स्नेहेनानुबन्ध इति यावत् अनुगतस्तम् अत्या०स०। सहचरे, सहाये, स्वपक्षपातिनि, "नारीणामनुकूलमाचरसि चेज्जानासीति" का० प्र०। "अनुकूलयतीन्द्रोऽपि स्वर्गद्रुमविभूषणैरिति" कुमा० अनुकूलयति अनुकूलं करोतीति नामधातुः। ङीष्टच्चे स्त्री राजनि०। अलङ्कारशास्त्रप्रसिद्धे "अनुकूल एकरति"रित्युक्ते नायकभेदे "एकस्यामेव नायिकायामासक्तोऽनुकूलनायक" इति तदर्थः यथा "अस्माकं सखि! वाससी न रुचिरे, यैवेयकं नोज्ज्वलं, नो वक्रा गतिरुद्धतं, न हसितं, नैवास्ति कश्चिन्मदः। किन्त्वन्येऽपि जना वदन्ति सुभगोऽयस्याः प्रियो न्यायतो दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्" इति॥ "अनुकूलं प्रातिकूल्यमानुकूल्यानुबन्धि चेत्" इति (सा० द०) दृश्युक्तेऽर्थालङ्कारभेदे न०। यथा "कुपितासि यदा तन्वि! निधाय करजक्षतम्। बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा॥" "सर्वेषामात्मत्वेनानुकूले परमेश्वरे पु० "अनुकूलः शतावर्त्तइति"विष्णुस०। सर्वेषामात्मत्वादनुकूलः न हि स्वस्मिन् प्रतिकूलं स्वयमाचरतीति" भा०।

अनुकृति स्त्री अनु+कृ–क्तिन्। "अनुकरणे। ओमित्येतदनुकृतिर्हैक वा" इति श्रुतिः।

अनुकृष्ट अनु+कृष–कर्म्मणि क्त। कृताकर्षणे, अनुवर्त्तिते च।

अनुक्त त्रि० न उक्तः। अनभिहिते अकथिते उक्तिश्च प्रायेण तिङ्कृत्तद्धितसमासैः "तत्र तिङा हरिः सेव्यते, कृता चैतेन गतः, तद्धितेन, यतेन क्रीतः यत्। यत्नः, समासेन, आरूढो वानरोयमिति वाक्ये आरूढवानरो दृश्यः सर्वत्र कर्म्मण उक्तत्वात् प्रातिपादिकार्थे प्रथमा। तैरुक्तभिन्ने तु ग्रामं गच्छति, ग्रामं गत, वेदेऽधीते, इत्यादौ "अनभिहिते" इति द्वितीयाद्येव एवमन्यकारकेऽप्युदाहार्य्यम् "अनुक्तसमुच्चयश्चकार" इति रघु० अनियोजिते च "असावनुक्तोऽपि सहाय एव इति" कुमा०।

अनुक्थ त्रि० नास्ति उक्थं स्तोत्रं यस्य। स्तोत्रशून्ये "किं यामनिन्द्राः क्षणवन्नुकथा" इति ऋ०५,२,२, "अनुक्थाः अस्तुतय" इति भा०।

अनुक्रम त्रि० अनुगतः क्रमम् अत्या०स०। अनुगतक्रमे क्रमानुलङ्घिते, अनुक्रमश्च यथोत्तरं यस्य पाठः करणं वा उचितं तदनतिक्रमेण तस्यानुष्ठानरूपा परपाटी। "प्रचक्रमे वक्तुमनुक्रमज्ञा" इति रघुः। क्रमश्च स्थानं तत्स्वरूपादि क्रमशब्दे वक्ष्यते। क्रममनतिक्रम्य यथार्थे अव्ययी०। क्रमानतिक्रमे अव्य०।

अनुक्रमणिका स्त्री अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम–करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे कनि ह्रस्वः। अनुक्रमज्ञापके, ग्रन्थाद्यंशभेदे उक्तस्य वक्तव्यस्य वार्थसङ्ग्रहे ग्रन्थशेषे, ऋचिदादौ वा संख्याङ्के पुराणादेरंशविशेषे। स्वार्थे काभावेऽनुक्रमणीत्यपि, तत्रैव। तत्र आदौ यथा "भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहःपर्व्वानुक्रमणी पूर्वं द्वितीयः पर्व्वसंग्रह" भार० आदि०। अन्ते यथा "अनुक्रमणिकाध्यायं तथा माहात्म्यमुत्तममिति" काशीख०। एवमन्यत्र द्रष्टव्यम्।

अनुक्री पु० अनुक्रियते अनु–कृ–उणा० बा०ई किच्च। साद्यस्क्रक्रतुभेदे, "षट् साद्यस्क्रा ऋत्विक्रम्य "हीनस्यानुक्रीः" इति कात्या०२२,२,१६, उक्तम् "अनुक्रीर्नाम साद्यस्क्रः क्रतुः स हीनस्य भवतीति" तद्व्याख्या।

अनुक्रोश पु० अनुक्रोश्यतेऽनेन अनु+क्रुश–आह्वाने रोदने च घञ्। दयायाम्। परदुःख प्रहरणेच्छारूपदयया हि परक्रोशं दृष्ट्वा तदनु रोदनं क्रियते इति तस्यास्तथात्वम्। अनुगतः क्रोशं गतिस०। प्राप्तक्रोशाध्वके त्रि०।

अनुक्षण न० वीप्सायाम् अव्ययी०। प्रतिक्षणे अनवरते, अनुगतं क्षणम् अत्या०स०। अजस्रवृत्तौ त्रि०।

अनुग त्रि०अनुगच्छति अनु+गम–ड। पश्चाद्गामिनि, "गोत्रिरिक्थानुगः पिण्डः व्यपैति ददतः स्वधेति" क्षिप्रं निवारयेत् सर्वं स्वभूकरसुखानुगमिति" "प्रसदाह्युत्पथं नेतुं कामक्रोधवशानुगमिति" च मनुः। सहचरे, आनुलोम्यं गते, सेवके च। "तद्भूतनाथानुग! नार्हसि त्वमिति" रघुः।

अनुगङ्ग अव्य० गङ्गायाम् विभक्त्यर्थे अव्ययी०। गङ्गायामित्यर्थे। परिखा० अच्। आनुगङ्गम् अनुगङ्गभवे त्रि०।

अनुगत त्रि० अनु+गम–क्त। पश्चाद्गते, सहगते, आनुलोम्यं गते, सामान्यधर्म्मोपक्षणेन संगृहीतेऽखिले विशेषे, अधीने च। "आगच्छदत्र कार्त्तस्वरः स्वर्गाय सनुपस्थितः विमानवरकोटीभिर्दैवैरनुगतस्तदेति" रामा०।

अनुगति स्त्री अनु+गम–क्तिन्। अनुगमने, पश्चाद्गतौ, "बलस्य चतुरङ्गस्य नायकानुगतिर्नय"इति "गतानुगतिकन्यायः"।

अनुगम पु० अनु+गम–घञ् वृद्ध्यभावः। पश्चाद्गमने, "इहतेर्धातोरर्थानुगमादिति" भा०भा०। सहायीभवने, सामा-

न्यधर्मेण सर्वेषां विशेषरूपाणां संग्रहे च। "सम्बन्धस्यानुगमो न दोषायेति" दाय० श्रीकृष्णः। आनुलोम्यकरणे, "कलौ त्वनुगमान्विते" इति स्मृतिः।

अनुगमन न० अनु+गम–भावे ल्युट्। पश्चाद्गमने। "शवानुगमनाशौचं स्नानमात्रेण शुध्यतीति" स्मृतिः भर्त्तृशरीरानुगमनमहं करिष्यामीति शु०त० रघु०।

अनुगव न० गोःसदृश आयामः "यस्य चायाम" इति समासे नि०अच्। गवायामतुल्यायामयुक्ते शकटादौ।

अनुगवीन त्रि० गोः पश्चात् पर्य्याप्तं वा गच्छति अनुगु–ख। गोः पश्चाद्गामिनि गोपाले। "अनुगवमंगामीति" (पा०) उक्तेः पर्य्याप्तगन्तरि च।

अनुगादिन् त्रि० अनुगदति अनु+गद–णिनि। अनुवादके स्त्रियां ङीप्। अनुगाद्येव स्वार्थे, "अनुगादिनष्ठक् च" पा० ठक् आनुगादिकः तदर्थे।

अनुगामिन् त्रि० अनुगच्छति अनु+गम–णिनि। पश्चाद्गन्तरि, सहचरे च। स्त्रियां ङीप्। "दृष्ट्वा स्त्रियमिवायान्तीं ब्राह्मणीमनुगामिनीमिति" रामा०।

अनुगुण त्रि० अनुकूलो गुणो यस्य। अनुकूले, अङ्गगते, अनुरूपे च। "अद्वैतं सुखदुःखयोरनुगुणं सर्व्वास्ववस्थासु यदिति" उत्तरच०। अनुरूपः गुण उपकरणम्। योग्योपकरणे "रसानुगुणतामेतीति" सा०द०। सदृशगुणयुक्ते त्रि०। "कान्तारतापसाविन्दू वंशकानुगुणौ मताविति" सुश्रुतम्। अनुगतः गुणं तन्त्रीरूपं वा गुणानुरक्ते त्रि० तन्त्रीयुक्तवीणायां स्त्री "उत्कण्ठितस्य हृदयानुगुणा वयस्येति" अनुगुणा वीणेति तदर्थः। गुणे विभक्त्यर्थे, गुणमनतिक्रम्य वा अव्ययी०। गुणे इत्यर्थे, गुणानतिक्रमे च। तद्वोधकमन्यमधीते वसन्तादि० ठक्। आनुगुणिकस्तदध्येतरि, तद्वेत्तरि च त्रि०।

अनुगुप्त त्रि० अनु+गुप्–क्त। आच्छादिते। "अनुगुप्ता अप आवृत्येति" गोभिलः "अनुगुप्ता आच्छादिता" इति रघु०।

अनुगृहीत त्रि० अनुग्रह–क्त। कृतानुग्रहे।

अनुग्र त्रि० न उग्रः। शान्तस्वभावे असमर्थे, अनुद्धते च। "भगमनुग्रो अवयाति रत्नमिति" ऋ०७,३८,६, "अनुग्रः असमर्थः" इति भा० "अनुग्राश्च दृतद्रुनू ऋ० ८,१,१४, अनुग्रा अनुद्धूर्णा इति (भा०) उक्तेः अनुद्धूर्णे च।

अनुग्रह पु०अनु+ग्रह–अप्। अभीष्टसम्पादनेच्छारूपे प्रसादे, आनुकूल्ये, अनिष्टनिवारणपूर्व्वकेष्टसाधनेच्छारूपायामभ्युपपत्तौ, "विरूपोक्षत्तनिःस्वासानामनुत्थापूर्व्वकं हि यत्। पूरणं दानमानाभ्यामनुग्रह उदाहृत" इत्युक्तलक्षणे दरिद्रादिपोषणे च। "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" इति तन्त्रम्। "अनुग्रहं संस्मरणप्रवृत्तमिति" कुमा०। "पादार्घणानुग्रहपूतपृष्ठमिति" रघुः। अनुग्रो यज्ञियं सूर्य्यादिग्रहो वा अनुगतस्तम् गति स०। यज्ञानुगते सूर्य्यादिग्रहानुगे च त्रि०।

अनुग्राह्य त्रि० अनु+ग्रह–ण्यत्। अनुग्रहार्हे "यदि तेऽहमनुग्राह्यो यदि स्थरसि मे गुणानिति" "सर्वथानुग्राह्यो देवतानामसंशय" इति च रामा०।

अनुचर त्रि० अनुचरति अनु+चर–ट स्त्रियां ङीप् अच् वा स्त्रियां टाप्। सहचरे, पश्चाद्गामिनि, दासादौ, "व्रताय तेनानुचरेण धेनोरिति" "अन्येद्युरात्मानुचरस्य भावमिति च" रघुः। अनुगतश्चरं दूतं गतिस०। दूतानुगे त्रि०। सेवके च, "गन्धर्वा गुह्यकाश्चैव विबुधानुचराश्च ये" इति मनुः "चत्वारि च शतान्यनुचरणामिति" कौ०आ० "अग्नरसो मरुद्भिरनुचरा दृशेति "सौमित्रिसीतानुचरस्तेति" भट्टिः। "पालागली सानुचर्य्यः शतेन शतेन" इति काल्या० २०,१,१२, एतद्व्याख्यायां बह्वृचः अनुचरीशब्दप्रयोगस्तत्र द्रष्टव्यः पालागली दासयुक्तौ।

अनुचारक त्रि० अनुचरति अनु+चर–ण्वुल्। अनुगन्तरि, सेवके च। तस्य धर्म्यम् अण्। आनुचारिकम् सेवकधर्म्ये कार्य्ये त्रि०।

अनुचित त्रि० न–उचितः। अपरिचिते, अयुक्ते च।

अनुचिन्तन न० अनु+चिन्ति–ल्युट्। अनुस्मरणे सततचिन्तायाम् "हादृशे हत्युभावे च वैपरीत्यानुचिन्तनमिति ज्योति०।

अनुचिन्ता स्त्री अनु+चिन्ति–अ। सततचिन्तायाम्।

अनुच्च त्रि० न उच्चः विरोधे न०त०। उच्चताविरोधिनिम्नत्ववति। ज्योतिषोक्ते ग्रहाणां नीचस्थाने च। तानि स्थानानि उच्चशब्दे वक्ष्यन्ते।

अनुच्छिष्ट त्रि० उद्+शिष–क्त न०त०। उच्छिष्टभिन्ने आहार्य्यद्रव्यस्य भुक्तावशिष्टभुक्छिष्टं तद्भिन्ने।

अनुज त्रि० अनु पश्चात् जायते अनु+जन–ड। पश्चाज्जाते सहोदरे भ्रातरि। तद्भ्यां भगिन्यां स्त्री। एकाधिकं द्वरेऽल्पेऽल्पः प्रसवोऽध्यर्द्धं ततोऽनुज" इति मनुः। "चचार सानुजः शान्त" इति रघुः "परिवेत्तानुजेऽनूढे" इति मनुः।

अनुजन्मन् पु० अनु जन्म यस्य। सहोदरे कनिष्ठभ्रातरि। "जनकाय! तवानुजन्मनामिति" भारविः।

अनुजात त्रि० अनु+जन–क्त । पश्चाज्जातमात्रे, "दन्तजातेऽनुजाते च व्रतचूड़े च संस्थिते" इति मनुः । अनुजाते दन्तजन्मानन्तरं संस्थिते इति" कुल्लू० "श्वातस्त्वानुजाताऽहं भुङ्क्ष्व भक्तमिदं शुभम्" इति स्मृतिः । "असौ कुमारस्तमजोनुजात" इति रघुः । अनन्तरजातत्वात् पुत्रस्य तथात्वम् ।

अनुजावर त्रि० अनुजादप्यवरः । अत्यन्तनिकृष्टे । "एतामेवानुजावराय कुर्यादिति" ता० ब्रा० । अनु पश्चाज्जायते इत्यनुजः कनीयान् सहि निकृष्टः तस्मादप्यवरो निकृष्ट इति भा० वेदे न रूढ़ीभावः लोके तु अनुजावरस्तै ।

अनुजीविन् त्रि० अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव-णिनि । सेवके, आश्रिते च । [णीये सेव्ये ।

अनुजीव्य त्रि० अनुजीव्यतेऽसौ अनु+जीव–ण्यत् । आश्र-

अनुज्ञा स्त्री अनु+ज्ञा–अङ् । स्वयंप्रवृत्तस्यान्यस्य प्रवृत्त्यविघातकरणेन प्रवर्त्तनारूपायामनुमतौ । "गुरोरनुज्ञामधिगम्य मातः" ! इति रघुः । "तद्वा एतदनुज्ञाक्षरं यद्विकिञ्चनानुजानात्योमित्येव तदाहेति" श्रुतिः ।

अनुज्ञात त्रि० अनु+ज्ञा–क्त । कृतानुज्ञे यज्ञै करणायानुज्ञा कृता तस्मिन् जने ।

अनुज्येष्ठ त्रि० अनुगतो ज्येष्ठम् प्रा०स० । ज्येष्ठानुगते । ज्येष्ठमनतिक्रम्य यथार्थे अव्ययी० । ज्येष्ठानुरूपे ज्येष्ठानतिक्रमे च अव्य० । [रार्धं देये शुल्कादौ, आतरे ।

अनुतर न० अनुतीर्यतेऽनेन अनु–तॄ–करणे अप् । नदीपा-

अनुतर्ष न० अनुहृष्यतेऽनेनेदं वा करणे कर्म्मणि वा घञ् । सुरापानपात्रे, मद्ये च । भावे घञ् । मद्यपाने, अभिलाषे, पानेच्छायाञ्च । "सोपचारस्तुपशान्तविचारं सानुतर्षमनुतर्षपदेनेति" माघः ।

अनुताप पु० अनु+तप–घञ् । इदमनुचितं कृतमिति स्वकृतवस्तुनो दुःखजनकतया ज्ञानेन पश्चात्तापे । "श्लाघनेनानुतापेन" इति" मनुः । "तस्याः करिष्यामि दृढानुतापमिति" कुमा० ।

अनुतिल त्रि० अनुगतस्तिलम् अत्या०स० । तिलानुगते क्षेत्रादौ, तिले विभक्त्यर्थे अव्ययी० तत्र भवः परिमुखादि० अञ् । आनुतिल्यः तिलभवे त्रि० ।

अनुतूलन न० तूलेनानुकृष्णाति तृणाद्यर्थं तूलेनानुवर्तयति अनु+तूल+अनुकोषणे णिच्–भावे ल्युट् । तूलेन तृणाद्यादेरनुवर्तने ।

अनुत्क त्रि० न०त० । उत्कण्ठितभिन्ने स्वस्थे ।

अनुत्कर्ष पु० न उत्कर्षः अभावे न०त० । उत्कर्षाभावे ब० । उत्कर्षशून्ये त्रि० ।

अनुत्त त्रि० न+उन्द्–क्त नसत्तनिषक्तानुत्तेत्यादिना नि० । अक्लिन्ने "इन्द्र ! तुभ्यमिदद्रिवोऽनुत्तमिति" ऋ० १,८०,७, नुद–क्त न०त० । अनुक्ते अप्रेरिते । "अनुत्तमाते मघवन्निति" ऋ० १,१६५,६, "अनुत्तमप्रेरितमिति" भा० ।

अनुत्तम न० न उत्तमोयस्मात् । अत्युत्कृष्टे । "काङ्क्षन् गतिमनुत्तमामिति," इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखमिति" "यशोऽस्मिन् लोके प्राप्नोति प्रेत्य चानुत्तमं सुखमिति" च मनुः ।

अनुत्तर त्रि० उत्तरउत्तमः न० ५ब० । अत्यन्तश्रेष्ठे । ६ब० । उत्तरवाक्यरहिते "भवत्यवक्ता च भवत्यनुत्तरादिति" नैष० । न०त० । उत्तरदिग्भिन्नायां तद्विरोधिन्यां दक्षिणस्यां दिशि, स्त्री । उत्तमभिन्ने अपकृष्टे त्रि० । न उत्तरति चलति उद्+तॄ–अच् न०त० । स्थिरे त्रि० ।

अनुत्तान त्रि० न उत्तानः विरोधे न०त० । उत्तानभिन्ने अवताने अवाङ्मुखे ।

अनुत्तरङ्ग त्रि० उद्गतस्तरङ्गो वीचिर्यस्मात्यस्य वा यस्मात् प्रा० ब० न०त० । अनुद्गततरङ्गे अचञ्चले च "अपामिवाधारमनुत्तरङ्गमिति" कुमा० शिवपक्षे अचञ्चलमित्यर्थः ।

अनुत्पत्ति स्त्री न उत्पत्तिः अभावे न०त० । उत्पत्त्यभावे "क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते । अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते" स्मृतिः ।

अनुत्पत्तिक त्रि० नास्ति उत्पत्तिर्यस्य कप् । उत्पादशून्ये ।

अनुत्पन्न त्रि० न उत्पन्न न०त० । उत्पन्नभिन्ने अजन्ये ।

अनुत्पाद पु० न उत्पाद उत्पत्तिः अभावार्थे न०त० । उत्पत्त्यभावे । ब० । उत्पत्तिशून्ये त्रि० ।

अनुत्साद पु० न उत्सादः अवसादनम् भावे न०त० । अवसादाभावे उच्छेदाभावे । न०ब० । उच्छेदशून्ये त्रि० ।

अनुत्साह पु० न उत्साहः अभावे न०त० । उत्साहाभावे ब० । उत्साहशून्ये त्रि० ।

अनुत्सिक्त त्रि० न उत्सिक्तः गर्वितः । अगर्विते गर्वशून्ये ।

अनुत्सुक त्रि० न०त० । उत्सुक–भिन्ने उत्कण्ठाशून्ये ।

अनुत्सूत्र त्रि० उत्क्रान्तः सूत्रम् अत्या०स० न०त० । सूत्रानुगते "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धनेति" माघः । सूत्रं पाणिनीयसूत्रं नीतिशास्त्रञ्चेति विवेकः ।

अनुद त्रि० न नुदति नुद्–क न०त० । प्रेरकभिन्ने अनुददाति तुल्यं ददाति अनु+दा क । तुल्यरूपदातरि,

एतस्य उदाहरणम् प्रागुक्ते अनानुदग्यशब्दे द्रष्टव्यम् ।

अनुदक त्रि० नास्ति उदकं यत्र । "उदकशून्ये मरुदेशादौ अल्पार्थे न०त० । अल्पजले पल्वलादौ "उद्वन्वतीरनुदकाश्च या" इति ऋ०७,५१,४, उदकदानविशेषशून्ये श्राद्धभेदे "पुरोडाशमात्रा अनुदका" इति कात्या० १०, ५,११, । "अनुदकाः प्रत्यवनेजनपरिषेचनादि वर्जिता" इति तद्व्याख्या ।

अनुदग्र न उद्गतमग्रमस्य । ह्रस्वे अतीक्ष्णे उन्नताग्रभिन्ने च नास्ति उद्गोयस्मात् ५ब० । अत्युन्नते त्रि० ।

अनुदर त्रि० न उदरं यस्यात्सार्थे न०ब० । अल्पोदरयालिनि क्षुद्रोदरे, "अनुदरा कन्येति सि०कौ० स्त्रियां टाप् ।

अनुदर्शन अनु+दृश–ल्युट् । अनुचिन्तने, "जन्ममृत्युजराव्याधि दुःखदोषानुदर्शन"मिति गीता ।

अनुदात्त न० न उदात्तः विरोधे न०त० । उदात्तस्वरभिन्ने नीचैरुच्चारिते स्वरभेदे । स्वराहि त्रिविधाः उदात्तः अनुदात्तः स्वरित इति भेदात् तत्र "उच्चैरुदात्तः" "नीचैरनुदात्तः" "समाहारः स्वरित" इति च पा० । तालादिषु, समागेषु स्थानेषूर्द्ध्वभागे निष्पन्नोऽनुदात्तः, तत्रैव नीचभागे निष्पन्नोऽच् अनुदात्तः । "तस्मादित उदात्तमर्द्धहस्वमिति" पा० । यस्मादितोऽर्द्धह्रस्वमुदात्तमन्त्यमनुदात्तं ताभ्यः स्वरः स्वरितः इति" "अनुदात्तं पदमेकवर्ज्ञ"मिति"अस्यैव निघात नीचादि संज्ञा उदात्तानुदात्तत्वादिकं स्वरवर्णस्यैव न तु व्यञ्जनानां, यथोक्तम् शिक्षायाम् "उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः ह्रस्वोदीर्घः प्लुतश्चेति कालतोनियमस्त्रयः" । "प्रयत्नप्रेरितोवायुर्यदोर्द्ध्वभागे प्रतिहतोऽचं निष्पादयति स उदात्तः । एवमधोनिष्पन्नोऽनुदात्त इति" शब्देन्दु० । "उदात्तानुदात्तस्वरितानां सन्निकर्षः श्रेय श्रुत्यम्" इति आश्व० उक्तम् ।

अनुदार न० न उदारः । अतिदातरि, अतिमकृति च । नास्ति उदारो यस्मात् ५ब० । अतिमात्रदातरि, अतिमकृति च । अनुगतो दारान् अत्या०स० । दारानुगते । "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्चेति का० प्र० । उदारत्वानुदारत्वयोरापाततो विरोधः । उदारत्वानुगतदारत्वाभ्यां तत्परिहारः ।

अनुदित पु० उद्+इण्+क्त द्वैयर्थ्ये न० ७त० । किरणमालेण द्वैयर्थ्यदित्यर्थे प्रविरलतारके काले । "उदितेऽनुदिते चैवेति मनुः न०त० । उदितभिन्ने त्रि० । यद्–क्त न०त० । अवधिते त्रि० ।

अनुदिन अव्य० वीप्सार्थे अव्ययी० । प्रतिदिने "गरावतः खलु शिलाकणमात्रभोगी कामी भवेदनुदिनं वद कोऽत्र हेतु"रित्युद्भटः । अनुदिवसादर्थाद्यत्व ।

अनुदृष्टि स्त्री अनुगता अनुकूला वा दृष्टिः प्रा०स० । अनुगतदृष्टौ, अनुकूलदृष्टौ च । ब० । तथादृष्टिमति त्रि० । तथाभूतस्त्रियाः अपत्यं कल्याण्या०ढक् ङनङ्च । आनुदृष्टिनेयः तदपत्ये पुंस्त्री० । अनुदृष्टेः पुंसोऽपत्यम् शुभ्रा० ढक् । आनुदृष्टेयः तदपत्ये पुंस्त्री० ।

अनुदेश पु० अनु+दिश–घञ् । यथाक्रमोच्चारणे, उपदेशे च "यथासंख्यमनुदेशः समानामिति" पा० । अनुदिश्यते कर्मणि घञ् । उपदेशे "अनुदेशाद्याः पुरोडाशेत्यादि" कात्या० १८,६,१५ ।

अनुद्देश पु० न उद्देशः अभावार्थे न०त० । उद्देशाभावे ।

अनुद्धत त्रि० न उद्धतः विरोधे न०त० । विनययुक्ते ।

अनुद्धरण न० न उद्धरणम् अभावार्थे न०त० । उद्धाराभावे

अनुद्धार पु० न उद्धारः अभावार्थे न०त० । उद्धाराभावे । न उद्धारः विभाज्यविशेषस्योत्थापनं यत्र । विशोद्धारशून्ये विभागे त्रि० । "अनुद्धारोविभागः स्यादिति स्मृतिः ।

अनुद्धृत त्रि० न उद्धृतसुत्थापितम् । अनुत्थापिते "यथोऽनुद्धृतसारश्चेति" इविष्यविषये स्मृतिः ।

अनुद्भट त्रि० न उद्भटः विरोधे न०त० । अप्रलुभे ह्रस्वे ।

अनुद्यम पु० न उद्यमः अभावे न०त० । उद्यमाभावे । न० ब० । उद्यमशून्ये त्रि० ।

अनुद्यूत न० अनु+द्यू–क्त । द्यूतस्य पश्चात् पुनर्द्यूते । तद्विधिश्च कृतप्रन्थतयोक्तमनुद्यूतपर्व सभापर्वणि द्रष्टव्यम् ।

अनुद्योग पु० न उद्योगः अभावे, न०त० । उद्योगाभावे ब० । उद्यमशून्ये त्रि० ।

अनुद्रुत त्रि० अनु+द्रु–क्त । अनुगते "धनुर्द्धरै राजसुतैरनुद्रुतमिति रघुः "अनुद्रुतः संयति येन केवलं बलस्य यत्नः प्रथयंस धीमतामिति" माघः । "अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धञ्चाप्यनुद्रुतमित्युक्ते" मात्राचतुर्थभागकाले तालभेदे न० । [न०त० । तच्छून्ये त्रि० ।

अनुद्वाह पु० न उद्वाहः अभावार्थे न०त० । विवाहाभावे

अनुद्विग्न त्रि० न उद्विग्नः विरोधे न०त० । उद्विग्नभिन्ने अव्याकुलचित्ते ।

अनुद्वेग पु० न उद्वेगः अभावार्थे न०त० । उद्वेगाभावे न०ब० । तच्छून्ये त्रि० "अनुद्वेगकरं वाक्यं सतां स्वाभाविकं मतमिति" नीति० ।

अनुधावन न० अनु+धाव–ल्युट्। पश्चाद्गमने, तत्त्वनिश्चयार्थानुसरणे, अनुसन्धाने च। [आसक्तौ च।

अनुध्या स्त्री अनु+ध्यै–अङ्। शुभानुचिन्तने, अनुपदेशे,

अनुध्यान न० अनु+ध्यै–ल्युट्। अनुक्षणचिन्तने "या नः प्रीतिर्विरूपाक्ष! त्वदनुध्यानसम्भवेति" कुमा०।

अनुध्याय पु० अनु+ध्यै–कर्त्तरि घञ्। अनुचिन्तके शुभानुचिन्तके। "बालस्याथवृद्धस्य वा तदनुध्यायमनसेति" मा०त० स्मृतिः।

अनुध्येय त्रि० अनु+ध्यै–कर्म्मणि यत्। अनुध्याहेतु यदीयशुभानुचिन्तनं क्रियते तस्मिन्। "अनुदध्युरनुध्येयं साध्वध्यैः प्रतिभागतैरिति" रघुः।

अनुनय पु० अनु+नी+अच्। विनये, प्रणिपाते, प्रार्थने, सान्त्वने च। "कथं नु? शक्योऽनुनयोमहर्षेर्विश्राणनादन्यपयस्विनीनामिति" रघुः। [अनुरूपशब्दे।

अनुनाद पु० अनुरूपोनादः मा०स०। प्रतिध्वनौ प्रतिशब्दे

अनुनादिन् त्रि० अनु+नदति अनु+नद–णिनि। प्रतिरूपशब्दकारके "गम्भीरेणानुनादिनेति" रामा०।

अनुनायिका स्त्री अनुगता नायिकाम्। नायिकानुगतायाम् "सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा। अन्याश्च शिल्पकारिण्यो विज्ञेया ह्यनुनायिका" इत्युक्तदास्यादौ।

अनुनाश पु० अनु+नश–घञ्। अनुसरणे। अदूरदेशादावर्थे सङ्गणादि० ख आनुनाश्यः तददूरदेशादौ त्रि०।

अनुनासिक त्रि० अनुगतो नासिकाम् अत्या०स०। नासिकया सह स्वस्थानेनोच्चार्य्यमाणेषु वर्णभेदेषु। ते च "अमोऽनुनासिकाश्च ह्रौ" इति शिक्षायां दर्शिताः हकाररकारभिन्नाः अम्प्रत्याहरान्तर्गताः वर्णाः। "मुखनासिकावचनोऽनुनासिक" इति पाणिन्युक्तेष्वेषां तत्तत्स्थानसहितनासिकयोच्चार्य्यमाणत्वात्तत्त्वम् "उपदेशेऽजनुनासिक" इति पा०। अम्प्रत्याहारमध्ये रभिन्ना यवलाः निरनुनासिकाः सानुनासिकाश्च तत्तानुनासिकस्थाने उत्पन्नत्वबलादेव सानुनासिकत्वम् "यलोद्विधाऽरो निरनुनासिकः सानुनासिकः। अमोऽनुनासिकस्तेन तत्स्थाने सानुनासिक" इत्यभियुक्तोक्तेः यथा यय्यँय्यते विद्वाल्लिखति, सर्व्वत्सरः अन्ये निरनुनासिका। वेत्यनुवृत्तौ "अणोऽप्रगृह्यस्यानुनासिक" इति पाणिन्युक्तेरप्रगृह्या एवाणोऽनुनासिकाः।

अनुनीत त्रि० अनु+नी–क्त। कृतानुनये यस्य सान्त्वनार्थं विनयादिकं क्रियते तस्मिन्। "स चानुनीतोऽपि भृशं चुकोपेति" भारतम्।

अनुनेय त्रि० अनु+नी–कर्म्मणि यत्। अनुनयकरणार्हे, अनुनेतुं योग्ये च।

अनुपकार पु० न उपकारः अभावार्थे न०त०। उपकाराभावे विरोधे न०त०। अपकारे। [स्त्रियां ङीप्।

अनुपकारिन् त्रि० न उपकारी विरोधे न०त०। अपकारिणि

अनुपचित त्रि० उप+चि–क्त वेदे निष्ठातस्य न नत्वम् न०त०। अनुपचीर्णे। "सुवीर्यं वर्षिष्ठमनुपचितम् ऋ० ३,१३,७ अनुपचितम् "अनुपचीर्णमिति" भा०। लोके तु अनुपचीर्णः त्रि०।

अनुपठित न० अनु+पठ–भावे क्त। गुरुमुखपाठानुसारिपाठे अनुपठितमनेन इष्टादि० इनि। अनुपठितो कृतानुपाठे त्रि० स्त्रियां ङीप्। [पतने च।

अनुपतन न० अनु+पत–ल्युट्। अनुकूलपतने, अनुरूप-

अनुपति अव्य० पत्युः सामीप्यम् अव्ययी०। पतिसमीपे। "अनुपति पत्नीरुत्तर उत्तर" इति कात्या० १२,२,१६, दीक्षाकर्त्ता पतिसमीपे तत्पत्नीः दीक्षयतीति तद्व्याख्या।

अनुपथ पु० अनुकूलः पन्थाः अच् समा०। अनुकूलमार्गे "अन्तस्था अनुपथा" इति ऋ० ५,५२,१०, अनुपथाः अनुकूलमार्गाः" इति भा०। पथःसमीपे पथि वा अव्ययी०। पथिसमीपे पथीत्यर्थे वा अव्य०। परिमुखा० अञ्। आनुपथ्यम् पथिभवादौ त्रि०।

अनुपद न० अनुरूपं पदम् प्रा०समा०। अनुकूलपदे अनुरूपस्थाने "आशिषामनुपदमिति" "अर्घानुपदमाशिष" इति च रघुः। पदस्य पश्चात् अव्ययी०। पदस्य पश्चादित्यर्थे पश्चाद्गमने च। भवादौ परिमुखा० अञ् आनुपद्यः तत्र भवादौ त्रि०। सुप्तिङन्तं पदं तत्सदृशं अन्यमधीते वेत्ति वा उक्थादि० ठक्। आनुपदिकः तदध्येतरि तद्वेत्तरि च त्रि०।

अनुपद् न० अनुपद्यते प्रतिदिनं लभ्यते अनु+पद्–क्विप्। प्रतिदिनलभ्येऽन्ने। "अनुपदस्यानुपदे त्वा" य० १५,८, "प्रतिदिनमनुपद्यतेऽनुपदन्नमिति" वेददीपः।

अनुपदिक त्रि० अनुपदमस्यास्य गन्तृत्वेन ठन्। पश्चाद्गते

अनुपदिन् अनुपदमन्वेष्टा अनुपद+इनि। अनुपदम् अन्वेष्टरि (अन्वेषणकर्त्तरि) "अनुपद्यन्वेष्टेति" पा० "मृगस्यानुपदो रामो जगाम गजविक्रम" इति भट्टिः।

अनुपदिष्ट त्रि० उप+दिश–क्त न०त०। उपदेशाकर्म्मणि।

अनुपदीना स्त्री अनु, पदस्य आयामतुल्यायामः आयामेऽव्ययी०। अनुपदं वस्त्रेत्यर्थे ख। पादतुल्यायामवत्यां पादवस्त्रायां पाडुकायाम् (मोजा) इत्यादि ख्यातायाम्।

अनुपधि त्रि० नास्ति उपधिश्छलं यत्र । निष्कपटे सरल-व्यवहारे । [ज्ञानलक्षणाधीनज्ञानाविषयीभूते त्रि० ।

अनुपनीत पु० न उपनीतः न०त० । अकृतोपनयनसंस्कारे

अनुपन्यास त्रि० न उपन्यासः अभाषे न०त० । उपन्यासाभावे कथनाभावे । न०ब० । कथनशून्येवागारस्थशून्ये त्रि० ।

अनुपपत्ति स्त्री उप+पद-क्तिन् उपपत्तिर्युक्तिः न०त० । युक्त्यभावे, असङ्गतौ च । "तात्पर्य्यानुपपत्तिश्च" इति भाषा० । उपपत्तिश्च न्यायादिमते व्यतिरेकव्याप्तिज्ञानाधीनानुमितिः" आपादकज्ञानाधीना आपाद्यनिश्चयरूपा ऽनुभूतिर्वा । यथा पीनोदेवदत्तो दिवा न भुंक्ते इत्युक्ते दिवाऽभोजिनः पीनत्वं रात्रिभोजनं विनानुपपद्यमिति" अभोक्तुः पीनत्वासम्भवेन रात्रिभोजनं निश्चीयते तथा हि पीनत्वस्य भोजनव्याप्यतया पीनत्वाभावस्य च रात्रिभोजित्वाभावव्याप्यतानिश्चयेन पीनत्वेन रात्रिभोजनमनुमीयते सा चानुमितिः अर्थापत्तित्वेन व्यवह्रियते इति नैयायिकाः । मीमांसकवेदान्तिभिस्तु कल्पयामि अर्थापत्तामीति विलक्षणानुभवात् अनुमितिभिन्नैव सेति स्वीक्रियते । अधिकमर्थापत्तिशब्दे वक्ष्यते ।

अनुपपन्न त्रि० उप+पद-क्त न०त० । उपपत्तिशून्ये ।

अनुपबाध त्रि० नास्ति उपबाधा प्रतिबन्धोऽस्य । प्रतिबन्धशून्ये ।

अनुपम त्रि० नास्ति उपमा यस्य । अतुल्ये अन्यसादृश्यरहिते अत्युत्कृष्टे । 'बलं प्रमाणं यस्यैव परैरनुपमं मतम्' इति रा० । कुमुददिग्गजयोषिति स्त्रीत्यमरः । सुप्रतीकदिग्गजस्त्रियां स्त्रीति मेदिनिः ।

अनुपमेय त्रि० कोनापि न उपमीयतेऽसौ उप+मि-कर्म्मणि यत् न०त० । अन्यैरतुल्ये, अन्यसादृश्यरहिते ।

अनुपयुक्त न उपयुक्तम् उचितं भुक्तं वा न०त० । असुचितभिन्ने अननुरूपे भुक्तभिन्ने च ।

अनुपयोग पु० न उपयोगः आनुकूल्यं भोजनं वा न०त० । आनुकूल्याभावे, भोजनाभावे च । न०ब० । आनुकूल्यशून्ये, भोजनशून्ये च त्रि० । [रागनिवृत्तिशून्ये ।

अनुपरत त्रि० उपरतः निवृत्तः न०त० । अनिवृत्ते विषय-

अनुपरति स्त्री न उपरतिः विषयरागः अभावे न०त० । विषयरागाभावे । [शेषाज्ञाते अतर्किते ।

अनुपलक्षित त्रि० न उपलक्षितः विशेषेण ज्ञातः । विशे-

अनुपलब्धि स्त्री न उपलब्धिः अभावे न०त० । ज्ञानाभावे प्रत्यक्षाद्यभावे च । तत्र अनुपलब्धिश्च न केवलं इन्द्रियादिसन्निकर्षाभावमात्रेण, किन्तु तत्सन्निकर्षेऽपि कारणान्तरादपि भवति यथोक्तं सांख्यतत्त्वे । "सौक्ष्म्यात्तदनुपलब्धिरिति" । तदेव कारिकायां विवृतम् 'अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । सौक्ष्म्यादव्यवधानादभिभवात् समानाभिहारादिति "नास्ति घटोऽनुपलब्धेरिति" । योग्यपदार्थस्यानुपलब्धिश्च अभावज्ञानरूपा । तत्विवरणं योग्यानुपलब्धिशब्दे द्रष्टव्यम् ।

अनुपवीत पु० न उपवीतं यज्ञसूत्रं विधिना जातस्य । अनुपनीते बालके । उपवीतादन्यत्रोत्तरीये च ।

अनुपशम पु० न उपशमः शान्तिः निवृत्तिर्वा अभावे न०त० । शान्त्यभावे, निवृत्त्यभावे च ।

अनुपसंहारिन् पु० न्यायमते परिभाषिते दुष्टहेत्वाभासे । स च अन्वये व्यतिरेके च दृष्टान्तरहितत्वेन दुष्टो हेतुः । यथा सर्वमभिधेयं प्रमेयत्वादित्यनुमाने सर्वस्यापि पक्षत्वेन अन्वये दृष्टान्तो नास्ति नापि व्यतिरेके दृष्टान्तः, सर्वस्यापि प्रमेयतया तदभावस्य असम्भवेः । "तथैवानुपसंहारी केवलान्वयिपक्षक" इति । "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधा नैकान्तिको मत" इति च भाषा० मुक्तावल्यान्तु सर्वमभिधेयं प्रमेयत्वादित्यादिकं तदुदाहरणत्वेनोपन्यस्तं "केवलान्वयिपक्षक इत्यस्य च केवलान्वयिसाध्यक इत्येतत्परतया व्याख्यातञ्च । यथा "केवलान्वयिधर्म्मावच्छिन्नपक्षक इत्यर्थः । सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्व्वस्यैव पक्षत्वात् सामान्याधिकरण्यग्रहस्थलान्तराभावाच्चानुमितिः इदन्तु न सम्यक् । पक्षैकदेशे घटसहचाराग्रहेऽपि व्यतिरेकाभावात् अस्तु वा सहचाराग्रहस्तावतापि पक्षे अज्ञानरूपाभिरेव न तु हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् । उपसंहाराकारके त्रि० ।

अनुपसेचन त्रि० नास्ति उपसेचनं व्यञ्जनं यत्र । दध्यादिव्यञ्जनशून्ये अन्ने "स यत्तदन्नस्य सर्पिष्मान् विद्यादि" त्युपक्रम्य 'नास्य इति ब्रूयान्नानुपसेचन" इति उक्तम्, अथ० १९, २, ४ ।

अनुपस्कृत त्रि० उप+कृ क्तिन् सुट् न०त० । अकृतपाकादिसंस्कारे अविकृते च "शुन्धन्तामिति पयः सोमो मांसं यज्ञानुपस्कृतमिति" मनुः अनुपस्कृतं पाकोपस्कारारहितमिति टीकृत० । "अविकृतमिति" कुल्लू० । अपरिष्कृते "अजमप्यमयश्चैव राजतञ्चानुपस्कृतमिति" मनुः । इष्टप्रयोजनानभिज्ञे, "ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृत"

इति मनुः "इष्टप्रयोजनानपेक्ष" इति कुल्लू०। अनिन्दिते च "एषोऽनुपस्कृतः प्रोक्त" इति मनुः अनुपस्कृतः अविहित इति कुल्लू०। [भावे न०व०। तच्छून्ये त्रि०।

अनुपस्थान न० न उपस्थानम् अभावे न०त०। उपस्थाना-

अनुपस्थाप्य त्रि० न उपस्थाप्यः। अक्षरणीये। प्रथमान्तपदानुपस्थाप्यत्वादिति जग०। [भावे, स्तुत्यभावे च।

अनुपस्थिति स्त्री न उपस्थितिः अभावे न०त०। उपस्थित्य-

अनुपहत न० न उपहतः भोगच्छेदादिना। सद्यो नवे अभुक्ते वस्त्रे "अनुपहतमतिधवलमिति" काद०। उपघात शून्ये त्रि०। [रचनादिसंस्कार उपाकरणं तद्रहिते।

अनुपाकृत त्रि० उप-आ-कृ-क्त न०त०। सत्कैर्यज्ञे पशो-

अनुपात पु० अनुरूप त्रैराशिकेन पातः। पाटीगणितोक्तेन त्रैराशिकेन युक्तसंख्यापाते। "पुरान्तरं चेदिदमुत्तरं स्यात् तदत्रविश्लेषबलैस्तदा किम्?। चक्रांशकैरित्यनुपात-युक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्" सि०शि०॥ "निरक्षदेशः खदेशाद्यथा यथा दक्षिणतो भवति तथा तथा खस्वस्तिकाद्विषुवद्वृत्तं नतम् तयोरन्तरेऽक्षांशाः। ते च निरक्षदेशजापसारयोजनैरनुपातेनोत्पद्यन्ते। अतः कस्मिंश्चित् पुरेऽक्षांशान् ज्ञात्वा तस्मात् पुरादुत्तरतोऽन्यस्मिन् पुरे ज्ञेयाः। ततस्तेषामन्तरांशैः पुरान्तरयोजनैश्चानुपातः। यद्यन्तरांशैः पुरान्तरयोजनानि लभ्यन्ते तदा चक्रांशैः ३६० किमिति फलं भूपरिधियोजनानि" इति प्रमि०। तदानयनञ्च "प्रमाणनिक्षा च समानजाती आद्यन्तयोः स्तः, फलमन्यजाति मध्ये, तदिच्छाहतमाद्यहृत् स्वा"दित्युक्त त्रैराशिकरीत्या अन्तरयोजनसंख्याङ्केन राशिचक्रसंख्या-३६० ङ्के गुणिते पुरान्तरयोजनाङ्केन विभक्ते लब्धं परिधिमानसंख्या। पश्चात्पतने च। अनुगतः पातं राङ्करूपयहभेदम्। पातयहानुगते। अनु+पत-णिच् घञ्। पश्चादुपातयित्वेत्यर्थे अव्य०। किन्तु कर्म्मोपपदेन सह "अमैवाव्ययेने"ति पा० नित्यसमासः "लतानुपातं कुसुमान्यगृह्णादिति" भट्टिः।

अनुपातक न० अनुपातयति नरकं गमयति पत-णिच्-ण्वुल् पातकं ब्रह्महत्यादि तत्सदृशम् प्रा०स०। ब्रह्महत्यादिमहापातकसदृशे वेदनिन्दादिजन्ये पापविशेषे तानि च पञ्चत्रिंशत्प्रकारहेतुत्ववेन तावत्संख्यातानि अनुरत्न साहश्ये तेन पतनहेतुमहापातकतुल्यत्वादस्य अनुपातकत्वमिति प्रा० वि०। तानि च विष्णुना दर्शितानि यथा "यागस्थस्य क्षत्रियस्य वैश्यस्य च, रजस्वलायाश्चार्त्तवव्यत्याशान्निगोतायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति, कौटसाक्ष्यं सुहृद्वध एतौ सुरापानसमौ। ब्राह्मणस्य भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेयसमम्। पितृव्यमातामहमातुलश्वशुरदत्पत्यभिगमनं गुरुदारगमनसमम्। पितृष्वसृमातृष्वसृसखिगमनञ्च श्रोत्रियवर्त्तिगुणाध्यायसित्पत्यभिगमनञ्च स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्याः अन्त्यजाया रजस्वलायाः शरण्यागतायाः प्रव्रजिताया निक्षिप्तायाश्च॥ अनुपातकिनस्ते महापातकिनो यथा अश्वमेधेन शुध्यन्ति तीर्थानुसरणेन वा इति"॥ नरकाख्यभिधाय "एतेऽकृतप्रायश्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते, मन्वन्तरं तु महापातकिनः, अनुपातकिनश्च, उपपातकिनश्चतुर्युगमिति विष्णुः स०। तथा च महापातक सदृशान्येतानि पातकानि। अन्यान्यपि मनुना सहिभ्य दर्शितानि यथा "अन्तश्च मलदुष्कर्षे राजगामि च पैशुनम्। गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया॥ ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्॥ निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनाञ्च रुक्मस्तेयसमं स्मृतम्॥ रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च। सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति"॥

अनुपातकिन् त्रि० अनुपातकमस्त्यस्य इनि स्त्रियां ङीप्। अनुपातकयुक्ते "अनुपातकिनस्ते ते महापातकिनस्तथा" स्मृ०।

अनुपातिन् त्रि० अनुपतति अनुगच्छति अनु+गम-णिनि अनुगामिनि।

अनुपान न० अनु भेषजेन सह पश्चाद्वा पीयते कर्म्मणि ल्युट्। औषधेन सह, तत्पश्चाद्वा पेये मधुगुड़ादौ। पानस्य जलस्य समीपे अव्ययी०। जलसमीपे अव्य०।

अनुपाद्दत्त त्रि० न उपाद्दत्तः। अपराद्दत्ते।

अनुपुष्प पु० अनुगतं पुष्पं तद्विकाशम् अत्या०स०। भरद्वाजे तस्य पुष्पेणैव प्रकाशात्तथात्वम्।

अनुपूर्ब्ब त्रि० अनुगतं पूर्ब्बं परिपाटीं गतिस०। यथाक्रमप्राप्ते यथाक्रान्यनुपूर्ब्बं भवति ऋ० १०,१८,५ "यथावदनुपूर्ब्बश" इति वर्णानामनुपूर्ब्बश" इति च मनुः। अनुपूर्ब्ब+शस्। अनुपूर्ब्बशः। "दत्तानुपूर्ब्बं च न चानिदोर्षं" इति कुमा० "ततोऽनुपूर्ब्बायतदत्तबाहुरिति" भारविः पूर्ब्बमनुगतौ गोपुच्छाकारावितिमल्लि०, अनुगतः पूर्ब्बम्। पश्चादुगामिनि त्रि०। आग्नेयः प्रथमो गच्छत्यन्वारब्धो-

ऽनुपूर्व्वा इतरे, कात्या० ८,८,२६ "इतरे दश पशवः अनन्वारब्धा एव अनुपूर्व्वाः अनुगामिनो भवेयुरिति" व्या० निकृष्टप्रमाणे च "अनुपूर्व्वाइतरे" कात्या० ८,८,२०, "अनुपूर्व्वाः निकृष्टा ह्यनुगच्छन्ति अत्र च प्रमाणेन निकृष्टत्वम् । अतश्च दक्षिणश्च वर्षिष्ठत्वसूत्रं तत उत्तरश्च तदपेक्षया हीनप्रमाणत्वं तदपेक्षया तत उत्तरश्च, तदपेक्षया तदुत्तरश्चेत्येवमेकादशो यूपः सर्वतो निकृष्टो यथा भवति तथा कर्त्तव्यमिति" व्याख्या । अनुपूर्व्व+भावादौ ष्यञ् । आनुपूर्व्ये तद्भावे त्वित्वात् चातुरीवत् वा स्त्री "साजात्यञ्च समानानुपूर्व्वीकत्वेनेति" जग० । वेदे पृ० पूर्व्वपदह्रस्वः । अनुपूर्व्वी आनुपूर्व्व्यौ स्त्री । "वर्षिष्ठरथनः पुरुषोऽनुपूर्व्व्या इतरेषामिति" कात्या० १६,१,६, "अनुपूर्व्या द्विव्यामया रथनया" इति व्याख्या ।

अनुपृष्ठ्य त्रि० अनुपृष्ठं बध्यते अनुपृष्ठ+यत् । पृष्ठमध्ये बध्यमाद्यौ "अनुपृष्ठ्यामायस्य पार्श्वयोरिति" कात्या० १६,८,५ ।

अनुपेत त्रि० न उपेतः । उपगतभिन्ने । उपगमनञ्च उपनयनार्थं गुरुसमीपगमनम्, तच्छून्ये च । न स्त्री जुह्वयान्नानुपेते" इति स्मृतिः "अनुपेतः अनुपनीतः" इति रघु० । "अं प्रव्रजन्तमनुपेतमपेतकृत्यमिति" भाग० अत्रापि शुकस्य विद्वत्त्वेन कृत्यसामान्याभावेन अनुपनीततयैव प्रव्रज्योक्तिः ।

अनुप्रदान न० अनुप्रदीयते वर्णविशेषरूपता आधीयते अनेन अन+प्र+दा-करणे ल्युट् । वर्णोत्पादनवाह्यप्रयत्नभेदे "एते श्वासानुप्रदाना अघोषाश्च विवृण्वते" इति सि० कौ० । श्वासः अनुप्रदानं बाह्यप्रयत्नो येषामिति तत्त्वबो० । "अनुप्रदानात् संसर्गात् स्थानात् करणविन्यासात् । जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमादिति" शिक्षा ।

अनुप्रवचन न० अनुरूपं गुरुनुखोच्चारितानुरूपं प्रवचनम् । गुरुच्चारितानुवचने । तत्प्रयोजनमस्य क । अनुप्रवचनीयः तथाभूत अध्ययनप्रयोजनयुक्ते त्रि० ।

अनुप्रवचनादि पु० तैत० । णिन्यन्ते "तदस्य प्रयोजनमित्यर्थे विहितप्रत्ययनिमित्ते प्रकृतिभूते शब्दसमूहे । अनुप्रवचन, उद्यापन, उपस्थापन, संवेशन, अनुप्रवेशन, अनुवादन, अनुवचन, अनुवाचन, अन्वारोहण, प्रारम्भण, आरम्भण, आरोहण ।

अनुप्रवेश पु० अनु+प्र+विश+भावे घञ् । अनुरूपप्रवेशे "पुरोष इद्दिं फरिदन्वदीधितेरनुप्रवेशादिव बाधचन्द्रमाः" इति रघुः । अभावाच्चाद्यचन्द्रार्कयोः एकराश्यवस्थितत्वेन सूर्य्यषड्भागादधःस्थितत्वाच्चार्वाचीनचन्द्रस्यान्तरगतौ सूर्य्यरश्मेरिन्दौ प्रवेशः तदुत्तरञ्च क्रमशःप्रवेशाधिक्यम् "सलिलमये गगनि रवेर्दीधितयोमूर्च्छितास्तमोनैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्तरिति" दण्डिनः । यथा च तस्याधस्त्वं तथा इन्दुशब्दे वक्ष्यते । तथाहि यावद्यावच्च सूर्य्यात् चन्द्रमाः पूर्वं गच्छति तावत्तावदेव व्यवधानानुरूपेण सूर्य्यरश्मेस्तत्र क्रमशःप्रवेशः ।

अनुप्रासः पु० अनुगतः रसाद्यनुगुणं प्रकृष्टन्यासं वर्णन्यासं समवर्णरचनां समवर्णोच्चारणं वा गतिश० । अलङ्कारप्रसिद्धे स्वरवैषम्येऽपि समवर्णानां तुल्यरचनारूपे "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् (सा० द०) उक्ते शब्दालङ्कारभेदे । स च पञ्चधा ते च सोदाहरणलक्षणा दर्शिते यथा "छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा" । छेकश्छेकानुप्रासः । अनेकधेति स्वरूपतः क्रमतश्च । रसः सर इत्यादिक्रमभेदेन सादृश्यं नाम्नालङ्कारस्य विषयः । यथा "आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान् । अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः" ॥ अत्र गन्धानन्धीकुर्वन्निति संयुक्तयोः, कावेरीवारीत्यसंयुक्तयोः । पावनः पवन इति बहूनां व्यञ्जनानां सकृदात्तिः । छेको विदग्धः तत्प्रयोज्यत्वादेष छेकानुप्रासः । "अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा । एकस्य सकृदप्येष उक्तश्चानुप्रास उच्यते" ॥ एकधा स्वरूपत एव न तु क्रमतोऽपि । अनेकधा स्वरूपतः क्रमतश्च । सकृदपीत्यपिशब्दादसकृदपि । यथा "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः । नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः" । अत्र रसोल्लासैरमी इति रसयोरेकधैव साम्यम् । न तु तेनैव क्रमेणापि । द्वितीये पादे तु कालयोरसकृत् तेनैव क्रमेण च । प्रथमे एकस्य तकारस्य सकृत् । रसविषयव्यापारवती वर्णरचना दीप्तिरसानुगतत्वेन प्रकर्षेण न्यसनाद्भवेदनुप्रासः । "उच्चार्यत्वाद्यदैकत्र स्थाने तालुरदादिके । सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते" ॥ यथा "इयं दक्षं मनसिजं जीवयन्ति दृशैव याः । विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः" ॥ अत्र "जीवयन्तीति" "या इति" "जयिनीरिति" अत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्यत्वात् सादृश्यम् । एवं दन्त्यकण्ठ्यादिस्थानभेदादार्थ्यम् । एष च सकृदुच्चारणमतीव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः । "व्यञ्जनं चेद्यथास्थानं सकृदेकेन रूपेण तु । आवर्त्यतेऽन्य-

योज्यत्वादन्त्यानुप्रास एव तत्"॥ "यथावस्थमिति" यथा सम्भवमनुस्वारविसर्गस्वरसंयुक्ताक्षरविशिष्टम्। एष च प्रायेण आदस्य पदस्य चान्ते प्रयोज्यः। यादान्तगो यथा "केशः काशस्तवकविकासः कायः प्रकटितकरभविलासः। चक्षुर्दग्धवराटककल्पं त्यजति न चेतः कामममल्पम्" ॥ यदान्तगो यथा। "मन्दं हसन्तः पुलकं वहन्त इत्यादि। "शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः। लाटानुप्रास इत्युक्तोऽनुप्रासः पञ्चधा ततः" इति। यथा "स्मेराजीवनयने! नयने किं निमीलिते?। पश्य निजितकन्दर्पं कन्दर्पवशगं प्रियम्॥ अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि सूक्ष्मतरस्य प्रातिपदिकार्थद्योत्यधर्म्मिरूपस्याभिन्नार्थत्वाल्लाटानुप्रासत्वमेव। "नयने तस्यैव नयने" अत्र द्वितीय नयनशब्दो भाग्यगतादिगुणविशिष्टत्वरूपतात्पर्य्यमात्रेण भिन्नार्थः। यथा वा। "यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य। यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य" ॥ अत्रानेकपदानां पौनरुक्त्यम्। एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रास" इति।

अनुप्लव पु० अनु–प्लु–अच्। सहाये, अनुचरे, दासे च। "सानुप्लवः प्रभुरपि क्षणदाचराणामिति" रघुः।

अनुबन्ध पु० अनु+बन्ध–यथायथं भावादौ घञ्। बन्धने, इच्छापूर्वकदोषविशेषाभ्यासे, "अनुबन्धादिकं दृष्ट्वा सर्वं कार्यं यथाक्रममिति" स्मृतिः। "अनुबन्धः पौनःपुन्येनाभिनिवेश" इति रघुः। शास्त्रस्मादौ वक्तव्येषु अधिकारिविषयप्रयोजनसम्बन्धेषु, "अनुबन्धोनामविषयप्रयोजनाधिकारिसम्बन्ध" इति "अस्य वेदान्तप्रकरणत्वात्तदैरेवानुबन्धैस्तद्वत्तासिद्धेरिति च" वेदा०सा०। "ज्ञातार्थं ज्ञातसम्बन्धः श्रोतुं श्रोता प्रवर्त्तते। ग्रन्थादौ तेन वक्तव्यः सम्बन्धः स प्रयोजन" इत्युक्तेः विषयप्रयोजनादीनामारम्भप्रयोजकत्वात् सङ्गत्वम्। अस्मिन् पक्षे च अनुबध्यते अनेनेति करणे घञ्। मुख्यानुयायिनि अप्रधाने, बालकादौ प्रकृतस्यानुवर्त्तने, संबन्धे, वातपित्तादिदोषाणामप्राधान्ये, प्रकृतिप्रत्ययागमादेशानां विकरणागमगुणवृद्ध्यादिकार्य्यविशेषार्थमनुबन्धनीये परिनिष्पन्नपदकालेषु अश्रूयमाणतया नश्वरे कृतसंज्ञतया क्षतलोपे वर्णादौ, "पदानिङ्विङ्विकरणाद्यनुबन्धगणोदितम् कर्म्मोच्चारणमात्रेण सदृशत्वानुबन्धत इति" कविकल्पद्रुमः। फलसाधने पुनःपुनरनुष्ठानाभ्यासे, "अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः। सत्त्वापरावौ चालोक्य दृष्ट्वा दण्ड्येषु पातयेदिति" मनुः। बन्धेऽपि मेदिनिः। आरम्भे, शब्दरत्ना०। अनुसरणे "शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयाज्ज्वर इति" सुश्रुतम्। सन्ततसम्बन्धे (अविच्छेदे) "सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः" इति रघुः। अनुबध्यते अनुरुध्यते कर्म्मणि घञ्। पश्चाद्भाविनि शुभाशुभे। "अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्" इति गीता पश्चात्सम्बन्धे च। "यदग्रे चानुबन्धे च सुखं मोहनमात्मन" इति गीता।

अनुवन्धिन् त्रि० अनुबध्नाति अनु+बन्ध–णिनि। सहचरे, अनुगते, अनुरोधिनि, व्यापके च। स्त्रियां ङीप्। "गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव" इति रघुः। "अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके" इति गीता। "सूक्ष्मानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुरिति" "मेदःकषायैः खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी" इति च सुश्रुतम्।

अनुवन्ध्या स्त्री अनुबध्यतेऽतिस्नेहेन व्याप्रियतेऽनया अनु+बन्ध–घञ् गौरा० ङीष्। स्त्रिक्कारोगे, व्रणायाञ्च।

अनुवन्ध्य त्रि०वधार्थं बन्धोऽनुबन्धः अनु+बन्ध-कर्म्मणि ण्यत्। वधार्थं बध्ये गवादौ। "नानुबन्ध्यावधोऽपि वा। तयोर्द्वारविभागश्च नैव संप्रति वर्त्तते" इति स्मृतिः।

अनुबोध पु० अनु+बुध–णिच्–घञ्। पूर्व्वलिप्तचन्दनादेर्गन्धोद्दीपनार्थं पुनर्मर्दनादौ, पश्चाद्बोधे च।

अनुब्राह्मण न०ब्राह्मणं मन्त्रेतरवेदभागस्तत्सदृशम्। ब्राह्मणसदृशे ग्रन्थे। तदधीते वेद वा इनि। अनुब्राह्मणी ब्राह्मणसदृशग्रन्थाध्यायिनि, तद्वेत्तरि च त्रि० स्त्रियां ङीप्।

अनुभव पु० अनु+भू–अप्। स्मृतिभिन्ने ज्ञाने। विषयानुरूपभवनाच्च बुद्धिवृत्तेरनुभवत्वम्। "वृत्तिसारूप्यमितरत्र" पात० सूत्रे, विषयानुरूपत्वं चित्तवृत्तेरभिहितम्। तथाहि यथा पयः प्रणाल्या क्षेत्रादिकं प्राप्य चतुरस्राद्याकारेण परिणमते एवमेव इन्द्रियादिप्रणाल्याऽन्तःकरणं बहिर्निःसृत्य विषयाकारेण परिणमते तादृशपरिणामरूपवृत्त्या च विषयगतमज्ञानं निवारयतीति अन्तःकरणस्य विषयरूपानुरूपभवनात् अनुभवत्वम्। स्मृतौ तु विषयसन्निकर्षाभावात् न विषयाकारतापाप्तिरिति तद्भिन्ने ज्ञाने एवास्य प्रयोगोपाधिता इति सांख्यवेदान्तिमतम्। अनुभवस्य प्रत्यक्षानुमानोपमाशाब्दभेदेन चतस्रो विधाः इति नैयायिकादयः। वेदान्तिनो मीमांसकाश्च अर्थापत्त्यनुपलब्धिरूपमधिकं तद्भेदद्वयमसरीचक्रुः। वैशेषिकाः सौगताश्च

प्रत्यक्षानुमारूपमेव अनुभवद्वयं स्वीचक्रुः अन्येषां सर्वेषामनयोरन्तर्भावात्। सांख्यादयः प्रत्यक्षानुमाशाब्दा एवेति भेदत्रयीमङ्गीचक्रुः। चार्वाकाः प्रत्यक्षमात्रमिति भेदः। "अनुभवं वचसा सखि लुम्भसीति" नैष०।

अनुभाव पु० अनुभावयति उद्बोधयत्यनेन अनु+भू-णिच्-करणे-घञ्। कोषदण्डादिजाते राज्ञां तेजोविशेषे। सामर्थ्ये च। कर्त्तरि अच्। अलङ्कारशास्त्रप्रसिद्धे रसव्यञ्जके "भावं मनोगतं साक्षात् स्वगतं व्यञ्जयन्ति ये। तेऽनुभावा" इति ख्याताः, इत्युत्तरत्र भूभङ्गादौ। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथेति" सा०द०। अनुभावस्य लक्षणभेदादिकमुक्त्वा दर्पणे। "उद्बुद्धं कारणैः स्वैःस्वैर्बहिर्भावं प्रकाशयन्। लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥ यः खलु लोके सीतादिचन्द्रादिभिः स्वैःस्वैरालम्बनोद्दीपनकारणैरारोपादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः। कः पुनरसावित्याह। "उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः। तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि" ॥ तद्रूपा अनुभावस्वरूपाः। तत्र च यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णने तत्र तत्र दर्शितः। तत्र सात्त्विकाः। "विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः"। सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनाऽन्तरो धर्म्मः। "सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः" ॥ गोबलीवर्द्दन्यायेन इति शेषः। के ते इत्याह। स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥ तत्र। स्तम्भश्चेष्टाप्रतीघातो भवहर्षभयादिभिः। वपुर्ज्वलोष्मभः स्वेदो रतिधर्म्मश्रमादिभिः॥ हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया। मदसंमदपीडाद्यैरस्वर्थं गद्गदं विदुः॥ रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः। विषादमदरोषाद्यैर्वर्ण्यान्यत्वं विवर्णता॥ अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम्। प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिरोधतिः स्मृतिः" ॥ "अनुभावविशेषाश्च सेनापरिगतैरिव" रघुः। तेजसि च। गुरुभिरभिनिविष्टं लोकपालानुभावैरिति" रघुः। माघालोः, "जाने वो रक्षसाक्रान्तावनुभावप्रकाशनौ इति" रघुः।

अनुभावक त्रि० अनुभावयति बोधयति अनु-भू-णिच्-ण्वुल्। बोधके "यत्पदेन विना यस्यानुभावकता भवेत् साकाङ्क्षेति" भाषा०। "येन पदेन विना यत्पदस्यान्वयानुभावकत्वं तेन सह तस्याकाङ्क्षेति" सिद्धान्तमुक्तावली।

अनुभाविन् त्रि० अनुभवति अनु+भू-णिनि। साक्षात्कारादिकारके। "अनुभावी तु यः कश्चित् स्मर्य्यात् साक्ष्यविवादिनामिति" मनुः। मनुपश्चात् भवति। पश्चाज्जाते कनिष्ठादौ। "अनुभाविनां परिवापनमिति" आप०स्मृतिः। अनुपश्चाद्भवन्तीति अनुभाविनः कनिष्ठा इति रत्नाकरः "स्नाशौचमनुभवन्तीति अनुभवकारका" इति शु०त०रघु०।

अनुभाषणा न० अनु सहितं भाषणम्। सहभाषणे।

अनुभू स्त्री अनु+भू-क्विप्। अनुभवरूपे ज्ञानभेदे "अयमात्मा सर्व्वानुभूरिति" बृ०उप०। "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुत्या ब्रह्मणोज्ञानरूपत्वात् सर्व्वज्ञानरूपत्वम्।

अनुभूत त्रि० अनु+भू कर्म्मणि क्त। अनुभवविषयीभूते पदार्थे अनु+भू-कर्त्तरि क्त। पश्चाज्जाते त्रि०।

अनुभूति स्त्री अनु+भू-क्तिन्। अनुभवे तद्विषयकमनुभवजन्ये ज्ञाने दृश्यम्। "अनुभूतिश्चतुर्विधा प्रत्यक्षमथानुमितिस्तथोपमितिश्चाब्दजे" इति भाषा०।

अनुभूतिप्रकाश पु० अनुभूतेरनुभवस्य वेदान्तश्रवणजन्यस्य प्रकाशार्थं माधवाचार्य्यप्रणीते उपनिषत्तात्पर्य्यभाषणे प्रकरणभेदे

अनुमत त्रि० अनु+मन-क्त। स्वयंप्रवृत्ते इदं क्रियतामिति प्रोत्साहनार्थमनुज्ञाते। अनुमोदिते च "कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकमिति" वेणी०। "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि" इति मनुः। "सम्यग्विनीयानुमतो गृहायेति" च रघुः। "उभयानुमतः साक्षीति" स्मृतिः।

अनुमति स्त्री अनु+मन-क्तिन्। अनुज्ञायाम्। "अनुमत्या व्यपेयादिति" स्मृतिः। अनुमन्यते कलाहीनत्वेऽपि पूर्णिमादिक्षितयागादिकरणायानुज्ञायते ऽस्यां अधिकरणे क्तिन्। कलाहीनचन्द्रत्वां शुक्लचतुर्दशीयुतपूर्णिमातिथौ। अनुमतो राकेति देवपत्न्यामिति मैत्रेयाः पौर्णमास्यामिति याज्ञिका या पूर्व्वा पौर्णमासी सानुमतिर्योत्तरा सा राकेति विज्ञायते॥ अनुमतिरनुमननात्। "अनुमतिराकामिनीबालीकृष्णभ्यश्चरव" इति का०१८,६,२१, कुहूं "चैवानुमत्यै च प्रजापतय एव चेति" मनुः।

अनुमन्तृ त्रि० अनु+मन-तृच्। स्वयमुदासीने कार्य्यादौ प्रवृत्तस्यान्यस्योत्साहवर्द्धनार्थमनुज्ञाकर्त्तरि। "अनुमन्ता विशसिता निहन्ता क्रयविक्रयीति" मनुः "उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वर" इति गीता। "अनुमन्ता अनुमोदयितैव सन्निधिमात्रेणानुग्राहक" इति श्रीधरः।

अनुमन्त्रण पु० अनु मन्त्रोच्चारणात् पश्चात् मन्त्रणम् मन्त्रेण

संस्कारादिकरणम् । मन्त्रोच्चारपूर्व्वके यागादिषु संस्कार-भेदे "प्रयाजानुमन्त्रणमिति" कात्या० ३,३,२ ।

अनुमरण न० अनु+मृ—ल्युट् । भर्त्तरि मृते तद्देहाप्राप्तौ तत्पादुकादिग्रहणेन पृथक्चितारोहणेन स्त्रीणां देहत्यागे । "भर्त्तानुमरणं काले याः कुर्व्वन्ति तथाविधाः । कामात् क्रोधात् भयाद्वापि सर्व्वाः पूताः भवन्ति ताः" इति स्मृतिः अनुपूर्व्वकमरणस्य मरणसदृशमरणार्थकत्वेन सकर्म्मकत्वम् अतएव "भवता नानुमृतापि लभ्यते" इति रघौ कर्म्मणि क्तप्रयोगः । अनुमरणं च भर्त्तुः देशान्तरादिमरणे देहाद्यलाभे एव "देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि संशुद्धा प्रविशेज्ज्वातवेदसमिति" स्मृतिः । तत्र क्षत्रियादीनामेवाधिकारो न विप्रायाः, यथोक्तम् । "पृथक्चितां समारुह्य न विप्रा गन्तुमर्हतीति" शु०त०स्मृतौ ।

अनुमा स्त्री अनु+मा—अङ् । परामर्शज्ञानाधीने (व्याप्तधूमादिलिङ्गविशिष्टज्ञानाधीने) ज्ञानभेदे यथा "पर्व्वतो वह्निमानित्यादि" तथाहि धूमादिहेतौ महानसादौ प्राक् भूयः-सहचारदर्शनात् धूमत्ववह्नित्वसामान्यधर्म्मेण सकलवह्नि-धूमादिव्याप्तिनिश्चयः अनन्तरं देशान्तरं गतवतो वह्न्यर्थिनः पर्व्वतादौ धूमदर्शने सति तत्र वह्निव्याप्तिस्मृतिर्जायते एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतायां नियमेन, धूम-दर्शनात् धूमगतायां वह्नेर्व्याप्तेः स्मरणसम्भवात् । तत-स्तादृशधूमवान् अयं पर्व्वत इति निश्चयरूपपरामर्शेन तत्र वह्निमानयमिति निश्चिनोति सोऽयं निश्चयः अनुमितिरूपः अनुभवभेद इति । तत्र च धूमादिलिङ्गज्ञानमेव करणं नतु ज्ञायमानलिङ्गं करणमिति नव्यनैयायिकसिद्धान्तः प्राचीनमते ज्ञायमानलिङ्गमेवेति भेदः "अनुमायां ज्ञायमानं लिङ्गं तु करणं न हीति" भाषा० । "सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमेति" म०म०प्र० ।

अनुमातृ त्रि०अनु+मा—तृच् । अनुमानकर्त्तरि "नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार" इति वाचस्पतिः ।

अनुमान न० अनु—मि—मा—वा भावादौ ल्युट् । व्याप्यस्य ज्ञानेन व्यापकस्य निश्चये, यथा वह्निर्धूमस्य व्यापक इति धूमस्तस्य व्याप्य इत्येवं तयोः भूयः सहचारं पाकस्थानादौ दृष्ट्वा पश्चात् पर्व्वतादौ उद्भूयमानशिखस्य धूमस्य दर्शने तत्र वह्निरस्तीति निश्चीयते । करणे ल्युट् । तद्धेतुभूते धूमादौ । "तच्चानुमानं त्रिविधमिति" चिन्तामणिः । श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र स्मृतिवाक्यात् श्रुतिवाक्यमनुमीयते इति श्रुत्यनुमापकं स्मृतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः । "विरोधे त्वनपेक्षत्वमसति ह्यनुमानमिति जै०सू० । इयं स्मृतिः वेदमूलिका आप्तवाक्यत्वादित्येवमनुमानाकारः इति । "दृष्टमनुमानमाप्तवचनञ्च सर्व्वप्रमाणसिद्धत्वादिति सा०का० । "अतीन्द्रियस्य सिद्धिरनुमानादिति" सांख्य०सू० "प्रत्यक्षपरिकलितसम्बन्धमनुमानेन बुभुत्सते" इति वाच० "प्रत्यक्षमनुमानं च शास्त्रञ्च विविधागममिति मनुः । "एवमनुमाने निरूपिते तस्मात् पुरुषधौरेयसिद्धिरिति" चिन्ता० "नानुमानं रसादीनामिति सा०द० "सपरिकर मनुमानं निरूप्येति" चिन्तामणिदीधितिः ।

अनुमानचिन्तामणि पु० गङ्गेशोपाध्यायकृते न्यायशास्त्र-स्यानुमानतत्त्वज्ञापके प्रकरणभेदे । तत्र च आदौ अनु-मितिस्वरूपादिनिरूपणं ततस्तत्कारणव्याप्तिज्ञानार्थं व्या-प्तिनिरूपणम् ततोव्याप्तिग्रहोपायनिरूपणम् ततो व्याप्ति-ग्रहानुकूलतर्कनिरूपणम्, उक्तासु बह्वीषु व्याप्तिषु कथङ्कारं तासामनुगमस्तन्निरूपणम्" ततः व्याप्तिज्ञानोपायतया सामान्यलक्षणानिरूपणम् ततो हेतोः परिशुद्धिज्ञानार्थ-मुपाधिनिरूपणम् । ततोऽनुमित्यङ्गपक्षतानिरूपणम् परा-र्थानुमानस्य पञ्चावयवन्यायसाध्यतया तन्निरूपणम् । अनु-मितौ परामर्शस्य (साध्यव्याप्तिमद्धेतुविशिष्टज्ञानात्मकस्य) स्वरूपादिनिरूपणम् ॥ ततोहेतुत्रैविध्यस्य (केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकित्वरूपस्य) निरूपणम् ततो वर्জ্জनीयतया हेतोर्दोषाणां (हेत्वाभासानाम्) निरू-पणम् तत्रादौ सासान्यतोहेत्वाभासलक्षणम् ततः सव्य-भिचारस्य, साधारणस्य, असाधारणस्य, अनुपसंहारिणः, असिद्धेश्च क्रमशः, ततो बाधस्य निरूपणम् इत्येतत्पर्य्यन्तं सपरिकरमनुमानं हेयतया तद्दोषांश्च निरूप्य तादृशानुमानेन ईश्वरस्य सिद्धिर्दर्शिता तस्याराधनसहकृतेन योऽयमर्थः तत्त्वज्ञानेनात्यन्तिकदुःखनिवृत्तिरूपापवर्गसिद्धिरित्येते पदा-र्थाः तत्तया अवधेयाः ।

अनुमानदीधिति स्त्री अनुमानरूपचिन्तामणेर्दीधितिरिव । रघुनाथशिरोमणिकृतायामनुमानचिन्तामणिव्याख्यायाम् ।

अनुमार्ग अव्य० मार्गे विभक्त्यर्थे यथार्थे, पश्चादर्थे वा अव्ययी० । मार्गे इत्यर्थे, मार्गानुरूपे, मार्गस्य पश्चादर्थे च । "अनु-मार्गागतायाञ्चेति" काद० ।

अनुमाष अव्य० माषे विभक्त्यर्थे अव्ययी० । माषे इत्यर्थे । परिसङ्ख्या० अत्र । आनुमाष्यः तद्भवादौ त्रि० ।

अनुमास अव्य० वीप्सार्थे अव्ययी० । प्रतिमासे, अनुमासे

भवः ठञ्। आनुमासिकः प्रतिमासभवे "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम्" इति मनुः।

अनुमित त्रि० अनु+मि-कर्म्मणि क्त। ज्ञातानुमाने अनुमानविषयीभूते। "अनुमितोऽपि हि वाह्यनिरीक्षणाद् व्यभिचार न तापकरोऽनल" इति नैष०।

अनुमिति स्त्री अनु-मा-क्तिन्। अनुमाने व्याप्तिविशिष्टस्य पक्षधर्म्मताज्ञानाधीने अनुभवभेदे "स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेदिति" भाषा०। अनुमितिश्च द्विविधा स्वार्था परार्था च तत्र हेतो व्याप्तिनिश्चये सति तस्य च पक्षे वृत्तित्वज्ञानात् उपादेयपदार्थसाधनाय प्रवर्त्तिका यानुमितिः सा स्वार्था। विवदमानं प्रति कञ्चित्पदार्थं साधयितुं मध्यस्थाद्यवलम्बनेन प्रतिज्ञाहेतूदाहरणोपनयननिगमनरूपपञ्चावयवन्यायसाध्या परार्था।

अनुमित्सा स्त्री अनु+मि-सन्-भावे अ। अनुमातुमिच्छायाम् सिषाधयिषायाम्। अनुमित्सायां हि सिद्धिसत्त्वेऽप्यनुमितिरुदेति तदभावे साध्यवत्तानिश्चयरूपसिद्धिसत्त्वे नानुमितिः। तत्रायं विशेषः सामाधिकरण्येन सिद्धिसत्त्वेऽपि अवच्छेदावच्छेदेनानुमितिर्भवत्येव न तत्रानुमित्सापेक्षा तथा च अवच्छेदावच्छेदेन सिद्धिरेव अवच्छेदावच्छेदेन सामानाधिकरण्येन चानुमितिं प्रतिबध्नाति एवञ्च तत्रैव इच्छापेक्षेति। अतएव वाचस्पतिना "प्रत्यक्षपरिकल्पितमर्थमनुमानेन बुभुत्सन्ते तार्किकाः" इत्युक्तम्।

अनुमृत त्रि० अनु पश्चात् शोकादिना मृतः। शोकादिना मृतस्य पश्चात् मृते। अनु+मृ-कर्म्मणि क्त। यस्य पश्चात् म्रियते तस्मिन् "भवता नानुमृताऽपि लभ्यते" इति रघुः।

अनुमेय त्रि० अनुमीयतेऽसौ अनु+मि-कर्म्मणि यत्। अनुमित्यर्हे, अनुमातुं योग्ये "एतावता नन्वनुमेयशोभीति" कुमा०। "फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव" इति रघुः।

अनुमोद पु० अनु+मुद्-णिच्-घञ्। प्रकृतकर्म्मणि प्रवृत्तिविधातारकरणेनान्यप्रोत्साहानुकूलव्यापारे। त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलापव्यङ्ग्ये। भावे ल्युट्। तत्रैवार्थे न०।

अनुमोदित त्रि० अनु+मुद्-णिच्-कर्म्मणि क्त। कृतानुमोदने स्वानुमतत्वज्ञापनेन प्रोत्साहिते "भवता यदुद्यवसितं तन्मेसाध्वनुमोदितम्। प्रार्थ्यमानोऽर्थिना यत्र कृपार्द्रो नैव विघातितः। दानकालेऽथवा तूष्णीं स्थितः, सोऽर्थोऽनुमोदित इति (प्रा०वि०) उक्तेऽर्थे च।

अनुयव अव्य० यवे विभक्त्यर्थे अव्ययी०। यवे इत्यर्थे। परिमुखा० भवादौ अत्र। आनुयव्यम् तत्भवे पदार्थे त्रि०।

अनुयाज पु० अनु+यज घञ् यज्ञाङ्गत्वात् कृत्वाभावः। दर्शपौर्णमासाङ्गेषु प्रयाजादिषु पञ्चसु यागेषु। "यजतिषु ये यजामहे नानुयाजेषु" इति श्रुतिः। "प्रयाजान्ते अनुयाजांश्च केवलानिति" कट० १०,५१,६, अनुयाजानुमन्त्रणम् का० ३,५,१४।

अनुयात त्रि० अनु या-कर्त्तरि क्तः। पश्चाद्गन्तरि, सहगन्तरि च कर्म्मणि क्तस्य पश्चाद्गम्यते तादृशे जने।

अनुयात्र अव्य० यात्रायां विभक्त्यर्थे पश्चादर्थे वा अव्ययी०। यात्रायामित्यर्थे, यात्रायाः पश्चाङ्गत्वे च। अनुगता अनुरूपीकृता यात्रा येन प्रा०ब०। अनुयायिवर्गे। "त्यक्तभोगस्य मे राजन्! वने यत्नेन जीवतः। किं कार्य्यमनुयात्रेणेति" रामा० अनुगता यात्रा प्रा०स०। पश्चाद्यात्रायां स्त्री। तत्प्रयोजनमस्येत्यर्थे ठक्। आनुयात्रिकः अनुचरे सेवके त्रि०।

अनुयात्रिक त्रि० अनुयात्रा पश्चाद् यात्रा अनुगमनमस्यास्य ठन्। पश्चाद्गन्तरि अनुचरे "सर्व्वानेवानुयात्रिकवर्गान् त्वया सहेति" भक्ति०।

अनुयायिन् त्रि० अनुयाति पश्चात् गच्छति अनु+या-णिनि स्त्रियां ङीप्। पश्चाद्गन्तरि, सेवके, अनुचरे "न्यषेधि शेषोऽप्यनुयायिवर्गः" इति रघुः सदृशे, सख्यस्यानुगन्तरि शिष्यौ च।

अनुयुक्त त्रि० अनु+युज-क्त। जिज्ञासिते पदार्थे। कृतप्रश्ने, यं प्रति कस्यचित् पदार्थस्य जिज्ञासार्थं प्रश्नः क्रियते तस्मिंश्च। "स चानुयुक्तो व्याचष्टामिति खण्डनखाद्यम्।

अनुयुग अव्य० युगे विभ० अव्ययी०। युग इत्यर्थे। तत्र भवः परिमुखा० अत्र। आनुयुग्यः अनुयुगभवे त्रि०।

अनुयूप अव्य० यूपे विभ० अव्ययी०। "यूप इत्यर्थे। तत्र भवः परिमुखा० अत्र। आनुयूप्यः यूपभवे त्रि०।

अनुयोक्तृ त्रि० अनु+युज-तृच् स्त्रियां ङीप्। प्रश्नकारके। श्रुतकाध्यापके च।

अनुयोग पु० अनुयुज्यते कथनाय नियुज्यते अनु+युज-घञ्। प्रश्ने। सति हि प्रश्ने, दृष्टः कथनाय प्रवर्त्तते। "निग्रहस्थानयोगे चेति" भा०। अनुपूर्व्वात् युजेः प्रश्नार्थकता। तेन "त्वया कियदेति तमन्वयुङ्क्त" इति रघौ प्रश्नार्थकतया निर्देशः।

अनुयोगकृत् पु० अनुयोगं प्रश्नविषयसंशयं लुनाति कृत छेदने क्विप्। आचार्य्ये। कृ-क्विप्। पृच्छके त्रि०।

अनुयोगिन् त्रि० अनुयुङ्क्ते अनु+युज–घिनुण्। प्रश्नकारके।

अनुयोज्य त्रि० अनुयुज्यते नियुज्यते "अनु+युज–यक्यार्थे आवश्यकार्थे वा यत्। प्रश्नार्हे अवश्यनियोज्ये, त्वया कथमित्थं कृतमित्याक्षेपेण कृतप्रश्ने, आज्ञाकारके, दासादौ च "वासवानुयोज्यो दुघ्नन्तः प्रणमति" यक्षु०।

अनुरक्त त्रि० अनु+रनृज क्त। अनुरागयुक्ते, अनुगतः रक्तं रागम् अत्या०स०। प्राप्तरक्तवर्णे।

अनुरक्ति स्त्री अनु+रनृज–क्तिन्। अनुरागे।

अनुरञ्जक त्रि० अनुरञ्जयति अनुरक्तं करोति अनु+रनृज–णिच्–ण्वुल्। अनुरागयुक्तकारके।

अनुरञ्जन न० अनु+रनृज–णिच्–भावे ल्युट्। अनुरागयुक्तकरणे "विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दुरिव" रामा०। कर्त्तरि ल्यु। अनुरञ्जके त्रि०।

अनुरञ्जित त्रि०अनु+रनृज–णिच्–कर्म्मणि क्त। यस्य अनुरागः कृतः तस्मिन्, अनुरक्तीकृते जने।

अनुरणन अनु+रण–ल्युट्। घण्टादिशब्दजप्रतिध्वन्यात्मके शब्दसन्ताने व्यञ्जनरूपशब्दशक्तिभेदे, ध्वनिभेदे च।

अनुरत त्रि० अनु+रम–कर्त्तरि क्त। अनुरक्ते, अभिरते च।

अनुरति स्त्री अनु+रम–भावे क्तिन्। अनुरागे।

अनुरस त्रि० अनुगतो रसम्। माधुर्य्यादिरसानुगते "भूमिजं गुरु नातिवातलं भूमितश्चास्यानुरस" इति "मधुरानुरसं रूक्षं लवणानुरसं लघु। नार्य्यास्तु मधुरं स्निग्धं कषयानुरसं हिममिति" च सुश्रुतम्।

अनुरहस त्रि० अनुगतं रहः अत्या०स० अच्समा०। निर्ज्जनदेशानुगते।

अनुराग पु० अनु+रनृज+घञ्। अत्यन्तप्रीतौ, स्नेहे च। अनुरूपो रागः मा०स०। अनुरूपरागे। "अनुरागवन्तमपि लोचनयोरिति" माघः "प्रणादस्तु शब्दः स्यादनुरागज" इत्यमरः। "प्रियानुरागस्य मनःसमुच्चतेरिति" रघुः। अनुगतो रागं गतिस०। प्राप्तलौहित्यवर्णे त्रि०।

अनुरागिन् त्रि० अनु+रनृज–घिनुण् कुत्वम्। अनुरागयुक्ते स्त्रियां ङीप्। "वेश्याङ्गानुरागिणीमिति" सा०द०

अनुरात्र अव्य० रात्रौ विभ० अव्ययी० अच्समा०। रात्रावित्यर्थे, प्रतिरात्रे च। "तस्मात् स्त्र्यनुरात्रं पत्याविच्छन्ते" इति श्रुतिः। अनुगतो रात्रिम्। रात्र्यनुगते त्रि०।

अनुराधा स्त्री० अनुगता राधां विशाखाम् अत्या०स०। सप्तविंशतिधाविभक्तस्य राशिचक्रस्य सप्तदशभागात्मके नक्षत्रभेदे "रेवत्युत्तररोहिणीहस्तगशिरोमूलानुराधामघेति" ज्योति०। "राधे विशाखे सुहवानुराधाज्येष्ठासु नक्षत्रेष्विति" श्रुतिः। "शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुमज्ञाः। विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः। भूतशतपञ्चवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्विन्यादीनां कालस्तारामानेन। नक्षत्रजसुद्वाहे फलमत्रैनारकाभितैः सदसत्। दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः" इति बृ०उक्तोत्सङ्गाः चतुस्तारात्मकत्वम्। अश्वियमदहनकमलजशशिमूलभदितिजीवभाभिपितरः। योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च। शक्रो निर्ऋतिस्तोयं विश्वे देवा हरिर्वसुर्वरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" इति बृहत्संहितोक्तोत्सङ्गा मित्रदेवताकत्वम्। तस्य च योगतारा "ज्येष्ठाश्रवणभैत्राणां वार्हस्पत्यस्य मध्यमा" इति सूर्य्यसि० उक्तेर्मध्यमा तारा। तत्र भवः अणो लुक् "लुक्तद्धितलुकीति" पा० स्त्रीप्रत्ययस्य लुक्। अनुराधास्तज्जाते त्रि०। नक्षत्रेण युक्तः काल इत्यणस्तु लुप् "लुपि युक्तवद्व्यक्तिवचनमिति" पा० अनुराधा अनुराधानक्षत्रयुक्तकाले ततः सप्तम्यर्थे तृतीयेति भेदः। पृ० दीर्घः। अनूराधाभ्यत्र।

अनुरुद्ध–त्रि अनु+रुध–कर्म्मणि क्त। अपेक्षिते।

अनुरुध् त्रि०अनु+रुध–क्विप्। अनुरोद्धरि अपेक्षके। कर्मणि क्विपि वेदे उपसर्गदीर्घः। अनूरुद्धे। "आच्छित्पूर्व्याःखपरा अनूरुद्ध ऋ० ३,५५,५, "अनूरुद्ध अनुरुद्धमिति" भा०।

अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी०। रूपस्य सादृश्ये, योग्यतायाञ्च। अर्थ आद्यर्चि। तद्वति त्रि०। "अथानुरूपाभिनिवेशतोषिणेति" कुमा०। "सत्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत" गीता। द्वादशाहसाध्ये यागे वक्ष्यमाणगतानां त्रयाणां ऋचानां मध्ये मध्यमे ऋचे। "स्तोत्रियानुरूपौ ऋचौ भवतः वृषण्वन्तस्तृचा भवन्ति तत्र उत्तमः पर्य्यास" इति ता०ब्रा०। प्राक्तनानां वक्ष्यमाणगतानां त्रयाणां ऋचानां स्तोत्रियः, अनुरूपः, पर्य्यासश्चेति त्रीणि नामानीति भा०।

अनुरोध पु० अनु+रुध–घञ्। अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च। "मित्रस्यानुरोधेन द्विविधं स्मृतमासनमिति" "नानुरोधोऽस्त्यनध्याये" इति च मनुः।

अनुरोधिन् त्रि०अनु+रुध–णिनि। अपेक्षके। स्त्रियां ङीप्। "पतिव्रतानां समयानुरोधिनीति" रामा०। [भाषणे।

अनुलाप पु० अनुर्वीप्सायां वारंवारं लप्यते लप–घञ्। मुद्ध-

अनुलिप्त त्रि० अनु+लिप–क्त। गन्धादिना कृतानुलेपे

"वन्दनागुरुकर्पूरकुङ्कुमोशीरपल्लकैः अनुलिप्तो नरैर्भक्त्या हरिरिष्टं प्रयच्छतीति" पुरा० ।

अनुलेप पु० अनु+लिप–भावे घञ् । चन्दनादिभिर्देहे । करणे घञ् । अनुलेपसाधने चन्दनादौ ।

अनुलेपक त्रि० अनुलिम्पति अनु+लिप–ण्वुल् । चन्दनादिभिः स्वदेहदेवार्च्चाद्यनुलेपकारके । स्त्रियां टाप् । तस्याः धर्म्ये मह्यि० अण् । आनुलेपिकम् तद्धर्म्ये त्रि० ।

अनुलेपन न० अनु+लिप–भावे ल्युट् । चन्दनादिभर्दने "धात्रीफलं तथा दद्यादनुलेपनकारणादिति" पुरा० । करणे ल्युट् । अनुलेपसाधने चन्दनादौ द्रव्ये ।

अनुलेपित त्रि० अनु+लिप–णिच्–कर्मणि क्त । "अनुलिप्तीकृते

अनुलेपिन् त्रि० अनुलिम्पति अनु+लिप–णिनि । अनुलेपके

अनुलोम पु० यथाक्रमे अव्ययी० अच्समा० । यथाक्रमे । "अनुलोमविलोमाभ्यां मातृकार्णान् जपेद्बुध इति तन्त्र० "तत्र प्रतिलोममालिख्योन्नानुलोममिति" सुश्रुतम् अनुगतः लोम आनुरूप्यम् रोम वा प्रा०स० । आनुरूप्यप्राप्ते, यथाक्रमप्राप्ते च त्रि० "सवर्णासु सुताः सवर्णा भवन्ति अनुलोमजा मातृवर्णा" इति विष्णुस० अनुलोमं क्षेत्रं क्षेत्रं प्रतिलोमं कर्षति सि०कौ० । अनुगतरोमे च । "अनुलोमाः सुलोमाश्च रुचिरा रोमराजय" इति ।

अनुलोमज पु०स्त्री० अनुलोमेन यथाक्रमेण जातः जन–ड । परिणीतक्षत्रियादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धावसिक्तादौ सङ्कीर्णवर्णे । अनुलोमजाश्च "विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां, विशःस्त्रियाम् । अम्बष्ठः, शूद्रायां निषादजातिः पारशवोऽपि वा" "वैश्याशूद्रोत्तु राजन्यात्, माहिष्योग्रौ सुतौ स्मृतौ, वैश्यात्तु करणः शूद्रायां, विप्रास्वेष विधिः स्मृत" इति च याज्ञ०स० ।

अनुलोमजन्मन् पु०स्त्री० अनुलोमं पितृवर्णानुक्रमेण जन्म यस्य । अनुलोमजाते मूर्द्धावसिक्तादौ । स्त्रियां ङीप् । "अन्येऽनुलोमजन्मानः प्रतिलोमभवा अपीति" काशी० ।

अनुवंश अव्य० वंशे विभक्त्यर्थे अव्ययी० । वंशे इत्यर्थे तत्र भवः परिखसा० अण् । आनुवंश्यस्तत्र भवे त्रि० ।

अनुवक्तृ त्रि० अनुवक्ति गुरुमुखात् श्रुत्वा तदनुरूपं वदति अनु+वच–तृच् । गुरुमुखोच्चारितानुरूपपाठके । स्त्रियां ङीप् ।

अनुवक्र त्रि० अनुक्रमेण वक्रः । अतिवक्रे "यस्य वक्रानुवक्राभ्यां" इति सुश्रुतम् अतिवक्रत्वञ्च यथाणाम् "अतिवक्रा नगोष्टग" इति सूर्य्योक्तान्तराग्रमेलनया सप्ताष्टस्थानस्थितौ भवति ।

अनुवचन न० अनुरूपं वचनम् प्रा०स० । अनुरूपकथने "तमेतं ब्राह्मणाविविदिषन्ति वेदानुवचनेन" इति "तिश्रश्चोर्वेदानुवचनमिति" च श्रुतिः ।

अनुवत्सर पु० अनुकूलो वत्सरो दानादिविशेषाय । "शकाद्धात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः । सम्वरोदानुपूर्व्वाश्च तथोदापूर्व्वका मता" इत्युक्ते वत्सरभेदे । "संवत्सरे तथा दानं तिलस्य तु महाफलम् । परिपूर्व्वे तथा दानं यमानाञ्च द्विजोत्तम ! । इदापूर्व्वे च वत्सराणां धान्यानाञ्चानुपूर्व्वके उदासंवत्सरे दानं रजतस्य महाफलमिति" विष्णु०ध०पुरा० । अनुवर्षादयोऽप्यत्र ।

अनुवर्त्तन न० अनु+वृत–ल्युट् । अनुगमने, अनुसरणे, व्याकरणादौ पूर्व्वसूत्रस्थसुतङञ्चस्योत्तरसूत्रेऽन्वयार्थमनुसरणे च ।

अनुवर्त्तिन् त्रि० अनु+वृत–णिनि । पार्श्वगामिनि अनुयायिनि च स्त्रियां ङीप् । "सशरीरा गता स्वर्गं भर्त्तारमनुवर्त्तिनी" इति रामा० ।

अनुवाक पु० अनूच्यते अनु+वच घञ् कर्त्तरि । गानसूक्ते ऋग्विशेषे, कर्म्मयज्ञसमूहे, शस्त्रनाम्नि ख्याते वेदांशे । "अग्निरेकाक्षरेणैत्यनुवाकं द्वादशयत् क्रतोति" काण्वा० १४,५.२६, "यत् काण्वैकात्मकमनुवाकं द्वादशवदिति" वेददीपः । "अध्यायानुवाकयोर्लुक्" पा० विसृक्तशब्दोऽस्यस्य अण् तस्य वा लुक् । वैसृक्तो विसृक्तो वा अध्यायः अनुवाको वा ।

अनुवाक्या स्त्री अनु+वच–ण्यत् कर्त्तरि । ऋत्विग्भेदः प्रथमोक्ता तत्कार्य्यायां देवताज्ञानसाधने ऋचि । "पुरोऽनुवाक्या याज्या वेति" यजु० "द्वे ऋचौ सुराग्रहणार्थे याज्यानुवाक्ये प्रथममनुवाक्या, द्वितीयमेवेति याज्येति" वेददीपः । "पुरोऽनुवाक्या याज्या च यस्यैवेति" द्व०उप० । पुरोऽनुवाक्या प्राक्प्रयोगकालाद्या प्रयुज्यन्ते ऋचः सा ऋग्जातिः पुरोऽनुवाक्येत्युच्यते इति भा० ।

अनुवाच् पु० अनुवाचयति अनु+वच–णिच्–क्विप् । अनुवाचके अध्यापके ।

अनुवाचन न० अनु+वच–णिच्–ल्युट् । अध्यापने । तत्रयोजनमस्य अनुप्रव० छ । अनुवाचनीयः अध्यापके त्रि० ।

अनुवात पु० अनुगतो वातः । शिष्यादिदेशात् गुर्वादिदेशगान्तरि वायौ "प्रतिवातेऽनुवाते च नाश्नीत गुरुणा सहेति" मनुः ।

अनुवाद पु० अनु+वद–घञ् । विधिप्राप्तस्य वाक्यान्तरेण कथने यथा अग्निहोत्रं जुहोतीति वाक्येन प्राप्तस्य होमस्य

दध्ना जुहोतीति वाक्येन पुनरनुवादेन दधिकरणकत्व-मात्रं तत्र विधेयम्। तत्र होमस्यानुवादः एवमन्यत्रापूह्यम् अनुवादः पूर्व्वस्मिति का०४,३,१८, "य इष्ट्वेत्यनेन वाक्येन पौर्णमास्यामावस्यायां वा विकृतीनामनुष्ठानमुच्यते तच्च प्रकृतितः प्राप्तमेव अतः कारणात् य इष्ट्वेत्यनुवाद इति तद्भा० अनुवादश्च त्रिविध भूतार्थानुवादः स्तुत्यर्थानुवादः गुणानु-दश्चेति। तत्र सदेव सौम्येदमग्र आसीदित्यादौ भूतार्थानुवादः। "वायुर्वै क्षेपिष्ठा देवतेत्यादौ, स्तुत्यर्थानुवादः। वायव्यं श्वेतं छागमालभतेत्यादौ प्राप्ताया वायुदेवतायाः स्तुत्यर्थत्वात् तस्य स्तुत्यर्थानुवादत्वम्। अग्निहोत्रं जुहोतीति प्राप्तस्याग्निहोत्रहोमस्य गुणविधानार्थं प्रवृत्तं दध्ना जुहो-तीत्यादि गुणानुवादः। एवमन्यान्यप्युदाहार्य्याणि। अनु-वादलक्षणकथने। "क उत्तमः श्लोकगुणानुवादात् पुमान् विर-ज्येत विना पशुघ्नादिति" भाग०। "सिद्धोपदेशे च "अनुवादे चरणानामिति" पा०। "सिद्धोपदेशे" इति सि०कौ०।

अनुवादक त्रि० अनुवदति अनु+वद-ण्वुल्। अनुवादकारके अनुवदनशीले च।

अनुवादिन् त्रि० अनुवदति अनु+वद-णिनि। अनुवादका-रके, अनुवदनशीले, युक्तगीतानुवादिनि च स्त्रियां ङीप्।

अनुवाद्य त्रि० अनु+वद-ण्यत्। उद्देश्ये प्राप्तावपि किञ्चि-द्विधानार्थमनुकीर्त्तनीये। "अनुवाद्यमनुक्त्वैव न विधेयमुदी-रयेदिति वृद्धाः तथा च। पर्वतो वह्निमानित्येव प्रयोक्तव्यं न वैपरीत्येन, तथा प्रयोगे तु आलङ्कारिकैः वाक्यगतविधेया विमर्शदोषो भवतीति प्रतिपादितम् यथा "न्यक्कारो ह्ययम-मेव मे यदवः" इति वाक्ये अयमेव न्यक्कार इति प्रयोक्तव्ये तद्वैपरीत्येन प्रयोगात्तथात्वम्। अतएव "वृद्धिरादैच्" इति पा० सूत्रे आदैच् वृद्धिसंज्ञः स्यादित्यर्थके वृद्धेर्विधेय-त्वेन पूर्व्वनिर्देशावश्यम्भावेऽपि वृद्धिशब्दस्य मङ्गलार्थत्वेन प्राक्प्रयोगो भाष्यादौ समर्थितः यथा "पूर्व्वोच्चारितः" संज्ञी परोच्चारितः संज्ञेत्याक्षिप्य "एतदेकमाचार्यस्य मङ्गलार्थं क्रियताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरित्यन्तेन"। "माङ्गलिको मङ्गल-प्रयोजनः। महतोऽर्थतः एकैकं सूत्रं शास्त्रमिति शास्त्रौ-घस्येत्युक्तम्। मङ्गलादीनीत्यादिना स्वप्रयोजनं श्रोतृ-प्रयोजनञ्चोक्तम्। प्रथन्ते विस्तृतानि भवन्ति तेन समाप्ति-रर्थाच्छिष्यते" भा०उद्यो०।

अनुवासन न० अनु+वास-सौरभ्ये ल्युट्। धूपादिभिः सुर-भीकरणे, वैद्यौकोक्ते स्नेहाद्यैः वस्तिकर्म्मणि च। "द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनम्। कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनम्" इति वैद्यकम्। अनुवसति, अनुवासरं दीयते वा घञ्। सुश्रुतोक्ते अनुवासनद्रव्ये घञ्। तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवा-सनः पादावशेषः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः। तस्यापि विकल्पोऽर्द्धाङ्गमात्रावशेषोऽपरिहार्य्यो मात्रावस्तिरिति"। "निरूहः शोधनो लेखी स्नेहनो बृंहणो मतः। निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति। अपेतसर्वदोषासु नाड़ीष्विव वहज्जलम्। सर्वदोषहरश्चासौ शरीरस्य च जीवनः। तस्माद्धि शुद्धदेहस्य स्नेहवस्तिर्विधीयते" इति। "तत्रो-न्मादभयशोकपिपासारोचकाजीर्णाशयास्रुद्रोगभ्रममदमूर्च्छा च्छर्दि-कुष्ठ-मेहोदर-स्थौल्यश्वासकासकण्ठशोषशोकोपसृष्ट-चेतसश्चीणचतुस्त्रिमासगर्भिणी दुर्बलाग्न्यात्मसङ्घा बालवृद्धौ च वातरोगार्त्ते क्षीणा नानुवास्या नास्थापयितव्या उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। असाध्यता विकाराणां स्नेहेष्वनुवासनात्" इति च सुश्रुतम्। अजादिवस्ति-चर्म्मघनवस्त्यादिनिर्म्मितेन (पिचुकारीति) प्रसिद्धयन्त्रेण धातुवैषम्यदोषनाशाय लिङ्गद्वारेण योनिद्वारेण वा दीय-मानं स्नेहादिद्रव्यमनुवासन इति वैद्यकप्रसिद्धिः। अधिकं वस्तिकर्म्मशब्दे वक्ष्यते। अनुवासनं प्रयोजनमस्य अनुप्रवच० छ। अनुवासनीयः अनुवासनहेतौ त्रि०।

अनुवासित त्रि० अनु-वास-क्त। सुरभीकृते, वस्तिकर्म्मणा चिकित्सिते च।

अनुवास्य त्रि० अनु+वस-कर्म्मणि यत्। सुरभीकार्य्ये वस्ति-कर्म्मणा चिकित्स्ये च। "अवश्यं स्थापनीयाश्च नानु-वास्या कथञ्चनेति" सुश्रुतम्।

अनुविधायिन् त्रि० अनु+विधत्ते अनु+वि+धा-णिनि। पश्चाद्विधायिनि, अनुगते च। "गुणानां तदन्वयव्यति-रेकावनुविधायित्वमिति" सा०द०।

अनुविद्ध त्रि० अनु+व्यध-क्त। संसृष्टे। "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्ध इवार्थो हि सर्वः शब्देन भासते" इति वाक्यप०। "कोटानुविद्धरत्ना-दिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट" इति सा०द०। [वावन्यावितिं" भा०भी०प०।

अनुविन्ध्य पु० अवन्तिदेशीये नृपतिभेदे "विन्ध्यानुविन्ध्या-

अनुवृत् त्रि० अनु पश्चात् वर्त्तते अनु+वृत–क्विप्। पश्चाद्वर्त्तिनि पश्चाद्भाविनि अनुगते च "अनुवृदङ्स्वनुवृते" इति ता०ब्रा०।

अनुवृत्त त्रि० अनु+वृत–क्त। अनुगते, पूर्व्वसूत्रादपरसूत्रे आकाङ्क्षापूरणार्थम् अन्विते पदादौ, अनुक्रमेण वृत्तताप्राप्ते क्रमशः वर्त्तुलाकारे। अनुगतो वृत्तं शीलम् अत्या०स०। शीलानुगते त्रि०।

अनुवृत्ति स्त्री अनु+वृत–क्तिन्। अनुसरणे, सेवने, पूर्वसूत्रादुत्तरसूत्रे आकाङ्क्षापूरणार्थमनुसरणे च। "कृषी दक्षक्षिवाणिज्यगुल्कशालानुवृत्तिभिः कृतोपकारादाप्तञ्च राजसं सम्मतादाहृतमिति" नारदः। "अनुवृत्तिः सेवेति" रघु०। "अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृतामिति" देवी० तत्सत्त्वे तत्सत्त्वरूपे अन्वये, समन्वये च। एवं व्यावृत्त्यनुवृत्तिभ्यामन्नमयत्वं मनसः सिद्धमिति का० उप०भा०। "जन्माद्यस्य यतोऽन्वयादिति" भागव०। "अन्वयशब्देनानुवृत्तिरिति" श्रीधरः नह्यन्वयवृत्तस्वभावा भिन्नजः स्वस्यानुवृत्तिं रोगनिग्रहणञ्च कर्त्तुं समर्था इति सुश्रुतम् "यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परेति" सा०द०। दोषः दोषा च तदनुवृत्तिः सेवा अनुसरणञ्चेति तदर्थः।

अनुवेध पु० अनु+विध–घञ्। संसर्गे। "नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशा" इति सा०द०।

अनुवेल न० वीप्सार्थे अव्ययी०। प्रतिसमये अनुक्षणे "इति स्म पृच्छत्यनुवेलमादृत" इति रघुः। अर्थआदि० अस्त्यर्थे अच्। तद्वत्तौ त्रि०।

अनुवेल्लित न० अनु+वेल्ल–क्त। सुश्रुतोक्ते व्रणलेपनबन्धभेदे। बन्धाश्च "कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिकायमकखट्वाचीनविबन्धवितानगोफणापञ्चाङ्गी चेति चतुर्दश बन्धविशेषाः तेषां नामभिरेवाकृतयः प्रायेण व्याख्याता" इति सुश्रुतोक्ताः वेदितव्याः। तत्र अनुवेल्लितं तु शाखासु इति वैद्यकप्रसिद्धिः।

अनुवेश पु० अनु+विश–घञ्। ज्येष्ठातिक्रमेण कनिष्ठस्य विवाहे "यवीयसोऽनुवेशो हि ज्येष्ठस्य विधिलोपक" इति भार०।

अनुवेश्य त्रि० अनुक्रमेण वेशमर्हति यत्। प्रतिवेश्यानन्तरवासिनि। "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" इति मनुः। "अनुवेश्यः प्रातिवेश्यानन्तरगृहवासीति कुल्लू०।

अनुव्रज त्रि० अनुव्रजति अनुगच्छति अनु+व्रज–क। अनुगते ततो देवा अनुव्यभिषासुः का० १,२,५, अनुव्रजम् अनुगमनं न्यग्भूतिं "प्राप्ता इव बभूवुरिति" तद्व्या०।

अनुव्याख्यान त० अनुरूपं व्याख्यानम् प्रा०स०। मन्त्रादीनामनुरूपार्थप्रकाशके व्याख्याने। [कथने च।

अनुव्याहार पु० अनु+वि+आ+हृ–घञ्। अनुवादे, सङ्ग-

अनुव्रजन न० अनु+व्रज+भावे ल्युट्। अनुगमने अनुव्रजनं च गच्छतोऽतिस्निग्धादेः जलसमीपपर्य्यन्तानुधावनम् तथैवोपमाविधया वर्णितं नैषधे "वनान्तपर्य्यन्तमुपेत्य सस्नुहं क्रमेण तस्मिन्नथ तीर्णदृक्पथे। न्यवर्त्तिदृष्टिप्रकरैः पुरोकसामनुव्रजद्भ्यमसाजबन्धुभिरिति"।

अनुव्रज्या स्त्री अनु+व्रज–क्यप्। अनुसरणादिरूपे सेवने। "अब्राह्मणादध्ययनमापत्काले विधीयते। अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोरिति" मनुः।

अनुव्रत त्रि० अनुकूलं व्रतं कर्म्म यस्य। अनुकूलकर्म्मयुक्ते। "अनुव्रताय रन्धयसूपव्रतायेति" भट्ट० १,५,६, अनुव्रताय अनुकूलकर्म्मयुक्ते इति भा०। वैश्याः स्तम्भमनुव्रताः रामा०

अनुव्रतिकादि न० ६ब० पाणिनीयगणपाठोक्ते ञिति णिति किति च तद्धिते परे द्विपदयोरादेश्चोत्तरपदनिमित्तीभूते शब्दसमूहे, सच गणः। अनुव्रतिक, अनुकोड़, अनुसंवरण, अनुसंवत्सर, अङ्गारवेणु, असिसत्य, अस्थकृत्य, अस्थहेति, अध्योग, पुष्करमद्द, अमुहरत्, कुरुकत, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्वलोक, सर्वपुरुष, सर्वभूमि, प्रयोग, परस्त्री, (राजपुरुषात् ष्यञि) स्तनकड़, आकृतिगणोयम्। तेनाभिगम, अधिभूत, अधिदेव, चतुर्विद्या, इत्यादयोऽन्येऽपि।

अनुशय पु० अनु+शीङ्–अच्। अत्यन्तद्वेषे, पश्चात्तापे, पूर्व्वदोषे च। अनुगतः शयं कृत्तं गतिस० कृत्तानुगते त्रि०। तत्र क्रीतादिपदार्थविशेषेणानुशयस्वरूपादि नारदेनोक्तम्। "क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते"। क्रा० यस्मिन्नहनि पण्यं क्रीतन्तस्मिन्नेवाह्नि तदविक्षतं प्रत्यर्पणीयमिति तेनैवोक्तम्। "क्रीत्वा मूल्येन यत् पण्यं दुःक्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयन्तस्मिन्नेवाह्नि विधानतमिति"। द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः। "द्वितीयेऽह्नि ददत् क्रेता मूल्यात्तृतीयांशमाहरेत्। द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तदिति"। परतोऽनुशयो न कर्त्तव्य इत्यर्थः। एतच्च बीजादिव्यतिरिक्तोपभोगादिविनश्वरवस्तुविषयम्। बीजादिक्रये पुनरन्य एव प्रत्यर्पणेऽवधिरित्याह। "दृष्टैक-

पञ्चसप्ताहमासत्रयार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्री दोह्यपुंसां परीक्षणम्" । बीजं व्रीह्यादिबीजम् । अयो लौहम् । वाह्यो बलीवर्द्दादि । रत्नं मुक्ताप्रवालादि । स्त्री दासी । दोह्यं महिष्यादि । पुमान् दासः । एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः । परीक्ष्यमाणे च बीजादौ यदसम्यग्बुद्ध्याऽनुशयो भवति तदा दशाहाभ्यन्तर एव क्रयनिवृत्तिः । न पुनरूर्द्धमित्युपदेशप्रयोजनम् । यत्तु मनुवचनम् । "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वेति" । तदुत्तमलोहादिव्यतिरिक्तोपभोगादिविनश्वरघटहर्म्यक्षेत्रयानशयनासनादिविषयम् । सर्वञ्चैतदपरीक्षितक्रीतविषयम् । यत् पुनः परीक्षितञ्च पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रीते न प्रत्यर्पणीयम् तदुक्तम् । "क्रेता पश्यं परीक्षेत प्राक् स्वयं गुणदोषतः । परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति" मिता० । ततश्च क्रीतस्य, विक्रीतस्य, अन्यथा वा कृतस्य वस्तुनः, असम्यगनुबुद्ध्या यः पश्चात्तापः सोऽनुशय इति बोध्यम् । "भुक्तकर्म्मणोऽवशेषे च "कृतान्तयेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवमिति" भा० स्व० स्वर्गार्थकर्म्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथा हि स्नेहभाण्डं विरिच्यमानं न सर्वात्मना विरिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति" भा० । "तत्र दृष्टं प्रत्यक्षं श्रुतिः सा हि सानुशयानामेवावरोहं दर्शयति यथा "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं चाण्डालयोनिं वेति" । चरणशब्दे नानुशयः (शेषः) रूच्यते । दृष्टश्चायं जन्मनैव प्राक्तनश्चावचरूपउपभोगः प्रविभज्यमान आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुकत्वस्य सामान्यतः शास्त्रेणावगमितत्वादिति च भा०भा० ।

अनुशयाना स्त्री अनु+शीङ्—शानच् । परकीयनायिकाभेदे । तद्विवरणं नायिकाशब्दे दृश्यम् । अनुतापकर्त्तरि त्रि० ।

अनुशयिन् पु० अनु+शीङ्—इनि । यावत्कर्म्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्म्मणि पश्चात्तापान्विततया भूमिलोकेजन्मग्रहणायागन्तुं प्रवृत्ते जीवे । "यो यो ह्यङ्गमत्ति अनुशयिभिः तदंशेन भावितत्वात् संस्कृतत्वाच्च संश्लिष्टरेतःसिगिति" छा०भा० । तस्य रेतःसिगाख्यात् पूर्व्वसम्भूतत्वात् तदूर्ध्वेण गर्भाशयमनुप्रविष्टोऽनुशयी रेतःसिगाख्यतिर्भवतीति आनन्द० । पश्चात्तापयुते त्रि० । पुरुषस्य अनुशयत एव भुक्तभोगायाः प्रकृतेस्त्यागः श्रुतावुक्तः । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति "यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथेति" भाग० ।

अनुशयी स्त्री अनुशय्यते पश्चात्तप्यतेऽस्याम् । अनु+शीङ्—अधिकरणे अच् गौरा० ङीष् । पादरोगभेदे, "हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेरिति" भावप्रकाशः ।

अनुशर पु० अनुशृणाति अनु+शॄ—कर्त्तरि—अच् । राक्षसे ।

अनुशासन न० अनुशिष्यते याथार्थ्येन निरूप्यते अनु+शास—भावे ल्युट् । याथार्थ्यज्ञापने, निरूपणे, कर्त्तव्योपदेशे च । "ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नुते तद्द्विगुणं तन्मनोरनुशासनमिति" मनुः अनुशासनविरोधादिति टीकाः । करणे ल्युट् । तत्प्रतिपादके शास्त्रे यथा "अथ शब्दानुशासनम्" । "अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भाष्यप्रदीपोद्योतः । "अथशब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति भाष्यम्" । "अथ योगानुशासनमिति" पातञ्जलसूत्रम् योगोऽनुशिष्यतेऽनेन तादृशं शास्त्रमधिकृतमिति तदर्थः उभयत्र अथशब्दस्याधिकारार्थत्वात्तथात्वम् "नामलिङ्गानुशासनमित्यमरः" अनुशासनं धर्म्मनिरूपणं प्रयोजनमस्य ठक् आनुशासनिकम् । महाभारतान्तर्गतानुशासनपर्व्वणि ।

अनुशासिष्ट त्रि० अनुशास्ति याथार्थ्येन कर्त्तव्यमुपदिशति अनु+शास—ष्टच । कर्त्तव्योपदेशके । स्त्रियां ङीप् । औणा०ष्टन् । अनुशास्त्यपि तत्रार्थे त्रि० स्त्रियां ङीप् ।

अनुशासिन् त्रि० अनु+शास—णिनि । कर्त्तव्योपदेशके दण्डयितरि च "एषस्ते नानुशासी राजेति" विक्र० ।

अनुशिष्ट त्रि० अनु+शास—कर्म्मणि क्त । कृतानुशासने, यस्य हितोपदेशः क्रियते तस्मिन्, दण्डिते च ।

अनुशीत अव्य० शीते विभ० अव्ययी० । शीते इत्यर्थे, परिसुखा० भवादौ आ । आनुशीत्यः तद्भवादौ त्रि० ।

अनुशीलन न० अनुक्षणं शीलनं प्रा०स० । सतताभ्यासे अनुक्षणाचरणे "आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमेति" भक्तिरसा० कृष्णस्य तद्गुणकीर्त्तनस्यानुशीलनं तदर्थः ।

अनुशोक पु० अनु+शुच-घञ्। पश्चाच्छोके अनुशोचने।

अनुशोचन न० अन+शुच-ल्युट्। अनुशोके। "दृष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्। श्लाघानुशोचनाभ्यां च भग्नतेजो विभिद्यते" इति शु०त० देवलः। अनुशोचनं धनव्ययेन पश्चात्ताप इति रघुनन्दनः। स्वार्थे णिचि युच्। अनुशोचना तत्रैवार्थे स्त्री।

अनुशोचनीय त्रि० अनुशुच्यते अनु+शुच-कर्म्मणि अनीयर्। अनुशोचनार्हे यदुद्दिश्य शोक क्रियते तस्मिन्।

अनुशो(शु)चित न० अनु+शुच-भावे क्त उदुपधत्वात् वा न किन्त्वम्। अनुशोचने। अनुशोचितुमारब्धः आरम्भार्थे क्त वा शुगः। कृतशोचनारम्भे त्रि०।

अनुश्लोक न० अनुश्लोक्यते गीयते अनु+श्लोक-कर्म्मणि अच्। महाव्रते गेये सामभेदे, "श्लोकेन स्तुवते पुरस्तात् सदसः, अनुश्लोकेन पश्चादिति" ता०ब्रा०। तच्च वेगानयन्ये ११,२ प्रपा० आद्यम् साम। [नुषक्ता" इति सि०कौ०।

अनुषक्त त्रि० अनु+सनुज क्त। संलग्ने। "येऽत्र नकारा-

अनुषङ्ग पु० अनु+सनुज-घञ्। दयायां दयया हि अन्यदुःखेनान्यदुःखसम्बन्धात्तथात्वम्। प्रसङ्गे, प्रसङ्गश्च अन्योद्देशेन प्रवृत्तस्य तन्नान्तरीयकविधयान्यसिद्धिः यथा "विप्रबधप्रायश्चित्तेन तन्नान्तरीयकविधया अवगोरदण्डनिपातनप्रायश्चित्तसिद्धिः। "अयं केचिदुपात्तस्य दुरितस्य प्रवृत्तते। अनुत्पत्तिं तथाचान्ये प्रत्यवायस्य मन्वते। नित्यक्रियां तथाचान्ये कृत्स्नषङ्गफलां श्रुतिमिति" प्रा०त० आप०सू०। अनुषङ्गेण फलं यस्या इति तदर्थः। एकस्य वाक्ये श्रुतस्य शब्दस्यान्यत्र वाक्येऽन्वयार्थमाकर्षणे। यथा "नित्यक्रियां तथा चान्ये" इति वाक्ये पूर्ब्बवाक्योपात्तस्य मन्वते इति क्रियापदस्यान्वयार्थमाकर्षणम्। तथा पञ्चावयवन्यायवाक्येषु उपनयवाक्यस्थस्य अयमिति पदस्य निगमनवाक्येऽन्वयार्थमाकर्षणम्। यथा वह्निव्याप्यो धूमो धूमवांश्चायमिति उपनयवाक्यस्थस्य अयमिति शब्दस्य तस्माद्वह्निमानिति वाक्येऽन्वयेन अयं वह्निमानिति बोधः। अतएव भाष्यकारैः पूर्ब्बत्र श्रुतशब्दस्योत्तरत्रानुकर्षणबोधनाय एतत्पदमनुषङ्गनीयमित्युक्तम्।

अनुषङ्गिन् त्रि० अनुषङ्गं सजते अनु+सनुज घिनुण्। अनुषङ्गं प्रसक्ते। "सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः। पूर्ब्बं पूर्ब्बं गुरुतरं विद्याद्व्यञ्जनमात्मनः" इति मनुः। अनुषङ्गिणः प्राधेणावस्थितस्येति कुल्लू०। व्यापके च। "त्रिभुवानुषङ्गि भवमिति जन इति "किरा० विभुतायाः प्रभुत्वस्यानुषङ्गि व्यापकमिति" तट्टीकायां मल्लिनाथः।

अनुषञ्ज अव्य० अनु+सनुज क्विप्। आनुपूर्ब्बी। खरादेराकृतिगणत्वादयं तङ्गणीयः" इति मनो०। पृ० दीर्घः। आनुषगण्यत्वार्थे अव्य०।

अनुषिक्त त्रि० अनु+सिच-क्त। सततसिक्ते पश्चात्सिक्ते च।

अनुषेचन न० अनु+सिच-भावे ल्युट्। अनुक्षणसेचने, पश्चात्सेचने च।

अनुष्टुति स्त्री अनु+स्तु-क्तिन्। अनुक्रमेण स्तुतौ "यः पूर्ब्बमनुष्टुतिभीगे इति भट्ट० ८,६८, अनुष्टुतिम् अनुक्रमेण क्रियमाणां स्तुतिमिति भाष्यम्।

अनुष्टुब्गर्भा स्त्री ६ब०। "आद्यः पञ्चाक्षरः" पादः उत्तरेऽष्टाक्षरास्त्रयः अनुष्टुब्गर्भैव सोष्णिक्सेनुत्तमक्षणे छन्दोभेदे। "अद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा" इति का०सर्वा०

अनुषण्ड अव्य० षण्डः षण्डनमूहस्तत्र विभ० अव्ययी०। षण्डे इत्यर्थे। तत्र जातादि कन्यादि० अण्। आनुषण्डस्तज्जाते त्रि०।

अनुष्टुभ् स्त्री अनु+स्तुभ-क्विप् तत्वम्। सरस्वत्याम्, अष्टाक्षरपादके, छन्दोभेदे वाचि च। अनुष्टुप्छन्द इति य० १५,५, "अनु निरन्तरं स्तुभ्यतेऽनया अनुष्टुप् वाक्" वागेव संस्तुप् छन्दः "वागनुष्टुप् छन्द" इति श्रुतेरिति वेददी०। "अनुष्टोभनादनुष्टुबिति" ब्राह्मणे निरुक्तिः। "गायत्युष्णिगनुष्टुप् चेति छन्दः। अनुष्टुप् च द्विविधा यथा कथञ्चिदष्टाक्षरपादिका जातिः, विशेषलक्षणयुक्ताक्षरकं छन्दश्च। तत्र जातेः २५६ भेदाः। "पञ्चमं लघु सर्ब्बत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठञ्च पादानां शेषेष्वनियमो मत" इति छन्दोमञ्जर्य्युक्तलक्षणं द्वितीयम्। तस्य च पञ्चमलघुत्वं व्यभिचरति च "यियजासो नाङ्गत" इति माघः। तस्य च मात्राद्यसङ्कल्पत्वं यथा "प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वक्षणक्षणम्। लोकेऽनुष्टुबिति ख्यातम् तस्याष्टाक्षरता श्रुतेति छन्दोम०। अतएव उत्तरत्राकरे "वक्त्रं नाद्याक्षरौ स्यामध्येयोऽनुष्टुभि ख्यातमिति" वक्त्रनामतोक्ता। वर्द्धमानस्य तु वितानमिति नाम यथोक्तं उत्तरत्राकरे "वितानमाभ्यां यदन्यदिति।" आभ्यां समानिकाप्रमाणिकाभ्यामन्यत् सर्वमित्यर्थः। "अथ छन्दांसि गायत्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्च चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि, जगत्यधिकेनैकेन त्रिष्टुब्भूरिजौ, ताभ्यां विराट्स्वराजौ, पादपूरणार्थं तु क्षिप्रसंयोगैकाक्षरीभावात् व्यूहेदिति "अनादेयेऽष्टाक्षराः पादाश्चतुष्पदार्च्चे इति

तृतीयमनुष्टुबिति" च कात्या० सर्व्वानुक्र० "शुचिमनुष्णिहा प्राणमनुष्टुभेति" यजु० ।

अनुष्ठ त्रि० अनुक्रमेण तिष्ठति अनु+स्था–क षत्वम् । अनुक्रमेण स्थातरि "हिता विश्वा अनुष्ठा प्रवणेषु जिघ्नते इति ऋ० १,५४,१०, अनुष्ठाः अनुक्रमेण तिष्ठन्तीरिति भाष्यम् । भावे अङ् टाप् । अनुष्ठाने स्त्री ।

अनुष्ठाट त्रि० अनु+स्था–टच् स्त्रियां ङीप् । विधानकर्त्तरि "शास्त्रदेशित फलमनुष्ठातरीति" न्यायवाक्यम् ।

अनुष्ठान न० अनु+स्था–भावे ल्युट् षत्वम् । विहितकर्म्मादिकरणे । अलब्धलाभादिकमभिधाय "एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् । अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रित" इति मनुराह स "उपरुध्यते तपोऽनुष्ठानम्" शक्र० ।

अनुष्ठित त्रि० अनु+स्था–कर्म्मणि क्त । विधानेन कृते धर्म्मकार्य्यादौ "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व० प० ।

अनुष्ठु अव्य० अनु+स्था–कु । सम्यगित्यर्थे "पार्थिवानाद्भूतून् प्रासासद्विदधावनुष्ठु इति ऋ० १,६५,३, अनुष्ठु इत्येतदव्ययं सम्यक्समानार्थं सुष्ठु यथेति भा० ।

अनुष्ठेय त्रि० अनु+स्था–कर्म्मणि यत् । विधेये । "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व० प० ।

अनुष्ण त्रि० न उष्णः न० त० । उष्णभिन्ने शीतपदार्थे "अनुष्णाभिरफेनाभिरद्भिस्तोर्थेन धर्मविदिति" मनुः । न उष्णः विरोधे न० त० । अलसे । अलसो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्म्मणि जड़ इव भवति दत्तस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड़ इव सन् व्याप्रियते इति तयोरुष्णानुष्णता । अत्र कारिण्यर्थे कनि अनुष्णकोऽपि । उत्तले न० । उष्णभिन्ने शीतले स्वर्गे पु० "अनुष्णाशीतपाकज" इति भाषा० । अनुष्णः स्वर्गश्च पृथिवीसमीरणयोः, तयोरौष्ण्योपलब्धिस्तु तेजःसंयोगविशेषादिति बोध्यम् ।

अनुष्णगु पु० अनुष्णाः शीतला गावः किरणाः अस्य । चन्द्रे अनुष्णकिरणादयोऽप्यत्र पु० ।

अनुष्णवल्लिका स्त्री० अनुष्णा शीतला वल्लीव ह्रस्वार्थे कनि टापि अत इत्त्वम् । नीलदूर्व्वायाम् ।

अनुसंवत्सर अव्य० संवत्सरे विभक्ति० वीप्सायां वा अव्ययी० । वत्सरे इत्यर्थे, प्रतिवर्षे च । तत्र भवादौ ठञ्, अनुशतिका० उभयपदवृद्धिः । आनुसांवत्सरिकः प्रतिवर्षभवे त्रि० ।

अनुसंवरण न० अनु+सम्+वृ–ल्युट् । अनुक्रमेण गोपने । अनुसंवरणाय हितम् ठण् अनुशतिका० द्विपदवृद्धिः । आनुसांवरणिकः तद्भवादौ त्रि० ।

अनुसंहित त्रि० अनु+सम्+धा–कर्म्मणि क्त । कृतानुसन्धाने यस्य ज्ञानार्थमन्वेषणादिकम् क्रियते तस्मिन् । संहितायां विभ० अव्ययी० । संहितायामित्यर्थे । 'अथैके प्राङ्ररनुसंहितमिति' ऋग्वेदप्रातिशाख्यम् ।

अनुसन्तति स्त्री अनुक्रमेण सन्ततिः । अविच्छेदधारायाम् "अनुसन्ततिपातिनः पटुत्वमिति" माघः ।

अनुसन्धान न० अनु+सम्+धाञ्–ल्युट् । अन्वेषणे, चिन्तने च

अनुसन्धेय त्रि० अनु+सम्+धा कर्म्मणि अर्हार्थे वा यत् । अनुसन्धातुं योग्ये, अनुसन्धातव्ये च ।

अनुसर त्रि० अनुसरति पश्चाद् गच्छति । अनु+सृ–ट स्त्रियां ङीप् । अनुचरे, सहगन्तरि च ।

अनुसरण न० अनु+सृ–ल्युट् । अनुगमने, सदृशीकरणे च ।

अनुसवन अव्य० सवनस्य पश्चात् अव्ययी० । सवनस्य (स्नानस्य) पश्चात् सवने, "अनुसवनमेनमालभेरन्निति का० २५,१३, २६, एनं ज्वराद्यभिभूतं दीक्षितं सर्व्वे ऋत्विजः सवनान्तेषु स्नुशेयुरिति तद्व्याख्या ।

अनुसाय अव्य० साये विभ० अव्ययी० । सायाह्ने इत्यर्थे तत्रभवः पारिसुखा० अञ् । आनुसायः तत्रभवे त्रि० ।

अनुसार पु० अनु+सृ–घञ् । अनुसरणे, "धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति या० स्मृतिः । "कृतानुसारादधिका व्यतिरिक्ता न सिध्यतीति" मनुः ।

अनुसारणा स्त्री अनु+सृ+णिच्-युच् सारणा अनुगत्य सारणा चालना । अनुधावने, अपसारणायाम्, भीतिहेतोरनुधावने हि भीतस्य चालना भवतीति तस्य सरणाहेतुत्वम् "तस्मात् पलायमानानां कुर्य्यान्नात्यनुसारणाम्" भा० शा० प० ।

अनुसारिन् त्रि० अनुसरति पश्चाद् गच्छति अनु+सृ–णिनि । अनुगन्तरि । "कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके । हरिणानुसारिणं साक्षात् पश्यामीव पिनाकिन" मिति शक्र० । "यदा यदा सतां हानिर्वेदमार्गानुसारिणामिति" पुरा० ।

अनुसूया स्त्री अनुसूयते अनु+सूञ्–क्यप् । शकुन्तलासहचरीभेदे शक्र० । अनुसूयेत्येके ।

अनुसृति स्त्री अनु+सृ–क्तिन् । अनुसरणे । अनुसरति कुलान्तरं कर्त्तरि संज्ञायां क्तिच् । कुलटायां स्त्रियां, स्त्री । तस्याः अपत्यं मतान्तरे कल्याणादि० ढक् ढनङ् च । आनुसृतिनेयः तदपत्ये पु० स्त्री० ।

अनुसृष्टि स्त्री अनु+सृज–क्तिन् । अनुसर्जने । कर्त्तरि संज्ञायां

क्तिच् । प्रत्यत्पन्नमतौ स्त्रियां स्त्री । तस्याः अपत्यम् कल्याण्यादि० ढक् ढनङ् च । आनुस्तुष्टिनेयः तदपत्ये पु० स्त्री० ।

अनुसेविन् त्रि० अनुक्षणं सेवते अनु+सेव-णिनि स्त्रियां ङीप् । सततसेविनि "क्रूरकर्म्मानुसेविनीमिति" रामा० ।

अनुस्तरण त्रि० अनुस्तीर्यते अनु+स्तृ-करणे ल्युट् । आच्छादने चर्म्मादौ स्त्रियां ङीप् । "अनुस्तरण्या वपामुत्खिद्य शिरोमुखं प्रच्छादयेदिति" ता० ब्रा० । तत्साधने स्त्रीगव्यां स्त्री । "अनुस्तरणीं गामजां वैकवर्णां कृष्णामेके सव्ये वाहौ बध्नीति" श्रुतिः । "सेयं गौः सूतं दीक्षितमनुसूतत्वाद्धिंसित त्वाच्चानुस्तरणीत्युच्यते" इति तद्विवृतब्राह्मणम् । अनुतीर्य्यते वैतरणी नदी अनया अनु+तॄ-करणे ल्युट् षुट् । वैतरणीनद्युत्तारिकायां गवि स्त्री । "तस्मात् पुरुषाय पुरुषानुस्तरणी क्रियते इति" श्रुतिः ।

अनुस्मृति स्त्री अनु+स्मृ-क्तिन् । अनुरूपचिन्तने आलम्बनसदृशतया चिन्तने "अनुस्मृतेर्बादरिरिति" भा० सू० । प्रादेशमात्रत्वेन श्रयम् (परमेश्वरः) अप्रादेशमात्रोऽप्यनुस्मरणीयः प्रादेशमात्रप्रत्ययवत्त्वाय । एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्य्योमन्यते इति भा० । "प्रादेशमात्रोऽभिविमान एष इत्यादौ श्रुतौ प्रादेशमात्रश्रवणमनुस्मृत्यर्थमित्यत्र तत्तात्पर्य्यम् ।

अनुस्यूत त्रि० अनु+सिव-क्त ऊट् । ग्रथिते, सततसंबन्धे च । "सकुसूत्रवत् सर्व्वानुस्यूतेति" ति० त० रघुनन्दनः ।

अनुसमाहार पु० अनु+सम्+आ+हृ-घञ् । अनुसन्धाने "अनुसमाहरतीत्यस्यानुसन्धत्ते" इति भाष्ये व्याख्यानाकथात्तम् ।

अनुस्वार पु० स्वृ-अप् उदात्तादिस्वरवत्त्वात् स्वराः स्वरवर्णाश्च स्वाराः अनुगतः स्वारान् अत्वा० स० । स्वराश्रयेण उच्चार्य्यमाणे बिन्दुरेखया व्यज्यमानेऽनुनासिके वर्णभेदे । "अनुस्वारो विसर्गश्चे"त्यपक्रम्य "आश्रयस्थानभागिन" इत्युक्तेरस्य तथात्वम् । सानुस्वारो विसर्गी च दीर्घश्चैव गुरुर्भवेत् छन्दोम० । "अनुस्वारो विसर्गश्च +कपौ चापि पराश्रितौ । अयोगवाहा विज्ञेया आश्रयस्थानभागिन" इति शिक्षा ।

अनुहरण न० अनु+हृ-ल्युट् । देशभाषाचेष्टादिना सदृशीकरणे, वाद्यधर्म्मविष्करणे च ।

अनुहार पु० अनु+हृ-घञ् । अनुकरणे पश्चाद्धरणे च ।

अनुहार्य्य त्रि० अनु+हृ-ण्यत् । सदृशीकार्य्ये ।

अनुहृत त्रि० अनु+हृ-क्त । अनुकृते सदृशीकृते ।

अनुहोड त्रि० होडे विभक्त्य० अव्ययी० । होडे इत्यर्थे । तत्र भवादौ ठक् अनुपतिका० द्विपदर्क्षिः । आनुहोडिकः । होडभवे त्रि० ।

अनूक पु० अनु+उच-समवाये क नि० कुत्वम् । गतजन्मनि । सुशीले न० । यज्ञाधारे पृष्ठास्थिभेदे पु० । यज्ञ शीर्ष्णोऽवद्यति नांसयोर्नानूकस्य नापरसक्थ्योरिति" श्रुतः ३,८,३,२७, भाष्यकृता तथैव व्याख्यातम् । चयनसाधने यज्ञिये इष्टकोपधायकपात्रभेदे न० । "अनुष्मागण्यमध्यमानूके" इति कात्या० १६,७,२२। अनुष्मो य इष्टका गणः तासां मध्यमाऽनूके उपधेया इति । "एका च" कात्या० १६,७,२३। यावत्यैकेष्टका साध्यनूक एव । "अभितो युग्माः २४, अनूकमभितो युग्मा अर्द्धाधिकया इति तद्भा०। "साध्यमनूकं वक्षादिति" इष्टकाधिकृतोक्ते पुरुषलक्षणभेदे न०।

अनूकाश पु० अनु+काश घञ् उप० दीर्घः । अधस्तनदेशादिप्रकाशे "प्रकाशेनान्तरमनूकाशेन याज्ञ्यमिति" य० २५,२ "अनूकाशेनावस्तनदेशेनेत्यर्थे" वेददीपः ।

अनूचान पु० अनु+वच कानच् नि० । शिक्षादिषडङ्गसहितवेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च । "इदमूचुरनूचानाः प्रीतिकण्टकितत्वच" इति क्षेमा० "मन्त्र ब्राह्मणवर्त्म उपेत्य चतुर्विंशतिवर्षः सर्व्वान् वेदानधीत्य महासभा अनूचानमानी सभ्य एयाय" छा० उप० । "बाह्वाकिर्ह्यनूचानमना आसेति" छा० उ० ।

अनूच्य त्रि० अनूच्यते अनु+वच-क्यप् । अनुवाच्ये पाठे "पश्चादरण्येऽनूच्यमिति" "विमुखेनारण्येऽनूच्यमिति" च का० १८,४२०,२४ ।

अनूढ त्रि० अनु+वह-क्त । अविवाहिते । "परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहा"दित्यमरः । स्त्रियां ङीप् ।

अनूति स्त्री वे-क्तिन् अभावे न० त० । गमनाभावे । "अस्तूती अनूती क्षिरिभिप्रःसत्वा" इति ऋ० ६,२८,६ । "अनूत्या अनागमनेनेति" भा० ।

अनूदित त्रि० अनु+वद-क्त । अन्य तुल्यार्थकभाषान्तरेणानुवादः कृतः, तत्किन् पदार्थे अनुवादविषये च ।

अनूद्य अव्य० अनु+वद-ल्यप् । अनुवादं कृत्वेत्यर्थे । अनु+वद-क्यप् । अनूद्ये अनुवादार्हे ।

अनून त्रि० न ऊनः न० त० । परिपूर्णे, समग्रे, अक्षीणे च । "अनूनराजस्य गुणैरनूनमिति" रघुः । नूनं निश्चितं न० त० । अनिश्चिते । स्वार्थे कन् तत्रैवार्थे ।

अनूप त्रि० अनुगता आपो यत्र ७त० अच्समा० अतउत्त्वम्। जलप्राये स्थाने। "शकटः शाकिनो गावो जालमस्यन्दनं वनम्। अनूपं पशवो राजा दुर्भिक्षे नव दुत्तय" इति आङ्गि० त० क्षागलेयः। तत्स्थले सर्व्वदावासिनि महिषे पु०। "बह्वम्बुर्बहुदुग्धश्च वातश्लेष्मामयान्वितः। देशोऽनूप इति ख्यात" इत्युक्ते "अनूपसर" इति प्रसिद्धे देशभेदे पु०। "अनूपराजस्य गुणैरनूनामिति" रघुः।

अनूपज न० अनूपे जलप्राये देशे जायते जन-ड ७त०। (आदा) इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात्तथात्वम्। तत्स्थानजातमात्रे त्रि०।

अनूप्य त्रि० अनूपदेशे भवः यत्। अनुगतजलदेशभवे "यच्च आपो धन्वन्याः शमनः सन्वनूथा" इति स्नानमन्त्रः।

अनूबन्ध्य त्रि० अनु+बन्ध-ण्यत् उपस० दीर्घः। बधार्थं बन्धनीये यज्ञिये पशौ, "वशामनूबन्ध्यामालभेत" इति श्रुतेः २,४,४,१४, "अनुबन्ध्यायेति" आश्व०। [याजार्थे।

अनूयाज पु० अनु+यज घञ् उपसर्गस्य वा दीर्घः। अनु-

अनूरु पु० न स्त अरू यस्य ब०। सूर्य्यसारथौ विनताऽण्डेऽपुत्ते अरुणे। तस्य अपूर्णे एव गर्भे मात्रा अण्डस्य स्फोटनादूरुप्रभृत्यङ्गविकलत्वम् तत्कथा भा० आदिप०। यथा "ततः पुत्रार्थिनी देवी व्रीड़िता च तपस्विनी। अण्डं विभेद विनता तत्र पुत्रमपश्यत। पूर्व्वार्द्धकायसम्पन्नमितरेणाप्रकाशतम्। स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुतिः। योऽहमेवं कृतो मातस्त्वया लोभपरीतया। शरीरेणासमग्रेण तस्मादासी भविष्यसि। पञ्चवर्षशतान्यस्या यया विध्वंसितं मम। एष च त्वां सुतो मातर्दासीत्वान्मोचयिष्यति। यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात्। न करिष्यसनङ्गं वा व्यङ्गं वापि यशस्विनम्। प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया। विशिष्टं बलमीप्सन्त्या पञ्चवर्षशतान्तरः। एवं शप्त्वा ततः पुत्रो विनतामन्तरीक्षगः। अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा। आदित्यरथमध्यास्ते सारथ्यं ममकल्पयदिति"। 'गतं तिरश्चीनमनूरुसारथेरिति" माघः। [तत्कथाऽनुपदमुक्ता।

अनूरुसारथि पु० अनूरुः सारथिः रथनियन्ता यस्य। सूर्य्ये

अनूराध त्रि० अनु+राध-घञ् उपस० दी०। अनुराधनीये "इन्द्रं वयमनूराध हवामहे" इति अथ० १६,१५२।

अनृच पु० नास्ति अभ्यस्ततया ऋक् यस्य अच् समासान्तः। ऋक्शून्ये अनुपनीते बालके। "अन्वचबह्वृचावध्येतव्यौ वेति" सि० कौ०। "यथा चाऋचेऽफलं दानं तथा विप्रोऽन्वचो ऽफलः" मनुः। "अन्वचः अनधीयान इति" कुल्लू०। "अन्वचो माणवक इति" मुग्धबोधम्। समासान्तविधेरनित्यत्वात् क्वचित् न अच्। "तेन सहस्रं हि सहस्राणामन्वचां यत्र भुञ्जते इति" "तथान्वचे हविर्दत्त्वा न दाता लभते फलमिति" च मनुः। समासान्तपक्षे अन्वचे इति विवक्षया सप्तमी, तद्भावपक्षे चतुर्थीति भेदः। अध्येतरीत्युक्तेः "अन्वक् सामेति" सि० कौ०। अजभावपक्षे विभाषया कप्। अन्वक्कः ऋक्शून्ये त्रि०।

अनृजु त्रि० न ऋजुः। शठे वक्रे कुटिले च। "न पाणिपादचपलो न नेत्रचपलोऽनृजुः" इति मनुः। "या भ्रातरमे अनृजोर्क्षणमिति" ऋ० ४,३,१३। "लग्नात् पापाद्व्ययेऽनृजू व्ययार्थस्थौ यदा तदा। कस्तूरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदेति" मुहूर्त्तचि०। ऋजुर्मार्गगामी पूर्व्वगतिः, अनृजुः वक्री पश्चाद्गतिरिति तदर्थः।

अनृण त्रि० न ऋणं यस्य। ऋणशून्ये। ऋणञ्च अवश्यदेयम् तच्च उत्तमर्णाय दातव्यत्वेन स्वीकृतं धनम्। तच्चावश्यं शोध्यं तदशोधने "ऋणानामनपक्रियेत्युक्तेरुपपातकं भवति। अवश्यशोध्यत्वेन तत्सदृशम् वेदाध्ययनादिकमपि ऋणशब्देन व्यवह्रियते "जायमानो वै पुरुषस्त्रिभिर्ऋणैर्ऋणी भवति स्वाध्यायेन ऋषिभ्यः, यज्ञेन देवेभ्यः प्रजया पितृभ्य" इति श्रुतिः एवञ्च वेदाध्ययनादिना ऋष्यादीनामृणशोधने अन्वणो भवतीति स्मृत्यादौ प्रसिद्धम्। एवञ्च "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति" ऋणशून्यस्यैव मोक्षाधिकारः। अतएव मनुना "दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा संन्यसेदन्वणो द्विज" इति अन्वणस्यैव संन्यासोऽभिहितः। "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितृणामन्वणश्चैव स तस्मात् सर्व्वमर्हतीति" मनुः। "एष वा अन्वणः यः पुत्रीति" श्रुतिः। कृतोपकारस्य प्रत्युपकारोऽपि ऋणत्वेन स्वीक्रियते। तदभिप्रायेणैव "प्राणैर्दशरथप्रीतैरन्वणं कर्त्तुमिच्छता" रघौ वर्णितम्।

अनृणिन् त्रि० न ऋणी स्त्रियां ङीप्। ऋणिभिन्ने "दिवसाष्टमे भागे शाकं पचति यो नरः। अन्वणी चाप्रवासी च स वारिचर! मोदते, इति भा० व० प०। "एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽन्वणी भवेदिति" पु०।

अनृत न० न ऋतम्। सत्यभिन्ने मिथ्याभूते। "यद्वाहमभिदुद्रोह यद्वा शेप उतानृतमिति" ऋ० १,२३,२२। "प्रियञ्च

नान्तं ब्रूयादेष धर्मः सनातन" इति मनुना मिथ्याभूतं प्रियवाक्यमपि निषिद्धं तत्र साक्ष्यनृतभाषणस्यातीवनिन्द्यता यथा "यावतो वान्धवान् यस्मिन् हन्ति साक्ष्येऽनृतं वदन्निति" "एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेदिति" च मनुः। "ये च पापकृतां लोका महापातकिनां तथा। अग्निदानाच्च ये लोकाः ये च स्त्रीबालघातिनाम्। तान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेदिति" या०। "ब्रूहि साक्षिन्! यथातत्त्वं लम्बन्ते पितरस्तव। तव वाक्यमुदीक्षन्ते पतन्ति पतन्ति च॥ नग्नो मुण्डः कपाली च भिक्षार्थं क्षुत्पिपासितः। अन्धगर्त्तमुखे गच्छेद् यस्तु साक्ष्यनृतं वदेत्॥ पञ्च कन्यानृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति, सहस्रं पुरुषानृते॥ वशि०स्म०। क्वचिद्विषये तदपवादः। "वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति" या०। "प्राणात्यये सर्व्वधनापहारे विप्रस्य चार्थे ह्यनृतं वदेच्च। विवाहकाले रतिसंप्रयोगे पञ्चानृता-न्याहुरपातकानि भा०क०प०। क्षणिकमेणि न०मे०।

अनृतक त्रि० अनृते प्रवृत्तः कन्। असत्यकथनरते "लुब्धा अनृतकायैव तिष्ठे जायन्ति भारत"। भा० भी०प०।

अनृतवादिन् त्रि० अनृतं वदति वद्-णिनि। मिथ्यावादिनि

अनृतु पु० न ऋतुः वर्षादिकालः। स्वस्वयोग्यधर्म्मैर्युक्ते काले "तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने" इति मनुः। नास्ति ऋतुः स्त्रीपुष्पविकारो यस्मिन् काले। स्त्रीपुष्प-विकारशून्ये काले पु०। "अनृतावृतुकाले च मन्त्र-संस्कारकृत् पतिरिति" मनुः।

अनृशंस त्रि० न नृशंसः विरोधे न०त०। अहिंसे दयालौ। तस्य भावः युवादि० अण् आनृशंस्यम्, ब्राह्मण०ष्यञ् आनृ-शंस्यञ्च दयायाम्।

अनेक त्रि० न एकः एकभिन्नतया उत्सर्गतः बहुवचनान्तता। बहुसंख्यायाम्। "अनेकानि सहस्राणि कौमारब्रह्मचारिणा" मिति मनुः। "पतन्त्यनेके जलधेरिवोर्म्मयः" इति माघः "अनेके सेवन्ते भवदधिकगीर्वाणनिवहानिति" व्याख्या-स्तोत्रम्। एकशब्दस्य सर्व्वनामत्वेन नञ्तत्पुरुषे तद्भिन्न-वाचकतया गौणत्वेऽपि अतच्छब्दवत् सर्व्वनामकार्य्यं तेन अनेके इति, अनेकेषामिति, अनेकस्मै इत्यादि। एवञ्च एक-शब्दस्य समाहारद्विगुत्वनिषेधादनेकशब्दस्य बहुसंख्यावाच-कत्वेऽपि न समाहारः। तेन अनेकराजन्यरथाश्वसङ्कुल-मिति किरा० समाहारे अनेकराजन्यरथाश्वीति ङीप्। "यत्रानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीय इति" परिभा० सि०कौ०। "अनेकपिटकानान्तु पिटतो भाग-कल्पनेति" याज्ञ०। "अनेकबाह्वुदरवक्त्रनेत्रमिति" "अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति" च गीता नास्ति एकः "द्वैकयोर्द्विवचनैकवचने" इतिवत् एकत्वं यत्रेति बहुव्रीहौ अनेकशब्दस्य एकवचनान्तताधीष्यते। "अनेकमन्यपदार्थे" इति पा०स्म०। "आकाशमेकं हि यथा घटादिषु पृथग्भवेत् "तथात्मैकोऽप्यनेकस्थेति" याज्ञ०। "अनेकमाश्रितं लिङ्गमिति" सा०का०। "एको-ऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे सङ्गतेऽल्पे संख्यायाञ्च प्रयुज्यते" इत्युक्तेष्वर्थेषु एकशब्दस्य वृत्तेः तदन्यार्थाभिधे त्रि०। तत्र च संख्यान्यार्थे एव बहुवचनान्तताऽन्यत्र यथेष्टमिति मनो०। उत्करादि० भवार्थे क। अनेकीयः तद्भवे त्रि०। भावे त्व० ष्यञ्। अनेक्यं बहुत्वे न०।

अनेकज पु० अनेकप्रकारं जायते जन ड हलौ संख्यावाच-कस्य सुजर्थता। द्विप्रकारं जाते पक्षिणि, तस्य गर्भाण्डाभ्यां जातत्वेन द्विप्रकारजाततया द्विजत्वादनेकजत्वम्। ५त०। बहुभ्यो जाते त्रि०।

अनेकधा अव्य० अनेक-धाप्रकारे धाच्। बहुप्रकारे "अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैरिति" स्मृतिः। "तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधेति" गीता।

अनेकप पु० अनेकाभ्यां सुखशुण्डाभ्यां पिबति पा-क। द्विपे हस्तिनि। "भालवनायोऽप्यनेकानेकपयूथनाथः" दं०क०।

अनेकमूर्त्ति पु० अनेका लोकानामनुग्रहाय अवतारेषु नाना-विधा मूर्त्तयोऽस्य। परमेश्वरे "अनेकमूर्त्तिरव्यक्त" इति विष्णुसह०।

अनेकरूप पु० अनेकानि रूपाण्यस्य। बहुरूपे परमेश्वरे "रूपं रूपं प्रतिरूपो बभूवेति" श्रुतौ तस्य बहुरूप-त्वोक्तेस्तथात्वम्। नानाविधरूपयुक्तमात्रे पटादौ त्रि०।

अनेकलोचन पु० अनेकानि लोचनानि यस्य। इन्द्रे, परमे-श्वरे च "सहस्राक्षः सहस्रपादिति" श्रुतौ अनेकबाह्वुदर-वक्त्रनेत्रमिति" गीतायाञ्च तस्य अनेकनेत्रत्वोक्तेस्तथात्वम्

अनेकवर्णसमीकरण न० अनेकवर्णाः अज्ञातविशेषसंख्यका-नेकराशयः समीक्रियन्ते ज्ञातसंख्यकसमतया क्रियन्ते यत्र। बीजभेदे यथोक्तं भास्करबीजगणिते "अथानेकवर्णसमीकरणं बीजम्। तत्र क्वचित् कार्य्यद्वयतत्त्वम्।" "आद्यं वर्णं शोध-येदन्यपक्षादन्यान् रूपाण्यव्यक्तवाद्यभावे। पक्षेऽन्यस्मिन्नाद्य-वर्णोन्मितिः स्याद्वर्णैक्योन्मितीनां बहुत्वे॥ समीकृत-

च्छेदगमे तु ताभ्यस्तदन्यवर्णोन्मितयः प्रसाध्याः । अन्योन्मितौ कुट्टविधेर्गुणाप्तौ ते भाज्यभङ्गाजकवर्णमाने ॥ अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिष्टं परिकल्प्य साध्यम् । विलोमकोत्थापनतोऽन्यवर्णमानानि भिन्नं यदि मानमेवम् ॥ भूयः कार्य्यः कुट्टको ऽतान्यवर्णं तेनोत्थाप्योत्थापयेद्यावत्समानात्" । "इदमनेकवर्णसमीकरणं बीजं यतो दाहरणे द्वित्रादयोऽव्यक्तराशयो भवन्ति तेषां यावत्तावदादयो वर्णाः मानेषु कल्प्यास्तत्र पूर्व्वाचार्य्यैः कल्पिताः यावत्तावत्, कालक, नीलक, पीतक, लोहितक, श्वेतक, चित्रक, कर्पूरक, पिङ्गलक, धूम्रक, पाटलक, शबलक, श्यामलक, मेचका, इत्यादि । अथ वा कादीन्यक्षराणि अव्यक्तानां संज्ञाः असङ्करार्थं कल्प्याः । अतः प्राग्वदुद्देशकालापवर्द्धिं कुर्वता गणकेन पक्षौ समौ कार्य्यौ पक्षा वा समाः कार्य्याः । ततः क्षेपावतारोऽयं तयोः समयोरनेकवर्णात् पक्षादितरपक्षाद्यं वर्णं शोधयेत्तदन्यवर्णान् रूपाणि च इतरपक्षाच्छोधयेत्ततः आद्यवर्णशेषेणेतरपक्षे भक्ते भाजकवर्णोन्मितिः । बहुषु पक्षेषु ययोर्ययोः साम्यमस्ति तयोरेवं कृते सति अन्या उन्मितयः स्युः । ततस्तासून्मितिषु एकवर्णोन्मितयो यद्यनेकधा भवन्ति ततस्तासां मध्ये द्वयोर्द्वयोः समौ कृतच्छेदगमेनाद्यं वर्णं शोधयेदित्यादिनान्यवर्णोन्मितयः स्युः । एवं यावत्सम्भवस्ततोऽन्योन्मितौ भाज्यवर्णे योऽङ्कः स भाज्यराशिः, यो भाजके स भाजकः, रूपाणि क्षेपः, अतः कुट्टकविधिना यो गुण उत्पद्यते तद्भाज्यवर्णमानं, या लब्धिस्तद्भाजकवर्णमानं, तयोर्मानयोर्दृढभाजकभाज्याविष्टेन वर्णेन गुणितौ क्षेपकौ कल्प्यौ । ततः स्वस्वमानेन सक्षेपेण पूर्ब्ववर्णोन्मितौ वर्णावुत्थाप्य स्वच्छेदेन हरणे यल्लभ्यते तत् पूर्ब्ववर्णस्य मानम् । एवं विलोमकोत्थापनतोऽन्यवर्णमानानि भवन्ति । यदि तु अन्योन्मितौ द्व्यादयो वर्णा भवन्ति तदा तेषामिष्टानि मानानि कृत्वा स्वस्वमानैस्तानुत्थाप्य रूपेषु प्रक्षिप्य कुट्टकः कार्य्यः । अथ यदि विलोमकोत्थापने क्रियमाणे पूर्ब्ववर्णोन्मितौ तन्मितिर्भिन्ना लभ्यते तदा कुट्टकविधिना यो गुण उत्पद्यते स क्षेपः स भाज्यवर्णमानं तेनान्यवर्णमानेषु तं वर्णमुत्थाप्य पूर्ब्वोन्मितिषु विलोमकोत्थापनप्रकारेणान्यवर्णमानानि साध्यानि । इह यस्य वर्णस्य यन्मानमागतं व्यक्तमव्यक्तं, व्यक्ताव्यक्तं वा तस्य मानस्य व्यक्ताङ्केन गुणने कृते तद्वर्णाक्षरस्य निरसनमुत्थापनमुच्यते" तद्व्याख्या । उदाहरणं तत्रैव द्रष्टव्यम् ।

अनेकविध त्रि० अनेका विधा प्रकारा यत्र । बहुप्रकारे "यत्रानेकविधमानार्थं तत्र स्थानत आनर्थ्यं बलीय" इति परि० ।

अनेकशस् अव्य० अनेक+वीप्सार्थे कारके शस् । अनेकवारार्थे "अनेकशो निर्जितराजकस्वभिति" भट्टिः ।

अनेकाग्र त्रि० न एकाग्रः । शून्यहृदये एकाग्रतामून्ये

अनेकान्त त्रि० न एकान्तो नियमो अव्यभिचारो यत्र । अनियमे, अनिश्चितफलके च । व्यभिचारवति दुष्टहेतौ पु० । "अनेकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा० । स च त्रिविधः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मत" इति भाषा० । एकान्तोऽस्यास्य प्रज्ञा० ण । ऐकान्तः न० त० अनैकान्तोऽपत्र क्वचित् "भाषायाम् अनैकान्तो विरुद्ध स्वेत्येव" पाठः । तथा च साधारणादित्रितयान्यान्यत्वमनेकान्तत्वम् ।

अनेकान्तवादिन् पु० अस्ति नास्ति वेत्येकान्तं न वदति वद-णिनि ६त० । बौद्धभेदे । तस्य अस्तिनास्तिकायवादित्वेन तथात्वं विवरणमर्हच्छब्दे द्रष्टव्यम् ।

अनेकार्थ त्रि० अनेके अर्था अभिधेया यस्य । नानार्थे शब्दे । यथा गवादय अक्षादयश्च । 'अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधा यथेति' सा० द० । अयमाशयः "संयोगश्च विभागश्च साहचर्य्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती देशः कालाद्युक्तिः स्ववाचक । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव" इति हर्य्युक्तेरनेकार्थशब्दानां सर्वत्र शक्तौ समानायां सत्यां, संयोगाद्यैरितरार्थबोधप्रतिरोधनेन विशेषार्थ एव कार्य्यते । तद्विज्ञार्थस्य तु व्यञ्जनया बोधः इत्यलङ्कारिकाणां मतम् । तथाच संयोगादयः शक्त्या अन्यार्थोपस्थितौ प्रतिबन्धकाः । व्यञ्जना तूत्त्या तदुपस्थापने तु न । "अनेकार्थशब्देभ्यः सर्वेषामर्थानामविशेषेणोपस्थितौ सत्यामपि संयोगादयः अन्यशक्यविषयशब्दबोधमात्रं प्रतिबध्नन्ति नतु व्यङ्ग्यविषयमिति" रसगङ्गाधरः । नैयायिकादयस्तु अनेकार्थशब्दानां शक्यताच्छेदकलाघवलाभे तत्रैव शक्तिरन्यत्र लक्षणा तत्र संयोगादयः अन्यार्थबोधनं नैव प्रतिबध्नन्ति । तथा च संयोगादयः सति तात्पर्य्ये, तद्विषयीभूतार्थविषयस्मृतिं तज्जन्यान्वयबुद्धिं वा न प्रतिबध्नन्ति किन्तु तात्पर्य्यमात्रोच्छायका इत्यतं व्यञ्जनाद्यूत्तेरिति स्त्रीचन्द्रुरिति भेदः । अनेके अर्थाः प्रयोजनानि

यत्र यस्य वा । अनेकप्रयोजनवति त्रि० "अनेकार्थाभियोगे च यावत्संसाधयेद्धनी" इति स्मृतिः । कर्म्म० । बहुप्रयोजने पु० ब०व० ।

अनेकाश्रित पु० अनेकेषु आश्रितः ७त० । वैशेषिकनये संयोगादिषु, सामान्येषु च । "संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणा" इति भाषा० "नित्यत्वे सति अनेकसववेतत्वं जातित्वमिति" मुक्ता० । एकस्या एव व्यक्तेर्नानाव्यक्तिनिष्ठत्वेऽस्य प्रयोगोपाधिता । भवन्ति च संयोगाद्यः सामान्यं च तथा । रूपादेर्नानाव्यक्तिषु सत्त्वेऽपि नैकव्यक्तेरिति न तस्य तथात्वमिति भेदः ।

अनेजत् न० न एजत् । सर्व्वदैकरूपे ब्रह्मणि । "अनेजदेकं मनसो जवीय" इति ईशोप० । "एजनं कम्पनं स्वभावप्रच्युतिस्तद्विवर्जितं सर्व्वदा एकरूपमिति" भा० । कम्पनशून्ये त्रि० स्त्रियां ङीप् ।

अनेडमूक त्रि० एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ ब० । (काला, बोबा) इति ख्याते श्रवणवचनशक्तिरहिते, मूढे च । [प्रशस्ते प्रधाने निरुक्तकारः ।

अनेद्य त्रि० निंदि कुत्सने क्यप् नि० नलोपश्च न०त० ।

अनेनस् त्रि० नास्ति व्यसनमधर्म्मो वा यस्य । व्यसनपापादिरहिते "राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः" इति व्यव०त० मन्वादिस्मृ० । "अनेनो वोमरुतो याम" इति ऋ०६,६६,७ । "अनेनः पापरहितं यथा भवतीति" भाष्यम् "त्वानेना नमसा तुर" इति ७,८६,४ । "अनेना अपापः" इति भाष्यम् ।

अनेमा पु० नी–मनिन् न०त० । प्रशस्ते निरुक्तकारः ।

अनेहस् पु० न हन्यते हन–असि प्रकृतेरेहादेशः । काले । सौ अनड्वान् । अनेहा "कालोद्दिष्टोऽप्यनेहापी"त्यमरः । न हन्यते कर्म्मणि असि । अहिंसनीये त्रि० । "ग्रभ्रुवं मन्त्रं देवा अनेहसमिति" ऋ० १,४०,६ । "अनेहसं कालमाहिंसामिति" भा० । "यापिनोषयम् यजामहे सुप्रतूर्तिमनेहसम्" ऋ० १,४०,४ । "यथा नोऽह्ने क्षयाय त्रिधातवे अनेहः" ऋ० ६,५०,१ ।

अनैकाग्र्य न० एकाग्रस्य भावः ष्यञ् अभावे न०त० । ऐकाग्र्याभावे । न०ब० । ऐकाग्र्यशून्ये त्रि० । "आचाराधानमनैकाग्र्यं सर्वेषामुपलक्षणादिति" भाग० ।

अनैकान्त पु० अनेकान्तयत्वार्थे । तलैव व्युत्पत्तिर्दर्शिता "अनैकान्तो विरुद्धश्चेति" भाषा० पाठान्तरम् ।

अनैकान्तिक पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् एकान्तो नियमो व्याप्तिरस्यास्य ठन् स्वार्थे अण् वा न०त० । अनेकान्तशब्दार्थे अनेकान्तशब्देऽधिकं द्रष्टव्यम् "त्रिधाऽनैकान्तिको मत" भाषा० । ऐकान्तिको निश्चितरूपस्तद्भिन्ने त्रि०

अनैक्य न० न ऐक्यम् अभावे न०त० । ऐक्याभावे ।

अनैतिह्य त्रि० न ऐतिह्यं यत्र । परम्पराश्रवणरूपैतिह्य प्रमाणशून्ये । "अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति" ? भा०शा०प० ।

अ(आ)नैपुण न० अनिपुणस्य भावः अण् आद्यचो वा वृद्धिः । अनिपुणत्वे । ष्यञ् अ(आ)नैपुणमप्यत्र न० ।

अ(आ)नैश्वर्य्य न० अनीश्वरस्य भावः आद्यचो वा वृद्धिः । अनीश्वरत्वे अधीनत्वे । नास्ति ऐश्वर्यं यस्य । अनैश्वर्यः ऐश्वर्यशून्ये त्रि० ।

अनो अव्य० न+नो डो । अभावार्थे । "अभावे, नञ्प्रनो नापी"त्यमरे अनो इत्येकं नामेति भीलकण्ठः । अन्ये तु अ इति, नो इति, च त्रिच्या नामद्वयमित्याहुः ।

अनोकहा पु० अनसः शकटस्याकं गतिं हन्ति प्रतिरोधं करोति हन–ड ईत० । वृक्षे । "द्रुमान्मूलं हरति पुष्पमनोकहानामिति" अनोकहाकम्पितपुष्पगन्धीति च" रघुः । "उद्यन्तमुद्वृतमनोकहाग्रमध्ये इति" माघः ।

अनोदन त्रि० नास्त ओदनरूपं भक्ष्यं यत्र । "अन्नवर्जनयुक्ते व्रते । "नक्तं हविष्यान्नमनोदनं वा" इति स्मृतिः ।

अनोङ्कृत त्रि० न ओङ्कारस्योच्चार्य्य कृतः ओम्+कृ–क्त न०त० । ओङ्कारोच्चारणाभावेन कृते । "ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्व्वदा । स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्य्यति" मनुः । ओमिति स्वीकारे तथा कृतम् । अङ्गीकृते त्रि० ।

अनक्ष व्यक्तौ चु०उभ०सक० सेट् । अञ्जयति ते आञ्जिचत् त कर्म्मणि अञ्ज्यते । णिजभावे अज्यते इति भेदः "पूर्व्वात् पूर्वयदच्यते" इति श्रुतिः ।

अनञ्चु गतौ अचिवत् ८२ पृ० द्रष्टव्यम् ।

अनज गतौ कान्तौ व्यक्तौ च भ्वा० उभ० वर्त्तमाने क्त अदित् वेट् पर० । अनक्ति । सिचि परस्मैपदे नित्यमिट् । आञ्जीत्-आनङ्क्ष । अञ्जिता-अङ्क्ता । अञ्जिष्यति-अङ्क्ष्यति । क्त अक्तः । क्तिन् अक्तिः । क्त्वा–अक्त्वा अञ्जित्वा । वि+प्रकाशने । व्यनक्ति व्यज्यते "व्यनक्ति कालतितयेऽपि योग्यतामिति" साहः । घञ् व्यक्तः । ण्यत् व्यक्त्यः । "सव्यक्त्यमुच्चकैः काव्यमिति" । णिच् । व्यञ्जयति ल्युट् । व्यञ्ज-

नम्। "अन्यार्थधीकृत् व्यावृत्तिरञ्जनम्" का०प्र०। कर्त्तरि ल्यु। व्यञ्जना एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना सार्भिधाश्रयेति" सा०द०।

अन्त न० अम्—तन्। स्वरूपे, स्वभावे च। शेषे पु०न०। नाशे, सीमायां, निश्चये, शेषावयवे च पु०। निकटे, मनोहरे च त्रि०। तत्र स्वरूपे "स्तृदुलतान्तलतान्तमनोकयदिति" माघः। नाशे "पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा। "अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यतीति" उद्भटः। "वैरस्यान्तं करिष्यति" रामा०। सीमायां "वनान्तपर्य्यन्तसुमेत्य सस्तृहमिति" नैष०। "ओदकान्तात् स्निग्धोऽनुगन्तव्य" इति स्मृतिः। सीमाऽवधिः स च दैशिकः कालिकश्च। तत्र दैशिक उक्तोदाहरणे कालिकस्तु। "पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवमिति" ज्योति०। "दशाहान्ते पुनः क्रियेति" स्मृतिः शेषसीमायाम् "असुं वनान्ताद्वनितवहारिणमिति" माघः। "दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिन" इति भामिनी०। "गङ्गाप्रयागान्तविरूढशष्पमिति" रघुः। शेषावयवे "नेत्रान्तसञ्चारिणि" इति वेदान्त इत्यादि। निश्चये। "उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति" गीता। उभयोः सदसतोरित्यर्थः। निकटे अन्तपालः। स्वभावे गुणान्तः। शेषे निशान्तः।

अन्तःकरण न० क-कृरणे ल्युट् अन्तरभ्यन्तरस्थं करणं, कर्म्म०, तद्वृत्तिपदार्थानां सुखादीनां करणं ज्ञानसाधनं इत० वा। ज्ञानसुखादिसाधने आभ्यन्तरे मनोबुद्धिचित्तादिपदाभिलप्यमाने इन्द्रिये। तच्चान्तःकरणम् वेदान्तिमते चतुर्विधम्। "मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" इत्युक्तकार्य्यभेदात्। अन्यत्र व्यक्तमुक्तम् "यदा तु संकल्पविकल्पकर्त्रं तदा भवेत्तन्मन इत्यभिख्यम्। स्वार्थद्वि संशं च यदा तु वेत्ति सुनिश्चितं संशयरूपहीनम्। अनुसन्धानरूपं तच्चित्तञ्च परिकीर्त्तितम्। अहंकृत्यात्मवृत्त्या तु तदहङ्कारतां गतमिति"। एतदनुसारेणैव शारादायासुक्तम् "अन्तःकरणमात्मनः। मनोबुद्धिरहङ्कारश्चित्तञ्चेति प्रकीर्त्तितमिति"। तस्य च ज्ञानादिप्रत्यक्षकरणत्वादन्तःकरणत्वम्। तत्साधकमनुमानञ्चेत्थम् ज्ञानसुखादिप्रत्यक्षं स्वग्राहकेन्द्रियसापेक्षं प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत्। नच चक्षुरादीनां तत्करणत्वं सम्भवति रूपादित्वाभावादित्यन्तःकरणसिद्धिरिति नैयायिकादयः। सांख्यादयस्तु महत्तत्त्वापरपर्य्यायमेवान्तःकरणमङ्गीचक्रुः। पञ्चतन्मात्रेभ्यो भूतेभ्यश्चाहङ्काररूपद्रव्यसिद्धिसत्त्वा "तेनान्तःकरणस्येति" सां०सू०। तत्सिद्धिरुक्ता तदनुमाने च भाष्ये एवं प्रयोगादिकं दर्शितम्। "अहङ्कारद्रव्यं निश्चयवृत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात् यच्चैवं तच्चैवं यथा पुरुषादिरिति। अत्राप्ययं तर्कः, सर्वोऽपि लोकः पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते अयमहं, मयेदं कर्त्तव्यमित्यादिरूपेणेति, तावत् सिद्धमेव। तत्राहङ्कारद्रव्यकारणाकाङ्क्षायां बुद्ध्योः कार्यकारणभावेन तदाश्रययोरेव कार्यकारणभावो लाघवात् कल्प्यते कारणस्य वृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिकत्वादिति। यद्यपि अन्तःकरणमेकं तथापि वंशपर्वस्विवावान्तरभेदमाश्रित्यान्तःकरणत्रये क्रमः, कार्यकारणभावश्चोक्तः योगोपयोगिस्मृतिसूत्रपरिभाषानुसारादिति मन्तव्यम्। तदुक्तं वाशिष्ठे। "अहमर्थोदयो योऽयं चित्तात्मा वेदनात्मकः। एतच्चित्तद्रुमस्यास्य बीजं विद्धि महामते!॥ एतस्मात् प्रथमोद्भिन्नादङ्कुरोऽभिनवाकृतिः। निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते॥ अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपौनता। सङ्कल्परूपिणी तस्याश्चित्तचेतोमनोभिधा" इति। अहमर्थोऽन्तःकरणसामान्यम्। अत्र वाक्ये बीजाङ्कुरन्यायेनैकस्यैवान्तःकरणवृत्तस्य वृत्तिमात्ररूपेण चित्तादिव्यवस्थाभेदाः क्रमिकास्त्रिविधाः परिणामा उक्ता इति। साङ्ख्यशास्त्रे च चिन्तनावृत्तिकस्य चित्तस्य बुद्धावेवान्तर्भावः। अहङ्कारस्य चात्र वाक्ये बुद्धावन्तर्भावः" इति॥ कारिकायामपि "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यमिति" त्रैविध्यसूक्त्या "सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्, तस्मात्त्रिविधं करणं द्वारि, द्वाराणि शेषाणीति" तत्त्रयस्यैव प्राधान्यसूक्तम्। एवञ्च पुरुषस्य सन्निधिमात्रादधिष्ठातृत्वं गौणं सुखमधिष्ठातृत्वन्तु अन्तःकरणस्यैव यथोक्तम् "अन्तःकरणस्य तदुज्ज्वलितत्वात्लौहवदधिष्ठातृत्वम्" सां०सू०॥ "अन्तःकरणस्यानुपचरितमधिष्ठातृत्वं सङ्कल्पादिद्वारकं प्रत्येतव्यम्। नन्वधिष्ठातृत्वं घटादिवदचेतनस्य न युक्तं तत्राह। लौहवत् तदुज्ज्वलितत्वादिति। अन्तःकरणं हि तप्तलौहवच्चेतनोज्ज्वलितं भवति। अतस्तस्य चेतनायमानतयाधिष्ठातृत्वं घटादिव्यावृत्तमुपपद्यत इत्यर्थः। नन्वेवं चैतन्येनान्तःकरणस्योज्ज्वलने चितेः सङ्क्रान्त्यभिन्नवदेव स्यादिति चेन्न नित्योज्ज्वलचैतन्यसंयोगविशेषमात्रस्य संयोगविशेष

जन्यचैतन्यप्रतिबिम्बस्य वान्तःकरणोज्ज्वलनरूपत्वात्। न तु चैतन्यमन्तःकरणे संक्रामति येन सङ्गिता स्यात्॥ अग्नेरपि हि प्रकाशादिकं न लौहे संक्रामति, किन्त्वग्निसंयोगविशेष एव लौहस्योज्ज्वलनमिति। नन्वेवमपि संयोगेन परिणामित्वमिति चेन्न सामान्यगुणातिरिक्तधर्म्मोत्पत्तावेव परिणामव्यवहारादिति। अयं च संयोगविशेषोऽन्तःकरणस्यैव सत्त्वोद्रेकरूपात् परिणामाद्भवतीति फलबलात् कल्प्यते पुरुषस्यापरिणामित्वेन संयोगे तन्निमित्तकविशेषासम्भवादिति। अयमेव च संयोगविशेषो बुद्ध्यात्मनोरन्योन्यप्रतिबिम्बने हेतुरिति" सा०प्र०भा०। अन्तःकरणस्य च वृत्तयस्त्रिधा "शान्ताघोरास्तथामूढा मनसो वृत्तयस्त्रिधा। वैराग्यं शान्तिरौदार्य्यमित्याद्याः शान्तवृत्तयः। तृष्णा स्नेहोरागलोभावित्याद्या घोरवृत्तयः। सम्मोहोभयमित्याद्या कथिता मूढवृत्तयः" इति तास्वेव वृत्तिषु ज्ञानत्वोपचारात् तत्साधनत्वमिन्द्रियाणाम् "अन्तःकरणवृत्तौ ज्ञानत्वोपचारादिति" पञ्चपादिकाविवरणम्। शान्तादीनामेव सात्विकादिरूपेण व्यवहारः। ताश्च वृत्तयः "क्रमशोऽक्रमशश्च वृत्त इति सां०सू० उक्तेः युगपदपि भवन्तीति सांख्याद्यः। नैयायिकादयस्तु "अयौपद्याज्ज्ञानानां"मित्युक्तेः क्रमिकत्वमेवाङ्गीचक्रुः। तच्चान्तःकरणमणुपरिमाणमिति नैयायिकादयः। यावद्देहकार्य्यकारित्वात् जलावगाहे एकदैव सर्वदेहगतशैत्याद्युपलब्धेर्मध्यपरिमाणमिति सांख्यादयः। तेषां च चतुर्णां चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातारोदेवा इति।

अन्तःकुटिल पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयवयुक्ते भल्ले। वक्रान्तःकरणे त्रि०।

अन्तःक्रमि पु० अन्तरभ्यन्तरे क्रमिर्यस्य। (गुटि) इति ख्याते क्रमिकोषफले। मध्यस्थक्रमियुक्ते फलादौ त्रि०।

अन्तःकोटरपुष्पी स्त्री अन्तःकोटरे अभ्यन्तरे पुष्पं यस्याः जातित्वात् ङीप्। अन्तःकोटरपुष्पत्वात् नीलवृक्षायाम्।

अन्तःपदवी स्त्री ७त०। सुषुम्णामध्यगते पथि।

अन्तःपशु पु० अन्तःग्राममध्ये पशवो यत्र। ग्राममध्ये पशुस्थितिकाले प्राह्णे, सायाह्णे च "अन्तःपशौ पशुकामस्य सायं प्रातः" काल्या० ४,१५,१४। "अन्तःपशौ काले ग्राममध्ये पशवो यस्मिन् काले, सायं पशुषु ग्राममध्येषु आगतेषु, प्रातश्च ग्रामादनिःसृतेष्विति" तद्भा०।

अन्तःपात पु० अन्तर्मध्ये पततीति पत–कर्त्तरि घञ्। सन्धिस्थाने। भावे घञ्। मध्यपतने।

अन्तःपातिन् त्रि० अन्तःपतति पत–णिनि ङित०। मध्यप्रविष्टे। स्त्रियां ङीप्।

अन्तःपात्य पु० अन्तर्मध्ये पात्यते पत–णिच्–आधारे यत्। मध्ये पातनाधारे देशे "अन्तःपूर्व्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयतीति" कात्या० १५,६,२२, "स्थापितगवानां पतये स्वभ्रातृ द्रव्यं शतमधिकं वा दत्त्वा यूपात् पूर्व्वदिशि परीत्यान्तःपात्यदेशे स्थापयेदिति" वेददीपः।

अन्तःपुर न० अन्तरभ्यन्तरं पुरं गृहं कर्म्म०। (अन्दर) इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। "त्रितयमिदमपूर्वं दृष्टमन्तःपुरे ते" इत्युद्भटः "व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् इति" भुक्तानु विहरेच्चैव स्त्रीभिरन्तःपुरे सहेति। "अन्तःपुरप्रचारश्च प्रणिधीनाञ्च चेष्टितमिति" च मनुः। तत्र स्थितत्वात् राजमहिलायामपि। "दाक्षिण्येन ददाति याचसचिवामन्तःपुरेभ्यो यदेति" भक्त०। पुरशब्दसमासे अपि स्त्रीत्वात् ङीप्। अन्तःपुरीत्यपि स्त्री।

अन्तःपुरचर पु० अन्तःपुरे चरति चर–ट ७त०। राजान्तःपुरचारिणि कञ्चुक्यादौ। अन्तःपुरस्त्रियाम् स्त्री ङीप्।

अन्तःपुरसहाय पु० अन्तःपुरे सहायः। राज्ञामन्तःपुरसञ्चरे विदूषकादौ।

अन्तःपुराध्यक्ष पु० ६त०। "दृङ्नः कुलोद्गतः शक्तः पित्रैतामहः शुचिः। राज्ञामन्तःपुराध्यक्षो विभीतश्च तथेष्यते" इति नरपत्युक्तलक्षणेऽन्तःपुराधिपते। अन्येऽपि पञ्च तथा, "पञ्चापरे वामनको जघन्यः कुब्जोऽपरो मण्डलकोऽथ सामी। पूर्व्वोक्तभूयानुचरा भवन्ति सङ्कीर्णसंज्ञाः प्रकृतिक्रमेण॥ सम्पूर्णाङ्गो वामनो (१) भग्नदृष्टिः किञ्चिन्नोन्नम्यमध्यकक्षान्तरेषु। ख्यातो राज्ञो ह्येष भक्तानुजीवी स्फीतो दाता वासुदेवस्य भक्तः॥ मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्यश्रवणः सुसन्धिः। शुक्रेण सारः पिशुनः कविश्च रूक्षच्छविः स्थूलकराङ्गुलीकः॥ क्रूरो धनी स्थूलमतिः प्रतीतस्ताम्रच्छविः स्यात् परिकासयोनिः। उरोऽन्तिकेष्वसितरोमपारश्वभागश्च जघन्यनामा (२)॥ कुब्जो (३) नाम्नायः स गुडो ह्रस्वस्तात् स्त्रीणः किञ्चिन्नूपूर्व्वकाये नतश्च। हंसासेवी नास्तिकोऽर्थैकदृष्टो विद्वान् शूरः स्थपकः स्यात् कृतज्ञः॥ कक्षाक्षिभ्रूः कलहप्रियश्च प्रभूतभक्ष्यः प्रमदाजितश्च। सम्भूक्ष्य लोकं प्रजहात्यकस्मात् कुब्जोऽयमुक्तः सततोद्यतश्च॥ मण्डलकनामधेयो ४ रूपकाजुचरोऽभिचारवित् कुशलः। ज्ञात्वैतावाद्यादिषु कर्मसु विद्यास्तु चानुरतः॥

दृङ्गाकारः खरकृत्तमूर्धजः शत्रुनाशने कुशलः । द्विजदेव-यज्ञयोगप्रसक्तधीः स्त्रीजितो मतिमान् ॥ सामीति (५) यः सोऽतिविरूपदेहः शशानुगामी खलु दुर्भगश्च । दाता महा-रत्नसमाप्तकार्यो गुणैः शशस्यैव भवेत् समानः" बृहत्-संहितोक्तलक्षणादिभेदपञ्चकात् ।

अन्तःपुरिक त्रि० अन्तःपुरे नियुक्तः ठक् संज्ञापूर्व्वकविधे-रनित्यत्वान्न वृद्धिः । अन्तःपुराध्यक्षे कञ्चुक्यादौ "अस्मत्-प्रार्थनामन्तःपुरिकाभ्यो निवेदयेति" चण्डकौ० ।

अन्तःपुष्प न० अन्तर्गतं पुष्पं स्त्रीरजः । द्वादशवर्षादूर्द्ध्वमभ्य-न्तरजाते स्त्रीणां रजसि । "वर्षद्वादशकादूर्द्ध्वं यदि पुष्पं वहिर्नहि । अन्तःपुष्पं भवत्येव पणसोडुम्बरादिवत्" । इति काश्यपसंहिता ।

अन्तःप्रकृति स्त्री अन्तर्वर्त्तिनी प्रकृतिः राज्याङ्गम् । राज्ञां सच्चिवप्रकृतौ अमात्यादौ । "अन्तःप्रकृतिकोपनं हि राज्ञां महद्व्यसनमिति" नीतिः । [आत्मानुसन्धानपरे ।

अन्तःप्रज्ञ त्रि० अन्तःस्था प्रत्यक्तत्त्वविषयिणी प्रज्ञा यस्य ।

अन्तःप्रविष्ट त्रि० अन्तःकरणे, मध्ये वा प्रविष्टः । हृदय-गते, अभ्यन्तरगते च । "अन्तःप्रविष्टकर्णपल्लवप्रतिबिम्बे-नेति" काद० ॥

अन्तःशरीर न० अन्तः स्थूलदेहमध्यस्थं शरीरम् । स्थूल-देहमध्यवर्त्तिनि वेदान्तमतसिद्धे सूक्ष्मशरीरे । तच्च "पञ्च-प्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन"मित्युक्तं सप्तदशावयवं भोगसाधनं सूक्ष्ममङ्गम् । शरीरस्य मध्ये अव्ययी० । देहमध्ये इत्यर्थे अव्य० । अन्तर्देहहृदयोऽयुक्तार्थयोः । अन्तरेव देहः । मनोरूपदेहे न० । [दुःखदायके ।

अन्तःशल्य न० अन्तःकरणस्य शल्यमिव पीड़कत्वात् । मनसो

अन्तःसंज्ञ त्रि० अन्तः अभ्यन्तरवर्त्तिनी कथनायोग्यत्वात् अप्र-काश्या संज्ञा चेतना यस्य । वृक्षादौ । ते च मनुना दर्शिता यथा "उद्भिज्जा स्थावराः सर्व्वे बीजकाण्डप्ररो-हिणः । ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तोये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः । गुच्छगुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च । तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना । अन्तः-संज्ञा भवन्त्येते सुखदुःखसमन्विता" इति ।

अन्तःसत्त्वा स्त्री अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी सारो वा यस्याः यस्य वा ब्व० । गर्भिण्यां स्त्रियाम् । अन्तःसारे त्रि० ।

अन्तःसुख त्रि० अन्तरात्मनि तदनुसन्धाने एव सुखं यस्य । आत्मानुसन्धानमात्रसुखे बाह्यसुखशून्ये । "योऽन्तः-सुखोऽन्तरारामः इति" गीता । [मदस्रावित्रि हस्तिनि ।

अन्तःस्वेद पु० अन्तःस्वेदो मदस्यन्दनं मदजलं यस्य ब्व० ।

अन्तक पु० अन्तयति अन्तं करोति अन्त+णिच्-ण्वुल् । मृत्यौ "व्याजेनापि हृता राजन् नो दर्शयति सान्तक-मिति" भार० पु० । देहिनां स्वस्वकर्मानुसारेण विनाशनाय ईश्वरनियुक्ते यमाख्ये देवभेदे "कृपिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंसा" इति रघुः । विनाश-कमात्रे त्रि० "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तक-स्यान्तकोऽहमिति" वेणी० । परमेश्वरे पु० तस्य सर्व्वभूतानां प्रलये संहर्त्तृत्वात्तथात्वम्, "महोदधिशयोऽन्तक" इति विष्णुसह० ।

अन्तकर त्रि० अन्तं नाशं करोति कृ-ट उप०स० । नाश-कारके । "अहमन्तकरो नूनं ध्वान्तस्येव दिवाकर" इति भट्टिः । स्त्रियां ङीप् ।

अन्तकरण त्रि० अन्तं करोति नन्द्या० ल्यु । नाशकारके । "दूतं समाह्वयञ्चैव राजा राष्ट्राद्विवासयेत् । राज्यान्त-करणावेतौ द्वौ दोषौ पृथिवीक्षितामिति" मनुः । भावे ल्युट् । नाशने न० ।

अन्तकर्म्मन् न० अन्तस्य नाशस्य परिच्छेदस्य वा कर्म्म उत्पाद-नम् । नाशने । "धो अन्तकर्म्मणि इति" पा० धातु० । स्यते-र्नाशनार्थत्वात् सकर्म्मकत्वम् तेन "राघव ! स शरैर्घोरैर्घोरं रावणमाहवे" इत्यादौ रावणस्य कर्म्मता स्येति स्यतेर्लोटो मध्यमैकवचनान्तरूपम् । परिच्छेदकरणे "अवासासीच्च वैयासकीमित्यादि ।

अन्तकारिन् त्रि० अन्तं करोति कृ-णिनि ऐत० । अन्त-कारके विनाशके । स्त्रियां ङीप् । ण्वुल् । अन्तकारको-ऽप्युक्तार्थे त्रि० । [ब्रह्म निर्वाणमृच्छतीति" गीता ।

अन्तकाल पु० ऐत० । मृत्युकाले, "स्थित्वाऽस्यामन्तकालेऽपि

अन्तकृत् त्रि० अन्तं करोति कृ-क्विप् ऐत० । विनाशके ।

अन्तग त्रि० अन्तं गच्छति गम-ड उप०स० । कार्य्यान्त-गामिनि, निरवशेषकार्य्यकारके, पारगामिनि, च "यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्य्युं छन्दोगं च समाप्तिकमिति" मनुः । [गामिनि ।

अन्तचर त्रि० अन्ते शेषावधौ चरति चर-ट । कार्य्यादिशेष-

अन्ततस् अव्य० अन्त+सार्व्वविभक्तिकस्तसि । अन्तेन अन्तौ अन्तादिलाद्यर्थे । तत्र तृतीयार्थे । "वैश्योऽङ्गिः प्रसिता-

भिस्तु शूद्रः स्पृष्टाभिरन्तत" इति मनुः। "शुध्येत स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्तत" इति या०। सप्तम्यर्थे "सह द्यावापृथिव्योश्च तथा खिष्टकृतेऽन्तत" इति मनुः। "अन्ततः उपस्पृश्य शुचिरिति गोभि०। अन्ततः अन्तावच्छेदे इत्यर्थः "तामन्ततोऽपक्रम्येत्यादौ तु पञ्चम्यर्थे। अमेक्षायां, सम्भावनायाञ्च। अवयवे, शासने च विश्व०।

अन्तम त्रि० अन्तिक+तमप् "तादेश्चेति" वेदे तिकशब्दलोपः। अन्तिकतमे अत्यन्तनिकटस्थिते। शिक्षा अन्तमस्येति ऋ० १,२७,५, "तनूपा अन्तमो भवेति" ऋ० ६,४६,१०, । भाष्यलतोक्तार्थतयैव व्याख्यातम्।

अन्तपाल त्रि०पु० अन्तं समीपदेशं द्वारं पालयति। द्वारपाले। "शुद्ध्युत्सृक्वन्तपालेभ्यः श्रुत्वा लिखितमागतमिति" भा०या०प०।

अन्तर् अव्य० अम-अरन् तुड़ागमश्च। मध्ये, "अन्तःशाक्ता बहिःशैवाः सभायां वैष्णवा मता" इति तन्त्रम्। "अन्तर्विश्वानि भेषजा" ऋ० १,२३,२० "अप्स्वन्तरमृतमप्सु" इति ऋ० १,२३,१९, "न मूत्रस्थानि गतान्याख्याद्रव्यान्तरधिष्ठितमिति" मनुः "प्रतिबलजलधेरन्तरौर्वायमाणं" इति "अन्तर्ज्वालावलीढेति" च वेणी०। सर्व्वमध्यस्थे परमेश्वरे देहमध्यस्थे जीवे च अन्तःप्रज्ञः अन्तर्ज्योतिरित्यादि। चित्ते "अन्तर्गता मदनवह्निशिखावली येत्युद्भटः "अन्तर्गतं प्राणभृतां हि वेदेति" रघुः। प्राप्ते, स्वीकारे च। अस्य च मध्यार्थेऽव्ययीभावः। अन्तर्जलधि अन्तर्गृहमित्यत्यादि अव्य०।

अन्तर न० अन्तं राति ददाति रा-क। अवकाशे, अवधौ, परिधानांशुके अन्तर्द्धाने, भेदे, परस्परवैलक्षण्यरूपे विशेषे, तादर्थ्ये, छिद्रे, आत्मीये, विनार्थे, बहिरर्थे, व्यवधाने, मध्ये, सदृशे च। आसन्ने त्रि०। "क्षत्रायुजश्चिदन्तरम् ऋ० १,१०,६, अन्तरं क्षत्र आसन्नं कुरु" भा० "पायुरन्तरो निषङ्गाय" ऋ० १,३१,१२, "अन्तरः समीपवर्त्तीति" भा० "न यत्परो नान्तर इति" ऋ० २,४१,८, "अन्तरः समीपवर्त्तीति" भा० निकटस्थे "यद्योहीलो वो अन्तर इति" ८,१८,१९, अन्तरः अन्तिके वर्त्तमान इति भा०। अन्तरयति दूरीकरोति अन्तर-णिच्+अच्। अपसारणे। अन्तर्गते त्रि०। "हृदो अक्षन्नरम्" ऋ० ७,१०१,५ "अन्तरमन्तर्गतमिति" भा०। इ०उप० अन्तर्याभिराङ्भ्यां अन्तर्गते बहुशः प्रयुक्तः तच्च (१३०) पृष्ठे द्रष्टव्यम्। "यो अन्तरोमित्रमहो वनुष्यात् ऋ० ६,५,३, अन्तरः अभ्यन्तरवर्त्तीति भा०। "पुरोऽग्नितोऽन्तरोयासिदूत्यम् ऋ० १,४४,१२, "अन्तरः देवयजनमध्ये वर्त्तमान" इति भा०। अवकाशे, "मृणालसूत्रान्तरमप्यलभ्यम्" कुमा०। "तत्रान्तरे जघ्नुरसुं कटाक्षैः" माघः। मध्ये, "दिलीपसूनोः स इहाङ्गजान्तरमिति" रघुः। "आवयोरन्तरे जाताः पर्व्वताः सरितो द्रुमा" इति रामा०। व्यवधाने गिरिर्वा व्यवधायकः। "महानद्यन्तरं यत्र तद्देशान्तरमुच्यते इ०मनुः। "निरन्तराभ्यन्तरवातदृष्टिषु" कुमा० निरन्तरमव्यवधानम् इत्यर्थः। "एकान्तरे आनुलोम्यादिति" मनुः। भेदे "सैव विशिनष्टि पुनःप्रधानपुरुषान्तरं सूक्ष्ममिति" सा०का०। "शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" भिताो०। "यदन्तरं सर्षपशैलराजयोर्यदन्तरं यायजवैनतेययोरिति" रामा०। व्यसने। "प्रकरेदन्तरे रिपुम्"। वह्नियोगे "अन्तरे च पुरात् चाण्डालावासा" इति। उपसंव्याने (उत्तरीयवस्त्रे) अन्तरं परिदधाति। सदृशे, "स्थानेऽन्तरतम" इति पा० अन्तरशब्दस्य पुरीभिन्ने एव विशेषे सर्वनामकार्य्यम् "सुमेधसामन्तरजैं" इति सि०कौ०, मु०बो०। पुर्य्यान्तु न, अन्तरायै नगर्य्यै। तत्रापि बहिर्योगे उपसंव्याने एव सर्वनामता। मयूरव्यंसादित्वात् नञादेर्गान्तरशब्दस्य स्वजातीयभिन्ने वृत्तिः शब्दस्वाभावात् "राजान्तरं राजसुतां निनायेति" रघुः। अन्यो राजा भूयू० "राजान्तरमिति" मल्लिना० "देशान्तरस्थे पत्यौ साध्वी तत्पादुकाद्वयमिति" स्मृतिः "स्वमेव मूर्त्तेरन्तरमप्यमूर्त्तिरिति "अर्थोऽयमर्थान्तरभाव्य एव" इति च कुमा०। अन्तरस्य भावः ब्राह्मा०ष्यञ्। आन्तर्य्यं माटर्य्ये न० "यत्नानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीय" इति परि०सि०कौ०। अन्तरे भवः अण् आन्तरः तद्भवे त्रि०। "कथमन्तरो भाव इति" सा०द०। "अन्तःकरणमान्तरमिति" वेदा० व्यवकलने (वियोजने) "कर्य्याद् यथा स्थाननकमन्तरं वेति" लीला०।

अन्तरग्नि पु०अन्तर्यत्तौ अग्निः। जठराग्नौ "दीप्तान्तरग्निः परिशुद्धकोष्ठ" इति "शाम्यन्ति चायं चिरमन्तरग्नेरिति" "वृक्षाभिघातभयशोककृतेऽन्तरग्नौ" इति च सुश्रुतम्। अग्नेर्मध्ये अव्य०। अग्निमध्ये अव्य०।

अन्तरङ्ग पु० अन्तरं सदृशमङ्गं यस्य। अत्यन्तप्रिये, "समीपमोऽन्तरङ्गःप्रियो भवतीति" छा०उप०भा०। "चरमगिरिकुरङ्गीमङ्गकण्डूयनेन खपिति सुखमिदानीमन्तरङ्गः

कुरङ्गः" इति। वहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि निमित्तानि यस्य। व्याकरणोक्ते परनित्यवृद्धिरङ्गबाधके नैमित्तिककार्य्यभेदे, तद्बोधकशास्त्रे च। यथा श्यामखिनी कुले इत्यादौ "इकोऽचीति"पा०)नित्यप्राप्तं नुमं बाधित्वा "ह्रस्वो नपुंसके" इति पा० ह्रस्वः। पूर्व्वं कृते तु नुमि अजन्तत्वाभावात् ह्रस्वो न स्यात्। ततश्च नुमूरूपकार्य्यं प्रत्ययस्याजरूपं निमित्तमपेक्षतेइति तद्वहिरङ्गं, ह्रस्वस्तु प्रकृतिमात्रसापेक्षत्वात् अन्तरङ्गं इति तस्य वहिरङ्गनिमित्तककार्य्यबाधकत्वे बीजम्। "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इति" "असिद्धं वहिरङ्गमन्तरङ्गे" इति च परि०शि०कौ०। एतन्मूलिकैव "वहिरङ्गविधिभ्यस्तु अन्तरङ्गविधिर्बलीति"कारिका। अन्तः आसन्नमङ्गं कर्म्म०। आराद्युपकारके न० यथा ब्रह्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि, संप्रज्ञातसमाधौ च धारणादीनि त्रीणि अन्तरङ्गाणि। यमादयस्तु पञ्च वहिरङ्गाणि। तथा हि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयइत्यष्टौ संप्रज्ञातसमाधेरङ्गानि तत्र यमादयः वहिरङ्गाणि, प्रतिबन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवर्त्तनेन परम्परया उपकारकत्वात्, धारणाद्यस्तु संप्रज्ञातसमाधेः समानविषयतया साक्षात्स्वरूपोपकारकत्वादन्तरङ्गाणीति अत एव धारणादित्रयमभिधाय "त्रयमन्तरङ्गं पूर्व्वेभ्य" इति पात०सूत्रे धारणादित्रयस्यान्तरङ्गत्वमुक्तम्। धारणादिस्वरूपादि तत्तच्छब्दे वक्ष्यते। असंप्रज्ञातसमाधौ तु सर्व्वाण्येव वहिरङ्गाणि असमानविषयत्वादिति बोध्यम्।

अन्तरचक्र न० अन्तरं मध्यवर्त्ति चक्रम्। तन्त्रोक्तेषु देहस्थसुषुम्णामध्यस्थेषु मूलाधारादिषु षट्सु पद्माकारचक्रेषु। विवरणं षट्चक्रशब्दे द्रष्टव्यम्। ऐत०। आत्मीयसमूहे न०।

अन्तरज्ञ त्रि० अन्तरं भेदं विशेषं जानाति ज्ञा-क ऐत०। विशेषज्ञे "नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते" इति किरा०।

अन्तरण न० अन्तरं व्यवहितं करोति अन्तर+णिच्-भावे ल्युट्। अन्तरितकरणे व्यवधापने, "हविरन्तरणे प्राक् प्रधानेज्यायाः" इति कात्या० २५.५.१५, "यदि नाम हविरन्तरितं न गृहीतमेव, प्राक् प्रधानेज्यायाः स्मृत्वा अन्वाहरेत् हविषोऽन्तरणं बहूनां मध्ये एकस्याग्रहणमिति" तद्भा०।

अन्तरतम त्रि० अतिशयेन अन्तरः सदृशः, अत्यन्तसदृशे "स्थानेऽन्तरतम" इति पा०। सादृश्यञ्च "तुल्यास्यप्रयत्नमिति" पा० सूत्रोपात्तं स्थानादिसाम्यम्, यथा ककारादीनां ङकारादिषु तुल्यस्थानप्रयत्नवत्त्वेन साम्यम् एवं सकारस्य थकारे। आत्मीयतमे च।

अन्तरतस् अव्य० सप्तम्यर्थे तसि। मध्ये इत्यादार्थे। "दृष्ट्वान्तरतःकृत्वा रावणं वाक्यमब्रवीत्" इति रामा०।

अन्तरदृश् पु० अन्तरे दृग् यस्य। अन्तरस्थे परमात्मानुसन्धायिनि। अन्तरं भेदं पश्यति दृश-क्विप् ऐत०। विभेदज्ञे त्रि०।

अन्तरदेश पु० कर्म्म०। मध्यदेशे तद्विवरणं मध्यदेशशब्दे द्रष्टव्यम्

अन्तरपु(पू)रुष पु० अन्तरः मध्यवर्त्ती पुरुषः वा दीर्घः। अन्तर्यामिनि परमेश्वरे। "मन्यन्ते च पापकृतो "न कश्चित् पश्यतीति नः"। तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुष" इति मनुः।

अन्तरपूजा स्त्री ७त० तन्त्रोक्ते मनःकल्पितोपचारेण पूजायाम् तत्प्रकारस्तु अन्तर्यागशब्दे वक्ष्यते।

अन्तरप्रभव पु० अन्तरेभ्यो भिन्नवर्णेभ्यः पितृभ्यः प्रभवति प्र+भू-अच् ५त०। सङ्कीर्णवर्णे मूर्द्धावसिक्तादौ। अन्तरप्रभवाश्च द्विविधाः अनुलोमजाः, प्रतिलोमजाश्च तत्रोत्कृष्टवर्णात् अपकृष्टवर्णायां स्त्रियां जाताः मूर्द्धावसिक्तादयः अनुलोमजाः, अपकृष्टवर्णात् उत्कृष्टवर्णायां स्त्रियां जाताः प्रतिलोमजाः सूतादयः। "भगवन्! सर्व्ववर्णानां यथावदनुपूर्व्वशः। अन्तरप्रभवानाञ्च धर्म्मान्नो वक्तुमर्हसीति" मनुः। एतेषां भिन्नवर्णजातत्वात् अन्तरनामत्वमपि मनुना हि अनुलोमजान् प्रतिलोमजांश्च उक्त्वा "तानन्तरनामसु मातृदोषात् प्रचक्षते" इत्युक्तम्। अधिकं वर्णसङ्करशब्दे वक्ष्यते।

अन्तरय पु० अन्तर्मध्ये अयः गमनम् इण्-अच्। मध्यगतौ व्यवधाने। ल्युडन्तमध्यत्र न०। अन्तरं याति या-क। देहमध्यस्थचित्तगते त्रि०।

अन्तरयायिन् पु० अन्तरे याते यी+णिनि। चित्तस्थे जीवे। तस्य तत्र प्रतिबिम्बरूपेण स्थितत्वात्तथात्वम्।

अन्तरस्थ पु० अन्तरे देहमध्ये तिष्ठति स्था-क ७त०। देहमध्यस्थचित्तस्थे जीवे।

अन्तरा अव्य० अन्तरेति इण्-डा। निकटे, मध्ये, विनार्थे च। तत्र मध्ये "अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेदिति" या०। "अन्तरा ऋतस्रुतके" इति स्मृतिः। "पशुमण्डूकमार्জ्जारश्वसर्पनकुलादिभिः अन्तरा गमने, विद्यादनध्यायमहर्निशमिति" मनुः। "सौमित्रेर्निशितैर्बाणैरन्तरा प्रकलीकृता" इति रघुः। "अन्तेऽन्ते बीज-

सुत्सृष्टमन्तरैव विनश्यति" इति मनुः। द्वयोर्मध्ये "अन्तरान्तरेण युक्ते" पा० उक्तेः एतत्सम्बन्धिपदात् द्वितीया। अन्तरा त्वां मां हरिरिति" सि०कौ०। वर्জ্জने निकटे च मेदिनिः। [विश्वरत्यन्तरात्मेति" सा०द०।

अन्तरात्मन् पु० कर्म्म०। जीवात्मनि। "तदपि न हरिणाक्षी"

अन्तरापत्या स्त्री अन्तरे गर्भमध्येऽपत्यं यस्याः। गर्भवत्यां स्त्रियाम्।

अन्तराय त्रि० अन्तरं व्यवधानमयते अय--अच्। व्यवधानकारके। "अस्य ते वाणपातपथवर्त्तिनः क्षणसारस्यान्तरायौ तपस्विनौ संवृत्तौ" शक०। विघ्ने च "त्वमन्तरायो भवसि च्युतो विधिरिति" रघुः। "वैरी न चेद्वै वेपथुरन्तराय" इति सा०द० "समाध्यन्तरायाश्च लयादयः वेदान्तसारे दर्शिताः यथा। "अस्याङ्गिनोनिर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारोविघ्नाः सम्भवन्ति। लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः। लयविक्षेपणाभावेऽपि चित्तवृत्तेः रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः, समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा, तदा निर्व्विकल्पकसमाधिरित्युच्यते। तदुक्तम्। "लये संबोधयेत् चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति। योगशास्त्रोक्ताः प्रधानपुरुषसाक्षात्कारात् प्राग्भवाः प्रातिभवाः सिद्धयः विवेकसाक्षात्कारस्योपसर्गापरपर्य्याया अन्तरायाः यथोक्तं पातञ्जलसूत्रे "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" इत्यनेन प्रातिभादिसिद्धीरुक्त्वा "ते समाधावुपसर्गा व्युत्थाने सिद्धय इति" अयमर्थः। योगजशुक्लधर्म्मानुग्रहीतेन मनोमात्रेण सर्वगोचरज्ञानं प्रातिभसिद्धिः। दिव्यानां शब्दस्पर्शरूपरसगन्धानां ग्रहणे योगजधर्म्मानुग्रहीतानि श्रवणादीनि यदाक्रमं समर्थानि यदा भवन्ति तदा श्रावणवेदनादर्शास्वादवार्त्ताख्याः सिद्धयः। तथा च दिव्यशब्दग्रहणे यदा योगिनः श्रवणं समर्थं भवति तदा श्रावणमिति संज्ञा एवं दिव्यस्पर्शग्रहणसमर्थं त्वक् वेदनासंज्ञा, दिव्यरूपग्रहणे समर्थं नेत्रं दर्शसंज्ञम्। दिव्यरसास्वादे समर्था रसना आस्वादसंज्ञा, दिव्यगन्धग्रहणे समर्थं घ्राणं वार्त्तासंज्ञा। ते प्रातिभादयः निःश्रेयसफले समाधौ तस्य योगिनः व्युत्थानसमये योगविरामकाले जायमानाः उपसर्गा भवन्ति। अतो मोक्षार्थी तानुपेक्षेतेति उपदेशग्रन्थयोजनम् नह्यात्मसाक्षात्कारं विना सिद्धिकोट्यापि कृतकृत्यता भवतीति।

अन्तरारम पु० अन्तरे सर्व्वभ्यन्तरेऽतिसूक्ष्मत्वात् आत्मनि आरमते क्रीड़ति आ+रम कर्त्तरि घञ्। आत्माभिरते। "योऽन्तःसुखोऽन्तरारम" इति गीता।

अन्तराल न० अन्तरं व्यवधानसीमामारातिं ग्रहणाति आ+रा-क रस्य लत्वम्। मध्ये अभ्यन्तरे। "ततोष पश्यन् विलक्षणान्तराला" इति भट्टिः। "वधूप्रवेशोऽष्टदिनान्तराले" इति शुद्धः दिङ्नामान्यन्तराले" पा०। सङ्कीर्णार्थे च। "वर्णानां सान्तरालानां स सदाचार उच्यते" मनुः। तद्वर्त्तिनि त्रि० स्वार्थे अण् आन्तरालमप्यत्र न०।

अन्तरालदिक् स्त्री अन्तराला दिक्। दिशो मध्यायां विदिशि ऐशान्यादौ कोणे।

अन्तरावेदि(दी) स्त्री अन्तरा मध्यस्था वेदिः वा ङीप्। गजयोर्युध्यमानयोर्मध्यस्थायां भूमयवेद्याम्। "जयश्रीरन्तरावेदौ मत्तवारणयोरिव" रघुः। अन्तरेति पृथक्पृथगिति मल्लि०। "समूहे चान्तरावेद्यामिति" त्रिका०।

अन्तरिक्ष न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्षते ईक्ष कर्म्मणि घञ्, अन्तः क्षत्राणि अस्य वा पृषो० पक्षे सुखः अकारस्य रित्वं वा। पक्षिमेघसञ्चारयोग्ये भूलोकस्वर्गमध्यवर्त्तिनि आकाशप्रदेशे। "पृथिवी शिल्पकारोऽन्तरिक्षं प्रस्तावः" इति छा० उप०। "अन्तरिक्षगतांश्चैव मुनीन् देवांश्च इति" मनुः। "तिर्य्यक चान्तरिक्षं व्यपोहितमिति" ऋग्०। "अदितिर्द्यौरदितिरन्तरिक्षमिति" ऋ० १,८९,१०। "अदितिरदीना अखण्डनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः ततश्च सैवान्तरिक्षम् अन्तरा द्यावापृथिव्योर्मध्ये ईक्षमाणा व्योमेति" भा०। "विश्वमाप्रा अन्तरिक्षमिति" ऋ० १,५२,१३। अन्तरिक्षमन्तरिक्षान्तं द्यावापृथिव्योर्मध्ये वर्त्तमानमाकाशं विश्वं सर्वमिति" भा०। "दिवञ्च पृथिवीं चान्तरिक्षमथो स्वरिति" सन्ध्यामन्त्रः। ततश्च द्यावापृथिवीमध्यस्थाकाशस्यैव भुवर्लोकरूपस्यान्तरिक्षत्वम्। "सादयाम्यन्तरिक्षस्य धर्त्रीमिति" य० १४,५। अन्तरिक्षस्य भुवर्लोकस्य धर्त्रीमिति" वेददीपः। अत्र अन्तरीयमपि। अस्यान्तरीक्ष-

निरुक्तिः श्रुतौ । "योऽन्तरे नाकाश आसीदन्तरीक्षमभवदीक्षं हि तन्नाम ततः पुरान्तरा वा इदानीमीक्षमभूदिति" तस्मादन्तरीक्षमिति" ।

अन्तरिक्षप्रा त्रि० अन्तरिक्षं प्राति पूरयति प्रा–पूरणे विच् । अन्तरिक्षपूरके "अन्तरिक्षप्रां तविषीभिरावृतमिति" ऋ० १,१५,२ । "अन्तरिक्षं द्युलोकं स्वतेजसा प्राति पूरयतीति" विच्, भा० ।

अन्तरिक्षप्रुत् त्रि० अन्तरिक्षं प्रवते प्रुङ् गतौ क्विप् । अन्तरिक्षचरे "अन्तरिक्षप्रुद्भिरपोदकाभिरिति" ऋ० १,११६,३।

अन्तरिक्षसद् त्रि० अन्तरिक्षे सीदति सञ्चरति सद–गतौ क्विप् । आकाशचारिणि । "हंसः शुचिषद्वसुरन्तरिक्षसदित्यादि ऋ० ४,४०,५ । "अन्तरिक्षसद अन्तरिक्षसञ्चारीति" भा० ।

अन्तरिक्षसद्य त्रि० अन्तरिक्षे सद्यम् सदनं सद–भावे यत् । अन्तरिक्षसदने । "उपरि सद्यं वा एष जयति यो जयत्यन्तरिक्षसद्यमिति" कौ० ब्राह्म० ।

अन्तरिक्षिय त्रि० अन्तरिक्षे भवः यत् । अन्तरिक्षभवे । "पवतामन्तरिक्षिया इति ऋ० ९,२६,५ ।

अन्तरित त्रि० अन्तर्–इण–कर्त्तरि क्त २त० । अन्तर्गते अन्तरं व्यवधानं करोतीति णिचि कर्म्मणि क्त । व्यवधानी गते, व्यवधापिते, तिरस्कृते आच्छादिते, "द्विरेफवृन्दान्तरितैः सरोरुहैरिति" किरा० । अपसारिते, "कुर्य्यात् यथास्थानक्रमन्तरं वेति" लीलावत्यामन्तरशब्दस्य वियोजने प्रयोगात् तत्प्रकृतिकतया वियोजिते च ।

अन्तरिन्द्रिय न० कर्म्म० । अन्तःकरणे ।

अन्तरीक्ष न० अन्तरिक्षवत्सर्व्वम् । [दके आकाशात्पतितजले

अन्तरीक्षजल न० अन्तरीक्षात् पतितं जलम् शा० त० । दिव्यो-

अन्तरीप पु० अन्तर्मध्ये गता आपोऽस्य ब० अच् समा० आतः ईत्त्वम् । द्वीपभेदे । द्वीपस्य हि जलमध्यस्थत्वात् अन्तर्गतजलत्वात्तथात्वम् द्वयांस्तु भेदः चतुर्दिक्षु जलसत्त्वे तस्य अन्तरीपत्वम् द्वयोर्दिशोर्जलसत्त्वे द्वीपत्वमित्यनयोर्भेदः । काकाक्षिगोलकन्यायात् 'द्वीपोऽस्त्रियामन्तरीपमित्यत्रापि अस्त्रियामित्यस्य अन्वय इति तेनायं पुंस्त्री० इति केचित् ।

अन्तरीय न० अन्तरे भवं गहादित्वात् छ । "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तदच्छिन्नसुभयान्तयो" रित्येवंलक्षणे परिधाने वस्त्रे । भवार्थे धूमा० वुञ् । आन्तरीयकः तद्भवे त्रि० ।

अन्तरे अव्य० अन्तरेति इण्–क्विप् । मध्ये । "आनन्देऽथान्तरेऽन्तरा, अन्तरेण च मध्ये स्युरित्यमरः" ।

अन्तरेण अव्य० अन्तरेति इण्–ण टवर्गादित्वेऽपि णस्य नेत्त्वम् । विनार्थे, मध्यार्थे च । तत्र विनार्थे "अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनमिति" रामायणम् । मध्ये "अन्तरेण वै योनिं गर्भः सञ्चरति" कौ० ब्रा० । "अन्तरेणापां गुणम् इति" स्मृतिः । तत्र विनार्थे, द्वितीयाद्वितीये पर्य्यायेण, "श्रीनैर्ऋतेन विना शम्भुनान्तरेणाच्युतं सुखमिति" सु० बो० । उभयोर्मध्येऽर्थे द्वितीया "अन्तरेणाहवनीयं गार्हपत्यञ्चेति" कौ० ब्रा० ।

अन्तर्गंडु त्रि० अन्तर्मध्ये गडुरिव निरर्थकः । ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वन्निरर्थके । "किमनेनान्तर्गडुनेति सर्व्वदर्शन सं० । "अन्तर्गडु निरर्थकमिति" मेदिनिः ।

अन्तर्गत त्रि० अन्तःअन्तःकरणे गतः । अन्तःकरणस्थे देहस्थे च "अन्तर्गतं प्राणभृतां हि वेद" इति रघुः । "येषामन्तर्गतं पापं जनानां पुण्यकर्म्मणामिति" पुरा० "अन्तर्गता मदनवह्निशिखावली या सा बाध्यते किमिह चन्दनचर्च्चितेनेति" उद्भटः । अभ्यन्तरस्थे च "अन्तर्गतश्चवे ग्रामे दृषलस्य च सन्निधाविति" । "नेत्रवक्त्रविकारेण गृह्यतेऽन्तर्गतं मनः" इति च मनुः । अन्तर्गतफलारम्भाः शस्यानामिव सम्पदः" इति रघुः ।

अन्तर्गर्भ त्रि० अन्तरभ्यन्तरस्थो गर्भोऽस्य । अभ्यन्तरस्थगर्भयुक्ते । "कुशौ समावग्रशीर्षावनन्तर्गर्भाविति" कात्या० २,३,३१ । गर्भस्य मध्यम् अव्ययी० । गर्भमध्ये अव्य० ।

अन्तर्गर्भिन् त्रि० अन्तर्मध्ये गर्भोऽस्यास्य इनि । मध्यस्थगर्भयुक्ते । "अनन्तर्गर्भिणं साग्यं कौशं द्विदलमेव चेति" पवित्रलक्षणे कात्यायन स्मृतिः ।

अन्तर्गृह न० अन्तःस्थं गृहम् । वाराणसीक्षेत्रे सप्तावरणवति स्थानविशेषे "अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति । वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति । पञ्चक्रोश्यां कृतं पापमन्तर्गृहे विनश्यति" ॥ काशीखा० अन्तर्गेहमध्यत्व "अन्यत्र यत्कृतं पापं तत्काश्यां परिणश्यति वाराणस्यां कृतं पाप मन्तर्गेहे विनश्यति अन्तर्गेहे कृतं पापं पैशाच्चनरकावहमिति" "देवो विरजसः पीठादन्तर्गेहं विवेश हेति" च काशी० । मध्यस्थगृहे च । गृहस्य मध्यम् अव्ययी० गृहस्य मध्ये अव्य० ।

अन्तर्घण पु० अन्तर्हन्यते क्रीडीभवत्यस्मिन् अन्तर्+हन–अप्

त्रि० घादेशः षत्वम् । द्वारमतिक्रम्य स्थिते सावकाशे देशे "तस्मिन्नन्तर्घणे पश्यन् प्रघणे सौधसङ्गतः" इति भट्टिः ।

अन्तर्जठर अव्य० जठरस्य मध्यम् अव्ययी० । जठरस्य मध्ये, उपचारात् तत्स्थकोष्ठे न० ।

अन्तर्जात त्रि० अन्तर्देहमध्ये जातः । देहाभ्यन्तरजाते ।

अन्तर्जानु अव्य० जानुनोर्मध्यम् अव्ययी० । जानुनोर्मध्ये "अन्तर्जानु शुचौ देश उपविष्ट उदङ्मुखः । प्राङ् वा प्राक्शिरा तीर्थेन द्विजो नित्यमुपस्पृशेदिति" या० "जानुनोर्मध्ये हस्तौ क्षत्वेति" रघु० ।

अन्तर्ज्योतिस् न० अन्तर्गतं ज्योतिःप्रकाशकत्वात् चैतन्यम् । सर्वान्तर्यामिनि परब्रह्मरूपचैतन्ये तस्य सर्वान्तर्यामित्वात्तथात्वम् ।

अन्तर्ज्वलन न० अन्तः देहान्तरस्थं ज्वलनम् । रोगभेदे देहान्तर्दाहे । अन्तःस्थो ज्वलनः । जठरानले पु० ।

अन्तर्दधन न० अन्तर्दध्यते आधीयते मादकताऽनेन दधकरणे ल्युट् । किण्वप्रभृतौ मद्यबीजे ।

अन्तर्दशा स्त्री अन्तर्गता दशा आधिपत्यकालः । ज्योतिषोक्ते महादशान्तर्गते ग्रहाणां स्वाधिपत्ययुक्तकालभेदे । दशा च नानाविधा तासु दशाशब्दे वक्ष्यते । तत्राष्टोत्तरीयदशायामन्तर्दशाऽभिधीयते वक्ष्ये च तस्या एव प्रवक्षितत्वम् । "षट्सूर्यस्य दशा ज्ञेयाः शशिनोदश पञ्च च । अष्टावङ्गारके ज्ञेया बुधे सप्तदश स्मृताः । शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः । राहोर्द्वादश वर्षाणि भृगोरप्येकविंशति"रित्युपक्रम्य सत्याचार्यः "कृत्तिकादितये सूर्यः सोमो रौद्रचतुष्टये । मघादितितये भौमो बुधो हस्तचतुष्टये ॥ अनुराधात्रये सौरिर्गुरुःपूर्वात्रयेण च । धनिष्ठात्रितये राहुः शेषे शुक्रःप्रकीर्तितः ॥ सूर्योपप्लवभौमार्किदशातिकष्टदा नृणाम् । गुरुशशचन्द्रशुक्राणां वर्षेप्सितफलप्रदा" ॥ अन्तर्दशामानं यथा । "स्वदशाभिर्दशां कृत्वा नवभिर्भागमाहरेत् । लब्धा मासास्तु तच्छेषं पूरयित्वा तु त्रिंशता ॥ अङ्कैर्हृत्वा दिनं लब्धं तच्छेषे घटिपूरिते । नवभिस्तु हृते लब्धा ज्ञेया दण्डास्तदन्तरे ॥ रवेः षड्वर्षमध्ये तु वेदा ४ मासा रवेर्निजाः । चन्द्रस्य दश मासाश्च दिग्दिनं पञ्चमासकाः । कुजस्य, सप्त रुद्रास्तु मासा दिग्दिवसाः, शनेः । ऋतुमासाद्रि विंशच्च गुरोर्ज्ञस्यैकविंशतिः । राहोर्मासाष्टकं ज्ञेयं भृगोर्वेदस्तु मासकौ एवं ग्रहाणामन्येषामूह्यावैवान्तरादयः । यद्ग्रहक्षान्तरे यस्तु यत्संख्यकालमाप्नुयात् । तत्संख्यं खान्तरे तस्मै सदद्यादिति निश्चयः । खान्तरे यद्गृहे खांशं खांशेन पूरयेत् सदा इति" ज्यो०त० । विंशोत्तरीये तु । आर्कं कुराजीशबुकेशुपूर्व्या वक्ष्यादितो भात् क्रमशस्त्रिवारम् । मानं रसाशानगदन्तिचन्द्रकलाङ्कचन्द्राद्रिरसाद्रिविंशा" इत्युक्तेः क्षत्तिकादिक्रमेण रव्यादीनां त्रिवारं रसादिमिता वर्षा महादशा । यथा कृत्तिकायां जातौ रवेः षट्वर्षाः, रोहिण्यां जातौ चन्द्रस्य १० वर्षाः, मृगे, कुजस्य ७ वर्षाः, आर्द्रायां राहोः १८ वर्षाः, पुनर्वसौ जीवस्य १६ वर्षाः, पुष्ये जातौ शनेः १९ वर्षाः, अश्लेषायां बुधस्य १७ वर्षाः, मघायां केतोः ७ वर्षाः, पूर्वफाल्गुन्यां जातस्य शुक्रस्य २० वर्षाः, एवमुत्तरफाल्गुन्यादिषु नवसु उत्तराषाढादिषु नवसु च रव्यादीनां यथाक्रमं षड्वर्षाः । तदन्तर्दशा तु "स्वदशाभिर्दशां कृत्वा नवभिर्भागमाहरेदिति" विधेयः । ततश्च उभयोर्दशयोरनुपातेनान्तर्दशामानमुद्धरेत् यथा यदि १०८ वर्षैः ६ वर्षाः तदा ६ वर्षैः किमिति इत्यादिक्रमेण त्रैराशिकेन तत्तन्मानम् एवं १२० वर्षैः यदि ६ वर्षाः तदा ६ वर्षैः किमित्यादिक्रमेण त्रैराशिकेन तत्तन्मानसिद्धिः । एवं योगिन्यादिदशायामपि अन्तर्दशामानमुद्धरेत् ।

अन्तर्दशाह अव्य० दशाहस्य मध्यम् अव्ययी० । दशाहाभ्यन्तरे "अन्तर्दशाहे स्नातानां पुनर्मरणजन्मनी" इति मनुः दशाहपदं स्वस्वजात्युक्तावधिपरम् ।

अन्तर्दहन न० अन्तरभ्यन्तरे दहनम् । रोगभेदे देहाभ्यन्तरदाहे । अन्तःस्थः दहनः । जठरानले पु० ।

अन्तर्दाह पु० अन्तर्मध्ये दाहः । देहाभ्यन्तरसन्तापे ।

अन्तर्दुष्ट त्रि० अन्तः अन्तःकरणे दुष्टः । दुष्टान्तःकरणे ।

अन्तर्द्वार न० अन्तर्गतं द्वारम् । गृहमध्यस्थे गुप्तद्वारे । जालद्वारे स्रोतसां (छिद्राणां) द्वारे शवरः ।

अन्तर्धा स्त्री अन्तर्+धा स्त्रियां भावेऽङ् । अन्तर्धाने तिरोधाने "अन्तर्धासुपयुक्तपात्रवतीषु" इति माघः ।

अन्तर्धान न० अन्तर्+धा-ल्युट् । तिरोधाने दृश्यपदार्थस्य दर्शनायोग्यस्थाने स्थितौ, शून्यादीनां घरीरत्यागे च । "अन्तर्धानं गते रामे" इति रामायणम् ।

अन्तर्धि पु० अन्तर्+धा-कि । आच्छादने, व्यवधाने, अन्तर्धाने च "अन्तर्धौ येनादर्शनमिच्छति" या० ।

अन्तर्नगर न० नगरस्य मध्यम् अव्ययी० । नगरमध्ये अन्तःस्थं नगरम् कर्म० । अन्तःपुरे । "दधानलानानगरं ददर्शेति" रामा० ।

अन्तर्भाव पु० अन्तर्मध्ये भावः प्रवेशः । मध्यप्रवेशे समुदाय-मध्यपाते । "आत्मानमात्मना विश्वदस्तीति व्यवदिश्यते अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मक" इति हरिका० स्वविषयकज्ञानविषयत्वे च भवति च वह्निमङ्क्षोधविषयत्वा-द्वह्नेर्वह्निमदन्तर्भावः । अन्तःस्थोभावः । चित्तवृत्तिभेदे ।

अन्तर्भावना स्त्री अन्तःस्था व्यञ्जकचेष्टाकारादिरहिता भावना । व्यञ्जकचेष्टादिशून्ये चिन्तने ।

अन्तर्भावित त्रि० अन्तर्+भू–णिच्–क्त । मध्यप्रवेशिते समु-दायान्तर्भूतीकृते । "अन्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वतः । नान्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वत" इति खण्डनखण्डखाद्यम् । अव्यवहितपूर्ववर्त्तितया कार-णस्य यत् सत्त्वसुररीक्रियते तस्य सत्त्वमस्ति न वा तस्य सत्त्वस्वीकारे पुनस्तत्सत्त्वस्य सत्त्वस्वीकारेऽनवस्थापातः ततश्च उत्तरत्र एकस्य सत्त्वमनङ्गीकृत्यैव अनवस्था वारणीया, तथाच कारणसत्त्वेऽपि कुतः तथा नाङ्गीक्रियते । एवं च विनापि सत्त्वं, तदङ्गीकृत्य कारणतास्वीकारे न कोऽपि दोषोऽस्ति इति तदाशयः ।

अन्तर्भूत त्रि० अन्तर्मध्ये भूतः भू+क्त । मध्यस्थिते, अन्त-र्गते च । "कालभावाद्यदेशानामन्तर्भूतक्रियान्तरैः । सर्वै-रकर्मकैर्योगे कर्मत्वमुपजायते" इति हरिका० "एष वै भगवान् विष्णुरन्तर्भूतः सनातन" इति पुरा० ।

अन्तर्मनस् त्रि० अन्तर्गतं वाह्यव्यापारशून्यतया अन्तरेव स्थितं मनो यस्य । व्याकुलचित्ते, समाहितमनस्के च । दुःखितस्य हि वाह्येतरव्यापारशून्यतया तत्प्रती कारचिन्तनायान्तरेव मनसः स्थितत्वात् तथात्वम् समाधि-स्थस्य तु वाह्यविषयपरिहारेण ध्येयात्ममात्रगोचरमन-स्कतया तथात्वमिति भेदः ।

अन्तर्मुख त्रि० अन्तःपरमात्मा मुखं प्रवेशद्वारं यस्य । वाह्य-वस्तुपरिहारेण परमात्मविषयकतया प्रवेशयुक्ते चित्तादौ । अन्तरभ्यन्तरे मुखं यस्य । सुश्रुतोक्ते व्रणस्रावणसाधने शस्त्र भेदे न० । "स्थूलोकृष्णपत्राचीमुखशरारीमुखान्तर्मुखत्रिकू-र्चकानि विस्रावणे" इति सुश्रुतम् । अन्तःकरणं अविद्या-वृत्तिरूपं द्वारं सुखानुभवे यस्य । स्वरूपसुखानुभवहेतुना अविद्यावृत्तिरूपान्तःकरणेन सुषुप्तौ आनन्दानुभवकारके प्राज्ञाख्ये जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतौ प्राज्ञस्य आनन्दभोगे चेतोमुखत्वोक्त्या तथात्वम् । मुखस्य मध्यम् अव्ययी० । मुखस्य मध्ये इत्यर्थे अव्य० ।

अन्तर्मातृका स्त्री अन्तःस्था षट्चक्रस्था मातृका अकारादि-वर्णाः । तन्त्रोक्तेषु षट्पद्मस्थेषु अकारादिषु वर्णेषु । ते च वर्णा अन्तर्मातृकान्यासशब्देऽनुपदं वक्ष्यन्ते ।

अन्तर्मातृकान्यास पु० अन्तःस्थाया मातृकाया न्यासः उच्चा-रणपूर्व्वकं तत्तत्स्थानेषु न्यासः । अन्तस्थमातृकावर्णानां उच्चारणपूर्व्वकं तत्तत्स्थानेषु न्यासे । यथा "न्यासोऽय-मान्तर" इत्युपक्रम्य "द्वात्रिंशत्पत्राम्बुजे कण्ठे स्वरान् षोडश विन्यसेत् । द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत् । दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश । षट्पत्रमध्ये लिङ्गस्थे बकारादीन्न्यसेच्च षट् । आधारे चतुरो वर्णान् न्यसेद्वादीन् चतुर्दले । द्वयौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये ! । तन्मध्ये परविन्दुञ्च क्षकारस्थितिलयात्मकम् । एवं समाहितमना ध्यायेन्न्यासोयमान्तरः" इति तन्त्रसारः ।

अन्तर्मृत पु० स्त्री अन्तर्गर्भाशये मृतः । गर्भाशये मृते बालकादौ "भवत्युच्छ्वासपूतिश्च मूलं चान्तर्मृते शिशौ" इति सुश्रुतम् ।

अन्तर्य्य त्रि० अन्तरे भवः दिगा० य । मध्यभवे ।

अन्तर्याग पु० अन्तरन्तःकरणेन मनसा कल्पितोपचारैर्याग: पूजा होमश्च । तन्त्रोक्ते मानसोपचारैः पूजने, होमभेदे च । "अर्च्चयन् विषयैः पुष्पैस्तत्क्षणात् तन्मयो भवेत् । न्यासै-स्तन्मयतामुद्विः सोऽहंभावेन पूजयेत्" । तन्मयेति तदेकत्व-ज्ञानं सोऽहमिति, "मन्त्राक्षराणि तच्छक्तौ प्रोतानि परिभाव-येत् । तामेव परमव्योमि परमानन्दरूपिणे । दर्शयत्यात्मसद्भावं पूजा होमादिभिर्विनेति" । विषयपुष्पाणि यथा । अमा-यामनहङ्कारमरागमगदं तथा । अमोहकमदम्भञ्च अ-निन्दाऽक्षोभकौ तथा । अमात्सर्य्यमलोभञ्च दशपुष्पं विदुर्बुधाः । अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः । दया पुष्पं क्षमा पुष्पं ज्ञानं पुष्पञ्च पञ्चमम् । इत्यष्टसप्तभिः १५ पुष्पैः पूजयेत् परदेवताम्" । अथ होमः । "आत्मा-नमपरिच्छिन्नं विभाव्यात्मानमन्तरा परमात्मज्ञानैकरस-रूपं संविभाव्य च । चतुरस्रं तु चित्कुण्डमानन्दमेखला-युतम् । अर्द्धमात्राकृतियोनिस्तया चैव विभूषितम् । नाभौ ध्यात्वा तन्मयस्यज्ञानाग्नौ जुहुयात् यथा । मूलान्ते नाभि-चैतन्यरूपाग्नौ हविषा स्रुचा । ज्ञानप्रदीपिते नित्यमक्षष्टसौ-र्जुहोम्यहम्" । (स्वाहा इति प्रथमाऽऽहुतिः, मूलान्ते) धर्म्मा-धर्म्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा । सुषुम्णावर्त्मना नित्यमक्षष्टसौर्जुहोम्यहम्" । (स्वाहेति द्वितीयाऽऽहुतिः, मूलान्ते) "प्रकाशाकाशहस्ताभ्यां अवलम्बनमनःस्रुचा । धर्म्माधर्म्मकलाक्षेपपूर्णमग्नौ जुहोम्यहम्" । (स्वाहेति तृती-

याहुतिं जुहुयात् । ततो मूलान्ते) । "अन्तर्निरन्तर-निरिन्धनएधमाने मायान्धकारपरिपन्थिनि सविद्ग्नौ । कस्मिंश्चिदद्भुतमरीचिविकाशमूर्मौ विश्वं जुहोमि वसुधादि-शिवासनान्तम् । इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् । न तस्य पापपुण्यानि जीवन्मुक्तोभवेद्ध्रुवम्" । "अयमन्त-र्यागोऽनिनामेव । अथान्तःपञ्चमकारयजनप्रकारः ॥ तदुक्तं कुलार्णवे अन्तर्यजने" । "सुरा शक्तिः शिवोमांसं तद्भोक्ता भैरवःस्वयम् । तयोरैक्यसमुत्पन्ने आनन्दोमोक्ष उच्यते । आनन्दं ब्रह्मणोरूपं तच्च हृद्ये व्यवस्थितम् । तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते । लिङ्गत्रय-विशेषज्ञः षट्चक्रपद्मभेदतः । पीठस्थानानि चागम्य महा पद्मवनं व्रजेत् । आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः । चिच्चन्द्रकुण्डलीशक्तिसामरस्यमहोदयः । व्योमपञ्चजनि-ष्यन्दसुधापानरतो नरः । मधुपानमिदं देवि ! चेतरन्मद्य-पानकम् । पुण्यापुण्यं पशुं हत्वा ज्ञानखड्गेन योगवित् । परे लयं नयेच्चित्तं पलाशीति निगद्यते । मानसादिन्द्रिय-गणं संयम्यात्मनि योजयेत् । मांसाशी स भवेद्देवि ! इतरे प्राणिघातकाः । शिवशक्त्यात्मिथुनसंयोगानन्दनिर्भराः । सुप्तास्ते मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः" इति त०सा० "अन्तःपूजां विधायैव बाह्यपूजां समाचरेदिति" तन्त्रम् ।

अन्तर्याम पु० अन्तर्यामो यस्मात् । यहरूपे सामापराख्ये पात्रभेदे । "त्रिष्टुभः खारं खारादन्तर्यामः 'अन्तर्या-मात् षड्दश" इति यजु० १३,५५ खारात् साम्नोऽन्त-र्यामं ग्रहं निरमिमीतेति" श्रुतेरिति वेददीपः । तच्च यज्ञियं पात्रभेदः । "सुहवा सूर्य्यायान्तर्याममनु-मन्त्रयेदिति" श्रुतिः "उच्चैतः पात्रयोजनमित्युपक्रम्य" खरोत्तरपूर्व्वार्द्धे" उपांशवन्तर्यामयोः" कात्या० ६,१,२, खरस्य उत्तरपूर्व्वार्द्धे ईशानकोणे, उपांशवन्तर्यामयोः पात्रयो योजयति साधयतीति वा" तद्भा० ।

अन्तर्यामिन् पु० अन्तर्मध्येऽनुप्रविश्य शमयति स्वस्वकर्म्मणि इन्द्रियादीनि जीवं वा व्यापारयति यम-णिच्-णिनि । "अन्तरादिश्य भूतानि यो बिभर्त्त्यात्मकेतुभिः । अन्तर्यामी-श्वरः ताक्षात् भवे"दित्युक्ते ईश्वरे "अन्तरेष यमयती-त्यादि" बृहदारण्यकान्तर्यामिब्राह्मणोक्तेस्तस्य तथात्वम् । आत्मकेतुभिः निजव्यापारैः प्राणादिवृत्तिभिरित्यर्थः । वायौ च तस्य सर्व्वप्राणिषु अध्यात्मवायुरूपेण स्थितत्वा-त्तथात्वम् । अन्तर्गतवस्तुज्ञातरि त्रि० ।

अन्तर्यामिब्राह्मण न० अन्तर्यामिन ईश्वरस्य ज्ञापकम् ब्राह्मणं मन्त्रेतरवेदभागः । बृहदारण्यकान्तर्गते अन्तर्या-मिनः ईश्वरस्य ज्ञापके ब्राह्मणे । तच्च १२०पृष्ठे दर्शितम् ।

अन्तर्लोम न० अन्तर्गतमाच्छाद्यं लोम अच् समा० । आच्छाद्ये लोम्नि ।

अन्तर्वंशिक त्रि० अन्तर्वंशे राज्ञामाभ्यन्तरगृहे नियुक्तः नियुक्तार्थे ठक् संज्ञापूर्व्वकविधेरनित्यत्वाच्च वृद्धिः, अन्त-र्वंशः नियोज्यतयाऽस्त्यस्य ठन् वा । राज्ञामन्तःपुरे रक्ष-णार्थं नियुक्ते पञ्चजनादौ ।

अन्तर्वण अव्य० वनस्य मध्यम् सप्तम । वनमध्ये इत्यर्थे ।

अन्तर्वत्नी अन्तरस्त्यस्य गर्भ इति वत्वे "अन्तर्वत्पतिवतो-र्नुगिति" पा० अन्तःशब्दस्याधिकरणाभिधानतयाऽस्ति-सामानाधिकरण्याभावात् अप्राप्तौ मतुप् मस्य वः नुक् च । गर्भवत्याम् स्त्रियाम् । "तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती सुतावस्तत सम्पद्यायिति" रघुः । अन्तःशब्दस्य ततम्भावनाया अस्त्यर्थे मतुप् मस्य वः । अन्तःस्थपदार्थवति त्रि० । "पुमानन्तर्वो स्थविरः पयस्वानिति" अथ० ९,४,२, ।

अन्तर्वमि पु० अन्तःस्थित एव वाणयति उद्गारशब्दं कारयति वम-णिच् इन् मस्य मत्वम् । (ढेकर) इतिख्यात-स्योद्गारशब्दस्य कारके अजीर्णनामके रोगभेदे ।

अन्तर्वर्त्तिन् त्रि० अन्तः मध्ये वर्त्तते वृत णिनि । मध्य-वर्त्तिनि । "अन्तर्वर्त्तिनीं विभक्तिमाश्रित्येति" सि०कौ० ।

अन्तर्वा त्रि० अन्तः अन्तरङ्गभावम् अन्तःकरणं वा याति गच्छति स्निग्धत्वेन वा-गतिगन्धनयोः विच् । सत्यपद्यादिषु ।

अन्तर्वाणि त्रि० अन्तर्गता अन्तःकरणे स्थिता शास्त्रवाक्या-त्मिका वाणी यस्य ब० समासान्तविधेरनित्यत्वात्च कप् ह्रस्वश्च । बहुशास्त्रवाक्याभिज्ञे पण्डिते ।

अन्तर्वावत् त्रि० अन्तर्वाः पुत्रादिरस्त्यस्मिन् मतुप् मस्य वः । पुत्रादिमति "अन्तर्वावत् अयं दधे" इति ऋ० १,४०,७, 'अन्तर्वावत् अन्तः स्थितपुत्रादिमत्त्वात् यद्वृणोपेतं अयं मदृभमिति" भा० ।

अन्तर्वाष्प त्रि० अन्तर्गतं वाष्पम् । वाष्पाप्रकाशिते कण्ठ-पथाप्राप्ते रोदनजन्यजलकणे । ब० । तद्युक्तपदार्थे त्रि० । "अन्तर्वाष्पविलोचने" इति ।

अन्तर्विगाह पु० अन्तर्भूत्वा विगाहः । मध्यप्रवेशे । ल्युट् । अन्तर्विगाहनमप्यत्र न० क्षेम० ।

अन्तर्वेदि पु० अन्तर्गता वेदिर्यत्र देशे । ब्रह्मावर्त्तदेशे, स च देशः आ प्रयागात् हरिद्वारपर्य्यन्तो गङ्गायमुनयोर्मध्यदेशः ।

वेद्या मध्यम् अव्ययी० । वेदिमध्ये अव्य० । "अपणस्य पश्चादुपविशत्यन्तर्वेदि वा कात्या० २,५,११, "अन्तर्वेदि वेद्याः करिष्यमाणायाः प्रदेशो लक्ष्यते तस्य देशस्याभ्यन्तरे उपविशतीति" तद्वा० "अन्यदन्तर्वेदि" कात्या० १३,३,३। अन्तर्वेदि विहितं कर्म्म ठन् । अन्तर्वेदिकम् अन्तर्वेदि-विहिते इष्ट्यादौ कर्म्मणि "नित्यनैष्टिकपौर्त्तिकमिति" मनुवचने ऐष्टिकमन्तर्वेदिकमिति" कुल्लू० ।

अन्तर्वेदी स्त्री पृथिव्या मध्यस्थितत्वादन्तर्वेदीव । हरिद्वारा-वधिप्रयागपर्य्यन्ते गङ्गस्यलीति ब्रह्मावर्त्तइति च ख्याते देशे

अन्तर्वेशिक त्रि० अन्तर्वेशे अन्तःपुरे नियुक्तः ठक् संज्ञा पूर्व्वकविधेरनित्यत्वात् न वृद्धिः । अन्तःपुररक्षणाय नियुक्ते कञ्चुक्यादौ । अन्तर्वेशिकादयोऽप्यत्र ।

अन्तर्हत्य अव्य० अन्तर्+हन–ल्यप् । मध्ये हत्वेत्यर्थे "अन्त-रपरिग्रहे" पा० अपरिग्रह एवास्य गतित्वेन समासः परिग्रहे तु न, "अन्तर्हत्वा गतः हतं परिगृहेति" सि०कौ० । [तद्वति त्रि० ।

अन्तर्हास पु० अन्तरप्रकाशो हासः । गूढ़हास्ये, क्लीत० ।

अन्तर्हित त्रि० अन्तर्+धा–क्त । गुप्ते, तिरोहिते च । "अन्तर्हितगवर्थे" इति सि०कौ० ।

अन्तवत् त्रि० अन्तो नाशः परिच्छेदो वाऽस्य मतुप् मस्य वः । अवश्यनश्वरे "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः" इति गीता । परिच्छेदयुक्ते सीमावति च । "स चैतानन्तवत उपास्तेऽन्तवतः स लोकान् जयतीति" छ० उ० । "अन्तवतः परिच्छिन्नानिति" भा० । स्त्रियां ङीप् ।

अन्त(न्ति)वासिन् पु० अन्ते समीपे वस्तुं शीलमस्य वस–णिनि सप्तम्या वा अलुक् । शिष्ये । स्त्रियां ङीप् । समीपस्थिते त्रि० । [सीमावासु, नाशसमये च ।

अन्तवेला स्त्री अन्तस्था वेलाऽवधिः कालो वा क्लीत० । शेष-

अन्तशय्या स्त्री शयनं शय्या शीङ्–भावे क्यप् अन्तस्य नाशार्थं शय्या चतुर्थ्यर्थे क्लीत० । मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च । अन्त एव शय्या निर्व्यापारत्व-साहश्यात् कर्म्म० । मरणे ।

अन्तसद् पु० अन्ते निकटे सीदति सद–क्विप् । अन्तेवासिनि शिष्ये । "तमुपासते गुरुमिवान्तसद्" इति किरा० । समीपगे त्रि० ।

अन्तस्सलिल न० अन्तरप्रकाशं सलिलम् । भूमिमध्यस्थे जले "गङ्गाया अन्तस्सलिलवाहित्वान्न दोष" इति रघु० । सत्त्वाभावपक्षे अन्तःसलिलमस्यत्र । अन्तर्गतं सलिलं यस्याः । अप्रकाशितजलायां सरस्वतीनद्यां स्त्री । सलिलस्य मध्यम् अव्ययी० । जलमध्ये अव्य० । अन्तःसलिलमव-गाहेतेति" स्मृतिः । [तापे च ।

अन्तस्ताप पु० अन्तःस्थितः तापः । चित्ततापे, देहमध्य-

अन्त(न्ति)स्था पु० अन्तः स्वरोष्मणोर्वर्णयोर्मध्ये तिष्ठतीति स्था–क्विप् । वरलवाख्येषु वर्णेषु ते हि कादिभावमानस्वरोष्मणां यणसहरूपेष्वणत्वमध्यस्थाः । वा विसर्गलोपेऽन्तस्था अपि । "हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् । औरस्यं तं वि-जानीयात् कण्ठ्यमाङ्गरसंयुतमिति" पा० शि० । स्था–क । अन्तःस्थोऽप्यत्र मध्यस्थितमात्रे त्रि० । भवादौ गहा० क । अन्तःस्थीयः मध्यस्थभवे त्रि० ।

अन्तादि त्रि० आदिश्च अन्तश्च इ०राज० वा परनिपातः । आद्यन्तयोः । "अन्तादिवच्चेति" पा० ।

अन्तानल पु० अन्तस्य प्रलयस्थानलोवह्निः । प्रलयानले, अन्त्येष्टिकर्म्माङ्गवह्नौ च ।

अन्तार पु० अन्तं वनपर्य्यन्तदेशमृच्छति ऋ–अण् उप० । "अधिष्ठातारमन्तारं पशूनां पुरुषं विदुरिति" भारतोक्ते पशुपालके । [चाण्डालादौ तस्य श्वपाकान्तस्यत्वात्तथात्वम् ।

अन्तावशायिन् पु० अन्ते पर्य्यन्तदेशेऽवशेते अव+शी–णिनि ।

अन्तावसायिन् पु० नखकेशानामन्तमवसातुं छेत्तुं शीलमस्य अव+सो–णिनि युक् च । नापिते । अन्ते वृद्धे वयसि अवस्थति निश्चिनोति तत्त्वम् । मुनिभेदे । "अन्ताय स्वतो-ऽर्थं जन्तुनाशाय अवस्थति । प्राणिहिंसके चाण्डालादौ ।

अन्ति (का) स्त्री अन्त्यते संबध्यते अन्त–इ । नटाभिनयन-काले तदुक्तौ ज्येष्ठभगिन्याम् । स्वार्थे के टापि अन्तिकेत्यपि । सामीप्यार्थे अव्य० "मुग्धप्रभीतवदुपेयतुरन्ति भावो-रिति" भाग० "यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट स" इति ऋ० १,७६,११, "अन्ति अन्तिके" भा० । "नहीं नु वो मरुतो अन्त्यक्षे" ऋ० १,१६७,६ । अस्य सामीप्यार्थ-त्वात् पदान्तरेण अव्ययीभावे । तत्तदर्थसामीप्ये "दृष-णावन्तिदेवगिति ऋ० १,१८०,७ ।

अन्तिक त्रि० अन्त्यते संबध्यते सामीप्येन, अन्त–घञ् सो-स्यास्तीति मत्वर्थीयः ठन् । सामीप्यवति । "विप्रान्तिके पितॄन् ध्यायन्निति" "अनैः पिण्डान्तिके पुनरिति" "वसे-युश्च गृहान्तिके" इति च मनुः । "तामन्तिकन्यस्तबलि-प्रदीपामिति" रघुः । स्वार्थे ठनि सामीप्ये न० । चूल्लाम् न० । ओषधिभेदे स्त्री । अन्तं शेषसीमां व्याप्नोति अन्त+कन् । पर्य्यन्तव्यापके त्रि० । "केशान्तिको ब्राह्म-

यस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात्तु भागान्तिको विशः" इति "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्। तद्द्विकं पादिकं वा ग्रहणान्तिकमेव वेति" च मनुः। "जनान्ते स्याज्जनान्तिकमिति" भा०ट०।

अन्तिकतम त्रि० अतिशयेनान्तिकः अतिशयने तमप्। अत्यासन्ने वेदे तु "तादेर्वेति" तिकलोपे अन्तमोऽप्युक्तार्थे।

अन्तिकाश्रय पु० अन्तिकं समीपम् आश्रयते आ+श्रि-अच्। निकटस्थे, अवलम्बनस्थाने च।

अन्तितस् अव्य० अन्तिक+तसिल् कलोपः अन्तिशब्दाद्वा तसिल्। अन्तिके इत्यर्थे "नकिष्टं ब्रह्मन्यन्तितोनदूरादिति" ऋ० २,२७,१२, "अन्तितः अन्तिकादिति" भा०।

अन्तिम त्रि० अन्ते भवः अन्त+डिमच्। अन्तभवे, चरमे च। "अजातशत्रुमूर्खानां वरमाद्यौ नचान्तिमः। सद्यहोपकरावाद्यावन्तिमश्च पदे पदे" हितो०।

अन्तिवास त्रि० अन्ति अन्तिके वासं वसनीयं धनमस्य। निकटस्थधने "अन्तिवासा दूरे" इति ऋ० ७,७७,४। "अन्ति अस्मदन्तिके वासं धनं यस्याः सान्तिवासेति" भा०।

अन्तेवसत् पु० अन्ते निकटे विद्याग्रहणाय वसति वस-शतृ ७त० अलुक्समा०। शिष्ये अन्तेशब्दस्य पृथक्स्थितावपि तत्समभिव्याहारमात्रेण तदर्थता। "वसन्निवान्ते विनयेन जिष्णुः" किरा०।

अन्तेवासिन् पु० अन्ते निकटे विद्याग्रहणाय वसति वस-णिनि ७त० अलुक्समा०। शिष्ये "याज्ञान्तेवासिनोवापि न त्वन्यत इति स्थितिरिति" मनुः "कलापिवैशम्पायनान्तेवासिभ्येति" "आचार्योपसर्जनान्तश्चान्तेवासीति" च पा०। "वामदेवान्तेवासी तदाश्रमवासीति" दशकु०। वामदेवान्तेवासिनि चाण्डालादौ त्रि०।

अन्तोदात्त न० अन्ते उदात्तः स्वरो यस्य। अन्तोदात्तस्वरयुक्ते पदे "पथिमथोः सर्व्वनामस्थाने" पा०सूत्रे "सर्व्वनामस्थाने किम्? ज्योतिष्मतः पथो रक्षेति उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदमिति" सि०कौ०। अन्ते अन्ता वयवे उदात्तः। यादृशस्य समुदायस्य अन्त उदात्तः तादृशे समुदाये "कर्षात्वतो घञोऽन्त उदात्त" इत्यधिकारे विहिते अन्तोदात्तस्वरे, कार्षःपाक इत्यादि। "धातोः" पा० अन्तोदात्तः। "गोपायतश्च" इति सि०कौ०। "क्विबन्त उदात्त" इत्यधिकारे भानुजिदीक्षाचार्यप्रणीतसूत्रैः प्रातिपदिकस्यान्त उदात्तः। तानि च सूत्राणि सि०कौ० उत्तरार्द्धे ५५१, पृष्ठादौ उपात्तानि। बाहुलकसूत्रोत्पन्नानां प्रातिपदिकानामन्तोदात्तता बोध्या।

अन्त्य त्रि० अन्ते पर्य्यन्ते वसतीति अन्त+यत्। चाण्डाले। "अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपीति" मनुः "अन्त्यश्वपचाल" इति कुल्लू०। म्लेच्छे, चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति" नक्षत्रवृक्षनदीनाम्नो नान्त्यपर्वतनाम्निकामिति" "नान्त्यो न विकलेन्द्रिय" इति च मनुः। "अन्त्यश्वपचाल्यादिरिति" "नक्षत्रवृक्षनदीम्लेच्छपर्वतनाम्निकामिति" च कुल्लू०। म्लेच्छानां सर्व्वापकर्षान्तभवत्वात्तथात्वम्। अवसानभवे, "जायायै पूर्व्वमारिणे दत्त्वाग्नीनन्त्यकर्म्मणीति" मनुः "नानाशीरेवमन्त्य एव सामर्थ्यात्" काल्या०२,४,१०, "असक्तृपीडं भगवन्! कृणमन्त्यमवेहि मे" इति "विसमस्यं तदन्त्यमवसानमिति" च रघुः "क्रियतां कथमन्त्यमवसानमिति" कुमा०। अवसानञ्च दैशिकं कालिकञ्च उक्तोदाहरणे यथायथं बोध्यम् अन्ताय परिच्छेदाय हितः यत्। परिच्छेदकारके वैशिषिकोक्ते विशेषपदार्थे "अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तित" इति भाषा०। प्रलये परमाणूनां गगनादीनाञ्च अन्यस्य विशेषकारकस्याभावात् विशेषस्यैव परिच्छेदकत्वमिति तस्यान्त्यत्वम्। स्त्रियाम् स्त्री। अन्तिमे वस्तुनि त्रि०। यथा नक्षत्राणां मध्ये रेवती, रागीनां मध्ये मीनः, वर्णानां मध्ये हकार इत्यादि। संख्याभेदे न०"जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तरा संख्ये"ति भास्कराचार्य्योक्ते परार्द्धगतभागे। गणितशास्त्रोक्ते सर्व्वस्य वामस्थिताङ्के "स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्न" इति लीला०। लग्नावधिद्वादशराशौ पु० "अन्त्येऽन्त्ये भुविवेन्दिरेश" इति लील०ता०। "तिलोत्थाष्टकयूकान्त्यफलायद्वत् फलं तथा इति"ज्योति०। अन्तेभवः दिगा० यत्। सिद्धान्तशिरोमणिगणितोक्तायां चरजीवया युतोनायां तिथ्यायाम् स्त्री। यथा "त्रिंशद्भक्तयैवं द्विगुणश्च सा कृतिश्चरज्यया त्रिगुणोऽपि सान्त्यजा"। "द्विगुणैव तिथिज्यया-सरगोले युता, याम्ये रहिता कृतिर्भवति। एवं तिथ्या चरजीवया युतोनान्त्या स्यात्। अलोपपत्तिः। अत्र गोलेऽहोरात्रवृत्तक्षितिजसंपातयोर्यद्यं यत् तदुदयास्तसूत्रम्। एवमुन्मण्डलसंपातयोर्यद्यं तदहोरात्रवृत्तस्योदयसूत्रम्। तदुदयास्तसूत्रयोरन्तरं सर्व्वत्र तुल्यम्। अथ याम्योत्तरवृत्तसंपातयोर्यद्यं तत् तन्मितं तस्य आयसूत्रम्।

तयोर्व्यासस्रुतयोर्यः संपातस्तस्मादुपरितनं खण्डं दुज्या। सोऽत्तरगोलेऽधःस्थया कुज्यया युता यावत् क्रियते तावद्दिनार्धं कोदयास्रुतयोरन्तरं स्यात्। दक्षिणे तु कुज्यया हीना। यतस्तत्रोदयास्रुतादधः कुज्या। यदर्कोदयास्रुतयोरन्तरं सा च क्षितिरुच्यते। एवमन्यत्रापि। अतोऽहोरात्रवृत्तव्यासार्धं त्रिज्यातुल्यैरङ्कैरङ्क्यते तावत् त्रिज्यातुल्यं भवति। तैरङ्कैर्यावत् कुज्या गण्यते तावच्चरज्यातुल्या भवति। अथ चरज्यया त्रिज्या युतोनाऽन्त्यासंज्ञा भवति। नक्षत्रान्त्याक्षुण्णोः क्षेत्रसंस्थानभेदः। किन्त्वङ्कानां गुरुलघुत्वात् केवलं सख्याक्रतो भेद इत्युपपन्नम्" प्रमिता०।

अन्त्यकर्मन् न० अन्ते नाशे भवं कर्म्म। अन्त्येष्टिक्रियायाम्। "जायायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि" "आत्मानां याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति" इति "जातकर्म्मान्त्यकर्माणि नवश्राद्धं तथैव चेति" च मनुः। "तमेनं मृतमितोऽस्माद्ग्यामात् अग्नये" इति का०उप० अग्नयेऽन्त्यर्थमृत्विजोहरन्ति पुत्रा वान्त्यकर्म्माणि" इति का०उप० भा०।

अन्त्यज पु०स्त्री० अन्त्यः सन् जायते जन—ड। शूद्रे तस्य वर्णमध्ये शेषभवत्वात्तथात्वम्। "येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यज" इति मनुः। "अन्त्यजः शूद्रः" इति कुल्लू०। शेषजातमात्रे त्रि०। अन्त्यश्चाण्डाल इव जायते जन—ड। रजकादिषु सप्तसु जातिषु पु०स्त्री०। "रजकश्चर्मकारश्च नटो वरुड़ च। कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अत्रिसंहिता। "न शूद्रराज्ये निवसेदित्यधिकृत्य नोपस्पृष्टेऽन्त्यजैर्नृभिरिति" "सङ्कल्पं त्वन्त्यजस्त्रियामिति" च मनुः।

अन्त्यजन्मन् पु०स्त्री० अन्त्यं जन्म यस्य। शूद्रे, "प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मन" इति मनुः। शेषजातमात्रे त्रि०।

अन्त्यजाति पु०स्त्री० अन्त्या जातिर्यस्य। शूद्रे। "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितामिति" मनुः। चण्डालादौ च। "अन्त्यजातिरविज्ञातो निवेशयास्य वेश्मनीति" आप०।

अन्त्यभ न० कर्म०। मीनराशौ, रेवतीनक्षत्रे च तयोः राशि चक्रस्यान्ते स्थितत्वात्तथात्वम्।

अन्त्ययोनि पु०स्त्री० अन्त्या योनिरुत्पत्तिर्यस्य। शूद्रे, चण्डालादौ च 'शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनय" इति मनुः।

अन्त्यवर्ण पु०स्त्री० कर्म०। शूद्रे। पदवाक्यादेरवसानस्थिताक्षरे पु०। [पृष्ठेऽस्य विवरणम्।

अन्त्यानुप्रास पु० कर्म०। शब्दालङ्काररूपे अनुप्रासभेदे (१७८)

अन्त्यावसायिन् पु० स्त्री० "निषादस्त्री तु चण्डालात् पुक्कसन्त्यावसायिनम्। श्मशानगोचरं सूते" इति मनूक्ते निषादस्त्रियां चण्डालजाते (सुरदाफरास) इति ख्याते सङ्कीर्णवर्णे स्त्रियां ङीप्। "चण्डाल श्वपचश्चैत्ता श्वतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" इत्यङ्गिरसोक्तचाण्डादिषु च। "अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामत" इति अङ्गिरःस्मृतिः।

अन्त्याश्रम पुंन० कर्म०। चतुर्थाश्रमे भिक्षुरूपेशाश्रमे।

अन्त्याश्रमिन् पु० अन्त्याश्रमोऽस्यास्ति इनि। चतुर्थाश्रमयुक्ते।

अन्त्याहुति स्त्री कर्म०। अन्त्येष्टौ साग्निकस्य मृतस्य देहसंस्कारके यज्ञभेदे "अन्त्याहुतिं हावयितुं सविप्रा" इति भट्टिः।

अन्त्यूति स्त्री अन्ति अन्तिकस्य वा ऊतिः रक्षणम् अव—क्तिच् कलोपः। आसन्नरक्षणे "अहमन्त्यूतिमयोभुवमिति" ऋ० १,१३८,१।

अन्त्येष्टि स्त्री अन्ते भवा इष्टिः। साग्निकस्य मृतस्य देहसंस्कारार्थमिष्टिभेदे तत्प्रमत्वात् निरग्नेर्दाहमात्रसंस्कारे च। "पतितानां न दाहःस्यान् नान्त्येष्टिर्नास्थिसञ्चय" इति शु०त० स्मृतिः।

अन्त्र न० अन्त्यते देहो बध्यतेऽनेन अति—बन्धने करणे ष्ट्रन्। देहबन्धने—"उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्द्दिशेत्"। इति वैद्यकोक्तपरिमाणवति नाड़ीभेदे। "सार्द्धत्रि व्यामान्यन्त्राणि पुंसः स्त्रीणामर्द्धव्यामहीनानि" सुश्रुतम्। "निर्यदन्त्रविभूषितमिति दुर्गाध्यानम्" "यस्मान्मज्ञैरुपलेपिभिरिति" सुश्रुतम्।

अन्त्रकूज पु० अन्त्रस्य कूजः शब्दभेदः। अन्त्रविकूजने "पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति वेति" सुश्रुतम्।

अन्त्रपाचक अन्त्रस्थं दोषं पाचयति। त्वचिसारे निर्य्यासविषे औषधिभेदे "स्थावरङ्गङ्गमञ्चैव द्विविधं विषमुच्यते" इत्युपक्रम्य। "दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयमित्यभिधाय "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च निर्य्यासाः धातवश्चैव कन्दश्च दशमः स्मृत" इति विशेषतः स्थावरस्य स्थानमुक्त्वा "अन्त्रपाचककर्कारीयसौरीयककरघाटक रक्षनन्दनवराटकानि सप्त त्वक्सारनिर्य्यासविषाणा-

ज्वेति" २५२ पृ० सुश्रुते उक्तम् । विवरणं विषशब्दे द्रष्टव्यम् ।

अन्त्रमांस न० "आन्त्रिकं छिद्रमार्गेण धौतं निर्मलधारिणा । तस्य खण्डान् संविधाय वेसवार (वेसन) युतान् पचेत् । निःसारं विरसोद्गारमन्त्रमांसमुदाहृतमिति वैद्यकोक्ते पक्वमांसभेदे आन्त्रिके ।

अन्त्रवृद्धि पु० अन्त्रनिमित्ता वृद्धिः । सुश्रुतोक्ते रोगभेदे स च रोगः सु० २८६ पृ० सुश्रुते दर्शितो यथा "वातपित्तश्लेष्मशोणितमेदोमूलान्त्रनिमित्ताः सप्त वृद्धयः । तासां मूलान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलसमुत्पत्तिहेतुरन्यतमः ॥ अधःप्रकुपितोऽन्यतमो हि दोषः फलकोशवाङ्क्षणोरभिप्रपद्य धमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते ॥ तासां भविष्यन्तीनां पूर्व्वरूपाणि वस्तिकटीसुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशयोरुत्क्षेपेति तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिरुजं वातवृद्धिमाचक्षते, पक्वोदुम्बरसङ्काशां ज्वरदाहोष्मवतीं चाशु समुत्थानपाकां पित्तवृद्धिं, कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं, कृष्णस्फोटाढ्यां पित्तवृद्धिलिङ्गां, रक्तवृद्धिं मृदुलिङ्गवां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् ॥ मूत्रसम्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा द्रतिरिव क्षुभ्यति मूलकृच्छ्रवेदना दृषणयोः स्वयथुः कोथयोश्चापद्यति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणबलवद्विग्रहहस्त्यश्वपतनादिभिरायासविशेषैर्व्यायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्रोतरश्च चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य अन्त्रिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोशं प्रविश्य शुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीड़ितश्चोच्छ्वसिति । विमुक्तश्च पुनराधमति तामन्त्रवृद्धिमसाध्यामित्याचक्षते" इति । "धन्वमांसानुपयुञ्जीतमन्त्रवृद्धिं व्यपोहति" सुश्रुतम् ।

अन्त्रिका स्त्री अदि+बन्धने ण्वुल् । नाड्यौ ज्येष्ठभगिन्यामित्यमरटीकायां नीलकण्ठः ।

अन्त्रू स्त्री अन्त्रते बध्यतेऽनेन अदि+ऊ । निगडे स्त्रीपादभूषणभेदे च । स्वार्थे कन् "कोऽण इति" ह्रस्वः । अन्त्रुकोऽत्र "स्वार्थिकप्रत्ययस्य प्रकृतितो लिङ्गवचनातिक्रमस्य देवताशब्दादौ दर्शनात् पुंस्त्वम् ।

अ (आ) न्दोल दोलने अद० चु० उभ० सक० सेट् । अ(आ)न्दोलयति-ते आन्दुदोलत्-त । ल्युट् । अ(आ)न्दोलनम् "किन्वासासरविन्दसुन्दरदृशां द्राक्षासरान्दोलनादि"त्युक्तेः । अ(आ)न्दोलितः । सुरादेराकृतिगणत्वनायसुत्प्रेक्षितः स च दीपादि । "आन्दोलत् क दोलने" इति कविकल्पद्रुमोक्तेः शब्दान्ते इत्यन्ते तन्नान्तं द्रष्टव्यम् ।

अन्ध दृष्टिविघाते अद० चु० उभ० पात्यर्थगृहीतकर्मकत्वादकर्मक० सेट् । अन्धयति ते आन्दिधत् त । अन्धयन् अन्धितः । "कनकस्मृतपत्थान्धितधीरिति" मा० द० । दृष्टिरत्र नेत्रेन्द्रियज प्रत्यक्षं विवेकज्ञानञ्च तद्विघातार्थस्य कर्त्तृत्वम् ।

अन्ध त्रि० अन्ध अच् । नेत्रद्वयमूले एकचक्षुषीति तु नास्य प्रयोग. अनुपकृतनेत्रान्तरेण तस्य दर्शनसम्भवात् । अन्धश्च द्विविधः जन्मान्धः, उत्पन्नौ नेत्रद्वयानपि रोगादिना उपकृतनेत्रद्वयश्च उभयत्रैव तत्प्रयोगात् । "अङ्गभङ्गान्धबधिरानिति" "उन्मत्तोऽन्धश्च पञ्चधा" स्मृतिः" च मनु । "इहैवास्ते तु सा लोके गोरम्भेवेक्षयन्निति" "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ" तथेति मूलान्तरम् "अन्धोगगनं न पश्यतीति" व्यु० सदा० "दृशोऽन्धः पतिरेष मन्धकगत" इति सा० द० । चक्षुःसत्त्वेऽपि आलोकादि सहकारिकारणान्तराभावेन दृष्टिरहितोऽपि अस्य प्रयोगः । यथा "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यचक्षुष" इति देवी० । तत्र पेचकानां दर्शने आलोकाभावस्यैव सहकारितया तेषां दिवान्धत्वम् । कपोतादीनां तु सूर्य्यालोकाभावेऽपि दीपाद्यालोकान्तरसद्भावे रात्रावन्धता । मनुष्याणान्तु दिवा सूर्य्यालोकात्, रात्रौ दीपाद्यालोकात् उभयत्र दृष्टिसत्त्वान्नान्धत्वम् । विवेकज्ञानमूल्ये "क्रोधान्धस्तस्य तस्य स्वयमिह भवितेति" वेणी० "नैवान्धत्वं मदान्धसिन्दूरघटेति" गङ्गास्तोत्रम् । "अरान्धा गादतारुण्या सभक्षरतकोविदेति" सा० द० "अज्ञानतिमिरान्धस्येति" गुरुगीतिः । परिव्राजकभेदे, तस्य "सवक्तुरचक्षुरिव सकर्णः अकर्ण इत्यादि श्रुत्या वाक्यश्रवणदर्शनशून्यचक्षुःश्रोत्रत्वोक्तेरन्धत्वम् अतएव "पितृतोव्रजतोऽपि यस्य चक्षुर्न दूरगम् । चतुष्पदां भुवं सङ्ख्या, परिव्राजश्च उच्यते" इत्यनेन तस्यान्धत्वं परिभाषितम् । नक्षत्रच्छायालोकाभावयोगितया ज्योतिषपरिभाषिते राशिभेदे च । "मेषो वृषो मृगेन्द्रश्च दिवान्धाः परिकीर्त्तिताः । ऋक्षुकर्कटकन्याश्च रात्रावन्धाः प्रकीर्त्तिता" इति तथा च मेषादिषु दिवा नक्षत्रस्य लाभः तत्र मक्षीसञ्चारस्य दिवान्धत्वात् । मिथुनादिषु तु रात्रौ नक्षत्रस्य लाभः तत्र मक्षीसञ्चारस्य रात्रावन्धत्वात्

अन्यत्र नष्टस्य न लाभ इत्येतत्परतया तत्ताभ्यत्वम् भाक्तम् । अन्धयतीत्यन्धम् अन्ध–चु०प्रेरणे णिच्–अच्, अन्ध–करणे अच् वा । तमसि अन्धकारे "अन्धं तमस्ते प्रविशन्ति ये के चात्महनोजना इति" श्रुतिः । यथार्थ ज्ञानावरके वेदान्तिमतसिद्धे अज्ञाने च "आसीदिदं तमोभूतमिति" मनौ "तमसाऽततत्त्वेनेति" "तमसैवावृतं तत्त्वं नाहपश्यति मूढधीरिति" च पुराणे तमःशब्देनाज्ञानस्यैवाभिधानात्तथात्वम् । जले न०मेदि० । तस्य मनुष्याणामन्धकारित्वात्तथात्वम् तेषां हि जलमध्ये उन्मीलितनेत्राणामपि न दर्शनमित्यनुभवसिद्धम् ।

अन्धक पु० अन्ध–ख्वुल् । दैत्यभेदे स च दैत्यः दितौ कश्यपादुत्पन्नः तस्य वरेण महादेवैरवध्यतामाप्तेदे यथोक्तं हरिवंशे १४५ अ० "दितिरुवाच हतपुत्राऽस्मि भगवन्! देवैर्धर्मभृतांवर!। अवध्यं पुत्रमिच्छामि देवैरमितविक्रमम् । कश्यप उवाच । अवध्यस्ते सुतो देवि! दाक्षायणि! भवेदिति । देवानां संशयो नात्र कश्चित् कमललोचने!। देवदेवस्पृते रुद्रं तस्य न प्रभवाम्यहम् । आत्मा ततस्ते पुत्रेण रक्षितव्यो हि सर्व्वथा । अन्वालभत तां देवीं कश्यपः सत्यवागथ । अङ्गुल्योदरदेशे तु सा पुत्रं सुषुवे ततः । सहस्रबाहुं कौरव्य! सहस्रशिरसं तथा । द्विसहस्रेक्षणञ्चैव तावच्चरणमेव च । स व्रजत्यन्धवद्ग्राहान्नन्योऽपि हि भारत!। तमन्धकोऽयं नामेति प्रोचुस्तत्र निवासिनः । अबध्योऽस्मीति लोकान् स सर्व्वान् बाधति भारत!। हरत्यपि च रत्नानि सर्व्वाण्यात्मबलाश्रयात् । बाधयत्यात्मवीर्य्येण निगृह्यासुरसं गणान् । खवेश्मन्यूर्ज्जितोऽत्यर्थं सर्व्वलोकभयङ्करः । परदारापहरणं परररत्नविलोपनम् । चकार सततं मोहादन्धकः पापनिश्चयः" इति "निर्मितस्त्रिभूवनदारितान्धकमहासुर इति" काद० । अन्ध एव अन्धकः स्वार्थे कन् । मुनिभेदे स च दक्षस्तिज्येष्ठभ्रातुः उतथ्यात् ममतायामुत्पन्नः दक्षस्तिशापादन्धत्वमाप्तेदे । तस्य जात्यन्धत्वात् दीर्घतमा इति नामान्तरं तत्कथा भा० आ०प० १०४अ० "उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् । बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत ॥ उवाच ममता तन्तु देवरं वदताम्बरम् ॥ अन्तर्वत्नी त्वहं भ्राता ज्येष्ठेनारभ्यतामिति । अयञ्च मे महाभाग! कुक्षावेव बृहस्पते!। औतथ्यो वेदमत्रापि षडङ्गं प्रत्यधीयत ॥ अमोघरेतास्त्वञ्चापि द्वयोर्नास्त्यत्र सम्भवः । तस्मादेवं गतेऽद्य त्वमुपारमितुमर्हसि ॥ एवमुक्तस्तया सम्यक् बृहस्पतिरुदारधीः । कामात्मानं तदात्मानं न शशाक नियन्त्रितुम् ॥ स बभूव ततः कामी तया सार्द्धमकामया । उत्सृजन्तं तु तं रेतः स गर्भस्थोऽभ्यभाषत ॥ भोस्तात! मा गमः कामं द्वयोर्नास्तीह सम्भवः । अल्पावकाशो भगवन्! पूर्व्वञ्चाहमिहागतः । अमोघरेताश्च भवान्न व्रीडां कर्त्तुमर्हसि ॥ अश्रुत्वैव तु तद्वाक्यं गर्भस्यस्य बृहस्पतिः । जगाम मैथुनायैव ममतां चारुलोचनाम् ॥ शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः । पद्भ्यामरीधयन्मार्गं शुक्रस्य च बृहस्पतेः ॥ स्थानमप्राप्तमथ तद्रेतः प्रतिहतन्तदा । पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः ॥ तद्दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः । उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवान्मुनिः ॥ यस्मात् त्वमीदृशे काले सर्व्वभूतेप्सिते सति । एवमात्य वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि ॥ स वै दीर्घतमा नाम शापादृषिरजायत । बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा ॥ जात्यन्धोवेदवित् प्राज्ञः पत्नीं लेभे स विद्यया । तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम् ॥ स पुत्रान् जनयामास गौतमादीन् महायशाः" इति । यादवभेदे च "सात्वतान् सत्त्वसम्पन्नात् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवावृधं नृपम् । अन्धकञ्च महाबाहुं वृष्णिञ्च यदुनन्दनम् । तेषां विसर्गाश्चत्वारो विस्तरेणेह तान् शृणु । अन्धकात् काश्यदुहिता चतुरोऽलभतात्मजान् । कुकुरं भजमानञ्च शमं कम्बलबर्हिषम्" । इति हरिवंशे ३८ अ० । "दूतं संप्रेषयामास वृष्ण्यन्धकनिवेशनम्, ततो वृष्ण्यन्धकाः क्षुण्णमिति" हरिवंशः ।

अन्धकरिपु पु० ६त० । महादेवे तस्य तन्नाशकत्वात्तथात्वम् यथा हरिवंशे १४६ अ० "सुमोच भगवाञ्छूलं प्रदीप्तानिलसप्रभम् । तत् पपात हरोत्सृष्टमन्धकोरसि दुर्द्धरम् । भक्षयन्नाकरोद्रौद्रमन्धकं साधुकण्टकमिति"। अन्धकहन्त्रादयोऽप्यत्र । अन्धकस्यान्धकारस्य रिपुरपसारकत्वात् । सूर्य्ये, चन्द्रे, वह्नौ, च पु० ।

अन्धकवर्त्त पु० अन्धक इव वर्त्तते वृत–अच् । पर्वतभेदे गरुड० ऊ । अन्धकवर्त्तीयस्तद्भवे त्रि० ।

अन्धकार पुं०न० अन्धं करोति कृ–अण् उप०स० । तमसि तच्च तेजोद्रव्यसामान्याभावरूपमिति नैयायिकाः । नीलं तमोधावतीति प्रयोगात् नीलरूपवत् धावनादिक्रियावच्च द्रव्यान्तरम्, आलोकस्य अन्यत्र चाक्षुषप्रत्यक्षे सहकारित्वेऽपि तत्प्रत्यक्षे मेचकप्रत्यक्षवद्व न सहकारिता

वस्तुखाभाव्यादिति भेद इति मीमांसकादयः । "दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारमिति" कुमा० "सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनमिति" मृच्छ० "अथान्धकारं गिरिगह्वराणामिति" रघुः । अन्धकारस्य दृष्टिविघातकत्वं मनुष्याणामेव तेषामेवालोकसहकारेण दर्शनोदयात् उन्दुरादीनान्तु तदभावेऽपि दृष्टेरुदयात् । ततश्च आलोकरूपसहकारिविघटनेनास्य दृष्टिरोधकत्वमवसेयम् । यथार्थज्ञानविरोधिनि वेदान्तिमतसिद्धे अज्ञाने च । [रान्धकारे ।

अन्धकारमय त्रि० अन्धकार+प्राचुर्य्ये मयट् । प्रचु-

अन्धकारि पु० अन्धकः तदाख्यासुरस्यारिः ६त० । शिवे अन्धकरिपुशब्देऽस्य विवृतिः ।

अन्धकासुहृत् पु० अन्धकस्य असून् हरति हृ-क्विप् तुक् च, अन्धकाख्यासुरस्य असुहृत् रिपुर्वा ६त० । महादेवे ।

अन्धकूप पु० अन्धयतीत्यन्धः स चासौ कूपः । सान्धकारे कूपे । अन्धः कूपो यत्र ७ब० । नरकभेदे यथा "यस्त्विह वै भूतानामीश्वरकल्पितदृत्तीनामविक्लिपरव्यधानां स्वयं पुरुषोपकल्पितदृत्तिर्विक्लिपरव्यथोव्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति ॥ तत्रह्यसौ तैस्तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकमत्कुणमक्षिकादिभिः, ये के चाभिदुग्धास्तैश्च सर्व्वतोऽभिदुह्यमाणस्तमसि विहतनिद्रानिर्दृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः इति भाग० ५स्क० । अन्धस्य दृष्ट्यभावस्य कूप इव । मोहे । सहि सर्व्वदृष्ट्यभावस्याकरः इति तस्य तथात्वम् । [अन्धकरणसाधने ।

अन्धङ्करण न० अन्धःक्रियतेऽनेन च्व्यर्थे ङ-करणे ल्युट् ।

अन्धतमस न० अन्धयति अन्ध+अच् तान्यति अनेनेति तम-करणे-असि कर्म्म० अच् समासान्तः । निविड़ान्धकारे, तद्युक्ते नरकभेदे च ।

अन्धतामस न० तम एव तामसं प्रज्ञा० स्वार्थेअण् अन्धयतीति अन्धं कर्म्म० । निविड़ान्धकारे ।

अन्धतामिस्र न० तमिस्रा तमस्ततिः तमिस्रैव तामिस्रम् अन्धयतीत्यन्धम् कर्म्म० । निविड़ान्धकारे । अन्धम् अन्धकारकं तामिस्रं यत्र ७ब० । नरकविशेषे पु० न० । "तामिस्रमन्धतामिस्रं महारौरवरौरवौ नरकं कालसूत्रञ्च महानरकमेवचेत्यादिना" मनुना गणितेषु एकविंशतिनरकभेदेषु द्वितीये नरके तत्स्वरूपम् । "यस्तु परवित्तापत्यकलत्रायपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकै स्तामिस्रे नरके बलात्क्षिप्यते ॥ अनशनानिपानदण्डताड़नसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुरत्र कश्मलमासादितएकदैव मूर्च्छामुपयाति तामिस्रपाशे ॥ एवमेव अन्धतामिस्रे । यस्तु "वञ्चित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्दृश्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति इति भाग० ५स्क० ॥ सांख्यशास्त्रप्रसिद्धे भयविशेषविषयकेऽभिनिवेशे पु० । तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः इति सा० का० । "अभिनिवेशस्त्रासः दिव्यादिव्यशब्दविषयत्वेन दशविधयकत्वात् अणिमाद्यष्टविधैश्वर्य्यविषयत्वाच्चाष्टादशधा । तथा हि देवाः खलु अणिमादिकमष्टविधमैश्वर्य्यमामाद्य दश शब्दादीन् भुञ्जानाः "शब्दादयो भोग्यास्तदुपायाश्चामी मादृशोऽस्माकं असुरादिभि र्माक्ष उपघानिघतेति विभ्यति तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविषयत्वादष्टादशधेति" सा० को० । वेदान्तिमतसिद्धे "देहे नेदे अहमेव नष्टोऽस्मीत्येवं" रूपे अज्ञाने च ।

अन्धत्व न० अन्धस्य भावः । नेत्रघाते चक्षुषः स्वग्राह्यासामर्थ्ये "एकादशेन्द्रियवधा" इत्यादि सा० का० (४९) व्याख्याने कौमुद्याम् "बाधिर्य्यं कुष्ठिताम्बत्वजड़ताऽजिह्मता तथा । मूकता कौब्जपङ्गुत्वक्लैव्योदावर्त्तमन्दता इत्यादिना श्रोत्रादीनां क्रमेण इन्द्रियाणां घातोदर्शितः ।

अन्धपूतना स्त्री ३त८ तत्पुरुषे बालग्रहभेदे "स्कन्दग्रहस्य प्रथमः स्कन्दापस्मार एव च शकुना रेवती चैव पूतना चान्धपूतने"त्युक्तेः । "योऽहेर्हि स्तनमतिसारकासक्षिक्काकर्दीभिर्ज्वरसक्षिताभिरर्द्द्यमानः दुर्वर्णः सततमधःशयोऽमुगन्धिस्तं ब्रूयुर्वरभिषजोऽन्धपूतनार्त्तमिति" तल्लक्षणमुक्तम् ।

अन्धमूषिका स्त्री अन्धं दृष्ट्यभावं मुष्णाति मुष-ण्वुल् दीर्घः । देवताऽदृश्ये तत्सेवने हि चक्षुर्नष्टा भवतीति वैद्यकप्रसिद्धम् ।

अन्धम्भविष्णु त्रि० अनन्धोऽन्धोभवति भू-च्व्यर्थे स्नुच् । अन्धीभवितरि ।

अन्धम्भावुक त्रि० अन्ध च्व्यर्थे भू-स्नुकञ् । अन्धीभवितरि

अन्धस् न० अद्यते अद-असुन् नुम् धश्च । ओदने । अन्धतान्धसोदेवाः । "द्विजातिशेषेण यदेतदन्धसा" किरा० "विषानं शुक्रमन्धस इति" यजु० १९,७५ ।

अन्धाहि पु० अन्धोऽहिरिव । (कुचिया) इति प्रसिद्धे सर्पे ।

अन्धवर्त्मन् पु० अन्धं सूर्य्यप्रकाशरहितत्वात्प्रकाशं वर्त्म यत्र । वायोः सप्तमे स्कन्धे । "मरुदिन्द्रः सरभसः साम-

सोमानुषीतिषाः देवीविशोऽन्धवर्त्मा च स्वान्धः सप्तम आ भ्रुवादिति" पुरा० ।

अन्धातमस न० कर्म्म० अन्येष्योऽपीति दीर्घः । निविड़ान्धकारे । रंजन्यान्तु स्त्री ।

अन्धिका स्त्री अन्धयति अन्ध–प्रेरणे णिच् ण्वुल् । द्यूतक्रीड़ायाम् तया हि जनः अन्धइव विवेकशून्यः क्रियते । सर्षप्याञ्च तस्याश्चात्यन्तसेवनात् दृष्टिक्षयः वैद्यकप्रसिद्धः ।

अन्धु पु० अन्ध–कु । कूपे । कूपतुल्यच्छिद्रवत्त्वात् धुंचिक्के च । "वाक्पाणिपादपायुभ्रुसंज्ञान्याङ्गमनीषिणः" इति भा० ति० । अन्धुलिङ्गमिति शब्दा०चि० ।

अन्धुल पु० अन्ध–उलच् । शिरीषवृक्षे । तत्पुष्पदर्शनात् वियोगिनामन्धत्वात्तथात्वम् ।

अन्ध पु० अन्ध–रन् । देशभेदे स च देशः । "जगन्नाथादूर्द्ध्वभागादर्वाक् श्रीभ्रमरात्मकात् तावदन्ध्राभिधोदेश इत्युक्तः" ॥ वैदेहेन कारावरस्त्रियामुत्पादिते अन्त्यजभेदे च । व्याधभेदे इति काश्यपः ।

अन्न न० अनित्यनेन अन–नन्, अद्यते इति अद्–क्त वा "अन्नाद्य इति" या० निर्देशात् अन्नार्थतया न जग्धिः । ओदने, खिन्नान्ने, "यत्तं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते । आमंतु वितुषं क्षेयं खिन्नमन्नमुदाहृतम्" इति वसि० स्मृ० । अन्नमूलं हि जीवनमित्युक्तेः तेषां प्राणहेतुत्वात्तथात्वम् । तत्त्वामान्नेऽपि अन्नशब्दप्रयोगः "आमान्नं हरये दत्त्वा पक्वं कृत्वाथ खादयेत् । षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिरिति" पुराणे "चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् विड्भुक्त्वा पराक" इति विष्णुस्मृतौ, आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मानवे च तत्र प्रयोगात् "खिन्नमन्नमुदाहृतमिति वशिष्ठोक्तिस्तु परिभाषार्था न तु तन्मात्रस्यैवान्नताबोधनार्था । अतएव "अन्नमाश्रित्य पापानि तिष्ठन्ति हरिवासरे" इत्यादिनिषेधे आमान्नभक्षणस्यापि ग्रहणम् अन्नानि च विविधानि "अन्नानि विविधानीह भवन्ति गिरिसम्भवे" । इत्युपक्रम्य अष्टादशविधानि धान्यान्यभिधाय "अन्नवर्ज्जव्रते देवि ! एतान्येव विवर्ज्जये"दित्यनेन पद्मपुराणे अन्नवर्ज्जनव्रते तेषां वर्ज्जनीयत्वाभिधानात् अष्टादश धान्यानि च धान्यशब्दे वक्ष्यन्ते "अन्नमथितं लेषा विधीयते तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन" इति श्रुत्या "अन्नमयं हि सोम्य मन इति" श्रुत्यन्तरोक्तं मनसोऽन्नमयत्वं यत् समर्थितं तत् सर्व्वप्रकारान्नविकारत्वेनैव । ततश्च "राजान्नं तेज आदत्ते" इत्यादौ निषिद्धतापि सर्व्वेषामेव । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्नाः नापितश्चैव यश्चात्मान निवेदये"दित्यादावपि दासादेर्भोज्यान्नतापतिप्रसवः अष्टादशान्नविषयएव दासादेश्च संकीर्णजातिभेदाः पराशरोक्ता वेदितव्यास्ते च तत्तच्छब्दे दर्शयिष्यन्ते । "गोरसं तिलसक्तूंश्च तिलपिण्याकमेव च । अपूपान् भक्षयेत् शूद्राद्यान्यत् पयसाक्तमिति" संवर्त्तवचनन्तु आपदि शूद्रान्ननिषेधानामपि भक्ष्यतार्थम् । "कन्दुपक्वं तैलपक्वं पायसं दधि सक्तवः । एतान्यशूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति" हारीतवचने अशूद्रान्नभुजामिति विशेषणात्तथावगतेः एवमेव प्रा०वि० । "अन्नं हि भूतानां श्रेष्ठं तस्मात् सर्व्वौषधमुच्यते" इति श्रुतौ अन्नस्य सर्व्वौषधिरूपत्वोक्तेः सर्व्वेषां व्रीह्याद्योषधीनामन्नत्वं व्यक्तमुक्तं "पृथिव्या ओषधय ओषधिभ्योऽन्नमिति" श्रुतौ च ओषधिजमात्रस्य अन्नत्वमुक्तम् "अद्यतेऽदन्ति च भूतानि तस्मादन्नमितीयते" इति तन्निरुक्तिरपि श्रुतौ दर्शिता । पृथिव्यां, तस्माच्च अन्नहेतुत्वादन्नशब्दवाच्यता । "अन्नमोऽन्नमिति श्रुतेः" "यत् कृष्णं रूपं तदन्नस्येति" छा०उप० श्रुतेश्च । अत एव भाष्यकृता "हन्ताहमिमास्तिस्रो देवता" इति श्रुतौ इदमा तेजोबन्नात्मिकाया देवतायाः परामर्शः इत्युक्तम् । उदके च निरुक्त० तस्य च "वृष्टेरन्नं ततः प्रजा इति" मनुना अन्नहेतुत्वोक्तेस्तथात्वम् । तथाऽनिति प्राणित्यनेनेति व्युत्पत्तेः उदकस्य प्राणहेतुत्वादन्नत्वम् "आपोमयः प्राण" इत्युक्त्वा तत्समर्थनाय "आपः पीतास्त्रेधा विधीयन्ते तासां यःस्थविष्ठोधातुस्तन्मूत्रं योमध्यमः तल्लोहितं योऽणिष्ठः स प्राण इति छान्दोग्येऽपां प्राणहेतुत्वमुक्तम् । तथा "षोड़शकलो वा असौ पुरुषः" इत्युपक्रम्य "यद्यदश्नाम्यन्नानि भाषीः कामम्पः पिबापोमयः प्राणो न पिबितो विच्छेत्स्यते" इति तत्रैव जलपानाभावे प्राणविच्छेद उक्तः । प्राणानन्दहेतुत्वाद्वा अन्नस्य तथात्वम् यथा "आपो वा अन्नाद्यस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणाः अन्नं कनीयो भविष्यतीति अथ यदा सुवृष्टिर्भवति आनन्दिनः प्राणाः भवन्ति अन्नं बहु भविष्यतीति छा०उप० । सूर्य्ये पु०सि०कौ० तस्य अन्नहेतुवृष्टिहेत्वात्तथात्वम् "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मनुना तद्धेतुत्वोक्तेस्तथात्वम् भोगसाधने उपकरणे, न० "स्त्रियोऽन्नं पशवोऽन्नञ्च विशोऽन्नञ्च कृष्णोक्तितामिति" मनुः । भक्ष्यद्रव्ये च "प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् । स्थावरं

जङ्गमञ्चैव सर्वं प्राणस्य भोजनमिति" मनुना जङ्गमस्याप्यन्नत्वोक्तेः ।

अन्नकिट्ट न० ६त० । अन्नपाकशब्दे वक्ष्यमाणे अन्नमलभेदे ।

अन्नकोष्ठ पु० अन्नस्य व्रीह्यादेः खल्लं कोष्ठमिव अल्पार्थे कन् । (कुटी) इति ख्याते धान्यादेः स्थापनस्थाने ।

अन्नद त्रि० अन्नं ददाति दा–क । अन्नदातरि "वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नद" इति मनुः । अन्नपूर्णाख्यदेवीभेदे स्त्री तत्पूजादि अन्नदाकल्पग्रन्थे दृश्यम् ।

अन्नदास पु० अन्नेन पालितो दासः । अन्नमात्रलाभेन प्राप्तदासत्वे भक्तदासे (पेटभाता) अन्नस्य दासमात्रे च, "अन्नस्य पुरुषो दास" इति भारते पुरुषस्य अन्नहेतुनैव दासत्वोक्तेः ।

अन्नदोष पु० अन्नस्य भोजनप्रतिग्रहादिकृतः दोषः पापविशेषः धातुवैषम्यं वा । अभक्ष्यान्नभक्षणजनिते अग्राह्यान्नप्रतिग्रहजनिते च पापहेतौ अपथ्यभोजनजधातुवैषम्यकृते च दोषभेदे "आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" मनुः । अभक्ष्यान्नानि द्विविधानि स्मृत्यादौ निषिद्धतया उक्तानि, तानि च अभक्ष्यशब्दे वक्ष्यन्ते । वैद्यके रोगनिदानतया उक्तानि च, तानि धातुवैषम्यसम्पादनद्वारा रोगनिदानतया वैद्यके प्रसिद्धानि यथा मन्दाग्नेः गुर्वन्नादीनि ।

अन्नपाक पु० ६त० । अन्नस्य व्रीह्यादेर्लौकिकदहनेन विक्लित्त्यनुकूलव्यापाररूपे पचने, भुक्तान्नस्य जठरानलेन रसरक्तादिरूपान्तरापादने च तत्र लौकिकपाकः चूल्ल्यादिपरिस्थापनपूर्व्वाधःसन्तापनादिलौकिकसिद्धः । जाठरपाको यथा षडर्थादर्शे योगार्णवे । "आयुष्यं भुक्तमाहार स वायुः कुरुते द्विधा सप्रविश्यान्नमध्यन्तु पृथक् किट्टं पृथगजलम् । अग्नेरूर्द्धं जलं स्थाप्य तदन्नं च जलोपरि । जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमने रतैः । वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् । अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः । द्विधा भवति तत् पक्वं पृथक् किट्टं पृथगजलम् । रसेन तेन ता नाड्यः प्राणः पूरयते पुनः । प्रतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः । रसः स नाड़ीमध्यस्थः शरीरे चोष्मणा भृशम् । पच्यते पच्यमानस्तु भवेत् पाकद्वयं पुनः । चर्म्मवेष्ट्र समन्ताच्च रुधिरञ्च प्रजायते" इति त्वगादिधातुपाकस्तु ४६ पृष्ठे उक्तः ।

अन्नपान न० अन्नस्य अभ्यवहार्य्यमात्रस्य पानसहभोगः । यावद्दनीयादिमत्त्वे; "अथातोऽन्नपानविधिमध्यायं व्याख्यास्याम" इति प्रतिज्ञाय "तस्माशितपीतलीढखाद्यादितस्य नानाद्रव्यात्मकस्येति" सुश्रुते उक्तत्वात् सर्व्वेषामन्नपानत्वम् ।

अन्नपूर्णा अन्नं पूर्णं यया । देवीभेदे "अन्नपूर्णे ! सदापूर्णे ! शङ्कर प्राणवल्लभे ! । ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां मे देहि पार्व्वतीति, शङ्कराचार्य्यः । एषा च काशीश्वरगृहिणी काशीखण्डे एतस्याभूरिशो वर्णनम् ।

अन्नपूर्णेश्वरी स्त्री भैरवीभेदे, तन्त्रसारेऽस्या विवरणम् । अन्नपूर्णायामपि "भिक्षां देहि कृपावलोकनकरी माताऽन्नपूर्णेश्वरीति" शङ्कराचार्य्यः ।

अन्नप्राशन "न० प्रकृष्टं विधानेन प्रथममाशनं प्राशनं ६त० । षष्ठाष्टममासादौ बालकादेर्विधानेन प्रथममन्नभोजने । "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले" इति मनुः । "ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि । "अष्टमे वास्य कर्त्तव्यं यद्वेष्टं मङ्गलं कुले" इति स्मृत्यन्तरम् । षष्ठ इति मुख्यकल्प इति रघु० । तत्रायं विशेषः कल्पचिन्तामणौ । "अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ" मुनिः । तत्र विहितितिथ्यादि यथा

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे । प्राजेशादिति पौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरैरानेयाप्यपतिपैत्र्यभैश्च नितरामन्नादिभक्तः शुभ इति, भुज० भी० । प्राजेशाद्यस्य रोहिण्यादयः ४,५,७,८,२७,१,२२,२३,१३,१४,१५, १६,१७,१८,१२, २१,२६,३,२०,१०, । तथाचैतन्नितानि नक्षत्राणि तत्र । विहितानि । तत्र वर्ज्यानि । "द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्वसु । बलमायुर्यशोहन्यात् शिम्बूनामन्नभक्षणम् । कल्पचि० । "वैधं सर्व्वत्र वर्ज्यं" दिलुक्तेनैतत्वेधस्यापि तत्र वर्ज्यता ।

अन्नभक्त त्रि० अन्नार्थं भक्तः दासः । अन्नमात्रदानेन प्रतिपादिते दासभेदे भक्तदासे विटतिरस्य दासशब्दे दृश्या ।

अन्नमय पु० अन्नस्य विकारः अन्न+विकारार्थे मयट् । स्थूलशरीरे । स्थूलशरीरस्य अन्नविकारत्वादन्नमयत्वम् अतएवोक्तम्, 'पित्तभुक्तान्नजाद्दोर्य्याज्जातोऽन्नेनैव वर्द्धते, देहः सोऽन्नमयोनाम्ना प्राक् चोर्द्धं तदभावत इति' शङ्करोक्तिः 'सवा एष पुरुषोऽन्नरस' इति श्रुतौ अन्नरसत्वोक्तेस्तस्य अन्नमयत्वम् । 'अन्नाद्रेतः रेतसः पुरुषः" इति श्रुतौ च देहस्यान्नमयत्वे प्रकारोदर्शितः ॥ अन्नविक्रयिमात्रे त्रि० । "अन्नमयं

हि सोम्य ! मन" इति श्रुतिः विवरणं कोशशब्दे। अन्न-प्रकृतमुच्यतेऽस्मिन् "तत् प्रकृतवचने" पा० मयट्। अन्न-प्रचुरे यज्ञादौ "अन्नमयोयज्ञ" इति सि०कौ०।

अन्नमल न०पु० अन्नस्य मलः किट्टः। निस्सारितरसभागभेदे (विष्ठि) इति ख्यातेऽन्नकिट्टे "वर्चस्कः मल" इति सि० कौ०। सुरायाञ्च "सुरा वै मलमन्नानां पुरीषं मलमुच्यते। तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति" प्रा०वि० स्मृतिः।

अन्नरस पु० अन्नस्य रसः सारांशः स्वादो वा। भुक्तस्य अन्नस्य सारांशे "सवा अयं पुरुषोऽन्नरस" इति श्रुतिः अपथ्यैः सह सम्भूते व्याधिरन्नरसे यथेति" वै०। रसस्तु जठरानलेनान्नस्य परिपाकात् कश्चित् सारांशः। अन्नपाकशब्दे तद्विवरणम्। अन्नस्यास्वादे च।

अन्नविकार पु० अन्नस्य विकारः। शोणितादिषु सप्तसु धातुषु "प्रधानेन व्यपदेशाभवन्तीति" न्यायात् चरमधातावेवास्य प्रयोगोपाधित्वात् चरमे धातौ शुक्रे रा०नि०। शुक्रोत्पत्त्यर्थमेव हि क्रमशःशोणितादिपाकात्तस्य प्राधान्यम्। अत एव "अन्नाद्रेत" इति श्रुतौ अन्नतो रेतस उत्पत्तिर्दर्शिता सा च परम्परयैव।

अन्नाद त्रि० अन्नमत्तुं शक्नोति अद्-अण् उप०। अन्न-भोजनसामर्थ्यवति दीप्ताग्नौ। "अन्नवानन्नादोभवति य एवं विद्वानिति छा०उप०। "अन्नादः दीप्ताग्निरिति" भा०भा०। "त्विषिमानर्चितिमान् यशस्वी ब्रह्मवर्चस्वान्" इति कात्या० ३,३,५। अन्नभक्षके त्रि० "टिड्-ढाणञित्यादि" पा० सूत्रे आद्यन्तयोस्तद्धितसदृश्यात् तद्धिताणन्तादेव ङीप् अन्यतोन, तेनातः स्त्रियां टाप्।

अन्नादिन् त्रि०अन्नमत्ति अद्-णिनि ह्रस्व०। अन्नभक्षके। "भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रतीति" मनुः स्त्रियां ङीप्।

अन्नाद्य न० अन्नरूपमाद्यं भक्ष्यम्। अन्नरूपभक्ष्ये। "अग्नि-मन्नादमन्नाद्यायादधे" य० २,५,। अन्नमाद्यं यस्य। अन्न-प्रभृतौ त्रि०"अन्नाद्याय व्यूहध्वं सोमोराजायमागमदिति" दत्तभावनमन्त्रः। "अन्नाद्येनोदकेन वा" इति मनुः।

अन्नायुस् त्रि० अन्नमायुर्जीवनसाधनमस्य। अन्नजीवने "स एषोऽन्नस्य मह्नोयद्वायुरन्नायुर्वा एष यद्वायुरिति" ऐ० उप०। अन्नायुरन्ननिबन्धनायुरन्नजीवन इत्यर्थः।

अन्नावृध त्रि० अन्नं वर्द्धतेऽनेन वृध-करणे क्विप् ह्रस्व० पूर्व्व-पददीर्घः। अन्नवर्द्धके। "अत उत्वा पितृभृतोजनित्री-रन्नावृधं प्रतिचरन्त्यन्नैरिति ऋ० १०,१,४,।

अन्नाशन न० अन्नस्य विधानेन आशनम्। अन्नप्राशनार्थे।

अन्य त्रि० अन-अन्नादि० य। भिन्ने, सदृशे च। "उक्षितं दृढशेऽन्यच्च कवन्धेभ्यो न किञ्चनेति" रघुः। "शरीरेण समं नाशं सर्वमन्यद्धि गच्छति" हितो०। "अन्यदुच्छ्वसितं सत्यमन्यच्छास्त्रनियन्त्रितमिति" माघः धन्यास्तागुणरत्नरोहणभुवोधन्यास्तदन्यैव सेति" सा०द० सदृशे अन्योक्तिः सख्यत्वेऽस्य सर्वनामता। "नान्यत्वे सति सर्व्वस्वं यच्चान्यच्चै प्रतिश्रुतमिति" या०। "व्याप्तिः साध्यवदन्यस्मिन्निति" भाषा०। "दृतहन्नन्येषां या घृत-क्रतोरिति ऋ० ८,३२,१४, अन्यस्मिन् यूपे, निदधाति रेत इति ऋ० ३,५५,१७। द्वन्द्वेऽन्यस्य न तत्कार्य्यम्, "साध्वन्यानां सखिद्विषे" इति सु०बो० जसि तु वा साध्वन्ये-साध्वन्याः। तस्येदमित्यर्थे ञ दुक्। अन्यदीयः।

अन्यकारक प्र० अन्यत् करोति ञ-उण् स्वार्थे कन् कारकः। पुरीषकिट्टे कारा०। अन्यस्य कारके त्रि०।

अन्यचित्त न० अन्यदिव स्वव्यापरालम्बं चित्तं कर्म्म०। विषयालोचनासमर्थे चित्ते। दैत०। अन्यमनस्के त्रि०।

अन्यत् अव्य०। अन-बा० यति। अन्यार्थे। "देव-दत्तोगच्छति अन्यच्च यज्ञदत्त" इति गण० महो० स्वरादिपाठादव्ययत्वम्।

अन्यतम त्रि० अन्य+डतमडति, सुग्धबोधम्। बहूनां मध्ये निर्द्धारिते एकस्मिन्। न्यायमते अनेकभेदावच्छिन्नप्रतियो-गिताकभेदवति तच्च तद्भिन्नत्वे सति तद्भिन्नत्वे सति तद्भिन्न-भिन्नत्वम्। यथा घटपटभट्टान्यतम इत्यादौ घटादिभेद-त्रयभेदो घटपटभृत्तेष्वेव, तद्भिन्नेषु सर्वत्र तत्त्रयभेदस-त्त्वात्। अनेकत्वञ्च अमेत्ताबोधविषयत्वं तथा च यावन्तः पदार्थाः अन्यतमघटकप्रथमभेदप्रतियोगितया विवक्षिता-स्तावन्तएव भेदा याहग्रास्तथा च तावत्पदार्थभिन्नभेद-वत्त्वमेवान्यतमशब्दार्थः। "अन्यतरान्यतमशब्दौ अव्युत्पन्नौ प्रातिपदिके इति" कैयटः। तेनान्यतमस्य न सर्वनामका-र्य्यम् "किंयत्तदोनिर्द्धारणे इति" पा० किंयत्तद्भ्योऽन्यत्व डतरादिविधानाभावाच्च डतमान्तत्वम् अतोऽव्युत्पन्नत्वम्। इति भा०प्र०उ०। अतएव सर्वनामसंज्ञासूत्रे डतरडत-मान्तयोरुक्तत्वेऽपि अन्यतरशब्दस्य पृथगग्रहणम्।

"कर्म्मादिष्टत्वान्यतमत्वं कारकत्वमिति" सारमञ्जरी "अधःप्रकृपितोऽन्यतमो हि दोष" इति सुश्रुतम्।

अन्यतर त्रि० अन्य+डतर सु०बो०। द्वयोर्मध्ये निर्द्धारिते एकस्मिन्। न्यायमते भेदद्वयादिच्छिन्नप्रतियोगिताकभेदवति

तच्च तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वमधिकमन्यतमशब्दे दृश्यम् अव्युत्पन्नत्वेऽपि अस्य स्वशब्देनोपात्तत्वात् सर्वनामकार्य्यम् । किंयत्तद्भ्योऽन्यत्र डतरादाद्यभावात् अव्युत्पन्नत्वमिति भाष्य० प्र० उद्योत०। शुभ्रादि०अपत्ये ठक्। आन्यतरेयस्तदपत्ये पुंस्त्री० । [दिवसे ।

अन्यतरेद्युस् अव्य० अन्यतरस्मिन्नहनि एद्युस् । अन्यतर-

अन्यतस् अव्य० अन्य+सप्तम्यादार्थे तसिल् । अन्यत्र अन्यस्मादित्यादार्थे । तत्र सप्तम्यर्थे "नैव न प्रियतमोभयथासौ यद्युसं न हृणुते हृणुते वा । एकतस्तु धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः इति" नै० "एकतस्तु सकलानि निमित्तान्यन्यतो मनसः प्रतिपत्तिरिति" नीति० "गुरो र्यत्र परीवादोनिन्दा वापि प्रवर्त्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत" इति मनुः । पञ्चम्यर्थे तु "या नियुक्तान्यतः पुत्रं देवराद्याप्यवाप्नुयादिति" मनुः ।

अन्यतस्त्य त्रि० अन्यतोऽन्यस्मिन् खेतरपक्षे भवः अन्यतस्+त्यप् । सपक्षे । "स य एतमुपास्ते जिष्णुर्ह्यपराजिष्णुर्भवत्यन्यतस्त्यजायीति" श्रुतिः । [कारके ।

अन्यत्कारक त्रि०अन्यस्य कारकः ईत० टुक् च । अन्यस्य-

अन्यत्र अव्य० अन्यस्मिन्+अन्य+त्रल् । अन्यस्मिन्नित्यर्थे । "अन्यत्र निद्रद्रव्येभ्य आश्रितत्वमिष्यते इति" भाषा० न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षते इति" अन्यत्र प्रजापतिव्रतादिभ्यः इति च शारी० भा० । प्रकरणबलाच्च कालो देशो वा विशेष्यः तत्र कालः । "अन्यत्र निधनात् पत्युः पत्नी कैशान्न वापयेदित्यादौ" निधनकालभिन्ने काले इत्यर्थः । उक्तोदाहरणे तु देश इति । "इतराभ्योऽपि दृश्यन्ते इति" पा०उक्तेः तत्रभवानित्यादिवत् प्रथमार्थे त्रल् । प्रथमार्थे "देवा अन्यत्राश्विभ्यां सत्रं निषेदुरिति" को०ब्रा० । अन्यत्र अन्ये इत्यर्थः "अन्यत्र धर्म्मादन्यत्राधर्म्मादन्यत्र कृताकृतात् अन्यत्र भूताद्भव्याच्चेति" कठ०उप० । धर्म्मादन्यइत्यर्थः ।

अन्यथा अव्य० अन्य+प्रकारार्थे थाच् । अन्यप्रकारे "यदभावि न तद्भावि भावि चेन्न तदन्यथेति" हितो० । "अवाप्यते वा कथमन्यथा द्वयमिति" कुमा० । निष्कारणे भेदि० अभावार्थे च "अन्यथानुपपत्तिरिति" ।

अन्यथाकारम् अव्य० अन्यथा+कृ+णमुल् । अन्यप्रकारेण कृत्वेत्यर्थे यस्य यथाकरणमुचितं ततोन्यरूपेण कृत्वेत्यर्थे ।

अन्यथाख्याति स्त्री अन्यथा अन्यरूपेण ख्यातिर्ज्ञानम् । यस्य यद्धर्म्मवत्त्वेन ज्ञानमुचितं तस्य तद्भिन्नधर्म्मेण ज्ञाने । यथा ह्रदो वह्निमानित्यादिज्ञानम् तच्च भ्रमात्मकं तदभावति तत्प्रकारकत्वात् । तच्च विशिष्टमेकं ज्ञानं तस्यैव प्रवर्त्तकत्वात् तथा च शुक्तौ रजतत्वभ्रमात् रजतार्थिनस्तद्ग्रहणे प्रवृत्तिरुपजायते इति नैयायिकादयः । मीमांसकादयस्तु तत्र ज्ञानद्वयम् वह्निज्ञानं ह्रदज्ञानञ्च असंसर्गाग्रहवशाच्च तयोः विशिष्टज्ञानकार्य्यकारिता सति च ह्रदे वह्नेरसंसर्गज्ञाने तत्र न प्रवृत्तिरित्यतोऽसंसर्म्माग्रह एव तत् प्रवर्त्तकः अप्रवृत्तिस्तु तदभावे इत्याहुः । वेदान्तिनस्तु धर्म्मिणोऽसन्निकृष्टस्थले नान्यथाख्यातिः किन्तु अनौकिकपदार्थान्तरोत्पत्त्या तस्य लौकिकं प्रत्यक्षं जायते यथा इदं रजतमिति ज्ञानं तद्विवरणमध्यासशब्दे १४० पृष्ठे उक्तम् । अतोऽसत एव तत्र ख्यातिरित्यसत्ख्यातिः धर्म्मिसन्निकर्षस्थले तु जपासन्निकृष्टस्फटिकादौ अन्यथाख्यातिरिति भेद इत्यङ्गीचक्रुः ।

अन्यथानुपपत्ति स्त्री अन्यथा अभावे न उपपत्तिःअसम्भवः स्वाभावप्रयोज्यासम्भवे, अर्थापपत्तिप्रमाणे च तथा हि पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाभोक्तृत्वेदनस्य पीनत्वं रात्रिभोजनं विनाऽनुपपन्नम् (असम्भवि) इति ज्ञानात् रात्रिभोजनाकर्त्तृकपीनत्वेन रात्रिभोजनं कल्प्यते तथा च भोजनस्य पीनत्वव्यापकतया व्यापकाभावस्य च व्याप्या भावव्याप्यतया साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानात् अनुमितिरूपार्थापत्तिरुदेति । सेयमर्थापत्तिः मीमांसकमते प्रमाणान्तरं नैयायिकानां मते व्यतिरेकव्याप्तिज्ञानहेतुकानुमितिरिति भेदः ।

अन्यथाभाव पु० अन्यथा अन्यरूपेण भावः । यस्य यथारूपमुचितं तस्य ततोऽन्यथारूपेण भवने । अन्यरूपापादने च । "अतो मय्यन्यथाभावो न कर्त्तव्य इति" ज्ञा०उप० भा०"ज्ञातेऽपि विषये तथानुक्तिरित्येवं रूपो भाव इत्यर्थः ।

अन्यथाभूत त्रि० अन्यथा अन्यप्रकारेण भूतः । प्रकारान्तरतां प्राप्ते । "अन्यथाभूतखरिति" भु०वो० ।

अन्यथावृत्ति स्त्री अन्यथाऽन्यरूपेण वृत्तिः । चित्तादेः अन्यप्रकारेण वृत्तौ, (परिणामे) अन्यथास्थितौ च ।

अन्यथासिद्ध त्रि० अन्यथा अन्यप्रकारेण सिद्धः । अन्यप्रकारेण सिद्धे पदार्थे, न्यायादिमते अन्यथासिद्धिरूपाणां कारणतापतिबन्धकानां दोषाणामाश्रये वस्तुनि च । अन्यथासिद्धानि च पञ्च तत्र घटादौ दण्डत्वादिकमाद्यम् दण्डादिरूपं द्वितीयं, कुलालजनकः तृतीयः, गगनादि चतुर्थम् रासभादि पञ्चमम्, यथोक्तं भाषायाम् 'येन सह पूर्व-

भावः कारणमादाय वा यस्य । अन्यं प्रति पूर्व्वभावे ज्ञाते यत्पूर्व्वभावविज्ञानम् ॥ जनकं प्रति पूर्व्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते । अतिरिक्तमथापि यद्भवेद्विषयतावश्यक-पूर्व्वभाविनः ॥ एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् । घटादौ, दण्डरूपादि द्वितीयमपि दर्शितम् ॥ तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः । पञ्चमो रास-भादिः स्यादेतेष्वावश्यकस्त्वसौ" इति ॥

अन्यथासिद्धि स्त्री अन्यथा अन्यप्रकारेण सिद्धिः । अन्य-प्रकारेण सिद्धौ न्यायाद्युक्तकारणतापतिबन्धकरूपे पञ्च-विधे दोषे च ।

अन्यदर्थ पु० अन्योऽर्थः कर्म्म० दुक् । भिन्नार्थे । ईत०३त० वा अन्यार्थः अन्यस्यान्येन वार्थे पु० । अन्यः अर्थोयस्य अन्यार्थः भिन्नार्थके त्रि० । "अन्यार्थं उपन्यास इति"

अन्यदा अव्य० अन्यस्मिन् काले दा । अन्यस्मिन् काले इत्यर्थे "अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितामिति" माघः

अन्यदाशा स्त्री अन्या आशा दुक् । भिन्नप्रार्थने । अन्य-स्याशा ईत० । अन्यस्य वाञ्छायाम् अन्यलाभाशये ।

अन्यदाशिस् स्त्री अन्या आशीः दुक् । अन्याशीर्वादे अन्यस्य अन्येन वाशीरिति ईत०३त० वा । अन्या-शीरित्येव । अन्यस्य अन्येन वाऽशास्यप्रार्थने ।

अन्यदास्था स्त्री अन्यस्मिन् आस्था दुक् । अन्यस्मिन्नास्थायाम् अन्यस्यास्था ईत०० । अन्यास्थेत्येव अन्यस्यास्थायाम् ।

अन्यदास्थित त्रि० अन्यमास्थितः दुक् । अन्यरूपास्थिते ३त० । अन्यास्थित इत्येव अन्येनास्थिते ।

अन्यदीय त्रि० अन्यस्यायम् गहा०छ दुक् च । अन्यसम्बन्धिनि

अन्यदुत्सुक त्रि० अन्यस्मिन् उत्सुकः दुक् । अन्य-विषयोत्कण्ठिते । अन्येन उत्सुकः ३त० । अन्योत्-सुक इत्येव तत्रैवार्थे त्रि० ।

अन्यदूति स्त्री अन्या दूतिः दुक् । अन्यरक्षणे । अन्यस्य दूतिः ईत० । अन्योदूतिरित्येव अन्यस्य रक्षणे ।

अन्यद्राग पु० अन्यस्मिन् रागः दुक् । अन्यविषयरागे । अन्येन अन्यस्य वा रागः ३त०ईत० वा । अन्यराग इत्येव अनुकरणके अन्यसम्बन्धिनि च रागे ।

अन्यपुष्ट पुंस्त्री० अन्यया मातृभिन्नया पुष्टः सर्वनाम्नो वृत्तौ पुंवद्भावः । कोकिले "अथान्यपुष्टाः प्रतिकूलशब्दाः श्रोत्रर्वितन्त्रीरिव ताडयमानेति" कुमा० । "बलिपुष्ट-कुलादिवान्यपुष्टैरिति" माघः ।

अन्यपूर्व्वा स्त्री अन्यः पूर्व्वो यस्याः । पूर्व्वपतिमरणादौ पश्चात् कृततद्भिन्नपतिकायां पुनर्भूस्त्रियाम् । अन्यपूर्व्वा च सप्तविधाः यथोक्तं नारदेन "परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा । कन्यैवाक्षतयोनिर्य्या पाणिग्रहण-दूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा । देशधर्म्मानवेक्ष्य स्त्री गुरुभिर्य्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता"।(उत्पन्नसाहसा उत्पन्नव्यभिचारा) । "असत्सु देवरेषु स्त्री बान्धवैर्य्या प्रदीयते । सवर्णाय सपि-ण्डाय सा तृतीया प्रकीर्त्तिता" । स्त्री प्रसृताऽप्रसृता वा पत्यावेव तु जीवति । कामार्थमाश्रयेदन्यमथमा स्वैरिणी तु सा । कौमारमतिसृष्टज्य या त्वन्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्त्तिता । मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्त्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या । तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तिता इति" । अन्या अपि सप्तविधाः कात्यायनेन दर्शिता यथा "सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः । वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला । उद्-कस्पर्शिता या च या च पाणिगृहीतिका । अग्निं परिगता या च पुनर्भूप्रभवा च या । इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" इति । अन्यपूर्व्वावेदनञ्च युगान्तरविषय-मिति माधवाचार्य्यादयः "नष्टे मृते प्रव्रजिते क्लीबे वा पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्योविधीयते पराशरवाक्यस्य तेन युगान्तरविषयकत्वस्य व्यवस्थापनात् । कलियुगेऽपि तत्कर्त्तव्यतेति आधुनिकास्तन्यन्ते तत्र बला-बले तत्तद्ग्रन्थे एवावगन्तव्ये । अन्यस्वामिकमात्रेऽपि "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यमन्य-पूर्व्वेव तस्त्रिन्नासीत् वसुन्धरेति रघुः । ततः अर्शआदित्वादच्, अन्या पूर्व्वा यस्य वा । तत्परिणेतरि पुनर्भूपतौ पु० ।

अन्यभाव पु० अन्यरूपो भावः । अन्यरूपभवने अन्यरूप-चित्तभावे च । ब्रा० ष्यञ् । आन्यभाव्यं तद्भावे न० ।

अन्यभृत् पुंस्त्री० अन्यया भ्रियते भृ-कर्म्मणि क्विप् । कोकिले ।

अन्यभृत पुंस्त्री० अन्यया भृतः पुष्टः । कोकिले । "कलमन्य-भृतासु भाषितमिति" रघुः । अन्यपुष्टमात्रे त्रि० ।

अन्यमनस् त्रि० अन्यस्मिन् मनोयस्य । स्वग्राह्यविषयपरि-हारेण उत्कण्ठया व्याकुलीभावेन अन्यत्रासक्तचित्ते । वा कप् । अन्यमनस्कोऽप्यत्र त्रि० ।

अन्यमातृज पु० अन्यस्या मातुर्जायते जन ड ५त० पुंवद्भ ।

सापत्ने भ्रातरि "असंसृष्टापि चादद्यात् संसृष्टोनान्यमातृज" इति याज्ञ० तादृशभगिन्यां स्त्री ।

अन्यलिङ्ग पु० अन्यस्य स्वविशेष्यस्य लिङ्गमिव लिङ्गमस्य । विशेष्यलिङ्गानुसारिलिङ्गके शब्दे । वा कप् । अन्यलिङ्गकोऽप्युक्तार्थे "त्रेयाः सप्तान्यलिङ्गका" इत्यमरः ।

अन्यवर्ण पुंस्त्री अन्यो वर्णः यस्य । सवर्णजातीयवर्णे यथा ब्राह्मणस्य क्षत्रियः क्षत्रियस्य वैश्यजातिरित्यादि ।

अन्यवादिन् पु० अन्यथा प्रतिज्ञातार्थादन्यथा वदति वद्-णिनि । हीनप्रतिज्ञे वादिनि—प्रतिवादिनि च । "अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः । आहूतः प्रपलायी च हीनः पञ्चविधः स्मृत" इति नारदसंहिता ।

अन्यविवर्द्धित पुंस्त्री० अन्यया स्वमातृभिन्नया विवर्द्धितः पुंवत् । कोकिले । परवर्द्धितमात्रे त्रि० ।

अन्यव्रत त्रि० अन्यत् वैदिकाद्भिन्नं व्रतं कर्म्म यस्य । श्रुतिस्मृति-विहितव्यतिरिक्तकर्म्मकारके असुरादौ यथेष्टाचारिमानुषे च । "अपहवेषो अपह्नरोऽन्यव्रतस्य ऋ० ५,२०२, अकर्म्मा दस्युरभि नो अमन्तुरन्यव्रतोऽमानुषः ऋ० १०,२२,८, ।

अन्यशाख पु० अन्या स्वाध्यायभिन्ना शाखा वेदभागभेदो यस्य । स्वाध्यायवेदशाखाभिन्नशाखाध्यायिनि "अन्यशाखोद्भवोदक्षो रटहीतश्चोपनायित" इति दक्षक० च० स्मृतिः । वा—कप् । अन्यशाखकोऽप्युक्तार्थे । स्वशाखासूत्रस्थ अन्यशाखामध्येतरि च । स्वार्थे कन् । शाखारण्डे ।

अन्यसाधारण त्रि० अन्येन साधारणः । अन्येन सदृशे, "अप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्मेति" कु० अन्यस्य साधारण्यवति स्वपरस्वत्वास्पदीभूते साधारणे वित्तादौ ।

अन्यादृश त्रि० अन्य इव पश्यति अन्य+दृश—"कर्त्तरि क्वप्" पा० उक्तेः कर्म्मकर्त्तरि क्वप्, कर्म्मणि सक् इति मुं० बो० । अन्यादृशे । क्विन् । अन्यादृशशब्दस्य स्त्रियां ङीप् । कञ् । अन्यादृशकार्थे "कूमे ननूमौदृशा अन्यादृशा" इति ज्ञा० उप० । स्त्रियां ङीप् ।

अन्याय पु० न्यायो विचारः, सङ्गतिः औचित्यं, प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यञ्च अभावार्थे न० त० । विचाराभावे, सङ्गत्यभावे, अनौचित्ये, पञ्चावयवन्यायाभावे च न्यायशब्दार्थे त्वधिकं वक्ष्यते । न० ब० । विचारशून्ये, औचित्यशून्ये, असङ्गते, प्रतिज्ञादिपञ्चकवाक्यशून्ये च त्रि० । "अन्यायेनापि तं ब्रान्तं नेष्यन्ति प्रमथाः" इति स्मृतिः । "अन्यायेनापि यद्गृह्यं बह्वन्यद्दशतानि चेति" नारदस० ।

अन्याय्य त्रि० न न्याय्यः । न्यायादनपेतभिन्ने अनुचिते ।

अन्यार्थ पु० अन्योऽर्थः वा दुगभावः । भिन्नार्थे । अन्योऽर्थः-अभिधेयं प्रयोजनं वास्य । भिन्नाभिधेयवाचके, शब्दे भिन्नप्रयोजनके पदार्थे च त्रि० ।

अन्यून त्रि० न न्यूनम् । हीनभिन्ने व्याप्यभिन्ने च । "अन्यूनानतिरिक्तवृत्तित्वमवच्छेदकत्वमिति" न्यायप्रकरणम् ।

अन्यूनाधिक त्रि० न न्यूनं नाप्यधिकम् । समानभावप्राप्ते न्यूनाधिकतारहिते ।

अन्यूनानतिरिक्त त्रि० अन्यूनः अहीनः अनतिरिक्तः नाधिकः विशेषणयोरप्येकस्य विशेष्यतावित्तया क० । समाने । "अन्यूनातिरिक्ताङ्गीं योषितं सौम्यदर्शनामिति" स्मृतिः । अन्यूनानतिरिक्तवृत्तित्वमिति न्या० प्र० ।

अन्येद्युष्क त्रि० अन्येद्युः अन्यस्मिन्नह्नि भवः कन् उदु पधत्वात् षत्वम् । अन्यदिवसभवे । "अन्येद्युष्कमहोरात्रादेककालं प्रवर्त्तते इति" सुश्रुतम् ।

अन्येद्युस् अव्य० अन्यस्मिन्नह्नि अन्य+एद्युस् । अन्यदिवसे इत्यर्थे "परेद्यव्यद्य पूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्निति" भट्टिः "अन्येद्युरात्मानुचरस्य भावमिति" रघुः ।

अन्योढा स्त्री अन्येन ऊढा । परकीयनायिकायाम् "यात्रादिनिरतोऽन्योढां कुलटां गणितत्वमेति" सा० द० ।

अन्योदर्य्य पु० अन्यस्मिन् स्वमातृभिन्ने उदरे गर्भे भवः उदर+यत् । एकपितृके भिन्नमातृके वैमातेये भ्रातरि । "अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्योधनं हरेरिति याज्ञ० स्मृतिः । तथाभगिन्यां स्त्री । अन्योदरजातमात्रे त्रि० अतएव दायभागे तद्वचनव्याख्याने श्रीकृष्णादीनामपि अन्योदर्य्यपदार्थतया दायाधिकार उक्तः ।

अन्योन्य त्रि० अन्य+कर्म्मव्यतिहारे (एकजातीयक्रियाकरणे) द्वित्वम् पूर्व्वपदे सुच । परस्परार्थे । "अन्योन्यसृपीकृत्य दृत्पक्षाच्छादनं स्वमुखं पाण्डु तथा प्रकटमिति" "अन्योन्यसंसक्तसक्थियाममू" "अन्योन्यसंसर्गनिमीलिताक्षी" इति "अन्योन्यकोशानि विलोचनानिनीति" च कुमा० अतद्वित्वस्थापि सर्व्वनामता तेनान्योऽन्यस्मै इत्यादि । "अन्योन्यश्लिष्टबाह्वात्मकतामध्यरुहेति" भारी० भा० । "तावेतावन्योन्यश्लिष्टौ प्रतिष्ठितौ" इति वृ० उ० अन्योन्यस्या एवैतच्छ्रिया प्रतिष्ठमानाय इति कौ० ब्रा० "अन्योन्यमुभयोरेकक्रियायाः करणं मतमि"त्युक्तलक्षणे कर्णाभरणभेदे न० । "त्वया या योभते तन्वी यया

त्वमपि शोभसे । रजन्या शोभते चन्द्रश्चन्द्रेणापि च यामिनी" सा०द० ।

अन्योन्याध्यास पु० अन्योन्यस्मिन् अन्योन्यतादात्म्याध्यासः आरोपः । वेदान्तिमतसिद्धे परस्परतादात्म्यारोपे यथा अन्तःकरणे चेतनाध्यासः, चेतने वा अन्तःकरण तादात्म्याध्यासः "जलव्योम्ना घटाकाशो यथा सर्वत्रितोहितः । तथा जीवे च कूटस्थः सोऽन्योन्याध्यास उच्यते" इति वृद्धाः ।

अन्योन्याभाव पु० अन्योन्यस्मिन् अन्योऽन्यस्य अभावः । भेदे । भेदो हि यथा घटे पटस्य, तथा पटे घटस्य सदाऽस्ति, संसर्गाभावस्तु नैवं, घटे भूतलस्याभावेऽपि भूतले घटस्य कदाचित् सत्त्वसंभवेन सदाभावाभावात् । "अभावस्तु द्विधा ससर्गान्योऽन्याभावभेदत" इति भाषा० तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् अन्योन्याभावत्वमिति मुक्ता० । तच्च अखण्डोपाधिरिति नान्योन्याश्रयः इति तु नव्याः ।

अन्योन्याश्रय त्रि० अन्योन्यमाश्रयतीति आ+श्रि-अच् । परस्परसापेक्षे । न्यायमते तर्कविशेषे पु० । स च एकस्य ज्ञानादिजननाय यथाऽन्यज्ञानाद्यपेक्षा तथातस्य ज्ञानादि जननायेतरस्य ज्ञानापेक्षायेति स्वापेक्षापेक्षित्वनिमित्तकोऽनिष्टः प्रसङ्गः । अपेक्षा च ज्ञप्तौ, उत्पत्तौ, स्थितौ च भाक्ता तत्र ज्ञप्तौ "घटोऽयम् यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् ,तदैतद्घटभिन्नः स्यात् तत्र स्वज्ञानस्य स्वज्ञानजन्यत्वेनानिष्टं प्रसज्येत स्वापेक्षापेक्षितज्ञानत्वात् स्वापेक्षितघटज्ञानरूपविषयस्य तज्जनकज्ञानविषयाद्भेदरूपमनिष्टञ्च सज्येत अतोघटस्य घटभेदप्रसङ्गोऽनिष्टः । उत्पत्तौ यथा घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटभिन्नः स्यादित्यादि । एतद्घटस्य उत्पत्तौ एतद्घटजन्यसापेक्षत्वे कारणस्य कार्याद्भेदनियतया एतद्घटस्य एतद्घटभेदरूपोऽनिष्टःप्रसङ्गः । स्थितौ यथा घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तदा तथात्वेनोपलभ्येत न च तथा उपलभ्यते तथात्वे च घटस्य घटवृत्तित्वापत्तिरनिष्टा प्रसज्येत । एतेषु ज्ञप्तिविषयतयैव प्रायशोऽनिष्टप्रसङ्गः । सर्वत्र तन्मूलकमेव स्वपक्षसापेक्षपक्षसापेक्षपक्षकत्वमनयोनाश्रयत्वं तत्र तत्र व्यवच्छिद्यते । अतएव परस्परज्ञानसापेक्षज्ञानाश्रयोऽनयोनाश्रय इति आर्तैरुक्तम् । एवञ्च अन्योन्यपदस्य तज्ज्ञाने, तदुत्पत्तौ, तत्स्थितौ च तत्तया तदाश्रयः अनयोनाश्रय इति त्रितयसाधारणः विग्रहः ।

अन्वञ्च त्रि० अनुगतमञ्चमिन्द्रियं गतिर्य० । प्रत्यक्षे, अनुपदे, अनुगते च । अक्ष्णः समीपम् अव्ययी० टच्समा० । चक्षुर्निकटे अव्य० ।

अन्वग्भाव पु० अनूचोभावः । पश्चाद्गन्तृत्वे, आनुगत्ये ।

अन्वच् त्रि० अनु+अन्च-क्विन् । अनुगामिनि, स्त्रियां ङीप् । "समानबन्धू अमृते अनूची" ऋ० १,११३,२, अनूची अन्वञ्चन्ताविति भा० । "तस्मादिमे अन्वञ्चश्च तीर्यञ्चश्च" श० ब्रा० । पशुश्चान्वक् काल्या० ६,५,६ । अनु पश्चादञ्चतीति तद्ब्रा० । अनुपदे न० अव्य० अमरः । "अन्वग्व्ययौ मध्यमलोकपालइति" रघुः अनुपदं यथावित्यर्थः स्वरादेराकृतिगणत्वेन तङ्गणीयः अनुमाने अव्य० प्रो०मनो० ।

अन्वन् त्रि० अन-वनिप् । अनुगन्तरि । "अन्वासि रात्रीत्वेति" ता०ब्रा० स्त्रियां ङीप् । भाष्यकृता तु अनुपूर्वाद्धातोरेतद्रूपमित्युक्तम् । तेन अनु+वा-क्त पृ० रूपसिद्धिः । स्त्रियां टाप् ।

अन्वय पु० अनु+इण्-भावे अच् । सत्तौ, अनुगतौ, "जन्माद्यस्य यतोऽन्वयादिति" भाग० । वृत्तौ, आनुकूल्ये, कार्ये-कारणस्यानुसरणे, कार्यसत्तापादकस्वसत्ताकस्य कारणस्य कार्ये स्थितौ, स्वसत्तानियतसत्तावत्कार्यसंबन्धे, च । कर्त्तरि अच् । वंशे तस्य पूर्व्वपुरुषदेहावयवानुगमनात्तथात्वम् । "तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तर' इति "रघूणामन्वयं वक्ष्ये" इति "तस्यान्वये भूपतिरेष जात" इति "अथ स्तुते वन्दिभिरन्वयज्ञैरिति" च रघुः पदानां, स्वोपस्थाप्यपदार्थानां वा परस्परसंबन्धे । "तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने" इति सा०द० "परस्परनिरपेक्षाणामेकस्मिन्नन्वयः समुच्चय" इति सि० कौ० । "मुख्यार्थस्येतराक्षेपो वाक्यार्थान्वयसिद्धये" इति सा०द० । तत्त्वे तत्स्वरूपे, "गुणानां तदन्वयव्यतिरेकानुविधायित्वादिति" सा०द० । अन्वेति इन्द्रियम् कर्त्तरि अच् । प्रत्यक्षे, "स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् । निरन्वयं भवेत् स्तेयमिति" मनुः । अनुगतमात्रे त्रि० । "का त्वमेकाकिनी भीरु ! निरन्वयजने वने" इति भर्तृः अनुगतजनशून्ये इत्यर्थः ।

अन्वयबोध पु० एकपदार्थे धर्म्मिणि अपरपदार्थस्य अन्वयं सम्बन्धं बोधयति आकाङ्क्षादिना, बुध-णिच्-अण् उप० स० । शब्दज्ञानजन्ये शाब्दबोधरूपानुभवभेदे । स च बोधः न प्रत्यक्षं नाप्यनुमेति नैयायिकाः । किन्तु ततोविलक्षण-

कारणकत्वाद्भिन्न इति यथोक्तं प्रकाशिकायाम् । "शब्दो यदि स्वार्थस्यानुभवे भवेद्धेतुस्तर्हि प्रात्यक्षिकएवौपनायिके, तत्र नाकाङ्क्षादयुपयोगः, तद्भिन्ने चेदानुमानिक एव न च तत्र सद्यः, साकाङ्क्षत्वादिधीमात्रेण, व्याप्तिबोधस्यापेक्षणादित्याशङ्कामपनेतुमन्वयबोधनामकमनुभवान्तरं दर्शयति । "साकाङ्क्षशब्दैर्योबोधस्तदर्थान्वयगोचरः । सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा" । शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षादिसामान्यं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वासम्भवात्, शाब्दान्यप्रत्यक्षत्वाद्यच्छिन्नं प्रति तस्यास्तथात्वमपेक्ष्य शाब्दधियः प्रत्यक्षत्वाद्भिन्नत्वकल्पनायामेव लाघवाच्च । लिङ्गजन्यत्वेनान्वयबुद्धेरनुमितित्वसिद्धावनायत्त्या शाब्दान्यानुमित्यां तत्सामग्र्याः प्रतिबन्धकत्वं वाच्यमतो लिङ्गजत्वमेव शाब्दधियः खण्डयति ।"योग्यतार्थगताऽऽकाङ्क्षा शब्दनिष्ठाऽनुभाविका । प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः" । गवादावस्तित्वादेरनुभवार्थं न तावदस्तित्वबाधविरहरूपं लिङ्गं बाधनिश्चयाभावेनान्यथासिद्धस्य योग्यतानिश्चयस्यानावश्यकत्वात् योग्यतामात्रलिङ्गकसंसर्गानुमानस्यान्वयबुद्धित्वे घटः कर्म्मत्वमित्यादिस्थलीयस्यापि तस्य तथात्वापाताच्च । योग्यतायाः संशयस्थलेऽन्वयबुद्धेरानुभविकत्वात् । गवादावस्तित्वादेरन्वयबोधानुकूलानुपूर्व्यापर्य्यवसिताकाङ्क्षा स्वयमसिद्धा कथमस्तित्वाद्यन्वयबोधं साधयेत् तत्र गवास्तित्वादेर्योग्यताविशिष्टसमाकाङ्क्षावत्त्वं न तदन्वयस्यानुमापकप्रसिद्धेरित्यादि" ।

अन्वयिन् त्रि० अन्वेति अनु–इण–णिनि । शाब्दबोधोपयोगि संबन्धवति अनुगते च अन्वयः वंशादिः अस्त्यस्य इनि । प्रागुक्तान्वयवति स्त्रियां ङीप् । न्यायनये अन्वयव्याप्तियुक्ते हेतौ पु० "केवलान्वयी" ।

अन्वर्थ त्रि० अनुगतोऽर्थम् अत्या०स० । अर्थानुगते व्युत्पत्तियुक्ते शब्दे "तथैव सोऽभूदन्वर्थः राजा प्रकृतिरञ्जनादिति" रघुः ।

अन्ववसर्ग पु० अनु+अव+सृज–घञ् अनुगतोऽवसर्गसिद्धानुरूपप्रचारम्, अत्या०स०, अनुरूपं स्वेच्छानुरूपतया अवसृज्यते न प्रतिरुध्यते अनेन इति वा अनु+अव+सृज–घञ् । यथेष्टं क्रियतामित्येवं रूपायामनुज्ञायाम् कामाचारानुज्ञाने, "अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु" पा० अपि सिञ्च अपि सुहि इत्यादौ यथेष्टं कुर्य्या इत्यादयोऽपिना द्योत्यते न तु कृत्वापि अनुज्ञया प्रतिरोधः क्रियते इति तस्य तथात्वम् ।

अन्ववाय पु० अन्ववाय्यते उत्पत्त्यानुसंबध्यते अनु+अव+अय–घञ्, इण्–अच् वा अनुन्यवेति अनुगच्छति देहावयवम् अनु+अव+इण्–कर्त्तरि अच् वा । वंशे, सन्ताने च ।

अन्वयव्यतिरेकिन् त्रि० अन्वयव्यतिरेकौ स्तोऽस्य इनि । साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः । स हि वह्निमति महानसादौ, वह्न्यभाववति जलादौ च भावाभावाभ्यां वह्नेरन्वयव्याप्तेः व्यतिरेकव्याप्तेश्च तथेति न्यायमते प्रसिद्धम् । अन्वयोऽन्वयव्याप्तिर्व्यतिरेको व्यतिरेकव्याप्तिस्तौ विद्येते अस्य इनि । अन्वयव्याप्तिमति व्यतिरेकव्याप्तिमति च हेतौ । यथा वह्नौ साध्ये धूमस्य अन्वयव्यतिरेकव्याप्तिकत्वम् । तत्र च धूमसत्त्वे वह्नि सत्त्वरूपान्वयव्याप्तिः वह्निव्यतिरेके च धूमाभावः व्यतिरेकव्याप्तिरित्युभयव्याप्तिसत्त्वात्तथात्वम् ।

अन्वयव्याप्ति स्त्री अन्वयेन व्याप्तिर्व्यापनं नियततया स्थितिः ३त० । यत्र धूमस्तत्र वह्निरित्येवं रूपायां व्याप्तौ । अन्वयेन तस्य सत्त्वेन व्याप्तिः इतराव्ययस्य साध्यस्यान्वयः व्यापकता । यथा धूमसत्त्वेन वह्निसत्ता इत्यतो धूमसत्त्वेन वह्नेर्व्यापकता । सा च साध्यसामानाधिकरण्यरूपा ।

अन्वयागत त्रि० अन्वयात् वंशपरम्परायाः आगतः । दायप्राप्ते धनादौ "श्रुतं शौर्य्यं तपःकर्मप्राशिष्यायाज्याऽन्वयागतम् धनं सप्तविधं शुद्धमिति" नारद० ।

अन्वेक्षा स्त्री अनु+अव+ईक्ष–अङ् । अपेक्षायामनुरोधे ।

अन्वष्टका स्त्री अनुगतोऽष्टकाम् । श्राद्धकालभेदे स च अग्रहायण्या ऊर्द्धं तिसृः कृष्णाष्टम्यः अष्टकाः, तदुत्तरवर्त्तिन्यस्तिस्रः कृष्णनवम्यः तद्रूपः । ताश्च सान्निकस्य मातृश्राद्धकालः । तथाहि "अष्टका योर्द्धमाग्रहायण्यास्तिस्राष्टमीति" गोभि० । "पितृदानाय मूले स्युरष्टकास्तिस्र एव च कृष्णपक्षे वरिष्ठाश्चेति" ब्रह्मपु० । आश्वलायनगृह्ये तु तासामतस्त्र इत्युक्तम् यथा । "हेमन्तशिशिरयोश्चतसृणामपरपक्षाणामष्टमीष्वष्टका" इति । "एकस्यां चतसृषु वेति" विकल्पश्रवणात् सामर्थ्यभेदेन एकस्यां तिसृषु चतसृषु वा अष्टकाश्राद्धम् अन्वष्टकाश्राद्धं च कार्य्यमिति गम्यते । तत्र पशुकल्पस्थालीपाकाद्यङ्गजातमुक्ता "अपरेद्युरान्वष्टक्यमिति" सूत्रेण तदुत्तरवर्त्तिकृष्णनवमीस्तु तद्विहितम् तत्र मातृश्राद्धिभ्योऽपि देयम् "पितृभ्यश्च हुता मन्थवर्ज्जम् स्त्रीभ्यश्च सुरामामिति" तत्रैवोक्तेः मनुनाऽपि "पितृंश्चैवाष्टकास्वेवंगृह्यमन्वष्टकासु" चेत्युक्तम् अत्र पितृपदमष्टकापक्षे स्वपरम्, अन्वष्टका-

पक्षे "स्त्रिया पुंवत्" इत्येकशेषेण मातृपितामहीप्रपितामहीसहितपित्रादिपरम्। एवञ्च आश्वलायनगृह्ये मनुवचने च पित्रादेरपि देवतात्वश्रवणात् मात्रादिमातृदैवत्यं रघुनन्दनोक्तं चिन्त्यं वस्तुतः शाखिभेदेन सपत्नीकपित्रादिश्राद्धं मात्रादिदेवताकं वा तच्छ्राद्धमिति व्यवस्था। "पित्रादित्रिकपत्नीषु भोज्या मातृः प्रति द्विजाः। स्त्रीणामेव तु तद्यस्मान्मातृश्राद्धमिहोच्यते" शङ्खवचनन्तु तासां पृथक्श्राद्धविधानार्थम्। एतच्च अन्वष्टकाश्राद्धं साग्निकमात्रेण कर्त्तव्यम्। तथा च विष्णुः। "अन्वष्टकाष्टकावद्यग्नौ हुत्वा मातरं पितामहीं प्रपितामहीं पूर्ब्ववद्ब्राह्मणान् भोजयित्वा" इति। अत्र होमत्वदेवाग्निप्राप्तेरग्निग्रहणं तन्नियमार्थम्। न चाग्नौकरणहोमे विप्रपाख्यादेर्विधानादत्रापि तथेति वाच्यम् प्रकृतिभूतश्राद्धविधुक्तस्थाधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात्। न वा लौकिकाग्नौ होमः "न पैत्र्ययज्ञियो होमोलौकिकाग्नौ विधीयते" इति मनुवचनेन निषेधात्। श्राद्धचिन्तामणावप्येवम्। आ०त० रघुनन्दनः।

अन्वष्टमदिग् अव्य० अष्टमीं दिशमनुलक्ष्योक्त्य अव्ययी० अच्समा०। पश्चिमोत्तरयोर्दिशोरष्टमाभिमुखीकृतदिग्भागे। स च वायुकोणः तस्य च पश्चिमोत्तरयोर्मामावर्त्तदक्षिणावर्त्ताभ्यामष्टमभागत्वात्तथात्वम् "अरण्ये संयतपाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तराभिमुखोऽन्वष्टमदिशमानक्षत्रदर्शनादिति" आ०त० सांख्या०गृ०। अन्वष्टमदिगयमिति उभयदिगष्टमभागमिति रघु०। [प्रत्यृक्षमित्यर्थे।

अन्वह अव्य० अह्नि अह्नि वीप्सार्थेऽव्ययी० अच् समा०।

अन्वाख्यान न० अनु+आ+ख्या—ल्युट। तात्पर्य्यावधारणार्थं व्याख्याने तत्प्रतिपादने च "वस्त्वन्वाख्यानं क्रियान्वाख्यानं चेति" "आत्मस्वरूपान्वाख्यानपरैश्चेति च" दृ० उ० भा०

अन्वाचय पु० प्रधानस्य पश्चादन्यः आचीयते बोध्यते यत्र अनु+आ+चि+अच्। उद्देश्यसिद्ध्यानुद्देश्यसिद्ध्यर्थोपदेशे। यथा भिक्षां गच्छ यदि गां पश्येस्ताञ्चानय, अत्र भिक्षायामेव उद्देशः न गवानयने, तत्सिद्ध्युत्तरं गवानयनमनुद्दिष्टमपि साध्यतया निर्दिष्टम्। "चान्वाचये समाहारे" इत्यमरः। "चार्थे द्वन्द्व इति" पा० सूत्रे "समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः" इति सि०कौ०।

अन्वाजे अव्य० अनु-आजयत्यनेन अनु+आ+जि—डे। दुर्ब्बलस्य बलाधाने। बलस्य हि जयहेतुत्वं प्रसिद्धम्। सम्प्रत्यन्तप्रतिरूपकोऽयम्। "उपाजे अन्वाजे इति" पा० वा उपपदसमासे अन्वाजेकृत्येत्यादौ ल्यप्। पक्षे अन्वाजेकृत्वा।

अन्वादेश पु० अनु+आ+दिश—घञ्। पूर्ब्बोपात्तस्य किञ्चित्कार्य्यान्तरं विधातुं पुनरुपदेशे। यथा अनेन व्याकरणमधीतं नृत्यायमेनं प्रपाठयेति नृत्यपाठनार्थं पुनरुपदेशः। कथितकथने, अनुवादार्थे च। "इदमोऽन्वादेशेऽशनुदात्त" इति पा०।

अन्वाधान न० वह्निस्थापनस्य पश्चात् आधानम्। आहित वह्नौ—इध्मैः तिसृणां वा समिधामाधाने। स्थण्डिलादिकरणानन्तरम् "तदभ्युक्ष्याग्निं प्रतिणाय्यान्वाधाय परिसमुहेति" आ०गृ०। सूत्रे हि अग्न्याधानोत्तरं तदाधानमुक्तम्। "अग्नेरन्वाधानमध्वर्युर्यजमानो" वेति कात्या० २,१,२'।

अन्वाधि पु० पश्चात् आधीयते अनु+आ+धा—कि। स्वसमीपे आहितस्य वस्तुनः स्वामिने दानाय परत्राधाने तद्विषये धने च "अर्थमार्गणकार्य्येषु अनृक्थिन् वचनान्मम। दद्यास्त्वमिति योदत्तः स इहान्वाधिरुच्यते इति" कात्या० स०। सन्तत आविः। सन्ततमानव्याधायाम्।

अन्वाधेय न० विवाहस्थे पश्चात् आधेयम् दत्तम्। अनु+आ+धा—यत्। विवाहात् परम् पित्रादिभिः स्त्रीभ्यो दत्तधने स्त्रीधनभेदे "विवाहात् परतोयत्तु लब्धं भर्त्तृकुलात् स्त्रिया अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथेति ना०स०। "बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तद्वाप्नुयुरिति" या०।

अन्वायतन अव्य० आयतनस्य मध्यम् अव्य०। गृहमध्ये इत्यर्थे अनुगतमायतनम् अत्या०स०। गृहानुगते त्रि०।

अन्वायत्त त्रि० अनु+यत—क्त। अनुगते "प्रस्तोतः! या देवता प्रस्तावमन्वायत्ता ताञ्चेदविद्वानिति" "वसवोऽन्वायत्ता" इति च छा०उप०।

अन्वारब्ध त्रि० अनु+आ+लभ—कर्त्तरि क्त लस्य रः। कृतसर्गे "विष्णोः कर्म्माणीति वाचयति यूपमन्वारब्धमिति" का० ६,३,१२, "अन्वारब्धं सृष्टवन्तमिति" वेददीपः। कर्म्मणि क्त। पश्चाद्भागे—सृष्टे, पश्चाल्लग्ने च। "अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु इति" आ०त० या०। "अन्वारब्धेन पश्चाल्लग्नेनेति" रघु०। "द्वाभ्यां पत्नीभ्यामन्वारब्ध" इति बौ० सू०।

अन्वारभ्य त्रि० सह आलभ्यः लस्य रः। सहसृष्टे।

अन्वारम्भ न० पश्चात् आलम्भः लस्य रः। सर्गे अनुपूर्ब्बकलभेर्हि सर्गार्थत्वम्। "अनड्वाहमन्वारभामहे"

इति यजु० ३५,१२ स्वार्थे प्रयोगात्। "अनड्वाहमन्वारभामहे आलभामहे स्वृशाम" इति वेददीप०। [रूढे च।

अन्वारूढ त्रि० अनु+आ+रुह-क्त। अधिरूढे। पश्चादा-

अन्वारोहण न० पश्चात् आरोहणम्। पश्चादभक्तरि मृते पश्चात् सह वा स्त्रियाश्चितारोहणे तच्च "ब्रह्मचर्य्यं तदन्वारोहणं वेति" वि०सूत्रे विहितम् विहितमनुमरणशब्दे।

अन्वासन न० अनु+आस-ल्युट्। अनुपवेशनेन सेवने।

अन्वासित त्रि० अनु+आस-कर्मणि क्त। पश्चादुपवेशनादिना सेविते "अन्वासितमरुन्धत्येति" रघुः।

अन्वाहार्य्य न० मासि मासि आहियते अनु+आ+हृ-कर्मणि ण्यत्। "यच्छ्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत्। आमावास्यां द्वितीयं स्यादन्वाहार्य्यं विदुर्बुधा इति" कात्यायनपरिभाषिते नान्दीमुखश्राद्धे, अमावास्यां मासि मासि कर्त्तव्ये श्राद्धे, दक्षिणायाञ्च "पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधा इति मनुः। "सर्वाण्येवान्वाहार्य्यवन्ति" गोभि०। अन्वाहार्य्यं नान्दीमुखश्राद्धम् दक्षिणा च तदुभयवन्ति। स्वार्थे कन् तत्रैव। "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकमिति" मनुः मासि-मासिकर्त्तव्यश्राद्धस्यानुमासमाहियमाणत्वात् नान्दीमुखस्य संस्कारादौ आहियमाणत्वात्, दक्षिणायाः कर्म्मणां पश्चात् आहियमाणत्वाच्च तथात्वम्।

अन्वाहार्य्यपचन पु० अन्वाहार्य्यं तदर्थाग्निं पच्यतेऽनेन पच+ल्युट्। दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ। "अथ हैनमन्वाहार्य्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति छा०उप०। अन्वाहार्य्यपचनो दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इत्येतमोमम चतस्रस्तनवस्तत्तुर्त्रा अहमन्वाहार्य्यपचनः विभज्य आत्मानं स्थितः इति" भा०। "प्रसिद्धं हि दर्शपौर्णमासयोरन्वाहार्य्यपचने हविः श्रपयन्तीति" आन०गि०। "यस्मिन्नग्नाहुचा वा सान्नाय्या वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयादन्ते दक्षिणां वा हरेयुरनु वा गमयेयुर्दक्षिणा वाहेन हरन्त्यान्वाहार्य्यपचनोभविष्यतीति अनु वा गमयन्ति" इति शत० ब्रा० तस्य निरुक्तिर्दर्शिता।

अन्वाहित त्रि० अनु+आ+धा-क्त। कृताधाने, वह्नौ-प्रक्षिप्तसमिद्विशेषे अन्वारोपिते" आधेःस्वामिनोदानार्थमपरस्य हस्ते निक्षिप्ते च। "अन्वाहितं याचितकमित्यादि वा०"।

अन्विच्छा स्त्री अनु+इष-अ नि०। अन्वेषणे।

अन्वित त्रि० अनु+इण+क्त। अनुगते, युक्ते, सङ्गसम्बद्धे, शाब्दबोधे विशेष्यतानाम्ने च "प्रत्ययार्थान्वितस्यार्थबोधकत्वं प्रत्ययानामिति" न्यायः।

अन्विष्ट त्रि० अनु+इष क्त। अन्वेषिते कृतान्वेषणे। "यद्वायुरन्विष्टमृगेः किरातैरिति कुमा०। कृतानुसन्धाने च "अन्विष्टः स्यात् प्रमातैव यामदोषादिवर्जितः" इति या०भा०।

अन्विति त्रि० इण-क्तिन् नमस्कारेण अनुकूला इतिः यस्य। नत्या अनुकूलताप्राप्ते "अन्वितिरसि दिवे त्वेति" ता० ब्रा०। "अन्वितिः अनुकूलनतिमुक्तोऽसीति" भा०।

अन्वीक्षा स्त्री पश्चात् ईक्षा पर्य्यालोचना प्रा०स०। तदर्थाध्ययनस्य पश्चात् तदर्थनिश्चयार्थं तदर्थपर्य्यालोचने, अन्वीक्षायै हिता ठक्। आन्वीक्षिकी तर्कविद्या। "आन्वीक्षिकी कौशलानामिति" गीता। ल्युट्। अन्वीक्षणमभ्यस्त न०।

अन्वीत त्रि० अनु+इ गतौ कर्त्तरि क्त। अनुगते अन्वितशब्दार्थे

अन्वीप त्रि० अनुगता आपो यत्र स्थानादौ ब्रह्मसमा० अच् आत इत्। अनुगतजले स्थाने, देशे वाच्ये तु "अदनोदेशे" इति पा० जत्, अनूपोदेशः।

अन्वृच अव्य० ऋचि विभ० अव्ययी० अच् समा०। ऋचीत्यर्थे। "त्रिष्टुभश्चान्वाहु तामाशुस्तो बन्धुरुक्तं वेषा-मन्वृचमिति" शत०ब्रा०।

अन्वेष पु० अनु+इष-भावे घञ्। अन्वेषणे अनुसन्धाने गवेषणे "वयं तत्त्वान्वेषान्मधुकर! कृतास्त्वं खलु कृतीति" भक्त०।

अन्वेषण न० अनु+इष-भावे ल्युट्। अनुसन्धाने गवेषणे नष्टद्रव्यस्य दर्शनाय लाभाय वा व्यापारभेदे। "रक्षान्वेषण-दक्षाणां द्विषामाभिमतां ययौ" रघुः।

अन्वेषणा स्त्री अनुगता एषणा "इषेरनिच्छार्थकस्येति" पा० युच् टाप्। तत्त्वानुसन्धाने तर्कादिना ज्ञातपदार्थस्य युक्त्यर्थं युक्त्यादिना समर्थने गवेषणे च।

अन्वेषित त्रि० अनु+एष गतौ-इष-स्वार्थे णिच्-कर्म्मणि वा क्त। गवेषिते, कृतानुसन्धाने च।

अन्वेषिन् अनु+इष-णिनि। गवेषणकर्त्तरि "सौ सीतान्वेषिणौ यद्वं लूनपक्षमपश्यतामिति" रघुः। स्त्रियां ङीप्।

अन्वेष्टव्य त्रि० अनु+इष-कर्म्मणि तव्य। अनुसन्धेये "सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुतिः "अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमात्वस्य भावतः" इति या०भा०।

अन्वेष्टृ त्रि० अनु+इष-तृच् वा इडभावः। गवेषणे

गीले तत्कर्त्तरि च "अनुपदमन्वेष्टा" पा०। इट्पक्षे अन्वेषितायत्व। उभयतः स्त्रियां ङीप्।

अप् स्त्री ब०व०। आप-क्विप् हृस्वश्च। जले। "प्रत्तं जलं इन्द्रजलमित्येकेऽपाम्" भट्टिः। "अद्भिरेव पारयित्वा नैत्यिकान्ते भुञ्जिक्रियेति" स्मृतिः अग्नेरापः, अङ्गेभ्योऽभिति श्रुतिः "अपएव ससर्ज्जादौ तासु बीजमवासृजदिति" मनुः। समासान्ते अच् समासान्तः। "बह्वपानि तड़ानि सारसाः सम्पासते" इत्युद्भटः। कृतसमासान्तस्य उपसर्ग द्वान्तःपरस्य आतश्चित्वम्। समीपं प्रेपम् द्वीपः अन्तरीपम्। अनुपूर्व्वानु देशे वाच्ये जल। अनूपोदेशः अन्यत्र अन्वीपोग्राम इत्यादि। पूजार्थकसुपूर्व्वात् न अच्। स्वाम्मि नगराणि। अपां विकारः मयट्। अम्मयः, वा घ्यञ्। आप्यम्। स्वार्थे चातु० घ्यञ्। आप्यं जले न०।

अप अव्य० न पाति पा-ड। वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्ज्जने, चौर्य्ये च। "अप-वियोग विकृति-विपरीत-निदर्शनानन्द-वर्ज्जन-चौर्य्य-वारणेषु" इति ग०म०। वियोगे "अपयाति 'सत्ये निविशतेऽपैतीति" पा० भा०। "भीत्या रामादपासरत् ?। विकृतौ, अपकृतः अपचयः' विपरीते, अपशब्दः "तएव शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हर्य्युक्तेः साधुशब्दानां वैपरीत्येनोच्चारणएवापशब्दत्वस्य परिभाषितत्वादस्य विपरीतशब्दत्वम्। निदर्शने निदेशे अपदिशति। आनन्दे अपहसति, वर्जने "अपपरी वर्जने" इति पा० उक्तेः कर्म्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी। अपत्रिगर्त्तात् वृष्टोदेवः। चौर्य्ये अपहरति। वारणे अपवर्त्तयति "समेन केनापवर्त्तेति" लीला०। अपकर्षे अपकर्षः। अधः प्रदेशे, च अपाङ् अपानः। अधोगतिमानित्यर्थः।

अपकर्म्मन् न० अपकृष्टं कर्म्म प्रा०स०। दुष्टाचरणे। अपाकरणे च "ऋणस्यानपकर्म्म चेति" दत्तस्यानपकर्म्म चेति स्मृतिः पा०ब०। दुष्टाचरणवति त्रि०। स्त्रियां वा डाप्।

अपकर्त्तृ त्रि० अप+कृ-तृच् स्त्रियां ङीप्। अपकारकारके।

अपकर्ष पु० अप+कृष-भावे घञ्। उचितधर्म्मापेक्षातो हीनतायां, "तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलभवरसोऽत्युत्कर्षापकर्षेण चेति" यथा हि वस्त्रानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेणेति" च सुश्रुतः "उत्कर्षश्चापकर्षश्च मनुष्येष्विह जन्मत इति" मनुः। "उत्कर्षापकर्षविहीनोमध्यः, सि० कौ०। स्वकर्त्तव्यकालात् पूर्व्वकालकरणे, परकृतपदानामन्वयार्थं पूर्व्वकृते आकर्षणे आकर्षणमात्रे च। अपकृष्यते कर्म्मणि घञ्। स्वकालतः पूर्व्वं कर्त्तव्ये यथा अपकर्षसमिद्धनम्। तथा च "सख्यं श्राद्धं मासिमासि अपर्य्याप्तादृतं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाहवेति" स्मृतौ मरणोत्तरं कृताहे मासि मासि कर्त्तव्यानां कृताहनिमित्तकमासिकादीनां द्वादशाहेषु एकाहेषु च कर्त्तव्यत्वोक्तेः सर्व्वापकर्षः। तथाऽपकर्षे च हेतव एकपुत्रत्वादयः। "आनन्त्यात् कुलधर्म्माणां पुत्रस्य चायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहे प्रशस्यते इति" स्मृत्युक्ताः। तत्र पाश्चात्यानां कुलधर्म्मात् द्वादशाह एव कर्त्तव्यतायाः कुलपरम्पराचार। वङ्गीयानान्तु एकपुत्रस्यैव आयुषःक्षयसम्भावनायामिति भेदः। अयमेव सर्व्वापकर्षः, आनश्यकृद्धारम्भकाले तु न सर्व्वापकर्षः। किन्तु, पश्चाद्भाविनामेवापकर्ष इति भेदः। एवं नवममासादिष्वप्यपकर्षणे न सर्व्वापकर्ष इति बोध्यम्।

अपकर्षक त्रि० अपकर्षति अप+कृष-कर्त्तरि ण्वुल्। अपकर्षकारके "रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते" इति 'दोषास्तस्यापकर्षका" इति च सा०द०।

अपकर्षण त्रि० अपकर्षति अपहरति कर्त्तरि ल्यु। अपहारके "नचास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणमिति" "वर्षायां बद्धविन्मूत्रारूक्षाः श्लेष्मापकर्षणा" इति सुश्रु० भावे ल्युट्। आकर्षणे न०। "सशल्यः क्लिश्यते प्राणैर्विशल्योविनशिष्यति। इति मामाविशच्चिन्ता तस्य शल्यापकर्षणे" रामा०।

अपकाम त्रि० अपगतः कामो यस्य यत्र यस्माद्वा प्रा०ब०। अपगतकामे वा उत्तरपदलोपाभावे अपगतकामोऽभ्युक्तार्थे "अपकामं स्यन्दमाना अवीवरत वोऽवितमिति" ऋ० ३१३,१, कामस्यात्ययः अत्यये अव्ययी०। कामात्यये अव्य० "यत्रोरुकामं कृणोति धन्वनेति" ऋ० ६,७५,२, "अपकामं कामस्यात्ययमिति" भा०।

अपकार पु० अप+कृ-भावे घञ्। अनिष्टसम्पादने तद्धेतौ द्रोहे च "द्रोहेऽपकार इति" सि० कौ०। "उपकारापकारौ हि लक्ष्यं लक्षणमेतयोरिति" भाघः। "अपकारोऽनिष्टचिन्ते" मुक्तेरनिष्टं भूयादिति चिन्तने च "ततो जातास्त्विमा घोरा भानारूपा महाविषाः अपकाराय वर्त्तन्ते इति सुश्रुतः।

अपकारगिर् स्त्री अपकारेण द्वेषेण गीर्य्यते गृ-क्विप्। भर्त्सनवाक्ये। "भर्त्सनं त्वपकारगीः" इत्यमरः।

अपकारिन् त्रि० अप+कृ-कर्त्तरि णिनि। अपकारकारके,

अनिष्टचिन्तके' द्रोग्धरि च। "उपकर्त्तारिणा सन्धिर्न मित्रेणापकारिणेति" भाघः स्वयोर्येणैव तान् शिष्यान्मान-वानपकारिण" इति मनुः।

अपकृत त्रि० अप+कृ-कर्म्मणि क्त। यस्यानिष्ट कृतं तस्मिन् कृतद्रोहे "किं मयापकृतं तवेति"। भावे क्त। अपकारे न०। "मित्रस्य चैवापकृते द्विविधोविग्रहः स्मृत" इति मनुः। [द्रोहे च।

अपकृति स्त्री अप+कृ-भावे क्तिन्। अपकारे, अनिष्टचिन्तने,

अपकृत्य न० अपकृष्टं कृत्यम् प्रा०स०। अपकृष्टकर्म्मणि। अप+कृ-भावे क्यप्। अपकारे न०। भावे स्त्रियां क्यप्। अपकृत्या अपकारे स्त्री।

अपकृष्ट त्रि० अप+कृष-क्त। अधमे, हीने, स्वकालात् पूर्व्व-काले कृते, परस्मैपदान्तत्वार्थं पूर्वसूत्रे आकृष्टे, आकृष्टमात्रे च "खेऽपकृष्टा भगणैः प्राङ्मुखंयान्ति भद्रहा" इति सूर्य्यसिद्धान्तः।

अपक्ति स्त्री न पक्तिः अभावार्थे न०त०। पाकाभावे।

अपक्रम पु० अप+क्रम-भावे घञ्। अपयाने। अपक्रमा-दुहैवैषामेतद्भिभयाञ्चकार" शत०ब्रा० ४,३,३,११। अपक्रम्यते यस्मात् अपादाने घञ्। अपयानावधिस्थाने "विच्छिपत्येष विच्छेपं चन्द्रादीनामपक्रमादिति" सू०सि०। "अपक्रमात् क्रान्तिवृत्तस्यसदृग्भोगस्थानादिति" रङ्ग-नाथः। अपगतः क्रमःपरिपाटी यस्मात् प्रा०स०। क्रम-विहीने अक्रमे त्रि० वा उत्तरपदलोपाभावे अपगत-क्रमोऽप्युक्तार्थे त्रि०। क्रमस्यात्ययः अव्ययी०। क्रमात्यये अव्य०। क्त्रि वेट्कत्वात् वा द्वित्वं। अपक्रामोऽप्युक्तार्थे। "यस्यस्याभिक्रान्त्याऽपक्रामाय" इति ऐ० ब्रा०।

अपक्रमण त्रि० अप+क्रम-भावे ल्युट्। अपयाने पलायने च। "अपक्रमणमेवास्य सर्वकामैरहं वृणे" इति रामा०। "पुरस्ताच्चापक्रमणमस्यैवान्विच्छतेति" शत०ब्रा०।

अपक्रमिन् त्रि० अप+क्रम-कर्त्तरि णिनि वेट्कामन्तत्वात् वा ह्रस्वः। अपयानकर्त्तरि "तानेवैतदनपक्रमिणोऽकुरुत" शत० ब्रा० द्वौ अपक्रामीत्यपि स्त्रियां ङीप्।

अपक्रिया स्त्री अप+कृ-भावे स्त्रियां श। द्रोहे, अपकारे च। चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रियेवि" माघः। "जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रिया-मिति" किरा०।

अपक्रोश पु० अप+क्रुश-घञ्। निन्दने। उपक्रोशोऽप्यत्र। भावे ल्युट्। अपक्रोशनेऽप्यत्र न०।

अपक्व त्रि० न पक्वः। अपरिणते अपक्वयोगी अपरिणतयोगी यथा योगाभ्यास उचितः तथाभ्यासशून्यः इत्यर्थः। आमे तण्डुलफलादौ च। "अपक्वेन धर्त्तव्यं फलमूलादि-नापि वेति" स्मृतिः।

अपक्ष त्रि० नास्ति पक्षो गरुत् यस्य। पक्षशून्ये उड्डयन-शक्तिशून्ये च। पक्षः सहायः। तच्छून्ये।

अपक्षपात पु० पक्षे सहायतायां पातः आनुकूल्यम् अभा-वार्थे न० त०। पक्षपाताभावे सहायताऽकरणे। "अपक्षपातात् वक्तव्यं सभायामिति निश्चय इति" नीति०।

अपक्षपातिन् त्रि० पक्षे सहायतायां पतति पत णिनि ७०त० ततः न०त०। पक्षपातिभिन्ने यथार्थवादिनि।

अपक्षेपण न० अप-क्षिप-ल्युट्। अध.स्थानसंयोगहेतौ क्रियाविशेषे, अधःपातने च। अपक्षेपणमस्यार्थे। उत्-क्षेपणं तथापक्षेपणमाकुञ्चनं तथा प्रसारणञ्च गमनं कर्म्मा-ण्येतानि पञ्च चेति" भाषा० अवक्षेपणमिति वा पाठः।

अपगण्ड पु० गण्डोवृद्धौ वैपरीत्यार्थेनञा अपशब्देन प्रा०स०। अतिबाले अपोगण्ड इति हैम०। अपोगण्डशब्दे विवरणं द्रष्टव्यम्। [भावे घञ्। तत्रार्थे पु०।

अपगत त्रि० अप+गम-कर्त्तरि क्त। अपयाते पलायिते च।

अपगम पु० अप+गम-भावे घञ् न वृद्धिः। अपयाने अप-सरणे। "निद्रापगमहेतुभ्यो विबोधस्येतमागम" इति सा०द०। "पुराणपत्रापगमादनन्तरं लतेव सञ्जघ्नमनोज्ञ-पल्लवेति" रघुः।

अपगर पु० अप+निन्दार्थे गॄ-भावे अप्। निन्दने। "अन्य-दन्तर्वेदीत्युपक्रम्य "अभिगरापगरौ" कात्या० १२,३,३, "अपगरोनिन्देति" तद्व्या०।

अपगा स्त्री अपगच्छति निष्यन्दते अप+गम ड। आप-गायाम् नद्याम्। अपयानकर्त्तरि त्रि०।

अपगा(गो)रम् अव्य० अप+गुरी-उद्यमने घञ् एव आङ् वा। उद्यम्येत्यर्थे "अस्रपगारम् अस्रवगोरं वेति" सि०कौ०।

अपगोह पु० अप+गुह-घञ्। तिरोधाने गोपने च। "य विज्ञानपगोहं कर्णीनामाविर्भवन्ति" ऋ० २,१५,७, "अपगोहं तिरोभावमिति" भाष्यम्।

अपघन पु० अपहन्यते संहृत्य कर्म्म कृत्वा वियुज्यते अप+हन-अप् घनादेशः। शरीरे, हस्ताद्यवयवे च। शरीरादि हि पुरुषोपभोगाय प्रथमं संहृत्य तत्तत्कर्म्म निष्पाद्य भोगाद्दृष्ट-त्वे पुनर्वियुज्यते इति तस्य तथात्वम्। देहादेः संहृत्य

कारित्वं च पातञ्जलादौ दर्शितं यथा। "परार्थं संहत्य कारित्वादिति" पात०। इतरसाहित्येनार्थक्रियाकारित्वं संहत्यकारिता, संहननञ्च आरम्भकसंयोगभेदः। तथा च देहादिकं परार्थं (स्वेतरस्य भोगापवर्गफलकम्,) संहतत्वात् शय्यासनादिवदित्यनुमानप्रयोगः। अतएव सांख्यसूत्रे "संहतपरार्थत्वादिति" संहन्तृसिद्धिरुक्ता। संहतानां देहादीनां स्वेतरस्य भोगादिफलकत्वात् संघातातिरिक्तः पुरुषोऽनुमीयते नहि अचेतनानां देहादीनां स्वतः संघातः सम्भवति अतः संघातसिद्धये पुरुषसिद्धिरिति समुदितार्थः। "संयोगाश्च विभागान्ता" इत्युक्तेः संयोगभेदरूपसंहननस्यावश्यं वियोगान्तत्वात् देहादीनां तदवयवानाञ्च क्रमेणारम्भकसंयोगनाशेन परस्परवियोग इत्यतोऽङ्गादेरवश्यवियोगवत्त्वात् तथात्वम् अतएव "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण" इति गीतायामारम्भकसंयोगनाशपूर्व्वकपरस्परवियोगेन नाश उक्तः। "लौहोद्वनघनस्वभ्रा लिताप्यघनां स्त्रियमिति" भट्टिः। अपगतोघनोमेघो यस्मात् प्रा०ब० वा गतलोपः। मेघावरणशून्ये त्रि० वा गतलोपाभावे अपगतघनोऽप्युक्तार्थे। [मरुणे च।

अपघात पु० अप–हन–भावे घञ्। अपकृष्टहनने दुष्टहेतुक-

अपघातक पु० अपहन्ति अप+हन–ण्वुल्। विनाशके। "जिज्ञासा तदपघातके हेतौ" सा०का० पाठान्तरम्।

अपघातिन् त्रि० अप+हन–कर्त्तरि णिनि। अपहननकर्त्तरि स्त्रियां ङीप्।

अपच पु० न पक्तुं शक्तः पच–"अचकावशक्तावितिवुन्" पा०। अच्। पक्तुमशक्ते। "अपचः पक्तुमशक्त" इति सि०कौ०।

अपचय पु० अप+चि भावे अच्। हानौ, अपहरणे, व्यये च।

अपचरित न० अपकृष्टं चरितं प्रा०स०। अपकृष्टचरिते सदोषाचरणे, "आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधामिति" शकु०।

अपचार पु० अप+चर–भावे घञ्। अहिताचरणे अपथ्यसेवने "कृतापचारोऽपि परैरनाविष्कृतविक्रियः। असाध्यं कुरुते कोपं प्राप्ते काले गदो यथेति" माघः। "अपचारः अपकारः अपथ्यञ्चेति" मल्लि०। "योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैरिति" वैद्य०। वैपरीत्यादिहेतुकदोषे "नापचारमगमन् क्वचित् क्रिया" इति माघः। "अपचारं लोपविपर्य्यासादिदोषमिति" मल्लि०। विनाशे च "मङ्क्षुरे विध्यपचारदोष" इति किरा०। "अपचारः कर्म्मलोपदोष" इति मल्लि०। "सुङ्गापचारे माषप्रतिनिधाविति" मीमांसा। अपकर्म्मणि च "गूहमानाऽपचारं सा बन्धुपक्षभयात्तदा" भा०आ० प० १११ अ०।

अपचारिन् त्रि० अप+चर-तच्छीलार्थे कर्त्तरि णिनि। अपकर्म्मकरणशीले स्त्रियां ङीप्। "पत्यौ भार्य्यापचारिणीति" मनुः। "भार्य्या अपचारिणी व्यभिचारिणी जारपतिं क्षममाणे भर्त्तरि पापं संश्लेषयतीति" कुल्लूकभट्टः।

अपचिकीर्षा स्त्री अपकर्त्तुमिच्छा अप+कृ–सन्-भावे स्त्रियाम् अ। अपकर्त्तुमिच्छायाम्। [कारकरणेच्छावति।

अपचिकीर्षु त्रि० अपकर्त्तुमिच्छुः अप+कृ–सन्–उ। अप-

अपचित् त्रि० अप+चि–क्विप्। अपचयकारके। "इतस्ताः सर्वानश्यन्तु बाधका अपचितामिव" अथ०६,२५,१।

अपचित त्रि० अपचाय्यते आनन्देन पूज्यते चाय–पूजनादौ क्त चायतेश्चिः अपगतश्चयानन्दपूर्व्वकत्वम्। आनन्देन पूजिते। पूजितो हि आनन्दपूर्व्वकं पूज्यते। अप+चि–क्त। जातापचये अवयवाद्यपचययुक्ते, हीने, व्यथिते च। "तत्रापचितबलाः प्राणिनोभवन्ति" सुश्रुतः।

अपचिति स्त्री० अप+चाय–क्तिन् चायतेश्चिः। पूजायाम् "विहितापचितिर्महीभृता" इति माघः। अप+चि–क्तिन्। अपचये हीनतायाम्, अपचयरूपभावविकारभेदे च।

अपची स्त्री अपकृष्टं पच्यतेऽसौ पच–कर्म्मकर्त्तरि अच् अप्राशुन्ये न०त० गौ० ङीष्। गण्डमालोपरिजाते रोगभेदे "अथातोऽग्न्यपच्यर्व्वुदगण्डमालानां निदानं व्याख्यास्याम" इत्युपक्रम्य "अनन्यवर्ण्यैरुपचीयमानं चयप्रकर्षादपचीं-वदन्ति कण्डूयनान्तेऽल्परुजाः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये" इति सुश्रुते तल्लक्षणमुक्तम्। "ते ग्रन्थयो केचिदनाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति केचिदिति" वै० "नाड़ीं कफानिलकृतामपचीं व्रणांश्चेति" अपचीं गण्डमालां च ग्रहणीं गोपथमेव वेति" च सुश्रुतः। [यमाणे।

अपचीयमान त्रि० अप+चि–कर्मकर्त्तरि शानच्। अपचो-

अपच्छाय पु० अपगता देहच्छाया कान्तिर्यस्य प्रा०ब० वा गतलोपश्च। देवे देहच्छायाशून्यत्वात्तेषामपच्छायत्वम्। अतएव "भजन्तु रूपं कियदस्य देवाश्छाया नखस्यास्ति तथापि नैषाम्। इतीरयन्तीव तथा निरैक्षि सा (छाया) नैषधे नत्वमरेषु तेषु" इति नैषधे देवानां छायाराहित्यं लक्षणत्वेन वर्णितम्। अपगतकान्तौ त्रि०।

अपच्यव पु० अप+च्युङ्–गतौ भावे अप्। अपसरणे निर्गमने

"यत्र नार्य्यपच्यवमुपच्यवञ्च शिक्षते" इति ऋ० १,२८,३ "अपच्यवं शालायानिर्गममिति" भा० । अप--च्यु--ल्यटे, अप् । अपच्यरणे । [च्यरिते च ।

अपच्युत त्रि० अप+च्यु-कर्त्तरि क्त । अपच्ययप्राप्ते नष्टप्राये-

अपजगुराण त्रि० अप+गृ-यङ् लक्-ताच्छील्ये चानश् । आच्छादनादिमोचनशीले "जिगर्त्तिमिन्द्रो अपजगुराण" इति ऋ० ५,२९,४, ।

अपञ्चीकृत त्रि० अपञ्चात्मकं पञ्चात्मकः कृतः न०त० । पञ्चात्मकतामनासादिते सूक्ष्मभूते, पञ्चीकारप्रकारस्तु पञ्चीकरणशब्दे वक्ष्यते "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" वेदा० प० ।

अपजय पु० अप+जि-भावे अच । पराजये ।

अपटान्तर त्रि० पटेन तिरस्करिण्या अन्तरमत्र न०त० । अव्यवहिते, आसन्ने, संसक्ते च । अपटान्तरमित्यव्ययत्वेनार्थे ।

अपटी स्त्री अल्पः पटः पटो न०त० । (कानात्) इति ख्याते काण्डपटे वस्त्रप्रावरणे स च "दूष्याधोलम्बिवायुसञ्चारार्थः पटभेदः" इति मल्लिनाथः ।

अपटीक त्रि० नास्ति पटी यस्य कप् । प्रावरणपटशून्ये, अपगता टीकाव्याख्यायन्योयस्य । टीकाज्ञानशून्ये, "अपटीकोजड़ोमाषे भक्षं जाड्येन ताड्यते" इत्युद्भटः ।

अपटीक्षेप पु० अपट्याः काण्डपटस्य क्षेपः । प्रावरणपटक्षेपे । नाट्ये हि प्रावरणपटे अनैशराज्ञिप्रे एव पात्रप्रवेशोऽभिनयसम्प्रदायस्तमुल्लङ्घ्य पात्रेण यत्र काण्डपटं स्वयं क्षिप्त्वा प्रविश्यते तेन चाक्षिप्तत्वं तत्प्रवेशस्य गम्यते । एतत्प्रयोगश्च भूरिशो नाटकेषु ।

अपटु त्रि० पटुर्न्नः न०त० । रोगिणि, दक्षतारहिते, कार्य्याक्षमे, दक्षताविरोधिमन्दत्वे च । भावे त्व अपटुत्वम् । अपाटवे । तल् । अपटुतायामेव त्वान्तं न०तलन्तं स्त्री । गुणवचनत्वात् इमनिच् । अपटिमा तत्रैव पु० ।

अपण्य त्रि० न पण्यः विक्रेयः अप्राशस्त्ये न०त० । सूत्रादिनिषिद्धविक्रये पदार्थे । प्रायश्चित्तसहितानि अपण्यानि च प्रायश्चित्तविवेके दर्शितानि यथा

विष्णुः । क्षौद्रक्षीरकृतान्नगुड़गन्धमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् । रक्तः सिन्दूरवस्त्रादि । एतत् सकृद्विक्रये पैठीनसिः । "तथाऽविक्रेयाणि ब्राह्मणस्य लवणं पक्वान्नं मधुरक्षीरं दधि घृतसूदकं सर्व्वगन्धौषधान्नारक्तवासो गुड़लवणं पीलुपण्यूनामेकशफाः केशिनः । सर्व्वे चारण्याः पशवोविद्यापूर्त्तेभ्यः गावः शङ्खचोर्णा चेति विक्रयेण तेषामेकैकस्मिन् प्राजापत्यञ्चरेत्" । तथाच्यवनः "दधिमधुच्छिष्टसर्पिःपक्वान्नतिलतक्रक्षीरमविषतिलाम्बरीलोकौर्द्यशमीलाक्षारमलवणविक्रये प्राजापत्यञ्चरेत् । एतच्चाभ्यासविषय तत्र धेनुरेका दातव्या । हारीतः । " लाक्षालवणमांसतैलक्षीरदधिघृततक्रगन्धचर्म्मरक्तवाससामेकतमविक्रये चान्द्रायणम्" तथा शातातपः । "आममांससुरासोमलाक्षालवणसर्पिषाम् । विक्रये सर्व्वपण्यानां द्विजश्चान्द्रायणञ्चरेत्" । एतच्चाल्पाभ्यासे चान्द्रायणे चाष्टधेनवः । भविष्यपुराणे । "गुड़ं तिलांस्तथा नीलीं क्षौद्रगोधूमकल्यकाः । विक्रये ब्राह्मणोऽपाङ्क्तं मासेनापनयेत्" । एतद्बहुतराभ्यासे सान्तपने धेनुद्वयम् । हारीतः "अयोस्त्रिकोशिकेशरिणाञ्च धेन्वनडुद्गजगवाश्वविक्रये तप्तकृच्छ्रविधिः । किञ्जुगुग्गुलुरसमर्जरसहरितालमनःशिलागैरिकाञ्जनलवणमणिमौक्तिकप्रवालटङ्कणखगुक्तिशङ्खचेलुकीयवसूकरमयविक्रये च । आरामतड़ागोदपानपुष्करिणीपूर्त्तसुहृद्विक्रयेषु त्रिषवणस्नाय्यधःशायी चतुर्थकालभुक् संवत्सरेण पूतोभवतीति" । आरामादिनिखिलविक्रये हेतुरतिदिधर्म्मप्रदीपः । तथा "हीनोन्मानमापनसङ्कीर्णविक्रये च" । अत्र च कामाकामसकृदभ्यासामेलयावैषम्यदोषः समर्थनीयः । हीनमानोन्मानमापनं तुलादंनाङ्कुरसङ्कीर्णत्वं द्रव्यद्रव्येण । विष्णुः "प्राणिभूपुष्पशाकमूलचर्म्मविदलतृणकार्पासकोशभस्मास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यम्" । विदलः माषचितवंशादिनिर्म्मितः । तथा "श्लेष्मजतुमधुच्छिष्टशङ्खशुक्तिवपुषीशकक्षणलोहोदुम्बरखड्गपात्रविक्रयी महासान्तपनम्" । श्लेष्मा चर्म्मविकारः वरट्टेति यस्य पर्य्यायः । महासान्तपने धेनुद्वयम्, शमन्तः "देवर्षिसोमचैत्रप्राचापत्यशूपोदपानदारात्मनां विक्रये कृच्छ्रद्वयम् । घृततिलतैलरक्तवस्त्रपक्वान्नानां प्राजापत्यंचरेत् । गोविक्रयनिन्दामाह यमः । "गवां विक्रयकारी च यावतीर्लोमानि यानि तु । तावद्वर्षसहस्राणि गवां लोके क्रमिर्भवेत्"॥ यत्तु मनुनोक्तं सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयीति, तन्निन्दातिशयार्थम् । गौतमः । "पशवः हिंसायोगे" अस्यार्थः यत्र विक्रीताः सन्तः पशवोहिंसायां तत्र तेषामप्यपण्यत्वम् । यानि चान्यानि गुरुतरप्रायश्चित्तबोधकवचनानि तानि बहुतरकालाभ्यासे समूहानि गुरुत्व त्वत्वलाघवादि दोषाभावमाह पराशरः । "लवणं मधु मद्यं वा दधि तक्रं घृतं

पयः। न दुष्येत् शूद्रजातीनां कुर्य्यात् सर्वेषु विक्रयम्" ॥ कालिकापुराणे। "विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक् ॥ मधुचर्मसुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्" । एतदभ्यायहि, दोषापवादमाह गौतमः। "विनिमयस्तु रसानां रसैः पशूनाञ्च लवणक्षताक्षयोस्तिलानाञ्च समेनामेन पक्वस्य संयत्यर्थे"। पशूनां समानजातीयैरसमानजातीयैर्वा पशुभिरेव परिवर्त्तो न तु द्रव्यान्तरेण। पक्वान्नस्य चामेन तण्डुलादिना तावत्परिमितेनेत्यर्थः। अत्र समशब्दादन्यद्रव्यपरिवर्त्ते न नियमः। मनुः "रसारसैर्विमातव्या नत्वेव लवणं रसैः। घृतान्नञ्चाहृतान्नेन तिलधान्येन तत्समाः" ॥ वशिष्ठः "रसारसैः समतोहीनतो वा विमातव्या नत्वेव लवणं रसैः तिलतण्डुलपक्वान्नविद्यामनुष्यान्च विहिताः परिवर्त्तकेन" । नारदः। "अगदौ भेषजस्यार्थे यज्ञहेतोस्तथैव च। यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः" ॥ एतेन 'कामं सुतप्राद्य क्षयान्तु स्वयमेव क्षेत्रबलः। विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिरस्थितानिति" मनुवचनम् तिलविनिमयपरम् ॥

अपतन्त्रक पु० अपगतं तन्त्रं भिषजामधीनता यत्र कप्। वातरोगभेदे "वायुरूर्द्धं व्रजेत् स्थानात् कुपितो हृदयं शिरः। सन्धौ च पीड़यत्यङ्गान्याक्षिपेन्नमयेच्च सः। निमीलिताक्षो निश्चेष्टस्तब्धो वापि कूजति। निरुच्छ्वासोऽथ वा क्षच्छ्वाद्दुच्छ्वस नष्टचेतनः। स्वस्थः स्याद्धृदये शुद्धे आक्षेपे च प्रमुह्यति। कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रक इति" सुश्रुते २५५ पृ० तल्लक्षणमुक्तम्। "अपतन्त्रकातुरं नापतर्पयेदिति" सुश्रुतः।

अपतर्पण न० अप+तृप-भावे ल्युट्। रोगादौ-उपवासे, तृप्त्यभावे च। "अपगतं तर्पणं यस्य वा गतलोपः तर्पणशून्ये त्रि० "क्रियाभिश्चिकित्सेत् स्थूलमपतर्पणं सुक्ताभिरिति" सुश्रुतः।

अपतानक पु० अपक्रम्य अन्तरान्तरा तनुते तन कर्त्तरि-ल्युट्। वातरोगभेदे "यदा तु चमनीः सर्व्वाः कुपितोऽभ्येति मारुतः। तदाक्षिपत्याशुसुङ्मुखदैहं सुदुस्वरः। सुदुर्मुक्तस्तदाक्षेपादाक्षेपक इति स्मृतः। सोऽपतानकसंज्ञोयः पातयत्यन्तरान्तरेति सुश्रुते आक्षेपकवातरोगस्यैवान्तरान्तरापतने अपतानकसंज्ञा" सु०२५४पृ०कृता "अभिघातनिमित्तश्च शोणिताभिस्रवाच्च यः। गर्भपातनिमित्तश्च न सिध्यत्यपतानक" इति तत्रैव तस्याप्राध्यतोक्ता "अभुक्तवता पीतमद्यदधिसरिचवचायुक्तमनपतानकं हन्ति तैलसर्पिर्वसाक्षौद्राणि चेति" सुश्रु०।

अपत्नी स्त्री नास्ति पतिर्यस्याः "विभाषा सपूर्व्वस्येति" पा०वा न ङीप् च। पतिरहितायां स्त्रियाम्। पत्नेः अपतिरित्यपि कपि तु अपतिकेत्येव तत्रैवार्थे।

अपत्नीक पु० नास्ति सन्निकर्षे कर्म्मयोग्या, मृता वा पत्नी यस्य कप्। असन्निहितपत्नीके, कर्म्मायोग्यपत्नीके, मृतपत्नीके च। "अपत्नीकस्याहवनीये तच्छ्रापिणः" कात्या० २.५, १८। "अपत्नीकस्य रजोदोषप्रसवप्रवासादिना असन्निहितपत्नीकस्य तच्छ्रापिण आहवनीयश्रापिणः आहवनीये हविःश्रपणं कुर्व्वतो यजमानस्य "आहवनीये आज्यमधिश्रयती" त्युक्तेः। आहवनीयश्रापिणोऽपि सन्निहितायां पत्न्यां गार्हपत्य एवाज्यमधिश्रयति, शास्तान्तरे चैवं श्रूयते 'यस्य व्रतेऽहनि पत्न्यनालंभुकी (रजस्वला) स्यात्तामनवरुध्य यजेतेति"। केचित् अपत्नीको मृतपत्नीक इत्याहुः तस्याप्येकाकिन एवाधानं श्रूयते आश्वलायनब्राह्मणे, "पत्न्यां मृतायामग्निभिर्दग्धायां पुनर्विवाहासम्भवे आत्मार्थमग्न्याधानमाहापस्तम्बः दर्शपौर्णमासाप्रयणार्थं, शेषाणि कर्म्माणि न भवन्तीति" तथा तिकाण्डे मण्डनः 'तस्मान्नग्नेरकेदेशेन दग्धव्या पूर्व्वमारिणी पत्नी ज्येष्ठेतरा वापि यज्ञपार्श्वे निरूपितम्" ॥ कात्यायनः (कर्मप्रदीपे) 'मृतायामपि भार्य्यायां वैदिकाग्नीन्नहि त्यजेत्। उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति"। तद्व्या०(उपाधिना स्वर्णादितत्प्रतिमूर्त्त्या)'। नास्ति पत्नी सहिता यस्य कप्। पत्नीसाहित्यरहिते। "पित्र्यश्चसुपक्रम्य"। "अपत्नीकः" कात्या०५.७.५। "पित्र्यश्चो भवति केवलस्यैकाकिनो यजमानस्यैवाधिकारो न तु पत्नीसहितस्य। अतोऽत्र पत्न्याः प्रतिषेधात् "पत्नीं सञ्चहयेति प्रैषस्याभावः। आज्यावेक्षणं त्वाज्यसंस्कारत्वादध्वर्युः करोतीति" तद्व्या०।

अपत्य न० न पतन्ति पितरोऽनेन पत-वा करणे यत् न०त०। पुत्रदुहितृरूपे संताने। "नापुत्रस्य लोकोऽस्तीति श्रुतेः पुत्राभावे स्वर्गादिलोकानुत्पत्तेः "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपमिति" या० स्मृतेश्च तदुत्पादने स्वर्गलोकलाभोक्तेः "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र" इति स्मृत्या नरकनिस्तारकत्वस्य श्रुतेश्च सुतादीनां पतनाहेतुत्वात् तथात्वम् पौत्रादीनामपि पतनाहेतुत्वात् अपत्यत्वम्। अतएव "अपत्यं पौत्रप्रभृति गोत्रमिति" पा० सूत्रे पौत्रादीनामप्यपत्यत्वमुक्त्वान्यतोक्ता। पौत्रादीनां तु गोत्रसंज्ञापीति विशेषः। "अपत्यं पितुरेव स्यात् ततः

प्राचामपोति चेति" सि० कौ० का० । "अपत्यैरिव नीवार-भागधेयोचितैर्ग्रामैरिति" रघुः । "सोऽपत्यं भ्रातुरुत्पाद्येति" "अपत्यलाभात् वा तु स्त्रीति, "अपत्यं धर्मशुश्रूषेति" च मनुः ।

अपत्यदा स्त्री० अपत्यं तद्धेतुं गर्भं ददाति । सेवनेन गर्भ-दायके ओषधिविशेषे गर्भदायिविद्यादौ च । अपत्यदायि-मात्रे मन्त्रादौ त्रि० ।

अपत्यपथ पु० अपत्यस्य गर्भात् तन्निसारणस्य तदुत्पत्तेश्च पन्थाः अच् समा० । प्रसवनिःसारणद्वारे स्त्रीणां गुह्य-स्थानभेदे "स यदा विगुणानिलपीडोऽपत्यपथमनेकधा-प्रतिपद्यते इति" स्त्रीणान्तु विंशतिरधिका, दश तासां स्तनयोरेककस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः । अपत्यपथे चतस्र इति" । "तिर्य्यगायतस्य परिघस्येव तिर-श्चीनस्य पार्श्वादूर्द्धमूर्द्धमुत्क्षिप्य गर्भमपत्यपथं प्रत्यार्ज्जवमानी-यापहरेत् पार्श्वापवृत्तशिरसमसंप्रपीड्य ऊर्द्धमुत्क्षिप्य शिरो-ऽपत्यपथमानीयापहरेदिति" च सुश्रुतः ।

अपत्यघ्न स्त्री अपत्यं यत्तुर्गर्भभेदनेन नाशकं यस्याः । कर्क-ट्याम् सा हि गर्भेऽपत्यजनने तन्निःसारणसमये गर्भस्फोट-नान्म्रियते इति" लोकप्रसिद्धेः "स्वनाशाय कर्कटी गर्भं धत्त इत्युक्तेश्च तथात्वम् । दैत० । अपत्यनाशके, कर्कटे सर्पे च ।

अपत्यसाच् पुंस्त्री० अपत्यैः सचते संबध्यते सच-क्विप्-खिञ् । अपत्यसमवेते । "अपत्यसाचं श्रुत्यं रराधाम्" ऋ० १, ११७,२३ ।

अपत्र पु० नास्ति पत्रं दलं पक्षोवास्य । वंशकरीरे (कोड़) अङ्कुरे च तदवस्थायां तयोः पत्रशून्यतयोत्पत्तेस्तथात्वम् । गलितपत्रे वृक्षे, गलितपक्षे विहगे च ।

अपत्रप त्रि० अपगता त्रपा लज्जा यस्मात् प्रा० ब० वा गतलोपः । लज्जाहीने लोपाभावे अपगतत्रपोऽप्युक्तार्थे ।

अपत्रपा स्त्री अपरम् अपेक्ष्य त्रपा, अप+त्रप-भावे स्त्रियाम् अ वा । अन्यहेतुकलज्जायाम् लज्जामात्रे च । "अपत्रपा चेतसि च न्यषेधदिति" नैषधम् । [लज्जाशीले ।

अपत्रपिष्णु त्रि० अप+त्रप-ग्लार्थे ष्णुच् । स्वभावतो

अपथ न० न पन्थाः अप्राशस्त्ये न०त० । "अपथं" पु०न० पा० । "विभाषेति" पा० वा अच् समा० । अपकृष्टपथे निन्दितपथे कुपथे । "धनागमे राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते" इति नै० । "को वा न पद-मपथेऽकार्षीत मया" इति प्रबोध० । "अथैतदपथमिवैति यदेतादृशमिति" शत० ब्रा० । नास्ति पन्थाः सुन्दरमार्गो यत्र ब० अच् समा० । सुन्दरपथशून्ये ग्रामादौ त्रि० । पथोऽभावः अव्ययी० अच् समा० । मार्गाभावे अव्य० ।

अपथिन् पु० न पन्थाः अप्राशस्त्ये न०त० वा अजभावः । अपकृष्टपथे ।

अपथ्य न० पथ्ये वैद्यकोक्तभोजनादिनियमाय नीत्युक्ताचाराय वा हितम् यत् न०त० । वैद्यकोक्तसुश्रुते, अनिष्टे भोजनादौ अहिताचारे च "अकार्य्यं कार्यसङ्काशमपथ्यं पथ्यसम्मितम्" रामा० । "संतापयन्ति किमपथ्यभुजं न रोगा" इति वै० । पथ्यापथ्ये च सुश्रुते दर्शिते यथा "अथातो हिताहितीयमध्यायं व्याख्यास्यामः । यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद्द्रव्य-मेकान्तेन हितमहितं वास्तीति" कैश्चिदाचार्य्या ब्रुवते तत्तु न सम्यक् । इह खलु यस्माद् द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति । तत्रैकान्ताहितानि जातिसात्म्यात् सलिल-हतदुग्धौदनप्रभृतीनि । एकान्ताहितानि दृष्टनष्टभ-क्षणादिषु प्रसक्तान्यग्निसारविषादीनि । संयोगादप-राणि विषतुल्यानि भवन्ति । हिताऽहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्व्वप्राणिनामयमाहारार्थो वर्ग उपदिश्यते । तद्यथा रक्तशालिषष्टिकगोधूमकलाय-मुद्गकपोतकपीतकप्रमोदककालकाशनकपुष्पकवर्टमकशण-हतसुगन्धककलमशीवारकोद्दालकश्यामाकगोधूमवेणुयवा-दयः । एणहरिणकुरङ्गवराहशशादंष्ट्राकरालकङ्क-कपोतलावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकादीनां मांसानि । सुद्गवनमुद्गमकुष्टकलायमसूरमङ्गल्यचणकहरेणुवाढकीसतीनाः। चिल्लीवास्तूकसुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः । गव्यं घृतं सैन्धवदाडिमामलकमित्येष वर्गः सर्वप्राणिनां सामान्यतः पथ्यतमः । तथा ब्रह्मचर्य्या-निवातशयनो-ष्णोदकनिषादप्रव्यायामाश्चैकान्ततः पथ्यतमाः । एकान्त-हितान्येकान्ताहितानि प्रागुपदिष्टानि ॥ हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति ॥ संयोगतश्चापथ-राणि विषतुल्यानि भवन्ति । तद्यथा । वल्लीफलकवक-करीराम्लफलदधित्थकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्क-शाकाजाविकमांसमद्याम्लवल्लिविषमलवणगोधावराहांश्च नैकध्यमश्नीयात् पयसा ।

रोगं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान् । अनेक्ष्या-न्यादिकान् भावान् रोगहेतोः प्रयोजयेत् । अवस्थान्तर-

जाङ्गलाद्योगादीनां व्यवस्थितम् । द्रव्यं नेच्छन्ति भिषज इच्छन्ति खल्वरक्षणे । द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः । दुग्धस्यैकान्तहितता विषमेकान्ततोऽहितम् ॥ एवं युक्तरसाद्येषु द्रव्येषु सलिलादिषु । एकान्तहितता विद्धि वत्स ! सुश्रुत ! नान्यथा ॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः ॥ न च विरूढधान्यैर्व्यसामधुघृतगुड़माषैर्वा यवान्नपूपोदकपिण्याकादीनि चाश्नीयादहरेत् । न पयोमधुभ्यां रोहिणीशाकं जातु शाकं वाश्नीयात् । बलाकां वारुणीकुल्माषाभ्याम् । काकमाचीं पिप्पलीमरिचाभ्यां, नाड़ीभङ्गशाकाकुटदधीनि च नैकध्यम् । मधु चोष्णोदकानुपानं पित्तेन वा मांसानि । सुराक्षीरपायसांश्च नैकध्यम् । सौवीरकेण सह तिलशष्कुलीम् । मत्स्यैः सहैतुविकारान् । गुड़ेन काकमाचीं, मधुना मूलकं, गुड़ेन वाराहं, मधुना च सह विरुद्धम् । क्षीरेण मूलकम् । आम्बजाम्बवश्वाविच्छूकरसगोधाश्च सर्व्वांश्च मत्स्यान्विशेषेण चिलिचिमं पयसा । कदलीफलं तालफलेन, पयसा, दध्ना, तक्रेण वा । लकुचफलं पयसा, दध्ना, माषसूपेन वा मधुना, घृतेन च प्राक् पयसः पयसोऽन्ते वा ।

अतः कर्म्मविरुद्धान् वक्ष्यामः ॥ कपोतान् सर्षपतैलभृष्टान्नाद्यात् । कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात् । कांस्यभाजने दशरात्रपर्य्युषितं सर्पिर्म्मधु चोष्णैरुष्णे वा । मत्स्यपरिपचने घृतक्षीरपरिपचने वा सिद्धां काकमाचीम् । तिलकल्कसिद्धसुपोदिकाशाकम् । नारिकेलेन वराहवसापरिभृष्टां बलाकाम् । भासभृङ्गारशूल्यं नाश्नीयादिति ॥

अतो मानविरुद्धान् वक्ष्यामः ॥ मध्वम्बुनी मधुसर्पिषी मानतस्तुल्ये नाश्नीयात् । स्नेहौ मधुस्नेहौ जलस्नेहौ वा विशेषादान्तरीक्षौदकानुपानौ ।

अत ऊर्द्धं रसवीर्य्यविपाकतश्च विरुद्धानि वक्ष्यामः । तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च मधुरकटुकौ च सर्व्वतः । मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ललवणौ रसतः । अम्लकटुकौ रसविपाकाभ्यामम्लतिक्तावम्लकषायौ च सर्व्वतः । लवणकटुकौ रसविपाकाभ्यां लवणतिक्तौ लवणकषायौ च सर्व्वतः । कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः । तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत् । भवन्ति चात्र ॥

विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः । तान्येकान्ताहितान्येव शेषं विद्यादितात्हितम् ॥ व्याधिमिन्द्रियदौर्ब्बल्यं मरणञ्चाधिगच्छति । विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः ॥ यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायाच्च निर्हरेत् । रसादिष्वयथार्थं वा तद्विकाराय कल्पते ॥ विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् । वमनं शमनं वापि पूर्ब्बं वा हितसेवनम् ॥ सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च । स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥ व्यायामशीलो बलवान् शिशुश्च स्निग्धोऽग्निमांश्चापि भक्षयेच्च । आप्नोति रोगान्न विरुद्धजातानभ्यासतो बाल्यतया च जन्तुः । अथ वातगुणान् वक्ष्यामः ॥

पूर्ब्बः समधुरः स्निग्धो लवणश्चैव मारुतः । गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः ॥ क्षतानां विषजुष्टानां बलिनः श्लेष्मलाश्च ये । तेषामेव विशेषेण सदा रोगविवर्द्धनः ॥ वातलानां प्रशस्तश्च आढ्यानां कफशोषिणाम् । तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः ॥ मधुरस्त्वविदाही च कषायानुरसोलघुः । दक्षिणो मारुतः श्रेष्ठस्त्वग्घो बलवर्द्धनः । रक्तपित्तप्रशमनो न च वातप्रकोपणः ॥ विषदो रूक्षपरुषः खरः स्नेहबलापहः । पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः । सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम् ॥ उत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च । कषायानुरसः शीतो दोषाणामप्रकोपणः ॥ तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्द्धनः । क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः" इति सु० १,२० ।

अपद् त्रि० न पद्यते ज्ञायते पद–कर्म्मणि क्विप् न० त० । अज्ञेये । "गायत्र्यास्त्येकपदी द्विपदी त्रिपदी चतुष्पदापदसि न पदयसे" इति शत० ब्रा० १४,८,१५,१० । नास्ति पादोऽस्याः पादोऽन्यलोपः कुत्वा० ङीप् पादः पच्च । पादशून्यायां स्त्रियाम् । पुंसि तु अन्यलोपो "न ङीप् । अपाद् । "आपादशीर्षा गूहमान" इति ऋ० ४, १,११ । "अपादहस्तोऽपृतनादयदिन्द्रमिति" ऋ० १,३२,७ । "अथ यदपात् समभवत्तस्मादहिरिति" शत० ब्रा० । "अपादपाणिर्जवनोग्रहीतेति" श्रुतिः ।

अपद न० न पदम् अप्राशस्त्ये न० त० । अप्रशस्तस्थाने सुप्तिङन्तभिन्ने च नापदं शास्त्रे प्रयुञ्जीतेति दुर्ज्ञाः ।

अपदान न० अपदायति परिशुध्यति येन कर्म्मणा अप+दैप–शोधने करणे ल्युट् । परिशुद्धाचरणे येन कर्म्मणा सर्व्वैः परिशुद्धत्वेन ज्ञायते तस्मिन् कर्म्मणि । [सञ्चिक्षेपे, संसक्ते च ।

अपदान्तर त्रि० न पदान्तरं व्यवधानं यत्र । अव्यवच्छिन्ते,

अपदिश अव्य० दिशयोर्मध्ये अप+दिश+अव्ययी०। दिशोर्मध्ये विदिक् इति कोश इति च ख्याते। दिक्शब्देन समासे तु शरदा० टच् इति भेदः।

अपदिष्ट त्रि० अप+दिश-कर्म्मणि क्त। कथिते प्रयुक्ते। "कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा०।

अपदेश पु० अप+दिश-घञ्। लक्ष्ये, स्वरूपाच्छादनरूपे, छले, निमित्ते स्थाने च। "रक्षापदेशान्मुनिहोमधेनो रिति" रघुः। "न धर्म्मव्यापदेशेन पापं कृत्वा व्रतं चरेदिति"। "भक्ष्यभोज्यापदेशैश्च ब्राह्मणानां च दर्शनैः"। "शौर्य्यकर्म्मापदेशेनेति" "साध्यभावे प्रणिधिभिर्विधेयोरूपसमन्वितैः। अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वत इति"च मनुः। उपदेशे च। "दीक्षाया अपदेशात्" कात्या० २२, १२२। अपदेश उपदेश इत्यर्थः। अपकृष्टोदेशः प्रा० ब० वा कृष्टपदलोपः। अपकृष्टदेशे, अनुचितस्थाने च।

अपदेश्य त्रि० अप+दिश-कर्म्मणि यत्। छलेन कथनीये। अपदेशे अनुचितस्थाने भवः दिगा० यत्। अनुचितस्थानभवे त्रि०। "अपदिश्यापदेश्यञ्च पुनर्यस्यपधावतीति" मनुः। यत्र यस्य दानमुचितं ततोऽन्यत्र स्थाने दानस्यानुचितत्वात् तथात्वम्।

अपद्रव्य न० अपकृष्टं द्रव्यम् प्रा०ब० वा कृष्टभागलोपः। अपकृष्टद्रव्ये "अदूषितानां द्रव्याणां दूषणे भेदने तथेति" मानव व्याख्यायाम् "अपद्रव्यप्रदानेन दूषणे" इति कुल्लूकः।

अपद्वार न० अपकृष्टं द्वारं प्रा०ब० वा कृष्टलोपः। अपकृष्टद्वारे "निर्यियासुरपद्वारैरिति" सुश्रुतः।

अपधा स्त्री अप+धारणे धा-भावे स्त्रियाम् अङ्। वारणार्थं निरोधे, "मा उदाजदपधा बलस्य" इति ऋ० २,१२,३। "अपधाअपधायाः निरोधादिति" भा०।

अपध्यान न० अपकृष्टं ध्यानम् प्रा०स०। अनिष्टचिन्तने। वैपरीत्यचिन्तने च।

अपध्वंस पु० अप+ध्वन्स-भावे घञ्। नाशे, यस्य यथारूपमुचितं ततः प्रच्यवे च। "यथासपध्वंसेनैवेन्द्र" इति अथ० १,२,५।

अपध्वंसज पुंस्त्री० अपध्वसतेऽनेन अपध्वंसः वर्णानां भिन्नरूपतासंपादकः सङ्करस्तस्माज्जायते जन-ड ५त०। भिन्नवर्णसङ्करजाते करणादौ सङ्कीर्णवर्णे। "शूद्राणां तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृता" इति मनुः "ये द्विजानामपसदा ये चापध्वंसजाः स्मृता" इति च मनुः। तेषां पित्रोः समवर्णत्वाप्राप्तेः स्वरूपभ्रंशेन जातत्वात् तथात्वम्।

अपध्वंसिन् त्रि० अपध्वंसयति अप+ध्वन्स-णिच्-णिनि। नाशके। "सर्व्वेनसामपध्वंसि जप्यं स्यादघमर्षणमिति" मनुः

अपध्वस्त त्रि० अप+ध्वन्स-क्त। निन्दिते, परित्यक्ते अवचूर्णिते च।

अपध्वान्त न० अपकृष्टं ध्वान्तं ध्वनितम् ध्वन-क्त वेदे नि० खनार्थेऽपि डडभावः। भिन्नकांस्यस्वरसमे शब्दे "दृंहस्तेरपध्वान्तमिति" का०उप०। वार्हस्त्यं तदपध्वान्तं भिन्नकांस्यस्वरसममिति" भा०।

अपनय पु० अप+नी-अच्। दूरीकरणे स्थानान्तरनयने च। "अपनयो वाऽदृष्टत्वादिति" कात्या० २५,६,२। "तस्य तण्डुलापनयो वचनादिति" कात्या० २५,४४,३। "अपनयतेर्दूरीकरणार्थत्वात्तथात्वम् अतएव "अविनयमपनय विष्णो!" इति शङ्कराचार्य्येण दूरीकरणार्थतया प्रयुक्तम्। अपकृष्टो नयो वैपरीत्ये प्रा०स० वा। निन्दितनीतौ दुष्टनीतौ च। अपकारे "ततः सपत्नापनयस्मरणानुशयस्मृरेति" माघः।

अपनयन न० अप+नी-ल्युट्। दूरीकरणे, खण्डने च। अपनीयतेऽनेन अप+नी-करणे ल्युट्। अपकारसाधने। अपगतं नयनं यस्य। नेत्रहीने त्रि०।

अपनस त्रि० अपगता नासिका यस्य प्रा०ब० नसादेशश्च। अपगतनासिके। "असिं कौक्षेयमुद्गृह्य नकारापनसं मुखमिति" भट्टिः। [सारिते च।

अपनीत त्रि० अप+नी-क्त। खण्डिते, दूरीकृते, अप-

अपनुत्ति स्त्री अप+नुद-क्तिन्। खण्डने दूरीकरणे। "परिजनश्रमापनुत्त्यै" इति का०उप०। "पापानामपनुत्तये इति" "गुरुतल्पापनुत्तये" इति च मनुः।

अपनुद त्रि० अप+नुद-क। दूरीकारके, खण्डके, शोधके च।

अपनोद पु० अप+नुद-भावे घञ्। खण्डने, दूरीकरणे, अपसारणे च। "तस्यापनोदाय फलप्रदृत्ताविति" रघुः। "ब्रह्महत्यापनोदाय चितभुङ्नियतेन्द्रिय" इति मनुः।

अपनोदन न० अप+नुद-ल्युट्। अपसारणे खण्डने च "एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनमिति" मनुः। कर्त्तरि ल्यु। दूरीकारके त्रि०। "यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः। तथाऽघमर्षणं जप्य सर्व्वपापापनोदनम्" इति। "पराकोनाम कृच्छ्रोऽयं सर्व्वपापापनोदन" इति च मनुः।

अपन्न त्रि० पत-क्त नि०न०त०। अपतिते। "आयवोऽपन्नदृंहसेति" यजु० ६,२४। न पन्नं पतितं दृढं यस्मिन्निति" वेददीपः। पन्नम इत्यत्र हि पन्नशब्दस्य पतितार्थकत्वं दृष्टम्।

अपपाठ पु० अपकृष्टः पाठः । यथा यस्य पाठः समुचितः ततोऽन्यथा पाठे अपकृष्टपाठे "द्वादशापपाठा अस्य जाता इति" सि०कौ० ।

अपपात्र त्रि० अपकृष्टं पात्रं भोजनपात्रं यस्य । चण्डालौ तेषां हि भोजने पात्राणामपकृष्टत्वं तत्रान्यैर्भोजनानर्हत्वात्तेषां तथात्वम् "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः अपपात्राश्च कर्त्तव्या इति" मनुः ।

अपबर्हिस् त्रि० अपगतं बर्हिर्यत्र प्रा०ब० वा गतलोपः । बर्हिर्होमरहिते "सोऽपबर्हिषौ द्वावनुयाजौ" इति श्रुतिः । "अपबर्हिषश्चतुरः प्रयाजान् यजति" । शत० ब्रा० । अपबर्हिष इति पृथक्पदमित्येके ।

अपभय त्रि० अपगतं भयं यस्य प्रा०ब० वा गतलोपः । गतभये भीतिशून्ये । लोपाभावे अपगतभयोऽर्थुक्तार्थे त्रि० ।

अपभर्त्तृ पु० अपकृष्टो भर्त्ता प्रा०स० । अपकृष्टभर्त्तरि

अपभी त्रि० अपगता भीरस्य प्रा०ब० वा गतलोपः । भीतिशून्ये अपभीतिरप्यत्र स्त्री ।

अपभूति स्त्री अपकृष्टा भूतिः प्रा०स० । "अपकृष्टविभूतौ "यमभी पुरोदधिरे ब्रह्माणमपभूतये" इति श्रुतिः ।

अपभ्रंश पु० अप+भ्रन्श–घञ् । अपच्चरणे अधःपतने "अत्याकूढिर्भवति महतामप्यपभ्रंशनिष्ठा" भक्र० । "अपभ्रंशति स्वभावात् प्रच्यवते" अप+भ्रन्श–कर्त्तरि अच् । साधुशब्दस्य शक्तिवैफल्यप्रयुक्तान्यथाचारणयुक्ते अपशब्दे । "त एव शक्तिवैकल्यप्रमादालस्तादिभिः । अन्ययोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिणा साधुशब्दानामेवान्यथोच्चारणेऽपशब्दतोक्तेः तस्य स्वभावतो भ्रंशात् तथात्वम् । "अनपभ्रंशतानार्यदाभ्युदययोग्यतेति" हरिः । "आभीरादिगिरः काव्येष्वपभ्रंशगिरः स्मृताः । शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितमिति" दण्डी ।

अपम त्रि० अपकृष्टं मीयते अप+मा–बा० क । अपकृष्टतया ज्ञाते "भगोऽनाधोश्चिद्वितोऽपमस्य चित्" । ऋ० १०, ३९, ३ । "अपमस्य ज्ञात्यादिनिकृष्टस्य" भा० । अपक्षभूगोलादुपरि मीयते । भूगोलानाच्छादितान्तरिक्षभागे ज्योतिषपरिभाषितायां सूर्यादिगत्यर्थतिर्यग्रेखायाम् क्रान्तौ यथा । "नाड़िकामण्डलात् तिर्यग्गतापमः, क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः । विक्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाड़िकावृत्तखेटान्तरालेऽपम" इति सि०शि० । "क्रान्तिवृत्ते यत् स्फुटमग्रस्थानं तस्य नाड़ीवृत्तात् तिर्यगन्तरम् अपमः क्रान्तिः । अथ विमण्डले यत् अग्रस्थानं तस्य क्रान्तिवृत्तात् यत् तिर्यगन्तरं स विक्षेपः अथ विमण्डलस्य प्राक् च नाड़ीवृत्तात् यत् तिर्यगन्तरम् स्वः अपमः स्फुटा क्रान्तिः अग्रस्य उत्तरतो याम्यदिशं याम्यान्तात् तदनु सौम्यदिग्भागम् । ग्रसि० "परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमः" इति । सि०शि० ।

अपमज्या स्त्री अपमस्य धनुराकृतिक्षेत्रस्य ज्येव । क्रान्तिवृत्ताख्यजीवायाम् । विवरणम् क्रान्तिज्याशब्दे द्रष्टव्यम् ।

अपमण्डल न० अपक्रान्तं मण्डलात् भूमण्डलात् निरा०त० । सिद्धान्तशिरोमण्युक्ते क्रान्तिवृत्ते । यथा "अग्रस्य गोले कथिताऽपमण्डलं प्रकल्प्य कक्षावलयं यथोदितमिति" "क्रान्तिवृत्तं कक्षामण्डलं प्रकल्पेति" ग्रसिता० । "एष भगोलः कथितः खेचरगोलोऽयमेव विक्षेपः । अत्रापमण्डले वा सूत्राधारैव यस्य तस्यैवेति" सि०शि० ।

अपमर्द पु० अप+मृद–घञ् । विमर्द्दने "हयहस्तिकरीषाभ्यामपमर्दैः क्षतोमहानिति" रामा० ।

अपमान पु० अपकृष्टं मीयतेऽनेन अप+मा–करणे ल्युट् । अनादरे "अपमानं पुरस्कृत्य स्वकार्य्यं साधयेच्चर" इति नीतिः । "मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो" रिति" गीता । वेदस्य ब्राह्मणानाञ्च अपमानाद्धोगतिः पुरा० अपकृष्टो मानो यस्मात् अप+मन–करणे घञ् वा । अनादरे पु० । नामपमानः प्रयोक्तव्यः कामक्रोधकृतः क्वचिदिति" रामा० । "अथापमानेन पितुः प्रयुक्तेति" कुमा० ।

अपमानित त्रि० अपमानं जातमस्य तारo इतच् । यस्यापमानं कृतं तस्मिन् कृतापमाने अनादृते । [सितवर्त्मनि ।

अपमार्ग पु० अपकृष्टो मार्गः प्रा०स० वा कृष्टलोपः । कुत्-

अपमार्जन न० अप+मृज–भावे ल्युट् वृद्धिः । संशोधने । "कांस्यापमार्जनमसीमधुरं सैन्धवं नवमिति" सुश्रुतः अधस्तान्मार्जने च । अपमार्जनप्रोक्षिताभ्यामपकृष्ट इति कात्या० ६, १०, ४ । "अपमार्जनं यत्पात्रमुखादारभ्याधस्तादपमार्जनमिति" तद्भा० ।

अपमित त्रि० अप–मा–क्त । अवज्ञाते अनादृते ।

अपमित्यक न० अपमित्य अपमानमङ्गीकृत्य गृह्यते कन् । ऋणे

अपमुख न० अपगतं पराभूतं मुखम् प्रा०त० । पराङ्मुखे वदने प्रा०ब० गतलोपः । पराङ्मुखवदनवति पदार्थे त्रि० ।

अपमूर्द्ध त्रि० अपगतो मूर्द्धा यस्य । शिरःशून्ये कबन्धे ।

अपमृत्यु पु० अपकृष्टः दुष्टहेतुजन्यत्वेन मृत्युर्मरणम् । विषोद्बन्धनादिहेतुके मृत्यौ । "अपमृत्युहेतवश्च शुद्धिप्रपञ्चे कौर्म्मे दर्शिता यथा

"दष्टक्लिन्नदंष्ट्रिनखिव्यालविषवह्निक्रियाजलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां दृढस्तु यः। नागानां विप्रियं कुर्वन् दग्धश्चाथ विद्युता। निग्रहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित्। परदारान् रमन्नन्त्र द्वेषात्तत्पतिभिर्हृताः। असमानैश्च सङ्क्रीर्णैश्चाण्डालाद्यैश्च विग्रहम्। कृत्वा तैर्निहतास्तांस्तु चाण्डालादीन् समाश्रिताः। गवाग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः। क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्। गिरिदृक्प्रपातञ्च ये कुर्वन्ति नराधमा" इति।

अपस्मृषित त्रि०न० अप+स्मृष–क्त वाक्ये वाच्ये नि०। त्याज्ये वाक्ये। अन्यत्र अपस्मृतमित्येव सोढ़े त्याज्ये पराकृष्टे च।

अपयशस् न० अपकृष्टं यशः। "यशोविपरीतायामकीर्त्तौ "अपयशो यस्यास्ति किं मृत्युना" इतिनीतिः। अपगतं यशो यस्य। कीर्त्तिशून्ये त्रि०। [अकीर्त्तिहेतौ।

अपयशस्कर त्रि० न यशस्करः क–हेतौ ट विरोधे न०।

अपयान न० अप+या–भावे ल्युट्। अपक्रम्य पलायने "अपयानेऽपि न भवान् समर्थो लघुविक्रय" इति रामा०।

अपर न० न पूर्य्यते यतः पृ–अपादाने, अप्। गजस्य पश्चाद्भागे। "बद्धापराणि परितो निगडान्यलावीदिति" माघः। परितो बद्धः अपरः पश्चिमपादोयैरिति मल्लि०। न पृणाति सन्तोषयति पृ-अच्। अतृप्तौ, भिन्ने त्रि०। "अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे" इति मनुः "तमा सप्तव्राद्दपरे परे रूपाः" नैष० पश्चिमायां दिशि स्त्री "अपरदिग्गणिकेति" माघः परकालवृत्तौ त्रि०। "पूर्ब्बां सन्ध्यां जपन् तिष्ठेत् स्वकाले चापरां चिरमिति" मनुः। पश्चाद्वृत्तौ त्रि० "पूर्ब्बापरौ तोयनिधी वगाह्य" कुमा०। ऋग्वेदादिविद्यायां स्त्री। "द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति" वृ० भा० श्रुता स्मृतिः। अस्य च कालदेशादिनियमे सर्व्वनामकार्य्यम्। तत्र "पूर्ब्बादिभ्यो नवभ्यो वा इति" पा०वा तत्कर्म। अपरत्वञ्च दैशिकं कालिकं च द्विविधं, तत्र स्वापेक्षया उदयाचलविप्रकृष्टत्वम् दैशिकमपरत्वम् स्वापेक्षयाधिकसूर्य्यस्यन्दनवत्त्वं कालिकम्। उल्कादावृतौ दैशिकम् कालिकन्तु। "अपरं भवतो जन्म परं जन्म विवस्वत" इति गीता। अल्पदेशवृत्तिरूपे व्याप्ये त्रि० "सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च। व्यापकत्वात् परापि स्यात्, व्याप्यत्वादपरापि च" भाषा०। द्रव्यत्वादेः घटत्वाद्यपेक्षया अधिकदेशवृत्तित्वात् परत्वं सत्तापेक्षयाऽल्पदेशवृत्तित्वात् अपरत्वमिति मुक्ता०। "द्रव्यत्वादिकजातिस्तु परापरतयोच्यते" इति भाषा०। "स्वायम्भुवस्य च मनो षड्वंश्या मनवोऽपरे" इति अपरकालिका भिन्ना वा इत्यर्थः। निरुक्ते। "भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" इति गीता। तत्र भूम्यादीनामितरपदार्थानुगतित्वेऽपि जड़त्वात् संहत्य कारित्वात् स्वयमसमर्थत्वेन जीवस्य भोगाद्यर्थमेव प्रवृत्तिमत्त्वाच्च निकृष्टत्वम्। जीवस्य तु तदपेक्षया परत्वम्॥

उत्तरकालिकत्वात् तद्विकारलक्षणे कार्य्ये "तदेतद्ब्रह्माऽपूर्ब्बमनपरमनन्तमिति" बृह०उप०। नास्ति अपरं कार्य्यं यस्येति भा०। वस्तुतः स्वरूपप्रच्यवाभावेन कूटस्थस्य न कार्य्यकारित्वमत एव "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति" गीतायाम् तस्याकर्त्तृत्वमुक्तं कर्त्तृत्वन्तु अज्ञानोपहितेश्वरस्येति न विरोधः। सम्प्रदायिनः शैवभागे "अपरात्रः अपराह्णः एकदेशि स०। अस्य पूर्ब्बपदस्यस्य पश्चादेशः पश्चार्द्धम् न० शेषार्द्धे। अपरस्मिन् भवः ठिमच् पश्चिमः शेषभवे। प्रथमाप्रभृत्यादिदेशकालवृत्ते परवल्लात् प्रथमाद्यर्थे अति। पश्चात्। अधिकमधःगन्त्रे दृश्यम्। अस्य दिग्वाचकत्वात् तेन समासे देशवाचिनः णिदादि तद्धिते उत्तरपदस्यैव वृद्धिः अपरपाञ्चालक इत्यादि।

अपरक्त त्रि० अपगतो रक्तः शोणितो यस्मात्। अपगतरक्तवर्णे अप+रञ्ज–क्त। विरक्ते अनुरागशून्ये च त्रि०।

अपरज पु० अपरस्मिन् काले जायते जन–ड ७त०। रुद्रभेदे "नमः पूर्ब्बजाय चापरजाय" वेति यजु० १६,३२।

अपरति स्त्री अप+रम–भावे क्तिन्। अविरतौ। [काले वा।

अपरञ्च अव्य० अपरस्मिन् कालादौ। अपरस्मिन् देशे

अपरत्व न० अपरस्य भावः त्व। अपरभावे तच्च वैशेषिकोक्तो गुणभेदः। तदपि द्विविधं दैशिकं कालिकञ्च तत्स्वरूपमपरशब्दे उक्तम्। तत्र च कारणमपेक्षाबुद्धिविशेषः तस्य नाशाच्च परत्वापरत्वयोर्नाशः। "संयोगश्च विभागश्च परत्वञ्चापरत्वकमिति" "परापरत्वधीहेतुरेका नित्या द्वितीयते" इति च भाषा०। तत्र दैशिकापरत्वं अल्पसूर्य्यसंयोगज्ञानजन्यं, कालिकं तु अल्पसूर्य्यपरिस्पन्दज्ञानजन्यमिति भेदः। कालिके कालोपाधिः दैशिके तु

दिगिति भेदः । "परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् । दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥ परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् । अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ तयोरसमवायी तु दिक्संयोगस्तदाश्रये । दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥ परत्वमपरत्वन्तु तदनन्तरबुद्धितः । अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥ अपेक्षाबुद्धिनाश्येन नाशस्त्वेषामुदाहृत" इति भाषा० ।

अपरदक्षिण अव्य० अपरा च दक्षिणा च "दिङ्नामान्यन्तराले इति" पा० सूत्रं बाधित्वा तिष्ठद्गुप्रभृतिपाठात् अव्ययी० । पश्चिमदक्षिणयोरन्तराले नैर्ऋते कोणे । तद्गणपाठाच्च नैतस्य समासान्तरघटकतेति विशेषः ।

अपरपक्ष पु० अपरः शेषः पक्षः । कृष्णपक्षे स हि चन्द्रस्य वृद्धिह्रासपक्षयोर्मध्ये शेषः, चैत्रशुक्लप्रतिपदेव वर्षारम्भणात् शुक्लस्य पूर्व्वत्वम् सुतरां कृष्णस्यापरत्वम् । "पूर्व्वपक्षो देवानामपरपक्षः पितॄणामिति" श्रुतिः । "यथा चैवाऽपरपक्षः पूर्व्वपक्षाद्विशिष्यते" इति मनुः "अथ श्राद्धमसावास्यायां पितॄणां दद्यात् पञ्चमीप्रभृति वाऽपरपक्षस्येति" स्मृतिः "अश्वयुक्कृष्णपक्षस्य प्रेतपक्षत्वेन अपरपक्षत्वव्यवहारः । "अमावास्यास्तृतीयस्यापरपक्षस्तथा । तस्य पार्वणमुद्दिष्टं मुनिभिः पञ्चपातकमिति" स्मृतिः क्वचित् प्रेतपक्षेत्येव पाठः । "तुलादिषडशीत्यङ्कां षडशीतिसुखं क्रमात् । तच्चतुष्टयमेव स्याद्दिक्षभावेषु राशिषु ॥ षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च । मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे ॥ ततः शेषाणि कन्याया यान्यहानि तु षोड़श । क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम्" इति सूर्य्यसिद्धान्तोक्तेः षड़शीतिसुखावशिष्टानां षोड़शानां दिनानां श्राद्धप्रशस्तकालत्वादपरपक्षत्वम् अथ वा नास्ति परो यस्मात् तादृशः पक्षः । तथाचाक्षयपुण्यदत्वेन अत्युत्कृष्टत्वात्तथात्वम् । पञ्चादशाहस्यैव पक्षत्वेऽपि षोडशानां दिनानां किञ्चिदधिकपक्षत्वात् पक्षत्वम् तेषां सौरत्वेऽपि चान्द्रे पक्षे व्यवहारस्य गौणतेति भेदः । विकल्पप्रभावयोः पक्षयोर्मध्ये शेषपक्षे च ।

अपरराव पु० अपर रात्रेः एकदे० त० अच् समा० । रात्रिशेषे "अपरराव सायंदोहमिति" कात्या० ७,४,३०, "अपरराव कृतम्" सि० कौ० ।

अपरव पु० अपक्षष्टोरवः प्रा० त० । अकीर्त्तौ अपयशसि ।

अपरवक्त्र न० "अयुजि नयरला गुरुः समे नजभपरवक्त्रमिदं ततोजरौ" इति वृत्तरत्नाकरोक्ते अर्द्धसमे मात्रावृत्तभेदे "वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः । पुष्पिताग्राभिधं केचिदौपच्छन्दसिक तथेति वृ० र० । अपरवक्त्रा स्त्रियामिति केचिदाहुः ।

अपरवैराग्य न० कर्म्म० । पातञ्जलोक्ते वैराग्यभेदे । यथा "दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यमिति" यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञात्मकः तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विन्द्रियप्रवर्त्तकानां पाकाय प्रयत्नो यतमानसंज्ञं वैराग्यं ततः पक्वानां केषाञ्चित्कषायाणां वक्ष्यमाणेभ्यो विरागावधारणं व्यतिरेकसंज्ञं वैराग्यं, ततः पक्वानां सर्वेषामिन्द्रियप्रवर्त्तनाऽपक्वानां मनस्यौत्सुक्यरूपेणावस्थानमेकेन्द्रियसंज्ञं वैराग्यम्, स्त्रियोन्नपानमित्यादिषु दृष्टेषु, गुरुश्चारणमनु श्रवः श्रवणं यस्य सोऽनुश्रवो वेदः तदुक्तेष्वानुश्राविकेषु स्वर्गादिदिव्यविषयेषु मर्त्यैषु च विनाशपरितापसातिशयत्वासूयादिदोषाणामभ्यासेन साक्षात्काराद्वितृष्णस्योपेक्षाबुद्धिः वशीकारसंज्ञं वैराग्यमित्यर्थः । एतानि च संप्रज्ञातसमाधेरन्तरङ्गाणि असंप्रज्ञातसंसाधेस्तु बहिरङ्गाणि" इति पा० द० ।

अपरस्पर न० अपरस्य परस्य क्रियासातत्ये द्वित्वं सुश्च । क्रियासातत्ये । क्रियावतां सातत्ये तु त्रि० । अपरास्पराः पुंसांसः, योषितो वा गच्छन्ति अपरस्पराणि कुलानि यान्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । "अपरस्पराः सार्था गच्छन्ति" सि० कौ० ।

अपरहैमन त्रि० अपरहेमन्ते भवः अपरहेमन्त+भवार्थे अण् तलोपः उत्तरपदवृद्धिः । हेमन्तशेषभवे । एवं पूर्व्वहैमनः हेमन्तपूर्व्वभवे त्रि० ।

अपरा स्त्री अपहृत्य राति गृह्णाति जन्म यस्याः रा—अपादाने वा० ड । जरायौ ततोऽपयानादेव गर्भाद्विस्मरणाज्जन्मेति तस्यास्तथात्वम् । अधिकमपरशब्दे द्रष्टव्यम् ।

अपराग पु० अप+रञ्ज—घञ् नलोपकुत्वे । अननुरागे विरागे "अनुरागापरागौ च प्रचारं मण्डलस्य चेति" मनुः ।

अपराग्नि पु० द्वि० कर्म्म० । गार्हपत्यदक्षिणाग्न्योः, "अन्तरेणापराग्नी गत्वा दक्षिणेनेति" कात्या० ४,१३,१२, "अपराग्नो गार्हपत्यदक्षिणाग्नी" इति तद्भा० । अन्तिमाग्नौ अन्त्येष्टिकर्म्माङ्गवह्नौ पु० एकव० ।

अपराङ्ग न० अपरस्य रसादेरङ्गम् । गुणीभूतव्यङ्ग्ये काव्यभेदे । "अगूढमपरस्याङ्गमिति" काव्य० प्र० । अपरस्य रसादेः वाक्यार्थीभूतस्य वा वाच्यस्याङ्गम् यथा "अयं स

रशनोत्कर्षी पीनस्तनविमर्द्दनः । नाभ्यूरुजघनस्पर्शी नीवी-विस्रंसनः कर इति"। अत्र षट्कारस्य करणाङ्गत्वात्तथात्वम् वाच्याङ्गव्यङ्ग्यं तत्र द्रष्टव्यम् ।

अपराङ्मुख त्रि० न पराङ्मुखः न०त० । अनिवृत्ते कर्त्तव्यकर्म्मणोऽसोढतया ततोनिवृत्तिरहिते" स्त्रियां ङीप् ।

अपराच् त्रि० न पराञ्चति परावर्त्तते परा+अञ्च-क्विन् न०त० । अनिवृत्ते पराङ्मुखभिन्ने स्त्रियां ङीप् ।

अपराजित पु० परा+जि-क्त न०त० । शिवे, विष्णौ, तयोः केनाप्यपराजितत्वात्तथात्वम् ऋषिभेदे च । परा-जितभिन्ने त्रि० । दूर्वायां, शेफालिकायां, जयन्तीवृक्षे, असनवृक्षे, शङ्खिनीवृक्षे, कृष्णवृक्षे असनपर्य्यायम्, ऐशान्यां दिशि "अपराजितां वास्याय व्रजेद्दिशमजिह्मग" इति मनुः "अपराजितामैशानीं दिशमिति" कुल्लू० । चतु-र्द्दशाक्षरपादके "ननरसलगैः स्वरैरपराजितेति" वृ०र० उक्ते छन्दोभेदे, दुर्गायां देव्यां "अपर्णा चापराजितेति" दुर्गास्तोत्रम् "नास्ति पराजितं शत्रोः पराजयो यस्याः ५त० । विजयदशम्याम् पूजनेन अपराजयदात्रीदुर्गामूर्त्ति-भेदे । सा च आश्विनशुक्लदशम्यां श्रवणयुतायामपराह्णे सन्ध्यायां वा पूज्या यथा हेमाद्रौ व्रतखण्डे "आश्विनशुक्ल-पक्षस्योपक्रम्य" "दशम्यां च नरैः सम्यक् पूजनीयाऽपरा-जिता । क्षेमार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः । नवमीशेषयुक्तायां दशम्यामपराजिता । ददाति विजयं देवी पूजिता जयवर्द्धिनी" स्कान्दम् । "आश्विने शुक्लपक्षे तु दशम्यां पूजयेच्चरः । एकादश्यां न कुर्व्वीत पूजन-ञ्चापराजितमिति"निर्णयसिन्धौ स्कान्दम् । "उदये दशमी किञ्चित् संपूर्णैकादशी यदि, श्रवणर्क्षं यदा काले सा तिथि-र्विजयाभिधेति" हेमाद्रौ काश्यपः । "काले ऽपराह्णे"इति निर्णयसिन्धुः । तस्याञ्च अपराह्णपूजयता हेमाद्रौ दर्शिता ततएव तद्गवन्तव्यम् । "नाधयोव्याधयस्तस्य भवन्ति न पराजयः श्रियं पुत्रमवाप्नोति विजयञ्च सदा भुवीति" तत्पूजायाः फलत्वेन अपराजयश्रोक्तेस्तच्छास्तथात्वम् । तत्पूजाङ्गदशम्या अपि अपराजयहेतुत्वात् विजयहेतुत्वाच्च अपराजितेति विजयेति च नाम अतएव "पूजनञ्चापराजित" मित्युक्तम्अपराजितामधिकृत्योक्ततत्वात् पूजनस्यापराजित-त्वम् तत्र पूजनप्रकारस्तु हेमाद्रौ व्रतखण्डे अपराजित-दशमीप्रकरणे द्रष्टव्यः । योगिनीभेदे तत्स्वरूपं ध्यानशब्दे वक्ष्यते । ॐविष्णुः पराजितः तच्छब्दवर्थतया, यथा । विष्णुक्रान्तायां स्वनामख्यातायां लतायां च स्त्री । अधिकं विजयदशम्यां वक्ष्यते ।

अपराद्ध त्रि० अप+राध-कर्त्तरि क्त । अपराधिनि, स्वोचितकार्य्याकारके, स्खलिते च "निमित्तादपराद्धेषो-र्धानुष्कस्येव वल्गितमिति" माघः भावे क्त । अपराधे ।

अपराद्धपृषत्क पु० अपराद्धो लक्ष्यात् च्युतः पृषत्को बाणो यस्य । लक्ष्याव्याहिसायके धानुष्के ।

अपराद्धृ त्रि० अप+राध-तृच् । अपराधकर्त्तरि स्वोचित-कार्य्याकारके स्त्रियां ङीप् ।

अपराध पु० अप+राध-घञ् । स्वोचितकर्म्माकरणे आगमि "क्षमपराधलवं मम पश्यसीति" सा०द० । दण्डयोग्य कर्म्माकरणे । "यथाऽपराधदण्डनामिति" रघुः । देवविषये अपराधस्य शास्त्रविध्युल्लङ्घनेन, निषिद्धसेवनेन च जात-दुरितविशेषः । तत्र निगमे द्वात्रिंशद्वृ अपराधा दर्शिता यथा' यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे । देवोत्सव-वाद्यसेवा च अप्रणामस्तदग्रतः ॥ उच्छिष्टे वाथवाऽशौचे भगवद्दर्शनादिकम् । एकहस्तप्रणामश्च पुरस्तादप्रदक्षिणम् ॥ पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम् । शयनं भक्षणं वापि मिथ्याभाषणमेव च ॥ उच्चैर्भाषा मिथोजल्पो रोदनानि च विग्रहः । निग्रहानुग्रहौ चैव क्रूरभाषणम् ॥ कम्बलावरणं चैव परनिन्दा परस्तुतिः । अश्लीलभाषणं चैव अधोवायुविमोक्षणम् ॥ शक्तौ गौणो-पचारश्च अनिवेदितभक्षणम् । तत्तत्कालोद्भवानाञ्च फला-दीनामनर्पणम् ॥ विनियुक्तावशिष्टस्य प्रदानं व्यङ्ग्ना-दिके । पृष्ठीशय्यासनं चैव परेषामभिवादनम् ॥ गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा । अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः इति" ॥ आह्निकतत्त्वे तु वाराहमूलका अन्यविधा द्वात्रिंशत् दर्शिता यथा । "भगवद्भक्तानां अतिथयेऽदत्वाऽभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा ऽस्नात्वा विष्णोरुपसर्पणम् ३ कृतं नरं कृत्वाऽस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुगृहप्रवेश-नम् ५ मानवं शवं स्पृष्ट्वाऽस्नात्वा विष्णुसन्निधाववस्था-नम् ६ विष्णुं स्पृशतः पादुकादिप्रयोगः ७ विष्णोः-कर्म्म कुर्वतः मुरोधत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रा-न्तरप्रशंसा ९ अनिर्मज्जितं वासः परिधाय विष्णुकर्म्मा-चरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम् । ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्षुद्रस्य विष्णु-

स्पर्शनम् १३ निषिद्धपुष्पेण विष्णुर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ क्षणवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोच्छ्वासः परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० हंसजालपादसरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तप्रक्षालनं विष्णोःस्पर्शनं कर्म्मकरणं वा २२ श्मशानं गत्वाऽस्नात्वा विष्णूपसर्पणम् २३ पिन्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमाघ्राय पीत्वा स्पृष्ट्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिच्छितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० भेरिशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुस्पर्शनम् ३२ इति" एतदुपलक्षणम् "अपराधसहस्राणि, अपराधशतानि चेति" मन्वभिधानात् "अहन्यहनि योमर्त्यो गीताध्यायन्तु संपठेत्। द्वात्रिंशदपराधेषु अहन्यहनि मुच्यते" इति नरसिंहपुरा०।

अपराधय त्रि० अपराधं याति या–ड। अपराधप्राप्ते। ब्राह्म० भावे कर्म्मणि च ष्यञ् आपराध्यं तस्य भावे तत्कर्म्मणि च न०। [कारके, स्त्रियां ङीप्।

अपराधिन् त्रि० अप+राध–णिनि। कृतागसि अपराधे

अपरान्त पु० "अपरस्याः पश्चिमायाः अन्तः सीमाभूतोदेशः। देशभेदेऽस्य पश्चिमदिशः सीमाभूतत्वात्तथात्वम् स च देशः कुतस इति तावन्निर्णीयते "तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः रामास्त्रोत्सारितोऽभ्यासीत् सह्यलग्न इवार्णव इति" रघुः। तेनास्य सह्यपर्व्वत सन्निकृष्टत्वम्। "अवकाशं किलोदन्वान् रामायार्थितो ददौ। अपरान्तमहीपालव्याजेन रघवे करमिति" रघुः तेनार्णवसन्निकृष्टत्वं च प्रतीयते। तत्रैव देशे रघौ "त्रिकूटमेव तत्रोच्चं जयस्तम्भं चकार सः" इति त्रिकूट पर्वतवर्णनात् त्रिकूटयुक्तत्वञ्च तस्य प्रतीयते। "पारसीकांस्ततोजेतुमित्यनन्तरोक्तेश्च पारसीकदेशात् पूर्व्वत्वं प्रतीयते पारसीकदेशश्च पाश्चात्यः "संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैरिति" तेषां पाश्चात्यत्वस्य तत्रैव वर्णनात्। बृहत्संहितायाञ्च "नव भारतवर्षे मध्यात् प्रागादिविभाजितादेशा" इत्युपक्रम्य "अपरस्यां सणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः। अपरान्तशान्तिकर्हैहयप्रशस्ताद्रिकोङ्कणा" इत्यादिना मध्यस्थानात्तस्य पश्चिमदिक्स्थत्वमुक्तम् तत्र च सुरसा नाम नदी। "सुरसामारुतोद्भूतमिति" रघौ तत्र तस्या वर्णनात् तद्वान्तरदेशः केरलः। "भयोत्सृष्टविभूषाणां तत्र केरलयोषितामिति" रघौ तथा वर्णनात्। जनपदवाचित्वात् तद्धितार्थोलुकि तद्देशभवे तद्राजनि च त्रि०। "उन्मूलनः सन्निपत्यापरान्तैरिति" माघः।

अपरार्क पु० स्मृतिसंग्रहभेदे।

अपरार्द्ध पु० न परार्द्धम्। परार्द्धभिन्ने। अपरमर्द्धमिति वाक्ये तु अपरस्य पश्चाद्देशे पश्चार्द्धमित्येव।

अपरावर्त्तिन् त्रि० न परावर्त्तते परा+वृत–णिनि न०त०। अपराङ्मुखे कार्य्ये समाप्तिमत्त्वादनिवर्त्तिनि स्त्रियां ङीप्।

अपराह्ण पु० अपरमह्न एक०त०टच् अह्नादेशः। दिनशेषभागे स च द्विधा विभक्तस्य, त्रिधा विभक्तस्य च दिनस्य शेषभागः। "पूर्व्वह्णं मनुष्याणामपराह्णः पितॄणामिति" श्रुतौ द्विधा विभजनात् "पूर्व्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणामिति श्रुतौ त्रिधा विभजनाच्च तयोस्तेषु वा शेषस्य तथात्वम्। तथा च द्विधा विभक्तस्य दिनस्य शेषार्द्धम्, त्रिधा विभक्तस्य तृतीयार्द्धं च अपराह्णः। "यत्राऽसौ सविता याति पितरस्तासुपासते। तिथिं तेभ्योऽपराह्णो हि स्वयं दत्तः स्वयंभुवेति" स्मृतिः। "तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" मनुः। पञ्चधा विभक्तस्य तु चतुर्थभागे च तस्य च कर्म्मयोग्येतरामेध्ययाऽपरत्वात् तथात्वम्। अन्तिमतिमुहूर्त्तस्य तु राक्षसवेलात्वेन कर्म्मानर्हत्वात् कर्म्मार्ह शेषभागत्वाभावान्नापराह्णत्वम्। तथा च "प्रातःकालोमुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततस्त्रिधा। सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्। राक्षसी नाम सा वेला गर्हिता सर्वकर्म्मसिति" त्रिमुहूर्त्तात्मकतया पञ्चधा विभक्तदिनस्य चतुर्थे भागे कर्म्मार्हापराह्णत्वेन परिभाषणात्तथात्वम्। लौकिके तु मध्याह्नात्परतः, सूर्य्यास्तात् प्राक्कालोऽपराह्णत्वेन व्यवह्रियते इति" भेदः। ततः भवार्थे वा वुञ् अपराह्णकः तद्भवे त्रि०। पक्षे तदर्थे ठञ् आपराह्णिकः। तद्भवे त्रि०। "श्राद्धे चैवापराह्णिक" इति स्मृतिः। स्त्रियां ङीप्। "पार्व्वणे पिण्डकृत्ये च तिथिर्यापराह्णिकीति" स्मृतिः।

अपराह्णतन त्रि० अपराह्णे भवः ट्युल् तुट् च। अपराह्ण-

भवे त्रि० स्त्रियां ङीप् । "घकालेयादिना" पा० सप्तम्या वा अलुकि अपराह्णेतनोऽप्युक्तार्थे त्रि० । [अश्नुते च ।

अपरिकलित त्रि० न परिकलितः न०त० । अज्ञाते, अदृष्टे,

अपरिक्रम त्रि० नास्ति परिक्रमः उद्योगोयस्य । अनुद्युक्ते । "जानन्नपि च किं कुर्य्यादृश्यन्तस्यापरिक्रम इति" स्मृतिः । परितः क्रमः क्रमणम् अभावार्थे न०त० । परितः क्रमणाभावे पु० । परिगतः क्रमम् न० त० । क्रमापरिगते अपरपाटीके त्रि० ।

अपरिक्लिष्ट त्रि० क्लिश भावे क्त न परिक्लिष्टं क्लेशोयत्र । अनायाससाध्ये । कर्त्तरि क्त न०त०। क्लेशयुक्तभिन्ने त्रि० ।

अपरिगत त्रि० न०त० । ज्ञातभिन्ने, अप्राप्ते च ।

अपरिगृहीत त्रि० न०त०। अस्वीकृते, अनुढे, अज्ञाते च

अपरिग्रह पु० अभावे न०त० । परिग्रहाभावे, पातञ्जलोक्ते यमभेदे च यथा "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" "सू० तत्रापरिग्रहो नाम देहयात्रानिर्वाहकातिरिक्तभोगसाधनधनाद्यनङ्गीकारः । तस्य फलमपि तत्रैव दर्शितम् यथा "अपरिग्रहस्थैर्य्ये जन्मकथन्तासंबोधः" अपरिग्रहस्थैर्य्ये तत्स्थैर्य्ये सति किंरूपं जन्म किंप्रकारकं, किंहेतुकं, किंफलकम्, किमवसानमिति शरीरस्थापि परिग्रहविरोधिनी जिज्ञासा भवति शरीरस्थापि परिग्राह्यत्वाविशेषात्कथं तत्परिग्रहो न स्यादिति जिज्ञासावश्यम्भावात् । ततः कार्य्यकरणसंबन्धात् पुरुषस्यास्य जन्म देवनरतिर्य्यक्त्वप्रकारम् । क्लेशकर्म्महेतुकं, दुःखैकफलकम्,पुरुषतत्त्वावसानमित्याचार्य्यादागमतश्च निश्चित्य अदेहः सन्नपरिग्रहस्थमस्य परमां काष्ठामनुभवतीत्यर्थः" इति तद्भ० । "लोभस्य पुरतः केऽमी ? सत्यास्ते यापरिग्रहा" इति प्र०च० । नास्ति देहयात्रानिर्व्वाहकव्यतिरिक्तस्य परिग्रहः संग्रहो यस्य । परिव्राजके "निराशीरपरिग्रह" इति गीता । तस्य च कौपीनादिपरिग्रहेऽपि तस्य शरीरयात्रानिर्वाहकत्वान्न क्षतिः "कौपीनाच्छादनार्थं हि वासोवै बिभृयादतिः । योगसम्भारभेदांश्च गृह्णीयात् पादुके तथेति" स्मृतौ तत्परिग्रहविधानात् । [पूर्व्वमग्राते च ।

अपरिचित त्रि० परि+चि–क्त न०त० । अननुभोगितभिन्ने,

अपरिच्छद त्रि० न परिच्छदोयस्य अप्राशस्त्ये न०ब० । अपकृष्टवस्त्राद्युपकरणयुक्ते दरिद्रे ।

अपरिच्छन्न त्रि० परिच्छन्नः परिष्कृतः न०त० । अपरिष्कृते, मार्জ্জনगुल्मादिरहिते ।

अपरिच्छिन्न न० न परिच्छिन्नः । द्रव्यान्तरहिते निःसीमनि कूटस्थे चैतन्यात्मके ब्रह्मणि "तदेतद्ब्रह्मापूर्व्वमनपरमनन्तमिति श्रु०उ०श्रुत्या तस्यान्तराकृत्योक्तेस्तथात्वम् द्रव्यान्तरहितमात्रे त्रि० "जगत्पर्य्याप्नेत्यादि" भाष्यव्याख्यायामपर्य्याप्तः अपरिच्छन्न" इति मल्लि० ।

अपरिच्छेद पु० अभावार्थे न० । परिच्छेदाभावे द्रव्यत्वाभावे । न०ब० । द्रव्यत्वशून्ये त्रि० । [तच्छून्ये त्रि० ।

अपरिज्ञान न० अभावे न०त०। तत्त्वविषयकाभावे । न०ब० ।

अपरिणत त्रि० परि+नम–क्त न०त० । अपरिपक्वे । यस्य यथा परिणाम उचितस्तथात्वमप्राप्ते अन्यरूपतामप्राप्ते च ।

अपरिणय पु० परिणयो विवाहः अभावे न०त० । विवाहाभावे । [काले कौमारात्प्रागयुक्ते ।

अपरिणीत त्रि० परि+नी-क्त न०त० । विवाहसंस्कार-

अपरितोष पु० अभावे न०त० । सन्तोषाभावे ।

अपरिपक्व त्रि० न०त० । परिपक्वभिन्ने यस्य यथा परिणतिरुचिता तथारूपतामप्राप्ते, "यथा अपरिपक्वयोनीति" । विक्लित्तिप्राप्तिशून्ये आमे तण्डुलफलादौ च ।

अपरिमाण न० अभावे न०त० । परिमाणाभावे द्रव्यसाराहित्ये न०ब० । तच्छून्ये त्रि० ।

अपरिमित त्रि० न०त० । द्रव्यत्वशून्ये परिमाणशून्ये ।

अपरिमेय त्रि० परिमातुं योग्यः न०त० । परिमातृमयोग्ये द्रव्यसारहिते ।

अपरिम्लान पु० न परिम्लायति कर्त्तरि क्त । रक्तवर्णे (आवला) ख्याते महासहाद्रुक्षे रा०नि० । तस्य बहुभर्द्रनेऽपि म्लानिराहित्यात् तथात्वम् । म्लानिवर्জিते त्रि० ।

अपरिविष्ट त्रि० परि+विष–कर्म्मणि क्त न०त० । वेष्टनशून्ये अव्याप्ते । "जर्ज्जयन्त्या अपरिविष्टमास्थमिति" ऋ० २, १३,८ । अपरिविष्टं मलादिभिरव्याप्तमिति" भा० । विष्टभाहारार्थमुपकृतं न०त० । परिवेषनशून्ये भोजनपरिमार्थमनुपढौकिते त्रि० ।

अपरिवृत त्रि० न परिवृतः । अनाच्छादिते । परितोवेष्टनरहिते अनावृते क्षेत्रादौ "तत्रापरिवृतं यस्यं विहिंस्युः पशवोयदीति" मनुः क्षेत्राद्यावरणप्रकारोऽपि तेन दर्शितः "वृतिं तत्र प्रकुर्व्वीत यान्नद्रोणावलोकयेत् छिद्रञ्च वारयेत् सर्व्वं श्वशूकरमुखानुगमिति" तेन तादृशच्छिद्रद्रोणावरणशून्येऽपि अपरिवृतत्वम् असंसृष्टे च "मरुद्भिरपरीवृतो वसति प्रचेताः" ऋ० २,१०,३, अपरीवृतोऽसंसृष्टः इति भा० वेदे दीर्घः । [राहित्ये। न०ब०। द्रव्यत्वशून्ये त्रि० ।

अपरिशेष पु० अभावे न०त० । परिशेषाभावे द्रव्यत्वा-

अपरिष्कार पु० अभावे न०त० । मार्ज्जनादियोधनसंस्कारा-भावे । न०ब० । तच्छून्ये त्रि० ।

अपरिष्टि स्त्री अप+वैपरीत्ये रिष-हिंसायाम् क्तिन् । पूजायाम् हैम० । पूजायाश्च हिंसाहेतुकद्वेषशून्यत्वात् तथात्वम् ।

अपरिसमाप्ति स्त्री अभावे न०त० । इयत्ताभावे समाप्त्यभावे च । न०ब० । तच्छून्ये त्रि० । [न०ब० । तच्छून्ये त्रि० ।

अपरिसर पु० अभावे न०त० । विस्ताराभावे प्रचाराभावे च

अपरिहरणीय त्रि० न परिहर्त्तुं शक्यते हृ-शक्यार्थे कर्म्मणि अनीयर् । परिहर्त्तुमशक्ये, परिहर्त्तुमयोग्ये च ।

अपरिहार्य्य त्रि० न परिहर्त्तुमर्हति शक्यते वा हृ-ण्यत् । परिहर्त्तुमयोग्ये, परिहर्त्तुमशक्ये च ।

अपरीक्षित त्रि० न०त० । रूपवर्णपरिमाणादिना यथार्थ तत्त्वानुसन्धानशून्ये "एतच्चापरीक्षितक्रयविषयमिति" मिताक्षरा परीक्षिते तु "परीक्षितं तु यत् क्रीतं तत् सर्वं न निवर्त्तयेदिति" तद्धृता स्मृतिः ।

अपरीत त्रि० न०त० । परितोऽव्याप्ते अनभिगते च "शवसाऽपरीता" इति ऋ० १,१००,३, "अपरीताः अपरैरनभिगता" इति भा० । अपरिगते, अपर्य्याप्ते च "अपरीतं नृतो शव" इति ऋ० ८,२४,६, "अपरीतम् शत्रुभिरपरिगतमव्याप्तमिति वा" भा० ।

अपरुष् त्रि० अपगता रुट् यस्य । विगतक्रोधे "अपरुषा परुषाक्षरमीरितेति" रघुः ।

अपरूप न० अप आनन्दे आश्चर्य्ये वा प्रा०स० । आश्चर्य्यरूपे आनन्दहेतुप्रशंसितरूपे च । "ततोऽपरूपं जायते तस्माद्व्येष्यदेनस इति" अथ० १२,४,६, अपकृष्टरूपे च । प्रा०ब० । तद्वति त्रि० ।

अपरेद्युस् अव्य० अपरस्मिन् अह्नि एद्युस् । अपरदिने इत्यर्थे "पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः ।

अपरोक्ष अव्य० न परोक्षम् इन्द्रियासन्निकृष्टम् । प्रत्यक्षे विषयेन्द्रियसन्निकर्षोत्पन्ने ज्ञाने "सम्भावनादिनिरासे तु विचारविपाकात्तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभावात् फलं जनयदपरोक्षमित्युच्यते" इति टङ्काः । फलं ज्ञाततामिति भाट्टाः चितिबुद्धेः प्रतिविम्बमिति सांख्याः बुद्धौ चितः प्रतिविम्बमिति वेदान्तिनः । संस्कारम् विषयताविशेषं वेति तार्किकादयः । तथा हि प्रथममिन्द्रियेण विषयः संबध्यते ततो विषयालोचनारूपं विनिर्विकल्पकस्थानीयं सामान्याकारं ज्ञानं जायते ततः विषयावरणरूपप्रतिबन्धनाशात् चित्प्रतिविम्बरूपं फलं जनयज्ज्ञानमपरोक्षमित्युच्यते इति वेदान्तिनः । नैयायिकास्तु विषयेन्द्रियसन्निकर्षात् प्रथमं निर्विकल्पकरूपं विशेष्यविशेषणयोः संसर्गानवगाहि ज्ञानं जायते तदुत्तरं विषयप्रत्यक्षमित्यङ्गीचक्रुः । सांख्यादयस्तु विषयेन्द्रियसन्निकर्षात् बुद्धेस्तत्तद्विषयकारेण परिणामे जाते ततश्चेतनायत्तौ बुद्धेः प्रतिविम्बरूपं फलमुत्पद्यते तत्रैव ज्ञानत्वव्यवहारोमुख्यः बुद्धिवृत्तौ तु गौण इति मन्यन्ते । "युक्तितोऽपि न बाध्यते दिङ्मोहरदपरोक्षादृते" सां०रू० । ब्रह्मणस्तु अज्ञानरूपावरणाभावात् सर्वदा प्रकाशमानत्वात् नेन्द्रियादिसन्निकर्षापेक्षेति तस्य सर्वदा प्रत्यक्षरूपत्वम् "यत् साक्षादपरोक्षाद्ब्रह्मेति" श्रुतिः अपरोक्षादपरोक्षमित्यर्थः । अर्श० अस्त्यर्थे अच् । तद्विषये त्रि० ।

अपरोक्षानुभूति पु० अपरोक्षा प्रत्यक्षा अनुभूतिर्यस्मात् । वेदान्तप्रकरणभेदे । कर्म० । प्रत्यक्षरूपे ज्ञाने स्त्री ।

अपरोध पु० अप+रुध-भावे घञ् । "बाधने अभिप्रायमभिषुखन्ति देशानपरोधेन" काल्या० २४,३,२१ ।

अपर्णा स्त्री नास्ति पर्णान्यपि वृत्तिसाधनानि यस्याः । शैलराजदुहितरि उमायां सा हि शिवप्राप्त्यर्थं व्रतकाले पर्णान्यपि त्यक्तवती यथोक्तं कुमारे "स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः । तदपाकीर्ण मतः प्रियंवदाम् वदन्त्यपर्णामिति तां पुराविद" इति "चतुर्थे त्यक्तपर्णा च अपर्णाख्यामवाप सेति" शि०पु० ।

अपर्त्तु त्रि० अपगत ऋतुर्यस्य । वसन्ताद्यृतुविगमयुक्ते । "यत्र विजायते यमिन्यपर्त्तुरिति" अथ० ३,२८,१, अपगतऋतुः स्त्रीपुंसं यस्याः । निष्टत्तरजस्कायां स्त्रियां स्त्री ।

अपर्य्याप्त त्रि० नास्ति पर्य्याप्तोमर्य्यादा यस्य । निःसीमनि इयत्तारहिते "तदत्यमपर्य्याप्तं दुर्ज्जयं वानरं बलम्" रा० ।

अपर्य्याप्त त्रि० परि+आप-क्त न०त० । असमर्थे, असम्पूर्णे, स्वकार्य्याक्षमे च "परिभुक्तमवज्ञातमपर्य्याप्तमसंस्कृतम् यः प्रयच्छति विप्रेभ्यस्तद्वन्यवतिष्ठतीति" "अपर्य्याप्तं स्वकार्य्याक्षममिति शु०त० रघु० । अपरिच्छिन्ने इयत्तारहिते "जगत्यपर्य्याप्तसहस्रभानुनेति" माघः "अपर्य्याप्तः अपरिच्छन्न" इति मल्लि० ।

अपर्य्याप्ति स्त्री न पर्य्याप्तिः अभावार्थे न०त० । अपरिच्छेदे असामर्थ्ये च । "सुखं आद्धं मासिमासि अपर्य्याप्तदत्तं प्रतीति" स्मृतिः । न०ब० । परिच्छेदशून्ये त्रि० ।

अपर्य्याय पु० न पर्य्यायः परिपाटी अभावे न०त० । क्रमाभावे । न०ब० । क्रमशून्ये त्रि० ।

अपर्य्युषित त्रि० न पर्य्युषितः । अभिनवे सद्योभवे पुष्पादौ । "अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैरिति" नर० पु० ।

अपर्वदण्ड पु० अपर्वा दण्ड इव । रामठाख्यगरभेदे तस्येतरगरस्येव ग्रन्थियुक्तत्वाभावात्तथात्वम् ।

अपर्वन् त्रि० नास्ति पर्व ग्रन्थिः अन्यप्रकरणपरिच्छेदो वा यस्य । ग्रन्थिशून्ये दण्डादौ विच्छेदशून्ये ग्रन्थादौ च । वा कप् । अपर्वकोऽप्यत्र त्रि० । "यदपर्वक स्यात् प्रतस्मिमिति" शत० ब्रा० । "विच्छेदशून्यमिति" भा० ।

अपल न० अपक्रमनिष्टत्त्यै लाति गृह्णात्यत्र ला–बा० आधारे क । कीलके शब्द० मा० । तद्बन्धने हि अपक्रमनिष्टत्तेस्तथात्वम् । नास्ति पलं मांसं यस्य । मांसशून्ये त्रि० ।

अपलाप पु० अप+लप–घञ् । सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, "न च प्रत्यक्षसिद्धस्यापलापः कर्तुं शक्यते इति" अप+आनन्दे लप्यतेऽनेन लप करणे घञ् । स्नेहे मेदिनिः । स्नेहेनैवानन्दभावणात्तथात्वम् ।

अपलाषिका स्त्री लष इच्छायां पर्य्याये खुच् लाषिका पर्य्यायेण इच्छा अप वैपरीत्ये प्रा० स० । अपर्य्यायेच्छारूपायां तृष्णायामतिशयलालसायाम् हेम० । अत्रार्थे अपलाषिकेति पाठकल्पनं प्राग्वादिकं लषतेरिच्छार्थत्वाभावात् ।

अपलाषिन् त्रि० अप+अपकर्षे लष–ताच्छील्यादौ घिनुण् । अनुचितधनादितृष्णाशीले । स्त्रियां ङीप् ।

अपलाषुक त्रि० अप+अनुचितत्वात् अपकर्षे लष–ताच्छील्यादौ बा० उकञ् । अनुचितधनादितृष्णाशीले ।

अपल्यूलन न० न पल्यूलनं शोधनम् अभावे न० त० । स्नानमार्জ্জনक्षारसंयोगादिना शोधनाभावे । "यदिदं स्नातवस्त्रं निर्हितमपल्यूलनकृतं भवतीति शत० ब्रा० । "अपल्यूनकृतं क्षारद्रव्यसंयोगादिनाऽशौतमिति" भा० । अत्रासमर्थसमासात् करणे नञर्थान्वय इति भेदः । तथा च रजकाधौतमिति तदर्थः । कर्मकाले रजकधौतवस्त्रं परिधानस्य स्मृतौ निषेधात् तथोक्तम् ।

अपवत् त्रि० अपः कर्म तदस्यस्य मतुप् वेदे सस्य लोपः । कर्मयुक्ते । "अपृपानपवांश्चरुरेह सीदतु" अथ० १८, ४, २४ ।

अपवन न० अपगतं क्लृप्तिमत्वात् खल्पत्वाच्च वनम् प्रा० त० । उपवने कृत्रिमवने हेम० । [अन्तर्गृहे वासगृहे ।

अपवरक न० अप+व्रियते अप+वृ–कन्० संज्ञायां वुन् ।

अपवरण न० अप+वृ–भावे ल्युट् । अनावरणे आवरणाभावकरणे च ।

अपवर्ग पु० अपवृज्यते संसारोऽत्र अप+वृज–घञ्कुत्वम् । मोक्षे । "स्वपर्गापवर्गयोर्मार्गमामनन्ति मनीषिण" इति गारुडा० । "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायादनन्तरापायादपवर्गः" इति "कृत्स्नत्रयोपाकरणाच्चात्यन्तपवर्गः" इति च न्यायसू० । अपवर्गप्रकारस्तु मोक्षशब्दे वक्ष्यते । भावे घञ् । दाने, त्यागे च "सुहृदेरसम्भेद इवापवर्गे" किरा० । अपवृज्यते विरज्यते यस्मात् अपादाने घञ् । फलप्राप्तौ तद्धेतुके कर्म्मसमापने च "अपवर्गे तृतीयेति" पा० । "अपवर्गे तृतीयेति भणतः पाणिनेरपीति" नैषधम् "उद्गयपवर्गं सुखेषु सम्पद्यादिति" ता० ब्रा० । "कृत्वा गते भाग्य इवापवर्गमिति" किरा० "अपवर्गं समाप्तिमिति" मल्लि० ।

अपवर्ज्जन न० अप+वृज ल्युट् । दानादावपवर्गार्थे । "घटापवर्जनमिति" मिताक्षरा ।

अपवर्ज्जित त्रि० अप+वर्ज्ज क्त । परित्यक्ते, त्यागे, दत्ते च ।

अपवर्त्तन न० अप+वृत णिच् ल्युट् । परिवर्त्तने, वक्रीकरणे अङ्कयास्ते प्रसिद्धे भाज्यभाजकयोरुभयोरपि तुल्यरूपेण केनचिदङ्केन विभाजने । "समेन केनापवर्त्त्येते" लीला० । अपहरणे च "न त्यागोऽस्ति द्विपन्नाद्य न च दायापवर्त्तनमिति" मनुः । भावे अच् अपवर्त्तोऽप्यत्र पु० ।

अपवाद पु० अप+वद भावे घञ् । निन्दायाम् अपकीर्त्तौ "किं करिष्यामि राज्येन सापवादेन राघव !" "प्रकाशं च कृते तस्मिन्नपवादो भवेन्मम" इति च रामा० । मिथ्यावादे "अपवादमात्मबुद्धानामिति" सां० सू० "अपवादः मिथ्यावादः" भा० । कुत्सितवादे तत्रैव "अपवादः कुत्सितवाद" इति व्याख्यान्तरम् । अपोद्यते सामान्यशास्त्रं स्वविषयात् सङ्कोच्यतेऽनेन करणे घञ् । विशेषशास्त्रे । तच्च स्वविषयं परिकृत्य सामान्यशास्त्रं विषयान्तरे व्यवस्थापयतीति तस्य सङ्कोचकं भवति यथा "मा हिंस्यात् सर्व्वाभूतानीति" श्रुतौ हिंसानिषेधस्य सर्वभूतविषयकत्वेऽपि "वायव्यं श्वेतमालभेतेति" शास्त्रं वायव्यश्वेतागहिंसाविषयकत्वेन विरोधात् स्वविषयात् सङ्कोचयत् तस्येतरविषयकतां व्यवस्थापयति "अपवादैरिवोत्सर्गाः कृतव्याहतयः परैरिति" कुमारः "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय" इति "अपवादेनोत्सर्गस्य चरितार्थस्यकर्त्रन्तरकेण बाध्यते" इति च व्या० परि० । "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" इति पा० भा० । अपोद्यते अपवाद्यते मिथ्याभूतमनेन अप+वद–करणे घञ् । वेदान्तमतसिद्धे मिथ्याभूतपदार्थनिवारणार्थोपदेशभेदे । स च रज्जुविवर्त्तस्य मिथ्याभूतसर्पस्य रज्जुमात्रत्ववत् वस्तुभूतब्रह्मणो विवर्त्तस्य प्रपञ्चादेः वस्तु-

भूतरूपतोपदेशः। "अध्यारोपापवादाभ्यां वस्तुतत्त्वविनिश्चय, इति वेदा० प्र०। भावे घञ्। विश्वासे, प्रणये च। करणे घञ्। बाधनसाधने वस्तुमात्रे। कर्म्मणि घञ्। कुत्सितवाद्ये "मधुकरैरपवादकरैरिव" माघः "अपवादः सगवञ्चनाय घण्टादि कुत्सितवाद्यमिति" मल्लि०। भावे घञ्। आदेशे "ततोऽपवादेन पताकिनीपतेरिति" किरा०। "अपवादेन आदेशेनेति" मल्लि०। निरासने च।

अपवादक त्रि० अपसार्य्य स्वविषयात्, वदति शास्त्रान्तरम् व्यवस्थापयति वद-ण्वुल्। स्वविषयं परिहृत्य सामान्यशास्त्रेतरत्र व्यवस्थापके विशेषशास्त्रे। अप+वद-ण्वुल्। अकीर्त्तिकरे" निन्दके निरासके च त्रि०। [ङीप्।

अपवादिन् त्रि० अप+वद-णिनि। अपवादकर्त्तरि स्त्रियां

अपवारण त्रि० अपवारयति आच्छादयति अप+वृ-णिच् नन्द्या० ल्यु। व्यवधायके। भावे ल्युट्। व्यवधाने नै० आधारे ल्युट्। अन्तर्द्धौ सति तु व्यवधाने अन्तर्धानं भवत्येवेति तस्य तथात्वम्।

अपवारित त्रि० अप+वृ-णिच्-कर्म्मणि क्त। आच्छादिते व्यवधापिते च। भावे क्त। अपवारणे, अप्रकाशे न०। "तद्ब्रवैदपवारितम्। रहस्यन्तु यदन्यस्य पराद्दत्तत्र प्रकाश्यते" इति सा०द० उक्ते पराद्दत्तत्राऽन्यस्य रहस्यकथने न० पराद्दत्तत्राऽन्यस्य रहस्यकथनमपवारितमिति तदर्थः।

अपवारितक न० अपवारितं अपवारणम् अप्रकाशमेव स्वार्थे कन्। अप्रकाशे "अपवारितकेन प्रादुष्योतीति" नाटकम्। अप्रकाश्याच्छोदयतीत्यर्थः।

अपवारुक पु० अप+वृ-ण०। उकञ्। प्रस्तरे।

अपवार्य्य अव्य० अप+वृ-णिच्-ल्यप्। आच्छाद्येत्यर्थे "विपताकैकरेणान्यमपवार्यान्तरा कथेति" सा०द०।

अपवास पु० अपसृत्य वासः स्थितिः। अपसरणे "अपवासे मनुष्याणामपवास उपसासुत" अथ० ३,७,७।

अपवाह पु० अपसार्य्य वाहः स्थानान्तरनयनम्। इतरस्थानादपसार्य्य स्थानान्तरप्रापणे। "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति" कौटिल्यः "भोनाः वट् गिति नवरसगरयतियुतमपवाहाख्यमिति" वृ०र० उक्ते वर्ण्यवृत्तभेदे।

अपवाहन न० अप+वह-णिच्-ल्युट्। परदेशस्थजनानां स्वदेशप्रापणे "स्वराष्ट्रं वर्द्धयेद्राजा परदेशापवाहनादिति" हितो०।। [वह-णिच्-ल्यप्। अपसार्य्यन्यत्रार्थे अव्य०।

अपवाह्य त्रि० अप+वह-कर्म्मणि ण्यत्। दूरीकार्य्ये। अप+

अपविघ्न त्रि० अपगतो विघ्नो यस्मात्। विघ्नशून्ये "शतं क्रतूनामपविघ्नमाप स" इति रघुः।

अपवित्र पु० न पवित्रः क्षतशौचादिः। अक्षतशौचादौ, "अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरे शुचिरिति" स्मृतिः।

अपविद्ध त्रि० अप+व्यध-क्त। त्यक्ते "अपविद्धगदोबाहुर्भग्नशाख इव द्रुम" इति कु०। "सोऽपविद्धस्तया रक्षस्निर्भेदभयादिति" दशकु०। प्रत्याख्याते, निरस्ते च "रत्नोविप्रकृतावास्तामपविद्धशुचाविव" रघुः "मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते" इति मनूक्ते द्वादशपुत्रान्तर्गते पुत्रभेदे पु०।

अपविद्या स्त्री अप विरोधे प्रा०त०। विद्याविरोधिन्यां वेदान्तादिप्रतिपन्नायामविद्यायाम् "तत्त्वस्य संविच्छिरिवापविद्यामिति" किरा०। अपकृष्टा विद्या। बौद्धाद्यागमविद्यायाम्। [राज०नि०। अपगतविषमात्रे त्रि०।

अपविषा स्त्री अपगतं विषं यस्याः। निर्विषत्वणभेदे

अपवृत्त त्रि० अपवर्त्तते अप+वृत-कर्त्तरि क्त। समाप्ते, "अपवृत्ते कर्मणि वामदेव्यगानं शान्त्यर्थमिति" गोभिलः। "अपवृत्ते समाप्ते" संस्कारतत्त्वे रघुनन्दनः।

अपवेध पु० अपकृष्टः अस्थानकृतत्वात् वेधः प्रा०त०। मणीनामस्थानकृते वेधने "मणीनामपवेधे च दण्ड उत्तमसाहसम् इति" मनुः।

अपव्यय पु० अपकृष्टः शास्त्रादिमर्य्यादासुल्लङ्घ्यास्थाने कृतत्वात् व्ययः प्रा०त०। द्यूतवेश्यादावस्थाने कृते व्यये। अपगतः व्ययश्चयोऽस्य। अविनश्वरे त्रि०।

अपव्ययमान त्रि० अप+वि+अय-शानच्। अपलापकर्त्तरि। "अर्थेऽपव्ययमानन्तु कारणेन विभावितम्। दापयेद्वनिकस्यार्थं दण्डलेशञ्च शक्तित इति" मनुः। अपव्ययमानमपलपन्नमिति दि०त०रघु०। अपव्ययकर्त्तरि त्रि०।

अपव्रत त्रि० अपगतं व्रतं औतादि कर्म्म यस्य। अपगतविहितकर्म्मणि "अनुव्रताय रन्धयञ्चपव्रतानिति" ऋ० १,५१,९, अपव्रतान् "अपगतकर्म्मण" इति भा०। "गूढ सूर्य्यं तमसाऽपव्रतेन" ऋ० ५०,४,६,१, अपगतव्रतस्य। नष्टव्रते गृहीतव्रतत्यागिनि त्रि०। प्रा०त०। अपकृष्टे व्रते न०

अपशङ्क त्रि० अपगता शङ्का यस्य प्रा०ब०। निःशङ्के शङ्कारहिते।

अपशद त्रि० अप+शद-कर्त्तरि अच्। नीचे इति कोचित्। तच्च सदधातुघटिततया दन्त्यमध्यमिति बहवः।

अपशब्द पु० अपशब्दविपरीते प्रा०त०। शक्तिवैकल्यप्रमा-

दादिना साधुशब्दस्यान्यथोच्चारणसाध्ये अपभ्रंशशब्दे "त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिः "म्लेच्छो हवा नाम यदपशब्दः" इति श्रुतिः ।

अपशव्य त्रि० पशवे हितः यत्, विरोधे न०त० । पशुवृद्धिविघातके "अपशव्येव तु वा ईश्वरा" इति ता०ब्रा० "अपशव्येव पशूनां वृद्धिविघातिनी" भा० ।

अपशु पु० न पशुः अप्राशस्त्ये न०त० । गोऽश्वभिन्ने पशौ । "अपशवो वा अन्ये गोऽश्वेभ्यः इति" "अपशुर्वा एष यदाग्नेयोनैतस्य होतव्यमिति" च शत०ब्रा० । नास्ति पशुर्यस्य । पशुशून्ये "अप्रजा अपशुर्भविष्यति" । शत०ब्रा० ।

अपशुच् त्रि० अपगता शुक् शोको यस्य प्रा०ब० । अपगतशोके । सर्वदाऽप्येतशोके आत्मनि पु० । "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनाऽपशुघ्नात्" इति, भागवते पाठं प्रकल्प्य श्रीधरेण अपशुघ्नात्येतिव्याख्यातम् तस्य हननञ्च यथार्थज्ञानं "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं ? चौरेणात्मापहारिणेति" मनुना आत्मनोऽन्यथारूपज्ञानेनैव स्वात्महन्तृत्वोक्तेः । "अन्धं तमस्ते प्रविशन्ति ये केचात्महनोजनाः" इति श्रुतिभाष्येऽपि तथैवात्माज्ञाने आत्महननमुक्तम् । अपशोकादयोऽप्यत्र त्रि० ।

अपश्चिम त्रि० न पश्चिमः विरोधे न०त० । अग्रिमे "कस्यस्य महाभागस्येषामासीदपश्चिम" इति रामा० नास्ति पश्चिमः शेषभवोयस्य । शेषशून्ये, दयत्तशून्ये च "अपश्चिमामिमां कष्टामापदं प्राप्नवत्यहमिति" रामा० ।

अपश्य त्रि० दृश–वेदे बा०य न०त० । अदृष्टरि अदर्शके "अन्धा अपश्या न दभन्नभिख्या" इति ऋ० १,१४८,५, "अपश्या अदृष्टारः" इति भा० लोके तु अदर्शीत्येव ।

अपश्रय पु० अप+श्रि–अच् । उषाकाले "सामासाद उद्गीथोऽपश्रयः" अथ० १५,१,८, ।

अपश्री त्रि० अपगता श्रीर्यस्मात् श्रीः शोभादिः । शोभादिहीने ।

अपश्लिष्ट त्रि० अप+श्लिष–क्त । श्लेषशून्ये, संसर्गहीने, विश्लिष्टे च । [अपक्रम्य स्थातरि त्रि० ।

अपष्ठ न० अप+स्था–क अस्वा० षत्वम् । अङ्गुष्ठाग्रे हेम० ।

अपष्ठु अव्य० अप+स्था–सुषामादि० षत्वम् । निर्हीने, शोभने, विपरीते, च । "अपष्ठु पठतः पाठमधिगोऽपि पठस्व ते" इति नैष० । प्रतिकूले, विरुद्धार्थे च त्रि० । काले पु० ।

अपष्ठुर(ल) त्रि० अप+स्था–कुरच् वा लत्वम् । प्रतिकूले हेम० । विपरीते त्रिका० ।

अपस् न० आप–असुन् हृस्वश्च । कर्म्मणि निरु० । तद्वति च । "अपसा सन्तु नेमे" ऋ० १,५४,८, अपः कर्म्म तद्वन्तो वेति भा० "ग्लास्त्वाऽक्रन्नप्सरोऽतन्वत" ता०ब्रा० । "अक्षण्वन्नीरपसोयन्त्यच्छा" ऋ० ७,७१,२ "अपसा कर्म्मयुक्ता" इति भा० । प्राग्ने त्रि० । "चक्ष्याम कर्म्मापसा नवेन ऋ० १,२१,८, "अपसा प्राग्नेनेति" भा० ।

अपसद त्रि० अपकृष्ट इव सीदति सद–अच् । अधमे, नीचे च । "रेरे क्षत्त्रियापसदाः!" इति वेणी० । "विप्रस्य त्रिषु वर्णेषु नृपतेर्वैश्यशूद्रयोः । वैश्यस्य वर्णे चैकस्मिन् यस्ते तेऽपसदाः सृता इति" मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुंस्त्री० । "ये द्विजानामपसदा ये चापध्वंसजाः सृता" इति मनुः ।

अपसम अव्य० समाया अत्ययः अव्ययी० । वत्सरात्यये तिथ्यादृगुगणपाठाद्गैतस्य समासान्तरघटकता ।

अपसर पु० अप+सृ–भावे अच् । अपयाने, अपसरत्यस्मात् स्वत्वम् अपादाने अच् । प्रतिपक्षक्रमादौ । "निरन्वयोऽनपसरः प्राप्तः स्यात्तौरकिल्बिषमिति" मनुः । "अपसरः प्रतिपक्षक्रमादिः" कुल्लूकभट्टः ।

अपसरण न० अप+सृ–भावे ल्युट् । अपयाने "इतोऽव सरणमेव श्रेय इति" नाटकम् "अपसरणतोऽद्य वा अग्ने देवा जयन्तोऽजयन्" इति "दिवमेवाग्ने अग्रेदमन्तरिक्षमग्रेतोऽनपसरणात् सपत्नाननुदन्त इति च शत०ब्रा० १,६,१११ ।

अपसर्ज्जन न० अप+सृज–भावे ल्युट् । त्यागे, वर्ज्जने च । घञ् । अपसर्गोऽप्युक्तार्थे पु० ।

अपसर्प पु० अप+सृप–कर्त्तरि अच् । गुप्तचरे । "सर्वाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः" रघुः । "तयैवासर्पभूतया तत्र सङ्गाद्गणेशमघोरयाः" इति दशकु० । भावे घञ् । अपसरणे । [गमने ।

अपसर्पण न० अप+सृप–भावे ल्युट् । अपयाने पृषतो

अपसल त्रि० अप+सल–कर्त्तरि अच् । अपसव्यतामापन्ने । "यथाबालं पुरस्कृत्य यज्ञोपवीतानि अपसलानि कृत्वा तीर्थमवतीर्य्येति" शु०त० बौधा० । "अपसलानि अपसव्यानीति शुद्धितत्त्वे रघुनन्दनः ।

अपसलवि अव्य० अप+सल–वा० अवि । तर्ज्जन्यङ्गुष्ठमध्यस्थानरूपे पितृतीर्थे, "तर्ज्जन्यङ्गुष्ठयोरन्तरा अपसलवि अपसव्यं वा तेन पितृभ्योनिदधाति" शु०त० स्मृत्यम् । "सव्येनैव पाणिना कृतन्तुं गृहीत्वा अपसलवि पूर्व्वस्यां वर्ह्यां पितृभ्यो निदध्यादिति" गोभिलः ।

अपसव्य न० अपक्रान्तं सव्यात् निरा०त०। १ देहदक्षिणभागे "तर्ज्जन्यङ्गुष्ठयोरन्तरा अपसव्ये अपसव्यं वेति" २ गरुडपरिभाषिते पितृतीर्थे च। अपगतं भग्नतया भूमौपातिततत्वम् सव्यं यत्र। भूमौ पातनेन भग्नप्रायवामाङ्गे अप वैपरीत्ये सू-भावे यत् सव्यं गतिः। विपरीते त्रि०। "अपसव्यं ततः कृत्वा पितृणामाप्नुदक्षिणमिति" याज्ञ०। "देवकर्म्मानन्तरं पितृकर्मकरणे प्राप्नुवामोपचारनिरासायाप्नुदक्षिणव्यापार" इति आ०त० रघु०। आप्नुदयिके हि "निपातो न हि सव्यस्य जानुनोविद्यते क्वचिदिति" आ०त० वशिष्ठोक्तेः भूमौ पातितवामजानूकरणाभावः। अतएव "नात्रापसव्यकरणं न पैत्रं तीर्थमिष्यते" इत्यादिना अपसव्यकरणनिषेधः सूपपन्नः। पितृतीर्थञ्च "यत्रानुक्तोविशेषस्तु दक्षिणस्तत्र गृह्यते इति" स्मृतेः। दक्षिणहस्तस्थ एव। "प्राचीनावीतिना भाव्यमपसव्यमतन्द्रिणा। पितृभाभिधनात् कार्य्यं विधिवद्दर्भपाणिना" इति मनुः।

अपसार पु० अप+सृ-णिच्-अच्। १ दूरीकरणे २ बहिष्करणे, ३ अपनयने ३ च। ल्युट्। अपसारणमत्र न०।

अपसारित त्रि० अप+सृ-णिच्-क्त। १ उत्सारिते २ दूरीकृते च

अपसिद्धान्त पु० अपक्रान्तः सिद्धान्तात् निरा०त०। १ स्वीकृतसिद्धान्तात् स्खलनरूपे दोषभेदे, "सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त इति" गो०सू०। सिद्धान्तं किञ्चिच्छास्त्रकाराभ्युपगतमर्थमभ्युपेत्य स्वीकृत्यानियमात् तत्रियमोल्लङ्घनात् कथायां प्रसङ्गः स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्त इति तदर्थः। यथा सांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्य कथायामारब्धायाम् आविर्भावस्याविर्भावाङ्गीकारेऽनवस्थेति दूषणे वादिनोद्भाविते प्रतिवादी यदा तद्दोषोद्धारणाय आविर्भावस्यासतोऽपि सत्तत्त्वमभ्युपैति तदा सत्कार्य्यवादिसांख्यमतविरुद्धाभिधायित्वेन स्वाभ्युपगतनियमातिक्रमात् स्वीकृतसिद्धान्तप्रच्यवरूपो दोषो भवति सएवापसिद्धान्तः एवमन्योऽप्युदाहार्य्यः। वितण्डावादिनः बौद्धभेदाश्च नापसिद्धान्तं दोषमङ्गीचक्रुः तेषां कस्यचित् सिद्धान्तस्यानङ्गीकारात्।

अपसोपान पु० अपक्रान्तः अतिक्रान्तः सोपानमाकारेण अत्या०स०। १ हस्तिनखे।

अपस्कर पु० अप+कृ-अप् रथाङ्गे नि०सुट्। १ चक्रभिन्ने रथारम्भके अवयवभेदे। "अपस्करोरथाङ्गमिति" पा०। "कूबरश्च रथस्थासीद्वासुकिर्भुजगोत्तमः। अपस्करमधिष्ठाने हिमवान् विन्ध्यपर्वत" इति भा०क०प० उक्तेः स्त्रीत्वमपि।

अपस्नात त्रि० अपगतं अमङ्गलार्थत्वात् स्नातः। १ मृतमुद्दिश्य स्नाते जने। २ स्नानसंस्काराय स्थापिते मृते पुंस्त्री०क्षीर०

अपस्नान त्रि० अपक्रान्तः स्नानात् निरा०स०। १ स्नानावशिष्टे जले "उद्वर्त्तनमपस्नानं विष्णवेरक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामत" इति मनुः।

अपस्पश त्रि० अपगतः स्पशोगूढचरोयतः। १ गूढचरभूत्ये। "यद्यद्विद्येव नोभाति राजनीतिरपस्पशेति" माघः। यद्यद्विद्याप्रसङ्गे पस्पशा पातञ्जलभाष्यस्य नवाह्निकं २ तच्छून्येत्यर्थः।

अपस्मार पु० अपस्मारयति स्मरणं विलोपयति अप+सृ-णिच्-कर्त्तरि अच्, अपगतः स्मारः स्मरणं यतो वा। १ रोगभेदे। स च सुश्रुते दर्शितो यथा "स्मृतिर्भूतार्थविज्ञानमप्यस्य परिवर्जने अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्नकृत्॥ मिथ्यादियोगेन्द्रियार्थकर्म्मणामतिसेवनात्। विरुद्धमलिनाहारविहारकृपितैर्मलैः। वेगनिग्रहशीलानामहिताशुचिभोजिनाम्। रजस्तमोऽभिभूतानां गच्छताञ्च रजस्वलाम्॥ तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशम्। चेतस्यभिहते पुंसामपस्मारोऽभिजायते॥ संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः। रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा॥ विक्षिपन् हस्तपादौ च विजिह्वभ्रू र्विलोचनः। दन्तान् वादन् वमन् फेनं विहतात्मः पतेत् क्षितौ॥ अल्पकालान्तरञ्चापि पुनः संज्ञां लभेत सः। सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः॥ वातपित्तकफैर्दृष्टैराद्यस्तु सन्निपाततः। हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता॥ निद्रानाशश्च तस्मिंस्तु भविष्यति भवन्यथ। वेपमानो दशेद्दन्तान् श्वसन् फेनं वमन्नपि॥ यो ब्रूयाद्विकृतं सत्वं कृष्णं मामनुधावति। ततो मे चित्तनाशः स्यात्सोऽपस्मारोऽनिलात्मकः॥ तृट्तापस्वेदमूर्च्छार्त्तोध्मनच्छर्दनानि विह्वलः। यो ब्रूयाद्विकृतं सत्वं पीतं मामनुधावति॥ ततो मे चित्तनाशः स्यात्स पित्तभव उच्यते। शीतेच्छाश्वासनिद्रार्त्तः यतन् भूमौ वमन् कफम्॥ यो ब्रूयाद्विकृतं सत्वं शुक्लं मामनुधावति। ततो मे चित्तनाशः स्यात्सोऽपस्मारः कफात्मकः॥ हृदि तोदस्तृडुत्क्लेदश्लिष्यमेतेषु संस्थया। प्रलापः कूजनं क्लेशः प्रलेकस्तु भवेदिह॥ सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे। अनिमित्तागमाद्व्याधेर्गमनादृतेऽपि च॥ आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम्। क्रमोपयोगाद्दोषाणां ऋषिकल्पात्तथैव च॥ आगमाद्दैवरूप्याच्च स तु निर्वर्त्तते बुधैः। वर्षत्यपि यथा देवे भूमौ बीजानि कानिचित्॥ यदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः। स्यायिनः कोचिदल्पेन

कालेनाभिप्रवर्द्धिताः ॥ दर्शयन्ति विकारांस्तु विश्वरूपाद्विसर्गतः । अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु" इति ॥ "धूर्त्तोऽपस्मारयोगी स्यादिति" ज्ञाता० कर्म्म० । "अपस्मारादिरोगाणां ज्वरादीनां विशेषत इति" वटुकस्तोत्रम् ।

अपस्मारिन् त्रि० अपस्मार+अस्त्यर्थे इनि । १ अपस्मारयोगयुक्ते । स्त्रियां ङीप् ।

अपस्य त्रि० अपसि कर्म्मणि साधुः अपस्+यत् । १ साधुकर्म्मकारिणि "अनाहुता अपस्योवसाना" इति "यजु० १०,७, अपस्याः अपसि कर्म्मणि साध्वयः" वे० दी० । "अपरेण स्वयमात्मनेत्यपस्याः यच्च पञ्चानूकान्लोक्यमिति" का० १७, ६,२, अपस्यास्तत्संज्ञका इष्टकाभेदा इति वेददी० ।

अपस्यु त्रि० अपः कर्म्मेच्छति अपस्+क्यच् उ । १ कर्म्मेच्छौ "गिर यदी सबन्धवः पञ्चाव्राता अपस्यव" इति ऋ० ६, ४४,२

अपह त्रि० अप+हन "अमे क्लेशतपसोः" पा० ड । १ अपघातकर्त्तरि । क्लेशापहः पुत्रः तमोऽपहः सूर्य्यः । योगविभागादन्यत्रापि "सुपरीक्षितमद्याद्यमद्यान्नास्त्रीविषापहैरिति" मनुः

अपहत त्रि० अप+हन-क्त । १ विनाशिते "योऽयमात्माऽपहतपाप्मेति" श्रुतिः ।

अपहति स्त्री अप+हन-क्तिन् । १ नाशने । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" छा० उ० ।

अपहर त्रि० अप+हृ-कर्त्तरि अच् । १ अपहरणकर्त्तरि "भद्रं भवेद्भयापहरं स्वलोके" इति हेमा० भवि० पु० ।

अपहरण न० अप+हृ-ल्युट् । १ स्तेये साधारणस्य परकीयस्य वा धनादिचौर्य्ये । "सीताद्रव्यापहरणे प्रस्तावामोषधस्य चेति" "निक्षेपस्यापहरणं नराश्वरजतस्य चेति" "भक्ष्यभोज्यापहरणे यानशय्यासनस्य च" इति च मनुः स्तेयस्वरूपञ्च स्मृतौ दर्शितं यथा "उपायैर्विविधैरेषां कलयित्वापकर्षणम् सुप्रमत्त प्रमत्तेभ्यः स्तेयमाहुर्मनीषिण" इति नार० । "स्यात् साहसं स्वन्वयवत् प्रसभं कर्म्म यत् कृतम् । निरन्वयं भवेत् स्तेयं कृत्वापक्रूयते च यदिति" मनुः । "अन्वयवद् द्रव्यस्वामिराजाध्यक्षादिसमक्षं प्रसभं बलाद्दृष्ट्वेन यत् परधनहरणादिकं क्रियते तत् साहसं, स्तेयन्तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वञ्चयित्वा यत् परधनहरणं तदुच्यते यच्चान्वयमपि कृत्वा न भयेदं कृतमिति भयात् निह्नुते तदपि स्तेयमिति" मिताक्षरा । तच्च साधारणस्य परकीयस्य वा हरणम् "सामान्यद्रव्यप्रसभहरणात् साहसं कृतमिति" याज्ञ० उक्तेः । तथाच परकीये साधारणे वा द्रव्ये स्वस्य हेतुभूतलौकिकक्रयप्रतिग्रहादिकमन्तरेण स्वत्वापादनं हरणम् तदेव बलपूर्व्वकं साहसमिति भेद इति मिताक्षरादिमतम् दायभागमते तु साधारणद्रव्यस्य नापहरणं परमात्मस्वत्वद्रव्यस्यैवापहरणमिति तत्रोक्तेरिति विशेषः । २ बलादपकर्षणे च । "निर्विशोऽतिसमर्थेन राज्ञाप्यपहरेन्न चेति" देवी भा० ।

अपहरणीय त्रि० अपहर्त्तुमर्हति अप+हृ अनीयर् । १ अपहरणयोग्ये तानि वस्तूनि च स्मृतौ दर्शितानि । "द्विजोऽध्वगः क्षीणवृत्तिर्द्वौ पिञ्छौ हे च मस्करे । आददानः परक्षेत्राद्दण्डं दातुमर्हति" मनुः । "चणकव्रीहिगोधूमयवानां सङ्गमायसोः । अनिभिद्येक्षितव्या सा दृष्टिरेका पथि स्थितैरिति" "तत्रैव मग्ने भक्ते भक्तानि सदनञ्चता । अपहरणविधानेन कर्त्तव्यं क्षीणकर्म्मणा इति" च मनुः । "द्विजस्तत्रैव पुष्पाणि मूलतः स्वदारुहरेदिति" याज्ञ० । "गोऽन्यत्र तृणमेधाभ्यां यत्राणैं वोऽहनस्यतोनां पुष्पाणि स्वदामीत फलानि चेति" गो० । २ अपनेतव्ये च ।

अपहर्त्री त्रि० अप+हृ तृच् स्त्रियां ङीप् । १ अपहारके । "निक्षेपस्यापहर्त्तोर तत्सुतं दापयेद्बलादिति" मनुः । क्षिपि तु नलोपात्क्षादिना षत्वे निषेधात् कर्म्मणि द्वितीया ।

अपहस पु० अपहासार्थे हस-घञ् । १ मस्तहस्ते अपहासार्थायोग्यतः हसोयस्य । २ मस्तहस्तेन अपहासिते त्रि० ।

अपहसित त्रि० हसेन अपहासयते अप+हस+णिच्-कर्म्मणि क्त । १ मस्तहस्तादिना निरस्ते अपहासिते ।

अपहार पु० अप+हृ घञ् । १ चौर्य्ये अपहरणे, २ अपनयने । "कर्णनासापहारेण भगिनी मे विरूपितेति" रामा० स्वाम्यनुपकारिधनत्यजे "नापहारं स्त्रियः कुर्युः पतिरिक्थात् कथञ्चनेति" स्मृतिः । "अपहारश्च धनस्वाम्यनुपयोगे भवतीति" दायभागः । ४ अपचये, ५ क्षतौ, ६ सङ्कोचने च ।

अपहारक त्रि० अप+हृ-ण्वुल् । १ चौर्य्यकर्त्तरि २ अपहारणकर्त्तरि ३ सङ्कोचके ४ व्याजान्तरापकर्षके च । "जात्यापहारकान् पक्षिण" इति स्मृतौ० । अपहारकभेदाश्च मनुना दर्शिताः "द्विविधांश्चरतश्चरान् विद्यात् परद्रव्यापहारकान् । प्रकाशाश्चाप्रकाशाश्च चारश्चक्षुर्म्महीपतेः । प्रकाशवञ्चकाश्चान्ये नानापण्योपजीविनः । प्रच्छन्नवञ्चकाश्चान्ये ये स्तेनादविकादयः । उत्कोचकाश्चोपधिकाश्चञ्चकाः कितवास्तथा । मङ्गलादेशवृत्ताश्च भद्राश्चैतविधैः सह । अमेध्यकारिणश्चैव महापातकिनश्चकाः । विस्रोपचारयुक्ताश्च नियुक्ताः पण्ययोषितः । एवमादीन् विजानीयात् प्रकाशांश्चौरकर्म्मकान् । "निगूढचारिणश्चान्यानन्यांश्चार्थविलुम्पकान्" इति ।

अपहारिन् त्रि० अप+हृ–णिनि स्त्रियां ङीप् । १ अपहर्त्तरि २ अपनायके च "इन्द्रियाणां विचरतां विषयेष्वपहारिषु" इति मनुः "क्षेत्रदारापहारी च षड्ङेते ह्याततायिन" इति मनुः

अपहास पु० अप+हस–घञ् । १ अकारणहास्ये हेमचन्द्रः ।

अपह्नव पु० अप+ह्नु–अप् । १ सतोऽपि वस्तुनोऽसत्त्वेन कथनरूपेऽपलापे, । अपह्नवश्च द्विविधः शब्दतः अर्थतोवा "मिथ्यैतदिति शब्दतः, नाभिजानाम्यहं, तत्र तदा न मम स्थितिरित्येवमर्थतोऽपह्नव इति । २ प्रेमभेदे च ।

अपह्नुत त्रि० अप+ह्नु–क्त । १ ज्ञतापहारे वस्तुनि यस्य चौर्य्यं ज्ञातं तस्मिन्, २ स्थानान्तरं नीते, ३ अपसारिते च ।

अपह्नुति स्त्री अप+ह्नु–क्तिन् । १ अपह्नवे "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति" सा०द० उक्ते २ अर्थालङ्कारभेदे च । सा च द्विधा अपह्नवपूर्ब्बकः अन्यारोपः, अन्यारोपपूर्ब्बकः अपह्नवश्च यथा "नेदं नभोमण्डलमम्बुराशिर्नैतास्तारा नयफेनभङ्गाः । नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः" ॥ "एतद्विभाति चरमाचलचूडचुम्बि हिण्डीरपिण्डरुचिशीतमरीचिबिम्बम् । उच्चालितस्य रजनीं मदमानलस्य धूमं दधत्प्रकटलाञ्छनकैतवेन" ॥ "विराजते व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः" । इत्याद्याकारेण प्रकृतनिषेधो बोद्धव्यः । "गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन । यदि श्लेषेणान्यथा वाऽन्यथयेत् साध्यपह्नुतिः" सा०द० तत्र श्लेषेण यथा ॥ "काले वारिधराणामपतितया नैव भक्ष्यते स्थातुम् । उत्कण्ठितासि तरले ! न हि न हि सखि ! पिच्छिलः पन्थाः" ॥ अत्रापतितयेत्यत्र पतिं विनेत्युक्त्वा पतनाभावेनेत्यन्यथाकृतम् । अश्लेषेण यथा । "इह पुरोऽनिलकम्पितविग्रहा मिलति का न वनस्थलिना लता । स्मरसि किं सखि कान्तरतोत्सवं ! न हि घनागमरीतिरुदाहृता" इति ॥

अपह्नुवान त्रि० अप+ह्नु–शानच् । १ चोरयति २ अपनयति ३ संगोपयति च "अपह्नुवानस्य जनाय यच्चिजामिति" नैष०

अपह्नूयमान त्रि० अप+ह्नु–कर्म्मणि शानच् । १ अपनीयमाने २ स्थानान्तरमपसार्य्यमाणे ३ चौर्य्यमाणे च ।

अपह्रियमाण त्रि० अप+हृ–कर्म्मणि शानच् । १ चौर्य्यमाणे । २ अपाक्रियमाणे च ।

अपांक्षय पु० ईत० अलुक् स० । १ नेत्रे । अम्बुजलधरत्वात्तथात्वम् "अपांक्षये चक्षुषि, त्वां सादयामि "चक्षु वां अपांक्षय इति" श्रुतिः यजुर्वेददीपः । पदद्वयमित्येके ।

अपांज्योतिस् न० ईत० अलुक्स० । १ विद्युत्सुता हि अम्बु क्षियन्ति "अपांज्योतिषि विद्युति त्वां सादयामि" "विद्युद्वा अपांज्योतिरिति" श्रुतिः वे०दी० पदद्वयमित्येके

अपांनपात् पु० न पातयति पत–णिच्–क्विप् न०त० "न भ्राण्नपादित्वा०" पा० प्रकृतिभावः अलुक्स० । १ यज्ञ देवताभेदे । "अपोनपात् अपांनपाच्च देवतेति" सि०कौ० । "अपोनपाते अपांनपातेऽनुब्रूहीति" प्रैष्यः ।

अपांनप्त्रि(प्त्री)य त्रि० अपांनपात् देवताऽस्य घ, छ वा । १ अपांनपाद्देवताके हविरादौ ।

अपांनाथ पु० ईत० अलुक् स० । १ समुद्रे ।

अपांनिधि पु० निधीयतेऽस्मिन् नि+धा–आधारे कि ईत० अलुक्स० । १ समुद्रे, २ विष्णौ च "अपांनिधिरविज्ञानमप्रमत्तः प्रतिषिद्ध इति" विष्णुसह० । "सरितामस्मि सागरः" इति गीतोक्तेस्तस्य तथात्वम् । [२ वरुणे च ।

अपांपति पु० पा–डति ईत० अलुक् स० । १ समुद्रे,

अपांपायस् न० पाथः सारः ईत० अलुक्स० । १ अन्ने तस्य दृष्टिप्रभवत्वात्तथात्वम् "दृष्टेरन्नं ततः प्रजेति" गीतायां तथोक्तेः । "अपांपाथसि अन्ने त्वां सादयामि" "अन्नं वा अपांपाथ" इति श्रुतिः वे०दी० । पदद्वयमित्येके ।

अपांपित्त न० ईत० वा अलुक् स० । १ अग्नौ, तस्य जलहेतुत्वात् तत्पित्तत्वम् "आकाशाद्वायुर्द्वायोरग्निरग्नेराप" इति" श्रुतौ तस्य तथात्वावगतेः । वा लुकि अप्पित्तमप्यत्र ।

अपांपुरीष न० पुरीषं मलः ईत० अलुक्स० । १ सिकतासु, तासां जलमलरूपत्वात्तथात्वम् "अपांपुरीषे सिकतासु त्वां सादयामि "सिकता वा अपां पुरीषमिति श्रुतिः" वेददी० ।

अपांयोनि स्त्री ईत० अलुक्समा० । १ समुद्रे "अपांयोनौ समुद्रे" इति वेददी० "समुद्रोवै अपांयोनिरिति" शत० ब्रा० पदद्वयमित्येके ।

अपांशु(सु)ला स्त्री पांश(स)वोऽभिचारदोषाः सन्ति यस्याः सिध्१० लच् पांशु(सु)ला स्त्रैरिणी न०त० । १ पतिव्रतायां स्त्रियाम् "अपां(सु)शुलानां धुरि कीर्त्तनीयेति" रघुः ।

अपांसदन न० अलुक्स० । १ दिवि "दिवि ह्यापः सद्मा इति" शत०ब्रा० । भिन्नं पदमित्येके ।

अपांसधस्थ पु० ईत० अलुक्स० । १ अन्तरिक्षे "अपांसधस्थे अन्तरिक्षे" वेददी० "अन्तरिक्षं वा अपांसधस्थमिति" शत०ब्रा० । भिन्नं पदमित्येके ।

अपांसधिम् न० ईत० अलुक्स० । १ श्रोत्रे "अपांसधिमिव श्रोत्रे" वेददी० । "श्रोत्रं वा अपांसधिरिति" शत०ब्रा० ।

अपांसमुद्र पु० समुद्रः सदनम् ई॰ अलुक्स०। १ मनसि "मनो वा अपां समुद्र" इति शत०ब्रा०।

अपाक पु० पच-घञ् न०त०। १ पाकाभावे, भुक्ताद्यादेरग्निमान्द्यादिना २ पाकाभावे च। ७ब०। तत्साधने२जीर्णतारोगे। ईब०। पाकरहिते आमे त्रि०। ४ मूर्खः पाकः ५तद्विशे,प्रा० "ऐतनापाकाः प्राज्ञेन केचिदापय" इति ऋ० १,११०२, अपाकाः! पक्वाव्यप्रज्ञाःअपरिपक्वज्ञाना इति भा०। "अदिद्युतत् स्वपाको विभावाग्ने ऋ० ई,११,। पाकः पक्वाव्यप्रज्ञोमूर्खस्तद्विलक्षण इति" भा० "आ यस्मिन् त्वे स्वपाके यजत्रा" ऋ० ई,१२,२,"अपाके प्राज्ञे" इति भा० "पाकः पक्वाव्य" इति निरु०। पाकश्च द्विविधः लौकिकः अलौकिकश्च तत्र लौकिकः दहनादिसाध्यः अलौकिकस्तु द्विविधः कालकृतपरिणतिभेदः जठराग्निसाध्यश्च तत्र तण्डुलादेः पाकः लौकिकः, आम्रफलादेः कालकृतः, भुक्ताद्यादेः जठराग्निकृतः वैद्यकप्रसिद्धः। स च सुश्रुते दर्शितः "विपाकः प्रधानमिति" कस्मात्? सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यग्मिथ्याविपक्वानि गुणं दोषं वा जनयन्ति। तत्राऽन्ये प्रतिरसं पाक इति। केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तत्तु न सम्यग्भूतगुणादागमाच्चास्त्रो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यग्नेर्मन्दत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो मधुरस्त्वाम्लोऽम्लस्त्वेवं सर्व्वेषामिति केचिदाऽऽर्द्रदृष्टान्तं परिदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिपच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्त्याः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति। केचिद्वदन्त्यबलवन्तो बलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एषः। आगमे हि द्विविध एव पाकोमधुरः कटुकश्च तयोर्मधुराख्योगुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यग्नेजोवायुकाशानां द्वैविध्यं भवति गुणसाधर्म्यादुगुरुता लघुता च पृथिव्यापश्च गुर्व्यः, शेषाणि लघूनि, तस्मादुद्विविध एव पाक इति। भवन्ति चात्र।

द्रव्येषु पच्यमानेषु येऽम्बु पृथिवीगुणाः। निर्व्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥ तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु। निर्व्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते॥ पृथक्त्वदर्शिनामेव वादिनां वादसंग्रहः। तद्गुणैर्भेदं सामर्थ्यमिच्छन्त्यत्र विपश्चितः॥ तद्द्रव्यमात्मना किञ्चित्किञ्चिद्वीर्य्येण सेवितम्। किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा॥ पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्। रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥ जन्म तु द्रव्यरसयोरन्योऽन्यामेलकं स्मृतम्। अन्योऽन्यामेलकं जन्म कथा स्याद्देहदेहिनोः॥ वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः। रसेषु न वरुन्यते निर्गुणास्तु गुणाः स्मृताः॥ द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः। श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः॥ अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः। आगमेनोपयोज्यानि भेषजानि विचक्षणैः" इति॥ तदुभयाभावः अपाकः। वैद्यकोक्तापाकलक्षणमुक्तं निदाने "अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः॥ अपाकः शून्यताङ्गानामामवातस्य लक्षणमिति"। गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदुष्य, दृढं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरद्वृत्तमपाकमिति" माधवः। पाकः अल्पः ई तद्विशे त्रि०। "सेनयाग्नेरपाकचक्षस" इति ऋ० ८।७५।७। "अपाकचक्षसः अनल्पचक्षस" इति भा०। अधिकं पाकशब्दे वक्ष्यते।

अपाकज त्रि० न पाकाज्जायते जन-ड न०त०। १ पाकजभिन्ने "अपाकजानुष्णाशीतः सर्व्वस्तु पवने मत" इति भाषा०।

अपाकरण न० अप+आ+कृ-ल्युट्। १ निराकरणे। "तदपाकरणायाहेति" प्रश्न०उ०भा०। "ऋणत्रयापाकरणाच्चाप्ययवर्ग इति" गौ०कृ०। अपसारणे, दूरीकरणे च। "निधाय वत्सापाकरणं पूर्व्ववदिति" का० ४१२।३५।

अपाकरिष्णु त्रि० अप+आ+कृ-वा० ष्णुच्। १ दूरीकरणशीले २ अपसारणशीले।

अपाकर्त्तवै अव्य० अप+आ+कृ-तुमर्थे तोसुन्। १ अपाकर्त्तव्ये तस्य च भावलक्षणत्वमौपाधिकम्।

अपाकर्म्मन् न० अप+आ+कृ मनिन् निरासे।

अपाकशाक पु० न पच्यते शाको यस्य। १ आर्द्रके। तस्य मूलमेव भोजनार्थं पच्यते न शाकः।

अपाकिन् त्रि० न पाकोऽस्यास्य इनि॥ १ पाकशून्ये अपाके।

अपाकृत त्रि० अप+आ+कृ-क्त। १ निवारिते २ दूरीकृते "अपाकृतस्वेदलवामरुद्भिरिति" रघुः। [२अपसारणे च।

अपाकृति स्त्री अप+आ+कृ-भावे क्तिन्। १ दूरीकरणे।

अपाकृत्य अव्य० अप+आ+कृ-ल्यप्। १ निराकृत्येत्यर्थे "ऋणत्रयमपाकृत्य मनोमोक्षे निवेशयेदिति" मनुः।

अपाक्रिया स्त्री अप+आ+कृ-भावे य। १ अपाकरणे २ अपसारणे "ऋणानाम नपाक्रियेति" उपपातकगणनया स्मृतिः

अपाक्तात् अव्य० अपाची अवाची प्रतीची वा बा० तातिल् ।अवाच्याः २प्रतीच्या वा इत्यर्थे "प्राक्तादपाक्तादधरादुदक्तादभि ऋ०७,१०४।१९ । अपाक्तात् प्रतीच्या इति भा०।

अपाक्त न०० अपनतमनुगतमक्तमिन्द्रियम् अत्या० स० । १ इन्द्रियसन्निकर्षजे प्रत्यक्षे २ तद्विषये त्रि० त्रिका० ।

अपाङ्क्तेय त्रि० सह्नः सह भोजने पङ्क्तिमर्हति अर्हार्थे ढक् न०त० । १ सह्नः सह एकपङ्क्तौ भोजनानर्हे स्तेनपतितादौ । अत्र व्यञि अपाङ्क्त्य इत्यपि । ते च मनौ दर्शिताः यथा "ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ जटिलं चानधीयानं दुर्बलं कितवं तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तोवर्ज्याः स्युर्हव्यकव्ययोः ।

प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । अक्षद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥ कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वागुदुष्टः कुण्डगोलकौ ॥ अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । आग्नेयैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥ अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥ पिता विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥ वृषलीनां कर्त्ता च यश्चाग्नेदिधिषूपतिः । मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ भ्रामरी गण्डमाली च श्वित्रयथो मिमुस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥ हस्तिपोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ स्रोतसां भेदको यश्च तेषां च प्रोषणे रतः । गृहसंरोधको दूतो दृष्टारोपक एव च ॥ वृक्षक्रीड़ी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः ॥ आचारहीनः स्त्रीवश्च नित्यं याचनकस्तथा । क्षयिजीवी स्त्रीपदी च सङ्गिर्निन्दित एव च ॥ औरभ्रिको मार्गिणिकः परपूर्वापतिस्तथा । प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः ॥ एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरोविद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥ अपाङ्क्त्यदाने यो दातुर्भवत्यूर्द्धं फलोदयः । दैवे हविषि पित्र्ये वा तत्प्रवक्ष्याम्यशेषतः ॥ अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्त्रादिभिस्तथा । अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते" इति ॥

अपाङ्क्त्य त्रि० न पङ्क्तिमर्हति अत्र न०त० । १ अपाङ्क्तेये । "अपाङ्क्त्यदाने योदातुरिति" मनुः ।

अपाङ्ग पु० अपञ्चति तिर्य्यक् चलति नेत्रं यत्र अप+अञ्च घञ् । १ नेत्रप्रान्ते, "अञ्जनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जन" इति नैष० २ तिलके च । अपगतमङ्गं यस्य प्रा० ब० । २ अङ्गहीने त्रि० स्त्रियां ङीप् ।

अपाङ्गक पु० अपगतमङ्गं यस्य वा कप् । (आपाङ्) इति ख्याते अपामार्गे । स्वार्थे कन् १ नेत्रान्ते पु० । २ अपगताङ्गे त्रि० ।

अपाङ्गदर्शन न० अपाङ्गेन नेत्रान्तेन दर्शनं ३त० । १ कटाक्षे

अपाङ्गनेत्र न० अपाङ्गं देशं व्याप्य नेत्रम् । १ दीर्घनेत्रे ।

अपाच् त्रि० अपाञ्चति अप+अनुच—क्विप् । १ अपगमनकर्त्तरि २ अप्रकाशार्थे च । स्त्रियां ङीप् । सा च २ दक्षिणस्यां दिशि, ४ प्रतीच्यामिति वेदभाष्ये माधवः । "प्राक्तादपाक्तादधरादिति ऋ०७,१०४,१९ "अपाक्तात् प्रतीच्या" इति तेन व्याख्यानात् । तत्र पदान्तरेण दक्षिणप्रतीतेरपाक्शब्दस्य प्रतीच्यां लक्षणैव न तत्रशक्तिरिति तु युक्तम् ।

अपाचीन त्रि० अपाच्यां दक्षिणस्यां भवः ख । १ दक्षिणदिग्भवे २ अप्रकाशमाने च । "योऽप्रपाचीने तमसि मदन्तीरिति" ऋ० ७,६,४, "अपाचीने अप्रकाशमाने" भा० ।

अपाच्य त्रि० अपाच्यां भवः "दिक्पाग्दिग्भ्यो०" पा० यत् । १ दक्षिणदिग्भवे पदार्थे "ये के च नीच्यानां राजानो ये अपाच्यानामिति" ऐत० ब्रा० ।

अपाटव न० पाटवं पटुता पटु+भावेऽण् नास्ति तद्यत्र । १ रोगे । न०त० । २ पटुताभावे "अपाटवाद्यशौचाद्यैर्व्यदिविघ्नं प्रजायते" इति स्मृतिः । ६ब० । ३ पटुतान्यूने त्रि० ।

अपात्त त्रि० अप+आ+दा—क्त । १ प्राप्ते । "सहोवाच विज्ञायते नास्ति हिरण्यस्यापात्तमिति" छ० उ० । "अपात्तं प्राप्तमिति" भा० ।

अपात्र न० पात्रं श्राद्धभोजनदानादियोग्यं न०त० । १ विद्यादिहीनेऽनाचारे, २ दानादियोग्यताहीने कुपात्रे, नटादौ च । दानादिपात्रञ्च पात्रशब्दे दर्शयिष्यते । "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति" गीता "अपात्रेषु च यद्दत्तं तत् सर्वं विफलं भवेदिति" स्मृतिः "अपात्रे पात्रमित्युक्ते कार्ये वा धर्म्मसंहिते" इति मिताक्षरायां नारदः ।

अपात्रीकरण न० अपात्रं श्राद्धभोजनाद्ययोग्यं क्रियतेऽनेन। १ निन्दितप्रतिग्रहादिजनिते "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं" मिति मनूक्ते पापभेदे २ तद्धेतुभूते निन्दितधनादानादौ च।

अपाद् त्रि० नास्ति पादोऽस्य अन्यलोपः समा०। १ पादशून्ये "अपादपाणिर्जवनोग्रहीतेति" श्रुतिः।

अपादान न० अपगमाय आदीयतेऽवधित्वेन अप+आ+दा-ल्युट्। "ध्रुवमपायेऽपादानमिति" १ व्याकरणपरिभाषिते कारकभेदे। यथोक्तं हरिणा "अपाये यदुदासीनं चलं वा यदि वाऽचलम्। ध्रुवमेवातदावेशात्तदपादानमुच्यते" यतोध्रुव एवाश्वो यस्मादश्वात् पततत्यसौ। तस्माच्चाश्वस्य पतने कुद्यादि ध्रुवमुच्यते। मेषान्तरक्रियापेक्षमवधित्वंपृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक्" इति तच्चापादानं त्रिविधम्। "निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते" इति हर्य्युक्तेः। निर्दिष्टः श्रूयमाणो विषयो यस्य तत्, स्वापेक्षितश्रूयमाणक्रियमित्यर्थः यथा दृक्षात् पत्रं पततीत्यादौ, अपादानविषयीभूतं पतनं हि तत्र श्रूयमाणम्। द्वितीयम् उपात्तः गृहीतः धात्वन्तरार्थघटकीभूत इति यावत् विषयो यस्येति व्युत्पत्त्या स्वविषयक्रियाघटितश्रूयमाणक्रियान्तरमित्यर्थः यथा मेघात् विद्योतते विद्युदित्यादौ निःसरणपूर्व्वकविद्योतनार्थविद्योतितयोगे मेघादेस्तदेकदेशे निःसरणेऽपादानत्वम्। अपेक्षितक्रियं त्रयीयं यथा कुतो भवानिति प्रश्नवाक्ये, पाटलिपुत्रादित्युत्तरवाक्ये च कुत इति पाटलिपुत्रादित्यनयोरपेक्षितगत्यादिक्रियापेक्षत्वात् अपेक्षितक्रियापादानत्वम्। "अपादाने पञ्चमीति पा०।

अपान पु० अपानयति अपसारयति मूत्रादि अप+आ+नी-ड अपसारयति अधोऽनिति गच्छति वा अप+अन-अच् वा १ मूत्रादेरधो नयनशीले, गुह्यप्रदेशस्थे, "अधोनयनमपानस्तु आहारञ्च ददाति पुन" रित्युक्तलक्षणे 'मूत्रशुक्रवहोवायुरपान इति कीर्त्तितः' इत्युक्तलक्षणे च वायौ। "प्राणोऽपानव्यानसमान इत्येतत् सर्वं प्राण" इति श्रु० "अपनयनात् मूत्रपुरीषादेरपानोऽधोवृत्तिर्वायुः नाभिस्थान" इति भा० "अथ योऽयं प्रत्यङ् मुखिः सोऽपान" इति छा० उ०। "अथ योऽयं प्रत्यङ् मुखिः पश्चिमदिक्स्थो वायुविशेषः स मूत्रपुरीषाद्यधोऽनितीत्यपान" इति भा० "यद्वै प्राणिति स प्राणः यदपानिति सोऽपान इति" छा० उ०। "यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं वह्निर्निस्सारयति स प्राणाख्यो वायुर्वायुवृत्तिविशेषः यदपानित्यपश्यमिति ताभ्यामेव मुखनासिकाभ्याम् अन्तराकर्षति वायुः सोऽपानोऽपानाख्या वृत्तिरिति" भा०। पदार्थादर्शे तु पूर्व्वोक्तैव निरुक्तिर्दर्शिता यथा अपानयत्यपानोऽयमाहारं च मलार्षितम्। "शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः। इन्द्रगोपप्रभाकाशः सन्ध्याजलदसन्निभः॥ स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे कक्षाद्यास्तु नाभिमूले च तिष्ठती" ति योगार्थवः। "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठतीति" महा० भा० "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणा" विति गीता। अप+अन-भावे घञ्। २ अपानक्रियायाम् बहिर्गतायाः ३ प्राणवृत्तेरन्तः प्रवेशने पु० "प्रजाभ्योऽपानायेति" ता० ब्रा०। "अपानः बहिर्गतायाः प्राणवृत्तेरन्तःप्रवेशनमपाननं तेन हि वायुः शरीरे नीयते अपानेन, यतः "प्राणो न पराभवतीति" श्रुत्यन्तरमिति" ता० भा०। आधारे घञ् ४ गुह्यस्थाने पु०।

अपानन न० अप+अन-भावे ल्युट्। १ अपनयने, मुखनासिकाभ्यां बहिर्निस्सारिप्राणवायोस्ताभ्यामेव मार्गाभ्यामन्तराकर्षणे २ मूत्रपुरीषादेरधोनयने च अपानशब्दे ता० ब्रा० उदा०

अपान्तरतमस् पु० अपगतमान्तरं तमो यस्य। १ वेदार्थप्रकाशके देवसुतभेदे। "अपान्तरतमा नाम जातो देवस्य वै सुतः। कृताश्च तेन वेदार्थास्तेन सत्येन मोक्षयेति" हरिव० २६२अ०

अपाप त्रि० नास्ति पापं पापकारणं वा यस्य। १ पापजनकाचारशून्ये २ निष्पापे च "इयं दाशरथे! सीता सुव्रता ब्रह्मचारिणी। अपापा हि त्वया त्यक्तेति" रामा०।

अपामार्ग पु० अपमृज्यते व्याधिरनेन मृज्-करणे घञ् कुत्वदीर्घौ। (आपाङ्) इति १ ख्याते वृक्षे! "अपामार्ग! त्वया वयं सर्व्वं तदपमृजमहे" अथ० ४,१८,७। "अपामार्गं ओषधीनां सर्व्वासामेक वृहमीति" अथ० ४,१७,६,७।

अपामार्गक्षारतैल न० "कर्णनादे कर्णक्लेदे कटुतैलेन पूरणम् नादबाधिर्य्ययोः कुर्य्यात् कर्णशूलोक्तभैषधम् अपामार्गक्षारजलैः कृतकल्केन साधितम् तिलजमपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणात्" इति चक्रदत्तोक्ते १ तैलभेदे।

अपामार्गतैल न० "क्षयजे क्षयमासाद्य कर्त्तव्यो दृंहणो विधिः। पाने नस्ये च सर्पिः स्यादातञ्चैर्मधुरैः शुभम्। क्षमिजे व्योषनक्षाक्षशिग्रुवीजैश्च नावनम्। अजामूत्रयुतं नस्यं क्रमिजे क्रमिजित् परम्। अपामार्गफलव्योषनिम्बाचारकरामठैः। सविड्कं गृहीतं मूले तैलं नस्यं

क्रमिं जयेदिति" चक्रदत्तोक्ते १ क्रमिघ्नतैलभेदे ।

अपाय पु० अप+इण्-अच् । १ विश्लेषजनकक्रियायाम् "ध्रुवमपायेऽपादानमिति" पा० । "अपाये विश्लेषजनकक्रियायामिति" सि० कौ० । "अपाये यदुदासीनमिति" हरि० । २ नाशे ३ अपगमने च ।

अपायिन् त्रि० अप+इण-णिनि । १ अपाययुक्ते २ वियोगिनि ३ नश्वरे च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारतेति" गीता । "अनपायिनि संश्रयद्रुमे गजभग्ना पतनाय वल्गरीति" कु० ।

अपार त्रि० नास्ति पारं यस्य । १ पारशून्ये २ दुःखेनोत्तार्ये ३ दीर्घमर्य्यादे । "महीमपारां सदने सदक्षेति" ऋ० ३,३०,९ ४ अगाधे "अन्तरपार जर्वे अन्हतं दृहनोः ऋ० ३,१,१४ । "अपारे अगाधे" इति भा० । ५ दूरपारे "रजसो अपारे ऋ० १,४२,४ ई । "इमे चिदिन्द्र ! रोदसी अपारे इति ऋ० २,१२०५ । "अपारे दूरपारे" इति भा० । ६ सीमारहिते "मही अपारे रजसी" ऋ० ९,९८,३ । "अपारे सीमारहिते" इति भा० । ७ अधिके 'अपारो वो महिमा वृद्धशरस" इति ऋ० ५,८७,९ । "अपारः अधिक" इति भा० । "अपारे पारमिच्छन्तः संसारार्णवरोधसीति" भट्टभा० । "तदपार, मसंख्येयं वानराणां महद्बलम्" रामा० । ८ अनुत्तार्थे "रावणस्य महाबलमपारः प्रतिभाति मे इति" रामा० । तस्याः पारमपारञ्च व्रजन्ति विजयैषिण इति" भा० क० प० १९ अ० । ९ नद्यादेरर्वाक्पारे न० । १० पृथिव्यां स्त्री निरु० ।

अपार्ण न० अप+अर्ण-क्नि० न । १ अभ्यर्णे समीपे निरु० । २ समीपवर्त्तिनि त्रि० ।

अपार्थ त्रि० अपगतोऽर्थो यस्य । १ निरर्थके २ व्यर्थे ३ निष्प्रयोजने "सर्वमेतदपार्थं ते चिप्रं तौ संप्रसादयेति" वनप० २१४ अ० । ४ अभिधेयशून्ये, "अपार्थं बहु सङ्कीर्णं भाषते" इति सुश्रुतम् । वा कप् । अपार्थकोऽप्यत्र । अतो यदन्यद्विद्वद्भुर्धर्म्मार्थं तदपार्थकमिति" मनुः । तच्च योग्यतासत्त्वाकाङ्क्षात्मकं वाक्यं यथोक्तं गौतमेन "पौर्वापर्य्यायोगादप्रतिपत्तेरनर्थकमपार्थकमिति" "पौर्वापर्य्यं कार्य्यकारणभावस्तस्याऽयोगादसम्भवात् शाब्दबोधजनकाकाङ्क्षाज्ञानाद्यसम्भवात् अप्रतिपत्तेः असम्बद्धोऽर्थः प्रयोजनं शाब्दबोधरूपं यत्र । तत्राभिमतवाक्यार्थबोधानुकूलाकाङ्क्षादिशून्यबोधजनकत्वं तत्त्वमिति तदर्थः ।

अपाल त्रि० नास्ति पालः पालको यस्य । १ पालकशून्ये पश्वादौ । २ ब्रह्मवादिन्यामत्रिसुतायां स्त्री । "अपालामिन्द्र । शिष्यः पूह्यक्रणोरिति" ऋ० ८,९१,७ । अपालामेतन्नामिकामत्रिसुतां ब्रह्मवादिनीमिति" भा० ।

अपालम्ब पु० अपलम्ब्यालम्बते अप+आ-लम्ब घञ् । १ शकटपश्चाद्भागे "ततःपश्चात् परिक्रम्य अपालम्बमभिपद्याहेति" शत० ब्रा० ३,३,४,१२, "अपालम्बं शकटस्य पश्चाद्भागमिति" भा० । [पतित्वा लुण्ठने, २ अपाकरणे च ।

अपावर्त्तन न० अप+आ+वृत-ल्युट् । १ उल्लुण्ठने भूम्यादौ

अपावृत त्रि० अप+आ+वृ-क्त । १ अनावृते २ उद्घाटिते ३ अपसारितावरणे च "यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ । लभन्ते युद्धमीदृशमिति" गीता । "अहो अपावृतं द्वारमापदामयमेव मे" रामा० ४ आवृते, ५ पिहिते स्थगिते च इति मेदिनिः ।

अपावृति स्त्री अप+आ+वृ-क्तिन् । १ आवरणनिवारणे उद्घाटने २ आवरणापसारणे च । "स ज क्षे रेजयत्यपावृतिमिति" ऋ० ।

अपावृत्त त्रि० अप+आ+वृत-क्त । १ अन्तरिते २ पराङ्मुखे, ३ निवृत्ते च "प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचिदिति" भट्टा० भा० "कथं द्रक्ष्याम्यपावृत्तां परैरिव हृतां चमूमिति" रामा० । [वृत्तौ च ।

अपावृत्ति स्त्री अप+आ+वृत-क्तिन् । १ उद्वर्त्तने २ निवृत्तौ च ।

अपाश्रय पु० अप+आ+श्रि-अच् । १ मध्ये "पर्य्यङ्कापाश्रये" इति काद० । २ अङ्गप्रावरणे चन्द्रातपादौ हेम० अपगत आश्रयो यस्य । ३ आश्रयविहीने त्रि० ।

अपाष्ठ त्रि० अप+आ+स्था-क अम्बा० मत्वम् । १ अपास्थिते "शल्याद्विषं निरवचं प्राञ्जनादुत पर्ष्णेधेः । अपाष्ठाच्छुक्रादिति" अथ० ४,९,५ ।

अपासङ्ग पु० अप+आ+सन्ज-घञ् कुत्वम् । १ तूणे इषुधौ ।

अपासन न० अप+अस-ल्युट् । १ मारणे बधे २ अपक्षेपणे, ३ दूरीकरणे च ।

अपासित त्रि० । अप+अस+णिच्-क्त । १ अपसारिते ।

अपासृत त्रि० अप+आ+सृ-क्त । १ दूरीभूते २ पलायिते ।

अपास्त त्रि० अप+अस+क्त । १ क्षिप्ते २ निरस्ते ३ दूरीकृते ४ अपसारिते च "ससुच्छ्वसितविभ्रमा गतिरपास्तसंस्था मतिरिति" माघ० "निरस्तगाम्भीर्य्यमपास्तपुष्पकमिति" माघः । [पास्ताभरणानि यौवने" इति कुमा० ।

अपास्य अव्य० अप+अस-ल्यप् । १ निरस्येत्यर्थे । "किमित्यपि अव्य० न पियति गच्छति । पि-गतौ क्विप् न तुक् ।

अपक्रमकरणायोद्यमरूपायां, १ यत्नोत्कर्षभाविष्कर्तुमत्युक्तिरूपायाञ्च सम्भावनायां, २ सन्देहे, ३ निन्दायां, ४ प्रश्ने, ५ समुच्चये, ६ अल्पपदार्थे, ७ कामचारानुज्ञायाम्, ८ अवधारणे, ९ पुनरर्थे च। क्रियायोगेऽस्य उपसर्गसंज्ञा "अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु इति" पा० उक्तार्थेषु कर्म्मप्रवचनीयसंज्ञा तदर्थेषु न तु उपसर्गत्वम् तेन न पत्वादि तत्र "पदार्थे सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः। सम्भावनायां लिङ् तस्या एव विषयभूते भवने कर्त्तृदौर्लभ्यप्रयुक्तान्दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे। एवमेवापिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्त्तते सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्" सि०कौ० सम्भावने अपि स्तुयाद्विष्णुम् सम्भावनं यत्नोत्कर्षभाविष्कर्त्तुमत्युक्तिः। अन्यवसर्गः कामचारानुज्ञा अपि स्तुहि। गर्हायाम् धिग्देवदत्तमपि स्तुयाद्वृषलम्। समुच्चये अपि सिञ्च अपि स्तुहि। गणरत्ने तु "सम्भवगर्हागीर्कृतिभूषासमुच्चयेष्वित्युक्तं तेन तेऽपि अपिशब्दार्थाः तत्र १० सम्भवे योजनमस्ति, गर्हायाम् अपि पापिन्! ११ आशीर्वादे भद्रमपि, १२ स्तुतौ सरणमपि, १३ भूषायाम् अपि नकृतिष्कारम्, समुच्चये तदपीत्युदाहृतञ्च। समुच्चये 'अन्यप्रसिद्धं यशसे हि पुंसामिति' क्षेमा०। प्रश्ने "अपि प्रसन्नेन मरुद्गणेशा त्वमिति" रघुः अस्य क्रियायोगभेदे अकारलोपो वा "यष्टिभागुरिरञ्जोपधयाश्चेत्युपसर्गयो" रित्युक्तेः। अपिधानं पिधानं अपिनद्धः पिनद्ध इति "वितत्य पार्श्वे कवचं पिनद्धेति" भट्टिः।

अपिकक्ष अव्य० कक्षे विभक्त्यर्थे अव्ययी०। १ कक्षप्रदेशे इत्यर्थे "पीवायां बद्धो अपिकक्ष आसनि" ऋ० ४,४०,४।

अपिकक्ष्य त्रि० अपिकक्षं सम्बन्धमर्हति यत्। १ कक्षप्रदेशेन संधानभूते प्रवर्ग्यविद्याख्ये रज्जौ। "त्वाङ्गं यद्ध्वावरेऽपिकक्ष्यं वाम्" ऋ० १,१६७,२२। "अपिकक्ष्यं शिक्षस्व यद्धिरण्यः कक्षप्रदेशेन संधानभूतं प्रवर्ग्यविद्याख्यं रज्जुमिति" भा०।

अपिकर्ण न०अपिगतः कर्णम् अत्या०स०। १ समीपे। २ तद्वर्त्तिनि त्रि०। "हुते अपिकर्णे आहवे ऋ० ६,४८,१६, "अपिकर्णे कर्णसमीपगते समीपे स्थितः इति भा०।

अपिगीर्ण त्रि० अपि+ग्-क्त। १ कथिते २ वर्णिते स्तुते च। [१ प्रतिज्ञाशब्दे।

अपिग्रह(या)ण त्रि० अपि+ग्रह-वेदे-क्यप् लोके ल्युट्।

अपिच अव्य० ह०। १ किञ्चेत्यर्थे पदद्वयमिति भरतः।

अपिच्छिल त्रि० न०त०। १ पिच्छिलविरोधिनि गाढे २ अपङ्किले च। "प्रमोक्ष्यसे यदा मूलमनाविलमपिच्छिलमिति" निदा०।

अपिज त्रि० अपि अम्बु जायते जन-ड अलुक्स०। वेदे अम्बुशब्दैकत्वम्। १ ज्यैष्ठे मासि तस्य जलक्रीड़ारतिसाधनत्वात्तथात्वम्। "प्रसवाय स्वाहापिजाय स्वाहेति" यजु० १८,२८। "अम्बु जायते इत्यपिजः जलक्रीड़ारतत्वाज्ज्यैष्ठे इति" वेददीपः।

अपित् स्त्री आप् इतोगता यस्याः वेदे न जश्। १ अनरक्षितायां नद्याम् "अपितः पित्वं धिय" ऋ० ७,८२,३ "अपितोऽनरक्षिता नदीरिति" भा०। "अस्य मदे जरितर्मिन्द्रोजिन्वदनुरोऽपित्वदपित" इति तद्भृता श्रुतिः।

अपितु अव्य० अपि+तु+ह्र०। १ यद्यर्थे त्रिका०। २ किन्त्वित्यर्थे भूरिप्रयोगः।

अपित्व न० अपित्वरतेऽर्थे अपि+त्वर भा०ड। १ भागे भागिनो हि विभक्तधनाद्यादानाय त्वरते इति तस्य तथात्वम्। "तस्यामपित्वभीषा ते" इति शत०ब्रा०।

अपित्विन् त्रि० अपित्वं भागोऽस्यास्ति इनि स्त्रियां ङीप्। १ भागवति सभागे। "तस्मिन् देवता अपित्विन्योमन्यन्ते" इति शत०ब्रा०।

अपिधान न० अपि+ धा-ल्युट्। १ आच्छादने। करणे ल्युट्। २ तत्साधने त्रि०। "अक्तोपिधानमसि स्वाहेति" भोजनान्ते जलपानमन्त्रः "राध्यमानस्यौदनस्य द्यौरपिधानमिति" अथ० ११,३,१। साधने आच्छादनत्वोपचारात् सामानाधिकरण्यम्। अमेरतो वा लोपे पिधानमस्य "पृथिवी ते पात्रं द्यौः पिधानमिति" आह्वानमन्त्रः "तस्य तद्वारं यदमावास्या चन्द्रमा एवद्वारपिधानः" शत०ब्रा०।

अपिधि पु० अपिधीयते तत्रिपर्य्यन्तं दीयते अपि+धा-कि। १ तत्रिपर्यन्तदत्ते। "प्रियाँ अपिधौ वनिषीष्ट" ऋ० १,१२७,७, "अपधीन् तत्रिपर्य्यन्तं दत्तानिति" भा०।

अपिनद्ध त्रि० अपि+नह-क्त। १ परिक्षिप्ते, अतोवाक्षोभे पिनद्धश्च तत्रार्थे।

अपिप्राण त्रि० अपि+प्र+अन-अच् स्त्रियां ङीप्। १ सर्व्वदा चेष्टमाने "बलाता अपिप्राणो च सदनीच भूवा" इति ऋ०। १,१८६,११। "अपिप्राणी सर्व्वदा चेष्टमानीति" भा०।

अपिव्रत त्रि० अपिः संसर्गे संकटं व्रतं, कर्म्म, भोजनं वा यस्य।

१ दायाद्येनाविभक्ते २ संसृष्टधने ३ गोत्रजे ४ संसृष्टभोजने च । "अपिव्रताश्चान्वारभन्ते यजमानमिति" का० ८,६, २६ । "अपिव्रतास्त उच्यन्ते येषां यजमानव्रते अपित्वमस्ति दायाद्येनाविभक्ता इति" पित्रभूतिः "अपिव्रता गोत्रजा इति कर्कभा० "अपिः संसर्गे संसृष्टं व्रतं कर्म्म येषामिति अपिव्रता अविभक्ता दायादाः तेऽध्वर्य्वेनापि क्रय्यादि कर्म्म कृतं सर्वे उपजीवन्तीति हरिस्वामी, "व्रतं भोजनं यजमानेन सह प्राश्नभोजनाः बन्धुवर्गाः" इति माधवः ।

अपिशर्व्वर त्रि० अपिः प्रादुर्भावे अव्ययी० बा० अच् समा० । १ शर्व्वरीसुखसमये प्रदोषकाले, "समिद्धमपिशर्व्वरे" इति ऋ० ३,६,७, । "अपिशर्व्वरे शर्व्वरीसुखे" इति भा० ।

अपिशल पु० अपिशलते अपि+शल–अच् । १ मुनिभेदे तस्यापत्यम् इञ् । आपिशलिः । शाब्दिकभेदे । "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिशाब्दिका" क०क० "तुल्यापिशलेः" इति पा० ।

अपिहित त्रि० अपि+धा–क्त । १ आवृते "तुच्छेनाभ्रपिहित" इति श्रुतिः । अतोलोपे पिहितोऽप्यत्र "भुजङ्गपिहितद्वारमिति" रघुः ।

अपीच्य त्रि० अपिच्यवते सौन्दर्य्यादीयते अपि+च्यु–ड अतोलोप उपसर्गदीर्घः न०त० । १ अतिसुन्दरे "अपीच्यदर्शनं सौम्यं सर्व्वलोकनमस्कृतमिति" भट्ट० "अपीच्यवेषं द्विभुजं सौम्याकारं सुदर्शनमिति" यममूर्त्तिलक्षणम्, अपि+अन्च–क्विप् अपअङ् तत्र साधु यत् अञ्चतेरतोलोपे पूर्व्वदीर्घः । २ अन्तर्हिते । "यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतमिति" ऋ० ८,४७,१३, अपीच्यमन्तर्हितम् भा० ३ गुह्ये च "मर्त्तानां मनुष्याणामपीच्यम्" ऋ० ८,३६,६, "अपीच्यं गुह्यमिति" भा० ।

अपिजू त्रि० अपि+जव–क्विप्–जठ् । १ प्रेरके । "उषसानक्ता जगतामपीजुवा" ऋ० २,३१,५ । "अपिजुवा प्रेरयित्र्या" इति वेदे उवङ् भा० ।

अपीत त्रि० अपि+इण–क्त । १ विलयप्राप्ते विलीने, "सौम्य ! तदा सम्पन्नोभवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतोभवतीति" छा० भा० श्रुता श्रुतिः । भावे क्त । १ विलये २ अपगमने न० । पीतवर्ज्जभिन्ने पु० तद्वति त्रि० । पीतं पानकर्म्म ३ तद्भिन्ने त्रि० ।

अपीति स्त्री अपि+इण–क्तिन् । १ विलये २ अपगमे ३ प्रलये च । "अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्" भा० सू० । आधारे क्तिन् । ४ संग्रामे । "पुरा यत् स्फरस्नसो अपीतेस्तमद्रिवः" इति ऋ० १,१२१,१० । "अपीतेः संग्रामादिति" भा० ।

अपीनस पु० अपीनाय अपीनत्वाय सीयते कल्पते सो कर्म्मकर्त्तरि क । १ पीनसरोगे तद्विवरणं पीनसशब्दे ।

अपुंस् पु० न पुमान् न०त० । १ नपुंसके क्लीबे । "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्यय इति" मनुः ।

अपुंस्का स्त्री नास्ति पुमान् यस्याः उरःप्रभृतित्वात् कप् । १ पतिशून्यस्त्रियाम् । 'नापुंस्कासीति मे मतिरिति' भट्टिः ।

अपुच्छा स्त्री नास्ति पुच्छमस्यं यस्याः । १ शिखरहीने शिंशपावृक्षे । २ पुच्छहीने त्रि० । [२ पुण्यशून्ये त्रि० ।

अपुण्य न० न पुण्यं विरोधे न०त० । १ पापे । न०ब० ।

अपुण्यकृत् त्रि० पुण्यं न करोति अपुण्यं पापं वा करोति । ताच्छील्ये क्विप् १ पुण्याकर्त्तरि २ पापकारिणि च । "क्षत्रियस्यैव दृत्तस्थोवैश्यः शूद्रस्तथैव च । यः पिबेत् कपिलाक्षीरं न ततोन्योस्त्यपुण्यकृत्" आप० स्मृतिः ।

अपुत्र पुंस्त्री नास्ति पुत्रोयस्य । १ अजातपुत्रे २ हतपुत्रे च । "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदेति" स्मृतिः "नापुत्रस्य लोकोऽस्ति" श्रुतिः । "अपुत्रा यत्नं भर्त्तुः पालयन्ती व्रते स्थितेति" दक्षवचनम् । "अपुत्रस्यैव या कन्या सैव पिण्डप्रदा भवेदिति" स्मृतिः पुत्रपदञ्च पुत्रपौत्रप्रपौत्रपरमिति दायभागादयः वा कप् । अपुत्रकोऽप्युक्तार्थे ।

अपुनर् अव्य० न पुनः न०त० । पुनर्वारभिन्ने सकृदर्थे "अनावृत्तिशब्दमपुनरुक्तार" ऋ० १०,६८,१० ।

अपुनरावृत्ति स्त्री न पुनः आवृत्तिः संसारगतिर्यतः ब० ब० । निर्व्वाणमुक्तौ "न स पुनरावर्त्तते" इति श्रुतेस्तथात्वम् । ई ब० । पुनर्गमनशून्ये त्रि० । अर्थाभावे अव्ययी० । पुनरावृत्त्यभावे अव्य० ।

अपुनर्भव पु० न पुनर्भवति संसारं भजतेऽस्मिन् भू–आधारे अप् । १ मोक्षे । करणे अप् न०त० । २ पुनर्भवाभावहेतौ तत्त्वज्ञाने अभावार्थे न०त० । पुनरुत्पत्त्यभावे पु० ३ प्रशमने निवारणे, "रोगाणामपुनर्भवे । ज्ञानं चतुर्विधं यस्येति" वैद्यकम् । नास्ति पुनर्भवः पुनरुत्पत्तिरस्य ४ पुनर्जन्मशून्ये तत्त्वज्ञानवति मुक्ते ।

अपुराण त्रि० विरोधे न०त० । १ पुराणभिन्ने नवीने ।

अपुष्ट त्रि० पुष–कर्म्मणि क्त न०त० । १ अकृतपोषणे यस्य पुष्टिर्न कृता तस्मिन् ।

अपुष्टता स्त्री अपुष्टस्य भावः तल् । अपुष्टदुष्क्रमव्याप्तव्याकृता-

श्लीलकष्टता" इत्यादिना सा०द०उक्ते काव्ये प्रकृतार्थापोषणकारित्वरूपे अर्थदोषभेदे। यथा "विलोक्य वितते व्योम्नि विधुमुच्चै रुषं प्रिये!" इत्यत्र विततशब्दो मानत्यागं प्रति न किञ्चिदुपकुरुते इति तस्य तत्पोषानुपकारित्वात्तथात्वम् अपुष्टस्य भावः त्व। अपुष्टत्वमप्यत्र न०। "अपुष्टत्वं मुख्यानुपकारित्वमिति" सा०द०।

अपुष्प अव्य० पुष्पस्याभावः अव्ययी०। पुष्पाभावे। "तैरपुष्पात् वनस्पति"रित्यमरः अपुष्पादित्यत्र पञ्चम्या नाम्भावः।

अपुष्पफलद पु० अपुष्पं पुष्पाभावेऽपि फलं ददाति दा–क। १ पुष्पं विना फलदे पनसे तथाभूते उदुम्बरादौ च। उपचारात् २ अहेतुकफलदातरि कर्त्तरि त्रि०।

अपूजा स्त्री अभावादौ न०त०। १ पूजाभावे २ आदराभावे ३ सम्मानाभावे ४ कुत्सितपूजायाम् ५ अविधानेनार्चनेच।

अपूजित त्रि०न०त०। १ पूजितभिन्ने २ अनादृते ३ अवज्ञाते च

अपूत त्रि० न०त०। १ पवित्रभिन्ने २ अशुचौ "अपूतो वा एषोऽमेध्यो यदश्वः" इति शत०ब्रा० "यश्चापूत इव मन्येत" कात्या० २२,४,२६। ३ संस्काररहिते ब्रात्ये च "एतैरपूतैर्विधिवदापद्यपि च कर्हिचिदिति" मनुः।

अपूप पु०न पूयते विशीर्य्यति पू–पन०त०। १ गोधूमादिचूर्णपिष्टके २ पुरोडाशे हविर्भेदे "अपूपं देव घृतवन्तमग्ने" ऋ० १०,४५,६। "अपूपं पुरोडाशमिति" भा०। "दशाक्षरसंख्यावं पायसापूपमेव चेति" मनुः। प्राचुर्य्ये मयट्। अपूपमयं पर्व अपूपमयो यज्ञः। अपूपाय हितम् "विभाषा हविरपूपादिभ्यः" पा०यत्। अपूप्यम् "छच" पा० अपूपीयं च पिष्टकहिते यवगोधूमचूर्णादौ। तत् पण्यमस्य ठक्। आपूपिकः। अपूपविक्रेतरि त्रि०।

अपूपादि पु० ६ब०। पाणिन्युक्ते हितार्थे ञ्यतोः प्रकृतिभूते शब्दसमूहे। स च गणः "अपूप तण्डुल, अभ्यूष, अश्योष, अवोष, अवेष, घृष्टक, ओदन, सूप, पूप, क्षिख, प्रदीप, सुसल, कटक, कर्षवेष्टक।

अपूपाद्या स्त्री अपूपसाधनाद्या। मौष्या अर्द्धं १ क्षणाद्यां २ तल विहिते आद्ये च।

अपूरणी स्त्री न पूर्य्यते सर्वतः कण्टकाद्यततया दुरारोहत्वात् पूर–कर्मणि ल्युट् ङीप् न०त०। धान्यमलिहत्ते। करणे ल्युट्। संख्यापूरणसाधनार्थकप्रत्ययभिन्ने च।

अपूर्ण त्रि० न पूर्णम्। ऊने। "अपूर्णमेवेन यतक्रतूपमः यतं क्रतूनामिति" श्रुतः। भावे क्त। पूरणाभावे "सारतण्डुलमपूर्णं व्यधयित्वेति" का० ४,१,५,७, अपूर्णं यथा दृतेन चरुणा स्थाल्याः पूरणं न भवतीति तथा अपचित्वेति" तद्भा०। पिपूरणं पुंस्त्वं तत्कालाप्राप्ते।

अपूर्णकाल त्रि० न पूर्णः कालोऽस्य। यस्य यत्काले

अपूर्व्व त्रि० न पूर्व्वं दृष्टम्। १ अदृष्टे २ आश्चर्य्ये "अधनुषि शरजालं मर्मभेदानुकारि त्रितयमिदमपूर्व्वं दृष्टमन्तःपुरे ते" इति "अपूर्व्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले। दूरतोदहतीवाङ्गं हृदि लग्नस्तु शीतल" इति च उद्भटः। पूर्व्वः पूर्व्ववर्त्ती न०ब०। ३ हेतुशून्ये त्रि०। न०त०। ४ पूर्व्वकालादिभिन्ने त्रि०। पूर्व्वशब्दस्य दिग्देशकालशास्त्रविषये सर्वनामसंज्ञातौ नञ्तत्पुरुषेऽपि अस्य सर्वनामसंज्ञातेन तत्कार्य्यम् अपूर्व्वैः अपूर्व्वेभ्यः ङिङसोस्त्वा दृष्टौ पंयङ्भावश्च "कौमारापूर्व्ववचने" इति पा०५ परब्रह्मणि पु०। "तदेतद् ब्रह्मापूर्व्वमनपरमनन्तरमबाह्यमिति" श्रुतः भा०। ऐतिह्यमाणान्तरापाप्ते "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलमिति" वेदा० सा० ७वैधनिषिद्धक्रियाजन्ययोः कालान्तरभाविनोः सुखदुःखयोर्हेतुभूतयोः पुण्यपापयोः न०। अदृष्टसिद्धिस्तु अपूर्व्वसिद्धिरूपेत्या। सा च ११७ पृष्ठे दृश्या। स्वर्गकामोऽग्नेयजेतेत्यादौ लिङा हि यागादौ दृष्टसाधनत्वं बोध्यते इति नैयायिकाः कार्य्यत्वेनापूर्व्वं बोध्यते इति प्राभाकरास्तन्ने। तत्रोभयमतेऽपि, आशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायिव्यापारजनकत्वं प्रयोजकमिति तथा हि अव्यवहितपूर्व्वस्थायिन एव कारणत्वेन यागस्य कालान्तरभाविस्वर्गस्य च मध्ये व्यापाररूपमपूर्व्वं प्रकल्प्यते साक्षात्साधनस्य यागस्य स्वर्गसाधनता व्यापारमन्तरेणानुपपद्यमाना स्वर्गनिर्वाहकं व्यापारमपूर्व्वं कल्पयतीति। तच्चापूर्व्वं किंनिष्ठं कथं वा तस्यैव व्यापारत्वमित्याशङ्क्य शब्दचिन्तामणौ निर्णीतं यथा "तथापि ध्वंस एव व्यापारोऽस्तु तव सद्भावनिरूपकत्वादि कारणत्वात् तस्यानन्तत्वेऽपि स्वभावात् सावधेः फलजनकत्वम्। यत्र ध्वंसोहेतुस्तत्र तत्प्रागभावोऽपीति चेत् न दुरवध्वंसजन्यदध्नि, मिथ्याधीध्वंसाध्यरुजौ च व्यभिचारात्। प्रतिबन्धकाभावत्वेन हेतुत्वे, तथाभावाच्च ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेन्न ध्वंसे सति तद्व्यापारत्वज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया ज्ञानेरिति चेन्न प्रतियोगिध्वंसयोरेकत्वाजनकत्वात् न हि नियमतोध्वंसे सति यद्भवति तत्तत् कारणम् न च संसर्गाभावत्वेन हेतुत्वे तत्रेति वाच्यं व्यभिचाराभावेन तस्यापि प्रयोजकत्वात्।

अथ यज्ञादेर्यागकारणता, व्यापारं विना तदनुपपत्तेः न च तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकम् अन्यत्र तु मानाभावाच्च तथेति वाच्यं यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य प्रमाणान्तरविरोधेनार्थापत्त्यकल्पनात् । अस्तु देवताप्रीतिरेव व्यापार इति चेन्न यागस्य देवताप्रीतिहेतुत्वे मानाभावात् गङ्गास्नानादौ देवताविरहेण तदभावात् । न च तत्रापि तत्प्रीतिः, तस्य तत्प्रीतिहेतुत्वे मानाभावात् लाघवेन कर्तृगतव्यापारकल्पनाच्च ननु नायं नियमः, पुत्रगतश्राद्धादिना पितरि, पितृगतजात्येष्ट्या पुत्रे चाऽदृष्टोत्पत्तेश्च अथ तत्रापि कर्तृस्थैवाऽदृष्टं, विहितक्रियाया यागस्येव कर्तृगताऽदृष्टजनकत्वात् । न च मृते पुत्रे तददृष्टनाशात् पितरि स्वर्गानुपपत्तिरिति वाच्यम् अदृष्टस्य फलनाश्यतया पितरि स्वर्गाभावेनाऽदृष्टानाशात् स्वदृष्टियागजन्याऽदृष्टस्य मुक्तिविरोधित्वात् न तु पितृगतमदृष्टं जन्यते मृते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः, पितृदृष्टजनकत्वात् तथात्वे च साङ्गमपि श्राद्धादिकं निःफलं स्यादिति तद्विधेरप्रामाण्यापत्तिः पुत्रगताऽदृष्टेन च मृते पितरि सुखोत्पत्तौ न विरोधः योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात् अथ पितृसुखं पितृपुण्यजन्यमिति पितरि न पुण्यं तेन विना तदभावात्, न, पुत्रे तत्फलप्रसङ्गात् । पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जनिकेति चेत् एवं पितृक्रियापितृपुण्यजनिकेति नतं विना पितरि पुण्यं, पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं, पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु तत्पुण्यं पितृदृष्टेति तत्सुखहेतुत्वात् न च पुत्रदृष्टि, तत्सुखाहेतुत्वादिति न, तत्पुण्यं न पितृदृष्टि तत्कृत्यजन्यपुण्यत्वात् पुत्रदृष्टि वा तत्कृतिजन्यपुण्यत्वात् तत्कृतपुण्यवत् तस्मात् पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्रएव तत्पुण्यमिति, मैवं स्वर्गोपपादकं ह्यपूर्वं स्वर्गाश्रये कल्प्यते प्रथमोपस्थितिकत्वेन लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च । न च स्वर्गहेतुकामनाश्रये, स्वर्गकामनाजन्यक्रियाकर्तरि, वा, विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपादकत्वाच्च यदि च पुत्रकृतपुण्येन सुकृतस्य शरीराद्युत्पत्तिः सुखं वा स्यात्, तदा साक्षिविषयाऽसत्त्वाभिधानादि पुत्रक्रियाजन्यपापेन "स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्येत" इत्यादिबोधितं नरकभागितादि सुकृतस्य पितुः स्यात् तथा च पुत्रकृततथाविधशङ्कया न कश्चिन्मोक्षार्थी ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत् "दुःखेनात्यन्तविमुक्तश्चरतीति" "न स पुनरावर्तते" इति श्रुतिविरोधश्च तथा च सुकृतस्य सुखदुःखशरीरादिकञ्च भवतीत्यपदर्शनम्। मृते च पितरि श्राद्धादिना दोषाभावादेव नाऽदृष्टमुत्पद्यते न चैवं साङ्गश्राद्धस्यापि नित्यफलत्वम् अदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैगुण्यात्, यथा विघ्नहेतुदुरितशून्येन कृतं मङ्गलं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावादिति एवञ्च यागस्यापि व्यधिकरणव्यापारोभविष्यतीति ॥ उच्यते विहितक्रियया कर्तृगतव्यापारद्वारा कालान्तरे फलं जन्यत इत्युत्सर्गः स च बलवता बाधकेनापोद्यते प्रकृते च बाधकं नास्ति यथा शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्गः सुतकृतयागश्राद्धस्य पितृस्वर्गं प्रति, पितृकृतजात्येष्टेः पुत्रपूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेण बोधनात् नन्वयंनियमएव पितृयज्ञजात्येष्ट्यादौ परम्परासम्बन्धेन कर्तृगतमेव फलं, न हि यस्य कस्यापि पितरिपुत्रे वा फलं किन्तु स्वपितृपुत्रयोः तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं परम्परासम्बन्धः फलेन पुत्रस्य, एवं पूतत्वादिकं पितृगतमेव । न च फलस्य कर्तृगतत्वं साक्षात्सम्बन्धेनैवेति वाच्यं ग्रामपशुभूमिहिरण्यादीनां परम्परया कर्तृगतत्वमिति व्यभिचारात् न हि ग्रामादयः कर्तरि साक्षात्संबद्धाः। एवं फलस्य साक्षात्कर्तृगामित्वबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्तृगामिताबोधने यत्तु स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात् 'पितृस्वर्गकामः' इत्यादि श्रुतेः स्वतश्च तथा कामनया प्रवृत्तौ फलकामनाविरहेण प्रयोगेऽङ्गवैगुण्यात् फलाभावप्रसङ्गः। किञ्च स्वर्गभागिपितृकत्वं विधिष्टं तत्र विशेष्यं तत्पितृकत्वं न काम्यम् न वा फलं, सिद्धत्वात् तदसाध्यत्वाच्च, किन्तु विशेषणं पितृगतः स्वर्ग इति सएव फलमिति" तच्च न हि स्वर्गभागिपितृकत्वं फलम् अपि तु स्वर्गेण समं पुत्रस्य परम्परासम्बन्धरूपं तदुक्तमिति । उच्यते परम्परासम्बन्धेन यदि पुत्रगतत्वं पितृस्वर्गस्य, तदा संयुक्तसमवायेन तत्पुत्रधनस्यापि फलत्वं स्यात् । सम्बन्धः शास्त्रेण बोध्यत इति चेत् तदा स्वर्गभागिपितृकत्वमपि न तथा, शास्त्रेण बोधितत्वाभावात् ग्रामादिपशुहिरण्यादीनाञ्च सिद्धत्वेन न काम्यत्वं. किन्तु तद्विषयकं स्वत्वं काम्यं फलमपि काम्यं तदेव, तच्च साक्षात्कर्तृगतमिति कर्तृगतत्वेन फलस्य साक्षात्सम्बन्धोऽपि नियत एव तत्स्वत्वेन फले कामनात् । तस्मात् यथागममेव शास्त्रदेशितं फलम्

अतएव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः, स्वर्गपुत्रत्वादेश्च पितृपुत्रगतत्वेन काम्यत्वमिति आद्धजातेश्चादेः पितृपुत्रगतमेव फलम् एवञ्च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीमहादानादिकं पित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाधनत्वेन तेषां श्रुतत्वात् न हि स्वगतस्वर्गकामस्य कर्त्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति किन्तु स्वर्गकामस्य स्वर्गः स्वगतः परगतो वेति स्वर्गकामत्वमविशिष्टम् । यजेतेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वे । न च स्वर्गकामोयजेतेत्यादौ स्वगतस्वर्गकामनाया अन्तरङ्गत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते । सामान्ये बाधकं विना विशेषपरत्वे मानाभावात् । केचित्तु सम्यग्वहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयते इति जातेष्टिपितृयज्ञयोरपि दृष्टस्थकर्म्मत्वेन तदेव फलमिति फलस्य कर्त्तृगामित्वे नियमएव प्रातिस्विकफलाभिप्रायेणोत्सर्गः इत्याहुः नन्वावच्चित्यपरिपालनस्य तत् फलं न तु काम्यत्वाद्धादेः काम्यान्तर्भावे मानाभावात् यावत्काम्यानुष्ठानाशक्तेश्च, यावच्छक्यानुष्ठानस्यापि नान्तर्भावः कामनाविरहादिनाप्यकरणात् यावच्चित्यानुष्ठाने तत्फलाभावप्रसङ्गान्नित्यस्यैवावश्यकत्वेनोपस्थित्यान्वयाच्च । अपि च तैः कर्म्मभिः प्रत्येकमुत्पन्नपूर्व्वं तेषु परमापूर्व्वं जन्यत इति" न गौरवान्नानाभावाच्च किन्त्वन्तिमक्रियया परिपालनरूपक्रियान्तरेण वेति न सर्व्वं कर्म्म ब्रह्मलोकावाप्तिफलकमिति" मैवं भगवदुद्देशेन कृतस्य नित्यस्य यस्य कस्यापि पालनात् ब्रह्मलोकप्राप्तिः फलं श्रूयत इति जातेष्टिपितृयज्ञयोरपि तथा कृतयोस्तदेव फलं तथा च श्रीभगवद्गीता "यज्ञायाचरतः कर्म्म कर्म्मबन्धनिर्लीयते यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धन" इति तत्र कर्म्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थं फलसम्बन्धे, संवलनन्तु मङ्गलवदुपयुज्यते अन्यथैकप्रयोगस्य व्यवधानादसम्भवः । परिपालनन्तु कर्त्तव्यमित्येव करणं तदुक्तं "ददामि देयमित्येव यजे यष्टव्यमित्यपि" इति यत्तु निषिद्धासम्बन्धएव सम्यक्त्वम् न तु विहितमात्रानुष्ठानमिति, तन्न यत्किञ्चिन्निषिद्धासम्बन्धस्याभावात्, सर्वनिषिद्धासम्बन्धस्य सर्वत्र सुलभत्वादिति सम्प्रदायः । अत्र ब्रूमः भगवदुद्देशेन कृतं किञ्चिदेव कर्म्म, सर्वं वा, काम्यं वा सर्वं, नित्यं वा सर्वमिति नाद्यः एकेनैव काम्येन नित्येन वा ज्ञानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये आद्धादावप्रवृत्त्यापत्तेः नापरौ अयुक्तत्वात् न तृतीयः जातेष्टयादेर्नित्यत्वाभावात् तस्मात् सम्यग्वहस्थाश्रमपरिपालनस्य न तत्फलं सम्यक्त्वञ्च सामस्त्यमेव अतो न आद्धादेः ब्रह्मलोकावाप्तिरिति साधूक्तं भास्करेणेतं फलमनुष्ठातरीत्युत्सर्ग इति तच्च फलं क्वचिद्विधिवाक्यश्रुतं क्वचिदर्थादिकमिति" । इदन्त्वपरेषां कर्मध्वंसेनापूर्वप्रत्याख्याने "ज्ञानाग्निः सर्वकर्म्माणीत्यादि शास्त्रबोधितस्य तत्त्वज्ञाननाश्यत्वस्य बाधः ध्वंसस्य नाश्यत्वाभावात् न्यायमते तु कर्मपदेन तज्जन्यापूर्वलक्षणया तेषां क्षयसम्भव इति । अस्य च कार्य्यमात्रं प्रति कारणतेति नैयायिकादयः । कर्मण एव फलमिति मीमांसकाः । ईश्वराधिष्ठितादेव सूक्ष्मावस्थापन्नात् कर्मणः फलमिति वेदान्तिनः तथा हि "फलमत उपपत्तेरिति" शा० सू० भाष्ये "अथोच्येत कर्म्मकार्य्यादपूर्व्वात् फलमुत्पत्स्यते" इत्याशङ्क्य । तदपि नोपपद्यते अपूर्व्वस्याचेतनस्य कालान्तरेऽसमवेतस्य चेतनाप्रवर्त्तितस्य प्रवर्त्तयितृत्वानुपपत्तेः तदस्तित्वे च प्रमाणाभावात् अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिप्रमाणत्वादिति" अपूर्व्वं निराकृत्य । "धर्म्मं जैमिनिरत एवेति" शा० सू० । जैमिनिमतं धर्म्मस्यैव फलहेतुत्वं पूर्व्वपक्षीकृत्य । "पूर्व्वन्तु बादरायणो हेतुव्यपदेशादिति" शा० सू० निराकृतम् । व्याख्यातञ्चैतत् भाष्यकृता शङ्कराचार्य्येण । अन्वनुष्ठानविनाशिनः कर्म्मणः फलं नोपपद्यते इति परित्यक्तोऽयं पक्षः नैष दोषः श्रुतिप्रामाण्यात् श्रुतिर्येन प्रमाणं यथायं कर्म्मफलसम्बन्धः श्रुत एव उपपद्यते तथा कल्पयितव्यः न चानुत्पाद्य किमपूर्व्वं कर्म्म विनश्यत् कालान्तरितं फलं दातुं शक्नोतीति अतः कर्म्मणो वा काचिदुत्तरावस्था फलस्य वा पूर्व्वावस्थाऽपूर्व्वं नामास्तीति च तर्क्यते । उपपद्यते चायमर्थ उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नम । अविचित्रस्य कारणस्य विचित्रकार्य्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गादनुष्ठानवैयर्थ्यापत्तेश्च तथा च श्रुतएव फलमिति "पूर्व्वपक्षः" "बादरायणस्तु आचार्य्यः पूर्व्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात् कर्म्मणोऽपूर्व्वाद्वा केवलात् फलमित्ययं पक्षः तुशब्देन व्यावर्त्यते कर्म्मापेक्षाद्वाऽपूर्व्वापेक्षाद्वा यथा तथा वा ईश्वरात् फलमिति सिद्धान्तः "हेतुव्यपदेशात्" धर्म्माधर्म्मयोरपि कारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यते फलदातृतया च । "एष हेवैव साधु कर्म कारयति तं यमेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधोनिनीषते" इति श्रूयते चायमर्थो गीतासु । "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्या

राधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान् इति"। विचित्रकार्य्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते" इति। एतेन "नमस्तत् कर्मभ्योविधिरपि न येभ्यः प्रभवतीत्युक्तिस्तु प्रामादिकीत्यवसेयम् एवञ्च ईश्वराधिष्ठितकर्मभ्य एव तत्तत्फलोत्पत्तिरिति सुस्थम्। कर्मणामाशुविनाशिनामपि सूक्ष्मरूपेणैव स्वकारणेऽन्तःकरणे सत्त्वात् "क्षीयन्ते चास्य कर्माणि" इत्यादयुक्तिः सङ्गच्छते तज्जन्यापूर्व्वस्वीकारे तु तत्र तज्जन्ये लक्षणेति भेदः। अतएव "ज्ञानाग्निः सर्वकर्म्माणीत्यादौ सूक्ष्मावस्थानां ज्ञानादेव क्षयः, स्थूलावस्थापन्नानान्तु आशुनाशात्" इति वेदान्तिमते युक्तिरूहनीया। "आत्मान्तरगुणानामात्मान्तरेऽकारणत्वादिति" वै० सू०। "आत्मान्तरस्य गुणानां पुण्यपापानामात्मान्तरेऽकारणत्वात् स्वर्गफलस्येति शेषः। "शास्त्रदेशितं फलमनुभातरीति" जै० सू०। "आत्मान्तरे यो दुःखदुःखगुणौ तयोरकारणत्वात् प्रत्यात्मनिष्ठाभ्यामेव धर्म्माधर्म्माभ्यां सुखदुःखे, न व्यधिकरणाभ्याम्। अन्यथा येन यागहिंसादिकं न कृतं तस्य तत्फलं स्यादिति कृतहानिरकृताभ्यागमश्च प्रसज्येतेति" एतच्च सामान्यशास्त्रं विशेषशास्त्रेणापोद्यते तेन पितृयज्ञादेः पुत्रपूतत्वादिहेतुत्वमिति" वै० सू० उपस्कारः। तच्चापूर्व्वं त्रिविधं प्रधानापूर्व्वमङ्गापूर्व्वं कलिकापूर्व्वञ्चेति मीमांसकाः। तत्र दर्शपौर्णमासाद्यपूर्वं प्रधानापूर्वं तदेव परमापूर्वं, प्रयाजाद्यङ्गजन्यापूर्वमङ्गापूर्वं, तदवान्तरक्रियाकूटजन्यमपूर्वं कलिकापूर्वं तच्च व्रीहिप्रोक्षणाभ्युक्षणादिजन्यं द्रव्यनिष्ठमिति मीमांसवाः तज्जन्यसंस्कारविशेष एव कलिकापूर्व्वतया व्यवह्रियते स चात्मनिष्ठ इति नैयायिकाः विस्तरस्तु कुसुमाञ्जलौ १ स्तबके द्रष्टव्यः। कलिकापूर्व्वञ्च परमापूर्वं जनयित्वा नश्यति। अङ्गापूर्व्वैस्तु परमापूर्वं विशेषमाधीयते इति भेदः तथा च अङ्गापूर्वसहितं परमापूर्वं विशिष्टफलं जनयति तद्विहीनन्तु स्वल्पं फलम्। अत एव प्रधानकरणे दैवात् यत्राङ्गाकरणे न प्रधानस्य वैफल्यं किन्तु अल्पफलत्वमेवेति सिद्धान्तः। केवलाङ्गापूर्वाणां तु न फलजनकत्वम् प्रधानासिद्धेः फलाभावात्। अतएव "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। अप्रधानाक्रियायान्तु नावृत्तिर्न च तत्क्रियेति" छन्दोगपरिशिष्टे तथा व्यवस्थापितम्। इदञ्च परमापूर्वं फलनाश्यं तत्त्वज्ञाननाश्यं कर्मनाशाजलस्पर्शादिनाश्यञ्च। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति" "कर्मणाञ्चैव सर्वेषां भोगादेव क्षयोभवेदिति" च शास्त्रात् "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्জ্জুनेति" गीतावाक्याच्च। सर्वकर्मपदेन च प्रारब्धकर्म्मातिरिक्तकर्म्माण्येवोच्यन्ते तेन प्रारब्धकर्मणां भोगादेव क्षय इत्यनुपदं वक्ष्यते। परमापूर्वञ्च नित्यकर्मणि परञ्चापूर्वत्वेन मीमांसकैः व्यवह्रियते सन्ध्यावन्दनस्य किञ्चित्फलाजनकत्वात्। अर्थवादोपस्थापितब्रह्मलोकादिप्राप्तिरूपफलजननात् न तत्रापूर्वस्य फलाजनकत्वेन परञ्चत्वमिति नैयायिकाः। अत एव चिन्तामणौ यत्रार्थवादिकं फलं न श्रूयते तत्र तत्त्वज्ञानसाधनत्वं गीतादिवाक्येन व्यवस्थापितं तच्च पूर्वं दर्शितम्। "नकलञ्जं भक्षयेदित्यादि निषेधस्यापि परञ्चापूर्वजनकत्वमिति मीमांसकाः। तत्रापि प्रत्यवायाभावरूपफलाङ्गीकाराच्च परञ्चत्वमिति तत्त्वज्ञानप्रतिबन्धकाभावत्वेन तस्यापीष्टत्वादिति नैयायिकाः। अपूर्वस्यापूर्वशब्दवाच्यत्वे हेतुर्जैमिनिना दर्शितः। "प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्" सूत्रेण व्याख्यातञ्चैतत् अदृष्टशब्दे ११६ पृष्ठे ततश्च पूर्वमविद्यमानत्वात् अपूर्वशब्दवाच्यतेति। वेदान्तिनस्तु कर्म्मणः सूक्ष्मावस्था, फलस्य पूर्व्वावस्था वाऽपूर्वमिति स्वीचक्रुः तच्चानुपदं दर्शितम्। तत्त्वज्ञानेन कर्मक्षये कश्चिद्विशेषोऽभिधीयते। "तदधिगमे उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" शा० सू० भाष्ये "अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः किन्तावत् प्राप्तं फलहेतुत्वात् कर्म्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनो ह्यस्य शक्तिः श्रुत्या समधिगता यदि तदन्तरेणैव फलोपभोगमुपमृद्येत, श्रुतिः कदर्थिता स्यात्। स्मरन्ति च "नहि कर्म्म क्षीयत" इति। नन्वेवं सति प्रायश्चित्तोपदेशोनिरर्थकः प्राप्नोति। नैष दोषः प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्हेच्छादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता नत्वेवं ब्रह्मविद्यायाविधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्म्मक्षये, तत्फलस्यावश्यभोक्तव्यत्वादनिर्म्मोक्षः स्यात्। नेत्युच्यते। देशकालनिमित्तापेक्षोभोक्तः कर्म्मफलवद्भविष्यति। तस्माच्च ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः। तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्व्वाघयोरश्लेषविनाशौ भवतः उत्तरस्याश्लेषः पूर्वस्य विनाशः। कस्मात्? तद्व्यपदेशात्। तथा हि ब्रह्मविद्याप्रक्रियायां

सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति श्रुतौ "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" इति । तथा विनाशमपि पूर्व्वोपचितस्य दुरितस्य व्यपदिशति "तद् यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" इति । अयमपरः कर्मक्षयव्यपदेशो भवति । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति । यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकृदर्थनं स्यादिति । नैष दोषः न हि वयं कर्मणः फलदायिनीं शक्तिमपजानीमहे विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः । शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियेत न प्रतिबन्धाभावेऽपि । "न हि कर्म क्षीयते" इत्येतदपि स्वरसतोत्सर्गकं न भोगात्ते कर्म क्षीयते तदर्थत्वादिति इष्यत एव प्रायश्चित्तादिना तस्य क्षयः । "सर्वं पाप्मानमरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिश्रुतिस्मृतिभ्यः । यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि क्षपयिष्यन्तीति तदसत् दोषसंयोगेन नोद्यमानानामेषां दोषनिर्हृतिफलान्तरकल्पनानुपपत्तेः । यत् पुनरुक्तं न प्रायश्चित्तवद्दोषक्षयहेतुना विद्याविधानमस्तीत्यत्र ब्रूमः । सगुणासु तावद्विद्यासु विद्यत एव विधानं तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते । तत्राविद्वत्त्वाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते । निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्तृत्वात्मबोधात् कर्मप्रदाहसिद्धेः । अक्लेश इति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति । अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेद एव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रक्षीयन्त इत्याह विनाश इति । पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्त्ता भोक्ता वाहमासं नेदानीं नापि भविष्यामि काल इति ब्रह्मविदवगच्छति । एवमेव च मोक्ष उपपद्यते अन्यथा कृतादिकालोत्पत्तावां कर्मणां क्षयाभावे मोक्षाभावः स्यात् । न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्वक्तुमर्हति अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य । तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितम् ॥ "इतरस्याप्येवमसंश्लेषः पाते तु" या० सू० ॥ "पूर्वविदधिकरणे बन्धहेतोरविशेषाच्छेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशाच्चिरूपितौ धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेन विरोध इत्याशङ्क्य तन्निराकरणाय पूर्व्वाधिकरणन्यायातिदेशः क्रियते । इतरस्यापि पुण्यस्य कर्मणः एवमवयवशः संश्लेषोविनाशश्च ज्ञानवतो भवतः । कुतः ? तस्यापि स्वफलहेतुत्वे ज्ञानफलप्रतिबन्धित्वप्रसङ्गात् "उभे उ ह्येवैष एतेन तरतीत्यादि" श्रुतिषु च दुष्कृतवत् सुकृतस्यापि प्रायश्चब्यपदेशात् अकर्तृत्वात्मबोधनिमित्तस्य कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् । "क्षीयन्ते चास्य कर्माणि इति चाऽविशेषश्रुतेः । यत्रापि केवलएव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याक्षिप्तमिति द्रष्टव्यं । सामर्थ्यात् निरुक्तफलत्वात् । अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः "अथ य सेतुमेतं तीर्त्वा प्रतते तरत" इत्यत्र सकृद्दुष्कृतेन सुकृतमप्युक्त्वा "सर्वे पाप्मानोऽतो निवर्त्तन्ते" इत्यविशेषेण प्रतिषेधे पाप्मशब्दप्रयोगात् । पाते त्विति । तुशब्दोऽवधारणार्थः । एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादक्षये सति नाभिनवोत्पत्तेरवश्यं भाविनी विदुषः शरीरपाते सञ्चितस्याधारयति "अनारब्धकार्ये एव तु पूर्वे तदवधेः" ॥ "पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्ययोरपि भवति विशेषेणानारब्धकार्ययोरेवेति विचार्यते तत्र "उभे उहैवैष एतेन तरतीत्येवमादि" श्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्ये एव त्विति । अप्रवृत्तिफले एव पूर्वजन्मान्तरसञ्चिते आत्मन्यपि न जन्मनि प्राक् न ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते न त्वारब्धकार्ये सम्भुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्म्मितम् । कुत एतत् ? "तस्य तावदेव चिरं यावन्न विमोक्ष्यति शरीरपातावधिकरणात् क्षेमप्राप्तेः । इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञान प्राप्तानन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षा नाचक्षीत । ननु वस्तुबलेनैवायमकर्तृत्वात्मबोधः कर्म्माणि क्षपयतु कथं कानिचित् क्षपयेत् कानिचिन्नक्षपयेत न हि समाने इन्धनबीजसम्भारे केषाञ्चिदग्नीनां शरीराणि क्षीयन्ते केषाञ्चिन्न क्षीयन्ते इति यत्नमङ्गीकर्तुमिति । उच्यते । न तावदनारब्धकार्यकर्म्मायं ज्ञानोत्पत्तिरुपपद्यते आश्रिते च तस्मिन् क्षुत्तृष्णवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम् । अकर्तृत्वात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्मायत्तुक्षिपति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात्

कश्चित् कालमनुवर्त्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदः कश्चित् कालं शरीरं म्रियते न म्रियते वा इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणज्ञापरेण प्रतिक्षेप्तुं शक्येत ? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूप्यते । तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय" इति भा०।

अपूर्व्वता स्त्री अपूर्व्वस्य अन्यतोऽप्राप्तस्य भावः तल् । १ प्रमाणान्तरागम्यत्वे "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् अर्थवादोपपत्तिश्च हेतुस्तात्पर्य्यनिर्णये २ इत्युक्ते तात्पर्य्यावधारणहेतुभेदे च यथा छान्दोग्ये "तन्त्वौपनिषदं वेदेति ब्रह्मणो मानान्तरागम्यत्वमुक्तम् ।

अपूर्व्वपति स्त्री न पूर्व्वः पतिर्य्यस्याः । कुमार्य्याम् । "अपूर्व्वपतिं कुमारीमिति" सि० कौ०।

अपूर्व्ववाद पु० अपूर्व्वमधिकृत्य वादः तत्त्वबुभुत्सोः कथा । गङ्गेशोपाध्यायकृते शब्दचिन्तामण्यन्तर्गते ग्रन्थभेदे ।

अपूर्व्वविधि पु० अपूर्व्वे प्रमाणान्तरेणाप्राप्ते विधिर्विधानम् वि+धा–कि । अप्राप्तप्रापके लिङादिपदवेदनीये शब्दविशेषे । यथा स्वर्गकामो यजेतेति लिङादियुक्तं वाक्यं प्रमाणान्तरेणाप्राप्तस्य स्वर्गसाधनत्वस्य यागे बोधयत् तथा । अपूर्व्वविधिरपि चतुर्विधः कर्म्मविधिः गुणविधिः विनियोगविधिः प्रयोगविधिश्चेति । तत्र अग्निहोत्रं जुहोति इत्यादौ यागरूपे कर्मणि दृष्टसाधनतायाः, कृतिसाध्यताया भावनाया वा मतभेदेन बोधनात् कर्म्मविधित्वम् । द्रव्यदेवतादिविधायकविधिर्गुणविधिः । यथा दध्ना जुहोत्यादिवाक्यं प्राप्तस्याग्निहोत्रस्यानुवादेनाप्राप्तगुणरूपद्रव्यादेर्विधानात् । "ऐन्द्राग्नं गार्हपत्यमुपतिष्ठत इत्यादि ऐन्द्राग्नं ऋचः गार्हपत्योपस्थाने विनियोजनात् विनियोगविधिः । एवं ज्ञात्वा एवं कुर्य्यादित्यादि प्रयोगज्ञापको विधिः प्रयोगविधिः । यथा अधीत्य स्नायादित्यादि "उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोत्यादि च अयञ्च विधिरिति भेदः ।

अपूर्व्य त्रि० न पूर्व्यमर्हति यत् न० त० । पूर्व्यानर्हे "त्वं नो वायवेषामपूर्व्यः सोमानामसि" ऋ० १,१३५,६ ।

अपृक्त त्रि० पृच–क्त न० त० । १ असंबद्धे "अपृक्त एकाल् इति पाणिनिसूत्रे वर्णान्तरासृष्टे २ एकवर्णे "वैरपृक्तस्य पा०

अपृथक् अव्य० न पृथक् । सहयोगे पूर्व्वापरयोरेकादेशरूपे सम्भूयभवने पृथक्साकल्यमपृथक्साकल्यञ्चेति साकल्यं द्विविधमिति वृद्धाः ।

अपेक्षणीय त्रि० अप+ईक्ष–कर्म्मणि अनीयर् । १ अनुरोद्धव्ये अपेक्षाकर्म्मणि २ प्रतिपाल्ये च "आत्मा यत्नेन रक्ष्योरणशिरसि पुनः सोऽपि नापेक्षणीय" इति नीतिः।

अपेक्षा स्त्री अप+ईक्ष–भावे अ । १ आकाङ्क्षायां, सा च शाब्दबोधजनिका "यत्पदेन विना यस्यानुभावकता भवेदित्युक्ता तत्पदे पदवत्त्वरूपा । अपेक्षायाश्च प्रायशोऽत्रिर्नेष्यते "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन । सापेक्षं तद्विजानीयादसमस्तविशेषणम्" यथा प्रवीरं पुत्रकाम्यति कृष्णस्य राजमातङ्ग इत्यादौ प्रत्ययसमासौ न स्तः।"सापेक्षत्वेऽपि गमकत्वात् समास" इति भाष्योक्तेः देवदत्तस्य गुरुकुलमित्यादौ समासः इति भेदः । १ प्रयोजकत्वे तच्च ज्ञाने स्थितौ उत्पत्तौ वा इतरस्यानुरोधित्वम् ज्ञानादिकार्य्ये च यस्य यत्पदार्थान्तरज्ञानाद्यदनुरोधः तस्य तदपेक्षा । अतएव तर्कग्रन्थे जगदीशेन "स्वापेक्षायादकः प्रसङ्ग आत्माश्रयः अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च याद्येत्यभिधाय एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति ज्ञप्तौ । घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यादिति उत्पत्तौ, अयं घटः यद्येतद्घटदृष्टिः स्यात् तर्ह्यनोपलभ्येतेति स्थितौ च" स्वापेक्षापेक्षितत्वेऽदाहृतम् । अनतिदूरे च "अपेक्षा चात्र साक्षात्परम्परासाधारणी याद्येत्युक्तम् । तेन साक्षात् परम्परया वा स्वज्ञानादिप्रयोजकतैवापेक्षेति निष्कर्षः । स्वयंदृसापेक्षं यदृसापेक्षयदृकत्वमन्योन्याश्रयलक्षणम् । २ अनुरोधे "सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" रघु । ३ स्पृहायाञ्च "सङ्गोदेषु कामेषु निरपेक्षः परिव्रजेदिति" "अध्यात्मरतिरासीत निरपेक्षोनिरामिष इति च मनुः । "निरपेक्षः विगतस्पृह इति" कुल्लूकभट्टः ।

अपेक्षाबुद्धि स्त्री अयमेकः अयमेक इत्याकारिकायाम् अनेकैकत्वविषयिण्यां "अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते भाषा० परिभाषितायाम् बुद्धौ ।

अपेक्षाबुद्धिज त्रि० अपेक्षाबुद्धितो जायते जन–ड तृ० । न्यायोक्ते द्वित्वादिपरार्द्धान्ते संख्याभेदे ।"द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः अपेक्षाबुद्धिनाश्याश्च नाशस्तेषां प्रकीर्त्तित" इति भाषा० । अत्रायमभिसन्धिः । यद्यपि द्वित्वादि समवायः प्रत्येकं घटादावस्ति तथापि एकोद्वाविति ज्ञानाभावात् एको न द्वाविति ज्ञानाच्च द्वित्वादीनां पर्य्याप्तिस्वरूपः कश्चित् संबन्धोऽनेकाश्रयोऽङ्गीक्रियते पर्य्याप्तिसंबन्धेन च

प्रत्येकं घटादौ न द्वित्वादि । तादृशसम्बन्धस्य अपेक्षाबुद्धिसापेक्षत्वेन तत्सत्त्वे तथा ज्ञानं, तदसत्त्वे न तथाज्ञानम् । तत्र प्रथमम् अयमेकः अयमेक इत्याकारिका अपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः ततो द्वित्वद्वित्वत्वनिर्विकल्पक ततोद्वित्वप्रत्यक्षम् । अपेक्षाबुद्धिनाशाच्च ततोद्वित्वनाशः इति । यद्यपि योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वेन ज्ञानमात्रस्य द्वित्वणस्थायित्वं तथापि अगत्या अपेक्षाबुद्धेस्त्रिक्षणस्थायित्वं स्वीक्रियते अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशे द्वित्वस्य नाशः प्रसज्येत न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विषयस्य प्रत्यक्षं प्रति कार्य्यकालवृत्तित्वेन कारणत्वोपगमात् तथा च द्वित्वप्रत्यक्षमेवापेक्षाबुद्धिनाशकं नान्यदिति कल्प्यते । कालान्तरे द्वित्वप्रत्यक्षाभावाच्च अपेक्षाबुद्धिनाशात् द्वित्वादिनाशइति कल्प्यतइति सि०मु०।

अपेक्षित त्रि० अप+ईक्ष-कर्म्मणि क्त । १ अपेक्षाविषयभूते २ आकाङ्क्षिते च । "अपेक्षितक्रियश्चेति त्रिधाऽपादानमिष्यते" इति हरिः ।

अपेक्षिन् त्रि० अप+ईक्ष-णिनि स्त्रियां ङीप् । अपेक्षावति स्वकार्य्यजननादौ इतरप्रयोजकतानुरोधिनि च ।

अपेक्ष्य त्रि० अप+ईक्ष-कर्म्मणि ण्यत् । १ अपेक्षणीये । भावे ल्यप् । अनुरुध्येत्यर्थे अव्य० "किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते वृगाधिप" इति किरा० ।

अपेत त्रि० अ+इण-कर्त्तरि क्त । १ अपगते अपसृते । "यं प्रव्रजन्तमनुपेतमपेतकृत्यमिति" भाग० २पलायिते च ।

अपेतराक्षसी स्त्री अपेतः राक्षस इव पातकं यस्याः गौ०ङीप्। तुलस्याम् राजनि० । तस्याः राक्षसतुल्यपापादिहरणात्तथात्वम् । "दूर्व्वा दहति पापानि धात्री हरति पातकम् । हरितकी हरेद्रोगं तुलसी हरते भयम्" आ०त० स्कान्दोक्तेस्तस्याः पापादिहारित्वम् ।

अपेय त्रि० पा अर्हार्थे यत् न०त०। १ स्मृतौ निषिद्धपाने मद्यादौ "मद्यमदेयमपेयमनिग्नाद्यमिति" ति०त०उद्व० एवमन्यानि अपेयानि स्मृतौ प्रसिद्धानि यथा "वर्ज्यं सलवणं क्षीरं यच्च विस्रुतं पयः । अनिर्दशायागोः क्षीरं पीत्वा चान्द्रायणं चरेदिति" आ० त० स्मृतिः । "अपः सुराभाजनस्था मद्यभाण्डे स्थितास्तथा पञ्चरात्रं पिबेत् पीत्वा शङ्खपुष्पीघृतं पय" इति मनुः । "शुनोच्छिष्टाः स्थिता वृक्षापो यदि कश्चित् द्विजः पिबेत् शङ्खपुष्पीविपक्वेन लाक्षं क्षीरेण वर्त्तयेदिति" यमः । "स्त्रियोच्छिष्टाः स्थिता आपो यदि कश्चित् पिबेद्द्विजः । शङ्खपुष्पीत्यादि० शङ्खः "शूद्रोच्छिष्टा स्थिताश्चापो यदि कश्चित् पिबेत् द्विजः । कृशमूलविपक्वेन लाक्षं क्षीरेण वर्त्तयेदिति शातातपः "शुना संस्पृष्टभाण्डे तु रेतोमूत्रविदूषिते । जलक्षीरादिकं पीत्वा तप्तकृच्छ्रं समाचरेत्" लघुहा० । "चण्डालिकूपभाण्डेषु यस्त्वज्ञानाज्जलं पिबेत् प्रायश्चित्तं कथं तत्र तस्मै वर्षे विधीयते । चरेत् सान्तपनं विप्र प्राजापत्यन्तु भूमिपः । तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्य निर्द्दिशेत्" आप० । "चण्डालपरिगृहीतं योऽज्ञानाज्जलं पिबेत् । तस्य शुद्धिं विजानीयात् प्राजापत्येन नित्यश" इति आप० । "यस्तु चण्डालसंस्पृष्टं पिबेत् किञ्चिदकामतः स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः" अङ्गिराः । "किञ्चिदिति जलक्षीरादिकमिति" प्रा०वि० । आमभांसादौ न दोषः । "आर्द्रं मांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः । क्रौञ्च-भाण्डस्थिता दुष्टानिष्क्रान्ताः शुचयः स्मृताः" यमः "अन्त्यजैः क्षालिताः कूपास्तडागानि तथैव च । यत्र स्नात्वा च पीत्वा च पक्षिगव्येन शुध्यति" आप० । जलाशयाशाभे तु तदभावादि पात्रं भक्षयते "अन्त्यजैः क्षालिते कूपे सेतौ वाप्यादिके तथा तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते इति हेमाद्रौ० । "दृढमत्यन्तापद्विषयमिति" प्रा० वि० । "भाण्डस्थिता अभोज्यानामपः पीत्वा पयोदधि । ब्राह्मणो क्षत्रियो वैश्यः शूद्रसेवोपसर्पति ब्रह्मकूर्चोपवासस्य याज्यवर्षस्य निष्कृतिः" परा० । उपसर्पति उपसर्पेत् पायश्चित्तमिति शेषः तदेवाह "ब्रह्मकूर्चोमिति । "यदि विप्रः प्रमादेन शूद्रतोयं पिबेत् स्वयम् । उपोष्य विल्वपद्मानां पलाशस्य कुशस्य च । एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात्" भाता० । अत्रापवादः । "नयभाण्डेषु पानीयं विट्शूद्रक्षत्रजन्मनाम् । मेयं तदाकृतिप्राणां पयोदधि तथैव च" जाबा० । "घृतं तैलं पयःक्षीरं तथैवेक्षुरसो गुडः । शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति" भाता० । घृतादीनामाकरभाण्डस्थितानां न दोषः" शङ्खः । "मैत्रावरुणेषितं पीत्वा पानीयं ब्राह्मणः क्वचित् । तिरात्रं तु व्रतं कुर्य्यादामकृच्छ्रेण वा पुनः" शङ्खः । "वामेन जलमेतेति" प्रा०वि० । "प्रपामरण्ये घटके च भूमे द्रोण्यां जलं कोपगतास्तथापः । कृतेऽपि शूद्रात्तदपेयमाहुरापन्नतो भूमिगताः पिबेत्ता" इति यमः । प्रपाजलं, कूपजलाहरणघटस्थजलं द्रोणी मेकपात्रविशेषः तज्जलं, शङ्खादि कोपगतं जलञ्च शूद्रासम्बन्धेऽप्यपेयम् "आपदि तु तदेव जलं भूमिगतं कृत्वा ततः पात्रान्तरेणोद्धृत्य पेयमिति"

प्रा० वि०। एतद्विषये एव। द्रोणाभावसयुक्तायां क्षुद्रे प्रावर्त्तके तथा। श्यामप्रपाजलञ्चैव पीत्वापत्सु न दुष्यतीति लघुहारीतः। तदपि भूमिगतं कृत्वैव पेयं पूर्ववचनैकवाक्यत्वात्। "प्रावर्त्तके सेचके क्षुद्रे अज्ञाते" प्रा० वि०। "कूपे विन्मूत्रसंसृष्टे पीत्वा तोयं द्विजोत्तमः। त्रिरात्रेण विशुध्येत" अङ्गिराः। "जलाशये तथान्येषु स्थावरेषु महीतले। कूपवत् कथिता शुद्धिः महत्सु च न दूषणमिति" विष्णुः। "महत्स्वप्यशुचिशङ्कया तीर्थसमीपतोवयवहरणवर्জ্জनमिति" प्रा० वि०। यथोक्तं देवलेन। "तत्राक्षोभ्यतडागानि नदीर्वापीः सरांसि च कक्षलाशुचियुक्तानि तीर्थतः परिवर्জयेदिति"। "स्रुतपञ्चनखात् कूपादत्यन्तोपहताद्धोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेदित्यादि" विष्णुः "अत्यन्तोपहतात् अमेध्यादिनेति" प्रा० वि०। "यस्तु कूपात् पिबेत् तोयं ब्राह्मणः शवदूषितात् उपवासत्रयं कृत्वेत्यादि" लघुहा०। "क्लिन्नो भिन्नः शवश्चैव कूपस्थो यदि दृश्यते। पयः पीत्वा त्रिरात्रेण शुध्यत्यादि" देवलः। "पीतशेषं पिबेत् विप्रैर्विप्रः स्यादन्यथा पशुरिति भवि० पु०। "श्लेष्मोपानद्विण्मूत्रं स्त्रीरजो मद्यमेव च। एभिः संदूषिते कूपे तोयं पीत्वा कथं विधिः। एकं द्वाहं त्र्यहञ्चैव द्विजातीनां विशोधनमिति" अत्रिः। अत्रापवादमाह स एव "गोदोहने चर्म्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते। स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि। प्राकाररोधे विषमप्रदेशे सेवानिवेशे भवनस्य दाहे। आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः। शुचि गोदग्निकृत्तोयं प्रकृतिस्थं महीगतम्। चर्म्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलमिति"। प्रागुक्तवचनजातैः चर्म्मभाण्डस्थितयन्त्रोद्धृतयोरपेयत्वेन निषेधे प्राप्ते चर्मभाण्डैरुद्धृतं यन्त्रोद्धृतञ्च सन्ततधारयोद्धृतञ्च एतत्त्रयं यदि महीगतं गोदग्निकरं प्रकृतिस्थमविकृतं च तदा शुचीत्यनेन प्रतिप्रसूतम् महत्सु च न दुष्यतीत्यनेन महत्त्वस्यापेक्षाकृतत्वेन अव्यावर्त्तकतया गोदग्निकरत्वेन विशेषणात् तथाभूतं महत्त्वमेव प्रकृते विवक्षितम्। तदपि जलान्तराभावे शुद्धमित्यवधेयं प्रागुक्तवचने आपद्गतस्यैव भूमिगतं कृत्वा तत उद्धृत्य पानविधानेन तदेकवाक्यत्वात् तथैवेह ज्ञेयम्। एतच्च स्वभावतः पेयजलस्यैव—चर्म्मभाण्डादिस्थितिरूपदोषप्रतिप्रसवार्थम् न तु अपेयस्य क्षुद्रादिखानिततोयस्यापि पेयताविधानार्थं तथात्वे वाक्यभेदापत्तेः न च हिरण्योदकस्यैव अत्रस्थेव सामान्यशास्त्रनिषिद्धापेयजलस्य शुद्ध्यर्थतापरं स्वभावतः पेयस्यैव चर्म्मभाण्डादिगतत्वेन दोषपरिहारार्थतापरत्वैव सर्व्वसामञ्जस्ये विधिद्वयकल्पनायाः अन्याय्यत्वात् एतेन इदानीन्तनस्य क्षुद्रादिखानितस्य जलस्य यन्त्रोद्धृतत्वेन शुद्धताकीर्त्तनं साहसमेव तस्य क्षुद्रादिखानितजलत्वेन स्वभावतोऽपेयत्वात् जलान्तरस्य गङ्गाजलस्य च सन्निकृष्टत्वादापद्विषयत्वाभावात् प्रकृतिस्थविशेषणाच्च तस्य संस्कारविशेषेण विकारविशेषवत्त्वादेतद्वचनस्यापि तत्राप्रवृत्तेश्च। किञ्च "विचित्रसा तु हृदये यस्मिन्नद्रे प्रजायते सहस्रेखन्तु विज्ञेयं पुरुषन्तत् स्वभावतः" इति ब्रह्मपुराणेन अमेध्यस्पर्शवत्त्वेन शङ्कितात्रादेर्भोजननिषेधात् क्षुद्रादिखानमेध्यादिस्पर्शवत्त्वेन शङ्कितस्यास्य जलादेरप्यपेयतेति गम्यते। यद्यपि सूर्य्यकिरणास्पृष्टतया च तस्य व्यापन्नजलतया वैद्यकोक्तदोषाधायकत्वेनापि अपेयता। "अपि चण्डालभाण्डस्थं तज्जलं पावनं महत्" इत्युक्तेस्तत्स्थखाते गङ्गाजलानामेवाद्भुतत्वात्तस्य स्वभावतः शुद्धतेति तु न शङ्क्यं "सर्व्वत्र पावनी गङ्गा त्रिषु स्थानेषु दुष्यति क्षुद्रे च स्वर्गे सुराभाण्डे मेघादिजलमिश्रणे" इति वचनात् तस्य मेघादिजलसम्पर्कगङ्गायामुक्षादिस्पर्शस्य प्रत्यक्षदर्शनाच्च स्वभावतः शुद्धत्वाभावात्। धारायां प्रतिप्रसवमाह बौधायनः "अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः। आकराः शुचयः सर्वे वर्জयित्वा सुराकरमिति" "काले नवोदकं शुद्धं न पातव्यन्तु तत्क्वचित्। अकाले तु दशाहं स्यात् पीत्वानाद्यादहर्निशमिति" आ० त० स्मृतिः। "स्नानमाचमनं दानं देवतापितृतर्पणम्। शूद्रोदकैर्न कुर्वीत तथा मेघादिनिःसृतैः"। आचमननिषेधात् पानादेः सुतरां निषेधः। "यद्यद्दयं श्रावणादि सर्व्वा नद्यो रजस्वलाः। तासु स्नानादिकं वर्জ्यं वर्জयित्वा सुरापगाम् इति" छन्दो० प०। "यैः कृतः सर्वभक्ष्योऽग्निस्तेषामेयश्च महोदधिरिति" मनुः यैः विप्रैः "अन्यथा हि कृतश्चेद्द देवयोनिरपांपतिः। कृष्णायेणापि कौन्तेय न स्प्रष्टव्योमहोदधिरिति भा० व० प० स्पर्शनिषेधात् पाननिषेधः। "अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा। आविकं सन्धिनीक्षीरं विवत्साया च गोः पयः। आरण्यानाञ्च सर्व्वेषां मृगाणां महिषं विना। स्त्रीक्षीरञ्चैव वर्জ्यानि सर्व्वशुक्तानि चैव हि" मनुः। "गोः क्षीरमनिर्दशायाः सूतके अजामहीष्योश्च नित्यमेयमौष्ट्रमैकशफञ्च स्नन्दिनीनाञ्च या च वत्सव्यपेताः" अङ्गिः। "वर्জ्यं येद्गोरवत्सायाः पयश्चैवान्यवत्सया। आरण्यानाञ्च सर्व्वेषां वर्জयित्वा तु माहिषमिति" यमः। "सर्वासां हि स्नानीनां क्षीरं वर्জ्यमजावर्জ्यमिति" शङ्खः "गोजामहिषीवर्জ्यं

सर्वमयांति वान्यनिर्दयाहं तान्यपि सन्धिनीस्यन्दिनीविवत्सायमक्षीरं चामेध्यभुजश्च" विष्णुः । पीत्वोपवसेदित्यनुवृत्तिः । सन्धिनी दृषभाक्रान्ता स्यन्दिनी नित्यं प्रस्रवत्पयःस्तना । अमेध्यभुजः मद्यादिभक्षणशीलायाः । यमस्मृर्वत्सयुग्मं प्रसूता "हस्तवत्या निन्दितं रासभश्च पयो वर्ज्जयेदिति" हारीतः । तत्राजाक्षीरं दशाहादर्वाक् निषिद्धम् ऊर्द्धं तत् पेयं सर्ववचनसामर्थ्यात् "गोप्रातं शकृनोच्छिष्टं पदास्पृष्टञ्च कामतः । सन्धिन्यनिर्दशावत्सगोपयः परिवर्ज्जयेत् याज्ञ०।" "क्षीराणि यान्यभक्ष्याणि तद्विकाराश्च ये पुनः सप्तरात्रं हृतं कुर्य्यादित्यादि" या० । "उष्ट्रक्षीरमानुषीक्षीरपाने पुनरुपनयनं तप्तकृच्छ्रञ्चेत्यादि" याज्ञ० । "उष्ट्रतक्रेऽविलयनपिन्याकमथितप्रस्तीनि चात्तवीर्य्याणि नाश्नीयात्" गौत० । उष्ट्रतक्रेऽविक्षीरादि विलयनं दृतमलं पिन्याकः खलिः मथितं तक्रादि आत्तवीर्य्याणि गृहीतसाराणि ॥ आत्तवीर्य्यपदञ्चात्यन्तोष्ट्रतक्रेऽपरं मथितपदं च उदकप्रायतक्रपरञ्च । "क्षत्रियस्यैव दत्तस्यो वैश्यः शूद्रोऽथ वा पुनः । यः पिबेत् कपिलाक्षीरं न ततोऽन्योऽस्यपुण्यकृत्" आप० । "कापिलं यः पिबेच्छूद्रो नरकेण विपच्यते" स्मृतिः । स्मृते तु धातुदोषविशेषजनकतयाकानिचिदपेयान्युक्तानि तानि प्रायशः सामान्यतोऽपेयशब्दे २२६,२७, पृष्ठे उक्तानि । तत्र विशेषः कश्चित् प्रदर्श्यते "वर्षाजले गाङ्गेयरसः समुद्रत्वपरे क्षणसङ्गा "वर्षान्यत्वे सिकतोदे च सासमुद्रमिति विद्यात्तत्रोपादेयमित्युक्तम् कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम् । दृष्टपर्शीत्करधृतं कलुषं विषसंयुतम् योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । स वाह्याभ्यन्तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु तत्र यत् सैवालपद्मदृष्टपङ्कप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्विषापन्नमिति विद्यात् । तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकाः दोषाः षट् सम्भवन्ति । व्यापन्नं वर्ज्जयेच्चित्रं तोयं यदयनार्त्तवम् । दोषसङ्कनं हेतुत्वाददीताक्षितन्तु तत् । "व्यापन्नं सलिलं यस्तु पिबतीहाप्रसाधितम् । श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकताम् । श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान् वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव चेति" नदीविशेषजलस्य दोषकीर्त्तनेनापेयता च तत्रोक्ता "पूर्व्वाधिरूढास्तु न प्रशस्यन्ते गुरूदकत्वादिति । सह्यप्रभवाः कुष्ठं जनयन्ति, विन्ध्यप्रभवाः कुष्ठं पाण्डुरोगञ्च, मलयप्रस्रवाः क्षयीन्, महेन्द्रप्रभवाः श्लीपदोदराणि, ऋष्यवत्प्रभवाः कुष्ठश्वयथुगरोरोगश्लीपदगलगण्डान्, प्राच्यावन्त्याः अपरावन्त्याश्चाशांस्युपजनयन्ति, इति "सासमुद्रमुदकं विस्रं लवणं सर्व्वदोषकृदिति । अनेकदोषमानूपं वार्य्यभिष्यन्दिगर्हितमिति"च। रोगभेदे शीतलजलस्यापेयतायुक्ता, "पार्श्वशूले प्रतिश्याये, वातरोगे गलग्रहे, आध्माते क्षिमिते कोष्ठे सद्यः शुद्धे नवज्वरे । हिक्कायां स्रस्तेपीते च शीताम्बु परिवर्ज्जयेदिति" । तक्रस्यापेयता रोगभेदे तत्रोक्ता "तक्रं नैव क्षते दद्यान्नोष्णकाले न दुर्बले । न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके । शीतकालेऽग्निमान्द्ये च कफोत्थेष्वामयेषु चेति"। द्रव्यान्तरसंयोगादपेयता अपथ्यशब्दे २२६,२७, पृष्ठे दर्शिता । विशेषस्त्वेषः । "उष्णोदकानुपानन्तु स्नेहानामथ शस्यते, क्षते भल्लातकस्नेहात् स्नेहात्तैवरकात्तथेति" रोगभेदेऽनुपाननिषेधेन तत्र जलादीनामपेयता भङ्ग्या तत्रैव दर्शिता । अनुपानगुणमभिधाय "न पिबेच्छासकासार्त्तो रोगे चाप्यूर्द्धजत्रुगे । क्षतोरस्कः प्रसेकी च यस्य चोपहतः स्वरः । पीत्वाऽध्वभाष्याध्ययनगेयस्त्रग्भ्राजयेत् । प्रदुष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितः । मन्दाग्निसादकृद्गृध्रादीनामयान् जनयेत् वक्ष्यति"सुश्रुते ॥ [अदर्शे

अपेशल त्रि० विरोधे न०त० । पेशलत्वविरोधिधान्यगुणे

अपेहिकटा स्त्री अपेहि अपगच्छ कट ! इत्युच्यते यस्यां क्रियायाम् मयू०स० । कटसम्बोधनकापगतिनिर्देशक्रियाविशेषे । एवं मयू० समासे । अपेहिद्वितीया, अपेहिप्रथमा, अपेहिबाणिजा अपेहिस्वागता एतेऽपि शब्दाः तत्तत्सम्बोधनकागमनक्रियानिर्देशे ।

अपैशुन न० अभावे न०त० । १ पैशुन्याभावे न०ब० । २ पैशुन्यशून्ये त्रि० अपैशुन्यमभ्युपायोऽर्थे न० तद्वति त्रि०

अपोगण्ड त्रि० अपसि कर्म्मणि गण्डः त्याज्यः । विकलाङ्गे "विकलाङ्गं हि सर्वत्र धर्म्मकार्य्येषु वर्ज्जयेदिति" स्मृतेः स हि वैधकर्म्मसु त्याज्यः । २ अतिभीरौ सोऽपि हि कर्म्मशाले त्याज्यः । अपसि अगण्डः अवीर इति वा तस्य कर्म्मणि अवीरत्वात्तथात्वम् । अपोजलमिव भङ्ग्युक्तत्वात् गण्ड एकदेशोऽस्य । ३ त्रिवलियुते मध्यभागे वलीनामिव तस्य तरङ्गाकारत्वात् तथात्वम् । अपसि कर्म्मणि त्याज्यः गण्डः अपटुत्वात् पोगण्डः शिशुः न०त० । पोगण्डः पञ्चमादब्दादर्वाक् च दशमाब्दतदयुक्ते पञ्चाब्दे बाले । पोगण्डभिक्षशिशोरेव तथात्वात् । "बाल आषोडशात् वर्षात् पोगण्डश्चेति शब्दव्रत" इति नारदोक्तपोगण्डभिक्षे ५ षोडशवर्षातीतवयस्के च "अजङ्घेदपोगण्डो

विषये चास्य भुज्यते भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति" कात्या०। [भ्रान्तं प्रत्यक्षं निर्विकल्पकम्" स०द०।

अपोढ त्रि० अप-वह-क्त। १ निरस्ते त्यक्ते २"कल्पनापोढम-

अपोदक त्रि० अपगतमुदकं सुस्निष्टत्वात् यस्य। १ अप्रविष्टोदके "तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ऋ०१,११६,३। अपनद्ध फलेषूदकं यस्याः उक्तपुंस्कत्वात् स्त्रियामत इत्त्वं वा। इत्त्वपक्षेऽपोदिकापि (पुइ) पूतिकायाम् तत्फलेषु उदकवत्त्वात्तथात्वम्। अपगतमुदकं यस्मात् ५ब०। जलापकर्षहेतौ विषादौ "यत्र अपोदकं विषं तत्त एतास्वप्सभवम् अथ० ५,१३,१।

अपोनप्त्रि(प्त्री)य त्रि० अपोनप्तात् देवताऽस्य घ-छ वा नि०। अपोनप्तृदेवताके हविरादौ। [मयट्। जलमये।

अपोमय त्रि० अपः जलं तदात्मक तद्विकारत्वात् अपस्+

अपोह पु० अप+उह गत्यादौ बा० भावे क। १ त्यागे २ अतद्व्यावृत्तौ तद्विशिष्ट व्यावृत्तेरपि त्यागविशेषरूपत्वात्तथात्वम्। "तद्वानपोहो वा शब्दार्थे" इति काव्यप्र० "अपोहः अतद्व्यावृत्तिरिति" महेश्वरः। अहस्तर्कः अपः विपरीते प्रा०स०। अपरतर्कनिरासाय कृते विपरीततर्के स च "शुश्रूषा श्रवणं चैव ग्रहणं धारणा तथा। ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा इति हेमचन्द्रोक्तः बुद्धिगुणभेदः। "स्वयमूहापोहासमर्थे" इति पा०भा०। भावे ल्युट्। अपोहनमप्यत्र न०। "मत्तः स्मृतिर्ज्ञानमपोहनञ्चेति" गीता।

अपोहनीय त्रि० अप-ऊह-अनीयर्। अपरकृततर्कनिरसनेन तर्कणीये, "ऋत्विगपोहनीयास्त्रय." कात्या० २२,६ २१।

अपोह्य त्रि० अप-उह गत्यादौ कर्म्मणि यत्। अपगमनीये "त्याज्यो एतैर्त्रिभिरपोह्य स्यादेनोहिंसासङ्गवम्" मनुः अप+वह-ल्यप्। दूरीकृत्येत्यर्थे अव्य०।

अपौरुष त्रि० नास्ति पौरुषमस्य। विक्रमशून्ये। अभावे न०त०। पौरुषाभावे न०।

अप्चर त्रि० अप्सु चरति चर-ट। १ जलचरे जन्तौ स्त्रियां ङीप् "तीरस्थाद्यान्याश्रितास्तेषां मृगगर्त्ताश्रयाप्चराः" इति मनुः तीर्थे दुर्गार्थे।

अप्नु न० आप्यते भोगाय जीवेन आप-क्नुन् नुडागमश्च। १शरीरे २ सूक्ष्मरूपसोमे च। "अथाप्नवे द्वितीये यामाऽऽहुतिं जुहोति शत०ब्रा०३,६,३८, अप्नुः सूक्ष्मरूपः सोमः भा०।

अप्नुर् पु० अप्नुः जलदानाय स्तुतोऽस्ति उर-वेगे क्विप्। जलदायके इन्द्रे तस्य सेवनायकत्वेन तत्प्रेरकतया जलदातृत्वात्तथात्वम् "यत्रेन गातमप्नुरो विविद्रिरे ऋ०२,२१,५, "अप्नुरः अपां प्रेरकादिन्द्रात्" भा०। २तद्व्यायकेऽनलादौ च तत्राग्न्याहेः "अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिरिति" मनूक्तेः जलप्रेरकत्वम्।

अप्नुर्य न० अप्नुरो भावः बा० वेदे यत्। "जलप्रेरकत्वे लोके तु घञ् आप्नुर्य्यमित्येव। "इन्द्राग्नी! तविषाणि वां सधस्थानि प्रयांसि च युवोरप्नुर्य्यं हितम् १२,८, अप्नुर्य्यं वृष्टिप्रेरकत्वम् भा०युवोर्युवयोरिन्द्राग्न्योः

अप्नोर्याम पु० अप्नोर्दैर्घ्यस्य यामकत्वाद्याम इव अलु०स०। अग्निष्टोमाङ्गयागभेदे "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या अग्निष्टोमस्य देहव्यापककालकत्वात्तथात्वम्। "सोऽप्नोर्यामेण यजेत" कात्या० ६,११,१०, "षडुत्तरे अत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्नोर्यामः कात्या० १०,६२६,।

अप्त्य त्रि० अप्सु देहे भवः यत् वेदे टिलोपः। १अपत्ये निरु० २देहकर्म्मणि स्थिते च "पूर्व्ये अर्द्धे रजसो अप्त्यस्य" ऋ०१,१२४,५ "अप्त्यस्य कर्मणि स्थितस्येति" भा०

अप्नःस्य त्रि० अप्नसि कर्मणि तिष्ठति अधिकृतत्वात् स्था-क ७त०। १ कर्मण्यधिकृते "संयावप्नःस्यो अपसेव" ऋ० ६, ६७,३। "अप्नःस्यः कर्मण्यधिकृतः" भा०।

अप्नराज पु० अप्नसां कर्म्मणां राजा प्रेरकत्वात् टच् स०त० वेदे दृ० सलोपः। कर्म्मप्रेरके। "युवं ह्यप्नराजावसीदतम् ऋ० १०१३२७।

अप्नवान पु०अप्नसा कर्म्मणा वानं गतिः सङ्गतिरस्य। भृगुवंश्ये, ऋषिभेदे, "यमप्नवानो भृगवो विरुरुचुः ऋ० ४,७,१, अप्नवानः भृगुसम्बन्धी कश्चिदृषिः, भा०। "और्व्वभृगुवदप्नवानवदाङ्गिरसे अग्निं सप्तदृसम्" ऋ०८,१०२,४, अत्रैव वत्सादिगोत्रप्रवरत्वम् "वत्सानां भार्गवच्यवनाप्नवानौर्व्वजामदग्न्याः" इति "भार्गवौर्वजामदग्न्याः" इति वा "भार्गवच्यवनाप्नुवानाः" इति वा"वेदानां पञ्च, भार्गवच्यवनाप्नवानौर्ववेदा." इति गोत्रप्रवरा०। वङ्गानामाप्नुवतः प्रवरकल्पनं प्रवराध्यायविरुद्धत्वाद्धेयम्। अप्नसे आदानकर्मणे वानमस्य पृ० सलोपः। बाहौ निरु०।

अप्नस् त्रि० आप-असुन् नुट् च। १ कर्म्मणि निरु०। "क्रियातो विभागः विभागात् पूर्व्वदेशसंयोगनाशस्तत उत्तरदेशसंयोग" इत्युक्तेः संयोगहेतुत्वात्तथात्वम् "तद्देवेषु चक्षसे भद्रमप्नः ऋ० १,११३,६। "अप्नः कर्म" भा०।

वा० अकर्म्याख्यायामपि असुन् नुट् च्छ्वश्च । २ प्राप्तव्ये, "यच्चित्तमप्र उषसो वहन्ति" ऋ० १,११३,२० । "अप्रः प्राप्तव्यम्" भा० ।

अप्रस्वत् त्रि० अप्रस्+अस्त्यर्थे मतुप् मस्य वः स्त्रियां ङीप् । कर्मयुक्ते । "अप्रस्वतीषुर्व्वराखिति" ऋ० १,१२७,६ । "अप्रस्वतीषु खननादिकर्म्मोपेतासु" भा० ।

अप्पति पु० अपां पतिः ६त० । १वरुणे २समुद्रे च । "इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्" इति "वित्ताप्पत्योर्यमस्य च" इति च मनुः ।

अप्पित्त न० अपां पित्तमिव हेतुत्वात् । १ अग्नौ "अग्नेरापः" इति श्रुतौ अग्नेर्जलहेतुत्वोक्तेस्तथात्वम् ।

अप्य त्रि० अपामिदम् तत्र साधु संस्कृतं वा यत् । १जलसंस्कृते "अप्येगो राजाप्यस्तमिष्यते" ऋ० ६,८६,४५ । "अप्यः अप्सु संस्कृतः" भा० जलसम्बन्धिनि "त्वयाहितमप्यमप्सु भागम्" ऋ० २,३८,७ । "अप्यमपां सम्बन्धिनम्" भा० । २कर्मणि साधौ "स ईं मृगो अप्योवनर्गुरूप" ऋ० १, १४५,५ । "अप्यः कर्मणि साधुः" भा० अप्सु योग्यं वेदे यत् च्छ्वश्च । ४प्राप्तुं योग्ये "योनिमप्यमनिग्मितम्" ऋ० २,३८,८ । "अप्यम् आप्तुं योग्यम्" भा० ।

अप्यय पु० अप+इण-भावे अच् । १ "अपगमने २ नाशे ३ विलये च "खाप्ययादिति या०स्मृ० भवाप्ययौ हि भूतानां श्रुतौ विस्तरशोमया" गीता । अपैत्यस्मात् अपादाने अच् । पशुपुच्छसन्धिषु "पशुपुच्छानि परास्मिरप्ययेषु" कात्या० १७,६,७, "अप्ययेषु पशुपुच्छाप्यसन्धिषु" वेददी० ।

अप्रकट त्रि० न प्रकाशः विरोधे न०त० । प्रकाशितभिन्ने गुप्ते । "प्रकटाऽप्रकटा चेति लीला सेयं हरेर्द्विधा प०पु०

अप्रकम्प पु० न प्रकम्पः अभावे न०त० । १ चलनाभावे न० ब० । २चलनहीने त्रि० "अप्रकम्पो दुराधर्षः" इति पुरा० ।

अप्रकर्ष पु० न प्रकर्षः विरोधे न०त० । १ अपकर्षे न०ब० । २ प्रकर्षशून्ये त्रि० ।

अप्रकाण्ड पु० न प्रकृष्टः काण्डः स्तम्बोऽस्य । १ स्तम्बशून्ये भिक्षोप्रभृतितृणे । न०त० । २प्रकाण्डभिन्ने स्वल्पे त्रि० ।

अप्रकाश पु० न प्रकाशः अभावे न०त० । प्रकाशाभावे गोपने "अप्रकाशक्रये क्रेतुः स्वामिनश्चाधरक्षणादिति" या०त०ना० । न०ब० । "प्रकाशशून्ये त्रि० "प्रकाशांश्चाप्रकाशांश्च तस्करान् द्विविधान् विदुः" मनुः । अप्रकाशचौरश्च अपहर्त्तृशब्दे मनूक्ताः १५४ पृष्ठे द्रष्टव्याः । "प्रकाशश्चाप्रकाशश्च लोकालोक इवाचल" इति रघुः ।

अप्रकाश्य त्रि० प्र+काश-णिच् अर्हार्थे कर्म्मणि यत् । १ प्रकाशयितुमनर्हे गोप्ये "अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्" तन्त्रम् । २ विशेषतो गोप्ये जन्मर्क्षादिनवके च तत्र । "जन्मर्क्षं मैथुनं मन्त्रो गर्हच्छिद्रञ्च वञ्चनम् । आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा" का०ख० ।

अप्रकृत त्रि० न प्रकृतः प्रक्रान्तः यथार्थो वा । १अप्रक्रान्ते २अयथार्थे च । प्रकृतिः स्वभावोऽस्यास्य अर्श० आ० अच् न०त० । भयादिना २स्वभावहीने । "तामसं यच्चाप्रकृतो ददातीति गु०त० हारी० "अप्रकृतो भयादिभान्" रघुनन्दनः ।

अप्रकृति स्त्री न प्रकृतिः । प्रकृतिभिन्ने कार्य्यकारणभिन्ने सांख्यप्रसिद्धे पुरुषे "न प्रकृतिर्न विकृतिः पुरुष" इति सां०का० उक्तेस्तस्य प्रकृतिभिन्नत्वात्तथात्वम् २ व्याकरणोक्ते प्रत्ययनिमित्तरूपप्रकृतिभिन्ने प्रत्ययादिशब्दे, मीमांसकोक्तायां ३ प्रकृतिभिन्नायां विकृतौ च । प्रकृतिः स्वभावः न० ब० । ४तच्छून्ये त्रि० या कप् । अप्रकृतिकोऽप्यत ।

अप्रकृतिस्थ त्रि० प्रकृतौ स्वभावे न तिष्ठति रोगभयादिना ततश्चलति स्था-क ७त० न०त० । रोगभयादिना स्वभावाच्चलिते ।

अप्रकृष्ट त्रि० न प्रकृष्टः विरोधे न०त० । निकृष्टे अपकर्षयुक्ते

अप्रक्लृप्त त्रि० प्र+कृप्-क्त न०त० । कृप्तभिन्ने यदुचितं तद्भिन्ने "ऋत्विजां वैकोऽप्रकृप्तत्वाच्छामित्रे कात्या० ६,७,२

अप्रक्षित त्रि० प्र+क्षि-भावे क्त "अगतार्थे" मा० उक्तेः भावकर्मणोश्च रूढ्यर्थतया तद्भिन्ने दीर्घविधानात् भावस्य च रूढ्यर्थतया न दीर्घः तेन न नत्वम् नास्ति प्रक्षितं प्रक्षयो यस्य । प्रक्षयरहिते "अप्रक्षितं वसु बिभर्षि" ऋ० १,५५,८ । [भद्दुलक्षयति ।

अप्रखर त्रि० न प्रखरः विरोधे न०त० । १ तीक्ष्णत्वविरोधि

अप्रगुण त्रि० न प्रकृष्टो गुण उपकरणं कार्य्यसामर्थ्यं वा यस्य । १ व्याकुले न०त० । २ अनुगुणभिन्ने च ।

अप्रचेतस् न० न प्रचेतति प्र+चित--असुन् न०त० । अज्ञाने "कथाविधात्यप्रचेताः" ऋ० १,१२०,१ ।

अप्रज पु० न प्रजायते आत्मजरूपेण प्र+जन-ड न०त० । पुत्रादिजननाभावेन अजाते १ वन्ध्ये "आत्मा वै जायते पुत्र" इति श्रुतेः पुत्रजनने आत्मजननात् तच्छून्यस्य तथात्वम् । "भार्य्याममप्रजः कश्चित् क्रियेत प्रव्रजेत वेति" स्मृतिः "अप्रजस्त्रीधनं भर्त्तुर्भ्रात्रादिषु न गच्छेदिति" या० । २पुत्ररहितायां स्त्रियां स्त्री "अप्रजायामतीतायां बान्धवा-

स्तदवाप्नुयुः" इति स्मृतिः "संवत्सरद्वयं तन्तु गान्धारीगर्भमाहितम् । अप्रजा धारयामास ततस्तां दुःखमाविशत्" भा०आ०प० ।

अप्रजस् पुंस्त्री० न प्रजा सन्ततिः यस्य असिच् समा० । प्रजाशून्ये । "अतीतायामप्रजसि तद्वनं भर्तृगामि च" स्मृतिः । "अस्तं त्वाप्रजसं कृणोमि" अथ० ७,३५,२ ।

अप्रजाता स्त्री न प्रजाता कदापि न प्रसूता । १ अप्रसूतगर्भायां वन्ध्यायां स्त्रियाम् "दासीनामप्रजातानां शुभानां स्वर्णवर्चसाम् । शतमश्वै प्रदास्यामि" भा०उ०प० १५अ० ।

अप्रणीत त्रि० न प्रणीतः वेदविधिना संस्कृतः । १ वैधसंस्कारशून्ये अनलादौ २ अक्षते च ।

अप्रतर्क्य त्रि० न प्रतर्क्यः तर्कयितुमशक्यः । लिङ्गाद्यभावेन अनुमानेन ज्ञातुमशक्ये । "अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः" मनुः ।

अप्रता त्रि० प्र+ताय–क्विप् नास्ति प्रताः यस्मात् ५त० । १ अतिविस्तीर्णे "न सोमो अप्रता पपे" ऋ० ८,२२,१६, "अप्रता विस्तीर्णधनेनेति" भा० धातोरातोलोपात् रूपम्

अप्रति त्रि० नास्ति प्रति प्रतिरूपः प्रतिद्वन्द्वी वा यस्य । १ अत्युत्कृष्टे "सो अप्रतीनि मनवे पुरूणीन्द्रः" ऋ० २,१९,४, "अप्रतीनि उत्कृष्टानि" भा० २ प्रतिद्वन्द्विरहिते "यः एकः इदप्रतिमन्यमानः ऋ० ५,३२,३ । "अप्रतिः प्रतिद्वन्द्विरहितः" भा० । ३ अप्रतिरूपे अनुपमे च

अप्रतिकर त्रि० प्रति वैपरीत्ये कृ–कर्त्तरि अच् न प्रतिकरः । १ विपरीतकारिणि विश्वस्ते, जटा० प्रति+कृ–भावे अप् प्रतिकरः प्रतिक्षेपः अभावे न०त० । २ प्रतिक्षेपाभावे पु० न०ब० ३ प्रतिक्षेपशून्ये त्रि० ।

अप्रति(ती)कार पु० प्रति+कृ–घञ् वा दीर्घः अभावे न०त० १ प्रतीकाराभावे । न०ब० । २ प्रतीकारहीने ३ प्रतिकर्त्तुमशक्ये च त्रि० । अभावे अव्ययी० । ४ प्रतीकाराभावे अव्य० ।

अप्रतिकर्म्मन् त्रि० नास्ति प्रतिकर्म प्रतीकारो यस्य । १ प्रतिकर्त्तुमशक्ये । नास्ति प्रति प्रतिरूपं तुल्यं यस्य तादृशं कर्म यस्य । २ अतुल्यकर्मके त्रि० स्त्रियां ङीप् वा ।

अप्रतिक्रिया स्त्री प्रतिक्रिया प्रतीकारः अभावे न०त० । १ प्रतीकाराभावे । न०ब० । २ प्रतीकारशून्ये ३ प्रतिकर्त्तुमशक्ये च त्रि० ।

अप्रतिग्राह्य त्रि० न प्रतिग्रहीतुं योग्यं स्मृतौ निषेधात् । प्रतिग्रहीतुमयोग्ये स्मृतौ निषिद्धप्रतिग्रहतया उल्लिखिते हिरण्यादौ द्रव्ये, शूद्रादिधनादौ च प्रतिग्रहस्याऽदृष्टार्थत्यक्तद्रव्याङ्गीकारः । तत्र द्रव्यविशेषे, अपादानविशेषे, कालादिविशेषे च प्रायश्चित्तोत्कीर्त्तनेन पापजनकत्वात् क्वचित् वस्तुकृता क्वचित् कालादिनिमित्तकृता चाप्रतिग्राह्यता "प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्" मनुः तानि च प्रायश्चित्तविवेके दर्शितानि तत्रादौ प्रतिग्रहे अपादाननियमः "यथा "राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा । याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः" मनुः । राजशब्दोऽत्र न्यायवर्त्तिक्षत्रिय नृपतिपरः "न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः" इति "यो राज्ञः प्रतिगृह्णीयाद्भुक्त्वोच्छास्त्रवर्त्तिनः स पर्य्यायेण यातीमान्नरकानेकविंशतिमिति" मनुनान्यराजतस्तन्निषेधात् देवलेन विधिष्टादेव राज्ञः प्रतिग्रहविधानाच्च "धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽशुचीन् मेध्यमेव धनं प्राह्लस्तीक्ष्णस्यापि महीपतेः" इति "द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः । अपि वा क्षत्रियात् वैश्यात् न तु शूद्रात् कदाचनेति" व्यासः निन्दितप्रतिग्रहस्य अपात्रीकरणम् "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमिति" मनूक्तेः चाण्डालादिप्रतिग्रहस्तु पातित्यहेतुः "चण्डालान्त्यस्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रोज्ञानात् साम्यं तु गच्छति" मनूक्तेः तेन प्रायश्चित्ताधिक्यम् रजकादीनुक्त्वा "भुक्त्वा चैषां स्त्रियोगत्वा पीत्वापः प्रतिगृह्य च । कृच्छ्रमब्दं चरेज् ज्ञानादिति" मनूक्तेः "पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च । मासोपवासं कुर्वीत चान्द्रायणमथापि वा" हरः । "शौकरिकव्याधनिषादरजकवरुड़चर्मकारा न भोज्यान्ना अप्रतिग्राह्यास्तदन्नायनप्रतिग्रहयोश्चान्द्रायणं चरेत्" शुमं० "रजकश्चर्मकारश्च नटोवरुड़ एव च कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः एतेषाञ्च स्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रोज्ञानात् साम्यं तु गच्छति" यमः अत्रापवादः "शय्यां गृहं कृषाणं गन्धान् पत्रं पुष्पं फलं दधि । धानामत्स्यान् पयोमांसं शाकञ्चैव न निर्णुदेदिति" मनुः न निर्णुदेत् न त्यजेत् "अभोज्यान्नानामपि पुष्पफलशाकहरणकाष्ठधान्यानि क्षेत्रस्थान्यपि तड़ागस्थं, गोदस्थं च पय आदाय न दोष" इति शुमन्तुः तेषाञ्च उपढौकितानामेवादाने न दोष इति प्रा०वि० । "अयाचितान्नृतं याच्ञमपि दुष्कृतकर्मणः । अन्यत्र कुलटाषण्ढपतितेभ्यो द्विष-

स्तथेति" या० स्मृत्येकवाक्यत्वात्। व्यक्तमुक्तम् "गन्धपुष्पकुशान् शय्यां याकं मांसं पयोदधि। मणिमत्स्त्रौ गृहं धान्यं याह्यमेतदुपस्थितम्। मधूदकं फलं मूलमेधांस्य भयदक्षिणा अभ्युद्यतानि याह्याणि" का०ख०। तेनैषामेवायाचिताहृतानां याह्यता नान्येषाम्। एवञ्च चण्डालादितोऽपि शय्यादिभिन्नानामुपढौकितानामपि अप्रतिग्राह्यता। शूद्रादिप्रतिग्रहनिषेधस्तु अनापद्येव, आपदि तु तस्य कर्त्तव्यता "याजनाध्यापने नित्यं क्रियेते संकृताःत्मनाम्। प्रतिग्रहस्तु क्रियते शूद्रादप्यन्तजन्मन" इति "अदृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः" इति मनुना तस्याभ्यनुज्ञानात्। तत्र स्तेनात् द्रव्यं कथञ्चिदपि न प्रतिग्राह्यम् "योऽदत्तादायिनोहस्तात् लिप्सेत ब्राह्मणोधनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" या०उक्तेः आपदि शूद्रधनस्य याह्यत्वेऽपि यज्ञार्थतया नयाह्यता "न यज्ञार्थं धनं शूद्राद्विप्रोलिप्सेत कर्हिचिदिति" मनुना कर्हिचिदत्यनेन आपद्यपि तस्य निषेधात् "ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिता" इति मनूक्तेश्च। तत्र द्रव्यविशेषे प्रतिग्रहनिषेधः। "गृहीतयाह्यत्याही न पुनर्मानवोभवेदिति" हुरा०। "यस्तं वित्तं सुरा चाप्रतिग्राह्या ब्राह्मणानामन्येषाञ्च" वशि०। वित्तं सुवर्णम्" "मद्यमदेयमपेयमनिग्राह्यमिति" ति०त० उश०। "मणिवासोमवादीनां प्रतिग्रहे सावित्र्यष्टोत्तरं जपेत् पञ्चरात्रं, मध्यमे द्वादशरात्रं पयोव्रतः यतसङ्कल्पमसत्प्रतिग्रहे" हारी०। "हिरण्यं भूमिसवं गामश्वं वासस्तिलान् घृतम्। अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत्" मनुः। अविद्वानित्युक्तेः विदुषो न दोषाय। "किं करिष्यत्यसौ मूढोगृह्णन्नुभयतोमुखीम्। सकृत्सं वाङ्मयाः पापाः क्षुरधारासमन्विताः पूर्णं वर्षसहस्रे तु पापं एकः प्रमुच्यते। एतामवस्थां प्राप्नोति गृह्णन्नुभयतोमुखीमिति म०पु०। एतस्य विद्वदविद्वद्विषये निषिद्धता कृष्णाजिनादीनां तु अप्राह्यग्रन्थे दर्शिते उक्ता। देशकालाविशेषे च प्रतिग्राह्य यामस्य प्रतिग्राह्यता "न तीर्थे प्रतिगृह्णीयात् पुरुषेष्वायतनेषु च। निमित्तेषु च सर्व्वेषु अप्रमत्तोदभवेद्विजः" तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रय" इतिप्रा०त०पु०। "पाणीयं पायसं भैक्षं घृतं लवणमेव च। कृसरदत्तं न गृह्णीयात् तुल्यं गोमांसभक्षणैः" इति का०ख०। "नत्वेकं छत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि धर्म्मनाय

पूर्व्वेषा" नित्यनेन ज्येष्ठपुत्रदानप्रतिग्रहयोर्निषेधेन तस्याप्यप्रतिग्राह्यता। तथा "न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानात् भर्त्तुरिति" स्मृतेः भर्त्तुरनुज्ञामन्तरेण स्त्रियाः पुत्रस्याप्रतिग्राह्यता। परितोषार्थं विसृष्टग्रहणे तु न दोषः। न प्रतिग्राह्यं यस्मात् ५त०। प्रतिग्राह्यद्रव्यादानाच्च वधौ शौकरिकादौ चण्डालादौ च पु०। "न भोज्यान्ना अप्रतिग्राह्या" इति प्रायुक्तसमन्तुवाक्यम्। "प्रायश्चित्तद्रव्यग्रहणे दोष" इतिप्रा०वि०।

अप्रतिघ त्रि० नास्ति प्रतिघः प्रतिघातकोऽस्य। १ प्रतिघातकशून्ये अप्रतिबद्धे "यस्तु दुःखसमायुक्तमप्रीतिकरमात्मनः। तद्रजोऽप्रतिघं विद्यात् सततं हारि देहिनामिति" मनुः।

अप्रतिद्वन्द्व त्रि० प्रतिगतः द्वन्द्वं विरोधं स्पर्द्धां वा अत्या० स० न० त०। १प्रतिस्पर्द्धाशून्ये "त्वामप्रतिमकर्म्माणमप्रतिद्वन्द्वमाहवे" रामा०। प्रतिद्वन्द्वः सहचरः। २तच्छून्ये च "सोऽहं धनमिदं प्राप्तोनिर्जनं जनवर्जितः। सीतया चाप्रतिद्वन्द्व" इति रामा०।

अप्रतिपक्ष त्रि० नास्ति प्रतिपक्षः विपक्षः सदृशो वा यस्य। १विपक्षहीने २असदृशे च।

अप्रतिपत्ति स्त्री प्रतिपत्तिः कर्त्तव्यतानिश्चयः अभावे न० त०। कृतिकर्त्तव्यतानिश्चयाभावे "अप्रतिपत्तिविमूढानि चेन्द्रियाणि" काद०। २ निश्चयाभावे ३ अस्वीकारे ४अग्रहणे ५स्मृत्यभावे "उत्तरस्याप्रतिपत्तिरप्रतिभेति" गौ०सू०। न०ब०। ३तच्छून्ये त्रि०।

अप्रतिपद् त्रि० प्रतिपद्यते जानाति प्रति+पद्-क्विप् न०त०। विकले "सर्व्वेभ्यो प्रतिपदम्" य० २०,८। "अप्रतिपदं विकलमिति" वेददी०।

अप्रतिपन्न त्रि० न०त०। १अज्ञाते २असङ्गीकृते च।

अप्रतिबद्ध त्रि० न प्रतिबद्धः निरुद्धः न०त०। अनिरुद्धे उद्दामे। [प्रबले २ विपक्षहीने च।

अप्रतिबल त्रि० नास्ति प्रतिबलः प्रतिपक्षो यस्य। १ अति-

अप्रतिभ त्रि० नास्ति प्रतिभा यस्य। १ प्रतिभाशून्ये २अप्रगल्भे ३ स्फूर्त्तिशून्ये ४ प्रत्युत्पन्नमतिशून्ये ५अदृष्टे दैवलब्धे च।

अप्रतिभा स्त्री अभावे न०त०। वादिप्रतिवादिनोर्वाक्ये प्रश्ने वादिनोद्भावितदोषोद्धारणोपायज्ञानेऽपि तदुद्धारं प्रतिवादिनः१ स्फूर्त्यभावरूपे निग्रहस्थानभेदे "उत्तरस्याप्रतिपत्तिरप्रतिभेति" गौ०सू०। २ प्रगल्भताभावे च।

अप्रतिम त्रि० नास्ति प्रतिमा उपमा यस्य । अतुल्ये "अनुपमे-त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे" इति रामायणम् ।

अप्रतियोगिन् त्रि० नास्ति प्रतियोगी तुल्यरूपः यस्य । स्त्रियां ङीप् । १ अनुपमे । प्रतियोगी अभावसंबन्धी न०त० । २ अभावसम्बन्धिभिन्ने । "अथ वा हेतुमच्चिद-विरहाप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते" भाषा० । यस्याभावः स एव प्रतियोगीति द्रष्टव्यः ।

अप्रतिरथ पु० नास्ति प्रतिरथः प्रतियोद्धा यस्य । १ प्रति-योधशून्ये । नास्ति प्रतिरथः तुल्यः मङ्गलार्थत्वेनास्य । २यात्रा मङ्गलार्थे साममेदे । "एष सोऽप्रतिरथोऽस्य यः स दृहस्पति-रिति" "ब्रह्मा दक्षिणतोऽप्रतिरथं जपति" इति च श्रुत० ब्रा० ।

अप्रतिरव त्रि० न प्रतिकूलो रवः प्रतिरवः स नास्ति यत्र । समेदं द्रव्यं त्वया न भोक्तव्यमित्यादि प्रतिषेधकवचनशून्ये भोगे । "अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता हानि-र्भवति" मिता० ।

अप्रतिरूप त्रि० नास्ति प्रतिरूपस्तुल्यरूपो यस्य । असदृशे ।

अप्रतिरूपकथा स्त्री नास्ति प्रतिरूपा प्रत्युत्तरीभूता कथा यस्याः । उत्तरवाक्यरहितायां वाचि । [पराक्रमे ।

अप्रतिवीर्य्य त्रि० न प्रतिरुद्धं वीर्य्यं यस्य । अन्यैरनिरोध्य

अप्रतिषिद्ध त्रि० न प्रतिषिद्धम् । अनिषिद्धे "अप्रतिषिद्धमनु-मतं भवतीति" न्यायः सौवर्णराजतोलूखरखड्गमणिमय-पात्राणामन्यतमेषु अप्रतिषिद्धेषु वेति" आ०त० गोभिलः "अप्रतिषिद्धानि कदलीपत्रत्वगादीनि" रघु० ।

अप्रतिष्कुत त्रि० प्रति+स्कु-क्त न०त० वेदे षत्वम् । १अप्रतिशब्दिते "स वीरो अप्रतिष्कुतः" ऋ० ७,३२,९, "अप्रतिगतोऽप्रतिशब्दितो वा" भा० २अप्रतिगते च ।

अप्रतिष्ठ न० नास्ति प्रतिष्ठा यस्य । १अन्याधारशून्ये स्वधामप्रतिष्ठिते ब्रह्मणि । "स भगवः ! कस्मिन् प्रति-ष्ठितः खे महिम्नीति" श्रुतेस्वस्यान्याधारशून्यत्वात्तथात्वम् । २अनाश्रये ३निष्फले । "सोमविक्रयिणे विप्रा भिषजे पूय-योषितम् । नष्टं देवलके दत्तमप्रतिष्ठं तु वार्द्धुषौ" मनुः ४प्रशंसाशून्ये च त्रि० । अभावे न०त० । ५प्रशंसाभावे स्त्री । अप्रतिष्ठितमप्यत्र । स च विष्णौ पु० । "अपां-निधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठित" इति विष्णु सह० ।

अप्रतिसंख्य त्रि० न प्रतीता संख्या यस्य उत्तरपदलोपः । अयमेकः अयमेक इत्याकारापेक्षाबुद्ध्यभावेन १प्रत्येक-संख्याग्रहणाभावादनुपलब्धसंख्याके वस्तुनि । प्रतिसंख्या बुद्धिविशेषः । अभावे न०त० । २विशेषबुद्ध्यभावे स्त्री ।

अप्रतिसंख्यानिरोध पु० न प्रतिसंख्यया बुद्ध्या निरोधः । १ बौद्धविशेषकल्पिते अबुद्धिपूर्व्वके भावविनाशे । तद्विशेषः बौद्धशब्दे वक्ष्यते । सोऽयम् प्रतिसंख्यानिरोधः "प्रति-संख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्" शा० सू० प्रत्या-ख्यातः । "अपि च वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्वयादन्यत् संस्कृतं क्षणिकञ्चेति" तदपि त्वयं प्रति-संख्याऽप्रतिसंख्यानिरोधावाकाशञ्चेत्याचक्षते । त्वयमपि-चैतद्वस्तु अभावमात्रं निरूपाख्यमिति मन्यन्ते बुद्धिपूर्व्वकः किल विनाशोभावानां प्रतिसंख्यानिरोधोनाम भाष्यते तद्विपरीतोऽप्रतिसंख्यानिरोधः आवरणाभावमात्रमा-काशमिति प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसम्भ इत्यर्थः । कस्मात् ? अविच्छेदात् तौ हि प्रतिसंख्याऽप्रति-संख्यानिरोधौ सन्तानगोचरौ वा स्याताम् भावगोचरौ वा । न तावत् सन्तानगोचरौ सम्भवतः, सर्व्वेष्वपि सन्तानेषु (ज्ञानप्रवाहेषु) सन्तानिनामविच्छिन्नफलहेतुभावेन सन्तान विच्छेदस्यासम्भवात् नापि भावगोचरौ, नहि निराश्रयो निरूपाख्योविनाशः सम्भवति सर्व्वास्वस्थासु प्रत्यभिज्ञाबलेन-न्वयाविच्छेददर्शनात् अदृष्टप्रत्यभिज्ञास्वस्थासु क्वचिद्दृष्टे नान्वयाविच्छेदेन अन्यत्रापि तदनुमानात् । तस्मात् पर-कल्पितस्य निरोधद्वयस्यानुपपत्तिरिति" शङ्करभाष्यम् ।

अप्रतिश्रुत त्रि० न०त० । अनङ्गीकृते दातव्यत्वेनास्वीकृते ।

अप्रतिहत त्रि० न प्रतिहतोऽभिभूतः प्रतिरुद्धो वा न०त० । अन्यैरनभिभूते २अप्रतिरुद्धे च । [२निरवयवे ब्रह्मणि न० ।

अप्रतीक त्रि० नास्ति प्रतीकमेकदेशो यस्य । १ सम्पूर्णे

अप्रतीक्षा स्त्री न प्रतीक्षा अपेक्षया कालयापनम् अभावे न०त० । १ प्रतीक्षाभावे कार्य्यजननाय इतरापेक्षया कालयापनाभावे २इतरानपेक्षया त्वरितकरणे । न०ब० । ३प्रतीक्षाशून्ये "अथाप्रतीक्षं पुनरायन्ति" श्रुत०ब्रा० ।

अप्रतीत त्रि० प्रति+इण-क्त प्रतीतः परिज्ञातः प्रतिगतश्च न० त० । १ प्रतिगतभिन्ने "सहस्रसां वाजिनमप्रतीतम्" ऋ० १,११७,६, । "अप्रतीतं यत्नुभिरप्रतिगतम्" भा० "महत्वतो अप्रतीतस्य" ऋ० । ५,४२,६, "अप्रतीतस्या" प्रतिगतस्य भा० २अपरिज्ञाते "देवेभिर्विश्वतो अप्रतीतः" ऋ० ३,४६,३, "अप्रतीतः एतावदस्य सामर्थ्यमित्य-परिच्छिद्यमानः" भा० २अपलायिते च ।

अप्रतीति न० अभावे न०त० । ज्ञानाभावे "न स्थोटः प्रतीत्य-प्रतीतिभ्याम्" सां० सू० ।

अप्रतीत्त त्रि० प्रति+दा क्त प्रतीत्तं प्रतिदत्तं न०त० ।

प्रतिदत्तभिन्ने "अपमित्यमप्रतीत्तं यदस्मि यमस्य, येन बध्निना चरामि" इति अथर्ववेदः ६,११७,१,

अप्रतीप त्रि० विरोधे न०त० । प्रतीपभिन्ने अनुकूले ।

अप्रत्यय पु० न प्रत्ययः विश्वासोज्ञानं वा अभावे न०त० । १विश्वासाभावे "दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानामिति" सिद्धान्तः न०ब० ।२ विश्वासशून्ये । "बलवदपि शिक्षितामात्मन्यप्रत्ययं चेतः" भर्तृ० । ३ज्ञानाभावे पु० । न०ब० । ४ज्ञानशून्ये त्रि० । प्रत्ययः-प्रकृतिनिमित्तकः अर्थबोधकः सुबादिशब्दभेदः न०त० । ५सुबादिशब्दभिन्ने सार्थके प्रकृतिरूपे शब्दे "अर्थवद्धातुरप्रत्ययः प्रातिपदिकमिति" पा० ।

अप्रत्याख्येय त्रि० न०त० । अपरिहार्य्ये त्यक्तुमशक्ये ।

अप्रधान न० न प्रधानम् । १प्रधानभिन्ने मुख्यभिन्ने गौणे । "प्रधानकर्म्मण्याख्याते लादीनाङ्कर्द्विकर्म्मणाम् अप्रधाने दुहादीनां यज्ञे कर्त्तुश्च कर्म्मणः" हरिः कर्म्मणोऽप्रधानत्वञ्च अप्रधानक्रियाफलाश्रयत्वम् । "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता" भाट्टाः २अनुत्कृष्टे अङ्ग त्रिलिङ्गत्वमपीष्यते । "अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् । प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः" नीतिः । ३ प्रधानकर्म्माङ्गे न० "अप्रधानकालं सकृदसन्निपातात्" कात्या० १,७,१५, अवभृथेः । "वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यनारभ्याधीतमग्न्याधानमग्निहोत्रादीनामङ्गमिति कृत्वा चिन्त्यते किमङ्गं सत् आधानं प्रतिकर्म प्रतिप्रयोगं च भेदेन कर्त्तव्यम् उत सर्व्वप्रयोगाणां साधारणं सकृदिति । तत्र कर्म्माङ्गत्वे प्रयाजाद्यङ्गवत् प्रतिकर्मभेदेन कर्त्तव्यम् न च वह्निःकालत्वेनाग्नेरङ्गमाधानविशेषता, यदृच्छानन्तरं क्रियते तत्तदर्थमित्यानन्तर्य्येण विशेषग्रहणात् । तस्मात् प्रतिकर्मभेदेनाधानप्राप्तावित्युच्यते अप्रधानकालं यदङ्गमाधानसदृशम् तत्सकृदेव कर्त्तव्यम् न भेदेन कर्म्मण आदौ । कुतः ? असंनिपातात् न चैतत् कस्यचित् कर्म्मणः प्रकृतौ कर्म्ममध्ये वा संनिपतितम् येन विशेषग्रहणं स्यात् किन्तु यदेव किञ्चिदग्निकार्य्यं निमित्तवशात् कामवशाद्वा यथाकामं प्राप्तम् तदर्थमाधास्येऽग्नीनिति, न तु कञ्चिदेव कर्मविशेषमभिसंधायाधानम् एवमनभिसंहितकर्मविशेषेण सर्वोद्देशेनाधाने कृते यद्यपि कारणवशात् किञ्चित् कर्म प्रथममापतति तथापि न तादर्थ्यमेव भवति प्रथमावस्थायामेव सर्वार्थत्वावधारणात् तस्मात् अप्रधानकालीकत्वात् सकृदेव कार्य्यमिति" कात्या० व्या० ।

अप्रधृष्य त्रि० न प्रधर्षितुं शक्यः । १अतिक्रान्तुमशक्ये २धर्षितुमशक्ये च । "यदाश्वौषं भीष्ममत्यन्तशूरं हतं पार्थेनाहवेष्वप्रधृष्यम्" भा० आ० प० ।

अप्रपन्न त्रि० न०त० । १प्राप्तभिन्ने, २अनागते, ३अज्ञाते च

अप्रबल त्रि० न प्रबलः । प्रबलभिन्ने हीनबले ।

अप्रभाव पु० न प्रभावः अभावे न०त० । १ प्रभावाभावे न०ब० । २ प्रभावशून्ये त्रि० ।

अप्रभूत त्रि० न प्रभूतः न०त० । प्रचुरभिन्ने स्वल्पे ।

अप्रमत्त त्रि० प्र+मद्–क्त प्रमादवान् विरोधे न०त० । सावधाने "निमित्तेषु च सर्व्वेषु अप्रमत्तोभवेश्वर" इति स्मृतिः । "यतात्मनोऽप्रमत्तस्य हादशाहमभोजनम्" "युक्तश्चैवाप्रमत्तस्य परिरक्षेदिमाः प्रजाः" इति च मनुः २ विष्णौ पु० "अपां निधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठितः" विष्णुस० "अप्रमत्तोऽधिकारिभ्यः कर्म्मानुरूपं फलं यच्छन्नप्रमत्तः" इति भा० । २ मद्यादिना प्रमत्तभिन्ने त्रि० ।

अप्रमय पु० न प्रमीयते प्र+मि–अच् वेदे नाञ्चम् । अप्रमेये "मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्" शत० ब्रा० "अप्रमयमप्रमेयम्" भा० ।

अप्रमाण न० न प्रमाणं विरोधे न० । प्रमाज्ञानभिन्नभ्रमादिजनके वाक्यादौ । तानि च "वेदाः प्रमाणं स्मृतयः प्रमाणं धर्म्मार्थयुक्तं वचनं प्रमाणम् । यस्य प्रमाणं न भवेत् प्रमाणं कस्तस्य कुर्य्याद्वचनं प्रमाणमिति" स्मृत्युक्तवेदादिप्रमाणभिन्नानि चार्वाकादिवचनानि "मद्यं शिलाः तरन्तीत्यादीनि प्रमाणान्तरविरुद्धार्थकानि वचनानि" च । एवं पित्तादिदुष्टानि इन्द्रियाणि आभासकलितानि लिङ्गानि च । "प्रमाणत्वाप्रमाणत्वे" इत्यादि मीमांसा ।

अप्रमाद पु० न प्रमादः अभावार्थे न०त० । १ प्रमादाभावे "अप्रमादेन गन्तव्यं कान्तारेषु नदीषु च" इति "अप्रमादश्च कर्त्तव्यः सर्व्वभूतेषु नित्यशः" इति च रामा० । न०ब० २प्रमादशून्ये त्रि० "माता च मम कौशल्या । कुशलं चाभिवादयन् । अप्रमादं च वक्तव्यमिति" रामा० "प्रमादश्च कर्त्तव्येषु अकर्त्तव्यत्वभ्रमेण तत्तोन्निष्क्रियः । अकर्त्तव्येषु च कर्त्तव्यत्वभ्रमेण तत्र प्रवृत्तिरिति" मलमासादयः । [प्रमादशीले स्त्रियां ङीप् ।

अप्रमादिन् त्रि० न प्रमाद्यति प्र+मद्–णिनि न०त० ।

अप्रमायुक त्रि० प्र+मि+उण् आयुषे युच् स्वार्थे कन् न०त० । अपरिच्छेदके । "क्रणोत्यप्रमायुकं रथद्युतिमनागसम्" ऋग्० १६,४४,२ ।

अप्रमित त्रि० न प्रमितः न०त०। १अपरिमिते २अनुपलब्धे च।

अप्रमीय त्रि० प्र+मा-बा० कर्मणि य०न०त०। अप्रमेये। "गजराजिसुख्याः वाऽप्रमीयाः प्रमीयन्ते" स्मृतिः।

अप्रमूर त्रि० प्र+मूर्छा-क्विप् प्रमूः मूर्छा अस्त्यर्थे कुड्वादि०र न त०। १मूर्छायुक्ताभिन्ने अमूर्च्छिते। "ते हि वस्वो वसवानास्ते अप्रमूरा मरुद्भिः ऋ० १,६०,२, "अप्रमूराः अमूर्च्छिताः" भा०।

अप्रमृष्ट त्रि० प्र+मृष-क्त न०त०। १ असोढ़े अक्षान्ते। प्र+मृज-क्त न०त०। २ अदृष्टे ३अप्रोञ्छिते प्र+मृश-क्त न०त०। ४अक्षाते च।

अप्रमृष्य त्रि० न प्रमृष्यः प्र+मृष-क्यप् न०त०। १ बाधितुमशक्ये। "सुदासं तद्रेक्णो अप्रमृष्यम्" ऋ० ६,२०,७। "अप्रमृष्यं केनाप्यबाध्यम्" भा०।

अप्रमेय त्रि० प्रमातुं ज्ञातुं परिच्छेत्तुं वा योग्यं न०त० १अपरिच्छेद्ये २बहुसंख्यकत्वेनोर्य्यवति ३इदमित्थमिति निश्चेतुमशक्ये "त्वमेकोऽग्रश्च सर्व्वस्य विधानस्य स्वयम्भुवः। अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित्प्रभुः" मनुः "स्वयंभुवोऽपौरुषस्य विधानस्य वेदस्य" कुल्लू०। "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदिति" श्रुतौ तस्य रूपाद्यभावश्रुतेः। नापि अनुमानगम्यता व्याप्तिलिङ्गाद्यभावात् "असङ्गोऽयं पुरुष" इति श्रुत्वा तस्य सर्वसङ्गशून्यतोक्तेः साधुरमानगम्यता निर्द्धर्म्मकत्वेन, तद्धर्म्मित्वे सति तद्गतभूयोधर्म्मवत्त्वलक्षणस्य साद्दश्यस्य तत्राभावात्। न वार्थापत्तिगम्यत्वम् किञ्चिद्वस्तु विना अनुपपद्यमानस्यैवार्थस्यार्थापत्तिप्रमाणवेद्यतया तद्धर्म्मिवस्त्वभावेन तत्र तदसम्भवात्। न्यायमते च अर्थापत्तेर्व्यतिरेकव्याप्तिहेतुकानुमानेऽन्तर्भावेण तल्लिङ्गस्य तत्राभावात्। योग्यानुपलब्धेस्त्वभावमात्रप्रमाणत्वात् परब्रह्मणश्च सदात्मकत्वेनाभावरूपत्वाभावात्। नापि शब्दप्रमाणवेद्यत्वम् तत्र शाब्दबोधोपायशक्त्यादेरभावात् अतएव "यद्वाचा न मनुते येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुत्याऽस्य वाग्विषयत्वं निराकृतम्। न च लक्षणया तद्बोधः, शक्यसम्बन्धरूपलक्षणायाः निस्सम्बन्धे तस्मिन्नप्रवृत्तेः। अतएव "ब्रह्मन्! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति? श्रुतयः साक्षात् सदसतः परे" इति भागवते गुणवृत्तिश्रुतिगोचरतासून्यत्वमस्योक्तम्। न च प्रमाणागोचरत्वे तस्य कथं सिद्धिः? कथं वा "तत्त्वौपनिषदं पुरुषं वेदेति" श्रुतौ "शास्त्रयोनित्वादिति" भा० सूत्रे च तस्य उपनिषद्वेद्यत्वमुक्तं संगच्छताम्? शास्त्रजनितबुद्धौ तस्य विषयीकरणात् तथात्वसङ्गतेः। तथा च शास्त्रजन्यान्तःकरणविषयत्वमेव तस्य न तु तदवच्छिन्नचैतन्यविषयतापि यथोक्तं "फलव्याप्यत्वमेवास्य शास्त्रलब्धिर्निराकृतम् ब्रह्मणश्चानना शायै वृत्तिव्याप्तिरपेक्षितेति" फलति प्रतिबिम्बति बुद्धिवृत्तौ फलं चिदाभासस्तद्व्याप्यत्वं तद्विषयत्वं तेन यथा घटपटादीनां तदाकारबुद्धिवृत्ति प्रतिफलितेन चिदाभासेनैव प्रकाश्यता, न तथा,ब्रह्मणः स्वप्रकाशतया तस्य इतराप्रकाश्यत्वात् किन्तु स्वयं प्रकाश्यता न तु तत्रान्यापेक्षास्ति। परन्तु स्वाज्ञाननाशायैव बुद्धिवृत्तेरपेक्षामात्रं सा च शब्दजनितेति उपनिषद्वेद्यता इत्यनुभयश्रुतिसामञ्जस्यम्। वाचस्पतिमते तु शब्दादपि अखण्डाकारा काचित् दशमस्त्वमसीत्यादिवत् मनोवृत्तिरूपेति तद्विषयत्वादस्य शास्त्रवेद्यता। "मनसैवानुद्रष्टव्यमिति" श्रुतेस्तस्य मनोमात्रवेद्यत्वेऽपि "तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति" शास्त्रात् मनःसंस्कारे च शास्त्रापेक्षणात् शास्त्रवृत्तिवेद्यता। न च मनोवृत्तिवेद्यत्वेऽप्रमेयत्वहानिः। असंस्कृतमनोविषयत्वाभावेनैव तथात्वात् "अवाङ्मनसगोचरमिति" वाक्यस्यापि तत्रैव तात्पर्य्यात्। मनोविषयत्वोक्तिरपि अज्ञाननाशार्थमनोवृत्तिमात्रवेद्यताभिप्रायेण, तदवच्छिन्नचिदाभासविषयत्वाभावाच्चाप्रमेयता "यन्मनसा न मनुते येन मनोऽहुमन्यते" इति श्रुतेस्तथार्थत्वात्। जगत्कर्त्तृत्वेन ईश्वरस्यानुमानेऽपि कूटस्थस्य तदनुमानगम्यत्वाभावात् ईश्वरस्यैव श्रुतिप्रमाणकत्वेन उपनिषद्वेद्यतोक्तिः। तदुत्तरं मननादिना श्रुतिवाक्यतात्पर्य्यावधारणेनाखण्डब्रह्माकारा चित्तवृत्तिरुदेति इति न काचिदनुपपत्तिः। नैयायिकादिमते तु तद्गुणगणस्य परिमाणमशक्यत्वात् दुष्टाशयावेद्यत्वाच्च अप्रमेयत्वमिति। प्र+मि+क्ये यत् न०त०। अपरिच्छेद्ये "यदाश्चर्यं वासुदेवार्ज्जुनौ तो तथा धनुर्गाण्डिवमप्रमेयम्" भा०आ०प०।

अप्रयत्न पु० प्रकृष्टो यत्नः प्रयत्नः प्रयासः अभावे न०त०। १प्रयत्नाभावे प्रयासाभावे। न०ब०। २प्रयासशून्ये त्रि०। "अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः" मनुः।

अप्रयुत त्रि० प्र+यु–मिश्रणे अमिश्रणे च क्त न०त०। १अपृथग्भूततया युते २पृथग्भूततया युते च।

अप्रयुवन् त्रि० प्र+यु–पृथग्भावे क्वनिप् न०त०। अपृथग्भूते "पर्त्तृभिष्टमद्भ्येरप्रयुत्वभिः" ऋ० ६,४८,१०, "अप्रयुत्वभिरपृथग्भूतैः" भा०।

अप्रलम्ब न० प्र+लम्ब–घञ् अभावे न०त०। १ विलम्बाभावे शीघ्रे २तद्वति त्रि० हलायुधः।

अप्रवर्त्तिन् त्रि० न प्रवर्त्तितुं शीलमस्य ताच्छील्ये णिनि। १प्रवृत्तिशीलशून्ये २सन्तते ३विच्छेदरहिते स्त्रियां ङीप् ४अनुच्छित्तौ "मैतदग्निन् संवदिष्ठाः अप्रवर्त्तीति" छ०उ०। "अथं वाव स योऽयमन्तर्हृदयाकाशस्तदेतत् पूर्णमप्रवर्त्ति अप्रवर्त्तिनीं श्रियं लभते य एवं वेद" इति छा० उ०। "अप्रवर्त्ति अनुच्छित्तिधर्म्मकमिति" भा०।

अप्रवीत त्रि० प्र+वी-प्रजननादिषु क्त न०त० १अजाते। गर्भधारणेन गतसारभिन्नायां २ अकामितायां च स्त्रियां स्त्री। "दक्षिणेन द्वारं सोमक्रयणी तिऽत्यलक्षिता व्यङ्गाऽप्रवीतेति" कात्या०७,६, १४, "अप्रवीता वीर्यातिजननकान्त्यादिषु अत्र प्रजननार्थः प्रशब्दात् वाक्यशेषाच्च प्रजाता हि गतसारा भवति नोपभोगमात्रेण। तस्मादप्रवीताऽप्रजातेति वक्ष्यिसी। अकामितेति कर्म्मभा० ४अयातयामायां स्त्रियाम् "सा स्यादप्रवीता वाग्वा एषा निदानेन यत् सहस्रो अजातयाम्नी वा इयं वागयातयाम्नी अप्रवीता, तस्मादप्रवीता स्यादिति" शत०ब्रा० ५अनुपगते त्रि० "यदप्रवीता दधते ह गर्भम्" ऋ० ४,७,६, "अप्रवीता अनुपगता" भा०। [निहत्ते।

अप्रवृत्त त्रि० न प्रवृत्तः विरोधे न०त०। प्रवृत्तिभिन्ने

अप्रवेद त्रि० नास्ति प्रवेदः लाभोयस्य। १ दुर्लभे। "अलक्षू अप्रवेदे इति माह कस्माच्च नलक्षू प्रत्यक्षीभवति इदं पुष्टं कथन प्रविदतेर्लाभेवैवादाह" शत०ब्रा० "नास्ति प्रवेदः प्रलाभः यस्योः दुर्लभे" इति भा०।

अप्रशस्त त्रि० न प्रशस्तम् विरोधे न०त०। १प्रशस्तभिन्ने अपकृष्टे २दुष्टे "अप्रशस्तेषु कृत्येषु भाषमाणो भवेद्भुक्" मनुः। ३निन्दिते च "अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनादिति" परा०। ४क्लीबे "पान्ति मित्रावरुणावदब्धावप्रशस्तान् रैभ्यमोऽप्रशस्तान्" ऋ० १,१६७,८, "अप्रशस्तान् क्लीबान्" भा०। यावत्पदार्थस्य यत्र उचितत्वम् ततोन्यूनत्वे अस्य प्रवृत्तिः।

अप्रसक्त त्रि० न प्रसक्तः अभिनिवेशयुक्तः संबन्धो वा। १अभिनिवेशशून्ये, आग्रहरहिते २प्रसङ्गरहिते च अप्रसक्तनिषेधानुपपत्तेरिति मीमांसा। ३असंबद्धे।

अप्रसक्ति स्त्री अभावे न०त०। प्रसङ्गाभावे न०ब०। प्रसङ्गशून्ये त्रि० प्रसक्तिराग्रहः प्राप्तिश्च।

अप्रसङ्ग पु० अभावे न०त०। १सम्बन्धाभावे। न०ब०। २सम्बन्धशून्ये त्रि०। प्रसङ्गः उत्तराभिधाने सङ्गतिभेदः अभावे न०त०। ३सङ्गत्यभावे। न०ब०। ४तच्छून्ये त्रि० "अप्रसङ्गाभिधाने च श्रोतुः श्रद्धा न जायते" दृष्टाः।

अप्रसन्न त्रि० न०त०। १प्रसादशून्ये २अस्वच्छे ३चित्तप्रसादशून्ये ४स्फूर्त्तिहीने ५असन्तुष्टे च।

अप्रसाद्य त्रि० न प्रसादयितुं योग्यम्। १ प्रसादयितुमयोग्ये तीव्रकोपयुते।

अप्रसाह पु० न प्रसह्यतेऽभिभूयते प्र+सह–कर्म्मणि घञ्। १अनिष्टादिना अनभिभूयमाने "पश्चादग्नेः संविशति चर्मणि स्थण्डिले वा वाचंयमोऽप्रसाहः" छा०उ०। "न प्रसह्यते नाभिभूयते स्त्र्याद्यनिष्टस्वप्रदर्शनेन" भा०।

अप्रसिद्ध त्रि० न०त०। १अनिष्पन्ने २अविख्याते च "अथ प्रसिद्धं वक्ष्ये हि पुंसामिति" कुमा०।

अप्रस्तृत त्रि० न प्रस्तृतः। १ विस्तारशून्ये प्रसरशून्ये।

अप्रस्तुत त्रि० न प्रस्तुतः। १ अनिष्पन्ने २कार्य्यसाधनायानुद्युक्ते ३ अप्रक्रान्ते ४ असंस्तुते च।

अप्रस्तुतप्रशंसा स्त्री सा०द०उक्ते अर्थालङ्कारभेदे तल्लक्षणादि "क्वचिद्विशेषः सामान्यात्१, सामान्यं वा विशेषतः२। कार्य्यात्किमित्तं३ कार्य्यञ्च ४हेतोरथ समात् समम्५॥ अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्यात्"। "पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः"॥ अत्रापमानादपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्। "क्षणिय यदि जीवितापहा हृदये किं लिखिता न हन्ति माम्?। विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया"॥ अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं, हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः। एवञ्चात्राप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। दृष्टान्ते प्रसिद्धमेव वस्तु प्रतिबिम्बत्वेनोपादीयते। दृष्टे तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सङ्गतयः॥ "इन्दुर्लिप्त इवाङ्कनेन, जडिता दृष्टिर्हरौ गीयतां, प्रच्छायार्कशिखेव विद्रुमदलं श्यामेव हेमप्रभा। कार्कश्यं कलया च कोमलमधूकस्यैष्टि प्रस्तुतं सीतायाः पुरतश्च कस्य मधिनां मर्म्मा समर्पेद

मनु ॥" अत्र संभाव्यमानेभ्य इन्द्रादिगताङ्गनलिप्तत्वादिभ्यः कार्य्येभ्यो वदनादिगतसौन्दर्य्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते । "गच्छामीति मयोक्तया सहसा निःश्वासमुद्रेकिणं त्यक्त्वा तिर्य्यगवेक्ष्य वाष्पकलुषेणैकेन मां चक्षुषा । अद्य प्रेम मदर्पितं प्रियसखीहस्ते त्वया बध्यतामित्यं स्नेहविवर्द्धितो मृगशिशुः सोल्लासमाभाषितः ॥" अत्र कस्यचिद्गमनरूपे कार्य्ये कारणमभिहितम् । तुल्येऽप्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च । श्लेषमूलापि समासोक्तिवद्विशेषणमात्रश्लेषे, श्लेषवद्विशेष्यस्यापि श्लेषे भवतीति द्विधा । क्रमेण यथा ॥ "सहकारः मदामोदो वसन्तश्रीसमन्वितः । समुज्ज्वलरुचिः श्रीमान् प्रभूतोत्कलिकाकुलः" ॥ अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात् सहकारात् कस्यचित् प्रस्तुतस्य नायकस्य प्रतीतिः "पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयनेन" अहानपि स्यात् । अथवुद्वरेत्तदपि विश्वसितीदृशीत्यं केनापि दिक् प्रकटिता पुरुषोत्तमेन" ॥ अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रसिद्ध्या प्रथमं विष्णुरेव बोध्यते । तेन वर्ण्यनीयः कश्चित्पुरुषः प्रतीयते । सादृश्यमात्रमूला यथा । "एकः कपोतपोतः शतशः श्येनाः क्षुधाभिधावन्ति । अम्बरमाकृतिशून्यं हरि हरि शरणं विधेः करुणा" ॥ अत्र कपोतादप्रस्तुतात् कश्चित् प्रस्तुतः प्रतीयते । इयं क्वचित् वैधर्म्म्येणापि भवति । यथा "धन्याः खलु वने वाताः कल्हारस्मर्गशीतलाः । रामभिन्दीवरश्यामम् ये स्पृशन्त्यनिवारिताः" ॥ अत्र वाता "धन्या अहमधन्या इति वैधर्म्म्येण प्रस्तुता प्रतीयते । वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम् । तत्र सम्भवे उक्तोदाहरणान्येव । असम्भवे यथा । "कोकिलोऽहं भवान् काकः समानः कालिमावयोः । अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः" ॥ अत्र काककोकिलयोर्वाकोवाक्यम् प्रस्तुताध्यारोपणं विनाऽसम्भवि । उभयरूपत्वे यथा । "अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः । कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः" ॥ अत्र प्रस्तुतस्य कस्यचिद् आरोपणम् विना कमलनालान्तश्छिद्राणाम् गुणभङ्गुरीकरणे हेतुत्वमसम्भवि अन्येषान्तु सम्भवीत्युभयरूपत्वम् ।

अप्रहत त्रि० न प्रहन्यते स्म प्र+हन-क्त न०त० । अक्षुण्णे (खिल) इति ख्याते अक्षतभूम्यादौ । "ईषद्भौतं नवं श्वेतं सदृशं यत्प्रकारितम् निर्णेजकाच्चालितञ्चाप्रहतं वासउच्यते" इति विधा०पा०उक्ते वाससोभेदे अहतमिति पाठान्तरम् ।

अप्रहन् त्रि०न प्रहन्ति प्र+हन्-क्विप् न०त० स्त्रियां ङीप् । "कार्य्यानार्शके तदनुग्राहके 'त्वमेको अप्रहण्यं रणीषे शवसाम्पतिम्" ऋ०६,४४,४। "अप्रहण्यमनुग्राहकमिति" भा० ।

अप्राकृत त्रि० प्रकृतेरागतम् अण् प्राकृतम् न०त० । १प्रकृतिकार्य्यभिन्ने ईश्वरलीलादौ । प्रकृतेः स्वभावस्य अयम् अण् न०त० । २स्वभावसम्बन्धिभिन्ने असामान्ये मनुष्यादौ च । [अधमे ।

अप्राग्र्य त्रि०न प्राग्र्यः प्रधानः विरोधे न०त० । श्रेष्ठभिन्ने

अप्राण त्रि० नास्ति देहादुक्रान्तत्वात् प्राणो यस्य । १मृते शवे । सर्व्वथा प्राणशून्ये २ईश्वरे पु० अप्राणोह्यमनो बुद्धिरिति" श्रुतिः ।

अप्राप्त त्रि०न प्राप्तः प्रमाणान्तरावगतः । १ प्रमाणान्तरानवगते "अप्राप्तप्रापको विधिरिति" "अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः" इति च मीमांसा । २अनागते च ।

अप्राप्तकाल त्रि० न प्राप्तः कालोऽस्य । अप्राप्तसमये । "अवयवविपर्य्यासवचनमप्राप्तकालमिति" गौ०सू० उक्ते २समाचोभव्यामोहादिना व्यत्यस्ताभिधानरूपे वाग्दोषभेदे च । प्रतिज्ञाहेतूदाहरणादीनां यथाक्रमं विन्यासे हि वादसमयः । तेषां व्युत्क्रमकथने वादिनो निग्रहः ।

अप्राप्तप्रापक पु० अप्राप्तं प्रापयति बोधयति प्र+आप-णिच्-ण्वुल् ईत० । प्रमाणान्तरेणानवगतस्य यागादीनामिष्टसाधनत्वस्य कृतिसाध्यत्वस्य वा बोधके लिङादौ शब्दे । तथा च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वं तत्त्वम् भवति च स्वर्गकामोयजेतेत्यादौ लिङ्युक्तं वाक्यं, यागे इष्टसाधनतां कृतिसाध्यतां वा बोधयत् प्रेरकतासया । अप्राप्ता दस्यावस्था यस्य ततः स्वार्थे कन् देवकवत् उत्तरपदलोपः । २अप्राप्तदस्यावस्थे वत्से "पादस्याप्राप्तके देयः" स्मृतिः "अप्राप्तके अप्राप्तदस्यावस्थे" इति रघु० ।

अप्राप्तव्यवहार त्रि० न प्राप्तः व्यवहारयोग्यः कालोऽस्य । "अप्राप्तव्यवहारोऽसौ यावत् षोड्शवर्षक" इति दक्षोक्ते अपूर्णषोड्शवर्षवयस्के बाले "गर्भस्थैः सप्तमोत्तेय आष्टमात् वत्सराच्छिशुः । बाल आ षोड्शादर्वाक् पौगण्डश्च निगद्यते । परतोव्याहारज्ञः स्वतन्त्रः पितराहते स्मृति" नारदः । "अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् । न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" कात्या० स्मृतिः ।

अप्राप्ता स्त्री न प्राप्तः विवाहप्रयुक्तकालोऽस्याः ष० उत्तरपद लोपः । अप्राप्तविवाहप्रयुक्तकालायां कुमार्य्याम् ।

"उत्कृष्टायाभिरूपाय वराय सदृशाय च । अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि" मनुः "अप्राप्ताम् अप्राप्त विवाहप्रशस्तकालाम्" उ०त० रघुनन्दनः ।

अप्राप्ति स्त्री अभावे न०त० । १ लाभाभावे "तदप्राप्ति-महादुःखविलोनाशेषपातका" का०प्र० २प्रमाणान्तरतो-ज्ञानाभावे "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सतीति" मीमां० ३असम्भवे "प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्ति-रिति" भा०सू० । "अप्राप्तिरसम्भव" इति भा० । ४अनुपपत्तौ च "समुदायहेतुकोऽपि तदप्राप्तिः" भा०सू० । समुदायाप्राप्तिः समुदयभावानुपपत्तिः भा० । न०ब० । ५लाभशून्ये त्रि० ।

अप्रामाणिक त्रि० प्रमाणेन सिद्धः, प्रमाणं वेद वा ठञ् न०त० । १प्रमाणासिद्धे २प्रमाणानभिज्ञे च स्त्रियां ङीप् । "अप्रमाणिकीयमनवस्थेति" सां०भा० ।

अप्रामाण्य न० अभावे न०त० । १यथार्थबोधकत्वाभावे "अप्रामाण्यं कथयति सदा नन्दसूनोर्वियोगः" पदा० अप्रामाण्यहेतुकानुष्ठानाभावे च "अननुष्ठानलक्षणमप्रा-माण्यम्" सां०सू० ।

अप्रामि त्रि० प्रकर्षेण अस्यते क्षिप्यतेऽसौ प्र+अस–णिच्-कर्मणि इन् न०त० । अक्षिप्ते, "अप्रामिमत्योमघवन्" । ऋ० ८,६०,४, "अप्रामिमत्यः अक्षिप्तमत्यः" भा० ।

अप्राय्य त्रि० प्र+इण–ण्यत् न०त० । अगन्तरि, "असच्च प्रा-युवोरक्षितारो दिवेदिवे" ऋ० १,८६,१, "अप्रायुवः अप्रायवः अगच्छन्तः वेदे तन्वादित्वादुवङ्" भा० ।

अप्रायुस् त्रि० न प्रकृष्टं प्रगतं वाऽऽयुर्यस्य । १प्रकृष्टायुर्भिन्ने २गतायुर्भिन्ने च । "नक्तयः सुदर्शतरोदिवातरादप्रायुषः ऋ० १,१२७,५ ।

अप्रिय न० विरोधे न०त० । प्रियभिन्ने दृष्टभिन्ने स्वभा-तोद्दिष्टे दुःखे "न ह वै सशरीरस्य सतः प्रियाप्रिययोरप-हतिरस्ति" श्रुतिः "तस्मात्तम इव स्वामी स्वयं हित्वा प्रियाप्रिये" इति मनुः । २ तत्साधने वचनादौ त्रि० "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्" "यामिष्यादृश्य साध्वी स्त्री नाचरेत् किञ्चिदप्रियम्" इति च मनुः । (सिद्धिः) ग्रहणीमत्स्ये स्त्री शब्द र० । प्रिय हेतुत्वाभावात्तस्यास्तथात्वम् । [जनवाक्यप्रयोक्तरि

अप्रियंवद त्रि० विरोधे न०त० । कटुवाक्यवादिनि उद्वे-

अप्रियवादिन् त्रि० अप्रियं वदति वद-णिनि ६त० स्त्रियां ङीप् । । कटुवाक्यवादिनि उद्वेजकवाक्यकथके "माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनीति" चाणक्यः ।

अप्रीति स्त्री अभावे न०त० । १सन्तोषाभावे, २दुःखे, "प्रीत्यप्रीतिविषादाः प्रकाशप्रवृत्तिनियमार्थाः" इति सां०का० । "प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीति-र्दुःखमप्रीत्यात्मकोरजोगुणः" इति सां०त०कौ० ।

अप्रेतराक्षसी स्त्री न प्रेता प्राप्ता राक्षसीम् अत्या०स० न०त० । तुलसाम्, अप्रेतराक्षसीशब्दे २५४पृष्ठे विस्तरः ।

अप्रेमन् पु० न प्रेम विरोधे न०त० । स्नेहविरोधिनि द्वेषे ।

अप्रौढ़ त्रि० न प्रौढः न०त० । १अप्रगल्भे २अपटौ च ।

अप्सु त्रि० आप–बा०क्सु पृ० ह्रस्वः । प्राप्ये "असीषां चित्त प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि" ऋ० १०, १०२, १२, "हरिमाणं नेऽङ्गेभ्योऽप्वासन्तरोदरात्" अथ०६,८,६

अप्स त्रि० अपः सनोति सन ड । १अपां विशेषगुणीभूते रसे "पृथिव्याः पुरीषमप्सोनाम" य०१४,४ । "अप्सोनामापां सारभूतो रस" इति वेददी० । आप इव निर्मलतया सन्यते संबध्यते सन–बा०ड । २रूपे निरु० ।

अप्सरःपति पु० ६त० । १इन्द्रे अप्सरापतिरप्यत्र ।

अप्सरस् स्त्री ब०व० अद्भ्यः सरन्ति उद्गच्छन्ति सृ-असुन् । समुद्रादिक्षुतायां खर्वेश्यायाम् "अप्सुनिर्मथनादेव रसात्त-स्माद्वरस्त्रियः । उत्पेतुर्मनुजश्रेष्ठ । तस्मादप्सरसो ऽभवन्" इत्युक्तेस्तासां तथात्वम् । "एकाप्सरःप्रार्थितयोर्विवादः" रघुः "आराधितोऽद्भा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः स-निमेषचिह्नाः" इति भावः । तासां च नाट्यकर्म वृत्तिः । ताश्च प्रधानतया द्वादश वह्निपुराणे दर्शिताः "उर्व्यशी मेनका रम्भा मिश्रकेशी ह्रलम्बुषा विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा भानुवत्यलम्बा रम्या द्वादशाप्सरसः शुभाः" इति गणभेदनामाध्याये । अत्र शुभा इति विशेषणात् अन्या अपि । ताश्च "उर्व्यशी मेनका रम्भा घृताची पुञ्जिकास्थला सुकेशी मञ्जुघोषा च मकारङ्कनवेति च" इति मा० पु० "अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च मनुजव्याघ्र । दक्षकन्याश्चतुर्दश" इति कश्यपपत्नीरभिधाय । "इत्येते देवगन्धर्वाः प्राधेयाः परिकीर्त्तिताः" इति गन्धर्ववंशमभिधाय च "इमं त्वप्सरसां वंशं विदितं पुरुषव्याघ्रम् प्रधाऽसृत महाभागादेव देवर्षितः पुरा । अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलो-त्तमा । अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा । केशिनी च सुबाहुश्च सुरता सुरसा तथा । सुप्रिया चातिबाहुश्च"

कृत्युक्तम् भा०आ०प०। एतासाञ्च चतुर्दशोत्पत्ति स्थानानि क दम्बर्यां वर्णितानि "यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति तासां चतुर्दश कुलानि एकं भगवतः कमलयोनेर्मनसः ससृत्पद्मम्, अन्यद्देवेभ्यः सम्भूतम्, अन्यदग्नेरद्भूतम् अन्यत् पवनात् प्रसूतम्, अन्यदमृतान्मथ्यमानादुत्थितम्, अन्यज्जलाज्जातम्, अन्यदर्कांकिरणेभ्यो निर्गतम्, अन्यत् सोमरश्मिभ्यो निष्पतितम्, अन्यद्भूमेरद्भूतम्, अन्यत् सोदामनीभ्यः प्रदत्तम्, अन्यन्मृगुना निर्मितम्, अपरं मकरकेतुना ससृत्पादितम्, अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वौ सुते सुनिरिष्टा च बभूवतुः, ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् एवमेतान्येकत्र चतुर्दश कुलानि" एतन्मूलं तु विस्तरभयान्नोक्तम्। २दिवि ३ उपरिदिवि च तयोर्जलहेतुत्वात्तथात्वम् "पुञ्जिकास्थला च क्रतुस्थाश्चरसाविति" य० १५,१५, "पुञ्जिकास्थला क्रतुस्थला चाश्चरसौ दिगुपदिग्रूपे परिचारिके" इति वेददी०। "अश्चरसाविति दिक् च उपदिक् चाह" श्रुतेस्तथात्वम्। "मेनका वै अश्चरारूपिणीति" भाष्यप्रयोगात् अश्चरसाविति श्रुतिनिर्देशाच्च नित्यबहुवचनान्ततेद्युत्सर्गः क्वचिदेकवचनान्तताऽपि

अप्सरस्तीर्थ त्रि० ६त०। १ तीर्थभेदे।

अप्सरा स्त्री अप्सु रूपमस्त्यस्याः प्राशस्त्ये कुञ्चा०र। दिव्यरूपवत्यां स्वर्वेश्यायाम् "उद्भिन्दतीं संजयन्तीमप्सराम्" अ० ४,३८,१।

अप्सरायमाणा स्त्री अप्सरस इवाचरति देहसौन्दर्य्यादिना अप्सरस+क्यङ्-सलोपः कर्त्तरि शानच्। अप्सरस्तुल्यसौन्दर्य्यवत्यां स्त्रियाम्।

अप्सव त्रि० अप्सु जलरसं वाति छिनत्ति वा-कइ०त०। जलरसस्नेहे सम्बन्धे तस्य लवणजलत्वात्तथात्वम्। "ये अप्सवमर्णसं चित्रराधस्तेनो रासन्ताम्" ऋ० १०,६५,३।

अप्स्य पु० अप्सु भवः "अपोयोनियन्मतुपः" वार्त्ति० सप्तम्या अलुक्, यञ्च। जलभवे।

अप्सस् त्रि० अप्सु अप्साधने तेजसि सन्ति खपिति ससक्किप् ७त०। १ रूपे तस्य तेजोहेतुत्वात् तथात्वम् २ रूपवति च। "शीर्णा शिरोऽप्ससाग्नो अर्दयन्नं स्थून बभस्ति हरितेभिरश्वभिः" अ० ६,४६,२, "जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः" ऋ० १,१२४,७।

अप्सा त्रि० अपोजलानि सनति ददाति सन-विट्। जलदातरि "आषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सामिति" ऋ० १,६१,२१, "अप्सां जलानां दातारम्" भा०। "पवस्व देवमादनो विचर्षणिरप्साः" ऋ० ६,८४।

अप्सु त्रि० नास्ति अप्सु रूपम् (निरुक्तोक्तम्) यस्य। रूपरहिते "मा त्वा वयं सहसावन्नवीरा माप्सवः परि" ऋ०७,४,६, अप्सवः रूपरहिताः" भा०। अप्राशस्त्ये न०ब०। अप्रशस्तरूपे असुरे, "अप्सुजितः" अप्सुजिच्छब्दे दृश्यम्।

अप्सुक्षित् त्रि० अप्सु जलाधारे अन्तरिक्षे क्षियति निवसति-क्षि-क्विप् अलुक्स०। अन्तरिक्षवासिनि देवादौ "ये देवासो दिव्येकादश स्थ पृथिव्यामेकादश स्थ अप्सुक्षितो महिनैकादश स्थ" ऋ० १,१३९,११, य० १८,६, च "तद्धेतुत्वात् तात्स्थ्यम् अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीति" भा०। [ङीप्। जलचरे।

अप्सुचर त्रि० अप्सु चरतीति चर-ट अलुक्समा० स्त्रियां

अप्सुज त्रि० अप्सुजले तद्धेतौ अन्तरिक्षे वा जायते जन-ड अलुक्स०। १जलजाते २अन्तरिक्षजाते "यदग्ने! दिविजा अप्सुजाः" इति ऋ० ८,४३,२८, "अप्सुजा अन्तरिक्षजाता" इति भा०।

अप्सुजा पु० अप्सु-जायते जन+विट् अलुक्स०। अश्वे "अस्रताबाष्पतो वक्रेर्वेदेभ्योऽण्डाच्च गर्भतः। साम्नोहयानामुत्पत्तिः सप्तधा परिकीर्त्तिता" इत्युक्तेरस्य बाष्पजातत्वात्तथात्वम् "संश्रितो अप्सुषुजा ब्रह्मा सोम पुरोगवः" य० २३,१४, "अप्सुजा अश्व" इति वेददी०। २ वेतसे तस्य जलसमीपजातत्वात् तथात्वम् "अप्सुयोनिर्वा अश्वोऽप्सुजा वेतस" इति शत०ब्रा०। ३ जलजातमात्रे त्रि०।

अप्सुजित् त्रि० अप्सून् असुरान् जयति जि-क्विप् अलुक्समा०। अन्तरिक्षस्थासुरजेतरि "सुपारः सुश्रवस्तमः समप्सुजितः" ऋ० ८,१३,२, "अप्सुजितः अन्तरिक्षवर्त्तमानानामसुराणां जेतारः" भा०।

अप्सुमत् त्रि० अप्सु आपः जलानि सन्त्यस्य "अपोयोनियन्मतुपः" वार्त्ति० सप्तम्या मतुप् अलुक्स० च। १जलसंसृक्ते आधारज्यभागे। "अप्सुमन्तावाधाराज्यभागाविति" सि०कौ०। २यज्ञेऽपि जलसत्त्वे च "न ह्याप्सु प्रौक्ष्यमाणान् भवति, का०श्रौ०। मरुस्थलीष्वपि यज्ञेदोदकवान् भवतीति" आनन्दगिरिः।

अप्सुयोग पु० ७त० अलुक्समा०। जलेषु योगे। "जिष्णवे योगायाप्सुयोगैर्वोयुनज्मि" अथ० १०,७,५।

अप्सुयोनि त्रि० अप्सु योनिरुत्पत्तिरस्य अलुक्समा०।

१जलभवे २अश्वे पु० "अम्भुयोनिर्वाऽश्वः" इति शत० ब्रा० । जलजत्वमश्वस्य अम्बुजाशब्दे उक्तम् ।

अप्सुषद् त्रि० अप्सु जले कारणत्वेन सीदति सद-क्विप् वेदे षत्वम् । जलस्थे अग्नौ "चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदम्" ऋ० ६,३,५ ।

अप्सुषोम पु० अप्सु अद्भिः सोम इव पवित्रत्वात् "सुषां सु" पा० व्यत्ययेन सप्तमी अलुक्समा० वेदे षत्वम् । जलपूर्णे चमसभेदे "अप्सुषोमानाम चमसानामालब्देशे अद्भिः पूर्णा" इति ता० ब्रा० द्राह्यायणश्रुतम् । "पूर्णपात्रान् समवस्यन्ति यानेकेऽप्सुषोमा इत्याचक्षते" शत० ब्रा० ।

अप्सुसंशित पु० अद्भ्यः संशितः वि० व्य० अलुक्समा० जलनिमित्तभूते विष्णुक्रमेऽन्तरीक्षे "विष्णोः क्रमोऽसि सपत्नमप्सुसंशितो वरुणतेजाः" अथ० १०,५,२३, ।

अफल त्रि० नास्ति फलं पुण्यप्रभवं धर्म्मप्रभवं सुखादिकं वा यस्य । १बन्ध्ये फलकाले फलशून्ये (राँड़ाइत्ते) २धर्म्मकार्य्यसुखादिशून्ये ३निष्फले च । "यथा षोण्ढ्ऽफलः स्त्रीषु यथा गौर्गवि चाफला । यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचेऽफल इति" मनुः । अफलं दानमाह मनुः "धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणदासेषु दत्तं भवति निष्फलमिति" हारीतः । "अथासद्द्रव्यदानमस्वर्ग्यं दत्त्वा परितप्यते तर्ह्यदानमफलं यज्ञोपकारिणे ददाति यच्च तन्मात्रं परिक्लिष्टं यच्च सोपधं ददाति अन्यथावितमलं यच्चापात्राय ददाति अनिष्टदानं स्मरति यच्च दत्त्वा प्रकीर्त्तयति स्वयदानं यच्चाश्रद्धया ददाति क्रोधाद्दानसं यच्चाक्रुश्य ददाति दत्त्वा वा क्रोशति असत्कृतं पैशाचं यच्चावज्ञातं ददाति वावजानीते मुमूर्षोस्तामसं यच्चाप्रकृतो ददाति" । "एतैर्दानोपसर्गैरुपसृष्टं दानमप्रशस्तमस्वर्ग्यमयशस्यमप्रुवफलं भवत्यल्पफलं वा रघु० (झाउ) । ४भावुकदुष्टे पु० तस्य फलशून्यत्वात्तथात्वम् । नास्ति फलमिव दृषणावस्था । ५इन्द्रे । स हि गौतमशापात् दृषणशून्योभेषदृषणश्चासीत् यथोक्तं रामायणे "नित्यं पुष्पफलोपेतैः पादपैरुपशोभिते ॥ स चेह तप आतिष्ठद्दुश्चरं सुसमाहितो मुनिः । संवत्सरसहस्राणि बहूनि रघुनन्दन ! ॥ तस्यान्तरं विदित्वाथ कामार्तस्त्रिदिवेश्वरः । मुनिवेशधरो भूत्वा सोऽहल्यामिदमब्रवीत् ॥ ऋतुकालः प्रतीक्षोऽपि न प्रतीक्षे सुमध्यमे । संगमं शोभनमिच्छामि पृथुश्रोणि ! सङ्गम त्वया ॥ मुनिवेशधरं शक्रं सा ज्ञात्वापि परंतप ! । मतिं चकार दुर्मेधा देवराजकुतूहलात्" इत्युपक्रम्य ॥ "सोऽपि दृष्ट्वैव देवेन्द्रं मुनिवेशधरं मुनिः ॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् । मम रूपं समास्थाय कृतवानसि दुर्मते ! ॥ अकर्त्तव्यमिदं यस्मात्तस्मात् त्वं विफलो भव । गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ पेतुर्दृषणौ भूमौ सहस्राक्षस्य राघव ! । व्यथितः स तदा चासीद्वृतौजा विफलीकृतः ॥ धर्षितस्तपसोग्रेण कृत्स्नं चापि सोऽविशत्" इत्युक्त्वा । "गौतम क्रोधमुत्सृज्य सुरकार्यं चिकीर्षुणा ॥ अफलोऽयं कृतस्तेन क्रोधात् सा च निराकृता । शापदोषेण तेनास्य तपोविघ्नः कृतो मया ॥ तन्नां सुरगणाः सर्वे सर्षिसंघाः सचारणाः । सुरकार्यार्थसफलं सफलं कर्तुमर्हथ ॥ गतक्लमोर्वशः श्रुत्वा देवा अग्निपुरोगमाः । ऊचुः पितृगणान् वाक्यमिदं तत्र समागतान् ॥ एष मेषः सदृषणोऽफलश्चाकृतोऽफलः । अस्मै मेषं दृषणौ च्छित्त्वा मच्छेन्द्राय प्रयच्छत ॥ अफलस्तु कृतो मेषः परां तुष्टिमुपैष्यति । भवतामुपयोगेन तच्छाश्वं सुमहत् फलम् ॥ तस्मान्मेषस्य दृषणौ च्छित्त्वा मेषौ ददातमर्हत । इन्द्राय सुरकार्यार्थं विफलाय पितामहाः ! ॥ श्रुत्वाग्निपुरोगाणां देवानां पितरो वचः । उत्कृत्य मेषदृषणाविन्द्रायोपददुस्तदा ॥ ततःप्रभृति कात्स्न्य ! पितरः कव्यभोजिनः । अफलं भुञ्जते मेषं सफलं तु न भुञ्जते ॥ इन्द्रस्य मेषदृषणस्ततःप्रभृति राघव ! गौतमस्य प्रभावेन बभूवामिततेजसः" रामा० ॥ ईदृशेऽपि च तस्य दृषणोत्पत्तिकरणात्तस्य तथात्वम् नास्ति फलं यस्याः जातित्वेऽपि "फलाच्छ" इति पा० ङी० अजादित्वात् टाप् । ७फलकामार्थाम् टभूम्यालक्ष्याञ्च स्त्री तयोः फलशून्यत्वात्तथात्वम् । फलं प्रयोजनम् एतच्छून्ये त्रि० । "अन्यथा ते वर्त्तमानस्याधर्म्मोभवत्यफला च विद्या" सुश्रु० । "यथा षण्ढ इत्यादि" मनुः ।

अफलाकाङ्क्षिन् त्रि० न फलं कर्म्मफलमाकाङ्क्षते या+काङ्क्षणिनि ऐत० न० त० स्त्रियां ङीप् । कर्म्मफलाकाङ्क्षाशून्ये । "अफलाकाङ्क्षिभिर्यज्ञः क्रियते ब्रह्मवादिभिः" गीता ।

अफलित त्रि० फलं जातमस्य तारका० इतच् न० त० । फलितभिन्ने बन्ध्ये अफले वृक्षे ।

अफल्गु त्रि० विरोधे न० त० । फल्गुभिन्ने सारे ।

अफुल्ल त्रि० न० त० । फुल्लभिन्ने सङ्कुचिते ।

अफेन त्रि० नास्ति फेनं यस्य । १फेनशून्ये दुग्धादौ । निन्दितं फेनं निर्य्यासोऽस्य (आफिङ्) ख्याते अहिफेनेऽस्य निर्य्यासस्य बहुसेवने प्राणनाशनात् निन्दितफेनत्वम् ।

अब भक्षे भ्वादि० आत्म० सक० सेट् । अबते

आश्लिष्ट अम्बा अम्बाला अम्बिका अम्बरम् अम्बष्ठः ।

अबद्ध त्रि० बन्ध–क्त न०त०। १असंबद्धे २अन्वयबोधयोग्यताशून्ये परस्परविरुद्धे वाक्ये च यथा "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता माता तु मम बन्ध्यासीदृतुश्च पितामहः" इत्यादि वाक्यम् । ३ बद्धभिन्ने मुक्ते च ।

अबद्धमुख त्रि० न बद्धं यथेच्छवादितया अप्रतिरुद्धं मुखमास्यक्रिया यस्य स्त्रियां वा ङीप् । अप्रियवादिनि "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियमिति" मनुनाऽप्रियवचनकथनस्य निषेधेऽपि तदुल्लङ्घनेन अप्रियवाक्यप्रयोक्तृत्वेन तस्य तथात्वम् ।

अबध पु० न बधस्ताडनं देहे आघातः प्राणवियोजनं वा अभावे न०त०। ताड़नाभावे । "शिष्यस्त्रिरवधेनाग्रन्थौ वेणुदलेनेति" मिता० स्मृतिः । १प्राणवियोजनाभावे च ।

अबधा स्त्री न बध्यतेऽसौ लम्बेन । लीलावत्युक्ते त्रिकोणादि क्षेत्रे लम्बोभयपार्श्वस्थे भूमिखण्डे। न, बाध्यते आबाध्यते वा, अबाधा आबाधाऽस्यत्र । तदानयनञ्च "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लम्बा। द्विःस्था भूर्ऊनयुता दलिताऽबाधे तयोः स्यातामिति" लीला०।"दशसप्तदशप्रमौ भुजौ त्रिभुजे यत्र नवप्रमा मही। अवधे वद लम्बकं तथा गणितं गाणितिकाशु तत्र मे" इति लीला० अबधोद्देशकः।

अबध्य त्रि० बधमर्हति यत् न०त० । १बधानर्हे प्राणवियोगफलकव्यापारो हिंसात्र बधः । "अबध्याञ्च स्त्रियं प्राज्ञस्तिर्य्यग्योनिगतामपि" स्मृतिः । २बधदण्डानर्हे ब्राह्मणे च "बधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः । अविशेषेण सर्वेषामेषदण्डविधिः स्मृतः । बधार्हते ब्राह्मणस्य न बधं ब्राह्मणोऽर्हति" मिता० स्मृतिः । "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमौ। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणोव्रजेदिति" मनुः बन्ध–ण्य० क्यप् । ३अयोग्यवाक्ये हे०मे० च ।

अबन्धक न० बध्यते स्वधनमितरत्र आधीयते बन्ध आधीयमानद्रव्यं स नास्ति यत्र कप् । १आधिशून्ये ऋणादाने । "अशीतिभागोद्दिष्टिः स्यान्मासिमासि सबन्धके । वर्षक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" या० "अन्यथा बन्धकरहिते" मिता० "दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु" या० व्याख्यायाम् "ब्राह्मणादयोवर्णा अबन्धके सबन्धके वा स्वकृतां वृद्धिं सर्वासु जातिषु दद्युः" विज्ञा०। अस्य पा०उपकादिगणपाठात् "उपकादिभ्योऽन्यतरस्यामद्वन्द्वे च" पा०सूत्रेण गोत्रप्रत्ययस्य बहुत्वे लुग्विधानात् कस्मिंश्चित् २ गोत्रप्रवर्त्तके ऋषावपि अस्य रूढिः ।

अबन्धुर त्रि० न०त० । १ उन्नतानतभिन्ने २ शोभनभिन्ने ३ विधुरबन्धुरबन्धुरमैच्छतेति" माघः ।

अबन्ध्य त्रि० बन्ध्यः अफलः । १सफले,"अबन्ध्यं दिवसं कुर्य्यात् दानाध्ययनकर्म्मभिः"स्मृतिः २अफलभिन्ने फलकाले फलयुक्ते वृक्षे पु० ।

अबल न० न बलं सामर्थ्यमुत्कर्षोवाऽभावे न०त०। १ बलाभावे "प्रायश्चित्तं प्रदातव्यं दृष्ट्वा तस्य बलाबलम्" स्मृतिः । "गम्भीरानाञ्च रसानाञ्च ज्ञात्वा चार्षबलाबलम्" मनुः । बलमुत्कर्षमबलमनुत्कर्षम्" इति कुल्लू० । नास्ति बलं यस्य। २बलहीने दुर्बले त्रि० "पञ्चवर्गीबलेनोनो न हर्म्यस्थानमाश्रितः अबलोऽयं लग्नदर्शीति नी०ता०। अबलस्खलुलाशिनो भसाच्चिजनीडद्रुमपीड़िनः खगान्" नैष० । ३नार्य्यां स्त्री"भुजलतां जडतामबलाजनः"रघुः।"हृदये वहसि गिरीन्द्रौ त्रिभुवनजयिनी कटाक्षेण । अबला त्वं यदि मन्ये के बलवन्तोन जानीम" इत्युद्भटः । ५ब० । ४वरुणवृक्षे पु० । [रोगादिनिमित्ते देहस्य क्षीणभावे ।

अबलिमन् पु० बलस्य भावः इमनिच् विरोधे न०त० ।

अबाध पु० अभावे न०त० । १बाधाभावे २ प्रतिबन्धाभावे । नास्ति बाधो यस्य । ३ बाधशून्ये त्रि० । बाधश्च असत्त्वं स चानुमापकहेतौ दोषभेदः वह्न्यभाववद्ध्रुदत्वं हि बाध दोषः यत्सत्त्वेऽनुमितेः प्रतिबन्धः तस्य हेत्वदूषकत्वमिति नैया० । नास्ति बाधा पीड़ायस्य । ४पीड़ाशून्ये त्रि० ।

अबाधक त्रि० न०त०। १बाधकभिन्ने अनुगुणे। नास्ति बाधो यस्य वा कप्। २बाधशून्ये त्रि० ।

अबाधित त्रि० न बाधितः । बाधितभिन्ने यथार्थे "अबाधिताग्रहीतनिश्चयत्वं प्रमात्वमिति" वृद्धाः । तद्वति तत्प्रकारकं ज्ञानं हि प्रमा तच्च तदभाववति तत्प्रकारकज्ञानेन प्रतिबध्यते तथा च तदभाववति तत्प्रकारकतान्यत्वेन ज्ञानस्य याथार्थ्यं, तादृशज्ञानविषयत्वात् विषयस्याबाधितत्वम् । [अप्रतिरोध्ये ।

अबाध्य त्रि० न बाध्यते अपोद्यते बाध–ण्यत् न०त० ।

अबाल त्रि० न०त० । १ बालभिन्ने पूर्णे चन्द्रादौ २तरुणे च ।

अबिन्धन पु० आप एव इन्धनमुद्दीपनसाधनमस्य । बाड़वाग्नौ "अबिन्धनं वह्निमसौ बिभर्त्ति" रघुः ।

अबुद्ध त्रि० बुध-कर्त्तरि कर्म्मणि वा क्त न०त०। १बोधानाश्रये २बोधाविषये च। [सुचितं २तथाज्ञानाभावे।

अबुद्धि स्त्री अभावे न०त०। १ज्ञानाभावे यस्य यत्नेन ज्ञान-

अबुद्धिपूर्व्वक त्रि० अबुद्धिः पूर्व्वो यस्य। यथार्थबुद्धिपूर्व्वक-भिन्ने। "अबुद्धिपूर्व्वं हनने व्रतार्हमुपकल्पयेत्" स्मृतिः यदि गां गवयबुद्ध्या हन्ति, गवयं वा गोभ्रान्त्या हन्ति, सर्व्वथा-ऽबुद्धिपूर्व्वकत्वम् एवमन्यार्थचिन्नाराचादिना हननेऽपि तथात्वम्। इयं गौरिमां हन्मीत्युद्देश्येनैव हनने बुद्धि-पूर्व्वकत्वम्। [२अल्पज्ञाने च।

अबुध पु० विरोधे अप्राशस्त्ये वा न०त०। १बुधभिन्ने मूर्खे

अबु(बो)ध्य त्रि० बुध बा० वेदे क्यप् लोके तु ण्यत्। ज्ञातुमशक्येऽर्थे "अबुध्यमबुध्यमानं सुषुपाणमिन्द्रम्" ऋ० ४, १८,३, ',अबुध्यं दुर्विज्ञेयमिति" भा०।

अबुध्न न० नास्ति बुध्नं मूलमस्य। १मूलशून्ये अन्तरिक्षे "अबुध्ने राजा वरुणो वनस्योर्द्ध्वम्" ऋ० १,२४,७, "अबुध्ने मूलशून्ये अन्तरिक्षे" भा०। २मूलशून्यमात्रे करकादौ त्रि०।

अबोध पु० अभावे न०त०। १बोधाभावे अज्ञाने "निसर्ग-दुर्बोधमबोधविज्ञाप्यः" किरा०। न०ब०। २बोधरहिते त्रि०।

अबोधगम्य त्रि० बोधेन गम्यः विषयीकार्य्यः न०त०। ज्ञानेनाविषयीकार्य्ये ज्ञातुमशक्ये।

अब्ज न० अप्सु जायते जन-ड ७त०। १पद्मे, २ शङ्खे पु न०। ३ निचुलवृक्षे तस्य जलप्रायभवत्वात् तथात्वम् १ चन्द्रे ५ धन्वन्तरौ च पु० तयोः समुद्रजातत्वात् तथात्वम् "प्रस-न्नात्मा सशत्पद्मः सोमः शीतांशुरुज्ज्वलः" इति "धन्वन्तरि-स्ततोदेव! वपुष्मानुदतिष्ठत" इति च भा०आ०प०। चन्द्रनामकत्वात् ६कर्पूरे पु०। "अर्बुदमब्जं खर्वनिखर्वमहा-पद्मशङ्खवस्तस्मादिति" लीलावत्युक्तदशार्बुदसंख्यायां ७शत-कोटिसंख्यायां दशतत्संख्येये च न०। ९जलजातमात्रे त्रि० "स्थलजाः पक्षिणोऽब्जाश्च" इति 'अब्जेषु चैव रत्नेषु सर्व्वेष्वग्नमयेषु च" इति रामा०।

अब्जकर्णिका स्त्री अब्जस्य कर्णिका कर्णाभरणभेदइव तुल्याकारत्वात्। पद्ममध्यस्थमवर्त्तिकाख्ये पद्मावयवभेदे पद्मकर्णिकादयोऽप्यत्र।

अब्जज पु० अब्जात् विष्णोर्नाभिकमलात् जायते जन-ड। चतुर्मुखे ब्रह्मणि तस्य विष्णुनाभिकमलजातत्वात्तथात्वम् "ब्रह्मा भूतानि भगवान् लोकस्यार्थमव्ययः। ब्रह्मणो जन्म-सञ्ज्ञितं बहुरूपं विचिन्वति" इत्युपक्रम्य "ततस्तस्मिन्महा-तोये हरिणो हरिरच्युतः। स्वपन् क्रीडंश्च विविधं मोदते वैस पावकिः पद्मं नाभ्युद्भवं चैकं ससृत्पादितवांस्ततः॥ सहस्रपर्णं किरजो भास्कराभं हिरण्मयम्। अथ योग-विदां श्रेष्ठं सर्वभूतमनोमयम्। स्रष्टारं सर्वभूतानां ब्रह्माणं सर्वतोमुखम्। तस्मिन् हिरण्मये पद्मे सङ्घयोजनविस्तृते। इति ससृत्पादितवानित्याकर्षः अनतिदूरे च "कस्त्वं पुष्करमध्यस्थः सितोष्णीषशतर्मुखः। आवां न गणये-गौर्हादास्त्वं विगतज्वरः। एहावयोर्बाहुयुद्धं प्रयच्छ कमलोद्भव!। इति तेन तस्य विष्णुनाभिकमलज त्वं तदुत्थत्वञ्च हरि०पौ०प०। "खरागौ खांशुगे सोम्ये (बुधे) लग्नस्थे वा भृगोः सुते। जीवे वाऽब्जजयोगोऽयं यातुः शत्रुविनाशकृदिति" ज्योतिषोक्ते २ यात्रायोगभेदे च।

अब्जबान्धव पु० अब्जानां बान्धवइव प्रकाशकत्वात्। कमलप्रकाशके सूर्य्ये तस्योदये हि कमलं विकाशते इति कविसम्प्रदायप्रसिद्धिः। एवं कमलबान्धवादयोऽप्यत्र।

अब्जभोग पु०अब्जस्य पद्मस्य भोगः अवयवइव भोगोयस्य। पद्मावयवतुल्यावयवे वराटके। भुज्यते भुज कर्म्मणि घञ् भोगः भोज्यम्। अब्जस्य भोज्यांशे पद्माकन्दे बालके तस्य लोकैर्भुज्यमानत्वात् तथात्वम् कमलभोगादयोऽप्यत्र।

अब्जयोनि पु० अब्जं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य। चतुर्मुखे ब्रह्मणि। विस्तरोऽब्जजशब्दे दृश्यः।

अब्जवाहन पु० अब्जस्य चन्द्रस्य वाहनं धारणं येन "अब्जं शङ्ख इव शुभ्रं वाहनं दृषद्रूपं यस्य वा। १चन्द्रमौलौ शिवे। अब्जं कमलं वाहनमिवाधारो यस्याः। २पद्मा-सनस्थायां लक्ष्म्याम् "पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्य मातरमिति" तद्ध्याने उक्तेः तस्या अब्जवाहनत्वम् कमलादि वाहनार्थत्व। [ड०द०। तस्य जन्मावधिप्राप्यत्वेन तथात्वम्।

अब्जस् न० आप्यते जन्मतः आप-असुन् जुट्-ह्रस्वश्च। रूपे

अब्जस्थित पु०। अब्जे विष्णुनाभिकमले स्थितः स्था-क। चतुर्मुखे ब्रह्मणि "स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः देवी अधिकमब्जजशब्दे दृश्यम्।

अब्जहस्त पु० अब्जं पद्मं हस्ते यस्य। सूर्य्ये "पद्मासनं पद्महस्तम्" इति तद्ध्यानोक्तेस्तथात्वम्।

अब्जा त्रि० अप्सु जायते जन-विट् ७त०। जलजातमात्रे "अब्जासुक्थैरहिं रण्वीये" ऋ०७,२४,१६, "अब्जामद्भ्यो जात-महिम्" भा०।

अब्जिनी स्त्री अब्जानां समूहः अब्ज+इनि-ङीप्। पद्मसमूहे। अब्जानां देवः पुष्करा० इनि। २पद्मलतायाम् च।

अब्जिनीपति पु० अब्जिन्याः पद्मसमूहस्य पतिःप्रकाशकत्वात्।

अमरप्रकाशके सूर्य्ये । पद्मिनीनाथतत्पत्न्यादयोऽत्र ।

अ(ब्द)ब्द पु० अवति रक्षति सीमानं दन् । १ पर्वतभेदे स च वर्षपर्वत एव तद्भेदः वर्षपर्वतशब्दे वक्ष्यते । अपोददाति दा-क ईत० । २मेघे २सस्तायां च तस्याश्चात्यन्तशीतवीर्य्यत्वेन वैद्यकोक्तेः जलमयमूलत्वाच्च तथात्वम् । आप्यन्ते व्याप्यन्ते ऋतुमासपक्षतिथिनक्षत्रयोगकरणवारादयो येन आप-दन् हस्वश्च "अ(ब्दा)ब्दादयश्च"उ०नि० । ४वत्सरे । स च नवविधः । "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नवेति" सू०सि० उक्तेः तत्र ब्राह्माब्दमानम् "सूर्य्याब्दसंख्यया द्वितिसागरैरयुताहतैः सप्तसप्त्यसहितं विज्ञेयं तच्चतुर्युगम् इदं युगसहस्रेण भूतसंहारकारकः कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती"परमायुः शतं तस्य तथाहोरात्रसंख्यया"इति च सू०सि ।तथाच सौरैः(४३२०००००००) एतावद्वर्षैस्तस्याहस्तावद्भिश्च रात्रिः तेन द्विगुणितैस्तैः ३६० गुणितैर्ब्राह्माब्दमानम् । अथ दिव्यम् "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमुच्यते" इति तत्रोक्तेः ३६० सौरवर्षैर्दिव्याब्दमानम् "मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् न तत्र द्युनिशोर्भेद इति तत्रोक्तम् मन्वन्तरमानमेव प्राजापत्याब्दमानम् तच्च "युगानां ४३२०००० सप्ततिः सैका मन्वन्तरमुदाहृतम्" इत्युक्तम् तेन७१ गुणितैः २११०४०००सौरवर्षैः प्राजापत्यम् ।पित्र्यं तु"त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः" स्मृतेः चान्द्रमास एव पित्र्यमहोरात्रं तच्च ३६० गुणितं तद्वर्षमानम् तथाच १०८०० चान्द्रदिनैः पित्र्यवर्षमानमितिफलितम् । वार्हस्पत्यन्तु "वैशाखादिषु कृष्णे च योगः षष्ठ्यब्दगे तिथौ । कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा" सू०सि० "यथा पौर्णमास्यां नक्षत्रसम्बन्धेन तत्संज्ञो मासो भवति तथेति समुच्चयार्थकम् । इहस्पतेः सूर्य्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे षष्ठ्यब्दगे तिथौ अमायामित्यर्थः । चकारः पौर्णमासीसम्बन्धात् समुच्चयार्थकः । योगो दिननक्षत्रसम्बन्धः कार्त्तिकादीनि द्वादश वर्षाणि भवन्ति । वैशाखकृष्णपक्षषष्ठ्यब्दस्यामावास्यायां इहस्पतेरस्ते उदये वा जाते सति तदादि इहस्पतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्त्तिकसंज्ञम् । एवं ज्ये॰षाषाढश्रावणभाद्रपदाश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनचैत्रमासेषु क्रमशो रुद्रपुष्यमघापूर्वफाल्गुनीचित्राविशाखाज्येष्ठापूर्वाषाढाश्रवणापूर्वभाद्राश्विनीनक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति । अत्रापि नक्षत्रद्वयत्वयसम्बन्धः चान्द्रमासवत् बोध्यः । तच्च मासशब्दे द्रष्टव्यम् तेन यद्दिने इहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं वार्हस्पत्यं वर्षं भवतीति तात्पर्य्यम् । मेषादिसंक्रान्तीरुक्त्वा "मेषादयो द्वादशैव सौरमाने तु वत्सराः" इति "सौरन्तु तद्भवेन्मानं भानोर्भगणपूरणादिति" चोक्तेः ३६० सौरदिवसैः सौरवर्षमानम् । सावनन्तु "उदयादुदयं भानोः सावनं तत्प्रकीर्त्तितं"मित्युक्तम् । "पञ्चाङ्गरामास्तिथयः खरामाः सार्द्धद्विदस्राः कुदिनाब्दमब्दे" इति सि०शि० उक्तेः ३६५, दिनानि १५,३०,२२,३०, दण्डादिसहितानि सावनदिनानि "अस्तार्कमासोऽर्कलवः प्रदिष्टस्त्रिंशद्दिनः सावनमास" इति सि०शि० उक्तदिशा तन्मासादयोज्ञेयाः । "त्रिंशता तिथिभिर्मासश्चान्द्र इति" प्राग्युक्तं चान्द्रमानम् तच्च "कालेन येनैति पुनः शशीनं क्रमेण भचक्रं विवरेण गत्योः मासः स चान्द्रोऽब्दयमाः कुरामाः भून्येषवस्तत् कुदिनप्रमाणम्" इति सि०शि० उक्तेः ३११।५० दण्डादियुतैरेकोनत्रिंशत्कुदिनैश्चान्द्रमासः द्वादशगुणिते च तस्मिन् ३५४।१८ कुदिनैश्चान्द्रवर्षमानम् चान्द्रमासविशेषाः मासशब्दे वक्ष्यन्ते । नाक्षत्रं यथा "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते"सू०सि०नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहस्य प्रवहवायुक्रमतः परिभ्रमः नाक्षत्रं नक्षत्रसंबन्धि दिनम् । एवं नवसु ब्राह्मादिषु वर्षेषु दर्शितेषु चतुर्ष्वेव व्यवहारोपयोगिता यथोक्तं "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यश" इति सू०सि० । तत्र कस्य कुतोपयोगस्तदप्युक्तं तत्रैव । "सौरेण द्युनिशोर्मानं षड्शीतिसुखानि च अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" इति "तिथिःकरणसुद्राहः चौरं सर्व्वक्रियास्तथा व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते" इति "सावनानि खुरेतेन यज्ञकालविधिस्तु तैः स्मृतकानां परिच्छेदोदिनमासाब्दपास्तथा मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते" सू०सि० । चान्द्रेण तु मासवर्षादिगणनापि "चैत्रे मासि जगत्स्रष्टा ससर्ज प्रथमेऽहनि शुक्लपक्षे समग्रन्तु सदातारोदये सति प्रवर्त्तयामास तदा कालस्य गणनामपि सदानु राशीन्ऋतून् मासानु वत्सरान् वत्सराधिपान्" इति म०त० ब्र०पु० । "शतब्दे पुरुषसहसं शुभं सोऽब्दः शुभप्रदः"इति नी०ता० ।

अब्द्प पु० अब्दं पाति पा—क । १वर्षाधिपे तदानयनप्रकारश्च सि०शि०दर्शितः यथा "अधोऽधस्त्रिधा कल्पयातादृष्टहृद्दात् कराभ्यां, क्षतैः, पावकैः, संगुणाच्च । भुजङ्गैरवाप्तं फलं स्वाह्निनाद्यं तदब्दान्वितं भास्करादब्दपः स्यात्" अत्रोपपत्तिः । एकस्मिन् रविवर्षे सावनाहाः प्राक् प्रतिपादिताः ३६५ । १५ । ३० । २२ । ३० एतदष्टभिः सवर्णितं कार्यम् । ततोऽनुपातः । यद्यष्टभिर्वर्षैरेतावद्दिनाद्यं तदा कल्पगतैः किमिति । फलं दिनाद्यम् । तदनष्टं संस्थाप्यम् । ततो गताब्दैर्युतं सदब्दपतिः स्यादिति यदुक्तं तदुक्तम् । यतः पञ्चषष्ट्यधिकशततये सप्तभिर्भक्ते एकोऽवशिष्यते । अत एकगुणाब्दसंख्या तस्मिन् दिनाद्ये निक्षिप्ता । तस्मिन् सप्ततष्टेऽब्दाद्योऽब्दपतिः । यतो यस्मिन् वारेऽब्दादिः सोऽब्दपतिः स्यादित्युपपन्नम् । ताजिकोक्ते २ वर्षाधिपतौ च तदानयनप्रकारश्च जन्मलग्नपतिवर्षलग्नाधिपतिमुन्थहाधिपतित्रिराशिपतीनां दिवास्थ्यक्रान्तराशिपतेः रात्रौ चन्द्राक्रान्तराशिपतेश्चैषां पञ्चाधिकारिणां मध्ये द्वादशवर्गीबलेन पञ्चवर्गीबलेन योगेतः लग्नदर्गी वर्षाधिपतिः । बलसाम्ये दृष्टयतिरेकात्, तत्रापि साम्ये दृष्ट्यभावे च सुधहेश्वरः वर्षाधिपः । "अब्दपबलस्य विचारणेत्थम्" नी०ता० । अब्दपत्वादयोऽप्यत्र ।

अब्दसार पु० अब्दस्य मुस्तायाः सारः मूलनिर्यासः । कर्पूरे तस्य मुस्तामूलसारजत्वात्तथात्वम् घनसारमेघसारादयोऽप्यत्र ।

अब्दवाहन पु० अब्दोमेघोवाहनमस्य । इन्द्रे ।

अब्दिमान् त्रि० अपां दानमब्दिः दा०बा० भावे कि ईत० ततः अस्त्यर्थे मतुप् । जलदानवति "अब्दिमानुदधिमान्" ऋ० ५,४२,१४, "अपांदानवान् मेघ" इति भा० ।

अब्दुर्ग अब्दिर्वेष्टितं दुर्गं या०त० । सर्वतोवेष्टितेनोदकेनोपलक्षिते दुर्गे (गड़) "धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्" मनुः ।

अब्देवत त्रि० आपोदेवताऽस्य । १जलदेवताके मन्त्रभेदे "उदित्यृचा वारुणेन नृचेनाब्दैवतेन च" मनुः "स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयम" इति या० । स च मन्त्रः "आपोहि ष्ठा मयोभुव" इत्यादिस्तृचात्मकः । य० ११,५०,५१,५२ । २जलदेवताके पूर्वाषाढानक्षत्रे च ।

अब्धि पु० आपो धीयन्तेऽस्मिन् धा—आधारे कि उप०स० । "प्लरोवरे २समुद्रे च स च जम्बूद्वीपपूर्व्वापरादिवर्त्तिता भेदेन सप्तविधः यथोक्तं भागवते "तत्र चतुर्द्वा विमलप्रभाना-[illegible] निविशति, सीतालकनन्दावदक्षुर्भद्रेति । सीता तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि खारं समुद्रमभिप्रविशति । एवं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभिवर्षन्ती प्रतीच्यां दिशि सरित्पतिं प्रविशति । भद्रा चोत्तरतोमेरुशिखरतो निपतिता गिरिशिखरान्निरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति । तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसावधमती भारतमभिवर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" अत एव तत्संख्यातुल्यसंख्याकचतुःसंख्यावधिकताऽस्य । "पञ्च पञ्चयुगषट्कलोचनद्व्यधिषड्गुणमिता ई४२२ई२५५ गुरोर्मता" । "खाष्टाब्ध्यो (४८०) ऽष्टाग्नजेषुदिग्द्विपद्विपाब्धयः ४८८१०५८५८, इति च सि०शि० । सप्तद्वीपान्तरालस्थलवणादिभेदात् सप्तविधोऽपि यथोक्तं सि०शि० "मेरुर्धौ खारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राङ्मुखाचार्यवर्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये खारक्षीरादम्बुधीनां निवेशः । लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतमयतरङ्गिः श्रीश्च यस्माद्बभूव । महितचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र । दधी घृतक्षीरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः । स्वादूदकान्तर्बडवानलोऽसौ पातालनोकाः पृथिवीमुदानि" । तेषाञ्च द्वीपद्वयान्तरालस्थितिमूलम् अब्धिद्वीपशब्दे दृश्यम् तेन तत्संख्यातुल्यसप्तसंख्यकोऽस्य क्वचित् प्रवृत्तिः अतएव सप्तद्वीपेत्यर्थे अब्दिद्वीपेति प्रयुक्तम् । "चतुरः सप्त वाम्बुधीन्" वाग्भटालङ्कारः ।

अब्धिकफ पु० अब्धेः समुद्रस्य कफ इव । समुद्रफेने ।

अब्धिज ०० अब्धौ जायते जन—ड ७त० । १चन्द्रे २ शङ्खे ३ समुद्रजातमात्रे त्रि० ४लक्ष्म्यां स्त्री । ५अश्विनीकुमारयोः द्वि०व० । एतेषाञ्च समुद्रजातत्वात्तथात्वम् ।

अब्धिद्वीपा स्त्री अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा अस्याः । जम्बूप्रभृतिसप्तद्वीपवत्यामु पृथिव्याम् । "भाकं ततः शालमलमत्र कोशं क्रौञ्चं च गोमेदकपुष्करे च । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपसदाकृतीनि" सि०शि० ।

अब्धिनगरी स्त्री अब्धौ तत्समीपे नगरी । द्वारकायां तस्याः समुद्रसन्निकटत्वात् समुद्रोत्खातभूमौ रचितत्वाच्च तथात्वम् यथा "इयं द्वारवती नाम पृथिव्यां निर्मिता मया भविष्यति

पुरी रम्या यक्षरक्षोगणावृता" त्युपक्रम्य "यदीच्छेत् सागरः क्षिप्तुदुत्सृष्टुमिह तोयराट्। ततः खायतलक्षेण पुरी स्यात् पुरुषोत्तम। एवमुक्तस्ततः कृष्णः द्रागेव कृतनिश्चयः। सागरं सरितां नाथमुवाच वदतांवरः। सप्तद्र। दश च द्वे च योजनानि जलाशये। प्रतिसंहियतामम्भो यद्यस्ति मयि मान्यता। अवकाशे त्वया दत्ते पुरीयं मामकं बलम्। पर्य्याप्तविषयरामा समग्रं विषहिष्यति ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः। स मारुतेन योगेन उत्ससर्ज्ज जलाशयम्" इति हरिवंशः।

अब्भिनवनीतक पु० अब्भेर्नवनीतमिव कायति प्रकाशते कै-क। चन्द्रे-गं०र० तस्य क्षीरसारतुल्यत्वात् तथात्वम्।

अब्भिफेन पु० ईत०। समुद्रफेने।

अब्भिमण्डूकी स्त्री अब्भिं मण्डयति मण्ड-ऊक गौरा० ङीष् ईत०। मुक्तासाधने शुक्तौ।

अब्भिशय पु० अब्भौ शेते शी-अच् ७त०। समुद्रस्यवटपत्रशय्यायाम् अब्भौ वा शय्यायां शायिनि विष्णौ। खण्डप्रलयमुपक्रम्य "ततस्तं मारुतं घोरं खयम्भूर्मनुजाधिप!। आदिःपद्मालयोदेवः पीत्वा स्वपिति भारत!। तस्मिन्नेवार्णवे घोरे" इत्युपक्रम्य॥ "ततः कदाचित् पश्यामि तस्मिन् सलिलसञ्चये। न्यग्रोधं सुमहान्तंवै विशालं पृथिवीपते!। शाखायां तस्य वृक्षस्य विस्तीर्णायां नराधिप!। पर्य्यङ्के पृथिवीपाल! विश्वयः सुमहानभूत्। कथं त्वयं त्रिशुःशेते लोके नाशमुपागते भा०व० मार्क०प० १८८३ देवीमाहात्म्ये तु "एकार्णवेऽहिशयने योगनिद्रामुपागत" इत्यहिशयनत्वमुक्तम्।

अब्भ्राग्नि पु० अब्भौ स्थितोऽग्निः। वडवानले तत्कथा और्वशब्दे दृश्या। अब्भिटच्नादयोऽप्यत्र।

अब्भक्ष पु० अपो भक्षयति भक्ष-अण् उप०स०। १सर्पभेदे २जलमात्राहारे त्रि०। "अब्भक्षो वायुभक्षश्च उपवास परस्तत" इति पुरा०।

अब्भ्र(भ्र) न० अपोबिभर्त्तीति अभ्र-गतौ-अच् वा वा द्वित्वम्। १मेघे "अ(भ्रा)ब्भ्राणि विभ्राणसुमाङ्गसङ्गेति" माघः। २मेघनामायां मुस्तायाम्, (आभ) २ धातुभेदे च। मेघतुल्याकारत्वात्तस्य तथात्वम्। ४ मेघाधारे आकाशे न०।

अब्भ्रंलिह(भ्रं) पु० अब्भ्रं(भ्रं) लेढि स्पृशति लिह-खश् मुम् च। उच्चशिखरे "अब्भ्रंलिहाग्रं रविभागभङ्गमिति" भट्टिः। "अब्भ्रंलिहानि लिलिहे नवपल्लवानीति" माघः।

अब्भ्र(भ्र)क पु० अब्भ्र(भ्र)मिव कायति राजते कै-क। (आभ) धातुभेदे। मेघतुल्याकारत्वात्तस्य तथात्वम्।

अब्भ्र(भ्र)ङ्कष त्रि० अ(ब्भ्रं)भ्रं मेघं कषति शोषयति कष-खच् मुम् च। १वायौ। २अत्युच्चे त्रि०।

अब्भ्र(भ्र)पुष्प न० अब्भ्र(भ्र)स्य पुष्पमिव शुभ्रत्वात् कार्य्यत्वाच्च। १जले। अब्भ्र(भ्र)मिव पुष्पमस्य ब०। २वेतसवृक्षे पु०। [ऐरावते गजे तस्य मेघनायकत्वात्तथात्वम्।

अब्भ्र(भ्र)मातङ्ग पु० अब्भ्रा(भ्रा)धिपः मातङ्गः शा०त०।

अब्भ्र(भ्र)मु स्त्री अब्भ्रे(भ्रे) अब्भ्रा(भ्रा)धिपे ऐरावते माति मा-डु। ऐरावतस्य योषिति पूर्व्वदिग्वस्तिन्याम्।

अब्भ्र(भ्र)मुवल्लभ पु० अब्भ्र(भ्र)मोः वल्लभः ६त०। ऐरावते गजे। अब्भ्र(भ्र)-सुपत्यादयोऽप्यत्र।

अब्भ्र(भ्र)रोहम् पु० अब्भ्रा(भ्रा)त् तच्छब्दात् रोहति रुह-असुन्। वैदूर्य्यमणौ तस्य हि मेघशब्दादुद्भव इति प्रसिद्धम् "विदूरभूभिर्न्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव" कु०वर्ण्णितम्

अब्भ्रो(भ्रो)त्थ न० अ(ब्भ्र)भ्रात् तद्विघर्षणादुत्तिष्ठति उद्+स्था-क। १ वज्रे २ विद्युदग्नौ पु० अ(भ्र)ब्भ्रजादयोऽप्यत्र। [नौकासलाघाकर्षके काष्ठमये कुद्दाले।

अब्भ्रि(भ्रि) स्त्री अभ्र गतौ इन् वा द्वित्वम्। काष्ठकुद्दाले

अब्भ्रि(भ्रि)य त्रि० अब्भ्रे(भ्रे)भवः घ। मेघभवे।

अब्रह्मचर्य्य न० विरोधे न०त०। १ ब्रह्मचर्य्यविरोधिनि स्त्रीसंभोगादौ ब्रह्मचर्य्यं च स्त्रीस्मरणादि तत्र ब्रह्मचर्य्यशब्दे वक्ष्यते। न०ब०। २ ब्रह्मचर्य्यरहिते त्रि०।

अब्रह्मण न० ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु यत् विरोधे न०त०। १ब्रह्मकर्म्मणश्चसाधौ २हिंसादौ तथात्वेन भोदनविषये ३वचने च तथा हि "अयं न वध्य" इति कथने हि न हिंस्यते। हिंसा च ब्रह्मकर्म्मणि न साधुः इत्यतस्तस्य तथात्वम् एतच्च प्रायेण नाञ्जोक्तावेव प्रयुज्यते "भो अब्रह्मण्यमब्रह्मण्यं वर्त्तते" नाटकम्। क्वचिदन्यत्रापि "अथैत्य योगनन्दस्य व्याडिना क्रन्दितं पुरः। अब्रह्मण्यमनुत्क्रान्तजीवो योगस्थितोद्विजः" बृहत्कथासारः।

अब्राह्मण पु० अप्राशस्त्ये न०त०। १अप्रशस्तब्राह्मणे "समब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे" इति पुरा० अब्राह्मणाश्च षट् स्मृतौ दर्शिताः। "अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी तृतीयो वृद्धयाज्यःस्याच्चतुर्थो ग्रामयाजकः। पञ्चमस्तु हृतस्तेषां ग्रामस्य नगरस्य च। अनागतान्तु यः पूर्व्वां सादित्यां चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः" आ०त०आता०। एवमन्येऽपि स्मृत्यु-

ज्ञानेदितव्याः । २ ब्राह्मणसङ्गे क्षत्रियादौ भट्टदैवज्ञादौ च "अब्राह्मणाद्ध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः" मनुः । भेदे न०त०। ३ ब्राह्मणभिन्ने शूद्रादौ च "नेतद्ब्राह्मणोवक्तुमर्हति समिधमाहर उप त्वा नेष्ये" इति छा०उ० ।

अब्रूकृत न० न ब्रुवे कृतम् । १ कथनाय प्रतिरोधके सनिङ्नीवे अब्रूकृते "अब्रूकृतमाह नङ् दुष्टम् इति श्रुतिः ।

अभिङ्ग त्रि० अपां लिङ्गं बोधनसामर्थ्यं यत्र । जलरूपार्थ प्रकाशसामर्थ्ययुक्ते य० पठिते ११,५०५१,५२अपोहिष्ठा इत्यादिके तृचे अभ्यृचते मन्त्रे "कस्य नूनमित्यादि" पञ्चदशर्चात्मके च तत्र ऋ० १ मण्डले चतुर्विंशम् सूक्तम् ।

अभक्त त्रि० भज-सेवायां विभागे च कर्त्तरि कर्म्मणि वा क्त न०त० । १असेवके । "भक्तमभक्तमवोव्यन्तः" इति ऋ० १, १२७,५ । २अदृष्टकृते च । [हीने त्रि० ।

अभक्ति स्त्री अभावे न०त० । १भक्त्यभावे । न०व० । २भक्ति-

अभक्षण न० अभावे न०त० । १ भक्षणाभावे २ भक्षणनिषेधौ च । "पौर्णमास्यन्नभावे च मूलकानामभक्षणमिति" म०त० ।

अभक्ष्य त्रि० भक्षितुमयोग्यं स्मृतिनिषिद्धित्वात् । १ स्मृतिनिषिद्धभक्षणे लशुनादौ अभक्ष्यत्वञ्च वस्तुस्वभावकृतं, कालकृतं, देशादिनिमित्तकृतं, द्रव्यान्तरयोगकृतं, स्वामिविशेषकृतं, चण्डालादिस्पर्शदर्शनादिदोषकृतम्, पात्रविशेषयाचादिकृतम्, अधिकारिविशेषकृतञ्चेति तत्तदुपाधिकृतम्, तत्र केषाञ्चित् नखादिना केषाञ्चिच्च तत्तद्भक्षणे प्रायश्चित्तोपदेशेना भक्ष्यत्वं स्मृत्यादावुक्तम् । अभक्ष्याणि च श्रुत्यादौ दर्शितानि "न कलञ्जं भक्षयेन्न लशुनं न पलाण्डुमिति श्रुतिः "लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च" मनुः । । कवकानि छत्राकाः अमेध्यप्रभवानि विण्मूत्रादिजातानि । पलाण्डुसदृशं यत् तु गव्यवर्णरसादिभिः । अभोज्यं तद्भवेत् सर्वमिति 'लशुनादिषु येतुल्या गव्यवर्णरसादिभिः । अभक्ष्यग्रासे द्विजातीनाम्" इति च देव० । "लशुनपलाण्डुगृञ्जनकरञ्जविड्वराहकुक्कुटग्राम्यशूकरभक्षणे द्वादशरात्रं पयः पिबेत्" शङ्खः "लोहितान् वृक्षनिर्यासान् ब्रह्मणप्रभवांस्तथा । शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत्" मनुः शेलुं बहुवारफलं गोसम्बन्धि पेयूषं नवप्रसूतायाः गोः अग्निसंयोगात् कठिनीभूतं क्षीरम् । "दध्याज्यपरमान्नं पायसापूपमेव च अनुमासतमांसानि देवान्नान्यपि वर्जयेत्" मनुः । तथा देवताद्यनुद्देशेन आत्मार्थं यत् पच्यते तत् । "तिलतण्डुलसंपक्वः क्षपरः सोऽभिधीयते" इति छा०प० उक्तः क्षपरः, संयावः घृतक्षीरगुडगोधूमचूर्णमयः पिष्टकभेदः । अनुपाकृतानि मन्त्रैरसंस्कृतपशुमांसानि । देवान्नानि देवार्थं कल्पितानि प्राक् होमात् नाद्यानि । "दृष्टमांसञ्च नाश्नीयात् पितृदेवादिवर्जितम्" स्मृतिः 'न तदश्नीयाद्यद्देवपितृमनुष्यार्थन्न कुर्य्यात्" शङ्खलि० । "दृष्टमांसं न भोक्तव्यं भोक्तव्यं श्राद्धकर्मणि अन्यथा भक्षयन् विप्रः प्राजापत्यं समाचरेत्" छाग० । अस्यापवादः "भक्षयन्नपि मांसानि शेषभोजी न दुष्यति औषधार्थमशक्तौ वा नियोगात् वक्तृकारणात्" देवलः, "रोगी नियुक्तो विधिना कृतं विप्रमतं तथा । मांसमद्याक्षतुर्ङ्गेषा परिसंख्या प्रकीर्त्तिता" दक्षः । मनुरपि "क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा अर्चयित्वा पितॄन् देवान् खादन्मांसं न दुष्यति" अन्यत्र दोषमाह स एव "अतोऽन्यथा तु योऽश्नीयात् विधिं हित्वा पिशाचवत् । यावन्ति पशुरोमाणि तावत् प्राप्नोति सान्वयम् । प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया यथाविधि नियुक्तस्तु प्राणानामेव चात्यये इति च मनुः । ब्रह्मणकाम्यया तु सकृदेव भक्ष्यम् "भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया दैवे नियुक्तं श्राद्धे वा नियमे तु विवर्गयेदिति" यमोक्तेः नियमः मांसभोजननिवृत्तिसंकल्पः स च व्रतभेदः । "मांसं नाश्नीयात् तद्व्रतम् संवत्सरं वेति" छा० उप० इत्यादिकः । अतएव विहित मांसविवर्जने एव मनुना फलाधिक्यं दर्शितम् "यो बन्धन वधक्लेशान् प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते । यज्जायति यत्कुरुते धृतिं वा याति यत्र च । तदवाप्नोत्ययत्नेन यो हिनस्ति न किञ्चन" इति वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥ फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः न तत् फलमवाप्नोति यन्मांस परिवर्जनात्" । अतएव मनुना न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला" इत्यनिषिद्धमांसवर्जनस्य महाफलतोक्ता । मांसभक्षणे न दोषइत्यादिकं तु दैवादिकर्म्मादौ अनुक्तमांसादिदोषाभावपरम् न तु निन्दितमांसभोजनेऽपि दोषाभावपरं तस्य स्वेनैव दुष्टत्वाभिधानात् तथा च स्वोक्तविहितमांसभक्षणे "सौत्रामण्यां सुरां पिबेदिति" श्रुत्युक्ते मद्यपाने, "न कामतो न परिहरेत्तद्व्रतमित्यादि" स्मृत्युक्ते मैथुने च न दोषः । तेषामेव त्यागे महाफलत्वम् । अत

एव "कुर्यात् घृतपशुं सङ्गे कुर्यात् पिष्टपशुं तथे"त्यनेन सति सङ्गे (यज्ञादिफलकामनायाम्) पिष्टपशुनैव तं सम्पादयेदिति तेनेवोक्तम् अधिकं पिष्टपशुशब्दे वक्ष्यते। रोगिणा भक्षणेऽपि विशेषः "ब्राह्मणानुज्ञया भक्ष्यसक्तं मांसञ्च रोगिभिः। मातापितृभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः पुनः प्रशान्तरोगेण कर्त्तव्यमधिकं व्रतम्" ब्रह्मपु०। "अगम्यागमने चैव मद्यगोमांसभक्षणे शुद्ध्यै चान्द्रायणं कुर्यात् पराश० "ग्रामञ्च कुक्कुरोष्ट्रौ च सर्वान् पञ्चनखांस्तथा। क्रव्यादं कुक्कुटं श्राद्धम् भुक्त्वा संवत्सरं व्रतम्" शङ्खः। पञ्चनखाश्च शशादिभिन्नाः। "शशकः शल्लकी गोधा खड्गो कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुरिति मनूक्तेः। "विड्वराहग्रामकुक्कुटनरगोमांसभक्षणेषु सर्वेष्वेव द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात्" विष्णुः "हंसं मद्गुं च काकोलं काकं वा खञ्जरीटकम्। मत्स्यादांश्च तथा मत्स्यान् बलाकां शुकसारिके। चक्रवाकं प्लवं कोलं मण्डूकं भुजगं तथा। मासमेकं व्रतं कुर्यात् भूयश्च तन्न भक्षयेदिति शङ्खः। मत्स्यादः पाठीनव्यतिरिक्तः "पाठीनरोहितावाद्यौ नियुक्तौ दैवपैत्रयोः" मनुना तस्य विधानात्। "कलविङ्कहंसमद्गुचक्रवाकरज्जुबालसारसदात्यूहशुकसारिकाभासचाषकाकबलाकाकोकिलखञ्जरीटाशने त्रिरात्रमुपवसेत्" विष्णुः। "चाषांश्च रक्तपादांश्च सोनं वल्लूरमेव च मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्" मनुः। स्त्रना बध्यस्थानं तत्र भवत् सौनम् वल्लूरं शुष्कमांसम्। "क्रव्यादान् शकुनीन् सर्वान् टिट्टिभञ्च विवर्जयेत् कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम् सारसं रज्जुबालञ्च दात्यूहं शुकसारिके। प्रतुदान् जलपादांश्च क्रौञ्चांश्च नख विष्किरान्। निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च वकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः" इति मनुः। मत्स्यभेदे दैवादावबादमाह मनुः "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राजीवसिंहतुण्डांश्च सशल्कांश्चैव सर्वशः" "अभक्ष्यं भक्ष्येष्वजामहिषीक्षीरं विवर्जयेत् पञ्चनखमत्स्यवराहमांसानि" चेति विष्णुः। "मत्स्यान्कर्कटशम्बूकशङ्खशुक्तिकपर्द्दकान् पीत्वा नवोदकञ्चैव पञ्चगव्येन शुध्यति" हारी० "कृमिकीटपिपीलिकाजलौकापतङ्गास्थिप्राशने गोमूत्रगोमयाहारस्त्रिरात्रेण प्रयतो भवेत्" हारी० केशमक्षिकारुधिरप्राशने आममांसकृमिभक्षणे इत्युपक्रम्य "त्रिरात्रोपवासं घृतप्राशनञ्च कुर्यात्" शङ्खलि०। "भक्ष्याणामप्यामांसरुधिरप्राशने तु पञ्चगव्यम्" हारी०। "नखकेशरुधिरप्राशने सद्यः स्नानं घृतकुशहिरण्योदकप्राशनञ्च"बुधः "अजाविकमहिषश्वगोणाम् मांसभक्षणे केशरुधिरप्राशने च बुद्धिपूर्व्वं त्रिरात्रम्" बौधा० भक्ष्यमांसकस्यापि क्वचिदंशे निषिद्धता "पृथ्वमांसं गर्भशय्यां शुष्कमांसमथापि वा। भूमेरन्तर्गतं कृत्वा वृद्धिश्राद्धागतं च यत्। पक्वं मांसञ्च जीवन्तु प्रयत्नाच्च न भक्षयेत्। प्रमादभक्षितैरेभिर्वने वासं वसेद्दृढः ब्र०पु०। क्रव्यादं पिष्टपचनभाण्डं तत्र पक्वम्। व्यक्तिविशेषे सर्वमांसानामभक्ष्यता "न भक्ष्यं यतिना मांसं कदाचित्तु समूर्णया" ब्र०पु०। स्त्रीणान्तु सर्वथा मांसनिषेधमाह भागवतम् "ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते यान्च स्त्रियो नृपसूत् खादन्ति तांश्च तान्च ते पशवः इह ये निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव खधितिनावदायाहृक् पिबन्ति"इति। कार्त्तिकादौ तु सर्व्वथा मांसादिनिषेधः। "न मत्स्यं भक्षयेन्मांसं न कौमं नान्यदेव हि। चण्डालो जायते राजन्! कार्त्तिके मांसभक्षणात्" आ०त०ना०पु०। "कौमुदन्तु विशेषेण शुक्लपक्षं नराधिप!। वर्ज्जयेत् सर्वमांसानि धर्म्मस्तत्र विधीयते। एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु"इत्युपक्रम्य वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ब्रह्मपु०।"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने यो भक्षयति राजेन्द्र! चण्डालादधिकोहि सः। कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत्। निष्पावान् सुनिषाद्दूंश्च। यावदाभूतनारकी। कदम्बानि पटोलानि डुन्नाकसहितानि च। न त्यजन् कार्त्तिके मासे यावदाभूतनारकी। एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने। यतजन्मार्जितं पुण्यं दहत्येतान्न संशयः"म०त०ब्रह्मपु०। निष्पावः श्वेत शिम्बी। कदम्बानि कदम्बफलानीति कलम्बीति वा म०त० रघु०। तिथिविशेषेषु मांसादीनामभक्ष्यता 'स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु मानवः विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" इति वि०पु०। "षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्दशी। अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे" स्मृतिः "भक्तक्लुन्नान्नराणाञ्च न भुञ्जीत कदाचन। केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः। भ्रूणघ्नावेक्षितं चैव संस्पृष्टञ्चाप्युदक्यया। पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च। गवा चाघ्रातमवधूतान्नञ्च विशेषतः। गणान्नं गणिकान्नञ्च विदुषा च जुगुप्सितम्। स्तेनगाय-

नयोश्चैव तक्षणोवार्द्धुषिकस्य च। दीक्षितस्य कदर्यस्य वृद्धस्य निगड़स्य च। अभिशस्तस्य षण्डस्य पुंश्चल्या दाम्भिकस्य च। चिकित्सकस्य क्रूरस्योच्छिष्टभोजिनः। उद्यानं सूतिकान्नञ्च पर्य्याचान्तमनिर्दशम्। शुक्तं पर्य्युषितं चैव शूद्रोच्छिष्टं तथैव च। अनर्चितं दृथामांसमवीरायाश्च योषितः। द्विषदन्नं नगर्य्यन्नम् पतितान्नमवक्षुतम्। पिशुनान्हतिनोश्चान्नं क्रतुविक्रयिणस्तथा। शैलूषस्तन्तुवायान्नं कृतघ्नस्यान्नमेव च। कर्म्मारस्य निषादस्य रङ्गावतारकस्य च। सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा श्रवतां शौण्डिकिनाञ्च चेलनिर्णेजकस्य च। रजकस्य नृशंसस्य यस्य चोपपतिर्गृहे। भृत्यन्ति ये चोपपतिं स्त्रीजितानाञ्च सर्वशः। अनिर्दशञ्च प्रेताधूमदृष्टिकरमेव च। राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्म वर्चसम्। आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः। कारुकान्नं प्रजा हन्ति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति। पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्। विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणोमलम्। भुक्त्वा चान्यतमस्यान्नमनाता त्वपयं तप्तकृच्छ्रम्। भुक्त्वा भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च। नाद्यात् शूद्रस्य पक्वान्नं विद्वानश्राद्धिनोद्विजः। आद्दीतामयेयाच्चाद् दृत्वावेक्षेतादित्यम्" मनुः। "कोशकोटाचपक्वं कोशकीटैः सह पक्वम्। शुष्कान्नं "कोशोत्तारः" इत्युक्ता सत्वादौ यदन्नं दीयते तत्। गणान्नं बहुभिर्मिलित्वा यद्भोज्यं क्रियते तत्। दीक्षितस्य दीक्षणीययागानन्तरमा यज्ञसमाप्तेः अन्नमभक्ष्यम्। बद्धस्य रज्ज्वादिना। निगड़स्य अर्श० आ० अच् निगड़वतः निगड़बद्धस्येत्यर्थः। सूतिकान्नं सूतिकाभक्षणमुद्दिश्य यत् पक्वं तत्कुलजैरपि न भक्ष्यम्। पर्य्याचान्तम् एकपङ्क्तिस्थेषु बहुषु भुञ्जानेषु यदि कश्चिदाचमनं करोति तदा तत्पङ्क्त्युपविष्टानां तदन्नमभक्ष्यम्। अनिर्दशं जननाशौचिनोऽन्नं तेनानिर्दशान्नं प्रेतान्नमित्यनेन न पौनरुक्त्यम्। "सूतको तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत् पानीयमश्नीयात् क्षमश्नीयात् क्षुधेत वा। पानीयपाने कुर्वीत पञ्चगव्यस्य भक्षणम् त्रिरात्रं भोजने प्रोक्तम्" यमः। एतच्चोभयाशौचपरम् उक्तं यन्मधुरं क्षारत्वादम्लतां गतमम्ल क्षारत्वान्मधुरतां गतम्। शुक्तेषु दधि तज्जातत्र भक्ष्यम् "दधि शुक्तेषु भोक्तव्यं सर्वत्र दीक्षितस्यमिति" मनूक्तेः। तदपि गुड़ादिद्रव्यमिश्रणेऽभक्ष्यमेव "शुष्कशाकसंयुक्तं वृक्षार्द्रं पर्य्युषितं दधि। तथैव यावकादीनि मन्थादिचरितान्यपि" यमोक्तेः। "सगुड़ं मरिचाक्तं च तथा पर्य्युषितं दधि जीर्णतक्रमपेयञ्च नष्टस्वादञ्च कोनचित्। प्रभाटभक्षितैरेभिर्वने पक्षव्रतं चरेत्" स्मृतेश्च "यवगोधूमवर्ज्यं गव्यविकारं स्नेहाक्तं चक्षुषाभवं वर्जयित्वा पर्य्युषितं प्राश्नीयवसेत् तथा दधिवर्जं सर्वशुक्तानि" विष्णुः। "केवलानि च शुक्तानि तथा पर्य्युषितानि च। ऋजीषपक्वं भुक्त्वा तु त्रिरात्रं तु व्रती भवेत् शङ्खः। चुक्रुषा व्यञ्जनभेदः। "अपूपान्न करम्भान्न धाना वटकशष्कुलः। शाकं मांसमपूपञ्च सूपं क्षरमेव च। यवागूं पायसञ्चैव यच्चान्यत् स्नेहसंयुतम् सर्वं पर्युषितं भक्षेत् शुक्तं तु परिवर्जयेदिति यमः। "अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" पर्य्युषितं रात्र्यन्तरितम् स्नेहाक्तं चेदभक्ष्यं यथाह मनुः॥ यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यज्ञेदिति" "चिरसंस्थितमप्याद्यं सस्नेहान्नमपि द्विजैः। यवगोधूमजं सर्वं पयसाज्येन चिक्रियेति" च अनर्चितं निन्द्यार्धारोहितम्। अधीरायाः निःसन्तानायाः पतिपुत्रहीनायाः सन्तानेच्छया पितामहादिनैयोगेन दोषः। नगर्य्यन्नं नगरिणो नगराधिपस्यान्नम् "नगराधिपतेः शल्योः पिशुनान्हतिनोस्तथेति" ब्र० पु० ऐकवाक्यात्। अवक्षुतं अवक्षुतदूषितम्। "इत्युक्त्वेदी गटानान्तु स तु शैलूषक. स्मृत" इति आ० पु० उक्तः शैलूषः। तन्तुवायकः सूचीकर्म्मजीवः, निषादः प्रतिलोमजवर्णसङ्करभेदः। रङ्गावतारकः नृत्यस्थाने गीतवाद्यादिना तदनुगुणतायां प्रसक्तौ। वेणः वंशविकारपात्रादिकर्त्ता। श्वपाक्षः शुनकुरपोषणजीवः। शौण्डिकादयश्च तत्तद्वृत्तिभाजो द्विजाः अन्त्यजानां गुरुप्रायश्चित्तव्यवस्थात् प्रा० वि०। शूद्रान्नं शूद्रगृहे न भक्ष्यम्। "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निष्कारणेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्"। "निष्कारणेन शूद्रान्नाभिलाषेणेति" आ० त० रघु० "यथा यतस्ततो वृक्षाः शुष्कं यान्ति नदीं गताः। शूद्रान्नमद्भ्यश्चैवान्नं प्रविष्टं तु सदा शुचि" अत्रिः। तेन स्वगृहागतस्यैव शुद्धस्य तदृष्टगृहगतस्य शूद्रान्नत्वमिति भेदः। "यः शूद्रेण समाहूतो भोजनं कुरुते द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः। यः शूद्रेणाभ्यनुज्ञातः कृत्वाह्नो भोजनं द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः" दक्ष० आ०। "शूद्रान्नेन तु भुक्तेन यदरक्तेन यो वमेत्। स वै शूद्रत्वमाप्नोति शूद्रं वाऽधिगच्छति। "शूद्रान्नं ब्राह्मणोभुङ्क्ते तथा रङ्गावतारिणः। चिकित्सकस्य क्रूरस्य तथा स्त्रीजग-

जीविनः । चण्डालान्नं भूमिपान्नमजजीव्यश्वजीविनाम् । शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासव्रती भवेदिति' शङ्खः । सूद्रस्यापि भोज्यविशेषस्य भक्ष्यतामाह सुमन्तुः गोरसञ्चैव शक्तूंश्च तैलं पिण्याकमेव च । अपूपान् भक्षयेच्छूद्रात् यच्चान्यत् पयसा कृतम् । कन्दुपक्वं तैलपक्वं पायसं दधि शक्तवः एतान्यसूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति" हारीतः । "रजके चैव शैलूषे वेणुचर्म्मोपजीविनि । एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत् आप० । अन्त्यजान्नं यदा भुङ्क्ते सूद्रो मोहात् कदाचन एकरात्रोषितोभूत्वा दानं दत्त्वा विशुध्यति" संवर्त्तः "अभिशस्तपतितपौनर्भवस्त्रैणपुंश्चल्यशुचिशस्त्रकारतैलिकचाक्रिकध्वजिसुवर्णकारलेख्यकशण्डतन्तुवायकवन्धकगणिकान्नानि च न भोज्यानि शौकरिकव्याधनिषादरजक वरूडकैवर्त्तचर्मकारा अभोज्यान्ना अप्रतिग्राह्याश्च" सुम० । "पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्य्यात्" दक्षः० "चाण्डालपतितान्नभोजनेषु ततः पुनरुपनयनम्" वसि० । "पतितद्रव्यमादाय भुङ्क्ते च ब्राह्मणः क्वचित् । कृत्वा तस्य सकृत्सर्गं यतिकृच्छ्रं चरेद्द्विजः" उश० । "चण्डालचाक्रिकलोहकारघाण्टिकान्नभोजने त्रिरात्रमुपवसेत्" हारीतः चाक्रिको दृषादिचक्रेण तैलनिष्पादनवृत्तिः । घाण्टिकः देवघण्टावादकः । "ध्वजिबणिक्किरीटिवार्द्धुषिकान्नभोजने पञ्चरात्रम्" हारीतः । ध्वजी शौण्डिकवृत्तिः बणिक् शिल्पोपजीवी । किरीटी बणिग्भेदः । "भगवृत्तिपुंश्चलीवेश्यान्नभोजने सप्तरात्रम् दुष्कृतिगरदतस्करान्नभोजने दशरात्रम् प्रव्रजितगणोद्दिष्टान्नभोजने दशरात्रं लाक्षाकांस्यसीसकारव्याधिततल्लकान्नभोजने तप्तकृच्छ्रं ब्राह्मणवृत्तिघ्नबधबन्धोपघातवृत्त्यन्नभोजने च सङ्कीर्णान्नभोजने च असंस्कृतावज्ञासरोषविस्मयान्नभोजने च" हारी० । भगवृत्तिर्मैथुनशुल्केन यस्य वृत्तिः गरदो विषदाता व्याधिजनकौषधदाता च "कृतरे ये त्वभोज्यान्नास्तेषामन्नं विगर्हितम् अजाविके माहिषिके कूटे च वृषलीपतौ एतेषां भोजनं कृत्वा द्वादशाहं पयःपिबेत्" मनुः । अजाविकोऽजाविभ्यां वृत्तिमान् । माहिषिकः महिषेण वृत्तिमान् । कूटः अन्यन्मनसि अन्यद्वचसीत्यादिरूपकपटव्यवहारी "वन्ध्या तु वृषलीज्ञेया वृषली च सुतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला" । उश० उक्ता तस्याः सूद्रायाश्च प्रतिः विष्णुः "गणगणिकास्तेनगायकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत तच्छस्त्रं चर्म्मकर्त्तुश्च वार्द्धुषिककदर्य्यस्य दीक्षितनग्नमिगड़ाभिशस्तानाञ्च पुंश्चलीदास्त्रिकचिकित्सकलुब्धकक्रूरोच्छिष्टभोजिनाञ्च अवीरास्त्रीसुवर्णकारसंसर्गपतितानाञ्च पिशुनानृतवादिनाञ्च धर्म्मसोमविक्रयिणाञ्च शैलूषतन्तुवायकृतघ्नरजकानाञ्च कर्म्मकारनिषादरङ्गावतारिवेणशस्त्रविक्रयिणाञ्च अजीविशौण्डिकतैलिकचेलनिर्णेजकानाञ्च भुक्त्वान्नावेक्षितसुदक्या संसृष्टं पतत्रिणावलीढं शुना संसृष्टं गवा घ्रातञ्च कामतः यदासृष्टमवज्ञातञ्च मत्तक्रुद्धातुराणाञ्च अनर्चितं दृषा मांसञ्च । यत्र नाश्नन्ति देवाश्च पितरश्च यथाविधि । दृषापाकः परिज्ञेयः तस्य नाद्यात् कथञ्चन । दृषापाकस्य भुञ्जानः प्रायश्चित्तं चरेत्" । "नवं क्षरपयूषादि पायसं मधुसर्पिषी चण्डालेन शुना वापि दृष्टं हविर्यज्ञियम् । विड्वराहादिभिरुच्छिष्टं दुष्टसङ्गं विवर्जयेत् अन्यत्र हिरण्योदकस्पर्शादिति" याज्ञ० । हिरण्योदकस्पर्शस्त्वेवान्नस्य, तापनादेः घृतादीनां शुद्धिकरत्वमाह सएव "तापनं घृततैलानां स्नावनं गोरसस्य च अन्नानां भक्षणीयेषु भक्षितोयैर्द्विजातिभिः । चान्द्रं कृच्छ्रं तदर्द्धं वा" उशनाः "कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा । ज्ञानात् कृच्छ्राब्दमुद्दिष्टम्" आप० । "अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः । शिशुचान्द्रायणं कुर्य्यादिति" अङ्गि० । "चण्डालपतितादीनामुच्छिष्टस्य च भक्षणे । द्विजः शुध्येत् पराकेण" अङ्गि० । "अमेध्यपतित चाण्डालपुक्कशरजस्वलाऽवधूतकृमिकुष्ठिकुनखिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्" शङ्खः । अमेध्यं मद्यभाण्डविण्मूत्रेतत्यादि । पुक्कशः क्षत्रियायां सूद्राज्जातः प्रतिलोमजः वर्णसङ्करः । कृमिः स्वभावतः प्राणिविकल्पः । "चाण्डालपतितामेध्यकृमिभिः कुष्ठिना तथा उदक्यासूतिभिः स्पृष्टं भुक्त्वा मासं वने वसेदिति" अ०पु० । "अस्पृश्यादिदूषितान्नञ्च भुञ्जानस्तु यदा भवेत् स्नात्वार्कमर्चयित्वा तु घृतं प्राश्य विशुध्यति" अ०पु० पतितादिस्पर्शे अकृतस्नानानामन्नमात्रस्याभक्ष्यता "महापातकिसंसर्गे स्नानमेव विधीयते संसृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेत् स्नानार्हको यदा स्नानमकृत्वाश्नाति वै द्विजः । अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति" पैठ० । "केशकीटावपन्नञ्च स्त्रीभिः स्पृष्टं तथैव च । सोदक्याशूद्रसंस्पृष्टं पञ्चगव्येन शुध्यति" जाबा० । स्त्री भिन्नजातिस्त्री । केशकीटाद्युपहतस्य प्रोक्षणादिकं कृत्वा भक्ष्यमेव । "अवक्षुतं केशपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् । अज्ञातकृद्दुभस्त्रिरण्यतीयैः संसृष्टमन्नं मनुराह भोज्यम्"

यमः चण्डालपतितामेध्यैः कृमिपैः कुष्ठिना तथा। ब्रह्मघ्नसूतिकीदक्याकौलेयकवृषलैः। दृष्टं वा केशकीटाक्तं भ्रूणघ्नकनकाम्बुभिः शुद्धमद्यात् सङ्कल्पेखं प्रभूतं व्युष्टमेव च ब्रह्मपु०। कौलेयकः कुक्कुर कटुम्बी कुक्कुटादि प्राणिभेदः तस्यबद्धकुटुम्बवत्त्वात्। व्युष्टं पर्य्युषितम्। एतच्च चुरतरमभ्युच्च भक्ष्यम् अत्यन्तोपहतस्य तु त्यज्यतैव" प्रा०वि० "विशुद्धमपि चाहारं मक्षिकाभ्रमिजन्तुभिः। केशलोमनखैर्वापि दूषितं परिवर्ज्जयेत्" देव०। तन्मात्रसृतं शुद्धयेत् कठिनन्तु पयोदधि। "अविलीनं तथा चैव विलीनं अपघेन तु" याता० "नाश्नीयतते यज्ञे यामयाजिकृते तथा। स्त्रिया क्लीबेन च कृते भुञ्जीत ब्राह्मणः क्वचित्। अश्लीलमेतत् साधूनां यत्र जुह्वत्यमी हविः प्रतीपमेतद्देवानां तस्मात्तत् परिवर्ज्जयेदिति" मनुः। "अश्रोत्रोऽनधीतवेदः तेन कृतयज्ञे अन्नमभक्ष्यम्। यामयाजी यामजनानां श्राद्धपूजाकारयिता ऋत्विग्भावेन होमसत्र्यजनकर्त्ता च स च होता यत्र यज्ञे तदन्नमभक्ष्यम्। श्राद्धविशेषान्नस्याभक्ष्यता "चान्द्रायणं नवश्राद्धे पराकोमासिके मतः। पक्षश्राद्धेऽतिकृच्छ्रः स्यात् षण्मासे कृच्छ्रएव च। आब्दिके कृच्छ्रपादः स्यादेकाहः पुनराब्दिके अङ्गिः०। पक्षश्राद्धं तैपक्षिकश्राद्धम्। नवश्राद्धमेकादशाहादिश्राद्धम्। हस्तादिदत्त द्रव्यविशेषस्याभक्ष्यता। "हस्तदत्तांश्च ये स्नेहा लवणं व्यञ्जनानि च दातारं नोपतिष्ठन्तु भोक्ता भुङ्क्ते च किल्बिषम्। तस्माच्छान्तरितं देयं पर्णेनाथ तृणेन वा। प्रदद्यान्न तु हस्तेन नायसेन कदाचन। आयसेन तु पात्रेण यदन्नन्तु प्रदीयते। भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत्" भवि०पु०। "माक्षिकं फाणितं शाकं गोरसं लवणं घृतम्। हस्तदत्तानि भुक्त्वा च भोक्ता सान्तपनञ्चरेत्" यमः। "एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेत्। घृतं तैलञ्च लवणं पानीयं पायसं तथा" स्मृतिः। "वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रं तु व्रती भवेत्" शङ्खः। शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने। अहोरात्रोषितीभूत्वा पञ्चगव्येन शुध्यति" संव०। भिन्नभाजनं कांस्यपरं "भिन्नकांस्ये तु योऽश्नीयादन्नं स्नात्वा जपन् द्विजः। गायत्र्यष्टसहस्रं तु एकभक्तस्ततः शुचिः" बौधा० कांस्यत्वेन विशेषणात्। आपोशनाकरणे भोजनस्य निषेधात् तदकृतवता द्रव्यमात्रस्याभक्ष्यता। "आपोशानमकृत्वा तु भुक्त्वोऽनापदि द्विजः। भुक्त्वान्यदा ब्रूयात् गायत्र्यष्टशतं जपेत्" अनाचान्तस्य द्रव्यमात्रस्याभक्ष्यता। "अनाचान्तः पिबेत्तस्तु भक्षयेद्यापि किञ्चन। गायत्र्यष्टसहस्रं तु जप्यं कृत्वा विशुध्यति। आचामेच्च्वर्ष्णे नित्यं सुप्त्वा ताम्बूलचर्वणम् दन्तलग्ने फलमूले भुक्तस्नेहे तथैव च। ताम्बूले चेक्षुदण्डे च नोच्छिष्टो भवति द्विजः" जाबा०। "कषायकटुताम्बूले भुक्तस्नेहानुलेपने। मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत्" लघुवौ० अनाचान्तः कषायकटुताम्बूलेक्षुव्यतिरिक्तद्रव्यं सकृद्भक्षयित्वा दुग्धमधुनारिकेलजलादिकञ्च सकृत् पीत्वा अष्टोत्तरसहस्राष्टसं गायत्रीं जपेत् प्रा०वि०। यज्ञोपवीतरहितानामन्नमात्रस्याभक्ष्यता। "विना यज्ञोपवीतेन भुङ्क्ते तु ब्राह्मणो यदि। स्नानं कृत्वा जपं कृत्वा उपवासेन शुध्यति" लघुहा०। अमेध्यदूषितफलानामभक्ष्यता। शृङ्गवेरमुसादींश्च फलकन्देक्षुमूलकान्। विण्मूत्रदूषितान् प्राश्य कृच्छ्रं तु पादमाचरेत् सन्निकृष्टे ऽङ्गिरेव स्यात्" संव०। मृद्दारुभक्ष्यता। "अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षलवणं तथा। मृत्तिकाभक्षणञ्चैव तुल्यं गोमांसभक्षणैः भवि०पु०। अत्रापवादः। सैन्धवं लवणञ्चैव यच्च सामुद्रिकं भवेत् पविले परमे क्षेत्रे प्रत्यक्षे अपि नित्यशः" वायुपु०। "भुक्त्वा तु लवणं त्रिरात्रं तु वने वसेत्" यमः। "मृल्लोष्टखादने अक्षोरात्रमभोजनाच्छुद्धिः आ०त०रघु०। "नैकोमिष्टान्नमश्नीयात् बन्धुयित्वा मृही सुतान्। दारान् भृत्यातिथींश्चैव तथासम्बन्धिबान्धवान् इत्युपक्रम्य "लालापे नरके घोरे दुर्गन्धे प्राप्नुते नरः" यमः। "पयोऽनुद्धृतसारञ्च भक्षयेद्दधि नो निशि दिवसे नवनीतञ्चेति" "सर्वं तिलमयं नाद्यात् सायं धर्म्माभिलाषिभिः" स्मृतिः। "नाश्नीयात् सन्ध्ययोर्द्वयोः" स्मृतिश्च का०ख०। "नातिसौहित्यमाचरेत् नातिप्रगे नातिसायम् न निशीथे नचोषसि" मनुः न दध्युद्धृतसारञ्च भक्षयेद्दधि नो निशि। नाद्यादाहृत्य रात्रिषु" काशी०ख० "श्राद्धं कृत्वा परश्राद्धे योऽश्नीयात् स्नानवर्ज्जितः। दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग् भवेत्" यत् वेष्टितशिराभुङ्क्ते यत् भुङ्क्ते दक्षिणामुखः सोपानात्कस्य यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते, इति का०ख०। "यो मृष्टीत्वा विवस्वाग्निं मृष्टस्य दत्त भक्षते। अन्नं तस्य न भोक्तव्यं दृथापाको हि स स्मृतः" का०ख०। "पक्षे वा यदि मासे वा यस्य गेहेऽस्ति न द्विजः। भुक्त्वा दुरात्मनस्तस्य चरेच्चान्द्रायणं व्रतम्" का०ख० "अयाद्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम्" ति०त०पु०। "वालभाराः

पिशाचाश्च राक्षसाः क्रूरराक्षसाः । हरन्ति रसमन्नस्य मण्डलेन विवर्जितम् का०ख०। नोत्सङ्गे भाजनं कृत्वा नो पाणौ नैव कर्पटे । नासने न च शय्यायां भुञ्जीत न मलार्दितः" का०ख०"। "नारिकेलोदकं कांस्येताम्रपात्रे गुड़स्तथा । सुरातुल्यं भवेदेतत् ताम्रे गव्यं घृतं विनेति आ०त०पुरा०।"वर्जनीयं सदा माघे मूलकं मदिरासममिति" ब्र०पु०। सदा विप्रैरिति विधानपा० पाठः । "वड़मूलोदुम्बरनीपदधित्थमातुलङ्गानि न भक्षयेत्" हारी० दधित्थः कपित्थः । कालान्तरेऽपि द्रव्यान्तर निषेधः "आमिषं चुक्रशाकञ्च योभुङ्क्ते च रवेर्दिने सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते । स्त्रीतैलमांससंभोगी पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" वि०पु० । अथ तिथिविशेषे द्रव्यविशेषाभक्ष्यताभाङ्ग भट्टौ "कृष्माण्डे चार्थहानिः स्यात् दृहत्यां न स्मरेद्धरिम् । बृहत्यः पटोले स्यात् धनहानिस्तु मूलके । कलङ्की जायते विल्वे तिर्यक्कगयोनिश्च निम्बके । तालेशरीरनाशःस्यान्नारिकेले च मूर्खता । तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका । श्लिम्बी पापकरी प्रोक्ता पूतिका ब्रह्महातिका । वार्ताकौ सुतहानिः स्याच्छिरोरोगी च मार्षके । महापापकरं मांसं प्रतिपदादिषु वर्जयेत्" षट्त्रि०। तत्र सप्तम्यामेव तालनिषेधादन्यत्र भक्षणं प्राप्तम् । अतः 'तालं श्वेताञ्च वार्ताकीं न खादेद्वैष्णवो नरः'। इत्यत्रेन तालमपि श्वेतं निषिद्धं साहचर्य्येण श्वेतालुब्धकात् । "अलाबूं वर्त्तुलाकारां वार्ताकीं कन्दसन्निभाम्"" ति०त० पु० यदपि 'कुसुम्भनालिकाशाकं दृन्ताकं पूतिकान्तथा । भक्षयन् पतितस्तु स्यादपि वेदान्तगोद्विजः' इत्यनेन सामान्यतोऽभिहितम् । तदपि श्वेतदृन्ताकपरम् । तत्र नालिकाश्वेतकलम्बी । पूतिका द्वादशाम्बधिकदोषाय शूद्रविषयिकावा इति ति०त०रघु० ।

कृष्माण्डं २बृहतीफलन्तु ३लवणं वर्ज्यं ४तिलाम्लं तथा ५तैलं ६ चामलकं ७दिवं प्रवसता ८शीर्षं ९ कपालान्नकम् १०। ११ निष्पावाञ्च १२ मस्तरिकाफलमथो १३ दृन्ताक संज्ञं १४ मधु घृतं १५ स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाहोश्च । नि०सि०सु०दीपि० । शीर्षं नारिकेलम् कपालं अलाबूः अन्नकं पटोलम् । "१कृष्माण्डं २ बृहती ३ क्षारं ४ मूलकं ५ पनसं ६ फलम् । ७ धात्री ८ शिरः ९ कपालान्नं १० ११नख १२ चर्म १३ तिलानि च १४ क्षुरकर्माङ्गनासेवां १५ प्रतिपदादिषु वर्जयेत् नि० सि०भूपालः । नखं शिम्बी चर्म मस्तरिका । "उच्छिष्टस्यान्नमात्रस्याभक्ष्यता "उच्छिष्टमगुरोरभोज्यं स्त्रीउच्छिष्टमुच्छिष्टाहृतञ्च" भाता० । गुरुः पित्रादिः । "पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्', आप० मातापितृभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः" ब्र०पु० । स्वमुच्छिष्टन्तु यो भुङ्क्ते यो भुङ्क्ते त्यक्तभाजने एवं वैखसतः प्राह भुक्त्वा चान्द्रायणं चरेत्" चतुर्विंशतिमतम् । "नाश्नीयात् भार्य्यया सार्द्धं नाश्नीयादुत्कटासने" मनुना स्त्रिया सह भोजननिषेधेऽपि अध्वनि ब्राह्मणया स्त्रिया सह भोक्तुं शक्यते । "ब्राह्मणया हितया सार्द्धं क्वचिदुभुञ्जीत चाध्वनि । अधोवर्णस्त्रिया सार्द्धं भुक्त्वा चान्द्रायणं चरेत्" ब्र०पु० । एतद्विषय एव "ब्राह्मणया वा सहाश्नीयादुच्छिष्ट न कथञ्चन । न तत्र दोषं मन्यन्ते" अङ्गिराः । विड़ालादयुच्छिष्टस्याभक्ष्यता । "विड़ालकाकादयुच्छिष्टं जग्ध्वा श्वनालस्य च । केशकीटावपन्नञ्च पिबेत् ब्रह्मसुवर्चलाम्" मनुः । "दूषितं केशकीटैश्च मार्ज्जारैर्मूषिकैस्तथा । मक्षिकामशकश्चैव त्रिरात्रेण विशुध्यति । श्वकाकगोभिरुच्छिष्टभक्षणे तु दिनत्रयम्" मनुः अत्रापवादः । "देवद्रोणां विवाहेषु यज्ञेषु प्रकृतेषु च काकैः स्पृष्टञ्च संसृष्टमन्नं तत्र विवर्जयेत् । तन्मात्रमन्नमर्द्धित्य शेषं संस्कारमर्हति" यमः । संस्कारश्च "घनानां प्रोक्षणाच्छुद्धिः द्रवाणामपि तापनात् । संस्पर्शात्तु भवेच्छुद्धिरपां प्राकृष्टतस्य च छागस्य मुखसंसृष्टं शुचि चैव हि तद्भवेत्" यमः । "पक्षिश्वापदजग्धस्य रसस्यान्नस्य भूयसः । संस्काररहितस्यापि भोजने पादशुद्धिकम्" विष्णुः । कृत्सितशूद्रादिपङ्क्तिभोजननिषेधात्तदन्नमात्रस्याभक्ष्यता "यस्तु पङ्क्तिषु भुञ्जीत कुत्सितानां विशेषतः अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति" अङ्गि० । "अपाङ्क्तेयब्राह्मणोपवेशनेन कुत्सितासु । जलादिना पङ्क्तिभेदनमन्तरेणेत्याचारः प्रा०वि० । "ब्राह्मणः क्षत्रियपङ्क्त्यामुपविश्यासंस्पृशन् यदा भुञ्जे तदा नक्तमाचरेत् । वैश्यपङ्क्त्यामेकरात्रं शूद्रपङ्क्त्यां त्रिरात्रमाचरेत्" विष्णुः । अनिन्दितपङ्क्तिष्वपि सहभोजने एकस्योत्थाने तदन्नमात्रस्याभक्ष्यता "एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने । यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं न भोजयेत् । मोहात् भुङ्क्ते तु यः पङ्क्त्यामुच्छिष्टं सहभोजने । प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सान्तपनं तदा" शङ्खः । कालविशेषे द्रव्यमात्रस्य अभक्ष्यता । "सूर्य्यग्रहे तु नाश्नीयात् पूर्व्वं यामचतुष्टयम् । चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना" हेम०गौ०। "ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः भुञ्जी-

तावर्त्तनात् पूर्व्वं प्रथमे प्रथमाद्धः" मा०पु०। अधि अर्द्धम्। "यस्योदये सति विधोर्नाह्नभोजनमाचरेत्" वधि०। "अस्तङ्गयोरस्तगयोरद्यात् दृष्ट्वा परेऽहनि" व्यासः। "अहोरात्रं न भोक्तव्यं चन्द्रसूर्य्यग्रहो यदा सृष्टिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततःपरम् विष्णुध०पु०। 'सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुञ्जीत रात्रावपि कदाचन" गर्गः। सायं सन्ध्यायां सूर्य्ये यस्तास्ते, पूर्व्वेऽह्नि रात्रौ च न भोक्तव्यं, प्रातः सन्ध्यायां चन्द्रे यस्तास्ते पूर्व्वरात्रावपरेऽह्नि च न भोक्तव्यमित्यर्थः नि०शि०। बालदृद्धातुरैर्विनेत्युक्तेस्तेषां विशेषः। "सायाह्ने ग्रहणं चेत् स्यादपराह्णे न भोजनम्। अपराह्णे, न मध्याह्ने, मध्याह्ने न तु सङ्गवे। भुञ्जीत संगवे चेत् स्याच्चतुर्थं भोजनक्रियेति" मा०पु० उक्तेः'। एतच्च बालादिविषयमिति नि० शि०। "सर्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत हुतमन्नं विवर्जयेत्" हेमा०घट्त्रि०। "नवश्राद्धेषु यच्छिष्टं गृहपर्य्युषितञ्च यत्। सर्व्वं तद्दुष्टतामेति" स्मृतेः श्राद्धकाले पक्वान्नादेरभक्ष्यता। अत्रापवादः। "आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम्। मणिकस्थोदकं चैव न दुष्येद्राहुसूतके" मेधा०। "अन्नं पक्वमिह त्याज्यं स्नानं सवसनं जले। वारितक्रारनालादि तिलदर्भैर्न दुष्यति" स्मृतिः १ पुंसवनाद्यन्नस्याभक्ष्यता। "यावकान्नं नवश्राद्धं संग्रहे चैव भोजनम्। स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत्। ब्रह्मोदने च सोमे च सीमन्तोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्" आप०। संग्रहे स्त्रीणामेव व्यभिचारादिदोषार्थंप्रायश्चित्तेन संग्रहे। ब्रह्मौदने आधोवसवस्नाङ्गकर्म्मविशेषे प्रा०वि०। "जन्मप्रभृति संस्कारे बालस्यान्नस्य भोजने। असंपिण्डैर्न भोक्तव्यं प्रसवानन्तु विशेषतः" अङ्गि०। "निर्दशे चूडहोमे च प्राङ्नामकरणात् तथा। चरेत् स्नात्वपनं भुक्त्वा जातकर्म्मणि चैव हि" व्यासः। भोजनकाले मूत्रादुत्सर्गेऽन्नमात्रस्याभक्ष्यता। "मूत्रोच्चारसमुत्सर्गे भोक्तुं भुक्त्वेव वा पिबेत्। त्रिरात्रं कुर्व्वीत" यमः। भोजनकाले सूतकाद्यशौचे भक्ष्यभाक्ष्यान्नस्याभक्ष्यता "यदा भोजनकाले तु अशुचिर्भवति द्विजः। भूमौ निःक्षिप्य तं ग्रासं स्नात्वा विप्रोविशुध्यति। भक्षयित्वा तु तं ग्रासमहोरात्रेण शुध्यति अक्षित्वा सर्व्वमेवान्नं त्रिरात्रेण विशुध्यति" यमः। "अशुचिः सूतकादिनेति" प्रा०वि०। तैलाभ्यङ्गादिना स्नानार्हस्नातस्नानस्यान्नमात्रस्याभक्ष्यता। "अस्नाते द्विजः स्नाने भुञ्जीताथ पिबेत्तथा। गायत्र्याष्टसहस्रं तु जपेत् स्नात्वा समाहितः" रुद्रया०। स्नाने तैलाभ्यङ्गक्षौरादिनिमित्ते स्नाने प्राप्ते प्रा०वि०। नीलीवस्त्रपरिधाने द्रव्यमात्रस्याभक्ष्यता। "नीलीवस्त्रं परिधाय भुक्त्वा स्नानार्हकस्तथा। त्रिरात्रं तु व्रतं कुर्य्यात्" यमुः। "लोहितान् वस्त्रनांस्तथा। अनुपाकृतमांसानि विड्जानि कवकानि च छत्राकशरसंधानपायसापूपशष्कुलीरिति" या०। विड्जानि अमेध्योद्भवानि। अमेध्यदेशोद्भवानान्तु न दुष्टता "अमेध्येषु तु ये दृष्टा उष्णाः पुष्पफलोपगाः तेषान्नैव प्रदुष्यन्ति पत्रपुष्पफलानि चेति" बौधा० उक्तेः। अतिथ्यादिष्वभुक्तवत्सु गृहस्थस्यान्नमात्रस्याभक्ष्यता 'देवतातिभृतेषु भृत्येष्वभ्यागतेषु च। अभुक्तवत्सु वेऽश्नन्ति तथा पित्राग्निपक्षिषु। दुष्टान्नपूयनिर्यासभुजः सूचीहरास्तु ते। जायन्ते गिरिवर्ष्माणः" स्मृतिमार्क०पु०। "असंतर्प्य पितॄन् देवान्नाद्यादन्नं नवं क्वचित्। पक्वान्नं चापि नो भक्षेदसंमितं का०ख० भक्ष्येष्वपि देवायानिवेदितमभक्ष्यमेव "अनिवेद्य न भुञ्जीत मत्स्यमांसादिकं च यत्। अन्नं विष्ठा पयोमूत्रं यद्विष्णोरनिवेदितम्" आ०त०पु०। "नैवेद्यान्नप्रदानेभ्यो यो भुङ्क्ते स्वेन एव सः" गीता ब्रह्मचारिणोऽभक्ष्याणि। 'आमिक्षान्नन्तु योऽश्नीयादसमावर्त्तकोद्विजः। स लोमयज्ञान्युपवसेत्तु मङ्कः। "अज्ञातं मधुमांसञ्च नैवाश्नीत व्रती क्वचित्। त्रिरात्रोपोषितः सम्यक्पात्रमेकां जले वसेत्" देवलः। "सूतिकान्नं नवश्राद्धं मासिकान्नं तथैव च। ब्रह्मचारी च योऽश्नीयात् मधुमांसं कथञ्चन प्राजापत्यं तु कृत्वादौ सौम्येनैवेन शुध्यति" संव०। मांसं च शिष्टभक्ष्यमांसपरम् "ब्रह्मचारी चेन्मधुमांसमश्नीयात् शिष्टभोजनीयं, कृच्छ्रं द्वादशरात्रञ्चरित्वा व्रतशेषं समापयेत्" वधि०उक्तेः। अस्यापवादः "स चेत् व्यधीयत कामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं प्राश्नीयात् येनेच्छसेन चिकित्सेत् स यदा अगदः स्यादादित्यमुपतिष्ठेत्" बौधा०। अस्य पात्रविशेषे द्रव्यमात्रस्याभक्ष्यता। "आमिषस्य तु यो भाण्डे पक्वमश्नीत सुव्रतः (ब्रह्मचारी)। कृच्छ्रमूलविपक्वेन व्रतशेषं क्षीरेण वर्त्तयेत्" वसुष्कारीतः।

सर्वापवादापवादः। "जातमात्रः शिशुस्तावद्यावद्दन्तो न जायते" स्मृतेः। भक्ष्याभक्ष्येषु भोक्तुर्दुष्टेद्यावद्भैवोपनीयते" का०ख०। एवमन्यान्यपि स्मृतौ निषिद्धानि दृष्टव्यानि वैद्यकोक्तदोषादपि कानिचिदभक्ष्याणि तानि चापथ्यग्रन्थे २२ द्वादशे प्रायशोदर्शितानि विशेषतः कानिचित् प्रदर्श्यन्ते "वर्जयेत् पयसा सिद्धं मत्स्यमांसमनूपकम्। बल्लीफलम-

कुष्माण्डमज्जैर्ज्जम्बूफलाढ्यते। मांसं मूलकसंसिद्धं घृतेन मधुसंयुते। मत्स्यानि क्षुरिकारेण क्षौद्रसुरूपेण वारिणा पुनरुष्णीकृतञ्चाज्यं घृतं कांस्ये दधाह्निकम्। दध्ना तक्रेण यवसा तालस्यापि फलेन च। विरोधाञ्चैव भुञ्जीत मतिमान् कदलीफलम्। विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् वमनं शयनं वारि पूर्व्वं वा हितभोजनम् शाम्येतालस्यतया वापि दीप्ताग्नेस्तरुणस्य च स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत्। अदृष्टदोषास्तु जायन्ते पापिनामिह" आह्निकतत्त्वे वैद्यकम्।

अभङ्ग पु० न०त०। १ भङ्गाभावे २ पलायनाभावे च न०ब०। "भङ्गरहिते त्रि०। २ अभङ्गाख्ये "पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मक" इति सा०द० उक्ते श्लेषे शब्दालङ्कारभेदे पु०। यथा "पायात् स खयमम्बकस्त्रयकरस्त्रां सर्वदोमाधवः"। अन्त्रकेयत्रताभङ्गः श्लेषः।

अभङ्गुर त्रि० न भङ्गुरः। भङ्गुरभिन्ने स्थिरे "अभङ्गुरतनुत्विषां बलयिता घृतैर्विद्युताम्" रसगङ्गाधरः।

अभद्र न० विरोधे न०त०। सुखभिन्ने दुःखे १ न०ब०। २ मङ्गलभिन्ने अमङ्गले च ३ तत्साधने ४ तदाश्रये च त्रि०।

अभय न० अभावे न०त०। १भयाभावे। "प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च" मनुः। "अभयं वै जनक! प्राप्तोऽसीति" श्रुतिः। "प्रवृत्तिं च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये" गीता ईत०। २ भयशून्ये त्रि०। न भयमस्मात् ५ब०। ३परमात्मनि, ४तज्ज्ञाने च। ५हरितक्यां ६दुर्गामूर्त्तिभेदे च स्त्री ७ वीरणमूले ८शीरे न० ८ सर्वपरित्यक्तशून्ये, शास्त्रोपदिष्टैर्यैरुत्सन्दैर्नानुष्ठातरि ९ आत्मनिष्ठे पु०। "उच्चमूलत्रिकोणेषु वर्त्तते गुरुभार्गवौ। अभयाभिधयोगोऽयं भयङ्करविनाशनः" इति "यत्रैकादशगस्सन्द्रोभानुर्वा प्रबलः शुभः। अभयोनाम योगोऽयमरिभूतविनाशकृदिति" च ज्योतिषोक्ते १० यात्रिकयोगभेदे पु०। न भयं यस्मात् ५त०। मा भैर्भैरित्युक्ता ११ उत्तोलितदक्षिणहस्तप्रसारभेदे "अभयं वरदं चैव दक्षिणे दधतीक्रमात्" ध्यानाध्यानम्। १२ त्राणे च न०।

अभयङ्कर त्रि० अभयं त्राणं करोति कृ-खिच् ईत०। १ त्राणकर्त्तरि। न भयङ्कर विरोधे न०त०। भयङ्करभिन्ने २ सौम्ये। अभयकारकादयोऽप्युक्तार्थे। [सौम्ये।

अभयङ्कर त्रि० न भयङ्करः विरोधे न०त०। भयङ्करभिन्ने

अभयङ्कृत् स्त्री द्वि० अभयं कुरुतः क्विप् वेदे पू० सुम्। द्यावापृथिव्योः द्यावापृथिव्यावित्युपक्रम्य "उरू गव्यूती ते अभये स्यामित्यतदाह" शत०ब्रा०।

अभयजात पु० अभयाय जातः। गर्गादिगणभेदे मुनिभेदे तस्यापत्यं यञ्। आभयजात्यः तदपत्ये पुंस्त्री०स्त्रियां ङीप् यलोपश्च आभयजाती। पुंसि बहुषु लुक्। अभयजाताः। यूनि आभयजातायनः।

अभयडिण्डिम पु० अभयाय स्वयोधभयाभावाय डिण्डिमः स्वसैन्यप्रोत्साहनार्थं वादनीये रणढक्कादौ वाद्यभेदे।

अभयद त्रि० अभयं भयाभावं ददाति तदर्थं वचनं प्रयुङ्क्ते दा-क ईत०। मा भैषीरित्यादिवचनमुक्त्वा भीतत्राणकर्त्तरि "त्रातुमलमभयदाईति" किरा०। अभयप्रदयोऽत्र। "यानयथाप्रदोभार्य्याभैश्वर्य्यमभयप्रदः २ विष्णुः।

अभयदक्षिणा स्त्री अभये त्राणे त्रातेन देया दक्षिणा। त्रातेन रक्षितरि देयदक्षिणायाम्। "मधूदकं फलं मूलमेधांस्यभयदक्षिणा अभ्युद्यतानि आह्याणि" का०ख०। "सर्वतः प्रतिगृह्णीयान्मध्यमाभयदक्षिणाम्" मनुः। अभयं दक्षिणेव देयत्वात्। अभयरूपदेये "रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्" मत्स्य पु०। अभयदक्षिणामभयदानम् रघु०। [शब्दे विवरणम्।

अभयमुद्रा स्त्री अभयार्था मुद्रा। १ तन्त्रोक्ते मुद्राभेदे मुद्रा-

अभयवाच् स्त्री अभयार्था वाक्। १ अभयदानार्थे मा भैषीरित्यादिवाक्ये।

अभयाद्य पु० अभया हरितकी आद्या यस्य। १ वैद्यकोक्ते मोदकभेदे। स च "अभया पिप्पलीमूलं मरिचं नागरं तथा॥ त्वक्पत्रपिप्पलीसूक्ष्मविडङ्गामलकानि च। कर्षैः प्रत्येकमेषान्तु दन्त्याः कर्षत्रयन्तथा॥ षट्कर्षांश्च सिताया स्तु द्विपलं लिहतो भवेत्। सर्वं चूर्णितं कृत्वा मधुना मोदकं कृतम्॥ खादेत् प्रतिदिनञ्चैकं शीतक्षीरानुपिबेच्छुभम्। तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते॥ अभयाद्यो मोदकोऽयम्" चक्रदत्तोक्तः।

अभव पु० भव उत्पत्तिः अभावे न०त०। १ भवाभावे जन्माभावे "मत्त एव भवाभावौ" गीता। २ विनाशे "भवाय सर्वभूतानामभवाय च रक्षसाम्" रामा०। ७ब०। ३मोक्षे "प्राप्नुमभवमभिवाञ्छसि वा" किरा०। शिवभिन्ने पु०

अभव्य न० नञ् भव्यम् अप्राशस्त्ये न०त०। १ अमङ्गले, २दुष्टभाग्ये च न०ब०। ३ दुर्भाग्यवति त्रि०। "उपनतमवधीरयन्त्यभव्याः" किरा०।

अभाग पु० न भागः अभावे न०त०। १ भागाभावे।

भागश्च एकदेशः दायादग्राह्यधनाद्यञ्च ७ब० । तच्छून्ये पूर्त्ते निंदाये च त्रि० । "यो ज्येष्ठो विनिकुर्व्वीत लोभाद्भ्रातॄन् यवीयसः । सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः" मनुः "यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्ति" शत० ब्रा० ।

अभागिन् त्रि० न भागी स्त्रियां ङीप् । १ अधिकारानर्हे क्लीवपतितादौ । २ भागोभाग्यम् । तच्छून्ये च । "यमात्मानं नविदुरभागिन" इति कट ञ० ।

अभाग्य न० अप्राशस्त्ये न०त० । १ दुष्टभाग्ये । न०ब० । २ दुष्टभाग्यवति त्रि० । [गुणदुष्टोरभाजनम्" का० प्र० ।

अभाजन न० न०त० । अनाधारे "दीधीवेवीसमः कश्चिद्

अभार्य्य पु० नास्ति भार्य्या तत्सम्बन्धो वा यस्य । १ भार्य्याहीने २ शास्त्रनिषिद्धभार्य्यासम्बन्धे नैष्ठिकब्रह्मचारिप्रभृतौ च । "अतिदुष्टज्ञानभार्य्यांश्च ऋषिसङ्घान्" नृपस्य च ञ० त० का० प० । "अभार्य्यान् शास्त्रनिषिद्धभार्य्यासम्बन्धान्" रघु० ।

अभाव पु० न भावः । भावभिन्ने सत्त्वेन प्रतीत्यनर्हे वैशेषिकोक्ते सप्तमपदार्थे भावभिन्नत्वमभावत्वमिति बहवः । भावभेदाश्रयरूपत्वस्य तल्लक्षणस्य अभावविशेषघटितत्वेन अन्योन्याश्रयदोषग्रस्ततया अभावत्वमखण्डोपाधिरिति नव्याः । अभावश्च भावाभावसाधारणाश्रयः घटाभावस्य पटे पटाभावस्य च सत्त्वात् स च भावातिरिक्तः कश्चित् पदार्थ इत्याधुनिका वैशेषिका नैयायिकाश्च उररीचक्रुः । सूत्रकृता तु "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" इति षडेव पदार्थाः करणत उक्ताः । अत एव "नवयं षट्पदार्थवादिनः" इति सांख्यसूत्रे षट्पदार्थीस्वीकारस्तेषां सूचितः । आधुनिकास्तु घटोनास्तीत्यादिप्रतीत्यन्यथानुपपत्त्या पदार्थान्तरमभावं कल्पयन्ति । प्राभाकरास्तु अभावस्याधिकरणस्वरूपत्वमङ्गीचक्रुः । तेषामयमाशयः "ज्ञानाधीना मेयसिद्धिरित्युक्तेः अभावस्यातिरिक्तस्य सिद्धौ प्रमाणं वक्तव्यम् न तावत् प्रत्यक्षम्, अभावस्य रूपाद्यभावेन इन्द्रियसन्निकर्षाभावात् तदयोग्यत्वात् न च इन्द्रियसंयुक्तविशेषणता तत्सन्निकर्षः भूतलादौ चक्षुरादिसन्निकर्षसत्त्वेऽपि तत् स्वरूपविशेषणतायाः अव्यावर्त्तकत्वात् अन्यथा घटाभाव प्रत्यक्षकाले घटाद्यभावप्रत्यक्षस्य दुर्वारत्वात् भूतलादिस्वरूपस्यानुगमात् तस्मे सन्निकर्षरूपे विशेषणता सम्बन्धे विनिगमनाभावेन नियामकत्वाभावात् । अथ ज्ञानलक्षणया यस्य ज्ञानं, तस्यैवाभावस्य प्रत्यक्षमिति कल्पनादपि नियमः इति चेत् ज्ञानलक्षणया घटादेरुपनये तद्विशिष्टबुद्धेरेवोदयप्रसङ्गात् विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन तज्ज्ञानसामग्र्याः समवधानात् अथ अभावज्ञानसामग्र्याः प्रतिबन्धकत्वेन न तद्बोध इति चेत् अभावबोधसामग्र्याः अनियतत्वेन तस्या अप्रतिबन्धकत्वात् इन्द्रियसन्निकृष्टविशेषणतात्मकस्य स्वरूपसम्बन्धस्य भूतलादिस्वरूपत्वानतिरेकात् भूतलादिस्वरूपस्य कदाचिदप्यनपायेन प्रतिबन्धकत्वायोगात् अन्यथा भूतलादौ कदापि घटादेर्ज्ञानलक्षणया विशिष्टज्ञानस्यानुत्पत्त्यापत्तेः "अभावबुद्धिस्तु विशिष्टवैशिष्ट्यावगाहिबोधमर्य्यादां नातिशेते" इति दीधितिकृदुक्तेश्च प्रतियोगिज्ञानस्यापेक्षितत्वेन अभावांशे प्रतियोगिज्ञानवत् धर्म्यंशे तज्ज्ञानस्य दुष्परिहारत्वात् । एतेन योग्यानुपलब्धेस्तत्र हेतुत्वकल्पनेऽपि न निस्तारः । घटादीनामिव घटादेरपि योग्यतया तदुपलब्धेरभावस्य सत्त्वेन सर्वेषां योग्यानामभावप्रत्यक्षप्रसङ्गात् । नाप्यनुमानं तत्र प्रमाणं, तत्र व्याप्तिलिङ्गादेरभावात् । तस्यैवाज्ञाने तद्ग्राह्यताग्रहासम्भवाच्च किञ्चातिरिक्ताभाववादिभिः भूतले "घटोनास्तीति प्रतीतिः सविषया प्रतीतित्वात् यत्तज्ज्ञानं तत्तत् सविषयकं यथा घटादिज्ञानमित्यनुमानप्रयोगः स्वीकार्य्यः । तत्र तदनुमानेन सविषयकत्वसिद्धावपि अधिकरणस्वरूपेणैव तद्विषयकत्वसम्भवेन उद्देश्यासिद्धेः नापि लक्षणात्तत्सिद्धिः अभावस्य निर्वक्तुमशक्यतया तल्लक्षणस्यैवाभावात् । तथा हि अभावशब्दस्य व्युत्पाद्यमानस्य भावभिन्नत्ववाचितया भावभिन्नत्वमभावस्य लक्षणवाच्यं तच्च भेदरूपाभावज्ञानसापेक्षत्वेनान्योन्याश्रयदोषकवलितत्वेन दुर्ज्ञेयम् । किञ्च भावभिन्नत्वस्य अभावलक्षणत्वे भावरूपविशेषणज्ञानशून्यकाले घटोनास्तीति प्रत्ययानुपपत्तिः विशिष्टबुद्धेर्विशेषणज्ञानाधीनत्वात्, अभावो न भाव इति वाक्यात् शाब्दबोधानुपपत्तिश्च उद्देश्यतावच्छेदकविधेयतयोरैक्ये घटोघटः इत्यादाविव शाब्दबोधाभावस्य सर्वसम्मतत्वात् । एतेन अभावत्वम् समवाय सामनाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभाववत्त्वमित्युक्तावपि न निस्तारः तथात्वे अभावो न भाव इति शाब्दबोधोपपत्तावपि तदज्ञानकाले घटोनास्तीति प्रत्ययस्यानुपपत्तेरन्योन्याश्रयदोषस्य दुष्परिहरत्वाच्च । घटाभावाभावादेर्घटरूपतयाऽङ्गीकारेण तत्र समवायेन सत्तावत्त्वेन निरुक्ताभाववत्त्वाभावात् घटाभावाभावोऽभाव इति बुद्धेरनुत्पत्त्यापत्तेश्च । अथ अभाववत् अभावत्वमव्यतिरिक्तः पदार्थः तथाचाभावत्वं न भावभिन्नत्वादि किन्तु स्वरूप-

सम्बन्धविशेषः अखण्डोपाधिर्वेति मतम् तत्रेदमुच्यते कोऽयंस्वरूपसम्बन्धः ? किंस्वरूपमेव संबन्धः ? स्वरूपस्य वा सम्बन्धः ? तत्राद्ये यदि अधिकरणस्वरूपस्यैव सम्बन्धत्वम् आयातं तर्हि अभावस्याधिकरणस्वरूपत्वेन, स्वरूपस्यैवाभावाधिकरणसम्बन्धत्वेन भवतापि स्वीकारात् । अन्त्ये कस्य स्वरूपस्य सम्बन्धः ? यदि अधिकरणस्य तदा जितं प्राभाकरैः अन्यस्य तथाविधत्वेऽपसिद्धान्तापत्तेः भूतले तदाधारतानुपपत्तेश्च । अखण्डोपाधेरपि अभाववत् प्रमाणसापेक्षतया तद्दोषतादवस्थ्यम् प्रमाणाधीनतयैव पदार्थस्य सिद्धे सर्वसम्मतत्वात् असति प्रमाणे कथं तत्सिद्धिः ? । किञ्च अखण्डोपाधित्वस्य भवन्मते कारणतावदपि सत्त्वेनाभावेतरभेदासाधकतया तल्लक्षणत्वायोगः, भिन्नभिन्नाखण्डोपाधिस्वीकारे च तस्यापि लक्षणसापेक्षतया तस्य च निर्वक्तुमशक्यतया न तस्याभावलक्षणत्वम् । न च नञ्पदशक्यतावच्छेदकतया तत्सिद्धिः तथाहि अभावस्य अधिकरणस्वरूपत्वे स्वरूपसंबन्धविशेषस्यैव नञ्पदशक्यतावच्छेदकत्वं वाच्यं तदपेक्षया अभावत्वरूपाखण्डोपाधेरेव तथात्वकल्पने लाघवम् इति वाच्यम् कम्बुग्रीवादिमानित्यादौ गुरुधर्म्मोऽपि शक्यतावच्छेदकत्वस्वीकारात् अन्यथा घटः कम्बुग्रीवादिमानित्यादिवाक्यात् शाब्दबोधानुपपत्तिः । उपेयते च सर्वैः गुरुधर्म्मोऽपि शक्यतावच्छेदकत्वम् । अथ शब्दएव अभावे प्रामाणमिति चेत् शब्दवेद्यस्य बध्यपुत्रादेरपि, अतिरिक्ततया कल्पनापत्तेः अथाप्तशब्दएव प्रमाणमिति चेन्न अभावस्य पदार्थान्तरत्वे आप्तवाक्याभावात् भवतां स्वतस्त्वेऽपि अभावस्य षट्पदार्थातिरिक्ततया क्वाप्यनुक्तेः अभावशब्दमात्रप्रयोगेऽपि तस्याधिकरणस्वरूपत्वेनोपपत्तौचित्यात् । एवमतिरिक्ताभावकल्पनपक्षे निरस्तेऽपि स्वपक्षदोषोद्धारमित्थं चक्रुः । अभावस्याधारस्वरूपत्वे भूतले घटोनास्तीत्यादावधिकरणतायाप्रतीतिः कथं संगच्छतामिति चेत् परेषामिव अत्यन्ताभावस्य नित्यत्वेऽपि घटसत्त्वे घटाभावबुद्धेरनुत्पादे तत्तत्कालीनभूतलादिसम्बन्धस्य नियामकतावत् तत्तत्कालीनभूतलस्वरूपस्यैव अभावपदार्थतया तथाप्रतीतिसम्भवात् तत्तत्कालीनभूतलस्वरूपस्य घटाद्यनवच्छेदकालसम्बन्धरूपतया तस्य च भूतले स्वरूपमित्यादिवदाधारताऽक्षतेः । एतेनाभ्रनलसम्बन्धस्वरूपकल्पनापेक्षया एकाभावकल्पने लाघवमित्यपास्तं क्लृप्ततया कालस्य तत्सम्बन्धस्य च सर्वथादिसम्मततया अधिकस्याकल्पनात् । भवतामभावस्य तत्रैव तत्सम्बन्धे घटादेः प्रतियोगितयान्वयः कल्प्यते अतो नाधिककल्पना । घटो न पट इत्यादौ घटनिष्ठमेव तत्तत्कालीनतादात्म्यं भेदशब्दार्थस्तत्रैव पटतादात्म्यानुपहितस्य तादात्म्यस्याधिकरणे घटादिस्वरूपे भेदे तादृशसम्बन्धे वा पटादेः प्रतियोगितयान्वये सर्वसामञ्जस्यम् । अतएव "न सोऽस्ति प्रत्ययोलोके यत्र कालो न भासते" इत्युक्तेः सर्वत्र बुद्धौ कालावभास इत्यभियुक्तोक्तिः । भक्तासभावभेदबुद्धीर्यथा नियमः मन्नतेऽपि तथा । वायुादौ रूपाद्यभावाच्चाक्षुषत्वाद्यनुपपत्तिरिष्टैव न च तत्र दृढतरं किञ्चित् प्रमाणमस्तीत्येव तत्स्वीकारावश्यकतेति" । अभावभेदबुद्धीर्नियमाश्च नञ्शब्दे प्रदर्शयिष्यन्ते । सोऽयमभावः बौद्धैः शून्यतया आकाशतया निरावरणतया निरुपाख्यतया च व्यवस्थाप्यते तच्च तत्रतावसरे वक्ष्यते । "अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशय" इति हरिः । "नाभावउपलब्धेः" शां०सू० । "नासतोविद्यते भावो नाभावोविद्यते सतः" इति गीता । यथा च अभावान्न भावोत्पत्तिस्तथा उत्पत्तिशब्दे वक्ष्यते । न्यायादिमते स चाभावः द्विविधः संसर्गाभावः अन्योन्याभावश्चेति भेदात् संसर्गश्च ध्वंसप्रागभावात्यन्ताभावभेदात् त्रिविधः । "अभावश्च द्विधा ससर्गान्योन्याभावभेदतः । प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभावएव च । एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" इति भाषा० । प्रागभावश्च उत्पत्तेः प्राक् कारणस्य सूक्ष्मावस्था, उत्पत्तिराविर्भावः, ध्वंसस्तिरोभाव इति सांख्यादयः । २मरणे, मरणञ्च खाद्यैरवयवशरीरेण सह जीवस्य विभागः, पूर्व्वसंयोगनाशो वा, प्राणवायोरुत्क्रमणं वा बोध्यम् । भावः आलङ्कारिकोक्तरत्यादिस्थायिभावः ३ तच्छून्ये त्रि० । आन्तरः भावः स्नेहापरपर्य्यायः अनुरागः । ४तद्वीने त्रि० । सचानुरागः देवविषयो भक्तिः पुत्रादिविषयः स्नेहः, पत्न्यादिविषयः प्रेमेति भेदः । मीमांसकाद्युक्ते अभावप्रमाणके ६ योग्यानुपलब्धिरूपे प्रमाणे ७ असत्त्वे, अविद्यमानत्वे च । नास्ति भावः सत्त्वं यस्य । ८मिथ्याभूते त्रि० । [तुल्यशब्दे च ।

अभावनीय त्रि० न०त० । १ चिन्तयितुमशक्ये २उत्पादयितुमशक्ये च ।

अभावसम्पत्ति स्त्री अभावस्य मिथ्याभूतस्य सम्पत्तिः । १ मिथ्याभूतपदार्थज्ञाने अध्यासे यथा शुक्तिकायां रजतज्ञानं तत्र च यथा मिथ्याभूतस्यैव ज्ञानं तथोक्तमध्यासशब्दे ।

अभाषण न० अभावे न०त० । भाषणाभावे मौनभावे ।

अभि अव्य० न भाति भा—बा०कि । १ कञ्चित् प्रकारं प्राप्तस्य

द्योतने, २ आभिसुख्ये, ३ अभिलाषे, ४ वीप्सायाम्, ५ लक्षणे, ६ समन्तादर्थे। ७ धर्षणे दुर्गा०। "अभि पूजाभ्यर्थेच्छासौम्याभिसुख्यसौरूप्यवचनाहारस्वाध्यायेषु" गणरत्नोक्तेऽपूजादौ च तत्र पूजायाम् अभिवन्दते अभिवादयते। अभ्यर्थे अभियुक्तः अभिनिवेशः। इच्छायाम् अभिलाषः अभिकः। सौम्यं माधुर्य्यम् तत्र अभिजातः "प्रजल्पितायामभिजातवाचि" कुमा०। आभिसुख्ये अभिसुखम् अभ्यग्नि शलभाः पतन्ति "अभिचैद्यं प्रतिष्ठाम्" माघः सौरूप्ये अभिरूपम्। वचने, अभिधानम् "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचक" इति काव्य०प्र०। आहारे अभ्यवहारः। स्वाध्याये अभ्यस्यति "वेदाभ्यासे सदारतः" स्मृतिः। स्वाध्याय इत्युपलक्षणम् अन्यस्यापि पौनःपुन्यमात्रेऽस्य प्रवृत्तिः "अभ्यस्यन्ति तटाघातं निर्जितैरावतागजा" कु०। एतस्य च तत्तदर्थद्योतकतामात्रं समभिव्याहृतशब्दस्यैव तत्तदर्थे लक्षणेति सिद्धान्तः अस्य क्रियायोगे उपसर्गता "वीप्सेत्यभ्यावृत्तिषूपकर्मप्रवचनीयता। वृक्षंवृक्षमभिसिञ्चति। हरिमभि वर्त्तते। भक्तोहरिमभि, अग्निमभि शलभाः पतन्तिदृत्यादुदाहार्य्यम् शब्दपरत्वेपु० "अभिरभागे" पा०।

अभिक त्रि० अभिकामयते अभि+कन्। १ अनुकाभिकाभीकाः कमितेति" पा०नि०। कामुके 'सोऽधिकारमभिकः कुलोचितं कार्य्यं स्वयमवर्त्तयत् समाः" रघुः।

अभिकाङ्क्षा स्त्री अभि+काङ्क्ष–भावे अ। अभिलाषे "प्रीताभिकाङ्क्षा सुखतिक्तता च" सुश्रु०।

अभिकाङ्क्षित त्रि० अभि+काङ्क्ष–कर्मणि क्त। अभिलषिते। [स्त्रियां ङीप्।

अभिकाङ्क्षिन् त्रि० अभि+काङ्क्ष–णिनि। अभिलाषवति

अभिकाम त्रि०अभिकामयते अभि+कम–णिङ्–अच्। १कामयमाने "याचे त्वामभिकामाहं तस्मात् कुरु मम प्रियम्" भा०आ०प०। भावे घञ्। अभिलाषे पु० "मनसाप्यभिकामस्य कुरुक्षेत्रं युधिष्ठिर! भा०व०प०अभिकामादागतः ठञ् आभिकामिकः अभिलाषात् प्राप्ते त्रि०स्त्रियां ङीप्। "गुणैश्चानुपमैर्युक्तः समस्तैराभिकामिकैः" भा०शा०प०।

अभिक्रम पु० अभि+क्रम–भावे घञ् अदृद्धिः। १ आरम्भे, २ आरोहणे, ३ युद्धाय, शत्रुसंमुखयाने च। कर्मणि घञ्। ४ आरम्भे "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" गीता। आधारे घञ्। ५ युद्धे।

अभिक्रमण त्रि० अभि+क्रम–ल्युट् स्त्रियां ङीप् वनो र च। आभिसुख्येन कारिणि। "अग्नेर्वातमनुक्रमेत्यभिक्रमणमन्वभिक्रमणरोः अथ० २,८,२।

अभिक्लृप्त त्रि० अभि+क्लृप–क्त रोलः। १ सम्यक्ते २ नियते ३अभिप्रकाशिते च "हृदा मनीषा मनसाभिक्लृप्तायः एतद्विदुः" कठ उप०।

अभिक्रतु पु० आभिसुख्येन क्रतुर्यज्ञकर्म यस्य। बलवति। "अथाभवद्भमिताभिक्रतूनाम्" ऋ० २,३४,१०। "अभिक्रतूनाम् बलीयसाम्" भा०।

अभिक्रान्ति स्त्री अभि+क्रम–क्तिन्। १अभिक्रमे २उपक्रमे "यज्ञस्याभिक्रान्तिरनपक्रमाय" श्रुतिः।

अभिक्रान्तिन् त्रि० अभिक्रान्तमनेन इष्टादि० इनि। उपक्रमकर्त्तरि "य एषामध्ययने अभिक्रान्ततमः" स्मृतिः।

अभिक्रामम् अव्य० अभि+क्रम–वीप्साभीक्ष्ण्ययोः णमुल्। आक्रम्य, आरभ्य, आभिसुख्येन गत्वेत्यर्थे। पूर्व्वं पूर्व्वमेवाभिक्रामम्" काद्या० २,२,२१। [२निन्दायाम्।

अभिक्रोश पु० अभि+क्रुश–भावे घञ्। १आक्रोशे

अभिक्रोशक त्रि०अभि+क्रुश–ण्वुल्। १निन्दके २अपवादके च

अभिक्षत्तृ त्रि० अभि+क्षद–तृच् स्त्रियां ङीप्। हिंसके "अभिक्षत्तृस्तावतो वरूताः" ऋ०७।२१।८। "अभिक्षत्तुरभिहिंसकस्य" भा०।

अभिक्षद् त्रि० अभि+क्षद–हिंसायाम् अच्। हिंसके। "अभिक्षदामर्य्यमाणम्" ऋ० ६,५०,१। अभिक्षदां हिंसकं छान्दसत्वात् आत्वम्।

अभिख्या स्त्री अभि+ख्या–अङ्। १अभिधाने, २शोभायां "काव्यभिख्या तयोरासीत् व्रजतोः शुक्लवेषयोः रघुः। ३ कीर्त्तौ ४ अभितः ख्यातौ, ५ माहात्म्ये "अन्या अपख्यानदभद्रभिख्याम्" ऋ० १,१४८,५ "अभिख्यामभितः ख्यातिं माहात्म्यं वा" भा०। कर्त्तरि क्विप्। ६अभितो गन्तरि" ७प्रसिद्धे च "अभिख्या भासा दृक्षता शुशुक्वनिः" ऋ०८,२२,५ "अभिख्या अभिमुखं गच्छन्त्याऽभितः प्रसिद्धया वा भासा" भा० धातोरातोलोपात् रूपम्। ८ प्रज्ञायां निरु०।

अभिख्याढ त्रि० अभि+ख्या–ढच् स्त्रियां ङीप्। १ कामके अभिगन्तरि २अभिद्रष्टरि च। "आपिरभिख्यतामर्डितो सोख्यानाम्" ऋ० ४.१७,१७ "अभिख्याताभिद्रष्टा" भा०।

अभिगत त्रि० अभि+गम–क्त। १आनुकूल्येन प्राप्ते २सेविते ३ आभिसुख्येन गते च।

अभिगन्तव्य त्रि० अभि+गम–तव्य। अभिगम्ये सेव्ये च

"सन्तः सदाभिगन्तव्या यदि वोपदिशन्ति ते" वशि० ।

अभिगन्तृ त्रि० अभि+गम–तृच् स्त्रियां ङीप् । युद्धार्थम् आभिमुख्येन १ गन्तरि २ आनुकूल्येन गन्तरि च । "त्वं वरुणोऽभिगन्तेव ब्रह्म" शत० ब्रा० ।

अभिगम पु० अभि+आभिमुख्ये आनुकूल्येवा गम–घञ् । आभिमुख्येन गमने "तवार्हतो नाभिगमेन दृष्टम्" रघुः आनुकूल्येन २गमने "स्वरुच्या क्रियमाणे तु यत्नावस्थक्रिया क्वचित् । नोद्यते नियमः सोऽत्र ऋतावभिगमो यथेति" मीमांसा । भावे ल्युट । अभिगमनं तत्रैव न० । "ज्ञेयाभिगमनात् पूर्वं तेनाप्यनभिनन्दिता" रघु० । "पापकृन्मुच्यते पापात्तीर्थाभिगमनेन च" स्मृतिः ।

अभिगम्य त्रि० अभिगन्तुं शक्यते सौम्याकारत्वात् । आभिमुख्येन गन्तुं शक्ये "अद्यप्रभृति भूतानामभिगम्योऽसि भूपते" कुमा० । "सोऽभिगम्यश्च पूज्यश्च कर्त्तव्यश्च प्रदक्षिणम्" कुमा० । "अष्टाध्यायाभिगम्यस्य वादोरत्नैरिवार्णवः" रघुः । अभि+गम–ल्यप् । आभिमुख्येन गत्वेत्यर्थे अव्य० "मनुमेकाग्यमासीनमभिगम्य महर्षयः" इति मनुः ।

अभिगर पु० अभि+गॄ–स्तुतौ अप् । १ अभितः स्तवे । "अनुष्टुप् तेऽभिगरम्" इति यजु० ८,४७ ।

अभिगामिन् त्रि० अभिगच्छति अभि+गम–णिनि अभिगन्तरि । "ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा" मनुः । "राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना" या०

अभिगीत त्रि० आनुकूल्येन गीतः । १ आनुकूल्यार्थं स्तुते २ अभितोगीते च ।

अभिगुप्ति स्त्री अभि+गुप्–क्तिन् । १ अभिरक्षणे "तद्व्रजमेवेताभिगुप्ता आसादयति" श० ब्रा० ।

अभिगूर्त्त(र्ण) त्रि० अभि+गुर–क्त वेदे नत्वाभावः । १उक्ते "दृष्टं वीतमभिगूर्त्तम्" यजु० २५,३७, "अभिगूर्त्तं ये यजामहे दृत्यभिगूर्त्तोक्तम्" वे० दी० लोके तु अभिगूर्णइत्येव अभ्युदाते त्रि० ।

अभिगूर्त्ति स्त्री अभि+सातत्ये गुर–क्तिन् । सततसङ्कल्पे "तेषामभिगूर्त्तिर्नं इन्वतु" ऋ० १,१६२,६ । "अभिगूर्त्तिः सङ्कल्पः सर्व्वथा करणीयमिति बुद्धिः" भा० २ अभित उद्यमे च "उतो तेषामभिगूर्त्तिर्नं इन्वतु" ऋ० १,१६२,१२, "अभिगूर्त्तिः" उद्यमः भा० । [आनुकूल्यार्थं कृताङ्गतौ ।

अभिगृहीतपाणि त्रि० आनुकूल्यार्थं गृहीतः पाणिर्येन ।

अभिगेष्ण त्रि० अभि+गै–ल्युण । अभितो गायके "यदेखवा अभिगेष्णाचरन्ति" श्रुतिः ।

अभिगोप्तृ त्रि० अभितो गोपायति अभि+गुप–तृच् स्त्रियां ङीप् । अभिरक्षके ।

अभिग्रस्त त्रि० अभि+ग्रस–क्त । १ आक्रान्ते २कवलीकृते च

अभिग्रह पु० अभि+ग्रह–अप् । (लुट) इति ख्याते प्रकाशहरणे, २ अभियोगे, ३ आभिमुख्येनोद्यमे, ४ गौरवे ५युद्धे च । ल्युटि अभिग्रहणमप्यत्र न० । [१घर्षणे, २ग्रहणे च ।

अभिघर्षण न० अभि+घृष–भावे ल्युट् । परस्परसंयोगेन

अभिघात पु० अभि+हन–भावे घञ् । १ निःशेषहननेसमूलनाशने "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सां० का० । २ ताडने । "तडाभिघातादिव लग्नपङ्के" कुमा० । अभिहन्यतेऽस्मै फलाय उद्दिश्यार्थे वा० घञ् । द्रव्यान्तरक्रियया उत्पादितद्रव्यान्तरसंयोगे, वैशेषिकोक्ते शब्दहेतौ, द्वयोगिनोर्भिन्नयोर्विभागजनकक्रियाहेतौ च ३ संयोगभेदे । यथोक्तं "नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्मेति वै० सू० । "यः संयोगः शब्दनिमित्तकारणं, यच्जनितं कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः नोदनं तु तद्विलक्षणः संयोगः । ताभ्यामपि प्रत्येकं कर्म्म जन्यते षड्ढ्याख्यायां पृथिव्यां चरणेन नोदनात् चरणाभिघाताच्च कर्म्म जायते तत्र षड्ढः समवायिकारणम् नोदनाभिघातौ यथा यथमसवायिकारणम् गुरुत्ववेगप्रयत्ना निमित्तकारणानि संयुक्तसंयोगात् नोदनाभिघाताद्वा षड्ढे कर्म षड्ढस्थिते घटादावपि, तत्समकालमेव कर्मदर्शनादिति" श० उपस्कारः । "आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म, तथा हस्तसंयोगाच्च मुषले, अभिघातजे मुषले कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः" वै० सू० तथात्मसंयोगात् हस्तकर्मणि, अभिघातान्मुषलसंयोगाच्च हस्ते कर्म "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिये"त्युक्तिमनुसृत्याह आत्मसंयोगप्रयत्नाभ्यां हस्तेसमवायिकारणे कर्म, तस्य च कर्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणं प्रयत्नस्तु निमित्तकारणम् प्रयत्नवदात्मसंयोगासमवायिकारणिका च क्रियैव चेष्टा । तथा उत्क्षेपवद्धस्तसंयोगात् मुषले उत्क्षेपणं कर्म जायते । तथाच प्रयत्नवदात्मसंयुक्तेन हस्तेन यो मुषलस्य संयोगः स तत्रासमवायिकारणम् मुषलं समवायिकारणमिति । उदूखलाभिहतस्य मुषलस्य कर्मण्युदुत्पतनं जायते तत्र कारणमाह । मुषलादौ उत्पतनकर्मणि अभिघात एव हेतुः, न तु हस्तसंयोगः तस्यतं प्रति कारणत्वेनान्वयासिद्धत्वात् तद्व्यतिरेकेऽपि अभिघात-

मात्रेण अभिहतप्रधानगुरुद्रव्यसंयोगेनैव उत्पतनदर्शनात् यथा भूम्यादौ हस्तेन वेगवच्छिघ्रलोष्टादेर्हस्तयोगं विनाऽपि उत्पत्तिर्दृश्यतेऽत उत्पतने अभिघात एव असमवायिकारणम् "अभिघातात् सुषवे संयोगाद्धस्ते कर्म" वै० सू० अभिघातात् अभिघातजनितसंस्कारजनितात् हस्तसुषवसंयोगात् हस्ते उत्पतनं कर्म तत्र सुषवसंयोगोऽसमवायिकारणम् । तीव्रवेगप्रयुक्तक्रियाजनितः संयोगः शब्दहेतुः । "हतोयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः अभिघातोनोदनश्च शब्दहेतुरिहादिमः । शब्दाहेतुर्द्वितीयः स्यादिति" "शब्दोध्वनिश्च वर्णश्च ह्रदक्काद्यभवोध्वनिः । "कण्ठसंयोगादिजन्यावर्णास्ते कादयोमता" इतिच भाषा० अतएवोक्तम् "कण्ठताल्वाद्यभिघातजन्यः शब्दः" इति दृढैः । शिक्षायामप्युक्तम् "आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते" इति । स उदीर्णः सन्धिः पादपूरणार्थः । ह्रदक्कादौ तीव्रवेगेन काष्ठादिताड़नसंयोगे शब्दोजन्यते इति लौके प्रसिद्धिः । ह्रत्कादौ प्रवहत्तरवायुसंयोगाच्च शब्दो ध्वन्यात्मक एव । ह्रदुवेगेन क्रियया संयोगे नोदनरूपे न शब्दः इति तस्य शब्दाहेतुत्वमुक्तम् अधिकं नोदनशब्दे वक्ष्यते । "अभिघातोऽस्यस्य अर्थ० अच् । अभिघातयुक्ते त्रि० "अभिघातं स्यात् पूर्व्वं वेदद्वित्रादिवर्णाश्चेत् । नववर्गाणां नवतो धरणीचन्द्रद्विरामाद्या" इति कोषोक्ते वर्णभेदे, न० शब्दकल्पद्रुमः ।

अभिघातक त्रि० अभि+हन-ण्वुल् । १ शत्रौ रिपौ २ अभिघातसंयोगकारके ३ समूलनाशके च । "तदभिघातके हेतौ" सां० का० । [इन् । रिपौ ।

अभिघाति पु० अभिघातयति अभि-हन-खार्थे णिच-

अभिघातिन् त्रि० अभि+हन-णिनि स्त्रियां ङीप् । १ शत्रौ २ नाशके ३ अभिघातसंयोगकारके च ।

अभिघार पु० अभिधार्य्यते समन्तादग्नौ सिच्यते अभि+धृ-घारणे णिच -भावे घञ् । अग्नौ समन्तात् घृतादेः १ सेचने २ घृतादिसंस्कारभेदे च । "द्रव्यभिक्षितोभावो द्रव्यवत् प्रकाशते" इत्युक्तेः अभिधार्य्यमाणे ३ घृतादौ च त्रि० ।

अभिघारण न० अभितोधारणम् जलादिभिः विधिना सेचनम् । अभि+धृ-णिच्-भावे ल्युट् । घृतादेः संस्कारभेदे "यत्र जुह्वाभिघारणम् स्रुवाया हविष उपभृतश्च" कात्या० ३, ३, ८, "यद्यप्रयाजशेषानन्तरं यजतिस्यात्तदेव वेदेः पश्चादागत्य उपविश्य जुह्वस्थेनैव प्रयाजशेषेण स्रुवाया औपभृतस्यस्य हविषः आज्यस्याज्यपुरोडाशयोश्च उपभृतः उपभृत्संस्थस्याज्यस्य अध्वर्युरभिघारणं करोति उपयोगक्रमेण अयञ्च हविः संस्कारः प्रयाजशेषप्रतिपत्तिः हवींषीति द्वितीयाश्रुतेः हविषः संस्कार्य्यत्वावगमात् अतः सन्निहितानि सर्व्वाणि हवींषि शेषेणाभिघारणीयानि" कर्क० ।

अभिचक्षण अभि-चक्ष-ल्युट् । १ सर्व्वतोविचक्षणे कर्मकुशले "वेदाहं तस्य भेषजं शोषुदुरभिचक्षणम्" अथ० ६, १२७, २, विषूचीर्य्यावतीरापो अभिचक्षणादिवः अथ० ६, २, २१ ।

अभिचर त्रि० अभितः आभिमुख्येनानुकूल्यार्थं चरति चर-ट । १ भृत्ये २ अभितो गते च स्त्रियां ङीप् ।

अभिचरण न० अभि+चर-ल्युट् । १ शत्रुघाताय विहितश्येनयागादौ ।

अभिचरणीय त्रि० अभिचरणमर्हति छ । १ अभिचाराहें वैरिणि "तं त्वष्टा हतपुत्रोऽभ्यचरत् सोऽभिचरणीयमपेन्द्रम् सोममाहरत्" यत० ब्रा० ।

अभिचार पु० अभि-आभिमुख्येन कृत्याजननार्थं चारः अभि+चर-भावे घञ् । १ शत्रुवधोत्पादककृत्याजनके मूलकर्म्मणि "श्येनेनाभिचरन् यजेतेति" विहिते श्येनयागादौ । "अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विगुणोदमः" "अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति" इतिच मनुः "अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसः" काद० । अभिचाराय हितं स प्रयोजनमस्य वा ठञ् । आभिचारिकः । १ तत्रहितकर्म्मादौ २ तत्प्रयोजनवादौ च त्रि० स्त्रियां ङीप् ।

अभिचारकल्प पु० अभिचारसाधनं कल्पोरहस्यञ्चापकग्रन्थः । १ अथर्ववेदान्तर्गते ग्रन्थभेदे अथर्ववेदशब्दे विवरणम् ।

अभिचारिन् त्रि० अभिचरति अभि+चर-णिनि स्त्रियां ङीप् । १ अभिचारकर्त्तरि "ये त्वा कृत्वा लेभिरे विदूका अभिचारिणः" अथ० १०, १, ६ ।

अभिच्छाय त्रि० अभिगतश्छायाम् अत्या० स०, अभिमुखीभूता छाया यस्य वा । १ छायाप्राप्ते २ छायाभिमुखप्राप्ते च । छायाया अभिमुखम् अव्ययी० । २ छायाभिमुखे अव्य० । "यो मामिच्छायमत्येषि मां चाग्निं कामतः" अथ० १२, १, ५७ ।

अभिजन पु० अभिजायतेऽस्मिन् जन+आधारे-घञ् अलुक्सः । १ कुले, "न परिचयं रक्षति नाभिजनमीक्षते" काद० । "वयसः कर्म्मणोऽर्थस्य श्रुतस्याभिजनस्य च वेषवाग्बुद्धिसादृश्यमाचरन् विचरेदिह" मनुः । २ जन्मभूमौ,

अभिमतः पित्रादेर्नां जनोजन्मस्थानम् । २ पित्रादिभिरध्युषिते स्थाने "अभिजनश्च" पा० "अभिजनो नाम यत्र पूर्व्वैरुषितम्" भाष्यम् । अभिमतोजनः श्रेष्ठत्वात् प्रा०स० । ४कुलश्रेष्ठे अभि+जन–भावे घञ् । उत्कृष्टस्थानजतया ५अभिमतोत्पत्तौ "श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति" मनुः ब्रह्मसुखोद्भवत्वेनाभिजनेन श्रेष्ठतया" कुल्लू० । अभिजायते सत्पुरुषोभवति येन करणे घञ् । ६कीर्त्तौ "यावत् कीर्त्तिर्हि लोकेषु तावत् पुरुष उच्यते" इत्युक्तेः कीर्त्त्यैव सफलजन्मत्वात्तस्यास्तथात्वम् । अभिजनादागतः अण् । आभिजनः वंशसंबन्धादागते, त्रि० "तां पार्व्वतीत्याभिजनेन नाम्ना" कु० ।

अभिजात त्रि० अभिमतं प्रशस्तं जातं जन्म यस्य । १कुलीने, "जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कुशः" "भिन्नानस्त्रैर्मोहभाजोऽभिजातान्" च रघुः । २पण्डिते, ३श्रेष्ठे "न म्लेच्छितव्यं यत्नादौ स्त्रीषु नाप्राकृतं वदेत् । सङ्कीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतम्" हेमाद्रिः । ४मनोहरे । "प्रजल्पितायामभिजातवाचि" कु० । अभिजातस्य भावः ष्यञ् । आभिजात्यं कौलीन्येन० । [जनने ।

अभिजाति स्त्री प्रशस्ता जातिः जननं प्रा०स० । प्रशस्तवंश-

अभिजित् त्रि० अभिसुखीभूय जयति यत्नात् अभि+जि–क्विप् । १अभिसुखीभूय यत्नाज्जयिनि । अभितो जयत्यनेन करणे क्विप् । २सर्वतोजयसाधने "अभिजिता तेजसा तेजोजिन्वे" य० १५,७, "सर्व्वजयहेतुना तेजसा अन्नेन" वेददी० । "अभिजिदसि युक्ताग्रावेन्द्राय" ता० ब्रा० "अभिजित् सर्वजयहेतुरसि" भा० । अभिजयति ऊर्द्धाधःस्थित्या अपराणि नक्षत्राणि कर्त्तरि क्विप् । "अभिजिन्नाम नक्षत्रमुपरिष्टाद्गोवीथ्याः" श्रुत्युक्ते ३नक्षत्रभेदे इतरनक्षत्राणां स्वकक्षामात्रस्थितेस्तस्य च ऊर्द्धाधःस्थित्या इतरनक्षत्रजयित्वात् तथात्वम् । अतएव भागवते "नक्षत्राणि मेरुं दक्षिणेनैव कालायने रैश्वरयोजितानि सहाभिजिताऽष्टाविंशति" रित्युक्तम् । नक्षत्रचक्रस्य अश्विन्यादिसप्तविंशतिनक्षत्रात्मकतया ज्योतिषे प्रसिद्धत्वेऽपि श्रुत्युक्तोत्तराषाढोपरिश्रवणाधःस्थाने अभिजिन्नामकं नक्षत्रचक्रानन्तर्गतमपि कर्म्मविशेषे फलविशेषार्थं ज्योतिषादौ स्वीकृतम् यथा" सप्त सप्त विलिखेत्तु रेखिकास्तिर्य्यगूर्द्ध्वमथ कक्षिकादिकम् । लेखवेदभिजिता समन्वितं चैकरेखकगणेन विध्यते । वैश्वस्य चतुर्थांशे श्रवणादौ लिप्ति आषतुष्के च । अभिजित् तत्स्थे खेटे वित्तेया रोहिणी विद्धा । यद्यत्रैवैकरेखास्थो वेधः सप्तशलाकके" इति दीपिका ततश्च आषाढोपरिश्रवणाधोभागे तस्य स्थितावपि जनविंशकलात्मकत्व कर्म्मविशेषार्थं कल्पितम् तत्र यच्छस्थित्या सप्तशलाकादिवेधवशात् विवाहादौ वर्ज्यता अनिष्टफलदायकत्वात् । श्रुतौ स्थानविशेषोक्तिस्तु तस्य स्थिति स्थानज्ञापनार्था अतएव सूर्य्यसिद्धान्ते "आषस्यैवाभिजित् प्रान्ते वैश्वान्ते श्रवणस्थितिरित्युक्तं व्याख्यातञ्चैतत् रङ्गनाथेन आषस्य पूर्व्वाषाढाया अवसाने, धनराशौ विंशतिकलोनसप्तविंशतिभागे २६,४० अभिजिद्योगतारा" इति एवञ्च दीपिकोक्ता जनविंशतिकलात्मकता कर्मविशेषार्था अतएव अष्टाविंशतिनक्षत्राभिप्रायेणैव बृहत्संहितायामष्टाविंशतिर्नक्षत्राधीश्वरा उक्ताः "अश्वियमदहनकमलजशशिमूलरुद्रदितिजीवधरणिपितरः । यौन्यर्यमदिनकृत्वष्टृपवनशक्राग्निमित्राश्च ॥ शक्रो निर्ऋतिस्तोयं विश्वे ब्रह्मा हरिर्वसुर्वरुणः । अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" ॥ तथा चाभिजितोब्रह्माधीश्वरः । अभिजयति इतरश्राद्धकालान् प्राग्रूप्येन, आभिमुख्येन पश्चिमावस्थितां छायां जयति प्राग्वर्त्तिनीं करोति वा क्विप् । पश्चिमवर्त्तिच्छायायाः पूर्व्ववर्त्तित्वसम्पादके पञ्चदशधाविभक्तदिनस्याष्टमे कुतपाह्वये श्राद्धप्रशस्ते २ मुहूर्त्ते । "अपराह्णे तु संप्राप्ते अभिजिद्रोहिणोदये । यदत्र दीयते जन्तोस्तदक्षयमुदाहृतमिति" मत्स्यपु० उक्तोत्तरोत्तरापेक्षयाऽक्षयफलदात्वात्तथात्वम् । "कुतपप्रथमभागे एकोद्दिष्टमुपक्रमेत् आवर्त्तनसमीपे वा" स्मृतेः "आरभ्य कुतपे श्राद्धं कुर्य्यादारोहिणं बुधः" इत्युक्तेश्च तन्मुहूर्त्तस्यारम्भकालतया प्रशस्तत्वाच्च तथात्वम् । अभिजयति यत्नात् गमनेनात्र आधारे" क्विप् । "मध्यं व्योमप्रयाते स्फुरदनलनिभे कोशरे चार्कबिम्बे छाया साध्वीव कान्ता प्रचलति पुरुषे यत्र तत्पादलग्ना । तावत् सौरेर्न दृष्टिः कुजकृतमशुभं नैव चन्द्रस्य योगः लक्ष्मीसारोग्यसम्पत्तिमथ युवतीं तत्र गन्ता लभेत" इति ज्योतिषोक्ते ४यात्रालग्नभेदे च । यद्यपि "सर्वेषान्तु विधुपापयुक्तनुलवावर्द्धे निशार्द्धोर्ध्वटीत्रयं वै" इत्यादिना दिनार्द्धपूर्व्वापरस्थघटीत्रयात्मक–२० पलस्य सर्वत्र वर्ज्यता तथापि यात्रायां विशिष्याभिधानात्तदपवादः । "ततः प्रभाते विमले मुहूर्त्तेऽभिजिति प्रभुः" रामा० । अग्निष्टोमयागाङ्गे गवामयनिके ५ यागभेदे अभिजिदग्निष्टोम" इति कात्या० । अग्निष्टोमग्रहणादभि-

जिदन्तरं तत्संज्ञकं गवामयनिकमेतत् कर्क० । संवत्सरसाध्येगवामयने २षष्ठमासीयपञ्चविंशतितमदिने यथोक्तम् ता०भाष्ये "तत्र षष्ठे मासादौ त्रयोऽभिप्लवाः षड्हाः कार्य्याः तत एकः पृष्ठ्यः षड्हः ततोऽभिजिदेकमहः" इति । अभिजिन्मुहूर्त्तस्य च किञ्चिदूनदिनार्द्धप्रवक्तेः तत्सान्यात् पञ्चविंशतिदिनाधिकपञ्चममासस्य किञ्चिदूनदैर्घ्यवदिवसार्द्धतुल्यतयास्याभिजिच्छब्दवाच्यता ६ तद्विहितकर्त्तव्ये ७ अतिरात्रयागादौ च उपचारात् अतएव ताण्ड्यभाष्ये "षष्ठे मासि त्रीनभिप्लवान् एकं पृष्ठ्यञ्च कृत्वाऽभिजिदनुष्ठेयः" इत्युक्तम् विवरणं गवामयनशब्दे द्रष्टव्यम् । "अभिजिदतिरात्रे" इति श्रुत० ब्रा० । "अतिरात्रसंस्थः अभिजिन्नामके दिने कार्य्यः" इति भा० ।

अभिजित पु० अभिजोयादन्यान् संज्ञायामाग्रोर्व्वादे देवरातादित्वात् क्तच् । अर्द्धरात्रसम्बन्धिनि मुहूर्त्ते "अहं त्वभिजिते योगे निशाया यौवने स्थिते । अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखम्" । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम् विष्णु पु० ।

अभिजिति स्त्री अभि+जि–भावे क्तिन् । अभिजये "एषां लोकानामभिजित्यै" श्रुत० ब्रा० ।

अभिज्ञ त्रि० अभिजानाति अभि+ज्ञा–क । १ निपुणे, २पण्डिते ३ ज्ञातरि चेतने "अन्वयादितरत्तस्यार्थेष्वभिज्ञः स्वराट्" भाग० । अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः कुमा० "शङ्कुस्खनाभिज्ञतया निवृत्ताः" रघुः ।

अभिज्ञा स्त्री अभि–ज्ञा–अङ् । १ प्रथमसुत्पन्ने ज्ञाने । २ संस्कारसहकृते इन्द्रियसन्निकर्षजन्ये प्रत्यभिज्ञारूपे ज्ञाने च ।

अभिज्ञात त्रि० अभिज्ञायतेस्म अभि+ज्ञा–कर्म्मणि क्त । कालान्तरे पुनःदृष्ट्वा जातेन सोयमित्याकारकज्ञानेन विषयीकृते पूर्व्वदृष्टे पदार्थे ।

अभिज्ञान न० अभिज्ञायतेऽनेन अभि+ज्ञा–करणे ल्युट् । सोऽयमिति ज्ञानसाधने १चिह्ने । "चिह्नभूतं त्वभिज्ञानं त्वमङ्के कर्त्तुमर्हसि" "उपपन्नैरभिज्ञानैर्दूतं तमवगच्छत" इति च रामा० । भावे ल्युट् । तद्विषयित्वाकारके २ज्ञाने च । तच्च संस्कारसहकृतं पुरोवर्त्तिनि इन्द्रियसन्निकर्षजन्यं प्रत्यक्षविलक्षणं स्मृतिविलक्षणञ्च ज्ञानम् । "तदभिज्ञानहेतोर्हि दत्तं तेन महात्मना" रामा० ।

अभिज्ञानशकुन्तला स्त्री अभिज्ञायते कर्म्मणि ल्युट् तथा भूतां शकुन्तलामधिकृत्य कृताख्यायिका "तदधिकृत्य कृते ग्रन्थे" पा० अण् आख्यायिकायां तस्य वा लुपि व्यक्तिवचनतेति स्त्रीत्वम् । कालिदासकृतौ दुष्यन्तेन गान्धर्व्वविधिना कृतोपयमां कण्वकन्यां शकुन्तलामधिकृत्य कृते नाटकभेदे तस्याश्च दुर्वासःशापात् प्रथमं दुष्यन्तेनानभिज्ञानात् पश्चाच्च स्वदत्ताङ्गुरीयकरूपाभिज्ञानदर्शनेन प्रत्यभिज्ञातत्वात् तामधिकृत्याख्यायिकारूपत्वाच्चाटकस्य तथात्वम् । "कालिदासस्य सर्व्वस्वमभिज्ञानशकुन्तला" लुबभावे आभिज्ञानशकुन्तलम् न० । "नवेनाभिज्ञानशकुन्तलेनेति" भक्त० ।

अभिजु त्रि अभिगते आभिमुख्येन स्थापिते जानुनी येन वेदे बा०भु १ आभिमुख्येनावस्थापितजानुयुक्ते । "संजानाना उपसीदन्नभिज्ञु" ऋ० १,७२,५ ।

अभितराम् अव्य० अभि+प्रकर्षे–तरप् आम् । १ आभिमुख्यातिशये २ भृशैःभृशैराभिमुख्ये च "अभितराम्ह वै जयन् क्रामति तस्मादभितरामभितरामेव क्रामेत्" श्रुत० ब्रा० । "अभितराम् उ वै शत्रोरत्यन्तमभिमुखं खलु, अन्यावपि ईषदीषत् पुरस्तादाक्रामेदिति" भा० ।

अभितस् अव्य० अभि+तसिल् । सामीप्ये, आभिमुख्ये, उभयतोऽर्थे, शीघ्रतायाञ्च । एतद्योगे द्वितीया "अभितस्तेतसोःकार्य्या धिक्समुपर्य्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु तथान्यत्रापि दृश्यते" इत्युक्तेः । "अङ्गान्यवाप्तोदभितः प्रधानमिति" भट्टिः "अभितस्तं पृथासूनुः स्नेहेन परिषस्वजे" किरा० "कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितोब्रह्मनिर्वाणमिति" गीता २साकल्ये च । "पर्य्यभिभ्याञ्च" पा० "सर्व्वोभयाधीभ्यामेव बा० उक्तेः सर्व्वोभयार्थयोरेवास्य साधुता ।

अभितप पु० अभि+तप–घञ् । भृशं सन्तापे ।

अभितास्र पु० भृशं तास्रं प्रा०स० । १ आत्यन्ततास्रवर्णे २ तद्वति त्रि० "रामस्तमभितास्राक्षं दृष्ट्वाशास्रक्षयक्षिणम्" रघुः ।

अभितोमुख त्रि० अभितः मुखमस्य । १ सर्व्वदिग्मुखे ।

अभिदर्शन न० आभिमुख्येन दर्शनम् अभि+दृश–भावे ल्युट् । आभिमुख्येन दर्शने, "यामघातेषु हितामङ्के, परेषामभिदर्शने" मनुः । [स्मृतौ च ।

अभिद्रा स्त्री अभि+द्रा–अङ् । १ पलायने, २अभिध्यायाम्

अभिदि(धि)प्नु त्रि० अभि+दम्भ–स्नु ङ वेदे नदस्य धः । १अभिभवनेच्छावति "विश्वा इदर्यो अभिदिप्नुः" ऋ० ३,२३,१३ । "अभिदिप्नुः अभिभवनेच्छावती ज्ञानशक्तिः" भा०

अभिद्रवण न० अभि+द्रु-ल्युट्। १ वेगेन गमने। अप्। अभिद्रवोपयुक्तार्थे पु०।

अभिद्रुह् त्रि० अभिद्रुह्यति अभि+द्रुह् क्विप्। १ अपकारके

अभिद्रोह पु० अभि+द्रुह-घञ्। १आक्रोशे, २अनिष्टचिन्तने, ३अपकारे च। "नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः"। मनुः "भूतेन्द्रियानभिद्रोहो धर्मोहि परमोमतः" का०ख०

अभिधर्षण न०आभिमुख्येन धर्षणम्। १निर्भीड़ने २आस्फालने ३भूतादेरावेशे च। कर्त्तरि ल्यु। ४राक्षसे पु०।

अभिधा स्त्री अभि+धाञ्-भावे अङ्। १ कथने, २शब्दनिष्ठे अर्थबोधजनकताशक्तिभेदे च। अभिधीयतेऽनेनेति करणे अङ्। २ वाचकशब्दे भट्टमते फलजनकव्यापाररूपायां शब्दनिष्ठायां ४ भावनायाञ्च। अभिधा च सङ्केतितार्थस्य बोधिका शब्दनिष्ठा शक्तिरिति आलङ्कारिका "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः॥ व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" ता अभिधाद्याः। "तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा" सा०द०। भाट्टास्तु प्रवृत्तिजनने विधिव्यापारीभूता विधिसमवेता भावनापरनामाऽतिरिक्तपदार्थविशेषोऽभिधा तस्या एव ज्ञानं प्रवर्त्तकं तत्रैव च भावनात्वरूपेण विधिशक्तिः सा च जन्यत्वसम्बन्धेन एकपदोपात्तत्वप्रत्यासत्त्या वा आख्यातसामान्यशक्तिबललभ्या कृतिरूपव्यापारविधेरर्थान्तरे विशेषणतयाऽन्वेति प्रकृत्यर्थोऽपि विषयितया व्यापारे विशेषणं तथा च यागविषयकभावनाजन्यव्यापारवान् पुरुष इत्यन्वयबोधः नचैतादृशबुद्धावपि प्रयोजनाज्ञाने कुतः प्रवृत्तिः प्रयोजनस्याहेतुत्वे विश्वजिदादौ फलकल्पनानुपपत्तेरिति वाच्यम् यागविषयकव्यापारेऽभिधाजन्यत्वस्यान्वये व्यापारनिष्ठेष्टसाधनत्वस्यान्वयप्रयोजकरूपतया योग्यतात्वेन योग्यतावलादेव व्यापारे तज्ज्ञानात्। यद्वा विधित एव स्वर्गादिसाधनत्वग्रहस्तच्च प्रवृत्तिरूपव्यापारे आख्यातार्थेऽन्वेति प्रवृत्तावि्टसाधनताज्ञानमेव प्रवर्त्तकम्। न चैवं न्यायमतविशेषः इष्टसाधनत्वेन विध्यर्थत्वस्वीकारादिति वाच्यं क्रियागतं साधनत्वं न विध्यर्थः अपि तु प्रवृत्तिगतमिति विशेषात् अभिधाभ्युपगमाभ्यामपि विशेषसम्भवाच्च न चैवं तादृशाभिधायां मानाभाव इति वाच्यं विधिः प्रवृत्तिजनकधर्मसमवायिकारणं तज्जनकद्रव्यत्वादात्मवदित्यनुमानादेव तत्सिद्धेः भट्टमते शब्दस्य द्रव्यत्वाच्चासिद्धिः। न च प्रवृत्तिजनकशरीरे व्यभिचारः, तस्य शरीरप्राणसंयोगोपादानत्वात् न च विधिर्न प्रवृत्तौ कारणं प्रवृत्तिसामान्ये व्यभिचारात् इति वाच्यं वैधजन्यप्रवृत्तौ तद्धेतुत्वात् ज्ञानवत् प्रवृत्तावपि वैलक्षण्यसम्भवाच्च तच्च जातिरूपमखण्डोपाधिरूपं स्वरूपं वेत्यन्यदेतत्। नन्वस्त्वभिधा तथापि तद्धीर्न प्रवृत्तिहेतुः प्रवृत्तिसामान्ये तस्य व्यभिचारात् प्रत्यक्षादिना दृष्टसाधनत्वग्रहेऽपि प्रवृत्तेः, नापि यागादिविषयिकायां, यागकृतिः स्वर्गसाधनमित्याप्तवाक्यादितोपि प्रवृत्तेः। नापि विधिजन्यायां, तज्जन्यताया अवच्छेदकस्यैव दुष्परिचयात्। नापि जातिविशेषविशिष्टायां, गुणगतजात्यनभ्युपगमात् इति चेन्न विधिजन्यतावच्छेदकौखण्ड्योपाध्यवच्छेदेनैव तद्धेतुत्वात् न च भावनादिपदादपि तादृशप्रवृत्त्यापत्तिरिति वाच्यं विधिजन्यभावनाज्ञानस्यैव विलक्षणशक्तिमत्त्वेन तादृशप्रवृत्तिविशेषे हेतुत्वादित्याहुः। तामेतामभिधारूपभावनां प्रभाकरान मन्यन्ते। एवं हि तस्यानिरासस्तैः कृतः" अभिधासंकल्पाऽपूर्व्वभावनाज्ञानं न प्रवर्त्तकं तस्मिन् सत्यप्रवृत्तेः असत्यपि प्रवृत्तेश्च किन्तु कार्य्यत्वज्ञानमेव प्रवर्त्तकमिति तथा हि ज्ञानस्य कृतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति यत्सत्त्वे कृतिविलम्बोहेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयकेच्छा पाकं कृत्वा साधयामीति तदनुभवात् सा च स्वकृतिसाध्यज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात्" इति। यथा चास्यैव प्रवर्त्तकत्वं तथा विधिशब्देवक्ष्यते। सा चाभिधाशक्तिः कुत्रार्थे कस्येति व्याकरणादितोज्ञायते तदुक्तमभियुक्तैः "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा" इति व्याख्यायेदमुदाहृतमस्माभिः शब्दार्थरत्ने। यथा "तत्र सर्वेषां शब्दानां प्रथमतो व्यवहारादेव प्रायशः शक्तिग्रहः। तथा हि केनचित् वृद्धेन व्युत्पन्नं पुरुषं प्रति गामानयेत्युपदिष्टे तत् श्रुत्वान् व्युत्पन्नो गवानयने प्रवर्त्तते। तच्चेष्टादर्शनेन तत्प्रवृत्तिमनुमाय व्युत्पित्सुर्बालो व्युत्पन्नपुरुषीयप्रवृत्त्यन्यथानुपपत्त्या तद्धेतुभूतकर्त्तव्यतादिज्ञानादिकं तत्रानुमिनुतेऽनुमिनुते चापरकारणानुपस्थितेः श्रुतस्यैव सप्तदितवाक्यस्य तद्बोधजनकत्वम्। ततश्च वाक्यस्य तद्बोधजनकत्वेन तत्सम्बन्धित्वमवसीयते इत्यतो व्यवहारस्यैव शक्तिग्राहकत्वमित्येवमवसीयते शास्त्रकारैः। पश्चाच्च पदानामन्वयव्यतिरेकाभ्यां प्रत्येकपदशक्तिग्रहः तथा हि पुनश्च गां बधान घटमानयेत्यादिवाक्यश्रवणे नियोज्यस्य पूर्व्वापेक्षया विशेषकार्य्यं प्रवृत्तिदर्शनेन गवादिपदश्रवणसत्त्वे तत्कार्य्यकरणं तदभावे च तत्कार्य्याऽ-

करणमित्यन्वयव्यतिरेकाभ्यां तत्तत्पदानां विशेषार्थवाचकत्वावधारणमिति द्रष्टव्यम्। व्याकरणमपि तथा, तद्धि कर्मणि द्वितीयेत्यादिना द्वितीयादीनामर्थविशेषे प्रयोगनियमाय प्रवृत्तं द्वितीयादीनामर्थमध्यवगमयति तथा हि कर्म्मण्येव द्वितीया भक्ता न करणादौ, कर्मणि द्वितीयैव भक्ता न तृतीयेत्येवं द्विविधनियमपरतया प्रवृत्तं शास्त्रं नियमतद्विक्रमयोः पुण्यापुण्यफले दर्शयत् तत्तच्छब्दानां तत्तदर्थेष्वेव साधुतोक्त्या शक्तिमवगमयति। तदुक्तं भाष्यकारैः "सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। प्रसिद्धानियमस्तत्र नियमः प्रकृतेषु चेति"। उपमानमपि शक्तिग्राहकम्। यथा गोसदृशो गवय इत्युपदेशवाक्यं श्रुतवतोऽरण्यपुरुषस्य वनगमनादनन्तरं गोसदृशपिण्डदर्शनेनोपदिष्टं वाक्यं स्मरतश्च दृष्टक् पिण्डो गवयपदवाच्य इति भवति मतिरित्युपमानरूपोपदेशवाक्यस्य गवयपदशक्तिग्राहकत्वम्। तत्र च व्याकरणादीनामप्रवृत्तेः प्रकृतिप्रत्ययाधीनोपस्थितविषये एव व्याकरणस्य, रूढिविषये च कोषस्योपयोगात्तदभावाच्च तस्यैव तत्र तथात्वम्। कोषोऽपि अनपेक्ष्यैव प्रकृतिप्रत्ययादिविभागं केषाञ्चित् पदजातानां रूढित्वज्ञानाय प्रवर्त्तमानो मण्डपघटादिशब्दानां शक्तिमवगमयति। आप्तवाक्यमपि तथा, व्याकरणादिशक्तिधीहेत्वज्ञानेऽपि यथार्थज्ञानवतात्तोपदेशेन तत्तच्छब्दानां तत्तदर्थेषु शक्तिग्रहः। व्यवहारतस्तु दर्शितः। वाक्यशेषोऽपि तदुपपत्तौ हेतुः यथा स्वर्गकामोयजतेत्यादौ श्रुतस्वर्गपदस्य अर्थविशेषमजानतामधिकारिणां तच्छक्तिबोधनाय प्रवृत्तेन "यच्च दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति" वाक्यशेषब्राह्मणेन दुःखासंभिन्नत्वादिमति सुखविशेषे एव स्वर्गपदस्य शक्तिग्रहः। व्याख्यानरूपा टीकादिपदार्थाभिधेया विवृतिरपि तत्तच्छब्दानां तत्तदर्थेषु शक्तिं ग्राहयति यथा पचतिपदस्य पाकं करोतीति व्याख्या पाककर्त्तृत्वेऽन्वयात्। प्रसिद्धपदसामानाधिकरण्यमपि तदुपपत्तौ हेतुः। पिकादिशब्दार्थमविदुषाप्तोपदेशाय प्रवृत्तेन सहकारतरौ मधुरं रौति पिक इति वाक्येन प्रत्येकशक्त्या ज्ञातशक्तिकपदोपस्थापितार्थे मधुरशब्दकारके पिकशब्दस्य शक्तिग्रहः। एवं कोषादावपि "सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूजद" इत्यादौ प्रसिद्धपदोपस्थापितार्थे सत्कार पूर्व्वकालङ्कृतकन्यादातरि कूजदपदस्य शक्तिग्रहः। अत्र च प्रसिद्धपदसान्निध्यं नाम अर्थविशेषे निश्चितशक्तिकपदसामानाधिकरण्यम् सामानधिकरण्यञ्च स्वबोध्यार्थाभेदेनान्वयबोधजनकत्वम्। वैयाकरणमते चाख्यातप्रथमान्तार्थयोरभेदेनान्वयस्वीकारः। अतो मधुरं रौति, कन्यां ददातीत्यादावाख्यातान्तस्य प्रथमान्तसामानाधिकरण्यं सुलभमेव। अतएव च भाष्ये "लटः शतृशानचावप्रथमासमानाधिकरणे" इति सूत्रे अप्रथमासमानाधिकरणे इति निर्देशादन्यत्र लटः प्रथमान्तसामानाधिकरण्यसुपपादितमुपपादितञ्च "आदेशे सामानाधिकरण्यं दृष्टानुमानाङ्गत्वं स्थानिनः सामानाधिकरण्यमित्यादिना" लटः स्थानिलकारसामान्यस्य प्रथमान्तसमाधिकरण्यम्। एतेन ददानः कूजदः स्मृत इत्यादि पाठकल्पनमपि परेषामसमादेयमेवेति"।

अभिधान न० अभि+धा–भावेल्युट्। १ कथने। करणे ल्युट् १नामनि, २शब्दार्थप्रतिपादके निघण्टुकोषादिनामके ग्रन्थे च। तथा च शब्दादानामर्थविशेषे शक्तिग्राहकं कोषादिकमेव अभिधानशब्दवाच्यम् तच्चामरादिनामा कोषादिकम्। तत्र च प्रायेण एकार्थवाचकानां पर्य्याय शब्दानां क्वचिच्च नानार्थानामपि शब्दानां संघ उपदिष्टः तेषां शक्तिग्राहकत्वञ्च अभिधाशब्दे दर्शितम्।

अभिधानी स्त्री आभिधीयते आभिमुख्येन धीयते बध्येऽनया अभि+धा–करणे ल्युट्। १ रज्ज्वौ तया हि बध्यमानेन बध्यमाभिमुख्येन स्थाप्यते। "इषामग्भ्रुरशनामृतस्य इत्यस्याभिधानीमादत्ते" इति तै० ब्रा०। "अभिधानीं रशनामिति" भा० "तस्या इन्द्रोवत्स आसीद्गायत्रमभिधान्यभवमूधः" अथ० ८,१०,१२। "भूमोक्तीभिरभिधानीभिर्हिता भवन्ति" कात्या० २,४।

अभिधामूला स्त्री अभिधा मूलं यस्याः। आलङ्कारिकोक्तौ व्यञ्जनाभेदे। अभिधाश्रयाव्यत्व अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया" आद्यशब्दाद्विप्रयोगादयः"। उक्तं हि "संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालोव्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः" इति यथा सगदश्चक्री हरिः" इत्यत्र गदाचक्रसंयोगेन हरिशब्दोयमुभयाभिधत्ते। अगदश्चक्री हरिः इति वियोगेन तमेव। भीमार्জ্জुनौ इति अर्জ্জुनः पार्थः। कर्णार्জ্জुनौ इति कर्णः सूतपुत्रः। स्थाणुं वन्दे इति स्थाणुः शिवः

सर्वं जानाति देवः इति देवोभवान् । कुपितोमकरध्वजः इति मकरध्वजः कामः । देवः पुरारिः इति पुरारिः शिवः । मधुना मत्तः पिकः इति मधुर्वसन्तः । पातु वोद्वियतासुखमिति साम्मुख्यम् । विभाति गगने चन्द्रः इति चन्द्रः शशी । निशि चित्रभानुः इति चित्रभानुर्वह्निः । भाति रथाङ्गम् इति नपुंसकव्यत्यया रथाङ्गं चक्रम् । स्वरस्तु वेदे एव विशेषप्रतीतिकृत् न काव्यादौ तस्य विषयोऽतोनोदाहृत इति, यथा । दुर्गालङ्घितविग्रहो मनसिजं सम्मोलयंस्तेजसा प्रोद्यद्राजकलो गृहीतगरिमा विश्वग्वृतो भोगिभिः । नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् गामाक्रम्य विभूतिविभूषिततनू राजत्युमाल्लभः । अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नी महादेवी तद्वल्लभभानुदेवन्दपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते" सा० द० ।

अभिधायक त्रि० अभि+धा–ण्वुल् । वाचकशब्दे "लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति का० वृत्तिः २ तत्तच्छब्दोच्चारके च ।

अभिधायिन् त्रि० अभिधत्तेकथयति अभि+धा–णिनि स्त्रियां ङीप् । १ कथके २ शब्दप्रयोक्तरि । "त्वं सुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्दोटिकां संसृणीति "अमरशतकम् वाचकशब्दे च "प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः वेदान्ता यदि शास्त्राणि बोद्धैः किमपराध्यते इति ।

अभिधावक त्रि० आभिमुख्येन धावति अभि+धाव–ण्वुल् । आभिमुख्येन वेगेन गन्तरि । [यिदुमिच्छायां विवक्षायाम् ।

अभिधित्सा स्त्री अभिधातुमिच्छा अभि+धा–सन्–अ । कथ-

अभिधृष्णु त्रि० अभि+धृष–नु । अत्यन्तधर्षके । "तस्माद्ब्रह्मणः पश्चूनभिधृष्णुतम" शत० ब्रा० ।

अभिधेय त्रि० अभिधीयते अभिधाशक्त्या बोध्यते अभि+धा–कर्मणि यत् । वाच्यार्थे सङ्केतयति शब्दार्थे । आविष्कारातिशयोभिधेयवत् प्रतीयते" सा० द० "अभिधेया विनाभूतप्रतीतिर्लक्षणोच्यते का० प्र० अन्यप्रतिपाद्ये च" "इतिप्रयोजनाभिधेयसम्बन्धा" इति मुग्धबोधम् "एतेनाभिधेयश्च दर्शितम् सा० द० ।

अभिधा स्त्री अभि+धे–अङ् । १ परधनस्याजिहीर्षायां, २ जिघृक्षायां, ३ विषयप्रार्थनायां ४ चिन्तने, च । अभिध्यायतेश्चिन्तनार्थत्वात् तथात्वम् "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजा इति" मनुना आलोचने अभिध्यायतेः प्रयोगात् तस्यास्तथार्थत्वम् । "अभिध्योपदेशाच्च" शा० सू० ।

अभिध्यातव्य त्रि० अभि+ध्या–तव्य । सततचीन्तनीये । "यः पुनरेतं त्रिमात्रेणौमित्येतेन परं पुरुषमभिध्यायीतेति" श्रुत्या "परमेव ब्रह्माभिध्यातव्यमित्युपदिश्यते" शा० भा० ।

अभिध्यान न० अधि+ध्यै–भावे ल्युट् । १ अभिध्याशब्दार्थे २अभितोध्याने च तत्र भिन्नजातीयप्रत्ययवानन्तरितोऽविच्छिन्न एकजातविषयप्रत्ययसन्तानः । "तदभिध्यानादेवतल्लिङ्गात्" शा० सू० ।

अभिनद्ध त्रि० अभितो नद्धः बद्धः अभि+नह–क्त । सर्वतो बद्धे "यथा सौम्य । पुरुषमभिनद्धात्तमिति" छा० उ० "अभिनद्धात्तं बद्धात्तम्" भा० "परिरब्धरुचिं ततिर्जलानामभिनद्धा रसमानसारसेन" माघः ।

अभिनन्द पु० अभि+नन्द्–घञ् । १सन्तोषे, २प्रतिपाद्यगुणकथनादिनाऽऽनन्दे ३ प्रशंसायाम् ४अल्पसुखे च "योनिरर्चियदन्तः करोति तेऽङ्गारा अभिनन्दाः विस्फुलिङ्गाः छा० उ० "अभिनन्दाः सुखलवाः" भा० । अभिनन्दयति । अभि+नन्द्–णिच्–अच् । ५ सन्तोषके ६ प्रोत्साहनेन प्रवर्त्तके च त्रि० । अभितो नन्दत्यत्र आधारे घञ् । अत्रस्थ सकलत्वादि गुणप्रशंसनप्रवर्त्तकभ्रान्तिभेदे । तत्र हि स सुखायते । अभितोनन्दः । आत्मनन्दमये परमात्मनि इति वेदान्तिमते । नैयायिकादिमते तु अभितोनन्दः दुःखाभावो यत्र ७ब० । परमात्मनि, सर्वदुःखशून्यत्वात्तस्य तथात्वम् । भारादिदुःखापनयेऽपि भारादिवाहकानाम् अहं सुखी संवृत्तः इति प्रतीते र्दुःखाभावेऽपि सुखत्वोपचारदर्शनात् ईश्वरस्य सदा दुःखाभावाच्च तथात्वम् ।

अभिनन्दन न० अभि+नन्द्–भावे ल्युट् । १ सन्तोषे । णिच्–ल्युट् । सन्तोषार्थं २ प्रशंसने । कर्त्तरि ल्यु । ३ सन्तोषके प्रोत्साहनार्थं ४ प्रवर्त्तके ५ प्रशंसके च त्रि० । ६ बुद्धभेदे पु० ।

अभिनन्दनीय त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द्–णिच् कर्मणि अनीयर् । १प्रशंसनीये २प्रोत्साहनेन प्रवर्त्तनीये च ।

अभिनन्दित त्रि० अभि+नन्द्–णिच्–क्त । १प्रशंसिते २अनुमोदनेन प्रोत्साहिते च ।

अभिनन्दिन् त्रि० अभिनन्दति णिनि । १ सन्तोषिणि । अभिनन्दयति णिनि । २ अनुमोदनेन प्रोत्साहके । स्त्रियामुभयत्र ङीप् ।

अभिनन्द्य त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द्–णिच्–यत् । १ प्रशंसनीये "जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ" रघुः अभि+नन्द्–णिच् ल्यप् । प्रशस्येत्यर्थे अनुमोदनेन प्रोत्साहयेत्यर्थे अव्य० ।

अभिनम्र त्रि० अभिमुखं नम्रः प्रा० स० । आभिमुख्येन नम्रे नते "दूर्वां तटाघातलताश्च तन्वीं स्तनाभिरामस्तवकाभिनम्राम्" रघुः ।

अभिनय पु० अभि–नी–करणे अच् । १ कृतभावव्यञ्जके शरीरचेष्टादौ । भावे अच् । २ अभिनेयपदार्थस्य शरीरचेष्टाभाषणादिभिरनुकरणे "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्यः सात्त्विकस्तथेति" नटैरङ्गादिभिः रामयुधिष्ठिरादीनामवस्थानुकरोऽभिनयः सा० द० । नर्त्तकीरभिनयातिलङ्घिनीति" रघुः । नानाभिनयसम्बन्धात् भावयन्ति रसान् यतः" सा० द० तदभिनयमिवाचरिवर्णनामामतनुत नूतनपल्लवाङ्गुलीभिः माघः । "अङ्गैराङ्गिकमेवेदं कृत्स्नमर्थं प्रकाशयेदित्युक्तादिशा व्यङ्गकचेष्टामतनुतेत्यर्थः । "धीरिरित्यभिनयादिवोचुषैः" माघः । अभिनयति बोधयत्यर्थमत्र आधारे अच् । शरीरचेष्टादिभिर्व्यङ्ग्यपदार्थप्रापके २ रूपकादौ दृश्यकाव्ये ।

अभिनव पु० अभि+नु–भावे अप् । आनुकूल्यार्थस्तवे । अभिगतः प्रशस्तः नवः प्रा० स० । प्रथमोद्भूते नवीने त्रि० । "रथाङ्गनाम्नेऽभिनवं वराय" माघः । "अभिनवा इव मदविशेषकाः" रघुः ।

अभिनवतामरस न० "अभिनवतामरसं ननजाद्वय" इति छन्द० उक्ते द्वादशाक्षरपादके १ वृत्तभेदे । २ नूतनपद्मे च ।

अभिनवोद्भिद् (द्) पु० अभिनवमुद्भिद्य जायते उद्+भिद्–क्विप् क वा । अङ्कुरे । [दृढबन्धने च ।

अभिनह्न न० अभि+नह्–भावे क्त । १ अभितो बन्धने

अभिनिधन त्रि० अभिगतं निधनम् अत्या० स० । १ नाशाभिमुखतां प्राप्ते नाशोन्मुखे । निधनस्य समाप्तेर्वाभिमुख्यम् अव्ययी० । २ नाशावसानयोराभिमुख्ये अव्य० तत्र पाठे १ सामभेदे च । "आभीक्ष्णमभिनिधनमाभीक्ष्ण्यानि" कात्या० २५, १३, १५, "आभीक्ष्ण्याद्यानि सामानीति" कर्क० ।

अभिनिधान अभि+धा–भावे ल्युट् । १ आभिमुख्येन स्थापने । "संयम्य पुरुषवा दत्वभिनिधानतया" कात्या० ५, १, २१ ।

अभिनिर्मुक्त पु० अभितः सर्व्वतः सायन्तनकर्म्मणा निर्मुक्तः । १ सूर्य्योदयादौ निष्पादनात् समाप्तसायन्तनकर्त्तव्यकर्म्मणि । "सूर्य्येण कृताभिनिर्मुक्तः यदानोऽभ्युदितश्च यः प्रायश्चित्तमकुर्वाणोयुक्तः स्यात्कृतैनसा" मनुः एतद्वचनस्य ब्रह्मचारिप्रकरणत्वात् ब्रह्मचारिगतेवर्त्तमानेऽस्य रूढिः ।

अभिनिर्य्याण न० अभिलक्ष्य रिपून् निर्य्याणम् युद्धार्थं निष्क्रमः । रिपुजिगीषया सैन्यैः सह निष्क्रमणे ।

अभिनिर्वृत्त त्रि० अभि+निर्+वृत–क्त । १ निष्पन्ने ।

अभिनिर्वृत्ति स्त्री० अभि+निर्+वृत–क्तिन् । १ निष्पत्तौ ।

अभिनिवर्त्त पु० अभि+नि+वृत–भावे घञ् । १ अभितो निवृत्तौ । षत्वम् । अभिनिवर्त्तम् । पुनः पुनर्भवेत्यर्थे अव्य० । "पुनरभिनिवर्त्तन्ते ऋत्विजोभक्षयन्ति तस्माद्वत्सश्च मासश्चान्योन्यमभिनिवर्त्तन्ते" श्रुतः० ब्रा० ।

अभिनिविष्ट त्रि० अभि+नि+विश–कर्त्तरि क्त । १ अभिनिवेशयुक्ते २ चिन्तयाव्यग्रे ३ चिन्तनाय प्रवृत्ते च "निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता" सा० द० ।

अभिनिवेश पु० अभितोनिवेशः घञ् । अवश्यमिदं कर्त्तव्यमित्याग्रहसमन्विते मनःसंयोगभेदे योगशास्त्रप्रसिद्धे मरणभीतिजनके अज्ञानविशेषे, अनिष्टैरपि देहादिभिर्वियोगो मा भूदिति मरणनिवारणार्थे आग्रहे च । योगशास्त्रे हि अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः दर्शिताः क्लिश्नन्ति कर्म्मतत्फलप्रवर्त्तकाः सन्तः पुरुषं दुःखाकुर्व्वन्ति क्लेशाः पञ्च । उत्तरेषामविद्याप्रसवत्वमपि तत्रोक्तम् । "अविद्याक्षेत्रमुत्तरेषामप्रसुप्ता तनुविच्छिन्नोदाराणाम्" पा० सू० उत्तरेषामस्मितादीनामविद्या क्षेत्रं प्रसवभूमिः तेषाञ्च अप्रसुप्ता विवेकख्यात्यभावेनादग्धतया शक्तिरूपेणावस्थानात् अतएव ते पुनरुद्भवन्ति ते च क्रियायोगिनां तनवः, विषयसङ्गिनां विच्छिन्ना उदाराश्च भवन्ति । यथा यत्र रागस्तत्र क्रोधो विच्छिन्नः सुरतां राग उदारः । एवं यत्र क्रोध उदारस्तत्र रागोविच्छिन्न एवं रागादयः विच्छिन्नोदाराभूत्वा पुरुषमपि क्लेशयन्ति एवं च क्लेशा अविद्याभूताः अविद्यायाः पुरुषविवेकख्यात्याभिनिवृत्तौ निवर्त्तन्ते । एवं सामान्यतः क्लेशानुच्छादाभिनिवेश उक्तः "स्वरसवाही विदुषोऽपीऽभिनिवेशः" इति । विदुषोमूर्खस्य वा जन्तुमात्रस्य यो मरणत्रासः सोऽभिनिवेशः यथा मूर्खस्य अहं सदा भूयासं न कदापीति रूढः त्रासस्तथा विदुषोऽपि दृश्यते यतः स्वरसवाही सः, पूर्व्वजन्मसु अनुभूतमरणदुःखानुभवजन्यवासनासंघः स्वरसः तेन वहति प्रवर्त्तते इति स्वरसवाही । ते चाविद्यादयः पञ्च क्रमेण तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः । सांख्यकारिकायाञ्च पञ्च विपर्य्ययभेदाउदाहृत्य । "भेदस्तमसोऽष्टविधो-

मोऽस्य च दशविधोमहामोहः । तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः" ॥ अन्धतामिस्रः अभिनिवेशस्त्रासः तथेत्यनेनाष्टादशधेत्यनुषज्यते । देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् भुञ्जानाः शब्दादयोभोग्यास्तदुपायाश्चाणिमादयोऽस्माकमसुरादिभिर्मा स्म उपधानिषतेपि बिभ्यति । तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविधत्वात् अष्टादशधेति" सा०कौ०। २ आसक्तौ च "अथानुरूपाभिनिवेशतोपिणा" कुमा० ।

अभिनिवेशिन् त्रि० अभि+नि+विश–णिनि स्त्रियां ङीप् । १ आग्रहवति २ अनुरागवति च ।

अभिनिष्कारिन् त्रि० अभि+निस्+कृ–णिनि स्त्रियां ङीप् । अभितोनिःशेषेण कारिणि "कृताकृतो वह्निनोऽभिनिष्कारिणः प्रजाम्" अथ० १०,१,३१ ।

अभिनिष्क्रम पु० अभि+निस्+क्रम–घञ् । आभिमुख्येन निर्गतौ ल्युट् । अभिनिष्क्रमणमप्यत्र न० । [निर्गते ।

अभिनिष्क्रान्त त्रि० अभि+निस्+क्रम–कर्त्तरि क्त । अभि-

अभिनिष्ठान पु० अभि+स्थान–घञ् शब्दसंज्ञायां षत्वम् । १विसर्जनीये । "नाम चार्द्धं दद्युर्धोषवदाद्यन्तस्यमभिनिष्ठानान्तम्" स्मृत्यर्थसारः । २ अक्षरमात्रे च शब्दमात्रे तु न षत्वम् । अभिनिस्थान इत्येव । [निर्गमे ।

अभिनिष्पतन न० अभि+निस्+पत–ल्युट् । आभिमुख्येन

अभिनिष्पत्ति स्त्री अभि+निस्+पद–क्तिन् । १ सम्पत्तौ सिद्धौ यस्य यथारूपमुचितं तथारूपेण तस्य भवने २उत्पत्तौ च ।

अभिनिष्पन्न त्रि० अभि+निस्–पद–क्त । १सम्पन्ने २सिद्धे च ।

अभिनीत त्रि० अभिनीयते स्म अभि–नी क्त । न्याय्ये, १युक्ते "अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः" भा०शा०प० । २भूषिते ३अतिसंस्कृते ४पूजिते ५शोभने, यस्याभिनयः कृत्याद्यकरणं चेष्टादिभिः कृतस्तत्किन् ६ आभिमुख्येन ७प्रापिते च "मितार्थमभिनीतत्वम्" रामा० ।

अभिनीति स्त्री आनुकूल्यार्था युक्तिः । १ प्रियवाक्यादियुक्तयुक्तौ । "साम्नैवपूर्व्वमभिनीतिहेतुकम्" किरा० । २अभितः प्रापणे च कृपादेर्दैन्यादिना ३ अनुकरणे च । नीतेराभिमुख्यम् अव्ययी० । ४ नीत्याभिमुख्ये अव्य० ।

अभिनेतव्य त्रि० अभि+नी–कर्म्मणि तव्य । देहचेष्टादिना १अनुकार्य्ये आभिमुख्येन २ प्रापणीये च । भावे तव्य । आवश्यकाभिनये न० । [अनुकरणकर्त्तरि नटादौ ।

अभिनेत्र त्रि० अभि+नी–त्रच् स्त्रियां ङीप् । नाटके देहादे-

अभिनेय त्रि० अभि+नी–कर्म्मणि यत् । १ देहादिचेष्टादिना १अनुकार्य्ये आभिमुख्यं २प्रापणीये च ।

अभिन्न त्रि० न भिन्नः । १एकरूपतापन्ने २अविदलिते ३अविदारिते च "भूयोभूयोरयिमिदस्य वर्द्धयन्नभिन्ने खिल्ये" ऋ० ६,२८,२ "अभिन्ने शत्रुभिरभेद्ये" भा० । "न भिन्नां कृष्णासुपदध्यात् आर्क्षति वा एषा या भिद्यते" इत्युपक्रम्य "नाभिन्नां परास्येदिति" शत० ब्रा० । ४अमग्ने दृढे, "अभिन्नेन चरेत्" कात्या० २६,७,४८, "अभग्नेनदृढेन" कर्क० ।

अभिन्नपुट पु० अभिन्नं न विदलितं पुटं यस्य । नवपल्लवे "दूर्व्वाप्रवालाङ्कुरसन्निभत्वगभिन्नपुटोत्तरान्" रघु ।

अभिन्यास पु० अभिन्यस्यते अन्तःस्थ आत्मा बहिष्करणेन अभि+नि–अस–करणे घञ् । ज्वरमुपक्रम्य, "श्वसनं निपतितः शेते प्रलापोपद्रवायुतः । तमभिन्यासमित्याहुर्हृतौजसमथापरे" सुश्रुतोक्ते ज्वरभेदे "निद्रालुं तमभिन्यासं क्षीणमेनं हृतौजसमिति" सुश्रुतः ।

अभिपत्ति स्त्री अभि+पद–क्तिन् । निश्चत्तौ ।

अभिपन्न त्रि० अभि+पद–क्त । १ अपराधवति, २ आपन्नते, ३खीकृते, ४आभिमुख्येन गते च ।

अभिपित्व न० अभि+पा–भावे कित्वन् । १अभिपतने २आगमनकाले "विश्वं जगदभिपित्वे मनीषा" य० ३३,३४, "अभिपित्वे अभिपतने आगमनकाले" वेददी० । ३अभिमतप्राप्तौ "हृदन्तमिहाभिपित्वम् करते स्थानः" ऋ० ४,१६,१, "अभिपित्वमभिमतप्राप्तिम्" भा० । ४ अभितः प्राप्तौ "तवेदिन्द्रो अभिपित्वेषु रण्यति" ऋ० १,८३,६, "अभिपित्वेषु अभिप्राप्तिषु" भा० कृच्छ्राभिपित्वं करतः कृशोषतः ऋ० १०,४०,२, "इमामेव ऋचमभिप्रेत्य "क्व स्थिरौ भवथः क्व दिवा क्वाभिप्रापिं कुरुथ" इति याज्ञेन अभिप्रापिपरत्वमस्य कृचित्तम् । कर्म्मणि कित्वन् । ५अभिपतनीये, "नोविश्वं जगदभिपित्वे मनीषा" १,१८६,१, "अभिपित्वे अभिपतनीये" भा० ६अभिगन्तव्ये, "कृविभिर्भिपित्वे सजोषाः" ऋ० १,१८६,६, "अभिपित्वे अभिगन्तव्ये" भा० ७अभिप्राप्ते "यत्कृष्णीमाबध्नेदभिपित्वं जगाम" ऋ० ७,१८,६, "इत्थाधिये अभिपित्व आरात्" ऋ० ८,५,२१, अभिपित्वे अभिप्राप्ते भा० । ८आसन्नकाले "कच्चीवां अभिपित्वे अक्रान्" ऋ० १,१२६,३ "अभिपित्वशब्दस्यासन्नकालवाचीति" भा० ९अभिप्राप्तकाले "अभिपित्वेमनवे शासः" ऋ० १,१८६,७, "अभिपित्वे अभिप्राप्तकाले" भा० ।

अभिपुष्प पु० अभितः पुष्पमस्य । १ सर्वतः पुष्पवति वृक्षे ।

अभिपूरण न० अभ्यासेन अभितो वा पूरणम् प्रा०स० । अभ्यासेन सर्वतः पूरणे "अभिप्लवाभ्यासेनाभिपूरणम्" कात्या० २४,३,२३, ।

अभिप्रज्ञा स्त्री अभितः सततं प्रज्ञा चिन्तनम् । सततचिन्तने "तमशनायापिपासे अब्रूतामावाभ्यामेवाभिप्रजानीहि" ऐ०भा० अभिप्रजानीहि चिन्तयेति व्याख्यानात्तस्यार्थत्वम् ।

अभिप्रणयन न० अभितः सर्वतः प्रणयनं संस्कारः । वेदविधिना अग्न्यादेः संस्कारे ।

अभिप्रणीत पु० अभितः प्रणीतः । सर्वतः वेदविधिना संस्कृते वह्न्यादौ "जज्वाल लोकस्थितये स राजा यथाध्वरे वह्निरभिप्रणीतः" भट्टिः ।

अभिप्रमुर् स्त्री अभिप्रमूर्च्छति आहुतिदानेन वह्निरनया । १ अभि+प्र+मूर्च्छ करणे क्विप् । जुह्वाम् ।

अभिप्रवर्त्तन न० अभितः प्रवर्त्तनम् । १सर्वतः प्रवृत्तौ २सर्वतः प्रवृत्तिसम्पादने च "त्वक्खादोरोमहर्षश्च खेदस्चाभिप्रवर्त्तनम्" सुश्रुतः ।

अभिप्रातर् अव्य० अत्यन्तं प्रातः । १ अतिप्रत्यूषे "अथाभिप्रातरेव स्थालीपाकाद्यताज्यमिति" शत०ब्रा० ।

अभिप्राप्ति स्त्री आभिमुख्येन प्राप्तिः प्रा०स० । १ आभिमुख्येन प्राप्तौ अभिपित्वयज्ञे उदाहृतं निरुक्तवाक्यम् ।

अभिप्राय पु० अभि+प्र+इण-भावे अच् ।१ आशये । "तेषां स्वंस्वमभिप्रायमुपलभ्य पृथक् पृथक्" मनुः ।"सर्वानभिप्रायकृतान् भार्य्यालभत कौरव" भा०उ०प० अभिप्रैति कर्त्तरि पचा० अच् । २ अभिगामिनि "स्वरितञित आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा० कर्त्रभिगामिनीति व्याख्याकारः मणिकृता तु एतत्सूत्रं कर्तुरीप्सिततापरतया व्याख्यातम् तच्चापूर्वयज्ञे २५० पृष्ठे दर्शितम् । अभिप्रेयते पुरुषार्थकाङ्क्षिभिः आभिमुख्येन प्रलयेऽभिप्रैति जगदस्मिन् वा कर्मणि आधारे वा अच् । ३विष्णौ "अभिप्रायः प्रियार्होऽर्हः" इति वि०सह० ।

अभिप्री त्रि० अभिप्रीणाति अभि+प्री-क्विप् । १ सर्वतस्तर्पके "लभ्यं वाता अभिप्रियस्तुभ्यं संयन्ति सिन्धवः" ऋ०९,३१,२

अभिप्रेत त्रि० अभि+प्र+इण-क्त । १अभिलषिते "अभिप्रेतार्थसिद्धिर्मङ्गलम् "कामाय तु भवेत् काम्यमभिप्रेतार्थसिद्धये" भवि०पु० ।

अभिप्रेत्य अव्य० अभि+प्र+इण-ल्यप् । १ उद्दिश्येत्यर्थे । "यदभिप्रेत्य दातव्यं तदभ्युद्यमनमिति" व्याकरणान्तरम्

अभिप्रेषु त्रि० अभि+प्र+आप-सन-उ । प्राप्तुमिच्छौ "सङ्कासनमभिप्रेषुरुत्कृष्टस्यापकृष्टजः" "ऐन्द्रं स्थानमभिप्रेषुः" इति च मनुः ।

अभिप्रोक्षण न० अभितः प्रोक्षणं संस्कारभेदः । १ जलादिना सर्वतः सेचनरूपे वैधे संस्कारे ।

अभिप्लव पु० अभिप्लवन्ते स्वर्गमभिगच्छन्ति अभि+प्लु-गतौ अच् । १ प्राजापत्ये आदित्ये । "अथादित्याश्च आङ्गिरसश्च उभये प्राजापत्या अस्पर्द्धन्त वयं पूर्वे स्वर्गं लोकमेष्यामो वयं पूर्वे इति । आदित्याश्चतुर्भिः स्तोमैश्चतुर्भिः पृष्ठ्यैश्चतुर्भिः सामभिः स्वर्गं लोकमभ्यप्लवन्त तस्मादभिप्लवाः आदित्याः" शत०ब्रा० । वर्षसाध्ये गवामयने प्रत्येकमासीय चतुर्विंशतिदिवसेषु चतुःषट्कात्मकेषु चतुर्षु षडहेषु विशेषः गवामयनशब्दे वक्ष्यते । "अभिप्लवः षडहः षड्यज्ञानि भवन्त्यभिप्लवः" इति शत०ब्रा० । "अभिप्लवं पूर्व्वं पुरस्ताद्विषुवत् उपयन्ति चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवमिति" च शत०ब्रा० । २षड्हसाध्ये सोमादिपाठसाधनके गवामयनाङ्गयागभेदे च । ३उपप्लवे उपद्रवे ५सर्व्वतः प्लवने च । अभिप्लवे विहितः ठक् । आभिप्लविकः उक्तषड्हेषु विहिते सामादौ । [सिद्धो च ।

अभिप्लुत त्रि० अभि+प्लुत-क्त । १ सर्वतोव्याप्ते २अभितः

अभिभङ्ग त्रि० अभितोभङ्गोयस्मात् । १ भङ्गहेतौ "अभिभुवेऽभिभङ्गाय वन्यते" ऋ०२,२१,२, अभितोभङ्गः । २सर्वतोभङ्गे पु० । अभितोभङ्गो यस्य । ३भङ्गशीले त्रि० ।

अभिभव पु० अभि+भू-अप् । पराजये, तिरस्कारे, अनादरे, च । "रघोरभिभवाशङ्की चुक्षुभे द्विषतां मनः" रघुः "अलभ्यशोकाभिभवेयमाकृतिर्विमानना शुभ्रु! कुतः पितुर्गृहे" कु० "अधर्माभिभवाच्चैव प्रदुष्यन्ति कुलस्त्रियः" गीता । रोगादिना गात्रादिजड़ीभावे "दृषत्सिङ्घ दृष्टिकघटैर्विद्धि स्थानं गमागमौ न स्तः । न क्षतं न चापि नष्टं न रोगशान्तिर्नचाभिभवः" षट् पञ्चाशिका ।

अभिभवन न० अभि+भू-ल्युट् । १ अभिभवे रोगादिनाक्षानरोधे "जरया चाभिभवनं व्याधिभिश्चोपपीडनम्" मनुः

अभिभा स्त्री अभि+भा-अङ् । १ अभिभवे "भा त्वा काचिदभिभा विश्वावित्" ऋ० २,४२,१ । "अभिभा अभिभवः" भा० ।

अभिभार त्रि० अभिर्भर्त्सार्थे अतिशयितो भारो यस्य । अतिभारान्विते "चतुरुपसदति तद्यज्ञमभिभारं करोति तेन वज्रेणाभिभारेणैमं लोकानुप्रभिनत्ति" शत०ब्रा० ।

अभिभावक त्रि० अभि+भू–ण्वुल् । १ अभिभवकर्त्तरि २तिरस्कारके ३पराजेतरि ४जड़ीभावकारके च ।

अभिभाविन् त्रि० अभिभवति अभि+भू–णिनि स्त्रियां ङीप् । १तिरस्कारके २ पराजेतरि "सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना" रघुः । ट्यच् । अभिभवितायत्र ।

अभिभावुक त्रि० अभि+भू–उकञ् । १ तिरस्कारके २पराजेतरि ३जड़ीभावकारके च । [मुख्येन कथने ।

अभिभाषण न० आभिमुख्येन भाषणम् प्रा०स० । १ आभि-

अभिभाषिन् त्रि० आभिमुख्येन भाषते अभि+भाष–णिनि स्त्रियां ङीप् । आभिमुख्येन भाषिणि । "प्रसन्नमुखरागं तं स्मितपूर्व्वाभिभाषिणम्" रघुः ।

अभिभू त्रि० अभिभवति अभि+भू–क्विप् । १ अभिभावके २ तिरस्कारके "अभिभुवे अभिभङ्गाय वर्त्तते" ऋ०२,२१, २, "अभिभुवे अभिभवित्रे" भा० ।

अभिभूत त्रि० अभि+भू–क्त । १ किं कर्त्तव्यमिति ज्ञानशून्ये, २पराभूते, ३व्याकुले च । "सज्वरेणाभिभूत" इति ज्यो० ।

अभिभूति स्त्री अभि+भू–क्तिन् । १ पराभवे २अवज्ञायाञ्च अभिभवति कर्त्तरि क्तिच् । ३अभिभावके त्रि० । "गायत्रेण छन्दसे अभिभूत्यै स्वाहा" कात्या०२५,२ । "यस्य पूर्वी दीर्घनिद्रत्वमभिभूति पुष्यात्" ऋ० ४,२१,१ । अभिभूति अभिभावुकं बलम्" भा० । अतः संज्ञायामभिभूत आभरे" ऋ० १,५२,३ । "अभिभूते, शत्रूणामभिभवितः" भा० ।

अभिभूय न० अभि+भू–भावे 'भुवो भावे' पा० क्यप् । अभितोभावे "अभिभूयाय त्वा राष्ट्रम्" अथ० १९,३७,२ । अभि+भू–ल्यप् । तिरस्कृत्यर्थे अव्य० ।

अभिभूवन् त्रि० अभि+भू–क्वनिप् स्त्रियां ङीप् रत्व । अभिभावके "समजैषमिमा अहं सपत्नीरभिभूवरीः" ऋ० १०,१५९,९ ।

अभिमत त्रि० अभि+मन-कर्म्मणि क्त । १अभिमानविषयीभूते ममेदमिदमित्याकारमिथ्याज्ञानविषये २सम्मते ३आदृते ४अभीष्टे च "अभिमतफलसंसी चारु पुल्लोर वाल्लः" भट्टिः । भावे क्त । ५ अभिमाने मिथ्याज्ञाने न० ।

अभिमति स्त्री अभि+मन–क्तिन् । १अभिमाने, मिथ्याज्ञाने २आदरे, ३सम्माने, ४अभिलाषे च ।

अभिमनस् त्रि० अभिमुखं मनो यस्य । कर्त्तव्यप्रवणमनस्के । भट्टा० क्यङ् सलोपश्च अभिमनायते । "कान्तिं नाभिमनायेत कोधा स्थाणुसमोऽपि ते" भट्टिः ।

अभिमन्तव्य त्रि० अभि+मन–कर्म्मणि तव्य । ज्ञातव्ये "न सा स्त्रीत्यभिमन्तव्या यस्यां भर्त्ता न रज्यति" पुरा० । २अभिमानेन विषयीकर्त्तव्ये च ।

अभिमन्तृ त्रि० अभि+मन–तृच् स्त्रियां ङीप् । १अभिमानिनि "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्" मनुः । २सम्मानकर्त्तरि च ।

अभिमन्तोस् अव्य० अभि+मन-तोसुन् । अभिमन्तुमभिमानेन विषयीकर्त्तुमित्यर्थे "एष वै रुद्रियोऽग्निः सहैनमीश्वरः सपुत्रं सपशुमभिमन्तोः" शत० ब्रा० ।

अभिमन्त्र न० अभि+मन्त्र–भावे अच् । १ "मन्त्रसंस्कारयत्नेव मन्त्रार्थत्वेन संस्करेत् । शेषिणं तन्मना भूत्वा स्वादेतदनुमन्त्रणम् एतदेवाभिमन्त्रस्य लक्षणं वीप्सयाधिकम्" मीमांसोक्ते मन्त्रपाठपूर्वकेक्षणादिसंस्कारभेदे । ल्युट् । अभिमन्त्रणमस्यत्र न० "अभिमन्त्रणशेषो वा विशेषोपदेशात्" कात्या० ६,१,१९, "अभिमन्त्रणसंस्तरैः" कात्या०९,८,२१ ।

अभिमन्त्र्य अव्य० अभि+मन्त्र+ल्यप् । १ अभिमन्त्रणं कृत्वेत्यर्थे

अभि(धि)मन्थ पु० अभि(धि)मथ्नाति नेत्रम् । "दृङ्नैरेतैरभिष्यन्दैर्नराणामक्रियावताम् । तावन्त्यभि(धि)मन्थाः स्युर्नयने तीव्रवेदने" इति माधवोक्ते १ नेत्ररोगभेदे भावे घञ् । २मथनमन्थने । अवग्रयो० । मन्थदण्डस्याभिमुख्येऽव्र० ।

अभिमन्यु पु० कृष्णसुभद्रागर्भजाते अर्জ্জুনपुत्रे । स च युद्धे षड्भिः महारथैः परिवृत्य हतः । तत्कथा । "एतत्कुरु महेष्वास । राधेय ! यदि शक्यसे । अथैनं विमुखीकृत्य पश्चात् प्रहरणं कुरु । सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः । विरथं विधनुष्कञ्च कुरुष्वैनं यदीच्छसि तदाचार्य्यवचः श्रुत्वा कर्णो वैकर्त्तनस्वरान् । अक्षतो लघुहस्तस्य पृषत्कैर्द्वेनुराच्छिनत् । तस्याश्वानवधीद्भोजो गौतमः पार्ष्णिसारथी । शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन् । स्वरमाणास्वराकाले विरथं षण्महारथाः । शरवर्षैरकरुणा बालमेकमवाकिरन् । स छिन्नधन्वा विरथः खं धर्मसुपालयन् । खड्गचर्मधरः श्रीमानुत्पपात विहायसा । मार्गैः स कौशिकाद्यैश्च लाघवेन बलेन च । आर्জুनिर्व्योमचरद्रोन्मि श्येनं वै पक्षिराडिव । मय्येव निपतत्येष सासिरित्यूर्द्धदृष्टयः । विव्यधुस्तं महेष्वासाः समरे छिद्रदर्शिनः । तस्य द्रोणोऽच्छिनन्मुष्टौ खड्गं मणिमयत्सरुम् । क्षुरप्रेण महातेजास्तरमाणः सपत्नजित् । राधेयो निशितैर्बाणैर्व्यधमच्चर्म चोत्तमम् । वृत्रसिक्तमेषुपूर्णाङ्गः सोऽन्तरीक्षात् पुनः क्षितिम् । आस्थितश्चक्रुद्धस्य द्रोणं क्रुद्धोऽभ्यधावत" इति "विचेता न्यपतद्भूमौ सौभद्रः शरवीरहा । एवं

विनिहतो राजन् एको बहुभिराहवे" भा० द्रो० प० ॥

अभिमर पु० आभिमुख्येन म्रियतेऽत्र अभि+मृ आधारे अप्। १युद्धे। करणे अप्। २भये, अभिम्रियते यस्मात् अपादाने अप्। ३ मारणव्यापारे बधे ४ बन्धने च अभिमुखीभूय म्रियते कर्त्तरि अच्। ५ खड्गे ६ धनाशया प्राणनिरपेक्षतया हस्तिनं व्याघ्रं वाऽभियोद्धुमुद्यते च।

अभिमर्द पु० अभि+मृद्–भावे घञ्। १चूर्णीकरणे २निष्पीड़ने च। आधारे घञ्। ३ युद्धे, ४ मद्दे च। कर्त्तरि अच्। ५ मर्द्दनकर्त्तरि त्रि०।

अभिमर्द्दन न० अभि+मृद्–भावे ल्युट्। १ आरम्भकसंयोगनाशनेन चूर्णीकरणे २निष्पीड़ने च।

अभिमर्श(र्ष) पु० अभि+मृश(ष) भावे घञ्। १ स्पर्शे ध्वंसने च "पराभिमर्शेन तवास्ति कः करमिति" कुमा०। "हृताभिमर्शा(र्षा)मनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्य" भट्ट०। "परदाराभिमर्शे(र्षे)षु प्रवृत्तान् मनुर्महीपतिः" मनुः।

अभिमर्श(र्षि)क त्रि० अभि+मृश(ष) ण्वुल्। १स्पर्शकर्त्तरि २धर्षणकर्त्तरि च "न दुष्टः कश्चिदध्यासीत् परदाराभिमर्शकः" रामा०।

अभिमर्शन(र्षण) न० अभि+मृश(ष)–भावे ल्युट्। १ स्पर्शे "नीवीस्तनप्रावरणसक्थिकेशाभिमर्शनम् (र्षणम्)" मा०। "यः पुनः परनारीपरिधानग्रन्थिप्रदेशकुचप्रावरणजघनमूर्द्धकचादिस्पर्शनं साभिलाषं प्रवाचरति" मिता०। "यदोऽभिमर्शनम्(र्षणम्) काम्या० ६,८,१६, "तूष्णीं पिण्डनादीनां करणाभिमर्शन(र्षण)क्षत्तणधूपनप्रदहनोद्धरणावसेचनानि" काम्या० २६,१,२७ धर्षणे च "परदाराभिम(र्शे)र्षणम्" स्मृतिः।

अभिमाति त्रि० अभि–मेङ् कर्त्तरि क्तिन् न ह्रस्वम्। घातके। "विष्णोः क्रमोऽभिमातिघ्न"यजु० १२,५, "अभिमातिः घातकः" वेददी०। २शत्रौ पु० हेम०। "अग्ने! सहस्व पृतना अभिमातीरपस्य" ऋ० ६,२७, अभिमातिः शत्रुरुच्यते स्त्रीत्वमार्षम् अभिमातीन् शत्रून्" वेददी०।

अभिमातिन् पु० अभिमातमनेन अभि+मेङ्–भावे क्त वेदे पृ० न ह्रस्वम् इष्टा० इन्। शत्रौ। "बाधते विश्वमभिमातिनम्" ऋ० १,८५,३ "अभिमातिनम् शत्रुम्" भा०।

अभिमातिषाह् त्रि० अभिमातिं रिपुं सहते सह–क्विप्–वेदे षत्वम्। रिपुजयिनि "तद्वीरासो अभिमातिषाहः ऋ० ६,७,३, "अभिमातिषाहः शत्रूणामभिभवितारः" भा०

अभिमातिषाह त्रि० अभिमातिं रिपुं सहते सह–अण् उप० स० वेदे षत्वम्। रिपुजयिनि। "अभिमातिषाहोगवेषणः सहमान उद्भित्" अथ० ५,२०,११।

अभिमान पु० अभि+मन–घञ्। १ आत्मन्युत्कर्षारोपे, २ मिथ्यागर्व्वे–बलादिदर्पे, ३ प्रणये, ४ हिंसायाम्। ५ गर्वमात्रे "संकल्पयोनेरभिमानभूतम्" कुमा० ६ स्वरूपज्ञाने। "अनात्तस्य चाभिमानसामर्थ्यात्" कात्या० ६,५,१२ "अनात्तस्य अनात्तरसस्य सरसस्यैव सोमस्य सोमाभिमानसामर्थ्यात् सोमबुद्धिसामर्थ्यादिति सोमोयमिति बुद्धिरनात्तरसे अनभिषुते एव सोमे नाभिषुते" कर्क०। ७मिथ्याज्ञाने "अभिमानेन मानोमे जातिदोषेण वै मकान्" भा० शा० प०। "उत्पादादिसमुद्बोधः साधारण्याभिमानतः" सा० द०। मिथ्याज्ञानञ्च तदभावकोटि तत्प्रकारकं ज्ञानं यथा देहे आत्मत्वबुद्धिः आत्मनि च असतोऽप्युत्कर्षस्य ज्ञानम्। शुक्तिकायां रजतज्ञानम् मूर्खस्य पाण्डित्याभिमान इत्यादि। अभिमानमात्मधर्म इति वैशेषिकादयः। अन्तःकरणधर्म्म इति पातञ्जलादयो वेदान्तिनश्च। तत्र विपर्य्यासज्ञानमविद्या सा च बुद्धिधर्मः गर्व्वात्मकज्ञानम् अहङ्कारस्य वृत्तिभेदः। अहङ्कारश्चाभिमानवृत्तिकमन्तःकरणद्रव्यम्" सां० प्र० भा०। अभिमानोऽहङ्कारः सा० सू० "अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः" सा० का० अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः शक्तः खल्वहमत्र, मदर्थं एवायं विषयः, मत्तोनान्योऽत्राधिकृतः कश्चिदस्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति कर्त्तव्यमेतन्नायेति" त० कौ०। अन्तःकरणञ्च वृत्तिभेदात् त्रिविधमिति साङ्ख्यादयः" "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयोगर्वः स्मरणं विषया इमे" इति चतुर्विधवृत्तिसम्बन्धेन चतुर्विधं वेदान्तिनः स्वीचक्रुः। "न हि धनिनो दरिद्रस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न हि कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानशून्यस्य तदेव कुण्डलित्वनिमित्तं सुखं भवति" भा० भा०। अभितोमानः। दम्भकारणावस्थाभेदे। "विप्रलम्भोऽथ सम्भोग इत्येष द्विविधोमतः स

च पूर्व्वरागमानप्रवासात्मकश्चतुर्व्वा स्यात् । मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि" सा० द० अधिकं मानशब्दे । दुर्वैर्निर्यातने, "अभिमानधनस्खलत्वरैः" किरा० । अभिमानेन निर्वृत्तं ठक् । आभिमानिक अभिमानसाध्ये त्रि० ।

अभिमानित त्रि० अभिमानोगर्वोजातोऽस्य इतच् । जातगर्व्वे १जाताभिमाने अभि+मन+णिच्—आधारे क्त । २अभिमानसाधने मैथुने सुरते न० ।

अभिमानिन् त्रि० अभि+मन—णिनि स्त्रियां ङीप् । १गर्वयुक्ते २प्रणयकोपादियुक्ते च सौम्यस्य मनोः २सुतभेदे पु० । "तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च अभिमानी प्रवीणश्च जिष्णुः संक्रन्दनस्तथा । तेजस्वी सबलश्चैव सौम्यस्यैते मनोः सुताः, हरिवं० । ३मिथ्याज्ञानयुक्ते त्रि० । "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" भा० सू० । "यतोभिमानिव्यपदेश एषः । रुद्रादयोभिमानिन्योवागाद्यभिमानिन्यश्चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते" भा० भा० ।

अभिमानुक त्रि० अभि+मन—बा० उकञ् । अभिमानशीले अभिमानश्च प्रागुक्तः बाधितुं शक्ते च । "अनक्ता एवास्य रभिमानुकोरुद्रः पशून्नुत्स्यात् यदङ्क्ताम्" शत० ब्रा० । "अभिमन्तुं बाधितुं शक्तः स्यात्" भा० ।

अभिमाय त्रि० अभिगतोमायामविद्याम् अत्या० स० । इति कर्त्तव्यविमूढे अज्ञानेनैव लोकानां कर्त्तव्याकर्त्तव्येषु मोहः इति तद्गतत्वान्मूढत्वम् ।

अभिमि(मे)ह्य त्रि० अभि+मिह-बा० वेदे क्यप् लोके ण्यत् । यस्याभिमुखं मेहनं मलमूत्रत्यागः क्रियते तस्मिन् "यत्र मेह्यन् भवति तत् क्षणविषाणाया लोष्टं वा किञ्चिद्दोपहन्तीयं ते यज्ञिया तनूरिति इयं वै पृथिवी देवयजनी सा दीक्षितेन नाभिमिहा" शत० ब्रा० ।

अभिमुख त्रि० अभिगतोमुखम् अत्या० स० । १सम्मुखतां गते "प्रसादाभिमुखो ब्रह्मा प्रत्युवाच दिवौकसः" कुमा० । "वानराभिमुखोऽगच्छद्रणे रणविशारदः" रामा० । "निद्रा चिरेण नयनाभिमुखीबभूव" । सुखशब्दस्य स्वाङ्गपरत्वे स्त्रियां वा ङीप् । अभिमुखीप्रतिभा अस्वाङ्गपरत्वे टापेव अभिमुखा शाला । अभिगतं सुखं यस्य । तत्तत्कर्म्मकरणाय २प्रेरितमुखे उद्यते । "प्रातः प्रयाणाभिमुखाय तस्मै" "पुरः प्रवेशाभिमुखो बभूव" इति च रघुः । "युयोज याकाभिमुखैः भर्त्तुर्विज्ञापनाफलैः" कु० । सुखमभिलक्ष्योक्त्या अव्य० । २आभिमुख्ये अव्य० । "कर्णं ददात्यभिमुखं भवि भावमार्गे" अमरुशतकम् ।

अभिमुखीकरण न० न अभिमुखः अभिमुखः क्रियते अनेन अभिमुख+च्वि—कृ—करणे ल्युट् । व्याकरणोक्ते सम्बोधने । कृते हि सम्बोधनपदाद्युच्चारणे श्रोता अभिमुखो भवति इति तस्य तथात्वम् । "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः । प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति हर्य्युक्तादिशा अभिमतक्रियाप्रवर्त्तनाविषयबोधनस्यैव सम्बोधनपदार्थत्वात् प्रवर्त्तयितव्यस्य तदाभिमुखीभावस्यावश्यकत्वाच्च तथात्वम् ।

अभिमुखीभाव पु० अनभिमुखस्य अभिमुखतया भावः । १आभिमुख्ये २कार्य्यानुकूलतायाम् ३तत्तत्क्रियोद्यमे च ।

अभिमृष्ट त्रि० अभि+मृश—मृष—वा क्त । १स्पृष्टे २धर्षिते ३मिलिते ४संसृष्टे च । मृज—क्त । कृतमार्जने त्रि० ।

अभिमेथक त्रि० अभि+मिथ—ण्वुल् । सर्व्वप्रायश्चित्तसाधने वाक्यभेदे । स्त्रियां तु टापि अत इत्त्वम् । "सर्वाप्तिर्वा एषा वाचः यदभिमेथिका सर्व्वे कामाः अश्वमेधे सर्वया वाचा सर्वान् कामानाप्नवाम" शत० ब्रा० ।

अभिस्नात त्रि० अभि+स्ना—क्त । सर्व्वतोस्नाने । न० त० । अनभिस्नातः तस्यापत्यम् । शिवा० अण् । आनभिस्नातः अनभिस्नात इत्यपि नभ्यपाठः ।

अभियाचन न० अभि+याच+ल्युट् । अभिमुखप्रार्थने ।

अभियाति पु० अभिमुखं युद्धार्थं याति या—क्तिच् । १रिपौ भावे क्तिन् । २युद्धार्थमभिगमने स्त्री । [इनि । शत्रौ ।

अभियातिन् पु० अभियातमनेन अभि+या—भावे क्त इष्टा०

अभियाट पु० अभिमुखं याति युद्धार्थम् अभि+या—टच् । १शत्रौ, २अभिमुखगन्तृमात्रे त्रि० । स्त्रियां ङीप् ।

अभियायिन् त्रि० अभिमुखं याति या—णिनि । अभिमुखगन्तरि । "रामाभियायिनां तेषां तदेवाभूदमङ्गलम्" रघुः ।

अभियुक्त त्रि० अभि+युज—क्त । १परैः रुद्धे, २आसक्ते व्यवहारविषये ३प्रतिवादिनि च । "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्" नार० । "अभियुक्तन्तु नान्येन नोक्तं विप्रकृतं नयेदिति" या० । ४पराक्रान्ते "नागाभियुक्त इव युक्तमदो मदेभः" माघः । ५आप्ते वृहत्सं० ।

अभियुज्व(ज्व)न् त्रि० अभि+युज—ङ्वनिप् वेदे पृ० कुत्वम् । अभियोक्तरि "स रथेन रथीतमोऽश्वानेनाभियुज्वना" ऋ० ८,४५,१५ लोके तु अभियुज्वा । स्त्रियां ङीप् वनोरच ।

अभियुज् त्रि० अभिमुखं युनक्ति अभि+युज—क्विप् । अभि-

योक्तरि "आभिर्विश्वा अभियुजो विषूचीः" ऋ०६,२५,२।

अभियोक्तव्य त्रि० अभि+युज-तव्य। निग्रहे "न स राज्ञाभियोक्तव्यः स्वकं संसाधयन् धनम्" मनुः। व्यवहारे यं प्रति अभियोगः कर्त्तुं शक्यते २ तस्मिन् प्रतिवादिनि अभिसुखं ३योजनीये च।

अभियोक्तृ त्रि० अभि+युज-तृच्। १व्यवहारे-अपराधयोजनकर्त्तरि वादिनि, स्त्रियां ङीप् "अभियोक्ता दिशेद्देशं करणं बान्धवद्देशेत्"। "अभियोक्ता न चेत् ब्रूयाद्बध्यो दण्ड्यश्च धर्म्मतः" इति च मनुः २युद्धार्थमाक्रामिणि च।

अभियोग पु० अभि+युज-घञ्। अन्यकृतस्य निजधर्षणस्य ज्ञापाय १विज्ञापने, (नालिश) अभियोगो द्विविधः "अभियोगस्तु विज्ञेयः शङ्काऽसत्यान्तु संसर्गात् तत्त्वं ज्ञेढ़ाभिदर्शनात्" नारदोक्तेः। "अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्" या० २युद्धार्थमाक्रमे, ३शपथे, ४उद्योगे, ५आग्रहे "सन्तः स्वयं परहितेषु कृताभियोगाः नीति० ७अपचिकीर्षयाक्रमणे, "सम्प्रापद्प्राप्तपराभियोगम्" कुमा० ८अभिनिवेशे "नयाभियोगं मनसः प्रसादं समाधयस्यात्मगुणेन कामम्" रामा० ९अपचिकीर्षयानिरोधे। "क्षुभितं वनगोचराभियोगादिति" किरा०।

अभियोगिन् त्रि० अभि+युज-घिनुण्। १अभियोगकर्त्तरि वादिनि "मिथ्याभियोगी दण्ड्यः स्यात् विवादात् द्विगुणं दमम्" या०। २आक्रमकर्त्तरि, ३आग्रहयुक्ते, ४अभिनिविष्टे, ५योजनकर्त्तरि च।

अभियोजन न० भृशं योजनम्। योजितस्य दृढार्थं पुनर्योजने "अभियोजनं नाम युक्तस्य पुनर्योजनमिति" माघ०।

अभिरक्षण न० अभितो रक्षणम्। मन्त्रादिना सर्व्वतः स्वेत सर्षपादिविक्षेपैः यातुधानादिभ्यो १ रक्षणे २ सर्व्वतो रक्षणे चाभावे च। अभिरक्षाप्यत्र स्त्री। "प्रधानबाधं दिगतोऽभिरक्षया" किरा०।

अभिरक्षित त्रि० अभितोरक्षितः। सर्वतोरक्षिते।

अभिरक्षित्र त्रि० अभितोरक्षति रक्ष् स्त्रियां ङीप्। सर्वतो रक्षके "वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता" मनुः

अभिरत त्रि० अभिसुखतया भृशं वा रतः। १आत्मान्यासक्ते २अभिसुखतया रते च।

अभिरति स्त्री अभितो रतिः प्रा०स०। आसक्तौ "न खगायाभिरतिर्मनोदरम्" रघुः। [मनोरमे।

अभिरम्य त्रि० अभिरमते भृशं रमतेऽत्र आधारे यत्।

अभिराज् त्रि० अभितो राजते अभि+राज+क्विप्। १अधिकदीप्तियुक्ते २अधीश्वरे च।

अभिराद्ध त्रि० अभि+राध-क्त। सेविते।

अभिराम पु० अभिरम्यतेऽस्मिन् रम+आधारे घञ्। १सुन्दरे २प्रिये, ३मनोहरे च। "श्रोत्राभिरामाः शब्दास्तौ रथनेमिस्वनोन्मुखैः" "श्रोत्राभिरामध्वनिना रथेन" "यस्यात्मगेहे नयनाभिरामः" इति च रघुः श्रोत्राभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः शक०। "राम इत्यभिरामेण वपुषा तस्य नोदितः" रघुः।

अभिरुचि पु० भृशा अत्यन्ता रुचिः प्रा०स०। १ अत्यन्तरुचौ

अभिरूप त्रि० अभिरूपयति सर्वं स्वात्मकं करोति रूप-अच्। १प्रिये, २विष्णौ च। अभिरूपयति निरूपयति। २परिष्कृते। उत्कृष्टं रूपं यस्य। ४कन्दर्पे, ५चन्द्रे च। ६मनोहरे त्रि०। "उत्कृष्टायाभिरूपाय वराय सदृशाय च" मनुः। "अभिरूपगुणभूयिष्ठा परिषत्" शक०। ७अनुरूपे त्रि० "कामममनभिरूपमस्या वयसो वल्कलम्" शक०। अभिरूपस्य भावः मनोज्ञा० वुञ् आभिरूपकम् ष्यञ् आभिरूप्यञ्च सौन्दर्य्यादौ न०। "अर्चकस्य तपोयोगादर्चनस्यातिशायनात्। आभिरूप्याच्च विम्बानां देवः सान्निध्यमृच्छति" ति०त०धृ०।

अभिलक्ष्य त्रि० अभिलक्ष्यते दृश्यते अभि+लक्ष यत्। १दृश्ये। लक्ष्यस्य शरव्यस्याभिसुख्यम् अव्ययी०। २शरव्याभिसुख्ये अव्य०। "शब्दं प्रतिगजप्रेषुरभिलक्ष्यमपातयत्" रघुः। ल्यप्। २लक्ष्योक्त्येत्यर्थे अव्य०।

अभिलङ्घन न० अभि+लघि-भावे ल्युट्। उल्लङ्घने। "तयाणामेव भूतानां सागरस्याभिलङ्घने" रामा०।

अभिलषणीय त्रि० अभि+लष-कर्म्मणि अनीयर्। काम्ये। एष्टव्ये। तव्य। अभिलषितवद्रोऽभ्यत्र त्रि०।

अभिलषित त्रि० अभि+लष-कर्म्मणि क्त। १दृष्टे अभिलाषविषये। भावे क्त। २अभिलाषे इच्छायाम् न०।

अभिलाष पु० अभिलष्यते मनःसंकल्पोऽनेन। १ मनःसंकल्पावेदके अहमिदं करिष्ये इत्यादिरूपे वाक्ये "काम्ये हि कामाभिलाषसहितकृषजलतिलत्यागरूपः सङ्कल्पः कार्य्य इति प्रा०त० प्रक्रमाधिकरणम्। २ आत्मीयज्ञानाकारोल्लेखिवाक्ये च यथा भूतलं घटाभाववदिति ज्ञानावेदकं घटोनास्तीति वाक्यं यथा च अयं घट इति ज्ञानोत्तरमनुव्यवसायात्मकज्ञानस्यावेदकं घटमहं जानामीति वाक्यम् "न निर्विकल्पकं ज्ञानं तस्य वाचकमिष्यते तथाऽभिलाप-

संसर्गयोग्यत्वविरहाच्च सविकल्पकज्ञानवेद्यानां हि वचनप्रयोगयोग्यता न तु रसस्येति" सा० द० । कथने च "तदभावाभिलाषाच्च" शा० सू० ।

अभिलाव पु० अभि+लू–घञ् । छेदने ।

अभिलाष(स) पु० अभि+लष(स)–घञ् । १इच्छायां, २लोभे च । अभेरिच्छाद्योतकत्वात् तदुपसृष्टलसेरिच्छार्थत्वम् । "अतोऽभिलाषे प्रथमं तथाविधे" इति रघुः मानुषामनुजव्याघ्र ! साभिलाषाः सुतान् प्रति" देवीभा० । "न खलु सत्यमेव मकरन्दलतायां ममाभिलाषः" शकु० ।

अभिलाषक त्रि० अभि+लष–ण्वुल् । १ अभिलाषयुक्ते ।

अभिलाषिन् त्रि० अभि+लष–णिनि स्त्रियां ङीप् । अभिलाषशीले "जलाभिलाषी जलमाददानाम्" "अगच्छदंशेन गुणाभिलाषिणी" इति च रघुः "असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः" शकु० ।

अभिलाषुक त्रि० अभि+लष–उकञ् । अभिलाषशीले, "जयमत्र भवानूनमरातिष्वभिलाषुकः" किरा० ।

अभिवदन न० अभिरानुकूल्ये अनुकूलं वदनं कथनम् । १आनुकूल्यार्थकथने अभिवादने । वदनस्य मुखस्याभिमुख्यम् अव्ययी० । २मुखस्याभिमुखे अव्य० ।

अभिवन्दन न० अभितः सर्वतोऽभिमुखे वा वन्दनम् । १सर्वतोनतिकरणे २ अभिमुखप्रणामे च । "उभयोरेवशिरसा चक्रे पादाभिवन्दनम्" रामा० ।

अभिवयस् त्रि० अभिमतं श्रेष्ठं वयोऽस्य प्रा० ब० । प्रकृष्टवयस्के "तीव्रसाभिवयसो अस्य पाहि" ऋ० १०, १६०, १ ।

अभिवर्त्तिन् त्रि० आभिमुख्येन वर्त्तते अभि+वृत–णिनि स्त्रियां ङीप् । १ अभिमुखे वर्त्तमाने "कलत्रान्तां च रणार्थाय मृत्युकालाभिवर्त्तिनः" रामा० ।

अभिवर्षक त्रि० अभितोवर्षकः । १ सर्वतोवर्षणकर्त्तरि ।

अभिवर्षण न० अभितोवर्षणम् । सर्वतोवर्षणे ।[सर्वतोवर्षके ।

अभिवर्षिन् अभितोवर्षति अभि+वृष–णिनि स्त्रियां ङीप् ।

अभिवात् त्रि० आभिमुख्येन वाति गच्छति वा–शतृ स्त्रियां ङीप । १अनुचरे, २"अभिवानभिभूत्यै रूपम्" शत० ब्रा० ।

अभिवाद पु० अभि+चु०वद–भावे अच् । १अभितः प्रणामे– "प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते" इति "नाममधेयस्य ये केचिदभिवादं न जानते" इति च मनुः

अभिवादक त्रि० अभि+चु०वद–ण्वुल् । १ आभिमुख्येन नतिकारके । "आयुष्मान् भव सौम्येति वाच्योविप्रोऽभिवादकः (के) मनुः ।

अभिवादन न० अभिमुखीकरणाय वादनं वदनम् चु०–वद–ल्युट्, अभिमुखं वाद्यते आशीरनेन वद–णिच्–ल्युट् वा । १नामग्रहणपूर्ब्बकनतौ २पादग्रहणेन वाचा वा नतौ । तत् प्रकारो यथा "ऊर्द्धं प्राणाह्युत्क्रामन्ति यूनः स्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः । चत्वारि संप्रवर्द्धन्ते आयुर्विद्या यशो बलम् ॥ अभिवादात् परं विप्रो ज्यायांसमभिवादयन् । असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥ नाममधेयस्य ये केचिदभिवादं न जानते । तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैवच ॥ भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने । नाम्नां स्वरूपभावोहि भोभाव ऋषिभिः स्मृतः ॥ आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादकः (के) । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्ब्वाक्षरप्लुतः ॥ यो न वेत्त्यभिवादस्य विप्र' प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोभवत्पूर्ब्बकं तेनमभिभाषेत धर्मवित् ॥ परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः । तां ब्रूयाद्भवतीत्येवं सुभगे । भगिनीति च ॥ मातुलांश्च पितृव्यांश्च श्वशुरान्त्विजो गुरून् । असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥ मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा । संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्य्यया ॥ भ्रातुर्भार्य्यासंपूज्या सवर्णाऽन्यन्यपि । विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥ पितृभगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि मातृवद्वृत्तिमातिष्ठेत् माता ताभ्यां गरीयसी ॥ दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाध्यताम् । त्रयाब्दपूर्ब्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥ ब्राह्मणं दशवर्षन्तं शतवर्षन्तु भूमिपम् । पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥ वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च । यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥ चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः । स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥ तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ । राजस्नातकयोश्चैव स्नातको नृपमानभाक्" इति मनुः "राजर्त्विक्श्रोत्रियाधर्मप्रतिषेध्युपाध्यायपितृव्यमातामहमातुलश्वशुरज्येष्ठभ्रातृसम्बन्धिनश्चाचार्य्यवत् । मत्य

एतेषां सवर्णाः । मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च । श्वशुरपितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थानमेवाभिवादनम् । हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपसंग्रहणेन । गुरुपत्नीनां गात्रोत्सादनस्नानकेशसंयमनपादप्रक्षालनं न कुर्य्यात्" विष्णुः । "पादोपसंग्रहणं गुरुसमवायेऽन्वहम् । अभिगम्य तु विप्रोष्य मातापितृतदबन्धूनां पूर्व्वजानां विद्यागुरूणां तत्तद्गुरूणाञ्च सन्निपाते परस्य । नाम प्रोच्याहमयमित्यभिवादोऽन्तसमवाये स्त्रीपुंयोगेऽस्त्रियां तोऽनियममेके न विप्रोष्य स्त्रीणाममातृपितृव्यभार्य्याभगिनीनां, नोपसंग्रहणं भ्रातृभार्य्याणां स्वस्रश्च । ऋत्विक्श्वशुरपितृव्यमातुलानान्तु यवीयसां प्रत्युत्थानमनभिवाद्यास्तथान्यः पूर्व्वः पौरोऽशीतिकावरः शूद्रोऽप्यपत्यसमेनावरोऽप्यार्य्यः शूद्रेण नाम चास्य वर्जयेदाक्षत्रियाजपः प्रेष्योभोभवच्चिति वयसः समानेऽहनि जातोदग्वर्षद्वयः पौरः पञ्चभिः कलाभरः श्रोत्रियश्चारण्यस्त्रिभिः राजन्योवैश्यः कर्म्मविद्याहीनोदीक्षितस्य प्राक्क्रयात् । वित्तबन्धुकर्म्मजातिविद्यावयांसि मान्यानि परवत्तीयांसि श्रुतन्तु सर्व्वेभ्योगरीयस्तन्मूलत्वाद्धर्म्मस्य श्रुतेः" गौत० । अनभिवाद्यास "समिद्दार्युदकुम्भपुष्पाक्षतस्रोनाभिवादयेद्यश्चाप्येवंयुक्तमिति" बौधायनः । "जपयज्ञजलस्थञ्च समित्पुष्पकृशानवान् दन्तकाष्ठञ्च भक्षञ्च वहन्तं नाभिवादयेदिति" लघुहारीतः । अन्यत्रापि । "समित्पुष्पकृशान्यम्बु—वहदन्नाक्षतपाणिकः । जपं होमञ्च कुर्वाणोनाभिवाद्यो द्विजो भवेदिति" च ।

अभिवाद्य त्रि० अभिवादयितुमर्हः यत् । १ अभिवादनार्हे अभिवाद्यास्त्वभिवादनशब्दे उक्ताः । "गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः" मनुः । ल्यप् । २ अभिप्रणम्येत्यर्थे अव्य० ।

अभिवान्य त्रि० अभि+वन—संभक्तौ कर्म्मणि यत् । संभजनीये । "अभिवान्यवत्सायाः प्रजुह्वयात्" श्रुतिः ।

अभिवासस् अव्य० वासस उपरि अव्ययी० । परिच्छितवस्त्रस्योपरिभागे "स वा अभिवासः संनह्यति" शत० ब्रा० । "परिच्छितस्य वस्त्रस्य उपरि" भा० ।

अभिवाह्य अभि++वह्—ण्यत् । १ अभितो वहनीये । भावे ण्यत् । २ वहने न० "कव्यकव्याभिवाह्याय सर्व्वस्वाय च रुद्रये" इति मनुः ।

अभिविधि पु० अभितो विधिर्व्याप्तिः । १ व्याप्तौ, मर्य्यादायां हि अवधिभूतं विहाय तत्तत्कार्य्यान्वयः अभिविधौ तु अवधिसहिते कार्य्यान्वय इति तस्य व्यापकता अतएवोक्तम् "मर्य्यादाभिविधिसन्देहे कार्य्यान्वितत्वादभिविधेर्व्याप्तिमात्रे युक्तः । "आङ् मर्य्यादाभिविध्योः" पा० । "अभिविधौ भाव इनुण्" पा० "मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः । य आकारः स ङित् प्रोक्त" सु० बो० ।

अभिविमान पु० परमात्मनि, "यस्त्वेनं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते" इति छा० उ० । एतस्य निरुक्तिः भा० भाष्ये दर्शिता । प्रत्यगात्मतया सर्व्वैः प्राणिभिरभिविमीयत इति अभिविमानः । अभिगतो वाऽयं प्रत्यगात्मत्वात्, विमानश्च मानवियोगादित्यभिविमानः । अभिविमीते वा सर्व्वं जगत्कारणत्वादित्यभिविमानः" इति ।

अभिवृत्ति स्त्री अभि+वृत् -क्तिन् । अभिगमने "स्वर्गस्य नो तस्याभिवृत्त्यै" ता० ब्रा० "अभिवृत्त्यै अभिगमनाय" भा० ।

अभिव्यक्त त्रि० अभि+वि+अञ्ज -कर्म्मणि क्त । १ अभिव्यक्तियुक्ते २ सांख्यादिम—सिद्धार्विर्भावयुक्ते "तत्र दैवमभिव्यक्तं पौरुषम् पौर्व्वदेहिकम् पु० अभिव्यक्तमाविर्भूतं फलदानोन्मुखम्" रघु० ।

अभिव्यक्ति स्त्री अभि+वि—अञ्ज—क्तिन् । १ प्रकाशे स्वरूपेण स्थितस्य ("कारणात्मना स्थितस्य) कारणस्य २ कार्य्यरूपेणाविर्भावे । साङ्ख्यपातञ्जलादिमते हि उत्पत्तेः प्राक् कार्य्यं सत् कारणव्यापारेण व्यज्यते यथोक्तम् । सांख्यसूत्रे । "त्रिविधविरोधापत्तेश्च" । "अथ सर्व्वं कार्य्यं त्रिविधं सर्व्वादिसिद्धमतीतमनागतं वर्त्तमानमिति । तत्र यदि कार्य्यं सदा सन्नेष्यते तदा त्रिविधत्वानुपपत्तिः । अतीतादिकाले घटाद्यभावेन घटादेरतीतादिधर्म्मकत्वानुपपत्तेः सदसतोः सम्बन्धानुपपत्तेः । किञ्च प्रतियोगित्वस्य प्रतियोगिरूपत्वे तद्दोषतादवस्थ्यात् । अभावमात्रस्वरूपत्वे घटाद्यभावो घटाद्यभावः स्यादभावत्वाविशेषात् । अभावेष्वपि स्वरूपतो विशेषाङ्गीकारे चाभावत्वस्य परिभाषामात्रत्वप्रसङ्गात् । अथ प्रतियोग्येवाभावविशेषक इति चेन्न असतः प्रतियोगिनः प्रागभावादिषु विशेषकत्वा सम्भवादिति । तस्मान्नित्यस्यैव कार्य्यस्यातीतानागतवर्त्तमानावस्थाभेदा एव वक्तव्याः । घटोऽतीतो घटो वर्त्तमानो घटो भविष्यतीति प्रत्ययानां तुल्यरूपतौचित्यात् । न त्वेकस्य भावविषयत्वमन्ययोश्चाभावविषयत्वमिति । ते एवातीतानागतत्वे अवस्थे ध्वंसप्रागभावव्यवहारं जनयतस्तदतिरिक्ताभावद्वये प्रमाणाभावादिति यत्समत्वन्नाभावान्योन्याभावाद्यधिकरणस्वरूपावेव । न चैवं प्रतियोगिसत्ताकालेऽप्यधिकरणस्वरूपानपायादत्यन्ताभावप्रत्ययप्रसङ्ग इति वाच्यम् परैरपि प्रतियोगिमति देशे तदत्यन्ताभावाङ्गीकारात् । प्रतियोगिसम्बन्धस्यातीतानागतावस्थयोरेव

सामयिकात्यन्ताभावत्वसम्भवाच्च। तस्माद्वास्तविद्वान्तेऽभावोऽतिरिक्तः किञ्च घटो ध्वस्तो घटो भावी घटोऽत्रनास्तीत्यादिप्रत्ययनियामकतया किञ्चिद्वस्त्वाकाङ्क्षायां तद्भावरूपमेव कल्प्यते लाघवात्। अभावस्याद्दृष्टस्य कल्पने गौरवादिति"प्र०भा० ॥"नासदुत्पादोदृष्टत्वात्"सू०॥ नरश्रृङ्गतुल्यस्यासत उत्पादोऽपि न सम्भवतीत्यर्थः॥"उपादाननियमात्" सू०॥ मृदेव घट उत्पद्यते तन्तुभ्य एव पट इत्येवं कार्य्याणामुपादानकारणं प्रति नियमोऽस्ति। स न सम्भवति उत्पत्तेः प्राक् कार्य्यासत्तायां हि न कोऽपि कारणे विशेषोऽस्ति येन कञ्चिदेवासन्तं जनयेन्नेतरमिति। विशेषाङ्गीकारे च भावत्वापत्तेर्गतमसत्तया। स एव च विशेषोऽस्माभिः कार्य्यस्यानागतावस्थेत्युच्यत इति। एतेन यद्वैशेषिकाः प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयन्ति तदप्यपास्तम्। अभावकल्पनापेक्षया भावकल्पने लाघवात्। भावानां दृष्टत्वादन्यानपेक्षत्वाच्च। किञ्चाभावेषु स्वतो विशेषे भावत्वापत्तिः। प्रतियोगिविशेषस्य प्रतियोग्यसत्ताकाले नास्ति। अतोऽभावानामविशिष्टतया न कार्य्योत्पत्तौ नियामकत्वं युक्तमिति॥"शक्तस्य शक्यकरणात्"सू०॥कार्य्यशक्तिमत्त्वमेवोपादानकारणत्वम् अन्यस्य दुर्वचत्वात् लाघवाच्च। सा शक्तिः कार्य्यस्यानागतावस्थैवेत्यतः शक्तस्य शक्यकार्य्यकरणान्नासत उत्पाद इत्यर्थः॥"कारणभावाच्च" सू० उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते तस्माच्च सत्कार्यसिद्धा नासदुत्पाद इत्यर्थः। कार्यस्यासत्त्वे हि सदसतोरभेदानुपपत्तिरिति। उत्पत्तेः प्राक् कार्य्याणां कारणाभेदे च श्रुतयः। "तद्वेदं तर्ह्यव्याकृतमासीत्। सदेव सौम्येदमग्र आसीत्। आत्मैवेदमग्र आसीत्। आप एवेदमग्र आसुरित्याद्याः॥ "न भावे भावयोगश्चेत्" सू०॥ नन्वेवं कार्यस्य नित्यत्वे सति भावरूपे कार्ये भावयोग उत्पत्तिप्रयोगो न सम्भवति असतः सत्त्व एवोत्पत्तिव्यवहारादिति चेदित्यर्थः॥ "नाभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ"सू०॥ कार्योत्पत्तेर्व्यवहाराव्यवहारौ कार्याभिव्यक्तिनिमित्तकौ। अभिव्यक्तिं उत्पत्तिव्यवहारोऽभिव्यक्त्यभावाच्चोत्पत्तिव्यवहाराभावः न त्वसतः सत्त्वेत्यर्थः। अभिव्यक्तिश्च न ज्ञानं किन्तु वर्त्तमानावस्था। कारणव्यापारोऽपि कार्यस्य वर्त्तमानलक्षणपरिणाममेव जनयति। मनस्य कार्यस्य कारणव्यापारादभिव्यक्तिमात्रं लोकेऽपि दृश्यते। यथा शिलामध्यस्थप्रतिमाया लौकिकव्यापारेणाभिव्यक्तिमात्रं शिल्पस्यैवास्य च निर्मोड़नेन, धान्यस्यतण्डुलस्य चावघातेनेति। तदुक्तं वाशिष्ठे। "मृच्छक्त्यावस्थया चक्रपङ्क्तिरेखाः शिलोदरे। यथा स्थिताश्चितेरन्तस्तथेयं जगदावली"॥ एतेषामिवाक्षाकमप्यनागतावस्थायाः प्रागभावाख्यायाः अभिव्यक्तिहेतुत्वाच्चेति। नन्वतीतमप्यस्तीत्यत्र किं प्रमाणं ? न ह्यनागतसत्तायामिव श्रुत्यादयोऽतीतसत्तायामपि स्फुटमुपलभ्यन्त इति। मैवम्। योगिप्रत्यक्षत्वान्यथानुपपत्त्यानागतातीतयोरुभयोरेव सत्त्वसिद्धेः प्रत्यक्षसामान्ये विषयस्य हेतुत्वात्। अन्यथा वर्त्तमानस्यापि प्रत्यक्षेणासिद्ध्यापत्तेः। तस्माद्विद्यामौत्सर्गिकप्रामाण्येनासति बाधके योगिप्रत्यक्षेणातीतमप्यस्तीति सिद्ध्यति योगिनामतीतानागतप्रत्यक्षे च श्रुतिस्मृतीतिहासादिकं प्रमाणं योगवार्त्तिके प्रपञ्चितमिति। नन्वभिव्यक्तिरपि पूर्वं सती वाऽसती वा। आद्ये कारणव्यापारात् प्रागपि कार्यस्याभिव्यक्त्या स्वकार्यजनकत्वापत्तिः कारणव्यापारश्च विफलः। अन्त्ये चाभिव्यक्तावेव सत्कार्यसिद्धान्तक्षतिः असत्या एवाभिव्यक्तेरभिव्यक्त्यङ्गीकारादिति अत्रोच्यते। कारणव्यापारात् प्राक् सर्वकार्याणां सदासत्त्वाभ्युपगमेनोक्तविकल्पानवकाशाद्दृष्टवत् तदभिव्यक्तेरपि वर्त्तमानावस्थया प्रागसत्त्वेन तदसत्त्वानिवृत्त्यर्थं कारणव्यापारापेक्षणात्। अनागतावस्थया च सत्कार्यसिद्धान्तरक्षणात्। नन्वेकदा सदसत्त्वयोर्विरोध इति चेत्। प्रकारभेदस्योक्तत्वात्। नन्वेवमपि प्रागभावानङ्गीकारेण प्रागसत्त्वमेव कार्य्याणां दुर्वचमिति। मैवम्। अवस्थानामेव परस्परभावरूपत्वादिति॥ ननु सत्कार्यसिद्धान्तरक्षार्थमभिव्यक्तेरभिव्यक्तिरेष्टव्येत्यत आह।"पारम्पर्यतोऽन्वेषणा बीजाङ्कुरवत्"सू०॥ पारम्पर्यतः परम्परारूपेणैवाभिव्यक्तेरनुधावनं कर्त्तव्यम् बीजाङ्कुरवत् प्रामाणिकत्वेन चास्या अदोषत्वादित्यर्थः। बीजाङ्कुराभ्यां चात्रायमेव विशेषो यद्बीजाङ्कुरस्थले क्रमिकपरम्परानवस्था, आभिव्यक्तौ चैककालीनपरम्परेति। प्रामाणिकत्वन्तु तुल्यमेवेति। सर्वकार्याणां स्वरूपतो नित्यत्वमवस्थाभिर्विनाशित्वं चेति पातञ्जलभाष्ये वर्द्धिवर्ष्मसदेवैरपीयमनवस्था प्रामाणिकत्वेन स्वीकृतेति। "उत्पत्तिवद्वाऽदोषः" सू०॥ यथा घटोत्पत्तेरुत्पत्तिः स्वरूपमेव वैशेषिकादिभिरसदुत्पादवादिभिरिष्यते लाघवात् तथैवाक्षाभिर्घटाभिव्यक्तेरभिव्यक्तिः स्वरूपमेवैष्टव्या लाघवात्। अत उत्पत्तावभिव्यक्तावपि नानवस्थादोष इत्यर्थः। अथैवमभिव्यक्तेरभिव्यक्त्यनङ्गीकारे कारणव्यापारात् प्राक् तस्याः सत्त्वानुपपत्त्या सत्कार्यवादक्षतिरिति चेन्न। अस्मिन् पक्षे सत

एवाभिव्यक्तिरित्येव सत्कार्यसिद्धान्त इत्याशयात् । अभिव्यक्तेश्चाभिव्यक्त्यभावेन तस्याः प्रागसत्त्वेऽपि नासत्कार्यवादत्वापत्तिः । नन्वेवं मृदादीनामेव प्रागसत्त्वमिष्यतां किमभिव्यक्त्याख्यावस्थाकल्पनेनेति चेन्न । तद्वेदं तर्ह्यव्याकृतमासीदित्यादि श्रुतिभिरव्यक्तावस्थायाः सतामेव कार्याणां सिद्धेः तथाप्यभिव्यक्तेः प्रागभावादिस्वीकारापत्तिरिति चेन्न । तिस्रणामनागताद्यवस्थानामन्योऽन्यस्याभावरूपतयोक्तत्वात् तादृशाभावनिहत्तय एव च कारणव्यापारसाफल्यादिसम्भवात् । अयमेव हि सत्कार्यवादिनामसत्कार्यवादिभ्यो विशेषो यत् तैरुच्यमानौ प्रागभावध्वंसौ सत्कार्यवादिभिः कार्यस्यानागतातीतावस्थे भावरूपे प्रोच्येते । वर्त्तमानताख्या चाभिव्यक्त्यवस्था घटाद्यतिरिक्तेति घटादेरवस्थात्रयवत्त्वानुभवादिति । अन्यत्तु सर्वं समानम् । अतो नास्यस्याधिकशङ्कायाय इति सां० प्र०भा० । "अतः सिद्धं प्राक् कार्योत्पत्तेः कारणसद्भावः । कार्यस्य चाभिव्यक्तिलिङ्गत्वात् अभिव्यक्तेः कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः । कथम् ? अभिव्यक्तिलिङ्गत्वात् । अभिव्यक्तिर्लिङ्गमस्येत्यभिव्यक्तिश्च साक्षादिन्द्रियानालम्बनत्वप्राप्तिः । यद्धि लोके प्राप्तं तमआदिना घटादि वस्तु तदालोकादिना प्रावरणतिरस्कारेण विज्ञान विषयत्वं प्राप्नुवत् प्राक् सद्भावं न व्यभिचरति । तथेदमपि जगत् प्रागुत्पत्तेरित्यवगच्छामः न हि अविद्यमानो घट उदितेऽध्यादित्य उपलभ्यते" इ०भा० । २ अन्यथा स्थितस्य अन्यरूपेण प्रकाशे "अभिव्यक्तेरित्याश्मरथ्यः" शा०सू० । "अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात् अभिव्रज्यते किल प्रादेशपरिमाणः परमेश्वर उपासकानां क्षते, प्रदेशेषु वा हृदयादिषु प्राणविद्यास्थानेषु विशेषेणाभिव्रज्यते ततः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्योमन्यते" इति भा० ।

अभिव्यञ्जक त्रि० अभिव्यञ्जयति प्रकाशयति अभि+वि+अञ्ज-णिच्-ण्वुल् । प्रकाशके आलङ्कारिकप्रसिद्धव्यञ्जनया इत्था प्रकाशके च गुणाभिव्यञ्जकौ शब्दार्थौ "गुणाभिव्यञ्जकशब्दार्थत्वस्यापि रसाभिव्यञ्जकत्वेन उपचारत" इति च सा०द० ।

अभिव्यापक त्रि० अभि+वि+आप-ण्वुल् । अभितोव्यापके सर्वावयवावच्छेदेन व्यापके यथा इच्छादेराकाशसंयोगः, कपिसंयोगादिस्तु नैवं तस्य स्वाधिकरणे वृक्ष एव मूलावच्छेदेनासंत्वात् । वैयाकरणोक्तौ सर्व्वथा व्यापकतावति आधारभेदे "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" सि०कौ० । यथा सर्व्वस्मिन् ब्रह्मास्ति" ।

अभिव्याप्ति स्त्री अभि+वि+आप भावे क्तिन् । १ अभितोव्याप्तौ सर्वावयवावच्छेदेन व्याप्तौ । व्याप्तिशब्दे विस्तरः ।

अभिव्याप्य त्रि० अभि+वि+आप-कर्मणि ण्यत् । १ सर्वावयवच्छेदेन १ व्याप्ये । ल्यप् । २ सर्वतो व्याप्येत्यर्थे अव्य० । "अभिव्याप्याकर्षणमपवर्गे" इति सुश्रु० ।

अभिव्याहार पु० अभि+वि+आ+हृ-घञ् । १ प्रशस्तोक्तौ २ अभितः कथने व्याङ्उपसर्गयुक्तस्य हरतेः कथनार्थत्वादभियोगात्तस्यैव सम्यक्त्वार्थता । अतएव "ऋचं वा यजुर्वा साम वाऽभिव्याहरतीति" शत० ब्रा० "नाभिव्याहरेयुः ब्रह्म स्वधानिनयनादृते" मनौ च तथार्थे एव अभिव्याहरतेः प्रयोगः । समुपसर्गयोगे तु साकल्येऽस्य रूढिः ।

अभिव्रज् पु०अभि+व्रज-गतौ घञ् । अभिगमने यासां तिस्रः पञ्चागतोभिव्रज्यैरपायव" ऋ० १,११२,४ । अभिव्रज्यैरभिगमनैः व्रज्यतिर्गतिकर्मेति" भा० ।

अभिशंसन न० आभिमुख्येन शंसनमाक्रोशवचनं वारोपापवादश्च । समक्षमाक्रोशरूपे पारुष्यकरणे १ अयं चोर" इत्यादिना २ मिथ्यापवादे च "शतं ब्राह्मणमाक्रुश्य" त्युपक्रम्य "पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने इति वाक्यारम्भे "अभिशंसनप्रयोगात्तयोस्तुल्यार्थत्वम् "स्वभार्यान्तु यदा क्रोधादगम्येति नृपो वदेत्" या० व्याख्यायां स्वभार्यामभिशंसनमिति विज्ञानेश्वरेणोक्तम् । ३ आभिमुख्येन कथनमात्रे च "शतं स्त्रीदूषणे दद्यात् द्वे तु मिथ्याभिशंसने" इति याज्ञ० ।

अभिशंसिन् त्रि० अभि+शंस-णिनि । १ समक्षमाक्रोशके २ अपवादवाक्यप्रयोक्तरि च "मिथ्याभिशंसनो दोषो द्विगुणोऽनृतवादिन" इति या० ।

अभिशङ्का स्त्री अभि+शङ्क-भावे अ । १ सर्वथा शङ्कने २ संशये ३ भ्रमे च । "उपेयुषो कल्पलतामभिशङ्कया" किरा० "कल्पलतामभिशङ्कया कल्पलताभ्रमेण" मल्लि० । संशयस्य स्थाणुर्वानरोवेति उभयकोटिज्ञानरूपत्वेऽपि तदीयायथार्थकोटिविषयत्वेन भ्रमस्य तदीयैकतरकोटिविषयकत्वात् तथात्वम् । अयञ्च मिथ्याभूतकोटिमेवावगाहते इति विशेषः । कर्त्तरि अच् । २ सर्वतः शङ्कते त्रि० ।

अभिशङ्कित त्रि० अभि+शङ्क-क्त । १ सन्दिग्धे २ भ्रान्ते च ।

अभिशप्त त्रि०अभि+शप-क्त । इदं नेऽनिष्टं भूयादित्येवं रूपस्य

गुरुविप्राद्यभिशापस्य उद्देश्ये। "न नाम ग्रहणं कुर्यात् जनकस्य गुरोस्तथा। भार्य्यायां अभिशप्तस्य क्षपणस्य विशेषतः" इति पुरा०। [२समन्तकथिते च।

अभिशब्दित त्रि० आभिमुख्येन शब्दितः। १ समन्तमाहूते

अभिशस् त्रि० अभि+शंस्–क्विप्। अभिशंसनकर्त्तरि "यदाशंसा निःशसाभिशसा" ऋ० १०,१६४,२।

अभिशस्त त्रि० अभि+शंस्–क्त। अयं परस्त्रियं गच्छतीत्यादिना मिथ्याभाक्येन मैथुनविषयकदोषारोपो यस्मिन् जने कृतः तस्मिन्। "अभिशस्तो ह्यपा कृच्छ्रं चरेदाग्नेय मेव वा" या०। "नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्" स्मृतिः। अभि+शस–बधे क्त। २हिंसिते २आक्रान्ते च त्रि०। "आतुरानभिशस्तांश्च चौरव्याघ्रादिभिर्भये" मनुः। "अभिशस्तामाक्रान्तामिति" प्रा०त० रघु०। उभयतः भावे–क्त ४ आक्रोशे, ५ अपवादकथने ६हिंसने ७ अभिशापे च न०। "एवञ्चैव नरश्रेष्ठः रक्ष्या एव द्विजातयः। शापराधानपि हि तान् विषयान्ते सस्तृत्सृजेत् अभिशस्तमपि ह्येषां क्षपयेत विशाम्पते"। भा० शा० प०।

अभिशस्तक त्रि० अभिशस्ते अभिशापे भवः कन्। वैद्यकोक्ते अभिशापजज्वरादौ "दृष्ट्वा ये देवद्रोहाभिशस्तका अथर्वकृता उपसर्गकृताश्च" सुश्रुतः।

अभिशस्ति स्त्री अभि+शंस्–क्तिन्। १ अभिशापे "उरुष्या णो अभिशस्तेः सोमः" ऋ० १,६१,१५। अभिशस्तेरभिशापरूपाच्छिन्दनात्" भा०। २ अपवादे "इमां मिथ्याभिशस्तिञ्च क्षणस्व सखदाकृताम्" कृ० वं०। अभि+शस बधे भावे क्तिन्। ३ हिंसायां "तितिक्षन्ते अभिशस्तिं जनानाम्" ऋ० २,३०,१। "अभिशस्तिं हिंसाम्" भा०। शस्यते हिंस्यतेऽनेन करणे क्तिन्। ४हिंसाहेतौ, "पुरा तस्या अभिशस्तेरधीहि" ऋ० १,७१,१० "अभिशस्तेः हिंसाहेतोः" भा०। आभिमुख्येन शस्तिरर्थाच्चनम्। ५प्रार्थनायाम्। [शार्हे च

अभिशस्य त्रि० अभिशस्तिमर्हति यत्। १हिंसार्हे २आक्रोश्ये

अभि(भी)शाप पु० अभि+शप–घञ् वा दीर्घः। १ मिथ्यापवादकथने २ आरोपितदोषकथने ३ अनिष्टं ते भूयादित्याक्रोशे च "वेद मिथ्याभिशापास्तं न स्मृशन्ति कदाचन" कृ० वं०।

अभिशिरोग्र त्रि० शिरसोऽभिमुखमग्रं यस्य। १ ऊर्द्धमूलाग्रोप्ये "ओषधे। त्रायस्वैनमिति सप्त दर्भपिञ्जूलीर्दक्षिणस्यां कपिञ्जिकायामभिशिरोग्रा उपदधाति" गो०। अभिशिरोग्राः ऊर्द्धमूलाग्रोप्याः सं०त० रघुनन्दनः।

अभिशोक पु० अभिलक्ष्य शोकः। कञ्चिदभिलक्ष्यीकृत्य कृते शोके। शुच–घञ्। अभिशोचनमप्यत्र न०।

अभिश्रा(श्र)व पु० अभि+श्रु–अप् वेदे घञ्। अभितः श्रवणे "ऋतं दिवे तदवोचं पृथिव्यामभिश्रावाय" श्रुतिः।

अभिश्रैत्य त्रि० अभितः श्रैत्यं शुद्धचारित्र्यादस्य। शुद्धचरिते "अदक्षिणमयज्ञानमभिश्रैत्येति व्याहरन्" भा० द्रो० प०

अभिषङ्ग पु० अभि+षञ्ज–घञ्। १ पराभवे, २ आक्रोशे, ३ शपथे, ४ व्यसने च "अभिषङ्गजडं विजज्ञिवानिति" रघुः "तीव्राभिषङ्गप्रभवेण दृप्तिम्" कुमा० "जातोभिषङ्गो नृपतिर्निषङ्गात्" "ततोऽभिषङ्गानिलविप्रविद्धा" "विनोदयिष्यन्ति नवाभिषङ्गाम्" इति च रघुः "नवाभिषङ्गां नूतनदुःखामिति" मल्लि०। ५आसक्तौ "सुरुरिति वनविभ्रमाभिषङ्गात्" माघः ६भूताद्यावेशे अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः" माधवनिदानम्।

अभिषव पु० अभि+सु–अप्। १ यज्ञाङ्गस्नाने, २निष्पीड़ने, ३ सुरोत्पादनादिव्यापारे, ४ सोमलतापाने, ५ तत्कण्डने च "अद्रेरादानप्रभृति निष्पर्य्यायानभिषवान् करोति" कात्या० १०,१,४। "निर्यात्य राजानमभिषुण्वन्ति व्याख्यातोऽभिषव" इति कर्क०। "आप्यायनाभिषवाश्वदाभ्येषु च" कात्या० ७,६,२८। सर्वजित् महाव्रतः संवत्सरदीक्षः सप्ताहाभिषवस्तिस्र उपसदः कात्या० "संवत्सरादूर्द्धं सप्ताहेऽतीतेऽभिषवः स्यात्" कर्क०। ६स्नाने। "जपोपवासाभिषवैर्मुनीनाम्" किरा०। करणे अप्। ७ अङ्गुल्यामिति निरु० सोमकण्डनसाधनत्वात् तथात्वम्। आधारे अप्। ८यज्ञे।

अभिषवण न० अभि+सु–ल्युट। अभिषवशब्दार्थे स्नानमात्रे "शिरसा हरिन्मणिनिभः स वहन् जतजन्मनोऽभिषवणेन जटाः" किरा० करणे ल्युट् स्त्रियां ङीप्। अभिषवसाधने "सूर्यं पवित्रं तृषा ऋजीषाभिषवणीराप:" अथ०।

अभिषह्य त्रि० अभितः सहः। १ सोढुं शक्ये। ल्यप्। २प्रसह्येत्यर्थे अव्य० "अभिषह्य तु वः कन्यां कुर्याद्धर्मेण मानवः"। मनुः।

अभिषाच् त्रि० अभि+सच–खि–स्वार्थे णिच्–क्विप् वा। १ आभिमुख्येन सम्बन्धुं समर्थे २ अभिभावुके च "वसो अभिषाचक्रध्वान्" ऋ० ६,६३,६।

अभि(भी)षाह् त्रि० अभि+सह–णु णिच्–क्विप् वा षत्वम् वा दीर्घः। १शत्रुजयिनि २सहनशीले च।

अभिषिक्त त्रि० अभि+सिच–क्त। १ कृताभिषेके राजादौ

"कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तम्" सा०द० । "दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च" परा० । "सेनापत्येन देवानामभिषिक्तो गुहस्तदा" भा०व०प० २ स्नाते च । अभिषिक्तेन निर्वृत्तम् सङ्घा० अण् । आभिषिक्तः अभिषिक्तानिर्वृत्ते कूपे पुं० । [सोमादौ च ३काङ्क्षिके न० ।

अभिषुत त्रि० अभि+सु–क्त । १ निष्पीड़िते २ कृताभिषवे

अभिषेक पु० अभि+सिच–घञ् । १ विधिना गान्त्यर्थं, सेचने, २अधिकारप्राप्त्यर्थं स्नाने, यथा "अथाभिषेकं रघुवंशकेतोः" रघुः । मन्त्रादिना शिरसि जलप्रक्षेपमात्रेण ३ मार्जने । ४स्नानमात्रे च । "कृताभिषेकां हुतजातवेदसम्" कुमा० । "निष्यन्दिनीरनिकरेण कृताभिषेकाः" माघः "तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत्" । "तत्राभिषेकं कुर्व्वीत पितृदेवार्चने" रतः "तत्राभिषेकं कुर्व्वीत नागतीर्थे नराधिप । भा०व०प० । ५ कर्म्मान्ते गान्त्यर्थं स्नाने च । "सुरास्त्वामभिषिञ्चन्तु इत्यादिमन्त्रैस्नाने तच्च मन्त्रतत्तल्लादानादिपद्धतौ २०६पृष्ठे द्रष्टव्यम् । ६प्रतिष्ठादौ देवादेः स्नपने च । करणे घञ् । ७ जले ।

अभिषेक्तृ त्रि० अभि+सिच–तृच् । अभिषेकारि स्त्रियां ङीप् ।

अभिषेक्य त्रि० अभिषेक्तुमर्हति अभि+सिच–ण्यत् कुत्वम् । अभिषेकयोग्ये "अभिषेक्याभविष्यत समाप्नुवन्त इत्याह राजसूयात्" कात्या० २०,२,१७ "यूयमश्वस्य समाप्नुवन्तः पट्टाभिषेकयोग्या भविष्यथ" कर्क० ।

अभिषेचन न० अभि+सिच–भावे ल्युट् । अभिषेकशब्दार्थे अभिषेचने हितम् ठञ् । आभिषेचनिकम् । अभिषेकद्रव्यमन्त्रादौ त्रि० । करणे ल्युट् । अभिषेकद्रव्ये न० ।

अभिषेचनीय त्रि० अभि+सिच–कर्म्मणि अनीयर् । अभिअभिषेकार्हे "ये वा एतस्योदयं गमिष्यन्ति राष्ट्रं ते भविष्यति राजानो अभिषेचनीयाः" शत०ब्रा० । साध्वर्थे छ । २ अभिषेकद्रव्ये त्रि० "पुरोडाशस्त्रिष्टिलतोऽभिषेचनीयवत्" कात्या० १८,६,१५, "राजसूयस्यान्तर्गताभिषेचनीय सोमस्येव" कर्क० "अभिषेचनीयेष्वा" शत०ब्रा० ।

अभिषेणन न० सह इनेन सेना तयाभिसुखं याति यतोः अभि+सेना+णिच्–ल्युट् षत्वम् । युद्धार्थं शत्रोरभिसुखं सेनया सह जिगीषोर्गमने ।

अभिष्टन पु० अभि+स्तन–अप् षत्वम् । सिंचनादे "अभिष्टने ते अद्रिवो यत् स्था" ऋ० १,८०१७, "अभिष्टने सिंचनादे" भा० ।

अभि(भी)ष्टि त्रि० अभि+यज–क्त षत्वं कित्त्वं वेदे पृ०एका० ।

१ "अभियष्टव्ये 'मह्ना अभिष्टिरोजसा य०२३,२५, अभीज्यते इत्यभियष्टव्यः वे०दी० । २ अभिलाषे, । आसादभिष्टिद्रवसे यासदुग्रः" य० २०,४८ अभिष्टिमभिलाषं करोतीत्यभिष्टिकृत् मनोरथप्रदः" इति वेददी० ।

अभिष्टुत त्रि० अभि+स्तु–क्त । १वर्णिते, २स्तुते, च ।

अभि(स्य)ष्यन्द पु० अभि+स्यन्द–भावे घञ् अप्राणिकर्त्तरि वा षत्वम् । १ अतिदृष्टौ २ स्रवणे ३ जलादिक्षरणे च । कर्त्तरि घञ् । ४ अधिके । "स्वर्गाभिष्यन्दव मनमिति" कुमा० । "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दनेन वा निवेशयेदिति" कौटि० । आधारे घञ् । ५नेत्ररोगहेतौ । "प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः" । तस्मादभिष्यन्दसुदीर्णमाशुपाचदेदाशु हिताय धीमान् सुश्रु० । उष्णाभितप्तस्य जलप्रवेशादूरेक्षणात् स्वप्नविपर्य्ययाच्च । स्वेदाद्रजोधूमनिषेवणाच्च ऋद्धैर्विधाताद्वमनातियोगात् दूवासयाचाम्बिषि सेविताच्च विण्मूत्रवातक्रमनिग्रहाच्च प्रसक्तघर्षेादनशोककोपाच्छिरोभिघाताद्दिवामैथुनाच्च । वाष्पग्रहात् क्षुज्जलनिरोधाच्च नेत्रे विकारान् जनयन्ति दोषाः । स च चतुर्विधः यथा । वातात् पित्तात् कफाद्रक्ताद्भिष्यन्दश्चतुर्विधः । प्रायेण जायते घोरः सर्व नेत्रामयाकरः । सुश्रु० ।

अभिष्यन्दनगर न० अभिष्यन्देन प्रधाननगरातिदृष्ट्या तदतिवाहेन कृतं नगरम् । आख्यानगरे अभिष्यन्दरमणमित्यपि पाठः । रत्नं रतिस्नानं ईत० । तत्रार्थे ।

अभिष्य(स्य)न्दिन् त्रि० अभिष्यन्दते अभि+स्यन्द–णिनि अप्राणिकर्त्तरि वा षत्वम् १ सर्व्वतः स्रुते । "पयोऽभिष्यन्दि गुर्व्वाभं प्रायशः परिकीर्त्तितम्" सुश्रु० ।

अभिष्वङ्ग पु० अभि+स्वन्ज–घञ् । १ उत्कटरागे २अनात्मन्यहंबुद्धौ च "असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु" गीता

अभिसंरब्ध त्रि० अभि+सम्+रभ–क्त । १ क्रुद्धे । [निष्पन्ने च

अभिसंवृत्ति स्त्री अभि+सम्+वृत–क्तिन् । १ व्यवहारे २ अभि-

अभिसंश्रय च० अभितः संश्रयः । १ सर्वत आश्रये "यदि कुर्य्यात् भवानेवं विशेऽस्मिन्नभिसंश्रयम्" रामा० ।

अभिसंसार अव्य० संसारस्याभिसुख्यम् अव्ययी० । संसाराभिसुख्ये । अभि+सम्+सृ–घञ्यायां यणादेशः । अभिनावीत्यादौ तनात् न द्वित्वम् । अभिसंसारम् अभिसंसरन्तमभिगच्छन्तमित्यर्थे । "सङ्गतागमिवाभिसंसारं दिङ्मिथुनारः" ब्रा० ।

अभिसंहित त्रि० अभि+सम्+धा–कर्मणि कर्त्तरि वा क्त । १ फलोद्देशेन कृते २ अभिसन्धिविषयभूते ३ अभिसन्धिकर्त्तरि च "विसृक्तिदायेऽनभिसंहितेषु" रुचिस्तवः ।

अभिसन्ताप पु० अभिसन्तापयतेऽनेन अभि+सम्+तप–णिच्-करणे अच् । १ अभिशापे । तप–भावे घञ् । २ अभितः सन्तापे । तप–आधारे । घञ् । ३ युद्धे ।

अभिसन्धक त्रि० अभि+सम्+धा–क–स्वार्थे कन् । १ परगुणासहनेन आक्षेपके, "वैडालव्रतिकोज्ञेयोहिंस्रः सर्वाभिसन्धकः मनुः" । "अभिसन्धक' परगुणासहनेन सर्वाक्षेपक इति" कुल्लू० । [२ फलोद्देशे ३ वञ्चने च ।

अभिसन्धा स्त्री अभि+सम्+धा–भावे अङ् । १ अभिसन्धौ

अभिसन्धान न० अभि+सम्+धा–ल्युट् । १ परवञ्चने । "पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्" रघुः । "पराभिसन्धानपरामन्त्रिणः" काद० २ फलोद्देशे ३ अभिसन्धौ च । "फलाभिसन्धानपरा न योगिनः" पुरा० ।

अभिसन्धाय पु० अभि+सम्+धा–भावे घञ् । १ अभिसन्धौ फलाद्युद्देशे । ल्यप् । २ फलाद्युद्दिश्येत्यर्थे अव्य० । "अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्" गीता ।

अभिसन्धि पु० अभि+सम्+धा–भावे कि । १ फलाद्युद्देशे । "स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे" कुमा० । "स्वधाभुजः काव्यफलाभिसन्धौ" रुचिस्तवः ।

अभिसन्धित त्रि० अभिसन्धा जाताऽस्य तारo इतच् । १ जाताभिसन्धौ अभिसन्धिविषये ।

अभिसम्पत्ति त्रि० अभि+सम्+पद–क्तिन् । १ अभितः सम्पत्तौ अन्यरूपस्यान्यथाभवने, "चित्यस्याहवनीयाभिसम्पत्तेः" कात्या० १८,६,३५ । "आहवनीय एव चित्याभिसम्पत्ति श्रवणात् "यो वाव चितेऽग्निर्निधीयते तामेवेष्टकामेष सर्वोऽग्निरभिसम्पद्यत" इतिश्रुतिः एकवारं चित्यस्योपरि निधानेनाहवनीयाग्नेरेव सर्व्वदा चित्यात्मकतासम्पन्ना" कर्क० ।

अभिसम्पद् स्त्री अधिका सम्पद् प्रा०स० । १ अधिकसम्पत्तौ । अभिलक्ष्य संख्यां सम्पद् । तत्तत्संख्यादिसाम्येन सम्पन्नतायाम् "तान्युभयान्येकविंशतिः सम्पद्यन्ते द्वादश मासाः पञ्चर्त्तवस्त्रय इमे लोकाः असावादित्य एकविंशः एतामभिसम्पदम्" शत० ब्रा० । "यैषा संख्यासम्पत्तिस्तामभिलक्ष्य भवति" भा० । सम्पदमभिलक्ष्य अव्ययी० टच् समा० । अभिसम्पदम् सम्पदमभिलक्ष्यीकृत्येत्यर्थे अव्य० ।

अभिसम्पात पु० अभि+सम्+पत–आधारे घञ् । १ युद्धे । भावे घञ् । २ पतने । करणे घञ् । ३ अभिशापे लोकप्रसिद्धिः ।

अभिसम्बन्ध पु० अभि+सम्+बन्ध–घञ् । १ अभितः सम्बन्धे "द्रव्याणां कर्म्मसंयोगे गुणात्वनाभिसम्बन्धः" "फलार्थित्वात्तु स्वामित्वे नाभि" जै०न्या० "वैजिकादभिसम्बन्धादनुरुन्ध्यादधं तादृक्" मनुः २ वाक्यादौ आकाङ्क्षितपदान्वये च पदानामन्वयश्च पदार्थान्वयोन्यत्वएव ।

अभिसर त्रि० अभितःसरति सृ+ट स्त्रियां ङीप् । १ सहाये, २ अनुचरे । "तथैवाभिसरास्तेषां त्यक्तात्मानो जये धृताः" भा० उ० प० । "अथ साभिसरं शरैस्तरस्वी" माघः ।

अभिसरण न० अभि+सृ–ल्युट् । १ अभिगमने २ नायकयोरेकतरेण रागेण सङ्केतस्थानगमने च । [३ उत्कृष्टे च

अभिसर्ज्जन न० अभि+सृज–भावे घञ् । १ दाने, २ बधे

अभिसाय अव्य० आभिमुख्ये अव्ययी० । सायाङ्गाभिमुख्ये । "श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्" माघः ।

अभिसार पु० अभि+सृ–आधारादौ घञ् । १ युद्धे, २ साहाय्ये, ३ साधने, ४ स्त्रियाः पुंसो वा संभोगार्थं निर्ज्जनसङ्केतस्थानगमने च । "आरब्धे रभसान्मया प्रियसखि ! क्रीड़ाभिसारोत्सवे" । अभिसारप्रकारश्च । "स्रोषु गात्रेषु संलीना मुकीकृतविभूषणा" । अवगुण्ठनसंवीता कुलजाऽभिसरेद्यदि । विचित्रोज्ज्वलवेषा तु वल्गच्चूपुरनिस्वना प्रमोदस्फोरवदना स्याद्देश्याऽभिसरेद्यदि । मदस्खलितसंलापा विभ्रमोत्पुल्ललोचना । आविद्धगतिसञ्चारा स्यात् प्रेष्याऽभिसरेद्यदि ॥ चेतं वाटी. भग्नदेवालयो दूतीगृहं वनम् । मालयञ्च श्मशानञ्च नद्यादीनां तटी तथा एवं कृताभिसाराणां पुंश्चलीनां विनोदने, स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रये" इति सा० द० । कर्त्तरि घञ् । अनुचरे पु० "अभिसारेण सर्वेण ततोयुद्धमवर्त्तत" भा० व० प० ।

अभिसारिका स्त्री अभिसरति अभिसारयति वा कान्तं सङ्केतस्थानं अभि+सृ–णिच्–वा ण्वुल् । १ "अभिसारयते कान्तं या मन्मथवशंवदा । स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका" सा० द० उक्ते नायिकाभेदे "अनभिज्ञास्त्रिस्त्रियाणां दुर्हिनेष्वभिसारिकाः" कुमा० "यः सञ्चरोऽभूदभिसारिकाणाम्" रघुः ।

अभिसारिन् त्रि० अभिसरति णिनि । १ आभिमुख्येन गन्तरि २ अनुचरे च स्त्रियां ङीप् । "षष्ठं त्रिष्टुपे क्रौष्टुभपदा

द्वौ तु जागतौ यस्याः सा जागते जगती, त्रैष्टुभे त्रिष्टुप्। वैराजौ जागतौ चाभिसारिणी" अनु०क्र० उक्ते वैदिकच्छन्दोभेदे स्त्री यस्याः वैराजौ द्वौ पादौ द्वौ च पादौ जागतौ साऽभिसारिणीति तदर्थः।

अभिसृष्ट पु० अभि+सृज-क्त। १दत्ते, २उत्सृष्टे, ३त्यक्ते च

अभिस्वर् न० स्वृ-भावे-क्विप् स्वः अभितः स्वः स्वरणं शब्दो वा यस्य। अभितः स्वरयुक्ते स्तोत्रभेदे "अभिस्वरा निषदा गा अवस्यवः" ऋ०२,२१,५ अभितः स्वः स्वरः शब्दनं वा यस्य तेन स्तोत्रेण" भा०। "स्तोतं नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा" ऋ०८,६७,१२ "अभिस्वरा अभिस्वरणेन स्तोत्रेण" भा०। [रथस्य हर्योरभिरभिस्वरे" श्रुतिः।

अभिस्वर पु० अभि+स्वृ-अप्। आभिमुख्येन प्रेरणे "स्यात

अभिहत त्रि० अभि+हन-क्त। १ अभिघातसंयोगवति। "सोदीर्णोर्मूर्ध्नाभिहतो वक्त्रमापद्य मारुतः" शिक्षा। २ ताडिते "परस्परेणाभिहता विनेदुः" पु०। ३ गुणिते च। "अन्योन्याराभिहतौ हरांशौ" लीला०।

अभिहरण न० अभि+हृ-ल्युट्। १आभिमुख्याहरणे "कार्मुकाभिहरणाय मैथिलः" रघुः। २विवाहादौ यौतकदाने च।

अभिह्व पु० अभिह्वयते अभि+ह्वे-अप् संप्रसारणञ्च। आभिमुख्येनाह्वाने ह्रस्व-अप्। २ सर्व्वतोहोमे।

अभिहस्य त्रि० अभि+हस-यत्। उपहसनीये "यस्ते मदोऽव केशोविकेशो येनाभिहस्यं पुरुषं कृणोषि" अथ०६,३०,२, ल्यप्। २ उपहसेत्यर्थे अव्य०।

अभिहार पु० अभि+हृ-घञ्। १ अपचिकीर्षया अभिगम्याक्रमणे, २ साक्षाच्छौर्य्ये, ३ अभियोगे, ४ कवचादिधारणे ५ संश्लेषणे ६ मेलने च। "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सां०का०। "समानाभिहारात् तोयदविप्रकृष्टानुदबिन्दून् जलाशये न पश्यति" सा० कौ०।

अभिहित त्रि० अभि+धा-क्त। १ अभिधया उक्त्या बोधिते २उक्ते। "अभिहिते प्रथमा" पा०। अभिधानञ्च प्रायेण तिङन्तसुबन्तसमासैः क्वचिदव्ययेन। तत्तत्तत्संख्याया अभिहितत्वे कर्तृकर्मणोरभिहितत्वमिति नैयायिकाः भवति च ग्रामं गच्छति चैत्रः, ग्रामो गम्यते चैत्रेणेत्यादौ कर्तृकर्मगतसंख्याया आख्यातेनाभिधानमतस्तत्र प्रथमोपपत्तिः। तथाचाख्याताभिधेयसंख्यात्वेन कर्तृकर्मणोः अभिहितत्वम्। वैयाकरणमते कर्तृकर्मणोरेव आख्यातेनाभिधानमिति भेदः। "अनभिहिते" पा० अनभिहिते इत्यधिकारे कर्मादौ द्वितीयादि "इति प्रविश्याभिहिता द्विजन्मना" कु०अस्य वन्ध्यर्थकतया गौणे कर्मणि क्त। वचनोद्देश्यत्वेन तस्याः कर्म्मत्वादुक्तता। गौणकर्म्मणोऽप्रयोगे तु मुख्यकर्म्मणोवचनादेरुक्तता। "वासुदेवेनाभिहिते वाक्ये तेन महात्मना" भा०उ०प०।

अभिहितान्वय अभिहितानामन्वयः। अभिधाशक्त्या(शक्त्या)उपस्थापितानामर्थानां परस्परसंबन्धे। तथा हि अभिधाशक्त्या पदार्थबोधने द्विधा प्रकारः। अन्विताभिधानम् अभिहितान्वयश्च तत्र मीमांसका एवमाहुः "सर्वेषां शब्दानां व्यवहारादेव प्रथमं व्युत्पत्तिर्गृह्यते इतरोपायानां शब्दव्युत्पत्त्यधीनत्वात्। तथा हि प्रयोजकस्य वाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिरेव प्रयोजनमवधारयति न चाकिञ्चित्कृत्तत्तस्यार्थं सम्भवतीति तद्वाक्यजन्यं प्रवृत्त्यनुकूलं कार्य्यतात्पर्य्यज्ञानमेव कल्पयति स्वप्रवृत्तौ बालेन कार्यतात्पर्य्यज्ञानस्य हेतुत्वावधारणात् तथा च प्रेक्षावत् प्रवृत्तिः कार्यतात्पर्य्यज्ञानाधीना प्रवृत्तित्वात् मदीयप्रवृत्तिवदित्यनुमीयते तत्र कारणान्तरानुपस्थितेः शब्दस्यैवोपस्थितेस्तस्यैव कार्यतात्पर्य्यज्ञानहेतुत्वमवधार्य्य तत्रैव शक्तिं कल्पयति पश्चात्तान्वयव्यतिरेकाभ्यां क्रियाकारकपदानां कार्य्यान्वितस्वस्वार्थेषु शक्तिं गृह्णाति प्रथमं गृहीतसामान्यशक्त्यनुरोधात्। ततश्च पदं कार्य्यान्वितज्ञानशक्तं पदत्वादिति सामान्यतोऽवगतः स्वार्थः, विशेषः परं नाधिगतः स च उत्तरकाले सुहृदुपदेशादिभिरवगम्यते। अतः प्रवृत्तिपराणामेव शब्दानां प्रवर्त्तकज्ञानजनकत्वम् तच्च क्वचित् साक्षात् क्वचित्परम्परया कार्य्यान्वितम् तत्र साक्षात् यजेत घटमानयेत्यादौ वाक्ये। विधिशेषीभूतार्थवादादौ तु परम्परया। कार्य्यान्वय इति सर्व्वत्र वेदे कार्य्यान्वितस्वार्थबोधकता स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थासंसर्गाग्रहेण संसर्गस्य व्यवहारः न तु संसर्गग्रहेण, तथा च व्यवहारेणैवानुमिते इतरान्वितज्ञाने करणत्वग्रहात् तत्रैव शक्तिर्गृह्यते उपस्थितत्वात् नचार्थे तत्त्यागः हेत्वभावात्। न तु पदार्थमात्रे शक्तिग्रहः व्यवहारात्तस्यानुपस्थितेः उपायान्तराच्चानुपस्थितस्यान्तरकल्पने मानाभावात्। एवञ्च इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकमिति वाक्यार्थ एव शक्त्याऽभिधीयते इत्यन्विताभिधानवादिनः"। अभिहितान्वयवादिनस्तु नैयायिकादयस्तेषामयमाशयः। इतरा-

न्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ पदार्थस्य विषयत्वात् विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिः कल्प्यते लाघवात् नत्वन्वयांशेऽपि गौरवात् अस्तु वा प्रथममितरान्विते शक्तिर्यद्दोऽन्ये तस्य त्यागः आकाङ्क्षायोग्यतादिलभ्यत्वप्रतिसन्धानात् अनन्यलभ्यस्यैव शब्दार्थत्वात् प्रथमगृहीतत्वमात्रस्याकिञ्चित्करत्वात् तथा च घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वाराकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सहस्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्यथैवान्वयज्ञानोदयात् किं तत्र शक्त्या, अन्वयमात्रशक्तावपि अन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात् तैरेव सहकारिभिरन्वयविशेषावगमसम्भवात् । क्रियाकारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वेऽवान्तरवाक्यार्थद्वयबोधप्रसङ्गात् । न चैकमेव पदमन्विताभिधायकमितरत्तु अन्वयप्रतियोगिस्मारकमिति वाच्यम् अविशेषात् कस्याभिधायकत्वमित्यनिर्णयात् । किञ्च किमशक्ययोरेवान्वये शक्तिः ? उत शक्ययोः ? आद्ये यस्य कस्यापि अन्वयबोधकत्वापत्तेरतिप्रसङ्गः स्यात् तथा च शक्यान्वयाभिधायकत्वं वाच्यं एवं च शक्ये शक्यान्वये च द्विधा शक्तिः कल्पनीयेति गौरवम् । अथ अन्वयतात्पर्यकतया तत्प्रतिपादकं पदमित्युभयसङ्गतम् तात्पर्यं निर्वाहिका च वृत्तिः सा च न गौणी न वा लक्षणेति अगत्या शक्तिः स्वीकार्येति चेत् वृत्तिं विनापि तात्पर्यनिर्वाहात् किं वृत्त्या, पदानामुच्चारणक्रमेणान्वयबोधकत्वसम्भवात् अन्यथा शक्त्यैव तात्पर्यनिर्वाहावश्यम्भावे लक्षणोच्छेदः स्यात् । अथ घटमानयेत्यादौ प्रत्येकमन्वये सत्येव विशेषान्वयसामान्ये जिज्ञासा भवति न च सामान्यानवगमे विशेषे सा स्यादित्यतस्तत्र शक्तिरिति चेन्न कारकेण क्रियायाः क्रियया च कारकस्य सामान्यत आक्षेपात् दृष्टे फले तदीयरसजिज्ञासावत् तदुपपत्तेः ततश्च पदार्थे एव शक्तिः न पदार्थान्वयांशे तस्मात् पदज्ञानं करणं पदार्थस्मरणं व्यापारः आकाङ्क्षादिसहकारिणी स्मारितपदार्थान्वयानुभवः फलमिति" ।

अभिङ्खति स्त्री अभि+ङ्खे–क्तिन् । आभिमुख्येनाङ्खाने ।

अभिङ्खत् त्रि० अभि+ङ्खे–कर्मणि अति वेदे प्रु० न गुणः । आभिमुख्येन क्षियमाणे । "दुरितादभिङ्खतः शंसादघादभिङ्खतः" ऋ० १,१२८,५ "अभिङ्खत आभिमुख्येन क्षियमाणात्" भा० ।

अभिङ्कर् त्रि० अभि+ङ्कृ–क्विप् । १ कुटिलगन्तरि "नाभिङ्करे पदं निदधाति शेवृधे" अथ० ६,७९,३ अभि+ङ्कृ–कर्मणि अप् । अभिङ्करः उपङ्करे गन्तव्यदेशादौ ।

अभिङ्कृत् त्रि० ङ्कृ कौटिल्ये कर्त्तरि अति प्रु० । आभिमुख्येन कुटिलं कुर्व्वति "निनित्सोरभिङ्कृतामसि" ऋ० १,१८९,६, "अभिङ्कृतामाभिमुख्येन कुटिलं कुर्व्वताम्" भा० ।

अभिङ्कृति स्त्री अभि+ङ्कृ–क्तिच् वेदे प्रु० । कुटिलस्वभावे । "शतभुजिभिस्त्वमभिङ्कृतेरघाते" ऋ० १,१९९,८ "अभिङ्कृतेः कुटिलस्वभावात्" भा० ।

अभी त्रि० नास्ति भीर्यस्य । भयशून्ये । कप् । अभीकोऽप्यत्र

अभीक त्रि० अभि+कन् "अनुकाभिकाभीकाः कामयिता" पा० नि० । १ कामयमाने "मेदस्विनः सरभसोपगतानभीकान्" माघः । २क्रूरे ३उत्सुके च । आभिमुख्येन कायति प्रकाशते दीर्घः । ४समीपे "प्रतङ्गावयो वहन्त्वरुषासभीके" ऋ० १,११८,५, "अभीके गृहसमीपे" भा० । ४ अभि+इण+कक् । ५ अभिगते त्रि० "यामङ्गुरुष्यतामभीके" ऋ० ७,८९,१, "अभीके अभिगते" भा० । ६कवौ ७स्वामिनि च त्रि० ।

अभीक्ष्ण त्रि० अभि+क्ष्णु–तेजने बा० ड प्रु० दीर्घः अभिगतः क्ष्णां वा प्रु० । १ सन्तते २ भृशे च । ३ क्रियावौनःपुन्ये" न० । "सहारण्यमनभीक्ष्णोपसेवितम्" रामा० । अभीक्ष्णस्य भावः ष्यञ् । आभीक्ष्ण्यम् सन्ततभावे "नित्यबीप्सायोः" पा० "आभीक्ष्ण्ये" इति सि० कौ० ।

अभीक्ष्णम् अव्य० अभि+क्ष्णु–बा० डमु प्रु० दीर्घः । पौनःपुन्येस्वरादि । "अभीक्ष्णमङ्गुलतयाऽतिदुर्गमम्" माघः ।

अभीत त्रि० अभि+इण–क्त न० त० । १ अभिगते । न० भीतः विरोधे न० त० । २ भीतभिन्ने उत्साहान्विते त्रि० ।

अभीति स्त्री अभावे न० त० । १ भयाभावे २ तद्भावार्थायाम् अभयसुद्रायाञ्च । "परशुगदगदाभीतिहस्तं प्रसन्नम्" शिवध्यानम् । ३ एते० । ३ भीतिशून्ये त्रि० । अभि+इण–क्तिन् । अभिगमने ४ "अभीतिमर्षे" इति ऋ० ७,२१,६ । "अभीतिमभिगमनम्" भा० । कर्मणि क्तिन् । ५समीपे ।

अभीपत् त्रि० अभि+पत–क्विप् दीर्घः । अभिगमनकर्त्तरि । "अभीपतोवृष्टिभिस्तर्पयन्तम् ऋ० १,१९४,५२, "अभीपतोऽभिगमनवतः" भा० । [क्षिते ।

अभीप्सित त्रि० अभि+आप+सन–क्त । १ अभीष्टे अभि-

अभीप्सु त्रि० अभि+आप+सन्–उ । अभिलाषुके ।

अभीम त्रि० विरोधे न० त० । १ भयानकभिन्ने सौम्ये ।

अभीमान पु० अभि+मन–क्विप् वा दीर्घः । अभिमानशब्दार्थे

अभीर पु० अभिमुख्येनात्य ईरयति गाः अभि+ईरः अच् ।

गोपे जातिवाचकादन्तशब्दत्वेन ततः स्त्रियां ङीप्।

अभीरु(लु) त्रि० न०त०। १ भीरु(लु)भिन्ने युद्धादावुत्साहान्विते। "स्थाने युद्धे च कुशलानभीरूनविकारिणः" मनुः "ते वाशीमत इष्मिणो अभीरवः" ऋ० १,८७,६। २वटुकभैरवे पु० "अभीरुर्भैरवो भीरुर्भूतपोयोगिनीपतिः" वटुकस्तः ७त०। युद्धस्थाने न०। शतमूल्यां स्त्री असङ्कुचितपत्रत्वात्तथात्वम्। वा ङीष्। अभीरूः शतमूल्याम्। "अभीरूभिसिसिम्बूयवत्सकोशीरपद्मकैः" सुश्रुतः।

अभीरुगा अभि+रु-बा०उनन् दीर्घः। १ अभिमुखे "यज्ञाभिद्रुहोहान्तं यज्ञ यंपे अभीरुणम्" श्रुतिः।

अभीरुपत्री स्त्री न भीरूणि असंचितत्वात् पत्राण्यस्याः जातौ ङीप्। शतमूल्याम्। [२ तद्वति। त्रि०

अभील न० अभि+ईर अच् रस्य लः। १ कण्ठे २ भयानके

अभीलाप पु० अभि+लप भावे घञ् दीर्घः। अभिमुखकथनरूपे शब्दे। "आलापाश्च प्रलापाश्चाभीलापलपश्च ये" अथ० ११,८,२५ लप् लपनं भावे क्विप् ततोद्वन्द्वः। तेन लपनालापप्रलापाभीलापाश्चत्वार एक उक्ताः। अभीलापलप् इति शब्दस्खलनं भ्रमविजृम्भितम्।

अभीवर्ग पु० अभि+वृज-आधारे घञ्। अभिमुखसंघे "अहं राष्ट्रस्याभीवर्गे निजोभयासमुत्तमः" अथ०३,५,२०।

अभीवर्त्त पु०अभिवर्त्तन्ते गच्छन्ति स्वर्गमनेन अभि+वृत-करणे घञ्। १ब्रह्मसामनि तच्च "उदग्रभतपरिधत्तमोषां योना पुत्रं ब्राह्मणाच्छंसिनमक्तिगर्भेदस्य पृष्ठस्तोत्रम्। "अभीवर्त्तोब्रह्मसाम भवति अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभ्यवर्त्तन्त तदभीवर्त्तो ब्रह्मसाम भवति स्वर्गस्य लोकस्याभिवृत्यै" ता०ब्रा०। "अभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्तसंज्ञा निष्पन्ना" भा०। "तदभीवर्त्तस्याभीवर्त्तत्वमिति सांख्यायनसू०। एतदभीवर्त्तसंज्ञं साम पूर्वस्मिन् पक्षसि विद्यमानानामभिप्रविष्टानां संज्ञां स्वरसाम्नां च माध्यन्दिने सवने यजमानान्वारब्धेन ब्रह्मणा पृष्ठस्तोत्रतया कर्त्तव्यं, तथा उत्तरस्मिन् पक्षसि "इन्द्रक्रतव आभरे" त्येक एव प्रगाथः ब्रह्मसामाश्रयः कर्त्तव्यः। प्रत्यृचं च तस्मिन् प्रगाथे अन्यदन्यत्साम ब्रह्मणा पृष्ठस्तोत्रार्थं कर्त्तव्यम् इति", ता०ब्रा० भा०। २ संवत्सरे। "अभीवर्त्तः सविंशः" यजु० १४,२२। अभिवर्त्यन्ते आवर्त्यन्त इत्यभीवर्त्तः सामाष्टसिद्धः स विंशः स्तोमः यद्वा अभिवर्त्तयत्यावर्त्तयति सर्वाणि भूतानीत्यभीवर्त्तः संवत्सरः "उपसर्गस्य अन्यतरस्यां बहुलमिति" पा० दीर्घः। द्वादशमासषट्ऋतुसंवत्सररूपविंशतिसङ्ख्यया सहितः सविंशः। य एष सविंशस्तोमः तमुपदधातीत्यर्थः "संवत्सरो वा अभीवर्त्तः इति संवत्सरो हि सर्वाणि भूतान्यभिवर्त्तते" श्रुतिः वे०दी०। ३अभीवर्त्तेनेत्यादिके सूत्रे "अधैनं सारयमाणमुपारुह्याभीवर्तं वाचयति" आश्व० श्रौ०। ४ अभिवृत्तिसाधने हविर्भेदे च। "अभीवर्त्तेन हविषा येनेन्द्रो अभिवावृते" ऋ० १०,१७४,१।

अभीशु पु० अभि+अश-उनु पृ० अत इत्वम्। १ बाहौ "अभीशवोऽभ्यश्नुवते कर्म्मणि" निरु०। २ अश्वरज्जौ। "स्थिरा वसन्तु नेयोरधो अश्वा स एषां सुसंस्कृता अभीशवः" ऋ० १,१६२,१२,। ३ किरणे "प्रफुल्लसापिच्छनिभैरभीशुभिः" माघः "सुयन्तृभिः सर्वशासैरभीशुभिः" ऋ० ५,४४,४, अभीशुभिः रश्मिभिः" भा०। ४ "अङ्गुलौ च अभीशवोऽङ्गुलयः" ऋ० भा० उक्तेः।

अभीशुमत् पु० अभीशवः किरणा बाहुल्येन सन्त्यस्य मतुप्। सूर्य्ये "क्षितिपःक्षितिपुरभीशुमानिव" माघः।

अभीषङ्ग पु० अभि+सनुज-घञ् दीर्घः। अभिषङ्गशब्दार्थे।

अभीषु पु० अभि+इष+कु। १ किरणे (लागाम) इति ख्याते २प्रग्रहे, ३ वाजे, ४ अनुरागे च। सर्वे कोषकारा मूर्द्धन्यान्ततया मेदुः लोकवेदयोस्तालव्यान्तप्रयोगः" भट्टि०।

अभीष्ट त्रि० अभि+इष-क्त। १ वाञ्छिते, २ दयिते, ३ हृद्ये च "ज्ञातकं गुरुमभीष्टमित्विजम्" माघः। "आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये" वे०सा०।

अभुक्त त्रि० भुज-कर्म्मणि क्त न०त०। १ "अभक्षिते अश्नादौ २अकृतभोगे पुण्यादौ च। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि" पुरा०। भोगश्च भोजनीयद्रव्याहारः कर्म्मकृतसुखदुःखानुभवश्च॥ भुक्तं भोजनं भावे क्त अर्शा० अच् न०त०। २ भुक्तवज्जिते "भुक्ताभाक्षणाः पीता गाव इति अर्थ आद्यश्च" पा०भाष्यम्। सुप्तबोधे तु कर्त्तरि क्त इत्युक्तम्। "अभुक्तौ क्वतिथिर्व्रजेत्" स्मृतिः "अभुक्तस्य दिवा निद्रा पाषाणमपि जीर्य्यति" वैद्य०।

अभुक्तमूल न० "भुजङ्गयोरन्द्रपौष्णभानां तद्व्यभानाञ्च यदन्तरालम्। अभुक्तमूलं प्रहरप्रमाणं त्यजेत् सुतं तत्प्रभवां सुताञ्च" इति नारः। "ज्येष्ठान्ते घटिके द्वे च मूलाद्य घटिकाद्वयम्। अभुक्तमूलमित्याहुर्ज्ञातं तत्र वियर्ज्जयेत्" वशि० ज्येष्ठान्यघटिकार्द्धञ्च मूलादौ घटिकार्द्धकम्। तयोरन्तर्गता नाड़ी ह्यभुक्तमूलसुच्यते" इति ब्रह्मवै० उक्ते ज्येष्ठामूलानक्षत्रयोराद्यन्तघटिकाविशेषे।

अभुज् त्रि० न भुङ्क्ते भुज–क्विप् न०त०। अभक्षके। "नभ आश्वश्वोः किमभुग्वदामि" ऋ० १०, ९५, ११।

अभूत त्रि० न भूतः। भूतशब्दार्थभिन्ने। "अभूतमासज्य विरूपमोक्षितम्" माघः। २ मिथ्याभूते ३ अविद्यमाने च

अभूततद्भाव पु० अभूतस्य प्रकृतिरूपेणानाविर्भूतस्य तेन रूपेण भावः। यः कश्चित् पदार्थः येन रूपेण प्रागभूतस्तेन रूपेण तस्याविर्भावे। यथा मृत्तिका घटीभवति। "कृभ्वस्तियोगे सम्पद्ये कर्त्तरि च" पा० "अभूततद्भावे इति वक्तव्यम्" वा०। [त्वाभिमाने।

अभूताभिनिवेश पु० अभूतेऽसत्येऽभिनिवेशः। असत्ये सत्य-

अभूति स्त्री अभावे न०त०। १ भवनाभावे "तस्य ह न देवाश्च नाभूत्या ईशते" शत० ब्रा०। "अभूत्यै अभवनाय" भा० २ सम्पत्त्यभावे" "ध्रुवाश्चापि व्यशीर्य्यन्त भरतानामभूतये" भा०शल्य०। न०ब०। भूतिशून्ये त्रि०।

अभूमन् पु० विरोधे न०त०। १ भूरिभिन्ने स्वल्पे।

अभूमि स्त्री न०त०। १ अनाश्रये अविषये "अभूद्भूमिः प्रतिपत्तिजन्मनां भियामिति" माघः "अभूमिरियमपनयस्य"शकु०"नाभूद्भूमिः स्मरशायकानाम्" नैष०। "सखलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः" इति शकु०। अप्राशस्त्ये न०त०। अप्रशस्तभूमौ। न०ब०। भूमिशून्ये त्रि०।

अभूमिज त्रि० न०त०। १ भूमिजभिन्ने आकाशजे जलादौ २अप्रशस्तभूमौ उत्पन्ने धान्यादौ च। "अभूमिजं नवश्वापि न धान्यं गुणवत् स्मृतमिति" सुश्रुतः।

अभूयिष्ठ त्रि० विरोधे न०त०। भूरिभिन्ने अल्पे।

अभूषित त्रि० विरोधे न०त०। भूषितभिन्ने अपरिष्कृते

अभृत त्रि० न भृतः। १ अप्राप्तवेतने। गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः" मनुः २ अपुष्टे च।

अभृग्न त्रि० न०त०। १ भृग्नभिन्ने मन्दे अल्पे।

अभेद पु० अभावे न०त०। भेदाभावे ऐक्ये "गतयोरभेदमिति सैन्ययोस्तयोः" माघः "अभेदः शिवरामयोः" पुरा० "रलयोर्डलयोश्चैव जययोर्बवयोरपि। शसयोर्णनयोश्चान्ते सविसर्गाविसर्गयोः। सविन्दुकाविन्दुकयोः स्यादभेदेन कल्पनम्" आलङ्कारिकाः "गुणगुणिनोः क्रियाक्रियावतोश्चाभेद" इति सांख्यादयः। अभेदश्च भेदाभाव इति बहवः। तादात्म्यमिति तु साङ्ख्यादयः। तादात्म्यञ्च तत्सत्त्वनियतसत्ताकत्वं तेन गुणगुणिनोः क्रियाक्रियावतोरपि तादात्म्यं गुणक्रिययोर्द्रव्यनियतसत्ताकत्वात् अतएव वेदान्तपरिभाषायाम् सत्यैक्ये मिथोभेदस्तादात्म्यमित्युक्तं द्रव्यगुणयोर्मिथोभेदसत्त्वेऽपि तत्सत्त्वनियतसत्ताकत्वात् तथात्वम्।

अभेद्य त्रि० भेत्तुं शक्यते भिद्–शक्यार्थे ण्यत् न०त०। १ भेत्तुमशक्ये "अभेद्यकवचं दधे" भा० द्रो० प०। २ क्षीरके न० तस्य केनापि धातुना भेत्तुमशक्यत्वात् तथात्वम्।

अभोक्तव्य त्रि० न भोक्तुमर्हम् ण्यत्यादिनिषिद्धत्वात्। अभक्ष्ये। तच्चाभक्ष्यशब्दे २७४ पृष्ठे दर्शितम्।

अभोक्तृ त्रि० न भोक्ता स्त्रियां ङीप्। भोक्तृभिन्ने। [त्रि०

अभोग पु० अभावे न०त०। १भोगाभावे न०ब०। २भोगशून्ये

अभोजन न० अभावे न०त०। भोजनाभावे उपवासे "स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्" "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्" इति च मनुः। भोजनाभावश्च भोजनविषयकनिवृत्तिरिति मीमांसकाः भोजनात्यन्ताभाव इति नैयायिकाः आत्यन्ताभावस्य स्वैमिकजन्यत्वाङ्गीकाराच्च कृतिसाध्यत्वमिति विवेकः। भोजनाभावश्च भोजने क्वचिद्रागाभावेन रोगेण वा, क्वचिच्च शास्त्रादितो भोजने बलवदनिष्टसाधनत्वज्ञानेन विरोधात् इष्टसाधनताज्ञानानुदयेन, यथा न कलञ्जं भक्षयेदित्यादौ। क्वचिच्च व्रतरूपे भोजनाभावे इष्टसाधनताज्ञानेन। स च भोजननिवृत्तिस्तदन्याभावो वेत्युक्तम्। विस्तरस्तु निषेधनिषेधविधिशब्दयोर्द्रष्टव्यः। "अजीर्णे भोजनं येषां जीर्णे येषामभोजनम् रात्रावभोजनं येषां तेषां नश्यन्ति धातव" इति वैद्यः। न०ब०। २ भोजनशून्ये त्रि०।

अभोज्य त्रि० न भोक्तुं शक्यं निषिद्धत्वात्। अभक्ष्ये तत्स्वामिनि उपचारात् "अभोज्यानान्तु भुक्त्वान्नमिति" मनुः अभक्ष्यशब्दे २७४ पृष्ठे विवरणम्।

अभोज्यान्न त्रि० न भोज्यमन्नं यस्य स्मृतिनिषिद्धत्वात्। अभक्ष्यान्नस्वामिनि ते च अभक्ष्यशब्दे २७४ पृष्ठे उक्ताः। "य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः" मनुः।

अभौम न० भूमौ भवम् न०त०। भौमभिन्ने नाभसजलादौ विरलं जलशब्दे "अभौममम्भोविसृजन्ति मेघाः" इति पुरा०

अभ्यक्त त्रि० अभि+अन्ज–क्त। १ कृततैलाद्यभ्यङ्गे २ अभितोलिप्ते च।

अभ्यग त्रि० अभिसुखमयं यस्य। आसन्ने निकटे।

अभ्यङ्ग पु० अभि+अन्ज–घञ् कुत्वम्। तैलादिमर्द्दने। "मूर्द्धि दत्तं यदा तैलं भवेत् सर्वाङ्गसङ्गतम्। स्रोतोभिस्तर्पयेत् बाह्यं अभ्यङ्गः स उदाहृतः" "तैलमल्पं यदाङ्गेषु न च स्याद्बाह्यतर्पणम्। संवार्द्धिबद्धयोऽभ्यङ्गोमस्तकादौ प्रकीर्त्तितः" इति च वैद्यकोक्ते २ विशेषाभ्यङ्गे च। "तैलाभ्य-

ङ्गनिषेधे तु तिलतैलं निषिध्यते" । "अतैलं सार्षपं तैलं यत् तैलं पुष्पवासितम् । अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यश" इति च ति०त० स्मृतिः । "अभ्यङ्गनेपथ्य मलङ्कार" कुमा० । "अभ्यङ्गमङ्गनश्चाक्ष्णोरुपानच्छत्रधारणमिति" मनुः । "अभ्यङ्गमाचरेन्नित्यं सजरा-श्रमवातहम्" । "शिरःश्रवणपादेषु तं विशेषेण शीलयेत्" वैद्य० ।

अभ्यञ्जन न० अभि+अनुज-भावे ल्युट् । अभ्यङ्गशब्दार्थे "भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः" मनुः । "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" शु०त० प्रचेताः । करणे ल्युट् । २नेत्रादौ कज्जलादिदाने । ३ तत्साधने द्रव्ये । अभि+अनुज-णिच् ल्युट् । अभ्यङ्गनसाधन-व्यापारे "अभ्यङ्गनं स्नापनञ्च गात्रोत्साद्दनमेव च । गुरु-पत्न्या न कार्य्याणि" मनुः ।

अभ्यञ्जनीय त्रि० अभि+अनुज-कर्मणि अनीयर् । १अनु-लेपे चन्दनादौ २ मर्द्दनीये तैलघृतादौ च "एतदभ्यञ्ज-नीयं घृतमिति" दुर्गोत्सवपूजापद्धतिः" ।

अभ्यधिक त्रि० अभ्यमधिकः प्रा०स० । उत्कृष्टतमे । "अयं वैनः श्रेष्ठ" इति द०उ० भाष्ये श्रेष्ठः प्रशस्ततमः अभ्यधिकइति व्याख्यानात् तथात्वम् । "न त्वत्समोऽस्त्यभ्यधिकः कुतोन्यः" गीता । २ अधिकपरिमाणे "धान्यं दशभ्यः कुम्भेभ्योहर-तोऽभ्यधिकं वधः" "तथा धरिम (पल) मेयानां शताद-भ्याधिके वधः" इति । "पञ्चपलतस्त्वभ्यधिके हस्त-च्छेदनमिष्यते" इति च मनुः ।

अभ्यध्व अव्य० अध्वनोऽभिमुखम् अव्ययी० अच्समा० । मार्गाभिमुखे "संस्थितेऽध्वर्युराहवनीयसमीपे स्थित्वाऽ-भ्यध्वं यज्ञं प्राहुरिति" कात्या० २४,५,३५, "अभ्यध्वं मार्गाभिमुखम्" कर्कः । "ययोरभ्यध्वे उत यद्दरे चित्" "अध० ४,२८,२" तृतीयासप्तम्योर्बहुलम्" पा०वा नाम्

अभ्यक्ता पु० अभि-अक्त-अच् पृ० । तिलकल्के । (खलि)

अभ्यनुज्ञा स्त्री० अभि+अनु+ज्ञा-अङ् । अनुज्ञार्थायाम् इदं कुरु इत्यादिना प्रवर्त्तने "कृताभ्यनुज्ञा गुरुणा गरीयसा" कुमा० "पपौ वसिष्ठेन कृताभ्यनुज्ञः" रघुः ।

अभ्यनुज्ञात त्रि० अभि+अनु+ज्ञा-क्त । इदं कुरु इत्या-दिनाज्ञा नियोजिते आभिमुख्येनानुज्ञाते ।

अभ्यनुज्ञान न० अभि+अनु+ज्ञा-भावे ल्युट् । १ अनुज्ञा-याम् इदं कुरु इत्याद्यनुज्ञा नियोजनभेदे । "भरद्वाजाभ्य-नुज्ञानाच्चित्रकूटस्य दर्शनम्" रामा० । [२ प्रकाशिते च

अभ्यनूक्त त्रि० अभि+अनु+वच-क्त । १ आभिमुख्येन अनूक्ते

अभ्यन्तर न० अभिगतमन्तरम् । १ अन्तराले, मध्य-स्थाने । "नवोटजाभ्यन्तरसम्भृतानलम्" कुमा० । "प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया" "शमीमिवाभ्यन्तरलीन-पावकाम्" इति च रघुः । "ब्रह्मद्विट्परिविक्तिञ्च गणा-भ्यन्तर एव च" मनुः । २ उभयोर्मध्ये ३ अन्तःकरणे च । अभ्यन्तरे भवः अण् आभ्यन्तरम् । अन्तःकरणस्थे त्रि० "शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्त्वाभ्यन्तरम् । अशौचाद्धि वरं बाह्यं तस्मादाभ्यन्तरं वरम्" दक्षः ।

अभ्यन्तराराम त्रि० अभ्यन्तरे सर्व्वाभ्यन्तरे परमात्मनि आर-मति कर्त्तरि घञ् । आत्मारामे आत्मज्ञे योगिनि "आत्मनश्च 'इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः । महतः परमव्यक्तमव्य-क्तात् पुरुषः परः" इति गीतावाक्येन अन्तर्यामिब्राह्मणेन १२० पृष्ठे दर्शितेन च सर्व्वाभ्यन्तरवर्त्तित्वम् ।

अभ्यमन न० अभितः अमनम् अम-गत्यादौ भावे ल्युट् । १ अभिगमने । चु० अम-ल्युट् अमन्तत्वात् ह्रस्वः । २ । रोगे, करणे ल्युट् । ३तत्साधने अहितसेवने च ।

अभ्यमित त्रि० अभि+चु०+अम-कर्मणि क्त । १ रुग्णे २ पीड़िते च । वा त्रि० । अभ्यान्तोऽप्यत्रैव "बलभिस्तेन चाभ्यान्तस्तं विव्याध ततोऽधिकैः" भा० द्रो०प० ।

अभ्यमित्र अव्य० अमित्रस्याभिमुख्यम् अव्ययी० । अमित्रस्य शत्रोराभिमुख्ये । अमित्रमलंगामीत्यर्थे "अलं गामीत्यधि-कारे "अभ्यमित्राच्छ च" पा०ङ अभ्यमित्रीयः चात् ष्वयतौ अभ्यमित्रीणः अभ्यमित्रः । सामर्थ्येन शत्रोरभिमुखगामिनि वीरे पु० । "मारीचोऽनुनयंस्तासादभ्यमित्रोभयामि ते" "उद्योगमभ्यमित्रीणोयथेष्टं त्वञ्च सन्तनु" इति च भट्टिः ।

अभ्यमिन् त्रि० अभि+चु०+रोगे-अम-कर्त्तरि अम-न्तत्वात् ह्रस्वः णिनि । १रोगयुक्ते २आभिमुख्येन पीड़के ।

अभ्यय पु० अभितः सर्व्वतः अयः निष्क्रमः इण-अच् । १ अस्तमये "आदित्याभ्ययेऽङ्गतायामपि" कात्या० ८, ६,१३ "वषाहोमात् पूर्व्वमादित्यास्तमये" कर्कः । २अपगमे च "तमोऽभ्यये सायं जुहुयात्" कात्या० ४,१५,१२ तमसोऽन्धकारस्याभ्ययेऽपगमे" कर्कः ।

अभ्यर्चन न० अभि+अर्च-ल्युट् । १ समन्तात्पूजने २ आभिमुख्यार्थं पूजने च । "नित्यं स्नात्वा शुचिः

कार्य्यादित्युपक्रमे "देवताभ्यर्चनञ्चैव" मनुः। भावे अ। अभ्यर्चायत्र स्त्री।

अभ्यर्च्य त्रि० अभि+अर्च-कर्म्मणि ण्यत्। १ अभितः पूजनीये "देवाग्नयः सदाभ्यर्च्याग्रहस्थैस्तु विशेषतः" पु०। ल्यप्। २आभिमुख्येन पूजयित्वेत्यर्थे अव्य० "देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्" मनुः।

अभ्यर्ण त्रि० अभि+अर्द्द-कर्म्मणि क्त आविदूर्थे इडभावे नि० नत्वम्। समीपे। "कालोऽभ्यर्णजलागमः कुर्यालिनो-वत्सस्य वार्त्तापि न" सा०द०। "अभ्यर्णमागस्कृतमस्मृ-ग्रद्भिः" रघुः। "कृष्णार्णवाभ्यर्णचरैकहंसः" प्रतप्तमभ्यर्ण-तया विवस्वता" इति च माघः।

अभ्यर्थना स्त्री अभि+अर्थ-भावे युच्। आभिमुख्येन प्रार्थने "अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे" कुमा०। भावे ल्युट्। तत्रैव न०। [अभिमुखं याचनीये।

अभ्यर्थनीय त्रि० अभि+अर्थ-गौणे कर्म्मणि अनीयर्।

अभ्यर्थित त्रि० अभि+अर्थ-गौणे कर्म्मणि क्त। १प्रार्थिते "अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ" रघुः। गौणकर्म्मण्यविवक्षायां मुख्ये क्त। २प्रार्थनाकर्म्मणि।

अभ्यर्ह्य त्रि० अभि+अर्थ-ण्यत्। प्रार्थनीये। "कार्य्येषु चैककार्य्यत्वादभ्यर्ह्योऽस्मि न वज्रिणा" रघुः। ल्यप्। अभिमुखं याचयित्वेत्यर्थे अव्य०।

अभ्यर्हित त्रि० अभि+अर्द्द क्त। भक्षणोद्यते।

अभ्यर्हणा स्त्री अभि+अर्द्द-भावे युच्। १ पूजायाम् २अभि-मुखमर्चायाञ्च। भावे ल्युट्। तत्रैव न०।

अभ्यर्हणीय त्रि० अभि+अर्द्द-अनीयर्। पूजनीये। "शा-रङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" मनुः।

अभ्यर्हित त्रि० अभि+अर्द्द-कर्म्मणि क्त। १पूज्ये २उचिते च।

अभ्यवकर्षण न० अभि+अव+कृष-भावे ल्युट्। शस्यादुद्धारे।

अभ्यवस्कन्द पु० अभि+अव+स्कन्द-घञ्। १ यत्नेराक्रमे, २ निर्बलीकरणाय यत्नभिः क्रियमाणे प्रहारे ३अभ्य-वसादने ४ प्रहारमात्रे, ५ आसादने, ६ प्रपाते च। ल्युटि अभ्यवस्कन्दनमप्यत्रार्थे न०।

अभ्यवहरण न० अभि+अव-हृ-ल्युट्। भोजने।

अभ्यवहार पु० अभि+अव+हृ-घञ्। भोजने। "अल्पान्ना-भ्यवहारेण" मनुः।

अभ्यवहार्य्य त्रि० अभि+अव+हृ-ण्यत्। भोक्तुंयोग्ये। "सर्व्व-मेतादृक्षाभ्यवहार्य्यमेव" विक्र०। "खरं विशदमभ्यवहार्य्यम्" पा०भ०

अभ्यवहृत त्रि० अभि+अव+हृ-क्त। भक्षिते।

अभ्यवायन न० अभि+अव+इण-ल्युट्। आभिमुख्येनापयाने "यत्र शुष्कस्य चार्द्रस्य च सन्धिःस्यात्तदपगूहेत यद्यु अभ्यवायनाय" यत०ब्रा०।

अभ्यसन न० अभि+अस-ल्युट्। १अभ्यासे २पौनःपुन्येनैक-क्रियाकरणे ३ पुनःपुनरावर्त्तने "विद्यामभ्यसनेनेव प्रसा-दयितुमर्हसि" रघुः। "स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते" गीता "अनभ्यसनशीलस्य विद्येव तनुतां गता" रामा० "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः" दक्षः।

अभ्यसनीय त्रि० अभि+अस-आवश्यकार्थे अनीयर्। अव-श्याभ्यासयोग्ये वेदादौ।

अभ्यसूयक त्रि० अभि+असू-उपतापे कण्ड्वा० यक् ण्वुल्। अत्यन्तासूयाकर्त्तरि सन्मार्गवर्त्तिनां गुणेषु दोषारोपके। "मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" गीता।

अभ्यसूया स्त्री अभि+असू-उपतापे कण्ड्वादि० यक् प्रत्य-यान्तत्वात् अ, स्त्रीत्वात् टाप्। गुणेषु दोषारोपणे। "केनाभ्यसूया पदकाङ्क्षिणा ते" कुमा० "रूपेषु वेशेषु च साभ्यसूयाः" "शक्राभ्यसूयाविनिवृत्तये यः" "नूनं तेषा-मभ्यसूयापरोऽभूत्" इति च रघुः।

अभ्यस्त त्रि० अभि+अस-क्त। पौनःपुन्येनैकजातीयाक्रिया कर्म्मणि पुनःपुनरावर्त्तिते। "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणामिति" रघुः। २ "उभे अभ्यस्तम्" पा० उक्तयोः कृतहित्वयोरुभयोः धातुभागयोः। "नाभ्य-स्ताच्चतुः" "अभ्यस्तस्य च" पा०।

अभ्यस्य अव्य० अभि+अस-ल्यप्। पुनःपुनरावर्त्त्येत्यर्थे।

अभ्याकाङ्क्षित न० अभि+आ+काङ्क्ष-भावे क्त। १मिथ्या-भियोगे। (मिथ्यानाखिय) कर्म्मणि क्त। २ईप्सिते त्रि०।

अभ्याख्यान न० अभि+आ+ख्या-ल्युट्। १ मिथ्याभियोगे, "यतं मे धारयसीत्यादि" मिथ्याभियोगे २ मिथ्योद्भावने च।

अभ्यागत पु० अभि+आ+गम+क्त। भिन्नग्रामीणे गृहं गते-ऽतिथौ "सर्व्वत्राभ्यागतो गुरुः" पुरा०। २ सम्मुखागत-मात्रे त्रि०। "अभ्यजातोऽभ्यागतस्तूर्णतर्णकान्" माघः।

अभ्यागम आभिमुख्येनागम्यतेऽत्र अभि+आ+गम-अप्। १ युद्धे। कर्म्मणि अप्। २ अन्तिके। करणे अप्। ३ विरोधे। भावे अप्। ४ अभ्युत्थाने ५ अभिघाते ६ अभिमुखगमने "किं वा मदभ्यागमकारणं ते" रघुः।

अभ्यागमन न० अभि+आ-गम-ल्युट्। १ आभिमुख्ये नोद्गमने २ अभ्युत्थाने च।

अभ्यागारिक पु० अभ्यगारे तद्गतकर्म्मणि व्याप्तः ठन्।

१ गृहवृत्तिपुत्रादिपोषणेषु व्याप्ते २तेनैव व्याकुले ।

अभ्याघात पु० अभि+आ+हन-घञ् । १ आघाते २ ताड़ने च । करणे घञ् । २ आघातोपदेशे । "अभ्याघातेषु मध्यस्थान् शिष्याञ्चौरानिव हुतम्" मनुः "अभ्याघातेषु चौर्य्योपदेशेषु" कुल्लू० ।

अभ्याघातिन् त्रि० अभि+आ+हन-ताच्छील्ये विनुण् । हिंसाशीले । "अभ्याघातिभिरामिश्चश्वातकैः परिराटिभिः" भट्टिः ।

अभ्याचार पु० अभि+आ+चर-घञ् । आभिमुख्येनाचरणे । "अवारयन्त वरुणेन देवाअभ्याचारमसुराणाम्" अथ० १०,३,२

अभ्याज्ञाय पु० अभि+आ+ज्ञा-घञ् । अभिज्ञाने पूर्व्वज्ञातस्य तथात्वरूपेण ज्ञाने "तस्मिन् दक्षिणां दधाति तूपरौ मिथुनौ दद्यादित्यभ्याज्ञायैवमन्य" इति शत० ब्रा० ।

अभ्यातान पु० अभि+आ+तन-घञ् । अत्यन्तसन्ततौ ।

अभ्याक्त पु० अभि+आ+अक्त+सातत्ये कर्त्तरि क्त वेदे त्रि० । १ सर्व्वव्यापके परमेश्वरे । "सर्व्वमिदमभ्याक्तोऽवाक्यनादरः" छा० उप० । "सर्व्वमिदं जगदभ्याक्तः अभिव्याप्तः अततेः व्याप्यर्थस्य कर्त्तरि निष्ठा" भा० । अभि+आ-दा-क्त । २आभिमुख्येन गृहीते त्रि० । [२ आरम्भे च ।

अभ्यादान न० अभि+आ+दा-ल्युट् । १ आभिमुख्येनादाने,

अभ्याधान न० अभित आधानम् । अभितोमन्त्रादिना वह्न्यादेराधाने "यानिघ्मस्य परिदधात्यभ्याधानाय" शत० ब्रा० । [अभ्यमितशब्दे २७५ पृष्ठे विवरणम् ।

अभ्यान्त पु० अभि+अम-क्त नि० । रोगयुक्ते निष्पीड़िते

अभ्यापत्ति स्त्री अभि+आ-पद-क्तिन् । आभिमुख्यागमने ।

अभ्यामर्द्द अभि+आ+मृद-आधारे घञ् । १ रणे । भावे घञ् । २निष्पीड़ने ।

अभ्यायंसेन्य त्रि० अभि+आ+यम-कर्म्मणि वा० सेन्य । अभितो नियन्तव्ये । "वाससोऽभ्यायंसेन्या भवतं मनीषिभिः" ऋ० १,२४,१, "अभ्यायंसेन्यौ अभितोनियन्तव्यौ" भा० ।

अभ्यारम्भ पु० अभि+आ+रभ-घञ् समु० । प्रथमारम्भे

अभ्यारूढ त्रि० अभि+आ+रुह-क्त । अभ्यमारूढे दृष्टे "तेनैव आत्मनमभ्यारूढम्" शत० ब्रा० ।

अभ्यारोह पु० अभि+आ+रुह-घञ् । १ आभिमुख्यारोहणे । आभिमुख्येनारोहति देवभावमनेन करणे घञ् । २मन्त्रजपभेदे "नन्विदमभ्यारोपजपविधिशेषोऽर्थवादः" इति ह० भा० । "श्रेयान् वा एषोऽभ्यारोहाद्भवति" शत० ब्रा० ।

अभ्यारोहणीय त्रि० अभि+आ+रुह-अनीयर् । आभिमुख्येनारोहणीये । यज्ञात् । अभ्यारोहद्योऽयत्त ।

अभ्यावर्त्त त्रि० अभि+आ+वृत-अच् । १ पुनः पुनरावर्त्तमाने "प्रजा वै बर्हीरेतः आज्यं तत्प्रजास्वेवैतत् रेतः सिञ्चते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते" शत० ब्रा० । भावे घञ् । २ अयमाहुत्तौ पु० । अभि+आ+वृत-णिच् कर्म्मणि अच् । २ पुनः पुनरावर्त्तनीये स्तोत्रादौ त्रि० । "चतुर्विंशाः पवमानाः त्रिवृदभ्यावर्त्तं चतुश्चत्वारिंशाः पवमानाः एकविंशमभ्यावर्त्तम् अष्टाचत्वारिंशाः पवमानास्तयस्त्रिंशमभ्यावर्त्तम्" शत० ब्रा० ।

अभ्यावर्त्तिन् त्रि० अयमावर्त्तते अभि+आ+वृत-णिनि । १ सन्तत वर्त्तमाने । २वेदप्रसिद्धे यजमानराजपुत्रे पु० । "मेषोऽभ्यावर्त्तिने यजमानाय गिरन्" ऋ० ६, २७,५ । "अभ्यावर्त्ती यजमानो ददाति" ऋ० ६,२७,८ ।

अभ्याहृत पु० अभि+आ+हृत- उपसृष्टत्वात् कर्म्मणि क्त । आभिमुख्येन आनीते होमयोग्यद्रव्ये । "वातोऽभ्याहृतः" य० १,५८ । "अभ्याहृतः होमयोग्यीभूतः" वे० दी० २ पुनःपुनरभ्यस्ते त्रि० ।

अभ्याहृत्ति स्त्री अभि+आ+हृत-क्तिन् । यौनःपुन्येनाभ्यासे "संख्यायाः क्रियाभ्याहृत्तिगणने कृत्वसुच्" पा० । "मनागनभ्याहृत्या वा कामं भाव्यतु यः अभौ" साम० ।

अभ्याश पु० आभिमुख्येनाश्नुते व्याप्नोतेऽनेन अश्नु-व्याप्तौ करणे घञ् । निकटे । निकटस्थस्याभिमुखव्यापनात्तथात्वम् । २क्षिप्रे तस्याव्यवहितकालेन व्यापनात्तथात्वम् । "यएतदेवं विद्वान् साधु सामेत्युपास्ते अभ्याशोह यदेनं साधवोधर्म्मा अभ्यागच्छेयुः" छा० उ० । "अभ्याशः क्षिप्रम्" भा० "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्" । य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्" छा० उ० ।

अभ्यास पु० आभिमुख्येनाश्नुते क्षिपते अस-क्षेपे कर्म्मणि घञ् । १ निकटे । "द्यूतयष्टिरिवाभ्यासे सभौ परभृतोऽनुशो" कुमा० । अभेर्मीर्य्यर्थत्वे । २ पुनःपुनरनुशीलने यौनःपुन्येन करणे । "अभङ्गाभ्यासरतिं विधित्स्व तमिति" कुमा० । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ! "अभ्यासेन च कौन्तेय ! वैराग्येण च गृह्यते" । "अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमोभव" २ "अभ्यासयोगयुक्तात्मा ततो याति परां गतिम्" इति च गीता ४वेदादेराद्यत्वे च अभ्यासस्य पञ्चधा । "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः । तद्ज्ञानञ्चैव शिष्येभ्योवेदाभ्यासो हि पञ्चधा"

दत्तः । ४ ग्रन्थतात्पर्य्यज्ञापके पौनःपुन्येन कथनरूपे लिङ्गभेदे "उपक्रमोपसंहाराभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये इति" उक्तेः यथा च्छान्दोग्ये षष्ठप्रपाठके "तत्त्वमसि श्वेतकेतो ! इत्यस्य नवकृत्वः अभ्यासः । ५ एकस्मिन्नालम्बने देवादौ इतरतः समाकृत्य मनसः स्थापने च । कर्मणि घञ् । ६ व्याकरणोक्तयोः द्विरुक्तभावापन्नयोः धातुभागयोः । "स्यादिश्च अभ्यासेन चाभ्यासस्य" पा० ।

अभ्यासयोग पु० अभ्यासेन सततानुशीलनेन योगः । सततैकविषयचिन्तनेन जाते समाधौ । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय" ! "अभ्यासयोगयुक्तात्मा ततो याति परां गतिमिति" च गीता ।

अभ्यासादन न० अभि+आ+सद्–णिच् ल्युट् । १ शस्त्राद्यैः शत्रोर्निर्बलताकरणे, २ शत्रोः सम्मुखगमने ३ समीपस्थापने च ।

अभ्याहार पु० अभि+आ+हृ–घञ् । १ अभिहारार्थे २ समाहरणे ३ आभिमुख्येन आनयने च । "अस्मिन्नु हैवैकेऽवान्तरदेशे कर्षूं खात्वा ततोऽभ्याहारं कुर्व्वन्ति" शत० ब्रा० ।

अभ्याहित त्रि० अभि+आ+धा–कर्मणि क्त । १ आभिमुख्येन मन्त्रादिना स्थापिते विधिना कृतसंस्कारे वह्नौ ।

अभ्युक्त त्रि० आभिमुख्येनोक्तः । १ समन्त्रसुक्ते २ प्रकाशिते च ।

अभ्युक्षण न० अभि+उक्ष्–सेचने ल्युट् । "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् । न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृत्युक्ते अवतानपाणिना सेच्याभिमुख्येन, सेचने २ सेचनमात्रे "परस्पराभ्युक्षणतत्पराणाम्" रघुः अभ्युक्षणं च स्नानकार्य्ये कात्या० २२,६,१४ । कर्त्तव्यमिति शेषः । अभ्युक्षणादि च द्रव्यादिसंस्कारविशेषः अभ्युक्षितद्रव्याणामेव यागाङ्गत्वात् । स च संस्कारः अदृष्टविशेषरूपः द्रव्यनिष्ठ इति मीमांसकाः तेषामयमाशयः । यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनक इति नियमेन व्रीह्यादिगतावघातानुकूलशक्तिरूपफलार्थितया क्रियमाणानां प्रोक्षणाभ्युक्षणादीनां स्वगतावघातादिरूपफलजनकव्यापारत्वम् तथा च प्रोक्षिता एव व्रीह्यादयोऽवघातादौ कल्प्यन्ते प्रोक्षणादिजन्यः कालान्तरभाव्यवघातजनकोव्यापारो व्रीह्यादिनिष्ठ एव कल्प्यते" इति ॥ नैयायिकास्तु "संस्कारः पुंसएवेष्टः प्रोक्षणाभ्युक्षणादिभिः" कुसुमा० उक्तेः प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसएव पुंनिष्ठः एव स्त्रीक्रियते प्रतिव्रीह्यादि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यस्य लाघवेन कल्पनात् शास्त्रदेशितं फलमनुष्ठातरीतिन्यायेन क्रियाकर्त्तर्य्येव प्रधानफलवत्तत्तद्व्यान्तरादृष्टस्यापि तत्रैव कल्पनौचित्यात् अन्यथा अन्यगतादृष्टेन अन्यगतप्रधानापूर्व्वजनने वैयधिकरण्यात् अतिप्रसङ्गः स्यात् व्रीह्यादेश्च सर्व्वपुरुषसाधारण्येनानिर्णयकत्वात् अन्यथा अकृतप्रोक्षणादिसंस्कारस्यापि पुंसः परकृतसंस्कारेण प्रधानापूर्व्ववत्त्वापत्तेः । यो यद्गतफलार्थितयेत्यादिनियमस्य शत्रुनिष्ठबधाद्युद्देशेन क्रियमाणे श्येनयागादौ व्यभिचाराच्चार्थसाधकत्वं तत्र हि शत्रुगतवधफलाद्युद्देशेऽपि अभिचारिपुरुषगतस्यादृष्टविशेषस्य कल्पनावश्यम्भावात् अन्यथा तत्कर्त्तुः प्रायश्चित्तोपदेश्यस्यानर्थक्यापत्तेः अभिचारकर्मणश्च उपपातकमध्ये मन्वादिभिर्गणनात् तस्य पापजनकत्वसिद्धिरिति ।

अभ्युचित त्रि० अभि+उक्ष–क्त । कृताभ्युक्षणे यज्ञपात्रादौ

अभ्युक्ष्य त्रि० अभि+उक्ष–अर्हार्थे ण्यत् । अभ्युक्षणार्हे । ल्यप् । अवतानपाणिना सिक्त्वेत्यर्थे अव्य० "असन्दैनस्वष्टयं कृत्वाभ्युक्ष्य सोमोपनह्यनेन" कात्या० २२,६,१३ । "तेनोदकेनात्मानं यूजनोपकरणञ्चाभ्युक्षेति" त० सा० ।

अभ्युच्चय पु० अभि+उद्+चि–अच् । १ दृद्धौ । "अभ्युच्चयस्तु लक्ष्मीः" किरा० २,१८ मल्लिनाथोक्तेः २ लक्ष्म्यामपि ।

अभ्युत्थान न० अभि+उत्–स्था–ल्युट् । १ आदरेणासनादित उत्थाने २ गौरवेणोत्थानादिना ३ प्रत्युद्गमने, ४ उत्थानमात्रे, ५ उद्यमे, ६ ऊर्द्ध्वे च । "नवाभ्युत्थानदर्शिन्योनमन्तुः सप्रजाः प्रजाः" रघुः "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम्" गीता । [कर्त्तरि स्त्रियां ङीप् ।

अभ्युत्थायिन् त्रि० अभि+उद्+स्था–णिनि । अभ्युत्थान

अभ्युत्थित त्रि० अभि+उद्–स्था–क्त । १ कृताभ्युत्थाने अभिवादे सम्मानार्थमासनादित उत्थिते । २ अभिमुखेनोद्गते च "अभ्युत्थितानिपिशुनैरतिथीनाश्रमोन्मुखान्" रघुः ।

अभ्युत्थेय त्रि० अभि+उद्+स्था–उपसृष्टत्वात् कर्मणि यत् । अभिवादे यस्याभिवादनार्थमासनादित उत्थानं क्रियते तस्मिन् । "अभ्युत्थेयस्याधि" कात्या० २२,५,२७ गुर्व्वादेरभ्युत्थेयस्यापि अभ्युत्थानमिति" कर्क० ।

अभ्युत्पतन न० अभि+उत्+पत–ल्युट् । आभिमुख्येनोत्पतने "अलक्षिताभ्युत्पतनो वृषेण प्रसह्य सिंहः" रघुः ।

अभ्युदय पु० अभि+उत्+इण्–अच् । १ अभीष्टकार्य्याणां प्रादुर्भावे, २ वृद्धौ, "भवो हि लोकाभ्युदयाय ताद्दशाम्" रघुः ।

अभ्युदीयतेऽनेन करणेऽच् । २आधारेऽधिकरणेऽच् । चूडादिसंस्कारे च । अत एव तदर्थकश्राद्धम् आभ्युदयिकमित्युच्यते । ४अभ्युदयसाधने दृष्टलाभे ५दृष्टनिमित्तके श्राद्धे च "सम्पन्नमित्यभ्युदये दैवे क्वचितमित्यपि" मनुः । "अभ्युदये दृष्टे श्राद्धे" कुल्लू० । "प्रतिषेद्धाऽपि चेद्या तु मद्यमभ्युदयेष्वपि" मनुः । भावे अच् । ६उत्तरोत्तरवृद्धौ "अभ्युदयफलं धर्म्मज्ञानमिति" भा० भा० "धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनमिति" भवि० पु० । अभ्युदयः दृष्टलाभादि प्रयोजनमस्य ठञ् । अभ्युदयनिमित्ते श्राद्धे । "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्" गोभि० "अभ्युदयः दृष्टलाभः विवाहादि तदर्थं श्राद्धम् आभ्युदयिकम् तच्च भूतभविष्यद्भेदेन द्विविधम् भूतं पुत्रजन्मादि भविष्यत् विवाहादि" आ० त० रघुनन्दनः ।

अभ्युदयार्थक न० अभ्युदयः दृष्टलाभादि अर्थो निमित्तं यस्य । अभ्युदयनिमित्ते श्राद्धे "नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयार्थकम्" मार्क० पु० ।

अभ्युदानयन न० अभि+उद्+आ+नी-ल्युट् । अग्नेरभिमुखमानयने "अभ्युदानयन्" गो० सू० अभ्युदानयन् अग्नेरभिमुखमानयन् जपेदिति भ० त० रघुनन्दनव्याख्यानात् तदुपसृष्टस्य नयतेः तथार्थत्वम् ।

अभ्युदाहरण न० अभि+उद्+आ+हृ-ल्युट् । १ अभिमुखकथने २आभिमुख्येनोर्द्धमुत्क्षेपणे च ।

अभ्युदित त्रि० अभितः सर्व्वतः उदितमुत्क्रान्तं प्रातर्विहितं कर्म यस्मात् । सूर्य्योदयकाले निद्रयाऽक्षततत्कालकर्त्तव्ये १ब्रह्मचारिणि । "सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः" मनुः । २अभितउदिते, ३ प्रकाशिते च त्रि० "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" भ० त० पुरा० । [भावे क्त कथने न० ।

अभ्युदीरित त्रि० अभि-उद्+ईर-क्त । अभिमुखमुक्ते ।

अभ्युद्गम पु० अभि+उद्+गम भावे अप् । १ अभ्युत्थाने २ उद्भवे च । ल्युट् । अभ्युद्गमनमप्यत्र न० ।

अभ्युद्यत त्रि० अभि+उद्+यम क्त । उद्युक्ते "कुलमभ्युद्यत नूतनेश्वरम्" रघुः । १अयाचितोपनीते फलादौ, "यथोदकं मूलफलमन्नमभ्युद्यतञ्च यत्" मनुः ।

अभ्युद्धृत त्रि० अभि+उद्+हृ-क्त । १अयाचितोपनीते २अभ्यर्थ्य दत्ते च "यथोदकं मूलफलमन्नमभ्युद्धृतञ्च यत्" शु० त० मनुवचनपाठः "अभ्यर्थ्य दत्तमिति व्याख्यातं च रघुनन्दनेन । अभि+उद्+धृ-क्त । २आभिमुख्येनोत्तोलनेन धृते ।

अभ्युन्नत त्रि० अभिमुख्येन उन्नतः । आभिमुख्येन उन्नते अत्यन्तोन्नते । "अभ्युन्नताङ्गुष्ठनखप्रभाभिः" कुमा० ।

अभ्युपगत त्रि० अभि+उप+गम-क्त । १स्वीकृते अङ्गीकृते । २ समीपगते ३अभिमुखमुपगते च ।

अभ्युपगम पु० अभि+उप+गम-अप् । १स्वीकारे "क्रियाभ्युपगमात्त्वेतद्दीजार्थं यत् प्रदीयते" मनुः । २समीपगतौ च । "नियमदयादीक्षाभ्युपगमेत्यादि" सुश्रुतः ।

अभ्युपपत्ति स्त्री अभि+उप+पद-क्तिन् । अनिष्टनिवारणपूर्व्वकाभीष्टसम्पादनरूपे अनुग्रहे, "ब्राह्मणाभ्युपपत्तौ च यमपथे नास्ति पातकमिति" "स्त्रीविप्राभ्युपपत्तौ च धर्मेण न च दुष्यति" "स्त्रीबालाभ्युपपत्तौ च वाक्पाणां सिद्धिकारणम्" इति च मनुः अभ्युपपूर्व्वपदात्तेः सान्त्वमानुग्रहार्थत्वेनैव "रतिमभ्युपपन्नमात्मरामेति" कु० प्रयोगः । २ सान्त्वने च

अभ्युपपत्तुम् अव्य० अभि+उप+पद-तुमुन् । सान्त्वयितुम् अनुग्रहीतुं वेत्यर्थे "रतिमभ्युपपत्तुमात्मरामम्" कुमा० ।

अभ्युपपन्न त्रि० अभि+उप+पद-क्त । अनुगृहीते ।

अभ्युपाय पु० अभि+उप+इण्-अच् । १ स्वीकारे २ अभिकोपाये च । "तस्मिन् सुराणां विजयाभ्युपाये" कुमा० "तान् वोऽभ्युपायान् वक्ष्यामि" मनुः ।

अभ्युपेत त्रि० अभि+उप+इण-क्त । १अभिमुखसमीपगते २अङ्गीकृते ३ अङ्गीकर्त्तरि च ।

अभ्युपेत्य त्रि० अभि+उप+इण-कर्म्मणि क्यप् । अभिमुखं समीपगम्य । ल्यप् । स्वीकृत्येर्थे अव्य० । "अभ्युपेत्य च शुश्रूषामिति" नार० ।

अभ्युपेत्याशुश्रूषा स्त्री अभ्युपेत्य अङ्गीकृत्य अशुश्रूषाऽसेवनम् । अङ्गीकृत्य पश्चात् दास्याकरणरूपे विवादभेदे "अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते" नार० । "आत्माकरणं शुश्रूषा तामङ्गीकृत्य पश्चाद्यो न सम्पादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यमिति" मिताक्षरा ।

अभ्युपेत्या स्त्री अभि+उप+इण-भावे क्यप् । सेवायाम् ।

अभ्युषित त्रि० अभि+वस-क्त । १अभिमुखमुषिते अभिमुखस्थिते सेवकादौ पु० ।

अभ्यूष पु० अभित ऊ(ऊ)ष्यते अग्निना दह्यते अभि+ऊ(ऊ)ष-घञ् । कर्म्मणि क । १ यवगोधूमादिचूर्णकृते (रोटि) प्रसिद्धे दग्धान्नभेदे । अष भावे कर्म्मणि वा घञ् । वह्निना दह्यमाने ओदने हेम० भावे घञ् । कलायादेरीषद्दहने अभि+उष-भावादौ घञ् । अभ्योषोऽप्यत्र अभ्यू(भ्यूषो)-भावश्चित्रं द्रष्टव्यौ अभ्यू(भ्यु)(भ्यो)षीयम् अभ्यू(भ्यु)(भ्यो)-

च्च । तत्रहिते गोधूमकलायादौ । अपूपादिगणपाठात् नि० अत्येषशब्दोऽप्युक्तार्थे ततोऽपि क्वयतौ उक्तार्थे ।

अभ्यूह अभि+ऊह-घञ् । स्वबुद्धिमात्रकल्पिते तर्के "नैषा तर्केण मतिरापनेयेति" कठ उ० भाष्ये "स्वबुद्ध्याभ्यूहेन केवलेन तर्क्यमाण इति" उक्तम् ।

अभ्यूहनीय त्रि० अभितः ऊहनीयः । स्वबुद्ध्या तर्कणीये ।

अभ्यूह्य त्रि० अभितः ऊह्यः । १स्वबुद्धिमात्रेण तर्कणीये । ल्यप् । २अभितस्तर्कयित्वेत्यर्थे अव्य० ।

अभ्र अतौ भ्वादि० पर० सक० सेट् । अभ्रति आभ्रीत् आनभ्र अभ्रम् "तेष्वसौ दन्त्यूकारिर्वनेष्वानभ्र निर्भयः" भट्टिः ।

अभ्र न० अभ्र-अच् । १मेघे २मुस्तके ३आकाशे च अभ्र-शब्देऽधिकं दृश्यम् । "तदा विद्यादनध्यायमनृतौ चाभ्र-दर्शने" मनुः "अभ्रं लिह्यात् रविमार्गभङ्गम्" भट्टिः । "वर्षाभ्यश्च हमभ्रघनादिभ्योन्दोः" रघुः कुर्व्यादिगण-पाठात् तच्छासके ऋषिभेदे पु० । तस्य अपत्यम् कुर्वादि० यञ् । अभ्र्यः तदपत्ये पुंस्त्री । अभ्रमिवाचरति क्यङ् अभ्रायते ।

अभ्रक न० पु० अभ्र-कुन् । क्वचित् पुंस्त्वमप्यस्य । (आव)-धातुभेदे एतच्च गौरीरजोजातं यथोक्तम् रसेश्वरदर्शने शिववाक्यम् । "अभ्रकस्य बीजन्तु भस बीजन्तु पारदः अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनम्" । जारिताभ्रस्यैव पारदमेलनद्वारा मृत्युनाशकत्वमतस्तज्जारणविधिर्दर्शितः चक्रदत्ते । "क्षौणाभ्रकमनेकवपुर्व्यञ्जाख्यञ्चैकपात्रकं क्षत्वा । काष्ठमयोदूखलके चूर्णं सुबलेन कुर्वीत ॥ भूयो दृषदि च पिष्टं वासःसूक्ष्मावकाशतलगलितम् । मण्डूकपर्णिकायाः प्रस्वरसे स्थापयेच्चदिनम् ॥ उद्धृत्य तद्रसाद्य पिण्याद्यैर्मल्लिकधान्यभक्षास्यम् । अक्षोदात्य-न्तस्वच्छजलेन प्रयत्नेन । मण्डूकपर्णिकायाः पूर्वं सुरसेनालोडनं कुर्यात् । स्थालीपाकं पुटनं चाद्यैरपि भृङ्गराजाद्यैः ॥ ताडादिपत्रमध्ये क्षत्वा पिण्डं निधाय भस्माग्नौ । तावद्देयं यावन्नीलोऽग्निर्दृश्यते सुचिरम् ॥ निर्वापयेच्च दुग्धेन दुग्धं प्रक्षाल्य वारिणा तदनु । पिष्ट्वा दद्या वस्त्रे चूर्णं निस्चन्द्रकं कुर्यात्" इति ।

अभ्रंलिह त्रि० अभ्रं गगनं लेढि स्पृशति अभ्र+लिह-खश् मुम् । गगनस्पर्शिनि अत्युच्चे "प्रासादमभ्रंलिहमा-रुरोह" रघुः "अभ्रंलिह्यं रविमार्गभङ्गमिति" भट्टिः ।

अभ्रंकष त्रि० अभ्रं गगनं कषति पीड्यति उच्चत्वात् अभ्र+कष-ख मुम् । अत्युच्चे । "आदायाभ्रंकषं प्रायान्मलयं मलयालिनम्" भट्टिः ।

अभ्रज त्रि० अभ्रात् मेघात् जायते जन-विट् ५त० । मेघ-जाते "यो अभ्रजा वातजा यश्च शुम्भोवनस्पतीनुत्सचतां पर्वतांश्च, अथ० १,१२,३जन-ड । अभ्रजोऽप्युक्तार्थे त्रि०

अभ्रनाग पु० ६त० १ ऐरावते गजे ।

अभ्रपथ पु० ६त० अच् समा० । विमाने गगनमार्गे ।

अभ्रपिशाच पु० अभ्रे गगने पिशाच इव । राहुग्रहे तस्य च्छायात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वम् ।

अभ्रम पु० भ्रमोभ्रमणं मिथ्याज्ञानञ्च अभावे न०त० । १भ्रमा-भावे । न०व० । २भ्रान्तिशून्ये त्रि० । [जटामांसाम् ।

अभ्रमांसी स्त्री अभ्रमिव जटाया मांसमस्य गौ०ङीष् ।

अभ्रमाला स्त्री ६त० । मेघसमूहे ।[केन लिप्तायां स्त्रियाञ्च ।

अभ्रलिप्ती स्त्री ३त० ङीष् । १अल्पाभ्रैर्लिप्तायां दिवि २अल्पमुस्त-

अभ्रवर्ष पु० अभ्रैर्मेघैर्वृष्यते कर्मणि घञ् । १मेघैः सिच्यमाने "दिव्यानकोशासो अभ्रवर्षाः" ऋ० ६,८८,६, अभ्रवर्षाः अभ्रैर्वृष्यमाणाः भा० । भावे घञ् । २मेघवर्षणे ।

अभ्रवाटिका स्त्री अभ्रेण शून्येन वाटो वेष्टनं यस्याः गौ० ङीष् । अज्ञातकदृक्षे । तस्याः पत्रशून्यकाले शून्याष्टतत्वेन प्रतीतेस्तथात्वम् ।

अभ्राज त्रि० न भ्राजते भ्राज-अच् न०त० । १ दीप्ति शीलभिन्ने २सामगानविशेषद्रष्टरि ऋषिभेदे पु० । तेन दृष्टं साम अण् । आभ्राजं तदृष्टे सामभेदे न० तच्च "परिखानो गरिष्ठा मृत्यस्माद्रुचि गीयमानं साम" ता० ब्रा० भा० । तदपि जरद्गाने ६प्र० दर्शितम् । तस्य च पाठविनियोगः ता० ब्रा० उक्तः यथा "भ्राजाभ्राजे पवमानसुखे भवत" इति गवामयने विषुवद्दामाहे तत् पाठ्यम् ।

अभ्रातृ(क) पुं स्त्री नास्ति भ्राता यस्य वेदे न कप् लोके तु कप् । भ्रातृशून्ये । "अभ्रातेव पुंस एति प्रतीची" ऋ० १,२२,३, कवभावे स्त्रियां ङीष् । "नाभ्रातीसुपयच्छेत्" स्मृ० । कपि तु अभ्रातृका तत्रार्थे "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्" मनुः ।

अभ्रातृव्य त्रि० नास्ति भ्रातृव्यः शत्रुर्यस्य । शत्रुरहिते "अभ्रातृव्योभ्रातृव्यान् भवति य एवं विद्वान्" शत० ब्रा० ।

अभ्रान्त त्रि० विरोधे न०त० । १ भ्रान्तभिन्ने यथार्थज्ञानयुक्ते २ भ्रमणशून्ये स्थिरे च ।

अभ्रान्ति स्त्री अभावे न०त० । १मिथ्याज्ञानाभावे २ भ्रमणाभावे च । न०व० । ३मिथ्याज्ञानशून्ये ४ भ्रमणशून्ये च त्रि० ।

अभ्रावकाश पु० अभ्रमेवावकाशः । इतरावरणशून्ये आकाश-मात्रावकाशे ।

अभ्रावकाशिन् त्रि० अभ्रावकाशोऽस्यास्य इनि । गगनमात्रावकाशवति निरावरणे । स्वार्थे कन् । तत्रैव "ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः" मनुः ।

अभ्रि स्त्री अभ्रति मलं यस्मात् अभ्र गतौ अपादाने इन् । १नौकामलघर्षणार्थे काष्ठमये कुद्दाले २ कुद्दालभाले च । "खनति भेषजमित्युपक्रम्य । "हिरण्मयीभिरभ्रिभिर्गिरीणामुपसानुषु" अथ० १०,४,१४ । वा ङीप् । अभ्रीत्यप्यत्र

अभ्रित त्रि० अभ्रं मेघोजातमस्य तारं० इतच् । जातमेघे अभ्रराजौ "ददर्श काले दिवसभ्रितामिव" रघुः ।

अभ्रिय त्रि० अभ्रे मेघे भवः घ । १मेघोद्भवे, २ सुस्तकभवे, ३गगनभवे च । "अभ्रिया न द्युतयन्तो दृष्टयः ऋ०२, ३४,२, । "यदभ्रियां वाचमुदीरयन्ति ऋ०१,१६८,८, ।

अभ्रेष पु० भ्रेष–चलने घञ् न० त० । १ न्याय्ये, उचिते २ चलनशून्ये त्रि० ।

अभ्रु त्रि० भू–प्राप्तौ क्रुन् डिच्च न०त० । अप्नोति निरु० । "यत्ते विश्वानिरण्यसिदभ्राः" इति ऋ० १,६२,१ ।

अम रोगे चुरा० उभय० सेट् अक० पीड़ने सक० । अमयति-ते आमिमत् त । "यक्षा उदरमामयत्" ऋ० १०८६,८ मा च नः किञ्चनाममत्" अथ० ६,२७,३ । अमितः–आन्तः मजादौ क्तिच अमः–आमः अमी–आमी ।

अम गतौ भोजने भ्वादि० सक० शब्दे च अक० सेट् प० । अमति आमीत् । "किंशूरपत्निनस्त्वमभ्यमीषि" १०,८६,८ वेदे शपोलुकि ईट् । अमतः अमतिः अमनिषः ।

अम पु० अम–रोगे घञ् । १ रोगे "अम–गतौ अच् । प्राणे सर्व्वदागतिमत्त्वात्तस्य तथात्वम् । "वाग्वै सामैषा सा चामस्रेति छ० उ० "अमो नामासि अमा हि सर्व्वमिदम् का०उ० । अमः प्राणः भा० । अमति सहगच्छति । सेवके "याहि राजेवामवाँ" ऋचेन य० १२, ६ । "अमवान् सेवकान्" वेदी० ४ अपक्वफलादौ न० शब्दर० । प्राणहेतुत्वात् ५ बले "सेनेव सृष्टामं दधाति" ऋ० १,६६,४, अमं बलम् भा० ।

अम् अव्य० चु० अम–क्विप्०स्वरादि० । १अल्पे २शीघ्रतायाञ्च

अमङ्गल पु०नास्ति मङ्गलं प्रयोजनं यतः । एरचड्टत्वे । ईव० । कुशलशून्ये त्रि० । न०त० । मङ्गलभिन्ने । अमङ्गलञ्च मङ्गलविरोधिवस्तु । मङ्गलञ्च अभिप्रेतार्थसिद्धिर्मङ्गलमित्युक्तं तद्विरोधि अनभिप्रेतार्थसिद्धिः । तथा च अनिष्टदुःखादिरमङ्गलं मङ्गलस्य हेतोर्विनायकस्तवपाठादेर्मङ्गलत्ववत् अनिष्टप्राप्तिर्वा अनक्षाममङ्गलत्वम् । अमङ्गलस्य साधनं च द्विविधं लौकिकमलौकिकञ्च । लौकिकमिष्टवियोगादि । अलौकिकन्तु अनिष्टसूचकत्वात् अनिष्टसाधनम् न तु कारकम् "गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः इत्युक्तेः "उत्पातेन ज्ञापिते चेति वार्त्तिकोक्तेश्च । अलौकिकमपि त्रिविधं भौमं दिव्यमान्तरिक्षञ्च । तानि च उत्पातशब्दे वक्ष्यन्ते । अमङ्गलसूचकानि लिङ्गानि च कानिचित् साधारणानि कानिचिच्चासाधारणानि नेत्रस्पन्दादीनि तत्र साधारणानि कतिचित् संग्रह्य दर्शयन्ते यथा भा०भी०प० । "तथेमानि निमित्तानि भयायाद्योपलक्षये ॥ श्येना गृध्राश्च काकाश्च कङ्काश्च सहिता वकैः । संपतन्ति नगाग्रेषु समवायांश्च कुर्व्वते ॥ अभ्यघ्नञ्च प्रधर्ष्यन्ति युद्ध्यमानस्निनो द्विजाः । क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥ निर्हृयञ्चाभिवाश्यन्तो भैरवा भयवेदिनः । कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम् ॥ उभे पूर्व्वापरे सन्ध्ये नित्यं पश्याभि भारत ! । उदयास्तमने सूर्य्ये कबन्धैः परिवारितम् ॥ श्वेतलोहितपर्य्यन्ताः कृष्णग्रीवाः सविद्युतः । त्रिवर्णाः परिघाः सन्धौ भानुमन्तमवारयन् ॥ क्षपितार्केन्दुनक्षत्रं निर्ज्ञियेषदिनत्रयम् । अहोरात्रं मया दृष्टं तद्भयाय भविष्यति ॥ अलक्ष्याः प्रभया क्षीणाः पौर्णमासीञ्च कार्त्तिकीम् । चन्द्रोऽभूदग्निवर्णश्च पद्मवर्णे नभस्तले ॥ स्वप्स्यन्ति निहता वीरा भूमिभाङ्क्ष्य पार्थिवाः । राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ अन्तरीक्षे वराहस्य दृषदंशस्य चोभयोः । प्रणादं युध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये ॥ देवताप्रतिमाश्चैव प्रकम्पन्ते हसन्ति च । वमन्ति रुधिरञ्चास्यैः स्विद्यन्ति प्रपतन्ति च ॥ अनाहता दुन्दुभयः प्रणदन्ति विभाम्यते । अयुक्ताश्च प्रवर्त्तन्ते वाहिन्यायां मनोरथाः ॥ कोकिलाः शतपत्राश्च चाषा भाषाः शुकास्तथा । सारसाश्च मयूराश्च वाचो मुञ्चन्ति दारुणाः ॥ गृहीतशस्त्राः क्रोशन्ति वर्म्मिणो वाजिपृष्ठगाः । अरुणोदये प्रहस्यन्ते शतशः शस्त्रभृज्जनाः ॥ उभे सन्ध्ये प्रकाशेते दिशां दाहसमन्विते । पर्व्वस्वपांशुवर्षी च मांसवर्षी च भारत ! ॥ या चैषा विश्रुता राजंस्त्रैलोक्ये साधुसम्मता अरुन्धती तयाप्येष वसिष्ठः पृष्ठतः कृतः ॥ रोहिणीं पीडयत्येष स्थितो राजन् ! शनैश्चरः । व्याहृत्य कृष्णं सोमस्य भविष्यति महद्भयम् ॥ अनभ्रे च महाघोरः स्तनितः श्रूयते खनः । वाहनानाञ्च रुदतां निपतन्त्यश्रुबिन्दवः ॥ खरा गोषु प्रजायन्ते रसन्ते मातृभिः सुताः । अता-

र्त्तेवं पुष्पफलं दर्शयन्ति वनद्रुमाः ॥ गर्भिण्यो राजपुत्रांश्च जनयन्ति विभीषणान् । क्रव्यादाः पक्षिणश्चापि सहान्नन्ति परस्परम् ॥ त्रिविषाणास्त्रिनेत्राः पञ्चपादा द्विमेहनाः । द्विशीर्षाश्च द्विपुच्छाश्च दंष्ट्रिणः पशवोऽशिवाः ॥ जायन्ते विकृताश्चाश्च व्याहरन्त्योऽशिवा गिरः । त्रिपदाः शिखिनश्चार्च्यांश्चतुर्दंष्ट्रा विषाणिनः ॥ तथैवान्याश्च दृश्यन्ते स्त्रियो वै ब्रह्मवादिनाम् । वैनतेयान् मयूरांश्च जनयन्त्यः पुरे तव ॥ गोवत्सं बड़वा सूते श्वा शृगालं महीपते ! । कुक्कुटान् करभांश्चैव शुकांश्चाशुभवादिनः ॥ स्त्रियः काश्चित् प्रजायन्ते चतस्रः पञ्च कन्यकाः । जातमात्राश्च नृत्यन्ति गायन्ति प्रसहन्ति च ॥ पृथग्जनस्य सर्वस्य क्षुद्रकाः प्रहसन्ति च । नृत्यन्ति परिगायन्ति वेदयन्तो महद्भयम् । प्रतिमाश्चालिखन्त्येते सयक्षाः कालचोदिताः अन्योन्यमभिधावन्ति गिरयो दण्डपाणयः । अन्योन्यमवमृद्नन्ति नगराणि युयुत्सवः ॥ पद्मोत्पलानि दृश्यन्ते जायन्ते कुमुदानि च । विध्वग्वाताश्च वान्त्युग्रा रजो नाशुपधास्यति । अभीक्ष्णं कम्पते भूमिरर्कं राहुरुपैति च । श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति । अभावं हि विशेषेण कृष्णां तत्र पश्यति ॥ धूमकेतुर्महाघोरः पुष्यञ्चाक्रम्य तिष्ठति । सेनयोरशिवं घोरं करिष्यति महाग्रहः । मघास्वङ्गारको वक्रः श्रवणे च दृश्यते । भाग्यं(मघाम्)नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते ॥ शुक्रः प्रौष्ठपदे पूर्व्वे समारूढश्च विरोचते । उत्तरे तु परिक्रम्य सहितः सप्तदीप्यते ॥ श्वेतो ग्रहः प्रज्वलितः सधूम इव पावकः । ऐन्द्रं तेजस्वि नक्षत्रं ज्येष्ठामाक्रम्य तिष्ठति ॥ ध्रुवं प्रज्वलितं घोरमपसव्यं प्रवर्त्तते । रोहिणीं च पीड़यत उभौ च शशिभास्करौ ॥ चित्रास्वात्यन्तरे चैव धिष्ठितः परुषो ग्रहः । वक्रानुवक्रं कृत्वा च श्रवणं पावकप्रभः । ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः ॥ सर्व्वसस्यपरिच्छन्ना पृथिवी सस्यशालिनी । पञ्चशीर्षा यवाश्चापि शतशीर्षाश्च शालयः ॥ प्रधानाः सर्व्वलोकस्य यास्यायत्तमिदं जगत् । ता गावः प्रस्रुता वत्सैः शोणितं प्रस्रवन्त्युत ॥ निःसेहुरर्चिषश्चापात् खद्योताश्च ज्वलिनो भृशम् । व्यक्तं पश्यन्ति शस्त्राणि संग्रामं समुपस्थितम् ॥ अग्निवर्णा यथा भासः शस्त्राणां सदृक्षश्च । कवचानां ध्वजानाञ्च भविष्यति महान् क्षयः ॥ पृथवी शोणितावर्त्ता ध्वजोडुपसमाकुला । कृष्णा वैश्ये राजन् ! पाण्डवैः सह भारत ! ॥ दिक्षु प्रज्वलिताश्चाश्च व्याहरन्ति मृगद्विजाः । अत्याहितं दर्शयन्तो वेदयन्ति महद्भयम् ॥ एकपक्षाक्षिचरणः शकुनिः खचरो निशि । रौद्रं नदति संरब्धः शोणितं छर्द्दयन्निव ॥ शस्त्राणि चैव राजेन्द्र ! प्रज्वलन्तीव संप्रति । सम्पतीषासुदाराणां समवच्छाद्यते प्रभा ॥ संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ । विशाखायाः समीपस्थौ दृश्यतेऽग्निश्चरौ ॥ चन्द्रादित्यावुभौ ग्रस्तावेकपक्षे त्रयोदशीम् । अपर्व्वणि ग्रहं यातौ प्रजासंक्षयमिच्छतः ॥ अशोभिता दिशः सर्व्वाः पांशुवर्षैः समन्ततः । उत्पातमेघा रौद्राश्च रात्रौ वर्षन्ति शोणितम् ॥ कृत्तिका पीड्यते तीक्ष्णैर्नक्षत्रं पृथिवीपते ! ॥ अभीक्ष्णं वाता वायन्ते धूमकेतुमवस्थिताः । विषमं जनयन्त्येते आक्रन्दजननं महत् ॥ त्रिषु क्षत्रेषु सर्व्वेषु नक्षत्रेषु विशाम्पते । रुग्नः संपतते दीर्घः जनयन् भयमुत्तमम् ॥ चतुर्दशीं पञ्चदशीं भूतपूर्व्वां च षोड़शीम् । द्यूमान्तु नाभिजानामि भूतपूर्व्वां त्रयोदशीम् ॥ चन्द्रसूर्य्यावुभौ ग्रस्तावेकमासे त्रयोदशीम् । अपर्व्वणि ग्रहावेतौ प्रजाः संक्षयिष्यतः । शोणितैर्व्वक्त्रसम्पूर्णा अत्यम्बुस्तत्र राक्षसाः । प्रतिस्रोतोवहा नद्यः सरितः शोणितोदकाः । फेनायमानाः कूपाश्च कूर्द्दन्ति वृषभा इव ॥ पतन्त्युल्काः सनिर्घाताः शक्राशनिसमप्रभाः । अद्य चैव निशां व्युष्टामुदये भानुराहरत् ॥ ज्वलन्तीभिश्च वह्नीभिरुल्काभिः सर्व्वतो दिशम् । अन्योन्यमवहत्यङ्गिरस्तत्र चोक्तं महर्षिभिः । भूमिपालसहस्राणां भूमिः पास्यति शोणितम् ॥ कैलासमन्दराभ्यान्तु तथा हिमवतो गिरेः । सहस्रशो महाशब्दाः शिखराणि पतन्ति च ॥ महाभूता भूमिकम्पे चत्वारः सागराः पृथक् । वेलामुद्वर्त्तयन्तीव क्षोभयन्तो वसुन्धराम् । वृक्षानुन्मथ्य वान्त्युग्रा वाताः शर्करकर्षिणः ॥ अभस्माः सुमहावातैरग्नयोभिः समाहताः । दृश्याः पतन्ति चैत्यास्च आमेषु नगरेषु च । नीललोहितपीतश्च भवत्यग्निर्द्रुतो द्विजैः । वामार्चिर्दुष्टगन्धश्च सृजन् वै दारुणं स्वनम् ॥ स्वर्गं गत्वा रसास्चैव विपरीता महीपते ! । धूमं ध्वजाः प्रसृजन्ति कम्पमाना मुहुर्मुहुः ॥ सृजन्त्यङ्गारवर्षञ्च भैरवं च पटहास्तथा ॥ शिखराणां सहस्राणामुपरिष्टात् समन्ततः । वायसास्च रुवन्त्युग्रं वामं मण्डलमाश्रिताः । पक्षापक्षेति सुभृशं वाश्यन्ते वयांसि च ॥ निलीयन्ते ध्वजाग्रेषु क्षयाय पृथिवीक्षिताम् ॥ ध्मायन्तः प्रकिरन्तश्च व्याला वेपथुसंयुताः । दीनास्तुरङ्गमाः सर्व्वे वारणाः श्लिष्टवाश्रयाः" इति असाधारणानि अमङ्गलानि च दर्शितानि यथा "मुक्तकेशीं छिन्ननासां रुदतीञ्च दिगम्बराम् । कृष्णवस्त्रपरीधाना-

मपरां विधवामपि । सुखदुष्टां योनिदुष्टां व्याधिताञ्चैव कुट्टिनीम् । पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो । कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् । कुचेलमतिरूक्षाङ्गं नग्नं काषायवासिनम् । अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा । चितां दग्धवतं भक्ष निर्व्वाणाङ्गारमेव च । सर्पक्षतनरं सर्पं गोधाञ्च शशकं विषम् । श्राद्धपात्रञ्च पिण्डञ्च मोटकं वानरं तथा । देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् । शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् । कुण्डगोलकारञ्चैव शवदाहनकारिणम् । शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च । कार्पासं कच्छपं पूर्णं कुक्कुरं शब्दकारिणम् । दन्तिणेन श्रृगालञ्च कुर्वन्तं भैरवं रवम् । कपर्दकञ्च क्षौरञ्च छिन्नकेशं नखं मलम् । कलहञ्च विलापञ्च विलापकारिणं जनम् । अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् । मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् । पुंश्चलीपतिपुत्रञ्च पुंश्चल्युदनभोजिनम् । देवताशुरुविप्राणां वस्तुविक्षेपकारिणम् । दन्तापकारिणं दक्षं हिंसकं सूचकं खलम् । पितृमातृविरक्तञ्च द्विजाश्वत्थविघातिनम् । सत्यघ्नञ्च कृतघ्नञ्च न्यासापहारिणं जनम् । विप्रद्रोहं मित्रद्रोहं व्रतं विश्वासघातकम् । गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् । जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् । व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् । गलितव्याधिगात्रञ्च काणं बधिरमेव च । पुक्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा । क्षिप्तं वमन्तं रुधिरं महिषं गर्दभं तथा । मूत्रं पुरीषं श्लेष्माणं कन्यिनं नष्टकपालिनम् । भञ्जावातं रक्तदृष्टिं वात्याञ्च वृक्षपातनम् । एकञ्च शूकरं रुग्णं श्येनं कङ्कञ्च भल्लुकम् । पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा । अम्बष्ठानिक्षाञ्चाण्डञ्च तक्षमन्त्रोपजीविनम् । वैद्यञ्च रक्तपुष्पञ्चौषधं तृणमेव च । कुवार्त्तां मृतवार्त्तांञ्च विप्रशापञ्च दारुणम् । दुर्गन्धवातं दुःशब्दं राजा संग्राम वर्त्मनि । मनश्च कुत्सितं प्राहुः शुभितश्च निरन्तरम् । वामाङ्गस्पन्दनं देहज्वरो राज्ञो बभूव ह । तथापि राजा निःशङ्कं दर्शदर्शमकल्पयम्' इति ब्रह्म० पु० नि० निषेधमन्त्यमपि साधारणासाधारणानि निमित्तान्यन्यानि ज्ञेयानि "अमङ्गलाभ्यासरतिं विचिन्त्य तम्" कुमा०

अमङ्गल्य त्रि० अमङ्गलाय हितं यत् । अमङ्गलसाधने "अमङ्गल्यं बीजं तव भवतु नामैकमखिलम्" पुष्पदन्तः ।

अमण्ड त्रि० नास्ति मण्डो भक्षावशिष्टं भूषा वा यस्य । १ मण्डहीने भक्षादौ २ भूषणहीने च ।

अमत पु० अम-रागादौ अतच् । १मृत्यौ २काले ३रोगे च । ४रेणौ उज्ज्वल० । मन-क्त न०त० । ५सम्मतभिन्ने त्रि० । "यस्यामतं तस्य मतमिति श्रुतिः ।"ऐअज्ञाते च ।

अमति पु० अम-अति । १ काले उणा० । २ चन्द्रे मेदि० ३रूपे स्त्री निरु० वेदे तद्रूपे एव अस्य प्रयोगः "क्षिरस्यामतिं यामग्निश्चेत्" "व्युर्वा पृथ्वीममतिं सृजान" ऋ०७,३८,१,२ अमतिं रूपमिति भा० आवन्धुरेष्वमतिं दर्शता" १,६४,६ । दुष्टे त्रि० यद्वार्ण० । मननं मतिः अभावे न०त० । ४ज्ञानाभावे यथाश्रुतपाठाने । "अमत्यैतानि षड्जगृह्य तिरोदधिति" मनुः "कृच्छ्रांस्तु चतुरः कुर्य्यान्नोवधे बुद्धिपूर्व्वके अमत्या तु हयं कुर्य्यादिति स्मृतिः ५ अप्रशस्तबुद्धौ च स्त्री न०ब० । ६ज्ञानहीने त्रि० ।

अमतीवन् त्रि० अमतिरप्रशस्ता बुद्धिः तथा वसुते वन-क्विप् दीर्घः । अप्रशस्तबुद्धियुक्ते । "न मे स्तोताऽमतीवान दुरितः स्यात्" ऋ०८,१६,२६ । "अमतीवा अप्रशस्तबुद्धिमान्" भा० ।

अमत्र न० अमत्यनमत्र अम-भोजने आधारे अत्रन् । १भोजनपात्रे । "अयं सोमश्चमूसुतोऽमत्रे परिषिच्यते" ऋ०५, "आसनं वसनं चैव भार्य्याऽमत्रं कमण्डलुः । आत्मनस्तु शुचीनि स्युर्न परेषां कदाचन" स्मृतिः । अम-रोगे अत्रन् । २ यत्नूणामभिभावके । "मघा अमत्रो ऊजने" ऋ० २, ३६,४ । "अमत्रः यत्नूणामभिभविता" भा० अम-गतौ कर्त्तरि अत्रन् । ३भक्षनशीले त्रि० । "स्वरिरमत्रो ववक्षे रणाय १,६१,६ । "अमत्रः युद्धादिषु गमनकुशलः" भा० ४ बले च "गम्भीरेण न जरूथाममत्रिन्" ! ६,२४,६ "अमत्रं बलं तद्वत् ! भा० ।

अमत्त त्रि० न०त० । १ मत्तभिन्ने मादकद्रव्यादिभिरविकृतचित्ते २सावधाने अप्रमत्ते च । [२अन्यद्देषभून्ये त्रि० ।

अमत्सर पु० अभावे न०त० । १अन्यगुणद्वेषाभावे । न० ब० ।

अमनस् त्रि० नास्ति कार्य्यान्तरं मनो यस्य । १ कार्य्यान्तरमनोहीने बालादौ "यथा बाला अमनसः प्राणन्तः" छा० उ० । २मनोवृत्तिहीने योगिनि च । सर्व्वथा मनःशून्ये ३परात्मनि पु० "अप्राणोह्यमनाः शुभ्रः" श्रुतिः । वा कप् । ४अन्यमनस्के ५स्नेहशून्ये ६अनिच्छौत्सुक्यमनस्के च ऐयोगपद्यभेदे पु० ।

अमनि स्त्री अमति गच्छत्यत्र अम-अनि । पथि ।

अमनुष्य पु० अप्राशस्त्ये न०त० । १ मनुष्योचितकर्त्तव्यशून्ये जातिमात्रमनुष्ये २मनुष्याभिन्ने गन्धर्व्वादौ च "मनुष्यसंबन्धरहितमनुष्याणामसम्भवात्" कात्या० १,६,१७ । मनुष्यसंबन्धरहि-

सत्वम् अमनुष्याणां मनुष्याभिज्ञानां गन्धर्वादीनां सम्भवात् सहस्रायुधं भवति मनुष्याणां तु तदसम्भवात्" कर्क०।

अमनोगत त्रि० न मनोगतः। १ अनभिप्रेते २ मनसाऽचिन्तिते। [अगृहीते २अनभिप्रेते च

अमनोनीत त्रि० न मनसा नीतः गृहीतः। १ मनोदत्त्या

अमनोयोग पु० मनसो योगः विषयेषु सावधानतया संयोजनम् अभावे न०त०। अवधानाभावे तत्त्वनिर्णायकमनोदत्त्यभावे। न०ब०। तच्छून्ये त्रि०।

अमनोहर त्रि० विरोधे न०त०। रम्याभिन्ने कुत्सिते।

अमन्तु त्रि० मन्तुर्मन्ता मन—तुन् न०त०। अज्ञातरि "अकर्मा दस्युरभितो अमन्तुरन्यव्रतः" ऋ०१०,२२,८ १ मन्तुरपराधः न०ब०। २ तच्छून्ये त्रि०।

अमन्त्र त्रि० नास्ति मन्त्रः पाठो यत्र कर्मणि। १ मन्त्रशून्ये कर्म्मादौ "सायं त्वस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्" मनुः, नास्ति मन्त्रः मन्त्राध्ययनमस्य। २ वेदपाठशून्ये "अव्रतानाममन्त्राणां जातिमात्रोपजीविनां, नैषाम् प्रतिग्रहो देयः" "निरिन्द्रियाह्यमन्त्राश्च स्त्रियोऽनृतमितीरितः" श्रुति च मनुः। वा कप्। अमन्त्रकोऽप्युभयत्र "अमन्त्रकं तु शूद्रस्य सर्व्वकर्म्माणि कारयेत्" अमन्त्रकस्य शूद्रस्य विप्रोमन्त्रेण गृह्यते" श्रुतिः च स्मृतिः। [क्रते च।

अमन्द त्रि० विरोधे न०त०। १मन्दभिन्ने पटौ २उत्-

अमम त्रि० नास्ति ममेत्यभिमानः गेहादिषु यस्य। गृहपुत्रादिषु ममेत्यभिमानशून्ये "शरण्येष्वममश्चैव इक्षमूलनिकेतनः" मनुः। २ जिनविशेषे पु०। अममकारादयोऽत्र

अमर पु० मृ-पचाद्यच् न०त०। बहुकालस्थायितया मृत्युहीने देवे, "तत्रामरालयमरालमरालकेशी" नै० "सुधाय रत्नानि हरामराङ्गनाः" माघ। स्त्रीयमुत्तरार्द्धि क्रमशः सुवङ्गमनरामराः" मनुः अष्टार्द्धिकमध्ये २ अमरसिंहनामके शाब्दिके, "धान्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातोवराहमिहिरोनृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" शङ्कुः सुवाग् वररुचिर्मणिरंशुदत्तो जिष्णुस्त्रिलोचनहरी घटकर्पराख्यः। अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा यस्येह विक्रमनृपस्य सभासदोऽमी" इति च ज्योतिर्विदा०। ३मृत्युहीनदेवे, स हि छिन्नोऽपि पुनःपुनः प्ररोहति, सहसा न म्रियते। ४ पारदे तस्य वह्न्यादौ बहुतापनेऽपि न ध्वंसः। अपादाने वा अप्। तत्रैव तस्य सेवने हि मृत्युराहित्यम् रसेश्वरदर्शनशब्दे वक्ष्यते। ५ अस्थिसञ्जये च स हि बहुकालं भूमौ स्थितोपि न जीर्य्यति। स०ब० ६ मरणशून्येत्रि०। "अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेत्" हितो० "उत्पादयति सावित्रा सा नित्या साऽजराऽमरा" मनुः ज्योतिषोक्ते ७ विवाहयोटकार्थे नक्षत्रगणभेदे "हस्ताश्वातिश्रुतिमृगशिरःपुष्यमैत्वाश्विभानि पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि" ज्योतिश्चिन्ता० अधिकं गणशब्दे दृश्यम्। मरुत्वतीगर्भजाते ८मरुद्गणभेदे पु०। "मारुत्वती च मरुतो देवानजनयत् सुतान् अग्निवर्चुर्हविर्ज्योतिः सावित्रं मितमेव च। अमरं शरदश्विञ्च सत्रयञ्च महाभुजम्" इत्यादि हरिवं० ९ गुडूच्याम् १० दूर्व्वायां ११ वारुणीवृक्षे १२ महानिलीवृक्षे १३ धृतकुमार्य्याम् १४ स्नुहीवृक्षे च स्त्री। एतासां छेदनेऽपि पुनः प्ररूढत्वात् यथायथं दूर्भरत्वाच्च तथात्वम्। न म्रियतेऽनया करणे अप्। १५ जरायौ स्त्री। तच्चर्म्मणा वेष्टनेनैव जठरानलदाहनिवारणात् मरणनिवारकत्वात् तथात्वम्। १६नाभिनालायाम् राजनि० १७स्थूणायां गृहध्वंसनिवारककत्वात्तथा। अमराः सन्त्यस्मात् अर्श आ०अच्। १८ इन्द्रपुर्य्याममरावत्यां स्त्री

अमरकोष पु० अमरेण कृतः कोषः। अमरसिंहकृते लिङ्गानुशासनाख्ये त्रिकाण्डात्मके अभिधानभेदे।

अमरज पु० अमरः दुर्मर इव जायते जन—ड। दुष्खदिरे कालस्कन्धाख्ये खदिरभेदे दुर्मरत्वेन जातत्वात्तथात्वम्।

अमरदारु पु०न०। अमराणां प्रियं दारु। देवदारुवृक्षे।

अमरद्विज पु० अमरपूजकः द्विजः शाक० त०। देवले (पूजारीति) ख्याते विप्रे।

अमरपति पु०ई०त०। देवराजे इन्द्रे अमरभर्त्रादयोऽप्यत्रार्थे

अमरपुष्पक पु० अमरमविशीर्णं पुष्पं यस्य। १कल्पवृक्षे २इक्षुगन्धायां स्त्री। ३ काशवृक्षे पु० रत्नमा०।

अमरपुष्पी स्त्री अमरमविशीर्णं पुष्पमस्या जातित्वात् ङीप्। अवाक्पुष्प्याम्। कप् अत इत्त्वम्। अमरपुष्पिकाप्यत्र।

अमरप्रभु पु०ई०त०। १विष्णौ तस्य सर्व्वेश्वरत्वात्तथा। २ शक्रे च

अमररत्न न० अमर इव शुद्धं रत्नम्। स्फटिके मणौ।

अमरराज पु० ई०त० टच् समा०। देवराजे इन्द्रे।

अमरलोक पु० ई०त०। १ स्वर्गे। अमराणामिव लोको भुवनं यस्य। २प्राप्तदेवलोके धार्म्मिके त्रि०। "तेषां सम्यग्वर्त्त-

मानो गच्छत्यमरलोकताम्" मनुः ।

अमरवल्ली स्त्री अमरा उच्छेदनेऽपि न म्रियमाणा वल्ली । आकाशवल्ल्याम् (आलकलता) अमरलतादयोऽप्यत्र ।

अमरसरित् स्त्री ६त० । मन्दाकिन्यां गङ्गायाम् ।

अमराङ्गना स्त्री ६त० । "अमरांस्तु "सुधाण रत्नानि हरामराङ्गनाः" माघः ।

अमराद्रि पु० ६त० । सुमेरौ । तत्स्थानञ्च । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्पश्चिमे रोमकपत्तनञ्च । अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये बड़वामुखञ्च । इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः दुरितगजन्मकृपद्मकर्णिकेति च पुराविद इत्यमवर्णयन्" सि० शि० । अधिकं मेरुशब्दे भूगोलशब्दे च द्रष्टव्यम् ।

अमराधिप पु० ६त० । देवराजे इन्द्रे अमराधीशादयोऽप्यत्र

अमरापगा स्त्री ६त० । गङ्गायाम् । [नैष० ।

अमरालय पु० ६त० । स्वर्गे "तत्रामरालयमरालमरालकेशी"

अमरावती स्त्री अमराविद्यन्तेऽस्यां मतुप् मस्य व दीर्घः । इन्द्रनगर्याम् । सा च मेरुपर्यंतोपरिस्था "सप्तलकाञ्चनमयं शिखरत्रयञ्च मेरो सुरारिकपुरारिपुरादि तेषु । तेषामधः शतमखज्वलनान्तकानां रक्षोऽम्बुपाभिधनगेशपुराणि चाष्टौ" सि० शि० । एतद्वर्णनं भा० स० प० ७ अध्याये भागी० स्क० १० अध्याये च द्रष्टव्यम् । "सस्मन्नमेन्द्रद्रुतपातितार्गला निमीलाताक्षीव भियाऽमरावती" का० प्र० ।

अमरिषण त्रि० मृ आ० ल्युच् न० त० । मरणशीलभिन्ने "अनातुरा अजरास्तामरिषणवः" ऋ० १०,६४,११ ।

अमरु पु० अमरुगतकप्रन्थकारके कविभेदे "कविरमरुः कविरमरुः कविश्चैरोमयूरक" इत्युद्भटः ।

अमरेश पु० ६त० । देवराजे इन्द्रे अमरेश्वरादयोऽप्युक्तार्थे "अयममरेशदिशोमुखं सुधांशुः" सा० द० ।

अमर्त्य त्रि० मृ-तच् न० त० । मरणधर्मशून्ये "मृत्युणानि च मर्तमानो अमर्त्तः" ऋ० ५,२३,६, "अमर्त्तः अमरणधर्मा" भा० ।

अमर्त्य त्रि० मर्तिमर्हति यत् न० त० । मरणशून्ये "अग्ने ! विश्वद्रुपसचित्रं राधो अमर्त्य !" ऋ० १,४४,१, "अमर्त्य ! मरणरहित !" भा० "उत्क्रान्तवायोः समकालमेव अमर्त्यभावेऽपि कयोश्चिदासीत्" रघुः ।

अमर्त्यभुवन न० अमर्त्यानां देवानां भुवनम् । स्वर्गे ।

अमर्य्याद त्रि० नास्ति मर्य्यादा सीमा सम्मानो वा यत्र । १ सीमारहिते २ सम्मानरहिते च ।

अमर्ष पु० मृष-घञ् वा भञ् विरोधे न० त० । असहिष्णुतायां कोपे । "अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः" किरा० तानेव सामर्षतया निजघ्नुः" रघुः हर्षामर्षभयोद्वेगैर्विगुप्तः स च मे प्रियः" गीता ।

अमर्षण त्रि० मृष-ल्युन न० त० । १असहने २क्रोधने, च । "हृदि चतो गोत्रमिदाप्यमर्षणः" रघुः । अमर्षणोऽनवस्थायी विषादं कायलक्षणम्" । अमर्षणः स्वयं जेतुमशक्तः क्षत्रियोरणे भा० आ० प० । भावे ल्युट् । क्रोधे न० ।

अमर्षित त्रि० मृष-क्त इट् गुणश्च न० त० । क्रुद्धे "अस्त्रं प्रादृश्यकारोर्ध्वं नारायणममर्षितः" भा० आदिप० ।

अमर्षिन् त्रि० मृष-णिनि न० त० । क्रुद्धे स्त्रियां ङीप् ।

अमल न० अम+कलच् । १ सातलाख्ये २ अभ्रके च नास्ति मलं यस्य । ३निर्मले, दोषरहिते त्रि० "रसकलामलपल्लवलीलया" माघः "संचिन्वाचारकोमलामलपटैर्लालित्यलीलावतीम्" "अमलकमलरागेस्त्वां जपन्त्वांगषष्ठैः" लीला० ।

अमलात्मन् पु० अमलः रागादिदोषरहितत्वात् शुद्ध आत्मान्तःकरणं यस्य । निवृत्तरागादौ योगिनि । [२निर्बोधे च

अमम पु० अम-गतिरोगादौ असच् । १ काले २ रोगे

अमलिन त्रि० विरोधे न० त० । १मालिन्यशून्ये २निर्दोषे च "कलममलिनं मत्वेवाहं न च जीवितम्" माल० ।

अमसृण त्रि० विरोधे न० त० । चिक्कणभिन्ने रूक्षे ।

अमा अव्य० न+मा-का । १सहार्थे, अमेवानः सुहवाः" ऋ० २,३६,२ । "अमा सह भा०" । अमावस्या । २निकटे च । न मांति परिच्छिनत्ति क्षयोदयविशेषम् मा-क न० त० । सर्व्वकलाव्यापकतया स्थितायां चन्द्रस्य षोड़श्यां २कलायाम् स्त्री "अमा षोड़शभागेन देवि ! प्रोक्ता महाकला संस्थिता परमा माया देहिनां देहधारिणी अमादिपौर्णमास्यन्ताया एव शशिनः कलाः । तिथयस्ता समाख्याताः षोड़शैव वरानने !" इति रू० प्रभा० ख० । व्याख्यातं चैतत् कालाधीने "महामाया आधारशक्तिरूपा देहिनां देहधारिणी सा चन्द्रमण्डलस्य षोड़शभागेन परिमिता चन्द्रदेहधारिणी अमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदश तिथयो भवन्तीति तिथयः षोड़शैव एवञ्चात्र सामान्यविशेषरूपेण तिथिर्द्विविधश्च भवति । तत्र येयम् अमेत्युक्ता क्षयोदयवर्জ্জिता ध्रुवा षोड़शी कला तदुक्तः कालस्तिथिसामान्यम् । याश्चावशिष्टा इतिक्षयोपेताः पञ्चदश कलाभिः विशिष्टकालविभागस्तिथिविशेषः" इति । अधिकं तिथिशब्दे वक्ष्यते

सूर्य्यकिरणासंपर्कादंदीप्तायां, ४ पञ्चदश्यां कलायाम् न भीयते दृश्यते विधुरत्र । ५अमावस्यायां तिथौ च स्त्री । "अमार्कपाते श्रवणं यदि स्यात्" "यद्यमा रविवारेण" इति च प्रा०त०पुरा० । "अमायां तु सदा सोम-ओषधीः प्रतिपद्यते" इति सोमो० । न मीयतेऽसौ मा-कर्मणि क्विप् । ६ आत्मनि पु० । ७ मानशून्ये त्रि० । ८ गृहे अव्य० निरु० । "कामस्वरतामा भूते" ऋ० २,३८,६ । "अमा गृहमिति" भा० । अम्यते गम्यते चन्द्रलोकात् अत्र अम-आधारे-घञ् वा हृस्वः । ९इहलोके । "अमातोमरुतोवि आन्तरिक्षादमायुत" ऋ०५,५०,५८ । "अमातः अस्माल्लोकात्" भा० । तत्र यावत्सम्पातसुषित्वा "क्षीणे पुण्ये मर्त्यलोकं विशन्तीति" श्रुतौ चन्द्रलोकादेव इह लोकागमनात्तथात्वम् । [दुर्ब्बलः ।

अमांस त्रि० नास्ति मांसं यस्य । १दुर्ब्बले । मांसहीनो हि

अमात्य पु० अमा सह वसति ण्यत् । मन्त्रिणि । तस्य दण्डनीतौ राजसहचरत्वात्तथात्वम् । "पुरोहितामात्यसुखाश्च योधाः" भट्टिः । "अमात्यपुत्रैः सवयोभिरन्वितः" रघुः । "अमात्ये दण्ड आयत्त" इति मनुः "अमात्यव्यञ्जना राज्ञां दृष्यास्ते यत्नसंहिताः" माघः । अमात्यलक्षणयुक्तं हेमा० विष्णुध० पु० । "सर्व्वशास्त्रकुलज्ञो मन्त्री राज्ञस्तथा भवेत् । ब्राह्मणो वेदतत्त्वज्ञोविनीतः प्रियदर्शनः । कुलजश्चे मुहात्मा च स्वामिभक्तः प्रियंवदः । दृष्टस्मृत्युदितप्रोक्तां नीतिं जानाति सर्व्वतः । रागद्वेषेण यः कार्यं न च हन्ति महीक्षितः । लोकापवादाद्राजार्थे भयं यस्य न विद्यते । क्षेत्रज्ञमस्तु धर्म्मात्मा विजितात्मा जितेन्द्रियः । गूढमन्त्रश्चाऽश्वदक्षः प्राज्ञो भक्तजनप्रियः । इङ्गिताकारतत्त्वज्ञ जल्पोहविशारदः । शूरश्च ज्ञातविद्यश्च न मानी न च मत्सरी । चारप्रचारकुशलः प्रणिधिप्राण आत्मवान् । षाड्गुण्यविधितत्त्वज्ञ उपायकुशलस्तथा । वेत्ता विधाता कार्य्याणां नैव कार्य्यातिपातनः । समयज्ञश्च कालज्ञो भृत्यानाञ्च गुणप्रियः । कृतानामकृतानां च कर्मणामन्ववेक्षिता । यथा पुरुषसङ्घानां पुरुषाणां नियोजकः । कर्त्ता परोक्षे कार्य्याणि सांपराये भवेत्तम ! तत्त्वातत्त्ववेदिता च कर्मणो गुरुलाघवम् । यत्नमित्रविभागज्ञो विग्रहे चैव तत्त्ववित् स राज्ञः सर्व्वकार्य्याणि कुर्यादुभृगुवुलोद्वह ! विदितानि तथा कुर्याच्च ज्ञातानि महीक्षिता अज्ञातानि नरेन्द्रस्य कृत्वा कार्य्याणि भार्गव ! अचिरेणापि विद्वेषं स मन्त्री त्वधिगच्छति । कुरुते यस्तु कार्य्याणि विदितानि महीपतेः भेदो न तस्य भवति कदाचिदपि भूभुजा एवगुणो यस्य भवेत्तु मन्त्री वाक्ये च तस्याभिरतस्य राज्ञः । राज्यं स्थिरं स्याद्विपुला च लक्ष्मीर्यशश्च दीप्तं भुवनत्रयेऽपि" इति ।

अमात्र पु० नास्ति मात्रा परिच्छित्तिर्यस्य । १इयत्ताशून्ये परमात्मनि तुरीये ब्रह्मणि । हृत्परिमाणकल्पनेन २परिच्छेदशून्ये गगनादौ च त्रि० । अमात्रं त्वा धिषणं तविषे ऋ० १,१०२,७, "अमात्रं मात्रया इयत्तया रहितम्" भा० ।

अमानना स्त्री अभावे न०त० । आदराभावे न०ब० । आदरशून्ये त्रि० । [मनःकष्टदायके दुःखे ।

अमानस्य न० मानसे साधु न भवति मानस+यत् न०त० ।

अमा(म)मासी स्त्री अमा सह सूर्य्येण माः मासो वा चन्द्रमा यस्यां गौरा० ङीष् । अमावस्यायाम् ।

अमाय त्रि० नास्ति माया यस्य । १कपटशून्ये २अविद्याशून्ये ब्रह्मणि न० । मायोमानम् । ३इयत्ताशून्ये त्रि० ।

अमानिन् त्रि० न मन्यतेऽभिमन्यते मन-णिनि न०त० । अभिमानशून्ये "अमानित्वमदम्भित्वम्" गीता ।

अमार्जित त्रि० मृज-क्त विरोधे न०त० । अपरिष्कृते ।

अमा(वा)वसी स्त्री अमा सह वसतश्चन्द्रार्कौ यस्याम् अप् वञ् वा नि० गौरा० ङीष् । अमावास्यायाम् ।

अमाव(वा)स्या अमा सह वसतश्चन्द्रार्कौ यस्याम् नि० । कृष्णपक्षीयपञ्चदशीतिथौ । तथा हि अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः, ऊर्द्ध प्रदेशवर्त्ती मन्दगामी सूर्य्यः । तयोर्गतिविशेषात् यत्काले चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलस्याधोभागे व्यवस्थितम् भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वात् चन्द्रमण्डलमीषदपि न दृश्यते इति कृष्णपक्षे पञ्चदशकलाक्रियाकूटोपलक्षितं कालः अमावस्येति निष्कर्षः । "सूर्य्याचन्द्रमसोः यः परो विप्रकर्षः सा पौर्णमासी यः परःसन्निकर्षः साऽमावस्येति" गोभि० "अमावस्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी" मनुः । अमावास्यायां भवः वा कुन् अमावास्यकः अण् आमावस्यः । तत्रभवे त्रि० । "य आगारे सृगयन्ते प्रतिक्रोशेऽमावास्ये" अथ० २६,३ ।

अमावसु पु० आयुपुत्रे ऋषिभेदे "अमावसुमिति ख्यातमायोः पुत्रं यशस्विनम्" हरिवं० ।

अमित त्रि० न मितः । १अपरिच्छिन्ने इयत्ताशून्ये "अमितस्य हि दातारं भर्त्तारं का न पूजयेत्" ? रामा० । २अज्ञाते च ।

अमितविक्रम पु० अमिता अपरिच्छिन्ना विक्रमाश्चयः पाद-

विक्षेपा अस्य, अमितः विक्रमः शौर्य्यमस्येति वा १ विष्णौ । "सुक्रन्दोऽमितविक्रमः" वि०स० । बहुशौर्य्ये त्रि० ।

अमिताशन पु० अमितमश्नाति संहारसमये अश-ल्यु । सर्वभक्षके परमेश्वरे । "यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदने मृत्युर्यस्योपसेचनम्" इति श्रुतेः "अत्ता चराचरग्रहणात्" इति भा० स्मृताच्च तस्य सर्वभक्षकत्वम् । २ विष्णौ च "वेगवानमिताशनः" विष्णुस० ।

अमितौजस् त्रि० अमितमोजो यस्य । अपरिच्छिन्नसामर्थ्ये प्रचुरबले । "कविरमितौजा अजायत" ऋ० १,११,४ । "स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः" मनुः ।

अमित्र अम० रोगे इत्र । रिपौ । "स्यातामभित्रौ मित्रे च सहजप्राकृतावपि" तस्य मित्रागमेऽमित्रागमेऽस्ते" इति च माघः "अमित्रजिन्मित्रजिदोजसा स यदिति" नैष० "अमित्रादपि सद्वृत्तमेध्यादपि काञ्चनम्" मनुः ।

अमित्रम(मा)ह त्रि० अमित्रं सहते बलाधिक्यात् अच् अण् वा । रिपुजयशीले बलिनि "शासदृत्रा मघवा अस्यमित्रहा" । अथ० १,२०,४ । [तस्ते प्रियमभ्यमित्रा"रघुः ।

अमिथ्या अव्य० विरोधे न०त० । मिथ्याभिन्ने सत्ये "तामूव-

अमिन् त्रि० चु० अम रोगे इनि । रोगिणि ।

अमिन त्रि० मि-क्विपे बा० कर्मणि नङ् न०त० । अक्षेपणीये अहिंस्ये "उत द्विबर्हा अमिनः सहोभिः" ऋ० ६, १६,१ । "अमिनः अहिंसनीयः" भा० ।

अमिश्र त्रि० न०त० । संकीर्णाभिन्ने पृथग्भूते । "तद्वा अमिश्रमेव वसूनां प्रातः सवनम्" शत०ब्रा० ।

अमिश्रित त्रि० न०त० । मिश्रितभिन्ने पृथग्भूते ।

अमिष न० अम-भोगे कर्मणि इषन् । १लौकिकसुखे नास्ति मिषस्यश्लं यत्र । २व्याजशून्ये त्रि० ।

अमीत त्रि० मी-क्ते कर्मणि क्त न०त० । अहिंसिते । "अमीतवर्णा उषसश्चरन्ति" ऋ० ४,५१,६, "अमीतवर्णा अहिंसितवर्णाः" भा० ।

अमीव त्रि० अम-वन् नि० ईड़ागमः । १रोगे "मनेव्यस्मद् यवयन्त्वमीवाः य०" ६,१६ । अमीवाः व्याधीन् सुषंसुः वे०दी० । "अपामीवं बाधते वेति" ऋ० १, ३५, ६ "अमीवां रोगादिबाधाम्" भा० "प्रजावन्तोऽनमीवा अनागसः" ऋ० १०,३७,७ "अनमीवा रोगरहिताः" भा० । "अमीवहा वास्तोष्पते" ऋ० ७,५५,१ "अमीवं रोगं हन्ति अमीवानां रोगाणां नाशयिता" भा० । २पापे, ३ दुःखे, च न० । उच्चनदत्तस्तु मीञ् हिंसायां वन् मीवः उदरकृमिरित्येवनिपातः न तु अमीवः इत्याह ।

अमीवचातन त्रि० अमीवं रोगं चातयति चत याचने णिच्-ल्यु । रोगहिंसके "देवममीवचातनम्" ऋ० १,१२,७ अमीवानां हिंसकानां शत्रूणां रोगाणां वा चातनं घातकम्"भा० स्त्रियां गो० ङीष् । आप इद्व उ भेषजीरापो अमीवचातनीः" ऋ० १०,१३७,६ ।

अमुक त्रि० अदस्+टेरकच् उच्चमत्वे । अदःशब्दार्थे "अत्राहमसुकः साक्षी" "समाप्तेऽर्थे कर्त्तरि नाम स्वहस्तेन निवेशयेत् मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्" च या० ।

अमुक्त त्रि० न मुक्तः विरोधे न०त० । मुक्तभिन्ने १ बद्धे "सदा प्रहृष्टया भाव्यं व्यये चामुक्तहस्तया" मनुः । २संसारबन्धयुक्ते च न मुच्यते सर्व्वदा योधः ।(हातकरी)। ३कुरिकाभेदे न० ।

अमुक्ति स्त्री अभावे न०त० । १मुक्त्यभावे मुक्तिर्मोचनं रज्ज्वादिबन्धननिवृत्तिः संसारबन्धनिवृत्तिरूपोमोक्षश्च । न०ब० २मुक्तिशून्ये त्रि० । [गौणे ।

अमुख्य त्रि० मुख्यम् विरोधे न०त० । मुख्यभिन्ने प्रधानभिन्ने

अमुग्ध त्रि० न मुग्धः १ मुग्धभिन्ने । मुग्धः भोक्तान्वितः मनोहरश्च । २मुग्धावस्थातीतप्रौढायां स्त्रियां स्त्री ।

अमुतस् अव्य० असुष्मात् अदस+तसिल् उच्चमत्वे । १ असुष्मादित्यर्थे २ परलोकादित्यर्थे च "इतआजातोऽमुतः कुतश्चित् ऋ० १, १७६, ४ ।

अमुत्र अव्य० असुष्मिन् अदस् त्रल् उच्चमत्वे । १ असुष्मिन्नित्यर्थे २ परलोके इत्यर्थे च "यत्तु वागिजके दत्तं नेह नामुत्र तद्भवेत्" मनुः । ["असुत्रभूयादध यद्यमस्य" श्रुतिः ।

अमुत्रभूय न० असुत्र भवनम् भू-भावे क्यप् । परलोकभवने

अमुथा अव्य० असुना प्रकारेण थाल् । असुनाप्रकारेणेत्यर्थे "इत्थं नः सद्योऽमुथाभवोः न एतदतिक्रामादिति" शत०ब्रा० ।

अमुदृच् (च्) त्रि० असुमञ्चति अदस् अनुच क्विप् अदृगागमः उच्चमत्वे । १अदःशब्दार्थप्राप्ते २तत्पूजके च । प्रसादौ अमुदृचः । पूजार्थे अमुदृञ्चः । स्त्रियां ङीप् ।

अमुमुयच् (च्) त्रि० असुमञ्चति अदस् अनुच क्विप् गतौ न लोपः अदृगादेशः अदृरपि उच्चमत्वे । १अदःशब्दार्थे गते तत्पूजके च प्रसादौ अमसु दृचः अमुमुयुचः स्त्रियां ङीप् ।

अमु(दो)वत् अव्य० असुष्यै व वति वेदे उच्चमत्वे । अमुष्यैवेत्यर्थे "मनुष्वदङ्गिरस्वदमुवदिति यजमानार्थे याज्याः" कात्या० ३,२,७ ।

अमुष्यकुल न० इत० त्रि० असुक् । प्रसिद्धकुले । मनोज्ञा० वुञ् आमुष्यकुलकम् तद्भावे कौलीन्ये न० ।

अमुष्यपुत्र पु० ईत०नि०अलुक्। प्रख्यातवंशे कुलीने तस्य भावः मनोज्ञा० वुञ् आमुष्यकम्। कौलीन्ये न०।

अ(आ)मुष्यायण पु० अमुष्य अपत्यम् फक् (फञ्) अलुक्। विख्यातकुलोत्पन्ने अपत्ये अमुष्यापत्ये च।

अमूदृक्ष त्रि० अमुष्येव दर्शनमस्य अदस्+दृश—क्स आति अत्वमत्वे। अदःशब्दार्थसदृशे। कञ्। अमूदृशः क्विन् अमूदृक् कुत्वम्। उक्तार्थे। कञ् प्रत्यये स्त्रियां ङीप् "अमूदृशी तत्कविवृन्दवन्दिता" नै०।

अमूर स्त्री अमूः मूढ्भावः कुत्सा० अस्त्यर्थे र। मूढभिन्ने मोहशून्ये "संजानत स्वैर्दक्षैरमूराः" ऋ० १ दै८'४, "यास्वसु मूढा वयं स्मोऽमूढस्त्वमसि इति" मूढशब्दस्य रूपमाह तत्र पृ० साधुत्वम्।

अमूर्त्त त्रि० न०त०। मूर्त्तभिन्ने अवयवशून्ये अपरिच्छिन्नपरिमाणे "क्षितिर्जलं तथा तेजः पवनोमन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी" भाषा०। "मूर्त्तत्वमवच्छिन्नपरिमाणवत्त्वमिति" सि०मुक्ता०। तद्हीने गगनादौ। "द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तमेव च" शत०ब्रा०।

अमूर्त्तगुण पु० ईत०। वैशेषिकोक्ते अमूर्त्ताकाशादेर्गुणविशेषे "धर्माधर्मौ भावना च शब्दोबुद्ध्यादयोऽपि च एतेऽमूर्त्तगुणाः सर्व्वे" भाषा०।

अमूर्त्ति त्रि० नास्ति मूर्त्तिरस्य। १अवयवशून्ये गगनादौ २विष्णौ पु० "अमूर्त्तिरनघोऽचिन्त्यः" विष्णुस०। "मूर्त्तिर्घनरूपं धारणसमर्थं चराचरलक्षणं तन्नास्ति यस्य" भा०।

अमूर्त्तिमत् त्रि० न०त०। १मूर्त्तिमद्भिन्ने गगनादौ २विष्णौ पु० "दीप्तमूर्त्तिरमूर्त्तिमान्" वि०स०।

अमूल त्रि० नास्ति मूलं यस्य। १ आदिकारणशून्ये "मूलं मूलाभावादमूलम्" सा०सू०। "त्रयोविंशतितत्त्वानां मूलसुपादानं प्रधानं अमूलं मूलशून्यं अनवस्थापत्त्या तत्र मूलान्तरासम्भवात्" प्र०भ०। "इयं वा इदं जीवनं "मूलि चैवामूलञ्च तदुभयं देवानां यन्मनुष्याः उपजीवन्ति पशवोऽमूलाः ओषधयोमूलिन्यः" शत० ब्रा०। मूलि च अमूलञ्चान्नाद्यं प्रतिष्ठितम्" शत०ब्रा०। २ मूलदृक्षादिशिफा तच्छून्ये त्रि० मूलादच" । पा० अजादि० टाप्। सा च २ अग्निशिखाटङ्के। कप्। अमूलकोऽल्पार्थे मूलशब्देषु—अदृष्टे च "एतद्वचनममूलकम्" भूरिलोकप्रसिद्धिः।

अमृक्त त्रि० मृज—शोधालङ्कारयोः वेदे न पत्वम् न०त०। १अशोधिते अनिर्णिक्ते "अमृक्तेन कृशता वाससा" भ० ऋ० ६,६६,५ लोके तु अमृष्टः। तत्रार्थे धातूनामनेकार्थत्वात् २अहिंसिते। "रथोवाजा ऋभुक्षणो अमृक्ताः" ऋ०७,३७,१। "अमृक्ताः अहिंसिताः" भा०।

अमृणाल स० सादृश्ये न०त०। मृणालसदृशे वीरणमूले।

अमृत त्रि० न मृतः। १मरणशून्ये जीविते "अमृते जारजः कुण्डः" अमरः "अपाम सोमममृता अभूम" इति श्रुतिः मरणश्रुत्या "आभूतसंप्लवस्थानममृतत्वं हि भाष्यते इति" विष्णु पु० उक्तम् महाकल्पावस्थायित्वं, देवानामपि तथैवामृतत्वम् "कार्य्यान्वये तदध्यक्षेण सहातः परमान्नायात्" या०सू० कार्य्यब्रह्मणा सह सर्व्वेषां लयाभिधानात्। न मृतं मरणं यस्मात्। २पीयूषे तत्सेवने हि अमृतत्वं भारतादौ प्रसिद्धम्। तच्च प्रथमं पृथूपदिष्टै र्देवैरिन्द्रं वत्सं कृत्वा गोरूपधरायाः पृथ्वा दुग्धम् पश्चाच्च दुर्वासःशापात् समुद्रमध्यं गतम् ततो देवासुरैः समुद्रे मथिते पुनरुत्पन्नमिति पौराणिकी कथानुसन्धेया "देवासुरैरमृतमस्मुनिधिर्मथ्यमाने" किरा०। न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा०उ०। "अमृतदीधितिरेष विदर्भजे। भजसि तापमनुष्यकिमंशुभिः। यदि भवन्ति मृताः सखि! चन्द्रिकाः इति" नैषधम्। ३ जले तस्य प्राणहेतुत्वात् अमृतत्वम्। "अन्नमयं हि सौम्य। मन आपोमयः प्राणः" इत्युपक्रम्य षोड़शकलः सौम्य! पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यते" छा०उ०। जलपानाभावे प्राणविच्छेदोक्तेः तत्पाने च प्राणदृष्टेः जलस्य मरणाहेतुत्वम्। "अमृतोपस्तरणमसि स्वाहा" "अमृतापिधानमसि स्वाहेति" आपोशनमन्त्रः। ४ घृते तस्य, "आयुर्वै घृत" मित्युक्तेरायुर्जनकत्वात् मरणाहेतुत्वात्तथात्वम्। "अमृतं नाम यत् सन्तोमन्त्रजिह्वेषु जुह्वति। शोभैव मन्दरक्षुब्धक्षुभितास्भोधिवर्णना" माघः। ५पारदे तस्य च रसायनादिना पाने "अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः अनयोर्मेलनं देवि! स्यादारिद्र्यनाशनम्" इत्युक्तेः बहुकालजीवनहेतुत्वात् तथात्वम् रसेश्वरदर्शने विवरणम्। ६यज्ञशिष्टे द्रव्ये "यज्ञशेषोऽमृतं स्मृत" मित्युक्तेस्तथात्वम्। ७ अयाचिते वस्तुनि "मृतं स्याद्याचितं भैक्ष्यममृतं स्याददयाचितम्" मनूक्तेस्तस्य मरणरूपापमानहेतुयाचनशून्यत्वात् तथात्वम्। "ऋताऽमृताभ्यां जीवेत" मनुः। ८दुग्धे तस्य देहधारकत्वेन मरणाहेतुत्वात् तथात्वम्। ९अन्ने "अन्नमूलं हि जीवन" मित्युक्तेस्तथात्वम्। न म्रियते म्रीयते। १० स्वर्गे।

"अग्नौ सुवर्णमक्षीणमिति" या० उक्तेस्तस्य वह्नौ बहुतापनेऽपि अक्षीणत्वात्तथात्वम् अतएव तस्य तैजसत्वं "स्वर्णं तैजसमत्यन्तानलसन्तापेऽपि अनाश्यत्वादित्यनुमानेन" सि०सु०साधितम् । एतदभिप्रायेणैव "अमृतं वै हिरण्यमित्युक्तम्" शत०ब्रा० । ११भक्ष्यणीयद्रव्यमात्रे, तस्याश्चवक्तथात्वम् १२खाद्यद्रव्ये अमृततुल्यस्वादवत्त्वात् । १३ तत्साधने द्रव्ये त्रि० "आदित्योवै देवमधु" इत्यादि मधुविद्यायाम् 'ता एवास्यामृतामधुनाड्यः" छा०उ०पञ्चम्यः पाठः । १४हृद्ये अमृतवदाह्लादकत्वात् तथात्वम् १५ विषे १६ वत्सनाभे विषे तयोः वैद्यकोक्तादिशा शोधने अमरणहेतुत्वात्तथा । अतएव "विषमप्यमृतं क्वचिद्भवेदिति" रघुः १७मोक्षे "विद्ययामृतमश्नुते" इति श्रुतिः क्षयशून्यत्वात्तथा "अमृतस्यैष सेतुरिति" श्रुतिः "स स्निग्धे चामृताय च" अमरः । १८ अमृततुल्ये आनन्दकरत्वात्तथा । "अमृतं बालभाषितमिति" हितो० । "आप्यायितोऽसौ वचनामृतेन उद्भटः" । अमृतमरुस्य स्वामित्वेन भक्तत्वेन वा अर्श०अच् । १९ धन्वन्तरौ सहि समुद्रमथनसमये अमृतं बिभ्रदुत्थितः इति पुराणे प्रसिद्धम् । २० देवे तद्भक्षत्वेन तथात्वम् । देवानाञ्चामृतदर्शनेनैव तृप्तत्वम् "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छा०उ०उक्तेः "रथेनामृतं मर्त्यश्च" य०२३,४० अमृतं देवादिकमिति" वे०दी० । न म्रियते म्रा कर्त्तरि क्त । २१धाराकदम्बे' तस्य वह्निच्छेदनेऽपि पुनःप्ररूढत्वात्तथा २२ घनसङ्गे च तस्य ओषधितया फलपाकान्तत्वेऽपि छिन्नप्ररूढत्वात्तथात्वम् । २३ गुडूच्याम् । २४ इन्द्रवारुण्यां २५ ज्योतिष्मत्याम् २६ गोरक्षदुग्धायाम् २७ अतिविषायां २८ रास्नायिद्धति २९ दूर्व्वायाम् ३०आमलक्यां ३१ हरीतक्यां ३२ तुलस्यां ३३ पिप्पल्यां ३४ स्थूलमांसहरीतक्याञ्च स्त्री । एतासां यथायथं रोगनिवारकत्वेन तथात्वम् । अमृतेन सहोत्पन्नत्वात् अमृततुल्यास्वादवत्त्वाच्च ३५ सुरायां स्त्री । ३६सूर्य्यरश्मिभेदे स्त्री "तासां यत्तासि चत्वारि रश्मीनां दृष्टिसर्जने । यत्तत्यं हिनोत्यर्गे तावद्भर्गस्य सर्जने । आमनन्ति हि मेधाय भूतनाः पूतना इति । अतःयतं दृष्टिवाहाः सर्व्वास्ता अमृता स्त्रियः" भविष्० यादवः । तासाञ्चामृतस्य जलस्य दायित्वात्तथा । "सौरीभिरिव नाड़ीभिरमृताख्याभिरर्च्यः" रघुः । ३७सरणशून्ये विष्णौ पु० "अमृतः शाश्वतः स्थाणुः" विष्णु० । नास्ति मृतं मरणं यस्मात् । ३८ अजरामरत्वप्रदे त्रि० । "इन्द्रियस्येन्द्रियमिदं पयोऽमृतं मधु" यजु० १९,७२,७३,७४,७५ । "अमृतमजरामृत्युप्रदत्वात् आनन्दकरम् अमृततुल्यम् वे०दी० "नन्दा भौमार्कयोर्भद्रा शुक्रेज्योश्च जया बुधे । शुभयोगा गुरौ रिक्ता पूर्णा मन्देऽमृताह्वया । "आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः जया ज्ञे स्याद् गुरौ रिक्ता पूर्णाकैं चामृता शुभेति" इति ज्योतिषोक्ते ३९ तिथिवारयोगरूपे योगभेदे "ध्रुवगुरुकरमूला पौष्णभान्यर्कशारे हरियुगविधियुग्मे फल्गुनीभाद्रयुग्मे । दिवसकरतुरङ्गौ भैरवीनाथवारे । गुरुयुगनलवातोपान्त्यपौष्णानि कौजे । दहनविधिशताख्यामैत्रभं सौम्यवारे । मरुददितिभपुष्या मैत्रभं जीववारे । भगयुगजयुगस्वोपिण्डमैत्रे सिताहे । वसुनकमलयोनी सौरिवारेऽमृतानि" राज ना० उक्ते आदित्यहस्ता गुरुपुष्यधुक्ता बुधानुराधा शनिरोहिणी च । सोमे च विष्णुः कुजरेवती च शुक्राश्विनी चामृतयोगवर्गाः । उक्ते च ४० वारनक्षत्रयोगजे योगभेदे 'यदि विष्टिव्यतीपातौ दिनंवाप्यशुभं भवेत् । हन्यतेऽमृतयोगेन भास्करेण तमो यथा" ज्योति० । ४१ब्रह्मणि न० ।

अमृतगति स्त्री यदि दशमं गुरु विक्षितं विग्रिक्षमितं शुक्र विक्षितम् । अमृतगतिः फणिकथिता दलयतिका रूप ! कथिता" इत्युक्तलक्षण छन्दोभेदे ।

अमृतगर्भ पु० अमृतं ब्रह्म गर्भेऽभ्यन्तरे यस्य । १ जीवे तस्य ब्रह्मात्मकत्वात् ब्रह्मणा चान्तर्यामितया तदन्तःस्थितत्वात् तथात्वम् । "योन जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न" अथ० ६,४६,१ "स्वप्नान् स्वेन तदा सम्पन्नो भवतीति" श्रुतेः सुषुप्यवस्थायां सकलानर्थभवभासनेन तच्छून्यतया जीवस्य ब्रह्मरूपापत्त्या तथात्वम् अधिकं सुषुप्तिशब्दे दृश्यम् अमृतस्य मोक्षस्य गर्भ आधारः ।२ ब्रह्मणि

अमृतजटा स्त्री अमृतमिव स्वादु जटा यस्याः । जटामांस्याम्

अमृततत्व न० अमृतस्यामरणस्य भावः त्व । १मोक्षे । "त्यागेनैके अमृतत्वमानशुः" श्रुतिः "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" क०उ० । "अमृतत्वममरणधर्म्मत्वम् भा० "अहिंसया च भूतानाममृतत्वाय कल्पते" इति मनुः "आभूतसंप्लवस्थानममृतत्वं हि भाष्यते" इति विष्णु०पु० उक्ते २मकाकल्पावस्थायित्वे च ।

अमृततरङ्गिणी स्त्री अमृतस्य सुधाया तुषारस्य तरङ्गिणी नदीव । ज्योत्स्नायाम् राज०नि० ।

अमृततिलका स्त्री नगणयमौधरुचिरा द्वादशमिरावितस्तु-

क्करा । वसुलघुर्दीर्घयुगलका भवति सखेऽमृततिलका कथितेयम्" इत्युक्तलक्षणे दशाक्षरपादके वर्णवृत्तभेदे "त्वरितगतिश्च नजनगैरित्युक्तत्वरितगतिलक्षणाक्रान्तत्वात् तस्या एव नामान्तरम्।

अमृतदीधिति पु० अमृतमिवाप्यायिका दीधितिरस्य । चन्द्रे "अमृतदीधितिरेष विदर्भजे भजसि तापमसह्यम्" नै० ।

अमृतद्युति पु० अमृतमिवाप्यायिका द्युतिरस्य । चन्द्रे ।

अमृतधारा स्त्री अमृतस्य धारा सन्ततिः । अमृतसन्ततौ । "चरमचरणलयमवसितिगुरुयुग्मम् । अखिलमपरसुपरिगतमिति लक्षितपद्युक्ता तदियममृतधारा" वृ०र० उक्ते १पदचतुरूर्द्धपदके २छन्दोभेदे । उपरिगतम् "सुखपादोऽष्टभिर्वर्णैः परेऽस्मान्मकरालयैः क्रमाद्दृष्टा" इत्याद्युक्तलक्षणम् वृत्त० । २सुधासन्ततौ च । [उपनिषच्छब्दे विवरणम् ।

अमृतनाद पु० उपनिषद्भेदे सा च कृष्णयजुर्वेदान्तर्गता

अमृतनालिका स्त्री अमृतस्य स्वादुरसस्य नालीव । कर्पूरनालिकाभेदे पक्वान्नभेदे शब्दर० ।

अमृतप पु० अमृतं पाति रक्षति असुरेभ्यः पा-रक्षणे क । १विष्णौ हि अमृतमन्थनसमये असुरैर्हियमाणममृतं मोहिनीरूपं विधाय तान् वञ्चयित्वा देवेभ्योदानात् तत् पालकः इति भागवती कथा । "सोमपोऽमृतपः सोम" इति वि०स० । अमृतं पिबति पा-पाने क । २देवे तद्दर्शनेन तृप्तत्वात्तत्पायित्वम् अमृतशब्दे दृश्यम् । ३ अमृततुल्यमद्यादिपातरि त्रि० । "ध्रुवममृतपनामवाञ्छयासावधरमसुं मधुपस्तवाजिहीते" माघः ।

अमृतपक्ष पु० अमृतस्य हिरण्यस्य पक्षः क्षयाकारित्वात् । १वह्नौ "अग्नौ सुवर्णमक्षीणम्," या० उक्तेः सर्व्वदाहकत्वात्यपि वह्नेर्न सुवर्णनाशकत्वमित्यतस्तस्य सुवर्णपक्षत्वम् । "तस्मेतावन्मृतपक्षौ यावेतावभितोऽग्नी" इति शत० ब्रा० अमृतं स्वर्णमिव पीतौ पक्षावस्य । १सुवर्णवर्णपक्षे श्येनभेदे "हिरण्यपक्षः शकुनोभुरण्युममृतं वै हिरण्यमृतपक्षः शकुन." शत० ब्रा० ।

अमृतफल न० अमृतमिव स्वादु फलम् । (नासपातीति) १ यवनप्रसिद्धे रुचिफले "अमृतफलं लघु दृष्यं सुस्वादु तीक्ष्णहरेद्दोषान् । देयेषु सुहृत्सानां बहुलं तल्लभ्यते लैकैः भा०म० । वै०ब० । २ आमलक्याम् ३ द्राक्षायाञ्च स्त्री ४पटोले ५पारावतशब्दे च पु० ।

अमृतबन्धु पु० अमृतस्य बन्धुः एकस्थानोत्पत्तिकत्वात् सहोदरः । १ चन्द्रे तस्य अमृतमन्थनसमये समुद्रात् उत्पन्नत्वात् तथात्वम् । "ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् अमृतात्मा समुत्पन्नः सोमः शीतांशुरुच्यते" इति भा० आ० प० । अमृतस्य बन्धुरिव आहकत्वात् । २ देवमात्रे "तं देवा अन्वजानन्त भद्रा अमृतबन्धवः" ऋ० १०,७२,५, ।

अमृतभल्लातकी स्त्री "सुपक्वभल्लातफलानि सम्यक् द्विधा विदार्य्याढकसम्मितानि । विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषेण्यनीय तेन ॥ पुनः पचेत् क्षीरचतुर्गुणेन घृतांशयुक्तेन घनं यथा स्यात् । सितोपलाः षोडशभिः पलैस्तु विमिश्र्य संस्थाप्य दिनानि सप्त ॥ ततः प्रयोज्याग्निबलेन मात्रां जयेद्गुदोत्थानखिलान् विकारान् । कचान् सुनीलान् घनकुञ्चिताग्रान् सुवर्णदृष्टिं सुकुमारतान्च ॥ जवं हयानाञ्च मतङ्गजं बलं, स्वरं मयूरस्य कृताग्रदीप्तिम् । स्त्रीवल्लभत्वं लभते प्रजाञ्च नीरोगमब्दद्वितयानि चायुः ॥ न चान्नपाने परिहार्य्यमस्ति न चातपे चाध्वनि मैथुने च । प्रयोगकाले सकलामयानां राजा हृयं सर्व्वरसायनानाम् ॥ भल्लातकी गुडूचिरिह प्रागिष्टा चूर्णगुग्गुलात् । घृताच्चतुर्गुणं क्षीरं घृतस्य प्रस्थ दूष्यते" चक्रदत्तोक्ते घृतभेदे ।

अमृतभुज् पु० अमृतं भुङ्क्ते दृष्ट्वा भोगतृप्त्यं तद्भिमञ्नुते भुजक्विप् दै०त० । देवे "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छा०उ० उक्तेः दर्शनमात्रेण भोजनतृप्तिमत्त्वात्तथात्वम् । अमृतमयाचितं यज्ञशिष्टान्नं वा भुङ्क्ते । २ यज्ञशिष्टान्नभोक्तरि ३ अयाचितान्नभोक्तरि च त्रि० ।

अमृतयोग पु० अमृताख्योयोगः । ज्योतिषोक्ते । तिथिवारादियोगभेदे स चामृतशब्दे उक्तः ।

अमृतरस पु० अमृतं रस इव आस्वाद्यम् । १ अमृतरूपे आस्वाद्ये "विज्ञानेन विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः" कुमा० । अमृतस्य रसः सारः । २सुधारसे "सिक्ता इवामृतरसेन सुहृज्जनानाम्" माघः । अमृतं मोक्षः रस इव यस्य । ३ परमात्मनि "स एष वैश्ववनोऽमृतरस इति" श्रुतिः अमृतस्येव रस आस्वादोऽस्याः । ४ कपिलाद्राक्षायां (अन्दरसा) प्रसिद्धे ५ पक्वान्नभेदे च स्त्री । सा च "तृतीयभागखण्डेन मिश्रितं मधिपिष्टकम् । शुभ्रमीषद्घृतयुतं मर्दयेद्दृढपाणिना । एवं संवर्द्धितं कृत्वा स्थापयेद्भाजनोमितम् । ततोऽन्यच्चिक्कणे तु चित्तितं निस्नेचैन्तिलैः विधाय पूपकं तेन तस्मिंकायां घृते पचेत् । ततोऽमृतरसा जाता वातघ्नबलवर्द्धिनी" इति भा०म० उक्ता ।

अमृतलता स्त्री अमृतालता । १ गुडूच्याम्" (अमरलता) इति २ ख्यातायां लतायाञ्च ।

अमृतवपुस् अमृतेनाप्यायितं वपुरस्य । १ चन्द्रे स हि क्षण-

पत्ते वह्न्यादिभिः कलानामेकैकशः भक्षणेऽपि पुनः यज्ञग्नि-ष्टरूपामृतेनाप्यायते । यथोक्तं कालमाधवीये सोमोत्पत्ति-वाक्येन "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः । विश्वे देवास्तृतीयान्तु चतुर्थीं सलिलाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमजयेकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् । दशमीं पिबते वायुः पिबत्येकादशीमुमा । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः । त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निष्पीतस्य कलाशेषश्चन्द्रमा न प्रकाशते । कला षोडशिकाया तु सा त्वपो विशते तदा । अमायां तु सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं गावः पिबन्त्यधुगतश्च यत् । तत्क्षीरममृतं भूत्वा भक्ष्यभूतं द्विजातिभिः । हुतमग्निषु यज्ञेषु पुनराप्यायते प्रभो । दिने दिने कलाष्टद्धिः पौर्णमास्यां तु पूर्णता" इति । यद्यपि ज्योतिषे कृष्णपक्षे सूर्यमण्डले प्रवेश एव उक्तस्तथापि तत्तद्दिवसे चन्द्रकला-भक्षणवत् वह्न्यादीनां तत्तिथित्वेतत्परत्वं सोमोत्पत्तिवाक्यस्य देवानाम् अन्नादीनामिव भोजनस्यासिद्धे तृप्तिमात्राधायकत्वेन तद्भोग्यत्वम् "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा० उ० उक्तौ तथावगम्यते तत्त्वविरोधः । अमृतस्वरूपे विष्णौ: "अमृतांशोऽमृतवपुः" विष्णुस० ।

अमृतवल्ली स्त्री० अमृता वल्ली । गुडूच्याम् (गुलुञ्च) ।

अमृतवाक् त्रि० अमृतमिव वाक्यो वचनं यस्य । १अमृततुल्य वचने "अमृतवाक्या वयसा या त्वित्प्रश्नेन जनयति" यज० ब्रा० ।

अमृतसंभवा स्त्री० अमृतमेव सम्भवति सम् भू+अच् । गुडूच्याम् (गुलुञ्च) ।

अमृतसंयाव न० अमृतमिव स्वादु संयावम् । पक्वान्नभेदे । "पचेत् क्षतोत्थमे तत्र न्यसेत् पक्वं नवे घटे । ततो मरिचचूर्णेन चणकचूर्णावचूर्णितम् । कुर्यात् कर्पूरसंयुक्तं संयाव ममृतोपमम् । संयावममृतस्वादु पित्तघ्नं मधुरं स्मृतमिति भा० प्र० ।

अमृतसार पु० अमृतस्य दुग्धस्य सारः । घृते । चक्रदत्तोक्ते अयःपाकभेदे यथा "क्षीरस्य पाकमधुना नागार्जुनमथिदमधिदग्धः ॥ क्षीरारकूटतालजलकटाहे दृढमृण्मये प्रणम्य शिवम् । तदयः पचेदपक्वः काष्ठेन्धनेन वह्निना मृदुना ॥ निक्षिप्य त्रिफलाजलवृद्धितं यस्तत् घृतञ्च दुग्धस्य । संचाल्य क्षीरमक्षा दर्व्या लग्नं सशर्करा मथ्य ॥ मृदुमध्यखरभावैः पाकस्त्रिविधोऽत्र वक्ष्यते पुंसाम् । पित्तसमीरणश्लेष्मप्रकृतीनां मध्यमस्य समः ॥ अभ्यक्तदर्विलोढं सुखदुःखस्खलनयोगि मृदु मध्यम् । उज्झितदर्वि खरं परिभाषन्ते केचिदाचार्याः ॥ अन्ये विक्षीनदर्वीप्रलेपमाखुत्करावलिं ब्रुवते । मृदुमध्यमदर्वीचूर्णं सिकतापुञ्जोपमन्तु खरम् ॥ त्रिविधोऽपि पाक इष्टः सर्वेषां गुणकृदेव न तु विफलः । प्रकृतिविशेषे रूक्षो गुणदोषौ जनयतीत्यलम् ॥ विज्ञाय पाकमेवं द्रागयतार्थं चितौ क्षणान् कियतः । विस्राव्य तत्र क्षीरे त्रिफलादेः प्रक्षिपेच्चूर्णम् ॥ यदि कर्पूरप्राग्निर्भवति ततो विगलिते यदुक्तत्वे । चुक्षीकृतमनरूपं क्षिपेच्च वा न यदि तल्लाभः ॥ पक्वं तदघृतसारं सुचिरधृतस्निग्धभाविरक्तत्वे । गोदोहनादिभाण्डे क्षौद्रभाण्डाभावे सति स्थाप्यम् । यदि तु परिप्लुतिहेतोर्घृतमौक्तेताधिकं ततोऽन्यस्मिन् । भाण्डे निधाय रक्षेद्व्याप्युपयोगो ह्यनेन महान् ॥ अयसि विरूक्षीभूते स्नेहस्तिलघृतेन सम्पाद्यः । एतत्ततो गुणोत्तरमित्यसना स्नेहनीयं तत् ॥ अत्यन्तकफप्रकृतेर्भक्षणमयसोऽसुनेव शंसन्ति । केवलमपीदमथितं जनयत्ययसो गुणान् कियतः ॥ अमृतसारः" चक्र० द० ।

अमृतसारज पु० अमृतादिव स्वादोः सारात् जायते जन-ड ५त० । १गुडे रा० नि० ।

अमृतसू अमृतं दीधितिरूपमाप्ययनं सूते सू-क्विप् । चन्द्रे । अमृतान् देवान् सूते । देवमातरि स्त्री ।

अमृतसोदर अमृतस्य सोदर एकत उत्पन्नत्वात् । उच्चैःश्रवसि अश्व । तस्यामृतमथने सप्तद्वादुत्पन्नत्वात् तथात्वम् । सुरा देवी समुत्पन्ना तुरगः पाण्डुरस्तथा" भा० आ० प० । तज्जातीयत्वात् घोटकमात्रे राजनि० ।

अमृतस्रवा स्त्री० अमृतमिव स्रवति स्रु-पचाद्यच् । १ रुदन्तीलतायाम् । भावे अप् टित० । २ अमृतनिष्यन्दे पु० ।

अमृतांशु पु० अमृतमिवाप्यायकः अंशुरस्य । चन्द्रे ।

अमृतांशूद्भव पु० अमृतांशोश्चन्द्रस्योद्भवो यस्मात् । विष्णौ "अमृतांशूद्भवो भानुः" वि०स० । ५त० चन्द्रोद्भवे त्रि० ।

अमृतान्धस् पु० अमृतमन्धोऽन्नमिव दर्शनात् तृप्तिकरमस्य । अमृताशने देवे तेषाममृताशनञ्च दर्शनमात्रेण "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" श्रुतेः । तेषां तत्पानकथा "ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् । जहार दानवेन्द्रेभ्यो नरैश्च सहितः प्रभुः । ततो देवगणाः सर्वे पपुस्तदमृतं समम्" भा० आ० प० ।

अमृताफल न० अमृतायाः फलम् । पटोले वृक्षभि० ।

अमृताभ्यमान त्रि० अमृतमिवाचरति अमृत+क्यङ् शानच् ।

अमृततुल्ये "उच्चिष्ठ वल्गेत्यमृतायमानम् वचोनिगद्येति" रघुः।

अमृताग्र पु० अमृतममरणं त्वयाभावमश्नुते अश-व्याप्तौ अण्। विष्णौ "१अमृताशोऽमृतवपुः" विष्णु०स० अमृतं सुधामश्नाति अश-भोजने अण्। २देवे। [म्यशब्दे विवरणम्।

अमृताशन पु०अमृतमश्नाति अश-भोजने ल्यु। देवे अमृता-

अमृताश्म त्रि० न म्रियते मृ-तन् न०त०जौत नित्यः कर्म्म० टच् समा०। प्रस्तरभेदे जीविप्रस्तरखण्डभेदे।

अमृताष्टक पु०अमृताप्रभृतीनामष्टकं यत्र। गडूचीन्द्रयवारिष्टपटोलं कटुका तथा नागरं चन्दनं हरिद्रं पिप्पलीचूर्णसंयुतम् "अमृताष्टक इत्येष पित्तश्लेष्मज्वरापहः" चक्रदत्तोक्ते कषायभेदे।

अमृतासङ्ग न०अमृतस्य विषस्येवासङ्गो यत्र। नीलवर्णे तुत्थभेदे हेम०। तस्य विषतुल्यनीलवर्णत्वात् तथात्वम्।

अमृतासु त्रि० अमृता अनश्वरा असवो यस्य। अनश्वरप्राणे ब्रह्मकालजीविनि। "आवभूवाऽमृतासुर्वर्धमानः सुजन्मा" "उतामृतासुर्नृत एभि" रिति च अथ० ५,१,१,७।

अमृताहरण पु० अमृतमाहरति मातृदास्यनिवारणार्थं स्वर्गात् भूलोकं नयति आ+हृ-ल्युट्। गरुडे तत्कथा भा० आदि प० ३३ अ०। "तान् हत्वा पतगश्रेष्ठः सर्व्वानुत्क्रान्तजीवितान्। अतिक्रान्तोऽमृतस्यार्थे सर्व्वतोऽग्निमपश्यत॥ आदीप्तानं महाज्वालमर्चिर्भिः सर्वतोऽम्बरे। दहन्तमिव तीक्ष्णांशुं चण्डवायुसखीरितम्॥ ततो नवत्या नवतीर्मुखानां कृत्वा महात्मा गरुड़स्तरस्वी। नदीः समापीय सुखैस्ततस्तैः सुशीघ्रमागम्य पुनर्ज्वलेन॥ ज्वलन्तमग्निं तमभित्रतापनं समास्तरत् पत्ररथो नदीभिः। ततः प्रचक्रे वपुरन्यदल्पं प्रवेष्टुकामोऽग्निमभिप्रधाय॥ जाम्बूनदमयो भूत्वा मरीचिनिकरोज्ज्वलः। प्रविवेश बलात् पक्षी वारिवेग इवार्णवम्॥ स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके। परिभ्रमन्तमनिशं तीक्ष्णधारमयस्कमम्॥ ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्। घोररूपं तमत्यर्थं यन्त्रं देवैः सुनिर्मितम्॥ तस्यान्तरं स दृष्ट्वैव पर्य्यवर्त्तत खेचरः। आरान्तरेणाभ्यपतत् संक्षिप्याङ्गं क्षणेन तु॥ अथसक्रस्य चैवात्र दीप्तानलसमद्युती। विद्युज्जिह्वौ महावीर्य्यौ दीप्तास्यौ दीप्तलोचनौ॥ चतुर्विषौ महाघोरौ नित्यं क्षुधौ तरस्विनौ। रक्षार्थमेवामृतस्य ददर्श भुजगोत्तमौ॥ सदा संरक्तनयनौ सदा चानिमिषेक्षणौ। तयोरेकोऽपि यं पश्येत् स तूर्णं भस्मसाद्भवेत्॥ तयोश्चक्षूंषि रजसा सुपर्णः सहसाऽक्षिपत्। ताभ्यामदृष्टरूपोऽसौ सर्वतः समताडयत्॥ तयोरङ्गे समाक्रम्य वैनतेयोऽन्तरीक्षगः। अच्छिनत्तरसा मध्ये सोमसभ्यद्रवत्ततः॥ ससृत्पाद्याऽमृतं तत्र वैनतेयस्ततो बली। उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्य्यवान्॥ अपीत्वैवामृतं पक्षी परिगृह्याशु निःसृतः। अगच्छदपरिश्रान्त आदाय्यार्कप्रभां ततः"। हृच्। अमृताहर्त्तृ तत्रैव। "काश्यपेयोऽमृताहर्त्ता" ध्वजभूजामन्त्रः।

अमृताङ्ग न० अमृतमाङ्गयते सर्व्वते हल्यत्वादफलेन आ+ङ्गे-क (आराकानदेश) जाते लघुविस्वाकृतौ (नासपाति) नामके रुचिफले हृच्छे। अमृतफलशब्दे विवरणम्।

अमृतेशय पु० अमृते जले शेते शी-अच् अलुक् स०। विष्णौ तस्य प्रलये जलशायित्वात् तथात्वम्।

अमृतोत्पन्न न० अमृतं विषमिव उत्पन्नम् नीलवर्णत्वात्। खर्परीतुत्थे राजनि०। [५त०। मक्षिकायां राजनि०।

अमृतोत्पन्ना स्त्री अमृतमिव स्वादु मधु उत्पन्नं यस्याः

अमृतोद्भव न०अमृतं विषमिव नीलवर्णतया उद्भवति उद्+भू-अच्। खर्परीतुत्थे (तुते) तुत्थभेदे। अमृतं मृत्युञ्जयं शिवमुद्भवते प्राप्नोति स्वसाध्यार्चनावत्त्वात्। विल्वहृच्छे। "अमृतोद्भवः श्रीवृक्षः शङ्करस्य सदा प्रियः" तद्दानमन्त्रः।

अमृत्यु पु० अभावे न०। १मृत्युविगमे। नास्ति मृत्युर्यस्मात्। २मृत्युहेतुभिन्ने त्रि०। "स्वभानवे स्वोऽमृत्यु धुक्षत" ऋ०२, ४८,१२ "अमृत्यु अमरणहेतुं स्वोऽन्नम्" भा०। मृत्युर्विनाशो नास्त्यस्य। ३विनाशशून्ये विष्णौ "अमृत्युः सर्व्वदृक् सिंहः" विष्णुसहस्रनाम।

अमृध्र त्रि० मृधू उन्दने बा०रक् न०त०। क्लेनाद्यहिंसके। "ध्रुवं मित्रोनपातमद्भ्रम्" ऋ० १,३७,११, अमृध्रं क्लेनाहिंसम्" भा०। [स्तितस्तथैव पुरुषोऽमृषा" शत०ब्रा०।

अमृषा अव्य०न०त०। मिथ्याभिन्ने सत्ये। "यथा हृच्छो वन-

अमेधस् त्रि० नास्ति मेधा धारणावती बुद्धिर्यस्य असिच् समा० श्रवणमात्रेण विस्मारिणि धारणाशून्यबुद्धिमति मूर्खे।

अमेध्य त्रि० न मेध्यम् पवित्रम् विरोधे न०त०। अपवित्रे। "अमेध्यादपि काञ्चनम्" "नामेध्यं प्रक्षिपेदग्नौ" इति अमेध्यप्रभवानि च" इति च मनुः। २पुरीषे न०।

अमेनि त्रि० मि-नि-न०त०। परिच्छेदाभावे। "मेन्या मेनिरसमेनयस्ते सन्तु मेऽस्मानभ्यधारयन्" अथ० ५,६,६।

अमेय त्रि०न मेयः। १परिच्छेत्तुमशक्ये २ज्ञातुमशक्ये च "अमेयो मितलोकस्वमनर्थः प्रार्थनावहः" रघुः ३"इ ग्राकपिरमेयात्मा" विष्णुस०।

अमोघ त्रि०मोघो निष्फलः न०त०। १सफले, २अव्यर्थे च।

"अमोघासु पतन्तीषु धर्मपोतेन सत्वर" भा० आ०प० । "यदमोघमपामन्तरप्नं बीजमज ! त्वया" कुमा० "धनुष्यमोघं समधत्त सायकम्" "अमोघाः प्रतिगृह्णन्तावघोनु-पदमार्शिषम्" इति च रघुः । २नदभेदे पु० । ३पटौलल-तायां, हरितक्यां ५विड्भेदे च स्त्री । ६विष्णौ पु० "अमोघः पुण्डरीकाक्षः" विष्णु० स० "सत्यकामः सत्यसङ्कल्प" इति श्रुतेः अवितथसङ्कल्पत्वात्तस्य तथात्वम् ।

अमोत न० अमा सह जातम् ब्ये-क । अच्छिन्नदशवस्त्रयुग्मे "अमोतं वासो दद्याद्विरण्यमपि दक्षिणाम्" अथ० ९,५,१४

अम्ब गतौ भ्वादि० पर०सक० सेट् । अम्बति आर्म्भीत् आनम्ब अम्बा अम्बालिका अम्बिका अयमिदित् गत्यर्थे केचित् ।

अम्बक न० अम्बति शीघ्रं नक्तमस्थानपर्य्यन्तं गच्छति अम्ब-ण्वुल् । १नेत्रे । अम्ब्यते स्नेहेनोपगच्छति घञ् स्वार्थे क । २पितरि ।

अम्बर न० अबि-गत्यादौ घञ् अम्बः गच्छन्तं राति धत्ते रा-क ईत० । १गगनाख्ये आकाशे २मर्मरगन्धयुक्ते वस्त्रे, स्वनाम-ख्याते ३गन्धद्रव्ये ४अभ्रकधातौ च । "अङ्गुलाकारयाङ्गुल्या तावतर्जयताम्बरे" इति रघुः "धौतदुकूलवल्कलधवलाम्बर इति काद० "आकाशसाम्यं दधुरम्बराणि" माघः "संवि-व्युरम्बरविकाशि चमूसमुत्थम्" माघः । २अन्तिके निघ० ।

अम्बरि(री)ष पुंन० अम्बन्ते पच्यतेऽत्र अम्ब-अरिष नि० वा दीर्घः । (भाजनाखोला) इति ख्याते भर्जनपात्रे । अम्बरीषमपि । "वैश्यकुलाम्बरीषमहानसाद्वा" कात्या० ४,७,१६ । "अग्निमाहृत्य गार्हपत्यागारे निमथ्याधा-दधीतेति शेषः वैश्यकुलाच्च लौकिकोऽग्निर्हुतोच्छिष्टो वा आहृतः न तु परिगृहीत आवसथ्यादिः । अथवा अम्ब-रीषात् आहृतात् भन्दुकाटहृतात् महानसाद्देति कर्क० । दीर्घयुक्तास्तु २विष्णौ, ३शिवे, ४भास्करे, ५बालके, ६आम्रातकवृक्षे, ७नरकभेदे, ८अनुनाम्नि । ९सूर्य्य-वंश्यनृपभेदे पु० स च । "भर्गारथसुतो राजा श्रुत इत्यभिविश्रुतः । नाभागस्तु सुतस्तस्मात् पुत्रः परम-धार्मिकः । अम्बरीषस्तु नाभागः सिन्धुद्वीपपिताऽभवत्" इति हरिवंशोक्तः सूर्य्यवंश्यभगीरथपौत्रः "अम्बरीष ! मुक्तप्रोक्तं नित्यं भागवतं शृणु । परा० उ० । "भगवान् अम्बरीषश्च आह्लादानमितौजसं भा० आनु० प० । "पुण्यश्लोकोऽम्बरीषश्च पुण्यश्लोको युधिष्ठिरः" इति प्रातः स्मरणीयेषु पुरा० ।

अम्बरीषवृक्ष पुं० अम्बरीषो वृक्ष । देवेषु तेषां मेरुस्थितत्वेऽपि मेरोः सर्व्वतः उच्चत्वादस्मदाद्यपेक्षयाम्बरवासित्वम् । तेन आकाशस्य धारणात्तत्वेऽपि न क्षतिः । "विलिप्यते मौलिभिरम्बरौकसाम्" कुमा० ।

अम्बर आभरणे कण्ड्वा० । अम्बर्य्यति ।

अम्बष्ठ पु० अम्बाय चिकित्सकबन्धाय तत्प्रख्यापनार्थं तिष्ठते-ऽभिधत्ते स्था-क षत्वम् । चिकित्सके "विप्रात् वैश्य-कन्यायां जाते १सङ्कीर्णवर्णे, "ब्राह्मणाद्वैश्यकन्यायामम्ब-ष्ठोनाम जायते" मनुः "सजातिजानन्तरजाः षट्सुता द्विजधर्मिणः" इति मनूक्तेः "द्विजातीनां समानजाती-यासु जाताः तथानुलोम्येनोत्पन्नाः ब्राह्मणेन क्षत्रि-यावैश्ययोः, क्षत्रियेण वैश्यायामेवं षट् सुता द्विज-धर्मिणः उपनेयाः तानन्तरजनाम्ना इति यदुक्तं तत् तज्जातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचिद्भ्रमः स्यात् अत एषां द्विजातिसंस्कारानवचनमिति" कुल्लू० उशना अम्बष्ठादीनामुपनयनसंस्कारसत्त्वेऽपि इदानीन्तनानां संस्कारलोपेन शूद्रत्वम् अतएव इदानीं क्षत्रियादीनां शूद्रत्वमेवमम्बष्ठादीनामपि" इति रघु० ये तु ब्रात्य-दोषप्रायश्चित्तमाचरन्ति तेषामुपनयनयोग्यता भवत्येव "येषां पित्राद्योऽनुपनीतास्तेषामापस्तम्बोक्तम् "यस्य पिता पितामहादनुपनीतौ स्यातां तस्य संवत्सरं त्रैविद्य-कम्बुद्धयर्थं यस्य प्रपितामहादीनां नानुकुर्य्यात उप-नयनन्तस्य द्वादशवार्षिकं त्रैविद्यकम्बुद्धयर्थमिति" मिता० उक्तेः । "व्रतानामश्वसारथ्यम्बष्ठानां चिकित्सितम्" मनूक्ता तेषां वृत्तिः । २देशभेदे, ३वृत्तिपके च । ४यूथि-कायां स्त्री । स्वार्थे कनि ह्रस्वे अत इत्वे । अम्बष्टिका-प्यत्रैव (वामनहाटीति) प्रसिद्धायां ५ब्राह्मीलतायाञ्च ।

अम्बष्ठकी स्त्री अम्बष्ठं कायति स्वादनार्थमागच्छति कै क गौरा० ङीष् । १(पटाखड़) इति ख्यातायां लतायां पाठायाम् ।

अम्बष्ठा स्त्री अम्बन्ते शब्द्यन्ते अम्बा आह्वानी सती तिष्ठति स्था-क अम्बा० षत्वम् । (अम्बाड़ा) इति ख्यातायाम् पठा-ख्यायाम् (पटांड़ु) इति हिमगिरिप्रसिद्धायां १पाठायाम् । २वाक्पट्यायाम् । ३यूथिकायाञ्च । संज्ञायां कन् अत इत्वे । अम्बष्टिका । (वामनहाटी) ४ब्राह्मीलतायाम् ।

अम्बा स्त्री अम्बन्ते स्नेहेनोपगच्छन्ते अम्ब-अर्म्मणि घञ् । १मातरि, लोके सम्बोधने तदर्घे ह्रस्वः । "अम्बाऽन्यालेऽम्बिके ! अम्बालिके ! पूर्व्वेद्युः" ग्रा० निर्देशात् न ह्रस्व । "अम्बे ! अम्बिके !

अम्बालिके ! न मानयति कञ्चन य० २३, १८। नाद्योक्तावपि तत्रैव, २अम्बशालतायां, ३काशीराजकन्यायाञ्च। "अथाश्रौषं महाबाहो तिस्रः कन्याः स्वयंवराः। रूपेणाप्रतिमा लोके काशीराजसुतास्तदा। अम्बां चैवाम्बिकां चैव तथैवाम्बालिकामिति। राजानश्च समाहूताः पृथिव्यां भरतर्षभ।। "अम्बा ज्येष्ठाभवत्तासामम्बिका त्वथ मध्यमा। अम्बालिका च राजेन्द्र! राजकन्या कनीयसी" इत्युपक्रम्य। अम्बाया उपाख्यानं विस्तरेण वर्णितम् भा० उ० प० अम्बोपाख्याने। "मया सौभपतिः पूर्व्वं मनसा हि कृतः पतिः इत्यम्बिकयोक्ते "अनुजज्ञे तदा ज्येष्ठामम्बां काशीपतेः सुताम्। अम्बिकाम्बालिके भार्य्ये प्रादात् प्रीत्या यवीयसे। भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा" भा० आ० प०।

अम्बाला स्त्री अम्बेति शब्दं लाति धत्ते ला—क। मातरि।

अम्बालिका स्त्री अम्बालैव स्वार्थे के ह्रस्वे अत इत्त्वम्। मातरि, १पाण्डुराजमातरि काशीराजकन्यायां विचित्रवीर्य्यस्य भार्य्यायाम्।

अम्बिका स्त्री अम्बैव कन्। १मातरि २दुर्गायाम् "आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम्" कुमा०। काशीराजस्य मध्यमकन्यायां विचित्रवीर्य्यस्य भार्य्यायां धृतराष्ट्रस्य २मातरि।

अम्बिकापति पु० ६त०। शिवे। [१गणेशे २धृतराष्ट्रे च।

अ(आ)म्बिकेय पु० अम्बिकाया अपत्यम् ढ (ठक्) वा।

अम्बु न० अबि शब्दे—उण्। १लग्नावधिके चतुर्थस्थाने २(बाला) इति ख्यातायामोषधौ ३जले "गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः" का० प्र०। "क्षीतेतराम्बुच्छटा" का० प्र० "विश्वासाय विहङ्गनामालवालाम्बुपायिनाम्" "तौ सरांसि रसवद्भिरम्बुभिः" इति च रघुः। "फलं कतकवृक्षस्य यद्यप्यम्बु प्रसादनम्" मनुः। तच्च जलम् रसतन्मात्रादुत्पन्नो भूतविशेष इति सांख्याः पञ्चीकृतेभ्य एव पञ्चभ्यो भूतेभ्यः स्थूलतया उत्पन्नमिति वेदान्तिनः जलभूतांशत्वाच्छ्लेष्मात् जलत्वव्यवहारः "वैशेष्यात्तद्वादः" भा० सूत्रात्। तस्य च रूपरसस्पर्शशब्दा विशेषगुणाः "योयोयावतिथश्चैषां स स तावद्गुणाः स्मृत" इति मनुना भूतमध्ये चतुर्थस्य जलस्य चतुर्गुणत्वाभिधानात् "शब्दस्पर्शौ रूपरसौ सलिलस्य गुणा अमी" भा० शा० प० उक्तेश्च "जले चुलचूलध्वनिः। शीतस्पर्शः शुक्लरूपं रसो माधुर्य्यमीरितम्" पञ्चद०। "अग्नेरापः" इति श्रुतेस्तस्मान्निप्रभवत्वम् यथोक्तं "तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते पुरुषस्तेजस एव तदध्यापो जायन्ते" छा० ७०। "तेज इति प्रसिद्धं लोके दग्धृपक्त्रप्रकाशकं रोहितञ्चेति तत्सृष्टं तेज ऐक्षत। तेजोरूपत्वेन स्थितं सदैक्षतेत्यर्थः। बहु स्यां प्रजायेयेति पूर्व्ववत्तदपोऽसृजत। आपो द्रवाः स्निग्धाः स्यन्दिन्यः शुक्लाश्चेति प्रसिद्धं लोके॥ यस्मात्तेजसः कार्य्यभूता आपस्तस्माद्यत्र क्व च देशे काले वा शोचति सन्तप्यते स्वेदते प्रस्विद्यते वा पुरुषस्तेजस एव तदापोऽधिजायन्ते। ता आप ऐक्षन्तेति पूर्व्ववदेव आकारसंस्थितं सदैक्षतेत्यर्थः भा०। "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति "सेयं देवतैमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्" छा० ७०॥ "सेयं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणीति तासाञ्च तिसृणां देवतानामेकैकां त्रिवृतं करवाणि एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् न तु तिसृणां पृथक् त्रिवृत्करणमिति। एवं हि तेजोऽवन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदम्" इमा आपः, अन्नमिदमिति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात्। एवमीक्षित्वा सेयं देवतैमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्य्यविम्ववदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डमनुप्रविश्य यथासङ्कल्पमेव नामरूपे व्याकरोदसौनामायमिदं रूप इति तासाञ्च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत्कृतवती देवता" भा०। "अद्भिः सोम्य! शुङ्गेन तेजो मूलमन्विच्छ" छा० ७० "अद्भिः शुङ्गेन तेजोमूलं कार्य्येण कारणम् अन्विच्छ" "तेजो वा अद्भ्यो भूयस्त्वाद्वा एतद्वायुमपगृह्याकाशमभितपति तदाङ्गर्निर्योचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽथापः सृजते तदेतद्दुर्भिक्षे तिरश्चीभिश्च विद्युद्भिर्मेघाच्चादाश्चरन्ति तस्मादाङ्गर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽथापः सृजते तेज उपास्येति" छा० ७०॥ "तेजो वाऽद्भ्यो भूयः, तेजसोऽप्यकारणत्वात्। कथमपकारणत्वमित्याह। यस्माद्व्योनिस्तेजस्तस्मात्तद्वा एतत्तेजोवायुमाकाशमवष्टभ्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभिव्याप्यवस्तपति यदा, तदाङ्गौकिकाः अभिशोचति सन्तपति सामान्येन जगत्ति तपति देहानतो वर्षि-

ष्यति वै इति । प्रसिद्धं हि लोके कारणमभ्युद्यतं दृष्ट्वतः कार्यं भविष्यतीति विज्ञानम् ॥ तेज एव तत्पूर्व्वमात्मानमुद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोऽपूस्रष्टृत्वाद्भूयोऽद्भ्यस्तेजः । किञ्चात्तत्तेजस एव स्तनयित्नुरूपेण वर्षहेतुर्भवति । कथं जर्त्तराभिश्चोर्द्ध्वगाभिर्विद्युद्भिस्तिरश्चीभिश्च तिर्यग्गताभिश्च महाह्लादाः स्तनयनशब्दाश्चरन्ति । तस्मात्तद्दर्शनादाङ्लौकिका विद्योतते स्तनयति वर्षिष्यति वा इत्याद्युक्तार्थमतस्तेज उपास्येति भा० ।

नैयायिकादयस्तु परमाणुविशेषेभ्य एव तस्योत्पत्तिः । तच्च द्विविधं नित्यमनित्यञ्च नित्यं परमाणुरूपमनित्यं द्व्यणुकादि । प्रकारान्तरेण अनित्यमपि त्रिविधं देहेन्द्रियविषयभेदात् । देहः अयोनिजः वरुणचन्द्रलोकयोः शुक्लादिप्रसिद्धः इन्द्रियं रसनं शब्दादिषु मध्ये रसमात्रव्यञ्जकत्वात् तस्य जलीयत्वम् । द्व्यणुकादिक्रमारभ्य हिमकरकमिन्ध्वर्थत्वं विषयः उपभोग्यत्वात् । स्पर्शसंख्यापरिमितिसंयोगविभागपरत्वापरत्वानित्यत्वौ वेगः गुरुत्वं रूपं रसः स्नेहश्च जलस्यैते चतुर्दशसमन्वायिगुणाः यथोक्तं "स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् । रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश । वर्णगुल्कोरसस्पर्शौ जले मधुरशीतलौ । स्नेहस्तत्रद्रवत्वं तु सांसिद्धिकमदाहृतम् । नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् इन्द्रियं रसनं सिन्ध्वादिविषयो मतः" भाषा० । एवं स्थूलभूतजलस्य उपाधिभेदेन सुश्रुते गुणदोषादिविवेकाय भेदा दर्शिता यथा "पानीयमान्तरीक्षमनिर्देश्यरसमभ्रसं जीवनं तर्पणं धारणमाश्वासजननं श्रमभ्रमक्लमपिपासामदमूर्च्छातन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमञ्च तदेवावनौ पतितमन्यतमं रसमुपलभते स्थानविशेषाच्चदीनदसरस्तडागवापीकूपचुण्टीप्रस्रवणोद्विहिङ्किरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति । तत्र लोहितकपिलपाण्डुपीतनीलशुक्लेष्वनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते तन्तु न सम्यक् तत्र पृथिव्यादीनामन्योन्यानुप्रवेशक्रमतः सलिलरसो भवत्युत्कर्षापकर्षेण तत्र स्वगुणभूयिष्ठायां भूमावम्लं लवणञ्च । अम्बुगुणभूयिष्ठायां मधुरम् । तेजोगुणभूयिष्ठायां कटुकं तिक्तञ्च । वायुगुणभूयिष्ठायां कषायञ्च । आकाशगुणभूयिष्ठायामव्यक्तरसमव्यक्तं ह्याकाशमित्यतस्तत्प्रधानमव्यक्तरसत्वात् तत्पेयमान्तरीक्षाभे । तत्रान्तरीक्षं चतुर्व्विधम् । तद्यथा । धारं कारं तौषारं हैमनिति । तेषां धारं प्रधानं लघुस्वात्तत्पुनर्द्विविधं गाङ्गं सामुद्रं चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षणं कुर्व्वीत शाल्योदनपिण्डमभ्युक्षितमविदग्धं रजतभाजनोपरिस्थितं वर्षति देवे परिषेचयेत् स यदि मुहूर्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तत्र तदुपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गं पुनः प्रधानं तदुपाददीताश्वयुजे मासि, शुचिशुक्लाविततपटैकदेशच्युतमथवा कर्य्यतलपरिभ्रष्टमन्यैर्व्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृण्मये वा पात्रे निदध्यात्तत्सर्व्वकालमुपयुञ्जीत तस्यालाभे भौमम् । तच्चाकाशगुणबहुलं तत् पुनः सप्तविधम् । तद्यथा । कौपं नादेयं सारसं ताडागं प्रास्रवणमौद्भिदं चौष्टमिति तत्र वर्षास्वान्तरीक्षभौद्भिदं वा सेवेत मेघागुणत्वात् शरदि सर्व्वं प्रसन्नत्वात् हेमन्ते सारसं ताडागं वा, वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेष्वेवं प्रावृषि चौष्टमनवसनमभिष्टं सर्व्वस्येति ॥ कीटभूतपुरीषास्थ्यन्तकोथादूषितम् । लवणपर्णीत्वक्पत्रयुतं कलुषं विषसंयुतम् ॥ योऽवगाहेत वर्षासु पिबेद्वापि नयं जलम् । स नाड्यान्यन्तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु ॥ तत्र यत् शैवालपङ्कशैलपद्मपत्रप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपहतञ्च तद्व्यापन्नमिति विद्यात् ॥ तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकदोषाः षट् सम्भवन्ति । तत्र खरता शैवाल्यमौर्ण्यदन्त्याहिता च स्पर्शदोषाः । पङ्कसिकताशैवालबहुवर्णता रूपदोषाः । व्यक्तरसता रसदोषः । अनिष्टगन्धता गन्धदोषः । यदुपयुक्तं लक्षणगौरवशूलकफप्रसेकानाहादयति स वीर्य्यदोषः । यदुपयुक्तं चिराद्विपच्यते विष्टभ्नाति वा स विपाकदोष इति । त एते आन्तरीक्षे न सन्ति ॥ व्यापन्नानामभिलक्षणं कर्य्यातपप्रतापनं तप्तायःपिण्डनिसिकतालोष्ठाणां वा निर्व्वापणं प्रसादनञ्च कर्त्तव्यं नागवल्मीकोत्खनपाटलापुष्पप्रभृतिभिराधिवासनमिति ॥ सौवर्णे राजते ताम्रे कांस्ये मणिमये तथा । पुण्यातंसं भौमे वा सुगन्धि सलिलं पिबेत् ॥ व्यापन्नं वर्जयेच्छिल्पं तोयं यद्व्याधनात्तैषम् । दोषसञ्जननंहेतुत्तच्चादौताहितन्ततत् ॥ व्यापन्नं सलिलं यस्तु पिबतीहाप्रसादितम् । श्वयथुं पाण्डुरोगञ्च लभते दोषमविपाकताम् ॥ श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान् वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव च ॥ तत्र सप्त कलुषस्य प्रसादनानि भवन्ति । तद्यथा । कतकगोमेदकविषपन्थिशैवालमूलवस्त्राणि शुक्तामणिश्चेति ।

पञ्च निक्षेपणानि भवन्ति । तद्यथा । फलकं त्रपुटकं सुञ्चकलय उदकमङ्किका शिक्यञ्चेति ॥ सप्त शीतीकरणानि भवन्ति प्रवातस्थापनमुदकप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरणं वालुकाप्रक्षेपणं शिक्यावलम्बनञ्चेति

अम्बुकण पु० ईत० । शीकरे जलविन्दौ स्त्रीत्वेके । [च ।

अम्बुकण्टक पु० अम्बुनः कण्टकमिव । १कुम्भीरे, २मत्स्यघातके

अम्बुकिरात पु० अम्बुनि किरात इव हिंस्रः । कुम्भीरे ।

अम्बुकीश पु० अम्बुनि कीशः वानर इव । (शुशक) इति ख्याते शिशुमारे जलजन्तुभेदे ।

अम्बुकूर्म्म पु० अम्बुनि कूर्म्म इव । शिशुमारे (शुशक) हेम० ।

अम्बुकेशर पु० अम्बुजातः केशरोऽस्य । कोलवृक्षे रत्नमा० ।

अम्बुचर त्रि० अम्बुनि चरति चर–ट ७त० । जलचरे हंसादौ स्त्रियां ङीप् । [ख्याते धैवाले ।

अम्बुचामर न० अम्बुनि चामरमिव । (सेओयाला) इति

अम्बुचारिन् त्रि० अम्बुनि चरति चर–णिनि ७त० । जलचरे हंसादौ स्त्रियां ङीप् । "लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम्" मनुः ।

अम्बुज न० अम्बुनि जायते जन+ड । १पद्मे २सारसपक्षिणि । ३चन्द्रे ४कर्पूरे ५हिजल इति ख्याते वृक्षे च पु० । दैत्यभेदे पु०न० । ७वज्रे च । वज्रस्य जलदप्रभवत्वात्तथात्वम् । "चापं पाशाम्बुजसरसिजान्यङ्कुशं पुष्पबाणमिति"–ऽभुवनेश्वरीध्याने अम्बुजं पद्मं नतु यज्ञमिति तन्त्रसारोक्तेः अस्य यज्ञवाचकतापीति ज्ञायते ।

अम्बुजन्मन् न० अम्बुनो जन्मास्य जन्मोत्तरपदत्वाद्बहुव्रीहिः । १पद्मे २सारसविहङ्गे ३यज्ञे पु०च ।

अम्बुजासना स्त्री अम्बुजमासनम् यस्याः । १लक्ष्म्याम् । २जलोद्भवे त्रि० । [याम् अच् । धैवाले (सेओयाला) ।

अम्बुताल पु० अम्बुनि तालयति प्रतितिष्ठति चु० तल–प्रतिष्ठा–

अम्बुद पु० अम्बु ददाति दा–क । १मेघे, "नवाम्बुदश्यामवपुर्न्यविक्षत" माघः "नवाम्बुदानीकमुहूर्त्तलाञ्छने" "स्वतश्चुतं वह्निमिवाद्रिरम्बुदः" इति च रघुः । २मुस्तके च ।

अम्बुधर पु० अम्बूनि धरति धृ–अच् । १मेघे "शरत्प्रवृत्तानम्बुधरोपरोधः" रघुः "अग्नेरवृतस्य चोभयोर्वर्षिनश्चाम्बुधराश्च योनयः" कुमा० । २मुस्तके च ।

अम्बुधि पु० अम्बूनि धीयन्तेऽत्र धा–आधारे कि । १समुद्रे । "रत्नावलीरम्बुधिराबबन्ध" माघः २उदकाधारे घटादौ अम्बुधिर्घटः शि०कौ० । ३चतुःसंख्यान्विते च ।

अम्बुधिप्रसवा स्त्री अम्बुधिमिव प्रचुररसं प्रसूते प्र+सू–अच् । १इतरकुमार्याम् ।

अम्बुनिधि अम्बूनि निधीयन्तेऽस्मिन् अम्बु+नि+धा–आधारे कि । समुद्रे । "देवासुरैरमृतमम्बुनिधिर्ममन्थे" किरा० । "ये पक्षिणः प्रथममम्बुनिधिं गतास्ते" माघः ।

अम्बुप पु अम्बूनि पाति पिबति वा पा–रक्षणे–पाने वा क । १जलेश्वरे वरुणे "रक्षोऽम्बुपानिलयशीशपुराणि चाष्टौ" सि०शि० । २समुद्रे च ३जलपायिनि त्रि० ।

अम्बुपत्रा स्त्री अम्बूनि पत्रे यस्याः । उच्चटाख्ये । अम्बुयुक्तं पत्रमस्याः गौरा० ङीष् । अम्बुपत्रीत्यपि ।

अम्बुप्रसाद पु० अम्बूनि प्रसादयति प्र+सद–णिच्–अण् उप०स० । कतककतृक्षे (निर्मालि) ।

अम्बुप्रसादन न० अम्बूनि प्रसादयति प्र+सद+णिच्–ल्यु ईत० । कतकतरुफले "फलं कतकवृक्षस्य यद्यम्बुप्रसादनम्" मनुः । जलप्रसादकारके त्रि० तानि ३२०श्लोके दृश्यानि ।

अम्बुभृत् पु० अम्बु बिभर्त्ति–भृ–क्विप् ईत० । १मेघे २मुस्तके ३समुद्रे च । ४जलाधारमात्रे त्रि० ।

अम्बुमत् त्रि० अम्बूनि बाहुल्येन सन्त्यस्मिन् । १बहूदके देशादौ स्त्रियां ङीप् । सा च २नदीभेदे । "ततोऽम्बुमत्या धर्मज्ञ ! सुतीर्थञ्चाप्यनुत्तमम् भा०व०अ० ।

अम्बुमात्रज पु० अम्बुमात्रे अल्पजले जायते जन–ड ७त० । शम्बूके, (शामुक) हेम० । [२मुस्तके च ।

अम्बुमुच् पु० अम्बूनि मुञ्चति मुच–क्विप् ईत० । १मेघे

अम्बुर पु० अम्ब–बा०उरन् । द्वाराधःकाष्ठे (गोवराट) हेम०

अम्बुराशि पु० अम्बूनां राशयो यत्र । समुद्रे । "नैतद्भोमखण्डलमम्बुराशिः" सा०द० "अभूतपूर्व्वां रुचमम्बुराशेः" माघः "शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः" रघुः ।

अम्बुरुह न० अम्बुनि रोहति रुह–क्विप् ७त० १ पद्मे "विस्रुत्वरैरम्बुरुहां रजोभिः" माघः । २सारसविहगे च

अम्बुरुह पु० अम्बुनि–रोहति रुह–क ७त० । १ पद्मे । "द्रक्ष्यस्यम्बुरुहं दिव्यं गोशृङ्गं नाम पर्वतम्" । "नदीं गोदावरीं चैव प्रसन्नाम्बुरुहां तत" इति च रामा० । अम्बुरुहं पद्ममिव पुष्पमस्याः अर्श०अच् । स्त्रियां पद्मिन्यांङ्ङी

अम्बुरुहिणी स्त्री अम्बुरुहाणां समूहः सङ्घिकृष्टदेशोवा इनि । १ पद्मसमूहे २ पद्मलतायाञ्च । [रसे च ।

अम्बुरोहिन् न०अम्बुनि रोहति रुह–णिनि । १पद्मे २सा-

अम्बुवाची स्त्री अम्बु तर्पणं वाचयति सूचयति वच–णिच्–अण् उप०स०ङीप् । आर्द्राद्यपादस्थरविकालिकभूमौ "आर्द्राद्यादि

विशाखान्तं रविचारेण वर्षति" इत्युक्तेस्तथा दृष्टिसूचकत्वम्। तत्काले हि भूमेरन्तर्गतरजोयोगस्तत्तस्तथात्वम्। यथोक्तम् "रजोयुक्तास्वम्बुवाची च रौद्राद्यपादगे रवौ" ज्योति०। मिथुनराशिर्हि मृगशिरःशेषार्द्रापादचतुष्कं पुनर्वसुपादत्रयात्मकः। तत्र मृगशिरसि भुक्ते यदा आर्द्रायां प्रथमपादोपभोगार्थं रविर्गच्छति तदा पृथ्वी ऋतुमती भवति तच्च मिथुने ६।४० चत्वारिंशत्कलाधिकषड्भागानतीत्य आर्द्राद्यपादावधि यावत्तिष्ठति तावत्। यथोक्तं राजमा०। "रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः" इत्युपक्रम्य। "चत्वारिंशल्लिप्तिका षड्भागयुतोरविर्यदा भवति। तत्राम्बुवाची त्वेया शिवर्क्षपादे स्थितो यावत्। दिग्भागशून्यलिप्तोनगणितेन भवति रविर्यदा साग्र" इति। तत्र च वर्ज्यानि "न स्वाध्यायं वषट्कारं न देवपितृतर्पणम्॥ फलानां वाहनञ्चैव बीजानां वपनं तथा" राजमा०। "तस्यां पाठोबीजवापोनाब्धिभीर्दुग्धपानतः" ज्यो०। यदा तूर्क्षं समादाय भानोर्मध्यगामिता। पुनस्तत्स्थं समादाय यजनं तद्दिनं त्यजेत्। काम्यं नैमित्तिकं चैव यात्रां मन्त्रक्रियां तथा। ऋतुमत्यां न कुर्वीत पूर्वसङ्कल्पितादृते। न कुर्यात् खननं भूमेः सूच्यग्रेणापि शङ्करि!। मत्स्य सू०। "यतिनोव्रतिनश्चैव विधवा च द्विजस्तथा। अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्। स्वपाकं परपाकं वा अम्बुवाचीदिने तथा। भक्षणं नैव कर्त्तव्यं चण्डालान्नमथं स्मृतम्" विष्णुरहस्यम्।

अम्बुवासिन् त्रि० अम्बुप्रधाने देशे वसति वस-णिनि ङीप्। १ पाटलावृक्षे। २ जलवासिमात्रे त्रि०। [पाटलावृक्षे।

अम्बुवासी स्त्री अम्बुप्रधाने देशे वासो यस्याः गौरा०ङीष्।

अम्बुवाह पु० अम्बूनि वहति वह-अण् उप० स०। १ जलधरे मेघे। "व्याजेन यस्यावहिरम्बुवाहः यत्तोक्षिताभिर्मुकुरम्बुवाहैः" "हलपरपरिधानश्यामलैरम्बुवाहैः" इति च माघः। २मुस्तके। णिच् अम्बुवाहयति अण्।

अम्बुवाहिन् त्रि० अम्बूनि वहति धारयति वह-णिनि ईत०। १ जलधारके त्रि० २ मेघे ३ मुस्ते च पु०।

अम्बुवाहिनी स्त्री अम्बूनि वहति स्थानान्तरं नयति वह-णिनि ईत० ङीप्। १नौकाजलसेचनार्थे काष्ठनिर्मिते पात्रभेदे २ जलवाहिकायां स्त्रियाञ्च।

अम्बुविहार पु० ७त०। जलक्रीड़ायाम् सन्तरणादौ "व पुरम्बुविहारविहितं सुचिना" माघः। [वैकूटकायां कृतकुमार्य्याम्।

अम्बुविस्रवा स्त्री अम्बूनि विस्रवति वि+स्रु-अच्। पलाण्ड्वाम्।

अम्बुवेतस पु० अम्बुजातोवेतसः प्राक०त०। जलवेतसे।

अम्बुशिरीषिका स्त्री अल्पः शिरीषः अल्पार्थे कन् स्त्रीत्वम् जलशिरीषे। [(जोंक) इति ख्यातायां जलौकायाम्।

अम्बुसर्पिणी स्त्री अम्बुनि सर्पति सृप-णिनि ७त०।

अम्बुसेचनी स्त्री अम्बूनि सिच्यन्ते नौकातः अनया सिच-करणे ल्युट् ईत० ङीष्। नौकादेर्जलसेचनीपात्रे।

अम्बूकृत न० अनम्बु अम्बु कृतं अम्बु श्लेष्मात्मकाम्बु उपचारात्तद्वत्कृतं ततः च्वि+कृ-क्त। निष्ठीवनयुक्ते वचसि।

अम्बू पु० अबि-मन्दे क्कु नि० न दीर्घः। १अम्बरसे २तद्वति त्रि०।

अम्भ ध्वनौ भ्वा० आ० अक० सेट्। अम्भते आम्भिष्ट आनम्भे आनभे अयमु दित्येके तेन आनम्भे इत्येव। अम्भः

अम्भस् न० आप्यते आप-असुन् "उदके नुम्भौ चेति" उणा० अम्भ-मन्दे असुन् वा। १जले "सैव्यमानज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति"?। "त्रिस्रोतसः सन्ततधारमम्भः" इति च माघः। "परिश्रमाम्भःपुलकेन सर्पता" किरा०। "कथमप्यम्भसामन्तरा निष्प्रतेः प्रतीयते" कुमा०। "अभ्यर्णेऽम्भःपतनसमये" इति मेघ०। २देवे, जलहेतुत्वात् तथात्वम् ३ पितृलोके, तेषां जलमयचन्द्रलोके स्थितत्वात् अम्भोमयदेहत्वाच्च तथात्वम्। ४मनुष्ये "वेत्थ सौम्य! यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" छा०उ०उक्तेः। पुरुषाणां जलमयत्वात् तथात्वं पञ्चाग्निविद्यापदे प्रपञ्चः। ५असुरे, युद्धे देवसङ्घया शब्दायमानत्वात्तथा। "तानि वा एतानि चत्वार्यम्भांसि देवा मनुष्याः पितरोऽसुरा" इति श्रुतिः। ६बालनामोषधौ। ज्योतिषोक्ते ७लग्नाच्चतुर्थस्थाने। योगशास्त्रोक्तासु नवविधतुष्टिषु मध्ये प्रकृत्याख्यायां दशाध्यात्मिकतुष्टौ च। यथा "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। वाक्प्रविषयोपरमात् पञ्च, नव तुष्टयोऽभिमताः सा०का०। "प्रकृतिव्यतिरिक्तआत्मास्मीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिक्यस्तुष्टयोभवन्ति प्रकृतिव्यतिरिक्तात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, आसाः, इयत आह प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा तस्मिंश्चदुपदेशः "विवेकसाक्षात्कारोहि प्रकृतिपरिणामभेदः तत्र प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन, तस्मादेवमेवास्व वर्त्तस्वेति"। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः आम्भ इत्युच्यते" त०कौ०। अस्य आम्भः-

शब्दवाच्यत्वे हेतुस्तद्व्याख्याने दर्शितोऽस्माभिः यथा "अक्षाश्च तुष्टेरम्भस इव प्रसन्नत्वात् उपदेशरूपशब्दहेतुकत्वाच्च अम्भस्त्वम् अभि–शब्दे इति धातोरसुन्नन्तस्य शब्दहेतुकरूपार्थानुगमात्" । द्यावापृथिव्योः द्वि०व० निरु० । [रा०नि० ।

अम्भः(म्भस्)सार न० अम्भसां सारं वा सत्वम् । मुक्तायां

अम्भः(म्भस्)स्थ पु० अम्भांसि स्थते स्था–क्विप् वा सत्वम् । धूमे हे० ।

अम्भसांनिधि पु० ६त० अलुक् स० । समुद्रे "शिखाभिरालिष्ट इवाम्भसां निधिः" माघः ।

अम्भृण पु० भ्रण–शब्दे यङ् लुक् अच् वेदे नि० । १महति निरु० । २भयङ्करशब्दकारके "पिशङ्गभृष्टिमम्भृणं पिशाचिम्" ऋ० १,१२३,५, "भयङ्करशब्दायमानमतिप्रवृद्धं वेति" भा० । "कृष्णीभ्याममम्भृणौ हुते" य० १९,२७ ।

अम्भोज न० अम्भसि जायते जन–ड ७त० । १पद्मे "गिरा सुखाम्भोजमियं युयोज" नैष० । "वक्त्राम्भोजं सरस्त्यधिवसति सदा शोणएवाधरस्ते" का०प्र० । २सारसे ३चन्द्रे "पिबन्ति तन्मुखाम्भोजच्युतं हरिकथामृतमिति" भाग० । चन्द्रादेवामृतच्युति सम्भवः ४कर्पूरे च पु० । ५शङ्खे पु०न० । ६जलजातमात्रे त्रि० ।

अम्भोज(ख)षण्ड न० अम्भोजानां समूहः(ख)षण्डच् । पद्मसमूहे "कुसुदवनसुषमि श्रीमदम्भोजख(ष)ण्डम्" माघः ।

अम्भोजजन्मन् पु० अम्भोजाज्जन्म यस्य जन्माद्युत्तरपदोव्यधिकरणोऽपि साधु वामनः । चतुर्मुखे हरिनाभिपद्मजे ब्रह्मणि अजजशब्दे विवरणम् । "अम्भोजजन्मजनिस्तदन्तरगतो वत्सानितो वत्सपान्" भाग० अम्भोजजन्मनः हिरण्यगर्भस्य जनिरुत्पत्तिर्यस्मात् तथाविधो विष्णुरित्यर्थः ।

अम्भोजयोनि पु० अम्भोजं हरिनाभिपद्मं योनिः उत्पत्तिस्थानं यस्य । विधातरि । अजजशब्दे विवरणम् । "सद्मसुषमगतोऽहं पूर्व्वमम्भोजयोनेरिति" प्रबो० ।

अम्भोजिनी स्त्री अम्भोज+समूहार्थे तद्वति देशे वा पुस्करा० इनि । १पद्मसमूहे, २ लतारूपे पद्मयुक्तदेशे च ।

अम्भोद पु० अम्भो ददाति दा–क । १मेघे, २मुस्तके च । ३जलदानकर्त्तरि त्रि० । [२मुस्तके ३समुद्रे, च ।

अम्भोधर पु० अम्भोधरति धृञ्–धारणे अच् । १मेघे ।

अम्भोधि पु० अम्भांसि धीयन्ते यत्र धा–आधारे कि । समुद्रे । "सम्भूयाम्भोधिमभ्येति महानद्या नगायगा" । "अम्भोधिरोधसि पृथुप्रतिमानभागेति" "अम्भोधिर्विकसित वारिजाननोऽसौ" इति च माघः ।

अम्भोधिवल्लभ पु० ६त० । प्रवाले राजनि० ।

अम्भोनिधि पु० अम्भांसि निधीयन्तेऽत्र अम्भस्–नि+धा–कि । १समुद्रे । "सैनाकमम्भोनिधिबद्धसख्यम्" कु० "अम्भोनिधिर्वडवेति दुर्वहबाड़वाग्निम्" चौ० प० । [समुद्रे ।

अम्भोराशि पु० अम्भसां राशिरिव एकत्वोपचितत्वात् ।

अम्भोरुह न० अम्भसि रोहति रुह–क । १पद्मे २सारसे च ३जलजातमात्रे त्रि० "हेमाम्भोरुहशस्त्राणां तद्वाप्यो धाम साम्प्रतम्" कुमा० ।

अम्मय त्रि० अपां विकारादि अप्+मयट् । १जलविकारे २जलप्रचुरे च "सौरीभिरिव नाड़ीभिरमृताख्याभिरम्मयः" रघुः । "नद्यम्मयानि तीर्थानि न देवा मृच्छिलामया" भाग० ।

अम्ल पु० अमति सौरभेण दूरं गच्छति अम–रन् । आम्लवृक्षे । फलपत्रादौ न० । एवं प्रायः सर्व्वत्र दृश्यवाचकेषु ।

अम्ला(म्ली)न पु० अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अत–अण् वा रस्य लत्वम् । (आमड़ा) आम्लातकवृक्षे । स्वार्थे कन् अम्ला(म्ली)तकोऽपि ।

अम्ल न० अम–क्त । (घोल) १तक्रे । (टक)रसभेदे पु० । २ तद्वति त्रि० "कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः" गीता । अम्लरसद्रव्याणि च सुश्रुते दर्शितानि यथा । दाड़िमामलकमातुलुङ्गाम्लातककपित्थकरमर्द बदरकोलप्राचीनामलकतिन्तिड़ीकोषाम्बभव्यपारावतवेतसफललकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लोवर्गः" ।

अम्लक पु० अल्पोऽम्लः अल्पार्थे कन् । (मान्दार) लकुचवृक्षे ।

अम्लकाण्ड न० अम्लं काण्डं यस्य । लवणवृक्षे राजनि० ।

अम्लकेशर पु० अम्लः केशरोऽस्य । बीजपूरे (गोंड़ानेबु) ।

अम्लचूड पु० अम्ला चूड़ा शिखाऽस्य । अम्लशाके ।

अम्लजम्बीर पु० अम्लो जम्बीरः । (गोंड़ानेबु)जम्बीरवृक्षे ।

अम्लनायक पु० अम्लं रसं नयति नी–ण्वुल् । अम्लवेतसे ।

अम्लनिशा स्त्री अम्लरसे निःशेषेण शेते शीङ् ड । गठीवृक्षे

अम्लपञ्चफल त्रि० "कौलं च दाड़िमञ्चैव दृश्याम्लं चूक्रिका तथा । अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्" जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पुमः । तिन्तिड़ीकं बीजपूरमम्लपञ्चफलं स्मृतमिति चोक्ते फलपञ्चके ।

अम्लपत्र पु० अम्लं पत्रं यस्य । अम्लवृक्षवृक्षे ।

अम्लपत्री स्त्री अम्लं पत्रं यस्याः ङीप् । पत्राशीलतायाम् ।

अम्लपनस पु० अम्लः पनसः कर्म्म० । (मान्दार) लकुचवृक्षे ।

अम्लपित्त त्रि० अम्लाय पित्तम् । रोगभेदे यत्र भुक्तं सर्व्वं

वस्तुमात्रं पित्तदोषेणाम्लरसतां नीयते तस्मिन् रोगभेदे ।
अम्लपूर न० अम्लेन अम्लरसेन पूर्यते पूर-कर्म्मणि घञ् ६त० । इक्षाम्ले (तेतुल) राजनि० ।
अम्लफल पु० अम्लं फलं यस्य । (तेतुल) इतिख्याते इक्षाम्ले ।
अम्लबन्धा स्त्री बन्ध-कर्म्मणि यत् । अम्लसम्बद्धे कन्दभेदे ।
अम्लभेदन पु० अम्लार्थं भिद्यतेऽसौ कर्म्मणि ल्युट् । अम्लवेतसे
अम्लरस पु० अम्लो रसः । अम्ले रसे । २तद्वति त्रि० ।
अम्लरुहा स्त्री अम्लाय रोहति रुह-क । मालवजनागबल्लाम्
अम्ललोनि(णि)का स्त्री अम्लं रसं लाति गृह्णाति अम्लः तमूनयति अल्पयाम्लत्वात् हीनयति ऊन-ण्यन् पृ० णत्वम् । (आमरुल) इति ख्याते लताभेदे । अम्लोनीप्यत्र ।
अम्लवती स्त्री अम्लो रसो विद्यतेऽस्या अम्ल+रसा० मतुप् मस्यवत्वम् । (आमरुल) ख्याते लताभेदे ।
अम्लवर्ग पु० अम्लरसप्रधानानां वर्गः । सुश्रुतोक्ते अम्लरस-प्रधानद्रव्ये । तच्च अम्लशब्दे २२२ पृष्ठे दृश्यम् ।
अम्लवल्ली स्त्री अम्लरसयुता वल्ली । तिक्तपर्णिकानामकन्दभेदे
अम्लवाटिका स्त्री अम्लस्य वाटिका स्थानमिव । नागवल्ली भेदे । पित्तरक्तप्रकोपकरत्वेन तत्स्थानत्वात् तथात्वम् ।
अम्लवास्तूक पु० अम्लरसान्वितो वास्तूकः शाकभेदः । (चुक-पालङ्ग) इति ख्याते चुक्रे ।
अम्लबीज न० अम्लस्य बीजं कारणम् । (तेतुल) इक्षाम्ले ।
अम्लवृक्ष न० अम्लरसोवृक्षो यस्य । (तेतुल) इक्षाम्ले
अम्लवेतस पु० अम्लोवेतस इव नलच । (चुका) ख्याते चुक्रे
अम्लशाक पु० अम्लः शाको यस्य । (चुका) इति १ ख्याते चुक्रे । २ अम्लप्रधाने शाकान्वे पु० ।
अम्लसार पु० अम्लोरसस्य सारः प्रधानं यस्य । १ चुक्रे २निम्बुके, ३क्षिप्तायां च । ४ काम्बिके न० । [ख्याते वृक्षे
अम्लहरिद्रा स्त्री अम्लरसान्विता हरिद्रा । (आमहरिद्रा)
अम्ला स्त्री अम्लो विद्यतेऽस्या अर्श आद्यच् । तिन्तिड्याम् ।
अम्लाङ्कुश पु० अम्लम् अङ्कुशाकारमस्य यस्य । चुक्रे ।
अम्लातक पु० न म्लायति म्लै-तनु न०त० । अम्लवेतसे ।
अम्लादन पु०अद्यतेऽद-कर्म्मणि ल्युट् कर्म्म० । क्रकचकवृक्षे ।
अम्लान पु० म्लै-क न०त० । आवृता इति ख्याते महा-वृक्षवृक्षे । २ म्लानभिन्ने त्रि० । "अम्लानपङ्कजां मालां शिरस्युरसि चापराम्" देवी० । ३ पद्मे न० । [न्याम् ।
अम्लानिनी स्त्री अम्लानां पद्मानां समूहः इनि । पद्मि-
अम्लिका स्त्री अम्ल+स्वार्थे कन् । १तिन्तिड्याम् । अम्लाम्लीके-त्यपि पा च २ पलाशीलतायां ३ श्वेताम्लिकायां ४ क्षुद्राम्लिकायाञ्च राजनि० । अम्लोऽस्यत्र उद्गारे वा ठन् । १ अम्लोद्गारे मेदि० ।
अम्लिकावटक पु० अम्लिकाया वटकः । भावप्रकाशोक्ते (अम्ल वड़ी) इति ख्याते वटकभेदे यथा "अम्लिकां स्वेदयित्वातु जलेन सह मर्दयेत् । तन्नीरे क्षतसंस्कारे वटकान् मज्जयेत् पुनः । अम्लिकावटकास्ते तु रुच्यवह्निप्रदीपनाः" भा० प्र० ।
अम्ली स्त्री अम्ल+गो० ङीष् । चाङ्गेर्य्याम् (आमरुल)।
अम्लोटक पु० अम्लम् उठं पतं यस्य । (अम्लकृचा) इति अम्लम्लकवृक्षे ।
अम्लोद्गार पु० अम्लस्य उद्गारः । अम्लरससूचके उद्गारे ।
अय गतौ भ्वा० आ०सक० सेट् । अयते आयिष्ट अयाञ्चक्रे अयाम्बभूव अयामास अयाञ्चक्रे । अस्य परस्मैपदित्वमपि "अय स्तुदयति सुहृदभ्रमनः पद्मिनीनामित्युद्भटः "शुचोदयन् दीधितिसुक्थशासः यजु० १९ ६९ । "उदयति वितनो-र्द्धरश्मिः" माघः ।
अय पु० एति सुखमनेन इण् करणे अच् । १ प्राक्तने शुभ-कर्म्मणि, २शुभदायके-दैवे "स गुप्तमूलप्रत्यन्तः सुदृष्टापाय-रथान्वितः" रघुः "तव धर्म्मः सदयोदयोज्वलः" मे० ३विधाने च । अयते जयमनेन । ४कपर्द्दकरूपे एकाद्यङ्कयुक्ते द्यूतसाधने ५पाशके च "अथाक्षै पञ्चाननान् पाणायामयति अभिभूरस्येतास्ते पञ्च दिशः कल्पन्तामित्येष वा अयानभि-भूर्यत्कलिरेष हि सर्वानयानभिभवति" इति शत० ब्रा० । "अक्षा नाम कपर्द्दकाः सुवर्णनिर्म्मिता, विभीतफलानि सौवर्णानि वा । ते चाक्षा द्यूतकाले निवपनीयाः । तेषां चतुर्णामङ्कानां कृतसंज्ञा पञ्चानां कलिसंज्ञा तथा च शाखान्तरे सोमसंस्थायां कृतादिव्यवहारः श्रुतः "ये वै चत्वारः सोमाः कृतं तत्" अथ ये पञ्च कलिः इति" यदा पञ्चाप्यक्षा उत्ताना भवन्ति तदा देवि-तृजयोभवति पञ्चसु त्वेकरूपासु जय एव भविष्यतीत्यन्य-लोक्तम् । अयशब्दः अक्षवाची" इति भा० । चतुरङ्गा-न्विते ६ पाशकभागे च । "यथा कृताय विजिताया-धरेयाः संयन्ति" छा० उ० "कृतो नाम अयोद्यूत समये प्रसिद्धचतुरङ्कः स यदा जयति द्यूते प्रवृत्तानां, तस्मै विजिताय तदर्थमितरे त्रिव्यङ्काद्या अधरेयाः तेताद्यापरकलिनामानः संयन्ति सङ्कल्पे अन्तर्भवन्ति चतुरङ्के कृताङ्के त्रिद्व्यङ्कादीनां विद्यमानत्वादन्तर्भवन्तीति" भा० । "द्यूतस्य समयः सङ्केतस्तदुत्तानसमयो वा येन द्यूतविद्यायां जीयते सोऽस्य कश्चिद्भागोऽयशब्दवाच्यः स

च चतुरङ्गोभागः चत्वारोऽङ्गाविशिष्टान्यस्मिन्निति व्युत्पत्तेः तस्मै, कृतनामभ्यते, यदा द्यूते प्रवृत्तानां मध्ये स कोऽपि जयति तदा तस्मै कृतनामभ्यते विजिताय अधरेवाः संयन्तीति सम्बन्धः तदर्थं व्याचष्टे तदर्थमिति अधरेयान् व्याकरोति त्रेतेति । अक्षस्य यस्मिन् भागे त्रयोऽङ्काः स त्रेतानामायः यत्र तु द्वावङ्कौ स द्वापरनामायः । यत्र एकोऽङ्कः स कलिनामाय इति । तादर्थ्येनेतराङ्कानामन्तर्भावमुक्त्वा व्यक्तीकरोति चतुरङ्क इति तदन्तर्भवति तस्मिन् कृताये त्रेतादयस्तेऽन्तर्भवन्ति महासंख्यायामवान्तरसंख्यान्तर्भावः प्रसिद्ध इति" आनन्दगिरिः । यन्ति धाराः अस्मिन् इण-आधारे अच् । द्यूते सर्वधारणस्थाने ऽक्षभेदे अयानयशब्दे विवरणम् । अयते अच् । ऽगन्तरि त्रि० । चिदया आ नाम ऋ०६,६६,५ ।

अयःपान न० अयः द्रवीभूतं तप्तलौहं पीयतेऽत्र ल्युट् । नरकभेदे यथा भाग० ५स्कन्धे तामिस्रादिनरकगणनायाम् नीत्वैरयःपानमित्युक्त्वा तद्विवरणं सङ्केतकं तत्रैवोक्तं 'यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुराः व्रतस्थो वा पिबति प्रमादतः तेषां निरयं नितानातुरक्षि यदाक्रम्य वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति" इति ।

अयःशूल न० अय एव शूलम् उपतापकम् । १तोत्रे उपतापे, २लौहकृतास्त्रभेदे च । वा सत्वम्, अयश्शूलमयत्व ।

अयक्ष्म त्रि० नास्ति यक्ष्मा रोगोयस्य भेदे नि०अच् समा० । १नीरोगे रोगशून्ये "यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्" यजु०१६,४ अयक्ष्मं नीरोगम् वेददी० । ५व० । २उपद्रवासाधने "तयाक्ष्मान्त्स्वतस्त्वमयक्ष्मयापरिभुज" यजु० १६,११, "अयक्ष्मया निरुपद्रवया" वेददी० ।

अयक्ष्म त्रि० नास्ति यक्ष्मो यस्य । अकृतयत्ने । "पनीं अयक्ष्म अदधा अयक्ष्मान्" ऋ० ७,६,२ ।

अयज्ञिय त्रि० न यज्ञाय हितः यज्ञ-घ न०त० । १यज्ञकर्मणि दातुमनर्हे २भाषादौ "अयज्ञिया वै भाषा" श्रुतिः यज्ञकालेऽनुच्चार्येऽपशब्दे च अयज्ञियवाग्वचने भ०भ० ३यज्ञं कर्त्तुमनर्हे असंस्कृतेऽनुपनीतादौ "अयज्ञिया वै गर्भास्तमेतं ब्रह्मणैव यजुषा यज्ञियं करोति" शत०ब्रा० ।

अयज्यु त्रि० यज-वा० उ नि० युट्० न०त० । १यष्टृभिन्ने २यज्ञविघातके च "ग्रासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते !" ऋ० १,१३१,४ "यज्वेदयज्योर्विभजातिभोजनम्" ऋ०२,२६,१ ।

अयज्वन् पु० विधिनेष्टवान् यज्वा न०त० । अकृतयज्ञे । "अयज्ञानसदक्षिणमभिश्वेलेति व्याहरन्" भा०द्रो०प० षोड़शधा पाठः । "योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः" "अयज्वनान्तु यद्वित्तमासुरं वै तदुच्यते" मनुः ।

अयत त्रि० न यस्यते यम-क्त न०त० । १अकृतयमे अकृतेन्द्रियनिग्रहे । यतते यत-अच् न०त० । २यत्नशून्ये ।

अयत्न पु० अभावे न०त० । १यत्नाभावे आयासाभावे "तद्वाग्रोत्प्लवत्नेन यो हिनस्ति न कञ्चन" मनुः । न०ब० । २प्रयासशून्ये त्रि० "तद्रोधवारवाणानामयत्नपटवासताम्" रघुः ।

अयत्नवत् त्रि० न यत्नवान् । १यत्नशून्ये "तेन तुल्यम् क्रिया चेद्वति" "तत्र तस्येवि" पा० वा वति । २यत्नशून्यतुल्यक्रियादौ ३यत्नशून्यस्य समाने च अव्य० ।

अयथा अव्य० यथा योग्यत्वे न०त० । यस्य यथा विधानमुचितं १यथा करणाभावे २अनुचितकरणे ३मिथ्याभूते च नास्ति तथा योग्यत्वं यत्र । ४अयोग्ये ५ अयत्ने च त्रि० । "तस्मा अयथं कर्षदेतत्" ऋ० १०,१८,१५ अयथमयत्नेन लीलया" भा० ।

अयथातथ त्रि० यथा योग्यं तथा न भवति "यथातथयथापुरयोरिति" पा० निर्देशात् नि०स० । १अयथार्थे यत् यदर्थं क्रियते तस्मिन् तदर्थमभूते च । "दैवे कर्म्मणि पित्र्ये च तद्वत्क्रियायथातथम्" मनुः । यत् कर्म्म यदर्थं क्रियते तत्र साधयति" कुल्लू० तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः आयातथ्यम् अयाथातथ्यञ्च तद्भावे न० ।

अयथार्थ त्रि० विरोधे न० त० । यथार्थभिन्ने मिथ्याभूते यथा अयथार्थानुभवः । स च तदभाववति तत्प्रकारकं ज्ञानं तच्च त्रिविधम् संशयभ्रमारोपरूपतर्कज्ञानभेदात् । तेषां सर्वेषाम् तदभाववति तत्प्रकारकज्ञानरूपत्वात्तथात्वम् ।

अयथावत् अव्य० अयोग्यरूपमर्हति अर्हार्थे वति । अननुरूपे यथोचितभिन्ने । [२स्खले त्रि० ।

अयथेष्ट अव्य० न०त० । १इच्छानुरूपाभावे । अर्थ आद्यच्

अयन न० अय-भावे ल्युट् । १गतौ, दक्षिणत उत्तरस्याम्, उत्तरतश्च दक्षिणस्यां सूर्य्यस्य चन्द्रस्य च २गतौ, तथा हि द्वादशराश्यात्मकस्य राशिचक्रस्यार्द्धं मकरावधिमिथुनपर्य्यन्तम् राशिषट्कं क्रमेण उत्तरावनतं तत्र स्थितोऽर्कश्चन्द्रो वा स्वगत्या प्राचीं गच्छन्नपि किञ्चित् किञ्चित्तिर्य्यग्गत्वा उत्तरामभिक्रामति, एवं कर्कटाबधिधनुःपर्य्यन्तं राशिषट्कं क्रमेण दक्षिणावनतं तत्र स्थितोऽर्कश्चन्द्रो वा प्राग्वत् दक्षिणामेवाभिक्रामति सेयं गतिरयनशब्देन ज्योतिषे व्यव-

क्रियते तत्र सूर्य्यस्यायनं सौरैः षड्भिर्मासैरेकं भवतीति च तत्रैव प्रसिद्धम् । "अयनविषुवद्दीपडगीतयः" इत्युक्तेः ३अयनाख्यसंक्रान्तौ सा हि परिभाषिकायनशब्दवाच्या । नभोमण्डले प्रवहानिलेन पश्चान्नित्या बंभ्रम्यमाणस्य राशिचक्रस्य निराधारतया दोलायमानत्वेन सप्तविंशांशपर्य्यन्तं प्राक् पश्चाच्च गतिर्भवति । क्रान्तिस्थानच्च अष्टमासाधिक ६६।८ षट्षष्टिवर्षैरेकैकमंशमतीत्य प्राक्, पश्चाद्वा चलतीति १८०० अष्टदशशतवर्षैः सप्तविंशांशपर्य्यन्तं प्राक् गत्वा पुनः पश्चात्, पश्चाद्गत्वा च पुनः प्रागवलम्बते । यदा चैवं राशिचक्रस्यायनस्थानं प्राक् गच्छति तदा राशिचक्रनिर्दिष्टमेषादिस्थानात् उक्तकालभेदेनैकैकांशातिक्रमेण क्रमशः प्राचि, प्राक्तरे, प्राक्तने, वा स्थाने रव्यादिग्रहाणां प्रभाषुञ्जसञ्चारः । यदा तु पश्चादवलम्बते तदा निर्दिष्टमेषादिस्थानात् तत्रैव परे, परतरे, परतमे, वा स्थाने ग्रहाणां प्रभापुञ्जसञ्चार इति भेदः । इदानीञ्च पश्चिमायनं तेन राशिस्थानात् पश्चादेव ग्रहप्रभापुञ्जसञ्चारः । तथा च ज्योतिषोक्तगणितरीत्या मीनान्तात् पश्चादेकविंशांशे एवेदानीं विषुवादिसंक्रान्तिर्भवति एवं विषुवपश्चादीनामपि तत्तदंश एव ग्रहप्रभापुञ्जसञ्चारः । अयञ्चायनानुसारेण ग्रहप्रभापुञ्जसञ्चारस्वीकारः दिनमानविशेषस्य लग्नपरिमाणस्य क्रियापदविशेषस्य, च बोधार्थमिति सिद्धान्ते प्रसिद्धम् । करणे ल्युट् । ४उक्तायनस्थानसाधने शास्त्रे, ज्योतिषामयनञ्चैवेति" ५सैन्यनिवेशविशेषदक्षपथ्यूहप्रवेशमार्गे च "अयनेषु च सर्व्वेषु यथाभागमवस्थिताः" इति गीता । आधारे ल्युट् । ६पथि, ७रहे, ८आश्रये, ९स्थाने, "तायदस्यायनं पूर्व्वमिति" भट्टः । प्रागुक्तराशिचक्रस्य क्रान्तिदत्तास्वस्थानविशेषे १०अंशादौ च "तत्काले सायनार्कस्येति" नीलकण्ठः । तथाहि मीनान्तो हि युगादौ अयनांशप्रथमस्थानं ततःप्राग्गत्वा कियदंशपर्य्यन्तचलनेन परावृत्य पश्चाद्गत्वा पूर्व्वराशेः कियदंशपर्य्यन्तं गत्वा पुनः प्रागत्वा प्राथमिकचलनस्थानप्राप्तौ अयनसौकौविलक्षणो भगणो भवति इत्येवं स्थिते तद्भगणपूरणकालादिज्ञापनाय किञ्चिदभिधीयते । सूर्य्यसिद्धान्ते । "विंशत्यब्दो युगे भानां चक्रं प्राक् परिलम्बते । तद्गुणाद्भूदिनैर्भक्ताद्गुणाद्दवाप्यते ॥ तद्दोच्छिन्ना दशाप्तांशा विक्षेपा अयनाभिधाः । तत्संस्कृताद्ध्रुवक्षात् क्रान्तिच्छायाचरदलादिकम्" इति ॥ "भानां चक्रं राशीनां इत्यं क्रान्तिदत्तं [illegible] विंशतयः षट्शतमित्यर्थः । परिलम्बते ध्रुवाधारभगोलस्थानात् तद्दूरमवलम्बते । अत्र परिलम्बत इत्यनेन भचक्रपूर्व्वाभिमुखाभाव उक्तोऽन्यथा ध्रुवभगणप्रवहेण मध्याधिकार एवंतदुक्तं स्यात् । तथा च तद्दूरमवलम्बनोक्त्या परावृत्तं यथास्थितं भवतीत्यागतं तथापि स्वस्थानात् तथैव पश्चिमतोऽप्यवलम्बत इति सूचितम् । एवञ्च भचक्रं पश्चिमत ईश्वरेच्छया प्रथमतः कतिचिद्भागैश्चलति ततः परावृत्य यथास्थितं भवति ततोऽपि तद्भागैः क्रमेण पूर्व्वतश्चलति ततोऽपि परावृत्य यथावस्थानंस्थितमित्येको विलक्षणो भगणः । तेन प्राणिन्युपलक्षणम् । पश्चिमावलम्बनात्तुल्येषु संवादकाले तदभावात् । अत्र त्रिंशत्तमत्व इति पाठः प्रामादिकः । "युगे षट्शतकल्पो हि भचक्रं प्राग्विलम्बते" इति सोमसिद्धान्तविरोधात् । "तत् पश्चाच्चलितं चक्रमिति" ब्रह्मसिद्धान्तोक्तेश्च । अकर्मणात् तद्गुणात् षट्शतगुणितात् भूदिनैर्युगीयरव्यहर्गणादिनैर्भक्तात् यत् भगणादिकं प्राप्यते तस्य भगणत्यागेन राश्यादिकस्य भुजः कार्य्यस्तद्गुणाप्तांशा दृग्भिर्भजनेनाप्तभागाश्चिगुणिता अयनसंज्ञका ज्ञेयाः । भुजांशाश्चिगुणिता दृग्भक्ताः फलमयनांशा इति तात्पर्य्यार्थः । तत्संस्कृतात् तैरयनांशैर्भचक्रपूर्व्वापरचलनवशादुत्तरीनाद्भक्तात् पूर्व्वापरभचक्रचलनावगमस्ययनभक्तस्य यद्भगणगतलग्नगतलग्नक्रमेण क्रान्तिच्छायाचरदलादिकं साध्यम् । न केवलात्, विशेषोक्तेः । छाया वक्ष्यमाणा चरदलं चरं पूर्व्वाधिकारोक्तम् । आदिशब्दादयनवलनमायनदक्कर्म सङ्कृप्यते । यद्यपि तत्संस्कृतात् भक्षात् क्रान्तिरित्येव वक्तव्यमन्यथामत्र तदुपजीव्यत्वात् भक्षं व्यर्थं तथापि क्रान्तिरित्युक्त्या केवलक्रान्तिज्ञानार्थं तत्संस्कृतभक्षात् क्रान्तिः साध्या । यदार्थान्तरोपजीव्यावाः क्रान्तेः साधनं तु केवलादित्यस्य चरार्थं क्रान्तिवात् तत्संस्कृतात् साध्यमिति सूचकं छायाचरदलादिकथनम् । ईश्वरेच्छया क्रान्तिदत्तं स्वमार्गे पश्चिमतः सप्तविंशतिभागैः क्रमोपचितैश्चलितं ततः परावृत्य स्वस्थानं आगत्य तत्स्थानात् पूर्व्वतः सप्तविंशतिभागैश्चलितम् । तथा च क्रान्त्यादिभूतक्रान्तिविषुवद्वृत्तसम्पातान्वितक्रान्तिवृत्तप्रदेशो देवलोकस्थः प्रागागीतभक्षभोगावधिरूपः स्वस्थानात् पूर्व्वमपरतो वा क्रान्तिवृत्तमार्गे गतः । विषुवद्वृत्ते तु तद्भागस्य वा पश्चिमभागः पूर्व्वभागो वा गतः । सम्पाते तद्वृत्तयोर्याम्योत्तरान्तराभावात् क्रान्त्यभावः । पूर्व्वसम्पातप्रदेशे तु तयोर्याम्योत्तरान्तरत्वात् क्रान्तिवृत्तपातो यथास्थितभक्षभो-

गात् क्रान्तिरसङ्गतेति सम्मातावधिकग्रहभोगात् क्रान्तिर्युक्ता तत्र सम्मातावधिकग्रहभोगज्ञानार्थं पूर्व्वसम्मातावधिकः पूर्व्वाधिकारोक्तो ग्रहभोगो वर्त्तमानसम्मातपूर्व्वसम्माताश्रितक्रान्तिदृक्तप्रदेशयोरन्तरभागैरयनांशाख्यैः पूर्व्वसम्मातप्रदेशस्य पूर्व्वपश्चिमावस्थानक्रमेण युतहीनो भवति। क्रान्त्युपजीव्याः पदार्था अपि वर्त्तमानसम्मातादुत्पन्ना इति तत्साधनमपि तत्संस्कृतग्रहात्। अथायनांशज्ञानं तु षट्यतभगणेभ्यः पूर्व्वानुपातरीत्याकर्षणाद्ग्रहभोगो भगणादिकस्तत्र गतभगणमितं परपूर्व्वभचक्रावलम्बनं गतम्। वर्त्तमानं त्वारभ्य पश्चिमावलम्बनाद्राशिषट्क्रान्तगते राश्यादिके पश्चिमावलम्बनमनन्तर्गते पूर्व्वावलम्बनम्। तत्रापि त्रिभान्तर्गतानन्तर्गतत्वक्रमेण चलनं परावर्त्तनमिति भुजः साधितस्ततो नवत्यंशैर्यदि सप्तविंशतिभागास्तदा भुजांशैः किमित्यनुपातेन गुणहरौ नवभिरपवर्त्य भुजांशाश्विगुणिता दशभक्ता इति सर्व्वमुपपन्नम् रङ्ग०"॥ 'स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये। प्राक् चक्रं चलितं हीदं छायार्कात् करणागते॥ अन्तरांशैरपाहृत्य पश्चाच्छैस्तथाधिके" सू० सि०। "अयने दक्षिणोत्तरायणसन्धौ विषुवद्वये गोलसन्धौ चलितं चक्रं दृक्तुल्यतां दृष्टिगोचरतां स्फुटमनायासं गच्छेत्। तत्र प्रत्यक्षतस्तस्मिन् गत्यन्तरं दृश्यत इत्यर्थः। तथा च स्फुटादिकाले रेवतीयोगतारासञ्चावधिमेषतुलाद्योः कर्कमकराद्योर्विषुवायनप्रदृक्तेरिदानीमन्यत्र तत्स्फुटे प्रत्यक्षे इति क्रान्तिदृक्तं चलितमन्यथा तदनुपपत्तेरिति भावः। ननु पूर्व्वतोऽपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह। प्रागिति। छायार्काद्यहिने सूर्यच्छायनदिक्परावर्त्तनसुदये प्राच्यपरस्थलस्थत्वं वा तस्मिन् दिनेऽन्यस्मिन् दिने वा मध्याह्नच्छायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तत्कादित्यर्थः। करणागते प्रागुक्तप्रकारेणानीतः स्फुटः सूर्यस्तस्मिन्नित्यर्थः। न्यूने सति अन्तरांशैः सूर्ययोरन्तरांशैश्चक्रं क्रान्तिदृक्तं प्राक् पूर्व्वस्मिन् चलितमिति ज्ञेयम्। अथ यद्यधिके सति शेषैः सूर्ययोरन्तरांशैश्चक्रमाहृत्य परिहृत्य पश्चात् पश्चिमाभिमुखं तथा चलितमिति ज्ञेयम्। अतोपपत्तिः। छायातो वक्ष्यमाणप्रकारेण सूर्यो वर्त्तमानसम्माताद्गणितागतस्तु रेवतीतारासञ्चाद्यवधितोऽतस्तयोरन्तरमयनांशात्तत्र क्रान्तिदृक्तस्य पूर्व्वचलने गणितागतच्छायार्कोऽधिको भवति पश्चिमचलने तु न्यूनो भवतीति सर्व्वमुपपन्नम्"। रङ्गनाथः॥ एवमयनस्य प्रकृतस्थानात् चलने स्थिते सौरागमे "त्रिंशत्क्रान्त्योयुगे भागा" इत्युक्तेः सोमसिद्धान्ते "युगे षट्यतक्रान्त्यो हि भचक्रं प्राक् विलम्बते" इत्युक्तेश्च ४३२०००० वर्षमिते युगे षट्यतैर्विभाजिते लब्धैः ७२०० वर्षैरेकोऽयनस्य भगणो भवतीति गम्यते। एवञ्चोक्तदिशा युगादितः प्रथमं मीनान्तात् मेषसप्तविंशतिपर्यन्तं प्राक् गत्वा ततः परिवृत्य मीनशेषपर्यन्तं सप्तविंशत्यंशैरागत्य ततोऽपि पश्चाद्गत्वा सप्तविंशत्यंशैः मीनचतुर्थांशपर्यन्तमागत्य परावृत्य प्रागत्वा पुनः सप्तविंशत्यंशैः मीनशेषपर्यन्तं धावति इत्येवं चतुर्भिः सप्तविंशत्यंशैः अष्टोत्तरशतांशैः प्राग्पश्चाद्गतिभेदेन एकोऽयनभगणोभवति प्रागुक्तैः ७२०० वर्षैः यदि १०८ अंशाः तदा एकांशे किमित्यनुपातेन ६६। ८अष्टसाधिकषट्षष्टिवर्षैरेकैकांशायनचलनम् इति प्रतिभाति ततश्च यदि ६६। ८ वर्षादिभिः ६०कलात्मकोऽंशस्तदा एकवर्षेण किमित्यनुपाते ५४ विकलाः प्रतिवर्षमयनस्थानचलनमायाति अत्र प्रागित्युक्तेः सृष्ट्यादौ युगादौ च प्रथमं प्रागेव गतिर्न तु पश्चिमत तथात्वे इदानीन्तनांशवैषम्यापत्तेः। तथा हि ४३२०००० युगे यदि षट्यतानि अयनभगणास्तदा १७२८००० कृतयुगे किमित्यनुपातेन २४० भगणाः १२९६००० त्रेतायुगे १८० भगणाः ८६४००० द्वापरे १२० भगणाः इत्येवं त्रियुगे ५४० भगणा गता इदानीं कलियुगस्य वर्षागता ४९७३ यदि ७२०० वर्षेषु १०८ अंशात्मकोभगणस्तदा ४९७३ वर्षेषु किमिति त्रैराशिके ७४ अंशाः ३५ कलाः ४४ विकलाः लब्धा तथा च १०८ अंशात्मकायनभगणमध्ये एतावदंशादयो गता इति लभ्यते। तत्र यदि प्रथमं पश्चाद्गत्वा भगणारम्भस्तदा मीनान्तात् चतुर्थांशं यावत् पश्चाद्गत्वा परावृत्य मीनपर्यन्तगमने ५४ अंशाः गता ततः प्रागत्वा मेषसप्तविंशत्यंशैर्गतिस्वीकारे इदानीं मेषस्य २०।३५।४४ अयनांशादिः स्यात्। न च तत् छायादिसंवादि प्रथमं प्रागतिस्वीकारे तु प्रागत्वा प्रथमं मीनान्तात् मेषस्य सप्तविंशत्यंशपर्यन्तं गत्वा प्रत्यागत्वा सप्तविंशत्यंशैः मीनान्तगमने ५४ अंशाः गताः ततः पश्चाद्गत्वा मीनस्य एते २०।३५।४४ अंशादयोगतास्तथा च पश्चाद्गत्वा मीनस्य नवमांशे इदानीमयनांशादिरिति सर्व्वज्योतिर्वित्संप्रदायः। अतएव एतदयनांशमादायैव ग्रहस्फुटादिकं ग्रहर्क्षं साध्यते दिनमानादिकञ्चानीयते। इदानीन्तनाः ज्योतिर्विदां शिरोमणयः सर्वगणकावतंसाः पण्डितोत्तमाः श्रीमन्तोबापुदेवशास्त्रिणः अयनचलनस्य राद्धदृष्टान्तेन सर्व्वथा

विलोमगतितयायनभगणम् यदुरीचक्रुः तत्र विरोधादिकं प्रदर्शयिष्यते तद्दृष्ट्वा विद्वद्भिस्तस्य प्रमादोऽप्रमादो वावगन्तव्यः। तथा हि आयादिना अयनभोगस्य प्रतिवर्षं ५४विकलाः इदानीं पश्चादयनस्थानचलनं च सर्वज्योतिर्वित्प्रसिद्धम्। तत्र केवलं पश्चाद्गत्याऽयनस्थानचलनेन भचक्रस्यभ्रमणाङ्गीकारे। यदि ५४विकलाभिः एको वर्षस्तदा १२९६००० विकलात्मकभचक्रभ्रमणे कति वर्षा इत्यनुपातेन २४००० वर्षैरेको भगणो भवति यदि २४००० वर्षैः एकोभगणः तदा ४३२००० वर्षात्मके महायुगे कति भगणा भवन्ति इत्यनुपातेन १८० भगणा भवन्ति। ततश्च सौरसोमसिद्धान्तोक्तषट्गतसंख्याविरोधः इदानीं मीननवांशे अयनस्थानविरोधश्च। तथा हि तन्मते राशिचक्रस्य केवलं विलोमगत्यायनभगणस्वीकारेण प्रागुक्तदिशा २४००० वर्षैरेको भगणः तदा १७२८००० वर्षात्मके कृतयुगे कतीत्यनुपातेन ७२ भगणाः। १२९६००० वर्षात्मकत्रेतायाम् ५४,८६४००० द्वापरे २६ इत्येवं त्रियुगे १६२ भगणाः गताः इदानीं कलेः ४९७३ गताब्देषु किमिति जिज्ञासायाम् यदि ५४ विकलाभिरेको वर्षस्तदा ४९७३ वर्षेषु किमित्यनुपाते ७४।२१।४४ अंशाद्योगताः इत्यायाति तन्मते च मीनान्तात् सर्वथा पश्चाद्गत्या भगणपूरणस्वीकारेण मीनान्तात् ७४।२५।४४ अंशादितः पूर्व्वमयनस्थानापत्तिः तथा च मीनान्तात् तावद्भिरंशैः पूर्व्वं मकरस्य पञ्चदशांशे अयनांशादि स्यात्। न च तथाप्रत्यक्षादिभिरवगम्यते नापि ज्योतिर्विदां केषाञ्चित् सम्मतम् अतोऽयनस्थानेन केवलविलोमगत्या भचक्रस्य भ्रमणोक्तिः साहसमेव। किञ्च अतिचिरन्तनकालैः संवादनीये प्राग्गतित्वे पश्चाद्गतित्वे वा आर्षज्ञानं विना निर्णयासम्भवः अतः सौराद्यागमोक्तं प्राग्गतित्वमनादृत्य प्रथमं पश्चाद्गतिस्वीकारः केवलपश्चाद्गतिस्वीकारः अयनचलनस्य तद्भगणसंख्यातो विषमकल्पनञ्चार्वागृष्टीनां आगमविरोधात् वचनमात्रेण न श्रद्धाय प्रभवति। किञ्च सौरागमाद्युक्तं प्राग्गतित्वमनादृत्य केवलं पश्चाद्गतित्वं यत् स्वीकृतं तत् सर्व्वव्यवहारलोपकम् तिथ्यादिसाधनाङ्गायनांशादिविलोपकञ्च। एतेन इंलण्डिया अपि ज्योतिर्वेत्तारः सृष्टिकालस्य षट्सहस्रकालमात्रपरिमितिवादिनोऽपि परास्ताः। तैरपि प्रतिवर्षं ५४ विकलाः अयनांशभोगाः स्वीकृताः स्वीकृतश्च षट्षष्टिवर्षैरेकांशभोगः तथा च ६६।८ वर्षादिभिर्यदि एकोंशः पश्चाद्गच्छति तदा तद्धृतसृष्टिकाले ६००० अतीत्यनुपाते ९० अंशाः समायान्ति तेन मीनान्तात् ९० अंशान्तरे पश्चाद्गत्या धनुःशेषांशेऽयनारम्भः स्यात् तदेतद्दुष्टविरुद्धत्वादुपेक्ष्यमेव मीनान्तं विहाय अन्यत्र क्वान्तिवृत्तारम्भस्थानतच्चलनकल्पने न विनिगमकमस्ति इति विजातीयज्योतिर्विदाम्मतमसङ्गतमेव तैरपि तद्वधिक्रान्तिवृत्तारम्भांशचलनस्वीकारात्। इदानीं च संवाद्ययनानुसारेण मीनान्तात् २०।२५।४४तलानुपाते प्रायेण १३७०वर्षा आयान्तितत्रैव सृष्टिकल्पनन्तु नैव सम्भवति खीष्टाब्द १८७३कालस्य ततोऽधिकत्वेन ततःपूर्व्वं सृष्टेरुचितत्वात्। पुनर्भगणान्तरस्वीकारे तु २४०००वर्षास्ततोऽधिकाः सुखेन २५३५ वर्षाः सृष्टिकालाः अन्ततः स्युः तावतिघेव काले सर्व्वग्रहाणां मेषादौ स्थित्यसम्भव एव इति सर्वथा तन्मतमनादरणीयमेव। प्राग्दर्शितसरणौ प्राचीनसम्मतिरपि यथा। "मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे। प्रतिवर्षं चतुःपञ्चपलभाभक्रमेण तु। षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः। एवं चतुःपञ्चदिनादयनारम्भणं क्रमात्। व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवम्। कर्किसंक्रमणे तद्वदभितोदक्षिणायनम्। अयनांशक्रमेणैव विषुवारम्भणं तथा। रविसंक्रान्तितोमेषतुलयोरभितः पुनः" तिथि०त०। अधिकमयनसंक्रान्तिशब्दे वक्ष्यते। एति सूर्य्योदक्षिणामुत्तरां वाऽत्र आधारे ल्युट्। पूर्व्वोक्तरीत्या सूर्य्यस्योत्तरदक्षिणागत्याधारे ११काले तथा च। "तपस्तपस्यौ शिशिरार्द्धतुः मधुश्च माधवश्च वासन्तिकार्द्धतुः शुक्रश्च शुचिश्च ग्रैष्मार्द्धतुः अथैतदुत्तरायणं देवानां दिनं नभश्च नभस्यश्च वार्षिकार्द्धतुः इषश्च ऊर्जश्च शारदार्द्धतुः सहश्च सहस्यश्च हैमन्तिकार्द्धतुः अथैतद्दक्षिणायनं देवानां रात्रिः" इति श्रुतौ "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदोजनाः। धूमोरात्रिस्तथा कृष्णः षण्मासादक्षिणायनमिति" गीतायाञ्च षण्मासानामेव अयनत्वेनाभिधानात्। १२ अयनाभिमानिदेवेषु "आतिवाहिकास्तल्लिङ्गात्" ब्र०सू०। अर्च्चिरादीनां तदभिमानदेवतापरत्वव्यवस्थापनात् "तेऽर्चिषमभिसम्भवन्ति अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम् आपूर्य्यमाणपक्षात् यान्षडुदङ्ङेति तान्मासान् मासेभ्यः संवत्सरमित्युपक्रम्य स एतान् ब्रह्म गमयतीति" ब्र०उ० श्रुतौ ब्रह्मगमयितृत्वोक्तेः तेषां चेतनपरत्वौचित्यम्। "अयते याति अनेन कृतलक्षेण सूर्य्योदक्षिणायनमुत्तरायणं वेति

क्रतुत्रयमयनं तथा च वाजसनेयिनः पञ्चाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनन्ति । "यान् षण्मासान् दक्षिणादित्य एति, यान् षण्मासानुदङ्डादित्य एतीति" तथा छन्दोगा अधीयते । "यान् षड्दक्षिणैति- मासान् तान्, यान् षडुत्तरैति मासांस्तानिति" तैत्तिरीयाः क्रतु यहब्राह्मणे पठन्ति "तस्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेणैति" एवंचादित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवैतत् अत एव विष्णुधर्मोत्तरे सौरमानमधिकृत्योक्तम् "क्रतुत्रयं चायनं स्यादिति" केचित्तु चान्द्रमानेनायनद्वयमभ्युपगच्छन्ति "मार्गशीर्षादिकैस्त्रिभिः क्रतुभिः कल्पितः कालः षण्मासात्मकमुत्तरायणं ज्यैष्ठमासादिकैः दक्षिणायनमिति तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यं श्रौतस्मार्त्तकर्मानुष्ठाने तु मकरकर्कटसंक्रान्त्यादिक एवायनद्वयकाल इति यथोक्तस्मृतिस्मृतिभ्यामवगन्तव्यम् उत्तरायणस्य यागकर्माङ्गत्वं कथा अधीयते 'उदगयन आपूर्य्यमाणे पक्षे पुण्याहे द्वादशाहमुपसद्यतो भूत्वेत्यादि" । दीक्षादीनामुत्तरायणकर्त्तव्यता यज्ञयज्ञस्मृतिषु प्रसिद्धा । सत्यव्रतस्य देवताप्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विधिनिषेधाभावाच्च "देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणाभिमुखे कुर्व्वन् न तत्फलमवाप्नुयादिति" उग्रदेवतानां प्रतिष्ठा दक्षिणायने कर्त्तव्या तथा च वैखानससंहितायामभिहितम् "माहभैरवनारसिंहत्रिविक्रमाः । महिषासुरहन्त्री च स्थाप्या वै दक्षिणायन इति" कालमाधवीये माधवः । "सौरेण द्युनिशोर्मानं षड्शीतिमुखानिच । अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" । सू०सि० उक्तेः अयनं सौरमानेनैवेत्यवगम्यते । क्रान्तिदक्षारम्भस्थानचलनं च सर्वेषां राशीनां स्वस्वस्थानात् प्राक् पश्चाद्वा अयनांशानुसारेणान्यत्र स्थाने भवति । तस्य स्फुटानयनमयनसंक्रान्तिशब्दे वक्ष्यते । "संक्रान्तिषु यथा कालस्तदीयेऽप्ययने तथा" का०मा० स्मृतिः । एति सम्पद्यमिनेन करणे ल्युट् । १२सत्रविशेषे यथा गवामयनम् तद्विवरणं गवामयनशब्दे। अयनेन निर्वृत्तम् अयनस्येदं वा अण्। आयनम् अयनसाध्ये अयनसम्बन्धिनि च त्रि० । "युतायनांशोद्धृपकोटिशिञ्जिनी जिनांशभौर्व्यां गुणिता विभाजिता । द्युजीवया लब्धफलस्य कार्म्मुकम् भवेच्छराङ्गायनदिक्क्रमायनमिति" आयनं वलनमस्फुटेषुणा सङ्गुणं द्युगणभाजितं हृतम् । पूर्णपूर्णस्फुटतिथिघ्नं हारास्रितव्यक्षोदयक्षुदायनाः कलाः "अस्फुटेषुवलनाच्चतिथ्यु वा षष्टिहृत् फलकलाः स्फुरायनाः" इति च सि०शि० । अयने भवः ठञ् । आयनिकः अयनभवे त्रि० स्त्रियां ङीष् ।

अयनकाल पु० अयधारः कालः । अयनांशाधारे काले

अयन(च)वलन न० हृत० । अयनांशस्य प्राक् पश्चाद्वा स्थानान्तरचलने ।

अयनज पु० अयनात् राशीनां स्वस्वस्थानचलनात् जायते जन–ड । अयनांशजाते मासादौ ।

अयनभाग पु० अयनज्ञापको भागः । अयनांशे ।

अयनमास पु० अयनकृतः मासः । अयनांशानुसारेण दिनमानादिज्ञानार्थे कल्पिते मासे ।

अयनसंक्रम पु० अयनांशानुसारेण संक्रमः । मेषादिषु राशिषु अयनांशानुसारेण ग्रहाणां प्रभाभुक्तसञ्चारे अयनसंक्रान्तिशब्दे विवरणम् ।

अयनसंक्रान्ति स्त्री अयनेन राशिचक्रस्य पश्चात्, प्राग्वा- गत्या कृता संक्रान्तिर्ग्रहाणां प्रभाभुक्तस्य सञ्चारः सम्+क्रम–क्तिन् । चलसंक्रान्तौ, संक्रान्तिस्त्रिविधा मध्याचला अचला चेति भेदात् मध्यानुपदं वक्ष्यते मेषादिभिर्द्वादशभिः स्थानैर्विभक्तस्य निरांधारतया स्थितस्य राशिचक्रस्य दोलायमानतया प्राक् पश्चाद्वा निर्दिष्टमेषादिस्थानात् पश्चात् पूर्व्वं वा राश्यन्तरे मण्डलगतिं विनापि ग्रहाणां प्रभाभुक्तमात्रसंचारः चलसंक्रान्तिः अनियतस्थानतया चलत्वात् । निर्दिष्टराशिस्थानेषु ग्रहाणां मण्डलसञ्चारः अचलसंक्रान्तिः राशिसंक्रान्तिरिति चोच्यते तस्या नियतमेकस्थानएव जायमानत्वादचलत्वम् । अनयैव संक्रान्त्या यथा मासादिव्यवहारे न दोषः चलसंक्रान्त्या तु बहवो दोषास्तथा निरूप्यते तथा हि ग्रहाणामाक्रान्तराशितो राश्यन्तरक्रमणं संक्रान्तिरित्युच्यते सा च द्विधा मध्यमा स्फुटा च । षट्कर्म्मसंस्कृतो मध्यग्रहो यदा राश्यन्तरं संक्रामति तदा मध्यसंक्रान्तिरित्युच्यते यदा तु स्फुटीकृतसंस्कारो ग्रहो राश्यन्तरं गच्छति सा स्फुटसंक्रान्तिरित्युच्यते तत्र मध्यसंक्रमस्य स्फुटीकरणार्थत्वादेव तज्जनितसंक्रान्तेः स्फुटीकार एवोपयोगात् लोकयात्रयोर्व्यवहारे न तस्य उपयोगः किन्तु "गुरोर्मध्यमसंक्रान्तिर्हीनोयश्चान्द्रवत्सरः। अधिसंवत्सरस्तस्मिन् कारयेद्य सवत्सरम् । वर्जनीया प्रयत्नेन प्रतिष्ठा सर्वनाकिनाम् स्फुटसंक्रान्तिर्हीनश्चेत् सोऽप्यान्धरधिमासकम्" इति कालमाधवीयधृतस्मृतेः मध्यसंक्रान्तेरपि अधिवत्सरोपयोगिता तदन्यत्र तु तस्या-

नोपयोगः इति स्पष्टसंक्रान्तेरेव लोकयात्रोपयोगः। स्पष्टसंक्रान्तिरपि द्विविधा सायनांशा निरयनांशा चेति भेदात् यदा सिद्धान्तगणनयायनांशसंस्कृतो अहोरात्रयन्तरं गच्छति सा सायनांशा संक्रान्तिः। यदा तु अयनांशसंस्कारर-हितः राश्यन्तरं गच्छति सा निरयनांशा संक्रान्तिरुच्यते। संक्रान्तिश्च "त्रुटेः सहस्रभागोयः स कालोरविसंक्रम" इत्युक्तसूक्ष्मकालरूपा एतच्च क्रियैव काल इति मते अन्यमते तु संक्रान्त्युपलक्षितस्तत्तत्सूक्ष्मकाल इति भेदः। तादृग् सूक्ष्मकालस्य संक्रान्तिशब्दार्थत्वे संक्रान्तिशब्दे वक्ष्यमाणदानादिशब्दत्वात्तस्मिन्नेव "मुख्याभावे प्रतिनिधिः गौरवार्थं" इति न्यायेन गौणकालस्यापि ग्रहणं स्नानादिशब्दत्वान्यथानुपपत्त्या च तथा कल्पिते सत्यादृक्तकालविशेष एव तदङ्गत्वेन कल्पते यथोक्तं कालमाधवीये स्नानदानाद्यङ्गभूते संक्रान्तिकाले मुख्यकालस्यासम्भवादनुकल्पत्वादर्तव्यः यथाह देवलः "संक्रान्तिसमयः सूक्ष्मोदृग्ग्रेयः विशिष्टैर्जनैः। तद्योगाद्व्यधयोर्ह्यं त्रिगंशाद्याः पवित्रिताः" इति देशव्यवधानराहित्येनात्यन्तसंश्लिष्टयोः पूर्वोत्तररात्र्योर्मध्ये सूर्यः पूर्वरात्रिं परित्यज्य यावता कालेनोत्तररात्रिं प्रविशति स कालः योगदृष्टिं विना मांसदृष्ट्या दुर्ज्ञेयः अतोऽनुष्ठाने मुख्यसंक्रान्तिकालस्यग्रहणासंभवात् संक्रान्तिसम्बन्धिनौ पूर्वोत्तरकालौ ग्रहीतव्यौ संक्रान्तेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशद्घटिकाः पुण्या इति सामान्यत उक्तमिति"। तत्र अचलसंक्रान्तेरिव चलसंक्रान्तेरपि पुण्यकालतास्ति यथोक्तं तत्रैव मेषादिसंक्रान्तयो यस्मिन्दिने भवन्ति तस्माद्दिनात् पूर्वेभ्य एकादशदिनेभ्यः प्राचीने दिने मेषायनमेवं वृषभायनमित्येवं तत्तामाश्रित्यभवति तत्काले तस्मिन्नयने स्नानादिषु पुण्यकालमाह जाबालिः "संक्रान्तिषु यथा कालस्तथैवेऽयने तथा। अयने विंशतिः पूर्वा मकरे विंशतिः परेति" मकरव्यतिरिक्तैकादशसंक्रान्तिसम्बन्धिष्वयनेषु तत्तत्संक्रान्तिवत् पुण्यकालोऽवगन्तव्यः मकरसंक्रान्तिसंबन्धिनि त्वयने संक्रान्तिर्वैलक्षण्यं, तद्यथा मकरभिन्ने प्राचीना विंशतिघटिकाः पुण्याः मकरसंक्रान्तौ तु परापरात्मिका विंशतिघटिकाः पुण्या इति"। न केवलमादित्यस्यैव संक्रान्तिष्वयने पुण्यकालः किन्तु सर्वेषामपि ग्रहाणां नक्षत्रराशिसंक्रमे पुण्यकालो भवति इयांस्तु विशेषोरवेरेव राशिसंक्रमे पुण्यकालः अयनसंक्रमे तु चन्द्रादीनामपि कालविशेषे पुण्यता यथाह तत्रैव ज्योतिःशास्त्रे "नक्षत्रराश्योरविसंक्रमे सूरर्वाक् परस्ताद्रविचन्द्रनाद्याः पुण्यास्तयेन्दोस्त्रिधरालवैर्युता एकैव नाड्यो मुनिभिः शुभोक्ता। नाद्यश्चतस्रः सपलाः कुजस्य। बुधस्य तिस्रः पलविंशयुक्ताः। अष्टौ गुरोश्चतसः सपलाश्च शुक्रे। दिनाद्यनाड्यः पलसप्तयुक्ता शनेश्चरस्याभिहिताः सुपुण्याः। आद्यन्तमध्ये जपहोमदानं कर्वन्नवाप्नोति सुरेन्द्रधामेति"। अयमर्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक् परतश्च षोडश घटिकाः पुण्यकालः तथा चन्द्रस्यापि घटिकैका पलानि च त्रयोदशार्वाक्परतश्च-पुण्यकालः। एवं मङ्गलस्य चतस्रो घटिकाः पलमेकं च पुण्यकालः तथा बुधस्य तिस्रो घटिकाशतदयं पलानि च पुण्यकालः बृहस्पतेरपि सार्द्धचतस्रो घटिकाः सप्त पलानि च पुण्यकालः। शुक्रस्य चतस्रो घटिकाः पलमेकं पुण्यकालः शनैश्चरस्य द्वयर्धीतिघटिकाः पलानि च सप्त पुण्यकालः। पं. यूषधारायां तु जैमिनिवचनबलेन एतद्वचनमसम्बद्धमुक्तम्। मेषायनादिषु संक्रान्तिस्फुटीकरणमुक्त्वा ग्रहर्क्षविभागेषु "तथायनांशाः संस्कारोक्तश्च स्पष्टार्कगत्या विस्फुटादिनादि। मेषादितः प्राक् चलसंक्रमाः स्युर्दाने जपादौ च पुण्यदास्ते"। यथा राशिभोगमाः बहुपुण्यदास्तथा चलसंक्रमा अपीति द्योतनाय तथाशब्दः। अयनांशाः षष्ठ्या गुणिता स्पष्टया सूर्यगत्या विभृताः लब्धैर्दिनाद्यैः दिनघटीपलैः कृतां कृत्वा मेषादिद्वादशराशिसंक्रमणकालात् प्राक्चलसंक्रमाश्च संक्रान्तयः चलसंक्रमदाने प्राङ्मुखेभ्यो दक्षिणोदाने जपादौ जपश्राद्धहोमादौ बहुपुण्यदा भवन्ति तदुक्तं वसिष्ठसिद्धान्ते चलसंक्रमयुङ्मासे संक्रमोयः स संक्रमः अजागलस्तन इव राशिसंक्रान्तिरुच्यते" पुलस्त्यः "अयनांशसंस्कृतोभानुर्गोलेचरति सर्वदा असंख्या राशिसंक्रान्तिस्तुल्यः कालविधिस्तयोः। स्नानदानजपश्राद्धव्रतहोमादिकर्म्मणि यत् कृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते" इति रत्नमालायाम् "यावद्भिरयनच्युतिः स्यात्तद्भोग्यकालेन दिवाकरस्य। च्युतिर्भवेद्विष्णुपदादिकानां रहस्यमेतन्मुनिभिः प्रदिष्टमिति" अयनांशानयनञ्च अयनशब्दे दर्शितम्। तत्तद्राश्यादिमार्गेषु सूर्यादितेजःपुञ्जसञ्चारश्चलसंक्रमोमण्डलमध्यसंपर्कश्च राशिसंक्रम इतिविषयविवेकः तद्यथा रथ्यायां प्राक् पश्चाद्वा नीयमानस्य दीपस्याग्रे दीपप्रभा यस्मिन्प्रदेशे गच्छति तस्मिन्नेव प्रदेशे क्षणान्तरेण दीपोऽपि गच्छति एवं सर्वेषामपि ग्रहाणां चलसंक्रमादृष्टव्याः नन्वेवं चलसंक्रमस्य दृश्यत्वे तेनैव भानेन पञ्चाङ्गगणना स्यात् इतिचेत् न अश्विन्यादिभानां विसंवादात् तथाहि सूर्यार्कान्तराधिक्यषष्ट्यहैर्यत्रस्यैव सन्ध्याकाले प्रथमसदृश्योर्ज्योतिषे प्रसिद्धः सर्वसम्मतश्च। तत्

यदि अयनांशशोधनमन्तरेणैव सूर्यस्य तत्तद्राशिघटकनक्षत्रस्थितिस्वीकारस्तदा इदानीमयनांशानुसारेण २०,३५, ४४, एतदंशादितः पूर्वं रवेर्मेषादौ गत्यावश्यकत्वात् तस्य च तद्घटकनक्षत्रस्थितेस्तत्तत्पर्वदर्शनक्षत्रस्य सन्ध्यायां प्रथमोदयापत्तिर्न च तथा दृश्यते तथा यस्मिन् दिने इदानीममावास्यापूर्णिमादयो दृश्यन्ते ततः पूर्वं २०,३५,४४ सूर्यचन्द्रयोरेकराशिस्थत्वेन अमावास्यापत्तिस्ततः पञ्चदशेऽहनि पूर्णिमापत्तिश्च नचैतत् प्रत्यक्षसंवादीति। अयनांशशोधनेन निरयनांशसंक्रमादितस्तु सर्वं प्रत्यक्षसंवादि। किं च सायनसंक्रमरहितस्य चान्द्रमासस्याऽधिमासत्वव्यवहारप्रसङ्गः संक्रान्तिद्वययुतस्य तस्य क्षयमासत्वव्यवहारप्रसङ्गश्च। एवं च बहुविप्लवात् चलसंक्रान्तेः सुस्थत्वेऽपि तेनैव मासवर्षगणनादिशङ्का न कार्या प्राग्प्रदर्शितपुलस्य वचनेन, अयनशब्दे दर्शितेन सौरागमवाक्येन, "दिनरात्रिप्रमाणानां निर्णयो न भसंक्रमात्" अतः सकलकर्माणि" इति, सिद्धान्तशिरोमणिवाक्येन च स्नात्तकर्मविशेषे, ग्रहनक्षत्रादिकर्मस्वेव तस्य सुस्थत्वाभिधानात् न तेन सर्वव्यवहारः अन्यथा तत्तद्विशेषोपादानं व्यर्थं स्यात्। एकान्तेन राशिसंक्रमानङ्गीकारे प्रागुक्तवचनजाते राशिसंक्रान्तिवत् पुण्यकालताभिधानानुपपत्तिः तथा च यथा मासवत्सरादीनामनेकविधत्वेऽपि क्रियाविशेषे तेषां प्राह्यता एवं चलस्थिरसंक्रान्त्योरपि विषयविशेषेऽपि ग्राह्यता। किञ्च सायनसंक्रममात्रेण सर्वव्यवहारे अनेके विसंवादा प्रोयूष धारायां दर्शिताः। तेऽप्यत्रोपदर्श्यन्ते। सायनगणनया त्वयोन्येऽपि काले यद्दाकदाचिदेकनक्षत्रान्तरे नक्षत्रयोरन्तरे वोपलभ्येत सूर्यचन्द्रयोस्तु तेजोबहुत्वान्नक्षत्रतेजःपरिभवान्न नक्षत्रसंनिधावुपलम्भो यद्यपि। तथापि कदाचित् क्षीणचन्द्रस्योपलम्भोऽस्तत एव गोचरादिविषयक दुष्टफलानि एकराशिस्थितयद्दयोगफलानि च विरुध्येरन् यद्दणादिविसंवादश्च। तस्मान्निरयनगणनयैव सर्वोऽपि व्यवहारो युक्तः यत्तु अजागलस्तनद्वयेत्यादि प्रागुक्तवचनम् "पुण्यत्वं राशिसंक्रान्तेः केचिदाहुर्मनीषिणः नैतन्मम मतमित्यादिवशिष्ठवाक्यञ्च तत् चलसंक्रान्तेः स्तुतिपरम् "न निन्दानिन्दनीयं निन्दति किन्तु विधेयं स्तौतीति" न्यायात् अन्यथा संक्रान्तिशब्दे दर्शयिष्यमाणानां राशिसंक्रान्तिपुण्यकालताबोधकवचनानां बहूनां विप्लवापत्तेः "दिनप्रतिसंक्रमात् प्राक् षोडश नाड्यस्तु पुण्यकालः सः। परतः षोडश नाड्यः स्नानदानकार्य्यौचिति" वशिष्ठस्यैव वचनान्तरेण विरोधः स्यात् अयनसंक्रान्तिषु तु अन्यविषयस्यैव तेन पुण्यकालतोक्तेस्ततो विलक्षणविषयत्वौचित्यं तादृशवचनानाम्।

अयनांशज पु० अयनस्य अंशः तज्जः। प्राथमिकक्रान्तिदक्षारम्भस्थानातिक्रमेण जाते मासे "अयनांशजमासान्ते व्युत्क्रमेणादितो बुधैः" ज्यो०तत्त्व०।

अयव पु० अल्पोयवस्तुरुल्वोवा। १पुरीषजे क्षमिभेदे क्षमिशब्दे विवरणम् नास्ति यवः यत्नसाधनं यत्र। अङ्कतया यवहीने तिलसाधने २पिटकत्वादौ। नुमिश्रणे कर्त्तरि अच् न०त०। ३असम्बद्धे यत्नौ ४रविचन्द्रयोर्विवोजके कृष्णपक्षे च "अयवानामाधिपत्यमिति पूर्वपक्षा वा यवाश्चपरपक्षा वा अयवास्ते ह्येतं सर्वं युवते चायुवते" इति शतब्रा०।

अयवस् पु० न युतः पृथग्भूतौ चन्द्रसूर्यौ यत्र यु–असुन् न०त०। अर्द्धमासे पक्षे। "सजुरह्नो अयवोभिः" यजु० १२७४ "यवाद्यायवाद्यार्द्धमासाश्चोच्यन्ते वे०दी०।

अयश् विरोधे न०त०। यशोविरोधिनि अपवादे। अयशो- "मरुदाप्नोति नरकञ्चैव गच्छति" मनुः। "स्वभावलोलेत्य यशः प्रमृष्टम्" रघुः। न०ब०। कीर्त्तिशून्ये त्रि० वा कप् अयशस्कः तत्रैव।

अयश्कर त्रि० अयशः करोति कृ–ताच्छील्यादौ ट स्त्रियां ङीप्। अपवादकरे।

अयश्य न० यशसे हितम् यत् यशस्यम् विरोधे न०त०। अपवादकरे "पैशुन्याऽनृतालस्यायश्यानि हित्वा" मनुः।

अयश्चूर्ण न०त०। "शल्लदृसं लरङ्कस्य सुशुष्कं भावयेदति। निःक्वाथेन विडङ्गानां चूर्णं प्रक्षेपयन्तु तत्। अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक्" सुश्रुतोक्ते लौहचूर्णघटितौषधभेदे।

अयस् न० एति चलति अयस्कान्तसान्निध्यात् इण–असुन्। लौहे धातुभेदे तस्य स्थिरत्वेऽपि अयस्कान्तसान्निध्याच्चलनात्तथात्वम्। "सुहृदयोहृदयः प्रतिगर्ज्जताम्" "अमितप्रभयोऽपि मार्हवं भजते कैव कथा शरीरिणाम्" इति च रघुः "ताम्रायःकांस्यरैत्यानां त्रिपुणः सीसकस्य च" अयः कांस्यपात्राणाञ्च द्वादशाहमपाकृता" इति च मनुः। अयसः पाकादि अद्भुतसारशब्दे ३२६ पृष्ठे द्रष्टव्यम्। अधिकं लौहशब्दे वक्ष्यते। उपचारात् २अयोनिर्म्मिते शस्त्रादावपि। "तेजोऽयसो न धारां ऋ०६,३,५, अयसः अयोमयस्य परश्वादेर्धारां" भा०। हिरण्यशब्दोऽयो अस्यपादाः ऋ० १,१६३,८भावे असुन्। ३गमने न०। 'ज्योतिरकारि हरितो

नाऽयसे ऋ० १,५७,३ "अयसे गमनाय" भा० अयसा निर्म्मितम् अण् । आयसम् लौहमये कठाहादौ अयसो विकारः अण् आयसः । लौहविकारे 'अयस्कान्तदृनायसम्' रघुः "आयसेन तु पात्रेणेत्यादि २७८ पृष्ठे दर्शितम् । मयट् अयोमयः । वेदे तु अयआयादि० नि० अयस्मयः । लौहविकारे त्रि० स्त्रियां ङीप् । चतुरर्थ्यां छण् । आयसीयः अयस्मन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् । एति यत्रस्थानम् इण असुन् । श्वञ्चौ पु० । "अयाश्चाग्नेऽस्यनभिशस्त्यायाश्च सत्यमित्त्वमया असि । अयानो यज्ञं वहास्यया नोधेहि भेषजम्" यजु० । ४हिरण्ये निरु० "रत्नोहा विचर्षणिरभियोनिमयोहतम् अभ्यनूषतायोहतम् ऋ० ६,१,२,८०, "अय इति हिरण्यनामेति भा० "हिरण्यपाणिः प्रतिदोषमास्यात् अयोहनुर्यजते इति यजु० ६,७१,१, अयोहनुर्हिरण्मयहनुः" भा० ।

अयस्कंसा पु० न० । अयोविकारः कंसं पात्रं सत्यम् । लौहनिर्म्मिते पानपात्रे ।

अयस्कृती स्त्री अय इव कर्त्रीवस्य गौ० ङीष् । लौहतुल्यकठिनकर्त्रीयुक्तायां स्त्रियाम् ।

अयस्कान्त पु० अयस्सु कान्तः रमणीयः कान्तादित्वात् सत्वम् । (कान्तिलोह) इति ख्याते १लौहभेदे । अयसां कान्तः दृष्टः सन्निधिमात्रेणाकर्षकत्वात् । सन्निधिमात्रेण लौहाकर्षके (चुम्बक) इति ख्याते २प्रस्तरभेदे । "यन्मौर्यैस्तप्तमाकृष्टमयस्कान्तेन लौहवत्" कुमा० "स चकर्ष परस्यान्तर्दयस्कान्तमिवायसम्" रघुः । अयस्कान्तेनाकर्षणीयशल्यापनयनार्थे २व्रणचिकित्साभेदे यथोक्तं सुश्रुते "अनुलोममनवबृंहकर्णमनल्पव्रणमुखमयस्कान्तेन" ।

अयस्काम त्रि० अयः कामयते कम-अण् उप० स० सत्वम् । लौहाभिलाषिणि । [सत्वम् । लौहकारे (कामार) ।

अयस्कार त्रि० अयोविकारं करोति कृ-अण् उप० स० सत्वम् ।

अयस्कुम्भ पु० अयोविकारः कुम्भः सत्वम् । लौहमये घटे ।

अयस्कुम्भा स्त्री अयःसहिता कुम्भा मध्य० त० सत्वम् । लौहसहितकुम्भायाम् ।

अयस्कृति स्त्री अयसा कृतिः चिकित्सा प्रक्रिया सत्वम् । सुश्रुतोक्ते महाकुष्ठचिकित्साभेदे "अथ अर्शसामयस्कृतीर्व्याख्यास्यामः । तीक्ष्णलोहपलाशि तन्तूनि सवणवर्गप्रदिग्धानि गोमयाग्निप्रतापितानि त्रिफलाक्षारवसादिक्षणवेधेन निर्व्यूहेत् लौहपत्राणि खदिराङ्गारतप्तान्यु[illegible]पशान्तवर्णानि कार्ष्णेष्टाढतान्तवपरिस्रावितानि ततो यथाबलं मात्रां सर्पिर्भुञ्जां संसृज्योपयुञ्जीत । जीर्णे यथाव्याध्यन्नमन्नवणमाहारं कुर्व्वीत । तुलासुपयुञ्ज्य कृष्णभेकभेदः श्वयथुपाण्डुरोगोन्मादापस्मारानपहृत्य वर्षशतं जीवति तुलायां तुलायां वर्षशततयुणोत्कर्षः । एतेन सर्व्वलौहेष्वयस्कृतयो व्याख्याताः ।

अयस्थूण पु० अयोनिर्म्मितः स्थूणः वा विसर्गलोपः । लौहमये १यष्टस्थूणे ६त० । तथाविधयष्टस्थूणायुक्ते २यष्टगृहे । "अयस्थूणाश्यष्टपतीनां वै" यतत्रा० अयस्थूणा यष्टपतयस्तेषामिति तेषाम् क्षीनद्रव्यत्वादालोपः भा० । ७त० २अयोमयाक्षे रथादौ त्रि० । "व्युष्टायस्थूणहरिता सूर्य्यस्य" ऋ० ५,६२,८, अयस्थूणमयोमयगन्तुं गर्त्तं रथं वेति भा० । ४ऋषिभेदे पु० तस्य गोत्रम् अण् आयस्थूणः तस्य बहुषु लुक् । अयस्थूणाः । गौ० पाठात् ङीष् अयस्थूणी ।

अयस्पात्र न० अयोमयं पात्रं सत्वम् । लौहमये पात्रे ।

अयस्मय त्रि० अयोविकारः अयस्+मयट् वेदे नि० भत्वम् स्त्रियां ङीप् । अयोमये लौहमये "असुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिँल्लोके रजतामन्तरीक्षे हरिणीं दिवि" यतत्रा० । "भूम्या अयस्मयम् पात्रं" अथ० ५,२८,६, यतस्त्रिरयस्मयीः अथ० ४,३७,८, छन्दसीति प्रायिकं तेन लोकेऽपि "परिश्रमन्तमनिशं तीक्ष्णधारमयस्मयम्" भा० आ० प० "ततः यष्टिं दृष्ट्वा तु रुक्मदण्डमयस्मयीम् भा० द्रो० प० ।

अयस्मयादि पु० ६त० "अयस्मयादीनि छन्दसि" पा० उक्ते भत्वादिकार्य्यार्थे निपातनाङ्के अकृतिगणभेदे ।

अयाचित न० याच+क्त न० त० । १अभ्यर्थनाशब्दवति "अयाचितं स्यादयाचित"मिति मेदिनिः । २अप्रार्थिते त्रि० । "अयाचितोपस्थितमम्बु केवलम्" "अयाचितानूनं पाकपात्रमपि दुष्कृतकर्म्मणः" स्मृतिः "याचेर्नुङादिपाठात् गौणे कर्म्मणि" क्त । यस्य सकाशे न याच्यते ३तत्सन्निधिजने च ।

अयाज्य त्रि० न याजयितुमर्हः यज-णिच्-कर्म्मणि यत् न० त० । पतितादौ स्मृतिनिषिद्धयाजने । तेच स्मृतौ दर्शिताः यथा देवलः "पतितेन समेत्योक्ता जानन् संवत्सरं नरः निश्चित्य तेन सोऽज्ञाने सवासा पतितो भवेत् । याजनं योनिसम्बन्धं साध्यायं सहभोजनम् । ज्ञात्वा सद्यः पतत्येव पतितेन न संशयः । कौथा० "संवत्सरेण पतति पतितेन न संशयः याजनाध्यापनाद्यौनात् सद्यो न्यूनाधिकम्" ।

मनुविष्णू। "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनात् न तु यानासनाशनात्" पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनान्न त्वेकशय्यनासनात्"। पतितानभिधायाह सुमन्तुः। "यश्च तैर्यौनमौखस्तौवाणां सम्बन्धानामन्यतमेन सह संवत्सरं सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात्" इयात् कुर्यात् द्वादशवार्षिकमित्यर्थः मौखं सुखसाध्यमध्यापनं स्तौवं स्तुवसाध्यं याजनमित्यर्थः अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते प्रा०वि०। हारीतः। "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनादेकशय्यैकभोजनात्" वृहस्पतिः। "याज्ञासिके तु संयोगे याजनाध्यापनादिना। एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्"। "याजनादिकं लघुगुरुभेदेन द्विविधं भवति तत्र गुरुणाज्ञानकृतेन याजनादिना एकैकेन सद्यःपातः तेनैवाज्ञानकृतेन वारद्वयाभ्यासात्। लघुनि याजनादावज्ञानकृते संवत्सरेण पतति तस्मिन्नेव ज्ञानकृते वत्सरार्द्धेनेति व्यवस्था। तथाहि याजनं योनिसम्बन्धमित्यत्र देवलवचने पतितेन सहोषित्वा जानन्निति पूर्ववचनस्थस्य जानन्निति पदस्य सम्बन्धात् ज्ञानकृतत्वे गुरुत्वं दर्शितं गुरुयाजनाध्यापनादिकमाह देवलः। "आचार्याद्व्रतनियमशुश्रूषादिभिस्त्रयोविद्योपादानमध्ययनम्। तस्य चाचारान्वयप्रक्रमसामर्थ्ये भक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनं, पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिः खदिरपलाशाश्वत्थन्यग्रोधोदुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुसलकुठारखनित्रयूपदारुचर्मदर्भप्रावपवित्रभाजनादिभिर्द्रव्योपकरणैः प्रोत्साहिहोत्रध्वर्युब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकाणां पक्षादिपूर्वकाणां यथोक्तदक्षिणानां यज्ञानां समापनं यजनम् एतेन याजनं व्याख्यातम्"। तथा च ज्योतिष्टोमादियज्ञानां याजनं गुरु, पूर्वादिकर्मणा याजनं लघु। कौर्मम् "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः। कृत्वा सद्यः पतेज्ज्ञानान् सहभोजनमेव च"। यमः। "असत्प्रतिग्रहीतारस्तथैवायाज्ययाजकाः। नक्षत्रैर्जीव्यते यश्च सोऽन्धकारं प्रपद्यते"। वसिष्ठः। "अश्रद्धानस्य भोक्तव्यं शूद्रस्य च विशेषतः। न त्वेव बहुयाज्यस्य यज्ञो पनयते बहून्"। बौधायनः। "बहुप्रतिग्रहं वाऽप्रतिगृह्ययाज्यं वा याजयित्वाऽप्रतिग्राह्यस्य वा प्रतिगृह्य अनाशनस्य वाऽन्नमश्नित्वा तरत्समन्दीयं जपेत्"। वशिष्ठः। "एतेनैव गर्हिताध्यापकयाजकाव्याख्याता" दक्षिणात्यागाच्च पूताभवन्तीति विज्ञायते" "एतच्च शूद्रेतरस्योपपातकादिगर्हितस्य पञ्चमहायज्ञयाजनादिविषयमिति धर्मप्रदीपः" प्रा०वि०। तत्रैव शूद्रपुरोहितयाजकाध्यापकादानुद्वृत्तौ यमः। "एतेषामेव सर्वेषां प्रत्यापत्तिन्तु मार्गताम्। भैक्षान्नमपयुञ्जानोहिजश्चान्द्रायणञ्चरेत्। फलं नागह्रदे तोये प्लवयेदभिभावितम् अधोत्सर्गेण यन्नाम्ने तस्मात् पापात् प्रमुच्यते। अन्धारणलवणं कृत्वा पिबेद्दुग्धासुवर्चलाम्। तस्योपनयनं कृत्वा व्यवहार्य्यस्तदा भवेत्" इति। फलं लब्धं धनं नागह्रदे गजमज्जनयोग्यह्रदे अभिभावितम् अभुक्तम्। यन्नाम्ने व्रतान्ते।

अयाज्ययाजन न० अयाज्यस्य याजनम्। अयाज्यस्य पतितादेर्याजने। याजनं च लघुगुरुभेदेन द्विधेत्युन्नमयाज्यशब्दे। "अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् कृत्वान्यानि विनश्यन्ति यानि हीनानि मन्वतः" मनुः।

अयाज्यसंयाज्य न० सम्+यज–णिच्–भावे यत् दैत०। अयाज्यस्य पतितादेर्याजने "सैवाधायाज्यसंयाज्यपारदार्य्यात्मविक्रयः" इति मनुः।

अयातयाम पु० न यातोयामः समयोऽस्य। १अपर्य्युषिते २अनतिक्रान्तकाले ३विगतदोषे च। "छन्दांस्येवैतत् पुनराप्याययत्ययातयामानि करोति–न वा अत्र स्तुते न शंसन्ति तच्छन्दांस्येवैतत् पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते" इति शत० ब्रा०। "छन्दांस्ययातयामानि" भाग०। "अयातयामानि विगतदोषाणि" श्रीधरः।

अयातु पु० भीमो भीमसेनवत् यातुर्यातुधानः न०त०। १राक्षसभिन्ने २अहिंसके च योमायातुं यातुधानेत्याह ऋ० ७,१०४,१६, अयातुमराक्षसम् भा०। "क्रव्यादिदेवाँ अयातुरग्ने। ऋ०७,३४,८ अयातुः अहिंसकः भा०।

अयाथातथ्य न०त०। मिथ्यात्वे। अयथातथशब्दे विवृतिः।

अयान न० न यानं चलनं यस्य। १स्वभावे निसर्गे यथा जले शैत्यं अग्नेरुष्णता न हि तत् कदापि चलतीति तस्य तथात्वम् अभावे न०त०। २गमनाभावे। यानं गमनं वाहनञ्च न०ब०। ३यानशून्ये त्रि०।

अयानय पु० द्यूते सर्व्वसारगन्तव्यप्रेप्सोभावे शीर्षस्थाने व्युत्पत्तिविवरणम् मत्कृतसरलायाम् यथा आनीयन्ते धारा अस्मिन् इत्यानयः अक्षेन दक्षिणावर्त्तेनाप्तव्य-

समक्षेनानयः अयानयः शीर्षस्थानम् । तत् नेयः ख । द्यूतविशेषे हि चतस्रोवीथयः प्रत्येकं द्वादशकोष्ठोपेताः शारास्तु त्रिंशत् ते च एकैकवीथिगतेन पञ्चदशगो याह्याः स्वसमपार्श्वस्थप्रथमकोष्ठपर्य्यन्तमारभ्यान्तिमकोष्ठरूपंशीर्षस्थानरूपमयानयं दक्षिणावर्त्तेनोपसव्यगत्या सर्व्वेऽपि शारा नेया अतस्ते अयानयोना इत्युच्यन्ते तत्रायं प्रकारः "समक्षायस्य शारस्य परैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेण हन्यते इत्युक्तादिभावसेयः । परैः परकीयैः नाक्रम्यते द्वाद्यादिशाराश्रितकोष्ठं नाक्रम्यते परकीयशारेण तत्स्थानाक्रमणेन प्रतिरोधात् । असहायस्तु हन्यते इतरतः प्रतिरोधाजनतः "अनुपदसव्यायानयं बद्वा भक्षयति नेयेषु" पा० "अयानयः स्थानविशेषः तं नेयः अयानयोनः शारः" मि० कौ० ।

अयाग्रु त्रि० अयमञ्चति नाशयति अय अञ्च-ईत० । शुभीवकृविधिलोपके यातुधानभेदे "अलजाः शकुनाश्चा एकशला ये च षट्पटाः कृष्णसृक्का अयाशवः । तानस्या ब्रह्मणस्पतेः प्रतीबोधेन नाशय" अथ० ८,६,१५ ।

अयास्य त्रि० यस-णिच्-शक्यार्थे यत् न०त० । १उपलपयितुमशक्ये "अयुजो असमोन्दभिरेकः क्षीरयाशुः" ऋ० ८,६२,२, "अयास्यः उपलपयितुमशक्यः" भा० । यासः प्रयत्नस्तत्साध्यः यत् न०त० । २ युद्धरूपसाधनैः साधयितुमशक्ये स्त्री० । आस्यादयते निर्गच्छति अच् पृ०पदव्यत्ययः । २ मुखेन निर्गमनवृत्तिके प्राणवायौ उपचारात् ४ तदुपासके अङ्गिरसि ऋषिभेदे । "अयास्यः स्तवमानेभिरर्कैः" ऋ० १,६२,७, "अयास्यः यासः प्रयत्नः तत्साध्यो यास्यः न यास्योऽयास्यः । युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः यद्वा अयास्यः पञ्चवृत्तिर्मुख्यः प्राणः । स हयास्यान्मुखादयते गच्छति निष्क्रामति । तदुपासकोऽप्यङ्गिरा उपचारादयास्य उच्यते । तथा च छन्दोगैराम्नातम "तं ह्यायास्य उद्गीथमुपासाञ्चक्रे एतमु एवायास्यं मन्यन्ते आस्यादयते नेनेति" । अथवा अयमासे सुखे वर्त्तत इत्ययास्यः तथा च वाजसनेयकम् "ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्केत्थमासान्तरितीति" । पूर्ववदुपासकोऽप्ययास्यः "भा० ।

अधि अव्य० इण-इन् । १प्रश्ने, २अनुनये, ३संबोधने, ४अनुरागे च "अयि सम्प्रति देहि दर्शनम्" "अयि जीवितनाथ । जीवसि" इति च क्रमा० । "अयि ज्ञानीषे रेभितस्य सार्धवाहस्य गृहम्" कथा० ।

अयुक्कुद पु० अयुग्माः सप्त सप्त छदा अस्य । सप्तपर्णे वृक्षे तस्य हि एकैकवृन्ते सप्त सप्त पर्णानि विद्यन्ते । "सप्तयुक्छदसप्तपर्णयोः" माघः । अयुग्मपत्रादयो यत्र ।

अयुक्त त्रि० युज क्त न०त० । १विषयान्तरासंक्रान्तया कर्त्तव्येष्वनवहिते, २अनुचिते, ३याथार्थ्यहीने ४असंयुक्ते च "अयुक्तः प्राकृतस्तब्धः पशुर्नैकृतिकोऽलसः गीता" अयुक्ताः अनवस्थिता इति आ०त० रघु० । "नचायुक्तस्य भावना" गीता पू०अयोग्ये "अयुक्तरूपं किमतः परं वद" कुमा० । अयुक्तं प्रथमं कर्म्मचयोग्योग्यकर्म्मकृत् । ईश्वरिभूमौ "अयुक्तः कामकारेण फले सक्तोनिबध्यते इति गीता" "अयुक्तः अविहर्मग्नः" म०त० रघु० । युक्तियुक्तं युक्तम् न०त० युक्तियुक्ते त्रि० । "अयुक्तं यदिह प्रोक्तम्" इति दुर्गादासः व्याख्यायीजितेन च । "अयुक्तोचारप्रागल्भि" नीति० ।

अयुक्ति स्त्री अभावे न०त० । १युक्त्यभावे । न०ब० । २युक्तिशून्ये ३योजनशून्ये च त्रि० ।

अयुग न०त० । युग्मभिन्ने (विजोड़) विषमे । "युगपदयुगमग्निरुन्मंक्ष्यतीमेयरेः" माघः अयुगनेत्रः त्रिनेत्रः अयुगेषुः पञ्चशरः । अयुग्मत्वादयोऽप्यत्र । न०ब० । ३भग्नयुगे रथादौ

अयुगपद् अव्य० न०त० । युगपद्भिन्ने क्रमिकभजने ।

अयुगू स्त्री एति बन्ध्यत्वम् इण्-उनु अयुगूर्यते गै क्कृ । काकवन्ध्यायां स्त्रियाम् । "अयुगूः काकवन्ध्या या जाता तां न विवाहयेत्" कात्या० स्मृतिः ।

अयुग्म न० न०त० । युग्मभिन्ने (विजोड़) विषमे । यथा संख्यायामेकत्रिपञ्चसप्तादयः । न०ब० । २तत् संख्यान्विते त्रि० । "प्रत्येन्द्रियञ्चोभयमयुग्मनेत्रे" इति कुमा० । अयुग्मशरः पञ्चबाणः । अयुग्मच्छदः सप्तच्छदः अयुग्मबाहुः सप्ताश्वः । "अयुग्मे विधवा नारी" उ०त० पु० "युग्मासु पत्नीजायन्ते स्त्रियोऽयुग्मासु पतिषु" मनुः । "द्वादशराशिषु विषमसंख्यान्वितेषु मेषमिथुनसिंहतुलाधनुःकुम्भेषु" ज्योके प्रथमतृतीयचरणयोः ।

अयुग्मनेत्र पु० अयुग्मानि नेत्राण्यस्य । त्रिनेत्रे महादेवे "प्रत्येन्द्रियञ्चोभयमयुग्मनेत्रः" प० अयुग्मनेत्रादयोऽप्यत्र

अयुग्मच्छद पु० अयुग्माः सप्त सप्त छदा अस्य । सप्तच्छदे (छातिम) वृक्षे अयुग्मपत्रादयोऽप्यत्र ।

अयुग्मवाह पु० अयुग्माः सप्त वाहा अस्य । सप्ताश्वे सूर्य्ये । अयुग्माश्वादयोऽप्यत्र ।

अयुग्मशर पु० अयुग्माः पञ्च शरा अस्य । पञ्चबाणे कामदेवे अयुग्मबाणादयोऽप्यत्र । बाणपञ्चकं च पञ्चबाणशब्दे वक्ष्यते।

अयुज् त्रि० न युज्यते सजातीयेन, युज-क्विन् न०त० । अयुग्मे (विजोड़) विषमे "अयुजि नयुगरेफतो यकारो युजि नजरगाश्च पुष्पिताग्रा" "अयुग्दान्तं स्त्रीणाम्" गोभि० । "अयुक् अयुग्माक्षरम्" सं०त० रघु० "अयुजु त पितॄन् सर्वान्" मनुः । "ववरयुक्च्छदयुच्छत्रुगन्धय": माघः ।

अयुत त्रि० न युतः संयुक्तः सम्बद्धो वा । १असंयुक्ते २असम्बद्धे च २दशसहस्रसंख्यायाम् न०"सूर्याब्धिसंख्यया द्वितिसागरैरयुताहतैः" सू०सि० । स विज्ञेयः परः धर्म्मोनाज्ञानादुदितोऽयुतैः" मनुः । ४तत्संख्यान्विते च ।

अयुतनायिन् पु० अयुतं पुरुषमेधानामयुतं नीतवान् जि-भूते णिनि । पुरुवंश्ये महाभौमपुत्रे राजभेदे । "पूरोस्तु-भार्य्या कौशल्यानाम तस्यामथ जज्ञे जनमेजय" इत्युपक्रम्य "महाभौमः खलु प्राचेनजितीमुपयेमे तस्य पुत्रो जज्ञे अयुतनायी यः पुरुषमेधानामयुतमनयत् तेनास्यायुतनायित्वम्" भा० आ०प० ।

अयुतशस् अव्य० अयुतमयुतम् वीप्सार्थे कारकात् शस् । अयुतमयुतमित्यर्थे ।

अयुतसिद्ध त्रि० युतः पृथग्भूतः सन् सिद्धो न भवति न०त० । कारणकपालादेरपृथग्भूततया सिद्धे १कार्य्यद्रव्ये घटादौ तथाभूते वैशेषिकोक्ते द्रव्याश्रिते २गुणे ३कर्म्मणि च तदेतदयुतसिद्धत्वं कार्य्यद्रव्यगुणकर्म्मणां वेदान्तिभिर्नाङ्गीक्रियते यथा शा०भा० । गुणकर्म्मादीनां कारणद्रव्यात्मकतां व्यवस्थाप्य द्रव्यगुणादेरयुतसिद्धत्वनिरासावोक्तम् "गुणानां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्येत तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा स्यात् अपृथक्कालत्वं वा अपृथक्स्वभावत्वं वा । सर्व्वथापि नोपपद्यते । अपृथग्देशत्वे तावत् स्वाभ्युपगमोविरुध्येत कथं तन्वारब्धो हि पटस्तन्तदेशोऽभ्युपगम्यते नतु पटदेशः पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्युपगम्यन्ते न तन्तुदेशाः तथाचाहुः । "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति"।तन्तवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभन्ते तन्तुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादि गुणान्तरमारभन्ते इति हि तेऽभ्युपगच्छन्ति । सोऽभ्युपगमोद्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। अथापृथक्कालत्वमयुतसिद्धत्वमुच्येत सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत । अथापृथक्स्वभावत्वे त्वयुतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः सम्भवति तस्य तादात्म्येनैव प्रतीयमानत्वात् । युतसिद्धयोः सम्बन्धः संयोगः अयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमोऽनेनैव। तेषां प्राक्सिद्धस्य कार्य्यात् कारणस्यायुतसिद्धत्वानुपपत्तेः अथान्यतरापेक्ष एवायमभ्युपगमः स्यात् अयुतसिद्धस्य कार्यस्य कारणेन सम्बन्धः समवाय इति" एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन सम्बन्धोनोपपद्यते इत्ययत्नत्वात् सम्बन्धस्य । सिद्धं भूत्वा सम्बध्येत इति चेत् प्राक्कारणसम्बन्धात् कार्यस्य सिद्धावभ्युपगम्यमानायाम् युतसिद्धभावात् कार्यकारणयोः संयोगविभागौ न विद्यते इतीदमुक्तं दुरुक्तं स्यात् । यथा चोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्यस्य विभुभिराकाशादिद्रव्यान्तरैः सम्बन्धः संयोग एवाभ्युपगम्यते न समवायः एवं कारणद्रव्येणापि सम्बन्धः संयोग एवास्तु समवायः । नापि संयोगस्य समवायस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेणास्तित्वे किञ्चित्प्रमाणमस्ति । सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न एकत्वेऽपि स्वरूपबाह्यरूपापेक्षयाऽनेकशब्दप्रत्ययदर्शनात् । यद्यैकोऽपि सन् देवदत्तोलोके स्वरूपं सम्बन्धिरूपञ्चापेक्ष्यानेकशब्दप्रत्ययभाग्भवति मनुष्योब्राह्मणः श्रोत्रियोवदान्योबालो युवा स्थविरः पितापुत्रः पौत्रोभ्राताजामातेति । तथा चैकापि सती रेखास्थानान्यत्वेन निवेश्यमानैकदशशतसहस्रादिशब्दप्रत्ययभेदमनुभवति तथा सम्बन्धिनोरेव सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्तुत्वेनेत्युपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावोवस्त्वन्तरस्य । नापि सम्बन्धिविषयत्वे सम्बन्धशब्दप्रत्ययोः सततभावपसङ्गः स्वरूपबाह्यरूपापेक्षयेत्युक्तोत्तरत्वात् । तथैवाऽखण्डात्मनसामप्रदेशत्वाच्च संयोगः सम्भवति प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगदर्शनात् । कल्पिताः प्रदेशाअखण्डात्मनसामभविष्यन्तीतिचेन्न अविद्यमानार्थस्य कल्पनायां सर्व्वार्थसिद्धिप्रसङ्गात् इयानेवाविद्यमानो विरुद्धोऽविरुद्धोवार्थः कल्पनीयोनातोऽधिकइति नियमहेत्वभावात् कल्पनायाश्च स्वायत्तत्वात् प्रभूतत्वसम्भवाच्च । नच वैशेषिकैः कल्पितेभ्यः षड्भ्योऽर्थेभ्योऽभ्यधिकाः शतं सहस्रं वार्थान कल्पयितव्या इति निवारकोहेतुरस्ति । तस्माद्यत्र यत्र यद्यद्दोषते तत्तत् सिध्येत्। कश्चिद्ब्रूयात्नु प्राणिनां दुःखबहुलः संसार एवमा भूदिति कल्पयेत् अन्योवाव्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत्

कस्तयोर्निवारकः स्यात् । किञ्चान्यत् द्वाभ्यामणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः नह्याकाशस्य पृथिव्यादीनाञ्च जतुकाष्ठवत् संश्लेषोऽस्ति । कार्य्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यते इत्यवश्यकल्पः समवायइति चेन्न इतरेतराश्रयत्वात् । कार्य्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसिद्धौच तयोर्भेदसिद्धिः कुण्डबदरवदितरेतराश्रयता स्यात् । न हि कार्य्यकारणयोर्भेदः आश्रिताश्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते कारणस्यैव संस्थानमात्रं कार्य्यमित्यभ्युपगमात् । किञ्चान्यत् परमाणूनां परिच्छिन्नत्वात् यावत्परिमाणः घटादौ दृश्य वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत । यांस्तं दिग्भेदभेदिनोऽवयवान् कल्पयसि तएव मम परमाणव इति चेन्न स्थूलसूक्ष्मातरतम्यक्रमेणा परप्रकारत्वेन नायोपपत्तेः। यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तुभूतापि विनश्यति ततः सूक्ष्मं सूक्ष्मतरञ्च पृथिव्येकजातीयकं विनश्यति ततोद्व्यणुकं तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः । विनश्यन्तोऽवयवविभागेनैव विनश्यन्तीतिचेन्नायं दोषः यतोऽतिकाठिन्यविलयनवदपि विनाशोपपत्तिरवोचाम । यथाहि दृषत्सुवर्णादीनामविभज्यमानावयवानामप्यग्निसंयोगात् द्रवभावापत्त्या काठिन्यविनाशोभवति एवं परमाणूनामपि परमकारणभावापत्त्याविनाशोभविष्यति । तथा कार्य्यारम्भोऽपि नावयवयवसंयोगेनैव केवलेन भवति क्षीरजलादीनामन्तरेणाप्यवयवसंयोगान्तरं दधिच्छिदादिकार्य्यारम्भदर्शनात्" । इ० उ० भा० सत्कार्यव्यवस्थापनोद्देशे 'द्विनिष्ठत्वात् सम्बन्धस्यायुतसिद्धानामदोष इति चेत् न । भावाभावयोरयुतसिद्धत्वानुपपत्तेः । भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोर्यां तस्मात्सदेव कार्यं प्रागुत्पत्तेरिति सिद्धम्" । "युतसिद्धयोरव्यवहितयोर्विधःसंयोगे पृथक्सिद्धिरपेक्ष्यते अयुतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्य्यकारणादीनां सिध्योयोगेऽपृथक्सिद्धभावो न दोषमावहतीति ब्रूते अयुतेति" आनन्दगिरिः । "द्रव्याश्रयेष्वपि गुणेषु" भा०५,१८, भाष्यायां भल्लिनाथः द्रव्याश्रयेष्वपि अयुतसिद्धत्वात् द्रव्यसमवेतत्वाच्च द्रव्याधीनसत्ताकेषु सत्स्वपीति ।

अयुतसिद्धि स्त्री यु-अच्-निष्ठायां क्त युतः पृथग्भूतेन स्थितः तस्यभावः सिद्धिः अभावे न०त० । पृथग्भावेनासिद्धौ । यथा अवयवावयविनोः, द्रव्यगुणयोः, द्रव्यक्रिययोस्तथासिद्धिः ते हि स्वस्वकारणे अपृथग्भूततया सिद्धाः । अतएवोक्तं "युतसिद्ध्यभावात् कार्य्यकारणयोः संयोगविभागौ न विद्येते" वै०सू० । "सम्बन्धयोर्विद्यमानत्वम् पृथगाश्रयाश्रयित्वं वा युतसिद्धिस्तदभावस्त्ववयवावयविनोः" इति उप०वृत्तिः । अयमाशयः 'घटपटादयो हि पृथग्भूततया सिद्धाः आश्रयाश्रयिभावं लभन्ते । कार्य्यकारणयोस्तु न पृथक्स्थितिर्येन तथा स्यात्' इति ।

अयुताजित् पु० अयुतं जितवान् जि-भूते क्विप् दीर्घः उ०प०स०। यदुवंश्ये नृपभेदे । "अयुताजित् शतजाजित् शताजिदथ दासकः उपवाक्प्रकक्षक्रुथ्यां भजमानाद्विजज्ञिरे" हरि०प० । [त्रि० ।

अयुद्ध न० अभावे न०त० । १युद्धाभावे न०त० । २युद्धशून्ये

अयुव त्रि० न युवति यु-बा०क० । असंसृष्टे "अयुवमार्य्यस्य राष्ट्रं भवति" ऐत०ब्रा० ।

अयुवन् पु०स्त्री०न युवा विरोधे न०त० । डङ्गे स्त्रियां ङीप् ।

अयूप्य त्रि० यूपे साधु यत् न०त० । यूपासाधने निम्बजम्बीरादौ वृक्षे "तस्या द्विविधा यूपा अयूप्याश्च पलाशखदिरबिल्वादयो यूपा निम्बजम्बीरादयस्त्वयूप्याः" यजु०वेद०दी० ।

अये अव्य० इण्-यच् । १कोपे, २विषादे, ३संभ्रमे, ४सूतौ, ५अवज्ञायाञ्च । "अये दक्षिणेन पुण्यवाटिकाभागात्प इव श्रूयते" मृच्छ० "अये गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन" ! सां०द० ।

अयोग पु० युज्-घञ् अभावे न०त० । १योगाभावे, अप्राशस्त्ये न०त० । ज्योतिषोक्ते तिथिवारादीनां दुष्टे २योगे "अयोगः सिद्धियोगश्च द्वावेतौ भवतोयदि । अयोगोऽन्यते तत्र सिद्धियोगः प्रवर्त्तते' इति राजमा० । "अयोगे त्वयोगोऽपि चेत् स्यात्सदानोभयोगं निष्फलैव सिद्धिं तनोति । परे लग्नशुद्ध्या क्रियोगादिनाथं दिनार्द्धीसरं विधि-पूर्व्वञ्च यत्नम्" "यत्र लग्नं विना किञ्चित् क्रियते शुभसंज्ञकम् तत्र तेषामयोगानां प्रभावात्स्यायते फलम्" इतिच हरू० चि० । न०ब० । ३विधुरे, ४कूटे, ५कठिनोदये सुश्रुतोक्ते वमनापथमनीये ६रोगभेदे च। "यत्नाधानं हृदयपक्ष्मशूलाग्निमान्द्यं दाहश्च भवति तमयोगमित्याचक्षते तमाशु वमनेदिति"।"अयोगाद्वास्तु वक्ष्यामि व्यापदः सञ्चितसृसिताः। अतुष्योऽल्पौषधो क्षीणो वस्तिर्नेति प्रयोजितः विदग्धाध्मानशूलैश्च तमयोगं प्रचक्षते' इति च सुश्रुतः ।

अयोगवः पु० अय इव कठिना गौर्वाणी यस्य नि० अच्। अयोगं दुष्टयोगं वाति वा—क वा। "शूद्रादयोगवःक्षत्ता चाण्डालश्चाधमोनृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः इति मनूक्ते शूद्रात् वैश्यायां जाते प्रतिलोमजे सङ्कीर्णवर्णे। "प्रसाधनोपचारज्ञमदासं दासजीवनम् स्थैर्य्यं वागुरावृत्तिं क्षत्ते दक्षुरयोगवे, मनुः। अयोगवस्यायम् अण्। आयोगवः तज्जातिसम्बन्धिनि त्रि० स्त्रियां ङीप्। "भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः" मनुः।

अयोगवाह पु० अक्षरसमाम्नायसूत्रेषु "अइउण्" इत्यादिषु चतुर्दशसु नास्ति योगः पाठादिरूपः संबन्धो येषां ते तथापि वाहयन्ति पठणत्वादिकार्य्यादिकं निष्पादयन्ति वाहेः अच् कर्म्मधा०। "अनुस्वारो विसर्गश्च+कूँपौ चैव पराश्रितौ। अयोगवाहाविज्ञेया" इति शिक्षादुपदिष्टेषु अनुस्वारविसर्गादिषु

अयोगुल (ड) पु० गुलः गोलाकारः अयसा निर्म्मितोगुलः। (गोलीति(ख्याते लौहगुटिकायाम्। वा लस्य डः।

अयोगू पु० अयोलोहविकारं गच्छति कर्त्तृत्वेन गम—ड। अयोगन्तरि अयस्कारे "पाषाणे स्त्रीवसाक्रियायां वा अयोगमिति"। पुरुषमेधे यजु० ३०५ "अयोगूमयोगन्तारम्। वेद दी०।

अयोग्य त्रि० न०त०। १योग्यभिन्ने अनर्हे २अनुचिते च।

अयोऽग्र न० अयोऽग्रे मुखे यस्य। मुद्गले तस्य मुखे लौहास्थित्वा तथात्वम्।

अयोघन पु० अयांसि हन्यन्तेऽनेन हन-अप् घादेशश्च नि०। (हातुड़ीति) ख्याते लौहमुद्गरे। "अयोघनेनाय इवाभितप्तम्" ॥ रघुः।

अयोजाल न०अयोविकारः जालम्। १लौहमये जाले अय इव दुर्भेद्यं जालं मायाऽस्य। २दुर्भेद्यकपटे असुरादौ त्रि० "अयोजाला असुरा मायिनोऽयस्मयैः" अथ० १,१६,६६।

अयोदंष्ट्र त्रि० अयोमयी दंष्ट्रा चक्राग्रधारा अस्य। लौहमयधारे रथादौ। "यस्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून्" ऋ० १,८८,६, "दंष्ट्रा चक्रधारा" भा०।

अयोदत् त्रि० अयइव कठिनो दन्तोयस्य संज्ञायां दत्रादेशः। लौहवत्कठिनदन्तयुक्ते राक्षसादौ स्त्रियां ङीप्।

अयोध्य त्रि० योद्धुमशक्यः युध—ण्यत् न०त०। योद्धुमशक्ये "अष्टाचक्रा नवद्वारा देवानां पूरयोध्या" अथ० १०, २,३१, इक्ष्वाकुवंश्यक्षत्रियाणां राजधान्यां स्त्री सा च सरयूतीरसन्निकृष्टा सेवनादौ मोक्षदा च। "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" पुरा० "बलसुपहितयोधां तूर्णमायादयोध्याम्" भट्टिः।

अयोध्याकाण्ड न० अयोध्यायास्तत्तत्पट्टान्तवर्णनस्य काण्डम्। रामायणान्तर्गते अयोध्यावर्णनात्मके ग्रन्थे।

अयोनि स्त्री न०त०। १योनिभिन्नस्थाने। "अमानवीषु पुरुषे उदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्" मनुः। नास्ति योनिरुत्पत्तिस्थानं यस्य। २अजन्मनित्ये। "जगद्योनिरयोनिस्त्वम्" कु०।

अयोनिक त्रि० न आम्नाता योनिरस्य कप्। अनाम्नातयोनिकेषु यज्ञकर्म्मोपयुक्तपात्रादौ "नायोनिकेषु" कात्या० ६,५,२३, अयोनिकेषु यत्र "एष ते योनिः" इत्यस्याम्नानं न भवति तत्र "एष ते योनिः" इत्यनेनासादनं भवति "सर्वे ष्विति वातूक्तोऽविशेषात्" कात्या० ६,५,२७ "सर्वेष्वाम्नात योनिकेषु अनाम्नातयोनिकेषु च यज्ञेषु परिमार्जनानन्तरम् एष ते योनिरिति मन्त्रेणासादनं भवत्येव" कर्क०।

अयोनिज न० योनेर्न जायते जन—ड। योनितोऽनुत्पन्ने शुक्रशोणितसन्निपातानुत्पन्ने जरायुजभिन्ने क्रमिदंशादौ तथाहि "शरीरं द्विविधं योनिजमयोनिजञ्च" वै० सू०। तत्र पार्थिवादिशरीरेषु मध्ये पार्थिवं शरीरं द्विविधं योनिजमयोनिजञ्चेति आप्यतैजसवायवीयशरीराणां वरुणादित्यवायुलोकेषु प्रसिद्धानामयोनिजत्वमेव शुक्रशोणितसन्निपातानपेक्षत्वात्। अयोनिजञ्च देवानामृषीणाञ्च श्रूयते हि "ब्रह्मणो मानसामन्वादय" इति। कारणमन्तरेण कथं कार्य्यमिति चेत् योनेः शरीरत्वाच्छरीरेणाकारणत्वात् जन्मजक्रमिमशकादिशरीरे व्यभिचारात् संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरामेक्षयाऽस्मदादिशरीराणामन्याद्दशत्वात्, योनिजमपि द्विविधं जरायुजमण्डजञ्च, जरायुजं मानुषपशुमृगाणां, गर्भाशयस्य जरायुत्वात्, पक्षिसरीसृपाणामण्डजं परितः सर्पणशीलत्वात् सर्पकीटमत्स्यादयोऽपि सरीसृपा एव यद्यपि दष्टादयोऽपि शरीरभेदा एव भोगाधिष्ठानत्वात् न खलु भोगाधिष्ठानत्वमन्तरेण जीवन-मरण-स्वप्न-जागरणभेषज-प्रयोग-बीजसजातीयानुबन्धानुकूलोपगम-प्रतिकूलापगमादयः सम्भवन्ति दृष्टिस्तमरनसंरोहणे च भोगोपयादके स्फुटे एव, आगमोऽप्यस्ति। "नर्म्मदातीरसम्भूताः सरलार्জ্জुनपादपाः। नर्म्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम्"।

"श्मशाने जायते वृक्षः कङ्कटग्राद्यसेवितः", इत्यादिश्च तथापि चेष्टावत्त्वमिन्द्रियवत्त्वञ्च नोद्भिदां स्फुटतरमतो न शरीरव्यवहारः उ०द०॥ वृक्षादीनामयोनिजशरीरसत्त्वे प्रमाणान्तरमस्ति "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः" मनुना कर्म्मविशेषैर्नराणां तद्भावप्राप्तिरुक्ता। "गुरुं तृणं च डङ्कृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कटग्रादिसेवित" इत्यादि वचनेन। अयोनिजशरीरोत्पत्तिकारणमाह। "अनियतदिग्देशपूर्व्वकत्वात्" वै० सू०। "धर्म्मविशेषाच्च" "समाख्याभावाच्च" "अनियतदिग्देशाः परमाणवोधर्म्मविशेषजनितकर्म्माणस्तत्पूर्व्वकत्वात् अयोनिजशरीराणाम् ननु परमाणूनां कर्म्म विना कथं द्रव्यासमवायिकारणं संयोगमन्तरेण द्रव्योत्पत्तिरत आह। अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म्म तेन च कर्म्मणा सम्भूय परमाणवो द्व्यणुकादिक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्ते इत्यर्थः, उपलक्षणञ्चैतत् अधर्म्मविशेषाच्च क्षुद्रजन्तूनामूष्मजानां यातनामयानि शरीराण्युत्पद्यन्ते इत्यपि द्रष्टव्यम् देवर्षीणामयोनिजे शरीरे प्रमाणान्तरमाह। समाख्या अन्वर्था संज्ञा श्रुतिस्मृतीतिहासपुराणादिषु संज्ञायाश्चादित्वात् प्रसिद्धा तथाहि दुर्व्वासःप्रभृतयो मानसाः "अङ्गुष्ठाद्भ्यः समभवद्ब्रह्मा" इत्यादिका, तथाऽपि श्रूयते सन्त्ययोनिजानि शरीराणि देवर्षीणामिति प्रमाणान्तरमाह। सर्गादौ या ब्रह्मादिसंज्ञा आदिभूता प्राथमिकी तया श्रूयते अस्ययोनिजं शरीरमिति नहि तदा ब्रह्मणो मातापितरौ स्तः याभ्यां ब्रह्मादिसंज्ञा कृता स्यादिति भावः उपसंहरति। "सन्त्ययोनिजाः" "वेदलिङ्गाच्च वै०सू०" शरीरविशेषा इति शेषः उपसंहृतेऽतिदार्ष्टार्थं प्रमाणान्तरमाह। वेदो मन्त्रः स च लिङ्गयते ज्ञाप्यतेऽनेनेति वेदलिङ्गं ब्राह्मणम्, ततोऽप्ययोनिजं शरीरं प्रतिपद्यते इत्यर्थः। तथाहि ब्राह्मणम् "प्रजापतिः प्रजा अनेका असृजत् स तपोऽतप्यत प्रजाः सृजेयमिति स मुखतो ब्राह्मणमसृजत बाहुभ्यां राजन्यमूरुभ्यां वैश्यम् पद्भ्यां शूद्रम्" इति, वेदोऽपि "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादिः, एवं योनिजमयोनिजञ्च पार्थिवशरीरमुक्तम्, आप्यं तैजसं वायवीयञ्चायोनिजमेव "ब्रह्मणो मानसा मन्वादय" इति उप० वृत्तिः। "किन्तु देहमयोनिजमिति" भाषा० वार्त्तिकाभरणे च विभिन्नमुक्तं यथा "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति" छा०उ० "तेषां जीवापिधानां खल्वेषु पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशान्नतु तेजःप्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वादसति त्रिवृत्करणे प्रत्यक्षनिर्देशानुपपत्तिः। देवताशब्दप्रयोगाच्च तेजःप्रभृतिषु इमास्तिस्रोदेवता इति। तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति। कानि तानीत्युच्यन्ते। आण्डजमण्डाज्जातं अण्डजमेवाण्डजं पक्ष्यादि। पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते। ते च पक्षिणां बीजम्। सर्पः सर्पाणां बीजम्। तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः भा०। २अयोनिजदेहवति नरादौ च त्रि० "राघवाय तनयामयोनिजाम्" रघुः २विष्णौ पु०। "वाचस्पतिरयोनिज" इति वि० सह०।

अयोमय त्रि० विकारे मयट् स्त्रियां ङीप्। लौहविकारे अस्त्रशस्त्रादौ। "निःक्षेपोऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः" गुरुतल्पाभिभाष्यैनस्तप्ते स्वप्यादयोमये" इति च मनुः।

अयोमल न० अयसो मलमिव। (लौहगु) इतिख्याते लौहमले तत्किट्टे "शताद्द्वयुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्" अधमं षष्टिवर्षीयं ततो क्षीनं विषोपमम् यल्लौहं यद्गुणं प्रोक्तं तत्किट्टं चापि तद्गुणमिति" राजनि०।

अयोमुख न०अयोविकाररूपं मुखं यस्य। १लाङ्गलादौ "भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम्" २अयलौहयुक्ते त्रि० भेत्स्यत्यजः "कुम्भमयोमुखेन" रघुः। अय इव कठिनं मुखं यस्य। ३लौहतुल्यकठिनमुखे विहगादौ "अयोमुखाः सूचीमुखाः अयोविकृतिमुखाः पिशाची क्रव्यादो वातरंहसः अथ० ११,१०,३। "श्वानो भीषणकाया अयोमुखानि वयांसि जले गृध्रपक्षिणाञ्च सङ्घाः भा० शा० प०। ४असुरभेदे पु०। "शङ्कुकर्णो विराधश्च गवेष्टी दुन्दुभिस्तथा अयोमुखः शम्बरश्च कपिलोवामनस्तथा हरिवं०। अयःसुवर्णं मुखमाद्यं यस्य। सुवर्णादिधातौ "अयोमुखैश्च विपुलः पर्व्वतो धातुभिर्युतः इति हरिवं० तत्र भवः शुभ्रादि० छ। अयोमुखीयः तद्भवे त्रि०।

अयोरस पु० द्वैत०। लौहमले। ताप्यमानाल्लोहात् यत् पृथग् भवति तस्मिन् "सर्व्वायोरसाभ्रचूर्णैः रुद्राः संरुध्ये कात्या० १५,५,९, "अयोरसः लोहसिङ्घानः

किट्ट इति यः प्रसिद्धः कर्कः "अथैतत्त्रयं पिष्टं भवति शर्कराश्लक्ष्णायोरसस्तेन संहृजति" श० ब्रा० ।

अयोहृदय त्रि० अय इव कठिनं हृदयमस्य । कठिनचित्ते दयाशून्यचित्ते । "सुहृदयोहृदयः प्रतिगर्जताम् रघुः ।

अयस्मन् त्रि० अय–मनिन् । १गन्तरि २गमनसाधने च "समानमयस्मन् पर्य्येति जाग्विः" ता० ब्रा० "अयस्मन् अयसनि गमनसाधने रथे उपविष्टः" भा० ।

अर पु० इयर्त्ति गच्छत्यनेन ऋ–अच् । १चक्रस्य २नाभिनेम्योर्मध्यस्थे काष्ठे ३शीघ्रे च ४शीघ्रतादिगुणवति त्रि० । "गण्डोज्ज्वलासुज्ज्वालनाभिचक्र्या विराजमानां नवयोदरश्रियां" माघः उदरा उन्नता अराश्चक्रशलाका इति मल्लि० "विभुरराज नेमिः परिभूरजायथाः ऋ०१ १४,६ "अरा इव रथनाभाविति" श्रुतिः "सम्यञ्चोऽग्निं स पर्यतारा नाभिमिवाभितः" अथ० ३,२०,६, "अरा इवाग्ने नेमिरिति" शत०ब्रा० । एवमस्य पुंस्त्वेव प्रयोगात् "रोपधः" ६।७ पृष्ठे दर्शितात् पा० स्तनाच्च पुंस्त्वे स्थिते मेदिनीकरोक्तं क्लीवत्वं शीघ्रतायामेवान्वितं न तु चक्राङ्गेऽपि । "यदपि च तच्चक्रं द्वादशारं यद्वै कुमाराः परिवर्त्तयन्ति तेऽपि षड्ऋतवः संवत्सरश्चक्रम्" भा०आ०प० । द्वादश मासा अराइव यस्य तदर्थः । "पञ्चारे चक्रे परिवर्त्तमाने तस्मिन्नातस्थुर्भुवनानि च विश्वा" ऋ० १,१६४,१३ पञ्चारे पञ्चर्त्तुरूपैररैर्युक्ते हेमन्तशिशिरयोरेकत्वाभिप्रायेण पञ्चर्त्तुता" भा० ४ कोषे "त्रिपञ्चारे पीठे ध्रुवशिवकृद्दीति" श्यामास्तवः । संज्ञायां कन् । ५शैवाले "प्रापडीति" ख्याते दैपर्पटे च पु० ।

अरक्षस् त्रि० नास्ति रक्षो रक्षस्तुल्यं बाधकं यस्य । "बाधकरहिते । "जिघर्म्यरक्षसा मनसा च तज्जुषेत" ऋ०२,१०,५ । "अरक्षसा बाधकरहितेन मनसा" भा० ।

अरक्षित त्रि० न रक्षितः । रक्षितभिन्ने । "पादं खामिन्यरक्षिते" स्मृतिः ।

अरगध पु०पृ० हृक्षः । आरग्वधवृक्षे (शुँधाली) ।

अरघट्ट पु० अरं शीघ्रं घट्ट्यते चाल्यतेऽसौ । १महाकूपे, २कूपोपरिनिबद्धजलोत्तोलनकाष्ठे च । "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्पस्तेनानीतः" । "तदाकर्ण्य तु अरघट्टघाटिकामार्गमहमाश्रित्येति" च पञ्चत० स्वार्थे कन् । तत्रैव ।

अरङ्कृत् त्रि० अलं करोति अलम्+कृ–क्विप् तस्य रः । १अलङ्कारिणि "त्वमग्ने ! द्रविणोदा अरङ्कृते" ऋ० २,१,६,० "अरङ्कृते अलङ्कुर्वते" भा० कृविघ्नन्तो अरङ्कृतः ऋ०१,१४,५, भा० अलङ्कृतःअलङ्कुर्वतः "कपिलकादीनां संज्ञाछन्दसोः"तस्य रः भा०। २पर्य्याप्तकारिणि च "उरुधारामरङ्कृतम् ऋ० ८,१,१०, "अरङ्कृतं पर्य्याप्तकारिणमिन्द्रम्" भा० ।

अरङ्कृत त्रि० अलं क्रियते स्म अलम्+कृ+क्त तो रः । अलङ्कृते भूषिते "यमोह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः" ऋ०१०,१४,१२, अरङ्कृतः बहुभिर्व्यैरलङ्काररूपैर्युक्तः" भा० ।

अरङ्कृति स्त्री अलम्+कृ+क्तिन तस्य रः । अलङ्कारे भूषायाम् "का ते अस्त्यरङ्कृतिः स्तुहि" ऋ०७,२६,३ । "अरङ्कृतिरलङ्कृतिः" भा० ।

अरङ्गम पु० अलं पर्य्याप्तं गमोगतिः तस्य रः । पर्य्याप्त गमने "अरङ्गमाय जग्मयेऽपस्वाहृष्वने नरे" ऋ०६,४२,१, "अरङ्गमाय पर्य्याप्तगमनाय" भा० ।

अरजस् त्रि० रनञ् असुन् नलोपः न०व० । १रजोगुणकार्य्यकामक्रोधादिशून्ये । "अजरमरमरसमयमक्षतमरज" इति शत०ब्रा० वा कप् । अरजस्कोऽप्यत्र । २अनार्त्तवायां नग्निकायां स्त्री । भ्वशा० अभूततद्भावे क्यङ्" सलोपश्च, अरजायते ।

अरज्जु न० नास्ति रज्जुर्बन्धनसाधनं यत्र । ४बन्धनागारे रज्जुहीनत्वेऽपि बन्धनहेतुत्वात् तथात्वम् । "अरज्जौ दस्यूनृतसमनड्भीतये" ऋ०२,१२,६, "अरज्जौ बन्धनागारे" भा०२रज्जुरहिते रोगादौ च "सेतुभिः रज्जुभिः सिनीथः, ७,८१,२, रज्जुरहितैः रोगादिभिः भा० ।

अरट्टु(लु) पु० अरं शीघ्रमटति अट–अल वा उन् शक० । (शोना) वृक्षे इति ख्याते वृक्षादि० क । डलयोरैक्यात् अरडुकः तद्भवे त्रि० ।

अरट्ट पु० न रटति रट–वन् न०त० । पृथुश्रवोनृपतिमन्त्रिभेदे "अरट्टे अत्रे नहुषे सुक्रत्वनि" सुक्रत्तराय सुकृतः" ऋ० ६,४५,१७ अरट्टे अत्रे नहुषे सुकृत्वनि च एते तस्य राज्ञोऽध्यक्षाः" भा० ।

अरण त्रि० नास्ति रणं युद्धं यस्य । १युद्धशून्ये "अरणं मरणं समयात् समयात्" भट्टिः नास्ति रणः शब्दो येन । वाक्सङ्गरहिते २रिपौ "ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय स्वाय चारणाय" यजु० १६,२, "अरणाय पराय वाक्सङ्गरहिताय शत्रवे" वेददी० । ३अरमणे पृ०साधुः । "योनः स्वो अरणो यश्च निष्ट्यो जिघांसति" ऋ०६,

७८,१६ "अरणोऽरमसाणः" इति भा० । ४दुःखिते "मा भूम निष्ठा इवेन्द्र ! अरणा इव" ऋ०८,१,१३, "अरणा अरमसाणाः दुःखिनः" भा० ।

अरणि पु० ऋ-अनि । १स्थूर्ये 'गणियारीति' ख्याते २वृक्षे । ऋच्छति प्राप्नोत्यग्निम् । ३अग्निमन्थनकाष्ठे द्वि० । स्त्रियां ङीप् । "जाते पुत्रेऽरणिं मथित्वेति" स्मृतिः "आत्मानमरणिं कृत्वा" पुरा० "अग्न्युद्गारशब्दे ६२पृष्ठे विवरणम् "अरणीसहितं मन्थं ब्राह्मणस्य तपस्विनः । मृगस्य घर्षमाणस्य विषाणे समजज्जत" भा०व०५० । "ततः पुनर्मथित्वानः पाणिं वेनस्य दक्षिणम् । अरणीमिव संरब्धा ममन्थुर्जातमन्यव" इति हरिवं० "पराशरकुलोद्भूतः शुकोनाम महातपाः । भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः । व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन्" हरिव० । अरणीमधिकृत्य कृतोऽन्यः ठक् । आरण्येयम् भारतवनपर्व्वान्तर्गते अरणीहरणाधिकारेण व्यासकृतेऽवान्तरपर्वभेदे ।

अरणिक पु० अरण्ये अग्निमन्थनकाष्ठाय साधु ठन् । अग्निमन्थनकाष्ठसाधने अग्निमन्थनवृक्षे ।

अरणीकेतु पु० अरणी केतुरस्य । अग्निमन्थनवृक्षे राजनि० ।

अरणीसुत पु० ३त० । शुकदेवे "स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः" । अरणीसहिते वृक्षे ममन्थाग्निचिकीर्षया । अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा । घृताचीन्नामाप्सरसमपश्यद्भगवान्मुनिः । ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः । अभवद्भगवान् व्यासो वने तस्मिन् युधिष्ठिर ! । सा च दृष्ट्वा तदा व्यासं कामसंविग्नमानसम् । शुकीभूत्वा महाराज ! घृताची समुपागमत् । स तामप्सरसं दृष्ट्वा रूपेणाप्रतिमेन भुवि । शरीरजेनाभिगतः सर्व्वगात्रातिगेन ह । स तु धैर्य्येण महता निगृह्णन् हृच्छयं मुनिः । न शशाक नियन्तुन्तत् व्यासः प्रविसृतं मनः । भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः । यतात्मियच्छतस्तस्य मुनेरग्निचिकीर्षया । अरण्यामेव सहसा तस्य शुक्रमवापतत् । सोऽविषण्णेन मनसा तथैव द्विजसत्तमः । अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृपः । शुक्रे निर्म्मथ्यमाने स शुको जज्ञे महातपाः । परमर्षिर्महायोगी अरणीगर्भसम्भवः । यथाऽध्वरे समिद्धोऽग्निर्भाति हव्यसुदावहन् । तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा" भा०शा०५० ।

अरण्य पु०न०, अर्य्यते गम्ये, वयस्यल ऋ-अन्य । १वने, अर्ङ्गर्यादि । "माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्" चाणक्यः । "सावित्रीमप्यधीयीत गुत्वारण्यं समाहितः । गृहे गुरौ वारण्ये वा निवसन्नात्मवान् द्विजः" मनुः । "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्" मनुना अन्त्ये वयस्येव अरण्यवासविधानात्तस्य तथात्वम् । स्वार्थे कन् तत्रैव । "य एनमेव विन्दन्ति ये चारण्यकमाश्रिताः" या०स्मृ० । २कट्फलवृक्षे पु० । उत्करादि०चतुरर्थ्यां छ । आरण्यीयः अरण्यसन्निकृष्टदेशादौ त्रि० । अरण्येऽध्येयः वुञ् । आरण्यकं वनपाठे अनुवाकभेदे "आरण्यकमधीत्य च" मनुः । अरण्यमधिकृत्य कृतः अन्यः आरण्यम् रामायणान्तर्गतारण्यकाण्डे ।

अरण्यकदली स्त्री अरण्यस्यैव कदली । गिरिकदल्यां तस्या ग्रामादावनुत्पत्तेस्तथात्वम् । [अन्यभेदे ।

अरण्यकाण्ड न० रामायणान्तर्गते रामस्य वनगमनवर्णनात्मके

अरण्यकार्पासी स्त्री अरण्ये कार्पासी । (वनकापास) इति ख्यातायां वनकार्पास्याम् ।

अरण्यकुलत्थिका स्त्री अरण्यस्य कुलत्थिका । (वनकुलथीति) ख्यातायाम् वनकुलत्थिकायाम् ।

अरण्यकुसुम्भ पु० ६त० । वनकुसुम्भे ।

अरण्यगज पु० अरण्यस्थो गजः । दुर्ह्यन्तगजे ।

अरण्यगान न० अरण्ये गीयते कर्म्मणि ल्युट् । सामवेदान्तर्गते अरण्ये गेये गानभेदे । [भेदे राजनि० ।

अरण्यघोली स्त्री अरण्यजा घोली । वनघोल्यां पत्रशाक-

अरण्यचटक पु० ६त० । वनचटके ।

अरण्यचन्द्रिका अरण्ये चन्द्रिकेव निष्फला द्रष्टृरभावात् । निष्फलभूषणे । लोके हि चन्द्रिका उन्मीलितनेत्रपङ्क्तिभिरालोक्यते अरण्ये तु लोकाभावेन दर्शकाभावात् दर्शनेन प्रीतिजनिका न भवतीति तस्याः यथा निष्फला शोभा एवमन्यस्यापि तथा, अतएव "स्त्रीणां प्रियालोकफलो हि वेशः" इति कुमा० व्याख्यायां मल्लिनाथेन "अन्यथा अरण्यचन्द्रिका स्यादित्युक्तम्" ।

अरण्य(ण्ये)चर त्रि० अरण्ये चरति चर-ट ७त० वा अलुक्स० । वनचरे व्याधादौ ।

अरण्यज त्रि० अरण्ये जायते जन-ड उप०स० । वनजाते ।

अरण्यजादैक न० अरण्ये जायते जन-ड कर्म्म० । (वन आदा) इति ख्याते वनार्द्रके ।

अरण्यजीर पु० । ६त० । वनजीरके ।

अरण्यजीव त्रि० अरण्येन तद्भवफलादिना जीवति जीव-क । वनस्थफलादिना जीविकावति वानप्रस्थादौ ।

अरण्यधर्म्म पु० अरण्ये आचरणीयो धर्मः । वानप्रस्थधर्म्मे । स च धर्मः "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् । सन्त्यज्य ग्राम्यमाहारं सर्व्वञ्चैव परिच्छदम् । पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा । अग्निहोत्रं समादाय गृह्याञ्चाग्निपरिच्छदम् । ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः । सुन्यङ्गैर्व्विविधैर्म्मेध्यैः शाकमूलफलेन वा । एतानेव महा यज्ञान्निर्व्वपेद्विधिपूर्व्वकम् । वसीत चर्म्म चीरं वा सायं स्नायात् प्रगे तथा । जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च । यज्ञ्यं स्यात्ततो दद्याद्बलिं भिक्षाञ्च शक्तितः । अमूलफलभिक्षाभिरर्च्चयेदाश्रमागतान् । स्वाध्याये नित्ययुक्तः स्याद्दान्तोमैत्रः समाहितः । दाता नित्यमनादाता सर्व्वभूतानुकम्पकः । वैतानिकञ्च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कन्दयन् पर्व्व पौर्णमासञ्च योगतः । ऋक्षेष्ट्याग्रयणञ्चैव चातुर्म्मास्यानि चाहरेत् । उत्तरायणञ्च क्रमशो दक्षिणायनमेव च । वासन्तशारदैर्म्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैव विधिवन्निर्व्वपेत् पृथक् । देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः । शेषमात्मनि युञ्जीत लवणञ्च स्वयंकृतम् । स्थलजोदकशाकानि पुष्पमूलफलानि च । मेध्यवृक्षोद्भवान्यद्यात् स्नेहांश्च फलसम्भवान् । वर्जयेन्मधुमांसञ्च भौमानि कवकानि च । भूस्तृणं शिग्रुकञ्चैव श्लेष्मान्तकफलानि च । त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्व्वसञ्चितम् । जीर्णानि चैव वासांसि शाकमूलफलानि च । न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् । न ग्रामजान्यार्त्तोऽपि मूलानि च फलानि च । अग्निपक्वाशनोवा स्यात् कालपक्वभुगेव वा । अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोपि वा । सद्यःप्रक्षालको वा स्यान्मासषष्ठ्यन्तिकोऽपि वा । षण्मासनिचयोवा स्यात् समानिचय एव वा । नक्तभोजी समश्नीयाद्दिवा वाहृत्य शक्तितः । चतुर्थकालिकोवा स्यात् स्याद्वाप्यष्टमकालिकः । चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् । पक्वान्नयोर्वाप्यश्नीयाद्यवागूं कथितां सकृत् । पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा । कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः । भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत् सवने स्नपयंश्च पः । ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः । उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत् । तपस्वरंश्चोपतरं शोषयेद्देहमात्मनः । अग्नीनात्मनि वैतानान् समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः । अप्रयतः सुखार्थेषु ब्रह्मचारी धराशयः । शरण्येष्वसमश्चैव वृक्षमूलनिकेतनः । तापसेष्वेव विप्रेषु यात्रिकं भैक्ष्यमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु । ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा । एतांश्चान्यांश्च सेवेत दीक्षा विप्रो वने वसन् । विविधा श्रौपनिषदीरात्मसंसिद्धये श्रुतीः । ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः । विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये । अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः । आनिपाताच्छरीरस्य युक्तो वाय्यं निशाशनः । आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनूम् । वीतशोकभयो विप्रो ब्रह्मलोके महीयते" मनुः ६अ० ।

अरण्यधान्य न० ६त० । नीवारादौ वनधान्ये ।

अरण्य(ण्यानाम्) पति पु० अरण्यानां तत्स्थानां चौराणां पतिः वा अलुक् समा० । चौराधिष्ठातरि रुद्रे "नमोनमोनिचेरवे परिचरायारण्यानां पतये नमः" यजु० १६,२०, "रुद्रो हि लीलया चौरादिरूपं धत्ते यद्वा रुद्रस्य जगदात्मकत्वाच्चौरादयो रुद्रा एव ध्येयाः यद्वा स्तेनादिशरीरे जीवेश्वररूपेण रुद्रोद्विधा तिष्ठति तत्र जीवरूपं स्तेनादिशब्दवाच्यम् तदीश्वररुद्ररूपं लक्षयति यथा शाखायं चन्द्रम्" वे० दी० । तस्य सर्वनियन्तृत्वेन चौराणामपि पतित्वं युक्तमेव "एष एव साधु कर्म्म कारयति तं यमुन्निनीषते एष एवासाधु कर्म्म कारयति तं यमधोनिनीषते" इति श्रुत्या तस्य साध्वसाधुकर्म्मनियन्तृत्वस्योक्तेः पूर्व्वकृतकर्म्मापेक्षत्वेन च न वैषम्यनैर्घृण्ये इत्याकरे व्यक्तम् । २अरण्यचरव्याधपतौ च ।

अरण्यभव त्रि० अरण्ये भवति भू-अच् । वनभवे ।

अरण्यमक्षिका स्त्री ६त० । (डाश) इदि ख्याते दंशे ।

अरण्यमार्ज्जार पु० अरण्ये मार्ज्जारः । वनविड़ाले ।

अरण्यमुद्ग पु० ६त० । वनमुद्गे ।

अरण्ययान न० अरण्ये यानम् । अयोग्यकाले वनगमने "अरण्ययाने सुकरे पिता मम्" इति भट्टिः ।

अरण्यरक्षक पु० अरण्ये रक्षकः । वनरक्षके वनेषु लोकरक्षार्थं राज्ञा नियुक्तसैन्यभेदे ।

अरण्यराशि अरण्यसंज्ञको राशिः। "मकरादिमार्द्रसिंहौ वन्यौ दिवसेऽजवृषभौ चेति" ज्योतिषोक्ते सिंहादिराशौ।

अरण्य(ण्ये)रुदित न० अरण्ये रुदितं रोदनम् सप्तम्या वा अलुक्। शान्त्युपायकारकश्रोत्रशून्ये निष्फले १ रोदने २ तत्तुल्ये निष्फले वस्तुमात्रे च। लोके हि रोदने तद्रोदनशान्त्युपायोद्यालुभिः क्रियते अरण्ये रोदने तु न कश्चित् तस्य शमयितेति तस्य निष्फलत्वम्।

अरण्यवायस पु० ६त०। (दाँड़काक) इतिख्याते द्रोणकाके।

अरण्यवास पु० अरण्ये वासः। वनवासे।

अरण्यवासिन् त्रि० अरण्ये वसति वस–णिनि। वनवासिनि १सन्यादौ "एते हिमगिरेरुपत्यकारण्यवासिन" इति शकु०। स्त्रियां ङीप्। सा च २ अत्यल्पसर्वोत्तितायां राजनि०। [वास्तूके।

अरण्यवास्तूक पु० ६त०। (वनबेतो) इति ख्याते वन-

अरण्यशालि पु० अरण्यभवः शालिः। वनभवे नीवारादौ।

अरण्यशूकर पु० अरण्यस्य शूकरः। वनवराहे। [शूरण।

अरण्यशूरण पु० शा०त०। वनभवे (ओल) इति ख्याते

अरण्यश्वन् पु० अरण्ये श्व इव हिंस्रः। दके।

अरण्यषष्ठी स्त्री अरण्याय गन्तुं षष्ठी। ज्यैष्ठशुक्लषष्ठ्याम्। "ज्यैष्ठे मासि सिते पक्षे षष्ठी यारण्यसंज्ञिता। व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः" इतिः राजमा०।

अरण्याध्यक्ष पु० अरण्यरक्षणादौ अध्यक्षः। वनेषु लोकरक्षणार्थं राजनियुक्ते सैन्यपतिभेदे।

अरण्यानी स्त्री महदरण्यं नि०ङीप् आनुक् च। महारण्ये। "यथारण्यान्यासुत्साश्वरत" शत०ब्रा०।

अरण्यायन न०, अरण्येऽयनं वानप्रस्थधर्म्मस्तदिवाचरणमस्य अच्। "यद् अरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तदिति" श्रुत्युक्ते ब्रह्मचर्य्ये। "तदस्य एवार्षेयविवित्यादिना तत्रैव व्युत्पत्तिर्दर्शिता।

अरण्येतिलक पु० सप्तम्या अलुक्। वनतिलभेदे।

अरण्येऽनूच त्रि० अरण्ये अनूचः नियतपाठोमन्त्रो यस्य अलुक् समा० १ अरण्यमात्रपाठ्यमन्त्रेण संस्कृते पुराडाशादौ "पञ्चादरण्येऽनूच्यम्" १८,४,२०। "अरण्येऽनूच्या वक्तव्याः पठनीया मन्त्रा यस्यासौ अरण्येऽनूच" इति कर्क०। ७त०अलुक्स०। २अरण्येऽनूचे (पाठ्ये) मन्त्रभेदे पु०। स च "उच्चस्व भीमसेत्यादिमन्त्रः सहि [illegible] नियतमरण्ये पठ्यते" इति कर्क०। "वागेवारण्येऽनूच्या-[illegible]नूच्यो भवति" ता०ब्रा०। "अरण्येऽनूच्यः कश्चिदनुवाकः तेन हूयमानोऽपि पुरोडाशोऽरण्येऽनूच्यो भवति" भा०। अयमेव पक्षः श्रेयान् कर्कमते बहुव्रीह्या अरण्ये सप्तम्या लुक् न स्यात् अलुक्समासस्य तत्पुरुषे कविषयत्वात् अत उपचारात् तत्सम्बन्धवाचकत्वं युक्तम् "सोऽसौसोऽवाङ् प्राण एतस्य प्रजापतेः सोऽरण्येनूच्यो भवति" शत०ब्रा०।

अरण्यौकस् पु०अरण्ये विधानेनओकोयस्य। १सन्यादौ २वानप्रस्थे "वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः" शक०

अरत त्रि० न रतः। १ अननुरक्ते २विरते च। [त्रि०।

अरतचप पु० अरता विरता तत्पा यस्य। १ कुक्कुरे २लज्जाहीने

अरति पु० ऋ–अति। १क्रोधे। रम–क्तिन् न०त०। २अनवस्थितचित्ततायाम्, ३रागाभावे, "सुखं कषायमरतिर्गौरवं करणवत्त्वयोः" सुश्रुतः। ४ रतिविरहे, ५उद्वेगे, "स्वाभीष्टवस्तुलाभेन चेतसो याऽनवस्थितिः अरतिःसा" इत्येवंरूपे ६ इष्टवियोगाज्जनसोव्याकुलीभावे ७ असन्तोषे "भृशमरतिं हि सहियोगः" इति। किरा० स्मरक्लेते ८ नायकदशाभेदे च स्त्री। "इङ्गमनः सङ्गसङ्कल्पाजागरः क्षयताऽरतिः। ह्रीत्यासोन्मादमूर्च्छाः स्वाः इत्यनङ्गदशा दश" मल्लि०। सा च विषयविद्वेषं करोति। न०ब०। ६रागहीने त्रि०।

अरत्नि पु० ऋ–कत्नि रत्निः बद्धमुष्टिकरः स नास्ति यत्र। १विस्तृतकनिष्ठे बद्धमुष्टिहस्ते, २कफोणिमारभ्य कनिष्ठाङ्गुलिपर्य्यन्तपरिमाणे। अतस्ततः प्रमाणे मात्रच्। तत्परिमिते त्रि०। "अरत्निमात्रान्तरिते देशे" भवदेवः। "तासुत्तरतोऽग्नेर्निदधात्यरत्निमात्रे" गृह्यसू०। "अरत्निमात्रं क्षुपकाः पत्रैर्द्वाङ्गुलसम्मितैः" सुश्रु०। ३ कफोणौ (कुनो) बाहोरवयवे। "भीमो धनुष्मानुपजान्वरत्निः" भट्टिः। "जवनेनाहवनीयमरत्नी संधत्त" शत०ब्रा०। ४ बाहौ बाहुर्वा अरत्निः बाहुना वीर्य्यं क्रियते" शत०ब्रा०। वा कप्। अरत्निकोऽप्युक्तार्थे।

अरथि पु० ऋच्छति रथिना सह युद्धभूमिम् ऋ–रथिन् सारथिः न०त०। सारथिभिन्ने। "अस्खलन्वश्चिद्यमजत्यरथीः" ऋ० ६,६६,७, रथिः सारथिः न रथिअरथिः" का०दीर्घः भा०। [२ भग्नदन्ते दन्ते च

अरद पु० न जातोरदोयस्य। अजातदन्तावस्थे बाले

अरध्र त्रि० राध–हिंसने, कर्म्मणि रन् हस्वश्च न०त०। शत्रु- "भिरहिंसे उग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतरोबभूव" ऋ० ६,१८,४, राध–सिद्धौ रन् हस्वः भा०।

२सम्बन्धे च "ता ह त्यद्दर्त्तियदरध्रसुषे त्या" ऋ०६,६२, ३, अरध्रम् सम्बन्धम् भा० ।

अरन्तुक न० कुरुक्षेत्रान्तर्गतसमन्तपञ्चकसीमाभूते स्थानभेदे । "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च सचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकम्" इति भा०व०प० ।

अरन्धन न० अभावे न०त० । पाकाभावे स च सिंहसंक्रान्तौ कन्यासंक्रान्तौ च विधेयः "कर्कान्नमद्यात् सिंहार्के सिंहान्नं सिंहकन्ययोः" । इत्याचारमार्त्तण्डोक्तेः तस्मिन् पर्य्युषिताऽन्नभोजनविधानेन पाकाभावो गम्यते ।

अरन्ध्र त्रि० नास्ति रन्ध्रं छिद्रं यस्य । निर्विड़े छिद्ररहिते

अरपस् त्रि० नास्ति रपोदुरितं यस्य । पापशून्ये "शंयोररपोदधातन" ऋ०१०,१५,४, "तदस्मे शंयोररपोदधातन" ऋ० १०,३७,११ ।

अरम् अव्य० अल–अम् वा लस्य रत्वम् । १ वक्ष्यमाणेऽलमर्थे २ शीघ्रतायाञ्च । अरङ्कृतशब्दे अरङ्कृतिशब्दे च उदा० । ३ अत्यर्थे च । "तस्मा अरं गमावः" य०११,५२ अरमिषे स्तवामहे मीलुषेऽरंगमाय जग्मये" ऋ०८,४६,१७ ।

अरम त्रि० न रम्यतेऽत्र आधारे घञ् । अधमे ।

अरमति स्त्री अरात्यर्था पर्य्याप्ता वा मतिः । १पर्य्याप्तबुद्धौ २दोषौ च । "स्यादस्मे अरमतिर्वसूयुः ऋ०७,३४,२१ । "उप स्वैनमरमतिर्वसूयुः" छा०उ० ।

अरर त्रि० ऋ-अरन् । १ कवाटे । "अरमसमररात्रि द्रागपाटत्य" वीर० च० । २आपिधाने ३ वंशकीर्णे विश्वः ४ ऋषिभेदे पु० । गर्गा० यञ् । आरर्य्यस्तदपत्ये पुंस्त्री०

अररि पु०न० ऋच्छति ऋ+विट्अरमियर्त्तिऋ–इन् । कपाटे

अरारिन्द न० रा-कि द्वित्वं रारिर्दाता नास्त्यन्योरारिरस्य पिपासोपशमस्य अरारिं पिपासोपशमं ददाति दा-ख सुम् । जले निरु० । "अधारयदरारिन्दानि सुक्रतुः" ऋ०१।२६।१० । भाष्ये प्रागुक्ता अन्या च व्युत्पत्तिर्दर्शिता । 'यद्वा–अरारित्सतेत्व गमनं औणादिकोऽरिप्रत्ययः । आतोऽनुपसर्गे कः पृषोदरादित्वादभिमतरूपसिद्धिः । तद्ददतीत्यरारिन्दान्युदकानि चेष्टाप्रदानीत्यर्थः । 'आपोमयाः प्राणा' इति श्रुतेः । यद्वा रारिर्दानं न विद्यते तादृशं दानमितरस्मृतेषु तदरारि अन्यैरदेयं सो कोपकारि भोगं ददतीत्यर्थः" इति ।

अरारिवस् त्रि० रा–क्वसुः रारिवान् न०त० । अदातरि । "योनो अग्ने अरारिवाँ अघायुररातीः" ऋ०१,१४७,४ ।

अरारु पु० ऋ–अरु । १यत्नौ सि०कौ० । २आयुधे उज्ज्वलद० ३ गमनस्वभावे त्रि० अरारुं, भूर मर्त्यं परिदधाति मर्त्यं ऋ० १,१२६,३, 'अरारुं गमनस्वभावम्' भा० ।

अरारुस् पु० ऋ–अरुस् । अर्त्तेरारुः इति" स्वल्पं ज्ञानमिति माधवः । उपद्रवकर्त्तुमागते शत्रौ "मा नः शंसो अरारुषो धूर्त्तिः' ऋ०१,१८,३, । "अरारुषः उपद्रवं कर्त्तुमस्मत्समीपे प्राप्तस्य शत्रुरूपस्य मनुष्यस्य" भा० ।

अरारे अव्य० अरं शीघ्रं राति रा–के । शीघ्रं प्रत्युत्तर लाभेच्छया कृते अतिव्यग्रतया संबोधने । तच्च नीचं प्रत्येव

अरालु पु० अरं लाति ला–कु–ऋ अर कापिलका० रस्य लः वा । (शोना) श्योनाकवृक्षे । "अरालुवल्कप्रियङ्गू च मधूकं दाड़िमाङ्कुरान् । अवाप्य पिष्ट्वा दधनि यवागूं साधयेद्द्रवम्" सुश्रु० । स्वार्थे कन् "तत्रैव । कपोतवङ्कारलुको वरुणः पारिभद्रक" इति सुश्रु० ।

अरव पु० अभावे न०त० । १रवाभावे प्रतिषेधार्थक शब्दाभावे न०ब० । २तच्छून्ये त्रि० ।

अरविन्द न० अरान् चक्राङ्गानीव पत्राण्यपि विन्दते विद्–अ । पद्मे "सरसीषूरविन्दानां वीचिविच्छोभशीतलम् रघुः" "रविन्दधानेऽप्यरविन्दधाने" माघः "रागेण श्रियमरविन्दतः करात्रैः" माघः २सारसपक्षिणि ३ नीलोत्पले, ४ रक्तकमले ५ ताम्रे च । [नाभे विष्णौ ।

अरविन्दनाभ पु० अरविन्दं नाभौ यस्य अच् समा० । पद्म-

अरविन्दाक्ष त्रि० अरविन्दमिव मनोहरमक्षि यस्य अच् समा० स्त्रियां ङीष् । १ पद्मसदृशनेत्रे २ पुण्डरीकाक्षे विष्णौ पु० । "पद्मानाभोऽरविन्दाक्षः" विष्णुसह० ।

अरविन्दिनी स्त्री अरविन्दस्य सन्निकृष्टदेशादि इनि ङीप् । १पद्मयुक्ते देशे २पद्मलतायाञ्च । तेषां संघः इनि । ३ पद्मसमूहे ।

अरश्मन् त्रि० नास्ति रश्मिररस्य वेदे बा० अनिच्समा० । प्रग्रहरज्जुरहिते रथादौ "अरश्मानो येऽरथा अयुक्ताः" ऋ० ६,६,७,२,० । "अरश्मानो रज्जुरहिताः" भा० ।

अरस पु० अभावे न०त० । १ आस्वादाभावे । रस्यते आस्वाद्यते कर्म्मणि अच् । आस्वाद्यं मधुरादि न०त० । २ मधुरादिरसभिन्ने ३ अप्रकृष्टरसे । न०ब० । ४ रसशून्ये त्रि० "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्" श्रुतिः ५ असारे त्रि० । 'इक्षिक्षारसं विषमरसं इक्षिक! ते विषम्" ऋ० १,१६१,१६, "अरसमसारमिति भा०" । रसं वेत्ति अच् न०त० । रसज्ञभिन्ने । "किमस्यानाम स्वादरसमुरुमानादरभरैः" नैष० ।

अरसिक त्रि० रसं वेत्ति रस+ठन् न०त०। रसानभिज्ञे "अरसिकेषु रहस्य निवेदनं शिरसि मा लिख" इत्युद्भटः।

अराग पु० अभावे न०। १ अनुरागाभावे रङ्गनाभावे च न०ब०। २रागशून्ये त्रि०। "तमहमरागमतृष्णम्" वेणी०

अरागिन् त्रि० न रागी न०त०। विरक्ते स्त्रियां ङीप्।

अराजक त्रि० नास्ति राजा यत्र कप्। राजशून्ये देशादौ 'अराजको हि लोकोऽयम्' सर्व्वतो विद्रुते भयात्" मनुः। [दराजन्यप्रसूतितः" मनुः।

अराजन्य पु० न०त०। क्षत्रियभिन्ने "राज्ञो न धनमन्विच्छे-

अराजिन् त्रि० राजा अधिष्ठातृत्वेनास्त्यस्य व्रीह्या० इनि न०त०। १ राजानधिष्ठिते "वि पर्व्वताः अराजिनः" ऋ० १,७,२३। अराजिनः राज्ञा केनचित्स्वामिना ऽनधिष्ठिताः" भा०। न राजते राज–इनि। २दीप्तिशून्ये त्रि० स्त्रियामुभयतो ङीप्।

अराजीव पु० अरम् चक्राङ्गं तत्साधनम् आजीवति आ+जीव अन् उप०स०। १रथकारे। राजीवं पद्मम् न०ब०। ३पद्मशून्ये जलादौ त्रि०।

अराति पु०न राति ददाति सुखं रा+क्तिच् न०त०। १शत्रौ। "देशः, सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० अरिशब्दे विवृतिः। ज्योतिषोक्ते २षष्ठस्थाने। "आरतिव्रणयोः षष्ठेऽष्टमे मृत्युरन्ध्रयोः" इत्युक्तेः षष्ठस्थाने अरिक्षतशुभाशुभचिन्तनीयत्वात्तथात्वम् कामादिष्वान्तररिपुषु ४षट्संख्यायां कामादीनामान्तररिपूणां संख्यासाम्यात्। ५अभिगमनशीले च "मा घान्यर्योवनुषामरातयः" ऋ०७,८३,५,। "विश्वा अग्नौ अरातीः ऋ० ८,७९,२, अरातीः अभिगमनशीलाः शत्रवोवा भा० भावे क्तिन् अभावे न०त०। ६ दानाभावे स्त्री "मा नो अरातिरीयत" ऋ० २,७,२। 'अरातिरदानम् शत्रुर्वा वेदे शत्रौ अरातिशब्दः स्त्री" भा०। अरातिरिवाचरति। आत्मनः अरमिच्छति क्यच् अरातीयति। शत्रुतुल्यमाचरति तदिच्छति वेत्यर्थे। "य उक्ष यजमने यारातीयति" शत० ब्रा०। योऽस्मभ्यमरातीयात्" यजु० ११, ८०। [अथ० १०,६,१।

अरातीयु त्रि० अरातिरिव आचरति अराति+क्यच्–उ। शत्रुतुल्याचारशीले "अरातीयोर्भ्रातव्यस्य दुर्हृदः"

अरातीवन् त्रि० अरातिमिच्छति वेदे मत्वर्थीयोवनिप् पूर्व्वपदस्य दीर्घश्च। शत्रुतुल्याचारवति। "अघायुररातीवा मर्च्चयति दुवेन" ऋ०२,१४७,३।

अराधस् त्रि० राधः धननाम निरु०। तन्नास्ति यस्य। धनरहिते 'कदामर्त्तमराधसम्' ऋ०१,८४,८, "अराधसम् राधसा धनेन रहितम्" भा० 'यदा ग्रणी रराधसो निबाधस' ऋ०८,६१,२ "अराधसं धनहीनम् यज्ञञ्च" भा०।

अराय त्रि० नास्ति राधनं यस्य वेदे षच् समा०। १धनशून्ये स्त्रियां ङीष्॥ "अपह्नज्य वा यातुधानानप सर्व्वा अरायः" अथ० ४,१८,८ रा+भावे घञ् रायोयज्ञादौदानम् न०ब०। २तच्छून्ये त्रि०। "नारायासो न ज्यवृवः" ऋ० ८।६१।११, "अरायाः अधनाः अहविष्का वा" भा० "अरायेभ्योजिघत्सुभ्य इमं मे परिरक्षत" अथ० ८,२,२०।

अराल पु० ऋ-विच् अरमालाति आ+ला–क। १ सर्ज्जरसे २ मत्तहस्तिनि। ३ कुटिले त्रि०। "तन्नामरालयमरालमरालकेशी" नैष० "भित्त्वा निराक्रामदरालकेश्याः" रघुः "नोवक्त्रमात्मीयमरालपक्ष्मणः" कुमा०। ४ वेश्यायां स्त्री

अरावन् त्रि० रा–वनिप् न०त०। अदातरि। "अरावा चन मर्त्यः' ऋ०८,८,४, 'याहि धूर्त्तेरराव्णः, ऋ०१,३६, १५ स्त्रियां ङीप् वनोरच्। अरावरी।

अरि पु० ऋ–इन्। १ शत्रौ २ रथाङ्गे, चक्रे, ३विट्खदिरे, ४कामक्रोधलोभमोहमदमात्सर्य्येषु षट्सु, तत्संख्यासाम्यात् ५षट्संख्यायां, ६ ज्योतिषप्रसिद्धे लग्नावधिके षष्ठस्थाने ७ ईश्वरे च। तत्र शत्रौ "दूरात्प्रशमितारिभिः' 'विजितारिपुरः पुरः" रघुः। "नारीणामनुकूलमाचरसि चेज्जानासि" का०प्र० "अरिकरिहरणार्थम्" लीला०। "नारिं न मित्रं यं विद्यात्तं श्राद्धेभोजयेत् द्विजम्" मनुः। चक्रे "गदारिखड्ग पद्मधृक्" विष्णुध्यानम्। कामादौ "कृतारिषड्वर्गजयेन" किरा०। ईश्वरे अरिधामश् शब्दे ऽ०विट्खरि अरिभेदः। 'सितासितौ चन्द्रमसो न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रवितस्सुमित्रा' इति ज्योतिषोक्तेषु रव्यादीनां दशुक्रमन्दादिषु। यथा रवेः शुक्रशनी, कुजस्य बुधः, बुधस्य शशी, गुरोः बुधशुक्रौ शुक्रस्य रविचन्द्रौ" शनेः रविचन्द्रभौमाः। "नीचस्थितेऽरिगेहगेऽथ पराजिते वा जीवे भगौ अनविधौ स्फुतिकर्महीनः" ज्योति०एते च नैसर्गिका अरयः तात्कालिकास्तु "चतुर्थदशविलग्नाद्विनाशस्थाः परस्परम्। तत्कालमित्राण्युच्चस्थः कश्चिदुक्तोऽन्यथा रिपुः" ज्योतिषोक्तेः तत्काले तत्तद्राशिस्थग्रहापेक्षया २,३,४,१०,११,१२ स्थानभिन्नेषु १,५,६, ७,८,९ स्थानेषु स्थिताः ग्रहाः तथाहि कर्मकाले ये ग्रहा यत्र राशौ तिष्ठन्ति तेषां यदपेक्षया १,५,६,७,८,९,स्थान

स्था यद्दास्ते तेषां तत्कालिकारयो भवन्ति तएव यद्दा यदि नैसर्गिकरिपवस्तदा अधिशत्रवः नैसर्गिकसमाश्चेत् रिपवः, इति भेदः । यथोक्तं हितसमरिपुसंज्ञा ये निसर्गे निरूक्ताः अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः । रिपुसमसुहृदाख्या ये निसर्गोपदिष्टा अधिरिपुरिपुमध्याः यतुभिश्चिन्तनीया' इतिराजमा० । निसर्गसमाश्च "बुधःकुजेज्यास्फुजिदर्कपुत्राः शुक्रार्कजौ, भौमसुरेज्यमन्दाः, । शनिः, कुजेज्यौ, सुरराजमन्त्री रव्यादितोऽमी समसंज्ञिताः स्युः" इत्युक्ताः यथा रवेः बुधः, चन्द्रस्य कुजगुरुशुक्रशनयः । कुजस्य शुक्रशनी, बुधस्य कुजगुरुशनयः । गुरोः शनिः, शुक्रस्य कुजगुरू शनेः गुरुः, एतेषां क्रमेणैते समास्त एव समा अपि तात्कालिकरिपवश्चेत् रिपव इति अवगन्तव्यम् । एतेषां बलज्ञानार्थं तत्तत् संज्ञा तथाहि अधिमित्रगृहे २२।३०कला बलम् मित्रगृहे१५ कलाः, समगृहे ११।४५कलाः शत्रुगेहे ७।३० कलाः अधिशत्रुगृहे ३।४५ कलाबलम् । मूलं जातकादौ द्रष्टव्यम् । नैसर्गिकरिपुता तु सर्वकार्यमात्रे इति भेदः । एतच्च जातोक्तयद्दादिबलज्ञानोपयोगि । ताजके तु "दृष्टिः स्याच्चमपञ्चमे बलवती प्रत्यक्षतः स्नेहदा पादोना (४५कलाः) ऽखिलकार्यसाधनकरी मैत्रापकाख्योच्यते । युग्मस्नेहकरी तृतीयभवने कार्यस्य संसिद्धिदा त्र्यंशोना कथिता (४०कलाः) तृतीयभवने षड्भागदृष्टिर्भवे (१०-कलाः) । दृष्टिः पादमिता (१५कलाः) चतुर्थदशमे गुप्तारिभावा स्फुटाऽन्योन्यं सप्तमे तथैकभवने प्रत्यक्षवैराखिला" (६०कलाः) इति दृष्टिविशेषमभिधाय "पञ्चनवमत्रया (३,५,९,११,) सुहृत्, रिपुत्रया (१,४,७,१०,) शत्रुः । समस्त्वन्यथा २,६,८,१२,इति नील०उक्तादिशा तात्कालिकमित्रादि । तेन स्वाधेत्रया १,४,७,१०, स्थानस्था यद्दाः रिपवः । तत्र "स्वस्वाधिकारोक्तबलं सुहृद्वे पादोनमर्द्धं समभेऽरिभेऽङ्घ्रिः": नील० । राहोर्निसर्गरिपवस्तु "सूर्यः शशाङ्को धरणीसुतश्च राहोरिपुः"इत्युक्ता ज्ञेयाः । तत्कालिकास्तु प्रागुक्तादिशा ज्ञेयाः केतोस्तु 'शुक्रशनी विपक्षौ" इत्युक्तौ ज्ञेयौ । जातके षष्ठस्थाने "षष्ठे च ऋतविद्विषौ" इत्युक्तौ चिन्तनीयौ। ताजके तु "रिपौ मातुलभान्द्यारिचतुष्प्राङ्मन्दनीद्रणा" इति नील० ताजकोक्ताः चिन्तनीयाः । ८ तन्त्रोक्ते मन्त्रभेदे ।

तथाहि षोडशकोष्ठात्मके सिद्धादिचक्रे चतुश्चतुःकोष्ठादिक्रमेण सिद्धः, साध्यः सुसिद्धः अरिरिति संज्ञा । तत्रापि तेषु चतुःकोष्ठात्मकेषु प्रत्येकं चतुर्थं कोष्ठमपि अरिसंज्ञं तथा च पञ्चमकोष्ठं सप्तमकोष्ठं त्रयोदशकोष्ठं एकादशंकोष्ठम् द्वादशं पञ्चदशं कोष्ठं षोड़शं चेति सप्तकमरिसंज्ञं तत्रारिसंज्ञकत्वात् तत्स्थवर्णा अप्यरिसंज्ञाः । षोड़शकोष्ठस्थवर्णेषु मध्ये साधकनामाक्षरं यत्र तिष्ठति तस्यैवादित्वं प्रकल्प्य दक्षिणावर्त्तेन सर्व्वत्र चतुर्षु चतुःकोष्ठात्मकेषु गणना तथा च प्रथमादिकोष्ठस्थाक्षरादिको मन्त्रः सिद्धादिनामभाक् । यथा आद्यकोष्ठचतुष्टये प्रथमे १सिद्धसिद्धः २ द्वितीये सिद्धसाध्यः। तृतीये ३सिद्धसुसिद्धः ४ चतुर्थे सिद्धारिः । द्वितीयकोष्ठचतुष्के आद्ये साध्यसिद्धः द्वितीये साध्यसाध्यः। तृतीये साध्यसुसिद्धः चतुर्थे साध्यारिः । तृतीयकोष्ठचतुष्टये आद्ये सुसिद्धसिद्धः द्वितीये सुसिद्धसाध्यः । तृतीये सुसिद्धसुसिद्धः चतुर्थे सुसिद्धारिः । चतुर्थकोष्ठचतुष्के आद्ये अरिसिद्धः । द्वितीये अरिसाध्यः तृतीये अरिसुसिद्धः चतुर्थे अर्व्वरिरिति गणना । एतच्च प्रदर्शनमात्रमुक्तम् किन्तु सर्व्वत्र यत्र कोष्ठे साधकनामाक्षरं तदारभ्यैव गणना तथाच साधकनामाक्षरं यत्र तिष्ठति तत्कोष्ठस्यैवादित्वं प्रकल्प्य दक्षिणावर्त्तेन गणने मन्त्राक्षरं यत्र तिष्ठति तत्पर्य्यन्तगणनायां सिद्धादिषोड़शसंज्ञा तथा च २८ पृष्ठे दर्शिताऽकथहचक्रानुसारेण प्रथमादिसंज्ञा साधकनामाक्षरादिकल्पनयैव । ततश्च सिद्धादिचक्रस्थकोष्ठानां प्रथमादिसंख्या या उक्ता सा न नियता अकथहचक्रशब्दे तन्मूलं द्रष्टव्यम् ।"अरिमन्त्रं न गृह्णीयादिति"तन्त्रम् । राज्ञो विषयानन्तरस्थेऽन्यपतौ । स च द्वादशराजचक्रमध्ये आदिभूतः यथोक्तं माघ २,८१ श्लोकव्याख्यायां मल्लि० । "अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । अरिमित्रस्य मित्रञ्च विजिगीषोः पुरस्सराः" पञ्चेति शेषः "पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः" पार्ष्णिग्राहासारः आक्रन्दासारश्चेति चत्वार इति शेषः एवं नव भवन्ति विजिगीषुर्दशमः ':अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोः समर्थोव्यस्तयोर्बधे । मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः" इति मध्यमोदासीनाभ्यां सह द्वादश इति । अरये साधु तस्मै हितं वा यत् । अराय्यं तत्र साध्वादौ त्रि० "असौ यो अधराद्गृहस्तत्र सन्त्वराय्यः" अथ० २,१४,३, । १० प्रेरके त्रि० अरिष्टतशब्दे उदा० ।

अरिक्थभाज् त्रि० रिक्थं पित्रादिदायं न भजते भज–खिञ् अस०स० । दायाग्राहिणि अनंशे क्लीवपतितादौ अनंशशब्दे १४२ पृष्ठेऽस्य विवरणम् ।

अरिगर्त्त(र्ण) पु० अरये तद्वननाय गर्त्तः उद्युक्तः गुरौ उद्यमे क्त तस्य न वेदे नत्वम्। शत्रुवधायोद्युक्ते "पर्षदरिगर्त्तः स्तरिः ऋ०१,१८६,३ लोके तु अरिगर्त्त इत्येव।

अरिता स्त्री अरेर्भावः तल्। शत्रुतायामनिष्टसम्पादने।

अरित्र पु० ऋ-अन्तर्भूतण्यर्थे इत्र वेदे इट्। नाविके कर्णधारे "इयर्त्ति वाचमरितेव नावम्" ऋ०६,६५,२, २,४२,१, लोके तु नेट् अर्त्ता गन्तरि स्त्रियां ङीप्।

अरित्र न० ऋच्छत्यनेन ऋ-इत्र। (झाबि(इति ख्याते नौकाचालनकाष्ठे। "लोलैररित्रैश्चरणैरिवाभितः" माघः "नौर्हि वा एषा स्वर्य्या यद्बर्हिष्यमाणं तस्या ऋत्विज एव सक्थ्यारित्राणि" शत०ब्रा०। २गमनसाधने वाहनादौ च "अरित्रं वां दिवस्पृथु" ऋ०१,४६,८, "अरित्रं गमनसाधनं नौरूपम्" भा०। "शतारित्रां नावमातस्थिवांसम्" ऋ०१,११६।५, "शतारित्रां बह्वरित्रां यैः काष्ठैः पार्श्वतोबद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि" भा०। अरितः पापादित्रायते त्रै-क। पापादितो २रक्षके त्रि०। "दशारित्रो मनुष्यः स्वर्गः" ऋ०२,१८,१, "दशारित्रः अरिभ्य पापेभ्यस्त्रायन्ते इत्यरित्रा यज्ञाः दशसंख्याकाग्रहायस्त्र" भा०। कौश्या० ४ञ्जिठौ। तत्सम्बन्धिनि आरित्रिकः तद्वादौ च त्रि० अञ जिस्त्रियां ङीप्।

अरिदान्त पु० अरिर्दान्तोयेन निष्ठान्तत्वात् विशेष्यस्यापि परनिपातः। यदुवंशे क्षत्रियभेदे। 'रामे भारं समासज्य, युयुधाने च वीर्य्यवान्। अक्रूरे विदूरथौ चापि गदे च कृतवर्म्मणि। चक्रदेवे सुदेवे च सारणे च महाबले। निहतशत्रौ विक्रान्ते भङ्गकारे विदूरथे। उग्रसेनात्मजे काङ्क्षे शतद्युम्ने च केशवः। राजाधिदेवे मृदुरे प्रसेने चित्रके तथा। अरिदान्ते दृढहृर्गे स्वफल्के साल्यकौ पृथौ। वृष्ण्यन्धकेषु चोन्येषु मुख्येषु। मधुसूदनः। गुरुमासज्य तं भारं ययौ द्वारवतीं प्रति"। इति हरिवं०।

अरिधायस् त्रि० अरिभिरीश्वरैः धार्य्यते धा-असुन् पृ० युट् च। ईश्वरधार्य्ये। "अष्टावरिधायसोगाः" ऋ० १,१२६, ५, अरिधायसः "अरिभिरीश्वरैः धार्य्यमाणा" भा०।

अरिनन्दन त्रि० अरीन् शत्रून् नन्दयति तोषयति नन्द-णिच्-ल्यु उप०स०। शत्रुसन्तोषके अकृतेन्द्रियजये व्यसनासक्ते।

अरिन्दम त्रि० अरीन् शत्रून् कामादीन् वा दाम्यति दमयति दम-अन्तर्भूतण्यर्थे खच् मुम् उप०स०। पराभिभावके १शत्रुतापके २जितकामादौ च। काश्या०४ञ्जिठौ अरिन्दमिकः। तत्सम्बन्धिनि त्रि० ४ञ जिस्त्रियां ङीष्।

अरिप्र त्रि० रिप्रमिति निरुक्ते पापनाम तद्रहिते। पापरहिते "अरिप्रा वृत्रहन्तमाः" ऋ०८,८,६, "रिप्रमिति पापनाम" भा०। "तं वो वयं शुचिमरिप्रमद्य"। ऋ०७,४७,१, "अरिप्रं पापरहितम्" भा०।

अरिमर्द्द पु० अरिं रोगरूपं शत्रुं मृद्नाति मृद-अण् उ०स० १कासमर्द्दरुक्षे। २शत्रुतापके त्रि०।

अरिमर्द्दन त्रि० अरिं मृद्नाति मृद-ल्यु-उप०स०। १शत्रुतापके गान्दिनीपुत्रे अक्रूरसोदरे स्वफल्कस्य पुत्रे यदुवंश्ये क्षत्रियभेदे "स्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत। गान्दिनीं नाम तस्यार्थे गाः सदा प्रददौ पिता। तस्यां जज्ञे महाबाहुः श्रुतवानिति विश्रुतः। अक्रूरोऽथ महाभागो यज्वा विपुलदक्षिणः। उपमद्गुस्तथा मृदुगुर्दुरस्यारिमर्द्दनः। अरिक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः। धर्म्मदृष्ट्यतिधर्म्मा च गन्धमोजान्तकस्तथा आवाहाप्रतिवाहौ च सुन्दरी च वराङ्गना" हरिवं०।

अरिमेजय पु० अरिमेजयति कम्पयति एज-णिच्-खश् मुम् उ०स०। शत्रुतापके अक्रूरसोदरे यदुवंश्ये क्षत्रियभेदे अरिमर्द्दनशब्दे विवृतिः।

अरिमेद पु० अरेर्विट्खदिरस्येव मेदः सारः स्नेहोऽस्य। (गुइयावावला) १वृक्षभेदे। अरिरिव मेद्यति स्नेहयत्वात् अल्पं स्निह्यति मिद-अच्। २विट्खदिरे। संज्ञायां कन्। ३क्षत्रियभेदे तद्गणनायाम् "वाह्यका पिञ्जिटः कुक्षी वर्च्चकीटोऽरिमेदकः" सुश्रु०।

अरिला स्त्री 'षोड़शकले विलासिनि! स्नेहसि प्रतिपदमन्ते यमकविलासिनि। अरिला नाम पयोधरधारिणि! शेषे नियतलघुहृदयधारिणि" "इत्युक्तलक्षणे मात्रावृत्तभेदे।

अरिष पु० न इयर्त्ति मलं यस्मात् ऋ-किषन् न० त०। १अपानमांसजे रोगभेदे। न रिष्यति विच्छिद्यते रिष-क न०त०। २अविच्छिन्नधारावर्षणे न०।

अरिषड्वृक न०षट् च अष्टौ च द्व० ततः परिमाणार्थे कन् षड्वृकम् अरिस्वामिकं षड्वृकं शाक० त०। विवाहे वर्जनीये योगविशेषे, तथाहि दम्पत्योः परस्परराश्यपेक्षया परस्परस्य राशेः षष्ठत्वेऽष्टमत्वे वा अशुभं तयोः राश्योर्मित्रस्वामिकत्वे पुनर्न दोषः शत्रुस्वामिकत्वेऽतीव दोषः। यथोक्तं "मकरः करिकुलरिपुणा कन्या मेषेण सह भुजगुलया। कर्कीघटौ वृषधनुषी

दृश्चिकमिथुने चारिविधौ। यदि कन्याष्टमे भर्तुर्भर्तुः षष्ठे च कन्यका। षड्दृक्कं विजानीयात् वर्ज्जितं त्रिदशैरपि" ज्यो०त०। तत्र प्रतिप्रसवः। "सौहृद्ये तुभयोर्द्वयोरपि तयोरैकाधिपत्येऽपि वा तारापट्टसु सुमित्रमित्रसुखदत्वेमार्थसम्पदादि। षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः प्रोत्यायुःसुखदर्द्धिपुष्टिजननं कार्य्यो विवाहः शुभः" भुज०भो०। अत्यन्तापद्विषये व्यासः। "सैत्रादियोगेऽपि षडष्टकादौ तारावियुतप्रत्यरिनैधनाख्याः। वर्ज्या विवाहे पुरुषेऽतुलो हि प्रीतिः परा जन्मसु तारकासु"। तत्प्रदानसूक्तम् तत्रैव। "षड्दृष्टके गोमिथुनं प्रदेयमिति"।

अरिषड्वर्ग पु० षण्णां वर्गः समुदायः षड्वर्गः अरीणां कामक्रोधलोभमोहमदमात्सर्य्यरूपाणामन्तःशत्रूणां षड्वर्गः देवीभागवतवत् विष्णुभागवतवच्च सामेच्छत्वेऽपि गमकतया स०। कामादिषु षट्स्वान्तरेषु रिपुषु "कृतारिषड्वर्गजयेन" किरा०।

अरिषण्य त्रि० न रिषति हिनस्ति रिष-हिंसायाम् अन्यक् न०त०। अहिंसके "श्वानेव नौ अरिषण्या तनूनाम्" ऋ०२,३९,४, "अरिषण्यावहिंसकौ श्वानौ" भा०।

अरिष्ट पु० रिष-हिंसायां कर्त्तरि-क्त न०त०। १लशुने २निम्बे। "सर्षपारिष्टपत्राभ्यां सर्षिषा लवणेन च" "व्रणे रक्षायां सुश्रुतः। "सुमनायाश्च पत्राणि पटोलारिष्टयोस्त्वचेति" विद्रधिचिकित्सायां सुश्रुतः। ३ लङ्कानिकटवर्त्तिपर्वतभेदे ४काके ५कङ्के (रोठा) इति ख्याते ६फेनिलफलकवृक्षे। "अरिष्टकस्त्रिदोषघ्नोग्यहृज्जिह्वभेषजनः" वैद्य०। ७कृष्णहृतेऽसुरभेदे। 'यत्र शालुञ्च मैन्दञ्च कंसं द्विविदमेव च अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्। नागं कुवलयापीडं चानूरं मुष्टिकं तथा। दैत्यान् मानुषदेहस्थान् सूदयामास वीर्य्यवान्" हरिव०। ८अशुभे। ९तक्रे। १०सूतिकागृहे। "अरिष्टशब्दा परितोविसर्पिणा" रघुः तत्करणप्रकारस्तु "नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विन्यस्तन्यग्रोधतिन्दुकभल्लातकसर्षपदूर्वानिर्म्मितं शय्यागारं यथासंख्यं तन्मयपर्य्यङ्कसपरिघभित्ति सुविभक्तपरिच्छदं प्राग्द्वारं दक्षिणद्वारं वाऽष्टहस्तायतं चतुर्हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयम्" सुश्रु०। तत्र प्रवेशे "रोहिण्यैन्द्रवपौष्णे तु स्वातीवारुणयोरपि। पुनर्वसौ पुष्यहस्तधनिष्ठासूत्तरासु च। मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारमाविशेत्" नि० सि० तारा उक्ता। एतच्च सम्भवे "प्रसूति समये प्राप्ते सद्यएव प्रवेशयेत्" वशिष्ठोक्तेः। तच्च नैर्ऋत्यां वास्तुभूमौ-कार्य्यम् "वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम्" वशिष्ठोक्तेः "दशाहं सूतिकागारमायुष्यञ्च विशेषतः। वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः। सुखलेन तथा द्वारि वर्णकैश्चित्रितेन च" विष्णु०पु०११अनिष्टसूचके उत्पाते भूमिकम्पादौ "अरिष्टे त्रिविधोत्पाते" इतिज्यो० १२अनिष्टस्थानस्थेषु रव्यादिग्रहेषु। १३पानेनारिष्टकारके मद्ये। "रक्तारिष्टं शोणिताजीर्णशेषम्" माधवः। "अरिष्टं लघु पाकेन सर्व्वतस्तु गुणाधिकम्। अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" वैद्य०। मद्ये पुंस्त्वमपि भावप्र०। नास्ति रिष्टं यतोऽधिकम् ५ब०। १४मरणचिह्ने। "रोगिणो मरणं यस्मादवश्यं भावि लक्ष्यते। तल्लक्षणमरिष्टं स्यात् रिष्टमप्यभिधीयत" इति पुरा०। न०त०। १५शुभे न० ५ब०। १६ शुभदायके विधाने १७अविनाशिनि च त्रि०। १८बलिपुत्रे दैत्यभेदे पु० "अरिष्टो बलिपुत्रश्च वरिष्ठोऽथ शिलायुधः" हरिवं० (कटकी) ख्यातायां १९कटुकायां २०कश्यपपत्नीभेदे च स्त्री "अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा" इत्युपक्रम्य "कद्रुर्मुनिश्च राजेन्द्र! ताम्रपत्यानि मे शृणु अरिष्टा तु महासत्वान् गन्धर्वानसितौजसः" हरिव० रिष्ट हिंसा विरोधे न०त०। २१क्षेमेनावस्थाने न० "मर्त्तवेऽयो अरिष्टतातये" ता०ब्रा०। "अरिष्टं क्षेमेनावस्थानं तस्य तातये विस्तारायै" भा०। स्वार्थे कन्। निम्बादौ।

अरिष्टगातु अरिष्टं हिंसितं गच्छति गम-क्तुन् नि० आदन्तादेशः। अहिंसितगमने। "अरिष्टगातुःसहोतासहोभरिः" ऋ० ५,४४,३, "अरिष्टगातुरहिंसितगमनः" भा०।

अरिष्टताति अरिष्टस्य करः वेदे अरिष्ट+तातिल्। सुखकरणे 'जीवातवे न मृत्यवेऽथोऽरिष्टतातये' ऋ० १०,९०,८, "ओषधीरस्मा अरिष्टतातये" यजु०। लोके तु तायङ्-क्तिन्। अरिष्टविस्तारे "तदत्रभवतां निष्प्रत्याशिषमरिष्टतातिमाशास्महे" वीरच०। क्वचिद्देऽपि तथा अरिष्टशब्दे दृश्यम्।

अरिष्टदुष्टधी त्रि० अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य। आसन्नमरणसूचक-निमित्तेन दुष्टमतौ

अरिष्टनेमि पु०ऐत० कश्यपपुत्रे विनतायाः पुत्रभेदे "तार्क्ष्य-

श्चारिष्टनेमिश्च गरुड़श्च महाबलः। अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" हरिव० २ तीर्थंकरे जिनभेदे च।

अरिष्टि स्त्री न रिष्टिः हिंसा अभावे न० त०। हिंसाभावे। "योषं रयीणामरिष्टिं तनूनाम् ऋ० २, २१, ६,। 'अरिष्टिमहिंसाम्' भा०।

अरिष्टुत त्रि० अरिभिः प्रेरयितृभिः स्तुतं वेदे षत्वम्। प्रेरयितृभिः स्तुते प्रशस्ते "रासते विश्वगूर्त्तो अरिष्टुतः ऋ० ८, १, २२। लोके तु न षत्वम्। [स्यातरि।

अरिष्ठ त्रि० अरवे तिष्ठते स्था-क वेदे षत्वम्। शत्रुनाशाय

अरिह त्रि० अरीन् हन्ति हन-ड। १ शत्रुनाशके "हरिहयोऽरिहयोगविचक्षणः" रघुः "पौरवे नृपभेदे" अत्राचीनोऽपि वैदर्भीमपरामुपयेमे मर्य्यदां नाम तस्यामस्य जज्ञे अरिहः, अरिहः खलु क्षत्रियस्येमे" भा० आ० प०।

अरीढ़ त्रि० न रीढः लीढः न आस्वादितः लस्य रः। १ अनास्वादिते। ऋग्वेदे तु ढस्य लहः अरीलहः इत्येव। "अरीलहं वत्सम्" ऋ० ४, १८, १०। अरीलहं शत्रुभिरनभिभूतमानम् भाष्योक्ते २ अर्थे च।

अरीहण पु० अरिं हन्ति हन-अच् पूर्व्वदीर्घः। नृपभेदे अरीहणेन निर्वृत्तम् वुञ्। आरीहणकम्। चतुरर्थ्याम् उत्करा० ङ। अरीहणीयः तत्सन्निकृष्टदेशादौ त्रि०।

अरीहणादि पु० अरीहण आदिर्यस्य। निर्वृत्तार्थे विहितवुञ्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दसमूहे। स च गणः अरीहण, द्रुघण, द्रुहण, भगल, उलन्द, किरण, सांपरायण क्रौष्ट्रायण, औष्ट्रायण, त्रैगर्तायन, मैत्रायण भाल्लायण, वैमतायन। गौमतायन, सौमतायन। सौमायन, धौमतायन, सौमायन, ऐन्द्रायण,। कौन्द्रायण खाडायन, शाण्डिल्यायन, रायस्पोष, विपथ, विपाश। उद्दण्ड, उदञ्चन, खाण्डवीरण, वीरण, कशकृत्स्न, जाम्बवत शिंशपा, रैवत, विल्व, सुयज्ञ, शिरीष, बधिर जम्बु खदिर सुशर्मन्, दलद, भलन्दन, खण्डु, कनल यज्ञदत्त, अरीहणादिः।

अरुंषिका अरुंषि मर्मस्थानान्यधिकृत्य जाता ठन् ष०, सुम्। क्षुद्ररोगभेदे। "समासेन चतुश्चत्वारिंशत्क्षुद्ररोगा भवन्ति॥ तद्यथा अजगल्लिका यवप्रख्याऽम्बालजी विद्रधी। कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्पं कुनखोऽलुषयी विदारिका शर्कराऽर्बुदं पामा विचर्च्चिका एकसा पाददारिका कदरभल्लसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मस्तरिका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मर्मशकस्वर्म्म कीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकशः निरुद्धगुदोऽक्षिपूतनं दृष्णकच्छूर्गुदभ्रंशश्चेति"॥ अरुंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि। कफाहृक् क्रिमिकोपेन नृणां विद्यादरुंषिकाम्" "अरुं षिकाहृते रक्ते सेचयेच्चिम्बवारिणा" इति च सुश्रुतः।

अरुग्ण त्रि० रुग्णः विरोधे न० त०। स्वस्थे रोगशून्ये "रुजदरुग्णं विबलस्य सानुम्" ऋ० ६, ३६, २।

अरुच् त्रि० नास्ति रुक् कान्तिर्यस्य। प्रकाशहीने मलीमसे "अयं रोचयदरुचोरुचानोऽयम्" ऋ० ६, ३६, ४॥

अरुचि पु० न रुचिर्यत्र। सत्यप्यभिलाषे १ भोजनायोग्यता सम्पादके १ रोगभेदे। न रुचिः सन्तोषः न० त०। २ सन्तोषाभावे 'इत्यरुचेराह' जगदीशः। पूर्व्वोद्भावितदोषस्य शिथिलत्वशङ्कया सन्तोषाभावादित्यर्थः। भोजनादौ ३ अभिलाषाभावे च "सन्निपातज्वरश्वासकासशङ्काऽरुचिप्रदुत्" "स्याद्विरिक्ते कफपित्तकोपो दाहोऽरुचिर्गौरवमग्निसादः" इति च सुश्रुतः।

अरुज त्रि० नास्ति रुक् रोगो यस्य। १ रोगशून्ये २ अनुत्पन्नरोगे च "कोऽरुक् कोऽरुक् कोऽरुक्" "इति प्रश्ने" हुतभुगमितभुगशाकभुक् सोऽरुगित्यङ्गटः "अरुक् सद्यःप्रचलो महांश्च मर्म्मोत्थितश्चापि विवर्ज्जनीयः' सुश्रुतः।

अरुज पु० न रुजति रुज-क। (सेंदाल) इति ख्याते १ वृक्षे। नास्ति रुजा यस्मात् ५ ब०। २ रोगाभावसाधने त्रि० "विषेभ्यः खलु सर्व्वेभ्यः कर्णिकामरुजां स्थिराम्" सुश्रुतः। ३ दानवभेदे पु० दानवगणनायां हरिवं० "अनुह्लादो हरिहयोवराहः संह्लादोऽरुजः"। ६ त०। ४ रोगशून्ये नीरोगे च त्रि०। "अपाकरुक्कठिनः स्थूलोऽन्थिर्वर्त्मभवोऽरुजः" सुश्रुतः। "अरुजं वा हृतः स्थूलमन्तः क्लिन्नं स्रवत्यपि" सुश्रु०।

अरुण पु० ऋ-उनन्। १ सूर्य्ये, २ सूर्य्यसारथौ, ३ गुडे, ४ सन्ध्यारागे ५ निःशब्दे, ६ दैत्यदानवभेदे ७ कुष्ठभेदे, ८ पद्मरागरत्ने। ९ अव्यक्तरागे १० कृष्णमिश्रितरक्तवर्णे च ११ तद्वति त्रि०। १२ कुङ्कुमे, १३ सिन्दूरे च न०। १४ मञ्जिष्ठायाम् १५ श्यामाकायाम्, १६ अतिविषायाम् १७ नदीभेदे १८ कदम्बपुष्पायाञ्च स्त्री। १९ तित्तिरायां मेदि० २० इन्द्रवारुण्याम् २१ शुञ्जायां राजनि० २२ मुखरोगभेदे च स्त्री। तत्र अनूरौ 'विभावरी यद्यरुणाय कल्पते' कुमा० "यावत् प्रतापनिधिराक्रमते न भानुरुद्गाय तावदरुणेन तमोनिरस्तम्" रघुः। "तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च

महाबलः अरुणश्चारुणिश्चैव विनतायाः सुताःस्मृताः" हरि० "अरुणोगरुड़भ्राता जवापुष्पसमप्रभः। योगानाञ्चैव सर्वेषां साध्यानामधिपः कृतः" हरिव०। "तदुत्पत्त्यादिकथा अनूरुशब्दे" १६१ उक्ता। सूर्य्ये "संहृज्यते सरिजैरुणांशुभिश्चैः" रघुः "रागेण बालारुणकोमलेन" कुमा०। वर्णे तद्वति च "नयनान्यरुणानि घूर्णयन्" कुमा० "अरुणपुष्पाणि फाल्गुनानि" शत० ब्रा०। "दधत् सन्ध्यारुणव्योमस्फुरत्तारानुकारिणीः" माघः। द्वादशादित्यमध्ये माघमासाधिपे २३आदित्यभेदे "अरुणो माघमासे वै" आदित्यहृदयम् विवरणमादित्यशब्दे। २४देशभेदे पु०। धूमादि० वुञ्। आरुणकः तद्भवे त्रि० गुणवचनात् भावे इमनिच् अरुणिमा पु० ष्यञ् आरुण्यम् न०। तल् अरुणता स्त्री त्व अरुणत्वम् न०। रक्तादिवर्णे। अपत्ये इञ्। आरुणिः जटायौ सूर्य्यपुत्रेमन्दे यमे कर्णे वैवस्वतमनौ सुग्रीवे ऋषिभेदे च। अश्विनीकुमारयोः द्वि०व० यमुनायां तपत्यां च स्त्री गुणवचनात् ष्टक्षा० अभूततद्भावे क्यङ् अरुणायते अरुणायमानः। गौरा० ङीष्। २५अरुणवर्णायां गवि स्त्री। "अरुण्योगाव उषसामिति" निरुक्तोक्तायाम् २६ उषायामपि स्त्री। २७ मन्दरगिरिस्थे सरोवरे तस्य चारुणजलत्वात्तथात्वम् "सरांस्यधैतेष्वरुणञ्च मानसं महाह्रदः श्वेतजलं यथाक्रमात्" सि० शि०। "एतेषु मन्दरादिविष्कम्भशैलेषु" गुडकुङ्कुमसिन्दूरादीनाञ्चारुणवर्णत्वात्तथात्वम्।

अरुणकमल न० कृष्णसर्पवत् नित्यकर्म्मधा०। रक्तोत्पले

अरुणदूर्वा स्त्री कृष्णसर्पवत् नित्यसमासः। रक्तदूर्व्वाभेदे, "यद्यदाराद्य विन्देयुः अरुणदूर्व्वां अभिषुणुयात् एष वै सोमस्य न्यङ्को यदरुणदूर्व्वा तस्मादरुणदूर्व्वां अभिषुणुयात् यद्यरुणदूर्व्वां न विन्देयुः" शत० ब्रा०।

अरुणप्रिया स्त्री अरुणस्य प्रिया। सूर्य्यभार्य्यायाम् १ संज्ञायाम् २ छायायाञ्च अरुणभार्य्यादयोऽप्यत्र "तस्य भार्य्याऽभवत् देवी संज्ञा त्वाष्ट्री विवस्वतः" इति। "असहन्ती तु तां छायां सवर्णां निर्म्ममे ततः। छायामयीं तु सा संज्ञा, तस्माच्छायासमुद्भवा। प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर!। उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते!। स्थितास्मि तव निर्देशे शाधि मां वरवर्णिनि!। संज्ञोवाच। अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः। त्वयेह भवने मह्यं वस्तव्यं निर्विचारया। इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा। संभाव्यास्ते न चाख्येयमिदं भगवते क्वचित्। छायोवाच। आकचग्रहणा देवि! आ शापाच्चैव कर्हिचित्। आख्यास्यामि मतं तुभ्यं गच्छ देवि! यथेच्छया"। इति हरिवं०। २प्रधाकन्याभेदे च। "सुषुवेऽष्टौ महाभागा प्रधा देवर्षिपूजिताः"। अनुवन्धा मनूकाञ्च ऋननामरुणप्रियाम् अनुगां सुभगाञ्चैव" हरिवं० अरुणवर्णं पुष्पादि प्रियमस्य। ४रक्तवर्णपुष्पप्रिये सूर्य्ये पु० ५तद्वर्णपुष्पप्रियमात्रे त्रि०।

अरुणपृषु त्रि० अरुणः पृषुः रूपं (निरु०) यस्य। रक्तवर्णरूपे "ऋतावरीमरुणपृषुं विभातीम्" ऋ०५,८०,१, "अरुणपृषुमरुणरूपाम्" भा०। [२ रक्तनेत्रयुक्ते त्रि०।

अरुणलोचन पु० अरुणे रक्ते लोचने यस्य। १पारावतपक्षिणि

अरुणसारथि पु० अरुणः गरुड़ाग्रजः सारथिरस्य। सूर्य्ये विवरणमनूरुशब्दे।

अरुणात्मज पु० ऐत०। १जटायौ पक्षिणि। २सूर्य्यपुत्रे मन्दे ३ सावर्णे मनौ ४ कर्णे ५ सुग्रीवे ६ यमे च ७ अश्विनीकुमारयोः द्वि०व० ६ यमुनायां तपत्यां च स्त्री। "त्रीण्यपत्यानि कौरव्य! संज्ञायां तपतांवरः। आदित्यो जनयामास कन्यां द्वौ च प्रजापती। स च वैवस्वतः पूर्व्वं श्राद्धदेवः प्रजापतिः। यमश्च यमुना चैव यमजौ संभूवतुः"। संज्ञायां द्वौ सुतौ सुता चेति त्रीण्यपत्यानि। "द्वितीयायां तु संज्ञायां संज्ञेयमिति चिन्तयन्। आदित्यो जनयामास पुत्रमात्मसमं तथा। पूर्व्वजस्य मनोस्तात! सदृशोऽयमिति प्रभुः। मनुरेवाभवद्भ्राता सावर्णे इति चोच्यते। द्वितीयायां सुतस्तस्याः स विज्ञेयः शनैश्चरः"। इति सावर्णेः शनिश्च एतौ द्वौ सुतौ, संज्ञायाः छायाख्यायां द्वितीयायां सवर्णायां जातौ हरिवं०। वड़वारूपधरिण्यां संज्ञायाञ्च अश्विनीकुमारौ जातौ यथा तत्रैव। "वड़वारूपमास्थाय वने चरति शाद्वले। स तथारूपमास्थाय स्वां भार्य्यां शुभलीलया। ददर्श योगमास्थाय स्वां भार्य्यां वड़वां ततः। अदृष्टां सर्व्वभूतानां तपसा नियमेन च। वड़वावपुषा राजंस्वरन्तीमकुतोभयाम्। सोऽश्वरूपेण भगवांस्तां सुखं समभावयत्। मैथुनाय विचेष्टन्तीं, परपुरुषशङ्कया। सा तद्विरमच्छुक्रं नासिकायां विवस्वतः। देवौ तस्यामजायेतामश्विनौ भिषजांवरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति"। तपतीशब्दे तदुत्पत्तिः कर्णोत्पत्तिः यथा "एवमुक्ता बहुविधं सान्त्वपूर्व्वं विवस्वता। सा तु नैच्छद्वरारोहा कन्याऽस्मिति भारत!। बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी। तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ!। मत्प्रसादान्न ते राज्ञि! भवि-

ता दोष इत्युत । एवमुक्त्वा स भगवान् कुन्तिराजसुतां तदा । प्रकाशकर्त्ता तपनः सम्बभूव तथा सह । तत्र वीरः समभवत् कर्णः शस्त्रभृतां वरः । आमुक्तकवचः श्रीमान्देवगर्भः स्त्रियाऽन्वितः । सहजं कवचं बिभ्रत् कुण्डली द्योतिताननः । अजायत सुतः कर्णः सर्व्वलोकेषु विश्रुतः" । भा० आ० ५० । सुग्रीवोत्पत्तिः सुग्रीवशब्दे दृश्या ।

अरुणानुज पु० अरुणस्यानुजः । गरुडे तस्य ततोऽनुजातकथानूरुशब्दे दृश्या । [रोहरथे हरिः" हरिवं० ।

अरुणावरज पु० ६त० । गरुडे "अरुणावरजं श्रीमानारुरोह" भा० ।

अरुणित त्रि० अरुणं क्रियते स्म अरुण+क्यर्थे णिच्—कर्म्मणि क्त, तारकादि० इतच् वा । १रक्तवर्णीकृते २जातलोहितवर्णे च । "स्तनाङ्गरागारुणिताञ्च कन्दुकात्" कुमा० ।

अरुणोदक न० अरुणमुदकं यस्य । १सरोवरभेदे । उदकस्य वा उदादेशे अरुणोदमप्यत्र । तच्च सरः मन्दरगिरिरूपविष्कम्भपर्व्वतस्थम् त्रि० पु० । २नदीभेदे स्त्री सा च "मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसोगिरिशीखरस्थूलानि फलान्यरुतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामति मधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखराद्विपतन्ती पूर्व्वेणेलावृतमुपप्लावयति" इति भागवतोक्तस्थलस्था ।

अरुणोदय पु० अरुणस्यार्कस्य तत्किरणस्योदयो यत्र । "चतस्रो घटिकाः प्रातररुणोदय उच्यते" इत्युक्ते सूर्य्योदयात् प्राचि चतुर्दण्डात्मके काले ।

अरुणोदयविद्धा स्त्री अरुणोदयकाले विद्धा । अरुणोदयकाले दशम्या विद्धायामेकादश्याम् । "दशमीशेषसंयुक्ता यदि स्यादरुणोदये । वैष्णवेन न कर्त्तव्यं तद्धिनैकादशीव्रतम्" हेमा० भवि० पु० "अरुणोदयविद्धा तु द्वादश्यां पारणा लाभेऽपि वैष्णवैर्नोपास्या" ए०त० रघुनन्दनः ।

अरुणोदयसप्तमी स्त्री अरुणोदयकाले पुण्यविशेषसाधनं सप्तमी । माघशुक्लसप्तम्याम् । "सूर्य्यग्रहेण तुल्या हि शुक्ला माघस्य सप्तमी । अरुणोदयवेलायां तस्यां स्नानं महाफलम् । माघे मासि सिते पक्षे सप्तमी कोटिभास्करा । दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः । अरुणोदयवेलायां शुक्ला माघस्य सप्तमी । गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समेति" ति० त० भविष्य पु० ।

अरुणोपल पु० अरुण उपलः । (चुनीति) ख्याते पद्मरागे ।

अरुन्तुद त्रि० अरूंषि मर्म्माणि तुदति तुद—खश् मुम् च । मर्म्मपीड़के दुःखदायके "अरुन्तुदमिवानार्यं नवबड्वस्य दन्तिनः" इति रघुः "नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मकृत्" मनुः ।

अरुन्धती स्त्री न रुन्धती । १ रोधनाकारिकायां स्त्रियाम् २ वसिष्ठपत्न्याम् संज्ञात्वादव्युत्पन्नः "अन्वासितमरुन्धत्या स्वाहेवेव हविर्भुजम्" रघुः "आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति" "साक्षादिव तपःसिद्धिर्वभासे बह्वरुन्धती" इति च कुमा० । सा च कर्द्दमप्रजापतेराकूत्यामुत्पन्ना भाग० तपसा सिद्धा नक्षत्ररूपेण सप्तर्षिस्थाने स्थिता । ३ तन्नामके नक्षत्रभेदे तत्स्थितिस्थानञ्च "प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः । पूर्व्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽत्रात् । तस्माङ्गिरास्ततोऽत्रिस्तस्मात्सन्नः पुलस्त्यश्च । पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्व्वाद्याः । तत्र वसिष्ठं मुनिवरमुपाश्रिताऽरुन्धती साध्वी" इ०सं० ॥ विवाहकाले सैव पत्न्यै पत्या दर्श्यते "अरुन्धतीञ्च रुन्धाहमक्षीति" गोभि० । "एवञ्च सप्तर्षिनिकटवर्त्तिनीं सूक्ष्मां तारामरुन्धतीं रुन्धाहमक्षीति मानसमन्त्रेण पश्येत्" सं० त० रघु० । अरुन्धती यथा पत्यौ अनुरक्ता एवमेवं त्वं मयि इत्यभिप्रायेण तद्दर्शनम् । आसन्नमृत्यवश्च तां न पश्यन्ति यथोक्तम् सुश्रुते । "न पश्यति सनक्षत्रां यस्तु देवीमरुन्धतीम्" ध्रुवमाकाशगङ्गां च तं वदन्ति गतायुषे" ४दक्षकन्यारूपे धर्मस्य पत्नीभेदे । "ददौ सदश धर्माय" इत्युपक्रम्य "तासां नामानि मे शृणु" इति चोक्त्वा । "अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती । सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भारत ! । धर्मपत्न्यो दश त्वेता इति" "पृथिवीविषयं सर्वमरुन्धत्यामजायत च" हरिव० । ५ जिह्वायाञ्च "अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च । आसन्नमृत्युर्नो पश्येच्चतुर्थं मानसमण्डलम्" इत्युक्त्वा तत्रारुन्धत्यादिशब्दानां पारिभाषिकत्वं दर्शितं यथा "अरुन्धती भवेज्जिह्वा ध्रुवोनासाग्रमुच्यते विष्णोः पदानि भ्रूमध्यं नेत्रेऽग्नौ मानसमण्डलम्" काशीखण्ड० । [वसिष्ठे मुनौ

अरुन्धतीजानि पु० अरुन्धती जाया यस्य निङ् समा० । वसिष्ठे मुनौ तत्पत्न्यादयोऽत्रत्व ।

अरुन्धतीदर्शनन्याय पु० अरुन्धत्यादर्शनमिव दर्शनं यस्य तत् सूचको न्यायः । प्रथमस्थूलदर्शनेन सूक्ष्मदर्शनरूपे न्याये "यथाऽरुन्धतीं दिदर्शयिषुः तत्समीपस्थां स्थूलां तारामवस्थां प्रथममरुन्धतीति व्याहृत्य तां प्रत्याख्याय पश्चादरुन्धतीमेव व्याहरति" शा० भा० ।

अरुन्धतीनाथ पु० ६त० । वसिष्ठे मुनौ तत्पत्न्यादयोऽत्रत्व ।

अरुष त्रि० न रोषति क्रुध्यति रुष–क न०त० । १अक्रोधने । "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः" यजु० २३,५ "असौ वा आदित्योब्रध्नोऽरुषः" इति श्रुतिः । विरोधे न०त० । २ रोचमाने । "श्वेतं सद्मानमरुषं महिता" ऋ० ३,१,४, 'अरुषं रोचमानम्' भा० । ऋ–गतौ–उषन् । ३ गमनशीले अश्वादौ वेदे स्त्रियां ङीप् । "युञ्जाह्यरुषी रथे" ऋ०१,१४,१२, अरुषीर्गमनशीला वडवाः" भा० । रुषा हिंसा न०ब० । ४हिंसारहिते "जानन्ति वृष्णो अरुषस्य शेवम्" ऋ० ३,७,५,। "अरुषस्य हिंसारहितस्य" भा०। [स्त्री निरु०।

अरुष् त्रि०नास्ति रुट् यस्य । १अक्रोधे। गौ०ङीष्। २उषसि

अरुष्क पु० अरुर्मर्म्मस्थानं कायति पीड़यति कै–क । स्वर्णमात्रेण व्रणकारकफलरसे (भेला) भल्लातकवृक्षे ।

अरुष्कर पु० अरुः करोति ट उप०स० षत्वम् । स्वर्णमात्रेण व्रणकारकफलरसे १भल्लातके (भेला) २व्रणकारके त्रि० "शुष्कोह्यपार्थकोऽरुष्करश्च" सुश्रु०। स्त्रियां ङीप् ।

अरुस् पु० ऋ–उसि । १अर्के, २रक्तखदिरे च । ३मर्म्मणि न० ४व्रणे, पूयते च पु०न० । "अरुर्द्विषदजन्तस्य मुम्" पा० । "अरुर्वै" पुरुषोऽवच्छित्तः अनरुरेवैतद्भवति" शत०ब्रा० । "यद्दण्डेन यदिषा यद्वारुषा हरसा" अथ०५,५,४ । "अरुर्वै पुरुषस्याक्षीति" शत०ब्रा० उक्ते ई नेत्रे च । अरुस्+अभूततद्भावे च्वि अन्तलोपः दीर्घः अरूकरोति ।

अरुहा स्त्री न किञ्चिन्मूलमाश्रित्य रोहति रुह+क । भूम्यामलक्याम् राजनि० । ह्रस्वा० ह्रस्व् । आरुहीयम् तत्सन्निकृष्टदेशादौ त्रि० ।

अरूक्ष त्रि० विरोधे न०त० । स्निग्धे मसृणे, "दर्भैः प्रच्छादयत्यरूक्षतायै", शत०ब्रा० ।

अरूक्षित त्रि०न रूक्षितः विरोधे न०त०। स्निग्धे मसृणे, "अरूक्षितं दृश आ रूपे अन्नम्" ऋ०४,११,१, अरूक्षितं स्निग्धम्" भा० ।

अरूक्ष्ण त्रि०रूक्ष+नञ् विरोधे न० त० । स्निग्धे । "यत्ते वासः परिधानम्–संस्पर्शेऽरूक्ष्णमस्तु ते"अथ०८,२,१६ ।

अरूप त्रि० नास्ति रूपमस्य । १रूपशून्ये २सांख्योक्ते प्रधाने वेदान्तोक्ते ३ब्रह्मणि न० "अशब्दमस्पर्शमरूपमव्ययमिति" कठ०उ०। कुत्सितार्थे न०त०। २कुत्सितरूपे न०।

अरूपहार्य्य त्रि० रूपेण न हार्य्यः वशीकार्य्यः अस०स० । सौन्दर्य्यादिना अवशीकार्य्ये "अरूपहार्य्यं मदनस्य निग्रहात्" कुमा० ।

अरूष पु० ऋ–जषन् । १सर्पविशेषे २सूर्य्ये च शि० कौ० ।

अरे अव्य० ऋ–ए । १रोषाह्वाने, २नीचसंबोधने "आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति" न वा अरे पत्युः कामायायाः पतिः प्रियो भवति" शत० ब्रा० बहुकृत्वः पाठः। तच्च याज्ञवल्क्येन मैत्रेयीनामकपत्नीं प्रति सम्बोधनायोक्तं तस्याश्च स्वापेक्षया न्यूनत्वात् नीचसम्बोधनम् । ३अपकृतौ, ४असूयायाञ्च ।

अरेपस् त्रि० नास्ति रेपः पापं निरुक्तोक्तं यस्य १निष्पापे "प्रापे रूपी पुराऽरेपाः" इति माघः २निर्मले च "अरेपसा तन्वा शाशदानाः" ऋ०१,१२४,५, अरेपसाऽपापया निर्म्मलया वा" भा०।

अरेरे अव्य० अरे+वीप्सायां द्विरुक्तिः । नीचसंबोधनादौ । २सक्रोधसम्बोधने च "अरेरे राधागर्भभारभूत ! सूतापसद ! किमेवमात्थ" अरेरे वाचाट ! दृष्टाश्वस्थ्यहृणदुर्विदग्ध ! वटो" इति च वेणीसंहारः ।

अरोक त्रि० रुच–दीप्तौ घञ् रोकश्छिद्रं दीप्तिश्च न०ब० । १छिद्रशून्ये २दीप्तिशून्ये च । "विभाषा श्यावारोकाभ्याम्" पा०बहुव्रीहौ एतत्पूर्व्वकदन्तस्य दत्व । अरोकदन्तः अरोकदन्तः । निविड़दन्ते दत्वादेशे स्त्रियां ङीप् ।

अरोग त्रि० नास्ति रोगोऽस्य । रोगशून्ये "अरोगाः सर्व्वसिद्धार्थाश्चतुर्वर्षशतायुषः" सुश्रु० । "एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः" मनुः तस्य भावः ष्यञ् । आरोग्यम्। रोगाभावे न० "आयुरारोग्यविजयं देहि देवि! नमोऽस्तु ते" दुर्गास्तवः "आरोग्यं वित्तसम्पत्तिर्गङ्गाकारणजं फलमिति" पुरा० तल् अरोगता स्त्री त्व अरोग्यत्वम्" तत्रैव न० ।

अरोगण त्रि० रोगोऽस्यास्य वा०मत्वर्थेन न०त०। रोगशून्ये "तेषामसि त्वमुत्तमममनाश्रावमरोगणम्" अथ०२,३,२ ।

अरोगिन् त्रि० न रोगी विरोधे न०त० । रोगशून्ये "यावज्जीवमरोगी स्यात्" पुरा० स्त्रियां ङीप् । "अरोगिणौ आत्मतोम्" स्मृतिः ।

अरोचक पु०न रोचयति प्रीणयति रुच+णिच्–ण्वुल् न०त०। रोगभेदे यत्र क्वचिदपि द्रव्ये भोजनादौ न प्रीतिस्ताडृशे रोगे स च सुश्रुतोक्तः । 'दोषैः पृथक् सहजचित्तविपर्य्ययाच्च भक्तायनेषु हृदि चावतते प्रगाढम् । नाद्ये रुचिर्भवति तं भिषजो विकारं भक्तोपघातमिह पञ्चविधं वदन्ति । हृच्छूलपीड़नयुतं विरसाननत्वं वातात्मके भवति लिङ्गमरोचके तु । हृद्दाहशोषबहुता सुखतिक्तता च

मूर्च्छा षट्पदे भवति पित्तकृते तथैव । कण्डू गुरुत्वकफसंस्रवसादतन्द्राः श्लेष्मात्मके मधुरमास्यमरोचके तु । सर्व्वात्मके पवनपित्तकफा बहूनि रूपाण्यथास्य हृदये समुदीरयन्ति । संरागशोकभयविप्लुतचेतसस्तु चिन्ताकृते भवति सोऽशुचिदर्शनाच्च" इति । "शुल्मान् प्लीहोदरं कालंहलीसकमरोचकम्" इति सुश्रुतः । [शून्ये त्रि० ।

अरोदन न०अभावे न०त०। १रोदनाभावे । ब०। २क्रन्दन-

अरोधन न० अभावे न०त०। १रोधाभावे २आवरणाभावे ३गतिरोधके व्यापारे । न०ब० । ४तच्छून्ये त्रि० ।

अरोध्य त्रि० न रोध्यः । रोद्धुमशक्ये । [शून्ये त्रि० ।

अरोपण न०अभावे न०त०। १रोपणाभावे न०ब०। २रोप-

अरोष पु०अभावे न०त०। १क्रोधाभावे । न०ब० । २क्रोधशून्ये त्रि० ।

अरौद्र त्रि०न रौद्रः विरोधे न०त०। १भीषणभिन्ने सौम्याकृतौ २ रागद्वेषादिशून्ये विष्णौ पु० । "अरौद्रः कुण्डली चक्री" विष्णुस० "कर्म रौद्रं, रागश्च रौद्रः, कोपश्च रौद्रः, तयं यस्य नास्ति अवाप्तसर्वकामत्वेन द्वेषरागादेरभावादित्यरौद्रः" भा० ।

अर्क तापे, स्तुतौ च चुरा०उभ०सक० सेट् । अर्कयति ते आर्चिकत् त । अर्कयामास अर्कितः चर्कयितुम् ।

अर्क पु० अर्च-कर्मणि घञ् कुत्वम् । १सूर्य्ये, २इन्द्रे, ३ताम्रे, ४स्फटिके, ५विष्णौ, ६पण्डिते, (आकन्द,) इति ख्याते ७वृक्षे, (आरख) इति ख्याते ८काथविशेषे च । ९अर्चनीये त्रि० । "आ सूर्य्यो न भानुभिरर्कैः" ऋ० ६,५,६ "अर्कैः अर्चनीयैः" भा० "ब्रह्मादिभिः पूज्यमानैरर्चनीयत्वादर्कः" भा० १०ज्येष्ठे" पु० । लक्षणया ११अर्काधिपे वारे १२सप्तमीतिथौ १३उत्तरफल्गुनीनक्षत्रे १४द्वादशसंख्यायाञ्च तत्र विष्णौ । "अर्को वाजसनः शुक्ली" वि०सह० अर्कवृक्षे "अर्कः पलाशःखदिरः इति विष्णुध० । सूर्य्ये "अर्कोद्विनिःसृतः प्राचीं यद्यत्यहरहः शशी" सूर्य्यसि० "संपर्कादर्करोचिषाम्" माघः "स्फुटं जगत्पूज्यमयुज्य तार्कः" माघः इन्द्रे अर्कसोदरशब्दे उदा०। अर्कस्यापत्यम् इञ् । आर्किः सूर्यपुत्रे यमादौ, यमुनायां, तपत्याञ्च स्त्री अरुणात्मजशब्दे विवृतिः ।

अर्ककला स्त्री ६त० । शारदातिलके सूर्य्यस्य उपास्यत्वेनोक्ते द्वादशसंख्याके पीतवर्णे कादिडान्तवर्णभणिते कलाभेदे । तास्च १"तपिनी २तापिनी ३धूम्रा ४मरीचि ५ज्वालिनी ६रुचिः । ७सुषुम्णा ८भोगदा ९विश्वा १०बोधिनी ११धारिणी १२क्षमा । काद्यास्च वसुदाः सौम्यो दान्तास्ता द्वादशेरिताः" "वराभयकरा ध्येयाः श्वेतपीतारुणाः क्रमात्" शार० ति० ।

अर्ककान्ता स्त्री अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः कमक । (ऊड्ऊड़िया) इति ख्याते १वृक्षे ६ब० । २सूर्य्यप्रियायाम् ३संज्ञायां कायायाञ्च अरुणप्रियाशब्दे विवृतिः ।

अर्कक्षेत्र न० ६त० "कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् । जीवार्किभानुजेज्यानां क्षेत्राणि सुरजादयः" ज्योतिषोक्ते सूर्य्यस्वामिके सिंहराशौ ।

अर्कचन्दन पु० अर्कस्य प्रियःचन्दनः शाक०त० । रक्तचन्दने

अर्कज पु० अर्काज्जायते जन-ड ५त० । १यमादौ २तत्पत्यां ३यमुनायां च स्त्री ४अश्विनीकुमारयोः द्वि०ब० । ५सुग्रीवे ६कर्णे च । अरुणात्मजशब्दे विवृतिः ।

अर्कतनय पु० ६त० । राधासुते १ कर्णे २यमादौ च । अरुणात्मजशब्दे विवृतिः ।

अर्कदुग्ध न० अर्कस्य वृक्षस्य दुग्धमिव निर्य्यासः । अर्कवृक्षनिर्य्यासे श्वेतत्वेन दुग्धाकारे पदार्थे ।

अर्कनयन पु० अर्कोनयनं यस्य । विराट्पुरुषे । "सूर्य्याचन्द्रमसावग्निर्यस्य नेत्राणि जज्ञिरे" पुरा० अनन्तबाहुं शशिसूर्य्यनेत्रम्" गीता अर्कइव दुर्दर्शं नयनमस्य । २दुर्दृश्यलोचने त्रि० ।

अर्कनामन् पु० अर्कं नामयति अनुकूलयति नम-णिच् कनि । रक्तार्कवृक्षे ।

अर्कपत्र पु० अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य । १अर्कवृक्षे । अर्कपर्णोऽप्यत्र । २सुनन्दायाम् ३अर्कमूलायां स्त्री । ६त० । ४अर्कवृक्षस्य पत्रे न० "स कदाचिदर्कपत्राख्यभक्षयत् क्षुधार्त्तः तैर्भक्षितैरर्कपत्रैः" भा०आ०प० "देवराजो मया दृष्टो वारिवारणमस्तके । खादत्यर्कपत्राणि" विद०सु० । "सप्त वदरपत्राणि सप्तार्कपत्राणि च शिरसि निधायेति, माघसप्तम्यां स्नाने क०त० रघु० ।

अर्कपर्ण त्रि० अर्कइव रक्तं पर्णमस्य । १मन्दारे । ६त० २अर्कवृक्षपत्रे न० । [कर्म्मधा० । (आकन्द) २वृक्षभेदे ।

अर्कपादप पु० अर्कः अर्कवृक्षइव तीक्ष्णः पादपः । १निम्बे ।

अर्कपुष्पी स्त्री अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः जातित्वात् ङीप् । २कटुम्बिनीवृक्षे । वा कप् । अत इत्त्वे अर्कपुष्पिकाप्यत्र ।

अर्कप्रिया स्त्री अर्कं प्रीणाति प्री-क । जवायाम् । ६त० । १सूर्य्यप्रियायां, २संज्ञादौ अरुणप्रियाशब्दे विवृतिः ।

अर्कबन्धु पु० अर्कस्य बन्धुरिव । १गोतमे सूर्यवंश्ये बौद्धभेदे । तस्य तत्कुलोत्पन्नत्वात्तद्बन्धुत्वम् । अर्कस्य बन्धुरिव प्रकाश्यत्वात् । २पद्मे । अर्कबान्धवोऽप्युभयत्र ।

अर्कभ न० अर्काक्रान्तं भं नक्षत्रं ष० त० । १सूर्याक्रान्ते नक्षत्रे ऐत० । तत्स्वामिके २सिंहराशौ ३उत्तरफल्गुनीनक्षत्रे च ।

अर्कभक्षा स्त्री अर्कस्य भक्षा (झड़ूड़ुड़िया) इति ख्यातायां लतायाम् । तत्किरणसंपर्के एव हि तस्याः सौन्दर्य्यम् ।

अर्कमूल पु० अर्कइव सर्पाणां दुष्प्रसहं मूलं यस्याः । (इशेरमूल) इति ख्यातायां लतायाम् ।

अर्कलूष पु० अर्कइव रूक्ष उग्रः रस्य लः । ऋषिभेदे विदा० अञ् । आर्कलूषः तदपत्ये पुंस्त्री० । स्त्रियां ङीप् ।

अर्कवल्लभ पु० अर्कस्य वल्लभः समानवर्णपुष्पत्वात् । रक्तपुष्पत्वेन अर्कतुल्यपुष्पे बन्धूकवृक्षे । ब० । २पद्मे ।

अर्कविवाह पु० अर्कवृक्षस्य कन्यात्वेन प्रकल्पनेन विवाहः । तृतीयविवाहसिद्ध्यर्थमर्कवृक्षस्य कन्यात्वकल्पनेन विहिते विवाहभेदे । "चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् । "आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्व्वाह्णे कुर्यादर्कविवाहकम्" कश्य० । "तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः" शौनकः । तत्प्रकारस्तु विधानपारिजाते तृतीयविवाहप्रकरणे द्रष्टव्यः ।

अर्कवेध पु० अर्कस्य वृक्षस्येव वेधोऽत्र । तालोद्गमपत्रे वृक्षे ।

अर्कव्रत पु० अर्कस्याराधनार्थं व्रतम् । माघशुक्लसप्तम्यादौ कर्त्तव्ये अर्काराधनार्थे १व्रते । अर्कस्येव व्रतम् नियमः । "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसान् रविः" इत्युक्तेर्यथा रविणा लोकवृद्ध्यर्थं रसस्य ग्रहणमेवं प्रजापालनार्थमेव राज्ञा प्रजाभ्यो यत् करस्य ग्रहणं क्रियते तादृशे "अष्टौ मासान् यथादित्यस्तोयं गृह्णाति रश्मिभिः । तथा हरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तदिति" मनूक्ते राज्ञः २करादानभेदे ।

अर्कसूनु पु० ऐत० । १यमे २शनैश्चरे ३सुग्रीवे ४कर्णे ५श्राद्धदेवे ६अश्विनीकुमारयोः द्वि० व० । ७यमुनायां ८तपत्यां च स्त्री

अर्कसोदर पु० अर्कस्य इन्द्रस्य सोदर इवोपकारकत्वात् । १ऐरावते हस्तिनि २अर्कतुल्ये दुर्ज्जने च ।

अर्कहिता स्त्री ऐत० । १अर्कभक्षायां (झड़ूड़ुड़िया) लतायाम् २सूर्य्यहितकरे त्रि० ।

अर्काश्मन् पु० अर्कस्य अनुगतः, अश्मा । सूर्य्यकान्तमणौ, स हि सूर्य्यरश्मिसंपर्कादुज्ज्वलति ततस्तस्यार्कसम्बन्धित्वम् । अर्कइव रक्तः अश्मा । (चुनी) २अरुणोपले ।

अर्किन् त्रि० अर्चत्यनेन मन्त्रेण अर्को ऽर्चनहेतुमन्त्रः सोऽस्यास्ति इनि । अर्चनसाधनमन्त्रयुक्ते । "इन्द्रदिन्द्रमर्कैभिरर्किणः" ऋ० १,७,१, 'अर्किणः अर्चनहेतुमन्त्रोपेताः' भा० "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ऋ० १,१०, १, । अर्कोऽर्चनमस्यास्ति इनि । २अर्चनयुक्ते त्रि० । "वन्दस्व मारुतं गणं त्वेषम् अपनस्युमर्किणम्" ऋ० १,३८,१५ । अर्किणम् अर्चनोपेतम् भा० ।

अर्केन्दुसङ्गम पु० अर्कः इन्दुश्च सङ्गच्छेते यत्र । अमावास्यायां तिथौ तद्दिने हि सूर्य्याचन्द्रमसोरेकराश्येकावच्छेदेन उपर्य्यधोभावेन स्थितिः ज्योतिषप्रसिद्धा 'सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः साऽमावास्येति" गोभिलेन तस्यास्तथाविधत्वकीर्त्तनात् तथात्वम् । [पद्मरागे च ।

अर्कोपल पु० अर्कस्यानुगतउपलः । १सूर्य्यकान्तमणौ (चुनी)

अर्क्य त्रि० अर्च-कर्म्मणि ण्यत् कुत्वम् । १अर्चनीये । अर्कस्यायम् यञ् । अर्क्यः अर्कसम्बन्धिनि । "स एष वाकौय एष तपति तस्यैतदन्नं क्यमेष चन्द्रमार्क्यम्" शत० ब्रा० ।

अर्गल क्लीन० अर्ज्ज-कलच् न्यङ्वा० कुत्वम् । १कपाटमध्यस्थेरोधके २काष्ठादिदण्डे, "ससम्भ्रमेन्द्रद्रुतपातितार्गलानिमीलिताक्षीव भियाऽमरावती" का० म० । "पुरार्गलादीर्घभुजा बुभोज" रघुः, "अथानपोढ़ार्गलमध्यगारमिति" रघुः । सप्तशतीस्तोत्रादौ पाठे २स्तोत्रविशेषे "अर्गलां कीलकं चादौ पठित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चात्" मत्स्यसूक्तम् । ३कक्षोले, ४कपाटे च न० ५क्षुद्रार्गले स्त्री । गौरा० ङीष् स्वार्थे कन् । अर्गलिकाप्यत्रार्थे । ६विष्कम्भमात्रे रोधकमात्रे स्त्रीन० ॥ वार्य्यर्गलाभङ्ग इव प्रवृत्तः" रघुः । अनुगतनयमार्गामर्गलां दुर्नयस्य" माघः । [वृक्षे

अर्घ मूल्ये भ्वादि० पर० सक० सेट् । अर्घति आर्घीत् । आनर्घ । अर्घः । अर्घ्यः ।

अर्घ पु० अर्घ-घञ् । क्रेयवस्तुग्रहणार्थं देये तुल्यरूपे रजतादिद्रव्यरूपे १मूल्ये । "कुर्व्वीत चैषां प्रत्यक्षमर्घं संस्थापनं नृपः" "कुर्य्युरर्घं यथापण्यमिति" च मनुः अर्ह-करणे घञ् न्यङ्क्वादित्वात् कुत्वम् । २पूजोपचारे दूर्व्वाक्षतादौ । सामगैरयं सयकारः क्लीवलिङ्गश्च प्रयोक्तव्यः अन्यैः पुंलिङ्गोनियंकारश्च । अर्घाय देयम् यत् । अर्घ्यम् पूजार्थे देये जलादौ अर्घद्रव्याणि च "आपः क्षीरं

कुशाग्रञ्च दधि सर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः" कालीखण्डम्। "तमर्घ्यमर्घ्यादिकयादिपूरुषः" माघः "अर्घ्यमर्घ्यमिति वादिनं ह्यपं सोऽनवेक्ष्य भरताग्रजो यतः" "अर्घानुपदमाशिषमिति" च रघुः। [पूज्यतमे महादेवे।

अर्घीश पु० अर्घोऽस्यास्य इनि देयत्वेन तेषु ईशः। सर्व्वदेवेषु

अर्घ्य त्रि० अर्हति पूजयते अर्ह-यत्-न्यङ्का० कुत्वम्-अर्घमर्हति अर्घ+यत् वा। १पूजनीये "तमर्घ्यमर्घ्यादिकयादिपूरुषः माघः"। अर्घाय देयं यत्। २पूजार्घं देये जलादौ। "तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः" कुमा०। "अनर्घ्यमर्घेण तमद्रिनाथः" कुमा०। अर्घं मूल्यमधिकमर्हति यत्। ३जरत्कारतपोवनवृक्षोद्भवे मधुनि न० तस्य बहुमूल्यत्वात्तथात्वम्।

अर्च पूजायाम् उभ० भ्वादि०सक० सेट्। अर्चति ते आर्चीत् आर्च्चिष्ट। आनर्च-र्चे "पितृंश्चैवाष्टकास्वर्च्चेत्" मनुः। "एवं हि सर्वभूतानि ब्राह्मणोनित्यमर्चति" मनुः। "रत्नपुष्पोपहारेण क्रियमाणार्च पादयोः" रघुः "इन्द्रिष्मार्च्चीद्विसुधाधिपानाम्" "समीहे मर्त्तुमानर्चे तेन वाचाऽखिलं बलम्"। "आर्च्चीत् द्विजातीन् परमार्थविन्मान्" "प्रानर्च्चुरर्च्यं जगदर्चनीयम्" "विप्रानर्चे स्वधा स्तुवन्" इति च भट्टिः अर्चिः अर्चकः अर्चितः अर्चितवान् अर्चितुम् अर्चित्वा।

अर्चे पूजायां चुरा० उभ० सक० सेट्। अर्चयति ते आर्चिचत् त। अर्चयामास "दूरस्थमार्चयेदेनम्" मनुः। "स्वर्गौकसामर्चितमर्चयित्वा" कुमा०।

अर्चक त्रि० अर्चति अर्च-ण्वुल्। पूजके "ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः" मनुः स्त्रियां टाप् अत इत्त्वम्।

अर्चत्रि त्रि० अर्च-वेदे बा०अत्रि। अर्चनीये। "अर्चत्रयो धुनयो न वीराः" ऋ० ६,६६,१०। "अर्चत्रयः अर्चनीयाः" भा०।

अर्चत्र्य त्रि०अर्च-भावे-अत्रि अर्चत्रिमर्चनमर्हति यत्। पूजनीये। "अर्चत्र्योमघवा नृभ्यः" ऋ०६,२४,१। "अर्चत्र्यः अर्चनीयः" भा०।

अर्चन न० अर्च-भावे ल्युट्। पूजने। "अरिष्टं नाशयेत् सर्व्वं ग्रहविघ्नसुरार्चनम् पुरा०। ["निरतः पुरा०।

अर्चना स्त्री टु० अर्च-युच्। पूजायाम्। "देवार्चनायां

अर्चनीय त्रि० अर्च+अनीयर्। पूजनीये। "प्रानर्च्चुरर्च्यं जगदर्चनीयम्" भट्टिः।

अर्चा स्त्री अर्च्-आधारे अङ्। १प्रतिमायाम् "आभिरूप्येण चार्चायां देवः सान्निध्यमृच्छति" ति०त० पुरा०। "देवार्चामभ्यतः कृत्वा ब्राह्मणानां विशेषतः" आ०त०। भावेऽङ्। २पूजायाम् "लोकः पच्यमानश्चतुर्भिर्मैं! ब्राह्मणं भुनक्त्यर्चया च दानेन चोज्यया दयया च"। शत०ब्रा०।

अर्चि स्त्री अर्च-इन्। वह्न्यादिशिखायाम्। "यस्या रुशन्तो अर्चयः प्रतिभद्रा अदृक्षत" ऋ०१,४८,१३, "तव ज्योतींष्यर्चयः" ऋ०८,४४,१७।

अर्चित त्रि०अर्च-क्त। १पूजिते "स्वर्गौकसामर्चितमर्चयित्वा" कुमा० २विष्णौ पु० "अर्चिष्मानर्चितः कुम्भः" वि०स०। "सर्व्वलोकार्चितैर्ब्रह्मादिभिरर्चितः" भा०।

अर्चिरादिमार्ग पु०अर्चिरादिभिस्तदभिमानिदेवैः उपलक्षितो मार्गः। देवयाने पथि उत्तरमार्गे। "तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षड्दङ्उदेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सराद् आदित्यम्, आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः" छा०उ०। "आतिवाहिकास्तल्लिङ्गात्" ब्रा०सूत्रे तेषां तदभिमानिदेवतापरतेत्युक्तम् "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाताः गच्छन्ति ब्रह्म ब्रह्मविदोजनाः" गीता।

अर्चिव(म)त् त्रि० अर्चिरस्यास्य मतुप् वेदे मस्य वः। दीप्तियुक्ते। "उद्यच्चक्षतमर्च्चिवत्" ऋ०७,८,६१,२, "यत्ते पवित्रमर्चिवदग्नेः" ऋ०६,६७,२४। लोके तु अर्चिमान्। स्त्रियां ङीप्।

अर्चिष्मत् पु० अर्च्चिर्विद्यतेऽस्य मतुप्। १सूर्य्ये, २वह्नौ ३उपदेवभेदे च "अर्चिष्मांस्तुम्बुरुश्चैव भोरुश्च वदतांवरः। नेतारो देवदेवानामेते हि तपसान्विताः" हरिवं० ४दीप्ते त्रि०। स्त्रियां ङीप्। सा च ५अग्निपुर्य्याम्। इन्द्रलोकसुपवर्ण्यां "एतस्मादक्षिणे भागे येयं दृश्येत पूः शुभा। इमामर्च्चिष्मतीं पश्य वीतहोत्रपुरीं शुभाम्" काशीख० विवरणमग्निलोकशब्दे। ६विष्णौ पु०अर्चितशब्दे उदा०।

अर्चिस् न० अर्च्-इसि। १वह्न्यादेः शिखायां "प्रदक्षिणार्च्चिर्व्याजेन" "प्रदक्षिणार्च्चिर्हविरग्निरादद्दे" "आसीदासन्ननिर्वाणप्रदीपार्च्चिरिवोषसि" इति च रघुः २मयूखे ३वह्नौ च पु०"तेऽर्च्चिषमभिसम्भवन्ति अर्च्चिषोऽहः" छा० उ० "अग्निर्ज्योतिरहः शुक्लः" इति गीतावाक्यैकवाक्य-

त्वात् अर्चिरत्व वह्निः ४दीप्तिमात्रे न० "प्रथमादर्चिषा-मेतदनुदृगीर्ष्सुरायुधम्" कुमा० ।

अर्च्य त्रि० अर्च-स्तुतौ ण्यत् न कुत्वम् चु० अर्च-यत् वा । पूजनीये "मानर्चुरर्च्यं जगदर्च्चनीयम्" भट्टिः ।

अर्ज प्रतियत्ने भ्वादि०पर०सक०सेट् । अर्ज्जति, आर्ज्जीत् आनर्ज अर्जकः अर्जितः अर्जितवान् अर्जित्वा उपार्ज्य अर्जनम् । "अर्जकोद्ग्रथमाहारेत् । दाय०स्मृ०"नतत्पुत्रै-र्भजेतृणार्द्धमकामः स्वयमर्जितम्" मनुः । "आनर्जु-र्भुजोऽस्त्राणि" भट्टिः ।

अर्ज्ज संस्कारे चुरा० उभ०सक०सेट् । अर्ज्जयति ते आर्जि-जत् त । "अनुपन्नन् पितृद्रव्यं श्रमेण यदुपार्ज्जयेत्" स्मृतिः "परस्वान्यर्जयन्नारीरन्यदीयाः पराक्षिपन्" भट्टिः । अर्ज्जयित्वम् अर्ज्जयित्वा ।

अर्ज्जक पु० अर्ज्जयति रज्जुम् अर्ज्ज-ण्वुल् । (वावदूक) इति ख्याते वृक्षे, तत्त्वकृतन्तुना हि रज्जुर्निर्म्मीयते । अर्ज्जन-कर्त्तरि त्रि० । "अर्ज्जकोद्ग्रथमाहरेत्" स्मृतिः ।

अर्जन न० अर्ज-ल्युट् । १सम्पादने स्वामित्वसम्पादके २व्यापारभेदे च । स्वामित्वहेतवश्च "सप्त वित्तागमाः धर्म्म्या दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृत्युक्ताः "स्वामी रिक्थक्रयसंविभागाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्य-शूद्रयोः" गौ० उक्ताश्च रिक्थादयः साधारणाः सर्व्व-वर्णेषु । तत्राप्रतिबन्धोदायोरिक्थं यथा पित्रादिधने पुत्रादेः । अप्रतिबन्धोदायोविभागो यथा पत्नीप्रभृतेः । लब्धं प्रति-ग्रहः ब्राह्मणस्य तत्साधारणं "याजनाध्यापनप्रतिग्रहै-र्ब्राह्मणोधनमभ्रर्ज्जयेदिति" श्रुत्या ब्राह्मणकर्त्तृकार्ज्जनस्य याजनादिकरणकत्वनियमनात् । क्षत्रियस्य विजितं विज यलब्धमसाधारणम् । निर्विष्टं भृतिः तच्च वैश्यस्य कृषि-गोरक्षादिलब्धम् शूद्रस्य शुश्रूषया वेतनं चेति तयो-रसाधारणम् । एवञ्च मनुना "सूतानामश्वसारथ्यम्" इत्यादि यदुक्तं तत् सर्व्वं तेषामसाधारणं तदपि निर्विष्ट-शब्दाभिधेयम्" मिता० शूद्रवत् वर्णसङ्करा इति स्मृतेः 'शूद्रा-णान्तु सधर्म्माणः सर्व्वेऽपध्वंसजा स्मृताः" मनूक्तेश्च तेषां शूद्रधर्म्मातिदेशात्तथा । तच्चार्ज्जनं पुरुषार्थं न यत्नार्थं तेन यद्यस्य वर्णस्योचितं तदतिरेकेणार्ज्जितेनापि धनेन क्रतु-सिद्धिः पुरुषस्य परं नियमातिक्रमे दोषः इति जैमि-नीये लिप्सास्त्रे स्थितम् । मिताक्षरादृता तस्य चायमर्थ एवं विवृतः । "यदा द्रव्यार्ज्जननियमानां क्रत्वर्थत्वं तदा-नियमार्जितेनैव द्रव्येण क्रतुसिद्धिरिति न पुरुषस्य नियमा-तिक्रमदोषः इति पूर्व्वपक्षे सिद्धान्ते तु अर्ज्जननियमस्य पुरुषार्थत्वात् तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धि-र्भवति पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्र-मार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् । नचैतावता चौर्य्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् । लोके तत्तत् स्वत्वप्रसिद्ध्यभावात् व्यवहारविसं वादाच्च" इति । एवञ्च प्रतिग्रहाद्युपायकं स्वत्वं लौकिकमेव अतएव "सप्त वित्तागमाधर्म्म्याः" इत्यनेन तेषां धर्म्महेतुत्व-मात्रमुक्तं न तु श्रुतिप्रभृतीनां तत्तानुक्तानां स्वत्वाहेतुत्वम-पि "अर्जयितव्यापारोऽर्ज्जनमिति" दायभा० । "अर्ज स्वत्वं नापादयतीति" मिता० । "कणिशाद्यर्जनं शिलम्" मनुः । "अर्थानामर्जने दुःखमिति" नीति० अर्जधातोः प्रतियत्नार्थकतया विद्यमानपदार्थस्यैव स्वत्वसम्पाद-नार्थकत्वेन तस्य तथात्वम् ।

अर्जुन पु० अर्ज्ज-उनन् । स्वनामख्याते १वृक्षे, "सोऽङ्गणा-न्निःसृतः क्षणः कर्षमाण जटूखलम् । यमलाभ्यां प्रवृत्ताभ्यामर्ज्जुनाभ्यां निवारितः । मध्यान्निश्चक्राम तयोः शिशुः कर्षन्नुदूखलम् । तत्तस्य कर्षतो बद्धं तिर्य्य-गातमुदूखलम् । लग्नं ताभ्यां समूलाभ्यामर्ज्जुनाभ्याञ्चकर्ष सः । तावर्ज्जुनौ क्षुभ्यमाणौ तेन बालेन वत्सया । समूलविटपौ भग्नौ स च मध्ये जहास वै" इति हरिवं० । "कदम्बसर्जार्जुननीपकेतकी" रघु० । २मध्यमपाण्डवे शुक्लचरितत्वान्मध्यमपाण्डवस्यार्ज्जुनत्वम् । "पृथिव्यां चतुरन्तायां वर्त्तामि दुर्लभः समः । करोमि कर्म्म शुक्लञ्च तेन मामर्ज्जुनं विदुः" भा०वि०प० उत्तरं प्रति तस्य स्वनामव्युत्पत्तिकथनम् । स च पाण्डोः चैत्रे कुन्त्यां शक्रेण जनितः "एवमुक्ता ततः शक्र-माजुहाव यशस्विनी अथाजगाम देवेन्द्रो जनयामास चार्जु-नम् । जातमात्रे कुमारे तु वागुवाचाशरीरिणी । मेघा-गम्भीरनिर्घोषा नभोनादयतीव ह । हृष्टवतां सर्व्वभूतानां तेषां चाश्रमवासिनाम् । कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् । कार्त्तवीर्य्यसमः कुन्ति ! शिवतुल्यपराक्रमः । एष शक्र इवाजय्यो यशस्ते प्रथयिष्यति । अदित्या विष्णुना प्रीतिर्यथाऽभूदभिवर्द्धिता । तथाविष्णुसमः प्रीतिं वर्ध-यिष्यति तेऽर्जुनः" । भा०आ०प० । "पार्थः कर्णवधाय मार्गणगणान् यानर्ज्जुनः संदधे" लीला० २हैहयाधिपे कार्त्तवीर्य्ये, "एतस्मिन्नेव काले तु कृतवीर्य्यसुतोबली ।

अर्ज्जुनो नाम तेजस्वी क्षत्रियो हैहयाधिपः । दत्तात्रेय-प्रसादेन राजा बाहुसहस्रवान् । चक्रवर्त्ती महातेजा विप्राणामाश्रमेधिके । ददौ स पृथिवीं सप्तद्वीपां सवन-पर्व्वताम्" । हरिवं० ४करवीरे, ५मयूरे, "हृष्णाख्यायामित्युक्तेः" हैहये ७ध्रुवसे । दशभ्रतायुधवति त्रि० । "अहश्च कृष्णमहरर्ज्जुनं च" ऋ० ६,६,१, "अर्ज्जुनं सौरेण तेजसा शुक्लवर्णम् भा० । "कृष्णा कृष्णान्यर्ज्जुना अर्ज्जुनानि श्वेतवर्णानि" भा० "पिशङ्गभौज्ञीयुजमर्ज्जुनच्छविम्" माघः । (आजनि) इति ख्याते दृनेत्ररोगभेदे" "एकोयः शरुधिरोपमस्तु विन्दुः शुक्लो भवति तदर्ज्जुनं वदन्ति" माधवः । एकस्या-मात्मरेकस्मिन् १०पुत्रे मेदि० ११इन्द्रे "अर्ज्जुनोवै इन्द्रोयदस्य गृह्यं नाम" शत०ब्रा० । अर्जुनस्यापत्यम् इञ् । आर्जुनिः अभिमन्यौ ।

अर्जुनध्वज पुं न० ६त० । हनूमति । विवरणं कपिध्वजशब्दे ।

अर्जुनपाकी स्त्री अर्जुनः श्वेतः पाकः फलादिः यस्याः ङीप् । श्वेतपाक्यां लतभेदे हरितक्यादित्वात् फले जातस्याद्योत्तुप् लुपि प्रकृतिव्यक्तिवचने । अर्जुनपाकी तत्फले स्त्री । [३स्त्रियां गवि, ४कुट्टिन्यां च ।

अर्ज्जुनी स्त्री गौरा० ङीष् । १जर्षायां, २वाहुदायां, नद्याम्

अर्ज्जुनोपम पु० अर्ज्जुनः स्वनामख्यातः वृक्ष उपमा यस्य । (सेगुन) इति ख्याते १शाकद्रुमे, २महापत्राख्यवृक्षे च ।

अर्ण पु० ऋ–न । अकारादौ १वर्णे "पञ्चार्णोमनुरीरितः" तन्त्रम् । २गमनस्वभावे त्रि० । "ऋणोरपो अनव-द्यार्णाः" ऋ० १,१७४,२ "अर्णाः अरणस्वभावा" भा० "त्वं चिदर्ण मघवः" ऋ०५,३२,८ "अर्णं गन्तारम्" भा० । ३जले न० "अग्ने ! दिवो अर्णमच्छा" ऋ०३,२२, ३ । "अर्णमम्भः" भा० । अर्णं जलमस्त्यस्यअर्श० अच् । ४नद्याम् स्त्री । "वर्षान्नाभिषाता अर्णाः" ऋ०५,४१, १४ । "अर्णाःनद्यः, भा० । अभि+अर्ण–क्त दृढ़भावादि । अभ्यर्णम् । नि+न्यर्णम् वि+व्यर्णम् सम्+समर्णम् अभ्यासादौ न०तद्वत्तिनि त्रि० । "कालोऽभ्यर्णं जलागमः" इति सा०द० । "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः ।

अर्णव पु० अर्णांसि सन्त्यस्मिन् अर्णस्+व सलोपः । १समुद्रे । "यादोरत्नैरिवार्णवः" रघुः "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः २उदकयुक्ते त्रि० "ततः समुद्रादर्णवात्" सन्ध्यामन्त्रः "विरः समुद्रमर्णवम्" ऋ०१,१६,७ । "अर्णवसुदक-युक्तम्" भा० । अर्णांसि दात्रत्वेनास्त्यस्य मतुप् सलोपः । जलदातरि २सूर्य्ये ४इन्द्रे च "आदित्याज्जायते वृष्टिः" गीतोक्तेः सूर्य्यस्य पर्जन्याधिपत्वाच्च शक्रस्य जलदात्रत्वात्तथात्वम् । "सभानुरर्णवो नृचक्षाः" ऋ० ३,५१,२ "शतक्रतुमर्णवं भाकियं नरम्" ३,३,५१,२, अर्णवं पर्ज्जन्यात्मनोदकवन्तम्" भा० । ५सजले च । "अजएकपादनमितुरर्णवम्" ऋ० १०,६६,११ । "ब्रह्म-लोके, एतादेवताः सृष्टा अस्मिन्महत्यर्णवे" ऐ०ब्रा० । अस्य समुद्रावाचित्वेन क्षीरार्णवः जलार्णवः लवणार्णवः इत्यादौ आधारतामात्रबोधः ।

अर्णवज पु० अर्णवात् जायते जन–ड ६त० । १समुद्रफेने रत्नमा० । २समुद्रजातमात्रे त्रि० । अर्णवजातादर्थोऽस्यत्र ।

अर्णवमन्दिर पु० अर्णवः मन्दिरमिव यस्य । वरुणे ।

अर्णवोद्भव पु० उद्भवत्यस्मात् उद्+भू–अपादाने अप् अर्णव उद्भवोऽस्य । १अग्निजारवृक्षे २चन्द्रे च ३अमृते न० । ४स्त्रियां स्त्री ।

अर्णस् न० ऋच्छति ऋ–असुन् उदके नुट् चेति, नुट् । जले । "सवर्णमर्णः अथमन्यथास्य" माघः । "सिन्धु-र्नपिप्येऽर्णसा" ऋ०६,१०७,१२ । [त्रि० ।

अर्णस पु० अर्णोऽस्यास्य अर्श० अच् । १समुद्रे २जलवति

अर्णस्वत् पु० अर्णांसि सन्त्यस्मिन् मतुप् मस्य वः १समुद्रे २जलवति त्रि० ।

अर्णोद पु० अर्णांसि ददाति दा–क । १मेघे २समुद्रके त्त जलदातरि त्रि० । [२जलोद्भवमात्रे त्रि० ।

अर्णोभव पु० अर्णसि जले भवति भू–अच् ७त० । १शङ्खे

अ(आ)र्त्तगल पु० आर्त्तइव गलति गल–अच् पृषो० वा हुस्वः । नीलझिण्टिकायाम् । हुस्वाभावे आर्त्तगलश्च ।

अर्त्तन न० ऋत–ल्युट् पक्षे दृयङभावः । निन्दायाम् ।

अर्त्ति स्त्री अर्द–क्तिन् । १पीडायाम् । करणे क्तिन् । २धनुष्को-ट्याम् । "नाद्यं वाञ्छति नो निद्रासुपैत्यर्त्तिनिपीडितः" सुश्रुतः ।

अर्त्तिका स्त्री । ऋत–ण्वुल् । नाड्योक्तौ ज्येष्ठभगिन्याम् ।

अर्त्तुक त्रि० ऋत–बा० उकञ् । सर्द्दके । "समर्दैनान्विन्द-त्यर्त्तुकाह भवत्यपि हतमर्धं समर्दिन्दति" शत०ब्रा० ।

अर्थ याचने अद० चु० आत्म० द्विक० सेट् । अर्थयते आर्त्तिथत । अर्थयामास । अर्थकः अर्थी अर्थितः अर्थ्यः अर्थनीयः अर्थ-यितुम् अर्थनम् अर्थना । अर्थयित्वा अर्थयिता "सुराः समभ्यर्थयितार एते" कुमा० । "अवकाशं किलो-

त्यान् रामायाभ्यर्थितो ददौ" रघुः "अग्लोपित्वं स्थानिवत्त्वं चादन्तस्य प्रयोजनम् यत्र त्वेते न विद्येते तत्राग्लोपविकल्पनम्। तद्वलादन्त्यदीर्घश्च पुक् चेत्यङ्गापयत्यपि" कामधेनूक्तेः पुक्—दीर्घश्च अर्थापयते। सम्+समर्थने सममर्थयते समर्थनञ्च प्रमाणेन व्यवस्थापनम्। कु पीड़ने कदादेशः कदर्थयते। अभि+आभिमुख्येन प्रार्थने अभ्यर्थनीयः। "अभ्यर्थनाभङ्गभयेन साधुः" कुमा०। प्रति+प्रतिकूलाचरणे प्रत्यर्थी। "प्रत्यर्थीभूतामपि तां समाधेः" कुमा०।

अर्थ पु० अर्थ भावकर्म्मादौ यथायथम् अच्। १अभिधेये २शब्दशक्त्या बोध्ये पदार्थे च "तदर्थौ शब्दार्थावनलङ्कृती पुनः क्वापि" का०प्र० आलङ्कारिकमते स च अर्थस्त्रिविधः वाच्यो लक्ष्योव्यङ्ग्यश्चेति भेदात्। "अर्थोवाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। वाच्योऽर्थोऽभिधया बोध्यो लक्ष्योलक्षणया मतः। व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" सा०द०। तास्च तत्तच्छब्दे वक्ष्यन्ते। अन्यमते "तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने। तात्पर्य्यं हि तदर्थश्च वाक्यं तद्बोधकं यरे"। इति तात्पर्य्यप्रतिपाद्योऽप्यपरः अर्थभेदः। स च अभिहितान्वयशब्दे विवृतः। २धने। तस्य सर्व्वैरर्थनीयत्वात्तथात्वम् "अजरामरवत् प्राज्ञोविद्यामर्थांश्च चिन्तयेत्" "अर्थस्योपार्জ্জने क्लेशस्ततोऽपि परिरक्षणे" नीति०। सचार्थस्त्रिविधः शुक्लः शबलः कृष्णश्चेति भेदात् यथा "अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति। शुक्लः शबलोऽसितश्चेति। शुक्लेनार्थेन यदैहिकं करोति तद्देवमासादयति। यच्छबलेन तन्मानुष्यम्, यत्कृष्णेन तत्तिर्य्यक्त्वम्॥ स्वदत्त्युपार्জितं सर्व्वं सर्व्वेषां शुक्लम्। अनन्तरदत्त्युपात्तं शबलम्। अन्तरितदत्त्युपात्तञ्च कृष्णम्। क्रमागतं प्रीतिदायम् प्राप्तञ्च सह भार्य्यया। अविशेषेण सर्व्वेषां धनं शुक्लं प्रकीर्त्तितम्॥ उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रये। कृतोपकारादाप्तञ्च शबलं समुदाहृतम्॥ पार्श्विकद्यूतचौर्य्याप्तं प्रतिरूपकसाहसैः। व्याजेनोपार्জितं यच्च तत् कृष्णं समुदाहृतम्॥ यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च" विष्णु०सू०॥ ४प्रयोजने दृष्टे। प्रयोजनञ्च इच्छाविषयः। तच्च गौणमुख्यभेदेन द्विविधम् यत्र अन्येच्छानधीनेच्छा जायते तत् मुख्यं यथा सुखं दुःखाभावश्च तयोरिच्छाया अन्येच्छानधीनत्वात्। साक्षात् परम्परया वा तत्साधनं तु गौणं तत्र सुखदुःखाभावेच्छयैव इच्छोदयात् गौणत्वम्। प्रयोजनञ्च यद्यपि नानाविधम् तथापि शास्त्रकारैः प्राधान्येन धर्म्मार्थकाममोक्षरूपाणि चत्वार्येवाङ्गीकृतानि तत्रैव सर्व्वप्रयोजनानामन्तर्भावात्। तएव चत्वारः पुरुषार्थाः पुरुषेणेष्यमाणत्वात्। सांख्यास्तु सर्गापवर्गात्मकं द्विविधं पुरुषार्थमाहुः पुरुषस्य प्रयोजनमुद्दिश्य प्रकृतेः प्रवर्त्तनात्। एवं चतुर्विधे द्विविधे वा पुरुषार्थे मतभेदेन स्थिते तेषु मध्ये मोक्षएव परमपुरुषार्थः "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सा०सू०। "इह खलु धर्म्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षएव परमपुरुषार्थः" वे०प०। दुःखात्यन्तनिवृत्तिरूपसुखप्रयोजनस्य अन्येच्छानधीनेच्छाविषयत्वात् प्राधान्यम्। धर्म्मार्थकामास्तु तत्साधनानि तत्रापि धर्म्मोऽर्थसाधनम् अर्थः कामस्य साधनमित्यवान्तरभेदः "ईक्ष्वाकूणां दुरापेऽर्थे तदधीनाहि सिद्धयः" रघुः। "ज्ञातार्थोज्ञातसम्बन्धः श्रोतुं श्रोता प्रवर्त्तते" इत्यत्रार्थपदेनाभिधेयप्रयोजनयोर्ग्रहणम् "कस्यार्थकामौ वद पीड़यामि" "अथर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः" रघुः। ५निमित्ते "अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः" मनुः अर्थात्हेतोः कुल्लू० "अर्थोऽयमर्थान्तरलभ्य एव" कुमा० "अर्थान्तरं कारणान्तरमिति" मल्लि०। निमित्तञ्च कारणमुद्दिश्यञ्च तत्र निमित्तार्थेन "अर्थेन तु नित्यसमासो विशेष्यनिघ्नता चेति" वार्त्तिकोक्तेः नित्यसमर्थीसमासः। द्विजार्थं पयः। द्विजायै यवागूः। यूपार्थं दारु। भाष्यकृता तु यूपार्थं दारु इत्यादौ षष्ठीतत्पुरुषोऽपि साधुः खरे विशेष इत्युक्तम् "अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः" गीता "मदर्थमपि कर्म्माणि कुर्व्वन्नाप्नोति किल्बिषम्" गीता "मदर्थमन्द्रेशमृणालमन्थरः" नैष०। "परलोकसहायार्थं सर्व्वभूतान्यपीड़यन्" "तस्माद्धर्म्मं सहायार्थं" इति च मनुः। कर्म्मणि—अच्। ६विषये शब्दादौ। "इन्द्रियाणीन्द्रियार्थेभ्यः गीता" "इन्द्रियेभ्यः पराह्यर्था ह्यर्थेभ्यश्च परं मनः" क०उ०। ७ज्ञेयवस्तुनि "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्" गौ० सू०। अत्रार्थः घटादिवस्तुमात्रम्। राज्ञ उपाये ८तन्त्रावापादौ अर्थचिन्ताशब्दे उदा० ९वस्तुस्वभावे यथार्थम्। १०निवर्त्तनीये मशकार्थो धूमः। ज्योतिषोक्ते ११लग्नाद्वादशद्वितीयभवने १२प्रकारे। भावे अच् १३अभिलाषे १४प्रार्थने च कर्म्मणि यत् १५अर्थनीये विष्णौ पु० "अर्थोऽनर्थो महाकोपः" वि० स० "सुखरूपतया सर्व्वैरर्थ्यत इत्यर्थः। भा० १६फले। अर्थाय साधुः अर्थ-

दनपेतो वा यत् अर्थ्यः। अर्थादनपेते अर्थसाधने च त्रि०। "अर्थ्यामर्थपतिर्वाचम्" रघुः। "वागीशं वाग्भिरर्थ्याभिः" कुमा०।

अर्थकर त्रि० अर्थं करोति कृ-हेत्वादौ ट। अर्थहेतुकर्मकारके स्त्रियां ङीप्। अर्थकरी दण्डनीत्यादिविद्या।

अर्थकृच्छ्र न० अर्थविषये कृच्छ्रम्। अर्थस्य प्रयोजनस्य कृच्छ्रतायाम् कष्टसाध्यत्व एव तस्य तथात्वम्।

अर्थकृत् त्रि० अर्थं करोति-कृ-क्विप्। अर्थकारके।

अर्थक्रम पु० ६त० क्रमनिर्णयाय श्रुतशब्दक्रमातिक्रमेणाश्रयणीये प्रयोजनानुसारिक्रमे यथा पाठक्रमसमनादृत्याग्निहोत्रसाधनतया यवागूपाकः प्राक्क्रियते अग्निहोत्ररूपप्रयोजनादेः यवागूसाध्यत्वात्तथात्वम् यथोक्तं मीमां० यत्र प्रयोजनवशेन क्रमनिर्णयः स अर्थक्रमः। यथा अग्निहोत्रं जुहोतियवागूं पचतीत्यग्निहोत्रहोमयवागूपाकयोः। यवाग्वा वहोमसाधनत्वेन तत्पाकः प्रयोजनवशेन पूर्व्वमनुष्ठीयते। स चायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने क्रमस्य प्रयोजनबाधेऽदृष्टार्थत्वं स्यात्। नहि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चिदृष्टं प्रयोजनमस्ति येनार्थक्रमबाधेन पाठक्रमस्तत्रादिद्रियेत"।

अर्थगत त्रि० अर्थं गतः। १अर्थनिष्ठे अर्थाश्रये अलङ्कारोक्ते २दोषभेदे पु० अर्थदोषशब्दे विवरणम्। गतोऽर्थोऽस्य आहिता० वा परनि०। ३गतार्थे त्रि०।

अर्थगौरव न० ६त० खलशब्दस्यापि अर्थस्य गौरवम्। "भारवेरर्थगौरवम्" उद्भटः।

अर्थघ्न त्रि० अर्थं हन्ति ताच्छील्यादौ ट स्त्रियां ङीप्। अर्थनाशके "व्याधिता वाऽधिवेत्तव्या हिंस्रार्थघ्नी च सर्व्वदा" मनुः।

अर्थचिन्ता स्त्री अर्थानां तन्त्रावापादीनां चिन्ता। राज्याङ्गतन्त्रावापादीनां चिन्तने। "मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावपादयः" सा०द०। अर्थचिन्तनमप्यत्र न० "मन्त्री स्वच्चोभयच्चापि सखा तस्यार्थचिन्तने" इति। सा०द०अन्यमतम्। [अर्थोजातोऽस्य। २जातधने त्रि०।

अर्थजात न० अर्थानां जातम् ६त०। १अर्थसमूहे।

अर्थज्ञ त्रि० अर्थं जानाति ज्ञा-क। प्रयोजनाभिज्ञे।

अर्थतस् अव्य० अर्थ+तसिल्। १अर्थादित्यर्थे २अर्थानुसारेणेत्यर्थे ३वस्तुस्वभावादित्यर्थे च। "अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः" वे० सा०।

अर्थद त्रि० अर्थान् धनानि ददाति दा-क। १ददे धनदानेन तोषकेऽध्याये २शिष्यभेदे पु०। "आचार्यपुत्रः शुश्रूषुर्ज्ञानदोधार्म्मिकः शुचिः। आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्म्मतः" इति मनुः। ३कुबेरे पु०।

अर्थदूषण न० अर्थानां दूषणं नाशनम्। क्रोधजव्यसनमध्ये अतिशयेनासत्कर्म्मणि विनियोगेन कष्टदायके धननाशनरूपे व्यसनभेदे। "पैशुन्यं साहसं द्रोहईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः इति "दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदेति च" मनुः। "अर्थदूषणञ्च धनानामपहारः देयानामदानञ्चेति" म०त०रघुनन्दनः। [साधुः"कु०

अर्थना स्त्री अर्थ-युच्। याचने। "अभ्यर्थना भङ्गभयेन

अर्थपति पु० अर्थानां पतिः ६त०। १नटे,। "अर्थ्यामर्थपतिर्व्वाचम्" सनैषधस्यार्थपतेः सुताद्याम्" "किञ्चिद्विहस्यार्थपतिर्बभाषे"। "बलनिसूदनमर्थपतिञ्च तम्" इति च रघुः। २कुबेरे च।

अर्थप्रकृति स्त्री अर्थानां प्रयोजनानां प्रकृतिः कारणम्। १प्रयोजनहेतौ। "बीजं बिन्दुः पताका च प्रकरी कार्यमेव च। अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि" सा०द० उक्ते नाटकाङ्गे २कार्यबीजरूपपञ्चके च।

अर्थप्रयोग पु० अर्थानां धननां प्रयोगः नियोगः। ऋणदानादिदत्तौ १ऋणदानवाणिज्यादिरूपे धनसङ्ग्रहार्थके व्यवहारे। अर्थास्तन्त्रावापाद्यः ६त०। २यथायथं तन्त्रावापादेर्विनियोगे च। "अर्थप्रयोगकुशल" इति अमात्यलक्षणम्।

अर्थप्राप्त पु० अर्थतः वाचकशब्दाप्रयोगेऽपि तात्पर्य्यवशतः प्राप्तः। वाचकशब्दानुच्चारणेऽपि तात्पर्य्यवशात्ज्ञाते "अर्थप्राप्त एवात्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागो न विधातव्यः" द्व०उ०मा०।

अर्थबन्ध पु० अर्थैः विषयैः शब्दादिभिर्बन्धः। १जीवस्य शब्दादिभिः श्रोत्रसम्बन्धरूपे बन्धे २धनकृतबन्धे च।

अर्थभावना स्त्री अर्थनिष्ठा भावना भावयितव्यापार उत्पादना। भट्टमतोक्तायामर्थनिष्ठायां यागसाधनिकायां स्वर्गाद्युत्पादनायां स्वर्गादीष्टं यागेन साधयेदित्येवंरूपायाम्। भावना च द्विधा शाब्दी आर्थी च विवरणं भावनाशब्दे।

अर्थमर्य्यादा स्त्री अर्थस्य कारणस्य मर्य्यादा इतरसहकारेण सामग्रीसमवधानम्। सामग्रीसमवधाने, सामग्रीसमवधाने हि

कार्य्योत्पत्तिरर्थप्राप्तेति तदुत्पादस्यार्थमर्य्यादाधीनत्वम् ।

अर्थमात्र न० अर्थ एव मयूर० अवधारणाद्यर्थमात्रशब्देन नित्यस० । १अवधारितेऽर्थे । "भोजनाच्छादनाभ्यधिकं सत्यमर्थमात्रं न सम्मन्यते" इति ह० भा० । अल्पार्थमात्राशब्देन ऐत० । २अल्पधनांशे स्तो दृढत्वार्थे च मात्राशब्देन । ऐत० ।३धनबाहुल्ये । कथं मयास्येयमर्थमात्राहर्त्तव्या" महती धनमात्रेत्यर्थः ।

अर्थवत् त्रि० अर्थोऽस्यास्य अस्तीति मतुप् मस्य वः । १अर्थयुक्ते २सार्थके "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" पा० । ३प्रयोजनयुक्ते ४फलयुक्ते च "अपसव्य उमेतस्वेदाहितान्याहुतार्थवत् । या० स्मृ० "विष्णूत्सर्गगुह्यार्थं स्वदाद्यादेयमर्थवत्" मनुः ५असन्निहितधनवति त्रि० । सन्निहिते तु इनि अर्थीत्येव । स च व्यवहारे वादिनि रूढः "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" या० स्मृ० । स्त्रियासुभयत्र ङीप् । ५पुरुषे पु० राजनि० । अर्थमर्हति अर्थेन तुल्यं क्रिया, अर्थे इव वति । ६अर्थार्हे ७अर्थतुल्यक्रियायाम् ८अर्थसदृशे आम्रवे च अव्य० ।

अर्थवाद पु० अर्थस्य लक्षणया स्तुत्यर्थस्य, निन्दार्थस्य वा वादः वद-करणे घञ् । १प्रशंसानीयगुणवाचके, २निन्दनीयदोषवाचके च शब्दविशेषे । भावे घञि । २तत्कथने । अभिधया गौण्या वा दृष्ट्या भूतमर्थं वदन् स्वाध्यायविध्यापादित प्रयोजनवत्त्वलाभाय विधिमाकाङ्क्षन्नर्थवादः" अर्थवादेन हि क्वचिद्विधिशक्तिरवसीदन्ती विध्यर्थे शीघ्रं प्रवर्त्तयितुमुत्तभ्यते । सचं चतुर्विधः "स्तुतिर्निन्दा परक्रतिः पुराकल्प इत्यर्थवादः" गौ० स्मृतौक्तेः । तत्र स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसार्थकं वाक्यं यथा "सर्व्वस्य जिता वै देवाः सर्वमजयन् सर्वस्य व्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्यादि" । अनिष्टसाधनताद्वारा विध्यर्थव्यावर्त्तकं वाक्यम् निन्दा । यथा "एष वाव प्रथमोयज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वा अन्येन यजते स मर्त्तं पततीत्यादि" । पुरुषविशेषनिष्ठतया कथनं परक्रतिः परक्रिया, यथा "वयामेवाग्नेऽभिधारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्नेऽभिधारयन्त्यग्नेःप्राणाः पृषदाज्यमित्यभिदधतीत्यादि" ऐहिकमात्रचरिततया कीर्त्तनं पुराकल्पः । एवमन्येऽपि अर्थवादा ब्राह्मणरूपाः सामसंहिताभाष्ये माधवाचार्य्येण दर्शिताः यथा "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रतिः पुराकल्पोयावधारणकल्पना" इति "तेन ह्यत्रं क्रियत" इति हेतुः "एतद्भोदधित्वमिति" निर्वचनम् । "अमेध्या वै माषा" इति निन्दा "वायुर्वै क्षेपिष्ठेति" प्रशंसा "तद्क्वचिकित्सन् जुहवानीमाहोषामिति' संशयः 'यजमानेन सम्मिता औदुम्बरी भवतीति" विधिः 'माषानेव मह्यं पचते" इति परक्रतिः "पुरा ब्राह्मणा अभैषुः" इति पुराकल्पः । "यावतोऽशान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति' विशेषावधारणकल्पनेत्युदाहृतं च तत्रैव । लौगाक्षिणा तु त्रैविध्यमुक्तम् "अर्थवादश्च त्रिविधः गुणवादोऽनुवादोभूतार्थवादश्चेति तदुक्तम् ॥ "गुणवादोविरोधे स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः" ॥ गुणवादश्च "यथा सिंहो माणवक" इत्यादौ माणवके सिंहाभेदस्य विरोधेन तद्गतदंशाभेदोवोध्यते तेन समर्थत्वादिरूपं तद्वृत्तिगुणमनुवदति प्रतिपादयतीति गुणवादः अन्ये तु "यजमानः स्तृणीते" इत्यादौ प्रत्यक्षादिभिरवधारितेऽर्थे तमेवार्थमनुवदतीत्यनुवादः यथा "वह्निर्हिमस्य भेषजं, "भूमिरावपनं महत् सूर्य्यस्तापकर" इत्याहुः । तद्ज्ञानादेतदुभयार्थकत्वाभावात् तथा चैतदुभयभिन्नं भूतं सिद्धार्थं वदतीति भूतार्थवादः इति । अवच्छानेकविधः क्वचिदुक्तः, स्तुत्यर्थं वादः फलार्थं वादः सिद्धार्थं वादः निन्दार्थं वादः परक्रतिः पुराकल्पः मन्त्रश्चेति" । तत्र स्तुत्यर्थवादो यथा 'वायुर्वै क्षेपिष्ठा देवता" इत्यादि॥ फलार्थं वादो यथा "तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजेतेत्यादि' । "प्रतितिष्ठन्ति ह वै यएता रात्रीरुपयन्तीत्यादि' च यद्यप्येतस्य परक्रतावेव पर्य्यवसानं तथापि फलस्य विशेषतयाऽनभिधानात्तादृप्येण पृथगुपन्यासः ॥ सिद्धार्थवादो यथा । "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ॥ अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदमित्यादि" ॥ निन्दार्थवादो यथा 'अन्धन्तमस्ते प्रविशन्ति ये के चात्महनोजना" इत्यादि॥ परक्रतिः परक्रत्यभिधानं परक्रियोक्तिः । एवञ्च लौगाक्षिभास्करोक्तस्य "विरोधेनानुवादः स्यादित्यादि कारिकोक्तस्य त्रैविध्यस्य मध्ये स्तुत्यर्थवादस्यैवावान्तरभेदेन तस्य सप्तविधत्वमिति भेदः । ३अन्यतात्पर्य्यावधारणार्थे लिङ्षट्कान्तर्गते लिङ्भेदे च । "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये इति वे० सा० यथा "उत तमादेशमप्राक्षो"येनाश्रुतं श्रुतम् ।इत्यादिनाऽद्वितीयवस्तुनः प्रशंसनम्" का० श्रौ० भा० उक्तम् ।

अर्थविज्ञान न० ऐत० शुश्रूषाद्यष्टविधायुक्तधीगुणान्तर्गते गुणभेदे हे० ।

अर्थविद् त्रि० अर्थं कार्य्यं वेत्ति विद-क्विप् । कार्य्याभिज्ञे

"विवक्षितामर्थविदस्तत्त्वज्ञं प्रतिसंहृताम्" माघः ।

अर्थविप्रकर्ष पु० अर्थस्य अर्थबोधस्य विप्रकर्षः बोधनस्य विलम्बेनोत्पादनम् । पूर्वपूर्वमपेक्ष्य उत्तरोत्तरस्य विलम्बेनार्थबोधने "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् "जै०सू० । तथाहि अनपेक्षत्वरूपायाः द्वितीयादिश्रुतेः अर्थप्रकाशनसामर्थ्यरूपलिङ्गापेक्षया शीघ्रार्थबोधकत्वम् इति तस्याः सर्वतः प्राबल्यम् एवं लिङ्गस्य वाक्याद्यपेक्षया शीघ्रार्थोपस्थापकतया बलवत्त्वम् । विष्टतिः बलाबलाधिकरणशब्दे ।

अर्थव्ययज्ञ त्रि० अर्थस्य धनस्य व्ययं तत्प्रकारं जानाति ज्ञा—क । किं धनं, कथं,कुत्र, कियत्, कस्मै वा व्यय—तव्यमिति विशेषाभिज्ञे ।

अर्थव्यापाश्रय पु०अर्थस्य प्रयोजनस्य व्यपाश्रयः । १प्रयोजनसम्बन्धे २अभिधेयाश्रये । ब० । ३सप्रयोजने त्रि० ।

अर्थशास्त्र न० अर्थस्य भूमिधनादेः प्रापकं शास्त्रं शाक०त० । १नीतिशास्त्रे, अभिचारादिकर्म्मप्रतिपादके २शास्त्रे च । "अर्थशास्त्रात्तु बलवत् धर्म्मशास्त्रमिति स्थितिः" या०स्मृ० विष्टतमेतन्मिताक्षरायाम् "यद्यपि समानकर्तृकतया अर्थशास्त्रधर्म्मशास्त्रयोः स्वरूपगतो विशेषोनास्ति तथापि प्रमेयस्य धर्म्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितत्वाद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव । "गुरुर्वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन्। नाततायिवधे दोषोहन्तुर्भवति कश्चन। प्रकाशं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति" तथा "आततायिन मायान्तमपि वेदान्तगं रणे। जिघांसन्तञ्जिघांसीयान्न तेन ब्रह्महा भवेत्" इत्याद्यर्थशास्त्रम् । "इयं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् सकामतो ब्रह्मवधे निष्कृतिर्न विधीयते" इत्यादि धर्म्मशास्त्रमनयोर्विरोधे धर्म्मशास्त्रं बलवदिति युक्तं"मित्यन्यमतमुक्त्वा । "हिरण्यभूमिलाभेभ्योमितलब्धिर्वरा यतः । अतो यतेततत् प्राप्तौ" इत्यर्थशास्त्रम् । "धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति धर्म्मशास्त्रम् । तयोः क्वचिद्विषये विरोधो भवति यथा चतुष्पाद्व्यवहारे प्रवर्तमाने एकस्य जयेऽवधार्यमाणे धर्म्मानुसरणम् न मितलाभः । अन्यस्य तु जये मितलब्धिर्धर्म्म-शास्त्रमनुसृतम्भवति तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत् अतएव "धर्मार्थसन्निपाते अर्थपाक्ष्यं एतदेवेति" प्रायश्चित्तस्य गुरुत्वन्दर्शितमापस्तंबेन" इति ।

अर्थशौच अर्थानां तदुपायानां शौचम् तदर्जने शुद्धिः । अन्यायेन धनोपार्ज्जनपरिहारेण अर्थार्ज्जनशुद्धौ "सर्वेषामेव शौचानामर्थशौचं परं स्मृतमिति" मनुः ।

अर्थसंग्रह पु० ६त० । धनसञ्चये ।

अर्थसंस्थान न० अर्थानां धनानां संस्थानं स्थितिर्यस्मात् सम्+स्था—अपादाने ल्युट् वा । १धनोपार्जनसाधन प्रतिग्रहादौ । २भावे ल्युट् ६त० । ३अर्थस्थितौ ।

अर्थसञ्चय पु० अर्थानां धनानां सञ्चयः संग्रहः समुदायश्च । १धनसंग्रहे । "कुदेशमासाद्य कुतोऽर्थसञ्चयः" इति नीति० । २धनसमूहे च ।

अर्थसमाज पु० अर्थानां कारणानां वा समाजः समूहः । १बहुविधार्थसमूहे २कारणसमूहे च । "अर्थसमाजग्रस्तत्वात् नीलघटत्वादिकम् न कस्यचित् कार्य्यतावच्छेदकमिति" गदा० । तथाहि घटत्वं दण्डादेः कार्य्यतावच्छेदकम् । नीलत्वन्तु नीलकपालस्येति भिन्नभिन्नकारणस्यैव तत्तत्कार्य्यतावच्छेदकम् तथाच नीलघटत्वं न कस्याप्येकस्य कारणस्य कार्य्यतावच्छेदकम् नीलघटत्वस्य नाना कारणस्यैव कार्य्यतावच्छेदकत्वात् एवञ्च तस्य कारणसमाजग्रस्तत्वात् न कस्यापि कार्य्यतावच्छेदकत्वम् । एवमन्यदप्युदाहार्य्यम् । २धनसमूहे च ।

अर्थसमाहार पु० ६त० । १धनसंग्रहे सम्यगुपायेनार्ज्जने ते च उपायाः "सप्त वित्तागमा धर्म्म्या दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेति" स्मृत्युक्ताः साधारणाः "ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्दिष्टं वैश्यशूद्रयोः गौ०उक्ताः "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्জ্জयेदितिस्मृत्युक्ताश्च ब्राह्मणादेः यथायथम् असाधारणाः ज्ञेयाः । २धनसमूहे च ।

अर्थसम्बन्ध पु० अर्थस्य धनस्य वाच्यादर्थस्य वा सम्बन्धः । १धनसम्बन्धे वाच्यार्थसम्बन्धे । २ धनसम्बन्धप्रयोजकाश्च अपतितपुत्रत्वादयः शास्त्रीयाः क्रयादयश्च लौकिकाः ।

अर्थसिद्ध अर्थात् अर्थान्वयविशेषात् सिद्धः । शब्दादिनाऽबोधनेऽपि अन्वयबललभ्ये पदार्थे" यथा घटमानयेति वाक्ये घटस्य क्रियेतरत्वमन्वयबललभ्यं न च तत्र शब्दशक्त्याद्यपेक्षा । तथा च शाब्दबोधे योग्यतायाज्ञानस्य हेतुतया क्रियेतरघटएव जलाहरणप्रयोजकत्वावधारणेन तत्रैव प्रवृत्तिर्न तरघटादौ एवमन्यत्रापि । अर्थः प्रयोजनं धनं वा सिद्धोऽस्य यत्र० । २सिद्धार्थे सिद्धप्रयोजने ३स्वतः सिद्धधने च त्रि० ।

अर्थसिद्धि स्त्री अर्थतः योग्यान्वयवशात् सिद्धिः। १अपदार्थस्य तात्पर्यविषया सिद्धौ। ६त०। २धनसिद्धौ।

अर्थहर त्रि० अर्थान् धनानि हरति ताच्छील्यादौ ट स्त्रियां ङीप्। परकीयधनहरणशीले चौरादौ।

अर्थहीन त्रि० अर्थेन धनेन हीनः। १धनहीने दरिद्रे। २वाच्यार्थहीने च।

अर्थागम पु० अर्थस्य आगमः। १आये। अर्थागमोनित्यमरोगिता च"नीति०। अर्थ आगमस्यतेऽनेन करणे घञ्। २धनार्जनोपाये क्रयादौ। ३वाच्यादर्थापतने च "दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते" सा०द०।

अर्थान्तर न० अन्योऽर्थः अर्थान्तरं मयूर०त०। १अन्यार्थे, "बुद्धिरूपलब्धिर्ज्ञानमित्यनर्थान्तरमिति" सांख्यम्। न्यायमते उद्देश्यसिद्ध्यर्थं प्रयुक्ते शब्दसामर्थ्यादनुद्देश्यसिद्ध्यनुकूले २वाक्ये। तस्य प्रतिवादिनोद्भावने वादिनिग्रहः। "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासोहेत्वन्तरमर्थान्तरं फल्गुत्तरमित्यादि" गौ० सूत्रेण निग्रहस्थानान्युक्त्वा "प्रकृतादर्थादसम्बन्धार्थोऽर्थान्तरमिति" लक्षितम्। प्रकृतात् प्रकृतोपयुक्तात् ल्यब्लोपे पञ्चमी तेन प्रकृतोपयुक्तमर्थमपेक्ष्यासम्बन्धार्थाभिधानमर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फल्गुतार्थः यथा शब्दोऽनित्यः कृतकत्वात् इत्युक्त्वा शब्दोगुणः स चाकाशस्येत्याद्युक्तिः" न्या०वृत्तिः। शब्दस्यानित्यत्वसाधने प्रवृत्तेस्य गुणत्वसाकाश्यवृत्तित्वस्यचसाधने प्रकृतोपयोगित्वं नास्तीति तस्य तथात्वम्। विवरणं निग्रहस्थानशब्दे। अर्थशब्दस्य कारणपरत्वे २कारणान्तरे "अर्थोऽयमर्थान्तरलभ्य एव" कुमा०"अर्थान्तरेण कारणान्तरेण लभ्य" इति मल्लि०।

अर्थान्तरन्यास पु० अर्थान्तरं न्यासतेऽत्र। अर्थालङ्कारभेदे "सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते॥ साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः"। क्रमेणोदाहरणानि। "दृढत्वक्षायःकार्यान्तं चोदीयानपि गच्छति। सम्भूयाम्भोधिमभ्येति महानद्या नगापगा"॥ अत्र द्वितीयार्द्धगतः सामान्योऽर्थः सोपपत्तिकः क्रियते। "यावदर्थपदां वाचमेवमाधाय माधवः। विरराम महीयांसः प्रकृत्या मितभाषिणः" अत्र सामान्येन विशेषसमर्थनम्। "पृथ्वि! स्थिरा भव भुजङ्गम! धारयैनां त्वं कूर्मराज! तदिदं द्वितीयं दधीथाः। दिक्कुञ्जराः! कुरुत तत्रितये दिवीर्षामार्थ्यः करोति हरकार्मुकमाततज्यम्" अत्राततज्याकरणं पृथ्वीस्थैर्यादेः कार्यस्य समर्थकम्। "सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः" इत्यादौ सम्पद्हरणं कार्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम्। एतानि साधर्म्ये उदाहरणानि वैधर्म्ये यथा "दृत्यमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्। शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः"॥ अत्र सामान्यं विशेषस्य समर्थकम्। "सहसा विदधीतेति' अत्र सहसा विधानाभावस्यापत्पदत्वं विरुद्धं कार्यं समर्थकम्" सा०द०।

अर्थापत्ति स्त्री अर्थस्य अनुक्तार्थस्य आपत्तिः सिद्धिः। शब्देनानुपस्थापितार्थस्यसिद्धिरूपे मीमांसकोक्ते १प्रमितिभेदे। यथा पीनोदेवदत्तोदिवा न भुङ्क्ते इत्यादौ पीनत्वविशिष्टस्य देवदत्तस्य रात्रिभोजित्वरूपार्थस्य शब्दानुक्तस्यापि सिद्धिः। अर्थस्यापत्तिर्यतः। २तत्साधने च यथोक्तं वे० प०। "तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्रोपपाद्यज्ञानं करणम् उपपादकज्ञानं फलम्। येन विना यदनुपपन्नं तत्तत्रोपपाद्यम् यस्याभावे यस्यानुपपत्तिः तत्तत्रोपपादकं यथा रात्रिभोजनेन विना दिवाभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यं यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं रात्रिभोजनकल्पनारूपायां प्रमितौ, अर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दोवर्त्तते। कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थेनापत्तिः कल्पना यस्यादिति बहुव्रीहिसमासेन वर्त्तते इति फलकरणयोरुभयोस्तत्प्रयोगः। नचेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्वयव्याप्यज्ञानेनान्वयिभ्वनन्तर्भावात्। व्यतिरेकिणश्चानुमापकत्वं प्रागेव निरस्तम् अतएवार्थापत्तिस्थलेऽनुमीनोमीति नानुव्यवसायः किन्वनेनेदं कल्पयामीति"। "अद्वैतागमनासीरे साधुसा धुन्वती परान्। सेवामेवार्ज्जयत्यर्थापत्तिपत्तिपरम्परा"ख०खा०। सांख्यादिभिश्चेयं प्रमाणान्तरमपि तु अनुमानेऽन्तर्भवतीत्युक्तम् यथा"एवमर्थापत्तिरपि न प्रमाणान्तरं तथाहि जीवतश्चैत्रस्य गृहाभावादर्शनेन बहिर्भावस्याद्दृष्टस्य कल्पनमर्थापत्तिरभिमता दृङ्नानां साध्यनुमानमेव। यदा खलु व्यापकः सत्त्वैकत्र नास्ति तदान्यत्रास्ति, यदा व्यापकएकत्रास्ति तदान्यत्र नास्तीति सुकरः स्वगरीरे एव व्याप्तिग्रहः। तथाच सति गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव। न च चैत्रस्य क्वचि-

त्सत्त्वेन गृहाभावः शक्योऽपह्नोतुं येनासिद्धोगृहाभावो बहिर्भावे न हेतुः स्यात् । न च गृहाभावेन वा सत्त्वमपह्नूयते येन सत्त्वमेवानुपपद्यमानमात्मनः सत्तां बहिरवस्थापयेत् तथाहि चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्यते, गृहसत्त्वं वा ? न तावदात्र कश्चन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन, भिन्नविषयत्वात् । देशसामान्येन गृहविशेषाक्षेपोऽपि प्राक्षिक इति समानविषयकतया विरोध इति चेन्न प्रमाणनिश्चितस्य गृहेऽसत्त्वस्य प्राक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपातोगात् । नापि प्रमाणनिश्चितोगृहाभावः प्राक्षिकस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमात्रमपि प्रतिक्षेप्तुं, सांशयिकत्वं वापनेतुमर्हतीति युक्तं गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते न तु सत्त्वमात्रं तस्य तदौदासीन्यात् । तस्मात् गृहाभावेन लिङ्गेन सतो बहिर्भावोऽनुभीयत इति युक्तम् । एतेन विरुद्धयोः प्रमाणयोर्विषयव्यवस्थया अविरोधापादनमर्थापत्तेर्विषयइति परास्तम् अवच्छिन्नावच्छिन्नयोर्विरोधाभावात् । उदाहरणान्तराणि चार्थापत्तेरेवमेवानुमानेऽन्तर्भावनीयानीति" सां कौ० । व्याख्यातञ्चैतदन्नाभिस्तट्टीकायां यथा "व्यापकस्य देशविशेषेऽस्तितावपि देशान्तरे सत्त्वमवगम्यते इत्याह व्यापकः सन्नित्यादि । सन् सत्ताश्रयः । व्यापकः सत्त्वव्यापकः, तथा च । सन् चैत्रो बहिरस्ति गृहेऽस्तित्वात्स्वशरीरवदित्यनुमानादेवार्थापत्ति-विषय—सिद्धिरिति भावः । सत्ताश्रयस्य सतः पक्षीकरणात् सत्ताऽसत्त्वयोश्च विरोधितया सत्त्वप्रतिरुद्धः कथं गृहेऽसत्त्वरूपो हेतुरसिद्धेत् तथाच स्वरूपासिद्धहेतुना कथं बहिःसत्त्वरूपसाध्यसिद्धिरिति आशङ्क्य समाधत्ते न च चैत्रस्येत्यादिना । गृहाभावः गृहासत्त्वम् बहिर्भावः बहिःसत्त्वम् । ननु गृहेऽसत्त्ववतः कथं सत्ताश्रयता सत्त्वासत्त्वयोर्विरोधित्वात्तथा चाश्रयासिद्धिरित्याशङ्क्य समाधत्ते न च गृहाभावेनेति गृहासत्त्वेनेत्यर्थः । गृहासत्त्वस्य गृहसत्त्वं प्रत्येव विरोधिता न तु सत्त्वसामान्यं प्रतीति समर्थयितुं विकल्पयति तथाहि चैत्रस्येति । ननु सत्त्वाश्रयसामान्यमाक्षिपत् देशसामान्यमेवाक्षिपति देशसामान्यमाक्षिपता च तेन तन्मध्यवर्त्तिनोगृहरूपदेशस्यापि समाक्षेपात् गृहस्यापि प्राक्षिकसत्त्वलाभेन तेन सह गृहासत्त्वस्य विरोधित्वात् पुनः स्वरूपासिद्धिरित्याशङ्क्य देशसामान्येनेति आक्षिप्यमाणेनेत्यादिनाच सामान्यदेशाक्षेपेणैव विशेषदेशस्याक्षेपइति भावः । परिहरतीति नेति । प्राक्षिकतया पक्षे प्राप्ततया। सांशयिकेन संशयमापन्नेन ।"सामान्यविषयं सत्तावाक्यं "गृहविषयं न वेति" संशयमात्रलब्धेन-गृहसत्त्वेन प्रतिक्षेपायोगात् तस्य दुर्बलतया प्रतिबन्धकत्वानौचित्यात् । प्रमाणनिश्चितस्य प्राक्षिकस्य गृहासत्त्वस्य गृहसत्त्वं प्रत्येव प्रतिबन्धकत्वं न तु सत्त्वसामान्यं प्रतीति व्यवस्थापयन्नाह नापि प्रमाणेति । अस्य चैत्रस्य । प्रतिक्षिपन् प्रतिरुन्धन् । प्रतिक्षेप्तुं प्रतिरोद्धुमर्हतीत्यन्वयः । सांशयिकत्वं संशयमापन्नत्वम् । एतस्य च सत्त्वमात्रस्येत्यादिः । अपनेतुमपवारयितुम् । विषयविशेषे एव विरोधित्वमित्युपसंहरति युक्तमित्यादिना एतावता प्रबन्धेन व्यवस्थापनेनाविरोधापादनम् समावेशनमित्येवार्थापत्तेः फलं तत् निरस्यति एतेनेति । वक्ष्यमाणहेतुनेत्यर्थः परास्तमित्यनेनान्वयः । विरोधाभावे हेतुं वदन् निरसनहेतुं द्योतयति अवच्छिन्नेत्यादि गृहावच्छिन्नसत्त्वं प्रत्यक्षविषयः, गृहानवच्छिन्नसत्त्वमनुमानविषय इत्येकविषयत्वाभावेन—विरोधाभावात् विरोधस्यैव तत्रासङ्गात् अर्थापत्त्या किं समाधास्यते इति भावः"। २अर्थालङ्कारभेदे 'दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते" सा० द० । "मूषिकेण दण्डो भक्षित" इत्यनेन तत्सदृचरितमपूपभक्षणमर्थादायातं भवति इत्येष न्यायो दण्डापूपिका । अत्र च क्वचित् प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात् प्राकरणिकार्थस्येति द्वौ भेदौ । क्रमेणोदाहरणे । "हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले। मुक्तानामप्यवस्थेयं के वयं क्वरकिङ्कराः' । विललाप सवाष्पगद्गदं सहजामप्यवहाय धीरताम् । अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम्" ॥ "यदुक्तमर्थादापद्यते सार्थापत्तिः" इति सुश्रुतोक्ते ४तन्त्रयुक्तिभेदे च ।

अर्थिक पु० अर्थयते इत्यर्थी याचकः कुत्सितार्थी कन् । निद्रागतन्टपादेर्जागरणार्थं नियुक्ते स्तुतिपाठकादौ ।

अर्थित त्रि० अर्थ—गौणे कर्म्मणि क्त । १याचिते यस्य सकाशात् याच्यते स तस्मिन् । "अवकाशं किलोदन्वान् रामायाभ्यर्थितोददौ" रघुः । तस्याविवक्षायां मुख्ये कर्म्मणि क्त । याचनाकर्म्मणि २पदार्थे यद्वस्तु कस्यचित् समीपे याच्यतेस्म तस्मिन् । अर्थिनो याचकस्य भावः तल् । ३याच्ञायां स्त्री ।

"न व्यकृन्यत कदाचिदर्थिता" रघुः । याच्ञायास्तु व्याघातः याच्ञाफलालाभ एव भवति । "यद्यर्थिता तु दारैःस्यात् क्लीवादीनां कथञ्चन" मनुः । ४कामनायाञ्च ।

अर्थिन् त्रि० अर्थ+अस्त्यर्थे इनि । १याचके, २सेवके, असन्निहितधने ३धनस्वामिनि । "नैच्छतार्थिनमवज्ञया शुद्धः" "यात्रयादिव पराङ्मुखोऽर्थिन" इति च माघ. "यथाकामार्च्चितार्थिनाम्" "ततः समानीय स मानितार्थी" इति च रघुः । ४कार्य्यार्थिनि "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" या०स्मृ० । "स धर्म्मस्यसखः यच्चटू अर्थिप्रत्यर्थिनां स्वयम्" रघुः स्त्रियां ङीप् । "कान्तार्थिनी तु या याति" इत्यमरः सन्निहितधने तु अर्थवानित्येव ।

अर्थिसात् अव्य० अर्थि+च्वेरीयमधीनं करोति अर्थिन्+सात् । याचकाधीनतया कृते देये । "विभज्य मेरुर्न यदर्थिसात्कृतः" नैषधम् । कृभ्वस्त्यादियोगएवास्य साधुता ।

अर्थे अव्य०—के । साध्वा० । अर्थं कृत्वा अर्थे कृत्वा इत्यर्थे असार्थकं सार्थकं साम्याद्वेत्यर्थे गणरत्ने तु "विकल्पने प्रश्नतीनामेदन्तत्वं लवणादीनाञ्च मान्तत्वं गणपाठसामर्थ्यादेव यद्वा सप्तमीप्रतिरूपकम् द्वितीया प्रतिरूपकञ्च निपातनात्" इत्युक्तम् । तथाच २अर्थशब्दार्थे च ।

अर्थोपमा स्त्री अर्थेन नतु शब्देन उक्ता उपमा । लुप्तोपमाभेदे । विवरणञ्चोपमाशब्दे ।

अर्थोपक्षेपक पु० अर्थान् प्रयोजनानि उपक्षिपति उप+क्षिप+ण्वुल् । नाटकाङ्गभेदे विष्कम्भकादिपञ्चके "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ । चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि" सा०द० ।

अर्थ्य त्रि० अर्थात् प्रयोजनादनपेतः यत् । सार्थके सप्रयोजने "वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे" कुमा० । "अर्थ्यामर्थपतिर्वाचम्" रघुः । "स्तुत्यं स्तुतिभिरर्थ्याभिः" रघुः । २पण्डिते पु० । अर्थस्य भावः यत् । ३वस्तुस्वभावे । अर्थादागतः । ४न्याय्ये । अर्थ—कर्म्मणि यत् । ५याचनाकर्म्मणि अर्थनीये । अर्थाय साधुः यत् । ६अर्थसाधने त्रि० ।

अर्द् पीड़ने भ्वादि० उभ० सक० सेट् । अर्दति ते आर्दीत् आर्दिष्ट । "रक्षःसहस्राणि चतुर्दशार्दीत्" रघुः । आनर्द्द अर्दकः अर्दी अर्दित्वा अर्दितः । अति—अतिपीडने । अत्यर्दितः अभि+आभिमुख्येन पीडने । "अभेश्चाविदूर्य्ये" भा० उक्तेः वामीप्ये च अभ्यर्द्दः समीपवर्त्ती "कालोभ्यर्द्द जवागमः" सा०द० । अन्यत्र अभ्यर्दितः । निस्+निर्+वा—भृशपीडने । "सोऽस्यायं पराङ्मेव प्राणो निरर्दति" शत० ब्रा० । वि+विशेषेण पीड़ने "तद् या जर्म्मी व्यर्दितः पशौ वा पुरुषे वा" शत० ब्रा० । सम्+समर्द्दः नि+न्यर्द्दः वि+व्यर्द्दः ।

अर्द् याचने, गतौ, सक० पीड़ायां अक० स्वादि० पर० सेट् । अर्द्दति आर्दीत् । याचने "अरट्टघनं नार्द्दति चातकोऽपीति" रघुः ।

अर्द् बधे चुरा० उभय० सक० सेट् । अर्द्दयति ते आर्द्दिदत् त । "येनार्द्दिदत् दैत्यपुरं पिनाकी" भट्टिः । "अव्यर्द्दी गिरिकूटाभानभ्यर्द्दीनार्द्दिदत् द्रुतम्" भट्टिः । सम्+सम्यक्पीड़ने "यन्नारसस्य सहसा त्रिभिर्वार्णैः समार्द्दयत्" भा० व० प० प्रति+प्रतिरूपपीड़ने यस्य यत्कर्त्तृकं पीड़नं तेनैव पुनस्तस्य पीड़ने "प्रत्यर्द्दयत संक्रुद्धो राघवः पुनराहवे" रामा० ।

अर्द्दन न० अर्द्द—ल्युट् । १गतौ २पीड़ायां ३बधे ४याचने च ।

अर्द्दना स्त्री चु० अर्द्द—भावे युच् । १हिंसायां बधे ।

अर्द्दित त्रि० अर्द्द—क्त । १पीड़िते, २गते, ३याचिते च । ४रोगभेदेन० "अर्दयित्वाऽनिलोवक्त्रमर्दितं जनयत्यतः । वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते । शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् । ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना । यस्माद्गजो रोमहर्षो वेपथुर्नेत्रसाविलम् । वायुरर्द्धं त्वचि स्थापस्तोदोमन्याहनुग्रहः । तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः । ग्रीवास्या निमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः । न सिध्यत्यर्दितं वाई त्रिवर्षं वेपनस्य च" । इति सुश्रु० । "क्षयकासश्वास प्रणाशोऽर्द्दितापहम्" । "हनुग्रीवमधोमन्यमर्दितञ्च सुदारुणम्" इति च सुश्रु० ।

अर्द्दितिन् त्रि० अर्दितमस्त्यस्य इनि । नेत्रादिरोगभेदयुक्ते "अर्दिती कर्णशूली च दन्तरोगीच मानवः" सुश्रु० ।

अर्द्ध पु० ऋध—हृद्धौ भावादौ घञ् । १हृद्धौ । आधारे घञ् । २गृहादौ । "आ हृन इन्द्र ! हृतहव्यमर्द्धमागहि" यजु० २३,६५ । "अर्द्धम् निवासदेशम्" वे० दी० । अधि+ऋध-अच् । हृद्धिप्राप्त्याधारे २वायौ । "कतमोऽध्यर्द्ध इति" प्रश्ने "योऽयं पवते" इत्युत्तरं दत्त्वा "तदाहुर्यदयमेकपूर्वेण पवतेऽथ कथमध्यर्द्ध" इति प्रश्ने उत्तरम् । 'यदस्मिन्निदं सर्व्वमध्यार्ध्नोत् अस्मिन्वायौ सति इदं सर्व्वम् अधिकमार्ध्नोति प्राणः आप्नप्राप्नोतिरिति तेनाध्यर्द्ध" इति का० उ० । करणे घञ् । ४अवयवरूपे खण्डे अवयवेनैवोपचयात् अवयविनो

दृद्धिरिति तस्य तथात्वम् । समखण्डवाचित्वे तु न० । "अर्द्धं नपुंसकम्" पा० सूत्रे तथैवोक्तेः । ५समीपे अर्धदेवशब्दे उदा० समांसवाचिनस्तु एकदेशिसमासः । अर्धर्चैः अर्धकायम् अर्धपिप्पली क्वचित् षष्ठीसमासः "एतच्छतार्द्धमात्रत्व त्रैलोक्यविजयी भवेत्" तन्त्रम् । एतत् पूर्वकनौशब्दान्ततत्पुरुषात् अच् अर्धनावम् स्वार्थांसु वा अर्धखारम् अर्धखारो । खण्डमात्रवाचित्वे षष्ठीसमासः । "क्रोशार्धं प्रकृतिपुरस्सरेण गत्वा" रघुः । अवयवावयविनोर्भेदात् क्वचित् धर्म्मिपरता । अर्ध्यते वर्ध्यते ऋध्-णिच्-कर्म्मणि अच् । ६ खण्डिते त्रि० जसि अर्धाः अर्धे । [क्रियासमाप्तिस्तयोर्द्धे कृते ।

अर्द्धकृत त्रि० अर्धं कृतम् । असम्पूर्णकृते यस्य यथा करणे

अ(आ)र्धकौडविक त्रि० अर्धकुडवपरिमाणमर्हति ठञ् उत्तर पदस्य वृद्धिःपूर्वस्य वा। अर्धकुडवपरिमाणार्हे स्त्रियां ङीप्।

अर्द्धखारी स्त्री अर्धं खार्याः एक०त० वा अच् । खारीपरिमाणार्धांशे। अत्र वा अच् । अर्धखारम् तत्रैव न० ।

अर्द्धगङ्गा स्त्री अर्धं गङ्गायाः एकदेशित०। स्नानादौ गङ्गास्नानादेरर्द्धफलदायिन्यां कावेरीनद्याम्।

अर्द्धगर्भ त्रि०अर्धे वत्सरस्यार्धे मार्गादौ पौषादौ वाब्रह्माण्डस्यार्धे गगने वा गर्भं गर्भस्थानीयमुदकं यस्य । सूर्य्यरश्मिभेदे ते हि मार्गादौ पौषादौ च भूमिस्थम् उदकमाकृष्य गर्भरूपेण गगने धारयन्ति इति ज्योतिषप्रसिद्धम् "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने इत्यादिना ३२४ पृष्ठ दर्शितेन याज्ञवल्क्येन तेषां मध्ये शतत्वेन गर्भधारण स्योक्तेस्तथात्वम् गर्भधारणकालस्य वृ० स० उक्तम् यथा । "मार्गशिरःशुक्लपक्षप्रतिपत्प्रभृति क्वपाकरेऽषाढाम् । पूर्वां वा समुपगते गर्भाणां लक्षणं त्रेयम् । यन्नक्षत्रमुपगते गर्भे चन्द्रे भवेत् स चन्द्रजयात् । पञ्चनवते दिनशते तत्रैव प्रसवमायाति । सितपक्षभवाः कृष्णे, शुक्ले कृष्णा द्युसम्भवाः रात्रौ । नक्तंप्रभवाश्चाहनि, सन्ध्याजाताश्च सन्ध्यायाम् । मार्गशीर्षाद्यागर्भामन्दफलाः पौषशुक्लजाताश्च । पौषस्यकृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम् । माघसितोद्भवा गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति । माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम् । फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः।तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले। चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः । चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति" इति । "सप्तार्द्धगर्भा भुवनस्य रेतः" ऋ० १,१६४,३६ । "वत्सरस्यार्द्धे गर्भस्थानीयमुदकं धारयन्ति" भा० । [हारभेदे

अर्द्धगुच्छ पु०। अर्द्धः चन्द्रसमः गुच्छः । १चतुर्विंशतिलतिके

अर्द्धगुञ्जा स्त्री अर्द्धं गुञ्जायाः । गुञ्जायास्तुल्यार्धपरिमाणे "तुल्या यवाभ्यां कथिता तु गुञ्जा" लीला० उक्तेः यवद्वयार्द्धे एकयवरूपे तत्परिमाणे । तदर्हति ठञ् । उत्तरपदस्य वृद्धिः पूर्वस्य वा ॥ ञ(आ)र्द्ध गौञ्जिकः तत्परिमाणार्हे त्रि० । स्त्रियां ङीप् ।

अर्द्धचन्द्र पु० अर्द्धं चन्द्रस्य एक०त० । १चन्द्रस्यार्द्धे, तदाकारे-२नखक्षते, ३गलहस्ते, ४बाणभेदे, "रावणेन हृता सीता-अर्द्धचन्द्रार्द्धभास्करा" महाना० "सार्द्धचन्द्रं बिभर्त्ति यः" कुमा० "अर्द्धचन्द्रसुखैर्बाणैश्चिच्छेद कदलीसुखम्" रघुः "दृगालाः सर्वे गलेऽर्द्ध चन्द्रं दत्त्वा निस्सारिताः" । "तृतीयतां द्रागेतस्यार्द्धचन्द्रः" इति च पञ्च०त० । गलहस्तस्तु तर्ज्जन्यङ्गुष्ठविस्तारकृपा हस्तसन्निवेशविशेषमुद्रा । (नेओडोति) ख्यातायां ५त्रिवृति स्त्रीणां ६तिलकभेदे च । स्त्री । स्वार्थे कन् । हस्ते अतदूत्त्वे । अर्द्धचन्द्रिका १कर्णस्फोटलतायां २चित्रपर्ण्यां च ।

अर्द्धचन्द्रक पु० अर्द्धचन्द्र इव कायति कै-क । १मयूरपिच्छस्यार्द्धचन्द्राकारे पदार्थे ।

अर्द्धचन्द्राकृति पु० अर्द्धचन्द्राकृतिरिवाकृतिर्यस्य । गलहस्ते तर्ज्जन्यङ्गुष्ठविस्तारकृपे गले हस्तसन्निवेशविशेषे ।

अर्द्धचोलक न० अर्द्धं चोलस्य एकदेश त० संज्ञायां कन् । (काञ्चुलीति) ख्याते कुर्पासकवस्त्रे ।

अर्द्धजरतीय पु० अर्द्धा जरतीव इवार्थे कन् । अर्द्धवृद्धातुल्ये न्यायभेदे स च अर्द्धं कुक्कुट्याः पाकाय अर्द्धं प्रसवाय यथा न प्रभवति एवमेकभागस्यान्यपरत्वमन्यभागस्यान्यपरत्वं न युक्तमित्येवं परः न्यायः । "न च जानीमो विषयसन्धाया मिवान्तराले ऽवस्थानमर्द्धजरतीयकौशलम्" वृ० उ० भा० । यथा न जागर्त्ति न स्वपितीति विषयग्रहणमिति अन्तराले ऽवस्थानं दुर्घटं यथा चार्द्धं कुक्कुट्याः पाकार्थमर्धञ्च प्रसवायेति कौशलं नोपलभ्यते" आ० गि० । जरत्या एव पाकः युवत्यास्तु प्रसवार्थत्वं नत्वेकस्या एव द्विविधकार्य्यकरत्वमित्यर्थः "तुल्ययोर्ज्ञानार्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वादर्द्धजरतीयोन्यायो न युक्तः कल्पयितुम्" छा० भा० ।

अर्द्धजाह्नवी स्त्री अर्द्धगङ्गावत् । कावेर्यां नद्याम् ।

अर्द्धतिक्त अर्द्धः असम्पूर्णस्तिक्तः । नेपालनिम्बे । [त्रिके कावे ।

अर्द्धदिन अर्द्धं दिनस्य । दिनस्य तुल्याऽंशे सार्द्धसप्तमुहूर्त्ता

अर्द्धदेव पु० अर्द्धे समीपे तद्वर्त्ती देवानाम्। देवसमीपे वर्त्तमाने। "इन्द्रं न दृत्तहरमर्द्धदेवम्" "दृतहरणं ददथुरर्द्धदेवम्" ऋ० १,४३,८,९। "अर्द्धदेवं देवानामर्द्धे समीपे वर्त्तमानम्" भा०

अ(आ)र्द्धद्रौणिक त्रि० अर्द्धद्रोणमर्हति ठञ्। उत्तरपदस्य वृद्धिः पूर्वपदस्य वा। अर्द्धद्रोणपरिमाणार्हे वस्तुनि स्त्रियां ङीप्।

अर्द्धधार न० अर्द्धे धाराऽस्य। सुश्रुतोक्ते विंशतिशस्त्रमध्ये शस्त्रभेदे "विंशतिः शस्त्राणि। तद्यथा। मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीमुखकुठारिकाटीमुखशरारीमुखान्तर्मुखवृद्धिपत्रवेतसपत्रबडिशदन्तशङ्खक्षेपणम्" इति। "वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रार्द्धधाराणि छेदने भेदने च" सुश्रु०।

अर्द्धनारायण न० अर्द्धमर्द्धमितं स्थानं यस्य ताद्दृग्नारायणो यत्र "प्रवाहमवधिं कृत्वा यावद्वस्तचतुष्टयम्। अत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन" इत्युक्ते गङ्गायाः प्रवाहावधिहस्तचतुष्टयात्मके नारायणस्वामिके स्थाने।

अर्द्धनारीश्वर पु० अर्द्धाङ्गे या नारी तस्या ईश्वरः। हरगौरीरूपे शिवमूर्त्तिभेदे तद्रूपादि ध्यानशब्दे वक्ष्यते।

अर्द्धनाव न० अर्द्धं नावः अच् समा०। नौकायास्तुल्यांशे।

अर्द्धनिशा स्त्री अर्द्धं निशायाः एकदेशित०। अर्द्धरात्रे।

अर्द्धपण पु० अर्द्धं पणस्य। "वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणश्चतस्रः" इत्युक्तपणस्यार्द्धे काकिणीद्वये।

अर्द्धपथ न० अर्द्धं पथः अच् समा०। मार्गस्य तुल्यांशे प्रदेशे।

अर्द्धपाञ्चालिक पु० अर्द्धपञ्चाले भवः ठण् उत्तरपदवृद्धिः। अर्द्धपञ्चालदेशभवे।

अ(आ)र्द्धपादिक त्रि० अर्द्धपादं तच्छेदमर्हति ठञ्। पूर्वपदस्य वा वृद्धिः। अर्द्धपादच्छेदार्हे। "गोषु ब्राह्मणसंस्थासु क्षुरिकायाञ्च भेदने। पश्वनां हरणे चैव दण्डः कार्य्योऽर्द्धपादिकः" मनुः अर्धपदं मर्हति ठञ् उत्तरपदस्य वृद्धिः पूर्वपदस्य वा। अर्द्धपदप्रमाणार्हे उभयत्र स्त्रियां ङीप्। [प्रोते (तिस्तिरीति) ख्याते पक्षिणि।

अर्द्धपारावत पु० अर्द्धेन अङ्गेन पारावत इव। चित्रकण्टके।

अर्द्धप्लुतायित न० "मतार्द्धार्द्धक्रमादूनैर्मण्डलायितवल्गितैः। उत्प्लुत्यस्याश्वसुखस्य गतिरर्द्धप्लुतायितमिति" परिभाषिते अश्वगतिभेदे।

अ(आ)र्द्धप्रस्थिक त्रि० अर्द्धप्रस्थमर्हति ठञ् "नातः" पा० नोत्तरपदस्य वृद्धिः पूर्वस्य तु वा। अर्द्धप्रस्थप्रमाणार्हे स्त्रियां ङीप्।

अर्द्धभाग पु० अर्द्धं भागस्य। भागस्यार्द्धे "तदर्द्धभागेन सभस्य काङ्क्षितम्" कुमा०। अर्द्धभागमर्हति ठञ् वा पूर्वपदवृद्धिः। अ(आ)र्द्धभागिकः। अर्द्धभागार्हे त्रि० "जातोऽपि दास्यां शूद्रेण कामतोऽशंहरोभवेत्। मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिकम्" या० स्मृतिः।

अर्द्धभाज् त्रि० भज्—क्विप् उप० स०। अर्द्धांशहरे "निधीनां तु पुराणां च धातूनामेव च क्षितौ। "अर्द्धभाग्यक्षणाद्राजा भूमेरधिपतिर्हि सः" मनुः।

अर्द्धभ्रम न० अर्द्धात् भ्रमोभ्रमणं यत्र। "आहुरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदीति सर० कण्ठा० उक्ते शब्दालङ्कारभेदे यथा "स स त्व र ति दे नि त्यं
स द रा स र्व ना थि नि।
त्व रा धि क क सं ना दे
र म क त्व म क र्म ति" किरा०
अग्निपुराणे तु "गोमूत्रिकार्द्धभ्रमके' इति कान्ततया पठित्वा "पादार्द्धाद्यैश्चतुर्भिश्च कुर्याद्विन्यासमेतयोः। न्यस्यतामिह वर्णानामधोधः भ्रमभागिनाम्। अधोधःस्थितवर्णानामाद्यतुर्यपदं नयेत्। तुर्यपादं नयेदूर्द्धं पादार्द्धप्रातिलोम्यत" इति तल्लक्षणमुक्तम्। अयमर्थः तिर्य्यगताः पञ्चरेखाः ऊर्द्धगताश्च नव रेखालेख्या एवं द्वात्रिंशत् कोष्ठानि भवन्ति तत्र प्रथमादिपङ्क्तिक्रमेण एकैककोष्ठगतैकैकाक्षरकाश्चत्वारः पादाः क्रमेण पङ्क्तिचतुष्के लेख्याः एवं लेखने द्वात्रिंशद्वर्णा एकैककोष्ठगा भवन्ति। तत्र प्रथमपादार्द्धगता आद्याश्चत्वारोवर्णाः क्रमशोऽधोवर्त्तिनीषु प्रथमादिपङ्क्तिषु यथा भवन्ति यथा च तस्यापरार्द्धगताश्चत्वारो वर्णा अन्तिमादिपङ्क्तिषु ऊर्द्धोर्द्धक्रमेण अन्त्यकोष्ठगा भवन्ति तथा वर्णाः श्लोके निवेश्याः। एवं द्वितीयपादार्धगा आद्याश्चत्वारो वर्णा अधोऽधःक्रमेण प्रथमादिपङ्क्तिद्वितीयकोष्ठगाः अपरार्धघटकाश्चत्वारश्च वर्णा ऊर्द्धोर्द्धक्रमेण अन्तिमादिपङ्क्तिषु सप्तमकोष्ठगाः। तृतीयपादार्धगाः आद्याश्चत्वारो वर्णाः प्रथमादिपङ्क्तिषु अधोऽधःक्रमेण तृतीयकोष्ठगा उत्तरार्धगाश्चत्वारो वर्णाश्च ऊर्द्धोर्द्धक्रमेण अन्तिमादिषु षष्ठकोष्ठगाः चतुर्थपादार्धगा आद्याश्चत्वारोवर्णाः अधोधःक्रमेण प्रथमादिषु पङ्क्तिषु चतुर्थकोष्ठगाः उत्तरार्धगता श्चत्वारो वर्णाश्च ऊर्द्धोर्द्धक्रमेण अन्तिमादिषु पञ्चमकोष्ठगाः यथा भवेयुस्तथा वर्णविन्यासो विधेयः। एवं सति यथा प्रथमादिपङ्क्तिक्रमेण चत्वारः पादाः पठितुं शक्यन्ते एवमुक्तप्रकारेण अधोधःक्रमेण च प्रथमादिकोष्ठगवर्णग्रहणेन एवं अन्तिमादिषु, ऊर्द्धोर्द्धक्रमेण अन्तिमकोष्ठस्थवर्णग्रहणेन, उक्तरीत्या प्रथमादिपङ्क्तिषु द्वितीयादिकोष्ठस्थवर्णग्रहणेन

अन्तिमादिषु उपान्तिमकोऽगवर्ग्यचङ्येन च उक्तादिशा पाठे द्वितीयादिपादा भवन्ति। सर्व्वतोभद्रखेवास्य सर्व्वतो ऽनुलोमविलोमपाठसम्भवेन अर्धभ्रमत्वम् अयञ्च बन्धः अनुष्टुप्छन्दस्येव नान्यत्र छन्दसीति ज्ञेयम्। एवम् "अभीकगतिकेनेद्वे भीतानन्दस्य नाशने। कनत्सकामसेनाके मन्दकाममकामस्थिति" माघश्लोकेऽपि ज्ञेयः।

अर्द्धमाणवक पु० अर्धं माणवकस्य। द्वादशलतिके हारभेदे माणवकहारस्यचतुर्विंशतिलतिकत्वात्तस्यार्धमानतयास्य तथात्वम्।

अर्द्धमात्रा स्त्री अर्धं मात्रायाः। विन्दुर्धचन्द्राकारव्यञ्जायां २ब्रह्मरूपायाम् वाचि २तद्वाच्यायां देव्याञ्च। "अर्धमात्रा स्थिता नित्यं यानुच्चार्या विशेषतः" देवीभा०। "अकारो भगवान् ब्रह्मा उकारो विष्णुरुच्यते मकारो भगवान् रुद्रो ऽर्धमात्रा महेश्वरी। उत्तरोत्तरभावेनाधुत्तमत्वं स्फुटं बुधैः। अतः सर्व्वेषु शास्त्रेषु देवीसर्व्वोत्तमा स्मृता" देवीपुरा०। अर्धमात्रा उच्चारणकालोऽस्य। २हलन्तर्णे त्रि० "व्यञ्जनं चार्धमात्रक" मित्युक्तेस्तथात्वम्।

अर्द्धमास पु० अर्धं मासस्य एकदे० त०। पञ्चदशाहात्मके मासस्यार्धरूपे पक्षात्मके काले "दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि" मनुः "पञ्चदश वा अर्धमासस्य रात्रयः" इति शत० ब्रा०। "तत्त्रिंशता भवेन्मास" इत्युक्तेर्मासस्य त्रिंशत्तिथ्यात्मकतया तदर्धस्य पञ्चदशत्वम् "ऐरण्डतैलं वा मासमर्धमासं वा पाययेत्" सुश्रुतः।

अर्द्धयाम पु० अर्द्धं यामस्य प्रहरस्य। दिनरात्रयोः अष्टधा विभक्ते काले यावद्दिनमानं रात्रिमानं वा तस्याष्टधाविभागे यः कालस्तस्मिन्। तस्यैव वारवेलाकालवेलासंज्ञा तस्य च वारविशेषेषु वर्ज्यता ज्योतिषोक्ता। "कृतघ्नि यमयरमङ्गस्तुभास्करादिवाभार्द्धे। प्रभवति वारवेला न शुभा शुभकार्य्यकरणाय"। ज्यो० त० तथाच रवौ चतुर्थोऽर्द्धयामः वारवेला एवं चन्द्रे सप्तमः। कुजे द्वितीयः, बुधे पञ्चमः, गुरौ अष्टमः, भृगौ तृतीयः, शनौ षष्ठः वारवेला। "कालस्य वेला रविजः शराब्धिकालानलागास्त्रयवो गजेन्द्राः दिने, निशायामृतवेदनेत्रनगेषुरामा विधुदन्तिनौ च" ज्यो० त०। यथा दिने रवौ पञ्चमः कालवेला एवं चन्द्रे द्वितीयः, कुजे षष्ठः, बुधे तृतीयः, गुरौ सप्तमः, भृगौ चतुर्थः, शनौ अष्टमः आद्यश्च॥ रात्रौ रवौ षष्ठः कालवेला। एवं चन्द्रे चतुर्थः। कुजे द्वितीयः। बुधे सप्तमः, गुरौ पञ्चमः भृगौ तृतीयः, शनौ आद्यः अष्टमश्च कालवेला॥ एवं दिने वारवेलाकालवेलाद्वयसमावेशेन त्रयीर्वर्ज्यता यथोक्तं "रवौ वर्ज्यं चतुःषष्ठञ्च सोमे सप्तद्वयं तथा। कुजे षष्ठं द्वितीयञ्च बुधे वाणतृतीयकम्। गुरौ सप्ताष्टकञ्चैव त्रिचत्वारि च भार्गवे। शनावाद्यं च षष्ठञ्च अष्टमं परिवर्जयेत्"॥ एवञ्च रात्रौ न वारवेला किन्तु कालवेलैव। तद्दोषोऽप्युक्तः "बालायां मरणं काले (कालवेलायाम्) वैधव्यं पाणिपीड़ने। व्रते ब्रह्मवधः प्रोक्तः सर्व्वं कर्म्म ततस्त्यजेत्" ज्यो० त०। दिनविशेषे तद्दोषविशेषोऽपि ज्यो० त० उक्तः। "वारेशादर्द्धयामेषु रात्र्यर्द्धेषु पञ्च षट् क्रमात्। अधिपाःसुर्यहास्तत्र यथार्कांशे भवन्ति हि। रवीज्येन्दुभृगुज्ञाजशनिज्ञरवयो निधि। रविशुक्रशनीज्यकुजभास्कराः। दिने तूहया : परेष्वेवम्" अयमर्थः यस्मिन् दिवसे यो वारेशः सएव प्रथमयामार्द्धाधिपः। ततो द्वितीयेशस्तु रात्रौ वारेशापेक्षया पञ्चमः, पुनस्तदपेक्षया पञ्चमस्तृतीयेश एवं क्रमेणज्ञेयः। दिने तु वारेश एव आद्यार्धिपः द्वितीयेशस्तु वारेशापेक्षया षष्ठस्तदपेक्षया पुनः षष्ठस्तृतीयेश इत्येवंक्रमेण ज्ञेयः॥ एतच्च पताकीवेधे पापखामिकस्य रिष्टसूचकतादिवेचनार्थम् अन्यत्र शुभकर्म्मसु वर्जनार्थञ्च।

अर्द्धरथ पु० रथोऽस्यास्य अच् रथः रथी अर्द्धः असंपूर्णोरथः। असम्पूर्णे रथिनि। "सखा ते दयितो नित्यं य एष रथकर्कशः। उत्साहयति राजंस्त्वां विग्रहे पाण्डवैः सह। एष विकत्थनो नीचः कर्णोवैकर्त्तनस्तव। मन्त्री नेता च बन्धुश्च मानी चात्यन्तसुच्छ्रितः। एष नैव रथः कर्णो न चाप्यतिरथो रणे। वियुक्तः कवचेनैष सहजेन विचेतनः। कुण्डलाभ्याञ्च दिव्याभ्यां वियुक्तः सततं घृणी। अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात्। करणानां वियोगाच्च तेन नेऽर्द्धरथोमतः। नैष फाल्गुनमासाद्य पुनर्जीवन् विमोक्ष्यते। ततोऽब्रवीत् पुनर्द्रोणः सर्व्वशस्त्रभृतां वरः। एवमेतत् यथात्थ त्वं न मिथ्याऽस्ति कदाचन। रथैरथेऽभिमानी च विकुरुष्वापि दृश्यते। घृणी कर्णः प्रमादी च तेन नेऽर्द्धरथो मतः" इति भा० उ० प०।

अर्द्धरात्र अर्द्धं रात्रेः अच्समा०। रात्रेरुत्तरार्द्धभागे यामद्वयपूर्त्तिकाले "अर्द्धरात्रे त्वसम्पूर्णे दिवा पुण्यमनामतम्" "अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि" "सम्पूर्णे चार्द्धरात्रे चेति" च देवी पु०। "कलान्यूनार्द्धरात्रे तु यदि संक्रमणं भवेत्" गर्गः। "अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः"। "अर्द्धरात्रे तु संपूर्णे यदा संक्रमते रविः भु० भी०। "पूर्णेचेदर्द्धरात्रे तु रवि संक्रमणं भवेत्"

याता०जावा०। "प्रभाते चार्द्धरात्रे वा स्नानं कुर्य्यात् परेऽहनि" भविष्य पुरा०। "अथार्द्धरात्रे स्तिमितप्रदीपे" रघुः "मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्" मनुः।

अर्द्धर्च पु०न० अर्द्धमृचः एकदेशित० अच्समा०। ऋचोऽर्द्ध-भागे "अर्द्धर्चेऽर्द्धर्चे प्रतिष्टृणीयात्" शत०ब्रा०। "ऋचः पादं मात्रया कल्पयन्नोऽर्द्धर्चेन" अथ०६,१०,१६, अस्य परिमाणवाचकत्वात् वाक्यायां यत्। अर्द्धर्चः। अर्द्धर्च-मर्द्धर्चमिति वीप्साटत्तौ कारकभूते अर्द्धर्चे "तस्य वासस्या पाणिभ्यां पाणी सन्दहन् सावित्रमन्वाह पक्षोर्द्धर्चशः सर्वान्" कात्या० १७,१,१८, "तस्मादृचमर्द्धर्चशः शंसेत्" शत०ब्रा० "अयार्द्धर्चोहौवा इमौ प्राणौ" शत०ब्रा०।

अर्द्धर्चादि पु० ६त०। "अर्द्धर्चात् पुंसि चेति" पाणिन्युक्ते पुंनपुंसकलिङ्गानुयायिनिमित्ते यद्वृत्तसमूहे सच गण० १२, १३ पृष्ठे दर्शितः।

अर्द्धलक्ष्मीहरि अर्द्धं लक्ष्म्या आकारोऽस्य ताडयो हरिः। लक्ष्मीनारायणात्मके विष्णोर्मूर्त्तिभेदे तद्रूपं यथा "उद्यत् प्रद्योतनद्युतिं तप्तहेमावदातं पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्रा च जुष्टम्। नानारत्नोत्कलितविविधाकल्प-शोभितवक्षं विष्णुं वन्दे दरकमल कौमोदकीचक्रपाणिमिति"

अर्द्धविसर्ग पु० अर्द्धं विसर्गस्य तद्वदाकारत्वादुपचारः। विसर्ग सदृशाकारार्द्धरेखया व्यञ्जनीये कखयोःपरत जिह्वा-मूलीयाख्ये पफयोःपरतः उपाध्मानीयाख्ये च वर्णभेदे अर्द्धविसर्जनीयादयोऽप्यत्र।

अर्द्धवीक्षण न०अर्द्धमसंपूर्णं वीक्षणम्। कटाक्षदर्शने।

अर्द्धवैनाशिक पु० अर्द्धोऽसम्पूर्णः वैनाशिकः बौद्धभेदः। वैभेषिकशास्त्रकारे तस्य च सर्वस्य क्षणिकतावादितया वैना-शिकसमयवत् परिणामभेदेन देहादेरायुर्विनाशस्वीकारेण आत्मनस्तु स्थायित्वाङ्गीकारेण च ततो वैलक्षण्यात् अर्द्ध-वैनाशिकत्वम् इति वेदान्तिनो वदन्ति। वैभेषिकादयस्तु वेदान्तिनोऽर्द्धवैनाशिकत्वं कल्पयन्ति "तर्हि वैनाशिकवत् सर्वेषां पदार्थानां चिद्रूपत्वानभ्युपगमात्मकतया स्वीका-रेण चितस्य स्थायित्वाङ्गीकारमात्रेण ततो वैलक्षण्य-मित्यर्द्धवैनाशिकत्वमिति। यथा च नैषां तथात्वं तथा विवरणप्रमेयोपन्यासे प्रपञ्चितम् विद्यारण्येन।

अर्द्धवयस न० अर्द्धस्य वैयसं वयः। अर्द्धवधे "विधिना त्वत्मर्द्धवैयसम् "अर्द्धो वा आत्मनो यत् पत्नी" इति श्रुतेस्तस्य नाशे पत्न्या अर्द्धनाशोयुक्त इति तथोक्तम्।

अर्द्धशत न० अर्द्धं शतस्य एकदे०त०। १पञ्चाशत्संख्यायां २तत्संख्यान्विते च। "नैश्योऽर्द्धशतं हे च" मनुः। चचित् ६त०। तत्रैवार्थे न० एतच्छतार्द्धमावर्त्त्य त्रैलो-क्यविजयो भवेत्" तन्त्रम्। [शतमध्यत्व।]

अर्द्धशन एकदेशित० शक०। अर्द्धभोजने रत्नावली०

अर्द्धशफर पु०अर्द्धः शफरः। (दाड़का) इति ख्याते मत्स्यभेदे

अर्द्धश्लोक पु० अर्द्धं श्लोकस्य एकदेशित०। श्लोक-स्यार्द्धे प्रथम पादद्वये

अर्द्धसम त्रि०अर्द्धेन समः। १अर्द्धेन तुल्ये पदार्थे "प्रथमा-ङ्घ्रिसमो यस्य तृतीयस्तुर्य एव वा। द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसमसञ्ज्ञितं" वृत्तरत्नाकरोक्ते २वृत्तभेदे न० यथा "अयुजि न युगरेफतोयकारो युजि च नजौ जरगाश्च युग्मिताद्या" एवमुपचितादीनि।

अर्द्धसीरिन् पु० अर्द्धं सीरस्य हलस्य दृषदादिफलस्य सोऽस्यास्ति इनि १हलसाध्यफलभक्षणार्द्धभाजि। "शूद्रेषु दासगो-पालकुलमित्रार्द्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" या०स्मृतिः अत्र निरूढार्थपरत्वम् मिताक्षराकृतोक्तं "पराशरेण तु तस्य पारिभाषिकत्वम् दर्शितं यथा" दासनापितगोपालकुलमित्रार्द्धसीरिणः एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" इत्युक्त्वा "वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। अम्बिकः स तु विज्ञेयो भोज्यं विप्रैर्न संशयः" इत्युक्तम् तेन वैश्यागर्भजो ब्राह्मणेनोत्पादितः संस्कारवान् वर्णसङ्कर-भेदः अम्बिकः अर्द्धसीरीति। तेन २तदर्थेऽपि।

अर्द्धहार पु०अर्द्ध-हृदौ अच् अर्द्धः सम्मतः हारः। चतुः-षष्टिलतिके हारभेदे।

अर्द्धांश पु० एकदेशित०। अंशस्य सजातीयोचितभागस्य १तुल्यार्द्धभागे २सर्वद्रव्यस्यार्द्धभागे च।

अर्द्धार्द्ध पु० अर्द्धमु अर्द्धस्य तुल्यांशस्य एक०त०। तुल्यभागरूप स्यांशस्य तुल्ये अर्द्धभागे चतुर्थांशे। "चरोरर्द्धार्द्ध भा-गाभ्यां तामयोजयत्सुभे" रघुः। "पञ्चाधिकस्य वा नाशे-ततोऽर्द्धार्द्धे तु तद्ग्रहाः ततोऽर्द्धार्द्धविनाशे तु स्मृतेत् पुत्रादिमस्तकम्"। कात्या० स्मृ०।

अर्द्धासन न०अर्द्धमासनस्य। आसनस्यार्द्धभागे "यो विसर्जनाव-सरे मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य" शक०। "अर्द्धासनं गोत्रभिदाधितष्ठौ" रघुः। "अर्द्धासनं गोत्र-भिदोऽध्यगात्सीत्" भट्टिः। अर्द्धं सम्मतमसनं त्यागः विच्छे-दस्य। २खण्डेन दाने ३अकृत्स्नसने च धरणिः।

अर्द्धिक त्रि०अर्द्धमर्हति ठिठन् स्त्रियां ङीप्। १अर्द्धभागार्हे

"तदर्द्धिकं पादिकं स्यात्" मनुः २अर्द्धसौरिशब्दार्थे च उदा० तत्रैव ।

अर्द्धिन् त्रि० अर्द्धं अर्हीभूतत्वेनास्त्यस्य इनि । अर्द्धग्रहणार्हे "सर्वेषामर्द्धिनोसुखास्तदर्द्धेनार्द्धिनोऽपरे। हतीयिनस्तृतीयांशास्तुरीयांशास्तु पादिनः"। गोशतभागे स्मृतिः ।

अर्द्धुक त्रि० ऋध–वा०उकञ्। सम्यक्ते दृद्धिशीले "एकमतिरिक्तं जुहोति तस्मादेकः प्रजास्वर्द्धुकः" श्रुतः ब्रा० ।

अर्द्धेन्द्र पु० अर्द्धमिन्दोः एकदे०त० । १चन्द्रतुल्यांशे "जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम्। तदाकारत्वात् २नखक्षते ३तर्जन्यङ्गुष्ठविस्तारूपे गलहस्तमुद्रा भेदे ४अर्द्धचन्द्राकारे बाणे च ।

अर्द्धोक्त न०अर्द्धमुक्तम् वच–भावे क्त । अर्द्धकथने । "रामभद्रेत्यर्द्धोक्ते महाराज"! इति वीरचरिते कञ्चुकिवाक्यम्।

अर्द्धोदक न अर्द्धदेहव्यापकमुदकम् शाक०त० । देहार्द्धव्यापके उदके । "अर्द्धोदके तु जाङ्घाभ्यां म्रियतेऽनशनेन यः । स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च" अग्निपु० । "अर्द्धोदकं चरणाभ्यामभिपर्य्युदकम्" प्रा०त०रघुनन्दनः ।

अर्द्धोदय पु० अर्द्धस्य सकलस्य पुण्यस्य उदयो यत्र । तिथिनक्षत्रादियोगविशेषे "माघेमासि असावस्या यदि अर्कयुता भवेत् । नक्षत्रे श्रवणे देवि ! व्यतीपातो भवेद्यदा । अर्द्धोदयः स विज्ञेयः सूर्य्यपर्वशतैःसमः । दिवैव योगः श्रेष्ठोऽयं न चरात्रौ कदाचन । अर्द्धोदये तु सम्प्राप्ते सर्वं गङ्गासमं जलम् । शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंस्थिताः । यत् किञ्चित् क्रियते दानम् तद्दानं सेतुसन्निभमिति" निर्णया०। "अमार्कपातश्रवणैर्युता चेत् पौषमाघयोः । अर्द्धोदयः स विज्ञेय. कोटिसूर्य्यग्रहैः समः" स्कं०पु० । "अर्द्धोदये च पुण्यार्के हस्तार्के रोहिणीबुधे" हरहारदीयम् ।

अर्द्धोदयासन न० अर्द्धस्य देहस्य उदयेन अर्द्धक्षेपेणासनम् "अर्द्धोदयासनं नाथ! सर्व्वाङ्गं खे नियोजयेत् । केवलं हस्तयुगलं भुव्यवष्टभ्य तिष्ठति" रुद्रया० उक्ते आसनभेदे ।

अर्द्धेन्दुमौलि पु० अर्द्धेन्दुर्मौलावस्य। चन्द्रशेखरे शिवे ।

अर्द्धोरुक न० ०अर्द्धमूरोः अर्द्धोरु तत्र कायते काय-ड । १जघोरधरपर्य्यन्ताङ्गाच्छादने वस्त्रे, उत्तमस्त्रीणामर्द्धोरुपर्य्यन्ते चोलकाकारे २परिधेयवस्त्रे च ।

अर्द्ध्य त्रि० अर्द्धस्येदम् तत्र भवो वा वा यत् १अर्द्धसम्बन्धिनि २अर्द्धभवे च। ऋध-क्यिप्–यत् ।प्रवर्ग्यार्हे "विदुषा चिदर्द्ध्यः स्तोमः । ऋ०१,१५६,१, "अर्द्ध्यं वर्द्धनार्हम्, भा० "शविष्ठं वाजं विदुषा चिदर्द्ध्यम्" ऋ०५,४४,१० ।

अर्पण न० ऋ–णिच्–युक् ल्युट् । १निक्षेपे,२सत्त्वत्यागानुकूलव्यापारे ३निवेशने च । "पादार्पणानुग्रहपूतपृष्ठम्" "सेयं स्वदेहार्पणनिष्क्रयेण" "सुखार्पणेषु प्रकृतिप्रगल्भाः" इति च रघुः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" "तत् कुरुष्व मदर्पणमिति" च गीता करणे ल्युट् । ४मन्त्रादौ ५जुहूप्रभृतौ स्त्री । संप्रदाने ल्युटि । ६देवादिषु । अधिकरणे ल्युट् । त्यागाधिकरणे ७वङ्क्षादौ । कर्म्मणि ल्युटि । ८हविरादौ त्याज्यद्रव्ये

अर्पित त्रि० ऋ–णिच्-युक् च क्त । १दत्ते २निक्षिप्ते ३निवेशिते "तदनुच्चलनं मदर्पितम्" कुमा० ।"मय्यर्पित मनोबुद्धिः" गीता अनर्पितचरीं चिरात् करुणयावतितीर्णः कलाविति" हरिभ० "हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्" इति कुमा० ।

अर्पिस पु० ऋ–णिच् युक् च इसन् । १हृदये, अग्रमांसे च ।

अर्घ्य त्रि० ऋ–णिच्-युक यत् ।१निवेशनीये २देवे ३त्याज्ये च।

अर्ब(र्बं) हिंसने भ्वादि०पर०सक० सेट् । अर्ब(र्बं)ति आर्बीं(र्बीं)त् आन(र्ब)र्ब ।

अर्बु(र्बु)द न० अर्ब (र्बं) विच् तत्कौ उदेति उद्+इण्–ड । (आव् इति) ख्याते १मांसपिण्डाकारे रोगभेदे, स च सुश्रुतोक्तवर्त्माश्रयेषु एकविंशतिरोगेषु मध्ये रोगभेदः "पृथग्दोषा समस्ताश्च यदा वर्त्म व्यपाश्रयाः। शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्धं मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् । विकारान् जनयत्याशु नामतस्तान् निबोधत" इत्युपक्रम्य उत्सर्द्दिनोग्रभ्रतीन् एकविंशति भेदान् उक्त्वा तेषां प्रत्येकलक्षणान्युक्तानि तत्र "वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्। विज्ञेयमर्बुदं पुंसां सरक्तमवलम्बितम्" इत्यर्बुदलक्षणोक्तम् अर्बुदञ्च नानाविधं मांसार्बुदशोणितार्बुदादिभेदात् । "क्षणक्षोटीसरक्तैश्च पिड़काभिश्च पीड़ितम् । यस्य वस्तिरजस्रोग्रा ज्ञेयं तच्छोणितार्बुदम् । मांसदोषेण जानीयादर्बुदं मांससम्भवम्" एवं मेदोऽर्बुदादयोऽपि तल्लक्षणा रोगभेदा ज्ञेयाः। २दशकोटिसंख्यायां ३तत्संख्यातेषु च एकादिकोटिसंख्या दशगुणोत्तरा उक्ता अर्बुदमवर्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्" लीला० "क्ष्मा भेजुस्ते ! दृष्टका धेनवःसन्त्येका च दश च दश च शतं

च शतं चेत्युपक्रम्य "अर्बुदं चन्यर्बुदञ्च इति यजु० १७,२। ४पर्व्वतभेदे ५असुरभेदे च पु०। "महान्तं चिदर्बुदं निक्रमी पदा" ऋ० १,५१,४, ६काद्रवेये सर्पभेदे पु० पञ्चमेऽहनीत्युपक्रम्य "अर्बुदः काद्रवेयो राजेत्याह तस्य सर्पाविशः" इति शत० ब्रा०। अम्बूनि ददाति दा-क वेदे मस्य रः। ७मेघे "न्यर्बुदं वाहधानो अगुः ऋ० २,११, २०, "अम्बूनि ददातीत्यर्बुदो मेघः" भा० अर्बुदाकारत्वात् गर्भस्य ८मांसपिण्डभेदे" "यदि पिण्डः पुमान्, स्त्री चेत् पेशी, नपुंसकेऽर्बुदमिति" सुश्रु० द्वितीयमासिकगर्भमाले न०"प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः। मासेऽर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः" या० स्मृ०। "द्वितीये तु मासि अर्बुदमीषत्कठिनं मांसपिण्डमयं भवति" मिता०।

अर्बुदि पु० अर्बुदमिवाचरति अर्बुद+क्विप् इन्। सर्व्वव्यापके ईश्वरे। "अर्बुदिर्नाम योदेवईशानश्च न्यर्बुदिः। याभ्यामन्तरिक्षमाततमियं च पृथिवी मही" अथ० ११,९,४।

अर्भ पु० ऋ-भ १बालके। २अल्पे च। "नार्भादीषते न महो-विभाती। ऋ० १,१२४,६, "अर्भात् अल्पात्" भा०। "इन्द्रमर्भे हवामहे" ऋ० १,७।५। अर्भे स्वल्पोऽपि धने निमित्तभूते" भा०। "यूयं महेन एनसोयूयमर्भात्" ऋ० ८,४७,८, "अर्भात् अल्पात् एनसः" भा०।

अर्भक पु० अर्भएव स्वार्थे कन्। १बालके, "महद्भ्यो नमो अर्भकेभ्यो नमोयुवभ्यः" ऋ० १,२७,१३। "दृङ्मप्युचितनिद्रं मर्भकम्" माघः "अर्भकेन कुमारकोऽधितिष्ठन्नवं रथम्" ऋ० ८,६९,१५। २मूर्खे च ३क्षुद्रे, ४अल्पे, "नमो "नमोमहद्भ्योऽर्भकेभ्यो नमोवः" यजु० १६,२६। त्रि० "अर्भकौकस्त्वात्तद्व्यपदेशाच्च" या० सू०। अर्भकमल्पम् भा० "यथा सर्व्वगतमपि सद्व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकः एवं ब्रह्मणोऽपि अर्भकौकस्त्वम्" भा० ५सदृशे च त्रि०

अर्भगव त्रि० अर्भमल्पं गायति गै शब्दे च। बालके। "यावर्भगाय विमदाय" ऋ० १,११६,१।

अर्म्म न० ऋ-मन्। चिरन्तनधामनगरादौ "अर्म्मे चावर्णे द्व्यच्त्र्यच्" पा० गुप्तार्म्मं कुक्कुटार्म्मं अवर्णे किम् दृढदर्म्मं द्व्यच् त्र्यच् किम् कज्जलार्म्मम् अमहद्ववमिलेव। महानवार्म्मम्। नेत्ररोगभेदे पु० न०। स च पञ्चविधः प्रस्तार्यर्म्म-शुक्लार्म्म रक्तार्म्ममांसार्म्मस्नायुर्म्मभेदात्। तल्लक्षणं नान्तार्म्मशब्दे वक्ष्यते सुश्रुते तु नान्ततया पठितम्। अर्य्यते गम्यते कर्म्मणि मन्। २गन्तव्यदेशे। कुत्सिते कन्। अर्म्मकः अरणीये कुत्सितस्थाने ४क्षुद्रस्थानादौ "वैलस्थानके अर्म्मके महारण्यस्थे अर्मके" ऋ० १,१३३,३। "अर्म्मके क्षुद्रस्थानादौ" भा०।

अर्म्मण पु० ऋ-बा० मन्। वैद्यकोक्ते द्रोणपरिमाणे।

अर्म्मन् न० ऋ+मनिन्। नेत्ररोगभेदे "प्रस्तारिशुक्लरक्ततजार्धि मांसस्नायुर्म्मसंज्ञाः खलु पञ्च रोगाः। सुश्रुतिका चार्ज्जुन पिटकौ च जालं सिराणां पिड़कास्त्र याः स्युः। रोगा बला त्यधितेन सार्द्धमेकादशाक्ष्णोः खलु शुक्लभागे। प्रस्तारि यधितमिहार्म्म शुक्लभागे विस्तीर्णं तनुरुधिरप्रभं सनीलम्। शुक्लाख्यं बहु कथयन्ति शुक्लभागे सर्व्वेतं समभिह वर्द्धते चिरेण। यन्मांसं प्रचयमुपैति शुक्लभागे मञ्जाभं तदुपदिशन्ति लोहितार्म्म। विस्तीर्णं बहु बहलं यत्तत्प्रकाशं श्यावं वा तदधिकमांसजार्म्म विद्यात्। शुक्ले यत् पिच्छिलमुपैति दृङ्मेति, इति सुश्रु०। अर्म यज्जालवद्व्यापि तदप्युन्नार्ज्जलम्बितम्। अर्म्म चाल्पन्दधिनिभश्वेतं रक्तमथापि वा। ज्ञेयमेव तदर्म्मखात् कृष्णमण्डलगञ्च यत्"। अर्म्मवन्मण्डलाख्येन वर्ज्जितेनावलम्बिना। अर्म्माणि पिड़कां हन्यात्सिराजालानि तेन वै" इति च सुश्रु०।

अर्य्य त्रि० ऋ-यत्। १स्वामिनि २वैश्ये पुंस्त्री। स्त्रियां टाप्। अर्य्या वैश्यजातिस्त्रियां स्वामिन्याञ्च। पत्न्यान्तु ङीप्। अर्य्यी। वैश्यपत्न्याम् तत्र आनुक् ङीप् चार्य्याणीत्यपि "अर्य्यः स्वामिवैश्ययोः" पा० "अर्य्यक्षत्रियाभ्यां वा" वार्त्ति०। अर्य्याणी अर्य्या स्वामिनी वैश्या वा पुंयोगे तु ङीप् स्त्रि० कौ०। ३श्रेष्ठे त्रि०। "प्र तत्ते अद्य शिपिविष्ट नामार्यः ऋ० ७,१००,५, "सुभद्रमर्य्यभोजनं बिभर्षि" ८,१,३४, अर्य्यते पूज्यते वा० यत्। ४पूजनीये। "कण्वादुदस्थादर्य्या" ऋ० १,१२३,१। "अर्य्या अरणीया पूजनीया" भा०।

अर्य्यमन् पु० अर्य्यं श्रेष्ठं मिमीते मा-कनिन्। १सूर्य्ये, तद्देवताके २उत्तरफल्गुनीनक्षत्रे, ३अर्कवृक्षे, ४पितॄणां राजनि "पितॄणामर्य्यमा चास्मि" गीता। द्वादशादित्यमध्ये ५आदित्यभेदे च। "धातार्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा। इन्द्रोविवस्वान् पूषा च पर्जन्योदशमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजघन्योज धन्यजः इति विष्णुध० पु० एत एव कश्यपाददित्यां जाताः। भारते तु "अदित्यां द्वादशादित्याः समभूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत। धाता मित्रोऽर्य्यमा शक्रः वरुणस्त्वंशुरेव च।

भगोविवस्वान् पूषा च सविता दशमःस्मृतः एकादश स्मृतो त्वष्टा द्वादशोविष्णुरुच्यते" । कल्पभेदान्नामभेद इत्यविरोधः । तद्रूपम् ध्यानशब्दे वक्ष्यते । "यथा नरोऽर्यमणोमरुतः कवन्धिनः" ऋ० ५,५४,८ । "अर्यमृणे साक्षेति तदेनमस्य सर्वस्मादार्यमणं करोति शत०ब्रा० ।

अर्य्यमिक पु० अनुकम्पितः दत्तः अर्यमदत्तः अनुकम्पायाम् ठन् "शेवलसुपरिविशालवरुणार्यमादीनां ह्रतीयात्" या० अन्यलोपः । अनुकम्पिते अर्यमदत्ते ।

अर्य्यम्य पु० अर्यमैव स्वार्थे वेदे यत् । सूर्य्ये "अर्य्यम्यं वरुणमित्रं वा सखायं वा सदभिज्ञातरं वा" ऋ०५,८५,७ ।

अर्वन् पु० ऋ–वनिप् । १घोटके, २इन्द्रे, ३गोकर्णपरिमाणे च । स्त्रियामर्वती सा च ४बड़वायां ५कुट्टिन्यामपि । अस्य सुभिन्नेत्वादेशः अर्वन्तौ अर्वतः । "सुधीकृतप्रग्रहनमर्वतां व्रजाः" माघः सौ तु अर्वा इत्येव लोकएव त्वादेश इति भाष्यम् वेदे तु अर्वाणौ इत्येव । ४गमनशीले त्रि० स्त्रियां ङीप् वनोरच् । अर्वरी ।

अर्वाक त्रि० अवरमकति गच्छति अक–वक्रगतौ अण् पृ०अवरस्यार्वादेशः । समीपे "यच्चास्या पराके अर्वाके अस्ति भेषजम्" ऋ०८,९,१५ "अर्वाके समीपे" भा० ।

अर्वाक्काल पु० अर्वाक् अवरः कालः । अवरकाले तत्रभवः ठञ् नटेर्द्धिः अर्वाक्कालिकः अवरकालभवे त्रि० "तान्यर्वाक्कालितया निष्फलान्यदतानि च" मनुः ।

अर्वाक्स्रोतस् पु० अर्वाक् अधोगामि स्रोतोरेतोयस्य । ऊर्द्धरोतोभिन्ने इन्द्रियप्रसक्ते ।

अर्वाग्विल पु०अर्वाक् विलमस्य । चमसे । "अर्वाग्विलश्चमस ऊर्द्ध्वबुध्नस्तस्मिन् यशोनिहितम्" । शत०ब्रा० ।

अर्वाच् अव्य० अवरे काले देशे वा अञ्चति अनच्-क्विन् पृषो० अर्वादेशः । १पश्चात्काले २मध्यकाले "अर्वाग्दशभ्यो वर्षेभ्यः" भुज० ४तत्कालवर्त्तिनि त्रि० "ये केचिदस्मादर्वाञ्चो लोकाः" ऋ०उ० । "कथं वा दीयतामर्वाङ्मुनिता धर्म्मरोधिनी" किरा०स्त्रियां ङीप् अर्वाची "उर्म्मीदर्व्वा–"अर्वाचीश्च पराचीश्चोपदधाति" शत ब्रा० ।३विपर्य्यस्ते अञ्चेच्+असि तस्य लुक् ।४अवरकालादौ ५मध्येच अव्य० । ततोभवार्थे शुल् तुट् च अर्वाक्तनः । तद्भवे त्रि० स्त्रियां ङीप् । [गर्भे यस्य । पर्जन्ये मेघे ।

अर्वाग्वसु अर्वाक् अभ्यन्तरे अर्वाचीनं वसु दृष्टिहेतूदकं

अर्वाचीन त्रि० अर्वागभवः खञ् । अवरकालभवे । "अर्वाचीनं सुते मनो भावा कृणोतु" ऋ०१,८४,२, "यदूर्द्धं पृथिव्या अर्वाचीनमन्तरीक्षात्" शतब्रा० ।

अर्वावत् त्रि०,अवरकालोऽस्यास्य मतुप् पृ० अर्वामेयः दीर्घः मस्य वः । अर्वाचीने । "अर्वावतो न आगहि परावतश्च" ऋ०२,४०८, । "अर्वावतः अर्वाचीनान्" भा० ।

अर्वावसु पु० देवानां होतृविशेषे "इदमहमर्वावसोः सदने सीदामीति" अर्वावसुर्वा एष देवानां होता तस्यैव सदने सीदति" शत०ब्रा० "अर्वाक् वसु धनमस्य पृथो" भा० ।

अर्व्वुक पु० अर्व–हिंसने वा० उकञ् । आटविके दक्षिणदेश स्थे नृपभेदे ते च सहदेवेन जिताः "सचीना अर्वुकाश्चैव राजानश्च महाध्वजाः । तांस्तानाटविकान् सर्व्वान् अजयत् पाण्डुनन्दनः" भा०स०प० सहदेवदिग्विजये ।

अर्श त्रि० ऋश+अच् । अश्लीले पामिके "अनर्शरात्रिशब्दे १५१ पृष्ठे उदा० । २अर्शोरोगे न० ।

अर्शआदि पु० अर्शआदिर्येषाम् । अस्त्यर्थे अच्प्रत्ययनिमित्त भूते "अर्शे आदिभ्योऽच्" पाणिन्युक्ते शब्दसमूहे । सच गणः अर्शस् उपस् तुन्द–चतुर पलित, जटा घाटा अघ, कईम अन्ध, खवख, (खाङ्गाङ्गीनात्) (वर्षात्) आकृतिगणोऽयम् ।

अर्श(र्ष)स् न० ऋ–असुन् गुट् (सुट् दन्तादिरित्यन्ये) । बलिकाकारे गुह्यस्थरोगभेदे यथाह सुश्रुतः "षडर्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति ॥ तत्रानात्मवतां यथोक्तैः प्रकोपणैर्व्यि रुद्धाध्यशनस्त्रीप्रसङ्गोत्कटुकासनशुष्कयानवेगविधारणादिभिर्विशेषैः प्रकुपिता दोषा एकशो द्विशः समस्ताः शोणितसंहिता वा यथोक्तं प्रस्रुताः प्रधानधमनीरनुप्रपद्याऽधोगत्वा गुदमागम्य प्रदुष्य बलीन्मांसप्ररोहान् जनयन्ति विशेषतोमन्दाग्नेस्तथा तृणकाष्ठोपललोष्टवल्मीकादिभिः शीतोदकसंस्पर्शनाद्वा कन्दाः परिदृश्यन्ते समादयन्ति तान्यर्शांसीत्याचक्षते ॥ तत्र श्लेष्मान्द्रप्रतिबद्धमूर्द्ध्वगुदं गुदमाङ्कसक्थिनी वलयस्त्रिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी संवरणी चेति । चतुरङ्गुलायताः सर्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः॥ शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः । गजतालुनिभाश्चापि वर्त्मतः समुदीरिताः ॥ रोमान्तेभ्यो यवाध्यर्द्धं गुदौष्ठः परिकीर्त्तितः ॥ प्रथमा तु गुदौष्ठादङ्गुलमात्रे । तेषान्तु भविष्यतां पूर्व्वरूपाणि, अन्नेन श्रद्धा कृच्छ्रात्क्रिरस्त्रीकासकृथिसदनमाटोपः कार्श्यमुद्गारबाहुल्यमच्छोच्च व्यथुरन्द्रकूजनं गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणी दोषशोफग्रहणं कासश्वासौ भ्रमस्तन्द्रा निद्रेन्द्रियदौर्ब्बल्यञ्च । जाते-

श्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति ॥ तत्र मारुतात्मरिष्टोष्कारुणवर्णानि विषमसमध्यानि कदम्बपुष्पतुण्डिकेरीनाडीसुषुक्षूचीमुखाकृतीनि च भवन्ति । तैरुपद्रुतः सशूलं संहतमुपवेश्यते कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्य वेदना गुल्माष्ठीलाप्लीहोदराणि चास्य तन्निमित्तान्येव भवन्ति, कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति। पित्तान्नीलाप्याणि तनूनि विसर्पीणि पीतावभासानि यकृत्प्रकाशानि शुकजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति तैरुपद्रुतः सरुधिरमतिसार्यते ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति, पीतत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति । श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि दृत्तानि स्निग्धानि पाण्डूनि करीषपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति कण्डूबहुलानि च भवन्ति तैरुपद्रुतः सश्लेष्माणमनल्पं मांसधावनप्रकाशमतिसार्यते श्वेतपीत ज्वरारोचकाविपाकशिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति, शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढपुरीषप्रपीडितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक् सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति ॥ सन्निपातजानि सर्वदोषलक्षणयुक्तानि ॥ सहजानि दुष्टशोणितशुक्रनिमित्तानि तेषां दोषत एव प्रसाधनं कर्त्तव्यं विशेषतश्चात्र दुर्दर्शनानि परुषाणि पाण्डूनि दारुणान्यन्तर्मुखानि तैरुपद्रुतः क्षयोऽल्पभुक् सिरास्नायुतगात्रोऽल्पप्रजःक्षीणरेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्म्लाणशिरोऽक्षिश्रवणरोगवान् सततमन्द्रकूजाटोपहृदयोपलेपारोचकप्रभृतिभिः पीड्यते ॥" "अर्श आद्या महारोगा अतिपापाङ्गवन्ति हि" । भाता०स्फु०। पृषो०सलोपः । अर्शस्यत्र न० ।

अर्शस त्रि० अर्शस्-अस्त्यर्थेऽच् । बलिकाकारगुह्यव्याधियुक्ते । "क्लीबक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम्" मनुः ।

अर्शसान त्रि०कण्ड्व-असानच् सुट् च । बाधके हिंसके "अव प्रियमर्शसानस्य" ऋ०२,२०६ "अर्शसानस्य बाधसानस्य" भा० न्यर्शसानामोषति ऋ०१०१३०,८ २मन्दे हारावे "इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति ८,१२६, "अर्शसानं बाधमानं मन्दे हारावमसुरम्" भा० । [ङीप् ।

अर्शिन् त्रि० अर्शस्यस्य इनि । अर्शोरोगयुक्ते स्त्रियां

अर्शोघ्न पु०अर्शो हन्ति हन-ट । (ओल) १सूरणे, २भल्लातके च ३ अमनुष्यकर्तृकार्शोहननकारकमात्रे त्रि० "अर्शोघ्नं कारभं मूत्रं मानुषन्तु विषापहम् "यच्चान्यदपि स्निग्धमर्शोघ्नमसृष्टमूत्रपुरीषञ्च तदुपसेवेत" इति च सुश्रुतः । स्त्रियां ङीप् । सा च तालमूल्यामू मेदि०

अर्शोहित पु० अर्शसि हितः सेवनेन तन्नाशकत्वात् ७त० । १भल्लातके । २अर्शोरोगहितकारकमात्रे त्रि० अहित इति च्छेदे ।२तत्राहितकरे त्रि० ।

अर्ष्ण न० ऋष-गतौ भावे ल्युट् । १गमने करणे ल्युट् । २गमनसाधने स्त्रियां ङीप् । "याः सीमानं विरुजन्ति मूर्द्धानं प्रत्यर्ष्णोः अथ० ६,१८,१३ ।

अर्ह योग्यत्वे भ्वा० पर० अक० सेट् । अर्हति आर्हीत् आनर्ह लोके, वेदे तु आनर्हे । प्राप्तियोग्यतार्थे गतौ च सक० । अर्हीं अर्हितः अर्हितुम् अर्हित्वा अर्हणम् अर्हन् "हित्वाऽप्यहान्यर्हसि सोढु मर्हन्!"रघुः।"गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति" मनुः । "दण्डमर्हति माषकम् मनुः । स तस्माल्लब्धुमर्हति" स्मृतिः "तथापि त्वं महाबाहो नैनं शोचितुमर्हसि" गीता । क्वचिदस्यात्मनेपदित्वम् व्यत्ययेन । "सलिलं नार्हसे प्राज्ञ ! दातुमेषां हि लौकिकम्" "रावणो नार्हते पूजाम्"इति च रामायणम् ।

अर्ह पूजने चुरा०उभ०सक०सेट् ।अर्हयति ते आर्जिहत् त । "राजार्जिहत्तं मधुपर्कपाणिः" भट्टिः । अर्हयामास । अर्हणा अर्हयन् अर्हयितुम् अर्हयित्वा । "खगविणं तत्समामीनमर्हयेत् प्रथमं गवा"मनुः । पूजनं च स्तुतिनतिप्रभृतिभिः सम्माननम् । अभि+आभिमुख्येन सम्माननेऽपि । "अभ्यर्हितश्च" का० वार्त्ति० ।

अर्ह पु०अर्हयते चु०अर्ह-कर्मणि यत् । पूजास्तुत्यादिभिराराध्ये १ईश्वरे २शक्रे च । २पूजनीये त्रि० "अर्हानभोजयन् विप्रो दण्डमर्हति माषकम्"मनुः ४ विष्णौ पु० । "अभिप्रायः प्रियार्होऽर्हैः" विष्णुस० । "पूजास्तुतिनमस्कारादिभिः पूजनीय इत्यर्हैः" भा० । भावे घञ् । ५पूजने । अर्हति स्वा० अर्ह-कर्त्तरि अच् । देयोग्ये त्रि० । "तस्माद्वार्हा वयं हन्तुं धार्त्तराष्ट्रान् स्वबान्धवान्"गीता । 'अर्होऽसि कपिराजस्य स्त्रियं भोक्तुमनुत्तमाम्" रामा० । "नियुक्तायामपि पुमान् नार्यां जातोऽविधानतः । नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः" मनुः आर्षत्वात् कर्म्मणि न षष्ठी "पूजार्हावरिसूदन" गीतायान्तु "कर्म्मण्यण्" अण् उप० स० । भावे घञ् । ७गतौ ८योग्यत्वे भ्वादिनामनेकार्थत्वात् द्रव्यक्रययोग्यत्वात्च अर्ह-कर्मणि घञ्

दमूल्ये "महार्हशय्यापरिवर्त्तनच्युतैः" कुमा० "महानर्हो मूल्यमस्यास्तादृशी यया" इति मल्लि० ।

अर्हण न० अर्ह-भावे ल्युट् । १पूजने । "शिष्यवर्गपरिकल्पितार्हणम्" रघुः अर्हतेऽनेनकरणे ल्युट् । सम्मानसाधने द्रव्ये । "अर्हणं तत्कुमारीणामानृशंस्याय केवलम्" मनुः भावे युच् । "अर्हणा पूजायां स्त्री । "अर्हणामर्हते चक्रुर्मुनयोनयचक्षुषे" रघुः पूर्व्वदेवरिपुरर्हणां हरिः" माघः ।

अर्हणीय त्रि० चु० अर्ह-कर्म्मणि अनीयर् । १पूजनीये । अर्हतेऽनेन करणे अनीयर् अर्हणे साधु क वा । पूजासाधनद्रव्ये "अर्हणीयगवानुमन्त्रणे विनियोगः" भवदेवः ।

अर्हत् त्रि० "अर्हः प्रशंसायां कर्म्मणि शतृ । ४पूज्ये "अर्हणामर्हते चक्रु" द्विवाग्यद्वान्यर्हसि सोढुमर्हत्" इति च रघुः "सर्व्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः" इत्युक्तलक्षणे जैनदेवे पु० । तन्मतं सर्व्वदर्शनसंग्रहात् संगृह्यते ।

"ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेदनीयः प्रमाणपञ्चतिमध्यास्ते सद्भावप्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तोतातितैः "सर्व्वज्ञो दृश्यते तावद्वेदानोमस्मदादिभिः । दृष्टो न चैकदेवोऽस्ति त्रिकं वा योऽनुमापयेत् ॥ न चागमविधिः कश्चित्त्रिकसर्व्वज्ञबोधकः । न च तत्प्रार्थवादानां तात्पर्य्यमपि कल्प्यते ॥ न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥ अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् । क्षतिमेष त्वसत्त्वेन स कथं प्रतिपाद्यते ॥ अथ तद्वचनेनैव सर्व्वज्ञोऽन्यैः प्रतीयते । प्रकल्प्येतं कथं सिद्धिरन्योन्याश्रयतस्तयोः ॥ सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता । कथं तदुभयं सिध्येत् सिद्धमूलान्तराद्यते ॥ असर्व्वज्ञप्रणीतात्तु वचमान्मूलवर्जितात् । सर्व्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानतु ॥ सर्व्वज्ञसदृशं किञ्चिदादि पश्येम सम्प्रति । उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥ उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः । अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवदित्यादि" ॥ अत्र प्रतिविधीयते यदभ्यधायि सद्भावप्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तदयुक्तं तत्सद्भावावेदकस्यानुमानादेः सद्भावात् । तथा हि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्प्रतिबन्धकक्षयेसति प्रक्षीणप्रतिबन्धप्रत्ययत्वात् यत् यद्प्रतिबन्धक्षयेसति प्रक्षीणप्रतिबन्धप्रत्ययं तत् तत्साक्षात्कारि यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तद्प्रतिबन्धक्षयेसति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति । तावदशेषार्थग्रहणस्वभावत्वमात्मनः सिद्धं चोदनाबलाच्चिखिलार्थज्ञानात् नाभ्यन्यथानुपपत्त्या सर्व्वमनैकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयतीत्येवं जातीयकैरध्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयकज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम् । न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्दर्शनादित्रयबलेन सकलावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया पुनरन्येऽपि सुद्रोपदृष्टा विद्वाद्याः । नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशदं मुख्यप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञत्वानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेन्नैष अनादिमुक्तत्वस्यैवासिद्धेः सर्व्वज्ञोऽनादिमुक्तः मुक्तत्वादितरमुक्तवत् बद्धापेक्षया च मुक्तव्यपदेशः तद्रहिते चाकाशवत् । नन्वनादेः चित्त्वादिकार्य्यपरम्पराया कर्त्तृत्वेन तत्सिद्धिः तथाहि चित्त्वादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदिति तदयुक्तं कार्य्यत्वस्यैवासिद्धेः । न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति । सावयवत्वं, समवेतद्रव्यत्वं, किमवयवसंयोगित्वं अवयवसमवायित्वम् अवयवजन्यत्वम् समवेतद्रव्यत्वम् समवेतबुद्धिविषयत्वं वा । न प्रथमः, आकाशादावनैकान्त्यात् । न द्वितीयः सामान्यादौ व्यभिचारात् । न तृतीयः साध्यविशिष्टत्वात् । न चतुर्थः विकल्पयुगलार्गलग्रहणत्वात् समवायसम्बन्धवत्त्वे सति द्रव्यत्वं समवेतद्रव्यत्वम्, अन्यत्र समवेतद्रव्यत्वं वा विवक्षितं हेतुक्रियते । आद्ये गगनादौ व्यभिचारः तस्यापि गुणादिसमवायवत्त्वद्रव्यत्वयोः सम्भवात् । द्वितीये साध्यविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात् । अभ्युपगम्यैतदप्यणि वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात् । नापि पञ्चमः आत्मादिनानैकान्त्यात्तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात् । न च निरवयवत्वेऽप्यस्य सावयववार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येष्टव्यं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत् । किञ्च किमेकः कर्त्ता साध्यते किं वा सतन्त्रः प्रथमे प्रासादादौ व्यभिचारः स्यपत्यादीनां बहूनां पुरुषाणां तत्र कर्त्तृत्वो-

फलस्मादनेनैव सकलजगज्जननोत्तत्तावितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ "कर्त्तास्ति नित्यो जगतः स चैकः स सर्व्वगः सन् स्वयं स सत्यः। इमाः कुहेवाः कुविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वमिति" ॥ अन्यत्रापि। "कर्त्ता न तावदिह कोऽपि यथेच्छया वा दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः। कार्य्यं किमत्र भवतापि च तत्कलाद्यैराहृत्य च त्रिभुवन पुरुषं करोतीति" तस्मात् प्रागुक्तकारणत्रितयबलादावरणप्रक्षये सार्व्वज्ञं युक्तम्। न चासोपदेष्टृन्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादस्मद्याद्यैरर्थज्ञानस्य। न चान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्परायां बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्। रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसङ्गृहपरे परमागमसारे प्ररूपितं "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इति। विवृतञ्च योगदेवेन "येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्य्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रम्, "तत्त्वार्थं श्रद्धानं सम्यग्दर्शनमिति"। अन्यदपि "यविजिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते। जायते तद्विसर्गेण गुरोरधिगमेन वेति" ॥ "परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः" व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवाद्यः पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यथोक्तम् "यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा। योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः" इति ॥ तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् "मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति"। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्याप्तः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं सृष्टं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तम् अवच्छिन्नविषयं ज्ञानमवधिः। वीर्य्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानासंसृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम् "विज्ञानं स्वपराभासि प्रमाणं बाधवर्जितम् प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति" ॥ अन्तर्गणिकभेदस्तु सविस्तरस्तत्त्वैरागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्धानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक् चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता "सर्व्वथाऽवद्ययोगानां त्यागश्चारित्रमुच्यते। कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा। अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः ॥ न यत्प्रमादयोगेन जीवितव्यपरोपणम्। चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम् ॥ प्रियं पथ्यवचस्तथ्यं सूनृतव्रतमुच्यते। तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत् ॥ अनादानमदत्तस्यास्तेयव्रतमुदीरितम्। बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ॥ दिव्यौदरिककामानां कृतानुमतकारितैः। मनोवाक्काययत्नस्य त्यागो ब्रह्माष्टधा मतम् ॥ सर्व्वाभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः ॥ यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥ भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्। महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति" ॥ भावनापञ्चकप्रपञ्चञ्च प्ररूपितम् "हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्। आलोच्य भाषणेनापि भावयेत् सूनृतं व्रतमित्यादिना ॥ एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानाचरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्। अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वेस्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना "चिदचिद्रूपे परे तत्त्वे विवेकस्तद्विवेचनम्। उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः ॥ हेयं हि कर्त्तृरागादि तत् कार्य्यमविवेकिनः। उपादेयं परं ज्योतिरूपयोगैकलक्षणमिति" ॥ सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणस्य ज्ञानदर्शने उपयोगः स परस्परप्रदेशात्तु प्रदेशबन्धात् कर्म्मणैकीभूतस्यात्मनोऽन्यत्वप्रतिपत्तिकारणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमभावादौपशमिकक्षयात्मकक्षयौपशमिकभावेन कर्म्मोदयवशात् कलुषान्याकारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति यदवोचद्वाचकाचार्य्यः "औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य सत्त्वमौदयिकपारिणामिकौ चेति"। अनुदयप्राप्तारूढे कर्म्मण उपशमे सति जीवस्योत्पद्यमानो भावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादि द्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्म-

भावो मिश्रः यथा जलस्यार्द्रस्वच्छता । कर्मोदये सति भवन् भाव औदयिकः । कर्मोपशमाद्यनपेक्षः । सहजो भावः चेतनत्वादिः पारिणामिकः । तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः । तदुक्तम् स्वरूपसम्बोधने "ज्ञानाद् भिन्नो नचाभिन्नो भिन्नाभिन्नः कथञ्चन । ज्ञान पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्तितः" इति ॥ ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैवावास्तवत्वादुभयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम् । अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवाकाशधर्म्माधर्म्मपुद्गलास्तिकायभेदान् । एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः । तत्र जीवा द्विविधाः संसारिणोमुक्ताश्च । भवाद् भवान्तरप्राप्तिमन्तः संसारिणः । ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः । शिक्षाक्रियाकलापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः । ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः । तत्र मार्गगतधूलिः पृथिवी रूक्षादिः पृथिवीकायः पृथिवीकायत्वेन येन गृहीता स पृथिवीकायकः पृथिवीं कायत्वेन यो ग्रहीष्यति न पृथिवीजीवः । एवमवादिष्वपि भेदचतुष्टयं योज्यम् । तत्र पृथिव्यादिकायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात् । ते च स्थावराः सर्व्वेनैकेन्द्रियाश्च । भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्ते एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतवः । तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्व्वत्रावस्थितिगतिस्थित्युपग्रहो धर्म्माधर्म्मयोरुपकारः अतएव धर्म्मास्तिकायः प्रवृत्त्यनुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः अन्यवस्तुप्रदेशमध्येऽन्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशस्य । सर्व्वरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः । तत्र द्व्यणुकादिस्कन्धभेदादखादित्पद्यते अखादिसंघातात् द्व्यणुकादिरुत्पद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः । अत एव पूरयन्ति गलन्तीति पुद्गलाः । कालस्यानेकप्रदेशत्वाभावेनास्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्य्यायवद्द्रव्यमिति । द्रव्याश्रया निर्गुणाः गुणा यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्म्माधर्म्माकाशकालानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि सामान्यानि गुणाः । तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादः तद्भावः परिणामः पर्य्यायः इति पर्य्यायाः यथा "जीवस्य घटादिज्ञानसुखक्लेशादयः पुद्गलस्य मृत्पिण्डघटादयः धर्म्मादीनां गत्यादिविशेषाः अतएव षट् द्रव्याणीति प्रसिद्धिः । केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानीति" । तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते औदारिकादिकायादि चलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः यथा सलिलावगाहद्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्मास्रवतीति स योग आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्वा नीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म्म सर्व्वप्रदेशैर्गृह्णाति यथा वा निष्प्रायःपिण्डे जले क्षिप्ते कर्म्मः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म्म समन्ताद्गृह्णाति । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च । स द्विविधः शुभाशुभभेदात् तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः । तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्म्मयोगः स आस्रवः शुभः पुण्यस्य, अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण सप्रपञ्चमभाणि । अपरेत्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रवः, इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् रूपादिज्ञानरूपेण परिणमत इति । मिथ्यादर्शनाविरतिप्रमादकषायवासाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्म्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः । तदुक्तं "सकषायत्वाज्जीवः कर्म्म भावयोग्यान् पुद्गलानादत्ते स बन्धः" इति । तत्र कषायग्रहणं सर्व्वबन्धहेतूपलक्षणार्थम् । बन्धहेतून् पपाठ वाचकार्य्यः "मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतवः" इति । मिथ्यादर्शनं द्विविधं मिथ्याकर्म्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कायादानकं षडिन्द्रियासंयमनञ्च अविरतिः ।

पञ्चसमितिगुप्तिष्वनुत्साहः प्रमादः । कषायः क्रोधादिः । तत्र कषायात्मानः स्थित्यनुभवबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः । बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभवप्रदेशास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाभ्रोधरवत् प्रदीपप्रभातिरोधायककुड्यवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवत्कोलस्योच्चनीचकारित्वं कुम्भकारवद्वायादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोषाध्यक्षवत् । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मविशान्तरभेदमूलप्रकृतिवेदनीयः । तथाचोदुमास्वातिवाचकाचार्यः "आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः" इति तद्भेदज्ञप्तमग्रहणात् पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रममिति । एतच्च सर्वं विद्यानन्दादिभिर्विस्तृतमिति विस्तरभयान्न प्रस्तूयते । यथा अजागोमहिष्यादिक्षीराणामेतावन्मधनेऽयं माधुर्यस्वभावादप्रच्युतिस्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतिनामादित्रिंशत्सागरोपमकोटिकोट्यः परा स्थितिरित्युक्तं कालदुग्धवत् स्नेहस्वभावादप्रच्युतिस्थितिः । यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्यकारणे सामर्थ्यविशेषोऽनुभावः । तथा कर्मपुद्गलानां कार्यकरणे सामर्थ्यविशेषोऽनुभावः कर्मभावपरिणतपुद्गलस्कन्धानामनन्तानन्तप्रदेशानाम् आत्मप्रदेशानुप्रवेशः प्रदेशबन्धः । आस्रवनिरोधः संवरः येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः । संसारकारणाद्योगादात्मनोगोपनं गुप्तिः । सा त्रिविधा कायवाङ्मनोनिमित्तभेदात् । प्राणिपीडापरिहारेण सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा । प्रपञ्चितञ्च हेमचन्द्राचार्यैः "लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः । जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥ आपद्य रागतः सर्वजनीनं मितभाषणम् । प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥ द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥ आसनादीनि संवीक्ष्य प्रतिलङ्घ्य च यत्नतः । गृह्णीयान्निक्षिपेद्वायेन् सा दानसमितिः" स्मृता ॥ कफमूत्रमलप्रायैर्निर्जन्तु जगतीतले । "यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्" ॥ अत एव, "आस्रवः स्रोतसो द्वार संवृणोतीति संवरः" इति निराङ्कः । तदुक्तमभियुक्तैः "आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् । इतीयमार्हती सुष्टिरन्यदस्याः प्रपञ्चनम्" ॥ अर्जितस्य कर्मणस्तपःप्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वं चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशोल्लूञ्चनादिकं तप उच्यते । सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च सा गीयते । यत् कर्म तपोबलात् स्वकालनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म निर्जरा । यदाह "संसारबीजभूतानां कर्मणां जरणादिह । निर्जरा सद्विधा द्वेधा सकामा कामनिर्जरा ॥ स्मृता सकामा यमिनामकामा त्वन्यदेहिनामिति" । मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्माभावात् निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः बन्धहेतुभवहेतुनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् यथा कुलालचक्रदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्भ्रमादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बद्धयो यत् कृतं प्रणिधानं सुकृतञ्च तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा वृत्तिकालेपकृतमलावूदृव्यं जलेऽधःपतति पुनरपेतवृत्तिकाबन्धमूर्ध्वं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवन्नोर्ध्वगतिस्वभावाच्चाग्निशिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं "पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविरुद्धं कुलालचक्रवदव्यपगतलेपालाबूवदेरण्डबीजवदग्निशिखावच्चेति" । अतएव पठन्ति "गत्वागत्वा निवर्त्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्त्तन्ते त्वालोकाकाशमागता" इति ॥ अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन ऊर्ध्वदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते "जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो

भोक्तश्च नवतत्त्वानीति"। सङ्गृहे प्रष्टत्ता वयमुपरताः स्म। अत्र सर्व्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः "स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च। स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति"। तत्सर्व्वमनन्तधीर्यैः प्रत्ययीपदत् "तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥ क्रमेणोभयवाच्यायां प्रयोगः समुदायभाक्। युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥ आद्योवाच्यविवक्षायां पञ्चमो भङ्ग इष्यते। अन्त्योवाच्याविवक्षायां षष्ठोभङ्गसमुद्भवः॥ समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति"। स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः। यथोक्तम् "वाक्येष्वनेकान्तद्योति गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक" इति॥ यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात् स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यते इति नानर्थक्यम्। तदाह "स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः। सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति."॥ यदि वस्तुस्येकान्ततः सर्व्वथा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यं नतावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम् "घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः। नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोरित्यादि" तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्विधाः पुनरप्यनिर्व्वचनीयमतेनान्विताने सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्तुस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्। यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्। "अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्। एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥ न्यायानामेकनिष्ठानां प्रष्टत्तौ श्रुतवर्त्मनि। सम्पूर्णार्थविनिश्चायि स्याद्वादस्तु श्रुतमुच्यते" "अन्योन्यपक्षप्रतिपक्षभावाद्यथापरे मत्सरिणः प्रवादाः। नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथार्हतः" इति॥ जिनदत्तसूरिणा जैनं मतमित्यमुक्तम्। "बलभोगोपभोगानामुभयोर्दानलाभयोः। अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्। हिंसा रत्यरती रागद्वेषौ हास्यादयः षट्। शोको मिथ्यात्वमेतेऽष्टादश दोषा न यस्य सः। जीनो देवोगुरुः सम्यक् तत्त्वज्ञानोपदेशकः। ज्ञानदर्शनचारित्राख्यमपवर्गस्य वर्त्मनि। स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च। नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा। जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च। बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते। चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः। सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः। आस्रवः कर्म्मणां बन्धो निर्जरस्तद्वियोजनम्॥ अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन। पुण्यस्य संस्तवे पापस्यास्तवे क्रियते पुनः॥ लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः। क्षीणाष्टकर्म्मणोमुक्तिर्निर्व्याबाधस्य निर्जनोदिता सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः। श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥ लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः। जर्ज्जरीभूतचेले द्वे तातुर्द्वितीयाः सुर्जिनर्षयः॥ भुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः। प्राहुरेषामयं भेदोमहान् श्वेताम्बरैः सहेति"॥

अर्हन्त पु० अर्ह+बा० झ। जैनदेवे अर्हति।

अर्हन्ती स्त्री अर्हतः पूज्यस्य भावः ष्यञ् नुम् ङीष् यलोपः। पूज्यतायाम्—"औत्वार्हन्तीचरैर्गुणैः" सि० कौ०।

अर्हा स्त्री चु० अर्ह—अङ्। पूजायाम्। युच् स्त्रीत्वे बाधकः

अर्हित त्रि० अर्ह—क्त। पूजिते। "अभ्यर्हितश्च" का० वा०

अर्ह्य त्रि० चु० अर्ह—कर्म्मणि ण्यत्। १प्राप्तुं योग्ये २स्तोतुं योग्ये च। चु० अर्ह—यत्। ३पूज्ये।

अल भूषणे, वारणे, भ्वा० उभ० सक० पर्य्याप्तौ अक० सेट्। अलति ते आलीत् आलिष्ट।

अल न० अल—अच्। १दन्तिकपुच्छस्थे कण्टकाकारे पदार्थे। हेम०। २हरितालेऽमरः।

अलक पु० अलति भूषयति मुखम् अल—कुन्। १ललाटस्थे स्निग्धे कुटिलकेशे, "कलकलोऽलकलोलदृशाऽन्यया" माघः "ललाटिकाचन्दनधूसरालका" कुमा० "अस्तूत्तालकले-

ष्टनौ" "अलकेषु चमरेणुश्च सूर्यं प्रतिनिधीकृतः" इति च रघुः। "अङ्गलिप्रकुङ्कमे२" च। क्विपकादित्वात् कापि नेत्त्वम्। अलका। अष्टवर्षाधिदशवर्षपर्य्यन्तवयस्कायां २कन्यायां ४कुबेरपर्य्यायेच स्त्री। साच पुरी मेरुशिखरोपरिस्थेति अग्निलोकशब्दे दर्शितम्। तस्याः स्वरूपमुक्तम् "सभा वैश्रवणी राजन्! शतयोजनमायता। विस्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा। तपसा निर्जिता राजन्! स्वयं वैश्रवणेन सा। शशिप्रभा प्रावरणा कैलासशिखरोपमा। गुहा कैरुह्यमाना सा खे विपक्षेव शोभते। दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता। महारत्नवती चित्रा दिव्यगन्धा मनोरमा। सिताभ्रशिखराकारा प्लवमानेव दृश्यते। दिव्या हेममयैरङ्गैर्विद्युद्भिरिव चित्रिता। तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः। स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुण्डलः। दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते। दिव्यपादोपधाने च निषण्णः परमासने। मन्दाराणां मुदाराणां वनानि परिलोड़यन्। सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन्। नलिन्या बालकाख्यायानन्दनस्य वनस्य च। शीतोहृदयसंह्लादी वायुस्तमुपसेवते" भा०स०प०। गन्धवतीं नाम वायुपुरीं वर्णयित्वा काशी० ख० "ततःपरं कुबेरस्य श्रीमत्येषालका पुरीत्युक्तम्। "अलकामतिवाह्यैव" कुमा०।

अलकनन्दा स्त्री अलति पर्य्याप्नोति कनुन् अलका नन्दयतीति अच् नन्दा कर्म्म०। १गङ्गायाम्। "विष्णुपदी विष्णुपदात् पतिता मेरौ चतुर्द्वीपात्। विष्कम्भाचलसरःसङ्गता गता वियता। सीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम्" सि०शि०। "तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसा लुठन्ती भारतमभि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" भा०५स्क०। अलकैर्नन्दति अच्। २कन्यायाम्। सा हि अलकैस्तुष्यति।

अलकप्रभा स्त्री अलका पर्य्याप्ता प्रभा यस्याः। कुबेरपुर्य्यामलकाख्यायाम्। [(पियासाल) पीतसालवृक्षे।

अलकप्रिय पु० अलकान् प्रीणाति चिक्कणीकरोति प्री-क।

अलकाधिप पु० अलकाया अधिपः ६त०। कुबेरे। अलकेश्वरादयोऽप्यत्र। "अथजोवदमरालकेश्वरौ" रघुः।

अलक्त पु० न रक्तोऽस्मात् ५ब० रस्य लत्वम्। १लाक्षारसे, स्वार्थे कन्। अलक्तकोऽप्यत्र २तद्वृक्षे तौ लाक्षायाञ्च। "अलक्ताकाङ्कां पदवीं ततान" कुमा०रघुश्च। "चिरोज्झितालक्तकपाटलेन" कुमा०गोरचनालक्तककुङ्कुमेनेति" तन्त्रम्।

अलक्षण न० लक्षणमनुमापकं सुचिह्नं न०त०। १अननुमापके, सुचिह्नभिन्ने २दुर्लक्षणे च। लक्षणञ्च इतरभेदानुमापकं लिङ्गम् यथा पृथिव्यागन्धवत्त्वम् जलस्य स्नेहवत्त्वम्। शुभसूचकं चिह्नविशेषश्च लक्षणं तच्च लक्षणशब्दे वक्ष्यते। तदुभयभिन्नमलक्षणम् "आचाराद्वनमलक्ष्यमाचारोहन्यलक्षणम्" मनुः। नास्ति लक्षणं अनुमापकोऽव्यभिचारिहेतुः अशुभसूचकहेतुश्च यस्य।३तद्वति त्रि० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः। "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः। "अलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसन्नम्" शत० ब्रा०। "निर्ऋतीः कृष्णास्तुषपक्वास्तिस्रोऽलक्षणाः" कात्या० १७,२४,२३।

अलक्षित त्रि०लक्ष-क्त न०त०। १अज्ञाते २लक्षणेनानुमिते "अलक्षिताभ्युत्पतनो दृषेण" रघुः "वपुर्विरूपाक्षमलक्षितावधिः" काव्य०प्र०। ३अङ्कतचिह्ने च। "दक्षिणेन हारं सोमक्रयणी तिष्ठत्यलक्षिता व्यङ्गा" कात्या०। ७,६,१४, "अलक्षिता अनङ्किता" कर्क०।

अलक्ष्मी स्त्री विरोधार्थे नञ्त०। लक्ष्मीविरुद्धायां निर्ऋतौ "ज्यालक्ष्मीति" ख्यातायाम्। "अलक्ष्मीः कालकर्णी च" पुरा०। "अलक्ष्मीरपक्रामति" सुश्रुतः।

अलक्ष्य त्रि० न लक्ष्यते लक्ष-कर्म्मणि यत् न०त०। १अज्ञेये २दुर्ज्ञेये। "वपुर्विरूपाक्षमलक्ष्यजन्मता" कुमा०। न लक्ष्या लक्षणया बोध्या। ३लक्षणाबोध्यभिन्ने "न वाच्यत्वादिकं तस्य" इत्यस्य व्याख्याने "आदिशब्दादलक्ष्यत्वादि" सा०द०। नास्ति लक्ष्यं व्याजोयस्य। ४व्याजशून्ये त्रि०।

अलगर्द्द पु० लगति स्पृशति किप् लग् अर्द्दयति अर्द्द-अच् अल् स्वार्थे सन् अर्दो न भवति। १विषशून्ये जलव्याले पृषो० धत्वम् अलः पर्य्याप्नोति गच्छति वा गध-अच् वा। अलगर्दोऽप्यत्र। दर्वीकरगणनायां सुश्रुतः "महाशिरा अलगर्द्द आशीविष" इति। २जलायुकाभेदे स्त्री। "अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश तासां सविषाः षट् नावत्य एव निर्विषाः। तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। "रोमशा महापार्श्वा कृष्णमुखालगर्द्दा" इति च सुश्रु०।

अलग्न त्रि०न लग्नः संसृष्टः। लग्नभिन्ने असंसृष्टे "अलग्नमिव ह वै वागवदेद्यन्मनो न स्यात्" शत०ब्रा०"अलग्नमिव वक्ष्यव्यपदार्थेन सहासंसृष्टम्" भा०। अलग्नमित्यपाठः।

भाष्यानुक्तेः। ज्योतिषोक्ते पापाक्रान्तादिदुष्टलग्ने न०।

अलघु त्रि० न लघुः विरोधे न०त०। लघुवर्णभिन्ने १गुरुवर्णे आकारादौ २गौरवयुक्ते लाघवशून्ये। "जवनमलघुपीवरोरुवक्षा" माघः २दीर्घे च "अलघुप्रसारितविलोचनाञ्जलि." माघः। स्त्रियां वा ङीप्।

अलङ्करण न०अलम्+कृ–भावे ल्युट्। १भूषायाम्। करणे ल्युट्। २वलयादौ भूषणे। "आवसथोन्मर्दनालङ्करणदन्तप्रक्षालनान्यध्वर्योरदीक्षितस्य" कात्या० ८,६,२८, । न चालङ्करणं धार्य्यं क्वचिद्धेतुवशात्तया पुनः" विष्णुधर्म्मे पुरा०।

अलङ्करिष्णु त्रि० अलम् कृ–ष्णुच्। भूषके मण्डनकरणशीले। "अलङ्करिष्णवस्ते च शब्दमर्थं सुभौ तिधा" अग्निपु०।

अलङ्कर्त्तृ त्रि०अलम्+कृ–तृच्। भूषणकर्त्तरि स्त्रियां ङीप्।

अलङ्कर्म्मीण त्रि० अलं समर्थः कर्म्मणे ख। कर्म्मक्षमे।

अलङ्कार पु०अलम्+कृ–भावे घञ्। १भूषायाम्। करणे घञ्। २हारादौ भूषणे, साहित्यविषयदोषगुणप्रतिपादके ३ग्रन्थे, ४शब्दभूषणे–अनुप्रासादौ, ५शब्दार्थभूषणे–उपमादौ च। "शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" सा०द० उक्तम् शब्दार्थयोः शोभाकारित्वम् तल्लक्षणम्। ते च बहवः शब्दनिष्ठा अर्थनिष्ठाः उभयनिष्ठाश्च। तत्र जात्यादयः शब्दनिष्ठाः उपमादयोऽर्थनिष्ठाः पुनरुक्तवदाभासादय उभयनिष्ठाः तत्तदन्वयव्यतिरेकाभ्यां तथात्वम् शब्दनिष्ठासु बहुवस्तुषु केचित् तत्तच्छब्दे उक्ताः केचित् वक्तव्याश्च तच्छेदास्तावत् समासेनात्राभिधीयन्ते तत्र जात्यादयश्चतुर्विंशतिः शब्दालङ्काराः सरस्वतीकण्ठाभरणे दर्शिताः यथा "ये व्युत्पत्त्यादिना शब्दानलङ्कर्त्तुमिह क्षमाः। शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयोबुधैः"। "जातिर्गतीरीतिवृत्तिच्छायासङ्घोक्तियुक्तयः। भणितिर्गुम्फना लया पठितिर्यमकानि च। श्लेषानुप्रासचित्राणि वाक्रोवाक्यं प्रहेलिका। गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनेतयः। चतुर्विंशतिरित्युक्ताः शब्दालङ्कारजातयः"। तेषां लक्षणादीनि क्रमेण यथा तत्र १जातिः "तत्र संस्कृतमित्यादिर्भारतो जातिरिष्यते। सा त्वौचित्यादिभिर्व्वाचामलङ्काराय जायते संस्कृतेनैव कोऽप्यन्यः प्राकृतेनैव कोचन। साधारण्यादिभिःकोचित् कोचन श्लेष्मभाषया। न श्लेष्मितव्यं यत्नादौ स्त्रीषु नाप्राकृतं वदेत्। संकीर्णे नाभिजातेषु नाप्रबुद्धेषु संस्कृतम्। देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः। पैशाचाद्यं पिशाचाद्या मगधं हीनजातयः। संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः। शक्योरचयितुं कश्चिदपभ्रंशेन जायते"। तत्र जातिरपि षोढा यथोक्तं तत्रैव। "शुद्धा साधारणी मिश्रा सङ्कीर्णा रूढ्यगामिनी। अपभ्रष्टेति साचार्य्यैर्जातिः षोढा निगद्यते"। इति जातिः १

२ गतिः। "गद्यं पद्यं च मिश्रं च वाक्यं यत् सा गतिः स्मृता। अर्थौचित्यादिभिः साऽपि वाग्लङ्कार इष्यते। कश्चिद्गद्येन पद्येन कश्चिन्मिश्रेण शक्यते। कश्चिदेकेन च द्वाभ्यां काव्येऽर्थः कश्चन त्रिभिः। द्रुता विलम्बिता मध्या साथ द्रुतविलम्बिता। द्रुतमध्या च विज्ञेया तथा मध्यविलम्बिता। सा लघूनां गुरूणाञ्च बाहुल्यात्तत्व मिश्रणैः। गद्ये पद्ये च मिश्रे च षट् प्रकारोऽपि जायते। तत्र वृत्तं च जातिश्च पद्यमात्रस्य पृथक्। समञ्चार्द्धसमं चेति विषमञ्च प्रचक्षते"। "वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" वृ०र०। 'गद्यमुत्कलिकाप्रायं पद्यगन्धीति च द्विधा। द्विधैव गद्यपद्यादिभेदान्मिश्रमपीष्यते। ललितं निष्ठुरं चूर्णमाविद्धं चेति योऽपरः। विशेषः सतु गद्यस्य रीतिवृत्त्योर्विशिष्यते"। गतिः २।

३ रीतिः यथा "वैदर्भ्यादिगतः पन्थाः काव्ये मार्ग इति स्मृतः। रीङ् गताविति धातोश्च व्युत्पत्त्या रीतिरुच्यते। वैदर्भी साथ पाञ्चाली गौड़ियावन्तिका तथा। लाटीया मागधी चेति षोढा रीतिर्निगद्यते। तत्राद्यासा निःशेषश्लेषादिगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते"। दर्पणे तु "माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते" लक्षिता। "समस्तपञ्चषपदामोजःकान्तिविवर्जिताम्। मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः। समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः। अन्तराले तु पाञ्चालीवैदग्ध्यो र्यावतिष्ठते। सावन्तिका समस्तैः स्याद् द्वित्रैरिक्षचतुरैस्तथा। समस्तरीतिव्यामिश्रा लाटीया वृत्तिरिष्यते। पूर्व्वरीते रनिर्वाढे खण्डरीतिस्तु मागधी"। रीतिः३।

४ वृत्तिः यथा। 'या विकाशेऽथ विक्षेपे संकोचे विस्तरे तथा। चेतसो वर्त्तयित्री स्यात् सा वृत्तिः सापि षड्विधा। कौशिक्यारभटी चैव भारती सात्वती परा। मध्यमारभटी चैव तथा मध्यमकौशिकी। मुकुरार्धसंदर्भा कौशिकी तासु कथ्यते। यातु प्रौढ़ार्थसंदर्भा वृत्तिरारभटी तु सा। कोमलप्रौढ़सन्दर्भा कोमलार्था च भारती। प्रौढ़ार्थकोमलप्रौढ़संदर्भां सात्वतीं विदुः। कोमलप्रौढसन्दर्भा या सा

मध्यमकौशिकी । प्रौढार्थकोमलैर्वर्णैर्मध्यमारभटीष्यते । ४

५ छाया । अन्योक्तीनामनुक्तिश्छाया सापीह षड्विधा, । लोकज्ञेकार्थकोन्मत्तप्रौढामत्तोक्तिभेदतः" । ५

६ मुद्रा । "स्वाभिप्रायस्य वाक्ये यद्दृश्यापि निवेदनम् । मुद्रां तां मुत्प्रदायित्वात् काव्यमुद्राविदो विदुः । साक्षिनु पदस्य वाक्यस्य विभक्तेर्वचनस्य च । समुच्चयस्य संदृब्धा शोढा न्यासेन जायते" । मुद्रा ६

७ उक्तिः । 'विधिद्वारेण वा यत्र निषेधेनाथ वा पुनः । प्रतीयते विशिष्टोऽर्थः सोक्तिरत्राभिधीयते । विधेरथ निषेधात् स्यादधिकारात् विकल्पनात् । नियमात् परिसंख्याया उपाधेः सेह षड्विधा" । उक्तिः ७

८युक्तिः । 'अयुज्यमानस्य मिथः शब्दस्यार्थस्य वा पुनः । योजना क्रियते यासौ युक्तिरित्युच्यते बुधैः । पदं चैव पदार्थश्च वाक्यं वाक्यार्थ एव च । विषयोऽस्याः प्रकरणं प्रबन्धश्चाभिधीयते । योगकारणपर्यायाङ्गाङ्गिभावपरम्पराः । पदयुक्तेर्निमित्तं स्युर्निरूढाः पदसिद्धये । विरुद्धानां पदार्थानां गत्यादीनां परस्परम् । योजनायेह तां युक्तिं पदार्थविषयां विदुः । गर्भः सह निगर्भेण संदृब्धिः समसङ्गसा । हेतवो वाक्ययुक्तीनां क्रियन्तामेवमादयः । यत्तदादेरुपादानं क्रियाभ्यासश्च युज्यौ । क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः । यदश्चब्देयर्थैलादिवर्णनाभ्युपपत्तये । वाक्यं सेह प्रकरणविषया युक्तिरिष्यते । प्रबन्धविषयार्थेवं युक्तिरुक्ता मनीषिभिः" । युक्तिः ८

९ भणितिः । "उक्तिप्रकारो भणितिः सम्भवेऽसम्भवे च सा । विशेषसंदृब्धाश्चर्यं कल्पनासु च कल्पते" । भणितिः९

१० गुम्फना । 'वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता । शब्दार्थसमपर्यायपदवाक्यकृता च सा" । गुम्फना १०

११ लया । 'लयेत्यादुः पदार्थानां घटना या परस्परम् । सा प्रक्रान्तेन कस्मिंश्चित्प्रक्रान्तेन कुत्रचित् । अतिक्रान्तेन कुत्रापि यथायेवर्णयोः क्वचित् । क्वचित् वाच्यार्थयोः क्वापि प्रकीर्णानां च दृश्यते" । लया ११

१२ पठितिः "काकुस्वरपदच्छेदभेदाभिनयकान्तिभिः पाठेयोऽर्थविशेषाय पठितिः सेह षड्विधा" । पठितिः १२

१३ यमकम् । "विभिन्नार्थकरूपाया यादृच्छिवर्णसंहतेः । अव्यपेतव्यपेताभ्या यमकं तद्विगद्यते । तदव्यपेतयमकं व्यपेतयमकं तथा । स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते । तत्र पादादिमध्यान्तस्थानान्तेषु प्रकल्प्यते । यदव्यपेतमन्यद्वा तत्स्थानयमकं विदुः । चतुस्त्रिद्येकपादेषु यमकानां विकल्पना । आदिमध्यान्तमध्यान्तमध्याद्यान्तसर्वतः । अत्यन्तं बहवस्तेषां भेदाः संभेदयोनयः सुकरा दुष्कराश्चैव," अग्निपुराणे तु । अनेकवर्णावृत्तिर्या भिन्नार्थप्रतिपादिका । यमकं सा व्यपेत चाव्यापेतेति द्विधा मता । आनन्तर्याद्व्यपेता स्यात् व्यपेता व्यवधानतः । द्वैविध्येनानयोः स्थानपादभेदाच्चतुर्विधम् । आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः । सर्व्वथा पूर्व्वपूर्व्वेण चेत्यादिनोत्तरोत्तरम् । एकद्वित्रिपदारम्भात्तत्पादात्तदूपदात् परम् । तृतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् । पादान्तयमकं चैव कोटीयमकमेव च । संसर्गयमकं चैव विक्रान्तयमकं तथा । यमकं चक्रवालं च संदश्यमकं तथा । पादाद्ययमकं चैव तन्तु मैत्रीयमेव च । दशधा यमकं श्रेष्ठं तद्भेदाबहवोऽपरे" इत्युक्तम् । तत्रास्थानयमकमुक्तं "नादौ न मध्ये नान्ते यत् सन्धौ वा यत् प्रकाशते । अव्यपेतव्यपेतं तदस्थानयमकं विदुः । पादे श्लोके च तत्प्रायः पादसन्धौ च बध्यते । स्वभेदे च चान्यभेदे च स्थूलं सूक्ष्मं च सूरिभिः" । अन्यदग्निपुराणादौ ज्ञेयम् । यमकम् १३

१४ श्लेषः "एकरूपेण वाक्येन द्वयोरारभ्यमर्थयोः । तन्त्रेण यत् स शब्दज्ञैः श्लेष इत्यभिधीयते । प्रकृतिप्रत्ययोत्थौ द्वौ विभक्तिवचनाश्रयौ । पदभाषोक्तवौ चेति शब्दश्लेषा भवन्ति षट्" । १४ श्लेषः

१५ अनुप्रासः । "आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता । अलङ्कारेषु विद्वद्भिरनुप्रासः स दर्श्यते" "श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नामभिरुक्तिभिः । लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाश्यते" तत्र श्रुत्यनुप्रासः १७८पृष्ठे दर्शितः । स च त्रिविधः आभ्योनागर उपनागरश्चेतिभेदात् । आभ्योऽपि चतुर्विधः मसृणोऽमसृणो वर्णोत्कटो वर्णानुत्कटश्चेति भेदात् । वृत्त्यादीनां लक्षणानि तत्रैव । "मुखरावर्त्यमानेषु यः स्ववर्गेषु वर्त्तते । काव्यव्यापी स संदर्भो वृत्तिरित्यभिधीयते । कार्ष्णाटी कौन्तली कौड्री कौङ्कणी वानवासिका । द्राविड़ी माथुरी मात्सी मागधी ताम्रलिप्तिका । औड्री पौण्ड्रीति विद्वद्भिः सा द्वादशविधोच्यते" । तत्र कवर्गेणानुप्रासवती कार्ष्णाटी एवं चवर्गेण कौन्तली, टवर्गेण कौड्री, तवर्गेण कौङ्कणी, पवर्गेण वानवासिका, यवर्गेण, द्राविडी । यवर्गेण माथुरी, द्वित्रिवर्गानुप्रासवती मात्सी । द्वाभ्यां गर्भितैकवर्गानुप्रासवती मागधी । स्वान्यसंयोगिकवर्गानुप्रासवती ताम्रलिप्तिका ।

सरूपसंयोगियथिता औड्री । असरूपसंयोगियथिता गौड्री । अन्ये तु "सर्गादीनामसम्बन्धः सम्बन्धोवापि वैमिथः स्फुटादिबन्धसंसिद्ध्यै सेह वृत्तिर्निरुच्यते । सौकुमार्य्यमथ गौढिर्मन्थुरत्वञ्च तद्गुणौ । गम्भीरौजस्विनो प्रौढ़ा मधुरा निष्ठुरा त्रया । कठोरा कोमला मिश्रा परुषा ललिता मिता। इति द्वादशधा भिन्ना कविभिः परिपठ्यते" इत्याहुः । "यथा चम्पकपुष्पादिसगादेर्वर्ण उच्यते वर्णावृत्तिस्तथा वाचां वर्णानुप्रास उच्यते । स तु स्तवकवान् स्थानी गर्भोविद्वतसंवृतः । गृहीतमुक्तः क्रमवान् विपर्य्यस्तोऽथ संपुटम् । मिथुनं वेणिका चित्रोविचित्रश्चापि वर्ण्यते"। स्थानेस्थाने वर्णस्तवकस्य विन्यासात् स्तवकवान्। नियतविवक्षितस्थानविशेषे विन्यासभाजी स्थानी । आवृत्तौ वर्णान्तरायेण गर्भः । स्थानेस्थाने विकाशसङ्कोचाभ्यां विद्वतसंवृतः । चक्रवालवद्दानोपादानाभ्यां गृहीतमुक्तः । क्रमेण द्वित्रवर्णानां संयोगस्वराणामावृत्तिः क्रमवान् । स्वरसंयोगवर्णानां क्रमेणावृत्तिश्च क्रमवान् । विपर्य्ययोपन्यासात् विपर्य्ययः । आद्यवर्णवर्त्तिना स्वरेण सह पादमध्यान्तयोरनुप्रासः संपुटम् । अन्तःपादमुपसंहारोयत्रानयोर्विवक्षितस्वरानुप्रासे मिथुनम् । आ वाक्यसमाप्तेः वर्णानुप्रासनिर्वाहो वेणिका । उक्तलक्षणेभ्योऽन्यश्चित्रः । एकवर्णावृत्तेर्द्व्यनुप्रासस्थवर्णान्तरवैचित्र्येण विचित्रः । "समयमसमग्र" वा यत्रिह्नावर्त्तते पदम् । पदान्त्येन स प्रायः पदानुप्रासउच्यते । विसर्गबिन्दुसंयोगस्वर स्थानाविवक्षया । अनिर्वाहाय स प्रायो यमकेभ्यो विभिद्यते" "मसृणोदन्तुरः श्लक्ष्णः संपुटं सम्पुटावली । खिन्नः स्तवकवान् स्थानी मिथुनं मिथुनावली । गृहीतमुक्तनामान्यस्ततोऽन्यः पुनरुक्तिमान् । इति द्वादशभेदोऽयं मनीषिभिरिहोच्यते"। असंयुक्त वर्णावृत्तेः पदानुप्रासो मसृणः । संयोगाधिक्ये दन्तुरः । स्वरेण सहावृत्तेः श्लक्ष्णः । पदाव्यवधाने संपुटम् । तेषामावली संपुटावली । रीतेरनिर्वाहात् खिन्नः ॥ वर्णानुप्रासवत् पदानुप्रासोऽपि स्थाने स्थाने निवेशे स्तवकवान् । स्थाननियमात् पदानुप्रासः स्थानी । प्रतिपादं द्वयोर्द्वयोः पदानुप्रासयोः निरन्तरमावृत्ति र्मिथुनं तदावली मिथुनावली । चक्रवालवत् पदानुप्रासो गृहीतमुक्तः पदानां पुनः पुनरावर्त्तने पुनरुक्तिमान् । "स्वभावतश्च गौण्या च वीप्साऽभीक्ष्ण्यादिभिश्च सा । नाम्नां द्विरुक्तिर्वाक्ये तु नामानुप्रास उच्यते" । आदिना निमूलसंख्यमादि गृह्यते । "अर्थभेदे पदावृत्तिः प्रकृत्या भिन्नयाथ वा । स स्तरिभिरनुप्रासोलाटीय इति गीयते ॥ सचाव्यवहितो व्यस्तः समस्त उभयःपुनः । उभयं चक्रवालञ्च गर्भश्चेहाभिधीयते" ॥ अनुप्रासः १५ ।

१६ चित्रम् "वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः । नियमस्तद्विदुर्धैः षोढ़ा चित्रमित्यभिधीयते" ॥ स्वरस्य पृथक् निर्देशात् वर्णा अत्र व्यञ्जनानि एकव्यञ्जनद्विव्यञ्जनत्रिव्यञ्जनादिभेदात् नानाविधः एवमेकद्वित्रादिस्वरचित्रम् । स्थानचित्रम् । निष्करणत्रिनिस्तालव्यादिभेदात् सप्तविधम् आकारचित्रम् पद्माद्याकारेण चित्रम्। तत्राष्टदलपद्मचित्रम् "कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च । प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलाम्बुजे" प्रकारान्तरं यथा । "अष्टधा कार्णिकावर्णाः पत्रेष्वष्टौ तथाऽपरे। तेषां सन्धिषु चाप्यष्टावष्टपत्रसरोरुहे" । प्रकारान्तरं यथा । "आकर्णिकं पुनः पर्णं पर्णान्तात् पर्णकर्णिके । प्रतिपत्रं व्रजेद्वीमानिह त्वष्टदलाम्बुजे" इति चतुर्हलं यथा "कर्णिकातो नयेदूर्द्ध्वं पत्राकाराक्षरावलीम् । प्रवेशयेत् कर्णिकायां पद्ममेतन्नृतुर्दलम्"। षोड़शदलं यथा "गोमूत्रिकाक्रमेणाद्य वर्णाः सर्व्वे समासतः । मध्ये त्वेकाक्षरन्यासात् पद्मोऽयं षोड़शच्छदः" अष्टपत्रं कविनामाङ्कं यथा "निविष्टाष्टदलन्यास मिदं पादार्द्धभक्तिभिः । अस्यैष्टकर्णिकं कोणैः कविनामाङ्कमम्बुजम् । एतानि चित्राणि अनुष्टुप्छन्दस्त्वेव । चक्रबन्धो यथा "पुरः पुरोलिखेत् पादानत्र त्रीनुत्तरोत्तरान् ।तुर्य्यन्तु भ्रमयेन्नौ नामाङ्कचक्रसंविधः" । अस्योद्धारोदर्शितो माघव्याख्यायां मल्लिनाथेन । दशमण्डलरेखात्मके नक्षत्रमण्डलान्तरालवति चक्रे नाभिस्थानेन सहैकविंशति कोष्ठं प्रत्येकं द्व्यक्षरवत् षड्त्रितयं समरेखया लिखित्वा तत्रैकस्यां षष्ठौ वामपार्श्वक्रमेण आद्यपादमालिख्य तथा प्रादक्षिण्येन द्वितीयायां तृतीयायां च षष्ठ्यां द्वितीय तृतीयौ पादौ लिखित्वा नेमिस्थाने वाह्यवलये साक्षरकोष्ठषट्केन सहाष्टादशकोष्ठवति तृतीयकोष्ठान्तवर्त्तिवर्णमारभ्य प्रादक्षिण्येन तुर्य्यपादं लिखित्वा तत्रैव समापयेत् । तत्रैव माद्यन्तवर्णैः तुर्य्यपादोद्धारः तत्रनेमिस्थाने आद्यपादत्रयदशमाक्षरसंवादः । तृतीयान्तकोष्ठे तुर्य्याद्यन्तवर्णयोः संवादः" यथा "सत्त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो लब्ध्वाधत्तयशुद्विरुद्धतरश्रीवत्स भूमिर्भुदा । हत्वा कामसपास्तभीः परबृहद्गव्याधः सनादं हरेरेकोद्यैः समकालमभ्यसुदयी रोषैस्तदा ततस्तरे"। अत्र तृतीयवलये "माघकाव्यमिदम्"। "षष्ठवलये, मिथु-

पालबधः इति काव्यनामाङ्कयोगः । एवमन्यत्रापि यथायथमूह्यम् गतिचित्रं गत्वाविलोमगत्या तुरङ्गादिगत्या वा चित्रं तच्च यमकभेद एव यथोक्तं दण्डिना । "आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा । यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्" तत्र पादगता विलोमावृत्तिर्यथा "यामताशक्षतायासा सायाता क्षयता मया" । रमणारकता तेऽस्तु स्तुते ताकरणामर" अर्द्धगता यथा । "सा रमानवरारोहा नगेभागमना हि या । याहि नामग भागेन हारोरा वनमार सा" श्लोकगा यथा । "यान मानय मारावि कयोनानजनासना । यासुदारयताधीना मायामायमनादि सा । सादिनामयमाया मानाधीता शरदाऽसुया । नासना जनना शोकविरामाय न मानया" ॥ तथाच पादविलोमावृत्तौ अयुक्पादयोर्गतिः युक्पादयोः प्रत्यागतिः । अर्द्धावृत्तौ प्रथमपादाभ्यां गतिः शेषाभ्यां प्रत्यागतिरिति गतिप्रत्यागतिरूपचित्रमित्यवधेयम् । श्लोकावृत्तौ तु पादचतुष्टयेन गतिः प्रतिगत्या श्लोकान्तरमिति भेदः । इत्येवं गतिचित्रम् । तुरङ्गगतिचित्रं यथा "क्रमात् पादचतुष्कस्य षष्ठिकः परिलेखने । तुरङ्गपादायातेन श्लोकोऽन्यश्चपजायते" स०क० । यथा ।

वा१	ला२०	सु६	का२०	ल२	वा२४	ला११	सा२६																	
का१६	न्ति१६	ला२	ल२६	क१०	ला२७	लि४	ता२२																	
व२१	खाट	सु१७	त१४	व२१	तीर्ह	सा२५	रा१२																	
द१८	पि१५	का२२	व्र७	त२८	ग१३	र्द्धि२२	त५																	

अत्र तुरङ्गगत्या "बालालम्बिततीव्रेखा सुकला रागतर्पिका। सुदन्तिका वर्द्धिता ता वा सा साला तलालसका इति दत्ताङ्कानुसारेण क्रमशोवर्ण्यग्रहणे श्लोकोऽयं जायते । अर्द्धभ्रमगतिचित्रं सर्वतोभ्रमतिगचित्रञ्च यथा । "आद्धरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि । तदिदं सर्व्वतोभद्रं सर्व्वतोभ्रमणं यदि" स०क० । तत्रार्द्धभ्रमयुक्तं २६५ पृ ४ । सर्वतोभद्रं तु—

दे	वा	का	नि	नि	का	वा	दे
वा	हि	का	ख	ख	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	ख	भ	व्य	व्य	भ	ख	नि

अत्रार्द्धभ्रमणवत् सर्व्वं किन्तु पादानामपि अनुलोमविलोमाभ्यां तथैव सर्वतोभ्रमणेन सर्व्वतोभद्रम् एवमग्रे दर्शयिष्यमाणगोमूत्रिकाबन्धोऽपि गोमूत्रगतिमत्त्वात् गतिचित्रमपि । बन्धेन बन्धविशेषेण चित्रम् बन्धचित्रं तच्च नानाविधं तत्र द्विचतुष्कचक्रबन्धो यथा "दृष्ट्वा शिखरिसन्धिमालां विष्टवार्द्धं समाश्चितैर्वर्णैः । द्विचतुष्कचक्रबन्धे नेमिविधौ चापरं भ्रमयेत्" । द्विश्चक्राटकबन्ध । "श्चक्रबन्धः श्चक्रं व्रजेदिति द्विश्चक्राटकबन्धोऽस्त्रिनेमिः" । निविड़ितचक्रबन्धः । "शिखरादन्यतरस्मात् प्रतिपर्व्वं भ्रमति रेखा चार्द्धम् । नेमौ तदितरमर्द्धं निविड़ितचक्राभिधे बन्धे" । स०क०एतेषामुद्धारोदाहरणे तत्रैव द्रष्टव्ये । शरपत्रबन्धः "चतुर्ष्वपि च पादेषु षड्भिर्योलिखितेष्विह । आदेरादेस्तुरङ्गस्य पादैः पादः समाप्यते" । यथा

न१	म१८	स्ते२	ज२०	ग५	तां२२	गा५	त्र२४																	
स६	दा२६	न११	व२८	क्रु१२	ल३०	च्च१५	य३२																	
स१७	म२	स्ते१६	ज४	स२१	तां६	ना२२	त्र८																	
सु२५	दा१०	म२७	वा२	न२६	ल१४	च्च२१	या६																	
अत्र तुरङ्गगत्या स एव श्लोकः । व्योमबन्धः । "अष्टादशशिखरचरीं गोमूत्रिकया चतुष्पदीं न्यस्येत् । पत्राद्यन्तैर्दृष्टः स ज्ञेयो व्योमबन्धोऽत्र"																								

सुरजबन्धः । "अत्र पादचतुष्केऽपि क्रमशः परिलेखिते । श्लोकपादक्रमेण स्याद्रेखासु सुरजत्रयी" ।

सा१	सै१०	ना११	ग२८	म२६	ना१६	र१८	श्लेष																	
र६	सै२	ना२७	सी१२	द२०	ना३०	र७	ता१७																	
ता१६	र२६	ना३	द१३	ज२१	नार्ह	म२१	त्त२४																	
धी२५	र२५	ना१४	ग४	म५	ना२२	म२३	या३२																	

तदुद्धारस्तु मल्लिनाथेन दर्शितः "तिर्य्यग्रेखालिखेत् पञ्च नवोर्द्धास्तत्र पङ्क्तयः । अष्टकोष्ठाश्चतस्रः स्युस्तासु श्लोकं लिखेत् क्रमात् । तत्राद्यद्वितितुर्यासु तुर्य्यतिद्व्याद्यपङ्क्तिषु । आद्यद्वितिचतुःपञ्चषट्सप्ताष्टमकोष्ठगः । दृश्यते प्रथमः पादश्चतुर्थ्यश्चैवमेव हि । चतुर्थपङ्क्तिप्राथम्यात्प्रथमावधिवीक्षणात् । द्वितीयादाद्यद्वितीयोर्द्धितुर्ये तितुरीयके । तुर्य्यतिद्व्योस्तृतीयाद्ये द्रष्टव्योऽङ्घ्रिर्द्वितीयकः । तृतीयोऽङ्घ्रिर्द्वितीयान्ते आद्यसप्तमषष्ठयोः । द्वितिपञ्चमयोस्तुर्य्यषष्ठसप्तमयोः क्रमात् । तृतीयान्त्ये च खण्डोयमथान्यः क्रम उच्यते ॥ आद्यन्तयुग्मयोः पङ्क्त्योर्विन्यासोगोमूत्रिकाक्रमः । ज्ञेयमेकं च द्वितीयं द्वे इयमेकमिति क्रमात् । यद्वा द्वितयमेकं च इयमेकं द्वयं पुनः । खण्डपङ्क्तिक्रमादेव विन्यासद्वितयं भवेत् ॥ यद्वा प्रथमतुर्य्याङ्घ्री खण्डपङ्क्त्योस्तदनुक्रमात् । द्वितीयोऽङ्घ्रिर्द्वितीयस्यां क्रमादाद्यचतुष्टये । व्युत्क्रमाच्च तृतीयस्यामाद्यमेव चतुष्टये । व्युत्क्रमेण द्वितीयस्यां तृतीयस्यां क्रमेण च ।

द्रष्टव्यो हि तृतीयोऽङ्कुरन्यकोष्ठचतुष्टये॥ विन्यासभेदास्त्वन्येपि सन्त्येव बहवोऽत्र हि। विस्तरात्तु न लिख्यन्ते स्वयमूह्या विचक्षणैः"॥ एकाक्षरसरजो यथा। "श्लोकस्यैकस्य पादेषु लिखितेषु चतुर्ष्वपि। तिस्रोदङ्कुरीरेह स्याच्चतुरेकाक्षरावली"। सरजप्रस्तारो यथा। "क्रमेणैकस्य पादेषु प्रस्तृतेषु चतुर्ष्वपि। तुर्यान् सरजमार्गेण श्लोकोयमुपजायते"। गोमूत्रिकाबन्धः। "गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव। गोमूत्रिकेति तत् प्राहुः दुष्करं चित्रवेदिनाम्। स०क० तच्च नानाविधं दर्शितम्। "दुष्करत्वात् कठोरत्वात् दुर्बोधत्वादिना विधेः। दिङ्मात्रं दर्शितं चित्रं स्वयमूह्यं मद्दात्मभिः" स०क०। "अनेकधा वृत्तवर्णविन्यासैः शिल्पकल्पना। तत्तत्प्रसिद्धवस्तूनां चित्रमित्यभिधीयते इति सामान्यतः सर्ववस्त्वाकारकल्पनया चित्रं भवतीत्युक्तम् अग्निपु०।१६

१७ वाकोवाक्यम् "उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधाः। द्वयोर्वक्तोस्तद्विच्छन्ति बहूनामपि सङ्गमे। ऋजूक्तिरथ वक्रोक्तिर्वैयात्योक्तिस्तथैव च। गूढप्रश्नोत्तरोक्तिश्च तद्भिदा त्रिविधैव तु" वाकोवाक्यम् १९।

१८ प्रहेलिका। "प्रहेलिका सलक्षप्रश्नः सापि षोढा च्युताक्षरा। दत्ताक्षरोभयं मुष्टिर्विन्दुमत्यर्धवत्यपि। क्रीडागोष्ठीविनोदेषु तज्ज्ञैर्याकीर्णमण्डले। परव्यामोहने चापि सोपयोगा प्रहेलिका"। तत्र "च्युताक्षरा "पयोधरभराक्रान्ता सञ्चलन्ती पदे पदे। पदमेकं न का याति, यदि हारेण वर्जिता"। अत्राहारेणेत्याकारच्युतिः दत्ताक्षरा यथा। "कान्तयानुगतः कोऽयं पीनस्तन्यो मदोद्यतः। मृगाणां पृष्ठतो याति, शम्बरो रूढयौवनः"। शम्बर इति वक्तव्ये मकारो दत्तः। च्युतदत्ताक्षरा च्युतमन्यत् दत्तञ्चान्यदक्षर यत्र सा यथा "विदग्धः सरसो रागी नितम्बोपरि संस्थितः। तरुण्यालिङ्गितः कण्ठे कलं कूजति को, विटः। अत्र घट इति वक्तव्ये घकारस्य च्युतिः विकारस्य दानमिति तथात्वम्। विन्दुमत्यादीनामुदाहरणानि स०क०दृश्यानि। प्रहेलिका १८।

१९ गूढम्। "क्रियाकारकसम्बन्धपदाभिप्रायवस्तुभिः। गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिभिः। "पाण्डवानां सभामध्ये दुर्योधन उपागतः। तस्मै गाञ्च हिरण्यञ्च सर्व्वाण्याभरणानि च"। अत्र क्रियापदम् गूढम्। योऽधन उपागतस्तस्मै गवादिकमदुरित्यर्थः। गूढम् १९

२० प्रश्नोत्तरम्। "वस्तु पर्य्यनुयोगस्य निर्भेदः क्रियते पदैः। विदग्धगोष्ठ्यां वाक्यैर्वा तं हि प्रश्नोत्तरं विदुः अन्तःप्रश्नबहिःप्रश्नबहिःरन्तःसमाश्रयैः। जातिगोत्रोत्तराभिख्यैः प्रश्नैस्तदपि षड्विधम्। प्रश्नोत्तरम् १२०

२१ अध्येयम् "यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम्। तदध्येयं विदुस्तेन लोकयात्रा प्रवर्त्तते"। अध्येयम् २१

२२ श्रव्यम् "श्रव्यं शास्त्रेतिहासौ च काव्यं शास्त्रं तथैव च। काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्" । यथा रघुवंशादि। श्रव्यम् १२२

२३ प्रेक्ष्यम् "यदाङ्गिकैकनिवर्त्त्यं सृज्झितं वाचिकादिभिः। नर्त्तकैरभिनीयेत प्रेक्ष्यं तत् लुण्डितादिवत्। तल्लास्ताण्डवं चैव ह्लिकं भम्या सह। ह्लीसकञ्च रासं च षट्प्रकारं प्रचक्षते"। ह्लङ्काररसप्रधानत्वे लास्यं वीररसप्रधानत्वे ताण्डवं, ह्लङ्कारवीररसप्रधानत्वे ह्लिकमिति किन्वरविषयं ह्लिकमेव भम्या। "मण्डलेन च यत्स्त्रीणां नृत्यं ह्लीसकं तु तत्। तत्रायको भवेदेको गोपस्त्रीणां हरिर्यथा। तदिदं ह्लीसकमेव तालबन्धविशेषयुक्तो रासः। प्रेक्ष्यम् २३।

२४ अभिनयः "अङ्गवाक्सत्वसंहार्य्याः सामान्याश्चित्र इत्यमी। षड्धा अभिनयास्तद्वदभिनेयं वचो विदुः"।२४

"चत्वारो विंशतिश्चैताः शब्दालङ्कारजातयः। शब्दसंदर्भमात्रेण हृदयं हर्तुमीशते" सर० कण्ठा०। एतेषामुदाहरणानि विस्तरभयात् न लिखितानि तत एवावगन्तव्यानि। अर्थालङ्कारास्तु मतभेदेन बहवः तथाहि तेषां समष्टिः दण्डिना दर्शिता यथा। "स्वरूपाख्यानमुपमा रूपकं दीपकावली। आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना। समासोऽतिशयोक्तेच्छा हेतुः सूक्ष्मो लवः क्रमः। प्रेयोरसवदूर्जस्वि पर्य्यायोक्तं समाहितम्। उदात्तापह्नुतिस्तुल्ययोगिता। विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने। सहोक्तिः परिवृत्त्याशीःसङ्कीर्णमथ भाविकम्। इति वाचामलङ्कारा दर्शिताः पूर्वसूरिभिः"। सरस्वतीकण्ठाभरणे तु द्वैराश्येन तेषां समष्टिरभिहिता यथा "अलमर्थमलङ्कर्त्तुं यत् व्युत्पत्त्यादिवर्त्मना। ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया। जातिर्विभावना हेतुरहेतु रूक्तमुत्तरम्। विरोधमन्योन्यं परिवृत्तिर्निदर्शना। भेदः समाहितं भान्तिर्वितर्कौ मीलितं स्मृतिः। भावः प्रत्यक्षपूर्वाणि प्रमाणानि च जैमिनेः"। प्रत्यक्षानुमानोपमानार्थापत्त्यभावरूपाणि षट् इति चतुर्विंशतिः। एते

तु अर्थमात्रनिष्ठाः । "शब्देभ्योऽर्थेभ्य उपमादिप्रतीयते विशिष्टोऽर्थः कवीनां सा उभयालङ्क्रिया मता । उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः । समाध्युक्तिः समासोक्तिरुत्प्रेक्षाऽप्रस्तुतस्तुतिः । सतुल्ययोगितोल्लेखः सहोक्तिः ससुच्चयः । आक्षेपोऽर्थान्तरन्यासो विशेषोक्तिः परिवृत्तिः । दीपकक्रमपर्य्यायाविषमश्लेषभाविकाः संसृष्टिरिति निर्दिष्टास्त्रयस्त्रिंशतिर्बुधैः" इत्युक्ता तेषां लक्षणानि सभेदं तत्रैव दर्शितानि चन्द्रालोकदर्पणकादिभिश्च सामान्यतोऽगणयित्वा नानाविधा दर्शिताः न संक्षेपतो गणिताः । अथार्थालङ्कारा एकत्र संगृह्य सोदाहरणलक्षणा अकारादिक्रमेण तेषु केचित् दर्शिता अपि क्रमानुरोधात् सर्वेऽत्र प्रदर्श्यन्ते ।

१ अक्रमातिशयोक्तिः "अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः" च० । "आलिङ्गन्ति सखं देव ! त्वां परांश्च शरास्तव" ।

२ अतद्गुणः "सङ्गतानुगत्यनङ्गीकारमाहुरतद्गुणम्" च० । "चिरं रागिणि मच्चित्ते निहितापि न रज्यसि" ।

३ अतिशयोक्तिः १०५ पृष्ठे उक्तलक्षणोदाहरणा ।

४ अत्यन्तातिशयोक्तिः "अत्यन्तातिशयोक्तिस्तु कार्यहेतुप्रसक्तिजा" च० । "यास्यामीत्यूदिते तन्वा बलयोऽभवदूर्म्मिका" । ऊर्म्मिका बलयोऽभवदित्यत्र क्षणत्वात्तथात्वम् ।

५ अत्युक्तिः "अत्युक्तिरद्भुताऽतथ्यशौर्य्यौदार्य्यादिवर्णनम्" च० "त्वयि दातरि राजेन्द्र ! याचकाः कल्पशालिनः" ॥ याचकानां राजतोधनलाभेन कल्पतरुतुल्यताकथनमौदार्य्यस्यात्युक्तिः ।

६ अधिकम् १२५ पृष्ठे लक्षणोदाहरणभेदाः उक्ताः ।

७ अनन्वयः १४६ पृष्ठे उक्तलक्षणोदाहरणः ।

८ अनुकूलम् "अनुकूलं प्रतिकूलमानुकूल्यानुबन्धि चेत्" च० । "कुपिताऽसि यदि तन्वि ! निधाय करजक्षतम् । बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा" ।

९ अनुगुणः "प्राक्सिद्धः स्वगुणोत्कर्षोऽनुगुणः परसन्निधेः" च० । "नीलोत्पलानि दधते कटाक्षैरतिनीलताम्" ।

१० अनुज्ञा "दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्" च० । "मय्येव जीर्यतां वातु यत्त्वयेह कृतं हरे ! । नरः प्रत्युपकारार्थं विपत्तिमभिकाङ्क्षति" ।

११ अनुमानम् "अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्" च० । "यत्र पतत्यबलानां दृष्टिनिशिताः पतन्ति तत्र शराः । तच्चापरोपितशरो धावत्यासां पुरःशरो मन्ये" । स०क० विशेष उक्तः । यथा "लिङ्गाद्यल्लिङ्गिनोज्ञानमनुमानं तदुच्यते । पूर्ववच्छेषवच्चैव दृष्टं सामान्यतश्च तत् । फलसामर्थ्यभेदेन त्रिधैतत् भिद्यते पृथक्" । तेषु यत्र कारणं दृष्ट्वा कार्यमनुमीयते तत् पूर्ववत् । "अविरलविलोलगलज्जलकुटजार्জ্জुननीपसुरभिवनवातः । अयमायातः कालो हन्त हताः पथिकगेहिन्यः" अत्र वर्षर्त्तोः कारणभूतात् कार्यं विरहिणीमरणमनुमीयते । यत्र कार्यं दृष्ट्वा कारणमनुमीयते तच्छेषवत् । "सामागमिष्यन्नूनं पतितोऽसि पादयोस्सखाः । कथमन्यथा ललाटे यावकार्द्रतिलकपङ्क्तिरियम्" । अत्र कार्यभूतया यावकतिलकपङ्क्त्या कारणं पादपतनमनुमीयते । यदुभयविधभिन्नं तत् सामान्यतो दृष्टम् "मक्षा मदान्धस्य शिखण्डियूनो-दृष्टेः पुरस्तादचिरप्रभेव" । सेयं विद्युदिव दृष्टेः प्रथमसुपलभ्यमाना कामन्दकी अविनाभावेन मालत्यागमनं गमयतीति सामान्यतो दृष्टम् । फलसामर्थ्ययोरुदाहरणानि तत्र द्रष्टव्यानि ।

१२ अन्योन्यम् "अन्योन्यं नाम यत्र स्यादुपकारः परस्परम्" च० । "त्रियामा शशिना भाति शशी भाति त्रियामया" । स०क० भेद उक्तः । "अन्योन्यस्योपकारोयस्तदन्योन्यं त्रिधा च तत् । वाच्यं प्रतीयमानं च तृतीयमुभयात्मकम् ! अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यरूपता । अन्योन्यालङ्कृतावन्तस्त्रयमेतदुदाहृतम्" । तत्र वाच्यम् । "कण्ठस्य तस्यास्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य । अन्योन्यशोभाजनाद्बभूव साधारणो भूषणभूष्यभावः । प्रतीयमानन्तु अत्रैवान्योन्यपदानुपादाने । अन्योन्यचूलिका अन्योन्यरूपपरिवृत्तिः सा च व्यत्ययेन विनिमयेन च भवति । यथा "लोचनाधरकृताङ्गरागा वासितानन विशेषितवासा । वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयञ्च वितेने" । अत्र वारुण्या यदधररागोऽपहृत्य चक्षुषि निक्षिप्तस्तेन व्यत्ययः । यच्च मुखामोदवासितया तया स्वामोदो विशेषितस्तेन विनिमयः तेन परिवृत्तिविनिमयाख्यालङ्कारावत्रान्तर्भूताविति द्रष्टव्यम् ।

१३ अपह्नवातिशयोक्तिः "रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः । यदाऽपह्नुतिगर्भत्वम् सैव सापह्नवा मता ।" च० "त्वत्सङ्गिषु सुधा राजन् ! भ्रान्ताः पश्यन्ति तां विधौ" ।

१४ अपह्नुतिः २४१ पृष्ठे उक्तलक्षणोदाहरणा । स०कण्ठा० अन्यथोक्तम् । "अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्, औपम्यवत्यनौपम्या चेति सा द्विविधोच्यते" तत्र औपम्यवती यथा "न केतकीनां विलसन्ति रूचयः प्रवा-

सिनो हन्त हसत्ययं विधिः। तड़ित्प्रतेयं न चकास्ति चञ्चला पुरःस्फरज्ज्योतिरिदं विजृम्भते" तत्र केतकीसूचीनां विधिहासतः प्रतीयमानसादृश्येन तड़ित्प्रतायाः स्फरज्ज्योतिषापह्नुतिः। अनौपम्या यथा "राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः। अवगच्छेयुराज्ञातमहो शीतानिलं वनम्" नचात्र सादृश्यमस्ति।

१५ अप्रस्तुतप्रशंसा २६४ पृष्ठे उक्तलक्षणोदाहरणा।

१६ अभावः। "असत्ता या पदार्थानामभावः सोऽभिधीयते। प्रागभावादिभेदेन स षड्विध इहेष्यते। स०क०प्रागभावः ध्वंसः अत्यन्ताभाव मिथ्यापदार्थाभाव इतरेतराभावः अभावाभावश्च तत्र ध्वंसो यथा "धृतिरस्तमिता गतिश्च्युता विरतं गेयमहर्तुनिर्व्यवः। गतमाभरणप्रयोजनं परिशून्यं मयनीयमद्य मे"। इतरेतराभावो यथा। "कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम्। इति जानन्नपि जनो मन्यते नेत्रदीर्घताम्" अत्यन्ताभावः यथा "प्रसीद सद्यो मुञ्चेमं चण्डि। मानं मनोगतम्। दृष्टमात्रेऽपि ते तत्र रोषः खद्योतायते"। सामर्थ्याभावो यथा। "मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः। न प्रभातरत्नज्योतिरुदेति वसुधातलात्" अन्योदाहरणानि तत्रैव द्रष्टव्यानि।

१७ अभिदाहेतुः "अभेदेनाभिदाहेतुर्हेतोर्हेतुमता सह"। च० "लक्ष्मीविलासो भवतः कटाक्षवैक्षणं प्रभो"!

१८ अर्थान्तरन्यासः, २७१ पृष्ठे उक्तोदाहरणलक्षणः।

१९ अर्थापत्तिः, २७२ पृष्ठे उक्तलक्षणोदाहरणा। स०कण्ठा० "प्रत्यक्षादिप्रतीतोऽर्थोऽन्यथा नोपपद्यते। अर्थान्तरञ्च गमयत्यर्थापत्तिं वदन्ति ताम्। सर्वप्रमाणपूर्व्वत्वा देकस्योऽनेकगस्य सा। प्रत्यक्षपूर्व्विकेत्यादिभेदैः षोढ़ा निगद्यते। प्रत्यक्षपूर्व्विका यथा "निर्क्षेतुं शक्यमस्तीति मध्यं तव नितम्बिनि!। अन्यथानुपपत्त्यैव पयोधरभरस्थितेः"। अनुमानपूर्व्विका यथा "कपोलपुलकेनास्याः सूचितो मदनज्वरः। मनो निरन्तरासक्तः सद्यःकथयति प्रिये" योऽयं कपोलपुलकेनानुमितो मदनज्वरः स प्रिये मनसः निरन्तरासक्तिं विनानुपपद्यमानः अनुरागं कल्पयतीत्यनुमानपूर्विकार्थापत्तिः एवमन्या उदाहार्याः।

२० अल्पम् "अल्पन्तु स्तोकयादाधेयाद्यदाधारस्य स्तोकमता"। "मणिमालोर्म्मिका तेऽद्य करे जपवटायते"।

२१ अवज्ञा "दृष्टिहानो न चेत् स्तातमवज्ञालङ्कृतिश्च"सा न। "स्वल्पमेवाम्बु लभते पान्थः प्राप्यापि सागरम्" "भीलन्ति यदि मद्वाणि का हानिरहततद्युतेः"।

२२ असङ्गतिः "विरुद्धभिन्नदेशत्वं कार्य्यहेत्वोरसङ्गतिः१। अन्यत्र कारणार्थस्य ततोऽन्यत्र क्रतिश्च या२। अन्यत् कर्त्तुं प्रवृत्तौ च तद्विरुद्धक्रतिश्च या३" च०। क्रमेणोदाहरणानि। "विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गना१"। "अपारिजातां वसुधां चिकीर्षन् द्यां तथाऽकथाः"२। अपगतपरिजातं यस्याः नास्ति पारिजातो यत्र इति च। "गोत्रोद्धारप्रवृत्तोऽहि गोत्रोद्धारं पुराऽकरोः३। गोत्रा पृथ्वी गोत्रः पर्वतश्च।

२३ असम्भवः "असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम्।" च० "कोवेद गोपशिशुकः शैलमुत्पाटयिष्यति"।

२४ आक्षेपः "आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्१। निषेधाभासमाक्षेपं बुधाः केचन मन्वते२। आक्षेपोऽन्योविधौ व्यक्ते निषेधे चतिरोहिते३"। च० "चन्द्र! संदर्शयात्मानमथवास्ति प्रियासुखम्"१। "नायं दूति! तनोस्तापस्तस्याः कालानलोपमः२"। "गच्छ गच्छसि चेत् कान्त। पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयात्यत्र गतो भवान्"। ३

२५ आगमः "यदाप्तवचनं तद्धि ज्ञेयमागमसंज्ञया। उत्तमं मध्यमं चाथ जघन्यं चेति तत् त्रिधा"। स०क० तत्रोत्तमं विधिरूपं निषेधरूपञ्च। विधिरूपं यथा "दमं दानं दयां शिक्षे"रित्यादौ दास्यत दत्त दयध्वं इति विधिः। निषेधरूपं यथा "निवार्यतामालि! किमयं वटुः पुनर्विचक्षुः स्फुरितोत्तराधरः। न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्"। तथाच महान्तो नापभाषितव्या इति वाक्यार्थमर्य्यादया निषेधरूप उपदेशः। तदेतदुभयमप्यवश्यानुष्ठेयत्वादुत्तमम्। मध्यमम्पि द्विधा निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकञ्च तत्राद्यं यथा "कल्याणी बत गाथेयं लौकिकीं प्रतिभाति मे। एति जीवन्तमानन्दो नरं वर्षशतादपि" अत्र जीवन्नरः पश्यति भद्रमित्यर्थो निर्दिष्टवक्तृकतया निर्दिष्टः तत्र जीवनाय यतितव्यमिति रूपमाप्तवचनम्। "अत्रे वसति पिशाचो पिचुमर्दे दिनपतिर्वटे यक्षः। विश्राम्यति पद्मे श्रीस्तिलति गौरी मधूकतरौ" तदिदमनिर्दिष्टवक्तृकमनादिलोकप्रसिद्धपारम्पर्य्यमेतिह्यम्। अत्र सर्व्ववाक्यानां निषेधपर्य्यवसानात् अत्रं न सेवेत, पिचुमर्दं न निन्देत, वटं न छिन्द्यात्, पद्मं मूर्द्धि न बिभृयात्, मधूकं न पदा स्पृशेत्" इति निषेधचतुष्टयरूपआगमः। जघन्यं द्वेधा काम्यं निषिद्धं च। तत्र निषिद्धविषयविधिर्यथा "वयं बाल्ये बालांस्तरुणि-

मनि यूनः, परिणतानपेक्षामो दृष्ट्वा, परिणयविधान-स्थितिरियम् । त्वयारब्धं जन्म ऋषित्वमकार्ष्ट्येन विधिना न नो गोत्रे पुत्रि ! क्वचिदपि सतीलाञ्छनमभूत्" तदे-तच्चिरेधरूपम् निषिद्धविषयमाप्तवचनमसतीवचनरूपम् ।

२६ आशीः "आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा"। दण्डी "पातु वः परमं ज्योतिरष्टाङ्गमनसगोचरम्" ।

२७ उत्तरम् "किञ्चिदाकूतसङ्क्षिप्तं यद्गूढोत्तरमुत्तरम्" च०। "यत्रासौ वेतसी पान्थ । तत्रासौ सुतरा सरित्" ।

२८ उत्प्रेक्षा "सम्भावनाः स्युरुत्प्रेक्षावस्तुहेतूद्भवाः पुनः। उक्ता नुक्तास्वदाद्यात्तसिद्धासिद्धास्वहे परे"। च० "धूमस्तोमं तमः शङ्के कोकीविरहलक्षणम्" "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" "रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्"। "त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते यशी" "मध्यः किं कुचयोर्श्लथे बद्धः कनकदामभिः" "प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति" । दर्पणे तु अन्यथा विभज्य उदाहृतम् यथा "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना । वाच्या प्रतीयमाना सा प्रथमं विविधा मता वाच्येवादिप्रयोगेऽसादप्रयोगेऽपरा पुनः । जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि । तदष्टधापि प्रत्येकं भावाभावाभिमानतः । गुणक्रियास्वरूपत्वाद्विनिमित्तस्य पुनस्त्रिताः । ह्रादि'यद्विधतां यान्ति" । तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा ॥ "जरुः कुरङ्गकदृशस्त्रुलचेलाञ्चलोभाति । सपताकः कनकमयोविजयस्तम्भः स्मरस्येव" ॥ अत्र विजयस्तम्भस्य जातिवाचकत्वाज्जात्युत्प्रेक्षा ॥ "ध्याने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव" ॥ अत्र सप्रसवत्वं गुणः ॥ "गङ्गाम्भसि सुरत्राण ! तवाणस्त्व निःस्वनः । स्नातीवारिवधूवर्गगर्भपातनपातकी" ॥ अत्र स्नातीति क्रिया ॥ "सुखमेणीदृशोभाति पूर्णचन्द्र इवापरः" ॥ अत्र चन्द्रइत्येकव्यक्तिवाचित्वाद्द्रव्यम् । एते भावाभिमाने च । अभावाभिमाने यथा ॥ "कपोलफलकावस्य कण्ठं भित्त्वा तथाविधौ । अपश्यन्ताविवान्योन्यमीदृशां क्षामतां गतौ" ॥ अत्रापश्यन्ताविति क्रियाया अभावः । एवमन्यत् । निमित्तस्य गुणक्रियारूपत्वे यथा गङ्गाम्भसीत्यादौ स्नातीवेत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः । अपश्यन्ताविवेत्यादौ क्षामतागमनरूपं निमित्तं क्रिया एवमन्यत् । प्रतीयमानोत्प्रेक्षा यथा ॥ "तन्वङ्ग्याः स्नानयुग्मेन सुखं न प्रकटीकृतम् । हृदाय गुणिने स्थानं न दत्तमिति लज्जया" ॥ अत्र लज्जयेवेति द्रवाद्यभावात् प्रतीयमानोत्प्रेक्षा एवमन्यत् । अत्र वाच्योत्प्रेक्षायां षोडशसु भेदेषु मध्ये विशेषमाह "तत्र वाच्याभिदाः पुनः । विना द्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः", तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षयोः षोडशभेदास्तेषु जात्यादीनां त्रयाणां ये द्वादशभेदास्तेषां प्रत्येकं स्वरूपफलहेतुगतत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः । अत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु "जरुस्य विजयस्तम्भ" इति सप्रसवा इवेत्यादयः जातिगुणरूपाः। फलोत्प्रेक्षा यथा॥ "रावणस्यापि रामास्त्रोभित्त्वा हृदयमाशुगः । विवेश भुव माख्यातुमुरगेभ्यइव प्रियम्"॥ अत्राख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम् ॥ हेतूत्प्रेक्षा यथा ॥ "सैषा स्खली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमूर्व्याम् । अदश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्" ॥ अत्र दुःखरूपोगुणोहेतुत्वेनोत्प्रेक्षितः। एवमन्यत् । "उक्तयनुक्तयोर्निमित्तस्य द्विधा तत्र स्वरूपगाः" । तेषु चत्वारिंशत्संख्याकेषु भेदेषु मध्ये ये स्वरूपगायाः षोडश भेदास्ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां ह्रादि'यद्भेदा इति मिलित्वा षट् षड्भेदा वाच्योत्प्रेक्षायाः । तत्र निमित्तस्योपादाने यथा पूर्वोदाहृते स्नातीवेत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम् । अनुपादाने यथा 'चन्द्रइवापरः" इत्यत्र तथाविधसौन्दर्य्यातिशयोनोपात्तः । हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव तथाहि विश्लेषदुःखादिवेत्यत्र यन्निमित्तं बद्धमौनत्वम्, आख्यातुमिवेत्यत्र च भूप्रवेशस्तयोरनुपादाने असङ्गतमेव वाक्यं स्यात् । प्रतीयमानायाः षोडशसु भेदेषु विशेषमाह "प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः" । यथोदाहृते तन्वङ्ग्यास्नानयुग्मेनेत्यत्र लज्जयैवेति हेतूत्प्रेक्षितः अस्यापि निमित्तस्यानुपादानं न सम्भवति द्रवाद्यनुपादाने निमित्तस्य च कीर्त्तने उत्प्रेक्षायाः प्रमातुर्निश्चेतुमशक्यत्वात्। स्वरूपोत्प्रेक्षायत्र न भवति धर्म्मान्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात् यथा ॥ "अयं राजाऽपरः पाकशासन"इति॥ विशेषणाभावे च रूपकस्य,यथा "राजा पाकशासन" इति तदेवं ह्रादिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा।'उक्तानुक्तोः प्रस्तुतस्य पुत्रेकं ता अपि द्विधा" । ता उत्प्रेक्षाः । उक्तौ यथा ॥ "जरुः कुरङ्गकदृश" इति ॥ अनुक्तौ यथा

प्रभावत्वात् ॥ "इह हि संप्रति दिगन्तमाच्छादयता तिमिरपटलेन । घटितमिवाञ्जनपुञ्जैः पूरितमिव कृष्णसद्मोदैः । ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्,,॥ अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयो व्याप्तत्वं नोपात्तं यथा वा ॥ "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" ॥ अत्र तमसोलेपस्य व्यापनरूपोविषयोनोपात्तः अञ्जनवर्षणस्य तमःसंपातः, अनयोरुत्प्रेक्षानिमित्तञ्च तमसोऽतिबहुलत्वं धारावर्षाधःसंयोगश्च यथासंख्यम् । केचित्तु अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनञ्च निमित्तम् एवं नभोपि वर्षणक्रियाकर्तृत्वेनेत्याहुः । "अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्" तत्र सापङ्गोत्प्रेक्षा यथा । "अमुष्कलेन मुहुरोष्ठ-तपावकधूमकलुषाच्छाः । अप्राप्य मानभङ्गं विगलति लावण्यवारिपूर इव" । स्नेहहेतुगा यथा । मुक्तोत्करः सङ्कटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः । जानीमहेऽस्याः कमनीयकन्धुस्नेहाधिवासाद्गुणवत्त्वमाप" । अत्र गुणवत्त्वे स्नेहः कन्धुस्नेहाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः । अत्र जानीमहे इत्युत्प्रेक्षावाचकम् एवम् 'मन्येशङ्के ध्रुवं प्रायोनूनमित्येवमादयः" । क्वचिदुपमोपक्रमोत्प्रेक्षा यथा । "पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराजीः । वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूजितराजहंसाः"।इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा पर्य्यवसाने तु जलधितीरे यैवालस्थितेः संभवानुपपत्तेः संभावनोत्थानमित्युत्प्रेक्षा एवं विरहवर्णने । "केयूरायित-मङ्गदैरित्यत्र" "विकासिनीलोत्पलभिन्नकर्णे मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम् । भ्रान्तिमदलङ्कारे "सुधा दुग्धाब्धिरित्यादौ भ्रान्तानां वल्गादीनां विषयस्य चन्द्रिकादेर्ज्ञानं नास्ति तदुपनिबन्धस्य कविनैव कृतत्वात् । इह तु संभावनाकर्त्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः । सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः इह तूत्कटा संभाव्यभूतैका कोटिः । अतिशयोक्तौ विषयिणः प्रतीतस्य पर्य्यवसानादसत्यता प्रतीयते इह तु प्रतीतिकालएवेति भेदः । "रञ्जिता तु त्रिविधास्तरुयैर्ला नामितं तु गगनं स्थगितं तु । पूरिता तु विषमेरु धरित्री संहता तु कङ्कभल्लिभिरेण" इत्यत्र तर्व्वादौ तिमिराक्रान्ततारञ्जनादि रूपेण सन्दिह्यतइति सन्देहालङ्कारइति केचिदाहुः । तन्न एकविषये समानबलतयानेककोटिस्मरणस्यैव सन्देहत्वात् इह तु तर्व्वादिव्याद्यैः प्रतिसम्बन्धिभेदव्यापनादेर्निगरणेन रञ्जनादेः स्मरणञ्च । अन्ये त्वनिर्द्धारणरूपविच्छित्त्या अयत्नेनैककोट्यधिकोऽपि भिन्नोऽयं सन्देहप्रकारइतिवदन्ति च तदप्ययुक्तं निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हि सम्भावना तस्याश्चात्र स्फुटतया सद्भावात् नुशब्देन चेवशब्दवत्तया द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता अलमदृष्टसन्देहप्रकारकल्पनया । "यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते तदा चष्टे लोकः शशकइति नो मां प्रति तथा । अहन्त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणीकटाक्षोल्कापातव्रणकिण कलङ्काङ्कितततनुम्" इत्यत्र मन्येशब्दप्रयोगेऽपि उक्तरूपायाः सम्भावनाया अप्रतीतेर्वितर्कमात्रम्" नासावपह्नवोत्प्रेक्षा।

२९ उदात्तम् "लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" सा०द०। "अधःकृतान्मोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् । ज्योत्स्ना निपातात् चरतां पयोभिः केलीवनं द्रवितुमीश्वरीकरोति" । "नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा । अन्तं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते" ।

३० उपमा "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयो" सा०द०। रूपकादिषु साम्यस्य व्यङ्ग्यत्वं व्यतिरेके च वैधर्म्यस्याप्युक्तिः उपमेयोपमायां वाक्यद्वयम् अनन्वये च एकस्यैव साम्योक्तिरित्यस्याभेदः । "सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च । उपमेयं चोपमानं भवेद्वाच्यम्" सा उपमा साधारणोधर्म्मो द्वयोः सादृश्यहेतुर्गुणक्रियाजात्यादि, औपम्यवाचकमिवादि, उपमेयं मुखादि,उपमानं चन्द्रादि। "इयं पुनः । श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि । आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः" । यथेववादयः शब्दा उपमानान्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोधयन्तीति तत्सद्भावे श्रौती उपमा । एवं "तत्र तस्येवेत्यनेन" इवार्थे विहितस्य वतेरुपादाने । तुल्यादयस्तु "कमलेन तुल्यं मुखमित्यादौ"उपमेय एव । "कमलं मुखस्य तुल्यं"-मित्यादावुपमान एव "कमलं मुखञ्च तुल्यं"मित्यादावुभयत्रापि विश्रामन्तीति तत्सद्भावे आर्थी । एवं "तेन तुल्यमित्यादिना" तुल्यार्थे विहितस्य वतेरुपादाने। द्वे श्रौती आर्थी च । उदाहरणम् "सौरभमस्योरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ। हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले! ॥" अत्र क्रमेण त्रिविधा श्रौती। "मधुरः सुधावदधरः पल्लववत्कोमलौ करौ तस्याः । चकितहरिणलोचनाभ्यां सदृशौ चपले च लोचने तस्याः" ॥ "अत्र क्रमेण त्रिविधा आर्थी

"पूर्णा षडेव तत्। "लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः। त्रयाणां वानुपादाने औत्सार्थी सापि पूर्ववत्॰॥ सा लुप्ता। तद्भेदमाह। "पूर्णावद्धर्म्मलोपे सा विना औतीन्तु तद्धिते"। सा लुप्तोपमा धर्म्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्व्वोक्तरीत्या षट्प्रकारा, किन्त्वत्र तद्धिते औत्या असम्भवात् पञ्चप्रकारा। उदाहरणम्। "मुखमिन्दुरिव पाणिः पङ्कजेन समः प्रिये। वाक् सुधा दृगौत्पलस्ते बिम्बतुल्यो मनोऽनुजवत्"॥ "आधारकर्म्म विहिते द्विविधे च क्यचि क्यङि। कर्म्म कर्त्तृगुणे च स्यादेवं पञ्चधा पुनः"॥ धर्म्मलोपे लुप्तेत्यनुषज्यते। क्रमेणोदाहरणम्। "अन्तःपुरीयसि रणेषु, सतीयसि त्वंपौरं जनं, तव सदा रमणीयते श्रीः। दृष्टः प्रियाभिरहृतद्युतिदर्शमिन्द्रसञ्चार मत्र भुवि सञ्चरसि च्छितीश"!॥ अत्रान्तःपुरीयसीत्यत्र सुखविहारास्पदत्वस्य "सतीयसीत्यत्र" स्नेहनिर्भरत्वस्य च साधारणधर्म्मस्य लोपः। एवमन्यत्र ह्यूह्य यथादि तुल्यादिविरहात् औत्यादिविशेषचिन्ता नास्ति। इदञ्च केचित् औपम्यप्रतिपादकस्य वतेर्लोपे उदाहरन्ति तदयुक्तम् क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात्। ननु क्यङादिषु सम्यगौपम्यप्रतितीर्नास्ति प्रत्ययत्वेनाखतन्त्रत्वात् इवादिप्रयोगाभावाच्चेति चेन्न कल्पवादावपि तथा प्रसङ्गात्। न च कल्पवादीनामिवादितुल्यतयौपम्यस्य वाचकत्वं, क्यङादीनान्तु द्योतकत्वम्" इवादीनामपि वाचत्वे निश्चयाभावात्। वाचकत्वे वा समुदितं पदं वाचकं "प्रकृतिप्रत्ययौ स्वस्वार्थबोधकाविति च" मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यत्तु केचिदाहुः "वत्यादय इवाद्यर्थेऽनुशिष्यन्ते क्यङादयस्त्वाचारार्थे इति" तदपि न। न खलु क्यङादय आचरमात्रार्था अपि तु सदृशाचारार्था इति। तदेवं धर्म्मलोपे दशप्रकारा लुप्ता। "उपमानानुपादाने द्विधा वाक्यसमासयोः"। उदाहरणम्। "तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्"। अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः। अत्रैव च "मुखेन सदृशम्" इत्यत्र मुखं यथेदमिति" "नयनतुल्यमित्यत्र" "दृगिवेति" पाठे औत्यपि सम्भवतीत्यनयोर्भेदयोः प्रत्येकं औत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम्। "औपम्यवाचिनो लोपे समासे व्यपि च द्विधा"। "वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्" "गर्हभति श्रुतिपरुषं व्यक्तं निनदन्मनहात्मनां पुरतः"॥ अत्र "गर्हभतीत्यत्र" औपम्यवाचिनः क्विपो लोपः। न चेह उपमेयस्यापि लोपः। "निनदन्निति" अनेनैव निर्देशात्। "द्विधा समासे वाक्ये च लोपे धर्म्मोपमानयोः"। "तस्या मुखेनेत्यादौ" "रम्यमिति" स्थाने "लोके इति" पाठेऽनयोरुदाहरणम्। "क्विप्समासगता हेधा धर्म्मादिविलोपने"। उदाहरणम्। "विधवति सुखाब्जमस्याः"। अत्र "विधवतीति" मनोहरत्वधर्म्मलोपः। केचित्त्वत्रापि क्विप्प्रत्ययलोपमाहुः। "सुखाब्जमिति" अत्र समासगा। "उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि"। "अरातिविक्रमालोकविकसरविलोचनः। क्षणादोदग्रदोर्दण्डः स सहस्रायुधीयति"॥ अत्र स सहस्रायुधमिव आत्मानमाचरतीति वाक्ये उपमेयस्यात्मनो लोपः। न चेह औपम्यवाचकलोपः उक्तादेव न्यायात्। अत्र केचिदाहुः सहस्रायुधेन सह वर्त्तत इति ससहस्रायुधः स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति यदसिद्धेः विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोप इति तन्न विचारसहम्। कर्त्तरि क्यचोऽनुशासनविरुद्धत्वात्। "धर्म्मोपमेयलोपेऽन्या" यथा "यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे"। अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्म्मः शुक्लता च लुप्तौ। "त्रिलोपे च समासगा"। यथा। "राजते मृगलोचना"। अत्र मृगस्य लोचने इव चक्षुषे लोचने यस्या इति समासे उपमाप्रतिपादकसाधारणधर्म्मोपमानानां लोपः। "तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः"। पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा। एषु चोपोमाभेदेषु मध्ये अलुप्तसाधारणधर्म्मेषु भेदेषु विशेषः प्रतिपाद्यते "एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः। भिन्ने बिम्बानुबिम्बत्वं शब्दभावेन वा भिदा"॥ तत्र एकरूपे यथा "मधुरः सुधावदधरः" इत्यादि। बिम्बप्रतिबिम्बो यथा। "भल्लातपवर्ज्जितैस्तेषां शिरोभिः श्मश्रुलैर्मुखैर्भाति। तस्तार सरघाव्याप्तैः स द्राक्षपटलैरिव"॥ अत्र "श्मश्रुलैरित्यस्य" "सरघाव्याप्तैरिति" च दृष्टान्तवत्प्रतिबिम्बनम्। शब्दभावेन भिन्नत्वे यथा। "स्फेरं विधाय नयनं विकसितमिव नीलसुत्पलं मयि सा। कथयामास कथाङ्गो मनोगतं निखिलमाकूतम्"॥ अत्र एकेऽवयवे स्फेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे। "एकदेशविवर्त्तिन्युपमावाच्यत्वगम्यते। भवेतां यत्र साम्यस्य" यथा॥ "नलैरिवोत्पलैः पद्मैर्मुखैरिव सरः श्रियः। पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव"

अत्र नेत्रादीनां उत्पलादिसादृश्यं वाच्यं, सरःश्रीणा-स्याङ्गनासादृश्यं गम्यम् । "कथिता रसनोपमा । यथो-र्ध्वमुपमेयस्य यदि स्यादुपमानता" ॥ "चन्द्रायते मुख-मुचापि हसो हंसायते चारुगतेन कान्ता । कान्तायते स्वर्गसुखेन वारि वारीयते स्वच्छतया विधायः" ॥ "मालो-पमा यदेकस्योपमानं बहु दृश्यते" । यथा । "वारिजेनेव सरसी शशिनेव निशीथिनी । यौवनेनेव वनिता नयेन श्रीर्मनोहरा" ॥ क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते ॥ "हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा । विमलाः कुसुदानीव तारकाः शरदागमे" ॥ "अस्य राज्ञो गृहे भान्ति भूयानीता विभूतयः । पुरन्दरस्य भवने कल्पवृक्षभवा इव" ॥ अत्रोपमेयभूतविभूतिभिः कल्पवृक्ष-वैभवा इवेति" उपमानभूता विभूतय आक्षिप्यन्त इति आक्षेपोपमा । अत्रैव "गृहे इत्यस्य" "भवने इत्यनेन प्रतिनिर्देशात् प्रतिनिर्देशोपमा इत्यादयश्च न लक्षिताः एवंविधवैचित्र्यस्य सहस्रधा सन्दर्शनात्" सा०द० । "प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः । भूयोऽवयव-सामान्ययोगः सेहोपमा मता" स०कण्ठा० ।

२१ उपमानम् । "सदृशात् सदृशज्ञानमुपमानं द्विधेह तत् । स्यादेकमनुभूतार्थेऽननुभूते द्वितीयकम्" ।स०कण्ठा०।तत्रानुभू-तार्थे यथा"सर्व्वं प्राग्वत्प्रवणमवनन्मुक्तमाकृष्य वक्त्रात्तत्संङ्क्रान्ता द्विघटितदलत्खण्डमुच्चण्डरोचिः । एवं वेगात् कुलिश-करोत् व्योम विद्युत्सहस्रं भर्त्तुर्वज्रज्वलनकपिशास्ते च रोषाट्टहासाः" ॥ अननुभूते "तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले । समूहस्तारकाणां यः शकटाकार-मार्जितः" ॥

२२ उपमेयोपमा "पर्य्यायेण द्वयोरेतदुपमेयोपमा मता" दर्पणे । "कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः"

२३ उल्लासः "एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि" । च० । तत्र गुणे "अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी । दोषे, "काठिन्यं कुचयोर्दृढं वाञ्छन्त्याः पाद-पङ्कयोः । निन्दन्ति विश्वधातारं त्वद्दाटीधरियोषितः" ।

२४ उल्लेखः "कचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् । एकस्यानेकधोल्लेखः यः स उल्लेख इष्यते" सा०द० "प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधोक्ष इति देवैः । नारायण इति भक्तैर्ज्ञेयस्त्वाहि योगिभिर्देवः" । "शाखीत्येष सखेदोऽसि गौरवेणापि पर्वतः" ।

२५ उर्जस्वि "उर्जस्वि रूढ़ाहङ्कारम्" इति "अपकर्त्तारं सन्तीति क्रूद्धि ते मा स्म भूवयम् । विद्विषेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति एवमुक्ता परोषुद्धे निरुद्धोर्दर्प-शालिना । पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्थे वमादिकम्" इति च दण्डी ।

२६ एकावली पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम् । स्थाप्यतेऽपोह्यते वाचा स्यात्तथैकावली द्विधा" । सा०द० स्थापने । "सरोविकसिताम्भोजमम्भोजं भृङ्ग-सङ्गतम् । भृङ्गावलि समङ्गीताः सङ्गीतं सस्मरोदयम्" । वर्जने । "न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् । न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः' ।

२७ कारकदीपकम् "क्रमिकैकगतानान्तु गुणः कारकदीपकम्" । च० अत्र कारकः क्रिया कर्त्तृत्वादिसंज्ञाकारित्वात् "गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति" ।

२८ कारणमाला "परंपरं प्रति यदा पूर्व्वपूर्व्वस्य हेतुता । तदा कारणमाला स्यात्" । सा०द० "श्रुतं क्षतधियां सङ्गाज्जायते, विनयः श्रुतात् । लोकानुरागो विनयाच्च किं लोकानुरागतः" ॥

२९ काव्यलिङ्गम् "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" । सा०द० "जितोऽसि मन्द । कन्दर्प । यच्चित्तेऽस्ति तिलोचनः" अत्र पदार्थस्य हेतुता । वाक्यार्थस्य यथा । "यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं मेघे-ष्वन्तरितं प्रिये तव मुखच्छायानुकारी शशी । येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्य-विनोदमात्रमपि मैदैवेन न क्षम्यते" । अत्र चतुर्थपादार्थं आद्यपादत्रयार्थानां हेतुता ॥

३० काव्यार्थापत्तिः "कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" । च० "स जितस्त्वन्मुखेनेन्दुः का वार्त्ता सरसीरुहाम्" ।

३१ कैतवापह्नुतिः "कैतवापह्नुतिर्व्यक्ते व्याजाद्यैर्निह्नवे पदैः" । च० "निर्यान्ति शरनीराचा बालादृक्पातकैतवात्" । इयम् व्याजापह्नुतिरित्यन्ये अपह्नुतिशब्दे विदुतिः ।

३२ गूढोक्तिः "गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति गद्यते" । च० "इमामेहि परश्चेलादायाति चेलरक्तकः" । जारोद्देशेन इयं प्रत्युक्तिः ।

३३ चपलातिशयोक्तिः चपलातिशयोक्तिस्तत् पौर्वापर्य्यव्यति-क्रमः" । च० "अये मानोगतः पश्चादनुनीता प्रियेण सा" ॥

३४ छेकापह्नुतिः "छेकापह्नुतिरन्यस्य गूढ़ातस्यस्य निह्नवे" ।

च० "प्रजल्पन् मत्पदे लग्नः कान्तः किं? न हि नूपुरः"

३५ तद्गुणः "तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। च० "नयन् मधुलिहः स्वैरमुदंशुदशनांशुभिः" ॥

३६ तुल्ययोगिता "वर्णानामितरेषां वा धर्मैक्यं तुल्ययोगिता" "सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च"। सा त्रिधा। हिताहिते दृत्तितौल्यादमपरा तुल्ययोगिता। "प्रदीयते पराभूतिर्मिलनात्ववयोस्वया"। परा श्रेष्ठा भूतिरैश्वर्यं पराभूतिः पराभवश्च "गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" च०। "लोकपालोयमः पाशी श्रीदः शक्रो भवानपि"। यमादिभिरुत्कृष्टैः लोकपालत्वेन समीकृतिरत्र।

३७ दीपकम् "वदन्ति वस्तुधर्माणां धर्मैक्यं दीपकं बुधाः"। च० दर्पणेतु" अथ कारकमेकं स्यादनेकासु क्रियासु चेत्। "सती च योषित् प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि अत्र अनुगमनरूपैकक्रियासम्बन्धः वाणीपार्वत्योः।

३८ दीपकाद्वृत्तिः "त्रिविधा दीपकाद्वृत्तिर्भवेदाद्वृत्तिहेतुतः वस्तुनो वा स्वभावेन शक्तेर्वा हानिहेतुना। अकृतात्मीयकार्य्यः स्यादहेतुर्व्याहृतस्तु यः" स० क०। "न विरचिता ललाटतटन्यस्य करीभ्रुकुटी न परुषङ्कृतेन मुद्दुरिक्षत मन्तरितम्। न तव निशुम्भसंभ्रमवशादपि दारुणया भगवति! चेष्टया कलुषितं वदनाम्बुजम्"। अत्र कालुष्यस्य कारणे सत्यपि तज्जनने यदसामर्थ्यं तत् तन्मुखाम्बुजवस्तुनः स्वभावोनिमित्तमतो न विशेषोक्तेरभेदः। शक्तिहानितोयथा। "अनुरागवती सन्ध्या दिवसश्च पुरस्सरः। अहो दैवगतिश्चित्रा तथापि न समागमः"॥ अत्र दैवगत्या विद्यमानस्यापि समागमसामर्थ्यस्य कुण्ठीकरणात् हेतुशक्तिहानिकृतम् दीपकम्। पदपदार्थोभयावृत्तिभेदात्त्रैविध्यमुक्तं चन्द्रालोके। यथा। "वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः। माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखाबलाः"

३९ दृष्टान्तः दृष्टान्तस्तु सधर्म्मैरः वस्तुनः प्रतिबिम्बनम्। सा० द० स च साधर्म्यवैधर्म्माभ्यां द्विधा। "तत्र साधर्म्ये अविदितं गुणापि सत्कविभिरितिः कर्णेषु वसति मधुरधाराम्। अनधिगत परिमलापि हि हरति दृशं मालतीमाला,, । वैधर्म्ये। त्वयि दृष्टे कुरङ्गाक्ष्याः अंसते मदनव्यथा। दृष्टोदयमा जीन्दौ ग्लानिः कुमुदसंहते ,, ।

५० निदर्शना "सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना" ॥ सा० द० अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना यथा। "कोऽत्र भूमिबलये जनान् मुधा तापयन् सुचिरमेति सम्मदम्। वेदयन्निति दिनेन भानुमानससाद चरमाचलं ततः" ॥ अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्बन्धत्वेव दृष्टशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात्, स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शनात्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा। "कलयति कुवलयमालालालितं कुटिलः कटाक्षविक्षेपः। अधरः किसलयलीलामाननमस्याः कलानिधेर्विलासम्" ॥ अत्रान्यस्य धर्म्मं कथमन्यो वहतीति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति यथा वा। "प्रयाणे तव राजेन्द्र! मुक्ता वैरिद्रुगोद्यताम्। राजहंसगतिः पङ्क्तामाननेन यशिष्यति" ॥ अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते, स चासम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा। "इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति। ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" अत्र यत्तच्छब्दस्यनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति।

५१ निरुक्तिः "निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम्"। "दृष्टैश्चरितैर्जाने सत्यं दोषाकरोविधौ"। दोषाकरस्य रात्रिकरस्य दोषाणामाकरत्वरूपान्यार्थकल्पनमिह।

५२ निश्चयः "अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः"। च० "वदनमिदं न सरोजं नयने नेन्दीवरे एतौ। इह सविधे मुग्धदृशो मधुकर! न मुधा परिभ्रम्यते"।

५३ निषेधाभासः। आक्षेपभेदः विध्याभासे ४० पृष्ठे विवृतिः।

५४ परिकरः "उक्तिर्विशेषणैः साभिप्रायैः परिकरोमतः"। च० "सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः"।

५५ परिकराङ्कुरः "साभिप्रायोविशेष्यश्चेत् भवेत् परिकराङ्कुरः"। च० "चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः"

५६ परिणामः "विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि। परिणामोभवेत्तुल्यात्तुल्याधिकरणोद्विधा"। सा० द० "खिन्नेनो पायनं दूरादागतस्य कृतं मम। स्तनोपनीडमाक्षेपः कृतोद्यूते पणस्तया" अन्यत्र पणोपायने वसनाभरणादिना

उपयुज्यते अत्र तु नायकसम्भावनं स्त्रीतदुपायनम् द्यूते च दृढतया आक्षेपरूपणम्। अत्र प्रथमार्द्धे वैयधिकरण्येन द्वितीयार्द्धे सामानाधिकरण्येनेति भेदः ।

५७ परिवृत्तिः "परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्" च० "दत्त्वा कटाक्षवलनौ सा जग्राह हृदयं मम। मयाऽपि हृदयं दत्तं गृहीतो मदनज्वरः" "पूर्वार्द्धे समेन शेषार्द्धे न्यूनेन" "येन जर्जरकलेवरव्ययात् क्रीतमिन्दु-किरणोज्ज्वलं यशः" अन्योन्यान्तर्भाविकीर्तिः स० कण्ठा० ।

५८ परिसंख्या "परिसंख्या निषिध्यैकसैकस्मिन् वस्तु यत्नवत्" च० । "स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम्" ।

५९ पर्य्यस्तापह्नुतिः "अन्यत्र तस्मादोषाधी पर्य्यस्तापह्नुतिस्तु सा" च० । नायं सुधांशु किंतर्हि सुधांशुः प्रेयसीमुखम्"।

६० पर्य्यायः "क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् । भवति क्रियते वा चेत्तदा पर्य्याय इष्यते ॥" सा० द० क्रमेण यथा । "स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः । बलीषु तस्याः स्खलिताः प्रपेदिरे क्रमेण नाभिं प्रथमोदबिन्दवः" ॥ "विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः । बकाकाक्षिवास्तत्र धावन्त्यरिपुरे तव" ॥ "विश्लेषरागादधरान्निवर्त्तितस्तनाङ्क-रागादरुणाच्च कन्दुकात् । कृशाङ्गुरादानपरिच्युताङ्गुलिः कृतोऽस्तस्तनप्रणयो तया करः" । "ययोरारोपितस्तारो हारस्तोरिवधूजनैः ॥ निधीयन्ते तयोः स्थूलाः स्तन-योरश्रुबिन्दवः" ॥ एषु च क्वचिदाधारः संहतरूपोऽसंहत-रूपश्च । क्वचिदाधेयोऽपि यथा "स्थिताः क्षणमित्यत्र" उदबिन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन् । "विचरन्ति" इत्यत्राधेयभूता बकादयः संहतरूपारिपुरे क्रमेणाभवन्।

६१ पर्य्यायोक्तम् "पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते" सा० द० "सृष्टास्तानन्दने यत्नाः केनसञ्जोगलालिताः । सावज्ञं पारिजातस्य मञ्जर्य्यौयस्य सैनिकैः" ।

६२ पिहितम् "पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम्" च० । "प्रिये गृहागते प्रातः कान्ता तत्त्वमकल्पयत्"। प्रिये गृहा-गते परनारिकया सह रात्रिजागरणेन प्रातःशयन-मुचितमिति ज्ञापनाय कान्तया तत्त्वकल्पनं साकूतं चेष्टितम् ।

६३ पुनरुक्तवदाभासः आपाततो यदर्थस्य पौनरुक्त्यावभासनम्। पुनरुक्तवदाभासः स भिन्नाकारशब्दगः" सा० द० "भुजङ्ग-कुण्डली व्यक्तः शशिशुभ्रांशुशीतगुः । जगन्त्यपि सदापाया-दीशानेशोहरः शिवः" ॥ अत्र भुजङ्गकुण्डल्यादिशब्दानाम् आपातमात्रेण सर्पादयर्थतया पौनरुक्त्यप्रतिभासनम् । पर्य्य-वसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्याद्यन्यार्थत्वम् । पायादित्यस्यापायादित्यत्र पर्य्यवसानम् । भुजङ्गकुण्डली-तिशब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम्। हरः शिव इत्यत्र द्वितीयस्यैव । शशिशुभ्रांशुपदयोः द्वयोरपि । शब्दपरिवृत्तिसहत्वासहत्वाभ्याम् अस्योभयालङ्कारत्वम् । "भाति सदा न त्याग इति" अत्र तु न द्वयोरपीति शब्दालङ्कारत्वमिति भेदः ।

६४ पूर्वरूपम् "पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् । पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि"। च० "हरकण्ठा-भ्युदीप्तोऽपि शेषस्तद्यशसा सितः" । "दीपे निर्वापितेऽप्या-सीत् काञ्चीरत्नैर्महान्गृहः" ।

६५ प्रतिवस्तूपमा "प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः ॥ एकोऽपि धर्म्मः सामान्यो यत्र निर्दिश्यते पृथक्" सा० द० "धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि । इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति" ॥ अत्र समाकर्षणमुत्तरलीकरणञ्च क्रिया एकैव पौनरुक्त्यनिरासाय भिन्नरूपतया निर्दिष्टा । इयं मालयापि दृश्यते यथा । "विमल एव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः । शिवगिरिः शिवहास-सहोदरः सहजसुन्दर एव हि सज्जनः" ॥ अत्र विम-लत्वविशदादिरर्थत एक एव । वैधर्म्म्येण यथा । "चकोर्य एव चतुरास्चन्द्रिकापानकर्म्मणि" ॥

६६ प्रतिषेधः "प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम्" । च० "न द्यूतमेतत् कितवाः । क्रीडनं निशितैः शरैः" ।

६७ प्रतीपम् "प्रतीपमुपमानस्याप्युपमेयत्वकल्पनम्१ । अन्योप-मेयलाभेन वस्तुप्रख्यानादरश्च तत्२ । वस्त्वन्योपमानलाभेन तथान्यस्याप्यनादरः३ । वस्त्वन्यस्योपमाया अनिष्पत्ति-र्वचश्च तत्४ । प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते"५ च० "क्रमेण यथा । "त्वन्नोचनसमं पद्मम्"१ "अलं गर्वेण ते वक्त्र! कान्त्या चन्द्रोभवादृशः"२। "कः क्रौर्य्यदर्पस्तेऽन्यो! त्वत्तुल्याः सन्ति हि स्त्रियः" ३ । "मिथ्यावादोऽहि सुमुखि! त्वन्मुखाभं किलाम्बुजम्" । ४ । "दृष्टं चेत् वदनं तस्याः किं पद्मेन किमिन्दुना" । ५।

६८ प्रत्यक्षम् । "प्रत्यक्षमक्षजं ज्ञानं मानसं चाभिधीयते । स्वानुभूतिभवं चैवमुपचारेण कथ्यते" । स० कण्ठा० । तच्च युगपदेकशोवा तत्र युगपत् यथा । "क्रान्तकान्तवदन-प्रतिबिम्बे मग्नबालसहकारशुगन्धौ । स्वादुनि प्रथम-

दितालिनि पीते निर्विचार मधुनीन्द्रियवर्गः" एकयो यथा। "मन्दमन्दविगलत्तपमोषङ्चुरुल्लसितपक्ष्मदधत्या। वीक्ष्यते स्म घनकैर्नवबध्वा कामिनो सुखमधोसुखयेव" सुखादिविषयं मानसं यथा अस्तोकविस्मयमविस्मृत पूर्व्वदृत्तसुहृत्तनूतनभवज्वरजर्ज्जरं नः। एकक्षणत्रुटित संघटितप्रमोदमानन्दसैकरसवत्त्वसुपैति चेतः ,,।

६६ प्रत्यनीकम् "प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः" च० "जैत्रेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ"।

७० प्रस्तुताङ्कुरः "प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः"। च० किं भद्रं। सत्यां मालत्यां केतक्या कण्टकस्यया"।

७१ प्रहर्षणम् "उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम्१ वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम्२। यत्नादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्३" च०। क्रमेण "तामेव ध्यायते तस्मै विसृष्टा सैव दूतिका"१ "दीपस्तुद्दीपवेद्यावत्तावदभ्युदितो रविः" २ "निध्यञ्जनोपधीमूलं खनताऽऽसादितोनिधिः"। ३।

७२ प्रेयः "प्रेयः प्रियतराख्यानम्" दण्डी "अद्य या मम गोविन्द। जाता त्वयि दृढागते। कालेनैषा भवेत् प्रीतिस्तवैव गमनात् पुनः। इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः। भक्तिमात्रसमाराध्यः स प्रीतश्च ततो हरिः" इदञ्च दर्पणकारादिभिरनुक्तमपि काव्यादर्शादावुक्तम्।

७३ प्रौढोक्तिः "प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनम्" च०। "कवाः कलिन्दजातीरतमालस्तोममेचकाः"।

७४ भावः। "अभिप्रायानुकूल्ये तु प्रवृत्तिर्भाव उच्यते सोद्भेदोऽथ निरुद्भेदश्चैकतत्त्वाभितश्च सः हृद्यं सूक्ष्मञ्च भिद्येत न हि भावात् कथञ्चन" तत्र प्रार्थनावेदनाभ्यासङ्गिद्यमानः सोद्भेदो भावो हृद्यमित्युच्यते। "निरुद्भेदस्तु यो भावः स सूक्ष्मस्तु निगद्यते। इङ्गिताकारलक्ष्यात् स सूक्ष्मात् स्याद्भूमिकान्तरमिति" स०कण्ठा०। स भावः भूमिकान्तरमवस्थान्तरम्। तत्र हृद्यभावयोरुदाहरणे तत्रैव दृश्ये सूक्ष्मश्च सूक्ष्ममालङ्कारे वक्ष्यते।

७५ भाविकम् "अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः। यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्"२। सा०द० तत्र भूतस्य "मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः यैनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ"। भाविनः "आसीदनमतेति पश्यामि तव लोचने। भाविभूषणसंभारां साक्षात् कुर्वे तवाकृतिम्"।

७६ भेदकातिशयोक्तः "भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनम्" च०। "अन्यद्देवस्य गाम्भीर्य्यमन्यद्वैर्य्यञ्च भूपते"।

७७ भ्रान्तापह्नुतिः "अन्यस्य शङ्कया भ्रान्तापह्नुतिः भ्रान्तिवारणे"। च० "तापं करोति सोत्कम्पं ज्वरः किन्नु? सखे। स्मरः"।

७८ भ्रान्तिमान् "साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता" सा०द० "मुग्धा दुग्धधिया गवां विदधते कुम्भानधो वल्लवाः कण्ठे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि। कर्कन्दूफलमुच्चिनोति शबरी मुक्ताफलाशङ्कया सान्द्रा चन्द्रमसोन कस्य कुरुते चित्तभ्रमं चन्द्रिका" प्रतिभेतिविशेषणात् स्मरसंसिद्धे शुक्तिकायां रजतभ्रमे न। साम्यादित्युक्तेः "सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः। सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे" इत्यादौ त्रिभुवनवर्त्तिपदार्थावच्छेदकस्य साम्याभावान्न भ्रान्तिमान्। अयं भ्रान्तिरित्यन्ये।

७९ मालादीपकम् "मालादीपकं पुनः। धार्म्मिणामेकधर्म्मेण सम्बन्धोयत् यथोत्तरम्" सा०द०। "त्वयि सङ्गरसंप्राप्ते धनुषासादिता शराः। शरैरपिहितस्तेन भूत्वया त्वं, त्वया यशः" अत्रासादनक्रियाधर्म्मस्य यथोत्तरं सम्बन्धः।

८० मिथ्याध्यवसितिः "किञ्चिन्मिथ्यार्थसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् मिथ्याध्यवसितिर्ज्ञेया दर्शयेत् खञ्जं वहन्"। च० मिथ्यापह्नुतिस्तु अपह्नुतिभेदः।

८१ मीलितम् "मीलितं यदि सादृश्याद्भेद एव न दृश्यते" च० "रक्तोनक्तञ्चि लक्षायास्तरुणे सहजारुणे"।

८२ मुद्रा "रूढ्यार्थसूचनं मुद्रा प्रकृतार्थ परैः पदैः"। च० "नितम्ब गुर्व्वी तरुणी दृगुन्मिषितपुला च सा"।

८३ यथासंख्यम् "यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः" च० शत्रु मित्रं विपत्तिं च जय रक्षय भञ्जय"। क्रम इत्यन्ये

८४ युक्तिः "युक्तिः पराभिसन्धान क्रियया मर्म्मगुम्फने" च०। "त्वामालिखन्ती दृष्ट्वान्यां धनुः पौष्पं करेऽलिखत्"।

८५ रत्नावली "क्रमिकप्रकृतार्थानां न्यास रत्नावली विदुः" च०। "चतुरास्यः पतिर्ब्रह्मा सर्व्वमस्य मही पते!"। चत्वारि आस्यानि चतुरं निपुणमास्यमास्यव्यापारो वचनं च यस्य।

८६ रसवत्। "रसवद्रसपेशलम्" दण्डी "रसेन पेशलं आख्यानमित्यनुषङ्गः रसवत्। "स्पृहेति प्रेम सङ्गन्तु यया मे मरणं मतम्। सैषा तन्वी मया लब्धा कथमत्रैव जन्मनि" तत्समर्थनञ्च तत्रैव "प्राक् प्रतिदर्शिता सैव रतिः प्रकृष्टतां गता। रूपबाहुल्ययोगेन तदिदं रसवद्वचः। वाच्यस्यास्यतायोनिर्मांसलं दर्शितोरसः।

इह त्वदरसायत्ता रसवत्ता स्फुटा गिराम्' । दण्डी ।

८७ रूपकम् "रूपकं रूपितारोपात् विषये निरपह्नवे । तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा" । तत्र "यस्य कस्यचिदारोपः परारोपणकारणम् । प्रत्येकं केवलं मालारूपश्चेति चतुर्विधम्" सा० द० । तत्र श्लिष्टशब्द-निबन्धनं केवलपरम्परितं यथा । "आहवे जगदुद्दण्ड-राजमण्डलराहवे । श्रीनृसिंह ! महीपाल ! खड्गस्तु तव बाहवे" ॥ अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्ब मित्यारोपो राजबाहोराहुत्वारोपे निमित्तम् । तदेव मालारूपं यथा । "पद्मोदयदिनाधीशः सदागतिसमीरणः । भूभृदावलिदम्भोलिरेक एव भवान् भुवि" ॥ अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनं भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्यत्वारोपे निमित्तम् । अश्लिष्टशब्दनिबन्धनं केवलं यथा "पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः । त्रैलोक्यमण्डपस्तम्भास्त्वत्बाहवः" । अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम् । अश्लिष्टमालारूपं यथा । "मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः । विराजति व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्" अत्र मनो-जादेराजत्वाद्यारोपस्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम् । एषु च "राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलत्वारोपे निमित्तमिति केचित् । "अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् । समस्तवस्तुविष-यमेकदेशविवर्त्ति च" । तत्र "आरोप्यारोपणेषां शाब्दत्वे प्रथमं सतम्" । प्रथमं समस्तवस्तुविषयं, यथा । "रावणावग्रहक्लान्तमिति वागग्रहतेन सः । अभिद्रुत्य मरु-च्छस्यं कृष्णमेघस्तिरोदधे" ॥ अत्र कृष्णस्य मेघत्वारोपे वागादीनामग्रहत्वाद्यारोपितत्वम् । "यत्र कस्यचिदार्थत्वमेक-देशविवर्त्ति तत्" । कस्यचिदारोप्यमाणस्य । यथा । "लावण्य-मधुभिः पूर्णमास्यमस्या विकस्वरम् । लोकलोचनरोलम्ब-कदम्बैः कैर्न पीयते" ॥ अत्र लावण्यादौ मध्वाद्यारोपः शाब्दो मुखे पद्मत्वारोप आर्थः । न चेयमेकदेशविवर्त्ति-न्युपमा विकस्वरत्वधर्म्मसारोप्यमाणे पद्मे मुख्यतया वर्त्तनात् मुखे चोपचरितत्वात् । "निरङ्गं केवलस्यैव रूपणं तदपि द्विधा । माला केवलरूपत्वात्" तत्र मालारूपं निरङ्गं यथा । "निर्म्माणकौशलं धातुस्त्वन्द्रिका लोकचक्षुषाम् । श्रीलक्ष्मणस्य सेयमिन्दीवरेक्षणा" ॥ केवलं यथा । "दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि ! नात्र दूये । उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर-च्छिद्यते मृदु पदं ननु सा व्यथा मे" ॥ "तेनाष्टौ रूपके भिदाः" । चिरन्तनैरुक्ता इति शेषः । क्वचित् परम्परित-मप्येकदेशविवर्त्ति यथा । "खड्गः क्षमासौविदल्लः समिति विजयते मानवाखण्डलस्य" । अत्रार्थः क्षमाया महिषी-त्वारोपः खड्गे सौविदल्लत्वारोपे हेतुः । अस्य भेदस्य पूर्ववन्मालारूपत्वेऽप्युदाहरणं ह्रस्यम् । "दृश्यन्ते क्वचिदा-रोप्याः श्लिष्टाः साङ्गेऽपि रूपके" । तत्रैकदेशविवर्त्ति श्लिष्टं यथा । "करमुदयमहीधरस्तनाग्रे गलिततमःपटलां-शुके निवेश्य । विकसितकुमुदेक्षणं विचुम्बत्यवममरेश-दिशो मुखं सुधांशुः" समस्तवस्तुविषयं यथा । अत्रैव "विचुम्बतीत्यादौ" "चुचुम्बे हरिदबलामुखमिन्दुनायकेन इति" पाठे । न चात्र श्लिष्टपरम्परितम् तत्र हि । "भूभृदावलिदम्भोलिरित्यादौ" राजादौ पर्वतत्वादिरूपणं विना वर्णनीयस्य राजादेर्दम्भोलित्वादिरूपणं सर्व्वथैव सादृश्यासम्भवादसङ्गतम् । तर्हि कथं "पद्मोदयदिनाधीश इत्यादौ" परम्परितं, राजादेः सूर्य्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य सम्भवादिति न वाच्यम् तथा हि राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं न तु प्रकृते तद्विवक्षितं पद्मोदयादेरेव द्वयोः साधारणधर्म्मतया विवक्षितत्वात्, इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सुव्यक्तमेवेति न श्लिष्टपरम्परितम् । क्वचित् समासाभावेऽपि रूपकं दृश्यते । यथा । "मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा" । क्वचिद्वैयधिकर-ण्येऽपि । यथा । "विदधे मधुपश्रेणीमिह भूलतया विधिः" । क्वचिद्वैधर्म्येऽपि यथा । "सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुणज्योत्स्नाकृष्णचतुर्द्दशी सरल-तायोगश्वपुच्छच्छटा । यैरेषापि दुराशया कलियुगे राजावली सेविता तेषां मूलिनि भक्तिमात्रसुलभे सेवा कियत् कौशलम्" ॥ अत्र च केषाञ्चिद्रूपकाणां शब्दश्लेष-मूलत्वेऽपि रूपकविशेषत्वादर्थालङ्कारमध्ये गणनम् । एवं वक्ष्यमाणालङ्कारेषु बोद्धव्यम् । "अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत्" । तदेवाधिकारूढवैशिष्ट्यसम्भव-रूपकम् । यथा । "इदं वक्त्रं साचाद्विरहितकलङ्कः शशधरः सुधाधाराधारश्चिरपरिचितं बिम्बमधरः । इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये तरङ्गावण्यानां जल-धिरवगाढे सुखतरः" ॥ कलङ्करात्रित्वादिनाधिकम् ।

८८ रूपकातिशयोक्तिः "रूपकातिशयोक्तिः स्याद्विगीर्याध्यवसानतः" च० "पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः"

८९ ललितम् "प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम्"। ललितं" विगते नीरे सेतुमेषा चिकीर्षति च०।

९० लेशः "लेशःस्याद्दोषगुणयोर्गुणदोषत्वकत्थनम्"। च० "अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु। शुक! पिञ्जरबन्धस्ते मधुराणां गिरां फलम्"। स०क०तु लवत्वेनायमुक्तः।

९१ लोकोक्तिः "लोकप्रवादानुकृतिर्लोकोक्तिरिति" कथ्यते च०। "सहस्र कृतिचिन्मासान् मीलयित्वा विलोचने"।

९२ विकल्पः "विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः" च०। "सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः"।

९३ विकस्वरः "यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः"। च० "स न जिग्ये महान्तोऽपि दुर्जयाः सागरादृव"।

९४ विचित्रम् "विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् च०। "प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विसृजति प्राणान्। दुःखीयति सुखहेतोः कोमूढः सेवकादन्यः"।

९५ वितर्कः "ऊहो वितर्कः सन्देहनिर्णयान्तरधिषितः। द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्यते। तत्त्वानुपात्यतत्त्वानुपाती यश्चोभयात्मकः" स०कण्ठा०। तेषु निर्णयान्तस्तत्त्वानुपाती यथा। "मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहता शक्तिस्तस्य कुतः? स वज्रपतनाद्भीतो महेन्द्रादपि। तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणम् ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति"। स एवातत्त्वानुपाती यथा। "अस्राः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः शृङ्गारैकनिधिः स्वयं नु मदनो मासोनु पुष्पाकरः। वेदाभ्यासज डः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेत् मनोरमिदं रूपं पुराणो मुनिः" चन्द्रादिष्वन्यतमेन प्रजापतिना भवितव्यमित्यतत्त्वानुपाती निर्णयान्तोवितर्कः। स एव उभयात्मा यथा "चित्ते निवेश्य परिकल्पितसत्त्वयोगाद्रूपोच्चयेन रचिता मनसा कृता नु। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः" अत्र तत्त्वातत्त्वानुपातित्वादुभयात्मा निर्णयान्तो वितर्कः। अनिर्णयान्तो मिथ्याविषयो यथा। "अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोच्छ्रायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः"। स एवाभिधारूपो यथा। "अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना यमिनौकसा। समधिरूढमनेन च जिष्णुना खिदिति वेगवशान्मुहुर्गणैः"। स एव उभयात्मा यथा। माया खिदेषा मतिविभ्रमो वा भ्रष्टं तु मे वीर्यमथाहमस्मि। गाण्डीव सक्ता हि यथा पुरा मे परामृशन्ते न शराः किरीटे"।

९६ विधिः "सिद्धस्यैव विधानं यत् तामाहुर्विध्यलङ्कृतिम्" च०। "पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्"।

९७ विध्याभासः वस्तुनोवक्तुमिष्टस्य तु विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगोद्विधा। अनिष्टस्य तथार्थस्य विध्याभासः परोमत इति" सा०द०। उदाहरणं तत्र ज्ञेयम्। आक्षेपभेद इत्यन्ये।

९८ विनोक्तिः "विनोक्तिः स्याद्विना किञ्चित् प्रस्तुतं हीनमुच्यते। तच्चेत् किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते"। च० हीनत्वे "विद्या हृदयापि सावद्या विना विनयसम्पदम्"। रम्यत्वे "विना खलैर्विभात्येषा राजेन्द्र! भवतः सभा"। विनाऽथगम्यतायामपि सा०द०। "निरर्धकं जन्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्। उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन"।

९९ विभावना "विभावना विनापि स्यात् कारणं कार्यजन्म चेत्१ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता२। कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके३ अकारणात् कार्यजन्म चतुर्थी स्याद्विभावना४। किञ्चित्वात् कार्यसम्पत्तिर्दृष्टा काचिद्विभावना५। कार्यात् कारणजन्मापि दृष्टा काचित् विभावना६" च०। क्रमेण यथा। "अपि लाक्षारसाऽसिक्तं रक्तं ते चरणद्वयम्"१। "अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः"।२। "नरेन्द्रानेव ते राजन्! दशत्यसिभुजङ्गमः"।३। नरेन्द्रोन्दपो गरुड़विद्याभिज्ञश्च दंशनप्रतिबन्धकगारुड़विद्या सन्निधानेऽपि दंशनोत्पत्तेस्तृतीया विभावना" "शङ्खाद्वीणानिनादोऽयमुदेति मम हृदद्भुतम्"।४। "शीतांशुकिरणास्तन्वीं हन्त सन्तापयन्ति ताम्"।५। "यशःपयोराशिरभूत् करकल्पतरोस्तव"।६। दर्पणे तु "विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते। उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता" इति लक्षयित्वा "विना कारणमुपनिबध्यमानोऽपि कार्योदयः किञ्चिदन्यत् कारणमपेक्ष्यैव भवितुं युक्तं तच्च कारणान्तरं क्वचिदुक्तं क्वचिन्नेति" व्यवस्थाय उदाहृतम् "अनायासलघ मध्यमयङ्गतरङ्गे दृशौ। अभूषणमनोहारि वपुर्वयसि सुभ्रुवः"। अत्र वयोरूपं निमित्तमुक्तम् "वपुर्भाति नतभ्रुव इति पाठे तदनुक्तमिति भेदः।

१०० विरोधः "जातिस्वगुणक्रियाद्यैर्गुणो गुणादिभिर्हिभिः।

क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः । विरुद्धमिवभासेत विरोधोऽसौ दशाकृतिः"। सा०द०क्रमेण यथा। "तव विरहे मलयमरुद्दावानलः शशिरुचोऽपि सोष्माणः । हृदयमलिरुतमपि भिन्ते नलिनीदलमपि निदाघविरस्राः"। "सन्ततसुखलासङ्गाद्वज्रतरट्टकर्म्मघटनया व्यथतौ । द्विजमत्तीनां कठिनाः सति भवति करा: सरोजसुकुमाराः"। "अजस्य व्यट्टणतो जन्म निरीहस्य हृतद्विषः । स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तवः"। "वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः । राकाविभावरीजानिर्विषज्वालाकुलोऽभवत्"। "नयनयुगासेचनकं मानसदत्त्यापि दुष्प्रापम्। रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे" । "त्वद्वाजिराजीत्यादि" "वल्लभोत्सङ्गेनेत्यादि" श्लोके चतुर्थपादे "मध्यन्दिनदिनाधिप" इति पाठे द्रव्ययोर्विरोधः । अत्र "तव विरहे"इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दावानलोष्णहृदयभेदनसूर्य्यैर्जातिगुणक्रियाद्रव्यरूपैरन्योन्यं विरोधो सुखत आभासते। विरहहेतुकत्वेन समाधानम् । अजस्येत्यादौ अजत्वादिगुणस्य जन्मव्यट्टणादिक्रियाविरोधः । भगवतः प्रभावख्यातिश्रयितत्वात्तु समाधानम् । "त्वद्वाजीत्यादौ" "हरोऽपि शिरसा गङ्गां न धत्ते" इति विरोधः। "त्वद्वाजीत्यादिकविप्रौढोक्त्या तु समाधानम् । स्पष्टमन्यत् । विभावनायां कारणाभावेनोपनिबध्यमानत्वात् कार्य्यमेव बाध्यत्वेन प्रतीयते । विशेषोक्तौ च कार्य्याभावेन कारणमेव । इह त्वन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः ।

१०१ विरोधाभासः ।"आभासत्वं विरोधस्य विरोधाभासरूप्यते चन्द्रा० "अमित्रजिन्मित्रिजिदौजसा स यत् विचार डक्चारडगण्यवर्त्तत"नैषधम् ।

१०२ विहितोक्तिः "विहितोक्तिः श्लेषयुग्मं कविनाविष्कृतं यदि" च० । "द्वयोपेहि परक्षेत्रादिति वक्ति सरूपचनम्" ।

१०३ विशेषः "यदाधेयमनाधारमेकज्ञानेकगोचरम् । किञ्चित् प्रकुर्व्वतः कार्य्यमशक्यस्येतरस्य वा । कार्य्यस्याकरणं दैवाद्विशेषस्त्रिविधस्मृतः"। सा०द०क्रमेण यथा । "दिवमध्युपयातानामाकल्पगुणगणा येषाम् । रक्षयन्ति जगन्ति गिर: कथमपि कवयो न ते वन्द्याः" । "कानने सरिदुद्देशे गिरीणामपि कन्दरे । यश्चन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरः"। "व्यट्टिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ। करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्?" ।

१०४ विशेषोक्तिः"सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा" सा०द० । तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा ।"धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः । प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः" अत्र महामहिमशालित्वं निमित्तमुक्तम् । अत्रैव चतुर्थपादे "कियन्तः सन्ति भूतले" इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्वं च अनुक्तनिमित्तस्यैव भेद इति पृथग्नोक्तम् यथा "स एक श्लोजयति जगन्ति कुसुमायुधः । हरतापि तनुं यस्य शम्भुना न हृतं बलम्" । अत्र तनुहरणेऽपि बला हरणे निमित्तमचिन्त्यम् । इह च कार्य्याभावः कार्य्यविरुद्धसद्भावसुखेनापि सा०द० ।

१०५ विषमम् ।"गुणैः क्रिये वा यत् स्यातां विरुद्धे हेतुकार्य्ययोः । यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः । विरूपयोः सङ्घटना या च तद्विषमं मतम्"।सा०द०क्रमेण यथा।"सद्यः करस्पर्शमवाप्य चित्रं रणेरणे यस्य कृपाणलेखा । तमालनीला शरदिन्दुपाण्डु यशश्चिलोकाभरणं प्रसूते" । अत्र कारणरूपासिलतायाः "कारणगुणा हि कार्य्यगुणमारभन्ते" इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः । "आनन्दसमन्दमिमं कुवलयदललोचने ! ददासि त्वम्। विरहस्यैव जनितस्तापयतितरां शरीरं मे" । अत्रानन्दजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः । "अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया । धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः" । अत्र केवलं काङ्क्षितधनलाभो नाभूत् प्रत्युत क्षारवारिभिर्वदनपूरणम् । "क्व वनं तरुवल्कभूषणं नवपल्लश्रीः क्व महेन्द्रवन्दिता । नियतं प्रतिकूलवर्त्तिनोवत धातुश्चरितं सुदुःसहम्" । अत्र वनराजश्रियोर्विरूपयोः सङ्घटना ।

१०६ विषादनम् "इष्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनम्" च० । "दीपसद्दीपयेद्यावत्तावन्निर्व्वाण एव सः"।

१०७ व्यतिरेकः "आधिक्यमुपमेयस्योपमानान्न्यूनतापि वा । व्यतिरेक एक उक्तो हेतौ नोक्ते स च त्रिधा ॥ चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः । आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा । प्रत्येकं स्यान्निन्दितत्वाष्टचत्वारिंशद्विधः पुनः" ॥ सा०द० उपमेयस्योपमानादाधिक्ये हेतुरूपमेयगतसत्कर्षकारणमुपमानगतं निकर्षकारणञ्च । तयोर्द्वयोरप्युक्तावेकः" प्रत्येकं सप्तदशेन वानुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपिय-

व्दादश्लेषेऽपि चतुर्विंशतिप्रकारः । उपमानान्न्यूनतायामनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाऽष्टचत्वारिंशत्प्रकारो व्यतिरेकः । उदाहरणम् । "अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा" । अत्रोपमेयगतमकलङ्कत्वमुपमानगतञ्च कलङ्कित्वं द्वयमप्युक्तम् । यथाशब्दप्रतिपादनाच्च शाब्दौपम्यम् । अत्रैव "न कलङ्कि विधूपममिति" पाठे आर्षम् "जयतीन्दुं कलङ्किनमिति" पाठे तु द्वयादिलुप्तादिपदविरहादाक्षिप्तम् । अत्रैवाकलङ्कपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः" द्वयोरनुक्तौ द्वयोरनुक्तिः । श्लेषे यथा । "अतिगाढगुणायाश्च नाजवङ्गङ्गुरा गुणाः"। अत्र द्वयार्थे वतिरिति शाब्दौपम्यम् उत्कर्षनिकर्षकारणयोर्द्वयोरप्युक्तिः । गुणशब्दः श्लिष्टः । अन्ये भेदाः पूर्ववदूह्याः । एतानि चोपमेयस्योपमानादाधिक्ये उदाहरणानि । न्यूनत्वे दिङ्मात्रम् । यथा । "क्षीणःक्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते नित्यम् । विरम प्रसीद सुन्दरि यौवनमनिवर्त्ति यातं तु"॥"अत्रोपमेयभूतयौवनास्थैर्य्यस्याधिक्यं तेनात्र "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेक इति" केषाञ्चिल्लक्षणे "विपर्य्यये वेति पदमनर्थकमिति" यत् केचिदाहुः तन्न विचारसहम् । तथा ह्यत्राधिक्यन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते । अत्र च चन्द्रापेक्षया यौवनस्यासत्त्वं स्फुटमेव । अस्तु वातोदाहरणे कथञ्चिदिति । "हनूमदाद्यैर्यशसा मया पुनर्द्विषां हृत्सैर्दूतपथः सितीकृतः" ॥ इत्यादिषु का गतिरिति सुष्ठूक्तं "न्यूनताथ वेति" ।

८ व्याघातः "व्याघातः स तु केनापि वस्तु येन यथा कृतम् तेनैव चेदुपायेन कुरुतेन्यत्तदन्यथा । सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि२। सा०द०"इत्थादृग्धं मनसिजं जीवयन्तिदृशैव याः"। "दृशैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः समागन्ता कान्ते ! मदुरसि नचायाससहना । मदुत्वं मे हेतुः सुभग! भवता गन्तुमधिकं न मद्दो सोढा यद्विरहजतमायाससमम्" ॥ अत्र विदेशं जिगमिषुणा नायकेन नायिकायाः मदुत्वं सहगमनाभावहेत्वे नोक्तं नायिकया तु प्रत्युत सहगमने ततोऽपि सौकर्य्येण तदेव हेतुतयोक्तम् ।

९ व्याजनिन्दा "निन्दायानिन्दया व्यक्तिर्व्याजनिन्देति गीयते" च०।"विधेः स निन्द्योयस्तेऽग्रेकमेवाहरच्छिरः"। अत्र एकशिरोहर्त्तृत्वेनिन्दाव्याजेन विधेर्निन्दाया व्यक्तिः।

१० व्याजस्तुतिः "उक्ता व्याजस्तुतिः पुनः । निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः" । सा०द० । निन्दाया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः । क्रमेण यथा । "स्तनयुगमुक्ताभरणाः कण्टककलिताङ्गयष्टयो देव! त्वयि कुपितेऽपि प्रागिव विश्वस्ता रिपुस्त्रियो जाताः" ॥ "व्याजस्तुतिस्तव पयोद! मयोदितेयं यज्जीवनाय जगतस्तव जीवनानि । स्तोतन्तु ते मदृदिदं घन । धर्म्मराजसाहाय्यमर्ज्जयसि यत् पथिकान्निहत्य" ॥

११ व्याजोक्तिः "व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्" च०।"सखि ! पश्य मदाहारामपरागैरस्मि धूसरा" ।

१२ शुद्धापह्नुतिः "शुद्धापह्नुतिरन्यस्यारोपार्थे धर्म्मनिह्नवः" । च० "नायं सुधांशुः किं तर्हि ? व्योमगङ्गासरोरुहम्" ।

१३ श्लेषः शाब्दोऽलङ्कारः आर्षश्च शाब्दस्तूक्तः ३८६ पृष्ठे आर्षो यथा "शब्दैः स्वभावादेकार्थे श्लेषोऽनेकार्थवाचनम्" सा०द०। स्वभावादेकार्थैरिति शब्दश्लेषाद्व्यवच्छेदः । "सर्व्वदो माधवःपायात् स यो गङ्गामदीधरत्"।

१४ संसृष्टिः "यद्येत एवालङ्काराः परस्परविमिश्रिताः । तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा" सा०द० "देवः पायादपायाद्वः स्मेरेन्दीवरलोचनः । संसारध्वान्तविध्वंसहंसः कंसनिसूदनः । अत्र पायात्पायादिति यमकम् स्मेरेन्दीवरेत्यादौ चानुप्रास इति शब्दालङ्कारयोः, संसारध्वान्तेत्यत्र उपमा, हंस इत्यत्र रूपकमित्यर्थालङ्कारयोः, शब्दार्थालङ्कारयोश्च परस्परानपेक्षयैवात्र संसर्गः ।

१५ सङ्करः "अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितः । सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः" सा०द० । तत्राङ्गाङ्गिभावे यथा । "आकृष्टवेगविगलद्भुजगेन्द्रभोगनिर्म्मोकपट्टपरिवेष्टनयाम्बुराशेः । मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले" ॥ अत्र निर्म्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् अतिशयोक्तिश्च "मन्थव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम् । उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् । यथा वा । "अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः । अहो दैवगतिश्चित्रा तथापि न समागमः" ॥ अत्र समासोक्तिर्विशेषोक्तेरङ्गम् । सन्देहसङ्करो यथा । "इदमाभाति गगने भिन्नानं सन्ततं तमः । अमन्दनेयनानन्दकरं मण्डलमैन्दवम्" ॥ अत्र किं मुखस्य

चन्द्रतवाध्यवसानादतिशयोक्तिः, उत इदमिति सुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकं, अथ वा इदमिति सुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात्तुल्ययोगिता, आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकं किं वा विशेषणसाम्याद्-प्रस्तुतस्य सुखस्य गम्यत्वात् समासोक्तिः, यद्वा ऽप्रस्तुतस्य सुखस्यावगतिरित्यप्रस्तुतप्रशंसा, यद्वा सन्मयोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनासुखेन वर्त्तित इति पर्य्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः। यथा वा सुख-चन्द्रं पश्यामीत्यत्र किं सुखं चन्द्र इवेत्युपमा उत चन्द्र एवेति रूपकमिति सन्देहः साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे पुनर्न सन्देहः। यथा "सुखचन्द्रं चुम्बति" इत्यत्र चुम्बनं सुखस्यानुकूलमित्युपमायाः साधकम्। चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्, "सुखचन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्म्मो रूपकस्य साधको मुखे उपचरितेन सम्भवतीति नोपमाबाधकः। "राजनारायणं लक्ष्मीरुत्सासालिङ्गति निर्भरम्"। अत्र योषित आलिङ्गनं नायकस्य सङ्गमेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यस-म्भवादुपमाबाधकं नारायणे सम्भवादूपकम्। "एवं वदान-म्बुजमेणाक्ष्या भाति चञ्चललोचनम्"। अत्र वदने लोच-नस्य सम्भवादुपमायाः साधकता, अम्बुजे चासम्भवाद्रूप-कस्य बाधकता। एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्म्मप्रयोगे, "उपमितं व्याघ्रादिभिः सामान्या-प्रयोगे" इति वचनादुपमासमासो नं सम्भवतीति उपमाया बाधकः। एवञ्चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव। एकाश्रयानुप्रवेशो यथा। "कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा तदानन्दः सान्द्रः स्फुरति पिहिताशेष-विषयः। सरोमाञ्चोद्भूतुकुचकलशनिर्भिन्नवसनः परीरम्भारम्भः क इव भविताम्भोरुहदृशः" ॥ अत्र "कटाक्षेणा-पीषत्क्षणमपि" इत्यत्र क्षेकानुप्रासस्य "निरीक्षेत" इत्यत्र क्षकारमादाय इत्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः। एवं चात्रैवानुप्रासार्थापत्त्यलङ्कारयोः। यथा वा। "कुरवका रवकारणतां ययुरिति" अत्र रवकारवका इत्येकं वकारव-कार इत्येकमिति यमकयोः। सा०द०।

११६ सन्देहः "स्यात् क्वतिभ्रान्तिसन्देहैस्तदङ्गालङ्कृतित्रयम्" च०"पङ्कजं वा सुधांशुर्वा अस्याकन्तु न निर्णयः"॥

११७ समम् "समं स्यादानुरूप्येण श्लाघायोग्यस्य वस्तुनः"। सा०द० "शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधि-मनुरूपं जह्नुकन्याऽवतीर्णा"। आनुरूप्यञ्च कारणा-नुरूप्यं तदन्यानुरूप्यम् दृष्टपदार्थस्यायत्नसिद्धिहेतुकत्वञ्च॥ "सरूपमपि कार्य्यस्य कारणेन समं विदुः। विना यत्नेन। तत्सिद्धिर्यदर्थं कर्त्तुमुद्यममिति" च०उक्तेः तत्ता-कारणानुरूप्यसङ्गतम् कारणानुरूप्यं यथा, "नीचप्रवणता लक्ष्मि! जलजायास्तवोचिता"। द्वितीयं यथा "युक्तोवा-रणलाभोऽयं भूपतेर्वारणार्थिनः"।

११८ समाधिः "समाधिः सुकरे कार्य्ये दैवाद्यत्नान्तरागमात्" च०॥ "मानमस्यानिराकर्त्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्"। स० कण्ठा० तु "समाधि मन्यधर्म्माणामन्यत्रारोपणं विदुः। निरङ्कुशोऽथ सोऽङ्गेदः स द्विधा परिपठ्यते" इति लक्षितम्। उदाहरणं ज्ञेयम्।

११९ समासोक्तिः "समासोक्तिः समैर्यत्र कार्य्य लिङ्गविशेषणैः॥ व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः" सा०द०॥तत्र समेन कार्य्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः यथा। "व्याधूय यद्वसनमम्बुजलोचनाया वक्षोजयोः कनककुम्भविलास-भाजोः। आलिङ्गसि प्रमदमङ्गमशेषमस्या धन्यस्त्वमेव मलयाचलगन्धवाह!"। अत्र गन्धवाहे कठकासुकव्यवहार-समारोपः। लिङ्गसाम्येन यथा। "असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः। अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः" ॥ अत्र पुंस्त्वोल्लिङ्गत्वसाम्येन रविसन्ध्ययोर्नायकनायिकाव्यवहारः। विशेषणसाम्यन्तु श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा। तत्र श्लिष्टतया यथा। "विकसितसुखो रागासङ्गादलक्ष्मि सिराहतिं दिनकरकरस्पृष्टामैन्दीं निरीक्ष्य दिशं मुरः। जरठबलवीपाण्डुच्छायो भृशं कलुषान्तरः श्रयति हरितं हन्त प्राचेतसीं सुहिनद्युतिः" ॥ अत्र सुखरागादि श्लिष्टता। अन्यदुदाहार्य्यम् सा०द०।

१२० समुच्चयः "समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके॥ खलेकपोतिकान्यायात्तत्करः स्यात् परोऽपि चेत्॥ गुणौ क्रिये वा युगपत् स्यातां तद्वा गुणक्रिये" सा०द०।यथा "हंहो धीर! समीर! हन्त जननं ते चन्दनद्रुमाश्रितो दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः॥ प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निवन्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः" ॥ अत्र दाहे एकस्मिंश्चन्दनभूयोज्झन्मरुपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम्। अत्र सर्व्वेषामपि हेतूनां शोभनत्वात् सद्योगः। अत्रैव चतुर्थपादे मत्ता-दीनामशोभनानां योगादसद्योगः। सदसद्योगो यथा॥

"यथो दिवसधूसरो गलितयौवना कामिनी सरो विगत-वारिजं सुखमनक्षरं स्वाकृतेः। प्रभुर्धनपरायणः सततदुर्गतःसज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे"॥ "अरुणे च तरुणि! नयने तव मलिनञ्च प्रियस्य मुखम्। मुखमानतञ्च सखि! ते व्यलितस्वास्यान्तरे स्मरज्वलनः"॥ अत्रादेऽङ्गे गुणयोर्यौगपद्यं द्वितीये क्रिययोः। उभयोर्यौगपद्ये यथा। "कलुषञ्च तवाक्षितेष्वकस्मात् सितपक्षे रुहसोदरश्रि चक्षुः। पतितञ्च महीपतीन्द्र! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥ "धुनोति चाशिं तनुते च कीर्त्तिम्" इत्यादावेकाधिकरण्येऽप्येष दृश्यते।

१२१ सम्बन्धातिशयोक्तिः "सम्बन्धातिशयोक्तिः स्यादयोगे योग कल्पनम्१ योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्यते"२ च० "सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्"।१। "त्वयि दातरि राजेन्द्र! खर्द्दुमाद्रियामहे"।

१२२ सम्भवः "प्रभूतकारणालोकात् स्यादेवमिति सम्भवः। स विधौ१ वा निषेधे२ वा द्वये३ वा नद्वयेऽपि वा"४ सा०क० क्रमेण यथा "तथादातुं जलमुपनते शार्ङ्गिणोवर्णचौरे न स्यात् सिन्धोः पृथुरपि ततो दूर भावात् प्रवाहः। प्रेक्षिष्यन्ते गगनगतयो न्यूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्"। अत्र उक्तरूपेण दृश्योभविष्यतीति विधेः सम्भाव्यमानत्वादयं विधिरूपसम्भवः अतैव पूर्वार्द्धे सिन्धुप्रवाहस्य पृथुत्व निषेधरूपसम्भवश्च एवंविधिनिषेधतदुभयानात्मकसम्भवयो रुदाहरणे ह्यये।

१२३ सम्भावनम् "सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये" च०। "यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्। पारेपरार्द्धं गणितं यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात्"।

१२४ सहोक्तिः 'सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः। सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्" सा०द०। अतिशयोक्तिरभेदाध्यवसायमूला कार्य्यकारणपौर्व्यापर्य्यविपर्य्ययरूपा च। अभेदाध्यवसायमूलापि श्लेषनिमित्ता अन्यथा च क्रमेणोदाहरणम्। 'सहाधरदलेनासा यौवने रागभाक् प्रियः" अत्र रागपदे श्लेषः। "सह कुमुदकदम्बैः कामसुल्लासयन्तः सह घनतिमिरौघैर्व्यर्थमुत्साहरयन्तः। सह सरसिजषण्डैः स्वान्तमामीलयन्तः प्रतिदिशमसतांयोरंशवः सञ्चरन्ति"॥ अत्रोल्लासादीनां सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया।

१२५ सामान्यम् "सामान्यं प्रकृतस्यान्यतदात्म्यं सदृशैर्गुणैः"। च० "मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः। अविभाव्याः सुखं यान्ति चन्द्रिकाभिसारिकाः।

१२६ साम्यम् "द्वयोर्यत्रोक्तिवात्पर्य्यादौपम्यार्थोऽवगम्यते। उपमारूपकान्यत्वे साम्यमित्यामनन्ति तत्। तदानन्त्येन भेदानां संख्यानं तस्य दुष्करम्। दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्तिरेव च। तत्रेवादेः प्रयोगेण दृष्टान्तोक्तिं प्रचक्षते। इवादेरप्रयोगेण प्रपञ्चोक्तिं मनीषिणः। वस्तु किञ्चिदुपन्यस्य न्यसनात् तत् सधर्म्मणः। साम्यप्रतीतिरस्तीति प्रतिवस्तूक्तिरुच्यते। तत्र क्रियाजातिगुणद्रव्ययोगादिहेतुके। साम्ये पूर्वादिभेदेन दृष्टान्तोक्तिर्विधीयते" स०क०॥ तत्र क्रियानिमित्तम् "स्थितः स्थितासुच्चलितःप्रयातां निषेदुषीमासनबन्धधीरः। जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्"॥ इदं पूर्वम्। उत्तरं यथा। "रूपं तदोजस्वि तदेव वीर्य्यं तदेव नैसर्गिकसुन्नतत्वम्। न कारणात् खाड्विभेदे कुमारः प्रवर्त्तितो दीप इव प्रदीपात्"। अन्यान्युदाहार्याणि।

१२७ सारः "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते"। च० "मधुरं मधु, पीयूषं तस्मात्, तस्मात् कवेर्वचः"।

१२८ सूक्ष्मम् "संलक्षितस्तु सूक्ष्मार्थ आकारेङ्गितेन वा। कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते"। सा०द०। सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः। तदाकारेण यथा। "वक्त्रस्यन्दिस्वेदबिन्दु प्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे। पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्खित्वा पाणौ खड्गलेखां लिलेख" अत्र कयाचित् कुङ्कुमभेदेन संलक्षितं कस्याश्चित् पुरुषायितं रतं पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम्। इङ्गितेन यथा। "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्"॥ अत्र विटस्य भ्रूक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनिकालभाविना पद्मनिमीलनेन प्रकाशितः।

१२९ लोकोक्तिः "लोकोक्तिर्यत्र लोकोक्तिः स्यादर्थान्तरगर्भिता"। च० 'भुजङ्ग एव जानीते भुजङ्गाचरणं सखे"।

१३० स्मरणम् "सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते"। सा०द० "अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्। स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्"। स० कण्ठा० तु भेदोदर्शितः। "सदृशादृष्टचिन्तादेरनुभूतार्थवेदनम्। स्मरणं प्रत्यभिज्ञानस्वप्नावपि न बह्वहिः"। तत्र सदृशवस्तुदर्शनजन्यं स्मरणमुदाहरणे। अदृष्टहेतुकं यथा "मुनिसुतासुप्रणय-

स्मृतिरोधिना मम वियुक्तमिदं तमसा मनः। मनसिजेन सखे। प्रहरिष्यता धनुषि चूतशरस्त्व निवेशितः" । अत्र कण्वसुता भक्तनलाप्रणयस्मृतिरोधिना अज्ञानेन मम मनो वियुक्तमित्यदृष्टजनितं स्मरणम् न सदृशवस्तुदर्शनजन्यम्। चिन्ताजन्यम् यथा "पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्। अहो दृष्टं कालादपरमिव जातं वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं जनयति,, । अत्र प्रत्यक्षेषु स्रोतस्तरुवनादिषु चिन्ताजन्यत्वात् चिन्तोद्भूतं स्मरणम् आदिग्रहणात् परप्रयत्नादपि यथा "दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन। स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता"। अत्र परप्रयत्नजन्यत्वात्तथात्वम्। प्रत्यभिज्ञानं यथा।"स्पर्शः पुरा परिचितो नियतं स एव संजीवनश्च मनसः परिमोहनश्च"। अत्र य एव पूर्वानुभूतः स एवैषः इति प्रत्यभिज्ञा स्मरणम्। स्वप्नरूपं यथा। नागानन्दे "अद्य खलु स्वप्ने जानामि सैव प्रियतमा अत्र चन्दनलताग्रहे चन्द्रकान्तशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपलभमानेव रुदती मया दृष्टा" जीमूतवाहनेन विदूषकसमीपे स्वप्नस्य वर्णनम्। स्वप्नप्रत्यभिज्ञयोः पूर्वानुभूतसंस्कारजातत्वात् स्मरणत्वम्।

१३१ स्वभावोक्तिः "नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेत्याख्या सालङ्कृतिर्मता" दण्डी "तुण्डैः राताम्रकुटिलैः पक्षैर्हरितकोमलैः। त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः"। "कलकणितगर्भेण कण्ठेनाघूर्णितेक्षणः। पारावत परिभ्रम्य रिरंसुस्सुभ्यति प्रियाम्"। "बध्नन्ति मन्दरोभाग्रं कुर्वन्तु मनसि निर्वृतिम्। नेत्रे वामीलयन्त्येष प्रियास्वैरैः प्रवर्त्तते", "कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः।जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः"। "जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्। शास्त्रेष्वेव साक्षाज्यं काव्येष्वप्येतदीप्सितम्" । इयं जातिरपि ।

१३२ हेतुः "हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते १। हेतु हेतुमतोर्वैक्यवर्णनं हेतुरुच्यते२,,।"च०।असावुदेति शीतांशु र्मानच्छेदेन सुभ्रुवाम्,,१। "लक्ष्मीविलासोभवतः कटाक्षावेक्षणं प्रभो !२।

१३२ हेत्वपह्नुतिः "युक्त्या स एव पूर्व्वस्तेदुच्यते हेत्वपह्नुतिः।" च० स एव धर्म्मनिह्नव एव। "नेन्दुस्त्रीणां न निश्शर्कः स्निग्धोरोजोऽयमुत्थितः"। अन्येऽलङ्काराएवं बान्तर्भूताः। देहभूषणानि च शिरःप्रभृतीनि तानि च प्राधान्यादहौ "शिरसं स्कटं हारः कुण्डलं चारुदं तथा।कङ्कणं वलयश्चैव मेखलेत्यष्टधा वरम्,, ।वरं प्रधानं तेन अप्रधानानि पादकटकादीन्यपि । तत्र भूषणद्रव्याणि "पद्मरागश्च वज्रञ्च गोमेदो विजयस्तथा । मुक्ता वैदूर्य्यनीलानि तथा मरकतादयः । सुवर्णेनापि घटना सर्वेषामुपदिश्यते। प्रधानभूषणेष्वेवमप्रधाने न निश्चयः। प्रधानभूषणं प्रायः शिरसोऽहं विधीयते,, । भरतः "सुखदा मणयः शुद्धा दुःखदा दोषशालिनः" युक्तिकः नवालङ्कारधारणे विहितनक्षत्रादि यथा "रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु । गुरुशुक्रबुधादेषु वस्त्राभरणधारणम्" ज्योति०अत्रापवादः "उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मतौ। अनिष्टेष्वपि निर्दिष्टं वस्त्राभरणधारणम्"। नायकयोरङ्गजादिभावभेदेषु ते च यथा "यौवने सत्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः । शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता । औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः। लीला विलासोविच्छित्तिर्विब्बोकः किलकिञ्चितम्। मोट्टायितं कुट्टमितं बिब्बोकललितं मदः । विक्रतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्।हसित चकितं केलिरित्यष्टादशसंख्यकाः। स्वभावजाश्च भावाद्याद्य पुंसां भवन्त्यपि" । पूर्व्वे भावादयो धैर्य्यान्वा द्य नायकानामपि सम्भवन्ति किन्तु सर्व्वेऽप्यमी नायिकाश्रिता एव विक्षिप्ति विशेषं पुष्णन्ति" सा०द० उक्ताः । एषां लक्षणानि तत्तच्छब्दे वक्ष्यन्ते । ७अनगुरौ चतुष्कले"॥ऽत्याकारे गणभेदे च ॥ [समर्थे धनादौ ।

अलङ्कुमारि त्रि० अलंकुमार्य्यै तङ्करणाय । कुमारीभरणे ।

अलङ्कृत त्रि० अलम्+कृ–कर्म्मणि क्त । भूषिते मण्डिते । "अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्" सा०द० "सत्कृतालङ्कृतां कन्यां योददाति स कूलदः" इत्यमरः ।

अलङ्कृति स्त्री अलम्+कृ–भावे क्तिन् । १भूषणे करणे क्तिन् । २भूषणसाधने अलङ्कारशास्त्रोक्ते ३उपमादावलङ्कारे च "तदोषौ शब्दार्थावनलङ्कृती पुनःक्वापि" काव्य०प्र० "यो विद्वान् मन्यते काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलङ्कृती" चन्द्रा० ।

अलङ्क्रिया स्त्री अलम्+कृ–भावे श । भूषायाम् ।

अलङ्घामिन् त्रि० अलं पर्य्याप्तं गच्छति णिनि स्त्रियांङीप् । गमनसमर्थे रिपुं प्रति गन्तरि ।

अलङ्घनीय त्रि० न लङ्घनीयः । अनतिक्रमणीये । "तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता । अलङ्घनीयता-हेतुरुभयं तन्महस्विनि" माघः ।

अलङ्घ्य त्रि० न लङ्घ्यः । अनतिक्रमणीये । "लिलङ्घयिषतो लोकानलङ्घ्यानलघोयसः" माघः ।

अलजी स्त्री अला पर्य्याप्ता सती जायते जन–ड गौरा० ङीष् । सुश्रुतोक्ते सन्धिगतरोगभेदे यथा । "पूयानसः सोपनाहः स्रावा पर्व्वणिकालजी । क्रमिपन्थिश्च विज्ञेया रोगाः सन्धिगता नव" । तल्लक्षणं तत्रैव "जाता सन्धौ गुल्मक्षणेऽलजी स्रात्तच्चिन्नेवास्यापिता पूर्व्वलिङ्गै." इति ।

अलज्जा स्त्री न लज्जा विरोधे न० त० । १धार्ष्ट्ये अभावे न०त० । २लज्जाभावे । न०ब० । ३लज्जाशून्ये त्रि० ।

अलञ्जर पु० अलं सामर्थ्यं जृणाति जृ–अच् पृ० उत् । मधिके अलिञ्जरे बहुजलाधारे(जाला)वृक्षभेदे पात्रे । [धनादौ ।

अलञ्जीविक त्रि० अलं जीविकायै ४त० । जीविकापर्य्याप्ते

अलञ्जुष त्रि० अलं जुष्यते कर्म्मणि बा०क । भक्षणपर्य्याप्ते मांसादौ । "अथ तच्छृतस्य परिहरन्ति तदलञ्जुषम्" शत० ब्रा० "मांसं हि जोषाय भक्षणायालं पर्य्याप्तंभवति" भा० ।

अलति पु० अल–वा अतिच् । गीतिमात्रकायाम् स्वरसाधनार्थे सारिगामादिस्वरभेदे तदुपक्रमभेदेषु हि गीतेः प्रारम्भात्तेषां गीतिमात्रकात्वम् ।

अलन्धन त्रि० अलं प्रभूतं धनमस्यास्य अच् । पर्य्याप्तधने सद्वृद्धे । "निरादिष्टधनस्त्वेतु प्रतिभूःस्यादलन्धनः" मनुः ।

अलन्तराम् अव्य० अलम्+अतिशये तरप् आम् । अत्यर्थं पर्य्याप्तप्रादावर्थे । "पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम्" माघः । एवं तमप् आम् । अलन्तमाम् तत्रैवार्थे अव्य० ।

अलन्धूम पु० अलमत्यर्थो धूमः । धूमसमूहे जटाध० । [श्रीधरः ।

अलब्ध त्रि० न लब्धः । प्राप्तभिन्ने "अलब्धस्य प्राप्त्युपायो योगः"

अलभ्य त्रि० न लभ्यः । अप्राप्ये । "रोगे चालभ्ययोगे च क्लीबत्वे पुंसवेऽपि च । यद्ददाति सकृद्दृष्टं पूर्व्वलापि न दुष्यति" कालमा० मरी० "अलभ्ययोगे पुनरप्राप्तसम्बन्धनिमित्ते अधौचान्तदिवसे पूर्व्वत्र मलमासे" शु० त० रघु० ।

अलम् अव्य० अल–बा० अम् १भूषणे "जनयित्नोरलङ्घते यः प्रश्रय इव श्रियम्" अस्य उपपदसंज्ञा अलङ्कृत्य "अलङ्कृत्य सुतादानं दैवं धर्म्मं प्रचक्षते" मनुः । २सामर्थ्ये शक्तौ "विनाग्नयश्चादलमभूष्णु रिज्यायै तपसः सुतः" "कथा हि खलु पापानामलमन्येषु यत" इति च माघः "वरेण शमितं लोकानलं दग्धुं हि तत्तपः" कुमा० ३पर्य्याप्तौ ४संपूर्णतायां ५प्राचुर्य्ये "प्रतिभूःस्याद्यदलन्धनः" मनुः "अलमस्यास्य धनम् अच् बहुधनइत्यर्थः कृत्नु० । ७वारणे, "अलं विवादेन यथा श्रुतं त्वया" कुमा० "अलं विवादेन शमोविधीयताम्" महाना० ८निषेधे "आलभ्यालमिदं वध्योयत् स दारानपाहरत्" माघः ९निरर्थकत्वे १०अस्त्यर्थे ११अवधारणे १२अत्यर्थे च गदाध० ॥ "विजयायेत्यलमन्वशान्मुनिर्माम्" किरा० "अलं भूयः" मल्लि० । लस वा रः अरम् । तत्रार्थे अरङ्कृतशब्दे उदा० ।

अलम्पशु पु० अलं यज्ञे निरर्घः पशुः । "अप्रशस्ते पशौ "अलम्पशोरपशोश्च" कात्या० १९,१,४, पशुर्योग्यः सन् यो नाम पशूनविन्दते सोऽलम्पशुरपशुः" कर्क० ।

अलम्पुरुषीण पु० अलं समर्थः पुरुषाय "अषडक्षेत्यादिना" पा० खार्थे ख । युद्धादिसमर्थे प्रतिमल्लादौ पुरुषे ।

अलम्बुद्धि स्त्री अलम् व्यर्था बाधितविषयत्वात् पर्य्याप्ता वा बुद्धिः । मिथ्याबुद्धौ, पर्य्याप्तबुद्धौ च । "पश्यन्नपि नालम्बुद्धिमशय" किरा० १२,३९, श्लोक० व्या० मल्लि० ।

अलम्बुष पु० अलं पुष्णाति पुष–क पृ० षस्य बः । १वमने ऋर्ह्ये । २प्रहस्ते रावणमन्त्रिराक्षसे ३घटोत्कचकृते राक्षसभेदे च "अलम्बुषं तथा युद्धे विचरन्तमभीतवत् । क्रैङ्क्षिः प्रयथौ तूर्णम्" इत्युपक्रम्य "रिपुं निहत्याभिननन्द वै तदा कृतम्बुषं यक्षमलम्बुषं यथा" भा० द्रो० प० । अलम्बुषनामानौ च द्वौ राक्षसौ कुरुक्षेत्रयुद्धे समागतौ अयमेको घटोत्कचेन निहतः भी० प० अपरोपि निहतः इत्यविरोधः । ४अप्सरोभेदे तच्छब्दे विवृतिः । ५सुषडीर्य्याम् मेदि० ६लज्जालुलतायाम् ७अन्याप्रवेशार्थं दत्तजलरेखायाञ्च स्त्री राज० । तस्याः फलम् अच् लुप् तत्फले न० । "कृतम्बुषं यक्षमलम्बुषं यथा" भा० द्रो० प० ।

अलम्भूष्णु त्रि० अलम्+सामर्थ्ये भू–ग्लुच् । "समर्थे "विनाग्नयश्चादलम्भूष्णु रिज्यायै तपसः सुतः" माघः ।

अलय पु० न लयः विरोधे न० त० । १लयविरोधिनि शब्दे । "शकारादिष्वपि लोकेषु श्रूयमाणौ लयालयौ" रामा० अभावे न० त० । २विनाशाभावे । नास्ति लयोयस्य ३अवस्थानशून्ये भ्रमणशीले "स्थानमानमति कालिमालया" माघः "लवो लयन क्वचिदवस्थानं नास्ति यस्याः" मल्लि० ४विनाशशून्ये च त्रि० ।

अलम्बुसा पु० ब०व० । देशभेदे ।

अलर्क पु० अलमर्कतेऽर्च्यते वा अर्क–अच् अर्च–घञ् वा शक० । १श्वेतार्कवृक्षे २क्षिप्रकुक्कुरे ३क्षत्रियभेदे च स च भा० आ० प० दर्शितः यथा "अथ क्षेमिः क्लेशभेदोमांसशोणितभोजनः । दारुणो दारुणस्यर्षेः कर्षस्याभ्यासमागतः । स तस्योद-

मयासाद्य विभेद रुधिराशनः। न चैनमशक्नत् क्षेप्तुं हन्तुं वापि गुरोर्भयात्। स दह्यमानस्तु तया क्रमिणा तेन भारत! । गुरोः प्रबोधनायाङ्गी तमुपैक्षत सूर्य्यजः। कर्णस्तु वेदनां धैर्यादसहमां विनिगृह्य ताम्। अकम्पयन्नव्यथयन् धारयामास भार्गवम्। तदास्य रुधिरेणाङ्गं परिस्रुष्टं भृगूद्वहः। तदाऽबुध्यत तेजस्वी सन्त्रस्तश्चेदमब्रवीत्। अहोऽशुचिताम्प्राप्तः किमिदं क्रियते त्वया। कथयस्व भयं त्यक्त्वा याथातथ्यमिदं मम। तस्य कर्णस्तदाचष्ट क्रमिणा परिभक्षणम्। ददर्श रामस्तं चापि क्रमिं शूकरसन्निभम्। अष्टपादन्तीक्ष्णदंष्ट्रं सूचिभिरिव संवृतम्। रोमभिः सन्निरुद्धाङ्गमलर्कं नाम नामतः। स दृष्ट्वातो रामेण क्रमिः प्राणानवाहृजत्। तस्मिन्नेवाहृजि क्षिप्तस्तदद्भुतमिवाभवत्। ततोऽन्तरीक्षे ददृशे विश्वरूपः करालवान्। राक्षसो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः। स रामं प्राञ्जलिर्भूत्वा बभाषे पूर्णमानसः। स्वस्ति ते भृगुशार्दूल। गमिष्यामि यथागतम्। मोचितो नरकाद्दुष्टाद्भवता मुनिसत्तम! । भद्रञ्च तेऽस्तु वन्दे त्वां प्रियं मे भवता कृतम्। तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान्। कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत्। सोऽब्रवोद्दुमासं प्राग्दंशो नाम महासुरः। पुरा देवयुगे तात! भृगोस्तुल्यतया ह्यव। सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात्। महर्षेरभिशापेन क्रमिभूतोऽमतं भुवि। अब्रवीद्धि स मां क्रोधात्तव पूर्व्वपितामहः। मूढस्त्वेषाश्रमः पाप निरयं प्रतिपत्स्यसे। शापस्यान्तो भवेदूब्रह्मन्नित्येवं तमथाब्रुवम्। भविता भार्गवाद्रामादिति मामब्रवीद्भृगुः"।

अलपस् न०न रपः पापम् न०त० रस्य लः। अपापे पुण्ये।

अलबाल न० लबमालाति ला–क न०त०। वृक्षसेकार्थे वृक्षमूले कृदादिकृते जलाधारे वेष्टने स्वार्थेऽण्। आलबालमप्यत्र।

अलस त्रि० न लसति व्याप्रियते लस–अच्। अवश्यकर्त्तव्येषु शरीरापाटवमभिनीय १कृताप्रयासे, "कृदुतरतनवोऽलसाः प्रकृत्या:" माघः अयुक्तः प्राकृतः स्वयं शठो नैकृतिकोऽलसः। २क्रियामन्दे च (पाकुँड्) ३पादरोगभेदे, ४वृत्तभेदे च पु०। ५हंसपदीलतायां स्त्री। पादरोगो यथा "क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ। दुष्टकर्दम संस्पर्शात्कृमिकं च विभावय" पादौ क्षिप्त्वारनालेन लेपनं कार्य्यं हितम्" इति च सुश्रुतः। गर्गादिगणपाठात् ४मुनिभेदे ततः अपत्ये यञ् आलस्यस्तदपत्येऽवृद्धौ मुष्फ आलस्यायनः। अलसस्य भावः ष्यञ्। आलस्यम् न०तल् अलसता स्त्री त्व अलसत्वं न०। क्रियाकरणाय अप्रयत्ने।

अलसक पु० न लसति अनेन लस करणे–बा०वुन्। १रोगभेदे। यथाह सुश्रुतः "अजीर्णभामं विष्टब्धं विदग्धं च यदीरितम्। विसूच्यलसकौ तस्माद्भवेताम्" इत्युपक्रम्य "कुक्षिरानह्यतेऽत्यर्थं तास्यत्यत्यर्थं च कूजति। निरुद्धोमारतोवापि कुक्षावुपरि धावति। वातवर्चोनिरोधश्च यस्यात्यर्थं भवेदपि। तस्यालसकमाचष्टे दृष्णोद्धारौ च यस्य तु"। तच्चिरक्तिरपि अन्यत्र दर्शिता "प्रयाति नोर्द्धं नाधस्तादाहारो न च पच्यते। आमाशयोऽलसीभूतस्तेन सोऽलसकः स्मृतः"। अलस+स्वार्थे कन्। २अलस शब्दार्थे त्रि०।

अलात पु० न०। ला–क्त न०त०। (कोयाला) इति ख्याते (आङ्गार) इति ख्याते च अर्द्धदग्धकाष्ठे। "निर्वाणालातलाघवम्" कुमा०।

अलातृण त्रि० अलमत्यर्थमातृणा आतर्दनाः अलम्+आ+तृद नि० दस्य न लोपश्च। आतर्दनशीले। "अलातृणासो विदथेषु सुष्टुताः" ऋ०१,१६६,७, "अलातृणासः अलमत्यर्थं यत्नेनामातर्दनाः" भा०।

अलाबु(बू)बू स्त्री न लम्बते न+लबि–उ णित् नलोपश्च दीर्घः। (लाउ), तुम्बीम्। वा ऊङि। अलाबूश्चात्र। "अलाबूं वर्त्तुलाकारां वार्ताकुं कुन्दसन्निभाम् स्मृतिः"।

अलाबुमय त्रि० अलाबु+विकारे मयट्। शुष्कालाबुतुम्बिनिर्मिते पात्रे "यतिपात्राणि वृद्धेभ्युदार्वलाबुमयानि च। सन्ति तैः शुद्धिरेतेषां गोवालैश्चावधर्षणम्" या० स्मृतिः।

अलाबूकट न० अलाबूनां रजः अलाबु+रजोऽर्थे कटच्। तुम्बीरजसि।

अलाभ पु० न लाभः अभावे न०त०। १लाभाभावे "नार्थं नक्तः खलु तवातिमहानलाभः" नैष०। "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ" गी०। "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः "अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्" मनुः। न०ब०। २लाभशून्ये त्रि०।

अलाय्य त्रि० ऋ–आय्य–रस्य लः। १गमनशीले २अभिमुखगन्तरि गतौ च। "अलाय्यस्य परशुर्ननाय" ऋ०६,६७,२०, "अलाय्यस्य अभिगमनशीलस्य गतोः" भा०।

अलार न० अरार्य्यं ते ऋ–यङ् लुक् अच् रस्य लः। कपाटे शब्दरत्न०।

अलास पु० न लसति अनेन लस–करणे घञ् न०त०।

जिह्वागतरोगभेदे यथाह सुश्रुतः। "जिह्वागास्तु कण्टकाल्विधाल्विभिर्दोषैरलास उपजिह्विका च" इत्युक्त्वा "जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च याकच्छदनप्रकाशा। पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च। कफेन गुर्वी बहुलाचिता च मांसोद्गतैः श्लक्ष्मश्लिक्षकण्टकाभैः। जिह्वातले यः स्रवथुः प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्त्तिः। जिह्वां स तु स्तम्भयति प्रदह्यते मूले तु जिह्वा श्यथमेति पाकम्"॥ स तु असाध्यरोगः यथोक्तं तत्रैव। "असाध्या अपि वक्ष्यन्ते रोगा ये यत्र यादृशा" इत्युपक्रम्य "जिह्वागतेष्वलासस्तु नालव्येष्वेतदीदृशम्" इत्यवद्यभिधाय "असाध्याः कीर्त्तिताह्येते रोगा नव दशैव च"

अलि पु० अलति दंशे, कूजिते, शब्दिते, वा समर्थो भवति अल–इन्। १भ्रमरे, "अलमलेरिव गन्धरसावमू" माघः। "श्यामीभूताः कुसुमसमूहेऽलीनाम्" "मङ्क्षूदपाति पटलैरलीनाम्" इति च माघः "अलिपङ्क्तीरनेकशस्त्वया" कुमा०। २दृश्चिके, ३काके, ४कोकिले, ५दृश्चिकराशौ च स च द्वादशधा विभक्तराशिचक्रस्याष्टमो भागः विशाखाद्यपादानुराधाज्येष्ठारूपः। ६सुरायां च।

अलिक न० अल्यते भूष्यते अल–कर्म्मणि इकन्। ललाटे। "असंस्कृतालकिनीमलिकलेखाम्" काद०।

अलिकुलसङ्कुल पु० अलिकुलेन सङ्कुलः व्याप्तः। १कुसुमवृक्षे राजनि०। २भ्रमरकुलव्याप्ते त्रि०"अलिकुलसङ्कुलकुसुमनिराकुलनवदलमालतमाले" जयदेवः।

अलिगर्द्द पु० अलिरिव दृश्चिक इव स्पर्द्धते स्पर्ध–अच्। (आलर्क) इतिख्याते सर्पभेदे शब्दर०।

अलिगु पु० अलिरिव दुःसहा गौर्वाणी अस्य। गर्गादिगणपठिते ऋषिभेदे। ततः गोत्रे यञ् आलिगव्यः। तदपत्ये पुंस्त्री०। स्त्रियां तु सोदरादिः ङीष्। आलिगवायनी।

अलिङ्ग त्रि०नास्ति लिङ्गं ज्ञापकहेतुश्चिह्नं वा यस्य। १अनुमापकहेतुशून्ये २चिह्नशून्ये च। वेदान्तिमतसिद्धे परमात्मनि पु०। न०त०। लिङ्गभिन्ने २अननुमापके तच्च सांख्यमते "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितम् लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा०का० उक्तमव्यक्तम्। "अकार्य्यं नित्यं व्यापि अक्रियम् एकमनाश्रितमलिङ्गमनवयवं स्वतन्त्रमव्यक्तमिति" सा०त०कौ०। तच्च न कस्यापि लिङ्गम् कार्य्येण कारणानुमानमिह विवक्षितं तेन संहत्यकारित्वेन परार्थतया तस्य पुरुषानुमापकत्वेऽपि न क्षतिरिति च तत्रानुसन्धेयम् "तदलिङ्गमेकद्रव्यत्वात् कर्म्मणः" वै०सू०। "कर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्म च एकद्रव्यत्वात् एकमात्मभूतसमवायिकारणत्वात्" वै०सू० उ०। ४दुष्टचिह्ने च। [भिन्ने ब्रह्मचारिभ्रष्टौ।

अलिङ्गिन् त्रि० न लिङ्गी वेशधारी। कपटवेशधारिणि।

अलिजिह्वा स्त्री अलिरिव क्षुद्रा जिह्वा। जिह्वामूलस्थायां क्षुद्रजिह्वायाम् (आलजिभ) स्वार्थे कन् अत इत्त्वम्। तत्रैव।

अलिञ्जर पु० अलनमलिः अल–इन् तं जरयति जॄ–अच् षत्वं णत्वं० मुम्। (जाला) इति ख्याते छिद्रमये जलाधारे पात्रभेदे मणिके। "उदकान्तमुपानीय मत्स्यं वैवस्वतो मनुः। अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभम्" भा०व०प०।

अलिदूर्व्वा स्त्री अलिरिवाकारेण दूर्व्वा। भाङ्गादूर्व्वायाम्।

अलिन् पु० अलं दृश्चिकपुच्छस्थकण्टकं विद्यतेऽस्य इनि, अल–इनि वा। १दृश्चिके, २भ्रमरे च। "मलिनिमाऽलिनि माधवयोषिताम्" माघः स्त्रियां ङीप् अलिनी "रमताऽलिनी मिलीभ्रे" माघः।

अलिन त्रि० अल–बा० इनन्। पर्य्याप्ते तपोभिरतिप्रवृद्धे। आ पक्वासोभलानसोभनन्नालिनासो विषाणिनः" ऋ० ७।१८।७। "अलिना तपोभिरतिवृद्धाः" भा०।

अलिन्द पु० अल्यते भूष्यते अल+कर्म्मणि किन्दच्। १द्वारप्रकोष्ठे २बहिर्द्वारवर्त्तिनि चत्वराकारे प्रदेशे। "यस्याऽलिन्देषु न चक्रुरेव सुरभाङ्गना गोमयगोमुखानिः" माघः २बहिर्द्वारभागमात्रे ३देशभेदे ४वह्नेर्गतान्तिनि तद्राजनि च ब०व०। "अलिन्दाः कालवाश्चैव कुरुटाः करटा खशाः" भा० उ० प० जम्बूखण्डविभागे प्राच्यजनपदकथने। गौरादिगणपाठात् स्त्रियां ङीष्। अलिन्दी।

अलिपक पु० कुत्सितवर्णेन लिप्यते लिप–बा० कर्म्मणि वुन्। १कोकिले २भृङ्गे ३कुक्कुरे च मेदि०।

अलिपत्रिका स्त्री अलिर्दृश्चिक इव पत्रमस्याः वा कप् अत इत्त्वम्। दृश्चिकपत्राख्यलतायाम्। अलिपर्ण्यप्यत्र।

अलिप्रिय न०ष६त०। १कोकनदे रक्तोत्पले २भ्रमरप्रिये त्रि० ३पाटलावृक्षे राजनि०।

अलिमक पु० अलिरिव मक्कते–मक्क अच् पृ०कलोपः। १भेके २कोकिले ३भृङ्गे ४मधूकवृक्षे ५पद्मकेशरे च मेदि०।

अलिमोदा स्त्री अलीन् मोदयति मुद्+णिच्अच्। गणिकायां हेमच०।

अलिम्पक पु० कुत्सितं लिप्यते वस्त्रेण लिप–बा कर्म्मणि अ न०त० संज्ञायां कन्। १भृङ्गे २कोकिले ३मधूकवृक्षे ४भेके ५पद्मकेशरे च।

अलिल् पु० ऋ–इलच् रस्य लः। वेदान्तप्रसिद्धे गगनचारिणि षड्भिदे–अलिलः पक्षिणः पुत्रो गगनाद्यातिभूतलम्। खबोधाभावतः, स खबोधे यात्यम्बरं पुनः"। वेदा० वा०। अलिन इति पाठस्तु सम्यक्।

अलिवल्लभ पु० ई०। १फलेहृक्षाडुरे २पाटलौ।

अलिवाहिनी स्त्री अलिं वाहयति गन्धेन वह–णिच–णिनि ङीप्। कोङ्कणदेशप्रसिद्धे कदम्बवृक्षे।

अलीक न० अल–ईकन्। १अप्रिये, २ललाटे, च। अलति गच्छत्यधोऽनेन। २असत्ये। मिथ्याकथने हि नरकपातः। तत्र अप्रिये "अरोचकालीकनिर्बन्धः समानि ब्रह्महत्यया" मनुः "तद्व्यथा स महाराजो नालीकमधिगच्छति" रामा०। विशेषेण अलीकम् व्यलीकम् अत्यन्ताप्रिये "व्यलीकनिश्वासमिवोत्ससर्ज" कुमा०। अलीकमस्त्यस्य सुखा०ठनि न ठ्। अलीकी तद्वति त्रि० स्त्रियां ङीप्। अलीके भवः दिगा० यत अलीक्यः। मिथ्याभूतभवे त्रि०।

अलीकमत्स्य पु० "माषपिष्टिकयालिङ्ग्य नागवल्लीदलैर्मृदु" तत्तु संस्वेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि। ततोनिष्काषितं खण्ड्यं तिलतैलेन भर्जयेत्। अलीकमत्स्यउक्तोऽयं प्रकारः पाकपण्डितैः। तं दृष्ट्वाकं भक्षितेन वास्तूकेन च भक्षयेत्" राजनि० उक्तेपिष्टकादे।

अलु स्त्री अल–उन्। चुद्रकलखाम्।

अलुक्समास पु० नास्ति विभक्तेः लुक्–यत्र। विभक्तेर्लुक्शून्ये समासे यथा मनसिजः सरसिजमित्यादि।

अलुब्ध त्रि० न लुब्धः। निर्लोभे लोभशून्ये।

अलूक्ष त्रि० न रूक्षः वेदे रस्य लः। रूक्षभिन्ने चिक्कणे "अलूक्षाधर्म्मकायाः" तैत्ति० उ०।

अलेपक त्रि० नास्ति लेपः संबन्धोयस्य वा कप। निस्सम्बन्धे परात्मनि पु०। लिप–ण्वुल् न०त०। लेपकभिन्ने त्रि०।

अलोक पु०न लोक्यते लोक–कर्म्मणि घञ्। अक्षदादिभिरदृश्ये १पातालादौ २अदृश्यमात्रे त्रि० "लोकालोकइवाचलः" रघुः। लोकालोकपर्व्वते विहितिः। ३लोकशून्ये निर्जने त्रि० ३लोकशून्ये रहसि च न०"रक्ष सर्व्वानिमान् लोकान् नालोकं कर्त्तुमर्हसि" रा०। लोकस्याभावः अभावे अव्ययी०। ४लोकाभावे अव्य०। नास्ति लोकोभोग्यलोको यस्य। ५अकृतपुण्ये त्रि० ६क्षत्रियादौ ७अलोका क्षत्रियजः श्रुतः ब्रा० तेषां दक्षिणाग्रहणेन पुण्यभागित्वाभावात् च तथात्वम्। ७दृष्टकाभेदे स्त्री अलोका दृष्टका उपदंशादि"। लोकते कर्तरि अच्। दर्शकभिन्ने।

अलोक्य त्रि० लोकाय स्वर्गादिलोकप्राप्तये हितः तत्र साधु वा यत् न०त०। स्वर्गादिलोकासाधने। "यदलोक्यामग्निचित्याहुरथ किमचैषीरिति "सहोवाच किं नु लोक्यं किमलोक्यम् लोक्या यताहुतेत्येवाऽस्त्वेव पुरायुषः स्वःकामी न प्रेयादलोक्यं हि तत्" शत०ब्रा० "यथाखोडिजते वाचा नालोक्यां तादृदीरयेत्" मनुः।

अलोभ पु० लोभःधनादिप्राप्तितृष्णा अभावे न०त०। धनादिप्राप्तितृष्णाभावे। लोभोहि सत्यास्तेयापरिग्रहविरोधी सति हि लोभे सत्यादयो लुप्यन्ते। 'लोभस्य पुरतः केचौ सत्यास्तेयापरिग्रहाः' प्रबो० च०। "लोभात् सत्यः प्रणश्यन्ति सत्यास्तेयापरिग्रहाः" पुरा०। अतएव "लोभस्य यमादिप्रतिपक्षत्वं पातञ्जले उक्तम् "वितर्कबाधे प्रतिपक्षभावनम्" एतेषां यमनियमादीनां वितर्कैः हिंसादिसंकल्पैः "हननक्रियास्वेवम्" "अन्तत वच्छ्रमम्" "परस्वमादास्ये" इत्येवंरूपैः बाधने प्राप्ते सति यमपरः ब्राह्मणः प्रतिपक्षभावनं कुर्य्यादित्यर्थः।

अलोभिन् त्रि० अलोभोऽस्यास्ति इनि लोभोऽनुपदं व्याख्यातः। तच्छब्दे "अलोभो ह्यात् प्रजावित्ते सदृशीवात् सम्मितं करम्" भा० शा० प०।

अलोल त्रि० न लोलः। १अचञ्चले २वितृष्णे च।

अलोलुप त्रि० न०त०। लोभनीयद्रव्येन्द्रियसन्निधानेऽपि अविक्रिये लोभशून्ये पुरुषे।

अलोह पु० पाणिन्युक्ते नड़ादिगणीये ऋषिभेदे। गोत्रापत्ये नड़ा०फक् आलोहायनः। तस्य गोत्रापत्येषु० स्त्री०।

अलोहित न०त०। १लोहितभिन्ने रक्ताताशून्ये। नास्ति लोहितं यस्मात्। २रक्तपद्मे रत्नमाला।

अलौकिक त्रि० लोके विदितः ठक् न०त०। लोकेषु अविदिते स्त्रियां ङीप्। "अधिहरि हरि हि दृश्यलौकिकं विग्रहवाक्यम्" सि० कौ०। इन्द्रियादिलौकिकसन्निकर्षाभावेऽपि २सामान्यलक्षणाद्यधीने प्रत्यक्षे न० इति नैयायिकाः तथाहि प्रत्यक्षं द्विविधं लौकिकमलौकिकञ्च। आद्यं चक्षुरादिजन्यमन्त्यं तदजन्यम्। तत्र सामान्यलक्षणादिसन्निकर्षजन्यमलौकिकम् ते च सन्निकर्षा अनुपदं वक्ष्यन्ते।

अलौकिकसन्निकर्ष पु० लोकेषु अविदितः सन्निकर्षः। "अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा ज्ञानलक्षणा योगजोमत" इति भाषा० उक्ते प्रत्यक्षसाधनसन्निकर्षभेदे सामान्यलक्षणादिलक्षणं

च तत्तच्छब्दे वक्ष्यते तथाहि यत्किञ्चिद्घटादौ चक्षुःसन्निकर्षे घटत्वसामान्यधर्मज्ञानेन सकलघटादिज्ञानं सामान्यलक्षणाधीनं घटादिज्ञाने न घटादिज्ञानं ज्ञानलक्षणाधीनम्, योगविशेषजनितं सकलघटज्ञानं च एतत्त्रयमलौकिकं प्रत्यक्षं तस्य च अलौकिकत्वात् तदुत्तरं तत्तद्विषये साक्षात्करोमीति नानुव्यवसायः किन्तु जानामीत्येवानुव्यवसाय इति भेदः ।

अल्प त्रि० अल्प—प । १क्षुद्रे, २ईषदर्थे, ३सूक्ष्मे, ४मरणार्हे । "अथ यदल्पं तन्मर्त्यम्" छा० उ० । स्वार्थे कन् अल्पकमप्यत्र । ५अवयवे पु० । अल्पत्वञ्च यस्य वस्तुनः यावती इयत्ता उचिता ततोन्यूनत्वम् तत्त्वं च परिमाणभेदः अपेक्षाबुद्धिविशेषविषयत्वमपकर्षाधायकधर्मविशेषो वा तेन द्रव्यगुणादिधर्म्मत्वं तस्य । तच्च जातिगुणक्रियाद्रव्येषु भवति अल्पा नदी अल्पः श्यामः अल्पं ज्ञानं अल्पः पाकः अल्पोऽवकाशः । "क्वचाल्पविषया मतिः" रघु० । "अल्पप्रयोजनकृतोरुतरप्रयासैः" माघः । "प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते" मनुः । अस्य गुणपरतापि "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्येति" पाणिन्युक्तेः अल्पान्मुक्तः अल्पतया मुक्त इत्यर्थः । वीप्सार्थे द्वित्वम् । अल्पशः अव्य० । "पतितापतत्तैरल्पशः" पा० । अस्य संख्यावद्गुणवचनत्वात् अतिशायने इष्ठन् इयसुन् च । अल्पिष्ठः अल्पीयान् स्त्रियां ङीप् । "संख्यायाः अल्पीयस्याः" वार्त्ति० अत्र प्रकृतेर्वा कन् । कनिष्ठः कनीयान् "कनीयान् इयसस्तृज्वेत्" स्मृतिः "भ्राता ज्येष्ठः कनिष्ठो वा" स्मृतिः । भावे इमनिच् अल्पिमा पु० व्यञ् आल्पम् पु० क्ली तल् अल्पता । स्त्रीत्व-अल्पत्वं न० क्षुद्रपरिमाणे ।

अल्पकेशी स्त्री अल्पः केश इव पत्रमस्याः । भूतकेशीवृक्षे ।

अल्पगन्ध न० अल्पो गन्धोयस्य । १रक्तकैरवे । २खल्पगन्धयुक्त मात्रे त्रि० । एकान्तसम्बन्धे इच् समा० । अल्पगन्धिः तत्रैव त्रि० ।

अल्पतनु त्रि० अल्पा क्षुद्रपरिमाणा तनुः शरीरं यस्य १खर्व्वे, २दुर्बले, ३खल्पास्थियुक्ते च । पत्रके २क्षुद्रमात्रे च ।

अल्पपत्र पु० अल्पं पत्रं यस्य । १क्षुद्रपत्रयुक्ततुलसीभेदे खल्प-

अल्पपद्म न० अल्पमसम्पूर्णं पद्मम् । रक्तकमले रत्नमा० ।

अल्पप्रमाण पु० अल्पं प्रमाणमस्य वा कप् । (तरमुज) (खरमुज) वा इति१ ख्याते वृक्षे २अल्पप्रमाणयुक्ते त्रि० ।

अल्पप्राण पु० अल्पः प्राणः प्राणनक्रिया यस्मिन् । वर्णभेदे यस्योच्चारणे अल्पप्राणवायोर्व्यापारस्तस्मिन् । स च शिक्षायामुक्तः "अयुग्मवर्गयमगायणश्चाल्पासवः स्मृता" इति तथा च वर्गेषु प्रथमतृतीयपञ्चमवर्णाः यमगाः यवरलाश्च अल्पासवः । कर्म्म० । २ताडशवर्णोच्चारणवाह्यप्रयत्ने । वाह्यप्रयत्नास्तु एकादशधा "विवारः संवारः श्वासोनादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति" सि० कौ० । अल्पः प्राणः प्राणहेतुकं बलमस्य । ३अल्पबले त्रि० । [शाकै]

अल्पमारिष पु० अल्पः मारिषः शाक० कर्म्म० । (नटिया)

अल्पमेधस् त्रि० अल्पा मेधाऽस्य असिच् समा० । अल्पधारणायुक्तबुद्धौ धारणा च दृढ़संस्कारः ।

अल्पम्पच त्रि० अल्पं पचति पच—वा ख मुस् उप० स० १मितम्पचे आत्मम्भरौ कृपणे । करणस्य कर्त्तृत्वविवक्षायाम् । २अल्पपाकसाधने पात्रादौ ।

अल्पशमी स्त्री कर्म्म० । क्षुद्रायां शम्यां शम्याकारे क्षुद्रवृक्षे ।

अल्पसरस् न० अल्पं सरः कर्म्म० । (डोबा) क्षुद्रजलाशये ।

अल्पायुस पु० अल्पमायुः जीवनकालो यस्य । १छागे पशुभेदे तस्यैवाल्पायुष्कत्वात् तथात्वम् । २अल्पजीवनकाले त्रि० । "दुराचारोहि पुरुषो लोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च" मनुः वा कप अल्पायुष्कोऽप्यत्र । कर्म्म० । यस्य यावदायुरुचितं ततोऽल्पमिते । जीवनकाले ३आयुश्च जीवनकालः "शतायुर्वै पुरुषः" इति श्रुतेः शतवर्षावच्छिन्नजीवनकालोनराणामायुः । एवमन्येषामायुःपरिमाणमायुःशब्दे वक्ष्यते । तत्र विशेषकालतायां ज्योतिषोक्तयत्नयोगस्य सूचकता यथा जातकालङ्कारे । "आयुर्मूलं जन्मिनां जीवनं स्यादाजीवानां निर्जराणां सुधेव । एवमाहुः पूर्व्वमाचार्य्यवर्य्यास्तस्मादायुर्योगजाख्यं प्रवक्ष्ये । लग्नाधीशोऽतिवीर्य्यो यदि शुभविहगैर्वीक्षितः केन्द्रवार्तर्दत्ते ह्यायुः सुदीर्घं गुणगणखचितं श्रीयुतं मानवानाम् । सौम्याः स्वीयालयस्था जनुषि च रजनीनायके स्वीयतुङ्गे वीर्य्यारूढे लग्ननाथे वपुषि च भरदां षष्टिरायुर्नराणाम् ॥ सौम्याः केन्द्राश्रयस्थावपुषि सुरगुरौ लग्नतोवा सुधांशोरायुर्युक्तं न दृष्टं न च गगनगतैः सप्रतिवेत्सराणाम् । याता मूलत्रिकोणे शुभगगनचराः स्वीयतुङ्गे सुरेज्ये लग्नाधीशोऽतिवीर्य्यो गगनवसु ८० समासंख्यमायुर्नराणाम् ॥ सौम्ये केन्द्रेऽतिवीर्य्ये यदि निधनपदं खेटहीनं समाः स्युस्त्रिंशत् सौम्येक्षितं चेद्गगनत्रिभकरैः संयुतोऽथ स्वभे चेत् । खल्पाग्रे चामरेज्ये मुनिनयन २७ मितं स्वर्क्षगो लग्नगो वा चन्द्रोदयूने शुभस्थेदु-

गगनरसमितं ६० कोणगाः सौम्यखेटाः ॥ कोटे लग्ने कुरेज्ये यदि भवति तदा खाष्ट ८०तुल्यं लवेऽयं धर्माङ्के-वाङ्कनाथे निधनभवनगे क्रूरदृष्टेऽम्बुहस्ताः२४ । लग्नाधौ शाष्टनाथौ लयभवनगतौ सप्तविंशत् २७ विलग्ने क्रूरेज्यौ चन्द्रदृष्टौ यदि निधनगतः कस्मनास्ते द्विपज्ञाः २२॥ लग्ने क्रूरक्षोनौ वपुषि सुरगुरौ रन्ध्रभ खेटहीनं केन्द्रे सौम्ये खशैलाः ७० सितविबुधगुरू स्वाच्छतं १०० केन्द्र-गौ चेत् । वागीशे कर्कलग्ने यतमिह भृगुजे केन्द्रगेऽर्थार्क-सूनौ धर्माङ्कस्थे सुधांशौ व्ययनवसगते ह्यायनानां शतं स्यात् ॥ धीकेन्द्रायुर्नवस्था यदि खलखचरा नो गुरोर्भे विलग्ने केन्द्रे काव्ये गुरौ वा यतमथ निधनं सौम्य दृष्टं शतं स्यात् । लग्नादिन्दोर्न खेटा यदि निधन-गता वीर्यभाजौ सितेज्यौ पूर्णायुः खोदराशौ शुभगगन-चराः षष्टिरङ्कोऽङ्गगेज्ये ॥ कोदण्डाल्यार्द्धभङ्गं यदि सकल-खगाः खोऽङ्गगा वा निजांशे गोस्थे पूर्णे च केन्द्रे सुरगुरुभृगुजो लाभगेऽजे परायुः । शुक्रे नीचे तनुस्थे निधनपदगते सौम्यदृष्टे सुधांशौ जीवः केन्द्रे शतं स्यादथ तनुगटहपञ्चिद्रगः पुष्करेऽजे॥ वागीशोवोर्थदुःखो नवसभवनगाः सर्वखेटाःशतायुः कर्कोऽङ्के चन्द्रजीवौ सहजरिपुभगे स्यात् कवित्यौ च केन्द्रे । केन्द्रे सूर्यार-मन्दायुरूनबलवगा वाक्पतौ लग्नयाते व्यष्टस्थानेषु शेषाः शरगज ८५ कथितं स्याद्वराणां तदायुः ॥ क्रूराः सौम्यां-शयाता उपचयगटहगाः ३,६,१०,११, कातराः कण्टक १,४,७,१०स्थाः सौम्या व्योमार्कसङ्ख्य १२०यदि तपनकुजौ रन्ध्रगौ नो परायुः । केन्द्रे लग्नेऽजजीवौ नवसुतनिलये कण्टके१४,७१०,नो ख लाख्या सम्पूर्णे पापखेटायदि गुरुबल-वर्गाजीवभागे च सौम्याः॥युग्मर्क्षांशे गता वा व्ययधनगटहगाश्चे च्छुभाः शीतभानुः सम्पूर्णो लग्नयायी शतमिह हि दृशा-मिन्दिरामन्दिरं स्यात्। लग्नेशः सौम्ययुक्तो वपुषि च लयपो रन्ध्रगो नान्यदृष्टो विंशत् केन्द्रे लवेऽयं बलवियुजि तथा लग्नपे त्रिंशदायुः॥ इन्द्रावापोक्तिमस्थे ३,६,९,१२, तदनु तनुपतौ निर्बले पापदृष्टे दर्लसुल्यं२२ ततोऽर्कोऽशुभखगविवरेलग्नतो-ऽजात्रिसंख्यम्।रिपुफकेन्द्रे सुरेज्ये गुरुरिपुसहजे स्यात् स पापोऽङ्गनाथो रामाब्धिं कर्कलग्ने कुजतुहिनकरौ केन्द्ररन्ध्रे यहो न॥ रामाब्धिं ३स्याल्लवेशो वपुषि च निधनं सौम्यहीनं खवेदाः ४०लग्नेशोरन्ध्रयातो वपुषि निधनपः खाब्धयां वाणसंख्यम्५ । नक्रे तिग्मांशुमन्दौ सहजरिपु-गतौ कण्टके१,४,७,१०रन्ध्रनाथः पारावाराब्धिसंख्यं ४४ तदनु शुभखगाः खांशगास्त्रिंशदायुः॥ व्यङ्गेशे सौम्यदृष्टे यदि शुभविहगावीर्यवन्तस्तदानीम् यातः सौम्ये गणेऽब्जो गुण सुनिगणितं ७२ रन्ध्रगैर्मध्यमायुः । स्याच्चन्द्रादङ्गि पादै रथ तपनसुते द्यूनलग्नं प्रयाते रिपुफेशेवायुरीज्यो यदि बलरहितं कङ्कपक्षाब्धिसंख्यम् ५५ ॥ कर्काङ्के चण्डधामा खलविहगयुतः पुष्करे स्नो द्विजेन्द्रो वागीशोऽस्तयायी विशिखपवनयुक्७५ स्याच्चतुर्थांशदस्थः । सौम्यः पीयूष धामान्तिमतनुविलग्ने संस्थितोऽसौ कवीज्यावेकर्क्षे पुष्क-राख्यं ५० व्ययरिपुनिधने मूर्त्तिपसन्द्रयुक्तः ॥ मन्दांशे लग्ननाथो भुजगशरमितं ५८ स्याद्यो सौम्यखेटा रन्ध्रे नो देहनाथो व्ययरिपुनिधने पापयुक् षष्टि ६०रायुः। राशीशोलग्ननाथो दिनमणिसहितो ह्यस्तगोवासवेज्यो नो केन्द्रे षष्टिरायुर्वपुषि दिनकरः शत्रुभौमान्वितश्चेत् ॥ वागीशोहीनवीर्यो व्ययतनुजगते वाग्निनीये खशैला ७० धर्मे सर्वैः परायुः खलखगलवगैः केन्द्रयातैरशीतिः ८० । क्रूरैः क्रूरव्ययातैः शुभभवनगतैः सौम्यखेटैः सवीर्य लग्नेशे स्यात् परायुः सुतभवनगतैः षष्टिरायुर्नराणाम्॥ स्वारङ्गस्थान्त्यभागे यदि वपुषि गते चाद्यभागे च केन्द्रे सौम्याः खेटाः शतं स्याद्दश ८ सहज २खखे ४स्याच्चिरायुः समस्ताः । लग्नात् प्राग्नेयधाम्नो निधनसदनपोरिपफ-केन्द्रेऽष्टविंशत् २८ केन्द्रे सौम्यग्रहेशे यदि स्मृतिभवने कश्चिदास्ते खरामाः ३० ॥ क्षीणे प्राग्नेयभानौ यदि खलखचरो रन्ध्रगोरन्ध्र नेता केन्द्रस्थो लग्ननाथो निजबल रहितः खाब्धि २० तुल्यं तदायुः । सोम्यैरापोक्तिमस्थै र्दिनमणिजविधू वैरिरन्ध्रालयस्थौ तुल्यं कामाङ्गुणैः२२स्या-दथ धनलयगौ रिपफगौ पापखेटौ ॥ हीनौ खर्भानुना वा यदि हिममरुसाकाशबाहु २० प्रमाणं केन्द्रस्थौ सूर्य-मन्दौ यदि वपुषि कुजः पुष्करांशाङ्गुभः २५ स्यात् । शुक्रेज्यावङ्क्यातौ तनयभवनगौ भानुपापावनायुर्जन्मेशः सार्कलग्ने खलखगसहितो वेष्टितः स्यादनायुः ॥ यत् सम्प्रोक्तं योगजातम्मुरारौर्हीरापारावारपारप्रयातैः । तत्स्यादायुः सारमंशं गृहीत्वा पुंसामुक्तम्मुक्तभाजाम्भवेदम् ॥बलाबलविवेकेन पुनरागमयायिनाम् । सुमनोभिरिदं देयमायुर्धर्म्मादिशालिनाम्” ॥

“पापस्त्रिकोणकेन्द्रे सौम्याः षडाष्टमव्ययगताः । सूर्यादृते प्रसूतः सद्यः प्राणान्त्यजति जन्तुः” । सूर्यरिष्टम् । “षष्ठेऽष्टमे च चन्द्रः सद्योमरणाय पापसंदृष्टः । अष्टा-भिश्च शुभैर्दृष्टोवर्षैर्मित्रैस्तदर्द्धेन” । चन्द्ररिष्टम् । “मृत

मदनवान्त्यलग्नरन्ध्रेष्वशुभयुतोमरणाय शीतरश्मिः । भृगुसुतयशिपुत्रदेवपूज्यैर्यदि बलिभिर्न युतोऽवलोकितो-वा" । पापयुतचन्द्रारिष्टम् । "द्यूनचतुरस्रसंस्थे पाप-द्वयमध्यगे शशिनि जातः । विलयं प्रयाति नियतं देवैरपि रक्षितोबालः" । पापमध्यगचन्द्रारिष्टम् । "क्षीणे शशिनि विलग्ने पापैः केन्द्रेषु सत्यसंस्थैर्वा । भवति विपत्तिरवश्यं जवनाधिपतेर्मतञ्चैतत्" । क्षीणचन्द्रारिष्टम् । "नागदृगो१ सिद्ध२४ जातौ२२ षु५ चमा१ ब्धि४ तत्त्रि २३ धृति१८ र्नखाः २० । चमाग्नि२१ दिक्१० चेत्मजा द्यंशे तत्तुल्याब्दैर्विधौ व्यसुः" । मेषादीनां त्रिंशांश-विशेषस्थचन्द्रारिष्टम् । "भौमे विलग्ने शुभदैरदृष्टः षष्ठे-ऽष्टमे वार्कसुतेन युक्तः । सद्यः शिशुं हन्ति वदेन्मुनीन्द्रः स्मरे यमारौ न शुभेक्षितौ च" । त्रिविधभौमारिष्टम् । "कर्कटधामनि सौम्यः षष्ठाष्टमराशिगोविलग्नर्क्षात् । चन्द्रेण दृष्टमूर्त्तिर्वर्षचतुष्टयेन मारयति" । बुधारिष्टम् । "बृहस्पतिर्भौमगदृष्टेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः । वर्षैस्त्रिभिर्मार्गगदृष्टिहीनोलोकान्तरं प्रापयति प्रसूतम्" बृहस्पतिरिष्टम् । "रविशशिभवने शुक्रोद्दादशरिपुरन्ध्र-गोऽशुभैः सर्वैः । दृष्टः करोति मरणं षड्भिर्वर्षैः किमिह विचित्रम्" । शुक्रारिष्टम् । "मारयति षोडशाब्दात् शनैश्चरः पापवीक्षितोलग्ने । संयुक्तोमासेन वर्षाच्छुक्रस्तु मारयति" । त्रिविधशनिरिष्टम् । "राज्ञस्तृतीयस्थोमर-णाय वीक्षितोभवति पापैः । वर्षैर्वदन्ति दशभिः षोड़शभिः केचिदाचार्याः । षटसिंहदृष्टिक्षोदयक्षतस्थितिर्जीवितं हरति राज्ञः । पापैर्निरीक्ष्यमाणः सप्तमितैर्निश्चितं वर्षैः" । राज्ञरिष्टम् । "केतुर्यस्मिन्नृक्षेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः । रौद्रे सर्पसृक्षे प्राणैः संत्यज्यते क्षणात्" । केतुरिष्टम् । "लग्नेये द्रेक्काणा निगड़ाहिविहङ्गमपाश-धरसंज्ञाः । मरणाय सप्तवर्षे क्रूरयुताः स्वपतिदृष्टाः" । द्रेक्काणरिष्टम् । "मीनकर्कटयोरन्त्यौ दृश्चिकस्याद्यमध्यमौ । सर्पाश्चत्वार एवैते द्रेक्काणा निगड़ाश्च ते । तुलामध्यान्त-सिंहाश्च कुम्भाद्याः पक्षिणः स्मृताः । वृषाद्यमकरादन्त्या द्रेक्काणाः पाशधारिणः" । लग्नाधिपजन्मपती षष्ठाष्टमरिपु-स्थगौ प्रसवकाले । अस्तमितौ मरणकरौ राशिप्रमितैर्वदेद्व-र्षैः । जन्मपतिर्जन्मराश्यधिपः । लग्नाधिपजन्माधिपरिष्टम् "सौम्याः षष्ठाष्टमगाः पापैर्वक्रोपगतैर्दृष्टाः । मासेन हन्युदास्ते यदि न शुभैस्तत्र संदृष्टाः" । सौम्यग्रहरिष्टम् । "एकः पापोऽष्टमगः सद्यस्त्रीशुक्रयोक्षितोवर्षात् । मार-यति नरं प्रसूतं सुधारसोयेन पीतोऽपि" । पापग्रहरिष्टम् । "होरायाः सप्तमे सौरिर्द्रेष्कणस्थश्च भास्करः । अस्मिन् योगे तु योजातः सोऽल्पायुर्भवति प्रिये । दशमषडगते जीवे समसप्तगते शनौ । द्वादशस्थोयदा भानुर्वर्षमेकं न जीवति । "प्रतिपद्युत्तराषाढा नवम्यामेव रोहिणी । पूर्वभाद्रपदाष्ट-म्यामेकादश्यां च रोहिणी । द्वादश्यां च यदाश्लेषा त्रयोदश्यां यदा मघा । एभिर्जातो न जीवेत यदि शक्र-समोभवेत्" । एवमन्येऽपि अल्पायुर्योगा आकरे द्रष्टव्याः । मनुना तु "अनभ्यासेन वेदानामाचारस्य तु वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" इति अन्न-दोषादेरपि अल्पायुर्हेतुतोक्ता । अन्नदोषश्च अभक्ष्यभक्षणादि तच्चाभक्ष्यशब्दे उक्तम् आचारश्च आचारशब्दे वक्ष्यते ।

अल्पाल्प त्रि० अल्पप्रकारः अतिशयेन वा अल्पः अल्प+ प्रकारादौ द्विरुक्तिः । अत्यन्ताल्पे मादादौ "फलं चाल्पाल्पकं तस्य धर्म्मस्यार्द्धत्रयो भवेत्" ति०त० स्मृ० ।

अल्पिका स्त्री अल्पा प्रमाणेन कन् । १सङ्ख्यायाम् । अल्पार्थे कन् २अल्पमात्रायाम् ।

अल्पित त्रि० अल्पं क्रियते स्म अल्प+कृतर्थे णिच्-कर्म्म-णि क्त । अल्पीकृते "कृषा न चक्रेऽल्पितकल्पपादपः" नै० ।

अल्पिष्ठ त्रि० अतिशयेन अल्पः इष्ठन् । अतिशयिताल्पे ।

अल्पीयस् त्रि० अतिशयेन अल्पः ईयसुन् स्त्रियां ङीप् । अतिशयिताल्पे ।

अल्ला स्त्री अल्यते इत्यल् क्विप् अल्ले भूषायै लाति गृह्णाति ला-क४त० । १मातरि । अलतीति अल् पर्य्याप्तः सन् लाति सर्व्वानस्मि गृह्णाति जानाति वा ला-क । २सर्व्वज्ञायां सर्व्वभक्षिकायां परमात्मदेवतायाम् सा च अथर्व्ववेदे अल्लाल्लेत्यादिस्तुतौ प्रसिद्धा ।

अव रक्षणे, गतौ, कान्तौ, तृप्तौ, गोभागयां, प्रवणे, व्याप्तौ, आलिङ्गने, प्रार्थने, प्रवेशे, सत्तायां, दृब्धौ, ग्रहणे, वधे, सामर्थ्ये, अवगमे, करणे, इच्छोत्पादने च यथायथं सक० अक० च भ्वादि० सेट् पर० । अवति आवीत् । आव । अव्यात् । अविता । अवितः । अवन् । अविषः । "अ-वतु योगिरिसुता शशिभृतः प्रियतमा" उद्भ० । "अरि-सूदयादवतः" नलोदयः । "प्रविष्टोभिनमाविषुः" । य० २३,२६, तत्र तर्पणे "न मामवति सद्दीया रत्नसूरपि मेदिनी" रघुः । रक्षणे "यदाविथ सखीयतो यदाविथ" ऋ० १,१३१,५, "आविथ रत्नसि अन्यत्र तपयसि" भा० गतौ च आनो "बर्हिः सदताविता" ७,५६,६, "अविता

आगच्छत्" भा० । भक्षणे च "प्रोषदश्वो न यवसेऽविष्यन् यदा" । ७,३,२, "अविष्यन् भक्षयिष्यन्" "भा० लृषविष्यन्ततसेषु तिङ्ति" १,४८,२, "अविष्यन् भक्षयिष्यन्" भा० एवमन्यार्थेषूदाहार्य्यम् ।

अव अव्य० अव–अच् । १निश्चये, २व्याप्तौ, ३अनादरे, ४असाकल्ये ५आलम्बने, ६शुद्धौ, ७परिभवे, ८नियोगे, ९निम्नतायां च । अयं चादिः प्रादिश्च "अव ज्ञानावज्ञालम्बशुद्धीषदर्थव्याप्तिपराभवातियोगेषु" गण० र० । ज्ञाने अवगतोऽर्थः । अवज्ञायामवजानाति । आलम्बने आलम्ब्य यष्टिं गच्छति शुद्धौ अवदातम् । ईषदर्थे अवहन्ति अल्पं हन्ति, व्याप्तौ अवकीर्णः । परिभवे अवमन्ति । अतियोगे अवघात इत्युदाहृतञ्च । अनादरे "अवजानासि मां यस्मात्" रघुः अवमानः । व्याप्तौ अवकाशः असत्यां व्याप्तौ न सर्व्वतः प्रवेशः इति तस्य व्याप्त्यर्थकता । अवगाहते । निश्चये अवस्यति अवसायः अवधारयति । निम्नतायाम् अवनमति अवतरति अवच्छिनत्ति अवाचीनः इत्यादि । असाकल्यमीषदर्थः । ओहीनयहन्ति अवघातश्च विप्लुषीकरणार्थं एकदेशमात्रे घातः न तु सर्व्वावयवे इति असाकल्यद्योतकता पराभवे सत्यून् अवहन्ति पराभवतीत्यर्थः नियोगे अवक्लृप्तिः "एवेचानियोगे" वा० अनियोगोऽनवक्लृप्तिः सि० कौ० अवकल्पते । अस्य वातो लोपः वगाहः । "अवादयः क्रुष्टाद्यर्थे तृतीयया" वा० उक्तेः क्रोशार्थेऽपि अवक्रुष्टं कोकिलया अवकोकिलः ।

अवकट अव+स्वार्थे कटच् । १अवशब्दार्थे अतिशयिताधरे ततः स्वार्थे कन् तत्रैव । [पु० ।

अवकम्पित अव+कृपि कर्त्तरि–क्त । १विचलिते २वृक्षभेदे

अवकर पु० अव+कृ–अप् । १उपहतौ "स्तोमानवकरगन्धहि" ता० ब्रा० "अवकर उपहतिः" भा० । २सम्मार्ज्जन्यादिक्षिप्ते धूल्यादौ । "अवकरशोधनेन" ५,१२४, मनुव्या० कुल्लू० ।

अवकर्षण न० अव+कृष–ल्युट् । बलपूर्व्वकाकर्षणे स्थानान्तरनयनार्थं बलेनाकर्षणे ।

अवकलित त्रि० अव+कल–क्त । १दृष्टे २ज्ञाते ३गृहीते च

अवका स्त्री अव–अक्ष्णे कर्म्मणि कुन् स्त्रियका० न इत्त्वम् । शैवाले "तद्वत् करोत्यवकासुपदधाति अवकाभिः प्रच्छादयति आपोवा वा अवकाः" शत० ब्रा० "अरत्निमात्रेऽश्वाढां दक्षिणेनावकाशरूपरिष्टाच्च" कात्या० १७,४,२८ अवकासु शैवालेषु कर्क० । "मण्डूकावकावेतसशाखावेणौ ब्रह्मावकर्षति" का० १,२,१०, ।

अवकाश पु० अव+काश–घञ् । अवस्थितियोग्यतासम्पादके क्षाले, देशे च । तत्र कालिकोऽवकाशः क्रियान्तरस्थितियोग्यतासम्पादकः स चावसर इत्यभ्युच्यते, "क्षत्वावकाशे रुचि संकृन्नम्" इति भट्टिः । द्रव्यान्तरस्थितिप्रवेशयोग्यतासम्पादको दैशिकः स चावकाश इत्येव "अवकाशं किलोदन्वानिति" रघुः ।

अवकीर्ण त्रि० अव+कृ–क्त । १व्याप्ते "चतुष्कपुष्पप्रकारावकीर्णः कुमा० । २चूर्णिते ३ध्वस्ते च" भावे क्त । ४"अवकीर्णित्वे, ब्रह्मचर्य्यव्रतभङ्गे । अवकीर्णनिमित्तं तु ब्रह्महत्याव्रताचरेत्" । अङ्गि० ।

अवकीर्णिन् पु० अवकीर्णमनेन इष्टा० इनि । ध्वस्तव्रते ब्रह्मचारिणोयद्व्रतसक्तं स्त्रीसङ्गमादिवर्जनं तस्य भ्रंसेऽवकीर्णता । "अवकीर्णी तु कालेन गर्द्दभेन चतुष्पथे । पाकयज्ञविधानेन नैर्ऋतं निर्वपेत् पशुं याजयेत्" अङ्गि० "कुशीलवोऽवकीर्णी च वृषलीपतिरेव च" मनुः अवकीर्णिलक्षणञ्च–"कामतोरेतसः सेकं व्रतस्थस्य द्विजन्मनः । अतिक्रमं व्रतस्याहुर्धर्म्मज्ञा ब्रह्मवादिनः "अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् । गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति" या० रू० स्त्रियं विनाऽपि रेतसः स्रावे व्रतलोपः "ब्रह्मचारी चेत् स्त्रियमुपेयात् अरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदेवतं गर्द्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत् तत्र जुहुयात् कामाय स्वाहा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति एतदेव रेतसः प्रयत्नोत्सर्गे" इति वसिष्ठोक्तेः तेन कामतोरेतस उत्सर्गेऽपि अवकीर्णित्वम् । अकामतस्तु नावकीर्णित्वं किन्तु प्रायश्चित्तालत्वं यथोक्तं मनुना "स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्" ।

अवकुञ्चन न० अव+कुञ्च–ल्युट् । १आकुञ्चने आकुञ्चनञ्च सत् स्वेवावयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं वस्त्राद्यवयवकौटिल्योत्पादकं च कर्म्म यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः, तादृशं कर्म्म" वै० सू० ७० । करणे ल्युट् "अतज्ज्ञैः सर्व्वेदनाभवन्ति उपक्रम्य" "तोदभेदनस्तम्भनस्रावकुञ्चनाकुथिका भवन्तीति" सुश्रुतोक्ते २रोगभेदे च ।

अवकीर्णिव्रतम् अवकीर्णिनो व्रतम् प्रायश्चित्तम् । "अथातोऽकार्सि प्रायश्चित्तं व्याख्यास्यामः ब्रह्मचारी यस्यावकीर्य्येत स चतुर्थकालमक्तं भैक्षं चरेदेवं भूतो भवतीति"

यातातपोक्ते "एतस्मिन्नेव संप्राप्ते वसित्वा गर्हभाजिनम् । तप्तवानचरेत् भैक्ष्यं स्वकर्म परिकीर्त्तयन् । तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकम् । उपस्पृशंस्त्रिषवनमेनस स विशुध्यति" मनूक्ते अवकीर्त्तिव्रतस्योपक्रम्य "तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहुयात् ओङ्कारपूर्व्विकाभिः । संवत्सरं वा नक्तं भैक्ष्यं चरेत् चतुर्थकाले मितभुग्गायत्रीं वत्सरानुगां जपेदिति" शङ्खलिखितोक्ते च "अवकीर्त्तिनिमित्तन्तु ब्रह्महत्याव्रतञ्चरेत् । खरचर्म्मवासा षण्मासांस्तस्मान्मुच्येत किल्बिषात्" अङ्गिरसोक्ते च व्रतभेदे । एतस्य विषयभेदः प्रायश्चित्तविवेकतोज्ञेयः ।

अवकुटार त्रि० अव+स्वार्थे अतिशये वा कुटारच् अत्यन्तनिन्द्यादौ १अवगर्ह्यार्थे २वैरूप्ये न० ।

अवकृष्ट त्रि० अव+कृष–क्त । १दूरीकृते२अपसारिते, ३वहिष्कारिते च । अवकृष्टं गर्हायकरादेरवकर्षणमस्यस्य अर्श० अच् । ४गर्हायकरमार्जके दासभेदे पु० । "पणोदेयोऽवकृष्टस्य षड्भुत्कृष्टस्य वेतनम् । षाण्मासिकस्तयाच्छादो धान्यद्रोणस्तु मासिकः" मनुः । "अवकृष्टस्य गर्हादिसंमार्जकोदकादिवाहादेः कर्म्मकरस्य कुल्लू०" ।

अवकृष्य त्रि० अव+कृष कर्म्मणि क्यप् । १आकर्षणीये २दूरीकार्य्ये अव+कृष ल्यप् । ३आकृष्येत्यर्थे अव्य० ।

अवकृष्टि स्त्री अव+कृष–क्ति रोगः । सम्भावनायाम् "अनवकृष्टिरसम्भावना" सि० कौ० "क्रोव भोज्यसे अनवकृष्टिरेव" सि० कौ० ।

अवकेशिन् त्रि० अवच्युतं कं सुखं यस्मात् प्रा० ब० अवकं फलशून्यतामीषितुं शीलमस्य अवक+ईश–णिनि । १अफले वृक्षे । अवसन्नाः केशा विद्यन्ते अस्य इनि । २अल्पकेशयुक्ते । [लया कृष्टे ।

अवकोकिल त्रि० अवकृष्टः कोकिलया प्रा० स० । कोकि-

अवक्तव्य त्रि० न वक्तव्यः । १वक्तुमनर्हे अश्लीलादौ वाक्ये २निष्ठिवचने ३मिथ्याभूते च ।

अवक्तृ त्रि० नास्तिवक्त्रं यत्र । सुश्रुतोक्ते शोणितादिनिस्सारणसुखशून्ये व्रणादौ "अन्तःपूयेष्ववक्त्रेषु तथैवोत्सङ्गवत्सु च । नेत्रवर्त्मगुदास्यासनाड्यो ऽवक्त्राः सशोणिताः" ।

अवक्र त्रि० विरोधे न०त० । वक्रताविरोधिनि सारल्ययुक्ते ।

अवकर्षिन् त्रि० अव+कृष णिनि पृ० । अवकर्षणशीले "अवकर्षिणं वृषभं यथा जुरम्" ऋ०८,१,२, अवकर्षिणमवकर्षणशीलम्" भा० ।

अवक्रन्द त्रि० अव+क्रन्द कर्त्तरि अच् । १नीचैः क्रन्दनशीले "क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा" य० २२७। भावे घञ् । नीचैः २क्रन्दने पु० । भावे ल्युट् अवक्रन्दनमप्यत्र न० ।

अवक्रम पु० अव+क्रम–भावे घञ् । अवक्रमणे निम्नगतौ ।

अवक्रय पु० अवक्रीयते प्रतिरूपप्रदानेन स्वाधीनं क्रियतेऽनेन अव+क्री–अच् । याचितस्य प्रतिरूपत्वेन देये १मूल्ये २भाटके च भाटकञ्च गृहवस्त्रादिवस्तुनः एतावत् उपभोगे धनं याचित इति समयेन परायत्तीकरणम् क्रयेऽच । २तत्साधने द्रव्ये शुल्कादिस्थाने वणिग्भिर्दीयाय देये (माशुल) ३करे च ।

अवक्रान्ति स्त्री अव+क्रम–क्तिन् । निम्नक्रमणे अधोगमने ।

अवक्रुष्ट त्रि० अव+क्रुश–कर्म्मणि क्त । कृताक्रोशे यमुद्दिश्य क्रोशः कृतस्तस्मिन् । "अवक्रुष्टः कोकिलया" सि० कौ० ।

अवक्लिन्न त्रि० अव+क्लिद–क्त । पाकादधस्तात् १क्लिन्ने (पचा) १फलादौ जलादिना २अत्यन्तार्द्रे च । पूर्व्वं पक्वं ततोऽवक्लिन्नं राज० पूर्व्वनि० । अवक्लिन्नपक्वम् ।

अवक्लेद पु० अव+क्लिद–भावे घञ् । पाकोत्तरं क्लेदे (पचाकृओया) क्लेदस्य जलविशेषसंयोगेन वस्तुनो नाशजनकः अवयवसंयोगशैथिल्यसंपादको व्यापारः ।

अवक्षय पु० अव+क्षि–भावे अच् । दक्षुद्गरं नाशोन्मुखावस्थायां भावविकारभेदे ।

अवक्षयण न० अव+क्षि–णिच्–भावे ल्युट् । अवक्षयसाधने व्यापारभेदे । "ब्राह्मणा उन्मुखावक्षयणमक्रत" शत० ब्रा० । [यस्यावक्षेपः कृतस्तस्मिन् ।

अवक्षिप्त त्रि० अव+क्षिप–कर्म्मणि क्त । कृतावक्षेपे वस्तुनि

अवक्षीण त्रि० अव+क्षि–क्त । १अवक्षयप्राप्ते विनाशोन्मुखे पदार्थे । भावे क्त । २अवक्षये न० ।

अवक्षुत त्रि० अव+क्षु–क्त । उपरि कृतक्षुते । यस्योपरि क्षुतं कृतं तस्मिन् । "क्षिपदन्नं नगर्य्यन्नं पतितान्नमवक्षुतम्" मनुः ।

अवक्षेपण अव+क्षिप–भावे ल्युट् । अधःसंयोगानुकूले क्रियाभेदे । "सुखसमवक्षिपामीतीच्छाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगरूपादसमवायिकारणात् हस्ते क्रिया जायते ततोऽवक्षेपणविशिष्टहस्तनोदनादसमवायिकारणात् हस्तसंयुक्तमुसलेऽप्यवक्षेपणं कर्म्म तृतीयेदा जायते" वै० सू० उ० उक्तं ज्ञेयम् । "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वैशू० "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० । भावे घञ् । अवक्षेपोऽप्यत्रार्थे । करणे ल्युट् ङीप् । २बलायामोषधौ स्त्री ।

अवक्षात न० निम्नः क्षातः । गभीरगर्त्ते ।

अवखाद पु० अवज्ञातः निन्दितः खादः खाद्यम् प्रा०स०। निन्दितखाद्ये "नात्रावखादो अस्ति वः" ऋ०१,४३,४ "अवखादः अवज्ञातः खादः जुगुप्सितहविर्विशेषः" भा०

अवगणन न० अव+गण–भावे ल्युट्। १अवज्ञायां २निन्दने ३तिरस्कारे ४परिभवे च। [च ३तिरस्कृते ४पराभूते च।

अवगणित त्रि० अव+गण–कर्म्मणि क्त। १अवज्ञाते २निन्दिते

अवगण्ड पु० अव+गम+ड डकारस्य नेत्त्वम्। गण्डस्यव्रणभेदे गण्डोपरिजाते रोगभेदे (गरगण्ड)।

अवगत त्रि० अव+गम–क्त। १निम्नगते, २ज्ञाते च। "तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्व्वं संसारित्वं यस्य तु यथापूर्व्वं संसारित्वं नासावगतब्रह्मात्मभाव" इति भा० भा०।

अवगति स्त्री अव+गम–भावे क्तिन्। १ज्ञाने २निश्चयात्मकज्ञाने च "अवगतिपर्य्यन्तं ज्ञानं सनुप्रत्ययवाच्याया इच्छायाः कर्म्मफलविषयत्वादिच्छायाः ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म" "ब्रह्मावगतिर्हि पुरुषार्थः" ब्रह्मावगतिस्वप्रतिज्ञातेति" च भा०भा०। [उज्ज्व०।

अवगथ पु० अव+गा–कर्त्तरि थ नि०हुस्वः। प्रातःस्नाते

अवगर्हित त्रि० अव+गर्ह–कर्म्मणि क्त। १अपवादयुक्ते २निन्दिते

अवगम पु० अव+गम–भावे घञ्। १ज्ञाने २निश्चयात्मकज्ञाने "प्रत्यक्षावगमं धर्म्म्यं सुसुखं कर्त्तुमव्ययम्" गीता।

अवगाढ त्रि० अव+गाह–क्त। १निविड़े, २अन्तःप्रविष्टे, ३निमग्ने। यस्मिन् अवगाढः कृतस्तस्मिन् ४जलादौ ५विषयभूते पदार्थे च। यथा घटज्ञानेन घटत्वविशिष्टघटास्तत्संसर्गश्च अवगाढः। अस्य वा अतोलोपे वगाढोऽप्युक्तार्थेषु

अवगाह पु० अव+गाह–घञ्। १स्नाने, २अन्तःप्रवेशे ३ज्ञानेन वियोगीकरणे च॥ आधारे घञ्। ४स्नानस्थाने। वा अक्लोपे वगाहोऽप्यत्रार्थे। ल्युटि। अवगाहनमप्यत्र न०।

अवगाह्य त्रि० अव+गाह–कर्म्मणि ण्यत्। १अवगाहनादियोग्ये जलादौ २अन्तःप्रवेश्ये ३विषयीकार्य्ये च। अव+गाह–ल्यप्। ४अवगाहनं कृत्वेत्यर्थे अव्य०।

अवगीत त्रि० अव+गै–क्त। २निर्व्वादे जनापवादे २दुष्टे ३गर्हिते ४दुर्हृष्टे मेदि०भावे क्त। ४निन्दायाम् ४लोकापवादे च न०।

अवगुण पु० अव+गुण–क। दोषे। "परावगुणम् अन्यदोषमिति किरा० १३।४८। श्लोकव्या० मल्लि०।

अवगुण्ठन न० अव+गुण्ठ–ल्युट्। योषितां १शिरःप्रावरणक्रियायाम्। करणे ल्युट्। २मुखाद्याच्छादनवस्त्रे। "अवगुण्ठनसंवीता कुलजाभिसरेद्यदि" मा०द० "चण्डालस्त्रिभिरावगुण्ठनपटच्छेदं विधत्ते विधुः" मा०द०। स्त्रस्तावगुण्ठपटलक्षणलक्ष्यमाणः "माघः। २आच्छादनमात्रे च स्त्रमित्यवगुण्ठनं क्लृप्तेति" तन्त्रम्।

अवगुण्ठनमुद्रा स्त्री अवगुण्ठनाय मुद्रा। "सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी। अवगुण्ठनमुद्रेयमभितो भ्रमिता मता" तन्त्रसारोक्ते मुद्राभेदे।

अवगुण्ठिका स्त्री अवगुण्ठयति आवृणोति अव+गुण्ठ–ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम्। स्त्रीणां १मुखावरणशाट्याम्, २जवनिकायाञ्च। अव–गुण्ठ–धात्वर्थे ण्वुल्। ३अवगुण्ठनक्रियायाम्।

अवगुण्ठित त्रि० अव+गुण्ठ–क्त। १कृतावगुण्ठने आवृते "रजनीतिमिरावगुण्ठिते" कुमा०। २चूर्णिते च।

अवगुम्फित त्रि० अव+गुम्फ–कर्म्मणि क्त। ग्रथिते।

अवगूर्य्य अव्य० अव+गुरी–उद्यमे ल्यप्। बधार्थं दण्डसुद्यम्येत्यर्थे "अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" मनुः।

अवगृह्य न० अव+ग्रह–ल्यप्। व्याकरणसिद्धे प्रश्लिष्टसंज्ञके पदे। पाणिनीये प्रश्लिष्टमिति संज्ञा प्रातिशाख्ये तु अवश्लिष्टमिति संज्ञा। यस्यावग्रहः विशेषेण ग्रहः विच्छेदस्तेन भवति न सन्धिकार्य्यं तत् पदं प्रश्लिष्टमवश्लिष्टमिति च भण्यते। यथा हरी एतौ इत्यादि।

अवगौरण न० अव+गुर–उद्यमे ल्युट्। बधायास्फोटनोद्यमे। दण्डनिपातनप्रायश्चित्तेन नान्तरीकतया प्रसङ्गेन अवगौरणनिमित्तप्रायश्चित्तस्य सिद्धिः" प्रा० वि०।

अवग्र(ग्रा)ह पु० अव+ग्रह–घ १घञ् वा। १दृष्टिजलप्रतिबन्धे "दृष्टिर्भवति संस्थानामवग्रहविशेषिणाम्" "रावणावग्रहक्लान्तमिति वागग्रहेण सः"। नभोनभस्ययोर्दृष्टिमवग्रहश्चवान्तरे" इति च रघुः २अनादृतौ च "दृषेव सीतां तदवग्रहक्लताम्" कुमा०। ३निग्रहे "स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया" माघः। व्याकरणोक्ते सन्धिराहित्यरूपे ४विच्छेदे "इन्द्रोऽसि विशौजाः य०१०, २८ मन्त्रे विड़ौजा इति प्राप्ते विशौजाश्चान्दन्द्रसमतएव षट्कारो नावग्रहं चकार" वेददी०। ५प्रतिबन्धमात्रे "अवश्यभव्येष्वनवग्रहग्रहा यथा दिशा धावति वेधसः सृष्टा" नै०। ६गजसमूहे हारा० ७गजललाटे मेदि०। ८स्वभावे त्रिका०। अवग्राहस्तु ६भागे। [मेदि० २ज्ञाने च।

अवग्रहण न० अव+ग्रह–भावे ल्युट्। १प्रतिरोधे २अनादरे

अवघट्ट पु० अव+घट्ट–आधारे घञ्। भूमिरन्ध्रे (छिद्रे त्रिका०।

करणे घञ् । २घरट्टे (याँता) पेषणयन्त्रभेदे । भावे घञ् । ३चालने, घट्टनाक्रियायाम् भावे ल्युट् । अवघट्टनं तत्रैवार्थे न० । "प्रदेशस्य बहुशोऽवघट्टनादयोहि व्यधा" सुश्रुतः । युच् । तत्रैवार्थे स्त्री ।

अवघट्टित त्रि० अव+घट्ट-कर्म्मणि क्त । चालिते ।

अवघर्षण न०अव+घृष-ल्युट् । अधःस्थापयित्वा १घर्षणे सर्वतो २घर्षणे "दुर्न्यासात् व्रणवर्त्मावघर्षणम्" सुश्रुतः ३मार्जने च मलावघर्षणम् पात्रावघर्षणम्" सलिलैः शुद्धिरेतेषां गोबालैश्चावघर्षणात्" या० स्मृ० ।

अवघात पु० अव+हन-घञ् । १अवहनने तण्डुलादेर्विलुप्तीकरणव्यापारे । अवघातश्च व्रीहिसंस्कारार्थः व्यापारभेदः तत्करणे यज्ञासिद्धिः "व्रीहीन् प्रोक्षति व्रीहीनवहन्ति" इत्यादौ प्रोक्षणादिजन्यः । कालान्तरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठः कल्प्यते प्रोक्षिता व्रीहय एवावघाताय कल्पन्ते" कुसु० तथाचावघातजन्यः संस्कारः व्रीहिनिष्ठ इति मीमांसकाः । नैयायिकास्तु "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुसु० उक्तेः पुरुषएव संस्कारोऽदृष्टविशेषो जन्यत इत्याहुः अवघातश्च धर्म्मिणि सत्येव तदीयतण्डुलविलुप्तीकरणरूपपरिष्कारकृपः २हननमात्रे ३ताड़नमात्रे च "कर्णावघातैरपि ताड्यमाना दूरीकृताकारिवरेण" "अधरे दत्तदन्तावघाते" मा० द० ।

अवघातिन् त्रि० तव+हन-णिनि । अवघातके स्त्रियां ङीप् ।

अवघुष्ट त्रि० अव+घुष-क्त । घोषणया प्रचारिते ।

अवघूर्ण न न० अव+घूर्ण-भ्रमणे भावे ल्यु । सर्व्वतोभ्रमणे ।

अवघाटित अव+घट-परिवर्त्ते क्त । सर्व्वतोवेष्टिते समन्तात् परिवृते । यथा "शिविकया प्रायादवघोटितया खनगरमनुप्राप्य" भा० व० प० । [युच् । अवघोषणाभ्यत्र स्त्री

अवघोषण न० अव+घुष-भावे ल्युट् सर्व्वजनज्ञानायोच्चैर्घोषणे

अवघ्राण न० अव+घ्रा-भावे ल्युट् । आघ्राणे "पिण्डपितृयज्ञवद्दानप्रभृति प्राग्वघ्राणात्" का० २०५११ "अपघ्राणमितरेषु" का २२,१०,४ ।इदञ्च भोजनानुकल्पतया शिष्टैरुक्तम् । अतएव आङ्गशेषभोजनस्यावश्यकतया उपवासदिने तद्वघ्राणमात्रम् विहितम् "आघ्राय पिण्डसेवितमिति" स्मृतेस्तथाचरणम् ।

अवचक्षण त्रि० अव+चक्ष-ल्यु । निन्दिताख्यानकर्त्तरि "कुत्साभीक्ष्ण्ययोरर्थे एतस्य तिङः परत्वे अनुदात्तत्वम् ।

अवचन न० नवचनं कुत्सायां न० त० १निन्दायाम् । अभावे न० त० । २कथनाभावे "प्रकृतौचावचनात्" कात्या० २०,७,२१, "अवचनेऽग्निष्टोमः" । कात्या० २२,१,२ । न० ब० । ३वचनशून्ये त्रि० "शकुन्तला साध्वसादवचनातिष्ठति" । शकु० ।

अवचनीय त्रि० वक्तुमनर्हः वच-अर्हार्थे अनीयर् न० त० । १वक्तुमनर्हे अश्लीलादौ शब्दे "वादेष्वचनीयेषु तदेव द्विगुणं भवेत्" स्मृतेः २वचनीयं निन्द्यम् न० त० । ३निन्द्राभिन्ने त्रि० ।

अवचय पु० अव+चि-अच् । पुष्पफलाद्यादाने । "ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ" शकु० ।

अवचाय पु० अव+चि "हस्तादाने चेरस्तेये" पा० अचोवाधको घञ् । हस्तेन पुष्पफलाद्यादाने । "अविरतकुसुमावचायखेदा" माघः । अव+चि-णमुल् अवचायम् । अभीक्ष्णमर्थचित्येत्यर्थे अव्य० ।

अवचारण त्रि० अव+चर-णिच्-ल्युट् । १प्रचारणे सुश्रुतोक्ते २क्षारपाकविधौ च "विशेषक्रियावचारणाच्च" "क्षेत्राणि यत्नं जानीः पोषणं सावचारणम्" शुक्रदोषक्षयकरं यथास्वमवचारणम्" सुश्रुतः ।

अवचूड(ल) पु० अवनता चूड़ाग्रं यस्य वा डोलः । १ध्वजाधोवस्त्रे वस्त्रे । "पिच्छावचूड़कलनामिवोरः" "पिच्छावचूड़मनुमाधवधाम जगुः" इति च माघः "अंशोच्चूड़ावचूड़ाख्यौ मूर्द्धाधोलम्बचूड़योरिति" हला० उक्तेः २ध्वजाधोलम्बाङ्गे चामरादौ च ।

अवचूर्ण न न० सुश्रुतोक्ते १व्रणरोगभेदे । "तत्र व्रणस्य मन्दिरुपक्रमा भवन्ति" इत्युपक्रम्य "सर्पिस्तैलं रसक्रियावचूर्णनव्रणधूपनम्" इत्युक्त्वा, "तेषु कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनमिति शोधनरोपणानीति" । अव+चूर्ण-भावे ल्युट् । २पेषणे । चूर्णैरध्वंसते अवचूर्णयति अव+चूर्ण+अवध्वंसार्थे णिच्-भावे ल्युट् । ३चूर्णनेनावध्वंसे ।

अवचूर्णित त्रि० अव+चूर्ण-पेषे कर्म्मणि क्त । १पिष्टे । अवचूर्ण्यतेर्नामधातोः क्त । २चूर्णनेनावध्वस्ते ।

अवचूल न० अवचूड़वत् विग्रहः । ध्वजाधःस्थे १चामरादौ ध्वजाद्यङ्गे "दिवसकरवारणस्यावचूलचामरकलाप इव" काद० । [चामरे त्रिका० ।

अवचूलक न० अवचूलमिव इवार्थे कन् संज्ञायां वा कन् ।

अवच्छिन्न त्रि० अव+छिद-क्त । अवच्छेदः विशेषणोपाधिना विशेषकरणम् । उपाध्यादिना विशेषिते अवच्छेदकतानिरूपिते च "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगिताच्छेदकावच्छिन्नं यन्न

भवतीति" चिन्तामणिः। अवच्छेदकता हि स्वरूपसम्बन्धविशेषः अनतिरिक्तवृत्तित्वं वा तन्निरूपितत्वसमवच्छिन्नत्वं यथा दण्डादीनां घटकारणतावच्छेदकं दण्डत्वादिकं तस्य तदतिरिक्तदेशेऽवृत्तित्वात् एवं घटादीनामत्यन्ताभावप्रतियोगितायाः तदतिरिक्तदेशेऽवृत्तित्वात् घटत्वादिकमवच्छेदकम् अतः प्रतियोगितायां घटाद्यवच्छिन्नत्वम्। परिमाणादौ च अवच्छिन्नत्वमियत्ताकरणम् यथा द्रोणावच्छिन्नव्रीहिः द्रोणपरिमाणेन कृतपरिच्छेदोव्रीहिरित्यर्थः। सीमाकरणमप्यवच्छेदः। घटावच्छिन्न आकाशः घटाकाशः कर्णशष्कुल्यवच्छिन्न आकाशः श्रोत्रमित्यादि। एवमन्तःकरणावच्छिन्नं चैतन्यं जीव इति वेदान्तिनः।

अवच्छिन्नवाद पु० अवच्छिन्नतया अन्तःकरणावच्छिन्नतया जीवस्य वादोव्यवस्थापनम्। वेदान्तिमतप्रसिद्धे चैतन्यस्य अन्तःकरणावच्छिन्नतया व्यवस्थापके मतभेदे। तथाहि तेषां मतद्वैधम् केचित् अन्तःकरणे प्रतिबिम्बितं चैतन्यं जीव इति प्रतिपेदिरे केचिच्च तदवच्छिन्नं चैतन्यं जीव इति। तत्र नोक्तस्य चैतन्यस्यान्तःकरणे प्रतिबिम्बसम्भवेन प्रतिबिम्बस्य च मिथ्यात्वेन जीवस्य सत्यत्वानुपपत्तेः बन्धमोक्षयोः सामानाधिकरण्याभावापत्तेः प्रतिबिम्बवादं दूषयित्वाऽवच्छिन्नवादं समर्थयाञ्चक्रिरे। यथा च नैयायिकादीनामेकस्यापि नभसः कर्णशष्कुल्यादिभेदेन उपाधिकृतं नानात्वं न वस्तुकृतमेवमेकस्यापि चैतन्यस्यान्तःकरणोपाधिभेदेनावच्छिन्नतया नानात्वं तेन "तद्गुणसारत्वात्" शा०सू० "घटसंवृतआकाशे नीयमाने यथा घटे। घटोनीयेत नाकाशस्तद्वज्जीवोनभोपम" इत्युक्तेश्च जीवस्य न खलु इहलोकपरलोकगामित्वमपि तु बुद्धिरूपोपाधिभेदेन तथाव्यवहारः अतो न बन्धमोक्षव्यवस्थानुपपत्तिः यद्विशुपाधौ अज्ञानाधीना संसारप्रवृत्तिस्तस्य जीवभावात्मकतया बन्धः, यत्र च तद्विवृत्तिः न तत्र तथा, किन्तु मोक्षः। विस्तरस्त्वाकरे।

अवच्छुरित न०। अव+छुर–भावे क्त। १अवहासे–स्वार्थे कृत् तत्रैव। कर्मणि क्त। २मिश्रिते त्रि०।

अवच्छेद पु० अव+छिद–भावे घञ्। १छेदने २सीमाकरणे ३विशेषकरणे ४अवधारणे "शब्दार्थानामवच्छेदे विशेषस्मृतिहेतवः" वाक्य प० ५द्रव्यत्वाकरणे ६व्याप्तौ च। अवच्छिद्यते ऽनेन करणे घञ्। द्रव्यत्वाकरणसाधने ७एकदेशे अवयवादौ। यः कश्चित् पदार्थः कञ्चिंच्चिदाधारे एकदेशे तिष्ठति तत्रैव प्रदेशान्तरे चेन्न तिष्ठतीति स अव्याप्यवृत्तिः तथाव्याप्यवृत्तिताया निरूपकोऽवयवादिः। यथा वृक्षे अग्रदेशे कपिसंयोगः मूलदेशे तदभावः अतः कपिसंयोगः अव्याप्यवृत्तिः तादृशाव्याप्यवृत्तिताया नियामकश्च मूलादिप्रदेशः तत्रावच्छेदशब्देनाभिधीयते। तादृशावच्छेदश्च द्विविधः देशः कालश्च। तत्र देशस्तत्त्वे कालविशेषे तदभावात् कालएव तत्राव्याप्यवृत्तितायानियामकः। यथा आत्मनि जाग्रदादौ ज्ञानं सुषुप्तौ तदभावः। देशरूपस्तूक्तः। अवच्छेदावच्छेदेन साध्यसिद्धौ सामानाधिकरण्यसिद्धिः प्रतिबन्धिका इति शिरोमणिः। अवच्छेदाः यावन्तः साध्यसिद्धौ प्रदेशास्तावतामेवावच्छेदेन साध्यसम्बन्धव्यापकत्वेनेति तदर्थः।

अवच्छेदक त्रि० अवच्छिनत्ति अव+छिद–ण्वुल्। १छेदके २द्रव्यत्वाकारके ३सीमाकारके ४अवधारके ५अव्याप्यवृत्तितानिरूपके च। अवच्छिन्नशब्दे विवृतिः। "प्रतियोगितावच्छेदकावच्छिन्नमिति" चिन्तामणिः। अवच्छेदकत्वं च अवच्छेद्यस्य इव तदवच्छेदकेऽपि स्वीक्रियते यथा वह्निमान् पर्व्वत इति बुद्धौ वह्न्यभाववान् पर्व्वत इति निश्चयः प्रतिबन्धकः तत्र प्रतिबन्धकतावच्छेदकं निश्चयत्वमिव तत्तद्विषयताऽपि तत्तावच्छेदिका तथा च वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्व्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वावच्छिन्नं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यतासमानाधिकरणप्रकारतानिरूपितपर्व्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकत्वे निश्चयत्वस्येव तत्तद्विषयताया अपि तत्प्रतिबन्धकतावच्छेदकत्वं तथा तादृशज्ञानत्वस्येव तत्तद्विषयताया अपि प्रतिबध्यतावच्छेदकत्वम्। इयांस्तुभेदः अनुल्लेख्यमानजातेः स्वरूपतोऽवच्छेदकत्वं न तदवच्छेदकतायाः अवच्छेदकमस्ति तेन घटवद्भूतलमिति बुद्धौ घटत्वनिष्ठप्रकारतावच्छेदकतायाः नान्यदवच्छेदकम् तथाच यथा घटनिष्ठप्रकारतायाः अवच्छेदकम् घटत्वम् एवं घटत्वनिष्ठप्रकारतायानान्यदवच्छेदकमतस्तस्य निरवच्छिन्नावच्छेदकता अनुल्लिख्यमानेत्युक्तेरुल्लिख्यमानजातेर्नस्वरूपतोऽवच्छेदकत्वं तेन घटत्ववत्त्वान् देश इत्यादौ घटत्वप्रकारतायाः अवच्छेदकमस्तीति। अत्राप्ययं विशेषः धर्म्मग्रहे भासमानधर्म्मः विशेष्यतावच्छेदकः प्रकारांशे भासमानः प्रकारतावच्छेदकएवं सर्व्वत्र। किन्तु प्रतियोग्यंशे भासमानधर्म्मस्य न प्रतियोगितावच्छेदकत्वमपि तु अतिप्रसङ्गादनापादकस्यैव धर्म्मस्य तथात्वं यथा कम्बुग्रीवादिमान्नास्ति इत्याद्यभाववुद्धौ घटत्वस्यैव प्रतियोगितावच्छेदकत्वम् "सम्भवति लघौ

धर्म्मे गुरौ तदभावात्" दीधितिकृतः शक्यतावच्छेदकत्वं विषयतावच्छेदकत्ववत् गुरुधर्मस्यापि स्वीकृतमाकरे।

अवच्छेदकत्वनिरुक्ति स्त्री रघुनाथशिरोमणिकृते अवच्छेदकतापदार्थनिर्णायके अनुमानखण्डान्तर्गते ग्रन्थभेदे।

अवच्छेद्य त्रि० अव+छिद्–ण्यत्। १छेदनार्हे २अवधार्य्ये विशेषणीये २अवच्छेदार्हे च पदार्थे यथा दण्डत्वेनावच्छेद्या घटादिकारणता घटत्वेनावच्छेद्या घटप्रतियोगिता।

अवजय पु० अव+जि–अच्। पराजये "येनेन्द्रलोकावजयाय दग्नः" रघुः।

अवज्ञा स्त्री अव+ज्ञा–अङ्। "अनादरे। आत्मन्यवज्ञां शिथिलीचकार" रघुः। "गत्यर्थमन्यतेर्ढे चेष्टावज्ञयोः" मुग्ध०। "अविज्ञावज्ञेयं परितपति नोज्ञैरपि बुधम्" उद्भटः।

अवज्ञात त्रि०अव–ज्ञा–क्त। १अनादृते २तिरस्कृते ३कृतावमाने च

अवज्ञान न० अव+ज्ञा–भावे ल्युट्। १अवमाने २तिरस्कारे ३अनादरे "ईप्सितं तदवज्ञानात् विद्धि सार्गलमात्मनः" रघुः

अवज्ञेय त्रि०अव+ज्ञा–कर्म्मणि यत्। १अनादरणीये २तिरस्कार्य्ये "विप्रा हि ज्ञातियात्मानोनावज्ञेयाः कदाचन" वा०स्मृ०।

अवट पु०अव–अटन्। १गर्त्ते, २कूपे,। "रक्षसां गतसत्त्वानामेष धर्म्मः सनातनः। अवटे ये निधीयन्ते" रामा०। "भूतौदनो निवेद्यश्च स्वन्यापस्कारिणोऽवटे" सुश्रु० "अवटेष्ववनयति" शत०ब्रा०। ३देहस्य निम्नस्थाने कण्ठमूलादौ च "अवटश्चैवमेतानि स्थानान्यत्र शरीरके" वा०स्मृ० "शरीरे यःअवटःकश्चिन्निम्नोदेशः कण्ठमूलकक्षादि" मिता० ४ऐन्द्रजालिकजीविकावति च गर्गा० यज्ञ आवद्यः। अवटभवे त्रि०। [आधारे ल्युट्। नरकभेदे नरकशब्देविवृतिः।

अवटनिरोधन पु०अवटे गर्त्ते निरुध्यतेऽत्र अव+नि+रुध

अवटि स्त्री अव+अटि। १गर्त्ते २कूपे च वा ङीप् अवटीत्यपि।

अवटीट त्रि० अवनता नासिका प्रा०स० नतार्थे नासायाः टीटादेशः अर्श आदित्वात्। (खांदा) नतनासिके जने।

अवटु पु०अव+टीक–तितुट्वा०डु। १गर्त्ते,२उच्चभेदे, ३कूपे च। ४ग्रीवापश्चाद्भागे, ५ग्रीवाया उन्नतभागे च स्त्री ४देहस्थे निम्नदेशे "अवटुश्चैवमेतानि स्थानान्यत्र शरीरके" इति वा०स्मृ० पाठान्तरम् "अवटावथ हन्वोश्च प्रगृह्योच्चमवेक्षरम्" सुश्रु०। न०त० ५वटुभिन्ने पु०।

अवटुज पु०अवटौजायते जन–ड ७त०। शिरःस्थचरमकोशे घाटास्थकोशे "रागवानवटुजेष्ववक्षाः" माघः।

अवटोदा स्त्री न०त०अवटस्य कूपस्योदकमिव उदकमस्याः उदादेशः। भारतवर्षीये नदीभेदे।

अवडङ्ग पु० अवगतो डङ्गः शब्दो यस्मात्। हट्टस्थाने जटा०।

अवडीन न०अव+डी–भावे क्त। अवरोहणरूपे पक्षिगतिभेदे।

अवत पु० अव–अटच् वेदे पृ० टस्य तः। अवटरूपे कूपादौ निरु० "सिक्तमवतम्" ऋ०१,१३०,२ "अपतमवटमिति" भा० "अवते न कोशम्" ऋ०४,१७,१६।

अवतंस पु०न० अव–तनुस–घञ्। १कर्णपूरे, २शिरोभूषाभेदे च। "कर्णावतंसद्विगुणाच्चरूतम्" "स्वाहनत्तोभचलावतंसाः" "गणा नामेरुप्रसवावतंसाः" इति च कुमा०।

अवतंसित त्रि० अव+तनुस–क्त। भूषिते "समदनमवतंसिते ऽधिकर्णम्" माघः। वा अक्षोपे वतंसितोऽयत्न।

अवतमस न०अवततं व्याप्तं तमः प्रा०स०अच् समा०। व्याप्तान्धकारे। "अवतमसभिदायै भास्वताभ्युद्गतेन" माघः।

अवतरण अव+तॄ–भावे ल्युट्। तीरादिप्रदेशात् १जलाद्यवगाहाद्यर्थमवरोहणे।२अन्यरूपेण प्रादुर्भावे "अंशावतरणम्" भा०आ०प०। वस्तुमात्रस्य स्वस्थानात् ३अवरोहणे (नामा) "स्तन्यावतरणे चैव ज्वरोदोषैः प्रवर्त्तते। स्त्रीणामप्रजातानां स्तन्यावतरणे च यः" सुश्रु०। अवतीर्य्यते येन करणे ल्युट्। नद्यादेः सोपानादौ ४तीर्थे।

अवतरणी स्त्री अवतरति अन्योऽनया अव+तॄ करणे ल्युट्। ग्रन्थप्रस्तावार्थं प्रथमसुपोद्घातरूपायां सङ्गतौ (आभास) इत्याख्यायां २परिपाट्याञ्च स्वार्थे कन् अवतरणिकाप्यत्र।

अवतान पु० अव+तन–घञ् कर्म्मणि घञ्। १सन्ताने २अधोमुखे ३लताप्रताने च "लताग्रतैरवततामवतानशतैरिव" रामा०।

अवतार पु०अव+तॄ करणे घञ्। १तीर्थे, (पुष्करिण्यादेः सोपानपद्धतौ) "रुद्धे गजेन सरितः सरसाऽवतारे" माघः। भावे घञ्। २प्रादुर्भावे "नवावतारं कमलादिवोत्पलम्" मा भूत्परीवादमवावतारः" इति च रघुः ३देवानामंशावेशरूपेण प्रादुर्भावे च। "अवतारास्ह्यसंख्येया" इत्युक्तेः तेषां बहुत्वेऽपि प्राधान्याद्दशैव विष्णोरवतारा शास्त्रप्रसिद्धाः यथा "मत्स्य 'कूर्म्मोवराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दश" पुरा०खण्डमालायां तु प्रकृतेरेव एते अवतारा उक्ताः 'प्रकृतिर्विष्णुरूपात्र पुंरूपश्च महेश्वरः।एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश। कृष्णरूपा कालिका स्यात् रामरूपा च तारिणी। वगला कूर्म्ममूर्त्तिः स्यात् सीनो धूमावती भवेत्। छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी। सुन्दरी जामदग्न्यः स्यात् वामनो भुवनेश्वरी। कमला

बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी। स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम्। स्वयं च भगवान् कृष्णः कालीरूपोऽभवद् व्रजे" ।भागवते १स्क०७ प्राधान्यतः अन्येऽप्यवतारा उक्ताः यथा "लीलावतारानुरतो देवतिर्यङ्नरादिषु" इत्युपक्रम्य । "जगृहे पौरुषं रूपं भगवान् महदादिभिः । संभृतं षोड़शकलमादौ लोकसिसृक्षया । यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः। यस्यावयवसंस्थानैः कल्पितोलोकविस्तरः। तद्वै भगवतोरूपं विशुद्धं सत्वमूर्जितम् ।पश्यन्त्यदोरूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ।सहस्र मूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् । एतन्नानावताराणां निधानं बीजमव्ययम् । यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः । स एव प्रथमं देवः कौमारं सर्गमाश्रितः।चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्१। द्वितीयन्तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः२।तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्म्यं कर्म्मणां यतः३ ।तुर्य्ये धर्म्मकलासर्गे नरनारायणावृषी । भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः४।पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्५ ।षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्मुनिः। ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत सतामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरम् । ७अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः ।दर्शयन् वर्त्म धीराणां सर्व्वाश्रमनमस्कृतम् । ऋषिभिर्याचितोभेजे नवमं पार्थिवं वपुः ।दुग्धेमामोषधीर्विप्रास्तेन यः स उशत्तमः ६। रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लवे । नाव्यारोप्य महीमय्या महाहैवस्वतं मनुम्१०। सुरासुराणामुदधिं मथ्नतां मन्दराचलम् । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ११। धान्वन्तरं द्वादशमं त्रयोदशममेव च १२। अपाययत् सुरान्यान्मोहिन्याऽमोहयत् स्त्रिया १३ । चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् । ददार करजैरूरावेरकां कटकृद्यथा१४ । पञ्चदशं वामनकं कृत्वागादध्वरं बलेः । पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपम् । १५ । अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहोऽन्तकृत् । त्रिसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् १६ । ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः । १७।नरदेवत्वमापन्नः सुरकार्य्यचिकीर्षया। सप्तद्वीपवृहादीनि चक्रे वीर्य्याण्यतःपरम् १८ । एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरम् १९।२०।ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् । बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति ।२१।अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २२।अवतारास्त्वसंख्येया हरेः सत्वनिधेर्द्विजाः'। यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः । ऋषयो मनवोदेवा मनुपुत्रा महौजसः । कलाः सर्व्वे हरेरेव सप्रजापतयः स्मृताः । एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे" । "कस्मिन् काले स भगवान् किंवर्णः कीदृशोनृभिः। नाम्ना केन विधानेन पूज्यते तदिहोच्यताम्" । इति प्रश्ने । "कृतं त्रेता द्वापरञ्च कलिरित्येषु केशवः । नानावर्णाभिधाकारो नानैव विधिनेज्यते । कृते शुक्लश्चतुर्बाहुर्जटिलोवल्कलाम्बरः । कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डं कमण्डलुम्। मनुष्यास्तु तदा शान्ता निर्व्वैराः सुहृदः समाः । यजन्ति तपसा देवं शमेन च दमेन च । हंसः सुपर्णो वैकुण्ठोधर्म्मोयोगेश्वरोऽमलः । ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते । त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्तु मेखलः । हिरण्यकेशस्त्रय्यक्षः स्रुक्स्रुवादुपलक्षणः। तं तदा मनुजा देवं सर्व्वदेवमयं हरिम्। यजन्ति विद्यया त्रय्या धर्म्मिष्ठा ब्रह्मवादिनः । विष्णुर्यज्ञः पृश्निगर्भः सर्व्वदेव उरुक्रमः । वृषाकपिर्जयन्तश्च उरुगाय इतीर्य्यते । द्वापरे भगवान् श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः । तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् । यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप! । नमस्ते वासुदेवाय नमः सङ्कर्षणाय च। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः। नार यणाय ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्व्वभूतात्मने नमः । इति द्वापर उर्वीश स्तुवन्ति जगदीश्वरम्। नाना तन्त्रविधानेन कलावपि यथा शृणु । कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् । यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः । ध्येयं सदापरिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष! ते चरणारविन्दम्· भा० ११ स्कन्द० । अन्यत्र अवतारभेदस्तत्रैवोक्तः "हंसस्वरूप्यवदद्च्युतात्मयोगं दक्षः कुमार ऋषभोभगवान् पिता नः । विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृतामधुभिदा

स्तयोर्हयास्ये । युग्नोऽभ्ये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिजस्तारतार्क्ष्यः क्ष्माम्। कौर्म्मे धृतोऽद्रिरहतोन्मथने स्वपृष्ठे ग्राहग्रपन्नमिभराजमसुङ्मदार्त्तम् । संस्तुन्वतोनिपतितान् श्रमणानृषींश्च यक्रञ्च हत्वबधतस्तमसिग्रविष्टम् । देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्ने ऽसुरेन्द्र मभयाय सतां नृसिंहे । देवासुरे युधि च दैत्यपतीन् सुरार्थेहत्वान्तरेषु भुवनान्यदधत् कलाभिः। भूत्वाथ वामन इमामहरद्बलेःक्ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः। निःक्षत्रियामकृत गाञ्च त्रिसप्तकृत्वोरामस्तु हैहयकुलाप्ययबाड़वाग्निः । सोऽब्धिं बबन्ध दशवक्त्रमहन् सलङ्कं सीतापतिर्जयति लोकमलघ्नकीर्त्तिः । भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि । वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान् कलौ क्षिति भुजोन्यहनिष्यदन्ते । एवंविधानि जन्मानि कर्म्माणि च जगत्पतेः । भूरीणि भूरियशसोवर्णितानि महाभुज !" । सुरासुरादांशावतारा भारते आदिपर्व्वणि दर्शिताः यथा "इत्युक्त्वा स महीं देवो ब्रह्मा राजन् ! विसृज्य ताम्। आदिदेश तदा सर्व्वान् विबुधान् भूतकृत्स्वयम् । अस्मा भूमेर्निरसितुं भारं भागैः पृथक्पृथक्। अस्मामेव प्रस्तवध्वं विरोधायेति चाब्रवीत् । तथैव च समानीय गन्धर्व्वाप्सरसां गणान् । उवाच भगवान् सर्व्वानिदं वचनमर्थवत्" । इत्युपक्रम्य "स्वैस्वैरंशैः प्रस्तवध्वं यथेष्टं मानुषेषु च । अथ शक्रादयः सर्व्वे श्रुत्वा सुरगुरोर्व्वचः । तथ्यमर्थ्यञ्च पथ्यञ्च तस्य ते जगृहुस्तदा । अथ ते सर्व्वशोंऽशैः स्वैर्गन्तुं भूमिं कृतत्वराः । नारायणमभिप्रेत्य वैकुण्ठमुपचक्रमुः । यः स चक्रगदापाणिः पीतवासाः स्थितिप्रभः । पद्मनाभः सुरारिघ्नः पृथुश्रीरुच्छ्रितेक्षणः । प्रजापतिपतिर्हृषैः सुरनाथो महाबलः । श्रीवत्साङ्को हृषीकेशः सर्व्वदैवतपूजितः । तं भुवः शोधनायेन्द्र उवाच पुरुषोत्तमम् । अंशेनावतरेत्येवं तथेत्याह च तं हरिः" इत्युपक्रम्य च "अथ नारायणेनेत्थं चकार सह संविदम् । अवतर्त्तुं महीं स्वर्गादंशतः सहितः सुरैः । आदिश्य च स्वयं शक्रः सर्व्वानेव त्रिदौकसः । निर्जगाम पुनस्तस्मात्तत्र्याद्वारायणस्य च। तेऽमरारिविनाशाय सर्व्वलोकहिताय च । अवतेरुः क्रमेणैव महीं स्वर्गात्त्रिदौकसः । ततो ब्रह्मर्षिवंशेषु पार्थिवर्षिकुलेषु च। जज्ञिरे राजशर्दूल ! यथाकामं दिवौकसः" । इति सामान्यत उक्त्वा । "मानुषेषु मनुष्येन्द्र ! संभूता ये दिवौकसः। प्रथमं दानवांश्चैव तांस्ते वक्ष्यामि सर्व्वशः । विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः । जरासन्ध इति ख्यातः स आसीन्मनुजर्षभः । दितेः पुत्रस्तु यो राजन् । हिरण्यकशिपुः स्मृतः । स जज्ञे मानुषे लोके शिशुपालो नरर्षभ ! । संह्लाद इति विख्यातः प्रह्लादस्यानुजस्तु यः । स शल्य इति विख्यातो जज्ञे वाह्लीकपुङ्गवः । अनुह्लादस्तु तेजस्वी योऽभूत् ख्यातो जघन्यजः । धृष्टकेतुरिति ख्यातः स बभूव नरेश्वरः । यस्तु राजञ्छिबिर्नाम दैतेयः परिकीर्त्तितः । द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः । वाल्हलो नाम यस्तेषामासीदसुरसत्तमः । भगदत्त इति ख्यातः स जज्ञे पुरुषर्षभ ! । अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्य्यवान् । तथा गगनमूर्द्धा च वेगवांश्चात्र पञ्चमः । पञ्चैते जज्ञिरे राजन् वीर्य्यवन्तो महासुराः । केकयेषु महात्मानः पार्थिवर्षभसत्तमाः । केतुमानिति विख्यातो यस्ततोऽन्यः प्रतापवान् । अमितौजा इति ख्यातः सोऽभवत्कर्म्मा नराधिपः । खर्भानुरिति विख्यातः श्रीमान् यस्तु महासुरः । उग्रसेन इति ख्यात उग्रकर्म्मा नराधिपः । यस्त्वश्वइति विख्यातः श्रीमानासीन्महासुरः । अशोको नाम राजाऽभून्महावीर्य्योऽपराजितः । तस्मादवरजो यस्तु राजन्नृपतिः स्मृतः । दैतेयः सोऽभवद्राजा हार्द्दिक्यो मनुजर्षभः । वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः। अजकस्त्ववरो राजन् य आसीद्वृषपर्व्वणः। स शाल्व इति विख्यातः पृथिव्यामभवन्नृपः । अश्वग्रीवइति ख्यातः सत्ववान् यो महासुरः । रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः । सूक्ष्मस्तु मतिमान्राजन् कीर्त्तिमान् यः प्रकीर्त्तितः । वृहद्रथ इतिख्यातः क्षितावासीत्स पार्थिवः । वृहत्क्षत्र इति विख्यातो य आसीदसुरोत्तमः । सेनाविन्दुरिति ख्यातः स बभूव नराधिप' । वृषपोनाम यस्तेषामसुराणां बलाधिकः । नग्नजिन्नाम राजासीद्भुवि विख्यातविक्रमः । एकचक्रइति ख्यात आसीद्यस्तु महासुरः। प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ । विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः । चित्रधर्म्मेति विख्यातः क्षितावासीत्स पार्थिवः । हरस्त्वरिहरो वीर आसीद्यो दानवोत्तमः । सुबाहुरिति विख्यातः श्रीमानासीत्स पार्थिवः । सुहरस्तु महातेजाः शत्रुपक्षक्षयङ्करः । वाह्लीको नाम राजा स बभूव प्रथितः क्षितौ । निचन्द्रश्चन्द्रवक्त्रस्तु य आसीदसुरोत्तमः । सुक्षत्रेण इति ख्यातः श्रीमानासीत् स पार्थिवः । निकुम्भस्त्वजितः संख्ये

महामतिरजायत। भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः। शरभो नाम यस्तेषां दैतेयानां महासुरः। पौरवो नाम राजर्षिः स बभूव नरोत्तमः। शुक्रश्चस्तु महावीर्य्यः श्रीमान् राजन्महासुरः। सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः। क्रथस्तु राजन्! राजर्षिः क्षितौ जज्ञे महासुरः। पार्व्वतेय इति ख्यातः काञ्चनाचलसन्निभः। द्वितीयः शलभस्तेषामसुराणां बभूव ह। प्रह्लादो नाम बाह्लीकः स बभूव नराधिपः। चन्द्रस्तु दितिजश्रेष्ठो लोके तारापतिोपमः। चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः। अर्क्कदत्त्यभिविख्यातो यस्तु दानवपुङ्गवः। ऋषिको नाम राजर्षिर्ब्बभूव नृपसत्तमः। सुतपा इति विख्यातो य आसीदसुरोत्तमः। पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम!। गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः। द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः। मयूर इति विख्यातः श्रीमान् यस्तु महासुरः। स विश्वइति विख्यातो बभूव पृथिवीपतिः। सुपर्ण इति विख्यातस्तस्मादवरजस्तु यः। कालकीर्त्तिरिति ख्यातः पृथिव्यां सोऽभवन्नृपः। चन्द्रहन्तेति यस्तेषां कीर्त्तितः प्रवरोऽसुरः। शुनको नाम राजर्षिः स बभूव नराधिपः। विनायनस्तु चन्द्रस्य य आख्यातो महासुरः। जानकिर्न्नाम विख्यातः सोऽभवन्मनुजाधिपः। दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभः। काशिराजः स विख्यातः पृथिव्यां पृथिवीपते। यस्तन्तु सुषुवे यन्तु सिंहिकार्केन्दुमर्द्दनम्। स क्राथ इति विख्यातो बभूव मनुजाधिपः। अनायुषस्तु पुत्त्राणां चतुर्णां प्रवरोऽसुरः। विप्रचित्तो नाम तेजस्वी वसुमित्रो नृपः स्मृतः। द्वितीयो विप्रचित्तस्तु नराधिप! महासुरः। पाण्ड्यराष्ट्राधिप इति विख्यातः सोऽभवन्नृपः। बलीन इति विख्यातो यस्त्वासीदसुरोत्तमः। पौण्ड्यमात्स्यक इत्येवं बभूव स नराधिपः। दृढ इत्यभिविख्यातो यस्तु राजन्महासुरः। मणिमान्नाम राजर्षिः स बभूव नराधिपः। क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः। दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ। क्रोधवर्द्धन इत्येव यस्यन्यः परिकीर्त्तितः। दण्डधार इति ख्यातः सोऽभवन्मनुजर्षभः। कालेयानान्तु ये पुत्त्रास्तेषामष्टौ नराधिपाः। जज्ञिरे राजशार्द्दूल! शार्द्दूलसमविक्रमाः। मगधेषु जयत्सेनस्तेषामासीत्त्व पार्थिवः। अष्टानाम्तु वरस्तेषां कालेयानां महासुरः। द्वितीयस्तु ततस्तेषां श्रीमान्हरिहयोपमः। अपराजित इत्येवं स बभूव नराधिपः। तृतीयस्तु महातेजा महामायो महासुरः। निषादाधिपतिर्जज्ञे भुवि भीमपराक्रमः। तेषामन्यतमो यस्तु चतुर्थः परिकीर्त्तितः। श्रेणिमानिति विख्यातः क्षितौ राजर्षिसत्तमः। पञ्चमस्त्वभवत्तेषां प्रवरो यो महासुरः। महौजा इति विख्यातो बभूवेह परन्तपः। षष्ठस्तु मतिमान्यो वै तेषामासीन्महासुरः। अभीरुरिति विख्यातः क्षितौ राजर्षिसत्तमः। सप्तद्रसेनस्तु नृपस्तेषामेवाभवन्नृणात्। विश्रुतः सागरान्तायां क्षितौ धर्म्मार्थतत्त्ववित्। दृढक्षत्रमाष्टमस्तेषां कालेयानां नराधिप!। बभूव राजा धर्म्मात्मा सर्व्वभूतहिते रतः। कुक्षिस्तु राजन्! विख्यातो दानवानां महाबलः। पार्व्वतीय इति ख्यातः काञ्चनाचलसन्निभः। क्रथनश्च महावीर्य्यः श्रीमान्राजन्महासुरः। सूर्य्याक्ष इति विख्यातः क्षितौ जज्ञे महीपतिः। अनुराधान्तु यः सूर्य्यः श्रीमांश्चैव महासुरः। दरदो नाम बाह्लीको वरः सर्व्वमहीक्षिताम्। गणः क्रोधवशो नाम यस्ते राजन्! प्रकीर्त्तितः। ततः सञ्जज्ञिरे वीराः क्षितावित्थ नराधिपाः। मद्रकः कर्ष्वकेतुश्च सिद्धार्थः कीटकस्तथा। सुवीरश्च सुबाहुश्च महावीरोऽथ वाह्लिकः। क्रथो विचित्रः सुरथः श्रीमान्नीलश्च भूमिपः। चीरवासाश्च कौरव्य! भूमिपालश्च नामतः। दन्तवक्त्रश्च नामासीद्दुर्ज्जयश्चैव दानवः। रुक्मी च नृपशार्दूलो राजा च जनमेजयः। आषाढोवायुवेगश्च भूरितेजास्तथैव च। एकलव्यः सुमित्रश्च वाटधानोऽथ गोसुखः। कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च। सुतायुरुद्धहश्चैव दृढसेनस्तथैव च। क्षेमोऽप्यमोर्य्यः कुहरः कलिङ्गेषु नराधिपः। मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः। गणात् क्रोधवशादेष राजपुत्रोऽभवत् क्षितौ। जातः पुरा महाभागो महाकीर्त्तिर्म्महाबलः। कालनेमिरिति ख्यातो दानवानां महाबलः। स कंस इति विख्यात उग्रसेनसुतो बली। यस्त्वासीद्देवको नाम देवराजसमद्युतिः। स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः। दृढस्यतेर्दृढक्रोधैर्द्देवैर्विद्धि भारत!। अंशात्द्रोणं समुत्पन्नं भारद्वाजमयोनिजम्। धन्विनां नृपशार्दूल। यः मर्व्वास्त्रविदुत्तमः। महाकीर्त्तिर्म्महातेजाः स जज्ञे मनुजेश्वर!। धनुर्व्वेदे च वेदे च यं तं वेदविदो विदुः। गरिष्ठं चित्रकर्म्माणं द्रोणं खलवर्द्धनम्। महादेवान्तकाभ्याञ्च कामात् क्रोधाच्च भारत।। एकत्वमुपपन्नानां जज्ञे शूरः परन्तपः। अश्वत्थामा महावीर्य्यः शत्रुपक्षक्षयावहः। वीरः कमलपत्राक्षः क्षितावा-

सौद्गराधिप!। जज्ञिरे वसवस्त्वष्टौ गङ्गायां शान्तनोः सुताः। वशिष्ठस्य च शापेन नियोगाद्वासवस्य च। तेषामवरजो भीष्मः कुरूणामभयङ्करः। मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः। जामदग्न्येन रामेण सर्वास्त्रविदुषां वरः। योऽयुध्यत महातेजा भार्गवेण महात्मना। यस्तु राजन्! ऋषेर्नाम ब्रह्मर्षिरभवत् क्षितौ। रुद्राणान्तु गणाद्विद्धि संभूतमतिपौरुषम्। शकुनिर्नाम यस्त्वासीद्राजा लोके महारथः। द्वापरं विद्धि तं राजन्! संभूतमरिमर्दनम्। सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्वहः। पक्षात् स जज्ञे मरुतां देवानामरिमर्दनः। द्रुपदश्चैव राजर्षिस्तत एवाभवद्गणात्। मानुषे नृप! लोकेऽस्मिन् सर्वशस्त्रभृतांवरः। ततश्च कृतवर्म्माणं विद्धि राजन्!! जनाधिपम्। तमप्रतिमकर्म्माणं क्षत्रियर्षभसत्तमम्। मरुतान्तु गणाद्विद्धि सञ्जातमरिमर्दनम्। विराटं नाम राजानं परराष्ट्रप्रतापनम्। अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः। स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः। धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः। दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः। मानुषैर्गोष्टभेः कोपादन्ध एव व्यजायत। तस्यैवावरजो भ्राता महासत्त्वो महाबलः। स पाण्डुरिति विख्यातः सत्यधर्म्मरतः शुचिः। अलेस्तु सुमहाभागं पुत्रं पुत्रवतांवरम्। विदुरं विद्धि तं लोके जातं बुद्धिमतांवरम्। कलेरंशस्तु सञ्जज्ञे भुवि दुर्योधनोनृपः। दुर्बुद्धिर्दुर्म्मतिश्चैव कृष्णामयशस्करः। जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः। यः सर्व्वां घातयामास पृथिवीं पृथिवीपते। उद्दीपितं येन वैरं भूतान्तकरणं महत्। पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजेष्विह। यतं दुःशासनादीनां सर्व्वेषां क्रूरकर्मणाम्। दुर्मुखो दुःसहश्चैव येचान्ये नानुकीर्त्तिताः। दुर्योधनसहायास्ते पौलस्त्या भरतर्षभ। वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधिकः" इति। "धर्मस्यांशन्तु राजानं! विद्धि राजन्! युधिष्ठिरम्। भीमसेनन्तु वातस्य देवराजस्य चार्ज्जुनम्। अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि। नकुलः सहदेवश्च सर्व्वभूतमनोहरौ। यस्तु वह्नेः इति ख्यातः सोमपुत्रः प्रतापवान्। सोऽभिमन्युर्बृहत्कीर्त्तिर्जुनस्य सुतोऽभवत्। यस्यावतरणे राजन्! सुरानूचुः सोमोऽब्रवीदिदम्। नाहं दद्यामिमं पुत्रं मम प्राणैर्गरीयसम्। समयः क्रियतामेष न शक्यमतिवर्त्तितुम्। सुरकार्य्यं हि नः कार्य्यमसुराणां क्षितौ वधः। तत्र यास्यत्ययं वत्सो न च स्थास्यति वै चिरम्। ऐन्द्रिर्द्वैरस्तु भविता यस्य नारायणः सखा। सोऽर्ज्जुनेत्यभिविख्यातो पाण्डोः पुत्रः प्रतापवान्। तस्यायं भविता पुत्रो बालो भुवि महारथः। ततः षोड़श वर्षाणि स्थास्यत्यमरसत्तमाः!। अस्य षोड़शवर्षस्य स संग्रामो भविष्यति। यतांशा वः करिष्यन्ति कर्म वीरनिसूदनम्। नरनारायणाभ्यां तु स संग्रामो विनाकृतः। चक्रव्यूहं समस्थाय योधयिष्यन्ति वः सुराः। विसुखाञ्छात्रवान् सर्व्वान् कारयिष्यति मे सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति। महारथानां वीराणां कदनञ्च करिष्यति। सर्व्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति। दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्व्वीरैः समेत्य बहुभो रणे। दिनक्षये महाबाहुर्मया भूयः समेष्यते। एकं वंशकरं पुत्रं वीरं वै जनयिष्यति। प्रनष्टं भारतं वंशं स भूयो धारयिष्यति। एतत् सोमवचः श्रुत्वा तथाऽस्त्विति दिवौकसः। प्रत्यूचुः सहिताः सर्व्वे ताराधिपमपूजयन्। एवं ते कथितं राजंस्तव जन्म पितुः पितुः। अग्नेर्भागन्तु तं विद्धि धृष्टद्युम्नं महारथम्। शिखण्डिनमथोराजन्! स्त्रीपूर्व्वं विद्धि राक्षसम्। द्रौपदेयाश्च ये पञ्च बभूवुर्भरतर्षभ!। विश्वान्देवगणान् विद्धि सञ्जातान् भरतर्षभ!। प्रतिविन्ध्यः सुतसोमः श्रुतकीर्त्तिस्तथाऽपरः। नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्य्यवान्। शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत्"। सूर्य्यस्य कर्णरूपेणावतारः यथा "प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा। अजीजनत् सुतं चास्यां सर्वशस्त्रभृतां वरम्। सकुण्डलं सकवचं देवगर्भश्रियान्वितम्। दिवाकरसमं दीप्त्या चारुसर्व्वाङ्गभूषितम्। निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तद्कुमारं यशस्विनम्। तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोऽधिरथिस्तदा"। "पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ। ततो वैकर्त्तनः कर्णः कर्म्मणा तेन सोऽभवत्। आसुक्तकवचो वीरो यस्तु जज्ञे महायशाः। स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः। स तु सूतकुले वीरोवर्द्धते राजसत्तम!। कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम्। दुर्योधनस्य सचिवं मित्रं शत्रुविनाशनम्। दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम्"। "यस्तु नारायणोनाम देवदेवः सनातनः। तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान्। शेषस्यांशस्य नागस्य बलदेवो महाबलः। सनत्कुमारं प्रद्युम्नं विद्धि-

राजन्महौजसम्। एवमन्ये मनुष्येन्द्रा बहवोंऽशा दिवौकसाम्। जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः। गणस्त्वप्सरसां यो वै मया राजन् प्रकीर्त्तितः। तस्य भागः क्षितौ जज्ञे नियोगाद्वासवस्य तु। तानि षोड़श देवीनां सहस्राणि नराधिप! बभूवुर्मानुषे लोके वासुदेवपरिग्रहाः। श्रियास्तु भागः सञ्जज्ञे रत्यर्थं पृथिवीतले। भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः। द्रौपदी त्वथ सञ्जज्ञे शचीभागादनिन्दिता। द्रुपदस्य कुले कन्या वेदिमध्यादनिन्दिता। नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी। पद्मायताक्षी सुश्रोणी खसितार्द्धितमूर्द्धजा। सर्वलक्षणसम्पूर्णा वैदूर्य्यमणिसन्निभा। पञ्चानां पुरुषेन्द्राणां चित्तप्रमथनी रहः। सिद्धिर्धृतिश्च ये देव्यौ पञ्चानामातरौ तु ते। कुन्ती माद्री च जज्ञाते मतिस्तु सुबलात्मजा। इति देवासुराणां ते गन्धर्व्वाप्सरसां तथा। अंशावतरणं राजन् राक्षसानाञ्च कीर्त्तितम्। ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः। महात्मानो बहूनाञ्च ये जाता विपुले कुले" इति। भा०व०प० रामावतारकथने। "न सदेवासुरैः शक्यो युद्धे जेतुं विभावसो!। विहितं तत्र यत् कार्य्यमभितस्तस्य निग्रहः। तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः। विष्णुः प्रहरतां श्रेष्ठः स तत् कर्म करिष्यति। पितामहस्ततस्तेषां सन्निधौ शक्रमब्रवीत्। सर्वैर्देवगणैः सार्द्धं सम्भव त्वं महीतले। विष्णोः सहायान्ऋक्षेषु वानरीषु च सर्वशः। जनयध्वं सुतान् वीरान् कामरूपबलान्वितान्। ततो भागानुभागेन देवगन्धर्वदानवाः। अवतस्तुर्महीं सर्वे मन्त्रयामासुरञ्जसा। तेषां समग्रं गन्धर्व्वो दुन्दुभो नाम नामतः। यशास वरदो देवो गच्छ कार्य्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वो दुन्दुभो ततः। मन्थरा मानुषे लोके कुब्जा समभवत्तदा। शक्रप्रभृतयश्चैव सर्वे ते सुरसत्तमाः। वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान्। तेऽन्ववर्त्तन्त पितॄन् सर्वे यशसा च बलेन च। भेत्तारो गिरिशृङ्गाणां शालतालशिलायुधाः। वज्रसंहननाः सर्वे सर्वे चातिबलास्तथा। कामवीर्य्यबलाश्चैव सर्वे युद्धविशारदाः। नागायुतसमप्राणा वायुवेगसमा जवे। यत्रेच्छकनिवासाश्च केचिदत्र वनौकसः" इति। एवमन्येऽप्यवतारा पुराणादौ ज्ञेयाः।

अवतरत्न नेन रूपेण करणे घञ्। येन रूपेणाविर्भूतस्तस्मिन् ४रूपे "मत्स्यादिभिरवतारैरवतारवतां वताऽवता वसुधाम्। परमेश्वर! परिपाल्यो भवता भवतापभीतोऽहम्" शङ्करः।

अवतारण न० अव+तॄ-णिच्-ल्युट्। भूतादीनामावेशनेन १प्रादुर्भावने, (भूतनामान) २अवरोपणे, ३अन्यप्रस्तावने च करणे ल्युट् स्त्री। अवतारणमत्र।

अवतारित त्रि० अव+तॄ-णिच् क्त। "अवरोपिते "सन्तानार्थाय विधये स्वभुजादवतारिता" रघुः।

अवतीर्ण त्रि० अव+तॄ-कर्त्तरि क्त। १कृतावगाहने २कृतावरोहणे "कौवेरदिग्भागमपास्य मार्गमागस्त्यसुष्णांशुरिवावतीर्णः" माघः ३अन्यरूपेण प्रादुर्भावे च "तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः" भा०व०प०।

अवतूलन न० तूलैरवकृणाति तूलेन तृणाद्यमवघट्टयति अव+तूल+अवघट्टनार्थे णिच्-भावे ल्युट्। तूलेन तूलाद्यावघट्टने। [स्त्रियाम्।

अवतोका स्त्री अवपतितं तोकमस्याः प्रा०ब०। स्रवद्गर्भायां

अवत्त त्रि० अव+दो-खण्डने कर्म्मणि क्त। खण्ड्यते "तत् पयोऽवत्तं भवति यत् हृदयस्याग्रेऽवद्यति" शत०ब्रा०।

अवत्तिन् त्रि० अवत्तमनेन इष्टा० इनि। कृतखण्डने जने "विविधायजमानाश्चतुरवत्तिनः पञ्चावत्तिनश्चेति" आश्व०श्रौ०

अवत्सार पु० ऋषिभेदे सहि "अवत्सारस्य स्तृणवाम" इति ऋ०५,४४,१०, उक्तः।

अवदंश पु० अवदश्यते पानरूप्यर्थम् अव+दन्श-कर्म्मणि घञ्। मद्यपानादिप्रोत्साहनसाधने भ्रष्टचर्वणद्रव्ये "अन्यतमासवं पायवेदङ्गारशूल्यावदंशम्" सुश्रु०।

अवदरण न० अव+दॄ-भावे ल्युट्। विदारे "दशनयोवरदरणम्" "वेदनाप्रादुर्भावोऽवदरणम्" इति च सुश्रु०।

अवदाघ पु० अव+दह भावे घञ् न्यङ्क्वा० हस्य घः। निदाघे।

अवदात पु० अव+दै-क्त। १शुभ्रे, २पीते च वर्णे। ३तद्वति ४विशुद्धे "अन्यस्मिन् जन्मनि च न कृतमवदातम्" कादं०। ५मनोज्ञे च त्रि०।

अवदान न० अव+दो-ल्युट्। १खण्डने, २पराक्रमे ३अतिक्रमे ४शुद्धिकरणे, च अवद्यति रोगमनेन करणे ल्युट्। ५वीरणमूले न०।

अवदारक त्रि० अवदारयति अव+दॄ-णिच्-ण्वुल्। १विदारके अवयवविभागकारके। २खनित्रे पु०।

अवदारण न० अव+दॄ-णिच्-भावे ल्युट्। १विदारणे अवयवविभाजने। करणे ल्युट्। २खनित्रे। [विभाजिते।

अवदारित त्रि० अव+दॄ-णिच् कर्म्मणि क्त। विदारिते

अवदाह न० अवसादितोदाहो येन प्रा०ब०। वीरणमूले तस्य सेवने हि तापनिवृत्तिर्वैद्यके प्रसिद्धा

अव+दह–भावे घञ्। २ज्वरादिहेतुके दाहे।

अवदाहेष्ट न० अवदाहे ज्वरादिहेतुके देहतापे तन्निवारणाय इष्टम्। वीरणमूले उशीरे (वेणार मूल)।

अवदाहेष्टकापथ न० अवदाहे तन्निवारणाय इष्टकापथं सोपानमिव। वीरणमूले (खस्खस्)।

अवदीर्ण त्रि० अव+दृ–क्त। १द्वैधीभूते २विभक्ते च।

अवदोह पु० अवदुह्यते अव+दुह–कर्म्मणि घञ्। १दुग्धे त्रिका०। भावे घञ्। २दोहने आकर्षणपूर्ब्बकान्तःस्थित द्रवद्रव्यनिस्सारणरूपे व्यापारे।

अवद्य त्रि० वद–यत् न०त०। १अधमे, २पापिनि, ३निन्द्ये, ४दोषे ५कथनायोग्ये च। "निरवद्यविद्योद्द्योतेन द्योतितः" दायभा०। "कृष्यमूकेऽनवद्योऽस्ति" भट्टिः।

अवद्योतन न० अव+द्युत–णिच्–भावे ल्युट्। प्रकाशने।

अवधातव्य न० अव+धा–भावे–तव्य। १अवधाने "तदत्र देवेनावधातव्यम्" प्रबोधच०। कर्म्मणि तव्य। २अवधेये त्रि०

अवधान न० अव+धा–ल्युट्। मनोयोगविशेषे, यद्ग्रहात् विषयान्तरतो मनोनिवर्त्तते। "अवधानपरे चकार सा प्रलयान्दोलिते विलोचने" कुमा०। "सावधानावधारय" त०

अवधार पु० अव+धृ–णिच्–भावे अच्। निश्चये तद्भावाप्रकारकत्वे सति तत्प्रकारके ज्ञाने "तद्भावाप्रकारा धीस्तत्प्रकारा तु निश्चय" इति भाषा०। "सर्व्वत्र यदवधारणेनोच्यते स एकान्तः" सुश्रु०।

अवधारण न० अव+धृ–णिच्–ल्युट्। १इयत्तापरिच्छेदे, अयमित्थमेवेति विषयपरिच्छेदके २निश्चये च। संख्यादिना ३इयत्ताकरणे "यावद्ग्रहणे" पा०। ४अन्यतोव्यावर्त्तने च।

अवधारणीय त्रि० अव+धृ–णिच्–कर्म्मणि अनीयर्। दृढक्तया निश्चेतुं योग्ये। "विष्णोरिवास्यानवधारणीयम्" रघु।

अवधारित त्रि० अव+धृ–णिच्–क्त। यस्य संख्यारूपादिना निश्चयः कृतः १तस्मिन् अन्यतः कृतव्यावृत्तिभुते २पदार्थे च।

अवधार्य त्रि० अव+धृ–णिच्–कर्म्मणि यत्। निश्चेतुं शक्ये इदमित्थमेवेति १निर्णये अव+धृ–णिच्–ल्यप्। २निश्चित्येत्यर्थे अव्य०।

अवधि पु० अव+धा–कि। १सीमायां, २काले "सर्व्वे निदाघावधिना विरूक्षाः" रघुः। "निदाघावधिना निदाघकालेन" मल्लि०। ३चित्ताभिनिवेशे च। अपादाने कि। ४अपादाने। "भेदान्तरक्रियापेक्षमवधित्वं पृथक् तयोः" भर्त्तृ०। आधारे कि। ५विले गर्त्ते। सीमा च द्विविधा पूर्व्वा परा च तत्र "प्रवाहमवधिं कृत्वा यावद्वस्तुव्यभिचारादौ" पूर्व्वा "सञ्चारोरतिमन्दिरावधीत्यादौ परा" प्रकारान्तरेण सा त्रिविधा कालकृता देशकृता बुद्धिकल्पिता च। पूर्व्वोक्ते दैशिकी। "मासावधि विमोक्ष्यान्मित्यादौ" पूर्व्वा "मासकालं समारभ्य जपेन्मोक्षावधि प्रिये" इत्यादौ परा कालिकी "सखीकर्णावधि व्याहृतमित्यादौ बुद्धिकल्पिता"। अवधित्वञ्च स्वाभिधेयापेक्षया विभागाश्रयत्वम्। तच्च पञ्चम्यार्थेऽपि बोध्यते नद्यावनमित्यादौ वनस्य नद्यपेक्षविभागाश्रयत्वात् तथात्वम्। एवं मासात् पूर्व्वं घट इत्यादौ मासतो विभागाश्रयत्वात् घटादेस्तदवधिकत्वम् तत्र अयमस्मात् पूर्व्वकालवर्त्ती इत्यादौ कालिकम् अयमस्मात् पूर्व्वदेशवर्त्तीत्यादौ दैशिकं "माथुराः पाटलिपुत्रेभ्य आढ्यतरा इत्यादौ बुद्धिकल्पितम्। "स्वाभिधेयापेक्षोऽवधिनियमोव्यवस्थेति सि०कौ० "सञ्चारोरतिमन्दिरावधि सखीकर्णावधि व्याहृतं क्षणञ्चाधरपल्लवावधि मयाभानोऽपि मौनावधि। चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितं सर्व्वं सावधि नावधिर्म्मम गद्यां प्रेम्णः परं केवलमित्यादौ" दैशिकं बुद्धिकल्पिञ्चावधित्वम् "सरस्यावधिदां सरस्वतीम्" कुमा० इत्यत्र कालिकं "जनपदतदवध्योः" पा० इत्यत्र दैशिकम्।

अवधिमत् त्रि० अवधिरस्यास्य मतुप्। अवधिविशिष्टे अवधित्वमेव पञ्चम्यर्थ इति नव्यनैयायिकाः तेन तस्य स्वरूपसम्बन्धेन इतरपदार्थेऽन्वयः अवधित्वस्य पञ्चम्यर्थत्वस्वीकारे तु निरूपकतासम्बन्धेनान्यपदार्थेऽन्वयस्य वक्तव्यतया नञ्समभिव्याहारे च तेनैवसम्बन्धेनाभावान्वयस्याभ्युपगम्यत्वेन निरूपकतासंसर्गस्य वृत्त्यनियामकतया तत्सम्बन्धस्य प्रतियोगितानवच्छेदकतयानन्वयः वृत्तिनियामकसम्बन्धस्यैव तथात्वात्। अवधिमत्त्वस्य तदर्थत्वे तु तस्य स्वरूपसम्बन्धेनान्वयात् नञ्समभिव्याहारे अन्वयसम्भवः स्वरूपसम्बन्धस्य वृत्तिनियामकतया तस्य प्रतियोगितावच्छेदकत्वसंभवेन बाधकाभावात् "अतएव व्युत्पत्तिवादे मदाधारेण अवधित्वमवधिमत्त्वं वा पञ्चम्या अर्थ इति प्रथमपक्षोऽस्य सूचनाय तस्यान्ते निवेशः कृतः। "उत्तरादिभ्य एनप् स्यादवध्यवधिमतोः सामीप्ये" सि०कौ०।

अवधीयमान त्रि० अव+धा कर्म्मणि शानच्। यस्मिन् विषये चित्ताभिनिवेशः क्रियते तस्मिन् विषये।

अवधीर अवज्ञायाम् अद०चुरा० उभय०सक०सेट्। अवधीरयति ते आववधीरत् त। अनेत्यस्योपसर्गत्वे अवादिधीरत् त। अवधीरितः अवधीरी "रसैः कथा यस्य सुधावधी-

रिणी' नै० अवेत्यस्योपसर्गत्वे "इतीव धारामरधीर्यतेति नैषध० धात्ववयवरूपत्वे तु अवधीरयितेति भेदः ।

अवधीरणा स्त्री अवधीर–भावे युच् । १अवज्ञायां २तिरस्कारे च "कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि" रघुः "अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु ! मन्यसे" शकु० । भावे ल्युट् । तत्रार्थे न० ।

अवधीरित त्रि० अवधीर–कर्मणि क्त । १अवज्ञाते २तिरस्कृते च

अवधूत त्रि० अव+धू–क्त । १कम्पिते "पवनावधूतवसनान्तयैकया" माघः "विदधेऽवधूतरुरसङ्गमस्मदम्" माघः । कृष्णयजुर्वेदान्तर्गते २उपनिषद्भेदे । ३अभिभूते, ४निर्वर्त्तिते, "अवधूतं रक्षो अवधूता अरातयः" शत० ब्रा० ५अनादृते च । "यो विलङ्घ्याश्रमान् वर्णान् आत्मन्येव स्थितः पुमान् । अतिवर्णाश्रमी योगी अवधूतः स उच्यते" इत्युक्तलक्षणे वर्णाश्रमधर्मत्यागिनि ६सन्न्यासिनि पु० । "अक्षरत्वात् वरेण्यत्वात् धूतसंसारबन्धनात् । तत्त्वमस्यर्थसिद्धत्वादवधूतोऽभिधीयते । यथा रविः सर्वरसान् प्रभुङ्क्ते ह्यताशनश्चापि हि सर्व्वभक्षकः । तथैव योगी विषयान् प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्धः" इति च तन्निरुक्तिलक्षणे एवमवधूतगीतशब्दे तल्लक्षणं द्रष्टव्यम् ।

अवधूतगीत न० २त० । भागवते ११ स्क० भगवदुद्धवसंवादे यदुन्द्रपं प्रति कस्यचिदवधूतस्य उपदेशभेदे । यथा 'अत्राप्युदाहरन्तीममितिहासं पुरातनम् । अवधूतस्य संवादं यदोरमिततेजसः । अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् । कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् । कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा । यामासाद्य भवाँल्लोकं विद्वांश्चरति बालवत् । प्रायोधर्मार्थकामेषु विवित्सायाञ्च मानवाः । हेतुनैव समीहन्ते आयुषा यशसा श्रिया । त्वन्तु कल्पः कविर्दक्षः सुभगोमितभाषणः । न कर्त्ता नेहसे कर्त्तुं जड़ोन्मत्तपिशाचवत् । जनेषु दह्यमानेषु कामलोभदवाग्निना । न तप्यसेऽग्निना मुक्तो गङ्गाम्भःस्थइव द्विपः । त्वं नः संपृच्छतां ब्रह्मन् ! आत्मन्यानन्दकारणम् । ब्रूहि स्वर्गविहीनस्य भवतः केवलात्मनः" इति यदुन्द्रपेण तल्लक्षणमुक्तम् । एवं यदुना प्रष्टः स यदाह तदेव अवधूतगीतम् । तेन च "सन्ति मे बहवोराजन् ! गुरवोबुद्ध्युपाश्रिताः । यतो बुद्धिमुपादाय मुक्तोऽटामीह तान् शृणु । पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः । कपोतोऽजगरः सिन्धुः पतङ्गोमधुकृद्गजः । मधुहाहरिणो मीनः पिङ्गला कुररोर्भकः । कुमारी शरकृत् सर्प ऊर्णनाभः सुपेशकृत् । ततो मे गुरवो राजन् ! चतुर्विंशतिराश्रिताः । शिक्षार्थन्ति भिरेतेषामन्वशिक्षमनुव्रतम्" इत्युपक्रम्य चित्यादिभ्यश्चतुर्विंशतेर्यथा यत् शिक्षितं तदुक्तम् तद्विस्तरस्तु ६नवमाध्यायसमाप्तिपर्य्यन्ते तत्रैवानुसन्धेयः ।

अवधूनन न० अव+धू–णिच्–ल्युक् ल्युट् । १चालने । (झाड़ा) इति ख्याते व्यापारे "पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम्" मनुः । २चिकित्साभेदे च "तत्र हृष्टं गलापीड़ं कुर्य्यात्तत्राप्यवधूननम्" सुश्रु० । [ल्युट् अवचूर्णने]

अवधूलन न० धूलिं करोति अव+धूलि–तत्करोति णिच्–भावे

अवधृत त्रि० अव+धृ–अन्तर्भूतण्यर्थः कर्म्मणि क्त । १अवधारिते निश्चिते "अनवधृतात्मज्ञानसंशयविपर्यासस्तु यं कञ्चित् पुरुषं प्रति प्रवर्त्तमानः" इति सा० कौ० । २कृतनियमे ३विषयविशेषे व्यवस्थापिते ४स्थापिते च ।

अवधृष्य त्रि० अव+धृष–कर्म्मणि क्यप् । १अवधर्षणीये २तिरस्कार्य्ये । ३निश्चयेनावधार्य्ये "नियतं यत्ते रजसं क्षत्तोऽनवधृष्यम्" श्रुतिः "अनवधृष्योहि भवत्यनवधृष्यः" शत० ब्रा० । ५पराभवनीये च । अव+धृष–ल्यप् । दुर्धर्षित्वे त्यर्थे अव्य० ।

अवधेय त्रि० अव+धा–यत् । १निवेशे २स्थापनीये यत्र चित्ताभिनिवेशः क्रियते तस्मिन् ३श्रद्धेये "प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनो भवति" "अनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत" इति च सा० कौ० । ४क्षेये च । भावे यत् । ५अवधाने न० ।

अव(ब)ध्र त्रि० अव+धृ–मूलविभु० क बध–रक् न० त० वा । अहिंसके । "अव(ब)ध्र-ज्योतिरदितेर्ऋतावृधः" ऋ० ७,८२,१०, "अव(ब)ध्रमहिंसकम्" भा० ।

अवध्वंस पु० अव+ध्वनुस–घञ् । १परित्यागे, २चूर्णिते, ३निन्दायाञ्च "अवध्वंसदवाक्षरणः" अथ० ५,२२,३ ।

अवध्वस्त त्रि० अव+ध्वनुस–क्त । १नष्टे २निन्दिते ३अवचूर्णिते ४त्यक्ते च ।

अवन न० अव+ल्युट् । १प्रीणने, २रक्षणे, ३प्रीतौ च "शमनिन्दानवनागंजनतालिकुलं यथैव दानवनागम्" नलोद०

अवनत त्रि० अव+नम–क्त । १अधोभूते २आनते च । "अवनतधितिकरुकपठलच्छीम्" माघः । "चतुरर्थ्यां क्रयाद्या० छण् आवनतीयः, अवनतसन्निकृष्टदेशादौ त्रि० ।

अवनति स्त्री अव+नम–क्तिन् । औद्धत्याभावे, १विनये, २अधोनमने च । "धनुषामवनतिः" कादम्बरी । ३प्रणामे च ।

अवनद्ध त्रि० अव+नह–क्त । १खचिते, २रोपिते ३वेष्टिते ४बद्धे च "चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः"

मनुः । ५क्षुदङ्गादिवाद्ये न० । [विकावनद्धा" कुमा० ।

अवनम्र त्रि० अव+नम–र । अतिशयनम्रे "पर्य्याप्तपुष्पस्त-

अवनय पु० अव+नी–भावे अच् । १अधःपातने २निपातने ।

अवनयन न० अव+नी–ल्युट् । अवस्थापने । "अवनयनाव-स्तरणे चावटवत्" कात्या० ८।५।२४ । "गर्त्तेषु प्रोक्षणं शेषोदकसेचनम्" वेददी० तेन २तदर्थेऽपि ।

अवनाट त्रि० अवनता नासिका प्रा० स० नतार्थे नासिकाया-नाटादेशः अर्श आद्यच् । (खांदा) अवनतनासिके जने ।

अवनाय पु० अव+नी "अवोदोर्नियः" पा० अचोञ्णिकः घञ् । १अधोनयने अधःप्रापणे । [नतौ ।

अवनाम पु० अव+नम–घञ् । अवनतौ अधोभूत्वा क्षतायां

अवनि (नी) स्त्री अव–अनि । भूमौ । "सुसाधितायामवनौ" इति सू० सि० । वा ङीप् अवनीत्यपि । "दीनदयालुतया-ऽवनिपाल" "सुसमृद्धवनी दृषाऽवनी सुवनी संप्रवदत्-पिकापि का इति च नैष० । करणे अनि । २अङ्गुलीषु व० व० निरु० । अव प्रीणने कर्त्तरि अनि । ३नद्यां निरु० "सं यं सुभोऽवनयः न यन्ति सस्रुद्रं खवतोरोध-चक्रा" ऋ० १,१९०,७ । दीर्घान्तः ४लायमाणलतायां राजनि० ।

अवनिक्त त्रि० अव+निज–क्त । १क्षालिते २शोधिते च ।

अवनि(नी)नाथ पु० ६त० । रूपे भूपतौ अवनी(नि) नायकादयोऽस्यत्र ।

अवनि(नी)पति ६त० । रूपे अवनिस्वाम्यादयोऽस्यत्र । "पतिर-वनीपतीनां तैश्चकास्ते चतुर्भिः" रघुः ।

अव(नि)नीपाल ६त० । रूपे "इत्यसकृं विलपन्तमसञ्च-ह्रीनदयालुतयावनिपालः नैष० । "क्षितिविदवनिपालः शर्व्वरीः शर्व्वकल्पः" रघुः ।

अवनीश पु० ६त० । भूपतौ भूमीश्वरे अवनीश्वरादयोऽस्यत्र ।

अवनेजन न० अव+निज–ल्युट् ।१प्रक्षालने "न कुर्य्यादुगुरु मुलस्य पादयोश्चावनेजनम्" मनुः । श्राद्धे पिण्डदानार्थं भावृतकुशस्य जलेन सेकरूपे २संस्कारभेदे च । "दक्षि-णस्थितप्रागग्रकुशमूलमध्याग्रेषु मातादिभ्यस्तदुत्तरं मध्य-स्थितप्रागग्रकुशमूलमध्याग्रेषु पित्रादिभ्यस्तदुत्तरं स्थित प्रागग्रकुशमूलमध्याग्रेषु मातामहादिभ्यः प्राङ्मुखेना वनेजनं कर्त्तव्यम्" कल्पप्रदीपः । रघुनन्दनेन मात्पत्र-योनादृत इति भेदः ।

अवन्ति पु० अव–झि । मालवदेशे । स च ह०स० कूर्म्मचक्रविभागे "अथ दक्षिणेन लङ्केलुपक्रम्य "आक-रवणावन्तिकदग्धपुरगोनर्द्धा" इति उक्तः दक्षिणदेशस्थः । तत्र शिप्रा नदी महाकालनामा शिवमूर्त्तिविशेषः उज्ज-यिनी राजधानी । तत्पुरीपरत्वे स्त्री वा ङीप् । "अवन्तिनाथोऽयमुदग्रबाहुरित्युपक्रम्य "असौ महा-कालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः" । "अनेन यूना सह पार्थिवेन शिप्रातरङ्गानिलकम्पि-तासु विहर्त्तुम् ? च रघौ तथावर्त्तितम् । ज्योतिर्वि० विक्रमसंवत्सरणे "यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनी । समाश्रिता प्राप्य-पवर्गदायिनी श्रीविक्रमार्कोऽवनिपो जयत्यपि" तस्मिन् सदा विक्रमसंवत्सरीये विराजमाने शमवन्तिकायाम् । सर्व्वप्रजामण्डलसौख्यसम्भवः सर्व्वत्र च वेदकर्म्म" । तथाच अवन्ती उज्जयिनी च नामान्तरं यथोक्तं सि० शि० । "यथोज्जयिन्याः कुजचत्वरभागे प्राच्यां दिशि स्याद्यम कोटिरेव । ततश्च पश्चाच्च भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम्" । इयञ्च लङ्कास्थानात् भूपृष्ठषोड़शांशे मेरु पर्य्यन्तगतरेखायां समसूत्रस्थाने स्थिता यथोक्तं तत्रैव । "निरक्षदेशात् क्षितिषोड़शांशे भवेदवन्ती गणितेन यस्मात् । तदन्तरं षोड़शसंगुणं स्याद्भूमानमस्मात् वद किं तदुक्त्या" । इंलण्डीयमानचित्रवेदिनस्तु सम सूत्रस्थानात् किञ्चिदन्तरपश्चिमस्थेति वर्ण्यन्ति । इयञ्च मोक्षपुरी "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" । पुरा० । भा० उ० प० जम्बुखण्डविभागे जनपदगणनायाम् "कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः" इति उक्तेरस्य जन-पदवाचितया इदन्तत्वाच्च ततो भवादौ अण् । आवन्त्यः तद्भवादौ त्रि० । बहुषु च तद्राजनि अण्स्य लुक् । अवन्तयः तद्देशवासिषु ब० व० । तद्देशरूपे च । स्वार्थे कन् अवन्तीनगर्य्यासु "काशीकाञ्ची अवन्तिका" पुरा० ।

अवन्तीपुर न० अवन्तिः पूः अच् समा० । अवन्तिनगरे उज्जयिन्याम् । [अवन्तिस्थे ब्राह्मणे ।

अव(न्ति)न्तीब्रह्म पु० अवन्तिषु ब्रह्मा अच् समा० ।

अव(न्ति)न्तीसोम पु० अवन्तिषु सोम इव । काञ्जिके ।

अवपन्न त्रि० अव+पद्–क्त । १संकटे २सङ्कटापके च "केशकी-टावपन्नञ्च यदा स्पृशेच्च कामतः" मनुः । "अवपन्नं संसर्गदूषितम्" कुल्लू० । "केशकीटावपन्नं च स्त्रीभिः स्पृष्टं तथैव च" हारी० अवपन्नं सङ्कटापकम् प्रा० त० रघु० ।

अवपाक पु० अव+अपकर्षे पच–घञ् । १अपकृष्टपाके । कर्म्मणि

घञ्। २अपक्वपक्वे। "त्वच उत्कर्त्तनसवपाकानां संव्रश्चम्" शत०ब्रा०।

अवपात पु० अव+पत–भावे घञ्। अधःपतने। पत–णिच्–भावे अच्। २पातने "शस्त्रावपाते गर्भस्य पातने "चोत्तमोदमः" या०स्मृ०। आधारे घञ्। ३गर्त्ते "अवपातस्तु हस्वार्थे गर्त्ते क्षुद्रे तृणादिना" इति यादवोक्ते गजधारणार्थे ४गर्त्तभेदे च "रोधांसि निम्नन्नवपातमग्नम्" रघुः

अवपाच त्रि०अवरं भोजनायोग्यं पात्रं यस्य। यस्य भोजनेन पात्रे दुष्टेऽन्यस्य भोजनायोग्यता भवति ताडशे पतितत्वेच्छादौ जने। [अवपात्रितशब्दार्थे।

अवपात्रित त्रि० अवपात्र+तृतीयार्थे णिच्–क्त। भिक्षोदकीकृते

अवपाद पु० अव+पद–घञ्। अधःपतने "देवावै आदित्याः स्वर्गाल्लोकादवपादादिभियुः" ता०ब्रा०।

अवपाशित त्रि०अवपाशः समन्तात् पाशोजातोऽस्य तारं०इतच्। पाशबद्धे "यस्यान्यैव हि कण्ठे त्वां कालपाशावपाशितम्" रा०

अवपीड त्रि०अवपीड्यति अव–पीड–अच्। १समन्तात् पीड़के "चिकित्साविशेषे पु०२वेगान्तेषु चावपीड़ं दद्यात्" सुश्रु० "प्रतिमर्शोऽवपीड़श्च नस्यं प्रधमनं तथा। शिरोविरेचनं चेति नस्यः कर्म्म च पञ्चधा" इति चक्रदत्तोक्ते ३नासिकाचिकित्साभेदे च। तल्लक्षणं तत्रैवोक्तं यथा "अवपीड्य दीयते यस्मादवपीड़स्ततस्तु सः। शोधनः स्नेहनस्य स्यादवपीड़ो द्विधा मतः" इति।

अवपीडन न० अव+पीड़–णिच् ल्युट्। १निष्पीड़ने। सुश्रुतोक्ते २पीड़नदोषभेदे "अतिपीड़िततां शिथिलपीड़िततामभूयोभूयोवपीड़नं कालातिक्रम इति चत्वारः पीड़नदोषाः"। युच्। अवपीड़ना निष्पीड़ने स्त्री "अङ्गावपीड़नायाञ्च व्रणयोनितयोस्तथा" सुश्रु०। [तीर्थे च।

अवप्लुत त्रि०अव+प्लु–क्त। समन्तात् सिक्ते १आर्द्रभूते २अव-

अवबन्ध पु० अवबध्यते आच्छाद्यते नेत्रवर्त्मानेन करणे घञ्। सुश्रुतोक्ते नेत्रवर्त्मान्यवे। "पृथग्दोषाः समस्ताश्च यदा वर्त्म व्यपाश्रयाः। शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिता" इत्युक्त्वा "उत्सङ्गिन्यथ कुम्भीका पोथिक्यो वर्त्मशर्कराः। तथार्शो वर्त्मशुष्कार्शस्तथैवाञ्जननामिका। बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः" इत्यादीन्युक्त्वा "न सम्यक्छादयेद्यत्ति भवेद्बन्धः स वर्त्मनः" इति लक्षिते १रोगभेदे वर्त्मावबन्ध इत्येकं नामेत्युचितम्। भावे घञ्। समन्तात् २बन्धने च। [बन्धे च।

अवबाधा स्त्री अव+बाध–अ। १समन्तात् बाधायां २प्रति-

अवबाहुक पु० अवबद्धो बाहुर्यत्र प्रा०ब०। सुश्रुतोक्ते वायुरोगभेदे यथा "अंसदेशस्थितोवायुः शोषयित्वांसबन्धनम्। शिरास्नाकुञ्च्य तत्स्थो जनयत्यवबाहुकम्"। [ज्ञातरि।

अवबुद्ध त्रि० अव+बुध–कर्म्मणि क्त। १ज्ञाते कर्त्तरि क्त।

अवबोध पु०अव+बुध–भावे घञ्। जागरणे। "यौ तु स्वभाव बोधौ तौ भूतानां प्रलयोदयौ" मनुः। २ज्ञानमात्रे च "स्वभर्तुर्नामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः" रघु०"भावावबोधकलुषा दयितेव रात्रौ" रघु०। प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते" सा०द०।

अवबोधक पु०अवबोधयति अव+बुध–णिच्–ण्वुल्। १अर्के। २पाणां निद्राभङ्गकारके ३स्तुतिपाठकादौ च ४ज्ञापके त्रि०।

अवबोधन न०अव+बुध–णिच्–ल्युट्। ज्ञापने। "स्वेतरार्थानच्छिन्नयत्स्वार्थस्यावबोधने" शब्दशक्ति०।

अवभर्ज्जित त्रि०अव+भ्रस्ज–क्त भर्ज्जादेशः। १भृष्टे २दग्धे च।

अवभाषण न० अव+भाष–ल्युट्। कथने "व्यापारान्तरसक्तस्यथावभाषणविलोकनादिकरो" सा०द०।

अवभास पु० अव+भास–भावे घञ्। १ज्ञाने २प्रकाशे अन्यस्य अन्यरूपेण प्रकाशरूपे ३मिथ्याज्ञाने च।

अवभासक त्रि० अवभासयति अव+भास–णिच् ण्वुल्। १प्रकाशके सर्व्वावभासकेकूटस्थे चैतन्ये न०। "यस्य भासा सर्व्वमिदं विभाति" श्रुतेः "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" गीतोक्तेश्च तस्य सर्व्वावभासकत्वम्।

अवभासित त्रि०अव+भास+णिच्–कर्म्मणि क्त। प्रकाशिते।

अवभृथ पु० अव+भृ–क्थन्। सुख्ययज्ञसमाप्तौ क्रियमाणे १यज्ञशेषकर्म्मणि, यज्ञाङ्गभूते यज्ञान्ते कार्य्ये २स्नाने च। "नावभृथं सरस्वत्याम्" कात्या०२४,६,२२, "सरस्वत्यां नावभृथं कुर्य्यात्" कर्कः "परिप्लवेषूदकेषु" "असत्स्फुल्य ततः" कात्या० २४,६,२३,२४ "महति पात्रे कटाहादौ" कर्कः। अवभृथस्नानविधिश्च तैत्तरीयब्राह्मणे २अष्टके ६अ०६अनु०, "यद्देवा देवहेड़नम्" इत्यारभ्य "समिदसि जगन्नीषि "चेत्यनुवाकपर्य्यन्ते उक्तः। "स्नातवत्यवभृथे ततस्त्वयि" माघः "सर्वैनोऽभृथस्नातो हयमेधे विमुच्यते"। "तथाऽश्वमेधावभृथस्नानाद्वा यद्विमाप्नुयात्"। या०स्मृ० "भुवं कोणेन कृष्णोष्णी मेध्येनावभृथादपि" "प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः" "स्नातरावबभृथाप्लुतो मुनिः" इति च रघुः।

अवभ्रट त्रि० अवनता नासिका प्रा०स० नतार्थे नासिकाया-

भटादेशः अस्त्यर्थे अच् । अवनतनासिके (खांदा) ।

अवम त्रि० अव+अमच् । १रक्तके २पितृगणभेदे पु० "अवमैस्तु जर्व्वैः काव्यैस्ते पितृभिर्भक्षितस्य मधुमतोनाराशंसस्य" ता० ब्रा० "त्रिविधाः पितरः अवमाः जर्व्वाः काव्याश्चेति अनुसवनं नाराशंसदेवताः । हे सोम ! अवमैः रक्तकैः एतत्संज्ञकैः पितृभिः" भा० । अपादानेऽमच् । ३पापे ४तद्वति ५कृत्सिते च त्रि० । अवोभवः अवस्ताद्भवः "अवोऽधसोर्लोपश्चेति" मः अन्त्यलोपः । ६अधमे त्रि० "अनलकानलकानमवमां पुरीम्" रघुः । "या त ऊतिरवमा या परमा" ऋ० ६,२५,१,"उतावमस्य पुरुहूत बोधि" ऋ० ६, २१,५ "प्रकृतानां सावनानाञ्चान्द्राणाञ्चान्तरमवमानीच्यते सावनदिनेभ्यश्चान्द्राहा यावद्भिरधिकास्ते दिनक्षयाहा" इति च प्रमिताक्षरोक्ते ७दिनक्षये न० । तदानयनप्रकारश्च सि० शि० "शशाङ्कमासोनितसावनेन ०,२८,१० लिंशद्धृताः लब्धदिनैस्तु चान्द्रैः । रुद्रांशकोनाब्धिरसैः ६२,५४,३३ क्षयाहः, स्यात् सावनोऽतश्च युगेऽनुपातात्" । युगे चान्द्राणां सावनानां च यदन्तरं तान्यवमानि । तत्र एकस्मिन् मासे चान्द्रसावनान्तरं कृदिनात्मकं गृहीतम् । तत्र दिवसः शून्यम् अष्टाविंशतिर्घटिकाः दश पानीयपलानि ०,२८,१० इदमेकस्मिन् चान्द्रमासे त्रिंशत्तिथ्यात्मके कृदिनात्मकसवसखण्डम् । यदनेन ०,२८,१०, त्रिंशद्दिनानि चान्द्राणि लभ्यन्ते तदा संपूर्णैरेकेनावमेन कियन्तीति त्रैराशिकेन लब्धैः रुद्रांशकोनाब्धिरसैः ६३,५४,३३ एकः क्षयाहो भवति स च सावनः एवं कल्पेऽपि अनुपातात् । "सावनान्यवमानि स्युश्चान्द्रेभ्यः साधितानि चेत् । सावनेभ्यस्तु चान्द्राणि तच्छेषं तद्वदाचरेत्" इति सि० शि० । कल्पेऽवमप्रमाणञ्च दर्शितं तत्रैव । "दिनक्षयास्तत्र सहस्रनिघ्नाः खवाणवाणाब्धिखेषुदस्राः" २५०८२५५०००० । अन्तरं तरणिचन्द्रचक्रजं यद्भवेत् स विधुमाससंचयः । चन्द्रचक्रदिवसैक्यमूनितं चन्द्रमासभदिनैर्दिनक्षयाः" "अथ चन्द्रचक्रदिनैक्ये चन्द्रमासभदिनैक्येन वर्ज्जिते क्षयाहाः स्युः । अत्र वासना । चन्द्रभगणा रविभगणैरूनाश्चान्द्रमासाः स्युः अतो विपर्य्यया चान्द्रमासोनाश्चन्द्रभगणा रविभगणा भवन्ति तैरूना भभमाः सावना दिवसा भवन्ति । चान्द्राहाः क्षयाहा भवन्ति" ग्रमिता० । "तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनम्" ज्योति० त०

अवमत त्रि० अव+मन–क्त । १अवज्ञाते २तिरस्कृते च ।

अवमताङ्कुश पु० अवमतोऽङ्कुशस्तत्प्रहारतोऽस्य । दुर्दान्ते गजे ।

अवमति स्त्री अव-मन भावे क्तिन् । १अवज्ञायाम् २अनादरे २तिरस्कारे च । [वमा तिथिः" ज्योतिषोक्ते दिनक्षये ।

अवमतिथि स्त्री कर्म्म० । "स्युस्तिस्रस्तिथयो यत्रे एकस्मिन्न

अवमदिन न० कर्म्म० । "तिथ्यन्तद्वयमेकोदिनवारो यत्र तद्भवत्यमवदिनम्" ज्योतिषोक्ते दिनक्षये ।

अवमन्तव्य त्रि० अव+मन–तव्य । १अवज्ञेये २अनादरणीये– "बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः" मनुः ।

अवमन्तृ त्रि० अव+मन–तृच् स्त्रियां ङीप् । १अवज्ञातरि- २तिरस्कर्त्तरि च ।

अवमन्थ पु० अवमथ्नाति अव+मन्थ–अच् । सुश्रुतोक्ते पानीयस्थे उपद्रवरूपे १रोगभेदे "अतऊर्द्ध नामलिङ्गे वक्ष्ये पास्यास्य पद्रवान् । उत्पाटकश्चोत्पुटकः स्यावः कण्डूयुतो भृशम् । अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथेति" । "प्रलेपनमिदं दद्याद्वसिच्या वमन्थके" सुश्रु० । तत्रोक्ते शूकदोषनिमित्ते २व्याधिभेदे च यथा "लिङ्गदृङ्मिच्छतामक्रम प्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते तद्यथा सर्षिका अष्ठीलिका ग्रथितं कुम्भीका अलजी वृद्दितं सम्मूढपिडका अवमन्थ" इत्युपक्रम्य । "दीर्घा वङ्क्षण पिडका दीर्यन्ते मध्यतस्तु याः । सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत्" तत्रैव लक्षितः । "अवमन्थे गते पाकं भिन्ने तैलं विधीयते" सुश्रु० । ३अवमन्थनकारके त्रि०

अवमर्द पु० अव+मृद–घञ् । १पीडने । "सच स्वमासाद्य रणावमर्दम्" रामा० २राज्याङ्गभेदे "अवमर्दः प्रतीघात स्तथा चैव बलीयसाम्" इति भा० शा० राजधर्म ।

अवमर्ष पु० अव+मृष–घञ् । १आलोचनायाम्, "सुखं प्रतिसुखं गर्भोऽवमर्ष उपसंकृतिः । इति पञ्चास्य भेदाः स्युः" इत्युपक्रम्य "यत्र सुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः । शापाद्यैः सान्तरायश्च सोऽवमर्षः" इति रूपतः सा० द० लक्षिते २नाटकस्य सन्ध्यंगभेदे च । विमर्ष इति पाठान्तरम् ।

अवमान पु० अव+मन–भावे घञ् । १अवज्ञायाम् २अनादरे च "अक्षतस्येव चाक्षाङ्गे दवमानस्य सर्व्वदा" मनुः ।

अवमानना स्त्री अव+चुरा० मन–युच् । अपमानकरणे "तत्त्वज्ञानादृषीणामदेर्निर्वेदः स्यावमानना" सा० द० । भावे ल्युट् । अवमानन तत्रैव न० निर्वेदः स्यावमाननम्" हेमच० ।

अवमानित त्रि० अव+चुरा० मन–क्त । १कृतापमाने २ज्ञतानादरे च विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता" सा० द० ।

अवमानिन् त्रि० अव+मन-णिनि स्त्रियां ङीप्। अवज्ञातरि २अनादरणीये च "धिङ्मामनुपनतस्त्रेयोऽवमानिनम्" शकुन्तला। [२अनादरणीये च।

अवमाननीय त्रि० अव+चु०-मन-अनीयर्। १अवज्ञेये

अवमान्य त्रि० अव+मन-ण्यत्। १अवज्ञेये २तिरस्कार्य्ये च सानुक्राध्याधिवेत्तव्या नावमान्या च कर्हिचित्" मनुः अव+चु०मन-ल्यप्। २अवज्ञायेत्यर्थे अव्य०।

अवमार्जन न० अव+मृज-भावे ल्युट्। १प्रक्षालने करणे ल्युट्। २तत्साधने जलादौ "इमा ते वाजिन्नवमार्ज्जनानाम्" ऋ० १,१६३,५, "अवमार्ज्जनानि अङ्गप्रक्षालनसाधनान्युदकानि" भा०।

अवमूर्द्धन् त्रि० अवनतो मूर्द्धाऽस्य। अवनतमस्तके।

अवमूर्द्धशय पु० अवमूर्द्धा सन् शेते शी-अच्। अधोमुखतया शायिनि मनुष्ये। "उत्तानशयादेवा अवमूर्द्धशया मनुष्याः" श्रुत्युक्तेः गर्भादौ तथाशयनाद्वा नरस्य तथात्वम् २तथाभूततया शायिमात्रे त्रि०। [उन्मोचने।

अवमोचन न० अव+मुच-भावे ल्युट्। बन्धनराहित्ये

अवमोटन न० अव+मुट्-णिच्-ल्युट्। (मोचड़ान) परिवर्त्तनेनान्यथापादनरूपे परिमोटने।

अवयजन न० अव+यज-गतौ करणे ल्युट्। अपगमसाधने "देवकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमस्यात्मकृतस्यैनसोऽवयजनमसि यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि यत् स्वपतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि यद्दिद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमस्यैनसएनसोऽवयजनमसि" ताण्ड्यब्रा० "अवयजनम् अपगमनसाधनम्" भा०।

अवयव पु० अवयूयते कार्य्यद्रव्येण संबध्यते अव+यु-कर्मणि अप्। १द्रव्यारम्भके द्रव्ये "यथा परमाणुः द्व्यणुकं द्व्यणुकस्तत्तरेणुमारभते इत्यादिक्रमेण अन्त्यावयविपर्य्यन्तानि सर्व्वाणि द्रव्याणि स्वाश्रिततया अवयविद्रव्यान्तरमारभन्ते "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्" वै०सू० उक्तेः। अन्त्यावयविविभुद्रव्याणि विहाय द्रव्याणां सजातीयद्रव्यान्तरारम्भकत्वं तदर्थः अन्त्यावयवी नित्यद्रव्यं च न कस्यचिदारम्भकम्। आरम्भकद्रव्येच द्रव्यान्तरस्य समवायेनाऽवस्थित्याऽवयरत्वम्। आरम्भकद्रव्यञ्च उपादानकारणतया समवायिकारणतया च व्यवह्रियते अधिकमवयविशब्दे वक्ष्यते "अनित्या च तदन्या स्यात् सैवावयवयोगिनी" भाषा०। अवच्छिन्नपरिमाणवत्त्वम् अवयवत्वमिति केचित् प्रतिपेदिरे तन्न सम्यक्, घटादौ अवच्छिन्नपरिमाणवत्त्वेन तत्वातिव्याप्तेः किन्तु द्रव्यारम्भकद्रव्यत्वमेवावयवत्वम्। यु अमिश्रणे अप्। २देहे "तस्मान्नावयविततया द्रव्यान्तरानारम्भकत्वेन इतरद्रव्यसमवायशून्यत्वात् तथात्वम् ३हस्तादिषु देहावयवत्वात्तेषामवयवत्वम्। ते च प्राधान्येन पञ्च सुश्रुते दर्शिताः ७२ पृष्ठे अङ्गशब्दे उक्ता'। अङ्गप्रत्यङ्गानि च सूक्ष्मरूपेण गर्भे एव उत्पद्यन्ते क्रमशो विवर्द्धमानानि दृश्यन्ते यथोक्तं सुश्रुते "सर्व्वाङ्गप्रत्यङ्गानि युगपत् सम्भवन्तीत्याह धन्वन्तरिः गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्च तदुपलब्धिः फलवच्च तद्यथा चूतफले परिपक्वे केशरमासांस्थिमज्जानः प्रत्यक् दृश्यन्ते कालप्रकर्षात्, तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्। तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति एतेनैव वंशाङ्कुरोऽपि व्याख्यातः एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गेषु सत्स्वपि सौक्ष्म्यात्तदनुपलब्धिः। तान्येव कालप्रकर्षात् प्रव्यक्तानि भवन्ति"। अधिकं गर्भशब्दे वक्ष्यते। "तृतीये तु मासेऽङ्गैरिन्द्रियैश्च संयुक्तो भवतीत्याह, क्रियासु व्यक्ताङ्गतापरा। ४समुदायस्य एकदेशे "पदे न वर्णाविद्यन्ते वर्णेष्ववयवा न च" भर्त्तृहरिः "क्षणाहोरात्रावयवाः" भा०। "क्रियाहि नामेयमत्यन्तापरिदृष्टा पूर्व्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्" फ०भा०। "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पितभेदः क्रियेति व्यवदिश्यते" वाक्यप०। एकदेशाभिप्रायेणैव नास्तिकादीनां मते परमाण्वादौ अवयवव्यवहारः तैः परमाणुपुञ्जस्यैव घटादिरूपतास्वीकारात्। न्यायादिमतसिद्धपरार्थानुमानसाधनेषु ५वाक्येषु च। ते चावयवाः पञ्च इति बहवः तत्र दृश्यन्ते। यथा प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः पञ्च, प्रतिज्ञाहेतूदाहरणरूपाः हेतूदाहरणोपनयरूपा वा मतभेदेन त्रयः। यथा पर्व्वतो वह्निमान्, धूमात्, योयोधूमवान् स वह्निमान् यथा महानसम्, वह्निव्याप्योधूमो धूमवांश्चायम् तस्माद्वह्निमान्। प्रतिज्ञादीनां लक्षणानि च तत्तच्छब्देवक्ष्यन्ते उपचारात् तत्प्रतिप्रतिपादके चिन्तामणिकृते अनुमानखण्डान्तर्गते ६ग्रन्थे। ७उपकरणमात्रे च।

अवयविन् त्रि० अवयवः कारणत्वेनाऽस्यास्ति इनि। अवयवजन्ये द्रव्ये। अवयवित्वं च कार्य्यद्रव्यत्वम्। तच्च नैयायिकादिभिरवयवाद्भिन्नतया उत्पद्यते इत्युरीकृतम्। तत्र युक्ता० प्रमाणमधुपन्यस्तम् "ननु अवयविनि किं मानं ? परमाणुपुञ्जैरेवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्ष न स्यादिति वा-

च्यम् एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वम् । न च एकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः, नैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात् । न च तदानीमदृश्यपरमाणुपुञ्जात् दृश्यपरमाणुपुञ्जस्योत्पत्तत्वात् न प्रत्यक्षत्वे विरोध इति वाच्यम् अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरुन्मादिसन्ततौ कदाचिद् दृश्यत्वप्रसङ्गात् । न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेः दृश्यदहनोत्पत्तिरिति वाच्यं तत्र तदन्तःपातिभिः दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात् । न च अदृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति ? वाच्यम् । यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षं न तु द्व्यणुकादेः तदभावात् न हि तन्ततेऽपीदं सम्भवति परमाणौ महत्त्वाभावात् दृश्यं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयविधारायाश्चानन्त्ये मेरुसर्षपयोरपि साम्यप्रसङ्गः । अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे त्वत्समवेतकार्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्ति इति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं त्रसरेणु सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तद्द्वयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महद्वयवत्त्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकम् अपकृष्टमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेः" । अख्यातञ्चैतत् दिनकर्यां । 'बौद्धः षड्भते नन्विति नन्वयं घटइत्यादि प्रतीतिरेव तत्र प्रमाणं भविष्यतीत्यत आह परमाणुपुञ्जैरेवेति विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः उपपत्तेरिति अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः । तत्समूहस्य परमाणुसमूहस्य । तत्र दृष्टान्तमाह यथेति । तत्समूहस्य केशसमूहस्य । अनुपपत्तिरिति परमाणुविषयत्वादिति शेषः उपपत्तेरिति तत्र यथा धान्यसमूहस्यैकत्वादेक इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वात्मकतया महानिति प्रतीतिस्तथा परमाणुपुञ्जेष्वपीति भावः । प्रत्यक्षायोग्यत्वादिति तथाच स्वभावतोऽयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न सम्भवतीति भावः । दूरस्थकेशस्तु स्वभावतो नातीन्द्रिय इति त्वदुक्तदृष्टान्तस्य वैषम्यमित्याह दूरस्थकेशस्येति तस्य दूरस्थस्य केशस्य । तस्यैवेति एवकारश्च प्राक्तनसन्निधानपदेनान्वेति तथाच सन्निधान एव तस्य प्रत्यक्षत्वादित्यर्थः तथाच दूरत्वस्य प्रतिबन्धकत्वात्तद्भायायाम् अप्रत्यक्षत्वमात्रं तस्य, न तु स्वाभाविकाप्रत्यक्षत्वमिति भावः । उत्पन्नत्वादिति क्षणभङ्गवादिनां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः । अन्यथा अदृश्यस्य दृश्योत्पादकत्वे । तत्र तादृशदहनोत्पत्तिस्थले) । तदन्तःपातिभिः अतितप्ततैलान्तःपातिभिः । स्वभावात् कारणैरपेक्षात् उद्भूतरूपादीति आदिनालोकादिपरिग्रहः । तदभावे महत्त्वोद्भूतरूपाद्यभावे महत्त्वाभावादित्यर्थः । अत्र नास्तिकमतानुयायिनः परस्परविभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेऽपि परस्परसंयुक्तानां पुञ्जात्मनान्तेषां प्रत्यक्षे बाधकाभावः नच महत्त्वाभावएव बाधकः परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात् नच परमाणूनां नित्यत्वाद्घटादावुत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरिति वाच्यम् तन्ततेः पदार्थमात्रस्यैव क्षणिकत्वात् परमाणूनामुत्पत्तिनाशयोः स्वीकारात् नच परमाणुपुञ्जेषु घटत्वाङ्गीकारे कपालाद्घट इति प्रतीतेरनुपपत्तिः परमाणूनां कपालजन्यत्वाभावादिति वाच्यं तन्ततेः कपालस्यापि परमाणुपुञ्जरूपतया घटरूपपुञ्जेषु कपालरूपपुञ्जजन्यत्वस्वीकारात् पुञ्जात् पुञ्जोत्पत्तिरिति तेषां सिद्धान्तादित्याहुः, तद्घट इत्यादिप्रतीतिविषयतायां अनेकपरमाणुषु कल्पने गौरवात् अवयवातिरिक्तावयविसिद्धिरिति दिक् । मेरुसर्षपयोरपीति अपिशब्दः साम्यप्रसङ्ग इत्युत्तरं सम्बध्यते तेन च द्व्यणुकस्य सावयवारम्भत्वे महत्त्वापत्तिः समुच्चीयते साम्यं परिमाणतारतम्याभावः परिमाणकारणीभूतायां अवयवसंख्यायां उभयत्र साम्यादिति भावः । नच मेर्ववयवानां न सर्षपतुल्यपरिमाणवत्त्वं, सर्षपावयवानां च न मेर्ववयवतुल्यपरिमाणवत्त्वमित्यवयवपरिमाणविशेषाद्विशेष इति वाच्यम् मेर्ववयवसर्षपावयवयोरप्यनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्याप्यापादनीयत्वात् नच मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेष इति वाच्यम् प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्वि-

शेषानुपपत्तेरिति । ननु तथापि विश्रामाश्रयस्य नित्यत्वे मानाभाव इत्यत आह यत्र त्विति । असमवेतकार्य्योत्पत्ति प्रसङ्ग इति असमवेतभावकार्य्योत्पत्तिप्रसङ्ग इत्यर्थः । ननु तस्य नित्यत्वसिद्धावपि अणुत्वे किं मानमित्यत आह महत्परिमाणेति । चाक्षुषद्रव्यत्वादिति अवात्मनि व्यभिचारवाराय चाक्षुषपदं घटाभावे व्यभिचारवारणाय द्रव्यपदम् तदवयवसिद्धाविति त्रसरेण्ववयवसिद्धावित्यर्थः । तदसिद्धेरिति अवयवधारायां असिद्धेरित्यर्थः । अत्र नव्याः त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन त्रुटावेव विश्रामः नच चाक्षुषं प्रति महत्त्वं कारणं तथाच त्रुटौ महत्त्वमावश्यकं तच्चावयवसंख्याजन्यमिति अवयवं विना नोत्पद्यते इत्यनुकूलतर्कसत्त्वाद्व्यणुकसाधकानुमानमेति वाच्यम् त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात् नचाणुव्यवहारस्याणुपरिमाणनिबन्धनतया तदाश्रयद्रव्यसिद्धिराश्रयीकृतेति वाच्यम् तस्यापकृष्टपरिमाणनिबन्धनत्वात् महत्यपि महत्त्वमादाणुव्यवहारात् न चैवं त्रसरेणुप्रत्यक्षएवास्ववयवीति वाच्यम् विशकलितेष्वपि तेषु घट इत्यादिप्रत्यय प्रसङ्गात् नच तत्संयोगदृष्ट्यैव घटत्वं घटोद्रव्यमित्यादि प्रतीतौ च परम्परया तज्ज्ञानमिति वाच्यं सम्भवति साक्षात् सम्बन्धविषयत्वे परम्परासम्बन्धविषयकत्वकल्पने गौरवादित्याहुः । ननु परमाणुत्रयेण कृतो न द्रव्यान्तरोत्पत्तिः परमाणुद्वयेन द्व्यणुकवत् द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्त्यापत्तिस्त्रिभिर्द्व्यणुकैस्त्र्यणुकवदिति चेन्न प्रमाणाभावेन तादृशद्रव्यासिद्धौ परमाणुत्रये द्व्यणुकद्वये च द्रव्यारम्भकसंयोगाऽकल्पनात् । अत्रेदं चिन्त्यं त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारम्भे सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात् फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भसंयोगकल्पनात् वस्तुतो गवाक्षरन्ध्रे दृश्यमानानां द्व्यणुकत्वमेव युक्तमणुद्वयारब्धत्वे लाघवादिति"। अयमवयवी कारणात् भिन्नएव कार्य्यकारणयोरैक्याभावात् नियतपूर्ववर्त्तिन एव कारणतया कारणस्य प्राक्सत्त्वनियमेन कार्य्यस्य च तदाऽसत्त्वेन तयोर्भेदात् । अतएव "द्रव्याणि द्रव्यान्तरमारभन्ते" इति वै० सूत्रे अन्तरपदमुपात्तम् इति वैशेषिकादयः स्वीचक्रुः । सांख्यावेदान्तिनस्तु कार्य्यस्य कारणैक्यमेव स्वीचक्रुः तथाहि "तदनन्यत्वमारम्भणशब्दादिभ्यः" "युक्तेश्च यद्वान्तराञ्च" भा० सू० तद्भाष्ये चोक्तम् । "युक्तेश्च प्रागुत्पत्तेः कार्य्यस्य सत्त्व मनन्यत्वञ्च कारणाद्वगम्यते यद्वान्तराच्च । युक्तिस्तावद्दर्श्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृद्वर्णसृत्तिकादीन्युपादीयमानानि लोके दृश्यन्ते न हि दध्यर्थिभिर्मृत्तिकोपादीयते न घटार्थिभिः क्षीरम् । तच्चासत्कार्य्यवादे नोपपद्यते । अविशिष्टे हि प्रागुत्पत्तेः सर्वत्र सर्व्वस्यासत्त्वे कस्मात् क्षीरादेरेव दध्युत्पद्यते न मृत्तिकायाः, मृत्तिकाया एव घट उत्पद्यते न क्षीरात् । अथाविशिष्टेऽपि प्रागसत्त्वे क्षीरएव दध्नः कश्चिदतिशयो न मृत्तिकायां, मृत्तिकायामेव घटस्य कश्चिदतिशयो न क्षीरेइत्युच्येत तर्ह्यतिशयवत्त्वात् प्रागवस्थाया असत्कार्य्यवादहानिः सत्कार्य्यवादसिद्धिश्च । शक्तिश्च कारणस्य कार्य्यनियमार्था कल्प्यमाना नान्याऽसतो वा कार्य्यं नियच्छेत् असत्त्वाविशेषादन्यत्वाविशेषाच्च । तस्मात् कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम् । अपिच कार्य्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगन्तव्यम् । समवायकल्पनायामपि समवायस्य समवायिभिः सम्बन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्यः इत्यनवस्थाप्रसङ्गः अनभ्युपगम्यमानेऽत्र विच्छेदप्रसङ्गः । अथ समवायः स्वयं सम्बन्धरूपत्वादनपेक्ष्यैवापरं सम्बन्धं सम्बध्यते, संयोगोऽपि तर्हि स्वयं सम्बन्धरूपत्वादनपेक्ष्यैव समवायं सम्बध्येत । तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम् । कथञ्च कार्य्यमवयविद्रव्यं कारणेष्ववयवेषु वर्त्तमानं वर्त्तते किं समस्तेष्ववयवेषु वर्त्ततउत प्रत्यवयवम् । यदि तावत् समस्तेषु वर्त्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत, समस्तावयवसन्निकर्षस्याशक्यत्वात् नहि बहुत्वं समस्तेष्वाश्रयेषु वर्त्तमानं व्यस्ताश्रयग्रहणेन गृह्यते । अथावयवशः समस्तेषु वर्त्तेत तदाऽऽरब्धकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन् तैरवयवैरारब्धकेष्ववयवश्यवयवी वर्त्तेत । कोशावयवव्यतिरिक्तैर्हि वयवैरसिः कोशं व्याप्नोति । अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्त्तयितुमन्येषामन्येषामवयवानां कल्पनीयत्वात्।अथ प्रत्यवयवं वर्त्तेत तत्रैकत्र व्यापारेऽन्यात्राव्यापारः स्यात् न हि देवदत्तः खुड्गे सन्निधीयमान स्तदृहरेव पाटलिपुत्रे सन्निधीयते युगपदनेकत्र दृश्यनेकत्व प्रसङ्गात् देवदत्तयज्ञदत्तयोरिव खुड्गपाटलिपुत्रनिवासिनोः। गोत्वादिवत् प्रत्येकं परिसमाप्तेरदोष इति चेन्न तथा प्रतीत्यभावात् । यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात् यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवमवय-

व्यपि प्रत्यवयवं प्रत्यक्षेण गृह्येत नचैवेवं नियतं गृह्यते । प्रत्येकं परिसमाप्तौ चावयविनः कार्य्येणाधिकारात्तस्य चैकत्वात् गृह्णेणापि स्तनकार्य्यं कुर्य्यात् उरसा च गृहकार्य्यं, न चैवं दृश्यते । प्रागुत्पत्तेश्च कार्य्यसत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात् । उत्पत्तिश्च नाम क्रिया सा सकर्तृकैव भवितुमर्हति गत्यादिवत् । क्रिया च नाम स्यादकर्तृका चेति विप्रतिषिद्धेयत । घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किन्तर्ह्यन्यकर्तृकेति कल्पा स्यात् तथा कपालादीनामप्युत्पत्तिरुच्यमानान्यकर्तृकैव कल्पेत तथा च सति घट उत्पद्यते इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात् न च लोके घट उत्पद्यत इत्युक्ते कुलालादय उत्पद्यमानाः प्रतीयन्ते उत्पन्नताप्रतीतेश्च । अथ स्वकारणसत्ता सम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्य्यस्येति चेत् कथमलब्धात्मकं सम्बध्येतेति वक्तव्यं, सतोर्हि द्वयोः सम्बन्धः सम्भवति न सदसतोरसतोर्वा । अभावस्य च निरुपाख्यत्वात् प्रागुत्पत्तेरिति मर्य्यादाकरणमनुपपन्नम् । सतां हि लोके क्षेत्रगृहादीनां मर्य्यादा दृष्टा नाभावस्य । न हि बन्ध्यापुत्रो राजा बभूव प्राक् पूर्ब्बवंशोऽभिषेकादित्येवं जातीयकेन मर्य्यादाकरणेन निरुपाख्यो बन्ध्यापुत्रो राजा बभूव भवति भविष्यतीति वा विशेष्यते । यदि च बन्ध्यापुत्रः कारकव्यापाराद्ऊर्द्ध्वमभविष्यत् तत इदमप्युपपद्यत कार्य्याभावोऽपि कारकव्यापाराद्ऊर्द्ध्वं भविष्यतीति । वयन्तु ब्रूमो बन्ध्यापुत्रस्य कार्य्याभावस्य चाभावत्वाविशेषात् यथा बन्ध्यापुत्रः कारकव्यापाराद्ऊर्द्ध्वं न भविष्यति एवं कार्य्याभावोऽपि कारकव्यापाराद्ऊर्द्ध्वं न भविष्यतीति । तच्चैवं सति कारकव्यापारोऽनर्थकः प्रसज्येत, यश्चैव हि प्राक्सिद्धत्वात् कारणस्य स्वरूपसिद्धये न कश्चिद्व्यापृयते एवं प्राक्सिद्धत्वात् तदनन्यत्वाच्च कार्य्यस्वरूपसिद्धयेऽपि न कश्चिद्व्यापृयेत व्यापृयते च, अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्य्यस्येति । नैष दोषः यतः कार्य्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते । कार्य्याकारोऽपि कारणस्वात्मभूत एव अनात्मभूतस्यानारभ्यत्वादित्यभाणि । न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति न हि देवदत्तः सङ्कोचितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात् । यथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम माता मम भ्रातेति प्रत्यभिज्ञानात् । जन्मोच्छेदानन्तरित्वाच्चेत तत् युक्तं नान्यतेति चेन्न क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात् । अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामयवयवशाददर्शनापत्तावुच्छेदसंज्ञा । तत्तेदृगुजन्मोच्छेदान्तरितत्वेन चेदसतः सत्त्वापत्तिः सतश्चासत्त्वापत्तिः तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः । तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः पित्रादिव्यवहारलोपप्रसङ्गश्च । एतेन क्षणभङ्गवादः प्रतिपादितव्यः । यस्य पुनः प्रागुत्पत्तेरसत् कार्य्यं तस्य निर्व्विषयः कारकव्यापारः स्यात् अभावस्य विषयत्वानुपपत्तेः आकाशस्याहननप्रयोजनखड्गाद्यनेकायुधप्रसक्तिवत् । समवायिकारणे व्यापारः कारकव्यापारिः स्यादिति चेन्न अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरति प्रसङ्गात् । समवायिकारणस्यैवात्मातिशयः कार्य्यमिति चेन्न अतस्तर्हि सत्कार्य्यापत्तिः । तस्मात् क्षीरादीन्येव दध्यादिद्रव्यादिभावेनावतिष्ठमानानि कार्य्याख्यां लभन्त इति न कारणादन्यत्कार्य्यं वर्षशतेनापि शक्यं कल्पयितुम् । तथा च मूलकारणमेवान्त्यात्कार्य्यात् तेन तेन कार्य्याकारेण नटवत् सर्व्वव्यवहारास्पदत्वं प्रतिपद्यते । एवं युक्तेः कार्य्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वञ्च कारणादवगम्यते । शब्दान्तराच्चैतदवगम्यते । पूर्ब्बसूत्रे असद्व्यपदेशिनः शब्दस्योदाहृतत्वात्ततोन्यः सद्व्यपदेशी शब्द शब्दान्तरः "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादि । "तद्धैक आहुरसदेवेदमग्र आसीदिति" चासत्पक्षमुपक्षिप्य "कथमसतः सज्जायेत?" इत्याक्षिप्य "सदेव सोम्येदमग्रआसीत्" इत्यवधारयति । तत्तेदं शब्दवाच्यस्य कार्य्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिद्धयतः यदि तु प्र । गुत्पत्तेरसत्कार्य्यं स्यात् पश्चाद्योत्पद्यमानं कारणे समवेयात् तदन्यत्कारणात् स्यात् तत्र "येना श्रुतं श्रुतं भवतीयं प्रतिज्ञा हीयेत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते" भा० । "घटवच्च" शा०सू० । यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किञ्चान्यद्द्रव्यमिति स एव प्रसारितो यत् संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते स एव प्रसारणसमयेऽपि विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादयं भिन्नः पटः इति । एवं तन्त्वादिकारणावस्थं पटादि

कार्यमस्ति सत् तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं सत् वस्त्रं वर्तते ॥ ततः सवेष्टितपटप्रसारितपटन्यायेनानन्यत् कारणात् कार्यमित्यर्थः" भा०। सां०कौ० कारणात् कार्यस्यानन्यता दर्शिता यथा "कार्यस्य कारणाभेदसाधकानि च प्रमाणानि । न पटस्तन्तुभ्यो भिद्यते तद्धर्मत्वात् इह यद्यतो भिद्यते तत्तस्य धर्मो न भवति यथा गोरश्वस्य। धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम् । उपादानोपादेयभावाच्च नार्थान्तरत्वम् । नाथयोरुपादानोपादेयभावः यथा घटपटयोः उपादानोपादेयभावश्च तन्तुपटयोः । तस्मान्नार्थान्तरत्वमिति । इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावात् । पदार्थान्तरत्वे हि संयोगोऽदृष्टो यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः" नचेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वमिति । इतश्च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्यानुपलब्धेः । इह यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वान्तरकार्यं दृश्यते यथैकपलिकस्य खलिकस्य वा गुरुत्वकार्योन्नतिविशेषोऽधिकः न च तथा तन्तुगुरुत्वकार्यात् पटगुरुत्वस्य कार्यान्तरं दृश्यते तस्मादभिन्नस्तन्तुभ्यः पट इति । तान्येतान्यवीतान्यभेदसाधनानि । तदेवमभेदे सिद्धे तन्तव एव तेन तेन संस्थानभेदेन परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः । स्वात्मनि क्रियानिरोधबुद्ध्यिपदेशार्थक्रियाक्रियाव्यवस्थाभेदाच्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात् । यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्मात् मृदः सुवर्णस्य वा घटसुकुटादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतोत्पादः सतां वा निरोधः । यथाह भगवान् कृष्णद्वैपायनः "नासतोविद्यते भावो नाभावो विद्यते सतः" इति यथा कूर्मः स्वावयवेभ्यः सङ्कोचविकाशिभ्यो न भिन्नः एवं घटसुकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः । एवञ्चेत् तन्तुषु पटइति व्यपदेशो यथेह वने तिलका इत्युपपन्नः । न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः प्रकाशकः पाचकश्चेति । नार्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विप्रुषो वर्त्मदर्शनलक्षणामार्थक्रियां कुर्वन्ति न तु शिविकां वहन्ति मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति । स्यादेतत् आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन्वा असंश्चेत् प्राप्तं तर्ह्यसत उत्पादनम् । अथ सन्, कृतं तर्हि कारणव्यापारेण । न हि सति कार्ये कारणव्यापारप्रयोजनं पश्यामः । आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः । तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः । अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सतो असतो वा, सतो चेत् कृतं तर्हि कारणैः, असतो चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था । अथोत्पत्तिः पटाद्यर्थान्तरम् अपि तु पटएवासौ तथापि यावदुक्तं भवति पटइति तावदुक्तं भवत्युत्पद्यत इति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् । तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वकारणसत्तासमवायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम् । न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियात्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारणत्वाभावात्" व्याख्यातञ्चैतद्भाभिस्तट्टीकायां यथा "तद्धर्मत्वात् तेषां तन्तूनां धर्मत्वात् अवस्थाविशेषात्मकत्वात् स्वसत्त्वनियतसत्ताकत्वाद्वा । तत्सत्त्वनियतसत्ताकत्वरूपहेतुमध्ये एवऽन्वयव्याप्तेः प्रवेशात् व्यतिरेकव्याप्तिं दर्शयति यत्यतोभिद्यते इत्यादि तथा च व्यापकस्य धर्मत्वाभावस्य निश्चया व्याप्यस्य भेदस्य निश्चयेरभेदसिद्धिरिति भावः । पक्षे धर्मत्वरूपहेतुसत्त्वप्रदर्शनाय उपनयरूपन्यायावयवमाह धर्मश्चेत्यादि । धर्मत्वं च प्रागुक्तम् । निगमयति तस्मान्नार्थान्तरमिति । अन्योऽर्थः पदार्थः अर्थान्तरं मयूरव्यंसकादित्वात् समासे लोपेवता । पटः तन्तुभ्यो न भिन्नः पदार्थः किन्तु अभिन्न एवेत्यर्थः । 'उपादीयते कार्यजननाय विशेषरूपेण गृह्यते इत्युपादानम् कार्यस्यानागतावस्थाविशेषाश्रयरूपं कारणं तदाश्रितसूक्ष्मावस्थापन्नं कार्यान्नूपादेयं तद्भावात् कार्यकारणविशेषरूपत्वादित्यर्थः तथा च कार्यस्यानागतावस्थाश्रयत्वमेवोपादानकारणत्वम्, तच्च अनागतावस्थापन्नकार्यरूपमेव अन्यस्य दुर्वचत्वात् अन्यथा सर्व एव सर्वकार्यजननाय उपादीयेरन् न च तथा उपादीयन्ते । उपादीयन्ते च पटादिजनाय तन्तवः न तु मृदादयः । न च प्रागभाव एव तस्य नियामकः, तस्य अभावत्वेन स्वतोविशेषकत्वाभावात्

प्रतियोग्युपरक्तस्य तस्य तथात्वकल्पनन्तु प्रतियोग्यसत्त्वकाले ऽसम्भवात् उत्पत्तेः प्राक् प्रतियोगिनोऽसत्त्वेन तेन सह प्रागभावस्य संबन्धस्यानौचित्यात् इत्यनागतावस्थापन्नकार्यात्मकत्वमुपादानस्य युक्तम् तस्मात् पटः नः तन्तुभ्यो भिन्न इत्युपेयमिति भावः । संयोगाप्राप्त्यभावादिति। संयोगस्य अप्राप्तिः विभागस्य तयोरभावात् । तथा च संयोगाभावः विभागाभावस्य पृथक् अभेदसाधकः यथा पटस्तन्तुभ्यो न भिद्यते तत्संयोगानाश्रयत्वात् यद्यतो भिद्यते तयोः संयोगोदृष्टः यथा घटपटयोः । न च गुणेषु व्यभिचारः स्वमते तत्र तन्त्वभेदस्येष्टत्वात् द्रव्यत्वे सतीति हेतोर्विशेषणे च व्यभिचाराभावाच्च । अप्राप्तिर्वेति विभागस्चेत्यर्थ. तथा च संयोगानाश्रयत्वस्येव विभागानाश्रयत्वस्यापि अभेदसाधकत्वमिति भावः । गुरुत्वान्तरकार्यापेक्षणादिति । अयमाशयः। अवयवतन्तुपरिमाणेनैव तद्गुरुत्वेन स्वापेक्षयाधिकं महत्परिमाणमिव गुरुत्वम् जन्यते, गुरुत्वञ्च स्वपतन एव स्वाश्रितत्वुलादण्डादेरवनतिविशेषे हेतुरिति नैयायिकादिभिरभ्युपगम्यते । तत्र यदि पटस्तन्तुभ्योभिद्येत तदा तदाश्रितगुरुत्वविशेषेण स्वाश्रितत्वुलादण्डादेरवनतिविशेषोऽत्र गृह्येत यथा एकपलिकस्वर्णापेक्षया द्विपलिकस्वर्णस्य, तथा च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरप्रयुक्तस्वाश्रितत्वुलादण्डाद्यवनतिविशेषग्रहणायोग्यत्वात् गुरुत्वान्तरयुक्तस्वर्णादिवत् तुल्यगुरुत्वयुक्तपदार्थे व्यभिचारवारणाय ग्रहणायोग्यत्वादित्युक्तं तस्य च पृथक् त्वुलादण्डारोपणेऽवनत्यन्तरस्य ग्रहणसम्भवात् तन्तुपटयोश्च न तथासम्भव इति अभिन्नत्वमित्यन्यत्र विस्तरः।तन्तुगुरुत्वस्य कार्यं स्वाश्रितत्वुलादण्डादेरवनतिविशेषस्तस्मात् कार्यान्तरम् अवनत्यन्तरं न दृश्यते न गृह्यते इत्यर्थः । अवीतानि व्यतिरेकव्याप्तियुक्तानि यथा च तत्र तत्र व्यतिरेकव्याप्तिस्तथानुपदं तत्र तत्र दर्शितं प्राक् । पट इति बुद्धिविषयाः व्यपदेश्यभाजस्चेति शेषः । फलितमाह न तन्तुभ्योऽर्थान्तरमिति । अभेदसाधकहेतोः सत्प्रतिपक्षितत्वमाशङ्कते स्वात्मनीत्यादि । क्रिया उत्पादनक्रिया, निरोधः प्रध्वंसस्तयोर्बुद्धिः तथा च कार्यकारणयोरभेदे कार्यस्य कारणात्मकत्वेन स्वतः स्वस्योत्पत्तिविनाशयोरभावबुद्ध्यसम्भव इत्यर्थः । व्यपदेशः व्यवहारः अर्थक्रिया प्रयोजनोत्पादनं क्रियाव्यवस्था प्रावरणादिकार्यनियमः तेषां भेदः पश्चात्पुनर्वक्ष्यः । तथा च कार्यकारणयोरभेदे तन्तुषु पट इति कथं भेदव्यपदेशः? कथं वा प्रयोजनान्तरजनकता, ? प्रयोजनान्तरनियमश्च स्यादित्यर्थः । इत्यश्चात्र प्रयोगः पटस्तन्तुभ्यो भिद्यते तत्कार्यत्वेन, तन्त्र नष्टत्वेन वा प्रतीयमानत्वात्, तन्तुषु पट इति व्यपदेश्यप्रयोजकसंज्ञाभेदात्, विभिन्नार्थसाधकत्वात्, कार्यभेदवत्त्वाच्च । इति पञ्चभिर्हेतुभिः सत्प्रतिपक्षितोऽभेदसाधकहेतुर्नाभेदसाधनायालमित्याशङ्क्यार्थः । समाधत्ते नैकान्तिकमिति । ऐकान्तिकं वास्तवमित्यर्थः तथा च तत्र तत्रावास्तवत्वेव भेदव्यवहारो न वास्तवाभेदप्रतिबन्धीति भावः । एवञ्च बुद्धिमात्रस्य, व्यवहारमात्रस्य वा वास्तविकत्वप्रयोजकत्वे इदं रजतमिति बोधात् व्यवहाराच्च शुक्तिरजतस्यापि वास्तवत्वापत्तिः तथा अर्थक्रियाक्रियाव्यवस्थाभेदयोश्च न भेदसाधकत्वम् एकस्यैव वह्न्यादेः प्रकाशनपाचनादिरूपनानाकार्याणां, विष्टीनां व्यस्तानां मार्गदर्शनादिकार्यस्य समस्तानां तु शिबिकावाहनादिविभिन्नकार्यस्य च सम्पादनस्य दृष्टत्वात् तत्र तत्र हेतोर्व्यभिचाराच्च तयोर्भेदसाधकतेति न सत्प्रतिपक्षितत्वमभेदसाधकहेतोरिति भावः । तदेव क्रमश उपपादयति एकस्मिन्नपीति । प्रध्वंसन्ते नश्यन्ति । कूर्मेत इत्यनुषङ्गः अस्मिन् पक्षे च कूर्मे इत्यर्थः सार्वविभक्तिकः सप्तम्यास्तसिल् । यथाहेति भगवद्गीतायामितिशेषः । असतोऽसत्त्वाश्रयस्य, भावः सत्त्वम्, सतः सत्त्वाश्रयस्य न अभावः असत्त्वम् सदसतोरेकत्र समावेशाभावादिति शेषः । आपादयति व्यतिरेकव्याप्त्या साधयति तथा च प्रावरणादिक्रियाभेदः कारणभेदं विना अनुपपन्न इति व्यापकः प्रावरणादिप्रयोजनभेदाभावः निवर्त्तमानः व्याप्यं कारणभेदाभावं निवर्त्तयन् कार्यस्य कारणाद्भेदम् साधयतीत्यर्थः । इति यदुक्तं तदनूद्यनन्या दूषयित्वा तत्र हेतुप्रदर्शनाय व्यभिचारं दर्शयति एकस्यापीति तथा च कार्यभेदाभावः न कारणभेदाभावव्यापकः एकस्मिन् वह्न्यादौ नानाकार्यदर्शनात् तथा च भेदसाधकहेतुर्व्यभिचारीति भावः । एवम् भेदसाधकहेतुषु दूषितेषु इदानीं आविर्भावादेः सदसत्त्वे विकल्पेन दूषयितुं यतते स्वादेतदित्यादि । कृतमित्यव्ययम् अलमर्थकं कारणव्यापारेणेति तृतीयान्ते नान्वयि तथा च कारणव्यापारसाध्यं नास्ति तस्य स्वतएव सिद्धत्वादित्यर्थः । क्रियन्ते उत्पाद्यन्ते पटरूपेण व्यवह्रियन्ते इत्यपि बोध्यम् । यद्वि उभयवादिनोस्तुल्यदोषत्वं न तद्दूषणमित्याशयेन प्रतिबन्दिरूपदूषणदानायाह अथासदुत्पद्यत इत्यादि । उत्पत्तिः

आद्यक्षणसंबन्धः स च स्वरूपसंबन्धविशेषः न तु संयोगमात्रः गुणक्रिययोस्तदसम्भवात् तयोश्च उत्पत्तिव्यवहारस्य सर्व्वसिद्धत्वात्। प्रकृते स्वरूपसंबन्धविशेषश्च अनुयोगिस्वरूपएव एवञ्च उत्पत्तिः पटरूप एव नार्थान्तरमिति पटस्य उत्पत्तेः प्राक् असत्त्वात् तत्र कारणव्यापारापेक्षा भविष्यतीति शङ्कते अथोत्पत्तिरित्यादि। दूषयति तथापीति। पटादिशब्देन पटत्वविशिष्टस्येव उत्पत्तिमतोऽभ्युक्तत्वात् उत्पद्यते इति न प्रयोक्तव्यम् तद्वाच्यार्थस्योक्तत्वात् तदुक्तौ च पौनरुक्त्यात् घटो घट इतिवत् न तत्र शाब्दबोध इति भावः। पटादिशब्दस्य उत्पत्त्यर्थकत्वे दूषणान्तरमप्याह विनश्यतीत्यादि न वाच्यं प्रयोक्तुं न शक्यम् अयोग्यत्वादिति शेषः। पटशब्देन पटत्वविशिष्टस्येव उत्पत्तिमतोऽप्यभिधानात् उत्पत्तिमति चैकदा विनाशप्रतियोगित्वासम्भवेनायोग्यत्वादित्यर्थः। अयोग्यत्वे हेतुमाह उत्पत्त्यादीति एकत्र एकस्मिन् धर्म्मिणि युगपदेकदा विरोधात् सहानवस्थानात्। कालान्तरे भवितुमर्हतीति द्योतनाय युगपदिति। विनश्यतीति वर्त्तमानताप्रतीतेर्न विभिन्नकालता तयोरिति भावः। एवमुत्पत्तेः पटस्वरूपत्वाभावासम्भवसङ्गा अन्यरूपतास्वीकारेऽपि उत्पत्तेरुत्पत्त्यसम्भव एवेत्याह तस्मादित्यं पक्षोत्पत्तिरित्यादि। स्वकारणसमवायः स्वस्य कारणेषु तन्तुषु समवायः तत्संबन्धविशेषरूपा पटोत्पत्तिः। समवायस्य च सर्व्वदा विद्यमानत्वात् न तस्या उत्पत्तिः। समवायस्य नित्यत्वात् पटस्य कादाचित्कोत्पत्तिः कथं स्यादित्यतः पक्षान्तरमाह स्वसत्तासमवाय इति। स्वसत्तया स्वकारणे विद्यमानतया यः कारणे समवायस्तथा च स्वसत्ताकालिकत्वविशिष्टसमवायस्य पूर्व्वमसत्त्वान्न कादाचित्कत्वव्याघात इति भावः। उभयथापि उत्पत्तेरुभयरूपसम्भेऽन्यतरूपत्वेऽपीत्यर्थः न उत्पद्यते उत्पत्तिरिति शेषः। सिद्धस्वरूपत्वेऽपि सर्व्वजनानुभवसिद्धायाः कारणव्यापारापेक्षाया अनौचित्यस्य उभयमतेऽपि तुल्यत्वात् प्रतिबन्दिसमवधानमिति भावः। उत्पत्तेः कार्य्यस्य रूपेण सम्बन्धरूपतां शङ्कते न चेति। पटरूपस्य तन्तुरूपजन्यत्वात् तेन सह कारणानां संबन्धएव कार्य्यस्य उत्पत्तिस्तथा च तस्य जन्यत्वात् कारणव्यापारापेक्षेति न समानं दूषणमिति भावः। दूषयति रूपस्येति। रूपस्य भवन्मते गुणत्वेन क्रियारूपत्वाभावात् उत्पत्तेश्च क्रियारूपतायाः सर्व्वैरिष्यमाणत्वात् कारणानां च क्रियाजन्यत्वेनैव कारकत्वाभ्युपगमात्। तन्तुभ्यः पटउत्पद्यते इत्यादिषु च तन्त्वादीनामुत्पत्तिकारकत्वप्रतीतेश्च नोत्पत्तेः पटरूपसंबन्धरूपतेति" भावः।

अवयाज् पु० अव+यज–क्विप्। अपकृष्टयाजके संबुद्धौ अवयाः।

अवयाट त्रि० अव+या–क्विच्। पृथक् कर्त्तरि। "अदितिर्भवास्यवयाता हरस्य दैव्यस्य" ऋ०८,४८,२। "अवयाता पृथक्कर्त्ता" भा०।

अवयान न० अव+या–ल्युट्। अपगतौ "इयं धीर्भूया अवयानमेषाम्" ऋ०१,१८५,८, "एषां पापानामवयानमपगमम्" भा०।

अवयुन त्रि० वयुनं प्रज्ञा निरु० न०ब०। प्रज्ञाशून्ये। "स इत्तमोऽवयुनम्" ऋ०३,२१,३।

अवर पूजयां कण्ड्वा०प०सक०सेट्। अवर्य्यति पूजतयीत्यर्थः।

अवर त्रि० वृ–बा० अप् न०त०। १चरमे, २अधमे, ३कार्य्ये च। ४पश्चाद्वर्त्तिनि ५देशे ६काले पु० ७दिशि स्त्री ८तद्वर्त्तिनि त्रि०। हस्त्यजङ्घायाः ९पश्चाद्देशे न०। "दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय" गी०अस्य व्यवस्थावाचित्वे सर्व्वनामकार्य्यम् ङसिङोरसु वा। "श्रद्दधानः परां विद्यामाददीतावरादपि" मनुः अवरस्मादिति च। व्यवस्था च देशकृता कालकृता बुद्धिकल्पिता च तत्र देशकृता यदवरं कौशाम्ब्याः। कालकृता यदवरमाग्रहायण्याः। बुद्धिकल्पिता अवरादपीतिमानवे। मासेनावरः मासावरः इत्यादौ समासे विग्रहवाक्ये च न सर्व्वनामकार्य्यं मासावराय इत्यादि च। "द्रुमात्रावरंस्थण्डिलमुपलिप्य" श्रु० सू०। ५त०। अत्यन्तश्रेष्ठे त्रि०।

अवरज पु० अवरस्मिन् काले जायते जन–ड। १कनिष्ठसोदरे भ्रातरि, २शूद्रे च। मनुष्येषु प्रथमोत्पन्नौ तस्य जघन्यजत्वात् तथात्वम् २कनिष्ठसोदरभगिन्यां, ४शूद्रायाञ्च स्त्री टाप्। "अस्य चावरजं विद्धि भ्रातरं भां तु लक्ष्मणम्" रामा० "यदि स्त्री यद्यवरजः श्रेयः किञ्चित् समाचरेत्" मनुः "विदर्भराजावरजा तयैवम्"। "रावणावरजा तत्र राघवं मदनातुरा" इति च रघुः ५पञ्चाज्जातमात्रे त्रि०। "आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ" माघः।

अवरत त्रि० अव+रम–क्त। विश्रान्ते अनवरतं सततम्।

अवरतस् अव्य० अवर+तसिल्। अवरः अवरस्मिन् अवरस्मादित्यर्थे। अवरतः रमणीयम् आगतः, वसति वा।

अवरति स्त्री अव+रम–क्तिन्। १विरामे, २निवृत्तौ च।

अवरवर्ण पु० कर्म्म०। शूद्रे।

अवरवर्ण ज पु० अवरवर्ण्यः सन् जायते जन–ड। शूद्रे "श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्ण्यजः" "ब्राह्मणान् वाधमानन्तु कामादवरवर्ण्यजम्" इति च मनुः।

अवरव्रत पु० अवरं अत्यन्तश्रेष्ठं व्रतमस्य। १स्तूपे २अर्कवृक्षे च। अवरम् अधमं व्रतमस्य। ३हीनव्रते त्रि०।

अवरशैल पु० अवरः पश्चाद्वर्त्ती शैलः। अस्ताचले।

अवरस्तात् अव्य० अवर+प्रथमाद्यर्थे अस्ताति। प्रथमा प्रञ्चमीसप्तमीद्वित्तेरवरशब्दस्यार्थे। अवरस्तात् रमणीयम्, आगतः वसति वा। [अत्यन्तनिर्जने।

अवरहस न० अवतं रहः अच् समा०। अवतते रहसि

अवरार्द्ध न० कर्म्म०। अपरभागे "सकृत्कर्म्म पितृणाम-परार्द्धं देवानाम्" इति। "अपरार्द्धतश्च परार्द्धतश्च परि-वृज्य" शत०ब्रा० २देहस्य पश्चाद्भागे च।

अवरार्द्धिक त्रि० अवरार्द्धे भवः यत्। शेषभागभवे। न वरत्वेन अर्थ्यते ऋध–णिच्–कर्म्मणि यत्। न्यूने। "नावरार्द्धिं ततः कुर्य्यात् पूर्षपात्रमिति स्थितिः" ऊन्हो० परि०। "अवरार्द्धिन्यूनम्" स०त०रघु० "दृग्गवावरार्द्धिका दक्षिणा" आ० श्रौ०।

अवरोण त्रि० अव+रिङ–क्त। तिरस्कृते। [नाले।

अवरीयस् त्रि० न वरीयान् न०त० स्त्रियां ङीप्। अल्प-

अवरुग्ण त्रि० अव+रुज–क्त। १भग्ने २रोगान्विते च।

अवरुद्ध त्रि०अव+रुध–क्त। १प्रतिरुद्धे अन्यैरसंलक्षिते २गुप्ते च "अस्ति कश्चिद्राजरुद्धवरुद्धवरम्" दशकु० इतर गमननिषेधेन रक्षितायां ३स्त्रियां स्त्री। (राखनी)।

अवरुद्धि स्त्री अव+रुध भावे क्तिन्। १अवरोधने २प्रतिरोधे "इन्द्रियाणां वीर्य्याणाञ्चावरुद्धौ" श्रुतिः।

अवरूढ त्रि० अव+रुह–क्त। १कृतावरोहणे उच्चस्थानात् निम्नगते। २उत्पाटिते वृक्षादौ च।

अवरोचक अवरोचयति रुचिहीनं करोति अव+रुच–णिच्–ण्वुल्। अवरोचके रोगभेदे "स्वेदगन्धिरुजं तत्र काम-वासावरोचकः" सुश्रु०।

अवरोध पु० अव+रुध–भावे घञ्। १निरोधे "फेनाय-मानं स्रोतोऽवरोधः" सुश्रु० बलादि० मतुप् वा ठनो बाधक इनि अवरोधवान् अवरोधी अवरोधयुक्ते त्रि०। कर्म्मणि घञ्। राजान्तःपुरस्थायां २योषिति, ३राज दारेषु च। "तत्र भूणावरोधानां भर्त्तृषु व्यक्तविक्रमम्। "कलत्रवन्मात्रमनवरोधे महत्यपि" रघुः आधारे घञ्। ४राजान्तःपुरे। "यस्यावरोधे शतयोमदीयैः" इति रघुः। "निन्ये विनीतैरवरोधदक्षैः" कुमा०। "विस्रब्धवरूथमवरो-धबधूपघात" माघः। ल्युट्। अवरोधनं निरोधे न०।

अवरोधक त्रि०अव+रुध–ण्वुल्। १प्रतिरोधके २आवरके च। "सुधन्वा वीर्य्यवान्राजा मिथिलामवरोधकः" रामा० आर्षत्वात् कर्म्मणि न षष्ठी।

अवरोधायन न० दैत०। अन्तःपुरे।

अवरोधिक पु०अवरोधे तद्रक्षणादौ नियुक्तः ठञ्। राजा-न्तःपुररक्षणार्थं नियुक्ते १वामनादौ। अवरोधः स्थानं निवासत्वेनास्त्यस्य ठञ्। "नृपान्तःपुरस्थायां स्त्रियां स्त्री। "ययुस्तुरङ्गाधिरुहोऽवरोधिका" माघः।

अवरोधिन् त्रि० अवरुणद्धि अव+रुध–णिनि स्त्रियां ङीप्। १रोधके २आवरके च।

अवरोपण न० अव+रुह–णिच्–ल्युट्। उत्पाटने।

अवरोपित त्रि० अव+रुह–णिच्–पः क्त। उत्पाटिते।

अवरोह पु० अव+रुह–घञ्। १अवतरणे, (नामा) ऊर्द्ध-देशाच्छिन्नदेशगमने। कर्त्तरि संज्ञायां घ। तरोर्मूला-दग्रपर्य्यन्तमारूढायां २गुडूच्यादिलतायाम्। ३अपादाने घञ्। चन्द्रादिलोके स्वर्गे, ततो हि भोगावसाने मर्त्त्यैवतरन्ति। तत्र देहिनां चन्द्रलोकादवरोह-प्रकारस्तावदुक्तः शा० सूत्रे तद्भाष्ये च यथा "कृतात्यये-ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" शा० सू०। "धूमादिकारिणां धूमादिवर्त्मना चन्द्रमण्डलमारूढानां ततः प्रत्यवरोह आम्नायते "तस्मिन् यावत्सम्पातमुषित्वा-ऽथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेत"मित्यारभ्य यावत् "रम-णीयचरणाब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वा-दियोनिमिति"। तत्रेदं विचार्य्यते किं निरनुशया भुक्तकृतस्य कर्म्मणोऽवरोहन्ति? आहोस्वित् सानुशयाः?इति।किं तावत् प्राप्तं निरनुशया इति। कुतः? यावत्सम्पातमितिविशेष-णात्। सम्पातशब्देनात्र कर्म्माशय उच्यते सम्पतत्यनेना-स्माल्लोकादमुं लोकं फलभोगायेति। यावत्सम्पातमुषि-त्वेति च कृतस्यास्य तस्य तत्रैव भुक्ततां दर्शयति। "तेषां यदा तत्पर्य्यवैतीति" च श्रुत्यन्तरेणैष एवार्थः प्रदर्श्यते। स्यादे-तत् यावदनुशिष्टलोक उपभोक्तव्यं कर्म्म तावदुपभुङ्क्त इति कल्पयिष्यामीति नैव कल्पयितुं शक्यते यत् किञ्चेत्यन्यत्र परामर्शात्। "प्राप्यान्तं कर्म्मणस्तस्य यत् किञ्चेह करोत्य-यम्। तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्म्मणे"इति ह्यपरा श्रुतिर्यत्किञ्चेत्यविशेषपरामर्शेन कृतस्नस्यैवेह कृतस्य कर्म्मणस्तत्र क्षयितां दर्शयति। अपि च प्रायणमनारभ्य-

फलस्य कर्म्मणोऽभिव्यङ्क्तिं प्राक् प्रायणादारब्धफलेन कर्म्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्तेः । तच्चाविशेषेण यदृच्छावत् किञ्चिदनारब्धफलं तस्य सर्व्वस्याभिव्यङ्क्तिं न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति नह्य विशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते, न पटइत्युपपद्यते । तस्मान्निरनुशया अवरोहन्तीत्येवं प्राप्ते ब्रूमः "कृतात्यये अनुशयवानिति" । येन कर्म्मणेन्द्रेण चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदस्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनयोकाग्निसंपर्कात् प्रलीयते सन्दिष्टकिरणसंपर्कोद्भिन्नकरकादय इव हुतभुग्भिः संपर्कादिव च शुष्टकाठिन्यम् । ततः कृतात्यये कृतस्येष्टादेः कर्म्मणः फलोपभोगेनोपक्षये सति सानुशया एवमेव रोहन्ति । केन हेतुना? दृष्टस्मृतिभ्यामित्याह । तथाहि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति "तद्य इह रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्यासो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वेति" । चरणशब्देनानेनानुशयः स्मृत्यत इति वर्ष्यिष्यति । दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूपसुखभोगः प्रविभज्यमानः आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुःकृतयोः हेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् । स्मृतिरपि वर्णा आश्रमाश्च स्वकर्म्मनिष्ठाः प्रेत्य कर्म्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधायै जन्म प्रतिपद्यन्त इति सानुशयानामेवावरोहं दर्शयति । कः पुनरनुशयो नामेति कोचित्तावदाह्ः स्वर्गार्थस्य कर्म्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथाहि स्नेहभाण्डं विरिच्यमानं न सर्व्वात्मना विरिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवति ते तथानुशयोऽपीति । ननु कार्य्यविरोधित्वादृष्टस्य न भुक्तफलस्यावशेषेणावस्थानं न्याय्यम् । नायं दोषः न हि सर्व्वात्मना भुक्तफलत्वं कर्म्मणः प्रतीजानीमहे । ननु निरवशेषकर्म्मफलभोगाय चन्द्रमण्डलमारूढः । सादं तथापि स्वल्पकर्म्मावशेषमात्रेण तत्रावस्थातुं न शक्यते यथा किल कश्चित् सेवकः सकलैः सेवोपकरणैः राजकुलमुपसृप्तः चिरप्रवासात् परिक्षीणबहूपकरणः क्षत्रपादुकादिमात्रावशेषो न राजकुलेऽवस्थातुं शक्नोति, एवमनुशयलेशमात्रपरिक्षयो न चन्द्रमण्डलेऽवस्थातुं शक्नोतीति । न चैतद्युक्तमिव न हि स्वर्गार्थस्य कर्म्मणो भुक्तफलस्यावशेषानुवृत्तिरूपपद्यते कार्य्यविरोधित्वादित्युक्तम्। नन्वेतदयुक्तं न स्वर्गफलस्य कर्मणोनिखिलस्य भुक्तफलत्वं भविष्यतीति । तदेतदशेषं स्वर्गार्थं किल कर्म स्वर्गस्यस्यैव स्वर्गफलं निखिलं जनयति स्वर्गच्युतस्यापि कञ्चित् फलशेषं जनयतीति" न शब्दप्रमाणकानामीदृशी कल्पनावकल्पते । स्नेहभाण्डे तु स्नेहशेषानुवृत्तिर्दृष्टत्वादुपपद्यते । तथा सेवकस्योपकरणलेशानुवृत्तिर्दृश्यते न त्विह तथा स्वर्गफलस्य कर्म्मणोलेशानुवृत्तिर्दृश्यते नापि कल्पयितुं शक्यते स्वर्गफलत्वस्यास्खलिरोधात् । अवश्यञ्चैतदेवं विज्ञेयं न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्त्तमानोऽनुशय इति यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवन् तस्यैव कश्चिदेकदेशोऽनुशयः कल्पेत ततो रमणीयएवैकोऽनुशयः स्यान्न विपरीतः । तत्रेयमनुशयविभागश्रुतिरुपरुध्येत "तद्य इह रमणीयचरणाः अथ य इह कपूयचरणा इति" । तस्मादानुश्रविकफले कर्मजाते उपभुक्तेऽवशिष्टमैहिकफलं कर्मान्तरजातमनुशयः तद्बन्धोऽवरोहन्ति । यदप्युक्तं यत्किञ्चित्यविशेषेण परामर्शात् सर्वस्येहकृतस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति । नैतदेवम् अनुशयसद्भावस्यावगमितत्वात् । यत्किञ्चिदिहकृतमानुश्रविकफलं कर्मारब्धभोगं तत् सर्वं फलोपभोगेन क्षपयित्वेति गम्यते । यदप्युक्तं प्रायणमविशिष्टत्वादनारब्धफलं कृतस्नमेव कर्माभिव्यनक्ति तत्र केनचित् कर्मणानुश्रविकेन फलमारभ्यते केनचिदविशिष्टमिति विभागो न सम्भवतीति । तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तम् । अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यङ्क्तिं प्रतिबध्नातीति वक्तव्यम् आरब्धफलेन कर्म्मणा प्रतिबद्धस्येतरस्य दृष्ट्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले दृष्ट्युद्भवो भवतीति यदुच्येत "ततोवक्तव्यं यस्मैव हि प्राक्प्रायणादारब्धफलेन कर्म्मणा प्रतिबद्धस्येतरस्य दृष्ट्युद्भवानुपपत्तिरेवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्म्मणः युगपत्फलारम्भासम्भवाद्बलवता प्रतिबद्धस्य दुर्बलस्य दृष्ट्युद्भवानुपपत्तिरिति । नह्यारब्धफलत्वसामान्ये जात्यन्तरोपभोग्यफलमप्येककर्म्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभतइति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात्। नापि कस्यचित् कर्म्मणः प्रायणे अभिव्यक्तिः कस्यचिदुच्छेद इति

शक्यं वक्तुम् ऐकान्तिकफलत्वविरोधात् । नहि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्म्मणोऽनुच्छेदः सम्भावयते। स्थितिरपि विरुद्धफलेन कर्म्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमप्यवस्थानं दर्शयति । "कदाचित् सुकृतं कर्म्म कूटस्थमिह तिष्ठति । पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते" इत्येवंजातीयका । यदि च क्षतक्षमनारब्धफलं कर्म्म कस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत ततः सर्गनरकतिर्य्यग्योनिष्वधिकारानवगमात् धर्म्माधर्म्मानुत्पत्तौ निमित्ताभावाद्भोक्तरा जातिरुपपद्येत ब्रह्महत्यादीनां चैकैकस्य कर्म्मणोऽनेकजन्मनिमित्तत्वं स्वयमाणमुपरुध्येत । नच धर्म्माधर्म्मयोः स्वसदृशफलसाधनतादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुम् । नच दृष्टफलस्य कर्म्मणः कारीर्य्यादेः प्रयाणमभिव्यञ्जकं सम्भवतीत्यवग्राहिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना । प्रदीपोपन्यासोऽपि कर्म्मबलाबलप्रदर्शनेनैव प्रतिनीतः । स्थूलसूक्ष्मरूपाभिव्रक्तिवच्चेदं द्रष्टव्यं यथा हि प्रदीपः समानेऽपि सन्निधाने स्थूलरूपमभिव्रनक्ति नसूक्ष्मम्, एवं प्रायणं समानेऽप्यनारब्धफलस्य कर्म्मजातस्य प्राप्तावसरत्वे बलवतः कर्म्मणोऽभिव्यक्तिमुद्भावयति न दुर्बलस्येति । तस्मात् श्रुतिस्मृतिन्यायविरोधादश्लिष्टोयमशेषकर्म्माभिव्यक्तेरभ्युपगमः । शेषकर्म्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने संभ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः । तस्मात् स्थितमेतदनुशयवन्तोऽवरोहन्तीति । ते चावरोहन्तो यथेतमनेवञ्चावरोहन्तीति । यथेतमिति यथागतमित्यर्थः। अनेवमिति तद्विपर्य्ययेणेत्यर्थः । धूमाकाशयोः पितृयानेऽध्वन्युपात्तयोरवरोहे सङ्कीर्त्तनात् यथेतंशब्दाच्च यथागतमिति प्रतीयते । रात्र्याद्यसंकीर्त्तनादभ्रादिसंख्यानाच्च विपर्य्ययोऽपि प्रतीयते" भा० । अनतिदूरे च तत्रैव "स्वाभावापत्तिरुपपत्तेः" भा० सू० । "इष्टादिकारिण्यन्द्रमसमारूढ्य तस्मिन् यावत्सम्पातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तम् अथावरोहप्रकारः परीक्ष्यते तत्रेयमवरोहश्रुतिर्भवति "अथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमोभवति धूमोभूत्वाभ्रं भवति अभ्रं भूत्वा प्रवर्षतीति" । तत्र संशयः किमाकाशादिस्वरूपमेवावरोहन्तः ? प्रतिपद्यन्ते किं वाऽऽकाशादिसाम्यमिति? तत्र प्राप्तावदाकाशादिस्वरूपमेव प्रतिपद्यन्ते इति कुतः ? एवं हि श्रुतिर्भवति इतरथा लक्षणा स्यात् श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा, तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यपराणि तत् स्वरूपोपपत्तावेवकल्पन्ते तस्मादाकाशादिस्वरूपप्रतिपत्तिरित्येवं प्राप्ते ब्रूमः आकाशादिसाम्यं प्रतिपद्यन्त इति । चन्द्रमण्डले यदन्नमयं शरीरसुखभोगार्थमारब्धं तदुपभोगक्षये सति प्रलीयमानं सूक्ष्ममाकाशसमं भवति ततोवायोर्वशमेति ततो धूमादिभिः सहजयत इति तदेतदुच्यते यथेतमाकाशाद्वायुमित्यादिना । कुतः एतत्? उपपत्तेः एवं ह्युपपद्यते । नह्यन्यस्यान्यभावोसुख्य उपपद्यते । आकाशस्वरूपप्रतिपत्तौ च व्राह्यादिक्रमेणावरोहोनोपपद्यते । विभुत्वाच्चाकाशेन नित्यसंबन्धाच्च तत्साडश्यापत्तेरन्यस्तत्संबन्धो घटेत । श्रुत्यसम्भवे च लक्षणाश्रयणं न्याय्यमेव अत आकाशादितुल्यत्वापत्तिरेवात्राकाशादिभाव इत्युपचर्य्यते" भा० । नातिचिरेण विशेषात्" भा० सू० "तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विषयः किं दीर्घं कालं पूर्व्वपूर्व्वसादृश्येनावस्थायोत्तरोत्तरसादृश्यं गच्छन्ति? उताल्पमल्पमिति ?। तत्रानियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्ते इदमाह नातिचिरेणेति । अल्पमल्पकालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहैते भुवमापतन्ति । कुत एतत्? विशेषदर्शनात् । तथा हि व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि "अतो वै खलु दुर्निष्प्रपतरमिति"। तकार एकः छान्दस्यां प्रक्रियायां लुप्तोमन्तव्यः दुर्निष्प्रपततरं दुर्निष्क्रमतरं दुःखतरमस्माद्व्रीह्यादिभावान्निःसरणमवतीत्यर्थः । तदत्र दुःखनिःप्रपतनं प्रदर्शयन् पूर्व्वेषु सुखनिःप्रपतनं दर्शयति । सुखदुःखताविशेषस्यायं निःप्रपतनस्य कालाल्पत्वदीर्घत्वनिमित्तः तस्मिन्नवधौ शरीरानिष्पत्तेरुपतापासम्भवात् । तस्माद्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति" भा० । "अन्याधिष्ठिते पूर्व्ववदभिलापात्" सू० "तस्मिन्नेवावरोहे प्रवर्षणानन्तरं पद्यते "इह व्रीहियवाओषधिवनस्पतयस्तिलमाषा जायन्त" इति । तत्र संशयः किमस्मिन्नवधौ स्थावरजात्मापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवन्ति ? आहोस्वित् क्षेत्रज्ञान्तराधिष्ठितेषु संश्लेषमात्रं गच्छन्तीति ? किं तावत् प्राप्तं स्थावरजात्मापन्नास्तत्सुखदुःखभाजोऽनुशयिनो भवन्तीति । कुतः एतत् ? जनेर्भुख्यार्थत्वोपपत्तेः स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्यानिष्टफलत्वोपपत्तेः । तस्मादनुशयमेवेदमनुशयिनां व्रीह्यादिजन्म श्वादिजन्मवत् । यथा श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वेति

सुखमेवानुशयिनां त्वादिजन्म सुखदुःखान्वितन्मवति एवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः । अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवन्ति पूर्ववत् । यथा वायुधूमादिभावोऽनुशयिनान्तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि स्थावरैः संश्लेषमात्रम् । कुत एतत् ? तद्देवेक्षाभिलाषात् कोऽभिलाषस्तद्भावः । कर्मव्यापारमन्तरेण संकीर्तनं यथाऽकाशादिषु न कञ्चित् कर्मव्यापारं परामृशति एवं व्रीह्यादिजन्मन्यपि । तस्माच्चास्यत्व सुखभाक्त्वमनुशयिनाम् यत्र तु सुखदुःखभाक्त्वमभिप्रैति, परामृशति तत्र कर्मव्यापारं "रमणीय चरणाः कपूयचरणा" इति च । अपि च सुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु भज्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः यो हि जीवोयच्छरीरमभिमन्यते स तस्मिन् पीड्यमाने प्रवसतीति प्रसिद्धम् । तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलष्येत, अतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति । एतेन जनेर्मुख्यार्थत्वं प्रतिव्यूढात् उपभोगस्थानत्वञ्च स्थावरभावस्य । न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे । भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं, चन्द्रमसं त्ववरोहन्तोऽनुशयिनो न स्थावरभावमुपभुञ्जत इत्याचक्ष्महे"भा०। "अशुद्धमिति चेन्न शब्दात्" सू० । "यत् पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्पत इत्यतो सुख्यमेवानुशयिनो व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति तत् परिहियते । न शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य अयं धर्मः अयमधर्म इति शास्त्रमेव विज्ञाने कारणम् अतीन्द्रियत्वात्तयोरनियतदेशकालनिमित्तत्वाच्च । यस्मिन्देशे काले निमित्ते च योधर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेषु अधर्मो भवति तेन न शास्त्रादृते धर्माधर्मविषयं ज्ञानं कस्यचिदस्ति । शास्त्राच्च हिंसानुग्रहात्मकोज्योतिष्टोमोधर्म इत्यवधारितं स कथमशुद्ध इति शक्यते वक्तुम् । ननु "मा हिंस्यात् सर्व्वाभूतानीति" शास्त्रमेव भूतविषयां हिंसामधर्मं इत्यवगमयति" । बाढं उत्सर्गस्तु स. । अपवादः "अग्नीषोमीयं पशुमालभेतेति" उत्सर्गापवादयोश्च व्यवस्थितविषयत्वम् तस्माद्विशुद्धं वैदिकं कर्म शिष्टैरनुष्ठीयमानत्वादनिन्द्यमानत्वाच्च । तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वम् । नच त्वादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति तद्धि कपूयचरणानधिकृत्योच्यते नैवमिह वैशेषिकं कञ्चिदधिकारोऽस्ति । अतश्चन्द्रस्थलात् स्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्य्यते" भा० "रेतःसिग्योगोऽथ" सू० । "इतश्च व्रीह्यादि संश्लेषमात्रं तद्भावः यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेत सिग्भाव आम्नायते । 'योयोह्यन्नमत्ति योरेतः सिञ्चति तद्भूय एव भवतीति'। न चात्र सुख्योरेतःसिग्भावः सम्भवति चिरजातो हि प्राप्तयौवनो रेतःसिग्भवतीति कथमिवानुपचरिततद्भावमद्यमानान्नानुगतोऽनुशयी प्रतिपद्येत तत्रावश्यं रेत सिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः । तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः" भा०॥ "योनेःशरीरम्" सू० ॥ "अथ रेतःसिग्भावस्यानन्तरं योनौ सिक्ते रेतसि योनेरधिशरीरमनुशयिनामनुशयफलोपभोगायतनम् इत्याह शास्त्रम् "तद्य इह रमणीयचरणा" इत्यादि । तस्मादयवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरमेव सुखदुःखान्वितं भवतीति । तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम्"भा०। संज्ञायां कर्त्तरि घञ् "वटादितरोः शाखातो मूलावधि अवतारकोऽवभेदे च । "अवरोहगताकीर्णं वटमासाद्य तस्थतुः" रामा० । ज्योतिषोक्ते दशाभेदे स्त्री अवरोहिशब्दे उदा० ।

अवरोहण न० अव+रुह भावे ल्युट् । अवतरणे (नामा) "एवमारोहणावरोहणमतः" । काव्या० १८।३।६ ।

अवरोहशालिन् पु० अवरोहति छिन्नोऽपि पुनः प्ररोहति अव+रुह-अच् कर्म्म०, अवरोहति अधोगच्छति मूलमस्याः तादृशी शाखा कर्म्म० ततः बाहुल्ये मत्वर्थीय इनिर्वा । वटवृक्षे, तस्य छेदनेऽपि पुनः प्ररोहः तस्य च शाखातोऽपि बहूनि मूलान्यवतरन्तीति तस्य तथात्वम् । ब० । अवरोहिशाखोऽत्र ।

अवरोहिका स्त्री अवरोहति अल्पमधोगच्छति अव+रुह-ण्वुल् टाप् कापि अतइत्त्वम् । अश्वगन्धालतायाम् ।

अवरोहित पु० अवरोरोहितो वर्णः । अल्परक्तवर्णे मध्यादि० अचोबाधकः मतुप् । अवरोहितवान् अल्परक्तवर्णयुक्ते त्रि० स्त्रियां ङीप् ।

अवरोहिन् त्रि० अव+रुह-णिनि । १वटवृक्षे । २अवतरणकर्त्तृमात्रे त्रि० स्त्रियां ङीप् । सा च ज्योतिषोक्ते ३दशाभेदे तथा हि दशाशब्देवक्ष्यमाणस्य "आत्रं कुराज्ञीशुकेशुपूर्वा"

इत्यादिक्रमस्यानुसारेण जन्मनक्षत्रावधितत्तद्दशाधिपानामनुक्रमेण या दशा सा आरोहिणी तेषु चन्द्रादिपर्य्यन्तानां क्रमेण यथासम्भवं तेषामेव भोगेन पुनरवरोहेण सूर्य्यादीनां या दशा सावरोहिणी। तथाहि "आग्नेयादि त्रिरावृत्त्या तानि विंशोत्तरीयके" इत्युक्तादिशा जन्मनक्षत्रानुसारेण दशाधिपे आनीते तदुत्तरं तदुत्तरोत्तरपठितानां ग्रहाणां दशा। तत्र यस्य सूर्य्यदशायां जन्म तस्य आरोहिण्येव दशा यस्य तु चन्द्रादिदशायां जन्म तस्य तदुत्तरारोहक्रमेण कुजादिदशा आरोहिणी एवं शुक्रान्तदशाः परिसमाप्य सूर्य्यादीनां या दशा सैव अवरोहिणीति व्यपदिश्यते इति सम्प्रदायविदः। अन्ये तु स्वस्वभोग्यकालस्यार्द्धे प्रथमसारोहिणी दशा शेषार्द्धे अवरोहिणीत्याहुः। साच ग्रहविशेषे विशेषफलदा। यथोक्तम् "उच्चाङ्गपञ्चभस्थस्य दशा स्यादवरोहिणी। तस्यामल्पमवाप्नोति फलं क्लेशाच्छुभं नरः। मित्रोच्चांशगतस्यैषा नूनं मध्यफला भवेत्। सैवानिष्टफलानर्घा नीचार्य्यंशगतस्य च। नीचाङ्गपञ्चभस्थस्य दशावरोहिणी मता। तस्यां शुभफलं श्रेष्ठमल्पक्लेशादेव जायते। शत्रुनीचांशगतस्यैषा किञ्चित्कष्टफलाऽधमा। मित्रोच्चांशगतस्यास्य सैव सम्पूर्णदा मता"। इति सामान्यतोऽभिधाय" "दशाऽवरोहा दिननायकस्य क्षणिक्रियाचित्तरुष्टहेष्टनाशम्। चौराग्निपीड़ां कलहं विरोधं नरेशकोपं कुरुते विदेशम्" स्फु०। "निशाकरस्याप्यवरोहकाले स्त्रीपुत्रमित्राम्बरसौख्यहानिम्। मनोविकारं स्वजनैर्विरोधं चौराग्निभूपैर्लभतेति कष्टम्"। च०। "धरासुतस्यावरोहकाले स्थानार्थनाशं कलिकोपदुःखम्। विदेशवासं स्वजनैर्विरोधं चौराग्निभूपैः सततं करोति"। म०। "शशाङ्कसूनोरवरोहिणी या दशा महत् कष्टतरं तु दत्ते। विज्ञानहीनं पदरारसङ्गं दृष्टाग्निचौरैर्भयमत्र कष्टम्"। बु०। "देवेन्द्रपूज्यस्य दशाऽवरोहा करोति सौख्यं सकृदेव नाशम्। सकृद्दयशःकान्तिविशेषजालं नरेश्वरत्वं सकृदेव याति"। इ०। "भृगोः सुतस्यावरोहकाले प्रचण्डवेश्यागमनं धनाग्निम्। स्त्रीपुत्रबन्ध्वार्त्तिमनोविकारम् भ्रूमूलरोगं मदनार्त्तिमेति" शु०। "दिनेशसूनोरवरोहकाले राज्यच्युतिं दारसुतार्थनाशम्। भाग्यक्षयं भूपतिकोपयुक्तं प्रेष्यत्वमायाति गुदाच्छिरोगम्" सर्वार्थचि०। राहुकेत्वोरवारोहावरोहयोर्विशेषो नास्ति

अवर्ग पु० अकारसजातीयस्वराणां वर्गः अकार+प्रातिशाख्योक्तः वर्ग वा १स्वरवर्णमात्रे, "अकचटतपयशाः वर्गा" इतिकेरलम्। वर्गः समूहः न०ब०। २वर्गशून्ये त्रि०।

अवर्ण पु० अकारैकस्थानिको वर्णः शा०त०। ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिकाननुनासिकभेदेन अष्टादशसंख्यकेषु (अ)वर्णेषु" "अष्टन्यष्टादशानां संज्ञा" सि०कौ०। वर्ण्यतेऽसौ वर्ण्यः प्रशंसा विरोधे न०त०। प्रशंसाविरोधिनि २अपवादे। "सोढुं न तत्पूर्व्वमवर्ण्यमीशे "न चावदद्भर्त्तुरवर्ण्यं भार्या" इति च रघुः।

अवर्त्तन न० वृत–ल्युट् अभावे न०त०। १वर्त्तनाभावे २अस्थितौ। वर्त्ततेऽनेन करणे ल्युट् वर्त्तनं जीविका न०ब०। ३जीविकामूल्ये त्रि०। [पदार्थे।

अवर्त्तमान त्रि० न वर्त्तमानः विरोधे न०त०। वृद्धिशून्ये ऋणिनौ। [शून्ये त्रि०।

अवर्षण न० अभावे न०त०। १वर्षणाभावे न०ब०। २वर्षणशून्ये त्रि०।

अवलक्ष पु० अवलक्ष्यते अव+लक्ष–घञ्। १श्वेतवर्णे अमरः आदृच्। २तद्वति त्रि०। अतोलोपे वलक्षोप्युभयत्र।

अवलग्न पु० अव+लग–क्त नि० दृडभावः लस्ज–क्त वा। (माजा) १देहमध्यभागे। २सम्बद्धमात्रे त्रि०। "विपुलतरोन्नतस्तनावलग्नम्" माघः।

अवलम्बिका स्त्री अव+लब–तिकन्। गोधायाम् उज्ज्व०।

अवलम्बे पु० अव+लबि–आधारे घञ्। १आश्रये। भावे घञ्। २द्रव्यान्तराश्रयणे। "सावलम्बगमना स्तृदुस्तना" रघुः। करणे घञ्। ३अवलम्बसाधने दण्डादौ।

अवलम्बन न० अव+लबि–भावे ल्युट्। आलम्बने पतनादिनिवारणाय द्रव्यान्तराश्रयणे "अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि" माघः। "सहिष्यते तत्प्रथमावलम्बनम्" कुमा०। "प्रस्थानविक्लवगतेरवलम्बनाय" शकु०। आधारे ल्युट्। २आश्रये। करणे ल्युट्। आलम्बसाधने ३दण्डादौ।

अवलम्बित त्रि० अव+लबि–कर्मणि क्त। १आश्रिते २आलम्बिते "अवलम्बितकर्णपद्मकुण्डलसीकं रचयन्नवोचत"–नैषध०। ३शीघ्रे न० ४तद्वति त्रि० जटा०। अव+लम्ब–कर्त्तरि क्त। ५अवतीर्णे।

अवलम्बिन् त्रि० अव+लबि–णिनि। १आलम्बनकर्त्तरि "यस्या भवानपरपूर्व्यपदावलम्बी" रघु. "स गोपतिं नन्दिभुजावलम्बी" कुमा० "अथ धूमाभिताम्राक्षं दृष्ट्वाग्न्यावलम्बिनम्" रघुः। २अवतारके उच्चस्थानात् अधःपातिनि। "भगवति मरीचिमालिनि अस्ताचलचूड़ावलम्बिनि" काद०।

अवलिप्त त्रि० अव+लिप–क्त। १गर्विते "न सूर्य्यैर्नावलिप्तैश्च

नान्यैर्नान्यावसायिभिः" मनुः। २क्षतलेपने ३समन्तात् लिप्ने च

अवलीढ त्रि० अव+लिह्–क्त। १भक्षिते २कृतावलेहे ३जिह्वायेणास्वादिते ४व्याप्ते च "अस्रुग्ज्वालावलीढप्रतिवलजलधेरन्तरौर्वायमाणः" वेणी०। "यतश्चिरावलीढञ्च शुना संस्पृष्टमेव च" मनुः।

अवलीला स्त्री अवरा लीला। १अनायासे २अनादरे च।

अवलुञ्चन न० अव+लुञ्च–ल्युट्। १छेदने २उत्पाटने ३केशादेरबन्धने ४अपनयने "दूरादुज्झो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनम्" च। सुश्रु०। [अकृतबन्धने च।

अवलुञ्चित त्रि० अव+लुञ्च+क्त। उत्पाटिते अपनीते

अवलुण्ठन न० अव+लुठि–भावे ल्युट्। भूमौ पतित्वा परिवर्तने (लोटा)।

अवलेख पु० अव+लिख भेदने भावे घञ्। अवभेदने "वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक्" सुश्रु०।

अवलेप पु० अव+लिप् भावे घञ्। १गर्व्वे "प्रियसङ्गमेष्वनवलेपमदा" माघः बलावलेपादधुनापि पूर्ववत्" माघः। "ऐरावतमदावलेपलूनापारिजातशाखा" काद०। २लेपने ३भूषणे ४सम्बन्धे च।

अवलेपन न० अव+लिप–भावे ल्युट्। १विलेपे, २चक्षुषे, ३सम्बन्धे ४गर्वे च। करणे ल्युट्। ५चन्दनादौ।

अवलेह पु० अव+लिह–घञ्। १जिह्वाग्रेणास्वादने। कर्म्मणि घञ्। २तदास्वाद्ये औषधादौ च। "अतोऽवलेहान्वक्ष्यामः खदिरासननिम्बराजदक्षशालसारकाथे तत्सारपिण्डान् श्लक्ष्णपिष्टान् प्रक्षिप्य विपचेत् ततो नातिद्रवं नातिसान्द्रमवतार्य्य तस्य पाणितलपूर्णमप्रातरारोग्यमधुमिश्रं लिह्यादेव सालसारादौ न्यग्रोधारग्वधादौ च लेहान्धारयेत्" इति सुश्रु०। [द्रव्ये मधुप्रभृतौ द्रव्ये।

अवलेह्य त्रि० अव+लिह–कर्म्मणि ण्यत्। जिह्वाग्रेण आस्वा-

अवलोक पु० अव+लुक–लोक–वा घञ्। दर्शने चाक्षुषज्ञाने "दृक्साङ्गभङ्गनयनमीलनाङ्गावलोकवत्" सा० द०।

अवलोकन न० अव+लुक–लोक–वा ल्युट्। १दर्शने, २अनुसन्धाने च। "न बभूवुरवलोकनक्षमाः" रघुः। करणे ल्युट्। ३आलोके, ४नेत्रे च। योगनिद्रालविघटैः पावनैरवलोकनैः" रघुः।

अवलोकित त्रि० अव+लोक–कर्म्मणि क्त। १दृष्टे। भावे क्त। २दर्शने न०। ततोऽस्यर्थेऽच् ३बुद्धभेदे पु०।

अवलोकिन् त्रि० अव+लुक–लोक वा णिनि स्त्रियां ङीप्। वीक्षके दर्शके "तव प्रिय यूक्षतरावलोकिनः" कुमा०।

अवलोप पु० अव+लुप–घञ्। १खण्डने २नाशने ३विलोपने "यदधयदधरावलोपदक्षत्वत्" माघः। [अनुकूले।

अवलोम पु० अवनद्धं लोम आनुकूल्यम् प्रा० त० अच् समा०।

अवल्गुज पु० अवल्गोरशोभनाज्जायते जन–ड। १सोमराजीलतायाम्। (हाकुच) २असाधुजाते त्रि०।

अववर्षण न० अव+वृष–भावे ल्युट्। कृत्स्नवर्षणे। "स्वप्ने नदीतरणावर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात्" कात्या० १।७।१३। "तथा नदीं दृष्ट्वा कृत्स्नामेवाभिसन्धाय मन्त्रं प्रयुङ्क्ते न चावान्तरनिद्रां नाम्नेकं स्रोतः, नाम्नेकां वर्षधाराम् तस्मात् सकृत्प्रयोगः तत्र नदीसन्तरणे स्रोतसां भेदेऽपि नदीद्रव्यैकत्वात् सकृन्मन्त्रः अववर्षणे कालैकत्वादेव" कर्क०।

अववाद पु० अव+वद–घञ्। १निन्दायाम्, २विश्वासे, ३अवज्ञायाम्, ४अवलम्बने च।

अवश त्रि० नास्ति वशमायत्तत्वं यस्य। १अस्वाधीने, २कामादिपरवशे, ३पराधीने च। "जग्ध्वाऽहरविधिना मांसं प्रेत्य तैरद्यतेऽवशः" मनुः। कार्य्यतेऽह्यवशः कर्म्म सर्वः प्रकृतिजैर्गुणैः" "कार्य्यतेऽह्यवशोऽपि सन्" इति च गीता।

अवशस् त्रि० अव+शन्स–क्विप्। अववादे अवशंसने "अवशसा निःशसा यत् परागसो पारिम जाग्रतो यत्स्वपन्तः" अथ० ६।४५।२।

अवशातन न० अव+शद–णिच्–तङ् ल्युट्। १नाशने २शीर्णता करणे। "मांसानामवशातनं श्वयथुर्दं शकोथ" इति सुश्रुतः

अवशिरस् त्रि० अवनतं शिरोऽस्य प्रा० ब०। अवाङ्मस्तके।

अवशिष्ट त्रि० अव+शिष–क्त। १अतिरिक्ते, २परिशिष्टे, ३अधिके च। "सुराकामद्यतक्तं दण्डशुल्कावशिष्टकम्" या० स्मृ० "वाजिभ्योवाजिनमिति श्रुतौ वाजिनं आमिक्षावशिष्टं जलमिति रघु०।

अवशीभूत त्रि० न वशीभूतः। अनायत्ते। अवशीकृतोऽत्यल।

अवशीर्ष(क) त्रि० अवनतं शीर्षं यस्य वा कप्। १अवाङ्मस्तके। अवाक्शीर्षाख्ये सुश्रुतोक्ते २शय्यादोषभेदे पु० "अवाक् शीर्षे दीर्घनुज्जोत्तानसङ्कुचितदेहस्थितताद्विगुणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषा" इति। ३नेत्ररोगभेदे नेत्रव्यापदोऽभिधाय "अतिपीड़ितवहोषान् विधिं चाप्यवशीर्षके" इति सुश्रुतः।

अवशेष पु० न० अव+शिष–भावे घञ्। १कृतपदार्थस्य भेदे २समाप्तौ च "तोयावशेषेण हिमाभमभ्रम्" भट्टिः कर्म्मणि घञ्। अवशिष्टे।

अवशीष पु० अव+शुष–भावे घञ्। अत्यन्तशोषे।

अवश्य त्रि० न वश्यः। अनायत्ते १अनधीने २दुर्दान्ते।

अवश्यकरण न० अवश्यं करणं योगविभागात् मलोपः। नियतकरणे अकरणान्निवृत्तौ "अवश्यकरणञ्चाकरणान्निवृत्तिः" प्रा०त० रघु०।

अवश्यपुत्र पु० अवश्यः पुत्रः। यासितुमशक्ये अवशीभूते पुत्रे। तस्य भावः मनोज्ञा०वुञ्। आवश्यपुत्रकमू तद्भावे न०।

अवश्यम् अव्य०अव+श्यै–डम्। १निश्चये २अप्रक्यनिवारणे च। "अवश्यं याति तिर्य्यक्त्वं जग्धा चैवाऽऽढ्यं हविः" मनुः "अवश्यम्भाविन्यर्थे वै सत्तायो नेह विद्यते" भा०शा०प०। "लुम्मेदवश्यमःक्त्वे तुम्कामममनसोरपि" इत्युक्तेः क्त्वान्ते मलोपः अवश्यपाच्यम्। "अवश्यभव्येष्वनवग्रहस्यङ्हा" नैष० अवश्यम् भवः ठञ् अव्ययखटिलोपः आवश्यकः। अवश्यम्भवे त्रि०। "एतेष्वावश्यकस्त्वसौ" भाषा०।

अवश्या स्त्री अव+श्यै–क। १कुलज्झटिकायाम् २अनायत्तायां स्त्रियाञ्च।

अवश्याय पु० अव+श्यै–ण। १कुलज्झटिकायाम्, "अवश्यायकणास्वादास्वादसुक्ताफलत्विषः" भट्टिः। २अभिमाने च। पृ० हस्वः अवश्यायोऽपि कुलज्झटिकायाम्।

अवश्रयण न० अव+श्रि–ल्युट्। चूल्लीतोऽवतार्य्य स्थापने। "अधिश्रयणावश्रयणान्तादिपूर्व्वापरीभूतः व्यापारकलापः पाकादिशब्दवाच्यः" सा०द०।

अवष्टब्ध त्रि० अव+स्तभ–क्त षत्वम्। १आसक्ते, २आक्रान्ते, ३अवलम्बिते, "अवष्टब्धा यष्टिः" सि०कौ०४प्रतिरुद्धे च।

अवष्टभ्य अव्य० अव+स्तम्भ ल्यप् षत्वम्। अवलम्ब्येत्यर्थे।

अवष्टम्भ पु०अव+स्तम्भ–घञ् षत्वम्। १प्रारम्भे २अनम्रतायाम् ३आलम्बने। "अवष्टम्भकरं वापि भयन्नं दण्डधारणम्"। सुश्रु० कर्म्मणि घञ्। ३स्तम्भे, "रघोरुष्टम्भमवेन पतिणा" रघुः "न पर्य्याप्तावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्य्यात्" सुश्रुतः ४सुखे च भावे ल्युट्। अवष्टम्भनम्। प्रारम्भे आलम्बने च न०। [स्थान इत्येव।

अवघ्राण पु० अव+स्नन–घञ् षत्वम्। भोजने शब्दे अव-

अवस् अव्य० अवर+प्रथमायाः पञ्चम्याः सप्तम्या वार्थे असि अवादेशः। १अवरशब्दार्थे २पश्चादर्थे च। अवोरमणीयम्, आगतः, वसति वा। अव–भावे असिच्। २रक्षणे न०। कर्म्मणि असिच्। २यशसि ३अन्ने ४धने च न०। "मित्रस्य चर्षणी धृतोऽवो देवस्य" य०११,६,२ "अवोरक्षणं द्युम्नं यशोऽन्नं वा" वेद०। गमने च "आवां रथेनियुत्वान् वक्षदवसे" ऋ०१,१३५,४, "अवसे रक्षणाय गमनाय वा" भा०।

अवस पु० अव+असच्। १नृपे २सूर्य्ये सि०कौ० ३अर्कदुग्धे ४पाथेयभेदे च "एतत्ते रुद्रावसं तेन" य०३,६१ "अवस शब्देन देशान्तरं गच्छतो मार्गमध्ये तटागादिसमीपे भोक्तव्य ओदनविशेष उच्यते" वेद०।

अवसक्त त्रि०अव+सन्ज–क्त। १संलग्ने। 'अनुज्ञानुमध्यमवसक्तेति" किरा०। भावे क्त। २संसर्गे न०।

अवसक्थिका स्त्री अवबद्धे सक्थिनी यत्रा कप्। १पर्य्यङ्कबन्धे "शयानःप्रौढपादश्च कृत्वा चैवावसक्थिकाम्" मनुः "अङ्घ्रिणा अवसक्थिकाबन्धहेतुभूतेन" किरा० १२,२२, टी० मल्लि०।

अवसण्डीन न०अव+सम्+डी–क्त। विहगाधःपतनरूपे गतिभेदे।

अवसथ पु० अव+सो–कथन्। १निलये, २ग्रामे च। अवसति शास्त्रमत अव+सो कथन्। ३कालनिलये मठे हेम०।

अवसथ्य पु० अवसथ+स्वार्थे यत्। अवसथशब्दार्थे।

अवसन्न त्रि०अव+सद–कर्त्तरि क्त। १विषादप्राप्ते २विनाशोन्मुखे "अवसन्नतापमतमिक्षमभात्" माघः। ३स्वकार्य्याक्षमे च

अवसर पु०अव+सृ–अच्। १प्रस्तावे, जिज्ञासानिवृत्तयेऽवश्य वक्तव्ये २सङ्गतिभेदे सङ्गतयश्च तच्छब्दे वक्ष्यन्ते ४वत्सरे, मन्वन्तरभेदे, ५वर्षणे, क्रियास्थितियोग्यतासम्पादकरूपे दैकालिकेऽवकाशे च। "शशंस सेवावसरं सुरेभ्यः" कुमा० "अन्योन्यदर्शनप्राप्तोविक्रमावसरं चिरात्" रघुः "अवसरमधिगम्य तं हरन्त्यः" माघः।

अवसरालय पु० अवसराय आलयो यत्र। अर्द्धरात्रे तत्र हि काले सर्व्वैः आलयएव स्थीयते इति तस्य तथात्वम्।

अवसर्पिन् त्रि०अव+सृप–णिनि। अधोगन्तरि स्त्रियां ङीप्।

अवसर्ग पु० अव+सृज–घञ्। १अप्रतिबन्धे यथेष्टं क्रियतामिति २कामचारानुज्ञायां "अखवसर्गः कामचारानुज्ञा" सि०कौ०। २स्वतन्त्रतायाञ्च। [त्रे।

अवसर्प पु० अवसर्पति प्रभुनिदेशात् परम्। अव+सृप–अच्।

अवसर्पिन् त्रि० अव+सृप-णिनि। अधोगन्तरि स्त्रियां ङीप्। सा च बौद्धानां कल्पकाले हेम० सच दशकोटिकोटिसागरवर्षमितः।

अवसाद पु०अव+सद–घञ्। १नाशे, २विषादे, ३स्वकार्य्याक्षमत्वरूपावसन्नतायाञ्च। "विषदेति तावदवसादकरी" किरा० "वैद्यासनावसादो वा रोगी वा स्यादधोमुखः" "खरावसादो घुर्घुरक" इति च सुश्रुतः।

अवसादक त्रि० अवसादयति अव+सद–णिच्–ण्वुल्। १अवसन्नताकारके २खेदकारके। "एष श्लोकः परित्यक्तः

सर्वकार्य्यावसादकः" रामा०। २कार्य्याक्षमतासम्पादके च।

अवसादन न० अव+सद णिच्–भावे ल्युट्। १विनाशने २कार्य्याक्षमतासम्पादने सुश्रुतोक्ते ३व्रणचिकित्साभेदे च "अपतर्पणमालेप" इत्युपक्रम्य "व्रणधूपनसुत्सादनमवसादनम्" इत्यादिना षष्टिरूपकल्पना दर्शिताः "उत्सन्नमेदुमांसानां व्रणानामवसादनम्" इति च तत्र दर्शितम्।

अवसान न०अव+सो–ल्युट्। १विरामे, २समाप्तौ, ३सीमायां, ४समापने ५मृत्यौ च। "न योषिद्भ्रः पृथगद्यादवसान दिनादृते" उ०त० स्मृतिः। "विरामोऽवसानम्" पा० "होमावसाने क्षततूर्य्यनादः" हेमा०दा०खं०पुरा०। "दोहावसाने पुनरेव दोग्ध्रीम्" "तच्छिष्याध्ययनविदितावसानाम्"। "दिनावसानोत्सुकबालवत्साम्" इति च रघुः "ब्रह्मारम्भेऽवसाने च पादौ वाह्यौ गुरोः सदा" मनुः। "दिवावसानच्छायेव" भट्ट०अवसति स्माध्यतेऽस्मिन्"आधारे ल्युट्। ६स्थाने। "अदाभ्यसोऽवसानं पृथिव्याः य०१२,४५, "अवसानं स्थानमिति" वेददी०।

अवसाम न० अवरं साम अच् समा०। अधमसामनि अरण्यादौ अन्त्यकर्म्मणि च गेये सामनि।

अवसाय पु०अव+सो–घञ्। १समाप्तौ, २खेदे, ३निश्चये च। ल्यप्। ४समाप्त्यर्थे ५निश्चित्यर्थे च अव्य०।

अवसायक त्रि०अव+सो–ण्वुल्। १निश्चयकारके २समापके च।

अवसिक्त त्रि०अव+सिच–क्त। १क्षतसेके २आप्लुते ३स्नाते च

अवसित त्रि०अव+सो–क्त। १समाप्ते, "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा०। "अवसितं हसितं प्रसितं सदा" भट्टिः। २रुद्धे, ३स्नाते, ४परिणते ५निश्चिते, च ६मर्हितधान्येन०। अव+सि–क्त। ७संबद्धे त्रि०।

अवसृष्ट त्रि० अव+सृज–क्त। १दत्ते २त्यक्ते ३निःसृते च।

अवसे अव्य०अव–तुमर्थे असेन्। रक्षितुमित्यर्थे। "आवात्विन्द्रोऽवस उप" य० २०,४७।

अवसेक पु०अव+सिच–भावे घञ्। समन्तात्सेचने। "अवसेको भवेद्यस्तेनक्षात् दोषान् विवर्ज्जयेदिति सुश्रुतोक्ते नेत्रवस्तिरोगभेदे च।

अवसेकिम पु०अवसेकेन निर्वृत्तः अवसेक+इमन्। वटकभेदे।

अवसेचन न० अव+सिच+ल्युट्। १समन्तात्सेचने शोणिताधोनिस्सारणे "शोणितावसेचनोपाया जलौकसः सुश्रु० रोगभेदे च तिक्तकाद्दुमपत्राणां कार्य्यः क्वाथोऽवसेचने" सुश्रु०।

अवसेय त्रि० अव+सो–कर्म्मणि यत्। १निर्णये २समाप्ये च

अवस्कन्द पु०अव+स्कन्द्–आधारे घञ्। जिगीषूणां सैन्यनिवेशस्थाने १शिविरे। भावे घञ्। २अवतरणे, ३आक्रमणे च

अवस्कन्दन न० अव+स्कन्द्–ल्युट्। १सर्व्वाङ्गेणावगाहने, २अवतरणे, ३आक्रमणे च।

अवस्कर पु० अव+कृ–अप् सुट्। विष्ठादिमले। "वर्चस्कोऽवस्कर·" पा० "कुत्सितं वर्चः वर्चस्कमन्नमलम्" सि०कौ। मलमात्रे च। "गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्" मिता०ना० स्मृ०। अस्मिन् पक्षे च पृ० सुट् इति भेदः। १अपादाने अप्। २गुह्यदेशे उपस्थादौ। अवस्करे जातः वुन्। अवस्करकः अवस्करभवे त्रि०।

अवस्कव त्रि० अव+स्कु–अच्। हिंसके "अवस्कवं व्यधवरं क्रमीन् अथ० २,३१,४।

अवस्तरण न० अव+स्तृ–भावे ल्युट्। १विस्तारे। "अवनयनावस्तरणे चावटवत्" कात्या०५,५,१४।

अवस्तात् अव्य० अवरस्मिन् अवरस्तात् अवरमित्यर्थे अस्ताति आदेशः। अवरकालादौ। अवस्तात् रमणीयम्, आगतः, वसति वा। "अवस्तात् स्वर्गलोकं प्रापयन्तः" शत०ब्रा०

अवस्तार पु०अव+स्तृ–कर्म्मणि घञ्। (परदा) इति ख्यातायां १जवनिकायाम्, २आस्तरणे च।

अवस्तु न० कुत्सितार्थे न०त०। अपकृष्टे पदार्थे "अवस्तुनिर्बन्धपरे! कथं नु ते" कुमा०।

अवस्था स्त्री अव+स्था–अङ्। १कालकृतायां देहादेर्दशायाम् २अवस्थाने च। अवस्था च कालकृतः भावविकारभेदः "जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति" यास्कोक्तः षड्विधः। शाङ्करैस्तद्भेदोविषयभेदादन्यो दर्शितः। यथा "यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः" अविद्याऽस्मितारागद्वेषाभिनिवेशाभिप्रायेण योगशास्त्रे पञ्चावस्था दर्शिताः। सांख्यमते कार्य्याणां कारणात्मकतया सूक्ष्मरूपेण कारणे स्थितत्वात् उत्पत्तेः प्राक् याऽवस्था प्रागभावस्थानीया सा अनागतावस्था, ततः कारकव्यापारेण व्यक्ता अभिव्यक्तावस्था ततः ध्वंसस्थानीया कारणलयरूपातिरोभावावस्था इत्येवं त्रिविधा। वेदान्तिमते जाग्रत् स्वप्नसुषुप्तिरूपा जीवस्यावस्था मोक्षावस्था चेति चतस्रोऽवस्था इत्यङ्गीकृ०सू०"सुषुप्त्यूत्क्रान्त्योर्भेदः" इत्यनेन सुषुप्तावेवान्तर्भावो दर्शितः" "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि। कैशोरमापञ्चदशात् यौवनं तु ततः परम्। आ षोडशाद्बालेन्द्वाख्यस्तरुणस्तत उच्यते। वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्" इति च स्मृत्युक्ता अवस्था अष्टौ

आपञ्चदशपर्य्यन्तं बाल्यम् आ त्रिंशद्वर्षं कौमारम्। आ पञ्चाशद्वर्षं यौवनम् ततऊर्द्धं वृद्धत्वमिति वैद्यकोक्तास्तस्योऽवस्थाः । जीवमात्रस्य कौमारयौवनवार्द्धकरूपा अवस्थास्तिस्रः एवमन्येषामपि वस्तूनां तत्तत्क्षणभेदेनावस्थाभेदा उन्नेयाः । सर्व्वेषां पदार्थानां कालादिकृतपरिणामान्तरत्वेऽवस्थेत्युच्यते यथा नायकयोः "अवणार्हर्षनाद्यापि मिथः संरूढरागयोः । दशाविशेषेष्वेषोऽप्राप्तौ पूर्व्वरागः स उच्यते" इत्युपक्रम्य "अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंलापाश्च । उन्मादोऽथ व्याधिर्जडता मृतिरिति दशा कामदशाः" सा०द० उक्ता कामदशा दशविधाः । मल्लिनाथेन तु "दृङ्मनः सङ्गसङ्कल्पौ जागरः क्षयताऽरतिः । ह्रीत्यागोन्मादमूर्च्छाना मृत्यनङ्गदशा दश" इत्यन्यविधा दश दशा उक्ताः।एवं दैन्यावस्था-कारुण्यावस्था-शौकावस्था-मदावस्थादयोपि।"रसावस्थाः परं भावः स्थायितां प्रतिपद्यते" "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः" इति च सा०द० । "अन्तर्मदावस्थइव द्विपेन्द्रः"रघुः । "अपवित्रः पवित्रो वा सर्व्वावस्थाङ्गतोऽपि" वा पुरा० "तस्मात् सर्व्वास्वस्थासु मान्याः पूज्याश्च पार्थिवाः"रामा० ३आकारे च । "कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वतः कृतः" रघुः । [२स्थापने च ।

अवस्थापन न० अव+स्था–णिच्–युक् ल्युट् । १निवेशने

अवस्थापित त्रि० अव+स्था–णिच्–कर्म्मणि क्त । १निवेशिते २स्थापिते च । [स्थापयित्वेत्यर्थे अव्य०।

अवस्थाप्य त्रि०अव+स्था–णिच्–युक् यत् । निवेशनीये ख्यप्।

अवस्थायिन् त्रि० अव+स्था–णिनि स्त्रियां ङीप् । अवस्थितियुक्ते ।

अवस्थित त्रि०अव+स्था–क्त । १वर्त्तमाने २स्थिते "अन्यानपि प्रकुर्व्वीत शुचीन् प्रज्ञानवस्थितान्" "आधिश्चोपनिधिश्चैव" इत्युपक्रमे "दीर्घकालमवस्थितौ" इति च मनुः ।

अवस्थिति स्त्री अव+स्था–क्तिन् । अवस्थाने

अवस्यन्दन न० अव+स्यन्द–ल्युट् । क्षरणे गङ्गा० क्व । अवस्यन्दनीयः तद्वादौ त्रि० ।

अवस्यु त्रि० अवोरक्षणम् इच्छति–क्यच्–उन् । रक्षणेच्छायुक्ते । "वन्मारिरवस्युरसि द्युवस्वान्" ता० आ० । "दैलानामवस्यवे यविष्ठ" ऋ०२,६,६, "अवस्यवे स्वस्तय-मिच्छवे" भा०" ।

अवस्रंसन न०अव+स्रन्स–ल्युट् । १अधःपतने, २च्युतौ च ।

अवस्रंसित त्रि०अव+स्रन्स–णिच्–क्त । १दलिते २पातिते च ।

अवस्रस् त्रि० अवस्रंसते क्विप् । १भ्रंसनशीले २स्खलिते च ।

अवस्वत् त्रि० अवोरक्षणमस्यास्य मतुप् मस्य वः । रक्षणयुक्ते ।

अवह त्रि० न वहति वह–अच् न०त० । नद्यादेःस्रोतःशून्ये १देशे "सव्याहृतो व्रजन्त्यनवेक्षमाणा यत्रोदकमवहं भवति तत् प्राप्य सप्तदुन्नाड्यैकं जलाञ्जलिसप्तकृत्य नामगोत्रे गृहीत्वोत्तीर्य्यान्यानि वासांसि परिधायेति" आश्व० गृ० "अवहं यत्र देशे नद्याः स्रोतो नास्ति तद्दिति" गु०त०रघु० । २वृतीयस्कन्धस्थे वायुभेदे च विवृतिर्वायुशब्दे।

अवहत त्रि० अव+हन–कर्म्मणि क्त। अल्पाघातेन विलुप्तीकृते

अवहति अव+हन–क्तिन् । अवघाते अल्पावघातेन विलुप्ती करणार्थे व्यापारे ।

अवहनन न०अव+हन भावे ल्युट् । अवघाते धान्यादेः विलुप्तीकरणसम्पादके १व्यापारे । अवहन्यतेऽनेन शोणितम् करणे ल्युट् । देहस्थे शोणितवहे स्थानभेदे २गुप्तसे च । "वपावसावहननाभिः क्लोम यकृत् प्लिहा" या० स्मृ० "अवहननं गुप्तसः" मिता० ।

अवहरण न० अव+हृ–ल्युट् । १स्थानान्तरनयने सैन्यानां युद्धस्थानात् शिविरस्थाने २नयने च ।

अवहस्त पु० अवरं हस्तस्य एक० त० । हस्तपृष्ठे हेम० ।

अवहार पु० अव+हृ–कर्त्तरि घञ् । १चौरे, २ग्राहनामके जलजन्तुभेदे (झाङ्गोर) च । भावे घञ् । ३निमन्त्रितविप्रादिभ्यो द्रव्यहरणे।४स्थानान्तरनयने सैन्यानां युद्धस्थानात् ५शिविरनयने च । "ततोऽवहारं सैन्यानां तव तेभाञ्च भारत !" भा०भी०प० ६विरामे ७निवृत्तौ च "क्रियतामवहारोऽस्मादुद्वाद्ब्राह्मणसंवृतात्" भा०आ०प० ।

अवहारक त्रि०अव+हृ–ण्वुल् । १स्थानान्तरनायके २निवारके ३युद्धात् सैन्यादिनिवारके च । (झाङ्गोर)४जलजन्तुभेदे पु० ।

अवहार्य्य त्रि०अव+हृ–ण्यत् । अवहरणीये १स्थानान्तरं नेये २अवश्यदेये । "आधिश्चोपनिधिश्चैव न कालात्ययमर्हति अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" मनुः "अवहार्य्यौभवेच्चैव सान्वयः षट्पशो दमः"मनुः। ३समाप्ये च ।

अवहालिका स्त्री अवहलति अधःस्थित्वा ऊर्द्धं स्रवति अव+हल–विच्छेदे ण्वुल् टाप् अत इत्त्वम् । प्राचीरे झारावली । ["यज्ञापहारार्थमसत्कृतोऽस्मि" गीता ।

अवहास पु० अव+हस–घञ् । १क्षुद्धासे २उपहासे च ।

अवहास्य त्रि० अव+हस कर्म्मणि ण्यत् । उपहास्ये

अवहित त्रि० अव+धा–क्त । कृतावधाने सावधाने ।

अव(ब)हित्था स्त्री न बहिस्तिष्ठति स्था–क पृषो० । कृत्रिमभावे । "भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था, व्यापारान्तरासक्तत्वन्यथाभावभाषणादिलोकनादिकरी" सा०द०उक्ते व्यभिचारिभावभेदे। "एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकमलपत्राणि गणयामास पार्व्वती" कुमा० । अयं वर्ण्यसमध्यस्तु न्यायः । [अनादरे ।

अवहेल स्त्री न० अव+हेड्–अङ् स्त्रियां, घञर्थे क वा ड्रस्य लः।

अवहेलन अव+हेड् अनादरे भावे ल्युट् डस्य लः । अनादरे ।

अवहेलित त्रि० अव+हेड–कर्म्मणि क्त डस्य लः । अवज्ञाते ।

अवक्कर त्रि० अव+कॄ–अच् । कुटिले । [पुष्पिकायाम् ।

अवाक्पुष्पी अवाक् अधोमुखं पुष्पमस्याः । (सुलफा) शत-

अवाक्शाख पु० अवाची शाखाऽस्य । "ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् । अधश्चोर्द्ध्वं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके । न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा । अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा । ततपदं तत्परिमार्गितव्यम्" गीतोक्ते संसारवृक्षे । "ऊर्द्ध्वमुत्तरः चराचराभ्यामुत्कृष्टः पुरुषोत्तमोमूलं यस्य तम् । अवरति ततोऽर्वाचीनाः कार्य्योपाधयोहिरण्यगर्भाद्योऽष्टौब्रह्मे ते तु शाखादव शाखायस्य तम् । विनश्वरत्वेन न स्वःप्रभातपर्य्यन्तमपि स्थास्नुतीति विश्वासानर्हत्वादवत्थं प्राहुः । प्रवाहरूपेणाविच्छेदादव्ययञ्च । काः प्राहुः ? "ऊर्द्ध्वमूलोऽर्वाक्शाखएषोऽश्वत्थः सनातन" इत्याद्याः श्रुतयः । छन्दांसि वेदायस्य पर्णानि धर्म्माधर्म्मप्रतिपादनद्वारेण छायास्थानीयैः कर्म्मफलैः संसारवृक्षस्य सर्व्वजीवाश्रयणीयत्वप्रतिपादनात् पर्णस्थानीयावेदाः । यस्तमेवम्भूतमश्वत्थं वेद स एव वेदार्थवित् संसारप्रपञ्चवृक्षस्य मूलभीश्वरोब्रह्मादयस्तदंशाः शाखास्थानीयाः सच संसारवृक्षोऽविनश्वरः प्रवाहरूपेण नित्यः वैदोक्तैः कर्म्मभिः सेव्यतामापादितश्च इत्येतावानेव हि वेदार्थः अत एवं विद्वान् वेदविदिति स्तूयते । किञ्च अधश्चेति । हिरण्यगर्भाद्यः कार्य्योपाधयोजीवाः शाखास्थानीयत्वेनोक्तास्तेषु च ये दुष्कृतिनस्तेऽधः पश्वादियोनिषु प्रसृताविस्तारं गताः सुकृतिनश्चोर्द्ध्वं देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य शाखाः । किञ्च गुणैः सत्त्वादिवृत्तिभिर्जलसेकैरिव यथायथं प्रवृद्धा वृद्धिं प्राप्ताः । किञ्च विषयाशब्दादयः प्रवालाः पल्लवस्थानीया यासां शाखास्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् । किञ्च अधः, चशब्दादूर्द्ध्वञ्च मूलानि अनुसन्ततानि विरूढानि सुस्थं मूलमीश्वर एव द्रुमानि तन्तरालानि मूलानि तत्तद्भोगवासनालक्षणानि । तेषां कार्यमाह मनुष्यलोके कर्म्मानुबन्धीनि कर्म्म अनुबन्धि उत्तरभावि येषां तानि ऊर्द्ध्वाधोलोकेष्वपि भुक्तभोगवासनाभिर्हि कर्म्मज्ञये मनुष्यलोकप्राप्तानां तत्तदनुरूपेषु कर्म्मसु प्रवृत्तिर्भवति तस्मिन्नेव हि कर्म्माधिकारोनान्येषु लोकेषु अतोमनुष्यलोकइत्युक्तम् । किञ्च न रूपमिति । इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य तथा ऊर्द्ध्वमूलत्वादि प्रकारेण रूपं नोपलभ्यते । न चान्तोऽवसानमपर्य्यन्तत्वात् । नचादिरनादित्वात् । नच संप्रतिष्ठा स्थितिः कथं तिष्ठतीति नोपलभ्यते । यस्मादेवम्भूतोऽयं संसारवृक्षोदुरुच्छेद्योऽनर्थकरश्च तस्मादेनं दृढेन वैराग्येण छित्त्वा तत्त्वज्ञानाय यतेतेत्याह अश्वत्थमेनमिति" श्रीधर० ।

अवाक्शिरस् त्रि० अवाक्शिरोऽस्य । अवनतमस्तके "अवाक्शिरसमुत्पादम्" भट्टिः ।

अवाक्श्रुति पु० नास्ति वाक् च श्रुतिश्च यस्य । वागिन्द्रियश्रवणेन्द्रियशून्ये अनेडमूके । (कालावोवा ।)

अवाकिन् त्रि० उच्यतेऽनया वच–करणे घञ् वाकः, वागिन्द्रियं नास्ति यस्य इनि न० त० । १ वागिन्द्रियशून्ये परात्मनि । "सर्व्वमिदमभ्याक्तोऽवाक्यनादरः" छा० उ० । (वोवा) रमूके च

अवाच्य त्रि० अवनतमुखमस्य । नम्रमुखे ।

अवाङ्मुख त्रि० अवाङ् मुखमस्य । अधोमुखे । "अवाङ्मुखस्योपरि पुष्पवृष्टिः" रघुः ।

अवाङ्मनसगोचर पु० वाक् च मनश्च वाङ्मनसौ तयोर्गोचरो न भवति । वक्तुमशक्ये मन्तुमशक्ये च निर्गुणे ब्रह्मणि "यद्वाचानाभ्युदितं येन वागभ्युद्यते" "यन्मनसा न मनुते येन मनोऽनुमन्यते" इत्यादि श्रुत्या तस्य तद्विषयत्वोक्तेस्तथात्वम् । तच्च जन्यत्वच्छिन्नचैतन्याविषयत्वञ्च तद्विषयत्वं तयोर्वृत्तिविषयत्वस्य तच्छिन्नवृत्तित्वात् । "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् । ब्रह्मज्ञानाय वृत्तिव्याप्तिरपेक्षिता" इत्युक्तेः अतएव "मनसैवानुद्रष्टव्यः" "तन्त्वौपनिषदं वेदेत्यादि" श्रुतिषु तद्विषय यतोक्तिः सङ्गच्छते "अखण्डसच्चिदानन्दमवाङ्मनसगोचरम्" वे० सा० ।

अवाच् त्रि० अवाञ्चति अव+अन्च–क्विप् । १ अधोमुखगते, "अवाक्शिरसमुत्पादम्" भट्टिः । अवरे २ देशे, ३ काले च । ४ दक्षिणस्यां दिशि स्त्री ङीप् । नास्ति वाक् यस्य ब० व० । ५ वाक्यरहिते त्रि० वागिन्द्रियशून्ये ६ ब्रह्मणि

न० । "अचक्षुष्कमश्रोत्रमननोऽतेजस्कम्" श्रुत० ब्रा० पूर्वार्धे औ अवाञ्चौ अत्र अवाचौ इत्यादिभेदः । कालाद्यर्थे प्रथमादीनां स्थानेऽस्ताति तस्य लुक् । ७अवरकालादावर्थे अव्य० । अञ्चतेर्गत्यर्थत्वे नलोपः पूजार्थत्वे तु ननलोपः । उच्यते प्रशस्यते वाक् स्तुतिः । ऽतदृष्टिते च "दुष्ट्वाव्योऽवहन्देवाचः" ऋ० ४,२५,६, अवाचःस्तुति रहिताः भा० भवादौ ख । अवाचीनस्तङ्गवादौ त्रि० । तिरुभिर्भस्त्रावाचीनविला"ता०ब्रा०"अवाचीनविला अवाङ्मुखविला"भा० । दिगा०यत् । अवाच्यस्तङ्गवादौ त्रि० ।

अवाच्य न०वच-ण्यत् न कुत्वम् न०त० । १दुष्टवचने, "अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः" गीता २वचनानर्हे,निन्दनीये त्रि० ३अकथनीये च "अवाच्यो दीक्षितो नाम्ना यवीयानपि योभवेत्" मनुः अवाच्+भवार्थे यत् । ४अवरकालादौ भवे त्रि० । ५अभिधातुत्या बोधयितुमशक्ये च । "अवाच्यत्वादिकं तस्य वक्ष्ये व्यङ्ग्यनरूपणे" सा० द० । यदुद्दिश्य कथ्यते ईतद्विशे च ।

अवात त्रि०नास्ति वातो यत्र । १वायुशून्यदेशे वा-क्त न०त० । २अन्यैरप्रतिगते च "वन्वन्नवातोऽस्तृतः" ऋ० ६,१६,२० । वातव्यापारशोषणशून्ये "न कृष्यन्ते युवतयोऽवाताः" ऋ० ६,६,७ "अवाताः वातस्य शोषणहेतुत्वात् तच्छून्यतया अशुष्काः" भा० ।

अवाञ्चित त्रि० अव+अञ्च-णिच्-क्त । आनमिते "दृष्ट्वाञ्छया सुन्दरवाञ्चितानू" माघः । [देशे त्रिका० ।

अवाच्यदेश पु० अवाचि भवः यत् कर्म० । म्लेच्छानामधो-

अवादिन् त्रि०वद-णिनि न०त०स्त्रियां ङीप् । १अविरोधिनि २अवदनशीले च । [कादृष्टमेकमाज्यफलं किल"भा०स०प०

अवान त्रि० अव+अन-अच् । शुष्कफलादौ "अवानमशु-

अवान्तर त्रि०अवगतमन्तरं मध्यम् प्रा०स० । १प्रधानान्तर्पातिनि अङ्गादौ,२सामान्यस्य विशेषे ३प्रसङ्गागते च "इयं फलश्रुतिः निःश्रेयसपरमपुरुषार्थसाधनपरा भवति किन्तु बहिर्मुखानां मोक्षविवक्षयाऽवान्तर कर्मफलैः कर्मस्तुत्यर्थतोत्पादनमात्रम्" श्रीधरः । यथा "पिब निम्बं प्रदास्यामि खलु ते खण्डगुडूकान् । पित्तैवस्तुक्तः पिबति तिक्तमप्यतिबालकः" पुरा० । "तएतमवान्तरां दीक्षामयक्षन्" श्रुत० ब्रा० ।

अवान्तरदिश् स्त्री अवान्तरा द्वयोर्दिशोर्मध्ये दिक् । अन्तराले दिशि ऐशान्यादिदिशि कीर्ते । "दिशोः पार्श्वेऽवान्तरदिशः पर्यवः" इ० उ० ।

अवान्तराम् अव्य०अवान्तर+बा०आम् । सर्वमध्यपातिनि । "तदेतमवान्तरात्मानमुपद्रवयते" इति श्रुत० ब्रा० ।

अवापित त्रि० वप-णिच्-क्त न०त० । यस्य वपनं न कृतं ताडये आरोपिते १धान्यादौ २अच्छेदिते केशादौ च । अव+आप-णिच्-क्त-३प्रापिते च । "विषमां कुरङ्गनामवापिता" नैष० ।

अवाप्त त्रि० अव+आप-क्त । प्राप्ते । "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चन" गीता । [मवाप्तव्यम्" गीता ।

अवाप्तव्य त्रि० अव+आप-तव्य । प्राप्तवे । "नानवाप्त-

अवाप्ति स्त्री अव+आप-क्तिन् । प्राप्तौ । "तपः किलेदं तदवाप्तिसाधनम्" कुमा० "दृष्टानवाप्तेरौत्सुक्यम्" सा०द० ।

अवाप्य त्रि० अव+आप ण्यत् । १प्राप्ये । "ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यञ्च" यज्ञनम्" मनुः । न वाप्यः । २आरोप्ये ३अच्छेद्ये केशे च अव+आप-ल्यप् । ४प्राप्यत्वार्थे अव्य० ।

अवाम न० । न०त० । वामभिन्ने १दक्षिणे "अवामे वामाङ्गे" नैष० । वामः प्रतिकूलः सुन्दरो वा विरोधे न०त० । २अनुकूले सुन्दरभिन्ने ३अशोभने च त्रि० । [ऋ० १०,४,२

अवाय पु० अव+इण् घञ् । अवयवे । "अनवायं किमीदिने"

अवार न०न वार्यते जलेन इ-कर्मणि घञ् । नद्यादेरर्वाक्-वीरे । [भावे । न०ब० । तच्छून्ये त्रि० ।

अवारण न० इ-णिच्-ल्युट् अभावे न०त० । निषेधा-

अवारणीय त्रि० न वारणीयः वारयितुमशक्यः । वारयितुमशक्ये १रिपुप्रभृतौ २रोगादौ च । अवारणीयाश्च रोगाः सुश्रुते दर्शिता यथा "अथातोऽवारणीयमध्यायं व्याख्यास्यामः । उपद्रवैस्तु ये जुष्टा व्याधयो यान्यथार्थताम् । रसायनाहिना वत्स ! तानू श्रृणु संक्षेपतो मम ॥ वातव्याधिः प्रमेहश्च कुष्ठमर्शोभगन्दरः । अश्मरी मूढगर्भश्च तथैवोदरमष्टमम् ॥ अष्टावेते प्रकल्पैव दुश्चिकित्स्या महागदाः ॥ प्राणसंक्षयसंत्रासतृष्णाशोषवमिज्वरैः ॥ मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः । वर्ज्जनीया विशेषेण भिषजा सिद्धिमिच्छता ॥ मूत्रं शुष्कत्वचं भग्नं कस्याप्यानननिपीड़ितम् । नरं रजार्त्तिमन्तञ्च वातव्याधिर्विनाशयेत् ॥ यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव वा । पिडकापीड़ितं गाढं प्रमेही हन्ति मानवम् ॥ प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हृतस्वरम् । पञ्चकर्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्॥ तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितम् । शोफातिसारसंयुक्तमर्शोव्याधिर्विनाशयेत् ॥ वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च । भगन्दरात् प्रस्रवन्ति यस्य तं परिवर्ज्जयेत् ॥ प्रस्यूतनाभिदघ्नं वृक्षमूलं रुगन्वितम् ।

अङ्गारी ज्वरयत्याशु सिकतायर्करान्विता ॥ गर्भकोष-परासङ्गो भक्तक्लो योनिसंहतिः । हन्यात् स्त्रियं मूढ-गर्भं यथोक्ताश्चाप्युपद्रवाः ॥ पार्श्वभङ्गाङ्गविद्वेषशोफातिसार-पीड़ितम् । विरिक्तं मूर्द्धमाणञ्च वर्ज्जयेदुदरार्दितम् । यस्तास्यति विसंज्ञश्च शेते निपतितोऽपि वा । शीतार्दितोऽ-न्तरुष्णश्च ज्वरेण म्रियते नरः ॥ यो रूक्षरोमा रूक्षाक्षो रूक्षे संघातशूलवान् । नित्यं वक्त्रेण चोच्छ्वसेत् तं ज्वरो हन्ति मानवम्॥ हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोच-नम् । सन्ततोच्छ्वासिनं क्षीणं नरं ज्वरयति ज्वरः ॥ आविलाक्षं प्रतास्यन्तं निद्रायुक्तमतीव च । क्षीणशोणित-मांसञ्च नरं ज्वरयति ज्वरः ॥ श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितम् । विशेषेण नरं हन्यान्मतीसारो विनाशयेत् ॥ शुक्लाक्षमन्नद्वेषारमूर्द्ध श्वासनिपीड़ितम् ॥ कृच्छ्रेण बद्ध मेहन्तं यक्ष्मा हन्तीह मानवम् ॥ श्वासशूल-पिपासान्नविद्वेषमन्थिमूढताः । भवन्ति दुर्बलत्वञ्च गुदिम-नोरुत्लेशतः ॥ आध्मानं बद्धनिष्यन्दं हृर्दिहिक्काटङ्क-न्वितम् । रजाश्वाससमाविष्टं विद्यन्निर्नाशयेन्नरम् ॥ पाण्डु-दन्तनखो यश्च पाण्डुनेत्रश्च मानवः । पाण्डुसङ्क्रातदर्शी च पाण्डुरोगी विनश्यति ॥ लोहितं हर्दयेद्यश्च बद्धयो-लोहितेक्षणः । रक्तानाञ्च दिशां दृष्ट्वा रक्तपित्ती विनश्यति॥ अवाङ्मुखस्तन्मुखो वा क्षीणमांसबलो नरः । जागरिष्णु-रसन्देहस्तन्मादेन विनश्यति ॥ बद्धयोऽपस्करन्नन्तं प्रक्षीणं चलितभ्रुवम्। नेत्राभ्याञ्चविकुर्व्वाणमपस्कारो विनाशयेत्"॥

अवारपार पु० अवारमवाक्तीरं पारञ्चोत्तरतीरंचस्तो यस्य अर्शआद्यच्। उभयकूलवति समुद्रे ।

अवारपारीण त्रि० अवारपारे गच्छति+ख । पारगामिनि।

अवारिका स्त्री नास्ति वारि यत्र । धन्वाके, तस्य अतिशुष्क त्वेन जलशून्यत्वात्तथात्वम् ।

अवारित त्रि० न वारितः । अनिषिद्धे "ग्रामेषु सैन्यैरकरो-दवारितः" माघः । [गन्तरि ।

अवारीण त्रि० अवारं गच्छति ख । नद्यादेरर्वाक्पार

अवार्य्य त्रि० न वार्य्यः ।अवारणीये। "उपद्रवैस्तु ये जुष्टा-व्याधयो यान्त्यवार्य्यताम्" सुश्रु० ।

अवावट पु० "द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते । अवावट इतिख्यातः शूद्रधर्म्मा स जातितः" रत्नमुक्ते कुण्ड-गोलकादौ ।

अवावन् त्रि० ओण्-अपसारणे क्वनिप् । अपसारके । स्त्रियां ङीप् वनोरच् । अवावरी ।

अवासस् त्रि०न वासोऽस्य । १वस्त्ररहिते नग्ने २बौद्धभेदे च।

अवासिन् त्रि० न वसति वस-णिनि न० त० । निवासशील भिन्ने । स्त्रियां ङीप् ।

अवास्तव न० न वास्तवम् । सत्यभिन्ने मिथ्याभूते ।

अवाह्य त्रि० न० त० । वोढुमयोग्ये ।

अवि पु० अव–इन् । १सूर्य्ये, २अर्कवृक्षे ३मेषे, ४छागे, "महाल्यपि समृद्धानि गोजाविधनधान्यतः" जिनकार्ष्णुक-वस्त्रावी पृथक् दद्याद् विशुद्धये" इति च मनुः ५पर्व्वते, ६मूषिककन्यले, ७प्रभौ च । टलज्जायां स्त्री वा ङीप् । स्वार्थे कन् । अविशब्दार्थे । भावादौ पुरोहिता० यक् । आविक्यम् तद्भावादौ न० ।

अविकट पु० अवि+समूहे कटच् ।१मेघसंघाते । विकट उग्रः न०त० । २उग्रभिन्ने सौम्ये त्रि० ।

अविकटोरण पु०अविकटे मेघसंघे देयः उरणःमेघः । न्यायं शुल्करूपेण देये मेघसंघातमध्ये मेषरूपे करे ।

अविकत्यन त्रि न०त० । श्लाघाशून्ये "सन्तुष्टास्त्र समायुक्ता भवेयुरविकत्थनाः" देवीपुरा० ।

अविकल त्रि०न विकलः व्याकुलः। १व्याकुलभिन्ने २अविसं-वादिनि च "कलमविकलतालं गायकैर्बोधहेतोः" माघः "अधिकलोऽविसंवादी" मल्लि० ।

अविकार पु० अभावे न०त० । विकाराभावे न०ब० । विकारशून्ये । विकारश्च परिणामभेदः भावधर्म्मः ।

अविकार्य्य त्रि०नविकार्यः। १विकार्य्यभिन्ने परिणामिगुणशून्ये "अविकार्य्योऽयमुच्यते" गीता । विकार्यश्च द्वेधा "प्रकृत्यु-च्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् । किञ्चिद्गुणान्तरोत् पत्त्या सुवर्णादिविकारवत्" इति वाक्यप० उक्तं प्राक्तम् याद्यवस्तुनश्च विकार्यकर्मत्वम् तद्भिन्ने २पदार्थे परात्मनस्तु तदुभयाभावात् सर्वथाऽविकार्यत्वमेव ।

अविकृत त्रि०न विकृतः । परिणामिगुणशून्ये ।

अविकृति स्त्री अभावे न०त०।१विकाराभावे न०ब०२विकार शून्ये च । "३सांख्योक्तायां मूलप्रकृतौ स्त्री "मूलप्रकृति रविकृतिः" सा० का० ।

अविक्रिय त्रि० नास्ति विक्रिया यस्य । विकारशून्ये ।

अविक्रीत त्रि० न विक्रीतः । विक्रीतस्याऽपि कालविशेषमध्ये पुनः प्रत्याहर्त्तुं शक्ये द्रव्यभेदे।तत्र कालनियमो यथा "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहं तद्द्रव्यं दद्याच्चैवाददीत वा" मनुः । क्रीतानुशयकालवत् द्रव्यविशेषे विक्रयानुशयकालविशेषोऽप्याहुः। "दशैकपञ्चस-

मासत्रयत्रहार्द्धमासिकम् । वीजायोवाहूरत्नस्त्रीदोह्य पुंसां परीक्षणम्" या० स्मृ० । तथाच वीजे-व्रीह्यादौ पञ्चाहं, रत्ने-मुक्ताप्रवालादौ सप्ताहं, स्त्रियां-दास्यां मासं, दोह्ये-गोमहिष्यादौ त्रयहम्, पुंसि-दासे पञ्चदशाहं, व्याध्य परीक्षणं कर्त्तव्यम् तावत्कालमध्ये अनुशये प्रत्याहर्त्तुं शक्यते इत्यवगम्यते एवञ्च मनुवचनमेतदतिरिक्तविषयम् एवं विक्रयस्यानुशयकालविशेषेऽव्यविशेषे बोध्यः ।

अविक्रेय त्रि० विक्रेतुमनर्हः । स्मृतिनिषिद्धविक्रये लाक्षालवणादौ अपण्यशब्दे विवृतिः । "अविक्रेयस्य विक्रयः" स्मृतिः ।

अविक्षत विक्षतः नष्टः भोगादिना दुष्टोवा न० त० । १अविनष्टे भोगादिना १अदूषिते च । "विक्रेतुः प्रतिदेयं तत्तस्मिन्ने वाऽप्यविक्षतम्" स्मृतिः ।

अविक्षित त्रि० नास्ति विशेषेण क्षितम् क्षयोऽस्य भावे क्त । विशेषक्षयशून्ये "अविक्षितास आयुषा सुवीराः" ऋ० ७, १२३४ । वा दीर्घत्वे । अविक्षीणः तत्रैव कर्त्तरि क्त न० त० । अविक्षीण इत्येव ।

अविक्षिप त्रि० विक्षेप्तुं न शक्तः क्षिप-क- । विक्षेप्तुमशक्ते । स्वार्थे कन् तत्रैव । [अजगन्धाटच्चे ।

अविगन्धा स्त्री अवेर्भागस्य गन्ध इव गन्धः पृषोदरादित्वात् ।

अविगर्हित त्रि० न० त० । १अनिन्दिते

अविगीत त्रि० न० त० । अवनिन्दिते "अविगीतशिष्टाचार परम्पराप्राप्तत्व नेति" मुक्ता० । [२उद्विग्नभिन्ने त्रि० ।

अविग्न पु० विज-क्त न० त० । (करभचा) १करभकण्टके ।

अविग्रह त्रि० नास्ति विशेषेण ग्रहो यस्य । १विशेषग्रहेणाज्ञाते "अविग्रहा गतादिस्था यथा यामादिकर्म्मभिः" हरिः । न विग्रहो वृत्तिसमानार्थकं वाक्यं यस्य । २व्याकरणोक्ते नित्यसमासे । नास्ति विग्रहो देहो यस्य । ३निरवयवे परमेशे पु० नास्ति मीमांसकोक्ते ४विग्रहशून्ये देवे च । तैर्हि देवानां विग्रहवत्त्वं खण्डितं तच्च शङ्कापूर्व्वकं जै० सू० भाष्ये च दर्शितं यथा-"देवता वा प्रयोजनवेदतिथिवद्भोजनस्य तदर्थत्वात्" सू० "नैतदस्ति,-अग्न्यादयोऽप्रयोजकाः-इति, सर्व्वा देवताः सर्व्वेषां धर्म्माणां प्रयोजिकाः भवितुमर्हन्ति । कुतः ? । 'भोजनस्य तदर्थत्वात्',—भोजनं हि इदं देवतायाः, यागो नाम, भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते—इति, देवतासम्प्रदानको हि अयं यागः श्रूयते, सम्प्रदानं च नाम कर्म्मणोऽपि ईप्सिततमादभिप्रेततरम्, तस्मात् न गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्म्मणी । अपि च यागो नाम देवतापूजा, पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते, तदेतत् 'अतिथिवत्' द्रष्टव्यं, यथा यावत्किञ्चित् अतिथेः परिचरणं, सर्व्वं तत् अतिथिप्रयुक्तम् एवम् इदमपि—इति । आह,—"ननु एवं ब्रुवता, विग्रहवती देवता भुङ्क्ते च—इत्यभ्युपगतं भवति" । उच्यते, वाढं, विग्रहवती देवता भुङ्क्ते च । कुतः ? । स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च,—एवं हि स्मरन्ति, विग्रहवती देवता—इति, स्मृतिश्च नः प्रमाणम् । तथा विग्रहवतीं देवताम् उपचरन्ति,—यमं दण्डहस्तमालिखन्ति, कथयन्ति च, तथा वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तं, उपचारादपि स्मृतेर्द्दिग्मानं कल्पयामः । तथा अन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति,-"जग्भ्या ते दक्षिणम् इन्द्र ! हस्तम्"-इति, पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति । तथा "इमे चित् इन्द्र! रोदसी अपारे यत् संजग्भा मघवन् ! काधिरित्ते,—इति, काधिर्मुष्टिः, सोऽपि पुरुषविग्रहस्य एव उपपद्यते । तथा, "त्रविग्रीवो वयोदरः सुबाहुरन्धसो मदे। इन्द्रो: दृळ्हानि जिम्नते" इति, ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति । तस्मात् विग्रहवती देवता इति । भङ्क्ते च । कथम् अवगम्यते ?। स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं स्मरन्ति, भुङ्क्ते देवता इति । तथा च एनाम् भुञ्जानाम् इव उपचरन्ति, यदस्यै विविधान् उपचारान् उपहरन्ति । तथा च अन्यार्थवचनं भुञ्जानाम् देवतां गमयति,-"अङ्गेन्द्र ! पिब च प्रस्थितस्य-इति, तथा च, "विश्वासनानि जठरेषु धत्ते" इति, "एकया प्रति धा पिबत्साकं सरांसि त्रिंशतम्" इति । आह, "न देवता भुङ्क्ते, यदि च भुञ्जीत देवतायै हविः प्रत्तं क्षीयेत" । उच्यते, अक्षरसभोजिनी देवता मधुकरीवत् अवगम्यते । कथम्?। देवतायै हविः प्रत्तं नीरसं भवति, तस्मात् अक्षरसं भुङ्क्ते देवता इति गम्यते" भा० । "आर्थपत्याच्च" सू० । "यदि कस्यचित् अर्थस्य ईशाना देवता उपचर्यमाणा च प्रसीदेत् ततः तदाराधनार्थम् इयं देवतापूजा अभिनिर्वर्त्त्येत, न च एतदुभयम् अपि अस्ति इति, तत् उच्यते, अर्थपतिर्देवता इति । कथम् अवगम्यते? । स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं हि स्मरन्ति, अर्थानाम् ईष्टे देवता इति । तथा, देवयागो देवस्वत्वम् इत्युपचारस्यामेव स्मृतिं दृढयति । तथा अन्यार्थवचनम् ईशानां देवतां दर्शयति, "इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानां, इन्द्रो दृळ्हानि इन्द्र इन्नेधिराणाम् इन्द्रः

क्षेमे योगे हव्ये इन्द्रः' इति, तथा, "ईशानम् अस्य जगतः स्व ईशम् ईशानम् इन्द्र तस्थुषे" इति। तथा, स्तुत्युपचाराभ्यां प्रसीदति इत्युपगच्छामः, एवं हि स्मरन्ति, प्रसीदति देवता इति। तथा उपचरन्ति, प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः, प्रसन्नोऽस्य वैश्रवणो धनम् अनेन लब्धम् इति। तथा अन्यार्थदर्शनं भवति, आहुतिभिरिव हुतादो देवान् प्रीणाति इति, तद्वै प्रीता इषमूर्जं नियच्छन्ति इति" भा०। "ततश्च तेन सम्बन्धः" सू०। "ततो" देवतायाः, तेन फलेन सम्बन्धः परिचरितुर्भवति, यो देवताम् इज्यया परिचरति, तं सा फलेन सम्बध्नाति। कथम् एतत् अवगम्यते ?। स्तुत्युपचाराभ्यां स्मरन्ति हि, देवता यष्टुः फलं ददाति इति, तामेव उपचारेण स्तुतिं दृढयति, पशुपतिः, अनेनोपचरितः पुत्रोऽनेन लब्धः इति। तथा अन्यार्थदर्शनम् इषमेव अर्थं दर्शयति, "स, इत् जनेन स विशा स जन्मना स पुत्रैर्वाजम्भरते धनाऽभिः। देवानाम् यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम्" इति तथा, "तृप्त एवैनम् इन्द्रः प्रजया पशुभिः तर्पयति" इति तस्मात् हविर्ह्वानेन गुणवचनैश्च देवता आराध्यते, सा प्रीता सती फलं प्रयच्छति येन कर्मणा अग्निराराधितः, तस्य फलस्य दृष्टे, तत् कर्त्रे प्रयच्छति, न तत् स्मर्यः प्रदातुमर्हति, वचनादेतत् अवगम्यते। कः किं प्रयच्छति ? इति यथा अग्नौ वचनं, न तत् स्मर्ये" भा०। "अपि वा शब्दपूर्वत्वाद्यत्कर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः" सू०। "अपि वा इति पक्षो व्यावर्त्यते। न चैतदस्ति यदुक्तं देवता प्रयोजिका" इति, "यत्कर्म प्रधानं स्यात्" यजतेर्जातम् अपूर्वम्। कुतः ?। "शब्दपूर्वत्वात्, यत् हि फलं ददाति, तत् प्रयोजकम् इदं फलं ददाति इत्येतत् ज्ञानं शब्दपूर्वकं न प्रत्यक्षादिभिः अवगम्यते, शब्दश्च यजतिवाच्यात् फलम् आह, न देवतायाः। कथम् अवगम्यते ?। दर्शपूर्णमासयोः करणत्वेन निर्देशः "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति, तथा, "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति, यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः। "ननु द्रव्यदेवताक्रियं यजत्यर्थः"। सत्यमेवं, किन्तु "गुणत्वे देवताश्रुतिः", द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः, भूतभव्यसमुच्चारणे च भूतं भव्याय उपदिश्यते, तस्मात् न देवता प्रयोजिका। अथ यदुक्तं "कर्मणः ईप्सितादभिप्रेततरम्" इति न अस्य अभिप्रेतताम् अपह्नुमहे, तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यात् अभिप्रेतता अवगम्यते,। फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य। तस्य च श्रुत्या करणता अवगम्यते, न देवतायाः। तत्र यद्यपि देवतार्थता यागस्य गम्यते। फलार्थतापि तेन न प्रतिषिध्यते, फलं च पुरुषार्थः पुरुषार्था च नः प्रवृत्तिः, न च असौ देवतायाः, तस्मात् न देवताप्रयुक्ताः प्रवर्त्तिष्यामहे, या तु, सम्प्रदानस्य अभिप्रेतता सा फलवतो यजेः, साधनत्वे सति उपपद्यते। यच्च,—यजिर्देवतापूजा सा पूज्यमानप्रधाना लोके लक्ष्यते—इति, न लोकवत् इह भवितव्यम्, इह पूज्यमानपूजा प्रधानं, यत् हि फलवत् तत् प्रयोजकं, तस्मात् यत्कर्म प्रयोजकम्। अपिच, एतस्मिन् पक्षे विघ्नवती देवता भुङ्क्ते च—इति अध्यवसनीयं भवति, न हि अविघ्नायै अभुञ्जनायै च दानं भोजनं वा सम्भवति—इति"। यच्च उक्तं स्तुत्युपचारान्यार्थदर्शनैर्विघ्नवती, भुङ्क्ते च—इति। तत्र, स्तुतेर्मन्त्रार्थवादमूलत्वात्,—मन्त्रेभ्यश्च अर्थवादेभ्यश्च स्तुतिमूलं विज्ञानम् उत्पद्यते—इति प्रत्यक्षम् अवगम्यते, ते च मन्त्रार्थवादा नैवंपराः—इत्येतत् वक्ष्यामः। आह, 'यदि नैवंपरा न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानम्'—इति। उच्यते,—ये आलोचनमात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषाम् तत् स्तुतिमूलम् ये पुनर्निगुणतः पश्यन्ति, तेषां तत् बाधितम्। अपि च कस्यचित् स्तुतिर्मूलं भवति। तस्मात् ततः एव स्तुतिः। उपचारोऽपि स्तुतिमूल एव। यत्तु अन्यार्थदर्शनम्, उक्तं—'जगन्मा ते दक्षिणम् इन्द्र! हस्तम्'—इति। नैतत् एवम्परं,—इन्द्रस्य हस्तो विद्यते—इति" यःतस्य दक्षिणो हस्तस्तं वयमगृह्णीतवन्त इति। तस्मात् वाक्यात् इन्द्रस्य हस्तसत्ता न प्रतीयते। आह, 'यदि त्वसौ नास्ति, वयं ते हस्तं गृहीतवन्तः—इत्येवं न अवकल्पते—इति हस्तसत्ता अध्यवसीयते,—अस्त्यसौ हस्तः, वयं यं गृहीतवन्तः'—इति। तत्र उपपद्यते यद्यप्यस्य हस्तो भवेत्, तथापि न तम् उपगृहीतवन्तः—इति प्रत्यक्षमेतत्, तथाप्येतन्न अवकल्पत एव, तत्र एतत् असम्बद्धं वा अवकल्पयितव्यं, स्तुतिर्वा, तच्च सत्यपक्षेऽपि तुल्यम्। अथ एवम् उच्यते,—'तस्य एतद्वचनं, यो गृहीतवान् तस्य हस्तम्'—इति। उच्यते, नैतत् अध्यवसेयम्, आदिमत्तादोषो नेदस्य प्रसज्येत, न च, गृहीतवान् आसीत्—इत्युच्यते, प्रमाणाभावात्। 'एतस्मात् एव वचनात् अर्थात्

कल्प्यते हस्तग्रहीता इति चेत्' । तन्न, अयथार्थस्यापि उच्चारणं सम्भवत्येव यतः, यथा, 'दश दाडिमानि षड्-पूपाः' इति । यस्यापि च एष पक्षो, विग्रहवान् इन्द्रः इति, तस्यापि इन्द्रशब्देन आमन्त्रणं सम्बोधनार्थं, सम्बोधनम् अनुवचनाय, तत्र सम्बुद्धः इत्यवगते अनुवचनं न्याय्यम् न च, असौ केनचित् प्रकारेण सम्बुद्ध इति अवगम्यते, अनवगते सम्बोधनं व्यर्थम् । 'वचनप्रामाण्यात् सम्बुध्यते इत्येवं गम्यते इति चेत् उक्तम् अदृष्टकल्पनायां हस्तादिकल्पनानुपपत्तिरिति । न च, असौ सम्बुद्धः इति अवधार्यते, प्रमाणाभावात् । तस्मात् सम्बोधनवचनं न सम्बोधनाय, निर्देशार्थमेव । अविग्रहपक्षेऽपि तत् निर्देशार्थमेव भविष्यति । तत्र आमन्त्रितविभक्तिवचनं स्तुतये, एवम् इदं देवताख्यं साधयिष्यतम्, यच्चेतनादिवत् सम्बुध्य साधयति इति चेतनवदिव उपचर्यमाणः सम्बुद्धिशब्देन आमन्त्र्यते, तथा सम्बोधनशब्देन निर्देश्य उच्यते, श्रोतव्यो वयं तव हस्तं त्वदाश्रया वयम् इत्यर्थः, अस्माभिः इन्द्रकर्म कर्त्तव्यम् इत्येतत् अनेन ख्याप्यते । तथा "इमे द्यावापृथिव्यौ दूते अपारे यत् संगृह्णासि मघवन्नहो ते पूजितो सुष्टिः," इति सन्निव सुष्टिं स्तुत्यर्थेन वदति, । तस्यापि भावे न प्रमाणमस्ति, न इदं वचनं, "इत् महान् काशिः" अस्ति, किन्तर्हि, यस्तव काशिः, स महान् इति, अन्यार्थस्तव काशिरस्ति इति, अन्यः तव काशिर्महान् इति । "सता हि स्तुतिः उपपद्यते इति चेत्" । नैतत्,नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः, पौरुषविधिकैरङ्गैः तस्यापि स्तुतिर्भवति, यथा' "एते वदन्ति शतवत् सहस्रवत् अभिक्रन्दन्ति हरितेभिरासभिः । विष्णो यावाणः सुकृतः, सुकृत्यया स्वोतश्चित् पूर्वे हविरद्यमाशत" इति । तथा, "सुखं रथं युयुते सिन्धुरश्विनम्" इति। तस्मात् न स्तुतिवचनात् अर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः । तथा, "तुविग्रीव इन्द्रः, इति नैतत् युक्तं भवति, ग्रीवावान् इन्द्रः इति, किन्तर्हि याऽस्य ग्रीवा, सा महती, ग्रीवावत्त्वे नास्ति प्रमाणम् । न च,ग्रीवास्तुतिः अर्थापत्तिः, अपुरुषविधेऽपि स्तुत्युपपत्तेः । अपि च, "इन्द्रो दधानि जिघ्नते" इत्येताभ्यां पदाभ्याम् इन्द्रशब्दः सम्बुद्धो न शक्नोति तुविग्रीवादिभिः सम्बन्धं यातुं, द्विरुच्चारणम् अस्य प्रसज्यते, तुविग्रीववान् इन्द्रो वेदितव्यः दधानि च इन्द्रो हन्ति—इति, तथा हि सति भिद्येत, अभिन्नं च वाक्यम् उपलभ्यते, तद्देवम् अवकल्पते, यदि तुविग्रीवादयोऽस्य न उपदिश्यन्ते—इति स्तुत्यर्थं सङ्कीर्त्यते तुविग्रीवादिः, 'अन्यसो मदे इदुग्रो दधानि हन्ति'—इति एषा तु वचनव्यक्तिः, दधत्रधोपदेशपरम् इदं वचनम्—इति । यदपि वचनं,—बाहू ते इन्द्र रोमशौ, अक्षी ते इन्द्र पिङ्गले'—इति, तदपि बाह्वोः रोमशत्वम् अक्ष्णोश्च पैङ्गल्यम् आह, न बाहुसत्तामक्षिसत्तां च । यदपि अक्षिसत्तां वदति—इति गम्यते,—'चक्षुभ्यते शृण्वते ते ब्रवीमि'—इति, तदपि न चक्षुःसम्बन्धार्थं, चक्षुभ्यते ब्रवीमि—इति वचनसम्बन्धार्थं, तत् सतीमिव चक्षुभ्यत्तां स्तुत्यर्थम् उच्चारयति । कुतः एतत् अवगम्यते? । चतुर्थीनिर्देशात्, यदि प्रातिपदिकार्थोऽध्यवसीयते, तथा वाक्यमिश्रयेत, चक्षुभ्यान्—इत्येवं च उद्दिश्येत, चक्षुभ्यते ते ब्रवीमि—इति च । तस्मात् न किञ्चित् अन्यार्थदर्शनं पुरुषविधतां देवतायाम् इदं ख्यापयति—इति , न च, इदं भोजनं, न हि देवता भुङ्क्ते , तस्मात्, भोजनस्य तदर्थत्वात्—इति तत् असङ्गतम् । यदपि कृत्युपचारान्यार्थदर्शनैर्भुङ्क्ते—इति, तत् अविग्रहत्वेन प्रत्युक्तम् । अपि च, भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत । न च, मधुकरीवत् अक्षरसभोजिन्यो देवताः—इति प्रमाणमस्ति, मधुकरीषु प्रत्यक्षं, न च तद्वत् देवतायाम् । तस्मात् न भुङ्क्ते देवता इति। यदुक्तम् देवतायै हविः प्रत्तं नीरसं भवति—इति । नैषदोषः, वातोपहतं नीरसम्भवति—इति, शीतीभूतं च । न च, असौ कस्य चित् अर्थस्य ईष्टे, अनीशा कथं दास्यति ? ।—इति । यदुक्तं, कृत्युपचारान्यार्थदर्शनैः ईशाना देवता-इत्यवगम्यते—इति । तन्न, कृतेः मन्त्रार्थवादमूलत्वात्—इत्युक्तम् , उपचारोऽपि,-'देवमानो देवक्षेत्रम्'—इति उपचारमात्रम्,—यो यदभिप्रेतं विनियोगमर्हति, तस्य स्वं, न च यागं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता । तस्मात् न सम्भवत्यति—इति, देवपरिचारकाणान्तु ततो भूतिर्भवति, देवताम् उद्दिश्य, यत् त्यक्तम् । यदुक्तम्, अन्यार्थदर्शनम् ईशानां देवतां ख्यापयति,—'इन्द्रो दिव इन्द्र ईशे'—इत्येवमादीति, तत् प्रत्यक्षम् अनीशानां देवताम् उपलभ्य अध्यवस्यामः,—भाक्त एष शब्दः—इति । 'तत्र आह,+—वचनप्रामाण्यादेव अस्य ईशानता अवगम्यते, यद्देवलोका अर्थान् विनियुञ्जते, तद्देवताभिप्रायादेव-इत्यध्यवस्यामः'—इति । तन्न,

प्रत्यक्षाद् प्रमाणात् देवतापरिचारकाणाम् अभिप्रायः इत्यवगम्यते, स न शक्यो बाधितुम् । येऽपि देवताम् ईशानां वर्णयन्ति, तेऽपि न अपह्नुवते परिचारकाणाम् अभिप्रायम् । किं चाङ्गः, तथा देवता करोति, यथा परिचारकाणाम् अभिप्रायो भवति इति, न च, स ईशानो भवति, यः पराभिप्रायम् अनुरुध्यते, यस्य न स्वाभिप्रायात् विनियोगो भवति । अपि च, न च एतद्वचनं, वर्त्तमानकालोपदेशत्वात्, प्रत्यक्षविरोधात्, स्तुतिवादोऽवधार्यते, स्तुतिवादे च सम्भवति न वचनप्रामाण्यात् ईशिष्यते इति गम्यते । न च, देवता फलेन सम्बध्यते, या तदर्थं परिचर्येत । यदुक्तं, स्तुत्युपचारान्यार्थदर्शनैर्ह्येवं प्रीयते च इति । तत्र स्तुत्युपचारयोर्व्यक्तं यत् अन्यार्थदर्शनं तस्मै प्रीता इयमूर्ज्जम् इति, तत्र, अन्यस्य विधेराम्नानात् दक्षिणतः सम्परिहर्त्तव्या इत्याह" तथा "इन्द्र एवैनम् इन्द्रः प्रजया पशुभिस्तर्पयति" इति अत्र ऐन्द्रस्य हविषो विधातारम् । तस्मात् देवता न प्रयोजिका इति" भा० । "अतिथौ तत्प्रधानत्वभावः कर्म्मणि स्यात्तस्य प्रीतिप्रधानत्वात्" सू० । "यदुक्तम् अतिथिवत् इति तत् परिहर्त्तव्यम् आतिथ्यम् अतिथिप्रयुक्तं स्यात् आतिथ्ये हि तत् प्रीतिर्विधीयते अतिथिः परिचरितव्यः यथा प्रीयते तथा कर्त्तव्यम् इति । भोजनं दानं वा कार्य्यम् इति यद्यत् अतिथये रोचते तत् कर्त्तव्यं यत् तस्मै न रोचते न तत् बलात् कारयितव्यम् इति इह तु कर्म्मणि अभावः प्रीतिविधानस्य । तस्मात् विषमम् अतिथिना" शबरभाष्यम् । तदेतद्देवादिभिर्न मन्यते तर्हि तेषां विप्रकृष्टत्वमङ्गीकृतं तथाच शङ्कापूर्व्वकं देवानां विप्रकृष्टत्वं भा०सूत्रे तद्भाष्ये च व्यवस्थापितं यथा । "विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" भा०सू० "स्यादेतत् यदि विप्रकृष्टत्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारोवर्ण्यते विप्रकृष्टत्वाद्ऋत्विगादिवदिन्द्रादीनामपि स्वरूपसन्निधानेन योगेऽङ्गभावोऽभ्यते न च सम्भवति । बहुषु युगपदेकस्येन्द्रस्य स्वरूपसन्निधानानुपपत्तेरिति चेन्नायमस्ति विरोधः कस्मात् ? अनेकप्रतिपत्तेः एकस्यापि देवात्मनोयुगपदनेकस्वरूपप्रतिपत्तिः सम्भवति । कथमेतदवगम्यते ? दर्शनात् । तथाहि "कति देवाः" ? इत्युपक्रम्य "त्रयस्त्री च शता च त्रयस्त्री च सहस्रेति" निरूच्य" कतमे ते ? इत्यस्यां पृच्छयां "महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतान्दर्शयति । तथा त्रयस्त्रिंशतोऽपि षड्विद्यन्तर्भावक्रमेण "कतमएको देव इति प्राण" इति प्राणैकरूपतान्देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतान्दर्शयति । तथा स्मृतिरपि "आत्मनो वै बहूनि बहूनि भरतर्षभ ! कुर्य्यादयोगी बलं प्राप्य तैश्च सर्वैर्महीञ्चरेत् । प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुत्पत्तयश्चरेत्। संचिक्षेप्तु पुनस्तानि सूर्य्यो रश्मिगणानिव" इत्येवञ्जातीयका प्राप्तणिमाद्यैश्वर्य्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति किमु वक्तव्यमाजानसिद्धानां देवानाम्। अनेकरूपप्रतिपत्तिसम्भवाच्चैकैका देवता बहुरूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छति, परैश्च न दृश्यते ऽन्तर्द्धानादिशक्तियोगादित्युपपद्यते । अनेकप्रतिपत्तेर्दर्शनादित्यस्यापरा व्याख्या। विप्रकृष्टतामपि कर्माङ्गभावस्योदाहरनेका प्रतिपत्तिर्दृश्यते । क्वचिदेकोविप्रकृष्टाननेकत्र न युगपदङ्गभावं गच्छति यथा बहुभिर्भोजयद्भिर्नैकोब्राह्मणो युगपद्भोज्यते । क्वचिच्चैको विप्रकृष्टाननेकत्र युगपदङ्गभावं गच्छति यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते तद्वदिहोद्देश्यपरित्यागात्मकत्वाद्यागस्य विप्रकृतीमध्येकां देवतामुद्दिश्य बहवः स्वं-स्वं द्रव्यं युगपत् परित्यजन्तीति विप्रकृष्टत्वेऽपि देवानां न किञ्चित् कर्मणि विरुध्यते" भा०। "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" सू०। "मा नाम विप्रकृष्टत्वे देवादीनामुपगम्यमाने कश्चिद्विरोधः प्रसज्जि, शब्दे तु विरोधः प्रसज्येत, कथम् ? औत्पत्तिकं हि शब्दस्यार्थेन सम्बन्धमाश्रित्यानपेक्षत्वादिति वेदस्य प्रामाण्यं स्थापितम् । इदानीन्तु विप्रकृष्टतो देवताऽभ्युपगम्यमाना यद्यप्यैश्वर्य्ययोगाद्युगपदनेककर्मसम्बन्धीनि हवींषि भुञ्जीत तथापि विप्रकृष्टयोगादस्मदादिवज्जननमरणवतो सेति नित्यस्य शब्दस्यानित्येनार्थेनानित्यसम्बन्धे प्रमीयमाणे यद्वैदिके शब्दे प्रामाण्यं स्थितं तस्य विरोधःस्यादिति चेन्नायमस्ति विरोधः कस्मात्? अतः प्रभवात् अतएव हि वैदिकाच्छब्दाद्देवादिकञ्जगत् प्रभवति। ननु जन्माद्यस्य यत इति ब्रह्मप्रभवत्वं जगतोऽवधारितं कथमिह शब्दप्रभवत्वमुच्यते?। अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृतः ? यावता वसवोरुद्रा आदित्याविश्वेदेवासरुत इत्येतेऽर्था अनित्या एव, उत्पत्तिमत्त्वात् तदनित्यत्वे तद्वाचकानां वैदिकानां वस्तु-

दिशब्दानामनित्यत्वं केन वार्यते ? प्रसिद्धं हि लोके देवदत्तस्य पुत्रे उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियते इति। तस्मादविरोध एव इति चेन्न गवादिशब्दार्थसम्बन्धनित्यत्वदर्शनात्। न हि गवादिव्यक्तीनामुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात्। द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यन्ते नाकृतयः। आकृतिभिश्च शब्दानां सम्बन्धो नव्यक्तिभिः व्यक्तीनामानन्त्यात् सम्बन्धग्रहणानुपपत्तेः। व्यक्तिषूत्पद्यमानास्वप्याकृतीनां नित्यत्वान्न गवादिशब्देषु कश्चिद्विरोधो दृश्यते। तथा देवादिव्यक्तिप्रभवाभ्युपगमेऽपि आकृतिनित्यत्वान्न कश्चिद्वस्वादिशब्देषु विरोध इति द्रष्टव्यम्। आकृतिविशेषस्तु देवादीनां मन्त्रार्थवादाभ्यां विग्रहवत्त्वाद्यवगमादवगन्तव्यः। स्थानविशेषसम्बन्धनिमित्तास्त्वेन्द्रादिशब्दाः सेनापत्यादिशब्दवत्। ततश्च योयस्तत्तत्स्थानमधितिष्ठति स स इन्द्रादिशब्दैरभिधीयते इति न दोषो भवति। नचेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववदुपादानकारणत्वाभिप्रायेणोच्यते कथन्तर्हि ? स्थितिवाचकात्मना नित्यशब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्यार्थं व्यक्ति निष्पत्तिरतः प्रभव इत्युच्यते" भा०। "ज्योतिषि भावाच्च" सू०। "यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बंभ्रमज्जगद्वभासयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च। न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण, चेतनतया अर्थित्वादिना वा योगोऽवगन्तुं शक्यते हृदादिवदचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः। स्यादेतत् मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वाद्यवगमादयमदोष इति नेत्युच्यते। न तावल्लोको नाम किञ्चित् स्वतन्त्रं प्रमाणमस्ति प्रत्यक्षादिभ्यएव हव्यभिचरितविशेषेभ्यः प्रमाणेभ्यः प्रसिद्ध एवार्थो लोकात् प्रसिद्ध इत्युच्यते न चात्र प्रत्यक्षादीनामन्यतमं प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात् प्रमाणान्तरमूलतामाकाङ्क्षते। अर्थवादा अपि विधिनैकवाक्यत्वात् तत्स्तुत्यर्थाः सन्तोन पार्थगर्थ्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यन्ते। मन्त्रा अपि स्तुत्यादिविनियुक्ताः प्रयोग समवायिनोऽभिधानार्थाःन कस्यचिदर्थस्य प्रमाणमित्याचक्षते। तस्मादभावो देवादीनामधिकारस्य" भा०। "भावन्तु बादरायणोऽस्ति हि" सू०। तुशब्दः पूर्वपक्षं व्यावर्त्तयति। बादरायणस्त्वाचार्यो भावमधिकारस्य देवानामपि मन्यते। यद्यपि मध्वादिविद्यासु देवतादिव्यामिश्रासु असम्भवोऽधिकारस्य तथाप्यस्ति शुद्धायां ब्रह्मविद्यायां सम्भवः अर्थित्वसामर्थ्याद्यप्रतिषेधापेक्षितत्वादधिकारस्य। न च क्वचिदसम्भव इत्येतावता यत्र सम्भवस्तत्राप्यधिकारोऽपोद्येत। मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः सम्भवति तत्र योन्यायः सोऽत्रापि भविष्यति। ब्रह्मविद्यासु प्रकृत्य भवति लिङ्गदर्शनं औतं देवाद्यधिकारस्य सूचकं "तद्धोयो देवानां प्रत्यबुध्यत स एव तदभवत्" तथर्षीणामिति "ते होचुर्हन्त तमात्मानमन्विच्छामो यमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति" "इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणामित्यादि" च। स्मार्त्तेऽपि च गन्धर्व्यायाज्ञवल्क्यसंवादादि। यदप्युक्तं ज्योतिषि भावाच्चेति अत्र ब्रूमः। ज्योतिरादिविषया अप्यादित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति मन्त्रार्थवादेषु तथा व्यवहारात्। अस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योतिरादात्मभिश्चावस्थातुं यथेष्टञ्च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्। तथाहि श्रूयते सुब्रह्मण्यार्थवादे "मेधातिथिं ह काण्वायनमिन्द्रोमेधो भूत्वा जहारेति"। स्मर्यते च "आदित्यः पुरुषो भूत्वा क्रतौसुपजगाम स" इति। हृदादिष्वपि चेतना अधिष्ठातारोऽभ्युपगम्यन्ते "हृदब्रवीत्" "आपोऽब्रुवन्" इत्यादिदर्शनात्। ज्योतिरादिभूतधातोरादित्यादिष्वप्यचेतनत्वमभ्युपगम्यते चेतनास्त्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिव्यवहारादित्युक्तम्। यदप्युक्तम् मन्त्रार्थवादयोरन्यार्थत्वान्न देवताविग्रहादिप्रकाशनसामर्थ्यमिति। अत्र ब्रूमः प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणं नान्यार्थत्वमनन्यार्थत्वं वा। तथाहि अन्यार्थमपि प्रस्थितः पथि पतितं तृणपर्णादास्तीत्येवं प्रतिपद्यते। अत्राह विषम उपन्यासः तत्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तदस्तित्वं प्रतिपद्यते अत्र पुनर्विध्युद्देशैकवाक्यभावे स्तुत्यर्थेऽर्थवादेन पार्थगर्थ्येन नवृत्तान्तविषया प्रवृत्तिः शक्याऽध्यवसाययितुम्। न हि महावाक्ये प्रत्यायके इवान्तरवाक्यस्य पृथक् प्रत्यायकत्वमस्ति यथा "न सुरां पिबेदिति नञ्वति वाक्ये पदत्वयसम्बन्धात् सुरापाणप्रतिषेध एवैकोऽर्थो गम्यते, न पुनः सुरां पिबेदिति पदद्वयसम्बन्धात् सुरापाणविधिरपीति। अत्रोच्यते। विषमउपन्यासः युक्तं यत् सुरापाणप्रतिषेधे पदान्वयस्यैकत्वादवान्तरवाक्यार्थस्याग्रहणं" विध्युद्देशार्थवादयोस्त्वर्थवादस्थानि पदानि पृथगन्वयं वृत्तान्तविषयमतिपद्यानन्तरं कैमर्थ्यवशेन विधिस्तावकत्वं प्रतिपद्यन्ते।

यथाहि "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्र विधुद्देश्यवर्त्तिनां वायव्यादीनां पदानां विधिना सम्बन्धः "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिङ्गमयतीति" इत्येषामर्थवादगतानाम् पदानाम् । नहि भवति वायुर्व्वा आलभेत क्षेपिष्ठा देवता वा अलभेतेत्यादिवायुस्वभावसङ्कीर्त्तनेन त्ववान्तरमन्त्यं प्रतिपद्य एवंविशिष्टदैवत्यमिदं कर्म्मेति विधिं स्तु वन्ति । तदयत्र योऽवान्तरवाक्यार्थः प्रमाणान्तरगोचरोभवति तत्र तदनुवादेनार्थवादः प्रवर्त्तते । यत्र प्रमाणान्तरविरुद्धत्वत्र गुणवादेन । यत्र तु तदुभयं नास्ति तत्र किं प्रमाणान्तराभावाद्गुणवादः स्यात् आहोस्वित् प्रमाणान्तराविरोधाद्विद्यमानार्थवाद इति प्रतीतिशरणैर्व्विद्यमानार्थवादआश्रयणीयो न गुणवादः । एतेन मन्त्रो व्याख्यातः । अपि च विधिभिर्देवेन्द्रादिदैवत्यानि हवींषि चोदयद्भिरमेक्षितमिन्द्रादीनां स्वरूपम् । न हि स्वरूपरहिता इन्द्रादयश्चेतसि आरोहयितुं शक्यन्ते । न च चेतस्यनारूढायै तस्यै तस्यै देवतायै हविः प्रदातुं शक्यते । श्रावयति च "यस्यै देवतायै हविर्गृहीतं स्यात् तान्यायेत् वषट्करिष्यन्निति" । न च शब्दमात्रमर्थस्वरूपं सम्भवतीति शब्दार्थयोर्भेदात् तत्र वादश्यं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं न तत् तादृशं शब्दप्रमाणकेन- प्रत्याख्यातुं युक्तम् । इतिहासपुराणमपि व्याख्यातेन मार्गेण सम्भवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि प्रपञ्चयितुम् । प्रत्यक्षमूलमपि सम्भवति, भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम् । तथाच व्यासादयो देवताभिः प्रत्यक्षं व्यवहरन्तीति श्रूयते। यस्तु ब्रूयादिदानीन्तनानामिव पूर्व्वेषामपि नास्ति देवादिभिर्व्यवहर्त्तुं सामार्थ्यमिति स जगद्वैचित्र्यमतिषेधेत् इदानीमिव च नान्यदापि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात् ततश्च राजसूयादिचोदना उपरुन्ध्यात् इदानीमिव च कालान्तरेऽपि अव्यवस्थितप्रायान् वर्णाश्रमधर्म्मान् प्रतिजानीत ततश्च व्यवस्थाविधायिशास्त्रमनर्थकं कुर्य्यात् । तस्मात् धर्मोकर्षवशाद्विरल्तनाः देवताभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते । अपिच स्मरन्ति "स्वाध्यायादष्टदेवतासम्प्रयोग" इत्यादि योगोऽप्यणिमाद्यैश्वर्य्यप्राप्तिफलकः स्मर्य्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम् । श्रुतिश्च योगमाहात्म्यं प्रत्याख्यापयति "पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति" । कर्मणामपि मन्त्रब्राह्मण दर्शनात् सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम् । तस्मात् सम्भवमितिहासपुराणम् । लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाध्यवसातुं युक्ता । तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः । ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः । क्रममुक्तिदर्शनान्यथैवमेवोपपद्यन्ते इति" भा० ।

विग्रहादिपदेन "विग्रहोहविषां भोगऐश्वर्य्यञ्च प्रसञ्जता । फलप्रदानमित्येतत् पञ्चकं विग्रहादिकमिति" आन० गि० उक्तं पञ्चकं आहृत्य तच्च क्रमेण मीमांसाभाष्ये पूर्व्वपक्षे दर्शितम् । शब्दचिन्तामणावपि देवानां विग्रहवत्त्वं चेतनत्वञ्च व्यवस्थापितम् यथा "एवं देवतादावपि इन्द्रमुपासीतेत्यादौ लोके प्रयोगस्थानियमादगौणतयैव व्यवहाराच्चार्थाद्यनध्यवसायेन लौकिके सहस्राक्षादाविन्द्रादिपदशक्तिग्रहः प्रमाणञ्च इन्द्र सहस्राक्ष इत्यादिविधिसमभिव्याहृतोऽर्थवादएव स्वर्गपदवत् । अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या "तत्सुखं स.पदास्यदमिति" श्रुतेश्चार्थवादादेव शक्तिग्रहः नचेह तथार्थवादः किन्तु "इन्द्रः सहस्राक्षः इत्यादिस्तावकत्वेन प्रवृत्तिपर इति चेत् न इन्द्रः सहस्राक्षः" इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतितो बाधकं विना सहस्राक्षत्वेन्द्रादिपदवाच्यत्वावधारणात् प्रसिद्धपदसम्बन्धबलेन प्रतीयमानसमर्थबाधितमादायैव तेषां प्रवृत्तिपरत्वात् मन्त्रप्रकाशितयथिग्रेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां देवताव्यवहारात् अपि च शिवाय गां दद्यादित्यादौ देवतासंप्रदानत्वश्रुतेः, शिवादिसहस्रनाम्नां पर्य्यायत्वेन श्रुते र्मेक्षाजनपरिग्रहेण प्रमाणत्वात्आराधितदेवताया वरदात्रत्वश्रुतेश्च बाधकं विना चेतनैव देवता । अथ देवताचैतन्ये तत्प्रीतिरेव यागव्यापार इति नापूर्वसिद्धिरिति चेत् न प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाशित्वात् तज्जन्यसंस्कारस्य स्वाविषये फलाहेतुत्वात् फलहेतुस्थायिक्रतिव्यापारापेक्षायां लाघवेन क्रतिसमानाश्रयस्यैव व्यापारत्वकल्पनात् नानायागेष्वेकदाङ्गाने चैकदा सन्निधानं तद्बुद्धिविशेष एव प्रतिष्ठितविधिना प्रतिमादावङ्गारवत् । अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिरचेतनएव । देवता चेतना नास्ति मानाभावात् किन्तु देवनादेद्योतनचतुर्थ्यन्तपदनिर्द्दिश्यत्वं देवतात्वम् इन्द्राग्नेत्यादिपदमेव देवता । अतएवाग्निप्रकाशक मन्त्रेऽग्निप्रणयनस्यान्तरम् अग्नये इति नियमतो हविस्त्यागः न पर्य्यायान्तरेण । न चेन्द्रोद्देशेन हविस्त्यागः

इन्द्रनिष्ठकिञ्चिज्जनकः तत्स्वरूपाजनकत्वे सति तदुद्देश्येन क्रियमाणत्वात् ब्राह्मणायदानवदिति वाच्यम् अप्रयोजकत्वात् तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च इन्द्रायस्वाहेत्यत्र न तादर्थ्यं चतुर्थी किन्तु स्वाहादि पद-योगउपपदविभक्तिरेव अन्यथा नमःस्वस्तिस्वाहा-स्वधेत्यादिस्थलवैयर्थ्यात् मैवं चतुर्थ्यन्तपदस्य देवतात्वे मानाभावात् चतुर्थीं विनापि इन्द्रो देवतेति व्यवहारदर्शनात् अग्नये कव्यवाहनायेत्यादौ देवताहृद्य प्रसङ्गाच्च" इन्द्र सहस्राक्ष इत्यर्थवादस्य "इन्द्रमुपासीत" इत्यादिविधिसमभिव्याहारेण ऐकवाक्यतयोपास्यत्वात् देवत्वं नाददीतेत्यत्र देवत्वहृद्य त्यक्ते शिष्टानां देवत्वेन व्यवहारात् अग्नय इति पदेन नियमतस्त्यागस्य स्तुतिबोधितत्वेन तथात्यागस्य फलहेतुत्वात्। नच बीजाक्षराणां देवतात्वात् तत्रैव शिवादिपदशक्तिग्रह इति वाच्यम् बीजाक्षराणांचतुर्थ्यन्तत्वानियमात् तदप्रतीतावपि प्रकाशितशशिशेखराद्युपेतस्वहृद्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः। बीजाक्षराणां हविस्त्यागि त्वेनानुद्देश्यत्वात् शिवस्य प्रतिमन्त्रं बीजाक्षराणां नानात्वादननुगमेन तत्तत्पदशक्तिग्रहस्यायक्यत्वाच्च नच मूर्त्तिभेदेन शिवशरीराणामननुगतत्वेतत्रापि न शक्तिग्रह इति वाच्यम् ब्राह्मणादिना भिन्नशरीरेषु चैत्रत्ववच्छिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य चानुगतत्वात् अदृष्टम्यन्यस्य चेश्वरस्य न देवतात्वम्। ईशानश्च तद्भिन्न एव"।

अविघ्न न० विघ्नं कार्य्यप्रतिबन्धकम् अभावे न०त०। १विघ्नाभावे "अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम्" रघुः "अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव" भा०व०प० न०ब० २विघ्नशून्ये त्रि० "अविघ्नं गच्छ पन्थानम्" रामा०। अर्थाभावे अव्ययी० ३विघ्नाभावे अव्य०।

अविचक्षण त्रि० विरोधे न०त०। विचक्षणभिन्ने मन्दे अपटौ

अविचार पु० विचारः अभावे त०त०। १विचाराभावे "अविचारेण कर्त्तव्यम्" स्मृतिः न०ब०। २विचारशून्ये "अविचारपुरे देशे यः पलायति जीवति" हितो०। अवीनां चारो यत्र।३मेषचारणयोग्ये देशे न विगतचारो दूतो यस्य न०ब०। ४चारयुक्ते त्रि०। [विवेकाभावेनाक्षते।

अविचारित त्रि० न विचारितः। इदं कर्त्तव्यं न वेति

अविचाल्य त्रि०न विचाल्यः अन्यथा कार्य्यः। अन्यथाकार्य्याभिन्ने स्थिरैकरूपे। "अविचाल्यमेतदुक्तं तथा च भवता वचः" भा०व०प०।

अविचेतन विशेषेण चेतना विचेतना प्रा०त० न०ब०। विशेषतोज्ञानशून्ये १संज्ञारहिते २नष्टचैतन्ये। "यद्वाग्वदन्त्यविचेतनानि" ऋ०८,१००,१०।

अविच्छिन्न त्रि० न०त०। सन्तते। अविच्छिन्न तैलधारा।

अविच्छेद पु० न विच्छेदः अभावे न०त०। १विच्छेदाभावे सन्ततौ न०ब०। २विच्छेदशून्ये सन्तते। विच्छेदो नाम एकजातीयद्रव्यगुणादीनामन्यजातीयेन व्यवधानम्।

अविज्ञात त्रि० न०त०। १विशेषेणाज्ञाते "अविज्ञातं तु यत् क्रीतं क्रेता वा यदि वा मृतः" नाविजाते जलाशये" इति च स्मृतिः अर्थनिश्चयशून्ये त्रि०२यदधीतमविज्ञातं निगदेनैव पद्यते" इति वेदानु०।

अविज्ञाढ पु० विज्ञाता जीवस्तद्विलक्षणः। १परमेश्वरे जीवेन हि आत्मनि कर्त्तृत्वाभिमानेन ज्ञातृत्वं कल्पितमिति तद्वासनया च तेन कुण्ठीभूयते ईश्वरस्तु ततो विलक्षणः। "अविज्ञाता सहस्रांशुः" विष्णुस० २तत्तद्विषयज्ञातृभिन्ने त्रि० स्त्रियां ङीप्।

अविज्ञेय त्रि० न०त०। १अवेद्ये २इदन्तया विज्ञातुमशक्ये परमेश्वरे पु० स हि प्रमाणान्तरावेद्यतया स्थूलदृष्ट्या न विज्ञेयः।

अविडीन न० न विडीनम्। पक्षिणामाभिमुख्येन गमने

अवित त्रि० अव–क्त। रक्षिते पालिते च।

अवितथ न० वितथं मिथ्या विरोधे न०त०। सत्ये वचनादौ "तदवितथमवादीर्यन्नाम त्वं प्रियेति" माघः "य आहणोत्यवितथं ब्रह्मणा श्रवणावुभौ" मनुः २तद्वति त्रि०। "अवितथा वितथा सखि! सा गिरः" माघः।

अवितर्क्य न०तर्कयितुमशक्यः। तर्कयितुमशक्ये १औतार्थे। "अचिन्त्याः खलु ये भावा न तांस्तर्केण साधयेत्" इत्युक्तेः विपरीततर्केणाबाध्यः औतार्थः। २तर्कमात्रेणाविज्ञेये च।

अवितारिन् त्रि० वितारो विगमोऽस्यास्य न०त० स्त्रियां ङीप्। अनपायिनि "सुमेधामवितारिणीम्"। ऋ०२८, ५,६,। "अवितारिणीम् वितारः विगमनमपायः अनपायिनीम्" भा०।

अवित्र त्रि०अव–इत्र स्त्रियां ङीप्। रक्षितरि "सखीयतामवितेव बोधि सखा" ऋ०४,१७,१८, सा नो बोध्यवित्री" ऋ०७,९६,२।

अवित्त त्रि० न०त०। १अविख्याते। न०ब०।२धनशून्ये त्रि०

अवित्ति स्त्री विद–क्तिन् अभावे न०त०। ज्ञानाभावे

"अहमवित्त्यान्यानदृषि" छा० उ० । "अविद्याऽलाभेन" भा० । २ज्ञानाभावे च । न०ब० । ३लाभशून्ये ४ज्ञानशून्ये च त्रि० अव्ययी० । ५ज्ञानाभावे ६लाभाभावे च अव्य०

अवित्यज पु० न विशेषेण त्यज्यते रसायनादिषु त्यज–कर्म्मणि घा०क न० त० । पारदे राजनि० ।

अविधुर त्रि० व्यथ–उरच् कित् तेन संप्रसारणम् वेदे न थस्य धः न०त० । अवियुक्ते । "अनानता अविधुरा ऋजीषिणः" ऋ० १,८७,१ । "अविधुरा वियुक्ताः संङ्घीभूता इति भा० लोके तु अविधुरइत्येव ।

अविध्या स्त्री अवये हिता अवि+यत् । अजाहितायां यूथौ

अविदुग्ध न० ६त० । मेषीदुग्धे ।

अविदित त्रि०न विदितः । १अज्ञाते । २परमेश्वरे पु० "अन्यत्र विदितादन्यत्राविदितादधि" श्रुतिः ।

अविदाहिन् त्रि० न विदाही न० त० । १असन्तापके २अदाहके च ।

अविदूर न०न०त० । १समीपे अनतिदूरे २तद्वर्त्तिनि त्रि० ।

अविदूस न०अवेर्दुग्धम् अवि+दुग्धे दूसच् न षत्वम् । मेषीदुग्धे ।

अविद्धकर्णी स्त्री न विद्धः अच्छिद्रः पर्णरूपः कर्णोऽस्याः । पाठालतायाम् ।

अविद्या स्त्री न विद्या विरोधे न०त० । विद्याविरोधिनि १अज्ञाने २ज्ञानाभावे च । अविद्या च न्यायमते ज्ञानाभावः । सांख्यादिमते ज्ञानप्रागभावापरपर्य्यायज्ञानानगतावास्था सा च पञ्च भेदा "अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः" इति पुरा० पञ्च पर्व्वाणि च "अविद्याऽस्मितारागद्वेषाभिनिवेशा" इति पात० सूत्रोक्तानि । तत्र "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" पात० सू० । व्याख्यातञ्च तद्वृत्तौ यथा अविद्या "अतस्मिन् तद्बुद्धिरित्यर्थः अमरा देवा इत्यनित्येषु नित्यत्वभ्रान्त्या देवत्वार्थं कर्म कृत्वा बध्यन्ते, एवमशुचौ स्त्रीकाये शुचित्वभ्रान्त्या बध्यन्ते तदुक्तं भगवता व्यासेन "स्थानाद्बीजादुपष्टम्भान्निष्यन्दाभिधनादपि । कायमाधेयशौचत्वात् पण्डिताः प्राहुरशुचिं बुधाः" विष्णुपुराणे च "मांसशुक्रं मातृरुदरं स्थानं, शुक्रशोणितं बीजम्, अन्नपरिणामस्तम्भादिरुपष्टम्भः सर्वद्वारैर्मलानां स्रवणं निष्यन्दः, निधनं मरणम्। तेन हि श्रोत्रियकायोऽप्यन्नाशुचिर्भवति आधेयशौचत्वं ज्ञानानुलेपनादिना शुचित्वापादनम्। तथा परिणामदुःखे भोगे सुखत्वभ्रान्तिः अनात्मनि बुद्ध्यादावात्मख्यातिः अविद्या तत्त्वविद्याविरोधिनीत्यर्थः । यद्यपि शुक्तिरूपाद्यविद्याः सन्ति तथापि पञ्चविधैवाविद्या बन्धमूलमितिभावः" इयमविद्याऽदृष्टत्वेन नैयायिकैरङ्गीकृता "इत्येषा सहकारिशक्तिरसमा माया दुरतिक्रमेतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता"कुसु० "यस्येशस्य सहकारिशक्तिः कारणम् एषा सहकारिरूपा माया असमत्वात् सर्व्वकार्य्यापेक्षणीयत्वात् दुरतिक्रमत्वसाद्दश्यात् मायापदेऽदृष्टे लक्षणा । मूलत्वात् प्रकृतिः सैव, तत्त्वज्ञानप्रतिबध्यत्वात् सैवाविद्या उदिता उक्ता" हरिदासः । क्षणिकविज्ञानवादिनस्तु "अभिन्नोऽपि हि बुद्ध्यात्मा विपर्य्यासनिदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इत्युक्तादिशा क्षणिकविज्ञानमेवैकं तत्त्वं बाह्यं वस्तु नास्ति तथाहि बाह्यपदार्थाभावेऽपि मिथ्याज्ञानरूपयाऽविद्यया सर्व्वं वस्तु कल्पितमित्याहुः । तदेतत् सांख्ये निराकृतम् । यथा "नाविद्यातोऽप्यवस्तुना बन्धायोगात्" सू० "अविद्यातोऽपि न साक्षाद्बन्धयोगः अद्वैतवादिनां "तेषामविद्याया अप्यवास्तवत्वेन तया बन्धायोगात् न हि स्वाप्नरज्ज्वा बन्धनं दृष्टम् । नच "न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" इति "बन्धमोक्षौ सुखं दुःखं मोहापत्तिश्च मायया । स्वप्ने यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी" इतिचोक्तेः बन्धोऽप्यवास्तव इति वाच्यम् विज्ञानाद्वैतश्रवणोत्तरं बन्धनिवृत्तये योगाभ्यासविरोधात् बन्धमिथ्यात्वश्रवणेन बन्धनिवृत्त्यासिद्धत्व निश्चयात् तदर्थं बद्धायासस्साध्ययोगाङ्गानुष्ठानासम्भवात्" भा० "वस्तुत्वे सिद्धान्तहानिः" सू० "यदि चाविद्याया वस्तुत्वं स्वीक्रियते तदा स्वाभ्युपगतस्वाविद्याद्वैतत्वस्य हानिः" भा० । "विजातीयद्वैतापत्तिश्च" सू० । "किञ्चाविद्याया वस्तुत्वे क्षणिकविज्ञानसन्तानाद्विजातीयम् द्वैतं प्रसज्येत तच्च भवतामनिष्टम् । सन्तानान्तःपातिव्यक्तीनामानन्त्यात् सजातीयं द्वैतमिष्यतएव तैरित्याशयेन विजातीयेति । नन्वविद्याया अपि ज्ञानविशेषत्वाद्विद्यया कथं विजातीयद्वैतमिति चेन्न ज्ञानरूपाविद्याया बन्धोत्तरकालीनतया वासनारूपाविद्याया एव तैर्बन्धहेतुत्वाभ्युपगमात् । वासना तु ज्ञानाद्विजातीयेतिभावः" भा० । "नासद्रूपा न सद्रूपा माया नैवोभयात्मिका । सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी"त्युक्तिमनुरुध्याशङ्कते "विरुद्धोभयरूपा चेत्" सू० "विरुद्धं यदुभयं सदसच्च ततो विलक्षणं वा तद्रूपैवाविद्या वक्तव्या अतो न तया पारमार्थिकाद्वैतभङ्ग इति चेदित्यर्थः । वक्तव्याऽवक्तव्यरूपसदसत्तयोः स्वमतसिद्धयोर्विरोधोनास्तीति

सूचनाय विरुद्धेतिपदम्" भा० दूषयति । "न तादृक्पदार्थाप्रतीतेः" सू० । विरुद्धधर्म्मवत्पदार्थस्यासिद्धेरित्यर्थः । अपि चाविद्यायाः साक्षादेव दुःखयोगाख्यबन्धहेतुत्व ज्ञानेन विद्यात्वयानन्तरं प्रारब्धभोगानुपपत्तिः बन्धपर्य्यायस्य दुःखभोगस्य कारणनाशात् । अस्मदादिमते तु नायं दोषः संयोगद्वारैवाविद्याकर्म्मादीनां बन्धहेतुत्वात् जन्माख्यः संयोगः प्रारब्धसमाप्तिं विना न नश्यति" भा० । पुनः शङ्कते । "न वयं षट्पदार्थवादिनो वैशेषिकादिवत्" सू० "वैशेषिकाद्यास्तिकवच्च वयं षट्षोड़शादिनियत पदार्थवादिनः । अतोऽप्रतीतोऽपि सदसदात्मकः सदसद्विलक्षणो वा पदार्थोऽविद्येत्यभ्युपेयमिति भावः" भा० । परिहरति । "अनियतत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा वा लोनमक्तादिसमत्वम्" सू० । "पदार्थनियमोमास्तु तथापि भावाभावविरोधेन युक्तिविरुद्धस्य सदसदात्मकपदार्थस्य संग्रहो भवद्वचनमात्राच्छिष्याणां न सम्भवति । अन्यथा बालकाद्युक्तस्यायौक्तिकस्य संग्रहः स्यादित्यर्थः । श्रुत्यादिक मस्मिन्नर्थे स्फुटं नास्ति युक्तिविरोधेन च सन्दिग्धश्रुतेरर्थान्तरसिद्धिरिति भावः" भा० । एवं क्षणिकविज्ञानवादनिरसनेन वेदान्तिसम्मतावाविद्याऽपि प्रकृतिरेवेति तत्रैव व्यवस्थापितम् । यथा "पारम्पर्य्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम्" सू० ॥ "अविद्यादिद्वारेण परम्परया पुरुषस्य जगन्मूलकारणत्वेऽप्येकस्मिन्नविद्यादौ यत्र कुत्रचिन्निष्ठे द्वारे परम्परायाः पर्य्यवसानं भविष्यति पुरुषस्यापरिणामित्वात् । अतो यत्र पर्य्यवसानं सैव नित्या प्रकृतिः । प्रकृतिरिह मूलकारणस्य संज्ञामात्रमित्यर्थः" भा० ॥ नन्वेवं अविद्या स्थानीय प्रकृतेर्नित्यत्वानुपपत्तेस्तस्या उत्पत्तिश्रुतेर्ज्ञाननाश्यत्वाच्चेत्याशयेन मूलसमाधानमाह । "समानः प्रकृतेर्द्वयोः" सू० ॥ "वस्तुतस्तु प्रकृतेर्मूलकारणविचारे द्वयोर्वादिप्रतिवादिनोरावयोः समानः पक्षः । एतदुक्तं भवति यथा प्रकृतेरुत्पत्तिः श्रूयते एवमविद्याया अपि । "अविद्या पञ्चपर्वैषा प्रदुर्भूता महात्मनः" इत्यादिवाक्यैः । अत एकस्या अवश्यं गौण्युत्पत्तिर्वक्तव्या । तत्र च प्रकृतेरेव पुरुषसंयोगादिभिरभिव्यक्तिरूपा गौण्युत्पत्तिर्युक्ता । "संयोगलक्षणोत्पत्तिः कथ्यते कर्म्मज्ञानयोरिति" कौर्मवाक्ये प्रकृतिपुरुषयोर्गौणोत्पत्तिस्मरणात् । अविद्यायाश्च क्वापि गौणोत्पत्त्यश्रवणात् । तस्या अनादितावाक्यानि तु प्रवाहरूपेणैव वासनाद्यनादिवाक्यवद्व्याख्येयानीति । अविद्या च मिथ्याज्ञानरूपा बुद्धिधर्म इति योगे स्खलितमतो न नित्यत्वहानिः । अथ वा द्वयोः प्रकृतिपुरुषयोः समान एव न्याय इत्यर्थः । "यतः प्रधानपुरुषौ यतश्चैतच्चराचरम् । कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु" इत्यादिवाक्यैः पुरुषस्याप्युत्पत्तिश्रवणादिति भावः । तथा च पुरुषस्यैव प्रकृतेरपि गौण्येवोत्पत्तिः नित्यत्वश्रवणात्तदपि समानमिति । तस्मात् प्रकृतिरेवोपादानं जगतः प्रकृतिधर्म्मश्चाविद्या जगन्निमित्तकारणं तथा पुरुषोऽपीति सिद्धम् । यत् तु । "अविद्यामात्रुरव्यक्तं सर्गप्रलयधर्म्मिणम्" सर्गप्रलयनिर्मुक्तं विद्यां वै पञ्चविंशकम्" इति मोक्षधर्मे प्रकृतिपुरुषयोरविद्याविद्येति वचनं तत् तदुभयविषयतयोपचरितमेव । परिणामित्वेन हि पुरुषापेक्षया प्रकृतिरसतीति तस्या अविद्याविषयत्वमुक्तम् । एवमेव तस्मिन् प्रकरणे स्वस्वकारणापेक्षया भूतान्न कार्यजातमविद्येत्युक्तं स्वस्वापेक्षया च स्वस्वकारणमविद्येति । पुरुषस्य परिणामरूपं जगदुपादानत्वं तु प्रकृत्युपाधिकमेव कर्त्तृत्वादिवच्छ्रुतिस्मृत्योरुपास्यार्थमेवानूद्यते । अन्यथा "अस्थूलमनण्वह्रस्वमित्यादि" श्रुतिविरोधापत्तेरिति मन्तव्यम् । मायाशब्देन च प्रकृतिरेवोच्यते "मायां तु प्रकृतिं विद्यादिति" स्मृतौ "तस्मान्मायी सृजते विश्वमेतत्" "तस्मिंश्चान्यो मायया सन्निरुद्धः" इति पूर्वप्रक्रान्तमायायाः प्रकृतिस्वरूपतावचनात् । "सत्त्वं रजस्तम इति प्राकृतं तु गुणत्रयम् । एतन्मयी च प्रकृतिर्माया या वैष्णवी स्मृता" ॥ "लोहितशुक्लकृष्णेति तस्मात्साङ्ख्यैरजा प्रजाः" इत्यादिस्मृतिभ्यश्च । न तु ज्ञाननाश्याविद्या मायाशब्दार्थो नित्यतानुपपत्तेः । किञ्चाविद्याया द्रव्यत्वे शब्दमात्रभेदो गुणत्वे च तदाधारतया प्रकृतिसिद्धिः पुरुषस्य निर्गुणत्वादिभ्यः । अथ द्रव्यगुणकर्म्मविलक्षणैवाख्याभिरविद्या वक्तव्येति चेन्न तादृक्पदार्थाप्रतीतेरुक्तत्वादिति" भा० । वेदान्तिनस्तु ज्ञानविरोधि अज्ञानापरपर्य्यायं पदार्थान्तरमविद्येति स्वीचक्रुः तच्च विस्तरेण अज्ञानशब्दे ६३ पृष्ठे दर्शितम् । इयञ्चाविद्या मूलाविद्यातूलाविद्याभेदेन द्विविधा । तत्र हिरण्यगर्भोपाधिर्मूलाविद्या तूलाविद्याच्च प्रतिजीवभेदं नाना मायाशब्देनाभिधीयन्ते । "मायोपाधिरयं जीवः अविद्योपाधिरीश्वर" इत्युक्तेः "इन्द्रोमायाभिः पुरुरूपईयते" इतिश्रुतेश्च तथात्वम् । मायानाञ्च मूलाविद्याकार्य्यत्वात् अविद्याशब्दवाच्यतापि । अतएव आविद्यिको जीव इति तत्तत्स्थाने भाष्यकारादिभिरुक्तम् । स्वस्वान्तःकरणरूपाविद्योपाधौ तत्त्वज्ञाने सम्भूतेऽहं तदोयेवाऽविद्या निवर्त्तते नान्यत्र इत्येकमुक्तौ न सर्वमुक्ति-

रिति बन्धमोक्षव्यवस्था । अधिकमाकरे द्रष्टव्यम् । वैशेषिकास्तु विपर्ययसंशयज्ञानमविद्येत्याहुः तत्कारणप्रदर्शनपूर्व्वकमविद्या लक्षिता वै०सू० उपस्कारे च यथा "इन्द्रियदोषात् संस्कारदोषाच्चाविद्या" ॥ "अविद्येति सामान्यवाच्यपि पदं विपर्य्यये वर्त्तते प्रकरणात् संशयस्वप्नानध्यवसायानामुक्तत्वात्, तत्रेन्द्रियदोषोवातपित्ताद्यभिभवकृतमपाटवम्, संस्कारदोषोविशेषादर्शनसाहित्यं तदधीनं हि मिथ्याज्ञानं जायते" ॥ "तच्च दुष्टज्ञानम्" सू०॥ तदित्यव्ययपदं सर्व्वनामसमानार्थकमविद्यां परामृशति' साऽविद्या, दुष्टज्ञानं व्यभिचारि ज्ञानमतस्किंस्तदितिज्ञानं व्यधिकरणप्रकारावच्छिन्नविशेष्यावृत्तिप्रकारकमिति यावत्, दोषश्च ज्ञानस्यानिश्चयरूपत्वमपि, तेनैककोटिसत्त्वेऽपि संशयोदुष्ट एवानवधारणात्मकत्वात्' तदनेन संशयोविपर्य्ययस्वप्नज्ञानध्यवसायानाञ्चतुर्णामप्युपसंग्रहः" उप० ॥ "विद्याविद्याद्वैविध्यात् संशयः" गो०सू० । नास्ति विद्या शास्त्रादिज्ञानं यस्य । ३शास्त्रादिज्ञानशून्ये त्रि० "अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" पुरा० । "वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्" दा०भा० स्मृतिः । "अविद्यानान्तु सर्व्वेषामीक्षातश्चेदनं भवेत्' मनुः" ।

अविद्वेष पु०अभावे विरोधे वा न०त० । १विद्वेषाभावे २अनुरागे च । न०ब० । ३विद्वेषशून्ये ४अनुरागयुक्ते च त्रि०

अविधवा स्त्री विरोधे न०त० । सधवायां पतिवत्यां स्त्रियाम् "इमा नारीरविधवाः सपत्नीः" ऋ० १०,१८ ।

अविधा स्त्री अभावे न०त० । प्रकाराभावे न०ब० । प्रकारशून्ये

अविधान न० अभावे न०त० । १विधानाभावे २कृतिकर्त्तव्यताक्रमाद्यभावे । "अविधानेन यत् कुर्य्यात् तत्सर्व्वं विफलं भवेत्" स्मृतिः न०ब० । ३विधानशून्ये त्रि० ।

अविधि पु० अभावे न०त० । विध्यभावे कृतिकर्त्तव्यताक्रमाद्यभावे न० ब० । विधानशून्ये त्रि० ।

अविन पु० अवति यज्ञम् अव–इनन् । अध्वर्य्यौ उज्ज्व० ।

अविनय पु० अभावे न०त० । १विनयाभावे । विरोधे न०त० । २दुर्नये । "अविनयमपनय विष्णो" शङ्करा० "ब्रह्मबोऽविनयान्नष्टा राजानः सपरिच्छदाः" "वेणोविनष्टोऽविनयान्नहुषश्चैव पार्थिवः" इति च मनुः न०ब० । "विनयशून्ये त्रि० ।

अविनश्वर त्रि० विरोधे न०त० । १विनश्वरभिन्ने चिरस्थायिनि, २कूटस्थे परमेश्वरे पु० ।

अविनाभाव पु०विना व्यापकमृते न भावः स्थितिः अस्तित्वं ष० त० । १व्याप्यस्थित्यनुरोधिसत्तारूपायां व्याप्तौ । २सम्बन्धमात्रे च "अविनाभावोऽत्र सम्बन्धमात्रम्" काव्यप्र० "अथ केयमाकाङ्क्षा न तावत् अविनाभावः" इति शब्दचिन्ता० ।

अविनाभाविन् त्रि० न विना व्यापकम् भवति भू–णिनि । व्याप्ये "व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते" का०प्र० ।

अविनाभूत त्रि० न विना व्यापकमृते भूतः । १व्याप्ये २संबन्धमात्रे च "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" का०प्र० । ["अविनाशी वा अरे अयमात्मा" श्रुतिः ।

अविनाशिन् त्रि० न विनाशी स्त्रियां ङीप् । अविनश्वरे नित्ये

अविनीत त्रि०न विनीतः । १विनयशून्ये २कृतुत्सितक्रियानुरक्ते ३उद्धते ४अदान्ते च । "वदते विनीतमविनीतमशिभिः" माघः । ५अशिक्षिते च "नाविनीतैर्व्रजेद्युर्य्यैर्न च क्षुद्राधिपीड़ितैः" मनुः । ६कुलटायां स्त्री ।

अविनीय पु० विनीयः कल्कः कपटञ्च न०ब० । कपटशून्ये "अविनीयसंभ्रमविकाशिभक्तिभिः" माघः ।

अविनेय त्रि० न विनेतुं शक्यः । दुर्दमे अश्वादौ ।

अविन्ध्य पु० राक्षसभेदे हरिवंशे विवरणम् ।

अविपट अवीनां विस्तारः अवि+पटच् । मेषविस्तारे ।

अविपश्चित् पु० विरोधे न०त० । विचारशून्ये तात्पर्य्यज्ञानशून्ये ३अविवेकिनि च ।

अविपाक पु०विशेषेण पच्यते फलरूपेण वि+पच घञ् न०त० । फलरूपेणापरिणते १धर्म्माधर्म्मादौ । "विपाकश्च जात्यायुर्भोगाः" इति पातञ्जले उक्तः तद्भूमेणापरिणामश्च फलरूपतयाऽनाविर्भावः विहितविहितकर्म्मणोविशिष्टदेशकालनियतत्वात् यदा कर्म्म बलीयसा प्रतिबद्धं तदा तत् कर्म अविपाक इत्युच्यते । विपाकः अन्नादेः पाकः अभावे न०त० । सुश्रुतोक्ते १पाकाभावे २"अरोचकाविपाकौ तु शर्करार्त्तै भवन्ति च" । नास्ति विपाको यत्र । अग्निमान्द्यहेतुके २रोगभेदे च "एतच्चवायसमेतेन जाटर्य्यं न भवति सन्धोऽग्निराप्यायते दुर्नामयोऽपाण्डुकुष्ठरोगाविपाकाकाशश्वासप्रमेहाश्च न भवन्ति" सुश्रुतः ।

अविपाल त्रि० अवीन् पालयति पा–णिच् लः उप०स० । मेषपालके ।

अविपुल त्रि० विरोधे न०त० । विपुलभिन्ने क्षुद्रे ।

अविप्रकृष्ट त्रि० विरोधे न०त० । सन्निकृष्टे ।

अविप्रिय पु० अवीन् मेषान् प्रीणाति प्री–क । १श्यामाकवृक्षे विप्रियमपकारः न०त० । २अनपकारे ३आनुकूल्ये ।

न०ब० । ४अपकारशून्ये त्रि० । ५मुख्येतालतायां स्त्री ।

अविप्लुत त्रि० न विप्लुतः नष्टः । अविनष्टे "अविप्लुतब्रह्मचर्य्यः सवर्णां स्त्रियमुद्वहेत्" स्मृतिः ।

अविभक्त त्रि०वि+भज–क्त न०त० । १संसृष्टे विभागरहिते २द्रव्ये-३तत्स्वामिनि च । "अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्विदेति" "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः" इति च स्मृतिः । ४अभिन्ने एकभावापन्ने ऽर्थे ५अव्याहते अधिष्ठानतया ६सर्व्वत्रानुस्यूते बाधाशून्यत्वेन स्वस्मिन् ७वर्त्तमाने च ।

अविभावित त्रि० न विभावितः । २अलक्षिते २अचिन्तिते साक्षिप्रभृतिप्रमाणादिना २स्वकीयत्वेनानुज्ञाविते स्वरूपेण ४अज्ञापिते च ।

अविमुक्त त्रि०वि+मुच–क्त न०त० । १मुक्तभिन्ने । "न विमुक्तं शिवाभ्यां यद्विमुक्तं ततो विदुः" इत्युक्तलक्षणे २काशीक्षेत्रे न० । ३मूर्द्धचिबुकान्तरालस्थाने च । "यत्रयोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः" इति जाबा०उ० । "आमनन्ति चैनमस्मिन्" शा०सू० । "आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचिबुकान्तराले" भा० इमामेव श्रुतिं केचित् काशीविषयतया वर्णयन्ति वाक्यशेषे "अविमुक्तः कस्मिन् प्रतिष्ठित" इति प्रश्ने नासीवरणामध्यस्थितत्वप्रत्यभिज्ञानात् । "अपरोक्षवचना देवा इत्युक्तेः असीतिवक्तव्ये नाशीतिवर्षेव्यत्यय इति तेषामाशयः । अविमुक्तक्षेत्रञ्च असीवरणयोर्मध्ये गङ्गापश्चिमतटस्थं परितः पञ्चक्रोशात्मकम् । तद्विवरणं काशीखण्डे ऽनुसन्धेयम् ।

अवियोग पु०अभावे न०त० । १वियोगाभावे । विरोधे न०त० । २संयोगे । न०ब० । ३वियोगशून्ये ४संयुक्ते च । वियोगः विच्छेदः संयोगाभावः विभागश्च ।

अवियोगव्रत न० अवियोगार्थं व्रतम् । मार्गशीर्षशुक्लतृतीया कर्त्तव्ये स्त्रीणां व्रतभेदे "अवैधव्यप्रदं स्त्रीणामवियोगव्रतं त्विदम् । मार्गशीर्षे सिते पक्षे स्नाता शुक्लाम्बरप्रिया । दृष्ट्वा चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायसं" मित्युपक्रम्य कालिकापुराणे दर्शितम् । तद्विधिश्च हेमा० व्र०ख० तृतीयाव्रतप्रकरणे उक्तरीत्या एवावसेयः ।

अविरण न० विरमणं विनाशः अभावे न०त०वेदे मस्य लुक् । विनाशाभावे "सद्मो बभोऽविरणाय पूर्व्वीः" ऋ०१,१७४,८ "अविरणाय अविनाशाय" भा० ।

अविरत न०विरतं विरामः भावे क्त अभावे न०त० । १विरामाभावे नैरन्तर्य्ये । कर्त्तरि क्त न०त० । २विरामशून्ये २सन्तते द्रव्यादौ त्रि० क्रियाविशेषणत्वे न० । ४कार्य्यादनिवृत्ते त्रि० । "अविरतदयिताङ्गसङ्गसञ्चारितेन" माघः ।

अविरति स्त्री विरामो विरतिः भावे क्तिन् अभावे न०त० । १निवृत्त्यभावे २विषयादौ–स्थिरचित्ततायाम् ३विरामाभावे च । न०ब० । ४विरामशून्ये त्रि० ।

अविरल त्रि० न विरलः न०त० । घने, निबिड़े । विरलता च विच्छित्तिः तद्विपरीतं निबिड़त्वं मध्येऽविच्छेदः ।

अविराम पु०अभावे न०त० । १विरामाभावे २विच्छेदाभावे । न०ब० । ३विरामशून्ये ४सन्तते च त्रि० "अनिमिषमविरामा रागिणां सर्व्वरात्रम्" माघः ।

अविरुद्ध त्रि० । न० त० । १विरुद्धभिन्ने २विरोधशून्ये ३एकत्रसहावस्थायिनि ४अप्रतिबद्धे च ।

अविरोध पु० विरोधः सहानवस्थानमेकदेशे समावेशो वा अभावे न०त० । सहानवस्थानाभावे १एकत्रावस्थाने २एकत्र समावेशे च । "श्रुतिस्मृतिविरोधे च श्रुतिरेव गरीयसी । अविरोधे तयोः कार्य्यं स्मार्त्तं वैदिकवत् सदा, स्मृतिः "सर्वेषामविरोधेन ब्रह्मकर्म्म समारभेत्" पुरा० "शेषं वाऽविरोधात्" कात्या० २।६।३६। "नाविरोधात्" कात्या०५।१।८ । ३विवादाभावे च ।

अविलक्षण त्रि०विलक्षणो भेदकधर्म्माश्रयः विरोधे न०त० । १तुल्यरूपे २भेदकधर्म्मशून्ये ।

अविलक्ष्य त्रि०नास्ति विशेषेण लक्ष्यं व्याजः उद्देश्यं शरव्यं वा यस्य । १व्याजशून्ये २उद्देश्यशून्ये ३शरव्यशून्ये ४प्रतिकारशून्ये च "अविलक्ष्यमसत्प्रतिकारम्" किरा० । "अविलक्ष्यमसत्प्रतिकारम्" मल्लि० ।

अविलम्ब न० अभावे न०त० । १विलम्बाभावे शीघ्रे । न०ब० । २विलम्बशून्ये त्रि० विलम्बश्च कार्य्योत्पत्तिसाधककालप्रागभावः । तच्छून्यः अविलम्बः ।

अविलम्बित त्रि० वि+लबि–क्त न०त० । विलम्बशून्ये १त्वरायुक्ते द्रव्यादौ । क्रियाविशेषणत्वे न० । "अविलम्बितो द्वितीयः" कात्या० १०,१,८, ।

अविला स्त्री अव–इलच् । मेष्याम् १नास्ति विलं यत्र । २गर्त्तशून्ये त्रि० । [न०ब० । ३तच्छून्ये त्रि० ।

अविलास पु० अभावे न०त० । १विलासाभावे २अप्रकाशे

अविवक्षित त्रि० न विवक्षितः । १वक्तुमनिष्टे २तात्पर्य्याविषयीभूते "बहुत्वमविवक्षितमिति रघु० ।

अविवर त्रि० नास्ति विवरं छिद्रं यत्र । नीरन्ध्रे घने ।

अविवाच्य न० नास्ति विशेषेण वाच्यो मन्त्रादिः यत्र ।

अत्यग्निष्टोमसंस्थे दशमाहे "अत्यग्निष्टोमोऽविवाच्यं दशमम्" काल्या० १२,३,२१, । "अत्यग्निष्टोमसंस्थमविवाच्यं दशममहर्भवति" कर्क० । "नाग्निमरुति केनचित् कस्यचित् विवाच्यमविवाच्यमित्याचक्षते" आश्व० श्रौ० २,१२,१० । अग्निमरुति केनचित् कर्त्रा कस्यचित् कर्त्रे मन्त्रः कर्म्म वा न विवाच्यं नाख्यावक्तव्यमित्यर्थः कुतः ? यस्मादेतदहः अविवाच्यमिति श्रुतौ प्रसिद्धम् परस्परमविवचनीयमेतस्मिन्नहनीत्यविवाच्यमिदमहर्भवति ।

अविवाद पु० विरुद्धो वादः कथनं व्यवहारभेदः विरोधश्च अभावे ३न० त० । १,विरुद्धवादाभावे ऐक्यमत्ये २अव्यवहारे ३विरोधाभावे च न० ब० ४तच्छून्ये त्रि० । [विवाहसंस्कारे ।

अविवाहित त्रि० न० त० । विवाहितभिन्ने अनूढे अजात-

अविविक्त त्रि० न० त० । १एकीभूते २विवेकशून्ये ३अन्योन्यतादात्म्यापन्ने "तप्तायःपिण्डवदविविक्तं सत् तदेव महावाक्यस्य वाच्यार्थो भवति" वेदान्तसा० ।

अविवेक पु० न विवेकः भेदकधर्म्मेण ज्ञानम् अभावे न० त० । अन्योन्यतादात्म्यारोपहेतौ १विशेषज्ञानाभावे इति नैयायिकाः । विरोधे न० २अन्योन्यतादात्म्यज्ञानरूपे मिथ्याज्ञाने "तद्योगोऽप्यविवेकात्" सां० सू० । "अयञ्चाविवेकोऽष्टधा तासंसर्गैकसुभयज्ञानमविद्याख्यलाभिधिक्तं विवक्षितः" "बन्धोविपर्य्यात्" विपर्ययभेदाः पञ्च 'इत्यागामिसूत्रत्रयात् "तस्य हेतुरविद्येति" योगसूत्रे ऽप्यविद्याया एव पञ्चपर्व्वरूपाया बुद्धिपुरुषसंयोगहेतुतया वचनाज्ज्ञान्याख्यात्मनभ्युपगमएव योगतोऽत्र विशेषोचित्यात् । न पुनरविवेकोऽत्राभावमात्रं विवेकप्रागभावो वा मुक्तस्यापि बन्धापत्तेः जीवन्मुक्तस्यापि भाविविवेकव्यक्तिप्रागभावेन धर्माधर्म्मोत्पत्तिद्वारा पुनर्बन्धप्रसङ्गाच्च । तथागामिसूत्रस्थध्वान्तदृष्टान्तानुपपत्तेः अभावस्य ध्वान्तनदावकरत्वाभावात् । तथा दृङ्निष्ठासावस्यविवेकस्य श्रूयमाणौ नोपपद्येयातामिति । अत्रान्यते च वासनात्मकस्यैवाविवेकस्य संयोगाख्यजन्महेतुतया तमोवदावरकत्वदृङ्निष्ठासादिकमङ्गसैवोपपद्यते । "तस्य हेतुरविद्येति" पातञ्जलसूत्रे च भाष्यकारैरविद्याशब्देनाविद्याबीजं व्याख्यातम् ज्ञानस्य संयोगोत्तरकालीनत्वेन संयोगाजनकत्वादिति । अपि च "पुरुषः प्रकृतिस्थो हि भुङ्क्ते" इत्यादिशास्त्रेऽभिमानाख्यसंयोगस्यैव प्रकृतिस्थताख्यसंयोगहेतुतावगम्यते । अत एव चाविद्या नाभावोऽपि न विद्याविरोधिज्ञानान्तरमिति योगभाष्ये व्यासदेवैः प्रयत्नेनावधृतम् । तस्मादविवेकाविद्ययोस्तुल्ययोगक्षेमतयाऽविवेकस्यापि ज्ञानविशेषत्वमिति सिद्धम् । अयं चाविवेकस्त्रिधा संयोगाख्यजन्महेतुः साक्षात्,धर्माधर्मोत्पत्तिद्वारा, रागादिदृष्टद्वारा च भवति" सां० प्र० भा० । अधिकमविद्याशब्दे द्रष्टव्यम् । [शून्ये ।

अविवेचक त्रि० न० त० । विवेचकभिन्ने कार्य्याकार्य्यविवेचना

अविवेन त्रि० "वेनतिः कान्तिकर्म्मा" निरु० वि+वेन-अच् न० त० । विगतेच्छभिन्ने इच्छारहिते । "मनसाऽविवेनं तमित् सखायम्" ऋ० ४,२४,६,। "अविवेनमिच्छाविगमशून्यम्" भा०

अविशङ्का स्त्री विशेषेण शङ्का अभावे न० त० । १विशेषशङ्काभावे । न० ब० २विशङ्कारहिते त्रि० ।

अविशङ्कित त्रि० वि+शकि-कर्त्तरि क्त, विशङ्का जाताऽस्य इतच् वा न० त० । १विशङ्कारहिते । "विद्ध्यादविशङ्कितः" स्मृतिः । २अजातशङ्के च ।

अविशस्तृ त्रि० न विशस्ता विशसने कुशलः । यज्ञियपशुहिंसनेऽनिपुणे ऋत्विजि "मा ते रुद्रस्याविशस्तातिहाय" ऋ० १,१६२,२० ।

अविशुद्ध त्रि० विरोधे न० त० । विशुद्धभिन्ने सदोषे ।

अविशुद्धि स्त्री विरोधे न० त० । शुद्धिविपरीते दोषे "सङ्घाविशुद्धित्वयातिशयवत्तः" सां० का० । अविशुद्धिर्हिंसादोषसाधनता यथोक्तम् "अविशुद्धिः सोमादियागस्य पशुवोजादिवधसाधनता यथाह स्म भगवान् पञ्चशिखाचार्य्यः "खल्वसङ्करः सपरिहारः सप्रत्यवमर्षः" इति । खल्वसङ्करः ज्योतिष्टोमादिजन्यनः प्राधानापूर्वस्य खल्वेन पशुहिंसादिजन्यनानर्थहेतुना अपूर्वेण सङ्करः । सपरिहारः क्रियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावत्संसारधर्मं सूत्रे तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति । स्मर्य्यन्ते हि पुराणसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमालोपपादितां दुःखवल्लिकणिकाम् । न च "मा हिंस्यात् सर्व्वाभूतानीति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेते'त्यनेन" बाध्यत इति युक्तं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । न चेहास्ति कश्चित् विरोधः भिन्नविषयत्वात् । तथा हि "मा हिंस्यादिति" निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि "अग्नीषोमीयं पशुमालभेत" इत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते न त्वनर्थहेतुत्वाभावस्तथा सति वाक्यभेदप्रसङ्गात् न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः । हिंसा

हि पुरुषस्य दोषमावक्ष्यति कर्तोऽपरिकरिष्यति" सा०कौ०। इति सांख्या मन्यन्ते मीमांसका वेदान्तिनश्च वैधहिंसाया अनर्थहेतुत्वं निराचक्रुः तच्च भा०सूत्रे तद्भाष्ये च प्रपञ्चेनोक्तम् तत्तु ४४३ पृष्ठे उदाहृतम्।

अविशेष पु० विशेषोभेदकधर्म्मः अभावे न०त०। १भेदकधर्म्माभावे "वायुमब्दादविशेषविशेषाभ्याम्" भा०सू०। २अभेदे ऐक्ये च।न०ब०।३विशेषशून्ये तुल्ये त्रि० सांख्यादिमतसिद्धेषु शान्तत्वघोरत्वमूढत्वरूपविशेषशून्येषु स्थूलभूतोपादानेषु ४सूक्ष्मभूतेषु। तानि च तन्मात्राणि यज्जातीयेषु शान्तादिविशेषत्रयं न तिष्ठति तज्जातीयानां शब्दस्पर्शरूपरसगन्धानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानामविशेषाणि। "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति विष्णुपुराणादिभ्यः। अस्यायमर्थः तेषु तेषु भूतेषु तन्मात्राण्यिश्नन्तीति कृत्वा धर्म्मधर्म्य भेदाद्द्रव्याणामपि तन्मात्रता स्मृता। ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलगतशब्दादिविशेषैः शून्या एकरूपत्वात्। तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः। अतोऽविशेषिणोऽविशेषसंज्ञिता इति शान्तं सुखात्मकं, घोरं दुःखात्मकं, मूढं मोहात्मकम्। तन्मात्राणि च देवादिमात्रभोग्यत्वेन केवलं सुखात्मकान्येव सुखाधिक्यादिति" सां०प्र०भा०। तन्मात्राण्यविशेषाः" सां०का० तत्सत्त्वे च प्रमाणं तन्मात्रशब्दे दर्शयिष्यते। नित्ययोगे इनि। अविशेषीत्यपि तन्मात्रे।

अविशेषज्ञ त्रि० विशेषं न जानाति ज्ञा-क नञ्स०। विशेषानभिज्ञे भेदकधर्म्मानभिज्ञे।

अविशेषित त्रि० न विशेषितः भेदकधर्म्मेण। यस्य इतरस्मात् विशेषणेन व्यावृत्तिर्न कृता तस्मिन् पदार्थे। [२अक्लिष्टे च

अविश्रान्त त्रि० वि+श्रम–क्त न०त०। १विरामरहिते २सन्तते

अविश्वसनीय त्रि० वि+श्वस–अनीयर् न०त०। विश्वासकरणायोग्ये। [सेदविश्वस्ते विश्वस्ते नातिविश्वसेत्" हितो०।

अविश्वस्त त्रि० न०त०। विश्वासयोग्यताहीने "न विश्व-

अविश्वास पु० अभावे न०त०। १विश्वासाभावे न०ब०। २विश्वासानाधारे ३विश्वासायोग्ये पदार्थे च। [कारके।

अविश्वासिन् त्रि० न विश्वसिति णिनि स्त्रियां ङीप्। विश्वासा-

अविश्लिष्ट त्रि० विरोधे न०त०। विश्लिष्टभिन्ने सङ्गते।

अविष पु० अस्–टिषच्। १सप्तर्षे,२नृपे च।टित्त्वात् ङीप्।२नद्यां स्त्री। ४रक्तकमाले त्रि०। नास्ति विषं यत्र। ५विषशून्ये त्रि०। "अपओषधीरविषा वनानि" ऋ०६,३६,५, "अविषा विषरहिता निरस्तकानि वा वनानि" भा०। विस्तारायाम् अतिविषयाम् (आतइच्) स्त्री टाप्।

अविषक्त त्रि०न०त०। असंलग्ने।

अविषम त्रि० विरोधे न०त०। १विषमभिन्ने समे (जोड़) २सुपथे ३सुगमे च। [३विषयशून्ये त्रि०।

अविषय पु० न०त०। १अगोचरे २अप्रतिपाद्ये। न०ब०।

अविषह्य त्रि०न विशेषेण सहयः न०त०।१सोढुमशक्ये २इतरैरनभिभवनीये "अविषह्यविक्रमः, ३परिक्षेत्तुमशक्ये च "सीमायामविषह्यायाम् स्वयं राजैव धर्मवित्" मनुः।

अविष्टम्भ पु० अभावे न०त०। १आलम्बाभावे। न०ब०। २आलम्बनशून्ये त्रि०।

अविष्ठ त्रि० अतिशयेन अविता अवितृ+इष्ठन् तृणोलोपः। अतिशयेन रक्षके। "यो अर्च्चतो ब्रह्मकृतिमविष्ठः" ऋ०७।२८।५ "अविष्ठः अतिशयेन रक्षिता" भा०।

अविष्या स्त्री अव–गतौ इसुन् अविर्गतिमिच्छति क्यच्–भावे अ। गमनेच्छायाम्। "अविष्यामनुव्रतं सवितुः" ऋ०२,३८,३, "अविष्यां गमनेच्छाम्" भा०।

अविस् नु० अव–भावे इसुन्। १रक्षणे २गतौ च।

अविसंवाद पु० विसंवादः प्रमाणानुसरणाभावः विरोधे न०त०। १प्रमाणानुसरणे २याथार्थ्यविषयकत्वे।

अविसंवादिन् त्रि० विरोधे न०त०। प्रमाणान्तरानुसारिणि १यथार्थविषयके २सफले पदार्थे च।

अविसोढ न० अवेर्दुग्धम् अवि+सोढ्च् न षत्वम्। १मेषीदुग्धे। न विसोढः। २असोढे त्रि०।

अविस्थल न० भारतोक्ते ग्रामभेदे। "अविस्थलं दृकस्थलं माकन्दीं वारणावतम्। अवसानञ्च गोविन्द! कञ्चिदेकञ्च पञ्चमम्" भा०उ०प०।

अविस्पष्ट न० विस्पष्टं श्रुतमात्रेणार्थावबोधकं सुखेन अवधारयितुं योग्यञ्च। वि+स्पश–क्त न०त०। अस्पष्टवाक्ये।

अविस्मरण न० अभावे न०त०। १विस्मरणाभावे स्मरणे विस्मरणज्ञानानुभूतपदार्थस्य कालरोगादि प्रयोज्यः स्मरणाभावः सच अनुभूतविषयेषूद्बुद्धसंस्कारस्यापि प्रणिधानादिकारणान्तराभावात् अनुद्बुद्धतया स्मृतिरूपकार्य्याजनने, रोगादिना नाशने च भवति। तदभावः अविस्मरणं तत्र च प्रणिधानादिसहकृतसंस्कारस्य स्मरणजनकता रोगाद्यनभिभवनीयता च। यथाह गौ०सू०। "प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम्"। "प्रणिधानं चित्तै-

काय्यं सुप्तूर्षेति यावत् लिङ्गज्ञानं उद्बोधकम् उद्बोधकानामानन्त्यादादिपदं ज्ञानात्परतोयोजनीयं तस्य क्रमात् स्मरणक्रमः यदि च युगपदुद्बोधकानि तदा तावद्विषयकमेकं स्मरणमिष्यत एव यथा पदज्ञानादाविति मन्तव्यम् इत्तिः" । प्रणिधानादीनि च स्मृतिकारणानि तत्रैवोक्तानि । "प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रित सम्बन्धानन्तर्य्य वियोगैककार्य्य विरोधातिशयप्राप्तिव्यवधान सुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः" "स्मरणमित्यनुवर्त्तते निमित्तशब्दस्य हन्द्वात् परं श्रुतस्य प्रत्येकमभेदेनान्वयः । प्रणिधानं मनसोविषयान्तरसञ्चारवारणम्, निबन्धएकग्रन्थोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम्, अभ्यासः संस्कारवाङ्ल्यम्,एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यस्तः । अभ्यासोदृढतरसंस्कारः उद्बोधकत्वे नोक्तइति केचित् लिङ्गं व्याप्यं व्यापकस्य स्मारकं, लक्षणं यथा कपिध्वजादि अर्जुनादेः, सादृश्यं देवदत्तादेः। परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः तदेकतरेणान्यतरस्मरणम्, आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ, सम्बन्धोगुरुशिष्यभावादिः,गोदृष्टन्यायात् पृथगुक्तः। आनन्तर्य्यं प्रोज्झणावधात्रादेः, वियोगोयथा दारादेः, एककार्य्या अन्तेवासिप्रभृतयः परस्परस्मारकाः। विरोधादहिनकुलादेरन्यतरेणापरस्मरणम्। अतिशयः संस्कारउपनयनादिराचार्य्यादिस्मारकः, प्राग्निर्धनादेर्दातारं स्मारयति, व्यवधानमावरणं यथा खड्गादेः कोषादि । सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणम्, इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ, भयं मरणादेर्भवहेतोर्व्वा स्मारकम्, अर्थित्वं दातुः, शाखादेः क्रिया वायुादेः, रागात्प्रीतेः सुतादेः स्मरणं," धर्म्माधर्म्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूत सुखादेश्च स्मरणमिति । तेषु च किञ्चित्,स्वरूपसत्किञ्चञ्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः" इत्तिः । कणादेन तु स्मृतिसाधारणकारणमुक्तं यथा "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" सू० "उत्पद्यत इति शेषः संयोगविशेषः प्रणिधानादिसन्निधानम्, एतच्चादसमवायिकारणादात्मनि समवायिनि स्मृतिर्विद्याविशेष उत्पद्यते, निमित्तकारणमाह संस्कारादिति चकारेण व्याप्यारी पूर्व्वानुभवः समुच्चीयते, अनुभवयाथार्थ्यायार्थेनियममनुविधत्ते, रज्जुं भुजङ्गतयोपलभ्य पलायितस्य तथैव स्मृतेः नच सततं स्मृतिप्रसङ्गः, संस्कारोद्बोधाधीनत्वात्, तदुक्तं प्रशस्तदेवपादैः "लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पङ्क्तभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेषु ग्रहणानुव्यवसायस्मरणेच्छाद्वेषहेतुरतीतविषया स्मृतिः" इति । आर्षं ज्ञानं स्मृतिरूपता पृथङ्न लक्षितं, योगिप्रत्यक्षान्तर्भावितं, पदार्थप्रदेशाख्ये तु प्रकरणे तदुक्तं तद्यथा "आम्नायविधातृणामृषीणामतीतानागतवर्त्तमानेष्वर्थेषु धर्म्मादिषु अन्योपनिबन्धेषु वा लिङ्गाद्यनपेक्षादात्ममनसोः संयोगाद्धर्म्मविशेषाच्च प्रातिभं ज्ञानं यदुत्पद्यते तदार्षम्"इति तच्च कदाचिल्लौकिकानामपि भवति यथा कन्यका वदति "श्वो मे भ्राता गन्तेति हृदयं मे कथयतीति" उप० । संस्कारनाशकानि च रोगकालजन्मान्तरादीनि ।न० ब० स्मृतियुक्ते त्रि०

अविस्मृत त्रि० न०त० । विस्मृतभिन्ने स्मृते ।

अविहर्य्यत त्रि० "हर्य्यतिः प्रेप्साकर्म्मेति"पाक्तःवि+हर्य्य-अतच् न०त० । अनभिलषिते अनिष्टे "येनाविहर्य्यतक्रतोः" ऋ० १,६३,२। अविहर्य्यत क्रतोरनभिलषित यज्ञस्य' भा० ।

अविहित त्रि०न शास्त्रेण विहितः न०त०।१निषिद्धे।२अकृतेच

अविहुत त्रि०वि+हृ-बा०उतच् किच्च न०त० । अकिंस्ते । "ताहि चत्रमविहुतम्" ऋ०५,६६,२, "अविहुतमहिंस्रम्" भा० ।

अविह्वल त्रि० विरोधे न०त० । व्याकुलभिन्ने स्वस्थे ।

अवी स्त्री अवत्यात्मानं लज्जया अव-ई । कृतुमत्यास् ।

अवीकाश पु० वीकाशः प्रकाश उपसर्गदीर्घः अभावे न०त० । २प्रकाशाभावे । न० ब०।२प्रकाशशून्ये । [नम्शून्ये त्रि० ।

अवीक्षण न० अभावे न०त०। १दर्शनाभावे न०व० । २दर्शनाभावे न० ।

अवीक्षित त्रि० न०त० । १दृष्टभिन्ने । भावे क्त अभावे न० त० । २वीक्षणाभावे न० ।

अवीचि पु० नास्ति वीचिः प्रकाशः सुखं वास्य ।१नरकभेदे तत्स्वरूपं तत्कारणञ्च भागवते ५स्क० दर्शितं यथा "तामिस्रोन्धतामिस्र" इत्याद्युपक्रम्य "अवीचिरयःपानमित्यादिना अष्टाविंशतिनरकान् विभज्य "यस्त्विहाश्रुतं वदति साक्ष्ये, द्रव्यविनिमये, दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्धः सम्पात्यते । यत्र जलमिव स्थलमसृग्दृषदमवभासते तदवीचिनाम तिलशोविशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति"—अवीचिमान् अवीचिमयोऽत्र । २तरङ्गशून्ये जलाशये त्रि० ।

अवीज त्रि० नास्ति बीजमस्य । बीजशून्ये १फलादौ ।

२वृक्षायां स्त्री।बीजानाधायके त्रि०"अबीजमपि चेत्तं केवलं स्यण्डिलं भवेत्" मनुः। अप्राशस्त्ये न०त०। अङ्कुरोत्पादनायासमर्थे तैलायाणादौ २बीजे च। "अबीजविक्रयी चैव बीजोत्कृष्टं तथैव च" मनुः। "अबीजं प्ररोहासमर्थमिति" कुल्लू०। बीजं शुक्रं न०ब०। शुक्ररहिते ४क्लीबे न०। "न मूत्रं फेनिलं यस्य विड्वा चाप्सु निमज्जति। मेढ्रंचोन्नादशुक्राभ्यां स क्लीब इति कथ्यते" स्मृतेस्तस्य तथात्वम्। "उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम्" इति मनुः। ५कारणशून्ये त्रि०दैवयोगोक्ते निर्बीजे चित्तवृत्तिपरिणामनिरोधे पु०।

अवीत न० अनुमानभेदे तच्च दर्शितं सा०कौ० "तच्च प्रथमं तावत्त्रिविधं वीतमवीतञ्च अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतम् व्यतिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतम्" व्याख्यातञ्च तदुक्तैरभिःयथा "वीतं विशेषेण स्यूतं सङ्गतमन्वितम् अन्वयव्याप्तिहेतुकमित्यर्थः यद्वा विशेषेण स्यूतं ज्ञातं प्रसिद्धसाध्यव्याप्तिकमित्यर्थः तद्विपरीतमवीतम् व्यतिरेकव्याप्तिहेतुकम् अप्रसिद्धसाध्यव्याप्तिकं वेत्यर्थः व्यतिरेकमुखेन तदसत्त्वे तदसत्त्वरूपव्यतिरेकद्वारा साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिद्वारेत्यर्थः। निषेधकं यो यः पृथिवीभेदवान् स गन्धाभाववान् इति व्यतिरेकग्रहणेन व्यापकस्य गन्धाभावस्य पृथिव्यां निवृत्त्या पृथिवीभेदरूपस्य गन्धाभावव्याप्यस्य निवारकम्। तथा च पृथिवी पृथिवीतरभिन्ना गन्धवत्त्वादित्यनुमानमवीतम्"।

अवीर त्रि०वीरः पुत्रादिर्नास्ति यस्य। १पुत्रादिशून्ये। न०त० २वीर्य्यवज्जिते त्रि०। "पतिपुत्रवती नारी वीरा प्रोक्ता मनीषिभिः" इति परिभाषिता स्त्री वीरा न०त०। ३पतिपुत्ररहितायां स्त्रियां स्त्री। "अजातपुत्रा विधवा साऽवीरा परिकीर्त्तितेति" स्मृतिः। "मा त्वा वयं सहसावन्नवीराः" ऋ०७,४,६,। "अवीराः पुत्रादिरहिताः" भा०। "अवीरायाञ्च योषितः" स्मृतिः।

अवृक त्रि० वृ-कक् वृकः आवरकः न०ब०। आवरकशून्ये "ज्योतींषि कृण्वन्नवृकाणि" ऋ०१५५,६, "वृकेणावरकेण रहितानि" भा०।

अवृत्ति स्त्री वृत्तिर्जीवनोपायः अभावे न०त०। १जीविकाभावे "आददीताममेवाऽऽदवृत्तावेकरात्रिकम्" अवृत्तिकर्षिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि" अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत्" इति च मनुः। नास्ति वृत्तिः स्थितिरस्य। २अविद्यमाने। "साध्याभाववद्वृत्तित्वम्" साध्यवद्न्यावृत्तित्वम्" इति च अनुचिन्ता०। न०ब०। जीविकाशून्ये त्रि०

अवर्द्धुक न० नास्ति वर्द्धिः यत्र कप्। ऋणादौ वर्द्धिः लाभरूपा (सुद) तद्रहिते १मूलधने। तच्च स्मृतौ दर्शितं यथा "ऋणं पैतामहं पैत्रं प्रतिभाव्यागतं स्मृतं। समं दद्यात् ततसुतो च न दाप्यावीति निश्चयः"। "समं मूलधनं "ऋणमात्मोपवत् पित्रा पुत्रैर्देयं विभावितम्। पैतामहं समं देयमदेयं ततसुतस्य च" या०स्मृ०। "समं यावत् गृहीतं तावद्देयं न वर्द्धिः" मिता०। "गोप्याधिभोगे नो वर्द्धिः सोपकारेऽथ हापिते। नष्टोदेवोविनष्टञ्च दैवराजकृताद्ऋते" या०स्मृ०।

अवृध त्रि० न वर्द्धते वृध-क। १वर्द्धिशून्ये। अन्तर्भूतण्यर्थे वृध-क न०त०। अवर्द्धके। "यनौरश्वाँ अवृधाँ अवन्वान्" ऋ०७,७,२, "अवृधान् स्तुतिभिरग्निमवर्द्धयतः" भा०।

अवृष्टि स्त्री अभावे न०त०। १वर्षणाभावे "अथ यदाऽवृष्टिर्भवति बलीयानेव तर्ह्यबलीयस आदत्ते यन्नाऽहिनस्ति" शत०ब्रा०। न०ब०। वृष्टिशून्ये मेघे पु०।

अवृहत् त्रि० विरोधे न०त०। वृहद्भिन्ने क्षुद्रे स्त्रियां ङीप्

अवेक्षक त्रि० अव+ईक्ष-ण्वुल्। १दर्शके २पर्य्यालोचके ३आयव्ययादिषु अध्यक्षे च।

अवेक्षण न० अव+ईक्ष-ल्युट्। १दर्शने, २प्रतिजागरणे, ३अवधाने च "वर्णाश्रमावेक्षणजागरूकः" रघुः "भूषागारङ्गरचना वृथा विप्लवावेक्षणम्" सा०द० "पित्रामन्त्रालुहरणे आत्मालम्भे ह्यवेक्षणे" आ०त०स्मृ०

अवेक्षणीय त्रि० अव+ईक्ष-अनीयर् १दर्शनीये। "तपस्विसामान्यमवेक्षणीया" रघुः। २आलोचनीये च।

अवेक्षा स्त्री अव+ईक्ष-भावे अ। अवेक्षणशब्दार्थे।

अवेक्षित त्रि०अव+ईक्ष कर्म्मणि-क्त।१दृष्टे २पर्य्यालोचिते च।

अवेक्षिष्ट त्रि०अव+ईक्ष-इष्टच् स्त्रियां ङीप्। अवेक्षकशब्दार्थे।

अवेक्ष्य त्रि०अव+ईक्ष-कर्म्मणि यत्। १पर्य्यालोच्ये २दृश्ये च ल्यप्। २दृष्ट्वेत्यर्थे ४पर्य्यालोच्येत्यर्थे च अव्य०।

अवेदनाज्ञ त्रि० वेदनां न जानाति ज्ञा-क अस० समा०। वेदनानभिज्ञे "अवेदनाज्ञं कुलिशव्रतानाम्" कुमा०।

अवेदि स्त्री वेदिर्वेदनम् अभावे न०त०। ज्ञानाभावे "न वेदवेदिर्मृतौ विनष्टिः" इ०उ०। परिष्कृतभूमिशून्ये त्रि०

अवेद्य त्रि० न वेद्यः ज्ञेयः। १अज्ञेये। विद-लाभे ण्यत्। २अलभ्ये ३अविवाह्यस्त्रियां स्त्री "व्यभिचारेण वर्णानामवेद्यावेदनेन च" मनुः। ४गोवत्से पु० शब्दच०।

अवेल त्रि०नास्ति वेला सीमा यत्र । १सीमारहिते निर्मर्य्यादे २अपलापे पु० ३चूर्णगुवाके स्त्री मेदि० । अप्राशस्त्ये न०त०।४अनुचितकाले स्त्री ।न०व०। ५समयशून्ये त्रि० ।

अवेष्ट त्रि० अव+यज-क्त । नाशिते "अवेष्टादंदशूकाः" य०१०,१०,"अवपूर्व्वोयजतिर्नाशार्थः" वेददी० "अवेष्टा दृति लौहायसमाविध्यति" कात्या०१५,५,२२ ।

अवैध त्रि० विधित आगतम् अण् वैधं न०त० । १विधितः अप्राप्ते २निषिद्धे च। "अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन मुच्यते" स्मृतिः ।

अवैधव्य न० विधवाया भावः ष्यञ् वैधव्यं पतिहीनत्वम् अभावे न०त० । पतिशून्यत्वाभावे सपतिकत्वे । 'अवैधव्यप्रदं स्त्रीणाम्' कालिकापुरा० "अवैधव्यं भवेत्तस्याः सप्तजन्मसु निश्चितम्" पुरा० ।

अवैमत्य न० वैमत्यं विरुद्धमतता अभावे न०त० । १मतद्वैधाभावे ऐकमत्ये ।न०ब० । २तच्छून्ये ।

अवैयात्य न०वैयात्यं धार्ष्ट्यं निर्लज्जता अभावे न०त०। धार्ष्ट्याभावे १सलज्जत्वे न०ब०। २तच्छून्ये लज्जावति त्रि० ।

अवैर न०अभावे न०त०। १विरोधाभावे न०ब०। २विरोधशून्ये त्रि० ।

अवैराग्य न०वैराग्यं विषयवितृष्णा अभावे न०त० । १विषयतृष्णायाम् २सांख्योक्ते धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्यरूपाष्टविधप्रकृतिधर्म्मभेदे च ।

अवैलक्षण्य न० विलक्षणस्य भावः ष्यञ् वैलक्षण्यं भेदकधर्म्मः अभावे न०त० । १भेदकधर्म्माभावे अभेदे । न०ब० । २तच्छून्ये अभिन्ने त्रि० ।

अवोक्षण न० अव+उक्ष-भावे ल्युट् । तिरश्चा पाणिना सेचने "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् ।न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृतिः ।

अवोद पु० अव+उन्द-भावे घञ् नि०नलोपः । १अवक्लेदने ततः अस्त्यर्थे अर्श० अच् । क्लिन्ने २सार्द्रे त्रि० जटा० ।

अवोदेव अव्य० देवानामवरस्तात् अव्ययी० । देवानामवरस्मिन् देशादौ "अवोदेवसुपरिमर्त्यं ज्रवि" ऋ० ७,१६,१२ ।

अवोध पु० अव+उध-कर्मणि क । उष्णाम्भे। अपूपा०हितार्थे ख्यत्रौ । अवोधीयम् अवोध्यं तद्धिते वस्तुनि त्रि० ।

अव्द पु० अब्दवत् । वत्सरे । [पत्वादयोऽप्यत्र ।

अव्दप पु० अब्दपवत् वर्षाधिपे अब्दपशब्दे विवृतिः । अव्द-

अव्य त्रि० अविभवम् अवि+दिगा० यत् । मेषभवे लोमादौ "तिरः पवित्रं वितारमव्यम्" ऋ०९,१०६,१६, ।

अव्यक्त पु० वि+अन्ज-क्त न०त० । १विष्णौ,२कामे,३शिवे, सांख्यमते सर्व्वकारणे,४प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तथात्वम्, वेदान्तमते नामरूपाभ्यामव्याकृते ५अज्ञाने ६सूक्ष्मशरीरे ७सुषुप्तावस्थायां च शब्दप्रवृत्तिनिमित्तैर्जातिगुणादिभिर्व्वर्ज्जिते निराकारे ब्रह्मणि न० । ८असदृष्टे वस्तुमात्रे त्रि० । "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा०का० । हेतुमत्त्वादिभिर्व्यक्तधर्म्मैर्विरहितमव्यक्तम् । "अव्यक्तं त्रिगुणाल्लिङ्गात्" सा०सू० । "तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञ विज्ञानात्"सा०का०। "महत्तत्वं सुखदुःखमोहात्मकद्रव्योपादानं सुखदुःखमोहात्मकत्वे सति कार्य्यत्वात् तथाभूतघटादिवत् । महदादिकं स्वोपहितत्रिगुणात्मकोपादानं कार्य्यत्वात् घटवत् इत्यमव्यक्तानुमानम् दर्शितम्" सा०प्र०भा० । "बुद्धेरिवाव्यक्तमुदाहरन्ति" रघुः । वेदान्तिभिः नामरूपाभ्यामव्याकृतमज्ञानमेव मूलकारणतया अव्यक्ततया च स्वीकृतं तत्रैव प्रकृतिधर्म्माणां सर्व्वेषामन्तर्भावात् "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! । अव्यक्तनिधनान्येव तत्र का परिदेवनेति" गीतोक्तेरपि तत्रैव तात्पर्य्यम् तद्धेतुरेव ब्रह्मणः जगज्जन्मादिहेतुत्वम् "व्यक्तकारणमव्यक्तं नित्यं सदसदात्मकम्" मनूक्तावपि तद्रूपसज्ञानमेवाव्यक्तशब्देनाभिधीयते तस्य च प्रवाहरूपेणावस्थितत्वात् नित्यत्वम् "महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" श्रुतौ तु अव्यक्तशब्देन सूक्ष्मशरीरमिति शा०सूत्रे भाष्ये च व्यवस्थापितम् यथा "आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त गृहीतेर्दर्शयति च" सू०। "आनुमानिकमपि अनुमानेनिरूपितं प्रधानमेवैकेषां शाखिनां शब्दवदुपलभ्यते । काठके हि पठ्यते "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" इति तत्र य एव यत्नामानो यत्क्रमकाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वान्न व्यक्तमव्यक्तमिति व्युत्पत्तिसम्भवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते अतस्तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नं तदेव जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेन्नैतदेवम् नह्येतत् काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरम् नह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं प्रधानं तादृशमत्यभिज्ञायते। शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते स च शब्दो न व्यक्तमव्यक्तमिति

यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे दुर्लक्ष्ये प्रयुज्यते न चायं कस्मिंश्चिद्दृढः । या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। नच क्रमसामान्यात् समानार्थप्रतिपत्तिर्भवति तद्रूपप्रत्यभिज्ञाने। न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणाच्चात्र न परकल्पितं प्रधानं प्रतीयते शरीर रूपकविन्यस्तगृहीतेः । शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते कुतः ? प्रकरणात् परिशेषतश्च । तथाहि अनन्तरातीतो ग्रन्थः आत्मशरीरादीनां रथिरथादिरूपकल्पनिं दर्शयति । "आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति शेषे च "इन्द्रियादिभिरसंयतैः संसारमधिगच्छति। संयतैस्त्वध्वनः पारन्तद्विष्णोः परमं पदमाप्नोतीति"दर्शयित्वाकिं तदध्वनः पारमस्मदादिभिरप्राप्याकाङ्क्षायान्तेभ्यएव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमपदं दर्शयति। "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिरिति" । तत्र यएवेन्द्रियादयः पूर्वस्यां रूपककल्पनायामश्वादिभावेन प्रकृताः त एवेह परिगृह्यन्ते प्रकृतप्रक्रियाऽपरिहाराय । तत्रेन्द्रियमनोबुद्धयस्तावत् पूर्वत्रेह च समानशब्दा एव अर्थास्तु ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्तेभ्यश्चेन्द्रियेभ्यः परत्वम् इन्द्रियाणाञ्च महत्वं विषयाणामतिमहत्वमिति श्रुतिप्रसिद्धेः । विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य । मनसस्तु परा बुद्धिः, बुद्धिर्हि रथस्य भोग्यजातं भोक्तारमुपसर्पति । बुद्धेरात्मा महान् परः यः सः आत्मानं विद्धीति रथित्वेनोपन्यस्तः कुतः ? आत्मशब्दात् । भोक्तुश्च भोगोपकरणात् परत्वोपपत्तेः । महत्त्वञ्चास्य स्वामित्वादुपपन्नम्" । "तदेवं पूर्वापरालोचनायां नास्त्यत्र परकल्पितस्य प्रधानस्यावकाशः" भा०। "सूक्ष्मन्तु तदर्हत्वात्" सू० "उक्तमेतत्प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति । इदमिदानीमाशङ्क्यते कथमव्यक्तशब्दार्हत्वं शरीरस्य, यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हमस्पष्टवचनस्यव्यक्तशब्द इति अतउत्तरमुच्यते"सूक्ष्मन्विह" कारणात्मना शरीरं विवक्ष्यते सूक्ष्मसंज्ञावाचकशब्दार्हत्वात् । यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति प्रकृतिशब्दस्य विकारे दृष्टः यथा "गोभिः श्रीणीत मत्सरमिति"। तथाच श्रुतिः"तद्वेदं तर्ह्यव्याकृतमासीदिति"इदमेव व्याकृतं नामरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यन्दर्शयति" भा० । परमब्रह्मपरत्वे "ये चाप्यत्तरमव्यक्तं तेषां के योगवित्तमाः" "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति च गीता । "योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः" मनुः विष्णोस्तु "अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः सनातनः" इति विष्णुस० । अप्रकाशितार्थं "तमशेषमशेषाव्यक्तव्यवहारसूचितमर्थं मनसा जयाह्व" काद० "ततः स्वयम्भूर्भगवानव्यक्तं व्यञ्जयन्निदम्" मनुः संख्याविशेषेणानवगते गणितशास्त्रोक्ते १०राशिभेदे तच्च बीजनाम्ना व्यवह्रियते "उत्पादकं यत् प्रवदन्ति बुद्धेरधिष्ठितं सत् पुरुषेण सांख्याः । व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितज्ञ वन्दे । पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजप्रायप्रश्नानो विनाऽव्यक्तयुक्त्या" इत्युपक्रम्य "यावत्तावत्कालकोनीलकोऽन्यः वर्णः पीतो लोहितश्चैतदाद्याः । अव्यक्तानां कल्पिता मानसंज्ञास्तत्संख्यानं कर्तुमाचार्यवर्यैः" बीजग० तच्च चतुर्विधं यथोक्तम् तत्रैव "यावत्तात्कालिकमव्यक्तराशेर्मानं तस्मिन् कुर्वतो द्विष्टमेव । तल्लौ पक्षौ साधनीयौ प्रयत्नात्यक्त्वा क्षिप्त्वा वापि सङ्कुल्य भक्त्वा । एकाऽव्यक्तं शोधयेदन्यपक्षाद्रूपाण्यन्यस्येतरस्माच्च पक्षात् । शेषावर्क्षेनोद्धरेद्रूपशेषं व्यक्तं मानं जायतेऽव्यक्तराशेः । अव्यक्तानां ह्यादिकानामपीह यावत्तावद्वर्गादिनिघ्नं क्षुतं वा । युक्तोनं वा कल्पयेदात्मबुद्ध्या मानं क्वापि व्यक्तमेवं विदित्वा । तत्र प्रथममेकवर्णसमीकरणं द्वितीयमनेकवर्णसमीकरणं बीजम्। यत्र वर्णस्य द्वयोर्वा बहूनां वा वर्गादिगतानां समीकरणं तन्मध्यमाहरणम् । यत्र भावितस्य तद्भावितमिति बीजचतुष्टयं वदन्त्याचार्याः । तत्र प्रथमं तावदुच्यते पृच्छकेन पृष्टे सत्युदाहरणे योऽव्यक्तराशिस्तस्य मानं यावत्तावदेकं द्व्यादिं वा प्रकल्प्य तस्मिन्नव्यक्तराशौ उद्देशकालापवर्त्यव्यक्तगुणभजनलैराशिकपञ्चराशिकश्रेढीफलच्छेदवर्गादिगणनेन कार्य्यम्। तथा कुर्वता द्वौ पक्षौ प्रयत्नेन समौ कार्य्यौ । यद्यालापे समौ पक्षौ न स्तः ।

तदैकतरे न्यूने पक्षे किञ्चित्कल्पयित्वा ततः अधिकपक्षात्तावदेव विशोध्य वा न्यूनं पक्षं केनचित्कल्पितेन अधिकं पक्षं तावतैव भक्त्वा समौ कार्य्यौ । ततस्तयोरेकस्य पक्षस्यावक्तमन्यपक्षस्यावक्ताच्छोध्यम् अव्यक्तवर्गादिकमपि।अन्यपक्षरूपाणि इतरपक्षरूपेभ्यः शोध्यानि। यदि करणयः सन्ति तदा ताअपि उक्तप्रकारेण शोध्याः। ततोऽव्यक्तराशिशेषेण रूपशेषे भक्ते यल्लभ्यते तदेकस्यावक्तस्य मानं व्यक्तं जायते । तेन कल्पितोऽव्यक्तराशिरित्याद्यः ॥ यत्तोदाहरणे द्वाद्योऽव्यक्तराशयोभवन्ति तदा तस्यैकं यावत्तावत्कल्प्य अन्येषां द्वयादिभिरिष्टैर्गुणितं भक्तं वा इष्टैः रूपैरूनं युतं वा यावत्तावदेव प्रकल्प्यम् ॥ अथ वा एकस्य यावत्तावदन्येषां व्यक्तान्येव मानानि प्रकल्प्यानि । सर्वं विदित्वेति यथा क्रिया निर्वहति तथा बुद्धिमता ज्ञात्वा शेषाणामव्यक्तानि व्यक्तानि वा कल्प्यानीत्यर्थः।उदाहरणम्। एकस्य रूपं त्रिगुणा षडश्वा अश्वा दशान्यस्य तु तुल्यमूल्याः । कृतं तथा रूपशतं च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम् । यदा द्यवित्तस्य दलं द्वियुक्तं तत्तुल्यवित्तोयदि वा द्वितीयः । आद्योधनेन त्रिगुणोऽन्यतोवा पृथक् पृथङ्मे वद वाजिमौल्यम् । अत्राश्वमौल्यमज्ञातं तस्य मानं यावत्तावदेकं प्रकल्पितं वा १ तत्र त्रैराशिकं यद्येकस्य धीयत्तावन्मूल्यं तदा षण्णां किमिति न्यासः । १ । या १ । रै । फलमिच्छागुणं प्रमाणभक्तं लब्धं षण्णामश्वानामूल्यं या रै अत्र रूपशतत्रये प्रक्षिप्ते जातमाद्यस्य धनं या रै रू३०० एवं दशानां मौल्यं या १० अत्र रूपशते चर्णगते प्रक्षिप्ते जातं द्वितीयस्य धनं वा १० रू १०० एतौ समधनाविति पक्षौ स्वत एव समौ जातौ समशोधनार्थं न्यासः या ६ रू ३००

या १० रू १००

अथ एकाव्यक्तं शोधयेदन्यपक्षादिति आद्यपक्षाव्यक्तेऽन्यपक्षाव्यक्ताच्छोधिते शेषं या ४ । द्वितीयपक्षरूपेषु आद्यपक्षरूपेभ्यः शोधितेषु शेषं रू ४०० अव्यक्तराशिशेषेण या ४ रूपशेषे रू ४०० उद्धृते लब्धमेकस्य यावत्तावतोमानं व्यक्तं १०० यद्येकाश्वस्येदं मौल्यं तदा षण्णां किमिति त्रैराशिकेन लब्धे षण्णां मौल्ये ६०० रूपकशतत्रययुते६०० जातमाद्यस्य धनम्।एवं द्वितीयस्यापि६०० "बीजग० एवमनेकवर्णादीनामप्युदाहरणादीनि तत्रैव द्रष्टव्यानि ।

अव्यक्तमूलप्रभव पु० अव्यक्तं प्रधानमविद्या वा मूलम् प्रभवत्यस्मात् प्रभवः अपादाने अप् प्रभवोयस्य। संसारदृक्षे ।

अव्यक्तराग पु० न व्यक्तोऽल्पव्यक्तोरागोऽरुणिमा । १ईषद्रक्ते अरुणे वर्णे २तद्वति त्रि० ।

अव्यक्तलिङ्ग न० अव्यक्तस्य लिङ्गमनुमापकम् । सांख्यमते लिङ्गे १महत्तत्त्वादौ । अव्यक्तं लिङ्गमस्य । २असदृष्टचिह्ने रोगादौ त्रि० । न व्यक्तं दम्भाभावेन गुप्तं लिङ्गमस्य। गुप्ताश्रमयुक्ते २संन्यासिनि पु० ।

अव्यङ्ग स्त्री अवेरङ्गं अङ्गमिवाङ्गमस्याः । १शूकशिम्ब्याम् । न विकलमङ्गमस्य ब्री० । २विकलाङ्गभिन्ने पूर्णे त्रि० ।

अव्यङ्गाङ्गी स्त्री अव्यङ्गमविकलं सम्पूर्णमङ्गं यस्याः ङीप् । सम्पूर्णाङ्गयुक्तायां स्त्रियाम् "अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्" । मनुः ।

अव्यञ्जन पु० नास्ति व्यञ्जनं शुभलक्षणं यस्य । १अङ्गहीनपशौ, २शुभलक्षणशून्ये, ३चिह्नशून्ये च त्रि० ।

अव्यण्डा स्त्री न विगतमण्डं बीजमस्याः । शूकशिम्ब्याम् ।

अव्यतिकर पु० अभावे न०त० । १संसर्गाभावे न०ब० । २संसर्गशून्ये त्रि० ।

अव्यतिकीर्ण त्रि० वि+अति+कृ-क्त न०त० । असङ्कीर्णे "धाराः प्रसादवित्तस्यव्रतिकीर्णकृपाः" माघः ।

अव्यथ पु० न व्यथते पङ्क्त्यां न सञ्चलति व्यथभयचलनयोः अच् । १सर्पे । २व्यथाशून्ये त्रि० । नास्ति व्यथा यस्याः सेवनेन न०ब० । ३हरितक्याम् ४शुण्ठ्याञ्च स्त्री ।

अव्यथय पु० न व्यथयति गन्तारमक्लेशेन गन्तव्यस्थाननयनात् व्यथ-णिच्-बा०श घटा० ह्रस्वः न०त० । अश्वे निरु० ।

अव्यथा स्त्री अभावे न०त० । व्यथाभावे ।

अव्यथि त्रि० व्यथ-इन् न०त० । व्यथाशून्ये अक्लिष्टे "समुद्रमव्यथिर्जगन्वान्" ऋ०१,११७,१५,। [शून्ये च।

अव्यथिन् त्रि०न व्यथते व्यथ-इनि न०त०१निर्भये २व्यथा-

अव्यथिष न+व्यथ-टिषच् । १सूर्य्ये २समुद्रे च ३धरायां ४रात्रौ च स्त्री टित्त्वात् ङीप् ।

अव्यथ्य त्रि० न+व्यथ-णि० कर्त्तरि यत् । व्यथाशून्ये ।

अव्यपदेश्य त्रि० न व्यपदिश्यते अभिलापवाक्येन वि+अप+दिश-ण्यत् न०त० । १कथयितुमशक्ये न्यायमते निर्विकल्पके २ज्ञाने न० तद्धि अतीन्द्रियत्वेन अनुव्यवसायाविषय तथा अभिलपितुं न शक्यते । "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" गौ०सू० । जात्यादिशून्यतया१निर्देश्ये २ब्रह्मणि न० ।

अव्यपेक्षा स्त्री विशेषेणापेक्षा व्यपेक्षा अभावे न०त० ।

१विशेषणापेक्षाभावे समर्थसूत्रभाष्योक्ते अवयवार्थानपेक्षत्वे सतुदायस्य विशेष्यविशेषणभावानगाहेनैकोपस्थिति जनकत्वरूपे २एकार्थीभावे च। "समर्थः पदविधिः" पा० सूत्रे सामर्थ्यं द्विविधं व्यपेक्षा अव्यपेक्षा च प्रपञ्चितमस्माभिः सरलायाम्। तत्र स्वार्थपर्यवसायिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा। राज्ञः पुरुष इत्यादौ वाक्ये सत्याकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वश्च राज्ञो देवदत्तस्य च पुरुषः कम्बलश्च राज्ञोऽश्वो धनञ्जेत्यादि वृत्तौ तु नैवम् वृत्तीनामेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावावगाहेनैकोपस्थितिजनकत्वम्। तथाच राजपुरुषादिशब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे कम्बलादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य च नाश्वादिसम्बन्धिता राजादीनाम्। जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "सतुदायेन सम्बन्धो येषां गुरुकुलादिना। संसृष्टावयवास्ते तु युज्यन्ते तद्वता सहेति"। यद्वा सम्बन्धिशब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव कोषाञ्चित् सम्बन्धान्वयः तदुक्तं तेनैव "सम्बन्धिशब्दःसापेक्षोनित्यं सर्वैः समस्यते। वाक्यवत् सा व्यपेक्षापि वृत्तावपि न हीयते"। अतएव वार्त्तिककृता "सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सामान्यतो वृत्तिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभावमभिधायम् "अगुरुकुलगुरुपुत्रादीनां वक्तव्यम्" इत्यनेन गुरुकुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्य्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समानाधिकरणसमर्थवद्भवती"त्यनेन सर्व्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भङ्ग्याऽभिहितः। एतन्मूलकमेव प्राचां गाथा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदादन्यत् यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते" इति अतोयं विशेषः प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य वृत्त्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षयापि समासः। समासे चावयवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावाद्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तथान्याय्यधिककल्पना स्यादतः सतुदायशक्तिकल्पनम् यथोक्तं हरिणा "बहूनां वृत्तिवस्त्वर्थानां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितमिति" तथाहि इत्यादिविग्रहवाक्ये चकारादि प्रयुज्यते समस्ते तु न। वचनैरेव तन्निषेधः कल्पनीयः। सतुदायशक्तिपक्षे तु उक्तार्थानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नामार्थयोरभेदान्वयः क्लृप्तः सच राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परित्यक्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च क्लृप्तः सच प्राप्नानन्दादौ भज्येत आनन्दकर्त्तृकप्राप्तिकर्म्मेत्यर्थबोधस्योभयसम्मतत्वेन कर्त्तृविहितक्तान्तार्थस्य कर्त्तुर्विशेष्यतौचित्येन प्रकृते तद्वैपरीत्यात् आनन्दसम्बन्धादिलक्षणास्वीकारे सतुदायशक्तिपक्षे एव प्रवेशः। तथा प्राप्त आनन्दोयमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषणयोगवत् समासे तद्द्वारणाय वृत्तस्य न न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादिवस्तुविप्लवापत्तिरतः सतुदाये शक्तिः" नास्ति व्यपेक्षा यस्य। २अनपेक्षे त्रि०।

अव्यभिचरित त्रि० वि+अभि+चर—क्त न०त०। १व्यभिचारशून्ये हेतौ "का व्याप्तिः? न तावद्भिचरितत्वं तद्धि न साध्याभाववद्वृत्तित्वम्" अनुमानचिन्ता० व्यभिचारश्च द्विविधः अन्वयव्यभिचारोव्यतिरेकव्यभिचारश्चेति भेदात् अन्वयव्यभिचारोऽपि द्विधा। साध्याभाववद्वृत्तित्वं स्वसमानाधिकरणाभावप्रतियोगिसामानाधिकरण्यं चेति भेदात् यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायःपिण्डे वह्नेर्विद्यमानत्वात्, वह्न्यधिकरणे तप्तायःपिण्डे धूमाभावस्य विद्यमानतया तत्प्रतियोगिना सह समनाधिकरणत्वात् वह्नौ उभयविधव्यभिचारः। साध्याभाववद्व्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्यभिचारः यथा धूमवान् वह्नेरित्यादौ धूमाभावरूपसाध्याभावस्य तप्तायःपिण्डे सत्त्वेन वह्न्यभावस्य च तत्रासत्त्वात् वह्नेर्न साध्याभाववद्व्यापकीभूताभावप्रतियोगित्वम्। इति तत्र उभयविधव्यभिचारः। २अबाधितार्थे च "अव्यभिचरितेभ्यः प्रमाणेभ्यः" गौ० भा०।

अव्यभिचारिन् त्रि० वि+अभि+चर—णिनि न०त०। केनापि प्रतिकूलहेतुना १निवारयितुमशक्ये। न्यायमते २साध्यसाधकव्याप्तिविशिष्टे हेतौ च। ३अबाधितविषये च

"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारीति गौ० सू० [अव्यभिचरितशब्दे विवृतिः ।

अव्यभिचार पु० अभावे न० त० । १व्यभिचाराभावे २नैयत्यरूपे

अव्यय पु० न० वि+इण्–अच् न० त० । सर्वासु विभक्तिषु सर्व्वेषु वचनेषु च एकरूपे १शब्दवृत्तिधर्म्मे विशेषे, यथाक्षरादयोऽव्ययाः सर्व्वत्रैकरूपाः २अग्नौ ३विष्णौ च पु० । आद्यन्तरहिते ४विकारशून्ये त्रि० ५परब्रह्मणि न० । "सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु । वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति" श्रुतिः । प्रवाहरूपेण ह्यैसर्व्वदास्थिते च "अश्वत्थं प्राहुरव्ययम्" गीता "मनसावयवैः सूक्ष्मं सर्वभूतकृदव्ययम्" स्मृत्याभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम्" मनुः ७अव्ययफलदे च "भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः । छन्दोग० "अव्यया अव्ययफलदा मोक्षदा" इति आ० त० रघु० । "अव्ययः पुरुषः साक्षी" विष्णुस० । [भावे ।

अव्ययात्मन् त्रि० अव्यय आत्मा स्वभावो यस्य । अविनश्वरस्व–

अव्ययीभाव पु० अनव्ययमव्ययं भवत्यनेन अव्यय+च्वि–भू करणे घञ् । व्याकरणसिद्धे समासविशेषे । तत्र हि उपकुम्भमित्यादौ अनव्ययस्यापि कुम्भादिपदस्यावव्ययत्वम् "अव्ययीभावश्चेति" पा० सूत्रे तथाभिधानात् । "द्वन्द्वोद्विगुरपि चाहं नित्यं सदृदण्डेऽव्ययीभावः । तत्पुरुषः कर्म्मधारय येनाहं स्यां बहुव्रीहिः" उद्भटः ।

अव्यर्थ त्रि० न व्यर्थः । १सफले २सार्थके च ।

अव्यलीक त्रि० विरोधे न० त० । १प्रिये सत्ये च "इत्थं गिरः प्रियतमा इव सोऽव्यलीकाः शुश्राव सूनृततनयस्य तदाऽव्यलीकाः" माघः ।

अव्यवधान न० अभावे न० ब० । १व्यवधानाभावे नैकट्ये "यत् पदार्थस्य यत् पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधाने नोपस्थितिः कारणम्" आसत्तौ मुक्ता० । न० ब० । २व्यवधानशून्ये अव्यवधानञ्च द्विविधं देशकृतं कालकृतञ्च । पूर्व्वोत्तरक्षणादौ कालिकं द्रव्यान्तरेणानावरणे दैशिकम् ।

अव्यवसाय पु० व्यवसायः निश्चयउद्यमश्च अभावे न० त० । १निश्चयाभावे२उद्यमाभावे च । न० ब० । ३व्यवसायशून्ये त्रि० ।

अव्यवसायिन् त्रि० न व्यवस्यति वि+अव–सो–णिनि न० त० । १उद्यमाभाववति अनुद्यते २निश्चयाभाववति निश्चयशून्ये । "बुद्धयोऽव्यवसायिनाम्" गीता ।

अव्यवस्था स्त्री वि+अव+स्था–अङ् अभावे विरोधे वा न० त० । "इदंकर्त्तव्यमिदं नेति" १नियमाभावे, २शास्त्रादिविरुद्धायां व्यवस्थायाम् अविधौ च । "किमव्यवस्थाङ्गलितोऽपि केशवः" माघः । न० ब० । ३मर्य्यादाशून्ये ४अविहिते ५स्थितिरहिते च त्रि० । "स्खलादविन्द्रियमव्यवस्थामिति" कुमारः "अव्यवस्थां सञ्चारिणीम्" मल्लि० ।

अव्यवस्थित त्रि० वि+अव–स्था+क्त न० त० । १शास्त्रादिमर्य्यादारहिते २अनियतरूपे "अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" नीति० ३चञ्चले च ।

अव्यवहार्य्य त्रि० वि+अव+हृ–ण्यत् न० त० । शयनासनभोजनादौ एकत्रावस्थानायोग्ये पतितादौ "कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" स्मृतिः । अव्यवहार्य्यास्तु पातित्यहेतुकर्म्मकारिणः स्मृतावुक्ता वेद्यास्तेषां संसर्गविशेषोऽपिनिषिद्धः यथा "याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम् । कृत्वा सद्यः पतन्त्येते पतितेन न संशयः" देवलः "शरणागतबालस्त्रीहिंसकान् संश्रयेन्न तु । चौर्य्यव्रतानपि सदा कृतघ्नसहितानपि" या० स्मृ० । स्त्रीघातकस्यावव्यवहार्य्यत्वञ्च हीनवर्णोपभुक्तावतिरिक्तविषयम् "हीनवर्णोपभुक्ता या त्याज्या बध्याऽपि वा भवेत्" दक्ष० स्मृतौ तस्या बध्यत्वोक्तेः अत्र कृतप्रायश्चित्तानामपि अव्यवहार्य्यतोक्तेः अकृतप्रायश्चित्तानां सुतरां तथात्वम् तच्च शङ्खपूर्व्वं प्रा० त० रघुनन्दनेन समर्थितं यथा । "पापाभावे कथमव्यवहार्य्यता" इति चेत् या० स्मृतौ वचनादिह जायते इत्युक्तेस्तथात्वम् । तथाच किमिव वचनं न कुर्य्यात् नास्ति वचनस्यातिभारः तथाहि पापस्य हेतौ शक्तौ नरकोत्पादिका व्यवहारविरोधिका च । तत्रैकतरशक्तिविनाशेऽपि व्यवहारविरोधिका शक्तिरस्त्येवेति यथोक्तमापस्तम्बेन "नास्त्यस्मिन् लोके प्रत्यासत्तिर्विद्यते कल्पयन्तु विचक्षणाः" इति प्रत्यासत्तिर्भोजनादौ सान्निध्यम्" मिताक्षरायान्तु कामतो व्यवहार्य्य इत्येव पाठः तथैव तेन व्याख्यातं च "प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्य्यस्तु वचनादिह जायते" या० स्मृ० । "प्रायश्चित्तैः वक्ष्यमाणैरज्ञानाद्यदेनः पापं कृतं तदपैति अपगच्छति न कामत कृतम्" किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्य्यो जायते इति" समर्थितस्यायमर्थ आशङ्कापूर्व्वकं तत्रैव यथा "ननु कामकृते प्रायश्चित्ताभावात् कथं व्यवहार्य्यत्वम् ? तदभावश्च 'अनभिसन्धिकृतेऽपराधे प्रायश्चित्तमिति" वसिष्ठवचनात्, "इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इति मनुवचनाच्चावगम्यते । नैतत्

"यः कामतो महापापं नरः कुर्य्यात् कथञ्चन । न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते" इति । तथा "विहितं यदकामानां कामात्तद्द्विगुणम्भवेदिति" च कामकृतेऽपि प्रायश्चित्तदर्शनात् । यत्तु वशिष्ठवचनम् तस्माद्यकामकृतेऽपराधे प्रायश्चित्तं शुद्धिकरमित्यभिप्रायः, न पुनः कामकृते प्रायश्चित्ताभाव इति । यत्तु मनुवचनम् "इयं विशुद्धिरुदितेत्यादि" तदपीयमिति सर्वनामपराकृष्टद्वादशवार्षिकव्रतचर्य्याया एव "कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इत्यनेन प्रतिषेधो,न पुनः प्रायश्चित्तमात्रस्य, मरणान्तिकादेः प्रायश्चित्तस्य दर्शनात्। ननु यदि कामकृतेऽपि प्रायश्चित्तमस्ति तर्हि पापक्षयोऽपि कस्मान्न स्यादविशेषात् ? यदि पापक्षयेऽपि नास्ति तर्हि व्यवहार्यतापि कथन्नवति? उच्यते उभयत्र प्रायश्चित्ताविशेषः शास्त्रतोऽवगम्यते । अज्ञानकृते सर्व्वत्र पापक्षयः यत्र तु "ब्रह्महाशुरापगुरुतल्पगमात्मपितृयोनिसम्बन्धावगमस्तेननास्तिकनिन्दितकर्म्मा व्याधिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति" गौतमोक्तं महापातकादौ व्यवहार्य्यत्वं निषिद्धं तस्मिन् पतनीये कर्म्मणि कामतः कृते व्यवहार्थ्यत्वमात्रं न पापक्षय इति । न च पापक्षयाभावे व्यवहार्य्यत्वमनुपपन्नम् । द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारविरोधिका च तत्रैकतरशक्त्याविनाशेऽपि व्यवहारविरोधिकायाः शक्तेर्विनाशोनानुपपन्नत्वात् पापानपगमेऽपि व्यवहार्य्यत्वं नानुपपन्नम् । यत्तु मनुवचनम् "अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः । कामकारकृतेऽप्याहुरेके-श्रुतिनिदर्शनादिति" तदपि कामकृतेऽपि प्रायश्चित्तप्राप्त्यर्थं न पुनः पापक्षयप्रतिपादनपरम् । अपतनीये पुनः कामकृतेऽपि प्रायश्चित्तेन पापक्षयो भवत्येव ।"अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति । कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति" मनुस्मरणात् । पतनीयेऽपि कर्म्मणि कामकृते मरणान्तिकप्रायश्चित्ते कलुषक्षयोभवत्येव फलान्तराभावात् । "नास्थाक्षिन् लोके प्रत्यवस्थितिर्विद्यते कलुषन्तु निर्हन्यत इत्यापस्तम्बस्मरणात्" इति।

अव्यवहित त्रि० वि+अव+धा-क्त न०त० । व्यवधानरहिते साक्षात्संबद्धे । "विसाधर्म्यविधाविरूढविशिष्टलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नेति"दीधितिः ।

अव्यवहृत त्रि० वि+अव+हृ-क्त न०त० । १अकृतव्यवहारे यस्य व्यवहारो न कृतः तस्मिन् भोगादिना २अदूषिते च

अव्यसन न० अभावे न०त० । १व्यसनाभावे न०व० । व्यसनशून्ये। व्यसनानि च अष्टादश मनुना दर्शितानि यथा "दश कामसमुत्थानि तथाष्टौ क्रोधजानि च । व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् । कामजेषु प्रसक्तोहि व्यसनेषु महीपतिः । विमुच्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु ॥ मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियोमदः । तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ द्वयोरप्येतयोर्मूलं यं सर्व्वे कवयोविदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ । पानमक्षाःस्त्रियश्चैव मृगया च यथाक्रमम् । एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे । दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे । क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा । सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः । पूर्व्वंपूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान्" ।

अव्यसनिन् त्रि० न०त० स्त्रियां ङीप् । व्यसनशून्ये

अव्यस्त त्रि० न व्यस्तः विच्छिन्नः विपर्य्यस्तः पृथग्भूतो वा । १अविच्छिन्ने २अविपर्य्यस्ते ३समस्ते च। [अव्ययादयोऽप्यत

अव्याकुल त्रि० न०त० । निराकुले स्वच्छन्दे स्वस्थे ।

अव्याकृत त्रि० वि+आ+कृ-क्त न०त० । वेदान्तमते अप्रकटीभूते १बीजरूपे जगत्कारणेऽज्ञाने २सांख्यादिमते प्रधाने च। "तदेदं तर्ह्यव्याकृतमासीत्"श्रुतिः । "सदेव सौम्येदमग्रआसीत्"छा०उ०भा०"इदं नामरूपाभ्यामव्याकृतम्"

अव्याज पु०न० अभावे न०त० । १छलाभावे "इदं किलाव्याजमनोहरं वपुः" भक्तु० । अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता" मालवि० । न०ब० । २तच्छून्ये त्रि० व्याजश्च यथार्थभूतस्य वस्तुनः स्वरूपनिह्नवेन इतररूपेण प्रकाशार्थः व्यापारभेदः ।

अव्यापक त्रि०न०त० । १व्याप्यकभिन्ने २परिच्छिन्ने च । व्यापकस्य स्वाधिकरणनिष्ठाभावाप्रतियोगी तद्भिन्नत्वाद्यभाव प्रतियोगी अव्यापकः यथा धूमो वह्नेरव्यापकः तस्य वह्न्यधिकरणे तप्तायःपिण्डे वर्त्तमानत्वाभावस्य प्रतियोगित्वात् "अव्यापकविषयतान्यूनत्वम्" साभा०गदा० ।

अव्यापार पु० अभावे न०त० । १व्यापाराभावे न०ब० । २व्यापारशून्ये। व्यापारश्च करणजन्यः क्रियाया अव्यवहित जनकः ।यथा प्रत्यक्षज्ञाने इन्द्रियसन्निकर्षः । सहि इन्द्रियादुत्पन्नः प्रत्यक्षं जनयन् व्यापारो भवति एवं छिदिक्रियायां दात्रच्छेद्यसंयोगः। तथा यागादौ अदृष्टम्,अनुमितौ परामर्शः,शाब्दबोधे पदार्थस्मरणम् इत्यादि यथायथ-

सङ्गम्। तथा "उत्पादना क्रियाऽपि व्यापारः "व्यापारो-भावना सैवोत्पादना सैवच क्रिया" हरिः।

अव्यापिन् त्रि० न व्याप्नोति वि–आप णिनि न०त० स्त्रियां ङीप्। १अव्यापके २परिच्छिन्ने च "हेतुमदनित्यमव्यापि सक्रियमाश्रितं लिङ्गम्" सां०सू०सा०का०च। "अव्यापित्वं परिच्छिन्नत्वम्" सां०प्र०भा०।

अव्याप्त त्रि० न व्याप्तः। १व्याप्तभिन्ने इयत्तया २परिच्छिन्ने च।

अव्याप्ति स्त्री अभावे न०त०। १व्याप्तेरभावे। व्याप्तिश्च तदभाव वदवृत्तित्वम् व्यापकसामानाधिकरण्यमनौपाधिकत्वं आधेयतादिवत् वस्तुस्वभावविशेषोवा मतभेदेन ज्ञेया। २लक्ष्ये लक्षणस्याप्रवृत्तौ च "अव्याप्यवृत्तिसाध्यकसङ्केता ववह्निमाणङ्काह" दीधितिः।

अव्याप्य त्रि० व्याप्तिविशिष्टोव्याप्यः न०त०। व्याप्तिविशिष्ट भिन्ने १व्याप्तिशून्ये यथा वह्निर्धूमस्य अव्याप्यः वह्न्यधिकरणेतप्तायःपिण्डे धूमस्याभावात्तेः तथात्वम्। वि+आप-ल्यप् न०त०। २सर्व्वावच्छेदेनप्राप्तेयर्थे अव्य०।

अव्याप्यवृत्ति त्रि० अव्याप्य सर्व्वावच्छेदेनप्राप्य वृत्तिर्यस्य। स्वाधिकरणे अंशविशेषे कालभेदे वा अस्थिते पदार्थे यथा संयोगादिर्घटादिश्च न सर्व्वदेशं व्याप्य स्वाधिकरणे घटादौ तिष्ठति। तथा आत्मनि ज्ञानादिकं न सर्व्वदा तिष्ठति। अतः संयोगादीनां स्वाधिकरण एव अंशभेदे कालभेदे च असत्त्वात्तथात्वम्। अव्याप्यवृत्तिनि-यामकश्च देशः कालश्च तत्र देशे सत्त्वे क्वचित् कालस्य देशभेदस्य वा नियामकत्वं क्वचित् कालसत्त्वे देशस्य इति अव्याप्यवृत्तयश्च संयोगविभागादयो दैशिकाः कालिकाश्च तथा आत्मनि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मभावना-ख्यसंस्काराः तेषां देहावच्छेदेन सत्त्वेऽपि घटाद्यवच्छेदे-नासत्त्वात् देहावच्छेदेऽपि सर्व्वदाऽसत्त्वाच्च तथात्वम् एवं शब्दस्य दैशिककालिकाव्याप्यवृत्तित्वम् गन्धादयस्तु कालिकाव्याप्यवृत्तयस्ते हि स्वाधिकरणे एव उत्पत्तिकाले प्रलये च परमाणौ न तिष्ठन्ति। संयोगेन घटादयोऽपि दैशिककालिकाव्याप्यवृत्तयः। "अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते" भाषा० "अव्याप्यवृत्तिसाध्यकसङ्केता-विति" दीधितिः।

अव्यायाम पु० अभावे न०त०। १व्यायामाभावे परिश्रम साधनव्यापाराभावे २विशेषेण विस्ताराभावे च न०ब०। ३तच्छून्ये त्रि०।

अव्यावर्त्तक त्रि० न व्यावर्त्तयति इतरेभ्यो निवारयति वि+आ+वृत–णिच्–ण्वुल् न०त०। १रक्षा। इतरव्यावृत्तिनिवारणे २इतरव्यावृत्तिभेदासाधके ३अविशेषके च।

अव्यावर्त्तन न० वि+आ–वृत–णिच्–ल्युट् अभावे न०त०। इतरव्यावृत्तिनिवारणे न०ब०। व्याघातशून्ये त्रि०।

अव्याहत त्रि० विशेषेणाहतः प्रतिरुद्धः न०त०। व्याघात-शून्ये व्याघातश्च विरोधप्रतिसन्धानेनाप्रसङ्गः २अप्रतिरुद्धे च। "अव्याहताज्ञः सर्व्वत्र" पुरा० व्याहतं मिथ्यार्थकं तद्भिन्ने ३सत्ये वाक्ये न०।

अव्याहतत्व न० अव्याहतस्य भावः त्व। १व्याघाताभावे हेम चन्द्रोक्ते २वाक्यगुणभेदे च ते च गुणाः यथा "संस्कारवत्त्वमौ-दार्य्यमुपचारपरीतता। मेघनिर्घोषगाम्भीर्य्यं प्रतिनादविधा-यिता॥ दक्षिणत्वमुपनीतरागत्वं च महार्थता। अव्याहत-त्वं श्लिष्टत्वं संशयानामसम्भवः॥ निराकृतान्योत्तरत्वं हृद-यङ्गमिताऽपि च। मिथःसाकाङ्क्षताप्रस्तावौचित्यं तत्त्वनि-ष्ठता॥ अप्रकीर्णप्रसृतत्वमसंक्षाप्यान्यनिन्दिता। आभि-जात्यमतिस्निग्धमधुरत्वं प्रशस्यता॥ अमर्म्मवेधितौदार्य्यं धर्म्मार्थप्रतिबद्धता। कारकाद्यविपर्य्यासोविभ्रमादिवियु-क्तता॥ चित्रबन्धत्वमद्भुतत्वं तथानतिविलम्बिता। अनेक जातिवैचित्र्यमारोपितविशेषता॥ सत्त्वप्रधानता वर्णपद वाक्प्रविविक्तता। अव्युत्थितिरखेदित्वमश्चुत्यिं च वा गुणाः"॥

अव्युत्पन्न त्रि० वि+उद्+पद–क्त न०त०। समुदायशब्दस्या-वयवशोऽर्थबोधकतायाश्शक्तिः व्युत्पत्तिः तच्छून्ये अवयवार्थशून्ये शब्दे, "उणादयोव्युत्पन्नाः प्रातिपदिकम्" पा०। २शब्दावयवार्थानभिज्ञे अवैयाकरणे च।

अव्युत्थिति स्त्री वि+उद्+स्था–क्तिन् अभावे न०त०। उत्थानाभावे २वाक्यगुणभेदे च अव्याहतत्वशब्दे विवृतिः।

अव्रण त्रि० नास्ति व्रणोऽस्य। १व्रणशून्ये व्रणश्च क्षतादि "तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठि-कापरीणाहश्लक्ष्णमायतमव्रणम्" सुश्रु० २नेत्ररोगभेदे "यत् सव्रणं शुक्लमथाव्रणं वा पाकात्ययसाध्यजका तथैव। चत्वार एतेऽभिहिता विकाराः क्षणाश्रयाः संग्रहतः पुरस्तात्" इति विभज्य, प्रसङ्गमापतं सुश्रुते "सितं यदा भात्यसितप्रदेशे स्नन्दात्मकं नातिरुग-श्रुयुक्तम्। विद्यायसीवाभ्यदलानुकारि तदव्रणं साध्यतमं वदन्ति" "अनेनाप्रहरेच्छुक्लमव्रणं कुशलोभिषक्" सुश्रु०।

अव्रत त्रि० नास्ति व्रतं विहितनियमो यस्य। शास्त्रविहित नियमशून्ये "अव्रतानाममन्त्राणां जातिमात्रोपजी-

विनाम्। नैषां प्रतिग्रहोदेवो नशिखा तारयेच्छिलाम्" मनुः।

अव्रत्य त्रि० व्रताय हितम् यत् न०त०। व्रतकालेऽनाचरणीयेऽन्हतकथनादौ "अव्रतं वा व्याहरति तन्मिथ्या करोति व्रतम्" श्रुत०ब्रा०।

अश् संहतौ-व्याप्तौ च स्वादि०आत्म० सक० वेट्। अश्नुते आशिष्ट आष्ट आनशे। अशिता—अष्टा अश्यते-अशिष्यते अश्नुवानः अष्टिः व्याप्तिः समष्टिः "स्व प्राप्तेरेवैरिव चानशेऽर्कैः" भट्टिः "प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः" रघुः।

अश भोजने क्र्यादि० पर०सक० सेट्। अश्नाति आशीत्। आश। अशिता अशिष्यति। "ब्रह्महं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः, मनुः तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" गीता।

अशकुन पु० न०अप्राशस्त्ये न०त०। दुर्निमित्ते अनिष्टसूचके काकादिदर्शने। अशकुनाश्च द्विविधा औत्पातिकाः साधरणाः काकादिदर्शनादयोऽसाधारणाः। अमङ्गलशब्दे ३१७, १८ पृष्ठे विवरणम् "अपयाति सरोषया निरस्ते कृतकं कामिनि चुक्षुवे मृगाक्ष्या। कलयन्निव सव्यथोऽवतस्थेऽशकुनेन स्खलितं" किलेतरेण" माघः। "साहस्र नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः" नैष०।

अशक्त त्रि० न०त० "समर्थभिन्ने १कार्य्याच्चमे" २पूर्व्वोत्पन्नमशक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम्" सा०का०।

अशक्ति स्त्री अभावे न०त०। १सामर्थ्याभावे "अमेण तदशक्त्या वा न गुणानामियत्तया" रघुः। २अपाटवे सांख्यमतसिद्धे बुद्धेः ३ज्ञानजननासामर्थ्यभेदे च सा च "एष प्रत्ययसर्गोविपर्य्ययोऽशक्तितुष्टिसिद्ध्याख्यः" इति सामान्यत उक्त्वा "पञ्च विपर्य्ययभेदाः भवन्त्यशक्तिश्च करणवैकल्यात्। अष्टाविंशतिभेदा" इति। अशक्तीर्विभज्य "एकादशेन्द्रिय बधाः सह बुद्धिबधैरशक्तिरुद्दिष्टा। सप्तदश बधा बुद्धेर्विपर्य्ययात् तुष्टिसिद्धीनाम्" सा०का० "बाधिर्यं, कुण्ठिताऽन्धत्वं, जड़ताऽजिह्मता तथा। मूकता, कौण्यपङ्गुत्वक्लैब्योदावर्त्तमन्दताः"। यथासंख्यं श्रोत्रादीनामिन्द्रियाणां बधाः एतावत्येव तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति। तथाचैकादशहेतुकत्वादेकादशधा बुद्धेरशक्तिरुच्यते। हेतुहेतुमतोरभेदविवक्षया च सामानाधिकरण्यम्। तदेवमिन्द्रियबधद्वारेण बुद्धेरशक्तिसंज्ञा स्वरूपतोऽशक्तीराह सह बुद्धिबधैरिति। कति बुद्धेः स्वरूपतोबधा इत्यत आह सप्तदश बधा बुद्धेः, कुतः? विपर्य्ययाच्तुष्टिसिद्धीनाम्, तुष्टयोनवधेति तद्विपर्य्ययास्तन्निरूपणान्नवधा भवन्ति। एवं सिद्धयोऽष्टाविति तद्विपर्य्यास्तन्निरूपणात् अष्टौ भवन्तीति" सा०कौ०दर्शिता। व्याख्यातञ्चैतद्भाभिः, "पूर्व्वार्द्धे ज्ञानेन्द्रियाणाम् अपाटवमुत्तरार्द्धे कर्म्मेन्द्रियाणामिति मनसस्तु उभयेन्द्रियानुकूल्यादुभयाभिनिवेश इति भेदः। तत्र बाधिर्य्यं श्रोत्रगतं शब्दग्रहणापाटवम्। कुण्ठितात्वगतं स्पर्शग्रहणापाटवम्। अन्धत्वं नेत्रगतं रूपग्रहणापाटवम्। जड़ता रसनागतं रसग्रहणापाटवम्। मूकता वागिन्द्रियगतं वचनापाटवम्। कौण्यं हस्तगतमादानापाटवम्। पङ्गुत्वं पादगतं चलनापाटवम्। क्लैब्यमुपस्थगतं मैथुनासामर्थ्यम्। उदावर्त्तः अपानगतं विष्ठोत्सर्गासामर्थ्यम्। मन्दता मनोगतं सुखादिविषयग्रहणासामर्थ्यम्। एकादशेति पञ्च ज्ञानेन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि मनश्चेति एकादशेन्द्रियाणां बधाः स्वस्वकर्म्माक्षमत्वरूपा धर्मभेदाः तद्धेतुकत्वात् बुद्धेः स्वविषयाग्रहणमिष्यते अतो बुद्धेरशक्तिरेकादशविधैवेत्याह तथा चेत्यादि। ये बुद्धेः सप्तदश भेदा उत्तरार्द्धे वक्ष्यन्ते तैः सप्तदशभिः सह मिलिता एकादश भेदाः अष्टाविंशतिभेदाः स्युः। तथा च शक्तिरष्टाविंशतिभेदा इति यदुक्तं तत् समर्थितमिति"

अशकुम्भी स्त्री अश्नुते व्याप्नोति अश-अच् अशा खुभ्नाति जलमाक्षिणोति खनु+भा०-ड पृषो०सलोपः टित्त्वात् ङीप् कर्म्म०। अल्पकालेन जलव्यापके जलोपरिजाते (पाना) इति ख्याते तृणभेदे।

अशक्य त्रि० न शक्यते शक-क्यप् न०त०। असाध्ये "अशक्यशङ्क्यभिचारहेतुर्वाणी न वेदा यदि सन्तु केतु" नैष०।

अशङ्का स्त्री अभावे न०त०। १संशयाभावे २त्रासाभावे च न०त०। ३तत्कर्त्र्ये त्रि०।

अशङ्कित त्रि० शक्+क्त न०त०। १अभीते २सन्देहरहिते च।

अशत्रु पु० न शातयति शद्-ण्यर्थे तुन् न०त०। १चन्द्रे शब्दच०। विरोधे न०त०। शत्रुभिन्ने २मित्रे च।

अशन न० पु० अश्नुते व्याप्नोति अश-ल्यु। १पीतसारद्रव्ये दन्त्यमध्योऽयमत्वार्थे। भावे ल्युट्। २व्याप्तौ, ३भोजने च "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्" ति०त०स्मृ०। कर्म्मणि ल्युट्। ४भोज्ये अन्ने न० "पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः। पूजितं ह्यशनं नित्यं बलमूर्জ्जञ्च यच्छति। अपूजितं च तद्भुक्तम्" मनुः। "एवं

प्रयत्नं कुर्वीत यानशय्यासनाशनैः" मनुः "अशनपते ! अशनस्य नोदेहि" शत०ब्रा०।

अशनपर्णी स्त्री अशनस्य पीतशालस्य पर्णमिव पर्णमस्याः। (आराटो) इति ख्याते वृक्षभेदे सा हि पीतसालतुल्यपर्णा।

अशना स्त्री अशनमिच्छति—अशन+क्यच् क्विप्। भोजनेच्छायाम्। ग्रसाद्यचि अशन इत्यादि। "अशनापिपासे सौम्य ! विजानीहि" छा०उ०।

अशनाया स्त्री अशनमिच्छति अशन+क्यच्-स्त्रियाम् भावे अ। भोजनेच्छायाम्। "क्षुताशनायः फलवद्विभूत्या" भट्टिः "अन्नाद्वा अशनाया निवर्त्तते पानात् पिपासा" शत० ब्रा०। "अशनायायाशनाया हि मृत्युस्तन्मनोऽकुरुत" इ०उ०।

अशनायित त्रि० अशनमिच्छति अशन+क्यच्-कर्त्तरि क्त। १भोजनेच्छावति क्षुधिते। भावे क्त। २भोजनेच्छायां न०

अशनायुक त्रि० अशनमिच्छति अशन+क्यच्-उकञ्, उन् स्वार्थे कन् वा। भोजनाभिलाषुके। "अन्नमेव तन्मध्यतो भीयतेऽशनायुको यजमानो भवत्यशनायुकाः प्रजाः" ता०ब्रा०।

अशनि पुं० स्त्री अश्नुते संहन्ति अश-अनि। १मेघोत्पन्ने २ज्योतिषि २इन्द्रे "स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिः कतमः स्तनयित्नुरशनिः" शत०ब्रा०। अत्तुघातके ३अनुयाजे "अशनिरेव प्रथमोऽनुयाज" इत्युपक्रम्य "अशनिरिन्द्रोऽवहन्ति" शत०ब्रा० ४इन्द्रास्त्रे वज्रे, प्रस्तरवर्षिणि ५उल्काविशेषे, ६विद्युति च। "अशनेरन्नतस्य चोभयोर्वह्निनश्चाम्बुधराश्च योनयः कुमा० ७अग्नौ ८विद्युदग्नौ "तमब्रवीदशनिरसीति तद्यदस्य तन्नामाकरोद्विद्युत्तद्रूपमभवद्विद्युद्वा अशनिस्तस्माद्यं विद्युदित्यशनिरबधीदित्याहुः" शत०ब्रा०। वज्रं च दत्तासुरवधार्थमिन्द्रेण दधीचोऽस्थीनि गृहीत्वा विश्वकर्म्मणा कारितमिति भाग० ६स्क०। "मघवन् ! याहि भद्रं वोदध्यङ्ङृषिसत्तमम्। विद्याव्रततपःसारं गात्रं याचत मा चिरम्। स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्। यद्वा अश्वशिरोनाम तयोरमरतां व्यधात्। दध्यङ्ङथर्व्वणस्तुष्टे वर्म्माभेद्यं मदात्मकम्। विश्वरूपायत्वत् प्रादात्त्वष्टा यत्त्वमधास्ततः। युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गं स दास्यति"। ततस्तैरायुधश्रेष्ठो विश्वकर्म्मविनिर्म्मितः। येन वृत्रशिरो हर्त्ता मत्तेजउपबृंहितः"। इति विष्णुनोक्तेनेन्द्रेण तथा कृते स आह "तथाभियाचितो देवैर्ऋषिराथर्वणो महान्। मोदमान उवाचेदं मह्यश्विव भारत"। अपि इन्द्रारकायूयं न जानीत शरीरिणाम्। संस्थायां यस्त्वभिद्रोही दुःसहस्तेनापहः। जिजीविषूणां जीवानामात्मा प्रेष्ठदृहेप्सितः। कउत्सहेत तं दातुं भिक्षमाणाय जिष्णवे" इति दधीचोक्ते देवैः पुनरुक्तम् यथा "किं नु तद्दुस्त्यजं ब्रह्मन् ! पुंसां भूतानुकम्पिनाम्। भवद्विधानां महतां पुण्यश्लोकैककर्मणाम्। नूनं स्वार्थपरोलोको न वेद परसङ्कटम्। यदि वेद न याचेत नेति नाह यदीश्वरः। इत्युक्ते दधीचोक्तम् "धर्मं वःश्रोतुकामेन यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं दुस्त्यजं सन्त्यजाम्यहम्। योऽध्रुवेणात्मना नाथा। न धर्मं न यशः पुमान्। ईहेत भूतदयया स शोच्यः स्थावरैरपि। एतावानव्ययोधर्म्मः पुण्यश्लोकैरुपासितः। योभूतशोकहर्षाभ्यामात्मा शोचति हृष्यति। अहो दैन्यमहोकष्टं पारक्यैः क्षणभङ्गुरैः। यन्नोपकुर्य्यादस्थार्थैर्मर्त्यः स्वज्ञातिविभ्रुहैः। श्रीबादरायणिरुवाच। "एवं कृतव्यवसितो दध्यङ्ङाथर्व्वणस्तनुम्। परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ। गताच्छासुमनोबुद्धिस्तत्त्वदृग् ध्वस्तबन्धनः। आस्थितः परमं योगं न देहं बुबुधेऽस्मितम्। अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा। मुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्"।

अशब्द त्रि० नास्ति शब्दो, वेदादौ वाचकशब्दो वा यस्य। १शब्दहीने, वेदे २वाचकशब्दवर्জ্জिते प्रधाने "ईक्षतेर्नाशब्दमिति" शारीरकसूत्रम् ३शब्दादिगुणहीने ब्रह्मणि च न० "अशब्दमस्पर्शमरूपमव्ययमिति" श्रुतिः

अशरीर त्रि०नास्ति शरीरं तदभिमानो वा यस्य। "प्रत्यगात्मज्ञानविधिध्वस्ते मिथ्याज्ञाने सहेतुके। नेतिनेतिस्वरूपत्वादशरीरो भवत्ययम्" इत्युक्तलक्षणे सकलनिषेधरूपे १परमात्मनि, २शरीराभिमानशून्ये जीवन्मुक्ते "अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः" इति श्रुतिः। ३देहशून्ये ४मीमांसकोक्ते देवे ५ईश्वरे च परमात्मस्वरूपत्वात् ईश्वरस्याशरीरत्वम् "तदैक्षत बहु स्यां प्रजायेति श्रुत्या तस्येच्छितत्वं यदुक्तं तदप्युक्तं शरीरं विना ज्ञानानुपपत्तेरित्याशङ्कापूर्व्वकं भा०भा० तत् समर्थितं यथा "प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेच्छितत्वमनुपपन्नमिति न तज्ज्ञोद्यमवतदति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रो चैतावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः। "न तस्य कार्य्यं करणञ्च विद्यते न

तत्समस्याभ्यधिकस्य दृश्यते।परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादोजवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति" च। ननु नास्ति तव ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी।"नान्योऽतोऽस्ति द्रष्टेति विज्ञातेति"श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति। अत्रोच्यते सत्यं नेश्वरादन्यः संसारी तथापि देहादिसंघातोपाधिसंबन्ध दृश्यतएव घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः, तत्कृतशब्दप्रत्ययव्यवहारा लोकस्य दृष्टास्, घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा तथेहापि देहादि संघातोपाधिसंबन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतोदेहादिसंघातेऽनात्मन्यात्माभिनिवेशो मिथ्याबुद्धिमात्रेण सति चैवं संसारित्वे देहाद्युपेक्षोच्छित्तिरुपपन्ना संसारिणः"भा०।मोक्षस्यापि अवास्तविकं सशरीरत्वं तदपि तत्रैव व्यवस्थापितं यथा "शरीरे पतितेऽशरीरत्वं स्याच्च जीवत इति चेत् न सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं श्रुत्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् नित्यमशरीरत्वम् अकर्मनिमित्तत्वादिति चावोचामः। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् शरीरसम्बन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्। अन्धपरम्परैवाऽनादित्वकल्पना क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। सन्निधिमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न धनदानाद्युपार्जितभृत्यसम्बन्धवत् तेषां कर्तृत्वोपपत्तेः। नह्यात्मनोधनदानादिवच्छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः" शा०भा०।

अशरीरत्व न० अशरीरस्य भावः त्व। १शरीरसम्बन्धराहित्ये २मोक्षे च। यथा मोक्षस्याशरीरत्वं तथोक्तं शा० भा०। "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इति प्रियाप्रिय स्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्य्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्य्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधोनोपपद्यते। अशरीरत्वमेव धर्मकार्य्यमिति चेत् तस्य स्वाभाविकत्वात्। "अशरीरं शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति" "अप्राणोह्यमनाः शुभ्रः अक्षरोह्यं पुरुष" इत्यादि श्रुतिभ्यः। अतएवाहुरेयफल विलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्"। अयं भावः अभावस्याधिकरणानतिरेकेण शरीरसम्बन्धाभावस्य ब्रह्मरूपतया मोक्षस्य तदभिन्नतया च तथात्वम् इति।

अशरीरिन् त्रि० न शरीरी। १देहशून्ये ब्रह्मणि २मीमांसकोक्ते देवभेदे च। शरीरसञ्चारयितृत्वे नास्त्यस्य इनि न०त०। ३शरीरेणानुचार्य्ये आकाशशब्दे। उभयत्र स्त्रियां ङीप्। "वायुर्वाचाशरीरिणी" भा०आ०प०। [शून्ये त्रि०।

अशर्मन् न० विरोधे न०त०। १शर्मभिन्ने दुःखे न०ब०। २सुख

अशाखा स्त्री नास्ति शाखा यस्याः। मूलीहत्वे राजनि०। २शाखाशून्ये वृक्षमात्रे त्रि०।

अशान्त त्रि० विरोधे न०त०। शान्तभिन्ने शमहीने "नास्ति बुद्धिरयुक्तस्य–अशान्तस्य कुतः सुखम्" गीता। [त्रि०।

अशान्ति स्त्री अभावे न०त०। १शमाभावे न०ब०। २शमशून्ये

अशाश्वत त्रि० न शाश्वतः। अनित्ये अस्थिरे।

अशासन त्रि०अभावे न०त०। १शासनाभावे न०त०। २शासनशून्ये। [वेदादिविरुद्धे नास्तिकागमादौ।

अशास्त्र न० शास–करणे ष्ट्रन् शास्त्रं वेदादि विरोधे न०त०।

अशास्त्रीय त्रि० शास्त्रे विहितः छ न०त०। शास्त्राविहिते निषिद्धे।

अशास्य त्रि० शास–वा० ण्यत्। शासितुमशक्ये दुर्ज्ञेये।

अशिक्षित त्रि० विरोधे न०त०। शिक्षाशून्ये गतिनैपुण्यशून्ये कृषादौ।

अशित त्रि० अश–कर्म्मणि क्त। १भक्षिते "आपएव तदशितं नयन्ते" "अन्नमशितं त्रेधा विधीयते" "तेजोऽशितं त्रेधा विधीयते" इति च छा०उ०। कर्त्तरि क्त। २अशनेन दृष्टे आशितङ्वीनः भावे "क्त" ३अशने न०।

अशिच पु० अश–संहतौ इत्व। १चौरे। भोजनार्थात् कर्म्मणि इत्व। देवभेदे २चरौ।

अशिथिल त्रि० विरोधे न०त०। शिथिलभिन्ने दृढे।

अशिपद त्रि०न श्लिपदः पदरोगभेदः वेदे षष्ठ०खलोपः न०ब०। श्लिपदरोगशून्ये। "शिवा देवीरशिपदा भवन्तु सर्वाः" ऋ० ७,५०,४।

अशिमिद त्रि० "शिमिर्वधकर्म्मा" निरु० शिमिं हिंसां ददाति दा–क उप०स०। अहिंसके "सर्वा नद्यो अशिमिदा भवन्तु" ऋ० ७,५०,४।

अग्निर पु० अग्र–इरच्। १राक्षसे २अग्नौ तस्य सर्व्वं भक्षत्वात्तथात्वम् ३भास्करे ४वायौ च तयोर्व्यापकत्वात्तथात्वम् ङीनार्थौ स्त्री टाप्।

अग्निरस् पु० नास्ति शिरोऽस्य। १कबन्धे २अग्रशून्ये त्रि०।

अग्निरस्नान न०न शिरसा स्नानम्। शिरोमज्जनशून्ये स्नाने।

अग्निव न० विरोधे न०त०। १मङ्गलभिन्ने २तद्वति त्रि० ३उग्रे च ५व०। ४अमङ्गलशब्दोक्तौ तत्सूचके त्रि०।

अग्निशिषा स्त्री अग्नितृप्तिच्छा अग्र–सन्–भावे अ। भोजनेच्छायाम् "इश्नते हुयुत्क्रान्तौ प्राणस्याग्निशिषाऽतो व्याददातीति" छा० उ०भा०।

अग्निशु पु० विरोधे न०त०। १शिशुभिन्ने तरुणे "जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः" इति स्मृत्युक्तवयोऽतिक्रान्ते २नववर्षवयस्के च। नास्ति शिशुर्यस्य। ३शिशुशून्ये त्रि०। स्त्रियां ङीप् लोके, वेदेऽपि क्वचित् "आ धेनवोधुनयन्तामशिश्वीः" ऋ० ३,५५,१६। "नो मा कुत्रानोऽहेरयोधेनवोऽशु.स्तनाभुजो अशिश्वीः" ऋ० १,१२०,८।

अग्निष्ट त्रि० न०त०। १उपदिष्टभिन्ने यस्य शासनं न कृतं तस्मिन्। शिष्टः साधुः विरोधे न०त०। २असाधौ साधुत्वञ्च वेदार्थे विश्वासवत्त्वमिति दिनकरी ३तद्भिन्ने नास्तिके ४वर्णसङ्करकारके व्यभिचारवतिच "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" वार्त्ति०।

अग्निष्ठ त्रि० अत्राति अग्र–अच् अतिशयने इष्ठन्। १भोक्तृतमे २अग्नौ पु० तस्य सर्व्वभक्षकत्वात्तथात्वम्। "अशीतमेत्यग्निष्ठो ह्यग्निः" शत० ब्रा०।

अग्नीत न० विरोधे न० त०। १उष्णस्पर्शे २तद्वति त्रि०। शीतं हिमं तद्बाधा न०व०। हिमबाधाशून्ये त्रि० "अशीतास्तरवोमाघे" नीतिः। [अशीतिकिरणादयोऽत्र।

अग्नीतकर पु० अशीत उष्णः करो यस्य। उष्णांशौ सूर्य्ये

अग्नीतम पु० अत्राति अग्र–बा० इनि ततः तमप् वेदे दीर्घः। भोक्तृतमे अग्नौ "अशीतमेत्यग्निष्ठो ह्यग्निः" शत० ब्रा०।

अग्नीति स्त्री दशानामवयवं दशतिः दशकम् अष्टगुणिता दशतिः नि०अशीत्यादेशः। अष्टगुणिते दशके (आशी) १संख्याभेदे, २तत्सङ्ख्यान्विते च। "अशीतिभागो दृष्टिः स्यान्नासिकाभासि सन्मुखे" या० स्मृ०। अर्वागुद्वादशवर्षीयादशीतेरूर्द्धमेव च" स्मृतिः अशीतिः परिमाणमस्य ठन्। अशीतिक." तत्परिमिते त्रि०।

अग्नीर्षिक त्रि० नास्ति शीर्षा यस्य व्रीह्यादि० ठन्। अशीर्षवति १मस्तकशून्ये २अग्रशून्ये च।

अग्नील न०विरोधे न०त०।१दुष्टशीले न०त०२शीलशून्ये त्रि०

अग्नुच् त्रि० नास्ति शुगस्य। शोकशून्ये।

अग्नुचि त्रि० विरोधे न०त०। १शौचशून्ये २अपवित्रे मूत्रादौ च। स्त्रियां ङीप्। "अशुच्योनैव तास्तेन येन वैकारिकं हि तत्" भट्टः। शुचितत्कालजीविनां कर्म्माधिकारित्वेनाशुचेः पर्य्युदस्तत्वम् "अशुचिद्रव्याणि च अशुद्धिशब्दे वक्ष्यन्ते" व्रतानाशुपवासानां आद्धादीनाञ्च सङ्गमे। करोति यः चौरकर्म सोऽशुचिः सर्वकर्म्मसु" स्मृतिः "त्रिरात्रमशुचिर्भवेत्" स्मृतिः। अशुचित्वं च वैदिककर्म्मानर्हत्वप्रयोजकोधर्म्मविशेषः तच्च कर्त्तृनिष्ठं द्रव्यनिष्ठञ्च। स्मृतकर्मनिमित्तं दुष्टद्रव्यसंसर्गजतच्च कर्त्तृनिष्ठम्। द्रव्यनिष्ठन्तु वस्तुस्वभावसिद्धतम् "यथा मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्। नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेदित्यादि स्मृत्युक्तं तत्संसर्गयुतद्रव्यनिष्ठञ्च अधिकमशुद्धिशब्दे वक्ष्यते। शुचिः शुभ्र.। तद्भिन्ने ३कृष्णवर्णे पु० ४तद्वति त्रि० स्त्रियां वा ङीप्। तस्य भावः अण् अशौचम् ष्यञ् आशौच्यम्। अशुचिभावे न० "आशौच्यात् विप्रमुच्येत ब्राह्मणान् स्वस्तिवाच्य च" स्मृतिः वा पूर्ब्वपदवृद्धिः अशौच्यमपि तत्रैव। अशुचौ भवः ष्यञ् वा पूर्ब्वपदःदीर्घ अ(आ)शौच्यः तद्भवे त्रि०।

अग्नुद्ध त्रि० विरोधे न०त०। १शुद्धभिन्ने सदोषे २अपवित्रे च दोषश्च नानाविधः व्याकरणादिलक्षणानुसारित्वे शब्दस्य दोषः शास्त्रनिषिद्धतयाऽनुष्ठाने कर्म्मणां दोषः यथा हिंसादेः पापजनकतया सदोषता। स्नानाद्यपनेयमलादेश्च सदोषता विवरणमशुद्धिशब्दे। "सर्व्वतीर्थेष्वपि स्नातोह्यशुद्धः पुनरेव स." स्मृतिः एतच्च मनःशुद्धिप्रशंसार्थवादः।

अग्नुद्धि स्त्री अभावे न०त०। १शुद्धभावे दोषे न०त०। २शुद्धिशून्ये दुष्टे। तत्राशुद्धिस्तत्प्रतियोगितया शुद्धिश्च निरूपिता हेमाद्रौ आ०ख०। ततः सारांशः। अशुद्धिर्नाम कर्त्तृद्रव्यादेः स्मर्यनाद्यनर्हतापादकोदोषविशेषः शुद्धिस्तदीयसंस्कारापादिता तन्निष्ठत्तिः। शुद्धिमतएव सकलकर्म्मोपयोगयोग्यत्वम् "श्रौतं स्मार्त्तं तथा कर्म्म कर्त्तव्यमधिकारिणा। शुचिना साधनैः शुद्धैः सम्यक् श्रद्धान्वितेन च" ब्रह्मा०पुरा० उक्तेः। अतो यथाशास्त्रं शुचिना शुचिभिरेव द्रव्यैराचरणीयम्। ते चोभे अपि शास्त्रैकगम्ये। नन्वत्र किं शास्त्रेण लोकव्यवहारप्रसिद्धेः शुद्धाशुद्धोः, व्यवहरत्येव हि लोको जुगुप्सितमूत्रपुरीषादिसंस्पृष्टं द्रव्यमशुद्धमिति प्रक्षालनाद्यपनीतगन्धञ्च शुद्धमिति, सत्यमर्थं

लोकव्यवहारः क्वचिदेव जुगुप्सितस्पर्शोपहतएव द्रव्ये, न सर्व्वत्र । तत्रापि सामान्यतश्चासौ व्यवहारो न द्रव्यदेशकालावस्थादिभेदकृतो, नवा शुद्धाशुद्धितारतम्यविशेषकृतः । अतः सर्व्वत्र विशेषतश्च शुद्धाशुद्धोः शास्त्रादेव निश्चयः । यस्तु चण्डालादिस्पर्शादावपि विशेषतश्च लोकव्यवहारः स तु शास्त्रमूलप्रसिद्धिमाश्रित्यैव यागदानहोमादिषु श्रेयःसाधनत्ववत् । कथं पुनः कार्य्यार्थपरेण धर्म्मशास्त्रेण शुद्धाशुद्धिरूपस्य सिद्धार्थस्यावगतिः ? श्रुतार्थापत्त्येति ब्रूमः । तथाहि यथा दर्शपौर्णमासाभ्यां स्वर्गकामोयजेतेत्यादौ क्षणिकानां यागानां श्रूयमाणकालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या पुरुषे शुभापूर्व्वसिद्धिः, यथा च क्षणिकस्यावगोरणस्य श्रुतकालान्तरभाविशतयातनासाधनत्वान्यथानुपपत्त्या दुरितापूर्व्वसिद्धिः। तथा मूत्रपुरीषादिसंस्पृष्टेन न व्यवहर्त्तव्यम् प्रक्षालनप्रोक्षणादि संस्कारवता तु व्यवहर्त्तव्यमिति श्रुतव्यवहारनिषेधतदभ्यनुज्ञानान्यथानुपपत्त्या द्रव्यादिगतशुद्ध्यशुद्धिरूप सिद्धार्थकल्पना न विरुध्यते । अथ वा शुद्धाशुद्धिस्मर्त्तनां सिद्धार्थवादपरत्वमेवास्तु तासां च तादृशमेव वेदवाक्यं मूलं कल्प्यते स्वर्य्यमाणार्थानुसारिणी हि वेदकल्पना । नास्ति नियमः कार्य्यार्थपरेणैव वेदेन भाव्यमिति "तदभूतानां क्रियार्थेन समाम्नायः" इति न्यायेन सिद्धार्थानामपि विध्येकवाक्यतया प्रामाण्यव्यवस्थापनात् । प्रकृते च कर्म्मविधायके प्राणुक्तब्रह्मचर्य्यवाक्ये अधिकारिविशेषणतया साधनविशेषणतया च शुद्धेः, अशुद्धेश्च पर्य्युदस्ततया सिद्धाया अपि विधिनैकवाक्यतया प्रामाण्यसम्भवः । किञ्च प्रक्षालितेनैव व्यवहर्त्तव्यमिति नियमविधिर्दृश्यते अतो वेदमूलत्वकल्पना । अतः शुद्धाशुद्धी उभे अपि शास्त्रादेवावगम्ये । तदुक्तं "शुद्धाशुद्धी ह्यदृष्टत्वाद्विज्ञायेते यथाश्रुति" तदेवं वसा शुक्तमित्यादिभिरशुद्धिवचनैरशुद्धिर्गम्यते जलेनैव विशुध्यतीत्यादिभिश्च शुद्धिर्विधीयते । अतोऽदृष्टादिस्मृतिवत् वेदमूले एव शुद्ध्यशुद्धिस्मृती । शुद्धिवचनैश्चाशुद्धिराक्षिप्यते शुद्धिर्हि मूत्रादुपघातेनाशुद्धानां द्रव्याणां संस्काररूपा कर्त्तव्यतया विधीयते न पुनः शुद्धानाम्, न हि स्वभावादयः भावा स्वभावेनाशुद्धाः येन प्रयोगकाले शुद्धिमपेक्षेरन् । अथादृष्टार्थं व्रीहिप्रोक्षणवत् प्रयोगकाले संस्कारोविधीयते इति चेत् न तथात्वे अशुद्धिज्ञापकं वचनं विरुध्येत अतः सिद्धं शुद्धाशुद्धोः शास्त्रगम्यत्वम् । तत्र शुद्धिर्नानाविधाऽपि संक्षेपात् द्विविधा बाह्या आभ्यन्तरा च । यथा "अथातः शौचाध्यायं व्याख्यास्यामस्तद्द्विविधम् बाह्यमाभ्यन्तरञ्च आन्तरं शौचं नाम तद्यदहङ्कारनिन्दितेभ्यो मनो निवर्त्तते, बाह्यमपि गन्धलेपस्नेहोपघातेऽद्भिरनिष्टपुरुषस्पर्शने प्रोक्षणाच्छुचिरित्यशुचिप्रतिषेधः, हृदयशौचमनुतप्तता साधुता, कर्म्मशौचमगर्हितकर्म्मत्वता, शरीरशौचं मृद्भिरद्भिश्च, वाचाम् अप्रियानृतनिष्ठुरव्यवर्जनम्, मनसो मिथ्यासंकल्पप्रतिषेधः, बुद्धेर्ज्ञानम् । श्रूयते द्विविधं शौचं यच्छिष्टैः पर्य्युपासितम्" । "बाह्यं निर्लेपनिर्गन्धमन्तःशौचमहिंसनम्" इति च उश० । "अद्भिः शुध्यन्ति गात्राणि बुद्धिर्ज्ञानेन शुध्यति । अहिंसया च भूतात्मा मनः सत्येन शुध्यति" इति "कालोऽग्निर्मनसः शुद्धिरुदकाद्यनुलेपनम् अविज्ञानञ्च भूतानां षड्विधं शौचमुच्यते । देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च परिज्ञाय यथाविधि । शौचन्तः कुशलो धर्म्मे धर्म्मेप्सुः शौचमाचरेत्" इति च बौधा० "अनिलानलसोमसूर्य्यकाञ्चनरजतमरुतोयतान्त्रैः, अजसुखवालधिगोमयरजआद्यैः स्वर्गगुणैरिह मेध्यतां नयन्ति" हारी० "आत्मयाजिनां शरीरस्याद्भिर्मृद्भिश्च, ज्ञानेन बुद्धेः, तपसा पापानां, मन्त्रानजानां मातृपैतृकाणां दोषाणां यमनियममन्त्रव्रतोपवासादिभिः" शङ्खलि० "ज्ञानं तपोऽग्निराहारो मृण्मयो वार्य्युपाञ्जनम् वायुः कर्म्मार्कमासौ च शुद्धिकर्त्तृणि-देहिनाम्" सर्वेषामेव शौचानामन्नशौचं परं स्मृतम् । योऽन्ने शुचिर्हि स शुचिर्न मृद्वारि-शुचिः शुचिः । ज्ञान्या शुध्यन्ति विद्वांसोदानेनाकार्य्यकारिणः । प्रच्छन्नपापाजप्येन तपसा वेदवित्तमाः । शौध्यं शुध्यति मृत्तोयैर्नदी वेगेन शुध्यति रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः । अङ्गिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति। मनुः "कालोऽग्निः कर्म्म मृद्वारि मनोज्ञानं तपो जलम्। पञ्चात्मापो निराहारः सर्व्वेषां शुद्धिहेतवः। अकार्य्यकारिणां दानम्" क्षेत्रज्ञेश्वरज्ञानात् विशुद्धिः परमा मता" या० मृद्० "सत्यं शौचं तपः शौचं शौचमिन्द्रियसंयमः । सर्व्वभूतदया शौचमद्भिस्तु पञ्चमं मतम्" यमः "गात्रं मृदम्भसा शुध्येच्चित्तं भूतान्दयासंयमात् । विद्यया तपसा देही मतिर्ज्ञानेन शुध्यति । स्वाध्यायेनानुतापेन होमेन तपसैव च । ध्यानेन क्षेत्रवासेन दानेनेह परिक्षयः । परापवादाश्रवणं परस्त्रीणामदर्शनम् । एतच्छौचं श्रोत्रशौचो जिह्वाशुद्धिरपैशुनम् । अप्राणिवधमक्लेशं

शुचित्वं पादहस्तयोः । अशक्तौषः परस्त्रीणां शरीरं शौचमिष्यते" वृह० । "उच्छिष्टोपघातेऽभ्युक्षणाच्छुचिर्विस्रस्तं संस्पृश्योन्मृज्याचम्य प्रयतोभवेत्" पैठी० "प्राणिनामथ सर्वेषां मृद्भिरद्भिश्च कारयेत् । अत्यन्तोपहतानाञ्च शौचं नान्यत्" विष्णुः । "विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्ध्या देयमर्घवत् । दैहिकानां मलानाञ्च शुद्धिषु द्वादश स्मृतिः । वसा शुक्रमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट् । श्लेष्माश्रु दूषिकामेदो द्वादशैते नृणां मलाः" मनुः "तथा शरीरस्रोतोभ्यो मल निष्यन्दविस्रवः । अन्त्यादीनां प्रदेशश्च स्यादशुचिर्विशेषतः । प्रभूताशुच्यमेध्यानां स्पर्शनाद्वा शुचिर्भवेत् । स्वप्नाद्वस्त्रविपर्यासात् क्षुताद्वा द्विपरिभ्रमात् । उक्ता वाचमनाच्छ्वित्रदंष्टं क्रूरमेव वा । अपविद्धं धनुर्लक्ष्यं दृष्ट्वा वा अशुचिर्भवेत् । प्रलेपस्नेहगन्धानामशुचौ चापकर्षणम् । शौचलक्षणमित्याहुर्दम्भोलोमयादिभिः । लेपे स्नेहे च गन्धे च व्यपकृष्टे च दूरतः । पश्चादाचमनञ्चैव शौचार्थं वक्ष्यते विधिः" देवलः । "दुष्टाभिशस्तपतितितिर्यग्योवर्षोपहतानां संस्पर्शाञ्चास्रस्वेदतोयपूयशोणितदर्शिलालानिष्ठीवितरेणुकर्दमोच्छिष्टजलविण्मूत्रपुरीषादिभिर्बाह्यशरीरोपघातिभिरुपधूताभिरद्भिर्मृद्भिश्च मन्त्रगोमयौषधिमङ्गलाचारविधिप्रयुक्तैर्बाह्यशरीरोपघातात् पूतोभवति" हारीतः । "चिताधूमसेवने सर्वे वर्णाः स्नानमाचरेयुः । मैथुने दुःस्वप्ने रुधिरोपगतकण्ठे वमनविरेकयोश्च । प्रसक्तकर्मणि कृते च । शवं शवस्पृशञ्च स्पृष्ट्वा रजस्वलाचाण्डालशूद्रपांश्च । भक्ष्यवर्ज्यं पञ्चनखशवं तदस्थि सस्नेहञ्च । सर्वेष्वेतेषु पूर्वं वस्त्रं नाप्रक्षालितं बिभृयात् । रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्ध्यति । रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा । सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नात्वाऽश्नीयात् । क्षुत्वा क्षुम्वा भोजनाध्ययने पीत्वा स्नात्वा निष्ठीव्य वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषे कृत्वा पञ्चनखस्य सस्नेहास्थि स्पृष्ट्वा चाचामेत् । चाण्डालम्लेच्छसम्भाषणे च । नाभेरधस्तात् प्रवाहणे च कार्यिकैर्मलैः सुरादिभिर्वोपहतोऽहोरात्रेणैतदङ्गं प्रक्षाल्य शुध्यति । अन्यतोपहतोऽहोरात्रेणैतदङ्गं प्रक्षाल्य स्नानेन । वक्त्रोपहतस्तूष्णं स्नात्वा पञ्चगव्येन । दशनच्छदोपहतश्च । वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः । श्लेष्माश्रु दूषिका मेदोद्वादशैते नृणां मलाः । गौड़ी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजातिभिः । माधूकमैत्वं टाङ्कं कौलं खार्जूरमानसं । मृद्वीकारसमाध्वीकं मैरेयं नारिकेलजम् । अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य च । राजन्यस्यैव वैश्यस्य स्मृतैतानि न दुष्यतः "स्नानं तपोग्निराहारो मृन्मनोवार्ज्यपाञ्जनम् । वायुःकर्मार्ककालौ च शुद्धिकर्तॄणि देहिनाम्" विष्णुः । "जङ्घे नाभेः करौ कृत्वा यदङ्गमुपहन्यते । तत्र स्नानमधस्तात्तु क्षालनेनैव शुध्यति । इन्द्रियेष्वनुप्रविष्टं स्यादपेयं यदि कर्हिचित् । मुखेऽपि संस्पृश्यमानं तत्र स्नानं विशोधनम्" अङ्गि० । "रथ्या कर्दमतोयेन क्षीवनादेन वा तथा । नाभेरूर्द्धं नरः स्पृष्ट्वा सद्यः स्नानेन शुध्यति" "शङ्खः "सकर्दमेषु वर्षासु प्रविश्य ग्राममध्वरम् । जङ्घाभ्यां मृत्तिकास्तिस्रः पद्भ्यां च द्विगुणाः स्मृताः" यमः । "दिवाकीर्त्तिमुदक्यां च सूतिकां पतितं तथा । शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति । आचम्य प्रयतोनित्यं जपेदशुचिदर्शनात् । सौर्य्यान्मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः । नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रोविशुध्यति । आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम् । वान्तोविरेकी क्षुत्वा च क्षुतप्राणनमाचरेत् आचामेदेव भुक्त्वाद्यं स्नानं मैथुनिनः स्मृतम्" मनुः । मैथुनिनः स्नानस्मृतौ गर्भशङ्कायामेव "अन्तर्गतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत्" शातातपोक्तेः । "अजीर्णेऽभ्यादिते वान्ते प्रसक्तकर्मणि मैथुने । दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते । शुना चैव स्पृशेत्स्नेन निर्हारकेण वा । स्पृष्टमात्रस्तु कुर्वीत शिरसः स्नानं जलैः" मनुः "दुःस्वप्नदर्शने चैव वान्ते वा क्षुरकर्मणि । मैथुने कटधूमे च सद्यः स्नानं विधीयते । पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा तु कामतः । स्नात्वा सचेलं जुहुयाग्निं हुतं प्राश्य विशुध्यति । शवस्पृशं दिवाकीर्त्तिं चितायूपं रजस्वलाम् । स्पृष्ट्वा प्रमादतोविप्रः स्नानं कृत्वा विशुध्यति" वृह० । उदक्याशुचिभिः स्नायात्" या० स्मृ० उदक्यादिस्पृष्टैः स्पृष्टः स्नायात् हेमा० । "चण्डालं पतितं व्यङ्गं सुनक्तं शवमन्त्यजम् । सूतकं सूतिकां नारीं रजसा च परिप्लुताम् । अकृकुटवराहांश्च श्वानान् संस्पृश्य मानवः । सचेलं सशिरः स्नातः तदानीमेव शुध्यति । वृद्धशाता० । "श्वपाकं पतितं व्यङ्गसुनक्तं शवहारकम् । सूतकमित्यादि शातातपवत्" परा० "अशुद्धान् स्वयमेवैतान् शुद्धश्च यदा स्पृशेत् । विशुध्यत्युपवासेन" "उपस्पृश्याशुचिस्पृष्टं हतीयमपि मानवः । हस्तौ पादौ च तोयेन

प्रक्षाल्याचम्य शुध्यति" इति च देवलः। "मानुषास्थि वसाविड्घामार्त्तवं मूत्ररेतसी। मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्। स्नात्वा प्रक्षाल्य लेपादीनाचम्य स शुचिर्भवेत्। तान्येव स्वानि संस्पृश्य पूतःस्यात् परिमार्ज्जनात्" देव०। "चैत्यद्रुश्चितिर्यूपश्चण्डालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलोजलमाविशेत्"। परा०। "श्वपचसूतिकाप्रेतहारकश्वानि संस्पृश्य देवीरापइत्यभिमन्त्रितैर्जलैः स्नातः पूतोभवत्यजीर्णवान्ते मूत्रस्वकर्म्मणि पशुदिवामैथुने च" हारीतः "अथ सांसर्गिकं व्याख्यास्यामः "चण्डालश्वपचशवहतहारकरजस्वलासूतिकाः संस्पृश्याऽनुदितेऽस्तमिते स्कन्दित्वा चामुस्कन्दित्वाक्षिस्पन्दने कर्णक्रोशने चित्याहरणे यूपसंस्पर्शने" इत्युपक्रम्य "सचेलं स्नात्वा पुनर्मामो जपेत्" कश्य०। "श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं यूपं चितिं चितिकाष्ठं समशाखाण्डं सक्लेदं मानुषास्थि शवस्पृशं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचेलवासा अम्भोऽवगाह्यत्रीत्रीर्प्राणानायम्य" च्यव० "शुना म्रातावलीढस्य नखैर्विदलितस्य वा। अङ्गिः प्रक्षालनं प्रोक्तमग्निना चोपधूननम्" शाता०। अशुचिं संस्पृशेद्यस्तु एकएव स दुष्यति। तं स्पृष्ट्वान्यो न दुष्येत्तु सर्व्वद्रव्येष्वयं विधिः" दक्षः। "यस्य स्पर्शे आचमनमात्रं सोऽशुचिः" हेमा०। "श्ववराहखरानुष्ट्रान् शुकगोमायुवानरान्। काककुक्कुटभग्नांश्च स्पृष्ट्वा स्नानं समाचरेत्" संव०। "मार्जारवानरखरोष्ट्राणां शुनां तथा। शूकराणामशेषस्य स्पर्शे स्नानं सचेलकम्" व्यासः "षण्ढकं कुक्कुटं काकं श्वपाकगवयिवाहकान्। चितियूपश्मशानानि विड्वराहखराशुचीन्। अवक्षीर्णिनमन्त्यं च स्पृष्ट्वा स्नानं विधीयते" हारी०। "अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान्। पतितावीक्षचाण्डालं स्पृतहारांश्च धर्म्मवित्। संस्पृशन् शुध्यति स्नानात्" मार्क०पु०। "बौद्धान् पाशुपतान् जैनान् लोकायतिककापिलान्। विकर्म्मस्थान् द्विजः स्पृष्ट्वा सचेलोजलमाविशेत्। कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः" षट्त्रिं०। "म्लेच्छान् पाशुपतान् स्पृष्ट्वा लौकायतिकनास्तिकान्। विकर्म्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्" ब्रह्मा० पुरा० "शूद्रोच्छिष्टं द्विजः स्पृष्ट्वा उच्छिष्टं शूद्रमेव च। शुचिरप्यवगाह्यैव सचेलं स्नानमाचरेत्" छाग० "स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्" संव० "रजकश्चर्म्मकृच्चैव व्रात्यध्वजोपजीविनौ। निर्णेजकः शौण्डिकश्च नटः शैलूषकस्तथा। सुखेभगस्तथा स्वा च वनिता सर्व्ववर्णगा! चक्री ध्वजी व्याधयाजी" इत्युपक्रम्य "एभिर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु। तोयेन क्षालनं कृत्वा आचान्ताः प्रयता मताः" शाता०। "उर्द्ध्वं नाभेः करौ कृत्वा यदङ्गं स्पृशते खगः। स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यति" जातू०। "नीली नीलीविकारं च मानुषास्थीन्यपि द्विजः। चण्डालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत्" संव०। "स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः" स्कन्द०पु०। "अष्टम्यां च चतुर्दश्यां दिवा पर्व्वणि मैथुनम्। कृत्वा सचेलं स्नात्वा च वारुणीभिश्च मार्जयेत्" याज्ञवल्क्यः। "रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला" अङ्गि०। "रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्धिमवाप्नुयात्" शङ्खः "शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला। दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति" अङ्गि०। "रोगेण यद्रजः स्त्रीणामत्यर्थं तु प्रवर्त्तते। अशुच्योनैव तास्तेन येन वैकारिकं हि तत्" शङ्ख०। "अकाले यद्भवेत् स्त्रीणामुरक्तमाद्यर्मनीषिणः। काले तु तद्रजः प्रोक्तं तस्मात्तत्रैव साऽशुचिः" छाग०। एवमन्यान्यपि तद्बोधकान्यनुसन्धेयानि। शुचितत्कालजीविनः कर्म्माधिकारित्वेन शुद्धेः कर्त्तृविशेषणतया कर्म्माङ्गत्वमशुद्धेश्च तदधिकारित्वाभावः एवं तयोः कर्त्तृविशेषणतया कर्म्माधिकाराङ्गानङ्गत्वे निरूपिते। इदानीं द्रव्याणामपि कर्म्माङ्गतया द्रव्यगतशुद्ध्यशुद्धी निरूप्येते तत्र कालरूपद्रव्यस्याशुद्धिः ३६५पृष्ठे अकालशब्दे उक्तप्राया। पर्य्युदस्तकालानां तु कर्म्मानङ्गत्वेऽपि नाशुद्धत्वम्। "रात्रौ श्राद्धं न कुर्वीत" "आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु" इत्यादौ तत्तत्कर्म्मणां तदितरकाले कर्त्तव्यतामात्रं बोध्यते न तु तेषामशुद्धत्वमपि तेन सन्ध्यावन्दनादेः सन्ध्यारात्र्योः कर्त्तव्यताविधायकं "पश्चिमां तु समासीनोयावत्तारकदर्शनमित्यादि" "दिवोदितं यत् कर्म्मेत्युक्त्वा पूर्वेद्युः प्रथमे यामे तत् कुर्वीताविचारयन्नित्यादि" च शास्त्रं सार्थकम्। अपरद्रव्यगते शुद्ध्यशुद्धी तावदिदानीं निरूप्येते। तत्रादौ द्रव्यशुद्ध्यशुद्धिसम्पादकं द्रव्यादिकमुच्यते। "शारीरैर्मलैः सुराभिर्मद्यैर्यदुपहतं तदत्यन्तोपहतम्। अत्यन्तोपहतं सर्व्वलौहभाण्डमग्नौ प्रक्षिप्तं शुध्येत्' मणिमय मृन्मयमज्जं च सप्तरात्रं मही निखनेन शुध्येत् दन्ता-

स्थिभवं संतक्षणेन, दारवं क्षण्मयञ्च जहयात्। अत्यन्तोपहतस्य प्रक्षालितस्य त्रिरवद्य तच्छिन्द्यात्" विष्णुः "अत्यन्तोपहतानां सर्व्वतैजसानामग्निना शौचं क्षणमयचर्मणां त्यागः, तन्मात्रच्छेदमित्येके धारणं हि नववाससां शौचमित्याचार्याः तस्मात् सर्व्ववाससामाप्लावनादेव शुद्धिः" हारी० "तैजसानां कृमिपरीतोमूत्रपुरीषोपहतानामावर्त्तनमुल्लेखनं भस्मना त्रिःसप्तकृत्वः परिमार्जनं मृच्छदनं वा" शङ्खलि० "मूत्रपुरीषास्रक्कृमिपरीष्टानां तैजसानां पात्राणां पूर्व्वोक्तानामन्यतमेन त्रिःसप्तकृत्वः परिमार्ज्जनम्" "क्षौमाणि वाससि तेषामलाभे कार्पासिकान्यौर्णिकानि भवन्ति मूत्रपुरीषश्लोष्मितरेतःप्रभृत्युपहतानां क्षुदाद्भिः प्रक्षालनं वासोवदूर्णावल्कलानां, वल्कलवत् कृष्णाजिनानाम्' इति च बौधा० "मद्यैर्मूत्रपुरीषैश्च श्लेष्मभिरश्रुशोणितैः। संस्पृष्टं नैव शुध्येत पुनःपाकेन क्षण्मयम्। एतैरेव यदा स्पृष्टं ताम्रसौवर्णराजतम्। शुध्यत्यावर्त्तितं पश्चादन्यथा केवलाम्भसा" शङ्खवशिष्ठकाश्यपाः "अलाबुदारुपात्राणां वैदलानां तथैव च। अत्यन्तोपहतानाञ्च परित्यागो विधीयते। अत्र मूत्रपुरीषाभ्यां रेतसा रुधिरेण च। चेलं यदुपहन्येत पुनः प्रक्षालयेत्तु तत्। यद्यप्यसृग्न शुध्येत्तु वस्त्रं दोषहतं दृढम्। छेदनं तस्य दाहो वा यस्मात्तदुपहन्यते। मृत्तिकाक्षारपातेन अशुद्धं तत् परित्यजेत्" यमः। "वस्त्रवैदलचर्माद्यं शुद्धिः प्रक्षालनं स्मृतम्। अनिदुष्टस्य तन्मात्रं त्यजेच्छित्त्वात्मशुद्धये" दक्षः। "दूषितं वर्जितं दूष्यं कश्मलं चेति लिङ्गिनाम्। चतुर्विधमशेषं च सर्व्वं व्याख्यास्यते पुनः। शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते। अभक्ष्यभोज्यपेयानि वर्जितानि हि वक्ष्यति। न्यङ्कुः पतितचण्डालौ ग्राम शूकरकुक्कुटौ। श्वा च नित्यं विवर्ज्याः स्युः षड्ढते धर्मतः समाः। सद्यः सूतकी स्मृती मत्तोन्मत्तौ रजस्वला। स्नातव्यम्बरशुद्धश्च वर्ज्यान्यष्टौ स्वकालतः। स्वेदाश्रुविन्दवः फेनोनिरस्तं नखरोम च। आर्द्रचर्म त्वगित्येतद् दूष्यमाहुर्द्विजातयः। मानुषास्थिकफोविड्रेतोमूत्रार्त्तवानि च। कृमिपः पूयमित्येतत् कश्मलं चेत्युदाहृतम्। दूषिते प्रोक्षितेनापि शुद्धिरुक्ता विधानतः। दूष्ये मार्ज्जनसंस्कारैः कश्मले सर्व्वथा भवेत्" देवलः। अथ भूमिशुद्ध्यशुद्ध्युपायादि। "प्रसूते गर्भिणी यत्र म्रियते यत्र साङ्गकः। चण्डालैरुषितं यत्र यत्रोपन्यस्यते शवः। विण्मूत्रे चाहिते यत्र कृमिपोयत्र दृश्यते। एवं कल्मष भूयिष्ठा भूरमेध्येति लक्ष्यते। कृमिकीटपदष्टैर्दूषिता यत्र मेदिनी। तत्सद्यो कर्षणैः क्षिप्रा वान्तैर्वा दूष्यतां व्रजेत्। नखदन्ततनूजत्वक्तुषपांशुरजोमलैः। भस्मपङ्क तृणैर्वापि प्रच्छन्ना मलिना भवेत्। पञ्चधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति। दूष्या द्विधा त्रिधा वापि शोध्यते मलिनैकधा। दहनं खननं भूमेरुपलेपनवापने। पर्ज्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम्" देव०। तत्सद्यो घनीभूतश्लेष्मा "संमार्जनेनाञ्जनेन सेकेनोल्लिखनेन च। गवां च परिवासेन भूमिः शुध्यति पञ्चभिः" मनुः। "खननात् पूरणाद्दाहात्लेपनादभिघर्षणात्। गोभिराक्रमणात् कालाद्भूमिः शुध्यति सप्तभिः" यमः। "घनाया भूमेरुपघाते उपलेपनम् रुधिरायाः कर्षणम् आच्छन्नाया मेध्यमाहृत्य प्रच्छादनम् चतुर्भिः शोध्यते भूमिः गोभिराक्रमणात् खननाद्दहनादभिघर्षणात् पञ्चमाल्लेपनात्" बौधा० "कर्षणसुपलेपनमद्भिरभ्युक्षणं कालोदाहश्च भूमेः" शङ्खलि० शुद्धिरिति शेषः। "खननात् पूरणाद्दाहात्लेपनादभिघर्षणात्। गोभिराक्रमणात् कालात् भूमिरेभ्यो विशुध्यति" हारी०। "मार्जनोपाञ्जनैर्वेश्म प्रोक्षणेन च पुस्तकम्। मार्ज्जनेनाञ्जनेनापि सेकेनोल्लेखनेन च। दाहेन च भुवः शुद्धिर्वासेनाथ्य वा गवाम्" विष्णुः "गोचर्म्मसात्मबविन्दुर्गोः (भूमेः) शोधयति पातितः समूढमसमूढं वा यत्र लेपो न दृश्यते" बौधा० स्मृतौ वर्षादिशेषे कालभेदः। स्वमूत्रपतितात्रान्या स्मृतास्वेतु द्विजमन्दिरे। शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा। दशरात्राच्छुनि प्रेते मासात् सूद्रे भवेच्छुचिः। द्वाभ्यां तु पतिते गेहे अन्त्ये मासचतुष्टयात्। अत्यन्ते वर्जयेद्गेहमित्येवं मनुरब्रवीत्" इ० मनुः। अत्यन्त्य. श्वपाकः। द्विजस्य मरणे वेश्मविशुध्यति दिनत्रयात्। दिनैकेन बहिर्भूमिरग्निक्षेपप्रलेपनैः" यमः। यथोक्तकालानन्तरं कर्त्तव्यमाह संवर्त्तः गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थवनदूषिते। प्रोत्सार्य्य कृष्णमयं पात्रं सिद्धमन्नं तथैव च। गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत्। गोमयेनोपलिप्याथ छागेनाप्लावयेद्बुधः। आज्यैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः। सर्व्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयः। "दारुवदस्थि भूभ्योरावपनं च भूमेः" गौत० "मार्जनाद्वेश्मनां शुद्धिः" क्षितेः शुद्धिस्तु सप्तभिः" शङ्खः। अशुद्ध्यपवादः "ब्राह्मणावसथे भूमिर्देवागारे तथैवच। मेध्या चैव सदा मन्ये गवां गोष्ठे च या भवेत्" यमः। "रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च। स्पर्शनाच्च प्रदुष्यन्ति पक्षेष्टरचितानि च" भरा०

रथ्याकर्दमतोयानि सृष्टान्यन्यैश्च वायसैः । मरुताकर्षणं शुध्यन्ति पक्वेष्टरचितानि च। तथैभिश्च विशुध्यन्ति स्रुक्स्रुवौ सांशुमारुतैः" विष्णुः । अथ मृत्तिकाशुद्धिः "वल्मीकादुत्करात्क्षेत्राज्जलाध्वपथिदत्तयोः । कृतशौचावधिष्टाश्च न ग्राह्याः सप्त मृत्तिकाः। शुचिदेशे च संग्राह्याः शर्करादिविवर्जिताः" शाता० । अथ पक्वान्नादिशुद्धयः शुद्धयः । "केशकीटक्षुतघ्रातं वायसोपहतञ्च यत् क्लीवाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः । दूष्यं वा स्याद्यदन्नं तु तस्य निष्कृतिरुच्यते। अभ्युक्ष्य किञ्चिदुद्धृत्य तद्भुञ्जीता विशङ्कितः । भक्षणे वापि संसर्गे संस्पर्शे वोल्मुखेन च। सुवर्णरजताभ्यां च भोज्यं घ्रातमजेन वा" । घृतं सपायसं क्षीरं तथैवेक्षुरसो गुडः । सूदभाण्डस्थितं तक्रं तथा मधु न दुष्यति" शाता० "त्वक्केशकीटरोमनखास्थिपुरीषाणि दृष्ट्वा तद्देशपिण्डान्नमुद्धृत्याङ्गिरभ्युक्ष्य भक्षणावकार्याभिघार्य पुनरपि प्रोक्ष्य वाचा प्रशस्तम् ओं भूर्भुवः स्वरित्युपरि परिशोध्य च पुनरेवोपयुञ्जीत" बौधा० । "मक्षूरमाषसंयुक्तं तथा पर्य्युषितं च यत् । तत्तु प्रक्षालितं कृत्वा भुञ्जीत कृताभिघारितम्" यमः "माषाराजमाषाः" हेमा० । पर्य्युषितभोजनविधानमापद्विषयम् "शुक्तानि हि द्विजोच्छानि न भुञ्जीत कदाचन । क्षालयित्वा तु निर्दोषाण्यापद्धर्म्मगतो यदा" तस्यैव वचनान्तरात् "मक्षिकाकेशमक्षेषु पतितं यदि दृश्यते । मूषिकस्य पुरीषं वा क्षुतं यच्चावधूनितम् । भक्षणाद्यस्य वाग्नीयादभ्युक्ष्य सलिलेन वा" यमः। क्षुतेनाक्रान्तमवक्षुतम् अवधूनितं वस्त्रेण । "अवक्षुतं काकपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् । अज्ञातभक्षास्रुक्स्रिरणत्त्यागैः संसृष्टमन्नं मनुराह भोज्यम्" यमः। अस्यापवादः "मक्षिका मशका दंशा घुणा सूक्ष्मपिपीलिका। आमिषामेध्यसेवी च नैते कीटा निसर्गतः।यमः "पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति" मनुः । गोघ्रातैश्चैते तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वारि प्रक्षेप्तव्यं विशुद्धये ।अत्र मक्षिका विष्ठामक्षिका "केशकीटक्षुतनिष्ठीवित' वचोऽभिहतं श्वभिराघ्रातं प्रोक्षितं यच्च पर्य्युषितम् पुनः सिद्धं चण्डालेनावेक्षितमभोज्यमन्नमन्यत्र हिरण्योदकस्पर्शात्" शुमन्तुः "आकरजानां त्वव्यवहरणीयानां घृतेनाभिघारितानां शुद्धिः पुनःपचनमेव स्नेहानां, स्नेहवद्रसानां, संहतानामग्निः प्रोक्षणमतिद्रवाणामुत्पवनम्, शुष्काणामुद्धृतदोषाणां संस्कारः परिस्रावितानां, दोषाणां ततस्त्यागः" शङ्खलि० । "परोक्षमन्नं संस्कृत्य अग्नावधिश्रित्याङ्गिः प्रोक्षेत्तदन्नं पवित्रम्" आप० । "अनिष्टगन्धोपघ्राणस्पर्शदर्शन केशकीटपिपीलिकाभिरन्नाद्योपघाते काञ्चनरजतवैदूर्य्यप्रवालगोवालाजिनदर्भाणामेकतमेनाङ्गिः संसृष्टेन मन्त्रप्रोक्षणं पर्य्यग्निकरणमादित्यदर्शनात् पूतं भवति वह्वन्नोपघाते ब्राह्मणसत्या तदन्तरमपनीय अजसवभाव्य पूतं भवति त्यागोरसमयानाम्" हारी० । सिद्ध हविषां मक्षितां श्ववायसप्रधृत्युपहतानां तद्देशपिण्डमुद्धृत्य "पवमानः सुवर्ज्जन" इत्यनुवाकेनाभ्युक्षणं मधूदके पयोविकारे च पात्रान्तरनयने शुद्धिः एवं तैलसर्पिषी, उच्छिष्टसमन्वारब्धे तूदकेऽवधायोपयोजयेत्" बौधा० उच्छिष्टसमन्वारब्धे उच्छिष्टसंसृष्टे" हेमा० । पयोदधिविकारादि शुचि पात्रान्तरे स्थितम् । पावनोत्पवनाभ्यां च पर्य्यग्निकरणेन च" लौगा० "पवनं वस्त्रादिना गालनम् उत्पवनं दर्भपवित्रेण "सवितुष्ट्वाप्रसव उत्पुनामि" इत्यनेन मन्त्रेण संस्करणम् । "आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः।म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः स्मृताः" यमः "अपणं घृततैलानां स्नावनं गोरसस्य च । भाण्डानि स्नावयेद्भिः शाकमूलफलानि च । सिद्धमन्नं तथा सर्पिः क्षीरञ्च दधि चाम्बु च । एतेषामवलीढानां तैजसी शुद्धिरिष्यते काकमार्जारनकुलसर्पमूषिकपक्षिभिः । संस्कृतं तु यदाघ्रातमवलिह्येत केनचित् । सुवर्णवर्णं ताम्रोष्णं गोवालै रजतेन वा । स्पृष्टमेकतमेनापि भोज्यं घ्रातमजेन वा" शङ्ख० । तैजसी शुद्धिः पर्य्यग्निकरणम् । दृषद्यं शुद्धिः केशादिकं दूषकमुद्धृत्य कार्य्या" हेमा० । "घृतदधिपयस्तक्राणामाकरस्थितानामदोष" ङ्खः "आधारदोषे तु नयेत् पात्रात् पात्रान्तरं द्रवम् । घृतं तु पायसं क्षीरं तथैवेक्षुरसं गुडम्" द्रवद्रव्याणि भूरीणि परिस्रावयानि वाग्मसा । शुष्कानि व्रीहयश्चैव शाकमूलफलानि च । त्यक्त्वा तु दूषितं भागं प्रक्षालयाथ जलेन च । ब्रह्मा० यु० । "द्रोणादभ्यधिकं सिद्धमन्नमुपकृतं न दुष्यति । तस्योपकृतमात्रमपास्य गायत्राभिमन्त्रितं सुवर्णाम्भः क्षिपेत् वस्त्रस्य च दर्शयेदग्नेः" । विष्णुः। "घृतं द्रोणाधिकं चान्नं श्वकाकैरुपघातितम् । न त्याज्यं तस्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत् । कर्त्तव्यं वचनं तेषामन्नसंस्कारकर्म्मणि" "द्रोणाधिकस्य शुद्धिस्तु धर्म्मशास्त्रेषु पठ्यते । श्वकाकैरवलीढं तु द्रोणाद्यं न विसर्ज्जयेत् । प्रास्य सुद्धृत्य तन्मात्रं यच्च खाद्यान्वितं भवेत् । सुवर्णोदकेनाभ्युक्ष्य

ज्वलनेन तु तापयेत् । विप्राणां मन्त्रघोषेण पूतं भोज्यं च तद्भवेत्" परा० । द्रोणन्यूनपरिमाणस्यान्नस्य श्वाद्यवलेह मक्षोपघातदूषितस्य त्याग एव कर्त्तव्यः यथाह सएव । "श्वमार्जारगवाद्यैस्तु जग्धमन्नं यदा भवेत् । स्नेहो वा गोरसोवापि तत्र शुद्धिः कथं भवेत् ? । अन्नं परित्यजेत्तत्र स्नेहस्य पावनेन तु । अश्वस्तनतया शुद्धिर्गोरसस्य विधीयते । तत्रैव विषये देवलः "अवलीढं श्वमार्जारधाङ्क्ष कुक्कुटसूषिकैः । भोजने नोपयुञ्जीत तद्भेध्यं हि सर्व्वतः" चण्डालादिस्पृष्टस्य द्रोणाधिकस्यापि त्यागएव कार्य्य इत्याह "चण्डालेन शुना वापि दुष्टमन्नमयत्नियम् । चण्डालादिभिरुच्छिष्टैः स्पृष्टं भूयोऽपि वर्जयेत्" वसिष्ठः । तत्रापवादः देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च । काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत् । तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति" द्रव्याणां प्लावनेनैव घृतानां प्रोक्षणेन च । छागेन मुख संस्पृष्टं शुचि स्नेह हि तद्भवेत्" इह० "तीर्थे विवाहे यात्रायां संग्रामे देवविप्लवे । नगरे ग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति । गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः । अग्नीमांसानि शौचानि स्त्रीभिराचरितानि च" इह० "कन्दुपक्वानि तैलानि पायसं दधि सक्तवः । एतान्यशूद्रान्नभुजोभोज्यानि मनुरब्रवीत्" पाता० । द्रव्यविशेषे या शुद्धिरुक्ता सान्नान्तरसम्पादनायशक्तिरूपाया मापद्येव कार्य्या । अनापदि तु दुष्टमन्नं परित्यज्यान्नान्तरं संपाद्यम् यथोक्तं वायुपु० । "अन्नं पश्येयुरेते तु यदि वै हव्यकव्ययोः । उत्सृज्यान्नं प्रधानार्थं संस्कारस्यापदि स्मृतः" "हविषां संस्कृतानान्तु सुख्यमेव हि वर्जनम् । घृतप्रयुक्ताभिर्द्भिर्वा प्रोक्षणं तु विधीयते । सिद्धार्थकैः क्षणतिलैः कार्य्यं वाप्यवकीरणम् । द्विजस्पर्य्याग्निवस्त्राणां दर्शनं तु प्रयत्नतः" ब्रह्मपु० । अथोदकशुद्धशुद्धयाया । "उच्छिष्टं मलिनं क्लिन्नं यच्च विण्मूत्रलेपितम्" इत्युपक्रम्य "सूर्य्येन्दुरश्मिपातेन मारुतस्पर्शनेन च । गवां मूत्रपुरीषेण शुध्यन्त्याप इति स्थितिः" इह० । "घृतपक्वन्नखात् कूपादल्पोपहतास्तथा । अपः सप्तोद्धरेत् सर्व्वाः शेषं शस्त्रेण शोधयेत्" । वह्निं प्रज्वालनं कृत्वा कूपे पक्षेष्टकाचिते । पञ्चगव्यं न्यसेत् पश्चात् नवतोयसमुद्भवे । जलाशयेष्वगाधेषु स्थावरेषु महीतले । कूपवत् कथिता शुद्धिः महत्सु च न दूषणम्" विष्णुः "दश्वा कर्दमेत्यादिप्रागुक्तं ४८१ पृ० "भूमिस्थमुदकं पुराणं वैतसं यत्र गोर्भवेत् । अव्याप्तं चेदमेध्येन तद्वदेव हि शोधनम्" वापीकूपतडागेभ्य आपोग्राह्यास्तु सर्व्वशः । "पश्चात् पश्येदमेध्यन्तु पञ्चगव्येन शुध्यति" परा० "अस्थिचर्म्मावसिक्तं यत् श्वमार्जारास्वमूषिकैः । दूषितं यद्भवेत्तोयम्" इत्युपक्रम्य "अस्थिचर्म्मावपतितं खरश्वानर शूकरैः । उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् । वापीकूपतडागेषु दूषितेषु कथञ्चन । उद्धृत्य वै क्रमशतं पञ्चगव्येन शुध्यति । खनिकूपतडागेषु संदिग्धेषु विशेषतः । तेभ्योद्धृत्वा घटशतं पञ्चगव्येन शुध्यति । मार्दुकोपानद्विण्मूत्रं कूपे यदि निमज्जति । घटिं कृत्स्नान् समुद्धृत्य पञ्चगव्येन शुध्यति" परा० अथ नानाद्रव्यशुद्ध्याशुद्धी "श्वपाकोयत् स्पृशेद्द्रव्यं मृण्मयं द्रवमेव वा । पक्वं वा भोज्यं कल्कं वा तत् सर्वं परिवर्जयेत् उच्छिष्टाशुचिभिः स्पृष्टमद्भिर्वा शोध्यतेऽम्भसा" जनं वापि प्रभूतं वा शोधयेत् प्रोक्षणादिभिः देव० । तैजसानां मणीनाञ्च सर्व्वेषाञ्चाश्मनश्च च । भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥ निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति । अलग्नमश्मनश्चैव राजतञ्चानुपस्कृतम् ॥ अपामग्नेश्च संयोगाद्वैमल्यञ्च परं भवेत् । तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ॥ ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च । शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः ॥ द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लावनं स्मृतम् । प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम्॥ मार्ज्जनं यज्ञपात्राणां पाणिना यज्ञकर्म्मणि । चमसानां ग्रहाणाञ्च शुद्धिः प्रक्षालनेन तु ॥ चरूणां स्रुक्स्रुवाणाञ्च शुद्धिरुष्णेन वारिणा । स्फ्यशूर्पशकटानाञ्च मुसलोलूखलस्य च ॥ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् । प्रक्षालनेन तल्पानामद्भिः शौचं विधीयते ॥ चेलचर्म्मणां शुद्धिर्व्वैदलानान्तथैव च । शाकमूलफलानाञ्च धान्यवच्छुद्धिरिष्यते ॥ कौशेयाविकयोरूर्णैः कृतपानामरिष्टकैः । श्रीफलैरंशुपट्टानां क्षौमाणां गोरसर्षपैः ॥ क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च । शुद्धिर्विज्ञानता कार्य्या गोसृक्तेनोदकेन वा ॥ प्रोक्षणात्तृणकाष्ठञ्च पलालञ्चैव शुध्यति । मार्ज्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृण्मयम् ॥ मद्यैर्मूत्रैः पुरीषैर्व्वा क्षौद्रनैः पूयशोणितैः । यावन्नापैत्यमेध्याक्तान्न्यो लेपश्च तत्कृतः । तावन्मृद्वारि चादेयं सर्व्वासु द्रव्यशुद्धिषु" मनुः ॥ "कुसुम्भकुङ्कुमानां च जर्ज्जीकर्पासयोस्तथा । प्रोक्षणादि तथा शुद्धिरित्याह भगवान् यमः" शङ्खः "तूलिकाक्षुपधानानि पुष्परक्ताम्बराणि च । शोधयित्वातपे किञ्चित् करेण मार्ज-

नैमुच्यः । पश्चाच्च वारिणा प्रोक्ष्य शुचीन्येवमुदाहरेत् । तोयाभावे परस्यैं भूमीसंवेशनेऽपि च । कुण्डिकायाः परित्यागोदहनं वापदिश्यते" देवलः । आमान्नपरिशोधने विशेषमाह हारीतः । "तस्य यन्नात्मुपहृतं तन्नात्मं परित्यज्य शेषस्य कण्डनप्रक्षालने कुर्यात् । "पक्वसां दक्षां क्रीतानामवहननपवनै', व्रीहियवगोधूमानां घर्षणदलनशेषाद्यैः शिम्बिधान्यानां कण्डनविस्रयनप्रक्षालनैः फलीकृतानां घर्षणप्रक्षालेन पर्य्यग्निकरणैःशाकमूलफलानां भूस्थानग्रहणप्रक्षालनैः क्षुद्रकाष्ठानां, स्वविधिविधानात् अन्नदूषितं अपक्वमेव स्नेहानां पुनः पाककृतत्वक्षानां पुत्रकसादिभिः स्पृष्टानां भूस्थानं दृषत्काष्ठानामादित्यदर्शनाच्छौचम् । हारी० "गवाघ्रातेषु कांस्येषु सूद्रोच्छिष्टेषु वा पुनः । दशभिर्मृत्तिकाभिः शुद्धिः स्यात्काकोपहतेषु च" यमः । दुष्टाभिशस्तपतिततिर्य्यग्योवर्य्योपहतानामित्यनुवृत्तौ "यानशयनासनानि परिहार्य्यानीत्येके मन्यन्ते असंस्कृतायां भूमौ न्यस्तानां दृषदां प्रक्षालनं न रजोपहतानामभ्युक्षणम् एष क्षुद्रसमिधां महतां काष्ठानामुपघाते प्रक्षाल्यावघोषनं दारुमयानामुच्छिष्टसमन्वारब्धानामनुलेखनम् उच्छिष्टलेपोपहतानामेव तक्षणं मूत्रपुरीषलोहितरेतः प्रभृतिभिरुत्सर्गः मृण्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवज्वालनम् उच्छिष्टलेपोपहतानां पुनर्दहनं मूत्रपुरीषलोहितरेतःप्रभृतिभिरुत्सर्गः" बौधा० । शौचं सहस्रलोम्नां तु मारुतार्केन्दुरश्मिभिः । रेतःस्पृष्टं यच्च दुष्टमाविकं चैव शुध्यति" अङ्गिराः । अथाशुद्धप्रवादः । नित्यमाद्यं शुचि स्त्रीणां शकुनिः फलपातने । स्रवणे तु शुचिर्वत्सः स्वा मृगग्रहणे शुचिः" मनुः "वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने । स्त्रियश्च रतिसंसर्गे स्वा मृगग्रहणे शुचिः"यात्रा० "स्वभिर्हृतस्य यन्मांसं शुचि तन्मनुरब्रवीत् । क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः"मनुः "तथा मांसं श्वचण्डालक्रव्यादादिनिपातितम्, यात्रा० । शुचीति शेषः । "स्वहतास्त्र मृगा धन्याः पातितं तु खगैः फलम् । बालैरनुपरिक्रान्तं स्त्रीभिराचारितञ्च यत् । प्रसारितञ्च यत् पण्यं ये दोषाः स्त्रीमुखेषु च । मशकैर्मक्षिकाभिश्च विलीनं नोपहन्यते । क्षितिस्थायैव याज्ञायो गवां दृष्टिकराश्च याः"। वसि० "रश्मिरग्निरजस्वाया गौरश्वो वसुधाऽनिलः । विप्रुषोमक्षिकाः स्वर्गे वत्सः प्रस्रवने शुचिः । कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखं तथा" यात्रा० । "आत्मशय्यासनं वस्त्रं जाया पात्रं कमण्डलुः । शुचीन्यात्मन एतानि परेषामशुचीनि तु" बौधा० । "सा भार्य्या शिशुर्वस्त्रं स्रुवोपवीतं कमण्डलुः । आत्मनः कथितं शुद्धं न तु शुद्धं परस्य तु" शङ्खः । "आत्मशय्यासनं वस्त्रं मेध्यं वाऽमलदूषितम् । ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति स्थितिः । आसनं शयनं यानं स्त्रीसुखं कुतपं क्षुरम् । न दूषयन्ति विद्वांसो यज्ञेषु चमसं तथा । गौरश्वोविप्रुषश्छाया मक्षिका शलभः शलः । अजोहस्ती रथे क्षत्रं रश्मयश्चन्द्रसूर्य्ययोः । भूमिरग्निरजो वायुरापोदधि घृतं पयः । सर्व्वाण्येतानि शुद्धानि स्वर्गे मेध्यानि नित्यशः" यमः । "शुचिरग्निः शुचिर्वायुः पवित्रा ये वहिस्सराः । आपश्च शुचयोनित्यं पन्थाः सञ्चरणाच्छुचिः । आपःशुद्धा भूमिगता शुचिर्नारी पतिव्रता । शुचिर्धर्म्मपरो राजा संतुष्टो ब्राह्मणः शुचिः" यमः । "रजोभूर्वायुरग्निश्च मार्ज्जारश्च सदा शुचिः" विष्णुः "शुद्धं नदीगतं तोयं सर्व्वं एव तथाऽऽकराः । शुद्धं प्रसारितं पण्यम् शुद्धमजाजयोर्मुखम् । सुखवर्जं च गौः शुद्धा मार्ज्जारश्चाक्रमे शुचिः" शङ्खः । "अदूष्या सन्तता धारा वातोद्धूताश्च रेणवः । स्त्रियो दृष्टाश्च बालाश्च न दुष्यन्ति कदाचन । मार्ज्जारश्चैव दर्वी च मारुतश्च सदा शुचिः" यमः । आकराः सोमपानं च वाचा यज्ञ प्रशस्यते" उश० शुचयः इति शेषः । "अदूष्या सन्तता धारा वातोद्धूताश्च रेणवः । आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम्"बौधा० "रेणवः शुचयः सर्व्वे वायुना सकुदीरिताः । अन्यत्र रासभाजाविश्व समूहनिवाससाम्" पैठी० "गवाश्वरथनागानां प्रशस्तारेणवः सदा । अप्रशस्ताः समूहन्याःश्वाविरासभवाससाम्" उश० "अपि नोच्छिष्टदोषोऽस्ति मधुनो न च सर्पिषः । न फलानां न चेक्षूणां नाकराणां न योषिताम्" यात्रा० । "शुचि पूतं स्वयं शुद्धं पवित्रं चेति केवलम् । मेध्यं चतुर्विधं लोके प्रजानां मनुरब्रवीत्"। तथा "नवं चानिर्मलं वापि शुचीति द्रव्यमुच्यते । योषितं तु यदान्येन तत्पूतमभिधीयते । स्वयमेव हि यद् द्रव्यं केवलं धन्यतां गतम् । स्थावरं जङ्गमं वापि स्वयं शुद्धमिति स्मृतम् । अन्यद्रव्यैर्दूष्यं च स्वयमन्यानि शोधयेत् । हव्यकव्येषु पूज्यं यत्सत्पवित्रमिति स्मृतम् । अथ सर्वाणि धान्यानि हव्यान्याभरणानि च । अवर्ज्यभक्ष्यजातीनि शुचीन्येतानि केवलम् । वर्जिते निखिले द्रव्ये शुचिसंज्ञा न वर्त्तते । तच्चिह्नवेह

सर्वत्र शुद्धता न पुनर्भवेत् । तस्माच्छुद्धं तु कर्मण्यं शुचीत्याहुर्मनीषिणः। निर्मलं संस्कृतं द्रव्यं क्रियार्हं पूतमुच्यते। वसतिश्चमसोयानं वाहनं साधनास्त्रु च । छुरी नीरासनं चेति स्वयं शुद्धमिति स्मृतम् । शिशवश्च स्वयंशुद्धा योषितश्चानृतौ तथा । ब्रह्महत्या हि नारीणामृतुकाले न संभवेत् । आकरा हि स्वयं शुद्धा द्रव्याणामिह निर्णयः । भस्म क्षौद्रं स्रुवश्चैं च सदर्भाः कुतपास्तिलाः । अपामार्गशमीकाशाः पद्ममामलकं मणिः । माल्यानि सर्षपा दूर्वाः सदाभद्राः प्रियङ्गवः । अक्षतारोचनालाजा हरिद्राश्चन्दना यवाः । पलाशखदिराश्वत्थतुलसीधातकीतकी । एतान्याहुः पवित्राणि ब्राह्मणा हव्यकव्ययोः । योक्त्रिकाणि मलघ्नानि शोधनानि च देहिनाम् । तेष्वापोगोगजश्चैव पवित्राणि विशेषतः । सर्वाशौचे विशुध्यर्थं सर्वेषां सर्वतः सदा । अक्षयश्चलैः समिद्भोऽग्निर्दुर्मनुष्यैरदूषितः । सर्वेषामप्ययौचानां समर्थः शोधनाय सः । द्रव्याणामप्यिदं शुद्धानां मेध्यत्वमुपदिश्यते । ज्वालाभिरुद्गतपात्राणां शुचित्वं नियतं भवेत् । अग्नेर्दग्धस्य ग्रहणं नास्त्यनापदि । श्वपाको दग्धलाभस्तु ब्राह्मणोऽग्निरनाहितः । चण्डालाग्नेरमेध्याग्नेः स्रुतकाग्नेश्च कर्हिचित् । पतिताग्नेश्चितग्नेश्च न श्मिद्यैर्ग्रहणं स्मृतम् । गोगजच्छुद्धदेशस्था श्मशानाद्याचिता शिवा । अग्राम्या दृष्टवेच्छुद्धा स्पृष्ट्वा विण्मूत्रवर्जिता । ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानिसर्वशः" देवलः । "ऊर्ध्वं वै पुरुषस्य नाभेर्मेध्यमर्वाचीनमेध्यमिति"श्रुतिः । "अजास्वं सुखतोमेध्यं न गौर्न नरजा मलाः" विष्णुः ऊर्ध्वं नाभेः पुरुषोगौर्मेध्यः पृष्ठे समन्तादश्वः स्त्रियः सर्वतो हृदय मासामशुचि" उश० । "मेध्या रहोगता नारी स्त्री मुखे शुचिचारिणी । सर्वत्रे तु न दुष्यन्ति वातो यज्ञोरसः स्त्रियः । स्त्रीणां मुखरसश्चैव गन्धोनिश्वास एव च । सुखतोगौरमेध्याश्वान् मेध्योऽजोमुखतः स्मृतः । पृष्ठतोगौर्गजः स्कन्धे सर्वतोऽश्वः शुचिस्तथा । स्त्रीणां मूत्रपुरीषे तु अमेध्ये मल एव च । गोपुरीषं तु मूत्रं च नित्यं मेध्यमिति स्थितिः । यमः "पादौ शुची ब्राह्मणानामजाश्वस्य मुखं शुचि । गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम् । रोमोद्भेदे यशो भुङ्क्ते गन्धर्वः कुचदर्शने । अनलस्तु रजोभुङ्क्ते स्त्रियोमेध्यास्तु नान्यथा । बलात्कारोपभुक्ता वा चौरहस्तगतापि वा । स्वयं वा प्रतिपन्ना वा अथवा विप्लवादिता । अत्यन्तदूषितापि स्त्री न परित्याज्यार्हति । सर्वेषां निष्कृतिः प्रोक्ता नारीणां तु विशेषतः । स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासिमासि रजस्तासां दुष्कृतान्यपकर्षति। सोमः शौचं ददौ स्त्रीणां गन्धर्वश्च शुभां गिरम् । पावकः सर्वभक्षत्वं मेध्या वै योषितो ह्यतः"। ज्योतिषोक्तम् स्वराश्यपेक्षया दृष्टसमये अनिष्टस्थानस्थरव्यादिकतयानिष्टसूचनमपि अशुद्धिः ज्योतिषोक्तनञः पर्य्युदासप्रसज्यप्रतिषेधोभयपरतायाः सर्वनिबन्धृभिर्व्यवस्थापनात् तत्र निषिद्धकालस्य न केवलं रात्र्यादिकालादिवत् पर्य्युदस्तता किन्तु प्रसज्यप्रतिषेधपरतया अनिष्टविशेषसूचकतापि तेन तत्र तत्र अनिषिद्धकालस्याशुद्धता । अतएव गोचराशुद्धिः कालाशुद्धिरिति च व्यवहियते" तथाच ज्योतिषोक्तादिशा तत्तत्कालानां तत्तत्कर्म्मकरणायोग्यताप्रयोजकतया शुक्रास्तादिकालस्याशुद्धता सा च अकालशब्दे उक्तप्राया । "रविशुद्धौ यज्ञकरणं रविगुरुशुद्धौ व्रतोद्वाहौ" इत्युक्तेः गोचरे शुभस्थानस्थितौ रव्यादीनां शुद्धित्वं विपरीत्ये अशुद्धिः एवं वर्षर्त्तुमासदिवसानामप्यशुद्धिः सा च कन्यकानां दशवर्षाभ्यन्तरे एव विवेचनीया नातः परम् । "यज्ञशुद्धिं मद्यशुद्धिं शुद्धिर्मासचतुर्दिवसानाम् । अर्वाग्दशवर्षेभ्यः प्रवदन्ति कन्यकाना"मित्युक्तेः ।

अशुभ न० विरोधे न० त० । १अमङ्गले "यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्" गीता । २तत्सूचके रव्यादिपापग्रहे "अशुभे दण्डसंयोगे वेधश्चेत्तेन लभ्यते" ज्योति० अशुभसूचका अमङ्गलसूचकास्तेच साधारणा असाधारणाश्च अमङ्गलशब्दे ३१६ पृष्ठादौ दर्शिताः अन्येऽपि अशुभयोगा अरिष्टाध्यायोक्ताः असाधारणा वेदिव्याः । ३अपवित्रे च न० ब० । ४शुभाभाववति त्रि० । ५ब० । ५पापे न० ।

अशुभ्र पु० विरोधे न० त० । १शुभ्रभिन्ने कृष्णे २तद्युक्ते त्रि० ।

अशुष त्रि० न शुष्यति शुष–क न० त० । अशोषके । "रक्षो अग्निमशुषं तूर्वयाणम्" ऋ० १ । १७४ । २ ।

अशून्य त्रि० न० त० । अहीने पूर्णे "अशून्यशयनं भूयान्मम जन्मनि जन्मनि" शय्यादानमन्त्रः ।

अशून्यशयन न० न शून्यं शयनं यस्मात् । व्रतभेदे । "अस्ति व्रतं महापुण्यमशून्यशयनं नृप!" इत्युपक्रम्य "चातुर्मास्ये भवेद्राजन् वर्षायाम् व्रतमुत्तमम् श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप!। श्रावणादिकार्त्तिकान्तं कुर्य्याद्व्रतमनुत्तमम्" इत्यादिना तस्य विधानमभिधाय "चतुर्वर्षं प्रकुर्वीत पुरुषोनियतेन्द्रियः । एवं यः कुरुते राजन्

शून्यशयनव्रतम्। न तस्य शून्या यथा स्यादिति"च हेमा० व्रत० ख० भविष्यपुराणम्।

अशृत त्रि० न शृतं पक्वम्। अपक्वे पक्वभिन्ने १आमान्नादौ।

अशेव त्रि० शो–वनिप् न०त०। सुखकरे। "व्येतु दिद्युद्दिषामशेवा" ऋ० ७।३४।१२।

अशेष पु०अभावे न०त०। १शेषाभावे। न०त०। २शेषशून्ये सकले त्रि० "अशेषशेषसुषिरशोषं मांसमसृग्मि केवलम्" उद्भटः "क्रतोरशेषेण फलेन युज्यताम्" रघुः "येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि" गीता "तथाविधस्तावदशेषमस्तु सः" कुमा०। "अशेषतोर्थोपहृताः कमण्डलोः" माघः।

अशोक पु० नास्ति शोको यस्मात् ५ब०। १स्वनामख्याते वृक्षे, २बकुलवृक्षे च। ३पारदे न०। ४कटुकवृक्षे स्त्री। ङीप्। ५शोकशून्ये त्रि० ६विष्णौ पु० "सत्यनामा भवाञ्शोकः" "अशोकः शोकनाशनः" इति च विष्णुस०। "अशोकमर्थान्वितनामताश्रया गतान् शरण्यं गतशोचिनोऽध्वगान्। अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामञ्चलदस्रजालकम्" नैष० "सनूपुरश्चरणेन स्त्रीचरणेनाभिघाड़नम्। दोहदं तदशोकस्य ततः पुष्पोद्गमोभवेत्" एतदनुसारेणैव कविभिस्तथा वर्ण्यते यथा "असूत सद्यः कुसुमान्यशोकः स्वस्मात् प्रभृत्येव सपल्लवानि। पादेन नापैक्षत सुन्दरीणां संसर्गमाशिञ्जितनूपुरेण" कुमा० नवकिसलयरागेणार्द्धपादेन बाला स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन। अकुसुमितमशोकं दोहदापेक्षयावा प्रणमितशिरसं वा कान्तमार्द्रापराधम्" "अनेन तनुमध्यया सुखरनूपुराराविणा नवाम्बुरुहकोमलेन चरणेन सम्भावितः। अशोक यदि सद्य एव सुकुमारेण सम्पत्स्यसे सुधा वहसि दोहदमिति" "सर्व्वाशोकलतानां प्रथमं सूचितवसन्तविभवानाम्। निर्भिन्ने दोहदेऽस्मिन् संक्रान्तानीव सुकुमारानि" इति च मालवि०। अयमशोकः नवपल्लिकान्तर्गतः "कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः। विल्वोऽशोको जयन्ती च विज्ञेया नव पल्लिकाः" दु०त०। एतद्विधानतो शोकरहिता "अशोकस्थायै शोकरहितायै" इति दुर्गापूजापद्धतिः। अशोकश्च द्विविधः रक्ताशोकः पीताशोकश्च पीतरक्तपुष्पभेदेन तयोः तथात्वम्। तत्र रक्ताशोकाभिप्रायेण "अशोकनिर्भर्त्सितपद्मरागम्" कुमा०। "रक्ताशोकलतास्विशेषितगुणो विम्बाधरालक्तकः" मालवि० पीताशोकवर्णन तु मालविकाग्निमित्रे तृतीयाङ्के तपनीयाशोकवर्णने द्रष्टव्यम्। "अशोकोहेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः। कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा। अशोकः शीतलः स्निग्धो ग्राही वर्ण्यः कषायकः। दोषापचीतृषादाहकृमिशोषविषास्रजित्" भा०प्र०पर्य्यायगुणादि। चान्तः शोकाभावे त्रिका०।

अशोकतीर्थ न० अशोकनामकं तीर्थम्। काशीक्षेत्रान्तर्गते तीर्थभेदे। काशीस्थप्रयागतीर्थमधिकृत्य "अशोकाख्यमिदं तीर्थं गन्धर्वैश्च एष वै। मोक्षद्वारमिदं श्रेष्ठं स्वर्गद्वारमिदं विदुः"। काशी०।

अशोकत्रिरात्रं न० न शोको यत्र ताड्यं त्रिरात्रम्। हेमा० व्र०ख०भविष्योक्तरोक्ते व्रतभेदे तत्कालादिस्तत्रैवोक्तः "अस्त्यशोकत्रिरात्राख्यं व्रतं शोकभयापहम्। त्रिरात्रं तत्र कर्त्तव्यं व्रतं शोकविनाशनम्" इत्युपक्रम्य, मासि मार्गशिरे चैव ज्येष्ठे भाद्रपदे तथा। शुक्लपक्षे पञ्चदश्यामेकभक्तं तु कारयेत्" इत्यादिना आरम्भकालमुक्त्वा "अनेनैव विधानेन प्रतिमासं च पूजयेत् यावत् द्वादश मासान् वै कुर्य्याद्विद्यापनं ततः" इत्युक्तम्।

अशोकपूर्णिमा स्त्री नास्ति शोको यस्याः कर्म्म०। फाल्गुनपौर्णमासावधिवर्षपर्य्यन्तायां हेमा०व्र०ख० विष्णुधर्म्मोक्तव्रताङ्गे १पौर्णमासां तत्र प्रतिमासं कर्त्तव्ये २व्रते च यथा "अशोकपूर्णिमामेतां गृहणध्वं कमना मम। उपोष्य वै नरः शोकं प्राप्नोति स्त्री तथाऽपि वा। फाल्गुनामलपक्षस्य पौर्णमासीं त्वपोत्तम"। इत्युपक्रम्य विधानमुक्त्वा "अनेनैव प्रकारेण चत्वारः फाल्गुनादयः उपोष्या नृपते मासाः" इत्युक्त्वा च "आषाढादिषु मासेषु तद्वत् प्रोक्तं तथाम्बुना। चतुर्ष्वन्येषु च प्रोक्तं तथा वै कार्तिकादिषु" इत्यनेन वर्षसाध्यत्वमस्या उक्तम्।

अशोकरोहिणी स्त्री अशोक इव रोहति रुह–णिनि। कटुकीति ख्यातायाम् कटुकायां कटुकाशब्दे विदुतिः।

अशोकषष्ठी स्त्री कर्म्म०। चैत्रीयषष्ठ्राम् तत्र षष्ठीदेवीपूजनविधानात्तथात्वम्, "चैत्रे मासि सिते पक्षे षष्ठ्यां षष्ठीं प्रपूजयेत्। सुखाय पुत्रलाभाय शुक्लपक्षे तथैव च" उत्तरकामाख्यातत्वम्।

अशोका स्त्री नास्ति शोकोदुःखं सेवनादस्याम्। १कटुकायाम् (कटकी) शुभ्रा० ढक् आशोकेयस्तद्भवे त्रि०। २चैत्रशुक्लषष्ठ्राञ्च "सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी। वैशाखे चान्द्रनीत्युपक्रम्य चैत्रेऽशोका प्रकीर्त्तिता" स्कं० पु० परिभाषोक्ता।

अशोकारि पु० अशोकं शोकाभावञ्चकृति कृ–इन् ईत०।

शोकाभावदायके कदम्बवृक्षे शब्दच० कदम्बशब्दे विवृतिः ।

अशोकाष्टमी स्त्री नास्ति शोकोयस्याः कर्म्म० । चैत्रशुक्लाष्टम्यां,सा हि अशोककलिकापानादशोकदायिका । यथोक्तं हेमा०व्र०ख० लिङ्गपुरा० । "अशोककलिकाञ्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ।" कूर्म्मपुरा० । चैत्रे मासि सिताष्टम्यां बुधवारे पुनर्वसौ । अशोककुसुमैरुद्दमर्चयित्वा विधानतः । अशोकस्याष्ट कलिका मन्त्रेणोक्तेन भक्षयेत् ।" शोकं नैवाप्नुयान्नरः" अत्र बुधपुनर्वसुयोगः प्राशस्त्यार्थः हेमा० । "अशोककलिकापानमशोकतरुपूजनम्" शुक्लाष्टम्यां तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिमिति" लैङ्गे चैत्रशुक्लाष्टमीमात्रस्य निमित्तत्वोक्तेः । मन्त्रस्तु तत्रैव द्रष्टव्यः ।

अशौच्य त्रि० शुच–कर्म्मणि ण्यत् न०त० । शौचनानर्हे वस्तुद्दिश्य शुच्यते तद्भिन्ने । "अशौच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे" गीता ।

अशोधन न० अभावे न०त० । १शोधनाभावे । न०ब० । २शोधनशून्ये त्रि० । शोधनञ्चाशुचेर्जलादिना मलाद्यपनयनम् ऋणादेः प्रतिदानञ्च तदभावोऽशोधनम् ।

अशोधित त्रि० न०त० । १अप्रक्षालिते जलादिनाऽकृत मलाद्यपनयने २अकृतर्णादिप्रतिदाने च ।

अशोभन त्रि० शुभ–कर्त्तरि ल्युट् न०त० । १शोभनभिन्ने कुत्सिते । भावे ल्युट् अभावे न०त० । २अशोभनाभावे ।

अशोष्य त्रि० शुष–णिच्–ण्यत् न०त० । शोषयितुमशक्ये । "अच्छेद्योयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता ।

अशौच न० शुचेर्भावः शौचं न०त० । १शुचित्वाभावे स्मृतिप्रसिद्धे, विहि-तकर्म्मानधिकारित्वसम्पादके २अधर्म्मविशेषे च । "जनने मरणे चैव त्रिरहाशौचस्य भागिनः" स्मृतिः । "समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति । असमानं द्वितीयेनेति" यमः । स्वार्थे ष्यञ् आशौच्यमप्यत्र "आशौच्याद्विप्रमुच्येत" स्मृतिः । "अशौचं द्विविधं कालकृतं वस्तुस्वभावकृतञ्च तत्र कालकृतं "सव्रणः स्नुतकीत्यादिना" अशुद्धिशब्दे ४८० पृष्ठे दर्शितम् तथाच । सपिण्डमरणजननादिकृतं कालविशेषेऽशौचम् कालापगमे च तन्नाशः । तच्च चेतननिष्ठम् । बहुधा चास्य शुद्धितत्त्वादौ प्रपञ्चः । वस्तूनामशौचं स्वभावात् यथा मलमूत्रादेः, यत्संसर्गादितरवस्तूनामप्यशौचं शुद्ध्यभावः एवं तेषां संसर्गादिकृतं चेतनादेरशौचं यथा उच्छिष्टचण्डालादिस्पर्शे एवमशौचिक्षाभिकद्रव्यविशेषाणामाप्यशौचम् शुद्ध्यभावः । अथ सपिण्डासपिण्डादिभेदेनाशौचकालविशेषो यथा "जनने मरणे च सप्तमपुरुषपर्य्यन्तं विप्रस्य दशाहः, क्षत्रियस्य द्वादशाहः, वैश्यस्य पञ्चदशाहः, शूद्रस्य मासः । दशमपुरुषपर्य्यन्तं सर्व्ववर्णेषु त्रिरात्रः चतुर्दशपुरुषपर्य्यन्तं पत्नीजन्मनामस्मृतिपर्य्यन्तमेकाहः ततः स्नानमात्रम् । कन्यायाः सपिण्डत्रिपौरुषम् । अथ विदेशस्थाशौचम् । अशौचकालाभ्यन्तरे विदेशस्थस्याशौचश्रवणे शेषाहे शुद्धिः । अशौचकालोत्तरश्रवणे तु ज्ञातिजनानाशौचं नास्त्येव । पुत्रजनने तु सचेलस्नानात् शुद्धिः । मरणाशौचे तु वर्षाभ्यन्तरश्रवणे त्रिरात्रात् शुद्धिः । सचेलस्नानादङ्गास्पृश्यत्वनिवृत्तिः । वर्षोत्तरश्रवणे स्नानेन शुद्धिः सपिण्डानाम् । पुत्रादीनान्तु मातृपितृभर्तृमरणे वर्षोत्तरमेकाहेन शुद्धिः, द्वितीयवर्षे श्रवणे सद्यः । संपूर्णाशौचातिक्रमे त्रिरात्राशौचं न बालाद्याशौचातिक्रमे खण्डाशौचातिक्रमे वा । अथ गर्भस्रावाशौचम् । गर्भस्रावे तु स्त्रीणामेव षण्मासाभ्यन्तरेऽशौचं तच्च लौकिके कर्म्मणि मासदशसंख्यदिनव्यापकं द्वितीयमासावधिमासदशसंख्यदिनाधिकैकदिनात् परं ब्राह्मण्या वैदिककर्म्माधिकारः क्षत्रियाया दिनद्वयात् वैश्यायादिनत्रयात् शूद्रायास्तु दिनषट्कादिति हारलता प्रभृतयः । सप्तमाष्टममासीयगर्भपतने स्त्रीणां संपूर्णाशौचम् निर्गुणसपिण्डानामहोरात्रं यथेष्टाचरणसपिण्डानां त्रिरात्रम् तच्च जातस्य तद्दिनएव मरणे ज्ञेयं द्वितीयदिनादौ तु मरणे नवमादिमासजातबालकवत् । अथ स्त्र्याशौचम् । कन्यायाः जन्मप्रभृतिद्विवर्षाभ्यन्तरमरणे सद्यः शौचं तदुपरि वाग्दानपर्य्यन्तमेकाहः । वाग्दानोत्तरविवाहपर्य्यन्तं भर्त्तृकुले पितृकुले च कन्याया आदन्तजन्ममरणे सद्यः शौचम्, आ चूडादेकरात्रकम्, आ प्रदानात्त्रिरात्रं, स्यादिति विशेषः । दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः शयनादिसंसर्गशून्ययोरपि त्रिरात्रं तथाविधबन्धुसर्गाणामेकरात्रम् सम्बन्धे दशरात्रम् । अथ बालाद्याशौचम् । नवमादिमासजातबालकस्याशौचकालाभ्यन्तरमरणे मातापित्रोरस्पृश्यत्वयुक्तं तदेव जननाशौचं ज्ञातीनान्त्वशौचं नास्ति नवमादिमासदष्टजातयोस्तु कन्यापुत्रयोः पित्रादिसपिण्डानां जननाशौचं संपूर्णम् । पुत्रजन्मनि मुखदर्शनात् पूर्व्वं सचेलस्नानं कृत्वा ब्राह्मणेभ्यश्च यथाशक्ति दत्त्वा बालकाय काञ्चनं दत्त्वा मुखं पश्येत् । ततः पुनः सचेलस्नानम् ।

अन्याशौचमध्येऽपि जातकर्म षष्ठीपूजे कर्त्तव्ये । पुत्रजन्मनिमित्तकं वृद्धिश्राद्धं नाड़ीच्छेदात् पूर्व्वम् अशौचान्ते वा कर्त्तव्यम् । पुत्रकन्याजनने स्त्रीणां स्वजात्युक्तदशाहादितः परं लौकिककर्म्माधिकारः । पुत्रजनने तु वैदिककर्म्माधिकारोविंशतिरात्रोत्तरं स्नानात्, कन्याजनने तु मासोत्तरं स्नानात् ब्राह्मणाः । शूद्रायास्तूभयत्रैव मासोत्तरं स्नानात् शुद्धिः । एतत् सर्व्वं पुत्रकन्ययोर्विद्यमानत्वे बोध्यम् । जननाशौचकालोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे पितोरेकाहः । एवं निर्गुणसोदरस्य, सपिण्डानान्तु सद्यः । षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे पितोरेकाहः सपिण्डानामेकाहः षण्मासोपरि द्विवर्षपर्य्यन्तं पितोरेकाहः । सपिण्डानामकृतचूड़े मृते एकाहः कृतचूड़े त्र्याहः । द्विवर्षोपरि सर्व्वेषामनुपनीतस्य मरणे मासत्रयाधिकषड्वर्षं यावत् त्र्याहः । पञ्चवर्षोपनीतस्य तदानीमपि दशाहः । मासत्रयाधिकषड्वर्षोपरि सर्व्वेषां दशाहः । शूद्राणां तु षण्मासोपरि द्विवर्षाभ्यन्तरे पञ्चाहः । अत्रापि कृतचूड़स्य द्वादशाहः । द्विवर्षोपरि षड्वर्षाभ्यन्तरे द्वादशाहः । अत्रापि दैवात् कृतोद्वाहेऽपि मासः । षड्वर्षोपरि मासः । अत्र मासवर्षपरिगणना सावनेन "स्मृतकादिपरिच्छेदोदिनमासाब्दपास्तथा। मध्यमयहभुक्तिश्च सावनेन प्रकीर्त्तिता" इति सूर्य्यसिद्धान्तात् । अथासपिण्डाशौचं गुरु मातामहमरणे त्रिरात्रं भगिनीमातुलानीमातुलपितृष्वसृमातृष्वसृगुर्व्वङ्गनामातामहीमरणे पञ्चिणी । श्वश्रूश्वशुरयोर्भिन्नग्रामस्थयोर्मरणेऽहोरात्रम् । आचार्य्यपत्नी पुत्रयोरुपाध्यायस्य मातृवैमातृयोस्तु श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणेऽहोरात्रं मातृष्वस्रीयपितृष्वस्रीयमातुलपुत्रभागिनेयमरणे पञ्चिणी । पितामहभगिनीपुत्रपितामहीभ्रातृतद्भगिनीपुत्ररूपपितृबान्धवत्रयमरणे पञ्चिणी । मातामहभगिनीपुत्रमातामहीभगिनीपुत्रमातामहीभ्रातृपुत्ररूपमातृबान्धवत्रयमरणेऽहोरात्रम् । एकग्रामवासिगोत्रजमरणेऽहोरात्रम् औरसव्यतिरिक्तपुत्रजननमरणयोः परपूर्व्वभार्य्याप्रसवमरणयोश्च त्रिरात्रम् । सजातीयपुरुषान्तरसंगृहीतस्वभार्य्यामरणे त्रिरात्रम् । मातृष्वसृपितृष्वसृमातुलभगिनीपुत्राणां गृहस्थितानामाचार्य्यस्य च मरणे त्रिरात्रम् । श्वश्रूश्वशुरयोःसन्निधिमरणे त्रिरात्रं श्वश्रूश्वशुरयोरेकग्रामस्थितयोर्म्मरणे पञ्चिणी । प्रथममन्येनोढा तेनैव जनितपुत्रा पुत्रसहितैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्रा तयोः पुत्रयोर्यथासम्भवं प्रसवमरणयोर्द्वितीयपुत्रपितुश्च त्रिरात्रं तत्सपिण्डानामेकरात्रं तथाविधपुत्रयोः परस्परप्रसवमरणयोर्मातृजात्युक्तमशौचम् । दौहित्रमरणे पञ्चिणी । पितृमातृमरणे जड़ानां कनीयसां त्रिरात्रम् । यदि मातृष्वस्रादीनां दहनवहने करोति तदा त्रिरात्रम् । मातामहादीनां त्रिरात्राभ्यन्तरमरणश्रवणे तच्छेषेण शुद्धिः । तत्तत्कालोत्तरश्रवणे तु नाशौचं किन्त्वाचारात् स्नानम् । अथ म्लेच्छविशेषाशौचम् । शास्त्रानुमतवृद्धिपूर्व्वकात्मघातिनोनाशौचादि । शास्त्रानुमत्याऽनशनादिकृतस्य प्रमादादनशनाशनिवह्निजलोच्चदेशप्रपतनसंग्रामगृद्धिदंष्ट्रिनखिव्याल विषचाण्डालचौरहृतस्य त्रिरात्रम् । गृद्ध्रादिभिःखिद्या च क्रीड़ां कुर्व्वतः प्रमादहतस्यापि नाशौचादि । नागविप्रियकारित्वेन उद्धतस्य मरणोद्देशेन प्रवृत्तस्य विद्युद्धतस्य च चौर्य्यादिदोषेण राज्ञा हतस्य च कलहं कृत्वा चाण्डालादौरसमानैर्हतस्य च व्याधिजनकौषधस्य विषस्य वह्नेश्च दातृमरणे पाषण्डप्रायाश्रितस्य च नित्यं परापकारिणश्च क्रोधात् स्वयं प्रायोविषवह्निशस्त्रोद्बन्धनजलगिरिवृक्षप्रपातैर्हतस्य चर्म्मसास्यादिमयपात्रनिर्म्मातुर्विप्रादेश्च मनुष्यवधस्थानाधिकारिणश्च कण्ठदेशोत्पन्नभगरोगस्य पुंस्कर्म्माशक्तनपुंसकस्य च ब्राह्मणविषयापराधकरणान्निहतस्य च बुद्धिपूर्व्वकब्राह्मणहतस्य च महापातकिनश्च एवंविधपतितानां न दाहादिकं कार्य्यम् । तत्कृत्वा तप्तकृच्छ्रद्वयं कुर्य्यात् । म्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थं हतस्य विप्रादेर्दाहादिकमस्त्येव । अकृतप्रायश्चित्तस्य गलत्कुष्ठिनोन दाहादिकं कार्य्यं शस्त्रेणाभिमुखहतस्य सद्यः शौचं दाहादि च । गवार्थे ब्राह्मणार्थे वा दण्डेन युद्धहतस्याहोरात्रमशौचम् । नृपतिरहितयुद्धे लगुड़ादिहतस्य पराङ्मुखहतस्य त्रिरात्रम् । गोविप्रपालनेऽभिमुखपराङ्मुखत्वाभ्यां हतस्य सद्यस्त्रिरात्रं । शस्त्रघातेतरक्षते सप्ताहादूर्द्धं मरणे सम्पूर्णं, शस्त्रघाते त्र्यहादूर्द्धं च प्रकृताशौचम् । शुद्धि० त० । एतत्प्रमाणानि तत्रैव तु सन्त्येतानि । "मातृवद्वर्णसङ्कराः" इत्युक्तेर्मूर्द्धावसिक्ताम्बष्ठादीनां मनुलोमजानां मातृवर्णानुसारेणाशौचम् प्रतिलोमजानां तु "शूद्रेण तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः" इत्युक्तेः शूद्रतुल्याशौचमिति रघुनन्दनादयः । आचारस्तु मातृतुल्यतया दृश्यते अतएव चण्डालादीनां दशाहाशौचाचारः । देवतामन्त्रादिदातुर्मरणे त्रिरात्रम् । वेदाङ्गादि शास्त्राध्यापकस्य तथाविधशिष्यस्य च मरणे एकाहः "गृहीतो देवता मन्त्रः सावित्रीमृषयं कृतम्। यस्मात्तस्य त्रिरात्रं स्याद् ब्रह्मविद्या ह्यहोयतः" इति "उपनीयाध्यापकोयस्त्रिभिरपि

त्रिरात्रकम्। वेदवेदाङ्गशास्त्राणां व्याख्यानं शिक्षितं यतः। ज्ञानं प्रतिष्ठितं येन वेदाभ्यासोयतः कृतः। तस्मिन्मृते चैकरात्रं गुरोःशिष्ये तथैव" च मत्स्यसूक्तोक्तेः दत्तक पुत्रस्य ग्रहीत्रादिकुले त्रिरात्रम् जनककुलेऽशौचाभावः। तत्रायं विशेषः। सपिण्डदत्तकस्यापि त्रिरात्रं वाचनिकं तत्पुत्रादीनां तु संपूर्णे मिति। असपिण्डदत्तकस्य तत्पुत्राणाञ्च त्रिरात्रमिति बहवः सपिण्डासपिण्डदत्तकतत्पुत्राणां त्रिरात्रमिति "भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्रयहाशौचस्य भागिनः" इत्युक्तेरिति दत्तकमीमांसादयः। ग्रवानुगमनाशौचम्। ब्राह्मणस्यवस्यानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः। क्षत्रियस्यैकाहेन, वैश्यस्य द्व्यहेन, शूद्रस्य प्राणायामशतेन दिनत्रयेण च शुद्धिः। प्रमादाच्छूद्रवानुगमने जलावगाहाग्निस्पर्शघृतप्राशनैः शुद्धिः। अनाथब्राह्मणश्च धर्मबुद्ध्या दहनवहनयोः स्नानघृतप्राशनाभ्यां सद्यः शौचम्। लोभेन सजातीयदाहे स्वजात्युक्ताशौचम्। असजातीयग्रवस्य दहनवहनस्पर्शैः ग्रवजात्युक्ताशौचम्। स्नेहादसम्बन्धिदाहकविप्रस्य तद्गृहवासे त्रिरात्रं तत्कुलान्नभोजने दशरात्रं तद्गृहवासे तदन्नाभोजने चाहोरात्रं विशेषवचनाभावे सम्बन्धिनोमातुलादेरस्नेहेनापि अदाहे त्रिरात्रं चिताधूमसेवने सचेलस्नानं मृते शूद्रेऽस्थिसञ्चयनकालाभ्यन्तरे तद्गृहं गत्वाऽश्रुपातने विप्रस्य त्रिरात्रमशौचं, स्थानान्तरे विशेषवचनाभावेऽहोरात्रं तद्गृहे तदूर्द्धं मासाभ्यन्तरेऽहोरात्रं सचेलस्नानञ्च। सजातेर्द्विवसेनैव क्षत्रियवैश्ययोर्द्व्यहेन ब्राह्मणः शुध्यति शूद्रस्तु स्पर्शं विनानुगमने सर्वत्र नक्तेन। मृतस्य शूद्रस्य बान्धवैः सह रोदनरहितविलापमात्रेऽहोरात्रेण। अस्थिसञ्चयनकालश्च ब्राह्मणस्य चतुरहः शूद्रस्य दशाहः। तत्राहाशौचे द्वितीयाहः। मरणाशौचे विप्रस्य चतुर्थाहेऽस्पृश्यतानिवृत्तिः। शूद्रस्य दशमदिने सर्वस्य खण्डाशौचकाले विभागकालेन अतिक्रान्ताशौचे सचेलस्नानेन जनने तु सपिण्डानां स्पृश्यतैव। पुत्रोत्पत्तौ स्नानात् पितुः स्पृश्यत्वं एवं विमातृणामपि। एवं सूतिकास्पर्शे पितृविमातृणाञ्च सूतिकातुल्यकालात्स्पृश्यत्वम्। अन्येषां स्नानमात्रं कन्या पुत्रजनने मातुर्द्विरात्रसङ्कात्स्पृश्यत्वं शूद्रायास्तु दशरात्रमस्पृश्यत्वम्। अशौचकालादि विषये च प्रायोनिबन्धकर्तृणां मतभेदोऽस्ति बाहुल्यभयात् तन्न लिखितम् स्वस्वदेशप्रचलितनिबन्धानुसारेण तदवसेयम्। अशौचे तु वर्षादि विशेषादौ दश पञ्च हारलतायां दक्षेणोक्ताः यथा "सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा। षड्दश द्वादशाहश्च पक्षोमासस्तथैव च। मरणान्तं तथा चान्यत् दश पञ्चास्तु सूतके"। तत्र मरणान्तं जननमरणभिन्ननिमित्तम्। यथा "क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याऽऽशुमरणान्तमशौचकम्" शु०त० स्मृतिः। "अस्नात्वा चाप्यभुक्त्वा च अदत्त्वाऽन्नं तथा द्विजः। एवंविधस्य विप्रस्य सर्व्वदा सूतकं भवेत्" दक्षः "अग्न्यपूर्व्वा यस्य गेहे भार्य्या स्यात्तस्य नित्यशः। अशौचं सर्व्वकार्य्येषु देहे भवति सर्व्वदेति" नि०सि०स्मृतिः "मरणान्तपक्षस्तु निन्द्यार्थवादपरः "नामधारकविप्रस्तु दशाहं सूतकी भवेदिति" माधवधृतवचने नामधारकविप्रस्यापि दशाहाशौचविधानात्" नि०सि०। दासाद्यशौचे विशेषः तत्र दासाः पञ्चदशधा दासशब्दे वक्ष्यमाणास्तेषु गर्भदासस्य सपिण्डान्तरजननमरणयोः स्वामिकार्य्ये सद्यः शौचं भक्तदासस्य त्र्यहः "सद्यःशुध्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः" नि०सि०स्मृत्युक्तेः कर्म्मकरदासानां विशेषः "मूल्यैः कर्म्मकराः शूद्रा दासोदासास्तथैव च। स्नाने शरीरसंस्कारे स्पृष्टकर्मसु दूषिताः" भाता० उक्तेः। दत्तदासदासादीनां तु, "दासी दासस्य सर्व्वोवै यस्य वर्षस्य यो भवेत्। तद्वर्षस्य भवेच्छौचं दासा मासन्तु सूतकम्" अङ्गि० "स्वामिशौचेन दासाद्याः स्पृश्याः मासात्तु कर्म्मसु। योग्याः स्युर्मासतोदासी सूतके स्पृश्यतामियात्" षट्त्रिं०। दत्तदासादीनां सपिण्डमरणादौ स्वाम्यशौचसमसंख्यकदिनादूर्द्धम् सत्यपि मासाद्यशौचे स्वामिकार्य्ये स्पृश्यतेति हरदत्तः एवमन्तेवासिनामपि। "दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यन्ति मृतसूतके" दक्षः उक्तेः। दासादेः स्वामितत्सपिण्डमरणेऽशौचमाह विष्णुः "पत्नीनां दासानामानुलोम्ये स्वामितुल्यमशौचं मृते स्वामिन्यात्मीयम्" अत्रानुलोम्येनेत्युक्तेः प्रातिलोम्येऽशौचाभाव एव तस्य शास्त्रीयदासत्वाभावात् "वर्षाणामानुलोम्येन दासं न प्रतिलोमत" इति याज्ञ० स्मृत्या प्रातिलोम्येन दासत्वनिषेधात्। "सूतकानां परिच्छेद इत्यादि सू०सि० प्रागुक्तवचनात् सावनदिनस्यैव ग्राह्यता। मितास्तु रात्रौ विभागं ज्ञात्वाद्यभागद्वये चेत् पूर्व्वदिनम्, अन्ये चेत् परदिनमिति आरम्भकाले विशेष उक्तः। प्रागर्द्धरात्रात् प्राग्वा सूर्य्योदयात् पूर्व्वदिनमिति मतान्तरम्। एतेषु देशाचारतो व्यवस्था। अशौच्यन्नभक्षणेऽपि तत्तुल्य-

मशौचम् । "अथ ब्राह्मणादीनामशौचे यः सद्यदेवान्नमश्नाति तस्य तावदशौचम् यावत्तेषाम्" विष्णुः एतत् ज्ञानतः, अज्ञाने तु "अन्तर्दशाहे भुक्त्वान्नं मृतके सूतकेऽपि वा तस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः" अङ्गिरसोक्तं ज्ञेयम् "उभयत्र दशाहानि कुलस्यान्नं न भुज्यते" इति यमः । उभयत्र जननमरणयोः दशाहानीत्यशौचकालोपलक्षणम् । कुलस्य सूतकयुक्तस्य सम्बन्ध्यन्नमसङ्कल्पैर्नभोक्तव्यम् । सङ्कल्पानां न पुनर्दोषः "सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत्" इति तेनैवोक्तत्वात् अयञ्च निषेधोदात्तभोक्तोरन्यतरेण जननमरणे ज्ञाते सति द्रष्टव्यः । "उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् । एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षड्विंशन्मतदर्शनात् । तथाविवाहादिषु सूतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव । "विवाहोत्सवयज्ञेषु त्वन्तरा सूतसूतके । पूर्वसङ्कल्पितार्थेषु न दोषः परिकीर्त्तितः" इति बृहस्पतिस्मरणात् तथाऽपरोऽपि विशेषः षड्विंशन्मते दर्शितः । "विवाहोत्सवयज्ञेषु त्वन्तरासूतसूतके । परैरन्नं प्रदातव्यमभोक्तव्यञ्च द्विजोत्तमैः । भुञ्जानेषु तु विप्रेषु त्वन्तरा सूतसूतके । अन्यगेहोद्धृताचान्ताः सर्वे ते शुचयः स्मृताः" नि० सि० इति । तथाऽशौचिपरिग्रहत्वेऽपि केषु चित्द्रव्येषु दोषाभावः । यथाह मरीचिः । "लवणे मधुमांसे च पुष्पमूलफलेषु च । शाकशाकटलेष्वेषु दधिसर्पिःपयःसु च । तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः । पक्वेषु चैव सर्वेषु नाशौचं सूतसूतके" इति । शाकन्भक्ष्यं जातम् । अपक्वान्नखण्डखादि । स्वयंग्रह इति स्वयमेव स्वास्यनुज्ञातो गृह्णीयात् न तद्वस्तात् । एतदप्यामान्नविषयं सत्यप्रदत्तविषयञ्च । "अन्नसत्यप्रदत्तानामामसन्नमगर्हितम् । भुक्त्वा पक्वान्नमेतेषांति रात्रन्तु पयः पिबेदिति" अङ्गिरः स्मरणात् । अत्र पक्वशब्दोऽभक्ष्यव्यतिरिक्तौदनादिविषयः । शवसंसर्गनिमित्ताशौचे त्वङ्गिरसा विशेषउक्तः । "अशौचं यस्य संसर्गादापतेद्गृहमेधिनः । क्रियास्तस्यैव लुप्यन्ते गृह्यश्राणाञ्च न तद्भवेदिति" । तदशौचङ्केवलं गृहमेधिन एव न पुनस्तद्गृहमवानां भार्यादीनान्तद्गृह्यश्राणाञ्च भवेदित्यर्थः । एवमेवातिक्रान्ताशौचेऽपि । "संसर्गाद्यस्य चाशौचं यस्यातिक्रान्तकालता । तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित्" षट्त्रिं० नि० सि० । कर्म्मविशेषे कर्म्मारम्भे च तत्तत्कर्म्मणि अशौचाभावः यथोक्तम् । "क्रारवः शिल्पिनो वैद्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः" प्रचेतसा,। लघुविष्णुना च "व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् । प्रारम्भोवरणं यज्ञे संकल्पो व्रतबन्धयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया" वरणमिति ऋत्विक्परम् तेषाञ्च मधुपर्कमश्नतोत्तरमशौचाभावः । "गृहीतमधुमर्कासु यजमानात्तु ऋत्विजः । पश्चादशौचं पतितं न भवेदिति निश्चयः" ब्रह्मपुरा० उक्तेः एतन्मूलकमेव त्रिंशच्छ्लोक्यां तत्तत्कार्य्येषु अशौचाभाववचनम् यथा "तत्तत्कार्य्येषु सत्विग्व्रतिग्रहपूतपवहीक्षितर्त्विक्स्वदेशभ्रंशापत्स्वध्वनेकश्रुतिपठनभिषक्कृषिबल्यप्रातुराणाम् । संप्रारब्धेषु दानोपनयनयजनश्राद्धव्रतप्रतिष्ठाचूडातीर्थाङ्गयात्राजपपरिणयनाद्युत्सवेष्वेतदेव" "तीर्थेति आकस्मिकतीर्थप्राप्तौ तदङ्गं श्राद्धमशौचे कर्त्तव्यम् "विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत् कर्म्म यत्रादि कारयेत्" पैठी० उक्तेः यात्रा रथयात्रादि । जपः पुरश्चरणादि संकल्पितस्तोत्रपाठादिश्च । व्रती संकल्पेन गृहीतव्रतादिः "गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति" ब्राह्मोक्तेः "वरं प्राणान् परित्यक्तुं न खण्डनं शिरसोऽपि वा नत्वनभ्यर्च्य भोक्तव्यं भगवन्तं त्रिलोचनम्" इत्युक्तनियमवतो देवपूजायामधिकारः । कृतनियमविषया "शिवविष्णुर्चनं दीक्षा यस्य चाग्निपरिग्रहः । औतकर्म्माणि कुर्व्वीत स्नातः शुद्धिमवाप्नुयात्" यमोक्तिः "जपो देवार्चनविधिः कार्य्यो दीक्षान्वितैर्नरैः नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम्" शुक्लावली च । "अथ सूतकिनः पूजां वक्ष्याम्यागमचोदिताम् । स्नात्वा निर्वर्त्त्य नित्यञ्च मानसा क्रियया हि वै । बाह्यपूजाक्रमेणैव ध्यानयोगेन पूजयेत्" शारदा । मानसजपे तु अकृतनियमस्यापि अशुचेरप्यधिकारः "अशुचिर्वा शुचिर्वापि गच्छन् तिष्ठंस्तथा स्वपन् । मन्त्रैकस्मरणोविद्वान् मनसैव समभ्यसेत् "रामार्चनचन्द्रिकोक्तेः "मानसमप्यशुचीति" वचनं तु पठनपाठनाविषयम् । तारादिविषये तु अकृतनियमस्याप्यधिकारः "तारायाश्चैव काल्याश्च त्रिपुराया विशेषतः । जनने मरणे चैव न त्यजेयुर्जपार्चनम्" इति तन्त्रोक्तेः । अथाशौचे नियमाः नि० सि० याज्ञवल्क्यः "इति संश्रुत्य गच्छेयुर्गेहं बालपुरस्कराः । विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः । आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् । प्रविशेयुः समासाद्य क्रत्वाश्मानि पदं शनैः" । "प्रवेशनादर्कं

कर्म प्रेतसंस्पर्शिनामपि" नि० सि०। "क्रीतलब्धाशनाभ्यौ स्वपेयुस्ते पृथक्क्षितौ या० इदङ्घाद्योऽङ्ग। यथाशुद्धि" तत्त्वे वैजवापः "शमीमालभन्ते "शमी मे पापं शमयत्विति" अश्मानमालभन्ते "अश्मेव स्थिरोभूयासमिति" अग्निम्- "अग्निर्नःशर्म यच्छत्विति" ज्योगित्यन्तरा गामजमुपस्पृशन्तः क्रीत्वा लब्ध्वावान्यगेहादेकाह्नमलवणमेकरात्रं दिवाभोक्तव्यं 'त्रिरात्रं च कर्म्मोपरमणम्" क्रीताद्यशनमुपवासाश्चक्ष। आश्वलायनस्तु "नेतस्यां रात्र्यामन्नं पचेरंस्त्रिरात्रमक्षारलवणाशिनः क्षुद्वादशरात्रं चेत्याह महागुरुषु"। अशौचे रत्नाकरे आपस्तम्बः "भार्यां परमगुरुसंस्थायां चाकालभोजनानि कुवीरन्" यदा स्मृतिः परदिने तावत्कालमित्यर्थः। बृहस्पतिः "अधःशय्यासना दीना मलिना भोगवर्जिताः। अक्षारलवणाह्नाः स्युर्लब्ध्वक्रीताशनास्तथा" अक्षारलवणशब्देऽक्षारलवणशब्दार्थ उक्तः। भोगोऽभ्यङ्गताम्बूलादिः "तैलाभ्यङ्गो वान्नमाशानामङ्गसंवाहनञ्च यत्। तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः मार्क० पुरा० वाक्यन्तु अन्यदिनविषयम् "अशौचान्ते तिलकल्कैः स्नाता गृहं प्रविशेयुरिति विष्णूक्तेः सपिण्डानामस्थिसञ्चयनादूर्द्धं भोगोऽप्यङ्गः विष्णु० पु०। "शय्यासनोपभोगस्तु सपिण्डानामपीष्यते अस्थिसञ्चयनादूर्द्धं संयोगस्तु न योषिताम्" तिलान् ददत पानीयं दीपं ददत जाग्रतः। ज्ञातिभिः सह भोक्तव्य मेतत् प्रेतेषु दुर्लभम्" भारतम्। भोजनं च दिवैव। दिवा चैव च भोक्तव्यममांसं मनुजर्षभेत्यत्रोः प्रागुक्तवैजवापोक्तेश्च। "क्रीत्वा लब्ध्वा वा दिवाऽन्नमश्नीयुः" पारस्करोक्तेश्च अशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान्" आदि पुरा० ज्ञातिभिः सह भोजनञ्च तृतीयादिदिनपरम्। प्रथमेऽङ्गि तृतीये च सप्तमे दशमे तथा। ज्ञातिभिः सह भोक्तव्यमिति" मरीच्युक्तेः। "मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ" मनुः। लवणक्षीरमाषान्नापूपमांसानि पायसम्। वर्ज्ज्येदाहृताग्नेषु बालवृद्धातुरैर्विना" देवजानीयकारिः। "मृतस्य मांसानि न भक्षयेयुरा प्रदानात्" गौतः। "अधरुत्तरे तत्र ब्रह्मनन्नन्त आसीरन्" वसिष्ठः अशौचे पीठादिनिषेधात् अधकाले उपवेशार्थं कटस्तरः कार्य्यः "पाणिषु क्षुण्मयेषु पर्णपुटेषु वा ऽश्नीरन्" हारीतः। "उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य चैवहि" मरीचिः। अन्यदिने विशेषः "यस्य यस्य तु वर्णस्य यद्यत् स्यात् पञ्चिमं त्वहः। स तत्र गृहशुद्धिं च वस्त्रशुद्धिं करोत्यपि। ग्रामाद्बहिस्ततोगत्वा प्रेतस्पृष्टे तु वाससी। अन्यानामाश्रितानाञ्च त्यक्त्वा स्नानं करोत्यथ" ब्राह्मम् अत्र तिलकल्कादिस्नानं प्रागुक्तम् अशौचाहेषु सर्व्वदिनेषु वर्ज्जनीयधर्म्मानाह गङ्गः "दानं यज्ञोहोमः स्वाध्यायः पितृकर्म च। प्रेतपिण्डक्रिया वर्ज्जमशौचे विनिवर्त्तते" अत्र विशेषोमिताक्षरायाम् "अशुचित्वेन सकलश्रौतस्मार्त्तकर्म्माधिकारनिवृत्तौ प्रसक्तायां केषुचिदभ्यनुज्ञानार्थ माह। "वैतानौपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्" या०। वितानोऽग्नीनां विस्तारः तत्र भवावैताना स्तेनाग्निसाध्याः अग्निहोत्रदर्शपूर्णमासाद्याः क्रिया उच्यन्ते। प्रतिदिनमुपास्यत इत्युपासनो गृह्योऽग्निस्तत्रभवाः औपासनाः सायम्प्रातर्होमक्रिया उच्यन्ते। ता वैतानोपासना वैदिक्यः क्रियाः कार्याः कथं वैदिकत्वमिति चेत् श्रुतिचोदनात्। तथाहि। "यावज्जीव मग्निहोत्रञ्जुहुयात्" इत्यादि श्रुतिभिरग्निहोत्रादीनां चोदना स्तैव। तथा "अहरहः स्नात्वा कुर्यादह्नाऽभावे केनचिदा काष्ठादिति" स्मृत्यौपासनहोमोऽपि चोद्यते। अत्र च श्रौतत्वविशेषणोपादानात् स्मार्त्तक्रियाणां दानादीनामननुष्ठानङ्गम्यते। अतएव वैयाघ्रपादेनोक्तम्। "स्मार्त्तं कर्म्म परित्यागो राहोरन्यत्र सूतके। औते कर्म्मणि तत्काले स्नातः शुद्धिमवाप्नुयादिति"। श्रौतानाञ्च कार्यत्वाभिधानान्नित्यनैमित्तिकानां करणम्। यथाह पैठीनसिः। "नित्यानि निवर्त्तेरन्नैतानवर्ज्यं शालाग्नौ चैक" इति। नित्यानि निवर्त्तेरन् इत्यविशेषेणाबश्यकानां नित्यनैमित्तिकानाम्निवृत्तौ प्रसक्तायां वैतानवर्जमित्यग्नित्रयसाध्यावश्यकानाम्पर्युदासः। शालाग्नौ चैक इति गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिकः पर्य्युदास उक्तः। अतस्तेष्वशौचं नास्त्येव। काम्यानां पुनःशौचाभावादननुष्ठानम्। मनुनाप्यनेनैवाभिप्रायेणोक्तम्। "प्रत्यूहेन्नाग्निषु क्रिया" इति। अग्निषु क्रिया न प्रत्यूहेदित्यनग्निसाध्यानाम्यज्ञमहायज्ञादीनाम्निवृत्तिः। अत एव संवर्त्तः। "होमन्तत्र प्रकुर्वीत शुष्काद्येन फलेन वा। पञ्चयज्ञविधानन्तु न कुर्यान्मृत्युजन्मनोरिति"। वैश्वदेवस्य अग्निसाध्यत्वेऽपि वचनान्निवृत्तिः "विप्रोदशाहमासीत वैश्वदेवविवर्ज्जित" इति तेनैवोक्तत्वात्। "सूतके कर्मणान्त्यागः सन्ध्यादीनां विधीयत "इतियद्यपि सन्ध्यायानिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकङ्कार्य्यम्। "सूतके सावित्र्या चाञ्जलिमभिमन्त्र्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्यादिति" पैठिनसिस्मरणात्। यद्यपि वैतानौपासनाःकार्य्या इति सामान्येनोक्तं तथाप्यन्येन कारयितव्यम्। "अन्य एतानि कुर्युरिति" पैठीनसिस्मर-

णात्। दक्षस्मृतिनाप्युक्तम्। "स्तूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हापयेच्च तु हापयेत्" इति। तथा आर्त्तत्वेऽपि पिण्डपितृयज्ञश्रावणोकर्म्माश्वयुज्यादिकञ्च नित्योहोमःकार्य्य एव। "सूतके तु समुत्पन्ने आर्त्तङ्कर्म्म कथम्भवेत्"। पिण्डयज्ञं चरुं होममसगोत्रेण कारयेदिति" जातूकर्ण्यस्मरणात्। यद्यपि साङ्गे कर्म्मण्यकर्त्तृत्वन्तथापि स्वद्रव्यत्यागात्मकमधानं स्वयङ्कुर्य्यात् तस्यानन्यनिष्पाद्यत्वात्। अतएवोक्तम्। "श्रौते कर्म्मणि तत्काले स्नातः शुद्धिमवाप्नुयादिति"। यत्पुनः "दानमतिथ्यहोहोमः स्वाध्यायश्च निवर्त्तते" इति होमप्रतिषेधः। स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः" इत्यत्तेन। संध्यादो नामश्रवणादाहापरार्के पुलस्त्यः "संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् सूतके वापि त्यजन् गच्छेदधोद्विजः। सूतके मृतके चैव संध्याकर्म्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायाममथापि द्विजः" यत्तु चन्द्रिकायां जाबालः "सन्ध्यां पञ्च महायज्ञान्नैत्यिकं सूतिकर्म्म च। तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रियेति" यच्च संवर्तः "सूतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयतेः" यच्च विष्णुः पुरा०। "सर्वकालमुपासा तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमात्तुरभीतितः" इति तत् संपूर्णसन्ध्यापरम् "अर्घ्यान्ता मानसी सन्ध्या कृत्यवारिविवर्जितेति" शुद्धिदीपे च्यवनोक्तेः पैठीनसिस्त्वत्र मन्त्रोच्चारणमप्याह "सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्य्यं ध्यायन्नमस्कुर्य्यात्" प्रयोगपरिजाते भरद्वाजोपि "सूतके मृतके कुर्य्यात् प्राणायामममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य्य मार्जयेत्। गायत्रीं सम्यगुच्चार्य्य सूर्य्यायार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यमुपस्थानं न चैवहि" एवं मिताक्षरापरिजातादौ अशौचे सन्ध्याकरणभेदश्लोक्तेः गौड़ानां तदनाचरणमनाचार एव तस्य श्रौतत्वेन स्मृत्या बाधानुचितत्वादिति द्रष्टव्यम्। "अरुणादावस्तमयशौचापवादमाह व्यासः "आर्त्तकर्म्मपरित्यागो रात्रेरन्यत्र सूतके इति" लैङ्गे "सूतके मृतके चैव न दोषो रात्रुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिं न दृश्यते" प्रयोगपारिजाते "दक्षस्मृतिः "कन्याविवाहसंक्रान्तौ सूतकं न कदाचन"। महागुरुनिपातवर्षमध्ये कर्म्मविशेषेऽशौचम्। "स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणम्। प्रथमाब्दे न कुर्वीत महागुरुनिपातने" हेमा० स्मृतिः। महागुरवश्च माता पिता भर्त्ता च अतिगुरुशब्देनोक्ताः। "प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं न वा पैत्र्यं यावत् पूर्णो न वत्सरः" देवी पु० अग्नितर्पणं सूतहोमादि, न त्वाधानं तस्य प्रथमाब्देऽपि विधानात् यथा "पितुः सपिण्डीकरणं वार्षिकं मृतवासरे। आधानाद्युपसंप्राप्तावेतत् प्रागपि वत्सरात्" हेमा० उशः। अग्नितर्पणमित्यत्र अन्यतर्पणमिति शुद्धितत्त्वे पाठः। आधानादीत्यादिपदेन आवश्यकदर्शनिमित्तनित्यकर्म्मणोर्ग्रहणम्। आब्दकौस्तुभे देवी पु० "महातीर्थस्य गमनमुपवासव्रतानि च। संवत्सरे न कुर्वीत महागुरुनिपातने" एतदेकवाक्यतया प्रागुक्तवचने स्नानपदं काम्यतीर्थादिस्नानपरम् महादानसाहचर्य्यात् स्वाध्यायपदमपि काम्यवेदपारायणपरम् "तथैव काम्यं यत् कर्म्म वत्सरात् प्रथमाद्दते" लघुहा० वचनैकवाक्यत्वात् "महागुरुनिधाते तु काम्यं किञ्चित् न चाचरेत्। आर्त्विज्यं ब्रह्मचर्य्यं च श्राद्धं दैवयुतञ्च यत्" कालि० पु० "सपिण्डीकरणादूर्द्धं प्रेतः पार्वणभुग्भवेत्। दर्शेष्टापूर्त्तयोग्यश्च दर्शस्यश्च सदा भवेत्" मत्स्य पु०। दर्शेत्यनेन दर्शनिमित्तक सपिण्डनाभावे नाधिकारीत्यर्थः दर्शस्यश्च सदा भवेदित्यनेन दर्शस्योचितनित्यपञ्चयज्ञेष्वधिकारः। अतएव पितृमरणाशौचोत्तरमेव वैश्वदेवश्राद्धं विहितम्। एवं दर्शश्राद्धाभावे वर्षपर्य्यन्तं तत्तत्कर्म्मण्यशौचमिति स्थिते "प्रेतकर्म्माण्यनिवर्त्त्य चरेन्नाभ्युदयक्रियाम्। आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेदिति" ज्योतिषवाक्यं शुभदमित्युक्त्या शुद्ध्यर्थंचतुर्थाद्यकर्त्तव्यश्राद्धोत्तरं प्राशस्त्यमात्रपरमेव। एतच्चाशौचं वर्षमध्ये आवश्यकदर्शार्थसपिण्डनाभावएव। "अर्वाक् संवत्सरात् दर्शो पूर्णे संवत्सरेऽपि वा" इत्यादि स्मृत्यनुसारेण आवश्यकदर्शनिमित्तसपिण्डापकर्षे तु काम्यादिकर्मकरणयोग्यता। अत्र विशेषमाह लौगाक्षि। "अन्येषां प्रेतकर्म्माणि महागुरुनिपातने। कुर्य्यात् संवत्सरादर्वाक् आब्दमेकं तु वर्जयेत्" प्रेतकर्म्म दाहाद्येकादशाहान्तं तत्राशौचान्तरस्याप्रतिबन्धकत्वात् "आद्यं आब्दमशुद्धोऽपि कुर्य्यादेकादशेऽहनीति निर्ण० सि० धृतस्मृतेः। तेन एकं सपिण्डनं वार्षिकादि च। एवं देवी० पु० वचनेऽपि पैत्रपदं पार्वणसपिण्डनवार्षिकपरम्। अत्रापवादः माधवीये कण्व० "पत्न्याः पुत्रस्य तत्पुत्रभ्रातॄणां स्वसृणेषु च। स्नुषायास्त्वोश्च पितोश्च संघातमरणं यदि। अर्वाग्वदान्माद्यपित्रूर्ध्वं सपिण्डमाचरेत्" लौगा० "पत्नीपुत्रस्तथा पौत्रो भ्राता तत्पुत्रकोऽपि। पितरौ च यदेकस्मिन् म्रियेरन् वासरे तदा। आद्यमेकादशे कुर्य्यात् त्रिपक्षे तु सपिण्डनम्" इदम् एकदिनमरणविषयमेव "महागुरुनिपाते तु प्रेतकार्य्यं यथाविधि। कुर्य्यात् संवत्-

सरादूर्ध्वमेकोद्दिष्टं न पार्वणम्" इति धवलनिबन्धवाक्यात्। "माता चैव तथा भ्राता भार्य्या पुत्रस्तथा स्नुषा। एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः" इति भगुवचनं भिन्नदिनमरणेऽपि पितुर्मृतावन्यस्य सपिण्डनं न कार्य्यमेषामेव कार्य्यमित्येतत्परमिति नि०सि०। "पितर्य्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते। मातर्य्यपि च दत्तायां पितृश्राद्धादृते समाम्" माध० वृद्ध० वचनन्तु वार्षिकश्राद्धपरम् मातुः मृते इत्याकर्षः मातरं पितरं च विना अन्यस्य श्राद्धात् वार्षिकश्राद्धात् समां व्याप्य निवर्त्तते इत्यर्थः। "अन्यश्राद्धं पराह्णे च गन्धमाल्ये च मैथुनम्। वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः" देवलवचने अन्यपदं भृगुवचनोक्तमातृश्राद्धिभिन्नपरम्। अन्नपदञ्च खिन्नान्नपरं "भिक्षोऽस्थौ भक्तमन्नोऽन्नमित्यमरोक्तेः "खिन्नमन्नमुदाहृतम्" इत्युक्तेश्च न तु परस्वामिकामान्नमात्रपरम् अन्नशब्देन रूढ्या परिभाषया च सिद्धान्नस्यैव भक्षितत्वापत्यापकत्वात् आमान्नस्य लक्ष्यार्थतया विलम्बेनोपस्थितेश्च। एवमेवाचारः "विशेषतः शिवापूजां प्रकीर्तयपितृको नरः। यावत् वत्सरपर्य्यन्तं मनसाऽपि न चिन्तयेत्" कालिकापु० वाक्यं वार्षिकदुर्गापूजाविषयं नित्यपूजायाः कर्त्तव्यतायाः दशाहमध्येऽपि प्रागुक्तेः। "द्वयोरेव महागुर्व्वोरुद्देकमशौचकम्। नान्येषामधिकाशौचं स्वजातिविहितात् किलेति" श्राद्धको० धृतजातू० वचनं तु पुरुषविषयम्। स्त्रीणां भर्त्तुर्महागुरुतायाः सर्व्वसम्मतत्वेन तन्मरणे अधिकाशौचस्योचितत्वात् अतएव "महागुरुविपत्तिषु इत्यादिना सामान्यतो वक्ष्यवचनमुपात्तम्। "गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते" हेमा०भवि०पु०। तीर्थश्राद्धं गयाश्राद्धम् श्राद्धमन्यच्च पैतृकम्। अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु तिथ्य० गरु० पु०। इदं वृद्ध्यर्थसपिण्डनाभावे। वृद्धौ सपिण्डनाप्रकर्षे तु वर्षमध्येऽपि दर्शादिकं कार्य्यमेव "पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम्" छन्दोगप०वचनात् "सपिण्डीकरणादूर्द्धं नरः पार्व्वणभुग्भवेत्" मात्स्यात् "ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते। विन्दते पितृलोकं च ततः श्राद्धं प्रवर्त्तते" इति हारीतवचनाच्चेति शूलपाणि०। "उद्वाहश्चोपनयनं प्रथमेऽब्दे महीपते!। कृते सपिण्डनेऽप्यूर्द्धमस्थां चोद्वरणं त्यजेत्। तथापि कर्त्तुमिच्छन्ति त्रीणि चैतानि वै सुताः। मासिकान्यवशिष्टानि चापकृष्य चरेत् पुनः" ब्रह्म वै०पु०। अतएव बोध्यं वृद्धिं विना कुलधर्म्मैकपुत्रत्वादिवशतः वर्षमध्ये सपिण्डनापकर्षेऽपि पितृत्वप्राप्तिर्वर्षान्तएव "कृते सपिण्डीकरणे नरः संवत्सरात् परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" विष्णु ध०उक्तेः "अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं भवेत्। प्रेतत्वमपि तस्यापि विज्ञेयं वत्सरं परम्।" इत्यग्निपु०उक्तेश्च। तेन एतद्विषये महागुरूणां प्रेतत्वसत्त्वेन विवाहोपनयनादौ दैवपैत्रेषु च नाधिकारः वृद्धिनिमित्ते सपिण्डने संवत्सरप्राप्त्यपि प्रेतत्वविमुक्तिरूपेण सर्व्वत्राधिकारः। "अर्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपिवा। ये सपिण्डीकृताः प्रेता न तेषां च पृथक्क्रिया" भाता० वाक्ये पूर्णवत्सरस्येव वृद्धारभ्य कालस्यापि प्रेतत्वविमोचनहेतुत्वोक्तेः तथात्वम्। यतः सपिण्डीकृता अतो न प्रेताः प्रेतपदप्रतिपाद्या विमुक्तप्रेतभावा इत्यर्थः। तत्र विशेषः। "अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम्। प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्वित्तिमान् सुतः" मदनपारिजातधृतवचनम्। 'भक्तिमान् भक्त्याख्यश्राद्धकारीति मदनपारिजातादयः। 'भक्तिश्राद्धं तु तिस्रस्त्रीसेतौ उक्तम् तच्च गयाश्राद्धादिपक्षेतौ अस्माभिर्दर्शितं ततएवावगन्तव्यम्। एवं ज्ञताशौचमपि कर्म्म विशेषानर्हत्वप्रयोजकम्। विवरणं ज्ञताशौचशब्दे" ग्रहणेऽशौचं ग्रहणशब्दे वक्ष्यते। रजस्वलाशौचन्तु अशुद्धिशब्दे उक्तप्रायम्। "अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते। तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते" तिथि०त० स्मृतिः।

अशौचसङ्कर अशौचयोः सङ्करः। जननमरणाशौचयोर्मध्ये पुनर्जननामरणाशौचयोः पातेन जनिते अशौचविशेषे। तत्कालभेदो यथा जननाशौचमध्ये जननाशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः। पूर्णाशौचान्त्यदिने पूर्णाशौचान्तरपाते अन्तिमदिनोत्तरदिनद्वयेन शुद्धिः। अन्तिमदिवसोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्पाते सूर्य्योदयावधिदिनत्रयेण शुद्धिः। एवं मरणाशौचेऽपि। वर्द्धितदिनद्वयत्रयाभ्यन्तरे अशौचान्तरपाते पूर्व्वेणैव शुद्धिः। अशौचत्रितयान्तकृत्यमेकदैव। तदुद्वितीयदिनकृत्यं तत्परदिने। अत्र दशमदिनतत्प्रभातयोः पितृमातृभर्त्तृमरणे तु न दिनद्वयत्रयाच्छुद्धिः किन्तु स्वावधेरेव सम्पूर्णाशौचमिति। ज्ञातिजनना शौचमध्ये स्वपुत्रजनने पूर्व्वार्द्धे पूर्व्वेण, परार्द्धे परेण शुद्धिः। एवं ज्ञातिमरणमध्ये पितृमातृभर्तृमरणे पूर्व्वार्द्धे पूर्व्वाशौचकालेन, परार्द्धे पित्राद्यशौचकालेन शुद्धिः। स्वपुत्रजननाशौचान्तिमदिनतत्प्रभातयोर्ज्ञाति-

जनने, पितृमातृभर्तृमरणाशौचान्तिमदिनतत् प्रभातयोस्त्रीतिमरणेऽपि न दिनद्वयत्रयवृद्धिः। स्वपुत्रयोस्तु तथा जनने मातापित्रोस्तु तथा मरणे न द्विनद्वयत्रयवृद्धिः। जननाशौचयोस्तु सन्निपाते पूर्व्वार्द्धे जातोदकाशौचाभ्यन्तरे मृतस्तदा सपिण्डानां सद्यः शौचेन पूर्व्वाशौचस्य नाशः। तन्नाशादेव परार्द्धजातमातापितृव्यतिरिक्तानां परजननाशौचस्य निवृत्तिः। परजातमरणे तु न तथा तस्य पूर्वजननावधिस्थायित्वादिति गुरुचरणाः। एवं द्वितीयजातस्य पित्रोस्तु पूर्व्वार्द्धे जातमरणे पूर्व्वाशौचकालावधि अङ्गास्पृश्यत्वयुक्तमशौचं, परार्द्धजातमरणे तु स्वावधिजननाशौचमङ्गास्पृश्यत्वयुक्तमिति। औत्सर्गिकसमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन शुद्धिः। तदन्यकालयोस्तु दीर्घकालाशौचकालेन शुद्धिः। ततश्च पुत्रवत्यां विंशतिरात्राशौचान्त्यदिने पत्युर्मरणे बहुकालेन जनिताशौचकालेन शुद्धिः तथा सपिण्डद्वयजननजातद्वादशाहान्त्यदिने पितृमातृभर्तृमरणेऽपि बहुकालीनाशौचकालेन शुद्धिः। प्रथमदिने सपिण्डमरणद्वये यावदशौचं सर्वगोत्रास्पृश्यत्वयुक्तम् एवं प्रथमाहे सकल्पद्वयरणेऽङ्गास्पृश्यत्वयुक्तं त्रिरात्रम्। तेनैतत् त्रिरात्रं गुरु विदेशमरणादौ त्रिरात्रंतु लघु स्नानेनैवाङ्गास्पृश्यत्वनिवृत्तेः। ततश्चोभयोः सन्निपाते गुरुणैव शुद्धिः। एवं विदेशस्थमृतस्त्रातित्रिरात्राद्विदेशस्थमृतपितृमातृभर्तृत्रिरात्रं गुरु। संपूर्णाशौचे तु अयत्नानामपि यावदशौचमङ्गारलवणाभिलवदर्शनात्। अत्रापि तावत्कालं तथासिद्धत्वात्तत्रापि गुरुणैव शुद्धिः। तुल्यत्रिरात्रयोस्तु सन्निपाते पूर्व्वेणैव शुद्धिः। तथा कन्यापुत्रयमजोत्पत्तौ मातुर्मासेन शुद्धिः। तयोरशौचमध्ये मातुः कन्यामरणे सद्य शुद्धिर्न पुत्रमरणात्, अन्येषान्तु प्रथमजातमरणात् शुद्धिः। न परजातमरणात् एवमन्यङ्गाह्यं सुधीभिः" शुद्धितत्त्वम्।

अशौचान्त पु० अशौचस्यान्तोयत्र। स्वजात्युक्ताशौचावसानाधारे दशमादौ दिने "अशौचान्ताद् द्वितीयेऽह्नि श्रद्धां दद्याद्विलक्षणाम्"। "अशौचान्ताद्द्वितीयेऽह्नि यस्य नोद्वह्यते व्रणः" इति च स्मृतिः। [२तच्छून्ये त्रि०।

अशौर्य्य न० अभावे न० त०। १शौर्य्याभावे अपराक्रमे न० ब०।

अश्न त्रि० अश्नुते व्याप्नोति अश्नाति वा अश—नन्। १व्यापनशीले २भोजनशीले च "ह्नगोनाश्नो अति यज्ञुग्र्यात्" ऋ० १।१७२।२ "अश्नोव्यापकः अशनशीलश्च" भा० "कर्म्मणि ल्युट्। ३व्याप्ते "तस्य भ्राता मध्यमो अस्त्यश्नः" ऋ० १।१६४। १। "अश्नः व्याप्नः भा० ४असुरभेदे पु० सुष्णश्चुष्णः सूर्य्येण स्तवानश्च" ऋ० २।२०।५। "अश्नुते स्वतेजसा सर्वं जगदित्यश्नः कश्चिदसुरः भा०। "अध्वर्य्योयः स्वश्नं जघान" ऋ० २।१४।५।५। करणे ल्युट्। सोमकण्डनप्रस्तरे। "न्यभिर्धूतः सुतोश्नैरव्यो वारैः" ऋ० ८।२।२। अश्नैः अश्मभिः करणभूतैः सुतोऽध्वर्युभिरभिषुतः" भा०। अश्नुतेऽध्वरम्। ६मेघे निरु०।

अश्नीतपिबता स्त्री अश्नीत पिबत इत्युच्यते यस्यां निर्देशक्रियायाम् मयू० स०। भोजनादिनिर्देशक्रियायाम् "अश्नीतपिबतीत्यन्ती प्रहृता स्मरकर्म्मणि" भट्टिः।

अश्मक पु० अश्मेव स्थिरः निश्चलत्वात् इवार्थे कन्। १ऋषिभेदे "वेदस्थानेन वात्स्येन तथाश्मकसुमन्तुना" भा० शा० प०। २दक्षिणदेशस्थे देशभेदे। "गन्तव्योमलयः श्रीमान् पर्व्वतो धातुमण्डित" इत्युपक्रम्य "तथाश्मका पुलिन्दाश्च कलिङ्गाश्च विशेषतः" रा० कि० का०। बृहत्संहितायान्तु स देशः पश्चिमोत्तरस्यां दिशि। "दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालवनमद्राः। अश्मककुलूतनवडस्त्रीराज्यसिंहवनखण्डाः" इति कूर्म्मविभागे उक्तम्" अतएवतत्रापि तन्नामको देशः। तस्य जनपदवाचित्वात् तद्देशवासिषु तद्राजनि च ततः कताण्यो बहुषु लुक्। २तद्देशवासिनि ४तद्राजनि च ब० व०। "साल्वावयवप्रत्यग्रथकन कुलाश्मकादिञ्" पा० सू० साल्वजनपदावयवत्वेनोक्तेः ५साल्वदेशावयवे च साल्वदेशस्य बृह० सं० कूर्म्मविभागे नवसु खण्डेषु मध्यखण्डे उक्तः "भारतवर्षे मध्यात् प्रागादि विभाजिता देशाः भद्रारिमेदमाण्डव्यसाखनीयोल्विहानसंख्याताः" इत्युपक्रम्य "गजाह्वयस्येति मध्यमिदम्" इति नवखण्डे कूर्म्मभागे मध्यखण्डे तस्य स्थितिरुक्ता अतः साल्वावयवनामकोऽश्मकः तदीयदक्षिणप्रदेशस्थः इति गम्यते तेन रामायणवाक्यं तद्विषयकमिति न विरोधः। अश्मके साल्वावयवे भवः इञ् आश्मकिः। तद्देशभवे त्रि० तद्राजनि च बहुषु लुक् आश्मकाः साल्वावयवावश्मकवासिषु तद्राजसु च ब० व०। स्त्रियां न लुक् आश्मकयः। साल्वशब्देऽस्य विवृतिः।

अश्मकदली स्त्री अश्नुते अश्—मनिन् कर्म्म०। काष्ठकदल्याम्।

अश्मकुट्ट पु० अश्मनि प्रस्तरएव धान्यादिकं कुट्टयति कुट्ट—अण्—उप० स०। वानप्रस्थभेदे, तण्डुलादिशून्यत्वेन तण्डुलादेर्विदूषीकरणस्य तत्रैव विधानात्तथात्वम्। "अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोऽपि वा" मनुः। खुल्।

अश्मकुट्टकोऽत्र । "दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः" या० स्मृतिः ।

अश्मकेतु स्त्री अश्मेव केतुरस्य । क्षुद्रपाषाणभेदवृक्षे ।

अश्मगन्धा अश्मन इव गन्धो लेशोऽस्याः । पृश्निपर्णीलक्षणायामासन्नौ लतायाम् । "विषाखशावाश्मगन्धापृश्निपर्ण्यध्यण्डाश्च" कात्या० २०,७,१७, "अश्मगन्धा आसन्निः पृश्निपर्णीलक्षणेति" कर्क० । "न घरं नाश्मगन्धां नाध्यण्डां न पृश्निपर्णीं नाश्वत्थस्यान्तिके कुर्य्यात्" शत० ब्रा० । [मरकतमणौ । राजनि० ।

अश्मगर्भ पु० अश्मेव क्षतो गर्भोऽस्य । "पद्मा इति" ख्याते

अश्मगर्भज पु० अश्मगर्भाज्जायते जन–ड ५त० । मरकतमणौ अश्मयोनिरित्यत्र" राजनि० २प्रस्तरजे वृक्षौ पु० ।

अश्मगुड पु० अश्मनिर्म्मितो गुडः गोलाकारः पदार्थः । प्रस्तरनिर्म्मिते (गुली) प्रसिद्धे युद्धसाधने अस्त्रभेदे स्त्रीत्वमपि "स्थूलान् भुशुण्ड्यश्मगुड़ाः स्थूलाः कार्ष्णायसीस्तथा" भा० द्रो० प० । भुशण्डीनिर्मुक्ता अश्मगुड़ास्तदर्थः ।

अश्मघ्न पु० अश्मानं हन्ति हन–ड । पाषाणभेदवृक्षे ।

अश्मज न० अश्मनो जायते जन–ड ५त० । प्रस्तरजाते १शिलाजतुनि, । अश्मेव जायते जन–ड । २लौहे च ।

अश्मजतु न० अश्मनो जायते जन–तुन् डिच्च । शिलाजतुनि स्वार्थे कन् अश्मजतुकं तत्रैव ।

अश्मजाति स्त्री अश्मनो जातिः सामान्यमस्य । "पद्मा" ख्याते मरकतमणौ । अश्मन इव जातिरस्य । रत्नमात्रे अमरः रत्नानि च । "वज्रं गारुत्मतं पुष्परागो माणिक्यमेव च । इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमेव च । मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव" भाव० प्र० । "मुक्ताफलं हीरकं च वैदूर्यं पद्मरागकम् । पुष्परागं च गोमेदं नीलं गारुत्मतं तथा । प्रवालयुक्तान्येतानि महारत्नानि वै नव" विष्णुध० । अत्र पुष्परागादीनां स्त्रीवत्ताऽपि । अत्र चैषां महारत्नतैतोक्तेः तद्भिन्नानामपि रत्नत्वमस्त्येव यथोक्तं गारुड़े "तेषु रत्नोविषव्याधिव्यालघ्नान्यघहानि च । प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च । वज्रं मुक्ता मणयः पद्मरागाः समरकताश्च प्रोक्ताः । अपि चेन्द्रनीलमणयो वैदूर्याः पुष्परागाश्च । कर्केतनकुरुविल्वौ रुधिराक्षसमन्वितं स्फटिकम् । विद्रुममणिश्च" ।

अश्मदारण पु० अश्मानं दारयति इ–णिच्–ल्यु । पाषाणभेदके टङ्कनाभास्त्रे ।

अश्मदिद्यु त्रि० अतिशयेन द्योतते यङ् लुक् वा० ड विद्यु आयुधम् अश्म व्यापकं अश्ममयं वा दिद्यु यस्य । अश्ममयायुधयुक्ते । "विद्युन्महसो नरो अश्मदिद्यवः" ५,५४।३ । अश्मदिद्युवो व्याप्तायुधाः अश्ममयायुधा वा" भा० ।

अश्मन् पु० अश्नुते व्याप्नोति, संहन्यतेनेन वा कर्त्तरि करणे वा मनिन् । पाषाणे । "अथ यदस्तु संचरित मासीत् सोऽश्म पृश्निरभवत्" शत० ब्रा० । "दृयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना" ऋ० १।१९१।१५ । "अशिश्वकिभ्यां छन्दसि" इत्युक्तेः वेदेऽस्य भूरिप्रयोगः क्वचित् लोकेऽपि "नाराचक्षेपणीयाश्मनिष्पेषपतितानलम्" रघुः । दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः" या० "अश्मानं दृषदं मन्ये मन्ये काष्ठमदूखलम् । अन्धायाश्च सुतं मन्ये यस्य माता न पश्यति" जिनेन्द्रः । २मेघे निरु० तस्माच्चरव्यापकात्वात्तथात्वम् ३भूभिव्यापके पर्व्वते पु० । "अश्मानं चिद्यं बिभिदुः" ऋ० ४,१६,६ । "अश्मानं पर्व्वतं मेघं वा" भा० । "अश्मानं चिच्छवसा दिद्युतः ऋ० ५।३०४। "अश्मानं पर्व्वतम्" भा० । ४व्यापके त्रि० अश्मदिद्युशब्दे उदा० । त०स० उत्तरपदस्थः संज्ञायां जातौ च टचं समासान्तं लभते । संज्ञायाम् पिण्डाश्मः जातौ अरुताश्मः । नित्यसमा० । अश्मना क्षुण्णः आश्मनः । कृत्यादि० चतुरर्थ्यां क । अश्मकः । अश्मादि० चतुरर्थ्यां रः अश्मरः । उत्करा० चतुरर्थ्यां छ । आश्मीयः । तदर्हतीत्यर्थे अश्व । दि० ठण् । आश्मिकः । तत्र कुशल इत्यर्थे आकर्षादि० कन् । अश्मकः । अपत्येशुभ्रा० ढक् । आश्मेयः । अश्वा० गोत्रापत्ये फञ् । आश्मायनः । अश्मनोविकारः अण् टिलोपः आश्मः मयट् च अश्ममयः स्त्रियां ङीप् । अवयवार्थे तु न टिलोपः आश्मन इत्येव ।

अश्मन्त न० अश्मनोऽन्तोऽत्र शक० पररूपम् । १अश्मने क्षेत्रे, २क्षुद्रात्राच्च । अश्मनामन्तः । अश्मन्तोऽत्र ।

अश्मन्तक पु० न० अश्मानमन्तयति अन्त–णिच् ण्वुल् शक० । १चूल्लाम्, २दीपाधारे ३छादने, (आडड़) ख्याते तृणविशेषे च । "शुल्लालाभे तु कर्त्तव्याः कुशाश्मन्तकवल्वजैः" मनुः । ४अम्लोटकवृक्षे, ५अम्लपत्रे ६कोविदारकवृक्षे च पु० ।

अश्मन्मय त्रि० अश्मनोविकारः मयट् वेदे न नलोपः । पाषाणमये स्त्रियां ङीप् । "शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्" ऋ० ४।३०।२०। "लोके तु अश्ममयः । "अजमश्ममयञ्चैव" इति मनुः । [गन्धद्रव्ये ।

अश्मपुष्प न० अश्मन; पुष्पमिव । शिलाजतुनि, शैलेये

अश्मभाल न० अश्मेव भाजयति चूर्णितं करोति । भज-णिच् अण् पृषो० जस्य लत्वम् । द्रव्यचूर्णकारके (हामानदिस्ते) इति ख्याते लौहपात्रभेदे शब्दचन्द्रिका ।

अश्मभिद् पु० अश्मानमुद्भिद्य जायते । पाषाणभेदके वृक्षे । क, अश्मभिदः । अण् अश्मभेदः । खुल् । अश्मभेदकोऽप्यत्र पु० ।

अश्मयोनि पु० अश्मा योनिरस्य । मरकतमणौ ।

अश्मर त्रि० अश्मन्–चतुरर्थ्यां र । प्रस्तरसंबन्धिनि ।

अश्मरथ पु० अश्मेव दुर्भेदो रथोऽस्य । ऋषिभेदे गर्गा० यञ् । आश्मरथ्यः । "अभिव्यक्तेरित्याश्मरथ्यः" शा० सू०

अश्मरी स्त्री अश्मानं राति रा–क गौरा० ङीष् । मूत्रकृच्छ्ररोगे स हि मूत्रद्वारा प्रस्तरमिव कठिनमांसं रेचयति इति तस्य तथात्वम् । तन्निदानादि सुश्रुते उक्तं यथा ।

"अथातोऽश्मरीणां निदानं व्याख्यास्यामः ॥ चतस्रोऽश्मर्यो भवन्ति श्लेष्माधिष्ठानास्तद्यथा श्लेष्मणा वातेन पित्तेन शुक्रेण चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्मूर्छितोऽनुप्रविश्य वस्तिम्, अश्मरीं जनयति तासां पूर्वरूपाणि वस्तिपीडारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥ यथास्वं वेदनावर्णं दुष्टं सान्द्रमधाविलम् । पूर्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ॥ अथ जातासु नाभिवस्तिसेवनीमेहनेष्वन्यतमे मेहतोवेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदं प्रकाशमनाविलं सशिकतं विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति ॥ तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थसुपलिप्याधः परिवृद्धिं प्राप्य वस्तिसुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्व्यथते भिद्यते निस्तुद्यत इव वस्तिर्गुरुः शीतश्च भवति । अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥ पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिसुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातादुष्यते चूष्यते दह्यते पच्यत इव वस्तिरुष्णवातश्च भवति। अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥ वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिसुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीडयति मेढ्रं मंजाति पायुं स्तृणति विशर्दते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण वाऽस्य मेहतो निःसरन्ति । अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता भवति तां वातिकीमिति विद्यात्। प्रायेणैतास्तिस्रोऽश्मर्यो दिवास्वप्नप्रसक्तानाध्यशनशीतस्निग्धगुरुमधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति । तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति ॥ महत्यस्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रश्लथितमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संगृह्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा शुक्रमार्गमावृणोति शुक्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥ भवन्ति चात्र ॥ शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम् ॥ अश्मर्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना ॥ पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः । सा भिन्नमूत्रिवातेन शर्करेत्यभिधीयते ॥ वृत्तीव्रासक्थिसदनं कुक्षिशूलः सवेपथुः । वृषणोर्ध्वगोऽनिलः कार्श्यं दौर्ब्बल्यं पाण्डुगात्रता ॥ अरोचकाविपाकौ तु शर्करास्तै भवन्ति च । मूत्रमार्गप्रवृत्ता सा सक्ता कुर्यादुपद्रवान् ॥ दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमरोचकम् । पाण्डुत्वमुष्णवातश्च वृत्तीनां वृत्तीव्रणं वस्तिम्॥ नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम्। एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः ॥ अलाबा इव रूपेण सिरास्नायुपरिग्रहः। वस्तिर्व्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम् ॥ एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः । मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥ पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः ॥ तर्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥ वृक्कस्तावाम्नोपलभ्यते सुखान्यासां सहस्रशः । नाडीभिरुपनीतस्य मूत्रस्याशयान्तरात् ॥ जायतः खपतश्चैव स निःश्वसनेन पूर्यते । आसुखात्पुलिने न्यस्तः पार्श्वेभ्यः पूर्यते नवः ॥ घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्यते । एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा ॥ मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम् । अम्भु खच्छास्वपि यथा निषिक्तास्तु नवे घटे ॥ कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा । संहन्त्यपो यथा दिव्या मारुतोऽग्निश्च वैद्युतः ॥ तद्वद्बलासं वस्तिस्थमुष्मा संहन्ति सानिलः । मारुते प्रगुणे वस्तौ मूत्रं सम्यक् प्रवर्त्तते ॥ विकारा विविधाश्चापि प्रतिलोमे भवन्ति हि ॥ मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च । मूत्रदोषाश्च ये केचिद्वस्त्यावेव भवन्ति हि" सुश्रु० "अश्मरीं चप-

यत्राश्रु सिकताश्मकरान्वितम्" सुश्रु० । अयञ्च महापापजत्वान्महारोगः । "उन्मादस्वग्दोषो राजयक्ष्मा श्वासोमधुमेहो भगन्दरः । उदरोऽश्मरीत्यष्टौ महारोगाः" शु०त० नार० ।

अश्मरीघ्न पु० अश्मरीं मूत्रकृच्छ्रं हन्ति हन-ट । वरुणवृक्षे

अश्मरीहर पु० अश्मरीं हरति हृ-ट । (हिंगान) देवधान्ये ।

अश्मवत् त्रि० अश्माऽस्त्यत्र मतुप् । पाषाणभूयिष्ठे देशे स्त्रियां ङीप् । तथाविधभूमेर्गुणाश्च । "तत्राश्मवती स्थिरा गुर्व्वी श्यामा कृष्णा वा स्थूलदृक्षशर्करप्राया गुणभूयिष्ठा । स्निग्धा शीतलासहोदका स्निग्धश्यश्लक्ष्णकोमलवृक्षप्राया शुक्लाम्बुगुणभूयिष्ठा नानावर्णा लघ्वश्मवती प्रविरलाल्प पाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा इति" सुश्रुतः ।

अश्मसार पु०न० अश्मनः सार इव । लौहे । "फल्गुदृश्चिकदर्भाश्मसारचूर्णकवारिणा" सुश्रु० । "प्राणाः सत्वरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी" सा०द० । ई ब० । तत्तुल्यकठिने त्रि० ।

अश्महन्मन् न० हन्यतेऽनेन हन-मनिन् हन्म आयुधम् अश्मनिर्म्मितं हन्म । लौहनिर्म्मिते आयुधे "अग्नितस्तेभिर्युवमश्महन्मभिः" ऋ० ७,१०४,५ ।

अश्मादि पु० ईत० । चतुरर्थ्यां पाणिन्युक्तप्रत्ययनिमित्ते शब्दगणे स च गणः अश्मन्, यूथ, जघ, मोन, नद, दर्भ, वृन्द, गुद, खण्ड, नग, शिखा, कोट, ग्राम, कन्द, कान्द, कुल, गह्व, गुड़, कुण्डल, पीन, गुह्य ।

अश्मार्म न० अश्मकारकमर्म्म । (पाथुरे) अश्मरीरोगे ।

अश्मीर पु०न० अश्माऽस्त्यस्य ईरन् । (पाथुरे) अश्मरीरोगे ।

अश्मोत्थ न० अश्मनः उत्तिष्ठति उद्+स्था-क ५ त० । शिलाजतुनि राजनि० ।

अश्र न० अश्नुते नेत्रम् अश-रक् । नेत्रजले "सर्व्वाभिरश्रोत्तरमोचितामिमाम्" कुमा० "नेत्राभ्यामश्रुदुद्गजन्" रामा० । सुखा० अस्त्यर्थे इनि न मतुप् । अश्री अश्रुयुक्ते त्रि० स्त्रियां ङीप् ।

अश्रद्धा स्त्री अभावे न०त० । १श्रद्धाभावे विरोधे न०त० । श्रद्धाविरोधिनि २चित्तवृत्तिभेदे । "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" श्रुतिः "अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" गीता । न०ब० । ३श्रद्धाशून्ये त्रि० । [शून्ये त्रि० ।

अश्रद्धेय त्रि० न०त० । अश्रद्धानर्हे अविश्वसनीये । १अम-

अश्रम पु० अभावे न०त० । १श्रमाभावे अनायासे न०ब० ।

अश्रवण न० अभावे न०त० । १श्रवणाभावे न०ब० । २श्रवणशून्ये त्रि० ३श्रोत्रेन्द्रियशून्ये बधिरे त्रि० ४सर्पे पु० ।

अश्राद्धभोजिन् त्रि० श्राद्धं न भुङ्क्ते भुज-णिनि असमर्थस० । सति भोजने श्राद्धमेव यो भुङ्क्ते तस्मिन् । "अश्राद्धभोजीत्यत्र सति भोजनेऽश्राद्धमेव भुङ्क्ते न श्राद्धमिति नियमः तथात्वे व्रतलोपः स्यात्" दुर्गसिंहः प्रा०त० ।

अश्रान्त त्रि० श्रम-कर्त्तरि न०त० । श्रान्तभिन्ने १श्रमशून्ये २अविरते ३क्रियाविशेषणत्वे न० । "अश्रान्तश्रुतिपाठपूतरसनाविभूतभूरिरत्नवेति नैष० । भावे क्त न०त० । ४अविश्रामे न० ।

अश्रि(श्री) स्त्री अश्नुते संहन्यतेऽनया अश-वङ्क्रिन् । १यष्टादेः कोणे । आश्रीयते संघातार्थम् आ+श्री-"आङि श्रीहनिभ्यां हस्वश्च" उणा० इन् स च ङित् । २खड्गादेरग्रभागे उभयत्र वा ङीप् । "इतस्य हन्तुः कुलिशं कुण्ठितामीवलक्ष्यते" कुमा० वाजपेययूपं प्रकृत्य । "स वा अष्टाश्रिर्भवति तस्मादष्टाश्रिर्भवति" शत०ब्रा० । चतुःपूर्व्वादस्मात् अच्समा० चतुरस्रः । "क्लृप्तोपचारां चतुरश्रवेदीम्" कुमा० योगविभागात् अन्यस्मादप्यच् । तेन त्र्यश्रं षडश्रमित्यादि "आयताश्चतुरश्राश्च त्र्यश्रा मण्डलिनस्तथा" भरतलक्षणे सुश्रुतः "इष्टान्तस्त्र्यश्रपूर्व्वाणां नावाश्राणां पृथक् पृथक्" लीला० । समासान्तविधेरनित्यत्वात् क्वचिन्नाच् । "तिरश्चि हन्ति चतुरश्चिरुग्रः ऋ० १,२५,२,२ । [कप्] शोभाशून्ये ।

अश्री(क) नास्ति श्रीर्यस्य नदीत्वाभावात् न ह्रस्वः तेन वा

अश्रीर त्रि० न श्रीः अश्रीः अस्त्यर्थ० र । १कुत्सितश्रीके "अश्रीर इव जामाता" ऋ० ८,२,२० । "अश्रीरः गुणैर्हीनः कुत्सितः" भा० । २अमङ्गले च । "कथं चिदश्रीरम्" ऋ० ६,२८,६ । "अश्रीरममङ्गलम्" भा० ।

अश्रु न० अश्नुते व्याप्नोति नेत्रमदर्शनाय अश-क्रुन् । नेत्रजले "पपात भूमौ सह धैर्यकाश्रुभिः" दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः" "तमश्रु नेत्रावरणं प्रमृज्य" इति च रघुः । "श्लेष्मास्रु दूषिका खेदः" मनुः ।

अश्रुत त्रि० न०त० । १श्रुतभिन्ने श्रवणाविषयीभूते "येनाश्रुतं श्रुतं भवति येनामतं मतं भवति" छा०उ० श्रूयते स्म श्रुतं शास्त्रं तज्ज्ञानं न०ब० । २शास्त्रज्ञानशून्ये मूर्खे "भाग्य विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्" दा०भा० स्मृतिः ।

अश्रुति स्त्री अभावे न०त० । १श्रवणाभावे न०ब० । २श्रवणशून्ये त्रि० "अश्रुतिमेव तद्दधं गमयति" शत०ब्रा० ।

अश्रुपात पु० ईत० । नेत्रजलपाते क्रन्दने । "न चाश्रुपातः

पिण्डो वा कार्य्यं श्राद्धादिकं शु०त० क्वचित्" ब्रह्मपु०।

अश्रुमुख त्रि० अश्रुपूर्णं मुखं यस्य । नेत्रजलप्लुतमुखे स्त्रियां ङीप् । "पतिघ्नाप्यश्रुमुखी क्षुधकर्षी च क्रोधना अथ०११,११,७। [स्त्रियां ङीप् नेत्रजलयुक्ते ।

अश्रुमालिन् त्रि० अश्रुणा मलते मल–णिनि ३त० ।

अश्रेयस् त्रि० न श्रेयान् । हीनतरे । "अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात्" मनुः । स्त्रियां ङीप् ।

अश्रौत त्रि० श्रुतौ विहितः विरोधे न०त० । श्रुतिविहितविरुद्धे निषिद्धे नास्तिकाचारादौ । २वेदविहितभिन्ने स्मृतिमात्रविहिते च ।

अश्राद्धा स्त्री अभावे न०त० । विकल्पनाभावे १आत्मगर्भाभावे न०ब० । विकल्पनशून्ये गर्भशून्ये २विनीते त्रि० । [च ।

अश्लिष्ट त्रि० न०त० । १असङ्गते २असम्बन्धे २श्लेषशून्ये काव्ये

अश्लील त्रि० नास्ति श्रीर्यस्य कप् रस्य लः । श्रीप्रतिकूले श्रीनाशके । "अश्लीलमेतत् साधूनां यत्र जुह्वत्यमी हविः" मनुः ।

अश्लील न० श्रियं लाति गृह्णाति ला–क रस्य लः, श्री+सिध्मादित्वात् ल वा न०त० । १लज्जादिसम्भ्रमके वाक्ये २व्याख्यभाषायाम् । "भास्करालोकनाश्लील परिवादांश्च वर्ज्जयेत्" या०स्मृ० ३काव्यदोषभेदे न० तच्च त्रिविधं यथा "दुःश्रवं त्रिविधाश्लीलानुचितार्थाप्रयुक्तता" सा०द० अश्लीलत्वं व्रीड़ाजुगुप्सामङ्गलव्यञ्जकत्वात्त्रिधा यथा "दृप्तारिविजये राजन् ! साधनं सुमहत्तव" "प्रससार शनैर्वायुः" । "विनाशे तन्वि ! ते सदा" । "अत्र साधनवायुविनाशशब्दा अश्लीलवाचकाः" सा०द० । तत्र साधनशब्दस्य शिश्नस्यापि वाचकतया व्रीडायाः, वायुशब्दस्यापानवायुवाचकतया जुगुप्साया, विनाशशब्दस्य मरणवाचकतयाऽमङ्गलस्य च द्योतकता । यथाक्रमं च प्रकृते हेतुपवनविरहबोधकतायै प्रयुक्ता अपि ते अश्लीलव्यञ्जकत्वाद्दुष्टाः । ४निन्द्याव्यञ्जके वाक्ये च "यमस्तुत्याश्लीला वा वृक्ततीति" ता०ब्रा० "अश्लीला निन्दारूपा वाक्" भा० न श्रियं लाति ला–क । ५अश्लीके त्रि० । "यैर्वैनमसावश्लीलं वाग् वदति" ता०ब्रा० "अश्लीलमश्लीकरम्" भा० ।

अश्लेषा स्त्री न श्लिष्यति यत्रोलूपक्षेन शिशुना श्लिष–घञ् न०त० । सप्तविंशतिधा विभक्तराशिचक्रस्य नवमे नक्षत्रे तन्नक्षत्रजातस्य शिशोः पित्रादिभिराषण्मासं दर्शनाभावस्याश्लेषायान्तिमशब्देवक्ष्यमाणस्य सूचकतया तस्या अश्लेषात्वम् । तत्स्वरूपादि निरूपणाय सर्व्वतारायां स्वरूपं, संख्याविशेषः, योगतारायाश्च प्रसङ्गादत्राभिधीयन्ते यथाह श्रीपतिः । "१तुरगमुखसदृशं २योनिरूपं ३क्षुराभं ४शकटनिभमथैणस्योत्तमाङ्गेन ५तुल्यम् । ६मणि ७गृह ८शर ९चक्राभानि १०शालोपमं च ११शयनसदृशमन्यच्चात्र १२पर्य्यङ्करूपम् । १३हस्ताकारमजस्रमौक्तिकसमं १४ चान्यत् १५प्रवालोपमम् शिष्ट्रं तोरणवत् १६स्थितं १७वलिनिभं स्यात् कुण्डलाभं १८परम् । क्रुध्यत्केशरिविक्रमेण सदृशं १९शय्या समानं २०परम् चान्यद्दन्तिविलासवत् २१स्थितमतः (अभिजित्) शृङ्गाटकव्यक्ति च । २२तिविक्रमाभञ्च २३हृदङ्गरूपं २४हृत्तं ततोऽन्यद्यमलद्वयाभम् २५ । २६पर्य्यङ्कतुल्यं २७सुरजानुकारमित्येवमश्वादिभचक्ररूपम्" अतोऽङ्गानुसारेणाश्वादीनां रूपाणि ज्ञेयानि । "वक्रिति रूपत्रिषुगुणेन्दुलताग्निभूतवाणाग्निनेत्रशरभूकुनगाग्निरामाः । रुद्राब्धिरामशुचिवेदयतद्वियुग्मदन्ता बुधैर्निगदिताः क्रमयोभतारा:" । यथा तितारार्श्विनो भरणी च । षट्तारा: कृत्तिका । पञ्चतारा रोहिणी । त्रितारा मृगशिरा । एकतारा आर्द्रा, चतुस्तारा पुनर्वसुः त्रितारा पुष्या, पञ्चतारा अश्लेषा मघा च त्रितारा पूर्व्वफल्गुनी द्वितारा उत्तरफल्गुनी पञ्चतारा हस्ता, एकतारा चित्रा, स्वातिश्च सप्ततारा विशाखा, त्रितारा अनुराधा ज्येष्ठा च । एकादशतारा मूला, चतुस्तारा पूर्व्वाषाढ़ा त्रितारा उत्तराषाढ़ा, श्रवणा चतुस्तारा धनिष्ठा शततारा शतभिषा । द्वितारा पूर्व्वभाद्रपदा उत्तरभाद्रपदा च द्वात्रिंशत्तारा रेवती" यथा योगतारा सूर्य्यसि० । "फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढ़योर्द्वयोः । विशाखाश्विनसौम्यानां योगतारोत्तरा" सूता एषाञ्चनक्षत्राणां प्रत्येकं स्वतारासु मुख्या उत्तरा उत्तरदिक्स्था तारा योगतारा । "पश्चिमोत्तरतारा या द्वितीया पश्चिमे स्थिता । हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा" सू०सि० । हस्तनक्षत्रं पञ्चतारात्मकं हस्तपञ्चाङ्गुलिसन्निवेशाकारं ततो नैर्ऋत्यादिगवस्थिता पश्चिमावस्थिततारायाः उत्तरदिगाश्रिततारायाः द्वितीया पूर्व्वोक्तातिरिक्ता पश्चिमे वायव्याश्रिते स्थिता सा हस्तस्य योगतारा ज्ञेया, उत्तरतारासञ्ज्ञा पश्चिमाश्रिता तारा हस्तस्य योगतारा" धनिष्ठायास्तारासु या पश्चिमदिक्स्था सा तस्या योगतारा इति च रङ्गना० । "ज्येष्ठा श्रवणमैत्राणां वार्क्षस्यत्यस्य मध्यमा । भरणाग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा" सू०सि० "ज्येष्ठाश्रवणानुराधानां पुष्यस्य च प्रत्येकं तारात्रयात्मकत्वात् मध्यमतारा योग-

तारा" रत्नमा० । "रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि । तथा प्रत्यवशेषाणां स्थूला स्यात् योगतारका" सू०सि० रोहिणीपुनर्वसुमूलानामश्लेषायाश्च प्रत्येकं स्वतारासु पूर्व्वदिक्स्था तारा योगतारा । अवशिष्टानां आर्द्राचित्रास्वात्यभिजिच्छतताराणां यथायोग्यं स्वतारासु यात्यन्तं स्थूला सा योगतारा नक्षत्रप्रसङ्गात् ब्रह्मादिनक्षत्राणामपि स्थितिस्थानमुक्तं तत्रैव । "पूर्व्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः । प्रजापतिर्द्वयान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः" सू०सि० ब्रह्महृदयस्थानात् पूर्व्वभागे पञ्चभिरंशैः हृषान्तिकटे एकराशिसप्तविंशत्यंशैः प्रजापतिस्तारात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः । अस्य विक्षेपमाह असाविति । असौ ब्रह्मा सौम्येऽत्तरस्यां अष्टत्रिंशैः स्थित इत्यर्थः रङ्गना० । "अपांवत्सस्य चित्राया उत्तरेऽंशैस्तु पञ्चभिः । दृहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे" सू०सि० । "तिष्यपुनर्वसू इन्दे पा०सू० व्याख्यायां सरलायामाभिर्यत् पुनर्वसोर्द्वितारत्वमुक्तं तन्नोरमादिमूलतया प्रामादिकमेव । एतच्छास्त्रालोचनेन पुनर्वसुनक्षत्रस्य चतुस्तारात्मकत्वं पुष्यस्य त्रितारात्मकत्वं तेन बहुत्वे प्राप्ते द्वित्वविधायकं सूत्रं सार्थकमिति द्रष्टव्यम् ।"पादः पुनर्व्वसोरन्त्यः पुष्यो श्लेषा च कर्कट"। ज्योति० नक्षत्राधिपा उक्ताः दृहत्सं० । "अश्वियमदहनकमलजसर्पशम्भूलक्ष्मदितिजोवह्निपितरः । योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः । शक्रोनिर्ऋतिस्तोयं विश्वविरिञ्ची हरिर्विरुणः । अजपादोहिर्बुध्नः पूषा चेतीश्वरा भानाम्" । "चित्राश्लेषास्वातिविशाखाभरणीपित्र्यवह्नित्रिकाः । नातिशस्ताः प्रयाणेषु" ज्यो०त० अस्य क्लीवत्वमपि "अश्लेषवर्ज्जियमपित्र्यविशाखयुक्तं पूर्व्वात्रयं शतभिषा च नवाम्बूडूनि" एतान्यधोमुखगणानि कथितानि नित्यं विद्यार्थभूमिखननेषु च भूषितानि" ज्यो०त० । तथा च नक्षत्रपरत्वे न० तारापरत्वे स्त्रीत्वम् । एवं मूलाश्ववणादीनामपि द्विलिङ्गत्वम् । दृयं तीक्ष्णगणः "तीक्ष्णोऽहिरुद्रेन्द्रयुक्" ज्यो०त० नास्ति श्लेषो यस्य । २असंबन्धे त्रि० । श्लेषः काव्ये नानार्थपरता स नास्ति यत्र । ३श्लेषशून्ये काव्ये न० ।

अश्लेषाज पु० अश्लेषानक्षत्रे जायते जन-ड ऐत० । कोल मत्स्ये तस्याश्लेषाजातत्वात्तथात्वं अश्लेषाजातादयोऽप्यत्र ।

अश्लेषाशान्ति स्त्री अश्लेषाजननिमित्ता शान्तिः शाक०त० । अश्लेषाजननिमित्तशान्तौ । तत्र अश्लेषाजनने दोषमाह" ज्यो०त० । "अश्विनीमघमूलानां गण्डाद्याद्यास्त्रिनाड़िकाः । अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव यवनाः जगुः" मूलेन्द्र्योर्दिवा गण्डोनिशा च पितृसर्पयोः । सन्ध्याद्वये तथा ज्ञेये रेवतीतुरगर्क्षयोः" सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः । आत्मानं मातरं तातं वित्तं हन्ति यथाक्रमम् । सर्वेषां गण्डजातानां परित्यागो विधीयते । तातेनादर्शनं वापि यावत् षण्मासिको भवेत्" ज्यो०त० । त्यागासामर्थ्ये षण्मासपर्य्यन्तं सुखं न पश्येत् शान्त्या सर्वत्र शुभम् । त्रिपञ्चादिघटिकोत्थे दोषबाहुल्यार्थं वस्तुतः सर्वचरणेष्वेव दोषविशेषः यथाह नारदः । "आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी तृतीये । धनं चतुर्थेऽस्य शुभोऽस्य शान्त्या सर्वत्र तत्स्यादहिभे विलोमम्" । सन्ध्यादिविशेषोक्तिरधिकदोषार्था । यथाह ज्योतिर्निबन्धः । "मूलाश्विपित्र्यचरणे प्रथमे च नूनं पौष्णोन्द्र्योश्च फणिनश्च तुरीयपादे । मातुः पितुः स्वपुषोश्च करोति नाशं जातो यदा निशिदिनेऽप्यथ सन्ध्ययोर्वा" । कन्यायां विशेषः विधानपारिजाते । "न बाला हन्ति मूलर्क्षे पितरं मातरं तथा । मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनाम् । मघेन्द्रजाऽग्रजं हन्ति देवरन्तु द्विदेवजा । शान्तिर्वा पुष्कलास्याच्चेत्तर्हि दोषो न कश्चन" । द्विदेवजा अश्विनीजाता तस्याः अश्विनीसुतदेवताकत्वेन तयोश्च द्वित्वात् तथात्वम् । तच्छान्तिश्च "अश्लेषायान्तु जातानां शान्तिं वक्ष्याम्यतः परम् जातस्य द्वादशाहे च शान्तिहोमं समाचरेत् । विभवे पञ्च कुम्भांस्तु दृयं वा तदशक्तितः"इत्यादिना मानवसंहितोक्ता । सा च विधानपारिजाते अश्लेषाशान्तिविधानप्रकरणे दृश्या । तत्फलं च मन्त्रलिङ्गात् ज्ञेयम् मन्त्रो यथा । "अश्लेषाकृत्तजातस्य मातापित्रोर्धनस्य च । भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु । योऽसौ वागीश्वरो देवो दृधिदेवो दृहस्पतिः । मातापित्रोः शिशोश्चैव गण्डदोषं व्यपोहतु । पितरं सर्वभूतानां रक्षन्तु पितरः सदा । सर्पनक्षत्रजातस्य वित्तं ज्ञातिं च बान्धवान्" वि०पा० पुरा० ।

अश्व पु० अश्नुते व्याप्नोति मार्गम् अश-क्वन् । घोटके "गच्छन्नश्वलितवामरवारुमश्वम्" माघः । "जितसिंहभयानागा यत्राश्वा विजयोनयः" कुमा० । "अश्वताद्वाश्वतोवङ्गे वैदेभ्योऽण्डाच्च गर्भतः । साम्नो दृयानासुत्पत्तिः सप्तधा परिकीर्त्तिताः इत्युक्तेश्वानामश्वताद्युत्पत्तिस्थानम् ।

कबोत्पत्तिस्थानसंख्यासाम्याच्च २सप्तसंख्यायाम् "काश्तुल्यवपुर्दृष्टो मिथ्याचारश्च निर्भयः। हादयाङ्गुलमेढ्रश्च दरिद्रस्तु हयो मत" इत्युक्तलक्षणपुरुषभेदे "पद्मिनी यशके तुष्टा हये तुष्टा च हस्तिनीति" रत्न०। अत्र प्रसङ्गात् अश्वानामङ्गविभागविशेषसंज्ञालक्षणादिकमुच्यते जयदत्तकृतादश्वशास्त्रात् सारांशः "अतिप्रसिद्धा जिह्वा तु तस्याः सूना भवेदधः। ऊर्द्धं तालु भवेत्तस्यास्ततोऽग्रे दन्तपीठकम्। ततोदन्ताः समुद्दिष्टा ऊर्द्धदन्ता भवन्त्यधः। चिबुकं चाधरे भागे तेषां प्रोक्तं विचक्षणैः। चिबुकस्योपरिष्टात्तु अधरोष्ठः प्रकीर्त्तितः। चिबुकात्पार्श्वभागे तु हनुर्नामाभिधीयते। कृकाटद्वयं विजानीयात् वक्त्रपार्श्वगतं बुधः। उत्तरोष्ठं प्रवाणाख्यं तदूर्द्धं प्रोथ उच्यते नासाच्छिद्रे तथा पार्श्वे प्रोथस्यैव व्यवस्थिते। नासाच्छिद्रात्तिमध्ये तु घोणाख्या समुदाहृता। घोणापार्श्वगतौ गण्डौ लोरिके च ततःपरम्। नेत्रयोरुत्तरे भागे अश्वपात उदाहृतः। कर्णान्ते चैव नेत्रान्तमपाङ्गं ब्रुवते बुधाः। कनीनिकाख्यो विज्ञेयो यश्च नासासमीपगः। सितासितौ च तन्मध्ये नेत्रयोर्मण्डलं हि तत्। प्रच्छादनं भवेद्वर्त्म चाक्षिकूटमतःपरम्। तस्मादूर्द्धं भ्रुवोर्लेखा ललाटं च तदुत्तरम्। ऊर्द्धं ललाटदेशात्तु केशान्तं च ततः भवः। ततः शिरो विजानीयात् भवादूर्द्धगतं बुधः। शिरःपार्श्वगतौ कर्णौ तयोर्मूलं सकुन्तलम्। अपाङ्गादूर्द्धभ्रुवे चैव शङ्खं विद्याद्विचक्षणः। शङ्खकर्णान्तरे चैव कटाक्षं समुदाहृतम्। विदोमर्म्म विदुश्चैव कर्णस्याधः षड़ङ्गुले। षण्ढावन्ध्यसमीपस्थो निगालः परिकीर्त्तितः। अधस्तले निगालस्य गलमाहुर्मनीषिणः। ततः कण्ठं विजानीयादधोभागे नतं बुधः। ग्रीवा लोकप्रसिद्धा तु तस्याश्चोपरि केशरः। ग्रीवास्कन्धान्तरे चैव वाहं प्राहुर्मनीषिणः। वाहस्योपरि यस्तु खाल्काकसं ककुदं च तत्। ततः पृष्ठं विजानीयादासनं पृष्ठमध्यगम्। अंसके ककुदश्चैव निबन्धः परिकीर्त्तितः। खातासंसादधोबाहू तयोर्बाह्वोः षड़ङ्गुले। मन्दिरः पश्चिमोभागः कलापी जानुनोऽग्रिमः। जानुनश्चाधरे भागे जङ्घां विद्याद्विचक्षणः। जङ्घापार्श्वे कलां विद्यात् सव्यं चैषिकसंज्ञकम्। अग्रतः पालिहस्तः स्यात् पश्चात्कूर्चं उदाहृतः। किणस्तत्रैव मध्यस्थोऽधोभागे च कुट्टकी। खुरसन्धिं ततोविद्यादधोभागे ततः खुरम्। खुरस्य पार्श्वे पार्ष्णिः स्यादग्रभागे नखो भवेत्। खुरस्याधस्तलं चैव मण्डुकी तलमध्यगा। खुरमांसं विजानीयात् चीरकाख्यं विचक्षणः। हृदयात्परतः कुक्षी पार्श्वे तस्य विभागतः। जठरं पार्श्वमध्यस्थं तस्य नाभिश्च मध्यतः। रोमराजीं ततो विद्यान्मूत्रकोशमतःपरम्। आ कक्षाः पश्चिमे भागे पुटौ स्फिचौ च कीर्त्तितौ। पुच्छमूलं च वाहानां भाषते पुच्छमूलतः। तस्याधः कीर्त्तितः वायुः जीवनी च ततः परम्। सुक्कौ च कटिसन्धिं च ततोविद्यात्परं बुधः। अधस्तात्कटिसन्धेस्तु जरुसन्धिरुदाहृतः। सक्थिनी फलसन्धेस्तु जङ्घा पादाभिधायके। ततः स्यूरं विजानीयात्तस्याधोमन्दिरं भवेत्। किणं चैव ततो विद्यान्मन्दिराख्ये सुसंस्थितम्। ततः परं विजानीयात् कालकूर्चं च कुट्टिकम्। खुरान्तसंज्ञं मण्डूकं ततो विद्याद्विचक्षणः। अग्रे जङ्घाद्वयं चैव यत्नो ग्रीवाशिरोमुखम्। पूर्वकायःसमुद्दिष्टः पृष्ठदेशस्तु मध्यमः। आ कटेः पश्चिमे भागे खुरान्तश्चापरं स्मृतम्"।

तेषां लक्षणानि "अशुभैर्लक्षणैर्युक्ता हया न प्रशंसिताः। अतो लक्षणमेवादौ तेषां वक्ष्यामि देहजम। ओष्ठयोः कृकणोश्चैव जिह्वायां दशनेषु च। वक्त्रे तालुनि नासायां गण्डयोर्नेत्रयोस्तथा। ललाटे मस्तके चैव केशे कर्णपुटे तथा। ग्रीवायां केसरे चापि स्कन्धे वक्षसि वाङ्के। जङ्घायां जानुनोश्चाधः कूर्चे पादे तथैव च। पार्श्वयोः पृष्ठभागे च कुक्षौ कक्षां सवालधौ। मेढ्रने शुक्रयोश्चापि तथा चैवोरुहृदये। आवर्त्ते च खुरे पुच्छे गतौ वर्णे स्वरे तथा। महादोषे त्यजेत्तान्यायायां गन्धसत्वयोः। प्रमाणस्यैव वाहानां लक्षणं यत्प्रतिष्ठितम्। शुभाशुभविवेकाय तद्विद्वान्विभिनभिषक्। शालिहोत्रादिभिःसम्यक् त्रिकालज्ञानकोविदैः। आतास्त्रौ पूजितावोष्ठौ बलिहीनौ मृदुत्वचौ। सुप्रोथोत्तरसंस्थं च विपरीतं विवर्जयेत्। कृकणोरुद्गता श्रस्ता जिह्वायां रक्तता तथा। अतश्चान्यद्धि दोषाय न त्वदीर्घा च सा शुभा। घना स्निग्धा सुवद्धा च समा दन्ताः सुशोभनाः। षट्संख्ये बन्धरे वृत्ते तेषु व्यङ्गनसंभवः। आयतं तुङ्गघोणं च निर्मांसं प्रियदर्शनम्। सुबद्धं पूजितं वक्त्रं विपरीतं विगर्हितम्। तालुरक्तं प्रशस्तं च सुपुटे चैव नासिके। नातितनू समौ गण्डौ वाहानां कीर्त्तितौ शुभौ। अत्यन्तनिर्गते चैव सुबद्धे नैव चाविले। प्रशस्ते वाजिनां नेत्रे मध्याभे मलतारके। स्निग्धायते विशाले च श्रेष्ठे मधुनिभाक्षिणी। कनकप्रतिसंकाशे श्रस्ते वाहस्य लोचने। सावर्त्तं च विशालं च अनिम्नं चैव वाजिनः। ललाटं पूजितं प्राहुर्मुनयः शास्त्र-

कोविदाः। शिरः समं तथा वृत्तमावर्त्तद्वयभूषितम्। केशाश्च स्निग्धवर्णैव बहवश्चैव पूजिताः। ऋजुता कर्णयोश्चैव तीक्ष्णता तनुता तथा। अदीर्घरोमता चैव प्रशस्ता विप्रकीर्त्तिता। सुवृत्ताङ्गुलिताश्चैव धन्यां ग्रीवां विदुर्बुधाः। केशरस्य जटाहीनो स्निग्धश्चैव प्रशस्यते। हनुवक्त्रस्य दृढ़श्चैव स्कन्धो-वाहस्य पूजितः। वक्षः प्रशस्तं विपुलं निर्गतं विशरं च तत्। ऋजुवृत्तसमौ बाहू गूढ़ं जानु प्रशस्यते। अवक्रा मांसहीना च वाजिजङ्घा प्रशस्यते। शुभं स्निग्धं सुवृत्तं च समं चैव नतोन्नतम्। कूर्चमेवंविधं विद्याद्धन्यिव्रणविवर्जितम्। दृढ़मण्डलिकायुक्तो वर्त्तुलः श्लिष्टसन्धिकः। खुरः खरखुराकारः प्रशस्तः सुदाहृतः। पार्श्वे चैव समे वृत्ते जङ्घे मांसोपशोभिते। अविलम्बि सुवृत्तं च उदरं चातिपूजितम्। नातिदीर्घं समं पृष्ठं किञ्चिच्च विनतं शुभम्। सुवृत्ता चैव पीना च कटिर्धन्या प्रकीर्त्तिता। स्निग्धस्निग्धायतैर्युक्तं बालैः पुच्छं प्रशस्यते। दक्षणौ च समौ वृत्तौ दक्षस्यावलोमगौ। कृष्णवर्णविहीनं तु मुखं मेहन-मिष्यते। अनुपूर्वं परं चैव शोभनं चोरुकद्वयम्। पूर्व-जङ्घे च जङ्घादि खुरान्तं चापि पश्चिमम्। शालिहोत्रादिभिः प्रोक्तं मुनिभिः पूर्ववेदिभिः"।

आवर्त्तलक्षणम्"विंशतिस्तु शुभाः प्रोक्ताः षट्सप्तत्यशुभाः" स्मृताः। उत्तरोऽप्रमाणस्यात्तत्रावर्त्ताः शुभावहाः। स्निग्धाश्च या प्रोक्ताः सर्वकामफलप्रदाः। त्रयश्चैवाथ चत्वारो वाजिनो-र्यस्य रोमजाः। द्वौ वा ललाटजौ यस्य स तु धन्यतमः स्मृतः। आनुपूर्व्या स्थितास्त्वूर्द्धं ललाटे रोमजास्त्रयः। त्रिवेणी नाम सा ख्याता भर्तुः सर्वार्थसाधिनी। शिरःकेशान्त-योर्मध्ये भ्रुवोनामाभिधीयते। तत्रावर्त्तः स्थितोऽश्वस्य भर्तुर्जयविवर्द्धनः। घण्टाबन्धसमीपस्थो त्रिगालः कीर्त्तितो बुधैः। तस्मिन्देवमणिर्नाम रोमजः शुभकृत् स्मृतः। कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा। आवर्त्ताः पूजिता नित्यं विशेषेण तु मस्तके। आवर्त्ता यस्य चत्वारो वाजिनो वक्त्रसि स्थिताः। एका कण्ठे भवेत् स्निग्धं स धन्यः सर्वकामदः। रम्भे चैव सदा भर्तुः शंसितार्थप्रदोमतः। उपरम्भोद्भवश्चैव रोमजश्चाति पूजितः। शङ्खचक्रगदापद्मशुक्तिवज्रोपमाश्च ये। विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः। अत ऊर्द्धं प्रव-क्ष्यामि रोमजानशुभाय यान्। भर्तुः क्लेशवहान् सर्वा-न्धनप्राणापहारकान्। नासिकापुटयोर्मध्ये प्रदेशः प्रोच्य उच्यते। तत्र भर्तुर्विनाशाय रोमजोऽश्वस्य कीर्त्तितः। ऊर्द्धस्थो नासिकाच्छिद्रात् स्वामिनः क्लेश-दायकः। गण्डजश्चैव भर्तारं हन्यावर्त्तौ दुरासदः। अश्रुपातः सदुद्दिष्टः प्रदेशश्चक्षुषोरधः। तत्रावर्त्तौभवेद्धीनः स्वामिनः कुलनाशनः। अपाङ्गाद्वाङ्गजे चैव प्रदेशः शङ्ख उच्यते। तत्र भर्तुर्विनाशाय भवेद्वाहस्य रोमजः। भ्रुवो देशे समुद्भूत आवर्त्तो नैव पूजितः। सुहृद्वियोगकृत्स्व-स्याङ्गर्तुरर्थावसादकः। सव्यां ग्रीवां शिरां विद्यात्तत्रावर्त्तस्तु कुत्सितः। कक्षयोश्चापि संग्रामे स्वामिनं चाशु घातयेत्। चिबुकस्य समीपस्थो वामदक्षिणभागतः। प्रदेशस्तु हनुर्नाम तत्रावर्त्तौ हि दारुणः। अधरोष्ठस्य चाधस्तु चिबुको हि प्रसिद्धकः। तस्मिन् पापो भवेद्भर्तुः कर्णयोश्चापि रोमजः। कण्ठस्याथ निगालस्य मध्ये वालक उच्यते। तत्रावर्त्तः स्थितः पापः स्कन्धसन्निगतश्च यः। अधस्ताज्जङ्घयो-श्चैव ग्रन्थिः कूर्च इति स्मृतः। तत्रावर्त्तः स्मृतो भर्तुः संग्रामे जीवितान्तकृत्। कूर्चादुदङ्गुलं चोर्ध्वं पार्श्वयोः ककुदा स्मृता। तत्र भर्तुः पराघातो जीवितान्ताय रोमजः। ककुदं वृषभस्येव सुव्यक्तमुपलक्ष्यते। वाजिनो यस्य तत्रस्थ आवर्त्तस्तु विनाशकृत्। ककुदस्य पुरोभागे समीपे बाहु उच्यते। भर्तुः सुतसमेतस्य तस्मिन् नाशाय रोमजाः। काकसे तु हयस्य स्यादावर्त्तो यस्य दारुणः। रणे हतः समं भर्त्रा व्याधैः स विलुप्यते। क्रोडे चैवासने चापि हृदये चैव वाजिनः। आवर्त्ताः स्वामिघाताय भवन्त्येते न संशयः। पार्श्वयोरोमजो यस्य स चाश्वोनयति क्षयम्। सपत्नं चाशु भर्तारं नीहाराम्बु यथाम्बुजम्। कूर्चस्याधःप्रदेशस्तु कुक्षिश्च परिकीर्त्तितः। अधस्यस्तत् वाहस्य जघन्यो जानु-जश्च यः। नाभिजोमुष्कजश्चैव त्रिकजश्च विशेषतः। पुच्छमूलस्थितश्चापि नैव धन्यः प्रकीर्त्तितः। कुक्षौ व्याधिः, क्षयायेव रोमजाः कुक्षिसंभवाः। पायुस्त्रि-बलिमध्यस्था नैव धन्या प्रकीर्त्तिताः। स्फिचिजः खुरजश्चैव यस्यावर्त्तौ हि वाजिनः। लङ्घावर्त्तः स विख्यातो भर्तुः सर्वार्थनाशकः। शतपादीति विख्यातस्तथा वै शुक्लोऽपरः। आवर्त्तश्चैव संघातः पादुकस्यार्द्धपादुकः। शुक्तिश्चैवावलीढ़श्च आवर्त्तः कीर्त्तितोऽष्टधा। वाजिदृक्तगतः सम्यक् शुभाशुभनिवेदकः। शतपादीसमाकारः शतपादीति कीर्त्तितः। जातीसुकुलसंकाशो सुकुलः सुदाहृतः। आवर्त्तो भ्रमितो बालैः संघातो रोमपुञ्जकः। शुक्तिश्च शुक्तिसंस्थानै-रोमभिर्व्यक्तलक्षणैः। एतेषामेव लीढ़स्तु अवलीढ़ः प्रकी र्त्तितः। पादुकः पादुकाकारस्तथाचैवार्द्धपादुकः। बालै-

विशेषसंस्थानैर्निर्दिशेन्मतिमानभिषक् । शास्त्रमार्गानुसारेण यथा प्रोक्तं तपोधनैः एतेषामेव सर्वेषामावर्त्तानां विचक्षणैः । रोमणां तिलकता संज्ञा वाजिलक्षणवेदिभिः । शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः । एवं हेम्ना दहेत्पापं तेन दोषो न दुष्यति । अथ वा वाजिनो मुख्याः ये चाङ्गादिगुणाधिकाः । दत्त्वा आहुराः क्रयेणैव दुरावर्त्तस्तु काकूदी । श्रीवत्सो रोमजश्चैव रोचमानस्तथैव च । अङ्गादी प्रेषली नाम राजरत्नप्रदाः सदा । प्रयाणे मारुतं विद्यात्ललाटे च हुताशनम् । उरसि चाश्विनौ देवौ चन्द्रार्कौ च मूर्द्धनि । रम्भे स्कन्दविशाखौ च उपरम्भे हरीहरौ । इत्येवं पूजिताङ्गे ते दशबन्धास्तु वाजिनः । अथैकेन विहीना ये भवेयुरशुभास्तदा" ।

अथ पुण्ड्रलक्षणम् अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणम् शुभम् । शुक्तिशङ्खगदापद्मखड्गचक्राङ्कुशोपमाः । शिरोललाटं वदनं यः पुण्ड्रो व्याप्य तिष्ठति । स धन्यः पूजितोनित्यं सदुकश्चैव योभवेत् । पर्वतेन्दुपताकाभा ये च रुग्दामसन्निभाः । ते सर्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः । इति पुण्ड्राः समाख्याताः पूर्व्वशास्त्रानुसारतः । अशुभांश्चैव वक्ष्यामि यथायोगं समासतः । काककङ्कबलाकाहिमद्गगोमायुसन्निभाः । असिताः पीतका रक्ताः पुण्ड्रका न च पूजिताः । तिर्य्यगगाश्चैव विच्छिन्नाः शृङ्खलापाशशोभिताः । जिह्वाकृष्णाश्चिह्नानि भस्मवर्णनिभानि च । शूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभप्रदाः । पुण्ड्रकाणि विनश्यन्ति भिन्नवर्णानि वाजिनः" ।

अथ पुष्पलक्षणम् । "आगतं वत्सरन्तस्य ये भवन्त्यन्यवर्णकाः । विन्दवः पुष्पसंज्ञा वाहितात्हितत्वकारकाः । तेषां प्रदेशभेदे च लक्षणं यद्व्यवस्थितम् । तत्तथैव समासेन विस्तरं कीर्त्तयेऽधुना । प्रयाणे च ललाटे च कच्चे मूर्द्धनि कर्णयोः । निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् । स्कन्धे वक्षसि कच्चे च सुभ्रुकयोर्बाहुके मुखे । हनौ पृष्ठे च वाहानां पुष्पं स्वामिहितप्रदम् । नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम् । पुष्पं धन्यतमं प्रोक्तं भर्तुः सर्वार्थसाधकम् । अप्रशस्तानि दृष्टानि मुनिभिर्यानि शास्त्रतः । तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यन्यानि दूषणात् । अधरोष्ठे करे प्रोथे उत्तरोष्ठे तथैव च । घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः । ग्रीवायां चैव वाहे च स्फिक्कणोःस्थूरके स्थिचि । पार्श्वौ क्रोडे च पुष्पाणि निन्दितानीति निश्चयः । रक्तं पीतं तथा कृष्णं पुष्पं सर्वत्र नेष्यते । शुभप्रदेशे सञ्जातं भवेत्साधारणं ततः । पुत्रलाभधनप्राप्तिमारोग्यं विजयं तथा । विद्यात्पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् । सर्वाङ्गपुष्पितो वाहो परित्याज्यो न संशयः" ।

अथ गतिशुभादिलक्षणम् "दूरसृत्क्षिप्य यः पादांस्तान्नागारान् सृणन्निव । पुलं याति शुभं हृष्टो वाजी भद्रगतिस्तु सः । पूजिता हयमातङ्गसिंहशार्दूलगामिनः । अतोऽन्यगतयो नेष्टाः सर्वशुद्धतुरङ्गमाः । संकीर्णा एकतोभद्रा वङ्कभौघविवर्जिताः । अलूना चैव वक्रा च वाजिनां निन्दिता गतिः । षोडशाकोटिकाभिस्तु करवेष्टितजानुभिः । यतं द्विगुणितं गत्वा हस्तानां पुनरेति यः । स शीघ्रगतिरित्युक्तो वाजी धन्यस्तपोधनैः । दशहीना भवन्त्येते मध्यमाधमगा हयाः ।

अथ वर्णभेदेन नामभेदः "श्वेतः कोकाह इत्युक्तः कृष्णः खुग इ उच्यते । पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः । पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः । पीयूषवर्णः सिराहो गर्दभाभः सुरूहकः । नीलो नीलक एवाश्वः तिपूहः कपिलः स्मृतः । शिलहः कपिशो वाजी पाण्डुकेशः सुवालधिः । हलाहश्चित्रकस्तित्पुलाहः श्वेतपीतकः । ईषत्पीतः कुलाहस्तु यो भवेत् कृष्णजानुकः । कृष्णा चास्ये भवेद्रेखा पृष्ठवंशानुगामिनी । उराहः कृष्णजानुस्तु मनाक्पाण्डुस्तु यो भवेत् । वेरुहाणः स्मृतो वाजी पाटलो यः प्रकीर्त्तितः । रक्तपीतकषायोत्थो वर्णजो यस्य दृश्यते । दुकुलाहःस विख्यातो वर्णो वाहस्य देहजः । पूर्वोक्तानां च वर्णानां सुखपुण्ड्रेण वाजिनाम् । ये भवन्ति परे भेदास्तान् अवीम्यनुपूर्वशः । कोकाहः पुण्ड्रको नाखः कोकुराहः प्रकीर्त्तितः । खुराहखरगाहौ च हरिकोहरिराहिकः । कलाहश्चैव वोल्लाहः सिराहः सिङ्गराहकः । कुलाहः कुलुराहस्तु सराहः शुभराहकः । चारुराहो जयेदश्वो वोरराहो न यः स्मृतः । कुलीहो दुरुणाहस्तु युद्धके नैव कीर्त्तितः । तित्पुहस्तित्पुलाहश्च युद्धके नैव कीर्त्तितः । तित्पुहस्तित्पुलाहश्च चित्रलाङ्गश्च यो भवेत्" ।

अथ रोमवर्णभेदेन शुभाशुभलक्षणम् । "यस्य गौराणि पीतानि गात्ररोमाणि वाजिनः । स भर्तुः श्रियमाधत्ते यस्य शुक्लासितानि च । यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा । जङ्घाजङ्घा सिता यस्य तं विद्यादृष्टमङ्गलम् । प्रभूतासिततारास्तु प्रशस्ता मुनिभिः स्मृताः । यस्तु पीतासितैस्तारैः स धन्यः कीर्त्तितो हयः । प्रशस्तः

कृष्णतारस्तु मक्षिकाक्षः प्रकीर्त्तितः । श्वेतजावेष्टितं कृष्ण रेखया तारकं च यत् । मक्षिकाक्षः सविज्ञेयः स्वामिनः सुखवर्द्धनः । सिततयाऽग्रयस्तश्च स्वामिनः क्लेशवर्द्धनः । सर्वश्वेतश्च कृष्णश्च रक्तपीतस्तथैव च । एते सांग्रामिकाः प्रोक्तास्तुरगा मुनिसत्तमैः । हरिताः किल जायन्ते वाजिनः पुण्यदर्शनाः । यतो हिता नरेन्द्राणामायुरारोग्यश्रीप्रदाः । रक्ताक्षमेहनः श्रस्तः श्यामकर्णस्तु यः सितः । कपोतेन च वर्णेन योज्यः शुक्लकेसरः । शुक्लपादसुखो वाजी प्रशस्तः परिकीर्त्तितः । चतुर्णां चैव पादानां शुक्लता यस्य वाजिनः । सुखं सिततरं चैव पञ्चभद्रः स उच्यते । श्वेतमण्डलचित्रश्च भर्त्तुः सर्वार्थसाधकः । पाण्डुरा यस्य रेखा स्यात् पृष्ठवंशानुगामिनी श्वेतकृष्णशिरा यश्च नैव धन्यः प्रकीर्त्तितः । अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः । पुच्छेन शिरसा वापि नानावर्णेन निन्दितः । अव्यक्तवर्णो योवाश्वस्तया तित्तिरिसन्निभः । कृत्सितो वानराक्षश्च योवा व्याघ्रावलोढकः"

तथाङ्गविकृतितोऽशुभलक्षणम् । "काकुदी कृष्णजिह्वश्च कृष्णसेफाण्डतालुकः करालो हीनदन्तश्च ह्रस्वी वाधिकदन्तकः । एकाण्डश्चैव जाताण्डः कङ्कुको लिसरी तथा । मार्ज्जारपादो व्याघ्राभस्त्रिकर्णी द्विखुरी क्षतनी । यमयो वामनश्चैव काकतित्तिरसंनिभः । वानराक्षो विड़ालाक्षो सुश्रवी चेन्द्रहस्तिकः । वेषां पृष्ठे हतो भर्त्ता जातदन्तस्तथैव च । एते दोषान्विता वाहास्त्याज्या वै भूतिमिच्छता । धनप्राणहरा ह्येते बन्धुविग्रहकारकाः । एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः । पूर्व्वशास्त्रानुसारेण मुनीनां वचनं यथा । आवर्त्ता यत्र कुक्षौ काकुदी स उदाहृतः । करालैर्वाधरे दन्तैर्ज्जायते यस्य चोत्तरम् चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः । सप्तभिश्चाष्टभिर्दन्तैर्ज्जातश्चाधिकदन्तकः । अङ्गुष्ठपर्वसंकाशं छागह्रस्वोपमन्तथा । जम्बूदरसमं च तथा चामलकोपमम् । आम्रास्थिसदृशं चापि हरीतक्याः फलोपमम् । दग्धचर्म्मनिभं चापि बालं संस्थानमेव च । कालवर्णान्तरे यस्य केशान्ते चापि दृश्यते । धोरेयः सर्वपापानां वाहः शुङ्गी स कीर्त्तितः । एवंविधेन ह्रस्वेण ह्रस्वी राष्ट्रे न वासयेत् । एकतोलप्रमाणेन सुक्ष्मकेशैकाण्डसंयुतः । अत्यन्तरोमशाभ्यां तु ताभ्यां जाताण्ड उच्यते । स्कन्धे वक्षसि वाह्वोश्च अंसदेशे तथैव च । अन्यवर्णौ भवेद्वाजी कङ्कुकी स प्रकीर्त्तितः । यस्यान्यवर्णा रेखा स्यात्पादे कूर्च्चे च वाजिनः । मार्ज्जारपादः प्रोक्तोऽसौ सोऽधन्यः कुलनाशनः । अन्यवर्णश्च वाहस्य शिरः कृष्णं यदा भवेत् । लिसरी नाम स प्रोक्तो भर्त्तुः कुलविनाशनः । द्विखुरं गोखुराकारखुरैर्विद्याद्विचक्षणः । अथ वा लिखितौ निम्नमध्यश्च निर्दिशेत् । दृषणाभ्यां सुजाताभ्यां स्तनाभ्यां विहिता स्तनी । त्रिभिः कर्णैस्त्रिकर्णी च व्याघ्राभो व्याघ्रवर्णकः । एकेनाङ्गेन हीनेन निम्नेन च विशेषतः । यमयं वाजिनं विद्याद्वामनं वामनाकृतिम् । वर्णादेकेन पादेन अन्यवर्णेन यो हयः । सुस्रवीति स विख्यातो भर्त्तुः कुलविनाशनः । विरोधं नैव यो याति दृष्ट्वाश्वान् सुष्कवर्जितः । क्षुद्रदृष्टिः स विख्यातो भर्त्तुः कुलविनाशनः । अथ चेद्वड़वां दृष्ट्वा विरोधमधिगच्छति । निगूढ़ दृषणाख्यस्तु स धन्यः सर्वकामदः । द्विवर्षं तु समारभ्य यावद्वा पञ्चवार्षिकः । दन्तानां सुष्कयोश्चैव सम्भवो वाजिनः स्मृतः । अत ऊर्द्धं न जायन्ते सुष्कौ दन्ताश्च वाजिनः । अशुभं तु फलं वाच्यमभावे न ततस्तथा" ।

अथाश्वाङ्गचेष्टादिशुभाशुभम् । अतःपरं प्रवक्ष्यामि तुरगाणां विभागतः ज्वलितेन यथाङ्गेन फलं वाच्यं शुभाशुभम् । यदा ज्वलति वाहानां सर्व्वगात्रे हुताशनः । तदा विद्यादनादृष्टिमवृष्टिमेकं न संशयः । अन्तःपुरविनाशस्तु मेहने ज्वलिते भवेत् । उदरे वित्तनाशस्तु पायौ पुच्छे पराजयः । उत्तमाङ्गे च वक्त्रे च स्कन्धे चैवासने तथा । भर्त्तुर्जयाय वाहानां ज्वलनं यत्र नेत्रके । धूमं ललाटे बाह्वोश्च तथा वक्षसि निन्दितम् । तत्रैव ज्वलनं श्रस्तं तथा नासासमुद्भवः । यदा व्याधिं विना वाजी श्वासं त्यजति दुर्म्मनाः । अश्रुपातं च कुरुते तदा भर्त्तुरशोभनम् । स्वयमेव यदा वक्त्रं क्षुतो लोकयते हयः । स्वङ्गायप्रदाने तु तदा विद्याज्जयं प्रभोः । सर्वैर्देवं शिरोभस्तु सर्वेषां नैव पूजितः । वामपादाभिघातस्तु प्रभोर्यात्रानिषेधकः । स्वामिनारूढमात्रेण दक्षिणं पार्श्वमात्मनः । तुरङ्गमो यदा न्यस्येत्तदा भर्त्तुर्जयो भवेत् । पुच्छं वाहं यदा वाहो वामतो विकिरेद्यदा । तदा भर्त्तुः प्रवासः स्यात् दक्षिणे विजयस्तथा । प्रकिरन्ति यदात्यर्थं सर्वे पुच्छं तुरङ्गमाः । अकस्मादेव जाता च तेषां भीतिः प्रभोःस्मृता" ।

अथाश्वमानम् "हस्तोऽङ्गुलानां विंशत्या चतुरुत्तरया स्मृतः । चतुर्हस्तस्तु विख्यातः शास्त्रोक्तोत्तम उच्यते । अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः । सुहिन्यूनेन हस्तेन हीनश्चाधमः स्मृतः । अर्द्धमानप्रमाणं तु परिणाहं विनिर्दिशेत् ।

उत्तमानाञ्च मध्यानां हीनानां चैव वाजिनाम्। अर्द्धसप्तमहस्तं तु श्रेष्ठं दैर्घ्येण निर्दिशेत्। षड्भिश्च सुष्टिभिर्हीनं मध्यं च विचक्षणः। पञ्चहस्तप्रमाणस्तु जघन्यः समुदाहृतः। द्वात्रिंशदङ्गुलं वक्त्रमुत्तमाश्वस्य कीर्त्तितम्। पृष्ठं वक्त्रः कटी चैव सुखतुल्यं समादिशेत्। अङ्गुलीद्वयहीनं तु सुखादि मध्यमाधमम्। निर्दिशेन्मतिमान्वैद्यः वाजिशास्त्रविशारदः। सप्ताङ्गुलं खुरं चैव उत्तमाश्वस्य कीर्त्तितम्। षडङ्गुलं भवेन्मध्ये जघन्ये चतुरङ्गुलम्। षोड़शाङ्गुलदीर्घा तु जङ्घा चैवोत्तमे हये। चतुर्दशाङ्गुला मध्ये हीने च द्वादशाङ्गुला। एवंविधं प्रमाणं तु निर्दिष्टं शास्त्रशालिभिः। अपाङ्गात् पुच्छमूलं तु दैर्घ्येणार्द्धं प्रमाणवेत्। खुरान्तात् कक्षदं यावद्बुद्धिमानेन बुद्धिमान्। वक्त्रोभागे तु सर्वेभ्यो रज्ज्वा वा सूत्रकेण च। परिणाहं तुरङ्गस्य मापयेन्मतिमान्भिषक्। एवं प्रमाणभागेन विभक्ताङ्गश्च पूजितः। अतो हीनाधिकाङ्गाश्च हरयो नैव पूजिताः"।

आवर्त्तादिकं विशेषयति हेमा० प०ख० ज्योति० पराशरसंहिता। "आवर्त्तो बर्हिमुखदत्तमण्डलरोमा, दीर्घदत्ताङ्गरोमा शुक्तिः। कंनकमन्तर्मुखदत्तरोमसंघातं, प्रफुल्लविकचरोम पुष्परमिति"। पुष्पं विशेषयति तत्रैव। "श्वेतं स्निग्धमन्यवर्णस्य प्रशस्तं श्वेतस्य कृष्णं पीतं रूक्षं रक्तं वा। यस्यान्यवर्णं ललाटे श्वेतं बालेन्दुतारकसंस्थानं वा पुष्पम्"।

अथाश्वायुर्लक्षणम् "आयुर्लक्षणमश्वानामतऊर्द्धं प्रवक्ष्यते। शालिहोत्रादिनिर्दिष्टं यथा पूर्व्वं तपोधनैः। सुसंहताश्च ये वाहा ह्रस्वकर्णास्तथैव च। स्वरनेत्रसमावेषु न दीनाश्चिरजीविनः। महाघोणा महाकाया ये चाश्वाः पृथुवक्षसः। तेषां दीर्घं भवेदायुः स्निग्धाङ्गाश्चैव ये सदा। कर्णाग्रे पीड़िते येषां सिन्दूराभस्य दर्शनम्। शोणितस्य भवेत् क्षिप्रं ते मताश्चिरजीविनः। न विक्किरन्ति ये वालं खप्रासाय तुरङ्गमाः। न वा जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः। कुटिकानां किणा येषां दृश्यन्ते वाजिनां स्फुटाः। प्रतिस्रोतः पिबन्त्यम्भो ये च ते दीर्घजीविनः। पद्मपत्रदलाकारं जिह्वाग्रं यदि वाजिनः। दन्ताश्च मौक्तिकाकारा स्निग्धं येषां च निर्मलम्। सीत्कारं च भवेद्येषां लाङ्गूले चालनं पुनः। प्रस्वेदः शुभगन्धस्तु नखा वा दर्पणोपमाः। येषां च दृढरोमाणि ते सर्वे चिरजीविनः। स्निग्धा गम्भीरदीर्घाश्च श्रोणयो यस्य वाजिनः। भवन्ति विपुला रेखास्तं विद्याद्दीर्घजीविनम्। छत्रचामरहङ्कारखड्गयङ्काङ्कुशानिभाः। शुक्तिवज्रगदाकारा ध्वजपद्मसमोपमाः। श्रीवत्सस्वस्तिकाभासाः श्रोणिरेखाश्चिरायुषाम्। अर्द्धं श्रोणीस्थिता रेखा यस्य वामेन चानता। ह्रस्वा वा यस्य वाह्रस्व न चिरं तस्य जीवितम्। अर्द्धं श्रोणिसमा रेखा दृश्यते यस्य वाजिनः। तस्य स्युः समुद्दिष्टो दशमं प्राप्य वत्सरम्। त्रयोदशाङ्गुला चेद् दग्धे च वर्षाणां तस्य जीवितम्। त्रयोदशाब्दं स जीवेद्यस्याङ्गे चतुरङ्गुले। तिर्यग्गे चोर्द्धगे स्यातां द्वे रेखे चैव वाजिनः। श्रोण्यगे वाथ वाह्रस्व तस्य विद्याच्चतुर्दशम्। दक्षिणेन च पार्श्वेन यः शेते सर्वदा हयः। बहुभूत्वोऽल्पभूत्वश्च चिरं जीवति नो हयः। विनतः पूर्व्वकायेन स्थूलजानुश्च योहयः। न्यूनाधिकूटस्तस्याशुः स्वल्पायुः स प्रकीर्त्तितः। जातन्दन्तद्वयं वाह्ये पतत्यब्दे तृतीयके। चतुरो दशनान् विद्याच्चतुर्थे पतितोत्थितान्। पञ्चमे पतितोङ्गूतान् षट् च दन्तान् मनीषिणः। षडाब्देषु च वर्षेषु कालिकादितसम्भवः। कालिका हरिणी शुक्ला कृष्णा काचा समक्षिका। यङ्गा चैव क्रमेणाश्ववयसः परिसूचिकाः। वक्त्रान्ते कालिका रेखा कृष्णा दन्ताग्रसंस्थिता। षष्ठे च सप्तमे वर्षे चाष्टमे च भवेत् क्रमात्। आपीता हरिणी श्वेता कालिका स्थानमाश्रिता। नवमे दशमे वर्षे भवेदेकादशे तथा। कृष्णा चैव भवेच्छुक्ला दन्ते मूर्द्धि समुद्भवा। द्वादशाब्दं समारभ्य भवेद्यावच्चतुर्दशम्। सिता सिद्धार्थकाकारा काचेति परिकीर्त्तिता। पञ्चदशाब्दमारभ्य यावत्सप्तदशादितः। मक्षिका मक्षिकाकारा भवेदष्टादशादिषु। विंशत्यन्तेषु वर्षेषु वाजिनां दशनोद्भवा। त्रयोविंशावसानेषु एकविंशादिषु त्रिषु। यङ्गाकारा भवेच्छुक्ला प्रदुक्तस्थानमाश्रिता। छिद्रं च चलनं चैव तथा पातश्च दन्तितः"। "अतिबद्धाः कषायाश्च तनवश्चेति तत्त्रयः। ते भवन्ति द्विवर्षस्य युक्ताश्चैव द्विजन्मना। दैर्घ्यञ्च शिरसः स्थूलमा भवेच्च पतितोत्थिता। खल्लाग्रा विपुला दन्ता भवन्ति पतितोत्थिताः। खल्लभागे विनापूर्णे व्यञ्जनानां न सम्भवः। पूर्णेषु खल्लभागेषु जायन्ते कालिकादयः। निम्नं कृष्णं च दन्ताग्रं खल्लमित्यभिधीयते। पूर्णतां चास्य जानीयात् षष्ठप्रभृतिवत्सरे। खल्लेषु कालिकाऽऽयाति नैव कार्य्या विचारणा। नियता कालिका रेखा सुपूर्णे दन्तमस्तके। द्वयोर्भवति षष्ठे द्वे चतुर्णां सप्तमे तथा। खल्लमष्टसु वर्षेषु दन्तानां कालिका क्रमात्। कालिकानुक्रमेणैव हरिणयादिषु बुद्धिमान्। द्वौ द्वौ वर्षेण जानीयाद्वाजिनां व्यञ्जनं प्रति"।

देशभेदजाश्वलक्षम "अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्व्वशः । उत्तमानां च मध्यानां हीनानां चैव संमतान् । उत्तमास्त्वधिकाः प्रोक्तास्तथापारसिकाश्च ये । कोङ्कणाश्चैव ये वाह्या पृष्ठजा ये च कीर्त्तिताः । उरौजाताश्च कीराश्च तुरुष्का माण्डवाश्च ये । पार्व्वताः सैन्धवा मध्यास्तथा सारस्वता हयाः । संभलाश्चाष्टलाश्चैव जटादेशोद्भवाश्च ये । अधमाष्टङ्गणैः सार्द्धं ये च प्राग्दक्षिणोद्भवाः । दृत्तदीर्घाङ्गितग्रीवाक्षुरकर्णा महाहयाः । महाकाया महोरस्का निस्त्रासास्तेऽधिका मताः । अत्यन्तं विनतं येषां निर्म्मासं च मुखं भवेत् । पीनेन कटिदेशेन सुखराश्च भवन्ति ते । अध्वन्याश्च महासाराः संग्रामे चैव पूजिताः । अपि शस्त्रहताङ्गाश्च नैव सुञ्चति सादिनम् । पारसीकोऽधिकस्तस्मात् कोङ्कणाः किञ्चिदूनकाः । स्थूलाः स्थूलशरीराश्च प्रस्थाने दीर्घपृष्ठकाः । कोङ्कणदेशजातानां मध्यमानां च वाजिनाम् । नाधिकैः सदृशं वक्त्रं बाहुल्येन विनिर्देशेत् । सुदृत्तदेहतीक्ष्णश्च स्वप्रमाणेन मध्यमः । उरुजातः समुद्दिष्टः किञ्चित्स्थूलो मनागजवः । अतिस्थूलोऽतितीक्ष्णश्च हस्वग्रीवोरुकस्तथा । तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रसुखश्च यः । कोङ्कणाकारदेहस्तु भवेन्माण्डविको हयः । मान्या चैव प्रमाणेन केवलं नैव तत्समः । सिन्धुदेशोद्भवो वाजी पृष्ठजस्त्वारुकोरुकः । आननं चापि दीर्घं च तस्य पृष्ठं प्रकीर्त्तितम् । मान्या चैव जवेनापि रणस्थैर्य्यसंयुतः । सादिभर्त्सनेच्छया यातितार्जिकादधिकस्तथा । परिमण्डलदेहास्तु तीक्ष्णकर्णसुखा हयाः । पृष्ठदेशोद्भवा दृष्टास्तथा सारस्वताश्च ये । लम्बकर्णो जटस्यैव आष्टलः परिकीर्त्तितः । सम्भलः स्निग्धजानुश्च यदा पश्चाद्वलेपमः । वर्त्तुलाभ्यामपि हस्वाभ्यां च टङ्गणाः परिकीर्त्तिताः । दाक्षिणात्यो भवेत्कुण्ठो योऽधन्यः सर्व्ववाजिनाम् । जवहीना महादुष्टा पूर्व्वदेशसमुद्भवाः । वाजिवद्वेद्य जानां च वेद्यं विद्याद्विचक्षणः" ।

अथाश्वानां विप्रादिजातिः "सान्त्वेन जायते जाति र्ज्ञातिरूपेण वाहयेत् । साम प्रदानं दण्डं च त्रिविधं विनियोजयेत् । त्रासी लुब्धोदयालुश्च विप्रः स परिकीर्त्तितः । शूरश्च दृढमन्युश्च क्षत्रियस्तुरगः स्मृतः । यायिनः कलहरूपाश्च दुष्टाः वैश्याः प्रकीर्त्तिताः । विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः । ब्राह्मणान् यष्टिदानेन साम्ना चैव तु क्षत्रियान् । वैश्यान् दण्डेन यत्नेन शूद्रान् दण्डेन वाहयेत्" ।

अथ भद्रजात्यादि हेमा० प० ख० । "युद्धेऽध्वनि तथाग्नौ च समः पीड़ां नियच्छति । योवा व्रजति शीघ्रं च येन केनचिदासितः । दृष्टिं गच्छति सर्व्वत्र भद्रजातिस्तुरङ्गमः । भद्रल्यो लक्षणैर्युक्तः किञ्चित्त्वेव विगर्हितः । शीघ्रं गच्छति शिक्षां च क्षिप्रं च प्रतिमुञ्चति १ । रात्रौ स्वपिति न तथा क्षुद्रप्रविष्टस्तुरङ्गमः । तुरङ्गमाणां क्रोधीव कामी चेर्षालुरेव च । आदौ शूरस्ततः पश्चाद्भीतत्वमुपगच्छति । न केनापि प्रकारेण चिरं पालयते तु यः । एवंविधस्तु विज्ञेयो मन्द्जातिस्तुरङ्गमः २ । दैर्घ्यी भीतस्तथा त्रासी तथा सर्व्वत्र शङ्कितः । प्रसार्य्य गात्रं सकलं दिवा वा यदि वा निशि । सततं जातनिद्रोऽन्यान् बाधते च तुरङ्गमान् । न च वेत्ति प्रकरांश्च ग्लानिं शीघ्रं च गच्छति । न च तुष्टिं समाप्नोति दृगजातिस्तुरङ्गमः ३ । मिश्रैर्गुणैः स्यान्मिश्राख्यस्तथैव बड़वा गुणैः ४ । भद्रः श्रेष्ठोहयोज्ञेयो जातिरेषा तु वाजिनाम् । मिश्रोमिश्राधिकोज्ञेयोगुणदोषैः समासतः" । वर्णभेदेन अन्या अपि संज्ञाः शालिहोत्रे दर्शिता विस्तरभयान्नोक्ताऽत्रतएवावसेयाः ।

वृहत्संहितायां लक्षणादि समासेनोक्तम् "दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रतालोष्ठजिह्वः सूक्ष्मत्वक्केशबालः सुखफगतिसुखो हस्वकर्णोष्टपुच्छः । जङ्घाजानूरुवृत्तः समसितदशनश्मश्रुसंस्थानरूपो वाजी सर्व्वाङ्गयुक्तो भवति नरपतेः शत्रुनाशाय नित्यम् । अश्वपातहनुगण्डवृत्तललाटोष्ठजङ्घकटिवस्तिजानुनि । सुक्कनाभिकुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः । ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरि स्थिताः । ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः शुभोदयाः । तेषां प्रपाण एको ललाटकेषु च भ्रुवावर्त्तः । रन्ध्रोपरन्ध्रमूर्द्धनि वक्षसि चेति स्तुतौ द्वौ द्वौ । षड्भिर्दन्तैः सिताभैर्भवति हयश्रिशुस्तैः कषायैर्द्विवर्षैः सन्दंशैर्मध्यमाख्यैः पतितसमुदितैस्त्यवृदपञ्चाविदकोऽश्वः । सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिका पीतशुक्लाः काचा माक्षीकशङ्खाअथ चलनमतो दन्तपातं च विद्वि" । अश्नाति सर्व्वम् अश्नक् । २ अग्निविशेषे । अश्नुते व्याप्नोति । ४ व्यापके त्रि० अश्वपर्णशब्दे उदाहरणम् । "विष्णोरश्वस्य वाजिनम्" ता० ब्रा० । ५ अदुतंश्यचित्रकस्य पुत्रभेदेऽश्ववाक्शब्दे विवृतिः । गोत्रापत्ये अश्वा० फञ् । आश्वायनः तद्गोत्रापत्ये पुंस्त्री० । चतुरर्थ्यां कुत्सदा० ठक् । आश्विकः वाजिसम्बन्धिदेशादौ त्रि० । अश्वेन

चरति पर्पा० उन् अश्विकः अश्वेन चारिणि त्रि० स्त्रियां ङीप्। कस्यायमश्वः अज्ञाते क। अज्ञातस्वामिके अश्वे। कुत्सितोऽश्वः क। अश्वकः। कुत्सितेऽश्वे अश्व इव संज्ञायां कन् अश्वसदृशसंज्ञावति पु०। अश्व इव प्रकृतिकृतौ कन्। अश्वप्रतिकृतौ। अश्वानां समूहः छ यच्च अश्वीयम् अश्वाच्च घोटकसमूहे न०। एतदन्तस्य पादस्य बहुव्रीहौ ह्रस्वादि० नान्तस्यलोपः अश्वस्य पादाइव पादावस्य अश्वपाद इत्येव। जातित्वेऽपि अजा० स्त्रियां टाप्। अश्वा अश्वजातिस्त्रियाम् "अश्वे इव विशिते हासमाने" ऋ० २,३२,१,।

अश्वकन्दा स्त्री अश्वस्य मेढ्रमिव कन्दोमूलमस्याः। अश्वगन्धाख्यवृक्षे। वा कप् अश्वकन्दिकाप्यत्र।

अश्वकर्ण पु० अश्वस्य कर्णइव पत्रमस्य। १खनामख्याते सालवृक्षे। "पूतिकाश्वकर्णार्जुनखदिरकालेयकल्के, सुश्रु० स्वार्थे कन्। अश्वकर्णकोऽप्यत्र। वैत०। २अश्वस्य कर्णे।

अश्वखरज पु० अश्वश्च खरी च, अश्वा च खरश्च वा ताभ्यां जायते पुंवद्भावः। खचरे घोटकभेदे। खराश्वजोऽप्यत्र।

अश्वखुर पु० अश्वस्य खुरमिवाकृतिरस्य। (नखीति)ख्याते १गन्धद्रव्ये। २अपराजितायाम् स्त्री।

अश्वकिनी स्त्री अश्वस्य कं सुखं तत् सदृशाकारोऽस्यास्य इनि ङीप्। अश्विनीनक्षत्रे तस्याः श्रीपत्युक्त्या तुरगशीर्षाकारतायाः अश्लेषाशब्दे ४८० पृष्ठे उक्तत्वात्तथात्वम्।

अश्वक्रन्द पु० देवसेनापतिभेदे "अश्वक्रन्देन वीरेण रेणुकेन च पक्षिराट्" भा० आ० प० अहताहरणे देवगरुड़युद्धवर्णने।

अश्वगन्धा स्त्री अश्वस्य गन्ध एकदेशोमेढ्रमिव मूलमस्याः। वराहकर्णतुल्यपत्रे खनामख्याते क्षुद्रवृक्षभेदे। "गन्धान्तो वाजिनामादिरश्वगन्धा हयाह्वया। वराहकर्णी वरदाऽवरोहा कुष्ठघातिनी। अश्वगन्धानिलश्लेष्मपित्तशोथव्रणापहा। बल्या रसायनी तिक्ता कषायोष्णातिपिच्छिला" भा० प्र० उक्तेः हयादिकगन्धान्तनामिका हयनामिका च "यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनम् हितम्"। "शतावर्य्यश्वगन्धाभ्यां वायसेरण्डजीवनैः" इति च सुश्रु०।

अश्वगन्धातैल न० चक्रदत्तोक्ते तैलभेदे यथा "भल्लातकवृहतीफलदाड़िमफलकल्वसाधितं कुरुते। लिङ्गं मर्दनविधिनाकटुतैलं वाजिलिङ्गभग्नम्॥ कनकरसमसृणवर्त्तितहयगन्धामूलविश्वपर्य्युषितम्। माक्षिकमिह नवनीतं गतबीजे कनकफलमध्ये॥ गोमयगाढ़ोद्वर्त्तितं पूर्व्वं पश्चादनेन संलिप्तम्। भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम्। अश्वगन्धावरीकुष्ठमांसीसिंहीफलान्वितम्। चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्। स्त्रीलिङ्गकर्णपालिवर्द्धनं लक्षणादिदम्"।

अश्वगोयुग न० अश्व+द्वित्वे गोयुगच्। अश्वयुग्मे।

अश्वगोष्ठ न० अश्वानां स्थानं पशुनामत्वात् स्थानार्थे गोष्ठच्। अश्वस्थाने वाजिशालायाम् विवरणमश्वशालाशब्दे।

अश्वग्रीव पु० अश्वस्य ग्रीवेव ग्रीवाऽस्य। दानवभेदे "चत्वारिंशद्दनोः पुत्रा" इत्युपक्रम्य। "अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः" भा० आ० प०। स एवांशावतारे रोचमान इतिख्यातिरभूत् यथोक्तं तत्रैव। "अश्वग्रीव इति ख्यातः सत्ववान् योमहासुरः। रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः"। २विष्णोरवतारभेदे हयग्रीवे अश्वशिरःशब्दे विवृतिः। यदुवंश्यवित्तकस्य पुत्रभेदे अश्वबाहुशब्दे विवृतिः।

अश्वघ्न पु० अश्वं हन्ति अमनुष्यकर्त्तृकत्वात् हन-टक् उप० स०। करवीरे तस्य अश्वनाशकतया तथात्वम्।

अश्वचक्र न० वैत०। १अश्वसमूहे २अश्वाकारे नरपतिजयचर्य्योक्ते चक्रभेदे विवरणम् चक्रशब्दे। जाम्बवतीतनयेन लक्ष्मणात्मजेन हृते ३अश्वरदैत्यसेनापतिभेदे पु० "हृत्तोरुत्सायतपीनबाहुरेतेन संख्ये निहतोऽश्वचक्रः। को नाम यास्यस्य महारथस्य रणे समक्षं रथमभ्युदीयात्" भा० व० प०।

अश्वचिकित्सक पु० अश्वानां चिकित्सकः। अश्वानां रोगनिवारकेऽश्वे वैद्ये चिकित्साविधिश्च जयदत्तकृतेऽश्वशास्त्रे दृश्यः। [यदत्तकृतेऽश्वशास्त्रे दृश्या।

अश्वचिकित्सा स्त्री वैत० अश्वरोगनिवारणोपाये सा च जयदत्तकृतेऽश्वशास्त्रे दृश्या।

अश्वचेष्टित न० वैत० १वाजिचेष्टिते २शुभाशुभसूचके अङ्गनभेदे च तद्विवृतिः ६० स० यथा" उत्सर्गाच्च शुभदमासनोमरिस्थं वामे च ज्वलनमतोऽपरं प्रशस्तम्। सर्वाङ्गज्वलनमदृष्टिदं हयानां हे वर्षे, दहनकृशाच्च धूपनं वा। अन्तःपुरं नाशमुपैति मेढ्रे कोशः क्षयं याल्युदरे प्रदीप्ते। पार्श्वौ च पुच्छे च पराजयः स्याद् वक्षोत्तमाङ्गज्वलने जयश्च। स्कन्धास्यांसज्वलनं जयाय वन्धाय पादज्वलनं प्रदिष्टम्। ललाटवक्षोऽक्षिभुजेषु धूमः पराभवाय ज्वलनं जयाय। नासापुटप्रोथशिरोऽश्रुपातनेत्रेषु रात्रौ ज्वलनं जयाय। पार्श्वाग्रताश्वासितकर्बुराणां नित्यं शुकाभस्य सितस्य चेष्टम्। प्रस्वेदो यवसाम्भसां प्रपतनं स्वेदो निमित्तादिना कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा सम्भवः। अस्वस्थस्य विरोधिता निधि दिवा निद्रालसध्यानता सादोऽधोमुखता

विचेष्टितमिदं नेष्टं सूतं वाजिनाम्। आरोहणमन्यवाजिनां पर्य्याणादिधृतस्य वाजिनः। उपवाह्यतुरङ्गमस्य वा ऽविकलस्यैव विपन्न शोभना। क्रौञ्चवद्विप्लुवधाय हेषितं ग्रीवया त्वचलया च सोन्मुखम्। स्निग्धसुश्लक्ष्णमनुनादि हृष्टवद् घासरुद्ववदनैश्च वाजिभिः। पूर्णपात्रदधिविप्रदेवता गन्धाढ्यफलकाञ्चनादि वा। द्रव्यमिष्टमथ वापरं भवेद्धेषतां यदि समीपतो जयः। भक्ष्यपानसलिलाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा। सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः। वामैश्च पादैरभिताड्यन्तो महीं प्रवासाय भवन्ति भर्तुः। सन्ध्यासु दीप्तामवलोकयन्तो हेषन्ति चेद्वन्यपराजयाय। अतोव हेषन्ति किरन्ति बालान् निद्रारताश्च प्रवदन्ति यात्राम्। रोमत्यजो दीनखरस्वराश्च पांसून् वसन्तश्च भयाय दृष्टाः। सशब्दवद्दक्षिणपार्श्वशायिनः पदं सशब्दं क्षिप्य च दक्षिणं स्थिताः। जयाय शेषेष्वपि वाहनेष्विदं फलं यथासम्भवमादिशेद्बुधः। आरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगोऽन्यतुरगं प्रति हेषते च। वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भर्तुरचिरात्प्रचिनोति लक्ष्मीम्। सुदुर्मुखोर्मूत्रशकृत् करोति न ताड्यमानोऽप्यनुलोमयायी। अकार्य्यभीतोऽश्रुविलोचनश्च शुभं न भर्तुस्तुरगोऽभिधत्ते"।

अश्वतर पु० तनुरश्वः अश्व+तनुत्वे टरच्। अश्वायामश्वेनोत्पन्नत्वेऽश्वत्वं तस्य तनुत्वञ्चान्यपिटकत्वे। १गर्दभेनाश्वायास्तु जाते १खरेऽश्वविशेषे" २सर्पभेदे च। जातित्वेन स्त्रियामुभयत्र ङीप्। "जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथः" इति ब्रा० उ०। दण्डेनोपपन्नं शत्रुमनुगच्छति योनरः। स वृद्धयुपगतश्लोयादुगर्भमश्वतरी यथा" मनुः। "बहुत्वान्नामधेयानि पन्नगानां तपोधन! न कीर्त्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतोजातो वासुकिस्तदनन्तरम्" इत्युपक्रम्य "कम्बलाश्वतरौ चापि नागःकालीयकस्तथा" भा०आ०प०। अयञ्च वरुणलोकेस्थितः" भा०स०प० वरुणसभावर्णने "कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ" २गन्धर्वभेदे। "तद्यथैवादोधावयतोऽश्वो वा अश्वतरो वा गर्दभेत" शत० ब्रा०।

अश्वत्थ पु० न अश्वैरश्वं शालूमलिङ्गादिवत् तिष्ठति स्था—क पृ०नि०। १स्वनामख्याते वृक्षे, "बोधिद्रुः पिप्पलोऽश्वत्थश्चल पल्लवभोजनः। पिप्पलो द्रुर्जरःशीतः पित्तश्लेष्मव्रणापहः। शुष्कस्तुवरकोरूक्षोबल्योयोनिविशोधनः" भा०म०।

"अश्वत्थः सर्ववृक्षाणाम् गीता" तस्य विष्णुरूपित्वेन सर्व्वमङ्गलनाशकत्वम् अश्वत्थोत्पत्तिः "पार्वतीशिवयोर्देवैः सुरतं कुर्वतोः किल। अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा। शशाप पार्वती क्रुद्धा सर्वानेव दिवौकसः" इत्युपक्रम्य "तस्मान्मम सुखभ्रंशात् यूयं वृक्षत्वमाप्नुथ" पार्वतीशापमुक्ता "तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः। तस्मादिमौ विष्णुमहेश्वरावुभौ बभूवतुर्बोधिवटौ सुनीश्वराः!"। बोधिस्त्वं चार्किदिनं विनैव त्वच्छ्यतामापदलक्ष्मीयोगात्" पद्मपु० क्रिया० १६० अध्या० उक्ता। "तस्य शनिवारमात्रे स्पृश्यताकारणमुक्तं तत्रैव १६१ अध्या०। लक्ष्मा ज्येष्ठभगिन्या अलक्ष्म्या सह उद्दालकस्य विवाहमुक्ता पत्या "यावदागमनं मम तावत् अश्वत्थमूले त्वं निषीद" इत्युक्तया अलक्ष्म्या तत्रैव स्थितया बहुतिथे काले गतेऽपि पत्युरागमनमनालोक्य क्रन्दितं, तच्छ्रुत्वा च लक्ष्म्या कनिष्ठभगिन्या नोदितो विष्णुस्तत्रागत्य तामुवाच यथा। "लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः। आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्। अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव। ममांशसम्भवोह्येष आवासस्ते मया कृतः। मन्द्वारे सदा ह्येनं लक्ष्मीरत्रागमिष्यति। अस्पृश्योऽसौ भवेत्तस्मान्मन्द्वारं विना किल" एवञ्च अलक्ष्म्याः सर्वदावासादन्यदिने तस्यास्पृश्यत्वं मन्द्वारे लक्ष्मीसमागमाच्च स्पृश्यत्वमिति मर्य्यादा कृता। "अश्वत्थरूपो भगवान् विष्णुरेव न संशयः। वृक्षरूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक्। दर्शनस्पर्शनादेव ते वै पापहराः स्मृताः" तत्रैवोक्तम् अश्वत्थस्पर्शस्तु शनिवारे एव प्रागुक्तवचनात्। तस्य वैशाखे सेचनफलं पद्मपु० क्रिया० ११ अध्या०। यथा "वैशाखे सेचयेन्नित्यं विष्णुमश्वत्थरूपिणम्। चतुर्वर्गफलावाप्तिहेतवे वैष्णवोजनः। गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनम्। सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः" तन्मूलबन्धफलम् तत्रैव "अश्वत्थमूलं विप्रर्षे! यो बध्नाति शिलादिभिः। अश्वत्थरूपी भगवान् किं तस्मै न हि यच्छति"। तत्प्रणामफलं तत्रैव। "अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः। आयुर्दृष्टिर्भवेत्तस्य वर्द्धन्ते सर्वसम्पदः"। अतएव दुःस्वप्नदर्शनादौ "अश्वत्थरूपी भगवान् दुःस्वप्नं शमयात्वयं मे" इति मन्त्रेण प्रणामोविहितः। "तन्मूले धर्म्मकर्म्मं चरणप्रशंसा तत्रैव। "यदाश्वत्थतले विप्र! धर्मकर्म विधी-

यते । न्यूनातिरिक्तता न स्यात्तस्मिन् कर्मणि जैमिने ।। तत्र तीर्थानि सर्व्वाणि तिस्रोताद्दीनि सन्ति वै ।"। तत्पूजनफलं तत्रैव । "अश्वत्थपूजकोयस्तु स एव हरिपूजकः । अश्वत्थरूपी भगवान् स्वयमेव यतो हरिः" ॥ तस्य तच्छाखायास्च छेदने निषेधः तत्रैव । "तरुज्ञानात् द्विजश्रेष्ठ ! योऽश्वत्थं हन्ति मूढधीः । संसारे नास्ति तत् कर्म यत् कृत्वा स च शुध्यति । अश्वत्थोदुम्बराजोऽयं हरिमूर्त्तिः प्रकीर्त्तितः । तस्मादश्वत्थहन्तॄणां त्राता कोऽपि न विद्यते । अश्वत्थशाखामेकां च स्वल्पामपि छिनत्ति यः । स कोटि ब्रह्महत्यानां फलं प्राप्नोति मानवः" इति च । अन्यान्यपि तच्छेदने पापानि तत्रैवोक्तानि द्रष्टव्यानि । तच्छाखाच्छेदनमयज्ञार्थमेव निषिद्धं यज्ञार्थच्छेदने तु न दोषः पशुहिंसावत्तस्यापि विहितत्वात् "अर्कः पलाशखदिरः अपामार्गोऽथ पिप्पल" इत्यादिना जीवहोमे तस्यैव समिधो विधानात् । २नन्दीवृक्षभेदे अश्वत्थभेदे च "नन्दीवृक्षोऽश्वत्थभेदः प्ररीही गजपादपः। स्यालीवृक्षःक्षयतरुः क्षीरी च स्याद्" नन्दीति । नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवरउष्णकः । कटुपाकरसग्राही विषपित्तकफास्रनुत्" भा०पू० । ३गर्दभाण्डवृक्षे (वेलियापिप्पल) तद्गुणादि गर्दभाण्डशब्दे द्रष्टव्यम् । ४संसारवृक्षे तस्य चिरस्थायित्वाभावत् तथात्वम् । "ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" गीता तद्विवरणमधःशाखशब्दे । अश्व इव तिष्ठति स्था-क पृ० । ५अश्विनीनक्षत्रे तस्याश्वशीर्षाकारत्वात्तच्छब्दे उक्तत्वात्तथात्वम् । अश्वत्थनक्षत्रेण युक्तः कालः इत्यण् तस्य संज्ञायां लुप् । "अश्वत्थो मूहूर्त्तः" सि०कौ० । असंज्ञायान्तु आश्वत्थमहः आश्वत्थी रात्री । चतुरर्थ्यां काया० ढक । आश्वत्थिकः उत्क० छ आश्वत्थीयः तत्सन्निकृष्टदेशादौ त्रि० । अश्वत्थेन युक्ता पौर्णमासी अण् । तस्य पौर्णमास्यामपि "अमहायज्ञवत्याट्ठक्" पा० निर्देशात् नि० लुप् अश्वत्थयुक्तायां पौर्णमास्याम् । लुपि व्यक्तिवचनोक्तेः पुंस्त्वम् । तत्र भवः ठक् । आश्वत्थिकः । चान्द्राश्विनमासे ।

अश्वत्थक पु० अश्वत्थस्तत्फलम् तद्युक्तः कालोऽश्वत्थस्तत्र देयत्वेनास्त्यस्य ठन् । अश्वत्थफलकाले वैशाखादौ १देये कृत्ये । स्वार्थे कन् । २अश्वत्थवृक्षे ।

अश्वत्थकृण पु० अश्वत्थस्य पाकः पील्वा० कृणच् । अश्वत्थपाके फलादौ । [अश्वत्थशब्दे विवृतिः ।

अश्वत्थभेद पु० अश्वत्थस्य भेदोविशेषो यत्र । नन्दीवृक्षे

अश्वत्थामन् पु० अश्वस्येव स्थाम बलमस्य अश्वइव तिष्ठति युद्धे स्थिरत्वात् स्था—क वा पृषो० । भारतप्रसिद्धे द्रोणाचार्य्यकृपीसुते वीरे । "गोतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः । अश्वत्थाम्नस्तु जननी कृपश्चैव महाबलः । अश्वत्थामा ततोजज्ञे द्रोणादेव महाबलः" भा० आ०प० । तस्य नामनिरुक्तिरपि दर्शिता भा०आ० १३०अध्या० । यथा "शरद्वतीं ततोभार्य्यां कृपीं द्रोणोऽन्वविन्दत । अग्निहोत्रे च धर्मे च दमे च सततं रताम् । अलभद्गौतमी पुत्रमश्वत्थामानमेव च । स जातमात्रो व्यनदद्यथैवोच्चैःश्रवा हयः । तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षस्थमब्रवीत् । अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् । अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति" "अश्वस्य स्थाम्नोऽकारः वार्ति० अकारः । अश्वत्थामः । भवार्थे तु तस्य लुप् अश्वत्थामा तद्भवे । २भारतप्रसिद्धे पाण्डवसैन्यस्थे मालवेशेन्द्रवर्म्मणः २गजभेदे तत्कथा च "मतिमान् श्रेयसे युक्तः केशवोऽर्জ্জুनमब्रवीत् । नैष युद्धेन संग्रामे जेतुं शक्यः कथञ्चन । सघनुर्धन्विनां श्रेष्ठो देवैरपि सवासवैः । व्यक्तशस्त्रस्तु संग्रामे शक्यो हन्तुं भवेन्नृभिः । आस्थीयतां जये योगो धर्मस्तुत्कृज्य पाण्डवाः ! । यथा नः संयुगे सर्व्वान् हन्याद्रुक्मवाहनः । अश्वत्थाग्नि हते नैष युध्येदिति मतिर्मम । तं हतं संयुगे कश्चिदस्मै शंसतु मानवः । एतन्नारोचयद्राजन् ! कुन्तीपुत्रो धनञ्जयः । अन्ये त्वरोचयन् सर्वे कृच्छ्रेण तु युधिष्ठिरः । ततो भीमो महाबाहुरनीके स्वे महागजम् । जघान गदया राजन्नश्वत्थामानमित्युत । परप्रमथनं घोरं मालवस्येन्द्रवर्म्मणः । भीमसेनस्तु सव्रीड उपेत्य द्रोणमाहवे । अश्वत्थामा हत इति शब्दञ्चैवचकार सः । अश्वत्थामेति हि गजः ख्यातो नामाहृतोऽभवत् । श्रुत्वा मनसि तं भीमो मिथ्या व्याहृतमंस्तदा । भीमसेनवचः श्रुत्वा द्रोणस्तत्परमप्रियम् । मनसा सन्नगात्रोऽभूत् यथा सैकतमम्भसि । शङ्कमानः स तन्मिथ्या वीर्य्यज्ञः स्वसुतस्य वै । हतः स इति च श्रुत्वा नैव धैर्य्यादकम्पत" । "सन्दह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम् । अहतं वा हतं वेति पप्रच्छ सुतमात्मनः । स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यते ऽनृतम् । तयाणामपि लोकानामैश्वर्य्यार्थे कथञ्चन । तस्मात्तं परिपप्रच्छ नान्यं कञ्चिद्द्विजर्षभः । तस्मिंस्तस्य हि सत्याशा बाल्यात्प्रभृति पाण्डवे । ततो निष्पाण्डवामुर्व्वीं करिष्यन्तं युधाम्पतिम् । द्रोणं ज्ञात्वा धर्मराजं गोविन्दो

व्यथितोऽब्रवीत् । यद्यर्जुदिवसं द्रोणो युध्यते मन्युमास्थितः । सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति । स भवांस्त्रातु नो द्रोणात् सत्याज्जायोऽनृतं पुनः । अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेऽनृतैः । कामिनीषु विवाहेषु गवां भक्ते तथैव च । ब्राह्मणाभ्युपपत्तौ च अनृते नास्ति पातकम् । तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदम् । श्रुत्वैवं ते महाराज बधोपायं महात्मनः । गाहमानस्य मे सेनां मालवस्येन्द्रवर्म्मणः । अश्वत्थामेति विक्रान्तो गजः शक्रगजोपमः । निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम् । अश्वत्थामा हतो ब्रह्मन्निवर्त्तस्वाहवादिति । ननं नात्र मृषावाक्यमेवं मे पुरुषर्षभ । स त्वं गोविन्दवाक्यानि मानयन्न जयैषिणः । द्रोणाय निहतं शंस राजन् ! शारद्वतीसुतम् । त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः । सत्यवान् हि त्रिलोकेऽस्मिन् भवान् ख्यातो जनाधिप ! । तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः । भावित्वाच्च महाराज वक्तुं समुपचक्रमे । ततस्तस्मिन्भये मग्नो जये सक्तो युधिष्ठिरः । अव्यक्तमब्रवीद्वाक्यं हतः कुञ्जर इत्युत । तस्य पूर्व्वं रवः पृथ्व्यां चतुरङ्गुलमुच्चतः । बभूवैवन्तु तेनोक्तो तस्य वाक्यस्य शृण्महीम्" । "अश्वत्थामा हत इति पृथासूनुना शब्दमुक्त्वा स्वैरं शेषे गज इति किञ्च व्याहृतं सत्यवाचा" इति वेणीसं० । [चारिणि स्त्रियां ङीप् ।

अश्वत्थिक त्रि० अश्वत्थेन चरति पर्या० ठन् । अश्वत्थफलके

अश्वत्थी स्त्री० क्षुद्रोऽश्वत्थः अल्पार्थे ङीप् । क्षुद्रपिप्पले क्षुद्रपत्रे वनजाते अश्वत्थाकारे क्षुद्रवृक्षभेदे स्वार्थे कन अश्वत्थिकाऽप्यत्र ।

अश्वदंष्ट्रा स्त्री अश्वस्य दंष्ट्रेवाकारेण । गोक्षुरवृक्षे ।

अश्वनाय पु० अश्वं नयति अण्–उप०स० । अश्वपालके ।

अश्वन्त पु० अश्वस्य व्यापकस्य धर्मस्यान्तो यत्र शक० । १अशुभे २क्षेत्रे ३मृते ४युद्धार्थं च हेम० प्राणिहिंसास्थानत्वात्तस्यास्यथात्वम् ।

अश्वप पु० अश्वं पाति पा–क । हयपालके । [नृपभेदे च ।

अश्वपति पु० ऐत० । वाजिपालके रामायणप्रसिद्धे कैकेये

अश्वपत्यादि पु० प्राग्दीव्यतीयेऽर्थे अण्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दसमूहे सच गणः अश्वपति ज्ञानपति शतपति धनपति गणपति स्थानपति यज्ञपति वादपति, कुलपति गृहपति धान्यपति धन्यपति बन्धुपति, धर्म्मपति सभापति प्राणपति क्षेत्रपति, । आश्वपतम् पत्यन्तत्वेऽप्यवादात् न स्यः ।

अश्वपर्ण त्रि० अश्वानां पर्णं गमनं यत्र । अश्वगमनयुक्ते १रथे अश्वं व्याप्य पर्णं पतनं यस्य । २व्याप्यगमने मेघे च । "आविद्युन्मद्भिर्मरुतः स्वर्के रथेभिर्याति ऋष्टिमद्भिरश्वपर्णैः" ऋ० १,८८,१ । यथा व्युत्पत्तिर्दर्शिता तथैव भाष्ये उक्ता । [लोपः । हयपादतुल्यचरणे ।

अश्वपाद त्रि० अश्वस्य पाद इव पादोऽस्य हस्त्या० नान्त्य

अश्वपाल पु० अश्वान् पालयति पा+णिच्–ल्यु अण् । घोटकरक्षके । ख्युल् । अश्वपालकोऽप्यत्रार्थे ।

अश्वपुच्छी स्त्री अश्वस्य पुच्छमिव केशरोऽस्य । माषपर्णीवृक्षे ।

अश्वपेज पु० ऋषिभेदे । तेन प्रोक्तमधीयते शौनकादि० णिनि । आश्वपेजिनः तत्प्रोक्ताध्यायिषु ब० व० ।

अश्वपेशस् त्रि० अश्वेन पेशोरूपंरूपणीयं निरू० यस्य । अश्वेन रूपणीये । "गोअश्वमश्वपेशसम्" ऋ० २,७,१६ । "अश्वपेशसमश्वेन निरूपणीयां रातिम्" भा० ।

अश्ववडव पु० अश्वश्च वडवा च । अश्ववडवरूपसमासार्थे न परवल्लिङ्गम् ।

अश्ववाल पु० अश्वस्य बालः केशर इव तदाकारपुष्पत्वात् । (क्याशा) इति ख्याते १क्षुपे । ऐत० अश्वस्य२केशे च ।

अश्ववाह पु० यदुवंश्यचित्रकस्य सुतभेदे । "क्रोष्टोस्तु शृणु राजेन्द्र ! वंशमुत्तमपौरुषम् । यदोर्वंशधरस्यापि" इत्युपक्रम्य । "गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः" इत्युक्त्वा "माद्र्याः सुतौ च जज्ञाते सृतौ-दृष्णुग्रन्वकावुभौ । जज्ञाते तनयौ दृष्णेः शमीकचित्रकस्तथा" इत्युक्त्वा शमीकवंशमुक्त्वा च । चित्रकस्याभवन् सुताः पृथुविपृथुरेव च । अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ । अरिष्टनेमिरश्वस्य सुधर्म्मा धर्म्मविच्तथा । सुबाहुर्बहुबाहुश्च अरिष्टाश्चयणे स्त्रियौ" हरि० ३४,३५, अध्या० ।

अश्वमहिषिका अश्वमहिषयोर्वैरम् वुन् । अश्वमहिषयोर्वैरे ।

अश्वमार पु० अश्वं मारयति मृ–णिच् अण् । करवीरे ख्युल् । अश्वमारकोऽप्यत्र ।

अश्वमुख पु० अश्वस्य मुखमिव मुखमस्य । अश्वाकारमुखे पुरुषाकारान्याङ्गे किन्नरे । जातित्वात् स्त्रियां ङीप् "भिन्दन्ति मन्दां गतिमश्वमुख्यः" कुमा० अश्ववदनादयोऽप्यत्र ।

अश्वमेध पु० अश्वः प्रधानतया मेध्यते हिंस्यतेऽत्र मेध–हिंसने घञ् । यज्ञभेदे स च शत० ब्रा० १३काण्डे पञ्चभिरध्यायैरुक्तः । यजु० २४ अ० तदीययूपपशुविशेषा विहिता यथा । तत्राद्यमन्त्रोपोद्घाते यजु० वे० दी० उक्तम् अ-

श्वमेधे एकविंशतिर्यूपा सन्ति तत्र मध्यमोयूपोऽग्निष्ठसंज्ञः तत्र सप्तदश पशवोनियोजनीयाः अश्वः१ तूपरः२ (श्वङ्गोत्पत्तिकालेऽतीतेऽपि श्वङ्गहीनः छागः) गोमृगः गवयः ३ । द्वौ चाग्नेयौ ४ एकादशावयवयुक्तौ । अग्निमन्थने वक्ष्यमाणा रोहितादयः द्वादश गाव इति सप्तदश पशवोमध्यमयूपे बन्धनीयाः । द्वयोरेकादशावयवाश्च मध्ये कृष्णग्रीवः, अश्वस्य ललाटे पुरस्तात् ललाटे हन्वोरधस्तात् मेषी, अधोभागे शुक्लौ छागौ, बाह्वोरश्वस्य पूर्व्वपादयो रेकैकः । अश्वस्य नाभ्यां श्यामश्वेतकृष्णरोमाऽजः श्वेतः छागः दक्षिणपार्श्वे, वामे कृष्णः । बभ्रुरोमपुच्छकौ छागौ पश्चात् पादयोरेकैकः । अश्वस्य पुच्छे श्वेतः, वेहत् गर्भघातिनी, वामनः खर्व्वः पशुः पुच्छे एवम् एकादशानामश्वावयवतया कल्पयित्वा तथाविधौ एकादशिनौ द्वौ मध्ययूपे बन्धनीयौ अन्येषु एकैक इति भेदः पृषतीत्यादीनां श्वेताः सौर्य्या इत्यन्तानां शतत्रयसख्यकानां पशूनां मध्ये पञ्चदश पशवः एकैकस्मिन् अश्वादयस्त्रयः एते द्वादश च इत्येते पर्य्यङ्ग उच्यन्ते । अतोऽश्वस्य शरीरं तुम्बीफलवत् रज्ज्वा गुम्फनीयम् । ततः कृष्णग्रीव इत्यादयः अश्वस्य शरीरे यथोक्तस्थाने संबद्ध्वा रज्ज्वा बन्धनीयाः ततो रोहितादयः वक्ष्यमाणा द्वादश नियोज्याः इतरेषु त्रिंशतौ यूपेषु पञ्चदश पञ्चदश पशवः प्रत्येकमेकादशिनः इतिषोड़श इति भेदः"।

अश्वादिपशुभेदाः देवसहिताः यजु अ०२४ उक्ता यथा

"अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो ललाटे । पुरस्तात्सारस्वती मेध्यधस्ताद्बभ्रोराश्विनावधोरामौ बाह्वोः सौमापौष्णः, श्यामोनाभ्यां, सौर्य्यायामौ श्वेतश्च कृष्णश्च, पार्श्वयोस्वाष्ट्रौ लोमशसक्थौ, सक्थ्योर्वायव्यः श्वेतः, पुच्छइन्द्राय खपस्पाय, वेहद्वैष्णवोवामनः१ । रोहितोधूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या, बभ्रुरुणबभ्रुः शुकबभ्रुस्ते वारुणाः, शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः, शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः, पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः२ । शुद्धबालः सर्वशुद्धबालो मणिबालस्तआश्विनाः, श्वेतः श्वेतांक्षोऽरुणस्ते रुद्राय पशुपतये, कर्णायामा अवलिप्ता रौद्रानभोरूपाः, पार्जन्याः ३ । पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः, फल्गुर्लोहितोर्श्यपलक्षीताः सारस्वत्यः, श्रीहाकर्णः शुण्ठाकर्णोऽङ्गालोहकर्णस्ते त्वाष्ट्राः, कृष्णग्रीवः शितिकक्षोऽङ्गिरसक्थस्तऐन्द्राग्नाः" कृष्णाङ्गिरस्याङ्गिर्मङ्काङ्गिरस्तऽषभाः४ । शिल्पा वैश्वदेव्यो, रोहिण्यस्त्रयवो वाचे, ऽविज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः।५ । कृष्णग्रीवा आग्नेयाः, शितिभ्रवो वरुणानां, रोहिता रुद्राणां, श्वेता अवरोकिण आदित्यानां, नभोरूपाः पार्जन्याः।६ । उन्नत ऋषभो वामनस्त ऐन्द्रवैष्णवाः, उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः, शुकरूपा वाजिनाः, कल्माषा आग्निमारुताः, श्यामाः पौष्णाः ।७। एता ऐन्द्राग्ना, द्विरूपा अग्नीषोमीया, वामना अनड्वाह आग्नावैष्णवा, वशा मैत्रावरुणी, ऽन्यत एन्यो मैत्राः ।८। कृष्णग्रीवा आग्नेया, बभ्रवः सौम्याः, श्वेता वायव्या, अविज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्य'।९। कृष्णा भौमाः, धूम्रा आन्तरिक्षा, दृहन्तो दिव्याः, शबला, वैद्युताः सिध्मास्तारकाः १०। धूम्रान् वसन्तायालभते, श्वेतान् ग्रीष्माय, कृष्णान् वर्षाभ्यो,ऽरुणाञ्छरदे, पृषतो हेमन्ताय, पिशङ्गाञ्छिशिराय ११। त्र्यवयो गायत्रैः, पञ्चावयस्त्रिष्टुभे,दित्यवाहो जगत्यै, त्रिवत्सा अनुष्टुभे, तुर्यवाह उष्णिहे १२। पृष्ठवाहो विराजे, उक्षाणो दृहत्या, ऋषभाः,ककुभे, ऽनड्वाहः पङ्क्त्यै, धेनवोऽतिच्छन्दसे १३। कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, ऽरुणपृश्नयः सावित्राः, वत्सतर्य्यः सारस्वत्याः, श्यामाः पौष्णाः,पृश्नयो मारुता, बभ्रुरूपा वैश्वदेवा, वशा द्यावापृथिवीयाः १४। उक्षाः संचरा एता ऐन्द्राग्नाः, कृष्णा वारुणाः, पृश्नयो मारुताः, कायास्तूपराः १५। अग्नयेऽनीकवते प्रथमजानालभते, मरुद्भ्यः सान्तपनेभ्यः सप्तात्मान्, मरुद्भ्यो गृहमेधिभ्यो वह्निहान्, मरुद्भ्यः क्रीडिभ्यः संगृहान्, मरुद्भ्यः स्वतवद्भ्योऽनुगृहान् १६। उक्ताः संचरा एता ऐन्द्राग्नाः, प्राङ्गा माहेन्द्रा, बभ्रुरूपा वैश्वकर्म्मणाः१७। धूम्रा बभ्रुनीकाशाः पितॄणां सोमवतां, बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां, कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां, कृष्णाः पृषन्त स्त्रैयम्बकाः १८ । उक्ताः संचराः एता भूनासीरीयाः, श्वेता वायव्याः, श्वेताः सौर्य्याः १९ । एवं समाप्ता यूपाः इत्यश्वाद्याः सौर्य्यान्ताः सप्तविंशत्यधिकशतत्रयमिताः आख्याः पशवः सर्वे उक्ताः

इन्द्राग्निभ्यां क्रुञ्चान्, मित्राय मद्गून्, वरुणाय चक्रवाकान् २२। अग्नये कुटरूनालभते, वनस्पतिभ्य उलूकान्, नाभीषोमाभ्यां चाषान्, अश्विभ्यां मयूरान्, मित्रावरुणाभ्यां कपोतान्२३। सोमाय लबानालभते, त्वष्ट्रे कौलीकान्, गोषादीर्देवानां पत्नीभ्यः, कुलीका देवजामिभ्यो, अग्नये गृहपतये पारुष्णान्२४। अद्भ्यः पारावतानालभते, रात्रयै सीचाप्, रहोरात्रयोः संधिभ्यो जतू, मांसेभ्यो दात्यौहान्, संवत्सराय महतः सुपर्णान् २५। भूम्या आखूनालभते, अन्तरिक्षाय पाङ्क्तान्, दिवे कृष्णान्, दिग्भ्यो नकुलान्, बभ्रुकानवान्तरदिशाभ्यः २६। वसुभ्य ऋष्यानालभते, रुद्रेभ्योरुरून्, आदित्येभ्योन्यङ्कून्, विश्वेभ्यो देवेभ्यः पृषतान्, साध्येभ्यः कुलङ्गान् २७। ईशानाय परस्वत आलभते, मित्राय गौरान्, वरुणाय महिषान्, बृहस्पतये गवयान्, त्वष्टृ उष्ट्रान् २८। प्रजापतये पुरुषान् हस्तिन आलभते, वाचे सुपौ, चक्षुषे मशका, श्रोत्राय भङ्गाः, २९। प्रजापतये च वायवे च गोमृगो, वरुणायारण्योमेषो, यमाय कृष्णो, मनुष्यराजाय मर्कटः, शार्दूलाय रोहिद्, ऋषभाय गवयी, क्षिप्रश्येनाय वर्तिका, नीलङ्गोः क्रमिः, समुद्राय शिशुमारी, हिमवते हस्ती ३०। मयुः प्राजापत्य, उलो हलिक्ष्णो वृषदंशस्ते धात्रे, दिशां कङ्को, धुङ्काग्नेयी कलविङ्को लोहिताक्षिः पुष्करसादस्ते त्वाष्ट्रा, वाचे क्रुञ्चः ३१। सोमाय कुलुङ्ग, आरण्योऽजो नकुलः शका ते पौष्णाः, क्रोष्टा मायो, रिन्द्रस्य गौरमृगः, पिद्गोन्यङ्कुःकक्कटः, स्तोऽनुमत्यै, प्रतिश्रुत्कायै चक्रवाकः ३२। सौरी बलाका, शार्गः कृजयः शयाण्डकस्ते मैत्राः, सरस्वत्यै, शारिः पुरुषवाक्, श्वाविद्भौमी, शार्दूलो वृकः पृदाकुस्ते मन्यवे, सरस्वते शुकः पुरुषवाक् ३३। सुपर्णः पार्जन्य, आतिर्वाहसो दर्विदा ते वायवे, बृहस्पतये वाचस्पतये, मैङ्गराजो, अलज आन्तरिक्षः, प्लवोमद्गुर्मत्स्यस्ते नदीपतये, द्यावापृथिवीयः कूर्मः ३४। पुरुषमृगश्चन्द्रमसो, गोधा कालका दार्वाघाटस्ते वनस्पतीनां, चक्रवाकः सावित्रो, हंसो वातस्य, नाक्रो मकरः कुलीपयस्ते,कूपारस्य, क्षियै शल्लकः ३५। एणकृष्णो, मण्डूको वरुणानां कपिञ्जलः, कपोत उलूकः शशस्ते निर्ऋत्यै, वरुणायारण्यो मेषः ३८। श्वित्र आदित्याना, मुष्टो दृणोवान् वार्ध्रीनसस्ते मित्रा, अरण्याय क्षुमरो, रुरु रौद्रः, कृयिः कुटरुर्दात्यौहस्ते वाजिनां, कामाय पिकः ३९। खड्गो वैश्वदेवः, श्वा कृष्णः कर्णौ गर्दभस्तरक्षुस्ते रक्षसा, सिन्द्राय सूकरः। सिंहो मारुतः, कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः। ४०। एवं षट्यधिकं शतद्वयमारण्याः पशव उक्ताः। मध्यमयूपे द्वौ एकादशिनौ अन्येषु एकैके एकादशिनः इति एकविंशतियूपेषु द्वाविंशतिरेकादशिनः। अतः सप्तविंशत्यधिकशतत्रयम् अश्वादि सौर्यान्तं द्वाविंशत्या सह मिलिताम् सत् जनपञ्चाशदधिकं शतत्रयम्। ताः ग्राम्यपशवः आरण्यास्तु २६० मिलिताः ६०९ पशवोऽश्वमेधे विहिताः तदुक्तं श्लोके। "षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि। अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च"। तेषु ग्राम्या आलभ्या आरण्या बन्धनान्मोच्या न तु हिंसा इति। एवञ्चात्राश्वस्य प्रधान्यात् अश्वमेधत्वम्। अश्वलक्षणं तु" कालाम्भोधरसङ्काशः स्वर्णवर्णसुखोबली। यस्य पार्श्वयुभावर्द्धचन्द्राकारौ सुशोभनौ। पुच्छं विद्युत्प्रतीकाशसुदरं कुन्दसन्निभम्। पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूरसन्निभौ। ज्वलदग्निनिभा जिह्वा चक्षुषी भास्करोपमे, विराजितो रोमराज्या सानुलोमविलोमया। विचित्रैर्विविधैर्वर्णैश्चित्रोरजतविन्दुभिः। यो वेगे वायुतुल्यः स्याद्वर्द्धैःअवायधा। यस्य गात्रोद्भवोगन्धो गन्धर्व्वमपि मोहयेत्। एवं लक्षणसंयुक्तो यज्ञियः पशुरुच्यते"वाजि०रा०। "गोक्षीरसमवर्णञ्च कुन्देन्दुहिमसन्निभम्। पीतपुच्छं श्यामकर्णं सर्वतोगतिमत्तमम्। श्यामं वापि महीपाल यज्ञेऽस्मिंस्तुरगं विदुरिति"पुरा०। शत०ब्राह्मणे तु "द्विरूपएवैषोऽश्वः स्यात् कृष्णसारङ्गः प्रजापतेर्वाएषोऽश्वः समभवत् द्विरूपं वा इदं चक्षुः शुक्लं चैव कृष्णं च तदेनं स्वेन रूपेण समर्धयतीति। अथ होवाच सात्ययज्ञिः त्रिरूप एवैषोऽश्वः स्यात्तस्य कृष्णः पूर्वार्धः शुक्लोऽपरार्धः कृत्तिकाभिः पुरस्तात्तद्यत् कृष्णः पूर्वार्धो भवति यदेवेदं कृष्णमक्ष्णस्तदस्य तदथ यच्छुक्लोऽपरार्धो भवति यदेवेदं शुक्लमक्ष्ण स्तदस्य तदथ यत्कृत्तिकाभिः पुरस्तात्ता कर्णीनिका स एवं रूपसमृद्धोऽतो यतमोऽस्योपकल्पेत बहुरूपो वा द्विरूपो वा त्रिरूपो वा कृत्तिकाभिरुपालभेत जवेन त्वेव समृद्धः स्यात्"। "कृत्तिकाकारं कृत्तिकान्तिकरोहिणीशकटा

कारमङ्गिं पुरस्तं ललाटे यस्य भा० । ललामम्" । का त्या० २०।१।२३ । "नीलपौण्ड्रकयुक्तमिति" कर्क० । तस्योत्सर्ज्जनं चोत्तरपूर्व्वदिशि । "पशुवदुत्सर्ज्जनं निरष्टे ऽश्वस्यते" कात्या० २०।२।१ । "पशुवदित्युत्तरपूर्व्वा दिग् लक्ष्यते निरष्टे निरमणे दृढतया । अध्वर्युयजमानौ अश्वस्यते यतानामश्वानां मध्ये पशुवदुत्सर्ज्जनं कुरुतः क्रीडशे निरष्टे अश्वस्य वयोव्यञ्जनानि एकैकं त्रीणि त्रीणि वर्षाणि अनुवर्त्तन्ते तानि निर्गतान्यस्मादिति निरष्टम् अतीतचतुर्विंशतिवर्षमित्यर्थः" कर्कः । तेन दृढतया स्खलनसामर्थ्यराहित्यं सूचितम् तथा हि तस्याश्वस्य "बडवाभ्यो वारणम्" "प्रस्नेयाच्चोदकात्" कात्या० २०।२।१। २।३। वाक्येन बड़वाभ्यो निवारणं, प्रस्नेयात् यथेच्छस्नानार्हादुदकाच्च निवारणम् विहितम् । अतएव "प्रजाते वायव्यम्" कात्या० २०।३।२० । बड़वायां रेतःस्कन्दने प्रजातइत्युच्यते तस्मिन् वायव्यपयोनिर्वापोविहितः । तस्य रज्जवश्च यथारूपाः कर्त्तव्यास्तथाह शत०ब्रा० । "तस्यैते पुरस्ताद्रज्जितार उपकॢप्ता भवन्ति । राजपुत्राः कवचिनः शतं राजन्या निषङ्गिणः शतं सूतग्रामण्याः पुत्रा इषुधर्षिणः शतं ज्ञातसंग्रहीतॄणां पुत्रा दक्षिणतः शतमश्वशत निरष्टं निरमणं वक्षिन्नेनमपिसृज्य रज्जन्ति" अवधिकालमाह "तस्मात् पारिप्लवं षट्त्रिंशतं दशाहा नाचष्टे" इति शत०ब्रा० सावनगणनया संवत्सरे गते दीक्षा । "अग्नीषोमीयं पशुमालभते" इत्यादिना "सूतेर्वादर्शने च" इत्यत्रेन कात्या०२०,३,२०। प्रायत्तविशेषानुक्ता "अन्यस्य रथनादानादि करोत्यश्वयुक्तम्" सूते अश्वस्यादर्शने च" का०२०,४,१। अपुनरागमसम्बन्धे च अन्यस्याश्वस्य रथनादानादि अश्वयुक्तमश्वसंबन्धि अश्वोपकारकं सर्व्वं कर्म्म पुनः करोति" कर्कः । अश्वमेधारम्भकालश्च । "अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य" कात्या०२०,१,२, फाल्गुनशुक्लपक्षेऽष्टम्यां नवम्यां वा प्रारम्भः । "याऽसौ फाल्गुनी पौर्णमासी भवतीति" प्रकृत्य 'तस्यै पुरस्तात् षड़हे वा सप्ताहे वा ऋत्विज उपसमायन्तीति" शत० ब्रा० यौग्नेलेके" कात्या० २०,१,३, "ज्यैष्ठषाड़योः शुक्लाष्टम्यां नवम्यां वेत्येके" कर्कः । एकविंशतिपूपसन्निवेश्यमानादि यथा "एकविंशतिर्यूपाः सर्व्व एकविंशत्न रत्नयोराज्जुहूलोऽग्निश्चो भवति यैतत्तदारेवावभितः, षड्बैल्वास्त्रय इत्यात्रय इत्यात्, षट् खादिरास्त्रय एवेत्यात्रय इत्यात्, षट् पालाशास्त्रय एवेत्यात्रय इत्यात्, शत०ब्रा० । एतेषां नामनिर्व्वचनं तत्रैव द्रष्टव्यम् ।

अश्वमेधस्य यौगिकानि द्वादश नामानि दर्शितानि शत० ब्रा० १३काण्डे । "एष वै प्रभूर्नाम यज्ञः१ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रभूतं भवति । एष वै विभूर्नाम यज्ञः२ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विभूतं भवति । एष वै व्यष्टिर्नाम यज्ञः३ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव व्यष्टं भवति । एष वै विष्टतिर्नाम यज्ञः४ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विष्टतं भवति । एष वै व्याप्तिर्नाम यज्ञः५ । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्याप्तं भवति । एष वा ऊर्जस्वान्नाम यज्ञः६ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेवोर्जस्वद्भवति । एष वै पयस्वान्नाम यज्ञः६ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव पयस्वद्भवति । एष वै ब्रह्म वर्चसी नाम यज्ञः८ । यत्रैतेन यज्ञेन यजन्त आब्राह्मणो वर्चसी जायते । एष वाऽतिव्याधिर्नाम यज्ञः९ । यत्रैतेन यज्ञेन यजन्त आराजन्योऽतिव्याधिर्जायते । एष वै दीर्घो नाम यज्ञः१० । यत्रैतेन यज्ञेन यजन्तऽआदीर्घारण्यं जायते । एष वै क्लृप्तिर्नाम यज्ञः११ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव क्लृप्तं भवति । एष वै प्रतिष्ठा नाम यज्ञः१२ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रतिष्ठितं भवति" । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" शत०ब्रा० "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" भा०अश्व०प०।

अश्वमेध पु० अश्वमेधोऽस्यास्य अर्श० अच् । राजर्षिभेदे । "यो मरुतः प्रवोचत्यश्वमेधाय सूरये" ऋ० ५,२७,४ । अश्वमेधाय राजर्षये" भा० ।

अश्वमेधिक न० अश्वमेधमधिकृत्य कृतः ग्रन्थः ठक् ठञ् वा । महाभारतान्तर्गते चतुर्दशे पर्व्वणि । "ततोऽश्वमेधिकं पर्व सर्वपापप्रणाशनम्" "ततोऽश्वमेधिकं पर्व प्रोक्तं तच्च तृतीयम्" इति च भा०आ०प० ।

अश्वमेधीय पु० अश्वमेधाय हितः "अश्वमेधाच्च च"पा०ञ । अश्वमेधयोग्ये पशौ तल्लक्षणम् अश्वमेधशब्दे उक्तम् । चात् ठञ् । अश्वमेधिकोऽप्युक्तार्थे ।

अश्वया स्त्री अश्वमिच्छति अश्व–क्यच् "न छन्दस्युपसर्गेति" पा० नेत्त्वदीर्घौ भावे अ । इषेच्छायाम् "अप्तुराश्वयोत रथया" ऋ० ८,४६,१०। "अश्वया अश्वेच्छया" भा० ।

अश्वयु त्रि० अश्वोऽस्यास्य युच् । १अश्वयुक्ते "गव्युरश्वयुरीयते" ऋ० २१,१५ । अश्वमिच्छति क्यच् वेदे नि० नेत्त्व दीर्घौ उन् । २अश्वेच्छावति । अश्वयुर्गव्यूरथयुः" ऋ० १,२१,१४ । "अश्वयुरश्वानिच्छन्" भा० ।

अश्वयुज् स्त्री अश्वेन हयसुखाकारेण युज्यते युज–क्विप्। १अश्विनीनक्षत्रे तस्य तथाकारत्वमक्षेषाशब्दे उक्तम्। अश्वयुजि जातः अण् तस्य वा लुक्। अश्वयुक् २तन्नक्षत्रजाते त्रि० लुगभावे आश्वयुजः स्त्रियां ङीप्। अश्वेन हयाकारवता नक्षत्रेण युज्यते पौर्णमास्यन्तिन् मासे आधारे क्विप्। ३चान्द्राश्विनमासे "अश्वयुक्कृष्णपक्षस्य श्राद्धं कुर्याद्दिनेदिने" स्मृतिः। अश्वेन नक्षत्रेण युक् पौर्णमासी अस्यस्य अर्श० अच्। अश्वयुजोऽत्र रत्नमाला० अश्वयुजा युक्ता पौर्णमास्यन्तिन् प्रज्ञा० अण् आश्वयुजोऽत्र। कर्म्मणि क्विप्। अश्वेन युक्ते ४रथादौ। अश्वेन युनक्ति रथम् कर्त्तरि क्विप्। रथादौ ५अश्वयोजके त्रि०। "वयोदधो अश्वयुजः परिज्मनः" ऋ०भा०५,५४,२।

अश्वरक्षक पु० अश्वं रक्षति रक्ष–ण्वुल्। घोटकपालके।

अश्वरत्न न० अश्वोरत्नमिव उपमि०स०। उच्चैःश्रवसि तस्य हयश्रेष्ठत्वात्तथात्वम् "मथ्यमानेऽम्बुधौ जातमश्वरत्नमनुत्तमम्" भा० आ०प० १७अ०। हयरत्नादयोऽत्र "हयरत्नमहारि च" कुमा०।

अश्वरथ पु० अश्वयुक्तोरथः। १अश्वयुक्ते रथे। गन्धमादनसन्निहितायाम् २नद्यां स्त्री। "पञ्चवर्षाणि दुष्षाणि प्राप्स्यन्ते भरतर्षभ!। प्रत्यक्षं सर्वभूतानां नदीमश्वरथां प्रति" भा० व०प० १६०अ०।

अश्वराज पु० अश्वानां राजा श्रेष्ठत्वात् टच्। उच्चैःश्रवसि "यत्र जज्ञे महावीर्य्यः सोऽश्वराजो महाद्युति" भा० आ०प०१७अ०। भगवद्विभूतित्वादपि तस्य श्रेष्ठत्वम् "उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्" गीता।

अश्वरोधक पु० अश्वं रुणद्धि रुध–ण्वुल्। करवीरवृक्षे।

अश्वरोह पु० अश्वं रोहति रुह–अण् उप०स०। अश्वारोहे सादिनि।

अश्वल त्रि० अश्वं लाति ला–क ह्रस्व०। १हयग्राहके ऋषिभेदे "अथ हजनकस्य वैदेहस्य होताश्वलो बभूव" बृ०उ०। तद्ऋषेः याज्ञवल्क्यं प्रति प्रश्नप्रतिवचनरूपाख्यायिकाप्रतिपादके २ब्राह्मणे च तच्च "अथ हजनकस्येत्यारभ्य ततोऽहोताश्वलोविरराम" इत्यन्तम्। गोत्रापत्ये नडा० फक्। आश्वलायनः। तद्गोत्रापत्ये तेन प्रोक्तसूत्रग्रन्थसूत्रञ्च कृतम् तस्मिन्।

अश्वलक्षण न० अश्वानां शुभाशुभसूचकत्वं लक्ष्यतेऽनेन लक्ष–करणे ल्युट् ह्रस्व०। अश्वस्य शुभाशुभसूचके विज्ञभेदे अश्वशब्दे तन्त्रोक्तम्।

अश्वललित न० वृत्तरत्नाकरोक्ते त्रयोविंशत्यक्षरपादके वर्णवृत्तभेदे "यदि ह नजौ भजौभजलगास्तदाश्वललितं हरार्कयतिमत्"। इदमद्रितनयेति छन्दोम०।

अश्वलाला स्त्री अश्वस्य लालेवालत्वात्। ब्रह्मसर्षे हलाहलसर्पे जटाध०। अश्वलोमेति पाठान्तरम्। अश्वस्य लोम्ने वालतिरस्त्र" तत्र विग्रहः।

अश्ववक्त्र पु० अश्वस्य वक्त्रमिव वक्त्रमस्य। १किम्पुरुषे देवयोनिभेदे अश्ववदनहयमुखादयोऽत्र। २हयग्रीवे विष्णुमूर्त्तिभेदे अश्वशिरःशब्दे विवृतिः। तद्ध्यानेन च तन्मूर्त्तिरुक्ता तत्त्वसा०। "शरच्छशाङ्कप्रभमश्ववक्त्रं सुक्ताक्षमालैराभरणैः प्रदीप्तम्। रथाङ्गशङ्खाञ्चितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः"।

अश्ववत् त्रि० अश्वोऽस्यास्य मतुप् मस्य वः। १अश्वयुक्ते। "दधानो गोमदश्ववत् सुवीर्य्यम्" ऋ० ८,४६,५। मन्त्रे क्वचित् दीर्घः अश्वावान्। "भोजनमश्वावन्तं गोमन्तमाशुं नरः" ऋ० १,८२,४। अश्वे इव अश्वस्येव वा वति। २हयसदृशे अव्य०। अश्वेन तुल्यं क्रिया वति। ३हयसदृशक्रियातुल्यक्रियायाम् अव्य०। अश्वमर्हति वति। ४हयार्हे अव्य०। [नोद्देश्य सादिनि।

अश्ववह पु० अश्वेन उह्यते वह–कर्म्मणि वा अच्। हये-

अश्ववार पु० अश्वं वारयति वृ०इ–अण् उप०स०। हयनिवारके सादिनि "दुःखेन निश्चक्रुरश्ववाराः" माघः। ण्वुल्। अश्ववारकः तत्रैव। ल्यु अश्ववारणोऽत्र। अश्ववारलक्षणादिकमुक्तमश्वशास्त्रे यथा "आह्वानान् यन्त्रिदानेन साम्ना चैव तु चालयान्। वैश्यं दण्डेन शब्देन शूद्रं दण्डेन वाहयेत्। प्रत्यूषे वाहयेद्विप्रं क्षत्रियं प्रहरे गते। वैश्यं संन्ध्यागते काले शूद्रं रात्रौ च वाहयेत्। सत्वं च त्रिविधं प्रोक्तमुत्तमाधममध्यमम्। उत्तमं चोपयामेन साम्ना दण्डेन मध्यमम्। यन्त्राङ्गेन च दण्डेन वाहये दधमम्बुधः। सहजे निर्मले वाहे तैलदुग्धसमे रूपवान्। शालिश्च द्विविधा प्रोक्ता बलदौर्बल्यसम्भवा। बलिष्ठो दुर्बलत्वेन दुर्बलोऽपि बलेन वा। क्लेशेनोपाधिकायांश्च सत्वं ज्ञात्वा च वाहयेत्। सार्द्रां सुकठिनां चैव पाषाणोदकसंयुताम्। तृणकाष्ठसमायुक्तां रङ्गभूमिं तु वर्ज्जयेत्। समां च विपुलां चैव किञ्चित्पांशुसमन्विताम्। एकान्ते विजने रम्ये रङ्गभूमिं तु कारयेत्। स्थूलः क्रोधी च मूर्खश्च चिरोत्सुकश्चलासनः। अस्थाने दण्डपाती यो वाजी तस्य न सिध्यति। प्रचलति यस्य कटिरूर्द्ध बाहुर्दण्डपातः। न

तस्य वाहनं वाजी दुर्लक्ष्यं वाजिवाहितम् । दृढासनोऽथ तत्त्वज्ञो जितसृष्टिर्निरालसः । अविरागी स्थिरश्चापि षडेते वाजिवाहकाः । चित्तं यो नैव जानाति तुरगस्य समासतः । न वहन्ति हयास्तस्य दण्डपातेन ताड़िताः । क्षेपिते वल्गिते भीते तथा चोन्मार्गगामिनि । कुपितोद्भ्रान्तचित्ते वा षट्सु दण्डं निपातयेत् । क्षेपिते ताड़येन्मूर्द्धि जानुभ्यां वल्गिते तथा । क्रुद्धे उरसि हन्तव्यो भ्रान्तचित्ते तथोदरे । भीतं च ताड़येत्पश्चान्मुखे चोन्मार्गगामिनम् । ज्ञात्वा दोषं च रूपं च स्थानेष्वेतेषु ताड़येत् । अस्थानताड़ितोवाजी यावज्जीवं न सिध्यति । नो जहाति च तद्दोषं यावज्जीवत्यसौ हयः । धाराः पञ्च प्रवक्ष्यामि मुनिभिर्याः प्रकीर्त्तिताः । प्रथमा विक्रमा धारा द्वितीया पुलका स्मृता । तृतीया पूर्णकण्ठी तु चतुर्थी त्वरिता स्मृता । पञ्चमी चैव या धारा निरालम्बा प्रकीर्त्तिता । षष्ठी चैव तु या धारा श्रूयते न तु दृश्यते । विक्रमा गतिधारा च चतुष्का पुलका मता । सुखपादसमायुक्ता पूर्णकण्ठी तु सा भवेत् । स्वेच्छया त्वरिता धारा ताड़िता चैव पञ्चमी । षष्ठी चैव तु या धारा स्वर्गलोकेषु गीयते । वल्गाश्च संप्रवक्ष्यामि मुनिभिः परिकीर्त्तिताः । पुष्पवन्ती च गोकर्णी तूलोत्तुला तुला तथा । नागखड्गी पुष्पधारी दुमुही च शतस्रुनी । द्विहस्ती चैकहस्ती च शुभगा शोभना मता । द्वात्रिंशता द्वादश वल्गा मुनिभिः परिकीर्त्तिताः" "आरूढकर्णमध्ये तु मनो लक्षयति वाजिनः" शनैस्तु वाहयेत्पूर्व्वं पशुतल्पं समादिशेत् । न वक्रो न तथोत्तानो न कुब्जो नाग्रपोमुखः । न भवेत्तल्पगात्रस्तु स भवेदश्ववाहकः । स्थिरोरुः स्थिरपादश्च त्रिकोन्नतस्थिरासनः । दक्षिणादितुरङ्गस्य चासने तु दृढः सदा । अश्ववाराः समाख्याताः शेषास्तु भयदायकाः । ग्रीष्मादिषु न वर्त्तव्यमृतुषु त्रिषु वाहनम् । हेमन्तादिषु वर्त्तव्यं सादिभिः शास्त्रवेदिभिः । प्रतिपत्सु तथोदश्यां पञ्चम्यां वा सिते दले । धृतिसिद्धातियोगेषु वासरे चन्द्रसूर्य्ययोः । मूलरोहिण्यौहस्तेषु पुष्ये चैवोत्तरासु च । एवंविधे दिने सादी वाहान् संवाहयेत् शुभे । रङ्गभूमौ च रेवन्तं स्थापयेत् पूजयेत्ततः । पुष्पैर्धूपैः प्रदीपैस्तु चन्दनैः पायसैस्तथा । पक्वान्नैः पञ्चशब्दैश्च प्रातःशुचिशुवाससा । रक्ताम्बरधरोभूत्वा रक्तपुष्पधरस्तथा । "एकविंशतिवारांश्च ततः पर्य्याणयेद्धयम् । क्रोशमेकं तमारुह्य नयेच्छिक्षां शनैःशनैः । वल्गाग्रहश्च कर्त्तव्यः सव्यापसव्यमेव च । विक्रमा पुलका पूर्णकण्ठी च त्वरिता तथा । खलीनादौ प्रयोक्तव्या सादिना वाजिनां क्रमात् । नातिस्थूलं नाति लघ्वं न स्वल्पं नातिकर्कशम् । सप्ताङ्गुलप्रमाणन्तु खलीनं कारयेद्बुधः । खलीनादिषु लोहेषु धारयेद्विक्रमादिषु । क्रमेणैव तुरङ्गाणां कटानि संप्रयोजयेत् । खलीनादौ तु धारासु यदा सुश्लिष्टितो हयः । तदा कटेषु तं सादी भ्रामयेद्विक्रमादिभिः । शतहस्तादिकां भूमिं सप्तहस्तावसानिकाम् । भ्रामयेद्वाजिनं सादी सव्यं चैवापसव्यकम् । मण्डलं चतुरस्रं च गोमूत्रं चार्द्धचन्द्रकम् । नागपाशं क्रमेणैव भ्रामयेत्कटमञ्चकम् । एवमन्येषु लोहेषु त्रिषु वै भ्रामयेत्कटे । यश्चैवं वाहयेद्वाहं तस्य कष्टं न जायते । दद्याद्धयमभीतस्य भीतस्यापि हरेद्धयम् । रहस्यं सादिनामेतद्वाहनेऽस्मिन्निवेदितम् । पूर्वोक्तेषु च देशेषु षट्सु दोषेषु ताड़येत् । न जातु सादिनान्यस्मिन् काले दोषशतैरपि । दृश्यमानस्य अशुभ्रस्य यो दोषः सादिदोषतः । जायते ऽसौ निराकर्त्तुं सादिना नैव शक्यते । एवं शास्त्रविधानेन यः सादी वाहयेद्धयान् । हयस्तस्य सिध्यन्ति भवन्ति फलदायकाः । वाहनं यच्च दुष्टं च धूपलेपनमन्त्रकैः । तदहं संप्रवक्ष्यामि मुनिभिः कीर्त्तितं यथा । अस्थिभिर्दशनैश्चैव टंकाणं च यथा बुधैः । विषमत्तिकादंष्ट्राभिः धूपसंज्ञं सर्षपा । एलागुरुमदोशीरनागकेसरचन्दनैः । सर्ज्जिकातैलसंयुक्तो धूपयेद्दुष्टवाजिनम् । विषलोहगदैलाभिस्त्रैलाज्यदधिचन्दनैः । निःशेषदोषनाशाय धूप उक्तो हि वाजिनाम् । विल्वि गोमयैः प्रातर्द्विगीथे सर्वसन्धिषु । अदृश्यां च विशेषेण दुष्टाः सिध्यन्ति धूपिताः । काशीशं चन्दनं कौतीसिद्धार्थमरिचानि च । सैन्धवं बड़वामूत्रं गोमूत्रं कर्णजं मलम् । मुनिशुभ्राणि पित्तानि कणायाः सवचानि च । अञ्जनं सर्वदुष्टानां देयं पर्वणि पर्वणि । अनेनाभ्यञ्जितो वाजी निर्व्याधमधिगच्छति । कोपमोहं भयं त्यक्त्वा वश्यः स्यात्सादिनोश्वयम्" ।

अश्ववाह पु० अश्वं वाहयति चालयति वह–णिच्–अण् । अश्वचालके सादिनि । ख्युन् । अश्ववाहकोऽप्यत्र । ख्वुल् । अश्ववाहनोऽप्यत्र पु० ।

अश्वविक्रयिन् त्रि० अश्वं विक्रेतुं शीलमस्य वि+क्री–शीलार्थे णिनि ईत० । हयविक्रयाजीविकायुक्ते त्रिका० ।

अश्वविद् पु० अश्वं हयहृदयं वेत्ति विद–क्विप् ईत० । १नलन्यपतौ तस्याश्वहृदयज्ञता वर्णिता" भा० व० प० ७२ अध्या० । यथा "ऋतुपर्णं प्रति बाहुकरूपस्य नलस्योक्तिः "बाहुकस्तमु-

वाचाथ देहि विद्यामिमां मम। मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभ!। ऋतुपर्णस्ततोराजा बाहुकं कार्य्यगौरवात्। हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः। यथोक्तं त्वं गृहाणेदमश्वानां हृदयं परम्। निक्षेपोमेऽश्वहृदयं त्वयि तिष्ठतु बाहुकं'। अश्वं विन्दते विद्-क्विप्। २अश्वलब्धरि त्रि० "परि णो अश्वमश्वविन्नोमत्" ऋ० ६,६१,३। "अश्वविद् अश्वस्य लब्धकः" भा०।

अश्ववैद्य पु० ६त०। घोटकचित्सके तच्चिकित्साप्रकारः। जयदत्तकृतेऽश्वशास्त्रेऽवसेयः।

अश्वशङ्कु पु० ६त०। १अश्वबन्धनार्थे कीले। अश्वस्य शङ्कुरिव। २दनुपुत्रभेदे "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत"। प्रत्युपक्रम्य "अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान्" भा०आ०प० ६०अध्या०।

अश्वशाला स्त्री ६त०। हयस्थावे मन्दुरायां वाजिशालायाम् तत्करणविधिश्चाश्वशास्त्रे। यथा "प्रागुदक्प्रवणे देशे वालुकाकाष्ठवर्जिते। चिताचैत्यविहीने च शालां कुर्वीत पण्डितः। सुशुष्का सा च कर्त्तव्या दुष्टकीटाद्यसंयुता। शिशिरे स्थापयेद्देवं रेवन्तं पूजयेत्सदा। कार्य्या त्रिहस्तविस्तीर्णा तालाख्या पिण्डिका शुभा। शालाप्रमाणदीर्घा च तस्यां वप्रं प्रकल्पयेत्। द्वौ हस्तावुच्छ्रये तस्या मानं चैवं प्रकीर्त्तितम्। कर्कन्धूकाष्ठदण्डं च प्रान्तेऽस्याः स्थापयेद्बुद्धिः" वालुका पूरितं कार्य्यं संस्कृतं चत्वरं तथा। लुण्ठनाय च वाहानां भवेच्चङ्क्रमणाय च" "जय०अश्व०शा०। "दृष्टं ते गृहं कोशागारमायुधागारमश्वशालां हस्तिशालाञ्च क्रुद्धः" भा०व० प० १६७ अ०।

अश्वशास्त्र न० अश्वलक्षणादिज्ञापकं शास्त्रम्। शालिहोत्रकृते हयलक्षणादिज्ञापके १शास्त्रे तन्मूलके जयदत्तकृते २शास्त्रे च।

अश्वशिरस् न० ६त० १वाजिमस्तके। अश्वस्य शिरइव शिरोऽस्य॥ २दानवभेदे अश्वशङ्कुशब्दे विवृतिः। "अयःशिरा अश्वशिरा अश्वःशङ्कुश्च वीर्य्यवान्। तथागगनसूर्य्यश्च वेगवांश्चात्र पञ्चमः। पञ्चैते जजिरे राजन्! वीर्य्यवन्तोमहासुराः। कैकयेषु महात्मानः पार्थिवर्षभसत्तमाः" भा०आ०प० ६६अध्या०। ३हयशिरसि विष्णुमूर्त्तिभेदे, ताद्दङ्मूर्त्तिधारणमुक्तम्" भा०शा०प० ३४२अध्या०। "तेऽनुशिष्टा भगवता देवाः सर्षिगणास्तथा। नमस्कृत्य भगवते जग्मुर्देशान् यथेप्सितान्। गतेषु त्रिदिवौकस्सु ब्रह्मलोकः पर्य्यवस्थितः। दिदृक्षुर्भगवन्तं तमनिरुद्धतनौ स्थितम्। तं देवो दर्शयामास कृत्वा हयशिरोमहत्। साङ्गानावर्त्तयन् वेदान् करङ्कुलुन्दिदण्डष्टक्। व्यास उवाच। ततोऽश्वशिरसं दृष्ट्वा तं देवममितौजसम्। लोककर्त्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया। मूर्ध्ना प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः। स परिष्वज्य देवेन वचनं श्रावितस्तदा। श्रीभगवानुवाच। लोककार्य्यगतीः सर्वास्त्वं चिन्तय यथाविधि। धाता त्वं सर्व्वभूतानां त्वं प्रभुर्जगतो गुरुः। त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यथाङ्गसा। यदा च सुरकार्य्यन्ते अविषह्यं भविष्यति। प्रादुर्भावं गमिष्यामि तदात्मज्ञानदैशिकम्। एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत"। "कपर्द्दिने वराहाय एकशृङ्गाय धीमते। विवस्वतेऽश्वशिरसे चतुर्मूर्त्तिष्टते सदा" इति च तत्रैव।

अश्वशृगालिका स्त्री अश्वशृगालयोर्वैरं द्वन्द्वात् वैरे वुन्। हयशृगालयोर्वैरे शब्दरत्ना०।

अश्वश्चन्द्रा त्रि० अश्वैश्चन्द्रयति आह्लादयति चदि-णिच् रक् ३त० वेदे ष्टुत्वं। हयेनाह्लादिकायां स्त्रियां "गोमघा जरित्रे अश्वचन्द्राः" ऋ० ६,३५,४। "अश्वचन्द्राः अश्वैराह्लादयन्त्यः" भा०।

अश्वषड्गव न० अश्व+षट्के षड्गवच्। हयषट्के।

अश्वसनि त्रि० अश्वं सनुते ददाति-सन-क्विन् ६त०। हयदायके। "यस्तेऽश्वसनिर्भक्षः"। यजु० ८,१२। अनुसवनादि०।

अश्वसा त्रि० सन-विट-ङा ६त०। हयदातरि। "गोषणिं धियमश्वसां वाजसामुत" ऋ० ६,५३,१०।

अश्वसाद पु० अश्वं सादयति गमयति सद-गतौ णिच्-अण् उप०स०। सादिनि।

अश्वसादिन् पु० अश्वे सीदति सद्-णिनि ७त०। सादिनि (घोड़सओयार) "प्रतिग्रहाद्यममश्वसादी" रघुः।

अश्वसेन पु० १जिनपितृभेदे २नृपभेदे यस्य पुत्रः सनत्कुमारः कुरुक्षेत्रस्थेक्षुमतीनदीसमीपवासिनि तक्षकसुते ३नागभेदे च। "तक्षकश्चाश्वसेनश्च नित्यं सानुचरावुभौ। कुरुक्षेत्रे च वसतां नदीमिक्षुमतीमनु" भा०आ०प० ३अध्या०। "अश्वसेनोऽभवत्तत्र तक्षकस्य सुतो बली। स तीक्ष्णमकरोद्यत्नं मोक्षार्थं जातवेदसः"। भा०आ०प० २२६अध्या०

अश्वसेनतृपनन्दन पु० ७त०। सनत्कुमारे त्रिका०।

अश्वस्तन त्रि० श्वोभवः श्वस्+श्वु-तुट्च श्वस्तनः न०त०। परदिनास्थायिनि वर्त्तमानदिनमात्रभवे। "अश्वस्तनविधानेन कर्त्तव्यं मनुरब्रवीत्" मनुः स्त्रियां ङीप्।

अश्वस्तनिक त्रि० अश्वस्तनमस्त्यस्य मत्वर्थे ठन् न०त०। परदिनास्थायिधने वर्त्तमानदिनपर्य्याप्तधनसञ्चयकारिणि गृहस्थभेदे "कुम्भधान्यकोवा स्यात् कुम्भीधान्यक एव वा। त्र्यहैहिकोवापि भवेदश्वस्तनिक एव वा" मनुः।

अश्वस्तोमीय न० अश्वस्य स्तोमं स्तुतिरस्यस्य मत्वर्थे छ। हयस्तुतियुक्ते सूक्तभेदे तच्च सूक्तम्" ऋ० १,१६२। मानोमित इत्यादि द्वाविंशत्यृचम्। २ तत्साध्ये होमजाते च। "अश्वस्य वाऽआलब्धस्य मेध उदक्रामत्तदश्वस्तोमीय मभवद्यदश्वस्तोमीयं जुहोत्यश्वमेव मेधसा समर्धयति। आज्येन जुहोति। मेधोवा आज्यं मेधोऽश्वस्तोमीयं मेधमेवात्मिंस्तन्मेधो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान्धाम्ना समर्धयति। अश्वस्तोमीयं हुत्वा द्विपदा जुहोति। अश्वोवाऽअश्वस्तोमीयं पुरुषो द्विपदा, द्विपाद्वै पुरुषो द्विप्रतिष्ठस्तेनैनं प्रतिष्ठया समर्धयति तदाहुः अश्वस्तोमीयं पूर्वं होतव्यां द्विपदा इति पशवो वा अश्वस्तोमीयं पुरुषो द्विपदा यदश्वस्तोमीयं हुत्वा द्विपदा जुहोति तस्मात् पुरुष उपरिष्टात् पशूनधितिष्ठति षोड़शावश्वस्तोमीया जुहोति" शत० ब्रा०।

अश्वस्थान न० ऐत०। वाजिशालायाम् "अश्वस्थानात् गजस्थानात् सङ्गमात् वल्मीकात् ह्रदात्" विष्णुध० पुरा०।

अश्वहनु पु० अश्वस्य हनुरिव हनुरस्य। "दानवभेदे हरिश्चाश्व हनुश्चैव वीरौ तावथ सूदिनौ" हरिवं० ३६ अध्या०।

अश्वहन्तृ पु० अश्वं हन्ति हन-तृच् ऐत०। १करवीरे "बीजं विड़ङ्गाश्वहन्त्रोर्हरिद्रे दहतीद्वयम्" सुश्रुतः। २हय नाशके त्रि०।

अश्वहय पु० अश्वेन हिनोति गच्छति हि-कर्त्तरि अच्। अश्वेन गतिमति "प्रत्यर्द्धि र्यज्ञानामश्वहयो व रथानाम्" ऋ० १०,२६,५। अश्वेन हीयते व्याप्यते कर्म्मणि अच्। अश्वव्याप्ये। "सृजन्त्यश्वहयैरनिशितं नभोभिः ऋ० ६,६६,,२।

अश्वहृदय न० अश्वस्य हृदयं मनोगतभावादि। हयाभिलाषे २शदावेदकविद्याभेदे च अश्वविच्छब्दे उदा०।

अश्वाद्य पु० अश्वमद्यतीव अद्य समा०। देवर्षभेदे।

अश्वादि पु० पाणिन्युक्ते शुभाशुभसूचकनिमित्ते संयोगरूपेऽर्थे ठञ्प्रत्ययनिमित्ते १शब्दसमूहे सच गणः अश्व, अश्वजित् गण, अर्थात् उभा गङ्गा वर्षा वस्तु। गोत्रापत्ये २फञ्प्रत्ययनिमित्ते शब्दसमूहे च स च गणः अश्व, अश्वजित् गर्ग, मूलक, विद, पुट, रोहिण, खर्जूर, खड्गार, वस्त, पिजल भड़िल, भण्डिल, भड़ित, भण्डित, प्रज्ञत, रामोद, क्षान्त, काश, तीक्ष्ण, गोलाङ्क अर्क, खर, स्फुट, चक्र, अविष्ट, पविन्द, पवित्र, गोभिन्, श्याम, धूम, धूम्र, वाह्निन्, विश्वानर कुट, शप (आत्रेये)। जन, जड़, खड़, ग्रीष्म, अर्ह, कित, विशम्य, विशाल, गिरि, चपल, चुप, दासक, वैल्व प्राच्य, धर्म्म, आनडुह्य, (पुंसि)जात, अर्जुन, प्रहृत, सुमनस् दुर्मनस् मनस्, प्रान्त, ध्वन, आत्रेय (भरद्वाजे) भरद्वाज, (आत्रेये) उत्स, आतव, कितव, वद, धन्य, याद, शिव, खदिर अश्वादि।

अश्वामघ त्रि० अश्वोमघं धनमस्य वेदे दीर्घः। "अश्वरूपधन स्वामिनि 'अश्वामघा गोमघा वा इवेम" ऋ० ७,०७१,१

अश्वायुर्वेद पु० अश्वस्यायुर्वेद्यतेऽनेन विद-णिच् घञ्। हयायुर्व्वापके शास्त्रे तच्च शालिहोत्रेण सुश्रुतनामानं स्वसुतं प्रत्युपदिष्टम् तन्मूलञ्च जयदत्तकृतञ्च अश्वशब्दे विवृतिः।

अश्वारि पु० अश्वस्यारिः ऐत०। महिषे।

अश्वारूढ पु० अश्वमारूढोऽनेन। सादिनि अश्वारोहिणि।

अश्वारोह पु० अश्वमारोहति आ+रुह-अण् उप०स। हयवाहके, हयारोहणेन २युद्धकर्त्तरि च। अश्वस्तम्भेद्रुमिवारोहोमूलमस्य। ३अश्वगन्धायां स्त्री।

अश्वावतान पु० अश्वस्येवावतानोऽस्य। ऋषिभेदे। विदा० अपत्ये अञ्। आश्वावतानः तद्गोत्रापत्ये बहुषु गोपवना० न लुक्। आश्वावतानाः। [गन्धाष्टके॥

अश्वावरोहक पु० अश्वस्तम्भेद्रुमिवारोहति खुल्। अश्व-

अश्विन् पु० द्विव० अश्वाः सन्ति ययोः इनि, अश्विन्यां नक्षत्रे भवौ "सन्धिवेलाद्यृतनक्षत्रेभ्यः या० अण् "नक्षत्रेभ्योबहुलम्" पा० वा लुक् लुकि स्त्रीप्रत्ययस्य लुक्, अश्वा उत्पत्तिः स्थानत्वेनास्त्यस्य इनिवा। १खगवैद्ययोः। "किमश्विनौ सोमरसं पिपास्तः" भट्टिः "वासोदक्षन्द्रसालोक्यमश्विसालोक्यमश्नुदः" मनुः। "त्वाष्ट्री तु सवितुर्भार्य्या वडवारूपधारिणी। असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ" भा० आ० प०। "वा वां कशा मधुमत्यश्विना सूनृतावती" यजु० ७,२। अश्वस्तद्विज्ञावर्त्तः अस्त्यर्थे इनि। "कपोतयोस्तथावर्त्तौ विद्येते वाजिनोर्यदि। तावाश्विनाविति प्रोक्तौ राज्यवृद्धिकरौ परौ" इत्युक्तलक्षणयोः २हययोः द्वि०व०। ३हययुक्ते त्रि०। स्त्रियां ङीप्। "गोमा अग्नेऽविमाँ अश्वी" ऋ० ४,२,५।

अश्विनी स्त्री अश्वस्तदुत्तमाङ्गाकारोऽस्यस्य इनि ङीप्। सप्तविंशतिधाविभक्तराशिचक्रस्य प्रथमे भागे। अस्याः तथाकारत्वमन्यशब्दे उक्तम्। "अश्विनीमघमूलानां गण्डा आद्यास्त्रिनाड़िकाः" ज्यो० नक्षत्रपरत्वे न०। "पुष्याश्विहस्ता लघुः" ज्यो० अश्वाया आकारोऽस्यस्याः इनि ङीप्। हयरूपधारिण्यां त्वष्टृसुतायां २संज्ञायां भार्य्यायामरण्यात्मजशब्दे २६६८ पृ० विवृतिः।

अश्विनीकुमार पु० द्वि०व०। सूर्य्येण त्वष्टृसुतायां संज्ञायां बड़वारूपायामुत्पादितयोः स्वर्वैद्ययोः तदुत्पत्तिकथा भा० आ० प० ६६ अध्याये अश्विनीतनयशब्दे अरण्यात्मजशब्दे २६६८ पृ० विवरणम्।

अश्वीय न० अश्वानां समूहः छ। १हयसमूहे। अश्वस्य हितम् अपूपा० छ। २हयहिते। पक्षे यत्। अश्वीऽप्युक्तार्थे।

अश्वीरस न० अश्वानामिदं इव सख्यम् अच्समा०। सख्येहये।

अष दीप्तौ अक० गतौ, भक्षणे च सक० भ्वा० उभ० सेट्। अषति ते आषीत् आषिष्ट।

अषडक्षीण त्रि० न षण्णि षड़क्षीणि श्रोत्रेन्द्रियाणि यस्य कः। हतीयजनकर्णास्पृते द्वाभ्यामेव हते मन्वादौ।

अषाढ(ाड़) पु० अषाढ(ाड़)या युक्ता पौर्णमासी आषाढी (ाड़ी)सा यत्र मासे अण् वा लुक्। वैशाखादितृतीये चान्द्राषाढ(ड)मासे। आषाढी पूर्णिमा प्रयोजनमस्य प्रयोजनार्थे अण्। २ब्रह्मचारिभार्य्ये दण्डे, तस्य हि आषाढपौर्णमास्यां विहितकर्म्मोपयोगित्वात् तथात्वम् पृ०लुक्। आषाढोऽप्यभवत्। स्वार्थे कन् तत्रैव। सह न्न वेदे ओत्त्वाभावः षत्वञ्च न०त०। असोढ़े त्रि० "अषाढ़ं युत्सु पृतनासु पप्रिम्" यजु० ३४,३०। "अषाढाय सहमानाय वेधसे" ऋ० २,२१,२।

अषाढा(ड़ा) स्त्री षाढिः साहनं सह-णिच्+क्तिन् टत्वम् अर्श आद्यच् न०त० पृषो० वा यत्वं टत्वञ्च। अश्विन्यवधिके पूर्व्वादिके त्रिंशे, उत्तरादिके एकत्रिंशे च नक्षत्रे।

अष्टक न० अष्टौ अध्यायाः परिमाणमस्य अष्टन्+कन्। १पाणिनेरष्टाध्यायीग्रन्थे, प्रत्येकमष्टाध्यायात्मके २ऋग्वेदांशभेदे च ३अष्टसंख्यापरिमिते त्रि० "पैशुन्यं साहसं द्रोहईर्ष्या सूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु" पा०उक्तेः ३अष्टाध्ययनेऽपि। अष्टकं विदन्ति अधीयते वा "सूत्राच्च कोपधात्" पा० अध्येतृवेदितृप्रत्ययस्य वाऽल्ये लुक्। अष्टकाः पाणिनेः ४सूत्राध्यायिषु ब०व०। ५अष्टसंख्यायाम् "तारादृकमिदं पुण्यं भक्तिमान् यः पठेन्नरः" तन्त्रम्। गङ्गाष्टकं पठति यः प्रयतः प्रभाते" वाल्मी०। [द्विकर्णत्वात्तथात्वम्।

अष्टकर्ण पु० अष्टौ कर्णाऽस्य। चतुर्मुखे ब्रह्मणि प्रतिसर्गे

अष्टकर्म्मन् अष्टौ कर्म्माण्यस्य। "आदाने च विसर्गे च तथा प्रैषनिषेधयोः। पञ्चमे चार्थवचने व्यवहारस्य वेक्षणे। दण्डशुद्धोः सदा रक्तस्तेनाष्टगतिकोऽपरः" उशनसोक्ताष्टविधकर्म्मयुक्ते ऋषौ "अष्टकर्म्मा दिवं याति राजा शक्राभिपूजितः" उश०। अष्टकर्तिकोऽत्र "तत्रादानं करादीनाम्। विसर्गो भृत्यादिभ्यो धनदानम् प्रैषोऽमात्यादीनां इष्टाऽनुष्ठानेषु। निषेधो दृष्टादृष्टविरुद्धक्रियासु। अर्थवचनं कार्यसन्देहेन राजान्यैव तत्र नियमनम्। व्यवहारेक्षणं प्रजानामृणादिविप्रतिपत्तौ। दण्डः पराजितानां शास्त्रोक्तधनग्रहणम्। शुद्धिः पापे कर्म्मणि जाते तत्र प्रायश्चित्तसम्पादनमिति" कुल्लूकभट्टः। मेधातिथिस्तु। अकृतारम्भः। कृतानुष्ठानम्। अनुष्ठितविशेषणम्। कर्म्मफलसंग्रहः। तत्रा सामदानभेददण्डाः। यत्तदष्टविधं कर्म्मेत्याह। अथवा "क्षणिः वणिक्पथः। उदकसेतुबन्धनम्। दुर्गकरणम् कृतस्य संस्कारः निर्णयः। हस्तिबन्धनम्। खनिखननम्। सैन्यनिवेशनम्। दारुणवनच्छेदनञ्चेत्यष्टौ" इति। तन्मूलन्तु अष्टवर्गशब्दे वक्ष्यते।

अष्टका स्त्री अश्नन्ति पितरोऽस्यां तिथौ अश-तकन्। "अष्टका पितृदैवत्ये" इत्यजादिपाठात् न ङीत्वम्। "अष्टका तु समाख्याता सप्तम्यादिदिनत्रयम्" इत्युक्तलक्षणे १सप्तम्यादिदिनत्रये, २दिनत्रयसाध्ये कर्म्मभेदे च तत्राश्वलायन ऋ० दर्शितम् तदपि पौषमाघफाल्गुनानां कृष्ण सप्तम्यादिषु कर्त्तव्यं तत्र प्रधानमष्टमी, सप्तम्यामारम्भः अष्टम्यां क्रिया नवम्यामन्वष्टकेति भेदः। "अमावास्या चतुर्दश्योः पौर्णमास्यष्टकासु च" "अष्टकासु त्वहोरात्रमत्वन्तासु च रात्रिषु" इति च मनुः तत्र न पितृमात्रदैवत्वम् अन्यदैवत्वमपि यथाह "पित्र्यदानाय मूले स्यादुत्तराफाल्गुनासु एव च। कृष्णपक्षे वरिष्ठाहि पूर्व्वा चैन्द्री हि भाद्यते। प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी। आद्या पूर्वैः सदा कार्य्या मांसैरन्या भवेत्तथा। आग्नैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः वायु० पुरा०। मूले प्रधानस्थाने अमावस्या हि आद्यस्य प्रधानं काल; तद्वदिति

यावत् रघु०। पक्षभावे स्थालीपाकेन कार्य्यं "अपि वा स्थालीपाकं कुर्वीतेति" गोभिलः। एतद्विधानन्तु "स्थालीपाकं पशुस्थाने कुर्यात् यद्यानुकल्पिकम्। अपयेत्तं सवत्सायास्तरुण्या गोः पयस्तु" छन्दोगपरिशि०। अन्विति ओदनचरोः पश्चात्। अतएव। "पितरः सूदयन्त्यन्नमष्टकासु मघासु च। तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च" भाता०। तस्मादत्रं प्रधानं पूपादिकन्तूपकरणत्वेन शक्तानामावश्यकं, सदेति श्रवणात्। "अमावस्याष्टका ह्येषा कृष्णपक्षेऽयनद्वयम्"। "पौषमासस्य रोहिण्यामष्टकायामथापि वा" या०स्मृ०। अत्रायं भेदः हेमन्तशिशिरयोश्चतसृष्वमपरपक्षाणामष्टमीष्वष्टका एकस्यां वा" आश्व०सू० उक्तेः समर्थासमर्थभेदेन चतसृषु मासेषु कृष्णाष्टमीषु एकस्यां वा अष्टका कार्य्येति। आम्नायस्य ऊर्द्धं तिसृष्वष्टकासु"स्मृतन्तरात्तथात्वम्। अन्वष्टकाशब्दे विवृतमेतत्। अष्टपरिमाणमस्याः कन्। अजादिपाठा० टाप् पित्वदैत्वे इति अस्य प्रायिकत्वात् स्त्रियका०नेत्त्वम्। ४अष्टमीतिथिमात्रे "अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी। ब्रह्माष्टका पौर्णमासी तस्मात्ताः परिवर्जयेत्" मनुः एतद्विधायां स्त्रियामष्टिका अत इत्वम्।

अष्टकाङ्ग पु० अष्टकमङ्गं यस्य। नयपीठे त्रिका०। तानि चाङ्गानि स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च। राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेत्युक्तानि अङ्गानि

अष्टकिक त्रि० अष्टकाऽस्यास्त्र ब्रीह्या० ठन्। अष्टकायुक्ते अत्र वा इनि अष्टकी। अत्रैवार्थे त्रि० स्त्रियां ङीप्।

अष्टकृत्वस् अव्य० अष्टन्+क्रियाभ्यावृत्तौ कृत्वसुच्। अष्टभ्याभ्यावृत्तक्रियायाम्।

अष्टकोण त्रि० अष्टौकोणा अस्य। १अष्टकोणयुक्तक्षेत्रे तन्त्रोक्ते २यन्त्रभेदे च "विन्दुत्रिकोणवसुकोणदशारयुग्ममिति" तन्त्रम् "३कुण्डभेदे अष्टकोणमथैशान्यामत्यन्तं च भयप्रदम्" हेमा०व्र०ख०कुण्डप्र०। [क्रीते।

अष्टक्य त्रि० अष्टकेन क्रीतः गवा० यत्। अष्टसंख्यान्वितेन

अष्टगव न० अष्टानां गवां समाहारः योगवि०अच्। गवाष्टके तद्युक्ते शकटे तु अष्टागवमित्येव। "अष्टागवं धर्म्म इलमिति" स्मृतिः।

अष्टगुण त्रि० अष्टभिर्गुण्यते गुण—अभ्यासे कर्म्मणि क। अष्टभिर्गुणिते अष्टाहते। "मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम्" मनुः। "ददावष्टगुणैश्वर्य्यं तेषां तुष्टस्तु केशवः" भा०व०प्र० ८२ अध्या० "ततश्चाष्टगुणं पार्थ! प्राप्स्यसे धर्म्मसञ्चयम्" ८५ अध्या०। अष्टौ गुणा यस्य अष्टविधगुणयुक्ते २ब्राह्मणे ते च गुणा गौतमेनोक्ताः यथा अथाष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति। यस्यैते न चत्वारिंशत् संस्काराः न वाष्टावात्मगुणाः न स ब्राह्मणः"। अष्टाहतो गुणोऽस्य इतौ अष्टशब्दस्य तदाहतपरता। ४अष्टाहतगुणके पदार्थे "अन्नादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः। पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्। घृतादष्टगुणं तैलं मर्द्दयेन्न तु खादयेद्" वैद्यकम्।

अष्टगृहीत त्रि० अष्टत्वो गृहीतः इतौ हुजर्थौलुप्तः। अष्टवारगृहीते "रसमाज्यं मांसं पायसमिति संयूयाद्गृहीतं गृहीत्वा जुहूयात्" गोभि० अष्टगृहीतं केवलमेवाज्यमेनाष्टवारान् गृहीतम्" स०व० रघुनन्दनः।

अष्ट(ष्टा)चत्वारिंशत् स्त्री अष्टाधिका चत्वारिंशत् या०त० आत्वम्। (आटचत्वारिंश) १संख्यायां २तत्संख्येये च। "अष्टचत्वारिंशत्संस्कारैः संस्कृत" इति मिताच्च० गौत०। तत्र गौतमेन चत्वारिंशदेव संस्काराः अष्टौ गुणाश्च ब्राह्मणस्य हेतुत्वेन दर्शिताः चत्वारिंशत् संस्काराः गुणसहिता अष्टचत्वारिंशदित्येके। ते च "गर्भाधानपुंसवनसीमन्तोजातकर्म्मनामकरणान्नप्राशनचौड़ोपनयनम्। चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामित्येषाष्टाष्टकान्वकाष्वैणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था, अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावाग्रयणं चातुर्मास्यनिरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोड़शी वाजपेयोऽतिरात्रोऽप्तोर्य्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत् संस्काराः। अथाष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति यस्यैते न चत्वारिंशत् संस्कारा नवाष्टावात्मगुणा न स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति। यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति अधिकं संस्कारशब्दे वक्ष्यते" गौ० वृद्धिताया तु चत्वारिंशत्संस्कारैः संस्कृत इत्येव पाठः। मिताचराद्धृत पाठस्तु उक्तरीत्या समर्थितः।

अष्टतय त्रि० अष्टावयवा अस्य अष्टन्+तयप्। अष्टावयवे। "टिड्ढाणञिति" या०स्मृते तयपोऽत्त्वात् स्त्रियां ङीप्।

अष्टयी । अवयवमात्रे तयप् । २अष्टसंख्यायां न० ।

अष्टतारिणी स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः । "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिण्योमताः" इत्युक्तासु तारादिषु अष्टसु तारिणीरूपदेवीमूर्त्तिषु ।

अष्टत्रिंक न० अष्टाधिक त्रिंकम् । १चतुर्विंशतिसंख्यायां तत्संख्याते च "वैश्यस्याष्टत्रिंकाद्दत्तात् सावित्रीपतनं भवेत्" मार्कण्डेय पु० । "अष्टत्रिंकाच्चतुर्विंशतेः" म० त० रघु० ।

अष्टत्व न० अष्टनां भावः त्व । अष्टसंख्यायाम् ।

अष्टदंष्ट्र पु० ईव० दानवभेदे "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरि० २२९ अ० ।

अष्टदल न० अष्टौ दलानि यस्य । अष्टपत्रकमले "लिखेदंष्टदलं पद्मं भूषत्तत्रिकभूषितम्" तन्त्रम् ।

अष्टदिश् स्त्री ब०व० । कर्म० संज्ञत्वात् द्विगुः । पूर्व्वाग्नेयदक्षिणनैर्ऋतपश्चिमवायव्योत्तरैशानीरूपासु अष्टसु दिक्षु । "इन्द्रादीन् लोकपालाँश्च अष्टदिक्षु च पूजयेत्" तन्त्रम् ।

अष्टदिक्करिणी स्त्री ब०व० अष्टदिक्षुस्थाः करिण्यः । "करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावतीत्युक्तासु ऐरावतादीनां प्रियासु अष्टसु हस्तिनीषु इत्यमरः ।

अष्टदिक्पाल पु० अष्टौ दिशःपालयन्ति पा-णिच्-अण् उप०स० । "इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानरूपेषु अष्टसु दिक्पालेषु ।

अष्टदिग्गज पु० ब०व० अष्टदिक्षुस्था गजाः । "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजा' इत्युक्तेषु अष्टसु दिक्स्थेषु ऐरावतादिषु गजेषु एतत्संख्यामात्राद्गजशब्दस्याष्टसंख्यार्थकत्वम् ।

अष्टद्रव्य न० ब०व० कर्मधा० संज्ञात्वान्न द्विगुः । "अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः । सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधा" इत्युक्तेषु होमसाधनेषु अष्टसु द्रव्येषु । "त्रिखादयुक्तैर्जुह्वयाच्चाष्टद्रव्यैर्दशांशतः" तन्त्रसा० ।

अष्टधा अव्य० अष्टन्+प्रकारे धाच् । अष्टप्रकारे "भिन्नप्रकृतिरष्टधा" गीता । "सुरद्विपानामिव सासयोनिर्भिन्नोऽष्टधा विप्रससार वंशः" रघुः ।

अष्टधातु पु० ब०व०अष्टौ धातवः कर्म० संज्ञात्वान्न द्विगुः । "स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च । शीसं लौहं रसश्चेतिधातवोऽष्टौ प्रकीर्त्तिता" इत्युक्तेषु अष्टसु स्वर्णादिषु सप्तसु तु रसवर्জ্জिताः; सप्तैव धातवोऽभिहिताः किन्तु रसनिरूपणे "ततो रस इति प्रोक्तः स च धातुरपि स्मृतः" इत्युक्तेरष्टधातुताऽपि तस्याभियता "अष्टधातुमयप्रतिमा निर्माणे तु रसं विहाय पित्तलस्य ग्रहणम् "आरकूटं तथैव चेति" हेमा० भविष्योक्तेरिति भेदः ।

अष्टन् त्रि०ब०व०अश्—व्याप्तौ कनिन् तुट् च । (आट) १"संख्याभेदे द्व्येकयोर्द्विवचनैकवचने" पा० निर्देशेन संख्यावाचकमात्रस्य संख्यापरत्वनिर्णयात् । २तत्संख्यान्विते च । "अष्टौ तान्यव्रतघ्नानि आपोमूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" स्मृतिः "निन्द्याश्चाष्टासु चान्यासु स्त्रियोरात्रिषु वर्জयेत्" मनुः "अष्टानां लोकपालानां वपुर्धारयते नृपः" । "अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत" इति च मनुः । दशविंशतिशब्दयोः परतः समासे आदन्तादेश अष्टादशः । अष्टाविंशतिः त्रिंशदादौ वा अष्टत्रिंशत् अष्टात्रिंशत् अष्ट(ष्टा) चत्वारिंशत् अष्ट(ष्टा) पञ्चाशत् अष्ट(ष्टा)षष्टिः अष्ट(ष्टा)सप्ततिः अष्टाशीतिः अष्ट(ष्टा)नवतिः संख्याव्ययपूर्ब्बकात् ततः बहुव्रीहौ डच् । "निरष्टे अश्नुते" श्रुतः ब्रा० सप्ताहानि अहानि ।

अष्टपाद्(द) पु० अष्टौ पादा अस्य वा अन्यलोपः । १शरभे तच्छब्दे तल्लक्षणम् २लूतायाञ्च हेम० ।

अष्टपदिका स्त्री अष्टसु दिक्षु पादा अस्याः अन्यलोपः ङीपि पङ्क्तावे संज्ञायां कन् ह्रस्वः । (हापरमालि) लतायाम् । कनभावे । अष्टपदीत्यप्यत्र स्त्री ।

अष्टपल न० अष्टौ पलानि परमाणमस्य अण् द्विगोर्लुगनपत्ये" पा० तस्य लुक् "ओषणत्रिफलाकल्के वज्रमात्रे गुडाद्पले" । सर्पिषोऽष्टपलं पक्त्वा मात्रां मन्दानलः पिबेत्" चक्रदत्तोक्ते घृतभेदे" ।

अष्टपुष्पी स्त्री अष्टनां पुष्पाणां समाहारः । अनिर्द्दीत संज्ञकत्वात् द्विगुः । पुष्पाष्टके । "कदाचिर्दुन्यस्ताष्टपुष्पिकापरीत्यादितक्रोधेन' काद० अज्ञाताऽष्टपुष्पीति कन् । तत्रैव ।

अष्टभुजा स्त्री अष्टौभुजा अस्याः । देवी माहात्म्यस्य तृतीयचरितदेवतायां महासरस्वत्यां तन्मूर्त्तेर्ध्यानशब्दे विवृतिः ।

अष्टम त्रि० अष्टानां पूरणः डट् मट् च । येन अष्टसंख्या पूर्य्यते तस्मिन् । "पैशाचश्चाष्टमोऽधमः" "अष्टमं चायुषः स्थानमष्टमादष्टमं च यत् । तयोरपि व्ययस्थानं मारकस्थानमुच्यते" ज्योतिः परा० "गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्" मनुः स्त्रियां ङीप् । "सौविष्टकृत्यष्टमी" आश्व० विष्टिकृत संबन्धिनी अष्टमी आख्यातिः" कर्क० । सा च चन्द्रस्याष्टमकलाक्रियाकूटाधाररूपे तिथिभेदे" । "चतुर्दशष्टमी चैव

अमावस्या च पूर्णिमा पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च" "अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवम् पुरा० । "अष्टम्याः शेषदण्डे च नवम्या आद्य एव च । अत्र या क्रियते पूजा विज्ञेया सा महाफला" ति०त०पुरा० । "अपरपक्षाणामष्टमीप्रभृतयः" आश्व० ।

अष्टमकालिक त्रि० अष्टमः कालः भोजनेऽस्यस्य ठन् । सार्द्धदिनत्रयोपवासानन्तरं चतुर्थदिवसे रात्रौ भोक्तरि वानप्रस्थभेदे "नक्तं चान्द्रं समश्नीयाद्दिवा वाक्षुल्य यत्नितः । चतुर्थकालिको वा स्यात् स्याद्वाप्यष्टमकालिकः" मनुः । "मुनिभिर्हरिशयनं प्रोक्तं विप्राणां मलवासिनां नित्यम्" इत्युक्त्या दिवसे वारद्वयभोजनस्य विधानात् सार्द्धत्रिदिने सम्प्राप्तारमतीत्य चतुर्थदिवसे रात्रौ भोजने हि तथात्वं भवति ।

अष्टमङ्गल न० अष्टसंख्यं मङ्गलम् मा०त० । "राजराजो दृषो नागः कलशो व्यजनं तथा । वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्" इत्युक्तेषु "लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गोर्हुताशनः । हिरण्यं सर्पिरादित्य आपोराजा तथाष्टम" इत्युक्तेषु च अष्टसु द्रव्येषु ब०व० । अत्र कर्म्म० संज्ञात्वाच्च द्विगुरिति भेदः ।

अष्टमङ्गलघृत न० अष्टभिर्द्रव्यैर्मङ्गलार्थं घृतम् । चक्रोदत्तोक्ते घृतभेदे "वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च । शारिवा सैन्धवञ्चैव पिप्पलीघृतमष्टमम् । मेध्यं घृतमिदं सिद्धं पातव्यञ्च दिने दिने । दृढस्मृतिः क्षिप्रमेधः कुमारो बुद्धिमान् भवेत् । न पिशाचा न रक्षांसि न भूता न च मातरः । प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम्" ।

अष्टमभाव पु० अष्टमोभावः । ज्योतिषोक्ते जन्मलग्नावधिके १अष्टमस्थाने तन्नादिहादशभावमध्ये २अष्टमे भावे च भावश्च दृष्टकालेऽर्कलवादिकलादिना स्पष्टीकृतलग्नादिः । तदानयनं यथा "पूर्व्वं नतं स्याद्दिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात् । तत्कालके सायनार्कस्य भुक्तभोग्यांशसंगुणात् । स्फोटयात् खाग्निलब्धं यत् भुक्तं भोग्यं रवेस्त्यजेत् । इष्टनाड़ीपलेभ्यस्य गतगम्याद्विजोदयात् । शेषं खखत्राहतं भक्तमशुद्धेन लवादिकम् । अशुद्धशुद्धभे हीनयुक् तनुर्व्ययनांशकम् । एवं लङ्कोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् । पूर्व्वपश्चात्तदन्यत् प्राग्वत्तद्दृश्यं भवेत् । षष्ठेऽष्टमे लग्नभे जाया, तुर्य्ये, लग्नोनतुर्य्यतः । षष्ठांशयुक् तनौ सन्धिरन्ये षष्ठांशयोजनात् । तयः सन्ध्योर्भावाः षष्ठांशेनैकयुक् सुखात् । अन्ये तयः षड्वेवं ते भार्द्वयुक्ताः परेऽपि षट्" । नील०ता० । स्वस्वदेशोदयमानं देशान्तरयोगादिना आनेयम् लङ्कोदयमानानि तु मेषस्य २७८, वृषस्य २९९, मिथुनस्य २२३, कर्कटस्य २२३ सिंहस्य २९९, कन्यायाः २७८, तुलायाः २७८, वृश्चिकस्य २९९, धनुषः २२३ मकरस्य २२३, कुम्भस्य २९९, मीनस्य २७८, पलानि । एतदनुसारेण दशमराशेः उदयमानं गृहीत्वा दशमभावानयनम् "खेटे भावसमे पूर्व्वं फलं सन्धिसमे तु खम् । होनेऽधिके द्विसन्धिभ्यां भावे पूर्व्वापरे फलम्" नील०ता० । "भुक्तं भोग्यं खेटकालाच्च शुध्येत् त्रिंशद्विहृता खोदयाप्तं लवाद्यम् । हीनं युक्तं भास्करे तत्तनुः स्यात् रात्रौ लग्नं भार्द्धयुक्ताद्रवेस्तु । खेटे सन्धिद्वयान्तःस्थे फलं तद्भावजं भवेत्" । नील०ता० । "अष्टमस्थाने च चिन्त्यान्याह दीपिकायाम्" "रन्ध्रायुर्मृतयोऽष्टमे" इति । ताजके तु अन्यान्यपि चिन्त्यान्याह । "मृत्यौ चिरन्तनं द्रव्यं मृतिर्वित्तं रणे रिपुः । दुर्गस्थानं मृतिर्नाशः परीवादो मनोव्यथा" एतानि साधारणानि चिन्त्यानि विशेषतस्तत्र ग्रहयोगादिष्टाद्युक्तं जातके यथा । "आयुः स्थानाधीश्वरः पापयुक्तः षष्ठान्त्यस्थः स्वल्पमायुस्तनोति । लग्नेशाष्टमयोर्दृतिस्वल्पमेव दीर्घायुष्यं चाष्टमस्थः करोति । निधनतनुसुखभेगाः केन्द्रकोणत्रिलाभे १,३,४,५,७,९, १०,११, दधति हि विपुलायुर्भानुजोऽत्र प्रशस्तः । धनफरचतुरस्रेमध्यमं त्वायुरेते विदधति खलु नेष्टाः प्रान्त्यषष्ठे बलिष्ठाः । कमलकुमुदबन्धू मृत्युरन्ध्रान्तिमाक्षे विपदमथ धराजो द्विद्विवर्षेऽष्टमस्थः । धनलवमथ यच्छेच्छत्रुरन्ध्रे बुधोऽब्दे त्रितिगुणदशसंस्थे रोगभोगापचारौ । अरिष्टोच्छ्वासनिर्याणोच्छ्वासवीरत्व चिन्तनम् । दैवविद्भिः सदा कार्य्यमष्टमे भावचिन्तने" जातकप० वर्षप्रवेशकाले तु अन्यथा योगविशेषात् फलमुक्तम् यथा "भौमेऽब्दमे क्रूरहते पत्या घातेऽवलोकिते । अग्निभीरग्निभे क्रूरनष्टद्विपदभे मृतिः । विपत्तिर्नरपालोत्था रिपुतस्करतोभयम् । तुर्य्ये मातुः पितुर्व्या वा मातुलार्त्तिस्ततोगुरुः । लग्नेन्दिहापतिसमापतयो मृतीशाश्चेदित्यशोभन इमे निधनप्रदाः स्युः । चेत् पाकरिष्टसमये मृतिरेव तत्र सार्कै कुजे नृपभयं दिवसेऽब्दशेषे । सूर्य्ये मयूरिफे सितेन जनने वर्षेऽधिकारी तथा केन्द्रे राजगदाङ्गयं च रुगसृक्स्थानेऽधिकारीन्दुजे । सौम्ये क्रूरदृशा कुजस्य रुगसृग्दोषादि नाशस्थिते दृग्धे बन्धमृतो विदैशतरति प्राङ्मर्बुधे ताडने । भौमस्थानेऽधिकारी द्यौ युग्नं नृपभयं रुजः । मन्देऽधिकारी खे चोपहते [illegible]

स्फुटः । भौमस्थानेऽधिकद्वङ्गौ प्रहारो वा व्रणाङ्गयम् । आरे खस्थे चतुष्प्राङ्गः पातोदुःखरुजोऽरुजः । वित्ताद्गेज्यो धनहा यद्यवदेशः शुभेक्षितः । मन्दे द्यूने दुर्वचनापवादकलिभर्त्सनम् । पतिते त्रे क्रूरदृशाऽरेत्यशाले स्फुटिं वदेत् । कुजरुद्वास्थिते नाशः सौम्यदृष्ट्या शुभं वदेत् । यत्तर्क्षे जन्मनि कुजः सोऽव्दलग्नपगोयदा । नग्नाधिपोनष्टदृग्धोयोषिद्वादाः शुभान्विते । जन्मन्यष्टमगे जीवे साधिव्याधिकलिः पृथुः । जयः शुक्रेक्षणादुक्तप्रत्युत्तरवशेन तु । भौमेऽन्त्यगे धने स्फूर्ज्यं वादक्लेशं विनिर्दिशेत् । रिपुगैर्वाक्कलिभीतिः संख्ये कुजरुतेऽम्बुपे । दग्धोजन्माङ्गपोवर्षेऽष्टमोरोगकली दिशेत् । स्फुटव्द्योरधिकतो भौमस्थाने गुरुर्हतः । पापैर्वादः स्फुटोऽम्बेवं तादृशीन्दौ मनेः पदे । स्फुटव्द्योरधिकते चन्द्रे बुधपदे हते । क्रूरैर्विदेशगमनं वादः स्वाद्विमनस्कता । मेषे सिंहे धनुःस्थारेऽव्दैरन्ध्रे सिते भयम् । स्फुटौ स्फुटीशलग्नेशौ स्फुटदौ पापदृग्युतौ । यत्तर्क्षे जन्मनि कुजः सोऽव्दलग्नपगोयदा । बुधोवर्षपतिर्नष्टबलस्थत्व न शोभनम् । सार्के मनौ भौमयुतेस्वाष्टमे वाहनाद्भयम् । सार्के भौमेऽष्टमस्थे तु पतनं वाहनाद्वदेत् । सारेऽव्दे स्फुटगे स्फुटयुश्चन्द्रेऽन्यारिस्फुटौ स्फुटिः । उदिते स्फुटिसङ्क्षेपे निर्बले जीविते स्फुटिः । पुण्यसङ्क्षेश्वरः पुण्यसङ्क्षमादष्टमोपगः । स्फुटयष्टमेशपुण्येशौमृतिदृः पापदृग्युतः । स्फुटयष्टमगतो राशिः पुण्यसङ्क्षनि नाथयुक् । अब्दलग्नाष्टमर्क्षं तच्चेदित्थं स्यात्तदा स्फुटिः । पुण्यभं चाशुभाक्रान्तं स्फुटीशोऽन्यारिरन्ध्रगः । सुखहेशोऽब्दपोवापि स्फुटं तत्र विनिर्दिशेत् । सक्रूरे जन्मभे स्फुटौ स्फुटिश्चेदिन्धिहार्किशुक् । भौमसूतेक्षणे तत्र मृत्युः स्यादात्मघाततः । मन्दोऽष्टमोस्फुटीशेत्थशालान्मृत्युकरः स्फुटः । शुभेत्थशालात् सर्वेऽपि योगाः स्युः शुभदायकाः । स्फुटिरन्ध्रपतिर्मन्दोऽष्टमोऽब्दलग्नपेन चेत् । इत्थशाली क्रूरदृशा तत्कालं स्फुटिदायकः, नीलक० ता० । [अष्टस्फुटिमिते परिमाणभेदे ।

अष्टमान न० अष्टौ सुतयः परिमाणमस्य । कुडवरूपे

अष्टमिका स्त्री वैद्यकोक्ते चतुस्तोलकपरिमाणे ।

अष्टमी स्त्री अष्टानां पूरणी । षोड़शकलात्मकचन्द्रस्य अष्टमकलाक्रियारूपायां स्वनामख्यातायां तिथौ २अष्टसंख्यापूरण्याञ्च अष्टमशब्दे उदा० । अश्नू+क्त अटं संघातं व्याप्तिं वा माति मा–क गौरा० ङीष् । कोटालतायाम् ।

अष्टमुष्टि पु० अष्टौ सुतयः परिमाणमस्य अण् "द्विगोर्लुगिति" लुक् । कुञ्चिपरिमाणे "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कल" इति हेमाद्रिदानखण्डे परिभाषायां पुरा० ।

अष्टमूर्त्ति पु० अष्टौ भूम्यादयो मूर्त्तयोऽस्य । "क्षितिर्जलं तथा तेजो वायुराकाशमेव च । यष्टार्कश्च तथा चन्द्रः मूर्त्तयोऽष्टौ पिनाकिनः" इत्युक्ताष्टमूर्त्तिधारिणि शिवे । "महेश्वरेण यो राजन्नजीर्णो ह्यष्टमूर्त्तिना। कस्तमुत्सहते वीरोयुद्धे जरयितुं पुमान् । भा०व०अ० ४६ "अवेहि मां किङ्करमष्टमूर्त्तेः" रघुः । "स्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिः" "जयाह ताम्राङ्गुलिमष्टमूर्त्तिः" इति च कुमा० । क्षित्यादिमूर्त्तिभेदेन तस्य नामभेदः यथा सर्व्वः क्षितिमूर्त्तिः एवं भवोजलमूर्त्तिः रुद्रोऽग्निमूर्त्तिः । उग्रोवायुमूर्त्तिः भीम आकाशमूर्त्तिः पशुपतिर्यजमानमूर्त्तिः । महादेवः" सोममूर्त्तिः ईशान सूर्य्यमूर्त्तिः । एतएव तस्याष्टौ मूर्त्तयः शाकुन्तले वर्णिताः "या सृष्टुः सृष्टिराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्यविश्वम् । यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः" । अष्टन्+डट्योऽयच् । कर्म्म०संज्ञात्वान्न द्विगुः । शिवस्य क्षित्यादिषु अष्टसु २मूर्त्तिषु स्त्री ब०व० ।

अष्टमूर्त्तिधर पु० ष–अच् धरः अष्टानां मूर्त्तीनां धरः । शिवे "अष्टमूर्त्तिधरमूर्त्तिरष्टमी" माघः "तद्व्याख्याने अष्टानां मूर्त्तीनां समाहारः इति वदन् मल्लिनाथः "दिक्संख्ये संज्ञायामिति" स्वतात्पर्य्येण भ्रान्तएव मूर्त्तीनां प्रकृते क्षित्यादिविशेष संज्ञावाचित्वात् कर्म्मधारयस्यैव तत्र प्रसक्तेः त्रिलोकनाथवत्त्वादिवत् उत्तरपदद्विगुनैवोपपत्तौ तत्स्वतन्त्रसङ्केतानुपपत्तेः इत्यलम्

अष्टरत्नि त्रि० अष्टौ रत्नयः जङ्घामानमस्य । बहुव्रीह्यष्टच्स्तोक्षाने "अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः" भा० क०प० ७२ अध्या० ।

अष्टलोहक न० ब०व०कर्म्म० संज्ञात्वान्न द्विगुः । "सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ प्रचक्षते तु" इत्युक्तेषु अष्टसु धातुषु ।

अष्टवर्ग पु० अष्टानामराङ्गुल्यादीनां वर्गो यत्र । ज्योतिषोक्तौ रेखाविशेषेण शुभाशुभसूचके चक्रभेदे यथा । "जन्मकालस्फुटस्थित्या फलं वक्ष्ये शुभाशुभम् । "स्वादिनक्षत् शुभदः क्षितिपक्षसमुद्रनगादिकपक्षगतो १,२,४,७,८,९,१०,११, अथ विभावरिभर्तुरुक्षाङ्कदशेगतो ३,६,१०,११, अथ कुजाद्रविवत्,१,२,४,७,८,९,१०,११, अथ सोमसुतात्त्रिग-

र्त्तुनवादिषु यातः, ३, ५, ६, ६, १०, ११, १२, देवगुरोर्विष-यर्त्तुनवेशगतो, ५, ६, ६, ११, अथ सुरारिगुरोः समयाचल-भास्करयातः, ६, ७, १२, तीक्ष्णमरीचिसुतादपि भास्करवत्, १, २, ४, ७, ८, ६, १०, ११, अथ लग्नगटक्षात्त्रिकृताङ्कदशा-दिषु यातः, ३, ४, ६, १०, ११, १२। रविरेखाः। ४८। "चन्द्रः शुभोऽर्कात्त्रिकालाद्रिदन्तावलाशाग्निवस्थः, ३, ६, ७, ८, १०, ११, ततः खात्कुरामर्तुगवाशाग्निवस्थः, १, ३, ६, ७, १०, ११, क्ष्माजाद्त्रिवह्नीषुषड्गोदिगीशेऽब्ज, २, ३, ५, ६, ६, १०, ११, यत्क्षात् कुरामाब्धिवाणागदन्तावलाशाग्निवस्थः, १, ३, ४, ५, ७, ८, १०, ११, जीवात् कुदग्वेदशैलेभकाष्टाग्निवस्थो, १, २, ४, ७, ८, १०, ११, अथ शुक्रात्त्रिवेदेषुशैलयक्षाशाग्निवस्थः, ३, ४, ५, ७, ६, १०, ११, तीक्ष्णांशुदेहोद्भवाद्रामवाणर्त्तुयम्भु-स्थित, ३, ५, ६, ११, उदयाद्व्यवार्क्षर्त्तुकाष्टाग्निवस्थः, ३, ६, १०, ११, चन्द्ररेखाः। ४६। 'कूजोऽर्काच्छुभो वह्निवा-णर्त्तुदिक्यम्भुगो, ३, ५, ६, १०, ११, अथेन्दुतोरामकालेशगः, ३, ६, ११, क्षतः खात् कुदग्वेदसुन्यष्टदिक्यम्भुगः, १, २, ४, ७, ८, १०, ११, खाग्निशानाग्यपुत्राद्गुणेष्वङ्करुद्रोपयातः। ३, ५, ६, ११, ततोजीवतः कालकाष्टाग्निवार्कोपयातो, ६, १०, ११, १२, अथ देवारिपूज्यादनेर्होगजेशार्कसंस्थः, ६, ८, ११, १२, ततः सूर्यपुत्रात् कुवेदागनागयक्षाशाग्निवस्थो, १, ४, ७, ८, ६, १०, ११, अथ लग्नात् कुरामाङ्गदिक् यम्भु-यातः। १, ३, ६, १०, ११, कुजरेखाः ३६। बुधोऽर्कतः शरर्त्तुगोग्निवार्कगो, ५, ६, ६, ११, १२, अथ चन्द्रतोद्विवे-दकालनागदिङ्महेश्वरोपगः। २, ४, ६, ८, १०, ११, भूमि-जात्कुदक्कृतागनागगोदशेशग, १, २, ४, ७, ८, ६, १०, ११, क्षत-तः खतः कुवह्निपञ्चषड्नवादिकेषुगः, १, ३, ५, ६, ६, १०, ११, १२, वाक्पतेरसाष्टयम्भुसूर्य्यगो, ६, ८, ११, १२, अथ शुक्रतः कुवाङ्गवह्निवेदपञ्चनागगोग्निवेषुगः १, २, ३, ४, ५, ८, ६, ११, पङ्कुतःकुदक्कृतागनागादिपञ्चकस्थितोऽथ, १, २, ४, ७, ८, ६, १०, ११, १२, लग्नतः क्षितिद्विवेदकालनागदिक्ग्निवे-षुगः। १, २, ४, ६, ८, १०, ११, बुधरेखाः। ५५। सुरराजगुरुः शुभदोरवितः कुयमानलवेदनगादिकपञ्चगतो १, ३, ३, ४, ७, ८, ६, १०, ११, अथ त्रिधोर्द्विशराचलगोग्निवाशे, २, ५, ७, ६, ११, वसुधातनयात् कुयमाग्निनगाष्टदशेशगतो, १, २, ४, ७, ८, १०, ११, अथ बुधात् क्षितियुग्मकृतेषुरसयक्षदिग्गि-रिशोपग। १, २, ४, ५, ६, ६, १०, ११, क्षदत्त खतएकयमानल-वारिधिपर्व्वतनागदशेशगतो, १, २, ३, ४, ७, ८, १०, ११, अथ सिताद्ययमपञ्चरसयक्षदिक्ग्निवगो २, ५, ६, ६, १० ११, रविनन्दनतोदहनेषुरसार्कगत, ३, ५, ६, १२, खत्र लग्नगटक्षात् कुयमाग्निधशरर्त्तुनगयक्षदिग्गिरिशोप-गतः"। १, २, ४, ५, ६, ७६, १०, ११, गुरुरेखाः, ५६, 'भृगुः शुभोरवेर्गजेशसूर्य्यगो ८, ११, १२, अथ चन्द्र-तः, क्ष्मादिपञ्चकाष्टगोग्निवार्कगः, १, २, ३, ४, ५, ८, ६' ११, १२, कुजात्त्रिवेदकालगोग्निवार्कगो, ३, ४, ६, ६, ११, १२, अथ बुधात्त्रिकालरन्ध्ररुद्रसंस्थितः, ३, ६, ६, ११, गुरोः शराष्टरन्ध्रदिङ्महेशग, क्षतः ५, ८६, १०, ११, खतः कुपञ्चकाष्टरन्ध्रदिक्ग्निवोपगः। १, २, ३, ४, ५ ८, ६, १०, ११, यनेर्गुणाब्धिपञ्चनाग-गोदशेशगो, ३, ४, ५, ८६, १०, ११, अथ लग्नतः कुप-ञ्चकाष्टगोग्निवस्थितः शुभः। १, २, ३, ४, ५, ८, ६, ११, शुक्ररेखाः, ५१, 'शुभः पङ्कुरर्कात् यमाब्धिगोधिशैलाष्ट-दिक्यम्भुग, १, २ ४, ७, ८, १०, ११, इन्दुतोरामका-लेशगतः, ३, ६, १२, क्ष्मासुताद्वह्निवाणर्त्तुकाष्टाग्निवार्कोप-गो, ३, ५, ६, १०, ११, १२, अथ क्षतः कालदन्ताव-लादिस्थितः ६, ८, ६, १०, ११, १२, जीवतोवाक्षकाले-शमार्क्षखड्यात, ५, ६, ११, २२, ततोदैत्यपूज्यादनेर्हः-ग्निवार्कोपयातः। ६, ११, १२, खतोवीतिहोत्रेषुकालेशयात, ३, ५, ६, ११, खतोलग्नतः क्ष्मागुणाब्धिषड्दि-ङ्महेशस्थितः। १, ३, ४, ६ १०, ११, शनिरेखाः, ३६, 'राज्ञः शुभोऽर्कादृभुजवह्निवेदर्त्तुरन्ध्रगो, २, ३, ४, ६, ६, अथ चन्द्रात् कुरामवेदाङ्ग १, ३' ४, ६, खतः कुजाद्वह्निवाणाङ्करन्ध्रगतो, ३, ५, ६, ६, अथ बुधाच्छ-शिपञ्चवह्निवाणरन्ध्रग, १, ३, ३, ५, ६, खतोजीवाद्व्य-वार्क्षवेदाङ्करन्ध्रग, ३, ४, ६, ६, खतः शुक्रात् यज्ञवह्नि-वाणरन्ध्रगत, २, ३, ५, ६, खतः सौरात् पञ्चवार्क्षर्तुग, २, ५, ६, खतः खतः शशिवेदवाणरिपुरन्ध्रगो, १, ४, ५, ६, ६, अथ लग्नाद्वेदरन्ध्रदिग्पुद्रसूर्य्यगतः, ४, ६, १०, ११, १२। राज्ञरेखाः, ३६। सूर्य्यादेकद्वित्रचतुःसप्ताष्टदशैकादशेषु, १, २, ४, ७, ८, १० ११, सोमात्त्रिषड्दशैकादशेषु, ३, ६, १०, ११, भौमात्त्रिपञ्चषड्रेकादशेषु, ३, ५, ६, ११, बुधात् षड्दृनवदशैकादशेषु, ६, ८, ६, १०, ११, गुरोः पञ्चषड्रेकादशद्वादशेषु, ५, ६, ११, १२, शुक्रात्षड्रेकादश-द्वादशेषु, ६, ११, १२, शनेस्त्रिपञ्चाष्टदशैकादशेषु ३, ५, ८, १०, ११, लग्नादेकत्रिचतुःषड्दशैकादशेषु, १, ३, ४, ६, १०, ११, लग्नरेखाः ३८। इति निगदितमिष्टं नेष्टमन्यद्विशे-षादधिकफलविपाकं जन्मना तत्र दद्युः। उपचयगटक्ष-

मित्रस्योच्चगाः पुष्टमिष्टं त्वपचयगटहनीचारातिभे नेष्टसम्मत् । यावती यावती रेखा ग्रहाणामष्टवर्गके । तावतीं द्विगुणीकृत्य अष्टाभिः परिशोधयेत् । अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरविन्दवः । अष्टाभिस्तु समं यत्र तत्समं परिकीर्त्तितम् । रेखा ग्रहाच्छुभे देया विन्दवस्त्वितरत्र तु । रेखाविन्दु समानौ चेत् समस्तत्र निगद्यते । रेखाधिक्ये शुभं ज्ञेयं तद्विन्दोरधाशुभम् । श्रीरानन्दस्तया श्रेयोभोगो राज्यं भवेत्तथा । मलिनोऽथ विपच्चैव हानिर्मृत्युर्भवेत्तथा । द्वयादिरेखा द्वयादिविन्दोः फलान्येतान्यनुक्रमात् । रेखायां वत्सरोज्ञेयः सार्द्धसप्तदिनं समे । अष्टवर्गदशायुः स्यात् दिनं चतुर्षु विन्दुषु" । इत्यष्टवर्गः । "अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभश्चरैः । गोचरस्थैस्तदप्राप्तौ तद्प्राप्तौ च वेधगैः । व्रतारम्भे विवाहे च यात्रायां क्षुरकर्म्मणि । अविशुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः । सततं दिशति नराणां राशौ मध्येऽष्टवर्गफलं निखिलम् । भावफलं प्रथमार्द्धे दृष्टफलान्यर्द्धभुक्तेषु" ज्यो० त० । अष्टानामकचटतपयशानां वर्गः । ज्योतिषादौ शुभाशुभज्ञापनाय विशेषरूपेण अष्टधा विभक्तेषु २वर्णसमूहभेदेषु यथा स्वरवर्णाः १६। अवर्गः, कादयोमावसानाः पञ्चपञ्चात्मकाः कवर्गादयः५ । यरलवाः ४यवर्गः । शषसहा४शवर्गः इत्येवमष्टौ कल्पिताः । तेषां विभागक्रमेण संज्ञाभेदः । "वर्गवर्णप्रमाणञ्च स्वरैस्ताड़ितं मिथः । पिण्डसंख्या भवेत्तस्य गणा भागैस्तु कल्पना" केरलम् । "स्वं वर्गं द्विगुणं विधाय परवर्गेणान्वितं सप्तटं" इति ज्योति० । तन्त्रोक्ते मन्त्रस्य शुभाशुभज्ञानार्थं अवर्गादिक्रमेण २ पक्षिमार्জ্জারादयष्टवर्गे च । यथा आगमकल्पद्रुमे "इदानीं वर्गचक्रस्य विधानमभिधीयते । मन्त्रग्रामविशोधार्थं नामाद्यक्षरपूर्व्वकम् । अष्टौ कोष्ठान् समालिख्य वर्गानष्टौ लिखेत्ततः । पक्षिमार्জ্জारपञ्चास्यश्वानः सर्पाखुदन्तिनः । मेषः क्रमादकारादि वसुवर्गाश्रिता इमे । साध्यसाधकयोः प्रीतिर्ज्ञातव्या जातितः सदा" । इदमुक्त्वोक्तमे "वर्णशुद्धिं समासाद्य मन्त्रं दद्याद्गुरूत्तमः । अवर्गः पक्षिणोज्ञेयो मार्জ্জारश्च कवर्गकः । चवर्गश्च तथा सिंहश्चवर्गश्चैव कुक्कुरः । तवर्गो नाग इत्युक्तो मूषिकश्च पवर्गकः । यवर्गश्च गजोज्ञेयः शवर्गश्चैव मेषकः । पक्षिभुजगयोर्व्वैरं तथा च गजसिंहयोः । मार्জ্জारमूषिकयोश्चैव तथा कक्कुरमेषयोः । भुजङ्गसिंहयो मैत्री मेषमूषिकयोस्तथा । लोकादन्यच्च विज्ञेयं अवर्गादिप्रयोगतः" इति तन्त्रसा० । "जीवकर्षभकौ मेदे काकल्याष्टद्विष्टद्विके । अष्टवर्गोऽष्टभिर्व्वैरिति" वैद्यकोक्ते ४जीविका द्वयष्टद्रव्ये । "राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्ल्लभः । तस्मादस्य प्रतिनिधिं गृह्णीयान्नदुगुणं भिषक् । मेदाजीवककाकोलीद्वयद्विद्विकेऽपि वासति । वरोविदार्य्यश्वगन्धा वारणीश्च क्रमात् क्षिपेत्" वैद्य० । नीतिवेदिनां वर्জ্জनीये ५वर्गभेदे च । "ऋषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरबलादानं सैन्यानाञ्च निवेशनम् । अष्टवर्गमिमं साधु वर्জ्जये परिवर्জ्जयेत्" नीतिः ।

अष्टविध न० अष्ट विधाः प्रकारा अस्य । राज्याङ्गाष्टप्रकारे कर्मणि तच्च अष्टकर्मशब्दे दर्शितम् । "क्षत्रं चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्वतः" मनुः ।

सुश्रुतोक्ते विषयविशेषविषये छेद्यादौ अष्टप्रकारे शल्यकर्म्मणि तानि च यथा "छेद्यभेद्यलेख्यवेध्येष्याहार्य्यसाव्यसीव्यरूपाणि । तेषां विषयविशेषा अपि तत्रैव दर्शिता यथा । "छेद्या भगन्दरग्रन्थिः श्लैष्मिकश्लीलकालकः । व्रणवर्त्मार्बुदार्शस्कीलोऽस्थि मांसगम् ॥ शल्यं जतुमणिर्म्मांससंघातो गलशुण्डिका । स्नायुमांससिराकोथो वल्मीकं शतपोनकः॥ अभ्रुषश्चोपदंशाश्च मांसकन्द्यधिमांसकः । भेद्या विद्रधयोऽन्यत्र सर्जाद्यन्त्रवस्त्रयः ॥ आदितो ये विसर्पाश्च छद्मयः सविदारिकाः । प्रमेहपिड़काशोफस्तनरोगावमन्थकाः ॥ कुम्भीकानुशयीनाड्यो दन्तौ पुप्पुटिकालजी । प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥ तुण्डिकेरी गिलायुश्च पूर्व्वं ये च प्रमाकिणः । वस्तिस्तथाश्मरीहेतोर्म्मेदोजा ये च केचन ॥ लेख्याश्वतस्रो रोहिण्यः किलासमुपजिह्विका । मेदोजो दन्तवैदर्भौ ग्रन्थिवर्त्माधिजिह्विका ॥ अर्शांसि मण्डलं मांसकन्दो मांसोन्नतिस्तथा । वेध्याः सिरा बहुविधा मूत्रवद्वर्हकोदरम् ॥ एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये । आहार्य्याः शर्करास्तिस्रो दन्तकर्णमलाश्मरी ॥ शल्यानि मूढगर्भाश्च वर्चश्च निचितं गुदे । स्नाव्या विद्रधयः पञ्च भवेयुः पर्वजाश्रिते ॥ कुपितौ वायुं सरुजः शोफो यश्चैकदेशजः । पाल्यामयाः स्त्रीपदानि विषजुष्टञ्च शोणितम् ॥ अर्व्बुदानि विसर्पाश्च ग्रन्थयश्चादितस्तु ये । त्रयस्त्रयश्चोपदंशाः स्तनरोगा विदारिका ॥ शौषिरो गलशालूकम् कण्ठकाः क्रिमिदन्तकः । दन्तवेष्टः सोपक्रुशः शीतादोदन्तपुप्पुटः ॥ पित्तास्रकफजाश्चौष्ठ्याः क्षुद्ररोगाश्च भूरिशः । सीव्या मेद् सस्त्रव्याश्च भिद्याः सुलिखिता गदाः ॥ सद्योव्रणाश्च ये चैव चलसन्धिव्यपाश्रयाः । न क्षाराग्निविषैर्जुष्टा न वा मारुतवा-

क्षिनः ॥ नात्तर्लोहितशल्यांश्च तेषु सम्यक्त्रिशोधनम् ॥ पांशुरोमनखादीनि चलमस्थि भवेच्च यत् । अक्षतानि यतोऽमूनि पाचयेयुर्भृशं व्रणम् । रुजश्च विविधाः कुर्युस्तस्मादेतान्विशोधयेत् । ततोव्रणं समुन्नम्य स्थापयित्वा यथास्थितम् ॥ सीव्येत् क्षुद्रमेण क्षुद्रेण वल्केनाशुभ्रन्तकस्य वा । व्रणजत्वौमसूत्राभ्यां स्नायुना बालेन वा पुनः । मूर्व्वांशुडूचीतानैर्व्वा सीव्येद्वेल्लितकं व्रणैः ॥ सीव्येल्लोहशिकां वापि सीव्येद्वा तुन्नसेवनीम् । ऋजुग्रन्थिमथो वापि यथायोगमथापि वा ॥ देशेऽल्पमांसे सन्धौ च क्षुद्रे दत्ताङ्गुलद्वयम् । आयता त्वाङ्गुला त्वक्षा मांसले वापि पूजिता ॥ धनुर्वक्रा हिता मर्म्मफलकोशोद्रोपरि । इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः । कारयेन्नातनीपुष्पदन्ताग्रपरिमण्डलाः । नातिदूरे निकटे वा सूचीं कर्म्मणि पातयेत् । दूराद्व्रणो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनम् । अथ त्वौमपिचुच्छन्नं सुखूतं प्रतिसारयेत् । प्रियङ्ग्वञ्जनयष्ट्याह्वलोध्रचूर्णैः समन्ततः । शल्यकीफलचूर्णैर्व्वा त्वौमध्यामेन वा पुनः । ततो व्रणं यथायोगं बद्ध्वाचारिकमादिशेत् । एतदष्टविधं कर्म समासेन प्रकीर्त्तितम्" ।

अष्टश्रवण पु० अष्टौ श्रवणान्यस्य । चतुर्मुखे ब्रह्मणि चतुर्मुखस्य प्रतिमुखं द्विकर्णत्वाच्च तथात्वम् अष्टश्रवआदयोऽप्यत्र ।

अष्टाकपाल त्रि० अष्टसु कपालेषु संस्कृतः अण् तस्य लुक् । "अष्टनः कपाले ङ्विधि" वार्त्ति० आत् । अष्टसु कपालेषु संस्कृते पुराडाशादौ "आग्नेयोऽष्टाकपालः पुराडाशो भवति" । "अष्टाकपालाः मध्ये पुरोडाशा भवन्ति" इति च शत० ब्रा० ।

अष्टाक्षर त्रि० अष्टावक्षराणि यत्र पादे । १अष्टाक्षरयुक्तपादके अनुष्टुप्जातिके वर्णवृत्तभेदे । "अष्टाक्षरा वै गायत्री" श्रुतिः गायत्र्याःषडक्षरचतुष्पादत्वेऽपि अष्टाक्षरत्रिपादकृपत्वं सर्वत्र प्रसिद्धम् । २वल्कनामके मात्रावृत्तविशेषे विषमवृत्ते । "पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठञ्च पादानां शेषेष्वनियमोमतः । प्रयोगे प्रायिकं प्राहुः केऽप्येतल्लक्षणम् । लोकेऽनुष्टुबिति ख्यातम् तस्माच्छ्रुतता कृता" छन्दोम० ।

अष्टाङ्ग पु० अष्टावङ्गानि यस्य । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपे योगशास्त्रोक्ते १योग विशेषे "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानीति पात० सू०" । यमोनियमश्चासनञ्च प्राणायामस्ततःपरम् । प्रत्याहारोधारणा च ध्यानं सार्द्धं समाधिना । अष्टाङ्न्याङ्गरेतानि योगिनां योगसिद्धये इति" पुरा० । एतेषां लक्षणं अष्टाङ्गयोगशब्दे वक्ष्यते । "जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरित" इत्युक्तलक्षणे २प्रणामे "आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम् । यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः" इत्यष्टद्रव्यघटिते ३पूजोपकरणेऽर्घे, "आपः क्षीरं कुशाग्राणि दधि सर्पिः मधु तथा दधि । रक्तानि करवीराणि तथा रक्तचन्दनम् अष्टाङ्ग एष वा अर्घो भानवे परिकीर्त्तितः" काशीख० उक्ते ४अष्टद्रव्यात्मके सूर्य्यार्घे ५शरीफलके च तस्य प्रत्येकमङ्गौ अष्टपदरूपाङ्गत्वात्तथात्वम् । "दैवाद्यष्टाङ्गके आयुर्वेदे यथा "तद्यथा शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति । अथास्य प्रत्यङ्गलक्षणसमासः । तत्र १शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधान व्रणविनिश्चयार्थञ्च ॥ २शालाक्यं नाम ऊर्द्ध्वजत्रुगतानां रोगाणां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम् ॥ ३कायचिकित्सा नाम सर्व्वाङ्गसंश्रितानां व्याधीनां ज्वरातीसाररक्तपित्तशोथोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थम् ॥ ४भूतविद्या नाम देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थम् ॥ ५कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसंशुद्ध्यर्थानाञ्च व्याधीनामुपशमनार्थम् ॥ ६अगदतन्त्रं नाम सर्पकीटलूताद्यूषिकमूषिकादिदष्टविषव्यञ्जनार्थं विविधविष संयोगविषोपहतोपशमनार्थम् ॥ ७रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च ॥ ८वाजीकरणतन्त्रं नाम अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायनं प्रसादोपचयजननिमित्तं प्रहर्षजननार्थञ्च ॥ एवमसावायुर्वेदोऽष्टाङ्ग उपदिश्यते" सुश्रुतः ॥ कर्म० संज्ञात्वाच्च द्विगुः । अष्टसु तत्सदृशेषु न० ब० व० ।

अष्टाङ्गधूप पु० कर्म्म० "पलद्वया निम्बपत्रं वचा कुष्ठं हरीतकी । सर्षपाः सयवाः सर्पिर्धूपनं ज्वरनाशनम्" इति चक्रदत्तोक्ते ज्वरनाशने धूपभेदे ।

अष्टाङ्गमैथुन न० कर्म्म०। "स्मरणं कीर्त्तनं केलिः प्रेक्षणम् गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः" दक्षोक्ते स्त्रीणां स्मरणादिषु अष्टसु। यदभावो ब्रह्मचर्य्यम्।

अष्टाङ्गयोग पु० अष्टावङ्गान्यस्य कर्म्म०। यमनियमाद्यष्टाङ्गे योगे स च अङ्गसहितोदर्शितः तन्त्रसारे। "ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः। तत्र क्षेत्रात् समाख्याता योगविघ्नकरास्तु ये। कामक्रोधलोभमोहमदमात्सर्य्यसंज्ञकाः। योगाङ्गैरेतान्निर्जित्य योगिनो योगमाप्नुयुः। यमनियमावासनं प्राणायामस्ततःपरम्। प्रत्याहारो धारणाख्यं ध्यानं सार्द्धं समाधिना। योगाङ्गान्याहुरेतानि योगिनो योगसाधने। यमादयस्तु "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्জ্জবম्। क्षमा धृतिर्मिताहारः शौचञ्चेति यमा दश। तपःसन्तोष आस्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपोऽुतम्। दशैते नियमाः प्रोक्तायोगशास्त्रविशारदैः। आसनानि आसनशब्दे वक्ष्यन्ते। "दक्षपार्ष्णियेद्वायुं बाह्यं षोड़शमात्रया। धारयेत् पूरितं योगी चतुःषष्ट्या तु मात्रया। सुषुम्णा मध्यगं, सम्यग्ब्रह्मरन्ध्रान्तमात्रया शनैः। नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः। प्राणायामभिमं प्राहुर्योगशास्त्रविशारदाः। भूयोभूयः क्रमात्तस्य व्यत्यासेन समाचरेत्। मात्राष्टत्रिंशमेवैव सम्यग्द्वादश षोड़श। जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः। तदेतं निगर्भञ्च प्राणायामं परं विदुः। क्रमाद्भ्यसतः पुंसोदेहस्वेदोऽम्भोऽधमः। मध्यमः कम्पसंयुक्तो भूमित्यागः परोमतः। उत्तमस्य गुणावाप्तिर्यावच्छीलनमिष्यते" इन्द्रियाणां विचरतां विषयेषु निरर्गलम्। बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते। अङ्गुष्ठगुल्फजानूरुसीमनीलिङ्गनाभिषु। हृद्यौवाक्कण्ठदेशे तु तालिकायां तथा नसि। भ्रूमध्ये मस्तके मूर्द्ध्नि द्वादशान्ते यथाविधि। धारणं प्राणमरुतोधारणेति निगद्यते। समाहितेन मनसा चैतन्यान्तरवर्त्तिना। आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते। समत्वभावनां नित्यं जीवात्मपरमात्मनोः। समाधिमाङ्मुनयः प्रोक्तमष्टाङ्गलक्षणम्। इत्यादि कथितं देवि कामादिरिपुनाशनम्"। पात०स्मृ०तु अन्यथोक्तम्।

अष्टाङ्गावलेहिका स्त्री कर्म्म०"कटुकत्रं पौष्करं शृङ्गी व्योषं मासत्रयं त्रिवृत्। कृष्णा चूर्णकृतञ्चैतन्मधुना सह लेहयेत्। एषावलेहिका हन्ति सन्निपातं सुदारुणम्। हिक्काश्वासं च कासञ्च कण्ठरोगं नियच्छति। ऊर्द्धगश्लेष्महरणे उष्णे स्वेदादिकर्म्मणि। विरोध्युष्णे मधु त्यक्त्वा कार्य्या खादार्द्रजैरसैः"। चक्रदत्तोक्तेऽवलेहभेदे।

अष्टादश त्रि० अष्टादशानां पूरणः डट् स्त्रियां ङीप् अष्टादशसंख्यापूरणे। अष्टौ च दश च अष्टाधिका दश वा अष्टादशन्। १ (आठारो) संख्यायाम् २तत्संख्याते च त्रि०। "विद्या ह्यष्टादशैव तु" विष्णुपु० "अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्" नैष० "अष्टादश पुराणानि कृत्वा सत्यवतीसुतः" भा०आ०प०।

अष्टादशधान्य न०ब०व०कर्म०संज्ञात्वान्न द्विगुः। अष्टादशविधेषु धान्येषु। तानि च यथा। "यवगोधूमधान्यानि तिलाः कङ्गुकुलीत्थकाः। माषा मुद्गमसूराश्च निष्पावाः श्यामसर्षपाः। गवेधुकाश्च नीवारा आढक्योऽथ सतीनका। चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु हेमा० दा०ख०स्था० पु०। धान्यानि, व्रीहयः, गवेधुकाः, कसेरकाः। नीवाराः आरण्यव्रीहयः सतीनका, वर्त्तुलकलायाः। चीनकाः षष्टिकविशेषाः। निष्पावाः शिम्बीभेदाः। हेमा०।

अष्टादशपरिशिष्ट स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः। यूपादिलक्षणादिषु अष्टादशसु परिशिष्टविद्यासु "परिशिष्टाश्च संख्याता अष्टादश शृणुष्व ताः। यूपलक्षणं छागलक्षणं प्रतिष्ठानुवाकसंख्याचरणव्यूहस्नाङ्कलक्षणानि परिषदन्यजुषमिष्टकापूरणं प्रवराध्यायोच्छिष्टशान्तं क्रतुसंख्यानिगमा यज्ञपार्श्वहोलकम्। व्रतञ्च प्रसवोत्थाश्च शूर्म्मलक्षणसंयुतम्। कथिताः परिशिष्टास्तु ह्यूनविंशति संख्यया" हेमा०दा०ख०देवीपु०।

अष्टादशपुराण न०ब०व०कर्म्म०संज्ञात्वात् न द्विगुः। ब्राह्मादिषु अष्टादशसु पुराणेषु "ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्। आग्नेयमष्टमं प्रोक्तं भविष्यन्नवमन्तथा। दशमं ब्रह्मवैवर्त्तं लिङ्गमेकादशं तथा। वाराहं द्वादशं प्रोक्तं स्कान्दञ्चात्र त्रयोदशम्। चतुर्दशं वामनञ्च कौर्म्मञ्चैव तथा दशं। मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डमष्टादशं तथा" हेमा०दा०ख०वरा०पु०।

अष्टादशभुजा स्त्री अष्टादश भुजा यस्याः। देवीभागवतोक्ते द्वितीयचरितदेवतायां महालक्ष्म्यां तन्मूर्त्तिध्यानशब्दे वक्ष्यते

अष्टादशविद्या स्त्री ब०व० कर्म्म० संज्ञात्वान्न द्विगुः। वेदादिषु अष्टादशसु विद्यासु। "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्म्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रयः।

अर्थशास्त्रं चतुर्थं तु विद्याह्यष्टादशैव तु" हेमा०ब्र०ख० विष्णुपुरा०। अङ्गानि अङ्गशब्दे उक्तानि शिक्षादीनिषट् इति अष्टादशसंख्यापूर्त्तिः।

अष्टादशविवादपद न०ब०व०कर्म्म०संज्ञात्वान्न द्विगुः। ऋणादानादिषु अष्टादशसु विवादस्थानेषु "तानि च मनुनोक्तानि यथा "तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः। सम्भूय च समुत्थानं दत्तस्यानपकर्म च। वेतनस्यैव चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामिपालयोः। सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके। स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च। स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वय एव च। पदान्यष्टादशैतानि व्यवहारस्थितावहि"।

अष्टादशस्मृतिकारिन् पु०ब०व०कर्म्म०संज्ञात्वान्न द्विगुः। विष्णुप्रभृतिषु अष्टादशसु स्मृतिकारकेषु "विष्णुः पराशरो दक्षः संवर्त्तो व्यासहारितौ। शातातपोवशिष्ठश्च यमापस्तम्बगौतमाः। देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः। शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः। हेमा० दा०ख०दक्षनृमनुः।

अष्टादशाङ्ग पुंन० अष्टादश अङ्गानि यत्र। वैद्यकप्रसिद्धे पाचनभेदे तच्च वातादिभेदेन भिन्नभिन्नप्रकारं दर्शितं चक्रदत्तेन। "दृषमूली वटी शृङ्गी पौष्करं सदुरालभम्। भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी। अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः। कासहृद्ग्रहपार्श्वार्त्तिश्वासच्छिक्कावमीहरः१। भूनिम्बदारुदृषमूलमहौषधाम्रतिक्तेन्द्रबीजधनिकेभकणाकषायः। तन्द्रीप्रलापकसनारुचिदाहमोहश्वासादियुक्तमखिलं ज्वरमाशु हन्ति२॥ सुस्तपर्पटकोशीरदेवदारुमहौषधम्। त्रिफलाधन्वयासञ्च नीलीकम्भिल्लकं त्रिवृत्। किराततिक्तकं पाठाबलाकटुकरोहिणी। मधूकं पिप्पलीमूलं सुस्राद्यो गण उच्यते। अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत्। पित्तोत्तरे सन्निपाते हितञ्चोक्तं मनीषिभिः। मन्यास्तम्भे उरोघाते उरःपार्श्वशिरोग्रहे"२। अन्यविधमप्यन्यतोक्तं विस्तराद्वदुक्तम्।

अष्टादशोपचार पु०ब०व०कर्म०संज्ञात्वान्न द्विगुः। तन्त्रोक्तेषु आसनादिषु अष्टादशसूपचारेषु यथा "आसनं स्वागतं पाद्यमर्घ्याचमनीयकम्। स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्वशः। गन्धपुष्पे तथा धूपदीपावन्नञ्च तर्पणम्। माल्यानुलेपनञ्चैव नमस्कारविसर्जने। अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्" तन्त्रसारः।

अष्टादशोपपुराण न० ब०व० कर्म्म० संज्ञात्वान्न द्विगुः। सनत्कुमारादिषु अष्टादशसु उपपुराणेषु "अन्यान्युपपुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्। तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम्। चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम्। कापिलं मानवं चैव तथैवोशनसेरितम्। ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च। माहेश्वरं तथा शाम्बं सौरं सर्वार्थसञ्ज्ञयम्। पराशरोक्तं प्रवरं तथा भागवतह्वयम्। इदमष्टादशं प्रोक्तं पुराणं कौर्म्मसंज्ञितम्। चतुर्द्धा संस्थितं पुण्यं संहितानां प्रभेदतः। हेमा०दा०ख०कूर्म्मपु०।

अष्टादिगाब्दिक पु० कर्म्म० संज्ञात्वान्न द्विगुः। "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिगाब्दिकाः" इत्युक्तेषु अष्टसु प्रथमशब्दार्थस्य प्रवर्त्तकेषु इन्द्रादिषु।

अष्टापद पुंन० ब०व०अष्टौ अष्टौ पदानि पङ्क्तावस्य दत्तौ संख्याशब्दस्य वीप्सार्थत्वाङ्गीकारः आत्वम् अर्द्धर्चादिः। १शारीफलके। अष्टसु धातुषु पदं प्रतिष्ठा यस्य।२स्वर्णे। आवर्ज्जिताष्टापदकुम्भतोयैः" कुमा०। "अचेष्टताष्टापदभूमिरेणुः" माघः। उपचारात् स्वर्णमयेऽपि "अष्टापदेन बलवान् राजा वज्रधरोपमः" इति हरिवंशः ३वरभे ४लूतायाञ्च पु०। तयोरष्टपदत्वात्। अष्टं यथा स्यात्तथा पद्यते। ५क्रमौ। अष्टसु दिक्षु आपद्यते ६कीलके। अष्टाभिः सिद्धिभिरापद्यते। आ+पद-अप् ३त०। अणिमाद्यष्टसिद्धियुक्ते ७कैलासे पु०।

अष्टापाद्य त्रि० अष्टभिरापद्यते शुध्यते आ+पद-कर्म्मणि यत्। अष्टभिर्गुणनीये "अष्टापाद्यम् शूद्रस्य स्वेये भवति किल्बिषम्" मनुः।

अष्टाविंशति स्त्री अष्टाधिका विंशतिः शा०त० आदेशः।(आटाइस)१संख्याभेदे २तत्संख्यान्विते च। विंशच्छब्देन समासे तत्रैव "अष्टाविंशद्दिनम्" भ्युः ज्यो०। पूरणे डट्। अष्टाविंशः। तत्संख्यापूरणे त्रि० स्त्रियां ङीप्। पूरणे तमप् अष्टाविंशतितमः। तत्रैवार्थे त्रि०।

अष्टाविंशतितत्त्व न०अष्टविंशतौस्थानेषु तत्त्वंतत्त्वज्ञानं यत्र। रघुनन्दनभट्टाचार्यकृते मलमासादिषु अष्टाविंशतिस्थानेषु तत्त्वज्ञापके स्मृतिनिबन्धे। तानि च स्थानानि तेन प्रतिज्ञायां दर्शितानि यथा "मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये। प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते, दुर्गोत्सवे व्यवहृतावेकादश्यादिनिर्णये। तडागभगवनोत्सर्गे वृषोत्सर्गव्रते व्रते। प्रतिष्ठायां परीक्षायां ज्योतिषे

वास्तुयज्ञके । दीक्षायामाङ्गिके क्रत्वे क्षेत्रे श्रीपुरुषोत्तमे । सामश्राद्धे यजुःश्राद्धे मूढहत्यविचारणे । दत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः" । [आष्टकोणादयोऽप्यत्र ।

अष्टार त्रि० अष्टौ अरा इव कोणा यस्य । अष्टकोणे । अष्टा-

अष्टारचक्रवत् पु० अष्टारमष्टकोणं चक्रमस्यास्य मतुप् मस्य वः । अष्टकोणचक्रधारके जिनभेदे ।

अष्टाल पु० घोटकदेशभेदे अश्वशब्दे विवृतिः ।

अष्टावक्र पु० अष्टवक्रोवक्रः वक्रौ संख्या सुजर्थपरा पृ० दीर्घः । ऋषिभेदे स च उद्दालकशिष्यकहोडसुतः । तदुत्पत्तिकथा भा० व० १३२ अ० । "उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत् । गुरुं शुश्रूषुराचार्यवशानुवर्त्ती दीर्घं कालं सोऽध्ययनञ्चकार । तं वै विप्रः पर्य्यचरत् स शिष्यस्ताञ्च ज्ञात्वा परिचर्य्यां गुरुः सः । तस्मै प्रादात् सुतां एव सुतञ्च भार्य्यांञ्च वै दुहितरं स्वां सुजाताम् । तस्यां गर्भः समभवदग्निकल्पः सोऽधीयानं पितरञ्चाभ्युवाच । सर्व्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्त्तते । वेदान् साङ्गान् सर्व्वशास्त्रैरुपेतानधीतवानस्मि तव प्रसादात् । इहैव गर्भे तेन पितर्ब्रवीमि नेदं त्वतः सम्यगिवोपवर्त्तते । उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप । यस्मात् कुक्षौ वर्त्तमानोऽवोचि तस्माद्वक्रो भविताऽस्यष्टवक्रवः । स वै तथा वक्र एवाभ्यजायदष्टावक्रः प्रथितो वै महर्षिः" । सचाष्टावक्रसंहिताकारी

अष्टावक्रीय न० अष्टावक्रमधिकृत्य कृतः ग्रन्थः छ । भा० व० प० १३२ अध्यायमारभ्य अध्यायत्रयात्मक ग्रन्थभेदे यत्र वादेन वन्दिनं जित्वाऽष्टावक्रेण वन्दिपराजितं तेनैव जलेनिमज्जितं पितरं कहोडनामानं मुनिं मोचयामास तेन प्रसन्नेन पित्रा तस्याष्टवक्रतादूरीकरणेन सौम्याकारता कृतेति वर्णितम् ।

अष्टि स्त्री अश्नुते भूमौ क्षिप्यते अश-क्तिन् पृषो० षत्वम् । (आटि) इति ख्याते १बीजे, २षोडशाक्षरपादके छन्दोभेदे च । "अष्ट्यष्टी ततः सृष्टे" ह० र० । अक्ष-व्याप्तौ-क्तिन् । २व्याप्तौ । अश-करणे क्तिन् । ४भोगसाधने देहे "शतशारदीया शुश्रूषून जरदष्टिर्यथासम्" यजु० ३४,५२ । जरती अष्टिः शरीरं यस्य "वेदद्दो० अष्टेः षोड़शाक्षरपादत्वेन तत्संख्यासाम्यात् ५षोड़शसंख्यायां चैतत्संख्येये च । "सप्ताब्धिपञ्चाङ्कदिने विवाहाद्यधप्रत्रेयोऽष्टिदिनान्तराले । इति मुहू० चि० फलाभ्यन्तरस्थास्थितुल्यकठिनांशवाचो ह यकारमध्यः अस्थिशब्दएव ज्यायान् अस्थितुल्यतया तस्यास्थित्वम् । तकारयुक्तः पाठस्तु असमीचीनः । रसमयस्य त्वगाद्यभावात् फलमेव रसं पिबतेति" भाग० टी० श्रीधरः ।

अष्ट्रा स्त्री अश्नुते व्याप्नुतेऽनया अक्ष-करणे ष्ट्रन् । १प्रतोदे "शुनमष्ट्रामुदिङ्गय" ऋ० ४,५७,४ । "अष्ट्रांप्रतोदम्" भा० २रथचक्रावयवभेदे च । "अष्ट्रां पूषा शिथिरास्वङ्गुरीट्वजत्" ऋ० ६,५८,२ । "अष्ट्रामारामिति" भा० ।

अष्ठीला स्त्री अस्थिवत्तुल्यकठिनाश्मानं रा-क रस्य लः दीर्घः "आघ्नायन्तं वस्तिमष्ठीं वृद्धा वातश्लोणतामु" । कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रस्य मार्गरोधिनीमिति वैद्यकोक्तलक्षणयुक्ते वातजन्ये १व्याधिभेदे । २मूत्राघातरोगभेदे सुश्रुतः तल्लक्षणादि तत्र यथा "अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः वातकुण्डलिकाष्ठीला वातवस्तिस्तथैव च" द्वादशभेदानभिधाय लक्षितं यथा "बस्तेर्मार्गस्य वस्तेश्च वायुरन्तरमाश्रितः । अष्ठीलावद्घनं ग्रन्थिं करोत्यचलमुन्नतम् । विण्मूत्रानिलसङ्गश्च तत्राध्मानं च जायते । वेदना जायते वस्तौ वातष्ठीलेति तां विदुः" । २वर्त्तुलाकारे पाषाणखण्डे च । तदाकारत्वेन वातष्ठीलाया अपि तथात्वम् "ततोऽजस्रं मांसमेदो लोहाष्ठीलेव संहृता" भा० आ० प० ११५ अध्या० । मूत्राघाते क्लीवत्वमपि भेदनं दीपनं छद्यमानाष्ठीलघुलघु" सुश्रुतः ।

अष्ठीवत् पु० नास्ति अतिशयितमस्थि यस्मिन् मतुप् पृषो० नि० । (आंटु) इति ख्याते जानूर्ध्वोः सन्धिस्थाने । अष्ठीवन्तौ परिकृतौ च देहे" ऋ० ७,५०,२, जङ्घाभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्' अथ० १०,१६२,४, अस्य जङ्घापूर्व्वपदत्वे द्वन्द्वे १अदन्तता जङ्घाष्ठीवं न० । "चत्वार्यङ्गष्ठीवानि" शत० ब्रा० । २ष्ठीवद्भिन्ने त्रि० ।

अस दीप्तौ अक० अदर्शने गतौ च सक० भ्वादि० उभ० सेट् । असति ते आसीत् आसिष्ट । "लावण्य उत्पाद्य दवास यत्नः" कुमा० ।

अस विद्यमानतायाम् अदा० अक० पर० सेट् । अस्ति स्तः सन्ति असि स्थः स्थ अस्मि स्वः स्मः । स्तात् स्युः । अस्तु स्ताम् सन्तु एधि-असानि । आसीत् । अस अस्तीत्यस्य धातोः भूरादेशः । तेन भूधातुवदुरूपम् । विद्यमानता च कालसंबन्धधारणं तदुक्तं हरिणा "आत्मानमात्मना विन्ददस्तीत्यवदिश्यते । अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" "अस्त्युत्तरस्यां दिशि देवतात्मा" कुमा० यच्चावहासार्थमसत्कृतोऽसि गीता" "प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम्" श्यामास्तवः । "स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" फणिभा० "स्तात्मसिद्धे मिते च सदृज

प्राकृतावपि" माघः कामतस्तु प्रदत्तानामिमाः स्युः क्रमशो वराः" मनुः "दिनेदिने ह्यं तनुरेधि रेऽधिकम्" नैष० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः । "नत्वेवाहं जातु नासमिति" गीता । सन् सन्तौ सन्तः । "सदेव सोम्येदमग्र आसीत्" छा० उ० "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते" मनुः । "नासतोविद्यतेऽभावोनाभावो विद्यते सतः" गीता स्त्रियां ङीप् "सती सता योगविसृष्टदेहा" कुमा० "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी हरिः वि+अति+व्यतिहारे परस्परमेकरूपेण स्थितौ "अन्यो व्यतिस्ते तु ममापि धर्म्मः" भट्टिः ।

अस क्षेपे दिवा० पर० सक० सेट् । अस्यति अस्येत् अस्यत आस्यत् आस्यत् आस । असिता-अस्ता असिष्यति । अस्यन् अस्यमानः अस्तः । असितुम्-अस्तुम् । असित्वा-अस्त्वा अभ्यस, निरस "आरे अस्मद्द्वेष्यं हेतो अस्यतु" । ऋ० १,११४,४, "दस्यवे हेतिमस्यर्थम्" ऋ० १,१०३,३, अति-अतिदूरक्षेपणे "बहुभिश्चैकमत्यस्यन्नेकेन च बहून् जनान्" भा० अत्यस्तः पा० । वि+अति । वैपरीत्येन स्थापने "अत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" मनुः "अत्यासन्नयोगतः" स्मृतिः अधि-आरोपे आरोपश्च अतस्मिंस्तद्बुद्धिः अन्योपरिस्थापनञ्च आद्यार्थे "अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनतादध्यस्यन्ति" "आह कोऽयमध्यासोनाम" उच्यते स्मृतिरूपः परत्रपूर्व्वदृष्टावभासः" शा० भा० । अनु-पश्चात् सह वा क्षेपणे अन्वस्तः । "शुल्कमेखला वल्कलेनान्वस्ता भवति" शत० ब्रा० । अप-दूरीकरणे "गतिरपास्तसंस्था मतिः" मालतीमा० "किमित्यपास्याभरणानि यौवने" कुमा० । अभि-अभ्याहत्तौ, "अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" कुमा० "अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते" गीता । "शैशवेऽभ्यस्तविद्यानाम्" रघुः । अव-अवक्षेपे "तामवास्तो गच्छति च गृहम्" शत० ब्रा० समन्तात्क्षेपे "तामवास्त्यागच्छति गृहम्" शत० ब्रा० उद्-ऊर्द्धीतूक्षेपणे "पुच्छमुदस्यति" सि० कौ० । परि+उद् भिन्नतया बोधने । "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" मीमां० यथा आद्धादौ पर्य्युदस्तकालोरात्रादिः "अमावास्यायां पिण्डमोदद्यात्" "रात्रौ श्राद्धं न कुर्वीत" त्वुभयोरेकवाक्यतया रात्रीतरभावस्यायां श्राद्धं कर्त्तव्यमिति हि बोधः तत्र रात्रिः पर्य्युदस्ता एवमन्यत्रापि । परित:क्षेपणे च "अन्याः सर्वं पर्य्युदस्ता ऋषिभिर्निवेशने" भा० स० प० । वि+उद्-निवारणे । "चीराणीव व्युदस्तानि रेजुस्तत्र महावने" "रामा० त्वन्तु हेतूनतीत्यैतान् कामक्रोधौ व्युदस्य च" । भा० स० प० । उप-समीपस्थापने "तस्याधस्तं सदूबर्हिरुपास्यति चमसेषु" कात्या० १०,५, नि-अर्पणे "न मद्विधे न्यस्यति भारमग्र्यम्" । निक्षेपरूपेणार्पणे च "न्यासीकृता स्थानभिदा स्मरेण" कुमा० "राज्यं न्यासमिवाभुनक्" रघुः । उच्चारणपूर्व्वकं तत्र तत्र स्थाने अर्पणीतया ध्याने च । "आदाद्यादिकन्यासः करशुद्धिस्ततः परम् । अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च" तन्त्रम् । उप+नि+वाचारम्भणे "उपन्यासस्तु वाङ्मुखम्" अमरः । प्रथमप्रयोगे च "भूतमप्युपन्यस्तं पूर्व्वभावेदितं न चेत् । हीयते व्यवहारेण" स्मृतिः "स तु तत्र विशेष दुर्लभः सदुपन्यस्यति क्षत्यवर्त्म यः" किरा० सम्+नि त्यागे "व्रीड़ादसं देवसदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः" कुमा० विहितकर्म्मणां विधानेन त्यागे च "दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः । वेदान्तं विधिवच्छ्रुत्वा सन्यसेदनृणो द्विजः" मनुः । "न हि संन्यसनादेव सिद्धिं समधिगच्छति" "मयि संन्यस्य कर्म्माणि" गीता । निस्-निर्-निष्ठीवने दूरीकरणे च । निरस्यति "निष्ठीवति क्ष्विदु निरसने" पा० धातुपा० "निरस्तः परावसुः हतनिरसने भवदेवः "निरस्तगाम्भीर्य्यमपास्तधैर्य्यम्" माघः "निरास मुक्तं कुपितेव पद्मिनी" भट्टिः "क्षणदलिकुलनूपुरा निरासे" किरा० । त्वरितोद्धारणे च "निरस्तं त्वरितोदितम्" अमरः ।

परा-निराकारणे "एतेन खण्डनकारमतमपि परास्तम्" चिन्ता०

परि-परावर्त्तनेन स्थापने "सुखेन पर्य्यस्तविलोचनेन" कुमा० । "पर्य्यस्यन्निह निचयः सहस्रसंख्याम्" किरा० । अर्पणे च "ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य" कुमा० । वि-परि-वैपरीत्ये, परिवर्त्तने भ्रान्तिज्ञाने च "इतरथा पात्रे विपर्य्यस्येत्" शत० ब्रा० । "संशयविपर्य्यासनिवारणेनेति" चिन्ता० "विपर्य्यासितदर्शनैः" बौद्धका० ।

प्र-प्रक्षेपे "अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्" मनुः "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" गीता ।

अनु-प्र-आनुलोम्येन अनुगततया एकरूपेण निवेशने अनुप्रासः

प्रति-प्रतिरूपक्षेपणे । "तद्यथाऽहिर्निर्लयनी वल्मीके मृता प्रत्यस्ता शयीत" शत० ब्रा० ।

वि-विशेषरूपेण सम्यगवबोधनाय निवेशने व्यासः विग्रहवाक्यम् तस्य समस्तवाक्यार्थस्य विशेषेणावबोधहेतुतया निवेशनात्

तथात्वम् विभागे "विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः" भा०आ०प०। पारावारेति व्यस्तं समस्तं विपरीतञ्च" सि०कौ०। व्यस्तः "व्यस्तरात्रिन्दिवस्य ते" कुमा० पृथक्करणे एवैकशः प्रयोगे व्यस्तः "व्यस्तसमस्तमहाव्याहृतिहोमे" भवदेव। निवारणे च "व्यस्यन्नुदन्यां शिशिरैः पयोभिः" भट्टि। विक्षेपे "व्यस्तास्तारागणाइव" भा०।

वि–नि–अर्पणे "विष्णोर्वक्त्रसि विघ्ननायकतिना सिद्धान्तमुक्तावली विन्यस्ता" सि०मु० "विभागविन्यस्तसकृार्धरत्नम्" भट्टिः।

सम्–संक्षेपे "समासेन निबोधत" पुरा०समस्या। संक्षिप्यन्यसने यथा पीतम् अम्बरमिति समुदायस्य पीताम्बर इति संक्षेपेण प्रयोगः समासः। "सर्व्वोऽप्येकदेशोऽङ्गा सह समस्यते" वार्त्ति०। "समस्यमानपदार्थातिरिक्तपदार्थबोधकत्वं बहुव्रीहित्वमिति सारमञ्जरी। "समासः षड्विधोबुधैः" हरिः साकल्ये च समस्तम् "ज्ञानमस्ति समस्तस्य देवीमा० "व्यस्तसमस्त महाव्याहृति होमे विनि०" भवदे० संयोजने च समस्य सम्पादयत गुणैरिमाम्" किरा०।

असंयत त्रि० न०त०। बन्धनशून्ये "असंयतोऽपि मोक्षार्थी" काद०। असंयतः अबद्धः अकारे विष्णौ भक्तश्च।

असंयुक्त त्रि० विरोधे न०त०। १वियुक्ते। २अव्ययनवर्णाभिन्ने व्यञ्जनवर्णे ३द्रव्यान्तरैरसंसृष्टे च।

असंयुत त्रि० न०त०। संयुतभिन्ने "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाकुरसंयुतम्" पा० शिक्षा।

असंयोग पु० अभावे न०त०। १संयोगाभावे न०ब०। २संयोगशून्ये त्रि०।संयोगः क्रियाजन्यः द्रव्याश्रयगुणविशेषः हलवर्णयोरचाऽव्यवधानञ्च। "असंयोगोपधात्" पा०।

असंलग्न त्रि० न०त०।१संलग्नभिन्ने विभक्ते २असंबन्धे च।

असंवृत त्रि० न संवृतः। १अनावृते "नासंवृतमुखः कुर्य्यात्क्षुतं जिह्मां तथैव च" स्मृतिः "संवृतं संवरणम् न०७ब०। आत्मन्यावरके २नरकभेदे न० "योह्यस्य धर्म्ममाचष्टे यश्चोपदिशति व्रतम्। सोऽसंवृतं नाम तमः सह तेनैव मज्जति" मनुः।

असंशय पु० अभावे न०त०। १सन्देहाभावे न०ब०। २सन्देहशून्ये "असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः" शकु०सन्देहश्च एकस्मिन् धर्म्मिणि विरुद्धकोटिद्वयज्ञानम् यथा पर्व्वतो वह्निमानुनवा दहनतदभावरूपविरुद्धकोटिद्वयमेकस्मिन् पर्व्वते धर्म्मिणि ज्ञायते "स्थाणुः पुरुषो वेत्यत्र अस्थाणुत्वस्य पुरुषत्वव्याप्यतावच्छेदकतया गृहीतधर्म्मकत्वेन विरुद्धत्वात्तथात्वमिति वेदः ३निश्चये च

असंश्रव त्रि० नास्ति संश्रवः सम्यक् श्रवणं यत्र। सम्यक्श्रवणायोग्ये दूरदेशादौ। "असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्" मनुः।

असंश्लिष्ट त्रि० न०त०। संश्लेषशून्ये १विभक्ते २असङ्गते च।

असंसर्ग पु० अभावे न०त०। १संसर्गाभावे। न०त०। २संसर्गशून्ये निस्सम्बन्धे।

असंसर्गाग्रह पु० असंसर्गस्य परस्परसम्बन्धाभावस्याग्रहः। मीमांसकोक्तस्य इदमिति रजतमित्यादि ज्ञानद्वयस्यापि प्रवृत्तिजनकताप्रयोजके परस्परसम्बन्धाभावस्याबोधे। विस्तरः असत्ख्यातिशब्दे अख्यातिपक्षनिरूपणे ५२२पृष्ठे द्रष्टव्यः।

असंसृष्ट त्रि० न० त०। १संसर्गरहिते। संसर्गश्च द्रव्ययोः सम्बन्धः धनिनोरेकत्र द्रव्ये विभागानन्तरं समुदायस्वामित्वसम्पादनञ्च "विभक्तोयः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पित्रप्रेषाथ वा प्रीत्या स तु संसृष्ट उच्यते इह० उक्तेः। संसृष्टं द्रव्यमस्यास्ति अर्शा०अच् संसृष्टः। इनि संसृष्टी च विभानन्तरमेकत्र द्रव्येऽन्येन सह सम्बन्धवान् तद्भिन्नः असंसृष्टः असंसृष्टी च "अन्योदर्य्यस्तु संसृष्टीनान्योदर्य्यधनं हरेत् असंसृष्ट्यपि चादद्यात् संसृष्टीनान्यमातृजः" या०स्मृ०। "तस्माद्विभक्तासंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णातीति" मिता०।

असंस्कृत त्रि० सम्+कृ–क्त सुट् न०त०। १गुणान्तराधानमनीते २अपरिष्कृते ३गर्भाधानादिसंस्काररहिते, च। असंस्कृतः सुतो ज्येष्ठोनापरो वेदपारगः" स्मृतिः "असंस्कृतास्तु संस्कार्य्या भ्राद्भिः पूर्व्वमंस्कृतैः" या०स्मृ०। व्याकरणसंस्कारशून्ये ४अपशब्दे पु० "संस्कारोहि सतो गुणान्तराधानम् स च लौकिकालौकिकहेतुकः। तत्र यथा गर्भाधानादिना अलौकिकेन हेतुना देहः संस्क्रियते तत्संस्काराच्च तदभिमानी देही। एवं स्नानाचमनादिनाऽपि। लौकिकेन तु पाकादिना द्रव्यान्तरयोगेन वा अन्नादौ गुणान्तरमाधीयते अतएव संस्कृतं भक्षाः इति पा० सूत्रे भक्षस्य दध्याद्युपसेकेन संस्कार उक्तः। घरावे संस्कृतः भावावः सक्तुः दग्धि संस्कृतः दाधिकः रूपः" सि०कौ०।

असंस्तुत त्रि० न०त०। १अपरिचिते। "प्रेयानयमसंस्तुत इव परित्यक्तः" काद०। २असम्यगस्तुते च।

असंस्थित त्रि० न०त०। १अप्रेते परलोकं प्रति अप्रस्थिते "असंस्थितान् प्राणान् संस्थापयेत्" शत०ब्रा०२अनुस्थिते

अवस्थितभिन्ने २चले च। "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः" इति शकु०।

असंहत त्रि० न संहन्यते इतरेण संहन्यते सम्+हन-क्त न०त०। १संघातमनापन्ने २असंहते "सर्व्वतस्त्विदं पक्वाद्दतं वा बल्लजमयुग्ममसंहतं प्रागग्रं मूलमाच्छादयत्" गोभि० "असंहतमसंलग्नम्" सं०त० रघु०। सांख्यमतसिद्धे ३पुरुषे पु०। तन्मते हि प्रकृत्यादेः शय्याष्टकादिवत् संहत्यैव (इतरसापेक्षतयैव) पुरुषार्थकारित्वम् पुरुषस्य तु प्रकाशरूपक्रियायां नेतरापेक्षाऽस्तीति तस्यासंहतत्वम्। संहतपरार्थत्वात् पुरुषस्य" सां०भा० "विवादास्पदं प्रकृतिमहदादिकं परार्थं स्वेतरस्य भोगापवर्गफलकं संहतत्वात् शय्यासनादिवदित्यनुमानेन प्रकृतेः परोऽसंहत एव पुरुषः सिद्ध्यति तस्यापि संहतत्वेऽनवस्थापत्तेः। पातञ्जले च "परार्थं संहत्य कारित्वादिति" सूत्रकारेणानुमानं कृतं तत्तु यथाश्रुत मेवान्यावयवसाधारणम्। इतरसाहित्येनार्थक्रियाकारित्व मेव संहत्यकारित्वशब्दार्थत्वात्। पुरुषस्तु विषयप्रकाशनरूपायां स्वार्थक्रियायां नान्यदपेक्षते नित्यप्रकाशरूपत्वात्। पुरुषस्यार्थसम्बन्धमात्रे बुद्धित्त्यपेक्षणात्। सम्बन्धस्तु नासाधारणस्वार्थक्रियेति। "संहतपरार्थत्वात्" सां०सू०भा० "अतोऽसंहतः संहतदेहादिभ्यःपरः पुरुषः सिध्यति"।

असकृत् अव्य० न सकृत् न०त०। पौनःपुन्ये। "असकृदेकरथेन तरस्विना" रघुः "अन्यादृशेनासकृच्चैतान् गुणैश्च परिनोदयेत्" "असकृद्गर्भवासेषु वासं जन्म च दारुणम्" इति च मनुः। "आवृत्तिरसकृदुपदेशात्" शा०सू०।

असक्त त्रि० सृज-क्त न०त०। १आसक्तिशून्ये २फलाभिलाषशून्ये च "असक्तः सुखमन्वभूदि"ति रघुः। "कुर्य्यात् विद्वांस्तथाऽसक्तः" इति गीता "असक्तमारभ्यतो यथा यथम्" किरा०। [सक्तिशून्ये

असक्थ (क्थि) त्रि० नास्ति सक्थि यस्य वा टच् समा०।

असक्रा स्त्री सम्+क्रम-क्विप् पृ० समोऽन्लोपः न०त०। संक्रान्त्यां स्त्रियाम्। "न ह्यं पिन्वतमसक्राम्" ऋ०६,६३,८, असक्रामसक्रमणीम्" निरु०।

असखि पु० न सखा न टच् समा०। सखिभिन्ने रिपौ।

असगोत्र त्रि० न समानं गोत्रमस्य वा समानस्य सः। भिन्नगोत्रे "असगोत्रः सगोत्रोवा यदि स्त्री यदि वा पुमान्। यस्याग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि" स्मृतिः पक्षे न सादेशः। असमानगोत्रः "असमानगोत्रार्षेयीम् भार्य्यां विन्देत" स्मृतिः।

असङ्कल्प पु० विरोधे न० संकल्पाभावे। न०ब०। संकल्पशून्ये त्रि०।

असङ्कसुक त्रि० न०त०। स्थिरमतौ।

असङ्कुल त्रि० न सङ्कुलः। १परस्परविरुद्धे। २ग्रामादिपथे ३विस्तीर्णे पथि च पु०।

असङ्क्रान्तमास पु० न संक्रान्तः न राश्यन्तरं प्राप्नोरविर्यत्र चान्द्रमासे। शुक्लप्रतिपदादिदर्शान्ते रविसङ्क्रमणशून्ये मलमासे। "असङ्क्रान्तमासोऽधिमासोनिरुक्तः" विवरणमधिमासशब्दे १२१ पृ०।

असङ्क्षेप पु० अभावे न०त०। १संक्षेपाभावे विरोधे न०त०। २विस्तारे न०ब०। ३संक्षेपशून्ये विस्तीर्णे त्रि०।

असङ्ख्य त्रि० नास्ति संख्या इयत्ता यस्य। इयत्ताशून्ये। "प्रसह्य तेजोभिरसंख्यतां गतैः" माघः। [संख्यान्विते च

असङ्ख्यात त्रि० सम्-ख्या-क्त न०त०। १इयत्ताशून्ये २बहु-

असङ्ख्येय त्रि० संख्यातुमशक्यः १इयत्तारहिते २विष्णौ पु० "असंख्येयोऽप्रमेयात्मा" विष्णुस० संख्यार्हभेदादि न विद्यते इत्यसंख्येयः भा०।

असङ्ग पु० अभावे न०त०। १सम्बन्धाभावे नास्ति सङ्गो विषयैर्यस्य २पुरुषे जीवे तस्य सर्व्वसम्बन्धशून्यत्वात् तथात्वम्। "असङ्गोऽयं पुरुषः" सां०सू०। ३सम्बन्धशून्ये ४प्रतिबन्धशून्ये च त्रि०। "असङ्गमद्रिष्वपि सारवत्तया" रघुः। [३असंबन्धे ४सङ्गतिशून्ये च।

असङ्गत त्रि० न०त०। सङ्गतभिन्ने १अयुक्ते २युक्तिशून्ये

असङ्गति स्त्री अभावे न०त०। १सङ्गत्यभावे। सङ्गतिश्च "सङ्गतिरनन्तराभिधानव्याप्ता, आनन्तर्य्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोद्देश्यः सङ्गतिः, जायते च कार्य्ये कारणे वा ज्ञाते कारणत्वस्य कार्य्यत्वस्य ज्ञानात् किमस्य कारणं कार्य्यं वेति जिज्ञासा" दीधितिकृता सा च षोढा तदुक्तमभियुक्तैः "सप्रसङ्गमुपोद्घातो हेतुतावसरस्तथा। निर्व्याकाङ्क्षैककार्य्यत्वम् षोढा सङ्गतिरिष्यते" इति व्याख्यातञ्चैतत् जगदीशेन। "निर्दिष्टोपपादकत्वमुपोद्घातत्वम् "चिन्ता प्रकृतसिद्ध्यर्थमुपोद्घातं विदुर्बुधाः" इति प्राचीनोक्तौ चिन्ता पदं लक्षणाभिधितोभाव इति न्यायेन चिन्तनीयपरं तथा च तस्याऽपि प्रकृतसिद्ध्युपपादकतया चिन्तनीयत्वं प्रकृतसिद्ध्युपपादकत्वपर्य्यवसन्नमित्यर्थः। हेतुत्वं कारणत्वम्। अवसरोऽनन्तरवक्तव्यत्वम् अनन्तरोद्दिष्टत्वम् तथा इति श्रीभास्करकृत्। निर्व्याकाङ्क्षं कारणतानिर्व्याकाङ्क्षं कार्य्यत्वमिति यावत् एकं कार्य्यं ययोरिति व्युत्पत्त्या एककार्य्य-

कारित्वम् प्रसङ्गत्वन्तु सङ्गतित्वे सत्युपोद्घातादिभिन्नत्वम् "स्तुतस्य उपेक्षानर्हत्वं प्रसङ्ग" इति प्रवादेऽपि स्तुतत्वमनन्तराभिधानप्रयोजकस्तुतिविषयत्वम् उपेक्षानर्हत्वञ्च प्रसङ्गलक्षणोपेक्षा एव उपोद्घातादयस्तदन्यत्वं तेन ततोऽपि प्रागुक्तस्यैवार्थस्य लाभः" इति न्यायमतम् । वेदान्तिमते तु सङ्गतिस्त्रिविधा "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरूह्यताम्" । शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं पादप्रतिपाद्यमर्थमवगम्य शास्त्रसङ्गतिरध्यायसङ्गतिः पादसङ्गतिश्च तिस्रः सङ्गतय उह्यितुं शक्यन्ते इति तदर्थः । तत्र "शास्त्रं ब्रह्मविचाराख्यमध्यायाः खुचतुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा" ब्रह्मविचाराख्यशास्त्रस्य प्रथमेनाध्यायेन समन्वयः, (सर्व्वेषां वेदान्तानां ब्रह्मणि तात्पर्य्येणावधारणम्) प्रतिपाद्यते । द्वितीयेन अविरोधैः । तृतीयेन साधनम् चतुर्थेन फलम् । इत्येवमध्यायार्थाः एवमेषां प्रतिपाद्यसङ्गा षोड़शपादप्रतिपाद्यानर्थानभिधाय। "उह्यित्वा सङ्गतीस्त्रिस्रो याश्चावान्तरसङ्गतीः तत आक्षेपदृष्टान्तप्रत्युदाहरणादिकाः । पूर्व्वपक्षस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये । पूर्व्वपक्षोक्तयुक्तिं च तत्राक्षेपादियोजयेत्" इति वेदान्ताचार्य्याः अवान्तरसङ्गतिस्त्वनेकधा। आक्षेपसङ्गतिर्दृष्टान्तसङ्गतिः प्रसाङ्गिकसङ्गतिरित्येवमादि । उदाहृतञ्च तत्रैव तद्यथा प्रथमाधिकरणे ब्रह्मविचारशास्त्रमारभणीयमिति सिद्धान्तः । तत्र युक्तिः ब्रह्मणः संदिग्धत्वमिति । द्वितीयाधिकरणस्य जगज्जन्मादि ब्रह्मलक्षणं न भवतीति पूर्व्वपक्षः तत्र युक्तिः जन्मादेर्जगद्भिन्नत्वादि । तदुभयमवलोक्य तयोराक्षेपसंगतिं योजयेत् । संदिग्धत्वाद्ब्रह्म विचार्य्यमित्ययुक्तं जन्मादेरन्यनिष्ठत्वेन ब्रह्मलक्षणत्वाभावे सति ब्रह्मैव नास्ति कुतस्तस्य संदिग्धत्वं विचार्य्यत्वं वेत्याक्षेपसंगतिः । दृष्टान्तप्रत्युदाहरणसङ्गतौ अपि योजयितुं शक्येते । यथा संदिग्धत्व हेतुना ब्रह्मणो विचार्य्यत्वं तथा जन्माद्यन्यनिष्ठत्व हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टान्तसंगतिः । यथा विचार्य्यत्वे हेतुरस्ति न तथा लक्षणसद्भावहेतुं पश्याम इति प्रत्युदाहरणसंगतिः । एते दृष्टान्तप्रत्युदाहरणसंगती सर्व्वत्र सुलभे पूर्व्वाधिकरणसिद्धान्तयोरुत्तराधिकरणपूर्व्वपक्षे हेतुमत्त्वसाम्यस्योत्तराधिकरणसिद्धान्ते हेतुशून्यत्वलक्षणस्य च मन्दैरप्युत्प्रेक्षितुं शक्यत्वात् । आक्षेपसंगतिर्यथायोगमुह्येया। प्रासङ्गिकसंगतिरूह्यते । देवताधिकरणस्याधिकारविचाररूपत्वात्समन्वयाध्याये ज्ञेयब्रह्मवाक्यविषये तृतीयपादे च संगत्यभावेऽपि बुद्धिस्थावान्तरसंगतिरस्ति । तथाहि पूर्व्वाधिकरणेऽङ्गुष्ठमात्रवाक्यस्य ब्रह्मपरत्वादङ्गुष्ठमात्रत्वं ब्रह्मणो मनुष्यमात्रहृदयापेक्षं मनुष्याधिकारत्वाच्छास्त्रस्येति उक्तम् तत्प्रसङ्गेन देवताधिकरणं बुद्धिस्थम् सेयं प्रासङ्गिकी संगतिः । तदेवंन्यायसंगतिर्व्युत्पादिता" । एवं मीमांसासङ्गतिरपि अधिकरणमालायां दृश्या विस्तरभयान्नोक्ता ईदृशसङ्गत्यभावेऽसङ्गतिः । २असम्बन्धमात्रे ३अर्थालङ्कारभेदे च अलङ्कारशब्दे ३६३ पृष्ठे दृश्यः । [२तच्छून्ये त्रि० ।

असङ्गम पु० अभावे न०त० । १सङ्गाभावे मेलनाभावे न०त०

असङ्गिन् त्रि०सनृज–घिनुण् न०त० । सम्बन्धशून्ये "संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्" वे० परि० ।

असच्छास्त्र न०असत् असद्विषयकत्वेनानिष्टप्रयोजकम् शास्त्रम्। बौद्धागमे । तस्यासदर्थप्रतिपादकत्वात् वैदिकधर्म्मविरुद्धार्थकत्वाच्च तथात्वम् । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादिनां तेषामीश्वरानङ्गीकारेण चासत्त्वं ज्ञेयम्"।

असज्जन पु० विरोधे न०त० । सज्जनभिन्ने दुर्जने "न नामसज्जनेनार्य्या समानयितुमर्हसि" रामा० ।

असञ्ज्ञा स्त्री अभावे न०त० । १संज्ञाभावे न०ब० । संज्ञाशून्ये त्रि० । संज्ञा च ज्ञानं नाम ईङ्गितादिज्ञापनञ्च तेषामभावः । "तेभ्योऽसञ्ज्ञां चकार" शत०ब्रा० ।

असत् त्रि० अस+शतृ न०त० । १सद्भिन्ने, निरूपाख्ये निःस्वरूपे निषेधरूपेण प्रतीयमाने, २अभावत्वाश्रये, "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थे"ति गीतोक्ते अश्रद्धया कृते ३होमादौ च । ४इन्द्रे पु० । ५दुष्टाचारिणि असाधौ त्रि० "नच सत् नासदुच्यते" गीता।स्त्रियां ङीप् सा च ६कुलटायाम् । "परितस्तार रवेरसत्यवश्यम्" माघः नामरूपाभ्यामव्याकृते कारणात्मनास्थिते सूक्ष्मरूपे ईश्वरशक्तौ, च "असदेवाग्र आदीत्" कथमसतः सज्जायेत" च इति छा०उप० बौद्धागमसिद्धं सत्त्वमर्थक्रियाकारित्वम् तच्छून्ये ७अकिञ्चित्करे अभावादौ८अविद्यमाने "नासतो विद्यते भावः" इति यत्तत् सदसतोः परमिति च" गीता "विभेदजनकाज्ञाने नाशमात्यन्तिकं गते । आत्मनोब्रह्मणाऽभेदमसन्तं कः करिष्यति" संक्षे०शा० ।

असत्कर्म्मन् न० कर्म्म० । १वेदादिशास्त्रनिषिद्धे दुष्टकर्म्मणि न सत् कर्म्म यस्य । २साध्वाचारशून्ये त्रि०स्त्रियां डाप्

असत्कृत त्रि० न०त०। १अपूजिते २असम्मानिते "असत्कृतमवज्ञातम् तत्तामसमुदाहृतम्" गीता। "अवज्ञावहासार्थमसत्कृतीऽस्मि" गीता।

असत्ख्याति स्त्री असतः सत्त्वशून्यस्यानिर्वचनीयस्य ख्यातिर्ज्ञानम्। अनिर्वचनीयस्य रजतप्रपञ्चादेर्ज्ञाने। यथा शुक्तिकायां रजतमनिर्वचनीयमुत्पद्यमानमिव प्रतीयते एवं ब्रह्मणि जगत् अनिर्वचनीयतयोत्पन्नमिव ख्यायते इति हि वेदान्तिनां मतम्। अस्ति हि सर्वलोकेषु प्रसिद्धम् इदं रजतमित्यादिज्ञानं तच्च प्रवर्त्तकतया सर्वैरभ्युपगम्यते। तत्र चतस्रोविधाः अख्यातिः अन्यथाख्यातिः आत्मख्याति. असत्ख्यातिश्चेति विवरणे स्थितम्। तत्राख्यातिवादिनामयमाशयः। इदं रजतमित्यादौ चक्षुराद्यसन्निकर्षात् पारिशेष्यात् रजतं स्मर्य्यते न तु ज्ञायते इति तस्य स्मरणस्याख्यातित्वमिति। तदेतन्न सम्यक् रजतस्य प्रत्यक्षत्वेनानुभयमानत्वात् स्मर्य्यमाणस्याप्रवर्त्तकत्वाच्च नचेदमंशस्यैव प्रत्यक्षत्वं न रजतस्येति वाच्यम् यथा सत्यरजतस्थलेषु इदं रजतम् अयं घट इत्यादिषु इतरेतर संसृष्टौ सामान्यविशेषौ अपरोक्षतयानुभूयेते अत्रापि तथानुभवात्। अथ सामान्यविशेषयोर्नैरन्तर्य्येण प्रतिभासात् तथा व्यवहारो न तु संसर्गज्ञानरूपविशिष्टज्ञानसम्भवादिति वाच्यम् सत्यस्थलादौ षन्नूनतायां अदर्शनात्। अथ पुरोवर्त्तिनि रजतसंसर्गाभाव एवन्यूनतेति चेन्न पुरोवर्त्तिनि रजतसत्त्वासत्त्वयोरेवावयोर्विवादात् तदभावस्य न्यूनत्वासाधकत्वात्। किञ्च पुरोवर्त्तिनि रजतसंसर्गाभावः कथं निश्चीयते किं तल्लोचरज्ञानाभावात्? किं वा नेदं रजतमिति बाधज्ञानात्? नाद्यः तल्लोचरज्ञानाज्ञानयोरेवावयोर्विवादात् अर्थाभावेन ज्ञानाभावनिश्चयेऽन्योन्याश्रयात्। तस्मादपरोक्षज्ञानोदयादेव पुरोवर्त्तिनि रजत सत्ताङ्गीकार्य्या। न च अर्थसत्तानिश्चयाधीनः ज्ञानसत्तानिश्चय इति कल्पनात् प्रकृते चार्थासत्त्वात् न ज्ञानसत्त्वमिति वाच्यम् अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनतयाऽनवस्याप्रसङ्गात्। तस्मात् संविन्निश्चयः स्वप्राहकसामग्रीप्रयोज्यतया स्वतएव। तदधीनस्तु अर्थसत्तानिश्चयः। नापि द्वितीयः रजतमिति उत्तरज्ञानविरोधिज्ञानसत्त्वे नेदं रजतमिति ज्ञानानुदयेन तेन बाधायोगात्। किञ्च इदं रजतमित्यत्र यथा इदमाकाररजताकारयोरविवेकख्यया कल्प्यते तथा नेदं रजतमित्यत्रापि तयोरविवेक एव कल्प्यतां न तु विशिष्टसंसर्गसंविदित्यपि वक्तुं शक्यते। अथ विशिष्टज्ञानस्यैव संवादिप्रवृत्तिजनकत्वमिव विशिष्टनिषेधबोधस्यैव निवर्त्तकत्वमिति निषेधस्य विशिष्टसंसर्गविषयकत्वमिति चेन्न प्रवृत्तिनिवृत्तिमात्रं प्रत्येव संसर्गतदभावग्रहस्य हेतुतयैवोपपत्तौ संवादिविसंवादित्वयोः तत्र प्रवेशे गौरवात् किञ्च प्रवृत्तेः संवादित्वमपि वस्तुसत्त्वासत्त्वनिबन्धनम्। तच्च सत्यासत्ययोरुभयत्राप्यस्ति। न च पुरोवर्त्तिनि रजताभावः सर्वसम्मतः। शुक्तिकायां यथावभासमेवासत्यरजतस्य शुक्तिज्ञानेन निरसनयोग्यस्यैवास्माभिः स्वीकारात्। दृश्यांस्तु भेदः तत्र मिथ्यारजताभ्युपगमेऽपि नेदं रजतमिति त्रैकालिक रजतनिषेधः परमार्थिकरजतविषयत्वान्न विरुध्यते। नचाप्रसक्तनिषेधानुपपत्तिः। मिथ्याभूतेऽपि रजते परमार्थ रजतार्थिनां प्रवृत्तिदर्शनेन परमार्थरजतस्य सामान्योपाधिना रजतत्वेन प्रसिद्धिसम्भवात् अन्यथा भूतलादौ घटादि निषेधोऽपि अप्रसक्तनिषेधः स्यात् तत्र घटादिसत्त्वे तदभावोव्याहन्येत। तदसत्त्वे तु अप्रसक्तनिषेधः स्यात्। ततश्च देश सामान्योपाधिना कालसामान्योपाधिना वा यथा घटादि प्रसक्तिर्नतु तत्कालिकभूतलत्वादिना तथा परमार्थरजतस्य प्रसक्तिर्भविष्यति। एवञ्च उत्तरकाले नास्त्यत्र रजतमिति प्रत्यक्षं सत्यरजतविषयम् मिथ्यैव रजतमभादिति प्रत्ययश्च मिथ्यारजतविषयइत्युभयमप्युपपद्यते। एतेन रजतापरोक्ष्यं विशिष्टसंसर्गज्ञानं विनाप्यपरोक्ष शुक्तिज्ञानाविवेकादुपपद्यते इत्यपि परास्तम्। विवेकज्ञानकालेऽप्येतावन्तं कालं रजतमनेनाविविक्तमित्येव विवेकस्यैव परामर्शप्रसङ्गात् एतावन्तं कालमिदं रजतमित्यभादिति प्रत्यभिज्ञाया अनुपपत्तेश्च। अतश्च पुरोवर्त्तिनि असद्रजतमुत्पद्यते इत्यङ्गीकार्य्यम्। अन्यथा शुक्तिज्ञानात् रजते प्रवृत्तौ अतिप्रसङ्गः स्यात् समानविषयकज्ञानस्यैव प्रवर्त्तकत्वात् ततश्च न स्मर्य्यमाणमिदं रजतं किन्तु स्मर्य्यमाणसदृशमेव तदङ्गीक्रियते। तत्सादृश्यञ्च पूर्व्वानुभवसापेक्षज्ञानगम्यत्वेन। नच्वननुभूतरजतस्य पुरुषस्य रजतभ्रमोभवति। ज्ञानरूपाध्यासस्य तु संस्कारजन्यत्वेन स्मृतिसादृश्यमिति भेदः।

अथ ज्ञानस्य प्रमाणस्मृतिद्वैविध्यनियमेन अध्यासस्य बाधितविषयकत्वात् परिशेषात् संस्कारमात्रजन्यज्ञानत्वाच्च स्मृतित्वमेवास्तु। न च स्मृतित्वे अतिसादृश्यात्स्मृत्यन्तरमेव कुतो न स्मर्य्यते इति वाच्यं कर्त्तृगतरागादिदोषाणामपि तन्निमित्तत्वात् शुक्त्यन्तरे तदभावात् एवं तैरेव दोषैः स्मरणाभिमानस्य प्रबुधितत्वाच्च रजतस्मरणेऽपि तत्सांग्रतिक-

ख्यते नवा स्मरामीत्यनुव्यवसायः तथा तैरेव विशेषाभावभासस्य प्रतिरोधान्न शुक्तिग्रहणेऽपि तदीयनीलग्रहादिविशेषग्रहः। तथा च इदमंशे ग्रहणं रजतांशे स्मरणमुभयात्मकमपि ज्ञानमविविक्ततया प्रवर्त्तकमिति तादृशग्रहणस्मरणाभ्यां रजतार्थी पुरोवर्त्तिनि प्रवर्त्तते इति चेन्न ग्रहणस्मरणे किं द्वे अपि प्रवर्त्तके आहोस्विदेकैकम् आद्येऽपि किं संभूय प्रवर्त्तके! क्रमेण, वा नाद्यः स्मृतिग्रहणयोः युगपदुदयासम्भवात्। क्रमविशिष्टयोर्द्वयोः प्रवर्त्तकत्वमपि न युक्तम् पूर्वज्ञानस्य उत्तरज्ञानेन व्यवधानात् प्रवृत्तिहेतुत्वानुपपत्तेः इदमिति रजतमिति च विशिष्टद्वयोरपि ज्ञानयोः प्रवर्त्तकत्वापत्तेश्च। नाप्येकैकस्य प्रवर्त्तकत्वं व्यवहारस्य विशिष्टविषयकतया विशिष्टप्रवृत्तये विशिष्टसंसर्गग्रहस्यैव हेतुतायाः स्वीकार्यत्वादिति।

अत्र ग्रहणस्मरणनैरर्थक्यौत्पत्त्या प्रवर्त्तकत्वसम्भवेनासत्ख्यातिर्नाङ्गीकार्या अपि तु विशिष्टसंसर्गख्यातिरेवेति अख्यातिवादिनामेकदेशिनः आक्षेपः।

तदपि वेदान्तिभिः निराकृतं यथा कोयमख्यातिर्नाम किं ख्यात्यभावः? उत अन्यार्थिनोऽन्यत्र प्रवृत्तिहेतुभूतविज्ञानम्? अथाविविक्तानेकपदार्थज्ञानम्?। आद्ये सुषुप्तावेव सर्वज्ञानाभावसत्त्वेन तत्रैव भ्रमः स्यात् नान्यत्र-जाग्रत्स्वप्नयोः। द्वितीये झटिति बाधादालस्यादिना वा यत्र प्रवृत्तिर्न जाता तत्र भ्रान्तित्वं न स्यात्। तृतीयेऽप्यविविक्तत्वप्रतियोगिविविक्तत्वं नाम किम् भेदग्रहः? उत अभेदाग्रहः? आहोस्विदितरेतराभावभेदद्वित्वादिसंख्याविशिष्टज्ञानम्? नाद्यः इदमिति रजतमिति च पुनरुक्तशब्दद्वयहेतुत्वेन सामान्यविशेषयोर्भेदग्रहे सत्यपि अविवेकासङ्गात्। न द्वितीयः उत्तरीत्या भेदस्य गृहीतत्वादेव तद्विरुद्धाभेदस्याग्रहे सति तद्ग्रहनिषेधरूपस्याविविक्तत्वस्य दुःसम्पादत्वात्। तृतीयेऽपि द्वित्वादिज्ञानमपेक्षितं किमव्यासज्यवृत्ति उतानुषङ्गिकमपि पर्याप्तम् आद्ये गामानय दण्डेनेत्यत्र गोदण्डयोरपि साक्षाद् द्वित्वाद्यप्रतीतेरविवेकः प्रसज्येत। द्वितीये तु पुरोवर्त्तिरजतयोरप्यानुषङ्गिकद्वित्वादिज्ञानस्य सद्भावेन दुष्परिहरणीयत्वात्। नन्वविवेको नाम असंसर्गाग्रहः स च प्रतीयमानयोरिदं रजतयोः संभवति इदंरजते असंसृष्टे इति प्रत्ययादर्शनात् इति चेत् तदापि किं ग्रहणस्मरणयोरेवासंसर्गो विवक्षितः? उतान्ययोः? कयोश्चित्? आहोस्वित् संसर्गज्ञानरहितयोः? आद्ये अहं मनुष्य इति भ्रमो न स्यात् उभयोरपि ग्रहणत्वात्। द्वितीये षण्ढोगौः शुक्लः पटश्चेत्यपि भ्रमः स्यात् असंसर्गप्रतीत्यभावात्। तृतीयेऽपि सएव दोषः स्यात् न हि तत्र संसर्गज्ञानं संभवति तद्विषयस्यैक्याभावात् ऐक्यस्य च तद्विषयत्वस्य प्रत्यभिज्ञायमानत्वात्। यदि गुणगुण्यादिसंबन्ध एव तद्विषययोरैक्यमित्युच्यते तर्हि इदं रजतमित्यत्रापि सादृश्यतत्सम्बन्धस्तद्विषयत्वस्यापि वक्तुं शक्यत्वेन संसर्गप्रत्ययोदरुद्धरः। अथ तत्र नेदं रजतमित्यसंसर्गे तत्प्रत्ययेन बाधाच्च संसर्गतत्प्रत्ययौ सम्भवतः। तर्हि त्वन्मतेऽपि गुणगुण्यादेरितरेतराभावत्वान्नाख्योऽसंसर्गप्रत्ययोऽस्त्येवेति संसर्गतत्प्रत्यययोरसम्भवात् भ्रमत्वापत्तिस्तदवस्था तस्माच्चासंसर्गाग्रहोऽप्यविवेकः।

अस्तु तर्हि प्रकृतेऽपि संस्कारजन्यैव रजतस्मृतिरिति चेत् न रजतस्य पुरोवस्थितत्वेन प्रतिभासादित्युक्तोत्तरत्वात् न च पुरोऽवस्थितत्वमविवेकगतमिति वक्तुं शक्यम्। अविवेकस्य भ्रमं प्रत्यप्रयोजकत्वात्। तथा हि किं गृह्यमाणयोरविवेकः? किं वा गृह्यमाणस्मर्यमाणयोः? किं वा स्मर्यमाणयोः? नाद्यः स्वप्रदशायामात्मव्यतिरिक्तस्य कस्याप्यग्रहणेन द्वयोर्गृह्यमाणयोरभावे तदविवेकस्य भ्रमप्रयोजकस्याप्यभावेन भ्रमाभावप्रसङ्गात्। न द्वितीयः स्वप्ने गृह्यमाणेनात्मना स्मर्यमाणस्य नीलादेरविवेके सति अहं नीलमिति प्रतिभासप्रसङ्गात्। तृतीये तु परोक्षमेव सर्वं भ्रान्तावभासेत, सर्वस्यापि स्मर्यमाणत्वात् एवं च सति प्रकृतस्य पुरोऽवस्थितरजतज्ञानस्य स्मृतित्वानुमाने परोक्षावभासित्वोपाधिर्द्रष्टव्यः। यथार्थज्ञानस्य चायं प्रतिप्रयोगः। विमताः प्रत्यया न यथार्थाः बाध्यमानत्वाद्भ्रान्तिव्यवहारवदिति तस्मात् बोधहेराग्रहदुराग्रहं परित्यज्य तृतीयं भ्रान्तिज्ञानमङ्गीकर्त्तव्यम्।

अन्यथाख्यातिरिति नैयायिकादयः। ते ह्येवमूचुः ननु तर्हि मा भूदख्यातिः अस्त्वन्यथाख्यातिः। तथा हि देशकालान्तरगतं हि रजतं शुक्तिसंप्रयुक्तेन दोषेण प्रक्षिप्तेनेन्द्रियेण शुक्त्यात्मना गृह्यते न चैवमननुभूतस्यापि ग्रहणप्रसङ्गः। सादृश्यादेर्नियामकत्वादिति"।

तदेतदसत् किं ज्ञानेऽन्यथात्वं? किं वा? फले उत वस्तुनि?। नाद्यः रजताकारं ज्ञानं शुक्तिमालम्बते इति ज्ञानेऽन्यथात्वं वाच्यम्। तत्र शुक्तेरालम्बनत्वं नाम किं ज्ञानं प्रति स्वाकारसमर्पकत्वम् उत ज्ञानप्रयुक्तव्यवहारविषयत्वम् नाद्यः। रजताकारस्यं ज्ञानं प्रति शुक्तेः स्वाकारसमर्पणासम्भवात्। न द्वितीयः आम्रादिदर्शन

प्रयुक्तव्यवहारविषयस्य खड्गकुन्तधनुरादेर्व्याघ्रादि ज्ञानालम्बनत्वप्रसङ्गात् । नापि फलेऽन्यथात्वम् फलस्य स्फुरणस्य भ्रान्तौ सम्यग्ज्ञाने वा स्वरूपतो वैषम्यादर्शनात् । वस्तुन्यपि कथमन्यथात्वं किं शुक्तिकायां रजतताद्रात्म्यं किंवा रजताकारेण परिणामः । आद्येऽपि किं शुक्तिरजतयोरत्यन्तभेदः किंवा भेदाभेदौ । नाद्यः । अत्यन्तभिन्नयोर्वास्तवतादात्म्यासम्भवात् अनिर्वचनीयस्य त्वया अनभ्युपगमात् शून्यतादात्म्यप्रतीतौ च गुणगुणयादावपि तत्सम्भवेन भ्रान्तित्वं दुर्वारम्। समवायस्य च प्रक्रियामात्रसिद्धस्य तादात्म्यानतिरेकात् । भेदाभेदपक्षे तु षण्डोगौरितिवद्भ्रान्तिः स्यात् । परिणामपक्षेऽपि बाधोन स्यात्। विमतं रजतज्ञानमबाध्यं परिणामज्ञानत्वात् क्षीरपरिणामदुग्धज्ञानवत्। अतः क्षीरवदेव शुक्तिर्न पुनर्बाध्येत । ननु कमलसुकुलविकाशरूपपरिणामहेतोः सूर्यतेजसोऽपगमे पुनर्मुकुलीभावदर्शनात् रजतपरिणामहेतोर्दोषस्यापगमे पुनः शुक्तिभावोऽस्तु इति चेत् नैवं विकसितमेव सुकुलमासीदितिवत् रजतमेव शुक्तिरासीदिति प्रतीत्यभावात् कथञ्चित् तद्भावेऽपि न परिणामपक्षो युक्तः निर्दोषस्यापि रजतप्रतीतिप्रसङ्गात् नचैकमेव क्षीरं दधिरूपेण कञ्चित् पुरुषं प्रति परिणतमन्यं प्रति नेति दृष्टचरं तस्मान्नान्यथाख्यातिः सुनिरूपा । ज्ञानलक्षणया देशान्तरगतरजतभानन्तु साक्षात्करोमीति साक्षात्कारोल्लेखिबुद्धेरन्यथानुपपत्त्या न सम्भवतीति द्रष्टव्यम् । किञ्च ज्ञानलक्षणायाः प्रत्यासत्तित्वे तथैव पर्वते वह्निज्ञानसम्भवेनानुमानादेरुच्छेदः स्यात् अनुव्यवसायात्तत्सत्त्वकल्पने तु प्रकृतेऽपि साक्षात्कारानुव्यवसायसत्त्वेन तुल्यत्वात्।आत्मख्यातिरिति बौद्धाः। तथाहि सर्वासां बुद्धीनां विषयमन्तरेणापि तदाकारोल्लेखसम्भवेन रजतज्ञानमपि बुद्धिरूपतया न विषयान्तरमपेक्षते इत्यात्मनः बुद्धेरेव ख्यातिः प्रतिभासः "सहोपलम्भनियमादभेदोनीलतद्धियोः । भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वयः । अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति तेषां सिद्धान्तात् । तथाच विमतं रजतं बुद्धिरूपं चक्षुरादिसंप्रयोगं विनाऽप्यपरोक्षित्वात् सम्मतबुद्धिवत् इत्यनुमानेन रजतादेस्तद्रूपतासिद्धिः । ते हि मन्यन्ते शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाश्च षडपि प्रत्ययाः आलम्बनसमनन्तरसहकार्यधिपतिरूपान् प्रत्ययपदवाच्यान् चतुरो हेतूनपेक्ष्यैव उत्पद्यन्ते।तत्र नीलावभासरूपस्य चित्तरूपज्ञानस्य नीलालम्बनवतो नीलाकारता भवति । समनन्तरप्रत्ययात् पूर्वतनज्ञानवासनारूपात् बोधरूपता, सहकारिप्रत्ययादालोकात् स्पष्टतावभासः । चक्षुरादेरधिपतिप्रत्ययात् विषयप्रतिनियम इति । तदेतदुच्यते प्रकृते न तावत् सहकारिप्रत्ययाख्यादालोकात् रजताकारोदयो भवति तस्य स्पष्टतामात्रहेतुत्वात् । नाप्यधिपतिप्रत्ययाख्याच्चक्षुरादेः सम्भवति तस्य विषयविशेषे प्रत्येव नियमनमात्रहेतुत्वात् । नापि समनन्तरप्रत्ययाख्यात् पूर्वज्ञानात् । विजातीयघटादिज्ञानानन्तरं विजातीयरजतभ्रमोदयप्रसङ्गात्, नाप्यालम्बनप्रत्ययाख्याद्बाह्यार्थाद् भवति। विज्ञानवादिभिस्तज्ज्ञानङ्गीकारात्।ततश्च रजतादिबाह्यार्थासत्त्वे विज्ञानस्य कथं रजताकारतासमर्पणम्।संस्कारसामर्थ्येन तत्कल्पनेऽपि न निस्तारः संस्कारस्य क्षणिकस्थायित्वविकल्पासहत्वात् । तथाहि स्थायित्वे सिद्धान्तहानिः । क्षणिकत्वे पूर्वानुभवोत्तरसुत्पन्नस्य तस्य द्वितीयक्षणे नाशात् रजताकारोल्लेखसमये तस्यासत्त्वात् कथं तेन तदाकारोल्लेखः सम्भवति। किञ्च संस्कारस्य विज्ञानातिरिक्तत्वे क्षणिकविज्ञानमात्रसिद्धान्तहानिः । अथानादिज्ञानसन्ततौ यदा कदाचित् पूर्वं रजतज्ञानमुत्पन्नं तदेव संस्कार इत्यङ्गीक्रियते स च नद्यपि विजातीयानेकज्ञानव्यवहितः तथापि कदाचित् सजातीयं ज्ञानान्तरमुत्पादयत्येव यथा व्रीहिबीजमनेकाङ्कुरादिकार्यं व्यवधानेऽपि कदाचित् सजातीयान्तरमुत्पादयति तद्वत् । अथ न पूर्वबीजादुत्तरबीजोत्पत्तिः किन्तु पूर्वबीजजन्याङ्कुरसन्तानादेव तदुत्पत्तिरिति चेत् तर्ह्यत्रापि पूर्वरजतज्ञानजन्यज्ञानसन्तानएव संस्कारोऽस्तु अतो न सिद्धान्तहानिः । एवं पूर्वरजतज्ञानमपि ततः पूर्वतररजतज्ञानादुत्पद्यते ततोऽनादिवासनाप्रापितं रजतं बुद्धिरूपमेव सत् स्वान्या बहिर्वदवभासते इति चेत् अत्रोच्यते वेदान्तिभिः, किं तद्रजतमलौकिकं लौकिकं वा अलौकिकत्वेऽपि किं जन्मरहितम् उत लौकिकरजतवदेव जायते । अलौकिकत्वे जन्मरहितत्वे च जायमानस्य ज्ञानस्य रूपं न स्यात् । द्वितीयेऽपि किं बाह्यार्थात् जायते, उत ज्ञानात् नाद्यः तैर्बाह्यार्थाङ्गीकारात् ज्ञानादेव तदुत्पादाभ्युपगमे दुष्टकरणजन्यज्ञानादुत्पादो वाच्यः तथा च जनकस्य पूर्वसत्त्वनियमेन तज्जनिका प्रतीतिः न रजतं गृह्णीयात् वर्त्तमानपदार्थस्यैवाकारार्पकत्वनियमात् क्षणिकयोर्जन्यजनकयोर्भिन्नकालीनत्वेन रजतस्यापरोक्षकाले पूर्वज्ञानस्यासत्त्वात्

तेन ग्रहीतुमशक्यत्वात् अतोरजतापरोक्षव्यवहारो विलुप्तः स्यात्। यदि अन्येन केनचित् दुष्टकरणजन्यज्ञानेन तदुत्पादस्तत: स्वात्मकबुद्धा तदुग्रहःस्यादित्यङ्गीक्रियते तदाऽतिप्रसङ्गः किञ्च दुष्टकरणजन्यज्ञानस्यैव तदुत्पादकत्वं वाच्यं तत्र करणस्य दुष्टत्वञ्च अर्थक्रियाकारितान्यूनविषयग्राहित्वेनैव तथा च असति रजते कथं करणस्य दुष्टत्व निर्णयः। अथ अदुष्टकरणजन्यज्ञानं तदुत्पादयति तदा तस्य घटादिवत् अर्थक्रियाकारित्वरूपसत्त्वसम्भवेन देशान्तरवर्त्ति-रजतविषयकादविशेषः स्यात्। किञ्च रजतस्यानुत्पत्तौ न तस्य ज्ञानविषयता ज्ञानाकारार्पकतयैव विषयत्वस्य त्वया स्वीकारात् अनुत्पन्नस्य कथं ज्ञाने स्वाकारार्पकत्वसम्भवः। तस्मादात्मख्यातिपक्षे रजतमेव ज्ञानेन न प्रतीयेत।

एवमख्यात्मन्यथाख्यात्मख्यातिपक्षेषु निरस्तेषु इदानीमसत्ख्यातिपक्षः वेदान्तिभिरभ्युपगतः आक्षेपपूर्व्वकं प्रदर्श्यते इदं रजतमिति ज्ञानं स्मृतिग्रहणाभ्यामन्यत् अध्यासनामकं ज्ञानं यत्र असतोऽनिर्वचनीयस्य उत्पन्नस्य रजतादेर्भानमीदृशं ज्ञानमसत्ख्यातिपदवेदनीयमस्ति। ननु ज्ञानस्य स्मृतिग्रहणाभ्यामन्यः प्रकारो न सम्भवति इति चेन्न किं विलक्षणसामग्र्यनिरूपणात् तदसम्भवः? उत विलक्षणज्ञानस्वरूपानिरूपणात्? उत विलक्षणविषयानिरूपणात्? नाद्यः संप्रयोगसंस्कारदोषाणामेव तत्सामग्रीतया कल्पनात् न च दोषस्य पूर्व्वप्राप्तकार्य्यानुदयं प्रत्येव हेतुत्वं न पूर्व्वकार्य्योदयं प्रतीति वाच्यं कार्य्यानुदयस्य तत्प्रागभावरूपतयाऽनादित्वेन तत्र दोषहेतुत्वासम्भवात्। वातपित्तश्लेष्मणाञ्चापूर्व्वकार्य्योत्पादकत्वदर्शनाच्च न च दोषस्य संस्कारोद्बोधकत्वेनान्यथासिद्धिः तदुद्बोधस्य तद्व्यापारत्वात् न हि व्यापारेण व्यापारिणोऽन्यथासिद्धिरिति नियमात् नखुत्पतननिपतने कुर्व्वन् कुठारः छिदिक्रियां प्रति अहेतुर्भवति। ननु इन्द्रिय संप्रयोगस्य इदन्तामात्रे सत्त्वात् रजतांशेऽसत्त्वात् इदन्तताबोधनेन तस्योपक्षीणत्वात् एवं संस्कारस्य स्मृतिमात्रजनकत्वनियमेन वेदान्तिमते अध्यासात्मकज्ञानस्य स्मृतित्वानङ्गीकारात्, दोषस्य च स्वातन्त्र्येण ज्ञानहेतुत्वस्य कुत्राप्यदर्शनाच्च कथं रजतावभास इति चेत् उच्यते प्रथमं दोषसहितेनेन्द्रियेण इदन्तामात्रविषयाऽन्तःकरणवृत्तिर्जन्यते तत्र इदन्तायां तदूपाहंकर्त्तरि च चैतन्यमभिव्यज्यते तत्रेदन्तांशावच्छिन्नचैतन्यस्याऽविद्या दोषेण क्षुभिता सती सादृश्यादुद्बोधितसंस्कारवशात् रजताकारेण विवर्त्तते। इदन्त्वावच्छिन्नचैतन्यस्याऽविद्या तु रजतप्राक्तनवृत्तिसंस्कार सहकृता वृत्तिरूपेण विवर्त्तते। तौ च रजततद्वृत्तिरूपविवर्त्तौ स्वाधिष्ठानेन साक्षिचैतन्येनावभास्येते इत्येवं रजतावभासः कल्प्यते। यद्यप्यन्तःकरणवृत्तिरविद्यावृत्तिश्चेतिज्ञानद्वयम् तथापि तद्विषयौ सत्यान्ते इदंरजते अन्योन्यात्मकतामापन्नौ इति विषययोरैक्यात् वृत्तिद्वयस्यैक्यम् ततश्च विषयावच्छिन्नफलस्याप्येकत्वेन ज्ञानैक्यमुपपद्यते। एवं मिथ्याज्ञानतद्विषययोर्निरूपणेन द्वितीयतृतीयविकल्पौ निरस्तौ वेदितव्यौ। यद्यप्यन्यत्र संप्रयोगसंस्कारौ परस्परं निरपेक्षौ प्रमितिस्मृत्योर्जनने समर्थौ दृष्टौ तथापि क्रमेण स्मृतिप्रमित्योरुत्पत्तौ प्रवर्त्तकत्वानुपपत्तौ प्रवर्त्तकत्वानुपपत्त्या ताभ्यां प्रत्यभिज्ञावदेकं विशिष्टं मिथ्याज्ञानं जन्यते इति कल्प्यते यथा नैयायिकादिभिः निरन्तरोत्पन्नेष्वपि वर्णज्ञानेषु यौगपद्याभावात् पदार्थज्ञानानुपपत्त्या पूर्व्वज्ञानजन्य संस्कारसहितमन्त्यवर्णज्ञानमेव पदार्थबुद्धिहेतुत्वेन कल्प्यते तद्वत्। ननु विमतं ज्ञानं नैकं भिन्नकारणजन्यत्वात् रूपरसादिज्ञानवदिति चेत् न अनुमानप्रत्यभिज्ञानयोर्व्यभिचारात् उभयोरपि नानाकारणजन्यत्वात्। अनुमानं हि व्याप्तिज्ञानसंस्कारलिङ्गदर्शनपरामर्शजन्यम्। प्रत्यभिज्ञा च इन्द्रियसंप्रयोगसंस्काररजन्येति सर्व्वैरङ्गीक्रियते न च शुक्तौ अनिर्वचनीयस्य रजतस्योत्पत्तौ तस्य च शुक्तौ संसर्गात् कथं तस्य मिथ्यात्वमसत्त्वञ्च स्यादिति वाच्यम् सत्तात्रैविध्याङ्गीकारेण तत्र व्यावहारिकसत्ताशून्यत्वे नैव तस्य मिथ्यात्वस्य कल्पनात्। तथाहि सत्त्वं त्रिविधं पारमार्थिकं त्रैकालाबाध्यत्वरूपं यथा ब्रह्मणः। व्यावहारिकं ब्रह्मज्ञाननिवर्त्त्यं यथा आकाशादेः प्रातीतिकम् अधिष्ठानज्ञाननिवर्त्त्यं यथा शुक्तिरजतादेः। न च मिथ्यात्वकल्पनं मानहीनम्" "अथ रथान् रथयोगान् पथः सृजते" इति श्रुतेः मिथ्यैवात्र रजतमभादिति रजततज्ज्ञानयोर्मिथ्यात्वप्रत्यभिज्ञानस्य च मानत्वात्। अतो मतान्तरवत् वेदान्तमते नानुभवविरोधोनिर्मूलत्वं वा। अख्यातिपक्षे अपरोक्षावभासिनः अर्थ्यमाणत्वं विरुध्यते। ज्ञानद्वयपक्षे रजतस्य पारोक्ष्यं स्मृतौ स्मरणाभिमानमोहादिकम्, अन्यथाख्यातौ रजतस्य आपरोक्ष्यानुभवविरोधः आत्मख्यातिपक्षे विषयाभावेनापरोक्षावभासविरोधः"। प्रमेयविवरणसारांशः।

शुक्तिरजतादि ज्ञानदृष्टान्तेनज्ञाननिवर्त्त्यतया सर्व्वेषां घटपटादिज्ञानानामसत्ख्यातित्वं तद्विषयाणां वस्तु-

तोऽसत्त्वात् असत्त्वेऽपि सत्त्वेन व्यवहार्यतामात्रमिति शुक्तिजतादिभ्यो घटादीनां विशेषः इति अध्यासरूपमविद्यात्मानमाश्रित्य तत् समर्थयता च भाष्यकृता तथैव व्यवस्थापितम्" यथा "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणाञ्चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्च विषयेऽध्यासोमिथ्येति भवितुं युक्तम्। तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्मनविविक्तयोर्धर्मधर्मिणो मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः॥ आह कोऽयमध्यासोनामेति उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभासः। तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति। अन्येतु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते इति सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकोऽनुभवः शुक्तिका हि रजतवदवभासते एकश्चन्द्रः स द्वितीयवदिति। कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयधर्माणाम्? । सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते। न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात् अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। नचायमस्तिवियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति अप्रत्यक्षेऽपि हृदाकाशे बालास्तलमलिनतादयध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यन्यस्यात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्त्वं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। तमेतमविद्याख्यमात्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्याविषयाणि प्रत्यक्षादीनि प्रमाणानि? शास्त्राणि चेति। उच्यते। देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। नह्यनिन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। नचाधिष्ठानमन्तरेण इन्द्रियादिव्यापारः संभवति। नचानध्यस्तात्मभावेन देहेन कश्चित् व्याप्रियते। न चैतस्मिन् सर्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति"। चतुर्थस्त्रभाष्ये च जगतोव्यावहारिकत्वे अन्यदीयमतं संवादितम् यथा "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माहमित्येव बोधे कार्ये कथं भवेत्?" इत्याक्षिप्य। "अन्येष्वात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः। अन्विष्टः स्यात् प्रमातैव पाश्वदोषादिवर्जितः। देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्" यथा च लौकिकव्यवहार्यपदार्थानां पारमार्थिकसत्त्वाभावेऽपि तत्सत्त्वमङ्गीकृत्य सर्वे व्यवहाराः तेषां च व्यवहारिकसत्त्ववत्त्वम् तथा प्रपञ्चेन समर्थितं खण्डनकृता खण्डनखण्डखाद्ये। यथा "अथ कथायां वादिनोनियमनेतादृशं मन्यन्ते प्रमाणादयः सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्। तदपरे न क्षमन्ते। तथाहि प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत् कस्य हेतोः? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाकाङ्क्षित्वनियतस्य तस्य प्रवर्त्तयितुमशक्यत्वात्, उत कथकाभ्यां प्रवर्त्तनीयवाग्व्यवहारं प्रति हेतुभावात्, उत लोकसिद्धत्वात्, अथ वा तदनभ्युपगमस्य तत्त्वनिर्णयविघातप्रसङ्गकत्वात्। न तावदाद्यः तदनभ्युपगच्छतोऽपि चार्वाकसाध्यसिकादेर्वाग्विषयविस्तरार्थां प्रतीयमानत्वात् तस्यैव वा अनिष्पत्तौ भवतस्तन्निरासप्रयासानुपपत्तेः। सोयमपूर्वः प्रमाणादिसत्त्वानभ्युपगमात्मा वाक्स्तम्भनमन्त्रो भवताभ्यूहितो नूनं, यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतसूत्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा नोपदिष्टाः भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि। प्रमाणाद्यनभ्युपगमेऽपि प्रवर्त्तन्तां तन्त्राते वाचोभङ्गयः तासु साधनबाधनक्षमा न भवन्ति तावतेति ब्रूमः इति चेन्न प्रमाणाद्यनभ्युपगम्य प्रवर्त्तितव्यं तदीयसाधनबाधनाक्षमतायां न नियामकं किन्तु सद्वचनाभासलक्षणयोगित्वमित्यवश्याभ्युपेयं भवता, येनाभ्युपगम्यापि प्रमाणादीनि प्रवर्त्तिताः मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वधर्मतान्तरव्यवहारानुसारिभिरपरैस्तथाभूता इति कथ्यन्ते। यदि त्वक्षद्वचसि सद्वचनाभासलक्षणं न भवान् दर्शयितुमीष्टे तदा अनभ्युपगम्य प्रमाणादि भवताप्र-

वर्त्तितोऽयं व्यवहारइति शतक्रतुत्वस्यैवोच्यमानेऽपि नास्माकमादरः । अन्यथाभ्युपगम्य प्रमाणादीनि भवता प्रवर्त्तितोऽयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं शक्यतएव । ननु यदि प्रमाणादीनि न सन्ति व्यवहारएव धर्म्मी कथं सिद्ध्येत् दूषणादिव्यवस्था वा कथं स्यात् सर्व्वविधिनिषेधानां प्रमाणाधीनत्वात् । नैवम् । न ब्रूमोवयं न सन्ति प्रमाणादीनीति, स्वीकृत्य कथारभ्येति । किन्नाम सन्ति न सन्ति वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैरेवास्माभिः स्वीकृत्य तानि भवता व्यवस्थाप्यते तथा व्यवहारिभिरेव कथा प्रवर्त्त्यतामिति । अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमारोप्य यदिदम्भवता दूषणमुक्तं तदपि न वक्तुं शक्यं कीदृशीं मर्य्यादामालम्ब्य प्रवर्त्तितायां कथायां दूषणमुक्तं किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्त्तितायां कथायाम् उतासत्त्वमभ्युपेत्य अथैकेन सत्त्वमपरेण चासत्त्वमङ्गीकृत्य । न तावदाद्यः अभ्युपगतप्रमाणादिसत्त्वं प्रति तादृक्पर्य्यनुयोगानवकाशात् । द्वितीयेतु स्वतोऽप्यापत्तेः न तृतीयः तस्यैव कथान्तरस्य प्रसक्तेः उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य । अन्यथा स्वाभिप्रायमालम्ब्य तेनापि तद्वचसि यत्किञ्चिद्वागात्मनि दूषणेऽभिहिते तस्य जयो व्यवतिष्ठताम् प्रमाणाद्यभ्युपगन्तुरेव यावज्जियमभरयन्त्रणा महती स्यात् । तस्मात् प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा कथायां प्रवर्त्तितायां भवतेदं दूषणमुक्तं युक्तमेव तथा सति स्यात् । योऽयं भवान् स्वाभिप्रायमपि नावधारयितुं शक्तोऽतिदूरतस्तस्मिन् पराभिसन्धानावधारणप्रत्याशा । अथ वादीत्यस्य दुर्वैतण्डिकं तस्मिन् बाधोऽभिधीयत इत्येव नेष्यते शिष्यादयस्तु तस्य कथानधिकारं ज्ञास्यन्ते अतएव भाष्यकारः "सप्रयोजनमनुयुक्तो यदि प्रतिपद्यत" इत्याहस्म न तु प्रतिपद्यस इति । नैवम् शिष्यादीन् प्रत्यपि चार्व्वाकादेर्दोषोऽयमित्येवाभिधातव्यम् । कथञ्च तथा स्यात् तस्य कथाप्रवेशाप्रवेशयोस्तद्वाक्यमत्वात्कथायामेव हि निग्रहः । नापि द्वितीयः तथाहि स्यादेवं यदि कथकप्रवर्त्तनीयवाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्त्तेत नचैवं सम्भवति तथा सति तत्सत्त्वानभ्युपगन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत हेत्वनुपपत्तेः । उक्तञ्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यत इति । अथ मन्यसे कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाच्चाभ्युपगमः यत्सत्तदभ्युपगम्यतइति स्थितेरिति । नैवम् । कयापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाच्चाभ्युपगमो भवता प्रसाध्यः । कथनात्पूर्व्वं तत्तत्त्वावधारणं वा परपराजयं वा अभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्य्यवस्यति तावदनुरोद्धव्यम् तच्च व्यवहारनियमस्यानुबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यतइति व्यवहारनियमसमयमेव बध्नीतः सच प्रमाणेन तर्केण च व्यवहर्त्तव्योवादिना प्रतिवादिनापि कथाङ्गतत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं तस्य दर्शनीयम् तदुद्भावने प्रथमस्य भङ्गोव्यवहर्त्तव्योऽन्यथा द्वितीयस्यैव । तादृशेतरौ च जेतृतया व्यवहर्त्तव्यौ प्रामाणिकपक्षस्तात्त्विकतया व्यवहर्त्तव्य इत्यादिरूपः । अतएवं व्यवहारनियमबन्धेऽपि हेतुर्वक्तव्यः तथा च सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्तइति प्रमाणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशम् । द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्थाजयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात् नचैवं प्रमाणानुपपत्तेस्वेच्छामात्रगृहीतमूलत्वान्मूलापरिशुद्धिसम्भवेन सर्व्वविचारविचार्य्यतत्फलविप्लवापत्तिः स्यात् । अविद्याविद्यमानानादिपारम्पर्य्यायातस्य लोकव्युत्पत्तिगृहीतसंवादस्य च तस्यान्यथाभावासम्भाव्यतालक्षणस्वतःसिद्धिशुद्धत्वात् । नच प्रमाणादीनां सत्तापीत्यमेव ताभ्यामङ्गीकर्त्तुमुचिता । तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः प्रमाणादिसत्तामभ्युपेत्यापि तथा व्यवहारनियमव्यतिरिक्तकथाप्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य वाभिलषितस्य कथकयोर्विपर्य्यवसानात् । नापि तृतीयः लोकव्यवहारो हि प्रामाणिकव्यवहारो वा स्यात् प्रामरादिसाधारणव्यवहारो वा । नाद्यः । विचारप्रवृत्तिमन्तरेण तस्य दुर्ज्ञेयत्वात् तदर्थमेव च पूर्व्वं नियमस्य गवेषणात् । नापि द्वितीयः शरीरात्मतादीनामपि तथा सति भवता स्वीकर्त्तव्यतापातात् । पश्चात्तद्विचारबाध्यतया नाभ्युपेयतदिति चेत् तर्हि प्रमाणादयोऽपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यत इति तावन्न भवति । नापि चतुर्थः यादृशोभवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते । तस्यैव प्रमाणादिसत्त्वासत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात् । तस्य

यदि मां प्रति फलातिप्रसङ्गकत्वं तदा त्वां प्रत्यपि समानः प्रसङ्गः । स्यादेतच्चियतवाग्व्यवहारक्रियासमयबन्धेन कथां प्रवर्त्तयतापि व्यवहारसत्ताभ्युपगन्तव्या नहि सत्तामनभ्युपगम्य व्यवहारक्रियाभिधातुं शक्या । क्रिया हि निष्पाद्यना असतः सद्रूपतापापणमिति यावत् प्रमाणैर्व्यवहर्त्तव्यमिति नियमबन्धने प्रमाणानां कारणभावो नियतः तद्भावश्च नियतपूर्व्वसत्तारूपं कारणत्वम् प्रमाणानामनादाय न पर्य्यवस्येत् । दूषणानाञ्चास्तित्वेन भङ्गावधारणनियमबन्धने साधनाङ्गानां व्याप्यादीनां सत्त्वेन तद्विषयस्य तत्त्वरूपतायाव्यवहारनियमनादौ च कण्ठोक्त्यमेव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भाः शक्यन्त इति । नैवम् । एभिरपि बाधकैः कथावाप्रारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्व्वोक्तबाधायामनिस्तारात् । न च व्यवहारनियमस्य स्वेच्छाकृतस्यैव प्रमाणादिसत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात् । यतः सत्ताज्ञानस्य तत्राङ्गत्वं न तु सत्तायाः । तत्र किं सत्तावगममात्रात्प्रत्यक्षाभ्युपगम्येति मन्यसे अबाधितात्तदवगमाद्वा । न तावदाद्यः मरुमरीचिकादौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात् । द्वितीयेऽपि किं वादिप्रतिवादिमध्यस्थमात्रस्य तस्यापि किं कथाकालमात्रएव बाधितत्वावगमाभावात् । अथवा कस्यचिदपि कालान्तरेऽपि च बाधितत्वबोधविरहात् । नाद्यः अतिप्रसङ्गात् पुरुषत्वयावगतस्य एकक्षणावगतस्य च पुरुषान्तरेण तेनापि क्षणान्तरे बह्वलं बाध्यतादर्शनादिति । नचासावर्थोऽसन्नपि द्वित्वादिपुरुषमात्रपूर्व्वजाततत्प्रतीत्यनुरोधाद्बाधदर्शने सत्यपि तथैव सन्नित्यभ्युपगम्यते । तस्माद्द्वितीयः पक्षः परिशिष्यते यत्र सर्व्वप्रकारेण बाधितत्वं नास्ति तत्सदित्यभ्युपगन्तव्यम् । तदित्थं यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथाकालमात्रे तैरबाध्यमानः कथाङ्गत्वेनाभ्युपेयते किमायातं सर्व्वप्रकाराबाधिततत्तत्सत्तावगमायत्ततत्सत्त्वाभ्युपगमक्षणानङ्गताङ्गीकारस्य । कतिपयप्रतिपत्तृकतिपयकालतथात्वावगमादेव च प्रायेण लौकिकव्यवहारः प्रतीयते तादृशश्चायं सत्त्वावगमः कथाङ्गमेतत्तदुच्यते व्यवहारिकीं प्रमाणादिसत्तामादाय विचारारम्भ इति । तस्माद्यादृग्व्यवहारनियमः कृतः तन्मर्य्यादानेन नोल्लङ्घितेति । यद्वादिवाग्व्यवहारे मध्यस्थावगमः स विजयते यस्य च वचसि नैवं तस्यावगमस्तस्य पराजयः । यत्र वाद्युक्तनिग्रहसत्त्वावगमः स निगृहीतः तद्विपरस्तु न तथेत्यादिनियम एव कथारम्भाय आहृतः । अनेन नियमेन व्यवहर्त्तव्यमित्यस्य हृदयमर्थोऽनेन नियमेनोल्लङ्घनेन नेति मध्यस्थावगमस्य विषयो भवितव्यमिति । नच वाच्यमन्ततस्तदवगमस्यापि सत्ताभ्युपेयेति । तस्यापि सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात् । नचैवमनवस्था तदनुसरणावश्यम्भावानङ्गीकारात् । एवं त्रिचतुरज्ञानजन्मनोनाधिकमतिरिति न्यायात् । नचान्तिमासत्त्वे पूर्व्वपूर्व्वप्रवाहासत्त्वापत्तिस्तथाचावगममादायापि न निस्तार इति वाच्यम् । अस्त्येवं हि तथापि त्रिचतुरज्ञानकल्पावगवेषणमात्रविश्रान्तेन विचारेण ततःपरमननुसरणरमणीयेनैव समयं बद्ध्वा कथाया भिधःसम्प्रतिपत्त्या प्रवर्त्तनात् । अन्यथा प्रमाणादिसत्ताभ्युपगमेऽपि ज्ञानानवस्थायादुष्परिहरत्वात् । नच वाच्यं सत्पक्षे स्वरूपसता ज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् न ज्ञानस्य परम्परानुसरणमुचितं नत्वेवं त्वत्पक्षे ज्ञानस्वरूपसत्ताङ्गीकारप्रसङ्गादिति । स्वरूपसत्तामादायापि परिहरतोऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्ष्यमाणत्वात् । यथा त्वत्पक्षे स्वरूपसदविशेषेऽपि ज्ञानस्वरूपसत्तैव परं व्यवहारोपयादिका न घटादिसत्ता । एवमेवासत्ताऽविशेषेऽपि ज्ञानमेवासद्व्यवहारोपपादकं नान्यत् । असच्छोपपादकञ्चेति व्याहतमिति चेन्न सदुपपादकमिति कुतो न व्याहृतम् । नहि सदुपपादकमसच्च नेति क्वचिदावयोः सिद्धम् । ननु तदसत्ताऽविशेषात्तत्कार्य्यस्यान्यदापि प्रसङ्गः, न कार्य्यस्यासत्त्वाक्षणे क्वान्यदापि सामग्रीसत्त्वाविशेषात्तदापि किं नान्यदा कार्य्यं जन्म । अथ न मम तदानीन्तनं सामग्रीसत्त्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु ततः प्राक् सामग्रीसत्त्वं तथादर्शनात् । तर्हि ममापि कालान्तरस्थमपि तदसत्त्वं तदातनकार्य्यजन्मनोनियामकं तथादर्शनादेव । मम तदव्यवहितोत्तरत्वं तदा कार्य्यजन्मनियामकमिति चेत् न समसमयत्वादागन्तुकत्वाद्यविशेषेण नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदास्थाया एव सामग्र्यास्तदा कार्य्यनियमोऽभ्युपेयः तथादर्शनादित्येव मन्तव्यम् । तथा च समः समाधिः । तथापि कार्य्यजन्मकालस्य कोविशेषः । कार्य्यजन्मैव । अन्यथा यद्विशेषान्तरं तदपि विशेषान्तरवतः कालस्य स्यादिति अपर्य्यवसानमेव पर्य्यवस्येत् । तथापि तत्कालस्यानुगतं किं रूपमिति चेन्न रूपान्तरवतोपि किं रूपमित्यपि पर्य्यनुयोगस्यानुदृत्तेः । किञ्च

"अन्तर्भावितसत्त्वञ्चेत्कारणं तदसत्ततः ।

नान्तर्भावितसत्त्वश्चेत्कारणं तद सत्ततः ।"

तथाह्यन्तर्भूतसत्त्वे यदि कारणत्वं तदा स्वविशिष्टे खट्वत्तिरसतः स्वाश्रयत्वमापादयति । विशिष्टस्यार्थान्तरत्वेऽपि च खच्चिन् खट्वत्तिव्यतिरेकवत् स्वविशिष्टे खट्वत्तिव्यतिरेके नियमदर्शनात् न सैव सत्ता तच्चिन्तिति अन्यस्यास्तस्याविशिष्टत्वमभ्युपगमे तामसच्चिवेश्य कारणत्वमभ्युपगन्तुः सर्व्वथैव कारणमसत्यं वक्ष्यति । अपरापरसत्तानिवेशने वा पर्य्यवसानमेव । न च सत्ताभेदानन्त्यमस्त्येवेत्यपि पादप्रसारिका निस्ताराय, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमननिबन्धनत्वच्छिन्नः प्रथमापि सत्ता न स्यादिति । सत्त्वदृष्टिभिस्तवतो मूलमपि ते नष्टमिति कष्टतरम् । न च स्वरूपसत्तोपगमाय खच्चि भिन्नानुगतबुद्ध्याधानपदेऽभिषिक्तता त्वया जातिमात्राय जलाञ्जलिर्वितीर्यते । सा भूदनुगतिः स्वरूपसत्त्वमेति च वदन् तद्भिन्नीं कारणतां कथमनुगमयितासीति । किञ्च स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोपि स्वरूपं स्वरूपमेव न ह्यसन् घटादिर्न घटादिः तथा सति घटादिर्नेत्यपि न स्यात् असतोऽघटादित्वात् । अथ सदपि सत्तामनन्तर्भाव्य कारणं तदानीमसदपि तत्तथास्तु सत्तासत्तयोः कारणकोट्यप्रवेशाविशेषात् । अथ न सत्ता कारणकोटिनिविष्टा किन्तु कारणत्वं सत्त्वं नियतपूर्व्वसत्तां हि कारणतामन्यदृति मन्यसे, तर्हि सत्त्वे सैव कारणतास्तु तर्हि कारणसत्तामभ्युपगतवानसीति षड्कुक्षां प्रभातमिति चेन्न भावानवबोधात् सत्तामसतीमभ्युपगच्छतापि सत्ता मयाभ्युपगतैव । अन्यथा कासावसतीति त्वमपि किं सत्तान्तःसत्तामन्तर्भाव्य कारणत्वमिच्छसि । नत्वेवं पूर्व्ववत् क्वापि सत्तात्यागो वा अनवस्थायां पर्य्यवसानं स्यात् । असत्ताऽविशेषात् कारणनियमः कथं स्यादिति चेन्न सत्ताविशेषेऽपि तुल्यत्वात् । सत्त्वेऽस्त्यन्यवाद्यनुविधानं तस्य तज्जातीयस्य वा सत्त्वे त्वसत्त्वाविशेषात् व्यतिरेकः परं सोऽप्यनियतो यदा कारणाभावस्तदा कार्य्याभावावश्यंभावानभ्युपगमात् नित्यासतः कारणस्यासत्त्वएव कदाचित्कार्य्योत्पादात् । अन्वयस्तु न कदाचिदपीति चेन्न तुल्यत्वात् अन्वयो नास्तीत्यभ्युपगच्छतापि अन्वयोपगमात् अन्वयस्यापि सत्तान्तर्भावने कथितदोषापत्तेः । एतेन

"आशामोदकतृप्ता ये ये चोपार्ज्जितमोदकाः ।
रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते" ॥

दृत्यस्यापि बाधकत्वमाशामोदकायते । सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्यादेशात् आशामोदकादिनापि च रसवीर्य्यविपाकादिजननात् । तदसत्कथं कार्य्यं स्यादिति चेन्न सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणत्वकार्य्येऽपि उक्तदोषस्यानन्तर्भावे वा ऽविशेषस्य पूर्व्ववदाहत्तेः तस्मात् ।

"पूर्व्वं सम्बन्धनियमे हेतुत्वे तुल्यएव नौ ।"

"हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ।"

आस्तां प्रतिवन्दिग्रहग्रहः कथं पुनरसतः कारणत्वमवसेयं प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात् असत्त्वस्य चाविशेषादिति चेन्न इदमस्माच्चियतं प्राक्सदितिबुद्ध्याविशेषात् । भ्रान्त्यैवंबुद्धिगोचरेऽतिप्रसङ्ग इति चेन्न यादृच्छा हि धिया त्रिचतुरकक्षाबाधानवरोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृश्येव विषयीकृतस्य समापि कारणतानिश्चयः । केवलन्ततः परास्यापि कक्षास्तु बाधात् पूर्व्वपूर्व्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणं वयं मन्यामह इति विशेषः । परदर्शनसिद्धान्तस्य भूरिकक्षाबाधिनोऽपि ततः परकक्षाबाध्यमानत्वेनातथाभावोपगमात् अन्यथैकदर्शनपरिशेषः स्यात् । एतेन सत्त्वाविशेषात् कथं कस्यचित् पक्षस्य त्रिचतुरकक्षाधावित्वमास्तामित्यपि निरस्तम् । अनेवंबुद्धिविषयतादशायां कोविशेष इति चेत् यदा कदापि तादृग्बुद्धिविषयतैव । अन्यथा कथय कथमन्यदा तादृग्बुद्धिविषयतया अन्यदा सत्त्वं स्यात् । तदा सत्त्वमन्यदास्येन गृह्यत इति चेत् अन्यकालिकमेव तर्हि तत्तदातनकारणत्वोपयोगीति समानम् तदेतत् संवित्तिसत्त्वमिति गीयते असती सा न विशेषिका सती सा नेष्टेत्यभिसन्धानेन द्वैतापत्तेरि संवित्तिरपि सती न वेति पृच्छन् प्रतिवक्तव्यः ज्ञानं तावद्व्यवहारोपपादकतया द्वाभ्यामभ्युपगतं तस्यापि जिज्ञासायां त्रिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्तोपपन्ना भविष्यति तदा सत्ता, तेनेदमुपपादितमभविष्यति । अथासत्ता तस्य पर्य्यवस्यति तदा असत्त्वैव तेनेदमुपपादित इति स्वीकर्त्तव्यं भ्रमविषयेष्वेव भ्रमे विशिष्टावग्रहारः । अविचार्य्यैव तावत्तस्य सदसत्त्वं विचार आरब्धव्यः । अन्यथा प्रथमभेव मतिकर्ष्मे कथारम्भणमयमापद्येत। स्वीकृतञ्च भवतापि भविष्यदादिविषये विज्ञाने विशिष्टव्यवहारनिदानत्वमसतो विषयस्य, कारणशक्तेश्च विशेषकमसदेव कार्य्यम् । न च कालान्तरसम्बन्धिनी सत्ता तस्या एकत्वान्यत्व नान्यदापीति वैधर्म्यमेतयोरपीति वक्तव्यम् विशिष्टव्यवहारप्रवृत्तिसमये द्वयोरप्यसत्ताऽविशेषात्

प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चरलुण्ठिते वेश्मनि यात्रिकजागरणदृष्टान्तमनुहरति तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो विशेषणतश्च वस्तुवच्छिन्नं, तद्विज्ञानेन स्वभाववलात् स्वविशेषणत्वेनोपादीयते। नत्वेवमत्यन्तासद्भवितुमर्हति तस्य स्वरूपतो विशेषणतश्च वस्तुवच्छिन्नतयानङ्गीकारात् कुत्र स्वभावतोविज्ञानं सम्बन्धि निरुच्यते न।उक्तमत्र असतोऽपि तदेव रूपं तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वादन्यथातिप्रसङ्गात् भ्रान्तिविषयेण दृष्टोत्तरत्वाच्चेत्यलमतिविस्तरेण"। खण्डनखण्डखाद्यम्। [३अव्यक्तत्वे च।

असत्ता स्त्री असतोभावः तल्। १अविद्यमानत्वे २असाधुत्वे

असत्त्व न० असतो भावः त्व। १अविद्यमानत्वे २अव्यक्तत्वे ३असाधुत्वे च सत्त्वं द्रव्यं न०त०। ४द्रव्यभिन्ने "सोऽसत्त्वप्रकृतिर्गुणः" इति फणिभा०। "क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः। असत्त्वरूपता तस्या द्रव्यमेवावधार्यतां" हर्युक्तायां लिङ्गसंख्यानन्वयिन्यां कर्तृकर्मत्वभिन्नकारकत्वशून्यायां साध्यरूपायां ५क्रियायाञ्च। सत्त्वं प्रकाशादिसम्पादकं प्रकृतेर्गुणभेदः न०त०। तद्भिन्ने ६रजसि ७तमसि च न०। सत्त्वं जन्तुमात्रम् न०ब०। ८जन्तुशून्ये त्रि०। सत्त्वं सात्त्विकः गुणभेदः। ९तच्छून्ये तामसादिगुणयुते त्रि०। सत्त्वमर्थक्रियाकारित्वम् अभावे न०त०। १०प्रयोजनानुपयुक्ते उदा० असत्ख्यातिशब्दे "सत्त्वासत्त्वकथा वृथा" खण्डनख०।

असत्पथ पु० असत् पन्थाः अच् समा०। १शास्त्रादिनिषिद्धे कार्य्यादौ २दुष्टे वर्त्मनि च। [दुष्टपक्षालम्बने।

असत्परिग्रह पु० असतः पक्षस्य परिग्रहः स्वीकारः।

असत्प्रतिग्रह पु० असतः निषिद्धस्य तिलादेः असद्ग्रोवा शूद्रादिभ्यः प्रतिग्रहः। १निषिद्धद्रव्यप्रतिग्रहे २शूद्रादिभ्यः प्रतिग्रहे च। प्रतिग्रहस्य अदृष्टार्थत्वात्तद्रव्य स्वीकारः। पारितोषिकोपढौकनादिग्रहणे तु न दोषः। विवरणमप्रतिग्राह्यशब्दे द्रष्टव्यम्। "शतसहस्रमसत्प्रतिग्रहेष्विति" विष्णु० "असत्प्रतिग्रहेषु उभयतोमुखादिप्रतिग्रहेष्विति" शु०त० रघुनन्दनः।

असत्य न० विरोधे न०त०। सत्यभिन्ने १मिथ्याभूते। २वृथार्थके वाक्यादौ "अपात्रीकरणं चैव मसत्यस्य च भाषणम्" मनुः। असत्यवादी असत्यभाषी असत्यवचनः। ३तत्प्रयोक्तरि मिथ्याभूते ४वस्तुनि च त्रि०। "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इति गीता। असत्यं वस्तुस्वभावविरोधिधर्मभेदः वाक्यस्य तु तथाभूतपदार्थप्रतिपादकत्वेन यथा इदं रजतमितिवाक्यं शुक्तिकायां रजततादात्म्यं प्रतिपादयत् असत्यं भवति एवमन्यदपि। सत्यत्वञ्च त्रैकालिकबाधशून्यत्वम् तच्छून्यमसत्यत्वम्।

असत्यजा पति० ५भार्य्याभेदे, स्त्री "शंयोरप्रतिमा भार्य्या सत्याऽसत्याथ धर्मजा" भा०व०प०२१६ अध्या०।

असत्यसन्ध त्रि० असत्ये सन्धाऽस्य। १वृथार्थाभिसन्धानवति २अन्यथास्थितस्यात्मनोऽन्यथारूपाभिमानवति च। यथा देहादिषु असत्येषु आत्माभिमानोऽसत्सन्धा। अत एव छा०उप० तस्य अनर्थहेतुत्वं दृष्टान्तेन समर्थितम्। "पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपाहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते॥ अथ यदि तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते। स यथा तत्र नादहेदेवैतदात्म्यमिदं सर्व्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो!" "यथा सोम्य! पुरुषं चौर्य्यकर्म्मणि सन्दिहमानं निगृह्य परीक्षणाय चोतापि हस्तगृहीतं वह्निहस्तमानयन्ति राजपुरुषाः। किं कृतवानयमिति पृष्टाश्चाऽरण्याहार्षीदनसायम्। ते चाऽः किमपहरणमात्रेण बन्धनमर्हति। अन्यथा दत्तेऽपि धने बन्धनप्रसङ्गादित्युक्ताः पुनराऽः स्तेयमकार्षीच्चौर्य्येण धनमपाहार्षीदिति। तेष्वेवं वदत्सु इतरोऽपह्नुते नाहं तत्कर्त्ता इति। ते चाऽः सन्दिह्यमानाः स्तेयमकार्षीत्क्वसस्य धनस्येति। तस्मिंश्चापह्नुवति आऽः परशुमस्मै तपतेति शोधयित्वात्मानमिति स यदि तस्य स्तैन्यस्य कर्त्ता भवति बहिश्चापह्नुते स एवमूतस्तत एवानृतमन्यथा आत्मानं कुरुते स तथानृताभिसन्धोऽनृतेनात्मानमन्तर्द्धाय परशुं तप्तं मोहात् प्रतिगृह्णाति स दह्यतेऽथ हन्यते राजपुरुषैः खड्गेनानृताभिसन्धिदोषेण। अथ यदि तस्य कर्म्मणोऽकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स तया स्तैन्याकर्त्तृतयात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति सत्याभिसन्धः सन्न दह्यते सत्यव्यवधानाद्य मुच्यते च मृषाभियोक्तृभ्यः। तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्त्तृकर्त्रोः, अनृताभिसन्धो दह्यते न तु सत्याभिसन्धः। स यथा सत्याभिसन्धस्तप्तपरशुग्रहणकर्म्मणि सत्यव्यवहितहस्ततलत्वान्नादह्येत न

दृश्यते इत्येतदेवं सद्ब्रह्म सत्याभिसन्धेतरयोः शरीरपातकाले च तुल्यायां सत्सम्पत्तौ विद्वान् सत्सम्पद्य न पुनर्व्यामिश्रदेवादिदेहग्रहणायावर्त्तते,, इति भा० ।

असदध्येतृ पु० असत् निषिद्धशास्त्रमधीते अधि-इङ् तृच् । स्वशाखां परित्यज्यान्यशाखाध्येतरि शाखारण्डे । "स्वशाखां यः परित्यज्य अन्यत्र कुरुते श्रमम् । शाखारण्डः स विज्ञेयोवर्ज्जनेत् तं क्रियासु चेति" स्मृतिः तथाध्ययननिषेधात्तस्यासदध्येतृत्वम् । स्वशाखाध्ययनोत्तरम् क्रमेणान्यशाखाशास्त्रान्तराद्यध्ययनकर्त्तृत्वे तु न असदध्येतृत्वम् ।

असदागम पु० विरोधे न०त० । १सच्छास्त्रभिन्ने नास्तिकादिशास्त्रे २असतः द्रव्यस्यागमे च दुष्टद्रव्यलाभे च कर्म० ३दुष्टे आगमे । "सप्त वित्तागमाधर्म्यादायोलाभः क्रयो जयः । विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेत्युक्तधर्म्मोपायभिन्नः सदागमस्तद्भिन्नः असदागमः ।

असदाचार पु० अभावे न०त० । १सदाचाराभावे न०ब० । २सदाचारशून्ये त्रि० । सदाचारश्च वेदादिशास्त्रानुसारी आचारः सतामाचारश्च ।

असदृश त्रि० न०त० । अयुक्तरूपे अननुरूपे । "यदुक्तवत्य सदृशं वैदेह्यो यच्चिमं वचः" भा०व०प० २७८ अ० । स्त्रियां ङीप् ।

असद्ग्रह पु० असति अविद्यमाने वस्तुनि यद्ग्रहः आग्रहः । बालादीनाम् (आवदार) इति ख्याते १आग्रहभेदे । ऐत० । २मिथ्याज्ञाने शुक्तिकारजतमित्यादिज्ञाने च ।

असद्धेतु पु० असत् व्यभिचारादिदोषवान् हेतुः । न्यायोक्ते व्यभिचारादिदोषयुक्ते हेतौ । यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायःपिण्डे वह्नेः सत्त्वेन व्यभिचारात् धूमसाधने वह्निहेतोर्दुष्टत्वादसत्त्वम् एवमन्यत्रापूह्यम् । हेतुदोषाश्च सामान्यतः पञ्चविधाः "अनैकान्तोविरुद्धश्चाप्यसिद्धः प्रतिपत्तितः । कालात्ययोपदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा० विस्तरो हेत्वाभासशब्दे वक्ष्यते ।

असद्भाव पु० सतोविद्यमानस्य भावः अभावे न०त० । १असत्त्वे अविद्यमानत्वे सतु भावः अभिप्रायः विरोधे ब०त० । २दुष्टाभिप्राये । ब० ३तद्वति त्रि० ।

असद्वृत्ति स्त्री सती वेदादिविहिता वृत्तिःस्वभावश्च अभावे न०त० । १सदाचाराभावे विरोधे न०त० । २निषिद्धाचारे । न०ब० । ३तद्वति त्रि० । [२तद्वति त्रि० ।

असद्व्यवहार पु० असत् दुष्टः व्यवहारः । १दुष्टव्यवहारे न०ब० ।

असन पु० अस-क्षेपे-युच् । पीतसालवृक्षे (मेयासाल) "प्रियविमानितमानवतीरुषां निरसनैरसनैरदृशार्थता" माघः तालव्यमध्यतापि "इन्द्रावने तु विकसितकन्दलदृशनैर्घोषति दरीमुखेषु कन्दलदृशनैः" उज्ज्वल० । भावे ल्युट् । २क्षेपणे न० । "दृशनिरसने विनियोगः" भवदेवः । धातूनामनेकार्थत्वात् कर्त्तरि युच् । ३चलनशीले त्रि० "क्षयाणोरस्तु रसनास्तरुध्यः" ऋ० १,१५५,२, "शर्यासनामनु द्यून्" ऋ० १,१४८,४ । [सातवृक्षे ।

असनपर्णी स्त्री असनस्य पर्णमिव पर्णमस्याः गौ० ङीष् ।

असनि त्रि० अस-अनि । क्षेपके ऋश्यादि० चतुरर्थ्यांक । असनिकः तत्सन्निकृष्टदेशादौ त्रि० ।

असन्तति स्त्री सन्ततिर्धारा अभावे न०त० । तदभावे १विच्छेदे सन्ततिर्धारा वंशस्य न०ब० २तच्छून्ये त्रि० ।

असन्तान पु० सन्तानोविस्तारः अभावे न०त० । १विस्ताराभावे सन्तानोवंशोविस्तारश्च न०ब० । २विस्तारशून्ये ३वंशशून्ये च त्रि० । [शून्ये त्रि० ।

असन्ताप पु० अभावे न०त० । १सन्तापाभावे न०ब० । २सना-

असन्तुष्ट त्रि० न०त० । सन्तोषशून्ये अधिकलाभेऽपि पुनरन्यधनाशावति "असन्तुष्टा द्विजा नष्टाः सन्तुष्टाः पार्थिवास्तथा" नीतिः । [२सन्तोषशून्ये अधिकलाभवति ॥

असन्तोष पु० अभावे न०त० १सन्तोषाभावे तत्प्रभावे । न०ब० ।

असन्दिग्ध त्रि० न०त० । १सन्देहाविषये २सन्देहशून्ये च । "खलात्तरसन्दिग्धं सारवत् विश्वतोमुखम् । अस्तोभमनवद्यञ्च स्तवं स्तवविदोविदुः" ।

असन्दित त्रि० सम्+दो-क्त इत्वम् सन्दितं बद्धं न०त० । बन्धनशून्ये अनिरुद्धे "मतङ्गानसंदितो वि मूज" ऋ० ४,४,१, "असन्दितः परैरनिरुद्धः" भा० ।

असन्दिन् त्रि० सन्दा बन्धनं मत्वर्थे इनि न०त० । बन्धनशून्ये । "अदृतं वर्हिस्तस्यावसन्दिनम्" ऋ० ८,१०२,१४ "असन्दिनमबन्धनम्" भा० ।

असन्धि पु० अभावे न०त० । व्याकरणोक्तसन्धिकार्य्याभावे सन्धिः पूर्व्वापरवर्णयोः सन्निकर्षविशेषात् वर्णान्यथाभावलोपः उभयोर्मेलनस्थानम् रात्रासुपायभेदश्च ब०ब० । तच्छून्ये त्रि० ।

असन्नद्ध त्रि० न सम्यक् नद्धः स्वकार्य्ये क्षमः । दृप्ते गर्व्विते पण्डितम्मन्ये तस्य सम्यक्पटुत्वाभावेऽपि दर्पेण तथात्वेनाभिमानात्तथात्वम् ।

असन्निकर्ष पु० अभावे न०त० । १सन्निकर्षाभावे विरोधे न०

त० । २दूरत्वे न०ब० । ३सन्निकर्षशून्ये दूरस्थे त्रि० ।

असन्निकृष्ट त्रि० विरोधे न०त० । १दूरस्थे ।

असन्निधि पु० अभावे न०त० । १नैकट्याभावे" विरोधे न० त० । "२दूरत्वे । न० ब० । ३दूरस्थे त्रि० ।

असन्निहित त्रि० विरोधे न०त० । १दूरस्थे । २असम्यग्-निवेशिते च ।

असपत्न त्रि० विरोधे न०त० । १शत्रुभिन्ने मित्रे न०ब० । २शत्रुशून्ये त्रि० "इमं देवा असपत्नम्" यजु०९,४, स्त्रियां यार० ङीन् "असपत्नी सपत्नघ्नी जयन्त्यभिभूवरी" ऋ० १०, १५९,५ । यज्ञे उपाधीयमाने इष्टकाभेदे "पञ्चस्यामन्तेष्वश्विनीवदसपत्नी" कात्या० १७,१,१ । "असपत्नी इष्टका" कर्क० ।

असपिण्ड पुंस्त्री० न समानः पिण्डः देहारम्भकावयवभेदो यस्य । सप्तमपुरुषाद्यनन्तर्गतयोः स्त्रीपुरुषयोः । "असपिण्डा च या मातुरसगोत्रा च या पितुः" मनुः असपिण्डः स-पिण्डो वा यज्ञेतस्योपनायितः" स्मृतिः । सपिण्डशब्द-निर्वचनेन च सापिण्ड्यं मिताक्षराकृता "अनन्यपूर्व्विकां कान्तामसपिण्डां यवयसोमिति" या० स्मृतिव्याख्याने दर्शितम् । असपिण्डां समान एकः पिण्डोदेहो यस्याः सा सपिण्डा न सपिण्डा असपिण्डा ताम् । सपिण्डता चैकशरीरावयवान्वयेन पित्रा सह एकपिण्डता । एव मितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात् । एवं मातृशरीरावयवान्वयेन माता । तथा मातामहादिभि-रपि मातृद्वारेण । तथा मातृष्वसृमातुलादिभिरपि एक शरीरावयवान्वयात् । तथा पितृव्यपितृष्वसादिभिरपि । तथा पत्या सह पत्न्या एकशरीरारम्भकतया । एवं भ्रातृभार्य्याणामपि परस्परमेकशरीरारम्भैः सह एक शरीरारम्भकत्वेन । एवं यत्र यत्र सपिण्डशब्दः तत्र तत्र साक्षात् परम्परया वा एकशरीरावयवान्वयो वेदितव्यः । अवश्यञ्चैकशरीरावयवान्वयेन सापिण्ड्यं वर्णनीयम् । "आत्मा हि जज्ञे आत्मन इत्यादि" श्रुतेः तथा "प्रजा-मनु प्रजायस" इति तथा "स एवायमिक्ष्वाकुः पृथक् पृथक् प्रत्यक्षेणोपलभ्यत" इत्यापस्तम्बवचनाच्च । तथा गर्भोप-निषदि । "एतन्मातृकौशिकं शरीरन्नीणि मातृतस्त्रीणि पितृतः अस्थिस्नायुमज्जानः पितृतः । त्वङ्मांसरुधिराणि मातृत" इति । तत्र तत्रावयवान्वयप्रतिपादनात् । निर्व्यापिण्ड्यान्वयेन तु सापिण्ड्यं मातृसन्ताने भ्रातृ-व्यादिषु च सापिण्ड्यं न स्यात् । समुदायशक्तीकारेण

रूढपरित्यागे अवयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्यात् । "असत्त्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रा नन्यगतित्वेन समुदायः प्रसिध्यति" । एवम्मातृसर्वैकशरीरा-वयवान्वयेन सापिण्ड्ये यथा नातिप्रसङ्गस्तथा वक्ष्यामः" । "असपिण्डामित्यत्रैकशरीरावयवान्वयद्वारेण साक्षात् पार-म्पर्येण वा सापिण्ड्यसद्भावञ्च सर्व्वस्य सर्व्वत्र यथाकथ-ञ्चिदादौ संसारे सम्भवतीत्यतिप्रसङ्ग इत्यत आह" । "पञ्चमात्सप्तमादूर्द्धं मातृतः पितृतस्तथा" या० स्मृ० । "मातृ-तोमातृसन्ताने पञ्चमादूर्द्धम् । पितृतः पितृः सन्ताने सप्तमा-दूर्द्धं सापिण्ड्यं निवर्त्तते इति शेषः । ततश्चायं सपिण्ड-शब्दोऽवयवशक्त्या सर्व्वत्र प्रवर्त्तमानोऽपि निर्म्मथ्य पञ्चमादि-शब्दवच्चियतविषय एव । तथा च पित्रादयः षट् सपिण्डाः पुत्रादयश्च षडात्मा च सप्तमः । सन्तानभेदेऽपि यतः सन्तान-भेदः, तस्मादाय गणयेदृयावत्सप्तम इति सर्वत्र योज-नीयम् । तथा च मातरमारभ्य तत्पितृपितामहादि-गणनायां पञ्चमपुरुषसन्तानवर्त्तिनी मातृतः पञ्चमीत्युपचर्यते एवं पितरमारभ्य तत्पित्रादिगणनायां सप्तमपुरुषस-न्तानवर्त्तिनी पितृतः सप्तमीति" मिता० । एवमेवाग्नेयेऽपि सापिण्ड्यम् पितृपक्षीयं ज्ञेयं अदत्तस्त्रीणां तु त्रिपौरुषं सापिण्ड्यम् दत्तानां तु सगोत्रत्वाभावाच्चार्षेचमिति" भेदः दायग्रहणोपयोगिसापिण्ड्यं तु दातृत्वभोक्तृ-त्वान्यतरसम्बन्धेनैकपिण्डत्वञ्चेति दायभागानुसारिणः ।

असभ्य त्रि० सभायामर्हति यत् न०त० । सभायामनुपयुक्ते १स्त्रीवर्णनादौ, २खले च ।

असम त्रि० नास्ति समोयस्य । १अतुल्ये । "संप्रधार्य्याब्रवीद्भ्राता न समौ नासमाविति" मनुः । समःयुग्मसंख्यान्वितः २तद्भिन्ने अयुग्मे विषमे (विजोड) एकत्रिपञ्चादि संख्यान्विते च यथा मेषादिषु द्वादशराशिषु मेषमिथुनसिंह तुलाधनुःकुम्भाः असमराशयः एवमन्यत्रापि । ३बुद्धभेदे पु० ।

असमञ्ज न० न समञ्जम् । १अप्रत्यक्षे अनुचित्यादिज्ञाने अव्य० अच् । २तद्विषये त्रि० ।

असमग्र त्रि० न०त० । असम्पूर्णे असकले ।

असमञ्जस न० समञ्जसं युक्तियुतं न०त० । १असङ्गते । "यद्यपि का नोहानिः परस्य हृत्वां रासभश्चरति । असमञ्जसमिति मत्वा तथापि तरलायते चेतः" उद्भटः ।

असमञ्जस् पु० सम्+अञ्ज—असुन् न०त० । सगरन्दज्येष्ठ-पुत्रे अंशुमतः पितरि सूर्य्यवंशे क्षत्रियभेदे तत्कथा "अयोध्याधिपतिः श्रीमान् पूर्व्वमासीन्नराधिपः । सगरो-

नाम धर्म्मात्मा प्रजाकामः स चाप्रजाः। विदर्भराजदुहिता केशिनी नाम नामतः। ज्येष्ठा सगरपत्न्यासीद्बभिष्ठा सत्यवादिनी। अरिष्टनेमिदुहिता सुपेणाप्रतिमा भुवि। द्वितीया सगरस्यासीत् पत्नी परमधार्म्मिकी" इत्युपक्रम्य। "अथ कालेन महता पुत्रं ज्येष्ठा व्यजायत। असमञ्जा इति ख्यातं काकुत्स्थं सगरात्मजम्" रामा०आ०२०अ०। "असमञ्जा इति ख्यातः सगरस्य सुतोऽग्रभूत्। यं वैद्या जनयामास पौराणां स हि दारकान्। गलेषु क्रीडतो गृह्य नद्याश्चिक्षेप दुर्बलान्। ततः पौराः समाजग्मुर्भयशोकपरिप्लुताः। सगरञ्चाभ्ययाचन्त सर्व्वे प्राञ्जलयः स्थिताः। त्वं नस्त्राता महाराज! परचक्रादिभिर्भयात्। असमञ्जोभयाद्घोरात्ततो नस्त्रातुमर्हसि। पौराणां वचनं श्रुत्वा घोरं नृपतिसत्तमः। मुहूर्त्तं विमना भूत्वा सचिवानिदमब्रवीत्। असमञ्जाः पुरादद्य सुतो मे विप्रवास्यताम्। यदि वो मत्प्रियं कार्य्यमेतच्छीघ्रं विधीयताम्। एवमुक्ता नरेन्द्रेण सचिवास्ते नराधिप!। यथोक्तं त्वरिताश्चक्रुर्यथा न्यायितवान्नृपः। एतत्ते सर्व्वमाख्यातं यथा पुत्रो महात्मना। पौरणां हितकामेन सगरेण विवासितः" भा०व०प०१०७ अ०। असच्। असमञ्जसोऽपि तस्मिन्नर्थे "असमञ्जस इत्युक्तः स केशिन्या नृपात्मजः। तस्य पुत्रोऽंशुमान्नाम पितामहहिते रतः"। "असमञ्जस आत्मानं दर्शयन्नसमञ्जसम्। जातिस्मरः पुरा सङ्गाद्योगी योगाद्विचालितः। आचरन् गर्हितं लोके ज्ञातीनां कर्म्म विप्रियम्। सरय्वां क्रीड़तोबालान् प्रास्यद्वैजयन् जनान्। एवंवृत्तः परित्यक्तः पिता स्नेहमपोहय वै। योगैश्वर्य्येण बालांस्तान् दर्शयित्वा ततो ययौ। अयोध्यावासिनः सर्व्वे बालकान् पुनरागतान्। दृष्ट्वा विस्मिस्मिरे राजन्! राजा चाप्यन्वतप्यत" भाग० ९म० ८अ०।

असमद् त्रि० सह मदेन गर्वेण समदः कलहःस नास्ति यत्र। कलहरहिते विरोधशून्ये। "तथैभ्योऽसमदं करोति तद्भिनत्ति" "ताभ्यएवैतत्सह सतीभ्योऽसमदं करोति" इति च शत०ब्रा०। "असमदमकलहं परस्पराविरोधम्" भा०।

असमन त्रि० असममतुल्यत्वं भिन्नवर्णत्वात् नयति नी-ड। विभिन्नवर्णे "असमना अजिरासो रघुष्यदः" ऋ०१।१८०,४, असमना भिन्नवर्णाः भा०।

असमनेत्र पु० असमानि अयुग्मानि नेत्राण्यस्य। त्रिनेत्रे शिवे असमलोचनादयोयत्र।

असमय पु० अपक्वार्थे न०त०। १दुष्टकाले २अयोग्यकाले च "असमये मतिरुन्मिषति ध्रुवम्" नैषधचरिते ४सर्गः।

असमर्थ त्रि० समर्थः शक्तः न०त०। १अशक्ते २दुर्बले च। समर्थः सङ्गतार्थः न०त०। असङ्गतार्थे, व्याकरणशास्त्रप्रसिद्धे यत्र यस्यान्वययोग्यता तत्सहचारानपेक्षायुक्ते २समासे यथा अश्राद्धभोजीत्यादौ असमर्थसमासः नञ्पदस्य श्राद्धेन सहान्वययोग्यत्वात् भोजनेन च सहचाराभावेऽपि तत्रान्वयस्य अपेक्षणीयत्वात्तथात्वम्।

असमर्थसमास पु० कर्म्म०। येन सह यस्य अन्वयस्तद्व्यतिरेकेण अन्यान्वितेन पदेन समासे। यथा अश्राद्धभोजीति अस्यार्थः पश्येत्यादि। [कन्दर्पे असमशायकादयोयत्र।

असमवाण पु० असमा अयुग्मानि वाणा अस्य। पञ्चबाणे

असमष्ट त्रि० सम+अद्—क्त न०त०। अव्याप्ते। "पितामतीनाममष्टकाव्यः" ऋ०९,७६,४, "असमष्टकाव्यः अव्याप्तकर्म्मेति" भा०।

असमवायिकारण न० समवैति सम+अव—इण—णिनि न०त०कर्म्म०। न्यायमते समवायिकारणं द्रव्यं तच्चिन्नं द्रव्यवृत्ति यत् गुणादिकं कारणं तच्चिन्नार्थे। यथा कपालद्वयसंयोगरूपो गुणोघटस्य, द्रव्याश्रिता क्रिया संयोगविभागादेः। "समवायिकारणत्वं च्चेयमथाप्यसमवायिहेतुत्वम्"। "यत् समवेतं कार्य्यं भवति च्चेयन्तु समवायि जनकं तत्"। "तत्रासच्चं जनकं द्वितीयम्" "गुणकर्म्मभात्रवृत्ति च्चेयमथाप्यसमवायिहेतुत्वम्" इति च भाषा०व्याख्यातञ्चैतत् सूक्ता०। "तत्र समवायिकारणे आसच्चं प्रत्यासच्चं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वंस्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामिच्छाद्यसमवायिकारणत्वं स्यात् तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्यन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम्, आत्मविशेषगुणानान्तु कृत्याद्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे प्रत्यासच्चं द्विविधं कार्य्यकार्य्यप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले

प्रत्यासत्तिरस्ति, तथाच क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितार्थः । इत्थञ्च कार्य्यं कार्य्यकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्य्यवसन्नम्" ।

कुत्र कुत्र किंकिमसमवायिकारणं? वैशेषिकसूत्रे तदुक्तं ततउद्धृत्य किञ्चित् प्रदर्श्यते ।

"आत्मसंयोगप्रयत्नाभ्यां हस्तेकर्म्म१ । तथा हस्तसंयोगाच्च मुषले कर्म्म२ । अभिघातजे मुषलादौ कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः३ । तथात्मसंयोगो हस्तकर्म्मणि४ । अभिघातान्मुषलसंयोगाद्धस्ते कर्म्म५ । आत्मकर्म्म हस्तसंयोगाच्च ६ । संयोगाभावे गुरुत्वात् पतनम्७ । नोदनविशेषाभावान्नोर्द्ध्वं न तिर्य्यग्गमनम्८ । प्रयत्नविशेषान्नोदनविशेषः९ । नोदनविशेषादुदसनविशेषः१० । हस्तकर्म्मणा दारकर्म्म व्याख्यातम्११ । तथा दग्धस्य विस्फोटने१२ । यत्नाभावे प्रसुप्तस्य चलनम्१३ । तृणे कर्म्म वायुसंयोगात्१४ । मणिगमनं सूच्यभिसर्पणमदृष्टकारणम्१५ । इषावयुगपत्संयोगविशेषाः कर्म्मान्त्यत्वे हेतुः १६ । नोदनाद्याभिघोः कर्म्म तत्कर्म्मकारिताच्च संस्काराद्दुत्तरं तथोत्तरमुत्तरञ्च१७ संस्काराभावे गुरुत्वात् पतनम्" १८ वै०सू० "संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म्म, तस्य च कर्म्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम्, प्रयत्नश्च निमित्तकारणम्, इयमेव चेष्टा, प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियायाश्चेष्टात्वात् स्वसमवेतस्वातिरिक्तस्वसमवेतान्यप्रयत्नजन्यक्रियाया वा१ । तथा हस्तसंयोगादुत्क्षेपणबन्धस्तसंयोगादित्यर्थः अत्र च यत्नवदात्मसंयुक्तेन हस्तेन मुषलस्य संयोगोऽसमवायिकारणम्, मुषलं समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे २। उदूखलाभिहतमुषलस्योर्द्ध्वं यदुत्पतनं जायते तत्र कारणमाह । तत्र यद्यपि मुषलेन उत्पतता हस्तस्य संयोगोऽप्यस्ति तथाऽपि स संयोगोऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम्, कुत एवमित्यत आह व्यतिरेकादिति प्रयत्नस्य व्यभिचारादित्यर्थः । यदि तदा प्रयत्नः स्यात् मुषलस्यैवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुषलस्य धारणमेव भवेत् चेष्टाधीनं मुषलस्य पुनरुत्पतनं वा भवेत् इति भावः३ । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि कारणविशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्तुमाह । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि आत्मसंयोगः प्रयत्नवदात्मयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्व्वसूत्रस्थं तथेत्यतिदिश्यते४ । कुतस्तर्हि हस्ते तदोत्पतनमत आह । यथा मुषले उत्पतति मुषलसुखस्थं लोहमुत्पतति तथा हस्तोऽपि तदोत्पतति । अत्राभिघातशब्देन अभिघातजनितः संस्कार उच्यते उपचारात्, उत्पततो मुषलस्य पटुतरेण कर्म्मणा अभिघातसहकृतेन स्वाश्रये मुषले संस्कारोजनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुषलसंयोगादसमवायिकारणाद्धस्तेऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणकम्, अवश्यो हि हस्तो मुषलेन सहोत्पततीति भावः५ । ननु शरीरे शरीरावयवे वा यत्कर्म्मोत्पद्यते तत्र प्रयत्नवदात्मसंयोगः कारणं प्रकृते कथं न तथेत्यत आह । आत्मशब्दः शरीरावयवपर उपचारात् अन्वयानुपपत्तिरेवोपचारबीजम् । तथाचात्मनः शरीरावयवस्यापि हस्तस्य यत् कर्म तत् हस्तमुषलसंयोगात् चकाराच्च वेगसमुच्चयः, हस्तकर्म्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति स च क्वचित् प्रयत्नवदात्मसंयोगः क्वचिद्वेगवन्मुषलादिसंयोगो यथा वातूलस्य शरीरावयवकर्म्मेति भावः ६ ॥ प्रयत्नानधीनकर्म्मप्रकरणमारभते । संयोगपदेन प्रतिबन्धकमात्रमुपलक्षयति तेन प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम् अवःसंयोगफलिका क्रिया जायते, तत्र गुरुत्वमिति फलादौ प्रतिबन्धकः संयोगः, विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः, एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः । अभिध्यानादिना विषादेरन्तरीक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिरेव वा प्रतिबन्धकस्तेषामपि संयोगपदेन संग्रहः७ ॥ ननु गुरुत्वाद् यदि पतनं तदा लोष्टादेरुत्क्षिप्तस्य क्वचिदूर्द्ध्वं क्वचिच्च तिर्य्यग्गमनं कथम्भवेदित्यत आह । गुरुत्ववतोऽपि लोष्टकाष्ठादेर्दूर्द्ध्वं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतराच्चोदनात् । तथाच फलपक्षिबाणादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यक्,नवोर्द्ध्वं गमनमिति भावः८ । ननु नोदनविशेष एव कुत उत्पद्यते तत्राह । तिर्य्यक् ऊर्द्ध्वं दूरम् आसन्नं वा क्षिपामीतीच्छाकारणकः प्रयत्नविशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादेरूर्द्ध्वं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरोत्क्षेपणम् ९,१०॥ उदूखलाभिघातात् मुषलेन सह हस्ते यत्कर्म्म उत्पन्नं तत्तावत् प्रयत्नपूर्व्वकं न भवति नापि पुण्यपापहेतुकमतस्तत्तुल्यतया बालकस्य क्रीड़ाकरचर-

णादिचालनं यत्तत्वातिदिशति । बालकस्य यद्यपि कर-चरणादिचालनं प्रयत्नपूर्व्वकमेव तथापि हिताहितप्राप्ति-फलकं न भवति न पुण्यपापहेतुकमित्यतिदेशार्थः ११ ॥ इदानीं प्रयत्नपूर्व्वकोऽपि कर्म्मणि यत्र पुण्यपापहेतुकत्वं तत्र दारककर्म्म तुल्यतामतिदिशन्नाह । आततायिना केनाप्यगारे दाह्यमाने तत्र दग्धस्य पुरुषस्य विस्फोटे वह्निकृते जाते सति तस्माततायिनो वधानुकूलेन प्रयत्नेन हस्तादौ यत्कर्म्म जनितं तन्न पुण्यहेतुकं न वा पापहेतुकं यथाह्नः । "नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" । "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः" १२। इदानीं यत्नं विना यानि कर्म्माणि भवन्ति तान्याह । प्रसुप्तस्येति चैतन्याभावदशासुपलक्षयति तेन मूर्च्छितस्य जीवतोऽचैतन्येऽपि वायुकृतं चलनं द्रष्टव्यमत्र १३ ॥ शरीरकर्म्माणि व्याख्याय तदितराण्याह । हरणपदेन हस्तगुरुभलतावतानादिकं सर्व्वमुपलक्षयति १४। अदृष्टाधीनं कर्म परिगणयन्नाह । मणिपदेन कांस्यादिकमुपलक्षयति तेनाभिमन्त्रितं मणिकांस्यादि तत्कारणाभिमुखं यद् गच्छति तत्र गमने मण्यादि समवायिकारणम्, अदृष्टवत्तत्कारात्मणिसंयोगोऽसमवायिकारणम्, तत्कारस्य पार्श्वं निमित्तकारणम् । सूच्यभिसर्पणमिति सूचीपदेन लौहमात्रं हरणञ्चोपलक्षयति तथा चायस्कान्ताभिमुखं यत्सूच्यादेर्गमनं हरणकान्ताभिमुखं यत् हरणस्य गमनं तत्र सूच्यादि समवायिकारणम्, यस्य हितमहितं वा तेन हरणसूच्यादिगमनेन तददृष्टवदात्मसंयोगोऽसमवायिकारणम्, तददृष्टमेव निमित्तकारणम्, एवमन्यदप्यूह्यम् । तदुर्ध्वं यथा वह्नेरूर्ध्वज्वलनं वायोस्तिर्य्यग्गमनं सर्गादौ परमाणुकर्म्मादि १५ । ननु शरविहङ्गमालातचक्रादीनामुपरमपर्य्यन्तमेकमेव कर्म्म नाना वेति संशये निर्णयहेतुमाह । दृषाविति षष्ठ्यर्थे सप्तमी, इदमत्राकूतं वेगेन गच्छतां शरादीनां कुड्यादिसंयोगानन्तरं शरादौ सत्येव गत्युपरमो दृश्यते आत्माश्रयत्वात्तावत्तन्नाशकः आश्रयस्य विद्यमानत्वात् विरोधिगुणान्तरञ्च नोपलभ्यते तेन स्वजन्यः संयोग एव कर्म्मनाशक इत्युच्यते स च संयोगस्तृतीयक्षणे जातः पञ्चमक्षणे कर्म्म नाशयति । तथा हि कर्म्मोत्पत्तिरथ विभागः अथ पूर्व्वसंयोगनाशः उत्तरसंयोगः कर्म्मनाशः तेनानुभवसंयोगविशेषाः कर्म्मनानात्वज्ञापका इत्यर्थः संयोगविशेषा इति संयोगे विशेषः स्वजन्यत्वमेव अन्यथा संयोगमात्रस्य कर्मनाशकत्वे कर्म्म क्वचिदपि न तिष्ठेत् १६ । नोदननिघात्यकर्मप्रकरणानन्तरं संस्कारनिघात्यकर्मप्रकरणमारभते । पुरुषप्रयत्नेनाकृष्टया पतञ्जिकया नुन्नस्रोतोराद्यं कर्म जायते तत्र नोदनमसमवायिकारणम्, द्रव्यः समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे, तेन चाद्येन कर्मणा समनाधिकरणो वेगाख्यः संस्कारो जन्यते न च वेगेन, गच्छतीति प्रत्यक्षसिद्ध एव तेन संस्कारेण तत्रैव कर्म्म जायते तत्रासमवायिकारणं संस्कारः, समवायिकारणमिषु, निमित्तकारणन्तु तीव्रो नोदनविशेषः, एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेण उत्तरोत्तरः कर्मसन्तानो जायते स्वजन्योत्तरसंयोगेन कर्मणि नष्टे संस्कारेण कर्मान्तरजननात् एक एव संस्कारः कर्मसन्तानजनकः न तु कर्मसन्तानवत् संस्कारसन्तानोऽभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह तथोत्तरमुत्तरञ्चेति तत्कर्मकारितान्च संस्कारादित्येकवचनञ्च, न्यायनये तु कर्मसन्तानवत् संस्कारसन्तानस्वीकारे गौरवम्, यत्तु युगपत्प्रक्षिप्तशरयोरेकस्य तीव्रो वेगोऽपरस्य तु मन्दस्तत्र नोदनतीव्रत्वमन्दत्वे निमित्तम् १७। ननु संस्कार एक एव चेत् कर्मसन्ताजनकस्तदा कदाचिदपि शरपातो न स्यात् कर्मजनकस्य संस्कारस्य सत्त्वादित्यत आह । गुरुत्वन्तावत् पतनकारणमनुवर्त्तमानमेव तच्च गुरुत्वं संस्कारेण प्रतिरुद्धं पतनं नाजीजनत् अथ प्रतिबन्धकाभावे तदेव गुरुत्वं पतनं करोतीत्यर्थः" १८। उपस्कार ।

"नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म १ । तद्विशेषेणादृष्टकारितम् २ । अपां संयोगाभावे गुरुत्वात् पतनम् ३ । द्रवत्वात् स्यन्दनम् ४ । नाड्यो वायुसंयोगादारोहणम् ५। नोदनापीड़नात् संयुक्तसंयोगाच्च ६ । हस्ताभिसर्पणमित्यदृष्टकारितम् ७ । अपां संघातो विलयनञ्च तेजःसंयोगात् ८। तत्र विस्फुर्জ্জथुर्लिङ्गम् ९। वैदिकञ्च १० । अपां संयोगाद्विभागाच्च स्तनयित्नोः ११। पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् १२। अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक् पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् १३। हस्तकर्मणा मनसः कर्म व्याख्यातम् १४। आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे १५। तदारब्धे आत्मस्थे मनसि शरीरस्य दुःखाभावः स योगः १६। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चेत्यदृष्टकारितानि" १७। वै० सू० नोदनादि निघात्य कर्मपरीक्षाप्रकरणम् तत्राह। नोदनं संयोगविशेषः येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतु

र्न भवति यः संयोग शब्दनिमित्तकारणं न भवति वा। यः संयोगः शब्दनिमित्तकारणं भवति यज्जनितं कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः। ताभ्यामपि प्रत्येकं कर्म जन्यते षड्भाख्यायां पृथिव्याश्चरणेन नोदनात् चरणाभिघाताच्च कर्म जायते तत्र षड्भः समवायिकारणम्, नोदनाभिघातौ यथायथमसमवायिकारणम्, गुरुत्ववेगप्रयत्नाः यथासम्भवं निमित्तकारणम्। संयुक्तसंयोगादिति नोदनादभिघाताद्वा षड्भे कर्म तत्पड्भस्थिते घटादावपि तत्समकालमेव कर्मदर्शनात्१। ननु भूकम्पादौ नोदनाभिघातावन्तरेण जायमाने किमसमवायिकारणमत आह। तदिति पृथिवीकर्म परान्दहति पृथिव्यामेव कर्म यदि विशेषेण आश्रयेण भवति तदाऽदृष्टकारितम्, तेन भूकम्पेन यस्य दुःखं सुखं वा भवति अदृष्टवत्तदात्मसंयोगस्तत्रासमवायिकारणम्, भूः समवायिकारणम्, अदृष्टं निमित्तकारणम्, यद्वा तदा नोदनाभिघातौ परान्दहति विशेषो व्यतिरेकः तथा च नोदनाभिघातव्यतिरेकेण यत् पृथिव्यां कर्म तददृष्टकारितमित्यर्थः२। इदानीं द्रवद्रव्यसमवेतकर्मपरीक्षाप्रकरणम्, तत्राह। अपां यत् पतनं वर्षणरूपं तद्गुरुत्वासमवायिकारणकम्, तत्संयोगस्य मेघसंयोगस्याभावे सति भवति तेन संयोगाभावस्तन्निमित्तकारणमित्यर्थः३। तेषामेव दृष्टविन्दूनामन्योन्यसंयोगजनकं कर्म कथमत आह। क्षितौ पतितानामपां विन्दूनां परस्परं संयोगेन महज्जलावयवि स्रोतोरूपं यज्जायते तस्य यत् स्यन्दनं दूरसंसरणं तत् द्रवत्वात्समवायिकारणाद्गुरुत्वाच्च निमित्तकारणाद्भ समवायिकारणेषु४। ननु यदि भूमिष्ठानामपाम् ऊर्ध्वं गमनं भवति तदा गुरुत्वात् पतनवर्षणं सम्भाव्यते तदेव तु कुत इत्यत आह। कारयन्तीतिशेषः यदपामूर्ध्वारोहणं तत् नाड्यः सूर्यरश्मयो वायुसंयोगात् कारयन्ति ग्रीष्मे वाय्वभिहताः सूर्यरश्मय एव आरोहयन्त्यप इत्यर्थः। क्वचित् पाठो नाड्यवायुसंयोगादिति स च नाड्यो नाडीसम्बन्धी यो वायुसंयोग इत्युपपादनीयः५। ननु सूर्यरश्मीनां कथमयं महिमा यत् भूमिष्ठा अप ऊर्ध्वं नयन्तीत्यत आह। नोदनेन बलवद्वायुनोदनेन आयोड़नादाक्रन्दनात् वायुसंयुक्ता रश्मयस्तत्संयुक्ता आप ऊर्ध्वं धावन्ति यथा स्थालीस्था अपः क्वथ्यमानाः वायुसञ्चरद्भिरश्मय ऊर्ध्वं नयन्ति, एवकार इवार्थस्तत्र च उपमानं स्थालीस्था एवापो द्रष्टव्याः६। ननु मूले सिक्तानामपां वृक्षाभ्यन्तरेणोर्ध्वं गमनम् अभितः, तत्र नोदनाभिघातौ न वादित्यरश्मयः प्रभवन्ति तत्कथं तदित्यत्राह। अभितः सर्वतोऽभिसर्पणं तदभिसर्पणं मूले निषिक्तानामपां वृक्षे तददृष्टकारितं पत्रकाण्डफलपुष्पादिदृष्टिक्षितं सुखं दुःखं वा येषामात्मनाम्, अदृष्टवत्तदात्मसंयोगात्तत्समवायिकारणात् अदृष्टाच्चनिमित्तादपु समवायिकारणेषु तत् कर्म भवति। येन कर्मणा आप ऊर्ध्वं गत्वा वृक्षं वर्द्धयन्तीत्यर्थः७। नन्वपां सांसिद्धिकद्रवत्वं लक्षणसूत्रं ताडयतीत्येवापामूर्ध्वमधस्तिर्यक् च गमनसुपपादितं हिमकरकादीनाञ्च शैत्यादप्रभवविवादसिद्धम्, तत्कथं तेषां संघातः काठिन्यम्, कथञ्च विलयनमित्यत आह। दिव्येन तेजसा प्रतिबन्धादाद्याः परमाणवो द्व्यणुकसारम्भमाणा द्व्यणुकेषु द्रवत्वं नारभन्ते ततो द्रवत्वशून्यैरवयवैर्द्व्यणुकादिक्रमेण द्रवत्वशून्या हिमकरकादय आरभ्यन्ते तेन तेषां काठिन्यमुपलभ्यते। नन्वेवं हिमकरकादीनामाप्यत्वे किं प्रमाणमत उक्तं विलयनञ्च तेजःसंयोगादिति तेजःसंयोगेन बलवता हिमकरकारम्भकपरमाणूनां क्रिया क्रियातो विभागस्ततः आरम्भकसंयोगनाशपरम्परया हिमकरकादिसङ्घावयवविनाशस्तत्र द्रवत्वप्रतिबन्धकतेजःसंयोगविगमात् त एव परमाणवः द्व्यणुकेषु द्रवत्वमारभन्ते ततो द्रवत्ववतां हिमकरकादीनां विलयनं तत्र च बलवत्तेजोऽनुप्रवेशो निमित्तमूढ। ननु बलद्दिव्यतेजोऽनुप्रवेशस्तत्र द्रव्यत्र किं प्रमाणमित्यत आह। तत्र दिव्यासु अप्सु दिव्यानां तेजसामनुप्रवेशे विस्फुर्ज्जथुर्विस्फूर्जः वज्रनिर्घोष एव लिङ्गमित्यर्थः आत्यन्तिकविद्युत्प्रकाशस्तावत्प्रत्यक्ष एव तदनुपदञ्च स्फूर्ज्जथुः सोऽपि प्रत्यक्ष एव तेनानुमीयते यस्मान्मेघात् करकाः प्रादुर्भवन्ति तत्र दिव्यतेजोविद्युद्रूपमनुप्रविष्टं तदुपलम्भेन करकारम्भकाणामपां द्रवत्वप्रतिबन्ध इति८। अत्रैव प्रमाणान्तरमाह। अपां मध्ये तेजोऽनुप्रवेश आगमसिद्ध एवेत्यर्थः। तथा हि "आपस्था अग्निं गर्भमादधीरन् या अग्निं गर्भं दधिरे सुवर्णम्" इत्यादि९०। ननु विस्फुर्ज्जथुः कथमुत्पद्यते संयोगविभागौ शब्दयोनी तौ च नानुभूयेते इत्यत आह। विस्फुर्ज्जथुरितिशेषः अद्भिः स्तनयित्नोः संयोगविभागौ निमित्तकारणीभूय स्तनयित्नोरेवाकाशेन संयोगादसमवायिकारणादाकाशे समवायिकारणे, शब्दं गर्ज्जितं जनयतः। क्वचिच्च वायुबलाहकसंयोगविभागौ निमित्तकारणे बलाहकविद्युत्संयोगविभागावसमवायिकारणे, कर्मकारणाधिकारेऽपि प्रासङ्गिकमिदमुक्तम्,

यद्वा मेघाकाशसंयोगे विभागे वा शब्दासमवायिकारणे कारणम् अपामेव नोदनाभिघातजनितं कर्मेति सूचितं कर्मण एवाधिकारप्राप्तत्वात् ११। भूकर्म प्रत्यदृष्टवदात्मसंयोगः कारणमुक्तं तत्रैवाकस्मिकदिग्दाहहेतोस्तेजसः आकस्मिकदृष्टादिलोभहेतोश्च प्रभञ्जनस्य कर्म यत् संजायते तत्प्रत्यदृष्टवदात्मसंयोगोऽसमवायिकारणम्, वायुतेजसी समवायिकारणम्, अदृष्टं निमित्तकारणमित्यर्थः, कर्मशब्दस्य द्वयादृष्टिसंज्ञोत्क्षादिकर्मसूचनार्थं १२। अदृष्टवदात्मसंयोगासमवायिकारणकं कर्मान्तरमाह। आद्यमिति सर्गाद्यकालीनमित्यर्थः, तदा नोदनाभिघातादीनामभावात् अदृष्टवदात्मसंयोग एव तत्रासमवायिकारणम् आद्यमूर्ध्वज्वलनम् आद्यं तिर्यक्पवनमिति, इतरेषां ज्वलनपवनकर्मणां वेगासमवायिकारणकत्वमेव मन्तुसुचितं दृष्टे कारणे सत्यदृष्टकल्पनानवकाशात् १३। अनाद्यं कर्माधिकृत्याह। सुषुप्तोत्क्षेपणादौ यथा प्रयत्नवदात्मसंयोगासमवायिकारणकं हस्तकर्म तथाऽभिमतविषयग्राहिणीन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रयत्नवदात्मसंयोगासमवायिकारणकमेव। यद्यपीन्द्रियं मनो न साक्षात्प्रयत्नविषयस्तथापि मनोवहनाडीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या, नाड्यास्तु त्वगिन्द्रियग्राह्यत्वमङ्गीकर्त्तव्यम् अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न सम्भवेत् १४। नन्वेवं मनसि कर्म्म उत्पद्यत इत्यत्रैव न प्रमाणमत आह। सुखदुःखे इत्युपलक्षणं ज्ञानप्रयत्नाद्यपि द्रष्टव्यं मनसोवैभवं पूर्व्वमेव निराकृतम्, अणुत्वञ्च साधितम्, युवपज्ज्ञानानुत्पत्तिश्च मनसो लिङ्गमित्युक्तं तेन तत्तदिन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म्म न भवेत् न भवेच्च पादे मे सुखं शिरसि मे वेदनेत्याद्याकारोऽनुभव इत्यर्थः। यद्यपि मनःसन्निकर्षाधीनः सर्व्वोऽप्यात्मविशेषगुणस्तथापि सुखदुःखे तीव्रसंवेगितयाऽतिस्फुटत्वादुक्ते १५। नन्वेवं यदि चपलं मनस्तदा चित्तनिरोधाभावाद्योगं विना नात्मसाक्षात्कारो न वा तमन्तरेण मोक्ष इति शास्त्रारम्भवैफल्यमतआह विषयेष्वलब्धप्रत्ययवत उदासीनस्य बहिरिन्द्रियेभ्योव्यावृत्तं मनो यदात्मस्थमात्मभावनिष्ठं भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् कर्म्म मनसि नोत्पद्यते स्थिरतरं मनो भवति स एव योगः चित्तनिरोधलक्षणत्वाद् योगस्य, तदारम्भ इति मनसः कर्मानारम्भ इत्यर्थः। यद्वा तत्पदेन सुखदुःखे एवाभिधीयेते प्रक्रान्तत्वात्, दुःखाभाव इति दुःखाभावसाधनत्वाद्योग एव दुःखस्याभावः "अन्नं वै प्राणः" इति वत्, यद्वा दुःखस्याभावो यत्रेति बहुव्रीहिः, शरीरस्येति शरीरावच्छिन्नस्यात्मनः, स योग इति प्रसिद्धिसिद्धतया तत्पदम्, अयं स योगः। यद्वात्मपदेनात्र प्राण उच्यते उपचारात् प्राणानुमेयत्वादात्मनः तथा च प्राणवहनाड्यां कर्मणा प्राणकर्मापि जायते यद्वा जीवनयोनियत्नवदात्मप्राणसंयोगासमवायिकारणकं प्राणकर्म, जीवनयोनिश्च यत्नोऽतीन्द्रियः प्राणसञ्चारानुमेयः कथमन्यथा सुषुप्तावस्थायामपि श्वासप्रश्वासगतागतमिति भावः १६। नन्वेवं प्राणस्य मनसश्च कर्म यदि प्रयत्ननिमित्तकं तदा प्राणमनसी यदा मरणावस्थायामपसर्पतः देहाद्बहिर्भवतः देहान्तरोत्पत्तौ तत्र पुनरुपसर्पतः प्रविशतः तत्र प्रयत्नाभावात्तदुभयमनुपपन्नम्, अशितपीतं भक्तपानीयादि तस्यापि शरीरावयवोपचयहेतुर्यः संयोगस्तज्जनकं यत् कर्म यच्च गर्भवासदशायां संयोगविभागजनकं कर्म तेषां कथमुत्पत्तिरत आह। अत्र "नपुंसकमपुंसकेनैकवच्चान्यतरस्यामिति" पा० नपुंसकनिर्देशः, संयोगपदञ्च तत्कारणे कर्मणि लाक्षणिकम्, अपसर्पणं देहारम्भककर्मत्तये देहादेव प्राणमनसोरुत्क्रमणम्, उपसर्पणञ्च देहान्तरोत्पत्तौ तत्र प्राणमनसोः प्रवेशनम्, अशितपीतादिसंयोगहेतुश्च कर्म, कार्य्यान्तरं गर्भशरीरं तत्संयोगहेतुश्च यत् कर्म यच्च तत् सर्व्वमदृष्टवदात्मसंयोगासमवायिकारणकम्, इतिकारेण धातुमलकर्मणामप्यदृष्टवदात्मसंयोगासमवायिकारणकत्वं सूचयति" १७ उप०।

असमवायिन् त्रि० न समवैति सम्+अव+इन-इणि न० त० स्त्रियां ङीप्। १असंबन्धे अभिलिते न्यायेऽपि २समवायसम्बन्धशून्ये जात्यादौ ३असमवायिकारणे च "कारणत्वसमवायिनो गुणाः" वै० सू० "ननु यद्यमूर्त्तत्वात् गुणाः कर्मसमवायिकारणं न भवन्ति तदा गुणैर्गुणाः कर्म्माणि च कथमुत्पद्यन्ते न हि समवायिकारणातिरिक्तत्वरूपेणापि कारणता संभवतीत्यत आह गुणा असमवायिकारणं न तु समवायिकारणमपि येन कर्माधाराः स्युः। सा चासमवायिकारणता क्वचित् कार्य्यैः कार्य्यसमवायात् यथाऽऽत्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागशब्दानां शब्दे, क्वचित् कारणैकार्थसमवायात् यथा कपालादिरूपादीनां घटादिरूपादिषु" उपस्कारः।

असमवृत्त न० न समानि भिन्नलक्षणकत्वात् न तुल्यानि पदानि यत्र कर्म० ।। छन्दःशास्त्रोक्ते १विषमवृत्ते तानि च "सुखपादोऽष्टभिर्वर्णैः परेऽक्षान्मकरालयैः क्रमाद्वृद्धाः"

दृत्यादीनि दृत्त० उक्तानि ज्ञेयानि।ब०।२अनुपमचरिते त्रि०

असमस्त त्रि० सम+अस—क्त न०त०। १असंक्षिप्ते २व्यस्ते "एते व्यस्ताः समस्ता वेति" विश्वामित्रवचनव्याख्याने "व्यस्ताः असमस्ताः" प्रा०त० रघु०। ३असमग्रे व्याकरणोक्तसमासभून्ये विभक्त्यादिकार्य्ययुक्ते ४विग्रहवाक्ये न०।

असमाति त्रि० समं साम्यमतति अत—इन् न०त०। अतुल्ये अनुपमे "एवाहि जातो असमात्योजाः" ऋ० ६,२६,६।

असमान त्रि० न०ब०। अतुल्ये। "समानं लघु चार्थौचं पूर्व्वेणैव विशुध्यति। असमानं द्वितीयेन" यमः।

असमानयानकर्म्मन् पु० न समानं तुल्यकालिकं यानकर्म-यत्र। सन्धिभेदे। त्वमग्रे याहि ततोऽहं यास्यामीति समयं कृत्वा यत्र पूर्व्वोत्तरं जिगीषुभ्यां गम्यते तादृशे यानकर्म्मरूपे सन्धौ। [२समाप्तिशून्ये त्रि०।

असमापन न० अभावे न०त०। १संपूर्त्त्यभावे न०ब०।

असमाप्त त्रि० न समाप्तः। १असम्पूर्णे "असमाप्ते व्रते चैव नैव कुर्य्यात् व्रतान्तरम्" स्मृतिः। संकल्पपूर्व्वं कण्डूतीव्रतस्यासमापने व्रतान्तरस्यात्राकर्त्तव्यताऽत्रोक्ता। आरब्धकर्म्मणः सपूर्त्तिता समाप्तिः। २तच्छून्ये च "असमाप्ते परिकर्म्मणि स्मृतः" कुमा०। ३सम्यगप्राप्ते च।

असमाप्ति स्त्री अभावे न०त०। १समाप्त्यभावे न०ब०। २समाप्तिशून्ये त्रि०। ३सम्यगप्राप्तौ स्त्री ४तच्छून्ये त्रि०

असमावृत्त पु० न०त०। समावृत्तः चीर्णब्रह्मचर्य्यतया गुरुणानुमतः गुरुकुलादावृत्तः गृहस्थकर्म्मकरणाय कृत समावर्त्तसंस्कारः न०त०। तद्भिन्ने ब्रह्मचारिणि स्वार्थे कन् असमावृत्तकोऽप्युक्तार्थे। "मासिकान्नं तयोऽश्नीयादसमावृत्त(वर्त्त)को द्विजः" मनुः। असमावर्त्तकोऽत्र।

असमाहार पु० समाहारो मेलनं संघातः सम्यगाहरणञ्च अभावे न०त०। १तदभावे न०ब०। २तच्छून्ये त्रि०।

असमाहित त्रि० न०त०। १समाधिशून्ये चित्तैकाग्र्यताशून्ये २असन्निवेशिते च।

असमीक्ष्यकारिन् त्रि० समीक्ष्य विविच्य न करोतीति कृ+णिनि। १विवेचनामकृत्वैव कर्म्मकारके, २मूर्खे च।

असमृद्धि स्त्री ऋद्धेराधिक्यं समृद्धिः अभावे न०त०। १ऋद्ध्याधिक्याभावे "नात्मानमवमन्येत पूर्व्वाभिरसमृद्धिभिः" मनुः। न०ब०। २समृद्धिशून्ये त्रि०।

असम्पत्ति स्त्री अनुरूपात्मलाभः सम्पत्तिः लक्ष्मीश्च अभावे न०त०। १सम्पत्त्यभावे। न०ब०। २तच्छून्ये त्रि०।

असम्पन्न त्रि०। सम्पन्नः सम्पद्युक्तः अनुरूपात्मस्वरूपप्राप्तश्च न०त०। तद्भिन्ने। [२संबन्धशून्ये त्रि०।

असम्पर्क पु० अभावे न०त०। १संबन्धाभावे न०ब०।

असम्पूर्ण त्रि० यावत्प्रयोजनानुसरणे समाप्तिप्राप्तवान् सम्पूर्णः न०त०। तादृशपूर्त्तिशून्ये। यथा असम्पूर्णं चन्द्रमण्डलम् "क्रूरग्रहः सकेतुश्चन्द्रमसंपूर्णं मण्डलं भिदानीम्" सुश्रुतः।

असम्पृक्त त्रि० न०। १असंबद्धे २असंयुक्ते।

असम्प्रज्ञात त्रि० न सम्यक् ज्ञातः ज्ञेयादिभेदो यत्र। पातञ्जलोक्ते ज्ञेयज्ञानज्ञातृभेदशून्ये निर्विकल्पके १समाधौ। समाधिस्तावत् द्विविधः सम्प्रज्ञातः असम्प्रज्ञातश्च तत्राद्यः सविकल्पकः ग्राह्यग्रहणग्रहीतृप्रतिभासत्वात् तत्प्रतिभासशून्यो निर्विकल्पकः सर्व्वविकल्पशून्यत्वादसम्प्रज्ञातो द्वितीयः यथाह पात० सूत्रादौ "क्षीणवृत्तेरभिजातस्य मणेर्ग्रहीतृग्रहण ग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" यथाऽभिजातस्यातिस्वच्छस्य मणेः स्फटिकादेः कुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति तथा अभ्यासवैराग्याभ्यां क्षीणवृत्तेरभिभूतरजस्तमोवृत्तिकस्य चित्तस्य स्थूलस्वरूपभूतात्मकग्राह्यैः ग्रहणैरिन्द्रियादिवृत्तिभिः ग्रहीतरि च वितर्कविचारानन्दास्मितानुगमात् तदाकारतापत्तिः समाधिर्भवति सेयं सम्प्रज्ञाताख्या समापत्तिः। तद्भिन्ना च असम्प्रज्ञाता समापत्तिः। संप्रज्ञातभेदादिकं च तच्छब्दे वक्ष्यते। अस्या एव च निर्बीज इति संज्ञान्तरम् "तस्यापि निरोधात् निर्बीजः समाधिः" पात०सू०। सत्वपुरुषान्यताख्यात्यनन्तरं परवैराग्यसंस्कारप्रचयेन तस्य सम्प्रज्ञातसमाधिसंस्कारस्य तत्प्रज्ञायाश्च निरोधे सति सर्व्वस्य सम्प्रज्ञातजन्यसंस्कारप्रवाहस्य निरोधात् समाप्त्याधिकारत्वेन चित्तस्य कृतकृत्यता स्यात् निमित्तापाये नैमित्तिकापाय इति न्यायेन निर्बीजः समाधिर्जायते स च "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" इत्युक्तः आगमेन श्रवणेन अनुमानेन मननेन ध्यानाभ्यासे योरसः परमवैराग्यं तेन प्रज्ञाप्रसादेन प्रज्ञां पुरुषसाक्षात्कारं संपादयन् योगं निर्बीजसमाधिं लभते इति तदर्थः कालक्रमेण निर्बीजसमाधिसंस्कार प्रलये सति स्वप्रकृतौ चित्तं लीयते हेत्वभावात्, कृत्स्नभोगलक्षणाधिकारोहि चित्तस्य स्थितिहेतुः न हि कृतभोगविवेकख्यातिकस्य चित्तस्य कृत्स्नभोगोऽस्ति येन तदधिक्रियेत। प्रकृतौ चित्तस्य प्रलये च पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्तो भवतीति" वृत्ति०। २सम्यग्ज्ञाते च।

असम्मति अव्य० तिङन्तप्र० समा०। १ अयोग्ये काले अनुपस्थितकाले च। "यच्चैव सम्मति दह्येथश्चैवासम्मति" शत० ब्रा०।

असम्बद्ध न० सम्बद्धं परस्परमन्वितं न भवति सम्+बन्ध-क्त न०त०। अर्थानवबोधकेऽन्वितार्थके १वाक्ये। "असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्" मनुः यथा "यावज्जीवमहं मौनीत्यादि" वाक्यम्। २सम्बन्धशून्ये असङ्गते च त्रि०।

असम्बद्धप्रलाप पु० कर्म्म०। १असङ्गते २अप्रस्तुतस्य वा कथने, ३निष्प्रयोजने कथने च।

असम्बन्ध पु० अभावे न०त०। १सम्बन्धाभावे "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्धउदाहृतः" भाषा० २परस्परमन्वयाभावे च "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" जै०सू० न०ब०। ३सम्बन्धशून्ये त्रि०। "असंबन्धकृतश्चैव व्यवहारो न सिध्यति" या०स्मृतिः।

असंबाध त्रि० नास्ति सम्बाधा अन्योन्यं पीड़ा प्रतिबन्धो वा यत्र। १परस्परसंघर्षरूपपीड़ारहिते विस्तीर्णे, २बाधारहिते च। "असंबाधा देवनदी स्वर्गसम्पादिनी शुभा" भा०आ० प०। न सम्यग् बाधा अभावे न०त०। ३सम्यग्बाधाभावे ४चतुर्दशाक्षरपादके वृत्तभेदे च स्त्री मतौ नसौ गावश्च यत्रविरतिरसंबाधा" वृत्त०र०।

असम्भव पु० अभावे न०त०। १सम्भवाभावे "अन्यदेवाङ्गः सम्भवादन्यदाङ्गरसम्भवात्" य० ४०६० "निष्क्रियस्य तदसम्भवात्" सां०सू० न्यायोक्तौ लक्ष्यमाणे २लक्षणानुसरणे। असम्भववारणाय प्रतियोगितावच्छेदकावच्छिन्नं यत्र भवतीतिव्याप्तिलक्षणे प्रतियोगितानवच्छेदकं साध्यतामवच्छेदकमिति कैश्चिदुक्तम्। सम्भवः समावेशः ३तदभावे। सम्भवश्च प्रमाणान्तरमिति अष्टप्रमाणवादिनः पौराणिकाः। सांख्यादिभिस्तु अनुमाने एव तस्य गतार्थत्वमुक्तम् यथाह" सा०कौ०। "सम्भवस्तु यथा खार्यां द्रोणाढकप्रस्थाद्यवगमः स चानुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं सत् द्रोणादिसत्त्वमवगमयति"। व्याख्यातञ्चैतदस्माभिः। "खारीत्वं खारीपरिमाणं महाद्रोपरिमाणेऽवान्तरपरिमाणसमावेशोऽनुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्यापकमिति खारीत्वस्य द्रोणादिपरिमाणाविनाभूततया अनुमानेनैव खारीपरिमाणे द्रोणादिपरिमाणसिद्धिः"।

असम्भवत् त्रि० सम्+भू-शतृ न०त० स्त्रियां ङीप्। असम्भवे वस्तुनि "असम्भवद्घनरसा मृतालीपरिसेविता। करं न सहते राजन्। भूमिर्नववधूरिव" उद्भटः।

असम्भाव्य त्रि० सम्+भू-कर्त्तरि नि०यत्। सम्भवाविषये वस्तुनि "असम्भाव्यं न वक्तव्यमिति" नीतिः। सम्+भू-णिच्-कर्म्मणि यत् असम्भाव्यमप्यत्र त्रि०। "असम्भाव्यं पराभवम्" अथ० ५,१८,१२, "तिर्य्यग्योनावसम्भाव्यमावश्यकमवस्थितः" भा० आदि०प०।

असम्भावना स्त्री अभावे न०त०। सम्भावनाभावे। सम्भावना च यत्र युक्त्युत्कर्षमाविष्कर्तुमशक्तिः निश्चयप्रायौत्कट्यापन्नसंशयश्च।

असम्भावनीय त्रि० न०त०। सम्भावनानर्हे वस्तुनि।

असम्भूति स्त्री सम्+भू-क्तिन् अभावे न०त०। १सम्भवाभावे सम्भूतिः कार्य्योत्पत्तिः सा नास्ति यस्याः। अव्याकृताख्ये प्रकृतिरूपे कारणे "अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते" यजु० ४,९। "असम्भूतिः प्रकृतिः कारणम्" वेददी०।

असम्भृत त्रि० न०त०। १अयत्नसिद्धे "असम्भृतं मण्डनमङ्गयष्टेः" कुमा०। २असम्यक्पुष्टे च।

असम्भेद पु० सम्भेदोमेलनं संसर्गः अन्योन्यरूपताप्राप्तिः भेदश्च अभावे न०त० १तदभावे न०ब०। २तच्छून्ये त्रि०।

असम्भ्रम पु० सम्भ्रमः औत्सुक्यहेतुककार्य्यत्वरा सम्यग् भ्रान्तिः भयहेतुकचित्तक्षोभश्च अभावे न०त०। १सम्भ्रमाभावे "यशस्तुल्यसत्त्वानां सैन्यघोषेऽयसम्भ्रमम्" रघुः। न०ब०। २सम्भ्रमशून्ये।

असम्मत त्रि० न०त०। सम्मतभिन्ने अननुमते "असम्मतः कस्तव मुक्तिमार्गम्" कुमा०। [२तच्छून्ये त्रि०।

असम्मति स्त्री अभावे न०त०। १सम्मत्यभावे। न०ब०

असम्मित त्रि० न०त०। अपरिमिते "तस्यादिमा अतिरिक्ता असम्मिता ओषधयः प्रजायन्ते" शत० ब्रा०।

असम्मुग्ध त्रि० सम्+मुह-क्त न०त०। १अकृतसन्देहे २पाण्डित्याभिमानरहिते च।

असम्मूढ त्रि० न०त०। सम्मूढभिन्ने १स्थिरनिश्चये २भ्रान्तिशून्ये "असम्मूढः स मर्त्येषु" "स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः" इति च गीता।

असम्मृष्ट त्रि० न०त०। १परस्परसंघर्षणशून्ये २बाधाशून्ये च "असंमृष्टोजायसे मातोः" ऋ० ५,११,३। "असम्मृष्टः अबाधितः" भा०। ३संमार्ज्जनशून्ये च। "अग्निमग्नीत्संमृष्टेत्यसंमृष्टमेव भवति सम्मेषितम्" शत० ब्रा०।

असम्मोह पु० अभावे न०त०। १भ्रमाभावे। विरोधे न०त० प्रमात्मके यथार्थे २ज्ञाने "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं

दमःशमः" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्तएव पृथग्विधा" इति गीतायां तेषां भावरूपत्वोक्तेः अयथार्थ-ज्ञानपरत्वम् न०ब० । ३तच्छून्ये स्थिरप्रज्ञे त्रि० ।

असम्यच् त्रि० न०त० । सम्यग्भिन्ने १अनुचिते २अयुक्ते । "असम्यग्व्ययशीलैस्ते" देवीभा० । स्त्रियां ङीप् असमीची

असर पु० सरति सृ-उन् न०त० । (कुकुरसोज्ञा) वृक्षे

असल न० अस्यते क्षिप्यतेऽनेन अस+कलच् । अस्त्रमेदो-पयुक्ते १मन्त्रभेदे २लौहे च ।

असवर्ण त्रि० न समानो वर्णोऽस्य समानस्य सादेशः । असजातीये भिन्नवर्णे यथा ब्राह्मणस्य क्षत्रियादिः । "द्विजानामसवर्णासु कन्यास्वुपयमस्तथा" दक्षसं० ।

असस्वत् त्रि० सस्वतिर्गत्यर्थः निरु०सस्व-शतृ न०त० । १अगम-नशीले स्त्रियां ङीप् "अस्य प्रजावती गृहेऽसस्वन्ती" ऋ० ८।३१।४ । "असस्वन्ती अगमनशीला" भा० । २अपराजिते च "मधुजिह्वा असस्वतः" ऋ०९।७३।४ । "असस्वतः अपराजितान्" भा० ।

असस्वुस् त्रि० सस्व-वा उसुन् न०त० स्त्रियां ङीप् । अप्रतिबद्धे "धानो दोहते तिरहन्नसस्वुषी दुहन्" ऋ०९।८९।१८ । "असस्वुषी अप्रतिबद्धा" भा० ।

असस्वत् त्रि० सस्व-स्वप्ने शतृ न०त० स्त्रियां ङीप् । स्वव्यापारे जागरूके "रेजन्ते असस्वन्तो अजराः" ऋ० १।१४३।३ । "असस्वन्तः स्वव्यापारेष्वस्वप्नन्तः" भा० ।

असह त्रि० न सहते सह-अच् न०त० । अक्षमे असहने

असहन पु०न सहति सह-ल्यु न०त० । १यत्नौ । २क्षमा-शून्ये त्रि० । भावे ल्युट् अभावे न०त० । ३क्षमाभावे

असहाय त्रि० नास्ति सहायोयस्य । १सहचरशून्ये अन्य-सहायरहिते २सङ्गरहिते च "कपालं वृक्षमूलानि कुचेलमसहायता । समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्," मनुः । ["खजनबन्धुजनेष्वसहिष्णुता" नीतिः

असहिष्णु त्रि० न सहिष्णुः । अक्षमे सहनशीलभिन्ने

असह्य त्रि० न सह्यः । सोढुमशक्ये "असह्यपीड़ं भगवन्नु णमन्यमवेहि मे" "द्विषामसह्यः सुतरां तरुणाम्" इति च रघुः । "नववैधव्यमसह्यवेदनम्" कुमा० ।

असाक्षात् अव्य० न०त० । १परोक्षे २इन्द्रियायोग्ये च ।

असाक्षात्कार पु० अभावे न०त० । १प्रत्यक्षाभावे विरोधे न०त० । २ परोक्षज्ञाने न०ब० । ३ प्रत्यक्षाविषये ४तच्छून्ये च त्रि० ।

असाक्षिक त्रि० नास्ति साक्षी साक्षाद्द्रष्टा अधिष्ठाता वा यस्य कप् । १साक्षिशून्ये "असाक्षिकेषु त्वर्थेषु मिथोवि वदमानयोः" मनुः । २अधिष्ठातृशून्ये च असाक्षिका जड़प्रकृतिरनुचितेति वेदा० प्रक० ।

असाक्षिन् त्रि० न साक्षी । स्वयुक्ते वचनतो दोषादितोवा साक्ष्यकर्म्मसु अप्राहेय श्रोत्रियादौ । असाक्षिणश्च मिता० दर्शिताः "उक्तलक्षणानां साक्षिणामसम्भवे प्रतिषेधरहि-तानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्याः ते च पञ्चविधा नारदेन दर्शिताः "असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः । वचनाद्दोषतोभेदात्स्वयमुक्ति-र्मृतान्तर" इति । के पुनर्वचनादसाक्षिण इत्याह । "श्रोत्रियास्तापसा दक्षा ये च प्रव्रजितादयः । असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः" याज्ञ० तापसादानप्रस्थाः । आदिशब्देन पित्राविवदमानादीनां ग्रहणम् । यथाह शङ्खः । "न पित्राविवदमानगुरुकुलवासिपरिव्राजकवान प्रस्थनिर्ग्रन्थयः साक्षिण" इति दोषादसाक्षिणो दर्शिता नारदेन "स्तेनाः साहसिकाश्चण्डाः कितवा मद्यपास्तथा । असाक्षिणस्ते दृष्टत्वात्तेषु सत्यं न विद्यते" इति । चण्डाः कोपनाः कितवाद्यूतकृतः । भेदादसाक्षिणाञ्च स्वरूपमेवैव दर्शितम् । "साक्षिणां लिखितानां च निर्दिष्टानाञ्च वादिना । तेषामेकोऽन्यथा वादी भेदात्सर्वे न साक्षिण" इति । तथा स्वयमुक्तिस्वरूपमुक्तम् । "स्वयमुक्तिरनिर्दिष्टः स्व-मेवेत्य यो वदेत् । सूचीलुप्तः सभास्थेषु न स साक्षित्वमर्हतीति" । मृतान्तरस्यापि लक्षणमुक्तम् । "योऽर्थः श्रावयि-तव्यः स्यात्तस्मिन्नसति चार्थिनि । का तद्वदतु साक्षित्व मित्यसाक्षी मृतान्तर" इति । येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेत् तयोरसत्यर्थे साक्षिण इति । तस्मिन्नर्थिनि प्रत्यर्थिनि वा असति मृतेऽर्थे च अनिवेदिते साक्षी का कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वद-तिति मृतान्तरः साक्षी न भवति । यत्र तु सुमूर्षुणा स्वस्थेन वा पित्रा पुत्रादयः श्राविताः अस्मिन्नर्थे अमी साक्षिण इति । तत्र मृतान्तरोपि साक्षी । यथाह नारदः । "मृतान्तरोऽर्थिनि प्रेते सुमूर्षुश्राविताऽऽते" । तथा । "श्रावितोनाऽतुरेणापि यस्त्वर्थो धर्मसंहितः । मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्वाहितादिषु" । तानेवासाक्षिणो दर्शयति । "स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः" । रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः । पतिताप्तार्थ-सम्बन्धिसहायरिपुतस्कराः । साहसी दृष्टदोषश्च निर्भूताद्याश्चसाक्षिणः" । स्त्री प्रसिद्धा । बालोऽप्राप्तव्यव-

ङारः । इङ्गोऽशीतिकावरः वृद्धयहणं वचननिषिद्धा नामन्येषामपि श्रोत्रियादीनामुपलक्षणम् । कितवोऽक्षदेवी । मत्तः पानादिना, उन्मत्तो यक्षाविष्टः । अभियस्तः, अभियुक्तो ब्रह्महत्यादिना । रङ्गावतारी चारणः पाषण्डिनो निर्ग्रन्थिप्रभृतयः । कूटकृत् कपटलेख्यादिकारी विकलेन्द्रियः श्रोत्रादिरहितः पतितः ब्रह्महादिः । आप्तः शुद्धत्, अर्थसम्बन्धी विप्रतिपद्यमानार्थसम्बन्धी । सहाय एककार्यः रिपुः शत्रुः तस्करः स्तेनः साहसी सबलावष्टम्भकारी दुष्टदोषो दुष्टवितथ वचनः । निर्धूतो बन्धुभिस्त्यक्तः । आदिशब्दादन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणामेषां दोषादसाक्षिणां स्वयमुक्तेर्मतान्तरस्य च ग्रहणम् । एते स्त्रीबालादयः साक्षिणो न भवन्ति" मिता० । अत्रापवादः "सर्व्वः साक्षी संग्रहणे चौर्ये पारुष्यसाहसे"। या० स्मृ० संग्रहणादौ सर्व्वे वचननिषिद्धाः श्रोत्रियादयः तपःप्रभृति गुणरहिताश्च साक्षिणोभवन्ति । दोषादसाक्षिणो भेदादसाक्षिणः स्वयमुक्तिश्चात्रापि साक्षिणो न भवन्ति सत्याभावादिहेतोस्तेषु विद्यमानत्वादिति" मिता० ।

असाधन न० अभावे न०त० । १सम्यादनाभावे साधनं हेतुः न०त० । २अकारणे न० ब० । ३कारणशून्ये ।

असाधारण त्रि०साधारणं सामान्यधर्मयुक्तं न०त० । १तद्भिन्ने, तन्मात्रवृत्तिधर्मयुक्ते विशेषे २अधिके च । न्यायमते "यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मत" इत्युक्ते ३सपक्षविपक्षाव्यावृत्तौ हेतौ पु० । यथा वह्निसाधने गगनादिहेतुः स च पक्षे पर्व्वतादौ, पक्षभिन्ने जलादौ च न विद्यते गगनादेः कुत्रापि विद्यमानत्वाभावात् इति तस्य तथात्वम् "साधारणासाधारणयोर्मध्येऽसाधारणे कार्य्यसंप्रत्यय" इति न्यायः । ४स्वमात्रस्वत्वास्पदीभूते इतरस्वत्वरहिते धनादौ च । स्त्रियां ङीष् गौरा० । "पिता पुत्रान्तरेष्वपि साधारणः माता त्वसाधारणी" मिता० ।

असाधारणानैकान्तिक पु० कर्म० । न्यायोक्ते सर्व्वसपक्षव्यावृत्ते हेत्वाभासभेदे यथा शब्दोनित्यः शब्दत्वात् अत्र शब्दत्वं सर्व्वनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिरिति तस्य तथात्वम् ।

असाधु त्रि० न०त० । १साधुभिन्ने, २असज्जनिते, ३दुष्टे "अतोऽर्हसि क्षन्तुमसाधु साधु वा" किरा ४संस्कृतशब्दभिन्ने, अप्रशस्यादौ च । "असाधुरनुमानेन" "असाधूनां प्रयोगे तु प्रत्ययोऽपि नो तथा इति" च हरिः । स्त्रियां ङीप् । असाध्वी भारती असाध्वी योषित् इत्यादि ।

असाध्य त्रि० साधयितुमशक्यः । १साधयितुमशक्ये रिपौ रोगादौ च "असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" माघः । असाध्यरोगाश्च सुश्रुते उक्ताः ते च अवारणीयशब्दे ४४६ पृष्ठे दर्शिताः "अर्द्धं साध्यमधोयाप्यमसाध्यं युगपद्गत" मित्यादयोऽपि विशेषतोऽसाध्या वैद्यके उक्ताः ततएव ते वेदितव्याः । [समर्थे

असान्तापिक त्रि० सन्तापाय न प्रभवति ठञ् । सन्तापाया-

असान्द्र त्रि० विरोधे न०त० । अनिविड़े विरले ।

असामञ्जस्य न०अभावे न०त० । १सामञ्जस्याभावे २अयुक्तत्वे ३सन्निवेशासम्भवे च न०ब० तच्छून्ये त्रि० ।

असामर्थ्य न० अभावे न०न० । सामर्थ्याभावे अपाटवे । "कालदोषादसामर्थ्यात् सर्व्वं तत् सफलं स्मृतम्" "असमार्थ्यात् शरीरस्य कालशक्त्याद्यपेक्षया । मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः" योगिया० ।

असामयिक त्रि० समयोऽस्य प्राप्तः ठञ् न०त० । अप्राप्तकाले "किमसामयिकं वितन्वता मनसः क्षोभमुपान्तरंहसः" किरा० ।

असामान्य त्रि० नास्ति सामान्यं तुल्यता यस्य । अनुपमे । अभावे न०त० । तुल्यत्वाभावे त्रि० । असाम्यमप्यत्र ।

असाम्प्रतम् अव्य० न साम्प्रतम् युक्तं न०त० । अयुक्ते । "विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्" कुमा० "सम्प्रत्यसाम्प्रतं वक्तुमुक्ते सुषमपाणिना" माघः "अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्" रघुः ।

असार पु० न०नास्ति १सारो यस्य । सारहीने एरण्डे वृक्षभेदे । २निष्फारे त्रि० । "असारः खलु संसारः" इत्युद्भटः । "निदर्शनमसाराणां लघुर्वृक्षस्तृणं नरः" माघः "धिगिमां देहभृतामसारताम्" रघुः । ४अगुरुचन्दने न० राजनि० । न०त० । ३सारभिन्ने तुच्छत्वे पु० ।

असावधान त्रि० न०त० । अवधानहीने प्रमत्ते ।

असाहाय्य न० अभावे न०त० । १साहाय्याभावे । न०ब० । २साहाय्यशून्ये त्रि० ।

असि अव्य० अस-दोप्तौ इन् विभक्ति प्रतिरूपकम् । त्वमित्यर्थे "कृतवानसि विप्रियं न मे" कुमा० "धन्यासि वैदर्भि ! गुणैरुदारैः" नैष० । "शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ! इति नीतिः ।

असि पुंस्त्री० असति सेवनेन पापानि इन् वा ङीप् । वाराणसी दक्षिणस्थे १नदीभेदे वाराणसीशब्दे विवृतिः । असते क्षिप्यते

अस-क्त्रन्। २खड्गे पु०"असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते। इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा"। खड्गपूजामन्त्रः, "सर्व्वाः श्यामाः असिकरा मुण्डमाला विभूषिताः" श्यामाकवचम् खड्गलक्षणन्तु वृह०उक्तम् "अङ्गुलयतार्धमुत्तम जनः स्यात्सञ्चविंशतिः खड्गः। अङ्गुलानाजत्रयो व्रणोऽशुभो विषमपर्व्वस्थः॥ श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाजानाम्। सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥ लकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः। खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च॥ स्फुटितो हुस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः। अस्वन इति चानिष्टः प्रोक्तविपर्य्यस्त इष्टफलः॥ कथितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात्। स्वयमुन्नीर्णे युद्धं ज्वलिते विजयो भवति खड्गे॥ नाकारणं विदण्डयान्न विघट्टयेच्च प्रश्नेन तत्त्व वदनम् न वदेच्च मूल्यम्। देशं न चास्य कथयेत् प्रतिमानयेच्च नैव स्पृशेन्नृपतिरप्रवतोऽसियष्टिम्॥ गोजिह्वा संस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रमूलाग्यमण्डलाग्याः प्रशस्ताः खुः॥ निम्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः। मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने॥ यस्मिन् त्वरप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य। वनितानामिव तिलको शुद्धेर्व्रणो सुखे दृष्टा॥ अथ वा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदवधार्य। कोशस्थस्यादेश्यो व्रणो ऽस्ति शास्त्रं विदित्वेदम्। शिरसि स्पृष्टे प्रथमे ऽङ्गुले द्वितीये ललाटसंस्पर्शे। भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च॥ नासोष्ठकपोलकुक्षिवक्षोग्रीवांसकेषु पञ्चाद्याः। उरसि द्वादशसंस्थस्योदरे कक्षयोर्त्रयः॥ स्तनहृदयोदरकुक्षिनाभीषु चतुर्दशादयो ज्ञेयाः। नाभीमूले कट्यां शुद्धेश्चैकोनविंशतितः॥ जघनेर्द्वाविंशे स्याद् जघनेमध्ये व्रणस्त्रयोविंशे। जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥ जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च। षड्विंशतिकाद्यावत्त्रिंशदिति मतेन मुनेश्च॥ पुत्रमरणं धनाग्निर्धनहानिः सम्पदश्च बन्धश्च। एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत्क्रमशः॥ सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ। क्रमशो विनाशवनिताग्निचित्तदुःखानि षट्प्रभृति॥ लब्धिर्हानिस्त्रीलब्धयो वधो दृष्टिमरणपरिक्लेशाः। ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥ वित्ताग्निरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम्। ऐश्वर्य्यमृत्युराज्यानि च क्रमात्त्रिंशदिति यावत्॥ परतो न विशेषफलं विषमसमस्थास्तु पापशुभफलदाः। कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽप्यनिति यावत्॥ करवीरोत्पलनजमदष्टकुङ्कुमकुन्दचम्पकसगन्धः। शुभदोऽनिष्टो गोमूत्रपङ्कभेदःसदृगगन्धः॥ कूर्मवसारक्तक्षारोपमश्च भवदुःखदो भवति गन्धः। वैदूर्यकनकविद्युत्प्रभो जयारोग्यदस्त्रिकरः॥ दृदमौशनसं च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्ताम्। कृविषा गुणवत्सुतामभिलिप्सोः सलिलेनात्मयमिच्छतश्च वित्तम्॥ बडवोष्ट्रकरेणुदुग्धपानं यदि पायेन समीहते ऽर्थसिद्धिम्। ऋषपित्तहृगाश्वखरदुग्धैः करिकृष्णच्छिदये सतालगर्भैः॥ आर्कं पयो कुडुविषाणमसीसमेतं पारावताखुशकृता च युतं प्रलेपः। शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्। सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्" वृ०स०। हेमा०परि० ख० तु तज्जात्यादिभेदात् फलभेदादिकं दर्शितं यथा "वत्स! पुरा भूतपूर्वैराचार्यैरुपदिष्टश्चैव यन्मयाऽनुसं तदुपदिशामि निबोध खड्गस्य लोहं षड्विधं भवति। योनयः षड्विधाः संस्थानं चतुर्विधं करणमा;कृतिर्द्विधा द्वादश स्थानि गौरवं पञ्चदशधा विस्तारस्त्रिविधः वर्णच्छायाव्रणगुणगन्धस्वरेण वा यत्र विशेषा भवन्ति तत्कीर्त्यमानं निबोध तीक्ष्णं मृदु स्निग्धं खरं रूक्षं तीक्ष्णं वज्रं चेति जातयः षट्भवन्ति वालुका मृत्पाषाणः पङ्कोधातुस्रावश्चेति योनयः पञ्चधा भवन्ति। पीतेभ्यस्तीक्ष्णं भवति। नीलेभ्योमृदु भवति। स्निग्धेभ्यःस्निग्धं खरेभ्यः खरं भवति। रक्तेभ्योरूक्षेभ्योमृदुतीक्ष्णं भवति। रक्तसैन्धवसन्निभैर्हरिद्भिः स्निग्धं यदन्तः उत्पद्यते लोहं तद्वज्रायुधधाम भवति। तच्च पाषाण एव पूजित इति। भवन्ति चात्रश्लोकाः। तापं चिरादेव विचूर्णितञ्च भिन्नाञ्जनाभं बहुरूक्षहीरम् पीतं भवेत् निर्मलरूक्षवर्णं सर्वाणि लोहानि भिनत्ति तीक्ष्णम्। सन्नम्यते तापसुपैति चाशु श्वेतं भवत्येव मलावनद्धम्। यत्स्थूलहीरन्नपुबद्धवर्णं सर्वेषु कार्य्येष्वपि तन्मृदु स्यात्। श्वेतं भवत्यायधिकं स्थिरञ्च संघट्टनामेति चिराच्च तापम्। संघातलोहेन चिराद्वियोगं स्निग्धञ्च लोहं प्रवदन्ति तज्ज्ञाः। खरं विशीर्य्येत न चैति योगम् सर्वत्र योग्यं मृदुतीक्ष्णमाहुः। यज्जातरूपं न च दह्यतेऽग्नौ तद्वज्रलोहं प्रसमीक्ष्य

वाच्यम् । तीक्ष्णस्य मृदुनः खरस्य स्निग्धस्य मृदुतीक्ष्णस्य वज्रलोहस्य च चित्रेयं कुट्टिमङ्कोशगर्भमेककोशगर्भं कुट्टिमकोशगर्भम् । सुतीक्ष्णं करणप्रवरं भवति । मृदुतीक्ष्णं मध्यमगर्भं कुट्टिमञ्च कारयेन् मृदुतीक्ष्णकुट्टिमं कोशगर्भमेकगर्भालयं वेति तथा तीक्ष्णं मन्दं वेति विविधमायसं भवति । तीक्ष्णस्य कुलानि उपकुलानि पुनः सृष्टानि वीतकपुष्कलावेतकं यावङ्गाधिकमङ्गोल्लं मयूरं हमालं वीरंकां वरं पुष्करार्कं पुष्कराङ्गक्रोडिनं वर्वरं रौद्रं शालिकं किल्किन्धं विस्फुलिङ्गं वाह्लीकं सुराष्ट्रायसं वेति तीक्ष्णयोनयो भवेयुरेकविंशतिरथ मन्दायसो वक्ष्यते । काम्बोजं काण्डवारं हंसपालं नीलाण्डं खर्यारङ्गाष्टमलयं पुन्नागपर्वतं यावतन्दं तीक्ष्णं कलिपार्वतीयं सिंहालकं वानवासीसिन्धुकं मूषकं नीलाण्डं मागधं देवान्तं मेनकं वाह्लीकं पारवं क्रथं शट्टाकं शाण्डिलं पालकं तुरुष्कतोलकं चित्रपालं नीलासुखं कूणीराष्ट्रं महेन्द्राष्ट्रं विचर्तुकं वेति लोहाः त्रिंशदेका भवन्ति । कुलानां संग्रहाद्विविधा लोहा तन्निबोध सम्म भवन्ति । मार्दवस्य खरस्य त्वष्टौ स्नेहान्वितस्य पुनः षड्गवन्ति । मृदुतीक्ष्णस्य दशैवसर्वज्ञायसस्त्वेकमेवेति कुलान्येतानि संग्रहादुक्तानि तत्र काम्बोजं काण्डवारं हंसपालं नीलाण्डं खरस्तैतानि भवन्ति । पावनं वटतीक्ष्णं कालिङ्गं पार्वतीयं सिंहालं वङ्गवालञ्च चेति स्नेहान्वितस्तैतानि कुलानि षड्भवन्ति । नीलासुखं कूणीराष्ट्रं महेन्द्राष्ट्रं विचर्तुकं सौपरं काष्टमलयं पुन्नागपर्वतं सिन्धुकं मूषिकं दक्षिणासुखं चेति मृदुतीक्ष्णस्य दशैतानि कुलानि भवन्ति । षष्टन्तु लोहं वेद्यान्तरगुहासु जायते तच्च वज्रलोहमिति विद्यात् । परमेतानि वज्रायसविवर्जितानि त्रिंशदेकाधिकानि । मृदु तीक्ष्णं मृदुतीक्ष्णं स्निग्धं खरं चेति । वीतकादीन्येकविंशतिं कुलानि वक्ष्यन्ते यत्र दृढत्वं बलवत्त्वं स्निग्धता लाघवङ्गौरवं च विशेषात्तत्र तत्र विविधं भवति सुताप्तनकर्म्मणि तत्र छिन्नपाटलानिभं भवति । यत्र वचस्यां दृश्यन्ते त्रुटिते त्रुण्टिते वा सुताप्तनेऽपि त्रुट्यमानं सकृदेव प्रभज्यते भल्लेऽग्रे च सर्वदक्षिणतो वैवर्ण्यं भजेन्नात्यकरटकच्छायावा स्यात् सिन्धासौवभिभा वा श्वेतलतनिस्नावतोरहान्यैव तत् मृदुलोहमिति विद्यात् । तयाणां चीनकादीनां लक्षणं वक्ष्यते आकृत्या संस्थानेन वर्णेन गन्धेन शब्देन क्रमशः स्यात् पृथक् वेतसवञ्जुलपत्राणामाकृतिः करवीरपत्राणां वा भवति । षड्भिर्युतं भिन्नकैरष्टाभिश्चतुरश्रेर्वा दृत्तं विपुलं वा नालशूलाकृतिर्वेति । संस्थानतःपरीक्षणीयम् निर्गुण्डीकुसुमानामिव यत्र वर्णोऽञ्जनालक्तकयोर्वा मयूरकण्ठच्छविः शुकपिच्छनिभः । काककोकिलसदृशोमक्षिकाभो वेति । वर्णतः परीक्षितव्यं चानुलोहम् । तथा अङ्गोलशोत्पलस्य मूषिकायाः पलस्य मधुकस्य वा गन्ध इति गन्धतः परीक्षणीयम् । तथा कांस्यघण्टाया वलाकानां शब्दइव शब्दो विस्फुलिङ्गायायस्येति शब्दतः परीक्षणीयाविज्ञातव्याः" । उपकुलादि विस्तरभयान्नोक्तम् "युग्माङ्गुलाः प्रशस्ताः अयुग्माङ्गुला विगर्हिताः खड्गास्ते कोऽपि ब्राह्मणस्य परिग्रहाधमनाशं दिशन्ति क्षत्रियस्यार्थविनाशं कुलक्षयं कुर्वन्ति वैश्यस्य तु सद्योवधमावहन्ति शूद्रस्य न कदाचिदपि दृष्टिकराः सुखधा व्रणाः छायास्निग्धवर्णाः पूजिताः छिन्ना रूक्षवर्णाश्रुक्षानुज्वलाश्च भर्तुरपजयाय सृष्टिगर्हिताः" । त्रिकोणाःपञ्चकोणाश्चतुरस्राव्रणाः प्रशस्ताः । अनुलोमाश्च प्रतिलोमाश्च प्रशस्तदीर्घतायै खड्गस्य भवन्ति । ते प्रतिलोमावेदितव्याः खड्गस्यानुगता अनुलोमा व्रणापदेशो वक्ष्यते । पूजितोनिन्दितश्च यदि खड्गाद्योऽङ्गुले दृश्येत तदा पुत्तमरणम् । द्व्यङ्गुले पुत्तदृद्धिरत्र्यङ्गुले पुत्तधननाशश्चतुर्थे पुत्तमङ्गल्यम् पञ्चाङ्गुले मरणं नरपशूनाम् । षड्ङ्गुले कर्म्मसिद्धिः पशुलाभश्च सप्ताङ्गुले कलहेन विनाशं भर्तुः करोति । व्रणोऽष्टाङ्गुले मित्रप्राप्तिं धनस्थितिं च कुर्यात् । नवाङ्गुले भ्रातृवधान्यविनाशञ्च भर्तुः करोति, दशाङ्गुले मित्रभृत्यानां लाभं सम्मद्विवृद्धिञ्च, एकादशाङ्गुले संग्रहणं मित्रविरोधञ्च । द्वादशाङ्गुले मित्रलाभञ्च भोगं सुखं च । त्रयोदशाङ्गुले प्रभुविनाशं चतुर्दशाङ्गुले प्रियतां गौरवञ्चलाभं च, पञ्चदशाङ्गुले शत्रुविवृद्धिम् । षोडशाङ्गुले शत्रुविजयं सप्तदशाङ्गुले भयम्, स्त्रीलाभम् अष्टादशाङ्गुले, शत्रुवधम् जनविप्रियं, एकोनविंशाङ्गुले, मरणम् एकविंशत्यङ्गुले, शत्रुजनितं नाशञ्च । द्वाविंशत्यङ्गुले राष्ट्रपालनं परराष्ट्रविनाशं च त्रयोविंशत्यङ्गुले विंशतिवर्षादेव मरणम् । चतुर्विंशत्यङ्गुले भूषणागमम् । पञ्चविंशत्यङ्गुले, भार्याविरागम्, षड्विंशत्यङ्गुले प्रियगुणलाभं, स्वभार्याविरागन्तु सप्तविंशत्यङ्गुले, विपुलश्रियोलाभमष्टाविंशत्यङ्गुले, एकोनत्रिंशत्यङ्गुले दृढभावे भ्रातृभि र्भेदम्, त्रिंशदङ्गुले दृढिमजिरंचेति खड्गे व्रणः करोति । तथा एकत्रिंशदङ्गुले सभृत्यस्त्रीवाहनं भर्तारं विनाशयति । द्वात्रिंशदङ्गुले पराजयमरिभिः करोति । त्रयस्त्रिंशदङ्गुले भर्तारं पीडयति नीचस्य च कर्मणो वशगङ्करोति ।

चतुस्त्रिंशदङ्गुले धन्यं दानधर्मभाजनं च पञ्चत्रिंशदङ्गुले मरणं सद्यः करोति । षट्त्रिंशदङ्गुले विजयं भर्त्तुर्ददाति सप्तत्रिंशदङ्गुले पराभवमरिभिः करोति । अष्टत्रिंशदङ्गुले शत्रुप्रमर्दनं करोति नवत्रिंशदङ्गुले कुजनैरेव परिक्लेशं नयति । चत्वारिंशदङ्गुले कन्यालाभमरिजयं च प्राप्नोति व्रणेन खड्गस्थितेन । तथैकचत्वारिंशदङ्गुले शत्रुभ्यः पीड़नाङ्गयं लभते द्विचत्वारिंशदङ्गुले खराष्ट्रवर्द्धिमन्त्रिणं त्रिचत्वारिंशदङ्गुले दुःखं प्राप्नोति सेनापतिरेव भर्त्ता भवति । चतुश्चत्वारिंशदङ्गुले श्रियं विपुलां लभते । पञ्चचत्वारिंशदङ्गुले व्रणो भयङ्क षट्चत्वारिंशदङ्गुले व्रणाः सुखावाहा भवन्ति । सप्तचत्वारिंशदङ्गुले खपक्षं पीड़यति परपक्षं वर्द्धयति अष्टाचत्वारिंशदङ्गुले राजश्रियं भुङ्क्ते एकोनपञ्चाशदङ्गुले शत्रोर्विजयं लभते । पञ्चाशदङ्गुले कुलवृद्धिर्भवति" । एकत्रिंशदाद्यङ्गुलिषु व्रणे फलविशेषोऽभिहितः । अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम् । प्रधानदेहसंभूतैरन्यास्थिभिररिन्दमः । लोहं प्रधानं खड्गार्थे प्रशस्तं तद्विशेषतः । खरीकटुरूक्षिकावङ्गस्तूर्य्यारकेषु च । विदेहेषु तथाङ्गेषु मध्यमग्रामचेदिषु । सह्यग्रामेषु वीरेषु तथा कालञ्जरेऽपि च । लोहं प्रधानं खड्गानां नवानां शृणु लक्षणम् । खरी कटुरूजा ये च दर्शनीयाश्च ते स्मृताः । कार्ये दत्ताश्च क्षिप्रिकाभद्रवो गुरवस्तथा" तीक्ष्णाग्ल्येट्सहा वङ्गा दृढाः स्तूर्य्यारकोद्भवाः । सुदृढाश्चैव विज्ञेया प्रभवन्ति विदेहजाः । अङ्गदेशोद्भवास्तीक्ष्णाः सह्यजास्ते दृढास्तथा । वेगवन्तस्तथा तीक्ष्णाश्चेदिग्रामसम्भवाः । असारलघवस्तीक्ष्णाश्चेदिदेशसमुद्भवाः । सह्यग्रामोद्भवाः खड्गाः सुतीक्ष्णालघवस्तथा । निर्वला निर्मला खड्गावीरदेशसमुद्भवाः । कालञ्जराभारसह्यास्तेषां वक्ष्यामि लक्षणम् । शतार्द्धमङ्गुलानां तु श्रेष्ठः खड्गः प्रकीर्त्तितः । तदधोमध्यसंज्ञाभाक् ततोहीनं न धारयेत् । प्रमाणाभ्यधिकं देव ! क्षिप्रवंशन्तथैव च । दीर्घः सुमधुरःशब्दोयस्य खड्गस्य भार्गव ! ॥ किङ्किणीसदृशस्यस्य धारणम् श्रेष्ठमुच्यते । खड्गः पलपलाशाग्रोमरुडलाक्षश्च शस्यते । करवीरपलाशाग्रसदृशश्च विशेषतः । महीद्विपसगन्धश्च मद्गोत्पलसुगन्धिकः । वर्षुतश्चोत्पलाकारः सवर्णो गगनस्य च । समाङ्गुलस्याः शस्यन्ते व्रणाः खड्गेषु भार्गव ! । श्रीवृक्षपर्वताकारवंशवस्तनिभाश्च ये । मङ्गल्यानां तथान्येषां सदृशा ये च भार्गव ! । काकोलूकार्कबन्धा भा विषमाङ्गुलिसंस्थिताः । वंशानुगाः प्रभूताश्च न प्रशस्ता कदाचन । खड्गे न पश्येद्व्रणं दृष्ट्वा न दृष्ट्वादृष्टम् । न चास्य कथयेन्मूल्यं जातिं देशं कथञ्चन । उत्कृष्टो न स्पृशेत् खड्गं निशि कुर्याच्च शीर्षके । दिवा च पूजयेदेनं गन्धमाल्यादि सम्मदा । खड्गं प्रशस्तं मणिहेमचित्रं कोशे सदा चन्दनचर्च्चयाढ्यम् । संस्थापयेद्भूमिपतिः प्रयत्नान् यतेत चेद्द खशरीरवृद्ध्यै" विष्णुध० । देवीपु० । "खड्गस्य लक्षणं वक्ष्ये त्रिशिखस्य तु सुन्दरि ! । नान्यशस्त्रोद्भवं कार्यं मृदुलोहमयन्तथा । स्फुटितं खण्डितं रूक्षं सव्रणं साधितं तथा । मृदुलोहेनचारभ्य सन्धितो मरणं भवेत् । सव्रणेनापि रूक्षेणो रेखायां पातकी भवेत् । भार्य्या माता तथा पुत्रो म्रियते खण्डितेन च । रूक्षेण लाघवं लोके दीर्घतापि स्फुटिद्रा । अन्यशस्त्रोद्भवेनापि संभवेन्मरणम् ध्रुवम् । पञ्चाशदङ्गुलं खड्गं त्रिशिखञ्च सुरेश्वरि । ईदृशङ्कारयेत्खड्गं राज्ञां सिद्धिफलप्रदम्" । असते क्षिप्यते असु-क्रन् । ३श्वासे "तिस्रः पत्न्योऽसिपद्यान् कल्पयन्त्यस्य सूचीभिः" काल्या० २०।७।१ । "असेः श्वासस्य पद्यः मार्गान्" कर्क० त्रि० । ४क्षिप्ते असगखड्गः । [हेम० ।

असिक न० असि-संज्ञायां कन् । अधरचिबुकयोर्मध्यभागे-

असिक्नी स्त्री सो-क्त सिता केशादौ शुभ्रा जरती तद्विज्ञा अदृष्टा क्नादेशः ङीप् च । अन्तःपुरचारिण्यामदृष्टायां १प्रेष्यायाम्, २नदीभेदे च । ३रात्रौ निरु० तस्याश्च सूर्य्यतेजःशून्यतया असितत्वात् तथात्वम् "त्वमसिक्नी भूमनो दिवस्परि" ६।७२।५। "त्वद्भिया विश्वमायन्नसिक्नीरसमानाः" ऋ० ७।५।३ । असिक्नीरसितवर्ष्णो राजसः" भा० वीरस्य प्रजापतेः ४कन्याभेदे । असिक्नीभावहत् पत्नीं वीरणस्य प्रजापतेः" इति हरिः० ३अ० । "छन्दसि क्नमेके" वार्त्ति० उक्तेः छन्दस्येवायं क्नादेशः लोके तु क्वचित् । "असिक्नी स्यादृष्टायामित्यमरः" ।

असिगण्ड पु० असिः चिह्नोगण्डो यत्र । गण्डोपधाने ।

असिजीविन् पु० असिना तद्व्यापारेण जीवति जीव-णिनि । शस्त्रव्यापारेण युद्धादिनाजीविकावति विप्रस्य तथात्वे निन्द्यत्वम् "असिजीवी मसीजीवी कारुश्च पुरुषस्य घातक" इत्युक्तेः ।

असित पु० सितः शुभ्रः विरोधे न० त० । १शुभ्रवर्णभिन्ने तद्विरुद्धे कृष्णवर्णे । २तद्वति त्रि० । ३कृष्णपक्षे पु० । ४नीलोपलौ अन्तःपुरचारिण्यामदृष्टायां ५प्रेष्यायाञ्च स्त्री ङीप् कृष्णवर्णपरतया क्नश्च असिक्नीत्येव । "असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्,, युष्मदुक्तः "तन्तुभवभ्यश्चसितम्" ऋ० ४,१३,४, ५यमुनायां तस्याः कृष्णवर्णत्वात् तथात्वम्

स्त्री "सितासिते यत्र सरिद्वरे शुभे" काशी०। अस्याः स्त्रीत्वेऽपि छन्दसीत्युक्तेः न ङीः तेन ङीवपि न। ६देवले ऋषिभेदे पु०। "असितोदेवलोव्यासः स्वयञ्चैव ब्रवीषि मे" गीता। असितसुनिश्च हिमवतः एकपर्णा नाम सुतामुपयेमे यथाह हरि० १८ अ०। "तिस्रः कन्यास्तु मेनायां जनयामास शैलराट्। अपर्णामेकपर्णाञ्च तृतीयामेकपाटलाम्। तपश्चरन्त्यः सुमहद्दुश्चरं देवदानवैः। लोकान् सन्तापयामासुस्तास्तिस्रः स्थाणुजङ्गमान्। आहारमेकपर्णेन एकपर्णा समाचरत्। पाटलापुष्पमेकञ्च आदधावेकपाटला। एका तत्र निराहारा तां माता प्रत्यषेधयत्। उमा इति निषेधन्ती मातस्नेहेन दुःखिता। सा तथोक्ता तदामात्रा देवी दुश्चरचारिणी। उमेत्येवाभवत् ख्याता त्रिषु लोकेषु सुन्दरी तथैव नाम्ना तेनेह विश्रुता योगधर्मिणी"। एवं त्रिस्रःकुमारीर्वर्णयित्वा। "सर्व्वाश्च ब्रह्मवादिन्यः सर्व्वाश्चैवोर्द्ध्वरेतसः। उमा तासां वरिष्ठा च ज्येष्ठा च वरवर्णिनी। महायोगबलोपेता महादेव मुपस्थिता। असितस्यैकपर्णा तु देवलस्य महात्मनः। पत्नी दत्ता तथा ब्रह्मन्! योगाचार्य्याय धीमते। जैजीषव्याय तु तथा विद्धि तामेकपाटलाम्। एते कन्ये महाभागे योगाचार्य्यमुपस्थिते"। ७यनौच ८अश्वरोभेदे स्त्री "असिता च सुवाङ्गश्च सुदत्ता मृदुका तथा"। हरि०व०।

असितकार्च्चिस् पु० असितयति णिच्-ण्वुल् सा अर्च्चिः शिखा यस्य। वह्नौ तच्छिखासम्बन्धेन हि सर्व्वेषामसितत्वम्।

असितगिरि पु० कर्म्म०। नीलपर्व्वते नीलाचले। "असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्" पुष्पद०। असित नगादयोऽप्यत्र। "असितनगनितम्बश्यामभासां घनानाम्"। किरा०। [ग्रीवाभ्यागैः" यजु० २३।१२।

असितग्रीव पु० असिता ग्रीवा धूमेन यस्य। वह्नौ "असित

असितफल पु० असितं कृष्णं फलं यस्य। मधुनारिकेले।

असितमृग पु० कर्म्म०। कृष्णसारमृगे।

असिताब्जेश्वर पु०। बुद्धभेदे।

असिताम्बुज न० कर्म्म०। नीलपद्मे। [शिखे वह्नौ।

असितार्च्चिस् पु० असिता कृष्णा अर्च्चिः शिखाऽस्य। धूम-

असितालु पु० कर्म्म०। नीलालौ आलुभेदे।

असिताश्मन् पु०कर्म्म०। जातित्वेऽपि अनित्यत्वात् न०समा०। इन्द्रनीलके मणिभेदे "निलयेषु नक्तमसिताश्मनां चयैः" माघः

असिद्ध त्रि० अस-क्तेमे क्त स्त्रियां ङीप्। क्षेपके "न वर्जुः स्वर्गरूपाणामस्त्राणामसितारिषु" भा०भी०प०।

असितोत्पल न० कर्म्म०। नीलोत्पले।

असितोपल पु० कर्म्म०। इन्द्रनीलमणौ।

असिदंष्ट्र पु० असिरिव तीक्ष्णा दंष्ट्रा यस्य। मकराख्ये यादसि। स्वार्थे कन् तत्रैव।

असिद्ध त्रि० सिद्धोनिष्पन्नः पक्षश्च न०त०। १अपक्के, २अनिष्पन्ने च न्यायमते आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टे २हेतौ पु०। "अनैकान्तोविरुद्धश्चाप्यसिद्धःप्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा० असिद्धिशब्दे विवरणम्। अनुमानेन ४अनधिगते च "तस्मादपि चासिद्धं परोक्षमाप्तवचनात् सिद्धम्" सां०का०। ५सिद्धिशून्ये च "स्वयमसिद्धः कथं परान् साधयेत्" न्यायः।

असिद्धि स्त्री सिध-क्तिन् न०त०। १अनिष्पत्तौ, २पाकाभावे ३योगोक्तसिद्ध्यभावे न्यायमते ४आश्रयासिद्धिप्रभृतिहेत्वदोषे च। सिद्धयश्च त्रिविधाः। "आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरन्यथा। व्याप्यतासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा। पक्षासिद्धिर्यत्र पक्षोभवेन्मणिमयोगिरिः। ह्रदोद्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्, इति च भाषा०। नीलधूमत्वं गुरुतया न हेतुतावच्छेदकम् समानाधिकरणव्याप्यतावच्छेदकधर्म्मान्तराघटितत्वेन व्याप्यतावच्छेदकत्वात् एतासां दूषकतावीजं तु असिद्धिसामान्यविशेषलक्षण कथनपूर्व्वकं दर्शितं मुक्ता० यथा "आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धित्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकाभावः। यत्र काञ्चनमयः पर्व्वतो वह्निमानिति साध्यते तत्र पर्व्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्व्वते परामर्शप्रतिबन्धः फलम्। स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदोद्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्॥ साध्यासिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्यतावच्छेदकाभावः। तथा च काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्ट साध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धःफलम्।

सिद्धिः साध्यवत्तानिश्चयः अभावे न०त०। ५साध्यवत्ता निश्चयाभावे "दृष्टान्तासिद्धेश्च" सां०सू०। दृष्टान्ते "क्षणिकत्वासिद्धेश्च न क्षणित्वानुमानम्" भा०। "स्थिर-

कार्य्यासिद्धेः क्षणिकत्वम्" सां सू०।

असिधारा स्त्री ६त० । खड्गस्य तीक्ष्णाग्रभागे । "असिधारापरिक्षतःकामं चक्रस्य तेन ते"। सुरगज इव दन्तैर्भग्नदैत्यासिधारैः" इति च रघुः ।

असिधाराव्रत न० असिधारायां स्थितिरिव दुष्करं व्रतम् । असिधारास्थिति तुल्यदुष्करे व्रते असिधारायां स्थितौ मनाक् स्खलने यथा नाशः एवं मनाक्स्खलने यत्रानिष्टं, तादृशे व्रते तच्च यादवेन दर्शितं यथा । "युवा युवत्या सार्द्धं यन् सुप्तो भर्त्तृवदाचरेत् । अन्तर्निदत्तसङ्गःस्यादसिधाराव्रतं हि तत् "असिधाराव्रतमिदं सखे यदरिणा सह संवासः" हितो० सतां केनोद्दिष्टं विषुलमसिधाराव्रतमिदम्"नीतिः ।

असिधाव पु० असिं खड्गं धावयति मार्ज्जयति धाव-अण् । यस्त्राणां मार्ज्जनकरे । ण्वुल् । असिधावकोऽप्यत्र ।

असिधेनुका स्त्री असिर्धेनुरिव यस्याः वा कप् । असेर्धेनुतुल्यत्वेन तद्वत्तुल्यायाम् छुरिकायाम् । कबभावे असिधेनुरप्यत्र ।

असिपत्र पु० असिरिव तीक्ष्णं पत्रमस्य वा कप् । १द्रुतृणे "जातं तमात्मन्यसिपत्रतृत्तम्" रघुः । २गुरुद्रुनामकतृणे च असेः पत्रमिवाच्छादकम् । ३खड्गकोषे न० । असिपत्राकारोऽस्य अर्श० अच् । द्रुतृपत्राकारे ४उभयतोधारे खड्गे च "अत्याक्षीत् खासिपत्रादीनबभासत् परस्वधान्" भट्टिः ।

असिपत्रवन न० असिरिव पत्रमस्य तादृशं वनम् । असिपत्रवने नरकभेदे तत्स्वरूपादि भाग०५स्क०। अन्धतामिस्रादिकमुपक्रम्य "कालसूत्रमसिपत्रवनं सूकरमुखं"मित्यादिना नरकभेदान् दर्शयित्वा तत्स्वरूपं कारणञ्चोक्तं तत्रैव "यस्त्विह वै निजपथादनापद्यपगतः पाषण्डशूपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्रासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गोहातोत्क्रोतिपरमया वेदनया मूर्च्छितः पदेपदे निपतति स्वधर्म्मं हा पाषण्डानुगमनफलं भुङ्क्ते" 'असिपत्रवनं नाम नरकम् शृणु चापरम् योजनानां सहस्रं वै ज्वलदग्न्यासृतावनिः । तप्तास्तूर्य्यकरैश्चण्डैः कल्पकालाग्नि दारुणैः । प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः । तन्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते । पत्राणि यत्र खड्गानि फलानि द्विजसत्तम! । श्वानश्च तत्र शवलाश्चरन्त्यासिफलोभिनः । महावक्त्रा महादंष्ट्रा व्याघ्रा इव महानखाः । ततस्तद्वनमालोक्य शिशिरच्छायमव्ययः । प्रयान्ति प्राणिनस्तत्र दृष्टतापपरिपीड़िताः । हा तात ! हा मातरिति क्रन्दन्तोऽतीव दुःखिताः । दह्यमानाङ्गिसुगलाधरग्निस्थेन वह्निना । तेषां गतानां तत्रासिपत्रव्यापि समीरणः । प्रवाति तेन पात्यन्ते तेषां खड्गास्तथोपरि । छिन्नाः पतन्ति ते भूमौ ज्वलत्पावकसञ्चये । लेलिह्यमाने चातीव व्याघ्राद्यैरमहीतले । सारमेयास्ततः शीघ्रं भ्रातयन्ति शरीरतः । तेषां खण्डानि रुदतामदन्त्यान नभीषणाः । असिपत्रवनं तात ! मयैतत् परिकीर्त्तितम्" इति मार्क० पु० । "असिपत्रवनं चैव लोहदारकमेव च" मनुः ।

असिपत्रव्रत न० अश्वमेधे कर्त्तव्ये व्रतभेदे । [जलजन्तुभेदे ।

असिपुच्छ पु० असिरिव धारायुक्तः पुच्छोऽस्य । शिशुमारे

असिपुत्रिका स्त्री असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्त्वम् । छुरिकायाम् । कनभावे असिपुत्रीत्यप्यत्र ।

असिभेद पु० असिरिव तीक्ष्णः भेदो निर्यासो यस्य। विट्खदिरे

असिर त्रि० अस+क्षेपे किरच् । क्षेपके । "यःसूर्य्यस्यासिरेण वृश्च्यते" ऋ० ६,७६,४ ।

असिलोमन् पु० असिरिव तीक्ष्णं लोमास्य । दनोःपुत्रभेदे । "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारतेत्युपक्रम्य "असिलोमा च केशी च दुर्ज्जयश्चैव दानवः" भा०आ०प० ६५ अध्या० हरिवंशे तु "अभवन् दनुपत्राश्च शतं तीव्रपराक्रमा" इत्युपक्रम्य शतपुत्रमध्ये "असिलोमा च केशी च षष्टश्च बलकोऽमदः" इत्युक्तम् । "असिलोमा पुलोमा च वाष्कलः प्रमदोऽमद" इति च हरि० । स च देवासुरयुद्धे वायुना सह युयुधे "असिलोमाथ बलिना मारुतेन महाहवे" हरिवं २४४ अध्या० । त्रिविक्रमावसरे च स हरिणा सह युयुधे विष्णुना हतश्च "असिलोमा हरिश्चैव जम्मतुर्वै परस्परमित्युपक्रम्य १६१अध्या० "विप्रचित्तिः शिवःशङ्कुरित्युपक्रम्य च "असिलोमा पुलोमाचेत्यादिना बहून् दैत्यान् युयुधानानभिधाय" "प्रमथ्य सर्वान् दैतेयान् पादहस्ततलैः प्रभुः । जहार त्रिदिवं देवस्त्रिभिर्विक्रमणैर्हरिः" हरि० २६३ अ० वामनेन तद्धननमुक्तम् । "असिलोम्नोऽपहन्ता वै तथा रावणनाशनः" विष्णुस्तवः ।

असिहत्य त्रि० असिना हत्यः घात्यः हन-वा० क्यप् ३त० । खड्गेन हननीये । भवादौ अण् अनुसतिका० द्विपदवृद्धिः आसिहात्यः ।

असिहेति पु० असिर्हेतिः साधनमस्य । खड्गेन युद्धकर्त्तरि ।

असु पु० असते क्षिप्यते अस-उन् । १क्षिप्ते । कर्त्तरि उन् ।

२तामे। करणे उन्। ३पञ्चवृत्तिषु वायुभेदेषु पु० ब० व०। "श्रेष्ठे जातौ भवेद्ब्रह्मन् ज्योति०। "आवश्योदक् पराङ्मत्य तिराचस्य शनैरसून्" मनुः। "शरीरेभ्योऽमरारीणामसूनिव विचिन्वति" देवीमा० "त्यजन्त्यसून् शर्म्म च मानिनो वरं त्यजन्ति नत्वे कमयाचितव्रतम्" नैषधम्। प्राणवृत्तीनां भेदविवक्षायामेव बहुत्वम् एकत्वविवक्षायां तु एकवचनान्तामिच्छन्ति अतएव- "प्राणापानौ समौ कृत्वा" गीता "प्राणोऽहं पिता प्राणोऽहं माते-त्यादौ प्राणशब्दवत् असुशब्दोऽप्येकवचनः" नानदद्वसु ऋ० १,१४०,८। "उदीर्ष्व जीवो असुर्न आगात्" ऋ० १,११३,१६, ४दशगुर्व्वक्षरोच्चारणकाले पलषड्भागे च "गुर्व्वक्षरैः खेन्दुमितैरसुभिः षड्भिः पलं तैर्घटिका खषड्भिः" सि०शि० ५प्रश्नायाम् निरू०।

असु उपतापे कण्ड्वा० यक्। असूयति आसूयीत् असूयामास। असूया। असूञ इत्येके असूयति ते।

असुकर त्रि० सुखेन क्रियते सु+कृ-खल् विरोधे न०त०। दुष्करे।

असुख न० विरोधे न०त०। १दुःखे असुखोदयः असुखावहः असुखोदर्कः "तत्तत् प्राप्य सुखासुखम्" गीता "याभ्यां प्राप्नोति संसृक्ताः प्रेत्येह च सुखासुखम्" मनुः। न०ब०। २सुखशून्ये। [१दुर्गमे २दुर्ब्बोधे च।

असुगम त्रि० सुखेन गम्यते सु+गम-खल् विरोधे न०त०।

असुतृप पु० असुना परकीयप्राणनाशनेन तृप्यति तृप-क ३त०॥ यमदूतभेदे "अरुणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतोजनँ अनु" ऋ० १०,१४,१२। [जीवने।

असुधारण न० असूनां प्राणादिपञ्चवायुवृत्तीनां धारणम्।

असुन्दर त्रि० विरोधे न०त०। सौन्दर्य्यहीने अनुत्कृष्टे कुत्सिते।

असुन्व त्रि० सु-अभिषवे बा०श न०त०। सोमाभिषवाकर्त्तरि "असुन्वामिन्द्र। सखंदम्" ८,१५,१४। "असुन्वां सोमाभिषवहीनाम्" भा०।

असुभृत् त्रि० असून् बिभर्त्ति भृ-क्विप् तृ०त०। १प्राणिनि

असुमत् त्रि० असवःसन्त्यस्य मतुप्। प्राणिनि "सततमसमतामगम्यरूपाः" माघः।

असुर पु० अस-दीप्तौ उर०। १सूर्य्ये। अस्यति क्षिपति देवान् उर विरोधे न०त० वा। सुरविरोधिनि २दैत्ये। ३रात्रौ स्त्री। असुरप्रभेदाश्च भारते आ०प० दर्शिताः "एकएव दितेः पुत्रो हिरण्यकशिपुः" श्रुतः। नाम्ना ख्यातास्तु तस्येमे पञ्च पुत्रा महात्मनः। प्रह्लादः पूर्व्वजस्तेषां संह्लादस्तदनन्तरम्। अनुह्लादस्तृतीयोऽभूत्तस्माच्च शिबिवाष्कलौ। प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत। विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत। विरोचनस्य पुत्रोऽभूद्बलिरेकः प्रतापवान्। बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः। रुद्रस्यानुचरः श्रीमान्महाकालेति यं विदुः। चत्वारिंशद्बलेः पुत्राः ख्याताः सर्व्वत्र भारत। तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः। शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः। असिलोमा च केशी च दुर्ज्जयश्चैव दानवः। अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान्। तथा गगनमूर्द्धा च वेगवान् केतुमांश्च यः। स्वर्भानुरश्वोऽश्वपतिर्वृषपर्व्वाजकस्तथा। अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा। शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा। एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः। अन्यौ तु खलु देवानां सूर्य्याचन्द्रमसौ स्मृतौ। अन्यौ दानवमुख्यानां सूर्य्याचन्द्रमसौ तथा। इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः। दनुपुत्रा महाराज दश दानववंशजाः। एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि। वातापी शतुतपनः शठश्चैव महासुरः। गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः। असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत। सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कमर्द्दनम्। सुचन्द्रं चन्द्रहन्तारं तथा चन्द्रप्रमर्द्दनम्। क्रूरस्वभावं क्रूरायाः पुत्रपौत्रमनन्तकम्। गणः क्रोधवशो नाम क्रूरकर्म्माऽरिमर्द्दनः। दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः। विक्षरोबलवीरौ च वृत्रश्चैव महासुरः। कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः। प्रविख्याता महावीर्य्या दानवेषु परन्तपाः। विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च। क्रोधः शतुस्तथैवान्ये कालकेया इति श्रुताः"। हरिवंशे तु अन्येऽपि बहवोऽसुरभेदा उक्ता यथा। "दितेः पुत्रद्वयं यज्ञे कश्यपादिति नः श्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान्। सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः। सैंहिकेया इति ख्याता यस्याः पुत्रा महाबलाः। गणैश्च सह राजेन्द्र! दशसाहस्रमुच्यते। तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। असंख्याता महावीर्य्या हिरण्यकशिपोः स्मृताः। हिरण्यकशिपोः पुत्रास्त्रयः प्रथितौजसः। अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव वीर्य्यवान्। संह्लादश्च चतुर्थोऽभूत् ह्लादपुत्रो

हृदस्तथा। संह्लादप्रतः सुन्दश्च निसुन्दश्चैव तावुभौ। हृदस्य पुत्रो ह्यायुर्व्वै शिविः कालस्तथैव च। विरोचनश्च प्राह्लादिर्बलिजज्ञे विरोचनात्। बलेः पुत्रशतन्त्वासीद्बाणज्येष्ठं नराधिप। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः। कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः। बाणस्तेषामतिबलो ज्येष्ठःपशुपतिप्रियः। पुराकल्पे हि बाणेन प्रसाद्योमापतिं प्रभुम्। पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः। बाणश्च चेन्द्रदमनो लोहित्याभूदपद्यत। गणास्तथा सुरा राजन् शतसाहस्रसम्मिताः। हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः। झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा। महानाभश्च विक्रान्तः कालनाभस्तथैव च। अभवन्। दनुपुत्राश्च शतं तीव्रपराक्रमाः। तपस्विनो महावीर्य्याः प्राधान्येन निबोध तान्। द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिराः प्रभुः। शङ्कुकर्णो विराधश्च गवेष्ठो दुन्दुभिस्तथा। अयोमुखः शम्बरश्च कपिलो वामनस्तथा। मरीचिर्म्मघवांश्चैव दूरा गर्गशिरा एकः। विद्योतनश्च केतुश्च केतुवीर्य्यशतह्रदौ। इन्द्रजित्सर्व्वजिच्चैव वज्रनाभस्तथैव च। महानाभश्च विक्रान्तः कालनाभस्तथैव च। एकचक्रो महाबाहुस्तारकश्च महाबलः। वैश्वानरः पुलोमा च विद्रावणमहाशिराः। स्वर्भानुर्वृषपर्व्वा च शङ्खशङ्खश्च महासुरः। सूक्ष्माक्षैव निचन्द्रश्च अर्णनाभो महागिरिः। असिलोमा च केशी च शठश्च बलको मदः। तथा गगनमूर्द्धा च कुम्भनाभो महासुरः। प्रमदो मयश्च कुपथो हयग्रीवश्च वीर्य्यवान्। वैरूपः स विरूपाक्षः सुपथोऽथ हराहरौ। हिरण्यकशिपोश्चैव शतमायश्च शम्बरः। शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान्। एते सर्व्वे दनोः पुत्राः कश्यपादभिजज्ञिरे। विप्रचित्तिप्रधानास्ते दानवाः सुमहाबलाः। एतेषां यदपत्यन्तु न तच्छक्यं नराधिपः। प्रसंख्यातुं महीपाल! पुत्रपौत्रमनन्तकम्। स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयम्। उपदानवी हयशिराः शर्म्मिष्ठा वार्षपर्व्वणी। पुलोमा कालका चैव वैश्वानरसुते उभे। ब्रह्मपत्ये महावीर्य्ये मारीचेस्तु परिग्रहः। तयोः पुत्रसहस्राणि षष्टिं दानवनन्दनान्। चतुर्हैव शतान्यान्यान् हिरण्यपुरवासिनः। मारीचिर्ज्जनयामास महता तपसान्वितः। पौलोमाः कालकेयाश्च दानवास्ते महाबलाः। अवध्या देवतानाञ्च हिरण्यपुरवासिनः। श्रुताः पितामहेनाजौ निहताः सव्यसाचिना। प्रभाया नहुषः पुत्रः शतयज्ञश्च शचीसुतः। पूरुंजत्तेऽथ शर्म्मिष्ठा द्रुह्यन्तमुपदानवी। ततोऽपरे महावीर्य्या दानवास्तितिदारुणाः। सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा। दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः। सहिकेया इति ख्यातास्त्रयोदश महाबलाः। वंशः शल्यश्च बलिनौ नभश्चैव महाबलः। वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा। आञ्जिको नरकश्चैव कालनाभस्तथैव च। राजन्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः। शुकः पोतरणश्चैव वज्रनाभश्च वीर्य्यवान्। मूकश्चैव तुहुण्डश्च ह्रादपुत्रौ बभूवतुः। मारीचः सुन्दपुत्रश्च ताड़कायां व्यजायत। एते वै दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः। तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। संह्लादश्च तु दैत्यस्य निवातकवचाः कुले। समुत्पन्नाः सुमहता तपसा भावितात्मनः। तिस्रः कोट्यः सुतास्तेषां मणिमत्यां निवासिनाम्। तेऽप्यवध्याश्च देवानामर्ज्जुनेन निपातिताः। षट्सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिताः"। "वासेन यस्य जनिताऽसुरभीरणश्रीः" नैष०। "समत्सरेणासुर इत्युपेयुषा" माघः। "ततः कानीयसा एव देवा ज्यायसा असुराः, य एषु लोकेष्वसुर्द्दन्ते हृदेवा अचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति" छा०उ०। "असुषु विष्वग्विषयासु प्राणनक्रियासु रमन्ते रम्-डु। स्वाभाविक्यां तम आत्मिकायामिन्द्रियवृत्तौ। "देवासुरा वै यत्र संयेतिरे" बृ०उ०। देवाश्चासुराश्च देवादीव्यतेर्द्योतनार्थस्य रूपं शास्त्रोद्भासिता इन्द्रियवृत्तयः। असुरास्तद्विपरीताः खेभ्येवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात् स्वाभाविकस्तम आत्मिका इन्द्रियवृत्तय एव" भा०। स्वार्थे प्रज्ञा० अण् आसुरः तत्रार्थे। तस्येदम् अण् आसुरः तत्सम्बन्धिनि त्रि० स्त्रियां ङीप्"आसुरीरात्रिरन्यत्र तच्चात्राः परिवर्ज्जयेत्" स्मृतिः "आसुरीं योनिमापन्नाः"गीता। हितार्थे यत्। असुर्य्यः। "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः" कठ०उ०। सुरा सुधा यद्गीत्वेनास्यस्य अर्श० अच् न०त०। "सुराप्रतिग्रहाद्देवाःसुरा इत्यभिस्तुताः। अप्रतिग्रहणाच्चापि दैतेयाश्चासुराः स्मृताः इत्युक्तनिर्व्वचनादपि तेषामसुरत्वम्। जातौ ङीप् असुरी "असुरी जिह्वा देवानां प्रातः सवनसत्रावेट्" श्रुध०। स्वांशे तस्यासुराद्यत्वात्तथात्वम्। मेघे पु० निरु०। [रक्षणीये।

असुरक्ष त्रि० सुखेन रक्ष्यते सु+रक्ष-खल् न०त०। सुखेनासुरराज् पु० असुरेषु राजते राज् क्विप् ७त०। प्रह्लाद-

पौत्रे बलिदैत्ये २असुराध्यक्षमात्रे च भा० आ० प० वकासुरवधने। "पुत्रो मानुषमांसेन दुर्बुद्धिः पुरुषादकः। रक्षत्यसुरराट् नित्यमिमं जनपदं बली"।

असुरारि पु० असुराणां रिपुः। दानवशत्रौ विष्णौ। असुरारिप्रभृतयोऽत्र। [तुलसीभेदे

असुरसा स्त्री न सुष्ठु रसो यस्याः ५ब०। (वायुदृतुलसी)

असुरहन् त्रि० असुरं हन्ति-हन् क्विप्। असुरनाशके। "प्राग्नये विश्वशुचे धियन्धेऽसुरघ्ने" ऋ०७'१२,१। स्त्रियां नान्तत्वात् ङीप्। असुरघ्नी।

असुरार्य्य पु० ईत०। शुक्राचार्य्ये। [ध्वजमात्रे च।

असुराधिप पु० ईत०। १प्रह्लादपौत्रे बलिदैत्ये २असुरा-

असुराङ्क न० असुरस्याङ्का आङ्का यस्य। कांस्ये हेम०।

असुर्य्य त्रि० असुराय हितः गया० यत्। १असुरहिते तत्सम्भूते च असुरशब्दे उदा०।

असुष्वि त्रि० सु-बा०किं द्वित्वम् न०त०। सोमाभिषवा कर्त्तरि "विपश्चिदसुष्वीन् ऋ०४,२४,५। जह्यसुष्वीन् प्रदहा पृणत" ऋ०६,४४,११। "असुष्वीन् अनभिषोतॄन् यजमानान्" भाष्यम्।

असुलभ त्रि० न सुलभः विरोधे। दुर्लभे दुःखेन प्राप्ये।

असुसु पु० असून् प्राणान् सुवति सू-क्विप्। बाणे "स सासिः सासुसूः सासोयेयायेयाययायः" किरा०। [भेदे च।

असुस्थ त्रि० विरोधे न०त०। १दुःखेन स्थातरि २रोगाद्यभि-

असुहृद् पु० विरोधे न०त०। सुहृद्भिन्ने रिपौ "शलभतां लभतामसुहृद्गणः" माघः।

असृ स्त्री न प्रसूते सू-क्विप्। अप्रसवायां स्त्रियाम् "याभिर्धेनुमसृम्" ऋ०१,११२,३। [अनादरे अवज्ञायाम्

असृ(ज्ञ)ज्ञण न०सृ(सृज्ञ)ज्ञ आदरे ल्युट् अभावे न०त०।

असूक्ष्म त्रि० विरोधे न०त०। सूक्ष्मतावि रोधिस्थूलत्ववति।

असूत त्रि० न०त०। अप्रसूते। [दोषारोपणशीले।

असूयक त्रि० (असु)असूज्-कण्ड्वादि० यकि-ण्वुल्। गुणेषु

असूया स्त्री असु (असू)-उपतापे कण्ड्वा० यक् अ। परगुणेषु दोषाविष्करणे "पैशून्यं साहसं द्रोहईर्षासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोदपिकोगणः" मनुः। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा०। "असूया परगुणेषु दोषाविष्करणम्" सि०कौ०।

असूयु त्रि० असु(सू)-कण्ड्वा० यक् उन्। असूयाशीले "इदन्ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" गीता।

असृर त्रि० सृरी सृम्भे धातूनामनेकार्थत्वात् स्तुतौ भावे घञ् न०ब०। स्तोत्ररहिते। "असृरे सन्ति सूरयः" ऋ०८,१०,४। ["असृक्तं सृक्तं रजसि" यजु०१७,१७।

असृक्त त्रि० सृरी क्त इडभावः न तस्य नत्वम्। "अप्रेरिते

असूर्य्यम्पश्या त्रि० सूर्य्यमपि न पश्यति दृश-खश् मुम् च अस०समा०। अत्यन्तगुप्ते सूर्य्यादर्शिनि राजदारादौ। "असूर्य्यम्पश्यरूपा त्वं किमभीररार्य्यसे?" भट्टिः।

असृक्कर पु० असृक् शोणितं करोति क-ट। शरीरस्थे रसधातौ, अन्नादेरग्नितप्तस्य प्रथमं रसरूपता, रसस्य रक्तरूपतेति वैद्यके प्रसिद्धम्। अथ रसस्य यथा रक्तकरत्वम् तथोक्तं सुश्रुते। "रसाद्रक्तं ततोमांस मांसान्मेदः प्रजायते। मेदसोऽस्थि ततोमज्जा मज्ज्ञः शुक्रस्य सम्भवः" तत्पाकप्रकारमाह भाव० प्रका०। "यान्यामाशयमाहारः पूर्व्वं प्राणानिलेरितः। माधुर्य्यं फेनभावञ्च षड्रसोऽपि लभेत सः"। "आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च। लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु। भोज्यमोदनपूपादि, भक्ष्यं मोदकमण्डकम्। चर्व्यं चिपिटधानादि-रसलादि तु लिह्यते। चूष्यमाम्रफलेक्षवादि पीयते पानकं पयः"। आमाशयमाह चरकः "नाभिस्तनान्तरे जन्तोराशयामाशयं बुधाः"। तत्र विशेषमाह। "उरोरक्ताशयस्तस्मादधःश्लेष्माशयःस्मृतः। आमाशयस्तु तदधस्तदधोहि मलाशयः"। अनिलेरित इति हृदयाधिष्ठानेन प्राणनाम्ना वायुना मुखंगतेनान्नं प्रवेशितं। तथाह सुश्रुते। "योवायुः प्राणनामासौ मुखं गच्छति देहभृत्। सोऽन्नः प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते" इति। तमाहारमामाशयस्थं क्लेदननामकफः क्लेदयति क्लेदनात्संहतं भिनत्ति च। उक्तं च सुश्रुते। "क्लेदनः क्लेदयत्यन्नं संहतं च भिनत्त्यतः" इति स आहारः षड्रसोऽप्यामाशये माधुर्यं लभते आमाशयस्थस्य मधुरस्य कफस्य योगात्। उक्तं च श्लेष्म स्वरूपम् "श्लेष्मा श्वेतो गुरुःस्निग्धः पिच्छिलः शीतलस्तथा। तमोगुणाधिकः स्वादुर्विदग्धोलवणो भवेदिति"। "फेनभावं च लभते जठरानलतेजसा"। यतआह वाग्भटः "संधुक्षितः समानेन पचत्यामाशयस्थितम्। औदर्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम्" इति। अथ सएवाहारः प्राणवायुना प्रेरितस्ततः किञ्चित्स्खलितः पाचकाख्यपित्तोष्मणोषत्पक्वोऽम्लोभवति। उक्तं च। "अथ पाचकपित्तेन विदग्धश्चास्खलतां व्रजेदिति" पाचकपित्तेन पाचकपित्तोष्मणा ततः स एवाहारो नाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितोग्रहणीम् प्रति नीयते उक्तञ्च। "ततः समान

महता महणीमभि नीयते" । महणीलक्षणमाह "यत्तो-पित्तधरा नाम पाकला परिकीर्त्तिता । आमपक्वाशयान्तःस्था महणीत्यभिधीयते"। पित्तधरा पाचकाख्यं पित्तं तदन्त्यधि-ष्ठानं तद्धारयति। तत्र महण्यामामाशयपक्वाशयमध्यवर्त्ति-पाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च-भवति । तथा च "महण्यामाम्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः । आहारो महण्यां कोष्ठवह्निना महणीस्थितपाचकपित्तेन वह्निना पच्यते पच्यमानः स महणीस्थितस्य कटुरसस्य पित्तस्य योगात्कटुर्भवति । एत-दाहारपाके विशेषमाह । "शरीरं पाञ्चभौतिकम्" तत्र प-ञ्चसु भूतेषु पञ्चाग्नयः तिष्ठन्ति । उक्तं च चरकेण । "भौमा-प्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्विह"।अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनो क्तेजितेन शरीरवर्त्तिभूभागाग्निनाहारवर्त्तिभूभागः पच्यते पक्वोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते । तथा च सुश्रुते "पञ्चभूता-त्मके देहे आहारः पाञ्चभौतिकः । विपक्वः पञ्चधा-सम्यक्गुणान् स्वानभिवर्द्धयेदिति" । गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थि-वादीन् भागानभिवर्द्धयेदित्यर्थः । एवमहोरात्रेण पक्वाहारो मिष्टश्च कटुश्च मधुरोभवति अम्लस्त्वम्लोभवति । कटुस्तिक्तः कषायश्च कटुर्भवति उक्तञ्च "मिष्टःकटुश्च मधुरमम्लोऽम्लं पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वाहारस्य सारो निगदितोरसः श्रेष्ठोमहणी-स्थोमलद्रवः । मलद्रवस्य जलभागः शिराभिर्वस्तिगतोमूत्रत्वमेति । उक्तञ्च "आहारस्य रसःसारः सारहीनो-मलद्रवः । शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् । श्रेष्ठं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते । समानवायुनानीतं तत्तिष्ठति मलाशये" । तत्र मलाशयेनापानवायुना प्रेरितं मूत्रं मेढ्भगमार्गेण, पुरीषं गुदमार्गेण शरीराद्बहिर्याति उक्तञ्च "मूत्रं कुप्यस्थमार्गेण पुरीषं गुदमार्गतः । अपानवायुना-त्तिप्तं बहिर्याति शरीरतः" । उपस्थः शिश्नोभगञ्च । रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सहमिश्रितोभवति उक्तञ्च "रसस्तु हृदयं याति समानमरुतेरितः । स तु व्यानेन पु-विक्षिप्तः सर्व्वान्धातून् विवर्द्धयेत् । केदारेषु यथा कुल्याः पूर्णन्ति विविधौषधीः तथा कलेवरे धातून् सर्व्वान्वर्द्धयते रसः" रसस्तु तत्र तत्र त्रिधा विभिद्यते । उक्तं च चरके "स्थूला एवं मलभेदैश्चतत्र त्रिधा रसः । खं स्थूलेऽंशः परं सूक्ष्म स्रोतसो याति तन्मलम्" । अयमर्थः स्थूलेऽंशः खं याति । यथास्थितं तिष्ठति सूक्ष्मस्त्वंशःपरं द्वितीयं धातुं याति-तन्मलः रसादिमलस्तन्मलं शरीरारम्भकं तत्तद्धातुमलं यातीत्यर्थः यथा लौकिकाग्निनेक्षुरसः पच्यते तथा शरी-रारम्भकस्य रसस्य अग्निनाहाररसः पच्यते पच्यमानः स पञ्चाहोरात्रात्सार्द्धदण्डमेकं च यावत्प्राक्तनरसधातावेव तिष्ठते उक्तञ्च सुश्रुते "स खलु रसस्त्रीणि त्रीणि कला-सहस्राणि पञ्चदशकला एकैकस्मिन्धातावेव तिष्ठति" इति । अत्र कलानां विंशतिः मुहूर्त्तः स च दण्डद्वयात्मकः तथा च भोजः "धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतोरसः । अहोरात्रात्त्वयंपञ्च सार्द्धं दण्डं च तिष्ठति" । प्रत्येकम् एक-स्मिन्नेकस्मिन्नित्यर्थः ततो यथा पच्यमानादिक्षुरसान्मलोनिर्ग-च्छति । तथा पच्यमानादाहाररसान्मलो निर्गच्छति सः कफः उक्तञ्च सुश्रुते "कफपित्तमलाः खेषु प्रस्वेदोनखरोम च नेत्रविट्चक्षुषःश्लेष्मोधातूनां क्रमशोमलाः । श्लेष्ममलः कर्णाक्षिस्रोतोमलः । स च कफः प्राणानिलप्रेरितोधम-नीमार्गेण शरीरारम्भकं क्लेदनाख्यं कफं गत्वा पुष्णाति । ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागः शरीरारम्भकं रसं पोष-यति सकलशरीराधिष्ठानेन व्यानवायुना प्रेरितोधम-नीभिः सञ्चरन् पोषणस्नेहनजठरानलोष्मतप्तसन्तापनि-वारणादिभिर्गुणैः सकलं पुष्णाति शरीरम् ततः स्थूलो-भागः प्राणवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रक्तस्य स्थानं गत्वा यकृत्प्लीहफुफ्फुसं त्वा तेन सह मिश्रितो भवति । ततः प्राक्तनरक्तस्थाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावत्प्राक्तनरक्तधातावेव तिष्ठति ततो यथाग्निना पुनःपुनः पच्यमानादिक्षुविकारा-द्वारंवारं मलं निर्गच्छति । तथा पुनःपुनः पच्यमाना दाहाररसात्प्रतिवारं मलं निर्गच्छति तत्र रक्ताग्निना-पच्यमानान्मलं पित्तं निर्गच्छति । तच्च पित्तं समानवा-युना प्रेरितं धमनीमार्गेण शरीरारम्भकं पाचकाख्यं पित्तं गत्वा पुष्णाति । ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः । स्थूलः सूक्ष्मश्च । तत्र सूक्ष्मोभागोरञ्जकाख्येन पित्तेन रक्तीकृतः शरीरारम्भकं रक्तं पोषयन् व्यान-वायुना प्रेरितो धमनीभिः सञ्चरन् सकलशरीरगतानि रुधिराणि पुष्णाति । ततः स्थूलोभागो व्यानवायुना-

प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकाणि मांसानि याति ततो मांसाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डं यावन्मांसेष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलं निर्गच्छति तद्व्यानवायुना क्षिप्रं कर्णावागत्य कर्णविड्भवति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च ततः सूक्ष्मोभागो मांसानि पुष्णाति ततः स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शरीरारम्भकस्य मेदसःस्थानमुदरं याति ततोमेदसोऽग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावन्मेदस्येव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति प्रस्वेदरूपः स च शीतः स्रोतस्येव तिष्ठति शरीरोष्णता तप्तश्च तदा व्यानवायुना प्रेरितः शिरामार्गे लोमकूपेभ्यो बहिर्याति जिह्वादन्तकक्षामेढ्रादिमलश्च मेदोमलमित्येके। ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो-भागो मेदः पुष्णाति उदरे तिष्ठन् व्यानवायुना प्रेरितः स्रोतोमार्गैः सूक्ष्मास्थितान्यपि मेदांसि पुष्णाति स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकास्थ्यस्थीनि याति ततोस्थ्यग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डं च यावदस्थिष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति स च व्यानवायुना-प्रेरितः शिरामार्गैरागत्याङ्गुलिषु नखाःस्नौ लोमानि भवन्ति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागोव्यानवायुना प्रेरितः स्रोतो-मार्गैर्मज्जस्थानानि स्थूलास्थ्यभ्यन्तराणि याति ततो मज्जाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्ध-दण्डञ्च यावन्मज्जन्येवावतिष्ठति। ततः पच्यमानात् तस्मान्मलं निर्गच्छति। तच्च व्यानवायुना प्रेरितं शिरामार्गैर्नेत्रयोरागत्य नेत्रविट् चक्षुःस्नेहश्च भवति ततःसारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च। तत्र सूक्ष्मोभागोमज्जानं पुष्णाति ततः स्थूलोभागो-व्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शुक्रस्य स्थानं सकलं शरीरं गत्वा शरीरारम्भकेण शुक्रेण सह मिश्रितो भवति। ततः शुक्राग्निना पुनः पच्यते पच्यमाने तस्मान्मलं नास्ति स हि सप्तधाधातुस्तुवर्णवत्। उक्तञ्च "स्वाग्निभिः पच्यमानेषु मलः षट्सु रसादिषु। न शुक्रे पच्यमानेऽपि क्षेमनीवाज्यये मलः"। अन्यच्च "स्वाग्निभिः पच्यमानेषु मज्जान्तेषु रसादिषु। षट्सु धातुषु जायन्ते मलानि त्रुटयोजयुः। यथा सप्तधाधातुर्न मलं किञ्चि-त्काञ्चने। तथा रसे शुद्धः पक्वे न मलं शुक्रतां गते"। ततः सारभूतस्य रसस्य द्वौ भागौ भवतः। स्थूलःसूक्ष्मश्च तत्र सूक्ष्मस्नेहभागः ओजस्तस्य लक्षणमाह। "ओजः सर्व-शरीरस्थं स्निग्धंशीतं स्थिरंसितम्। सोमात्मकं शरीरस्य बलं पुष्टिकरं मतम्" बलं चेष्टापाटवं तथा च। "चेष्टासु पाटवं यत्तु बलन्तदभिधीयते इति" यत्तु सुश्रुते रसादीनां शुक्रा-न्तानां धातूनां यत्परन्तेजस्तत् खल्वोजस्तदेव बलमिति तेजस्तेजोद्रवः"। अत्रायमभिप्रायः। यस्माद्रसादोजो भवति रसः सर्वधातुस्थानगतत्वात्तद्धातुवन्मन्यत इति। सर्वधातूनां स्नेहमोजःक्षीरे घृतमिव तदेव बलमिति" तत्-कार्य्यकारणयोरभेदोपचारात् अभेदकथनं च विकित्सैक्या-र्थम्। "अन्यच्च "गुरु शीतं मृदु स्निग्धंसान्द्रं स्लक्ष्णं स्थिरंतथा-प्रसन्नं पिच्छिलं श्लक्ष्णमोजो दशगुणं स्मृतम्"। चरके तु "अष्टविन्दुप्रमाणन्तदीषद्रक्तं सपित्तकम्। अग्निसोमात्मकत्वेन द्विरूपं वर्णितं तु तत्"। वाग्भटश्च "ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम्। हृदयस्थमपि व्यापि देहस्थिति निबन्धनम्। यस्य प्रदूषौ देहस्य तुष्टिपुष्टिबलोदयाः। यच्चा-शु नियतोनाशो यस्मिंस्तिष्ठति जीवनम्। निष्पद्यन्ते यतो भावाविविधा देहसंश्रयाः। तत्माहुः प्रतिभा चैव लावण्यं सुकु-मारता"। ततः स्थूलभागो रसोमासेन पुंसां शुक्रं स्त्रीणां त्वार्त्तवं शुक्रं च भवति। उक्तञ्च सुश्रुते "एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवं च भवतीति चेति" चकारात् स्त्रीणामपि शुक्रं भवति। अतएवोक्तं सुश्रुते। "योषितोऽपि स्ववत्येव शुक्रं पुंसः समागमे। तच्च गर्भस्य किञ्चि-त्तु करोतीति न चिन्यते" गर्भस्य शुक्रस्य, विकृतस्य तु गर्भस्य कारणत्वदपि भवति यत उक्तं "यदा नार्यावुपेयातां दुष-स्यन्यौ कथञ्चन। सृजन्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते" इति। एतेन स्त्रीणां सप्तमोधातुरार्त्तवं शुक्रमष्टम इति बोधितम् आशयाधिक्यवत्। "स्त्रीणां गर्भोपयोगी स्या-दार्त्तवं सर्वसम्मतम् तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि"। एवं रसएव केदारकुल्यान्यायेन सर्वान्धातून् पूरयति मासेन नवदण्डोनरेण शुक्रमार्त्तवञ्च भवति इति सिद्धान्तः। एवं सति रसाद्रक्तमिति भक्तमेव ततो-मांसन्ततो रक्तोत्पत्तेरनन्तरंमांसं जायते रसादेवेत्यर्थः मांसान्मेदः प्रजायते इति मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः। मेदसोऽस्थि मेदसोऽन्येऽस्थि जायते रसा-देवेत्यर्थः। एवं ततोमज्जा मज्जोऽन्ये शुक्रस्य सम्भव इत्यर्थः। रसःशरीरे त्रिधा सञ्चरति तथाचोक्तम्। "रसः-

शरीरे शल्लाचिर्ज्वलसन्तानवत् त्रिधा । संचरत्यनुरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः पुरुषास्तीक्ष्णाग्नयोमध्यमाग्नयोमन्दाग्नयश्च भवन्ति तत्र तीक्ष्णाग्नीनां रसःशल्सन्तानवच्छीघ्रं सञ्चरति । मध्यमाग्नीनामर्चिःसन्तानवन्मध्यवेगेन सञ्चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं सञ्चरति । तेन मासेन रसः शुक्रं भवति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तं दीप्ताग्नीनां तु रसः किञ्चिदूनेन मासेन शुक्रं भवति । मन्दाग्नेस्तु किञ्चिदधिकेन मासेनेति सिद्धान्तः" ।

असृग्धरा स्त्री असृक् धरति धृ+अच् । शोणितधारिण्यां त्वचि । अण् असृग्धाराया इत्र ।

असृग्वहा स्त्री असृक् शोणितं वहति अच् । शोणितवहायां नाड्यां तद्विवरणं सुश्रुते "सप्त सिराशतानि भवन्ति । ताभिरिदं शरीरमारामइव जलवाहिनीभिः केदारइव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकृत्स्नप्रसारणादिभिर्विशेषैः ॥ द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्ध्वमधस्तिर्यक् च । भवतश्चात्र ॥ यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् । नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥ नाभिस्थाः प्राणिनां प्राणाः प्राणाच्चाभिव्यवस्थिता । सिराभिराहता नाभिश्चक्रनाभिरिवारकैः ॥ तासां मूलसिराश्चत्वारिंशच्चासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्तत्यधिकं १७५ भवति तावत्य एव १७५ पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि ॥ तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थि पञ्चविंशतिः । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥ विशेषतस्तु कोष्ठे चतस्रिंशच्चासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ । द्वे द्वे पार्श्वयोःषट् पृष्ठे तावत्यश्चैवोदरे दश वक्षसि ॥ एकचत्वारिंशज्जत्रूर्ध्वं जर्ध्वं, तासां चतुर्दश ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायां । षट्नासिकायां । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम् । अस्य एव विभागः शेषाणामपि ॥ विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि । स्वाः सिराः सञ्चरद्रक्तं कुर्यात्स्वान्यानु गुणानपि ॥ यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः । तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥ नहि वातं सिराः काश्चिन्न पित्तं केवलं तथा । श्लेष्माणं वा वहन्त्येता अतः सर्ववहाः स्मृताः ॥ प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम् । ध्रुवस्तन्मार्गगमनमतः सर्ववहाः स्मृताः ॥ तत्रारुणा वातवहाः पूर्यन्ते वायुना सिराः । पित्तादुष्णाश्चानिलाश्च शीता गौर्यः स्थिराः कफात् ॥ असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः"

असृग्विमोक्षण न० दुष्टस्य दुष्टस्य असृजः शोणितस्य देहाद् विमोक्षणं स्रावणम् ६त० । देहाद् दुष्टस्य दुष्टस्य वा रक्तधातोः स्रावणे निस्सारणे । तत्प्रकारादिकमुक्तं सुश्रुते "तस्मान्न शीते नात्युष्णे नास्निग्धे नातितापिते । वायुं प्रतिगतस्य शोणितं मोक्षयेद्भिषक् । सम्यग्गत्वा यदा रक्तं स्वयमेवावतिष्ठते । शुद्धं तदा विजानीयात्सम्यग्विस्रावितञ्च तत् ॥ लाघवं वेदनाशान्तिर्व्यधेर्व्रणपरिक्षयः । सम्यग्विस्राविते लिङ्गं प्रसादो मनसस्तथा ॥ त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्च ये । रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥ अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठा भद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमहरिद्रार्कांङ्गुरनक्तमालफलैर्यथालाभं त्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैः सर्पिषतैलवसाप्रगाढैर्व्रणमुखमवघर्षयेदेवं सम्यक् प्रवर्त्तते । अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपद्मकेसरगैरिकसर्जरसरसाञ्जनशाल्मलीपुष्पशङ्खशुक्तिमाक्षिकयवगोधूमचूर्णैः शनैर्व्रणमुखमवचूर्णाङ्गुल्यग्रेणावपीडयेत् । सालसर्ज्जार्जुनारिमेदमेषशृङ्गधवधन्वनवल्मिकैर्वा चूर्णितामिः क्षौमेय वा भ्रामितेन सशृङ्गफेनलाक्षाचूर्णैर्वा यथोक्तैर्व्रणबन्धनद्रव्यैर्गाढं बध्नीयात् । शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैश्चोपाचरेत् क्षारेणाग्निना वा दहेद्यथोक्तं व्यधनादनन्तरं वा तामेवातिप्रवृत्तां सिरां विध्येत् । काकोल्यादिक्षीरं वा शर्करामधुमधुरं पाययेत् एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीरयूषरसैः स्निग्धैश्चाश्नीयादुपद्रवांश्च यथास्वमुपाचरेत्" । उपद्रवास्तत्रैवोक्ता यथा ॥ "धातुक्षयाच्छुते रक्ते मन्दः सञ्जायतेऽनलः । पवनश्च परं कोपं याति तस्मात् प्रयत्नतः ॥ तत्रातिशीतैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः । ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत् ॥ चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् । मन्थानं स्कन्दनञ्चैव पाचनं दहनं तथा ॥ त्रयं कषायः

सम्यक्ते रक्तं स्कन्दयते हिमम्। तथा सम्याचयेद्वस्त्र दाहः सङ्कोचयेत् सिराः। अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत्। सन्धाने भ्रस्यमाने तु पाचनैः सङ्गमाचरेत्॥ कर्मैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि। असिद्धिमत्सु चैतेषु दाहः परम इष्यते। सप्तसेषदोषे रुधिरे न व्याधिरतिवर्त्तते। सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम्॥ देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते। तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः॥ क्षुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले। शीतं सतोदं कोष्णेण सर्पिषा परिषेचयेत्॥

वृद्धबालस्थविरभीरुदुर्ब्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं वृङ्गजलौकालाबुशिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्वा। भवन्ति चात्र। उष्णं समधुरं स्निग्धं गवां वृङ्गं प्रकीर्त्तितम्। तस्माद्वातोपदुष्टे तु हितं तद्वसेचने। शीताधिवासा मधुरा जलौका वारिसम्भवा। तस्मात्पित्तोपदुष्टे तु हिता सा त्वसेचने। अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्। तस्माच्छ्लेष्मोपदुष्टे तु हितं तद्वसेचने। तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन वृङ्गेण शोणितमवसेचयेदाचूषणात्। सान्तर्दीपयाऽलाबा"। जलौकसां विवरणम् अस्रपाशब्दे वक्ष्यते।

"अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरुक्ष्य चास्य तमवकाशं वृङ्गोभयचूर्णैर्वैद्यरुजः स्यात्। वृङ्गीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा तामीरोगं याचयेत्। क्षुद्रशुक्लार्द्रपिचुलोतावच्छस्त्रं कृत्वा सुखमपाटणुयादग्रच्छिन्नं क्षीरबिन्दुं शोणितबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्वीत यद्येवमपि न गृह्णीयात्तदान्यां याचयेत्। यदा च निविशते ज्ञात्वा रुदानं कृत्वोन्नम्य च स्तब्धं तदा जानीयाद्गृह्णातीति गृह्णीं चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दंशे तोदकण्डूप्राद्भावैर्जानीयाच्छुद्धनियमादस्य इति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न सुखेनुखमसाः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकणेन प्रदिग्धगात्रीं तैलवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलिभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोमनुमार्जयेदा मुखाद्गमयेत्तावद्यावत्स्यग्वान्तलिङ्गानीति। सम्यग्गान्ता सलिल सरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्गमयेत्। दुर्व्वान्तायां व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्व्ववत्सञ्चिन्तयेत् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्वमीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिहादिति। भवति चात्र। क्षेत्राणि यत्नेन जातीः पोषणं सावचारणम्। जलौकसाञ्च यो वेत्ति तत्साध्यान् स जयेद्गदान्"।

अस्रज् न० न सृज्यते इतररागवत् संसृज्यते सहजत्वात् न+सृज्–क्विन्, असते क्षिप्यते इतस्ततो नाडीभिः अस् क्विप् वा। १ शोणिते २ मङ्गल्यक्षे च तस्य रक्तवर्णत्वात्तथात्वम्। कुङ्कुमे, ३ विष्कम्भावधिके ४ षोड़शे योगे। शोणितोत्पत्तिः रक्ता भाव० प्र०। "यदा रसोयकृद्याति तत्र रञ्जकपित्ततः। रागं याकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः। रक्तं सर्व्वशरीरे तु जीवस्याधार उत्तमः। स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्"। तस्योत्तमत्वञ्चोक्तं तत्रैव "जीवोवसति सर्व्वस्मिन् देहे तत्र विशेषतः"। वीर्य्ये रक्ते मले तस्मिन् क्षीणे याति क्षयं क्षणात्"। वीर्य्ये रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणयुक्ते शुद्धे जीवोवसति न तु दुष्टे वृङ्गे रक्तस्रावणोपदेशस्य विधानात्। पित्तवद्भवेदम्लं भवेदित्यर्थः॥ तस्य स्थानम्" "यकृत् प्लीहा च रक्तस्य सुखस्थानं तयोः स्थितम्"। अन्यत्र संस्थितवतां रक्तानां "पीतता भवेत्" इति भा० प्रका०। सुश्रुते शोणितोत्पादविवरणमन्यथोक्तं यथा "अथातः शोणितवर्णनीयमध्यायं व्याख्यास्यामः। तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रसइत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्र स्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चाहरहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानागतिरूपलक्षयितव्या क्षयवृद्धिवैकृतैः। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति। अत्रोच्यते स खलु द्रवानुसारिस्नेहनजीवनतर्पणधारणादिभिर्विशेषैः सौम्य इत्यवगम्यते। स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति। भवतश्चात्र॥ "रञ्जितास्तेजसा ह्यापः शरीरस्थेन देहिनाम्।

अव्यापन्नाः प्रसवेन रक्तमित्यभिधीयते ॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते । तद्वर्षाद्द्वादशाद्ऊर्द्धं याति पञ्चाशतः क्षयम् ॥ आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकत्वापरे जीवरक्तमाहुराचार्याः ॥ "विस्रता द्रवता रागः स्यन्दनं लघुता तथा । भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते" । [यामु ।

असृपाटी स्त्री असृजः पाटी परिपाटी ष० । शोणितधारा-

असेचनक त्रि० न सिच्यते दृश्यति मनोऽत्र सिच–ल्युट् संज्ञायां कन् । १अत्यन्तप्रियदर्शने यद्दर्शनान्मनो न तृप्यति तत्र "नयनयुगासेचनकम् मानसदृष्ट्यापि दुष्प्रापम्" सा०द० । सेचनं सेकः अभावे न०त० स्वार्थे कन् । २सेचनाभावे न०ब० । ३सेचनशून्ये त्रि० ।

असेवन न० अभावे न०त० । १सेवाभावे न०ब० । २सेवाशून्ये

असौ अव्य० सो–बा०–डौ न०त० । अदःशब्दार्थे । "असौनामाऽयमिदं रूप इति" शत०ब्रा० । अयञ्च साक्षादादिः इति बहवः । असौऽत्य । गणरत्ने तु तत्र गणे अग्नौ इति पठितम् व्याख्यातञ्च अग्नौ इति तीक्ष्णत्वे अग्नोऽत्येति" इति । [२सौन्दर्य्यशून्ये त्रि० ।

असौन्दर्य्य न० अभावे न०त० । १सौन्दर्य्याभावे न०ब० ।

असौम्य त्रि० विरोधे न०त० । सौम्यत्वविरोधिघोरत्वयुक्ते

असौम्यस्वर त्रि० असौम्यः स्वरोयस्य । १काकतुल्यमन्दस्वरयुक्ते । २कठोरस्वरे च । [२सौष्ठवशून्ये त्रि० ।

असौष्ठव न० अभावे न०त० । १सौष्ठवाभावे न०ब० ।

अस्कन्न त्रि० स्कन्द–क्त न०त० । अक्षरिते । "स्खलनं क्षविरसादिति" शत०ब्रा० ।

अस्कम्भन त्रि० स्कम्भ–ल्युट् न०त० । १रोधनाभावे न०ब० । २रोधनशून्ये । "अस्कम्भने सविताद्यामदंहत्" । १०,१४९,१

अस्कृधोयु त्रि० क्षुद्रः क्षुद्रः निरु० न०त० ष्टुः साधु । १अविच्छिन्ने २अक्षुद्रे च । "अस्रे धत्तं यदसदस्कृधोयु" ऋ० ७,५३,३ । "युवोर्मित्रावरुणावस्कृधोयु" ऋ० ६,६७, ११ । अस्कृधोयुरजरः ६,२२'३ । "अस्कृधोयुरविच्छिन्नः" भा० ।

अस्खलित त्रि० न०त० । १अप्रच्युते स्वकर्त्तव्ये २अप्रमत्ते च "भूभृद्भिरप्यस्खलिता खलूक्तैः" माघः । "स मे चिरायास्खलितोपचाराम्" रघुः ।

अस्त च० अस्यन्ते सूर्य्यकिरणा यत्र आधारे क्त । १पश्चिमाचले, "अधिरोढुमस्तगिरिमभ्यपतत्" माघः । "विड्वत्य ह्यस्तनिमग्नसूर्य्यम्" रघुः । कर्मणि क्त २क्षिप्ते ३अवसिते च त्रि० "निरस्तः परावसुः" भवदेवः । "गतिरपास्तसंस्था भतिः" मालती० । "निरस्तगाम्भीर्यमपास्तधैर्यम्" माघः । भावे क्त । ४दर्शनायोग्यत्वे ५अवसाने न० । आधारे क्त । ज्योतिषोक्ते ६लग्नात् सप्तमे स्थाने न० । लग्नात् सप्तमस्थानस्य तथात्वञ्च तस्योदये लग्नस्यादर्शनहेतुत्वात् । तथा हि द्वादशराशिचक्रात्मकस्य प्रवहवायुनानिशं पश्चाद्गीयमानस्य भचक्रस्य मध्ये दिवा षट् राशयो रात्रौ च षट् क्रमेणोद्गच्छन्ति तत्रोदितलग्नानां च षण्णामेव दर्शनयोग्यता इतरेषां षण्णां तु भूमण्डलेनाच्छादनान्न दृश्यता । तत्र यस्य यस्य राशेरुदयः यस्मिन् समये जायते ततः सप्तमराशेरुदयसमये तस्य तस्यास्तत्वम् अदर्शनयोग्यत्वं भवतीति सप्तमराशेरुदयकालस्यास्तकारित्वम् । "जन्मलग्नात् सुखास्तान्त्यरिपुरन्ध्रेष्वशोभना" नील०ता० । ७अदर्शनप्राप्ते रव्यादिग्रहे त्रि० सूर्य्यादिग्रहाणामपि प्रागुक्तरीत्या-स्वाधिष्ठितराश्युदयेऽस्तत्वम् यथोक्तं सि०शि० । "निजनिजोदयलग्नसप्तमे सप्तदयोऽपि भवेद्दिनभःसदाम् । भवति चास्तविलग्नसप्तमे प्रतिदिनेऽस्तमयः प्रवहक्रमात्" निशीष्टलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः । दिनेऽपि चन्द्रोरविसन्निधानात् नास्तंगतत्वेत् सति दर्शने भा" । "नक्षत्राणामप्युदयास्तज्ञापनमपि तत्रैव "दृक्कर्मणा फलभवेन तु केवलेन भानां सुनेर्भगरिपोरुदयास्तलग्ने । कृत्वा तयोरुदयलग्नमिनं प्रकल्प्य लग्नं ततो निजनिजे पठितेष्टकाले" । यत् स्वादसावुदयभानुरथास्तलग्नाद्व्यस्तं विभार्धमपि लग्नकमस्तसूर्यः । इष्टोनषष्टि ६० घटिकास्त्र वास्तलग्नाल्लग्नं क्रमेण भदलोनितमस्तसूर्यः । स्वादुन्नतो निजनिजोदयभानुतुल्ये सूर्येऽस्तभास्करसमेऽस्तमयश्च भानाम् । अतोधिकोनकालिका रविभुक्तिभक्ता यातैष्यवासरमितिश्च तदन्तरे स्यात् । यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यशरातिदैर्घ्यात् । तिग्मांशुसान्निध्यवशेन नास्ति विलग्नस्य तस्यास्तमयः कथञ्चित्" । "भानामगस्यस्य लुब्धकस्य च पूर्व्ववदुदयास्तलग्ने साध्ये परन्तु केवलेन फलभवेन दृक्कर्मणा । ध्रुवस्य क्षतायनदृक्कर्मकत्वात् पुनरायनं दृक्कर्म न कर्त्तव्यमित्यर्थः । तत्रोदयलग्नमर्कं प्रकल्प्य लग्नं साध्यम् । तच्च स्वकीये पठितेष्टकाले । एवं यल्लग्नं सिध्यति स उदयार्को ज्ञातव्यः । अथ यदस्तलग्नमानीतं तच्चार्कं प्रकल्प्य निजनिजेष्टकाले विलोमं लग्नं साध्यम् । तद्राशिषट्कोनमस्तसूर्यसंज्ञं

भवति । अथवेष्टघटिकोनाभिः षष्टिघटिकाभिरस्त लग्नात् क्रमेण लग्नं साधितं तद्भदलोनितमस्तसूर्यो- भवति यदोदयभानुसमो भानुर्भवति तदा तस्य नक्षत्र- स्योदयो भवति । यदास्तसूर्यसमस्तदास्तमयः । यदा- गस्योदयः किलाभीष्टदिनात् कियद्भिर्दिनैरिति विज्ञातु- मिष्यते तदेष्टदिनार्कस्यागस्योदयार्कस्य चान्तरकला रवि- भुक्त्या भाज्याः । लब्धदिनैरगस्योदय एष्यः यद्युद- यार्को महान् । यद्यूनस्तदा गतः । अतोपपत्तिः उदयास्तलग्नसाधने तु पूर्व्वं कथितैव । उदयलग्नोदये किल भस्योदयः यदोदयलग्नसमो रविर्भवति तदा रविणा सह तन्नक्षत्रमुदेति । तस्मादुदयात् प्राक् पठितेष्टघटिकातुल्यं कालं यावत् तन्नक्षत्रं रविप्रभाभिर्हृतं क्षितिजादुपरि- स्थमपि न दृश्यते । अथ पठितेष्टकाले यत् क्रमलग्नं तत्स्थानस्थितो रविरुदयार्कतुल्यो भवति तथा रव्यस्तम- यादनन्तरं नक्षत्रास्तमयात् पूर्व्वं प्रत्यक् क्षितिजादुपरि- स्थमपि नक्षत्रं पठितेष्टकालं यावन्न दृश्यते । अथ नक्ष- त्रस्य क्षितिजादुपरिस्थितत्वात् प्रत्यक्क्षितिजस्थेनार्केण न्यूनेन भवितव्यम् । अतोऽस्तलग्नात् पठितेष्टकाले व्यस्तं कार्यम् । तल्लग्नं प्राक्क्षितिजस्थं भवति । अतः षड्भो- नितं प्रत्यक्क्षितिजेऽस्तसूर्यो भवतीत्युपपन्नम् । ॥ इष्टोन- षष्टि ६०घटिकास्वित्यादौ वासना सुगमैव । यस्य नक्षत्रस्यो- दस्तार्कादस्तार्कोऽधिको भवति तस्य नक्षत्रस्यार्कसान्निध्यव- शादस्तं नास्तीति वेदितव्यम् । इदं कुत इत्यत आह सौम्यशरादिदैर्घ्यात् । यस्य यस्य सौम्यः शरो दीर्घो भवति तस्य पलोद्भवासवो बहवो भवन्ति ॥ तैर्विलोमलग्ने क्रिय- माणे उदयलग्नमूनं भवति । अस्तलग्नं क्रियमाणमधिकं भवति । ताभ्यां क्षुद्रयास्तार्कौ साध्यौ । तत्रास्तार्केण किल न्यूनेन भवितव्यम् । अस्तार्कसमे रवौ किलादृश्यतारम्भस्ततः कियन्ति च दिनान्यदृश्यं भूत्वोदया- र्कसमे रवौ तद्भिन्नमुदेति । अत उदयार्केणाधिकेन भवितव्यम् । यतोऽर्कसन्निधिवशेनैतावुदयास्तौ । यथा यथा सौम्यशरस्य दीर्घत्वं यथा यथाक्षवशेन गोलस्य दक्षिणतो नमनं तथा तथोदयास्तार्कयोरल्पमन्तरं भवति । अल्पान्तरेऽल्पान्येव दिनानि तन्नक्षत्रमदृश्यं भवति । एवं यस्मिन् देशे उदयास्तार्कौ तुल्यौ भवतस्ततः परं तस्मिन् देशे तस्य नक्षत्रस्यार्कसन्निधभावेनादृश्यता इति युक्तितः सिद्धम्" प्रभि० । अस्तलग्नसाधनमप्युक्तं तत्रैव "यत लग्नमपमण्डलं कुजे तद्दृष्टहाद्यमिह लग्नमुच्यते । प्राचि। पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे" कुजे भूमिमण्डलगते रेखादृत्ते अपमण्डलं ततो निरक्षदेशम- मण्डलम् । ग्रहाणामुदयास्तांशानाह तत्रैव । "प्राच्या- मुदेति क्षितिजोऽष्टदस्रैः २८ शक्रै १४ र्गुरुः सप्तकु- भिश्च १७मन्दः । स्वस्वोदयान्तोनित ३६०चक्रभागै-२२२ । ३४६ । ३४३ । स्वयो व्रजन्त्यस्तमयं प्रतीच्याम् । खाब्धै ५० र्जिनै २४ र्भसितयोरुदयः प्रतीच्यामस्तञ्च पञ्चतिथिभि १५५ र्मुनिसप्तभूभिः १७७ । प्रागुन्नमः शरनखै २०५ क्षिष्टतिप्रमाणै-१८२ रस्तञ्च तत्र दश- वह्निभि ३१० रङ्कदेवैः ३२६ । अवक्रवक्रास्तम- योदयोक्तभागाधिकोनाः कलिका विभक्ताः । द्व्यकेन्द्रभुक्त्या- म्रदिनैर्गतैर्व्यैरवक्रवक्रास्तमयोदयाः स्युः" । "बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते । मलमास इवैतानि वर्ज्जयेद्वेददर्शनम् । पक्षं वृद्धस्तु पूर्व्वेण दशाहं पश्चिमेन तु । प्रत्यग्बालो दशाहन्तु पूर्व्वेण च दिनत्रयम्" ज्यो०त० पूर्व्वेणेति प्रातःप्रातः पूर्व्वदिशि दृष्ट्वा रविकिरणाच्छन्न- तया न दृश्यते चेदुग्रहस्तदा प्रागस्तमितः तत्रास्तमितात् प्राक् पक्षं वृद्धः । पश्चिमेनेति । एवं सायंसायं अपरदिशि दृष्ट्वा रविकिरणाच्छन्नतया न दृश्यते चेदुग्रह- स्तदा प्रत्यगस्तमितस्तत्रास्तमितात् प्राक् दशाहं वृद्धः" । "द्वात्रिंशद्दिवसास्ते जीवस्य भार्गवस्य च । द्वात्रयस्तिर्भ- वत्यस्ते पादास्ते द्वादश क्रमात्" । इति ज्योतिर्विदुक्त- कालानन्तरमपरदिशि दृश्यते चेत्तदा दशाहं प्रत्यग्बालः पूर्व्वदिशि चेत्तदा दिनत्रयं प्राग्बाल इति भङ्गान्तरेणाह । "पक्षं वृद्धोग्रहास्ते तु बालत्वात् दशाहिकः । पादास्ते तु दशाहानि वृद्धोबालोदिनत्रयम्" इति च ज्यो०त०रघु० ।

अस्तक पु० अस्तं अपुनरावृत्तिम् अवसानं वा करोति अस्त+ णिच्-ख्वुल् । निर्व्वाणमोक्षे ।

अस्तग त्रि० अस्तमदर्शनं गच्छति गम-ड ईत० । १ सूर्य्य- किरणाच्छन्नतया अदृश्येग्रहे २अदर्शनगतमात्रे च । अस्त- गतादयोऽत्र ।

अस्तगमन न० अस्तस्यादर्शनस्य गमनम् । ग्रहाणां स्वाक्रान्त- राश्यपेक्षया सप्तमराश्युदये अदर्शनगमने "भीमसेन भजे- थास्त्वं प्रागस्तगमनाद्रवेः"भा०आ०प०१५५अ० ।

अस्तम् अव्य० अस-तमि । १नाशे, २अदर्शने च । "दृष्टे- नास्तमितत्विषा" कुमा० । "राज्यमस्तमिरेश्वरम्" रघुः । "सर्व्वञ्च तिलसंबन्धं नाद्यादस्तमिते रवौ" । "नेक्षेतोद्य- न्तमादित्यं नास्तंयान्तं कदाचन" चतुरोऽस्तमिते सूर्य्ये

शिशुचान्द्रायणं स्मृतम्' मनुः। "धृतिरस्तमिता गतिश्रुता" रघुः। [पर्य्यन्तेऽस्ते

अस्तमती स्त्री अस्तमतति अत-अच्-गौरा० ङीष्। शाल-

अस्तमन न० अस-ल्युट्-भावेऽप् अस्तम् अस्यस्य अनःगतिः। भगोलकक्षया तिरोधानेन, १ सूर्य्यादेरदर्शनगमने "तिरोधानञ्च यत्तेति तदेवास्तमनं रवेः। नैवास्तमनमर्कस्योदयः सर्व्वदा सतः" इति ज्योतिषोक्तेस्तथात्वम् ब०। "उदयास्तमने नाथ! दर्शनादर्शने रवेः" पुरा०। "उदयास्तमनक्लेशं न हृष्यति न शोचति" भा०ब० २५७ अ०। सूर्य्यास्तमनवेलायामासेदुस्ते महद्वनम्" भा०आ०प०२अ०। "उदयास्तमने भानुः प्रदक्षिणमवर्त्तत" भा०भी०प०। २तत्काले च।

अस्तमय पु० अस्तोमीयते ज्ञायते यत्र मिन्-अच् वा न ह्रस्वात्। १प्रलये, २सूर्य्यादेरदर्शने "करोत्यकालास्तमयं विवस्वतः" किरा०। "उदयश्चनाम सवितुरस्तद्गिरिवासिनां प्राणिनां चक्षुर्गोचरापत्तिस्तदस्तमयश्चास्तमयः न परमार्थतः उदयोऽस्तमयोवा" तद्गिरिवासिनाञ्च प्राणिनामभावे तान् प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरतापत्तेस्तदस्तमयस्य च तत्राभावात्" छा०उ०भाष्यम्। तथा च भट्टोत्पलार्द्धान्तरालस्थानएवोदयास्तमयौ भवतः "लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्द्धं यमकोटिपुर्य्याम्। अवन्तदा सिद्धपुरेऽस्तकालःस्याद्रोमके रात्रिदलं तथैव" सि०शि०। भूवृत्तचतुर्थांशे स्थितानां पुरांमध्ये प्रथमपुर्य्यामुदये तृतीयेऽस्तत्वोक्तेस्तथात्वम्। शा० भाष्ये तु यदाऽमरावत्यां मध्याह्नगतः सविता तदा संयामिन्यामुदन् दृश्यते तत्र मध्याह्नगोचरोवारुण्यामुदन् दृश्यते इत्युक्तम्" ग्रहाणां च सूर्य्यातिप्रत्यासत्त्या प्रकाशाभावेऽस्तत्वम् तद्वियोगे चोदयः। "रविणास्तमयोयोगो वियोगस्तूदयो भवेत्" इत्युक्तेः अन्यग्रहाणां २ रवियोगे च।

अस्तरण न० अभावे न०त०। स्तरणाभावे। तत्र दीयते कार्य्यम् वा व्युत्पा० अण्। आस्तरणम् तत्र देये कार्य्ये च त्रि०।

अस्ताघ त्रि० अस्तमघं कालुष्य-यत्र। अतिगभीरे हेम०।

अस्ताचल पु० अस्यन्ते किरणा यत्र आधारे क्त कर्म०। पश्चिमाचले अस्तगिरौ। "अस्ताचलचूडावलम्बिनि भगवति मरीचिमालिनि" काद० अस्ताद्रिप्रभृतयोऽत्र।

अस्ति अव्य० अस्-क्तिप्। १स्थितौ, विद्यमानतायाञ्च "अस्ति नास्ति न जानातीति" चाण्य०। २तद्वति च अस्तिवीरा अस्तिपरलोक इति मतिर्यस्य आस्तिकः नास्तिकः। चतुरर्थ्यां पक्षा० फक्। आस्तायनः। तत्सन्निकृष्टदेशादौ त्रि०।

अस्तिकाय पु० अस्ति कायः स्वरूपं यस्य। जैनमतसिद्धे विद्यमानतास्वरूपे पदार्थभेदे। अस्तिकायाश्च पञ्चविधाः जीवास्तिकायः पुद्गलास्तिकायः धर्म्मास्तिकायः अधर्म्मास्तिकायः आकाशास्तिकायश्चेति अर्हच्छब्दे ३८६ पृष्ठे विवरणम्। शा०भाष्ये तन्मतमन्यस्य निराकृतं यथा "सर्व्वेषामप्यन्येषामवान्तरप्रभेदान् बहुविधान् स्वसमयपरिकल्पितान् वर्णयन्ति। सर्व्वत्र चेमं सप्तभङ्गीनयन्यायमवतारयन्ति। स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्याद् वक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति नास्ति चावक्तव्य-श्चेति। एवमेवैकत्वनित्यत्वादावपीमं सप्तभङ्गीनयं योजयन्ति। अत्राचक्ष्महे नायमभ्युपगमोयुक्त इति। कुतः "एकस्मिन्नसम्भवात्" सू०। नह्येकस्मिन् धर्म्मिणि युगपत्सदसत्त्वादि विरुद्धधर्मसमावेशः सम्भवति शीतोष्णवत्। यदपि सप्त पदार्था निर्द्धारिता एतावन्त एवंरूपाश्चेति ते तथैव वा स्युः। नैव वा तथा स्युः। इतरथा हि तथा वा स्युर्न तथा वेत्थं निर्द्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्। ननु अनेकात्मकं वस्त्विति निर्द्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं सम्भवितुमर्हति। नेति ब्रूमः निरङ्कुशं ह्यनेकान्तं सर्व्ववस्तु प्रतिजानानस्य निर्द्धारणफलस्यापि वस्तुत्वाविशेषात् स्यादस्तिस्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्द्धारणात्मकतैव स्यात्। एवं निर्द्धारविषयनिर्द्धारणफलस्य च स्यात्। पक्षेऽस्तिता स्यान्नापक्षे नास्तितेत्येवं सति कथं प्रमाणभूतः संशीर्षकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्द्धारितारूपदेष्टुं शक्नुयात् कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्द्धारितरूपे प्रवर्त्तेरन्। ऐकान्तिकफलत्वनिर्द्धारणे हि सति तत्साधनानुष्ठानाय सर्व्वोलोकोऽनाकुलः प्रवर्त्तते नान्यथा। अतश्चानिर्द्धारितार्थं शास्त्रं प्रणयन्नत्तोन्मत्तवदनुपादेयवचनः स्यात्। तथा पञ्चानामस्तिकायानां पञ्चत्वसंख्यास्ति वा नास्ति वेति विकल्पयमानं स्यादिति तदेकस्मिन् पक्षे। पक्षान्तरे तु न स्यादित्यतोन्यूनसंख्यात्वमधिकसंख्यात्वं वा प्राप्नुयात्! नचैषां पदार्थानामवक्तव्यत्वं सम्भवति अवक्तव्याश्चेदुच्चरेयुरुच्यन्ते चावक्तव्याश्चेति विप्रतिषिद्धम्। उच्यमानाश्च तथैवावधार्य्यन्ते नावधार्य्याश्च इति च तथावदवधारणफलं सम्यग्दर्शनमस्ति वा नास्ति

वा एवं तद्विपरीतमसम्यगदर्शनमस्ति वा नास्ति वेति प्रतिपन्नस्तोन्नतपक्षस्यैव स्यात् प्रत्याययितव्यपक्षस्य। स्वर्गापवर्गयोश्च पक्षे भावः पक्षेचाभावः तथा पक्षे नित्यता तथा पक्षेचानित्यता इत्यनवधारणायां प्रवृत्त्यनुपपत्तिः। अनादिसिद्धजीवप्रवृत्तीनाञ्च स्वशास्त्रावधृतभावानामयथावधृत स्वभावत्वप्रसङ्गः। एवं जीवादिषु पदार्थेष्वेकस्मिन् धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोरसम्भवात् सत्त्वे चैकस्मिन् धर्मेऽसत्त्वस्य धर्मान्तरस्यासम्भवादसत्त्वे चैवं सत्त्वस्यासम्भवाद सङ्गतमिदमार्हतं मतम्। एतेनैकानेकनित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमानिराकृतामन्तव्याः। यत्तु पुद्गलसंज्ञकेभ्योऽणुभ्यः सङ्घाताः सम्भवन्तीति कल्पयन्ति तत् पूर्व्वमेवाणुवादनिराकरणेन निराकृतसम्भवतीत्यतोन पृथङ्निराकरणाय प्रयत्यते"। अस्तिनास्तिकायादयोऽप्युन्नेयाः। अणुवादनिराकरणद्वारेणासम्भवादग्रन्थे दृश्यम्।

अस्तिक्षीरा स्त्री अस्ति क्षीरं यस्याः। बड़दुग्धवत्यां स्त्रीगव्यादौ।

अस्तित्व न० अस्ति भावः त्व। विद्यमानत्वे। "न हि देहान्तरसम्बन्धिन आत्मनः प्रत्यक्षेणास्तित्वज्ञाने लौकायतिकाः बौद्धाश्च प्रतिकूलाः स्युः नास्त्यात्मेति" इ० उ० भा०। "सर्व्वोहयात्मास्तित्वं प्रत्येति न नाहमस्मीति" शा०भा०। तल्। अस्तितायत्र स्त्री। "गौरस्तितावान् अस्तिपङ्क्तसमभिव्याहृतगौःपदस्मारितत्वात्" शब्दम०। [स्त्रियां ङीप्।

अस्तिमत् त्रि० अस्ति विद्यमानं धनमस्य मतुप्। धनिनि

अस्तु अव्य० अस-दीप्तौ तुन्। १अनुज्ञायां, २पीड़ायाम् ३प्रतिक्षेपे ४असूयायाम्, ५प्रकर्षे, ६अङ्गीकारे, ७प्रशंसायाम्, ८लक्षणे, ९असूयापूर्व्वकाङ्गीकारे च। "अस्तोश्चेति वक्तव्यम्" वार्त्ति० सुम्। अस्तुङ्कारः अभ्युपगमः।

अस्तेन त्रि० न०त०। चोरभिन्ने।

अस्तेय न० अभावे न०त०। १स्तेयाभावे। "लोभस्य प्रतः कोऽभो सत्यास्तेयापरिग्रहाः" प्रबोधच० "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहायमाः" पात०सू० उक्ते २यमभेदे च "बलाद्हरसि वा परवित्ताहरणं स्तेयं तदभावोऽस्तेयम्" इक्तिः। तादृशयमानुष्ठानेऽवान्तरफलमपि तत्र दर्शितम्। "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" पात०सू०। दिव्यरत्नानां स्वयमागत्यनिकटे उपस्थितिरित्यर्थः।

अस्तोभ त्रि० नास्ति स्तोभः हुंफड़ादिः निरर्थकः शब्दोयत्र निरर्थकशब्दशून्ये "अस्तोभमनवद्यञ्च स्तुतं स्तुतविदो विदुः" विवरणं स्तोभशब्दे। [पाठान्तरम्।

अस्त्य न० अस्ति विद्यमानतायै हितम् यत्। गृहे निरुक्ते

अस्त्यान न० स्त्यै-क्त भावे न०त०। १निन्दायाम्, २मर्त्सने च। कर्त्तरि क्त स्त्यानः संहत न०त०। तद्भिन्ने त्रि०।

अस्त्र न० अस्यते क्षिप्यते अस-ष्ट्रन्। १ क्षेपणास्त्रे शरादौ करणे ष्ट्रन्। २चापे, धनुषि ३रिपुक्षेपणसाधने प्रहरणमात्रे खड्गादावपि। "प्रयुक्तमस्त्रमितो वृथा स्यात्" "प्रत्याहृतास्त्रो गिरिशप्रभावात्"। "अतिप्रबन्धप्रहितास्त्र दृष्टिभिः" इति च रघुः। "अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणः" वेणी०। [कारत्वात्तयात्वम्।

अस्त्रकण्टक पु० अस्त्रं कण्टकइव। बाणे तस्याप्रस्य कण्टकावत्।

अस्त्रकार त्रि० अस्त्रं करोति निर्म्मिमीते कृ-अण् उप० स०। शस्त्रनिर्म्माणकारके। ण्वुल्। अस्त्रकारकोऽप्यत्र।

अस्त्रचिकित्सा स्त्री अस्त्रेण चिकित्सा। सुश्रुतोक्ते अस्त्रेण चिकित्साभेदे सा च यथा। "अस्मिन् शास्त्रे शस्त्रकर्म्मप्राधान्याच्छस्त्रकर्म्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च॥ तच्च शस्त्रकर्म्माऽष्टविधम्। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति॥ अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाहङ्गुजलौकालाबूजाम्बवोष्ठपिचुमृदुस्त्रपत्रपट्टमधृतवसातैलकषायालेपनकल्कव्यजनशीतोष्णोदकघटाद्यादीनि परिकर्म्मणस्तु स्निग्धाः स्थिरा बलवन्तः॥ ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्च्चयित्वा कृतबलिमङ्गलस्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मसिरास्नायुसन्ध्यस्थिधमनीः परिहरन्नुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमुक्तं तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः भवन्त्यात्र॥ आयतस्तु विशालस्तु सुविभक्तो निराश्रयः। प्राग्गकालकृतश्चापि व्रण कर्म्माणि शस्यते॥ शौर्य्यमायुक्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू। असंमोहश्च वैद्यस्य शस्त्रकर्म्माणि शस्यते॥ एकेन वा व्रणेनाशुध्यमानेनान्तराबद्धावेध्यापरान् व्रणान् कुर्य्यात्। भवति चात्र॥ यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च। तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति॥ तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकजाकुक्षिवङ्क्षणेषु तिर्य्यक्छेदः उक्तः। चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत्। अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान्॥ अन्यथा

तु सिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दोत्पादुर्भावश्चेति । मूढगर्भोद्धरार्थोऽङ्गारीभगन्दरसुखरोगेष्वभुक्तवतः कर्म्म कुर्वीत । ततः शस्त्रमवचार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात्परिषेच्याङ्गुल्या व्रणमभिस्पृश्य प्रक्षाल्य कषायेण स्रोतोनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढामौषधयुक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां घनाङ्गवलिकान्दत्त्वा वस्त्रपट्टेन बध्नीयाद्देवदारुचोत्पलैर्धूपैर्धूपयेद्गोधूमैश्च सन्धैरन्तां कुर्वीत । ततोयुग्मगुल्गगुरुसर्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रव्याभिश्चैराज्ययुक्तैर्धूपैर्धूपयेत् । आज्यशेषेण चास्य प्राणान् समालभेत" । "ततः कृतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत् । ततस्तृतीयेऽहनि विस्रुत्यैवं बध्नीयाद्वस्त्रपट्टेन नचैनं त्वरमाणोऽपरेद्युर्मोक्षयेत् । द्वितीयदिवसे परिमोक्षणाद्विधयितो व्रणश्चिराद्रुपसंरोहति तोव्ररुजश्च भवन्ति । अत ऊर्द्धं देशकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचाराननुविदध्यात् । नचैनं त्वरमाणः स्नान्तदोषं रोपयेत् स ह्यल्पेनाप्यपचारेणाभ्यन्तरसुत्सङ्गं कृत्वा भूयोऽपि विकरोति ॥ भवन्ति चात्र । तस्मादन्तर्व्यहिश्चैव सुशुद्धं रोपयेद्व्रणम् । रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् । हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् ॥ हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् । तत्राहाद्यात्राच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ॥ प्रदीप्तागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥ या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रदुनोति जन्तोः । तेन सा शान्तिमुपैति सिक्ता कोष्णेन यष्टीमधुकान्वितेन ॥ अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक्" अस्त्राकारादि विवरणं तत्रैव "विंशतिः शस्त्राणि ॥ तद्यथा । सण्डलाग्रकरपत्रद्विपत्रनखशस्त्रसूद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखसारावेतसपत्रकवडिशदन्तशङ्खेषण्य इति । तत्र सण्डलाग्रकरपत्रे स्यातां छेदने लेखने च । द्विपत्रनखशस्त्रसूद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च । सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे । कुठारिकाव्रीहिमुखसारावेतसपत्रकाणि व्यधने सूची च । वडिशोदन्तशङ्खौ हरणे । एषणेऽवगे आनुलोम्ये च । सूच्यः सेवने । इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः । तेषामथ यथायोगग्रहणतदासोपायः कर्म्मसु वक्ष्यते । तत्र द्विपत्रं दन्तफलसाधारणे भागे गृह्णीयाच्छेदनान्येवं सर्वाणि । द्विपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने वक्रयोऽवचार्य्य दन्ताग्रे विस्रावणानि । विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्चकेन विस्रावयेत् । तत्प्रच्छादितदन्तमङ्गुष्टप्रदेशिनीभ्यां व्रीहिमुखम् । कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्याऽङ्गुष्ठविष्टब्धयाभिगृह्णन्यात् । आराकरपत्रैषण्यौ मूले । शेषाणि तु यथायोगं गृह्णीयात् । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र नखशस्त्रैषण्यावष्टाङ्गुले सूच्यो वक्ष्यन्ते वडिशो दन्तशङ्खावानताग्रे तीक्ष्णकण्टकप्रथमवयवपत्रमुखे । एषणी गण्डूपदाकारमुखी । प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा सूद्रिका । दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते । शेषाणि तु षडङ्गुलानि । तानि सुपरिहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितसुखाग्राण्करालानि चेति शस्त्रसम्पत् । तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिक्षुद्रमित्यष्टौ शस्त्रदोषाः । अतो विपरीतगुणमाद्दीतान्यत्र करपत्रात्त्रिखरधारमस्थिच्छेदनार्थम् । तत्र धारा भेदनानां सारूरी । लेख नानामर्द्धसारूरी । व्यधनानां विस्रावणानाञ्च कैशिकी । छेदनानामर्द्धकैशिकीति । तेषां पायना त्रिविधा क्षारोदकतैलेषु । तत्र क्षारपायितं शरशस्त्रास्थिच्छेदनेषु । उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिरास्नायुच्छेदनेषु । तेषां निशानार्थं श्लक्ष्णशिला शास्त्रवर्त्मा । धारासंस्थापनार्थं शस्त्रलीफलकमिति । भवति चात्र । यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम् । सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत् ॥ अनुशस्त्राणि तु त्वक्सारस्फटिकाक्षकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रशरीरबालाङ्गुलय इति । शिम्बूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् । त्वक्सारादि चतुर्व्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥ आहार्य्यच्छेद्यभेद्येषु नखं शस्त्रेषु योजयेत् । विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम् ॥ ये सुमुखगता रोगा नेत्रवर्त्मगताश्च ये । गोजीशेफालिकाशाकपत्रैर्व्विस्रावयेत्तु तान् ॥ एष्वेषेष्वगदाभे तु बालाङ्गुल्यङ्गुरा हिताः । शस्त्राण्येतानि मतिमान् शुद्धयैकायसानि तु । कारयेत्करणैः प्राप्तं कर्म्मारं कर्म्मकोविदम् ॥ प्रयोगशस्त्र वैद्यस्य त्रिभिर्भवति नित्यशः । तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा" ॥

अस्त्रजित् पु० अस्त्रं तदाघातजं व्रणं जयति निवारकत्वात्। (कवाटवेट्) वृक्षभेदे।

अस्त्रजीविन् पु० अस्त्रेण जीवति णिनि। अस्त्रव्यापारेण जीविकावति शस्त्रजीव्यादयोऽप्यत्र अण् अस्त्रजीवोऽप्यत्र।

अस्त्रधारिन् त्रि० अस्त्रं धारयति धारि-णिनि। अस्त्र धारके। ख्वुल्। अस्त्रधारकोऽप्यत्र।

अस्त्रमन्त्र पु० अस्त्राणां प्रयोगसंहारयोर्मन्त्रः। १शस्त्रप्रयोगादिमन्त्रभेदे। "सम्मोहनं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्"। "उदङ्मुखः सोऽस्त्रविदस्त्र-मन्त्रम्" इति च रघुः। तन्त्रोक्तेऽङ्गन्यासान्तर्गते फडिति २मन्त्रे च। [ष्ण्यताकारके। ख्वुल् अस्त्रमार्जकोऽप्यत्र।

अस्त्रमार्ज्ज पु० अस्त्रं मार्ष्टि मृज-अण् उप०स०। शस्त्रतो-

अस्त्रयुद्ध न० ६त०। अस्त्रेण युद्धे।

अस्त्रविद् पु० अस्त्रं तत्प्रयोगादि वेत्ति विद्-क्विप् ६त०। शस्त्रप्रयोगाद्यभिज्ञे "सोऽस्त्रविदस्त्रमन्त्रम्" रघुः।

अस्त्रविद्या स्त्री ६त०। १अस्त्रप्रयोगसंहारज्ञापकविद्यायाम् २तद्बोधके शास्त्रे च धनुर्वेदशब्दे विवृतिः।

अस्त्रवेद पु० अस्त्रस्य तत्प्रयोगादेः ज्ञापकोवेदः शाकपा०। धनुर्वेदे तच्छब्दे विवृतिः।

अस्त्रसायक पु० अस्त्रं चेषं सायकइव। १नाराचास्त्रे तस्य सायकतुल्यतया क्षेपकत्वात्तथात्वम्। अस्यते "शत्रुरनेन अस-करणे ष्ट्रन् कर्म्म०। २सर्व्वलौहमये बाणे।

अस्त्रहीन त्रि० अस्त्रेण तत्प्रयोगेण वा हीनः। १अस्त्रशून्ये २शस्त्रव्यापारशून्ये वाग्युद्धादौ।

अस्त्रागार न० ६त०। आयुधागारे शस्त्रादिस्थापनगृहे।

अस्त्राघात पु० ६त०। अस्त्रेणाघाते।।

अस्त्राहत त्रि० अस्त्रेणाहतः। १शस्त्रहते २शस्त्रेण क्षते च।

अस्त्रिन् त्रि० अस्त्रं धनुरस्यास्ति इनि। १धनुर्द्धरे, २शस्त्रधारिमात्रे च। "अस्त्रीजनः पुनरनेन, कृतः किल स्त्री" उद्भटः।

अस्थाग त्रि० अस्थामस्थितिं गच्छति गम-ड। अगाधे क्षेम०।

अस्थान न० अप्राशस्त्ये न०त०। अप्रशस्तस्थाने अयोग्यस्थाने "अस्थाने पतितामतोव महतामेतादृशी स्याद्गतिः" सा०द०।

अस्थाने अव्य० स्थाने युक्तं न०त०। अयुक्ते।

अस्थायिन् त्रि० विरोधे न०त०। चञ्चले स्त्रियां ङीप्।

अस्थावर त्रि० विरोधे न०त०। स्थावरभिन्ने जङ्गमे। "प्रपौत्रपर्य्यन्तरहितस्य मृतस्य विभक्ताविभक्तस्यावरास्था-वरधने पत्नी प्रथममधिकारिणीति दायभागानुसारिणः।

अस्थि न० अस्यते अस+क्थिन्। मांसाभ्यन्तरस्थे (हाड़) इति ख्याते धातुभेदे। अस्थिस्वरूपादयुक्तं भावप्रका०। "मेदोयत्स्वाग्निना पक्वं वायुना चातिशोषितम्। तदस्थिसंज्ञां लभते स सारः सर्व्वविग्रहे। अभ्यन्तरगतैः सारैर्यथा-तिष्ठन्ति भूरुहाः। अस्थिसारैस्तथा देहाधिष्ठन्ते देहिनां ध्रुवम्। तस्मान्निरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्। अस्थीनि न विनश्यन्ति सारा एतानि सर्व्वथा"। अथास्थां संख्या-माह। "शस्त्यतन्त्रेऽस्थिखण्डानां शतत्रयमुदाहृतम्। तान्येवात्र निगद्यन्ते तेषां स्थानानि यानि च। सविंशति-शतन्त्वस्थां शाखासु कथितं बुधैः। पार्श्वयोः श्रोणिफलके-वक्षःपृष्ठोदरेषु च। जानीयाद्विंशतेषु शतं सप्तदशोत्तरम् ग्रीवायामूर्द्धगां विद्यादस्थां षष्टिं त्रिसंयुताम्"। तत्र शाखागतान्याह। "एकैकस्यां पादाङ्गुल्यां तीणि तीणि तानि पञ्चदश पादतले पञ्चास्थिशलाकास्तदाधारभूत-मेकमस्थि। एवं षट् कूर्चे द्वे २ गुल्फे द्वे २ पार्ष्णावेकैकं २जङ्घयोर्द्वे २ जानुन्येकैकम् २ एवं त्रिंशदेक-स्मिन् सक्थिनि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। अथ पार्श्वादिगतान्याह। "पार्श्वयो षट्त्रिंशत् ३६ षट्त्रिंशत् ३६। शिश्ने भगे वा एकं १ नितम्बयोरेकैकं २ त्रिके एकम् १ वक्षस्यष्टौ ८ पृष्ठे-त्रिंशत् अचक्रसंज्ञे द्वे २" योगात् ११७। अथ ग्रीवोर्ध्व-गतान्याह। ग्रीवायां नव ६कण्ठनाड्यां चत्वारि ४ हन्वो-रेकैकं २ दन्तेषु द्वात्रिंशत् ३२ नासायां तीणि ३ तालु-न्येकं १ गण्डयोरेकैकं २ कर्णयोरेकैकं २ शङ्ख्योरेकैकं २शिरसि षट्। एतान्यस्थीनि पञ्चविधानि भवन्ति तानि यथा "तरुणानि कपालानि रुचकानि भवन्ति च। वल-यान्यपि तानि स्युर्नलकानि च कानिचित्। अस्थिकोषश्रुति प्राणग्रीवासु तरुणानि हि। शिरःशङ्खकपोलेषु तालु-सम्रोथजादिषु। कपालानि भवन्त्येषु, दन्तेषु रुचकानि च। प्रायः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु। पादयोर्वलयानि स्युर्नलकानि भुवेऽधुना। हस्तपादाङ्गुलितले कूर्चे च मणि-बन्धयोः। बाहुजङ्घाद्वये चापि जानीयाच्चलकानि तु"। अथैषां प्रयोजनमाह "मांसान्यन्यानि बद्धानि शिराभिः स्नायुभिस्त्वचा। अस्थीन्यालम्बनं लब्ध्वा न दीर्य्यन्ते पतन्ति न" सुश्रुते। याज्ञ० तु "प्राधान्यात् अन्यथासंख्याऽभिहिता यथा। "स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः। पाणि-पादशलाकाश्च तासां स्थानचतुष्टयम्। षष्ठ्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम्। चत्वार्यरत्निकास्थीनि जङ्घयो-स्त्रावदेव तु। द्वे द्वे जानुकपोलोरुफलकांससक्थ्नके। अक्ष-

तालुषके त्रीणीफलके च विनिर्दिशेत् । भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च । ग्रीवा पञ्चदशास्थिः स्याज्जत्रुकैकं तथा हनुः । तन्मूले द्वे ललाटास्थिगण्डे नासा धनास्थिका । पार्श्वकाः स्युर्दशकैः सार्द्धनवदशैव द्विसप्ततिः । द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा । उरःसप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः" "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचम्" इति स्मृतिः "मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्" मनुः अल्पार्थे कन् । अस्थिकं तत्रार्थे ।

अस्थिकृत् पु० कृ–क्विप् तैत० । अस्थिकारके मेदसि धातौ । यथा मेदसोऽस्थिकरत्वं तथोक्तम् अस्रक्करशब्दे ५५८ पृष्ठे ।

अस्थिच्छलित न० "कण्ठकमत्स्यकर्षं चूर्णितं पिच्छितमस्थिच्छलितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधमिति" काण्डभग्नसुपक्रम्य "पार्श्वयोरस्थिहीनोन्नतमस्थिच्छलितमिति" सुश्रुतोक्ते काण्डभग्नरूपरोगनिदानभेदे ।

अस्थिज पु० अस्थ्नो जायते जन–ड । अस्थिधातोर्जाते मज्जनि यथा चास्थ्नोमज्जजन्म तथोक्तमस्रक्करशब्दे ५५८ पृष्ठे ।

अस्थिति स्त्री अभावे न०त० । १स्थित्यभावे अस्थैर्ये । "अस्थितेश्च शरीरस्य पुंसां चैवायुषः क्षयात् । आनन्त्यात् कुलधर्म्माणां द्वादशाहः प्रशस्यते" इति स्मृतिः । अस्थितिः सङ्गीतसुरजध्वनीनाम्" काद० । २मर्य्यादाभावे । न०व० । ३मर्य्यादाशून्ये ४स्थैर्य्यशून्ये च त्रि० ।

अस्थितुण्ड पु० अस्थीव कठिनं तुण्डमस्य । विहङ्गमे ।

अस्थिधन्वन् पु० अस्थि अस्थिमयं धनुरस्य अनङ् समा० । शिवे । [पिञ्जराकारे कङ्काले ।

अस्थिपञ्जर पु० अस्थि पञ्जर इव । शरीरस्थास्थिसंहतौ

अस्थिप्रक्षेप पु० मृतस्यास्थ्नां गङ्गाजले विधानेन प्रक्षेपः । विधानेन मृतस्यास्थ्नां गङ्गाजले क्षेपणे तत्प्रकारश्च आदिपु० "भागीरथी यत्र यत्रास्ति तीर्थं कुलद्वये चापि यदा विपन्नः । तदा तदा तत्र तस्याथ भक्त्या भावेन चास्थीनि विनिक्षेपेच्च । स्नात्वा ततः गन्धगव्येन सिक्त्वा हिरण्यमध्याज्यतिलैश्च योज्य । ततश्च मृत्पिण्डपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढाम् । नमोऽस्तु धर्म्माय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च । उत्थाय भास्वन्तमवेक्ष्य सूर्य्यं स दक्षिणां विप्रमुखाय दद्यात्" । "एतद्भूर्ं तीर्थचिन्तामणौ अन्यथा पठितम्" तदुयथा । "स्नात्वा तयोस्तीर्थे च भास्करञ्च दृष्ट्वा प्रदद्यादथ दक्षिणान्तु" इति । "एवं कृते प्रेतपुरस्थितस्य स्वर्गे स्थितिः स्याच्च मन्वेन्द्रतुल्या" इति च । तत्प्रयोगश्च प्रा० त० द्रष्टव्यः ।

अस्थिभक्ष पु० अस्थि भक्षयति भक्ष–अण् । (हाड़गिला) १पक्षिणि, २कङ्कुरे च । भुज–क्विप् । अस्थिभुगादयोऽत्र ।

अस्थिभङ्ग पु० अस्थ्नो भङ्गः । अस्थिभङ्गे "अस्थिभङ्गे गवाञ्चैव लाङ्गूलस्य च भेदने" स्मृतिः ।

अस्थिमत् त्रि० अस्थीनि सन्त्यस्य मतुप् । अस्थियुक्ते प्राणिनि "अस्थिमतां तु सत्त्वानां सहस्रञ्च प्रमाथ च । पूर्णे वानस्पत्यां तु शूद्रहत्याव्रतं चरेत्" । किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति" मनुः अस्थिमतां शकलासादीनामनस्थ्नां मत्कुणादीनाम्" कुल्लू० । [निर्म्मिते अस्त्रादौ ।

अस्थिमय त्रि० अस्थ्नोविकारः मयट् स्त्रियां ङीप् । अस्थि

अस्थिमाला स्त्री अस्थिनिर्म्मिता माला । अस्थिनिर्म्मितगुटिकायां १मालायाम् तैत० । २अस्थिश्रेण्यौ च ।

अस्थिमालिन् पु० अस्थिमयी माला ऽस्यास्य इनि । शिवे ।

अस्थियुज् पु० अस्थि युनक्ति युज–क्विन् । (हाड़जोड़ा) हस्तिशुण्डाद्यस्थ्ने । [ध्वजनाम्" काद० ।

अस्थिर त्रि० न०त० । स्थिरभिन्ने चञ्चले । "अस्थिरत्व

अस्थिविग्रह पु० अत्यन्तकठिनत्वात् अस्थिसारो विग्रहो देहो ऽस्य । १शिवानुचरे भृङ्गरीटे । २अतिगौरदेहे त्रि० ।

अस्थिशृङ्खला स्त्री अस्थ्नां शृङ्खलेव योजनहेतुः । (हाड़जोड़ा) सन्धिमति दृश्ये । "काण्डं त्वग्विरहितमस्थिशृङ्खलाया मार्द्धं द्विदलमकण्टकं तदर्द्धम् । सन्धिष्टं सुतनु ! ततस्तिलस्य तैले संपक्वं वटकमतीव वातहारि" वैद्य० ।

अस्थिशेष त्रि० अस्थिमात्रं शेषोऽस्य । मांसादिशून्ये अतिकृशे ।

अस्थिसंहार पु० अस्थीनि संहरति योजयति सम्+हृ–अण् (हाड़जोड़ा) सन्धिमति दृश्ये । "अस्थिसंहारकः प्रोक्तो वातघ्नो शुक्रशोऽस्थियुक् । उष्णः सारः क्रमिघ्नश्च दुर्नामघ्नोऽस्थिरोगजित् । रूक्षः स्वादुर्लघुर्दृष्यः पाचनः पित्तलः स्मृतः" भा० पू० । [हृ–ण्वुल् । (हाड़जोड़ा) सन्धिमति दृश्ये

अस्थिसंहारिका स्त्री अस्थीनि संहरति योजयति सम्+

अस्थिसञ्चय पु० मृतस्यास्थ्नां गङ्गाजले प्रक्षेपार्थं सञ्चयः । गङ्गायां प्रक्षेपार्थं प्रथमादिदिने मृतस्य अस्थिसंग्रहे "नान्येद्युर्नास्थिसञ्चयः स्मृतिः" ल्युट् । अस्थिसञ्चयनमत्र न० । अस्थिसञ्चयनञ्च प्रथमादिदिनेषु कार्य्यम् । यथाह संवर्त्तः । "प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा । अस्थिसञ्चयनङ्कार्य्यं दिने तन्नोत्तरैः सह" । क्वचित् "द्वितीये त्वस्थिसञ्चय" इत्युक्तम् । वैष्णवे तु "चतुर्थे दिवसेऽस्थि

सञ्चयनं कुर्य्यात्तेषाञ्च गङ्गाम्भसि प्रक्षेप" इति। अतोऽन्यतमदिने खण्डहोक्तविधिना त्वस्थिसञ्चयनङ्कार्य्यम्" मिता०। अङ्गिरसा चात्र विशेषो दर्शितः। "अस्थिसञ्चयने यागोदेवानाम्परिकीर्त्तितः। प्रेतोभूतन्तदुद्दिश्य यः शुचिर्न करोति वेत्। देवतानान्तु यजनन्तं शपन्त्यथ देवताः"। देवताश्चात्र श्मशानवासिन्यः भूतपूर्व्वदृग्धाः। श्मशानवासिनोदेवाः शवानाम्परिकीर्त्तिता" इति तेनैवोक्तम्। अतस्तान्देवान् अचिरन्नतञ्च प्रेतमुद्दिश्य धूपदीपादिभिः पिण्डरूपेण वाचिन तत्र पूजा कार्य्येत्युक्तम्भवति" मिता०प्रा०अध्या०।

अस्थिसम्भव पु० सम्भवत्यस्मात् सम्भवः अपादाने अप् ब०। अस्थिजाते १मज्जधातौ यथा च अस्थिजत्वं मज्ज्ञस्तथोक्तमस्थङ्करशब्दे ५५८पृ०। २वज्रे च तस्य दाधीचास्थिजत्वात् तथात्वम् "तमुवाचेन्द्रमाक्रन्दे गरुड़ः पततां वरः। प्रहसन् श्लक्ष्णया वाचा तथा वज्रसमाहतः। ऋषेर्मानं करिष्यामि वज्रं यस्मास्थिसम्भवम्" भा० आ० ३३अ०। यथा चास्य तदस्थिजातत्वं तथोक्तमस्थनिशब्दे २७४ पृष्ठे ३अस्थिजातमात्रे त्रि०।

अस्थिसार पु० अस्थ्नः सारः पाकपरिणामः। अस्थिजाते मज्जधातौ। अस्थ्नैव सारो यस्य। रक्तमांसशून्यदेहे त्रि०

अस्थिस्नेह पु०ऽत०। मज्जनित स्नास्थिसारभूतत्वात्तथात्वम्।

अस्थूरि पु०स्था–बा० कूरि। एकाश्वयुक्तशकटे स्थूरि न०त० तद्विपरीतम्। बहुभिरश्वादिभिर्युते शकटे। "अस्थूरि गार्हपत्यानि सन्तु" ऋ०६,१५,१६।

अस्थैर्य्य न० अभावे न०त०। १स्थैर्य्याभावे विरोधे न०त०। २चाञ्चल्ये। न०ब०। ३स्थैर्य्यहीने त्रि०।

अस्नाविर त्रि० न०त०। शिरावर्জ্জिते, स्थूलशरीरशून्ये च।

अस्निग्धदारु न० अस्निग्धं रूक्षं दारु कर्म०। देवदारुभेदे।

अस्नेह पु० अभावे न०त०। १स्नेहाभावे न०ब०। २स्नेहशून्ये त्रि०। स्नेहस्तैलादेर्गुणभेदः प्रेम च। [शून्ये त्रि०।

अस्पन्दन न०अभावे न०त०। १चलनाभावे न०ब०। २क्रिया-

अस्पर्श पु० अभावे न०त०। १स्पर्शाभावे न०ब०। २स्पर्शशून्ये त्रि० "अशब्दमस्पर्शमरूपमव्ययम्" श्रुतिः।

अस्पर्शयोग पु०"नास्ति स्पर्शःविषयसंबन्धोयत्र कर्म०। विषय प्रतिभासशून्ये निर्विकल्पके ज्ञाने "अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः। अविवादो विशुद्धश्च देशितस्तं नमाम्यहम्"।

अस्पष्ट त्रि० न०त०। अव्यक्ते। "अथेदानीमस्पष्टब्रह्मलिङ्गानि वेदान्तवाक्यानि विचार्य्यन्ते" भा०भा०।

अस्पृश्य त्रि० न स्प्रष्टुमर्हः अर्हार्थे क्यप् न०त०। स्पर्शायोग्ये मलमूत्रादौ "मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्" नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेत् मनुः। अस्पृश्यस्पर्शने चैव सद्यः स्नानं समाचरेत्" स्मृतिः। अस्पृश्यद्रव्याणि च प्रायेण अशौचाशुद्धिशब्दयोः उक्तानि।

अस्पृहा स्त्री अभावे न०त०। "स्पृहाभावे"। "नास्पृहेषु परस्वेषु साऽस्पृहा परिकीर्त्तिता"। न०ब०। २स्पृहाशून्ये त्रि०।

अस्फुट त्रि० न स्फुटः। व्यक्तभिन्ने। अनलङ्कृतौ पुनः क्रियेति का०प्र०व्याख्यायां "अनलङ्कृतौ अस्फुटालङ्कारौ"। "क्वचित्प्रकाशां क्वचिदस्फुटार्थसम्" नैष०।

अस्फुटवाक् त्रि० अस्फुटा अव्यक्ता वाक् यस्य। कद्वदे।

अस्मद् त्रि०अस–मदिक्। अहंप्रत्ययावलम्बनत्वेन वेद्ये १प्रत्यगात्मनि, २देहाभिमानिनि जीवे च। "अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्" "अहमात्मा गुड़ाकेश"। गीता "आपो जहि न यत्रोर्वीं सलिलेन परिप्लुता" देवी भाग०। "सर्वेवयमतः परम्" "मान्तु वेद न कश्चन" गीता "यः सर्वदात्मानमुषत् स्वपोषम्" भट्टिः। "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्" गीता। अस्य लिङ्गत्रयेऽपि एकविधं रूपम्। आत्मवाचित्वे एवास्य सर्व्वनामता शब्दपरत्वे न गणकार्य्यम् "अस्मदोद्वयोश्च" पा०। द्विबहुवचनपरत्वे अस्मद्–अण्। आस्माकः। खञ् आस्माकीन क अस्मदीयः। एकवचनपरत्वे अण् मामकम् खञ् मामकीनम् क मदीयम्"। तसिल् अस्मत्तः एकवचने मत्तः "मत्तः परतरं नास्ति" गीता।

अस्मात् अव्य०अस्मद्+बा० त्याच्। अस्मात्स्थित्यर्थे। "अस्मत्रा ते सधमाद्क् सन्तु" ऋ० १,१३२।

अस्मदीय त्रि० अस्माकमिदम् छ। अस्मत्सम्बन्धिनि "सहास्मदीयैरपि योधमुख्यैः" गीता।

अस्मद्वयानच् त्रि० अस्मानञ्चति व्यस्मद्+अनच–किन् अद्व्यादेशः। अस्मदभिमुखे। "तुभ्यमस्मद्व्यञ्चोददतो मघानि" ऋ०७,१६,१० यसादाविच अस्मद्वीच इत्यादि। स्त्रियाम् ङीप् अस्मद्वीची।

अस्मद्विध त्रि० अस्माकमिव विधास्य। अस्मादृशे एकवचनपरत्वे महिधः "न महिधे न्यृञ्जति भारमग्नाम्" भट्टिः।

अस्मय्य त्रि० आत्मन अस्मान् इच्छति क्यच् उ बा० व्यत्ययेन एत्वम्। हविःस्वीकारार्थम् आत्मनः अस्मान् इच्छति। "उत त्वमस्मयुर्वसो!" ऋ० १,४१,७।

अस्माक त्रि०अस्माकमिदम् अण् अस्माकादेशः नि०वेदे अदृष्टिः।

अस्रत्सम्बन्धिनि "स रथेन रथीतमोऽस्राकेनाभियुग्वना" ऋ० ६,४५,१५ । लोके तु आस्राकः ।

अस्मि अव्य० अस-मिन् । अहमर्थे, "त्वामस्मिवच्मि विदुषां समवायोऽत्र तिष्ठति" मा०द० । "अस्मिता" । "दुडुम-नास्मि सागरम्" रघुः "ब्रह्मैवास्मि न शोकभाक्" ।

अस्मिता स्त्री अस्मि-भावः तल् । अहमिति ममेतिवेत्यभिमाने "अविद्यास्मितारागद्वेषाभिनिवेशाः" पात०सू० सचाभि-मानोमोह इत्युच्यते यथाह सां०कौ० । "दैवा ह्यष्टवि-धमैश्वर्यमासाद्यात्मताभिमानिनोऽणिमादिकमात्मीयं शाश्व-तिकमभिमन्यन्ते इति सोऽयमस्मितामोहोऽष्टविधैश्वर्य विषयत्वादष्टविधः" तत्त्वलक्षणसूत्रं पात०सू० । "दृगदर्शन शक्त्योरेकात्मतेवास्मिता" दृक्शक्तिः पुरुषः दृश्यते इति दर्शन तच्छक्तिः बुद्धिः शक्तिशब्दोयोग्यतार्थः भोक्तृभोग्ययो रत्यन्तविविक्तयोर्दृग्दृश्ययोरविद्याकृता आत्मता तादात्म्यम् दृग्शब्देन अहमस्मीत्यस्य भ्रान्तिकृतत्वम् तादात्म्यस्य द्योतितम् सास्मितेत्यर्थः इयं हृदयग्रन्थिरित्युच्यते ब्रह्मवादिभिः इति" दृत्तिः ।

अस्मृति स्त्री अभावे न०त० । स्मरणाभावे ।

अस्यवामीय न० अस्य वामेति शब्दोऽस्यत्र सूक्ते मत्वर्थे छ । अस्य वामेति शब्दयुक्ते सूक्ते तच्च सूक्तम् "अस्य वामस्य पलितस्य" इत्यादिकं द्विपञ्चाशदृचम् ऋ० १,१६४, सूक्तम् । "स्नेयं कृत्वा द्विजोमोहात् त्रिरात्रोपोषितः शुचिः । सूक्तं जघ्राऽस्यवामीयं क्षिप्रं मुच्येत किल्बिषात् "ऋग्विधाने १,२२९, । महाव्रते वैश्वशस्त्रं वैश्वदेवं निविद्वानं द्विप्रतीकं तत्रास्य वामदेवस्येत्यादिकमेकचत्वारिंशदृचं प्रथमं, प्रतीकम् तच्च पञ्चमारण्ये सूत्रितम् "अस्य वामस्य पलितस्य होतरिति" दैर्घतमसम् एकचत्वारिंशदृचम् तच्च तस्मिन्नेव सूक्ते "गौरीर्मिमाय सलिलानि" इत्यन्तमेक-चत्वारिंशदृचम् । "सकृत् जघ्राऽस्यवामीयं शिवसङ्कल्पमेव च अपहृत्य सुवर्णन्तु क्षणाच्चण्डवति निर्मलः" मनुः कुल्लू० एतद्वाख्याने अस्य वामस्य पतितस्येति पाठः लिपिकर-प्रमादकृतः पलितस्येत्येव सूक्ते पाठदर्शनात् ।

अस्यहत्य पु० हन-बा क्यप् न०त०असिना अहत्यः ३त० । खड्गेनाहननीये अनुगतिकादिकार्य्यम् । [गतिका० ।

अस्यहेति पु० असिरहेतिर्यस्य । खड्गसाधने योधे । अनु-

अस्युद्यत त्रि० असिरुद्यतोयेन वा परनि० । उद्धृतखड्गे ।

अस्र पु०,अस-रन् । १कोणे २कोणे च । ३रुधिरे ४चतुर्जलेचन० अश्रशब्दे उदा० ।

अस्रकण्ठ पु० अस्रः कोण इव कण्ठोऽस्य अस्रयुक्तकण्ठो वास्र । वाणे हारा० तस्य पातने हि शत्रुरुधिराक्त सुख-त्वात् कोणाकारसुखत्वाच्च तस्य तथात्वम् ।

अस्रखदिर पु० अस्रवर्ण रक्तवर्णः खदिरः । विट्खदिरे ।

अस्रज न० अस्रात् रुधिरात् पाकेन जायते । मांसे । तस्य रुधिरजातत्वमसृक्करशब्दे ५५८ पृष्ठे दृश्यम् ।

अस्रप पु० अस्रं रुधिरं पिबति पा-क । १राक्षसे २तद्देवताके मूलनक्षत्रे च । "द्विरागमं लघुध्रुवे चरेऽस्रपे मृदूडुनि" मुहूर्त्त चि० क्विप् अस्रपाद्यत्र । [रक्षाशाके भिण्डाशब्दे ।

अस्रपत्रक पु० अस्रमिव रक्तं पत्रमस्य संज्ञायाम् कन् ।

अस्रपा स्त्री अस्रं पिबति पा-क्विप् क वा । (जोंक) जलौ-कसि । तस्याः भेदादिकं सुश्रुते दर्शितं यथा "अथ जलायुका वक्ष्यन्ते । जलसासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः । तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तासञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । कूर्म्मसत्त्वदायता स्निग्धोन्नतकुक्षिः कर्ब्बुरा । रोमशा महापार्श्वा कृष्णसुस्थलगर्दा । इन्द्रायुधवद्बहुरागिभि-श्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृति चित्रा सामुद्रिका । गोदष्पवद्धोभागे द्विधाभूताकृति-रणुसुखी गोचन्दनेति । तामिर्दष्टे पुरुषे दंशे श्वयथुरति-मात्रं कण्डूर्मूर्च्छा ज्वरोदाहस्फर्दिर्मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मा दिषूपयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ॥ अथ निर्विषाः । कपिला पिङ्गला शङ्खमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धसुद्व-र्णा कपिला, किञ्चिदुक्ता दृत्तकाया पिङ्गायुगा च पिङ्गला । यत्पृष्ठवर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्खमुखी । मूषिकाकृति वर्णानिष्टगन्धा च मूषिका । सुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पञ्चधैं । इत्येता अविषा व्याख्याताः ॥ तासां यवनपाण्ड्यसह्यपीतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति ॥ तत्र सविषमत्स्यकीटदर्दुरमूलपुरीष कोथजाताः कलुषेष्वम्भःसु च सविषाः ॥ पद्मोत्पलनलिन-कुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्व

स्राःसु च निर्विषाः ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु । न च सङ्कीर्णचारित्र्यो न च पङ्क्षेशयाः सुखाः । तासां प्रयत्नेनमार्द्रचर्म्मणान्यैर्व्वा प्रयोगैर्द्रृणीयात् । अथैता नवे मृत्तिं घटे सरस्तड़ागोदकपङ्कभावाय निदध्यात् । मध्यार्थे चासासुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्च सूक्ष्मीकृत्य, शय्यार्थं तृणमौदकानि च पत्राणि, द्वयहात्त्र्यहाच्चान्यच्चलं भक्ष्यं च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत् । भवति चात्र । स्थूलमध्या. परिक्लिष्टाः पृथ्वो मन्दविचेष्टिताः । अमाक्षिण्योऽल्पायिन्यः सविषाश्च न पूजिताः"। अधिकमस्रृग्विमोक्षणशब्दे ५६१ पृष्ठे द्रष्टव्यम् ।

अस्रफला(ली) स्त्री अस्रमिव लोहितं फलमस्याः । सप्तकीवृक्षे । भस्त्रादिपूर्व्वकत्वाभावेन फलान्तस्य प्रागादिकः टाप् जातित्वात् ङीबेव युक्तः ।

अस्रमातृका स्त्री अस्रस्य रुधिरस्य मातेव पोषिका संज्ञायां कन् । अग्नितान्नादेः रसरूपे देहस्थे प्रथमे धातौ ।

अस्रयोधिनी स्त्री अस्रं क्षतजमायु रुणद्धि रुध–णिनि । लज्जालुलतायाम् ।

अस्रवत् त्रि० न स्रवति स्रु–शतृ न०त० स्त्रियां ङीप् । १स्रवद्रहिते अक्षरिते "अनागसमस्रवन्तीमारुहेमाम्" ऋ० १०, ६२,१०, अस्रमस्यास्ति मतुप् मस्य वः । २रुधिरयुक्ते त्रि०स्त्रियां ङीप् अस्रवती । सौ अस्रवान् इति भेदः ।

अस्रविन्दुच्छदा स्त्री अस्रविन्दुः रुधिरविन्दुरिव छदो दलं यस्याः । लक्षणानामके वृक्षे ।

अस्रार्जक पु० अस्रं रुधिरं सेवनेनार्ज्जयति अर्ज्ज–ण्वुल् । १श्वेततुलसीवृक्षे । २रुधिरोत्पादके रसे च यथास्य रक्तोत्पादकत्वं तथोक्तमसृक्करशब्दे ३शोणित्पादकमात्रे त्रि० ।

अस्रि स्त्री अस–क्रि । अस्रशब्दार्थे कोषे अस्रिशब्दवत् समानान्तभाक् । चतुरस्रयोभीत्यादि तच्छब्दे उदा० द्रष्टव्यम् ।

अस्रिध् त्रि० न स्रेधते स्रिध–क्विप् न०त० । अच्योतने "मित्रमदितिं दत्तमस्रिधम्" यजु० २५,१५ ।

अस्रु न० अस्रते क्षिप्यते अस–रु । चक्षुर्जले अस्र तालव्यान्तोऽपि "स्रुत्वास्रुत्वास्रुधारां त्यजतीति" कौचकबधः ।

अस्रेमन् त्रि० स्रिव–मनिन् गुणवद्लोपौ । १प्रशस्ते निरु० । २क्षयरहिते च "अमर्त्यांस्रेमाणं तरणिम्" ऋ० ३,२६,१३ । "अस्रेमाणं क्षयरहितम् भा० ।

अस्व त्रि० नास्ति स्वन्धनमस्य । १निर्द्धने । स्वः स्वकीयः न० त० । २स्वकीयभिन्ने त्रि० । एतदर्थोऽस्य सर्व्वनामतया अकच् । अस्वकः स्त्रियां तु नित्यमत इत्त्वम् अस्विका ।

अस्वच्छन्द त्रि० विरोधे न०त० । स्वच्छन्दभिन्ने पराधीने ।

अस्वजाति त्रि० न स्वस्मिन् जातिर्यस्य । भिन्नजातौ यथा विप्रस्य क्षत्रियादि

अस्वतन्त्र त्रि० विरोधे न०त० । स्वाधीनभिन्ने पराधीने । "अस्वतन्त्रा स्त्री पुरुषप्रधाना इति" वसि० । तस्या अस्वातन्त्र्यञ्च तत्रैव दर्शितम् "पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति" तथा पुत्रादीनामपि जन्माधीनं स्वत्वमिति स्थावरधनादेर्यथेष्टविनियोगे पित्रादेरस्वातन्त्र्यमिति मिताक्षरायाम् व्यवस्थापितं यथा "तस्मात्पैतके पैतामहे च द्रव्ये जन्मनैव स्वत्वम् । तथापि पितुरावश्यकेषु धर्म्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्त द्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम् । स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् । असंभूय सुतान्सर्व्वान् न दानञ्च च विक्रयः"।"ये जातायेऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिञ्च तेऽभिकाङ्क्षन्ति न दानञ्च च विक्रयः" इत्यादि स्मरणात् । अस्यापवादः "एकोऽपि स्थावरे कुर्य्यादाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः" इति । अस्यार्थः । अप्राप्तव्यवहारेषु दानानुज्ञादावसमर्थेषु वा तथाविधेष्वविभक्तेष्वपि सर्व्वकुटुम्बव्यापिन्यामापदि तत्पोषणे चावश्यकर्त्तव्ये स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः कुर्य्यादिति" । यत्तु वचनम् । "अविभक्ता विभक्तावा सपिण्डाः स्थावरे समाः । एकोद्यनोशः सर्व्वत्र दानाधमनविक्रये" इति । तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात्सर्व्वाभ्यनुज्ञा अवश्यं कार्य्या विभक्तेषु तु तदुत्तरकालं विभक्ताविभक्तसंशयव्युदासाय व्यवहारसौकर्य्याय च सर्व्वाभ्यनुज्ञानं न पुनरेकस्यानीश्वरत्वेन अतो विभक्तानामनुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति व्याख्येयम्" मिता० व्य०अ० ।

अस्वन्त न० अस्नां अन्तो यस्मात् ५ब० । १ चूल्लां तस्याः प्राणिवधहेतुतया नानास्थानरूपत्वात् तथात्वम् । सुष्ठु न अन्तो यस्य । २अशुभोदर्के त्रि० । ६त० । ३मरणे पु० ।

अस्वप्न पु० नास्ति स्वप्नो निद्रा यस्य । १देवे । २निद्रारहिते त्रि० । देवानां स्वप्नावस्थाराहित्यमुक्तम् शत० ब्रा० । अथा "न वै देवाः स्वपन्त्यनवरुद्धो वा एतस्यास्वप्नो भवति" दिवास्वप्नाभावेऽपि रात्रौ स्वप्नवतोऽस्वप्नत्वमुक्तम् भा० आ०प०

२२१३ अ०। "दाननित्यः पवित्रश्च अस्वप्नश्च दिवाऽस्वपन्"।

अस्वर पु० अप्रशस्तः स्वरोयत्र। १मन्दस्वरयुक्ते "वचनं दीनमस्वरम्" रामा०। २स्वरवर्णरहिते व्यञ्जनवर्णमात्रे पु०। ३उदात्तादिस्वररहिते लौकिकोच्चारणे च।

अस्वरूप त्रि० न स्वस्येव रूपमस्य। समानस्वभावशून्ये "न त्वस्वरूप" इति मुग्धबो०।

अस्वर्ग्य त्रि० स्वर्गाय हितं स्वर्ग+यत् न०त०। स्वर्गासाधने "अस्वर्ग्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत्" मनुः "अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्नु तु" स्मृतिः।

अस्वस्थ त्रि० न स्वस्मिन् स्वभावे तिष्ठति स्था—क ७त०न० त०। स्वस्थभिन्ने १अप्रकृतिस्थे २रोगादिना उपद्रुते च।

अस्वाच्छन्द्य न०अभावे न०त०। १स्वाच्छन्द्याभावे पराधीनत्वे न०त०। २तद्वति त्रि०।

अस्वातन्त्र्य न० अभावे न०त०। स्वातन्त्र्याभावे पराधीनत्वे न०त०। २तद्वति त्रि०। [अतिकषाये गोत्वुरट्चे।

अस्वादुकण्टक पु० अस्वादुरमधुरः कण्टको यस्य। (गोखुरि)

अस्वाध्याय त्रि० न स्वाध्यायो वेदाध्ययनमस्य। १वेदाध्ययनहीने "आनिः)स्वध्यायवषट्कारमिति" स्मृतिः। न स्वाध्यायो यस्मिन्। २अध्ययननिषिद्धकाले अष्टम्यादौ अनध्यायशब्दे विवृतिः। अधीयते अधि+इङ्-कर्म्मणि घञ् अध्यायः स्वस्य स्ववर्णानुसारेण अध्यायः स्वाध्यायः न०त०। "स्वाध्यायोऽध्येतव्य" इति श्रुत्युक्तस्वाध्यायभिन्ने २स्वेनापाठ्ये शास्त्रादौ।

अस्वामिक त्रि० न स्वामी यस्य। १स्वामिरहिते "अटव्यः पर्व्वताः पुरगा नद्यस्तीर्थानि यानि च। सर्व्वाण्येतान्यस्वामिकान्याहुर्न हि तेषु परिग्रहः" इति स्मृतिः। २निष्यादौ च। "प्रनष्टमस्वामिकमधिगम्य" गौत०।

अस्वामिकृत त्रि० अस्वामिना कृतः। अस्वामिना कृते विक्रयादौ "अस्वामिकृतत्वेन तुल्यत्वादिति" मिता०

अस्वामिविक्रय पु० अस्वामिना कृतो विक्रयः। १अस्वामिना कृते विक्रये २तद्विषये व्यवहारभेदे च। यथाह नारदः "निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा। विक्रीयतेऽसमक्षं यत् सज्ञेयोऽस्वामिविक्रय" इति। तत्र किमित्याह या०। "स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। क्रीणाद्रूपो हीनमूल्ये वेलाहीने च तस्करः" "स्वमात्मसम्बन्धि द्रव्यं अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। अस्वामिविक्रयस्य स्तेयहेतुत्वाभावात्। विक्रीतग्रहणन्तु क्रीतयोरुपलक्षणार्थम् अस्वामिकृतत्वेन तुल्यत्वात्। अतएवोक्तम्। "अस्वामिविक्रयन्दत्तमाधिञ्च विनिवर्तयेदिति" क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति। तथा हीनाद्रूपद्रव्यागमोपायहीनात्। रहसि चैकान्ते सम्भाव्यद्रव्यादपि हीनमूल्येनाल्पतरेण मूल्येन च क्रये वेलाहीने वेलया हीनोवेलाहीनः क्रयोरात्रादौ तत्र कृतः क्रेता तस्करो भवति तस्करवत् दण्डभाग्भवतीत्यर्थः। यथोक्तम्। "द्रव्यमस्वामिविक्रीतमाप्य स्वामी तदाप्नुयात्। प्रकाशक्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयादिति" स्वाम्यभियुक्तेन क्रेत्रा किं कर्तव्यमित्यत आह। "नष्टापहृतमासाद्य हर्तारं याहयेच्चरम्। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्" या० नष्टमपहृतं वान्यदीय क्रयादिना प्राप्य हर्तारं विक्रेतारं याहयेच्चौरोद्धरणकादिभिः स्वात्मविशुध्यर्थं राजदण्डा प्राप्त्यर्थञ्च। "अथाविदितदेशान्तरकृतः कालान्तरे वा विपन्न स्तदा मूलसमाहरणाशक्तौ विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनाष्टिकस्य समर्पयेत् तावतैवासौ शुद्धो भवतीति" श्रीकराचार्य्येण व्याख्यातम्। तदिदमनुपपन्नम्। विक्रेतुर्दर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात्। अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति नाष्टिकस्मृति अयमुपदेशः। नष्टमपहृतं आत्मीयन्द्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्त्तारं क्रेतारं स्थानपालादिभिर्याहयेत् देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसन्निधाने तद्विज्ञापनकालात्प्राक् पलायनाशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्। याहिते हर्त्तरि किं कर्त्तव्यमित्यत आह। "विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं न्यूनोदमम्। क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी" या० यद्यसौ गृहीतः क्रेता न मयेदमपहृतम् अन्यसकाशात् प्राप्तमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति। न पुनरसावभियोज्यः। किन्तु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः। यथाह बृहस्पतिः। 'मूले समाहृते क्रेता नाभियोज्यः कथञ्चन। मूलेन सह वादस्तु नाष्टिकस्य विधीयते' इति। तस्मिंश्च विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात्स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति न्यूनस्यापराधानुरूपन्दण्डं क्रेता च मूल्यमवाप्नोति। अथासौ देशान्तरङ्गतस्तदा योजनसंख्ययाऽऽनयनार्थं कालोद्देयः। "प्रकाशं वा क्रयं कुर्य्यान्मूलं वापि समर्पयेत्। मूलानयनकालश्च देयस्तत्राध्वसंख्ययेति"

स्मरणात् । अथाविज्ञातदेशतया मूलमाहर्तुञ्च शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति । "असमाहार्यमूलस्तु क्रयमेव विशोधयेदिति" मनुवचनात् । यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलञ्च न प्रदर्शयति तदा स एव दण्डभाग्भवतीति । "अनुपस्थापयन्मूलं क्रयं-वाप्यविशोधयन् । यथाभियोगञ्चिने धनन्दाप्योदमञ्च रु" इति स्मरणात् । स्वं लभेतान्यविक्रीतमित्युक्तम् तल्लिङ्गेन किं कर्त्तव्यमित्यत आह । "आगमेनोपभोगेन नष्टस्वाम्यमतोऽन्यथा । पञ्चबन्धोदमस्तस्य राज्ञे तेन विभाविते" आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदन्द्रव्यं तच्चैवं नष्टमपहृत वेत्यपि भाव्यं साधनीयन्तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशोदमोनाष्टिकेन राज्ञे देयः । अत्रैवायं क्रमः । पूर्व्वं स्वामी नष्टमात्मीयं साधयेत्ततः क्रैताचौर्य्य परिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत् । अथानेतुञ्च शक्नोति तदात्मदोषपरिहाराय क्रयं शोधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति । तस्करस्य प्रच्छादकत्वात्याह । "हृतं प्रनष्टं योद्रव्यमरक्षस्तादवाप्नुयात् । अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिम्पणान्" या० । हृतम्म नष्टं वा चौरादिहस्तस्थं द्रव्यम् अनेनमदीयन्द्रव्यमपहृतमिति रूपलक्षानिवेद्यैव दर्पादिना योऽरक्षात्सो षण्णवत्युत्तरात्तवर्त्तिम्पणान्दण्डनीयस्तस्करप्रच्छादकत्वेन दुष्टत्वात् । राजपुरुषानीतं प्रत्याह । "शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम् । अर्व्वाक् संवत्सरात्स्वामी हरेत परतोन्यः" या० । यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतन्द्रव्यं राजपार्श्वं प्रत्यानीतन्तदा संवत्सरादर्वाक् प्राप्तञ्चेन्नाष्टिकस्तद्द्रव्यमवाप्नुयात् । ऊर्द्धं पुनः संवत्सराद्राजा गृह्णीयात् । स्वपुरुषानीतञ्च द्रव्यं जनसमूहेषूद्घोष्य यावद्वत्सरं राज्ञा रक्षणीयम् । यथाह गोतमः । "प्रनष्टस्वामिकमधिगम्य राज्ञे प्रब्रुयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति" यत्पुनर्म्मनुनावध्यन्तरङ्गम् । प्रनष्टस्वामिकं द्रव्यं राजा तत्प्रज्ञं निधापयेत् । अर्व्वाक् तत्प्राप्तान्नेत्स्वामी परतोन्यपतिर्हरेत्" इति । तच्चुतदत्तसम्पन्नब्राह्मणविषयम् । रक्षणनिमित्तं षड्भागादिग्रहणञ्च तेनैवोक्तम् । "आददीताथ षड्भाग मनष्टाधिगताद्नृपः । दशमं द्वादशं वापि सतान्धर्म्म महक्षरन्निति" । तृतीयद्वितीयप्रथमवत्वरेषु यथाक्रमं षडादयो भागावेदितव्याः । प्रपञ्चितञ्च तत्पुरस्तात् । सनूक्षषड्भागादिग्रहणस्य द्रव्यविशेषे अपवादमाह । "पशूनेकशफे दद्याच्चतुरःपञ्च मानुषे । महिषोष्ट्रगवां द्वौ द्वौ, पादमादमजाविके" या० । एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तञ्चतुरःपशून् दद्यात् । मानुषे मनुष्यजातीये द्रव्ये पञ्च पशून् महिषोष्ट्रगवां रक्षणनिमित्तमेकं द्वौ द्वौपशौ, अजाविके पुनः प्रत्येकस्मादस्माद् दद्यादिति सर्व्वत्रानुषज्यते । अजाविकमिति समासनिर्देशेऽपि पादमादमिति वीप्सावलात्प्रत्येकं सम्बन्धोगम्यते' मिता० ॥ प्रायश्चित्ततत्त्वे तु चोराद्ग्राभविषये विशेषोदर्शितो यथा "ग्रामाग्रक्रये तु स्वामिनोपहणे नारददृष्टस्मृती । वणिग्वीथीपरिगतं विज्ञातं राजपुरुषैः । अविज्ञाताश्रयात् क्रीतं विक्रेता यदि वा मृतः । स्वामी दत्त्वार्द्धमूल्यन्तु ग्रहणीत स्वकन्धनम् । अर्द्धं द्वयोरपहृतं तत्र स्यात् व्यवहारतः । अविज्ञातक्रये दोषस्तथा चापरिपालने । एतत्त्रयं समाख्यातं द्रव्यहानिकरं परम्" इति ।

अस्वाम्य न० अभावे न०त० । १स्वाम्याभावे स्वत्वाभावे न० ब० । २ स्वत्वशून्ये त्रि० । अस्वाम्यं हि भवेत्तत्र" स्मृतिः

अस्वावेश त्रि० स्वस्मिन् स्वस्थाने स्वभावे वा आविशति आ+विश-अच् ७त० । स्वस्थाने स्वभावे वा स्थिते "जरदष्टस्वावेशम्" ऋ० ७,३८,७ ।

अस्वास्थ्य न० अभावे न०त० । १स्वास्थ्याभावे "य इत्यमस्वास्थ्यमहर्दिवं दिवः" माघः । २रोगादिद्यभिभवे च न०ब० । ३तद्वति त्रि० ।

अस्वीकार पु० अभावे न०त० । १स्वीकाराभावे न०ब० । २तच्छून्ये त्रि० । स्वीकारोऽङ्गीकारः प्रतिपक्षश्च ।

अस्वीकृत त्रि० न स्वीकृतः १गृहीतभिन्ने २अङ्गीकृतभिन्ने च ।

अस्वैरिन् पु०स्वैरी स्वाधीनः न०त० । १परतन्त्रे । स्त्रियां ङीप् ।

अह गतौ आत्म०भ्वा०सक० इदित् सेट् । अंहते आंहिष्ट । आनंहे "आनंहिरेऽद्रिं प्रति चित्रकूटम्" "आंहिमातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः" भट्टिः । रि अंहिः पादः अंहन् अंहः पापम् । इन् वा० नलुक् । अंहिःसर्पः केदारश्च । "एवा त इन्द्रोचथमहेम" ऋ० २,१९,७, वेदे तु वा० नलुक् । लटः पञ्चानां सिटः पञ्चकादेशे मुचयाकादेशः आह आहतुः आहुः आत्थ आहथुः "इत्याह भगवान् मनुः" इत्यादौ तु चादिगणपठितं विभक्तिप्रतिरूपमाहेति । [आङ्+हृ त ।

अह दीप्तौ चुरा० इदित् उभ०अक० सेट् । अंहयति ते

अह व्याप्तौ स्वा०प०सक० सेट् । अश्नोति । आहीत् आह ।

अह अव्य० अहि-घञ् पृ०नलोपः। १प्रशंसायां, २खेदे, ३वियोगे, ४निश्चये, ५आचारातिशये, ६अर्च्चने च। "अत्यहस्तादिन्द्रोऽच्युत देवो हि सः" "इदमहेदं सत्वं क्रमपश्चलाज्यमधायम्" शत०ब्रा०।

अहंयु त्रि० अहमहङ्कारोऽस्यास्ति युस्। १गर्व्वयुक्ते २अभिमानिनि "अहंयुनाथ क्षितिपः शुभंयुः" भट्टिः।

अहंश्रेयस् त्रि० अहमित्यव्ययम् अहमेव श्रेयान् यत्र। अहंश्रेयानितिनिर्णयप्रयोजने। "अथ ह प्राणा अहंश्रेयसि व्यूदिरेऽहंश्रेयानहंश्रेयानस्मीति" छा०उ० "अथ ह प्राणाः एवं यथोक्तगुणाः सन्तोऽहंश्रेयान् अहंश्रेयान् अहंश्रेयानस्मीति एतस्मिन् प्रयोजने व्यूदिरे नाना विरुद्धं वा जग्मिरे उक्तवन्तः" भा०। "ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः" बृ०उ०। "ते इमे प्राणा वागादयोऽहंश्रेयसे अहंश्रेयानित्येतस्मै प्रयोजनाय विवदमानाः विरुद्धं वदन्तो ब्रह्म जग्मुः" भा०।

अहः(स्कृ)कर पु० अहः करोति कृ-ट वा सत्वम्। सूर्य्ये २अर्कवृक्षे च। [रो रः। १सूर्य्ये २अर्कवृक्षे।

अहः(हर्पति पु० अह्नः पतिः उदयेन प्रवर्त्तकत्वात्। वा

अहः(हन्)शेष पु० अह्नः शेषः वा सत्वम्। १दिवावसाने अहःशेषो यत्र ब०। २अपौराह्णिकदिने।

अहङ्कार पु० अहमिति क्रियतेऽनेन कृ-घञ्। १अहमित्यभिमाने आत्मनि उत्कर्षावलम्बने २गर्व्वे ३तदाश्रये अन्तःकरणभेदे "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयोनिश्चयो गर्व्वःस्मरणं विषया इमे" वेदा०परि०। सांख्यमतसिद्धे ४अभिमानकारणे महत्तत्त्वजन्ये पञ्चतन्मात्रादीनां कारणे तत्त्वभेदे च यथोक्तं सां०का०। "प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः। तस्मादपि षोड़शकात् पञ्चभ्यः पञ्च भूतानि" इत्युद्दिश्य तल्लक्षणकार्य्ये तत्रैवोक्तं यथा' 'अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः। एकादशकश्च गणस्तन्मात्रपञ्चकं चैव"। व्याख्यातं च कौ० "अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः, अहं खल्वहमत्र, मदर्था एवामी विषयाः, ममैतान्योऽत्राधिकृतः कश्चिदस्त्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति "कर्त्तव्यमेतन्मयेति"। तस्य कार्य्यभेदमाह तस्मात् द्विविधः प्रवर्त्तते सर्गः। प्रकारद्वयमाह एकादशकश्च गणः इन्द्रियाख्यः तन्मात्रपञ्चकञ्चैव द्विविधएव सर्गोऽहङ्कारात् न त्वन्यदुत्पत्तेरवधारयति"। "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियम्" सा०सू०। अहङ्कारसत्त्वे प्रमाणमपि दर्शितम् "बाह्याभ्यन्राभ्यां तैश्चाहङ्कारस्य" सा०सू०। "बाह्याभ्यन्राभ्यामिन्द्रियाभ्यां तैः पञ्चतन्मात्रैश्च कार्य्यैस्तत्कारणतयाहङ्कारस्यानुमानेन बोधः इत्यर्थः। अहङ्कारश्चाभिमानवृत्तिकमन्तःकरणद्रव्यं नत्वभिमानमात्रं द्रव्यस्यैव लोके द्रव्योपादानत्वदर्शनात्। सुषुप्त्यादावहङ्कारवृत्तिनाशेन भूतनाशप्रसङ्गाद्वासनाश्रयत्वे नैवाहङ्काराख्यद्रव्यसिद्धेश्चेति। अत्रेत्थमनुमानम्। तन्मात्रेन्द्रियाणि अभिमानवद्द्रव्योपादानकानि अभिमानकार्य्यद्रव्यत्वात्। यच्चैवं तच्चैवम्। यथा पुरुषादिरिति। नन्वभिमानवद्द्रव्यमेवासिद्धमिति चेदहं गौर इत्यादिवृत्त्युपादानतया चक्षुरादिवत् तत्सिद्धेः। अनेन चानुमानेन मन आद्यतिरेकमात्रस्य तत्कारणतया प्रसाध्यत्वात्। अत्र चायमनुकूलस्तर्कः। "बहु स्यां प्रजायेय" इत्यादि श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्व्वकत्वाद्बुद्धिसृष्टिपूर्व्वकसृष्टौ कारणतयाभिमानः सिद्धः। तत्रैकार्थसमवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात् कल्प्यत इति। नन्वेवं कुलालाहङ्कारस्यापि घटोपादानत्वापत्त्या कुलालसत्त्वौ तदन्तःकरणनाशे तन्निर्म्मितघटनाशः स्यात् न चैतदुक्तम् पुरुषान्तरेण स एवायं घट इति प्रत्यभिज्ञायमानत्वादिति चेन्नैवम् सत्त्वपुरुषभोगहेतुपरिणामस्यैव तदन्तःकरणभोक्तोत्तरसत्त्वोच्छेदात्। न तु परिणामसामान्यस्यान्तःकरणस्वरूपस्य वोच्छेदः "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति" योगसूत्रे सत्त्वपुरुषोपकरणस्याप्यन्यपुरुषार्थसाधकत्वसिद्धेरिति। अथ वा घटादिष्वपि हिरण्यगर्भाहङ्कार एव कारणमस्तु न कुलालाद्यहङ्कारस्तथापि सामान्यव्याप्तौ न व्यभिचारः समष्टिबुद्ध्याद्युपादानकैव हि सृष्टिः पुराणादिषु सांख्ययोगयोश्च प्रतिपाद्यते न तु तदंशव्यष्टिबुद्ध्याद्युपादानिका यथा महापृथिव्या एव स्थावरजङ्गमाद्युपादानत्वं न तु पृथिव्यंशलोष्टादेरिति" सां०प्र०भा०। मनुनाप्युक्तम् "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्"। "अहङ्कारश्च वीररसे व्यभिचारिभावः। अस्याधिष्ठाता" शङ्करः। निरहङ्काररूपत्वाद्द्यावीरादिरेष नः" सा०द०। "नाहङ्कारात् परोरिपुः"। "अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीता।

अहङ्कारिन् त्रि० अहमभिमानं करोति कृ-णिनि। १अभिमानवति २गर्व्वयुक्ते॥

अहङ्कृत त्रि० अहमिति कृतं येन । १ सगर्वे २अभिमानवति च । "जातिरूपवयोविद्यादिभिरहङ्कृतः" याज्ञ० । "यस्य नाहङ्कृतोभावो बुद्धिर्यस्य न लिप्यते" गीता ।

अहङ्कृति स्त्री अहम्+कृ-क्तिन् । अहङ्कारशब्दार्थे ।

अहत न० हन-क्त न०त० । "ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात् पावनं सर्वकर्मसु" १इत्युक्तलक्षणे "निर्णेजकाच्चालितं यदहतं तत् प्रचक्षते २इत्युक्तलक्षणे च वस्त्रे "अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि" भा०स०प० ४ अ० । अहतवासा इत्यादौ करकडूयादिवत् तत्काले अहतत्वादिबोधनाय । ३भोगेनानाशिते "पञ्चद्रौणिक एवैकः सुवर्णोऽहतस्य वै" भा०स०प० ४६ अ० ४हतभिन्ने च त्रि० ।

अहति स्त्री अभावे न०त० । १हननाभावे अविनाशे "अजीवातवेऽहतये पवस्व" ऋ०९,९६४ न०त० । २हननशून्ये विनाशशून्ये त्रि० ।

अहन् न० न जहाति न त्यजति सर्वथा परिवर्त्तनम् । न+हा-कनिन् । १दिवसे । "अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः" स्मृतिः । "अन्योन्यसंक्रमहस्रियाममम्" रघुः । अहःशब्दश्च दिवसएव प्रसिद्धः "अहो अहोभिर्महिमा हिमागमे" नैष० क्वचित्तु दिनरात्रिपूरः यथा "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते" सू०सि० । "विप्रः शुध्येत् दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन" मनुः । "अघाहेषु निवृत्तेषु" "द्वादशाहः प्रशस्यते' स्मृतिः तत्परिमाणमुक्तं कालमाधव विष्णुध० । "लघ्वक्षरसमामात्रा निमेषः परिकीर्त्तितः । ततः क्षुद्रतरः कालोनोपलभ्योष्टगुणस्तस ! नोपलभ्यं यथा द्रव्यं सुक्ष्मं परमाणुतः । द्वौ निमेषौ त्रुटिस्त्रिंशैः प्राणः पञ्चत्रुटिः स्मृतः । विनाडिका तु षट्प्राणा तत्षष्टिर्नाड़िका स्मृता । अहोरात्रं तु तत्षष्ट्या नित्यमेतत् प्रकीर्त्तितम् । त्रिंशन्मुहूर्त्ताश्च तथा अहोरात्रे प्रकीर्त्तिताः । तत्र पञ्चदशप्रोक्ता राम ! रात्रौ दिवा तथा । उत्तरां तु यदा काष्ठां क्रमादाक्रमते रविः । तदा क्रमाद्वेष्टद्रिर्दिवसस्य महाभुज ! । तदाश्रितमुहूर्त्तानां तदा वृद्धिः प्रकीर्त्तिता । दिनवृद्धिर्यदा राम ! दोषाहानिस्तदा भवेत् । तदाश्रितमुहूर्त्तानां हानिश्चैवं तथा तथा । यदा तु दक्षिणां काष्ठां क्रमादाक्रमते रविः । दिवसस्य तदा हानिर्ज्ञातव्या तावदेव तु । क्षीयन्ते तस्य हानौ च तन्मुहूर्त्तास्तथैव च । रात्र्याश्रिताश्च वर्द्धन्ते रात्रेश्च क्रमेण तु । यदा मेषं सहस्रांशुस्तुलाञ्चैव प्रपद्यते । समरात्रिन्दिवः कालो मुहूर्त्तश्च तदा समः" । मुहूर्त्तानां सौरसावर्त्त ज्यौतिषाणि नामानि त्रिविधानि तत्र सौरानि कालमा० दृश्यानि । ज्यौतिषाणि आह कश्यपः "गौरीवल्लभसर्पमित्रपितरो वस्वम्बुविश्वाह्वया ब्रह्माग्नीरुहसम्भवेन्द्रुजतद्वेषनक्तञ्चराः । तोयेशार्य्यमयोनयोदश तथा पञ्चाप्यमी वासरे" । रुद्राजाहिर्बुध्नपूषाश्विनाः स्युः कौनाशोऽग्निर्धातृचन्द्रादितीज्यः । विष्णुर्भानुस्त्वष्टृवाता मुहूर्त्ता रात्रौ क्रूरास्वन्तकाजाग्निरुद्राः" । स्मार्त्तनामानि तु "रौद्रश्चैत्रश्च मैत्रश्च तथा सारस्वतः स्मृतः । सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्ततः । रोहिणस्तिलकश्चैव विभवोनिर्ऋतिस्तथा । शम्बरोविजयश्चैव दिवा पञ्चदशस्मृताः । षड्रश्वाजपादश्च तथाहिर्बुध्नमैत्रकौ । अश्विनौ यास्य आग्नेयो वैधातश्चान्द्र एव च । आदितेयोऽथ जैवश्च वैष्णवः सौर एव च । आह्नोनाभस्वतश्चैव मुहूर्त्ताः क्रमशोनिशि" । एतदनुसारेणैव "ब्राह्मे मुहूर्त्ते किल तस्य देवीति" रघुः "मैत्रे मुहूर्त्ते शशलाञ्छनेन" कुमा० "आरभ्य कुतपे श्राद्धं कुर्य्यादारोहिणं बुधः" इत्यादि प्रयोगः । अस्य द्विधा त्रिधा चतुर्द्धा पञ्चधा पञ्चदशधेति पञ्चधा विभागकल्पनापि दृश्यते । तत्र द्विधा विभागाभिप्रायेण । "यथा चैवापरः पक्षः पूर्व्वं पक्षात् विशिष्यते । यथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" मनुः त्रिधा विभागे "ऊर्द्धं सूर्य्योदयात् प्रोक्तं मुहूर्त्तानां तु पञ्चकम् । पूर्व्वाह्णः पञ्चकं प्रोक्तं मध्याह्नस्तु ततः परम् । अपराह्णस्ततः प्रोक्तं मुहूर्त्तानां तु पञ्चकम्" । "तस्मादृक्षः पूर्व्वाह्णे देवा अशनमभ्यवहरन्ति मध्यंदिने मनुष्याः अपराह्णे पितरः" गौत० "पूर्व्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम्" श्रुतिः चतुर्द्धा विभागे गोभिलः । "पूर्व्वाह्णः प्रहरं यावत् मध्याह्नःप्रहरस्ततः । आतृतीयादपराह्णः सायाह्नश्च ततः परम्" । पञ्चधा विभागमाह व्यासः । "मुहूर्त्तत्रितयं प्रातस्तावदेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तः स्यात् स्वस्वकार्य्ये पुरस्कृतः" एवमेव दत्तोक्तविभागः तच्चाहः नवविधम् "ब्राह्मं दिव्यं तथा पैत्रं प्राजापत्यं गुरोस्तथा । सौरञ्च सावनञ्चान्द्रमार्क्षं मानानि वै नव" सू०सि० । तत्र ब्राह्मम् "इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्ममहःप्रोक्तं तावती तस्य तावतीति" । दिव्यमुक्तं तत्रैव "मासैर्द्वादशभिर्वर्षं दिव्यं

तदहरुच्यते"। सुरासुराणामन्योन्यमहोरात्रं विपर्य्ययात् यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात्। पित्र्यमाह "तिंशत्तिथ्यात्मको मासस्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः"। "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते। मन्वन्तरव्यवस्था च प्रजापत्यमुदाहृतम् इति संक्रान्त्यासौरमुच्यते इति च सू०सि० वार्हस्पत्यमब्दशब्दे उक्तम् तेषु नवसु मध्ये चतुर्भिरेव व्यवहारः "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः" वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः। सू० सि० तत्र सौरनाक्षत्रादिप्रमाणमुक्तम्। "नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितम्। तन्त्रिंशताभवेन्मासः सावनोऽर्कोदयैस्तथाऽहः इति चान्द्रमाह "अर्कोद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी तच्चान्द्रमसमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" एतेषां कार्य्यभेदे ग्रहणमाह स एव "तिथिः करणमुद्वाहः क्षौरं सर्व्वाः क्रियास्तथा। व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते। उदयादुदयः भानोः सावनं परिकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालावधिस्तु तैः। सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते। अस्य तत्पुरुषान्ते टच् समा० पुंस्त्वञ्च एकाहः दीर्घाहः पुण्याहं तु न०। अव्ययादिपूर्व्वपदत्वे एकदेशिसमासे द्विगौ च टच् अह्नादेशश्च अत्यह्नः मध्याह्नः पूर्व्वाह्ण"पु०। उत्तरपदद्विगावेव अह्नादेशः न समाहारद्विगौ द्व्यहः त्र्यहः। उत्तरपदे तु द्व्यह्नप्रिय एवं तद्धितार्थे नाह्नादेशः द्व्यहीनः इत्यादि। कालत्वात् भवादौ ठञ् अह्नादेशः आह्निकः ष अह्नीनः दिनभवे त्रि०। २विष्णौ तस्य सर्व्वदा प्रकाशमानत्वात् तथात्वम्" "अहः संवत्सरो मासः" विष्णुस०। अर्च्चिरादिमार्गे आतिवाहिके २अहरभिमानि देवे—च। "ते अर्च्चिषमभिसम्भवन्ति अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम्" छा०उ०। एतदधिकृत्य "अतिवाहिकास्तल्लिङ्गात्" शा०सूत्रे आतिवाहिकत्वमेषां निर्णीतम् ४रात्रौ च। "यामस्तत्वारश्चारोर्मत्यानामहनी उभे"। "अयने अहनो प्राङ्गुरिति च" भा०२स्क०

अहना स्त्री अहर्मुखत्वेनास्त्यस्याः अच् नि० टिलोपाद्यभावः। जघायाम् निरु०। "यदहंस्तदहना व्यत्यक्षा" ऋ०१,१२२,४ "अहना जघेति" भाष्यम्।

अहन्ता स्त्री अहमित्यव्ययमस्मदर्थे तस्य भावः तल्। अस्मदर्थभावे २समतायाञ्च।

अहम् अव्य० अह-अम्। अहङ्कारार्थे, अस्मदर्थे "अहमर्थोदयोर्योऽयं चित्तात्मा वेदनात्मकः। एतच्चित्तद्रुमस्यास्य बीजं विद्धि महामते" वासि०। अहंप्रत्ययः। अहङ्कारः

अहमहमिका स्त्री अहमहंशब्दोऽस्यत्र वीप्सायां द्वित्वम् ठन् न टिलोपः। १परस्पराहङ्कारे २अहमेवाग्रे यास्यामीति रूपायामन्योन्योक्तौ च।

अहम्पूर्व्विका स्त्री अहं पूर्व्वोऽहं पूर्व्वं इत्यभिधानं यत्र। योधादीनां औत्सुक्यात् अहमेव पूर्व्वं यास्यामीत्यध्यवसायेनोक्तौ "जवादहम्पूर्व्विकया वियासुभिः" किरा०।

अहम्प्रत्यय पु० अहमित्याकारकः प्रत्ययः। अहमस्मि ममेत्याद्याकारे बोधे। "अहम्प्रत्ययलिङ्गानि च वैदिकानि" द०उ०भा०। "नचायमेकान्तेनाविषयः अहम्प्रत्ययविषयत्वात्" शा० भा०। अहंशब्दालम्बनश्चात्मा स च देह एवेति चार्वाकाः। क्षणिकविज्ञानमेवेति बौद्धाः देहादिव्यतिरिक्त इति आस्तिकदर्शनानुसारिणः।

अहम्भद्र त्रि० अहमेव भद्र इति निर्णयोयत्र। अहंश्रेयः शब्दार्थे "अथातोमनसश्च वाचश्च अहंभद्र उदितम् मनश्च ह वै वाक्चाहं भद्र उदाते। तद्ध मन उवाच अहमेव त्वच्छ्रेयोऽस्मि न मया त्वं किञ्चनाभिगतं वदसि यन्मत्तं कृतानुवन् वर्त्तयसेऽहमेव त्वच्छ्रेयोऽस्मीति अथ ह वागुवाच अहमेव त्वच्छ्रेयस्यस्मि यद्वै त्वं वेत्थाहं तद्विज्ञापयाम्यहं संज्ञापयामीति" शत०ब्रा०।

अहम्मति स्त्री अहमित्याकारा मतिः ज्ञानं मन+क्तिन्। १अविद्यायाम् अन्यस्मिन्नन्यधर्म्मावभासके २अज्ञाने।

अहर त्रि० न हरति अच् न०त०। १हारकभिन्ने हरोहारकः न०ब०। २हारकशून्ये गणितोक्ते शुद्धे ३राशौ ४असुरभेदे पु० असुरशब्दे उदा०।

अहरादि पु० अह्नः आदि। प्रभाते "शशधरमहरादौ रागवानुष्णरश्मिः" माघः। वार्त्तिकोक्ते पत्यादिशब्दे परे रोःस्थाने रेफादेशनिमित्ते अहन् गिर्—पुर् इति शब्दगणे।

अहर्गण पु० अह्नां गणः। दिनसङ्घे। ग्रहाणां मध्यभावादिज्ञानसाधनानि सृष्ट्यवधि श्वेतवराहकल्पावधि कल्पारम्भावधि वा दृष्टदिनपर्य्यन्तं यानि दिनानि गतानि तेषां समूहे। तत्र सृष्ट्यहर्गणस्तावत् "इत्थं युगसहस्रेण भूतसंहारकारकः। कल्पोब्राह्ममहःप्रोक्तं शर्व्वरी तस्य तावती। परमायुः शतं तस्य तयाहोरात्रसंख्यया। आयुषोऽर्द्धमितं तस्य शेषे कल्पोऽयमादिमः। कल्पादस्माच्च

मनवः षट् व्यतीताः ससन्धयः । वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः । अष्टाविंशाद्युगादस्माद्यातमेतत् कृतं युगम् । अतः कालम् प्रसंख्याय संख्यामेकत्र पिण्डयेत्" । सू०सि० तदानयनप्रकार उक्तः । तत्र सृष्ट्यादिकस्य अहर्गणस्यानयनमित्थम् । ब्राह्मदिनमानं मनुष्यपरिमाणेन ४३२०००००० वर्षाः रात्रिमानञ्च तथा, इत्यहोरात्रमानम् ८६४०००००० वर्षाः ब्राह्माहोरात्रमानम् ३६०गुणितं तस्य वर्षमानम् १७५१०४०००००००० एवं वर्षशतं ब्रह्मणः परमायुः ३१५०४०००००००००० तस्यायुषोऽर्द्धम् ८७५५२०००००००००वर्षागताः । मन्वन्तरसंख्या३०६७२०००० षड्भिर्गुणिताः १८४३२०००० एते वर्षाः यस्यां मनूनां गताः । तथा सन्धयश्च सप्त कृतयुगप्रमाणा गतास्तत्र युगसन्धिमानम् १७२८००० कृतप्रमाणवर्षाः सप्तभिर्गुणिताः १२०९६००० वर्षाः । सप्तमस्य वैवस्वतमनोः २७युगानि गतानि तेषां समष्टिः११६६४०००० वर्षाः सत्यादीनां त्रयाणां गतानां युगानां मानम् ३८८८००० । एवमादिसृष्टितः वर्त्तमानयुगान्तर्गतद्वापरयुगपर्य्यन्तम् । ८७५५२१८७२९४४००० वर्षाः गताः परार्द्धतः १९७२९४४०००वर्षा गताः । वर्त्तमान महायुगात् ३८८८००० वर्षागताः । एवमब्दपिण्डं कृत्वा तत्र कलियुगगताब्दपिण्डं योज्यम् । एतानि च सौरवर्षाणीति३६० गुणितानि सौरदिनेष्टान्यानि गतानि भवन्ति । "मध्यमग्रहभुक्तिश्च सावनेन इत्युक्तेः सावनैरेव ग्रहमध्यभावज्ञानमतस्तेभ्यः सि०शि० चान्द्रसावनानयनं दर्शितम् । यथा "कथितकल्पगतोऽर्कसमागणो रविगुणो गतमाससमन्वितः । खदहनै २०गुणितस्त्रिधिसंयुतः पृथगतोऽधिकमास १५९३३००००० समाहतात् । रविदिनानि १५५५२०००००००० गताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः । पृथगतः पठितावम २५०८२५५०००० संगुणाद्विधुदिना १६०२९९९०००००० प्रगतावमवर्जितः । भवति भास्करवासरपूर्वको दिनगणो रविमध्यमसावनः । अधिकमासदिनत्रयशेषतोद्युघटिकादिकमत्र न गृह्यते" । "अत्र वासना । कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युताश्चिंशद्गुणा दृष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः । एवं ते सौरा जातास्तेभ्यः पृथक्स्थितेभ्योऽधिमासानयनं त्रैराशिकेन । यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति । फलं गताधिमासाः । तैर्दिनीकृतैः पृथक् स्थितः सौराहर्गणैः सहितश्चान्द्रो भवति । यतः सौरचान्द्रान्तरमधिमासदिनान्येव । अथ चान्द्राद् द्युगणादवमानयनं त्रैराशिकेन । यदि कल्पचान्द्राहैः कल्पावमानि लभ्यन्ते तदैभिः किमिति । फलं गतावमानि । तैरूनश्चान्द्रोऽहर्गणोऽतः कर्त्तव्यः । यतः सावनचान्द्रान्तरेऽवमान्येव । एवं कृते सति रवेर्मध्यमः सावनाहर्गणो भवति न स्फुटः । मध्यमस्फुटाहर्गणयोर्भेदो गोले कथितः । स चाहर्गणोऽर्कादिः । यतः कल्पादौ रविवासरः । अत्राऽधिमासानयनेऽधिमासशेषं न स्थाप्यम् । न पुनस्तस्मादिनाद्यवयवा ग्राह्याः । एवमवमशेषमपि । न तस्माद्घटिकादिकं ग्राह्यम् । नन्वनुपातः सावयवो भवति कृतस्तदवयवा न ग्राह्याः ! तत्कारणं गोले कथितं व्याख्यातं च" इति० । मध्यमग्रहादभ्यहर्गणानयनं तत्रैवोक्तम् । "साभ्यात् स चक्राच्च खगात् कृतघ्नात् तत्कल्पचक्राप्तमहर्गणः स्यात्" । निरग्रचक्रादपि कुट्टकेन वक्ष्येऽतोऽभ्राङ्क तथाप्ययोगात् । "यदृच्छ भगणराशिभागकला विकला अन्ते विकलाशेषं च कुदिनैः संगुण्य स्वच्छेदेन विभज्योपर्युपरि निक्षिपेत् । तद्यथा । भगणादिपक्षे विकलाशेषावधि कल्पकुदिनगुणे विकलाशेषस्थाने कुदिनैर्विभज्य विकलास्थाने फलं प्रक्षिप्य तत्र षष्ट्या ६० विभज्य कलास्थाने निक्षिप्यैवं भगणान्तं यावत् । तत्र कल्पभगणैर्हृतैऽहर्गणः स्यात् । अत्रोपपत्तिर्विलोमगणितेन । तथा निरग्रचक्रादपि यदृच्छात् तथा केवलाद्भादपि तथा शेषयोः शेषाणां वा योगादहर्गणानयनमप्यत इति ग्रन्थाध्याये कुट्टकविधिना वक्ष्यते" इति० । कलिगताद्यहर्गणानयनं तत्रैव । "कलिगताद्य वा दिनसञ्चये दिनपतिर्भृगुजप्रभृतिस्तदा । कलिसुखध्रुवकेण समन्वितो भवति तद्द्युगणोद्भवखेचरः" । "अत्र कलिगताहर्गणेऽयं विशेषः । शुक्रादयो वारो गणनीयः । यतः कल्पगताहर्गणात् कलिसुखे शुक्रवारो भवति । तत्र च ये ग्रहाणां ध्रुवसंज्ञाः कथिताः । तद्द्युगभवः खेचरस्य कलिसुखध्रुवकेण समन्वितः कार्य इत्यत्र वासनापि सुगमा" इति० । कुट्टकविधिश्च बीजगणिते दर्शितो यथा । "अस्य गणितस्य ग्रहगणिते ग्रहानुपयोगः । तदर्थं किञ्चिदुच्यते । "कल्पाद्य शुद्धविकलावशेषं षष्टिघ्न भाज्यः

कुदिनानि हारः । तज्जं फलं स्युर्विकला गुणस्तु लिप्ता-मसंख्याश्च कला लवाद्यम् । एवं तदूर्द्धं च तथाधिमासाव-मायकीभ्यां दिवसा रवीन्दोः" ।"अहस्य विकलावशेषाद्यव-हारर्क्षगणयोरानयनम् । तद्यथा । षष्टिर्भाज्यः । कुदिनानि हारः । विकलावशेषं शुद्धिरिति प्रकल्प्य साध्ये गुणाप्ती । तत्र लब्धिर्विकलाः स्युर्गुणस्तु कलावशेषम्। एवं कलावशेषं शुद्धिः षष्टिर्भाज्यः कुदिनानि हारः । फलं कलाः । गुणोंऽशशेषम् । एवमंशशेषं शुद्धिस्त्रिंश-द्भाज्यः कुदिनानि हारः । फलं भागाः । गुणो-राशिशेषम् । एवं राशिशेषं शुद्धिर्द्वादश भाज्यः । कुदिनानि हारः । फलं गतराश्योगुणोभगणशेषम् । एवं कल्पभगणा भाज्यः । कुदिनानि हारः । भगणशेषं शुद्धिः । फलं गतभगणाः । गुणोऽहर्गणः स्यादिति । अस्योदाहरणानि त्रिप्रश्नाध्याये । एवं कल्पाधिमासा-भाज्यो रविदिनानि हारोऽधिमासशेषं शुद्धिः । फलं गताधिमासाः । गुणो गतरविदिवसाः । एवं युगावमानि भाज्यश्चन्द्रदिवसा हारोऽवमशेषं शुद्धिः । फलं गतावमानि । गुणोगतचन्द्रदिवसाइति" प्रमि० ।

अहर्गणानयने अधिमासावमपरित्यागे कारणमाह" सि० शि०"अहर्गणस्यानयनेऽर्कमासाश्चैत्रादिचान्द्रैर्गणकान्विताः किम् । कुतोऽधिमासावमशेषके च त्यक्ते यतः सावयवो-ऽनुपातः । दर्शावधिश्चान्द्रमसो हि मासः सौरस्तु संक्रान्त्यवधिर्यतोऽतः । दर्शाद्यतः संक्रममानतः प्राक् सदैव तिष्ठत्यधिमासशेषम् । दर्शान्ततो यातति-थिप्रमाणैः सौरैस्तु सौरा दिवसाः समेताः । यतोऽ-धिशेषोत्थदिनाधिकास्ते त्यक्तं तदस्मादधिमासशेषम् । तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम् । त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यन्तकाले द्युगणोऽ-नुपातः" । "मध्यमेनैव यावत्यमावास्या तदन्ते चान्द्रमासान्तः । मध्यमार्कस्य यस्मिन् दिने संक्रान्ति-स्तत्र संक्रान्तिकाले रविमासान्तः । तयोः रविचन्द्रमा-सान्तयोरन्तरे यावत्यस्तिथयः सावयवास्ता अधिमास-शेषतिथयः । यतः सौरचान्द्रान्तरमधिमासाः । अहर्ग-णानयने गताब्दा रविगुणास्ते सौरा मासा जाताः । अतस्तेषु चैत्रादिचान्द्रतुल्याः सौरा एव मासा योजि-तास्तें संक्रान्त्यवधयो जातास्तेषु त्रिंशद्गुणेषु गततिथि-तुल्याः सौरा एव दिवसा योजिताः । अतः सौर-चान्द्रान्तरेणाधिका जातास्तदन्तरमधिमासशेषदिनानि भवन्ति सौरचान्द्रान्तरत्वात् । अतोऽधिमासशेषदिना-स्तेभ्यः शोध्याः । अथ चाधिमासानयनेऽनुपातलब्धै-रधिमासैर्दिनीकृतैस्तच्छेषदिनैश्च युक्ताः सौराश्चान्द्रा-श्च भवितुमर्हन्ति । एवमत्राधिमासशेषदिनानि क्षेप्याणि । तत्र शोध्यानि । अतः कारणादधिमासशेषं त्यक्तम् । अथावमशेषत्यागकारणमुच्यते । तिथ्यन्तानन्तरं यावतीभिर्घटीभिः सूर्योदया अवमशेषघटिकाः यतश्चान्द्रसावनान्तरमवमानि । यद्यवमशेषं न त्यज्यते लब्धावमैरवमशेषघटिकाभिश्च तिथय जनीक्रियन्ते तदा तिथ्यन्ते सावनोऽहर्गणो भवति । अथ च सूर्यो-दयोऽवधिः साध्यः । तिथ्यन्ताहर्गणोऽवमशेषघटी-भिर्युक्तः सन्नुदयावधिर्भवति । अतोऽवमशेषे त्यक्ते सतः सूर्योदयावधिर्भवति" प्रमि० । "अहर्गणोमध्यम-सावनेन कृतस्फुटत्वात् स्फुटसावनस्य । तदूनखेटा उदयान्तराच्च कर्मोद्भवेनोनयुताः फलेन" सि०शि० अह-र्गणे विशेषमाह सि०शि० । "अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वत् । तदाधिमासावमशेषके च कल्पाधिमासावमयुक्तहीने" । "इह किल स्थूलतिथ्यानयने यस्यां तिथौ यो वार आगतः स चेदहर्गणे नागच्छति तदाहर्गणं सैकं निरेकं कृत्वा यदाः साध्या इति ज्योति-र्विदां संप्रदायो युक्तियुक्त एव । यतोऽहर्गणस्य वारो नियामकः । एवं कृते यो विशेषः सोऽभिधी-यते । तिथयोऽपि तद्वदित्यादि । अत्रैतदुक्तं भवति । यदा वारार्थं सैकोऽहर्गणः कृतस्तदाधिमासावमशेषाभ्यां चन्द्रार्कानयने कोद्याहतैरङ्गकृतेन्दुविश्वैरित्यादौ द्वादश-गुणास्तिथयोऽर्कभागेषु याः क्षेप्यास्ताः सैकाः कृत्वा द्वादशगुणाः क्षेप्याः । यदा निरेकोऽहर्गणः कृतस्तदा निरेकम् । तथा यदि सैकोऽहर्गणस्तदाधिमास-शेषं कल्पाधिमासैर्युतं कार्यम् । अवमैरवमशेषं च । यतः सैकासु तिथिषु सैकोऽहर्गणो निरेकासु निरेकः । तथा प्रतिदिनमधिमासशेषस्याधिमासैरूपचयोऽवमैरवमशेषः स्यात् युक्तमुक्तम्" इति प्रमिता० ।

अहर्जर पु० अहोभिःपरिवर्त्तमानो लोकान् जरयति जृ-णिच्-अच्, अहानि वाऽस्मिन् जीर्य्यन्ति आधारे अप् वा । "संवत्सरे "यथाम: प्रवता यन्ति यथा मासा अहर्जरम्" द्द०उ० ।

अहर्दिव न० अहश्च दिवा च समा० द्व० तुल्यार्थकतया वीप्सा गम्यते । प्रतिदिने इत्यर्थे "य इत्थमस्याश्चमहर्दिवं

दिवः" माघः अर्श आद्यच् । २तद्वृत्तौ त्रि० । "अह-र्दिवाभिरुतिभिः"। [दयोऽयत्र ।

अहर्नाथ पु० ६त० । १दिनपतौ २अर्कवृक्षे चाहरधिपा-

अहर्निश न० अहश्च निशा च समा०द्व० । अहोरात्रयोः "तयोः सप्तऋषयो मासः पितृणां तदहर्निशम्" भा० ६स्क० । "तस्य सोऽहर्निशस्यान्ते प्रबुद्धः प्रतिबुध्यत" मनुः

अहर्बान्धव पु० अह्नि बान्धव इव प्रकाशकत्वात् । १सूर्ये । २अर्कवृक्षे च ।

अहर्भाज् स्त्री दृष्टकाभेदे । "रात्रिसहस्रेण रात्रिसहस्रेणैकैकां परिश्रितं सम्यङ्नासुपासीताहःसहस्रेणाहःसहस्रेणैकैकामहर्भाजम्" । शत०ब्रा० । [दृष्टे च ।

अहर्मणि पु० अह्नि मणिरिव प्रकाशकत्वात् । १सूर्ये २अर्क-

अहर्लोक पु० दृष्टकाभेदे । "ततोयाः षष्टिश्च त्रीणि च शतान्यहर्लोकास्ता अङ्गानेव साग्निः क्रियते" शत०ब्रा० ।

अहर्विद् पु० अहः एकाहसाध्यम् अग्निष्टोमं वेत्ति विद्-क्विप् । एकाहसाध्याग्निष्टोमज्ञेत्तरि "सुतसोमा अहर्विदः" ऋ० १,२,२ ।

अहल्य त्रि० न हलेन क्रष्यम् । १हलाकृष्टे क्षेत्रे । २देशभेदे पु० । ३गोतमर्षिपत्न्यां स्त्री । अहल्योत्पत्तिर्यथा । "मौद्गल्यस्य सुतो ज्येष्ठोब्रह्मर्षिः सुमहायशाः । इन्द्रसेना यतोगर्भं वभ्रस्यं प्रत्यपद्यत । वभ्रस्यान्विशुनं जज्ञे मेनकायामिति श्रुतिः । दिवोदासस्य राजर्षिरहल्या च यशस्विनी । शरद्वतस्य दायादमहल्या समसूयत । शतानन्दमृषिश्रेष्ठम् तस्यापि सुमहायशाः" हरि० ३२अ० शरद्वतः इति गोतमस्य नामान्तरम् । यद्वंशजातः कृपाचार्यः शारद्वत इति गौतम इति चाख्यायते । तस्यागोतमशापकथा अकल्पशब्दे २६८ पृष्ठेदृश्या । तस्याः शापविमोचनमुक्तम् । "तस्मात् प्रविश्य राभासु गौतमस्याश्रमं विभो ! । तारयेमां महाभागामहल्यां शापविप्लुताम् । विश्वामित्रवचः श्रुत्वा रामः सौमित्रिणा सह । विश्वामित्रं पुरस्कृत्य प्रविवेशाश्रमं ततः । स ददर्श महाभागां तपसा द्योतितप्रभाम् । सेन्द्रैरपि सुरैः सर्वैरगम्यां समायतैः । प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव । धूमेनापि परिताम्रां दीप्तामग्निशिखामिव । क्षपारेणावृतां साभ्रां पूर्णचन्द्रप्रभामिव । मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव । सा हि गोतमवाक्येन दुर्निरीक्ष्या बभूव ह । त्रयाणामपि लोकानां सर्वभूतस्य दर्शनम् । इहैव राघवौ तस्याः पादौ अग्रहतुस्तदा । सा च तौ पूजयामास कृत्वा गौतमशासनम् ॥ पाद्यार्घासनसत्कारैर्यथावत् प्रीतमानसा । प्रतिजग्राह रामश्च पूजां तां विधिवत् तदा । ससृजुर्देववाद्यानि पुष्पवृष्टिः पपात खात् । गन्धर्वाप्सरसां चैव महानासीत् समागमः । साधु साध्विति देवाश्च तदाहल्यामपूजयन् । विशुद्धां तपसोग्रेण तदा रामसमागमे । गोतमोऽथ महातेजा दृष्ट्वा दिव्येन चक्षुषा । स्वमाश्रमपदं रामागतं प्रत्यपूजयत् । समेत्य भार्यया चैव पूतयाऽहल्यया तदा । तयैव सहितोभ्यस्तप्रस्तेपे महायशाः" इति रामा०आ० । "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" प्रातःस्मरणीये पुरा० ।

अहल्याजार पु० ६त० । इन्द्रे तत्कथा अकल्पशब्दे २६८पृष्ठे ।

अहल्यानन्दन पु० ६त० । शतानन्दे ऋषौ । तस्योत्पत्ति-कथा अहल्याशब्दे उक्ता अहल्यासुतादयोऽत्र ।

अहल्याह्रद पु० ३त० । गोतमाश्रमस्थे स्वनामख्याते तीर्थ-भेदे "ततोगच्छेत ब्रह्मर्षेर्गोतमस्य वनं प्रियम् । अहल्या यात्र हृदे स्नात्वा व्रजेत परमां गतिम्" भा०वन ८४अ० ।

अहल्लिक पु० अह्नि लीयते ली-क नि० संज्ञायां कन् । प्रेते । प्रेताहि रात्रौ चरन्तो दिवा लीयन्ते इति प्रसिद्धम् । "अहल्लिकेति होवाच याज्ञवल्क्यः" श०ब्रा० । "अहल्लिकेति होवाच याज्ञवल्क्यो नामान्तरेण संबोधनं कृतवान्" भा० । "नामान्तरेण अह्नि लीयते इति प्रेत-वाचिनेति' शेषः आनन्दगिरिः ।

अहस्कर पु० अहःकरवत् । १सूर्ये, "अलञ्चकारास्य बभू-रहस्करः" माघः । २अर्कवृक्षे च ।

अहस्त त्रि० न स्तः हस्तौ यस्य । हस्तशून्ये प्राणिनि १लाङ्गादौ "अहस्ताश्च सहस्तानां शूराणां चैव भीरवः" मनुः २छिन्नहस्ते च । "अपादहस्तो अपृतन्यदिन्द्रम्" ऋ० १,३२,७ ।

अहस्पति पु० अहःपतिवत् । १सूर्ये २अर्कवृक्षे च ।

अहह अव्य० अहं जहाति अहम्+हा-क पृषो० ॥ १सम्बो-धने २आश्चर्ये, ३खेदे, ४क्लेशे, ५प्रकर्षे च । "अहहारे त्वा सूद" का०श्रौ० "अहह महतां निःसीमानश्चरितविभूतयः" वीरच० "अहह कष्टमपण्डितता विधेः" गङ्गाद० ।

अहहा अव्य० अहं जहाति हा-डा । "अहहशब्दार्थे" "भित्त्वाऽपि बुभुक्षितं यदहहा" गङ्गालह० ।

अहार्य पु० हृ-ण्यत् न०त० । १पर्वते । २कर्तुमशक्ये ३अभेद्ये च त्रि० । "तलातलभूतैः शस्त्रैरहार्यैः परि-

चारकैः" मनुः अहार्य्यैरभेद्यैः" कुल्लू०। अहार्य्यमेवं स्वगनाभिधत्ते" गणरत्न०। "अहार्य्यं ब्राह्मणद्रव्यं राज्ञां नित्यमिति स्थितिः" मनुः।

अहि पु० आहन्ति आ+हन+डिन् टिलोपः आडो ह्रस्वश्च। १सर्पे, लोकप्रसिद्धसर्पभेदादि सुश्रुते दर्शितम्। "अशीतिस्त्वेव सर्पाणां भिद्यते पञ्चधा तु सा"। "दर्वीकरा मण्डलिनो राजिमन्तस्तथैव च। निर्विषा वैकरञ्जास्च त्रिविधास्ते पुनः स्मृताः॥ दर्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः। तेषु दर्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः। द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश। निर्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा। वैकरञ्जोद्भवाः सप्त चित्रामण्डलिराजिलाः। पदाभिहृष्टा दृष्टा वा क्रुद्धा श्वासार्घिनोऽपि वा। ते दशन्ति महाक्रोधास्तद्वि त्रिविधमुच्यते। सर्पितं दशितं वापि दष्टीयमथ निर्विषम्। सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः। पदानि यत्र दष्टानामेकं द्वे वा बहूनि च॥ निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि। चञ्चुमालकयुक्तानि वैक्लव्यकरणानि च। सङ्क्षिप्तानि सशोफानि विद्यात्तत् सर्पितं भिषक्। राज्यः सलोहिता यत्र नीलाः पीताः सिताः तथा। विज्ञेयं दशितं तत्तु ज्ञेयमल्पविषञ्च तत्। अशोफमल्पदुष्टासृक् प्रकृतिस्थश्च देहिनः। पदं पदानि वा विद्यादविषं तच्चिकित्सकः। सर्पस्पृष्टश्च भीरोर्हि भयेन कुपितोऽनिलः। कस्यचिद् कुरुते शोफं सर्पाङ्गाभिहतन्तु तत्। व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु। तथातिवृद्धबालातिदष्टमल्पविषं स्मृतम्। सुपर्णदेवब्रह्मर्षियक्षसिद्धविषेविते॥ विषघ्नौषधियुक्ते च देशे न क्रमते विषम्। रथाङ्गनाङ्गलच्छत्रवस्तिकाङ्कुशधारिणः॥ ज्ञेयादर्वीकराः सर्पाः फणिनः शीघ्रगामिनः। मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः॥ ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः। स्निग्धा विविधवर्णाभिस्त्रियुगूर्ध्वन्तु राजिभिः॥ चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः। शुक्लाम्बुप्रभा ये च कपिला ये च पन्नगाः॥ सुगन्धिनः सवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः। क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भयकोपनाः॥ सूर्य्यचन्द्रार्कवि च्छत्रं जच्छ तेषां तथाम्बुजम्। कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा। धूम्राः पारावताभास्च वैश्यास्ते पन्नगाः स्मृताः॥ भल्लिपक्षीपिवर्णाभास्तथैव परुषत्वचः। भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः॥ कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु। पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः॥ अपत्यसमवर्णाभ्यां द्विदोषकरलक्षणम्। ज्ञेयौ दोषैश्च दम्भत्योर्विशेषश्चात्र वक्ष्यते॥ रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि। शेषेषूक्ता मण्डलिनो दिवा दर्वीकराः स्मृताः॥ दर्वीकरास्तु तरुणा दृष्ट्वा मण्डलिनस्तथा। राजिमन्तो वयोमध्ये जायन्ते मृत्युहेतवः॥ नकुलाकुलिता बाला वारिविप्रहृताः कृशाः। दृष्ट्वा सुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः। तत्र दर्वीकराः। कृष्णसर्पो हाहाकृष्णः कृष्णोदरः श्वेतकपोतो मेघाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः कुमुदपद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्दो आशीविष इति॥ मण्डलिनस्तु। आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृथतो रोध्रपुष्पो मिलिन्दको गोनसो वृद्धगोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिन्दिरः पिङ्गलस्तन्तुकः पुष्पपाण्डुः षडगोऽग्निको बभ्रुः स्पायः कलुषः पारावतो हस्तीभरणश्चित्रक एणीपद इति॥ राजिमन्तस्तु। पुण्डरीको राजिचित्रोऽङ्गुलराजिर्विन्दुराजिः कर्दमकस्तृणशोषकः सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रको गोधूमकः किक्किसाद इति॥ निर्विषास्तु। गलगोली शुकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः चौरिकापुष्पकोऽन्धाहिकोऽहिपताकोगौराहिको दृष्टेश्वय इति। वैकरञ्जास्तु त्रयाणां दर्वीकरादीनां व्यतिकराज्जाताः। तद्यथा। भाकुलिः पोटगलः स्निग्धराजिरिति। तत्र कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो भाकुलिः। राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः। कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति। तेषामाद्यस्य पित्तवद्विषोल्बणौ द्वयोर्मांसवद्वित्येके। त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त तेषामाद्यास्त्रयो राजिलवत् ज्ञेया मण्डलिवत्। एवमेतेषां सर्पाणामशीतिरिति। तत्र महानेत्रजिह्वास्यशिरसः सुमांसः, सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः। उभयलक्षणामन्दविषा अक्रोधा नपुंसका" इति। तेषां

बहूनि पुराणे नामान्युक्तानि तेषां प्रधान्यतो भारते कतिचिदुक्तानि "बहुत्वान्नामधेयानि पन्नगानां तपोधन !। न कीर्त्तयिष्ये सर्व्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ। कालियो मणिनागश्च नागश्चापूरणस्तथा। नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः। नीलानीलौ तथा नागौ कल्माषशबलौ तथा। आर्य्यकश्चोग्रकश्चैव नागः कलशपोतकः। सुरामुखो दधिमुखस्तथा विमलपिण्डकः। आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा। निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा। बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिण्डकः। कम्बलाश्वतरौ चापि नागः कालीयकस्तथा वृत्तसंवर्त्तकौ नागौ द्वौ च पद्मावितिश्रुतौ। नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः। क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा। करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपाण्डरः। मूषकादः शङ्खशिराः पूर्णभद्रो हरिद्रकः। अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा। कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान्। विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्। हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः। कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः। कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा। कर्कराकर्करौ नागौ कुण्डोदरमहोदरौ। एते प्राधान्यतो नागाः कीर्त्तिता द्विजसत्तम !। बहुत्वान्नामधेयानामितरे नानुकीर्त्तिताः। एतेषां प्रसवो यश्च प्रसवश्च च सन्ततिः। असंख्येयेति मत्वा तान्न ब्रवीमि तपोधन !। बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च। अशक्यान्येव संख्यातुं पन्नगानां तपोधन ! भा० आ० ३५ अ०। "अहिपरिकरभाजो भास्वरैरङ्गरागैः" माघः। महतोऽप्येनसोमासात्तक्षेवाहिर्विमुच्यते" "न पश्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्" लूताहिशरटानाञ्च तिरश्चां चाक्षुचारिणामिति" च मनुः। ३सूर्य्ये, इन् ४राहौ, ५पथिके, अह-व्याप्तौ इन्। ६वृत्रासुरे तस्य सर्व्वलोकव्यापकत्वात्तथात्वम् स च विश्वरूपपितृस्वष्टृपुत्रः तदुत्पत्तिकथा भाग० ६स्क० ९अ० "कृतपुत्रस्तस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो ! विवर्द्धस्व मा चिरं जहि विद्विषम्। अथान्वाहार्य्यवचनादुत्थितो घोरदर्शनः। कृतान्त इव लोकानां युगान्तसमये यथा। विष्वग्विवर्द्धमानं तमिषुभानं दिनेदिने। दग्धयन्तं प्रतीकाशं सन्ध्याभ्रानीकवर्च्चसम्॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम्। देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी॥ अत्यन्तसुन्नयन्तञ्च चालयन्तं पदा महीम्। दरीगम्भीरवक्त्रेण पिबता च नभस्तलम्॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम्। महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः। वितत्यादृङ्मुखालोकावीक्ष्य सर्व्वे दिशोदिश॥ येनाहृताद्रमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना। सर्व्वेहत इति प्रोक्तः पापः परमदारुणः" ॥ ७खले, दक्षके, ८सर्पस्वामिके अश्लेषानक्षत्रे च। "अहृदगणस्तीक्ष्णोऽहि रुद्रेन्द्रयुक्" ज्यो०। "द्रुतं धनुःखण्डमिवाहिविप्लवः" किरा०। "अहिघस्रङ्गवता निशम्यताम्" माघः। १०आकाशे त्रि० "अहिरसि बुध्नः" ताण्ड्य०। अहिराकाशान्तरिक्षवर्त्तीनाम्" भा०। अह-व्याप्तौ इन्। ११जले महीव्यापित्वात्तत्त्वम् १२व्यापके १३व्याप्ते च त्रि०। १४व्याप्तपृथिव्यो० द्वि०व० १५पृथिव्यां १६स्त्रीगव्याञ्च स्त्री वा ङीप् नागनामत्वात् तज्जातत्वाच्च १७सीसे धातौ। तस्योत्पत्त्यादिकम् भावप्र० "दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु व्यमोचयत्" वीर्य्यं जातस्ततो नागः सर्व्वरोगापहोऽभवत्" सीसं वङ्गं तथा वप्रं योगेष्टं नागनामकम् (नागोभुजगः) सीसं रूक्षगुणं ज्ञेयं विशेषान्मेहनाशनम्। नागस्तु नागशस्तुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति। वह्निं प्रदीपयति कामबलं करोति मृत्युं च नाशयति सन्ततसेवितः सः। पाकेन हीनौ किल वङ्गनागौ कुष्ठानि शुक्लांश्च तथातिकष्टम्। पाण्डुप्रमेहानिलमादशोथभगन्दरादीन् कुरुतः प्रभक्तौ" तस्य पाकविधिमाह तत्रैव। ताम्बूलरस संपिष्टशिलालेपात् पुनः पुनः। हालिभल्लैः क्षुटेनांगो निरूप्यं भस्म जायते। (शिखा मनःशिला) अन्यच्च। "अम्लवल्लिद्वात्वक्चूर्णं चतुर्थांशेन निक्षिपेत्। तत्पात्रे विकृतो नागो लोहदर्व्या प्रघर्षितः। यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला। काञ्जिकेन द्रवं कृत्वा पचेत् कटपुटेन तम्। स्वाङ्गशीतं पुनः पिष्ट्वा शिखया काञ्जिकेन च। पुनः पचेत् समेताभ्यामेवं सप्तपुटैर्भवेत्" ।

अहिंसक त्रि०न हिनस्ति हिंसु-ण्वुल् न०त०। हिंसारहिते

अहिंसा स्त्री हिंसु-अङ् न०त०। १वाङ्मनःकायैः परपीड़ाभावे, २प्राणिपीड़ानिवृत्तौ, ३अशास्त्रीयप्राणिपीड़नाभावे च "अहिंसापरमो धर्म्मः" इति स्मृतिः। "या वेद विहिताहिंसा नियताश्चिंचराचरे। अहिंसामेव तां विद्यात् वेदाद्धर्म्मोहि निर्बभौ" मनुना वैधहिंसायां दोषाभावश्चः यत्तु मीमांसकादिभिर्ये सांख्यजैनैश्च

शास्त्रीयहिंसायामपि दोषः यथोक्तं सां०का० । "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" । अविशुद्धिहिंसादोषसंसर्गः यथा च वैधहिंसायां दोषसंसर्गस्तथोक्तमशुद्धिशब्दे ४७६ पृष्ठे । एतस्याश्च भावरूपत्वं गीतायामुक्तम् "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । अहिंसा समता तुष्टिः" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" । इयञ्च साधारणधर्म्मः । "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । एतत् सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः" इति मनूक्तेः "क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः । अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया, आर्जवं ह्रीरलोभश्च देवब्राह्मणपूजनम् । अनभ्यसूया च तथा धर्मः सामान्य उच्यते "विष्णूक्तेः "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । दानं शमोदया क्षान्तिः सर्वेषां धर्म्मसाधनमिति" याज्ञ०उक्तेश्च "सर्वेषां पुरुषाणां ब्राह्मणाद्याचण्डालान्तं धर्म्मसाधनमिति" "साधारणधर्मश्चाहिंसादिः" "न हिंस्यात् सर्वाभूतानीति" श्रुत्युक्तः आचाण्डान्तं साधारणधर्मः" मिता० । इयञ्च "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" पात०उक्तो यम भेदः, "अहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीड़नं सा परमः शुद्धोधर्मः "अहिंसा परमोधर्मः" इत्युक्तेः अन्ये सत्यादय एतस्या एव शुश्रूषाः तथा चोक्तं "स खल्वयं ब्राह्मणो यथा यथा तानि व्रतानि समादित्सति तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति" वृत्तिः । तस्याश्च कथंकर्त्तव्यता तदपि "वितर्कबाधने प्रतिपक्षभावनम्" पात०सू० दर्शितम् "एतेषां यमनियमानां वितर्कैर्हिंसादिसंकल्पैः कृतिकार्य्येनमसत्यं वदिष्यामि परस्वमादास्ये इत्यादिभिः बाधने प्राप्ते सति यमपरो ब्राह्मणः प्रतिपक्षभावनं कुर्य्यात् घोरेषु संसाराङ्गारेषु पापच्यमानेन येन मया शरणमुपगतः सर्वभूताभयप्रदानेन यमादिधर्म्मः स खल्वहं त्यक्ता हिंसादीन् पुनस्तानाददानस्तुल्यः शुना । यथा श्वा वान्ताशी तथा त्यक्तस्य पुनरादाने इति वितर्क प्रतिपक्षान् भावयेदित्यर्थः" वृत्तिः । वितर्काणां स्वरूपप्रकारकारणावान्तरभेदफलानि पञ्चभिः पदैः क्रमेण वदन् प्रतिपक्षभावनं स्फुटयति । "वितर्काः कृतकारितानुमोदिता लोभक्रोधमोहपूर्व्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्" पात०सू० । "वितर्क्यन्त इति वितर्काहिंसादयः इति स्वरूपोक्तिः । तत्र हिंसा त्रिप्रकारा स्वयंकृता, कुर्वित कारिता, साधुसाध्वित्यनुमोदिता चेति तत्रैकैका पुनस्त्रिविधा भवति कारणभेदात् मांसादिलोभेन, अपकृतमनेनेति क्रोधेन, धर्म्मो भविष्यतीति मोहेन च । एवं नवविधा जाता हिंसा । लोभक्रोधमोहा अपि प्रत्येकं त्रिविधा भवन्ति मृदुमध्याधिमात्रत्वेन । तत्पूर्व्वकाहिंसादयोऽपि मृदवोमध्या अतिमात्राश्च भवन्ति । तथा कृतकारितानुमोदिताश्च प्रत्येकं नवधा भवन्तीति हिंसायाः सप्तविंशतिभेदा भवन्ति । मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवन्ति मृदुमृदुर्मध्यमृदुस्तीव्रमृदुः मृदुमध्योमध्यमध्यस्तीव्रमध्यः मृदुतीव्रोमध्यतीव्रस्तीव्रतीव्रश्चेति एवं लोभो नवविधः एवं क्रोधमोहाविति तत्पूर्व्वकृताहिंसा सप्तविंशतिभेदाभवन्ति तथा कारितानुमोदिता चेत्येकाशीतिभेदा हिंसा भवति" वृत्तिः । तेषां फलान्याह दुःखाज्ञानानन्तफला इति । मनुनापि "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादके घातकाः स्मृताः" इत्यनेन अनुमत्यादीनां हिंसासाधनत्वमुक्तम् यममध्येऽहिंसाफलमप्याह पात०सू० । "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" । अहिंसासिद्धौ सत्यां तस्याऽहिंसकस्य सुनिवर्य्यस्य सन्निधौ स्वभावविरुद्धानामपि अहिनकुलादीनां वैरत्यागः अस्यापि प्रभावात् । अतएव कविभिः अहिंसायमप्रभावादेव शान्ताश्रमः "विरोधिसत्त्वोज्झितपूर्व्ववत्सरमित्यादि" वर्ण्यते ।

अहिंसान त्रि०न हिनस्ति हिंस्–शीलार्थे चानश् न०त० । हिंसाशीलभिन्ने "धर्म्मण्यहिंसानस्य सश्चिरे" ऋ०५,६६४,३ ।

अहिंस्र त्रि० न हिंस्रः । १हिंसाशीलभिन्ने । "अहिंस्रोदमदानाभ्यां जयेत् स्वर्गं तथा व्रतैः" मनुः "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्माविहितान्वते । यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत्" मनुः । "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावितान्वते । ते एव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः" भा०भा० स्मृतिः । (कुलेखाड़ा) २कुलिकवृक्षे पु० राजव० ।

अहिका स्त्री अहिरिव कायति प्रकाशते दुराक्रमत्वात् । १शालूकलिवृक्षे शब्दच० । २भूवनवृक्षे पु० ।

अहिकान्त पु० अहेः कान्तः भक्ष्यत्वात् । वायौ सर्पस्य पवनाशनत्वेन वायोस्तत्कान्तत्वम् ।

अहिक्षेत्र पु० अहेः क्षेत्रमिव । प्राग्देशवर्त्ति देशभेदे । भा०प० २५३ अ० कर्णदिग्विजये । "अवतीर्य्य ततः शैलात् पूर्व्वां दिशमभिद्रुतः । अङ्गान् वङ्गान् कलिङ्गांश्च" इत्युपक्रम्य

"आवशीरांश्च योधांश्च अहिक्षेत्रं च योधयन् । पूर्व्वां दिशं विनिर्जित्य वत्सभूमिं तथाऽगमत्" ।

अहिगण पु० १छन्दःशास्त्रप्रसिद्धे पञ्चमात्रात्मके आद्यगुरुके अन्त्यलघुत्वयरूपे सप्तमभेदे । ६त० । २सर्पाणां समूहे ।

अहिच्छत्र पु० अहेः फणाकारः छत्रमस्यादकः । १मेघपङ्क्तीवृक्षे, २नगरीभेदे स्त्री । ३देशभेदे पु० । स च देशः पार्थेन निर्ज्जित्य द्रोणाय दत्तः । "अहिच्छत्रं च विषयं द्रोणः समभिपद्यत । एवं राजन्नहिच्छत्रा पुरीजनपदायुता युधि निर्ज्जित्य पार्थेन द्रोणाय प्रतिपादिता" भा० आ० प० १३६ अ० । तत्र द्रुपदराज्यं पूर्व्वमासीत् यथोक्तं हरिवंशे २० अ० "अहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन् । मर्षेवानुमते तदा । ततोऽभूद्द्रुपदोराजा द्रोणस्तेन निराकृतः । ततोऽर्জ্জुनेन तरसा निर्ज्जित्य द्रुपदं रणे । अहिच्छत्रं सकाम्पिल्यं द्रोणायाथ पराक्रमात् । प्रतिगृह्य ततोद्रोणः उभयं जयतांवरः । काम्पिल्यं द्रुपदायैव प्रायच्छद्विदितं तव" हरि० २० अ० तत्सीमाबन्धश्च भा० आ० प० १३७ अ० उक्तः । "कामन्तीमथ गङ्गायास्तीरे जनपदायुताम् । सोऽध्यवात्सीद्दीनमनाः काम्पिल्यञ्च पुरोत्तमम्" । दक्षिणांशापि पञ्चालान् यावच्चर्म्मण्वतीं नदीम् । द्रोणेन चैवं द्रुपदं परिभूयाथ पालिता" । अहिच्छत्रस्य नामान्तरं प्रत्यग्रयः हेम० । अहिच्छत्रे भवः अण् आहिच्छत्रः । स्त्रियां ङीप् गुरूपोत्तमत्वेऽपि गोत्रार्खभित्त्वात् न घञ् आहिच्छत्री" सि० कौ० ।

अहिजित् पु० अहिं सर्पं हत्वासुरं वा जितवान् जि-क्विप् तुक् च । १कृष्णे, २इन्द्रे च । तत्र कृष्णस्य कालियदमनात्तथात्वम् तत्कथा हरि० ६६ अ० । "कृष्ण कृष्ण ! महाबाहो ! गोपानां नन्दिवर्द्धन ! । दश्यतामेष वै क्षिप्रं सर्पराजो विषायुधः । इमे नो बान्धवास्तात ! त्वां मत्वा मानुषं विभो ! । परिदेवन्ति करुणं सर्वे मानुषवद्भयः । तच्छ्रुत्वा रौहिणेयस्य वाक्यं संत्रासमीरितम् । विक्रीड्याऽस्फोटयन् बाहू भित्त्वा तं भोगबन्धनम् । तस्य पद्भ्यां समाक्रम्य भोगराशिं जलोल्बणम् । शिरस्सु कृष्णो जघ्राह खहस्तेनावनम्य च । तस्याऽरुरोह सहसा मध्यं तन्महच्छिरः । सोऽस्य मूर्द्धिस्थितः कृष्णः ननर्त्त रुचिराकृतिः । नृत्यमानः स कृष्णेन शान्तमूर्द्धा भुजङ्गमः" । इति । इन्द्रस्य वृत्रासुरजयकथा भाग० ६स्कन्धे ६ अ० "अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा । मुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्" इत्युपक्रम्य इन्द्रवृत्रासुरयुद्धं वर्णयित्वा "भित्त्वा वज्रेण तत्कक्षं निष्क्रम्य बलभिद्विभुः उच्चकर्त्त शिरः पक्षोगिरिशृङ्गमिवोजसा" इत्युक्तम् । [जिह्वाखलतायाम् ।

अहिजिह्वा स्त्री अहेर्जिह्वेव तदाकारशिखत्वात् । नाग-

अहिण्डुका स्त्री हिण्ड-उकञ् न० त० । सुश्रुतोक्ते कीटभेदे कीटशब्दे विवृतिः "अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवोमोहश्च" । "अहिण्डुकाभिर्दष्टानामापदो विषनाशनम्" इति च सुश्रुतः ।

अहित पु० न० त० । १शत्रौ । २पथ्यभिन्ने त्रि० । सुश्रुतोक्तानि अहितानि अपथ्यशब्दे २२६ पृष्ठे उक्तानि "अहितानिलोद्भूतैस्तर्জ্জयन्निव कोपिभिः" रघुः "रामनाम इति तुल्यमात्मजे वर्त्तमानमहिते च दारुणे" रघुः "निन्दन्तस्त्व सामर्थ्यं वदिष्यन्ति तवाहिताः" गीता । चतुर्ष्वमपि वर्णानां प्रेत्य चेह हिताहितान् । अष्टाविमान् समासेन स्त्रीविवाहाङ्विबोधत" मनुः । "अहितो देहजोव्याधिर्हितमारण्यमौषधम्" ।

अ(आ)हितुण्डिक पु० अहेस्तुण्डं सुखं तेन दीव्यति ठन् ठञ् वा । १व्यालग्राहिणि, २सर्पखेलके च ।

अहिहिंस् पु० अहिं सर्पं हत्वासुरं वा हिंसवान् हिंस-भूते क्विप् । १गरुडे, २मयूरे, ३नकुले, ४इन्द्रे गरुड़मयूरनकुलानां स्वभावसिद्धं तथात्वम् इन्द्रस्य वृत्रासुरहेष्टत्वमहिजिच्छब्दे उक्तम् "अहिहिंसक्षद्भवता निगृह्यताम्" भाघः । क । अहिहिंसोऽप्युक्तार्थेषु । [स्वभावसिद्धे वैरे ।

अहिनकुलिका स्त्री अहिनकुलयोर्वैरम् वुन् । सर्पनकुलयो-

अहिनिर्मोक पु० अहिना निर्मुच्यते निर्+सुच-कर्म्मणि घञ् ६त० । सर्पकञ्चुके (खोलस) इति ख्याते ।

अहिनिर्लयणी स्त्री अहिर्निलीयतेऽस्याम् निर्+ली-ल्युट् ङीप् । (खोलस) इति ख्याते सर्पनिर्म्मोके । "तद्यथाऽहिनिर्लयणी वल्मीके मृता प्रत्यस्ता शेते" छ० उ० ।

अहिपताक पु० अहिपु पताका तदाकारोऽस्यस्य अच् । सर्पभेदे अहिशब्दे ५८१ पृष्ठे सुश्रुतोक्तस्तद्भेदोदृश्यः ।

अहिपति पु० ६त० । वासुकिनागे । अहिनाथादयोऽप्यत्र ।

अहिपुत्रक पु० अहेः पुत्रः इव कायति प्रकाशते कै-क । सर्पाकारे नौकाविशेषे (छिप्) ।

अहिपूतन न० सुश्रुतोक्ते क्षुद्ररोगभेदे यथा "समासेन चतस्रिंशत् क्षुद्ररोगा भवन्ति" इत्युपक्रम्य "निकक्षगुदोऽहिपूतनं क्षपणकक्षूर्गुदभ्रंशश्चेति" तान् गणयित्वा" "ग्रहभूत-

समायुक्तेऽधौतेऽपाने शिशोर्भवेत् । स्विन्नस्राक्ष्याध्मानस्य कण्डूरक्तकफोद्भवा । कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते ।"एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्" इति तस्य लक्षणाद्युक्तम् । अस्य स्त्रीत्वमपि ॥ "धात्र्याः स्तन्यं शोधयित्वा बाले साध्याहिपूतना" । "घटोलपत्रत्रिफलारसाञ्जनविपाचितम् । पीतं हृतं नाशयति क्षुद्रामयमहिपूतनाम्" "चिकित्सन् शुष्ककच्छ्वाख्यहिपूतनपानवत्" सुश्रु० ।

अहिफेन पु० अहेः फेनः गरलमिव तीक्ष्णगुणत्वात् । (आफिङ्) इति ख्याते १उच्चनिर्यासभेदे । ६त० २सर्पलालायाञ्च ।

अहि(वु)बुध्न पु० अहेरिव बुध्नो मूलो यस्य । १रुद्रभेदे,२तद्देवताके २उत्तरभाद्रपदनक्षत्रे २मुहूर्त्तभेदे च । ष० अहिर्बु(र्बु)ध्नोऽहि(र्बु)र्बुध्न्योऽप्यत्र । तत्स्वरूपं ध्यानशब्दे वक्ष्यते । "अजैकपादहिर्बुध्नः विरूपाक्षश्च रेवतः" विष्णुध० । मुहूर्त्तभेदस्य अहःशब्दे ५७६ पृष्ठे उक्तः तच्चक्रतस्य तद्देवताकत्वञ्च अश्लेषाशब्दे ४६८ पृष्ठे उक्तम् ।

अहिभय न० अहेः, रूढ़स्यत्वात् आदृताकारत्वाच्च अहितुल्यात् स्वपत्वात् भयम् । राज्ञां स्वपत्वजनिते १भये ६त० । २सर्पभये च । [भयनाशिकायाम् भूम्यामलक्याम् ।

अहिभयदा स्त्री अहिभयं द्यति खण्डयति दो-क । सर्प

अहिभानु पु० अहिर्व्याप्तो भानुस्तद्गतिरस्य । सूर्य्यगतिहेतौ वायौ प्रयाहानिलेनैव सूर्य्यगतेर्ज्योतिषोक्तेस्तथात्वम् । "मरुतो अहिभानवः" ऋ० १,१७२,१ ।

अहिभुज् पु० अहिं भुङ्क्ते क्विप् । १गरुड़े, २मयूरे, ३नकुले च

अहिमत् पु० अहिमाभूषणतया बिभर्त्ति भृ-क्विप् । १शिवे

अहिम न० विरोधे न०त० । १उष्णस्पर्शे २तद्वति त्रि० ।

अहिमद्युति पु० अहिमा उष्णा द्युतिरस्य । १सूर्य्ये २अर्कवृक्षे च अहिमकरादयोऽप्यत्र ।

अहिमन्यु त्रि० अहिरिव हिंस्रोमन्युरस्य । १हननशीले २अहितुल्यहिंसक्रोधे च "ग्रसस्वाऽहिमन्यवः" ऋ० १,६४,८ । ६त० । ३सर्पक्रोधे च । [कुलीनामलतायाम् ।

अहिमर्दनी स्त्री अहिर्मर्द्यतेऽनया मृद-ल्युट् । गन्धना-

अहिमाय त्रि० अहेरिव कुटिला मायाऽस्य । वृत्रासुरादौ "वृत्रस्यतेरहिमायान् अभि द्यून्" ऋ० १,१६०,४ ।

अहिमार पु० अहिं मारयति मृ-णिच्-अण् । १अरिमेदवृक्षे सर्पमारके २गरुड़े ३मयूरे ४वृत्रासुरनाम्नि दैत्ये च । [अरिमेदवृक्षे ।

अहिमेद(क) पु० अहिराहन्नाऽरिरिव मेदोऽस्य वा कप् ।

अहिरिपु पु० ६त० । १गरुड़े २मयूरे ३नकुले ४कृष्णे च ५वृत्रासुरे इन्द्रे च । अहिजिच्छब्दे विवृतिः ।

अहिलता स्त्री अहिलोकस्य पातालस्य लता शाक०त० अहिरिव लता वा दीर्घाकारत्वात् । १ताम्बूल्याम् २अहिद्वेष्टी लता शा०त० । ३गन्धनाकुल्याम् ।

अहिविद्विष् पु० ६त० । १गरुड़े २मयूरे ३नकुले ४कृष्णे ५गन्धनाकुलीवृक्षे वृत्रासुरे इन्द्रे च "द्रुतं धनुःखण्डमिवाहिविद्विषः" किरा० । क । अहिविद्विषोऽप्यत्र ।

अहिशुभ्र त्रि० अह-व्याप्तौ इन् अहि व्यापि शुभ्रं यस्य व्यापकबले । "आस्राङ्गमद्यादहिशुभ्र !" ऋ०५,३३,५ ।

अहिसक्थ त्रि० अहिरिव दीर्घं सक्थि यस्य । १सर्व्वतुल्यदीर्घसक्थियुक्ते उपचारात् २तदाधारदेशे पु० । तद्देशादूरभवम् सुवास्वा० अण् । आहिसक्थः । तद्देशादूरभवे देशादौ त्रि० ।

अहिहत्य न० हत्या हननं भावे क्यप् वेदे न० । १वृत्रासुरहनने "अर्कमहिहत्ये जघ्नुः" ऋ० १,१६१, । लोके स्त्रीत्वम् । २सर्पहनने स्त्री । [२इन्द्रे च ।

अहिहन् पु० अहिं सर्पं वृत्रासुरं वा हतवान् क्विप् । १गरुड़े

अहीन पु० अहोभिः साध्यते ख । अह समूहसाध्ये द्विरात्रादियागभेदे । स च ताण्ड्य०ब्रा० भाष्ये षोड़श ऋत्विज उपक्रम्य "एतेऽहीनैकाहैर्याजयन्ति" आपस्त० उक्तः 'तएते होत्रादिनामका षोड़शर्त्विजोद्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति'भा० "अहीन यजनमशुचिकरमिति" श्रुतिः "अभिचारमहीनञ्च त्रिः कृत्वेह विशुध्यति" मनुः । अहीनामिनःस्वामी । २सर्पराजे वासुकौ पु० । न हीनः । ३अन्यूने त्रि० न न महीन महीन पराक्रमम् रघुः "वेदयज्ञैरहीनानां प्रशस्तानां सकर्म्मसु" मनुः "त्वत्तः सूतमहीनकीर्त्तेः" भा०आ०प० ।

अहीनगु पु० सूर्य्यवंश्ये नृपभेदे "अहीनगुर्नाम स गां समस्या महीनवाङ्द्रविणः यशास्व" रघुः "रामस्य तनयोजज्ञे कुश इत्यभिविश्रुतः । अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः । निषधस्य नभः पुत्रोनभः पुत्रोनलस्य तु । नभस्य पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः । क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान् । आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः । अहीनगोस्तु दायादः सुधन्वा नाम पार्थिवः" । हरि०व०१६अ० ।

अहीनवादिन् त्रि० न हीनः वादी । "अन्यवादी क्रियाद्वेषी नोत्थापता निरुत्तरः । आहूतप्रपलायी च हीनः प्रश्नविधः स्मृतः" इति स्मृत्युक्तहीनभिन्ने वादिनि ।

अहीमती स्त्री अहिरस्त्यस्याम् मतुप् शरादि०दीर्घः । नदीभेदे
अहीर पु० आभीरस्य पृषो० साधुत्वम् । आभीरे । [उक्तः ।
अहीरणादि पु०अरीहणादिगणे पाठान्तरम् स च गणः तच्छब्दे
अहीरणि पु० अहीन् दैरयति दूरीकरोति दैर-अनि । हिंसुखसर्पे तद्दर्शनाद्धीतरे सर्पाः पलायन्ते ।
अहीशुव पु०अहिरिव श्वयते श्वु-क बा०दीर्घः । शत्रौ "पिप्रुं-दासमहीश्वुवम्" ऋ०८,३२,२ । "अहीश्वुवं शत्रुम्"भा० ।
अहु त्रि० अह-व्याप्तौ उन् । व्यापके स्त्रियां ङीप् "पर उवीर्वा अन्या उपसदः परोऽङ्गीरन्याः" शत०ब्रा० । अंहते आधारे उन् अंङ्ग भगे न० । "यदस्य अंङ्गभेद्या ह्रुषु"य०२२,२८,"अंङ्गभगं भेद्यं विदार्य्यं यस्याः"दीपः ।
अहुत पु० नास्ति हुतं हवनं यत्र । धर्मसाधनत्वेऽपि अहोमे १वेदपाठे। "अहुतं च हुतञ्चैव तथा प्रहुतमेव च। ब्राह्मं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते" जपोऽहुतो हुतोहोमः प्रहुतो भौतिको बलिः । ब्राह्मं हुतं द्विजाग्र्याग्न्यां प्राशितं पित्रतर्पणम्" मनुः यस्य हवनं न हुतं तादृशे २हविरादौ त्रि० । "अथ यत् पुराणा नाश्नन्ति यथा अहुतस्य हविषो नाश्नीयात् एवं तत्तस्माद्दीक्षितस्य नाश्नीयात्" शत०ब्रा० ।
अहृणान त्रि० हृणी-रोषणे कण्डा० ताच्छील्ये चानश् वेदे नि०न०त० । अक्रोधने । "किं मे हव्यमहृणानो जुषेत" ऋ०७,८६,२ । लोके क्वचित् वेदे च अहृणीयमानः । "राजाना क्षत्रमहृणीयमानाः" ऋ०५,६२,६ ।
अहे अव्य-अह+ए । १क्षेपे, वियोगे च । "अहे राम ! घनश्याम ! तुभ्यामि सुखपङ्कजम् । यदि जीवामि भीकेन पुनः पश्यामि ते मुखम्" ।
अहेड त्रि० हेड-अनादरे अच् न०त० । अवज्ञाशून्ये
अहेडमान त्रि० हेड-शानच् न०त० । आदियमाणे अवज्ञाशून्ये "अहेडमानो वरुणः" ऋ० १,२४,११ ।
अहेतु पु०न०त० । १हेतुभिन्ने न०ब० । २हेतुशून्ये त्रि० या कप् अहेतुकोऽप्युक्तार्थे । हेतुः कारणसद्देश्यञ्च । कारणञ्च कार्य्याव्यवहितक्षणे कार्य्याधिकरणे स्थितिशाली यथा घटादिकं प्रति मृत्तिकादि कटकादिकं सुवर्णादि । तयोस्तदधिकरणे तत्पूर्व्वं स्थितत्वात् तथात्वम् । कारणतायाश्चकौ च अन्वयव्यतिरेकौ । मतभेदे तद्व्याख्यानं कारणशब्दे वक्ष्यते
अहेर पु० न हिनोति हि-क न०त० । मतभूख्याम् ।
अहैतुक त्रि० हेतुत आगतम् ठञ् न०त० । १हेतुतोऽप्राप्ते २उद्दिश्यान्तरासक्ततयाऽकृते । ३उपपत्तिशून्ये च । "यत्तु कृतघ्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् । अतत्त्वार्थवदत्यन्तञ्च तत्तामसमुदाहृतम्" गीता ।
अहो अव्य० न+हा-डो । १शोके, २अधिगमे, ३विषादे, ४दयायां, ५सम्बोधने, ६विस्मये, ७प्रशंसायाम, ८वितर्के, ९असूयायाञ्च "अहो महत्त्वं महतामपूर्व्वम्" नीतिः "कुसुमधनुषोमन्दिरमहो" श्यामास्तवः । "अहो अहोभिर्महिमाहिमागमे"नैष० ।
अहोरात्र पु० अहश्च रात्रिश्च टच् समा० । सूर्य्योदयद्वयमध्यवर्त्तिकाले षष्टिदण्डात्मके मानुषे दिने पित्र्याद्यहोरात्रमानन्तु-अहश्शब्दे ५७६पृष्ठे उक्तम् । त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रस्तु तावतः । अहोरात्रे विभजते सूर्य्योमानुषदैविके" मनुः । "रात्राह्नाहाः पुंसि"पा०उक्तेः पुंस्त्वेऽपि आर्षत्वात् क्लीवम् "रात्रिञ्च तावतीमेव तेऽहोरात्रविदोविदुः" मनुः । [दिवसे गेये रथन्तरनामकसामभेदे ।
अहोरथन्तर न० अह्नि गेयं रथन्तरम् सामभेदः न रो रः ।
अहोरूप न० अह्नो रूपम् न रो रः । दिवसरूपे ।
अहोवत अव्य०अहो च वत च द्व० । १खेदे, २सम्बोधने २अनुकम्पायाञ्च । "अहोवत महत् कष्टम्" गणरत्न० "अहोवत महत् पापम्"गीता "अहोवतासि सुकृणीयवीर्य्यः"कुमा०
अह्नवाय्य त्रि० ह्नु-बा० आय्य न०त० । निह्नवकर्त्तरि । "सत्यं तत्तुर्वशे यदौ विदानो अह्नाय्यम्"ऋ०८,४५,२७
अह्नाय अव्य० ह्नु-घञ् वृद्धिः पृषो० वस्य यत्वं न०त० । शैथ्ये । "अह्नाय सा नियमजं क्लममुत्ससर्ज" कुमा० "अह्नाय तावदरुणेन तमो निरस्तम्" रघुः स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-मूर्च्छन्मोसमहर्षिहर्षविकृतस्नानार्द्रिकाऽह्नाय वः" का०प्रा० ।
अह्नार्षु त्रि० अहिमाहन्तारं शत्रुमृषति गच्छ-उ । शत्रुं प्रति आभिमुख्येन गन्तरि "अह्नार्षूणां चिन्नयां अविष्याम्"ऋ० २।२८।३ ।
अह्नय त्रि० न जिह्नेति ह्नी-अच् न०त० । निर्लज्जे "वृणीमहे अह्नयं वाजसृत्मियम्" ऋ०१,२,४, ।
अह्नयाण त्रि०ह्नी-बा० "आनच् न०त० । निर्लज्जे "अध एति युवतिरह्नयाणा" ऋ० ७,८०,२ । [ऋ०६,५४,१ ।
अह्नि पु०ह्न-क्नि न०त० । कपौ । "शुक्लं हरिं अह्नयः"
अह्नुत त्रि० ह्नु-क्त न०त० पृ० । व्याप्तिले "सर्वमनह्नुतं यथा गिरः" ऋ०६,२४,६ ।
अह्रीक पु० नास्ति ह्रीर्यस्य । १ व्याधके तस्य दिगम्बरत्वेन लज्जाहीनत्वात्तथात्वम् २निर्लज्जे त्रि० ।

अक्लव त्रि० न क्लवति चलति क्लव–अच् न० त० १भक्लातके। २विक्लवभिन्ने त्रि०।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये बृहदभिधाने अकारादिकशब्दसमूहः समाप्तः।

आ

आ अव्य० आप–किप् पृ० पलोपः। १वाक्ये (वाक्यस्यान्यथात्वद्योतने पूर्व्वमेवमसंस्था इदानीमेवमिति प्रतिपादने) २स्तुतौ (आ एवं मन्यसे इति स्तुतस्यान्यथा प्रतिपादने) ३अनुकम्पायाम्। ४समुच्चये, ५अङ्गीकारे, ६ईषदर्थे ७क्रियायोगे, ८सीमायां ९व्याप्तौ च। वाक्यस्तुतिभिन्नेऽस्य ङित्त्वमिच्छन्ति अङितोऽस्य एकाज्निपातत्वात् प्रग्दीव्यसंज्ञा ङित्तु न। अतएवोक्तम् "मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः। य आकारः स ङित् प्रोक्तः वाक्यस्मरणयोरङित्" तत्र सीमायाम् आ–आत्मबोधात् आत्मबोधात् "लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्"। व्याप्तौ अह्नाह्न्यासकलात्। सकलं व्याप्येत्यर्थः। एतदर्थे विकल्पेन अव्ययीभावः। आत्मबोधम्। आसकलम्। धातुयोगः उपसर्गः। यथा आगच्छत् यामात्। ईषदर्थे आकल्पः आकेकरः। वाक्यञ्च वाक्यार्थद्योतकता। स्मरणं प्रमाणान्तरायावगतस्य नतु शब्दमात्रेणावगतस्येति तयोर्भेदः।

आकन पु० आ+कन–अच्। कृषिभेदे कर्णा० फिञ्। आकनायनिः तद्वंशे आनक इति वा पाठः।

आकम्प पु० आ+ईषदर्थे कपि–घञ्। ईषत्कम्पे।

आकम्पन त्रि० आकम्पते आ+कपि–युच्। १ईषत्कम्पनशीले। २भावे ल्युट्। ईषत्कम्पे न०। आ+कपि–णिच्–ल्यु। ३ईषच्चालके त्रि०। ततश्च भावे ल्युट्। ४ईषच्चालने न०।

आकम्पित त्रि० आ+कपि–कर्त्तरि क्त। १ईषत्कम्पिते 'अनोकहाकम्पितपुष्पगन्धी' रघुः। भावे क्त। २ईषत्कम्पने न०। णिच्–कर्म्मणि क्त। ३ईषच्चालिते त्रि०।

आकल्प न० न कल्पः स्वच्छताकारी अकल्पस्य भावः ष्यञ्। अस्वच्छत्वकारित्वे। "न नञ्पूर्व्वोत्तरपुरुषादित्यादि" पा० सूत्रे तस्य पर्य्युदासात् तत्पुरुष एव ष्यञ्। बहुव्रीहौ तु तलादि। अकल्पता अकल्पत्वम्।

आकम्प् त्रि० आ+कपि–र। ईषत्कम्पशीले।

आकर पु० आकुर्व्वन्ति संघीभूय कुर्व्वन्ति व्यवहारमत्र आ+कृ–घः। १समूहे, "शब्दाकरकरग्रामग्रथमण्डलमण्डलम्" कविकल्पद्रु०। "बभूव वज्राकरभूषणायाः रघुः"। २श्रेष्ठे च। आकीर्य्यन्ते धातवोऽत्र कृ–अप्। ३रत्नाद्युत्पत्तिस्थाने "आकरे पद्मरागाणां जन्म काचमणेः कुतः" हितो० "शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने" "आयव्ययौ च नियतावाकारान् कोषमेव च" "सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" मनुः। "दिलीपसूनुर्भणिराकरोद्भवः" रघुः। ४स्थानमात्रे च कमलाकरः पद्माकरइत्यादि। "हरिदश्वः कमलाकरानिव" रघुः "शैलोन्द्रोहिमवान्नाम धातूनामाकरो महान्" रामा०। आकरः स्यपरभूरिकथानां प्रायशो हि सुहृदां सहवासः" नैष०।

आकरिक त्रि० आकरे नियुक्तः ठञ्। स्वर्णाद्युत्पत्तिस्थानेषु राज्ञा नियुक्ते तत्र हि नियुक्तस्य लोभाधिक्येन पापसम्भवात् तत्राधिकारस्य मनुना उपपातकमध्ये परिगणना कृता। "सर्व्वाकरेष्वधीकार इति"।

आकरिन् त्रि० आकरः उत्पत्तिस्थानं प्राशस्त्येनास्त्यस्य इनि स्त्रियां ङीप्। "प्रशस्ताकरजाते। "दृषतमाकरिभिः करिभिः क्षतैः" किरा०।

आकर्ण अव्य० कर्णपर्य्यन्तम् अव्य०। कर्णपर्य्यन्ते "आकर्णं सुस्मितमस्य विकाशिकाशम्" माघः।

आकर्णन न० आ+कर्ण–ल्युट्। श्रवणे "मुदा तदाकर्णन तत्परामूत्"नैष०।

आकर्ष पु० आकृष्यते विषयान्तरतोऽनेन आ+कृष–घञ्। १पाशके, २शारिफलके, ३द्यूते, ४इन्द्रिये धन्विनो ५धनुरभ्यासे च। भावे घञ्। ६आकर्षणे। आधारे घञ्। ७निकषे उपले। खलादिगतं धान्यमाकृष्यतेऽनेन करणे घञ्। अङ्कुशाकारे (आकुड़ा) इति ख्याते टकाङ्कभेदे। "आकर्षः स्वेव आकर्षस्वः" सि० कौ०। आकर्षति कर्त्तरि अच्। ८आकर्षके त्रि०। मध्यित्वाकर्षैः कुर्य्युः" कात्या० १३,३,२०। मध्याकर्षैः कुर्य्युः" कर्क०। "आकर्षस्तेऽवाक्फलः सुप्रणीतोऽहृदि प्रोढोऽसन्न्यपदः समाधिः" भा० सु० ६अ० आकर्षकः हृदयाकर्षकः समाधिः चिन्तनम् अवाक्फलः नीचफलः। आकर्षे (पे) ण चरति ठन् आकर्षिकः। आकर्षणचारिणि त्रि० स्त्रियां ङीप्।

आकर्षक पु० आकर्षति सञ्चिक्षिप्तस्थं लौहं आ+कृष-ण्वुल्। (चुम्बक) इति ख्याते १अयस्कान्ते। २आकर्षणकर्त्तरि त्रि० आकर्षे नियुक्तः आकर्षादि० कन्। आकर्षनियुक्ते "आकृषः निकषोपल इति रेफरहितः पाठ युक्तः" त्रि० कौ०।

आकर्षण त्रि० आ+कृष-ल्युट्। अन्यत्र स्थितस्य वस्तुनः १बलेन अन्यत्र नयने "योषिदाकर्षणे चैव विनियोगः प्रकीर्त्तितः" तन्त्रम्। आकृष्यतेऽनेन करणे ल्युट्। २आकर्षणसाधने तन्त्रोक्ते षट्कर्म्मान्तर्गते विधानभेदे च। यथा "अथाकर्षणविधानानि कथयामि समासतः। यदुक्तं त्रैपुरे तन्त्रे यच्चोक्तं भूतडामरे। श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्। प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदन्ततः। अमुकीति पदं ब्रूयान्नमाकर्षेति द्विधा पदम्। खाहान्तं मन्त्रमुद्धृत्य जपेदष्टसहस्रकम्। षट्कोणञ्च समालिख्य रक्तचन्दनकुङ्कुमैः। षड्भिरङ्गैरथैवेन्द्रो लज्जाबीजसमन्वितम्। षड्दीर्घभाक्खरैश्चैव नादबिन्दुविभूषितम्। रक्तपुष्पाक्षतधूपनैवेद्यैः परिपूज्य ताम्। भावयेच्चेतसा देवीं त्रिनेत्रां चन्द्रशेखराम्। बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहाम्। पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके। मन्त्रस्यास्य प्रसादेन रम्भामपि तथोर्व्वशीम्। आकर्षयेच्च सन्देहः किं पुनर्मानुषीमिह। भूर्ज्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा। कार्पासीरागुरुकस्तूरीरोचनाभिलितेन तु। अनामारक्तमिश्रेण कामलाक्षीमनुं जपेत्। (ॐ श्रीं कामलाक्षि अमुकीमाकर्षय आकर्षय ह्रूँ फट्)। इमं मन्त्रं जपेदादौ सहस्रैकं जपेत् पुनः। भूर्जपत्रं समादाय गुलिकां कारयेत् सुधीः। तेनैव साध्यपादोत्थमृत्तिकापङ्कवेष्टितम्। शोषितं तेजसा भानोर्वेष्टयेत् कटुभिस्त्रिभिः। प्रतिमां स्त्रीनिभां कृत्वा तस्यां क्षिप्तेसधोदरे। गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीम्। ताडयाभिमुखो भूत्वा निर्जने निशि साधकः। यावच्छ्वसति चित्तञ्च तावद्भूयं जपेन्मनुम्। यावदायाति संतप्ता मदनालसविग्रहा" तन्त्रसा०। तत्र होमसाधनद्रव्यमुक्तं तत्रैव। "आकर्षणे तथा होमं सतिलं मधुरान्वितम्"।

आकर्षणी स्त्री आकृष्यतेऽनया आ+कृष-ल्युट् ङीप्। उच्चस्थपुष्पाद्याहरणार्थे (आङ्कशि) १यष्टिकाभेदे। २क्षुद्राभेदे च क्षुद्राशब्दे विवरणम्।

आकर्षा(षा)दि पु० पाणिन्युक्ते कनु प्रत्ययनिमित्ते शब्दगणभेदे आक(ष)र्ष, तृषद, पिशाच, पिचण्ड, अशनि, अशन, चय, निचय, विजय, जय, आचय, नय, पाद, दीप, ह्रद, ह्राद, ह्लाद, गन्द, शब्दानि "आकर्षा(षा)दिभ्यः कन" पा०।

आकर्षिन् त्रि० आ+कृष-णिनि। आकर्षकारके स्त्रियां ङीप्। समूपपूर्व्वात् तु। दूरगामिनि गन्धे। सच्चि दूरादेव नासिकां प्राप्य प्राणपुरुषं स्वप्रक्षणायानुकूलयन् समाकर्षतीवेति तस्य तथात्वम्।

आकलन न० आ+कल-ल्युट्। १आकाङ्क्षायाम्, २अवधृते ३संग्रहे ४गणने ५अनुसन्धाने च "सेव्यापि सानुनयमाकलनाय यन्त्रा" माघः।

आकलित त्रि० आ+कल-क्त। १अनुसृते २अधिते च। प्रक्षितभुजाऽऽकलितस्तनेन निम्ने"। "सुवर्णसूत्राकलिताधराम्बराम्" इति च माघः।

आकल्प पु० आ+कृप-णिच्-घञ्। १वेशरचनायाम्, २भूषणे च "रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्" शिवध्यानम्। "आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः" "अकृतकविधिसञ्चाक्षीणमाकल्पजातम्" रघुः। ३कल्पपर्य्यन्ते अव्य०। 'आकल्पं नरकं भुङ्क्ते" इति स्मृतिः

आकष पु० आकष्यते यत्र कष-अच्। स्वर्णादिकषणसाधने (कोषि) प्रस्तरभेदे। आकषे नियुक्तः कन्। आकषिकः तत्रनियुक्ते त्रि० तेन चरति ठन् आकषिकः तेन चारिणि। स्त्रियां ङीप्।

आकस्मिक त्रि० अकस्मादित्यव्ययं कारणाभावे कारणं विना भवः विनया० ठक् टिलोपः। अकस्माद्भवे। स्त्रियां ङीप्। जगत आकस्मिकत्ववादिनश्चार्वाका इत्यभाणुः। अकस्मादेव भवति कार्य्यं न किञ्चिदपेक्षमिति तदेतन्मतम् गौ०सू० उक्तम्। "अनिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिवत्" एतदवतरणिकायां दृष्टिः। यदि कार्य्याणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं न वेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणाय प्रकरणमारभते तत्र पूर्व्वपक्षं सूत्रम् अनिमित्तत इत्यादि। प्रथमार्थे तसिल्। अनिमित्ता भावोत्पत्तिरित्यर्थः तथा च घटाद्युत्पत्तिर्न कारणनियम्या उत्पत्तित्वात् कण्टकतैक्ष्ण्यादिमयूरचित्रताद्युत्पत्तिवत् इति सूत्रतात्पर्य्यम्" कुसुमा० हरि०। "अकस्मादिति किं हेतुनिषेधपरं वा स्वातिरिक्त हेतुनिषेधपरं परिभाषिकहेतुनिषेधपरं वा। अलोभयथाहेतुकत्वमन्त्येऽलौकिकहेतुकत्वं पर्य्यवस्यति"। तथा च आकस्मिकशब्दस्य ताडयार्थचतुष्टयपरता। "स्वभावा-

दित्यर्थं परं वेत्युक्तेश्च स्वाभाविकार्थताऽपि तु सर्व्वद०सं० "नन्वदृष्टानिष्टौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेन्न तद्वदृष्टं स्वभावादेव तदुपपत्तेः" अतएवोक्तम् "अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावादेव तत्स्थितिरिति चार्व्वाकमतम् तस्मायुक्तत्वपरोक्षणं चार्व्वाकशब्दशेषे द्रष्टव्यम्।

आकाङ्क्षा स्त्री आ+काङ्क्ष—अङ्। १अभिलाषे, न्यायमते २वाक्यार्थज्ञानहेतौ यत्पदं विना यत्पदस्यानन्वयस्तत्पदे तत्पदवत्त्वरूपे, संबन्धे ३ पदान्तरव्यतिरेकेणान्वयाभावे च "यत्पदेन विना यस्यानुभावकता भवेत् आकाङ्क्षा" भाषा० शब्दचिन्तायां तु "अथ केयमाकाङ्क्षेत्याशिष्य" "उच्यते अभिधानापर्य्यवसानमाकाङ्क्षेति" लक्षयित्वा स्वयमेव तद्विवृतयथा "यस्य येन विनास्यार्थान्वयाननुभावकत्वं तस्य तदपर्य्यसानं नाम,विभक्त्यिधात्वाख्यातक्रियाकारकपदानां परस्परं विना परस्परस्य न स्वार्थान्वयानुभावकत्वम्।परमते नीलोघटोनास्तीति नीलं घटमानयेत्यादौ नामार्थानां कारकाणाञ्च न परस्परमन्वयबोधः। विशेषणान्वितविभक्त्यर्थानन्वयादिति विशिष्टैर्विशिष्टेनान्वयः। किन्त्वर्थः समाजः। अस्माकन्तु नीलघटयोरभेदानुभवबलादभेद एव संसर्गः। विशेषणविभक्तिः माधुत्यार्था। यद्वा समानविभक्तिकयोरभेदानुभवबलाद्विशेषणान्वितविभक्तेरभेदार्थकत्वम् अतोविशेषणविशेष्यभावानुभावकत्वं तत्तत्पदयोर्न परस्परं विना। द्वारमित्यध्याहारं विना प्रतियोग्यलाभान्न स्वार्थान्वयानुभावकत्वम् विश्वजिता यजेत"अभेदं कार्य्यमिति प्रवर्त्तकं तात्पर्य्यविषयज्ञानं नाधिकारिणं विनेति तदाकाङ्क्षा। यद्वा कर्त्तुरिवाधिकारिणोऽप्यालेपादेर लाभ इति तदन्वयोन शाब्दः किन्त्वानुमानिकः। गौणत्वलक्षणिकयोरननुभावकत्वपक्षे तदुपस्थापितस्याप्यध्याहृतस्येतरपदं विना नानुभावकत्वम् घटः कर्मत्वमानयनं क्रतिरित्यादावभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यस्तात्पर्य्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव घटमानयतीत्यत्रैव क्रमेण तथान्वयतात्पर्य्येऽपि क्रियाकारकभावेन नान्वयबोधः नामविभक्तिधात्वाख्यातक्रियाकारकपदार्थानामन्वयबोधे तान्येव समर्थानि न तु तदर्थकानि पदान्तराणि अग्निः करणत्वमोदनः कर्म्मता पाकः क्रतिरिष्टसाधनता इति पदेभ्योऽग्निनौदनं पचेनेत्यत्रैवान्वयाबोधनात् अग्निकरणकौदनकर्मकपाकविषयक्रतिरिष्टसाधनमिति वाक्यं न पदम्। अतएव द्वारमित्यत्र पिधेहीति पदाध्याहारः। क्रियापदार्थस्यान्यत उपस्थितावपि कारकानन्वयात्। असामर्थ्यन्तु स्वभावात्। अनासन्नमध्यासन्नदण्डायामासन्नभ्रमेणैवान्वयबोधसमर्थमेव। वह्निना सिञ्चतीत्यत्र क्रियाकारकपदयोरन्वयबोधसामर्थ्येऽप्ययोग्यतायान्न प्रतिबन्धकं दाहे समर्थस्याग्नेर्मणिरिव। अतएव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽन्वयबोधः। न हि स्वभावतोऽसमर्थमारोपितसामर्थ्यं सिद्ध भवति पचतिवेति प्रकृते तु पदार्थस्वरूपज्ञानं न तत्त्वयबोधेऽपि। पुरुषपदं विनापि रात्र इत्यस्य पुत्रेण समं स्वार्थानुभावकत्वमिति न तदाकाङ्क्षा यद्वा त्वयाणां स्वरूपेऽजनितान्वयबोधदशायां पुरुषान्वयतात्पर्य्याभावान्नान्वयबोध इत्यपेऽपि तथा। न च पुत्रस्योत्थिताकाङ्क्षत्वात्तेनैवान्वयबोध इति वाच्यं तात्पर्य्यवशात् क्वचित् पुरुषेणैव प्रथमसन्वयबोधात् अतएवान्वयबोधसमर्थत्वे सत्यजनिततात्पर्य्यविषयान्वयबोधकत्वमाकाङ्क्षेति केचित्। प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोरजनितान्वयबोधकत्वमाकाङ्क्षा। नव्यास्तु पदविशेषजन्या पदार्थोपस्थितिः, घटः कर्मत्वमानयनं क्रतिरित्येवंविधपदाजन्यपदार्थोपस्थितिर्वाऽऽसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेवं विधशब्दान्नान्वयबोधः त्वयाप्येवंविधपदार्थोपस्थितेनाकाङ्क्षाहेतुत्वेनावश्यम्भपेयत्वात् जनितान्वयबोधान्नान्वयानुभवोस्तात्पर्य्याभावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति किन्तु स्वजनकोपस्थितेः परिचायकत्वमिति"। अत्र दिङ्मात्रं भाषुरी व्याख्या प्रदर्श्यते प्रपञ्चस्तु तत एवावगन्तव्यः। "सिद्धान्तयति अभिधानेति अभिधानपदं करणव्युत्पत्त्याशब्दोच्चारणपरम् अभिधत्तेयतस्तस्मात्पर्य्यवसानं फलानुत्पादस्तथा च तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभाव आकाङ्क्षा इति फलितं तच्च पूर्व्वोक्तरूपेण दुष्टम्। न चाभिधानपदं भावव्युत्पत्त्या शाब्दबोधपरं तस्यापर्य्यवसानम् अभावः तथा च तादृशशाब्दबोधे तादृशशाब्दबोधाभाव आकाङ्क्षा इति फलितमिति वाच्यं घटः कर्मत्वमित्यादावतिव्याप्तेरित्यतः पारिभाषिकमभिधानापर्य्यवसानपदार्थमाह यस्येति। यत्पदतिङ् यत्पदं विनेत्यर्थः। न स्वार्थान्वयानुभावकत्वमिति न तादृशान्वयबोध इत्यर्थः तस्य तदिति तत्पदस्य तत्पदवत्त्वमित्यर्थः। अपर्य्यवसानं तादृशान्वयबोधेऽभिधानापर्य्यवसानं तथा च यत्पदनिष्ठयत् पदव्यतिरेकप्रयुक्तयादृशबुद्ध्यभावः तत्पदस्य तत्पदवत्त्वं तादृशान्वयबुद्धेरभिधानापर्य्यवसानमिति फलितार्थः। पदत्वमत्र शब्दत्वम्।

प्रयुक्तत्वञ्च कारणाभावात् कार्य्याभाव इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः तत्प्रतियोगिजन्यताद्दशप्रतियोगिकत्वं तत्प्रयुक्तत्वम्। भवति चाव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकः प्रयुक्तो घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति। घटपदस्यानुस्वारपदवत्त्वं तादृशान्वयबोधस्याकाङ्क्षा। एवं विनिगमनाविरहेणाव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेनानुस्वारपदनिष्ठस्य घटपदव्यतिरेकप्रयुक्तोऽपि घटवत् कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशशाब्दबोधेऽनुस्वारपदस्य घटपदवत्त्वमपि आकाङ्क्षा। अव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदस्य कर्मत्वपदवत्त्वम्, अव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन कर्मत्वपदस्य घटपदवत्त्वञ्च न घटवत् कर्मत्वमिति भेदान्वयबोधे आकाङ्क्षा-अव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य च व्यतिरेकयोर्घटवत् कर्मत्वमिति भेदान्वयबुद्ध्यभावाप्रयोजकत्वात्। कारणाभावस्यैव कार्य्याभावप्रयोजकत्वात् अव्यवहितपूर्ब्ववर्त्तितासम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य भेदान्वयबुद्ध्यहेतुत्वात्"।

"वेदान्तपरिभाषायान्तु अन्यथोक्तं यथा तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा क्रियान्वये कारकस्य कारकान्वये क्रियायाः करणान्वये इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात्। अजिज्ञासोरपि वाक्यार्थबोधात् योग्यत्वमुपात्तं तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः। अभेदान्वये च सनानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादि वाक्येषु नाव्याप्तिः। एतादृशाभिप्रायेणैव बलाबलाधिकरणे "सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मित्यत्र वैश्वदेवयागस्यामिक्षान्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः। ननु तत्रापि वाजिनस्य जिज्ञासाविषयत्वेऽपि तद्योग्यत्वमस्त्येव, प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वात् इति चेन्न स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन बोधावच्छेदकत्वाभावात्। आमिक्षायान्तु नैवं, वाजिनान्वयस्य तदाहुपस्थानात्। उदाहरणान्तरेऽपि दुर्ब्बलत्व प्रयोजकाकाङ्क्षाविरह एवमेव द्रष्टव्यः"। "आकाङ्क्षेयं तगुरुतया नैव गन्तुं समर्थेति" पदाङ्कदूतम् "साकाङ्क्ष शब्दैर्योबोधः पदार्थान्वयगोचरः" इति "दोग्ध्यर्थगताकाङ्क्षा शब्दनिष्ठानुभाविका" इति शब्दशक्ति०"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा०द०"आकाङ्क्षाप्रतीति पर्य्यवसानविरहः स च जिज्ञारूपः" सा०द०।

आकाङ्क्षित त्रि० आ+काङ्क्ष–कर्म्मणि क्त। इच्छाविषये।

आकाङ्क्षिन् त्रि० आकाङ्क्षति आ+काङ्क्ष–णिनि। इच्छावति "अफलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोय इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्विकः" गीता। स्त्रियां ङीप्। "तं भावार्थप्रसवसमयाकाङ्क्षिणीनां प्रजानाम्" रघुः।

आकाय पु० आ+चि-कर्म्मणि घञ् चितौ क्त्वम्। १चीयमानेऽग्नौ "आकायमग्निं चिन्वीत" सि०कौ०उ० २निवासे इति केचित् तत्र क्त्वं चिन्त्यमूलम्।

आकार पु० आ+कृ–घञ्। १ मूर्त्तौ, २अवयवसंस्थानविशेषे च। आक्रियते आविष्क्रियते हृद्गतोभावोऽनेन आ-कृ-करणे घञ्। २हृद्गतभावावेदके मुखप्रसादवैवर्ण्यरूपे प्रीत्यप्रीतिसूचके देहचेष्टने। भावे घञ्। ३हृद्गतभावावेदने, ४इङ्गिते च। "आकारस्थाद्यसानोऽपि न शक्योविनिगूहितुम्। बलाद्धि विक्रियोत्पेव भावमन्तर्गतं नृणाम्" "आकारसदृशप्रज्ञः" रघुः। "तस्य संहृतमन्यस्य गूढाकारेङ्गितस्य च" रघुः। इङ्गितं हृद्गतोभावो बहिराकार आकृतिः"। सज्जनः। ईतादात्म्ये ७अभेदोपगमे च। आकारस्य सांख्यादिमतसिद्धः अभेदस्थानीयः पदार्थभेदः विषयितानिरूपितो वा। "यत् संबद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षमिति" सा०सू०। "सम्बद्धं भवत् सम्बद्धवस्त्वाकारधारि भवति यद्विज्ञानं बुद्धिदृत्तिरूपम् प्रत्यक्षम् स्वार्थसन्निकर्षजन्याकाराश्रयो वृत्तिः प्रत्यक्षमिति फलितम्। "वृत्तिः संबन्धार्थं सर्पती"त्यागामिसूत्रात् वृत्तेर्न सन्निकर्षजन्यत्वमित्याकारांशस्यग्रहणम् चक्षुरादिद्वारकबुद्धिदृत्तिरूप प्रदीपस्य शिखातुल्या बाह्यार्थसन्निकर्षानन्तरमेव तदाकारोल्लेखिनी भवतीति नासम्भवः"भा०। वेदान्तिभिरपि अन्तःकरणस्य साकारत्वमङ्गीकृत्य बुद्धिदृत्तेस्तदाकारत्वमुररीकृतं यथोक्तं वेदा०परिभा०। "यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना क्षेत्रादीन् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो दृत्ति-

रित्युच्यते। अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात् तथा चायं घटादित्यादि प्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात्"। सचाकारस्तेषां मते बाह्यवस्तुविषयसत्त्वेन तत्सन्निकर्षेण सम्भवति। बाह्यवस्तुसत्त्वानङ्गीकर्तृमते तु अनादिवासनयैव तदाकारोल्लेख इति यथोक्तं सर्व्वदर्शनसं०"। "तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते" इति। ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यत् येन वेद्यते तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते ज्ञानेन नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्यासन्नादिविच्छिन्नप्रवाहाऽभेदवासनैव निमित्तम्। यथोक्तम् "सहोपालम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्द्वाविवाद्वये" इति। अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति" च। न च रसवीर्य्यविपाकादि समानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुरायाः अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपहतानां केशेन्द्रनाड़ीज्ञानाभेदवदनादुपप्लववासनासामर्थ्याद्ग्राह्यवस्तोपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणाग्राह्यग्राहकाकारविप्लवाः। तथा ज्ञातव्यस्येयं केशादिज्ञानभेदवत्। यदा तदा न सङ्घोद्या ग्राह्यग्राहकलक्षणेति"। तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्"। "अन्येतु न तन्मन्यन्ते तथा हि यदुक्तं ग्राह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपालम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। नन्वभेदे सहोपालम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्वनियमासम्भवाच्च। नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययाद्व्यतिरेकात्। अथोच्येत ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भ्रूदेव प्रतिभासत इति न तत्राहमुल्लेख इति। यथोक्तं "परिच्छेदान्तरादृश्योऽस्य भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो बाह्य प्रतिभासोऽप्युपप्लव" इति "यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत" इति च। तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वस्तुसिद्धौ बध्योपलक्षवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादाज्ज्ञेयतादिकमेव संविदाना बाह्यमेवोपादत्ते जगत्युपेक्ष्यन्तेऽवान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत्। अतोबहिर्वदिति वदता बाह्यं तद्ग्राह्यमेवेति भावनीयमिति भवदीय एव वाणो भवन्तं प्रहरेत्। ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् न तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्य्यनुयोगपरिहारौ समप्रधीषाताम्। "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति"। तथा च यथा क्षुधा भोजनमनुमीयते यथा च भाषयया देशः यथा वा सस्नेहेन स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्"।

आकारे कुशलः ठञ् आकारिकः। तत्र निपुणे त्रि०।

आकारगुप्ति स्त्री गुप-क्तिन् आकारस्य छद्मतभावस्य गुप्तिर्गोपनम्। रत्यादिजनितसुखप्रसादस्य भयजनितविषादादेश्च अन्यहेतुकत्वप्रख्यापनेन वास्तविकत्वापह्नवे गोपने।

आकारण न० आ+कृ-णिच् ल्युट्। १आह्वाने। युच् स्त्रीत्वात् टाप्। आकारणायत्र।

आकाल अव्य० कालपर्य्यन्तम् अव्ययी०। यत्काले निमित्तं पूर्व्वदिने जातम् तत्परदिने तत्कालपर्य्यन्ते "भार्य्याः परमगुरुसंस्थायां चाकालसभोजनं कुर्व्वीरन्निति" आपस्त०।

आकालिक त्रि० अकाले भवं ठञ्। १असमयोत्पन्ने वस्तुनि। स्त्रियां ङीप् "आकालिकीं वीक्ष्य मधुप्रवृत्ति"मिति कुमारः। समानकालौ आद्यन्तौ यस्य समानकालस्य आकालस्य देशः

दृकञ् च नि० इति मल्लि० । २आशुविनाशिनि, आद्यन्तयोरभावात्, । आकालं व्याप्नोति ठञ् । १पूर्व्वदिक्से यत्समये उत्पत्तिः परेद्युस्तत्समयपर्य्यन्तव्यापके काले "आकालिकमनध्यायं नैत्यिकं" "एतानाकालिकान् विद्यादनध्यायान्तलावपि" "आकालिकमनध्यायं विद्यात् सर्व्वाङ्गुतेषु च" इति च मनुः । आशुविनाशित्वात् ४विद्युति स्त्री ।

आकाश पुंन० समन्ताद्दाकाशन्ते दृश्यादयोऽत्र । १खनामख्याते द्रव्यभेदे। स च न्यायादिमते नित्यः सर्व्वमूर्त्तसंयोगी शब्दमात्रविशेषगुणकः संख्यापरिमाणपृथक्त्वसंयोगविभागरूपसामान्यगुणकश्च । तत्सत्त्वे प्रमाणञ्च मुक्ता० दर्शितम् यथा "शब्दोविशेषगुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात्, सवत् । शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवत् इत्यनुमाने शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न सर्व्वबहिर्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्व्वकप्रत्यक्षत्वात्, सुखवत् । पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्व्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति । शब्दोन दिक्कालमनोगुणः विशेषगुणत्वात्, नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्यत्र शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति । न च वाय्ववयवेषु स्पर्शवत्सु शब्दक्रमेण यावौ कारणगुणपूर्व्वकः शब्दउत्पद्यतामिति वाच्यम् अवयवद्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्" । "व्याख्यातञ्च दिनक० "शब्दः पृथिव्यादिषट्द्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् रूपवदिति रूपं बोध्यम् । दर्शितं रूचितम् । अत्रानुमाने स्वरूपासिद्धिं परिहर्त्तुमाह तथाहीति घटादौ व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति आत्मनि व्यभिचारवारणायबहिरिन्द्रियग्राह्येति रसत्वादौ व्यभिचारवारणायजातिमदिति एतद्धानुमानमध्यक्षद्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यम् । गुणत्वादिति एतदनुमानेनोक्तपरिशेषानुमानहेतौ विशेषासिद्धिनिरस्ता । विशेषणासिद्धयुद्धारमाह शब्दोन स्पर्शवद्विशेषगुण इति । न स्पर्शवतोद्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः । अकारणगुणपूर्व्वकत्वत्वादिति अकारणगुणपूर्व्वकत्वे सति प्रत्यक्षत्वादित्यर्थः । हेतुसत्त्वं प्रतिपादयितुं आकाश इति । जलपरमाणुरिति अग्निसंयोगानां पार्थिवरूपादीनां केषाञ्चिदग्निसंयोगासमवायिकारणत्वात् केषाञ्चित्कारणपूर्व्वकत्वादत्रोक्तेः । न दिक्कालेति शब्द इत्यनुवर्त्तते बहिरिन्द्रियेति । मनसोऽन्यदिन्द्रियं बहिरिन्द्रियं तेन प्रत्यक्षत्वादित्यर्थः । एतेनात्मगुणग्राह्येन्द्रियत्वं बाह्येन्द्रियत्वं तच्च मनस्यतिप्रसक्तं तेनापि रूपादिग्रहणादिति निरस्तम् । इत्थञ्च अनेन प्रकारेण पृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ च । सिद्धतीति इति पूर्व्वोक्तपरिशेषानुमानेन सिद्धतीत्यर्थः । नन्वेतत्सर्वं तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किञ्चित्प्रमाणं स्यात् तत्तूक्तं न मानं पश्याम इति चेत् न शब्दोविशेषगुणः लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यतारहित्वे च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव तत्र प्रमाणत्वात् प्रमात्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति गुरुत्वमादाय व्यभिचारवारणाय प्रथमं सत्यन्तं, संख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यन्तम् । सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनाश्च प्रकृतहेतोरभावेऽपि तत्र हेत्वन्तरेणैव विशेषगुणत्वं साधनीयमिति भावः । पूर्व्वोक्तानुमाने बाधं स्वरूपासिद्धिं च आशङ्कते न चेति । वायाविति तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वात्तदभावसाधने बाध इति भावः । कारणगुणपूर्व्वकत्वकथनं तु अकारणगुणपूर्व्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थम् । अपावद्द्रव्यभावित्वेनेति स्वाश्रयसमवेतसमवायप्रतियोगि यद्यत् तद्भिन्नत्वेनेत्यर्थः । ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमिति चेन्न चाक्षुषत्वे प्रयोजकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याकाशेऽसंभवेन चक्षुषः प्रमाणत्वासम्भवात् । ननु यदि आकाशे न चाक्षुषस्तर्हि पक्षीति चाक्षुषेऽधिकरणत्वे न किं भाषत इति चेदालोक एवेति कल्पद्रुमः" । निष्क्रमणप्रवेशनाद्युत्क्षेपणधर्म्मवत्त्वादाकाशसिद्धिरिति सांख्यादयोमन्यन्ते" सांख्यमताभिप्रायेणैव सूत्रयते । "आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्व्वेच्छद्रसमूहो विविक्तता चेत्युक्तम्" । "शब्दः श्रोत्रेन्द्रियग्राह्यो विशेषाणि च विविक्तता । विषयतोदर्शिता एते गुणा गुणविचारिभिरिति" च भेदान्निरुक्तमिति वेदितव्यम् । तदेतन्मतं वैशेषिकसूत्रे निराकृतम् यथा "निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् २० । तदलिङ्गमेकद्रव्यत्वात् कर्म्मवत्त्वाच्च २१ । कारणान्तरानुपलब्धिप्रामाण्याच्च २२ । संयोगाद्भावः कर्म्मवत्त्वाच्च २३ । कारणगुणपूर्व्वकः कार्य्यगुणो दृष्टः २४ । कार्य्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः २५ परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः २६ ।

परिशेषाल्लिङ्गमाकाशस्य २७ । द्रव्यत्वनित्यत्वे वायुना व्याख्याते२८ । तत्त्वभावेन २९ । शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च३० ।" सू० "इतिशब्दः प्रकारार्थः उत्क्षेपणादीन्यपि कर्म्माणि संगृह्णाति सर्ग्गवद्द्रव्यसञ्चारो, निष्क्रमणं, प्रवेशनञ्च तत्कार्य्यमाकाशस्य लिङ्गमिति सांख्याः २० । तदेतद् दूषयितुमाह । निष्क्रमणप्रवेशनादिकर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्मणः एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणकत्वात् न कर्म्मापि व्याप्यवृत्तीत्युक्तं न वाऽमूर्त्तवृत्तीति २१। ननु चासमवायिकारणतयैवाकाशमनुमापयिष्यति निष्क्रमणप्रवेशनादीत्यत आह । अनुमृग्निर्लक्षणम् अनुमीयते ज्ञाप्यतेऽनेनेति व्युत्पत्त्या, कारणान्तरस्य असमवायिकारणस्य याऽनुमृग्निर्लक्षणं तद्वैधर्म्म्यादित्यर्थः । द्रव्यत्वावदसमवायिकारणं न भवत्येव असमवायिकारणता च कार्य्यैकार्थप्रत्यासत्त्या कार्य्यैकार्थप्रत्यासत्त्या च, प्रथमा तन्तुरूपाणां पटरूपं प्रति, द्रव्यत्वासमवायिकारणता महतीति संज्ञां लभते गुरुप्रतिपत्तिकत्वात्, द्वितीया च यथा आत्ममनःसंयोगस्य ज्ञानादिकं प्रति, द्रव्यत्वासमवायिकारणता लघ्वीति संज्ञां लभते लघुप्रतिपत्तिकत्वात्, आकाशस्य तु निष्क्रमणप्रवेशनादौ कर्म्मणि न समवायिकारणता नाप्यसमवायिकारणता तथाच न कर्म्माकाशसत्त्वे लिङ्गमिति२२ । ननु निमित्तकारणमस्तु कर्म्मण्याकाशम्, दृश्यते हृदाकाशे पक्षिकाण्डादीनां सञ्चारमत आह । मूर्त्तसंयोगेन कर्म्मकारणस्य वेगगुरुत्वादेः प्रतिबन्धात् कर्म्मणोऽभावोऽनुत्पादो न त्वाकाशाभावात् तस्याव्यापकत्वात्, तस्मादाकाशान्वयोऽन्वयासिद्ध एव नाकाशनिमित्ततां साधयतीत्यर्थः२३। एवं सांख्यमते दूषिते शब्दमाकाशे लिङ्गमुपपादयिष्यन् परिशेषानुमानाय पीठमारचयन्नाह । पृथिव्यादिलक्षणे कार्य्ये ये विशेषगुणा रूपादयस्ते कारणगुणपूर्व्वका दृष्टाः शब्दोऽपि विशेषगुणः जातिमत्त्वे सति बाह्येन्द्रियग्राह्यत्वात् रूपादिवत् तथाच तादृशं कार्य्यं नोपलभ्यते यत्र कारणगुणपूर्व्वकः शब्दः स्यादित्यर्थः२४। ननु वीणावेणुदण्डचर्म्मपटादौ कार्य्ये शब्द उपलभ्यते तथाच तत्कारणगुणपूर्व्वकः स्यादत आह । भवेदेवं यथा तन्तुकपालादिषु रूपरसाद्युपलभ्यते तत्सजातीयश्च रूपरसाद्यन्तरं पटघटादावुपलभ्यते तथा वीणावेणुदण्डाद्यवयवेषु यः शब्द उपलभ्यस्तत्सजातीयश्चेत् वीणावेणुदण्डादावप्युपलभ्येत नचैवम्, प्रत्युत निःशब्दैरेवावयवैर्वीणाद्यारम्भदर्शनात् नोरुपैस्तु तन्तुकपालादिभिः पटघटाद्यारम्भदर्शनात् किञ्च यदि शब्दः सर्ग्गवतां विशेषगुणः स्यात् तदा तत्र तार-तारतर-मन्द्र-मन्द्रतरादिभावो नानुभूयेत नह्येकावयव्याश्रिता रूपादयो वैचित्र्येणानुभूयन्ते तस्माच्च सर्ग्गवद्विशेषगुणः शब्दः २५ । नन्वात्मगुणो मनोगुणो वा शब्दो भविष्यतीत्यत आह । शब्दो यद्यात्मगुणः स्यात् तदाऽहं सुखी यते जाने इच्छामीत्यादिवत् अहं मूर्ख्यं अहं वाद्यं अहं शब्दवानित्यादि धीः स्यात् नत्वेवमस्ति, किन्तु शङ्खः मूर्ख्यते, वीणा वाद्यते इति प्रतियन्ति लौकिकाः । किञ्च शब्दो नात्मगुणः बाह्येन्द्रियग्राह्यत्वात् रूपादिवत्, अपि च शब्दो यद्यात्मयोग्यविशेषगुणः स्याद्बुद्धिरेणाप्युपलभ्येत दुःखादिवत् । तस्मात् सुष्ठूक्तं परत्र समवायादिति, अमनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति, नात्ममनसोर्गुण इति समासे कर्त्तव्ये यदसमासकरणं तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयोरपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितम् २६ । यदर्थमयं परिकरश्लोकाह शब्द इति शेषः । अत्रापि शब्दः क्वचिदाश्रितो गुणत्वात् रूपादिवदिति सामान्यतोदृष्टोदृष्टद्रव्यातिरिक्तद्रव्यसिद्धिः । गुणश्चायं बाह्येन्द्रियग्राह्यजातीयत्वात् रूपादिवत् अनित्यत्वे सति विभुसमवेतत्वात् ज्ञानादिवत् अनित्यत्वञ्च साधयिष्यते । परिशेषसिद्धस्य द्रव्यस्यावयवकल्पनायां प्रमाणाभावान्नित्यत्वं, सर्व्वत्र शब्दोपलब्धेर्विभुत्वम् २७ । शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदेशेन साधयन्नाह । अद्रव्यवत्त्वाद्यथा वायोर्नित्यत्वं तथाकाशस्यापि, गुणवत्त्वाद्यथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः २८। तत् किं बहून्याकाशानि एकमेव वेत्यत आह । व्याख्यातमिति विपरिणतेनान्वयः । भावः सत्ता सा यथैका तथाकाशमप्येकमेवेत्यर्थः २९ । नन्वनुगतप्रत्ययसद्भिन्ना सत्ताया एकत्वं सिद्धम् आकाशे कथमेकत्वं तदृष्टान्तेन सेत्स्यतीत्यत आह । तत्त्वमाकाशस्य सिद्धमित्यर्थः । वैभवे सति सर्व्वेषां शब्दानां तदेकाश्रयतयैवोपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गः अन्यदपि यदाकाशं कल्पनीयं तत्रापि शब्द एव लिङ्गं तद्भाविशिष्टं न च विशेषसाधकं भेदसाधकं लिङ्गान्तरमस्ति । आत्मनां यद्यपि ज्ञानादिकमविशिष्टमेव लिङ्गं तथापि व्यवस्थातो लिङ्गान्तरादात्मनानात्वसिद्धिरिति वक्ष्यते' २०उप० । इत्थं च तस्य नित्यत्वं

निरवयवद्रव्यत्वादिति सिद्धम् । सांख्यादयस्तु शब्दतन्मात्रात्तस्योत्पत्तिं शशंसुः "प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राणि" इत्युपक्रम्य "पञ्चभ्यः पञ्चभूतानि" इत्युक्तेः । वेदान्तिनस्तु अविद्यासहकृतब्रह्मण एव सकाशात्तदुत्पत्तिमशंसुः तस्य चोत्पत्तिमत्त्वे "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति श्रुतिर्मानम् । यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुत्या ब्रह्मणः सर्वभूतकारणत्वान्यथानुपपत्त्याऽपि तस्योत्पत्तिमत्त्वम् । श्रुतेर्गौणोत्पत्तिपरत्वं च आयङ्गापूर्वकं भा० रत्नप्रभाध्ययोर्निराकृतं यथा । "नवियदश्रुतेः सू० "वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते । केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न । तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न । एवं जीवस्य प्राणानाञ्च । एवमेव क्रमादिद्वारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषु लक्ष्यते । विप्रतिषेधाच्च परपक्षाणामनपेक्षत्वं स्थापितं तद्वत् स्वपक्षस्यापि विप्रतिषेधादेषामपेक्षत्वमाशङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मितत्वाय परः प्रपञ्च आरभ्यते । तदर्थं निर्मितत्वे च फलं यथोक्ताग्रङ्गानिष्टत्तिरेव। तत्र प्रथमं तावदाकाशमाश्रित्य विचिन्त्यते किमस्योत्पत्तिरुत नास्तीति । तत्र तावत् प्रतिपद्यते । न वियदश्रुतेरिति न खल्वाकाशमुत्पद्यते कस्मात् अश्रुतेः नह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति । छान्दोग्ये हि "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" सच्छब्दवाच्यं ब्रह्म प्रकृत्य "तदैक्षत तत्तेजोऽसृजतेति च पञ्चानां महाभूतानां मध्यमं तेजआदिं कृत्वा त्रयाणां तेजोऽबन्नानामुत्पत्तिः श्राव्यते । श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ । न चात्र श्रुतिरस्याकाशोत्पत्तिप्रतिपादिनी तस्मान्नास्याकाशस्योत्पत्तिरिति" भा० "अस्ति तु" सू० । तुशब्दः पक्षान्तरपरिग्रहे । भा नामाकाशस्य छान्दोग्ये भूतोत्पत्तिः श्रुत्यन्तरे त्वस्ति तैत्तिरीयकाः समामनन्ति "सत्यं ज्ञानमनन्तं ब्रह्मेति" प्रकृत्य "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति । ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रसृष्टा सृष्टिः क्वचिदाकाशप्रसृष्टेति । नन्वेकवाक्यतानयोः श्रुत्योर्युक्ता । सत्यं युक्ता न तु शक्यन्तुं शक्यते कुतः "तत्तेजोऽसृजतेति" सच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धानुपपत्तेः तत्तेजोऽसृजत तदाकाशमसृजतेति । ननु सच्छ्रुतस्य कर्तुः कर्तव्यद्वयेन सम्बन्धो दृश्यते यथा स रूपं पक्त्वौदनं पचतीति । एवं तदाकाशं सृष्ट्वा तेजोऽसृजतेति योजयिष्यामः। नैवं युज्यते प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते तैत्तिरीयके त्वाकाशस्य । नचोभयोः प्रथमजत्वं सम्भवति । एतेनेतरश्रुत्यन्तरविरोधोऽपि व्याख्यातः । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यत्रापि तस्मात् आकाशः सम्भूतस्तस्मात्तेजः सम्भूतमिति सच्छ्रुतस्यापादानस्य सम्भवनस्य च वियत्तेजोभ्यां युगपत्सम्बन्धानुपपत्तेः । वायोरग्निरिति च पृथगाम्नानात् । अस्मिन् विप्रतिषेधे कश्चिदाह । "गौण्यसम्भवात्" सू० । नास्ति वियत उत्पत्तिः अश्रुतेरेव। या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति । कस्मात् ? असम्भवात् । नह्याकाशस्योत्पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु । ते हि कारणसामग्र्यसम्भवादाकाशस्योत्पत्तिं वारयन्ति । समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वं श्रुत्पद्यमानमुत्पद्यते । द्रव्यस्य चैकजातीयमनेकञ्च द्रव्यं समवायि कारणमस्ति । नचाकाशस्यैकजातीयमनेकञ्च द्रव्यमारम्भकमस्ति यस्मिन् समवायिकारणे असमवायिकारणे च तत्संयोगे आकाशमुत्पद्येत । तदभावात्तदनुपपन्नमुक्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति । उत्पत्तिमत्ताञ्च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः सम्भाव्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति । आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यते । किं हि प्रागुत्पत्तेरनवकाशमशुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुम् । पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः । तस्माद्यथा लोके आकाशं कुरु आकाशीजात इत्येवं जातीयको गौणः प्रयोगो भवति यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो भवति । वेदेऽपि आरण्यानाकाशेष्वालभेरन्निति । एवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या भा० "शब्दाच्च" सू० । शब्दःखल्वप्याकाशस्याजत्वं ख्यापयति । अत आह "वायुश्चान्तरिक्षञ्चैतदमृतमिति" न चामृतस्योत्पत्तिरुपपद्यते । "आकाशवत् सर्वगतश्च नित्य इति" चाकाशेन ब्रह्मणो नित्यत्वसर्वगतत्वाभ्यां धर्माभ्यामुपमानः आकाशस्यापि तौ धर्मौ सूचयति । न च तादृशस्योत्पत्तिरुपपद्यते । यथाऽनन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणम् । आकाशशरीरं ब्रह्म आकाशआत्मेति । नह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मण-

स्तेन विशेषणं सम्भवति नीलेनेवोत्पलस्य । तस्मान्नित्य मेवाकाशेन साधारणं ब्रह्मेति गम्यते" भा० । "स्याच्चैकस्य ब्रह्मशब्दवत्" सू० । इदंपदोत्तरं सूत्रम् । स्यादेतत् कथं पुनरेकस्य सम्भूतशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्त्तमानस्य मुख्यत्वं आकाशे च गौणत्वमिति । अत उत्तरमुच्यते । स्याच्चैकस्यापि सम्भूतशब्दस्य विषयविशेषवशाद्गौणोमुख्यश्च प्रयोगः ब्रह्मशब्दवत् । यथैकस्यापि ब्रह्मशब्दस्य "तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म" इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोग आनन्दे च मुख्यः यथा च तपसि ब्रह्मविज्ञान-साधने ब्रह्मशब्दोभक्त्या प्रयुज्यते अञ्जसा तु विज्ञेये ब्रह्मणि तद्वत् । कथं पुनरनुत्पत्तौ नभसः "एकमेवाद्वितीय" मि-तीयं प्रतिज्ञा समर्थ्यते । ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति, कथञ्च ब्रह्मणि विदिते सर्वं विदितं स्या-दिति । तदुच्यते । एकमेवेति तावत्कार्य्यापेक्षयोपपद्यते । यथा लोके कश्चित् कुम्भकारकुले पूर्व्वेद्युर्मृदं दण्ड-चक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्यभत्राणि प्रसा-रितान्युपलभ्य ब्रूयात् मृदेवेहैकाकिनी पूर्व्वेद्युरासी-दिति । स च तयावधारणया मृत्कार्य्यजातमेव पूर्व्वेद्यु-र्नासीदित्यभिप्रेयात् न चक्रदण्डादि तद्वत् । अद्वितीय श्रुतिरधिष्ठात्रन्तरं वारयति यथा मृदोऽभत्रप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणोजगत्प्रकृतेरन्योऽधि-ष्ठितास्तीति । न च नभसापि द्वियोगेन सद्वितीयं ब्रह्म-प्रसज्यते । लक्षणान्यत्वनिमित्तं हि नानात्वं न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति । क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्त्तत्वादिधर्म्मसामान्यात् । सर्गकाले तु ब्रह्म जगदुपादित्सु यतते स्तिमितमितरत्तिष्ठति ते-नान्यत्वमवसीयते । तथाकाशशरीरं ब्रह्मेत्यादि श्रुति-भ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः । अतएव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः । अपि च सर्वं कार्य्य मुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्र-ह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं भवतीत्यतो ब्रह्मणा तत्कार्य्येण च विज्ञातमेवाकाशं भवति यथा क्षीरपूर्णे घटे-कतिचिदबिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति । न हि क्षीरग्रहणाद्बिन्दुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्य्येणाव्यतिरिक्तदेशकालत्वाद्गृहीत-मेव ब्रह्मग्रहणेन नभो भवति । तस्माद्ब्रह्मं नभसः सम्भ-वश्रवणमिति एवं प्राप्ते इदमाह । 'प्रतिज्ञाऽहानिरव्यति-रेकात्शब्देभ्यः' । सू० "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति" "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमिति" "कस्मिन्नु भगवोविज्ञाते सर्वमिदं विज्ञातं भवतीति" न काचन सङ्कुचिर्वा विद्यास्तीति "चैवंरूपा प्रति-वेदान्तं प्रतिज्ञा विज्ञायते तस्याः प्रतिज्ञाया एवमहा-निरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात् । व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इयमेव प्रतिज्ञा हीयेत । सचाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्मात् ब्रह्मण उत्पद्यते । शब्देभ्यश्च प्रकृतिविकारव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते । तथा हि "येनाश्रुतं श्रुतं भवतीति" प्रतिज्ञाय मृदादिदृष्टान्तैः कार्य्यकारणभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते । तत्साध-नायैव चोत्तरे शब्दाः "सदेव सोम्येदमग्र आसीत्" "एकमेवा द्वितीयं ब्रह्म" "तदैक्षत तत्तेजो सृजते" इत्येवंकार्य्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति "ऐतदात्म्यमिदं सर्व्वम्" इत्यारभ्या प्रपाठकपरिसमाप्तेः । तदेतदाकाशं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत ततश्च प्रतिज्ञा-हानिः स्यात् । न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्त्तुम् । तथा च प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति "इदं सर्वं यदयमात्मा" "ब्रह्मैवेदमग्र आसीत्" इत्येवमादयः । तस्मात् ज्वलना-दिवदेव गगनमप्युत्पद्यते । यदुक्तमश्रुतेर्न वियदुत्पद्यत इति तदयुक्तं वियदुत्पत्तिविषयस्य श्रुत्यन्तरस्य दर्शितत्वात् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति । सत्यं दर्शितं विरुद्धन्तु "तत्तेजोऽसृजत" इत्यनेन श्रुत्यन्तरेण । न एकवाक्यत्वात् सर्वश्रुतीनाम् । भवत्वेकवाक्यत्वमविरु-द्धानाम् इह तु विरोध उक्तः । सङ्कल्पस्य स्रष्टुः स्रष्टव्यस्य सम्बन्धासम्भवात्, द्वयोश्च प्रथमजत्वासम्भवाद्विकल्पा सम्भवाच्चेति । नैष दोषः तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निरिति" । अशक्या हीयं श्रुतिरन्यथा परिणेतुम् । शक्या तु परिणेतुं छान्दोग्यश्रुतिः तदाकाशं वायुञ्च सृष्ट्वा "तत्तेजोऽसृजतेति" । न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धामाकाश-स्योत्पत्तिं वारयितुं शक्नोति एकस्य वाक्यस्य व्यापार-द्वयासम्भवात् । स्रष्टा त्वेकोपि क्रमेणानेकं स्रष्टव्यं सृजेत् इत्येकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या । नचास्माभिः सङ्कल्पस्य स्रष्टुः स्रष्टव्यस्य

सम्बन्धोऽभिधीयते श्रुत्यन्तरबलेन सृष्ट्यान्तरोपसंग्रहात्। यथा च "सर्वं खल्विदं ब्रह्म तज्जलान्" इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखसृष्टिक्रमं बाधते एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखसृष्टिक्रमं बाधितुमर्हति। ननु श्रमविधानार्थमेतद्वाक्यं "तज्जलानिति शान्त उपासीतेति" श्रुतेः नैतत्सृष्टिवाक्यं न तस्मादेतत्प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति। "तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथाश्रुति क्रमोऽभ्युपेतव्य इति। नेत्युच्यते। न हि तेजःप्राधान्यानुरोधेन श्रुत्यन्तरप्रसिद्धोवियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात् क्रमस्य। अपि च तत्तेजोऽसृजतेति नात्र क्रमस्य वाचकं कञ्चित् शब्दोऽस्ति अर्थात्तु क्रमोगम्यते स च वायोरग्निरित्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्यते। विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयौ असम्भवान्नभ्युपगमाभ्यां निवारितौ। तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः। अपि च छान्दोग्ये "श्रेनाश्रुतं श्रुतं भवतीतो"त्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमान्नातामपि वियदुत्पत्तावुपसंख्यातव्यं किमङ्ग पुनस्तैत्तिरीयके समाख्यातं न संगच्छते। यच्चोक्तमाकाशस्य सर्वैश्वानन्यदेशत्वात् ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवति अतो न प्रतिज्ञा हीयते। न च "एकमेवाद्वितीयमिति" श्रुतिकोपो भवति क्षीरोदकवत् ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यम्। सृष्टादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानगृहीतक्षोदकस्य सम्यग्ज्ञानगृहीतत्वमस्ति। न च वेदस्य पुरुषाणामिव मायालोकवञ्चनादिभिरर्थावधारणमुपपद्यते। सावधारणा चेयम् "एकमेवाद्वितीयमिति" श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्यापेक्षयैवेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणञ्चेति न्याय्यम्। सृष्टादिष्वपि हि तत्सम्भवाच्च तदपूर्वं वस्तुपन्यसितव्यं भवति "स ईक्षतेतो यद्यु खोल्वेदं महामना अनूचानमानीक्षोऽसृत तमादग्रमात्मोत्पेनाश्रुतं श्रुतमभवती"त्यादिना। तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यत्वापेक्षयोपन्यस्यत इति द्रष्टव्यम्। यत् पुनरेतदुक्तमसम्भवान्नैषो गगनस्योत्पत्तिश्रुतिरिति। अत्र ब्रूमः "यावद्विकारन्तु विभागो लोकवत्" सू०। तु शब्दोऽसम्भवाशङ्काव्यावृत्त्यर्थः। न खल्वाकाशोत्पत्तावसम्भवाशङ्का कर्त्तव्या यतोयावत् किञ्चित् विकारजातं दृश्यते घटघटिकोदञ्चनादि वा कटककेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागोलोके लक्ष्यते नत्वविकृतं किञ्चित् कुतश्चिद्विभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते तस्मात् सोऽपि विकारो भवितुमर्हति। एतेन दिक्कालमनःपरमाणूनां कार्यत्वं व्याख्यातम्। नन्वात्मापि आकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत् प्राप्नोति, न "आत्मन आकाशः सम्भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात्तस्मात् परमन्यच्च श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् तथा च शून्यवादः प्रसज्येत। आत्मत्वादेवात्मनो निराकरणं शङ्कानुपपत्तिः। नह्यात्मागन्तुकः कस्यचित्, स्वयंसिद्धत्वात्। नह्यात्मात्मनः प्रमाणमपेक्ष्य सिध्यति। तस्य हि प्रत्यक्षादीनि प्रमाणान्यन्यसिद्धये उपादीयन्ते। नह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते। आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिद्ध्यति। नचेदृशस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वरूपम्। य एव हि निराकरणकर्त्ता तदेव तस्य स्वरूपम्। नह्यग्नेरौष्ण्यमग्निना निराक्रियते। तथाहमेवेदं जानामि वर्त्तमानं वस्तु अहमेवातीतंतरञ्चात्स्यामि अहमेवानागततरञ्च ज्ञास्यामीत्यतीतानागतवर्त्तमानभावेनान्यथाभवत्यपि ज्ञातरि न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्त्तमानस्वभावत्वात्। तथा भस्मीभवत्यपि देहे नात्मन उच्छेदोवर्त्तमानस्वभावत्वादन्यस्वभावत्वं वा न सम्भावयितुं शक्यम्। एवमप्रत्याख्येयस्वभावत्वादेवाकार्यत्वमात्मनः कार्यत्वञ्चाकाशस्य। यत्तूक्तं सजातीयमनेकं कारणद्रव्यं द्रव्यारब्धमिति तत्प्रत्युच्यते। न तावत् सजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति न हि तन्तूनां तत्संयोगानाञ्च समानजातीयत्वमस्ति द्रव्यत्वगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत् समवायिकारणविषयएव समानजातीयत्वाभ्युपगमो न कारणान्तरविषय इति तदप्यनैकान्तिकम्। सूत्रगोबालैर्नानाजातीयैरेका रज्जुः क्रियमाणा दृश्यते। तथा सूत्रैरूर्णादिभिश्च विचित्रान् कम्बलान् वितन्वते। मण्य-

द्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यम् सर्वस्य सर्वेण समानजातीयत्वात्। नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति अणुमनसोरादयकर्मारम्भाभ्युपगमात्। एकैकोहि परमाणुर्मनश्चाद्यं स्वकर्मारभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते। द्रव्यारम्भ एवानेकद्रव्यारम्भकत्वनियम इति चेन्न परिणामाभ्युपगमात्। भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्यारम्भकमभ्युपगम्येत तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमानं कार्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते मृद्बीजाद्यङ्कुरादिभावेन क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन। नेश्वरशासनमस्ति अनेकमेव कारणं कार्यं जनयतीति। अतः शास्त्रप्रामाण्यादेकस्माद्ब्रह्मण आकाशादि महाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते। तथा चोक्तं "उपसंहारदर्शनाच्चेति चेन्न क्षीरवद्धीति"। यच्चोक्तमाकाशोत्पत्तौ न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यत इति तदयुक्तं येनैव हि विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते। यथा च न ब्रह्मस्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववत् "अस्थूलमनखित्यादि" श्रुतिभ्यः एवमाकाशस्वभावेनापि न स्वभाववत् अनाकाशमिति श्रुतेरवगम्यते। तस्मात् प्रागुत्पत्तेरनाकाशमच्छद्मेति स्थितम्। यदप्युक्तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति तदप्यसत्। श्रुतिविरोधे सत्युत्पत्त्यसम्भवानुमानस्याभासत्वोपपत्तेः उत्पत्त्यनुमानस्य च दर्शितत्वात् अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसम्भवाच्च। आत्मनानैकान्तिकमिति चेन्न तस्यौपनिषदं प्रति अनित्यगुणाश्रयत्वासिद्धेः। विभुत्वादीनाञ्चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात्। यच्चैतदुक्तं शब्दाच्चेति। तत्राप्यृतत्वश्रुतिस्तावद्वियति "अमृता दिवौकस" इतिवद्दृष्ट्या उत्पत्तिप्रलययोरुपपादितत्वात्। "आकाशवत् सर्वगतश्च नित्यः" इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते निरतिशयमहत्त्वाय नाकाशसमानत्वाय। यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत्। एतेनानन्तत्वोपमानश्रुतिर्व्याख्याता। "ज्यायानाकाशादिति" श्रुतिभ्यश्च ब्रह्मणः सकाशात् आकाशस्योनपरिमाणत्वसिद्धिः। "न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति। "अतोऽन्यदार्त्तमिति" च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति। तथाच ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भवश्रुत्यनुमानाभ्यां परिहृतम्। तस्माद्ब्रह्मकार्यं वियदिति सिद्धम्"।

तस्य जन्यत्वेऽपि आप्रलयस्थायित्वात् गौणनित्यत्वम्। वैशेषिकाणां नित्यत्वानुमानं तु बलवदागमविरुद्धत्वात् नरकपालशुचित्वानुमानवत् बाधितमिति द्रष्टव्यम्। सांख्यमते दिक्कालयोराकाशएवान्तर्भावः अतएव सां० कौमुद्याम् कालरूपतत्त्वान्तरं निराकृतं यथा "कालश्च वैशेषिकाभिमत एकोन अनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं वैरूपादिभेदेरनागतादिभेदं प्रतिपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतमलान्तर्गडुना कालेनेति सांख्याचार्याः तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति" सूत्रे तु आकाशप्रकृतिकत्वं तयोरुक्तम् यथा "दिक्कालावाकाशादिभ्यः" सू०। नित्यौ यौ दिक्कालौ तावाकाशप्रकृतिभूतौ प्रकृतेर्गुणविशेषावेव। अतो दिक्कालयोर्विभुत्वोपपत्तिः। "आकाशवत् सर्वगतश्च नित्य" इत्यादि श्रुत्युक्तं विभुत्वं चाकाशस्योपपन्नम्। यो तु खण्डदिक्कालौ तौ तु तत्तदुपाधिसंयोगादाकाशादुत्पद्येते इत्यर्थः। आदिशब्देनोपाधिग्रहणमिति। यद्यपि तत्तदुपाधिविशिष्टाकाशमेव खण्डदिक्कालौ तथापि विशिष्टस्यातिरिक्ततामभ्युपगमवादेन वैशेषिकनयेनास्य कार्यतावत् तत्कार्यत्वमत्रोक्तम्" सां०भा०। पदार्थखण्डने शिरोमणिना अस्य ईश्वरस्वरूपानतिरेक उक्तः "दिक्कालावीश्वरान्नातिरिच्येते गगनमपि तथेति"। सौगतमतसिद्धे आवरणाभावरूपे निरूपाख्ये २ पदार्थभेदे च। तदेतत् मतम्" भा०सू०भाष्ययोर्निराकृतम् "आकाशे चाभावात्" सू०। "यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशश्च निरूपाख्यमिति तत्र निरोधद्वयस्य निरूपाख्यत्वं पुरस्ताद्विराकृतम् आकाशस्येदानीं निराक्रियते। आकाशे चायुक्तो निरूपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिववस्तुत्वप्रतिपत्तेरविशेषात् .आगमप्रामाण्यात्तावदात्मनः आकाशःसम्भूतइत्यादि श्रुतिभ्यः आकाशस्य वस्तुत्वसिद्धिः। विप्रतिपन्नानपि प्रति शब्दगुणानुमेयत्वं वक्तव्यं गन्धादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्रमाकाशमिच्छतस्तव एकस्मिन्नुपकर्णे पतत्यावरणस्य विद्यमानत्वात् नुपकर्णान्तरस्य पितृसतोऽनवकाशत्वप्रसङ्गः यत्रावरणाभावस्तत्र पतिष्यतीति चेत् येनावरणाभावो विधिष्यते तत्तर्हि वस्तु भूतमेवाकाशं स्यान्नावरणाभावमात्रम्

अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत । सौगते हि समये पृथिवी-भगवन् ! किंसन्निश्रयेत्यस्मिन् प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्ते वायुः किंसन्निश्रय इत्यस्य प्रश्नस्य प्रति-वचनं भवति वायुराकाशसन्निश्रय इति तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात् तस्मादयुक्तमाकाशस्यावस्तुत्वम् । अपि च निरोधद्वयमाकाशञ्च त्रयमप्येतन्निरुपाख्यमवस्तु नित्यञ्चेति विप्रतिषिद्धं नह्यवस्तुनोनित्यत्वमनित्यत्वं वा सम्भवति वस्त्वा-श्रयत्वाद्धर्मधर्मिव्यवहारस्य । धर्मधर्मिभावे हि घटादिव-दस्तुत्वमेव स्यात् न निरुपाख्यत्वम्" भा० । आ समन्तात् काशते अच् । "रतिमाकाशभवा सरस्वती" कु० "आकाशगङ्गापयसः पतेताम्" माघः आकाशात्तु विक-र्वाणात् सर्वशब्दवहः शुचिः मनुः" "घटसंवृतआकाशे नीयमाने यथा घटे" सां०प्र०भा० "आकाशो जायते तस्मात् तस्य शब्दगुणः स्मृतः" मनुः । रूपादिषु मध्ये शब्दमात्रग्राहकतया श्रोत्रस्याकाशात्मकत्वेऽपि कर्णशष्कुली-रूपोपाधिभेदान्नानात्वमौपाधिकमेकस्यादिवः प्राचीत्वा-दिवत् एकस्य कालस्य क्षणादित्ववच्च । २परब्रह्मणि "आकाशोह्वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" श्रुतिः "यावानयमाकाशस्तावान-यमन्तर्हृदयाकाशः" श्रुतिश्च० ड० । "आकाशस्तल्लिङ्गात्" भा०सू० । "आकाशवत् सर्वगतश्च नित्यः" श्रुतिः गीता च । ४छिद्रे गणितादिप्रसिद्धे ५शून्याङ्के च ।

आकाशकक्षा स्त्री ६त०। ब्रह्माण्डपुटवेष्टने लोकालोकपर्वत-रूपसीमापर्य्यन्तव्यापके सूर्य्यकिरणसञ्चारावधिभूते वृत्ताकारे गगनस्थे गोलक्षेत्रे । तन्मितिरुक्ता" सि०शि० "कोटिघ्नैर्नख नन्दषट्कनखभूभृद्भुजंगेन्दुभिर्ज्योतिःशास्त्र-विदोवदन्ति नभसः कक्षामिमां योजनैः १८७१२-०६८२०००००००। तद्ब्रह्माण्डकटाहसम्पुटतटे केचि-ज्जगुर्वेष्टनम् केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः सूरयः । करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् । दिनकरकरनिकरकरम्बितततमसो नभसः परिधि-रुदितस्तैः ।" तथा च सूर्य्यकिरणप्रचारावधिस्थानस्य नभःकक्षात्वेन कल्पितम् । वस्तुतोऽपरिच्छिन्नत्वादाकाश-स्यतोऽपि सत्त्वात् न तन्मात्रमानम् । अतएव "ब्रह्माण्डमे-तन्मितमस्तु नो वेति" ब्रह्माण्डस्यानिर्द्धारितप्रमाणकत्वं तल्लोक्तम् । व्याख्यातं च प्र०मि० "एभिस्तुल्यां गणकाः नभसः कक्षामाकाशपरिधिं वदन्ति तत्र कथमनन्तस्याकाश-स्येयत्ता वक्तुं शक्यते इत्याशङ्क्य अरुणपितद्युतिभाजोनभसः परिधेरिदं मानं वदन्ति अतएव पौराणिका-गणकाः ब्रह्माण्डपरिधिं वदन्ति । केचिल्लोका-लोकं वदन्ति यतस्तदन्तर्वर्त्तिन एवार्करश्मयः । एवमन्ये वदन्तीति नास्माकं मतमित्यर्थः प्रमाणशून्यत्वात्" । कर-तलकलितसकलब्रह्माण्डगोला एवं वक्तुं शक्नुवन्ति न वयम्" । तेन पौराणिकमतमेतत् सूर्य्यकिरणसञ्चार-स्थानपर्य्यन्तत्वोपाधिना तत्कल्पनमिति द्रष्टव्यम् ।

आकाशकल्प पु० ६तत्समास० आकाशः आकाश+कल्पप् । ब्रह्मणि "निस्सङ्गत्वाद्विभुत्वाच्च तथाऽनन्यरूपभावतः । ब्रह्म-व्योम्नोर्न भेदोऽस्ति चैतन्यं ब्रह्मणोऽधिकम्" इत्युक्तेः व्योम-गतजडताशून्यतया ततोवैलक्षण्यात् तस्य तत्कल्पत्वम् ।

आकाशगङ्गा स्त्री आकाशपथवाहिनी गङ्गा । मन्दाकिन्याम् । "उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्" माघः । आकाशनद्यादयोऽप्यत्र । आकाशस्याव-लम्बनत्वाभावेऽपि मेरुशिखरस्थात्युन्नतया सूर्गताकल्पनेन तस्यैवाकाशतुल्यता ततएव वहने आकाशे वहनोत्प्रे-क्षणात् तथात्वम् । अतएव गङ्गाया स्वर्पथगामित्वं पुराणे-घूक्तम् यथा च गङ्गायास्स्वर्पथगत्वं तथा गङ्गाशब्दे वक्ष्यते

आकाशगा स्त्री आकाशे अत्युच्चस्थाने सुमेरुशिखरे गच्छति गम-ड । १स्वर्गगङ्गायाम् २आकाशगामिमात्रे त्रि० ।

आकाशजननी स्त्री आकाशस्य छिद्रस्य जननीव पोषिका । छिद्रवत्यां प्रगण्ड्याम् । दुर्गमध्यस्थितानां जनानां बाह्यार्थ-दर्शनार्थं छिद्रवती भित्तिः प्रगण्डी तद्द्वारैव हि रिपुप्रत्या-सत्तौ आग्नेयास्त्रं स्वयमलक्षिततया बहिः क्षेप्यैः क्षिप्यते। दुर्गनिर्माणोपदेशे "प्रगण्डीः कारयेत् सम्यगाकाशजननी-स्तथा । आपूरयेच्च परिखां स्थाणुनक्रझषाकुलाम्" भा०भा० प०६६ अ० "सञ्चारो यत्र लोकानां दूरादेवावबध्यते प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता" प्रगण्डीं परि-भाष्य "दुर्गप्राकारभित्तौ शूराणामुपवेशस्थानानि प्रगण्डी । आकाशजननी तत्रैव एककक्षायां भित्तौ तत्तुल्यानां रन्ध्र-रूपायां बाह्यार्थदर्शनानि क्षुद्रच्छिद्राणि यद्द्वारानेया-स्त्रगुलिकाः प्रक्षिप्यन्ते इति" नीलक० ।

आकाशदीप पु० आकाशे दीयमानोदीपः । "तुलायां तिलतै-लेन सायंसन्ध्यासमागमे । आकाशदीपं यो दद्यात मासमेकं निरन्तरम्" ब्रह्मखण्डपु० उक्ते तुलास्थरवौ सायंसन्ध्यास्थाने दीयमाने दीपे ।

आकाशभाषित न० आकाशे भाषितम् । अलक्ष्यशरीरायां

अदृश्यानां देवादीनां गगनोद्भवे वचने आकाशवाक्याम् ।

आकाशमण्डल न० आकाशोमण्डलमिव । १नभोमण्डले आकाशस्य निरवयवत्वेन अनवच्छिन्नत्वेन च वेष्टनाकार मण्डलाभावेऽपि भूगोलवृत्तोपाधिकृतं तदीयं मण्डलमिव भवति। योहि नभोभागो भूगोलेनानावृतः सन् दृष्टिप्रचार पथवर्त्त्यालोकान् तस्यैव भूगोलोपाधिना गोलाकारत्वं कल्प्यते । एतेनापि प्रमाणेन भूमेर्गोलाकारत्वानुमानम् यदि भूमिर्गोलाकारा न स्यात् कथं तदाऽनन्तानवच्छिन्नस्याकाशस्य गोलाकारत्वमुपलक्ष्येत कस्यचिदुपाधेरेव च स्वभावात् तस्य गोलाकारत्वमुपलक्ष्यते इति कल्प्यम् अन्यस्य च परिधेरदर्शनात् परिशेषात् भुमेरेव तथात्वसिद्धिरिति तस्या गोलाकारता तद्वशाच्चाकाशस्य तथात्वकल्पनमिति "आकाश-मण्डलमध्यमध्यास्ते" काद० नभोमण्डलादयोऽत्र "नेत-न्नभोमण्डलमम्बुराशिः" सा०द० तन्त्रोक्ते भूतशुद्धौ चिन्तनीये भ्रूमध्यावधिब्रह्मरन्ध्रान्तस्थिते वृत्ताकारे स्वच्छे २नभोमण्डले च "वृत्तं दिवस्तत् षड्विन्दुलाञ्छितं मातरिश्वनः" तन्त्र०। पदार्थादर्शे, भूतशुद्धौ वायोराकाशे विलापनमभिधाय "ततोभ्रूमध्यादि ब्रह्मरन्ध्रपर्य्यन्तं स्वच्छं वर्त्तुलमाकाशमण्डलम्" इत्युक्तम् । तदेव मण्डलं विद्वेषे चिन्तनीयम् यथोक्तं "जलस्य मण्डलं प्रोक्तं" मित्युपक्रम्य "वृत्तं दिवस्तद्विद्वेषे" मन्त्रमहो० ।

आकाशमय पु० आकाश+प्रायार्थे मयट् । आकाशप्राये आत्मनि । "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयः चक्षुर्मयः श्रोत्रमय आकाशमयो वायु-मयस्तेजोमयः अम्भयः पृथिवीमयः" शत०ब्रा० । "योऽयमात्मनः संसारसंबन्धः स वास्तवो न भवति किन्त्वौ पाधिक एवेति तदुपाधीन् दर्शयित्वात्मनो वास्तवरूपमाह स वा इति। स प्रकृतः संसारी अयमविद्यातत्कार्य्य विनि-र्मुक्तः स्वप्रकाशोऽपरोक्षः आत्मा कूटस्थःसाक्षी चिद्धातुरेव-म्भूतः सोऽयमात्मा वै ब्रह्म अथनायाद्यतीतः परमात्मैव । ब्रह्मैव सन्नयमात्माऽविद्याऽब्रह्मवत् प्रतिपन्नः पुनः सम्यग्-ज्ञानात्तत्प्रध्वंसे ब्रह्मैवावतिष्ठतइति भावः । इदानीं यत्प्रयुक्तमेवंविधब्रह्मात्मनो बन्धस्तानुपाधीनाह विज्ञा-नमय इति विज्ञानं बुद्धिस्तत्प्रायः बुद्धेरैक्याध्यासाद्धि तद्धर्म्माणं कर्तृत्वादेरात्मनि आरोपितत्वं तत्प्रायत्वम् । अस्मिन् प्रकरणे सर्वोऽपि मयट् प्रायार्थे न तु विकारार्थे तत्र तदसम्भवात्" शा०भाष्यम् । [राजनि० ।

आकाशमांसी स्त्री आकाशभवा मांसी । क्षुद्रजटामांसाम्

आकाशमूली स्त्री आकाशे भूमिम्बन्धदेशे मूलमस्याः ङीष् । कुम्भिकायाम् (पाना) ।

आकाशयान न० आकाशे यायते ऽनेन या-करणे ल्युट् ७त० । आकाशगमनसाधने विमाने ।

आकाशरज्जिन् पु० आकाशे इव अत्युच्चप्राचीरोपरिस्थितः सन् रज्जति रज्ज-णिनि । दुर्गबहि-प्राचीरोपरिस्थिते रज्जके । "सञ्चारोयत्र लोकानां दूरादेवावबुध्यते। प्रगण्डो सा च विज्ञेया बहिःप्राकारसंज्ञिता । प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता । स एवाकाशरज्जीति रुच्यते शास्त्रकोविदैः" । भा०शा०अ०६६ व्या०नी०क० ।

आकाशवचन न० आकाशे वचनम् । पातालप्रवेशेऽपि तदीयवाक्यं प्रविष्टपात्रेण श्रुत्वा आकाशवाक्यत्वेन कल्पिते नाटकाङ्गे १वाक्यभेदे "नेपथ्योक्तं श्रुतं तत्र आकाशवचनं तथा । समाश्रित्यापि कर्त्तव्यमासुखं नाटकादिषु" सा०द० । अलक्षितशरीरतया देवादिभिरुच्चार्य्यमाणे २वाक्ये च ।

आकाशवत् त्रि० आकाशः गम्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप् । आकाशगामिनि "प्रतिगृह्य दक्षिणमूरु-मपाच्छाद्य तस्मिन् सादयित्वाऽकाशवतीभिरङ्गुलीरपि-दध्यात्" आश्वला० श्रौ०सू० । [पथि ।

आकाशवर्त्मन् न० आकाशोवर्त्मैव गम्यत्वात् । आकाशरूपे

आकाशवल्ली स्त्री आकाशस्य वल्ली शाखेव अत्युच्चत्वात् । (अमरवेल इति) ख्यातायां लतायाम् राजनि० ।

आकाशवाणी स्त्री आकाशे भवा वाणी । अदृश्योत्पादक-पुरुषत्वेनाकाशादिवोत्पन्नायां देवादिवाचि ।

आकाशसलिल न० आकाशात् पतितं सलिलम् । आकाशात् पतिते जले । तच्च चतुर्विधं मेघादिधारानिस्सृतं धारं, चन्द्रकरतआगतं कारम्, तुषारक्षतं तौषारम्, संहत हिमखण्डेननिर्वृत्तं च हैमम् । तच्च शुद्धते दर्शितम् अम्बुशब्दे ३२० पृष्ठे उक्तम् ।

आकाशस्फटिक पु० आकाशेभवः स्फटिकइव । वर्षोपले करकाख्ये संहतजलखण्डे । तदुत्पादविधयौ श्रीपति-राह । "उड्डीनैः पांसुभिर्भूमेः प्रचण्डपवनोद्धतात् । मेघमण्डलमानीतैर्मौलिन्यपरिवर्जितैः । मिश्रणाज्जल-बिन्दूनां पिण्डभावोभवेदिह । दृषद्वन्निपतन्त्येते दृषदे च पुनःक्षितौ" ।

आकाशास्तिकाय पु० कर्म्म०अर्हन्मतसिद्धे जीवभिन्ने आव-रणाभावरूपे पदार्थभेदे । सच अर्हच्छब्दे २८२ पृष्ठे दर्शितः

आकाशीय त्रि० आकाशस्येदं छ। नाभसे "वायव्यमिदमाकाशीयमिति"। "शब्दवद्बलमाकाशीयं तन्मार्दवशौषिरलाघवमिति" च सुश्रुतः। दिगा०यत् आकाशमस्यत्र त्रि०।

आकाशे अव्य० आ+काश-के। "दूरस्थाभाषणं यत् स्यादशरीरनिवेदनम्। परोक्षान्तरितं वाक्यं तदाकाशे निगद्यते" भरतोक्ते नाटकाङ्गे वाक्यभेदे "कञ्चुकी (दृष्ट्वा आकाशे) विरूढिके। अपि त्वयूजनपादबन्धनं कृत्वा प्रतिनिवृत्ता भानुमती" (कर्णं दृष्ट्वा) किं कथयसि आर्या एषा भानुमतीत्यादि" वेणीसं०।

आकिञ्चन्य न० अकिञ्चनस्य भावः ष्यञ्। दरिद्रतायाम्।

आकिर्दन्ति पु० १देशभेदे २तद्देशवासिनि च। दामन्या० आयुधजीविसंघार्थे छ। आकिर्दन्तीयः तद्देशीयायुधजीविसंघे। बह्वृषु लुक्ष लुक्। आकिर्दन्तयः।

आकीर्ण त्रि० आ+कॄ-क्त। १व्याप्ते, २विचित्रिते च। "आकीर्णैस्तपियत्नीनासटजद्वाररोधिभिः" रघुः। "खण्डैराकीर्णं कुसुमधनुषो मन्दिरमहो" श्यामास्तवः।

आकीम् अव्य० आ-कम्-वा० डीमि। १वर्ज्जने २वितर्के च चादिगणे माकीमित्यत्र आकीम् इति पाठान्तरम् "आकीं सूर्य्यस्य रोचनाद्विश्वादेवा उपर्बुधः" ऋ०१,१४,६,।

आकुञ्चन न० आ+कुच-ल्युट। सङ्कोचे, प्रसारितस्य संश्लिष्टत्वसम्पादनसाधने क्रियाभेदे "आकुञ्चनन्तु सत्स्वेवावयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं वस्त्राद्यवयविकौटिल्योत्पादकं कर्म्म, यतो भवति सङ्कुचति पद्म सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः" वै०सू० उप०। स च कर्म्मभेदः कर्म्म च पञ्चविधम्। "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वै०सू०। अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसाच्चाद्याः पञ्च जातयः" वै०सू०उ०। कर्म्म च "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म्मलक्षणम्" वै०सू० उक्तलक्षणकम्। विवृतञ्च उप० "एकमेव द्रव्यमाश्रयो यस्य तदेकद्रव्यं न विद्यते गुणोऽस्मिन्नित्यगुणम्" संयोगविभागेष्वनपेक्षकारणमिति स्वोत्पत्त्यनन्तरोत्पत्तिकभाव भूतानपेक्षमित्यर्थः तेन समवायिकारणापेक्षायां पूर्व्वसंयोगाभावापेक्षया च नासिद्धत्वम्। स्वोत्पत्त्यनन्तरोत्पत्तिकानपेक्षत्वं वा विवक्षितम् पूर्व्वं संयोगध्वंसस्यापि स्वोत्पत्त्यनन्तरानुत्पत्तिकत्वेन अभावत्वेन तस्माद्यत्वे सम्बन्धात् तेन नित्यद्रव्यसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्म्मत्वम्। प्रचलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वं वा गुणान्यनिर्गुणमात्रवृत्तिजातिमत्त्वं वा स्वोत्पत्त्यव्यवहितोत्तरत्वसद्वृत्तिविभागकारणतावच्छेदकजातिमत्त्वं वा" "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्मान्येतानि पञ्च च" भाषा० "सन्धिगतः पीड्यमानो न प्रवर्त्तत आकुञ्चनप्रसारणोल्लङ्घनविलम्बनप्रधावनोत्कासनप्रवाहणैश्च स्रवति" "प्रसारणाकुञ्चनबन्धनपीड़नैर्भृशमुपचरेत्" अनुसृत्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः" इति च सुश्रुतः।

आकुञ्चित त्रि० आ+कुच-क्त। १आभुग्ने २सङ्कोचिते च। "नतांसमाकुञ्चितसक्थ्यपादम्" भट्टिः।

आकुल त्रि० आ+कुल-क। व्यग्रे। "तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्" गीता "त्रासाकुलः परिपतन् परितो निकेतान्यूर्म्मिः" "अभिचोद्यं प्रतिश्रुत्यासुरासीत् कार्य्यहयाकुलः" इति च माघः। निराकुलः पर्य्याकुलः व्याकुलः समाकुलः। आकुलत्वञ्च मनस्याशुत्वसम्पादकमानसावस्थाभेदः स्वक्रियाऽसामर्थ्यञ्च। कृत्यर्थे णिच् आकुलयति अभूततद्भावे चि क्राद्यनुप्रयोगः आकुलीभूतः आकुलीकृतः "दृविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते"

आकुलाकुल त्रि० आकुल+प्रकारे द्विरुक्तम्। १आकुलप्रकारे २अत्यन्ताकुले च।

आकुलि पु० आ+कुल-इन्। व्याकुलत्वे।

आकुलित त्रि० आ+कुल-क्त। व्याकुलीभूते आकुल+कृत्यर्थे णिच् कर्म्मणि क्त। आकुलीकृते "मार्गाचलव्यतिकराकुलितेव सिन्धुः" कुमा०।

आकुलीकृत त्रि० अनाकुलः आकुलः कृतः आकुल+चि-कृ कर्म्मणि क्त व्याकुलतां प्रापिते। [भूते।

आकुलीभूत त्रि० आकुल+चि-भू-क्त। स्वयं तथा-

आकूत न० आ+कू-भावे क्त। आशये अभिप्राये। "स्वां स्वां प्रतिपद्यन्ते परस्परागूतहेलकां हृत्तिम्" सा० का० यथा यात्रीकादयः-"कृतसङ्केताः परावृत्तान्दने प्रहृष्टाः तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते तथा अन्यतमस्य करणस्याकूतात् स्वकार्य्यकरणाभिमुख्यादन्यतमं करणं प्रवर्त्तते" इति सां० को० "इतीरितागूतमनोज्ञवाञ्छितैः" किरा०। [वेदनाकूणितत्रिभागेण" काद०।

आकूणित आ+कूण-क्त। ईषत्सङ्कुचिते। "मदनशरस्य

आकूति स्त्री आ+कू-भावे क्तिन्। अभिप्राये। "आकूतीनाञ्च चित्तीनां प्रवर्त्तेव! नमामि ते" भा०व० २६२

अ०। द्रौपदीकृतकृष्णस्तवः। "आकूतिः सत्या मनसो मे अस्तु" ऋ० १०,१२४,४। "सं म आकूतिर्ऋध्यात्" ऋ० ४;३२,२। संज्ञायां क्तिच्। स्वायम्भुवमनोः शतरूपायां पत्न्यामुत्पादिते कन्याभेदे तत्कथा यथा। "कस्य रूपमभूद्द्वेधा यत् कायमभिचक्षते। ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत। यस्तु तत्र पुमान् सोऽभून्मनुः स्वायम्भुवः स्वराट्। स्त्री यासीत् शतरूपाख्या महिष्यस्य महात्मनः। तदा मिथुनधर्मेण प्रजा ह्येधाम्बभूविरे। स चापि शतरूपायां पञ्चापत्यान्यजीजनत्। प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत।। आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम।। आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम्। दक्षायादात् प्रसूतिञ्च यतश्चापूरितं जगत्" भा० ३स्क०।

आकृति स्त्री आक्रियते व्यज्यते जातिरनया करणे क्तिन्। जातिव्यञ्जकेऽवयवसंस्थानभेदे। "आकृतिग्रहणा जातिः" महाभा०। "जात्याकृतिव्यक्तयस्तु पदार्थः" गौ०सू० तत्राकृतिलक्षणं तत्रैवोक्तम् "आकृतिर्जातिलिङ्गाख्या" गौ०। "जातिर्गोत्वादेः सास्नादिः संस्थानविशेषो हि लिङ्गमिति। "इयमाकृतिरेव शक्यार्थः इति केचिन्मन्यन्ते। तदभिप्रायेण, महाभा०। "येनोच्चारितेन साक्षाल्लाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द इति" अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिन" इति। "लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते" इति च महाभा०। गौतमेन तु इतरपक्षनिराकरणेन त्रयाणामेव शक्यार्थत्वमङ्गीकृतं यथा। "आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः" सू०। आकृतिः पदार्थः कुतः सत्त्वस्य प्राणिनोगवादेर्व्यवस्थानसिद्धेर्व्यवस्थितत्वसिद्धेः तदपेक्षत्वादाकृत्यपेक्षत्वात् अयमश्वोगौरयमित्यादि व्यवहारस्याकृतपेक्षत्वात् आकृतिरेव शक्यार्थः। इति यत्तत् तदूषयित्वा जातेः पदार्थत्वमाह "व्यक्त्याकृति युक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां कृष्णवर्त्मके जातिः" सू०। कृष्णवर्त्मके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गात् जातिः पदार्थः। इतरथा कृष्णवर्त्मकस्यापि विग्रहित्वात् गवाकृतिमत्त्वाच्च वैधप्रोक्षणादिप्रसङ्ग इति भावः। एवं जात्याकृतिव्यक्तीनां प्रत्येकस्य शक्यत्वपक्षं निराकृत्य त्रयाणामेव शक्यत्वमित्याह। "जात्याकृतिव्यक्तयस्तु पदार्थः" सू० "तुशब्देन एकमात्रपदार्थत्वव्यवच्छेदः एकवचनं तु तिस्रष्वप्येकैव शक्तिरिति सूचनाय, विभिन्नशक्तौ कदाचित् कस्यचिदुपस्थितिः स्यात्। शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वं तथैव शक्तिग्रहात्। नचाकृत्यादिसाधारण्यशक्यतावच्छेदकाभावात् न शक्त्यैक्यम् इति वाच्यम् तथा नियमे मानाभावात् इदं गवादिपदमभिप्रेत्याह तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः जातिपदं वा धर्म्मपरं तथैव लक्षणस्य वक्तव्यत्वादिति" वृत्तिः। एवं शक्यत्वं व्यवस्थाप्य आकृतेर्लक्षणसूत्रं "आकृतिर्जातिलिङ्गाख्या" सू० प्राग्विवृतम्। एतेनाकृतिशब्दस्य जातिव्यक्त्योः संबन्धपरत्वकल्पनमर्वाचीनानां परास्तम् सम्बन्धस्य जातिलिङ्गत्वाभावात् तस्य शक्यतावच्छेदसम्बन्धत्वेन शक्यत्वाभावाच्च। भा०भा० आकृतीना नित्यत्वोक्तिस्तुल्याकृतिप्रवाहनित्यत्वाभिप्रायेण द्रष्टव्या "यत्राकृतिस्तत्र गुणा वसन्ति" नीतिः "न तुलाविषये तवाकृतिः" "त्वदुदाहरणाकृतौ गुणाः" इति च नैष०२आकारे "इङ्गितं कृतनोभावो बहिराकार आकृतिरिति" सज्जनोक्तेः ३आकृतियुक्ते देहे "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शक्०। "स्पष्टाकृतिः पत्तरथेन्द्रकोतोः" रघुः। "स्फुरितं मनोगतमिवाकृतयः" "गोवर्द्धनस्याकृतिरन्वकारि" इति च माघः। "नाकृतिगुरुता गुरुता" उद्भटः। ४आकरे मूलग्रन्थादौ च आकृतिगणः।

आकृतिगण पु० आकृतौ आकारप्रसिद्धौगणः शाक०त०। पाणिन्युक्ततत्तत्कर्म्मनिमित्ते शब्दसमूहे। यथा खरादिराकृतिगणः कण्ड्वादिरित्यादि गणपाठे भूरिप्रयोगः।

आकृतिच्छत्रा स्त्री छादयति छद्-णिच् कर्त्तरि ट्रन् ह्रस्वः २त०। (घोषा) घोषातकीलतायाम्।

आकृष्ट त्रि० आ+कृष-क्त। कृताकर्षणे। "नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं स्थानतः" महाना०।

आकृष्टि स्त्री आ+कृष-क्तिन्। आकर्षणे।

आके अव्य० आ+कन-ङे। १अन्तिके २दूरे च निरु०। "त्वमग्ने रुद्रभुराके नमस्" ऋ०२,१,१०

आकेकरा स्त्री आके अन्तिके कीर्य्यते कृ-कर्म्मणि अप्। "दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता। मीलितार्द्धाऽपरा लोके तारा व्यवर्त्तनोद्भवा" इत्युक्तलक्षणे दृष्टिभेदे नेत्रादिविशेषणत्वे न०। "निमीलदाकेकरलोचनाभ्याम्" माघः।

आकेनिप त्रि० आकेऽन्तिके निपतन्ति नि+पत-ड। अन्तिकपातिनि "आकेनिपासो अहभिर्दविध्वतः" ऋ०४,४५,६,

आकोकेर पु० ज्योतिषोक्ते मकरराशौ। "क्रियतावुरिजिश्च मकुलीरलेयपाथेययूककौर्पाख्याः। तैत्तिक आकीकेरोष्ट्र-

द्रोगश्चान्त्यमं चेत्यम्" ज्यो० । [पूर्व्वस्य वा । अपाटवे ।

आ(अ)कौशल न० अकुशलस्य भावः अण् । द्विपदद्वद्धिः

आक्रन्द आ+कन्द-घञ् । १सारवे रोदने, २आह्वाने, ३शब्दे, च । कर्मणि घञ् । ४मित्रे, ५भ्रातरि च । आधारे घञ् । ६दारुणे युद्धे, दुःखिनां ७रोदनस्थाने च । आक्रन्दयति अच् । ८पार्ष्णिग्राहपक्षाद्वर्त्तिनि नृपभेदे । अरिशब्दे ३५५ पृष्ठे विवृतिः "आक्रन्दे चाग्रयैहोति न दण्डं मनुरब्रवीत्' मनुः पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले" मनुः ।

आक्रन्दन न० आ+क्रन्द-ल्युट् । १सारवरोदने २आह्वाने च ।

आक्रन्दिक त्रि० आक्रन्दे दुःखिनां रोदनस्थानं धावति ठञ् टक् वा । दुःखिनां रोदनस्थानधावके ठजि स्त्रियां ङीप् ।

आक्रन्दिन् त्रि० आक्रन्दति आ+क्रदि+णिनि । रोदनपूर्ब्बकाह्वायके । "परस्पराक्रन्दिनि चक्रवाकयोः" कुमा० ।

आक्रन्दे अव्य० आ+क्रन्द-आधारे के । युद्धे निरु० ।

आक्रम पु० आ+क्रम-घञ् अदृद्धिः । १बलेनातिक्रमणे । ल्युट् । आक्रमणमप्यत्र न० । आक्रम्यते परलोकोऽनेन करणे घञ् । परलोकप्राप्तिसाधने २विद्याकर्म्मादौ । "अथ यथाक्रमोऽयं परलोके स्थाने भवति तमाक्रममाक्रम्योभयान् माघ्मन आनन्दांश्च पश्यति" बृ० उप । "अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्म्मपूर्ब्बप्रज्ञालक्षणेन युक्तोभवति तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्नाङ्कुरीभावमिव बीजं तमाक्रममाक्रम्यावष्टभ्य" भा० "अथ केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमते" शत० ब्रा० । ३कृताक्रमणे ४अभिभूते ५वप्राप्ते ६आश्रये च । आक्रामति पराभवति क्षुधाम् आ+क्रम-अच् । ७अन्ने "आक्रमोऽस्याक्रमाय त्वा" यजु० १५,६ । "आक्रमोऽन्नम्" वेददीपः ।

आक्रान्त त्रि० आ+क्रम-क्त । १पराभूते २खेपरिगत्या व्याप्ते समेव समाक्रान्तं इयं द्विरसगामिना" रघुः । "नितान्तमाक्रान्त इवाकुलानाम्" माघः ।

आक्रान्ति स्त्री आ-क्रम भावे क्तिन् । आक्रमणे उपरिस्थानेन प्राप्तौ "आक्रान्तिसम्मानितपादपीठम्" कुमा० ।

आक्रीड पु० आक्रीड्यतेऽत्र आ+क्रीड-घञ् । क्रीड़ास्थाने उद्यानादौ । "आक्रीड़पर्व्वतास्तेभं कल्पिताः स्वेषु वेश्मसु" कुमा० "कमप्याक्रीड़मासाद्य तत्र विश्रम्यतामिति" दण्डक० । कर्त्तरि अच् । २विहारशीले त्रि० ।

आक्रीडिन् त्रि० आ+क्रीड़-घिणुन् । क्रीड़ाशीले स्त्रियां ङीप् ।

आक्रुष्ट त्रि० आ+क्रुश-क्त । १कृताक्रोशे यं प्रति आक्रोश कृतस्तस्मिन् । २शब्दिते ३निन्दिते च । 'भैरीभिराक्रुष्टमहागुहासुखम्" माघः । भावे क्त । ४परुषभाषणे न० "मार्ज्जारमूषिकाख्यं आक्रुष्टे क्रोधसम्भवे" कात्या० "आक्रुष्टे परुषभाषणे" आ० त० रघुनन्दनः ।

आक्रोश पु० आ+क्रुश-घञ् । १विरुद्धचिन्तने, २शापे ३निन्दायाञ्च ल्युट् आक्रोशनमप्यत्र न० । ४अपवादे "पूर्ब्बमासीद्दराक्रोशं स्तनतस्तस्य भूतले" रामा० "कुलाक्रोशकरं लोके धिक् ते चारित्रमीदृशम्" रामा० ।

आक्रोशक त्रि० आ+क्रुश-ण्वुल् । आक्रोशकारके ।

आक्रोष्टृ त्रि० आ+क्रुश-तृच् । आक्रोशकारके । आक्रुश्यमानेनाक्रोशेन्मन्युरेव तितिक्षतः ॥ आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति" भा० आ० प० ८६ अ० ।

आक्ली अव्य० आ+क्लिद-ङी । विकारे उर्य्यादि । आक्लीक्त्य ।

आक्लेद पु० आ+क्लिद-घञ् । आर्द्रीभावे । [जाते वैरे ।

आक्षद्यूतिक न० अक्षद्यूतेन निर्वृत्तम् ठक् । आक्षद्यूतेन

आक्षपाटिक पु० अक्षपटे क्रीड़ास्थाने व्यवहारस्थाने वा नियुक्तः ठक् । १अक्षक्रीड़ाध्यक्षे २व्यवहाराध्यक्षे प्राड्विवाके च ।

आक्षपाद त्रि० अक्षपादस्येदम् अण् । १गौतमसम्बन्धिमते । तेन प्रोक्तम् अण् । तत्कृते २शास्त्रे च तच्च शास्त्रं प्रमाणादि षोड़शपदार्थतत्त्वावेदकं पञ्चाध्यायात्मकम् । प्रमाणप्रमेयेत्यादि सूत्रमारभ्य हेत्वाभासाश्च यथोक्ताः इत्यन्तसूत्रसमुदायात्मकम् । तस्य संक्षिप्तार्थः न्यायशब्दे वक्ष्यते । अक्षपादप्रणीतं वेत्ति अण् । न्यायमताभिज्ञे ३नैयायिके च ।

आक्षार पु० आ+क्षर-णिच्-घञ् । अगम्यागमनं कृतं त्वयेति पुरुषं प्रति, अगम्यागमनं त्वया कृतमिति स्त्रियं च प्रति दूषणे । ल्युट् आक्षारणमप्यत्र न० । युच् टाप् । अत्रार्थे स्त्री । [यावदक्षेण दूषिते ।

आक्षारित त्रि० आ+क्षर-णिच्-क्त । आक्षारोभिद्युनविष-

आक्षिक त्रि० अक्षेण दीव्यति जयति जितं वेत्ति अक्ष+ठक् । १अक्षेण देवके २अक्षेण जयिनि ३अक्षजिते च । "प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्" मनुः भारभूतानक्षान् हरति वहत्यावहति वा वंश० अक्ष पूर्ब्बात् भारात् ठक् । आक्षभारिकः अक्षभारवाहकादौ त्रि० अक्षोऽत्र संज्ञादिसाहचर्य्यात् कक्षिद्भुनः ।

आक्षित त्रि० आ+क्षि-क्विप् । "आवर्त्तमाने "आक्षितं पूर्ब्बापरा" ऋ० २,५५,५ । "आक्षितं आवर्त्तमानः" भा० ।

आक्षिप्त त्रि० आ+क्षिप-क्त । १क्षताक्षेपे यस्याक्षेपः कृतस्तस्मिन् २आकृष्टे च ।

आक्षीव पु०० आ+क्षीव-णिच्-अच् । १शोभाञ्जनवृक्षे । क्षीव-क्त नि० क्षीवोभक्तः प्रादि० । २दैवमत्ते ३सम्यक्प्रमत्ते च त्रि० ।

आक्षेप पु० आ+क्षिप-घञ् । १भर्त्सने, २अपवादे, ३आकर्षणे, धनादिन्यासरूपे, ४निश्चेपे ५अर्थालङ्कारभेदे स च २६४पृष्ठे दृश्यः । दैनिवेशने "गोरोचनाक्षेपनिताननगौरैः" कुमा० ७उपस्थापने "खसिद्धये परारक्षेपः परार्थे स्वसमर्पणम् । उपादान लक्षणं चेति" काव्यप्र० । ८अनुमाने यथा जातिशक्तिवादिनां मते व्यक्तेराक्षेपात् बोधः । सचानुमानमेव । तथा हि गामानयेति वाक्ये गोत्वकर्म्मकानयनं गोकर्म्मकानयनं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानेन गोत्वाश्रयस्य व्यक्तेरनुमानेन भानम् । यथोक्तं शब्दशक्ति० "गामानयेत्यादौ गोत्वादिकर्म्मकत्वेनैवानयनादेरन्वयधीः गोत्वादिशक्यत्वेन पदज्ञानस्य गोत्वाद्यानयनबुद्धिं प्रत्येवहेतुत्वात् गामनयेत्यादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्म्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् । कर्म्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकम् गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाच्चाज्यात्" । ९सतिस्कारवचने च "विरुद्धमाक्षेपवचस्तितिक्षतः" किरा० ।

आक्षेपक त्रि० आ+क्षिप-ण्वुल् । १निन्दके २आकर्षके । "यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः । तदा क्षिपत्यायु सुडुर्मुडुर्दैहं नभस्वरः । सुडुर्मुडुस्तदाक्षेपादाक्षेपक इति स्मृत" इत्युक्तलक्षणे ३वातरोगभेदे ४व्याधे च पु० मेदि० ।

आक्षेपण न० आ+क्षिप-ल्युट् । आक्षेपार्थे "पतनपीड़नप्रहाराक्षेपणव्यालरुद्गदशनप्रभृतिभिरभिघातविशेषैः" सुश्रु० ।

आ(अ)क्षेत्रज्ञ न० अक्षेत्रज्ञ एव ब्राह्मणा० स्वार्थे अञ् । द्विपदबहुव्रीहिः पूर्व्वपदस्य वा । अक्षेत्रज्ञे क्षेत्रानभिज्ञे ।

आक्षेपिन् त्रि० आक्षिपति आ+क्षिप-णिनि । १आकर्षके । आक्षेपः स्वरूपेच्छया पर्य्यालोचनमस्यास्य इनि । २स्वरूपेच्छया आलोचनपूर्व्वकाकर्षके च । "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" पात० सू० । प्राणायामशब्दे विवृतिः ।

आक्षोट पु० आ+अक्ष-ओट । शैलपीलुभेदे ।

आक्षोड पु० आ+अक्ष-ओड़ । शैलपीलुवृक्षे (आखरोट) इति ख्याते । "विल्वामलकखड्डीका-फलमाक्षातदाड़िमम् । भव्यं पानिनताक्षोडम्" सुतिः "आक्षोडमृजव्यफलकारफलं काश्मीरमिश्रितम्" आह्निकतत्त्वे रघुनन्दनः ।

आख पु० आखनत्यनेन आ+खन-ड । खनित्रे । अच् स्वार्थे कनु गौरा० पाठान्तरम् ङीप् । आखकी क्षुद्रखनित्रे स्त्री ।

आखण्डल पु० आखण्डयति भेदयति पर्व्वतान् आ+खडि-डलच् डस्य नेत्वम् । इन्द्रे । "आखण्डलः कामभिदं बभाषे" कुमा० "तमोघः कामरूपाणामत्याखण्डलविक्रमः" रघुः । [पूर्व्वपदाद्युदात्तम् ।

आखण्डिक आ+खण्ड-इन् आखण्डके भेदके पत्रादि०

आखन पु० आखनत्यनेन आ+खन-घ । खननसाधने खनित्रे । वेदे तु पृ०णत्वम् । "एवं तथाज्ञानमाखण्ड्य भित्त्वा" छा० उ० । न शक्यते खनितुं कुद्दालादिभिरपि दृढैरुच्छेत्तुं न शक्योऽखण्डस्तत्त्वा" शा० भाष्यम् ।

आखनिक आ+खन-कर्त्तरि ठक्न् । १चौरे, २शूकरे, ३मूषिके च ४खननकर्त्तरि त्रि० ।

आखनिक पु० आ+खन-करणे कर्त्तरि वा ठक्वक । खनित्रे १चौरे २शूकरे ३मूषिके च ५खनके त्रि० । ङर । आखरोपत्र । पात्रेसमितादिः युक्तारोहादिश्च ।

आखर पुं० आ+खन-करणे ड । खनित्रे ।

आखरेष्ठ त्रि० आखरे तिष्ठति स्था-क षत्वम् वेदे नित्यमलुक् । आखरे स्थिते "क्षणोऽप्याखरेष्ठः" सि० कौ० ।

आखान पु० आ+खन घञ् । समन्तात् खनने ।

आखु पु० आ+खन-डु । १मूषिके, २चौरे, ३शूकरे च । कर्म्मणि डु । ४देवताड़ृष्टे । "विभवे सति नैवात्ति न ददाति जुहोति न । तमाखुराखु"मित्युक्तलक्षणे ५क्षपणे च

आखुकर्णपर्णिका स्त्री आखुकर्णाविव पर्णान्यस्या वा कप् । (उन्दुरकाणी) लतायाम् ।

आखुकर्णी स्त्री आखोः मूषिकस्य कर्ण इव पर्णमस्याः ङीप् (उन्दुरकाणी) मूषिककर्णतुल्यपर्णयुक्तायां लतायाम् ।

आखुग पु० आखुना मूषिकेण गच्छति । गम-ड । मूषिकवाहने गणेशे । तस्य यथा मूषिकवाहनत्वं तथा गणेशशब्दे वक्ष्यते आखुवाहनादयोऽत्यत्र ।

आखुपर्णिका स्त्री आखुः तत्कर्णाविव पर्णमस्याः वा कप् । (उन्दुरकाणी) वृक्षे । कबभावे ङीप् । आखुपर्ण्यपि तत्रैव ।

आखुभुज् पु० आखुं भुङ्क्ते भुज-क्विन् । मूषिकभक्षके विड़ाले । क । आखुभुजोऽत्यत्र ।

आखुकरीष न० ६त०। मूषिकशुष्कपुरीषरूपकरीषे "तस्मादाखुकरीषं सञ्चरति" शत० ब्रा०।

आखुपाषाण पु० आखुः खनकः पाषाणः कर्म०। "आखुपाषाणनामायं लोहसङ्करकारकः" इत्युक्ते पाषाणभेदे राजनि०।

आखुविषहा स्त्री आखुविषं मूषिकविषं हन्ति हन-ड। मूषिकविषहरे १देवताडट्ले, २देवताखोलतायाञ्च।

आखूत्कर पु० आखुभिरुत्कीर्य्यते उत्+कृ-कर्म्मणि-अप्। मूषिकैरुत्कीर्य्यमाणेषु पांसुषु। (उन्दुरमाटि)। "हिरण्यं निधायोखूत्करान्निवपति" कात्या० ४,८,१६।

आखूत्थ त्रि० आखुभ्य उत्तिष्ठति उद्+स्था क। १आखूत्क्षुवे। भावे क। २आखूनामुत्थाने न० सि० कौ०।

आखेट पु० आखिद्यन्ते त्रास्यन्ते प्राणिनोऽत्र आ+खिट-घञ्। प्राणित्रासार्थायां मृगयायाम्। स्वार्थे कन् आखेटकोऽप्यत्र

आखेटशीर्षक न०। आखेट इव शीर्षास्य॥ "वीपिशीर्षं द्रुमशीर्षं तथा चाखेटशीर्षकम्। इति कृत्रिमसंभेदाः स्युः" इत्युक्ते (सुड़ङ्ग) कृत्रिमभेदे। [२तत्कुशलमात्रे च।

आखेटिक पु० आखेटे कुशलः ठक्। मृगयाकुशले १कुक्कुरे।

आखोट पु० आखः खनित्रमिव उटानि पर्णान्यस्य। (आखरोट) इति ख्याते शैलपीलौ।

आख्या स्त्री आ+ख्यायते अनेन आ+ख्या-अङ्। संज्ञायां रूढेनाम्नि वाचकशब्दे। "पश्वादुमाख्यां सुमुखो जगाम" क्षमा नाम च "येन स्वीयपदार्थस्य सुख्यतः प्रतिपादनं। खोत्तरप्रथमापेक्षा तन्नाम स्यात्तदर्थकमिति" शब्दश० उक्तलक्षणकम् "यत् प्रातिपदिकं नाम तन्नाम्नो नातिरिच्यते" इति च तत्रोक्तं "यादृशशब्देन स्वोपस्थाप्यपदार्थसुख्यविशेष्यकान्वयबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशः शब्द एव तदर्थकं नाम। घटादयोहि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थसुख्यविशेष्यकं बोधमुत्पादयन्ति नत्वन्यथा न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिसुख्यविशेष्यकः सुबर्थसंख्यादेरवगमः। पीतपटेत्यादिकः समासोऽपि स्वोत्तरं प्रथमाप्रतिसन्धानदशायामेव पटादिसुख्यधर्म्मितावच्छेदकस्य पीताद्यन्वयबोधस्य जनकः अतएव "नापदं प्रयुञ्जीतेति" वृद्धाः। पदं विभक्त्यन्तं पीतपटरूपमित्यादावपि नावान्तरवाक्यार्थबोधपूर्व्वको महावाक्यार्थबोधः पटादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयधियः पूर्व्वमसम्भवात् विशिष्टवैशिष्ट्यावगाहिन्या प्रमाणान्तरेण पटधर्म्मिकपीतनिश्चयादपि तत्र सम्भवात्। नचान्योन्याश्रयः परस्परादिनामसङ्गतिः "एभ्यः प्रथमा नाभिधीयते" इति वृद्धैः स्मरणादिति वाच्यं मल्लाभ्यामन्योन्यं हन्यत इत्यादौ मल्लयोः परस्परकर्तृकहननकर्म्मत्वान्व्याहारोधेन तेषामपि प्रथमान्तत्वादन्यथा सकर्म्मकस्य हन्तेर्भावारव्यातसाकाङ्क्षत्वानुपपत्तेरकर्म्मकस्यैव धातोस्तथात्वात्"। तेन न्यायमते प्रथमान्तसुख्यविशेष्यकशाब्दबोधस्वीकारेण तथात्वं वैयाकरणादिमते तु न तथा "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति या० उक्तेः भावप्रधानत्वे नैव बोधः तथाच "अर्थवदधातुरप्रत्ययः प्रातिपदिकं" "कृत्तद्धितसमासाश्चेति" पा० उक्तं लक्षणं प्रातिपदिकमेव नाम्नेत्यभिधीयते अतएवोक्तम् "उणादयो बहुलञ्च तद्धिताः समासजम्। नामसंज्ञा भवेत्तस्य खाद्युत्पत्तिस्ततुत्तरम्" तच्च नाम चतुर्विधम् "रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्। तच्चतुर्द्धा परे रूढयौगिकं मन्यतेऽधिकम्" शब्दश० व्याख्यातं च स्वयमेव जगदीशेन। "निरुक्तं नामविभजते। रूढञ्चेत्यादि तत् नाम। चत्वयमवधारणार्थं तेन किञ्चिन्नाम क्वचिदर्थे रूढमेव यथा गोप्रभृतौ गवादि, गमेर्डो दाभाभ्यां नुर्घेटङ्खेत्यादेरौणादिकप्रत्ययस्य शक्तिविरहेण यौगिकत्वविरहात्। किञ्चिल्लक्षकमेव यथा तीरादौ गङ्गादि, आद्यव्युत्पत्त्या पूर्ववत्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तद्प्रामाण्यकल्पनात् शक्तेः पूर्व्वपूर्व्वप्रयोगनियतत्वात्। किञ्चिद्योगरूढमेव यथा पङ्कजादिपद्माटौ पङ्कजादि "किञ्चित् यौगिकमेव यथा पाककर्त्रादौ पाचकादि। रूढयौगिकमप्यधिकं नाम यथा मण्डपमहाराजतादि तद्धि कदाचिद्दयवहत्या योगार्थमेव कदाचिच्च समुदायशक्त्या रूढार्थमेवाभिधत्ते इत्यपरैराम्नातम्। गौर्वाहीक इत्यादौ तु शक्यार्थसम्बन्धावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततोऽभिद्यते" तत्र रूढादिलक्षणानि तत्रैवोक्तानि यथा "रूढं सङ्केतमात्रं सैव संज्ञेति कीर्त्यते। नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा। यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढं योगरूढन्तु पङ्कजादिकं न तथा रूढनामैव च संज्ञापदेनाभिधीयते न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः, येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयोभेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति ये तु रूढस्य नाम्नश्चतुर्विधत्वमाहुस्तन्मतसंग्रहेण। जातिद्रव्यगुणसम्बन्धैर्मैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः। गोगवयादीनां गोत्वादि

जात्या पश्वादादीनां लाङ्गूलधनादिद्रव्येण धन्यपिशुनादीनां गुणयद्वेषादियुणेन चलचपलादीनाञ्च शब्दानां कर्म्मणादच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति । यदुक्तं दण्ड्याचार्य्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः । चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विध" इति तदेतज्जड़मूकमूर्खादीनामन्यम्लेच्छादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः । नैमित्तिकसंज्ञां लक्षयति । जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता । जातिमात्रे हि सङ्केतादृव्यक्तेर्भानं सुदुष्करम् । यद्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रादि· सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकयत्नात्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकशक्तत्वयत्नस्यान्यानुभावकत्वेऽतिप्रसङ्गात् । ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवान्वयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुबर्थकर्म्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमोत्पात् कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात् ज्ञानयं गोवृत्तिकर्म्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाच्चाच्यात् । न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवं यत्नादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादिति वाच्यम् गोपदं गोत्वशक्तमित्याकारज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयितासम्बन्धेन शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यायोगात् । न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्म्मावच्छिन्नत्वनियमोमानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य ज्ञाततालिङ्गकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात् । एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुबर्थकर्म्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम् उक्तस्थल एव व्यभिचारात् । नचैवं काल्लोगौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगोघट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्येव प्रत्यक्षस्यापि कालोगौरित्यादिबोधस्य नियमतोगवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः । तन्मन्दं विनाप्याख्येयं गामानयेत्यादितोगवादिकर्म्मताकत्वेनान्वयनादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनास्पर्शनात् गोत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च । एतेन कर्म्मत्वादौ गोत्वादेः स्वाश्रय वृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोत्ववृत्तित्व' गोवृत्तित्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिकोगवादिव्यक्तेर्बोध इति श्रीकरमतमप्यनादेयं मिथोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यालीकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधौपादानिकबोधस्य जननायोगाच्च । यत्तु गौर्ज्ञायते गौर्नश्यति सर्व्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनानन्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्य्यानुपपत्तेरपि लक्षणाया बीजत्वात् यदाहुर्मण्डनाचार्य्याः "जातेरस्तित्वमात्रे न हि कश्चिद्विवक्षति । नित्यत्वान्नक्षणीयायाव्यक्तौ स्ते हि विशेषणे" इति तदपि तुच्छं व्यक्तिविनांकृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तन्मात्रलक्षकत्वे तद्वति गवादौ लक्षणाया वस्तुभयकत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात् । न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेद्यत्वसम्बन्धेन शुद्धस्य गोत्वादेरन्वयासम्भवाविधस्थल एव जातौ मुख्यप्रयोगः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिष्ठगोत्वावच्छेद्यत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भेक्तिशक्तिभ्यां गोपदेन बोधने वृत्तिद्वयवैयर्थापत्तेः वस्तुतः शुद्धस्य गोत्वादेः शाब्दधीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयोदुर्घटएव । द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्घटत्वजातेर्नानात्वोपगमादिति । प्रभाकारास्तु गोत्वशक्तत्वेन

ज्ञातं पदं तादृप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतोगोत्वशक्तिग्रहान्न गोत्वेन गवयादे' न वा द्रव्यत्वादिना गोरन्वयधियोऽतिप्रसङ्गः । नचैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वेव गोरन्यविशिष्टनिति वाच्यं गवादिपदधर्मिकस्वशक्यतात्तानत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्ततापेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य शाब्दं प्रति जगकतानवच्छेदकत्वात् । अतएवान्वयबुद्धेरात्मस्वात्मत्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम् । अस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवयादेर्गोत्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात् वस्तुतो गोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्नतु गोत्वमपि जातिव्यक्त्योस्तुल्यविप्रतिपत्तित्वनियमादेव गोव्यक्तीनान्तदुविषयत्वसिद्धेः प्रमाणविरुद्धादेव गोत्वादिना गवयादिविषयत्वस्य तत्रासिद्धेश्च । यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषतया निरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने कालोगोत्वयानित्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वात् तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिस्तादृशविशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनाक्षेपेणात् गुरुण्यां गोत्वेन गवयादिबोधस्यालीकत्वात् । अतएव गवादौ गोत्वादिप्रकारकबोधः समवायेनेव सम्बन्धान्तरेणापि तत्प्रकारकः स्वाश्रीत्वप्रकारतायां गोविशेष्यताकत्वेव समवायावच्छिन्नत्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरुद्धेनासिद्धेः । एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतावच्छेदकत्वाद्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तदुव्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वमयुक्तोगौणः । नचैवं गच्छादिधातोरपि गत्यादौ शक्तिर्न स्यादतित्वादिशक्तिज्ञानादेव तादृप्येण गत्यादेर्गच्छादिधातुतोबोधसम्भवादिति वाच्यं गुरुण्यां गतित्वादेः संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् स्वस्वरूपस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वत्वावच्छिन्नशक्ततात्तानत्वेन हेतुतामपेक्ष्य लघुतया तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् गुरुत्वादिप्रयोज्यस्य पतनत्वादेरस्वरूपत्वे पतनादिधातूनान्तत्व शक्तत्वेऽपि ज्ञानभावाच्च पतनादिपदानामपि लोमवल्लाङ्गूलादिपर्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र वृत्तिग्रहोत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्याभानात् लोमादीनां स्वाश्रयतुल्यविप्रतिपत्तित्वस्य लोमवल्लाङ्गूलवान् देश इत्यद्यनुभवे व्यभिचारादिति प्राहुः'' तत्र परिभाषिकी औपाधिकी च तत्रैव लक्षिता यथा "उभयावृत्तिधर्मेण संज्ञा स्यात् परिभाषिकी । औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते । उभयावृत्तिधर्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाशखण्डित्वादिः सा हि द्वितीयावृत्तिनैव शब्दादिना रूपेण तदाश्रयमभिधत्ते नचाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि पटपदं न पटत्वावच्छिन्ने शक्तमदित्यादिप्रयोगः ततः पटत्वविशिष्टस्यानुभवादवश्यं तच्छक्तिरवच्छिन्नेति चेत् शब्दत्वेति शक्तमप्याकाशपदं न शब्दत्वत्वावच्छिन्नशक्तिमदित्येवं महदाद्याकाशादिपदाच्च शब्दत्वेन गगनस्य प्रतीतिरतस्तस्यापि शब्दत्वत्वावच्छिन्नैव तत्र शक्तिरिति विभाव्यताम् । एतेन पटत्वाद्युपलक्षिते धर्मिण्येव शक्तिग्रहस्य तादृप्येण पटाद्यनुभवं प्रति हेतुत्वान्नास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः । परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेवेति शिरोमणयुक्तमपि प्रत्युक्तं शब्दोपलक्षिते धर्मिणि शक्तिग्रहादेवाकाशादिपदात्तदंशे निर्विकल्पकात्मकस्मरणमन्वयानुभवश्चोत्पद्यत इति तु नानुभविकं न वा यौक्तिकम् । या चानुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी यथा भूतदूतादिः सा हि सचेतनादृत्तिविशेषगुणवत्त्ववार्तीकारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते शब्दादिस्तु स्वस्वरूपेणोपाधिरपि नानुगतोद्वितीयावृत्तित्वादतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः । घटत्वादेः संस्थानवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्तं तदौपाधिकमेव यदि च परम्परया वैलक्षण्यवत्त्वेन । तदा नैमित्तिकमेव । वस्तुतः सामान्यस्य शाब्दबुद्धौ स्वरूपतः

प्रकारत्वं समवायेनैवेत्यभिहितं प्रागिति" । लक्षकलक्षणं तूक्तं तत्रैवं "यादृशार्थस्य सम्बन्धवति शक्तन्तु यङ्गवेत् । तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि । यादृशार्थसम्बन्धवति यच्चाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत् । सैन्धवादयश्च शब्दास्तुरगादिसम्बन्धिनि लक्षका अपि लवणादाविव तुरगादावपि शक्ताएव।गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धिनीरादिशक्तत्वेन गृहीताएव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव। शक्तत्वे पूर्व्वपूर्व्वप्रयुक्तत्वापत्तेः तस्य तद्व्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वय।बोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरुक्तलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च । एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात् । किञ्चानुभावकत्वं यद्यनुभवस्योपधायकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्ज्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्व्वारं तस्याप्याधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तरसप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च नीरसम्बन्धित्वानपायात् । ननु वाक्यमपि लक्षकं भवत्येव कथमन्यथा चित्रगुसखदायस्य लक्षणया चित्रगोस्वामिनां बोधः कथं वा गभीरायां नद्यां घोष इत्यादौ गभीरनदीतीरस्य न हि तत्र नदीपदं तीरलक्षकं गभीरायामित्यस्यानन्वयापत्तेः न हि तीरं गभीरं नापि गभीरपदम् । तथा नद्यामित्यस्यायोग्यतापत्तेः नापि तीरं नदी तस्माद्वाक्यमेव तत्र गभीरनदीतीरलक्षकमिति मीमांसकाः तन्न गभीरायां नद्यामिति विभक्त्यन्तभागस्य तादृक्तीरलक्षकत्वे घोषाद्याधेयत्वेन तदन्वयानुपपत्तेः समासादन्यत्र नामार्थयोर्भेदान्वयस्यायुत्पन्नत्वात् । एतेन तादृग्तीरवृत्तितायामेव तद्भागस्य लक्षणयापि न निस्तारः तादृग्तीरवृत्तेश्च लक्ष्यत्वे घोषादावभेदेन तदन्वयायोगः समासभिन्नस्थले नामार्थयोरभेदान्वये तान्त्रोः समानविभक्तिकत्वस्य तन्त्रत्वात् । न च गभीरायां नद्यीति भागस्यैव तादृक्तीरलक्षकत्वम् । तदर्थे विभक्त्यर्थस्यानन्वयापत्तेर्नहि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् गभीरायां नद्यां व्रजेत्यादितोऽपि गभीरनदीतीरकर्म्मकत्वादिबोधापत्तेश्चाङ्गस्य वाक्यादन्यत्वाच्च तस्माद्गभीरापदं नदीपदं वा तत्र गभीरनदीतीरलक्षकं पदान्तरन्तु तत्र तात्पर्य्यग्राहकमिति सिद्धान्तविदः । चटपटाद्यनुकरणस्य ङ्खंफड़ादिस्तोभस्य च स्वानुभावकत्वमपभ्रंशानामिव शक्तिभ्रमादेव । गौर्व्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न ततोभिद्यते" । तस्य विभागोऽपि दर्शितस्तत्रैव । "जहल्लक्षार्थाजहल्लक्षार्थनिरूढाधुनिक्यादिकाः । लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा । काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जगत्यर्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य । काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहल्लक्षार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य । काचित्लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढा यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य । काचिच्च पूर्व्वपूर्व्वं तादृरूपेणाप्रत्यायकत्वादाधुनिकी यथा घटत्वादिना पटादिपदस्य । आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौणसुपभ्रंशाने यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य । तदेवं विविधलक्षणावत्त्वाल्लक्षकं नामापि जहल्लक्षार्थादिभेदादनेकविधमित्यर्थः । स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्वेतुभवेद्वयुक्तक्रमेण लक्षकाणां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तेरेवैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणाम् अग्नौ शैत्यं स्मृतेदित्यादौ शक्तेन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना सार्द्धं सम्प्रतीतासंसर्गकस्यैव सप्तम्यर्थाधेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य हुबर्थाधेयत्वादेर्घोषादावान्वयबोधायोगात् । न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वात्नान्वयबुद्धौ लक्ष्यार्थस्य प्रवेशः कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यतानुपपत्तेः कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्भिन्नोऽनुभवोपस्थाप्यानुभविकत्वाच्च तस्माच्छक्तेरिव भक्तेरपि ज्ञानसमुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः" ।

लक्षणाभेदेन लक्षकशब्दभेदा बहवः लक्षणाभेदाश्च सा०द०दर्शिताः लक्षणशब्दे विवृतिः। तत्र योगरूढलक्षणमुक्तं शब्दर्ण०। "खान्तनिविशिष्टशब्दार्थस्वार्थयोर्बोधकत्वम्। योगरूढं न यत्रैकं विनान्यस्यास्ति शाब्दधीः। यद्धाम खावयवर्त्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकत् तद्धाम योगरूढं यथा पङ्कजकृष्णसर्पाधर्मादि तद्धि खान्तनिविष्टानां पङ्कादिशब्दानां वृत्तिलभ्येन पङ्कजनिकर्त्रादिना समं स्वघटकस्य पद्मादेरन्वयानुभावकम्। पङ्कजमित्यादितः पङ्कजनिकर्तृ पद्ममित्यनुभवस्य सर्वसिद्धत्वात्। इयांस्तु विशेषोयद्रूढमपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं, मण्डपे शेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य मट्टादेरयोग्यत्वेनान्वयाबोधात्।" योगरूढन्तु पङ्कजादिपदमवयवशक्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात्। अतएव पङ्कजं कृमुदमित्यत्र पङ्कजनिकर्त्तृत्वेन, भूमौ पङ्कजमुत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कृमुदस्थलपद्मयोर्बोध इति वार्त्तिकम्। ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयाबोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थं खान्वयिसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्सदृशरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति खसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापिते पद्मादावन्वय इति चेदपङ्कजवृत्तिः सत्तेत्यादौ खजदक्षरसंयोगेऽपि तत्कथा सुखपङ्कजमित्यादौ च व्यभिचाराद्रूढ्यव्युत्पत्तेः सङ्कोचेनेति गदाधरः। न च धेनुपदस्य धानकर्म्मत्वविशिष्टायां गवीव पङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढिरेवास्तु न तु योगरूढिरिति साम्प्रतम् अन्यत्र क्लृप्तशक्तिकेभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्त्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायाशक्यत्वादनन्वालभ्यस्यैव शब्दार्थत्वात्। यद्यपि कर्त्तर्याचकडप्रत्यय एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवाच्च पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्यत्वमित्युक्तत्वात् कृतिधर्म्मज्ञानत्वयोरिवैकपदार्थयोरपि कर्त्तृपद्मयोर्मिथोऽन्वयस्य सम्भवित्वात् तथाप्यवयवार्थाशक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयबोधविरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्मास्तीत्याद्यभावार्थं भवश्यम्पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढिरूपेवा इतरथा प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया उपस्थापितस्यापि पद्मास्तित्वादिना सहान्वयानुपपत्तेः अतएव पङ्कजादिपदादुपस्थितशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो जात्वापि कर्त्तास्तीत्याकारकौन्मान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यत्रान्वये निराकाङ्क्षत्वादिति वक्ष्यते। किञ्चैवमेकाक्षरकोषावघटितशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढलक्षणया तत्तदर्थानुभावकत्वसम्भवादकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्विलीयेत कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि अकादिशब्दादकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रक्रियेऽपि समानं डादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्वसिद्धत्वात्। नचैवं चित्रगुरित्यादावपि चित्रगोखाद्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अगृहीतान्वयवृत्तिकस्य पुंसस्ततोऽर्थानधिगमेनान्वयानां ग्रहेऽवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति" योगरूढभेदस्तत्रैवोक्तः। "सामासिकं तद्धिताक्तमिति तत् द्विविधं भवेत्। योगरूढं कदन्नस्य समासत्वव्यवस्थितेः। तत् योगरूढं सामासिकं समासात्मकं कृष्णसर्पादि तद्धिताक्तं वासुदेवादि। कदन्नस्य पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्। यौगिकलक्षणविभागौ तत्रैव। "योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम्। समासस्तद्धिताक्तश्च कदन्नश्चेति तत्त्रिधा। यद्धाम खान्तनिविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रति हेतुस्तद्धाम तादृशार्थे यौगिकम्। योगरूढन्तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य तच्च यौगिकं त्रिविधं समासस्तद्धिताक्तं कदन्नश्चेति। इन्द्रोऽपि समासः खघटकशब्दानामाकाङ्क्षया लभ्यस्य भवत्वादिरार्थस्यानुभवोटङ्कतया यौगिकएव। सर्वत्रेदं रूढान्यत्वेन विशेषणीयं नातः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढेऽतिप्रसङ्गः। ब्राह्मणी श्वश्रूः शूद्रे त्वादौ जीवादेः स्त्रीत्ववाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव नातोविभागस्य व्याघातः?'।

वैयाकरणमते समासानां योगरूढत्वमेव यथोक्तम्" वै० भू० । "समासे सत्यपि शक्तिः पङ्कजशब्दवत् । बहूनां वृत्तिधर्माणां वचनैरेव साधने । स्यात्सङ्कोचः तस्मादेकार्थीभाव आश्रितः । चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् । कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः । अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना । लुप्तत्यागश्चास्ति तव तत् किं शक्तिं न कल्पयेः । समास इति वृत्तिमात्रोपलक्षणम् । "सनर्थः पदविधिः "इत्यत्र पदमुद्दिश्य योविधीयते समासादिः स सनर्थः विग्रहवाक्याभिधानशक्तः सा साधुरिति स्वार्थस्य भाष्यज्ञापात् । पदोद्देश्यकविधित्वञ्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव । विशिष्टशक्तिस्वीकर्तॄणां मते दूषणं शक्तिसाधकमेवेत्याशयेनाह पङ्कजशब्दवदिति । पङ्कजनिकर्तुरपि योगादेरुपस्थितौ तत्रापि समुदायशक्तिर्न सिध्येत् । न च पङ्कत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यम् । चित्रगवादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनाया दुष्परिहरत्वात् । लक्षणयैव तथोपस्थितिरिति चेत् पङ्कजपदेऽपि सा सुवचा । एवं रथकारपदेऽपि तथा च "वर्षासु रथकारोऽग्निमादधीत" इत्यत्रापि विना लक्षणां लुप्तप्रयोगेण ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वकल्पनमयुक्तं स्यादिति भावः । साधकान्तरमाह बहूनामिति उक्तेर्धर्म्मा विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैरेव साधने गौरवमित्यर्थः । अयं भावः विशिष्टशक्त्यस्वीकारे राज्ञः पुरुष इत्यत्रेव राजपुरुष इत्यत्रापि स्वाद्यविशेषाद्यन्वयः राजपदेन स्वतन्त्रोपस्थितिसत्त्वात् । विभाषावचनञ्च समासनियमवारणाय कार्य्यमिति । ननु "सविशेषणानामिति" वचनान्न विशेषणाद्यन्वयः विभाषावचनञ्च कृतमेवेत्याशङ्क्य समाधत्ते वचनैरेवेति । न्यायसिद्धमेव दूषणम् । व्यपेक्षाविवक्षायां वाक्यस्य एकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसम्भवात् । सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासम्भवात् न्यायसिद्धमिति भावः । अतएव व्यपेक्षापक्षसङ्गाय्य अर्थतस्तिङ् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावस्ततो विशेषः स वक्तव्य इति भाष्यकारेण दूषणमभ्युक्तम् । तथा धवखदिरौ, निष्कौशाम्बिगोरथो हतघटो गुडधानाः केशचूडः सुवर्णालङ्कारो द्विदाराः सप्तपर्ण इत्यादावितरेतरयोगादिकान्तयुक्तापूर्णमिश्रसङ्घातविकारसुच्प्रत्ययलोपो, वीप्साद्यर्थोवाचनिको वाच्य इत्यतिगौरवं स्यादिति । दूषणान्तरमाह । चकारादीति आदिना घनश्यामः हंसगमनइत्यादाविवादीनां पूर्व्वोक्तानाञ्च संग्रहः । दूषणान्तरमाह । बहुव्युत्पत्तिभञ्जनमिति । अयमाशयः चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा । न च तत्र लक्षणा प्राप्नोदकोग्राम इत्यादौ तदसम्भवात् । प्राप्निकर्त्रभिन्नसुदकमित्यादिबोधोत्तरं तत्सम्बन्धियामलक्षणायामप्युदककर्तृकप्राप्निकर्म्मयामइत्यर्थाभावात् । प्राप्नोतीति क्लृप्रत्ययस्यैव कर्तृर्थकस्य कर्म्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्निकर्म्मेति स्यात् । अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः प्राप्नेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च । अन्यथा देवदत्तः पचतीत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनानन्वयानापत्तेः । अथोदकाभिन्नकर्तृका प्राप्निरिति बोधोत्तरं तत्सम्बन्धीयामो लक्ष्यत इति चेन्न प्राप्नेर्धात्वर्थतया क्लृ्यर्थकर्तारं प्रति विशेष्यताया असम्भवात् । प्रकृतिप्रत्ययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः । प्राप्नपदे प्राप्नेर्विशेष्यत्वे तस्यैव नामार्थत्वेनोदकेन समभेदान्वयापत्तेश्च । एवमूढरथः उपहूतपशुः उद्धृतौदनो बहुपाचिकेत्यादावपि द्रष्टव्यम् । अत्र हि रथकर्म्मकवहनकर्त्ता, पशुकर्म्मकोपहरणोद्देश्यः, ओदनकर्म्मकोद्धरणावधिः बहुपाककर्त्राधिकरणमिति बोधाभ्युपगमात् अतिरिक्तशक्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्निकर्म्मत्वविशिष्टे प्राप्नोदकइत्यादिसमुदायशक्त्यैव निर्वाहइति भावः । साधकान्तरमाह । अषष्ठ्यर्थेति । अयं भावः चित्रगुरित्यादिषु चित्रगवस्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते । न च तत्र लक्षणा सा हि न चित्रपदे चित्रस्वामी गौरिति बोधापत्तेः । गवादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र चित्रादेरन्वयायोगात् । नच चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगवस्वामी गोपदेन लक्ष्यतेइति वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात् । नच गोपदे साक्षात् सम्बन्धएव विनिगमक इति वाच्यम् । एवमपि प्राग्नोदकः कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः । यौगिकानां कर्त्राद्यर्थकतया साक्षात्सम्बन्धाविशेषात् । नच पदद्वये लक्षणेति नैयायिकोक्तं युक्तम् बोधार्द्धत्तिप्रसङ्गात् । न च मरुत्वान् तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयो-

रिति न बोधापत्तिरिति वाच्यम् एवमपि विनिगमनाविरहादवश्येन लक्षणाया असम्भवात् । नच चरमपदे एव सा प्रत्ययार्थान्वयानुरोधात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् एवं हि बहुव्रीहावसम्भवापत्तेः "अनेकमन्यपदार्थे" इत्यनेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे तद्विधानात् । किञ्च एवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् पूर्ब्बवर्णानां तात्पर्य्यग्राहकत्वेनोपयोगसम्भवात् एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदलाबुदकपटमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः । एवञ्च अषष्ठ्यर्थबहुव्रीहौ वृत्युत्पत्त्यन्तरकल्पना उक्तयुक्तेः अगत्या शक्त्यन्तरकल्पनेत्यर्थः लुप्तत्यागः इत्यस्य लुप्तयत्योपपत्तिरिति वृत्युत्पत्तित्यागश्च तवास्ति तत्किम् सर्व्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः । यत्तु वृद्धैत्यादिनो नैयायिकमीमांसकादयः न समासे शक्तिः राजपुरुष इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुषइति बोधोपपत्तेः । अतएव राज्ञः पदार्थैकदेशतया न तत्र शोभनत्वेत्यादिविशेषणान्वयः । न वा घनश्यामनिष्कोशाम्बिगोरथइत्यादौ इवादिप्रयोगापत्तिः उक्तार्थतया इवकारादिपदप्रयोगासम्भवात् । न वा "विभाषेति" सूत्रानावश्यकत्वम् लक्षणया राजिसम्बन्ध्यभिन्नइति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात् । नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका तत्तावयवशक्तिभजानतोऽपि बोधात् । नच शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति । अतएव राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः । नच चित्रगुरित्यादौ लक्षणासम्भवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवः बहुवृत्युत्पत्तिभङ्गापत्तेरिति वाच्यम् प्राप्तोदकइत्यादावुदकपदे एव लक्षणास्वीकारात् । पूर्ब्बपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव सङ्केतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसम्भवात् । प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्याद्योत्तरपदे एव सा कल्प्यतइति विशेषः स्वीकृतश्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकाचार्य्यैरित्याहुः । अत्रोच्यते । समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् अर्थवत्त्वाभावात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्याप्रवृत्तेः । नच "कृत्तद्धितसमासा" श्चेत्यत्र समासग्रहणात् सा । तस्य नियमार्थतया भाष्यसिद्धतायां वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अयोगसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात् । अथ तिप्तस्झि इत्यारभ्य ङ्योस्सुविति तिप्प्रत्याहारोभाष्यसिद्धः तमादायातिप्प्रतिपदिकमित्येव सूत्रतां कृतमर्थवदादिसूत्रद्वयेन । समासग्रहणञ्च नियमार्थमस्तु तथा च सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञाधारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तिदवस्त्वभावेव । तथा च प्रातिपदिकसंज्ञारूपं कार्य्यमेवार्थवत्त्वमनुभाषयति धूमइव वह्निम् । किञ्चैवं चित्रगुमानयेत्यादौ कर्म्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् । यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यतइति तन्न उपकुम्भं वर्त्तयिष्यतीत्यादौ पूर्ब्बपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि सन्निधानमेव आनुपूर्व्यसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यानुपूर्व्या सा तदर्थगतं स्वार्थं बोधयति । समासे च समस्यमानपदोत्तरमेवानुपूर्व्यमिति वाच्यम् अर्थवत्सूत्रेण विशिष्टस्यैव विधानमनुपूर्व्यसनात् । अथ प्रकृतित्वान्वये विभक्त्यर्थान्वय इत्येव कल्प्यतइति चेत्तर्हि पङ्कजमानय दण्डिनं पश्य शूलिनं पूजयेत्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गात् अघटमानयेत्यत्र घटेष्वानयनान्वयापत्तेश्च । न च दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः । पाकाद्धीतः धर्म्मात्सुखी इत्यादौ पाकधर्म्मादिहेतुतायां रूपसुखादावनन्वयप्रसङ्गात् । यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति तन्न घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाङ्क्षयारणाय तथा प्रकृत्यर्थत्वस्यावश्यकत्वात् । अथ प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमितिचेन्न गामानयति कृष्णोदण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात् । अथ समस्यमानपदार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न अकृत्रिमकल्पनां कृत्रिमव्युत्पत्तित्यागस्त्वामेव्य सदुदयशक्तिकल्पनस्यैव युक्तत्वादिति दिक् । अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषः

चित्रगुः नीलोत्पलमित्यादौ सर्व्वत्रान्वयप्रसङ्गः। राजपदादेः सम्बन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुतायां आवश्यकत्वात् पुरुषादेस्तथात्वाभावात्। तण्डुलः शुक्ल इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः। शुभ्रेण तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्श्विकोवान्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादवश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः। किञ्च राजपुरुषइत्यादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः राज्ञः पुरुष इति विवरणविरोधात् समानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयोन स्यात् नान्त्यः राजसम्बन्धरूपः पुरुष इति बोधप्रसङ्गात् विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे। अतएव 'षष्ठ्यर्थः प्रथमभक्तः' इत्यत्र न भक्तमुद्दिश्य प्राथम्यविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति तृतीये, "अङ्गैः खिष्टकृतं यजति' इत्यत्राङ्गानुवादेन न त्वित्वविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति दशमे च निरूपितं सङ्गच्छते। सङ्गच्छते चारुण्याधिकरणारम्भः। अन्यथा "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यत्रारुण्यपदवदितरयोरपि एकत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याङ्गदशङ्काया असम्भवादिति प्रपञ्चितं भूषणे। तस्मात्प्रभासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेयइत्यास्तां विस्तरः"।

आख्यात त्रि० आ+ख्या–कर्मणि क्त। १कथिते। आख्यायतेऽनेन वा०करणे क्त। तिङ्रूपे प्रत्यये तल्लक्षणमाह शब्दश० "धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने। समर्थः स्वार्थयत्नस्य शब्दोवाख्यातसञ्ज्ञकः" इति। व्याख्यातं चैतत् स्वेनैव "धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दो वाख्यातं तदेव च तिङ् इत्यर्थाल्लभ्यते तिङाख्यातयोः पर्य्यायत्वात्। पाकस्तैत्तस्येत्यादौ नामार्थेनैव विशिष्टस्वार्थकर्त्तृत्वस्याभिधायकः षष्ठ्यादिकोन तु धात्वर्थेन विशिष्टस्य। चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नस्य यत्नस्य विधेयतया बोधकावपि नामधातू न स्वार्थस्य। चैत्रः पाचक इत्यादौ तु धात्वर्थविशेषितस्य यत्नस्य न विधेयता किन्तु कर्त्तुरेव कृतां धर्म्मिग्रहत्वात्तत्रान्यथा पाचकश्चैत्र इत्यादिकम योग्यमेव प्रातिपादकार्थयोः पाचकचैत्रयोर्भेदेनान्वयस्याव्युत्पन्नतया कृदर्थकृतेश्चैत्रादावन्वयायोगाच्च। अयं पक्तुं कालइत्यादौ तुमादिना धात्वर्थावच्छिन्नोऽनुकूलत्वादिः, इयं चिकीर्षेत्यादौ च सनादिनेच्छादिरेव विधेयत्वेनानुभाव्यते इति न तेष्वतिप्रसङ्गः। अत्रेदं तत्त्वम्। जीवनयोन्यादिनिखिलयत्नगतं यत्नत्वमेव तिङः शक्यतावच्छेदकं न तु चेष्टाया जनकत्वस्य चिकीर्षाया वा जन्यत्वस्यावच्छेदकतया सिद्धं प्रवृत्तित्वम्। चैत्रोनिश्वसितीत्यादितोऽपि श्वासाद्यनुकूलप्रयत्नस्य प्रतीतेः। तिङर्थकृतौ च धात्वर्थस्य तं करोमीतिप्रतीतिनियामकः साध्यत्वाख्यविषयतासम्बन्धेनेष्टसाधनोपधायकत्वलक्षणमनुकूलत्वं वा संसर्गमर्य्यादया भासते तथैव साकाङ्क्षादतोगत्यादिगोचरनिवृत्तिदशायां गच्छतीत्यादिको न प्रयोगः। "तत्र निश्वासवत्त्वमात्रप्रतीतावपि प्रयत्नत्वमेव तिङः शक्यतावच्छेदकं न तु प्रवृत्तित्वं पचतीत्यतः पाकानुकूलतिमानिति प्रतीतेः नहि प्रवृत्तित्वमेव कृतित्वं पाके प्रवृत्तोऽस्मीत्यस्याप्यनुभवस्य पाकं करोमीत्यतोविषयवैलक्षण्यस्य सर्वसिद्धत्वात्नित्यकृतौ रागप्रयोज्यस्य प्रवृत्तित्वस्य बाधादीश्वरः करोतीत्यादिवाक्यस्यायोग्यतापाताच्च। निविड़निखातस्तु पुरुषः समुत्थानगोचरप्रयत्नवानपि न तदुपधायकप्रयत्नवान् अतस्तत्रायमुक्तिष्टतीत्यादिकोन प्रयोगः नचैवमीश्वरः पचतीत्यपि स्यात् तस्यापि पाकानुकूलप्रयत्नवत्त्वादिति वाच्यं तिङर्थकृतेरवच्छेदकत्वेनैव संसर्गेण नामार्थान्वयस्य व्युत्पन्नत्वादङ्गुली पचतीत्यादि प्रयोगस्येष्टत्वात् अन्यावयविनिष्ठावच्छेदकत्वस्यैव तादृशतिङर्थे कृतेः संसर्गत्वे लाघवाच्च। नित्यप्रयत्नव्यावृत्तसंसर्गानुकूलत्वविशेषस्य तिङर्थकृतौ धात्वर्थस्य संसर्गत्वमित्यभ्युपेयम्"। ईश्वरो जानातीच्छति रथोगच्छतीत्यादौ च ज्ञानादिमत्त्वमात्रप्रतीतेः समवायित्वे, चैत्रोजानातीत्यादावच्छेदकत्वे, बुद्धिरवगाहते घटोभासत इत्यादौ देशिकाश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे, तिङोनिरूढ़लक्षणा। कृतित्ववदाश्रयत्वादेरखण्डत्वे तदवच्छेदेऽपि ज्ञानेच्छादेरपि तिङः शक्तिरेव। कृत्यादिकस्त्ववयवः प्रयत्नस्यैवावच्छेदको न तु ज्ञानेच्छादेरपि प्रमाणाभावादतः करोजानातीत्यादिको न प्रयोगः। प्रागुक्तैव वा रीतिरत्रापि। पचः पतति स्यन्दते इत्यादावपि पतनादेः समवायित्वमेव तिङानुभाव्यते न तु तदनुकूलं गुरुत्वद्रवत्वादि तेन कृतितुल्यशरीरेषु तेष्वपि तिङः शक्तिरापाद्यते। पटानां शतं पततीत्यादौ च शतपदार्थस्यैकदेशान्वयसंख्यायां

षष्ठ्यर्थपर्याप्तेरन्वयात् संख्यायाः पतनादिसमवायित्वविरहेऽपि न क्षतिः पटानां शतं संख्या इत्याद्यनुरोधेनैव शताद्येर्गुणवाचित्वसम्भवात् ।

तत्र क्त्यादिकं नाख्यातसमार्थः किन्तु कालः संख्या च तयोः प्रकारान्तरालभ्यत्वात् चैत्रः पचति रथोगच्छतीत्यादौ धात्वर्थस्यैव प्राक्कालत्वादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात् मैत्रः पच्यत इत्यादितोमैत्रादेः कर्तृत्वादिना तण्डुलः पचतीत्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावननुयेन धात्वर्थ एव धर्मिणि नामार्थस्य भेदेनानुयेऽव्युत्पन्नेन तु नामार्थेऽपि धात्वर्थस्य । नचैवं ज्ञानं चैत्र इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिण्यननुयप्रसङ्गः, तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनानुयस्याव्युत्पन्नत्वादेव तदसम्भवात् इति प्राभाकराः । तदसत् धात्वर्थानुविद्धस्वार्थकर्तृतायामेव लड़ादेः स्वोपस्थाप्यवर्त्तमानत्वाद्यनुभावकत्वव्युत्पत्तेः क्त्यादेस्तिङर्थत्वं विना तदनुपपत्तेः अन्यथातिप्रसङ्गात् । न च प्रकृत्यर्थ एव तिङः स्वार्थवर्त्तमानत्वाद्यनुभावकत्वनियमः पाकर्मनिष्पाद्यक्रियान्तरव्यासक्तेऽपि पुरुषे पचतीतिप्रयोगापत्तेः तदानीमपि पाकस्यानुवर्त्तमानत्वात् तिङाद्यन्तधात्वर्थस्य पाकादेर्वर्त्तमानक्त्यादिसम्बन्धेनैव प्रथमान्तस्य शाब्दोऽर्थे साकाङ्क्षत्वाच्चैवमिति चेत् किं कालस्यापि तिङर्थत्वप्रत्ययया संसर्गविधयैव तस्य लभ्यत्वात् । पचतीत्यादितोवर्त्तमानत्वादिवत्कृतिप्रकारकप्रतीतेरानुभविकत्वाच्च । किञ्च धात्वर्थस्यैव क्त्यादिसम्बन्धेन चैत्राद्यन्वये पचत्यपि चैत्रे नायं पचतीतिप्रयोगप्रसङ्गः संयोगादिसम्बन्धेन पाकाद्यभावस्य तत्र सत्त्वात् कर्तृत्वादेर्नियामकतया तत्सम्बन्धावच्छिन्नपाकाद्यभावस्यालीकत्वेन प्रत्येतुमशक्यत्वात् । एतेन मण्डनमते फलस्य धात्वर्थत्वात् तदनुकूलक्रियैवाख्यातेन चैत्रादावनुभाव्यते इति कृतेस्तिङर्थत्वाभावादुक्तलक्षणमसम्भवीत्यपि प्रत्युक्तं फलस्य धात्वर्थत्वे संयोगोगुणइतिवद्भवतिर्गुणोऽनेकाश्रिता इत्यादिप्रयोगापत्तेश्च न हि भावकृतामपि क्रियार्थः प्रमाणाभावात् । ननु यदि स्वार्थकर्तृत्वएव लड़ादिना वर्त्तमानत्वमनुभाव्यते इति नियमः कथं तर्हि कोऽत्र पचत इत्यादितः पाकादौ वर्त्तमानत्वधीरिति चेत् कएवमाह तत्राप्येकपदोपात्तत्वेन कर्माख्यातोपस्थापिते कर्तृत्वएव वर्त्तमानत्वान्वयात् । एवन्तु परं विशेषोवत् कर्तृविशिष्टेन चैत्रेण धात्वर्थस्य विशेष्यत्वेन, कर्म्मविशिष्टेन तु तस्य विशेषणत्वेन स्वार्थकर्तृत्वमनुभाव्यते तथैव साकाङ्क्षत्वात् । एतेन चैत्रेण पक्तमित्यादाविव चैत्रेण पच्यते इत्यत्रापि तृतीययैव कर्तृत्वमनुभाव्यते नत्वाख्यातेन, तिङर्थकृतेर्धात्वर्थविशेष्यत्वनियमादिति दीधितिरुन्नतमप्यनादेयम् एकपदोपात्ततया स्वार्थएव कर्तृत्वे शक्तस्यानजादेरिव लड़ादेर्वर्त्तमानत्वबोधकतया सुबर्थकृतौ तदन्वयासम्भवात् सुबर्थे तिङर्थान्वयस्याऽदृष्टचरत्वाच्चेति । शाब्दिकास्तु चैत्रः पचतीत्यादितः पाकादिकृतिमत्तयैव तत्कर्तृभेदेनापि चैत्रादेरन्वयानुभविकत्वात् कृतिरिव कर्त्तापि तिङर्थः कृतित्वमपेक्ष्य कर्तृत्वस्य गुरुत्वात् तदाख्यातस्य शक्यतावच्छेदकमिति तु रिक्तं वचः लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदकेऽपि शक्तेरसत्त्वमते तद्गुरुत्वस्याकिञ्चित्करत्वात् एकैकात्मनिष्ठानामनन्तकृतीनां शक्यत्वमपेक्ष्य निखिलात्मनामेव कर्तृत्वे शक्यतायां विपरीतलाघवाच्च । न च कर्तृनुभवजनकतया सङ्केतितत्वरूपं कर्तृशक्तत्वमेव तिङामस्तु, कर्तृन्वयानुभवजनकतासत्त्वे तत्प्रकारकेश्वरसङ्केतस्य तत्रावश्यम्भावादीश्वरेच्छायाः सदर्थायगाहित्वनियमादन्यथा कर्तृनुभवस्वरूपायोग्यत्वादेव तिङां कर्त्तरि शक्तत्वसम्भवे कृत्यपेक्षया कर्त्तरि गुरुत्वोपन्यासस्योन्मत्तप्रलपितत्वापत्तेः । अथैवं घटपदस्यापि लक्षणादिना घटाद्यनुयानुभावकत्वात् तत्प्रकारकनित्यसङ्केतवत्त्वेन तदपि घटशक्तं स्यात्, न स्यात् पटपदं घटे न शक्तमित्यादिव्यवहारस्य प्रामाणिकत्वेन घटादिपदनिष्ठस्यैव घटानुभावकतया नित्यसङ्केतितत्वस्य घटशक्तित्वात् कृत्याख्यातं न कर्तृशक्तमित्येवं व्यवहारस्यासत्त्वात् प्रत्युत पाणिन्यादिप्रामाणिकैस्तिङः कर्तृशक्तत्वेन व्यवहृतत्वात् । एतेन गुणवचनस्य नीलादेर्गुणिशक्तत्वमपि व्याख्यातम् इति प्राञ्चः" ।

आख्यातार्थस्य धात्वर्थादौ विशेषणतयैवान्वय इति तु वैयाकरणाः यथाह वै०भू०सा०। "फलव्यापारयोर्धात्वोराश्रये तु तिङः स्मृताः । फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" इति । अस्य व्याख्यायाम् 'कर्त्तरि कृत्' "तः कर्मणि च" पा०सूत्राभ्यां चकारेण कर्त्तरि कर्मणि च तिङः शक्तिरिति लाभे तत्र व्यापाराश्रयः कर्त्ता फलाश्रयः कर्मेति फलव्यापाररूपयोः विशेषणयोर्धात्वोरेवोपस्थाप्यत्वात् अमुख्यलभ्यस्याश्रयस्यैव तिङर्थत्वम् इत्येवं व्यवस्थाप्येत्यमाह । "पदार्थं निरूप्य वाक्यार्थं निरूपयति

फले इत्यादि। विक्लित्त्यादि फलं प्रति। तिङर्थः कर्तृकर्मसंख्याकालाः। तत्र कर्तृकर्मणो फलव्यापारयोर्विशेषणं, संख्या कर्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्म्मणि, समानप्रत्ययोपात्तत्वात्। तथाचाख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्तृकर्म्मोपस्थितिर्हेतुरिति कार्य्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो वाच्यः सोऽपि चन्द्रइव सुखं दृश्यते, देवदत्तोभुङ्क्ते व्रजतीत्यादौ चन्द्रक्रियार्थयोः आख्यातार्थाननुयादितराविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे। कालस्तु व्यापारे विशेषणम्। तथा हि "वर्त्तमाने लट्" इत्यत्राधिकाराद्धातोरिति लब्धम् तच्च धात्वर्थं वदत्याधाराद्व्यापारमेव व्याहरयतीति तत्रैव तदन्वयः। न च संख्यावत् कर्तृकर्मणोरेवान्वयः भङ्ग्याः अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः अयाक्षीदित्यनापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्। न चामवातजड़ीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः। परयत्नस्याज्ञानाद्प्रयोगात्। किञ्चित्रेष्टादिनावगतौ चायमुत्तिष्ठति यत्नभावात् फलन्तु न जायत इति लोकप्रतीतेरिष्टत्वात्। एवञ्च तिङर्थौ विशेषणमेव भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि "भावप्रधानमाख्यात सत्वप्रधानानि नामानीति" निरुक्तोक्तेः भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते। अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथा च पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् प्रथमान्तमृगस्य धावनक्रियाविशिष्टस्य दृष्टिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवम् अप्रथमासामानाधिकरण्यात् यत्तप्रसङ्गः। एवमपि द्वितीयायादुर्व्वारत्वेन पश्य मृगदित्यादिवाक्यस्यैवासम्भवापत्तेः। न च पश्येत्यत्र तमिति कर्म्माध्याहार्य्यम्। वाक्यभेदप्रसङ्गात् उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वात् अध्याहारे अनन्वयापत्तेश्च। एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिभावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावोद्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु क्त्वाजन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतुः पश्य मृगोधावति, पचति भवतीत्याद्यनुरोधादिति दिक्। इत्थञ्च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना, पच्यते इत्यत्रैकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटोनश्यतीत्यत्रापि घटाभिन्नैकाश्रयकोनाशानुकूलोव्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्। अतएव तस्यां सत्यां नश्यति, तदत्यये नष्टः, तद्भावित्वे नङ्क्ष्यतीति प्रयोगः। देवदत्तोजानातीच्छतीत्यादौ च देवदत्ताभिन्नैकाश्रयकोज्ञानेच्छाद्यनुकूलोवर्त्तमानो व्यापार इति बोधः स चान्तत आश्रयतैवेति रीत्योह्यम्"। एवञ्च वैयाकरणमते सुबभिन्नत्वे सति संख्याबोधकप्रत्ययत्वमाख्यातत्वमिति लक्षणम् "सुपां कर्म्मादयोऽप्यर्था संख्या चैव तथा तिङामित्युक्तेः यद्यपि आख्यातसामान्यस्य संख्यासामान्यशक्तत्वज्ञापकं सूत्रं नास्ति तथापि लड़ादेर्यैकवचनादीनां तत्तत् संख्याशक्तताज्ञापकसूत्रेण आदेशगतं तथात्वं स्थानिनि लकारे कल्पितमिति संख्याबोधनयोग्यत्वमादाय लक्षणसमन्वय इति बोध्यम् "आख्यातमाख्यातेन क्रियासातत्ये" मयूर० गणसूत्रम् तत्र आख्यातपदं च तदन्तपरम् "प्रत्ययग्रहणे तदन्तग्रहणम्। इति नियमात् ३आख्यातान्ते च।

आख्याति स्त्री आ+ख्या–क्तिन्। कथने।

आख्यात त्रि० आ+ख्या–क्त। उपदेशके। "आख्यातो यवयोगे" पा०।

आख्यान न० आ+ख्या–भावे ल्युट्। १कथने। २पूर्व्ववृत्तकथने "आख्यानं पूर्व्ववृत्तोक्तिः" सा० द०। "यथा देवः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० ३प्रतिवचने च। प्रआख्यानयोः" पा० "विभाषाख्यानपरिप्रश्नयोरिञ्" पा०। करणे ल्युट्। ४भेदके धर्म्मे। "लक्षणेत्थम्भूताख्यानेत्यादि" पा० इत्थम्भूतः कञ्चित् प्रकारं प्राप्त आख्यायते अनेन इति व्युत्पत्तेः कञ्चित्प्रकारं प्राप्तस्य भेदकोधर्म्म इति सूत्रार्थः यथा भङ्क्तोविभुभि। ५आर्ष महाकाव्यान्तर्गतसर्गभेदे तेन हि कथाविशेषेण वर्णनीयचरिताख्यानात्तथात्वम् महाकाव्यं लक्षयित्वा

तदीयसर्गनामकरणे विशेषमाह" सा० द० "नामास्य सर्गोपादेयकथया सर्गनाम तु" इत्यभिधाय "अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः" यथा भारते रामोपाख्यानम्। नलोपाख्यानं शकुन्तलोपाख्यानमित्यादि आख्यान+अस्त्यर्थे अर्श० अच्। ६प्रसिद्धाख्यानसंज्ञकसर्गयुक्ते आर्षमहाकाव्यभारतादौ। "स्वाध्यायं श्रावयेत् पित्रे धर्म्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च" मनुः साङ्गोपनिषदान् वेदान् चतुराख्यानपञ्चमान्" भा०व०। स्वार्थे कन् तत्रैव "नाटकाख्यानकादेश्चव्याख्यानादिक्रियानिपुणैः" काद०।

आख्यानकी स्त्री "आख्यानकी तौ जगुरू गओजे जतावनोजे जगुरू गुरुश्चेदिति" लक्षिते विषमवृत्तभेदे।

आख्यायक पु० आ+ख्या–ण्वुल्। परोक्षाख्यात्यत्र कथकेऽर्थे दूते "आख्यायकेभ्यः श्रुतसूनुवृत्तिः भट्टिः" २कथकमात्रे त्रि०।

आख्यायिका स्त्री आ+ख्या–ण्वुल् "आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तम् गद्यं क्वचित् क्वचित्। कथांशानां व्यवच्छेद आश्वास इति बध्यते। आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्। अन्योपक्षेपेणाश्वासः मुखे भाव्यर्थसूचनम्" सा० द० उक्ते कथाभेदे कथा च "कथायां सरसं वस्तु गद्यैरेव विनिर्म्मितम्। क्वचित्तत्र भवेदार्य्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनं" मित्युक्तलक्षणयुक्ता तत्र आख्यायिका यथा हर्षचरितादि" कथा कादम्बर्य्यादिः। २उपलब्धार्थबोधककथायाञ्च" अमरः।

आख्यायिन् त्रि० आ+ख्या–णिनि। १ कथके। २आवेदके दूतादौ च "रक्षस्याख्यायिवत् खनसि मृदु कर्षन्तिकचरः" शकु०। "रक्षस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्" याज्ञ०

आगत त्रि० आ+गम–क्त। १आयाते, २उपस्थिते, ३प्राप्ते च। "क्षेयं दुःखमनागतम्" पात० "ऋणादध्यागतं द्रव्यं कृतमध्युद्धरेत्तु यत्" स्मृतिः। "पित्रागतम् पित्र्यमिति" दायभा०। "तत आगतः" मा०। आगता वत जरेव हिमानी सेव्यतां सुरतरङ्गिणी" उद्भटः भावे क्त। ४आगमने न० "गतागतं कामकामा लभन्ते" गीता।

आगति स्त्री आ+गम–क्तिन्। १आगमने "लोकस्याश्च गतागतिम्" रामा०। २प्राप्तौ च तासामभ्यर्थुरागतौ यथो हवीव मोदते" ऋ०२,५,६। वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च। आत्मा गत्वा तथाऽऽगत्वा" याज्ञवल्क्यः।

आगत्य(स्य) अव्य० आ+गम–ल्यप् वा मोलोपे तुक्। आगमनं कृत्वेत्यर्थे तत्त्वमागत्य सत्येन" याज्ञ०। "आगत्य बिल्वशाखायां चण्डिके! कुरु सन्निधिम्" पुरा०।

आगन्तव्य त्रि० आ+गम–तव्य। १आगम्ये प्राप्ये "आगन्तव्यं तु नोदृष्टं पुनराश्रममण्डलम्" भावे तव्य। २अवश्यागमने न० आगन्तव्य झटितिमधुरामण्डलात् गोपकान्ते! पदाङ्कदूतम्।

आगन्तु पु० आ+गम–तुन्। १अनियतस्थायिनि अतिथौ "वैदर्भमागन्तुमजं नृपेशम्" रघुः। २कृठादुपस्थिते च आगन्तुना सह मैत्री न कर्त्तव्या" हितो०। ३आगमनशीले त्रि०। स्वार्थे कन्। आगन्तुकोऽप्यत्र।

आगन्तुज त्रि० आगन्तोः कृठादुपस्थितात् जायते जन–ड। कृठोपस्थितजाते रोगादौ। "आगन्तुजे भिषग्रोगे शस्त्रेणोत्कृत्य यत्नतः"। "दोषागन्तुजमृत्युभ्योरमन्त्रविशारदौ" सुश्रुतः।

आगम पु० आ+गम–घञ्। १आगतौ २प्राप्तौ २उत्पत्तौ च "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता, आगम्यते प्राप्यतेऽनेन करणे घञ्। ४सामाद्युपाये "आगमैः सदृशारम्भ आरम्भसदृशोदयः" रघुः आगम्यते स्वयमनेन। स्वत्वप्रापके ५क्रयप्रतिग्रहादौ "आगमोनिष्फलस्तस्य भुक्तिःस्तोकापि यत्र नो" या० स्मृतिः "अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि" स्मृतिः" यादृगागमस्य प्रामाण्यं तन्निरूपितम् मिता०। "भोगमात्रस्य स्वत्वव्यभिचारात् कीदृशोभोगः प्रमाणमित्यत आह। "आगमोऽभ्यधिकोभोगाद्विना पूर्व्वक्रमागतात्" या०स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः। स भोगादभ्यधिकोबलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात्। यथाह नारदः। "आगमेन विशुद्धेन भोगोयाति प्रमाणताम्। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति"। न च भोगमात्रात्स्वत्वावगमः परकीयस्याप्यपहारादिनोपभोगसम्भवात्। अतएव "भोग तु केवलंयस्तु कीर्त्तयेद्वागमं क्वचित्। भोगच्छलापदेशेन विद्धेयः स तु तस्करः" इति स्मर्य्यते। अतश्च सागमोदीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तम्भवति। तथा च स्मर्य्यते। "सागमो दीर्घकालत्वाविच्छेदोऽन्यरवोज्झितः। प्रत्यर्थिसन्निधानञ्च परिभोगोऽपि पञ्चधेति"। क्वचित्,आगमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह। विना पूर्व्वक्रमागतादिति।

पूर्व्वेषां पित्रादीनां त्रयाणां क्रमः पूर्व्वक्रमस्तेनागतो यो भोग-स्तस्माद्विना आगमोऽभ्यधिक इति सम्बन्धः। स पुनरागमाद-भ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः तत्राप्यागमज्ञान-निरपेक्षो न सत्त्वनिरपेक्षः सत्ता तु तेनैवावगम्यत इति बोद्ध-व्यम्। विना पूर्व्वक्रमागतादित्येतच्च स्मार्त्तकालप्रदर्शनार्थम्। "आगमोऽभ्यधिकोभोगादिति"च स्मार्त्तकालविषयम्। अतश्च स्मरणयोग्ये काले योग्यानुपलब्ध्यागमाभावनिश्चयसम्भवादा-गमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम्। स्मार्त्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासम्भवादागमज्ञान निरपेक्ष एव सन्ततो भोगः प्रमाणम्। एतदेव सृष्टीक्षतङ्काल्यायनेन। "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते स्मार्त्तेत्वनुगमाभावात् क्रमात् त्रिपुरुषागता"। स्मार्त्तश्च कालो वर्षशतपर्य्यन्तः "शतायुर्वै पुरुष इति" श्रुतेः। अनु-गमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चया-भावादिति। अतश्च वर्षशताधिको भोगः सन्ततोऽप्रतिरवः प्रत्यर्थिप्रत्यक्षस्यागमाभावे चानिश्चिते अव्यभिचारादाच्छि-न्नागमः स्वत्वं गमयति। स्मार्त्तेऽपि कालेऽनागमस्मृति-परम्परायां सत्यां न भोगः प्रमाणम्। अतएव "अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि। चौरदण्डेन तस्मात्तं दण्डयेत्-पृथिवीपति"रित्युक्तम्। न चानागमन्तु यो भुङ्क्त इत्येकवचन-निर्द्देशाद्बहून्यब्दशतान्यपीत्यपिशब्दप्रयोगात् प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यं द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् नचैतदिष्यते "आदौ तु कारणज्ञानं मध्ये भुक्तिस्तु सागमेति" नारदस्मरणात्। तस्मात् सर्व्वत्र निरागमोपभोगे "अनागमन्तु योभुङ्क्त इत्येतद्दृष्टव्यम् यदपि "अन्यायेनापि यद्भुक्तं पिता पूर्व्वतरैस्तिभिः। न तच्छक्यमपाकर्त्तुं क्रमात्त्रि-पुरुषागतमिति"। पिता सह पूर्व्वतरैस्तिभिरिति योज्यम्। तत्रापि क्रमात् त्रिपुरुषागतमित्यस्मार्त्तकालोपलक्षणम्। त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भ-वाद्द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गः तथा सति "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यत" इति स्मृतिविरोधः। "अन्यायेनापि यद्भुक्तमित्येतच्चा-न्यायेनापि भुक्तमपकर्त्तुञ्च शक्यं किमुनरन्यायानिश्चय-इति व्याख्येयमपिशब्दश्रवणात्। यच्चोक्तम्। "यद्दिनाग-ममत्यन्तभुक्तं पूर्व्वैस्तिभिर्भवेत्। न तच्छक्यमपाकर्त्तुं क्रमात् त्रिपुरुषागतमिति" तत्राप्यत्यन्तागमं विनेत्यत्यन्त मुपलभ्यमानागमं विनेति व्याख्येयम्। न पुनरागम स्वरूपं विनेति आगमस्वरूपाभावे भोगशतेनापि न स्वत्वं भव-तीत्युक्तं क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थम्। ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नम्। तथाहि। यद्यागमः प्रमाणान्तरेणावगतस्तदा तेनैव स्वत्वावगमाद्भोगस्य स्वत्वे आगमे वा प्रामाण्यम् अथ प्रामाणान्तरेण नागमोऽवगतः कथन्तद्विशिष्टोभोगः प्रमाणम्। उच्यते। प्रामाणान्तरेणावग-तागमसहित एव निरन्तरोभोगः कालान्तरे स्वत्वङ्गमयति। अवगतोऽप्यागमोभोगरहितो न कालान्तरे स्वत्वङ्गमयितुमलं मध्ये दानविक्रयादिना स्वत्वापगमसम्भवादिति सर्वमनवद्यम्। आगमसापेक्षो भोगः प्रमाणमित्युक्तम्। आगमस्तर्हि-भोगनिरपेक्ष एव प्रमाणमित्यत आह। "आगमेऽपि बलं नैव भुक्तिस्तोकापि यत्र नो"या० यस्मिन्नागमे स्वल्पापि भु-क्तिर्नोपलभ्यते तस्मिन्नागमे बलं सम्पूर्णं नैवास्ति। अयमभि-सन्धिः स्वत्वनिवृत्तिपरस्वत्वापादनञ्च दानम्। परस्वत्वापा-दानं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा। स्वीका-रस्त्रिविधोमानसो वाचिकः कायिकश्चेति। तत्र मानसो-ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्यादिभि-व्यवहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपा-दानाभिमर्शनादिरूपोऽनेकविधः तत्र च नियमः स्मर्य्यते "दद्यात्कृष्णाजिनस्युच्छे गां पुच्छे करिणङ्करे। केशरेषु तथैवाश्वन्दासीं शिरसि दापयेदिति"। आश्वलायनोऽप्याह। "अनुमन्त्रयेत् पाणिनाभिमृशेत् प्राणिनं कन्यां चेति"। तत्र हिरण्यवस्त्रादावुदकदानान्तमेवोपादानादिसम्भवात् त्रि-विधोऽपि स्वीकारः सम्पद्यते। क्षेत्रादौ पुनः फलोपभोग व्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगे-न भवितव्यम्। अन्यथा दानक्रयादेः सम्पूर्णता न भव-तीति फलोपभोगलक्षणकायिकस्वीकारविकलस्यागमो दुर्ब-लो भवति तत्सहितादागमात्। एतच्च द्वयोः पूर्व्वा-परकालापरिज्ञाने। पूर्वापरकालज्ञाने तु विगुणोऽपि पूर्व्व-कालागम एव बलीयानिति। अथ वा "लिखितं साक्षिणो-भुक्तिः प्रमाणं त्रिविधं स्मृत"मित्युक्तम्। एतेषां समवायै-कत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठते। "आगमोऽभ्यधिको भोगाद्विनापूर्व्वक्रमागतात्। आगमेऽपि बलं नैव भुक्तिः स्तो-कापि यत्र नो" इति अयमर्थः। आद्ये पुरुषे साक्षिभि-र्भावितस्यागमो भोगादभ्यधिकोबलवान् पूर्व्वक्रमागताद् भोगा द्विना। स पुन पूर्व्वक्रमागतो भोगश्चतुर्थे पुरुषे लिखिते-न भावितादागमात्बलवान् मध्यमे तु भोगरहितादाग-मात् स्तोकभोगसहितोऽप्यागमो बलवानिति। एतदेव

नारदेन स्मृतोक्तं "आदौ तु कारणन्दानं मध्ये भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका सन्तता या चिरन्तनीति" "पश्यतो ब्रुवत इत्यत्र विंशतिवर्षभोगादूर्द्धं भूमेर्द्वनस्यापि दशवर्षभोगादूर्द्धं फलानुसरणं न भवतीत्युक्तम्। तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रमाणव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह। "आगमस्तु कृतोयेन सोऽभियुक्तात्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी" या०। येन पुरुषेण भूम्यादेरागमःस्वीकारः कृतः। स पुरुषः कृतस्ते चेत्यादिकमित्यभियुक्तात्तमागमं प्रतिग्रहादिकं लिखितादिभिरुद्धरेत् भावयेत्। अनेनचाद्यपुरुषस्यागममनुद्धरतोदण्ड इत्युक्तं भवति तत्सुतो द्वितीयोऽभियुक्तोनागममुद्धरेत्, किन्तु अविच्छिन्नाप्रतिरवसमत्वभोगम्। अनेनचागममनुद्धरतो द्वितीयस्य न दण्डोऽपि तु विशिष्टभोगमनुद्धरतो दण्ड इति प्रतिपादितम्। तत्सुतस्तृतीयोनागमं नापि विशिष्टभोगमुद्धरेदपि तु क्रमागतभोगमात्रम्। अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दण्डोनागमानुद्धरणे न विशिष्टभोगानुद्धरणे वेत्यभिहितम्। तत्र तयोर्द्वितीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुः तृतीये गरीयसीति विवेक्तव्यम्। लिखितागमानुद्धरणेऽर्धहानिः समानैव दण्डे तु विशेष इति तात्पर्यार्थः। उक्तञ्च। "आगमस्तु कृतोयेन स दण्ड्यस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोगहानिस्तयोरपि"। अत्यन्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं विना पूर्व्वक्रमागतादित्यत्र तस्यापवादमाह। "योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्। न तत्र कारणम्भुक्तिरागमेन विनाकृता" या० यदा पुनराहर्त्तादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतःस्यात्परलोकगतोभवेत्तदा तस्य रिक्थी पुत्रादि स्तमागममुद्धरेत्। यत्कात्तत्र तस्मिन् व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम्।" व्यव०त०रघुनन्दनेन तु मध्यस्थएव आर्त्तकालतया उक्तः। यथा तद्धृतं व्यासवाक्यम् "वर्षाणि विंशतिं भुक्ता स्वामिनाऽव्याहृता मही। भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी। त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगम" इति। त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। अपितामहभुक्तं यत् तत्सुतेन विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेन्न प्रपितामहः। तस्याप्यां जीवतां भोगो

विज्ञेयस्त्वेकपुरुषः" इति एवञ्च शतषष्टिवर्षयोः आर्त्तकालत्वं देशभेदात् व्यवस्थापनीयम्। अत्रापवादः। "भुक्तिस्त्रैपौरुषी सिध्येदपरेषां न संशयः। अनिबन्धे सपिण्डत्वे सङ्कल्पानां न सिध्यति। अस्वामिना च यद्भुक्तं गृहक्षेत्रादिकम्। सुबहून्वसुकाल्यस्य न तद्भोगेन लोपते। विवाहश्राद्धतीर्थेषु भुक्तं राज्ञाऽमात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां स्वत्वं न सिध्यति" वृह०। अत्रापि विशेषमाह तत्रैव "स्त्रीधनञ्च नृपेन्द्राणां कदाचन न जीर्य्यति। अनागमं भुज्यमानमपि वर्षशतैरपि" आगम्यते तत्त्वमनेन। इतश्चावेदकशास्त्रे "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सा०का०। "सिद्धं सिद्धैः प्रमाणैस्तु स्थितं वात्र परत्र वा आगमः शास्त्रमाप्तानामाप्तास्तत्त्वार्थवेदिनः" इत्युक्तौ ऽशास्त्रमात्रे "मूर्खतां जायते भक्तिस्ततो गुरूपासते। स च विद्यागमान् वक्ति विद्यायुक्त्याश्रितो नृप!" देवीपु०। स च गुरुः विद्यासाधनमागमं वक्ति उपदिशतीत्यर्थः। श्रुतौ च "ऋचोहागमलक्षणसन्देहाः प्रयोजनम्" "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गोवेदोऽध्येयः ज्ञेयश्चेति" भा०भा०। "आगमः प्रयोजकः प्रवर्त्तकः नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति प्रयोजनशब्देन फलं प्रयोजकश्चेति कैयटः॥ "आगमपदेन श्रुतिरिति" उद्योतः। "बहवोध्वागमैर्भिन्नाः पन्थानः सिद्धिहेतवः" रघुः। ६ मन्त्रे च "सर्वेदः क्रियामूलं ऋषिभिर्वृद्धधोदितः। कालोदेशः क्रिया कर्त्ता कारणं कार्य्यमागमः। द्रव्यं फलमिदं ब्रह्मन्नवरोक्षोऽजयाहरिः"। भा०१२,११अध्या०। "तत्र कालः प्रातरादिः देशः समादिः क्रियाऽनुष्ठानं कर्त्ता ब्राह्मणादि, कारणं ऋत्वादि कार्य्यं यागादि आगमोमन्त्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि" इति श्रीधरः।

आ+गम्–गत्यर्थत्वात् ज्ञाने भावे घञ्। १०शब्दजन्यबोधे "प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्। त्रयं सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सुना" मनुः। विविधानां धर्म्माणामागमोयस्मात्तद्विविधागमम्। करणे घञ्। ११शब्दबोधसाधने शब्दरूपप्रमाणे च "ऐन्द्रिकह्यनुमानञ्च प्रत्यक्षमपि चागमम्। ये तु सम्यक्परीक्षन्ते तृतस्तेषामबुद्धिता" रामा० "आगतः शिववक्त्रेभ्यो गतश्च गिरिजानने। मतश्च वासुदेवस्य तस्मादागम उच्यते" यामलोक्ते ११ तन्त्रशास्त्रे पुंन० तथा च आगतादीनामाद्यन्तरयुक्तत्वात् तथात्वम्

रुद्रयामले तु मतं श्रीवासुदेवस्येति पाठः स्त्रीवत्वेन "आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः । पञ्चवर्त्मभेदेहीत्वाकृत्वागमोक्तैः स्तवैः प्रिये ! । यां कृत्वा कलिकाले च सर्वाभीष्टं लभेन्नरः" तन्त्रसारे यामलम्" प्रसङ्गात् तन्त्ररूपागमस्य प्रामाण्यं तदुपासनादिषु कलौ अधिकारिविशेषस्य कर्त्तव्यता च प्रदर्श्यते। निजनिजकर्मवासनारूपपाशबद्धान् अनात्मज्ञान् जन्ममरणादिक्लेशभाजः संसारपारं गन्तुमसमर्थान् प्राणिनो विलोक्य परमेश्वरः वेदेन कर्मकाण्डोपासनाकाण्डब्रह्मकाण्डात्मकार्थान् समुपदिदेश । तत्र वेदानाम् उच्छिन्नप्रायतया क्रमशो रागबाहुल्येन तदुक्तधर्मेषु उच्छिन्नप्रायेषु सत्सु अनुच्छिन्नानामप्यर्थस्य दुर्बोधसामिदानीन्तनादीनां दुरधिगमतया आयासबाहुल्येन च तत्राप्रवर्त्तमानानां क्रमशोविलुप्तेषु श्रौतधर्मेषु कथङ्कारसङ्कारः स्यादित्याकलय्य कारुण्योदयेन वेदार्थप्रकाशनार्थं सुगमोपायेन जैमिनिव्यासनारदादिरूपोपाधिभिरुपहितः सन् तत्तद्ग्रन्थान् प्रणीतवान् । तत्र कर्मकाण्डार्थौ जैमिना मन्वादिभिश्च सम्यक्तया व्याकृतः उपासनाकाण्डार्थः स्वयं शिवमूर्त्या तन्त्रशास्त्रं, नारदादिमूर्त्या च पञ्चरात्रादिकं विधाय विवृतः ब्रह्मकाण्डार्थश्च वेदव्यासमूर्त्येति विवेकः । ततश्च धर्मे वेदस्यैव स्वतःप्रमाणत्वेन वेदमूलकत्वादन्येषां प्रामाण्यं तत्र स्मृतीनामिव आगमस्यापि वेदमूलकत्वमनुमीयते। वेदएव रामतापनीयन्यसिंहतापनीयाद्यात्मके आगमोक्तोपासनादिसंवादात् तन्मूलकत्वाधिगमात् येषां च मूलानि नाधिगम्यन्ते तेषामपि प्रामाण्यं स्मृति वाक्यवत् अनुमातव्यम् भ्रमप्रमादादिशून्यत्वहेतोः स्मृतिकर्त्तॄणामिव आगमकर्त्तुः शिवस्य सत्त्वात् तन्त्रवाक्यस्य स्मृतिवाक्यवत् प्रामाण्यम् न च बौद्धागमादिवत् विप्रलम्भकवाक्यत्वं रागद्वेषादेस्तत्रिरस्तत्वात्। तत्र कर्मकाण्डार्थे सर्वेषामपर्य्युदस्तानामधिकारः मुमुक्षोरपि तत्त्वज्ञानपर्य्यन्तं चित्तशोधनार्थं प्रत्यवायपरिहारार्थं च कर्म्मणां कर्त्तव्यतोपदेशात् "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसेत्यादि" श्रुतेः "आरुरुक्षोर्मुनेर्योगम् कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते" गीतावाक्याच्च । ततोऽन्येषामपि ईश्वरार्पणेन फलानभिसन्धानेन च कृतानां कर्म्मणां बन्धाहेतुत्वात् क्रमशोमुक्तिः फलम्। एवमुपासनाकाण्डार्थेऽपि सर्वेषामधिकारः श्रुतौ तपसेति निर्देशात् "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत स क्रतुं कुर्वीतेति" श्रुत्या सोपाधिकस्य स्वस्योपासनाविधानाच्च । उपासना च मानसी क्रिया ध्यानपरपर्य्याया तत्र निराकारस्य ब्रह्मणोऽसम्भवात् सोपाधिकेश्वरविषयैवोपासना कर्त्तव्या। सा च गुणोपाधिविशिष्टस्यैव तत्तदाकारोपहितस्यापि सम्भवति "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पना" इत्युक्तेः । कल्पना च न स्वेच्छया किन्तु शास्त्रादिसिद्धैव । तथा चागमपुराणादिषु यानि यानि रूपाणि वर्णितानि तद्रूपेणैव उपासना कर्त्तव्या । ब्रह्मकाण्डार्थे तु कर्मभिश्चित्तशुद्धौ साकारोपासनेन तदैकाग्र्यवतः वेदान्तोक्तसाधनचतुष्टयवत एवाधिकार इति भेदः । तत्र तान्त्रिकोपासने कर्त्तव्येऽपि "देवोभूत्वा देवं यजेत्" इत्युक्तेः भूतशुद्ध्यादिना आत्मानं शोधयित्वा उपास्यदेवेनैकीभूतमात्मानं ध्यात्वैवोपासनं कार्य्यम् "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानामिति" श्रुत्या भेदेनोपासनाया निन्दनात् तान्त्रिकोपासनेऽपि कर्त्तव्ये वैदिककर्म्मसु सावित्र्यजन्मरूपो यनयनसंस्कारस्येव तन्त्रोक्तदीक्षायाएवाधिकारप्रयोजकत्वम् तत्र दीक्षायाञ्च सर्वेऽपि वर्णा अनुलोम प्रतिलोमजाश्चाधिकारिणः "मां हि पार्थ ! व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिमिति" गीतायां भगवदुपासने सर्वेषामधिकारस्य प्रतिपादनात् । अत्र "पुराणादौ कश्चित् विशेषो दर्शितः यथा "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि तेषां निष्ठा तु तामसी। करालभैरवञ्चापि यामलं वाममाश्रितम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु। मया कृतानि चान्यानि मोहायैव भवन्ति वै" इति देवीपुराणवचने वाममाश्रितमिति विशेषणात् श्रुतिस्मृति विरुद्धानीति निर्देशाच्च श्रुतिस्मृतिविरुद्धवाममार्गस्यैव निन्दनात् तत्रैवाधिकारिविशेषस्यानधिकारो न तु तन्त्रोक्तेष्वपि इतरांशेषु वेदाविरुद्धेषु इति निर्णयः । वस्तुतः "सौत्रामण्यां सुरां पिबेत्" इति श्रुत्या विहितस्य सौत्रामण्यां सुरासेवनस्यैव वामदेवसाधोपासकस्य "न काञ्चन परिहरेदिति" सर्वस्त्रीगमनस्यैव अधिकारिविशेषविषये तस्यापि आहृता । अतएव मनुना "न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफलेति" सामा-

न्यतो विहितमद्यादौ न दोष इत्युक्तम्। कुलाचारशब्दे वक्ष्यमाणस्य कुलाचारधर्म्मस्य प्रायेणेदानीन्तनानां दुष्करत्वेन सुतरां तन्मार्गस्य तन्त्रनिर्दिष्टाधिकारिणामिदानीमसत्त्वात् नैव कर्त्तव्यता। अथ कश्चित् प्राग्भववासनावशादधिकारी सम्पद्यते तथापि कुलचूड़ामणौ "यत्नासवं तु देयं स्यात् ब्राह्मणस्तु विशेषतः। तत्तार्द्धकरसं दद्यात् ताम्रे वा विल्वजेन्मधु। देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत्। मद्यद्रव्यं तु मूढस्य नान्येषान्तु कदाचन"। "वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साज्यकम्। ब्राह्मणस्य गवां क्षीरं ताम्रे वा विल्वजेन्मधु। नारिकेलोदकं कांस्ये सर्वेषांचैव शोधनम् इति" च द्विजातीनामासवदाननिषेधेन गौणकल्प एवाधिक्रियते न मुख्यकल्पे। "पीत्वा पीत्वा पुनः पीत्वा पतितोधरणीतले। उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते" इति वचनन्तु चतुर्थाश्रमविषयमिति तन्त्रसारः। "निस्त्रैगुण्यपथि विचरतां को विधिः को निषेधः" इत्युक्तेश्चतुर्थाश्रमस्य विधिनिषेधातिक्रान्तत्वेऽपि परमहंसाश्रमस्यैव दोषाभाव इति युक्तमुत्पश्यामः। "वरं प्राणाः प्रयच्छन्तु ब्राह्मणोनार्पयेत् सुराम्" ब्राह्मणो मद्यदानेन ब्राह्मण्यादेव क्षीयते" इत्यसङ्गतमेतत्। अतएव कालिका पु० "अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः। नारिकेलोदकं कांस्ये ताम्रे वा विल्वजेन्मधु" इत्यनुकल्पो गृहस्थद्विजातिमात्रे विहितः एवं मत्स्यमांसयोर्निषिद्धयोरपि वाममार्गिणां दानादिकं न श्रुतिविरुद्धं "देवान् पितॄन् समभ्यर्च्च खादन् मांसं न दोषभाक्" इति मनुना देवार्चनावशिष्टमांसभोजनस्य विधानात्। एतदपि दिव्यभावविषयमिति तन्त्रसारः "मादकं सर्वदा वर्ज्यं मद्यं मांसं सुलोचने!। ज्ञानेन संस्कृतं तत्तु महापातककृज्जनायनमिति" कुलार्णवोक्तेः। ज्ञानेन सर्वनरेषु आत्मवज्ज्ञानेनेत्यर्थः। तदपि न श्रुतिविरुद्धं विश्वनरेषु आत्मदृष्टिमतो वैश्वानरसोमोपासकस्य सर्वान्नभक्षणविधानवत् तथापि तादृशज्ञानमाहात्म्येन तत्र पापानुत्पत्तिसम्भवात् यथा वैश्वानरसोमोपासकं प्रकृत्य "न किञ्चनानन्नं भवति आश्वभ्य आशकुनिभ्य इति" छा० उ० सर्वान्नभोजनं विहितमेवमस्यापि ज्ञानेन पूतत्वान्न सङ्गत्वं दोषावहमिति। "कृते श्रुत्युदितोमार्गस्त्रेतायां स्मृतिचोदितः। द्वापरे तु पुराणोक्तः कलावागमसम्मतः" इत्यागमवचनं तु प्रशंसापरम् रागादिबाहुल्येन श्रौतादिधर्म्मेषु अधिकाराभावइति तादृशानां तन्त्राधिकारित्वसूचनार्थञ्च "चकार षोडशाख्यानि कोशवः सचिवस्तथा। कापिलं नाकुलं वामं भैरवं पूर्व्वपश्चिमम्। पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः, कर्म्म पु० "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पापित्वं ज्ञानिनामपि। प्रथमं ह्यत्रैवोक्तं शैवं पाशुपतादिकम्" पद्मपु० इत्यादिवचनैरागमस्य तामसत्वेन मोहशास्त्रत्वेन निषिद्धत्वेऽपि वेदाविरुद्धांशस्य ग्राह्यत्वम्। "तथापि योऽंशोमार्गाणां वेदेन न विरुध्यते। सोऽंशः प्रमाणमित्युक्तः केषाञ्चिदधिकारिणाम्" सूतसंहितावचनात् अत्र केषाञ्चिदित्युक्तेः न सर्वेषामधिकारितेति सूचितम् तत्राधिकारिणः शास्त्रेषु० दर्शिताः। "श्रुतिभ्रष्टः स्मृतिप्रोक्तप्रायश्चित्तपराङ्मुखः। क्रमेण श्रौतसिद्ध्यर्थं ब्राह्मणस्तन्त्रमाश्रयेत्" "पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम्। वेदभ्रष्टान् समुद्दिश्य कमलापतिरूचवान्" इति च। ततश्च इदानीन्तनानां विशेषतो गौड़देशवासिनां श्रौतधर्म्माधिकारोच्छेददर्शनेन तत्पापमोचाय प्रायश्चित्तपराङ्मुखतादर्शनेन च श्रौतमार्गभ्रष्टतया क्रमेण श्रौताधिकारस्य प्राप्त्यर्थं तन्त्रोक्तोपासनादिषु वेदाविरुद्धेषु अधिकारः। वेदविरुद्धेषु वाममार्गेषु तु चतुर्थाश्रमस्य तन्त्रोक्ताङ्गुताश्रमस्यैवाधिकारः न गृहस्थद्विजानाम् प्रागुक्तैः वचनजातैः ब्राह्मणादिषु मुख्यमद्यदानसेवनयोर्निषेधात् गृहस्थशूद्रस्य तु मुख्येऽप्यधिकारः द्विजानामनुकल्पाचरणेन तन्मार्गाश्रवणेऽप्यधिकार इतिविवेकः। तल्लक्षणन्तु "सृष्टिश्च प्रलयश्चैव देवानां च तथार्च्चनम्। साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च। षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः सप्तभिर्लक्षणैर्युक्तं त्रागमं तद्विदोविदुः" इति आगमभेदाश्च तन्त्रशब्दे वक्ष्यन्ते। अतएव कलिधर्म्मप्रकरणे "एवं क्रियायोगपरैः पुमान् वैदिकतान्त्रिकैः। अर्च्चन्नुभयतः सिद्धिम् मत्तोविन्दत्यभीप्सितम्" भाग० १२ स्कन्धे २७ अध्याये तान्त्रिकपथेनार्च्चनं विहितम्। "अथ सूतकिनः पूजां यथाशास्त्रागमनोदिताम्" या० रा०। आगच्छति प्रकृतिप्रत्ययावनुपपद्य उत्पद्यते कर्त्तरि संज्ञायां च। १३ व्याकरणोक्ते प्रकृतिप्रत्ययानुपपन्नके अट् इट् इत्यादौ शब्दभेदे "आगमादेशयोर्भेदे बलीयानागमोविधिः" व्याकरणान्तरपरि० "यदागमास्त्रहुयोभूतास्त्रद्भक्षणेन ब्रह्मणः"। "आगमः शास्त्रमानम्" इति च परिभा०। "आगमा आप्तोपदेशाः" "आगमा अविद्यमानमवबोधयन्तीति" च वा० वा०

आगमन न० आ+गम–भावे ल्युट्। १ किञ्चिद्देशावधिकविभानजनकक्रियायामागतौ। "संवत्सरे व्यतीते तु पुनरागमनाय च" दुर्गाविसर्जनमन्त्रः। २ प्राप्तौ "एतत्ते सर्व्वमाख्यातं वैरस्यागमन महत्" रामा०। ३उत्पत्तौ च "आगमापायिनोऽनित्याः" गीता। [आगमयुक्ते

आगमवत् त्रि० आगम अस्त्यर्थे मतुप मस्य वः स्त्रियां ङीप्।

आगमवृद्ध त्रि० आगमेन तज्ज्ञानेन वृद्धः। शास्त्रालोचनाजनितपरिणतज्ञाने "प्रतीप इत्यागमवृद्धसेवी" रघुः।

आगमवेत्तृ त्रि० आगमं वेत्ति विद–तृच् ६त०। स्त्रियां ङीप्। आगमाभिज्ञे।

आगमवेदिन् त्रि० आगमं वेत्ति विद–णिनि ६त०। १ आगमवेत्तरि २ शङ्कराचार्य्यपरमगुरौ गौड़पादाचार्य्ये पु०।

आगमापायिन् त्रि० आगमश्च अपायश्च तौ विद्येते अस्य इनि स्त्रियां ङीप्। उत्पत्तिविनाशशीले "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता।

आगमावर्त्ता स्त्री आगममात्रेण प्राप्तिमात्रेण आवर्त्तते कण्डूयनमस्याः आ+वृत–अपादाने घञ्। वृश्चिकाख्यां (बिछाति) क्षुपभेदे।

आगमिक त्रि० आगमादागतः ठञ्। आगमप्राप्ते।

आगमित त्रि० आ+गम–स्वार्थे–णिच्–क्त। अधीते ज्ञाते २पठिते। प्रेरणे णिच् क्त। यापिते ३प्रापिते च।

आग(गा)मिन् त्रि० आ+गम–भविष्यति णिनि गम्यादीनामुपसंख्यानमित्युक्तेः वा ह्रस्वः। भविष्यद्गमने "यामगमी" सि०कौ०। "यद्वागामिक्रियासुख्यकालस्याध्वनराजवत्" कात्या०सू०। "आगामिवर्त्तमानाहर्युक्तायां निशि पत्निणी" अमरः स्त्रियां ङीप्। "आगामिनीं जगृहिरे जनतास्तरुणाम्" माघः।

आगर पु० आगीर्य्यते उद्गमित्तुमारभ्यते चन्द्रमा अत्र आ+गृ–आधारे अप्। अमावास्यायां तत्र शेषयामे भक्षिता हि चन्द्रकलाः देवैः उद्गमित्तुमारभ्यन्ते इति तस्यास्तथात्वम्। "चर्द्धरात्रसमये च क्षीणो भवति चन्द्रमाः। अमावास्यासमाप्ते च ततः किल भवेदृणु" इत्युक्तेस्तथात्वम्।

आगवीन त्रि० गोः प्रत्यर्पणपर्य्यन्तं कर्म्म करोति मर्य्यादायामव्ययीभा० आगु+कर्म्मकारकार्थे ख। गोः प्रत्यर्पणपर्य्यन्तकर्मकरे गोपालकभेदे। गोपालकस्य द्विविधः दिवात्रातं गोःप्रचारणे नियुक्तः। दिवारात्रं योगक्षेमे नियुक्तश्च। "दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमेऽन्यथा चेत्तु पालोवक्तव्यतामियात्" मनुना दिवारात्रभेदेन पालकद्वयविषये दोषभेदविधानात् तथा विभागः। तत्र दिवापालकविषये याज्ञ० "यथार्पितान् यस्मून् गोपः स्वायं प्रत्यर्पयेत्तथा। प्रमादस्तनष्टांश्च प्रदाप्यः कृतवेतन" इति।

आगस् न० "इण आग अपराधे" उणा० इण्–असुन् आगादेशः। १अपराधे "मदीये हृदये नूनं सखि! नागो न विद्यते। वदन्तो सर्पसर्पेति किं नालिङ्गसि मामिति" उज्ज्वलदत्तोक्तेः। "सक्ष्मेऽपि ग्रतमागांसि खनोत्त इति यत्त्वया" माघः। "अभ्यर्हमागस्कृतमस्य मृष्यति" रघुः। "दासे कृतागसि भवत्युचितः प्रहारः" सा०द० अपराधश्च स्वकर्त्तव्यकर्म्मणः स्खलनम्। अपराधशब्दे २३२पृ० विवृतिः आगस्कर्त्ता आगस्कारो। २पापे ३दण्डे च।

आगस्ती स्त्री अगस्त्येयम् अण् स्त्रियां ङीप् यलोपः। १दक्षिणस्यां दिशि। [अगस्त्यहितकारके।

आगस्तीय त्रि० अगस्तये हितम् छण् यलोपः।

आगस्त्य त्रि० अगस्त्यस्येदम् यञ् यलोपः। अगस्त्यसम्बन्धिनि दक्षिणदिग्भागे "कौवेरदिग्भागमपास्य मार्गमागस्त्यसुषांशुरिरावतीर्णः" माघः "अगस्त्यस्य स्थितिस्थानसूत्रम्" सू०सि० "अशीतिभागैर्याम्यायामगस्त्योमिथुनान्तगः"। स्वकीयक्रान्तिविभागस्थानात् दक्षिणस्थामशीत्यंशैस्तारात्मकः अगस्त्यः मिथुनान्तगः कर्कादिभागे स्थितः" रङ्गनाथः। एवञ्च तस्य दक्षिणदिग्भागगतत्वेन तद्भागस्थागस्त्यसम्बन्धित्वम् अगस्तेरपत्यं गर्गा० यञ्। २अगस्तेरपत्ये पुंस्त्री० अगस्त्य+कण्वादि० अण्। ३तन्नीतापत्ये पुंस्त्री उभयत्र स्त्रियां ङीप् यलोपः।

आगाध त्रि० अगाध एव स्वार्थे अण्। १अतलस्पर्शे २दुरधिगमे च। [न्तुकशब्दार्थे च।

आगान्तु पु० आ+गम–तुन् नि०दृद्धिः। १अतिथौ २आगन्तुके

आगामक त्रि० आगमयति भविष्यद्वस्तु बोधयति आ+गम–णिच्–ण्वुल्। भविष्यद्बोधके। "मतिरागामिका ज्ञेया बुद्धिस्तत्कालदर्शिनी"। [कालदृष्टौ च।

आगामिन् त्रि० आगमिवत्। १आगन्तुके २भविष्यत्

आगामुक त्रि० आ+गम–उकञ्। आगमनशीले। "सुधीवस्त्वार्जितं मित्रं सर्व्वांस्त्वागामुकान् द्रुतम्" भट्टिः।

आगार न० अग–कुटिलायां गतौ घञ् आगच्छति अस्मिन्–अण् उप०स०। गृहे भवने।

आगारगोधिका स्त्री ७त०। गृहगोधिकायाम्(टिकटिकि)।

आगारधूम पु०आगारं गृहं धूमयति धूमान्वितं करोति

धूम+णिच्-अण । (भुज) १८हधूमे । ७त०८हवृत्तिधूमे च

आगुर् स्त्री आ+गुर्-क्विप् । प्रतिज्ञायाम् "अस्य यज्ञस्यागुर उद्दचमशीय" श्रुतिः । [णमप्यत्र ।

आगुरण न० आ+गुर-ल्युट् । उद्यमे पृ० दीर्घः आगूर-

आगू स्त्री आ+गम-क्विप् "ऊ च गमादीनाम् मलोपे ऊकारदेशः प्रतिज्ञायाम् । वधूवद्रूपम् ।

आगूर्ण त्रि०आ+गुर-क्त । १उद्यते । भावे क्त २उद्यमे न० ।

आगूर्त्त त्रि०आ+गुर-क्त "नसत्तनिषत्तेत्यादिना" पा०नि० वेदे नत्वाभाव १उद्यते । भावे क्त । २उद्यमे न० ।

आगूर्त्तिन् त्रि०आगूर्त्तमनेन इष्टा०इनि । कृतोद्यमे "आगूर्त्तीर्वा एष भवति यो दर्शपोर्णमासाभ्यां यजते" श्रुतिः ।

आग्नापौष्ण त्रि० अग्निश्च पूषा च द्व०आनङ् अग्नापूषाणौ तौ देवते अस्य अण् द्विपदवृद्धिः वा०नेत् । अग्नापूषदेवताके हविरादौ । "आग्नापौष्णं, इन्द्रापौष्णः" कात्या० १५,२।

आग्नावैष्णव त्रि० अग्निश्च विष्णुश्च द्व०आनङ् अग्नाविष्णू तौ देवते अस्य अण् द्विपदवृद्धिः "इद्वृद्धौ" पा०इत्त्वेप्राप्ते "विष्णौ न" वार्त्ति०नेत्त्वम् । अग्नाविष्णुदेवताके हविरादौ । "अथ-ग्नीषोमीये आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति" "तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति" इति च श्रुतः ब्रा० । "आग्नावैष्णव ऐन्द्राविष्णवः" कात्या० १५,२ अग्नाविष्णुशब्दौ विद्येते यत्र विसृष्टा० अण् । अग्नावैष्णवशब्दयुक्ते २अध्याये ३अनुवाके च ।

आग्निक त्रि०अग्नेरिदं वा०ठक् । अग्निसम्बन्धिनि । "प्रकृतान्योदृग्भणानि हुत्वा सप्राग्निकान्याकूतिमिति" कात्या० १६,५। "द्विश्च स्याल्याः स्रुवेणेत्येतदप्याग्निके भवति" कर्कदृष्टा श्रुतिः । [दत्तसन्निकृष्टदेशादौ ।

आग्निदात्तेय त्रि० अग्निदत्त+चतुरर्थ्यां सख्या०ढक् । अग्नि-

आग्निपद त्रि० अग्निपदे दीयते कार्य्यं वा व्युष्टा० अण् । अग्निस्थाने १दीयमाने २कार्य्ये वा पदार्थे ।

आग्निमारुत त्रि० अग्निश्च मरुतश्च द्व० आनङ् अग्नामरुतौ तौ देवते अस्य अण् द्विपदवृद्धिः इद्वृद्धौ" पा०इत् । अग्नामरुतदेवताके १शस्त्रे स्तोत्रभेदे २हविरादौ च ।

आग्निवारुण त्रि० अग्निश्च वरुणश्च द्व० ऐत् अग्नीवरुणौ तौ देवते अस्य अण् द्विपदवृद्धिः "इद्वृद्धौ" पा०इत् । अग्नीवरुणदेवताके हविरादौ ।

आग्निवेश्य पुंस्त्री अग्निवेश्यस्य ऋषेरपत्यम् गर्गा० यञ् । तदृषेरपत्ये "पुरोहितश्च कौरव्य ! वेदेवेदाङ्गपारगम् । आग्निवेश्यश्च राजानम्" भा०आश्व०प०६४अ० स्त्रियां ङीप् यलोपः । आग्निवेशी तद्गोत्रजस्त्रियाम् ।

आग्निशर्म्मि पुंस्त्री० अग्निशर्म्मणोऽपत्यं वाह्वा० इञ् । तदपत्ये ततः गोत्रे फक् । आग्निशर्म्मायणः तद्गोत्रजे पुंस्त्री०आग्निशर्म्मौ भवः गहा०अ । अग्निशर्म्मीय तद्भवे त्रि०

आग्निष्टोमिक पु० अग्निष्टोमं क्रतुं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा ठक् । १अग्निष्टोमयज्ञाभिज्ञे २तत्प्रतिपादकग्रन्थपाठके च । अग्निष्टोमग्रन्थस्य व्याख्यानः ग्रन्थः ठञ् । अग्निष्टोमयज्ञव्याख्याने ३ग्रन्थे ४विवृतौ स्त्री ङीप् । [अग्निष्टोमदक्षिणायाम् ।

आग्निष्टोमिकी स्त्री० अग्निष्टोमस्य दक्षिणा ठञ् ङीप् ।

आग्नीध्र न० अग्निमिन्धेऽग्नीत् तस्य शरणम् "अग्नीधः शरणे रण् भश्च" वार्त्ति० रण् भत्वाच्च जश् । अग्नीधो-यजमानस्य स्थाने उपचारात् २सान्निके द्विजे त्रि०कौ० । अग्निं धारयति ष्ट-मूल०क पूर्व्वपददीर्घश्च स्वार्थे अण् इति वा । सान्निके यजमाने द्विजे । "प्रति वीहि प्रस्थितं सौम्यं मधु पिबाग्नीध्रात्" ऋ० २,२६,१ । अग्नीध्र+स्वार्थे अण् । २अग्नीध्रस्थाने स्त्रियां ङीप् अग्निध्री तदाधारभूमौ स्त्री । स्वार्थे गहा० ऊ आग्नी-ध्रीय: । अग्निस्थाने "गार्हपत्याद्वा अग्नीध्रीयमागच्छति" श्रुतिः आग्नीध्रस्येदम् दृङ्गात् ऊः । आग्नीध्रसम्बन्धिनि त्रि० । "आग्नीध्रीयं प्रथमं चिनोति" श्रुतिः ।

आग्नीध्रा स्त्री अग्नीध्रस्थानमर्हति यत् । अग्निस्थानार्हे-शालायाम् ।

आग्नेन्द्र त्रि० अग्निश्च इन्द्रश्च द्व०आनङ् तौ देवते अस्य अण् "नेन्द्रस्य परस्य" इति पा० नोत्तरपदवृद्धिः इद्भावात् नेत् । अग्नेन्द्रदेवताके हविरादौ स्त्रियां ङीप् । "या वा आग्नेन्द्रैन्द्राग्नी सा" श्रुतिः ।

आग्नेय त्रि०अग्नेरिदम् अग्निर्देवता वास्य ढक् । अग्निदेवताके १हविरादौ "आग्नेयः पुरोडाशो भवति" शत०ब्रा० २अग्निसम्बन्धिनि च ३कृत्तिकानक्षत्रे न० तस्य अग्नि-देवताकत्वानुसारात्वम् "आग्नेयाप्यूपतिर्दैवतेति" ज्योति० । अग्निना प्रोक्तं पुराणं ढक् । "आग्नेयं वेदसम्मितम्" इत्युक्ते अग्निप्रोक्ते महापुराणभेदे अग्निपुराणशब्दे विवृतिः ४प्रतिपदि तिथौ स्त्री तस्याः तद्देवताकत्वमुक्तं यथा "अग्निः प्रजापतिः गौरी गणेशोऽहिर्गुहोरविः । शिवोदुर्गायमोविश्वोहरिः कामोहरः शशी । पितरः प्रतिपदादीनां तिथीनामधिपाः क्रमात्" । "५स्वर्गे तस्य तद्वीर्य्यजातत्वात् तथात्वम् । अग्निरेतःशब्दे विवृतिः ।

ई कार्त्तिकेये पु० तस्य तद्दीजजातत्वात् तथात्वम् अग्निकुमारशब्दे विवृतिः। ७ रुधिरे न० जठरानल-जायमानत्वात् देहस्थपित्तरूपाग्नेर्विकारत्वात् वाऽस्य तथात्वम्। अग्नये हितम् ढक्। जठरानलादिदृद्धिकरे वैद्यकोक्ते ८ द्रव्यभेदे त्रि० ९ बाह्याग्निबर्द्धके जतुप्रभृतौ च १० अग्निपर्व्वते ११ देशभेदे च पु० तस्य देशस्याग्न्यधिष्ठितत्वात् तथात्वम् स च देशः। दक्षिणा-पथवर्त्तिक्षुद्रकिष्किन्ध्यादेशसमीपस्थः माहेष्मतीपुरीयुक्तः तत्र हि वह्निः नीलराजकन्यासौन्दर्य्येण मोहितःताङ्कमेऽथ ताङ्गोद्वा तत्पाणिग्रहणार्थं तत्रैव पुर्य्यां स्वयं स्थितः यथोक्तम्"भा० स० प०"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः। श्रूयते हि गृहीतो वै पुरस्तात् पारदारिक। नीलस्य राज्ञो दुहिता बभूवातीव शोभना। साग्निहोत्रसुपातिष्ठद्बोधनाय पितुः सदा। व्यजनैर्धूयमानोऽपि तावत् प्रज्वलते न सः। यावच्चारुपुटौष्ठेन वायुना न विधूयते। ततः स भगवानग्निश्चकमे तां सुदर्शनाम्। नीलस्य राज्ञः सर्व्वैषासुपनीतश्च सोऽभवत्। ततो ब्राह्मणरूपेण रममाणो यदृच्छया। चकमे तां वरारोहां कन्यासुत्पललोचनाम्। तन्तु राजा यथाशास्त्रमग्निषद्वाग्निकस्तदा। प्रजज्वाल ततः कोपाद्भगवान् हव्यवाहनः। तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिम्। ततः कालेन तां कन्यां तथैव हि तदा नृपः। प्रददौ विप्ररूपाय वह्नये शिरसा नतः। प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा। चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः। वरेण च्छन्दयामास तं नृपं स्विष्टकृत्तमः। अभयञ्च स जग्राह स्वसैन्ये वै महीपतिः। ततः प्रभृति ये केचिद्राजानस्तां पुरीं नृपाः। जिगीषन्ति बलाद्राजंस्ते दह्यन्ते स्म वह्निना। तस्यां पुर्य्यां तदा चैव माहिष्मत्यां कुरूद्वह!। बभूवुरनलिप्याह्वा योषितस्कन्दतः किल। एवमग्निर्व्वरं प्रादात् स्त्रीणामप्रतिवारणे। स्वैरिण्यस्तत्र नार्य्यो हि यथेष्टं विचरन्त्युत। वर्ज्जयन्ति च राजानस्तत्पुरं भरतर्षभ। भयादग्नेर्म्महाराज। ततः प्रभृति सर्व्वदा। सहदेवस्तु धर्म्मात्मा सैन्यं दृष्ट्वा भयार्दितम्। परीतमग्निना राजन्नाकम्पत यथाऽचलः। उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत् पावकं ततः। सहदेव उवाच। त्वदर्थोऽयं समारम्भः कृष्णवर्त्मन्नमोऽस्तु ते। सुखं त्वमसि देवानां यज्ञस्त्वमसि पावक!। पावनात् पावकश्चासि वहनाद्धव्यवाहनः। वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि। चित्रभानुः स्फुरेश्च अनलस्त्वं विभावसो!। स्वर्गद्वारस्तृश्वासि ऊर्द्धगो ज्वलनः शिखी। वैश्वानरस्त्वं पिङ्गेशः सप्तजिह्वो भूरितेजसः। कुमारस्तूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्। अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे। पृथिवी बलमादध्याच्छिवञ्चापो दिशन्तु मे। अपां गर्भ! महासत्त्व! जातवेदः! सुरेश्वर!। देवानां मुखमग्ने! त्वं सत्येन विपुनीहि माम्। ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि। नित्यं सुहुतयज्ञेषु सत्येन विपुनीहि माम्। धूमकेतुः शिखी च त्वं पापहानिलसम्भवः। सर्व्वप्राणिषु नित्यस्थः सत्येन विपुनीहि माम्। एवं स्तुतोऽसि भगवन् प्रीतेन शुचिना मया। तुष्टिं पुष्टिं स्मृतिञ्चैव प्रीतिञ्चाग्ने! प्रयच्छ मे। वैशम्पायन उवाच। इत्येवं मन्त्रमाग्नेयं पठन् यो जुहुयाद्विभुम्। ऋद्धिमान् सततं दान्तः सर्व्वपापैः प्रमुच्यते। सहदेव उवाच। यज्ञविघ्नमिमं कर्त्तुं नार्हस्त्वं हव्यवाहन!। एवमुक्ता तु माद्रेयः कुशैरास्तीर्य्य मेदिनीम्। विधिवत् पुरुषव्याघ्रः पावकं प्रत्युपाविशत्। प्रमुखे तस्य सैन्यस्य भियोद्विग्नस्य भारत। न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः। तमुपेत्य शनैर्वह्निरुवाच कुरुनन्दनम्। सहदेवं नृणां देवं सान्त्वपूर्वमिदं वचः। उत्तिष्ठोत्तिष्ठ कौरव्य! जिज्ञासेयं मया कृता। वेद्मि सर्व्वमभिप्रायं तव धर्म्मसुतस्य च। मया तु रक्षितव्येयं पुरी भरतसत्तम। यावद्राज्ञो हि नीलस्य कुले वंशधराः नृपाः" १२ अग्नुपासने मन्त्रे १३ अग्निसम्बन्धिधारणाभेदे स्त्री"आग्नेय्या धारणया देहं दग्ध्वेति भूतशुद्धिः। "देहं धारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकम्"भाग० १४ दक्षिणपूर्व्वायां दिशि स्त्री। अग्नेर्भक्तः ढक्। १५ अग्निभक्ते आग्नेयो वै ब्राह्मणो देवतया" श्रुतिः अग्नेरपत्यम् अग्नेरागतम् अग्नौ भवः अग्निनादृष्टं साम्नेति वा ढक्। १६ अग्नेरपत्ये १७ अग्नितआगते १८ त्रि० अग्निना दृष्टे साम्नि न० "मन्त्र भौमं तथा तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्त स्नानानि चक्षते" इति विभज्य "आग्नेयं भस्मना स्नानमिति" पराशरोक्ते भस्मर्द्दनपूर्व्वके १९ स्नाने न०। "प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु दुष्टसामन्तहिंसस्य तदाग्नेयं व्रतं स्मृतमिति"मनूक्ते २० नृपतिचरितभेदे न० अग्नौ अग्न्युद्दीपने साधु ढक्। २१ अग्न्युद्दीपनसाधने जतुघृतादौ त्रि०"जिघ्राणोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्। हुतं हि व्यक्तमाग्नेयमिदं वेद्मि परन्तप!" "यदीदं गृहमाग्नेयं विहितं मन्यते भवान्"

इति च भा०आ०प०१४४ अध्या० । २२ अग्न्युद्दीपन साधने घृते २३अस्त्रविशेषे च न० । तत आगतः ठक् । अग्निप्रकृतिके २४कीटभेदे ते च चतुर्विंशतिविधाः यथाह सुश्रुतः । "कोण्डल्यकः करभको वरटी पत्रदृश्चिकः । विनायिका ब्रह्मणिका विन्दलोभ्रमरस्तथा । बाह्यको पिच्चिटः कुम्भो वर्चकीटोऽरिसेदकः । पद्मकीटो दुन्दुभिश्च मकरः शतपादकः । पञ्चालकः पाकमत्स्यः क्षुद्रतुण्डोऽथ गर्दभी । क्लीतः क्रमिसरारीच यश्चाप्युल्लेखकः स्मृतः । एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च । तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः । "अग्नायी देवताऽस्य ढक् पुंवद्भावः । २५ स्वाहादेवताकेष्टालीपाके । [अग्न्याधानदक्षिणायाम् ।

आग्न्याधानिकी स्त्री अग्न्याधानस्य यज्ञस्य दक्षिणा ठञ् ।

आग्रभोजनिक पु० अग्रभोजनं नियतं दीयतेऽस्मै ठञ् । नियतम् अग्रभोजनदानसम्बन्धदाने विप्रभेदे । (अग्रदानी) ।

आग्रयण त्रि० अग्रे अयणं भोजनं यस्मादेतेन कर्म्मणा वृ० ह्रस्वदीर्घः व्यत्ययः । नवान्नागमनिमित्ते साग्निककर्त्तव्ये यज्ञभेदे तत्प्रकारः आश्वलायनश्रौतसूत्रे दर्शितो यथा "आग्रयणं व्रीहियवानाम्१। यस्य नाश्नीयादग्निहोत्रमहुत्वा२ । यदा वर्षस्य क्षुप्तः स्यादथाग्रयणेन यजेत३। अपि हि देवा आक्षुप्तो नूनं वर्षस्याग्रयणेन हि यजत इति अग्निहोत्रीं वै नामादधित्वा तस्याः पयसा जुहुयात्४। अपि वा क्रिया यवेषु५। दृष्टिस्तु राज्ञ.ऐ । सर्वेषां चैके७। श्यामाकेष्वां सौम्यश्चरुः८ । सोम । यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यामित्यवान्तरेडाया नित्यं जपस्तूष्णीं सव्ये पाणौ कृत्वेतरेणाभिमृशेत् प्रजापतये त्वा यज्ञं गृह्णामि मह्यं श्रिये मह्यं यशसे मह्यमन्नाद्यायह। भद्रान्नः श्रेयः समनैष्ट देवास्तयावसेन समशीमहि त्वा । स नो मयोभूः पितवाविशे ह शन्नो भव द्विपदे शं चतुष्पद इति प्राश्नाचम्य नाभिमालभेतामोऽसि प्राण! तदृतं त्रीण्यमासि सर्व्वानसि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादमा म एधि मा मद्धाम इन्द्रेति१०। एतेन भक्षिणो भक्षान् सर्वत्र नवभोजने११। अथ व्रीहियवानां धान्ये विराजौ१२ । अग्नीन्द्राविन्द्राग्नी वा विश्वे देवाः सोमो यदि तत्र श्यामाकोद्यावापृथिवी१३। आद्या ये अग्निमिन्धते सुकर्माणः सुरुचो देवयन्तो विश्वे देवास आगत ये के च जग्मन्हि नो अद्भिमाया मही द्यौः पृथिवी च न.प्रपूर्वजे पितरानश्वसोभिरिति१४ । 'अग्रे अयनं भक्षणं येन कर्म्मणा तदाग्रयणम् । प्रथमद्वितीययोर्ह्रस्वदीर्घत्वव्यत्ययः । एषान्नवयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानाम् आग्रयणं नाम कर्म कर्त्तव्यमित्यर्थः । व्रीहिशब्दस्य प्रथमनिपातो व्रीहीणां प्राधान्यख्यापनार्थम् । तेन कालचोदना व्रीह्याग्रयणस्यैव भवति । श्यामाकशब्दस्य मध्यनिपातो व्रीहिकालाद्-यवकालो भिन्न इति ज्ञापयति। यस्य नवनिष्पन्नं, तन्नाश्नीयात् आग्रयणेनानिष्ट्वा । यद्याग्रयणेनानिष्टवतो नवनिष्पन्नेनाग्रयणेन विना निर्व्वापो न स्यात् तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायंप्रातरग्निहोत्रं हुत्वाऽश्नीयात् । ततः काल आगते त्वाग्रयणं कुर्य्यात् । अग्निहोत्रमहुत्वा नाश्नीयादितिवचनादाग्रयणेनानिष्ट्वाप्यग्निहोत्रं हुत्वाऽतो न दोष इति गम्यते । यस्येत्यत्र व्रीह्याद्यन्यदपि यन्निष्पन्नं तस्य सर्वस्य प्रतिषेधार्थम्२। यदा वर्षस्याग्निर्लोकस्य भवति तदाग्रयणेन यजेत । अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल उक्तो भवति । एतमेव कालं श्रुत्या समर्थयति३ । अथाग्रयणेन यजेतेति दृष्टिराग्रयणशब्देनोक्ता, इदानीमिदमुच्यते । अग्निहोत्रहोमार्था धेनुरग्निहोत्रीत्युच्यते । तां व्रीहिश्यामाकयवानामन्यतमस्य आधयित्वा तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात् । दृष्टिः प्रथमकल्पः, तदसम्भवेऽयमनुकल्पः इति ह्यनेनाग्रयणकल्पावलोच्येते४। यवैराग्रयणस्य क्रिया भवेत् अक्रिया वेति विकल्पः५। त्रयाणां वर्णानामविशेषेण कल्पद्वये प्राप्ते राज्ञो विशेष उच्यते दृष्टिरेव नान्य इतिदै । सर्वेषामपि वर्णानामिष्टिरेवेत्येके मन्यन्ते७ । श्यामाकाग्रयणे इन्द्राग्नी सोमदैवत्यश्चरुर्भवति । कालो वर्षा ऋतुः, शास्त्रान्तरे दर्शनात्८ । इतिकारोद्धाहारेण सूत्रच्छेदः । नित्यजपशब्देनेडे भागमिति मन्त्र उच्यते । तस्य नित्यत्वे सत्यपि नित्यवचनम् एतेन भक्षिण इति विध्यतिदेशे तद्भक्षितस्य प्राप्तणार्थम्९ । श्रुतिप्राप्ताचमनस्य विधानं यत्किञ् देवे आचमनं कृतं तस्मिन्नेव देवे स्थितस्य च नाभ्यालम्भनसिद्ध्यर्थम्१० । एतेन विधानेन सर्वभक्षेषु सर्वे भक्षिणः सर्वान् भक्षान् भक्षयेयुः । सर्वत्रवचनं प्रकरणोत्कर्षार्थम् । नवभोजनवचनं लौकिकेऽपि नवभोजने प्राप्तणार्थम् । सर्वत्रवचनात् प्रकरणादुत्कृष्टमपि नवभोजनवचनाल्लौकिक एव व्यवतिष्ठते । वैदिकेऽग्निहोत्रहोमे 'नवानां सयनीयान्, फलान्न प्राप्नुयात्, तत्रापि प्राप्तणार्थं भक्षणवचनम्११ । अथानन्तरं व्रीहीणां यवानां चाग्रयणेऽदृ-

ष्यते । तत्र व्रीह्याग्रयणस्य काल उक्तः ,वसन्तो यवाग्रयणस्य । तत्र हि तेषां प्रथमः पाक इति तन्त्रे विशेषाभावात् उभयोः सहवचनं तयोर्धान्ये विराजौ च भवतः । "इतरत् पौर्णमासं तन्त्रं वैराजम्" इत्येतावतैवोक्तेऽपि तावन्मात्रविकारसिद्धौ सत्यां धान्याविराजग्रहण विकल्पेन द्वयन्वतोरपि प्रापणार्थम् १२ । आद्ययोर्विकल्पेनैता देवता गृह्यन्ते । यदि श्यामाकाग्रयणसस्यामेवेष्टौ समानतन्त्रेण क्रियते तदा सोमस्तुतीयो भवति १३ । इन्द्राग्न्योः सोमस्य चोक्ता याज्यानुवाक्याद्वत्तिः" १४ । "य आहिताग्निराग्रयणेनानिष्ट्वा प्राग्नीयात्" श्रुतिः अतोऽकरणे दोषश्रवणान्नित्यत्वम् । अतएव कर्कपद्धतौ नित्यानि तु अग्निहोत्रदर्शपौर्णमासदाक्षायणाग्रयणपशुचातुर्मास्यादीनि अवश्यं कर्त्तव्यानीत्युक्तम् । २तन्निमित्तकेष्टौ नवशस्येष्टौ स्त्री गौरा० ङीप् । "इन्द्रेण सहितं यस्य हविराग्रयणं स्मृतम् । अग्निराग्रयणीनाम भानोरैवान्वयस्तु सः इत्युक्ते ३सूर्य्यान्वयजे वह्निभेदे पु० । उपचारात् ४आग्रयणकाले "व्रीह्याग्रयणानन्तरं यवाग्रयणाद्वांग्व्रीहिभिरेव दर्शपौर्णमासौ कार्य्यौ यवाग्रयणानन्तरं प्राग्व्रीह्याग्रयणाद्यवैरेव । अथवा व्रीहिभिरेव इति"कर्कः । "शस्यान्ते नवशस्येष्ट्या तदन्ते द्विजोऽध्वरैः" मनुव्याख्यायां पूर्व्वार्ज्जितधान्यादिशस्ये समाप्ते सति यवानामिति स्मृत्यवधारणात् असमाप्ते पूर्व्वशस्ये नवशस्योत्पत्तौ आग्रयणेन यजेतेति शस्यत्वयस्यानियतत्वात् धनिनां बहुहायनजीवनोचितशस्यसम्भवाच्च" कुल्लू० आग्रयणञ्च कर्म्माशुद्धकाले न कर्त्तव्यम् यथोक्तम् "वाप्यारामतडागकूपेत्यादिनोपक्रम्य" "गोदानाग्रहयण प्रपाप्रथमकोपाकर्म्मवेदव्रत"मित्यादीन्युद्दिश्य "श्रवणयोर्वेधं परीक्षां त्यज दृष्ट्वास्तगिगुरुत्व दूष्यसितयोर्न्यूनामासे तथा" मुहू०चि० उक्तेः । "सोमयोगादिकर्माणि त्याज्यानि शुभलिप्सुभे । तथैवाग्रयणाधानचातुर्य्यास्यादिकान्येहपि"गृ०परि०उक्तेः ।"बाले वा यदि वृद्धे वा शुक्रे वास्तं गते गुरौ । मलमासद्वयेतानि वर्ज्जयेत्"वृद्धगर्गोक्तेः ।

आग्रह पु० आ+ग्रह–अप् । १आवेशे आसक्तौ अभिनिवेशे "चलेऽपि काकस्य पदार्पणाग्रहः" नैष० । २आक्रमे ३अनुपक्षे ४ग्रहणे च ।

आग्रहायण पु०अग्रहायण्या मृगशीर्षनक्षत्रेण युक्ता पौर्णमासी आग्रहायणी अस्त्यत्र मासे ज्योत्स्ना० अण् । १चान्द्रमार्गशीर्षे मासि अग्रहायण्या युक्ता पौर्णमासी अण् । २चान्द्रमार्गशीर्षमासपौर्णमास्यां स्त्री । "आग्रहायण्या जर्द्धं तिसृष्वेवाष्टकासु"स्मृतिः । "कार्त्तिक्या आग्रहायणी मासे" सि०कौ० । यथा च मृगशीर्षनक्षत्रसम्बन्धात् मासस्य मार्गशीर्षत्वं तथोक्तम् सू०सि० "नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः" इति "पूर्णमास्यां मृगशीर्षनक्षत्रयोगात् मार्गशीर्षश्चान्द्रमासः मृगशीर्ष एव अग्रहायणीनामा पौर्णमास्यां तत्सम्बन्धयोग्यत्वमेव तदर्थः अत एव "कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम् । अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्" सू०सि० तेन कृत्तिकारोहिणीभ्यां कार्त्तिको मृगार्द्राभ्यां मार्गशीर्ष इत्यादि क्रमेण नक्षत्रद्वयसम्बन्धस्तत्रोक्तः ।

आग्रहाय(ण)णिक न० आग्रहायण्यां देवस्वं वुञ् ठञ् वा । आग्रहायण्यां देये स्वे ।

आग्रहायणिक पु० आग्रहायणी पूर्णिमाऽस्मिन्मासे ठक् । चान्द्रमार्गशीर्षे मासि । [(अग्रदानी) विप्रे ।

आग्रहारिक त्रि० अग्रहारोऽग्रभागोनियतं दीयतेऽस्मै ठञ् ।

आग्रायण पुंस्त्री अग्रनामकस्य ऋषेः गोत्रापत्यम् नडा० फक् । अग्रनामर्षेः गोत्रापत्ये १अग्रेऽयनं शस्यस्यास्य ज्योत्स्ना० अण् । २नवशस्येष्टौ ।

आघट्टक पु० आघट्टयति रोगान् ण्वुल् । रक्तयानमार्गे राजनि० चालके त्रि० । [नयां नभस्वतः" माघः ।

आघट्टना स्त्री आ+घट्ट–युच् । चालनायां "रथङ्गिराघट्ट-

आघट्टित त्रि० आ+घट्ट–क्त । चालिते ।

आघमर्षण न० अघमर्षणे विहितम् अण् । अघानां नाशनाय विहिते सूक्तभेदे अघमर्षणशब्दे तत्र दर्शितम् ।

आघर्ष पु० आ+घृष–घञ् । मर्द्दने "गण्डस्थलाघर्षगलन्मदोदक" माघः । भावे ल्युट् । आघर्षणमप्यत्र न० ।

आघाट पु० आ+हन–कर्त्तरि संज्ञायां घञ् पृ० नि० तस्य टः । १अपामार्गे २आघातके त्रि० । "यत्राघाटाः कर्कर्य्यः संवदन्ति" श्रुतिः ।

आघातिन् त्रि० आ+हन–णिनि पृ०नि० । आघातके "आघातिमिरिव धावयन्" ऋ०१,०,१४६,२ ।

आघात पु० आ+हन–घञ् । १वधे २आहनने ३ताडने च तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः" मेघ० । "अभ्यस्यन्ति तटाघातं निर्जितैरावतागजाः" कुमा० । "मूलाघातःस उच्यते" सुश्रुतः । आधारे घञ् । ४वधस्थाने । "आघातं नीयमानस्य वध्यस्येव" ।

आघातन न० आहन्यतेऽत्र आ+हन–स्वार्थे णिच्–आधारे

ल्युट्। १बधस्थाने हारा० भावे ल्युट्। २हनने।

आघार पु०आ+घृ-णिच्-कर्मणि अच्। १क्षते। भावे अच्। आहितवह्नेः वायव्यकोणादारभ्याग्नेयं यावत् नैर्ऋतीमारभ्य ऐशानीं यावच्छावच्छिन्नधारया २क्षतसेचने। "तूष्णीमाघारावाघार्य्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहा" आश्व०श्रौ०। "तूष्णीं मन्त्रवर्जम् उत्तरपश्चिमाया आरभ्य दक्षिणपूर्व्वाम् प्रत्यविच्छिन्नामाज्यधारां हरेत् तथा दक्षिणपश्चिमामारभ्य उत्तरपूर्व्वां प्रत्याघारयेत्" तद्वृत्तिः इति ऋग्वेदिनाम्। यजुर्वेदिनान्तु मन्त्रोच्चारपूर्व्वकं तत्प्रोक्षणमिति भेदः उभयवेदिनामपि आघारकाले प्रजापतीन्द्राग्नीनां सा ध्यानम् आज्यं च स्रुवे चतुर्व्वारं गृह्यमिति विवेकः।

आघूर्णित त्रि० आ+घूर्ण-क्त। १ चलिते, २भ्रान्ते च।

आघृणि पु० आगतो घृणिर्दीप्तिरस्य। सूर्य्ये। "एहि वां विमुचो न पादाघृणे। संचक्षावहै" "रायोधारास्याघृणे वसो।" ऋ० ६,५५,१,२। आघृणे! आगतदीप्ते! हे घृणन्!" भा०।

आघोषण न० आ+घुष-ल्युट्। सर्व्वत्र प्रचारणायोच्चैः-शब्दकरणे। णिच्-युच्। आघोषणाप्यत्र स्त्री।

आघ्राण त्रि० आ+घ्रा-क्त। १गृहीतगन्धे पुष्पादौ नासिकया यस्य गन्धज्ञानं जातं तस्मिन् २लब्धे च भावे क्त। ३ गन्धग्रहणे ४ लब्धौ च न०।

आघ्रात त्रि० आ+घ्रा-क्त वा तस्य नत्वाभावः। १गृहीतगन्धे पुष्पादौ २लब्धे ३ असृष्टे च "युष्माद्यनाघ्राततिथिविषयम्" ति०त० रघुनन्दनः।

आघ्रेय त्रि० आ+घ्रा-यत्। घ्राणेन आघ्रे "आघ्रेयः सर्व्वदेवानाम्" धूपदानमन्त्रः।

आङ् अव्य० अत-भा० डाङ् प्रयोगे तस्य ङित्त्वम्। आशब्दार्थे तच्छब्दे विवृतिः तत्र ईषदर्थे आताम्रः आग्निक्लवः अभिव्याप्तौ ब्रह्मास्त्यासकलात्। सीमायाम् "आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्" रघुः धातुविशेषयोगेनार्थविशेषे आगच्छति आतिष्ठते आलम्बते "तुलां यदारोहति दन्तवाससा" अभ्यासे आवृत्तिः अभ्यावृत्तः। प्रत्यावृत्तौ प्रत्यागच्छति। समन्ताद्वृत्तौ आचितः आकीर्णः।

आङ्गायन त्रि० अङ्गुयेन निर्वृत्तादि सङ्घा० चतुरर्थ्याम् फक्। अङ्गुयनिर्वृत्तादौ। [रणयुक्ते।

आङ्गुष्किक त्रि० अङ्गुषः प्रहरणमस्य ठक्। अङ्गुषप्रहरणयुक्ते।

आङ्ग न० अङ्ग+स्वार्थे अण्। १लोमसाङ्गे अङ्गादागतः अण्। व्याकरणप्रसिद्धे २अङ्गाधिकारनिर्दिष्टे कार्य्ये "वर्णादङ्गं बलीयः" परिभाषा अङ्गदेशे भवः अण्। ३अङ्गदेशभवे त्रि० बहुवचने तु तस्य लुक् अङ्गाः। अङ्गानां राजा अण्। ४अङ्गदेशस्य राजनि बहुषु लुक् अङ्गाः तद्राजसु। स्त्रियां प्राच्यत्वान्न लुक्, आङ्गी।

आङ्गिक त्रि० अङ्गेषु जनपदेषु भवः वुञ्। १अङ्गदेशभवे। अङ्गाः क्षत्रियाः तद्देशपतयो भक्तिरस्य वुञ्। अङ्गदेशक्षत्रिया यस्य सेव्याः तस्मिन् २बहूनामङ्गदेशक्षत्रियाणां सेवके। अङ्ग जनपदोभक्तिरस्य वुञ्। ३बहुत्ववदङ्गजनपदसेवके च त्रि०।

आङ्गविद्य त्रि० अङ्गविद्यां वेद "अङ्गलक्षधर्म्मनियोगादिद्यानाक्षेति वक्तव्यम्" वार्त्ति० ठको निषेधात् अण्। १व्याकरणाद्यङ्गविद्यावेत्तरि। तद्व्याख्यानो ग्रन्थः कृगयनादि० अण्। २अङ्गविद्याव्याख्याने ग्रन्थे अङ्गविद्यायां भवः अण्। ३तद्विद्याभवे। [समूहे।

आङ्गार न० अङ्गाराणां समूहः भिक्षादि० अण्। अङ्गार-

आङ्गिक त्रि० अङ्गेन अङ्गचालनेन निर्वृत्तम् अचतुरा० ठक्। भावव्यञ्जके अङ्गनिष्पन्ने नटादीनां १भ्रूविक्षेपादौ। "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिकोवाचिकश्चैवमाहार्य्यः सात्विकस्तथा" सा०द०। स्त्रीणां चेष्टाविशेषे २हावादौ। "यौवने सत्वजास्तासामष्टाविंशति रङ्गजाः। अलङ्कारास्तत्र हावभावहेलास्त्रयोऽङ्गजाः" सा०द०। हावादयश्च तत्सञ्ज्ञे वक्ष्यन्ते "अङ्गं नटङ्ग" तद्वाद्यं शिल्पमस्य ठक्। नटङ्गवादनशिल्पके त्रि०।

आङ्गिरस पुंस्त्री० अङ्गिरसोऽपत्यम् अण्। १अङ्गिरस ऋषेरपत्ये "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः" मनुः। बहुत्वेऽर्थो लुक्। अङ्गिरसः स्त्रियां ङीष् लुक् ङीष्। "आथर्वणीराङ्गिरसीर्देवोर्मनुष्यजाउत" अथ० ८,५,६। २तद्गोत्रजातौ तस्य तदपत्यत्वम् भा० आ०प० ६६अ०। "अङ्गिरसस्त्रयः पुत्राः लोके सर्व्वत्र विश्रुताः। बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः"। अङ्गिरसा दृष्टम् अण्। अथर्ववेदोक्ते दृष्टमन्त्रभेदे "अथर्वाङ्गिरसं नीलरुद्रं देव्यपराजिता। मधु कृष्णं रौद्रस्य शान्तिकाध्यायमेव च। अथर्वाणौ द्वारपालौ पठेत्सप्तसप्तरात्रितौ" दानपारि० पुरा०। तत्र कृष्णं अथर्वसंहितायां १८,१,५८,५६,६०, ६१ मन्त्रात्मकम्, "अङ्गिरसो नः पितरः" इत्यादिकम्। तत्र तृचादागादिपञ्चतौ अक्षाभिः १८५६० दर्शितम् अङ्गिरसज्ञानां रसः सारः स्वार्थे अण्।

ऽऽत्मनि । "सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः" इति श्रु० उ० । "आङ्गिरस आत्मा कार्य्यकरणानाम् कथमाङ्गिरसः" । प्रसिद्धं हि यदङ्गिनामङ्गानां रसत्वं तदपाये शेषप्राप्तेरिति वक्ष्यामः यस्माच्चायमङ्गिरसत्वात् विशेषानाश्रयत्वाच्च कार्य्यकरणानां साधारण आत्मा विशुद्धश्च तस्माद् वागादीनपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थः" ग० भा० ।

आङ्गिरसेश्वर पु० आङ्गिरसेन प्रतिष्ठितः ईश्वरः । का० क्षेत्रस्थे आङ्गिरसप्रतिष्ठिते शिवलिङ्गभेदे ।

आङ्गुरि(लि)क पु० अङ्गुलि (रि) व इवार्थे कन् । वा रत्वम् । अङ्गुल्याकृतौ पदार्थे ।

आङ्गूष पु० अङ्गति गच्छति देवान् अगि–जपच् अङ्गूषः ततः स्वार्थे अण् । स्तोत्रे । "तिरः पुरू चिदश्विना रजांस्याङ्गूषः" ऋ० २,५८,५ । "आङ्गूषं स्तोत्रम्" भा० । "प्रमन्महे भवसानाय शूषमाङ्गूषम्" यजु० २४,१६ । "अस्मा इदुग्रय इव प्रयंसि भरास्याङ्गूषं बाधे सुदक्षि" ऋ० १,६१,२ । [भवसन्निकृष्टदेशादौ ।

आङ्ग्य त्रि० अङ्गे भवः आङ्गः चतरर्थ्यां संकाशा० यत् । अङ्ग-

आचके अव्य० आ+चक ए–विभक्तिप्रतिरूपकम् । कामनायाम् निरु० । "त्वामवस्युराचके" यजु० २१,१ । आचके कामये" वे० दी० । "रक्षातुरुद्रोवसुभिराचके" य० ४,२१ ।

आचक्षाण त्रि० आ+चक्ष–शानच् । आख्यानं कुर्व्वति ।

आचतुर अव्य० चतुःपर्य्यन्तम् अव्ययी० अच् समा० । चतुःपर्य्यन्ते "आचतुरं क्षीमे पशवोऽन्नं मिथुनायन्ते" । माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेण "तत्पुत्रादिनापीति मर्य्यादार्थः" सि० कौ० ।

आचक्षुस् त्रि० आ+चक्ष–वा० उसि । आख्यानकर्त्तरि ।

आचतुर्य्य न० अचतुरस्य भावः "न नञपूर्व्वात् तुरादि" पा० सू० चतुरादिपर्य्युदासात् भावे ष्यञ् प्रत्ययः । अनैपुण्ये

आचम पु० आ+चम–घञ् वा ह्रस्वः । आचमनशब्दार्थे "दक्षा सह पलैकन्तु शुद्धं वारि तथाचमे" तन्त्रसा० ।

आचमन ग० आ+चम–भावे ल्युट् । १जलादेः पाने स्मृत्युक्ते कर्म्माङ्गे २कर्त्तृसंस्कारके ३क्रियाभेदे च, आ० तत्त्वे "आचमने उदकग्रहणप्रकारपरिमाणञ्चाह भरद्वाजः । 'आयतं पर्वणां कृत्वा गोकर्णाकृतिभत्करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः । सुखाङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं चरेत् । मासमज्जनमात्रासु संगृह्य त्रिः पिबेदपः' । पाणिना दक्षिणेन "त्रिः पिबेद्-

द्भिरिणेनापः" इति आदिपुराणोक्तेः । मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्' । मदनपारिजाते हारीतः । 'यन्निर्यक्षु पवित्रक्ष न तेनाचमनञ्चरेत्' । यन्थना यन्निरिति सप्तदशकरोऽपि । आचमनानुदृत्तौ देवलः । 'न गच्छन् न शयानश्च न क्रमन् न परान् स्पृशन् । न हसन् नैव संजल्पन् नात्मानञ्चैव वीक्षयन्' । क्रमन् कम्पमान इति रत्नाकरः । आत्मानं आत्मस्थानं हृदयं वीक्षयन् इति स्वार्थे णिच् । नेत्यनुदृत्तौ । 'केशाम्बीवीमघःकायं संस्पृशन् धरणीमपि । यदि स्पृशति चैतानि भयः प्रक्षालयेत् करम्" । अधःकायं नाभेरधः प्रदेशम् । करं दक्षिणम् । आचमनानुदृत्तौ गोभिलः । 'नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम्" इति । अन्तरीयमधःपरिधानं तदेकदेशेन उत्तरीयं कृत्वा । मरीचिः । 'न बर्हिर्जानुस्खरया नासनस्थो नचोत्थितः । न पादुकास्थो नाचित्तः शुचिः प्रयतमानसः । उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन" । जलस्थलोभयकर्म्मानुष्ठानार्थं जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । 'अन्तरुदके आचान्तोऽन्तरेव पूतोबहिरुदके आचान्तो बहिरेव शुद्धो भवति तस्मादन्तरेकं बहिरेकं च पादं कृत्वा आचामेत् सर्वत्र शुद्धो भवति" इति । जानुनज्जुजलेषु तिष्ठन्नेवाचामेत् । 'जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्यति" इति विष्णूक्तेः । हारीतः । "आर्द्रवासा जले कुर्य्यात् तर्पणाचमनं जपम् । शुष्कवासा स्थले कुर्य्यात् तर्पणाचमनं जपम् । कात्यायनः । 'स्नानमाचमनं होमं भोजनं देवतार्च्चनम् । प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् । आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" । आसनरूढ़पादः आसनारूढपादतलः । जानुनोर्जङ्घयोः कृतावसक्थिकः वस्त्रादिना कृतपृष्ठजानुजङ्घावन्धः तद्वयेन भेदप्रतीतेः । अत्र च "अनेको ह्याहृत्रे दारुशिले भूमिसमे दृषत्काश्च संकीर्णभूता" इति बौधायनवचनात् तथाविधपादोऽपि कुर्य्यात् । व्यासः । "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा । अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् । अपः पाणिनखाग्रेषु आचामेद्यस्तु वै द्विजः । सुरापाणेन तत्तुल्यमित्येवमृषिरब्रवीत् संवर्त्तेति" । सुखं संवृत्य अलोम-

कौष्टस्यर्थो यथा न भवतीति तात्पर्यम् । तथाच वशिष्ठः । "आचान्तः पुनराचामेत् वासोविपरिधाय च । ओष्ठौ संस्पृश्य च तथा यत्र स्यातामलोमकौ"। एवञ्च प्रागुक्तहारीतवचने यत् ओष्ठयोर्मार्जनमुक्तं तल्लोमकयोरेवेति । एतदनन्तर वामहस्तं पादौ शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत् । तथाच कामधेनावाप्तम्बः । "त्रिराचामेत् द्विरुन्नताभिरङ्गुलिभिरोष्ठौ परिमृजेत् । द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्च" । गोभिलः । 'त्रिराचामेत् द्विः प्रमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेत् इन्द्रियाण्यङ्गैः स्पृशेत् अक्षिणी नासिके कर्णाविति" । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणामसूर्त्तत्वात् तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः 'तर्ज्जन्यनामामध्याभिर्मुखं पूर्वं स्पृशेदिति ब्रह्मचारिकाण्डधृतभविष्यात् । 'घ्राणं नासापुटद्वयं 'तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम्" इति शङ्खात् । एवं पुनःपुनरिति चक्षुःश्रोत्रद्वयाभिप्रायेण श्रीदत्तोऽप्येवम् । तेन दक्षिणं स्पृष्ट्वा वामं स्पृशेत् । व्यक्तं कामधेनावाचारचिन्तामणावाप्तम्बः । 'चक्षुषी नासिके कर्णौ सकृत् सकृदुपस्पृशेत्" । द्विरित्येके द्विरिति शाख्यन्तरीयम् अत्र गोभिलीयाप्तम्बीयग्रन्थक्रमो न व्याहृतः तत्क्रमस्य "श्रुत्यर्थपठनस्थानसूत्रप्रावर्त्तिकाः' इति जैमिनिसूत्रात् 'घ्राणं पश्चादनन्तरमिति" दक्षोक्तशब्दक्रमेण बलवता बाधात् । अतएव दक्षेणैव प्रतिज्ञातम् । "उक्तं कर्म्म क्रमो नोक्तः न कालस्तत एव हि । द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत्" । अतस्कन्दोगपरिशिष्टेन गोभिलाप्तग्रन्थक्रमः समीक्षतः । यथा 'त्रिःप्राश्यापोहिरण्मृज्य मुखमेतान्युपस्पृशेत् । आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोऽसकान्' । अत्र नासाक्षीत्युक्तम् । सर्वाताङ्गुष्ठयोगेन करणमाह पैठीनसिः । "अग्निरङ्गुष्ठसंस्पर्शात्तेनैव सर्व्वाणि स्थानानि स्पृशेत्" । नाभिस्पर्शानन्तरं जलस्पर्शमाह व्यासः । 'ततः स्पृष्ट्वाभिदेशं पुनरप्सु संस्पृशेत्' । इन्द्रियस्पर्शानन्तरं भविष्ये । "यद्भूमावुदकं वीर ! समुत्सृजति मानवः । वासुकिप्रमुखान् नागान् तेन प्रीणाति मानवः' । पैठीनसिः । "स्पृष्ट्वा प्राणान् यथासंख्यं पादौ प्रोक्ष्य पयः शुचिः । सव्ये पाणौ ततः श्रेष्ठा अपोविनिनयेदिति" प्राणान् इन्द्रियाणीति रत्नाकरः । श्रेष्ठा आचमनावशिष्टाः इति मदनपारिजातः । एतत्परमेव 'अन्ततः प्रत्युपस्पृश्य शुचिः' इति गोभिलसूत्रम् । अन्यादिस्पर्शसहितमाचमनं कृत्वा उदकं स्पृष्ट्वा शुचिरिति सरला । अन्तत उपस्पर्शनात् पाणिना उदकस्पर्शं कृत्वा शुचिर्भवतीति भट्टभाष्यम् । अतएवोपस्पर्शमभिधाय ततो जलशेषं वामहस्ते त्यजेदिति पितृदयिता । एतेन द्विजातीनामपि द्विराचमने ओष्ठजलस्पर्शमात्रं शास्त्रार्थः "प्रत्युपस्पृश्यान्ततः शुचिर्भवति" इति गोभिलसूत्रादिति छन्दोगाङ्किकं निरस्तम् । "हृदयं स्पृशंस्त्वेवमेवाचामेत्" इति तदनन्तरस्तत्रैव हृदयस्पृग्जलनियमात् । "उच्छिष्टोऽस्यैवातोऽन्यथा भवत" इति सूत्रान्तरेण हृदयतत्वाभावे "उच्छिष्टत्वाभिधानात् एतदनन्तरमेवाथ प्रत्युपस्पर्शनम्" इत्यादिना द्विराचमनादिविधानाच्च । वायुपुराणे । 'निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने । उच्छिष्टस्य च संभाषात् अशुच्युपहतस्य च । सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च । विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत् । उद्वायससंस्पर्शे दर्शने चान्त्यवासिनाम्" । प्रागर्द्धं कृत इति शेषः । सन्देहेषु अप्रायत्यस्येति शेषः । शिखां मुक्त्वा अनन्तरं कृत्वा यज्ञोपवीतेन विना स्थित्वा पुनः परिधाय चाचामेदित्यर्थः । हारीतः । "स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेदिति" । देवलः । "उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम् । तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति" । तथाविधमुच्छिष्टम् । याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते स्वप्ने भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेत् वासोविपरिधाय च" । ब्रह्मपुराणम् "होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्रापि सकृत् सकृत् । द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्" स्मृतिः । "क्षुते निष्ठीविते स्वप्ने परिधानेऽश्रुपातने । कर्म्मस्थ एषु नाचामेच्छिरः श्रवणं स्पृशेत्" । साङ्ख्यायनः । "आदित्यावसवोरुद्रा वायुरग्निश्च धर्म्मराट् । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः" । अत्र हेतुमाह पराशरः । "प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा । विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत्" । मार्कण्डेयपुराणम् । "कुर्य्यादाचमनं स्पर्शं गोमुखस्यार्कदर्शनम् । कुर्य्यात्तालभनञ्चापि दक्षिणश्रवणस्य च । यथाविभवतोऽन्यत् पूर्व्वाभावे ततः परम् । न पूर्व्वक्रियमाणे विद्यमाने उत्तरप्राप्तिरिष्यते" । पुराणसारवायुपुराणयोः । "यः कर्म कुरुते मोहादाचम्यैव नास्तिकः । भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः" । इत्यलम् ।

मदनपारिजातेऽत्र विशेष उक्तः । दक्षयाज्ञवल्क्यौ "कृत्वाथ शौचं प्रक्षाल्य स्नात्वैव इन्द्रियोपहतस्तूष्णीं स्नात्वा" "कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्" प्रचेताः । "अनुष्णफेनशीताभिराचामेदिति" । आतुराणामनुष्णोदकमप्यविरुद्धम् । तथाचापस्तम्बः "उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनामिति" । अत्राचमनं भवतीति शेषः । योगीश्वरः "अन्तर्जानु शुचौ देशे उपविष्टउदङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् । तथा "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यपं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" । दक्षः । "प्रक्षाल्य पादौ हस्तौ च त्रि पिबेदम्बु वीक्षितम् । संहताङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखम् । वीक्षितमित्येतदङ्गविषयम् । "रात्रावनीक्षितेनैव शुद्धिरुक्ता मनीषिभिरिति" यमस्मरणात् मनुः । त्रिराचामेदपः पूर्व्वं द्विःप्रमृज्यात्ततोमुखम् । खानि चोपस्पृशेदद्भिरात्मानं शिरएव च" गौतमः । "त्रिश्चतुर्वा अप आचामेदिति" चतुर्ग्रहणं पित्र्यतीर्थेति केचित् । तिर्य्यग्ग्रहणेन तुल्यभाव इत्यन्ये । भरद्वाजः । संहताङ्गुलिभिस्तोयं गृहीत्वा दक्षिणेन तु । सुप्ताङ्गुष्ठकनिष्ठं तु शेषेणाचमनं चरेत् । ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन । कायं प्राजापत्यं त्रैदशिकं दैवम् । यस्मिन् आचमनप्रयोगे च येन ब्राह्मादितीर्थं स्वीकृतं तेनैव स प्रयोगः कार्य्यो न तीर्थान्तरेण । दक्षः । "संहताङ्गुलिभिः पूर्व्वं आस्यमेवमुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः । नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै । सर्वाभिश्च शिरः पश्चात् बाहू चाग्रेण संस्पृशेत् । याज्ञवल्क्यः । "अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । त्रिःप्राक्षाल्य द्विरुन्मृज्य खान्यङ्गिः सप्तसंस्पृशेत्" । अत्र विशेषमाह पैठीनसिः । "सव्ये पाणौ शेषा अपो निनयेदिति" । शेषा आचमनावशिष्टाः । बृहद्यङ्गस्त्वन्यथोपस्पर्शनमाह । "तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेत् खान्यद्वयन्ततः । अङ्गुष्ठानामिकाया योगेन श्रवणे स्पृशेत् । कनिष्ठाङ्गुष्ठयोगेन स्पृशेत् खान्यद्वयं ततः । नाभिञ्च हृदयं तद्वत् स्पृशेत् पाणितलेन तु । संस्पृशेच्च तथा शीर्षमिति" । शङ्खस्तु "ततोऽङ्गुलिचतुष्केण स्पृशेन्मूर्द्धानमादितः । तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेच्छ्रोत्रद्वयं पृथक् । मध्यमानामिकाभ्यान्तु स्पृशेन्नासापुटे क्रमात् । अङ्गुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत् । तर्ज्जन्यङ्गुष्ठयोगेन नाभिं हृदि तु संस्पृशेत्" । पैठीनसिः । "अग्निरङ्गुष्ठस्तस्मात्तेनैव सर्व्वाणि स्थानानि स्पृशेदिति" । अत्र स्वस्वशाखानुसारेण व्यवस्थितो विकल्पः । यत्र शाखायामङ्गमेव नाम्नातम् अङ्गुष्ठादिविशेषो वा नाम्नातः । तच्छाखीयानां त्वैच्छिको विकल्पः येषान्तु स्वशाखायां कतिपयाङ्गस्पर्शनं नाम्नातम् । तेषान्तु स्वशाखोक्तक्रमानुसारी शाखान्तरोक्तक्रमः अनुक्ताङ्गस्पर्शे भवतीति व्यवस्था । उदकपरिमाणमाह याज्ञवल्क्यः । हृत्कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः" । अन्तस्तालुगाभिः । हृदङ्गमापरिमाणमाह उशनाः । "नासमज्जनमात्रा हृदयङ्गमा भवन्ति" । आचमनप्रसङ्गात् सपवित्राचमने कश्चन विशेषः प्रदर्श्यते । तत्र मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत् । एतद्दक्षिणकराभिप्रायम् । हारीतेन वामे निषेधात् । "वामहस्ते कुशानुत्क्षिप्य समाचामति योद्विजः । उपस्पर्शी भवेत्तेन रुधिरेण मलेन चेति" । एतत् केवलवामहस्ताभिप्रायम् । हस्तद्वयाश्रयस्पर्शने गोभिलेन फलस्मरणात् । "उभयत्र स्थितैर्दर्भैः समाचामति योद्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेदिति" । अत्र विशेषमाह हारीतः । सव्यापसव्यौ कुर्व्वीत सपवित्रकरौ बुधः । ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं भवेदिति । पवित्रलक्षणमाह कात्यायनः । "अनन्तर्गर्भिणं सार्यं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" । मार्कण्डेयः । "चतुर्भिः कुशपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् । एकैकं नूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् । त्रिभिर्दर्भैः शान्तिकर्म्म पञ्चभिः पौष्टिकं तथा । चतुर्भिश्चाभिचाराख्यं कुर्व्वन् कुर्य्यात् पवित्रकमिति" । अथाचमननिमित्तानि तत्र मनुः । "उच्छ्वासनिष्ठीवितकर्माचामेदवतीर्य्य तथैव च" । हारीतः । "स्त्रीशूद्रोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगच्छंस्तु कामं आचमेत्" । अथ द्विराचमननिमित्तानि । तत्र याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते स्वप्ने भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेदासोविपरिधाय च" बौधायनः । "भोजने हवने दाने उद्गारे च प्रतिग्रहे । हविर्भक्षणकाले वा तद्द्विराचमनं स्मृतम्" । ब्रह्मपुराणे । होमे भोजन-

काले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्र च सकृत् सकृत्" । अङ्गिराः ।"चण्डालादीन् जपे होमे दृष्ट्वा चैव विशुद्ध्यति । श्वादीन् दृष्ट्वापि वाचामेत् कर्णं वा दक्षिणं स्पृशेत् । जानुनोरधस्तात्खादिस्पर्शे आचमनमन्यत्र स्नानविधानात् । उदकाभावेऽसामर्थ्ये वा दक्षिणश्रवणस्पर्शः । अनेनैवाभिप्रायेण दृष्टस्मृतिः । "पित्तमन्त्रोच्चरे रौद्रे आमान्नेऽधमेक्षणे । अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसम्भवे । मार्जारमूषिकस्पर्शे प्रवासेऽन्नतभाषणे । निमित्तेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत्" । तथा "आर्द्रं तृणं गोमयं वा भूमिं वा संस्पृशेद्द्विजः" । सांख्यायन । क्षुते निष्ठीवने इत्यादि प्रागुक्तम् । आचारसागरे । अपःपीत्वौषधं जग्ध्वा क्षत्वा ताम्बूलचर्वणम् । सौगन्धिकानि सर्वाणि नचाचामेद्विचक्षणः । अपोजग्ध्वेति अमृतोपधानमसीत्यादिभिर्मन्त्रैरपोजग्ध्वानन्तरं नित्यं नाचामेदित्यर्थः । बौधायनः । "पादक्षालनशेषेण नाचामेद्वारिणा द्विजः । शुभाभावे पिबेत् किञ्चित्तच्छिष्टा भूमौ जलं स्पृशेत्" । आपस्तम्बः । "सन्ध्यार्थे भोजनार्थे वा पित्रर्थे वा तथैव च । शूद्राहूतेन नाचामेत् जपेज्याक्षवनेषु च" । यमः । तावन्नोपस्पृशेत् विप्रोयावद्वामेन संस्पृशेत् । उदके चोदकस्थस्तु स्थलस्थस्तु स्थले शुचिः । पादौस्पृष्ट्वोभयतापि आचान्तोभयतः शुचिः" । जले स्थले चैकैकं पादं कृत्वाचान्त उभयत्र जलकर्मणि स्थलकर्मणि च शुद्धो भवतीत्यर्थः । "अकृत्वा पादयोः शौचं तिष्ठन्मुक्तशिखोऽपि वा । विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्" । तिष्ठन्निति स्थलविषयम् । विष्णुना तिष्ठतोपि जलेऽभ्यनुज्ञानात् । "जान्वोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् यत्नकृत्वोपि समाचान्तो न शुद्ध्यति" । अधस्तान्निषेधाज्जानुदघ्नेऽप्यविरुद्धम् । तथा च स्मर्यते । "जानुमात्रे जले तिष्ठन्निति" अत्राचान्तः शुचिरिति वाक्यशेषः । तथा "सोपानत्कोनचोष्णीषी पर्य्यङ्कशयनो नगः । दुर्दैवे प्रपतंश्चैव नाचमन् शुद्धिमाप्नुयात् । नरगोखरयानाश्वहस्त्यधीरोहकस्तथा । आचान्तः कर्म्म शुद्धः स्यात्स्वलौषधजग्धिकृत् । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन । न पादुकास्थो नत्वरितो नचायज्ञोपवीतवान् । स्पृशन्ति बिन्दवः पादौ जङ्घे चामतः परान् । भौमिकैस्ते समाख्येया नचैवाप्रयतो भवेत् । परेषामाचमनीदोदके दीयमाने ये बिन्दवः पादयोः पतन्ति ते नाशुद्ध्यर्थम्" । "न तिष्ठन्नुदतोदकेनाचामेच्च शूद्रायुच्छेकपाग्व्यावर्जितेन" गौ० स्पष्टः क्रमः काशीखण्डे उक्तः । "प्रागग्र उदगग्रो वा स्वपविष्टः शुचौ भुवि । उपस्पृशेद्विहीनायां तृणाङ्गारास्थिभस्मभिः । अनुष्णाभिरफेनाभिरद्भिर्जुष्टाभिरत्वरः । ब्राह्मणोब्राह्मतीर्थेन दृष्टपूताभिराचमेत् । कण्ठगाभिर्नृपः शुध्येत्तालुगाभिस्तथोरुजः । स्त्रीशूद्रावास्यसंस्पर्शमात्रेणापि विशुध्यतः । समस्ताङ्गुलिनोद्धृत्य पाणिना दक्षिणेन तु । त्यक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं विदुः । शिरः प्राप्त्य करं वा जले मुक्तशिखोऽपि वा । अव्याक्षिप्तपदद्वन्द्व आचान्तोऽप्यशुचिर्भवेत् । त्रिःपीत्वाम्बु त्रिशुद्ध्यर्थं ततः खानि विमोक्षयेत् । अङ्गुष्ठमूलदेशेन द्विर्द्विरोष्ठावरौ स्पृशेत् । अङ्गुलीभिस्त्रिभिः पश्चात् पुनरास्यं स्पृशेत् सुधीः । तर्जन्यङ्गुष्ठकोष्ठौ च घ्राणरन्ध्रे पुनः पुनः । अङ्गुष्ठानामिकाभ्यां च भालशीर्षे पुनः पुनः । कनिष्ठाङ्गुष्ठयोगेन नाभिरन्ध्रमथस्पृशेत् । स्पृष्ट्वा तलेन हृदयं समस्ताभिः शिरः स्पृशेत् । अङ्गुल्यग्रैस्तथास्कन्धौ साम्बु सर्व्वत्र संस्पृशेत् । आचान्तः पुनराचामेत् क्षुते स्त्र्युपसर्पणे । स्नात्वा भुक्त्वा पयः पीत्वा प्रारब्धे शुभकर्मणाम् । सुप्त्वा वासः परीधाय तथा दृष्ट्वाप्यमङ्गलम् । प्रमादाद्यदि स्पृष्ट्वा हिरण्यान्नं शुचिर्भवेत्" । सन्ध्याङ्गाचमने शाखिभेदे मन्त्रविशेषोऽपि स्मर्यते । "सायमग्निञ्च मेत्युक्त्वा प्रातः सूर्य्येत्यपः पिबेत् । आपः पुनन्तु मध्याह्ने ततश्चाचमनं चरेत्" एभिराचमनं चरेदिति शौनकीये पाठः । मैत्रायणीय गृह्य परि० । "प्रातः सूर्य्यञ्च मेत्युक्त्वा सायमग्निञ्च मेति च । आपः पुनन्तु मध्याह्ने कर्यादाचमनं ततः" । "ततः प्राणायामानन्तरमिति" आ० त० रघु० "प्राणायामं कृत्वा आचामेत् प्रयतोऽपि सन् । अन्तरं खिद्यते यस्मात्तस्मादाचमनं स्मृतम्" योगि० या० । मदनपारिजाते । "सन्ध्याचमने बौधायनः अथातः सन्ध्योपासनविधिं व्याख्याष्यामः तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादः अप आचम्याग्निञ्च मा मन्युश्चेति सायमपः पीत्वा, सूर्य्यञ्च मामन्युश्चेति प्रातरपः पीत्वेति" अग्निञ्च सूर्य्यञ्चेति यजुर्वेदिनामिमौ मन्त्रौ छन्दोगानां तु सन्ध्याचमने गौतमोक्तौ मन्त्रौ द्रष्टव्यौ "अहश्च मादित्यश्च पुनात्विति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमिति" "एतौ च मन्त्रौ प्रजापतिदृष्टौ लिङ्गोक्तदैवतौ चेति" अनयोश्च मन्त्रयोः सामविदिविषयकत्वेन तत्रोक्तावपि तयोः सम्यग्ज्ञानात् "यजुः सर्व्वत्र पीयते" इत्युक्तेश्च यजुर्वेदोक्ता-

जेव प्रायुक्तौ सामवेदिभिः प्रयुज्येते । तज्ज्ञाने तु तावेव प्रयोक्तव्यौ । काशीकाण्डे तु "इमं मन्त्रं ततश्चोक्त्वा कुर्यादाचमनं द्विजः । आचार्याः केचिदिच्छन्ति शाखाभेदेन चापरे । अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ! । त्वं यज्ञस्त्वं वषट्कार आत्माज्योतीरसोऽमृतम्" । आचमने मन्त्रान्तरमुक्तम् । तदपि शाखिभेदाद्व्यवस्थाप्यम् । मधुपर्कानाङ्गाचमने वेदिभेदेन मन्त्रभेदा मत्कृत तुलादानादिपद्धतौ द्रष्टव्याः । विस्तरभयात्तेऽत्रनोक्ताः । तान्त्रिकाचमनन्तु शाक्तवैष्णवभेदात् द्विधा तत्र । शाक्ताचमनं यथा । "आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः । वह्निकान्ता परे दत्त्वा शुद्धेन पायसाचमेत्" स्वतन्त्रतन्त्रम् "आचामेदात्मतत्त्वाद्यैः प्रणवाद्यैर्द्विठान्तकैः" मालिनीतं । तथा च ओं आत्मतत्त्वाय स्वाहा ओं विद्यातत्त्वाय स्वाहा ओं शिवतत्त्वाय स्वाहेति मन्त्राः । कालीदो विशेषः तन्त्रसारे "कालिकाभिस्त्रिभिः पीत्वा कालीदिभिरुपस्पृशेत् । द्वाभ्यामौष्ठौ द्विरुन्मृज्य चैकेन क्षालयेत् करम् । सुखप्राणेक्षणश्रोत्रनाभ्युरस्कं भुजौ क्रमात् । आचम्यैवं भवेत् कालो वत्सरात्तां प्रपश्यति" भैरवोक्तः । कालीदयश्च "काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी । विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता ततःपरम् । नीला घना बलाका च मात्रा मुद्रा मिता च ताः" इत्युक्ताः प्रयोगस्तु क्रीमित्यादिमूलमन्त्रेण त्रिरपः पीत्वा ओं काल्यै नमः कपालिन्यै नमः इति द्विरुन्मृजेत् । ओं कुल्लायै नमः करं क्षालयेत् ओं कुरुकुल्लायै नमः सुखस्य स्पर्शः । ओं विरोधिन्यैनमः ओं विप्रचित्तायै नमः दक्षवामनासिकयोः । ओं उग्रायै नमः ओं उग्रप्रभायै नमः नेत्रयोः । ओं दीप्तायै नमः ओं नीलायै नमः श्रोत्रयोः । ओं घनायै नमः इति नाभेः । ओं बलाकायै नमः वक्षसः, ओं मात्रायै नमः शिरसः । ओं मुद्रायै नमः ओं मितायै नमः इत्यंसौ स्पृशेत् । ताराचमनं तु "तारामन्त्रैस्त्रिभिः पीत्वा मायया क्षालयेत् करम् । स्त्रीं हूं फोंष्ठौ द्विरुन्मृज्य फट्कारैः क्षालयेत् करम् । आस्यं नासे दृशौ श्रोत्रे नाभिवक्षःशिरोभुजान् । वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते आचम्य भैरवो भूत्वा वत्सरात्तां प्रपश्यति" भैरवोक्तः । यथा ओं उग्रतारायै नमः ओं एकजटायै नमः ओं नीलसरस्वत्यै नमः इति त्रिरपः पीत्वा ह्रीमिति बीजेन करं क्षालयेत् । स्त्रीं हूं निखेताभ्यामोष्ठौ द्विरुन्मृज्य फडिति करं क्षालयेत् । ओं वैरोचनाय नमः इति सुखम् ओं शङ्खपाण्डराय नमः ओं पद्मनाभाय नमः दक्षवामनासिके । ओं तावकाय नमः ओं मामकाय नमः नेत्रे । ओं पाण्डवाय नमः तारकाय नमः श्रोत्रे, ओं असिताभाय नमः नाभिम् ओं पद्मान्तकाय नमः वक्षः । ओं यमान्तकाय नमः शिरः । ओं विघ्नान्तकाय नमः ओं नरान्तकाय नम इति अंसौ स्पृशेत् ।

वैष्णवाचमनं तु "केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ । द्वाभ्यामौष्ठौ च संहृत्य द्वाभ्यां मृज्यात् सुखं ततः । एकेन हस्तं प्रक्षाल्य, पादावपि तथैकशः । संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः । आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् । स्पृशेदेवं भवेदाचमनञ्च वैष्णवान्वये" गौतः सचतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः" निबन्धे । ततश्च ओं केशवाय नमः इत्यादि नामभिराचमनम् । केशवादयश्च "केशवनारायण माधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्रहरिकृष्णवः" तन्त्रसा० एताश्च चतुर्विंशतिर्विष्णुमूर्त्तयः । विष्णोर्द्विशतकीर्त्तनं मूर्त्तिभेदाभिप्रायेण चतुर्विंशतिमूर्त्तिशब्दे च तद्विवरणम् । अन्यदेवतानान्तु मूलमन्त्रेणाचमनमिति विवेकः । आचम्यते अनेन करणे ल्युट् । ३आचमनसाधने देवतार्चनोपचारभेदे । "जातीफललवङ्गकक्कोलतोयञ्च षट्पलम् । प्रोक्तमाचमनमिति" तन्त्रसारोक्ते जातीफलादिचूर्णमिश्रिते षट्पलमिते जले तत्साधने ४जलमात्रे च भावे ल्युट् । पूजायां दत्ताचमनीयजलस्य ४पाने च । "सुवर्णकलसेनैवाचमनं कुरु केशव ! । पद्मचक्रधरो देव ! क्षमालो । परमेश्वर ।" विष्णुपूजाचमनदानमन्त्रः ।

आचमनक न० आचमनस्य कं जलमत्र । १ पतद्ग्रहे (पिकदानि) (डावर) आचम्यतेऽनेन करणे ल्युट् । स्वार्थे कन् । २आचमनीयजलादौ ।

आचमनीय न० आचमनाय दीयते दा-क आ+चम-करणे बा० अनीयर् वा । आचमनीयार्थे देये जातीफलादिचूर्णमिश्रिते षट्पलमिते १जले आचमनशब्दे प्रमाणमुक्तम् । "आचमनीयमाचनीयमाचमनीयं प्रतिगृह्णातामिति" भवदे० कर्मणि अनीयर् । पेयजले २स्वार्थे कन् तत्रैव । अर्घ्यमाचनीयकम्" षोड़शोपचारः "उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्यैते पुनराचमनीयकम्" गौतमीयम् ।

आचम्य अव्य० आ+चम-ल्यप्। १आचमनं कृत्वेत्यर्थे आ+चम-कर्मणि यत्। २आचमनीये जलादौ त्रि०।

आचय पु० आ+चि-अच्। दूरस्थस्य पुष्पादेश्चयने। हस्तेन चयने तु घञ् आचाय इत्येव। तत्र नियुक्तः आकर्षादि० कन्। आचयकः आचितौ नियुक्ते त्रि०।

आचरण न० आ+चर-ल्युट्। १आचारे "अधीतिबोधाचरणप्रचारणैः" नैष०। "आचरत्यनेन करणे ल्युट्। २रथे ३शकटे च त्रि०। "यथा प्रयोग्य आचरणे युक्तः एवमस्मिन् शरीरे युक्तः" छा०उ०। "प्रयुज्यते इति प्रयोग्योऽश्वोवलीवर्दो वा आचरत्यनेन आचरणो रथोऽनो वा तस्मिन् आचरणे युक्तः तदाकर्षणाय, एवमस्मिन् शरीरे रथस्थानीये प्राणः पञ्चवृत्तिः इन्द्रियमनोबुद्धियुक्तः प्रज्ञात्मा विज्ञानरूपक्रियामूर्च्छितात्मा युक्तः स्वकर्म्मफलोपभोगनिमित्तं नियुक्तः ईश्वरेण राज्ञेव सर्वाधिकारे दर्शनश्रवणेष्टा व्यापारेऽधिकृत" इति शं०भा०।

आचरित न०आ+चर-भावे क्त। १आचारे "वागदेवताचरित चित्तितचित्त सदा" जयदेवः। २कृषिकाष्ठेषु कृष्णोपायभेदे। "धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः। "तत्र कृषिको यदि निःस्वो व्यवहारेण दापयितव्यः अन्यत् कर्म्मोपकरणं धनं दत्त्वा कृषिवाणिज्यादिना व्यवहारयितव्यः तदुत्पन्नं धनं तस्मात् गृह्णीयादिति" मेधा०। छलाचरितबलान्याह वृद्धः०। "छद्मना याचितं चार्थमानीय कृषिकाङ्गनी। अन्याकृतादि व्याकृत्य दाप्यते तत्र सोपधिः। दारुतत्पशून् कृत्वा छत्वा द्वारोपवेशनम्। यत्रार्थोदाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बद्ध्वा खट्टमानीय ताड़नार्थं रुपक्रमैः। कृषिकोदाप्यते यत्र बलात्कारः स उच्यते" कुल्लू० धृता। कर्मणि घञ्। २अनुष्ठिते त्रि०। "जलं वामकरे कृत्वा या सन्ध्याऽऽचरिता द्विजैः" काशी०।

आचरणीय त्रि० आ+चर-अनीयर्। अनुष्ठेये "यद्यपि शुद्धं लोकविरुद्धं नाचरणीयं नाचरणीयमिति" स्मृतिः। तव्य। आचरितव्यमत्र त्रि०।

आचर्य्य न० आचर्य्यतेऽत्र आ+चर-आधारे यत्। अनुष्ठानयोग्ये देशे "आचार्य्यमणित्वे" पा० सू० उक्तेः आचार्य्यम्। अङ्गुते त्रि०।

आचान्त त्रि० आ+चम-क्त। आचमनकर्त्तरि "१आचान्तः पुनराचामेत्" काशी० स्मृतिश्च। कृतमाचमनं यस्य ताडशे २ जलादौ च "आचान्तोदकाय गौरिति नापितस्त्रिर्ब्रूयात्" संव० गोभिलसूत्रम्।

आचाम पु० आ+चम-भावे घञ् वा वृद्धिः। आचमने कर्म्मणि घञ्। २भक्ष्ये ३भक्तनिस्रावे मण्डे (माड़) "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासः स्यात् कृच्छ्रः सौम्योऽयमुच्यते" या०। पिण्याकः निष्कृततैलस्निग्धः अदननिस्रावोदश्विदुदकसक्तूनां पञ्चानामेकैकं प्रतिदिवसमुपभुञ्जानः षष्ठेऽह्नि उपसेदिति" मिता०। "पिण्याकः खलिः आचामः भक्तभण्डः" भा०वि०। "आचाममथ पिण्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहं त्र्यहं प्रयुञ्जानोवायुभक्षस्त्र्यहमुद्वसेत्" यमः। ४सौत्रामणीयागाङ्गे सुरासाधने भक्तभण्डे च "कृत्वा तांश्च व्रीहिश्यामाकोदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्नासरम्" कात्या० १९,१,२०। "दक्षिणेन द्वारेण प्रवेश्याग्नागारं नग्नकुचूर्णानि कृत्वा। नग्नकुः किण्व उच्यते। तांश्च धान्यादीं सूर्णयित्वा व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्नासरमुच्यते। व्रीहिश्यामाभ्याञ्च सुरा निष्पाद्यते सा च यागसाधनम् तेन सा तद्धर्मैरभिसंबध्यते। अतस्तयोश्चतुर्मुष्टिकण्वपूर्वकं पृथगोदनौ निष्पाद्येते। नग्नकुरर्थ आह। "सप्तपर्णकलिङ्गला चैव शुण्ठी चैव पुनर्नवा। चतुर्जातिकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽथका वृहत्कृत्वा चित्रकं चेन्द्रवारुणी। अश्वगन्धां ससुतपाद्य मूलान्येतानि निर्दिशेत्। धान्यकं च यवानीं च जीरकं कृष्णजीरकम्। हे कटिरे वचा चैव विरूढा व्रीहयो यवाः"। क्वथनानन्तरं धान्यादीन्यादाय दक्षिणेन कृत्वाग्नागारं प्रवेश्य नग्नकुचूर्णानि कृत्वा सप्तपर्णादीनि तूर्णीं पिष्ट्वा तान् धान्यतोयलाजान् चूर्णीकृत्य दर्भपार्ष्णिमात्रमर्दनं मात्रासादनादि। श्यामाकचतुर्मुष्टिकण्वपूर्वकं फलीकरणान्तं समन्त्रकं कृत्वा वस्त्रतरोदके पृथक् पृथक् चरू पक्त्वा गृहीतान्यनानान्तं व्रीहिश्यामाकौदनयोः पृथगाचामौ परिषिच्य पृथगभिन्नयोः पात्रयोश्चूर्णमध्यादति रिक्तसुण्डोदकम् (भण्डम्) अवस्राव्य तदुदकं (भण्डम्) नग्नकुप्रभृतिभिश्चतुर्भिश्चूर्णैः संसृज्य निदधाति स्थापयति तन्नासरं तस्य चूर्णसंसृष्टस्याचामस्य नासरमिति संज्ञा" "एवमाचामयोश्चूर्णसंसर्गानन्तरमिति" च कर्कः। सौत्रामणीशब्दे तदीयसुरासाधनसंस्कारप्रकारोवक्ष्यते

आचार पु० आ+चर-भावे घञ्। १आचरणेऽनुष्ठाने स च

अनुष्ठाननिष्टत्यात्मकभावाभावरूपः तत्र सदाचारः वेदस्मृत्यादिविहितः तत्र निषिद्धश्च कदाचारः इति भेदात् द्विविधः। सदाचारलक्षणोक्तं काशी०। "सदाचारे हि सर्वोऽर्थो नाचारात् रिष्यते पुनः। तस्मात् विप्रेण सततं भाव्यमाचारशालिना। विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः। विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः"। प्रसङ्गादाचारपदार्थो निरूप्यते तत्र भा०सू०भा०। "चरणादितिचेदुपलक्षणार्थेति काष्णाजिनिः" सू०। "अथापि स्यात् या श्रुतिरनुशयसद्भावप्रतिपादनायोद्धृता "तद्य इह रमणीयचरणा इति" सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयात्" अन्यच्चरणमन्योऽनुशयः" चरणं चारित्रम् आचारःशीलमित्यनर्थान्तरम्। अनुशयस्तु भुक्तफलात्कर्मणोऽतिरिक्तं कर्माभिप्रेतम्। श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति "यथाऽऽचारी तथा भवतीति यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नेतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानीति च"। तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरितिचेन्नैष दोषः यतोऽनुशयलक्षणार्थैवेषा चरणश्रुतिरिति काष्णाजिनिराचार्योमन्यते" भा०। "आनर्थक्यमिति चेन्न तदपेक्षत्वात्" भा०सू०। "स्यादेतत्कस्मात्पुनश्चरणशब्देन औतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते। ननु शीलस्यैव तु औतस्य विहितप्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति अवश्यञ्च शीलस्यापि किञ्चित् फलमभ्युपगन्तव्यम् अन्यथा ह्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेन्नैष दोषः कुतः तदपेक्षत्वात् दृष्टादि हि कर्मजातं चरणापेक्षं न हि सदाचारहीनः कश्चिदधिकृतः स्यात्। "आचारहीनं न पुनन्ति वेदा" इत्यादि स्मृतिभ्यः पुरुषार्थत्वादाचारस्य नानर्थक्यम्। दृष्टादौ हि कर्मजाते फलमारभमाणे तदपेक्षएवाचारस्तत्रैव कञ्चिदतिशयमारभते कर्म चसर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिः। तस्मात्कर्मैव च शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति काष्णाजिनेर्मतम्। न हि कर्माणि संभवति शीलाद्योन्यापत्तिर्युक्ता न हि पङ्गवां पलायितुं पारयमाणोजानुभ्यां रंहितुमर्हतीति" भा०। "सुकृतदुष्कृते एवेति बादरिः" भा०सू०। "बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इतिमन्यते चरणमनुष्ठानं कर्मेत्यनर्थान्तरम्। तथा ह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते यो हि दृष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मं चरत्येष महात्मेति। आचारोऽपि धर्मविशेषएव। भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाभ्युपपद्यते। तस्माद्रमणीयचरणाः पुण्यकर्माणः कपूयचरणा निन्दितकर्माण इति निर्णयः" भा०। अत्र शीलाचारयोः पर्यायत्वोक्त्या "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" मनुवचने शीलस्य पृथगुक्तिर्ब्राह्मणपरिव्राजकन्यायेनेति बोध्यम्। अतएवानन्तरं मनुनैव "वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्" शीलस्याचारान्तर्भावाभिप्रायेण चतुष्कस्य धर्ममूलत्वमुक्तम्। शीलञ्च "ब्रह्मण्यता देवपितृभक्तता, सौम्यता अपरोपतापिता अनसूयता मृदुता, अपारुष्यं मैत्रता, प्रियवादित्वं कृतज्ञता, शरण्यता, कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलमिति" हारीतोक्तं तच्चाचार भेद एव। मेधातिथिस्तु शील समाधाविति धातोरूपसृष्टा "शीलं समाधानम् समाधानञ्च मानसोव्यापारः यत्र चेतसोऽन्यविषयेषु विक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणता तच्छीलमुच्यते" इत्याह। तदप्याचार एवान्तर्भवति। तत्र सदाचाराणां वेदस्मृतिमूलकत्वेन तयोरेव तन्मूलत्वं, स्वाचाचांराणामित्याङ्क्ष याद्दशाचारस्य धर्ममूलत्वं तमाह मेधातिथिः। "आचारोव्यवहारोऽनुष्ठानम्। यत्र श्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्मबुद्ध्याऽनुतिष्ठन्ति तदपि वैदिकवत् प्रतिपत्तव्यम् यथा विवाहादौ कङ्कणधारणादि माङ्गलिकत्वेन यत् क्रियते। याच विवाहयिष्यमाणायाः कन्यायाः प्रख्यातदत्तचत्वथादिपूजा देशभेदेनेत्यादि" एवं होलकाद्याचरणम्। अन्यादौ देवतास्तुतिनमस्कारादिमङ्गलाचरणञ्च बोध्यम्। स्पष्टमुक्तं प्रयोगपारिजाते स्कन्दपु०। "न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ। देशाचारकुलाचारैस्तत्र धर्मो निरूप्यते" अत्र न निषेधा इत्युक्तेः श्रुतिस्मृत्योर्विरोधे आचारस्य न प्रामाण्यमिति गम्यते। तच्चानुपदं विवेक्तव्यम्। स च देशभेदात् कुलभेदात् पुरुषभेदाच्च नानाविधः प्रातिस्विकरूपेण गणयितुमशक्यः। श्रुतिस्मृत्यविरुद्धः सर्वोऽपि सदाचारः धर्ममूलमतएवाख्यात्याज्यत्वमुक्तम् "देशानुशिष्टं कुलधर्ममग्र्यां स्वजातिधर्मं न हि संत्यजेच्च"। एवं पित्राद्याचारोऽपि धर्ममूलतया याह्यः "येनास्य पितरोयाता येन याताः पितामहाः।

तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते" मनूक्तेः। अत्र सन्मार्गमिति विशेषणात् कदाचारो न धर्ममूलमिति गम्यते ततश्च षोडशिग्रहणाग्रहणयोरुदितानुदितहोमयोः वैकल्पिकयोरेव पित्राद्याचारस्य प्रामाण्यं तद्ज्ञाने आत्मतुष्टेः इति द्रष्टव्यम्। तदयं निर्गलितार्थः। यत्र श्रुतिस्मृतिद्वैधम् तत्र सदाचारदर्शनेन शास्त्रार्थं निश्चित्य सद्भिराचरितमार्गेणाचरणं प्रथमः कल्पः। तदसम्भवे तु पित्राद्याचारदर्शनेन एकतरपक्षाश्रयणं तस्याप्यज्ञाने आत्मतुष्टयेव तदेवाचरितव्यमिति। यत्र साक्षात् श्रुतिस्मृती मूल नोपलभ्येते एवं विरुद्धार्थश्रुतिस्मृती वा नोलभ्येते तत्रापि सदाचारस्य धर्ममूलत्वम् "न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ" इति प्रागुक्तस्कान्दवाक्यात् यत्र तु विरुद्धार्थश्रुतिस्मृतौ उपलभ्येते तत्र न सदाचारः प्रमाणम् यथा दाक्षिणात्यानां शिष्टानां मातुलकन्यादि परिणयनाद्याचारः। स त्वनाचारोऽपि तद्दैशीयानां स्वल्पदोषावेति व्यवस्थापितमनाचारशब्दे १५७ पृष्ठे द्रष्टव्यम्। सदाचारस्य च स्मृतेरिव न साक्षात् श्रुतिकल्पकता किन्तु स्मृतिद्वारैवेति जैमिनीयन्यायमालायां प्रथमाध्याये निरूपितं तत्रैव विस्तरो द्रष्टव्यः। एवञ्च श्रुतेः स्मृत्युपजीव्यत्ववत् आचारस्य स्मृत्युपजीव्यतया ततोदुर्ब्बलत्वम् दुर्बलेन च तेन बलीयसोबाधायोगाच्च नाचारेणोपजीव्यजातीयस्मृतिबाधोयुक्तः अतएव जैमिनिना "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति" सूत्रे उपजीव्योपजीवकयोर्विरोधे उपजीवकस्यानपेक्षता अननुष्ठानम् असति तु विरोधे उपजीवकेन स्मृत्याचारपदार्थेन उपजीव्ययोः श्रुतिस्मृत्योरनुमानमित्युक्तम्" ततश्च स्मृतिविरोधे आचारस्य न प्रामाण्यमिति स्थितम्। अतएव दुर्बलत्वाभिप्रायेणैव भा० आ० प०। "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः। द्वितीयं धर्मशास्त्रञ्च तृतीयं लोकसंग्रहः" इति लोकाचारस्य तृतीयत्वं, श्रुतेः परमत्वोक्ता च स्मृतेर्द्वितीयत्वमुक्तम्। स्पष्टमुक्तम्" प्रयो० पा०स्मृतौ। "स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत्। तथैव लौकिकाचारं स्मृतिबाधे परित्यजेत्" "तदलाभे शिष्टाचारः प्रमाणम्" इति वशिष्ठेन शास्त्रालाभे एव शिष्टाचारस्य आदृतात्राभिहिता। शिष्टाचारस्य यद्यपि देशभेदात् नानाविधः तथापि मनुना ब्रह्मावर्त्तदेशीयानामेव पारम्पर्य्यागताचारस्यैव सदाचारतायाः व्यवस्थापनात् तत्तत्पारम्पर्य्यक्रमगताचारएव सदाचारः। ब्रह्मावर्त्तं परिभाष्य यथाह मनुः "तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति तथा "कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः एष ब्रह्मर्षिदेशोवै ब्रह्मावर्त्तादनन्तरम्। एतद्देशप्रसूतस्य। सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मनुना ब्रह्मर्षिदेशवासिविप्रसकाशात् सदाचारस्य शिक्षणीयत्वोपदेशात् तद्दैशीयाचारोऽपि सदाचार इति गम्यते। सदाचारोऽपि न केवलं शास्त्रमूलकः किन्तु शास्त्रमूलकोऽपि तत्र शास्त्रं मानवादिसंहितादि। तत्र कार्ष्णाजिनखण्डे शास्त्रमूलकाः सदाचाराः समाहित्यप्रणामादयः केचित् दर्शिता यथा।

"लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः। श्रद्दधानोनसूयश्च नरोजीवेच्छरत्समाः शतम्। दुराचाररतानोकं गर्हणीयः पुमान् भवेत्। व्याधिभिश्चाभिभूयेत तथाल्पायुः सुदुःखभाक्। त्याज्यं कर्म्म परायत्तं कार्य्यमात्मवशं सदा। दुःखी यतः पराधीनः सदैवात्मवशः सुखी। यस्मिन् कर्म्मण्यनारब्धे आत्मा क्रियमाणे प्रसीदति। तदेव कर्म्म कर्त्तव्यं विपरीतं न चाचरेत्। प्रथमं धर्म्मसर्वस्वं प्रोक्ता यच्छिष्यमायमाः। अतस्तेष्वेव वै यत्नः कर्त्तव्योधर्म्मसिद्धये। सत्यं क्षमार्जवं ध्यानमानृशंस्यमहिंसनम्। दमः प्रसादोमाधुर्य्यं मृदुतेति यमा दश। शौचं स्नानं तपोदानं मौनेज्याध्ययनं व्रतम्। उपोसनोपस्पर्शनोद्वेगेति नियमाः स्मृताः। कामं क्रोधं मदं मोहं मात्सर्य्यं लोभमेव च। अमून् षट् वैरिणो जित्वा सर्वत्र विजयी भवेत्। शनैः शनैः सञ्चिनुयाद्धर्म्मं वल्मीकमृद्वत्। परलोकसहायकः। धर्म्म एव सहायो स्यादमुत्र च परिच्छदः। पितृमातृसुतभ्रात्रादयोपिद्बन्धुजनादिकः। जायेत चैकलः प्राणी म्रीयेत तथैकलः। एकलः सुकृतं भुङ्क्तेऽश्नीयाद्दुष्कृतमेकलः। देहं पञ्चत्वमापन्नं त्यक्त्वासौ काष्ठलोष्ठवत्। बान्धवाविमुखायान्ति धर्म्मोयान्तमनुव्रजेत्। नित्यं सञ्चिनुयाद्धर्म्मं ततोऽमुत्र सहायिनम्। धर्म्मं सहायिनं लब्ध्वा सन्तरेद्दुस्तरं तमः। सम्यग्ज्ञानाचरेच्चित्यमुक्तमैरुक्तमैः सुधीः। अधमानधमांस्त्यक्त्वा कुलमुत्कर्षतां नयेत्। उत्तमानुत्तमानेव कुर्व्वन् हीनांश्च वर्ज्जयन्। ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्। अनध्ययनशीलञ्च सदाचारविलङ्घिनम्। अलसं च दुराचारं ब्राह्मणं बाधतेऽन्तकः।

ततोऽभ्यस्येत्प्रयत्नेन सदाचारं सदा द्विजः । तीर्थान्यभिलषन्ति सदाचारसमागमम्" इति । प्रशस्तं "रजनीप्रान्त्ययामार्द्धं ब्राह्मं समयउच्यते । स्वहितं चिन्तयेत्प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा । गजास्यं संस्मरेदादौ ततश्चैनं सहाम्बया । श्लोकान्तं श्लोकमेतं तु ब्रह्मारव्या कमलोद्भवम् इन्द्रादीन् सकलान्देवान् वशिष्ठादीन् मुनीनपि । गङ्गाद्याः सरितः सर्वाः श्रीशैलाद्यखिलान् गिरीन् । क्षीरोदादीन् समुद्रांश्च मानसादिसरांसि च । वनानि नन्दनादीनि धेनूः । कामदुघादिकाः । कल्पवृक्षादिवृक्षांश्च धातून् काञ्चनसुखतः । दिव्याः स्त्रीरूर्वशीमुख्या गरुडादीन् पतत्त्रिणः । नागाश्च शेषप्रमुखान् गजानैरवतादिकान् । अश्वानुच्चैःश्रवान् मुख्यान् कौस्तुभादीन् मणीन् शुभान् । सरिद्रूपवतीमुख्याः पतिव्रतवतीर्वधूः । नैमिषादीन्यरण्यानि पुरीः काशीपुरीमुखाः । विश्वेशादीनि लिङ्गानि वेदानृक्प्रमुखानपि । गायत्रीप्रमुखान् मन्त्रान् योगिनः सनकादिकान् । प्रणवादि महाबीजं नारदादींश्च वैष्णवान् । शिवभक्तांश्च बाणादीन् प्रह्लादादीन् दृढव्रतान् । वदान्यांश्च दधीच्यादीन् हरिश्चन्द्रादिभूपतीन् । जननीचरणौ स्तुत्वा सर्वतीर्थोत्तमोत्तमौ । पितरं च गुरूंश्चापि हृदि ध्यात्वा प्रसन्नधीः । ततश्चावश्यकं कर्त्तुं नैर्ऋतीं दिशमाश्रयेत् । क्रामाद्गुरुः शतं गच्छेन्नगराच्च चतुर्गुणम् । तृणैराच्छाद्य वसुधां शिरः प्रच्छाद्य वाससा । कर्णोपवीत्युदग्वक्त्रो दिवसे सन्ध्ययोरपि । विण्मूत्रे विसृजेन्नौनी निशायां दक्षिणामुखः । न तिष्ठन्नाप्सु नोविप्रगोवह्न्यनिलसंमुखः । न फालकृष्टे भूभागे न रथ्यासेव्यभूतले । नालोकयेद्दिशो भागान् ज्योतिश्चक्रं नभोऽमलम् । वामेन पाणिना लिङ्गं धृत्वोत्तिष्ठेत् प्रयत्नवान् । अथो मृदं समादत्ते जन्तुकर्करवर्जिताम् । विहाय मूषिकोत्खातां शौचोच्छिष्टाच्च नाकृताम् । शुद्ध्यै दद्यान्मृदश्चैकां पायौ पञ्चाम्बुसान्तराः । दश वामकरे चापि सप्त पाणिद्वये स्मृताः । एकैकां पादयोर्दद्यात्सिक्थःपार्ष्ण्योर्मृदः स्मृताः । इत्थं शौचं गृही कुर्यान्मृल्लेपक्षयावधि । क्रमाद्द्विगुणमेतत्स्याद्ब्रह्मचार्यादिषु त्रिषु । दिवा विहितशौचानां रात्रावर्द्धं समाचरेत् । रात्र्यर्द्धं च तदर्द्धं च पथि चौरादिगर्हिते । तदर्द्धं योषितां सुस्थे नूनं चातो न कारयेत् । अपि सर्वैर्नदीतोयैर्भूत्कूटैश्चापि गोमयैः । आपादमाचरन् शौचं भावदुष्टो न शुद्धिभाक् । अर्द्धमात्रीकृतोन्माना मृदः शौचे प्रकीर्त्तिताः । सर्वाश्चाऽऽततयोऽप्येवं आसाद्यान्द्रायणेऽपि च" ततः आचमनप्रकारोऽभिहितः स च ६२८ पृष्ठे दर्शितः । "अथो सुखविशुद्ध्यर्थं दन्तधावनम् । आचान्तोऽथ शुचिर्यस्मादकृत्वा दन्तधावनम् । प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे । दन्तानां काष्ठसंयोगे दहत्यासप्तमं कुलम् । अलाभे दन्तकाष्ठानां निषिद्धेऽथ वासरे । गण्डूषा द्वादश प्राह्या मुखस्य परिशुद्धये । कनिष्ठाग्रपरिमाणसत्वचं निर्व्रणं दृढम् । द्वादशाङ्गुलमानञ्च सार्द्रं स्याद्दन्तधावनम् । एकैकाङ्गुलिहासेन वर्षं यावन्मुनीषु तूदितम् । आस्याम्लातकधात्रीजम्बूौदुम्बरखदिरोद्भवम् । शम्यपामार्गखर्जूरीशेलुश्रीपर्णिपीलुजम् । राजादनं च नारङ्गं कषायं कटुकण्टकम् । क्षीरवृक्षोद्भवं वापि प्रशस्तं दन्तधावनम् । जिह्वोल्लेखनिकां वापि कुर्याच्चापाकृतिं शुभाम् । "अन्नाद्याय व्यूहध्वं सोमोराजायमागमत् । स मे सुखं प्रमार्ष्टु यशसा च भगेन च । आयुर्बलं यशोवर्च्चः प्रजाः पशुवस्वनि च । ब्रह्म प्रज्ञां च मेधां च तन्नो धेहि वनस्पते"! । मन्त्रावेतौ समुच्चार्य्य यः कुर्य्याद्दन्तधावनम् । वनस्पतिगतः सोमस्तस्य नित्यं प्रसीदति । मुखे पर्युषिते यस्माद्भवेच्च शुद्धिभाङ्नरः । ततः कुर्य्यात्प्रयत्नेन शुद्ध्यर्थं दन्तधावनम् । उपवासेऽपि नो दुष्येद्दन्तधावनमङ्गनम् । गन्धालङ्कारसद्वस्त्रपुष्पमाल्यानुलेपनम् । प्रातः सन्ध्यां ततः कुर्याद्दन्तधावनपूर्विकाम् । प्रातः स्नानं चरित्वाथ शुद्धेतोर्थे विशेषतः । प्रातः स्नानाद्यतः शुद्धेत्कायोऽयं मलिनः सदा । छिद्रितो नवभिश्छिद्रैः स्रवत्येष दिवानिशम् । उत्पादयेन्मेधासौभाग्यरूपसंपत्प्रवर्त्तकम् । मनःप्रसन्नताहेतुः प्रातः स्नानं विशिष्यते । प्रस्वेदलालाद्याखिन्नो निद्राधीनोयतोनरः । प्रातः स्नानात्ततोऽर्हः स्यान्मन्त्रस्तोत्रजपादिषु । प्रातः प्रातस्तु यत् स्नानं संजाते चारुणोदये । प्राजापत्यसमं प्राहुस्तन्महाघविघातकृत् । प्रातः स्नानं हरेत्पापमलक्ष्मीं ग्लानिमेव च । अशुद्धित्वञ्च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति । नोपसर्पन्ति वै दुष्टाः प्रातः स्नायिजनं क्वचित् । दृष्टादृष्टफलं तस्मात्प्रातः स्नानं समाचरेत्" । अन्यत्राध्याये च "अथवा प्रातरुत्थाय कृत्वावश्यकमेव च । शौचाचमनमाधाय भक्त्येदन्तधावनम् । विशोध्य सर्वगात्राणि प्रातः सन्ध्यां समाचरेत् । वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च । अध्यापयेच्छुचीन् शिष्यान् हितमेधा समन्वितान् । उमेशादीश्वरं चापि योगक्षेमार्थसिद्धये । ततो मध्याह्नसिद्ध्यर्थं पूर्व्वोक्तं स्नानमाचरेत् । स्नात्वा माध्याह्निकीं सन्ध्यामुपासीत विचक्षणः । देवतां परिपूज्याथ

नैत्यिकं विधिमाचरेत् । पचनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत् । निष्पावान् कोद्रवान् माषान् कलायांश्चनकांस्त्यजेत् । तैलपक्वं च पक्वान्नं सर्वं लवणयुक्तत्यजेत् । आढकांश्च मसूरांश्च वर्त्तुलान् वर्वटीस्तथा । भुक्तशेषं पर्य्युषितं वैश्वदेवे विवर्ज्जयेत् । दर्भपाणिः समाचम्य प्राणायामं विधाय च । पूषणोदेवेति मन्त्रेण पर्य्युक्षणमथाचरेत् । प्रदक्षिणञ्च पर्य्युक्ष्य त्रिः परिस्तीर्य्य वै कुशान् । एषोहदेवमन्त्रेण वह्निं कुर्यात् सुसंमुखम् । वैश्वानरं समभ्यर्च्य वाज्य पुष्पाक्षतैरथ । भूराद्याश्चाहुतीस्तिस्रः स्वाहान्ताः प्रणवादिकाः । ओँ भूर्भुवः स्वः स्वाहेति विप्रोदद्यात्तथाहुतिम् । तथा देवकृतस्याद्याजुह्वयाच्च षडाहुतीः । यमाय त्वेणीमेकाञ्च तथा स्विष्टकृते हयम् । विश्वेभ्यश्चापि देवेभ्योभूमौ दद्यात्ततो बलीन् । सर्वेभ्यश्चापि भूतेभ्योनमोदद्यात्तदुत्तरे । तद्दक्षिणे पितृभ्यश्च प्राचीनावीतिकोददेत् । निर्णेजनोदकार्थं वैशान्यां वै यक्ष्माणार्च्चयेत् । ततो ब्रह्मादिदेवेभ्यो नमोदद्यात्तदुत्तरे । निवीती सनकादिभ्यः पितृभ्यस्त्वपसव्यवान् । कृत्वा योड़शभिर्मासैस्तुभिः पुष्कलं स्रुतम् । यासमाता भवेद्भिक्षा गृहस्थस्य सुकृतप्रदा । अध्वगः क्षीणवृत्तिश्च विद्यार्थी गुरुपोषकः । यतिश्च ब्रह्मचारी च षड़ेते धर्मभिक्षुकाः । अतिथिः पान्थकोत्रेयोऽनूचानः श्रुतिपारगः । मान्यावेतौ गृहस्थानां ब्रह्मलोकमभीप्सताम् । अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत् । अन्नार्थिनि समायाते पात्रापात्रं न चिन्तयेत् । शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् । काकानाञ्च कृमीणाञ्च बहिरन्नं किरेद्भुवि । "ऐन्द्रावरुणवायव्याः सौम्या वै नैर्ऋताश्च ये । प्रतिगृह्णन्त्विमं पिण्डं काका भूमौ मयार्पितम् । द्यौष्यानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ । देवा मनुष्याःपशवो रक्षोयक्षोरगाः खगाः । दैत्याः सिद्धाः पिशाचाश्च प्रेता भूताश्च दानवाः । कृमयः तरवश्चापि भूतेनाभिलाषुकाः । कृमिकीटपतङ्गाद्याः कर्म्मबन्धा बुभुक्षिताः । तृप्त्यर्थमन्नं हि मया दत्तं तेषां सुखेऽस्तु वै" । इत्थं भूतबलिं दत्त्वा कालं गोदोहमात्रकम् । प्रतीक्ष्यातिथिमायान्तं विप्रेङ्गोच्यगृहं ततः । अदत्त्वा वायसबलिं नित्यश्राद्धं समाचरेत् । नित्यश्राद्धेषु सामर्थ्यात् त्रीन् द्वावेकमथापि वा । भोजयेत् पितृयज्ञार्थं दद्याद्वृत्त्या दुर्बलः । नित्यश्राद्धं देवहीनं नियमादि विवर्ज्जितम् । दक्षिणारहितञ्चैतत् दात्रभोक्तृव्रतोज्झितम् । पितृयज्ञं विधायेत्थं स्वच्छबुद्धिरनातुरः । अदुष्टासनमध्यास्य भुञ्जीत द्विजभिः सह । सुगन्धिः सुमनाः स्रग्वी शुचिवासोद्वयान्वितः । प्राग्वास्य उदग्वासोवाभुञ्जीत पितृसेवितम् । विधायाचमनन्नद्वदुपरिष्टाद्धस्तथा । आपोशानविधानेन कृत्वाऽश्नीयात् सुधी र्द्विजः । प्रदद्याद्भुवःपतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलित्रयम् । सकृज्जाप उपस्पृश्य प्राणाद्याहुतिपञ्चकम् । दद्याज्जठरकृष्णाग्नौ दर्भपाणिः प्रसन्नधीः । दर्भपाणिस्तु योभुङ्क्ते तस्य दोषो न बाधते । कोशकीटादिसंभूतं तदश्नीयात् सदर्भकः । यावत्तदन्नमश्नीयान्न ब्रूयात्तद्गुणागुणान् । भुञ्जते पितरस्तावद्यावन्नोक्ता गुणागुणाः । अतोमौनेन योभुङ्क्ते स भुङ्क्ते केवलामृतम् । अनुपीय ततः क्षीरं मद्यं पानीयमेव वा । अमृतापिधानमसीत्येवं प्राश्योदकं सकृत् । पीतशेषं त्रिषेच्छ्रौ तोयं मन्त्रमिमं पठन् । सुप्रक्षालित हस्तस्य दक्षिणाङ्गुष्ठमूलतः । "रौरवेऽपुरुषनिलये पञ्चाबुर्दनिवासिनाम् । उच्छिष्टोदकमिश्रान्नमक्षय्यमुपतिष्ठताम्" । पुनराचम्य मेधावी शुचिर्भूत्वा प्रयत्नतः । हस्तेनोदकमादाय मन्त्रमेतमुदीरयेत् । "अङ्गुष्ठमात्रः पुरुषस्त्वङ्गुष्ठस्य समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्" । इत्यर्घं परिसंकल्प्य प्रक्षाल्य चरणौकरौ । ततोऽन्नपरिपाकार्थं मन्त्रानेतानुदीरयेत् । "अग्निराप्याययेद्वातृन् पार्थिवान् पवनेरितः । दत्तावकाशोनभसा जरयत्वस्तु मे सुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नं पुष्टिकरं चास्तु मयास्त्वव्याहतं सुखम् । समुद्रोवडवाग्निश्च ब्रह्मोवह्नेश्च नन्दनः । मयाऽभ्यवहृतं यत्तदग्नेयं जरयन्त्विमे" । सुप्तशुद्धिं ततः कृत्वा पुराणश्रवणादिभिः । अतिवाह्य दिवाशेषं ततः सन्ध्यां समाचरेत् । गृहे गोष्ठे नदीतीरे सन्ध्या दशगुणा क्रमात् । संभेदे स्याच्छतगुणा कृत्रनद्या शिवसन्निधौ । उपासिता बहिः सन्ध्या दिवामैथुनपातकम् । शमयेदुदितोक्षार्घं मद्यगन्धजमेव च । पक्षिमास्योजमेत्यावद्यावन्नक्षत्रदर्शनम् । अतिथिं सायमायान्तमपि वा भृत्यगोदकैः । सम्भाव्य परिकल्पेत्थं निशः प्राक् प्रहरं सुधीः । इत्थं दिवा कर्म कृत्वा श्रुतेः पठनपाठनैः । एकाग्रमनसा सध्यां नातिक्रमोऽस्य संविशेत् । उद्धृतः समाख्यात एष नित्यतनोविधिः । इत्थं समाचरन् विप्रोनावसीदति कर्हिचित्" । इत्थं नित्यधर्माचरणमुक्ता गृहस्थस्यवर्णावर्णविशेषमाह वैखानसः

"ऋतुकालाभिगमनं धर्म्योऽयं गृहिणः परः। स्त्रीणां वर मनुस्मृत्य यथाकाम्यथ वा भवेत्। दिवाभिगमनं पुंसामनायुष्यं परं मतम्। श्राद्धाहः सर्व्वपर्व्वाणि यत्नात् त्याज्यानि धीमता। तत्र गच्छन् स्त्रियं मोहात् धर्म्मात्प्रच्यवते परात्। ऋतुकालाभिगामी यः स्वदारनिरतश्च यः। स ब्रह्मचारी धर्म्मज्ञोविज्ञेयः स गृहाश्रमी। ऋतुःषोड़शयामिन्यस्तत्रस्तासु गर्हिताः। पुत्रास्तासुपि या युग्माः अयुग्माः कन्यकाप्रजाः। त्यक्त्वा चन्द्रमसं दुःस्थं मघां मूलां विहाय च। शुचिः संनिर्विशेत्पत्नीं पुंनामत्र विशेषतः। शुचिं पुत्रं प्रसूयेत पुरुषार्थप्रसाधकम्। आर्षे विवाहे गोद्वन्द्वं यदुक्तं तन्न शस्यते। शुल्कमस्यपि कन्यायाः कन्याविक्रयपापकृत्। अपत्यविक्रयी कल्पं वसेद्विट्कृमिभोजने। अतोनास्यपि कन्यायाः उपजीवेत्पिता धनम्। स्त्रीधनान्युपजीवन्ति ये मोहादिह बान्धवाः। न ते परं निरयगास्तेषामपि हि पूर्व्वजाः। पत्या तृप्यति यत्र स्त्री तृप्येद्यत्र स्त्रिया पतिः। तत्र तुष्टा महालक्ष्मीर्निवसेद्दानवारिणा"

"वाणिज्यं कृषतेः सेवा वेदानध्ययनं तथा। कुविवाहः क्रियालोपः कुले पतनहेतवः। कुर्य्याद्वैवाहिके वह्नौ गृह्यं कर्म्मान्वहं गृही। पञ्चयज्ञक्रियां वापि पक्तिं दैनन्दिनीमपि। गृहस्थाश्रमिणः पञ्चसूनाकर्म्म दिनेदिने। कण्डनी पेषणी चूल्ली उदकुम्भस्तु मार्ज्जनी। तासाञ्च पञ्चसूनानां निराकरणहेतवः। क्रतवः पञ्च निर्द्दिष्टाग्रहिभ्रे योऽभिवर्द्धनाः। पठनं ब्रह्मयज्ञः स्यात्तर्पणञ्च पितृक्रतुः। होमोदैवो बलिर्भौतोऽतिथ्यर्च्चा क्रतवः क्रमात्। पितृप्रीतिं प्रकुर्व्वाणः कुर्वीत श्राद्धमन्वहम्। अन्नोदकं पयोमूलफलैर्वापि गृहाश्रमी। गोदानेषु च यत्पुण्यं पात्राय विधिपूर्व्वकम्। सत्कृत्य भिक्षवे भिक्षां दत्त्वा तत्फलमाप्नुयात्। तपोविद्यासमिद्धीप्ते श्रुतं विप्राग्र्यपावके। तारयेद्विघ्नसंघेभ्यः पापाब्धेरपि दुस्तरात्। अनर्च्चितोऽतिथिर्गेहात् भग्नाशो यस्य गच्छति। आजन्म सञ्चितात् पुण्यात् तत् क्षणात् स बहिर्भवेत्। सान्वयप्रूर्व्वाणि याक्यानि श्रद्धार्थे भूस्तृणोदकैः। एतान्यपि प्रदेयानि सदा गन्धकतुष्टये। गृहस्थः परपाकाढ्यः प्रेतः सन् पशुपतां व्रजेत्। श्रेयः परार्थपुष्टस्य गृहस्थीयादन्नदोषतः। आदित्योढ़ोऽतिथिः सायं सत्कर्त्तव्यः प्रयत्नतः। असत्कृतोऽन्यतोगच्छन् दुष्कृतं भूरि यच्छति। भुञ्जानोऽतिथिशेषान्नमिहायुर्धनभाग्भवेत्। प्रणोद्यातिथि सन्ध्यासी किल्बिषी च गृहाश्रमी। वैश्वदेवान्तरंप्राप्तः सूर्य्योढोवाऽतिथिः स्मृतः। न पूर्व्वकाल आयातो न च द्वारवरः क्वचित्। बलिपात्रकरे विप्रे यद्यन्योऽतिथिरागतः। अदत्त्वा तं बलिं तस्मै यथाशक्त्यन्नमर्पयेत्। कुमाराश्च सुवासिन्योगर्भिण्योऽतिरुजान्विताः। अतिथेरादितोऽप्येते भोज्या नात्र विचारणा। पितृदेवमनुष्येभ्योदत्त्वान्नाद्यमृतं गृही। स्वार्थं पचन्नघं भुङ्क्ते केवलं खोदन्भरिः। माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमाचरेत्। पत्नी सायं बलिदद्यात् सिद्धान्नैर्मन्त्रवर्जितम्। एतत्पायन्तनं नाम वैश्वदेवं गृहाश्रमे। सायं प्रातर्भवेदेवं वैश्वदेवं प्रयत्नतः। वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः। सर्वे ते दुष्कलाक्षेया प्राग्वेदा अपि द्विजाः। अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः। इह लोकेऽन्नहीनाः स्युः काकयोनिं व्रजन्त्यथ। वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः। तद्धि कुर्व्वन् यथाशक्ति प्राप्नुयात् स्वर्गतिं पराम्। षड्दृष्ट्योर्वेसेत्पापं तैले मांसे सदैव हि। पञ्चदश्यां चतुर्दश्यां तथैवच भगे क्षुरे। उदयन्तं न चेक्षेत नास्तं यान्तं न मध्यगम्। न राहुणोपसृष्टं च नाम्बुसंस्थं दिवाकरम्। न वीक्षेतात्मनोरूपमम्बुधावेन्न वर्षति। नोल्लङ्घेद्वत्सतन्त्रीं न नग्नोजलमाविशेत्। देवतायतनं विप्रं धेनुं मधु घृतं गुरुम्। जातिवृद्धं वयोवृद्धं विद्यावृद्धं तपस्विनम्। अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम्। सिद्धान्नं दधि सिद्धार्थं गच्छन् कुर्य्यात्प्रदक्षिणम्। रजस्वलां न सेवेत नाश्नीयात् सह भार्य्यया। एकवासा न भुञ्जीत न भुञ्जीतोत्कटासने। नाशृतां स्त्रीं समीक्षेत तेजस्कामोद्विजोत्तमः। असंतर्प्य पितॄन् देवान् नाद्यादन्नं नरः क्वचित्। पक्वान्नं चापि नो मांसं दीर्घकालं जिजीविषुः। न मूत्रं गोव्रजे कुर्य्यान्न वल्मीके न भस्मनि। न गर्त्तेषु ससत्वेषु न तिष्ठन्न व्रजन्नपि। गोविप्रसूर्य्यवायुग्नि चन्द्रार्काम्बु गुरूनपि। अभिपश्यन्न कुर्व्वीत मूत्रोच्चारविसर्ज्जनम्। तिरस्कृत्यावनीं लोष्ट काष्ठपर्णतृणादिभिः। प्रावृत्य वाससा मौलिं मौनो विण्मूत्रमुत्सृजेत्। यथासुखसुखोरात्रौदिने छायान्धकारयोः। भीतिषु प्राणबाधायां कुर्य्यान्मलविसर्ज्जनम्। मुखेनोपधमेन्नाग्निन्नग्नां नेक्षेत योषितम्। नाङ्घ्री प्रतापयेदग्नौ न वस्तु शुचि निक्षिपेत्। प्राणिहिंसां न कुर्व्वीत नाशीयान्मध्ययोर्द्वयोः। न संविशेच्च सन्ध्यायां प्रत्यक्सौम्यशिरा अपि। विण्मूत्रष्ठीवनं नाम्नु कुर्य्यादीप्सुर्जिजीविषुः। नाचक्षीत धयन्तीं गां नैन्द्रं चापं प्रदर्शयेत्। नैकः सुप्यात् क्वचित् शून्ये न शयानं प्रबोधयेत्। दत्तान

नैकको यावाच वार्य्यञ्जलिना पिबेत् । न दध्युद्भूतसारं च भक्षयेद्दधि नो निशि । स्त्रीधर्म्मिणीं नाधिवसेत् नाद्यादा हृत्रि रात्रिषु । तौर्य्यत्रिकप्रियोनस्यात् कांस्ये पादौ न धावयेत् । न धारयेदन्यभुक्तं वासश्चोपानहावपि । न भिन्नभाजनेऽश्नीयाद्भाग्यादिपरिदूषिते । आरोहणं गवां पृष्ठे प्रेतधूमं सरित्तरम् । बालातपं दिवास्वापं त्यजेद्दीर्घं जिजीविषुः । स्नात्वा न मार्ज्जयेद्गात्रं विसृजेच्च शिखां पथि । हस्तौ शिरोन धुनुयाद्वाकर्षेदासनं पदा । श्राद्धं कृत्वा परश्राद्धेऽश्नीयात् ज्ञानविवर्ज्जितः । दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग्भवेत् । नोत्पाटयेल्लोमनखं दशनेन कदाचन । करजैः करजच्छेदं तृणच्छेदं विवर्ज्जयेत् । शुभाय न यदायत्यां त्यजेत्तत्कर्म यत्नतः । अपद्वारे न गन्तव्यं खवेश्मपरवेश्मनोः । क्रीड्नाद्यैः सहासीत न धर्म्मघ्नैः रोगिभिः । न श्वयीत क्वचिन्नग्नः पाणौ, भुञ्जीत नैव च । आर्द्रपादकरास्योऽन्नीर्घकालं च जीवति । संविशेदार्द्रचरणोनोच्छिष्टः क्वचिदाव्रजेत् । शयनस्थोन चाश्नीयाच्च पिबेन्न जगेद्द्विजः । सोपानत्कश्च नाश्नामेन्न निष्ठ नु धारया पिबेत् । सर्व्वं तिलमयं नाद्यात्नायं धर्म्माभिलाषुकः । न निरीक्षेत विण्मूत्रे नोच्छिष्टः संस्पृशेच्छिरः । नाधितिष्ठेत्तुषाङ्गार भस्मकेशकपालिकाः । पतितैः सह संवासः पतनायैव जायते । आयवेद्यैदिकं मन्त्रं न शूद्राय कदाचन । ब्राह्मण्याद्धीयते विप्रः शूद्रोधर्म्माञ्च हीयते । धर्म्मोपदेशः शूद्राणां स्वधेयः प्रतिघातवेत् । द्विजशुश्रूषणं धर्म्मः शूद्राणां हि परोमतः । कण्डूयनं न शिरसः पाणिभ्यां शुभदं मतम् । न ताडयेत् कराभ्यां च क्रोधनं केशलुञ्चनम् । अधास्त्रवर्त्तिनोभूपाल्लोभात् कृत्वा प्रतिग्रहम् । ब्राह्मणः सान्वयोयाति नरकानेकविंशतिम् । अकालविद्युत्स्तनिते वर्षतौ पांशुवर्षणे । महावातध्वनौ रात्रावनध्यायाः प्रकीर्त्तिताः । उल्कापाते च भूकम्पे दिग्दाहे मध्यरात्रिषु । सन्ध्ययोर्भुक्तोपान्ते राजचन्द्रस्य सूतके । दर्शेऽष्टकासु भूतानां श्राद्धिकं प्रतिगृह्य च । प्रतिपद्यपि पूर्णायां गजकुम्भाग्र कृतान्तरे । खरोष्ट्रक्रोष्टु विक्ते समवाये ह्रदस्यपि । उपाकर्म्मण्यि चोत्सर्गे नाविमार्गे तरौ जले । आरण्यकमधीत्यापि वाणसाङ्गोरपि ध्वनौ । अनध्यायेषु चैतेषु नाधीयीत द्विजः क्वचित् । कृतान्तरायो न पठेद्वेदाङ्गान्यृषिभिः । भूतान्नयोः पञ्चदश्योर्ब्रह्मचारी सदा भवेत् । अनायुष्यकरञ्चेह परदारोपसेवनम् । पर्व्वद्विभिः परित्यक्तमात्मानं नावमानयेत् । सदोद्यमवतां यस्माच्छ्रियोविद्या न दुर्लभाः । सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्म्मोघटोद्भव ! । भद्रमेव वदेच्चित्यं भद्रमेव विचिन्तयेत् । भद्रैरेव हि संसर्गोनाभद्रैश्च कदाचन । रूपधिक्कारिभिर्हीनान् सुधीनाधिक्षिपेन्नरान् । पुण्यवन्तो न चेच्छेत त्वशुचिर्ज्योतिषाङ्गणम् । वातवेगं मनोवेगं जिह्मवेगञ्च वर्ज्जयेत् । उत्को च द्यूतदौत्यार्त्तद्रव्यं दूरात् परित्यजेत् । गोब्राह्मणाग्नीनुच्छिष्टः पाणिना नैव संस्पृशेत् । न स्पृशेदनिमित्तं च खानि खानि त्वनातुरः । गुह्यप्रजान्यपि लोमानि तत्स्पर्शादशुचिर्भवेत् । पादशौचोदक मूत्रसृक्किष्टाश्रोदकानि च । निर्लोमनञ्च श्लेष्माणं स्पृहाद्रं विनिक्षिपेत् । अरुक्षिणं श्वतेजस्याश्चौचावरनिषेधात् । अद्रीक्ष्णत्यागत्याच पूर्व्वजन्म स्मरेद्द्विजः । दृष्ट्वान् प्रयत्नाद्वन्देत दद्यात्तेषां स्वमासनम् । विनश्चधर्म्मनिस्सारादनुयायात्यतस्तान् । श्रुतिभूदेवदेवानां भूपसाधुतपस्विनाम् । पतिव्रतानां नारीणां निन्दां कुर्य्याच्च कर्हिचित् । न मनुष्यस्तुतिं कुर्य्यात्नात्मानमयनामयेत् । अभ्युद्यतं न प्रणुदेत्परकर्म्माणि नोक्षरेत् । अधर्म्माद्धियते पूर्व्वं विद्वेष्टमपि संजयेत् । सर्वतोभद्रं पश्येच्च ततोभद्रेच्च सान्वयः । उद्धृत्य पञ्च ऋत्पिण्डान् स्नायात् परजलाशये । अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् । अञ्जया पात्रमासाद्य यत्किञ्चिद्दीयते वसु । देशे काले च विधिना तदानन्त्याय कल्पते । भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽन्नदः । तोयदाता सदा तृप्तो रूपवान् रूप्यदो भवेत् । प्रदीपदो निर्मलाक्षो गोदातार्य्यलोकभाक् । स्वर्णदाता च दीर्घायुस्तिलदः स्याच्च सप्रजाः । वेश्मदोऽत्युच्चसौधेशोवस्त्रदश्चन्द्रलोकभाक् । हय प्रदोदिव्ययानोलक्ष्मीवान् छत्रभप्रदः । सुभार्य्यः शिबिकादाता सुपर्य्यङ्कप्रदोऽपि च । धर्म्मे सर्वर्द्धिभाक् नित्यमभयप्रदर्शिता । ब्रह्मदोब्रह्मलोकेज्योब्रह्मदः सर्व्वदोमतः । उपायेनापि योब्रह्म दापयेत्तोपि तत्समः । श्रद्धया प्रतिगृह्णाति श्रद्धया यः प्रयच्छति । स्वर्गिणौ तावुभौ स्यातां पततोऽश्रद्धया ह्रधः । अनृतेन चरेद्यस्तस्योविद्यायतः क्षरेत् । क्षरेत्कीर्त्तिनतोदानमायुर्विप्रापवादतः । गन्धपुष्पक्रयान् भक्ष्यं शाकं मांसं पयोदधि । मणिमत्स्यौ गुडं धान्यं याचमेतदुपस्थितम् । मधूदकं फलं मूलमेधांस्यभयदक्षिणम् । अभ्युद्यतानि याचमानि लेतान्यपि निक्षतः । दासनापितगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्नाः शूद्रवर्गेऽमी तथात्मविनिवेदकः । कृतभानुग्रहमाप्याद्य दे-

वर्षपिण्डजाद्यात् । माध्यस्थ्यमाश्रयेत् गेही सुते विष्वग्विरूढ्य च । गृहेऽपि ज्ञानमभ्यस्येत्काशीं वाथ समाश्रयेत् । सम्यग्ज्ञानेन वा मुक्तिः किं न विश्वेश्वरेऽनघे ? । सम्यग्ज्ञानं भवेत् पुंसां कुत एकेन जन्मना ? । वाराणस्यां ध्रुवा मुक्तिः शरीरत्यागमात्रतः । अद्यश्वोवा परश्वोवा कालाद्वाथ परःशतात् । सत्वरं गत्वरोदेहः काश्यां चेदमृतो भवेत् । सा च वाराणसी लभ्या सदाचारवता सता । मनसापि सदाचारमतो विद्वान्न लङ्घयेत्" । वसिष्ठस्मृतौ च "आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः । छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः । आचारहीनस्य तु ब्राह्मणस्य वेदाः षड्ङ्गाअखिलाः सपक्षाः । कां प्रीतिमुत्पादयितुं समर्थाऽन्धस्य दाराइव दर्शनीयाः । नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानम् । तत्ताच्चरे सम्यगधीयमाने पुनाति तद्ब्रह्म यथावदिष्टम् । दुराचारोहि पुरुषोलोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च । आचारात् फलते धर्म्ममाचारात् फलते धनम् । आचारात् श्रियमाप्नोति आचारोहन्यलक्षणम् । सर्व्वलक्षणहीनोऽपि यः सदाचारवान्नरः । श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति । आहारनिर्हारविहारयोगाः सुसंवृता धर्म्मविदा तु कार्य्याः । वाग्बुद्धिवोर्य्याणि तपस्तथैव धनायुषी गुप्ततमे च कार्य्ये । उभे मूत्रपुरीषे तु दिवा कुर्य्यादुदङ्मुखः । रात्रौ कुर्य्याद्दक्षिणास्य एवं ह्यायुर्न रिष्यते । प्रत्यग्निं प्रतिसूर्य्यञ्च प्रति गां प्रति च द्विजम् । प्रतिसोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः । न नद्यां मेहनं कार्य्यं न पथि न च भस्मनि । न गोव्रजे नवा दृष्टे नोप्ते क्षेत्रे न वाद्दले । छायायामन्धकारे वा रात्रावह्नि वा द्विजः । यथासुखमुखः कुर्य्यात् प्राणबाधाभवेषु च । उद्धृताभिरद्भिः कार्य्यं कुर्य्याच्च स्नानमुद्धृताभिरपि । न हरेन्मृत्तिकां विप्रः कूलात् सरित कतां तथा । अन्तर्जले देवगृहे वल्मीके मूषिकस्थले । शतशौचावशिष्टे च न ग्राह्याः पञ्च मृत्तिकाः । एका लिङ्गे करे तिस्रउभाभ्यां द्वे तु मृत्तिके । पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः । एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतीनान्तु चतुर्गुणम् । अष्टौ ग्रासा मुनेर्भक्ष्या वानप्रस्थस्य षोड्श । द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः । अनड्वान् ब्रह्मचारी च आहिताग्निश्च ते त्रयः । भुञ्जानाएव सिध्यन्ति नैषां सिद्धिरनश्नताम् । तपोदानोपहारेषु व्रतेषु नियमेषु च । दृज्याध्ययनधर्म्मेषु योन शक्तः स निष्क्रयः । योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम् । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् । सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः । प्रतिग्रहे सङ्कुचिता गृहस्थास्ते ब्राह्मणास्तारयितुं समर्थाः । असूयवः पिशुनश्चैव कृतघ्नो दीर्घरोषकः । चत्वारः कर्म्मचाण्डाला जन्मतश्चापि पञ्चमः । दीर्घवैरमसूयाञ्च असत्यं ब्रह्मदूषणम् । पैशुन्यं निर्हृयत्वञ्च जानीयाच्छूद्रलक्षणम् । किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम् । पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे । शूद्रान्नरसपुष्टाङ्गोह्यधीयानोऽपि नित्यशः । श्रुत्वापि च जपित्वापि गतिमूर्द्धां न विन्दति शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः । स भवेच्छूकरोग्राम्यस्तस्य वा जायते कुले । शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति । यस्यान्नं तस्य ते पुत्रा नच स्वर्गार्हकोभवेत् । स्वाध्यायाढ्यं योनिमित्रं प्रशान्तं चैतन्यस्थं पापभीरुं बहुश्रुतम् । स्त्रीयुक्तान्नं धार्म्मिकं गोशरण्यं व्रतैः स्नातं तादृशं पात्रमाहुः । आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु । विनश्येत् पात्रदौर्बल्यात्तच्च पात्रं रसाच्च ते । एवं गात्रं हिरण्यञ्च वस्त्रमन्नं महीं तिलान् । अविज्ञान प्रतिगृह्णानो भस्मीभवति दारुवत् । नाङ्गंनखञ्च वादित्रं कुर्य्यात् नचापोऽङ्गलिना पिबेत् । न पादेन पाणिना वा राजानमपि हन्यात् न जलेन जलम् । नेष्टकाभिः फलानि पातयेत् न फलेन फलम् । न कल्कपुटकोभवेत् । नश्लेष्मभाषां शिक्षेत । अथाप्युदाहरन्ति । न पाणिपादचपलो न नेत्रचपलोभवेत् । नचाङ्गचपलोविप्र इति शिष्टस्य गोचरः । पारम्पर्य्यागतोयेषां वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणास्तेया श्रुतिप्रत्यक्षहेतवः । यस्य सन्नं नचासन्नं नाश्रुतं न बहुश्रुतम् । न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मण" एवंमन्वादिसंहितादौ बहव आचारा उक्तप्रायाः दर्शिताः । भावापरपर्य्यायः तन्त्रोक्ताचारस्य दिव्याचारवीराचारपश्वाचारभेदात् त्रिविधः यथोक्तं तन्त्रसारे ।

"अथ भावविधिं वक्ष्ये शृणुष्व कमलानने ! । विना येन न सिध्येत्तु जन्मकोटिशतैरपि । भावस्तु त्रिविधो देवि ! दिव्यवीरपशुक्रमात् । दिव्यवीरौ महाभावौ अधमः पशुभावकः । वैष्णवः पशुभावेन पूजयेत् परमेश्वरम् । शक्तिमन्त्रे वरारोहे ! पशुभावो भयानकः । दिव्ये वीरे-

महेशानि। जायते सिद्धिरुत्तमा। दिव्ये वीरे न भेदोऽस्ति-ताभ्यां भेदःपशोस्ततः। दिव्यवीरौ प्रवक्ष्यामि सर्वभावोत्तमोत्तमौ। विना यत्नेन पूजास्ति मत्स्यं मांसं विना प्रिये!। सुरान्तु मैथुनञ्चापि विना नैव प्रपूजयेत्। स्त्रीभगं पूजनाधारं स्वर्णरूप्यकमेव च। अभावे सर्वद्रव्याणा-मनुकल्पः कलौ युगे। अथ वा परमेशानि। मानसं सर्व्व-माचरेत्। स्नानन्तु मानसं प्रोक्तं वैदिके मानसं सदा। यत्र भुक्त्वा महापूजा मानसं भोजनन्तु तत्। स्वकीयां परकीयां वा मानसन्तु रमेत् स्त्रियम्। मानसं मद्यमीनादि स्त्रीकुर्य्यात् साधकोत्तमः। स्त्रैरन्तु कुसुमं तद्वत् मानसं सम्प्रपाचरेत्। मानसं भगरोमादि मानसं भगपूजनम्। सर्व्वन्तु मानसं कुर्य्यात् तेन सिद्धिमवाप्नुयात्" इति पिच्छिलातन्त्रे पूर्व्वखण्डे दशमःपटलः। तद्विवरणं तत्तच्छब्दे द्रष्टव्यम्। आचारचन्द्रिका आचारचिन्तामणिः आचारदीपः आचारमाधवः आचारमयूखः आचारादर्शः आचारार्कः इत्यादयश्च अन्याः आचारवेदनार्थाः भारत-वर्षे देशभेदे च प्रसिद्धाः। तत एवाचारभेदा अवसेयाः। निषिद्धाचारश्च अनाचारः स च अनाचारशब्दे २५७ पृष्ठे उक्तप्रायः। अधिकं निषिद्धशब्दे वक्ष्यते।

आचारदीप पु० आचारार्थः नीराजनार्थोदीपः। राज्ञां वाजिप्रभृतीनां वा नीराजनार्थे दीपे।

आचारवत् त्रि० आचारः शास्त्रोक्तानुष्ठानं कर्त्तृ व्यतयाऽस्यास्ति मतुप् मस्य वः। शास्त्रोक्तानुष्ठानयुक्ते स्त्रियां ङीप्।

आचारवर्जित त्रि० आचारेण वर्जितः। शास्त्रोक्ताचारहीने आचारहीनादयोऽप्यत्र।

आचारवेत्तृ त्रि० आचारं वेत्ति विद्–तृच् स्त्रियां ङीप्। आचाराभिज्ञे। [स्त्रियां ङीप्।

आचारवेदिन् त्रि० आचारं विद्–णिनि। आचाराभिज्ञे

आचारवेदी स्त्री आचारस्य वेदीव। पुण्यभूमौ हेम०।

आचाराङ्ग न० आचारमङ्गमिव। दृष्टिवादे द्वादशस्य अङ्गेषु मध्ये अङ्गभेदे हेमचन्द्रः।

आचारिन् त्रि आचरति शास्त्रोक्तानुसारेण आ+चर–णिनि। शास्त्रोक्तानुष्ठानवति स्त्रियां ङीप्।

आचारी स्त्री० सम्यक् चारः प्रसरणं यस्याः गौ० ङीष्। (हेवञ्चा) शिक्षनोचिकालतायाम्।

आचार्य्य पु० आ+चर–ण्यत्। "उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" इति मनूक्तलक्षणे १ वेदाध्यापयितरि, "आम्नायतत्त्वविज्ञानाच्चराचरसमानतः। यमादियोगसिद्धत्वादाचार्य्य इति कथ्यते" इत्युक्तलक्षणे २ मन्त्र-स्थापके षड्गुराचार्य्यादौ च। स्त्रियां टाप्। आचार्य्या। आचार्य्यपत्यर्थन्तु ङीप् आनुक् च आचार्य्यानी न णत्वम्। "अग्निहोत्री तपस्वी च वेदमध्यापयेच्च यः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" दक्षः "कस्मादाचार्य्य आचारं ग्राहयत्याचिनोत्यर्थान् आचिनोति बुद्धिमिति वा" निरु०। "आचार्य्यस्तु ते गतिं वक्तीति" छा० उप०। "आचार्य्यात् पादमादत्ते पादं शिष्यः स्वमेधया। कालेन पादमादत्ते पादं सब्रह्मचारिभिः" नीलकण्ठधृता स्मृतिः। "क्रमेणाचार्य्यमिच्छध्यधर्माभावे कृतीर्थिनः" याज्ञ०। यज्ञादौ कर्मोपदेशके २ गुरौ "आचार्य्यस्त्वं यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञे स्विजाचार्य्यो भव सुव्रत! यथा शक्रस्य वागीश आचार्य्यः सर्व्वकर्म्मसु। तथा मम त्वमाचार्य्यः कृतोऽसीन्द्र यज्ञक-र्म्मणि" इति विधानपारि० पुरा०। ४पूज्यमात्रे त्रि० सुराचार्य्यः दैत्याचार्य्यः ५शिल्पकर्मज्ञे च "लङ्कास्त्रीणां पुमस्त्वे विलापाचार्य्यकं परैः" रघुः।

आचार्य्यक न० आचार्य्यस्य कर्म भावो वा योपधगुरूपो-त्तमत्वात् वुञ्। आचार्य्यकर्मणि। "लङ्कास्त्रीणां पुमस्त्वे विलापाचार्य्यकं परैः" रघुः "भैषजातु महेष्वासः पार्थम-क्लिष्टकारिणम्। हस्त्यादाचार्य्यकं दीप्तं संस्मृत्य शरनिर्मितम्" भा०उ०प०१६६ अध्या०। "आचार्य्यकं विजयि मान्यधाविरासीत्" स्व आचार्य्यत्वं तत्रैव न०-तत् आचार्य्यता तत्रैव स्त्री। सोऽचिरेणैव कालेन परमाचार्य्यतां गतः"।

आचार्य्यभोगीन त्रि० आचार्य्यभोगाय हितम् स "आ-चार्य्यादणवम्" वार्त्तिकोक्तेः न णत्वम्। आचार्य्यभोग-पर्य्याप्ते द्रव्यादौ।

आचार्य्यमिश्र पु० आचार्य्योमिश्रः। अतिशयपूज्ये।

आचिख्यासा स्त्री आख्यातुमिच्छा आ+ख्या–सन्–अ। आख्यातुमिच्छायाम्। [आख्यातुमिच्छो।

आचिख्यासु त्रि० आख्यातुमिच्छु आ+ख्या–सन उ।

आचित त्रि० आ+चि+क्त। १व्याप्ते, "कचाचितो विष्वगिवा-गजो गजौ" किरा० "फलैरुपचितैर्दिव्यैराचितां स्वादु भिर्भृशम्" (बदरीं दहशुः) भा०व०प० १४५ अ०। २गुम्फिते ग्रथिते "अङ्गाचिता सत्यकृतास्त्रतायाः" कुमारः रघुश्च "तुला पक्षगतं तासां विन्यस्य भार आचितः" इत्युक्ते

भारात्मके २द्विसहस्रपलमाने। आचितं दश भाराः स्यात् याकटोभार आचित इत्युक्ते ४ दशभारमाने न० याकटभारे पु०। परिमाणवाचकत्वात् पूतन्मितेऽपि। ६संश्लेषिते ७ ऊर्ध्वे च। "आढकाचितपात्रात् खोऽन्यतरस्याम्" पा० "आचितं सम्भवति (खन्मिन् सन्नियच्छति) अवहरति पचति वा ख ठञ् वा। आचितीनः आचितिकः। आचितपरिमाणद्रव्यस्य खन्मिन् समावेशनार्हे तदवहारके तत्पाचके च त्रि०। ठञि स्त्रियां ङीप्खे टाप्।

आचितादि पु० आचित आदिर्यस्य। गतिकारकोपपदात् कृदुत्तरपदप्रकृतिस्वरत्वे पाणिना पर्युदस्ते गणभेदे आचित, पर्याचित, आस्थापित, परिगृहीत, निरुक्त प्रतिपन्न, अपश्लिष्ट, प्रश्लिष्ट, उपहित, उपस्थित संहितागमि।

आचूषण न० आ+चूष-ल्युट्। ओष्ठसंयोगविशेषेण रसानुभवार्थे रसाकर्षके व्यापारभेदे (चोषा) विषशल्याद्युपकर्षणार्थे २ओष्ठादिसंयोगभेदेनाकर्षणे च। "नाडीयन्त्राश्मनेकप्रकाराणां" ल्युपक्रम्य "तानि आचूषणार्थमिति"। सुश्रु० करणे ल्युट् ३तत्साधने(शिङ्गा)"ततश्छिन्ते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात्" सुश्रु०।

आच्छद् त्रि० आच्छाद्यतेऽनेन आ+छद-णिच्-क्विप् हृस्वः। आच्छादने वस्त्रे घञर्थे क। आच्छदोऽप्यत्र पु०।

आच्छन्न त्रि० आ+छद-क्त। आवृते "मेघाच्छन्नेऽभ्रि दुर्दिनम्" अमरः। [आवरणे।

आच्छाद पु० आच्छाद्यतेऽनेन आ+छद-णिच्-करणे घञ्।

आच्छादक त्रि० आ+छद-णिच्-ण्वुल्। आच्छादनकर्त्तरि

आच्छादन न० आ+छद-णिच्-करणे ल्युट्। आवरणसाधने १वस्त्रे भावे ल्युट्। २आवरणे न०।

आच्छादित त्रि० आ+छद-णिच्-क्त। आवृते।

आच्छादिन् त्रि० आ+छद-णिच्-णिनि। आच्छादके "स्तनयुगपरिणाहाच्छादिना वल्कलेन" शकु०।

आच्छाद्य अव्य० आ+छद-णिच्-ल्यप्। १आवृत्येत्यर्थे "आच्छाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम्" मनुः आ+छद-णिच्-कर्मणि यत्। २आवरणीये स्तनादौ ३गोप्ये च त्रि०। [च।

आच्छिन्न त्रि० आ+छिद-क्त। १बलेन गृहीते २सम्यक्छिन्ने

आच्छु पु० आ+क्षु-वा० डु संज्ञायां कन्। (आदृच्)। इक्षौ।

आच्छुरित न० आ+क्षुर-क्त। १सशब्दहासे, २नखाघाते ३नखवाद्ये च। स्वार्थे क। आच्छुरितकमप्यत्र।

"सामोन्मुखेनाच्छुरिता प्रियेण दत्तेऽथ काचित् पुलकेन भेदे" भट्टिः। ४मिश्रिते च त्रि०।

आच्छेद पु० आ+छिद-घञ्। १समन्ताच्छेदने २ईषच्छेदने बलात्कारेण ३ग्रहणे च। ल्युट्। आच्छेदनमप्यत्र न०

आच्छोटन न० आ+स्फुट-ल्युट् पृ०। अङ्गुलिभोटने (तुड़िदेओया)। [अङ्गुल्यादौ।

आच्छोटित त्रि० आ-स्फुट-क्त पृ०। भोटलेन कृतध्वनौ।

आच्छोदन न० आच्छिद्यतेऽत्र छिद-ल्युट् पृषो० इतओत्। मृगवायाम् अमरः।

आच्युतदत्ति पु० अच्युतदत्तस्यापत्यम् इञ्। आयुधजीविभेदे ततः दामन्यादि० स्वार्थे ऊन् आच्युतदत्तीयः। संघीभूते आयुधजीविभेदे।

आच्युतन्ति पु० अच्युतन्तस्यापत्यम् इञ्। आयुधजीविभेदे ततः दामन्यादि० स्वार्थे ऊन्। आच्युतन्तीयः। संघीभूते आयुधजीविभेदे।

आच्युतिक त्रि० अच्युतस्य ज्ञातः कायादि० ठञ् ञिठ् वा। अच्युतज्ञाते ठञि स्त्रियां ङीष्।

आञ्छ आयामे (दीर्घविस्तारे) इदित् भ्वादि० पर० सक० सेट्। आञ्छति आञ्छीत्। आनाञ्छ-आञ्छ आञ्छिता। कर्मणि आञ्छ्यते। णिच् आञ्छयति ते आञ्छिषुः-त। सन् आञ्छिच्छिषति। क्विप् आन् आञ्छौ। क्वोरिति सूत्रे अतुकोऽपि ग्रहणमिति आन् आंछौ इत्येके। "आञ्छितः आञ्छित्वा "आञ्छेदतिच्छिन्नम्"। "चक्रयोगेनाञ्छेदूर्ध्वस्थिनिर्गतम्" इति च सुश्रु०।

आज न० आज्यतेऽनेन आ+अज-घञर्थे क। १घृते जटा०। अजस्येदम् अण्। २छागमांसादौ त्रि०। "अलङ्कृतं कुमारं कुशलीकृतगिरसमर्हतेन वाससा संवीतमैणेयेन वाजिनेन ब्राह्मणम्, रौरवेण क्षत्रियम्। आजेन वैश्यम्" आश्व०। भट्ट० "गव्यमाजं तथा चौष्ट्रमाविकं माहिषञ्च यत्। अश्वायाश्चैव नार्याश्च करेणूनाञ्च यत् पयः" सुश्रुतः। अजभावे घञ् न वीभावः। ३विक्षेपे आजानेयः।

आजक न० अजानां समूहः वुञ्। छागसमूहे।

आजकरोण त्रि० आजकेनोपलक्षिता रोणीनदीभेदः तस्याः सन्निकृष्टदेशादि अण्। अजसमूहोपलक्षितनदीसन्निकृष्टादौ

आजकार पु० अजस्यायमाजः कारो यस्य। शिवद्वेषे त्रिपुरासुरवधकाले विष्णुना वृषभरूपत्वकरणात् तस्य तथात्वम् यथा। "अथ विष्णुर्महायोगी सर्व्वतोऽभ्यतपत्ततः। वृषरूपं समास्थाय प्रोज्जहार रथोत्तमम्। समा-

क्लान्तं देवगणैः समग्रबलपौरुषैः । बलवांस्तोलयित्वा तु विषाणाभ्यां महाबलः । ननाद प्राणयोगेन मथ्यमान इवार्णवः । हतोयं वायुविषयं समाक्रम्य विषाणवान् । ननाद बलवद्वादं समुद्र इव पर्व्वणि" हरि० २२४ अ० ।

आजगर न० अजगरं सर्पकृपं नड्वर्मधिकृत्य कृतोयन्थः अण् । अगस्त्यशापेनाजगररूपतां प्राप्तस्य नड्वस्य युधिष्ठिरेण संवादरूपे भारतान्तर्गतवनपर्व्वणि अवान्तर पर्व्वभेदे तच्च भा० वनपर्व्वणि १७६ अ० अवधि १८० अध्यायपर्य्यन्ताध्यायषट्कात्मकं तत्कथा तत्रैव दृश्या ।"निवातकवचैर्युद्धं पर्व्व चाजगरं ततः" भा० आ० प० १अ० ।

आजगव न० अजगवमेव प्रज्ञाद्यण् । १शिवधनुषि अजगवगर्ब्बार्थे विहितः अजगवं तत्माहश्यमस्यत्व अण् । तत्तुल्य दृढे २धनुषि च "आजगवं नाम धनुः शराः शक्रोऽङ्गिरास्त्रयः" भा० व० प० १२७ अ० "तथेत्युक्त्वा पृथुर्वैण्योऽटहीत्वाजगवं धनुः" भा० द्रो० प० ६६ अ० ।

आजधेनवि पुंस्त्री० अजैव धेनुरस्य पृ० पुंवत् तस्यापत्यम् वाह्वादेः आकृतिगणत्वादिञ् । आगीरूपधेनुयुक्तमुनेरपत्ये ।

आजनन अव्य० आ+जन–ल्युट् । १विख्यातजनने "तेषामाजननं पुण्यं कर्म्मणः प्रीतिमावहेत्" भा० आ० प० सीमायाम् अव्ययी० । २जन्मपर्य्यन्ते अव्य० ।

आजन्म(न) अव्य० जन्मनः पर्य्यन्तम् सीमायाम् अव्ययी० वा अच् । जन्मपर्य्यन्ते "सोऽहमाजन्मशुद्धानाम्" रघुः ।

आजन्मसुरभिपत्र पु० आजन्मम् सुरभि पत्रमस्य । मरुवक वृक्षे राजनि० । [मारीपत्ये ।

आजमार्य्य पुंस्त्री० अजमारस्यापत्यम् कूर्व्वादि० गर्ग० यञ् ।

आजमीढ पु० अजमीढो देशभेदस्तत्र भवः अण् । (आजमीर) १देशभवे तस्य राजा अण् । तद्देशाधिपे २वृष्णे बहुषु तस्य लुक् । अजमीढाः । "सधस्तुतिमाजमीढासोऽग्नन्" ऋ० ४, ४४, ६, "अजमीढासः तत्सम्बन्धिन" भा० । ३यादवनृपभेदे च "भरतस्य कुरोः पूरोराजमीढस्य चानघ ! यादवानामिमं वंशम्" इत्युपक्रान्तम् भा० आ० प० ७५ अ० । "ओमित्येव वशिष्ठोऽपि भारतान् प्रत्यपद्यत । अथाध्यधिश्रित् साम्राज्ये सर्वक्षत्रस्य पौरवम् । विषयभूतं सर्वस्यां पृथिव्यामिति नः श्रुतम् । भरताध्युषितं पूर्व्वं सोऽध्यतिष्ठत् पुरोत्तमम् । पुनर्बलिभृतस्यैव चक्रे सर्वमहीक्षितः । ततः स पृथिवीं प्राप्य पुनरीजे महाक्रतुः । आजमीढो महायज्ञैर्बहुभिर्भूरिदक्षिणैः ६४ अ० । अजमीढेषु भवः यञ् । आजमीढः बहुत्वबहुमीढभवे त्रि० ।

आजयन न० आजीयतेऽत्र आ+जि–आधारे ल्युट् । युद्धे

आजरस अव्य० जरापर्य्यन्तम् अव्ययी० अच् जरसादेशः । जरापर्य्यन्ते । आगता जरा यस्य प्रा० ब० अच् जरसादेशश्च । प्राप्तजराभावे "आजरसाय समनक्त्वर्यमा" ऋ० १०, ८५, ४२, ।

आजवस्तेय पुंस्त्री० अजवस्तेर्घेरपत्यम् शुभ्रा० ढक् । अजवस्तिनामकर्षेरपत्ये शुभ्रा० ढञ् । आवस्तिकोऽप्यत्र स्त्रियां ङीप् ।

आजवाह त्रि० अजोवाह्यतेऽत्र वह–णिच् आधारे घञ् अजवाहोदेशभेदः तत्र भवादि अण् । अजवाहदेशभवादौ । सचदेशः बदरिकाश्रमादुत्तरस्यां पर्व्वतोपरिस्थः तत्र हि अजैरेव भारो वाह्यते इति तस्य तथात्वम ।

आजातशत्रव पु० अजातशत्रोरपत्यम् अण् । १युधिष्ठिरापत्ये न जातः शत्रुरस्य । अशत्रुकस्य नृपभेदस्यापत्ये २भद्रसेने नृपे च । "एतया वै भद्रसेनमाजातशत्रवमाङ्गिरभिचचार" श्रुत० ब्रा० "अजातशत्रुश्च काशीराजः यशोऽम्" छा० उ० "यशोमाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति" ।

आजाति स्त्री आ+जन–क्तिन् । आजनने जन्मनि "ताडयित्वा तृणेनापि संवादान्नतिपूर्व्वकम् । एकविंशतिमाजातीः पापयोनिषु जायते" । "साक्ष्येऽनृतं वदन्नाशमाप्नोत्यभ्यवपद्यते याद्दक्तैर्भ्रूणम् । विवृतः शतमाजातीस्तस्मात्साक्ष्ये वदेदृतम्" इति च मनुः ।

आजाद्य पु० स्त्री अजमत्ति अद–ण्यत् उप० स० तस्यापत्यम् गर्गा० यञ् । छागभक्षकमुनेरपत्ये स्त्रियांङीप् बहोपत्य ।

आजान अव्य० जनोजननमेव अण् आजानः तत्पर्य्यन्तम् अव्ययी० । सृष्टिकालपर्य्यन्ते सृष्टे । "अङ्गिराः सम्भृतः पृथिव्यै रसः विश्वकर्म्मणः समवर्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे" यजु० २१, १७, "पूर्व्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्नुवन्ति । "अङ्गिराः जलात् पृथिव्याः सकाशात् पृथिव्यपां सकाशं भूतपञ्चकोपलक्षकम् भूतपञ्चकात् योरसः सम्भृतः पुष्टः तथा विश्वं कर्म्म यस्य विश्वकर्म्मणः कालस्य रसात्प्रीतेः योरसोऽग्रे प्रथमं समवर्तत समभवत् भूतपञ्चकस्य कालस्य च सर्व्वं प्रति कारणत्वात् पुरुषमेधयाजिनो लिङ्गशरीरे भूतानि पुष्टानि कालश्च ततः पुष्टेभ्यः कश्चिद्रसविशेषफलरूपोत्तमजन्मप्रद उत्पन्न इत्यर्थः । तस्य रसस्य रूपं विदधत् भारयन् त्वष्टा, आ-

दित्यः एति प्रत्यहमुदयं करोति अयं प्रथमं मर्त्यस्य मनुष्यस्य शतस्य पुरुषमेधयाजिनः आजानं देवत्वं मुख्यं देवत्वम् सूर्य्यरूपेण । द्विविधा देवाः कर्म्मदेवा आजानदेवाश्च कर्म्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्म्मदेवाः सृष्ट्यादावुत्पन्ना आजानदेवाः ते कर्म्मदेवेभ्यः श्रेष्ठाः "ये शतं कर्म्मदेवानामानन्दाः स एक आजानदेवानामानन्द इति श्रुतेः" वेदद्दी० जननसाधने २प्रकृतौ च । "न हस्तिनं प्रतिगृह्णीयात् पुरुषाजानोहि हस्तीति" शत० भा० पुरुषाजानः पुरुषप्रकृतिकः" इतिभा० । आ+जन घञ् दीर्घः" ३उत्पत्तौ पु० ।

आजानज त्रि० आजानं जायते । सृष्टिकालादारभ्यजाते देवादौ । द्विविधा हि देवाः केचित् कर्म्मदेवाः केचिदाजानदेवाश्च यथ "ते ये शतमाजनजानां देवानामानन्दाः स एकः ये कर्म्मणा देवानपियन्ति" ऐत०उ० ।

आजानदेव पु० आजानं सृष्टिकालमारभ्य देवः देवत्वमाप्तः । कर्म्मणानुत्पन्नदेवभावे चिरप्रसिद्धे देवे "अथ ये शतं कर्म्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ते शतमाजानदेवानामानन्दाः" बृ०उ० । "आजानदेवानामेक आनन्दः उत्पत्तितएव ये देवास्ते आजानदेवाः" भा० ।

आजानि त्रि० आ+जन-अन्तर्भूतण्यर्थे इण् ऊदसीति दीर्घः । १जनके जननकर्त्तरि । "त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने !" ऋ०३,१७,३ । आजानीः जनयित्र्योमातरः" भा० । अन्तर्भूतण्यर्थाभावे । २अनुजाते च "तत्रैव पश्चान्तरे आजनयः अनुजाताः खसार इति भाष्यकृता व्याख्यातम् ।

आजानिक्य न० आजानौ भवः ठञ् तस्य भावादौ पुरो० यक् । आजन्मसिद्धपदार्थस्य भावे कर्म्मणि च ।

आजानेय पु० आजे विक्षेपेऽपि आनेयोऽश्ववाहो यथा स्थानमस्य । "अक्लिभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः" इत्युक्तलक्षणे उत्तमाश्वे । [स्य ब्रह्मणोऽपत्ये ।

आजायन पुंस्त्री अजस्यापत्यम् नडा० फक् । अजनामकक्षत्प-

आजि स्त्री अजन्त्यस्याम् अज-इण् न वीभवः । १समरभूमौ २संग्रामे, "आजिं न जग्मुर्गिर्वाहो अश्वाः" ऋ०६, २४,६, "ते यावन्तएवाजौ तावान् स दृश्य परैः" रघुः । "अस्माकमिन्द्र! हुवरं पुरोयाचालमाजिषु" ऋ०५,३५,७ "आजिषु संग्रामेषु" भा० । ३मर्य्यादायां स्त्री वा ङीप् । "अतोयान्यानि वीर्य्यवन्ति कर्म्माणि यथाग्नेर्मन्थनम् आजेः सरणम् दृढस्य धनुषआयमनम्" ऋ०उ० "आजेः मर्य्यादायाः सरणं धावनम्" यङ्लुकभा० ५ऋणे ६मार्गे पु० । "धन्वना गा धन्वनाजिं जयेम" यजु०२९,३९ । "धन्वना आजिं मार्गं जयेम अजन्ति गच्छन्ति यस्मिन्नसावाजिर्मार्गः" वेददी० । भावे इण् ७आत्त्वेमे ।

आजिनीय त्रि० अजिन+चतुरर्थ्यां छण्वाऽण् । चर्म्मसन्निकृष्टदेशादौ । [सन्निकृष्टदेशादौ ।

आजिरि त्रि० अजिर+चतुरर्थ्यां लुतङ्मा० इञ् । अङ्गन-

आजिरेय त्रि० अजिर+शुभ्रादि० ढक् । अङ्गनभवादौ ।

आजिहीर्षा स्त्री आहर्त्तुमिच्छा आ-हृ सन्-भावे अ । आहरणेच्छायाम् । उ । आजिहीर्षुः । आहरणेच्छौ त्रि० ।

आजीकूण न० आजौ कूणति आदृणोति यस्मिन् आ+कूण-आधारे क । मर्य्यादावरके देशभेदे ततः धूमादि०भवादौ पथ्यादौ वुञ् । आजीकूणिकः । आजीकूणदेशभवे-पथि अध्याये, न्याये, विचारे, मनुष्ये, हस्तिनि, गोमये च ।

आजीगर्त्ति पुंस्त्री० अजीगर्त्तस्यापत्यम् बाह्वा०इञ् । अजीगर्त्तस्यापपत्ये ।

आजीव पु० आजीव्यतेऽनेन आ+जीव-करणे घञ् । १आजीवनोपाये द्रव्यादौ २उपाये च । अन्नाशनसुपक्रम्य "तस्मिन् काले स्थापयेत्तत्पुरस्तात् वस्त्रं शस्त्रं पुस्तकं लेखनीञ्च । स्वर्णं रौप्यं यच्च गृह्णाति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा" सु०चि० । दृष्टां जन्मलग्नावधि दृग्भावे मेषादीनां श्वेतहोराद्रेक्काणनवांशद्वादशांशत्रिंशांशरूपैः षड्भिर्वर्गैः क्रमेणाजीवोपायविशेषज्ञानं भवति यथोक्तं जातके "अथ कल्याणवर्म्मोक्तां दृग्मेऽंशविभेदजाम् । वृत्तिचिन्तां लिखेत्कर्म्माजीवोक्तामपि चिन्तयेत् । "वाटिकाकृषिवणिग्यन्त्रसेवादूत्यतोऽजगणतः स्वभे भवेत् । जीवन दृग्गणाच्चतुष्पदैः यन्त्रिधान्यशकटादिसंग्रहैः । मौक्तिकादिजलजैर्लिपिलेख्यैर्विद्रुमादिकवणिक्क्रियादिभिः । द्वन्द्वभागत अथो कुलीरतोनीरजैर्विषमगाग्निशस्त्रजैः । वनाद्रिकाष्ठसञ्चारकृष्याकृष्यैश्च धान्यकैः । क्षितिपाषाणवाणिज्यैर्वृत्तिः सिंहांशतः स्वभे । गान्धर्वशिल्पशकटैर्मणिहेमकर्म्मगन्धक्रयैर्नभसि षट्कगणैश्च लेख्यैः । हेमाम्बुगोमहिषधान्यकृषिक्रयैश्च मूलैर्धनैर्नृपतितोऽपि तुलोत्थवर्गे । स्त्रीशङ्खमाग्र्यधनचौर्य्यचिकित्सितैश्च निन्द्योद्यमैर्नृपतिसेवनतोऽलिवर्गे । भैषज्यरूपगणितादिकयन्त्रविद्याभूपालमन्त्रिगिरिदुर्गवणाद्धनुःस्थे ।

वराङ्गना वारिभवोत्पवित्ताः श्रेष्ठा रताश्चापि रसायने स्युः । क्रीड़ासु रामासु महाप्रभेषु मृगाक्षवर्गे दृगमेऽतिवित्ताः । यस्याग्निभेदखननादिकीर्य्यभारस्तम्भोपदृष्टिरपि बाहु-बलादुघटोत्थे । खस्थे गणे भवभवे जवगस्तवाहयोनि प्रपायनधनानि नरस्य पश्यैः" । भावे घञ् । २आजीवार्थ-मालम्बने । आजीवति कर्त्तरि अच् । ४आजीवनकारिणि" कर्म्माजीवः नृपाजीव इत्यादौ त आ+जीव–अच् । उप०स० इति भेदः ।

आजीवन न० आजीवत्यनेन करणे ल्युट् । इत्युपाये भावे ल्युट् । इत्यर्थसुपायपक्षणे "आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः" मनुः "स्त्रीणामाजीवमार्थञ्च प्रदेयं प्रीतिपूर्व्वकम्" । "स्त्रीणामाजीवनत्वादिति" च स्मृतिः ।

आजीविका स्त्री आजीवयति आ+जीव णिच्–ण्वुल् । जीविकायां वृत्तौ जीवनार्थे व्यापारे । आ+जीव–कर्त्तरि ण्वुल् । आजीवकः आजीवनकर्त्तरि त्रि० ।

आजीव्य त्रि० आजीव्यतेऽनेन वा० करणे यत् । आजी-वनोपाये १इत्यादौ "आजीव्यः सर्व्वभूतानाम्" रामा० आजीव्यते इत्यर्थमालम्बतेऽसौ आ–जीव–कर्मणि यच् । २इत्यर्थमालम्बनीये रूपादौ । आजीव्यतेऽत्र आधारे वा० यत् । ३आजीवनीयदेशे "रक्ष्यमानस्तु सामन्तं स्वाजीव्यं देशमावसेत्" मनुः । तेऽपि सर्वे निवर्त्तन्तां येऽपि वृद्धानुयायिनः मया यथोचिताजीव्यैः संविभक्ताश्च वृत्तिभिः" भा०व०प० ६३अ० ।

आजू स्त्री आजवति आ+जु–क्विप् दीर्घः । भृतिं विना कर्म-कारके । (बेगार) "वृथादृष्टिकरः क्लेशैर्दृष्टिराजुश्च कीर्त्यते । इत्युक्ते कर्म्मकरभेदे ।

आजूर् स्त्री आ+ऊर–क्विप् जट् । विटौ मुकुटः ।

आज्ञप्त त्रि० आ+ज्ञा–णिच् क्त क्त्वस्वः । आदिष्टे कृतादेशे

आज्ञप्ति स्त्री आ+ज्ञा–णिच् क्तिन् क्त्वस्वः । आज्ञायाम् ।

आज्ञा स्त्री आ+ज्ञा–अङ् । १आदेशे आदेश्यञ्च निजस्य भृत्यादेः कार्य्यादौ प्रवर्त्तयितव्यापारभेदः । "आज्ञया नरपतेर्द्विजन्मनां दारकर्म्मकृतसूतके तथा । बन्धमोक्षमख-दीक्षणेष्वपि चौरमिश्रमखिलेषु शौडुप" ज्योति० । "तथेति शेषामिव भर्त्तुराज्ञाम्" कुमा० । "पश्चात् वनाय गच्छेति तदाज्ञां सुदितोऽग्रहीत्" रघुः । "अनतिक्रमणीया हि सतामाज्ञा" मनु० । "दूरापवर्ज्जितच्छत्रैस्सखाज्ञां शावनार्पितम्" रघुः "शिरोभिराज्ञामधरे महीभुजः" । माघः । २ज्योतिषोक्ते लग्नावधिदृग्मभावे तन्त्रोक्ते भ्रूमध्यस्थे सुषुम्णानाड्यन्तर्गते ४आज्ञाचक्रे च विवरणमा-ज्ञाचक्रशब्दे । "आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्ति-तेति" तन्त्रम् ।

आज्ञाकर त्रि० आज्ञया करोति कृ–अच् ३त० । आज्ञानु-सारेण कर्मकर्त्तरि दासादौ णिनि आज्ञाकारी तत्रैव त्रि० स्त्रियां ङीप् । क्विप् आज्ञाकृत् तत्रैवार्थे त्रि० ।

आज्ञाचक्र न० आज्ञासंज्ञकं चक्रम् । तन्त्रप्रसिद्धे देहाव-स्थितसुषुम्णानाड्यभ्यन्तरे भ्रूमध्यस्थे द्विदले पद्माकारे चक्रभेदे । विशुद्धचक्रसञ्ज्ञा "आज्ञाचक्रं तदूर्द्धन्तु आत्मनोऽधिष्ठितं परम् । आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तिता" । तत्र निष्कृतचित्तस्य पुरुषस्य सर्व्वपदार्थसाक्षात्-कारेण "एवं भूतम्, एव वर्त्तते, एवं भविष्यतीति" ज्ञानेन गुरोरीश्वरस्य तदूर्द्धं सहस्रदलकमले स्थितस्याज्ञायाः "इतः परं त्वया इत्थं कर्त्तव्यमिति" नियोगस्य संक्रमणं भवति तेन तदाज्ञाख्यं चक्रमित्यर्थः । यथा च षट्-चक्राणां देहे स्थितिस्तथोक्तं शारदायाम् । "अनुलोमविलो-मायां शरीरमुभयात्मकम् । शुद्धब्रह्मान्तरे कन्दमूलेऽधोऽङ्ग-मङ्गुलं विदुः । तस्य द्विगुणविस्तारं विन्दु-रूपेण शोभितम् । नाड्यस्तत्र समुद्भूता मुख्याश्चिन्त्राः प्रकी-र्त्तिताः । इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे मता । तयोर्मध्यगता नाड़ी सुषुम्णा ब्रह्मसंश्रिता । पादाङ्गु-ष्ठादपक्रान्ता शिखाभ्यां शिरसा पुनः । ब्रह्मस्थानं समा-पद्या सोमसूर्य्याग्निरूपिणी । तस्यामध्यगता नाड़ी चि-त्राख्या योगिवल्लभा । ब्रह्मरन्ध्रं विदुस्तस्यां पङ्कजन्तु-निभं परम् । आधारांश्च विदुस्तत्र मतभेदाननेकधा । दिव्यमार्गमिमं प्राहुरमृतानन्दकारकम् । इड़या सञ्च-रेच्चन्द्रः पिङ्गलायां दिवाकरः । नाड्यौ योगनिदानज्ञैः सुषुम्णायास्तु तावुभौ । आधारकन्दमध्यस्थं त्रिकोणमति सुन्दरम् । ज्योतिषां निलयं दिव्यं प्राहुरागमवेदिनः । तत्र विद्युल्लताकारा कुण्डली परदेवता । परिस्फुरति सर्व्वात्मा सुप्तार्हिसदृशाकृतिः । विभर्त्ति कुण्डली शक्तिरा-त्मानं हंसमाश्रिता । हंसः प्राणात्ययोनिस्थं प्राणा नाड़ी यथाश्रयाः । आधारादुत्थितोवायुर्यावत् ब्रह्मबिलं स्मृतम् । देहं प्राप्य खनाड़ीभिः प्रत्याहं कुरुते वपुः । द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः" । तन्त्र-चिन्तामणौ षट्प्रकाशे । "आज्ञानामाब्जं तद्विमलरुचि-हृयं ध्यानधाम प्रकाशम् हक्षाभ्यां वै कलाभ्यां प्रविल-

सितवर्णयुग्मपत्रं सुशुभ्रम् । तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यामुद्रां कपालं डमरूजपवटीं बिभ्रती शुद्धचित्ता । एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्" एतदभिप्रायेणैव "मनोऽपि भ्रूमध्ये निवसत्यानन्दलहर्य्यामुक्तम् । मनसस्तत्र स्थित्या च तदुपहितजीवस्यापि तत्रैव स्थितिः । एवञ्च श्रुतौ हार्द्दविद्यायां "हृदयं तस्माद्धृदयम्" इत्युक्तिस्तु हृदये ध्यानार्थादित्यविरोधः । महानिर्वाणतन्त्रे शरीर एव चतुर्दश भुवनानि सूक्ष्मरूपेण स्थितानि तानि च तत्रैव ध्येयानीत्युक्तं तत्र कुत्र किं ध्येयमित्याकाङ्क्षायां मूलाधारादिकं भूरादिलोकतया ध्येयमित्युक्तम् तत्र विशुद्धचक्रस्य जनोलोकतया ध्येयतामुक्ताह ।

"एतत्पद्मस्योर्द्धदेशे ज्ञानपद्मं सुदुर्लभम् । दलद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम् । पद्ममध्ये बीजकोषे शरच्चिन्तामणेः पुरीम् । तन्मध्ये नवकोणञ्च यन्त्रं परमदुर्लभम् । शम्भुबीजं हि तन्मध्ये साकारं हंसरूपकम् । हंसः परब्रह्मरूपः साकारः शिवरूपकः । तारचञ्चुर्वरारोहे निर्गमागमपत्रवान् । शिवशक्तिपदद्वन्द्वं विन्दुत्रयविलोचनः । विहारश्चास्य हंसस्य हेमपङ्कजपूजिते । एवं हंसोमणिद्वीपे तस्य क्रोड़े परः शिवः । वामे तस्य सिद्धकाली सदानन्दस्वरूपिणी । तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः । तपोलोक इदं भद्रे ! सर्व्वलोकस्य दुर्लभम् । यत्र ब्रह्मादयो देवा ध्यानयोगं सदाभ्यसेत् । मनसापि न लभ्येत योगेन तपसा न च । तपोलोकं गोलोकस्य चतुर्लक्षगुणं शिवे ! । ब्रह्मलोकेषु ये देवा वैकुण्ठे ये सुरादयः । शम्भुलोके वसेद्योहि तेजोभक्तिपरायणः । तपसापि न लभ्येत तपोलोकगतिं शिवे । तपोलोकसमानास्ति लोकमध्ये सुलोचने ! । सालोक्यं हि महोलोके सारूप्यं जनलोकके । सायुज्यं च तपोलोके निर्व्वाणं हि तदूर्द्धके । ततो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा । इति ते कथितं कान्ते ! चक्रषट्कस्य लक्षणम् । यज्ज्ञानादमरश्चैव जीवन्मुक्तश्च साधकः । यज्ज्ञात्वा जननीगर्भं न विशेत्तु कदाचन" ।

आज्ञात त्रि० आ+ज्ञा–क्त सम्यग्ज्ञाते "आज्ञातं यदनाज्ञातं यज्ञस्य क्रियते मिथः" यजु० शिवसङ्कल्पः ।

आज्ञातीर्थ न० ६त० । तन्त्रे मानसस्नानाङ्गे ध्येयतयोक्ते आज्ञाचक्राख्ये तीर्थे । "आज्ञाचक्रे सदा ध्यात्वा स्नाति निर्व्वाणसिद्धये" । रुद्रयामलम् ।

आज्ञान न० आ+ज्ञा–ल्युट् । आज्ञाकरणे मानसवृत्तिभेदे । मानसवृत्तयश्च यथा । "संज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामोवशः इति सर्व्वाण्येवैतानि प्रज्ञानस्य नामधेयानि" ऐ० उ० । "तदन्तःकरणोपाधिकस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मणः उपलब्ध्यर्थाः अन्तःकरणवृत्तयो बाह्यान्तर्वर्त्तिविषयविषयास्ता इमा इत्युच्यन्ते । संज्ञानं संज्ञप्तिश्चेतनभावः । आज्ञानम् आज्ञप्तिरीश्वरभावः । विज्ञानं कलादिपरिज्ञानम् । प्रज्ञानं प्रज्ञप्तिः प्रज्ञता । मेधा ग्रन्थधारणे सामर्थ्यम् । दृष्टिरिन्द्रियद्वारा सर्वविषयोपलब्धिः । धृतिर्धारणमवसन्नानां शरीरेन्द्रियाणां वयोऽन्वयेन भवति । धृत्या शरीरमुद्वहन्तीति हि वदन्ति । मतिर्मननम् । मनीषा तत्त्व ज्ञातन्त्वम् । जूतिश्चेतसोरुजादिदुःखिभावः । स्मृतिः स्मरणम् । संकल्पः शुक्लकृष्णादिभावेन संकल्पनम् रूपादीनाम् । क्रतुरध्यवसायः । असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः । कामोऽसन्निहितविषयाकाङ्क्षा । वशः स्त्रीव्यतिकराद्यभिलाष इत्येवमाद्याः अन्तःकरणवृत्तयः" शङ्करभाष्यम् ।

आज्ञानुग त्रि० आज्ञामनुगच्छति अनु+गम–ड ६त० । आदेशानुसारेण गन्तरि दासादौ स्त्र आज्ञानुगतोऽयत्र त्रि० ।

आज्ञानुगामिन् त्रि० आज्ञामनुगच्छति अनु+गम–णिनि ६त० स० । आज्ञानुगते स्त्रियां ङीप् ।

आज्ञानुयायिन् त्रि० आज्ञामनुयाति अनु+या–णिनि ६त०स स्त्रियां ङीप् । आज्ञानुसारेण गन्तरि दासादौ ।

आज्ञानुवर्त्तिन् त्रि० आज्ञामनुवर्त्तते अनु+वृत–णिनि ६त० स्त्रियां ङीप् । आज्ञानुसारेण वर्त्तमाने दासादौ ।

आज्ञानुसारिन् त्रि० आज्ञामनुसरति अनु+सृ–णिनि ६त० स्त्रियां ङीप् । आज्ञानुसारेण कर्म्मकारके दासादौ

आज्ञापक त्रि० आज्ञापयति आदिशति आ+ज्ञा–णिच् ण्वुल् । आज्ञाकारके स्वामिप्रभृतौ । [पत्ने(ङकुमनामा)

आज्ञापत्र न० आज्ञाज्ञापकं पत्रम् शाक० त० । आदेशज्ञापके

आज्ञाभङ्ग पु० आज्ञाया आदेशस्य भङ्गः स्वविषयेषु प्रचाराभावः । आदेशस्याकरणेन आदिष्टविषयेषु प्रचाराभावे (ङकुम नामानी) । "दंष्ट्राभङ्गं मृगाणामधिपतय इव त्यक्तमानावलेपाद्याज्ञाभङ्गं सहन्ते नरप ! त्वपतयस्त्वादृशाः सार्व्वभौमाः" इति "चन्द्रगुप्तस्य चेतसः पीड़ासुत्पादयता चाणक्येन क्रियमाणे चाज्ञाभङ्गे त्वयोपश्लोकैरुपश्लोक-

वितव्य" इति च सुद्रारात्नसम् । [आज्ञानुकूले दासादौ
आज्ञावह पु० आज्ञां वहति वह-अच् । आदेशवाहके
आज्ञासम्पादिन् पु० आज्ञाम् आदिष्टविषयं सम्पादयति सम्+पद+णिच्-णिनि दैत०स० स्त्रियां ङीप् । आदिष्ट विषयसम्पादके अनुकूले दासादौ ।
आज्य न० आज्यते आ+अञ्ज-क्यप् नलोपः । १ घृते । "सर्पिर्विलीनमाज्यं स्याद्घनीभूतं घृतं भवेदित्युक्ते २ विलीने सर्पिषि "स्रुवेण दत्तभागादाज्यं गृहीत्वा" भवदेवः "घृतं पवित्रेणेवाज्यमापः शुम्भन्तु मैनसः" ध्रुवपदमन्त्रः ३ श्रीवासे चन्द्रने पु० अजयपालः । "आजिमोयुक्तस्मादाज्यानामाज्यत्वमिति निरुक्ते सामस्तोमभेदे । स च "स्तोमः सामवि० ब्रा० भा० उक्तः "वह्निप्रवमानस्तुक्तस्य आद्यम् अग्न आयाहिवीतये" इत्यादि सूक्तम्, आनो मित्रावरुण इति द्वितीयम् "आयाहि सुष्य आहत इति" तृतीयम् । "इन्द्राग्नी आगतमित्यादि चतुर्थम्" उत्तरा० १ प्र० २, ५, ६, ७, सूक्तानि तान्येतानि प्रातः सवने गायत्रसाम्ना गीयमानानि आज्यस्तोत्राख्यन्ते तेषु चाज्यस्तोत्रेषु पञ्चदश स्तोभो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते । "पञ्चभ्योहिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्योहिंकरोति स एकया स तिसृभिः स एकया पञ्चभ्योहिंकरोति स एकया स एकया स तिसृभिः" सामविधानब्राह्मणम् "एवं तिरावर्त्त्यं तत्र प्रथमाष्टत्तौ प्रथमायास्थिरावृत्तिः द्वितीयाष्टत्तौ मध्यायाः स्थिरभ्यासः । तृतीयाष्टत्तौ उत्तमायास्थिरभ्यासः । सोऽयं पञ्चदशस्तोम इति"
आज्यदोह न० सामवेदिपाठे सूक्तभेदे "वामदेव्यं बृहत्साम ज्येष्ठसाम रथन्तरम् । तथा पुरुषसूक्तञ्च रुद्रसूक्तं ततः परम् । आज्यदोहानि सामानि शान्तिकं भारुडानि च । पञ्चमे द्वारपालौ तु पठेतां सामगौ तथा" दानसारि० पु० तानि च सामानि देवव्रतसंज्ञकानि त्रीणि यथा । "अधि पतायि मित्र पतायि वरुण पतायि स्वाः प तायि धनप ता २, यि ना २, माः । मन्युना वरुणस्त्वा सूर्य्येण स्वराद्यजेन मघवा दक्षिणाश्व प्रिया तनूराज्ञा विशं दाधार । वृषभस्त्वष्टा वरुणेन पत्नीपतिरग्नेन पत्नः पृथिव्या सृष्टिकोऽग्निना विश्वं भूतम् । व्यभवो वायुना विश्वाः । प्रजा अभ्यपवथा वषट्कारेणाङ्गभाक् सोमेन सोमपाः समिद्धा परमेष्ठी । ये देवादेवाः । दिविषदः । स्वाभ्यो वो देवादेवेभ्यो नमः । ये देवादेवाः । अन्तरिक्षषदः । स्वलेभ्यो० । ये देवा० । पृथिवीषदः । स्वलेभ्यो० । ये देवा० । असुषदः । स्थलेभ्यो० । ये देवा० दिक्षुसदः । स्थलेभ्यो० । ये देवा० । आशासदः । स्थलेभ्यो० । अवज्यामिव धन्वने विते मन्युत्रयासि सूढतां नदह अस्मभ्यम् । इडा २, ३, भा । यदिदं विश्वं भूतं युयो २, । आउ । वा २, २, ना २, २, ४, माः ॥१॥ अधिप तायि मित्रप तायि वरुणप तायि । स्वाःप तायि धनप ता २, यि । ना २, माः । नम उत्ततिभ्यश्चोत्तानेभ्यश्च नमो नीपङ्गिभ्यश्चोपवीतिभ्यश्च नमोऽस्खद्भ्यश्च प्रतिदधानेभ्यश्च नमः प्रविध्यद्भ्यश्च प्रव्याधिभ्यश्च नमः स्वरद्भ्यश्च स्वारिभ्यश्च नमः श्रीलभ्यश्च श्रायिभ्यश्च नमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्च नमो यते च यियते च नमः पथे च विपथाय च अवज्यामिव धन्वने इत्यादि पूर्ववत् ॥२॥ अधिप । तायि । मित्रप । तायि वरुणप । तायि । स्वःप । तायि । धनप । ता २, यि । ना २, माः । नमोऽज्ञाय नमोऽवपतये एकाक्षाय शतधन्वादाय च नमो नमः । रुद्राय तीरसदे नमः स्थिराय स्थिरधन्वने नमः प्रतिपदाय च पटरिणे च नमस्त्रियम्बकाय च कपर्दिने च नम आश्वेयस्य प्रत्याश्वेयस्य नमः क्रव्येभ्यश्च पिरम्मेभ्यश्च नमः संवते च विवते च अवज्यामित्यादि पूर्ववत् ३ । (सामारण्यौ ५ प्र० १ अ० ६, ७, ८ गा०) गानाभ्यक्तौ अधिपतये इत्याद्यनुवाकं त्रिधा जपेत् अधिपतये मित्रपतये वरुणपतये स्वःपतये धनपतये नम इत्येव पठनीयमेवमग्रेऽपि अस्मभ्यमित्यनन्तरं य इदं विश्वं भूतं युयोवे नम इति नीपङ्गीत्यत्र निषङ्गीत्येव पठनीयमन्यत् गानांशं स्तोभं विहाय समानम् ।
आज्यप पु० आज्यं पिबन्ति आज्य+पा-क उप० स० । पुलस्त्यस्य पुत्रे वैश्यानां पितृदेवेषु । "सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणान्तु सु कालिनः" मनुः । "पुलस्त्यस्याज्यपाः पुत्राः" इति भा० आ० प० । "देवाँ आज्यपाँ आयहेति" "देवा आज्यपा अग्निंहोत्रायावहेति" च श्रुत० ब्रा० ।
आज्यभाग पु० आज्यस्य भागः । १ घृतैकदेशे "वरुणस्याज्यभागा भवति" श्रुत० ब्रा० । घृतस्य २ वैदिकाकृतिभेदे च स च ऋग्वेदिनामग्नेरुत्तरभागे स्रुवेणाग्नये दीयमान आकृतिविशेषः तद्दक्षिणभागे सोमाय दीयमान आकृतिभेदश्च । "तूष्णीमाघार्य्याघारावाज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेति" आश्व० श्रौ० । यजुर्वेदिनान्तु अग्नये स्वाहा इदमग्नये इति उत्तरपूर्व्वार्द्धे सोमाय स्वाहा इदं

सोमावेति दक्षिणपूर्व्वार्द्धे इति भेदः । "ता उहैता देवताऊचुः याहमा अग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नौभूधियभाजौस्थोययोर्वामिदं युवयोरन्नान्नाभजतमिति। तौहोचतुः किमावयोस्ततः स्यादिति यस्मै कस्मै च देवतायै हविर्निर्व्वपास्महां पुरस्तादाज्यस्य यजानिति तस्माद्यस्मै कस्मै च देवतायै हविर्निर्वपन्ति ततपुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति" शत०ब्रा० । इति तयोः सर्व्वदेवानां यज्ञस्यादौ आज्यभागदानं विहितम् । "आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन" कात्या० २,३,१, ।

आज्यभुज् पु० आज्यं मन्त्रेण प्रक्षिप्तं विलीनं सर्पिः भुङ्क्ते भुज–क्विप्। १हविर्भुजि वह्नौ तन्मुखेन हविर्भोजे २देवे च।

आञ्जन न०आ+अञ्ज–ल्युट्। समन्तादभ्यञ्जने। "तेज वा एतच्चक्षुर्योर्दाञ्जनम्" ऐ०ब्रा० अञ्जनायां भवः अण्। २हनुमति वानरभेदे स च दाशरथिसहायः "दाशरथिबलैरिवाञ्जननीलनलपरिगतप्रान्तैः" काद० । अञ्जनस्येदम् अण्, । ३अञ्जनसम्बन्धिनि त्रि०।

आञ्जनिक्य न० अञ्जनाय हितम् ठन् ततः पुरो० भावे कर्म्मणि च यक्। अञ्जनसाधनत्वे ।

आञ्जनेय पु० अञ्जनाया अपत्यं ढक्। अञ्जनागर्भजाते हनूमति वानरे । "अञ्जनागर्भसंभूतो वायुपुत्रो महाबलः" । हनुमत्स्तुतिः । [अञ्जलिकरणे ।

आञ्जलिक्य न० आञ्जलिरेव स्वार्थे कन् ततः पुरो० यक् ।

आञ्जिनेय पु० अञ्जिन्यां भवः ढक् (आजनाद्) कीटभेदे ।

आञ्जिहिषा स्त्री आंहितुमिच्छा आ+अन्ह–सन्–अ । आगमनेच्छायाम् "आंहिष्ट जातास्त्रिहिषः" भट्टिः ।

आटरूष पु० अटरूष एव स्वार्थे अण् । वासकवृक्षे स्वार्थे कन् तत्रैव "आटरूषकवर्षाभाहयाः यान्त्यनुयायिनाम्" भा०द्रो० प० ।

आटविक त्रि० अटव्यां चरति भवो वा ठक् । अरण्यचारिणि "प्रच्छन्नवञ्चकास्तेते वै स्तेनाटविकादयः" मनुः "दण्डेषु सुहृत्कुमाराटाविकाः सामन्तसैनिकाद्याश्च" सा०द० २"सैन्यभेदे। सैन्यानि च षडविधानि। यथा "मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम्" भल्लिनाथधृतकोषः । तदभिप्रायेणैव "षड्विधं बलमदार्येति" रघुः ।

आटवी स्त्री अटव्याः सन्निकृष्टा भूः अण् । दक्षिणदिक्स्थयवनपुरीभेदे । सहदेवदिग्विजयवर्णने । "दूतैरेव वशे चक्रे करञ्चैनानदापयत् "पाण्ड्यांश्च द्रविड़ांश्चैव सह्यिता-ओड्रकेरलैः । अन्ध्रांश्चालयवनांश्चैव कलिङ्गानुष्ट्रकर्णिकान् । आटवीञ्च पुरीं रम्यां यवनानां पुरं तथा" भा०स०प० ।

आटि पु०आ+अट्–इण् । १शरारिपक्षिणि । २मत्स्यभेदे च जातित्वेन स्त्रियां वा ङीप् । क्षत्त्रादिषु पाठात् षत्वाभावश्चे परेऽस्योदात्तत्वम् ।

आटिक त्रि० आटाय गमनाय प्रवृत्तः ठक् । गमनप्रवृत्ते स्वार्थे घञ् । आटिक्यमप्यत्र न० ।

आटिकी स्त्री आटम् अटनमर्हति अण्–ङीप् । गर्हाद्वर्गन्तुमर्हायामनुपजातपयोधरायां स्त्रियाम् । "सटचीकृतेषु कुरुषाटिक्या सह जायया उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राण उवास" छा०उ० । आटिक्याऽनुपजातपयोधरादि स्त्रीव्यञ्जनया जायया सह" इति भा० ।

आटीकन न० आटीक्यत ईषद्गम्यते आ+टीक–ल्युट् । वृत्सानां प्रथममल्पगतौ स्वार्थे कन् तत्रैव हारा० लान्तत्वेन पाठः प्रामादिकः ।

आटीमुख न० आट्याः शरारिभेदस्य मुखमिव मुखमस्य । सुश्रुतोक्ते शस्त्रभेदे "सूचीकुशपत्राटीमुखशरारीमुखेत्यादि विंशतिशस्त्रगणनायाम् सुश्रु० अर्द्धधारशब्दे विवृतिः ।

आटोप आ+टुप–घञ् पृषो० ठत्वम् । १दर्पे, २संरम्भे, ३आडम्बरे च । "साटोपमुर्व्वीमनिशं नदन्तः" माघः "मदजलदुर्दिनाम्बुकारगजघटितघनघटाटोपपरिपालितापि"काद०"साटोपं परिक्रम्य"वेणी०"कलापस्थविराटोपनिचितान् सुकृटानिव" भा०व०प० । ४वातजन्ये उदरशब्दभेदे "आमाटोपापचिस्फोथगुल्मक्रिमिविकारिणाम्" सुश्रु० ।

आडम्बर पु० आ+डबि–क्षेपे, अरन् । १हर्षे, २दर्पे, ३तूर्य्यस्वने, ४आरम्भे ५संरम्भे, ६अश्विलोम्नि, घनगर्ज्जिते, ७आयोजने च । मत्वर्थे इनि । आडम्बरिन् तद्युक्ते त्रि० । [भेदे । ततः गोत्रप्रत्ययस्य बह्वृषु लुक् ।

आडारक पु० अड–उद्यमे घञ् ततः आरक् ऋषिभेदे ।

आडि पु० अड–उद्यमे इण् । खनामख्याते मत्स्यभेदे । शरारीविहगे च पुंस्त्री० स्त्रीत्वे वा ङीप् स्वार्थे कन् आडिकाप्यत्र ।

आडु पु० अल ज लस्य डः नि० दृद्धिः । (भेला) उडुपे ।

आढक पु० आढ्यौकते आ+ढौक–घञ् पृ० । "अष्टषष्टिर्भवेत् कुञ्जिःकुञ्जयोऽष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि आढकः परिकीर्त्तित इति" मतभेदे चतुर्विंशत्यधिकसप्तषष्टिमाने "द्वादशप्रकृतिभिः कुड़वस्तच्चतुर्गुणोत्तर प्रस्थाढकद्रोणा, इत्युक्ते द्विनवत्युत्तरशतप्रकृतिमाने च

एतच्च धान्यादेर्माने । सुवर्णादिमाने तु सुश्रुतः । "द्वादश धान्यमाषाः मध्यमाष्टसुवर्णमाषकः ते षोडश सुवर्णम् । अथ मध्यमनिष्पावा एकोनविंशतिर्द्धरणं ताम्यर्द्धकृतीयानि कर्षं ततश्चोर्द्धं चतुर्गुणमभिवर्द्धयन्नः पलकुडवप्रस्थाढकद्रोणा इत्यभिनिष्पद्यन्ते इत्युक्ते २५६ पलमाने च । अर्द्धर्चादिपाठात् कोपधादन्तत्वेऽपि अस्य पु०न०स्त्रिङ्गता । अस्य परिमाणवाचकत्वात् आढकोद्रीहिरित्यादौ प्रथमायाः परिमाणमर्थः आढकपरिमाण परिच्छेद्योद्रीहिरित्यादि बोधः । आढकं सम्भवति अवहरति पचति वा ख टञ् वा । आढकीनः आढकिकः आढकमितधान्यस्थापने तदवहारके च पात्रे तत्पाचके स्त्रादौ त्रि० ठञि स्त्रियां ङीप् इति भेदः ।

आढकजम्बु पु० आढकमिता जाम्बूर्यत्र देशे । स्थूलजम्बुयुक्तदेशे तत्र भवः वृद्धात्प्राचाम् ठञ् ऋस्यापवादकः । आढकजम्बुकः । तत्र भवे त्रि० ।

आढकी स्त्री आढौकते अच् पृषो०गौ० ङीष् । (अरहर) इति ख्याते शमीधान्यभेदे । "आढकी तुवरी रूक्षा मधुरा शीतला लघुः व्याहिणी वातजननी वर्ष्या पित्तकफास्रजित्" भावप्र० फले अस्य पुंस्त्वमपि "आढकांश्च मसूरांश्च कोद्रवान् सवणं त्यजेत्" काशी०ख० वैश्यदेवे वर्ज्जने ।

आढ्य त्रि० आ+ध्यै–क पृषो० । १युक्ते, २विशिष्टे ३सम्पन्ने ४धनिनि च । युक्ते धनाढ्यः पुण्याढ्यः विनयाढ्यः । सम्पन्नः सम्पद्युक्तः "आढ्यास्तथाऽन्यसचिवः खनुरक्तास्च सर्व्वदा" भा०स०प० ५अ० । "आढ्योदयति डम्भोधर्म्ममतिक्रामति धर्ममतिक्रामन् पापं करोतीति नीलकण्ठधृता स्मृतिः "त्रेतुःपञ्चभिराढ्यानाम्" स्मृतिः "आढ्यादिव प्रापणिकादजस्रम्" माघः ।

आढ्यकुलीन पुंस्त्री आढ्यकुले भवः खः । आढ्यकुलभवे ।

आढ्यङ्करण न० अनाढ्यमाढ्यं करोत्यनेन आढ्य+कृ-करणे ल्युट् सुम् उप०स० । अभूताढ्यस्य आढ्यताकरणे ।

आढ्यचर त्रि० भूतपूर्व्व आढ्यः चरट् । भूतपूर्व्वाढ्ये स्त्रियां ङीप् ।

आढ्यतम त्रि० अतिशयेन आढ्यः तमप् । अतिशयाढ्ये ।

आढ्यपदि अव्य० आढ्यं पदं प्रहरणं यत्र द्विदण्ड्या० इच् टजन्तत्वादव्ययत्वम् । आढ्यपदप्रहरणयुक्ते युद्धे ।

आढ्यभवन न० अनाढ्य आढ्योभवत्यनेन आढ्य+भू-करणे ल्युट् सुम् उप०स० । अनाढ्यस्य आढ्यभवनसाधने ।

आढ्यभविष्णु त्रि० अनाढ्य आढ्यो भवति आढ्य+भू-विष्णुच् सुम् उप०स० । अभूतपूर्व्वाढ्ये आढ्यताम् प्राप्ते "आढ्यम्भविष्णुर्यशसा कुमारः" भट्टि ।

आढ्यम्भावुक त्रि० अनाढ्य आढ्योभवति आढ्य+भू-युकञ् सुम् उप०स० । अनाढ्ये आढ्यतया भते ।

आढ्यवात पु० आढ्योवातोयत्र । "ककभेदोऽतो वायुर्यदोरू प्रतिपद्यते । तदाङ्गमर्द्दगैथिल्यरोमहर्षकजाज्वरैः निद्रया चार्द्दितौ स्तब्धौ शीतस्तावप्रचेतनौ । गुरुकावस्थिरावूरू न स्वाविव च मन्यते । तमूरुस्तम्भमित्याहुराढ्यवातमथापरे" सुश्रुतोक्तलक्षणे ऊरुस्तम्भरोगे ।

आणक त्रि० अणक एव स्वार्थे अण् । १प्रथमे तत्रभिते सुहृदः । "आणकं सुरतं नाम दम्पत्योः पार्श्वसंश्रयोः" इत्युक्त लक्षणे २सुरतभेदे न० ।

आणव न० अणोर्भावः वृद्ध्यादि० वा अण् । अणुत्वे ।

आणवीन त्रि० अणुधान्यानां यवगोधूमादीनां भवं क्षेत्रम् वा खञ् । (सुनाडाङ्गा) क्षेत्रभेदे यत्र यवगोधूमादिधान्यान्युत्पद्यन्ते तस्मिन् । पक्षे यत् अणव्यमप्यत्र ।

आणि पुंस्त्री० अण–इण् स्त्रियां वा ङीप् । रथचक्रावयवे १कीलके, २कोटौ ३सीम्नि च । "मयोभुवा सरथा यातमर्वाङ्नि धिं धुरमाणि मे नाभिम्" ऋ० ८, ४३,८ । "आणिं न रथ्यममृताधितस्थुः" ऋ० १,३५,६, सुश्रुतोक्ते मर्म्मस्थानभेदे, अत ऊर्द्धं प्रत्येकशोमर्म्मस्थानं व्याख्यास्याम" इत्युपक्रम्य । "जानुन ऊर्द्धं सुभगतरुणक्रुमाणिनाम तत्रशोफाभिहतैः स्तब्धसक्थिता च" उक्तम् ।

आणीवेय पुंस्त्री० अणिरस्यस्य वा दीर्घः अणीवः ऋषिभेद स्तस्यापत्यम् गुआ० ढक् । अणीवर्षेरपत्ये ।

आण्ड त्रि० अण्डे भवः अण् । १अण्डसम्भवे पक्षिप्रभृतौ स्त्रियां ङीप् भेदे तु क्वचित् टाप् । "आण्डेवभित्त्वा शकुनस्य गर्भम्" ऋ० १,६८,७, २अण्डजाते हिरण्यगर्भे पु० "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामह" इति मनूक्ते सहस्रांशुजातत्वात् तथात्वम् । "विराड्वक्षेमावाण्डौ खराट् च" शत० ब्रा० । अण्डमेव स्वार्थे अण् । ३पुरुषवृषणे स्वार्थिकप्रत्ययस्य क्वचित् स्त्रिङ्गवचनातिक्रमस्त्रेष्टत्वात् पु० "यस्य कृष्णाण्डौ भवतः रेतः सिञ्चति" शत० ब्रा० । "आनन्दमन्दामाण्डौ मे" यजु० २०,६, "आण्डौ वृषणौ" वेददी० । "अण्डं वृषणोऽस्यास्ति अण् । ४वृषणयुक्ते "आण्डौ वै रेतःसिचौ" शत० ब्रा० ।

आण्डेन निर्वृत्तः अण् । अण्डनिर्म्मिते १कपालरूपे द्युलोके भूलोके च । "तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्

स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा । ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्ममे इति" मनुनाऽण्डशकलाभ्यां तयोरुत्पत्तिप्रतिपादनात्तयोस्तथात्वम् ।

आण्डज पु० अण्डात् जायते जन–ड स्वार्थे अण् । १अण्डजे पक्षिसर्पादौ । २तच्छरीरे न० "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्" इति छा०उ० । "तेषां जीवाविष्टानां खल्वेषां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशात्तु तेजःप्रभृतीनाम् । तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति । कानि तानीत्युच्यन्ते । अण्डजमण्डाज्जातम् अण्डजमेवाण्डजं पक्ष्यादि । पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते । तेन पक्षी पक्षिणां बीजम् सर्पः सर्पाणां बीजम् । तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः ॥ नन्वण्डाज्जातमण्डजमुच्यते ऽतोऽण्डमेव बीजमिति युक्तं कथमाण्डजं बीजमुच्यते । सत्यमेवं स्याद्यदि त्वदिच्छातन्त्रा श्रुतिः स्यात्स्वतन्त्रा श्रुतिर्यत आहाण्डजाद्येव बीजं नाण्डाद्येति । दृश्यते चाण्डजाद्यभावे तज्जातीयसन्तत्यभावो नाण्डाद्यभावे । अतोऽण्डजाद्येव बीजान्यण्डजादीनाम्" भा० ।

आण्डायन त्रि० अण्डेन निर्वृत्तः पक्षा० फक् । अण्डनिर्वृत्ते त्रि० । [ण्डीर इत्येव साधुरित्यन्ये ।

आण्डीर पु० आण्डमस्यास्य ईरच् । दूषणयुक्ते इत्यपरे अ-

आण्डीवत पु० राजभेदे । तेन निर्वृत्तम् कखा० फिञ् । आण्डीवतायनिः तन्निर्वृत्ते त्रि० ।

आत् अव्य० अत–विण् । १अनन्तरमित्यर्थे । "आदस्य वातो अनुवाति शोचिः" ऋ० १,१४८,४ २अपिचेत्यर्थे "विश्वकर्मा विमना आद्विहायाधाता विधाता परमोत सन्दृक्" यजु० १७,२६, "आत् अपि च" वेददी० आ+स्वरूपे तकार । ३आकारलुप्ते वर्णे पु० "आतश्चोपसर्गे कः" पाणिनिसूत्रम् ।

आत त्रि० आ+अत् अच् । सततगते प्रहृते । "पक्षोभिः श्रयमाणा उदातैः" यजु० २९,५, "आतैः प्रहृतैः" वेददी०

आतक त्रि० अत+ण्वुल् । १सततगन्तरि २सर्पभेदे पु० "बाह्वश्वाजहृदश्च धूर्तकः प्रातरातकौ । कौरव्यकुलजास्तेते प्रयाता हव्यवाहनम्" भा०आ०५७ अ० ।

आतङ्क पु० आ+तकि–घञ् । १रोगे, "दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा । दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः" या० २सन्तापे, "प्रश्नेन च विजानीयात् देशं कालं जातिसात्म्यमातङ्कं सत्वमुत्पत्तिं वेदनासमुच्छ्रायम्" इत्यादि सुश्रुतः । ३सन्देहे, ४सुरजशब्दे, ५भये च । "पुरुषायुषजीविन्यो निरातङ्कानिरीतयः" रघुः ।

आतञ्चन न० आ+तनच–ल्युट् । १वेगे, २प्रापणे, ३आख्यायने दुग्धादौ दध्यादिभावापादनाय ४अम्लद्रव्यप्रक्षेपे, (दम्बल देओया) ५निक्षेपे, ६उपद्रवे, ७द्रवद्रव्यप्रक्षेपेण कठिनद्रव्यस्य चूर्णने गलितस्वर्णादेर्द्रव्यान्तरयोगेन ८जारणे च । करणे ल्युट् । ९दधिसाधनद्रव्ये (दम्बल) । गोभ्योऽदितिविधाः दुग्धाद्य उत्पद्यन्ते यथोक्तं श्रुतौ "प्रतिधुक् तस्यै हृतं तस्यै धरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै हृतं तस्या आमिक्षा तस्यै वाजिनम्" शत० ब्रा० । तत्र प्रतिधुक् सद्योदुग्धम् १हृतं पक्वं पयः२। धरः पक्वक्षीरस्योपरि सारभूतम्३ । घनीभूतं वस्तु दधि४ । दधिभवं सारभूतसुदकं मस्तु ५, । नवनीतहृते ६,७, प्रसिद्धे आतञ्चनं दधिभावकारणम् ८। आमिक्षा तप्ते पर्यसि दध्यानयने सति यत् घनीभूतं वस्तु जायते सामिक्षा९। द्रवात्मकं वाजिनम्१०"भा० "यत्पूर्व्वेद्युर्दुग्धं हविरातञ्चनं ततुक्तुर्वीत कात्या० । [स संसदा" रघुः ।

आतत त्रि० आ+तन–क्त । विस्तृते "आततज्यमकरोत्

आततायिन् त्रि० आततेन विस्तीर्णेन शस्त्रादिना अवितुं शीलमस्य अय–णिनि । वधोद्यते । विषयभेदेन आततायिवधे दोषादोषौ"प्रा०वि०उक्तौ यथा वृद्ध०"नाततायिवधे हन्ता किल्बिषं प्राप्नुयात् क्वचित् । विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्" । किल्बिषाभावःप्रायश्चित्तनिषेधार्थः अपराधाभावो दण्डनिषेधार्थः । यतः "सर्वत आत्मानं गोपायीतेति" श्रुतिमूलमिदम् अतः पलायनादिनापि रक्षणाभावे वृद्धं बोद्धव्यम् । कात्यायनः । "आततायिनमायान्तं मपि वेदान्तगं रणे। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्"जिघांसी सन् व्रजाङ्च्छेदित्यर्थः । देवलः । "उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् । निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्" । भ्रूणोब्राह्मणविषेषः । दोषदर्शनं नियमार्थम् । मनुविष्णू । "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्याद्देवाविचारयन्"एवकारोनियमार्थः । तथा "नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" । यस्माद्धन्तुमन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषोहन्ति हन्यते वेति हननविधेरपवादः । आततायिन-

माह वशिष्ठः । "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः" । विष्णुकात्यायनौ । उद्यतासिविषाग्निश्च शापोद्यतकरस्तथा । आथर्वणेन हन्ता च पिशुनश्चैव राजसु । भार्यातिक्रमिणश्चैव विद्यात्सप्तातताियिनः । यशोवित्तहरानन्यानाङ्क्ष्यार्थहारकान्" । विशेषमाह कात्यायनः । "अनाचारितपूर्व्वोयस्वपराधे प्रवर्त्तते । प्राणद्रव्यापहारे च प्रदत्तस्याततायिता"। अनाचारितोऽनपकृतः । तेन पूर्व्वकृतापकारस्य मारणोद्यतस्य नाततायिता । तेन प्रत्युपकारकवधे दोषएव । ननु आततायिनोरपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः । "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्" । तथा भविष्ये । "घातकानपि गोविप्रान्न हन्याद्वै कदाचनेति" । अतः पूर्व्ववचनविरोधः । सत्यम् । अत्र व्यवस्थामाह कात्यायनः । "आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः । बधस्तत्र तु नैव स्यात् प्राप्ते क्षीने बधोमतः" । जन्मपदेन जातिः कुलञ्चोच्यते । तेन हन्तृपेक्षया तपोविद्याजातिकुलैरुत्कृष्टोनाततायी बध्यस्तदन्योबध्यएव । अतएव भगवद्गीतायामाह । "पापमेवाश्रयेदस्मान् हत्वैतानाततायिन" इति । एतान् भीष्मादीन् अत्यन्तोत्कृष्टगुणानित्यर्थः । एवंभूतातताियिनश्चाहनने फलमप्याह वृद्धशातातपः । "आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम् । योन हन्याद्वधप्राप्तोऽश्वमेधफलं लभेत्" । यद्यपि "गुरुमप्यवलिप्तं हन्यादिति" । श्रूयते । तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्याप्युत्कर्षसम्भवः । एवं बहुश्रुतादावपि । एवमधमवर्णोत्तमवर्णो न बध्यः । पूर्व्वकृतापकारविषयं वा सुमन्तुवचनम् । गौराततायिनमपि न बध्यः । "नखिनां दंष्ट्रिणाञ्चैव दंष्ट्रिणश्चाततायिनाम् । हरण्यश्वानान्तथान्येषां बधे हन्ता न दोषभागिति" कात्यायनवचनं गोव्यतिरिक्तदंष्ट्रिविषयम् । विशेषमाह कात्यायनः । उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते । निहत्तस्तु यदारभ्य हन्यं न वधःस्मृतः" इत्यन्तेन । तत्तत्स्वरूपशब्दार्थमाह देवलः "अनूचानो गुणोपेतो यत्तस्वाध्यायवान्मितः । भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः" । मिताक्षरायामपि "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" । तथा "आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तञ्जिघांसीयान्न तेन ब्रह्महा भवेत्" इत्यात्मार्थशास्त्रम् । "दृश्यं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत" इत्यादि धर्म्मशास्त्रमनयोर्विरोधे धर्म्मशास्त्रं बलवदिति युक्तम् । अनयोरेकविषयत्वासम्भवेन विरोधाभावाच्च बलाबलचिन्ता अवतरति । तथा हि "शस्त्रं द्विजातिभिर्ग्राह्यं धर्म्मो यत्रोपरुध्यते" इत्युपक्रम्य "आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे । स्त्रीविप्राभ्युपपत्तौ च धर्म्मेण न च दुष्यति" त्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायाञ्च आततायिनमकूटशस्त्रेण घ्नन् न दण्डभागित्युक्त्वा तस्यार्थवादार्थविदमुच्यते । "गुरुं वा बालवृद्धौ वेत्यादि" । गुर्वादीनत्यन्तावध्यानप्याततायिनोहन्यात् किमतान्यानिति । यच्छब्दश्रवणादपि वेदान्तगमित्यत्राप्यपियच्छब्दस्य श्रवणाच्च गुर्वादीनां वध्यत्वप्रतीतिः "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादिति" सुमन्तुवचनात् । "आचार्यं च प्रकारम् पितरम्भ्रातरं गुरुम् । न हिंस्याद्ब्राह्मणान् गाश्च सर्व्वांश्च तपस्विन" इति मनुवचनाच्च । आचार्य्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवत्स्यान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् । "नाततायिवधे दोषोऽन्तुर्भवति कश्चन" इत्यतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव । यतः "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः" तथा "उद्यतासिविषाग्निश्च शापोद्यतकरस्तथा । आथर्वणेन हन्ता च पिशुनश्चापि राजनि । भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान् विजानीयात्सुबीनेवाततायिन" इति सामान्येनाततायिनोदर्शिताः । अतश्च ब्राह्मणादय आततायिन आत्मादित्राणार्थं हिंसामभिसन्धिना निवार्यमाणाः प्रमादाद्यदि विपद्येरंस्तत्र लघु प्रायश्चित्तं राजदण्डाभावश्चेति" । ब्राह्मणाद्याततायिवधे दोष उक्तः । अतएव भीष्मादीनामाततायिनामपि हननेन "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" इति भारते युधिष्ठिरादीनां महापातकित्वसङ्गम् ।

आतनि त्रि० आ–तन–इनि । आतानके विस्तारके । "त्वं विभिन्धुरसि यज्ञमातनिः" ऋ० २, १, १० ।

आतप् त्रि० आतपति आ+तप–क्विप् । तापके "परिवाम-रुषावयोर्हण्यावन्त आतपः" ऋ०५, ७३, ५ । "आतपः आतापिनः" भा० ।

आतप पु० आ–तप–घ । १उद्द्योते, २निर्विकारत्वे दौष्ट्ये च । "आतपः बहुलोकुथः खेदमूर्च्छातिथा-

प्रदः । दाहवैवर्ण्यजननोनेत्ररोगप्रकोपनः" सुश्रुतः । "भवति वपुरवाप्नुच्छायमेवातपेऽपि" माघः । "आतपात्ययसंच्छिन्नजीवाराषु निषादिभिः" रघुः । "तमातपक्लान्तमनातपत्रम्" रघुः । "ग्रहङ्गाणि यस्यातपवन्ति सिद्धाः" कुमा० । "भीतातपाभिघातांश्च विविधानि भयानि च" मनुः । आतपस्य विरलसंयोगापन्नः सूर्य्यस्य किरणभेदः स एव रौद्रशब्दाभिधेयः प्रकाशस्तु तनोऽपि विरलसंयोगापन्न इति प्रकाशरौद्रयोर्भेदः । अस्य च निबिड़तेजस्कत्वादुष्णस्पर्शवत्त्वम् तेन दुःखदायकत्वं मनुनोक्तम् । एवं "आतापतापितभूमौ माधव ! माधव ! मा धावेति" यशोदावाक्येऽपि । २ प्रकाशे "छायातपौ ब्रह्मविदो वदन्ति" श्रुतिः ।

आतपत्र न० आतपात् त्रायते त्रै-क । छत्रे । स्वार्थे कन् । आतपत्रकमप्यत्र । "तमातपक्लान्तमनातपत्रम्" । "एकातपत्रं जगतः प्रभुत्वम्" । "यज्ञा यज्ञातपत्रेण भेजे साम्राज्यदीक्षितम्" इति च रघुः । "राज्ञं स्वहस्तधृतदण्डमिवातपत्रम्" भक्कु० । "तस्यातपत्रं बिभराम्बभूवे" माघः । "निजातपत्रस्य तलस्थले नलः" नैष० आतपत्रोत्पत्तिर्यथा भार० आनु० प० ६२,६३ अ० । "यदिदं श्राद्धकल्पेषु दीयते भरतर्षभ ! । छत्रोपानहौ चैव केनैतत् संप्रवर्त्तितम् । कथञ्चैतत् सप्तत्पत्रं किमर्थञ्चैव दीयते । न केवलं श्राद्धकल्पे पुण्यकेष्वपि दीयते । बहुष्वपि निमित्तेषु पुण्यमाश्रित्य दीयते । एतद्विस्तरतो ब्रह्मन् ! श्रोतुमिच्छामि तत्त्वतः । भीष्म उवाच । शृणु राजन्यवहितश्छत्रोपानहविस्तरम् । यथैतत् प्रथितं लोके यथा चैतत् प्रवर्त्तितम् । यथा चाक्षय्यतां प्राप्तं पुण्यताञ्च यथा गतम् । सर्वमेतदशेषेण प्रवक्ष्यामि नराधिप ! । जमदग्नेश्च संवादं सूर्य्यस्य च महात्मनः । पुरा स भगवानुषाऽक्रीडत प्रभो ! । सन्धाय सन्धाय शरांश्चिक्षेप किल भार्गवः । तान् सर्व्वान् रेणुका छिन्नांस्तस्मै भानू दीप्ततेजसः । आनीय सा तदा तस्मै प्रादादप्रस्खलद्व्युत ! । अथ तेन स शब्देन ज्यायाश्चैव शरस्य च । प्रहृष्टः सम्प्रचिक्षेप सा च प्रत्याजहार तान् । ततो मध्याह्नमारूढे ज्येष्ठामूले दिवाकरे । स सायकान् द्विजो दृष्ट्वा रेणुकामिदमब्रवीत् । गच्छानय विशालाक्षि ! शरानेतान् धनुष्मतान् । यावदेतान् पुनः क्षिप्र ! क्षिपामीति जनाधिप ! । सा गच्छन्त्यन्तरा छायां वृक्षस्याश्रित्य भाविनी । तस्थौ तस्य हि सन्तप्तं शिरः पादौ तथैव च । स्थित्वा सा तु मुहूर्त्तं वै भर्त्तुः शापभयाच्छुभा । यथावानयितुं भूयः सायकानसितेक्षणा । प्रत्याजगाम च शरांस्तानादाय यशस्विनी । सा वै खिन्ना सुचार्व्वङ्गी पङ्क्त्यां दुःखं नियच्छती । उपाजगाम भर्त्तारं भयाद्भर्त्तुः प्रवेपती । स तामृषिस्तदा क्रुद्धो वाक्यमाह शुभाननाम् । रेणुके ! किं चिरेण त्वमागतेति पुनः पुनः । रेणुकोवाच । शिरस्तावत् प्रदीप्तं मे पादौ चैव तपोधन !। सूर्य्यतेजोनिरुद्धाऽहं वृक्षच्छायां समाश्रिता । एतस्मात् कारणाद्ब्रह्मंश्चिरायैतत् कृतं मया । एतच्छ्रुत्वा मम विभो ! मा क्रुधस्त्वं तपोधन ! । जमदग्निरुवाच । अद्यैनं दीप्तकिरणं रेणुके ! तव दुःखदम् । शरैर्निपातयिष्यामि सूर्य्यमस्त्राग्नितेजसा । भीष्म उवाच । स विस्फार्य्य धनुर्दिव्यं गृहीत्वा च शरान् बहून् । अतिष्ठत् सूर्य्यमभितो यतो याति ततोमुखः" । इत्येवं क्रोधेन आत्मानं (सूर्य्यं) पातयितुमिच्छवे जमदग्नये विप्ररूपं धृत्वागत्य तं च परितोष्य तस्मै छत्रमुपानहौ च सूर्य्योदद्यावित्युक्तं ततोऽध्यायान्तरे यथा ।

"एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूत्तमः । अथ सूर्य्योऽददत्तस्मै छत्रोपानहमाशु वै । सूर्य्य उवाच । महर्षे ! शिरस्त्राणं कृतं मद्रश्मिवारणम् । प्रतिगृह्णीष्व पद्भ्याञ्च त्राणार्थं चर्म्मपादुके । अद्यप्रभृति चैवेह लोके सम्प्रचरिष्यति । पुण्यकेषु च सर्व्वेषु परमक्षय्यमेव च । भीष्म उवाच । छत्रोपानहमेतत्तु सूर्य्येणैतत् प्रवर्त्तितम् । पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत !। तस्मात् प्रयच्छ विप्रेषु छत्रोपानहमुत्तमम् । धर्म्मज्ञेषु महान् भावी न मेऽत्रास्ति विचारणा । छत्रं हि भरतश्रेष्ठ ! यः प्रदद्याद्द्विजातये । शुभम् शतशलाकं वै स प्रेत्य सुखमेधते" । एतल्लक्षणं छत्रशब्दे वक्ष्यते ।

आतपवत् त्रि० आतपोऽस्त्यत्र मतुप् मस्य वः । आतपयुक्ते "ग्रहङ्गाणि यस्यातपवन्ति सिद्धाः" कुमा० ।

आतपवर्ष्य त्रि० आतपे निमित्तेसति वर्षन्ति वा० कर्त्तरि यत् । दृष्टिजले "अन्तरिक्षात् प्रतिगृह्यातपवर्ष्याः" कात्या० १५,४,५, अन्तरिक्षात् गृहीतव्या आतपे वर्षन्ति ताः । अन्तरिक्षात् प्रतिगृह्य भूमिपतनात् प्रागेवाकाशात् पतन्तीरादाय गृहीतव्या" कर्क० । अतएव दृष्टिजलस्यातपनिमित्तत्वात् नैमित्तिकत्वमिप्रायेण तासां यज्ञकाले ग्रहणसम्भवेन पूर्व्वं संग्रहोक्ता "यूपसन्नरेण नैमित्तिकयसम्भवात्" कात्या० १५,४२

"या आपोनिमित्तेन प्राप्यन्ते ता नैमित्तिक्यः यथा गोरुख्याः आतपवर्ष्यास्वासामस्मिन् काले वर्षणासम्भवात् अतः पूर्वं गृहीत्वा यूपसुत्तरेण पुनर्ग्रहणमिति" कर्कः । अतएव श्रुत्या दृष्टेरातपनिमित्तत्वमुक्तम् "तस्माद्यत्र क्वचित् शोचति खेदते वा पुरुषस्तेजस एव तदध्यापोजायन्ते" इति का०श्रौ० पुरुषदेहस्य सन्ताप खेदयोरातपनिमित्तत्वात् दृष्टेरातपहेतुकत्वम् । व्यक्तमाह यादवः "तासां शतानि चत्वारि रश्मीनां दृष्टिसर्ज्जने चतुःशतं दृष्टिवाहाः सर्व्वांस्ता अवृताः स्त्रियः" इति सूर्य्यरश्मीनां मध्ये चतुःशतस्य दृष्टिसर्ज्जकत्वेन दृष्टेरातपनिमित्तकत्वमत्र व्यक्तमेव ।

आतपवारण न० आतपं वारयति वृ–णिच् ल्यु । छत्रे । "वृषपतिकृतं दत्त्वा यत्ने सितातपवारणम्" "अनुदितान्यसितातपवारणम्" इति च रघुः ।

आतपात्यय पु० ६त० । रौद्रापगमे सूर्य्यकिरणविगमे । "आतपात्ययसंक्षिप्तनीवारास्तु निषादिभिः" रघुः ।

आतपाभाव ६त० पु० आतपस्याभावरूपायाम् छायायाम् ।

आतपीय त्रि० आतपस्य सन्निकृष्टदेशादि उत्करा० छ । आतपसन्निकृष्टदेशादौ ।

आतपोदक न० आतपे लक्ष्यमाणमुदकम् या०त० । सूर्य्यमरीचौ–लक्ष्यमाणे उदके मृगतृष्णिकायाम् ।

आतमाम् अव्य० आ+तमप् आम् । अतिशयाभिमुख्ये अत्यन्तसमन्ताङ्गावे च "मरुतोदेवं कथमातमाऽख्यायत आत्मा हि मरुद्गुकथम्" शत०ब्रा० ।

आतर पु० आतरत्वेन आ+तॄ–अप् । मद्यादेस्तरणार्थं देवे शुल्के "आतरत्वावक्षेतोर्मेरुहर ! तरणिं तवावलम्बे" इत्युद्भटः द्रव्यभेदे आतरमानमुक्तं मनुना "षण्णं यानन्तरे दाप्यमुत्क्रोशेऽर्द्धपणान्तरे । पादमग्रुश्च योषिच्च पादार्हं रिक्तकः पुमान् । भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः । रिक्तभाण्डानि यत् किञ्चित् पुमांसञ्चापरिच्छदाः"

आतर्पण न० आ+तृप–ल्युट् । १तृप्तौ । णिच्–ल्युट् । २प्रीणने ३मङ्गलालेपने । कर्त्तरि ल्युट् । ४तृप्तिकारके त्रि० ।

आतव पु० आ+तु–अप् । १हिंसने कर्त्तरि अच् । २हिंसके त्रि० ३राजभेदे पु० तस्यापत्यम् अश्वा०फक् । आतवायनः तद्पत्ये पुंस्त्री० ।

आता स्त्री आभिमुख्येन अत्यते गम्यते प्राप्तिभिः आ+अत–कर्त्तरि घञ् । दिग्वि निरु० । "प्रत्ने पितादिव अङ्गत्यातौ" ऋ०१,४३,६ ।

आतान पु० आतन्यते आ+तन–घञ् । १आभिमुख्येन विस्तारे २दीर्घविस्तारे पटादिवयनार्थं दीर्घविस्तारे (टाना देओया) "यथा लूता आतानवितानाभ्यां जालं विस्तारयतीति" वेदान्तप्र० कर्म्मणि घञ् । ३विस्तार्य्ये ४क्रियमाणे च "एष एव नित्य एकाहातानः" शत०ब्रा० ।

आतानक त्रि० आ+तन–ख्वुल् । विस्तारके ।

आतापि पु० आ+तप इण् । असुरभेदे स चागस्त्येन भक्षितः "आतापिर्भक्षितोयेन वातापिश्च महासुरः । समुद्रःशोषितोयेन स मेऽगस्त्यः प्रसीदतु" मन्त्रलिङ्गादवगम्यते ।

आतापिन् पु० आतपति आ+तप–णिनि । (चिल) पक्षिभेदे स्त्रीरत्नामी ।

आतायिन् पु० आ+ताय–णिनि । (चिल) इतिख्याते पक्षिभेदे ।

आतार पु० आतीर्य्यतेऽनेन आ+तॄ–भा० घञ् । नावातरणार्थे देये शुल्के ।

आतालो अव्य० आ+तल भा० ईण् । विधुरस्याकूलोकरणे अर्था० "आतालोलत्य विधुरमाकूलोकृत्येत्यर्थः" गयदासम् ।

आति पु० अत–इण् । शरारिपक्षिणि । "सुपर्णः पार्ज्जन्य आतिर्वाहसोः" यजु० २४,३४ । "तं आतयोन तन्यतुमन्तः स्वा" ऋ० १६,६५ । २सततगन्तरि त्रि० ।

आतिथिग्व पु० अतिथिमभिगच्छति गम ड्व अतिथिग्वो-दिवोदासोराजा तस्यापत्यम् अण् । दिवोदासराजपुत्रे । "पराऽहमतिथिग्वाय शंसं करिष्यन्" ऋ०६,२६,३ "अतिथिगवाय अतिथीनामभिगन्त्रे दिवोदासाय" भाष्योक्तेः दिवोदास एव ऋग्वेदेऽतिथिग्वत्वेन प्रसिद्धः "तुरणा आतिथिग्वे खमीयुँ राज्ञे" "षड्यामा आतिथिग्व इन्द्रोते वधूमतः" ऋ० ८,६८,१६,१७ । "आतिथिग्व एतन्नामकराजस्य पुत्रः तत्रैव" भा० ।

आतिथेय न० आतिथये इदं ढक् । १अतिथिनिमित्तके भोजनादौ । "आतिथेयमनिवारितातिथिः" माघः "दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु" मनुः । तत्र साधु ढञ् । २अतिथिसपर्य्यायां कुशले त्रि० । "प्रयतावातिथेयेषु यस्तृणिकुलेषु सः" रघुः । "यद्योत्तायं ऋगानु विध्यत्यातिथेयो विचक्रमे" भट्टिः "प्रत्युज्जगामातिथिमातिथेयः" रघुः । स्त्रियां ङीप् । "तमातिथेयी बहुमानपूर्व्वया" कुमा० ।

आतिथ्य न० अतिथेरिदं अण् । १अतिथिपरिचर्य्यायाम् । "तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्" रघुः "कुलपतेस्तस्य यथोचितमातिथ्यं विधाय" हितो० । स्त्रीत्वमपि "आतिथ्यायाः प्राक्प्रायणीयम्" शत०ब्रा० भाष्यम्

अतिथिपरिचर्य्याप्रकारश्च परिशिष्टखण्डे वक्ष्यते । स्वार्थे ष्यञ् । २अतिथौ हेम० ।

आतिदेशिक त्रि० अतिदेशादागतः ठक् । अतिदेशप्राप्ते । यथा प्रकृतिधर्मश्च विकृतौ आतिदेशिकत्वम् । "आतिदेशिकमनित्यम्" इति वृ्द्धा० परिभाषा ।

आतियात्रिक त्रि० अतियात्रायां नियुक्तः ठक् । आतिवाहिकदेवे विवरणमातिवाहिकशब्दे ।

आतिरेक्य न० अरिच्यते कर्मणि घञ् तस्य भावः ष्यञ् । अतिरेके दृष्टौ स्वपरिणातिरेके ।

आतिवाहिक त्रि० अतिवाहे इहलोकात् परलोकप्रापणे नियुक्तः ठक् । एतल्लोकात् परलोकप्रापणे ईश्वरनियुक्ते अर्चिराद्यभिमानिदेवगणे धूमाद्यभिमानिदेवगणे च । "आतिवाहिकास्तल्लिङ्गात्" वा० सू० । अतिवाहने नियुक्तास्च द्विविधाः दक्षिणमार्गे उत्तरमार्गे च तत्र कर्मिणां दक्षिणमार्गेण ज्ञानिनाञ्चोत्तरमार्गेण गमनात् तत्र नयनाय ईश्वरनियुक्ता धूमादयः अर्च्चिरादयश्च ते च छा० उ० दर्शिता यथा ।

"अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूमसभि सम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्न तं देवा भक्षयन्ति" । "इष्टापूर्त्ते इष्टमग्निहोत्रादि वैदिकं कर्म्म, पूर्त्तं वापीकूपतडागारामादिकरणम् । दत्तं च बह्विर्वेदि, यथाशक्त्यर्हेभ्यो द्रव्यसम्भागो दत्तम् । इत्येवंविधं परिचरणमरत्वाद्यादुपासते । इतिशब्दश्च प्रकारदर्शनार्थत्वात् । ते दर्शनवर्ज्जितत्वाद्धूमं धूमाभिमानिनीं देवतामाभिमुख्येन सम्भवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीमपरपक्षात् यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान् मासान् दक्षिणायनान् षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः । सञ्चारिण्यो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगश्चासु । नैते कर्म्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गोहेश्वरस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येतयतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यस्तैः प्राप्यः चन्द्रमाः य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्न देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्म्मिणो देवैर्भक्ष्यन्ते नन्वनर्थावेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् नैष दोषः । अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते केवलोत्त्वेषेण देवैर्भक्ष्यन्ते । किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवत् । दृष्टस्वान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीड़न्ते । शरीरञ्च तेषां तेषूपभोगयोग्यं चन्द्रमण्डले आप्यमारभ्यते । तदुक्तं "पुरस्ताच्छ्रद्धा शब्दा आपो द्युलोकाग्नौ हुताः सोमो राजा सम्भवन्तीति" । ता आपः कर्म्मसमवायिन्य इतरैश्च भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टादुपासकानां भवन्ति । इति" भा० पितृयानःपन्था दर्शितः देवयानस्तु ।

"अथ यदु चैवास्मिञ्छव्यं कुर्व्वन्ति यदि च नार्च्चिषमेवाभिसम्भवन्त्यर्च्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्केति मासांस्तान्मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्त्तन्ते" "अथेदानीं यथोक्तब्रह्मविदो गतिरुच्यते यद्यदि उ च एवाक्षार्त्तेवंविदि शव्यं शवकर्म्म कृते कुर्व्वन्ति यदि च न कुर्व्वन्ति ऋत्विजः, सर्व्वथाप्येवंवित्तेन शवकर्म्मणा अकृतेनापि न प्रतिबद्धो ब्रह्म प्राप्नोति न च कृतेन शवकर्म्मणाऽस्य कश्चनाभ्यधिको लोकः "न कर्म्मणा वर्द्धते नो कनीयानिति" श्रुत्यन्तरात् । शवकर्म्मग्रहणादरं दर्शयन् विद्यां स्तौति, न पुनः शवकर्म्म एवंविदो न कर्त्तव्यमिति । अक्रियमाणे हि शवकर्म्मणि कर्म्मणां फलारम्भे प्रतिबन्धः कश्चिदनुभूयते अन्यत्र । यत इह विद्याफलारम्भकाले शवकर्म्म स्याद्वा न वेति विद्यावतोऽप्रतिबन्धेन फलारम्भं दर्शयति । ये सुखाकाशमन्त्यिस्थं संयद्वामनीत्वेनोपासते प्राणसंहितामग्निविद्यां, तेषामन्यत्कर्म्म भवतु मा वा भूत्

सर्व्वथापि तेऽर्चिषमेवाभिसम्भवन्त्यर्चिरभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्त इत्यर्थः। अर्चिषोऽर्चिर्देवतायाः अहरहरभिमानिनीं देवतामञ्च आपूर्य्यमाणपक्षं शुक्लपक्षदेवतामापूर्य्यमाणपक्षात् षण्मासासदुदङ्ङुत्तरां दिशमेति सविता तान्मासानुत्तरायणदेवतां, तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवतां ततः संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्तत्स्थांस्तान् पुरुषः कश्चिद्ब्रह्मलोकादेत्यअमानवो मानव्यां सृष्टौ भवो मानवो न मानवोऽमानवः स पुरुष एतान् ब्रह्म सत्यलोकस्थं गमयति गन्तृगन्तव्यगमयितृव्यपदेशेभ्यः। सन्मात्रब्रह्मप्राप्तौ तदनुपपत्तेः। "ब्रह्मैवसन् ब्रह्माप्येतीति हि वक्तुं न्याय्यम्। सर्व्वभेदनिरासेन सन्मात्रप्रतिपत्तिं वक्ष्यति। न चादिष्टो मार्गो गमनायोपदिश्यते। "स एनमविदितो न भुनक्तीति" स्मृत्यन्तरात्। एष देवपथो देवैरर्चिरादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितः पन्था देवपथ उच्यते। ब्रह्म गन्तव्यं तेन चोपलक्षित इति ब्रह्मपथः। एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्म इमं मानवं मनुसम्बन्धिनं मनोः सृष्टिलक्षणमावर्त्तं नावर्त्तन्ते। आवर्त्तन्तेऽस्मिन् जनमरणप्रबन्धचक्रारूढा घटीयन्त्रवत् पुनः पुनरित्यार्त्तं न प्रतिपद्यन्ते। नावर्त्तन्त इति द्विरुक्तिः सफलाया विद्यायाः परिसमाप्तिदर्शनार्था" भा०।

यथा चैषामातिवाहिकत्वं तथा निरूपितम् भा० सू०भा०। "आतिवाहिकास्तल्लिङ्गात्" सू०। "तेष्वेवार्चिरादिषु संशयः किमेतानि मार्गचिह्नान्युत भोगभूमयोऽथ वा नेतारोगन्तॄणामिति। तत्र मार्गलक्षणभूता अर्चिरादय इति तावत् प्राप्तं तत्स्वरूपत्वादुपदेशस्य। यथा हि कश्चिल्लोको ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेममध्वानं गिरिं ततोन्यमुर्वं ततोनदीं ततोग्रामं ततोनगरं वा प्राप्नुरीति। एवमिहाप्यर्चिरर्चिषोऽहरह्न आपूर्य्यमाणपक्षमित्याह। अथ वा भोगभूमयएता इति प्राप्तम्। तथा हि लोकवद्ध्नाग्न्यादीनुपदर्शयति अग्निर्लोकमागच्छतीत्यादि। लोकवद्च्च प्राणिनां भोगायतनेषु भाष्यते मनुष्यलोकः पितृलोको देवलोक इति च। तथा च ब्राह्मणम् 'अहोरात्रेषु लोकेषु स्पृश्यन्त" इत्यादि। तस्मादातिवाहिका अर्चिरादयः। अचेतनत्वादपि तेषामातिवाहिकत्वानुपपत्तिः। चेतना हि लोके राजनियुक्ता पुरुषाः दुर्गेषु मार्गेष्वतिवाहयन्तीत्येवं प्राप्ते ब्रूमः। आतिवाहिका एवैते भवितुमर्हन्ति। कुतः तल्लिङ्गात्। तथा हि चन्द्रमसोविद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति सिद्धवन्निर्देशमात्मनस्तं दर्शयति। यावद्वचनं वाचनिकमितिन्यायात्। तद्वचनं तद्विषये एवोपक्षीणमिति चेन्न प्राप्तमानवत्वनिवृत्तिमात्रपरत्वाद्विशेषणस्य। यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततोयुक्तं तद्विरुद्ध्यर्थं पुरुषविशेषणममानव इति। ननुलिङ्गमात्रमगमकं न्यायाभावात्। नैष दोषः। उभयव्यामोहात्तत्सिद्धेः। एतावदर्चिरादिमार्गगास्ते देहवियोगात्पिण्डितकरणग्रामाऽतस्तन्त्राः। अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतोऽर्चिरादाभिमानिनश्चेतना देवतास्तद्वियोगा अतियातायां भियुक्ता इति गम्यते। लोकेऽपि हि मत्तमूर्च्छितादयः संपिण्डितकरणग्रामाः परप्रयुक्तयत्नानो भवन्ति। अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः। न हि रात्रौ प्रतिष्ठाभिसंस्थाभिसम्भा उपपद्यते। न च प्रातरानमस्तीत्युक्तमभक्षात्। भुक्त्वादेवतात्मनां नायं दोषो भवति। अर्चिरादिशब्दतावेषामर्चिराद्यभिमानादुपपद्यते। अर्चिषोऽर्चिरित्यादिनिर्देशस्त्वातिवाहिकत्वेऽपि न विरुध्यते। अर्चिषा हेतुनाहरभिसम्भवन्ति अह्ना हेतुनापूर्य्यमाणं पक्षमिति। तथा च लोके प्रसिद्धेनध्वातिवाहिकत्वेऽध्वंजातायक उपदर्शोऽयं ते गच्छ त्वमितोऽध्वयमाणं ततोऽयमिति। अपिचोपक्रमे तेऽर्चिषमभिसम्भवन्तीति सम्बन्धमात्रमुक्तं न सम्बन्धविशेषः कश्चित्। उपसंहारे तु "स एतान् ब्रह्म गमयतीति" सम्बन्धविशेषोऽतिवाहकृत्यातिवाहकत्वलक्षण उक्तः तेन सएषोपक्रमेऽपीति निर्ज्ञायते। संपिण्डितकरणग्रामत्वादेव च गन्तॄणां न तत्र भोगसम्भवः। लोकवद्तु अनुभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते अन्येषां तल्लोकवासिनां भोगभूमित्वात्। अतोऽग्निर्ज्वालामिकं लोकं प्राप्तोऽग्निनाऽतिवाहकृतेवायुर्ज्वालामिकलोकं प्राप्तो वायुनेति योजयितव्यम्। कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्सम्बन्धः विद्युतोऽधिवरुणादय उपदिश्यन्ते। विद्युत्स्थानन्तरमा ब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमित्यतश्चरं पठति। "वैद्युतेनैव तच्छ्रुतेः"। ततो विद्युदभिसम्भवादूर्द्धं विद्युदनन्तरवर्त्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यम्। तान् वैद्युतान् पुरुषोऽमानवः स एतान् ब्रह्मलोकं गमयतीति तत्रैव गमयितृश्रुतेः। वरुणादयस्तु

तस्यैवाप्रतिबन्धकरणेन साङ्गचर्यानुष्ठानेन वा केनचिदनुग्राह्यकाद्भूत्यवगन्तव्यम्। तस्मात्सूक्तमातिवाहिकादेव तात्मानोऽचिरादय इति" शाङ्करभाष्यम्।

आतिवाहे आतिवाहकाले द्युलोकान्तरगतिकाले भवः ठञ्। मनुष्याणां द्व्यवयवकालभवे २देहभेदे पु० शरीरविशेषत्वे न०। "तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। ऊर्द्धं व्रजन्ति भूतानि लोकस्वाभाव्यतस्य विष्णुह०। त्रीणि भूतानि तेजोवायुराकाशानि ऊर्द्धं गच्छन्ति गुरुत्वाभावात् पृथिवीजले तु गुरुत्वादधोगच्छत इत्यभिप्रायः तत्क्षणात् मृत्युक्षणं प्राप्येत्यर्थः "आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। इति च तत्रैवोक्तम्। पञ्चभूतानामुर्द्धाधोगतिश्च स्थूलभूतविषया सूक्ष्माणान्तु लिङ्गशरीराश्रयतया सर्वजीवानां देहान्तरप्राप्तौ तद्देहारम्भसाधनतया सहैव गमनम् यथाह "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" शा०सू० व्याख्यातमिदं शङ्कराचार्येण "जीवोऽस्यप्राणसचिवः सेन्द्रियः समनस्कोविद्याकर्म्मपूर्व्वप्रज्ञापरिग्रहः पूर्व्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्येतदवगत अथैनमेते प्राणा अभिसमायन्तीत्येवमादेरन्यद्भवतरं रूपं कुरुते इत्येवमनात् संसारप्रकरणस्याच्छब्दात् धर्म्माधर्म्मफलोपभोगसंभवाच्च। स किं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति आहोस्वित् संपरिष्वक्त इति चिन्त्यते किं तावत् प्राप्तं असंपरिष्वक्त इति। कुतः करणोपादानवत् भूतोपादानस्याश्रुतत्वात्। 'स एतास्तेजोमात्राः समभ्यादत्ते'इत्यत्र तेजोमात्राशब्देन करणानामुपादानं सकीर्त्तयति वाक्यशेषे चक्षुरादिसंकीर्त्तनात्। नैवं भूतमात्रोपादानसंकीर्त्तनमस्ति सुलभाश्च सर्व्वत्र भूतमात्रा यत्रैव देह आरब्धव्यस्तत्रैव सन्तीति ततश्च तासां नयनं निष्प्रयोजनम्। तस्मादसंपरिष्वक्तोयातीत्येवं प्राप्ते पठत्याचार्य्यः "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः" इति। तदन्तरप्रतिपत्तौ देहात् देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छतीत्यवगन्तव्यं कुतः प्रश्ननिरूपणाभ्याम्। तथा हि प्रश्नः "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति"। निरूपणञ्च प्रतिवचनं दुग्धपर्व्वन्य पृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति"। तस्मादद्भिः परिवेष्टितो जीवोरं हृतीति गम्यते। मन्त्रब्राह्मणश्रुतिर्जलौकावत् पूर्व्वं देहं न मुञ्चति यावद्देहान्तरं न क्रामतीति दर्शयति तद्यथा तृणजलायुकेति तत्राप्परिवेष्टितस्यैव जीवस्य कर्म्मोपस्थापितप्रतिपत्तव्यदेहविषयभावाय दीर्घीभावमात्रं जलौकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्म्मवशाद्वृत्तिलाभस्तत्र तत्र भवति केवलस्यैव वात्मनोऽवृत्तिलाभस्तत्र तत्र भवति। इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थान उत्पद्यन्ते, मनएव वा केवलं भोगस्थानमभिप्रतिष्ठते जीवएव वा उत्सृज्य देहाद्देहान्तर प्रतिपद्यते शुकइव वृक्षाद्वृक्षान्तरमित्येवमाद्याः, ता सर्व्वाएवानादर्त्तव्याः श्रुतिविरोधात्। ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहति इति प्राप्नोति अप्शब्दस्यवणश्चामर्थ्यात् तत्र कथ सामान्येन प्रतिज्ञायते सर्व्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीत्यतउत्तरं पठति। "त्र्यात्मकत्वात्तु भूयस्त्वात्"सू०। "तुशब्देन चोदितामाशङ्कामुच्छिनत्ति त्र्यात्मिका ह्यापः तिसृत्करणश्रुतेः तास्वारम्भिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्याभ्युपगन्तव्यं भवति त्र्यात्मकस्य देहः त्रयाणामपि तेजोबन्धानां तस्मिन् कार्य्योपलब्धेः पुनश्च त्र्यात्मकः त्रिधातुकत्वात् त्रिभिर्वातपित्तश्लेष्मभिर्व्याप्तत्वात् न भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोऽयम्"आपः पुरुषवचसः"इति प्रश्नप्रतिवचनयोरप्शब्दो न केवल्यापेक्षः सर्व्वदेहेषु हि रसलोहितादिद्रव्यभूयस्त्वं दृश्यते। ननु पार्थिवोधातुर्भूयिष्ठोदेहेषूपलक्ष्यते नैष दोषः इतरापेक्षयापां बाहुल्यं भविष्यति दृश्यते च शुक्रशोणितलक्षणे पि देहबीजे द्रवबाहुल्यम्। कर्म्म च निमित्तं कारणं देहान्तरारम्भे कर्म्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्म्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्म्मभिर्द्युलोकाख्येऽग्नौ हूयन्त इति वक्ष्यति तस्मादप्यां बाहुल्य प्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्व्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्। "प्राणगतेश्च"सू० "प्राणानाञ्च देहान्तरप्रतिपत्तौ गतिः श्राव्यते "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणाश्चानूत्क्रामन्तीत्यादि" श्रुतिभिः। सा च प्राणानां गतिर्नाश्रयमन्तरेण सम्भवतीत्यतः प्राणगतिप्रयुक्तानां तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते। न हि निराश्रयाः प्राणाःक्वचिद्गच्छन्ति तिष्ठन्ति वा जीवतोऽदर्शनात्"

भा०। मनुरपि "यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च। समाविशति संसृष्टस्तदा मूर्त्तिं विमुञ्चति" सूक्ष्मभूतैः संसृष्टस्यैव गतिमाह। अत्र अणुपदं पुर्य्यष्टकोपलक्षणम्। "भूतेन्द्रियमनोबुद्धिवासनाकार्यवायवः। अविद्या चाष्टकं प्रोक्तं पुर्य्यष्टकमिदं पुनः" सनन्दोक्तेः "पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षोमुक्तस्य तेन वै" ब्रह्मपु० उक्तेश्च संसृतिकाले पुर्य्यष्टकस्य परलोकगामित्वसिद्धेः। आतिवाहिकशरीरसत्त्वेऽन्यथानुपपत्तिरेव प्रमाणम् तत्स्वरूपञ्चोक्तं सांख्यसूत्रभाष्यादौ। "तद्बीजात् संसृतिः" सू०। तस्य शरीरस्य बीजात् त्रयोविंशतितत्त्वरूपात् सूक्ष्माद्धेतोः पुरुषस्य संसृतिर्गतागते भवतः कूटस्थस्य विभुतया खतो गत्याद्यसम्भवादित्यर्थः त्रयोविंशतितत्त्वेऽवस्थितो हि पुरुषस्तेनैवोपाधिना पूर्व्वकृतकर्मभोगार्थं देहाद्देहं संसरति। "मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्। वाचा वाचा कृतं कर्म कायेनैव तु कायिकम्" इत्यादिस्मृतिभिः पूर्वसर्गीयकरणैरेवोत्पद्यतेः सर्गान्तरेष्वपभोगसिद्धेः। अतएव ब्रह्मसूत्रम् "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त इति"। संसृतेरधिकमप्याह। "आविवेकाच्च प्रवर्त्तनमविशेषाणाम्" सू०। "ईश्वरानीश्वरत्वादिविशेषरहितानां सर्वेषामेव पुंसां विवेकपर्य्यन्तमेव प्रवर्त्तनं संसृतिरावश्यकी विवेकोत्तरं च न सा तत्र हेतुमाह। "उपभोगादितरस्य" सू०। इतरस्याविवेकिन एव स्वीयकर्मफलभोगावश्यम्भावादित्यर्थः। देहसत्त्वेऽपि संसृतिकाले भोगो नास्तीत्याह। "सम्प्रति परिरक्तो हाभ्याम्" सू। सम्प्रति संसृतिकाले पुरुषो हाभ्यां शीतोष्णसुखदुःखादिद्वन्द्वैः परिरक्तो भवतीत्यर्थः। तदेतत्कारिकयोक्तम्। "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" इति। भावा धर्माधर्मवासनाद्यः। अतः परं शरीरद्वयं विधिय वक्तुमुपक्रमते। "मातापितृजं स्थूलं प्रायश इतरत्र तथा" सू०। स्थूलं मातापितृजं प्रायशो बाहुल्येनायोनिजस्यापि स्थूलशरीरस्य करणादितरत्र सूक्ष्मशरीरं न तथा न मातापितृजं सर्गादावुत्पन्नत्वादित्यर्थः। तदुक्तं कारिकया। "पूर्व्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्। संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" इति नियतं नित्यं द्विपरार्धस्थायि गौणनित्यं प्रतिशरीरं लिङ्गोत्पत्तिकल्पने गौरवात्। प्रकृते तु तस्याः श्रुतिस्मृतिप्रामाण्यादिष्यते। गतिकाले भोगाभावश्चैनस्तत्सर्गाभिप्रायेण। कदाचित् तु वायवीयशरीरप्रवेशतो गमनकालेऽपि भोगो भवति। अतो यममार्गे दुःखभोगवाक्यान्युपपद्यन्ते। स्थूलसूक्ष्मशरीरयोर्मध्ये किमुपाधिकः पुरुषस्य द्वयोगस्तदवधारयति। "पूर्वोत्पत्तेस्तत्कार्यत्वं भोगादेकस्य नेतरस्य" सू०। पूर्वं सर्गादावुत्पत्तिर्यस्य लिङ्गशरीरस्य तस्यैव तत्कार्यत्वं सुखदुःखकार्यकत्वं कृत एकस्य लिङ्गदेहस्यैव सुखदुःखाद्यभोगात् न त्वितरस्य स्थूलशरीरस्य मृतशरीरे सुखदुःखाद्यभावस्य सर्वसम्मतत्वादित्यर्थः। उक्तस्य सूक्ष्मशरीरस्य स्वरूपमाह। "सप्तदशैकं लिङ्गम्" सू०। सूक्ष्मशरीरमप्यधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलिता लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिश्चेति सप्तदश। अध्यवसायरूपा बुद्धावेवान्तर्भावः। चतुर्थसूत्रे वक्ष्यमाणप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यं न तु सप्तदश एवं नियमादप्यपरतया व्याख्येयम्। उत्तरसूत्रेण व्यष्टिभेदस्योपपादनायात्र लिङ्गैक्ये एकवाक्यस्य तात्पर्यावधारणाच्च। "कर्मात्मा पुरुषो योऽसौ बन्धमोक्षैः प्रयुज्यते। स सप्तदशकेनापि राशिना युज्यते च सः" इति मोक्षधर्मादौ लिङ्गशरीरस्य सप्तदशत्वसिद्धेश्च सप्तदशावयवा अत्र सन्तीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहव्यावृत्तिलिङ्गदेहस्यावयवित्वं निराकृतम्। अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिप्रत्यभिज्ञानानुरोधेन कल्प्यत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्यादरेण लिङ्गदेहस्य भोगः प्रागुक्तः। प्राणाद्यान्तःकरणस्यैव वृत्तिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्याप्यन्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरत्वं स्वयं वक्ष्यति "लिङ्गशरीरनिमित्तक इति सनन्दनाचार्य" इति सूत्रेण। अतो भोगायतनत्वमेव सुखस्य शरीरलक्षणम्। तदाश्रयतया त्वन्यत्र शरीरत्वमिति पद्मपादाद्यक्तीभविष्यति। "चेष्टेन्द्रियार्थाश्रयः शरीरमिति" तु न्यायेऽपि तस्यैव लक्षणं कृतमिति। ननु लिङ्गं चेदेकं तर्हि कथं पुरुषभेदेन विलक्षणा भोगाः सुखत्वादेः। "व्यक्तिभेदः कर्मविशेषात्" सू० यद्यपि सर्गादौ हिरण्यगर्भोपाधिरूपमेकमेव लिङ्गं तथापि तस्य पश्चाद्व्यक्तिभेदो व्यक्तिरूपेणांशतो नानात्वमपि भवति। यथेदानीमेकस्य पितृलिङ्गदेहस्य नानात्वमंशतो भवति पुत्रकन्यादिलिङ्गदेहरूपेण। तत्र कारणमाह कर्मविशेषादिति। जीवानामेषां भोगहेतुकर्मादेरित्यर्थः। अत्र विशेषवचनात् समष्टिपुष्टजीवानां साधारणैः कर्मभिर्भवतीत्यायातम्। अयं

च व्यक्तिभेदो मन्वादिष्वभिव्यक्तः । यथा मनौ समष्टिसृष्टस्य षडिन्द्रियोत्पत्त्यनन्तरम् । "तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम् । सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे" इति षण्णामिति समस्तलिङ्गशरीरोपलक्षणम् । आत्ममात्रासु चिदंशेषु संयोज्येत्यर्थः । तथा च तत्रैव वाक्यान्तरम् । "तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह । क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः" । इति नन्वेवं भोगायतनतया लिङ्गस्यैव शरीरत्वे स्थूले कथं शरीरत्वव्यवहारस्तत्राह । "तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सू० । तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्यवसितोऽर्थः । अधिष्ठानशरीरं च सूक्ष्मपञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम् । यत्तु "आतिवाहिक एकोऽस्ति देहोऽन्यस्त्वाधिभौतिकः । सर्वेषां भूतजातानां ब्रह्मणस्त्वेक एव किम्" इत्यादिशास्त्रेषु शरीरद्वयमेव श्रूयते तल्लिङ्गशरीराधिष्ठानशरीरयोरन्योऽन्यनियतत्वेन सूक्ष्मत्वेन चैकताभिप्रायादिति । नन्वेवं षाट्कौशिकातिरिक्ते लिङ्गशरीराधिष्ठानभूते शरीरान्तरे किं प्रमाणमित्याकाङ्क्षायामाह । "न स्वातन्त्र्यात् तद्धते छायावच्चित्रत्वच्च" सू० । "तल्लिङ्गशरीरं तद्धतेऽधिष्ठानं विना स्वातन्त्र्यान्न तिष्ठति । यथा छाया निराधारा न तिष्ठति यथा वा चित्रमित्यर्थः तथा च स्थूलदेहं त्यक्त्वा लोकान्तरगमने लिङ्गदेहस्याधारभूतं शरीरान्तरं सिध्यतीति भावः । तस्य च स्वरूपं कारिकायामुक्तम् । "सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । सूक्ष्मास्तेषां नियता मातापितृजा निर्वर्तन्ते" इति । अत्र तन्मात्रकार्यं मातापितृजशरीरापेक्षया सूक्ष्मं यद्भूतपञ्चकं यावल्लिङ्गस्थायि प्रोक्तं तदेव लिङ्गाधिष्ठानं शरीरमिति लब्धं कारिकान्तरेण । "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" । इति । विशेषैः स्थूलभूतैः सूक्ष्माख्यैः, स्थूलाद्यान्तरभेदैरिति यावत् । अस्यां कारिकायां सूक्ष्माख्यानां स्थूलभूतानां लिङ्गशरीराङ्गत्वावगमेन "पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्" । इत्यादिपूर्वोदाहृतकारिकायां सूक्ष्मभूतपर्यन्तस्य लिङ्गत्वं लभ्यते किन्तु महदादिरूपं यल्लिङ्गं तत् स्वाधारसूक्ष्मपर्यन्तं संसरति तेन सह संसरतीत्यर्थः । नन्वेवं लिङ्गषट्कपदार्थाः कियन्त इति कथमवधार्यमिति चेत् । "वासनाभूतसूक्ष्मं च कर्माविद्ये तथैव च । दशेन्द्रियं मनो बुद्धिरेतल्लिङ्गं विदुर्बुधाः इति वाग्विज्ञादिवाक्येभ्यः । अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्माणामपि वासनाकर्माविद्यानां पृथगुपन्यासः । भूतसूक्ष्मं चात्र तन्मात्रा । दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन पुरीतद्वयमित्याशयः । यत्तु मायावादिनो लिङ्गशरीरस्य तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पुर्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति । ननु मूर्तद्रव्यतया वायुवेरिव लिङ्गस्याकाशमेवासङ्गेनाधारोऽस्तु व्यर्थमन्यत्र सङ्गकल्पनमिति तत्राह । "मूर्तत्वेऽपि न सङ्गाद्ययोगात् तरणिवत्" सू० मूर्तत्वेऽपि न स्वातन्त्र्यादसङ्गतयावस्थानं प्रकाशरूपत्वेन सूर्यस्येव सङ्गतसङ्गानुमानादित्यर्थः । सूर्यादीनि सर्वाणि तेजांसि पार्थिवद्रव्यसङ्गेनैवावस्थितानि दृश्यन्ते लिङ्गं च सत्त्वप्रकाशमयमतो भूतसङ्गतमिति । लिङ्गस्य परिमाणमवधारयति । "अणुपरिमाणं तत्कृतिश्रुतेः" सू० तल्लिङ्गमणुपरिमाणं परिच्छिन्नं न त्वत्यन्तमेवाणु सावयवत्वोक्तत्वात् । कुतः कृतिश्रुतेः क्रियाश्रुतेः । "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च" इत्यादिश्रुतेर्विज्ञानाख्यबुद्धिप्रधानतया विज्ञानस्य लिङ्गस्याखिलकर्मश्रवणादित्यर्थः । विभुत्वे सति क्रिया न सम्भवति । तद्गतिश्रुतेरिति पाठस्तु समीचीनः । लिङ्गशरीरस्य च गतिश्रुतिः "तसुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सविज्ञानो भवति सविज्ञानमेवानूत्क्रामतीति" सविज्ञानो बुद्धिसहित एव जायते सविज्ञानं यथा स्यात् यथा संसरति चेत्यर्थः । परिच्छिन्नत्वे युक्त्यन्तरमाह । "तदभ्रमयत्वश्रुतेश्च" सू० तस्य लिङ्गस्यैकदेशतोऽभ्रमयत्वश्रुतेर्न विभुत्वं सम्भवतीति । विभुत्वे सति नित्यतापत्तेरित्यर्थः । सा च श्रुतिः "अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वागित्यादिः" । यद्यपि मन आदीनि न भौतिकानि तथाप्यन्नसंसृष्टसजातीयांशपूरणादन्नमयत्वादिव्यवहारो बोध्यः । अचेतनानां लिङ्गानां किमर्थं संसृतिर्देहाद्देहान्तरसञ्चार इत्याशङ्क्याहाह । "पुरुषार्थं संसृतिर्लिङ्गानां रूपकारवद्राज्ञः" सू० यथा राज्ञः रूपकाराणां चाकयाचालाभ्यु सञ्चारो राजार्थं तथा लिङ्गशरीराणां संसृतिः पुरुषार्थमित्यर्थः" प्र० भाष्यम् सूक्ष्मदेहसत्त्वे प्रमाणं सांख्यतत्त्वकौमुद्यामित्थं दर्शितम् ।

"स्यादेतद्बुद्धिरेव साहङ्कारेन्द्रिया कस्माच्च संसरति तत्कृतं सूक्ष्मशरीरेणाप्राणिकेत्यत आह। "चित्रं यथाश्रयमृते स्थाखादिभ्योविना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्"। लिङ्गनात् ज्ञापनात् बुद्ध्यादयोलिङ्गं तत् अनाश्रितं न तिष्ठति। जन्मप्रबाणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपञ्चतन्मात्रवत्त्वे सति बुद्ध्यादित्वात् दृश्यमानशरीरवृत्तिबुद्ध्यादिवत्। विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः। आगमस्थात्र भवति 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति"। अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आत्मनोनिष्कर्षसम्भवेन सूक्ष्ममेव शरीरं पुरुषस्तदपि हि पुरि स्थूलशरीरे शेते"। एवञ्च सर्वेषां भूतानां संसरणकाले सूक्ष्मदेहव्यापृतत्वे स्थिते मनुष्याणामेव दाहादूर्ध्वम् आतिवाहिकदेहान्तरोत्पत्तिर्नान्येषां पूर्वोक्तकारणात् भवति तु दाहादौ सतां ग्रासादानिकभूतभावाप्तिरिति भेदः यथोक्तम्" युक्तिः० विष्णु०। "अतिवाहिक संज्ञोऽयौ देहो भवति भार्गव!। कोलं तन्मनुजानां नान्येषां प्राणिनां क्वचित्" इत्युपक्रम्य प्रेतशिरस्तेषां दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्यूतस्य विभोरणम्। ग्रासादानिकोयो भूतेभ्यो नाकल्पमेव विद्यते। तत्राऽस्य यातना घोरा शीतवातातपोद्भवा इति" अत्र प्रेतकार्य्याकरणे दोषाभिधानम्। निन्द्यार्थवादो विधेयस्तुत्यर्थम् "न निन्द्यं निन्दनीयं निन्दति किन्तु विधेयं स्तौतीति" न्यायात्। एतच्च विद्वद्विषयम् छा०उ० विदुषः दैवात्तदकरणेऽपि अर्चिरादिनाप्रेरकृतेः "अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदि न, अर्चिषमेवाभिसम्भवन्तीति"। एतद्भाष्यञ्च ६५१ पृष्ठे प्राग् दर्शितम्। एवं गवाश्वादावपि "अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथाऽपरे तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहमिति। मन्त्रलिङ्गेनाग्निदग्धस्याप्युद्धारप्रतिपादनात्। निश्कर्षस्य संसृतिकार्य्ये प्राणिमात्रस्य सूक्ष्मदेहप्राप्तिः तत्र मनुष्यादीनां दाहादिकर्म्मादिकमन्तरेणापि स्वस्वकर्म्मानुसारेण देहान्तरप्राप्तिः मनुष्याणान्तु क्षिप्तादिव्यतिरिक्तानां दाहादिकमन्तरेण ग्रासादानिकभूतभावप्राप्तिः सतां तु दाहादौ आतिवाहिकदेहप्राप्तिः पूरकपिण्डादौ पुनः प्रेतदेहप्राप्तिः सपिण्डीकरणात्परं भोगदेहप्राप्तिः। तीर्थस्थतानां न तु प्रेतदेह इति भेदः"ऋते सपिण्डीकरणे नरः संवत्सरात्परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इत्युक्तेः""ततः स नरकेयाति स्वर्गी वा स्वेन कर्मणा" इत्युक्तेश्च विदुषां सद्गतीर्धिस्थतानां तु दैवात् दाहादिकार्य्याकरणेऽपि अर्चिरादिमार्गेण तत्तत्स्थानयोग्यदेहप्राप्तिरिति।

आतिशय्य न० अतिशय एव स्वार्थे ष्यञ्। अतिशये।

आतिश्वायन त्रि०अतिक्रान्तः श्वानम् त्रि० न समासान्तः अतिश्वा दासः अत्यधीनत्वात् अतिश्वन्+चतुरर्थ्यां पक्षा० फक्। दासमात्रिजडदेशादौ।

आतिष्ठ न० अति+स्था-क पृषो० अतिस्तस्य भावः अण्। अतिक्रम्य स्थिता उत्कर्षे। "याधिपत्याय स्वाम्यायातिष्ठायाऽऽरोहामि" ऐ०आ०।

आतु पु० अत-उण्। भेलके। (भेला) इति भे०।

आतुच् प० "आतुचिगमनाशी इति" भा० आधारे क्विप्। स्वर्थेऽस्तंगतार्के तत्र निशीथनक्ते अस्तकाले "यदद्यक्त उदिते यन्नध्यादिन आतुचि" ऋ० १,२७,२१, "आतुचि सायम्" भा०।

आतुजि त्रि० आ+तुज-किंसाबलादानेषु क्विप् नुक्। हिंसके बलदायके च। "पिबतं सोममातुजी" ७,६६ ६८, "आतुजी हिंसको प्रदातारौ वा" भा०।

आतुर त्रि० ईषदर्थे आ+अत उरच्। कार्य्यान्तरे उच्च०। "घृतमुत्तमं विधिविधक्तमाहितं प्रपिबन्निदं अयति क्षयमातुरः" उच्च० वैद्य० श्लोकेऽपि च। "दशरथोनाम राजा तत्र राघवं मदनातुरा" रघुः। "न ज्ञानमावरेन्मूढो नातुरो न मदान्वितः" "बालवृद्धातुरैर्विना" "अकामेनात्तु विज्ञेया बालवृद्धातुरा" इति च मनुः। आतुरे नियमो नास्ति" स्मृतिः। [धिक्यते।

आतुरसंन्यास न० ६त०। संन्यासभेदे सन्यासशब्दे तद्वि-

आतुरोपक्रमणीय पु० आतुरमुपक्रम्य रोगनिवारणाय उपक्रमणीयम्। आतुरस्य चिकित्सार्थमातुर्य्याध्युत्पन्नियमयोर्देहबलसत्यसात्म्यप्रकृतिभेषजदेशकालादीनां परीक्षणे उपक्रमणीये व्यापारभेदे तदधिकृतोक्तग्रन्थः क०। तत्प्रतिपादकग्रन्थे च। स च सुश्रुतान्तर्गतोऽध्यायभेदः। तत्रोपक्रमभेदं ज्ञात्वा वैद्यैरातुरस्य रोगनिवारणायोपक्रमः कार्य्यः। स चाध्यायस्तावद्दर्श्यते यथा "अथातः आतुरोपक्रमणीयमध्यायम् व्याख्यास्यामः॥ आतुरमुपक्रममाणेन भिषजातुरादौ परीक्षेत। सत्म्यायुषि व्याध्युत्पन्नियमयोर्देहबलसात्म्यप्रकृतिभेषजदेशान् परीक्षेत॥ तत्र मनःशारीरविशेषाद्यर्थं पुरुषं-

नाग्रदशनवदनस्कन्धललाटम् दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षणबाहुम् विस्तीर्णभ्रूस्तनान्तरोरस्कम् हृस्वजङ्घामेढ्रग्रीवम् गम्भीरसत्वस्वरनाभिमनुच्चैर्व्वङ्क्षस्तनसुपचितमहारोमशकर्णम् पश्चान्मस्तिष्कम् स्नातानुलिप्तमूर्द्धानुपूर्व्वी विशुध्यमाणशरीरम् पश्चाच्च विशुध्यमाणहृदयम् पुरुषम् जानीयाद्दीर्घायुः खल्वयमिति। तमेकान्तेनोपक्रमेत्। एभिर्लक्षणैर्व्विपरीतैरल्पायुर्मिश्रैर्मध्यमायुरिति ॥ भवन्ति चात्र ॥ गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः। उत्तरोत्तरसुश्लेष्मो यः स दीर्घायुरुच्यते ॥ गर्भात्प्रभृत्यरोगो यः प्रायैः समुपचीयते ॥ शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥ मध्यमस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे। अधस्तादक्षिगायस्य लेखाः स्फुर्व्यक्तमायताः ॥ द्वे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ। नासाग्रमूर्द्ध्नश्च भवेदूर्द्ध्वलेखाश्च पृष्ठतः ॥ यस्य स्युस्तस्य परमायुर्भवति सम्मितः। जघन्यस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे ॥ हृस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम्। तथोरस्यालीढानि नच स्यात्पृथ्वावतम् ॥ अर्द्धञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिणः। हसतो जल्पतो वापि दन्तमांसम् प्रदृश्यते। प्रेक्षते यश्च विभ्रान्तम् स जीवेत्पञ्चविंशतिम् ॥ अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः। तत्राङ्गान्यन्तराधिसक्थबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति। तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते। प्रदेशिन्यास्तु मध्यमानामिका कनिष्ठिका यथोत्तरम् पञ्चमभागहीना। चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले। पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः। चतुर्दशाङ्गुलायतः पादः। चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि। अष्टादशाङ्गुला जङ्घा जानुपरिणाहेन। द्वादशाङ्गुलमेवं पञ्चायतम्। जङ्घायामसमावूरू। द्व्यङ्गुलानि वृषणचिबुकदशननासापुटभागकर्णमूलनयनान्तराणि। चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णललाटग्रीवोच्छ्रायदृष्ट्यन्तराणि। द्वादशाङ्गुलानि भगविस्तारमेहननाभिहृदयग्रीवास्तनान्तरसुखायाममणिबन्धप्रकोष्ठस्थौल्यानि। इन्द्रबस्तिपरिणाहांसपीठकूर्परान्तरायामः षोड़शाङ्गुलः। चतुर्विंशत्यङ्गुलो हस्तः। द्वात्रिंशदङ्गुलपरिमाणौ भुजौ द्वात्रिंशत्परिणाहावूरू। मणिबन्धकूर्परान्तरं षोड़शाङ्गुलम्। तलं षट्चतुरङ्गुलायामविस्तारम्। अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ यच्चाङ्गुले। अर्द्धचतुरङ्गुले प्रदेशिन्यनामिके। सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ। चतुर्विंशतिविस्तारपरिणाहं सुखग्रीवम्। त्रिभागाङ्गुलविस्तारा नासापुटमर्य्यादा। नयनत्रिभागपरिणाहा तारका। नवमस्तारकांशो दृष्टिः। केशान्तमस्तकान्तरमेकादशाङ्गुलम्। मस्तकाद्वटुकेशान्तो दशाङ्गुलः कर्णावट्वन्तरं चतुर्दशाङ्गुलम्। पुरुषोरःप्रमाणविस्तीर्णा स्त्रीश्रोणिः। अष्टादशाङ्गुलविस्तीर्णसरः। तत्प्रमाणा पुरुषस्य कटी। सविंशमङ्गुलशतं पुरुषायाम इति। भवन्ति चात्र। पञ्चविंशे ततो वर्षे पुमान् नारी तु षोड़शे। समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक्। देहः स्वैरङ्गुलैरेष यथावदनुकीर्त्तितः। युक्तःप्रमाणेनानेन पुमान् वा यदि वाऽङ्गना। दीर्घमायुरवाप्नोति वित्तञ्च महदश्नुते। मध्यं मध्यमैरायुर्व्वित्तं हीनैस्तथाऽवरम्। अथ सारान् वक्ष्यामः। स्मृतिभक्तिप्रज्ञाशौर्य्यशौचोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात्। स्निग्धं संहतश्वेताच्छिदन्तनखं बलवत्कामप्रजं शुक्रेण। अक्षयसुतलबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा। महाशिरःस्कन्धदृढदन्तहन्वस्थिनखमस्थिभिः, स्निग्धमूलखैर्दस्रं दृढच्छरीरमायाससहिष्णुं मेदसा। अच्छिद्रगात्रं गूढास्थिसन्धि मांसोपचितञ्च मांसेन। स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन। सुप्रसन्नस्निग्धत्वग्योभाग्यं त्वक्सारं विद्यादित्येषां पूर्व्वं पूर्व्वं प्रधानमायुःसौभाग्ययोरपि। भवति चात्र। सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः। परीक्ष्यायुः सुनिपुणो भिषक् सिध्यति कर्म्मसु। व्याधिविशेषास्तु प्रागभिहिताः सर्व्व एवैते त्रिविधाःसाध्या याप्याः प्रत्याख्येयास्च तत्रैतान् भूयस्त्विधा परीक्षेत किमसावौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति। तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः। प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च। अन्यलक्षणो यो भविष्यद्व्याधिख्यापकः स पूर्व्वरूपसंज्ञः। तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा। प्राक्केवलं यथास्वं प्रतिकुर्व्वीत। अन्यलक्षणे त्वादिव्याधौ प्रयतेत। भवति चात्र। नास्ति रोगो विना दोषैर्व्वायुस्तत्राद्विचक्षणः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्। प्रागभिहिता ऋतवः। शीते शीतप्रतीकारउष्णे चोष्णनिवारणम्। ज्ञात्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्। अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया। क्रियाहीना-

तिरिक्ता वा साध्येष्वपि न सिध्यति। वातुदीर्णं शमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्। (व्रणप्रश्ने) प्रागभिहितोऽग्निरन्नस्य पाचकः। स चतुर्विधो भवति दोषानभिपन्न एको विक्रियामापन्नस्त्रिविधो भवति विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्वसाम्यादिति। तत्र यो यथा कालमन्नमुपयुक्तं सम्यक्पचति। स समः समैर्दोषैः। यः कदाचित्सम्यक्पचति कदाचिदाध्मानभूक्लोदावर्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा। स विषमः। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः स एवाभिवर्द्धमानोऽत्यग्निरित्याख्यायते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकान्ते च गलतालोष्ठशोषदाहसन्तापान् जनयति। यः खलमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्रसेकोच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः। विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्। तत्र समे परिरक्षणं कुर्वीत, विषमे स्निग्धोष्णलवणैः क्रियाविशेषैः प्रतिकुर्वीत, तीक्ष्णे मधुरस्निग्धशीतैर्द्रवैश्च, एवमेवात्यग्नौ विशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्वमनैश्च। जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौष्म्याद्गुरुसानाददानो विवेक्तुं नैव शक्यते। प्राणापानसमानैस्तु सर्व्वतः पवनैस्त्रिभिः। धार्य्यते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः। वयस्तु त्रिविधम् बालम् मध्यम् वृद्धमिति। तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादाश्चेति तेषु संवत्सरपरा क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति॥ षोडशसप्तत्योरन्तरे मध्यम् वयस्तस्य विकल्पो दृष्टिर्यौवनम् संपूर्णता चेन्द्रियाणामिति। तत्रा विंशतेर्दृष्टिः, आ त्रिंशतो यौवनम्, आ चत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता। अतऊर्द्धमीषत् परिहाणिर्य्यावत्सप्ततिरिति। सप्ततेरूर्द्धं क्षीयमाणधात्विन्द्रियबलवीर्य्यौजोऽहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानम् सर्व्वक्रियासमर्थम् जीर्णागारमिवाभिदृष्टमवसीदन्तम् वृद्धमाचक्षते॥ तत्रोत्तरोत्तरास्तु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणेस्तत्राद्यापेक्षया प्रतिकुर्वीत। भवन्ति चात्र॥ बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु। मूर्द्धि वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥ अग्निचारविरेकैस्तु बालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु मृदुत्वम् कुर्य्यात्क्रियाम् प्रति॥ देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः। कर्शयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ। रक्षणञ्चैव मध्यस्य कुर्वीत सततम् भिषक्॥ बलमभिहितगुणम् दौर्ब्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम्॥ यस्माद्बलवतः सर्व्वक्रियाप्रवृत्तिस्तस्माद्बलमेव प्रधानमधिकरणानाम्॥ केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत्॥ सत्त्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्वर्थकल्पकरम्। सत्त्ववान् सहते सर्व्वं संसाध्यात्मानमात्मना। राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः॥ प्रकृतिम् भेषजम् चोपरिष्टाद्वक्ष्यामः॥ सात्म्यानि तु देशकालजातुरोगव्यायामोदकादिरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति। यो रसः कल्पते यस्य सुखायैव निषेवितः। व्यायामजातमन्यद्वा तत्तस्यात्मेति निर्दिशेत्॥ देशस्त्वनूपो जाङ्गलः साधारण इति॥ तत्र बहूदकानिम्नोन्नतनदीपर्वतबहुलो बहुशीतामिलो बहुमहापर्वतद्रुमो बहुसुकुमारोपचितशरीरमनुष्यप्रायः कफातुरोगभूयिष्ठश्चानूपः॥ आकाशसमः प्रतिरलाल्पकण्टकिद्रुमप्रायोऽल्पपर्णप्ररोहोदपानोदकप्रायोऽल्पतृणोपलः प्रतिरलाल्पशैलः स्थिरकणखरोरुमनुष्यप्रायोऽतिपित्तरोगभूयिष्ठश्च जाङ्गलः॥ उभयदेशलक्षणः साधारण इति॥ भवन्ति चात्र॥ समाः साधारणे यस्मान्नीतयस्तेन्द्रियाणि च। दोषाणाम् समता जन्तोस्तस्मात्साधारणो मतः॥ न तथा बलवन्तः स्युर्जलजा वा स्थलाश्रयाः। स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः॥ उचिते वर्त्तमानस्य भक्तिर्देशकृतम् भयम्। आहारस्वप्नचेष्टादौ तद्देशगुणगुणे सति। देशप्रकृतिसात्म्यर्त्तुविपरीतोऽविरोधितः। सम्मतो भिषगादीनां बलसत्त्वायुषां तथा॥ कोपनः सर्व्वदेहाग्नेः सुखसाध्यतमो गदः। अतोऽन्यथा त्वसाध्यः स्यात् कष्टो व्याधिश्चलक्षणः॥ क्रियायास्तु गुणाभावे क्रियाकालं प्रयोजयेत्। पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः॥ गुणाभावेऽपि सर्पादि यदि नैव क्रिया हिता। कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि यत्त्वमेनं विधिमेकरूपं बिभर्त्ति कालादियोगेन धीमान्। स मनुष्याणाम् जगतो गदीयानृद्धिमक्षि भैषज्यपरायणः॥

आतुरोपद्रव पु० [ष० त०। आतुरस्य उपद्रवः।] उपद्रवा संप्रतीकारोपायाः सुश्रुते दर्शिता यथा

"अथात आतुरोपद्रवचिकित्सितं व्याख्यास्यामः । स्नेहपीतस्य वान्तस्य विरिक्तस्य क्षुताहृजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽल्पैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमहद्भिर्बहुभिश्चादितोऽग्निरिवेन्धनैः ॥ सचाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सम्मुचित इवानलः । हृतदोषप्रमाणेन सदाहारविधिः स्मृतः । त्रीणि चात्र प्रमाणानि प्रस्थोऽर्द्धाढकमाढकम् ॥ तत्रावरं प्रस्थमात्रं द्वे शेषे मध्यमोत्तमे ॥ प्रस्थे परिस्रुते देया यवागूः स्वल्पतण्डुला । द्वे चैवार्द्धाढके देया तिस्रश्चाप्याढके गते ॥ विलेपीमुचिताङ्गस्य तावत्यर्थांश्चतां ततः । दद्याद्यूतेन विधिना क्लिन्नसिक्थामपिच्छिलाम् ॥ स्निग्धलवणां स्वच्छसुद्गयूषयुतान्ततः । अंशद्वयप्रमाणेन दद्यात्स्निग्धमोदनम् ॥ ततः सृष्टतमन्नेन हृद्येनेन्द्रियबाधिना । त्रीनंशान् वितरेद्भोक्तुमातुरायौदनं मृदुम् । ततो यथोचितं भक्तमभोक्तुमलं विचक्षणः ॥ लावणैर्हरिणादीनां रसैर्हृद्यान्यसंस्कृतैः । हीनमध्योत्तमेष्वेव विरेकेषु विधिः स्मृतः ॥ एकद्वित्रियुगः सम्यगाहारस्य क्रमो हि सः । कफपित्ताधिकान्मध्यनित्यान्हीनविशोधितान् ॥ पेयाभिष्यन्दवत्तेषां तर्पणादिक्रमो हितः । वेदनालाभनियमशोकवैचित्त्यहेतुभिः ॥ नरानुपोषितांश्चापि विरिक्तवदुपाचरेत् । आढकार्द्धाढकप्रस्थसङ्ख्या हेया विरेचने ॥ एको विरेकः श्लेष्मान्तो न द्वितीयोऽस्ति कश्चन । बलं यत्त्रिविधं प्रोक्तमतस्तत् क्रमसिद्धया ॥ तत्रानुक्रममेकन्तु बलस्थः सकृदाचरेत् । द्विराचरेन्मध्यबलस्त्रीन्वारान्दुर्बलस्तथा ॥ केचिदेवं क्रमं प्राहुर्मन्दमध्योत्तमाग्निषु । संसर्गेण विदह्येऽग्नौ दोषकोपभयाज्जयेत् ॥ प्राक्स्वादुतिक्तौ स्निग्धाम्ललवणानुकटुकं ततः । स्वाद्वम्ललवणानूभयः स्वादुतिक्तावतः परम् ॥ स्निग्धरूक्षान्रसांश्चैव व्यत्यासात्त्वस्थवत्ततः । केवलं स्नेहपीतो वा वान्तो यश्चापि केवलम् ॥ स समरात्रं मनुजो भुञ्जीत लघु भोजनम् । कृतः शिराव्यधो यस्य कृतं यस्य च शोधनम् ॥ स नरो परिहरेन्मासं यावद्वा बलवानुभवेत् । एकैकस्मिन्परिहरेद्दोषौ वस्तौ त्वहं त्वहम् ॥ तृतीये तु परीहारे यथायोगं समाचरेत् । तैलपूर्णामग्निदग्धाण्डसधर्माणो व्रणातुराः ॥ स्निग्धशुद्धाक्षिरोगार्त्ता ज्वरातीसारिणश्च ये । क्रुध्यतः कुपितं पित्तं कुर्य्यात्तानातुपद्रवान् ॥ आयासतः शोचतो वा चित्तं विभ्रममृच्छति । मैथुनोपगमाद्घोरान् व्याधीनाप्नोति दुर्मतिः ॥ आक्षेपकं पक्षघातमङ्गप्रत्यङ्गमेव च । गुह्यप्रदेशे श्वयथुं कासश्वासौ च दारुणौ ॥ शुक्रवच्चापि रुधिरं सरजस्कं प्रवर्त्तते । लभते च दिवास्वप्नात्तांस्तान् व्याधीन् कफात्मकान् ॥ श्लीहोदरं प्रतिश्यायं पाण्डुतां श्वयथुं ज्वरम् । मोहं सदनमज्ञानमविपाकं तथारुचिम् ॥ तमसा चाभिभूतस्तु स्वप्नमेवाभिनन्दति । उच्चैः सम्भाषणाद्वायुः शिरस्यापादयेद्भृशम् ॥ आन्ध्यं जाड्यमजिह्मत्वं बाधिर्य्यं मूकतां तथा । हनुमोक्षमधीमन्थं मर्म्मतश्च सुदारुणम् । नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरम् ॥ लभते दन्तचालं च तांस्तांश्चान्यानुपद्रवान् । यानयानात्तु लभते क्षुद्भिर्मूर्च्छाभ्रमक्लमान् ॥ तथैवाङ्गग्रहं घोरमिन्द्रियाणाञ्च विभ्रमम् । चिरासनात्तथा स्नानाच्छोथां भवति वेदना ॥ अतिचङ्क्रमणाद्बाहुजङ्घयोः कुरुते रुजः । सक्थिप्रशोषं शोफं वा पादहर्षमथापि वा ॥ शीतसम्भोगतोयानां सेवा मारुतहृद्ये । ततोऽङ्गमर्दविष्टम्भशूलाध्मानप्रवेपकाः ॥ वातातपाभ्यां वैवर्ण्यं ज्वरं चापि समाप्नुयात् । विरुद्धाध्यशनान्मृत्युं व्याधिं वा घोरमृच्छति ॥ असात्म्यभोजनं हन्याद्बलवर्णमृतायुषम् । अनात्मवन्तः पशुवज्जुह्वते येऽप्रमाणतः ॥ रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि । व्यापदां कारणं वीक्ष्य व्यापत्सु तासु बुद्धिमान् ॥ प्रयतेतातुरारोग्ये प्रत्यनीकेन हेतुना ॥ विरिक्तवान्तैर्हरिणैणलावकाः शशश्च सेव्याः सैमयूरतित्तिरिः । सषष्टिकाश्चैव पुराणशालयस्तथैव मुद्गा लघु यच्च कीर्त्तितम्" ॥ एवमन्येऽपि ततएवावगम्याः ।

आतुर्य्य न० आतुरस्य भावः ष्यञ् । १आतुरत्वे २फलनाशके ज्वरांशभेदे च "ज्वरांशाश्च वस्तुभेदेन नानाविधाः" हरि० १८३अध्या० दर्शिताः । "कृष्णउवाच । शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि । सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे । त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजस्वैकं द्वितीयेन च स्थावरान् । तृतीयो यस्तृभागो मानुषेषु प्रयत्स्यसे । त्रिधा भूतं वपुः कृत्वा पञ्चिषु त्वं भव ज्वर ! । चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्ततस्तृभागः खोरकस्य चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथ विशेषासु शिवसत्वं शृणुष्व मे । वृक्षेषु कोटरूपेण तथा सङ्कोचपत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च । पद्मिनीषु हिमोभूत्वा पृथिव्यामपि चोषरः । अपान्तु पोलिकां विद्याः शिखोद्भेदश्च वह्निनाम् । गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात्

स्वर्गनाशैव प्राणिनां वधमेव्यसि । कृते देवमनुष्यांश्च नान्यस्तां विषहिष्यते" । "आतुर्यं जालकैकदेशे सङ्कोचः नीलकण्ठः ।

आतृण त्रि० आ+तृद्-क्त । १हिंसिते २छिन्ने च । "तस्मादातृण्णात् प्रेरितो दृत्तादिवाहृतात्" शत०ब्रा० ।

आतृप्य न० आतृप्यत्वेन आ+तृप-बा० करणे क्यप् । (आता) फलभेदे ।

आतोद्य न० समन्तात् तुद्यते आ+तुद्-ण्यत् । वीणादौ वाद्ये । "सज्जमातोद्यशिरोनिवेशितम्" "आतोद्यं यातुधानास्त्रसत्त्वाजयदायुधम्" इति च रघुः । [रघुः ।

आत्त त्रि० आ+दा-क्त । गृहीते "गामात्तसारां रघुरप्यवेक्ष्य"

आत्तगन्ध त्रि० आत्तोत्कृष्टोतोऽरिणा गन्धो गर्वो यस्य । १शत्रुणाभिभूते, २गृहीतगन्धे पुष्पादौ च । "नात्तगन्धमवधूय शत्रुभिः" माघः आत्तगन्धमनाघ्रातमौरभमनभिभूतञ्चेति" मल्लिनाथः ।

आत्तगर्व त्रि० आत्तोत्कृष्टोतोगर्वोयस्य । १अभिभूते ।

आत्मकर्मन् त्रि० ऐत० । आत्मनः स्वस्य कर्त्तव्ये कार्य्ये "आत्मकर्मात्मजं देहं चातोधर्म इवाश्रितः" रघुः ।

आत्मकाम त्रि० आत्मानं कामयते कम--णिङ् अण् उप० स० । विषयान्तरेच्छानिवर्त्तनेन १आत्ममात्राभिलाषुके २आत्ममात्रज्ञानेच्छाशुके । "योऽकामोनिष्कामआप्तकाम आत्मकामः न तस्य प्राणा उत्क्रामन्ति" बृ०उ० । "आप्ताः कामा येन स आप्तकामः काम्यन्ते कामाः आत्मकामत्वेन यस्मात्सैव नान्यःकामयितव्यो वस्त्वन्तरभूतः पदार्थोभवति । "आत्मैवान्तरोबाह्यः कृत्स्नः प्रज्ञानघन एवरसोनोर्द्धं न तिर्य्यग्नाधः" नात्मनोऽन्यत् कामयितव्यं वस्त्वन्तरं यस्य "यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् बृहणया तृविज्ञानोयाद्वा" सर्वात्मभूतं विजानन् किं कामयेत यायमानोऽन्यत्वेन पदार्थः कामयितव्यो भवति नचासावन्यो ब्रह्मविद् आप्तकामस्यास्ति" भा० । आत्मकामस्यैव यथाप्तकामता तथाप्तकामशब्दे वक्ष्यते ।

आत्मकामेय त्रि० आत्मकामाया इदम् ढक् । आत्मकामासम्बन्धिनि ततः स्वार्थे राजन्या०वुञ् । आत्मकामेयकःतद्वे ।

आत्मगुप्त त्रि० आत्मना गुप्तः । स्वयमेव रक्षिते । (आलकुशी) लतामेदे स्त्री तस्याःगुणे हि अतिकण्डूयनं नृणां भवति तद्भयाच्चार्थिभिसा स्पृश्यते इति तथा आत्मगुप्तत्वम् ।

आत्मग्राहिन् त्रि० आत्मानं आत्मार्थमेव वा गृह्णाति ग्रह--णिनि-उदरम्भरौ २आत्मज्ञे च ।

आत्मघातिन् त्रि० आत्मानं देहं हन्ति हन्तु-णिनि ऐत० । "व्यापादयेत् स्वात्मानं स्वयं योऽम्बुदकादिभिः । अवैधेनैव मार्गेण आत्मघाती स उच्यते" इत्युक्तलक्षणे आत्मनः स्वशरीरस्य प्राणेन सह वियोजयितरि जने आत्मघातश्च द्विविधः वैधोऽवैधश्च अवैधोऽपि द्विविधः ज्ञानपूर्व्वकस्तदपूर्व्वकश्च । तत्र वैधात्मघाते न दोषः तदाहुः मनुवसिष्ठगर्गौ "वृद्धः शौचस्थते लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेत्तस्य भवेन्नाघमनुत्तमम् । तस्य विस्तरआत्मवधे द्वितीये वक्ष्यते । तृतीये वृद्धं ज्ञात्वा चतुर्थे आत्मनाचरेत्" ऐभाद्रो प्रयोगात्मघातनिन्दनेन तत्राधिकारिणमाह विष्णुधः । "नरस्य आधिरिवतो न लाजेदात्मनस्तनुम् अरण्यां नामतेनीका अन्धेन तमसावृताः । तांस्ते प्रत्यभि गच्छन्ति ये के चात्महनोजनाः । यदिदं वातमनोऽतीतामृत्युकालमुपस्थितम् । व्याधितोभिषजा त्यक्तो धर्म्मोऽयुषि चात्मनः । यथायुगादिसंस्थासु मरणेदात्मनस्तनुम् । तस्मिन् काले तनुत्यक्त्वा याति स्वर्गमकल्मषम्" अपरार्के ब्रह्मगर्भः "यो जीवितुं न यत्नीति महाव्याध्युपपीडितः । सोऽम्बुदकं भक्षयित्वा वा मर्त्तव्यमपि न दुष्यति" । तेन प्रयागादितिरिक्तेऽपि क्वचित्कुरोगादीनामतिक्रमः । मनुर्यानप्रस्थस्यैवेति विज्ञानेश्वरादयः । "आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनुम् । गोप्तृगोब्राह्मणस्त्रीणां ब्रह्मलोकाय कल्पते" इति मनुनाप्यानप्रस्थस्यैव मरणाधिकारप्रतिपादनात् । गृहस्थस्याप्यधिकार इति निर्णयसिन्धुः । प्रयागादितिरिक्तेऽपि प्रस्थे तु नाधिकारः "मूढाश्च क्षत्रिया वैश्या अन्त्यजातास्तथाधमाः । एते त्यजेयुः प्राणान् वै वर्जयित्वा द्विजं गवम् । पतित्वा ब्राह्मणस्यैव ब्रह्महा चात्मघातकृत्" मनुवचनात् ब्राह्मणार्थे स्वर्गादि महाफलजिगमिषया । प्रविश्योज्ज्वलनं तोयं करोत्यनशनं तथेति" आदित्य पु० वाक्याच्च । तत्र प्रयागादिषु सर्व्वे वर्णा वैधात्मघातेऽधिकारिणः यथा "दुश्चिकित्स्यैर्महारोगैः पीड़ितस्तु पुमानपि । प्रविश्योज्ज्वलनं दीप्तं करोत्यनशनं तथा अगाधतोयराशिं च भृगोः पतनमेव च । गच्छेन्महाप्रयागं वापि तुषारगिरिमादरात् । प्रयागवटमाश्रायां देहत्यागं करोति च । स्वयंदेहविनाशञ्च काले प्राप्ते महामतिः । उक्तमानु प्रायोलोकात्मघाती भवेत् क्वचित् । महाप्रयत्नयात् स्वर्गे दिव्यान् भोगान् समश्नुते । एतत्सिद्धाधिकारस्तु सर्वेषां सर्वजन्तुषु । नराणामथ नारीणां सर्ववर्णेषु सर्वथा । ऐहिकं सर्वं

येषां जीवानां कृतचिह्नवेत्। अशौचं तु तत्राहं तेषां वक्ष्यामि तत्त्वतः" आदि० पु० "वाराणस्यां म्रियते यः प्रत्याख्यातभिषक्क्रियः काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः। अविमुक्तोन्मुखस्तस्य कर्णमूलगतोहरः। प्रणवं तारकं ब्रूते नान्यथा कृतचित् क्वचित्" मात्स्ये, भारते च" न लोकवचनात्तात! न वेदवचनादपि मतिरुत्क्रमणीया ते प्रयागमरणं प्रति" अतएव विष्णुधर्मे रोग्यादिमरणमुक्त्वोक्तम् "यथायुगानुसारेण संत्यजेदात्मनस्तनुमिति" प्रयागादौ विशेषः त्रिस्थलीसेतौ स्कान्दे "यथा कथञ्चित्तीर्थेऽस्मिन् प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्रभुर्यादीक्षितानपि। पाद्मे विष्णुः "देहत्यागं तथा धीराः कुर्वन्ति मम सन्निधौ। मत्सन्नुं प्रविशन्त्येव न पुनर्जन्मने नराः" कौर्मे "व्याधितो यदि वा दीनः क्रुद्धोवापि भवेन्नरः। गङ्गायमुनमासाद्य यस्तु प्राणान् परित्यजेत् रथैश्चितान् लभते कामान्वदन्ति मुनिपुङ्गवाः" तथा "या गतिर्योगयुक्तस्य सत्यस्य मनीषिणः। सा गतिस्त्यजतः प्राणान् गङ्गायमुनसंगमे"। वाराहे "तत्र योमुञ्चति प्राणान् वटमूलेषु सुन्दरि। सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते"। तथा "अकामोवासकामो वा वटमूलेषु सुन्दरि। शीघ्रं प्राणान्प्रमुञ्चेत यदीच्छेत्परमां गतिम्" तथा "पञ्चयोजनविस्तीर्णे प्रयागस्य तु मण्डले। व्यतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश। नरस्तारयते सर्वान् यस्तु प्राणान्परित्यजेत्" ब्राह्मे "ध्यात्वा विष्णुपदाम्भोजं प्रयागे विष्णुतत्परः। तनुन्त्यजति वै माघे तस्य मुक्तिर्न संशयः। दुष्कृतोऽपि दुराचारो ब्रह्महत्यादिपातकी। हरिं ध्यात्वा त्यजेद्देहं प्रायशो मुक्तिभाग्भवेत्" भविष्योत्तरे "समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पतने च षोडश। महाह्रदे षष्टिरशीति गोव्रजे अनाशने भारत! चाक्षया गतिः अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः। प्रविशन्ति मुखन्ते मे निःसंदिग्धं वरानने! इति सामान्यतोऽपि फलमुक्तम् एवमन्येऽपि विधयोज्ञेयाः। एवं विहित मरणं तु कलौ निषिद्धमेव "अग्न्यग्निमरणं चैव वृद्धादिमरणं तथेति माधवीये कलिवर्ज्यप्रकरणे यत्तु गौडाः प्रयागादिमरणं ब्राह्मणभिन्नविषयमित्याहुस्तत् त्रिस्थलीसेतुकृता दूषितं प्रागुक्तवचनात् "सर्वेन्द्रियवियुक्तस्य स्वव्यापाराक्षमस्य च प्रायश्चित्तमनुज्ञातमग्निपातो महापथः। धर्माजनासमर्थस्य कर्तुः पापाङ्कितस्य च। ब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोक्षणमिति" हेमाद्रौ विष्वक्सेनोक्तेश्च अपरार्के चैवमेव। सहगमनं कलौ भवत्येव "कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते" इति ब्रह्मवैवर्तात् एतेन मरणान्तिकप्रायश्चित्तमपि व्याख्यातम् कार्शाखण्डादौ चातुर्वर्ण्यस्य तत्तुल्यागविधयश्च युगान्तरपरा एवं प्रयागेऽपि। अवैधात्मघाते तु "आत्मघातिनमुपक्रम्य" विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रियेति कू० पु० वचनात् नाशौचादि। तस्य च क्रियाकरणे चान्द्रायणद्वयसहित वर्षिवधप्रायश्चित्तं नारायणबलिं च कृत्वा वत्सरादूर्द्धं क्रिया कर्त्तुं शक्यते। वत्सरान्ते तु सर्वमौर्ध्वदेहिकं कुर्यात् इति हेमाद्रिप्रभृतयः। "गोब्राह्मणहतानाञ्च पतितानां तथैव च। ऊर्द्धं संवत्सरात् कुर्यात्सर्वमेवौर्ध्वदेहिकमिति हेमाद्रौ षट्त्रिंशन्मतात्, ब्राह्मे "क्रियते पतितानान्तु गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वान्नयाकूपे स्वबन्धुभिः मार्तण्डपादैमूले वाऽऽद्यं हरिहरौ स्मरन्" स्मृत्यर्थसारे इत्यर्थः तत्र वर्षमध्येऽपि कृत्यसमुच्चयमपरार्के वायुपुराणे "शुक्लपक्षे तु द्वादश्यां कुर्यात् आद्यन्तु वत्सरे। द्वादशाहनि वा कुर्याच्छुक्ले च प्रथमेऽहनि" छागलेयः "नारायणबलिः कार्योलोकगर्हाभयाद्वरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्व्यासः "नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते। तस्य शुद्धिकरं कर्म तद्भवेन्नैतदन्यथेति" सचात्मघातादिप्रायश्चित्तं कृत्वा कार्यः तदुक्तं हेमाद्रौ षट्त्रिंशन्मते "कृत्वा चान्द्रयणं पूर्वं क्रिया कार्या यथाविधि। नारायणबलिः कार्योलोकगर्हाभयाद्वरैः। पिण्डोदकक्रियाः पश्चाद्धोत्सर्गादिकं च यत्। एकोद्दिष्टानि कुर्वीत सपिण्डीकरणं तथा। इन्द्रियैरपरित्यक्ता ये च मूढाविषादिनः। घातयन्ति स्वमात्मानञ्चाण्डालादिहताश्च ये। तेषां सुताश्च पौत्राश्च दयया समभिप्लुताः यथा आद्यं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवम्" इति हेमाद्रौ तेनैवोक्तेश्च तत्रैव बौधायनोऽपि "अथ नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणिवा कुर्वीतेति" गृह्यपरिशिष्टे तु चण्डालादीत्याद्युक्त्वा "दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः। प्रायश्चित्तं तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयमित्युक्तम्। प्रमादमरणे तु नदोषः मदनरत्ने ब्राह्मे "प्रमादादपि निःशङ्कस्खड्गाद्यधिरोदितः चाण्डालैर्ब्राह्मणैश्चैरैर्निहतोयत्र कुत्रचित्। तस्य दाहादिकं कार्यं यस्याच्च पतितस्तु सः। चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये। यद्वा कृच्छ्रान् पञ्चदश कृत्वा

तु विधिना दहेत् "बुद्धिपूर्वकृतानां तु त्रिंशत्कृच्छ्रं समाचरेदित्युक्तम्" स्मृतिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वावांगयज्ञात्वं कार्यमित्युक्तम् आत्मनोघातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः । अर्वाक् संवत्सरात्कुर्याद्हनादि यथोदितम् कृत्वा नारायणबलिमनित्यत्वात्तदायुष इति" इदञ्चात्मवधनिमित्तं तत्तज्जातिवधप्रायश्चित्तेन समुच्चितं कार्य्यम् । प्रमादमरणे तु "अथ कश्चित् प्रमादेन त्रियेतान्गुरुदकादिभिः तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया" इत्युक्तेः सर्वं कार्य्यं तत्र तु "तोयाग्निरुपगोविप्रैरन्यत्रज्ञात्मघातिनाम्" याज्ञवल्क्येन सद्यःशौचं विहितं प्रायुक्तवचने त्वत्रहाशौचमिति तत्र त्वत्रहाशौचसद्यःशौचयोर्विकल्पइति भेदः। त्वत्रहाशौचमिति रघुनन्दनादयः । सद्यः शौचमिति मिताक्षरा । खलु आत्मघातकोऽप्यत्र त्रि० ।

आत्मघोष पु० आत्मानं घोषयति स्वशब्दैः । १काके, २कुक्कुटे, च, ताभ्यां हि (का का) (कु कु) स्वस्वध्वनिनैवात्मनामैकदेशो घोष्यते इति तयोस्तथात्वम् ।

आत्मज पु०आत्मनो मनसो देहाद्वा जायते, आत्मा वा जायते जन–ड । १मनोभवे २पुत्रे च "अङ्गादङ्गात् सम्भवति पुत्रवत् दुहिता ह्यसीति" स्मृतिः "आत्मा वै जायते पुत्र इति" श्रुतिः ३कन्यायां, ४मनोजन्यायां बुद्धौ च स्त्री । "चलिताः पुरःपतिसुपेत्युमात्मजाः" माघः वन्द्यं युगं चरणयोर्जनकात्मजायाः" रघुः । क्त । आत्मजातोऽप्यत्र पुंस्त्री० ।

आत्मजन्मन् पु०आत्मनो जन्म यस्य । अपत्ये "अत आहर्त्तुमिच्छामि पार्वतीमात्मजन्मने" कुमा० । "तमात्मजन्मानमजं चकार" रघुः । ष्टैत० । पुत्ररूपात्मोपत्तौ न० "तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" रघुः ।

आत्मज्ञान न० आत्मनोज्ञानम् । यथार्थरूपेणात्मनो ज्ञाने तज्ज्ञानस्य च मोक्षसाधनत्वं श्रुतावुक्तम् "अभयं वै जनक ! प्राप्तोऽसि येनात्मानमेवावेः?" "महान्तं विभुमात्मानं मत्वा धीरो न शोचति" श्रुतिः आत्मस्वरूपञ्च आत्मशब्दे वक्ष्यते तस्य इतरस्मात् भेदज्ञानं यथास्वरूपज्ञानञ्चात्मज्ञानम् तच्च साक्षात्काररूपम् तस्यैव मोक्षसाधनत्वात् "आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्" । "सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् । तद्ह्यग्र्यं सर्वविद्यानां प्राप्यतेऽमृतं ततः" इति च मनुः । ष्टैत० । आत्मबोधादयोऽप्यत्र ।

आत्मतत्त्व न० आत्मनस्तत्त्वम् । आत्मनो यथार्थस्वरूपे १चैतन्यरूपे मतभेदे२कर्त्तृत्वादिरूपे । आत्मतत्त्वं च उदयनाचार्यैः चार्वाकादिमतनिरसनेन आत्मतत्त्वविवेके दर्शितम् यथा "इह खलु निसर्गप्रतिकूलस्वभावं सर्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्वएव तद्धानोपायमविद्वांसोऽनुसरन्तः सर्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति न ततोऽन्यम्, प्रतियोग्यनुयोगितया आत्मैव तत्त्वतोज्ञेयः । तथाहि यदि नैरात्म्यं यदि वात्मास्ति वस्तुभूत उभयथापि नैसर्गिकमात्मज्ञानमतत्त्वज्ञानमेवेत्यत्राप्येकवाक्यतैव वादिनाम् अत आत्मतत्त्वं विविच्यते इत्यादिना, विस्तरस्तु तत्रैव अवगन्तव्यः आत्मैव तत्त्वं परमपदार्थः । २आत्मरूपे परमपदार्थे च ।

आत्मतुष्टि स्त्री० आत्मन्येव तुष्टिरस्य । आत्ममात्रज्ञानलाभेन १प्राप्ततुष्टौ आत्मज्ञे ब्रह्मविदि । ष्टैत० ।२आत्मनः सन्तोषे स्त्री । सा च विकल्पविषये धर्म्मे प्रमाणम् "वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति" मनूक्तेः । [घातिनि आत्मघातिशब्दे उदाहरणम्

आत्मत्यागिन् त्रि०आत्मानं देहं त्यजति त्यज घिनुण् । आत्म-

आत्मदर्श पु० आत्मा देहः दृश्यतेऽत्र दृश–आधारे घञ् । १दर्पणे आदर्शे हेम० । "प्रसादमाक्षीयमिवात्मदर्शः" रघुः । भावे घञ् ष्टैत० ।२आत्मनोदर्शने आत्मसाक्षात्कारे ।

आत्मदर्शन न०आत्मा दृश्यते साक्षात्क्रियतेऽनेन दृश–करणे ल्युट् ष्टैत० । आत्मसाक्षात्कारसाधने १श्रवणे २मनने ३निदिध्यासने, "आत्मा वा अरे द्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति श्रुतौ साक्षात्कारसाधनतया श्रवणादीनां त्रयाणां विधानात् तेषां तथात्वम् "श्रोतव्यः श्रुति वाक्येभ्योमन्तव्यश्चोपपत्तिभिः" इत्युपक्रम्य "एते दर्शनहेतव" इत्युक्तेश्च तेषां तथात्वम् भावे ल्युट् । २आत्मसाक्षात्कारे "एष वै परमोधर्म्मो यद्योगेनात्मदर्शनम्', ३आत्मत्वेन सर्वभूतेषु ज्ञाने च "स्वप्नालोकालब्धविगमः सर्वभूतात्मदर्शनम्" या० ।

आत्मद्रोहिन् त्रि०आत्मने द्रुह्यति द्रुह-णिनि । आत्मघातिनि

आत्मध्यान न० आत्मनोध्यानम् योगविशेषः । आत्मसाक्षात्कारसाधने मानसवृत्तिभेदे । तत्प्रकारश्च शङ्खस्मृतौदर्शितः "ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वशास्त्रयोगतः शुभम् । हृदिस्थादेवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः । हृदि ज्योतींषिभूयश्च हृदि सर्वं प्रतिष्ठितम् । स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् । ध्याननिर्मथनाभ्यास्तु विष्णुं पश्येद्धृदि स्थितम् । हृत्पद्मकर्णिकामध्ये सोममध्ये हुताशनः । तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितोऽच्युतः । अणो-

रणोयान् महतो महीयानात्मास्य जन्तोर्निहितोगुहायाम् । तेजोमयं पश्यति वीतशोकोधातुः प्रसादान्महिमानमात्मनः । वासुदेवात्मकोऽज्ञानां प्रत्यक्षोनैव जायते । अज्ञानपटसंवीतैरिन्द्रियैर्विषयेषुभिः । एष वै पुरुषोविष्णुर्व्यक्ताव्यक्तः सनातनः । एष धाता विधाता च पुराणोनिष्कलः शिवः । वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । मन्त्रैर्विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय । पृथिव्यापस्तथा तेजोवायुराकाशमेव च । पञ्चेभानि विजानीयान्महाभूतानि पण्डितः । चक्षुः श्रोत्रं स्पर्शनञ्च रसना घ्राणमेवच । बुद्धीन्द्रियाणि जानीयात् पञ्चेभानि शरीरके । शब्दोरूपं तथा स्पर्शोरसोगन्धस्तथैव च । इन्द्रियस्यान् विजानीयात् पञ्चैव विषयान् बुधः । हस्तौ पादावुपस्थञ्च गुदं पायुस्तथैव च । कर्मेन्द्रियाणि पञ्चैव नित्यं सन्ति शरीरके । मनोबुद्धिस्तथैवात्मा व्यक्ताव्यक्तं तथैव च । इन्द्रियेभ्यः पराण्याहु चत्वारि प्रवराणि च । तथात्मानं तद्व्यतीतं पुरुषं पञ्चविंशकम् । तन्तु ज्ञात्वा विमुच्यन्ते ये जनाः साधुदृष्टयः । इदन्तु परमं गुह्यमेतद्ब्रह्मसत्तमम् । अशब्दमरसस्पर्शमरूपं गन्धवर्जितम् । निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम् । विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । आराग्रशतभागाभः कल्पितस्तु सहस्रधा । तस्यापि शतभागाभाज्जीवः सूक्ष्मउदाहृतः । महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु तिष्ठत्यविरलः सदा । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" । जीवात्मपरमात्मानोरेकतया क्वचिदीश्वरधर्मेण क्वचिच्च जीवधर्मेण ध्यानमुच्यते । आत्मस्वरूपमुक्ता तस्य ध्यान प्रकारः या० स्मृतौ उक्तः यथा । "अनन्यविषयं ज्ञात्वा मनोबुद्धिस्मृतीन्द्रियम् । ध्येय आत्मा स्थितोयोऽसौ हृदये दीपवत् प्रभुः" "आत्मव्यतिरिक्तविषयेभ्यो मनोबुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्यात्मैकविषयाणि कृत्वात्मा ध्येयः योऽसौ प्रभुर्निर्वातस्थप्रदीपवद्देदीप्यमानो निष्प्रकम्पोहृदि तिष्ठति एतदेव तस्य ध्येयत्वं यच्चित्तवृत्तेर्बहिर्विषयावभासतिरस्कारेणात्मप्रवणतानाम मरावसम्भूतनिरुद्धप्रभाप्रतानप्रसरस्यैव प्रदीपस्यैकनिष्ठत्वम्" मिता० ।

आत्मन् पु० अत–मनिण् । १स्वरूपे, २यत्ने, ३देहे, ४मनसि, ५बुद्धिस्थे निजे, ६बुद्धौ, ७ऋक्षे, ८वह्नौ, ९वायौ, १०जीवे, ११ब्रह्मणि च । "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्" इति श्रुत्युक्तेः अहंप्रत्ययविषयत्वमात्मनः । अहं प्रत्ययविषयत्वे च ब्रह्मवादिविप्रतिपत्तयः या० भाष्येदर्शिताः । "देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताजना लौकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्येव चेतनान्यात्मेत्यपरे । मनइत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्त्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा सभोक्तृरित्यपरे । एवं हि बहवोविप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्तः" । विवृतञ्चैतत् विप्रतिपत्तिकारणसामान्यधर्मप्रदर्शनपुरःसरं विवरणोपन्यासे माधवाचार्येण "यथा रज्जुद्रव्यस्य दण्डसर्पधारादावनुद्भूतरूपेण प्रतीयमानत्वमेव सामान्यम् तथाऽऽत्मनः शरीरेन्द्रियमनोबुद्धिशून्यकर्तृभोक्तृसर्वज्ञब्रह्माख्यपदार्थेषु विप्रतिपत्तिस्थानेषु अनुद्भूतत्वेन प्रतीयमानत्वमेव सामान्यं भविष्यति प्रत्यक्षसिद्धेऽपि शरीराद्यर्थे प्रयुज्यमानस्यात्मवाचिनोऽहंशब्दस्य गोशब्दवदर्थविप्रतिपत्तिरुपपद्यते । गोशब्दस्य हि तत्तत्प्रसिद्धव्यक्त्याकृतिजातिक्रियागुणाद्यर्थेषु प्रयुज्यमानस्य जातिरर्थत्वेन वैदिकैः प्रतिपन्ना, व्यक्तिः सांख्यादिभिः, उभयं वैयाकरणैः, स्ववर्यवसस्थानाख्याकृतिरार्हतादिभिः । लिङ्गमपि नैयायिकाद्यैः । अथ गोशब्दप्रयोगे जात्यादीनामन्वयव्यतिरेकनियमात्तदर्थत्वशङ्का । तर्ह्यहंशब्दप्रयोगेऽपि शरीरादीनामन्वयव्यतिरेकनियमात्तदर्थत्वशङ्कास्तु । तत्र विचारविरहितं प्रत्यक्षमेव प्रमाणमाश्रित्य चेतयमानोऽहमात्मेति प्राकृताः शास्त्रसंस्कारवर्जिता जनाः प्रतिपन्नाः । तथा भूतचतुष्टयमात्रतत्त्ववादिनो लौकायतिकाश्च, मनुष्योऽहं जानामीति शरीरस्याहंप्रत्ययालम्बनत्वेन ज्ञानाश्रयत्वेन चावगम्यमानत्वात्तदेवात्मेति मन्यन्ते । अन्ये पुनरेवमाहुः सत्यपि शरीरे चक्षुरादिभिर्विना रूपादिज्ञानाभावादिन्द्रियाण्येव चेतनानि । न चेन्द्रियाणां करणतया ज्ञानाश्रयव्यतिरेकयोरन्यथासिद्धिः । करणत्वकल्पनादुपादानत्वकल्पनस्याभ्यर्हितत्वात् । अतः अन्धोऽहं काणोऽहं मूकोऽहमित्यहं प्रत्ययालम्बनानि चेतनानीन्द्रियाणि प्रत्येकमात्मत्वेनाभ्युपेयानि शरीरे त्वहंप्रत्ययालम्बनत्वं चेतनत्वञ्चात्मभूतेन्द्रियाश्रयत्वादन्यथासिद्धम् । नन्वेकस्मिन् शरीरे बहूनामिन्द्रियाणां चेतनत्वे यएवाहं पूर्वं रूपमद्राक्षं स एवेदानीं शब्दं शृणोमीति प्रत्यभिज्ञा न स्यात् ।

तथा भोक्तृत्वं रूपादिषु युगपदेव स्याद् क्रमेणेति चेत् नैवम् न हि चेतनैकत्वं प्रत्यभिज्ञाक्रमभोगयोर्निमित्तं किन्त्वेकशरीराश्रयत्वमेव। ततो यथैकस्मिन् गृहे बहूनां पुरुषाणामेकैकस्य विवाहेऽन्येषामुपसर्जनत्वं तथेन्द्रियात्मनामपि एकैकस्योपभोगकालेऽन्येषामुपसर्जनत्वम्। अन्ये तु मन्यन्ते स्वप्नेचक्षुराद्यभावेऽपि केवले मनसि विज्ञानाश्रयत्वमहंप्रत्ययालम्बनत्वं चोपपद्यते। न च रूपादिविज्ञानानां चक्षुराद्याश्रयत्वं, तथासति केवले मनसि रूपादिस्मृत्यनुपपत्तेः। ततः करणान्येव चक्षुरादीनि अहंप्रत्ययस्तु तत्र कर्तृत्वोपचारात् सिद्धति। न चानेकात्मकेकशरीराश्रयत्वमात्रेण प्रत्यभिज्ञा युज्यते एकप्रासादमाश्रितानामपि तत्प्रसङ्गात्। तस्माच्चक्षुरादिकरणकं शरीराद्याधारं मनएवात्मेति। विज्ञानवादिनस्तु क्षणिकविज्ञानव्यतिरिक्तवस्तुनः सङ्घातमनुभवविरुद्धम् मन्यानास्तस्यैव विज्ञानस्यात्मत्वमाहुः। प्रत्यभिज्ञानं तु ज्वालायामिव सन्ततिविज्ञानोदयसादृश्यादुपपद्यते विज्ञानानां हेतुफलसन्तानमात्रादेव कर्मज्ञानबन्धमोक्षादिसिद्धिः। माध्यमिकास्तु सुषुप्तौ विज्ञानस्याप्यदर्शनाच्छून्यमेवात्मतत्त्वमित्याहुः यदि सुषुप्तौ विज्ञानप्रवाहः स्यात्तदा विषयावभासोऽपि प्रसज्येत। निरालम्बनज्ञानायोगात् जाग्रत्स्वप्नज्ञानानामेव सालम्बनत्वं न सौषुप्तिकज्ञानानामिति चेत् न विशेषाभावात् विमतं सालम्बनम् प्रत्ययत्वात् संमतवदिति। अस्तितस्य सौषुप्तविषयस्मृत्यभावनियमान्न तत्र विषय इति चेत्। तर्हि तत्र नियमेनाक्षार्थमाणत्वादेव ज्ञानमपि मा भूत्। न च शून्ये विवदितव्यं यथा सविकल्पकः स्वविषयविपरीत निर्विकल्पकजन्यस्तथा सत्प्रत्ययोऽपि स्वविपरीतशून्यजन्य इत्यभ्युपेयत्वात् एवं चोत्थाने सति जायमानस्याहमश्रौषमिति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वायोगाच्छून्यमेव तत्त्वमिति। अपरे पुनः शरीरेन्द्रियमनोविज्ञानशून्यव्यतिरिक्तं स्थायिनं संसारिणं कर्तारं भोक्तारमात्मानमाहुः। न च शून्येऽहंप्रत्यय उपपद्यते बन्ध्यापुत्रादावपि तत्प्रसङ्गात्। नापि क्षणिकविज्ञाने क्रमभावी व्यवहारो युज्यते सर्वो हि लोकोऽनुकूलं वस्तु प्रथमतो जानाति ततः इच्छति ततः प्रयतते ततस्तत् प्राप्नोति ततः सुखं लभते। यद्येतादृशमेककर्तृकतया भाव्यमानं व्यवहारमेकसन्तानवर्त्तिनो बहव आत्मानः परस्परविज्ञानशिक्षा अपि निष्पादयन्ति तदा भिन्नसन्तानवर्त्तिनः किन्न निष्पादयेयुः। तस्मादहमेवाहमिदं वस्त्वज्ञासिषं सएवाहमिदानीमिच्छामीत्याद्यबाधितप्रत्यभिज्ञाननिर्वाहाय स्थायी आत्माभ्युपेयः। न चासौ विज्ञानरूपः अहंविज्ञानमित्येकत्वानुभवाभावात्। ममेदं विज्ञानमिति संबन्धोऽनुभूयते। नचायमनुभवोममात्मेतिवदौपचारिकः बाधकाभावात्। एतेन शरीरेन्द्रियमनसामात्मत्वं प्रत्युक्तम्। तत्रापि संबन्धतत्प्रत्ययस्यानिवार्यत्वात् अहमुल्लेखस्यात्माध्यासिकत्वात्। नचायमात्मा सादिः। शरीरोत्पत्तिसमनन्तरमेव सुखदुःखप्राप्तिमालोक्य तद्धेतुभूतयोः पुण्यपापयोः कर्त्ता पूर्वमभूदित्यनुमानात्। नचायमनित्यः विनाशानिरूपणात्। न तावत् स्वतोऽविनाशः निर्हेतुकविनाशस्यातिप्रसंङ्गतः सुगतेतरैरनङ्गीकारात्। नापि परतः। निरवयवस्य विनाशहेतुसंसर्गासंभवात् संभवे वा न विनाशः सिद्धेत्। कर्मनिमित्तोऽन्यस्य संसर्गः स च तत्कर्मफलोपभोगायात्मनोऽवस्थितिमेव साधयेन्न विनाशं तस्मादनादेरविनाशिनोऽनन्तरेषु यातायातरूपः संसारः सिद्धः। निष्क्रियस्य भोगासंभवाद्विक्रियस्य क्रियाफलरूपस्याभ्युपगमे क्रियावेशात्मकं कर्तृत्वमनिवार्यम्। भोक्तृत्वमप्यनुभूयमानं शरीरादिषु विज्ञानपर्यन्तेषु अनुपपन्नत्वादुक्तात्मन्येव पर्यवस्यति। तथा हि। शरीरं तावत् पञ्चभूतसंघातरूपम् "पञ्चभूतात्मके तनुशरीरे पञ्चताङ्गते" इत्यादिशास्त्रात्। यत्तु नैयायिका मन्यन्ते मूलोकवासिनां शरीरं पार्थिवमेव तत्र क्लेदनाद्युपलब्धिरन्नादाविव भूतान्तरोपष्टम्भादिति। तदसत्। शोषणादिना जलाद्यपगमेऽपि यथा वस्त्रादिस्वरूपस्य नापचयः। तथा क्लेदनपाचनव्यूहनाद्यकायानामपगमेऽपि शरीरस्यापचयाभावप्रसङ्गात्। यच्च वैशेषिकैरुच्यते पञ्चभूतात्मके शरीरस्याप्रत्यक्षत्वप्रसङ्गः वायुकाशयोरप्रत्यक्षतया प्रत्यक्षाप्रत्यक्षवृत्तित्वादिति तदप्ययुक्तम्। तथासति सर्वावयविनामप्रत्यक्षत्वापातात्तेषां प्रत्यक्षाप्रत्यक्षावयवदर्शनत्वात्। न हि स्थूलस्याः परभागस्थितास्तावयविनोऽवयवाः प्रत्यक्षीकर्तुं शक्यन्ते। तस्मात्सूक्ष्मसंघातः शरीरम्। न च गन्धादिमतां तद्रहितानाञ्च भूतानामेककार्यजनकत्वं परस्परविरोधादिति वाच्यम् तथा सति नीलादीनामेकावयविजनकत्वस्यैकचित्ररूपारम्भकत्वस्य चासम्भवप्रसङ्गात्। अनुभवबलादेव तत्र तथा स्वीकारे प्रकृते पि न तद्व्यवस्थापितम्। तत्र शरीरस्य भोक्तृतां यदन्ये लौकायतिकाः प्रतिपन्नाः किं व्यक्तानां भूतानां प्रत्येकं भोक्तृत्वमुत समु-

स्थानाम्, आद्योऽपि न तावद्युगपत् सर्वेषामभोक्तृता। तदा-स्वार्थप्रवृत्तानां तेषाम् अन्योऽन्यमङ्गाङ्गिभावानुपपत्तौ संघातापत्त्यभावप्रसङ्गात्। अन्तरेणैव संघातमभोक्तृत्वे देहा-द्बहिरप्येकैकस्य भूतस्य भोक्तृत्वोपलब्धेत। नापि क्रमेण तेषां भोक्तृत्वं संघातानुपपत्तितादवस्थ्यात्। न च वर-विवाहन्यायेन गुणप्रधानभावेन तदुपपत्तिः, वैषम्यात्। य-थैकैकवरस्यासाधारणत्वेनैकैका कन्या भोग्या न तथा चतुर्णां पृथिव्यप्तेजोवायूनां भोक्तृणां रूपरसगन्धस्पर्शा भोग्या व्यव-स्थिताः। कथं क्रमभोगः। अथ कथञ्चित् व्यवतिष्ठेरन्। तदा युगपत्सर्वविषयसन्निधाने सति क्रमानुपपत्तिः। यथैकस्मिन् मूहूर्त्ते प्रत्येक भोग्यकन्यावस्तुनि सन्निहिते वराणां क्रम-विवाहेगुणप्रधानतया संघातोवा नास्ति तद्वत्। नापि स-मस्तानां भोक्तृत्वसम्भवः। प्रत्येकमविद्यमानस्य चैतन्यस्य संघातेऽप्यभावाद्भोगानुपपत्तेः। अथ मन्यसेऽग्नौ प्रक्षिप्तेषु तिलेषूकैकस्य ज्वालाजनकत्वाभावेऽपि तिलसमूहस्य यथा-तज्जनकत्वं तथा संघातस्यैव चैतन्यं स्यादिति तदपि संपा-तापत्तौ हेतुर्वक्तव्यः। आगमिभोगो हेतुरिति चेन्न यदि तावद्भोगस्य गुणभावः तदा प्रधानभूतानामन्योऽ-न्यं गुणप्रधानभावरहितानां कथं संघातापत्तिः प्राधान्यं तु भोगस्यानुपपन्नम् भोक्तृशेषत्वात्। नच वाच्यं शे-षिणं भोगं प्रति शेषभूतयोः स्त्रीपुंशरीरयोः भोक्तोः स घातापत्तिर्दृष्टेति, तत्रापि शरीरे भोक्तृत्वासंप्रतिपत्तेः। ज्वालां प्रति तिलानां संघातापत्तिरिति योऽयं दृष्टान्तः सोऽ-पि तवासिद्धः संघातानिरूपणात्। न तावत् संघातोनाम भोग्यभोगिनोर्वनवदेकदेशतामात्रम् तथा सति तेन न्या-येन व्यापिनां भूतानां सर्वत्र सत्त्वाच्चैतन्यभोगयोः सार्व-त्रिकत्वप्रसङ्गात्। नापि तदारब्धोऽवयवी संघातः तस्य भूते-भ्योभेदे पञ्चभूतत्वाभ्युपगमप्रसङ्गात्। अभेदे भूतमात्रतया संघातत्वासम्भवात्। भेदाभेदयोश्चानङ्गीकरणात्। अथावय-विनः पारतन्त्र्याच्च पञ्चभूतत्वापत्तिस्तर्हि जलादेः पृथि-व्यादितन्त्रत्वाच्च तत्त्ववत्वप्रसक्तिरपि सिध्येत्। न चैकद्रव्यबुद्धा-वन्वयोग्यतापत्तिः संघातः, वस्तुतो ऽनेकेष्वेकत्वबु-द्धेर्विभ्रममात्रत्वात्। न चैकार्थक्रियायां युगपदन्वयः संघातः, तदानीं काष्ठान्वयेन वह्निना वायुसमवेते जले-माध्यमाने सति तत्र भूतचतुष्टयसंघाताद्भोगप्रसङ्गात्। नचान्वयःपिण्डवत्संश्लेषः संघातः, शरीरे वायोस्तथा श्लेषाभावात्। वह्निव्याप्तेनायःपिण्डेन सन्तापितजले वायुसंयुक्ते भोगप्रसङ्गात्। न चोक्तदोषपरि-हारायैकस्यैव भूतस्य भोक्तृत्वनियतिः शङ्कनीया सर्वसन्निधानात् कस्य भोक्तृत्वमित्यनिर्द्धारणात्। यत्तु लोकायतैकदेशिनां मतद्वयम् इन्द्रियाणां भोक्तृत्वम्। शरीरेन्द्रियसङ्घातस्य च भोक्तृत्वमिति। तदुक्तन्यायेन निराकरणीयम्। ननु कानि पुनरिन्द्रियाणि येषां भोक्तृत्वं निराक्रियते। तत्र गोलकमात्राणीति सुगतः। तच्छक्तय इति मीमांसकाः। तद्व्यतिरिक्तानि द्रव्यान्तरा-णीत्यन्ये सर्वे वादिनः। तत्र न तावत् गोलकमात्रत्वं युक्तं कर्णशष्कुल्यादिविरहिणामपि सर्पादीनां शब्दादुपलब्धि-सद्भावात् इष्टाणां सर्वगोलकरहितानां विषयोपलम्भ-सत्त्वाच्च "तस्मात्पश्यन्ति पादपा" इत्यादि शास्त्रात्। न च इष्टाणामचेतनत्वं हिंसाप्रतिषेधेन प्राणित्वावगमात् एवं गोलकशक्तित्वमिन्द्रियाणाम् न। अथ मन्यसे शक्तिमद्द्रव्यान्तरकल्पनात् प्रतिपन्नस्थानेषु शक्तिमात्रकल्प-ने लाघवमिति। तर्ह्यत्यन्तलाघवादात्मन एव क्रमकारिस-र्वविज्ञानसामर्थ्यं कल्प्यतां किमेभिरिन्द्रियैः। न च सर्व-गतस्यात्मनो गोलकप्रदेशेष्वेव ज्ञानपरिणामोऽनुपपन्नः, त्वया तस्यैव शरीरप्रदेशमात्रे ज्ञानपरिणामाङ्गीकारात्। एवं चानिन्द्रियेष्वपि गोलकप्रदेशेषु ज्ञानान्वयव्यति-रेकौ शरीरएवान्यथासिद्धौ। अतो मीमांसकमतमनु-पपन्नम्। सन्तु तर्हि द्रव्यान्तराण्येन्द्रियाणि तानि गोलके विशेषसंबन्धाच्चक्षुरादिशब्दवाच्यानीति। तदप्ययुक्तम्। तेषु प्रमाणाभावात्। विमताः रूपाद्युपलब्धयः करण पूर्विकाः कर्तृव्यापारत्वाच्छिदिक्रियावदिति चेत् करण प्रेरणालक्षणे कर्तृव्यापारे करणान्तराभावात् अन्यथाऽन वस्थानात्। "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि" चे-त्यागमगम्यानीन्द्रियाणीति चेत् न आगमसंस्कारविरहि-णामपीन्द्रियप्रतिपत्तेः। न च मनोवत्साक्षिवेद्यानीन्द्रि-याणि, रूपादिज्ञानाख्यं लिङ्गमनपेक्ष्य साक्षिमात्रेण चक्षु-रादीनां प्रतिपत्तेरभावात्। तस्माच्च सन्त्येवेन्द्रियाणीति। अत्रोच्यते। गोलकव्यतिरिक्तानीन्द्रियाणि आगमादेवाव-गम्यन्ते। न हि तत्संस्काररहितास्तानि जानन्ति किन्तु गोलकाश्रयेव। यत्तु तेषामिन्द्रियाणामहङ्कारकार्यत्वं सा-ङ्ख्यैरुच्यते। तत्र किमध्यात्माहङ्कारः कारणं किं वा कृत्स्नकार्यव्यापिनी काचिदहङ्काराख्या प्रकृतिः, उभयत्रा-पि नास्ति किमपि मानम्। अथ द्वितीयपक्षे नानापुराण वचनानि मानन्तच्च श्रुतिविरोधात्। "अन्नमयं हि सौम्य-मन आपोमयः प्राणस्तेजोमयी वागित्यादि" श्रुतौ

भूतविकारत्वावगमात्। अतः पुराणवचनानीन्द्रियाणामहङ्काराधीनतामात्रं प्रतिपादयन्ति। यत्तु शुष्कतार्किकैः भौतिकत्वमिन्द्रियाणामुक्तम्। तदप्ययुक्तम्। तेषामानुमानिकत्वात्। इन्द्रियाणि भौतिकानि सावयवत्वात् घटादिवत् सावयवत्वं च मध्यमपरिमाणत्वादितिचेत् न, इन्द्रियाणामणुपरिमाणत्वेऽपि बाधाभावात् हेत्वसिद्धेः विषयावभासस्याप्यणुत्वप्रसङ्गोबाध इति चेत् न तन्मनेऽप्यणुपरिमाणेनापि मनसा विस्तृतात्मादिवस्तुदर्शनसङ्गावात्। चक्षुः रूपगुणवत्प्रकृतिकं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् यस्य यस्येयमेवावभासकं तत्तद्गुणवत्प्रकृतिकं यथा रूपाभिव्यञ्जकरूपवत्प्रकृतिकोदीपः एवमन्यत्राप्यूहनीयमिति चेत् न शब्दस्यैवाभिव्यञ्जके श्रोत्रे शब्दगुणवदाकाशानारब्धेऽनैकान्तिकत्वात् कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य त्वया श्रोत्रत्वाभ्युपगमात् विशेषव्याप्तौ चानैकान्तिकत्वमिति चेत्। एवमप्यतिप्रसङ्गोदुर्वारः। रूपादिवत्तदभिव्यञ्जकस्य मनसोभूतचतुष्टयारब्धत्वस्य दुःसाध्यत्वात्। अभूतसाध्यात्मादेर्व्याप्यकतया मनोभूतारभ्यमिति चेत् तर्हि संख्यापरिमाणादेरपि व्याप्यकतया चक्षुरादीनां भूतारभ्यत्वं न स्यात् असाधारणविषयारभ्यत्वाङ्गीकारे सति भौतिकत्वसिद्धिरिति चेत् तर्हि मनोऽप्यसाधारणविषयेणारभ्येत एकद्रव्यस्यात्मनः सावयवद्रव्यानारम्भकत्वे निरवयवं मनोद्रव्यं प्रत्यारम्भकत्वं किन्न स्यात्। तस्मान्न शुष्कतर्कादिन्द्रियाणां भौतिकत्वसिद्धिः किन्तु आगमादेव। तानि पुनरिन्द्रियाणि सर्वगतानीति योगाः प्रतिपेदिरे तदपि मानहीनम्। आक्षेन्द्रियमनांसि सर्वगतानि सर्वत्रदृष्टकार्यत्वात् आकाशवत्त्ववत् दृश्यते हि ज्ञानं तत्कार्यं च सर्वत्रेति चेत् न सर्वत्रेत्यनेन अत्यन्तजगद्व्याप्तावसिद्धिप्रसङ्गात्। यत्र शरीरं तत्र सर्वत्रेति विवक्षायां शरीर एवानैकान्तिकत्वात्। दृश्यते हि यत्र क्वचित् शरीरं तत्र शरीरकार्यं न च शरीरस्य सर्वगतत्वमस्ति। अथेन्द्रियाणि सर्वगतानि शरीरोपाधिकगमनत्वात् आकाशवत्। यथाऽऽकाशस्य गमनं घटाद्युपाधिकं तथेन्द्रियाणां गमनं शरीरोपाधिकमिति चेत् न शरीरावयवेष्वनैकान्तिकत्वात्। प्राणोपाधिकं हि तेषां गमनम्। किं च इन्द्रियाणां सर्वगतत्वे युगपत्सर्वविषयोपलब्धिः स्यात्। शरीर एव क्वचिदाभाव दोष इति चेत् तर्हि बहिरिन्द्रियचक्षुरवच्छेदना न प्रमाणं प्रयोजनवती च। तस्मादसर्वगतानीन्द्रियाणि। चक्षुस्तेजःप्राप्यकारीणीति श्रुतयः कल्पयन्ति तदप्ययुक्तम्। तत्र किं चक्षुःश्रोत्रयोरप्राप्यकारित्वम् उत तदितरेषामपि न तावदितरेषां दूरत एव स्पर्शरसगन्धोपलब्धिप्रसङ्गात् नापि प्रथमः विमतं चक्षुःश्रोत्रे प्राप्यकारिणी बाह्येन्द्रियत्वात् घ्राणादिवत्। तेजस्त्वातिदूरक्षीप्रगमनदर्शनात् उन्मीलन मात्रेण चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा शब्दस्य च वीचिसन्तानवत् परम्परया श्रोत्रसमवायप्राप्तिरिति" यत्तार्किकैरुच्यते। तदसत् तथा सति इह श्रोत्रे शब्द इति प्रतीयेत प्रतीयते तु तत्र शब्द इति। तस्माद्यथानुभवं श्रोत्रस्यैव तत्र गमनं कल्पनीयम्। तदेवं भौतिकानि परिच्छिन्नानि प्राप्यकारीण्यिन्द्रियाणि सन्तीति सिद्धम्। किं तर्हि मनोनाम यस्मिन्नात्मत्वमपरे स्वीकायतिकैकदेशिनोमन्यन्ते। नित्यं निरवयवमणुपरिमाणं मन इति तार्किकाः। तत्र न तावन्नित्यं परिच्छिन्नत्वात् घटवत्। विमतं नित्यं निरवयवद्रव्यत्वात् आत्मवदिति चेत् न हेत्वसिद्धेः। विमतं सावयवकरणत्वाच्चक्षुरादिवत्। अन्यथा मनसोऽनुभवस्मृत्युत्पत्तिर्न बाध्येत। कथं तर्हि मूर्त्तद्रव्यानभिघात इति चेत् जीवनदशाया देहाद्बहिर्निर्गमनाभावादिति ब्रूमः। मरणदशायां तु सावयवत्वेनाभिमतानां चक्षुरादीनामप्यभिघातोविद्यत एव। अतएव सावयवत्वात् संयोगवत्त्वाच्च घटादिवदणुपरिमाणत्वम् सर्वगतत्वेच युगपत् सर्वेन्द्रियसंयोगात् सर्वज्ञानप्रसङ्गः। मध्यमपरिमाणत्वे तु न कोऽपि दोषः। स्थूलसूक्ष्मेषु हस्तिपुत्तिकादिदेहेषु क्रमेण प्राप्यमाणेषु कथं तद्देहसमानत्वेन वृत्तिरिति चेत् अवयवोपचयापचयाभ्यामिति ब्रूमः। वाक्यास्तु समनन्तरप्रत्ययएवोत्तरज्ञानकारणतया मन इति प्रतिपेदिरे तच्च सङ्गतं व्याप्तिस्मरणेच्छाकेवलस्य पूर्वज्ञानस्योत्तरज्ञानजनकत्वायोगात् लिङ्गज्ञानस्य व्याप्तिस्मरणेच्छासहितस्यैव लिङ्गिज्ञानजनकत्वदर्शनात्। शब्दज्ञानं व्याप्तिज्ञानमनपेक्षौवार्थज्ञानजनकमिति चेत् न तत्रापि शब्दस्यानुमानान्तःपातितयात्वापि व्याप्त्यपेक्षत्वात्। विशेषणज्ञानं व्याप्त्यनपेक्षमेव विशिष्टज्ञानजनकमिति चेत् न विशिष्टज्ञानस्य संसर्गजन्यत्वात्। अथ समनन्तरातीतप्रत्ययः उत्तरज्ञानं न जनयति किं तु तदाकारमात्रं समर्पयतीति चेत् न आकाराकारिणोरभेदात्। आकारस्य स्वाभाविकतयाऽन्यापेक्षितया ऽन्यापेक्षाभावात्। तस्मादन्यदेव सावयवं मन इति सिद्धम्। ननु कस्यायं वास्तव आत्मा योदेहादिषु विज्ञानान्तेषु आत्मेत्यादिभिरारोप्यते। तत्र सर्वगतोऽयं जीव आकाशेति केचित् तदसत्। शुष्कतार्किकाणां साधकाभावात्। अथ मतं देहाद्बहि-

रन्तः सर्वाणि भोगसाधनान्यात्मभोगायैव व्याप्रियन्ते तद्व्यापारस्वादृष्टवदात्मसंयोगापेक्षः । अतोऽसौ सर्वगत इति । तत्र किं यस्मिन्नात्मप्रदेशेऽदृष्टं तत्प्रदेशसंयोगोऽपेक्ष्यते उता दृष्टोपलक्षितात्मसंयोगः । नाद्यः । देहावच्छिन्नात्मसमवेतादृष्टस्य स्वर्गभोगाहेतुत्वात् । न द्वितीयः मोक्षेऽपि भोगप्रसङ्गात् । तस्मादागमादेव सर्वगतत्वसिद्धिः । नचायमात्मा जड़ः प्रत्यक्षानुमानागमैः स्वप्रकाशत्वावगमात् । तत्र प्रत्यक्षं सौषुप्तमवगन्तव्यम् । अनुमानान्यपि आत्मा स्वप्रकाशः स्वसत्तायां प्रकाशव्यतिरेकरहितत्वात् प्रदीपवत् संवेदनवच्च तथा विषयप्रकाशकर्तृत्वात् प्रदीपवत्, विषयप्रकाशान्यत्वादालोकवत् । अनिन्द्रियगोचरत्वे सति अपरोक्षत्वात् संवेदनवत् । अयमात्मा सति धर्मिणि अजन्यप्रकाशगुण प्रकाशगुणत्वादादित्यवत् । आगमश्चात्र "अयं पुरुषः स्वयंज्योतिरित्यादिः । सचायमात्मा सर्वशरीरेष्वेक एव सर्वत्राहमित्येकाकारप्रत्ययवेदनीयत्वात् गोत्ववत् । शरीराणां भिन्नत्वादेवातीतशरीरादाविव न भोगानुसन्धानप्रसङ्गः । ननु तर्ह्यस्मिन्नपि मनुष्यशरीरस्य प्रतिक्षणं परिणामभेदे सत्यत्वापि आत्मनोभोगानुसन्धानं प्रसज्येतेति चेत् न तदेवेदं शरीरमिति प्रत्यभिज्ञया सदेकत्वावगमात् । न च ज्वालाप्रत्यभिज्ञावद्भ्रान्तत्वम् तत्र सूक्ष्मदर्शनेन प्रत्यक्षत एव ज्वालानां भेददर्शनात् अत्र तदभावात् । तदेवमेकः स्वप्रकाश आत्मेति सिद्धम् । तमेतमात्मतत्त्वमवैदिका देहादिवुद्ध्यन्तपदार्थरूपत्वेन प्रतिपन्नाः मीमांसकादयस्तु तस्य देहादिव्यतिरेकं प्रतिपद्यापि कर्त्तारमेवभोक्तारमिच्छन्ति । तदेतत् सांख्या न सहन्ते । न तावदात्मनः कर्तृत्वं स्वाभाविकम् सर्वगतस्य निरवयवस्यात्मनः परिस्पन्दपरिणामलक्षणक्रियावेशायोगात् । स्वाभाविकत्वे चैतन्यवत् क्रियावेशो न कदाचिदपि व्यभिचरेत् । नापि कर्तृत्वमागन्तुकं निरवयवे कर्तृत्वहेतूपरागायोगात् । नापि बुद्धेः कर्तृत्वमात्मन्यारोपयितुं शक्यं अख्यातिवादे भ्रान्त्यभावात् । तस्मान्नास्ति कर्तृत्वम् । न चैवं भोक्तृत्वमपाकर्तुं शक्यम् । न हि सुखदुःखान्वयोभोगः येन कर्तृत्ववत् व्यभिचरेत् । किन्तु चिद्रूपत्वेन दृश्यसाक्षित्वम् । तस्माद्भोक्तैवात्मेति सांख्यानां पक्षः । वैशेषिकयोगनैयायिकाः उक्ताद्भोक्तुर्जीवादतिरिक्तः सर्वज्ञः सर्वशक्तिः ईश्वरः कश्चिदस्तीत्यनुमिमते । विमतं जगत् स्वरूपोपादानाद्यभिन्नकर्तृकं विविधकार्यत्वात् प्रासादादिवत् तत्र कल्पनालाघवेनैककर्तृत्वोपादानात् सर्वज्ञत्वादिसिद्धिरिति वैशेषिकाः । विमताः ज्ञानैश्वर्यशक्तयः क्वचित् पराकाष्ठाप्राप्ताः सातिशयत्वात् परिमाणवदिति योगाः । विमतं धर्माधर्मफलं कर्म तत्फलभोक्राद्यभिन्नेन दीयते व्यवहितकर्मफलत्वात् सेवाफलवदिति नैयायिकाः । नन्वीश्वर पक्षोपन्यासो न युक्तः यतोऽत्र जिज्ञास्ये प्रत्यगात्मरूपे ब्रह्मणि विप्रतिपत्तिर्दर्शयितुं प्रक्रान्ता, नैषदोषः प्रत्यगात्मा तस्मादीश्वरादन्योऽनन्योवेति प्रत्यगात्मविप्रतिपत्तावेव पर्य्यवसानात्" इत्यन्तेन । प्रपञ्चस्तु चार्वाकादिशब्दे वक्ष्यते । भाषापरिच्छेदे मुक्तावल्यात्मनिरूपणायेत्यमभ्यधायि "आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् । शरीरस्य न चैतन्यं स्मृतेषु व्यभिचारतः । तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः । मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् । धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः । प्रवृत्त्याद्यनुमेयोऽयं रथस्येव सारथिः । अहङ्कारास्पदमयोऽयं मनोमात्रस्य गोचरः । विभुर्बुद्ध्यादिगुणवान्" भाषा० । "आत्मानं निरूपयति आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति ईश्वरेऽपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात् । परे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दृश्यमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादिति वदन्ति । इन्द्रियादीति । इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः । यद्यप्यात्मनि "अहं जाने अहं सुखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इतः प्रमाणं दर्शयति करणमिति । कुठारादीनां छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्त्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्त्ता कल्प्यते । ननु शरीरस्यैव कर्तृत्वमस्तु अत आह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां तन्नत एव मृतशरीराणामपि तदभावे का स्मृतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्मारिते स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैस्तत्तादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उपपद्यत इति

वाच्यम् अनन्तसंस्कारकल्पने गौरवात् एवं शरीरस्य चैतन्ये बालकस्य स्तनपानादौ प्रवृत्तिर्न स्यात् दृष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनतास्मारकाभावात् मन्यते जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम् उद्बोधकाभावात् अत्र त्वन्मतया जीवनादृष्टमेवोद्बोधकं कल्प्यते इत्यत्र संस्कारस्यानादितया आत्मनोऽपि अनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं सिध्यतीति बोध्यम्। ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह तथात्वमिति चैतन्यमित्यर्थः उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव, कथमिति ? पूर्वं चक्षुषा साक्षात्कृतानाच्चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितृरभावात् अन्यदृष्टस्य अन्येन स्मरणासम्भवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः। ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यात् अत आह मनोऽपीति न तथा न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसो ज्ञानसुखादिमत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः यथा मनसोऽणुत्वं तथा वक्ष्यते। नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वं ज्ञानसुखादिकन्तु तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्तावालयविज्ञानद्वारा निराबाधैव दृगभदवासनाया वसनइव पूर्वं पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न तस्य जगद्विषयत्वे सार्वज्ञ्यापत्तेः यत्किञ्चिद्विषयत्वे विविगमनाभावात् सुषुप्तावपि विषयावभासप्रसङ्गः। तदानीं निराकारा चित्सन्ततिरनुवर्त्तत इति चेन्न तस्य स्वप्रकाशत्वे प्रमाणाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टापत्तिः विज्ञानव्यतिरिक्तवस्त्वभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानाच्चेन्न समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्, अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानेकक्षणसमावेशात् क्रमेणापि विरोधस्यैव दुरुपपत्तेश्च। न च वासनासंक्रमः सम्भवति मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात् न च उपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात्। उत्तरक्षणोत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात्। उत्तरविज्ञानस्यैव उत्पादकत्वे तदानन्त्यप्रसङ्गः। क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च। एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं गौरवादतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानादेवोपपत्तेः कुर्व्द्रूपत्वाकल्पनाच्च अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा "अविनाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतेरिति चेन्न तस्य विषयाभासम्भाग दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्यानुभवात्। अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धम्। सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धौ श्रुतरामीश्वरभेदः, अन्यथा बन्धमोक्षानुपपत्तेः, योऽपीश्वराभेदबोधकोपेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावने च यतितव्यमिति पदति। अतएव "सर्व एव आत्मनि समर्पिता" इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायते इत्यपि न, भेदस्य नित्यत्वे नाशायोगात् भेदनाशेऽपि व्यक्तित्वं स्वाश्रयत्वेन। न च द्वित्वमपि नश्यतीति वाच्यं तत्र निर्द्वन्द्वके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेऽपि द्वयात्मकौ तावितिसुवचत्वात् मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यतां प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति संपदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत्। अतएव "निरञ्जनः परमं साम्यमुपैति दिव्यमिति" श्रूयते ईश्वरो न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः" इत्यनुरोधात् आनन्दम् इत्यस्यापि आनन्दवदित्यर्थः अर्श आदित्वान्मत्वर्थीयाच्प्रत्ययात्, अन्यथा नुंसिकत्वापत्तेः आनन्दोऽपि दुःखाभावे उपचर्यते भारावपगमे सुखी संवृत्तोऽहमितिवत् दुःखाभावेन सुखित्वप्रत्ययात्। अस्तु वा तत्रिज्ञानन्दो न त्वसौ, आनन्दम् इत्यत्र मत्वर्थीयप्रत्ययविरोधात्। "आनन्दं ब्रह्मणो विद्वान्

भिमेति वदाचन" इत्यत्र भेदस्य स्पष्टत्वाच्चेति संक्षेपः । एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम् । बुद्धिश्च प्रकृतेः प्रथमः परिणामः । सैव महत्तत्त्वमन्तःकरणमप्युच्यते । तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ । तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः । पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव सुखोपरागः । इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा । कर्त्तव्यमिति व्यापारावेशः । तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव सुखस्योपलब्धिरुच्यते । ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव । श्रुतिसामानाधिकरण्येन प्रतीतेः । न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमप्यसम् । ज्ञत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः । बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् ज्ञत्यंशे किं नेष्यते । अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्व्वमसंसारापत्तिः । अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्तुर्जन्यत्वे मानाभावात् । "वीतरागजन्मादर्शनात्" अनादित्वम् । अनादेर्नाशासम्भवान्नित्यत्वम् । तत् किं प्रकृत्यादिकल्पनेन । न च "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इत्यनेन विरोध इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैः इच्छादिभिः कर्त्राहं कर्त्ताहमेव इत्यस्य तदर्थत्वात् "तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः । धर्माधर्माश्रयः इति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तिः । विशेषगुणयोगत इति । योग्यविशेषगुणसम्बन्धेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्यादि प्रतीतेः । प्रवर्त्तनेति । अयमात्मा परदेहादौ प्रवर्त्त्यादिनाऽनुमीयते । प्रवर्त्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः । तत्र दृष्टान्तमाह । रथेति यद्यपि रथकर्म्म चेष्टा न भवति तथापि तेन कर्म्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्म्मणा परात्मापीति भावः । अहङ्कारस्येति । अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति । मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् । विभुरिति । विभुत्वं परममहत्त्वं तच्च पूर्व्वोक्तमपि स्पष्टार्थमुक्तम् । बुद्ध्यादीति बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्व्वोक्ता वेदितव्याः" । ते च "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" इत्युक्ताः बुद्धिः सुखं दुःखमिच्छाद्वेषः यत्नःसंख्या परिमाणं पृथक्त्वं संयोगः विभागः भावनाख्यसंस्कारः धर्मः अधर्मश्चेति । एते च गुणा मनस एवेति सांख्यादयः । "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मनएवेति" श्रुतेः कामादीनां मनोधर्मत्वावगमात् तथा ६४२पृष्ठे आज्ञानशब्दोदिता अपि । मिता० "किं पुनर्वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाणमित्याशङ्क्याह । "महाभूतानि सत्यानि यथात्मापि तथैव हि । कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति । वाचं ना कोविजानाति पुनः संश्रुत्य संश्रुताम्" या०स्मृ० । "यथा हि पृथिव्यादिमहाभूतानि सत्यानि प्रमाणप्राप्तत्वात्तथात्मापि सत्यः, अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तोज्ञाता ध्रुवो न, तर्ह्येकेन चक्षुरिन्द्रियेण दृष्टं वस्त्वन्येन स्पर्शनेन्द्रियेण को विजानाति । यमहमद्राक्षन्तमहं स्पृशामीति । तथा कस्यचित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणां वाचन्तस्य वागियमिति कः प्रत्यभिजानाति तस्मात् ज्ञानेन्द्रियाद्यतिरिक्तो ज्ञाता ध्रुव इति सिद्धम् किञ्च ! "अतीतार्था स्मृतिः कस्य कोवा स्वप्नस्य कारकः । जातिरूपवयोदृष्टविद्यादिभिरहंकृतः । शब्दादिविषयोद्योगङ्कर्म्मणा मनसा गिरा" या० । "यद्यात्मा ध्रुवो न स्यात्तर्ह्यनुभूतार्थगोचरा स्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबन्धना कस्य भवेत्, नह्यन्येन दृष्टे वस्तुन्यन्यस्य स्मृतिरुपपद्यते । तथा कः स्वप्नज्ञानस्य कारकः । नहीन्द्रियाणामुपरतव्यापाराणामन्तःकारकत्वम् । तथाहमेवाभिजनवत्वादि सम्बन्ध इत्येवंविधानुसन्धानप्रत्ययःकस्य भवति स्थिरात्मव्यतिरिक्तस्य" तथा शब्दस्पर्शादिविषयोपभोगसिद्ध्यर्थमुद्योगं मनोवाक्कायैः कःकुर्यात्तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा-

स्थिरः" इत्यन्तेन आत्मविवेके च उदयनाचार्यैः अहमिति प्रत्यक्षविषयत्वमादौ आत्मनोव्यवस्थाप्य देहाद्यतिरिक्तविषयत्वं तत्प्रत्ययस्य व्यवस्थापितं यथा ।

"अथात्मसद्भावे किंप्रमाणं प्रत्यक्षमेव तावत् अहमिति वि. कल्पस्य प्राणभृन्मात्रसिद्धत्वात् । नचायमवस्तुकः सन्दिग्धवस्तुको वा, अशब्दत्वादप्रतिपत्तेश्च न च लैङ्गिकः, अननुसंहितलिङ्गस्यापि संप्रत्ययात् । नच स्मृतिरियम्, अननुभूते तदनुपपत्तेः । अनादिवासनावशादनादिरयमवस्तुकोविकल्पइत्यपि न युक्तं, नीलादिविकल्पसाधारण्यात् । इह वासनानुपादायानाश्वासे प्रमाणान्तरेऽपि कः समाश्वासः, यतो नीलादिविकल्पेषु समाश्वासःस्यात् । तस्माद्वासनामात्रवादं विहायागन्तुकमपि किंचित् कारणं वाच्यम् । तच्चाज्ञानाप्रगल्भो वा लिङ्गतदाभासौ वा प्रत्यक्षतदाभासो वेति । तत्र यथा प्रथममध्यमप्रकाराभावान्नीलविकल्प स्वरसं कल्पमालम्बते तथाऽहमिति विकल्पोऽपि, तत्रापि "प्रत्यक्षपृष्ठभाविन्यै साक्षादेव सवस्तुकः । तदाभासे तु मूलेऽस्य पारम्पर्यात् सवस्तुतेति" । न च बालप्रत्यक्षनिदर्शनादेव निर्मूलत्वं, बुद्धिविकल्पस्यापि तथात्वप्रसङ्गात् । तत्र स्वसंवेदनं मूलम्,इहापि मानसप्रत्यक्षमिति न कश्चिद्विशेषः । शरीरादिवस्तुको भविष्यतीति चेन्न निरुपाधिशरीरेन्द्रियबुद्धितत् समुदायालम्बनत्वेऽतिप्रसङ्गात् । सोपाधिश्चरीरादावयं स्यादिति वाच्यं तत्र कः स्वीयइति वचनीयम् । अनन्यत्वं स्वत्वं सर्वभावानां, तथा च यदा तेनैव तदनुभूयते तदा प्रत्येतुः प्रत्येतव्यादव्यतिरेकादहमिति स्यात् । अतएव घटादयेन कदाचिदनन्यानुभविटका इति न कदाप्यहमास्पदमिति चेत् एवन्तर्हि त्वन्मतेऽप्यहंप्रत्ययः शरीरादावारोपरूपएव ततः प्रत्येतुरन्यत्वात् । बुद्धौ सख्यएवेति चेन्न तस्याः क्रियात्वेनानुभूयमानाया भिन्नस्य कर्तुरहं छिनद्मीतिवदहं जानामीत्यनुभवात् । नीलादिप्रत्येतव्याकारवत् प्रतिपत्त्राकारोऽपि प्रतिपत्तेरेवायमात्मा तथा भासत इति चेत् तर्हि प्रत्येतव्यप्रतिपत्त्राकारयोस्तुल्ययोगक्षेमत्वात् सिद्धं नः समीहितम् । अस्तु स्वोपादानमात्मेति चेन्न तत्प्रतिभासने तदाकारस्यापि प्रतिभासप्रसङ्गात् आकारमन्तरेणाकारिणोऽनवभासात् । प्रवृत्तिसन्तानान्योबुद्धिसन्तानः प्रतिपत्ता, वयं तमालम्बविज्ञानमाचक्ष्महे इति चेत् अस्तु तर्हि प्रवृत्तिविज्ञानोपादानमनादिनिधनः प्रतिपत्ता । स किं वर्तमानक्षानरूपः तद्विपरीतोवा इति चिन्तावधिष्यते निःश्रेयसिता चास्यै प्रागिति" । स्थानान्तरे च तत्रैव "ननु सिद्धमिदं विशेषणं देहस्यैव चेतनत्वात् नैवं देहत्वभूतत्वमूर्त्तत्वरूपादिमत्त्वादिभ्यः । नच भूतानां समुदायपर्यवसितं चैतन्यं, प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वानुभूतस्यास्मरणप्रसङ्गात् । नच प्राक्पर्यवसितं, करचरणाद्यपयवविगमे तदनुभूतस्यास्मरणप्रसङ्गात् । देहस्य चेतनत्वे बालस्य प्रथममप्रवृत्तिप्रसङ्गाच्च इच्छाद्वेषावन्तरेण प्रयत्नानुपपत्तेः दृष्टाभ्युपायताप्रतिसन्धानं विना चेच्छानुपपत्तेः । इह जन्मन्यननुभूतस्य प्रतिबन्धस्यास्मृतौ प्रतिसन्धानायोगात्, जन्मान्तरानुभूते चानुभवितरि भस्मासाद्भूते अन्येन स्मरणायोगात् अनुभवादीनां प्रत्यक्षत्वानाच्च कार्य्यकारणभावस्य इहैव जन्मनि निश्चितत्वात् । तथा च तद्भावे तद्भावस्य सुलभत्वात् अन्यथा खतस्त्वप्रसङ्गः । अतएव नेन्द्रियाणि चेतयन्ते दर्शनस्पर्शनाभ्यामेकार्थग्रहणाच्च । नच मनस्तथा, तस्य करणत्वेनैवानुभवादिति प्रतिबन्धसिद्धिः परदेहात्मसिद्धिश्च । अनादिश्चासौ वीतरागजन्मादर्शनात्, अनन्तश्च मनोऽनादित्वात्, द्रव्यञ्च समवायिकारणत्वात्, विभुश्च नित्यद्रव्यत्वे सत्यमूर्त्तत्वात्, अमूर्त्तश्च निष्क्रियत्वात्, निष्क्रियश्च नित्यद्रव्यत्वे सत्यक्षादिप्रत्यक्षत्वात्, प्रत्यक्षधर्माश्रयत्वाच्च । तर्कात्र भवन्ति आदिमत्त्वे प्रथमप्रवृत्त्यनुपपत्तौ सर्वदैवाप्रवृत्तिप्रसङ्गः । सान्तत्वेऽनादेः सत्त्वानुपपत्तिप्रसङ्गः। अद्रव्यत्वे निर्गुणत्वप्रसङ्गः अविभुत्वे दहनपवनादेः क्रियानुपपत्तिप्रसङ्गः । नच संयुक्तसंयोगात् तदुत्पत्तिः साक्षात्क्रियाद्वारकस्य तस्याभावात् अतथाभूतस्य तद्धेतुत्वेऽतिप्रङ्गात् । मूर्त्तत्वे नित्यप्रत्यक्षास्मदादिप्रत्यक्षधर्म्माधारत्वप्रसङ्गः विशेषगुणवत्समवायिकारणत्वप्रसङ्गः, सक्रियत्वे मूर्त्तत्वप्रसङ्ग इति भास्वार्थसंग्रहः । अणुरेवासौ विज्ञानाससमवायिकारणसंयोगाधारत्वात् मनोवत् "अणीयांसमणोरपीति" बाधविरोधादिति कश्चित् तदयुक्तम् आत्मन्यविभौ ममसोऽणुत्वाभिज्ञेः तत्संयोगक्रमादेव क्रियाक्रमोपपत्तेः आगमस्तु "मनसोऽपि मनीयांसमिति" प्रथमपदमपहाय उपन्यस्तस्तदसमञ्जसत्वेन" । स्वाभ्युपगमकक्षात्मतत्ववादिनां मतं संक्षेपात्तत्परया गा०सू० भा० निराकृतम् यथा "समुदाय उभयहेतुकेऽपि तदाप्तिः" सू० "तत्रैते त्रयोवादिनो भवन्ति । केचित् सर्व्वास्तित्ववादिनः केचिद्विज्ञानास्तित्वमात्रवादिनः अन्ये पुनः सर्व्वशून्यत्ववादिनः इति । तत्र ये सर्व्वास्तित्ववादिनोबाह्यमान्तरञ्च वस्त्वभ्युपगच्छन्ति भूतं भौतिकं चित्तं चैतञ्च तान् तावत् प्रति ब्रूमः । तत्र भूतं पृथिवीधात्वादयः । भौतिकं रूपादयश्चक्षुरादयश्च चतुष्टये च पृथि-

व्यादिपरमाणवः खरस्नेहोष्णप्रेरणस्वभावाः ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पञ्च स्कन्धाःतेऽप्यध्यात्मं सर्व्वव्यवहारास्पदभावेन संहन्यन्ते इति मन्यन्ते । तत्रेदमभिधीयते । योऽयमुभयहेतुक उभयप्रकारः ससुदायः परेषामभिप्रेतोऽणुहेतुकश्च भूतभौतिकसंहतिरूपः पञ्चस्कन्धहेतुकश्च पञ्चस्कन्धरूपः । तत्रेह्युभयहेतुकेऽपि ससुदायेऽभिप्रेयमाणे तदग्राह्यिः स्यात् ससुदायाग्राह्यिः ससुदायिनामचेतनत्वात् चित्ताभिज्वलनस्य च ससुदयसिद्ध्यधीनत्वात् अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहन्तुरनभ्युपगमात् निरपेक्षप्रहत्त्यभ्युपगमे च प्रहत्तेरनुपरमप्रसङ्गात् । आशयस्याध्यन्तत्वानन्यत्वाभ्यामनिरूप्यत्वात् क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात् तत्प्रहत्तेरनुपपत्तेः तस्मात् ससुदायानुपपत्तिः । ससुदायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत । "इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्" सू० । यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरोनाभ्युपगम्यते तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्माच्चोपपद्यमानायां न किञ्चिदपरमपेक्षितव्यमस्ति । ते चाविद्यादयः अविद्या संस्कारोविज्ञानम् नाम रूपं षड़ायतनम् स्पर्शोवेदना तृष्णोपादानम् भवोजातिर्जरा मरणं शोकः परिवेदना दुःखं दुर्मनस्त्वेत्येवम् जातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षिप्ता निर्दिष्टाः क्वचित् प्रपञ्चिताः । सर्व्वेषामप्ययमविद्यादिकलापोऽत्यागेयः । तदेवमविद्यादिकलापेऽपि परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमावर्त्तमानेऽर्थाक्षिप्त उपपन्नः संघात इति चेत्तन्न कस्मात् ? उत्पत्तिमात्रनिमित्तत्वात् । भवेदुपपन्नः संघातो यदि संघातस्य किञ्चिच्चिमित्तमवगम्येत न त्ववगम्यते यत इतरेरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्व्वं पूर्व्वमुत्तरस्योत्तरस्योत्पत्तिमात्रनिमित्तं भवत् भवेत् न तु संघातोत्पत्तेः किञ्चिच्चिमित्तं सम्भवति । नन्वविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तम् अत्रोच्यते । यदि तावदयमभिप्रायः अविद्यादयएव संघातमन्तरेणात्मानमलभमाना अपेक्षन्ते संघातमिति ततस्तस्य संघातस्य किञ्चिच्चित्तं वक्तव्यं तच्च नित्येष्वणुष्वभ्युपगम्यमानेष्वाश्रयाश्रयीभूतेषु च भोक्तृषु सत्सु न सम्भवतीत्युक्तं वैशेषिकपरीक्षायां किमङ्ग पुनः क्षणिकेष्वणुषु भोक्तृरहितेषाश्रयाश्रयीभावशून्येषु चाभ्युपगम्यमानेषु सम्भवेत् । अथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति । कथं तमेवाश्रित्यात्मानं लभमानास्तस्यैव निमित्तं स्युः । अथ मन्यसे संघात एवानादौ संसारे सन्तत्यानुवर्त्तते तदाश्रयाश्चाविद्यादय इति । तदपि संघातात् संघातान्तरमुत्पद्यमानं नियमेन सदृशमेवोत्पद्येत अनियमेन वा सदृशम्, विसदृशं वोत्पद्येत । नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात् । अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित् क्षत्रेण हस्ती भूत्वा देवो वा पुनर्मनुष्योभवेत् इति प्राप्नुयात् । उभयमप्यभ्युपगमविरुद्धम् । अपि च यद्भोगार्थं संघातः स्यात् स जीवोनास्ति स्थिरोभोक्तेति तवाभ्युपगमः ततश्च भोगो भोगार्थएव सन्नाऽन्येन प्रार्थनीयः तथा मोक्षोमोक्षार्थ एवेति सुसूक्ष्मेणा नान्येन भवितव्यम् । अन्येन चेत् प्रार्थ्यतेऽयं, भोगमोक्षकालावस्थायिना तेन भवितव्यम् । अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः । तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत् भवतु नाम न तु संघातः सिध्येत् भोक्तृभावादित्यभिप्रायः इत्यन्तेन" । एतन्मत मनुसृत्यैव "सर्व्वकार्य्यशरीरेषु सङ्घाङ्गस्कन्धपञ्चकम् । सौगतानामिवात्मान्योनास्ति मन्वोमहीभृता मिति" माघः । आत्मनो देहपरिमाणत्वमार्हता मन्यन्ते । तदेतन्मतमुत्थाप्य दूषितं भा० सू० भा० यथा । "एवं चात्माकात्स्न्र्यम्" सू० । "यद्येकस्मिन् धर्म्मिणि विरुद्धधर्मासम्भवोदोषः स्याद्वादे प्रसक्त एवमात्मनोऽपि जीवस्याकात्स्न्र्यमपरोदोषः प्रसज्यते । कथं शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते । शरीरपरिमाणतायाञ्च सत्यामकृत्स्नोऽसर्व्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत । शरीराणाञ्चानवस्थितपरिमाणत्वान्मनुष्यजीवोमनुष्यशरीरपरिमाणोभूत्वा पुनः केनचित् कर्म्मविपाकेन हस्तिजन्म प्राप्नुयच्च कृत्स्नं हस्तिशरीरं व्याप्नुयात् पुत्तिकाजन्म च प्राप्नुयच्च कृत्स्नः पुत्तिकाशरीरे संभीयते । समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः । स्यादेतत् अनन्तावयवोजीवस्तस्य तएवावयवा अल्पे शरीरे सङ्कुचेयुर्महति विकसेयुरिति । तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम् । प्रतिघाते तावन्नानन्तावयवाः परिच्छिन्ने देशे सम्भीयेरन् । अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्व्वेषाम-

वयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसङ्गः स्यात् । अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवनामानन्त्यं नोत्प्रेक्षितुमपि शक्यम् । अथ पर्य्यायेण बृहच्छरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्तीत्युच्येत । तदाप्युच्यते । "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" सू० । न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेव तत्तद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते कुतः ? विकारादिदोषप्रसङ्गात् । अवयवोपगमापगमाभ्यां ह्यनित्यमापूर्य्यमाणस्योपचीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्य्यं विक्रियावत्त्वे चर्म्मादिवदनित्यत्वं प्रसज्येत ततश्च बन्धमोक्षाभ्युपगमोबाध्येत कर्म्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध्वगामित्वमेव तीति । किञ्चान्यत् आगच्छतामपगच्छतां चावयवानामागमापायधर्म्मवत्तादेहानात्मत्वं शरीरादिवत् । ततश्चावस्थितः कश्चिदयमात्मेति स्यात् । न च स निरूपयितुं शक्यते अयमसाविति । किञ्चान्यत् आगच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्ति, अपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यम् । न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च निलीयेरन्, अभौतिकत्वाज्जीवस्य । नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात् । किञ्चान्यत् अनवधृतस्वरूपत्वेन सत्त्वात्मा स्यात् आगच्छतामपगच्छतां चावयवानामनियत परिमाणत्वात् । अतएवमादिदोषप्रसङ्गाच्च पर्य्यायेणाप्यवयवोपगमापगमाभावात्मन आश्रयितुं शक्यते । अथ वा पूर्व्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचित शरीरान्तरप्रतिपत्तापकात्तद्दोषप्रसङ्गनद्वारेणानित्यतायाञ्चोदितायाम् पुनः पर्य्यायेण परिमाणानवस्थानेऽपि स्रोतःसन्ताननित्यतान्यायेनात्मनोनित्यता स्यात् यथा रक्तपटादीनाम् विज्ञानानवस्थानेऽपि तत्सन्ताननित्यता तद्व्यभिचारमपोह्याशङ्कानेन सूत्रेणोत्तरमुच्यते । सन्तानस्य तावद्वस्तुत्वं नैरात्म्यप्रवाद प्रसङ्गः वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति । "अन्यावस्थितेश्चोभयनित्यत्वादविशेषः" सू० । अपि चान्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैः तद्वत् पूर्व्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसङ्गादविशेषप्रसङ्गः स्यात् एकशरीरपरिमाणतैव स्यात् नोपचितापचितशरीरान्तरप्राप्तिः । अथ वाऽन्यस्य जीवपरिमाणस्यावस्थितत्वात् पूर्व्वयोरप्यवस्थयोरवस्थित परिमाणएव जीवः स्यात् । ततश्चाविशेषेण सर्व्वदैवाऽणुर्महान् वा जीवोऽभ्युपगन्तव्यो न शरीरपरिमाणः । अतश्च सौगतवदार्हतमपि मतमसङ्गतमित्युपेक्षितव्यम्" । इत्यनेन जीवस्याणुपरिमाणत्वं ये स्वीचक्रुः तन्मतमुपन्यस्य शा० सू० भा० दूषितं यथा ।

"उत्क्रान्तिगत्यागतीनाम्" सू० । इदानीन्तु किंपरिमाणो जीव इति चिन्त्यते किमणुपरिमाणः उत मध्यमपरिमाण आहोस्वित् महापरिमाण इति । ननु च नात्मोत्पद्यते नित्य चैतन्यरूपश्चायमित्युक्तमतश्च परएवात्मा जीव इत्यापतति, परस्य चात्मनोऽनन्तत्वमाम्नातं तत्र कतोजीवस्य परिमाणचिन्तावतार इति उच्यते सत्यमेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रतयन्ति स्वगत्वेन चास्य कश्चिदणुपरिमाणत्वमाम्नायते तस्य सर्वशरीराकलनोपपादनायायमारम्भः । तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीव इति उत्क्रान्तिश्रवणं "स यदाएतस्माच्छरीरादुत्क्रामति सर्व्वैरेतैः सर्व्वैरुत्क्रामतीति" गतिरपि "तेवै के चास्मात्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्व्वे गच्छन्तीति" । आगतिरपि "तस्मात्लोकात् पुनरैत्यस्मै लोकाय कर्म्मणे" इति श्रुतिभ्यो हृत्पद्मोत्क्रान्तिगत्यागतीनां श्रवणात्परिच्छिन्नस्यावज्ञीवः इति प्राप्तेऽभिधीयते न हि विभोश्चलनमवकल्पते इति । सति च परिच्छेदे शरीरपरिमाणत्वमात्मनः तन्मतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते । "स्वात्मना चोत्तरयोः" सू० । उत्क्रान्तिः कदाचिदचलतोऽपि यामस्वाम्यनिवृत्तिवद्धेतुस्वाम्यनिवृत्त्या कर्म्मक्षयेणावकल्पेत उत्तरे तु गत्यागती नाचलतः सम्भवतः स्वात्मना हि तयोः सम्बन्धोभवति गमेश्च कर्त्तृस्थक्रियात्वात् । अतोऽध्यम परिमाणस्य च गत्यागती अणुत्व एव सम्भवतः । तत्रोत्क्रान्तिगत्यागत्योरुत्क्रान्तिरपक्षयिरेव देहादिति प्रतीयते तस्यानपक्षस्य देहात्त्यागती स्यातां देहप्रदेशानाञ्चोत्क्रान्तावुपादत्तत्ववचनात् "चक्षुषो वा मूर्द्धोवा अन्येभ्योवा शरीरदेशेभ्यः" इति । "सएतास्तेजोमात्राः समभ्यादत्तोऽदृश्यमेवान्तर्वक्रामति शुक्रमादाय पुनरेति स्थानमिति" चान्तरेऽपि शरीरे शरीरस्य गत्यागती भवतः तस्मादस्याणुत्वसिद्धिः । "नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्" सू० । अथापि स्यात् नाणुरयमात्मा, कस्मात्, अतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः । "स वा एष महानजः" "आत्मा योऽयं विज्ञानमयःप्राणेषु" "आकाशवत्सर्व्वगतश्चनित्यः" "सत्यंज्ञानमनन्तं ब्रह्म" त्येवं जातीयका हि श्रुति-

रात्मनोऽणुत्वे विप्रतिषिध्येतेति चेत् नैष दोषः । कस्मात् इतराधिकारात् । परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः, परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात्, "विरजः पर आकाशात्" इत्येवं विधानाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात् । ननु-"योऽयं विज्ञानमयः प्राणेष्विति" शारीरोमहत्त्वसम्बन्धित्वेन प्रतिनिर्दिश्यते । शास्त्रदृष्ट्या त्वयं निर्देशो वामदेववद्दृष्टव्यः । तस्मात्प्राप्तविषयत्वात्परिमाणान्तरश्रवणस्य, न जीवस्याणुत्वं विरुध्यते । "स्वशब्दोन्मानाभ्याञ्च" सू० इतस्वाण्वात्मा यतः साक्षादेवास्याणुत्ववाचो शब्दः श्रूयते "स एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशेति" प्राणसम्बन्धाच्च जीवोऽयमणुरभिहितइति गम्यते तथा चोन्मानमपि जीवस्याणिमानं गमयति "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेय" इति । "आराग्रमात्रोह्यवरोऽपि दृष्ट" इति चोन्मानान्तरम् । नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते दृश्यते च जाह्नवीह्रदनिमग्नानां सर्व्वाङ्गे शैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरितिचेत् उत्तरं पठति । "अविरोधश्चन्दनवत्" सू० । यथा हि हरिचन्दनबिन्दुः शरीरैकदेशे सञ्जातोऽपि सन् सकलदेहव्यापिनमाह्लादं करोत्येवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनमुपलब्धिं करिष्यति । त्वक्सम्बन्धाच्चास्य सकलशरीरगता वेदना न विरुद्धते । त्वगात्मनोर्हि सम्बन्धः कृत्स्नायान्त्वचि वर्त्तते त्वक् च सर्व्वशरीरव्यापिनीति । "अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि" सू० । अत्राह यदुक्तम् "अविरोधश्चन्दनवदिति" तदयुक्तं दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् सिद्धे ह्यात्मनोदेहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति । प्रत्यक्षन्तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनञ्च । आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्त्तित्वम् । अनुमेयमन्यदिति यदुच्यते न चात्रानुमानं सम्भवति । किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं विभोर्नभसइव, आहोस्विच्चन्दनबिन्दोरिवाणोरेकदेशस्थस्येति संस्थानतिदृक्षेरिति । अत्रोच्यते-नायं दोषः । कस्मात् अभ्युपगमात् । अभ्युपगम्यतेऽस्माभिरात्मनोऽपि चन्दनस्येव देहैकदेशवर्त्तित्वमवस्थितिवैशेष्यम् । कथमिति उच्यते । हृदि ह्येष आत्मा प्रज्ञया वेदान्तेषु 'हृदिह्येष आत्मा" "स वाएष आत्मा हृदि तमः ? आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इत्याद्युपदेशेभ्यः । तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति । "गुणाद्वालोकवत्" सू० । चैतन्यगुणव्याप्तेर्वाणोरपि सतोजीवस्य सकलदेहव्यापि कार्य्यं न विरुध्यते । यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभा अपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्य्यं करोति तद्वत् । स्यात्कदाचिच्चन्दनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहाह्लादयित्वं नत्वणोर्जीवस्यावयवाः सन्ति यैरयं सकलदेहं विसर्पेदित्याशङ्क्य "गुणाद्वालोकवत्" इत्युक्तम् । कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्त्तेत न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्त्तमानोदृश्यते । प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात् । निविड़ावयवं हि तेजोद्रव्यं प्रदीपः विरलावयवन्तु तेजोद्रव्यमेव प्रभेति अत उत्तरं पठति । "व्यतिरेको गन्धवत्" सू० यथा गुणस्यापि सैतोगन्धस्य गन्धद्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धोपलब्धेः एवमणोरपि सतोजीवस्य चैतन्यगुणव्यतिरेकोभविष्यति । अतश्चानैकान्तिकमेतद्गुणत्वात् रूपवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतोगन्धस्याश्रयविश्लेषदर्शनात् । गन्धस्यापि सह्यैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसङ्गात् । अक्षीयमाणमपि तत्पूर्व्वावस्थातोऽवगम्यते अन्यथा तत्पूर्व्वावस्थैर्गुरुत्वादिभिर्हीयते । स्यादेतत् गन्धाश्रयाणां विश्लिष्टानामल्पत्वात्तत्रापि विश्लेषो नोपलक्ष्यते सूक्ष्मा हि गन्धपरमाणवः सर्व्वतो विप्रकृष्टागन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेन्न अतीन्द्रियत्वात् परमाणूनां स्फुटगन्धोपलब्धेश्च नागकेशरादिषु । न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातमिति गन्धएवाघ्रात इति लौकिकाः प्रतियन्ति । रूपादिव्याश्रयव्यतिरेकानुपलब्धेर्गन्धस्याश्रयव्यतिरेक इति चेन्न प्रत्यक्षत्वादनुमानाप्रवृत्तेः । तस्माद्यद्यथा लोके दृष्टं तत्तथैवानुगन्तव्यं निरूपकैर्नान्यथा । न हि रसोगुणोऽन्यद्रव्योपलभ्यतद्व्यतो रूपादयोपि गुणाजिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते । "यथा च दर्शयति" सू० । श्रुतिर्हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तस्यैव "आलोमभ्य आनखाग्रेभ्यः" इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति । "पृथगुपदेशात्" सू० । "प्रज्ञया शरीरं समारुरुक्षेति" चात्मप्रज्ञयोः कर्त्तृकरणभावेन पृथगुपदेशाच्चैतन्येन गुणेनैवास्य शरीरव्यापितावगम्यते । "तदेषां प्राणानां विज्ञानेन विज्ञानमा-

दावेति च" कर्तुः शरीरादु पृथग्विज्ञानसेंद्रियप्रदेश एतमेवाभिप्रायमुपोद्बलयति तस्मादणुरात्मेत्येवं प्राप्ते ब्रूमः। "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" सू०। ह्यग्रन्थः प्रज्ञं व्यावर्त्तयति। नैतदस्ति अणुरात्मेति उत्क्रान्त्याद्यवणात्। परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तम्। परमेव चेदब्रह्मजीवस्तस्माद्यावत्परं ब्रह्म तावानेव जीवो भवितुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः। तथा च "सर्वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु, इत्येवंजातीयका जीवविषया विभुत्ववादाः औताःस्मार्त्ताश्च समर्थिता भवन्ति। नचाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते। त्वक्सम्बन्धात् स्यादिति चेन्न त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत त्वक्कण्टकयोर्हि संयोगः कृत्स्नायां त्वचि वर्त्तते त्वक् च कृत्स्नशरीरव्यापिनीति पादतलएव तु कण्टकनुन्नां वेदनां प्रतिलभन्ते। नचाणोर्गुणस्य व्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभावाच्च द्रव्यान्तरत्वं व्याख्यातम्। गन्धोऽपि गुणत्वाभ्युपगमात् साश्रय एव सञ्चरितुमर्हति अन्यथा गुणत्वहानिप्रसङ्गात्। तथा चोक्तं भगवता द्वैपायनेन "उपलब्धाषु तद्गन्धं केचिदूचुरनैपुणाः। पृथिव्यामेव तं विद्यादपोवायुञ्च संश्रितमिति"। यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयात्राणुर्जीवः स्यात् चैतन्यमेव ह्यस्य स्वरूपं अग्नेरिवौष्ण्यप्रकाशौ, नात्र गुणगुणिविभागोविद्यत इति। शरीरपरिमाणत्वञ्च प्रत्याख्यातं परिशेषाद्विभुर्जीवः कथं तर्ह्यणुत्वादिव्यपदेश इति अत आह "तद्गुणसारत्वात्तु तद्व्यपदेश" इति। तस्याबुद्धेर्गुणाः तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयः तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारः तद्भावस्तद्गुणसारत्वम्। न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्त्तृत्वभोक्तृत्वादि लक्षणं संसारित्वमकर्त्तुरभोक्तुश्चासंसारिणोनित्यमुक्तस्य सत आत्मनः। तस्मात्तद्गुणसारत्वादबुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः। तथा च "बालाग्रशतभागस्य शतधा कल्पितस्य तु। भागोजीवः स विज्ञेयः स चानन्त्याय कल्पते" इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह तच्चैवमेव समञ्जसं स्यात् यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकं चानन्त्यम्। नह्यणुभवं सुख्यमवकल्पेत। नचानन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्व्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्। तथैतस्मिन्नध्याये "बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोह्यवरोऽपि दृष्ट" इति बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना। "एषोऽणुरात्मा चेतसा वेदितव्य" इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते। परस्यैवात्मनश्चेतोदनवद्ग्राह्यत्वेन ज्ञानप्रसादावगम्यत्वेन च प्रकृतत्वात्, जीवस्यापि च सुख्याणुपरिमाणत्वानुपपत्तेः। तस्मादुत्क्रान्त्यादिभिरभिप्रायभेदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यम्। तथा "प्रज्ञया शरीरमारुह्य" इत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्युपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं यद्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत्। नह्यत्र गुणगुणिविभागो विद्यत इत्युक्तम्। हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात्। तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति "कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि" इति "कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति। उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते, नचानपसृप्तस्य देहाद्गत्यागतौ स्याताम्। एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वमुपदेशः प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशः "अणीयान्व्रीहेर्वा यवाद्वा, मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्पः" इत्येवं प्रकारः तद्वत्" इत्यन्तेन। इति शाङ्करानुयायिनः रामानुजभाष्यादयश्च जीवस्याणुत्वमुपपादयन्तुरीचक्रुः। तत्पक्षश्चैतच्छास्त्रे दृष्टः तयोर्युक्त्याभासकत्वं नैयायिकवैशेषिकाङ्गीकृतविभुत्वप्रदर्शकयुक्तीरयत्नोक्ता सुधीभिः समर्थनीयम् न्यायसूत्रवृत्तौ चात्मनोदेहाद्यतिरिक्तत्वं प्रदर्शितं यथा "तत्रेन्द्रियं ज्ञानवच्चेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्तथा चात्मग्रहस्य नामार्थत्वादिन्द्रियाणामभौतिकत्वाद्वा न साङ्ख्यभितीन्द्रियचैतन्यादिव्यवस्थिराकरणायाह। "दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्"१। "न विषयव्यवस्थानात्"२। "तद्व्यवस्थानान्नासङ्गादप्रतिषेधः"३। "शरीरदाहे पातकाभावात्" ४। "तदभावः साम्परायप्रदाहेऽपि तच्छिष्यत्वात्" ५। "न कार्य्याश्रयकर्तृबधात्" ६। "सव्येन दृष्टस्येतरेण प्रत्यभिज्ञानात्" ७। "नैकस्मिन्नासम्भवात्" ८। "व्यवस्थाभि-

भानात्" ८। "एकनाशे द्वितीयाविनाशात्" ९। "अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः" १०। "दृष्टान्तविरोधादप्रतिषेधः" ११। "इन्द्रियान्तरविकारात्" १२। "न स्मृतेः कर्त्तव्यविषयत्वात्" १३। "तदात्मगुणत्वसद्भावादप्रतिषेधः" १४। "अपरिसङ्ख्यानाच्च स्मृतिविषयस्य" १५। "नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्" १६। "ज्ञातृज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्" १७। "नियमस्य निरनुमानः" १८। "पूर्व्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः" १९। "पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः" २०। "नोष्णशीतवर्षाकालनिमित्तत्वात् पद्मात्मकविकाराणाम्" २१। "प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्" २२। "अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम्" २३। "नान्यत्र प्रवृत्त्यभावात्" २४। "वीतरागजन्मादर्शनात्" २५ सूत्राणि "एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात् दर्शनस्पर्शने ज्ञानविशेषौ तृतीया च प्रकारे तेन चाक्षुषस्पर्शनोभयकर्त्तृकैकस्य धर्म्मिणः प्रतिसन्धानादित्यर्थः। तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्तएक इति १। अत्र शङ्कते चक्षुस्त्वगादीनां रूपस्पर्शादि नियतविषयत्वाच्चक्षुरादेश्चाक्षुषादिसमवायित्वमित्यक्षाभेदप्रत्ययोभ्रान्त इति भावः २। समाधत्ते उक्तप्रतिषेधेन युक्तः उक्तविषयव्यवस्थानादेवात्मसद्भावादतिरिक्तात्मकल्पनादित्यर्थः। अयंभावः तत्तदिन्द्रियाणां तत्तद्विषयकप्रत्यक्षं प्रति समवायित्वं वाच्यं न तु प्रत्यक्षत्वावच्छिन्नं प्रति, अनुमित्यादिजनकत्वेतु विनिगमकाभावात्। तेन जन्यज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वं चक्षुरादेरनित्यत्वादात्मनश्च नित्यतायावच्छमाणत्वाच्चक्षुरादिनाशेऽपि स्मरणाच्चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादोयुज्यत इति ३। समाप्तमिन्द्रियप्रकरणम्। ननु गौरोऽहं जानामीत्यादिप्रतीतेरस्तु शरीरमोक्ष इत्याशङ्क्य दूषयति। पातकाभावात् पातकादेरभावप्रसङ्गात् तथाचोत्तरकालिकं दुःखादिकं न स्यादिति। यद्वा दाहोनाशः तथा च शरीरनाशे सति कर्त्तरि शरीरे विनष्टे पातकं न स्यादित्यर्थः। यद्यपि भूतचैतन्यवादिना पातकादिकं नोपेयते तथापि तस्य प्रसाध्यत्वात्कत्वादेकदेशिनः पूर्व्वपक्षित्वाद्वा न दोष इति भावः ४। तवापि तुल्योदोष इत्याशङ्कते। तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात् तस्य आत्मनोनित्यत्वात् नित्यत्वेन निर्विकारत्वं तेन जन्यधर्म्मानाश्रयत्वमभिमतमितिकेचित्। तन्निरस्तं नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्। किञ्च सात्मकशरीरनाशेऽपि कर्त्तुः पातकाभावः स्यात् तस्यात्मनोनित्यत्वेन तन्नाशकत्वाभावात् ५। परिहरति। कार्य्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः क्षत्यवच्छेदकस्य शरीरस्यैव नाशः नत्वात्मन इति न पातकाभावः। यद्वा न कर्त्तुः पातकाभावः कार्य्याश्रयकर्त्तुर्बाधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति भावः। वस्तुतस्तु अपूर्व्वशरीरावच्छिन्नप्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मकं मरणमप्यात्मनः सम्भवति अन्यथा शरीरविनाशनोद्बन्धनसुखनिरोधादेर्हिंसात्वं न स्यात् पातकानभ्युपगन्तृचार्व्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ६। समाप्तदेहभेदप्रकरणम् प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते। वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति केषाञ्चिन्मतं तन्निराकरणायैतदुपन्यासः ७। एतदुदूषयति। मध्यस्थसेतुना तडागस्येव नासास्थिव्यवहितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययोभ्रम इत्यर्थः ८। आक्षिपति। चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः ९। अत्रैकदेशी परिहरति। अवयवस्य शाखादेर्नाशेऽप्यवयविनोदृष्टस्य प्रत्यभिज्ञानाद्भावयवनाशे सर्व्वत्रावयविनाशनियमस्तथा चैकनाशेऽपि नान्धत्वमिति १०। एकदेशिमतस्य पूर्व्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्। उक्तप्रतिषेधेन युक्तः दृष्टान्तस्य विरोधादयुक्तत्वात् न हि शाखाच्छेदे वृक्षस्थिरति तथा सति वृक्षस्थानाशप्रसङ्गादतोऽवस्थितावयवैस्तत्र खण्डवृक्षोत्पत्तेर्नैकदेशिमतं युक्तम्। एतेनैकनाशे द्वितीयाविनाशाङ्गीकारोऽपास्तः। यद्वा नैकनाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुःसम्भवात् दृष्टश्च लाघवाच्चक्षुरद्वैतमिति टीकाक्षरसमुद्भवम्। परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिनः। सूत्रं सव्येनेति। शङ्कते नैकस्मिन्निति। समाधत्ते एकेति। शङ्कते अवयवेति। निराकरोति दृष्टान्तेति। शाखानाशे वृक्षनाशावश्यकत्वात् दृष्टान्तोन युक्तः। यद्वा दृष्टान्तस्य गोलकभेदस्य विरोधादन्यथानुपपन्नत्वाद्दृष्टं हि सूत्रस्य चक्षुरविष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति ११। आत्मन इन्द्रियभेदे युक्त्यन्तरमाह। चिरविलम्बाद्यक्षद्वये दृष्टे तद्वस्मरणाद्वन्दोदकसंभवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त

आत्मा सिद्ध्यति १२। आक्षिपति। स्मृतिर्हि अर्थ्यविषयिणीति नियमस्तस्याश्च दर्शनादिना सामानाधिकरण्ये मानाभावात् अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः १३। समाधत्ते। उक्तप्रतिषेधोन युक्तः धर्म्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषेणात्मगुणत्वसिद्धेरहं सरागोत्यनुभवात् विषयनिष्ठकार्य्यकारणभावे चैतन्यस्य ज्ञानान्नैतस्य स्मरणापत्तेरिति भावः १४। विषयाणां अर्थ्यानां स्मृतिसमवायित्वम् स्यादित्याशङ्क्य समाधत्ते। अपरिसङ्ख्यानात् आनन्त्यात् तथा च लाघवादतिरिक्तात्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित् १५। समाप्तं चक्षुरद्वैतप्रकरणम्। ननु मनसोनित्यत्वादात्मत्वमस्त्वित्याशङ्कते। नातिरिक्त आत्मा आत्मसाधकमानानां मनसार्थान्तरत्वमिति भावः १६। समाधत्ते। यदि मनसो ज्ञातृत्वं तदा व्यासङ्गाद्युपपादनाय करणान्तरमवश्यं वाच्यं तथा चैको ज्ञाता ज्ञानसाधनं चैकं सिद्धं मन आत्मास्त्विति संज्ञामात्रं किञ्च व्यासङ्गोपपादकतया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यक्षोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः १७। ननु रूपादिप्रत्यक्षत्वम् सकरणकमस्तु न तु सुखादिप्रत्यक्षत्वम् एवंपरमाख्यन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षत्वम् स्यादत्राह। उक्तोनियमविशेषोनिरनुमानः निष्प्रमाणकः गौरवाच्चैपरीत्ये च विनिगमकाभावाच्चेति भावः १८। समाप्तम् मनोभेदप्रकरणम्। एवं साधितेऽपि देहादिभिन्ने आत्मनि विना तन्निष्ठतां न परलोकार्थिनः प्रवृत्तिरतः आत्मनिष्ठतापप्रतिपादनाय सूत्रम्। जातस्य बालस्य एतज्जन्मानुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां सम्प्रतिपत्तिः उत्पत्तिस्तस्याः पूर्व्वपूर्व्वानुभवाधीन स्मृतिसम्बन्धादेव सम्भवात् इत्थं चेदानीन्तनस्यात्मनः पूर्व्वपूर्व्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः १९। अत्र शङ्कते। बालस्य हर्षादयोसुखविकासाद्यनुमेया न च तत्सम्भवः पद्मादीनां प्रबोधादिवदहृष्टविशेषाधीनक्रियावत्वादेव तद्वपपत्तेरिति भावः २०। सिद्धान्तयति। उक्तं न युक्तं यतः पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकारास्तेषाम् उष्णकालादिनिमित्तत्वात् मनुष्यादीनान्तु हर्षादिनिमित्तका सुखविकासादय इति न तुल्यतेति भावः २१। आत्मनित्यत्वे हेत्वन्तरमाह। प्रेत्य मृत्वा जातमात्रस्य बालस्य अन्याभिलाषः स तावदाहाराभ्यासजनितः अन्यान्नदीप्याहारेऽभ्यासाधीनजन्यजीवनाद्दृष्टोद्बोधितसंस्कारादधीनेष्टसाधनतास्मरणेन हि बालःस्तनपाने प्रवर्त्तत इत्यनेनादित्वमिति २२। शङ्कते। यथाऽयस्कान्तसन्निधिं तस्यायसोऽयस्कान्ताभिमुखतया गमनं तथैव यत्नस्यापि स्तनोपसर्पणं न त्विष्टसाधनताज्ञानाधीनप्रवृत्तिजन्या चेष्टेयमित्यर्थः २३। समाधत्ते। स्तनपानएव बालः प्रवर्त्तते नत्वन्यत्रेति नियमः कथं स्यात्। वस्तुतस्तु अन्यत्र अयसि प्रवृत्त्यभावात् प्रवृत्तिर्हि चेष्टानुमिता लिङ्गं न तु क्रियामात्रमतोन व्यभिचार इति भावः २४। हेत्वन्तरमाह वीतरागोरागशून्यस्तावच्चोत्पद्यतेऽपि तु सरागतएव जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मरणं हेतुरिति पूर्व्वं सन्न्यासिभाषोक्तः सम्प्रति तु पतञ्जल्यादीनां कणादभक्षणाभिलाषसाधारणं रागमात्रमित्यपीनरुक्तम् २५" इति। वैशेषिकसूत्रोपस्करयोरात्मसाधनपुरस्सरं तस्य देहाद्यतिरिक्तता साधिता यथा "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यो ऽर्थान्तरस्य हेतुः"१। "सोऽनपदेशः"२। "कारणाज्ञानात्"३। "कार्य्येषु भावात्" ४। "अज्ञानाच्च" ५। अन्यदेव हेतुरित्यनपदेशः" ६। "अर्थान्तरं त्वर्थान्तरस्याऽनपदेशः" ७ सू०। "इन्द्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह। हेतुर्लिङ्गमर्थान्तरस्य आत्मन इन्द्रियार्थेभ्य इति इन्द्रियेभ्योऽर्थेभ्यश्च रूपादिभ्यश्चाहृदयस्य यदर्थान्तरम् आत्मा तस्य लिङ्गमित्यर्थः। यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितं तथापीन्द्रियार्थप्रसिद्धेरुक्तादिसाक्षात्कारस्य प्रसिद्धतरतया तादृश्येव लिङ्गत्वमुक्तम्। तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्य्यत्वात् घटवत् गुणत्वाद्वा क्रियात्वाद्वा सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदिक्रियावत् यच्च प्रसिद्धेः करणं तदिन्द्रियं तच्च कर्त्रप्रयोज्यं करणत्वात् वास्यादिवत् तथा यत्रेयं प्रसिद्धिराश्रिता, यः घ्राणादीनां करणानां प्रयोक्ता स आत्मा १। ननु शरीरमिन्द्रियाणि वा प्रसिद्धेराश्रयोऽस्तु प्रसिद्धिं प्रति तदुभयान्वयव्यतिरेकयोः स्फुटतरत्वात् किं तदाश्रयकल्पनया तथाहि चैतन्यं शरीरगुणः तत्कार्य्यत्वात् तद्रूपादिवत् एवमिन्द्रियगुणत्वेऽपि वाच्यमित्याशङ्क्याह। अपदेशो हेतुः तदाभासोऽनपदेशः तथाच तत्कार्य्यत्वं प्रदीपजन्यज्ञानादावनैकान्तिकत्वादनपदेशत्वमर्थः २। ननु तत्कार्य्यत्वं चैतन्यत्वावच्छिन्नस्यैव कार्य्यत्वं विवक्षितं प्रदीपादीनाञ्च समस्तमेव चैतन्यं न कार्य्यमिति न व्यभिचार इत्याशङ्क्याह। शरीरकारणानां करचरणादीनां तदवयवानां वा अज्ञानात् ज्ञानशून्यत्वादित्यर्थः। बुद्धिव्यादि-

विशेषगुणानां हि कारणगुणपूर्व्वकता दृष्टा तथाच शरीरकारणेषु यदि ज्ञानं स्यात्तदा शरीरेऽपि सम्भाव्येत नचैवम्। मन्यस्तु शरीरकारणेष्वपि चैतन्यमिति चेन्न ऐकमत्याभावप्रसङ्गात् न हि बहूनाञ्चेतनानामैकमत्यं दृष्टम्, करावच्छेदेनानुभूतस्य करच्छेदेऽस्मरणप्रसङ्गात् यतः "नान्यदृष्टं स्मरत्यन्यः" इति। किञ्च शरीरनाशे तत्कृतहिंसादिफलानुपभोगप्रसङ्गात् नहि चैत्रेण कृतस्य पापस्य फलं मैत्रो भुङ्क्ते ततश्च कृतहानिरकृताभ्यागमश्च स्यात् ३। ननु शरीरकारणेषु सूक्ष्ममात्रया ज्ञानमस्ति शरीरे तु स्फुटमतो नाऽकारणगुणपूर्व्वकता नचैकमत्यानुपपत्तिरित्याशङ्क्याह। यदि हि शरीरमूलकारणेषु परमाणुषु चैतन्यं स्यात् तदा तदारब्धेषु कार्येषु घटादिष्वपि स्यात् किञ्च पार्थिवविशेषगुणानाम् सर्व्वपार्थिववृत्तिताव्याप्तेः कार्येष्वपि घटादिषु चैतन्यं स्याच्च तत्र चैतन्यमुपलभ्यते इत्यर्थः ४। ननु घटादावपि सूक्ष्ममात्रया चैतन्यमस्त्येवेत्याशङ्क्याह। सर्व्वैः प्रमाणैरज्ञानात् कुम्भादौ न चैतन्यमित्यर्थः। सर्व्वप्रमाणागोचरस्याप्यभ्युपगमे शशविषाणादेरप्यभ्युपगमप्रसङ्गः न हि घटादौ चैतन्यं केनापि प्रमाणेन ज्ञायत इति ५। ननु श्रोत्रादिभिः करणैरधिष्ठाताऽनुमीयते इत्युक्तं तदयुक्तं नहि श्रोत्रादिभिरात्मनस्तादात्म्यं तदुत्पत्तिर्वा न च ताभ्यामन्तरेणाऽविनाभावसिद्धिः नचाविनाभावमन्तरेणाऽनुमितिरित्यत आह। हेतुः साध्यादन्य एव भवति न तु साध्यात्मा साध्यविशेषप्रसङ्गात् तस्मात्तादात्म्यघटितो हेतुरहेतुरनपदेश इत्यर्थः ६। ननु श्रोत्रादिभिरिन्द्रियैरात्मनो यथा न तादात्म्यं तथा तदुत्पत्तिरपि नास्ति नहि वह्नेर्धूम इव आत्मनः श्रोत्रादिकरणमुत्पद्यते इत्यत आह। हि यतः कार्यं धूमादि यथा रासभादेरर्थान्तरम् तथा कारणाद्वह्न्यादेरप्यर्थान्तरमेव तथा चार्थान्तरत्वाविशेषात् धूमो रासभं न गमयति किन्तु वह्निमेव गमयतीत्यत्र स्वभावविशेष एव नियामकः स च स्वभावो यदि कार्यादन्यस्यापि भवति तदा सोऽप्यपदेशोभवत्येव तथा च कार्यमविवक्षितस्वभावभेदम् अनपदेशः, तथा च तादात्म्यतदुत्पत्ती एवाऽविनाभावः तयोरेवाविनाभावपर्यवसानम् ताभ्यां समानोपायौ वा तदुभयमात्र यद्वाधीनयद्भौ वेति स्वशिष्यव्यामोहाय परिभाषामात्रमिति भावः" ७॥ उपस्क०। अनतिदूरे च तत्रैव "आत्मेन्द्रियार्थसन्निकर्षादुत्पद्यते तदन्यत्" १८ सू०। "ज्ञानमात्मन्युभयथा लिङ्गम्, ज्ञानं क्वचिदाश्रितं कार्यत्वाद्रूपादिवदिति वा, प्रत्यभिज्ञारूपतया वा योऽहमद्राक्षं सोऽहं स्पृशामीति, तत्र ज्ञानगतं कार्य्यत्वं नासिद्धं यन्निष्पद्यत इत्यभिधानात्, न विरुद्धं सामान्यतोदृष्टेऽत्र विरोधाभावात्। नचानैकान्तिकम्, तत एव, तथा च स्वगतकार्य्यत्वगुणत्वद्वारा सामान्यतोदृष्टेन ज्ञानमेवात्मनि लिङ्गम्, प्रत्यभिज्ञानन्तु भिन्नकर्तृकेष्वेकत्वव्यावर्त्तमानमेककर्तृकतायां पर्य्यवस्यति। न च बुद्धिचैतन्येऽपि कार्य्यकारणभावनिबन्धनमेव प्रतिसन्धानम्, शिष्यगुरुबुद्धेरपि प्रतिसन्धानप्रसङ्गात्। उपादानोपादेयभावस्तत्र नास्ति स च प्रतिसन्धानप्रयोजक इति चेदुपादानत्वस्य द्रव्यधर्म्मतया बुद्धावसम्भवात्, सम्भवे वा बुद्धीनां क्षणिकतया पूर्व्वानुभूतप्रतिसन्धानानुपपत्तेः, न हि पूर्व्वबुद्ध्या उत्तरासु बुद्धिषु कश्चित् संस्कार आधीयते, स्थिरस्य तस्य त्वयाऽनभ्युपगमात्, क्षणिकबुद्धिधारारूपस्य चकालान्तरस्थितौ प्रतिसन्धाने वाऽसामर्थ्यात्। आलयविज्ञानसन्तानः प्रवृत्तिविज्ञानसन्तानादन्य एव कर्त्ता च प्रतिसन्धाता चेति चेत् स यदि स्थिरः तदा सिद्धं नः समीहितम्, क्षणिकबुद्धिधारारूपश्चेत् तदा पूर्व्वदोषानतिवृत्तेः, न हि तत्रापि स्थिरः कश्चित् संस्कारः। किञ्च प्रवृत्तिविज्ञानातिरिक्ते तत्र प्रमाणाभावः। अहमिति बुद्धिधारैव प्रमाणमिति चेत् भवतु तत्र, प्रवृत्तिविज्ञानान्यालयविज्ञानमेव चेदुपादत्ते तदा प्रवृत्तिविज्ञानानामुपादानतावैरूप्ये निमित्तताऽपि न स्यात् उपादानताव्याप्यत्वान्निमित्तताया:, भाऽस्तु निमित्तताऽपीति चेत् तर्हि सत्त्वमपि गतम्, अर्थक्रियाकारित्वस्य सत्त्वलक्षणत्वात् प्रवृत्तिसन्तानालयविज्ञानसन्तानाभ्यां समूय सन्तानद्वयमुपादीयत इति चेत् तर्हि किमपरामृष्टमन्वयव्यतिरेकाभ्यां, व्यासज्यवृत्तितायास्तयोर्व्याप्यमुपपत्तेः। तस्माज्ज्ञानेनाश्रयतयाऽनुमितमात्मानं प्रतिसन्धानं स्थिरत्वेन साधयतीति न किञ्चिदनुपपन्नम्। यद्वा नित्या बुद्धिर्नात्मानं कारणत्वेन गमयितुमर्हतीति साङ्ख्यमतनिरासाय सूत्रमिदमुपतिष्ठते "आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्" बुद्धितत्त्वं यत्त्वयोच्यते तज्ज्ञानमेव, बुद्धिरुपलब्धिर्ज्ञानमिति हि पर्य्यायाभिधानं, तस्मात्तादात्म्यसन्निकर्षादुत्पन्नम्। अन्यदेव त्वदभ्युपगतादन्तःकरणादित्यर्थः तथाच भवति तत् आत्मनोलिङ्गमिति भावः" १८। "प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्" १९। "आत्मन्यनुमानमभिधाय इदानीं परात्मानुमानमाह। प्रत्यगात्मनीति स्वात्मनीत्यर्थः, इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती

प्रयत्नविशेषौ ताभ्यां च हिताहितप्राप्तिपरिहारफलके शरीरकर्म्मणी चेष्टालक्षणे जन्येते तथाच परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्यः आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मात्मानुमानम्" १६ उपस्क०। आह्निकान्तरे "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसोलिङ्गम्" १। "तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते" २। "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्" ३। प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि" ४। "तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते" ५। "यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाददृष्टं लिङ्गं न विद्यते" ६। "सामान्यतोदृष्टाच्चाविशेषः" ७। "तस्मादागमिकः" ८। "अहमितिशब्दस्य व्यतिरेकान्नागमिकम्" ९। "यदि दृष्टमन्यच्चमहं देवदत्तोऽहं यज्ञदत्त इति" १०। "दृष्टयात्मनि लिङ्गे एक एव दृढत्वात् प्रत्यूढवत् प्रत्ययः" ११। "देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः" १२। "सन्दिग्धस्तूपचारः" १३। "अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः" १४। "देवदत्तो गच्छतीत्युपचारादभिमानाच्चावच्छरीरप्रत्ययोऽहङ्कारः" १५। "सन्दिग्धस्तूपचारः" १६। "नन्वयं शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः" १७। "अहमिति सुख्ययोग्याभ्यां शब्दबुद्धिभ्यामेकार्थव्यभिचाराद्विशेषसिद्धेर्नागमिकः" १८। "सुखदुःखज्ञाननिष्पत्तिविशेषादेकात्मत्वम्" १९। "व्यवस्थातोनाना" २०। वैशेषिकसूत्रेऽपि "इदानीमात्मपरीक्षायोपक्रम्यते उद्देशक्रमलक्षणेन मनःपरीक्षामतरयन्नाह। मनोगतिमात्मनोलिङ्गं वक्ष्यति तद् यदि मनो ज्ञानकरणत्वेन मूर्त्तत्वेन च परीक्षितं भवति तदा यत्प्रेरितं मनः इन्द्रियान्तराभिमतविषयग्राहिणि इन्द्रिये सम्बध्यते स आत्मेति सिद्धं भवतीत्येतदर्थं क्रमलक्षणम्। आत्मेन्द्रियार्थसन्निकर्षे सति यस्मिन् इन्द्रियसन्निकृष्टे ज्ञानस्य भावः उत्पादः, असन्निकृष्टे ज्ञानस्याभावोऽनुपादस्तन्मन इत्यर्थः। ननु मनोवैभवेऽपि करणधर्म्मत्वादेव ज्ञानायौगपद्यमुपपद्यते किञ्च मनो विभु विशेषगुणशून्यद्रव्यत्वात् कालवत् ज्ञानासमवायिकारणसंयोगाधारत्वादात्मवत् स्वार्थान्तराभाववत्त्वादाकाशादिवादि वैभवसाधकं प्रमाणमिति चेत् नैवं यदि मनो विभु ज्ञानदा सर्व्वेन्द्रियसन्निकर्षात्तः सर्व्वेन्द्रियकमेकमेव ज्ञानं स्यात्, कार्य्यविरोधाच्चैवमिति चेन्न हि सामग्री विरोधाविरोधमाकलयति येन चाक्षुषत्वरासनत्वादिविरोधाय बिभ्येत्, चित्ररूपवत् चित्राकारमेव वा स्यात्। भवत्येव दीर्घशष्कुलीभक्षणस्थले इति चेन्न तत्रापि व्यासङ्गदर्शनात्, तर्हि रूपरसगन्धस्पर्शान् युगपत् प्रत्येमीति कथमनुव्यवसाय इति चेन्न श्रोत्रसञ्चारिमनोजनितेषु पञ्चसु स्मृत्युपनीतज्ञानेषु यौगपद्याभिमानात्। व्यासङ्गोऽपि करणधर्म्माधीन इति चेन्न उक्तोत्तरत्वात्, बुभुत्साधीनो व्यासङ्ग इति चेन्न सर्व्वबुभुत्सायां सर्वविषयकसंस्कारोदयप्रसङ्गात् बुभुत्सायाश्च अभिमतार्थग्राह्येन्द्रियमनःसम्बन्धमात्रफलकत्वात्, तस्माज्ज्ञानायौगपद्यान्यथानुपपत्त्या सिध्यति अणु मनः। ततोधर्म्मिग्राहकमानबाधिताः वैभवहेतवः। किञ्च मनोवैभवे पादे मे सुप्तं शिरसि मे वेदनेति प्रादेशिकत्वं सुखादीनां न स्यात्, विभुकार्य्याणां समवायिकारणावच्छेदेशे उत्पादनियमात्। तथापि सुखादीनामणुदेशापत्तिरिति चेन्न असमवायिकारणं विभुकार्य्यं स्वदेशे जनयत्येवेति नियमात्। तथाच निमित्तचक्षुरादावच्छेदादधिकदेशेऽपि जननाविरोधात्। ननु तथापि निमित्तसमवधानानुरोध इति चेन्न उक्तनियमभङ्गप्रसङ्गात् किञ्चात्मना विभुनो मनसः संयोगोऽपि कथं स्यात्, अजोऽसाविति चेन्न विभागस्याप्यजत्वप्रसङ्गात्, अवच्छेदावच्छेदकभावस्याविरुद्धाविति चेन्न संयोगविभागयोरवच्छेदभेदस्य स्वकारणाधीनत्वात् अजयोस्तु तदभावादितिदिक्। ननु सुखाद्युपलब्धिः करणसाध्या क्रियात्वात् रूपोपलब्धिवदित्याद्यनुमानात् युगपज्ज्ञानानुत्पत्त्या वा यन्मनः सिद्धं तत्करणतया, तथाच तस्य द्रव्यत्वं नित्यत्वञ्च कुत इत्यत आह। यथाऽवयविद्रव्यानुमितो वायुरप्रत्यक्षगुणवत्त्वात् क्रियावत्त्वाच्च द्रव्यम्, तथा युगपज्ज्ञानानुत्पत्त्यानुमितं मनो गुणवत्त्वाद्द्रव्यं, नहि तस्य इन्द्रियसंयोगमन्तरेण ज्ञानोत्पादकत्वं येन गुणवत्त्वं न स्यात्। किञ्च सुखादिसाक्षात्कारः इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदिन्द्रियत्वेन मनः सिद्धम्, इन्द्रियत्वञ्च ज्ञानकारणमनःसंयोगाश्रयत्वमित्यवयविसिद्धमेव मनोद्रव्यत्वम्, नित्यत्वञ्च तस्यानाश्रितत्वात्, तस्यावयवकल्पनायां प्रमाणाभावादनाश्रितत्वमिति २। तत् किं प्रतिशरीरमेकमनेकं वेति सन्देहे निर्णायकमाह। मनः प्रतिशरीरमिति शेषः यद्येकस्मिन्नपि शरीरे बहूनि मनांसि कुतश्चित् ज्ञानप्रयत्नानां यौगपद्यं स्यात्। यत्तु नर्त्तकीकरचरणाङ्गुलीषु

युगपत् कर्म्मदर्शनाद्युगपदेव बहव: प्रयत्ना उत्पद्यन्ते इति मतं तदयुक्तं मनसः शीघ्रसञ्चारादेव तदुपपत्तेः अविनष्टवस्त्वयोग्यात्मविशेषगुणानां योगपद्यानभ्युपगमात्। एतेनैकस्मिन्नपि शरीरे पञ्च मनांसि तेषां द्वित्रिचतुःपञ्चानां तत्तदिन्द्रियसंयोगे द्वे त्रीणि चत्वारि पञ्च वा ज्ञानानि युगपज्जायन्ते इति मतं निरस्तं कल्पनागौरवप्रसङ्गात्, योगपद्याभिमानस्तु समर्थित एव, रसनेन्द्रियावच्छेदेन त्वगिन्द्रियसम्बन्धेन मनसस्तत्क्षणोगुड इति ज्ञानद्वययोगपद्यापत्तिरपि करणधर्म्मत्वादेव नास्ति, द्वित्रिच्छिन्नगोधाभुजगादावपि अवयवद्वये कर्म्म खड्गाद्यभिघाताद्वा मनस आशुसञ्चाराद्वा तदानीमेवादृष्टेन षण्डमनोन्तरप्रक्षणाद्वा। यत्तु मनोऽवयव्येव जलौकावत् तत्सङ्कोचविकाशाभ्यां ज्ञानयोगपद्यायोगपद्ये इति तत्, तदवयवकल्पनागौरवप्रतिहतमिति दिक्। इदानीं क्रमलङ्घनप्रयोजनमादर्शयन्नेवात्मपरीक्षायेषं वक्तव्यमित्याह। प्रसिद्धिर्ज्ञानमेव केवलमात्मनो लिङ्गमिति न मन्तव्यं प्राणादयोऽपि सन्ति आत्मनो लिङ्गानि। तथाहि शरीरान्तश्चारिणि समीरणे प्राणापानलक्षणे ऊर्द्ध्वाधोगतौ उत्क्षेपणावक्षेपणे सुषुप्तादाविव प्रयत्नं विनाऽनुपपद्यमाने यस्य प्रयत्नाद्भवतः स नूनमात्मा, नहि तिर्य्यग्गमनस्वभावस्य वायोरेवंस्वभावविपर्य्ययो विना प्रयत्नात्, न च विरुद्धदिक्क्रिययोर्वाय्वोः संयोगयोरूर्द्ध्वगतिः स्यादिति वाच्यम् एवं सत्यूर्द्ध्वगमनमेव स्यान्नत्वधोगमनं फुत्कारादौ वा तिर्य्यग्गमनम्, तथाचास्ति कश्चित्, यः प्रयत्नेन वायुमूर्द्ध्वमधो वा प्रेरयति। सुषुप्तिदशायां कथं प्राणापानयोरूर्द्ध्वाधोगती इति चेन्न तदानीं योग्यप्रयत्नाभावेऽपि प्रयत्नान्तरस्य सद्भावात् स एव जीवनयोनिः प्रयत्न इत्युच्यते। एवं निमेषोन्मेषावपि शरीरस्याधिष्ठातारमनुमापयतः। तथाहि निमेषस्तावत् अक्षिपक्ष्मणोः संयोगजनकं कर्म्म उन्मेषस्तयोरेव विभागजनकं कर्म्म, एते च कर्म्मणी नोदनाभिघातादिदृष्टकारणमन्तरेण निरन्तरमुत्पद्यमाने प्रयत्नं विना नोत्पद्येते यथा दारुपुत्रकनर्त्तनं कस्यचित् प्रयत्नात्, तथाऽक्षिपक्ष्मनर्त्तनमपि, तेन प्रयत्नवानुमीयते। एवं जीवनमप्यात्मलिङ्गं तथाहि जीवनपदेन लक्षणया जीवनकार्य्यं दृद्धिक्षतभग्नसंरोहणादि लक्षयति। तथा च यथा गृहपतिर्भग्नस्य गृहस्य निर्म्माणं करोति, लवीयो वा गृहं वर्द्धयति, तथा देहाधिष्ठाता गृहस्थानीयस्य देहस्याहारादिना दृद्धिमुपचयं करोति क्षतञ्च भेषजादिना प्ररोहयति भग्नञ्च करचरणादि संरोहयति तथा च गृहपतिरिव देहस्याप्यधिष्ठाता सिध्यतीति। एवं मनोगतिरप्यात्मलिङ्गं तथा हि मनस्तावन्मूर्त्तमणु चेति पूर्व्वप्रकरणे साधितम्, तस्य चाभिमतविषयग्राहिणि इन्द्रिये निवेशनम् इच्छाप्रणिधानाधीनम्, तथा च यस्येच्छाप्रणिधाने मनः प्रेरयतः स आत्मेत्यनुमीयते यथा गृहकोणावस्थितोदारकः कन्दुकं लाक्षागुटकं वा गृहाभ्यन्तर एव इतस्ततः प्रेरयति। नन्वदारुपुत्रनर्त्तयिता गृहपतिर्दारको वा न शरीरादन्यो यो दृष्टान्तः स्यात् किञ्च शरीरमेव चैतन्याश्रयः अहङ्कारास्पदत्वात्, भवति हि गौरोऽहं स्थूलोऽहमित्याद्यहङ्कारसामानाधिकरण्येन प्रत्ययः। यत्तु बाल्येऽनुभूतं यौवने वार्द्धके वा स्मरति तत्र चैत्रमैत्रयच्छरीरभेदेऽपि स्मरणं न स्यात् "नान्यदृष्टं स्मरत्यन्य" इति तत्र चैत्रमैत्रयोर्भिन्नसन्तानत्वेन प्रतिसन्धानं माऽस्तु बाल्यकौमारभेदेऽपि सन्तानैकत्वात् कार्य्यकारणभावेन प्रतिसन्धानमुपपत्स्यत इति। तत्र नूनः पित्राऽनुभूतस्य पुत्रेणापि स्मरणप्रसङ्गः, तत्र शरीरभेदस्यहोबाधक इति चेत् दृष्टेन बालशरीराद्भेदेनैव स्वशरीरस्यग्रहात् प्रतिसन्धानानुपपत्तेः अनुपलब्धपित्रकस्य बालस्य शरीरभेदाग्रहस्यापि सत्त्वात्। मम शरीरमिति ममकारसामान्येनाहङ्कारस्य भानात्। ममात्मेत्यत्रापि तथेति चेन्न तत्र ममकारस्यौपचारिकत्वात् राहोः शिर इति वदभेदेऽपि षष्ठ्युपपत्तेः। हिंसादिफलञ्च कर्त्तरि न स्यात् शरीरस्यान्यान्यत्वात्, घातकमिच्छतोभूतचैतनिकस्य कृतहानमकृताभ्यागमश्च दोष इति दिक्। इन्द्रियान्तरविकारात् स्वप्नेऽपि दृश्यते हि नागरङ्गस्य चिरविल्वस्य वा रूपविशेषसहचरितं रसविशेषमनुभूय पुनस्तादृशं फलमुपलभमानस्य रसगर्द्धि प्रवर्त्तितो दन्तोदकसम्भवः, स च नाक्षरसानुमितिमन्तरेण, अनुमितिर्न व्याप्तिस्मृतिमन्तरेण, सा च न संस्कारं विना, स च न व्याप्त्यनुभवमन्तरेण, स च न भूयोदर्शनमन्तरेणेति दृढं ज्ञानपरम्परा नैकं कर्त्तारमन्तरेण कार्य्यकारणभूता सम्भवतीति तथा च गौतमीयं सूत्रम् "इन्द्रियान्तरविकारात्" इति। सुखादयश्च ज्ञानवदेवात्मलिङ्गानि द्रष्टव्याः। तथाहि सुखादिकं क्वचिदाश्रितं द्रव्याश्रितं सामान्यतोदृष्टमेव अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं विषयीकरोति न हि पृथिव्याद्यष्टकानाश्रिता इच्छा द्रव्याश्रितेति पृथिव्या अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं पृथकारमनादाय पर्य्यवस्यति यत्र तु पृथक्त्वं न बाधावता-

रस्तत्राष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं व्यतिरेकिसाध्यमिति भावः । व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति तु तुच्छम्, येन विना प्रतीतिर्न पर्य्यवस्यति तस्यैव तत्प्रकारत्वात् अन्यथा द्व्यणुकं कार्य्यानाश्रितं सत् क्वचिदाश्रितम् अवयवित्वादित्यादावकार्य्याश्रितत्वप्रकारिकाऽनुमितिर्न स्यात्४ । ननु सिद्ध्यतु आत्मा स्थिरः, स तु नित्य इति कुतः, कुतश्च द्रव्यमित्यत आह । यथा वायुपरमाणोरवयवकल्पनायां न प्रमाणमतोनित्यत्वं तथात्मनोऽपि, यथा गुणवत्त्वाद्वायुपरमाणुर्द्रव्यं तथात्माऽपीत्यर्थः५ । पूर्व्व पक्षमाह । सन्निकर्षे सति अयं यज्ञदत्त इति प्रत्यक्षं नास्ति चेत् तदा दृष्टं प्रत्यक्षतो गृहीतव्याप्तिकं लिङ्गं नास्ति, यथा वह्निना प्रत्यक्षेण सहचरितो गृहीतो धूमो वह्नौ दृष्टं लिङ्गं तथात्मसाधकं लिङ्गं दृष्टं नास्तीत्यर्थः६ । ननु प्रत्यक्षदृष्टव्याप्तिकस्य दृष्टलिङ्गस्याभावेऽपि सामान्यतोदृष्टमेव लिङ्गं भविष्यति नहि ततो नानुमितिरित्याशङ्क्य पुनः पूर्व्वपक्षी आह । सामान्यतोदृष्टमपि लिङ्गं भवति न तु तत आत्मत्वेन अष्टद्रव्यातिरिक्तद्रव्यत्वेन वा स्यादात्मसिद्धिः किन्तु तेनेच्छादीनां क्वचिदाश्रितत्वमात्रं सिद्ध्येत् तच्च नात्ममननौपयिकमित्यर्थः तदेतदाह अविशेष इति७ । तत् किं "योऽपहतपाप्मा स आत्मा" इत्याद्यागमोऽनर्थक एवेत्याशङ्क्य न एवाह । आगममात्रसिद्ध एवात्मा न त्वनुमेयः दृष्टसामान्यतोदृष्टयोर्लिङ्गयोरभावात् तस्मात् सम्यगुपनिषदां श्रवणात् तत्त्वसाक्षात्कार उत्पद्यते न तु मननप्रणालिकया, तथाच मननप्रयोजनकमिदं तन्त्रमतन्त्रम्, दृष्टं हि भूतदयाकन्दीसन्तरणादावुपदेशमात्रादेव साक्षात्कारि ज्ञानमुत्८ । तदेवं त्रिभिः सूत्रैः पूर्व्वपक्षे सिद्धान्तवाद्याह । नागममात्रं प्रमाणमात्मनि, किन्त्वहमिति पदमात्मपदं वा साभिधेयं पदत्वात् घटादिपदवत् इत्यनुमानादप्यात्मसिद्धिः । ननु पृथिव्याद्येव तदभिधेयं स्यादित्यत आह व्यतिरेकादिति पृथिव्यादितोऽहमिति पदस्य व्यतिरेकाद्व्याहत्तेरित्यर्थः । नहि भवत्यहं पृथिवी अहमापः अहन्तेजः अहं वायुः अहमाकाशम् अहं कालः अहं दिक् अहं मन इति व्यपदेश्यः, प्रत्ययो वा । शरीरे भवतीति चेन्न परशरीरेऽपि तत्प्रसङ्गात्, स्वशरीरे भवतीति चेन्न स्वात्मभिन्नस्वानिरूक्तेः मम शरीरमिति वैयधिकरण्येन प्रत्ययाच्च । नन्विदमपि सामान्यतोदृष्टमेव तच्च विशेषाप्रयोजकमिति दूषितमेवेति चेन्न अहम्पदेऽहन्त्वमात्मत्वमेव प्रकारः तथा च पक्षस्यैकार्थत्वादेवाऽहन्त्वस्य प्रवृत्तिनिमित्तत्वं पर्य्यवसन्नं तज्ज्ञानन्यसाधारणमेवेति विशेषसिद्धेः एवं सामान्यतोदृष्टादपि बाधसहकृतादविशेषसिद्धिः । यच्चोक्तं श्रवणादेव साक्षात्कारः किं मननेनेति तदयुक्तम् नहि मननमन्तरेण सङ्कुचितस्याश्रद्धामलस्यालनम्, नच तदन्तरेण तत्र निदिध्यासनाधिकारः, नच निदिध्यासनमन्तरेण सवासनमिथ्याज्ञानोन्मूलनक्षमस्तत्त्वसाक्षात्कारः, अभ्यासादेव हि कामातुरस्याकस्मात् कामिनीसाक्षात्कारः, नहि शाब्दमानुमानिकं वा ज्ञानं मिथ्याज्ञानोन्मूलनक्षमं दिङ्मोहादौ दृष्टमिति भावः । ननु तथापि परोक्षे आत्मनि कथं सङ्केतग्रह इति चेत् क एवाह नात्मा प्रत्यक्ष इति, किन्तु मनसा संयोगप्रत्यासत्त्यात्मग्रहः । कथमन्यथाऽहं सुखी जानामीच्छामि यते दुःखीत्यादिप्रत्ययः मनोग्रयभवस्तुकः सन्दिग्धवस्तुको वा, नीलादिप्रत्ययवत् अस्यापि निश्चितवस्तुकत्वात्, नच लैङ्गिकः, लिङ्गज्ञानमन्तरेणापि जायमानत्वात्, नापि शाब्दः, तदनुसन्धानानुविधानात्, प्रत्यक्षाभासोऽयमिति चेत्, तर्हि क्वचिदनाभासमित्यपोऽपि । नन्वप्रमितमारोप्यते इत्यावेदयिष्यतेऽ । एवञ्चेत् किमनुमानेनेति पूर्व्वपक्षवादी आह । इतिशब्दो ज्ञानप्रकारमाह दृष्टमिति भावे-क्तप्रत्ययान्तम्, अन्यज्ञमित्यध्यक्षं तेनायमर्थः अयं देवदत्तः अयं यज्ञदत्त इति प्रकारकं दृष्टं दर्शनं अध्यक्षमेवास्ति यदि किमनुमानप्रयासेन "नहि कारिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमानारः"१० । अत्र सिद्धान्त्याह । दृष्टे प्रत्यक्षेण गृहीते आत्मनि लिङ्गे समूतसामग्रीके सति एक एव एकवैषयिक एव प्रत्ययः । प्रत्यय इति निरस्तसमस्तविभ्रमाद्यङ्कितमाह, कृत एवमित्यत आह दृढत्वात् प्रमाणसंज्ञेनान्यथाभावशङ्कानिवर्त्तनपटुत्वात्, तत्र दृष्टान्तमाह प्रत्यक्षवदिति यथा दूरासीयप्रत्यक्षे सत्यपि संवादार्थं बलाकादिलिङ्गेनाऽपि तदनुमानं तदुक्तम् "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तार्किकाः" इति, इदमत्राकूतम् यद्यात्मा कदाचित् प्रत्यक्षे चैतसे भासत एव तथापि अहं गौरः अहं कृश इत्यादिविरोधिप्रत्ययान्नरतिरस्कृतो न तथा स्पष्टमनुभवारूढो भवति विद्युत्सम्भ्रमसङ्गतज्ञानवत्, तत्र लिङ्गेन अनन्यथासिद्धेन ज्ञानान्तरसत्यद्यमानं पूर्व्वज्ञानमेव स्थिरीकरोति । किञ्च "श्रोतव्यो मन्तव्य" इत्यादिविधिबोधितस्यात्ममननस्य दृष्टसाधनत्वावगतौ अनुमित्यावश्यमात्मन्यनुमानप्रवृत्तिः तदव्यतिरेके निदिध्यासनासम्भवे साक्षात्काराभावेऽपवर्गासम्भवादिति भावः । अहं देवदत्तोऽहं यज्ञदत्त इति प्रती-

तिङ्याभिधानमात्मनः प्रत्यात्मवेदनीयत्वं सूचयितुम् ११। ननु यदि यज्ञदत्तोऽहमिति प्रत्यय आत्मनि तदा यज्ञदत्तो गच्छतीति गमनसामानाधिकरण्यमानमनुपपन्नमित्यत आह। अस्ति हि अहं गौरः अहं स्थूल इति प्रत्ययः अस्ति च मम शरीरमिति भेदप्रत्ययः तत्र देवदत्तो गच्छतीति गतिसामानाधिकरण्यानुभवो व्यवहारश्च भाक्तः, ममेति प्रत्ययस्य यथार्थत्वात् यद्यपि देवदत्तत्वं शरीरवृत्तिर्जातिस्तेन देवदत्तो गच्छतीति मुख्य एव प्रयोगे यथार्थ एव च प्रत्ययः। तथापि देवदत्तपदं तदपच्छिन्नात्मनि प्रयुञ्जन्नेत् तदौपचारिकं बोद्धव्यम् १२। अत्र शङ्कते। तुशब्दः पूर्वपक्षद्योतकः। आत्मशरीरयोस्तावदहमिति प्रत्ययः प्रयोगश्च दृश्यते तत्र क्व मुख्यः क्व वौपचारिक इति सन्देहः १३। समाधत्ते। अर्थान्तरमात्मस्वरूपं प्रत्यक्षं यत्र प्रत्यये स प्रत्ययोऽर्थान्तरप्रत्यक्षः। अयमर्थः अहमिति प्रत्ययस्य प्रत्यगात्मनि स्वात्मनि भावाद् परत्र परात्मनि अभावात् अर्थान्तरे स्वात्मन्येव मुख्यः कल्पयितुमुचितः यदि तु शरीरे मुख्यः स्यात् तदा बहिरिन्द्रियग्राह्यः स्यात् न हि शरीरं मानसप्रत्यक्षं मानसश्चायमहमिति प्रत्ययः बहिरिन्द्रियव्यापारमन्तरेणापि जायमानत्वात् अहं दुःखी अहं सुखी जाने यते इच्छाम्यहमिति योग्यविशेषगुणोपहितस्यात्मनो मनसा विषयीकरणात्, नायं लैङ्गिको लिङ्गानुसन्धानमन्तरेणापि जायमानत्वात्, न शाब्दः शब्दाकलनमन्तरेणापि जायमानत्वात्, तस्मान्मानस एव। मनसश्च बहिरस्वातन्त्र्येण शरीरादावप्रवृत्तेरिति भावः। किञ्च यदि शरीरे स्यात्, परशरीरे स्यात्, स्वात्मनि यदि स्यात् तदापि परात्मनि स्यादिति चेन्न परात्मनः परस्यातीन्द्रियत्वात् तद्विशेषगुणानामयोग्यत्वात् योग्यविशेषगुणोपग्रहेण तस्य योग्यत्वात्, न केवलमात्मन इदं शीलं किन्तु द्रव्यमात्रस्य, द्रव्यं हि योग्यविशेषगुणोपग्रहेणैव प्रत्यक्षं भवति। आकाशमपि तर्हि शब्दोपग्रहेण प्रत्यक्षं स्यादितिचेत् स्यादेवं यदि श्रोत्रं द्रव्यग्राहकं भवेत्, आकाशं वा रूपवत् स्यात्। आत्मनोऽपि नीरूपत्वं तल्लक्षणमिति चेत् बहिर्द्रव्यमात्र एव प्रत्यक्षतां प्रति रूपवत्त्वस्य तन्त्रत्वात्, प्रत्यगित्ययं शब्दोऽन्यव्यावृत्तमाह १४। पुनः शङ्कते। अहङ्कारोऽहमिति प्रत्ययः स च शरीरप्रत्यक्षः शरीरं प्रत्यक्षं विषयो यत्र स शरीरप्रत्यक्षः। देवदत्तो गच्छतीत्युपचारात्तावत् प्रयोगः प्रत्ययो वा त्वया समाहितः सचोपचार आभिमानिकः यतोऽहं गौरः अहं स्थूलः सौभागिनेयोऽहं पुनरुक्तजन्मेत्यादयः प्रत्ययाः प्रयोगाश्चोपचारेण समन्वयितुमशक्या इत्यर्थः १५। सिद्धान्तमाह। तुशब्दोऽयं सिद्धान्तमभिव्यनक्ति। उपचारोऽयमाभिमानिकः किन्तु शरीर एवायमहम्प्रत्यय इति यदुक्तं तत्रापि सन्देह एवेत्यर्थः तथाच प्रत्ययस्योभयत्रापि कूटसाक्षित्वेन विशेषावधारणाय यतितव्यं तत्र यत्रे क्रियमाणे निमीलितात्तस्याप्यहमिति-प्रत्ययदर्शनात् शरीरभिन्ने बहिरिन्द्रियागोचरे वस्तुनि स मन्तव्यः, शरीरे भवन् परशरीरेऽपि स्यात् चक्षुर्नैरपेक्ष्येण च न स्यात्। अहं ह्रस्वः स्थूलो वा सुखीति कथं सामानाधिकरण्यमिति चेन्न सुखाद्यवच्छेदकत्वेनापि तत्र शरीरभानसम्भवात् सिंहनादवदिदं गहनमितिवत्, अहन्त्वमात्मनि शरीरे समारोप्यते मनसोपस्थितम्, त्वगिन्द्रियोपनीतमौष्ण्यम् उष्णं जलम् उष्णं शरीरमितिवत् १६। सिद्धान्तमुद्दृंहयन्नाह। ज्ञानमिति योग्यं सुखदुःखादिकमात्मगुणमुपलक्षयति, यथा यज्ञदत्तविष्णुमित्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपि भिन्नमेव तथा च यथा यज्ञदत्तस्येदं शरीरं तथा यज्ञदत्तस्य ज्ञाने सुखादौ वाऽनुभवे अहं सुखी जाने यते इच्छामीति ज्ञानादिकं विषयो भवति योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादीनामपि प्रत्यक्षत्वसम्भवात् न च सम्भवति, तस्मात् ज्ञानसुखादीनां शरीरादन्य एवाश्रयो वक्तव्य इति भावः। शरीरविशेषात् शरीरस्य भेदादित्यर्थः तथा च शरीरभेदं प्राप्य ज्ञानं, न तु विषय इति ल्यब्लोपे पञ्चमी १७। नन्वात्मा न प्रत्यक्षः नीरूपद्रव्यत्वात् निरवयवद्रव्यत्वाद्वा आकाशवत्, यथा चाह ह्रस्वो गौर इति बुद्धेः शरीरमेव विषयो वाच्यः, क्वचिदहं सुखीत्यादिधीरपि यद्यस्ति, तथाप्याश्रयमन्तरेण भासमानानां सुखादीनां शरीरे समारोप इत्येव कल्पयितुमुचितम्, यथोष्णं सुरभि जलम् इत्याश्रयमन्तरेण प्रतीयमानयोरौष्ण्यसौरभयोर्जले समारोपः, नन्वेतदनुरोधेन जलप्रत्यक्षेऽपि प्रसिद्धजलमन्तरेणान्यविषयत्वम्, तथाऽहमित्यप्रत्यक्षं शरीर एव वास्तवम्, सुखादिकन्तु कदाचित्तत्रारोप्यते तेनात्मनि प्रत्यक्षाकारं ज्ञानं नास्त्येव सुखाद्याधारत्वेन यत्कल्पनीयं तदागमसिद्धं भवतु न तत्रापि यह इत्यत आह। अयमर्थः अहं सुखी अहं दुःखीति प्रत्ययो नागमिको न शाब्दो नापि लैङ्गिकः शब्दलिङ्गयोरनुसन्धानमन्तरेणापि जायमानत्वात् प्रत्यक्षत्वे च नीरूपत्वं निरवयवत्वञ्च यद्बाधकमुक्तं तद्बहिरिन्द्रियप्रत्यक्षतायां भवति

तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात्, मानसप्रत्यक्षता च तदन्तरेणापि । ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह शब्दवद्व्यतिरेकाव्यभिचारादिशेषसिद्धेरिति यथा क्षित्यादिषु द्रव्येषु शब्दस्य व्यतिरेकोऽव्यभिचारी नियतस्तेन तदाश्रयस्याद्रव्यातिरिक्तस्याकाशरूपस्य विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अद्रव्यातिरिक्तेन भवितव्यम् । नन्वेतावतास्यानुमानिक एव आत्मा न तु प्रत्यक्ष इयत आह अहमिति सुखयोग्याभ्यामिति अहमितीतिकारेण ज्ञानाकारमाह तेनाहमिति ज्ञानं शब्दलिङ्गानुसन्धानमन्तरेण निमीलिताक्षस्य यदुत्पद्यते तत्स्वेन अहम्त्ववता योग्येन प्रमाणसिद्धेन उपपादनीयम्, न तु घटादिना, तत्रेच्छाया व्यतिरेकस्य व्यभिचारात् अभावात् । सुखयोग्याभ्यामित्यनन्तरम् उपपादनीयमिति पूरणीयम् आत्मनि प्रमाणानि बहूनिसन्ति ग्रन्थगौरवभियानोक्तानि मयूखेऽन्वेष्टव्यानि१८। आत्मपरीक्षाप्रकरणं समाप्य इदानीमात्मनानात्वप्रकरणमारभते तत्र पूर्वपक्षसूत्रम् । एक एव आत्मा चैत्रमैत्रादिदेहभेदेऽपि, कुतः सुखदुःखज्ञानानां निष्पत्तेरुत्पत्तेरविशेषात् सर्वशरीरावच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरविशिष्टैव यतः यद्यात्मभेदसाधकं लिङ्गान्तरं भवेत्तदा सिद्धेदात्मभेदः, न च तदस्ति, यथा तत्तत्प्रदेशावच्छेदेन शब्दनिष्पत्तावपि शब्दलिङ्गाविशेषादेकमेवाकाशम् यौगपद्यादिप्रत्ययलिङ्गाविशेषादेक एव कालः पूर्वापरादिप्रत्ययलिङ्गाविशेषादेकैव दिक्१९। सिद्धान्तमाह । नाना आत्मानः कुतः ? व्यवस्थातः व्यवस्था प्रतिनियमः । यथा कश्चिदाढ्यः, कश्चित् रङ्कः, कश्चित् सुखी, कश्चिद्दुःखी, कश्चिदुच्चाभिजनः, कश्चिन्नीचाभिजनः, कश्चिद्विद्वान्, कश्चित् जाड्य इतीयं व्यवस्था आत्मभेदमन्तरेणानुपपद्यमाना साधयत्यात्मनां भेदेम्, न च जन्मभेदेन बाल्यकौमारवार्द्धक्यभेदेन वा, एकस्याप्यात्मनो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभेदेऽपि स्यादिति वाच्यं कालभेदेन विरुद्धधर्माध्याससम्भवात्" २० । उपस्कारः सांख्यसूत्रभाष्ययोश्च प्रत्येकं भूतेषु चैतन्यादर्शनेन समुदाये न चैतन्यमित्युक्तं यथा "न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः"१ । "प्रपञ्चमरणाद्यभावश्च"२। "सङ्घातविशेषाच्चेत् प्रत्येकपरिदृष्टे सांकृत्ये तदुद्भवः३" सां०सू० "देहस्य भौतिकत्वेन यत् सिध्यति तदाह । भूतेषु पृथक्कृतेषु चैतन्यादर्शनाद्भौतिकस्य देहस्य न स्वाभाविकं चैतन्यं किन्त्वौपाधिकमित्यर्थः १ । बाधकान्तरमाह । प्रपञ्चस्य मरणस्य सुषुप्त्याद्यभावश्च देहस्य स्वाभाविकचैतन्ये सति स्यादित्यर्थः । मरणसुषुप्त्यादिकं हि देहस्याचेतनता सा च स्वाभाविकचैतन्ये सति नोपपद्यते स्वभावस्य यावद्द्रव्यभावित्वादिति २ । प्रत्येकादृष्टेरिति यदुक्तं तत्राशङ्क्य परिहरति । ननु यथा मादकता शक्तिः प्रत्येकद्रव्यावृत्तिरपि मिलितद्रव्ये वर्त्तते एवं चैतन्यमपि स्यादिति चेन्न प्रत्येकपरिदृष्टे सति सांहत्ये तदुद्भवः सम्भवेत् । प्रकृते तु प्रत्येकपरिदृष्टत्वं नास्ति । यतो दृष्टान्ते प्रत्येकं यावादिभिः सूक्ष्मतया मादकत्वे सिद्धे संहतभावकाले मादकत्वाविर्भावमात्रं सिद्ध्यति । देहावस्थायां तु प्रत्येकभूतेषु सूक्ष्मतया न केनापि प्रमाणेन चैतन्यं सिद्धमित्यर्थः ननु समुदिते चैतन्यदर्शनेन प्रत्येकभूते सूक्ष्मं चैतन्यशक्तिरनुमेयेति चेन्न अनेकभूतेष्वनेकचैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव नित्यवित्स्वरूपस्य कल्पनौचित्यात् । ननु यथावयवैरारब्धमानमपि परिमाणजन्यत्वाद्दृष्टं कार्यं घटादौ दृश्यते एवमेव शरीरे चैतन्यं स्यादिति चेत् मैवम् भूतगतविशेषगुणानां सजातीयकारणगुणजन्यतया कारणे चैतन्यं विना देहे चैतन्यासम्भवादिति"भा० अयमात्मा सांख्यैः पुरुषशब्देनाभिधीयते तै च नाना "जन्मादिव्यवस्थातः पुरुषबहुत्वम्"सां०सूत्रात्। वेदान्तिनस्तु तस्यैकत्वेऽपि उपाधिभेदेन कर्मीपाध्युपाध्यादिभेदेनाकाशभेदवत् नानात्वं वस्तुत एकत्वम् "इन्द्रो मायाभिः पुरुरूप ईयते" "रूपंरूपं प्रतिरूपो बभूवेति" श्रुतेः अंशोननाव्यपदेशात्" "तद्गुणसारत्वादिति" च न्यायाच्चेति । एतत्प्रपञ्चस्तु भा०भा० द्रष्टव्यः ।

मिताक्षरायामु देहाद्यतिरिक्तात्मास्तित्वे प्रमाणं दर्शितं यथा "भूतचैतन्यवादिप्रत्यभिज्ञित्सीर्षुराह" । "वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च । आत्मा गत्या तथाऽऽगत्या सत्त्वेन ह्यन्तरेण च । श्रेयसा सुखदुःखाभ्यां सम्भिश्च शुभाशुभैः । निमित्तयत्नसम्बन्धसंयोगजैः फलैः । तारानक्षत्रसञ्चारैर्जागरैः स्वप्नजैरपि । आकाशपवन ज्योतिर्जलभूतिभिरेवमा । मन्वन्तरयुगप्राप्त्या मन्त्रौषधिफलैरपि । विज्ञातारं विद्यमानम् कारणानुगतसाधा"भा० वेदैः "सएष नेति नेतीत्यात्मेति" अस्थूलमनण्वह्रस्वमपापविषादम्" इत्यादिभिः । शास्त्रैश्च मीमांसान्वीक्षिक्यादिभिः विज्ञानं चैव मनेदं शरीरमित्यादि देहव्यतिरिक्तात्मज्ञैः । तथा जन्ममरणाभ्यां जन्मान्तरानुयायिधर्म

नियताभ्यान्देहातिरिक्तात्मानुमानम् । आर्त्या जन्मान्तर गतकर्म्मानुष्ठाननियततया । तथा गमनागमनाभ्यां ज्ञानेच्छाप्रयत्नाधारनियताभ्यामपि · भौतिकदेहातिरिक्तात्मानुमानम् । न हि देहस्य चैतन्यादि सम्भवति यतः कारणगुणप्रक्रमेण कार्य्यद्रव्ये वैशेषिकगुणारम्भोदृष्टः । न च तत्कारणभूतपार्थिवपरमाण्वादिषु चैतन्यादि समवायः सम्भवति तदारब्धस्तम्भकुम्भादिभौतिकेष्वनुपलम्भात् । न च मदशक्तिवदुदकादिद्रव्यान्तर संयोगज इति वाच्यम् यत्नोःसाधारणगुणत्वादतो भौतिकदेहातिरिक्तश्चैतन्यादिसमवाय्यङ्गीकर्त्तव्यः । सत्यान्दते प्रसिद्धे । श्रेयो हितप्राप्तिः । सुखदुःखे आमुष्मिके । तथा शुभकर्म्मानुष्ठानमशुभकर्म्मपरित्यागः । एतैश्च ज्ञाननियतैर्देहातिरिक्तात्मानुमानम् । निमित्तं भूकम्पादि यत्नज्ञानम्भिङ्गलादिपतत्रिचेष्टालिङ्गकम् ज्ञानम् ग्रहाःसूर्य्यादयः तत्संयोगजैः फलैः । तारा अश्विन्यादिव्यतिरिक्तानि ज्योतींषि नक्षत्राण्यास्वयुक्प्रभृतीनि एतेषां सञ्चारैः शुभाशुभफलद्योतनैः । जागरैर्जागरावस्थाजन्यैश्च सच्छिद्रादित्यादिदर्शनैः । तथा स्वप्नजैः खरवराहयुक्तरथारोहणादिज्ञानैः । तथा आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः । तथा मन्वन्तरप्राप्त्या युगान्तरप्राप्त्या देहेऽनुपपद्यमानया तथा मन्त्रौषधिफलैः प्रेक्षापूर्व्वकैः क्षुद्रकर्म्मादैः साक्षात्परम्परया वा देहेऽनुपपद्यमानैर्विद्यमानं हे सुनयो विद्म जानीत । किञ्च । "अहङ्कृतिः स्मृतिर्मेधा द्वेषोबुद्धिः सुखं धृतिः । इन्द्रियान्तरसञ्चार इच्छा धारणजीविते । स्वप्नः स्वप्नश्च भावानामारणं मनसोगतिः । निमेषश्चेतना यत्न आदानम्भ्राञ्जनौतिकम् । यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः । तस्मादस्ति परोदेहादात्मा सर्वग ईश्वरः" या० । अहङ्कृतिः अहङ्कारः । स्मृतिः प्राग्भवीयानुभवभावितसंस्कारोद्बोध निबन्धना स्मर्य्यमाणादिगोचरा । सुखमैहिकम् । धृतिर्धैर्य्यम् । इन्द्रियान्तरेण दृष्टेऽर्थे इन्द्रियान्तरस्य सञ्चारः यमहमद्राक्षन्तमहं स्पृशामीत्येवमनुसन्धानरूप इन्द्रियान्तरसञ्चारः । अत्रेच्छाप्रयत्नचैतन्यानां स्वरूपेण लिङ्गत्वम् । पूर्व्वश्लोकेऽनुगमनसत्यवचनादिहेतुतयार्थिकम् लिङ्गत्वमित्यपौनरुक्त्यम् । तथा धारणं शरीरस्य, जीवितं प्राणधारणम् । स्वर्गोनियतदेहान्तरोपभोग्यः सुखविशेषः । स्वप्नः प्रसिद्धः पूर्व्वश्लोके तु स्वप्नस्य शुभफलद्योतकतया लिङ्गत्वमत्र स्वरूपेणेत्यपौनरुक्त्यम् । भावानामिन्द्रियादीनामारणं मनसोगतिश्चेतनाधिष्ठानव्याप्ता । निमेषः प्रसिद्धः तथा पञ्चभूतानामुपादानम् । यस्मादेतानि लिङ्गानि भूतेषूपपन्नानि साक्षात्परम्परया वात्मनोद्योतकानि दृश्यन्ते । तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति सिद्धम्" इत्यन्तेन मिता० ।

देहात्मनोः स्वभावभेदपर्य्यालोचनयाऽपि न यथा तयोरैक्यं तथा दर्शितं विवेकचूड़ामणौ "देहोऽयमन्नभवनोऽन्नमयस्तु कोषस्यान्नेन जीवति विनश्यति तद्विहीनः । त्वक्चर्म्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्यशुद्धः । पूर्व्वं जनेरपि मृतेरधुनापयस्ति जातक्षणः क्षणगुणोऽनियतस्वभावः । नैकोजडश्च घटवत्परिदृश्यमानः स्वात्मा कथं भवति भावविकारवेत्ता । पाणिपादादिमान् देहो नात्मा व्यङ्गेऽपि जीवनात् । तत्सच्छक्तेरनाशाच्च न नियम्योनियामकः । देहतद्धर्म्मतत्कर्म्मतदवस्थादिसाक्षिणः । स्वतएव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः । शल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः । कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः । त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति । विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम् । देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवाभिदुषस्त्वहंधीः । विवेकविज्ञानवतोमहात्मनो ब्रह्माहमित्येव मतिः सदात्मनि । अनात्मबुद्धिं त्यज मूढबुद्धे ! त्वङ्मांसमेदोऽस्थिपुरीषराशौ । सर्व्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शान्तिं परमां भजस्व । देहेन्द्रियादावसति भ्रमोदितां विद्वान्हन्तां न जहाति यावत् । तावच्च तस्यास्ति विमुक्तिवार्त्ताप्यम्बरेष वेदान्तनयान्तदर्शी । छायाशरीरे प्रतिबिम्बगात्रे यत्स्वप्नदेहे हृदि कल्पिताङ्गे । यथात्मबुद्धिस्तव नास्ति काचित् जीवच्छरीरे च तथैव मास्तु । देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजम् । यतस्ततस्त्वं जहि तां प्रयत्नात् त्यक्तोऽद्य चित्ते न पुनर्भवाशा" । आत्मस्वरूपमुक्तं विवेकचूड़ामणौ "अस्ति कश्चित् स्वयं नित्यमहंप्रत्ययलम्बनः । अवस्थात्रयसाक्षी सन् पञ्चकोषविलक्षणः । योविजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु । बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् । यः पश्यति स्वयं सर्व्वं यं न पश्यति कश्चन । यश्चैनयति बुद्ध्यादिं न तु यं चेतयत्ययम् । येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किञ्चन । आभासरूपमिदं सर्वं यं भान्तमनुभात्यम्

यम् । यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः । विषयेषु स्वकीयेषु वर्त्तन्ते प्रेरिता इव । अहङ्कारादिदेहान्ता विषयाश्च सुखादयः । वेद्यन्ते घटवदृश्येन नित्यबोधस्वरूपिणा । एषोऽन्तरात्मा पुरुषः पुराणोनिरन्तराखण्डसुखानुभूतिः । सदैकरूपः प्रतिबोधमात्रो येनेषिता वागसवश्चरन्ति । अन्त्रैव सत्यात्मनि धीगुहायामव्याकृताकाशउरुप्रकाशः । आकाश उच्चैरविवत् प्रकाशते स्वतेजसा विश्वमिदं प्रकाशयन् । ज्ञाता मनोऽहङ्कृतिविक्रियाणां देहेन्द्रियप्राणकृतक्रियाणाम् । अग्नोऽग्निवत्तानुवर्त्तमानो न चेष्टते नो विकरोति किञ्चन । न जायते नो म्रियते न वर्द्धते न क्षीयते नो विकरोति नित्यः । विलीयमानेऽपि वपुष्यमुष्मिन् न लीयते कम्भ इवाम्बरं स्वयम् । प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः सदसदिदमशेषं भासयन्निर्विशेषः । विलसति परमात्मा जाग्रदादिष्ववस्थास्वहमहमिति साक्षात् साक्षिरूपेण बुद्धेः । नियमितमनसामुं त्वं समात्मानमात्मन्यमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् । जनिमरणतरङ्गापारसंसारसिन्धुं प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः । अनात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः प्राप्तोज्ञानाज्जननमरणक्लेश संपातहेतुः । येनैवायं वपुरिदमसत् सत्यमित्यात्मबुद्ध्या पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत् । अतस्मिंस्तद्बुद्धिः प्रभवति निमूढस्य तमसा विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा । ततोऽनर्थव्रातो निपतति समादात्मरधिक स्ततो योऽसद्ग्राहः स हि भवति बन्धः शृणु सखे ! । अखण्डनित्याद्वयबोधशक्त्या स्फुरन्तमात्मानमनन्तवैभवम् । समावृणोत्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिम्बम् । तिरोभूते स्वात्मन्यमलतरतेजोवति पुमाननात्मान मोहाद्वहमिति शरीरं कलयति । ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति । महामोहग्राहग्रसनगलितात्मावगमनो धियोनानावस्थां स्वयमभिनयंस्तद्गुणतया । अपारे संसारे विषयविषपूरे जलनिधौ निमज्जोन्मज्ज्यायं भ्रमति कुमतिः कुत्सितगतिः । भानुप्रभासङ्घनिताभ्रपङ्क्तिर्भानुं तिरोधाय विजृम्भते यथा । आत्मोदिताहङ्कृतिरात्मतत्त्वं तथा तिरोधाय विजृम्भते स्वयम्" ।

शरीरमध्ये आत्मध्यानस्थानं स्वरूपञ्च या० स्मृतौ मिताक्षरायाञ्चोक्तम् । "हृदयप्रतिसङ्काशानि हृदयादभिनिःसृताः । हिताहिता नाम नाड्यस्तासां मध्ये यमिप्रभम् । मण्डलन्तस्य मध्यस्थ आत्मा दीपइवाचलः । मन्तेयस्तविदित्वेह पुनराजायते न तु" या० । "हृदयप्रदेशादभिनिःसृताः कदम्बकुसुमकेसरवत्सर्व्वतो निर्गता हिताहितकरत्वेन हितेति संज्ञा द्वासप्ततिसङ्काशानि नाड्यो भवन्ति । अपरास्त्रिशतोनाप्यस्तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते हृदि विपर्य्यस्ते नासाविवरसम्बन्धे प्राणापानायतने । सुषुम्णाख्या पुनस्तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्यता । तासां नाडीनां मध्ये मण्डलवन्मध्यम् । तस्मिन्नात्मा निवातस्थदीपइवाचलः प्रकाशमान आस्ते । सएवमूर्त्तो ज्ञातव्यः । यतस्तत्साक्षात्कारादिकः संसारे न पुनः संसरणलक्षणत्वमाप्नोति" मिता० ।

आत्मशब्दनिर्वचनञ्च तैत्तिरीयके "यदाप्नोति यदादत्ते यच्चात्ति विषयान् इह । यच्चास्य सन्ततोभावस्तस्मादात्मेति कथ्यते" अन्यत्र च "प्रत्यग्वयः परागुरुपात् व्याप्तोऽनुभवात्मना । प्रथते यः स आत्मेति प्राज्ञैरात्मविदोजनाः इति" स च पञ्चधा । "भूतात्मा चेन्द्रियात्मा च प्रत्यगात्मा तथा भवान् । आत्मा च परमात्मा च पञ्चधः मत" इत्येकस्यैवात्मनो भूतादिषु प्रविष्टानविष्टत्वेनावस्थितेः पञ्चविधत्वम् । "त्यज्यमानेऽपि नत्यक्तः प्राप्यमाणेऽपि नाप्यते । आगमापायसाक्षी यः स आत्मानमात्मकं" इति तत्र देहे "भर्त्तृरूपसखि निर्विशेषनीरागनोमधमदोद्भूमितानाम्" किरा० "आत्मनोऽहान्" भट्टि० "प्रभाविनं भाविनमन्तमात्मनः" माघः । आत्मनोनित्यत्वेन देहस्यैवात्मत्वमिह विवक्षितम् तदप्यच्छिन्नचेतनस्यात्मशब्दार्थत्वेऽपि विशेषे नागान्वयासम्भवात् विशेषपक्षे तदन्वयः । एवं "व्यापादयेद्य आत्मानमित्यादौ" "ये केवात्मजनोजना" इत्यादावपि "स्थितः सर्वेन्द्रियेमोर्धी क्षान्त्वा मेरुरियात्मना" रघुः । "आत्मना शरीरेण" भट्टि० "व्यत्यस्यानमधर्मस्य तदात्मानं सृजाम्यहम्" गीता । यत्र "कर्म्मात्मा त्वपरोयोऽसौ बन्धमोक्षैः स युज्यते" इति कर्म्मणि आत्मा यत्नोयस्तेत्यर्थः । भूतात्मेत्यादौ आत्मशब्दः गौणः आत्मोपकारकत्वात् आत्मजन्यत्वाद्वा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुत्या भूतानामात्मन उत्पत्तिप्रतिपादनात् । स्वभावे, बुद्धौ च "तमात्मसम्यमनिन्दितात्मा" रघुः । "अनिन्दितात्मा अगर्हितस्वभावः आत्मसम्यं बुद्धिसम्यम्" मल्लि० । १२देहेन्द्रियबुद्धिषु चैतन्ये च "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" स्मृतिः । अन्तःकरणे, "आत्मानमात्मना वेत्सि" कुमा० । "तन्मनोऽकृतात्मानो स्युः"

छ०उ० "अनेनात्मना मनसा आत्मन्वी मनस्वी स्याम्" भा० स्वरूपे" अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति" छा०उ० । जीवात्मनि "आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" कठ०उ० । "अत्रात्मानं संसारिणं रथिनं रथस्वामिनं विद्धि" भा० । बुद्ध्यादौ "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः । महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति यच्छेत्तद्यच्छेच्छान्त आत्मनि" कठ०उप० "ज्ञाने प्रकाशस्वरूपे बुद्धावात्मनि बुद्धिर्हि मनआदिकरणानि प्राप्नोतीत्यात्मा तेषां प्रत्यग्ज्ञानम् । बुद्धिमात्मनि महति प्रथममुत्पन्ने यच्छेत् प्रथमजत्वात् स्वच्छस्वभावमात्मनो विज्ञानमापादयेदित्यर्थः । तच्च महान्तमात्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमिते अविक्रिये सर्वान्तरे सर्वबुद्धिसाक्षिणि सुखे आत्मनि" भा० तत्र पुत्रादौ आत्मशब्दोगौणः ममात्मा भद्रसेन इति वत् देहादौ तु मिथ्याभिमान इति भेदः एतदभिप्रायेणैव "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनादिति" या० भा० उक्तम् । परमात्मनि "तस्माद्वा एतस्मादात्मनः आकाशःसंभूतः" । "आत्मा वा अरे द्रष्टव्यः" इति च श्रुतिः स्वरूपे तदात्मा पृथगात्मा "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते" वाक्यप० । बुद्धिविशेषस्वधर्मोपलक्षितार्थे स्वशब्दार्थे "आत्मेष्वात्मविसृष्टेषु" रघुः "देवात्मशक्त्या स्वगुणैर्निगूढाम्" स्मृतिः । भावे त्व आत्मत्वम् आत्मधर्मे न० । "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" उदयनः । तल् तत्त्वार्थे स्त्री "तदात्मताध्यातधवा रते च का" नैष० । ष्यञ् टिलोपः । आत्मम् तत्त्वार्थे न० । हितार्थे ख । आत्मनीनः आत्महिते त्रि० । तस्येदं ञ आत्मीयः । तत्सम्बन्धिनि त्रि० । गूढात् परत्वेऽस्य गु० वर्णविकृतौ गूढोत्मा "गूढोत्मावर्णविकृतेरिति" व्या० कारिका "गूढोत्मा न प्रकाशते" इति कठ०उप० । स्वात्मनः प्रत्यक्त्वं, परात्मनः पराक्त्वमिति भेदः तयोर्भेदाभेदपक्षौ च मदभेदेन प्राक् दर्शितौ ।

आत्मनिष्ठ त्रि० आत्मनि आत्मज्ञाने निष्ठा यस्य । आत्मज्ञानमात्रान्वेषिणि ब्रह्मनिष्ठे सुषुप्तौ ।

आत्मनीन त्रि० आत्मने हितम् ख । १आत्महिते "तामात्मनीनासुदवोढ रामः" भट्टिः । "अद्यापि नैवात्मनीनं कृतं कर्म यातं जनुः" नीतिः २पुत्रे ३ श्याले नाटकप्रसिद्धे विदूषके च पु० अजयः ४ प्राणधारके वह्निनि त्रि० ।

आत्मनेपद न० आत्मने आत्मार्थफलबोधनाय पदम् अलुक् स० । आत्मगामिफलबोधके व्याकरणप्रसिद्धे तङादौ । "तङानावात्मनेपदम्" पा० "अनुदात्तङितः आत्मनेपदम्" । "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा० उक्तेः आत्मगामिन्येव क्रियाफले तत्पदस्य विधानात् तथात्वम् तङ् प्रत्याहारः स च "तझातां झथास् आथांध्वम् इड् वहिमहिङ्" पाणिन्युक्तः" एतेषां स्थाने एव लकारभेदे तत्तद्रूपाणि आदिष्टानि ।

आत्मनेपदिन् पु० आत्मनेपदं विहितत्वेनास्त्यस्य इनि । पाणिन्युक्ते धातुभेदे ते च गणपाठे अनुदात्तेतोहलन्ताः स्वरान्तङितश्च पठिता धातवः । एवमन्येऽपि धातवः स्वरितेतोञितश्च कर्त्रभिप्राये क्रियाफले एव तथा अर्थविशेषे उपसर्ग विशेषयोगेन कर्त्तरि वाच्ये चात्मनेपदिनोऽपि भवन्ति ते च पाणिन्यनुशिष्टाः संक्षिप्य आशुबोधेऽस्माभिर्दर्शिताः यथा । "विपराभ्यां परस्मात्तु जयतेरात्मनेपदम् । परिव्यवेभ्यः क्रीणातेस्तङ् स्यात् कर्त्तरि नेर्विशः । आङो दोऽनास्यविस्तारे शपथे शपतेर्भवेत् । पर्य्यन्वाङः क्रीडः स्यादकूजार्थात्तु तङ् मतः । आङो नौतेः पृच्छतेश्च क्षमायामागमेर्भवेत् । नाधतेरार्थिषि भवेत् जिज्ञासायान्तु शिक्षतेः । हर्षात् भक्षाच्चवासाय लेखनार्थात् किरस्तु तङ् । उपात् कर्त्तरि सुट् तस्य चतुष्पादेऽथ पक्षिणि । प्रतिज्ञायां, निर्णयार्थमाश्रये, ऽभीष्टबोधने । वर्त्तमानार्त्तिष्टतेस्तङ् तथा कर्मविवर्ज्जितात् । देवपूजासंगमयोर्मैत्रां मार्गगतौ तथा । उपात्तङ् तिष्ठतेश्चैव मन्त्रसाधनकात्र तङ् । तथा संप्रपरिभ्यःस्य उदश्वानूर्द्धकर्मणि । स्वाङ्गकर्माकर्मकात् तङुद्भ्यां तपतेर्भवेत् । हनो यमस्तथाभूतादाङः कर्त्तरि तङ् भवेत् । समः कर्म्माविवक्षायां गम्यर्त्तिच्छुद्यो भवेत् । उपसर्गादस्यतेस्तङ्कृतेश्च विभाषया । निसंव्युपेभ्यो ह्वयतेः स्वर्द्धायामाङ एव तङ् । सूचने, भर्त्सने, दुष्ट–सङ्गेष्वेव प्रवर्त्तने । सतो गुणान्तराधाने, सेवायां विनियोजने । कथने च क्रमस्तङ् स्याद्धेषु सङ्गने तथा । वेः शब्दकर्मणस्तस्मात् कर्मणा र-

हिताच्च तङ्। शास्त्रार्थवेदनेनैव सम्माने तत्त्वनिश्चये। उत्क्षेपणे प्रार्थने च ऋणनिर्यातने तथा। अन्तिकप्रापणे भृत्यां व्यये चापनये तथा। अमूर्त्ते कर्त्तृगे कर्मगतेषु तङ्। नयतेर्भवेत्। उत्साहे चाप्रहितौ दृष्टौ च क्रमतेस्तु तङ्। परोपाभ्याङ्क्षेतरार्थे तङाङोऽध्योतिरुत्तमे। प्रोपाभ्यां तङ् समारम्भे वेः पादचलनार्थकात्। विभाषया क्रमेस्तङ् स्वादुपसर्गविवर्जितात्। निङ्क्षे शीङ्कर्मकाच्च संप्रतिभ्यामचिन्तने। यत्ने च ज्ञानपूर्व्वोक्तौ विमतावुपसान्त्वने। प्रार्थने च वदेर्व्यक्ते संभयोच्चारणे तु तङ्। अनोरकर्मकाद्वृक्षे सहोक्ते विमते तु वा। अवाद्गिरः कर्त्तरि तङ् प्रतिज्ञायां समस्तथा। उदश्वरः कर्म्मयुक्तात् समोयुक्तात् तृतीयया। तृतीया नेच्छत्यर्थैर्योगः संपूर्व्वकात्तु तङ्। ज्ञाश्रुस्मृदृशतेश्च स्यात् सनन्तात्कर्त्तरीष्यते। अनोर्जिज्ञासतेनैव प्रत्याङ्भ्याञ्च तथा श्रुवः। स्वरादान्नोपसर्गात्तङ् भुजे र्न यत्रपात्रके। अपालने भुजेस्तङ् स्यात् क्ष्णुवः संपूर्व्वकात्तु तङ्। अकृत्यर्थस्य धातोर्यत् कर्म्मागतस्य चेद्भवेत्। यत्नस्य कर्त्ता स, तदा तस्मात् यत्नात् भवेत्तु तङ्। णिजन्ताच्च गर्धेर्व्यक्तेः प्रतारार्थे तु तङ् भवेत्। कविकल्पद्रुमग्रन्थे जित्त्वेन पठितास्तु ये। णिजन्तास्तेभ्यस्तङ् कर्तृगे फले। अपाद्दोयमोऽग्रन्थे समुदाङ्भ्यस्तथैव तङ्। उपसर्गादृते यश्च तथा तङ् कर्त्तृगे फले। समोपस्थपदेनैव कर्त्तृगस्य फलस्य चेत्। द्योतनं स्यात्तदा तत्र तङ् कर्त्तरि विभाषया" उदाहरणं तत्रैव द्रष्टव्यम्। "परस्मैपदमिच्छन्ति आत्मनेपदिनः क्वचित्" व्या०कारिका। [स०। व्याकरणप्रसिद्धे आत्मनेपदशब्दार्थे।

आत्मनेभाषा स्त्री आत्मने तदुद्देश्येन भाषा परिभाषा अलुक्

आत्मन्वत् त्रि०आत्माऽस्यास्य मतुप् वेदे भत्वात् न मलोपः स्त्रियां ङीप्। १आत्मविशिष्टे "तमूहथुर्नौभिरात्मन्वतीभिः" ऋ० १,११६,३। "आत्मन्वभोऽदृक्षते घृतं पयः" ऋ० ६,७४,४। लोके तु आत्मवान् इत्येव। २यत्नवति २क्षुमनस्के च त्रि० स्त्रियां ङीप्।

आत्मन्विन् त्रि० आत्मन्+अस्यर्थे वा० विनि भत्वम्। मनस्विनि "तनूमनोऽकृतात्मन्वी स्वामिति" द्व्यक्षरकोषः "आत्मन्वी मनस्वी" भा०।

आत्मपुराण न० आत्मनः पुराणं कृष्णादिकर्त्तृकादिरूपमितिवृत्तमधिकृत्य कृतो ग्रन्थः अण्। आत्मनोजगत्कृष्णादिरूपेतिवृत्ताधिकारेण यद्वरापुरुद्धृते अष्टादशाध्यायात्मके उपनिषदर्थप्रकाशके ग्रन्थभेदे। तत्र प्रतिपाद्यानि १अ० ऐतरेयोपनिषदर्थविवृतिः। २ अ० बृहदारण्यस्य कौषीतकिब्राह्मणार्थविवृतिः। ३अ० बृ० गार्ग्यजातशत्रुसंवादार्थविवृतिः। ४ अ० बृ० मधुकाण्डार्थविवृतिः। ५अ० बृ० याज्ञवल्क्यकाण्डार्थविवृतिः। ६अ०बृ० याज्ञवल्क्यजनकसंवादार्थविवृतिः। ७अ० बृ० याज्ञवल्क्यमैत्रेयी संवादार्थविवृतिः। ८अ० श्वेताश्वतरोपनिषदर्थविवृतिः। ९ अ० काठकोपनिषदर्थविवृतिः। १० अ० तैत्तिरीयोपनिषदर्थविवृतिः। ११अ० गर्भाद्युपनिषदर्थविवृतिः। १२ अ० छान्दोग्यस्य श्वेतकेतुसंवादार्थविवृतिः। १३ अ० छा० सनत्कुमारनारदसंवादार्थविवृतिः। १४ अ०छा० प्रजापतीन्द्रसंवादार्थविवृतिः। १५अ० तत्त्वाकारोपनिषदर्थविवृतिः। १६ अ० मुण्डकोपनिषदर्थविवृतिः। १७अ० प्रश्नोपनिषदर्थविवृतिः। १८अ० माण्डूक्येगाजावालिप्रभृतीनामुपनिषदां सारांशार्थविवृतिः। एतत्पुराणञ्च सुगमोपायेन वेदान्तमतज्ञानार्थमतीवोपयोगि विहितञ्चैतत् काकाराममशास्त्रिणा ततश्च सत्यात्मेषार्थाः सुप्रसृताः।

आत्मप्रकाश त्रि०आत्मनः प्रकाशः। आत्मनश्चैतन्यस्य पदार्थावभासनरूपे प्रकाशे। "आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम्। नान्यादिदीपवह्नीन्द्रभास्वदन्यं यतोऽस्ति" इत्युक्तेः अग्न्यादिप्रकाशस्यात्मनित्यप्रकाशेन तत्प्रकाशेनैव घटादिस्फुरणेन च तस्य तथात्वम्। "वृद्धिवृत्तिविदाभासौ द्वावेतौ व्याप्तौ घटम्। तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तेस्तस्य सर्वप्रकाशकत्वम्।

आत्मप्रभ त्रि०आत्मना स्वयमितरनैरपेक्ष्येण प्रभा यस्य। १स्वयंप्रकाशमाने "लोकानात्मप्रभान् पश्यन् फाल्गुनोविस्मयान्वितः" भा०व०प०४२अ०। २परमात्मनि पु० "कूटस्थः स्वयं ज्योतिरिति" श्रुतेः "न तद्भासयते सूर्य्यो न शशाङ्को न पावकः" इत्युक्तेश्च तस्य भासने इतरापेक्षाभावात्तस्य तथात्वम्। ३त०। ४स्वयंप्रभायां स्वय प्रकाशे स्त्री।

आत्मप्रभव पु० प्रभवत्यस्मात् प्र+भू-अपादाने अप् आत्मा देहः मनो वा प्रभवो यस्य। १तत्तुजे पुत्रे मनोभवे २कामे च ३कन्यायां ४बुद्धौ च स्त्री आत्मभवादयोऽप्यत्र। ५आकाशादिषु च च परमात्मनः प्रभवत्वात्तेषां तथात्वम्।

आत्मबन्धु पु० आत्मनो बन्धुः। १आत्मभिन्ने "आत्ममातृस्वसृः पुत्राः आत्मपितृस्वसृः सुताः। आत्ममातृसुतात्वं विद्येयात्मबान्धवाः २इत्युक्ते" मातृपितृस्वसृः २सुते ३मातृस्वसृते च। "पत्नीदुहितरश्चैव पितरौ भ्रातर-

स्तथा। तत्सुतो गोत्रजोबन्धुः शिष्यः सब्रह्मचारिणः" या० वचने बन्धुपदेन एतेषामात्मबन्धूनां पितृमातृबन्धूनाञ्च ग्रहणम्। आत्मबान्धवादयोऽप्यत्र। ४आत्मनि च "आत्मैव ह्यात्मनोबन्धुरात्मैव रिपुरात्मनः" इत्युक्तेरात्मन एव आत्मोपकारज्ञानसाधनत्वेन बन्धुत्वात्तथात्वम्।

आत्मभू पु० आत्मनोमनसो देहात् वा भवति भू–क्विप् ६त०। मनोभवे १कामे देहभवे २पुत्रे ३कन्यायां ४बुद्धौ च स्त्री। आत्मनैव भवति भू–क्विप्। ५ईश्वरे पु० स हि "बहु स्यां प्रजायेयेति" ईक्षणपूर्व्वकं सृज्यवस्त्वाकारेण विवर्त्तनात् तथा। "सर्वज्ञस्त्वमविज्ञाता सर्वयोनिस्त्वमात्मभूः" रघुः "आत्मभूरवरजाखिलप्रजः" इति माघः ईश्वरे ७विष्णौ च परमेश्वराभेदात्तयोस्तथात्वम्। आत्मनः ब्रह्मणः भवति भू–क्विप्। आदिजीवे हैरण्यगर्भे "यो वै ब्राह्मणं विदधाति पूर्व्वम्" इति श्रुत्या "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतत् ब्रह्म नाम रूपमन्नञ्च जायते इति" श्रुत्या च चतुर्मुखस्यात्मजन्यत्वोक्तेस्तस्य तथात्वम् ब्रह्मेति क्लीवं छान्दसम् "यमामनन्त्यात्मभुवोऽपि कारणम्" "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा० अच् आत्मनो भवति भू+अच् ६त०। आत्मभवादयोऽप्युक्तार्थेषु।

आत्मभूत त्रि० आत्मनोदेहात् मनसो वा भूतः। तनुजे १पुत्रे मनोभवे २कामे च। ३कन्यायां ४बुद्धौ च स्त्री ५मनोजन्यमात्रे त्रि०। अनात्मा आत्मा भूतः श्येन्या० कर्म्म०। अनात्मनि आत्मरूपेण भवितरि देहेन्द्रादौ त्रि० "आत्मभूतानीन्द्रियाणीति भा० भा०। ७अनुकूले सेवकभेदे च। "तत्तात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः" मनुः।

आत्मभूय न० आत्मनो भावः भू–भावे क्यप् ६त०। आत्मत्वे ब्रह्मरूपे "आत्मभूयाय कल्पते" पुरा०।

आत्ममय त्रि० आत्मात्मकः आत्मन्+मयट्। आत्मस्वरूपापन्ने "सर्वमात्ममय जगत्" पुरा० स्त्रियां ङीप्

आत्ममानिन् त्रि० आत्मानमुत्कर्षेण मन्यते मन–णिनि ६त०। १आत्मोत्कर्षाभिमानिनि गर्व्विते २सर्वभूतेषु आत्मत्वेन ज्ञातरि च स्त्रियां ङीप्।

आत्ममूर्त्ति पु० आत्मनोमूर्त्तिरिव मूर्त्तिरस्य। १भ्रातरि तस्य एकदेहोत्पन्नत्वेन, "भ्राता स्वोमूर्त्तिरात्मनः" इति मनुना भ्रातुः स्वतुल्यमूर्त्तित्वोक्तेश्च तथात्वम्। ६त०। वेदान्तिमते आत्मनः स्वरूपे २चैतन्यादौ न्यायमते ३कर्तृत्वादौ च स्त्री।

आत्ममूली स्त्री आत्मैव रक्षणे मूलमस्याः दुःखार्त्ततयेतरमहंनतः स्वस्य स्वयं रक्षणात् गौ०ङीष्। १दुरालभालतायाम्। आत्मा परमात्मा मूलं यस्य। २जगति न०। तस्मात्प्रभवत्वात् तथात्वम् "ब्रह्म खानिलतेजांसि जलं भूश्चेति धातवः। इमे लोका एष चात्मा तस्माच्च सचराचरम्। ब्रह्मण्डचक्रसंयोगात् कुलालकारो यथा घटम्। करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः। हेममात्रमुपादाय रूप्यं वा हेमकारकः। निजलालासमायोगात् कोशं वा कोशकारकः। कारणान्येवमादाय तानुतास्मिन्न योनिषु। सृजत्यात्मानमात्मा च संहृत्य करणानि च" या०स्मृतावात्मनो भूतसृष्टिमभिधाय अनतिदूरे "सहस्रात्मा मया योव आदिदेव उदाहृतः। सुखबाहूरुपज्जाःस्म तस्य वर्णा यथाक्रमम्। पृथिवी पादतस्तस्य शिरसोद्यौरजायत। नक्षत्राणि दिशः" इत्युक्तेः जगतामात्ममूलत्वात्तथात्वम् "आत्ममूलमिदं सर्व्वमात्मन्येव प्रलीयते" इति पुरा०।

आत्मम्भरि त्रि० आत्मानं बिभर्त्ति भृ–खि मुम् च उप०स०। स्वोदरमात्रपूरके देवादिष्वनादरेण आत्मपोषकत्वात्तस्य तथात्वम् "आत्मम्भरित्वं पिशितैर्नराणाम्" भट्टिः। "यथा तवात्मम्भरयोऽकल्याणाद्यासङ्गवत्त्वात् घ्राणादयः न तथात्मम्भरिर्मुख्यः प्राणः किन्तर्हि सर्वार्थः, कथमित्युच्यते तेन मुखेन यदन्नमति यत्पिबति लोकस्तेनाशितेन पीतेन चेतरान् घ्राणादीन् प्रतिपालयति" छा०उ०भा०।

आत्मयाजिन् आत्मानं ब्रह्मरूपेण कर्म्मकरणादिकं भावयन् यजते यज–णिनि। 'ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" इत्युक्तरूपभावनया ज्योतिष्टोमादिकर्म्मकर्त्तरि आरुरुक्षौ ब्रह्मनिष्ठे १कर्म्मयोगिनि "सर्व्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छतीति" मनूक्ते आत्मतया २सर्व्वभूतदर्शिनि च

आत्मयोनि पु० आत्मा योनिरस्य। १चतुर्मुखे ब्रह्मणि २शिवे ३मनोभवे "प्रहर्त्तुमभ्युद्यतमात्मयोनिम्" कुमा०। ४विष्णौ च "आत्मयोनिः स्वयं ज्ञाता" विष्णुस०। आत्मैव योनिरुपादानकारणं नान्यदिति" भाष्योक्तेः विष्णौ स्त्रीत्वमपि।

आत्मरक्षा स्त्री आत्मन एव रक्षा यस्याः। १इन्द्रवारुणीवृक्षे ६त०। आत्मनो रक्षा। २शास्त्रोक्ते विघ्नकर्त्तृभ्य आत्मनो रक्षणे च "आत्मरक्षायां जपे विनियोगः" सन्ध्याप्रयोगः।

आत्मराम पु० आत्मनि रमते सत्तायां कर्त्तरि घञ्। आत्मज्ञानमात्रेण तृप्ते योगीन्द्रे।

आत्मलाभ पु० आत्मनोलाभः। आत्मनो यथास्वरूपज्ञानेन

आत्मस्वरूपप्राप्तौ "आत्मलाभात्परोलाभो नास्तीति मुनयो विदुः" पुरा० "आत्मलाभपरिणामनिरोधैः" किरा०।

आत्मलोक पु० आत्मैव लोकः प्रकाशः। स्वप्रकाशे आत्मनि।

आत्मलोमन् न० ६त०। सुखजाते लोमभेदे १श्मश्रुणि(दाढ़ि) २आत्मलोमजाते च।

आत्मवत् त्रि० आत्मा चित्तं वश्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप्। १वश्यचित्ते। "उद्यादिष्वविकृतिर्मनसः सत्त्वमुच्यते। आत्मवान् सत्त्ववानुक्तः" इत्युत्तरमालोक्तौ २निर्विकारचित्ते च "प्रकृतिष्वात्मजमात्मवत्तया" रघुः "तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः"। "दृष्टे गुरावरण्ये वा निवसन्नात्मवान् द्विजः" "पूर्वं पूर्वं गुरुतरं विद्यात् व्यसनमात्मवान्" "ब्रह्महत्यात्रतं पापं व्यपोहत्यात्मवत्तया" इति च मनुः। "न त्वामेवंविधो-भावः स्पृष्टुमर्हति मानद!। आत्मवन्तमिव व्याधिः पुरुषं दुष्टसेविनम्" भा० व०प० २७९ अ०। आत्मा प्रकाश्यतया विद्यतेऽस्य। आत्मप्रकाशके २शास्त्रे "श्रुतमात्मविप्रकृत-मात्मवत्त्वया" रघुः। आत्मना तुल्या क्रिया वति। ४आत्म-तुल्यक्रियायाम् अव्य०। "आत्मवन्मन्यते जगत्" इति नीतिः "मातृवत् परदारेषु परद्रव्येषु लोष्टवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" इति चाणक्यः।

आत्मवश त्रि० आत्मनोवश आयत्ततात्। आत्माधीने। "यद्यदात्मवशं तु स्यात्तत्तद् यत्नेत यत्नतः" "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" इति च मनुः।

आत्मवश्य त्रि० आत्मा मनो वश्योयस्य। वशीभूतमनस्के "आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति" गीता २आत्मनो-वश्ये च।

आत्मविक्रय पु० ६त०। स्वदेहविक्रये। स च "गोवधोऽध्याप्य-संयाज्यपारदार्य्यात्मविक्रय" इति मनूक्तोरुपपातकभेदः।

आत्मविद् त्रि० आत्मानं यथार्थरूपेण वेत्ति विद्-क्विप् ६त०। आत्मस्वरूपाभिज्ञे "आत्मविदोजनाः" आत्मशब्दे उदा० "अधीयन्नात्मविद्विद्याम्" भट्टिः "तरति शोकमात्मवित्" श्रुतिः "ध्यानयोगबलाभ्यास प्रसन्नमतयः सदा। सुखोप चयमव्यक्तं प्रविशन्त्यात्मविच्छमाः" भा० आश्व० प० ५१ अ०। आत्मानं स्वपक्षं वेत्ति क्विप्। २स्वपक्षज्ञातरि "य इहात्मविदो विपक्षमध्ये" माघः।

आत्मविद्या स्त्री आत्मनोविद्या। आत्मनो यथास्वरूपावेदक-विद्यायाम् "आन्वीक्षिकीत्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः। "आत्मविद्या च पौराणी, धर्मशास्त्रात्मिका तथा" नन्दिपु० सा च उपनिषद्रूपा तदुपकारिणारीकविद्या च। तद्विद्यासाधने २शास्त्रे च।

आत्मवीर त्रि० आत्मा प्राणः वीरइव यस्य। १निगृहीतबलयुक्ते २श्यालके ३पुत्रे विदूषके च पु० मेदिनिः।

आत्मवृत्ति स्त्री आत्मनोवृत्तिः। १आत्मनोवर्त्तनोपाये। आत्मनि वृत्तिः स्थितिर्यस्य। २स्वस्थो पदार्थे त्रि०।

आत्मशक्ति स्त्री ६त०। आत्मानुरूपसामर्थ्ये। "दैवं निहत्य कुरु पौरुषमात्मशक्त्या" नीतिः शक्तिश्च कार्य्यजननानुकूलः सामर्थ्यभेदः सा च देहप्राणादिनिष्ठा। आत्मनः परमात्मनो जगज्जननशक्तौ ३माधायां च "देवात्मशक्तिं स्वगुणैर्निगूढाम्" श्रुतिः। (अस्मिन् राजनि०।

आत्मशल्या स्त्री आत्मा स्वरूपं शल्यमिव यस्याः। यतायः-

आत्मशुद्धि स्त्री आत्मनः देहस्य मनसो वा शुद्धिः। १देह-शुद्धौ २चित्तशुद्धौ च शुद्धिशब्दे आख्याता।

आत्मश्लाघा स्त्री ६त०। आत्मनो सत्यगुणादिकीर्त्तने गर्हभेदे "आत्मश्लाघा विगर्हितः" सत्यापरूपलक्षणम्।

आत्मसंयम पु० आत्मनो मनसः संयमः। चित्तसंयमने "आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते" गीता।

आत्मसम्भव पु० आत्मा देहोमनः परमात्मायो सम्भवोऽस्य। १पुत्रे "कृतान्निहन्तो नरदेवदेव यं सुरेष्वात्मसम्भवेन" भा० द्रो० प० ११८ अ०। २मनोभवे कामे च पु० ३मनो-जन्ये सुखादौ त्रि० ४कन्यायां ५बुद्धौ च स्त्री परमात्मस-म्भूते ६आकाशादौ त्रि०। ७चतुर्मुखे ८धिषणे ९निष्णौ १० परमात्मनि च पु०।

आत्मसम्भव पु० सम्भवत्यस्मात् सम्+भू-अपादाने अप् आत्मा सम्भवो यस्य। तनूजे १पुत्रे। "एवमात्मरतिरात्मसम्भवान् तानु निवेश्य चतुरोऽपि तत्त्वतः"। "चकार भाम्ना रघु-रात्मसंभवम्" "तदात्मसम्भवं राज्ये मन्निबद्धाः समादधुः" इति च रघुः २मनोजन्ये त्रि० ३काये सुखादौ पु० ४कन्यायां ५बुद्धौ च स्त्री। ६आकाशादौ ७भूते त्रि०। "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूत आकाशाद्वायुर्वायोरग्नि-रग्नेरापः अद्भ्यः पृथिवीति" श्रुत्युक्तेस्तेषां तथात्वम् आत्मसंभूतादयोऽप्यत्र। आत्मा परमात्मा सम्भवोऽस्य। ७चतुर्मुखे पु० आत्मना सम्भवति अप्। ८धिषणे ९विष्णौ १० परमात्मनि च पु०।

आत्मसाक्षिन् त्रि० आत्मनः बुद्धिवृत्तेः साक्षी प्रकाशकः। वेदान्तादिसंतसिद्धे बुद्धिवृत्तिप्रकाशके चैतन्ये।

आत्मसात् अव्य० कर्तृकर्मणात्मनोऽधीनो भवति सम्पद्यते

अधीनं करोति वा साति। कात्स्न्र्येनात्माधीनतया सम्पन्ने, तथा भूते तथा क्रियमाणे च। अस्य च सम्पद्यादियोगे एव साधुत्वम् आत्मसाङ्कृतः आत्मसात् सम्पन्नः आत्मसात्कृत इत्यादि। "दुरितैरपि कर्त्तुमात्मसात्" रघुः "अग्नीन् वाप्यात्मसात्कृत्य" या०स्मृतिः। [च।

आत्मसिद्ध त्रि०आत्मना सिद्धः। १स्वयंसिद्धे २अयत्ननिष्पन्ने

आत्मसिद्धि स्त्री आत्मरूपा सिद्धिः। आत्मभावलाभे मोक्षे

आत्मसुख त्रि० आत्मैव सुखमस्य। आत्मलाभमात्रेण सुखिनि १आत्मैव सुखं सच्चिदानन्दरूपत्वात्। २आत्मरूपे परमान्द्रे न०।

आत्मस्थ त्रि० आत्मने आत्मज्ञानाय तिष्ठते यतते स्था—क ४त०। १आत्मस्वरूपज्ञानाय यतमाने आत्मनि मनसि तिष्ठति स्था-क ७त०। २मनोवृत्तिपदार्थे त्रि०। [वियोजने।

आत्महत्या स्त्री आत्मनो देहस्य हननम्। देहस्य प्राणै-

आत्महन् त्रि०आत्मानं हतवान् हन-क्विप्। "येऽन्यथा सन्तमात्मानमकर्त्तारं स्वयंप्रभुम्। कर्त्तां भोक्तेति मन्यन्ते तएवात्महनो जना," इत्युक्तलक्षणे आत्मनो यथार्थज्ञानरहिते, १देहाद्यभिमानिनि, "अन्धं तमस्ते प्रविशन्ति ये के चात्महनोजनाः" कठ०उ०"लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्। यस्त्वात्मकृत्यं न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात्"विवे०चू०। आत्मनो यथार्थज्ञानाभावे आत्महत्वमुक्तम्। "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनोजनाः" ईशोप०। "यथाशुकूलेन नभस्वतेरितं प्लवान् भवाब्धिं न तरेत् स आत्महा"भाग० २आत्मघातिनि जने च। आत्मघातिन्शब्दे विवृतिः।

आत्माधीन पु० आत्मनोऽधीनः। १पुत्रे, २श्यालके ३विदूषके च हेम० ४बलयुक्ते ५स्वाधीने त्रि०।

आत्मानुरूप त्रि० आत्मनोऽनुरूपम्। जातिवृत्तादिना स्वतुल्ये "तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" रघुः।

आत्मापहारक त्रि० आत्मानमपहरति निह्नुते अप+हृ-ण्वुल्। आत्मनो यथास्वरूपनिह्नवकारिणि "योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते। स पापकृत्तमो लोके स्तेन आत्मापहारकः" मनुः। णिनि। आत्मापहारी अथत्र "किं तेन न कृतं पापं चौरेणात्मापहारिणा" स्मृतिः स्त्रियां ङीप्।

आत्माराम त्रि० आत्मा आरामस्मिव रतिस्थानं रतिसाधनं वा यस्य। ज्ञानाय यतमाने योगिनि "आत्मारामाविहितरतयोनिर्विकल्पे समाधौ" वेणी०। "आत्मक्रीड़स्य सततं सदात्मभिष्टुनस्य च। आत्मन्येव सुतृप्तस्य योगसिद्धिर्न दूरतः। यस्मात्मव्यतिरेकेण किञ्चिदित्वं न पश्यति। आत्मारामः स योगीन्द्रोब्रह्मभूतो भवेदिति" काशी० उक्ते २योगीन्द्रभेदे च।

आत्मालम्भ पु०६त०। हृदयस्पर्शे "पित्रात्मन्वानुहरणेआत्मालम्भेवेक्षणे" कात्या०सू०"आत्मालम्भे हृदयस्पर्शे" रघु०।

आत्माग्निन् पु० आत्मानं स्वकुलमग्नानि अश-णिनि ६त०। स्वकुलभक्षके मीने तस्य सकुलभक्षकत्वात् तथात्वम् अतएव "अबलस्वकुलाशिनोझषान्" नैष० "मत्स्या इव जनानित्यं भक्षयन्ति परस्परमिति च" रामा० वर्णितम्।

आत्माश्रय पु०आत्मानमाश्रयति आ+श्रि—अच् ६त०। १स्वस्य स्वापेक्षित्वहेतुकानिष्टप्रसङ्गरूपे तर्कदोषभेदे। तर्कः पञ्चविधतर्कशब्दे वक्ष्यते तत्र "स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा यथा यद्ययं घटएतद्वटजन्यः स्यात्तदैतद्वटानधिकरणक्षणोत्तरवर्त्ती न स्यात्, यद्ययं घटएतद्वटवृत्तिः स्यात् एतद्वटव्याप्योन स्यात्, यद्ययं घटएतद्वटज्ञानाभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्वटभिन्नः स्यादिति वा सर्व्वत्रापाद्यम्" न्यायसूत्रवृत्तिः। २स्वाश्रिते ३चित्ताश्रिते च त्रि०६त०। ४स्वस्याश्रये पु०।

आत्मीय त्रि० आत्मनोऽयम् छ। आत्मसंबन्धिनि। "आत्मीयां मतिमादाय कुरु सज्जनरञ्जनम्" सा०द० "किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा" कुमा० "प्रसादमात्मीयमिवात्मदर्शः" रघुः अहमेनं प्रसादेनात्मीयं करिष्यामि" हितो०।

आत्मेश्वर त्रि० आत्मनो मनस ईश्वरः। चित्तविकारनिवारके मनःसंयमकारके "आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा०।

आत्मोत्पत्ति स्त्री आत्मन उत्पत्तिः स्रोपाध्यन्तःकरणवृत्तिकर्म्मणाऽपूर्व्वदेहसंयोगः। स्रोपाधीभूतान्तःकरणवृत्तिकर्म्मणाऽपूर्व्वं देहसंयोगरूपे आत्मनो जन्मनि। तदुत्पत्तिप्रकारः मिताक्षरायां दर्शितो यथा।

"निमित्तमक्षरः कर्त्ता भोक्ता ब्रह्म गुणी वशी। अजःशरीरग्रहणात् जात इति कीर्त्यते" "आत्मनः सकलजगत्प्रपञ्चाविर्भावेऽविद्यासमावेशवशात्समवायिसमवायिनिमित्तभित्वेवं स्वयमेव त्रिविधमपि कारणम्। न पुनःकार्य्यकोटिनिविष्टः यस्मादक्षरोऽविनश्वरः। ननु सत्त्वादिगुणविकारस्य सुखदुःखमोहात्मकस्य कार्य्यभूते जगत्प्रपञ्चे दर्शनाद्गुण-

वत्याः प्रकृतेरेव जगत्कर्तृत्वोचिता न पुनर्निर्गुणस्य ब्रह्मणः। नैवं मंस्थाः। आत्मैव कर्त्ता। यस्मादसौ जीवोपभोग्य सुखदुःखहेतुपुण्यापुण्यादेर्बोद्धा नह्यचेतनायाः प्रकृतेर्नामरूपव्याकृतविविक्तभोक्तृवर्गभोगानुकूलभोग्यभोगायतनादि योगिजगत्प्रपञ्चना घटते। तस्मादात्मैव कर्त्ता। तथा स एव ब्रह्म दृंहको विस्तारकः। नचासौ निर्गुणः, यतः तस्य त्रिगुणा शक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते। अतः स्वतोनिर्गुणत्वेऽपि शक्तिसम्बन्धेन सत्त्वादिगुणयोगी कथ्यते। नचैतावता प्रकृतेः कारणता यस्मादात्मैव वशी स्वतन्त्रो न प्रकृतिरपि स्वतन्त्रत्वत्त्वान्तरन्तादृग्विधत्वे प्रमाणाभावात्। न च वक्तव्यं शक्तिरूपापि सैव कर्तृभवेति। यतः शक्तिमत्कारकं न शक्तिस्तस्मादात्मैव जगत्कर्त्तृविधयापि कारणम्। तथा अजडत्वलक्षितः। अतस्तस्य यद्यपि साक्षाज्जननं नोपपद्यते। तथापि शरीरस्य क्षणमात्रेण जात इत्युच्यते। अवस्थान्तरयोगितयोत्पत्तिर्गृहस्थोजात इति वत्" मिता० देहेतरपरिग्रहकारःकाण्यशब्दे वक्ष्यते।

आत्मोद्भवा स्त्री आत्मनैवोद्भवति भू-अच्। मातृपत्नीभेदे आत्मा उद्भवो यस्याः। २कन्यायां ३वृद्धो च ४पुत्रे पु०। "आत्मोद्भवे वर्णचतुष्टयस्य" रघु। ईषनीभवे कामे ७चित्तभवे शोकादौ च ८आत्मभवार्थमात्रे च त्रि०।

आत्मोपजीविन् त्रि० आत्मना देहव्यापारेण उपजीव्यति उप+जीव-णिनि ३त०। स्वदेहव्यापारोपजीव्यके भारिकदासादौ "शूद्रांश्चात्मोपजीविनः" "नैष चारणदारेषु विधिर्नात्मोपजीविषु" इति च मनुः। [च त्रि०।

आत्मोपम त्रि० आत्मा देहउपमा यस्य १पुत्रे २निजसदृशे

आत्मौपम्य न० उपमायाभावः ष्यञ् औपम्यम् आत्मन औपम्यम्। आत्मसादृश्ये "आत्मौपम्येन सर्व्वत्र" गीता।

आत्यन्तिक त्रि० अत्यन्त+भवार्थे ठञ्। अतिशयेन जाते। "आत्यन्तिकासिद्धिविलम्बसिद्धोः" नै०"नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत्" मनुः।"विभेदजनकात्ज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणा भेदमसन्तं कः करिष्यति" वे०प० स्त्रियां ङीप्।"आत्यन्तिकी स्वत्वनिवृत्तिः"मिता०

आत्यन्तिकदुःखनिवृत्ति स्त्री आत्यन्तिकोदुःखनिवृत्तिः। अपवर्गे मुक्तौ। सा च स्वाधिकरणदुःखप्रागभावासमानाधिकरणा दुःखनिवृत्तिः याद्यया दुःखनिवृत्तेरुत्तरं पुनर्दुःखान्तरं नोत्पद्यते तादृशी दुःखनिवृत्तिः। दुःखञ्च अनागतत्वज्ञावश्यं "हेयं दुःखमनागतमिति" पात० सूत्रात् अतीतदुःखस्य नष्टत्वात् वर्त्तमानदुःखस्य च क्षतीयक्षण एव स्वयं नाशात् न तन्निवृत्तेः पुरुषार्थत्वमिति बोध्यम्।

आत्यन्तिकप्रलय पु० कर्म्म०। प्रलयभेदे। "प्रलयस्तावत् चतुर्विधः" यथाह वेद०प० "स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकलकार्य्यप्रलयरूपत्वात् धर्म्माधर्म्मपूर्व्वसंस्काराणाञ्च तदा कारणात्मनाप्यवस्थानं तेन सुप्तोत्थितस्य न सुप्तदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः। न च सुषुप्तावस्थाः कारणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः वस्तुतः आसात्मभावेऽपि तदुपलब्धे पुरुषान्तरविभ्रममात्रत्वात् सुषुप्तशरीरोपलम्भवत्। नचैवं सुषुप्तस्य परेतादविशेषः, सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति विशेषात्। यद्वा अन्तःकरणस्य ये शक्तौ जानाति क्रियाशक्तौ इति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टेति प्राणनादावस्थानमविरुद्धम्। "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति अथैनं वाक् सर्व्वैर्नामभिः सहाप्येति यदा सोम्य! तदा सम्पन्नो भवति स्वमपीतो भवतीत्यादि" श्रुतिरत्र प्रमाणम्। प्राकृतप्रलयस्तु कार्य्यब्रह्मणोऽपि विनाशकः सकलकार्य्यविनाशः। यदा तु प्रागेतदुपलब्धेरभावात् तत्कारणस्य कार्य्यब्रह्मणो ब्रह्मसूत्राधिकारेण ब्रह्मसाक्षात्कारेण ब्रह्मणा सह विदेहकैवल्यात्मिका परा मुक्तिः तदा लोकवासिनामप्यत्यन्तब्रह्मसाक्षात्कारेण ब्रह्मणा सह विदेहकैवल्यम् "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति" श्रुतेः। एवं स्वलोकवासिभिः सह कार्य्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्व्वर्त्तिनिखिललोकतदन्तर्व्वर्त्तिसंसारादीनां भूतानाञ्च प्रकृतौ मायायां लयः न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते। नैमित्तिकप्रलयस्तु कार्य्यब्रह्मणोदिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। ब्रह्मादिमयचतुर्युगसहस्रपरिमितः "चतुर्युगसहस्रान्ते ब्रह्मणोदिनमुच्यते" इत्यादिवचनात्। प्रलयकालोऽपि दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात्। प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि "द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय हि। एष प्राकृतिको राजन्! प्रकृतौ यत्र लीयते" इति वचनं प्राकृतप्रलये मानम्।

"एष नैमित्तिकः प्रोक्तः प्रलयोयत्र विश्वसृक्। शेतेऽनन्तासने नित्यमात्मसात्कृत्य चात्मभूरिति" वचनं नैमित्तिक प्रलये भानम्। तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्व्वगोक्तः सचैकजीववादे युगपदेव नानाजीववादे तु क्रमेण "सर्व्वएकीभवन्ति" इत्यादि श्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्म्मोपरमनिमित्ताः तुरीयस्तु ज्ञानोदयनिमित्तो लयोऽज्ञानेन सहैवेति विशेषः"। अत्र तुरीयः आत्यन्तिकः तत्र विशेषमाह सि० शि० "इड्विर्विश्वेरङ्भुवः समन्तात् स्याद्योजनं भूभवभूतपूर्वैः। ब्राह्मे लये योजनमात्रदग्धेनाशो भुवः प्राकृतिकोऽखिलायाः। दिनेदिने यन्म्रियते हि भूतैर्दैनंदिनं तं प्रलयं वदन्ति। ब्राह्मं लयं ब्रह्मदिनान्तकाले भूतानि यद्ब्रह्मतनुं विशन्ति। ब्रह्मात्यये यत् प्रकृतिं प्रयान्ति सर्वाण्यतः प्राकृतिकं क्षतीन्द्राः। लीनान्यतः कर्मपुटान्तरत्वात् पृथक् क्रियन्ते प्रकृतिर्विकारैः। ज्ञानाग्निदग्धाखिलपुण्यपापा मनः समादाय हरौ परेशे। यद्योगिनो यान्त्यनिवृत्तिमस्मादात्यन्तिकं चेति लयश्चतुर्धा"। "अत्र लयो भूतविनाशः। स तु साम्प्रतं प्रत्यक्षत्वात्पद्यते स दैनंदिन उच्यते। यो ब्रह्मदिनान्ते चतुर्युगसहस्रावसाने लोकत्रयस्य संहारः स ब्राह्मो लय उच्यते। तत्राद्यीणपुण्यपापा एव लोकाः कालवशेन ब्रह्मशरीरं प्रविशन्ति। तत्र सुखं ब्राह्मणाः, बाहुत्तरं क्षत्रियाः, जङ्घाद्वयं वैश्याः, पादद्वयं शूद्राः। ततो निशावसाने पुनर्ब्रह्मणः सृष्टिं चिन्तयतो मुखादिस्थानेभ्यः कर्मपुटान्तरत्वाद्ब्राह्मणाद्यस्तत एव निःसरन्ति। तस्मिन् प्रलये भुवो योजनमात्रदग्धेर्विलयो नाखिलायाः। अथ यदा ब्रह्मण आयुषोऽन्तस्तदा यः प्रलयः स महाप्रलय उच्यते। तत्र ब्रह्मा ब्रह्माण्डे, तत् पाञ्चभौतिके, भूर्जले, जलं तेजसि, तेजो वायौ, वायुराकाशे, आकाशमहंकारे, अहंकारो महत्तत्त्वे, महत्तत्त्वं प्रकृतौ। एवं सकलभुवनलोका अक्षीणपुण्यपापा एवाव्यक्तं प्रविशन्ति। यदा भगवान् सिसृक्षुः प्रकृतिपुरुषौ क्षोभयति। तदा तानि भूतानि कर्म्मपुटान्तरत्वात् प्रकृतेः स्वत एव निःसरन्ति। यथाह श्रीविष्णुपुराणे पराशरो जगदुत्पत्तिकारणम्। "प्रधानकारणीभूता यतो वै सृज्यशक्तय" इति सृज्यशक्तयस्तत्कर्माणि। तान्येव सृष्टौ मुख्यं कारणम्। इतराणि निमित्तकारणानि। अन्यैरप्युक्तम्। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"। "नह्यात्मनां भवति कर्मफलोपभोगः कायाद्विनेत्यादि"। अस्मिन् प्रलये ऽखिलाया भुवो नाश इत्यर्थः। तथा "ज्ञानाग्निदग्धाखिलपुण्यपापा योगिनो विषयेभ्यो मनः समादाय समाहृत्य तद्धरौ समाहितं कृत्वा यान्ति देहं त्यजन्ति। अनिवृत्तिं यान्ति। स आत्यन्तिको लय इति" प्रमिता०।

आत्यधिक त्रि० अत्ययः नाशः प्रयोजनमस्य ठक्। नाशप्रयोजनके कर्म्मणि "अग्निश्चवत्रात्ययिकं समेत्य" भट्टिः। "एकाकिनस्त्वात्ययिके कार्य्ये प्राप्ते भयप्रदे" मनुः। "कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च। प्रियाख्यनुभवन् श्रेष्ठे न त्वमन्तःपुरे नृप।" भा०स०प०५अ०।

आत्रेय पु० अत्रेरपत्यम् ढक्। अत्रिसुनेरपत्ये तस्यापत्यानि बहूनि तेषु मन्वन्तरभेदे केचित् सप्तर्षिमध्यपातिनः यथा ५मन्वन्तरे "वेदबाहुर्यदुघ्नश्च सुनिर्वेदशिरास्तथा। हिरण्यरोमा पर्জन्य ऊर्द्धबाहुश्च सोमजः। सत्यनेत्रस्तथात्रेय एते सप्तर्षयोऽन्तरे"। ८मन्वन्तरे। "रामोव्यासस्तथात्रेयो दीप्तिमानिति विश्रुतः भारद्वाजस्तथाद्रौणिरश्वत्थामा महाद्युतिः। गोतमस्यात्मजश्चैव भरद्वाजस्य गौतमः। कौशिको दानवश्चैव रुरुः काश्यप एव च। एते सप्त महात्मानो भविष्यासुनिसत्तमाः। ब्रह्मणः सदृशाश्चेति धन्याः सप्तर्षयः स्मृताः"। ९ मन्वन्तरे। "मेधातिथिस्तु पौलस्त्यो वसुः काश्यप एव च। ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा। सवनश्चैव वाशिष्ठ आत्रेयोहव्यवाहनः पौलहः सत्य इत्येते सुनयो रौहितेऽन्तरे"। १०मन्वन्तरे "हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथा ऽत्रेयो वाशिष्ठश्चाष्टकः स्मृतः। पौलस्त्यः प्रमतिश्चैव नभोगश्चैव काश्यपः। अङ्गिरा नभसः सत्यः सप्तैव परमर्षयः" ११ मन्वन्तरे। "हविष्मान् काश्यपश्चापि हविष्मान् वत्स भार्गवः। तरुणश्च तथात्रेयो वाशिष्ठस्तनयस्तथा। अङ्गिराश्चोदधिष्णश्च पौलस्त्योनिश्चरस्तथा। पौलहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः" १२ मन्वन्तरे। "द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा। अङ्गिरास्तमसोमूर्त्तिस्तपस्वी काश्यपस्तथा। पयोऽशनश्च पौलस्त्यः पौलहश्च तपोरविः। भार्गवः सप्तमस्तेषां विज्ञेयश्च ततोधृतिः"। १३ मन्वन्तरे। अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यपस्तु यः। पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः। निष्प्रकम्पस्तथाऽत्रेयो निर्मोहः काश्यपस्तथा। सुतपाश्चैव वाशिष्ठः सप्तैते तु महर्षयः" १४ मन्वन्तरे। अग्नीध्रः

काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवो ह्यतिबाहुश्च शुचिराङ्गिरसस्तथा । शुक्रश्चैव तथात्रेयः शुक्रो वासिष्ठ एव च । अजितः पौलहश्चैव अन्याः सप्तर्षयोमताः" हरिवं० ७अ० । तथा च मन्वन्तरभेदे सप्तर्षिमध्ये अत्रिपुत्रा सत्यनेत्रादयः । वैवास्वते तु मन्वन्तरे दत्तः दुर्वासाः सोमश्चेति तव आत्रेयाः प्रसिद्धाः । ते च ब्रह्मर्षेरच्युतांशजाः तथोक्तम्" भाग० ४स्क० १अध्या० । "अत्रेःपत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् । दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् । श्रीविदुरउवाच । अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः । किञ्चित्रिकीर्षवोजाता एतदाख्याहि मे गुरो । श्रीमैत्रेयउवाच । ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदांवरः । सहपत्न्या ययाऋक्षं कुलाद्रिं तपसिस्थितः । तस्मिन् प्रसूनस्तबकपलाशाशोककानने । वार्भिः स्वर्द्धिरुद्घुष्टे निर्ब्विन्ध्यायाः समन्ततः । प्राणायामेन संयम्य मनो वर्षशतं मुनिः । अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः । शरणं तं प्रपद्येऽहं य एष जगदीश्वरः । प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् । तप्यमानम् त्रिभुवनम् प्राणायामेधसाग्निना । निर्गतेन मुनेर्मूर्द्ध्नः समीक्ष्य प्रभवस्त्रयः । अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः । वितायमानयशसस्तदाश्रमपदं ययुः । तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः । उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् । प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः । हंसस्वपर्णस्थान्स्वैः स्वैश्चिह्नैः सुचिह्नितान् । कृपावलोकेन हसद्वदनेनोपलम्भितान् । तच्चोचिषा प्रतिहते निमील्य मुनिरक्षिणी । चेतस्तत्प्रवणं युञ्जन्नस्तावीत् संहताञ्जलिः । श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः । अत्रिरुवाच । विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विदृहीतदेहाः । ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्मि तेभ्यः किं वस्तेभ्यः कणव भवतां न इहोपहृतः । एकोमयेह भगवान् विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयोमे । श्रीमैत्रेयउवाच । इति तस्य वचः श्रुत्वात्रयस्ते विबुधर्षभाः । प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ! । श्रीदेवाजगुः । यथा कृतस्ते संकल्पोभ्यसूयतैव नान्यथा । ब्रह्मन् यद्वै ध्यायति ते वयम् । यथाऽदंशभृतास्ते आत्मजालोकविश्रुताः । भवितारोऽङ्ग भद्रन्ते विश्रुतान्वय भावनाः । एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः । सभाजितास्त्रयोः सम्यगृक्षमलोभिपतोस्ततः । सोमोऽभूद्ब्रह्मणोंऽशेन दत्तोविष्णोस्तु योगवित् । दुर्वासाः शङ्करस्यांशोनित्यबोधाङ्गिरसः प्रजाः" । आत्रेयश्च शुक्लयजुःसम्प्रदायप्रवर्त्तकः वंशगणनायाम् "भरद्वाज आत्रेयात् आत्रेयोमाण्डेः" शत० ब्रा० पठितः स्त्रियां ङीप् । "आत्रेय्यश्च" उत्तरच० शुक्लयजुषांसम्प्रदायप्रवर्त्तक वंशगणनायाम् "आत्रेयीपुत्रादात्रेयीपुत्र इति" शत० ब्रा० । "पुत्रसन्धनकर्मणः स्त्रीसंस्काराङ्गत्वेनोक्तत्वात् तत्सन्निधानादयं वंशः स्त्रीप्राधान्येनोच्यते" भा० । २अत्रिगोत्रमध्ये भेदे पु० । "आत्रेयाय चाग्नीध्रतमदत्त पुरस्तादुपरिष्टाय क आत्रेयं क आत्रेयमिति तिरुक्त्वा"कात्या० १०,२,२१ । "आत्रेयाय अत्रिसगोत्राय अतिप्रवराय"वा कर्कः "आत्रेयाय हिरण्यं ददाति" शत० ब्रा० । बहुषु ढकोलुक् अत्रयः अत्रिपुत्रेषु क्वचित् । "आगस्त्याश्च महाभागा आत्रेयाश्चोत्तमव्रताः । सर्वेऽमी जगतः श्रेष्ठाः पूजिता ब्राह्मणास्त्वया" भा० व० २१ अ० । तेषां श्रेष्ठ्यं च यज्ञे अनिष्टत्विङ्मोऽपि तेभ्यो दक्षिणादानस्य" शत० ब्रा० उक्तेः यथा "आत्रेयाय हिरण्यं ददातीत्युपक्रम्य "अत्रिर्वा ऋषीणां होतासीत्स म होवाचोत्तमसमभिपुप्लुवे त मध्योऽत्रिमभ्युवच हि प्रत्यङ् इदं तमोऽपजघ्नीति स एतत्तमोऽपाघ्नन्नयं वै ज्योतिर्य इदं तमोऽपाबधीदिति तस्मा एतद्दक्षिणामनयन् ज्योतिर्हिरण्यं तद्वै तत्तेजसा वीर्येणर्षिस्तमोऽपजघानाथैष एतेनैवैतज्ज्योतिषा तमोऽपघ्नन्ति तस्मादात्रेयाय हिरण्यं ददातीति" । अत्रिप्रशंसया च तद्वंशजानां प्रशंसा । अथात्रित्वमेव "आत्रेयाय चाग्नीध्रतमदित्यनन्तरम् "अत्रिभ्यो दक्षिणां ददातीति कात्या० श्रुतेः" ऋत्विक्त्वविशेषणात् तत्पूर्वस्य अन्यत्वमिति"कर्कः । ३देहस्थरसभेदे"हेम० ४नदीभेदे स्त्री"करतोया तथात्रेयी सौहित्यश्च महानदः" भा०स०प०९अ०वर्णिता । "आत्रेयी वक्ष्यामो रजस्वलास्नातामात्रेयीमाहुः आत्रेयीयमपत्यं भवतीत्यात्रेयीमिति" वसिष्ठोक्तनिर्वचनयुक्तायामृतुस्नातायां ५स्त्रियां स्त्री "कृत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् । राजन्यवैश्ययोर्जानावात्रेयीमेव च स्त्रियम्" मनुः "आहिताग्नेर्ब्राह्मणस्य कृत्वा पत्नीमनिन्दिताम् । ब्रह्मकृत्याव्रतं कृच्छ्रादात्रेयीब्रह्मणैव च" अङ्गि० । "यागस्थत्वविद्धातौ चरेद्ब्रह्म-

हनोव्रतम्। गर्भहा च यथावर्णं तथात्रेयीनिसूदकः" या०। आत्रेयीयमिति ज्ञात्वा तस्या वधे तु ब्रह्महत्याव्रतद्विगुणव्रतम् कार्य्यम् ब्रह्महत्याव्रतसङ्ख्या "एवं तु समभिज्ञातामात्रेयीं वा निपातयेत्। द्विगुणा ब्रह्महत्या वै आत्रेयीनिधने भवेत्" भा०शा०प० १६५ अ० उक्तेः। अश्वादि० भरद्वाजार्थे फञ्। आत्रेयायणः भारद्वाजरूपे तद्गोत्रजे पुं स्त्री०। छागलशब्दात् आत्रेयार्थे अण्। छागल आत्रेयः अन्यःछागलिः सि०कौ०। आत्रेयी+स्वार्थे कन्। आत्रेयिका ह्रस्वमत्याह्रस्वतायां स्त्रियाम् स्त्री।

आथर्वण पु०अथर्वणा मुनिना दृष्टो वेदः अण् आथर्वणः तमधीते वेत्ति वा पुनः अण्। १अथर्ववेदज्ञे ब्राह्मणे, आथर्वणिकस्य धर्म आम्नायो वा अण् ठक्लोपश्च। २अथर्ववेदिधर्म्मे ३तदाम्नाये च। अथर्वाणं वेदमधीते वेत्ति वा अण्। ४अथर्ववेदस्याध्येतरि ५वेत्तरि च तत्कल्पज्ञातरि ६पुरोहिते पु०। तेषां समूहः अण्। ७अथर्वसमूहे न०। अथर्वणा प्रोक्तमधीयते अण् तस्य तु बह्वृषु लुक्। अथर्वाण इत्येव। अथर्वणि विहितं कर्म अण्। अथर्ववेदविहिते ८अभिचारादौ कर्मणि न "आथर्वणेन हन्ता च" स्मृतिः ९तत्तत्ये कर्म्ममात्रे च "अग्नौ साङ्गिरसाथर्वणेन विधिनाऽर्घ्यमर्पणम्" दशकुमा०।

आथर्वणिक त्रि० अथर्वाणं वेदमधीते वेत्ति ठक् दारुड्या० नि०। अथर्ववेदपाठके विप्रे।

आदंश पु० आ+दन्श-भावे घञ्। दंशने। "आदंशः सर्वजन्तूनामेतदादंशलक्षणम्" सुश्रु०। आदंशश्च दन्तादि साध्यव्यापारभेदः। आदश्यते अत्र आधारे घञ्। २आदंशस्थाने "आदंशं खेदितं चूर्णैः प्रच्छितं प्रतिसारयेत्" सुश्रु०। करणे घञ्। ३दन्ते

आदंशि त्रि० आ+दा-किन् द्विच्च। आदानकर्त्तरि "वीलु द्वेषा अनुवश ऋणमादंशि" ऋ० २,२४,१३।

आदर पु० आ+दृ-कप्। १गौरवहेतुके कर्म्मणि सम्माने,। "न जातहार्दैन न विद्विषादरः" किरा०। "दरादराभ्यां दरकम्पिनो पपे" नैष०। "तद्दर्शनादभूच्छम्भोर्भूयान् दारार्थमादरः" कुमा०। २आरम्भे ३आसक्तौ। "तां प्रणामादरस्रस्तजाम्बूनदविभूषणाम्" कुमा०। ४यत्ने च "यदयन्त्रपताकाश्रीरपौरादरनिर्मिता" कुमा०।

आदरणीय त्रि० आ+दृ-अनीयर्। सम्माननीये। तव्य। आदर्त्तव्योऽत्र त्रि०।

आदर्श पु० आदृश्यतेऽत्र दृश-आधारे घञ्। १दर्पणे, तत्र हि बिम्बपदार्थस्य प्रतिबिम्बपतनात्, तत्संयोगेन नयनरश्मीनां परावर्त्तने वा बिम्बग्राहितया बिम्बं दृश्यते इति तस्य तथात्वम्। "आदर्शबिम्बसदृशमितायताक्षी" कुमा० "नेपथ्यदर्शिनश्छाया तस्यादर्शहिरण्मये" रघुः। आदृश्यते सम्यग्यूपेण ज्ञायते अन्यार्थोऽस्मिन्। टीकायां २प्रतिरूपपुस्तकादौ यत्तत्समक्षरसन्निवेशं दृष्ट्वा तदनुरूपं मन्यन्निख्यते तादृशे पुस्तके। "यथादर्शं तथा लिखितमिति भूरिप्रयोगः। आदर्शोगुणानाम् काद०। तत्र तदीयगुणान् दृष्ट्वा परैस्तथागुणा आश्रीयन्त इति तस्य तथात्वम् ४जनपदसीमाभेदे च। ततोभवादौ वुञ्। आदर्शकः। जनपदावधिसूचकस्थानभवे त्रि०।

आदर्शमण्डल पु० आदर्शइव मण्डलमस्य। आदर्शाकार मण्डलयुक्ते सर्पभेदे सर्पभेदात्मके। "मण्डलिनस्तु आदर्शमण्डलः श्वेतमण्डलः" इति सुश्रु०उक्तः। आदर्शोमण्डलमिव। २मण्डलाकारे दर्पणे न०।

आदहन न० आ+दह-भावे ल्युट्। १दाहे २हिंसायां ३कुत्सने च। आदह्यतेऽत्र आधारे ल्युट्। ४श्मशाने। "अङ्गमादहनं प्राप्य आसीनोदक्षिणामुखः" छन्दो०प०। "आदह्यतेऽस्मिन्निति आदहनं श्मशानम्" शु०त०रघु०।

आदाढ त्रि० आ+दा-दृच्। अग्रहीतरि "दाता नित्यमनादाता सर्वभूतानुकम्पकः" या०आदाननित्याच्चादाढः" मनुः।

आदादिक त्रि० अदादिगणे पठितः ठक्। अदादिगणपठिते धातुभेदे। "आदादिकस्य ग्रहणं" सि०कौ०।

आदान न० आ+दा-भावे ल्युट्। ग्रहणे। "कुशाङ्कुरादान परिक्षताङ्गुली" कुमा०। "आदानं हि विसर्गाय सतां वारिमुचामिव" रघुः। "आदानमप्रियकरं दानञ्च प्रियकारकम्" "आदाननित्याच्चादाढः" "निन्दितेभ्योधनादानं वाणिज्यं शूद्रसेवनम्" मनुः आदाने नियमविशेषाश्च स्मृतौ दर्शिताः। "भूमेः प्रतिग्रहं कुर्य्याद्भूमेः कृत्वा प्रदक्षिणम्"। विष्णुध०। प्रदक्षिणं न सर्व्वस्या भूमेः किन्तु तत्स्थायाः प्रदक्षिणावर्त्तनमात्रं भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम् रघु०तत्रैव। "करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः!। करन्तु हृदि विन्यस्य धर्म्मोज्ञेयः प्रतिग्रहः। आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः। तथाचैकशफानान्तु सर्व्वेषामविशेषतः। प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा। आरण्याः पशवश्चान्ये ग्राह्याः पुच्छे विचक्षणैः। प्रतिग्रहमधोभूस्य आरुह्य च तथा चरेत्। बीजानां सुष्टिमादाय रत्नान्यादाय सर्व्वतः।

वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः । आरुह्योपनाहौ यानमारुहैव च पादुके । ईशायान्तु रथो ग्राह्य श्छत्रदण्डौ च धारयेत् । आयुधानि समादाय तथा भूयं विभूषणम् । धर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम् । अवतीर्य च सर्व्वाणि जलस्थानानि वै द्विजाः ! । द्रव्याण्यन्यान्यथादाता स्पृष्ट्वा योन्नाह्मणः पठेत् । प्रतिगृहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् । ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम्" । भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः । "समाप्यैवन्ततः पश्चात् कामस्तुत्वा प्रतिगृहम् । विधिं धर्म्ममथोज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् । दात्रा सह तरत्येव कालदुर्गाणि वै द्विजः" । विष्णुध० "गां पुच्छे करिणं करे" मिता० वाक्यस्य प्रथमं करे गृहीत्वा पश्चादारोह इत्यर्थः एवमन्यत्र विरोधः समाधेयः । आदीयते औषधार्थं वैद्यैः आ+दा–कर्मणि ल्युट् ङीप् । २हस्तिशोषायां स्त्री रत्नमाला ।

आदाय अव्य० आ+दा–ल्यप् । गृहीत्वेत्यर्थे "तेषां सर्व्वंस्वमादाय राजा राष्ट्रात् प्रवासनम्" मनुः । आ+दा–भावे घञ् । २आदाने पु० ।

आदायचर त्रि० आदाय चरति चर–ट उप०स० । गृहीत्वा चारिणि । "द्विषन् वनेचराण्याणां त्वमादायचरोवने" भट्टिः ।

आदायिन् त्रि० आ+दा–णिनि स्त्रियां ङीप् । गृहीतरि "योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणोधनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" मनुः ।

आदार पु० आ+दृ–वेदे बा० घञ् । आदरे "आदारो वा सभानाम्" ऋ० १,४६,४ ।

आदारिविम्बी स्त्री आदारिणी विम्बीव नि०पु'वत् । (आनेरी) अस्त्रवैतसतुल्यपुष्पायां लतायां "आदारिविम्बीं सुकदम्ब पुष्पीं विषाच्च सर्पिर्विषचेत् कषायें' सुश्रु० ।

आदि पु० प्रथमं दीयते गृह्यते आ+दा–कि । १प्रथमे, २प्राक्सत्तायाम्, ३कारणे, ४सामीप्ये, ५प्रकारे, ६अव्ययवे च । ७आद्ये त्रि० अमरः । "जगदादिरनादिरस्त्रम्" कुमा० । "अपएव ससर्जादौ तासु वीजमवासृजत्" । "वेदशब्देभ्यएवादौ पृथक्संस्थाश्च निर्म्ममे" "मरीच्यादींस्तथा मुनीन्" इति च मनुः । "कथमेतत् विजानीयां त्वमादौ प्रोक्तवानिति" । "अहमादिश्च भूतानाम्" इति च गीता । "भूवादयोधातवः" पा० । भूश्च वाश्च भूवौ आदिश्च आदिश्च आदी भूवौ आदी येषाम् आद्य आदि शब्द प्रथमार्थः द्वितीयःप्रकारार्थस्तेन भूप्रभृतयो वाप्रकाराः क्रियावाचित्वेन धातवइत्यर्थः । एवमेव वैया० भू० । आदिशब्देन गणोऽपि सूच्यते । "भ्वादादो जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्रयादि चुरादयः" व्या० कारिका । तत्र भवः दिगा० यत् । आद्यः डिमच् । आदिमः । आदिभवे त्रि० ।

आदिकर त्रि० आदिं करोति अच्छेतादावपि ट स्त्रियां ङीप् । प्रथमकारके प्राक्सत्ताकर्त्तरि ।

आदिकर्त्तृ पु० आदिः कर्त्ता । आद्यकारके ईश्वरे "कस्माच्च ते न नमेरन् महात्मन् ! गरीयसे ब्रह्मणोऽप्यादिकर्त्त्रे" गीता ।

आदिकर्म्मन् न० कर्म्म०स० । १क्रियाकूटात्मकस्य कर्मणोऽवयवभूते प्रथमे कर्म्मणि प्रथममारभ्यमाणक्रियायाम् । "उदुपधाद्भावादेर्विभाषा भावादिकर्मणोः" "भावादिकर्म्मणोरन्यतरस्याम्" "आदिकर्म्मणि क्तः कर्त्तरि च" पा० । २प्रथमजे कर्म्मभावे च । ब० । ३तथाकर्म्मयुक्ते त्रि० ।

आदिकवि पु० आदिरादयःकविः । हिरण्यगर्भे तस्य प्रथमोत्पन्नत्वात् स्वयंप्रतिभातवेदत्वाच्च कवितया तथात्वम् । "तेने ब्रह्म हृदा य आदिकवये" भाग० । २वाल्मीकौ च ।

आदिकारण न० आद्यं कारणम् । १परमेश्वरे तदधीनत्वात् इतरकारणानाम् स हि प्रथमं खोपाधिभूताविद्यया सूक्ष्यमाणजीवादृष्टवशादिदमित्थं कर्त्तव्यमिति ईक्षणपूर्व्वकं सृष्टव्यपदार्थाकारेण विवर्त्तमानः सूक्ष्मभूतानि प्रथमसृत्वाद्य ततः स्थूलभूतानि भौतिकानि च सृजतीत्यागमसिद्धम् इति वेदान्तिनः । सांख्यमते २प्रधाने प्रधानं हि मूलकारणं तस्यैव महदाद्याकारेण परिणमनात्तथात्वम् । नैयायिकादिमते कारणशब्दस्य निमित्तार्थत्वे ईश्वरस्यैव तथात्वम् । समवायिकारणार्थत्वेपरमाणूनां मूलकारणत्वमिति भेदः इति. तेन तन्मते ३ईश्वरे ४परमाणुषु च ।

आदिकाव्य न० आदि आद्यं काव्यं पादचतुष्टयरूपच्छन्दोबद्धं वाक्यम् । वाल्मीकिरचिते रामायणे तस्य चाद्यकाव्यत्वं दर्शितं तत्रैव आदिका० २सर्गे "ददर्श क्रौञ्चयोस्तत्र मिथुनं चारुदर्शनम् । तस्मात्तु मिथुनादेकमागत्यानुपलक्षितः । जघान बह्वानुशयो निषादो मुनिसंनिधौ । तं शोणितपरीताङ्गं चेष्टमानं महीतले । दृष्ट्वा क्रौञ्ची रुरोदार्त्ता करुणं खे परिभ्रमा । तं तथा निकृतं दृष्ट्वा निषादेनाकृतं वने । मुनेः शिष्यसहायस्य कारुण्यं समजायत । ततः करुणवेदित्वाद्धर्म्मात्मा स द्विजोत्तमः ।

निशम्य करुणं क्रौञ्चीं रुदतीं तां जगाविदम् । मा नि-षाद ! प्रतिष्ठां त्वमगमः शाश्वतीःसमाः । यत्क्रौञ्चमिथुना-देकमवधीः काममोहितम् । तस्येदमुक्ता वचनं चिन्ताभूत् तदनन्तरम् । शकुनं शोचता ह्येवं किमतेद्व्याहृतं मया मुहूर्त्तमिव च ध्यात्वा वाक्यं तत् प्रविस्मृत्य च । शिष्यमाह स्थितं पार्श्वे भारद्वाजमिदं वचः । पादैश्चतुर्भिः संयुक्तमिदं वाक्यं समाक्षरैः । शोचतोक्तं मया यस्मात् तस्माच्छ्लोको भवत्विति" । एवं चिन्तयतस्तस्याश्रमे स्वयं ब्रह्मणागत्यो-पदिष्टम् । "महर्षे । यदयं प्रोक्तस्त्वया क्रौञ्चवधाश्रयः । श्लोक एवास्त्वयं बद्धस्तव वाक्यस्य शोचतः । छन्दादेव ते ब्रह्मन् ! प्रवृत्तेयं सरस्वती । रामस्य चरितं कृत्स्नं कुरुत्वमृषिसत्तम" । इत्युपदिष्टस्य वाल्मीकेःरामायणरचने-मतिरभूत् यथाह तत्रैव । "तस्य बुद्धिरभूत् तत्र वाल्मी-केरथ धीमतः । कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्य-हम्" इत्येवमभिनिवेशं कृत्वा कृत्स्नं रामायणं कृतमिति सर्गशेषे तत्रैवोक्तम् "ततः स रामस्य चकार कीर्तिमान् । समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदा-रधीः परम्" । इह लोके चतुष्पादश्लोकत्वादौ तेनैव प्रचा-रणात् तत्कृतकाव्यत्वादिकाव्यत्वम् । वेदे तु बहूनामनुष्टु-प्छन्दस्कानां श्लोकानां सत्त्वेऽपि लोके प्रथमप्रचारा भावात्तस्याद्यत्वम् । तेन "ऐषा वाक्सम्राडिदं सर्वं यत् किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्" इत्युपक्रमे "असुर्यानाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" इत्यादयः श्लोकाः शु०य० वे० ४० अध्याये पठिताः । एवमु ऋग्वेदादावपि बहवः तथाविधाः सन्ति" तथा च वेदे सत्त्वेऽपि लोके तेन प्रथमप्रचारणात्तस्याद्यकाव्यत्वम् । यत् तु उत्तरचरिते "चित्रमाम्नायाद-ध्योऽयं नूतनश्छन्दसामवतार" इति वर्णितम् तत् यथा श्रुतार्थेऽसङ्गतमेव । अन्यः लोकविद्ववाक्यादित्यध्याहारेण आम्नायात् आम्नायं वेदं मूलत्वेन प्राप्य छन्दसां नवावतारइति व्याख्याने तु न कोऽपि दोष इति युक्तम् ।

आदिकेशव पु० कर्म० काशीस्थे केशवमूर्त्तिभेदे "आदिकेशव पूर्व्वेण स्वयमादित्यकेशवः" "आदिकेशवसुखांश्च केश-वान् परितोष्य च" इति च काशी० ।

आदिगदाधर पु० १काशीस्थे विष्णुमूर्त्तिभेदे "दत्तात्रेये-श्वरात् पूर्व्वमेष आदिगदाधर" इतिकाशी० २६ अ० । २गयातीर्थस्थे विष्णुमूर्त्तिभेदे च । "आद्येन गदया चासौ यस्माद्दैत्यैः स्थिरीकृतः । स्थित इत्येव हरिणा तस्मादादि गदाधरः" इति वायु०गया०२अ० तन्नामनिरुक्तिः उक्ता । "गयाशिरस्यादवित्वा गुरुत्वादास्थिता शिला । काला-न्तरेण व्यक्तश्च स्थित आदिगदाधरः । तथा व्यक्तोऽव्यक्त रूपी आसीदादौ गदाधरः । आदिरादौ पूजितोऽत्र देवैर्ब्रह्मादिभिर्यतः । पाद्यार्घगन्धपुष्पाद्यैरत आदि गदाधरः" इति गारु०पु० निरुक्तिः । "आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत् । शिलायां निश्चलत्वाय स्वयमादिगदाधरः" वायुपुराणम् ।

आदिजिन पु० कर्म०स० । ऋषभदेवे हेम० ।

आदितस् अव्य०आदि+तसि । १आदौ इत्यर्थे "यतोनृ प्र-जानामसृजन्महर्षीनादितोदश" मनुः । आद्या०पञ्चम्या-स्तसिः । २आदेरित्यर्थे च । "इदं शास्त्रन्तु कृत्वादौ मामेव स्वयमादितः" मनुः आदित आदिमारभ्येत्यर्थः ।

आदितौल पु० कर्म्म० । "एकएव लघुर्यत्र आदितालः स लक्ष्यते । गुरुस्तत्परतोवाच्यः प्रायेणैतद्विदर्शनम्" सङ्गी-तशास्त्रलक्षिते तालभेदे ।

आदितेय पु० अदित्या अपत्यम् ढक् । १सुरमात्रे २सूर्य्ये च अदितिजशब्दे विवृतिः पृ०२१५ । "यदेनमद्युर्यत्रि-वासो दिवि देवाः सूर्य्यमादितेयम्" ऋ०१०,८८,११ ।

आदित्य पु०अदितेरपत्यं यञ् । १देवमात्रे "तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवने संप्रयन्ति" छा०उ० । २सूर्य्ये च "आदित्योब्रह्मेत्यादेशः" छा०उ० "जिगी-षुरेष दिनकृदादित्येष्विव कल्पते इति" माघः । "असौ-च कथमादित्याः प्रतापच्छविशीतलाः" कुमा० । ३तद-धिष्ठिते गगने दिवानिशं बंभ्रम्यमाणे लोकप्रकाशकरे तेजो मण्डले च "अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" मनुना अग्निहुतद्रव्याणां हविराज्यादीनां परमाणु भावतयाऽव-स्थितानां दग्धशेषाणां सूर्य्यरश्मिनाकर्षणेन सूर्य्यलोक-प्राप्त्या वृष्टिहेतुत्वमुक्तम् तच्च मण्डलार्थपरत्वेव सम्भवति "अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तद्भाम" "अथ यदेवैतदादित्यस्य शुक्लं भाः सैव सा, अथ यन्नीलं कृष्णं तदम" इति च छा०उ० । अत्र शुक्लकृष्णभा-युक्ततया मण्डलपरत्वं गम्यते । "असौ वा आदित्यो देवमधु" छा०उ० अत्र च मण्डलपरत्वम् उत्तरत्र आकाशे रश्मिसम्बन्ध कीर्त्तनात् स्पष्टमेव । "ज्योतिस्वरूपाभिधानात्" शा०सू० भाष्ये च चक्षुर्वृत्तेर्निरोधकं मार्त्तण्डादिकं तमउच्यते तस्मा

एवानुग्राहकमादित्यादिकं ज्योतिः" इत्यादित्यस्य चक्षुर्ग्रहणेरनुग्राहकतया ज्योतिःपदार्थपरत्वमुक्तम् । ४आदित्यमण्डलान्तर्गते हिरण्मये परमपुरुषे" विष्णौ "स्वयंभूः शम्भुरादित्यः" विष्णुस० । विष्णोश्चादित्यशब्दवाच्यत्वे कारणमुक्तं भाष्ये यथा "आदित्यमण्डलान्तःस्थोहिरण्मयः पुरुष आदित्यः, द्वादशादित्येषु विष्णुर्वा, "आदित्यानामहं विष्णुरिति"स्मृतेः, अदितेरखण्डितायाः महत्या अयं पतिरिति वा "इयं वा अदितिर्महती" "देवी विष्णुपत्नीति" श्रुतेः यद्वादित्यएकएवानेकजलेष्वनेकवत् प्रतिभासते एवमनेकेषु शरीरेषु एकएवानेकवत् प्रतिभासत इत्यादित्यसाधर्म्याद्वा आदित्यः" तत्र हिरण्मयपुरुषस्य सूर्य्यमण्डलमध्यवर्त्तित्वे च "य एषोऽन्तरादित्ये हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात् सर्वएव सुवर्णः" इति छा०उ० श्रुतिर्मानम् "अथ य एषोऽन्तरादित्ये आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो नहि सुवर्णविकारत्वम् देवस्य सम्भवति, ऋक्सामगेषणत्वापहतपाप्मत्वासम्भवात् । नहि सोवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति येन प्रतिषिध्येत चाक्षुषे चाग्रहणात् । अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात्, पूरयति वा खेनात्मना जगदिति । दृश्यते निष्टप्तचक्षुर्भिः समाहितचेतोभिर्ब्रह्मविद्यादिसाधनामेक्षैः । तेजस्विनोऽपि श्मश्रुकेशादयः कृष्णाः स्फुरिततो विशिनष्टि हिरण्यश्मश्रुर्हिरण्यकेश इति । ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेत्यर्थः" शाङ्करभाष्यम् । उपासकानामतिवाहनाय ईश्वरनियुक्ते अर्चिरादिमार्गस्थिते आतिवाहिकेऽपि देवभेदे च "संवत्सरादादित्यमादित्याच्चन्द्रमसम्" छा०उ० । आदित्याश्च द्वादश यथोक्तं विष्णुधर्मोत्तरे भारते च "धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्य एव च । भगो विवस्वान् पूषा च सविता दशमः स्मृतः । एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते" इति विष्णुध० । "धाताऽर्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा । इन्द्रो विवस्वान् पूषा च पर्জ্জन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यज" इति भा०आ०प० कल्पभेदादनयोर्व्यवस्था । मासभेदे आदित्यभेदा आदित्यहृदये दर्शिता यथा "अरुणो माघमासे तु सूर्य्यो वै फाल्गुने तथा । चैत्रे मासि च वेदस्रो वैशाखे तपनः स्मृतः । ज्यैष्ठे मासि तपेदिन्द्रः आषाढे तपते रविः । गभस्तिः श्रावणे मासि यमोभाद्रपदे तथा । आश्वे हिरण्यरेताश्च कार्त्तिके च दिवाकरः । मार्गशीर्षे तपेच्छित्रः पौषे विष्णुः सनातनः । इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः" । ईअर्कवृक्षे पु० । आदित्यस्यापत्यम् यञ् यलोपः । ७आदित्यापत्ये पुंस्त्री० ।

आदित्यकेतु पु० क्षत्राङ्गपुत्रभेदे तद्गणनायां भा०आ०प० ६७ अ० । "आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ" ईत० । आदित्यस्य केतौ अरुणे ।

आदित्यकेशव पु० आदित्यपूजितः केशवः । काशीस्थे "केशवमूर्त्तिभेदे "आदिकेशवपूर्व्वेण स्वयमादित्यकेशवः" काशीख० ।

आदित्यपत्र पु० आदित्यस्य अर्कवृक्षस्य पत्रमिव पत्रमस्य । क्षुपभेदे । ईत० । अर्कवृक्षपत्रे न० ।

आदित्यपर्णिनी स्त्री आदित्यवर्णं नित्यं पर्णमस्त्यस्या इनि । "मूलिनी पञ्चभिः पत्रैः सुरक्ता शुकतोमलैः । आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्त्तिनी" "आदित्यपर्णिनी ज्ञेया तथैव हि हिमत्यये" सुश्रुतोक्तलक्षणायामोषधौ ।

आदित्यपुराण न० आदित्येनोक्तं पुराणम् । उपपुराणभेदे । उपपुराणगणनायाम् "माहेश्वरं तथा साम्बं सौरं पाराशराह्वयम्" । कौर्म्मे सौरत्वेनेदं पठितम् । मत्स्यपुराणे तु "यत्साम्बं पुरस्कृत्य भविष्योत्पत्तिकथानकम् । प्रोच्यते तत् पुनर्लोके साम्बमेव शुचिव्रतम् । एवमादित्यसंज्ञं च तत्रैव परिपठ्यते" आदित्यसंज्ञमित्युक्तं देवीपु० "पराशरोक्तमपरं मारीचं भास्कराह्वयम्" भास्करत्वेनोक्तं तथा चादित्यपुराणस्यैव नामान्तरं सौरं भास्करञ्चेत्यादि । अधिकमुपपुराणशब्दे वक्ष्यते । एतदीयप्रतिपाद्यविषयाः सौरशब्दे द्रष्टव्याः ।

आदित्यपुष्पिका स्त्री आदित्यवर्णं रक्तं पुष्पमस्याः । रक्तपुष्पे अर्कवृक्षे । [वल्लभायाम् ओषधौ ।

आदित्यभक्ता स्त्री आदित्यभक्ता । (झड्झड़िया) अर्क-

आदित्यव्रत न० आदित्यस्य तदुपासनार्थं व्रतम् । सूर्य्योपासनार्थे व्रतभेदे । आदित्यव्रतस्य ब्रह्मचर्य्यमस्य ठञ् । आदित्यव्रतिकः तदुव्रतार्थब्रह्मचर्य्ययुक्ते त्रि० ।

आदित्यसुत पु० ईत० । सूर्य्यपुत्रे १सुग्रीवे २कर्णे, ३यमे ४शनैश्चरे च अरुणात्मजशब्दे विवृतिः दृ० ।

आदित्सु पु०आ+दा-सन्-उ । ग्रहीतुमिच्छौ, "आदित्सुभिर्नूपुरशिञ्जितानि" कुमा० ।

आदिदेव पु० आदौ दीव्यति स्वयं राजते दिव-अच् ७त० । १नारायणे २शिवे । आदिः कारणं देवः । ३आदिकारणे परमात्मनि । "सहस्रात्मा मया योव आदिदेव

उदाहृतः" या० स्मृ०। "पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्" गीता। "वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः" विष्णुस०। "आदिः कारणं देव इत्यादिदेवः दानादिगुणवान् वा" भा०। "देवोदानात्दीपनात् भवतीति" यास्कोक्तदेवशब्दनिरुक्तिमाश्रित्य भाष्ये तथोक्तम्।

आदिदैत्य पु० कर्म्म०। हिरण्यकशिपौ दैत्ये तस्य देतेः प्रथमजत्वात्तथात्वम्। "एक एव दितेः पुत्रः हिरण्यकशिपुः पुरा" भा० आ०प०६५ अ०। आदिदैत्योमहावीर्यो हिरण्यकशिपुः पुरा" भा०व०प० १०४ अ०।

आदिन् त्रि० अत्तीति अद्-णिनि। भक्षके। स्त्रियां ङीप्।

आदिनव पु० आदीनवस्य पृ० वेदे ह्रस्वः। आदीनशब्दार्थे "आदिनवं प्रतिदीव्ने हतेनाक्षाँ अभिक्षर" ऋ०७,११०,४।

आदिपर्व्वन् न० आदि आद्य पर्व्व। महाभारतान्तर्गते आद्ये पर्व्वणि। "इत्येतदादिपर्वोक्तं प्रथमस्याऽविस्तरम्" भा० आ०।

आदिपुराण न० आदि आद्यं पुराणम् कर्म्म०। पुराणभेदे सर्वेषामष्टादशानां पुराणानामुपपुराणानाञ्चादिभूते चतुर्लक्षात्मके ब्रह्मनिर्म्मिते पुराणभेदे। नारदपुराणे उपसंहारपादशेषे मरीचिं प्रति ब्रह्मवाक्यम् "अष्टादशानौपम्य सारात् सारतरं द्विज।। ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते। तदेव व्यस्तगदितमत्राष्टादशधा पृथक्। पाराशर्य्येण मुनिना सर्वेषामपि मानद"। वस्तुश्रद्धाय तेनैव मुनीनां भावितात्मनाम्। मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे। मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः। मया चेदं पुराणन्तु वसिष्ठाय पुरोदितम् तेन शक्तिसुतायोक्तं जातूकर्ण्याय ते न च। व्यासोलब्ध्वा ततश्चैतत् प्रभञ्जनसुखोद्गतम्। प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्". तथा च व्यासोक्तब्रह्माण्डन्तु द्वादशसाहस्रं तस्यैव संक्षेपार्थप्रतिपादकम्। एवञ्च तस्यैव चतुर्लक्षात्मकस्य सर्वपुराणमूलतया आद्यत्वात् आदिपुराणत्वम्। देवलोके तु आदिपुराणस्य शतकोटिश्लोकात्मकता यथोक्तं तत्रैव। प्रथमपादे मरीचिं प्रति ब्रह्मवाक्यम्। "शृणु वत्स! प्रवक्ष्यामि पुराणानां समुच्चयम्। यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्। पुराणमेकमेवासीत् सर्वकल्पेषु मानद!। चतुर्वर्गस्य बीजञ्च शतकोटिसुविस्तरम्। प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः। कालेन ग्रसनं दृष्ट्वा पुराणस्य महामतिः। हरिर्व्यासस्वरूपेण जायते च युगे युगे। चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा। तदष्टादशधा कृत्वा भूलोके निर्दिशत्यपि। अद्यापि देवलोके तु शतकोटिसुविस्तरम् अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते" एवञ्च तदानीं लोकप्रसिद्धचतुर्लक्षात्मकस्य ब्रह्माण्डनामकपुराणान्तरस्यैव व्यासप्रणीत चतुर्लक्षात्मकाष्टादशपुराणानामादिभूतत्वादादिपुराणत्वेन प्रसिद्धमासीत्। तच्च क्रमशउच्छिन्नप्रायं संस्कृत शालायान्तु तस्य खल्वांशमात्रस्य सत्त्वेऽपि सर्वांशस्य प्रायशः कृत्वापीदानीमलाभात् न तत्तत्प्रतिपाद्यविषया वर्णयितुं शक्याः। हेमाद्रि माधवादिभिरादित्यपुराणनाम्ना बहूनि वचनानि लिखितानि। तेषां काले च तत्पुराणस्य प्रचार आसीत् क्रमश इदानीमुच्छिन्नप्रचारतया समग्रलाभासम्भवः इति तत्तत्प्रतिपाद्यविषयप्रदर्शनादुपरतमस्माभिः।

आदि(पु)पूरुष पु० आदौ पुरि देहे वसति वस-उषन् स्वेनात्मना पूरयति जगत् पूर-उषन् वा पृ० वा ह्रस्वः। आदिजीवे १हिरण्यगर्भे २नारायणे च। "ते च प्रापुरदर्शनं बुबुधे चादिपु(पू)रुषः" रघुः। "दैत्येश्वरसभां गत्वा पाणिं संस्पृश्य पाणिना। दैत्यानामादिपुरुषः सुरारिरिति नन्दनः" भा०व०प०२७१अ०। ह्रस्वाभावे पूरूषोऽप्यत्र "तमर्घ्यमर्घादिकयादिपूरुषः" माघः।

आदिभव पु० आदौ भवतीति भू-अच्। १हिरण्यगर्भे "हिरण्यगर्भ समवर्त्तताग्रे" इति श्रुतौ तस्याग्रभवत्वोक्तेः तथात्वम्। २सर्व्वस्यादिः कारणं भवति। सर्व्वस्य कारणभूततयाविर्भूते ३विष्णौ च "रसातलादादिभवेन पुंसा" रघुः २अग्रजमात्रे त्रि०।

आदिम त्रि० आदौ भवः आदि+डिमच्। आदौ भवे।

आदिमत् त्रि० आदिरस्यास्य मतुप् स्त्रियां ङीप्। आदियुक्ते १सकारणे २आदिसीमायुक्ते च।

आदिराज पु० आदिराद्योराजा टच् समा०। पृथुनामके नृपतौ तस्य राज्ञामादित्वात्तथात्वम् तत्कथा भाग०४स्क० "अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत। तदृष्ट्वा मिथुनं जातविस्मया ब्रह्मवादिनः। ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम्। एष विष्णोर्भगवतः कला भुवनपालिनी। इयञ्च लक्ष्मीसंभूतिः पुरुषस्यानपायिनी। क्षत्तियः प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजोभविष्यति पृथुश्रवाः"। तस्य वेणस्येत्यर्थः।

आदिवराह पु० आदिरादौ वराहः। यज्ञवराहरूपेणाविर्भूते विष्णोरवतारभेदे तत्कथा "ततो महात्मा मनसा दिव्यं रूपमचिन्तयत्। किं नु रूपमहं

कृत्वा उद्धरेयं वसुन्धराम् । जले निमग्नां धरणीं येनाहं वै समुद्धरे । इति सञ्चिन्त्य मनसा हरिर्नारायणः प्रभुः । जलक्रीडारुचिस्तस्माद्वाराहं वपुरास्थरत् । हरिरुद्धरणे युक्तस्तदाऽभूदस्य मूर्मिष्टक् । अदृश्यं सर्व्वभूतात्मा वाङ्मयं ब्रह्मसंज्ञितम् । दशयोजनविस्तारस्तच्छ्रितं शतयोजनम् । नीलजीमूतसङ्काशं मेघस्तनितनिस्वनम् । गिरिसंहननं भीमं श्वेतदंष्ट्रोग्रदंष्ट्रिणम् । विद्युदग्निप्रकाशाक्षमादित्यसमतेजसम् । पीनदृप्तायतस्कन्धं दृप्तशार्दूलविक्रमम् । पीनोन्नतकटीदेशं दृप्तलक्षणलक्षितम् । रूपमास्थाय विपुलं वाराहमभितं हरिः । पृथिव्युद्धरणार्थाय प्रविवेश रसातलम् । वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः । आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् । सत्यधर्म्ममयः श्रीमान् क्रमविक्रमसत्कृतः । क्रियासत्रमहाघोणः पशुजानुर्म्महाकृतिः । उद्गात्रन्त्रो होमलिङ्गो वीजौषधिमहाफलः । वायुन्तरात्मा सत्रस्फिक् विकृतः सोमशोणितः । वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्मौष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः । नानाच्छन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वैश्रणिष्टङ्क इवोच्छ्रितः । भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशद्गुरुः । अद्भिः सञ्छादितासुर्व्वीं स तामार्च्छत् प्रजापतिः । रसातलजले मग्नां रसातलतलं गतः । प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार गाम् । ततः स्वस्थानमानीय पृथिवीं पृथिवीधरः । सुमोच पूर्व्वं सहसा धारयित्वा धराधरः । ततो जगाम निर्व्वाणं मेदिनी तस्य धारणात् । चकार च नमस्कारं तस्मै देवाय विष्णवे । एवं यज्ञवराहेण भूत्वा लोकहितार्थिना । उद्धृता पृथिवी देवी सागराम्बुधरा पुरा" हरिवं० २२४ अ० ।

आदिविद्वस् पु० आदिरादौऽखिलसम्प्रदायप्रवर्त्तकत्वात् विद्वान् । सांख्यशास्त्रकारके सर्वसम्प्रदायप्रवर्त्तके उपासनयासिद्धे जगत्कर्त्तरि कपिले । "आदिविद्वान् सिद्ध" इति कापिलाः" कुसुमा० कपिलशब्दे विवृतिः ।

आदिशक्ति स्त्री आदिराद्या शक्तिः । परमेश्वरस्य १मायारूपशक्तौ २देवीमूर्त्तिभेदे च । आद्याशब्दे विवृतिः ।

आदिशरीर न० आदि आद्यं शरीरम् । भोगार्थं परमेश्वरसृष्टे आद्ये लिङ्गाख्ये शरीरे । "अयमादिशरीरेण देवसृष्टेन मानवः । शुभानामशुभानाञ्च कुरुते सञ्चयं महत् । आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम् । संभवत्येव युगपद्यतो नास्त्यन्तरा भवः । तत्रास्य स्वकृतं कर्म्म छायेवानुगतम् तदा । फलत्यथ सुखार्हौ वा दुःखार्हौ वाऽथ जायते" भा० व० प० १८४अ० । आदि कारणं शरीरं कर्म० । २अविद्याख्ये २सूक्ष्मशरीरे च वेदान्तिमते शरीरं त्रिविधं कारणसूक्ष्मस्थूलभेदात् तत्राविद्यायाः कारणशरीरत्वं सर्वकारणत्वात् विद्यया शीर्य्यमाणत्वाच्च अविद्यां प्रकृत्य "सा कारणशरीरं स्यात्" पञ्चद० । [त्यर्थे च ।

आदिश्य अव्य० आ+दिश-ल्यप् । १अनुशिष्येत्यर्थे २उक्त्वे-

आदिष्ट न० आ+दिश-भावे क्त । १आज्ञायाम्, २उपदेशे च । कर्म्मणि क्त । ३उपदिष्टे, ४व्याकरणप्रसिद्धे स्थानिजाते वर्णे च त्रि० यथा इकः स्थाने यण् आदिश्यते इति इकोयणादिष्टइत्युच्यते । ५आज्ञप्ते ६उच्छिष्टे ७अनुशिष्टे च त्रि० "उपपातकयुक्तानामनादिष्टेषु चैव हि" विश्वा० ।

आदिष्टिन् पु० आदिष्टमादेशोव्रतादेयः अस्त्यस्य इनि । व्रतादेशोयस्य कृतस्नाद्येशे, ब्रह्मचारिणि । "आदिष्टी नोदकं कुर्य्याद्वा व्रतस्य समापनात्" मनुः आदिष्टं व्रतादेशोऽस्त्यस्येति आदिष्टी ब्रह्मचारी" कुल्लू० । आदिष्टमनेन इष्टा० इनि । २आदेयकर्त्तरि त्रि० स्त्रियां ङीप् ।

आदिसर्ग पु० कर्म्म० । प्राकृतप्रलयोत्तरं प्रथमसृष्टौ 'अव्यक्तात् पूर्व्वसुत्पन्नो महानात्मा महामतिः । आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते । महानात्मा मतिर्विष्णुर्जिष्णुः सत्त्वस्य वीर्य्यवान् । बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः । पर्य्यायवाचकैः शब्दैर्म्महानात्मा विभाव्यते । तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति । सर्व्वतः पाणिपादश्च सर्व्वतोऽक्षिशिरोमुखः । सर्व्वतःश्रुतिमान् लोके सर्व्वं व्याप्य स तिष्ठति । महाप्रभावः पुरुषः सर्व्वस्यैव हि निश्चितः । अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः । तत्त्व बुद्धिविदो लोके सद्भावनिरताश्च ये । ध्यानिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः । ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः । प्रसन्नमनसो धीरा निर्ममा निरहङ्कृताः । विशुद्धाः सर्व एवैते महत्तत्त्वमुपयान्त्युत । आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम् । अहङ्कारात् प्रसूतानि महाभूतानि पञ्च वै । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् । तेषु भूतानि युज्यन्ते महाभूतेषु पञ्चसु । ते शब्दस्पर्शरूपेषु रसगन्धक्रियासु च ।

महाभूतविनाशस्तु प्रलये प्रत्युपस्थिते। सर्व्वप्राणभृतां धीरा! महदुत्पद्यते भयम्। स धीरः सर्व्वलोकेषु न मोहमधिगच्छति। विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः। एवं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपम्। हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठति" भा०आश्व०प०अ०४०। स च सर्गः दशविधः प्राकृतः षड्विधः, वैकृतस्त्रिविधः, उभयात्मक एकविधः इति भेदात् तद्विवरणम्" भाग०२स्क०१०अ०। "विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना १२। यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् १३। सर्गोनवविधस्तस्य प्राकृतोवैकृतश्च यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः १४। आद्यस्तु महतः सर्गोगुणवैषम्यमात्मनः। द्वितीयस्त्वहमोयत्र द्रव्यज्ञानक्रियोदयः १५। भूतसर्गस्तृतीयस्तु तन्मात्रोद्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः १६। वैकारिको देवसर्गः पञ्चमोयन्मयं मनः। षष्ठस्तु तमसः सर्गोयस्तु बुद्धिकृतः प्रभोः १७। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु रजोभाजो भगवतोलीलेयं हरिमेधसः १८। सप्तमोमुख्य सर्गस्तु षड्विधस्तस्य चाभवत् यः। वनस्पत्योषधिलतात्वक् सारावीरुधो द्रुमाः१९। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः२०। तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधोमतः। अविदो भूरितमसो प्राणज्ञा हृद्यवेदिनः२१। गौरजोमहिषः कृष्णः शूकरो गवयोरुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्र च सत्तम। खरोऽश्वोऽश्वतरोगौरः शरभश्चमरी तथा एते चैकशफाः स्मृताः। शृणु पञ्चनखान् पश्चून्२२। श्वा शृगालोवृकोव्याघ्रोमार्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः। कङ्कगृध्रबकश्येनभासभल्लकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः२३। अर्व्वाक्स्रोतस्तु नवमः स्मृत्तरैकविधोऽन्नाम्। रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः२४। वैकृताह्यएवैते देवसर्गश्च सत्तम। वैकारिकस्तु यः प्रोक्तःकौमारस्तूभयात्मकः२५। देवसर्गश्चाष्टविधोविबुधाः पितरोऽसुराः। गन्धर्व्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याधाः किन्नरादयः। दृश्यन्ते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः"। "स्वव्यतिरिक्तसृज्याभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति। विष्णुमायया संस्थितं संकृतम्। ब्रह्म तन्मात्रं सत विश्वं ईश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम्। अव्यक्ता मूर्त्तिः स्वरूपं यस्येति स्वतोनिर्व्विशेषता दर्शिता १२। अप्रतिष्ठत्वं दर्शयितुं तत्कार्य्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्ति तथाग्रे पूर्व्वमभ्यासीत्। पश्चादपि तथा भविष्यति १३। एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् तन्निमित्तस्य पूर्व्वसर्गस्य पूर्व्वोक्तानेव भेदान् अनुवदति सर्गइति। यस्तु प्राकृतोवैकृतश्च स तु दशमः तन्निमित्तमेव त्रिविधं प्रलयमाह कालेनैव बलेन नित्यप्रलयः द्रव्येण सङ्कर्षणमुखाग्न्यादिना नैमित्तिकः गुणैः स्वस्वकार्य्यं प्रसङ्गिः प्राकृतिकः १४। तानेव सर्गान् प्रपञ्चयति। आद्य इत्यादिना यावदध्यायसमाप्ति। महतो लक्षणम् आत्मनोहरेः सकाशात् गुणानां वैषम्यमिति। अहमः अहङ्कारस्य। तस्य लक्षणं यत्रेति। द्रव्यादयोवक्ष्यमाणास्त्रयः सर्गाः १५ तन्मात्रो भूतसर्गः। ततःसूक्ष्मसर्ग इत्यर्थः। द्रव्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्म्मेन्द्रियात्मकश्चतुर्थः १६। पञ्चमोवैकारिकः। इन्द्रियाधिष्ठातारोदेवाः मनश्च। षष्ठस्तु तमसः पञ्चपर्व्वाविद्यायाः। अबुद्धिजीवानामावरणम् विक्षेपश्च तां करोतीत्यबुद्धिकृत् तस्य १७। मे मत्तः शृणु अनुद्वेगेन श्रोतव्यतामाह। यद्विषया मेधा संसार हरति तस्य हरेर्लीला। यद्वा, इयमिति तमआदिसर्गरूपा। रजोभाज इति ब्रह्मरूपस्येत्यर्थः। अस्मिन् पक्षेऽबुद्धिकृत इति प्रथमान्तं अनवधानकृत इत्यर्थः १८। सुखमिव प्रथमं कृतःसुख्यः सर्गः। तस्यृषां स्थावराणाम्। षड्विधमेवाह। ये पुष्पं विना फलन्ति ते वनस्पतयः। ओषधयः फलपाकान्ताः। लताः आरोहणापेक्षाः। त्वक्सारा वेणुवादयः। लता एव काठिन्येनारोहणानपेक्षा वीरुधः। ये पुष्पैः फलन्ति ते द्रुमाः १९। तेषां साधारणलक्षणमाह ऊर्द्ध्वंस्रोत आहारसञ्चारो येषाम्। तमःप्राया अव्यक्तचैतन्याः। अन्तःस्पर्शमेव जानन्ति नान्यत् तदभ्यन्तरेव न बहिः। विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः २०। तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति। स चाष्टविंशतिभेदः। तिरश्चां लक्षणम् अविदः श्वस्तनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। प्राणज्ञाः प्राणेनैवेष्टमर्थं जानन्ति हृदि अवेदिनः दीर्घानुसन्धानशून्याः। तथा च श्रुतिः। "अथेतरेषां पशूनाम् अशनापिपासे एवाभिज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकाविति" २१। अष्टविंशतिभेदानाह

गवाद्यश्चषट्पाताः द्विशफाः द्विखुरानव । खराद्यः च-मर्यन्ता एकशफाः षट् । श्वाद्योगोधान्ताःपञ्चनखा द्वा-दश२१। एवमेते भूचराः सप्तविंशतिः । मकराद्योजलचराः कङ्काद्यश्च खगाः अभूचरत्वेनैकीकृत्य गृहीताः । तदेवम-ष्टाविंशतिभेदान् वदन्ति । तेषु कृष्णरुरुगौराः मृग-विशेषाः अन्येषामपि तिर्यक्प्राणिनामेतेष्वेव यथायथ-मन्तर्भावः२३। अथ आहारसञ्चारोयश्च सोऽर्वाक्स्रोताः । दुःखमार्षम् । नृणां सर्गः । नृणां लक्षणम् । रजः अधि-कं येषु२४। एते त्रयोवैकृतास्त्रय एव कौमारवदुभयात्मकाः देव-सर्गोवैकृत इत्यनुषङ्गः । वैकारिकस्तु देवसर्गः प्राकृतेषु पू-र्वमेव प्रोक्तः अयन्तु ततोन्यूनत्वाद्वैकृतः देवसर्गएवान्त-र्भूतः सनत्कुमारादीनान्तु सर्गः प्राकृतोवैकृतश्च देवत्वेन मनु-ष्यत्वेन च सृज्य इत्यर्थः२५ । वैकृतश्च देवसर्गोऽष्टविधः अत्र विबुधादयस्त्रयोभेदाः गन्धर्वाप्सरसएकः यक्षरक्षांस्येकः । भूतप्रेतपिशाचाएकः सिद्धचारणविद्याध्राः एकः किन्नरादयएक आदिशब्दात् किंपुरुषाश्वमुखादयः" श्रीधरव्याख्या ।

एवं सामान्यतः सर्गमुक्त्वा तत्रैव २६अध्याये विशेष उक्तः "भगवानुवाच १० । यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदा-त्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ११ । पञ्चभिः पञ्चभिः ब्रह्म चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंश-तिकं गुणं प्राधानिकं विदुः १२ । महाभूतान्नि पञ्चैव भूरापोऽग्निर्मरुन्नभः । तन्मात्राणि च तावन्ति गन्धा-दीनि मतानि मे । इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननाघ्रा-णिकाः । वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते । १३ । मनोबुद्धिरहङ्कारश्चित्तमित्यात्मकम् । चतुर्धा लक्ष्यते भेदोवृत्त्या लक्षणरूपया १४ । एतावानेव संख्यातो ब्रह्मणः सगुणस्य च । सन्निवेशोमयाप्रोक्तोयः कालः पञ्चविंशकः १५ । प्रभावं पौरुषं प्राहुः कालमेके यतोभयम् । अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः १६ । प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ! । चेष्टा यतः स भगवान् काल इत्युपलक्षितः१७। अन्तः पुरुषरूपेण काल-रूपेण यो बहिः । समन्वेत्येष सत्त्वानां भगवानात्ममायया १८ । दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं सासूत महत्तत्वं हिरण्मयम् १९ । विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसा पिबन्नौघ्रमात्मप्रस्रापनं तमः २० । यत्तत् सत्व-गुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् २१ । स्वच्छत्वमविकारित्वं शान्तत्व-मिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा २२ । महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्यसम्भवात् । क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत २३ । वैकारिक स्तैजसश्च तामसश्च यतोभवः । मनसश्चेन्द्रियाणाञ्च भूतानां महतामपि २४ । सहस्रशिरसं साक्षात् यमनन्तं प्रच-क्षते । सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् २५ । कर्तृत्वं करणत्वञ्च कार्यत्वञ्चेति लक्षणम् । शान्तघोर विमूढत्वमिति वा स्यादहङ्कृतेः २६। वैकारिकाद्विकुर्वाणा-न्मनस्तत्त्वमजायत । यत्संकल्पविकल्पाभ्यां वर्तते कामस-म्भवः २७ । यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् । शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः २८ । तैज-सात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत् सति । द्रव्यस्फुरणवि-ज्ञानमिन्द्रियाणामनुग्रहः २९ । संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० । तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागतः । प्राणस्य हि क्रिया शक्तिर्बुद्धेर्विज्ञानशक्तिता ३१ । तामस-ञ्च विकुर्वाणाद्भगवद्वीर्यनोदितात् । शब्दमात्रमभूत्तस्मा-न्नभः श्रोतन्तु शब्दगम् ३२ । अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रत्वञ्चैव नभसो लक्षणं कवयो विदुः ३३ । भूतानां छिद्रदातृत्वं बहिरन्तरमेव च । प्राणेन्द्रियात्मधिष्ण्यत्वं नभसोवृत्तिलक्षणम् ३४ । न-भसः शब्दतन्मात्रात् कालगत्या विकुर्वतः । स्पर्शोऽभव-त्ततोवायुस्त्वक् स्पर्शस्तु संग्रहः ३५ । मृदुत्वं कठिनत्वञ्च शैत्यमुष्णत्वमेव च । एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३६ । चालनं व्यूहनं प्राप्तिर्नैष्ठुर्यं द्रव्यशब्द-योः । सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् । वायोश्च स्पर्शतन्मात्रादूपं देवैरितादभूत् । समुत्थितं ततस्तेजश्चक्षूरूपोपलम्भनम् । द्रव्याकृतित्वं गुणतो व्यक्तिसं-स्थात्वमेव च । तेजस्त्वं तेजसः साध्वि ! । रूपमात्रस्य वृ-त्तयः ३८ । द्योतनं पचनं पानमदनं हिममर्दनम् । तेजसोवृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च । रूपमात्राद्विकु-र्वाणात्तेजसोदेवनोदितात् । रसमात्रमभूत्तस्मादम्भो-जिह्वा रसग्रहः ४० । कषायोमधुरस्तिक्तः कटुश्च इति नैकधा । भौतिकानां विकारेण रस एकोविभिद्यते ४१ । क्लेदनं पिण्डनं तृप्तिः प्राणनाप्ययनोद(न्द)नम् । तापापनो दोभूयस्त्वमम्भसो वृत्तयस्त्विमाः ४२ । रसमात्राद्विकुर्वा-णादम्भसो देवनोदितात् । गन्धमात्रमभूत्तस्मात् पृथ्वी-प्राणस्तु गन्धगः ४३ । करम्भपूतिसौरभ्यग्राह्योदग्रा-

दिभिः पृथक् । द्रव्यावयववैषम्याद्गन्ध एकोविभिद्यते४४। भावनं ब्रह्मणःस्थानं धारणं सद्विशेषणम् । सर्वसत्व गुणोद्भेदः पृथिवीवृत्तिलक्षणम् ४५ । नभोगुणविशेषोऽर्थो यस्य तत् श्रोत्रमुच्यते । वायोर्गुणविशेषोऽर्थो यस्य तत् स्पर्शनं विदुः । तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते । अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः भूमेर्गुणविशेषोऽर्थो यस्य घ्राणः स उच्यते४६ । परस्य दृश्यते धर्मोऽन्यत्रन्यस्मिन् समन्वयात् । अतो विशेषो भावानां भूमावेवोपलभ्यते ४७ । एतान्यसंहत्य यदा महदादीनि सप्त वै । कालकर्मगुणोपेतो जगदादिरुपाविशत् ४८ । ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मात् उदतिष्ठदसौ विराट । एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः । तोयादिभिः परिवृतं प्रधानेनावृतं बहिः । यत्र लोकवितानोऽयं रूपं भगवतोहरेः ५० । हिरण्मयादण्डकोषाद्वृत्याम्भ सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्बिभेद खम्५१। निरभिद्यताख्य प्रथमं खं वायो ततोऽभवत् । बाह्या वह्निरथो नासे प्राणोतो घ्राण एतयोः ५२ । घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः । तस्मात् सूर्योऽन्वभिद्येतां कर्णौ श्रोत्रं ततोदिशः ५३ । निर्बिभेद विराजस्त्वग्रोमभ्यस्तस्माद्वयस्ततः । ततः ओषधयस्तासन् शिश्नं निर्बिभिदे ततः । रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् । गुदादपानोऽपानाच्च मृत्युर्लोकभयङ्करः ५४ । हस्तौ च निरभिद्येतां बलं ताभ्यां ततः खराट् । पादौ च निरभिद्येतां गतिस्ताभ्यां ततोहरिः ५५ । नाड्योऽस्य निरभिद्यन्त ताभ्योलोहितमाप्लुतम् । नद्यस्ततः समभवन्नुदरं समभिद्यत । क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् । अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ५६ । मनसश्चन्द्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः । अहङ्कारस्ततोरुद्रः चित्तञ्चैत्यस्ततोऽभवत्५७ । एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् । पुनराविशुः खानि तमुत्थापयितुं क्रमात् । वह्निर्वाचा मुखं भेजे नोदतिष्ठत्ततोविराट् । घ्राणेन नासिके वायुर्नोदतिष्ठत्ततो विराट् । अक्षिणी चक्षुराक्रम्यो नोदतिष्ठत्ततो विराट् । हस्तावुन्द्रोबलेनैव नोदतिष्ठत्ततो विराट् । विष्णुर्गत्यैव चरणौ नोदतिष्ठत्ततो विराट् । नाड्यो नद्यो लोहितेन नोदतिष्ठत्ततो विराट् । क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्ततो विराट् । बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्ततो विराट् । श्रोत्रेण कर्णौ च दिग्भ्योनोतिष्ठत्ततो विराट् । रेतसा शिश्नमापस्तु नोदतिष्ठत्ततो विराट् । गुदं मृत्युरपानेन नोदतिष्ठत्ततो विराट् । रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्ततो विराट् । चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत ५९ । यथा प्रसुप्तं हृदयं प्राणेन्द्रिय मनोन्वयाः । प्रभवन्ति विना येन नोत्थाप्रयितुमोजसा । तमस्मिन् प्रत्यगात्मानं धिया योगविदुत्तया । भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्"६०। व्याख्यातमेतत् श्रीधरेण "दैवाज्जीवादृष्टवशात् क्षुभिता धर्म्मा गुणायक्षाः । योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्य्यं चिक्षिपुः । सा प्रकृतिर्म्महत्तत्त्वमसृत । महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलम् १९ । विश्वं अहङ्कारादिप्रपञ्चं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यञ्जन् प्रकटयन् तमोऽपिबत्, कूटस्थः लयविक्षेपशून्यः, आत्मानं प्रख्यापयतीति तथा यत् पूर्व्वं प्रलयसमये महान्तं प्रकृतौ विलापयमासेति २० । प्रसङ्गात् चतुर्व्यूहोपासनमाह यत्तदिति सर्व्वागमप्रसिद्धत्वमाह । स्वच्छं विशदं शान्तं रागादिरहितं भगवतः पदमुपलब्धिस्थानम् । अतएव वासुदेवाख्यं यदाहुः । अयमर्थः अधिभूतरूपेण तस्यैव महानिति, अध्यात्मरूपेण चित्तमिति, उपास्यरूपेण वासुदेव इति, अधिष्ठाता तत्त्वस्य क्षेत्रज्ञः, एवमहङ्कारे सङ्कर्षणः उपास्यः,रुद्रोऽधिष्ठाता, मनसि अनिरुद्ध उपास्य ब्रह्माधिष्ठाता, बुद्धौ प्रद्युम्न उपास्य ब्रह्माधिष्ठातेति ज्ञातव्यम् २१ । स्वच्छत्वं भगवद्विभूतित्वाच्चित्वम् अविकारित्वं लयविक्षेपराहित्यं अपांप्रकृतिः फेनतरङ्गादिरहितावस्थापरा भूतसंसर्गात् प्राक्तनी सा यथा मधुरा स्वच्छा शान्ता च तद्वदित्यर्थः २२ अहङ्कारसोत्पत्तिपूर्व्वकं लक्षणमाह महत्तत्त्वादिति चतुर्भिः । क्रियासु शक्तिर्यस्य स क्रियाशक्तिः २३ । तस्य त्रैविध्यमाह वैकारिक इति । तस्य कार्य्यमाह यतोयस्मान्मन आदीनाम् भवउत्पत्तिरिति २४ । तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमिति २५ । कर्त्तृत्वं देवतारूपेण, करणमिन्द्रियरूपेण, कार्य्यत्वं भूतरूपेण, शान्तत्वादिकं तत्कारणगुणलयरूपेण२६ । मनस उत्पत्तिपूर्व्वकं लक्षणमाह वैकारिकादितिद्वाभ्याम् । संकल्पश्चिन्तनम् विकल्पोविशेषचिन्तनं यस्य मनसः संकल्पविकल्पाभ्यां कामसम्भवोवर्त्तते इति कामरूपा वृत्तिर्लक्षणत्वेनोक्ता न तु प्रद्युम्नोत्पत्तिस्तस्य संकल्पादिकार्य्यत्वाभावात् उपास्यव्यूहस्यानिरुद्धस्योक्तेः २७ । शारदं शरत्कालोनमिन्दीवरं नीलोत्पलं

तदिव श्यामं तच्छनैः संराध्यं वशीकर्त्तुमयोग्यं दुर्ग्रहत्वात् २८। बुद्धेरुत्पत्तिपूर्व्वकं लक्षणमाह तैजसादिति-द्वाभ्याम् हे सति!। द्रव्यस्फुरणरूपं विज्ञानमिति चित्त व्याद्यर्थमुक्तम्। इन्द्रियाणामनुग्रह इति सविकल्पज्ञाने वृषीकाणामधीश्वर इति यदुक्तं तत्तु निर्व्विकल्पक ज्ञाने २९। द्रव्यस्फुरणस्यैव प्रपञ्चः संशयादिः। विपर्य्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापोनिद्रा, "प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" इति पातञ्जलोक्ते ३०। इन्द्रियाणामुत्पत्तिमाह तैजसाहङ्काराज्जातानि वैकारिकत्वशङ्कानिवृत्त्यर्थमेवकारः द्विविधान्यपीन्द्रियाणि तैजसान्येवेत्यर्थः। तत्र हेतुः प्राणस्येति हि यस्मात्प्राणस्य क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् तदीयशक्तिमतामिन्द्रियाणां तैजसत्वम्। तथा बुद्धेस्तैजसत्वात् तदीयज्ञानशक्तिमतामपि ज्ञानेन्द्रियाणां तैजसत्वमपीत्यर्थः ३१। तन्मात्रोत्पत्तिपूर्व्वकमाकाशादिमहाभूतोत्पत्तिलक्षणञ्चाह। तामसादिति पञ्चभिः। श्रोत्रन्तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनन्तरं तत्सम्बन्धमात्रं कथ्यते न तूत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगम् ३२। शब्दस्य लक्षणमाह अर्थाश्रयत्वं अर्थवाचकत्वं, द्रष्टुर्लिङ्गत्वं कुड्यान्तरितस्य द्रष्टुर्ज्ञापकत्वं तदुक्तं "लिङ्गं यद्दृष्टदृश्ययोरिति, न भसः तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः ३३। छिद्रदातृत्वमवकाशदातृत्वं बहिरान्तरव्यवहारास्पदत्वम् आत्मा मनः। प्राणादीनाश्रिष्णुत्वमाश्रयत्वं नाड्यादिच्छिद्ररूपेण वृत्तिः कार्य्यमेतल्लक्षणम्। एवमुत्तरत्रापि एकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणं द्रष्टव्यमनुसन्धेयम्। आकाशात्त्वक्स्पर्शस्य सम्यग्ग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिङ्गत्वात्। यद्वा स्पर्शस्य संग्रहस्तोभवतीति शेषः। शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरान्वयार्थमुक्तम् ३५। स्पर्शत्वं स्वरूपलक्षणमित्यर्थः। नभस्वतो वायोस्तन्मात्रत्वञ्च ३६। चालनं वृक्षशाखादेः। व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गन्धवतोघ्राणं प्रति नेतृत्वं यथा गौरादिमतः स्पर्शनं, शब्दस्य श्रोत्रं प्रति नेतृत्वं सर्व्वेन्द्रियाणामात्मत्वम् उन्मीलकत्वं कर्म्मणा कार्य्येणाभिलक्षणं भावे ल्युट्। कर्म्मैवाभिलक्षणमिति विग्रहे तु करणे ३७। द्रव्याकृतित्वं द्रव्याकारसमर्पकत्वं गुणता द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु स्वातन्त्र्येणैव प्रतीतिः। अप्रत्यक्षद्रव्यस्य स्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः रूपस्य तु नैवमिति तस्यायं विशेषउक्तः। व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था सन्निवेशः सैव संस्था यस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः। तेजस्तेजस्त्वमसाधारणत्वम् ३८। द्योतनं प्रकाशनं पचनं तण्डुलादेः क्षुत्तृट् अशनाया पिपासा च तद्द्वारेण पानमदनञ्च ३९। जिघ्रत्यनेनेन्द्रियं रसोग्रन्थतेऽनेनेति रसग्रन्थस्ततो भवतीत्यर्थः ४०। कषायादिषु लवणोऽपि द्रष्टव्यः। भौतिकानां संसर्गिद्रव्याणां यदेकोमधुरएव सन् अनेकधा भिद्यते स रसस्तत्यर्थः ४१। क्लेदनमार्द्रीकरणं मृदादेः पिण्डीकरणं दृष्टिप्रदातृत्वं प्राणनं जीवनम्"आपोमयः प्राण" इति" श्रुतेः आप्यायनं वृद्धिलक्षण्यनिवर्त्तनं उदनं मृदुकरणम् उन्दनमितिपाठे सएवार्थः। भूयस्त्वं कूपादावुद्भूतस्यापि पुनः पुनरुद्गमः ४२। गन्धगः गन्धं प्राप्नोति ४३। करम्भोभिश्रगन्धः यथा व्यञ्जनादीनां हिङ्ग्वादिसंस्कारेणैव। पूतिर्दुर्गन्धः सौरभ्यं कर्पूरादेः, शान्तः शतपत्रादेः, उद्ग्रोलसुनादेः, संसर्गिणां द्रव्यावयवानां वैषम्यात् यएवंविभिद्यते स गन्धस्तत्यर्थः ४४। ब्रह्मणोभावनं प्रतिमादिरूपेण साकारतापादनं, स्थानं जलादिविलक्षणतया नैरपेक्ष्येण स्थितिः। धारणं जलाद्याधारत्वं सतामाकाशादीनां विशेषगुणवत्त्वेदकत्वं प्राणिनां तत्तद्गुणानाञ्च पुंस्त्वादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणम् ४५। श्रोत्रादीनां शब्दादिग्राहकत्वमुक्तं तेषाञ्च लक्षणमेतदेव इत्याशयेनाह पञ्चभिः श्लोकार्द्धैःनभसोगुणविशेषः शब्दोयस्यार्थोविषयः ४६। गुणविशेषं शब्दव्याद्यर्थं दर्शयति परस्य कारणस्य धर्म्मः शब्दादिः अपरस्मिन् कार्य्ये वाय्वादौ कारणान्वयाद्दृश्यते अतोभावानामाकाशादीनां विशेषगुणः सर्व्वोऽपि शब्दादिः भूम्यादावेवोपलभ्यते चतुर्णां तत्तान्वयात्, जलादिषु यथान्वयमेव न सर्व्वम् आकाशेऽन्यान्वयाभावेन एकएवेति ४७। एवं कारणोत्पत्तिमुक्त्वा कार्य्योत्पत्तिमाह सार्द्धैस्त्रिभिः। एतान्यसंहत्य असम्मिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् सम्प्रेति प्राधान्याभिप्रायेणोक्तं प्रवेशस्तु सर्व्वेष्वपिविवक्षितएव ४८। अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादसौ विराट्पुरुष उदतिष्ठत् ४९। भगवतोरूपमिति पुरुषाभेदाभिप्रायेण ५०। तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिः। उत्थाय औदासीन्यं विहाय, तमाविश्य अधिष्ठाय। महांश्चासौ देवश्चेति खं छिद्रम् ५१। वायुना सह बहिरभवत् प्राविशत्। नासे निरभिद्येतां प्राणोतः प्राणेन जतः सूतः सन् प्राणएतयोर्नासिकयोरभवदित्य-

सुषङ्ग :५२ । प्राणादनन्तरं वायुः । प्राणोतदिति विशेषणं सर्वेन्द्रियेषुपि द्रष्टव्यं व्यभिद्येतामिति अन्वभिद्येतामिति पाठद्वयेऽप्येकएवार्थः । श्रोत्रं दिशः प्राविशन्५३। आदिशब्देन केशाः५४। स्वराट् इन्द्रः। हरिर्विष्णुः५५। आभ्रतं जातम्५६। बुद्ध्यादिषु हृदयमेवाधिष्ठानम् । गिरांपतिर्ब्रह्मा, चैत्यः चेतनः ५७। अन्वयव्यतिरेकाभ्यां चेतनं विवेक्तुं सर्वेषां पुनः प्रवेशमाह एत इति नवभिः ५८। विराड्देहस्य व्यष्टिदेहं दृष्टान्तत्वेन दर्शयन् साङ्गानुकथनस्य प्रयोजनमाह यथेतिद्वाभ्याम् ५९ । प्रथमं परमेश्वरे भक्तिः ततोऽन्यत्र विरक्तिः ततोयोगप्रदत्ता धीः एकाग्र चित्तं ततोयज्ज्ञानं तेन प्रत्यगात्मानं चेतनं स्वस्मिन्नात्मनि कार्य्यकारणसङ्घाते विविच्य चिन्तयेत्" इ०।

वेदान्तिमते अत्र कश्चिद्विशेषः पञ्चदश्यामुक्तः । "चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्धविशुद्धिभ्यां मायाऽविद्या च ते मते । मायाबिम्बोवशीकृत्य तां स्यात् सर्वज्ञईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा । सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् । तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया । वियत्पवनतेजोऽम्बुभूवोभूतानि जज्ञिरे । सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्बोन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा । मनोविमर्षरूपं स्यात् बुद्धिः स्यान्निश्चयात्मिका । रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे । तैः सर्वैः सहितैः प्राणोवृत्तिभेदात् स पञ्चधा । प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः । बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया । शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते । प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते । हिरण्यगर्भताभोक्तृत्वयोर्व्यष्टिसमष्टिता । समष्टिरीशः सर्वेषां स्वात्मताज्ञात्ववेदनात् । तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया । तद्भोगाय पुनर्भोग्यभोगायतनजन्मने । पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् । द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः । स्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते । तैरण्डस्तत्र भुवनभोग्यभोगाश्रयोद्भवः । हिरण्यगर्भस्थूलेऽस्मिन् देहे वैश्वानरोभवेत् । तैजसा विश्वतां यातादेवतिर्यङ्नरादयः । ते परागर्थिनः । प्रत्यक्तत्त्वबोधविवर्जिताः । कुर्वते कर्म्म भोगाय कर्म्म कर्त्तुञ्च भुञ्जते" ।

एतन्मतप्रपञ्चस्तु "तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्म्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सङ्कल्परूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति "तदैक्षत बहु स्यां प्रजायेयेति" श्रुतेः । तत आत्मन आकाशादीनि पञ्च भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते । तत्राकाशस्य शब्दोगुणोवायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अप्यन्तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः । न तु शब्दस्याकाशमात्रगुणत्वं वायुादावपि तदुपलम्भात् । नासौ भ्रमः बाधकाभावात् । इमानि भूतानि त्रिगुणमायाकार्य्याणि अतस्त्रिगुणात्मकानि । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः । एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते । तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः । रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते । तत्र प्राग्गमनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती । अवाग्गमनवानपानः पायुादिस्थानवर्त्ती । विष्वग्गमनवान् व्यानः अखिलशरीरवर्त्ती । ऊर्द्वगमनवानुदानः कण्ठस्थानवर्त्ती । अशितपीताद्यादिसमीकरणः समानः नाभिस्थानवर्त्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् । पञ्चीकरणप्रकारश्चेत्थम् । आकाशादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णांशानां वायुादिषु चतुर्भूतेषु संयोजनम् । एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषाम् आकाशादिषु संयोजनम् । एवं तेजोऽपृथिव्यंशानामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकं अर्द्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् । "वैशेष्यात्तद्वादस्तद्वादः" इति शा०सू०। पूर्व्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं भोगपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । "पञ्चप्राणमनोबुद्धि

दशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरम् । अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम् अस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूस्यन्तरिक्षस्वर्गमहोजनस्तपःसत्यात्मकस्योर्द्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डज स्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्योजातानि पक्षिसर्पगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्राव्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम्, इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा "हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" श्रुतेः । हिरण्यगर्भो नाम मूर्त्तित्रयादन्यः प्रथमोजीवः "स वै शरीरी प्रथमः स वै पुरुषउच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत""हिरण्यगर्भः समवर्त्तताग्रे इत्यादि"श्रुतेः" । वेदा० प० सूक्ष्मादिस्थूलभूतान्तोत्पत्तिमुक्त्वा ब्रह्माण्डोत्पत्तिमाह आत्म पु० "उत्पाद्य स्थूलभूतानि भगवान् भूतभावनः नीरेषु स्वात्मनो बीजं सहसैव समासृजत् । सृष्टं तेन हि तद्वीर्यं नीराणासुपरिस्थितम् । दधिमण्डोपमम् कालात् काठिन्यमगमद् घनम् । कठिना पृथिवी सैयं सृष्टा सा दृश्यतेऽधुना । तस्याः सारसमुद्भूतो गोलकोऽभून्महालयः । कुक्कुटाण्डसमाकारःसप्तलोकस्य संस्थितिः । अनुसंवत्सरं कालं नीरेष्वास्तीत्तमन्ततः । शुष्यत्कालाबुसमोनित्यं वायुनाभ्याहतोभृशम् । स तु संवत्सरे पूर्णे विभिन्नः कुक्कुटाण्डवत् । तदन्तःपुरुषोजज्ञे सप्तलोकशरीरभृत् । इदं सर्वं पुमानेव भूतं भावि स्थितं च यत् । एष भोगस्य मोक्षस्य सर्वदृष्टेश्वरः । अत्रैव वर्धयन्त्येष स्थावराणि चराणि च । वक्ष्यमाणोऽस्य महिमा विज्ञेयः सर्वदा ऋषिः । पादःसर्वाणि भूतानि त्रिपादात्मनि तिष्ठति । महिमात्रयभूतो यो महिमः सोऽधिको यथा । तथैवास्य महिम्नोऽपि पुमानभ्यधिकोमतः । मार्गद्वयस्य कर्त्तायं अयमभ्यधिको यस्मात् सर्वस्माद्भौतिकादजः । तस्मात् विराडिति प्रोक्तो विशेषाद्राजते यतः । अधिष्ठाय पुरः सर्वास्थिरजङ्गमदेहिनाम् । पूरयत्यात्मना यस्मात् अतोयमधिपूरुषः । यस्मादभ्यधिकः सोऽयं ब्रह्माण्डान्तःस्थितः पुमान् । तस्य कार्यमिदं सर्वं गिरिदेहधरादिकम् । अयं यज्ञपुमान् हेतुर्ऋक्सामयजुषामपि । छन्दांस्यपि च सर्वाणि गायत्र्यादीनि जज्ञिरे । अस्मादजादयश्चापि विराजः पुरुषोत्तमात् । इन्द्राग्निश्च विप्राश्च मुखतोऽस्य विनिर्गताः । क्षत्रियाबाहुतस्तद्वत् जर्घ्वो वैश्याश्च जज्ञिरे । भूमिःसृष्टास्तथा पद्भ्यां जाता अस्य महात्मनः । चन्द्रमामनसोजातो नेत्रात् तद्वत् दिवाकरः । प्राणात् प्रभञ्जनोजातो नाभेस्तु गगनं महत् । मस्तकात् स्वर्गलोकोऽयं श्रोत्राज् जाता दृगादिशः । एवमन्येऽपिये सोऽस्मात् जाता लोका महात्मनः । द्रव्याणि वा तथा कालोवसन्ताद्यात्मको महान् । देवता यजमानो वा क्रियावातःपरा न हि । सहस्रमस्तको देवः सहस्रेन्द्रियवानपि । भूतभौतिकजातं स आदत्यात्मा परःस्थितः । बुद्धिसाक्षिणमात्मानमेतस्मात् परतः स्थितम् । स्वप्रकाशमहं वेदसर्वाज्ञानविवर्जितम् । नामरूपात्मकं सर्वं कृत्वाऽस्ते योवदञ्जिव शक्र ! त्वं धाटवदनात् सम्यक् विज्ञास्यते भवान् । दिशोऽपि प्रदिशस्तद्वदध ऊर्द्धं सएव हि । यतस्ततोऽत्र यत्नेन यज्ञान्ते तेन तं द्विजाः । धर्मशब्देन तेनैते स्वर्गं यास्यन्ति तच्छिरः । पुंसोऽस्य मूर्द्धा स्वर्गः स्यात् चन्द्रसूर्यौ च चक्षुषी । प्राणः प्रभञ्जनः प्रोक्तो मध्यदेहोऽन्तरिक्षकम् । स्थलानि विविधान्यस्य मूलाश्रय उदीरितः । भूर्लोकस्तु समस्योऽयं पादावस्य प्रकीर्त्तितः । वह्निमाहवनीयस्तद्वदयं चावसथ्यकः । स गार्हपत्यनामः स्याद्दक्षिणाग्निर्मनोमतम् । उरोवेदिस्तथा दर्भालोमजातसुरःस्थितम् । ओषध्योवनस्पतयः शेषाः केशाः शरीरगाः । किं बहूक्तेन शक्राद्य संक्षेपेणावधारय । यदस्ति यच्च नास्यत्र तत्सर्वं स महेश्वरः" ।

क्राणादादिमते तु आदिसर्गे वायवीयेषु परमाणुषु क्रियमाणजीवादृष्टवशात् क्रियोत्पद्यते सा च क्रिया स्वाश्रयं परमाणुं परमाण्वन्तरेण संयुनक्ति ततो द्व्यणुकादिक्रमेण महान् वायुरुत्पद्यते तेन नोदितेषु तैजसपरमाणुषु क्रियोत्पद्यते तया परमाण्वः परमाण्वन्तरेण संकृष्यमाणाः संयुज्यन्ते इत्येवंक्रमेण महाभूतोत्पत्तिरेवं शरीराणि चेन्द्रियाणि चतुर्दश भुवनान्युत्पद्यन्ते

दृश्यम्। तथा च आदिसर्गे एवैतेषां सर्वेषां सृष्टिः। नैमित्तिकप्रलयोत्तरन्तु न सर्वेषाम् किन्तु येषांमेव सादृश्यप्रलयदशायां नाशस्तेषामेव कतिपयानामिति भेदः। बीजाङ्कुरवत् सृष्टेः प्रवाहरूपेणानादित्वेऽपि एतत्सृष्टेः सादित्वमपि तत्तद्बीजव्यक्तेरङ्कुरव्यक्तेश्च यथा सादित्वमेवमेव वर्त्तमानब्रह्मण आदिसर्गकाले महदादेरुत्पत्तेरादिसर्गत्वमवगन्तव्यम्"यथेदानीमित्यादि" भागवतवचनेन"सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति" मन्त्रलिङ्गेन च प्रवाहरूपेणानादित्वं सूचितं न तु तत्तद्व्यक्तेः। कर्म्मसापेक्षस्यैव ईश्वरस्य सृष्टृत्वोक्तेः पूर्वं कर्म्मणामभावे विचित्रसृष्ट्यसम्भवः। अन्यथा वैषम्यनैर्घृण्ये ईश्वरस्य प्रसज्येयाताम् जीवस्य च कृतहान्यकृताभ्यागमप्रसङ्गश्चेति दिक्।

आदीनव पु०आ+दी–भावे क्त आदीनस्य वानं प्राप्तिः वा०क १दोषे,२क्लेशे,च। कर्मणि क। २दुर्दमे ३परिक्लिष्टे च त्रि०।

आदीपक त्रि० आदीपयति अन्यद्गृहमग्निना आ+दीप–णिच्–ण्वुल्। १परगृहस्य दाहके। "राज्ञोवधं चिकीर्षेद्यस्तस्य चित्तो वधो भवेत्। आदीपकस्य स्तेनस्य वर्ष्मसङ्करिकस्य च" भा०शा०८६अ०। २उद्दीपके च।

आदीपन न० आ+दीप–णिच्–ल्युट्। तण्डुलादिचूर्णमिश्रितजलेन गृहादौ १चित्राकारलेपनभेदे (आलिपना) २उद्दीपने च। [ङ्नादौ। २उद्दीपिते च।

आदीपित त्रि० आ+दीप–णिच्–क्त। दत्तादीपने १गृहा-

आदुरि त्रि० आ+दृ–अन्तर्भूतण्यर्थे कि। दारयितरि "वामं वामं त आदुरे देवोददात्वर्यमा" ऋ० ४,३०,२४। "हे आदुरे! शत्रूणां दारयितः!" भा०।

आदृत त्रि०आ+दृ–कर्त्तरि क्त। १सादरे कृतादरे। कर्म्मणि क्त। यस्यादरः कृतस्तस्मिन् २सम्मानिते ३पूजिते च।

आदृत्य त्रि०आ+दृ–कर्म्मणि क्यप्। आदरणीये १आदर्त्तव्ये। ल्यप्।२सम्मान्येत्यर्थे अव्य०।

आदृष्टि स्त्री प्रा०स०। तिविभागसंकोचितदृष्टौ।

आदेय त्रि०आ+दा–यत्। ग्राह्ये। "पञ्चाग्रयङ्गाग आदेयो राज्ञा पशुहिरण्ययोः" "अनादेयस्य चादानादादेयस्य च वर्ज्जनात्" इति च मनुः।

आदेवक त्रि० आदेव्यति आ+दिव–ण्वुल्। द्यूतकारके

आदेवन न० आ+दिव–भावे ल्युट्। १द्यूतक्रीड़ायाम् करणे ल्युट्। २द्यूतसाधने पाशकादौ। आधारे ल्युट्। द्यूतक्रीड़ाधारे (छक) ३द्यूतफलके।

आदेश पु०आ+दिश–भावे घञ्। १उपदेशे २आज्ञायाम्"अथातआदेशोनेति नेतोति"इ०उ०"उत तमादेशमप्राक्षः" "उत स क आदेशः"। "आदित्येब्रह्मेत्यादेश"इति च छा०उ० "आदेशं देशकालज्ञः शिष्यः शासितुरानतः"रघुः व्याकरणप्रसिद्धे कस्यचित् वर्णादितः२कस्यचिद्वर्णस्योत्वत्तौ च। आदिश्यते कर्म्मणि घञ्। ४आदिष्टे ५कथिते ६उपदिष्टे कस्यचित् स्थाने जाते कस्मिंश्चिद्वर्णे च"धातोः स्थान इवादेशं सुग्रीवं सत्त्ववेदयत्"रघुः "आदेशप्रत्यययोः"पा०"आगमादेशयोर्मध्ये बलीयानागमोविधिः"व्या०कारि०"स्थानिवदादेशोऽनल्विधौ"पा० "लोपोऽभ्यादेशउच्यते" व्या०का०"ज्योतिर्विदुयुक्ते दृष्टभाशुभफले च"नादेशास्तस्य निष्फलाः"बृहत्सं०। [कारके २आज्ञाकारके।

आदेशक त्रि० आदिशति आ+दिश+ण्वुल्। १आदेश-

आदेशन न० आ+दिश-भावे ल्युट्। आदेशे "क्रतोपनयनस्यैव व्रतादेशनमिष्यते" मनुः।

आदेशिन् त्रि० आदिशति आ–दिश–णिनि। १आदेशकारके"कपोलपाटलादेशि बभूव रघुचेष्टितम्"रघुः २दैवज्ञे गणके पु० हेम०। [३कथनीये च।

आदेश्य त्रि०आ+दिश–कर्मणि ण्यत्। १उपदेश्ये २आज्ञाप्ये

आदेष्टृ पु० आ+दिश–तृच्। ऋत्विजं प्रति यमेष्टस्मादनार्थं कर्म क्रियतामित्यादेशकर्त्तरि १यजमाने, २आज्ञाकर्त्तरि त्रि० स्त्रियां ङीप्।

आद्य त्रि० आदौ भवः दिगा०यत्। १आदिभवे। "एतदन्ताश्च गतयो ब्रह्माद्याः समुदाहृताः"। "स्वायम्भुवाद्याः सप्तैते मनवो भूरितेजसः"मनुः। अथौचान्तद्वितीयदिनकर्त्तव्ये २प्रेतश्राद्धभेदे न०"मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम्। प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" या०स्मृ०। तस्य षोड़शश्राद्धानामादिभूतत्वात् आद्यत्वम्। "आद्यमग्निमतः कुर्य्याद्दाहादेकादशेऽहनि। ध्रुवाणि तु प्रकुर्व्वीत प्रमीतानां च सर्व्वदा। द्वादश प्रतिमासानि आद्यं षाण्मासिके तथा। सपिण्डीकरणञ्चैव कृत्वेतत् श्राद्धषोड़श" कल्पो ग०प०। निरग्नेस्तु मरणावध्येवैकादशाहे तत् कर्त्तव्यमिति भेदः। एकादशपदञ्च खजाल्लुक्षाधौचान्तद्वितीयदिनपरम्। ३प्रधाने श्रेष्ठे त्रि० "आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव" रघुः अद+कर्मणि ण्यत्। ४अदनीयद्रव्यमात्रे त्रि० ५धान्ये न० राजनि० तस्यादनीयत्वात् "अन्नमूलं हि जीवनम्" इत्युक्तेश्च जीवनमूलत्वेन प्रधानत्वाद्वा आद्यत्वम्। [स्त्रीकौ च

आद्यकवि पु०कर्म०। आदिकवौ चतुर्मुखे १हिरण्यगर्भे २वा-

आद्यमाषक पु० मष्यतेऽनेन करणे घञ् कर्म्म० । पञ्चगुञ्जापरिमाणे, (माषा) इति ख्याते "माषकः सप्त क्षणला" इत्युक्तेराद्यत्वविशेषणम् तस्य कार्य्यविशेषोपयोगितया गौणत्वान्न मुख्यत्वम् अतएव "दशार्द्धगुञ्जं प्रवदन्ति माषमिति" भास्कराचार्य्येण माषस्य पञ्चगुञ्जात्मकत्वमेवोक्तम् ।

आद्यबीज न० कर्म्म० । मूलकारणे आदिकारणे, १ईश्वरे सांख्यमते २प्रधाने च ।

आद्या स्त्री आदौ भवा दिगा० यत् । १दुर्गायां तन्त्रोक्तायां युगभेदे २सुन्दर्य्यादौ च "सत्ये तु सुन्दरी आद्या, त्रेतायां भुवनेश्वरी, द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता" मुण्डमालातन्त्रोक्तेस्वासां तथात्वम्" । आदिभवायां तिय्यादौ च । "युगाद्या वर्षवृद्धिश्चेति" ति० त० पुरा० ।

आद्याकाली स्त्री नित्यस० संज्ञात्वान्न पुंवत् । "कालसंग्रसनात् कालो सर्वेषामादिरूपिणी । कालत्वादादिभूतत्वात् आद्याकालीति गीयते" निर्वाणतन्त्रोक्तायां परमप्रकृतौ

आद्यादि पु० आदिराद्यो यस्य । पञ्चम्याःस्थाने तसिप्रत्यय निमित्ते का० वा० उक्ते शब्दगणभेदे । स च आदि, मध्य, अन्त, पृष्ठ, पार्श्व, आकृतिगणः तेन "खरतो वर्णतो वेति" सिद्धम् ।

आद्युदात्त त्रि० आदिः उदात्तो यस्य । यस्य आदिरुदात्तः तादृशे प्रत्ययादौ । स च पाणिन्यादिभिर्दर्शितः "प्रत्ययः" इत्यधिकारे "आद्युदात्तः" पा० असति अपवादे सर्वोऽपि प्रत्यय आद्युदात्तः । कर्त्तरि तत्र तेति उदात्तः । "खपादिहिंसानामञ्चनिटि" पा० अदाद्यन्तर्गणखपादेर्हिंसार्थस्येच अनिटि अजादौ तसार्वधातुके परे आदिरुदात्तो वा । खपन्ति इत्यत्र खेत्यस्य वा उदात्तता । "अभ्यस्तानामादिः" पा० पूर्व्वोक्तविषये अभ्यस्तसंज्ञकानामादिरुदात्तः । दधति, इत्यादौ देत्यस्योदात्तता "अनुदात्ते च" पा० अविद्यमानोदात्ते च सर्वधातुके परे अभ्यस्तानामादिरुदात्तः । दधासि अनजादावपि देत्यस्योदात्तता "आदिर्ञमुण्नन्यतरस्याम्" पा० अभ्यस्तानामादिर्ञमुणि परे उदात्तो वा । लोलूयं लोलूयम् पर्च्चे लित्स्वरः । "अचः कर्त्तृयकि" पा० कर्म्मकर्त्तरि यकि परे उपदेशेऽजन्तानामादिरुदात्तो वा । लूयते केदारः स्वयमेव । "सर्वस्य सुपि" पा० सुपि परे सर्वशब्दस्य आदिरुदात्तः सर्व अत्र शेत्यस्योदात्तता । "अनित्यादिनित्यम्" पा० जिदन्तस्य निदन्तस्यादिरुदात्तः । अञोञित्त्वात् तदन्तस्यादिरुदात्तः "पथिमथोः सर्वनामस्थाने" पा० अनयोरादिरुदात्तः निवासार्थे क्षयस्यादिरुदात्तः । "जयः करणम्" पा० करणवाची जयशब्द आद्युदात्तः । "इषादीनाञ्च" पा० एषामादिरुदात्तः ! इष जन ज्वर मह हय गय नय ताय तय चय अम वेद स्वद अंश गुह्य (शमरणौ संज्ञायाम्) (संमतौ भावकर्म्मणोः)। मन्त्र शान्ति काम याम तारा धारा कारा वह कल पाद । "आकृतिगणत्वात् अविहितलक्षणमाद्युदात्तत्वं इषादिषु ज्ञेयम्" सि० कौ० । "संज्ञायामुपमानम्" पा० चञ्चेव चञ्चा । "निष्ठा च द्व्यजनात्" पा० निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तः नत्वाकारान्त । दत्तः । आकारस्तु स्नातः । "शुष्कधृष्टौ" पा० एतावाद्युदात्तौ असंज्ञायाम् "आशितः कर्त्ता" पा० कर्त्तृवाची आशितशब्द आद्युदात्तः "रिक्ते विभाषा" पा० रिक्तस्यादिरुदात्तः असंज्ञायाम् । "जुष्टार्पिते च छन्दसि" पा० एतौ आद्युदात्तौ असंज्ञायाम् "युष्मदस्मदोर्ङसि" पा० अनयोः ङसि परे आदिरुदात्तः । "ङयि च" पा० अनयोर्ङयि परे आदिरुदात्तः । "यतोऽनावः" पा० यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तः नावं विना । गव्यम् काम्या । "ईडवन्दवृहसहुहां ण्यतः" पा० ण्यदन्तानामेषामादिरुदात्तः । "विभाषा वेण्विन्धानयोः" पा० एतयोरादिरुदात्तः । "त्यागरागहासकुहश्वठक्रथानाम्" पा० एषाम् आदिरुदात्तः । फिट्सूत्रे शान्तनवाचार्य्यैरन्येऽपि आद्युदात्ता उक्ता यथा "दक्षिणस्य साधौ" फि० स्वाङ्गार्थकदक्षिणशब्दस्यादिरुदात्तो वा दक्षिणोबाहुः "छन्दसि च" फि० "शुक्लगौरयोरादिः" फि० "अनयोरादिरुदात्तः "अङ्कुशोदकवकवशानां छन्दस्यन्तः" फि० लोके तु आदिरुदात्तः । "अथादिः प्राक् शकटेः" फि० २पादे १सू० । अधिकारोऽयम् शकटिशकब्योरिति यावत् । "ह्रस्वान्तस्त्रीविषयस्य२" । आदिरुदात्तः स्यात् । वलिःतनुः । "नञ्विषयस्यानिसन्तस्य" ३। वनं वयः । इसन्तस्य तु सर्पिः । नपुंसकम् । "तृणधान्यानां च द्व्यषाम्" ४। द्व्यचामित्यर्थः । कुशाः, काशाः, माषाः, तिलाः, बह्वचान्तु गोधूमाः । "नृः संख्यायाः" ५ । पञ्च, चतस्रः । "स्वाङ्गिटामदन्तानाम्" ६ । शिट् सर्व्वनाम, "कसुंभ्यां चुचुकादघि" "ओष्ठाविव मधु" "विश्वो विछायाः" । "प्राणिनां कुपूर्व्वम्" ७। कवर्गात् पूर्व्वं आदिरुदात्तः । काकः, टकः, "शुकेषु मे" । प्राणिनां किम्, "क्षीरसर्पिर्मधूदकम्" । "खय्युवर्णे क्षत्रियाख्या चेत्" ८। खयि परे उवर्णश्चेदात्तं स्यात्,

शादसम्" । कः । "खरारन्वाद्यणवै" । वन् । "गोवानं मेषम्" । "वर्णानान्तणतिनितान्तानाम्" १० । आदिरुदात्तः, एतः हरिणः, शितिः, भृग्निः, हरित् । "हस्वान्तस्य हस्वसन्ट ताच्छील्ये" ११ । कृद्रूपं हस्वान्तस्यादिभूतं हस्वमुदात्तं स्यात् । सुनिः । "अन्नस्यादेर्वनस्य" १२ । आदिरुदात्तः, "तस्य नाक्तः" देवने तु "अक्षैर्मा दीव्य", "अर्ङ् क्षासमद्योतने" १३ । अर्ङो यामस्य, समेऽशके तु अर्ङं पिपृष्ठ्याः । "मीसङ्ध्वर्णानाम्" १४ । आदिरुदात्तः, पीतद्रुः, सरलः । "यामादीनाञ्च" १५ । यामं, सोमः, यामः । "लुबन्तस्योपमेयनामधेयस्य" १६ । चञ्चेव चञ्चा, स्किगन्तस्येति पाठान्तरम् । स्किगिति लुपः प्राचां संज्ञा । "न हस्वपर्वतविशेषव्याघ्रसिंहमहिषाणाम्" १७ । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः, मेरुरिव मेरुः, व्याघ्रः, सिंहः, महिषः । "राजविशेषस्य यमन्वा चेत्" १८ । यमन्वा हस्वः, आङ्क उदाहरणम् । अङ्काः प्रत्युदाहरणम् । "स्त्रीविषयवर्षाच्चुपूर्व्वाणाम्" २० । एषान्त्रयाणामाद्युदात्तः, स्त्रीविषयः, मल्लिका, वर्षः, श्येनी, हरिणी, अक्षुगन्धात् पूर्वोऽस्येषान्ते अक्षुपूर्वाः, तरक्षुः । "शकुनीनाञ्च लघुपूर्वम्" २१ । पूर्वं लघु उदात्तं स्यात्, कुक्कुटः, तित्तिरिः, । "नर्त्तुप्राण्याख्यायाम्" २२ । यथालक्षणं प्राप्तमुदात्तत्वञ्च, वसन्तः, शकलासः । "धान्यानाञ्च हस्वान्तानाम्" २३ । आदिरुदात्तः, कान्तानाम्, श्यामाकाः, धान्तानाम्, राजमाषाः । "जनपदशब्दानामयान्तानाम्" २४ । केकयः, "हयादीनामसंयुक्तलान्तानामन्तः पूर्व्वं वा" २५ । हयिति हलःसंज्ञा । पललम्, शललम्, हयादीनां किम् एकलः असंयुक्तेति किं मल्लः । "दृगन्तानाञ्च द्वयाम्" २६ । आदिरुदात्तः, कृषिः एतानि २पादस्थानि । "मकरवरुडपारेवतवितस्तेक्ष्वार्ज्जिद्राक्षाकलोमाकाश्यायुतश्रा काशीनामादिर्वा" ३,६, । एषामादिर्द्वितीयो वा उदात्तः । मकरः वरुडः । "छन्दसि च" १० । अमकराद्यर्थं आरम्भः । लक्ष्यानुसारादादिर्द्वितीयम् वा उदात्तं ज्ञेयम् । "कदमादीनाञ्च" ११ । आदिर्द्वितीयं वोदात्तः । "सुगन्धितेजनस्य ते वा" १२ । आदिर्द्वितीयं ते शब्दश्चेति पर्य्यायेण वोदात्ताः । "नपः फलान्तानाम्" १३ । आदिर्द्वितीयं वोदात्तम् । राजादनफलम् । "ईषान्तस्य हलादेरादिर्वा" १४ । हलीषा लाङ्गलीषा । उशीरदार्शेरकपालपलाशयर्यवालक्ष्यामाकशरीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्" १६ । "एषामादिरुदात्तः स्यात् । "महिष्यामाढयोर्ज्जावेडकाख्या चेत्" २० । आदिरुदात्तः, "महिषी जाया" आषाढा उपदधाति । एतानि २पादस्थानि । "निपाता आद्युदात्ताः" फि० ४,१२ । स्वाहा "उपसर्गाश्चाभिवर्ज्यम्" फि० ४,१३ । तथा च पाणिनिप्रभृत्तनवाचार्य्यादिभिर्यस्यादेरुदात्तत्वं विहितं ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

आद्यून त्रि० आ+दिव–क्त जट् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आद्यूतः । जिगीषया देवनकर्त्तरि । [मावधिश्लेषपर्यन्ते ।

आद्योपान्त पु० आद्यावधि उपान्तः अन्तपर्य्यन्तः । प्रथ-

आधमन न० आधीयते आ+धा–कमनन् । बन्धकदाने आधौ, । "योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यस्य वाप्युपधिं पश्येत्तत् सर्वं विनिवर्त्तयेत्" स्मृतिः "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्" स्मृतिः एकोऽज्ञनीयः सर्वत्र दानाधमनविक्रये" कात्या० स्मृतिः आधिशब्देऽस्य विवृतिः ।

आधमर्ण्य न० अधमर्णस्य भावः कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे "आवश्यकाधमर्ण्ययोर्णिनिः" पा० ।

आधर्म्मिक त्रि० अधर्मं चरति ठञ् । अधर्मशीले दैववशात् अधर्म्मानुष्ठातरि तु नास्य साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेदः ।

आधर्ष पु० आ+धृष–भावे घञ् । १तिरस्कारे २बलात्पीड़ने च

आधर्षण न० आ+धृष–भावे ल्युट् । १आधर्षे २बलात्पीड़ने ।

आधर्षित त्रि० आ+धृष–क्त अवैयात्ये इट् गुणश्च । १अवमानिते २तिरस्कृते ३बलात्कारेणाभिभूते च "स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" या० स्मृतिःधार्ष्ण्यं तु आधृष्ट इत्येव ।

आधर्ष्य त्रि० आ+धृष–णिच्–यत् । १अवमाननीये २बलात् पीड़नीये ३दुर्बले च भावे यत् । ४ दुर्बलत्वे न० । "आधर्ष्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः" नार० । "आधर्ष्यं दुर्बलत्वम्" व्य० त० रघु० ।

आधान न० आ+धा–भावे ल्युट् । संस्कारपूर्व्वकं वह्न्यादेः स्थापने १अग्न्याधाने २गर्भाधाने च । "आधाने सोमपाने च वपनं सप्तसु स्मृतम्" प्रा० त० पु० "भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि । पुनर्दारक्रियां कुर्य्यात्

पुनराधानमेव च" मनुः । विद्यमानपदार्थेषु गुणान्तरस्य ३करणे "प्रजानां विनयाधानात् रक्षणाद्भरणादपि" रघुः ततो गुणान्तराधानं प्रतियत्नः" सि०कौ० । ४निवेशने "गुणोविशेषाधानहेतुः सिद्धो वस्तुधर्म." सा०द० । ५बन्धक-दाने च "आधानं विक्रयञ्चैव दानं नैव समाचरेत्" स्मृतिः "विक्रयावक्रयाधानयाचितेषु पणा दश" या०स्मृतिः अग्न्याधानञ्च विवाहसमये कर्त्तव्यं यदि तत्राहिताग्नेः प्रमदादिना नाश' तदा पित्तमरणोत्तरमेव कर्त्तव्यं सति तु पितरि नैव कर्त्तव्यमिति, तत्र कालनक्षत्रादिविशेषाश्च निर्णयसिन्धौ दर्शिता यथा "प्राजापत्ये पूषभे सद्विदैवे पुष्यज्येष्ठाश्वेन्द्रवे कृत्तिकासु । अग्न्याधानं ह्युत्तराणां त्रयेऽपि चित्रादित्ये कीर्तितं गर्गसख्यैः" रत्नमा० आश्वलायनः "अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फाल्गुनीषु विशाखयोरुत्तरयोः प्रौष्ठपदयोरेतेषां कस्मिंश्चिन्नक्षत्रे पर्वणि ब्राह्मण आदधीत, श्रीश्चवर्षांश्चरत्नु क्षत्रियवैश्योपलक्षणः" यस्मिन् कस्मिंश्चिन्नक्षत्रावादधीत सोमेन यक्ष्यमाणो नर्त्तुं पृच्छेन्न नक्षत्रम्" सोमाधाने ऋत्वा-दानालोचनमात्रपरम्' अथो खलु यदैवैनं अग्नीषोमेदधाद-धीत सैवास्यर्धिरिति सोमेन यक्ष्यमाणोमर्तुं पृच्छेन्न नक्षत्रं तदेतदार्त्तस्यातिवेलं वा अग्न्याधुक्तस्य भवतीति" बौधायनोक्तेः मदनरत्ने वृद्धगार्ग्यः "पुष्याग्नेयत्रयुत्तरादित्यपौष्णज्येष्ठा-चित्रार्कद्विदैवेषु भेषु । कुर्युर्वक्ष्याधानमाद्यं वसन्तग्रीष्मौशान्नेष्वेव विप्रादिवर्णाः" कालादर्शे "अग्निहोत्रं दर्शपूर्णमा-सावप्युत्तरायणे। उपक्रम्य यथाकालमुपासीरन् द्विजातयः। सोमं च पशुबन्धञ्च सर्वांश्च विहृतीरपि । सोम्यायने यथा-कालं विदध्युर्गृह्यमेधिनः" पारस्करः "आवसथ्याधानं दार-काले दायाद्यकाल एकेषामिति" दायाद्यकालोविभागकालः मदनरत्ने व्यासः "अग्निर्वैवाहिको येन न गृहीतः प्रमादिना। पितर्यूपरते तेन गृहीतव्यः प्रयत्नतः । योऽगृहीत्वा विवा-हाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं दृषया-पाको हि स स्मृतः" । ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य पुत्रस्य वाऽग्न्यभावेऽपि न दोषः तदाह तत्रैव गार्ग्यः "पित्रपाकोजीवी वा भ्रात्रपाकोपजीविकः । ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना"। इदञ्चाधानं ज्येष्ठेऽकृताधाने न कार्य्यम् "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पू-र्वजः" इति मनुशातातपोक्तेः आर्त्तेऽप्येवम् "सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम् । आवसथ्यं तथाधानं पतितस्तु तथ भवेदिति" तत्रैव गार्ग्योक्तेः आज्ञायां त्वदोषमाह शुमन्तुः "ज्येष्ठोभ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् । अनुज्ञातस्तु कुर्वीत गुरुस्य वचनं यथा" वृद्धवसिष्ठः "अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम् । अग्रजो-ऽनुमते कुर्यादग्निहोत्रं यथाविधि" । हारीतः "सोद-राणां तु सर्वेषां परिवेत्ता कथं भवेत् । दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया"। अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः विवाहस्यनुज्ञयापि नेत्यर्थः सोदरोक्तेरसोदराणां सापत्नदत्तकादीनां न दोषः । दत्तक-स्यापि सोदरविवाहाभावेऽदोष एव तदाह हेमाद्रौ वसिष्ठः "पित्रव्य पुत्रान् सापत्नान् परनारीसुतांस्तथा दाराग्निहोत्र संयोगे परिविन्दन्न दुष्यति । परनारीसुताः दत्तकादयः । दे-शान्तरे विशेषमाह सएव "अष्टौ दश द्वादश वर्षाणि वा ज्येष्ठ-भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति" क्लीबा-दावप्यदोषमाह कात्यायनः "देशान्तरस्थक्लीबैकक्षयरुग्णान सहोदरान्। वेश्यानिष्ठांश्च पतितम्लेच्छव्रात्यतिरोगिणः। जडमूकान्धबधिरकुब्जवामनखञ्जकान् । अतिवृद्धानभार्यांश्च क्षयिसन्नाद्यपस्यच । धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा। कुटिलोन्मत्तचौरांश्च परिविन्दन्न दुष्यति" अपरार्केऽपि "उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीबएव वा । राजय-क्ष्मामयावी च न न्याय्यः स्यात् प्रतीच्छितुम्" एवं ज्येष्ठे च्छिन्नहस्तादावपि न परिवेत्तृत्वम् तदाह त्रिकाण्ड-मण्डनः "दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम् अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थिते । न कुर्याज्जनके ज्येष्ठे सोदरेऽचाप्यकुर्वति । क्षेत्रजादावनीजाने विद्य-मानेऽपि सोदरे । नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे । षण्ढवन्ध्यमूकबधिरपतितोन्माददूषणे । संन्यस्ते-च्छिन्नहस्तादौ यद्वा मण्डादिदूषणे । जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियामिति" "आरोहतं दशतं शकरीर्मे-मैत्याधान मन्त्रवर्णाश्च शकरीरङ्गुलीः तन्त्ररत्ने ऽप्युक्तम् "अङ्ग-वैकल्यात्पूर्वमाहिताग्नित्वेऽधिक्रियेतैव नित्येषु। आधानन्तु न कुर्यात्तस्य नैमित्तिकत्वादिति"। एवं चतुरङ्गुलेऽपि, षड्ङ्गुल काणविवर्णादेरल्पेवाधिकारः एकादशस्य दशान्तर्गतेः श-रीरकार्श्यं वा विप्रतिषिद्धमिति" हिरण्यकेशिसूत्रे कर्मा-भक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात् अतएव द्राह्यायणसूत्रे याज्यस्य प्रथमैस्त्रिभिर्गुरुभिरिति न्यूनाङ्गस्याप्यधिकार उक्तः । अपरार्के उशनाः "पिता पितामहोयस्य अग्रजो वाथ कस्य-चित्। तयोग्निहोत्रमन्त्रेषु न दोषः परिवेदने" पित्रराज्ञाया-

मथदोषमाह मदनरत्ने शुमन्तुः "पिता यस्य तु नाधानं कथं पुत्रस्तु कारयेत्। अग्निहोत्रेऽधिकारोऽस्ति शङ्खस्य वचनं यथेति" नाधानं कृतमित्यर्थः एतदाज्ञायामेवेति हेमाद्रिः यत्तु "पितुः सत्यप्यनुज्ञाने नादधीत कदाचनेति" तत्सत्यधिकारे ज्ञेयम्"। एवं स्मृतिसूत्रयोराधारानङ्गीकरणे प्रत्यवायश्रवणादाधानं नित्यमेव। एतेन कलिवर्ज्येषु आदित्यपुराणेऽग्निहोत्रस्योत्कीर्त्तनदर्शनेन गौड़ानां तदनाचरणमनाचार एव स्मृतितः पुराणस्य दुर्बलतया स्मृतिविहिताधानस्य बाधकत्वायोगात् "नैवानाहिताग्निर्भिवेतेति" श्रुतेः सर्व्वापेक्षया बलवत्त्वाच्च। तेन स्मृत्युक्तात् पूर्व्वमग्याधानं कर्त्तव्यमिति प्रतीयते व्यक्तं भविष्यति चैतदुपरिष्टात्। आधानस्वरूपादिकम् आश्व०श्रौ०सू० नारायणीयवृत्त्योर्दर्शितं यथा "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" सू० १२। अग्न्याधेयप्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्म्माणि, आधानं कृत्वैव कर्त्तव्यानीत्यर्थः। तत्र हेतुमाह, वैतानिकानीति। वितानेषु भवानि वैतानिकानि, वितानसाध्यानीत्यर्थः। वितानशब्दोऽस्मिन् सूत्रे भावसाधनोऽग्नेश्च विस्तारवाची, पूर्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्मवचनः। एतदुक्तं भवति, गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्म्माणि, अग्नयस्त्वाधानसाध्याः, तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्म्मणाम्। बहुवचनं सर्वश्रौतपरिग्रहार्थं सर्व्वाणि श्रौतान्याधानादूर्द्ध्वमेव कर्त्तव्यानि न किञ्चिदपि, श्रौतमाधानादर्वागित्यनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्नर्थत्वमर्थात् साधितं भवति। तद्यदि कर्मार्थं स्यात् प्रति कर्म क्रियेत, तत्र कस्यचित् परस्तादपि स्यात्, यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः ज्ञानवत्त्वादयो न भवन्ति, अवकीर्णिना पश्चाद्यर्थञ्चाधानं न कर्त्तव्यं, साधितं भवति न परस्तात्" वृत्तिः "अग्न्याधेयम्" १,३,६, सू० प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्याद्यग्नुत्पत्त्यर्थं यदङ्गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं, तत्कर्त्तव्यमित्यर्थः इदवृत्तिः। कस्मिन् काल इत्याह। "कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" १०सू०। एतेषां कस्मिंश्चित्११। वसन्ते पर्वणि ब्राह्मण आदधीत"१२। ग्रीष्मवर्षाशरत्सु च त्रियवैश्योपक्रुष्टाः १३। यस्मिन् कस्मिंश्चिदतावादधीत" १४। स्मृत्यादि एषां नारायणीया वृत्तिः "फल्गुनीष्विति पूर्वे उत्तरे च मन्यन्ते, अविशेषाद्बहुवचनाच्च। प्रोष्ठपदास्तूत्तरे एव। अतः सप्त एतानि नक्षत्राणि, तेषामेकस्मिन्नक्षत्रेऽग्नाधेयं कर्त्तव्यमित्यर्थः १०। एतेषां कस्मिंश्चित् पर्वणि। एवमेतत्सूत्रमर्थतो द्रष्टव्यम्। उत्तरञ्च सूत्रं "वसन्ते पर्वणि ब्राह्मण आदधीत" इति। एवं कृते सर्वमनुगुणं भवति एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि वाग्न्याधेयं कर्त्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्वसूत्रन्तु केवलं नक्षत्राणामेवाधानसम्बन्धं विदधाति। अतो द्वौ पक्षौ स्तः। समुच्चयस्तत्र प्रथमः कल्पः। तदसम्भवे केवलं नक्षत्रमेवेति विनिवेशो युक्तः। इदं कल्पद्वयं सोमाधानवर्जितेषु सर्व्वेष्वाधानेषु भवति११। इदमपि सूत्रमर्थत एवं भवति। अनेन वसन्ते ब्राह्मणगुणकमाधानं विधीयते१२। वैश्यस्तत्कर्मोपजीवी उपक्रुष्ट इत्युच्यते। अस्मिन् सूत्रे त्रीण्याधानानि विधीयन्ते। ग्रीष्मे क्षत्रियगुणकं, वर्षासु वैश्यगुणकं, शरदि उपक्रुष्टगुणकञ्च। एते वसन्तादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसन्तग्रीष्मवर्षा शरद्धेमन्तशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवः। वसन्तादयो मासाश्चैत्रादय एव१३। आदधीतेति स्थिते पुनरादधीतेतिवचनं आपत्कल्पोऽयमाधानविधिरिति दर्शयति। अत्यापदि सुमूर्षोः सर्व्वेष्वृतुषु आधानं कर्त्तव्यं "नैवानाहिताग्निर्भिवेतेति"। इदञ्चापरमाधानं, पूर्वोक्तानि चत्वारि, तेषु सर्वेषु पर्व्वनक्षत्रविधय उपसंहर्त्तव्याः, न पर्व्वर्तुखातन्त्र्येणाधानस्य कालविधयो भवेयुः। अत एव सूत्रकारः पर्व्वनक्षत्रविधीनाम्नर्तुविधिभिः सम्बन्धानामेवाधानकालताप्रदर्शनार्थमेवैतेषां कस्मिंश्चिदसन्त इति पर्वनक्षत्रसमुच्चयविधिपरे सूत्रे उत्तरसूत्राय पठितव्यम् ऋतुशब्दं व्यतिष्यज्य पठितवान्। पर्व्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति, तत्रैव तयोरन्तर्भावदर्शनादिति१४। "अश्वत्थाच्छमीगर्भादरणी आहरेदनवेक्षमाणः१६। यो अश्वत्थः शमीगर्भ आरुरोहत्विषा। तं त्वाहरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति, पूर्वार्द्धमन्त्रमग्न्याधेयम्१७। यस्मा गर्भः शमीगर्भः। शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। तद्धानार्थम्, आहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानो-

ऽयनेन मन्त्रेणाहरेत् । अनवेक्षमाणः पृष्ठतोऽनवेक्षमाणः । अयञ्चापरोऽर्थः कुर्यां न कुर्यामिति नान्यदपेक्षमाणः, अध्यवसिताधान इत्यर्थः १६। पूर्णाऽऽहुतिरन्ते यस्य तत् पूर्णाऽऽहुत्यन्तम्, अग्न्याधेयं कर्तव्यम् । तच्चाग्न्याधेयमरणाहरणादि पूर्णाऽऽहुत्यन्तं भवतीत्यर्थः । अस्य सूत्रस्य प्रयोजनं पूर्णाऽऽहुत्यन्ते आहिताग्नित्वप्राप्तिः । कथमिति चेत् । श्रुतावेवमाम्नातम् । "अग्नयः पुरुषार्थसाध्याः" इति प्रस्तुत्य "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्येवमादीनि वसन्तादिकालानि ब्राह्मणादिकर्तृकाणि कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधानानि विधाय, "ततोऽरणी आहरेत्, सम्भारान् सम्भरेत्, अग्न्यायतनानि कुर्यात्, केशश्मश्रु वपेत्, ब्राह्मौदनिकमौपासनिकं निदध्यात्, तस्मिन् ब्राह्मौदनं पचेत्, समिध आदध्यात्, आयतनेषु सम्भाराग्निदध्यात्, ब्राह्मौदनिकमरण्योः समारोप्य मथित्वा गार्हपत्यादीनादध्यात्, तत्र काश्चित्, समिध आदध्यात्, अग्निहोत्रं जुहुयात्, पूर्णाऽऽहुतिं जुहुयात्, तत आग्नेयमष्टाकपालं निर्वपेत् तदहरेव, तदहरादिसंवत्सरान्तानां कालानां कस्मिंश्चित् काले पवमानहवींषि निर्वपेद् ततस्वान्यानि हवींषि" इति १७ । एवञ्च विवाहवादग्रस्तके बौधायनवचने अन्यतराभावे कार्य्या प्रागग्न्याधेयेति पाठं दृष्ट्वाऽन्यथा मया व्याख्यातम् प्रागग्न्याधेयादिति पाठे तु अग्न्याधेयात् अग्न्याधानात् प्रागित्यर्थः इति बोध्यम् अयमेव पाठः समीचीनः प्रतिभाति एतच्च उद्वाहशब्दे विस्तरेण प्रपञ्चयिष्यामः । आधानप्रयोगश्च शाखिभेदेन पद्धतिविशेषे विस्तरतोज्ञेयः । सोमाधाने विशेषश्च विस्तरभयान्नोक्तः आश्व०श्रौतसूत्रादौ ज्ञेयः । कात्या०श्रौ०सूत्रे आधाने रथकारस्याधिकारमाह "रथकारस्याधाने" कात्या० १,१,६ । आधानपूर्व्वकत्वादन्यत्रापि तस्याधिकारः यथोक्तं मिता० "क्षत्रियेण वैश्यायामुत्पादितोमाहिष्यः वैश्येन शूद्रायामुत्पादिता करणी तस्यां माहिष्येणोत्पादितो रथकारोनाम जात्या भवति तस्य चोपनयनादि सर्वं कार्य्यं वचनात् यथा हि शङ्खः । "क्षत्रियवैश्यानुलोमानन्तरितोत्पन्नजोरथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धाः" एवमेव कर्कदत्तो स्थितम् ।[क्त्वेत्यर्थे भावे घञ्] २आधाने पु०

आधाय अव्य० आ+धा-ल्यप् । १स्थापयित्वात्यर्थे २आधानं

आधायक त्रि० आ+धा-ण्वुल् । आधानकारके ।

आधानिक पु० आधानं गर्भाधानं प्रयोजनमस्य ठञ् । गर्भाधाननिमित्ते वेदविहिते गर्भपात्रसंस्कारभेदे ।

आधार पु० आ+धृ-आधारे घञ् । १अधिकरणे, आश्रये, "अपामिवाधारमनुत्तरङ्गम्" कुमा० "चराचराणां भूतानां कुक्षिराधारतां गतः" कुमा० "वस्त्राधारस्नेहयोगाद्यथा दीपस्य संस्थितिः" या०स्मृतिः । २व्याकरणप्रसिद्धे औपश्लेषिकवैषयिकाभिव्यापकाख्येऽधिकरणकारके, यज्ञसम्पादनार्थं जलरोधनार्थे ३बन्धने दृत्यसेकार्थं जलधारणार्थे ४आलबाले च । "आधारबन्धप्रसृखैरिति रघुः" । "आधारोऽधिकरणम्" पा०अधिकरणञ्च साक्षात्परम्परया वा क्रियाश्रयः अधिकरणशब्दे विवृतिः तच्च त्रिविधम् औपश्लेषिकवैषयिकाभिव्यापकभेदात् । तत्र औपश्लेषिक एकदेशसम्बन्धः यथा कट आस्ते । वैषयिकः मोक्षे इच्छास्ति । अभिव्यापकः तिलेषु तैलमस्ति । मुग्धबोधकारस्तु "सामीप्यात्संविषयैर्व्याप्त्याधारश्चतुर्विध इति सामीप्यसम्बन्धेनाप्याधारतेत्याह । तच्चिन्त्यम् "गङ्गायां घोषोवसतीत्यादाविव लक्षणयैव गङ्गासमीपतीरस्योपस्थितौ न तस्य विभक्त्यर्थत्वमिति" पाणिनीयाः । ५तन्त्रोक्ते षट्चक्रमध्ये आद्यचक्रस्याधारे "आधारे लिङ्गनाभौ तदनु च हृदये तालुमूले ललाटे" आनन्दलहरी । आधारस्य भावः तत्व आधारता सम्बन्धविशेषेण पदार्थविशेषस्याधेयतासम्बादके धर्म्मविशेषे तथा च आधारता आधेतायाः निरूपिका आधेयता च आधारतायाः इति तयोः परस्परं निरूप्यनिरूपकभावः आधारतायाः अनतिरिक्तवृत्तिर्धर्म्म आधारतावच्छेदकः । एवमाधेयतायाः अनतिरिक्तवृत्तिधर्म्म आधेयतावच्छेदकः यथा संयोगेन घटाधारे भूतले भूतलत्वमाधारतावच्छेदकं भूतलाधेये घटे च घटत्वमाधेयतावच्छेदकम् तयोश्चावच्छेदकत्वात् ताभ्यामाधारताऽऽधेयता चावच्छिद्यते यथा घटत्वावच्छिन्ना घटनिष्ठाऽऽधेयता तथा भूतलत्वावच्छिन्ना भूतलनिष्ठाऽऽधारता इति नव्यनैयायिकानां रीतिः आधार+त्व । तदर्थे न० ।

आधारशक्ति स्त्री आधारस्य शक्तिः । सर्व्वाधारशक्तिरूपायां परमेश्वरशक्तौ १मायायां २प्रकृतौ च तन्त्रोक्तायां मूलाधारस्थायां कुण्डलिन्यां ३परदेवतायाम् । ४पीठपूजनीयदेव भेदे च "आधारशक्तिं प्रकृतिमित्यादि" प्रक्रम्य "प्रणवादिनमोऽन्तेन पीठशक्तीः प्रपूजयेत्" तन्त्रसा० पीठशक्तिशब्देऽस्य विवृतिः ।

आधाराधेयभाव पु० आधारश्चाधेयश्च तयोर्भावः । एकस्य यदपेक्षया आधारत्वम् अपरस्य तदपेक्षयैव यत्र

आधेयत्वं तादृशे सम्बन्धभेदे । यथा घटभूतलयोः ।

आधि पु० । अधीयतेऽभिनिवेश्यते प्रतीकाराय मनोऽनेन आ+धा–कि । मानसदुःखकारके व्यथाभेदे "नाधयोव्याधयः क्लेशादैवभूतात्महेतवः" भा०प्र० । "यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शकु० । आधिर्दैविकयद्देश्य विदृतिः । ईषत् अधिक्रियते उत्तमर्णोऽत्र आ+ईषदर्थे धा–अधिकारार्थे आधारे कि आधीयते ऋणशोधनार्थम् आ+धा–कर्मणि किंवा १ऋणशोधनार्थं प्रतिभूस्थानीयतया बन्धकत्वेन उत्तमर्णं समीपे अधमर्णेनाधीयमाने उत्तमर्णस्य ईषत्स्वत्वहेतुभूतव्यापारविशिष्टे २द्रव्येऽस्य विदृतिः मिता० । "धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च । यथाह नारदः । "विश्वम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति"। तत्र प्रतिभूर्निरूपित इदानीमाधिर्निरूप्यते । आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णायक्रियायै आधीयत इत्याधिः स च द्विधैव कृतकालोऽकृतकालश्च पुनश्चैकैकोद्विविधः गोप्योभोग्यश्च । यथाह नारदः।"अधिक्रियतइत्याधिः स विज्ञेयोद्विलक्षणः । कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा । स पुनर्द्विविधः प्रोक्तोगोप्योभोग्यस्तथैव चेति" । कृतकाल आधानकालएवासुष्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्योमोचयितव्यः इत्यर्थः । देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतोनियतः स्थापितइत्यर्थः । यावद्देयम् उद्यतोयावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः गोप्योरक्षणीयः । एवञ्चतुर्विधस्याधेर्विशेषमाह । "आधिः प्रणश्येत् द्विगुणे धने यदि न मुच्यते । काले कालकृतोनश्येत् फलभोग्यो न नश्यति" या० । प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः स्वं भवति । कालकृतः कृतकालः आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात्परतोवा । फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाशउक्तः "काले कालकृतोनश्येदिति । अकृतकालस्य भोग्यस्य नाशाभावउक्तः "फलभोग्यो न नश्यतीति" पारिशेष्यादाधिःप्रणश्येतदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते । द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यम् बृहस्पतिवचनात् "स्थिरस्थे द्विगुणीभूते पूर्णे काले कृतावधौ । बन्धकस्य धनी स्वामी दिवसान्दश प्रतीक्ष्य च । तदन्तरा धनन्दत्त्वा ऋणी बन्धमवाप्नुयादिति" । नन्वाधिःप्रणश्येदित्यनुपपन्नम् अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् मनुवचनविरोधाच्च "नचाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः" इति । कालेन संरोधः कालसंरोधस्थिरकालमवस्थानं तस्मात्कालसंरोधान्निरकालावस्थानादाधेर्न निसर्गोस्ति नान्यत्राधीकरणमस्ति न च विक्रयः एवमाधीकरण विक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति, उच्यते आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः । आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः । तत्र *धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति । न च मनुवचनविरोधः यतः"नत्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति" भोग्याधिं प्रस्तुत्येदमुच्यते "नचाधेः कालसंरोधान्निसर्गोस्ति न विक्रय" इति भोग्यस्याधेश्चिरन्तनकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वञ्चास्तीति । बृहस्पतिरुक्त "फलभोग्योन नश्यतीति"। गोप्याधौ तु पृथगारब्धत्वान्मनुना । "न भोक्तव्यो बलादाधिर्भुञ्जानोवृद्धिमुत्सृजेदिति" । बृहस्पतिरपि वक्ष्यते "गोप्याधिभोगे नोवृद्धिरिति" आधिःप्रणश्येद्द्विगुण इति तु गोप्याधिं प्रत्युच्यत इति सर्वमविरुद्धम् । किञ्च "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथहापिते । नष्टोदेयो विनष्टश्च दैवराजकृताहते"या० । गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति । अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्दृताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराङ्गमत्वं गमिते नो वृद्धिरिति सम्बन्धः नष्टोविकृतिङ्गतस्ताम्रकटाहादिष्किद्रभेदादिना पूर्ववत् कृत्वा देयः तत्र गोप्याधिर्नष्टश्चेत् पूर्ववत् कृत्वा देयः । उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या भोग्यादिर्यदि नष्टः तदा पूर्ववत् कृत्वा देयः । वृद्धिसङ्गावे वृद्धिर्वा हातव्या विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयोमूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाशः "विनष्टे मूलनाशः स्याद्दैवराजकृताहते" इति नारदवचनात् । दैवराजकृताहते दैवमनुद्दकदेशोपप्लवादि ।

दैवकृताद्विनाशादिना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सदृद्धिकं मूल्यं दातव्यमधर्मेणाध्यन्तरं वा यथाह । "स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते । आधिरन्योऽथ कर्त्तव्योदेयं वा धनिने धनमिति" । तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् । अपि च "आधेः स्वीकरणात्पूर्वोरक्ष्यमाणोऽप्यसारताम् । यातश्चेदन्य आधेयोधनभाग्वा धनी भवेत्" या० । आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपादानादाधिग्रहणसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्देशमात्रेण । यथाह नारदः । "आधिस्तु द्विविधः प्रोक्तोजङ्गमःस्थावरस्तथा । सिद्धिरत्रोभयत्रापि भोगोयद्यस्ति नान्यथेति" । अस्य च फलम् । "आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति" । या स्वीकारान्ता क्रिया सा पूर्वा-बलवती स्वीकाररहिता तु पूर्वापि न बलवतीति । सचाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारताम्बिभृत एव सदृद्धिकमूल्यद्रव्यापर्याप्तताङ्गतस्तदाधिरन्यः कर्त्तव्यः । "धनिने वा धनन्देयं रक्ष्यमाणोऽप्यसारतामिति" वदताऽऽधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम् । आधिःप्रणश्येद्द्विगुण इत्यस्यापवादमाह । "चरित्रबन्धककृतं सदृद्धादापयेद्धनम् । सत्याङ्कारकृतन्द्रव्यं द्विगुणम्प्रतिदापयेत्" या० चरित्रं शोभनाचरितम् चरित्रेण बन्धकम् चरित्रबन्धकम् तेन यत् द्रव्यमात्मसात्कृतम्तस्याधीनं वा कृतम् । एतदुक्तम्भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम् । यदि वाऽधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं गृहीतद्द्विगा सह दापयेत् । अयमाशयः एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणन्दातव्यमिति । तथा सत्यङ्कारकृतं करणङ्कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः "कारे सत्यागदस्तेति" पा० सुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः यदा बन्धकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम् नाधिनाश इति तदा तद्द्विगुणन्दापयेत् इति । अन्योऽर्थः । चरित्रमेव बन्धकञ्चरित्रबन्धकम् । चरित्रशब्देन शङ्खस्नानाग्निहोत्रादिजनितमपूर्वमुच्यते यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतम् । तत्र तदेव द्विगुणभूतन्दातव्यञ्चाधिनाश इति । "आधिप्रसङ्गादन्यदुच्यते । सत्यंकारकृतमिति क्रयविक्रयाद्व्यवस्थानिर्वाहाय यद्यङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणन्दातव्यं तत्रापि येनाङ्गुलीयकाद्यर्पितं. सएव चेद्व्यवस्थातिवर्त्ती तेन तदेव दातव्यम् । इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गुलीयकादिद्विगुणमतिदापयेदिति । किञ्च "उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् । प्रयोजकोऽसति धनं कुलेऽन्यस्याधिमाप्नुयात्" या० । धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्योधनिना दृद्धिलोभेन न स्थापयितव्यः । अन्यथा अमोक्षणे स्तेन चौरवद्दण्ड्यो भवेत् । असन्निहिते पुनःप्रयोक्तरि कुले तदाग्रहस्ते सदृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्ताप्यसन्निहितस्तदाग्राह्य धनस्य ग्रहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साऽधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षिते आह । "तत्कालकृतमूल्योवा तत्र तिष्ठेद्दृद्धिकः" या० । तस्मिन् काले यत्तस्याधेर्मूल्यन्तत्परिकल्प्य तत्रैव धनिनि तमाधिं दृद्धिरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यमृणिने । प्रवेशयति यदा तु द्विगुणीभूतेऽपि धने द्विगुणमेव ग्रहीतव्यम् नत्वाधिनाश इति विचारितमृणग्रहणकालएव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाऽधमर्णे धनिना किं कर्त्तव्यमित्यतआह । "विना धारणकाद्वापि विक्रीणीत ससाक्षिकम्" या० । धारणकाद्धमर्णाद्विना असन्निहिते साक्षिभिस्तदाग्रैश्च सहतमाधिं विक्रीय तत् धनं गृहीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः । यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव गृहीतव्यम् नत्वाधिनाश इति न विचारितम् । तदा आधिः प्रणश्येत् द्विगुण इत्याधिनाशः । विचारिते त्वयं पक्ष इति । भोग्याधौ विशेषमाह । "यदा तु द्विगुणीभूतऋणमाधौ तदा खलु । मोक्ष्य आधिरुदपत्रे प्रविष्टे द्विगुणे धने" या० यदा प्रयुक्तं धनं स्वकृतया दृद्धया द्विगुणीभूतन्तदाधौ कृते तदुत्पन्ने आध्युत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतऋणन्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्वथा सदृद्धिकमूलर्णापाकरणार्थाध्युपभोगविषयमिदं वचनम् । तमेनं त्र्याधिमाचक्षते लौकिकाः यत्र तु दृद्ध्यग्रे

एवाधुपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूलदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं बृहस्पतिना "ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा स धनभाग्धनी। ऋणी च न लभेद्बन्धं परस्परमतं विना" अस्यार्थः। फलभोग्यं यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सदृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सदृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी। यदा सदृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयादृणी। समं मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरप्यधिकफलं यदि स्यात्तदा धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्ध्येऽप्यपर्याप्तन्तदा सामकं दत्त्वापि बन्धम् न लभेतमर्णः वृद्धिशेषं दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह। परस्परमतं विना उत्तमर्णाधर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णोलभत इति"।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अतिशयितायाम्। "यदावगच्छेदायत्यामाधिक्यं भूयसात्मनः" मनुः "युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं तदा। कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्" ज्योतिस्तत्त्वम् "प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये" सि०कौ० "एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्" सुश्रु०।

आधिज्ञ त्रि० आधिं मनःपीडां जानाति अनुभवति ज्ञा-क ६त०। व्याधानुभावके व्यथिते अजयपालः।

आधिदैविक त्रि० अधिदेवं भवः देवान् वातादीन् अधिकृत्य प्रवृत्तः वा ठञ् अनुगतिका० द्विपदवृद्धिः। देवाधिकारेण प्रवृत्ते, १शास्त्रे "अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च" मनुः देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषत्सु प्रसिद्धः। वातादिनिबन्धने २दुःखे च। दुःखं हि त्रिविधमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादिः श्रुतेर्दर्शितः यथा "तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः संघातबलप्रवृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातुरपचारात्कुजात्यन्धबधिरमूकमिमिणखामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसकृता दौहृदापचारकृताश्च॥ दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एत आध्यात्मिकाः॥ संघातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता बलादिकृताश्च। एत आधिभौतिकाः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्का अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ताः क्षुत्पिपासाजराकृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृताश्चाकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधिदैविकाः"। एतदभिप्रायेणैव "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति सा०सू० "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सा०का० दुःखत्रयसृक्कं विवृतञ्च सां०त० कौ०। "दुःखानां त्रयं दुःखत्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मसु वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्"। "तापत्रयोन्मूलनम्" भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादि धर्म इति सांख्यादयः। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्य्यत्वात् प्रीत्यप्रीतिविषादानां त्रिगुणधर्माणां स्वस्वकार्य्ये संक्र-

मात् सर्वेषां विषयाणामेव दुःखादिमत्त्वमिति भेदः ।

आधिपत्य न० अधिपतेर्भावः कर्म्म वा पत्यन्तत्वात् यक् । १स्वामित्वे "अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्। गीता। "राष्ट्रस्याधिपत्यं मे देहि" ऋ० १०,११४,५। "तदेनमासां प्रजानामाधिपत्याय राज्याय" शत० ब्रा० "सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति" इति मनुः "यक्षाणामाधिपत्यञ्च राजराजत्वमेव च" भा० व० २७४ अ० । २राजकार्य्ये प्रजापालनादौ । "दुर्य्योधनं त्वहितं वै निगृह्य पाण्डोः पुत्रं प्रकुरुष्वाधिपत्ये। अजातशत्रुर्हि विशुद्धरागो धर्म्मेणेमां पृथिवीं शास्तु राजन्" भा० व० प० ४अ० ।

आधिबन्ध पु० आधिः बहुप्रजानां कथं पालनं स्यादिति चिन्ता एव बन्धः । बहुप्रजारक्षणार्थचिन्तारूपबन्धे । "कथं राजन् ! प्रजारक्षाधिबन्धेन युज्यते" युधिष्ठिरप्रश्ने तच्चिन्ताधिरूपबन्धनिवारणाय यथा राज्ञाचरणीयं तथोक्तं तं प्रति भीष्मेण भा० शा० ७०अ० "समासेनैव ते राजन् ! धर्मान् वक्ष्यामि शाश्वतान्। विस्तरेणेह धर्माणां न जातत्वमवाप्नुयात्। धर्मनिष्ठान् श्रुतवतो देवब्रतसमाहितान्। अर्च्चयित्वा यजेथास्त्वं गृहे गुणवतो द्विजान्। प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च। अथ सर्व्वाणि कुर्व्वीथाः कार्य्याणि सपुरोहितः। धर्म्मकार्य्याणि निर्वर्त्य मङ्गलानि प्रयुज्य च। ब्राह्मणान् वाचयेथास्त्वमर्थसिद्धिजयार्थिषः। आर्ज्जवेन च सम्पन्नो दृष्ट्या बुद्ध्या च भारत ! । यथार्थं प्रतिगृह्णीयाः कामक्रोधौ च वर्ज्जयेः। कामक्रोधौ पुरस्कृत्य योऽयं राजाऽनुतिष्ठति। न स धर्म्मं न चार्थं प्रतिगृह्णाति वालिशः। मा स्म लुब्धांश्च मूर्खांश्च कामार्थेषु प्रयोजयः। अलुब्धान् बुद्धिसम्पन्नान् सर्वकर्म्मसु योजयेः। मूर्खो ह्यधिकृतोऽर्थेषु कार्य्याणामविशारदः। प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः। बलिषष्ठेन शुल्केन दण्डेनाऽपराधिनाम्। शास्त्राणि तेन लिप्सेथा वेतनेन धनागमम्। दापयित्वा करं धर्मं राष्ट्रं नीत्वा यथाविधि। तथैतं कल्पयेद्राजा योगक्षेमतन्द्रितः। गोपायितारं दातारं धर्मनित्यमतन्द्रितम्। अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः। मा स्माधर्मेण लोभेन लिप्सेथास्त्वं धनागमम्। धर्मार्थावधुवौ तस्य यो न शास्त्रपरो भवेत्। अर्थशास्त्रमरौ राजा धर्मार्थौ चाधिगच्छति। अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति। अर्थमूलो हि हिंसाञ्च कुरुते स्वयमात्मनः। करैरशास्त्रदृष्टैर्हि मोहात् सम्पीडयेत् प्रजाः। अधस्क्रिन्द्यात्तु यो धेन्वाः क्षीरार्थी न लभेत् पयः। एवं राष्ट्रमयोगेन पीड़ितं न विवर्द्धते। यो हि दोग्ध्रीमुपास्ते च स नित्यं विन्दते पयः। एवं राष्ट्रमुपायेन भुञ्जानो लभते फलम्। अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम्। जनयत्यतुलां नित्यं कोषदृद्धिं युधिष्ठिर ! । दोग्ध्री धान्यं हिरण्यञ्च मही राज्ञा सुरक्षिता। नित्यं स्वेभ्यः परेभ्यश्च ह्यसा माता यथा पयः। मातृकारोपमो राजन् ! भव नाङ्गारिकोपमः। तथा युक्तश्चिरं राज्यं भोक्तुं शक्ष्यसि पालयन्। परचक्राभियानेन यदि ते स्याद्धनक्षयः। अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत्। मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रच्छ कञ्चन। अन्यायाभ्यवस्थायां किञ्चु स्फीतस्य भारत। धनानि तेभ्यो दद्यास्त्वं यथार्थं यथार्हतः। सान्त्वयन् परिरक्षंश्च स्वर्गमाप्स्यसि दुर्ज्जयम्। एवं धर्मेण वृत्तेन प्रजास्त्वं परिपालय। खनन् पुण्यं यशो नित्यं प्राप्स्यसे कुरुनन्दन ! । धर्म्मेण व्यवहारेण प्रजां पालय पाण्डव ! । युधिष्ठिर ! यथा युक्तो नाधिबन्धेन योत्स्यसे। एष एव परो धर्मो यद्राजा रक्षति प्रजाः। भूतानां हि यदा धर्मो रक्षणं परमा दया। तस्मादेव परं धर्म्मं मन्यन्ते धर्म्मकोविदाः। यो राजा रक्षणे युक्तो भूतेषु कुरुते दयाम्। यद्वा कुरुते पापमरक्षन् भयतः प्रजाः। राजा वर्षसहस्रेण तस्यान्तमधिगच्छति। यद्वा कुरुते धर्म्मं प्रजा धर्मेण पालयन्। दश वर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि। स्विष्टिः सधीतिः सुतपा लोकान् जयति यावतः। क्षत्रेण तानवाप्नोति प्रजा धर्मेण पालयन्। एवं धर्मं प्रयत्नेन कौन्तेय ! परिपालय। ततः पुण्यफलं लब्ध्वा नाधिबन्धेन योत्स्यसे" ।

आधिभोग पु० आधेर्ब्बन्धकद्रव्यस्य भोगः । बन्धकद्रव्यस्य भोगे "गोष्याधिभोगे नो दृद्धिः" आधिशब्दे उदा० आधेर्मूलव्यवहारस्य अनुभवरूपे २भोगे च ।

आधिभौतिक त्रि० भूतानि व्याघ्रसर्पादीन्यधिकृत्य जातम् । अधिभूत+ठञ् द्विपदवृद्धिः । व्याघ्रसर्पादिजनिते दुःखे । आधिदैविकशब्दे विवृतिः ।

आधिमन्यव अधिमन्यवे हितः अण् । ज्वरार्त्तौ छारा० ज्वरसन्तापे हि अधिकव्यथोद्भवात्तस्य तथात्वम् ।

आधिरथि पु० अधिरथः धृतराष्ट्रसारथिः तस्यायम् इञ् । सूतपुत्रे कर्णे "हिरण्यकण्ठीः प्रमदाः पामानु वा बहुगोकुलान्। किं ददानीति तं विप्रमुवाचाधिरथिस्ततः भा०

व० प० ३०८ अध्या०। तस्याधिरथपुत्रत्वप्राप्तिकथा स हि कन्यावस्थायां सूर्य्येण कुन्त्याम् उत्पादितः पश्चाच्च तया स्वकुलभयात् जले त्यक्तः अधिरथेन गृहीतो वर्द्धितश्च यथोक्तं "निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम्। तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा। चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ। दम्पती वसुषेणेति" भा०आ०६७अ०।

आधिराज्य न० अधिराजस्य भावः कर्म्म वा ष्यञ्। आधिपत्ये "बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः" रघुः।

आधिवेदनिक त्रि० अधिवेदनाय विवाहोपरिविवाहाय हितं ठक् तत्र काले दत्तं ठञ् वा। अधिवेदनार्थे तत्र काले च स्त्रियै पत्या दीयमाने स्त्रीधनभेदे। "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्" या०स्मृ०। "यच्च द्वितीयविवाहार्थिना पूर्वस्त्रियै पारितोषादिकं धनं दत्तं तदाधिवेदनिकमधिकस्त्रीलाभार्थत्वात्तथेति" दायभा०। मिताक्षरायां तु "आधिवेदनिकादयश्चेति" पठितम् आधिवेदनिकम् अधिवेदननिमित्तमिति व्याख्यातञ्च आद्यपदेन क्रयविक्रयादिप्राप्तस्य ग्रहणमित्युक्तम्। तत्र अधिवेदननिमित्तदाने विशेषः या० स्मृत्युक्तः "अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्या दत्ते त्वर्द्धं प्रकल्पयेत्" "एतदपि सामर्थ्ये असामर्थ्ये तु यत् किञ्चित् भरणपर्य्याप्तं दत्त्वा परितोषयेदिति भेदः। "एकामूढ्वा तु कामार्थमन्यां वोढुं यदृच्छति। समर्थस्तोषयित्वार्थैः पूर्व्वोढामपरां वहेत्" स्मृतौ समर्थपदस्वारस्यात्तथात्वम्। एवमेव मदनपारिजातविधानपारिजातादयः।

आधिस्तेन पु० आधेर्गोप्याधेर्भोगात् स्तेनइव। गोप्याधेर्बलात्कारेण भोक्तरि। "न भोक्तव्यो बलादाधिर्भुञ्जानोऽद्धिसुतृद्भजेत्। मूल्येन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्" मनुना तद्भोगे स्तेनत्वोक्तेस्तथात्वम्।

आधीकरण न० अनाधिराधिक्रियते आधि+च्वि+कृ-ल्युट्। बन्धकीकरणे आधिशब्दे मिताक्षरावाक्ये उदा०" कृ आधीकृतः। दत्तबन्धके द्रव्यादौ त्रि०।

आधुत त्रि० आ+धु-क्त। चालिते। [अप्राचीने च स्त्रियां ङीप्

आधुनिक त्रि० अधुना भवः ठञ्। १साम्प्रतभवे २अर्वाचीने

आधृष्टि त्रि० आ+धृष-भावे क्तिन्। १परिभवे २बलाद् निग्रहे च।

आधेय त्रि० आ+धा-कर्मणि यत्। १उत्पाद्ये। "आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" व्या०का०। यस्य सतो गुणान्तरमुत्पाद्यम् २तादृशे उत्पाद्यगुणान्तरे विद्यमाने एव यत्र घटादिपदार्थे पाकादिना रक्ततागुणान्तरमाधीयते तादृशे घटादौ। आधानविधिना ३स्थापनीये वह्नौ पु०। ४अधिकरणेऽभिनिवेशनीये "अधिकं पृथुश्चाधाराद्धेयाधिक्यवर्णनम्" चन्द्रा०। ५स्थापनीये द्रव्ये च। भावे यत्। ६आधाने न०। "अग्न्याधेयम्" आश्व० औ०सू०। "अन्यतराभावे कार्य्या प्राग्गन्त्याधेयात्" बौधा०सू०।

आधोरण पु० आ+धोर-गतिचातुर्य्ये ल्यु। हस्तिगतिचातुर्य्ये हस्तिपके। स्वल्पबलेनापि महाबलस्य हस्तिनः सङ्केतादिनैव चालनात्तस्य गतिचातुर्य्यवत्त्वात्तथात्वम्।

आध्मात त्रि० आ+ध्मा-क्त। १शब्दिते, २दग्धे, ३वातदोषजातौदरस्फीततासम्पादकरोगयुक्ते "साटोपमत्युपरुजमाध्मातमुदरंभृशम्" सुश्रु०। भावे क्त ४आध्माने न०।

आध्मान पु० आ+ध्मा-आधारे ल्युट्। "आध्मानमिति जानीयाद्दोषं वातनिरोधजम्" इत्युक्ते १वातव्याधौ। "मूलञ्च मूत्रं सुरभिर्मुञ्जः प्रहर्त्ति वस्तिरोदमाध्मानञ्च" सुश्रु० भावे ल्युट्। २उदरस्फीततायाम्। ३अग्निसंयोगजे शब्दभेदे न०। करणे ल्युट्। ४नलिकानामगन्धद्रव्ये स्त्री०ङीप्।

आध्मापन न० आ+ध्मा-णिच्-पुक्-भावे ल्युट्। १शब्दनिष्पादने २आध्माननिष्पादने सुश्रुतोक्ते ३शल्यापसारणोपयोगिव्यापारभेदे च। "अणून्यन्यानि शल्यानि परिषेचनाध्मापनैर्बालवस्त्रपाणिभिः प्रमार्ज्जयेत्" सुश्रु०।

आध्यत्त्य न० अध्यक्षस्य भावः ष्यञ्। १अधिष्ठातृत्वे २अधिकर्तृव्यापारे ३प्रत्यक्षत्वे च। [स्मृतौ

आध्या स्त्री आ+ध्यै-भावे अङ्। १चिन्तने २औत्सुक्येन

आध्यात्मिक त्रि० आत्मानं मनःशरीरादिकमधिकृत्य भवः ठञ्। शोकमोहज्वरादिरूपे दुःखे। आधिदैविकशब्देऽस्य विवृतिः। [र्व्वकस्मरणे च।

आध्यान न० आध्यै+-ल्युट्। १चिन्तायाम्, २उत्कण्ठापू-

आध्यापक पु० अध्यापकएव स्वार्थेऽण्। अध्यापके शब्दरत्ना०

आध्यायिक पु० अधीयतेऽध्यायोऽध्येयोवेदस्तमधीते ठञ्। अधीतवेदे "युवा स्यात् साधुयुवाध्यायिकः" तैत्ति०उ०। "आध्यायिकोऽधीतवेदः" भा०।

आध्यासिक त्रि० अध्यासेन कल्पितः ठक्। वेदान्तिमते अध्यासेन कल्पिते अतद्वति तत्त्वारोपेण कल्पिते पदार्थे यथा शुक्तिकादौ रजतादि कल्पितम् एवं ब्रह्मणि जगदादि

आरोपितमिति तस्याध्यासिकत्वमिति वेदान्तसिद्धान्तः ।

आध्र पु० आ+ध्र–क । आधारे । "आध्रस्य चित् प्रमतिरुच्यसे" ऋ० १,२१,१४ । "आध्रेण चित्तद्वेकं चकार" ऋ०७,१८,१७ ।

आध्वनिक त्रि० अध्वनि कुशलः ठक् । पथिकुशले "कान्तारेष्वपि विश्रामे जनस्याध्वनिकस्य वै" भा० आ० ।

आध्वरायण पुंस्त्री० अध्वरोयज्ञाभिज्ञस्य गोत्रापत्यम् नडा० फक् । यज्ञविज्ञोत्रापत्ये ।

आध्वरिक पु० अध्वरस्य व्याख्यानो ग्रन्थः ठक् । अध्वरव्याख्याने १ग्रन्थे । अध्वरं यज्ञं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा ठक् । २यज्ञवेत्तरि २तत्प्रतिपादकग्रन्थाध्येतरि च त्रि० ।

आध्वर्यव त्रि० अध्वर्योर्यजुर्वेदविद इदम् अञ् । अध्वर्यु सम्बन्धिनि कर्मादौ । "यदि वाध्वर्यवं राजा नियुनक्ति पुरोहितम्" अथ० १०,५२,२ । "ऋग्वेदेन हौत्रमकुर्वत यजुर्वेदेनाध्वर्यवं सामवेदेनोद्गीथम्" शत० ब्रा० ।

आन पु० आनित्यनेन आ+अन–करणे क्विप् आ प्राणवायुः ततः सुवाख्या० अदूरभवादौ अण् । सम्यग्जीवनसाधनस्य अन्तःस्थितस्य प्राणवायोर्नासिकया बहिर्निस्सारणेऽच्छ्वासे

आनक पु० आनयति सोल्लाहान् करोति अन–णिच् ण्वुल् । १पटहे, २मुदङ्गे, "ततः शङ्खाश्च भेर्यश्च प्रणवश्चानकगोमुखाः सहसैवाभ्यहन्यन्त" गीता ३सशब्दभेदे च । ४उत्साहके त्रि० । कर्णादि० चतुरर्थ्यां फिञ् । आनकायनिः । तत्सन्निकृष्टदेशादौ त्रि० ।

आनकदुन्दुभि पु० आनकः प्रोल्लाहकोदुन्दुभिर्देववाद्यविशेषो यस्य । १कृष्णपितरि वसुदेवे । कृष्णजन्मोत्सवे हि तथा वाद्यं तदुत्पन्ने जातमिति तस्य तथात्वम् । २दृढडकायां स्त्री वा ङीप् ।

आनकस्थली स्त्री आनकप्रधाना स्थली श० त० । आनकप्रधानस्थल्यां देशभेदे तस्यां भवः अदूरदेशादौ धूमा० वुञ् । आनकस्थलकः तत्सन्निकृष्टदेशादौ त्रि० ।

आनडुह न० आनडुह इदम् अण् । १वृषसम्बन्धिनि गोमय चर्मादौ । "आनडुहोगोमयः क्षरः स्यालोमाकः" गोभि० "चर्मण्यानडुहे रक्ते स्याद्यं भद्रासने तथा" या० स्मृ० । अनडुहा कृतम् अण् । २खनामख्याते तीर्थभेदे तच्च तीर्थं यच्चगिरिसन्निकृष्टदेशस्थितम् यथा क्रौञ्चपुरं वर्णयित्वा । "तमहंवै राजानं निवासाय गतेऽह्नि । तीर्थमानडुहं नाम गमिष्यामः सनातनम् । ततश्च तं गमिष्यामः यत्रास्य विवरे गिरिम्" । गोमन्तमिति विख्यातम्" हरिवं० २६अ० ।

आनडुहक त्रि० अनडुहा कृतम् संज्ञायां कुलला० वुञ् । अनडुत्कृते गोमयादौ ।

आनडुहय पु० अनडुहोगोत्रापत्यम् गर्गा० यञ् । अनडुन्नामकस्य मुनेर्गोत्रापत्ये । ततः पुनः गोत्रापत्ये अश्वा० फञ् । आनडुह्यायनः तदपत्ये पुंस्त्री० । चतुरर्थ्यां कर्णा० फिञ् । आनडुह्यायनिः तत्सन्निकृष्ट देशादौ त्रि० ।

आनत त्रि० आ+नम–क्त । १कृतप्रणामे, २अधोमुखे, ३विनयेन नते च "तं व्यासस्नुषसं मुनिमानतोऽस्मि" भा० १मस्तके । "स्तूयमानकरेणानतपूर्वकायम्" रघुः ।

आनति स्त्री आनमति प्रह्वीभवत्यनया आ+नम–करणे क्तिन् । आनुगत्यजन्ये १सन्तोषे "यच्च चिरावस्थितेर्व्यभिचारात् न प्रतिग्रहकारणत्वमानतेरिति" "आनतिद्वारा न प्रतिग्रहार्थत्वं द्रव्यस्येत्युक्तं तन्मन्दतरम् आनतिद्वारेण चिराश्रयणादीनां प्रतिग्रहकारणत्वादिति" "आनतेरनियतोपायपरिणामादिति" च दाय० भा० । भावे क्तिन् । २नम्रीभावे, ३अधोभवने, ४नम्रतायाञ्च "आत्मजातिसदृशीं किञ्चानतिम्" किरा० ।

आनद्ध न० आ+नह+क्त । चर्म्मणा बद्धमुखे १पटहमुरजादौ वाद्यभेदे, । २व्यथिते, ३व्याप्ते, ४बद्धे कोशभूषादिके च त्रि० । "मूलबद्धे हे तयोर्मूलं वस्तिमेढ्रञ्च तत् विज्ञानद्ववस्तिता" सुश्रु० ।

आनन न० अनित्यनेन आ+अन–करणे ल्युट् । मुखे मुखेन हि जलपानादिना प्राणादेः स्थितिरतस्तस्य तथात्वम् "सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ" "तदाननं मृत्सुरभि क्षितीश्वरः" नृपस्य कान्तं पिबतः सुताननम्" इति च रघुः ।

आनन्तर्य न० अनन्तरमेव चतुर्व० स्वार्थे ष्यञ् । १अव्यवहिते अनन्तरस्य भावः ष्यञ् । २अव्यवधाने । "आनन्तर्यात् स्वयोन्यास्तु तथा बाह्येष्वपि क्रमात्" मनुः "पयसः कालानन्तर्य्यधर्मानुपलक्षेभ्यः" कात्या० ४,२,१६ ।

आनन्त्य न० अनन्तएव स्वार्थे अण् । १अनन्ते २असीमे अनन्तस्य भावः ष्यञ् । ३सीमाशून्यत्वे ४नाशराहित्ये "हविर्यच्चिरात्राय यज्ञानन्त्याय कल्पते" मनुः । "लोकानन्त्यं दिव. प्राप्तिः पुत्रपौत्रप्रपौत्रकैः" या० स्मृतिः । "आनन्त्यात् कुलधर्म्माणां द्वादशाहे विधीयते" आ० त० पु० ५ शाश्वतप्रतिष्ठायाञ्च "यस्तु नित्यं कृतमतिर्धर्म्ममेवाभिपद्यते । अग्रङ्गमानः

कल्याणि ! सोऽमूत्रानन्त्यमश्नुते" भा०व०प०३१अ० ।

आनन्द पु० आ+नन्द्-घञ् । १हर्षे सुखे, २दुःखाभावे, ३ब्रह्मणि च । अर्शआदित्वादच् । ४आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिः । नैयायिका आनन्दशब्दः दुःखाभावे लाक्षणिकस्तस्माद्ब्रह्मणि आनन्दाभावेऽपि दुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते वेदान्तिनस्तु छान्दसं नपुंसकमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः एतदभिप्रायेणैव विवरणे "आनन्दोविषयानुभवो नित्यत्वञ्चेति सन्ति-धर्म्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते इत्युक्तम्" यथा च ब्रह्मण आनन्दप्रचुरत्वादानन्दमयत्वं तथा "आनन्दमयोऽभ्यासात्" शा०सू०भा० व्यवस्थापितम् तैत्ति०उप० आनन्दमयं प्रकृत्य "तस्य प्रियमेव शिरोमोदोदक्षिणः पक्षः प्रमोद उत्तरःपक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा" । "तस्माद्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनन्द इति सुखसामान्यम्, आत्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म । तद्धि शुभकर्म्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा । प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते तद्विषयसुखमिति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्म्मणोऽनवस्थितत्वात्सुखस्य क्षणिकत्वम् । तदुदन्तःकरणं तपसा-तमोघ्नेन, विद्यया, ब्रह्मचर्य्येण, श्रद्धया च निर्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणविशेष आनन्द उल्लसते विपुलोभवति । वक्ष्यति च "रसो वै सः रसं ह्येवायं लब्धानन्दी भवति एष ह्येवानन्दयाति" "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति"श्रुत्यन्तरात् एवञ्च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्षं आनन्दस्य वक्ष्यते । एवञ्चोत्क्रम्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः । यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठाः" भा० ब्रह्मण आनन्दरूपरसत्वमपि तत्रैव दर्शितं यथा "यद्वैतत् सुकृतं रसो वै सः रसं ह्येवायं लब्धानन्दी भवति कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयेऽभयं प्रतिष्ठां विन्दते" तै० उ० । "कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह । यद्वैतत्सुकृतं रसो वै सः । रसो नाम तृप्तिहेतुरानन्दकरो मधुरास्वादिः प्रसिद्धो लोके । रसमेवायं लब्ध्वा प्राप्यानन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके । बाह्यानन्दसाधनरहिता अयत्नोद्या निरीक्षणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसो नूनम् । ब्रह्मैव रसस्तेषाम् तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म । इतश्चास्ति कुतः । प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्य्यकारणैर्निर्वर्त्त्यमाना दृश्यन्ते । तच्चैकार्थदृष्टित्वेन संहननम् संहन्यमानं च नान्तरेण चेतनं संहतं सम्भवति अन्यत्रादर्शनात् । तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्याच्च भवेत्को ह्येव लोकेऽन्यात्प्राणचेष्टां कुर्यादित्यर्थः । कः प्राण्यात् प्राणनं कुर्य्यात्तस्मादस्ति तद्ब्रह्म । यदर्थाः कार्य्यकारणप्राणनादिचेष्टाः? तत्कृत एवानन्दो लोकस्य । कुतः ! एष ह्येव परआत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् । स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः" भा० । सर्वानन्दापेक्षया ब्रह्मरूपानन्दस्योत्कर्षस्तत्रैव दर्शितो यथा "सैषानन्दस्य मीमांसा भवति । युवा स्यात् साधुयुवाध्यायिकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्म्मदेवानामानन्दः ये कर्म्मणा देवानपि यन्ति, श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्म्मदेवानामानन्दाः स एको देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं

देवानामानन्दाः स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः स एको बृहस्पतेरानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एक प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे यश्चासावादित्ये स एकः । स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रामति, एतं प्राणमयमात्मानमुपसङ्क्रामति, एतं मनोमयमात्मानमुपसङ्क्रामति, एतं विज्ञानमयमात्मानमुपसङ्क्रामति, एतमानन्दमयमात्मानमुपसङ्क्रामति" तैत्ति०उप० "तस्यास्य ब्रह्मण आनन्दस्यैषा मीमांसा विचारणा भवति किमानन्दस्य मीमांस्यमित्युच्यते । किमानन्दो विषयविषयिसम्बन्धजनितो लौकिकानन्दवदाहोस्वित्स्वाभाविक इत्येवमेषानन्दस्य मीमांसा । तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसम्पत्तिनिमित्तउत्कृष्टः । स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम् । अनेन हि प्रसिद्धेनानन्देन व्याकृतविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते । लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्राऽविद्यया तिरस्क्रियमाणोऽविद्यातो उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादिसाधनसम्बन्धवशो विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः सम्पद्यते स एवाविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिष्वकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति । निरस्ताऽविद्याकृते विषयविषयिविभागे विद्यया स्वाभाविकः परिपूर्णैक आनन्दोऽद्वैते भवतीत्येतमर्थं विभावयिष्यन्नाह । युवा प्रथमवयाः साधुयुवेति । साधुश्चासौ युवा चेति यूनो विशेषणम् । युवाप्यसाधुर्भवति साधुरप्ययुवाऽतो विशेषणं युवा स्वात्साधुयुवेति । आध्यायिकोऽधीतवेदः । आशिष्ठ आशास्तृतमः । दृढिष्ठो दृढतमः । बलिष्ठो बलवत्तमः । एवमाध्यात्मिकसाधनसम्पन्नः । तस्येयं पृथिवी सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेन च कर्मसाधनेन सम्पन्ना पूर्णा । राजा पृथिवीपतिरित्यर्थः । तस्य च य आनन्दः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनन्दः । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः । मनुष्यादानन्दाच्छतगुणेनोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो भवति । मनुष्याः सन्तः कर्मविद्याविशेषाद्गन्धर्वत्वं प्राप्ताः मनुष्यगन्धर्वाः ते ह्यन्तर्धानादिशक्तिसम्पन्नाः स्वल्पकार्यकारणाः । तस्मात्प्रतिघातात्मत्वं तेषां इन्द्रप्रतिघातशक्तिसाधनसम्पत्तिश्च । ततोऽप्रतिहन्यमानस्य प्रतिकारवतो मनुष्यगन्धर्वस्य स्वाच्चित्तप्रसादः । तस्य प्रसादविशेषात्सुखविशेषाभिव्यक्तिः । एवं पूर्वस्मात् पूर्वस्मा भूमेरुत्तरस्मात्तरस्मां भूमौ प्रसादविशेषतः शतगुणेनानन्दोत्कर्ष उपपद्यते । प्रथमत्वकामहतत्वग्रहणं मनुष्यविषयभोगकामनाभिहतस्य श्रोत्रियस्य मनुष्यानन्दाच्छतगुणेनानन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थं साधु युवाध्यायिक इति श्रोत्रियत्वाद्विशेषणत्वं गच्छतो । ते ह्यविशिष्टे सर्वत्र । अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशिष्यते । अतोऽकामहतग्रहणम् । तद्विशेषतः शतगुणात् सुखोत्कर्षोपलब्धेरकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम् । व्याख्यातमन्यत् । देवगन्धर्वा जातित एव । चिरलोकानामिति पितॄणां विशेषणम् । चिरकालस्थायी लोको येषां पितॄणां ते चिरलोका इति । आजान इति देवलोकस्तत्स्थाजाने जाता आजानजा देवाः कार्तकर्म्मविशेषतो देवस्थानेषु जाताः । कर्मदेवा ये वैदिकेन कर्मणाग्निहोत्रादिना केवलेन देवानपि यन्ति । देवा इति त्रयस्त्रिंशद्वर्गविभुजः । इन्द्रस्तेषां स्वामी तस्याचार्यो बृहस्पतिः प्रजापतिर्विराट् त्रैलोक्यशरीरो ब्रह्मा । समष्टिव्यष्टिरूपः संसारभरणानलव्यापी । यत्रैत आनन्दभेदा एकतां गच्छन्ति । धर्मश्च तद्विमित्तं ज्ञानञ्च तद्विषयमकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भो ब्रह्मा तस्यैव आनन्दः श्रोत्रियेणाद्विजिनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वाद्विजिनत्वे नियते अकामहतत्वं तूत्कृष्यते इति प्रकृष्टसाधनतावगम्यते । तस्य तस्याकामहतत्वं प्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रा एकदेशः । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुत्यन्तरात् । स एष आनन्दो यस्य मात्रा समुद्राम्भस इव विप्रुषः प्रविभक्ता यत्रैकताङ्गताः स एष परमानन्दः स्वाभाविकोऽद्वैतत्वात् । आनन्दानन्दिनोश्चाविभागोऽत्र । तदेतन्मीमांसाफलमुपसंहियते स य श्चायं पुरुष इति । युक्तायां निष्ठितः परमे व्योम्न्याकाशादिकार्थे सृष्टाऽन्नमयान्तं

तदेवानुप्रविष्टः स य इति निर्दिश्यते । स एकोऽसावयं पुरुषे यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति स यश्चासावादित्ये इति स एकः । तं मीमांसया च सिद्धमुपसंहृतं भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्त्तव्यम्, अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति । ननु तदनुरूपएवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन । नन्वेवमप्यादित्यविशेषणग्रहणमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । इतस्य हि यो मूर्त्तामूर्त्तलक्षणस्योत्कर्षः सवित्रभ्यन्तरगतः स चेत् पुरुषगतविशेषोपमर्द्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्युभयं प्रतिष्ठां विन्दन दृश्युपपन्नम्" । "स यः कश्चिदेवं यथोक्तं ब्रह्मोत्युज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमश्नोति । एवशब्दस्य प्रकृतपरामर्शार्थत्वात् । स किम् ? अक्षान्नोकात्प्रेत्य दृष्टादृष्टविषयसुखदायो ह्ययं लोकस्तस्मादक्षान्नोकात्प्रेत्य प्रत्याहृत्य निरपेक्षो भूत्वा एतं यथा व्याख्यातम् अन्नमयमात्मानमुपसङ्क्रामति विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः । ततोऽभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम् । अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति । अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते तत्रैव नान्यत्र च" शाङ्करभाष्यम्

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं तावच्चिन्त्यते प्रकृतेः सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणरूपत्वात् सुखादीनां सत्त्वादिकार्य्यत्वम् । यथोक्तं सां०का० "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" अस्याः सां०कौ० व्याख्या ।

"प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखं अप्रीत्यात्मकोरजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्याह्यग्रहणम् । नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः । एवमन्यदपि व्याख्येयम् । भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव । रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशाद्भूतेनान्यदभिभूयते । तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति" ।

"प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्" सां० सू० । "गुणानां सत्त्वादिद्रव्यत्वयोगानामन्योन्यं सुखदुःखविषादाद्यैर्वैधर्म्यम् कार्य्येषु तद्दर्शनादित्यर्थः सुखादिकं च घटादिविषयाणामपि रूपवदेव धर्म्मोऽन्तःकरणोपादानत्वात् सर्वकार्य्याणां, तत्तद्गुणत्वौचित्यात् एतच्चानुपदं निरूपयिष्यते । मनसः संकल्पात्मकतावत् सत्त्वादीनां सुखाद्यात्मकता धर्म्मो धर्म्मभेदात्" सां०प्र०भा० । "हेयं दुःखमनागतम्" इत्युपक्रम्य "द्रष्टृदृश्ययोर्संयोगो हेयहेतुः" पात०सू० हेयस्य दुःखस्य कारणं द्रष्टृदृश्ययोः संयोगमुक्त्वा "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" पा०सूत्रे दृश्यपदार्थो निरूपितः । अयमर्थः प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः, प्रकाशक्रिययोः प्रतिबन्धरूपस्थितिशीलं तमः । तत्र सत्त्वं लघुत्वात् तर्य्यं, तापकं रजः रञ्जकत्वात् । एवं सत्त्वरजसोस्तप्यतापकभावे सति तमसा मोहः सम ताप इत्येवं रूपभ्रान्तिरूपोमोहः पुरुषस्य भवति । तदिदं गुणत्रयं स्वस्वकार्य्यं मिथः सहायमविवेकिभोग्यं विवेकित्याज्यं परस्पराश्रयं परस्पराभिभाव्याभिभावकभावञ्च गच्छति" इत्येवं स्थिते सति कारणान्तरे रजस्तमसी अभिभूय सत्त्वं यदा प्रवर्द्धते तदा सत्त्वोद्रेकात् सुखं जायते । सत्त्वतमसी अभिभूय सति कारणान्तरे यदा रजः प्रवर्द्धते तदा रज उद्रेकात् दुःखं भवति सत्त्वरजसी अभिभूय यदा तम उद्रिक्तं भवति तदा मोह विषादादिकं जायते इति सुखादिसम्भवप्रकारः । तत्र कारणं धर्म्माधर्म्मादिसचिवोरागादिरेव । यथाह "सुखानुशयी रागः" दुःखानुशयी, द्वेषः" पा०सू०

सुखानुभवे सति स्मृत्वा तज्जातीयसुखान्तरे तत्साधने वा तृष्णा स रागः सुखमनुशेते विषयीकरोति सुखानुशयीत्यर्थः एवं दुःखानुभवितुः स्मृत्वा दुःखे तत्साधने वा यः क्रोधः स द्वेष इत्यर्थः । एवञ्च सुखस्य स्मरणात्मकज्ञानात् सुखे इच्छा नान्येच्छाधीना इति तस्य स्वतःप्रयोजनत्वम् अन्येच्छानधीनेच्छाविषयत्वञ्चैव तथात्वात् । तत्साधने तु सुखसाधनत्वज्ञानादेवेच्छा अतस्तस्य गौणप्रयोजनत्वम् । स्मरणात्मकदुःखज्ञानाच्च दुःखे द्वेषः तत्साधने तु तत्साधनत्वज्ञानात् द्वेषः यथाह भाषा० "सुखन्तु जगतामेव कार्य्यं धर्म्मेण जन्यते । अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् । निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते । इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि । चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् । तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्* । बलवद्दृष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका । तद्धेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते । द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्" । इच्छया च तत्साधने प्रवृत्तिः । द्वेषाच्च तत्साधने निवृत्तिः । यत्र सुखनान्तरीयकविधया दुःखमुत्पद्यते तादृशे कर्म्मणि द्विष्टसाधनत्वज्ञाने सत्यपि इच्छातत्कार्य्ययोर्दर्शनात् बलवद्दृष्टसाधनत्वज्ञानस्यैव इच्छायां प्रवृत्तौ च कारणत्वेन तस्य तज्ज्ञानान्तरीयकत्वान्न बलवद्दृष्टत्वम् । अतएव कण्टकिमत्स्यभक्षणादौ सैन्धवधान्यादिभक्षणे च प्रवृत्तिः । कामुकादेः परदारादिगमने नरकसाधनत्वं विदुषोऽपि प्रवृत्तिस्तु तत्काले ऐहिकसुखापेक्षया कालान्तरभाविनि नरकादौ बलवद्दुःखाभावेन बलवद्दृष्टासाधनत्वज्ञानादेवेति न विरोधः ।

तत्र सुखं प्रथमं द्विविधं ज्ञानप्रसादलभ्यं ब्रह्मानन्दाद्यपरपर्य्यायं निरतिशयम्, वैषयिकं सातिशयञ्च" तच्च तैत्तिरीयश्रुतौ मनुष्यादारभ्य ब्रह्मपर्य्यन्तानाम् ७।७।७।८ प्राग्दर्शितम् सातिशयञ्च सुखं विवेकिनां दुःखमेव । यथोक्तम् विषयतृष्णाराहित्यरूपोपरतिसुखरूपतुष्टिप्रदर्शने" सां०कौ०। "अर्ज्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति । तथा हि सेवादयोधनोपार्जनोपायास्ते च सेवकादीन् दुःखाक्रुर्वन्ति । इष्यद्वरीश्वरहाःस्वहस्तदत्तचण्डांशुचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते? । एवमन्येऽप्यर्ज्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारसुच्यते । तथार्जितं धनं राजचौरागारिकाग्निजलौघादिभ्योविनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतोविषयोपरमे या तुष्टिः सा द्वितीया पारसुच्यते । तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्क्षयं भावयतोविषयोपरमे या तुष्टिः सा तृतीया पारपारसुच्यते । एव शब्दादिभोगाभ्यासाद्बन्धे कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते । एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते" । "परिणाम तापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" पात० सूत्रे चोक्तम् । अयमर्थः परिणामोऽन्यथाभावः तापः वर्त्तमानः, संस्कारोभूतः एतान्येव दुःखानि तैरिति विग्रहः तथा च विषयसुखभोगात् कामानलो वर्द्धते "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" इति भारतोक्तेः तदृष्टौ च सत्यां कदाचित् कास्यालाभे दुःखमवश्यं भावि कदाचिल्लाभेऽपि कुतश्चिद्भोगसङ्कोचे दुःखम् ततः सङ्कोचके द्वेषः ततः कामद्वेषाभ्यां पापस्योपचयात् दुःखमवश्यं भावि । असङ्कोचे व्याधिः पापञ्च ततोऽसुखम् एवं भोगस्य परिणामदुःखता । तथा सुखभोगस्य तत्साधनस्य नाशे तापः अनुतापः स च दुःखमेवेति तस्य तापदुःखता । तथा भोगनाशेऽपि तत्संस्कारः तिष्ठत्येव सति तस्मिन् तज्जातीये पुनः रागः रागे च पुण्यापुण्यसाधनावश्यम्भावः ततः पुनः सुखदुःखभोगः ततः पुनः संस्कार इत्यनन्तदुःखसन्ततिः तथा च यथा भोगनाशे न संस्कारो भवेत् तथा यतितव्यमिति अतएवोक्तम् "असक्तः सुखमन्वभूत्" सर्व्वमेव विषयभोगसाधनं विषयजन्यं सुखं च दुःखपक्षे निक्षेप्तव्यम् । तत्र हेतुः गुणवृत्तिविपर्य्यादिति गुणानां चित्तात्मना परिणतानां सत्त्वरजस्तमसां वृत्तीनां सुखदुःखमोहानां विरोधात् परस्पराभिभाव्याभिभावकत्वरूपविरोधात् इति । तथा च त्रिगुणचित्तस्य यदा रजस्तमसी सत्त्वात् निश्चिदूने भवतः तदा ते मिथुनीभूय सत्त्वाभिभवाभिमुखे भवतः । तदानीञ्च तमसा सत्त्वापिधाने कृते रजसैश्वर्य्यं कामयमानेन विषयः प्रियो भवति तदा तेन सत्त्वाच्छादनेन चित्तं विक्षिप्तं भवति । यदा तु तमः प्रधानं तदा चित्तं मूढं भवति सत्त्वोद्रेके तु सुखम् इत्येवमेकस्यैव चित्तस्य सत्त्वादिकारणोद्रेकभेदेन सुखदुःखादिरूपता ।

सुखादिकञ्च अन्तःकरणधर्म्मः धर्म्माधर्म्मफलत्वात् "या-

स्वदेशितं फलमनुष्ठातरीति" न्यायेन क्लृप्तादीनामन्तःकरण-धर्म्मत्वेन तद्धर्म्मत्वौचित्यात् पुरुषे तु तानि तदविवेकादौ-पाधिकानि "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीतोक्तेः प्रकृतिगुणानां वास्तविककर्त्तृत्वसिद्धेः। "तस्मात् संयो-गादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीन" इति सां०का० राजसवृत्तेः अन्तः-करणस्यैव वास्तविककर्त्तृत्वोक्तेश्च क्रियाफलस्य सुखादेरपि तत्सामानाधिकरण्यम्। एतदाशयेनैव "तत्र जरा-मरणकृतं दुःखं प्राप्नोति चेतन पुरुषः। लिङ्गस्या-विनिवृत्तेस्तस्माद् दुःखं स्वभावेन सा०का० उक्तिः पुरुषे औपाधिकदुःखस्य सद्भावपरा"। किञ्च अन्तः-करणस्य तावत् सुखादिभिरन्वयव्यतिरेकौ सर्व्वसम्मतौ इत्यन्वयव्यतिरेकाभ्यां सिद्धकारणभावस्य तस्योपादानत्वमेव सांख्यादिभिः कल्प्यते न पुनस्तस्य निमित्तत्वं प्रकल्प्य आत्मनस्तत्र समवायिकारणत्वकल्पनं गौरवपराहतत्वात् निर्गुणत्वादिश्रुतिविरोधाच्च। सत्यपि तस्य स्वाभाविककर्त्तृत्वे भोक्तृत्वमस्येवेति सांख्या आहुः यथोक्तं सांख्यसूत्रभाष्ययोः "चिदवसानो भोगः" सू०। "पुरुषस्वरूपे चैतन्येपर्यवसानं यस्य तादृशो भोगः सिद्धिरित्यर्थः। बुद्धेर्भोगस्य व्यावर्त-नाय चिदवसान इति। चितः परिणामित्वरूपधर्म्मत्वादि-शङ्कानिरासायावसानपदम्। चितौ भोगस्य स्वरूपे पर्यव-सितत्वाच्च कौटस्थ्यादिहानिरित्याशयः। तथाहि प्रमाणा-ख्यवृत्त्यारूढं प्रकृतिपुरुषादिकं प्रमेयं वृत्त्या सह पुरुषे प्रतिबिम्बितं सङ्गच्छते। अतोऽर्थोपरक्तवृत्तिप्रतिबिम्बाव-च्छिन्नं स्वरूपचैतन्यमेव भानं पुरुषस्य भोगः प्रमाणस्य च फलमिति। ततश्च प्रतिबिम्बरूपेणार्थसम्बन्धे द्वारतया वृत्तीनां करणत्वमिति। तदुक्तं विष्णुपुराणे। "गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति। अन्तःकरणरूपाय तस्मै विश्वात्मने नमः" इति। राज्ञो हि करणवर्गः स्वामिने भोग्यजातं समर्पयतीति दृष्टमिति। भोग-शब्दार्थस्याभ्यवहरणम् आत्मसात्करणमिति यावत्। स च देहादिचेतनान्तेषु साधारणः। विशेषस्त्वयम्। अपरिणामित्वात् पुरुषस्य विषयभोगः प्रतिबिम्बादान मात्रम्। अन्येषां तु परिणामित्वात् पुष्ट्यादिरपीति। अयमेव च परिणामरूपः पारमार्थिको भोगः पुरुषे प्रतिषिध्यते "बुद्धेर्भोग इवात्मनोऽविद्यादिभिरिति" मन्तव्यम्। अस्मिन् कृते पुरुषस्यापि फलव्याप्यता सिद्धा चिद-वसानतायाः एवात्र भोगत्ववचनादिति। ननु कर्त्तुरेव लोके क्रियाफलभोगो दृष्टः। यथा सञ्चरत एव सञ्चारोत्थ-दुःखभोग इति तत् कथं बुद्धिकृतधर्म्मादिफलस्य सुखा-द्यात्मकाया अर्थोपरक्तवृत्तिदृष्टेर्भोगः पुरुषे घटेतेत्या-शङ्कायामाह। "अकर्त्तुरपि फलोपभोगोऽन्नाद्यवत्" सू०। बुद्धिकर्म्मफलस्यापि दृष्टेरुपभोगस्तदकर्त्तुरपि पुरुषस्य युक्तः अन्नाद्यवत्। यथान्यकृतस्यान्नादेरुपभोगो राज्ञो भवति तद्वदित्यर्थः। अविवेकस्य स्वस्वामिभावस्य वा भोगनियामकत्वात् तु नातिप्रसङ्गः। सुखदुःखादेः कर्म्म-फलत्वमभ्युपेत्य बुद्धिगतं कर्म्मफलं पुरुषो भुङ्क्त इत्यु-क्तम्। इदानीं पुरुषगतभोगस्यैव कर्म्मफलत्वं स्वीकृत्य बुद्धिकर्म्मणा पुरुष एव फलवत्पद्यत इति सुख्यसिद्धान्त-माह। "अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः" सू०। अथवा कर्तरि फलमेव न भवति सुखं भुञ्जीयेत्यादि-कामनाभिभोगस्यैव फलत्वात्। अतो भोक्तृनिष्ठमेव फलं भवति "यास्कविहितं फलमनुष्ठातरीति" यास्केन कर्त्तुः फलावगमस्तु तत्सिद्धेरकर्तृनिष्ठाया भोगाख्यसिद्धेः कर्त्रैक्यद्वारविवेकादित्यर्थः। योऽहं करोमि स एवाहं भुञ्ज इति हि लौकिकानुभव इति। या च सुखं मे भूयादित्यादिकामना सा पुत्रो मे भूयादितिवत् फलसाधनत्वे नैवोपपद्यते। भोगस्तु नान्यस्य साधनम्। अतः स एव फलमिति सुख्यः सिद्धान्तः। भोगस्य पुरुषस्वरूपत्वेऽपि वैशेषिकाणां मते औलवत् कार्यता बोध्या सुखाद्यवच्छिन्नचितेरेव भोगत्वात्। अस्मिंश्च भोगस्य फलत्वपक्षे दुःखभोगाभाव एवापवर्गो बोध्यः। अथवा भोग्यतारूपस्वत्वसम्बन्धेन सुखदुःखाभावयोरेव फलत्वमस्तु तेन सम्बन्धेन धनादेरिव सुखादेरपि पुरुषनिष्ठ-त्वादिति" प्र०भा०युक्तञ्चैतत् "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति" श्रुत्या कामादेरन्तःकरण-धर्म्मत्वोक्तेस्तत्फलस्य सुखादेस्तद्ध-र्म्मौचित्यात्। तेषां मनोधर्म्मत्वमिति सांख्यादीनां मतमेव वेदान्तिनाम् "तदुगुणसारत्वादिति" या०सू०। तथैव भाष्यकृता निर्णीतत्वात्। इयांस्तु विशेषः सांख्यैर्विषयेष्वपि त्रिगुण-कार्य्यत्वात् सुखादिकमस्तीतिमन्यन्ते यथोक्तम्" सां०कौमु-द्याम्। "सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावाज्ज्ञानात्मम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्

कस्य हेतोः ? स्वामिनं प्रति तस्याः सुखरूपसम्बन्धत्वात् । सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः ? ताः प्रति तस्या दुःखरूपसम्बन्धत्वात् । एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः ? तत्प्रति तस्या मोहरूपसम्बन्धत्वात् । अनया च स्त्रिया सर्वे भावा व्याख्याताः । तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात् । तस्मात् सुखदुःखमोहैरिव विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उद्भाव्यन्ते एवं दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति" । सां० सूत्रे प्र० भाष्ये चोक्तम् ।

"सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मात्मकद्रव्यजन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वात् 'कान्तादिवदिति कारणगुणानुसारेणैव कार्यगुणौचित्यं चात्रानुकूलस्तर्कः श्रुतिस्मृतयोऽपीति मन्तव्यम् । ननु विषयेषु सुखादिमत्त्वे प्रमाणं नास्ति । अहं सुखीत्याद्येवानुभवात् तत् कथं कान्तादिविषयो दृष्टान्त इति चेन्न सुखाद्यात्मकबुद्धिकार्य्यतया स्रक्चन्दनसुखमित्याद्यनुभवेन च विषयाणामपि सुखादिधर्मकत्वसिद्धेः श्रुतिस्मृतिप्रामाण्याच्च । किञ्च यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते तस्यैव सुखाद्युपादानत्वमपरिकल्प्यान्यस्योपादानत्वकल्पने कारणद्वयकल्पनागौरवम् । अपि चान्योऽन्यसंवादेन प्रत्यभिज्ञया च विषयेषु सर्वपुरुषसाधारण्यस्थिरसुखसिद्धिः । तत्सुखमहत्त्वायात्मन्ये वृत्तिनियमादिकल्पनागौरवं च फलसुखत्वान्न दोषावहम् । अन्यथा प्रत्यभिज्ञयावयव्यसिद्धिप्रसङ्गात् तत्कारणादिकल्पनागौरवादिति । विषयेऽपि सुखादिकं च मार्कण्डेये प्रोक्तम् ।"तत् सन्तु चेतस्यथवापि देहे सुखानि दुःखानि च किं ममात्र" इति । अहं सुखीत्यादिप्रत्ययस्तु अहं धनीत्यादीप्रत्ययवत् स्वस्वामिभावाख्यसम्बन्धविषयकस्तेषां प्रत्ययानां समवायसम्बन्धविषयकत्वखण्डनिरासार्थं तु सुखिदुःखिमूढेभ्यः पुरुषो विविच्यते शास्त्रेष्विति । शब्दादिषु च सुखाद्यात्मताव्यवहार एकार्थसमवायात् । अस्तु वा शब्दादिषु साक्षादेव सुखसत्त्वप्रमाणेभ्यः । विषयगतसुखादेश्च बुद्धिमात्रग्राह्यत्वं फलबलात् । यत्तु विषयासम्प्रयोगकाले शान्तिसुखं सात्त्विकं सुषुप्त्यादौ व्यज्यते तदेव बुद्धिधर्म्म आत्मसुखमुच्यत इति" ।

वैशेषिकादयस्तु सुखादिकमात्मनएवधर्म्मः "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणाएते आत्मनः स्युश्चतुर्दश" इति भाषा० उक्तेः । मनसोऽणुत्वाङ्गीकारेण तेषां तद्गुणत्वे ज्ञानसुखादीनामप्रत्यक्षत्वापत्तेः । प्रत्यक्षे चाश्रयमहत्त्वस्य हेतुत्वात् मनसश्च ज्ञानायौगपद्यान्यथानुपपत्त्यैव मनसोऽणुत्वेन महत्त्वाभावादिति युक्तिं प्रदर्श्य श्रुतौ मनोधर्म्मत्ववचनन्तु आयुर्घृतमित्यादिवदौपचारिकमित्यङ्गीचक्रुः । तदेतन्मतमसमीचीनम् एकदा हृदावगाहे सकलदेहव्यापिशैत्योपलब्धेः क्वत्यगीताभिनयादेरेकदा श्रवणदर्शनादेर्दर्शनात् मनसोऽणुत्वासिद्धेः श्रौतमनोधर्म्मत्वस्य निमित्तपरत्वकल्पनेऽपि "अन्नमशितं त्रेधा विधीयते तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमं तन्मांसं योऽणिष्ठस्तन्मन" इति छा०उ०श्रुत्या "अन्नमयं हि सौम्य ! । मन" इत्युक्तस्य मनसोऽन्नविकारत्वस्य समर्थनाय प्रवृत्तया बोधितस्य मनसोऽन्नजन्यत्वस्य अन्नभोजनोपचयापचयाभ्यां तदुपष्टम्भासावगतेर्नाणुमानता मनस इति आगमविरोधे अनुमानाप्रवृत्तेः अङ्गीकृतञ्च तैरपि शङ्खदृष्टान्तेन प्राण्यङ्गत्वहेतुना नरकपालशुचित्वानुमाने "नारं स्पृष्ट्वास्थि संस्नेहं सचेलं जलमाविशेत्" मनुस्मृत्या बाधात्प्रामाण्यमतः प्रकृतेऽपि तथेति । मनसोऽनणुत्वाभिप्रायेणैव "क्रमशोऽक्रमशश्च वृत्तयः" सां० सूत्रे मनसोऽनणुत्वनिरासेन युगपद्वृत्तयोऽङ्गीकृताः । तथा सांख्यकारिकाकौमुद्योक्तम् । "युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा । दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः" का० "दृष्टे यथा यदा सन्तमसान्धकारे विद्युत्सम्पातमात्राद्ग्राह्यमभिसुखमतिसन्निहितं पश्यति तदा खल्वालोचनसङ्कल्पाभिमानाध्यवसाया युगपदेव प्रादुर्भवन्ति, यतस्तत उत्पत्य तत्स्थानादेकपदेऽपसरति । क्रमशश्च यदा मन्दालोके प्रथमं तावद्वस्तुमात्रं सम्मुग्धमालोचयति अथ प्रणिहितमनाः कर्णान्ताकृष्टसशरः कुञ्चितपादः शिक्षितज्याभण्डलीकृतकोदण्डः प्रचण्डतरः पाटच्चरोऽयमिति निश्चिनोति अथ च मां प्रत्येतीत्यभिमन्यते अथाध्यवस्यति अपसराभीतः स्थानादिति । परोक्षे तु अन्तःकरणत्रयस्य बाह्येन्द्रियवर्ज्जं वृत्तिरित्याह अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः । अन्तःकरणत्रयस्य युगपत् क्रमेण च वृत्तिर्दृष्टपूर्विकेति । अनुमानागमस्मृतयोहि परोक्षेऽर्थे दर्शनपूर्वाः प्रवर्त्तन्ते नान्यथा । यथा दृष्टे तथा, अदृष्टेऽपीति योजना" कौ० आकरेऽस्य प्रपञ्चः । तच्च सुखं त्रिविधम्" । यथा

"सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । ३६ । अभ्यासाद्रमते यत्र दुःखान्तञ्च नियच्छति । यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९ । न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०"गीतोक्तेः । "सुखस्य त्रैविध्यं प्रतिजानीते सुखन्विति । स्पष्टोऽर्थः ३६ । तत्र सात्त्विकं सुखमाह अभ्यासादिति सार्द्धेन । यत्र यस्मिन् सुखे अभ्यासाद्रमते न तु विषयसुखवत् सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखस्यान्तमवसानं नितरां यच्छति प्राप्नोति । कीदृशं, यत्तत् किमपि अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वाद्दुःखवदिव भवति परिणामे त्वमृतसदृशं आत्मविषया बुद्धिरात्मबुद्धिस्तस्याः प्रसादो-रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततोजातं यत् सुखं तत्सात्त्विकं प्रोक्तं योगिभिः ३७ । राजसं सुखमाह विषयेति । विषयाणामिन्द्रियाणाञ्च संयोगात् यत्तत् प्रसिद्धं स्त्रीसंसर्गादिसुखं अमृतसुषमा यस्य तादृशं भवति । अग्रे प्रथमं परिणामे च विषतुल्यं दृश्यमानत्व च दुःखहेतुत्वात् तत् सुखं राजसं स्मृतम् ३८ । तामसं सुखमाह यदिति । अग्रे च प्रथमक्षणे अनुबन्धे च पश्चादपि यत्सुखमात्मनो मोहकरम् । तदेवाह निद्रा च आलस्यञ्च प्रमादश्च कर्त्तव्यावधानराहित्येन मनोव्याक्षेपेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतम् ३९ । अनुक्तमपि संदृश्यन् प्रकरणार्थमुपसंहरति न तदिति त्रिभिः । एभिः प्रकृतिसंभवैः सत्त्वादिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातम् अन्यद्वा यत् स्यात्तत् पृथिव्यां मनुष्यादिषु दिवि देवेषु च क्वापि नास्तीत्यर्थः" श्रीधरः ।

वैषयिके सुखदुःखे च इष्टानिष्टविषयेन्द्रियसन्निकर्षजन्यज्ञानात् जायमाने अनुभूयेते क्षणिके च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ! इति गीतोक्तेः । वैषयिकसुखस्य च क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव "त्याज्यं सुखं विषयसङ्गमजन्म पुंसाम्" इत्युक्तेः प्रागुक्तपातञ्जलसूत्राच्च विषयेन्द्रियसंयोगाज्जातन्तु सुखं राजसं प्रागुक्तगीतावाक्यात् । तत्र विषयाश्च शब्दस्पर्शरूपरसगन्धाः यथायथं तद्वन्तश्च तत्र शब्दविशेषरूप गीतादिषु श्रवणेन्द्रियसंबद्धेषु यत् सुखं तत् वैषयिकमेव किन्तु आत्मोपासनाङ्गत्वेन गीतादिकमपि चित्तैकाग्र्यतासम्पादनद्वारा मोक्षसाधनं भवति तदुक्तं या० स्मृतौ मिताक्षरायाञ्च ।

"यस्य पुनश्चित्तवृत्तिर्निरोधारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्य्यमित्याह । 'यथाविधानेन पठन् सामगानमविच्युतम् । सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति' या० "स्वाध्यायावगतमार्गानतिक्रमेण सामगानं सान्नोगानात्मकत्वेऽपि गानमिति विशेषणम् अगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितम् । सावधानः सामध्वन्यनुसूतात्मैकाग्र्यचित्तवृत्तिः पठन् तदभ्यासवशात्तत्र निष्णातः शब्दाकारब्रह्मण उपासने परब्रह्माधिगच्छति । तदुक्तम् । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति" । यस्य पुनर्वैदिक्यादीतौ चित्तं नाभिरमते तेन लौकिकगीतानुसृतात्मोपासनङ्कार्यमित्याह । "अपरान्तकसुक्लोष्यं मद्रकम्रकरीन्तथा । औवेणकं सरोविन्दुसुत्तरङ्गोतकानि च । कृष्णगाथापाणिकादत्तविहिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम्" या० । अपरान्तकोल्लोष्यमद्रकप्रकर्य्यौवेणकसरोविन्दुसहितञ्चोत्तरमित्येतानि प्रकरणाख्यानि सप्त गीतकानि । चमढादासारितवर्द्धमानकादिमहागीतकानि गृह्यन्ते । गाथाद्यास्तस्रोगीतिका गृह्यन्ते । कृष्णगाथाद्यास्तस्रोगीतिकाश्चैतदपरान्तकादिगीतजातमध्यारोपितात्मभावन्मोक्ष साधनत्वान्मोक्षसंज्ञितं मन्तव्यम् तदभ्यासश्चैकाग्र्यतापादनद्वारेणात्मैकतापत्तिकारणत्वात् । किञ्च । "वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति" या० । भरतमुनिप्रतिपादितवीणावादनतत्त्ववेदी श्रूयत इति श्रुतिर्द्वाविंशतिविधा सप्तस्वरेषु । तथा हि षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतय ऋषभधैवतौ प्रत्येकन्त्रिश्रुती । गान्धारनिषादौ प्रत्येकं द्विश्रुती इति । जातयस्तु षड्जादयः सप्त शुद्धाः सङ्करजातयश्चैकादशेत्येवमष्टादशविधास्तासु विशारदः प्रवीणः तालइति गीतप्रमाणङ्कथ्यते तत्स्वरूपञ्च तदनुविद्धब्रह्मोपासनतया तालादिभङ्गभयाच्चित्तवृत्तेरात्मैकाग्र्यतायाः सुकरत्वादल्पायासेनैव मुक्तिपथन्नियच्छति प्राप्नोति । चित्तविक्षेपाद्यन्तरायोपेतस्य गीतज्ञस्य फलान्तरमाह । "गीतज्ञोयदि योगेन नाप्नोति परमम्पदम् ।

रुद्रस्यानुचरोभूत्वा सह तेनैव मोदते" या०। गीतज्ञोयदि-कथञ्चिद्योगेन परमम्मदन प्राप्नोति। तर्हि रुद्रस्य सचिवो-भूत्वा तेनैव सह मोदते क्रीडति"मिता०। विदृतिर्गानशब्दे।

सुखं दुःखञ्च न प्रतिनियतविषयजन्यं व्यक्तिभेदेन कालभेदेन देशादिभेदेन च सुखहेतोरपि दुःखहेतुत्वं दुःखहेतोरपि सुखहेतुत्वम्। तथा हि खलादिं प्रति साधुभिरुक्तस्य विनयवाक्यस्यापि तं प्रति दुःखहेतुत्वं कथ-मन्यथा तस्य श्रवणात् खलादेरहितकर्म्मणि प्रवृत्तिः स्यात् एवं वैरिणं प्रत्यपि सामवादस्य दुःखहेतुत्वम् एतदा-शयेनैव "सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः" इति माघे वर्णितम्। तथा चन्द्रकिरणनलिनभ्रमरध्वन्यादेरन्यत्र सुखकरस्यापि विरहिणं प्रति दुःखहेतुत्वम्,। एवंदुःखहेतो-र्विष्ठाहारादेरपि शूकरं प्रति सुखकरत्वम् इति तत्र न वस्तु नियमः। अतएवोक्तम् "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया। हिमसेकविपत्तिरत्र मे नलिनी पूर्व्व-निदर्शनं गता" रघुः एवं कालभेदेऽपि सुखदुःखकरयो-र्विपर्य्ययः यथा शीतकाले दुःखहेतोः ग्रीष्मे सुखहेतुत्वम् एवमन्नादितापस्य शीतकाले सुखकरस्य ग्रीष्मे दुःखकरत्वम् एवं देशभेदेऽपि यथा तिन्तिड्यादेरन्यत्र सेवने रोगादि दुःखदत्वं चारदेशे तु सुखकरत्वम् अतएवोक्तं "किमाश्चर्य्यं चारदेशे प्राणदा यमदूतिकेति"। यथा च वस्तुमात्रस्य त्रिगुणात्मकत्वात् व्यक्तिभेदेन कालादि-भेदेन च सत्त्वरजस्तमसां समुद्रेकात् विपर्य्यस्तरूपता-पत्तिः तथा प्रागुक्तसांख्यतत्त्वकौमुदीवाक्ये स्पष्टैव। अत एव रसादौ लोकसिद्धकारणविपर्य्ययः" सा०द०उक्तः यथा "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्। शोकहर्षा-दयो लोके जायन्तां नाम लौकिकाः। अलौकिकविभा-वत्वं प्राप्नेभ्यः काव्यसंश्रयात्। सुखं सञ्जायते तेभ्यः सर्व्वेभ्योऽपीति का श्रुतिः। ये खलु रामवनवासादयो लोके दुःखकारणानि श्रूयन्ते त एव हि काव्य-नाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारण-शब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः। काव्ये पुनः "सर्व्वेभ्योऽपि विभावादिभ्य सुखमेव जायते" इति नियमाद्र कश्चिद्दोषः। कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इ-त्युच्यते। अश्रुपातादयस्तद्दुःखदुःखत्वाच्चेतसो मताः"।

वैषयिकसुखेषु काव्यादिरसास्वादसुखमलौकिकचमत्कारा-धायकतया ब्रह्मानन्दतुल्यमित्यालङ्कारिका मन्यन्ते यथोक्तम्" सा०द०। "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्या-न्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कार-प्राणः कैश्चित् प्रमातृभिः। स्वाकारवदभिन्नत्वेनायमास्वा-द्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते। इत्युक्तप्रकारो बाह्यमेयविसुखतापादकः कश्चनान्तरो धर्म्मः सत्त्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशलक्षणचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्तार-रूपो विस्तयापरपर्य्यायः"। "रसे सारश्चमत्कारः सर्व्व-त्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः"। "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति"। यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तादिशा रसस्वास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति कालनिकं भेदमुररीकृत्य कर्म्मकर्त्तरि वा प्रयोगः। तदुक्तम्। "रस्यमानतामात्रसारत्वात् प्रकाशघनरूपादनन्य एव हि रस" इति च। "आनन्दजाश्रुभिरनुस्रियमाणमार्गान्" "सत्तमान-न्दमविन्दत द्विज" इति च नैषधम् एवं तत्तत्सर्व्वसर्गेषु उषान्तिमश्लोकेषु उदा०। "आनन्दाद्धेव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दे प्रविलीयन्ते" इति श्रुतिः। ५विष्णौ। "आनन्दोनन्दनोनन्द" विष्णुस०। ६आदिगुरौ-त्रिकले दृगणे ७षड्भिर्वंशैरगणै रचिते दण्डकछन्दोभेदे। आनन्दयति आ+नन्दि-णिच्-अच्। ८आनन्दकरे त्रि०। षष्टिसंवत्सरमध्येऽष्टाचत्वारिंशे ४वर्षभेदे पु०। "निष्प्रत्तिः सर्व्वग्रसानां सर्वग्रसमहार्घता। इतं तैलं समं याति आनन्दे नन्दिनी प्रजा" ज्योति०तल्लक्षणम्। १०मद्ये न०। ११गटहभेदे च तल्लक्ष्म गटहशब्दे वक्ष्यते। १२विष्णु-गणभेदे पु०।

आनन्दकानन न० आनन्दहेतुः काननम्। अविमुक्ते काशीक्षेत्रे आनन्दवनादयोऽप्यत्र। तस्यानन्दवननामनि-रुक्तिः काशीखण्डे २६ अ० दर्शिता यथा अविमुक्तं प्रकृत्य। "अस्यानन्दवनं नाम पुराऽकारि पिनाकिना। क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरम्। आनन्दकन्दवी-जानामङ्कुराणि यतस्ततः। क्षेत्राणि सर्वक्षेत्राणि तस्मि-

ज्ञानन्दकानने"। तस्य चानन्दहेतुत्वं तत्र मरणेन तत्त्वज्ञानसम्पादनद्वारा ब्रह्मस्वरूपानन्दप्राप्तिहेतुत्वात् यथोक्तं जाबालोपनिषदि अविमुक्तं प्रकृत्य "तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूय मोक्षी भवति"।

आनन्दज त्रि० आनन्दात् जायते जन–ड ५त०। आनन्दजातेऽश्रुपातादौ सत्त्वगुणोद्रेके हि चेतसो द्रुतत्वात् नेत्रादिद्वारेण तत्प्रेरितस्य जलबिन्दोः क्षरणं भवति यथोक्तम्"सा०द०"अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसोमताः" "आनन्दजाम्बुभिरनुक्षियमाणमार्गान्" नैष०।

आनन्दथु पु० आ+नदि–भावे अथुच्। आनन्दे सुखे नन्दथुरत्र "यस्मासौ तस्य नन्दथुः" भट्टिः।

आनन्ददत्त पु० आनन्दोदत्तो येन। मेहने शब्दचि० मेहनाद्धि प्रचुरानन्दोभवतीति तस्य तथात्वम्।

आनन्दन न० आनन्दयत्यनेन आ+नदि–णिच् करणे ल्युट्। यातायातकाले मित्रादेः १आरोग्यस्वागतादिप्रश्ने २तात्कालिकाल्लिङ्गने च। भावे ल्युट्। ३सुखजनने।

आनन्दपट पु०आनन्दजनकः पटः। नवोढावस्त्रे हारा०।

आनन्दपूर्ण पु० आनन्देन पूर्णस्तृप्तः। सदाप्तकामत्वेन कास्यान्तराभावात् परितृप्ते परमात्मनि। २अतिशयिता नन्दयुक्ते त्रि०॥ आनन्दप्रचुरादयोऽप्युभयत्र। नैयायिकादिमते तु आनन्देन दुःखाभावेन पूर्णः अपरिच्छिन्नतया विभुत्वात् इति इति भेदः।

आनन्दप्रभव पु० आनन्दःप्रभवः प्रभवापादनं यस्य। १वीर्ये रेतसि तस्य सात्विकानन्दोदयादेव प्रवृत्तेस्तथात्वम्। २भूतादिप्रपञ्चे "आनन्दाद्धेव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति" इति श्रुत्या भूतानां ब्रह्मस्वरूपानन्दभवत्वात् तथात्वम्।

आनन्दभुज् पु० आनन्दं भुङ्क्ते भुज–क्विप्। सुषुप्तावस्थापन्ने प्राज्ञे जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतिः यथा लोके आयासशून्यः सुखी आनन्दभुगुच्यते तथा सुषुप्तोऽपि सर्वायासशून्यतया आनन्दभुगित्युच्यते।

आनन्दभैरव पु० कर्म०। शिवमूर्त्तिभेदे तस्य पत्नी ङीप्। प्रकृतिस्वरूपायां परदेवतायाम् तत्पत्न्यां स्त्री अनयोरेव रुद्रयामले प्रश्नप्रतिवचनकर्तृत्वम्।

आनन्दमय पु० आनन्दः प्रचुरोऽस्य प्राचुर्ये मयट्। प्रचुरानन्दस्वरूपे परमात्मनि "आनन्दमयोऽभ्यासात्" शा०सू०। यथा च आनन्दप्रचुरत्वात् तस्य आनन्दमयत्वं तथा तद्ब्रह्मे निरूपितम् यथा "तैत्तिरीयकेऽन्नमयं मनोमयं विज्ञानमयं चानुक्रम्यान्नायते "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमय" इति तत्र संशयः किमिहानन्दमयशब्देन परएवात्मोच्यते यत्प्रकृतं "सत्यं ज्ञानमनन्तं ब्रह्मेति" किं वान्नमयादिवत् ब्रह्मणोऽर्थान्तरमिति। किन्तावत्प्राप्तं ब्रह्मणोऽर्थान्तरमसुख आत्मानन्दमयः स्यात्कस्मात्? अन्नमयासुख्यात्मप्रवाहपतितत्वात्। अथापि स्यात्सर्वान्तरत्वादानन्दमयोमुख्य एवात्मेति, न स्यात्प्रियाद्यवयवयोगाच्छारीरत्वश्रवणाच्च। मुख्यश्चेदात्मा स्यात् न प्रियादिसंसर्गः स्यात् दृश्यते च "तस्य प्रियमेव शिर"इत्यादि श्रूयते। शारीरत्वञ्च श्रूयते। "तस्यैकएव शारीर आत्मा यः पूर्वस्येति"। तस्य पूर्वस्य विज्ञानमयस्यैकएव शारीर आत्मा यएष आनन्दमय इत्यर्थः। न च सशरीरस्य सतः प्रियाप्रियसंसर्गोवारयितुं शक्यः। तस्मात् संसार्यैवानन्दमय आत्मादृत्येवं प्राप्ते दृदृश्यते। परएव आनन्दमयो भवितुमर्हति कुतः? अभ्यासात्परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुशस्त्वोऽभ्यस्यते आनन्दमयं प्रस्तुत्य "रसोवै स"इति तस्यैव रसत्वमुक्त्वोच्यते"रसं ह्येवायं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दोन स्यादेष ह्येवानन्दयति सैषानन्दस्य मीमांसा भवति"। "एष आनन्दमयमात्मानमुपसंक्रामति" "आनन्दं ब्रह्मणोविद्वान् न बिभेति कुतश्चन" "आनन्दो ब्रह्मेति व्यजानादिति" च। श्रुत्यन्तरे च "विज्ञानमानन्दं ब्रह्मेति" ब्रह्मस्वरूपेवानन्दशब्दोदृष्टः। एवमानन्दशब्दस्य बहुशस्त्वोब्रह्मस्वरूपाभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते। यत्तूक्तम् अन्नमयाद्यसुख्यात्मप्रवाहपतितत्वादानन्दमयस्याप्यसुख्यात्मत्वमिति। नासौ दोषः आनन्दमयस्य सर्वान्तरत्वात्। मुख्यमेव ह्यात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूर्धादिपक्षाद्रुतताद्यादिप्रतिभावत् ततोऽन्तरमित्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति गृह्णत् प्रतिपत्तिसौकर्य्यापेक्षया सर्वान्तरं मुख्यमानन्दमयमात्मानमुपदिदेशेति श्लिष्टतरम्। यथाऽरुन्धतीनिदर्शने बह्वीष्वपि तारासु मुख्याऽरुन्धतीषु दर्शितासु याऽन्या प्रदर्श्यते सा मुख्यैवारुन्धती भवति एवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्। यत्तु ब्रूषे प्रियादीनां शिरस्त्वादिकल्पनानुपपन्ना मुख्यस्यात्मन इति अतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्य-

दोषः। शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् न पुनः साक्षादेव सशरीरत्वं संसारित्वं तस्मादानन्दमयः परएवात्मा। "विकारशब्दान्नेति चेन्न प्राचुर्य्यात्" सू०। अत्राह नानन्दमयः परात्मा भवितुमर्हति कुतः? विकारशब्दात्। प्रकृतिवचनादयमन्यः शब्दो विकारवचनः समधिगत आनन्दमय इति मयटोविकारार्थत्वात् तस्मादन्नमयादिशब्दवद्विकारविषय एवायमानन्दमयशब्द इति चेन्न प्राचुर्य्यार्थेऽपि मयटः स्मरणात्"तत्प्रतिकृतवचने मयड्वृत्तिः"(पा०)प्रचुरतायामपि हि मयट् स्मर्य्यते। यथान्नमयो यज्ञ इति अन्नप्रचुर उच्यते। आनन्दप्रचुरत्वञ्च ब्रह्मणः मनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात् तस्मात्प्राचुर्य्यार्थे मयट्। "तद्धेतुव्यपदेशाच्च" सू०। इतश्च प्राचुर्य्यार्थे मयट् यस्मादानन्दहेतुत्वं ब्रह्मणोव्यपदिशति श्रुतिः "एष ह्येवानन्दयातीति"। आनन्दयतीत्यर्थः। योह्यन्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति यथा लोके योऽन्येषां धनित्वमापादयति स प्रचुरधन इति गम्यते तद्वत्। तस्मात्प्राचुर्य्यार्थेऽपि मयटः सम्भवादानन्दमयः परएव आत्मा। "मान्त्रवर्णिकमेव च गीयते"सू०। इतश्चानन्दमयः परएवात्मा यस्माद्"ब्रह्मविदाप्नोति परम्" इत्युपक्रम्य हि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यस्मिन्मन्त्रे यद्ब्रह्म प्रकृतं सत्यज्ञानानन्तविशेषणैर्निर्धारितं, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त,यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वान्तरं, यस्य विज्ञानायाऽन्योऽन्तर आत्मेति प्रक्रान्तं, तन्मान्त्रवर्णिकमेव ब्रह्मेह गीयते"योऽन्योन्तर आत्मानन्दमय"इति। मन्त्रब्राह्मणयोरैकार्थ्यं युक्तम् अविरोधात्। अन्यथा हि प्रकृतज्ञानाप्रकृतप्रक्रिये स्याताम्, न चान्नमयादिभ्यइवानन्दमयादन्योन्तर आत्माऽभिधीयते एतच्चिन्त्यैव च सैषा भार्गवी वारुणी विद्या "आनन्दो ब्रह्मेतिव्यजानादिति"। तस्मादानन्दमयः परएवात्मा" भा०भा०।

२आनन्दप्रचुरे त्रि०सर्व्वावस्थासम्भूयसुषुप्तावस्थापन्ने ३आनन्दमयकोषाभिमानिनि जीवे च। "काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक्। पुण्यभोगे भोगशान्तौ निद्रारूपेण जायते। कादाचित्कीत्यतोनात्मा स्यादानन्दमयोऽयम्। बिम्बभूतोय आनन्द आत्मासौ सर्व्वदा स्थितः"पञ्चद० अतः स्त्रीत्वम्। पारमार्थिकानन्दरूपपरात्मस्वरूपत्वेऽपि सुषुप्तौ तस्य स्फुरणेऽपि च स्वल्पकालिकत्वात् ब्रह्मानन्दवल्लक्षणम्। स्त्रियां ङीप्। साच ४दुर्गामूर्त्तिभेदे स्त्री०।

आनन्दमयकोष पु० आनन्दमयस्य परमात्मनः कोष इवावरकः। वेदान्तिमतसिद्धपञ्चकोषमध्ये पञ्चमे कोषे अविद्यास्वरूपे कारणशरीरे। आनन्दमयकोषस्वरूपादिकमुक्तं विवे० चू०।

"आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः। पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं भूत्वानन्दति यत्र साधुतनुभृन्मात्रः प्रयत्नं विना। आनन्दमयकोषस्य सुषुप्तौ स्फूर्त्तिरुत्कटा। स्वप्नजागरयोरीप्रदिष्टसन्दर्शनादिना। नैवायमानन्दमयः परात्मा सोपाधिकत्वात् प्रकृतेर्विकारात्। कार्य्यत्वहेतोः सुकृतक्रियायां विकारसङ्गतसमाहितत्वात्। पञ्चानामपि कोषाणां निषेधे युक्तितः श्रुतेः। तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते। योऽयमात्मा स्वयंज्योतिः पञ्चकोषविलक्षणः। अवस्थात्रयसाक्षी सन् निर्व्विकारो निरञ्जनः। सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता"।

आनन्दमयशब्देऽधिकमुक्तम्। "गुहाहितं ब्रह्म यत्तत् पञ्चकोषविवेकतः। बोद्धुं शक्यं ततः कोषपञ्चकं प्रविच्यताम्। देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः। ततः कर्त्ता ततोभोक्ता गुहा सेयं परम्परा" पञ्चद०।

आनन्दसम्भव पु० आनन्दस्य ब्रह्मानन्दस्य सम्भवः प्रकाशः। तत्त्वज्ञानप्रयोज्ये ब्रह्मानन्दस्फुरणे। "आनन्दसम्भवे लीनोनापश्यद्भयं सुने! पुरा०। सम्भवत्यस्मात् अपादाने ल्युट् आनन्दः सम्भवोऽस्य। २भूतादौ त्रि० आनन्दप्रभवशब्दे विवृतिः।

आनन्दा स्त्री आनन्दयति सेवनात् आ+नदि–णिच्–अच्। विजयायाम् (सिद्धि) राजनि०।

आनन्दार्णव पु०आनन्दः अर्णव इव असीमत्वात्। ब्रह्मानन्दे अखण्डानन्दरूपत्वादपरिच्छित्वाच्चास्य तथात्वम्। प्रमोदार्णवादयोऽत्र। "ब्रह्म प्रमोदार्णवमिति" नैष०।

आनन्दि पु०आ+नदि–इन्। १हर्षे "कौशल्यानन्दिवर्द्धनोराम" इति रामायणम्। २कौतुके च।

आनन्दित त्रि०आ+नदि–क्त। १हर्षयुक्ते सुखिनि, आ+नदि–णिच्–क्त। यस्यानन्दो जनितस्तस्मिन् २अभिनन्दिते त्रि०।

आनन्दिन् त्रि० आ+नदि–णिनि। १आनन्दयुक्ते णिच्–

णिनि । २आनन्दकारके त्रि० उभयत्र स्त्रियां ङीप् ।

आनन्दी स्त्री आनन्द्यति आ+नदि–णिच्–अच्–गौरा० ङीष् (आकन पाता(दृक्षभेदे शब्दच० ।

आनमन न०आनम्यते वशीक्रियतेऽनेन करणे ल्युट् । सन्नो-षार्थानुगत्वादौ १आनतौ । भावे ल्युट् । २सम्यग्नमने । णिच्+ल्युट् । नम्रतापादके ३व्यापारे ।

आनमित त्रि० आ+नम–णिच्–क्त । आवर्ज्जिते आनती-कृते अनुकूलीकृते ।

आनम्य त्रि० आ+नम–णिच्–कर्म्मणि यत् । १नम्रीकार्य्ये आ+नम–ल्यप् । २नमस्कृत्यर्थे अव्य० वा मलोपे तुकि आनत्येत्यपत्र अव्य० ।

आनय पु० आ+नी–भावे अच् । देशात् देशानन्तरनयने । आनीयते वेदाद्यध्ययनायात्र आधारे अच् । उपनयनसं-स्कारे हेम० । भावे ल्युट् । आनयनमप्यत्र न० ।

आनर्त्त ड० आन्दत्यत्र आधारे घञ् । १नटत्यशालायां २युद्धे च तत्र हि वीरैर्हर्षात् नटत्यमिव क्रियते इति तस्य तथात्वम् । ३सूर्य्यवंश्ये राजभेदे "मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्याति-रेव च" इत्युपक्रम्य "शर्य्यातेर्मिथुनं त्वासीदानर्त्तोनाम विश्रुतः । पुत्रः, कन्या सुकन्याख्या,या पत्नी च्यवनस्य हि । आनर्त्तस्य तु दायादोरेवोनाम महाद्युतिः । आनर्त्तो-विषयश्चासीत् पुरी चास्य कुशस्थली । रेवस्य रैवतः पुत्रः ककुद्मीनाम धार्म्मिकः । ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीम् । स कन्यासहितं स्वृत्वा गान्धर्व्वं ब्रह्मणोऽन्तिके । मुहूर्त्तभूतं देवस्य गतं बहुयुगं प्रभो ! । आज-गाम युगैर्वाथ स्वां पुरीं यादवैर्वृताम् । कृतां द्वारवतीं नाम्ना वज्रद्वाराकृतोरणाम् । भोजवृष्ण्यन्धकैर्गुप्तां वासु-देवपुरोगमैः । ततस्तद्रैवतोत्पात्य यथातत्त्वमरिन्दम ! । कन्यां तां बलदेवाय सुव्रतां नाम रेवतीम् । दत्त्वा जगाम शिखरं मेरोस्तपसि संस्थितः" हरिवं० १०अ० । तत्कृते ४देशभेदे आनर्त्तनामसूर्य्यवंशकृतत्वात्तस्य देशस्य आनर्त्तनामत्वम् । तत्रैव देशे च इक्ष्वाकुपुत्रसूर्य्य-स्यस्य पश्चात् राज्यमासीत् यथोक्तम्"

"आनर्त्तो नाम ते राष्ट्रं भविष्यत्यायतं महत् । तद्ग-विष्यमहं मन्ये कालयोगेन पार्थिव ! । अध्यास्यतां यथाकालं पार्थिवं दृक्षसुक्षमम् । यावातमपि वंशस्ते समेष्यति च यादवम् । अनुवंशञ्च वंशस्ते सोमस्य भविता किल । एष मे विभवस्तात तमेतं विषयोत्तमम् । दत्त्वा यास्यामि तपसे सागरं वरुणालयम् । लवणेन समायुक्तस्त्वमिमं विषयोत्तमम् । पालयस्वाखिलं तात ! स्वस्य वंशस्य वृद्धये । बाढमित्येव हर्य्यश्वः प्रतिजग्राह तत्पुरम् । स च दैत्यस्तपोवासं जगाम वरुणालयम् । हर्य्यश्वश्च महातेजा दिव्ये गिरिवरोत्तमे । निवेशयामास पुरं वासार्थममरोपमः । आनर्त्तं नाम तद्राष्ट्रं सुराष्ट्रं गोधनायुतम् । अचिरेणैव कालेन सवृद्धं प्रत्यपद्यत । अनूपविषयञ्चैव वेलावनविभूषितम् । निविष्टं क्षेत्रशताढ्यं प्राकारपरिखासंकुलम् । यशास स नृपः स्फीतं तद्राष्ट्रं राष्ट्रवर्द्धनः" ८४अ० । अत्र च सप्तद्वीपवेलादिकं तत्सीमादिक-मुक्तम् । ५तद्देशवासिजनेषु तद्राजेषु च ७चन्द्र-वंश्ये राजभेदे पु० । "वर्षकेतोस्तु दायादो विभुर्नाम प्रजे-श्वरः । आनर्त्तस्तु विभोः पुत्रो सुकुमारस्ततोऽभवत्" हरि वं० २२ । तत्र तद्देश राजपरत्वे "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः" भा०स०२४अ० । देशवासिपरत्वे । "उक्तवांश्च महाबाहो ! कासौ दृष्णिकुलाधमः । वासु-देवः स मन्दात्मा वसुदेवसुतो गतः । तस्य युद्धार्थिनोदर्पं युद्धे नाशयिताऽस्म्यहम् । आनर्त्ताः ! सत्यमाख्यात तत्र गन्ताऽस्मि यत्र सः" इति आनर्त्तवासिनः प्रति साल्व-वाक्यम् देशरपत्वे । "आनर्त्तेषु विमर्दञ्च क्षेपञ्चात्मनि कौरव ! इति भा०व० १४ अ० "आनर्त्तमेवाभिमुखाः शिवेन गत्वा धनुर्वेदरतिप्रधानाः" भा०व० १८२ अ० । कृत्तिकादिभिस्त्रिभिस्त्रिभिर्नक्षत्रैः क्रूरत्रयपीड़ितैः क्रमेण देशविशेषराजाशुभस्य दृ०सं० प्रतिपादनात् स्वात्यादिभि स्त्रिभिर्नक्षत्रैः क्रूरत्रयपीड़ितैस्तद्देशन्नृपस्याशुभं भवति यथा बृ०स० कूर्म्मवि० । "वर्गैराग्नेयाद्यैः क्रूरत्रयपीड़ितैः क्रमेण नृपाः । प्राच्यालोमागधिकाः कालिङ्गश्च क्षयं यान्ति । आवन्तोऽथानर्त्तो नृत्यं चायाति सिन्धुसौवीरः । राजा च हारहौरोमद्रेयशोन्यश्च कोणेन्द्रः" । आन्दत्यतीति कर्त्तरि अच् । दृजले न० तस्य तरङ्गरूपेण नृत्यस्येव करणात्तथात्वम् ६नर्त्तके त्रि०भावे घञ् । १०नर्त्तने पु०

आनर्त्तक त्रि० आनर्त्तदेशे भवः धूमा० वुञ् । १आनर्त्तदेश-भवे । आन्दत्यति आ+नृत–ण्वुल् । २समन्ता-नर्त्तके त्रि० । [पुर्य्याम् ।

आनर्त्तपुर न० आनर्त्तदेशस्य प्रधानं पुरम् । द्वारवत्याम्

आनर्त्तीय त्रि० आनर्त्तदेशे भवः वृद्धत्वात् छ । आनर्त्त-देशभवे ।

आनर्थक्य न० अनर्थस्य भावः ष्यञ् । १निष्प्रयोज-

नत्वे प्रयोजनाभावे । "स्तुत्यानर्थक्यमिति चेत्" कात्या० ७।१,८,५, "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जै०सू० । अनेन क्रियाप्रतिपादकभिन्नवेदभागानामानर्थक्योक्तेः वेदान्तवाक्यानां न स्वार्थे प्रामाण्यं सप्तद्वीपा वसुमतीत्यादिवाक्यवत् तेषां भूतार्थोपदेशकत्वात् तथा च उपासनाविधिविशेषतयैव तेषां प्रामाण्यम् इति मीमांसका मन्यन्ते । तदेतन्नतम् पूर्व्वपक्षत्वेनोपन्यस्य "तत्तु समन्वयादिति" शारीरकसूत्रभाष्ये निराकृतं यथा "यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते । यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिविशेषतया समर्थ्यन्ते तद्वत् । प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य । तथा हि शास्त्रतात्पर्य्यविद आहुः । "दृष्टोहि तस्यार्थः । कर्म्मावबोधनञ्चोदनेति क्रियायाः प्रवर्त्तकं वचनम् । तस्य ज्ञानमुपदेयः । तद्भूतानां क्रियार्थेन समाम्नायः" । "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति च" । अतः पुरुषं क्वचिद्विषय विशेषे प्रवर्त्तयत् कुतश्चिद्विषयविशेषाच्चिवर्त्तयच्चार्थवच्छास्त्रम् तच्चैषतया चान्यदुपयुक्तम् । तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात् । सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयते एवमस्तत्तत्कामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम् । कर्मकाण्डे भव्योधर्मोजिज्ञास्यः इह तु भूतं नित्यवस्तु ब्रह्म जिज्ञास्यमिति । तत्र धर्म्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम् । कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । "आत्मा वा अरे द्रष्टव्यः" "योऽयमात्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" । "आत्मेत्येवोपासीत" । "आत्मानमेव लोकमुपासीत" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिषु हि विधानेषु सत्सु कोऽसावात्मा ब्रह्मेत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः नित्यः सर्व्वज्ञः सर्व्वगतोनित्यदृग्नित्यं शुद्धबुद्धमुक्तस्वभावोविज्ञानानन्दं ब्रह्मत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टोमोक्षः फलं भविष्यति । कर्त्तव्यविध्यनुप्रवेशेन वस्तुमात्रकथने ह्यनोपादानासम्भवात् "सप्तद्वीपा वसुमती" "राजासौ गच्छति" इत्यादि वाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात् । नन्वस्तुमात्रकथनेऽपि रज्जुरियं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्त्तनेनार्थवत्त्वं दृष्टं तथेहापि संसार्य्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्त्तनेनार्थवत्त्वं स्यात् । स्यादेवं यदि रज्जुस्वरूपश्रवणादेव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्त्तते श्रुतब्रह्मणोऽपि यथापूर्व्वं सुखदुःखादि संसारित्वधर्मदर्शनात् । "श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति च श्रवणोत्तरकालयोर्मननिदिध्यासनयोर्दर्शनात् । तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माऽभ्युपगन्तव्यमिति" (पूर्व्वपक्षः) । "यद्यपि शास्त्र तात्पर्य्य विदामनुक्रमणम् । दृष्टोहि तस्यार्थः कर्म्मावबोधनमित्येवमादि । तत् धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् । अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानामानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतञ्चेत् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थं नित्यं भूतं नोपदिशतीत्यत्र कोहेतुः ? । न हि भूतमुपदिश्यमानं क्रिया भवति । अक्रियात्वेपि भूतस्य क्रियासाधनत्वात् क्रियार्थएव भूतोपदेश इति चेन्नैष दोषः । क्रियार्थत्वेऽपि क्रियानिर्व्वर्त्तनयोग्यत्वमद्वस्तूपदिष्टमेव । क्रियार्थत्वन्तु प्रयोजनं तस्य,न चैतावता वस्त्वनुपदिष्टं भवति । यदि नामोपदिष्टं किं तव तेन स्यादिति उच्यते । अनवगतात्मवस्तूपदेशस्य तथैव भवितुमर्हति । तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियतदित्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन । अपि च "ब्राह्मणोन हन्तव्यः" इति चैवमाद्या निवृत्तिरूपदिश्यते । न च सा क्रिया नापि क्रियासाधनम् । अक्रियार्थानामुपदेशोऽनर्थकश्चेत् "ब्राह्मणोन हन्तव्यः" इत्यादि निवृत्त्युपदेशानामानर्थक्यं प्राप्तं तच्चानिष्टम् । न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण । नञ्श्रुतिः स्वभावोयत् स्वसम्बन्धिनोऽभावं बोधयति । अभाव बुद्धिस्त्वौदासीन्यकारणम् । सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणोनहन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः । तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादपिषयमानर्थक्याभिधानं द्रष्टव्यम्" भा० । (सिद्धान्त') वाक्यादेः२र्थबोधकताभावे च । मीमांसकमते कार्य्यान्वित एव शब्दानां शक्तिग्रहनियमात् लिङादेश्च कार्य्यताबोधकतया तच्छून्यवाक्यस्यार्थबोधकत्वाभाव इति प्राभाकरामन्यन्ते ।

आनन्द्र त्रि०अनिति अन-उण् आतुः प्राणी तस्येदम् अण् ।

प्राणिसम्बन्धिनि बलादौ । "आनवस्य दृत्सवे गयम्" ऋ०७,१८,१२ । "आनोः सम्बन्धिनो बलस्य" भा० । "चिद्रचस आनवाय" ऋ०६,६२,६ स्त्रियां ङीप् ।

आनव्य न० आनोर्नरस्य इदं यत् । नरसम्बन्धिनि तन्त्रोक्ते मलद्वये । "मायिकं नाम योगेत्थम् पौरुषं कार्म्मणं मलम् । आनव्यं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्वयम्" तन्त्रसारे प्रपञ्चसारः ।

आनस त्रि० अनसः शकटस्य पित्वर्वा इदम् अण् । १शकट सम्बन्धिनि । "द्वयानि वै बानस्त्यानि चक्राणि रथ्यानि चानसानि" शत०ब्रा० । २पित्तसम्बन्धिनि च ।

आनाथ्य न० अनाथस्य भावः ष्यञ् । स्वामिशून्यत्वे ।

आनाम्य त्रि० आ+नम–कर्म्मणि ण्यत् अनिट्कत्वात् न हस्वः । नमस्कार्य्ये ।

आनाय पु० आनीयते मत्स्योऽनेन आ+नी–करणे "जालमानायः" पा० उक्तेः घञ् । मत्स्यधारणार्थे गुणसूत्रादिनिर्म्मिते जाले । अन्यत्र अच् । आनय इत्येव ।

आनायिन् त्रि० आनयति आ+नी–णिनि । १देशाद्देशान्तर प्रापके । आनायोजालमस्यास्ति आनाय+इनि । २जालिके धीवरे "आनायिभिस्तामपकृष्टनक्राम्" "आनायिनस्तद्विचये नदीष्णान्" इति च रघुः । उभयत्र स्त्रियां ङीप् ।

आनाय्य पु० आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ आ+नी–ण्यत् नि० आयादेशः । वैदिकप्रसिद्धे दक्षिणाग्निभेदे । "आनाय्योऽनित्ये" पा० "दक्षिणाग्निविशेष एवेदं निपातनम् स हि गार्हपत्यादानीयतेऽनित्यश्च सततमप्रज्वलनात् वैश्वादिकुलयोनिकत्वेन वैकल्पिकत्वाच्च । अन्यत्र तु यत् आनेयो घटादिः" सि०कौ० वैश्वकुलादेरानीतो दक्षिणाग्निस्तु आनेयएव "वैश्वकुलात् विप्रतोभ्राष्ट्रात् गार्हपत्याद्वा" आश्व०सूत्रे अग्नियोनिविकल्पश्रवणात् गार्हपत्यादानेयस्यैव आनाय्यत्वं नान्यस्य ।

आनाह पु०आ+नह–घञ् । १बन्धे२दैर्घ्ये आनह्यते अपसरत्प्रतिरोधेन बध्यते विण्मूत्रादि अनेन आ+नह+करणे घञ् । २विण्मूत्ररोधसाधने वैद्यकोक्ते रोगभेदे "आमं यकृद्वा निचितं क्रमेण भूयोविबद्धम् विगुणानिलेन । प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति" मा०नि० । वातादिदोषानुक्त्वा स्थानविशेषाश्रयत्वेन तेषां रोगविशेषजनकत्वमुक्तं सुश्रु० । "अत ऊर्द्धं स्थाननसंश्रयं वक्ष्यामः । एवं कुपितास्तांस्तान् शरीरप्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति । ते यदोदरसन्धिवेगं कुर्व्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गनाहविसूचिकातिसारप्रभृतीन् जनयन्ति" । "आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम् । पितरं दुःखितं दृष्ट्वा सुकन्येदमथाब्रवीत्" भा०व०प०१२२अ० ।

आनाहिक पु० आनाहे तत्प्रतीकारे विहितः ठक् । आनाहरोगोपशमनीये विधौ । "आस्थापनं मारुतजे, स्निग्धे स्निग्धे विशिष्यते । पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत्" सुश्रु० ।

आनिचेय त्रि० समन्ताच्चीयते आ+नि+चि–कर्म्मणि यत् । समन्तात् सञ्चयनीये स्त्रियां गौरा०पाठात् ङीन् ।

आनिरुद्ध पुंस्त्री० अनिरुद्धस्यापत्यम् दृष्णित्वात् अण् । अनिरुद्धस्य ऊषायतेरपत्ये स्त्रियां ङीप् । निरुद्धभिन्नस्यापत्ये तु इञ् । आनिरुद्धिरित्येव ।

आनिर्हत पु० अनिर्हत एव स्वार्थे अण् । देवहृदयतया प्रधाने देवभेदे "नम आनिर्हतेभ्य इत्येते ह्येभ्यो लोकेभ्योऽनिर्हताः" शत०ब्रा० "एतानि देवहृदयानि यथा हृदयं प्रधानं तथैतेऽपि प्रधानानि" भा० ।

आनिल त्रि० अनिलस्येदम् अण् । १वायुसम्बन्धिनि अनिलोदेवताऽस्य अण् । २वायुदेवताके हविरादौ स्त्रियामुभयत्र ङीप् । सा च स्वातितारायाम् सा हि अनिलाधिष्ठातृका

आनिलि पु० अनिलस्यापत्यम् इञ् । भीमे स हि पाण्डोः क्षेत्रे कुन्त्यां वायुनोत्पादितः यथा "ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा । ततस्तामागतो वायुर्मृगारूढोमहाबलः । किन्ते कृन्ति ! ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम् । सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम ! । बलवन्तं महाकायं सर्वदर्पप्रभञ्जनम् । तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः" भा०आ०प० १२३ अ० । २हनूमति च तस्य क्षेत्रजित्वे अञ्जनायां वायुना जनितत्वात् तथात्वम् तत्कथा संक्षिप्ता यथा "अहं केशरिणः क्षेत्रे वायुना जगदायुना । जातः कमलपत्राक्ष ! हनूमान्नाम वानरः" भा०व०प० १४०अ० । भीमं प्रति हनूमद्वाक्यम् । अतएव तयोः क्षेत्रभिन्नोत्पन्नत्वेऽपि एकेनोत्पादनात् भ्रातृत्वम् तेन "तद्रूपं दर्शयामास यद्वै सागरलङ्घने । भ्रातुः प्रियमभीप्सन् वै चकार सुमहद्वपुः" "भ्राता मम गुणश्रेष्ठो बुद्धिसत्त्वबलान्वितः रामायणेऽतिविख्यातः श्रीमान् वानरपुङ्गवः" इति च तत्रैवाध्याये तयोर्भ्रातृत्वेनोक्तिः । अनिलसुतादयोऽप्युभयत्र ।

आनीत त्रि० आ+नी–कर्म्मणि क्त । देशाद्देशान्तरं नीते ।

"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता" नाटकम्। [प्रियानीतिरामोरच्योबधे स्थितः" मुग्ध०।

आनीति स्त्री आ+नी-क्तिन्। आनयने "चङ्क्रमित्वा

आनील पु० ईषदर्थे आङ् प्रा०स०। १ईषन्नीलवर्णे २तद्वति त्रि०। ३नीलघोटके पु०हेम०। ४तज्जातिस्त्रियां स्त्री ङीप्

आनु त्रि० अन-उण्। प्राणिनि आनवशब्दे उदा०।

आनुकल्पिक त्रि० अनुकल्पं वेत्ति तद्बोधकग्रन्थमधीते वा उक्था० ठक् १अनुकल्पाभिज्ञे २तद्बोधकग्रन्थाध्येतरि च अनुकल्पेन प्राप्नः ठक्। ३अनुकल्पेन प्राप्ते। अनुकल्पाय हितम् ठक्। ४अनुकल्पसाधने। [वर्त्तमाने।

आनुकूलिक त्रि० अनुकूलं वर्त्तते ठक्। आनुकूल्येन

आनुकूल्य न०अनुकूलस्य भावः कर्म्म वा ष्यञ्। अनुकूलताचरणे १साहाय्ये २अनुगुणतायाञ्च। "यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते" या०स्मृ० "रमतश्चानुकूल्येन ययुः संवत्सरा दश" रामा०। [पश्चाङ्गवादौ।

आनुगङ्ग्य त्रि० अनुगङ्गं भवः परिमुखा० ञ्य। गङ्गा-

आनुगतिक त्रि० अनुगतमनुगमनं भावे क्त तेन निर्वृत्तः अन्नद्यूता० ठक्। अनुगमेन निर्वृत्ते सन्तोषादौ।

आनुगत्य न० अनुगतस्य भावः कर्म्म वा ष्यञ्। १अनुगमनरूपाचरणे २अनुगतत्वे च। [स्वार्थे ठक्। पश्चात्कथके।

आनुगादिक त्रि०अनुगदतीति अनुगादी स एव अनुगादिन्+

आनुगुणिक त्रि० अनुगुणमधीते वेद वा वसन्ता० ठक्। १अनुगुणाभिज्ञे २तद्बोधकग्रन्थाध्येतरि च। स्त्रियां ङीप्।

आनुगुण्य न० अनुगुणस्य भावः कर्म्म वा ष्यञ्। १अनुकूलताचरणे २अनुकूलत्वे च। [स्त्रियां ङीप्।

आनुग्रामिक त्रि० अनुग्राम भवः ठञ्। ग्रामपश्चाद्भवादौ

आनुचारक न० अनुचारकस्य धर्म्मः मल्लिकादि० अण्। अनुचरधर्म्मे आचरणे।

आनुति पुंस्त्री० आनुतस्यापत्यम् इञ्। आनुतनाम्नोयुनेरपत्ये। "इञः प्राचाम्" ततः युवप्रत्ययस्य लुक् तु तौल्वल्यादित्वात् न। आनुतिः पिता आनुतायनः पुत्रः। आ+नु-क्तिन्। सम्यक्स्तवने स्त्री। [पश्चाङ्गवादौ।

आनुतिल्य त्रि० अनुतिलं भवः परिमुखा०ञ्य। तिलस्य

आनुदृष्टिनेय पुंस्त्री अनुदृष्टौभवः शुभ्रा०ढक् कल्या०आनङ् च। अनुदृष्टिभवे। [ध्वंसपश्चाद्भवे स्त्रियां ङीप्।

आनुनाश्य त्रि०अनुनाशं विनाशस्य पश्चाद् भवः संका०यञ्।

आनुनासिक्य न० आनुनासिकस्य भावः ष्यञ्। अनुनासिकधर्म्मे, नासासृष्टितत्तत्स्थानोच्चार्य्यत्वे -"प्रतिस्पानुनासिक्याः पाणिनीयाः" व्याकरणीया परिभाषा।

आनुपथ्य त्रि०अनुपथं भवः परिमु०ञ्य। मार्गस्थ पश्चाद्भवादौ

आनुपदिक त्रि० अनुपदं धावति ठक्। अनुपदं १धावमाने पदस्य वेदपाठविशेषस्य पश्चात् अनुपदं तद्वेत्ति तद्बोधकग्रन्थं वाऽधीते उक्थाः ठक्। २पदग्रन्थाध्येतरि ३तद्भिन्ने च स्त्रियां ङीप्। [पश्चाङ्गवादौ।

आनुपद्य त्रि० अनुपदं भवः परिमुखा० ञ्य। पदस्य

आनुपूर्व्वी स्त्री पूर्व्वमनुक्रम्य अनुपूर्व्वं तस्य भावः ष्यञ् ततो वा ङीषि यलोपः। परिपाट्याम् मूलावधिके क्रमे "षड़ानुपूर्व्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्" मनुः। ङीषभावपक्षे आनुपूर्य्यमप्यत्र न०। "वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च" मनुः।

आनुमानिक त्रि०अनुमानादागतः ठक् स्त्रियां ङीप्। अनुमानप्राप्ते १युक्तिसिद्धे २व्याप्तिविशिष्टलिङ्गज्ञानादवगते अनुमितेपदार्थे यथा धूमदर्शनात् वह्निरनुमीयते स च वह्निः स्वव्याप्तिविशिष्टधूमज्ञानेनैवावगत इति तस्य तथात्वम्। अनुमानमात्रेणावगम्ये वेदे वाचकशब्दशून्ये सांख्यमतसिद्धे ३प्रधाने न०। "ईक्षतेर्नाशब्दमिति" या०स्मृत्व भाष्ये तस्य च वेदशब्दप्रतिपाद्यत्वं निराकृत्य "रचनानुपपत्तेर्नानुमानम्" सू० भा० अनुमानगम्यत्वमपि निराकृतम्। तस्य च यथानुमानिकत्वं तथा ४६६,६७ पृष्ठे अव्यक्तशब्दे दर्शितम् "आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" या०सू०।

आनुमाष्य त्रि० अनुमाषं भवः परिमुखा० ञ्य। माषस्य पश्चाद्भवादौ। [ध्रुवादौ।

आनुयज्य त्रि० अनुयजं भवः परिमुखा० ञ्य। यजस्य पश्चा-

आनुयूथ त्रि० अनुयूथं भवः परिमुखा० ञ्य। यूथस्य पश्चाद्भवादौ। [२आनुगत्ये च।

आनुरक्ति स्त्री आ+अनु+रञ्ज-क्तिन्। १अनुरागे

आनुराहति पुंस्त्री० अनुरहतोऽपत्यम् बाह्वा० इञ् अनुश० द्विपदवृद्धिः। मुनिभेदे युवापत्ये तु ततः फक् तौल्वल्या० न लुक्। आनुराहतायनः। तस्य युवापत्ये। आनुहारति इति पाठान्तरम्।

आनुरोहति पुंस्त्री० अनुरोहतोपत्यम् बाह्वा० इञ्। अनुरोहन्मुनेर्गोत्रापत्ये तस्य युवापत्ये फक्तस्य तौ०न लुक्। आनुरोहतायनः तदीययुवापत्ये।

आनुलेपिक त्रि०आनुलेपिकायाः स्त्रिया धर्म्मः मल्लिका० अण्। अनुलेपिकाया धर्म्ये कर्म्मणि।

आनुलोमिक त्रि० अनुलोमं वर्त्तते अनुलोम+ठक्। अनुलोमाचारवति। स्त्रियां ङीप्।

आनुलोम्य न० अनुलोमस्य भावः कर्म्म वा ब्राह्म० ष्यञ्। १अनुक्रमे "आनुलोम्येन सम्भूता जात्या ज्ञेयास्तएव ते। "एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ तथा सुतौ" इति च मनुः अनुकूलत्वे "क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः" सुश्रु०। [पश्चाङ्गवादौ।

आनुवंश्य त्रि० अनुवंशं भवः परिसुखा० अञ्। वंशदत्तस्य

आनुवेश्य त्रि० "अनुवेशं वसति "अव्ययीभावाच्च" पा० अञ् प्रातिवेश्यसन्निकृष्टगृहवासिनि। "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" मनुः। "निरन्तरगृहवासी प्रातिवेश्यः तदन्तरगृहवासी आनुवेश्यः इति कुल्लू० अव्ययीभावाच्चेति सूत्रे परिसुखादिष्य एवेष्यते इति नियमस्तु प्रायिकस्तेनात्रापीति बोध्यम्। [यतिकसन्निधि।

आनुशातिक अनुशतिकस्येदम् अण् द्विपदवृद्धिः। अनु-

आनुशासनिक त्रि० अनुशासनाय हितं ठक्। १अनुशासनसाधने नीतिवाक्यादौ २राज्यनीतेरनुशासनार्थे भारतान्तर्गते पर्व्वभेदे। "ततः पर्व परिज्ञेयमानुशासनिकं परम्" भा० आ० १अ०।

आनुश्रविक त्रि० गुरुपाठादनुश्रूयते अनुश्रवोवेदस्तत्र विहितः ठक्। स्वर्गादिसाधनतया वेदविहिते कर्म्मसमूहे "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सां० का०। "नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनाविशेषयोगादपुरुषार्थत्वम्" सां० सू०।

आनुषङ्गिक त्रि० अनुषङ्गात् आगतः ठक् स्त्रियां ङीप्। उद्देश्यान्तरप्रवृत्तस्य तत्कर्म्मनान्तरीयतया प्राप्ते प्रासङ्गिके अनुद्देश्ये "अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः" सि० कौ०। यथा भो वटो! भिक्षामट यदि गां पश्येः ताञ्चानयेत्यादौ भिक्षार्थप्रवृत्तस्य दैवात् गोदर्शनात्तस्या आनयनमानुषङ्गिकं तत्रोद्देश्यत्वाभावात्। [पूर्व्वाम्।

आनुषज् अव्य० आ+अनु—सृज-क्विप् सरा०। आनु-

आनुषण्ड त्रि० अनुषण्डे देशभेदे भवः कच्छा० अण्। अनुषण्डदेशभवे।

आनुष्टुभ त्रि० अनुष्टुप् छन्दोऽस्य उत्सा० अञ्। १अनुष्टुप्छन्दस्के मन्त्रादौ क्वचि स्त्री ङीप्। "अनुष्ट्वावाश्वाभ्योगवे आनुष्टुभे त्वे भवत" इति सामसं० भा० धृता श्रुतिः। अनुष्टुभ इदम् अञ्। २अनुष्टुप्सम्बन्धिनि। अनुष्टुप्सरस्वती देवताऽस्य अण्। ३सारस्वते हविरादौ" आनुष्टुभस्य हविषोयत्" ऋ० १०,१८१,१। "आनुष्टुभोवा अश्वः" आनुष्टुभैषा दिक्" शत०ब्रा०। अत्र छान्दसोङीबभावः स्वार्थे अण्। ४ अनुष्टुप्छन्दसि न० स्वार्थिकस्य क्वचित् प्रकृतिलिङ्गातिक्रमस्य देवतावदिष्टत्वात्लिङ्गान्यत्वम्।

आनुसाय्य त्रि० अनुसायं भवः परिसुखा० अञ्। सायस्य पश्चाङ्गवादौ।

आनुसीत्य त्रि० अनुसीतं भवः परिसुखा० अञ्। लाङ्गल पद्धते पश्चाङ्गवे। [पश्चाङ्गवादौ।

आनुसीर्य्य त्रि० अनुसीरं भवः परिसुखा० अञ्। लाङ्गल-

आनुसूय त्रि० अनुसूयया अत्रिपत्न्या दत्तम् अण्। अनुसूयया दत्ते "स्फुरत्प्रभामण्डलमानुसूयं सा बिभ्रती शाश्वतमङ्गरागम्" रघुः। [ढनङ् च। अनुसरणभवे।

आनुसृतिनेय त्रि० अनुसृतौ भवः शुभ्रा० ठक् कल्याण्या०

आनुसृष्टिनेय त्रि० अनुसृष्टौ भवः शुभ्रा० ठक् कल्या० ढनङ् च। अनुसर्जनभवे।

आनुहारति त्रि० अनुहरति भवः ब्राह्मा० इञ् अनुशतिक० द्विपदवृद्धिः। अनुहरणकुर्व्वति भवे।

आनूप त्रि० अनूपदेशे भवः कच्छा० अण्। अनूपदेशभवे स्त्रियां ङीप्। २जलानुगतदेशभवे प्राणिवर्गे च तत्तत्प्राणिनस्तन्मांसगुणाश्च सुश्रुते दर्शिता यथा "आनूपवर्गस्तु पञ्चद्विधः। तद्यथा कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयमहिषरुरुचमररुमररोहितवराहखड्गिगोकर्णकालपुच्छकोड्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः। वातपित्तहरा दृष्टा मधुरा रसपाकयोः। शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः। विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः। स्वादुस्निग्धवसास्तेषां गजः श्लेष्मानिलापहः। गवयस्य तु मांसं हि स्निग्धं मधुरकासजित्। विपाके मधुरं चापि व्यवायस्य तु वर्द्धनम्। स्निग्धोष्णमधुरो दृष्टो महिषस्तर्पणो गुरुः। वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम्। तथा चमरमांसन्तु स्निग्धं मधुरकासजित्। विपाके मधुरं चापि वातपित्तप्रणाशनम्। रुरुमरस्य तु मांसञ्च कषायानुरसं स्मृतम्। वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम्। स्वेदनं दृंहणं दृष्टं शीतलं तर्पणं गुरु। स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनम्। कफघ्नं खड्गिमांसितं कषायमनिलापहम्। पित्तं पवित्रमायुष्यं बहुमूत्रं विरूक्षणम्। गोकर्णमांसं मधुरं स्निग्धं स्मृतं कफा-

वहम् । विपाके मधुरत्वापि रक्तपित्तविनाशनम् । हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवञ्जीवञ्जीवकबलाकापुण्डरीकजलचरारीसुखनन्दीसुखमद्गुत्क्रोशकाघाह्लमल्लिकाचशुक्लाच्छपुष्करशायिकाकोनालकाम्बुकुक्कुटिकामेचरावश्वेतचरणप्रभृतयः प्लवाः सङ्घातचारिणः । रक्तपित्तहराः शीताः स्निग्धा दृष्या मरुज्जिताः । हृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः । गुरुष्णमधुरः स्निग्धः स्वरवर्ण्यबलप्रदः । दृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः ।

यङ्गयङ्गनखगुल्मियम्बुकमल्लूकप्रभृतयः कोशस्थाः । कूर्मकुम्भीरकर्कटकक्षणकाकटकशिशुमारप्रभृतयः पादिनः । यङ्गकूर्मादयः स्वादुरसपाका मरुद्गदः । शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः । कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः । शुक्लः सन्धानकृत् हृष्टविण्मूत्रोऽनिलपित्तहा । मत्स्याश्च द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः रोहितपाठीनपाटलाराजीववर्मिगोमत्स्यक्षणमत्स्यावगुडारसुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः । नादेया मधुरा मत्स्या गुरवोमारुतापहाः । रक्तपित्तकराश्चोष्णा दृष्याः स्निग्धाल्पवर्चसः । कषायानुरसस्तेषां यमर्थैवालभोजनः । रोहितो मारुतहरो नात्यर्थं पित्तकोपनः । पाठीनः श्लेष्मलो दृष्यो निद्रालुः पिशितायनः । दूषयेद्रक्तपित्तन्तु कृष्णरोगं करोत्यसौ । सुरली दृंहणो दृष्यः स्तन्यश्लेष्मकरस्तथा । सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः । महाह्रदेषु बलिनः स्थूलोऽल्पस्नेहबलाः स्मृताः । तिमिझिल्लगिलिशपाकमत्स्यनिरालंकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः । सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः । उष्णा वातहरा दृष्या वर्चस्याः श्लेष्मवर्द्धनाः । बलावहा विशेषेण मांसाशित्वात् समुद्रजाः । समुद्रजेभ्योनादेया दृंहणत्वाद्गुणोत्तराः । तेषामप्यनिलघ्नत्वाच्छौण्डाकौण्डौ गुणोत्तरौ । स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाथा गुणोत्तराः । नादेया गुरवो मध्ये यस्मात्पुच्छास्यचारिणः । सरस्तडागजानान्तु विशेषेण शिरो लघु । अदूरगोचरा यस्मात्तस्मादुत्क्लेदजाः । किञ्चिच्छ्लेष्मा शिरोदेशमत्यर्थं गुरवस्तु ते । अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः । उरोविचरणास्तेषां पूर्वमङ्गं लघु स्मृतम् । इत्यानूपो महाभिष्यन्दिभांसवर्गो व्याख्यातः" "मनुष्यतत्स्थयोर्वृञ्" पा०मनुष्ये तत्स्थेऽसितादौ वाच्ये तु वुञ् । आनूपक इत्येव

आनृत त्रि० अन्तं शीलमस्य कृता० अण् । सततमिथ्याभाषणशीलनकर्त्तरि स्त्रियां ङीप् ।

आनृण्य न० अनृणस्य भावः कर्म्म वा ष्यञ् । ऋणशून्यत्वे ऋणशोधने । "वक्तव्यं सर्वदा सद्भिरप्रियञ्चापि यद्धितम् । आनृण्यमेतत् स्नेहस्य सद्भिरेव कृतं पुरा" नरसिंहपु० ।

आनृशंसि पुंस्त्री० अनृशंसस्यापत्यम् इञ् । दयालोरपत्ये गर्गा० भवादौ छ । आनृशंसीयः तद्भवादौ त्रि० ।

आनृशंस्य न० अनृशंसस्य भावः कर्म्म वा ष्यञ् । १अनिष्ठुरतायां २कारुण्ये "आरोढुं सुमहाप्राज्ञ आनृशंस्याच्छुना विना" भा०आश्व० २अ० । "आनृशंस्यात् ब्राह्मणस्य भुञ्जते हीतरे जनाः" मनुः । ३अनुकम्पायाञ्च । "अर्हणं तत्कुमारीणामानृशंस्यं हि केवलम्" उद्वा०त० स्मृतिः । "आनृशंस्यमनुक्रम्या" रघु० । स्वार्थे ष्यञ् ३कारुण्ययुक्ते त्रि० "एष धर्म्मपरोनित्यमानृशंस्यश्च पाण्डवः" भा०व०प०७१ अ० ।

आनेट त्रि० आ+नी–ल्युट् । आनयनकर्त्तरि स्त्रियां ङीप् ।

आनेय त्रि० आ+नी–कर्म्मणि यत् । देशाद्देशान्तरमानेतव्ये १घटादौ वैश्यकुलात् विप्रतोभ्राड्वा आनेतुं योग्ये २दक्षिणाग्नौ पु० आनाय्यशब्दे विवृतिः "आनेयो घटादि वैश्यकुलादेरानेयोदक्षिणाग्निश्च" सि०कौ० ।

आ(अ)नैपुण न० अनिपुणस्य भावः अण् उत्तरपदवृद्धिः पूर्वपदस्य वा । अपाटवे नैपुण्याभावे ष्यञ् । पूर्ववत् वृद्धिः आ(अ)नैपुण्यमप्यत्र ।

आ(अ)नैश्वर्य्य न० अनीश्वरस्य भावः ष्यञ् । उत्तरपदवृद्धिः पूर्वस्य पदस्य वा । १ऐश्वर्याभावे २ऐश्वर्यविरोधिनि सांख्यादिमतसिद्धे बुद्धेर्धर्मभेदे धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यरूपा अष्टौ बुद्धेर्धर्मास्ते च भावरूपा एव तैरभावानङ्गीकारात् तत्र ज्ञानभिन्नानां सप्तानां बन्धहेतुत्वम् ज्ञानेन मोक्ष इति तेषां सिद्धान्तः यथाह सांका०कौमुद्योः" "रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः । सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण" तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः सप्तभिः रूपैरिति पुरुषार्थं प्रति भोगापवर्गौ प्रति आत्मानमेकरूपेण तत्त्वज्ञानेन विमोक्ष्यात्मा विमोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः" ।

आन्त त्रि० अम+क्त नि०वा दृडभावः उपधादीर्घः । पीडिते दृढत्वे अमितोऽत्यत्व । [नान्तरोधर्म्मः सत्वम्" सा०द०

आन्तर त्रि० अन्तर्मध्ये भवः अण् । आभ्यन्तरे । "कस्य-

आन्तरतम्य न० अन्तरतमस्य अत्यन्तसदृशस्य भावः ष्यञ्। सौसादृश्ये "बाह्यप्रयत्नाश्च यद्यपि सर्वसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्ते" सि०कौ०।

आन्तरागारिक त्रि० अन्तरागारस्य धर्म्यम् ठक्। अन्तरागारनियुक्तपुरुषस्य धर्म्ये अवरोधरक्षणादौ।

आन्तरप्रपञ्च पु० कर्म०। आध्यात्मिके आभ्यन्तरे द्वैतविस्तारे स चान्नमयादिकोषपञ्चकं शरीरत्रयम् जन्मस्थित्यादयः षड्भावविकाराः त्वङ्मांसादिषाट्कौशिकस्थूलदेहः अशनायापिपासादि षड्ऊर्म्मयः श्रोत्रादिज्ञानेन्द्रियपञ्चकं वागादिकर्मेन्द्रियपञ्चकं प्राणादिवायुपञ्चकं मनआद्यन्तःकरणचतुष्टयं सङ्कल्पाद्यन्तःकरणवृत्तयः जागराद्यवस्थात्रयं तदभिमानिविश्वतैजसप्राज्ञाः समाधिमूर्च्छोदयः क्रोधाद्यरिषड्वर्गः साधनचतुष्टयं सत्वादिगुणत्रयं सुखदुःखज्ञानाज्ञानादि अविद्यादिक्लेशपञ्चकम् मैत्र्यादिभावनाचतुष्टयं यमाद्यष्टाङ्गम् प्रत्यक्षादिप्रमाणवर्गः रोगारोग्यसमुदायोपायोपेयं विविधनामरूपगुणधर्मोदयः भोगापवर्गौ च। एवमन्यमतेऽप्यूह्यम्।

आन्तराल त्रि० अन्तरालं मध्यस्थितिं वेत्ति अण्। देहाभ्यन्तर एवात्मनः स्थितिवेत्तरि जीवस्याणुत्वादिनि पूर्वप्रश्ने माध्वे स हि आत्मनोविभुत्वखण्डनेन देहाभ्यन्तरे एव स्थितिं मन्यमानस्तस्याणुत्वम् प्रतिषेधे आत्मशब्दे तन्मतनुक्तप्रायम् अधिकं माध्वशब्दे वक्ष्यते। "अणुं वदन्त्यान्तराला: सूक्ष्मनाडीप्रचारतः। रोमणः सहस्रभागेन नाडीषु प्रचरत्ययमिति" तस्य सिद्धान्तः "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेय इति" श्रुतिमनुसृत्य तथा तेनाङ्गीकृतम्। दुर्विज्ञेयत्वेन सूक्ष्मत्वमौपचारिकमिति तु वेदान्त्यादयः।

आन्तरि(री)क्ष त्रि० अन्तरि(री) क्षे भवः अण्। आकाशभवे १उत्पातादौ "उत्पातांस्त्रिविधान् प्राह नारदो भगवान् प्रभो! दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पितामह!" ज्यो०। २अन्तरीक्षभवे जले च। अम्बु शब्दे ३२० पृष्ठेऽस्य विवृतिः।

आन्तरीपक त्रि० अन्तरीपे भवः घमा० वुञ्। अन्तरीपभवे धूमादिगणे द्वीपसाहचर्य्यात् देयवाचित्वाच्च अन्तरीपशब्दएव बोध्यः अन्तरीय इति पाठस्तु प्रामादिकः। [ङीप्।

आन्तर्गणिक त्रि० अन्तर्गणं भवः ठञ्। गणमध्यभवे स्त्रियां

आन्तर्गेहिक त्रि० अन्तर्गेहं भवः ठञ्। गेहमध्यभवे स्त्रियां ङीप्। अन्तर्वेशिकान्तर्वेश्मकादयोऽत्र।

आन्तर्य्य न० अन्तरस्य भावः ष्यञ्। अन्तर्वर्त्तित्वे।

आन्तिका स्त्री अन्तिकेव अण् अजा० टाप्। जेठ्यायाम् भगिन्याम्।

आन्त्र न० अन्त्रेण अस्—गतौ क्त्र उपधादीर्घः। १वायुवाहकनाड़ीभेदे। अन्त्रस्येदम् अण्। २अन्त्रसम्बन्धिनि त्रि० स्त्रियां ङीप्।

आन्दोल दोलने सुखस्वालने चद०चुरा०उभय०सक०सेट्। आन्दोलयति ते आन्दुदोलत् त। क्त आन्दोलितः।

आन्दोलक पु० आन्दोलयति ण्वुल्। दोलनकर्त्तरि।

आन्दोलन न० आन्दोल—भावे ल्युट्। १पुनःपुनर्दोलने, २सुखस्वालने "किन्वासामविन्दन्नुन्दरदयां द्राक् चामरान्दोलनात्" उद्भटः ३अनुसन्धाने च।

आन्धसिक त्रि० अन्धो भक्तं शिल्पमस्य ठक्। पाचके सूदे।

आन्धीगव न० अन्धीगुना ऋषिभेदेन दृष्टं साम—अण्। हतीयसवने गेये आर्भवपवमानसूक्तगते सूक्तभेदे तच्च सूक्तम् जगतीगाने १प्र०११क०पठितम् तच्च साम०स०भा०दर्शितम् यथा "श्यावाश्वान्धीगवेऽनुष्टुभानेये गण्यतेऽथ वा। पुरेव लिङ्गं जगती चतुर्विंशति-कीर्त्तनम्। इदमाम्नायते "पञ्चऋन्दा आवापः आर्भवः पवमानः सप्तसामा, गायत्रसंहिते गायत्रेऽृचे भवतः, श्यावाश्वान्धीगवे आनुष्टुभे ऽृचे भवतः, उष्णिहि यफम्, ककुभि पौष्कलम्, कावमन्त्यं जगतीषु" इति। अवमर्शः अस्मिं हतीयसवने पवमानः आर्भवसंज्ञकः, तस्मिन् पञ्च सूक्तानि, सप्त सामानि, "स्वादिष्टया मदिष्ठा" इत्येकं सूक्तम् (ऊ,१प्र,१५), तस्मिन् गायत्रस्त्रिष्ठ ऋचः तासु "गायत्रम्" "संहितम्" (ऊ,१प्र,८) चेति द्वे सामनी, "पुरोजितो वो अन्धसः" इति सूक्तान्तरम् (ऊ,१प्र,१८) तत्रैकानुष्टुबुत्तरे द्वे गायत्र्यौ तासु "श्यावाश्वम्" (ऊ,१प्र,११) "आन्धीगवम्" (ऊ,२प्र,११) चेति द्वे सामनी, "इन्द्रमच्छ सुता" इत्यपरं सूक्तम् (ऊ,१प्र,१८), तस्मिन्नुष्णिहस्त्रिष्ठः तासु "यफम्" साम, "पवस्व मधुमत्तम" इति प्रगाथः (ऊ,१प्र,१६), तस्मिन् पूर्वा ककुप्, उत्तरा पङ्क्तिः। तत्र "पौष्कलम्" (ऊ,१प्र,१६) साम, "अभिप्रियाणि पवते च नोहित" इत्यन्त्यं सूक्तम् (ऊ,१प्र,१६), तत्र तिस्रोजगत्यः तासु "कावम्" (ऊ,१प्र,१६) साम"।

आन्ध्र न० अन्धस्य भावः ष्यञ्। दृष्टिशक्तिराहित्ये यत्र प्रतिघाते तद्वति तद्दर्शितं सुश्रु०। गिरानाड़ीरूपकस्य "भूयु-

च्छान्तयोरधोऽक्ष्णोर्बाह्यतोऽपाङ्गौ नाम तत्रान्त्यं दृष्ट्युपघातो वा इति" तत्कारणञ्चोक्तम् "शोणितमतिनिर्हियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत्। अत्युष्णाभिस्निग्धातिविद्वेष्यैर्विस्रावितमतिप्रवर्त्तते अतिप्रवृत्तं शिरोऽभितापमान्ध्यमधिमन्थं तिमिरप्रादुर्भावमित्यादि चापादयति" सुश्रु०। २प्रकाशशून्यत्वे "जगदान्ध्यप्रसङ्गः" वे०प्र०

आन्ध्र पु०आ+अन्ध-रन्। १देशभेदे २तद्देशवासिनि ३तद्भूपे च ब०व०। "आन्ध्राःशका पुलिन्द्राश्च यवनाश्च नराधिपाः" भा०व०प०१८८अ०। स च देशः ष्ठ०स०कूर्म्मविभागे आग्नेय्यां दिशि वर्णितः यथा "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः कौशिकविदर्भवत्साम्बष्ठदिक्काश्चोर्द्धकण्ठाश्च" बृहत्संहितायाञ्च तत्रैवोक्तम् "द्रविडविदेहान्ध्रलेच्छकभाषापुरं कौङ्कणाः समान्ध्रीषकाः। कुन्तलकेरलदण्डकान्तिपुरलेच्छसङ्करजाः। नासिक्यभोगवर्द्धनविराटविन्ध्याद्रिपार्श्वगादेयाः। ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम्"। तेन विन्ध्याद्रिपार्श्वगः गोमतीतापीनद्योःसन्निकृष्टोऽयं देश इति गम्यते।

आन्न त्रि० अन्नं लब्धा अन्न+ण। अन्नं लब्धरि।

आन्यतरेय पुंस्त्री० अन्यतरस्यापत्यम् शुभ्रा० ढक्। आन्यतरेयापत्ये स्त्रियां ङीप्।

आन्यभाव्य न० अन्योभावोयस्य अन्यभावः तस्य भावः ब्राह्म० ष्यञ्। अन्यरूपत्वे। [स्त्रियां ङीप्

आन्वयिक त्रि० अन्वये प्रशस्तकुले भवः ठञ्। प्रशस्तकुलजाते

आन्वष्टक्य न० अन्वष्टका+स्वार्थे ष्यञ्। अन्वष्टकाशब्दार्थे "अपरेद्युरान्वष्टक्यम्" आश्व०गृ०।

आन्वाहिक त्रि० अहनि अहनि अन्वहम् तत्र भवः ठञ् अनुग० द्विपदवृद्धिः। प्रतिदिनसाध्ये पाकादौ "वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म्म यथाविधि। पञ्चयज्ञविधानञ्च पक्तिश्चान्वाहिकीं गृही" मनुः।

आन्वीक्षिकी स्त्री अन्वीक्षणादनु ईक्षा पर्य्यालोचना सा प्रयोजनमस्याः ठञ्। तर्कविद्यायाम् गौतमप्रणीतायां आत्मविद्यायाम्। तत्प्रतिपादकग्रन्थश्च अक्षपादेन पञ्चाध्यायी रचितः तत्रादिमं सूत्रं "प्रमाणप्रमेयसंशय प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम" इति अन्तिमसूत्रञ्च "हेत्वाभासाश्च यथोक्ताः" इति। तत्र प्रतिपाद्यविषयाश्च पदार्थतत्त्वज्ञानानुक्तिफलं तत्र क्रमोक्तिः। प्रत्यक्षानुमानोपमानागमरूपप्रमाणचतुष्टयम् तेषां लक्षणविभागादि। आत्मदेहेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गरूपप्रमेयविभागः। इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मलिङ्गानि। चेष्टावदन्यावयवित्वमिन्द्रियाश्रयत्वं वा देहलक्षणम्। घ्राणरसनचक्षुस्त्वक्श्रोत्ररूपेन्द्रियविभागः तेषां पृथिव्यादिभ्यः क्रमेणोत्पत्तिः। तत्कारणानि च क्रमेण पृथिव्यप्तेजोवाय्वाकाशात्मकानि पञ्च भूतानि। गन्धरसरूपस्पर्शरूपविषयपञ्चकं पृथिव्यादीनां विशेषगुणास्तेषां च क्रमेण घ्राणादिभिर्ग्राह्यता। महत्तत्त्वापर्य्यायाया बुद्धेर्ज्ञानरूपत्वम्। मनसो लक्षणम्। प्रवृत्तिलक्षणम् रागद्वेषाभिनिवेशरूपदोषत्रयलक्षणम्। पुनरुत्पत्तिरूपप्रेत्यभावलक्षणम् प्रवृत्तिजनितार्थरूपफललक्षणम्। बाधनारूपं दुःखलक्षणम्। दुःखात्यन्तनिवृत्तिरूपापवर्गलक्षणम्। एकस्मिन् धर्म्मिणि भावाभावविरुद्धकोटिद्वयज्ञानत्वं संशयलक्षणम् तत्र साधारणधर्म्मवद्धर्म्मिज्ञानमसाधारणधर्म्मवद्धर्म्मिज्ञानं विप्रतिपत्तिवाक्यजन्यकोटिद्वयोपस्थितिश्च कारणम्। प्रवृत्तिहेत्विच्छाविषयत्वं प्रयोजनलक्षणम्। वादिप्रतिवादिनोः साध्यसाधनद्वयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयत्वं दृष्टान्तलक्षणम् प्रतिवादिनिरसनेन निःसन्दिग्धतया अर्थनिश्चयरूपत्वं सिद्धान्तलक्षणम्। सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्त इति सिद्धान्तचतुष्टयविभागाः तल्लक्षणानि च। प्रतिज्ञाहेतूदाहरणोपनयनिगमरूपावयवविभागः। भाष्ये तु जिज्ञासा, संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति अधिकाः पञ्चावयवा उक्तास्तेन दशावयवा इति स्थितम्। तात्पर्य्यटीकायां तद्व्याख्यातञ्च तत्र जिज्ञासाऽज्ञातादिवस्तुसिद्धये प्रवर्त्तिका इच्छा जिज्ञासा। तज्जन्यश्च संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः इति। जिज्ञासा विप्रतिपत्तिरिति केचित्। एतेषां न्यायावयवत्वं नास्तीति दृष्टौ स्थितम्। साध्यविशिष्टतया पक्षस्य निर्देशः प्रतिज्ञालक्षणम् व्याप्तिविशिष्टहेतुबोधकः शब्दो हेतूदाहरणावयवः। व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विविधा तथा च ज्ञातान्वय व्याप्तिकहेतुबोधकः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधकश्च। साधनवाक्यप्रयुक्त साध्यवत्ताऽनुभावकोऽवयवः साध्यसाधनव्याप्तिप्रदर्शकः उदाहरणम् तत्र व्याप्तिश्च द्विविधा अन्वयो व्यतिरेकश्च। प्रकृतोदाहरणोपदर्शितव्याप्तिमद्धेतुविशिष्टपक्षवचनं उपनयावयवः व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विधा

प्रविष्टा । व्याप्तिविशिष्टस्य हेतोः पक्षवृत्तिताकथन-पूर्वकसाध्यविशिष्टपक्षबोधकवाक्यत्वं निगमनलक्षणम् । व्यापकाभाववत्त्वेन निर्णीते धर्मिणि व्याप्यस्याहार्यारोपात् व्यापकस्याहार्यारोपः तर्क इति तर्कलक्षणम् यथा निर्वह्निकत्वारोपाद्निर्धूमत्वारोपः निर्वह्निःस्याद्निर्धूमःस्यादित्यादि । सन्दिग्धपक्षस्य साधनयुक्त्या प्रतिपक्षस्य बाधनयुक्त्या च अर्थावधारणं निर्णय इति तल्लक्षणम् । इत्येते १अ० १म आह्निके पदार्था दर्शिताः । वादादिलक्षणानि । तत्र प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहोवादः इति वादलक्षणं प्रमाणतर्काभ्यां स्वपक्षस्य साधनं विपक्षस्योपालम्भो दूषणं च यत्र । पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहः तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवाक्यविशेषो वाद इति तदर्थः । छलजातिनिग्रहस्थानादिकं विपक्षे सम्भाव्य तस्य दूषणेन स्वपक्षस्थापन वाक्यत्वं जल्पलक्षणम् । स्वपक्षस्थापनाराहित्येन परपक्षनिराकरणवाक्यत्वम् वितण्डालक्षणम् । सव्यभिचारविरुद्ध प्रकरणसमसाध्यसमातीतकालरूपान् पञ्च हेत्वाभासान् विभज्य तेषां लक्षणानि । वाद्युक्त वचनस्य अर्थान्तरपरत्वकल्पनेन युक्त्या तत्खण्डनं छलमिति छललक्षणम् । तच्च वाक्छलार्थच्छलोपचारच्छलभेदेन त्रिविधम् । व्याप्तिनिरपेक्षतया दूषणोक्तिर्जातिः तद्भेदाश्चतुर्विंशतिः५ अ० वाच्याः । उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं निग्रहस्थानलक्षणमिति १अ० २आह्निके एते पदार्था उक्ताः । संशयकारणादिनिरूपणम् प्रमाणात् प्रमेयसिद्धिः । प्रत्यक्षप्रमाणलक्षणे परिशिष्टविवेचनम् । मनसोऽणुत्वे ज्ञानायौगपद्यस्य हेतुतयोक्तिः । प्रत्यक्षस्य क्वचिदनुमित्यात्मकताशङ्काथां तन्निराकरणम् । अवयवेभ्योऽवयविनोऽतिरिक्तता साधनम् । अनुमानाप्रामाण्यशङ्कातन्निरासौ । वर्त्तमानावस्थानिराकरणतत्स्थापने । उपमानाप्रामाण्यशङ्का निराकरणे । अनुमाने उपमानस्य गतार्थत्वमाशङ्क्य शाब्दबोधस्यानुमानेऽन्तर्भावमाशङ्क्य च तन्निवारणम् । सन्निकर्षस्यैव शब्दस्य बोधकत्वव्यवस्थापनम् । दृष्टादृष्टार्थकत्वेन शब्दस्य वैविध्यम् । तत्रादृष्टार्थकस्य वेदशब्दस्य अन्योन्यव्याघातपुनरुक्तदोषेभ्यः अप्रामाण्यमाशङ्क्य युक्त्या प्रामाण्यसमर्थनम् । विध्यर्थवादानुवादभेदात् ब्राह्मणरूप वेदभागस्य त्रैविध्योक्तिः । विधिलक्षणम् । स्तुतिः निन्दा परकृतिः पुराकल्प इति भेदादर्थवादस्यापि त्रैविध्योक्तिः विधिविहितस्यानुकथनमनुवादस्त्वनुवादलक्षणम् । वेदैकदेशविषयकरमन्त्रादेः आरोग्यार्थौषधादिप्रतिपादकायुर्वेदभागस्य संवादिफलकत्वेन तद्दृष्टान्तेन इतरवेदभागस्य प्रामाण्यव्यवस्थापनम् । २अ० १आह्निके एते पदार्थाः । ऐतिह्यार्थापत्तिसम्भवाभावरूपाणामतिरिक्तप्रमाणत्वमाशङ्क्य ऐतिह्यस्य शब्देऽन्तर्भावः अर्थापत्तिसम्भवाभावानाञ्चानुमानेऽन्तर्भाव इति समर्थनम् । अभावस्य प्रमेयत्वव्यवस्थापनम् । शब्दस्यानित्यताव्यवस्थापनम् । शब्दस्य घण्टादाश्रयकत्वनिराकरणम् । व्याकरणविधौ वर्णानां विकारपक्षनिराकरणेनादेशपक्षव्यवस्थापनम् । वर्णानामविकारित्वेऽपि गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषैः विकारव्यवहार इति व्यवस्थापनम् । तत्र उदात्तेऽनुदात्तत्वं गुणान्तरापत्तिः। उपमर्दो धर्मिनिवृत्तिः यथा अस्तेर्भूः । ह्रासःदीर्घस्य ह्रस्वता, वृद्धिर्ह्रस्वस्य दीर्घता, श्लेष एकदेशविकृतिः यथा अस्तेरल्लोपः । श्लेषः आगम इडादि । एतैर्विकारव्यवहारः । पदलक्षणम् । जात्यादीनां प्रत्येकं पदार्थत्वपक्षं निराकृत्य जात्याकृतिव्यक्तीनां समुदितानां पदार्थत्वव्यवस्थापनम् । व्यक्त्याकृतिजातीनां लक्षणानि एते २अ० २आह्निक गतार्थाः । इन्द्रियचैतन्यवादनिराकरणम् । भूतचैतन्यवादनिराकारणम् उभयगोलकेनैक्यव्यवस्थापनम् । आत्मन इन्द्रियभेदे युक्तिप्रदर्शनम् । मनस आत्मत्वनिराकरणम् । आत्मनित्यतासाधनम् । मनुष्यदेहस्य पार्थिवत्वसाधनम् । तस्य पार्थिवाप्यतैजसत्वमतोपन्यासः वायुभौतिकत्वमतोपन्यासः पाञ्चभौतिकत्वमतोपन्यासः । इन्द्रियाणां गोलकातिरिक्तत्वस्य व्यवस्थापनम् । तेषामाहङ्कारिकत्वनिराकरणेन भौतिकत्वव्यवस्थापनम् । इन्द्रियाणामप्रत्यक्षत्वेऽप्यनुमेयताव्यवस्थापनम् । चक्षुषः प्राप्यकारित्वसाधनम् । इन्द्रियैकत्वमाशङ्क्य तेषां पञ्चत्वसाधनम् । भूतानां विशेषगुणाः तेषाञ्चैकैकेन्द्रियग्राह्यतेति निरूपणम् । घ्राणादीनामनुद्भूतगन्धादिसाधनम् । २अ० १म आह्निकगतार्थाः । सांख्यमतसिद्धबुद्धेर्नित्यत्वनिराकरणम् मनसोऽणुत्वेनज्ञानानां क्रमिकत्वसाधनम् । मनसोविभुत्वे गत्यभावप्रसङ्गेन सर्वेन्द्रियैः सर्वदासम्बन्धापत्त्या च सर्वविषयकज्ञानापत्तिदोषात् विभुत्वनिरासः । भावानां नियमेन क्षणिकत्वपक्षखण्डनम् । परिणामवादखण्डनम् । इन्द्रियाधयोरन्वयव्यतिरेकसत्त्वेऽपि ज्ञानस्य न तयोर्धर्मत्वं किन्तु आत्मधर्मत्वमिति समर्थनम् । ज्ञानाऽनित्यत्वसाधनम् स्मरणायौगपद्ये कारणप्रदर्शनम् । ज्ञानवत् इच्छादीनामात्मधर्म-

त्वव्यवस्थापनम्। इतरगुणत्वनिवारणेन ज्ञानादेरात्मधर्म्मत्वव्यवस्थापनम्। स्मरणोपयोगिप्रणिधानादिकारणानि। बुद्ध्यादेः आशुविनाशित्वव्यवस्थापनम्। रूपादेरिव यावद्द्रव्यभावित्वाभावेन ज्ञानादिविशेषगुणानां देहधर्म्मत्वनिरासेनात्मधर्म्मत्वसमर्थनम्। कीटपतङ्गादिषु सुखाद्यनुपलब्धेः त्वक्पर्य्यन्तस्यैव देहस्य सुखाद्यवच्छेदकत्वसाधनम्। प्रतिदेहं मनसो नानात्वखण्डनम्। एकत्वेऽपि मनसः शीघ्रसञ्चारः। ज्ञानयौगपद्यस्य भ्रमत्वसमर्थनेन मनोऽणुत्वसाधनम्। देहस्य अदृष्टसापेक्षोत्पत्तिकत्व साधनम्। अदृष्टसहकारेणैव मातापित्राहारस्य तदारम्भकत्वसमर्थनम्। अदृष्टाभावे नित्यात्मनः संयोगेऽपि न देहोत्पत्तिरिति निरूपणम्। आत्मनोविभुत्वे सर्वशरीरैः संयोगे सत्यपि तदृष्टजन्यदेह एव तस्य विशेषसंभोगः भोगसाधक इति नियमनम्। परमाणुगतादृष्टाङ्गीकर्त्तुरार्हतस्य मतनिराकरणम् अदृष्टस्य मनोगुणत्वस्यापि तन्मतसिद्धस्य निराकरणम्। ३अ० २आ० गतार्थाः। प्रवृत्तिसाधनरागद्वेषाभिनिवेशात्मकदोषत्रैविध्यकथनम्। तत्र मोहस्य सर्व्वानर्थमूलत्वेन पापीयस्त्वसमर्थनम्। आत्मनोनित्यत्व एव प्रेत्यभावसिद्धिः अनित्यत्वे न तत्सिद्धिरित्यथा च एकजातीयशरीरेणाद्यःसम्बन्ध उत्पादः तत्चरमसम्बन्धनाशोमरणं तयोरेकस्मिन् आत्मनि नित्ये एव सम्भवः शरीरादेर्नित्यत्वात् न तदाश्रयत्वमिति समर्थनम्, उत्पत्तिप्रकारनिरूपणम्। बीजानाशेप्यङ्कुरोत्पत्तिदर्शनात् अभावादेव भावोत्पत्तिरिति अभावोपादानत्वमतनिराकरणम्। कर्म्मनिरपेक्षस्य ईश्वरस्यैव जगत्कारणत्वमत खण्डनेन कर्मसापेक्षस्य तस्य जगत्कारणत्वव्यवस्थापनम्। परमाण्वादिवदीश्वरस्य नोपादानत्वमिति व्यवस्थापनम्। भाष्ये तु गुणविशिष्टमात्मान्तरमीश्वर इतीश्वरलक्षणमुक्तम्। तदर्थश्च "गुणैर्नित्यज्ञानेच्छाप्रयत्नरूपविशेषगुणैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टम् आत्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेष्टेश्वरोजगतः पितेति" इत्यादिवृक्तः। कणादकर्तृकेश्वरवज्जगतामाकस्मिकत्वखण्डनम्। सर्वानित्यत्वखण्डनम्। सर्वनित्यत्वखण्डनम्। घटादीनां परमाणुद्वयात्मकतावादखण्डनेन एकावयविसाधनम् सर्वभूतानामभावरूपतानिराकरणम्। संख्यैकान्तवादनिराकरणम्। संख्यैकान्तवादाश्च भाष्ये बहवो दर्शिताः। "सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा आत्मा ज्ञेयं ज्ञानमिति, सर्वं चतुर्धा प्रमाता प्रमाणम् प्रमितिः प्रमेयमिति, एवमन्येऽपि"। तत्र यथा नित्यत्वानित्यत्वाभ्यां द्वैधं तथा सत्त्वेनैक्यम् घटः सन् पटः सन्नित्येकाकारसत्त्वप्रतीतेः। अन्ये तु एकमित्यद्वैतमाङ्गीकृत्य च ब्रह्मैवैकं निर्विशेषं सत् सर्वमन्यन्मिथ्या। अन्येऽपीति रूपसंज्ञासंस्कारवेदनानुभवाः पञ्च स्कन्धाः षट्पदार्थी सप्तपदार्थीत्यादि मतभेदाः। तत्राद्वैतपक्षनिराकरणं यथा ब्रह्माद्वैतस्वीकारे तत्साधकप्रमाणस्यासिद्धिः प्रमाणसत्त्वे तु न सत्त्वैकत्वसिद्धिरित्यं दूषणेन सत्त्वैकत्ववादनिराकरणम्। यथा वृक्षमूलसेकात् तदीयावयवोपचयद्वारवशेन फलोत्पत्तिस्तथा यागादेर्नाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वात् स्वर्गाद्युत्पत्तिरिति व्यवस्थापनम्। स्वर्गादेः स्वरूपेण फलत्वसाधनम्। फलस्य उत्पत्तेः प्रागसत्त्वेन शशशृङ्गादेरिव उत्पत्त्यसम्भवः सत्त्वे च उत्पत्त्ययोग्यतया कारणव्यापारानर्थक्यं सदसत्त्वाङ्गीकारे च विरोध इत्याशङ्क्य फलस्य उत्पत्तेः प्राक् असत्त्वव्यवस्थापनम् असत उत्पत्तौ इच्छातन्तुषु पटो भविष्यतीति प्रागभावज्ञानस्यैव प्रवर्त्तकतयाऽनियमवारणम्। कर्म्मकर्त्तृदेहादेर्नाशेऽपि अदृष्टस्यान्यथोत्पत्तेः तेनैव चादृष्टेन जायमाने स्वर्गादिदेहे सुखभोगे सामानाधिकरण्यसम्बन्धेनादृष्टजन्यस्वर्गादिफलस्यात्मनिष्ठत्वव्यवस्थापनम्। सुखदुःखयोरेव सुखस्य फलत्वं स्त्रीपुत्रादेस्तु तत्साधनत्वादौपचारिकफलत्वमिति नादृष्टसामानाधिकरण्यव्याघात इति समर्थनम्। देहसम्बन्धस्यैव विविधबाधनायोगहेतुत्वाद् दुःखस्वरूपत्वकथनम् विविधदुःखयुक्ततया शरीरस्य दुःखत्वेन भावनाकथनम् दुःखमध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानानौचित्येऽपि तदुपार्ज्जनादौ दुःखबाहुल्यात् देहसम्बन्धं सर्व्वं दुःखमित्येव भावनीयमिति निरूपणम्। प्रतिषिद्धभोजनमैथुनादौ प्रवृत्तिनिवारणार्थमपि दुःखस्य हेयत्वोक्तिः। आर्षदैवपैतर्षीयाकरणाद्दुरन्तेनापवर्गकालाभावमाशङ्क्य आयुषश्चतुर्थभागेऽपवर्गसाधनकालत्वसाधनम् तथा कामनाशून्यस्य विरक्तस्य ततोऽर्वागपि तत्सेवनव्यवस्थापनम्। तत्त्वज्ञानोत्पत्तौ प्रारब्धातिरिक्तकर्म्मजन्यादृष्टमात्मनाशेन न स्वर्गफलकादृष्टेन प्रतिबन्ध इति कथनम्। क्लेशानुबन्धसत्तयापवर्गाभावमाशङ्क्य सुषुप्तस्य सर्व्वक्लेशाभाववदपवर्ग इति सुषुप्तिदृष्टान्तेन क्षेत्रभावेनाऽपवर्गे दुःखाभावसाधनम्। रागशून्यस्यानुत्पत्तेः रागादीनां च मिथ्याज्ञाननिमित्तकत्वेन तत्त्वज्ञानेन च मिथ्याज्ञाननिवृत्तौ दुःखनिवृत्तिरिति

क्रमकथनम् ४अ० १आ० गतार्थाः। देहात्मबुद्धेर्दोषजन्यतया दोषस्य च मिथ्याज्ञानाधीनत्वेन तत्त्वज्ञानात् आत्मनोदेहादिभ्यो भेदज्ञाननिष्ठतौ तदभेदज्ञाननिरासेन मिथ्याज्ञाननिवृत्तिः तस्यां च सत्यां क्रमेण प्रवृत्तिनिष्ठत्या दुःखनिवृत्तिरूपापवर्गसिद्धिः अतोऽपवर्गसाधनं तत्त्वज्ञानमित्येवंप्रतिपादनम्। साधुतया भावितानां रूपादिविषयाणां दोषहेतुत्वकथनम्। सौन्दर्यं पश्यतो रागादिर्ब्रह्मणोऽप्यसुकरपरिहार इत्याशङ्क्य तत्र सौन्दर्यबुद्धे रागाधीनतया तरुण्यादिदेहे सौन्दर्याभिमानस्य त्याज्यताकथनम्। भाष्ये तु "परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीया" इत्युक्तम्। तथा च "खेलत्खञ्जननयना परिणतबिम्बधारा पृथुश्रोणी। कमलस्तुलस्तनीयम् पूर्णेन्दुसुखी सुखाय मे भवितेति" अनुरञ्जनसंज्ञा। "चर्मनिर्मितपात्रीयं मांसासृक्पूयपूरिता। अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः" अशुभसंज्ञा एवं स्वदेहादावपि चिन्तनम्। परमाणुद्रव्यस्यैव घटादिरूपताऽतोनास्ति अतिरिक्तोऽवयवीति सौत्रान्तिकवैभाषिकयोर्मतस्य पूर्वदूषितस्यापि स्वमतदार्ढ्याय पुनर्दूषणम्। परमाणोरुत्पत्तिपरत्वव्यवस्थापनम्। आकाशस्य सर्वगतत्वं सर्वमूर्तसंयोगित्वं तत्र संयोगस्याव्याप्यवृत्तितया तदवच्छेदकभेदं विनाऽनुपपत्त्या सावयवत्वापत्तिमाशङ्क्य मूर्तपदार्थस्यैवावयवानां तदवच्छेदकत्वम् इत्युक्त्वा तस्य निरवयवत्वसमर्थनम्। सर्वत्र शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् आकाशस्य सर्वमूर्तसंयोगित्वसमर्थनम् आकाशे च प्रतिहतस्य परावर्तनरूपव्यूहस्य उत्तरदेशगतिप्रतिबन्धरूपविष्टम्भस्याभावात् विभुत्वव्यवस्थापनम्। परमाणोः संयोगवत्त्वान्यथानुपपत्त्या सावयवत्वापत्तिः संयोगस्य अव्याप्यवृत्तितया अव्याप्यवृत्तेश्चावच्छेदकभेदं विना सत्त्वासम्भवादित्याशङ्क्य तदवयवानामपि संयोगसिद्धये सावयवत्वकल्पनायामनवस्थापत्तिरतो दिग्विभागानामेव संयोगावच्छेदकत्वकल्पनेन परमाणोर्निरवयवत्वसमर्थनम्। ज्ञानातिरिक्तो बाह्यपदार्थो नास्तीत्यत्र यदि प्रमाणमस्ति तदा ज्ञानातिरिक्तप्रमाणरूपबाह्यस्य सत्त्वान्न बाह्याभावः अथ तत्र प्रमाणं नास्ति तदा निष्प्रमाणकत्वान्न तत्सिद्धिरित्येवंरूपेण बाह्यार्थाभावाङ्गीकर्तृमतनिराकरणम्। स्वप्नस्य स्मृतिविशेषरूपत्वं व्यवस्थाप्य शुक्तिरजतविज्ञाने रजतांशस्य ज्ञानलक्षणया उपनीतस्य संसर्गमात्रबोध इति व्यवस्थापनेन स्वप्नदृष्टान्तेन ज्ञानमात्रस्वप्नविषयकत्ववादिमतनिराकरणम्। इत्येवंबाह्यार्थभङ्गनिराकरणम्। ज्ञानसामान्यात् तत्त्वज्ञानस्यापि क्षणिकत्वात् तन्नाशे प्रतिबन्धकापाये पूर्ववासनावशात् मिथ्याज्ञानं पुनरुत्पद्येतेति तत्त्वज्ञानस्य न मिथ्याज्ञानोच्छेदकतेत्याशङ्कायां तन्निरासः। समाधिविशेषाभ्यासात् तत्त्वज्ञानस्य विदुषः। तद्दृष्ट्या च मिथ्याज्ञानवासनातिरोभावान्न तत् फलायालमिति समर्थनम्। ततश्च तत्त्वज्ञानसंस्कारः अन्यसंस्कारप्रतिबन्धी भवतीति व्यवस्थापनम्। तत्र प्रतिबन्धस्य कार्याजनकत्वसम्पादनं विनाशोवेति। स्वाभाविकविषयरागादिना प्रतिबन्धात् समाध्यसम्भवमाशङ्क्य पूर्वकृतेश्वराधनादिना अभ्यासपाटवे जनिते तत्संस्कारात् समाधिसिद्धिरिति समर्थनम्। तथा च पूर्वकृतेश्वरानुसन्धानादिसहकारेणैव तत्त्वज्ञाने जनिते न रागादेः प्रतिबन्धकत्वम्। अरण्यगुहापुलिनादिषु योगाभ्यासस्थानत्वकथनम्। अपवर्गे प्रारब्धकर्मानुसारेण देहादेः सत्त्वेन तदनुरूपार्थावभाससङ्गावकथनम्। प्रारब्धकर्मावसाने देहाभावे विदेहकैवल्यप्राप्तिकथनम्। समाधिसिद्धये यमनियमाद्यष्टाङ्गयोगाभ्यासस्यावश्यकतोक्तिः। श्रवणमननिदिध्यासनैरात्मसाक्षात्कारोत्पत्तिकथनम्। एतच्छास्त्राभिज्ञैः सह स्वनिश्चितार्थदार्ढ्याय एतच्छास्त्रोदितार्थनिश्चयस्य संवादः कर्तव्य इति प्रतिपादनम्। संवादश्च शिष्यगुरुसब्रह्मचारिस्नेयोर्थिभिः जिगीषाहीनैः सह कार्य इति निरूपणम्। तत्त्वनिर्णयार्थं प्रतिकूलपक्षहीनतया संवादः करणीयः न जिगीषयेति निरूपणम्। तत्त्वनिश्चयसंरक्षणार्थं बीजप्ररोहसंरक्षार्थं कण्टकवरणवत् त्रयीबाह्यैः सह जल्पवितण्डे आश्रयणीये न वाद इत्येतत्कथनम् तथा च यदि त्रयीबाह्यैः स्वपक्षआक्षिप्यते तदा जल्पवितण्डाभ्यां तेषां मतं खण्डनीयम्। एते अर्थाः ४अ० २आ० उक्ताः। साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनित्यानित्यकार्य्यसमाश्चतुर्विंशतिः जातयो विभज्य तल्लक्षणान्युक्तानि। कथाभासप्रकरणम्। ५अ० १आ० गतार्थाः। प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरम् निरर्थकमविज्ञातार्थमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपोमतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्च निग्रह-

स्थानानि इति नित्यहस्थानानि विभज्य तेषां क्रमेण लक्षणानि उक्तानि ५ अ० २ आ० गतार्थाः । यथा पदार्थतत्त्वज्ञानादपवर्गस्तथा तन्मतं सर्व० द० समर्थयति । यथा "ननु तत्त्वज्ञानाद्निःश्रेयसमवतीत्युक्तं तत्र किं तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते, नेत्युच्यते तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति । तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु च द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित् समस्ति परस्परानुबन्धत्वात्तु रागादीनां, मूढोऽर्थति रक्तो मुह्यति मूढः कुप्यति कुपितो मुह्यतीति ततस्तैर्दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेयादीन्याचरति वाचा अनृतादीनि, मनसा परद्रोहादीनि, सेयं पापरूपा प्रवृत्तिरधर्ममावहतीति । शरीरेण प्रशस्तानि दानपरपरित्राणादीनि, वाचा हितसत्यादीनि, मनसा अहिंसादीनि, सेयं पुण्यरूपा प्रवृत्तिर्धर्मम् । सेयमुभयी प्रवृत्तिः ततः स्वानुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावं, तस्मिन् सति प्रतिकूलवेदनीयतया वासनात्मकं दुःखं भवति तत्र मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः संसारशब्दार्थो घटीचक्रवच्छिरवधिरनुवर्त्तते । यदा कश्चित् पुरुषधौरेयः पुराकृतसुकृतपरिपाकूबमादाचार्योपदेशेन सर्व्वमिदं दुःखायतनं दुःखानुषक्तञ्च पश्यति तदा तत्सर्व्वं हेयत्वेन बुध्यते ततस्तन्निवर्त्तकर्मविद्यादि निवर्त्तयितुमिच्छति तन्निवृत्त्युपायञ्च तत्त्वज्ञानमिति कस्यचित्तत्सृभिर्विद्याभिर्विभक्तं भावयतः सत्यदर्शनपदवेदनीयतया तत्त्वज्ञानं जायते तत्त्वज्ञानान्मिथ्याज्ञानमपैति, मिथ्याज्ञानापाये दोषाः अपयान्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमत्यन्तं निवर्त्तते सात्यन्तिकी निवृत्तिरपवर्गः । निवृत्तेरात्यन्तिकत्वं नाम निवर्त्यसजातीयस्य पुनस्तत्वानुत्पाद इति तथा च पारमर्षसूत्रम् "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः" इति । ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदद्यापि कफोणिगुड़ायितं वर्त्तते तत्कथं सिद्धवत्कृत्वा व्यवह्रियत इति चेन्नैवं सर्व्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्व्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्येतावत्तावद्विवादम् । अथ मन्येथाः शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्यानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तदरिक्तो वा । प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत् । द्वितीयेतस्य नित्यत्वे निवृत्तिरशक्यविधानैव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावान् "आत्मनस्तु कामाय सर्वं प्रियं भवतीति" सर्व्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्वोहि प्राणी मुक्त इति व्यवहरति । ननु धर्मनिवृत्तौ निर्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधारासम्भवात् लङ्घनाभ्यासादिवदनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते । आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः । अङ्ग भवान् पृष्टो व्याचष्टां किमावरणम् ? धर्माधर्मभ्रान्तय इति चेत् दृष्टमेव । अथ देहमेवावरणं तथा च तन्निवृत्तौ पञ्जरान्मुक्तस्य शुकस्येवात्मनः सततोर्द्ध्वगमनं मुक्तिरिति चेत्सदा वक्तव्यं किमयमात्मा मूर्त्तोऽमूर्त्तो वा । प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मवदात्मधर्माणामतीन्द्रियत्वं प्रसज्येत । सावयवत्वे यत् सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसज्येयाताम् । अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्तं प्रतिबन्धात् । पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवादम् । ऐश्वर्यं चेत् सातिशयतया सङ्कुचतया च प्रेक्षावतां नाभिमतम् । प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याभिमतेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं प्रकृत्याश्रयं वेति एतावदवशिष्यते तत्र पुरुषाश्रयमिति न श्लिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापातात्तापि प्रकृत्याश्रयः अचेतनत्वात् तस्याः । किञ्च प्रकृतिः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा आद्ये अनिर्मोक्षः स्वभावस्थानपायात् द्वितीये सम्प्रति संसारोऽस्तमियात् । नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्व्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते । श्रुतिस्तत्र प्रमाणमिति

चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा यावन्नावेऽपि तथाभावप्रसङ्गात् । ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुहरतीति चेत्तदेतन्नाटकपक्षपतितत्वाच्च न्यक्षेण । सुखस्य सातिशयत्वेन प्रत्यक्षतया बलप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषान्नषण्ढमधुवत् दुःखपक्षनिक्षेपात् । नन्वेकमनुसन्धित्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं संस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् तथा हि न्यायोपार्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि, अन्यायोपार्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तोविदांकुर्वन्तु विदांवरा भवन्तः । तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम् । नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा । आद्ये असिद्धान्तापातः द्वितीये परस्पराश्रयापातः । उपमानादिकमप्यत्र यद्यविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति । विवादास्पदं नगसागरादिकं सकर्तृकं कार्यत्वात् कुम्भवत् । न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधत्वात् । ननु किमिदं सावयवत्वम् अवयवसंयोगित्वम् अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्त्वादावनैकान्त्यात् । तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात् । अवान्तरमहत्त्ववत्त्वेन वा कार्यत्वानुमानस्य सुकरत्वात् । नापि विरुद्धो हेतुः साध्यविपर्ययव्याप्तेरभावात्, नाप्यनैकान्तिकः, पक्षादन्यत्र दृष्टेरदर्शनात् । नापि कालात्ययापदिष्टः, बाधकानुपलम्भात् । नापि सत्प्रतिपक्षः, प्रतिभटादर्शनात् । ननु नगादिकमसकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षमतामीक्षते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात् । तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्योऽपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यत्कारकचक्रमवधीर्यात्मानमासादयेदित्येतदविवादम् । तच्च सर्वं कर्तृविशेषोपस्थितमर्थादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम् । एवञ्च कर्त्रव्यावृत्तेस्तदुपस्थितसमस्तकारकव्यावृत्तावकारणकत्वात् कार्यानुत्पादप्रसङ्ग इति स्थूलः प्रमादः । तथा निरटङ्कि शङ्करकिङ्करेण ।"अनुकूलेन तर्केण सनाथे सति साधने । साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव" इति । यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात् तदुदितसुदयनेन ! "आगमादेः प्रमाणत्वे बाधनादनिषेधनम् । आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्भटा" इति । न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात् । तदेतत् परमेश्वरस्य जगद्विधाने प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः । द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत । अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित् तं प्रत्याचक्षीत तर्हि सर्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखवत्त्वात् करुणाविरोधात् । स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते । तदुक्तं भट्टाचार्यैः । "प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते । जगच्च सृजतस्तस्य किं नाम न कृतं भवेदिति" । नास्तिकशिरोमणे ! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः, सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकवैचित्र्यादैचित्र्योपपत्तेः न च सातत्यभङ्गः शङ्कनीयः स्वाङ्गं खव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्याहात् एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र प्रमाणम् । यद्येवं तर्हि परस्पराश्रयबाधव्याधिं समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा । नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्व

अग्नौ आगमानित्यत्वस्य तीव्रादिधर्म्मोपेतत्वादिना सुगमत्वात् । तस्माद्विवर्त्तकधर्म्मानुज्ञानवशादीश्वरप्रसादसिद्धावभिमतेऽसिद्धिरिति सर्व्वमवदातम्" । अस्याश्चात्मतत्त्वज्ञानहेतुत्वादात्मविद्यात्वम् । "त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ ! दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः" भा०प०५६अध्या० । "त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् । "आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः "तत्रौपनिषदं तात परिगेष्यन्तु पार्थिव ! मद्भक्तिं मनसा तत्त्वं दृष्ट्वा चान्वीक्षिकीं पराम्" भा०शा०प० । "आन्वीक्षिकी कोशलानामिति" गौता । "सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना । प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम् । आश्रयः सर्व्वधर्म्माणां विद्योद्देशे परीक्षिता" पक्षिलस्वामी । अन्वीक्षा शील-मस्याः तस्यै हितं वा ठक् । २दुर्गायाञ्च "आत्मवेदनशीलत्वादन्वीक्षणपरात्य वा । अन्वीक्षाकारणत्वाद्वा तस्मादान्वीक्षिकी स्मृता" देवीपु० तद्विरुक्तिः ।

आन्वीपिक त्रि० अन्वीपं वर्त्तते ठक् । अनुकूले ।

आप प्राप्तौ वा चुरा०उभ० पक्षे स्वादि० प०सक० अनिट् । आपयति ते आपिपत् त । पक्षे आप्नोति आप्नुतः आप्नुवन्ति आप्नुयात् आप्नोतु आप्नोत् आप्नुवन् । आपत् आप आपथुः आपुः आपिथ । आप्ना आप्यात् आप्स्यति आप्स्यत् । आप्नव्यः आप्यम् आपनीयम् आप्ना आप्नः आप्निः आप्त्वा आप्य । क्विप् हस्वः आपः अपः अद्भिः । अस्तुन् आपः । शतृ आप्नुवन् ताच्छील्ये चानश् आप्नुवानः । "अयशोमहदाप्नोति" "इहाप्यग्रां कीर्त्तिमाप्नोति" मनुः । "नत्वेवाधौ सोपकारे कौमोदीं दृढिमाप्नुयात्" वा०स्मृतिः "पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि" शक्र० "येन श्रेयोऽहमाप्नुयाम्" गीता "स दुष्प्रापयशाः प्रापत्" रघुः । "शतं क्रतूनामपविघ्नमाप सः" रघुः । "यदिदं सर्वं सत्यनाप्नम्" श्रुतिः "नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि" गीता । कर्म्मणि आप्यते आपि । प्रेरणे णिच् । आपयति ते आपिपत् त । सन् ऐप्सति ऐप्सितः । [प्राप्तिःसंयोगः स उदाहृतः" भाषा० । प्र-प्रकर्षेणाप्नोति प्राप्नोः प्राप्निः "अप्राप्तस्य च या सम्+संपूर्णतायां समाप्नोः समाप्निः समाप्तम् । [साधनं" कुमा० । अव+प्राप्तौ, "अनवाप्तमवाप्तव्यम्" गीता "तपः किलेदं तदवाप्नि परि+प्रचुरत्वे समर्थत्वे सम्पूर्णत्वे पर्य्याप्नोः पर्य्याप्निः । "अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्" गीता ।

अनु+प्रा-पश्चात्प्राप्तौ "नदीं गङ्गामनुप्राप्ताः" भा०आ०प० । वि+विशेषेण आप्नोः व्याप्निः व्याप्तः, व्याप्यः व्यापकः व्यापनम् "व्याप्तस्य पक्षधर्म्मत्वधीःपरामर्श उच्यते" । "व्याप्निः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः" भाषा० । "अस्मात्मनेपदित्वमपि स्वाराज्यं प्राप्नुते भवान्" इति दुर्गादासः ।

आप पु० आप्यते आप-कर्म्मणि घञ् । अष्टसु वसुषु मध्येऽर्घे वसौ, "धरो ध्रुवः सोमनासा तथापोऽथनिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः" विष्णुध० । "सव्यदक्षौ वसोर्यस्य चोर्द्धौ हस्तौ सशक्तिकौ । सोराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः" इति तद्ध्यानम् "आपश्चैवानिलश्चैव ववर्षतुररिन्दमौ" हरिवं०२४५अ० देवासुरयुद्धे । "आपस्य दुहिता भार्य्या सहस्य परमा प्रिया ! भूपतिर्भुवभर्त्ता चाजनयत् पावकं परम्" भा० व०२२१ अ० । भा०आ० प० ६६अ० तु "धरोध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः । धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा । चन्द्रमास्तु मनस्विन्याः श्रमायाः श्रमनस्तथा । वातायास्याश्वहः पुत्रः शाण्डिल्याश्च स्तायनः । प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ" इति आपस्थाने अह इति नामान्तरत्वेन कीर्त्तितम् कल्पभेदादविरुद्धम् । प्रभासस्यैव द्युनामता अष्टमस्य वसोः आपगेययज्ञे दर्शयिष्यमाणे भा० ६६अध्याये द्युनामतोक्तेः अपां समूहः अण् । २जलसमूहे न० । ३आकाशे निरु० । तस्य सर्व्वमूर्त्तसंयोगित्वात्तथात्वम् ।

आपक त्रि० आप-स्वुल् । प्राप्तरि । गौरा० स्त्रियां ङीष् ।

आपकर त्रि० अपकरे भवः अण् अञ् च । अपकरजाते स्त्रियां ङीप् ।

आपक्व न० ऐषत् पक्वम् आ+पच-क्त । १ऐषत्पक्वे कलायादौ भर्ज्जिते हरितयवादौ (होडापोडा) २ऐषत्पक्ववस्तुमात्रे त्रि० । [पत्ये स्त्रियां क्रौड्या० ष्यञ् । आपक्ष्यिका ।

आपक्षिति पु० अपक्षितस्यापत्यम् इञ् । अपक्षयापन्नस्या-

आपगा स्त्री आपेन जलसमूहेन गच्छति वहति ड । नद्याम् । "फेनायमानं पतिमापगानाम्" "सम्भूयाम्भोधिमभ्येति महानद्या नगापगा" माघः । "शिखरिणामिव सागरमापगाः" रघुः ।

आपगेय पु० आपगायां गङ्गायां भवः ढक् । गाङ्गेये भीष्मे तस्य

तत उत्पत्तिकथा भा०आ०९८अ० शान्तनुप्रार्थने गङ्गावाक्यं यथा। "एतच्छ्रुत्वा वचो राज्ञः स्मितं कृत्वा वचो च। वसूनां समयं स्मृत्वाऽथाभ्यगच्छदनिन्दिता। उवाच चैव राज्ञः सा श्लक्ष्णया मनो गिरा। भविष्यामि महीपाल महिषी ते वशानुगा। यत्तु कुर्यामहं राजन्! शुभं वा यदि वा शुभम्। न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियं चोक्ता त्यज्येयं त्वामसंशयम्"। वैश० उक्तिः "तथेति राज्ञा सा प्रोक्ता तदा भरतसत्तम। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्त्वाञ्च बुभुजे कामतो वशा। न प्रष्टव्येति मन्वानो न स तां किञ्चिदूचिवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारैश्च रहसि तोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमत्ं वरवर्णिनी। भार्य्योपनतकामस्य भार्य्या चोपनताऽभवत्। शान्तनोर्नृपसिंहस्य देवराजसमद्युतेः। सम्भोगश्लेषचातुर्य्यैर्हावलास्यमनोहरैः। राजानं रमयामास यथा रेमे तथैव सः। स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरान्बहून्मासान् बुबुधे न बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वरः। अष्टावजनयत्पुत्रांस्तस्यामरसन्निभान्। जातं जातञ्च सा पुत्रं त्रिषत्यम्भसि भारत। प्रीणाम्यहं त्वामित्युक्ता गङ्गास्रोतस्यमज्जयत्। तस्य तन्नप्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् पुत्रमात्मनः। मा वधीः कस्य काऽसीति किं हिनस्सि सुतानिति। पुत्रन्नि! सुमहत्पापं सम्प्राप्तं ते सुगर्हितम्"। स्त्र्युवाच। "पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतां वर!। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। महिषा मानुषी धात्री लोके नास्तीह काचन। तस्मात्त्वज्जननोद्देतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽजयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोचयिष्ये जन्मतो मानुषादिति। तच्छ्रुत्वा शापाद्विनिर्मुक्ता आपवस्य महात्मनः। अस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमम् सुतम्"। कृत निजधेनुकान् वसून् प्रति गङ्गया वशिष्ठशापस्तत्रैवोक्तः ९९अ०। "अथाश्रमपदं प्राप्तः फलान्यादाय वाग्ऋषिः। नचापश्यत्स गां तत्र सवत्सां काननोत्तमे। ततः स मृगयामास वने तस्मिंस्तपोधनः। नाध्यगमच्च मृगयंस्तां गां मुनिरुदारधीः। ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनैः। वयौ क्रोधवशं सद्यः शशाप च वसूंस्तदा। यस्मान्मे वसवो जह्नुर्गां वै दोग्ध्रीं सुवालधिम्। तस्मात्सर्व्वे जनिष्यन्ति मानुषेषु न संशयः। एवं शशाप भगवान् वसूंस्तान् भरतर्षभ!। वशं क्रोधस्य सम्प्राप्त आपवो मुनिसत्तमः। श्रुत्वा च तान्महाभागस्तपस्येव मनो दधे। एवं स भगवान् राजन्! वसूनष्टौ तपोधनः। महाप्रभावो ब्रह्मर्षिर्देवान् क्रोध समन्वितः। अथोत्रमपदं प्राप्तास्ते वै भूयो महात्मनः। शशापुरिति जानन्त ऋषिं तमुपचक्रमुः। प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ!। लेभिरे नच तत्राते प्रसादमृषिसत्तमात्। आपवात्पुरुषव्याघ्र! सर्वधर्म्मविशारदात्। उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः। अनुसं वत्सरात्सर्वे शापमोक्षमवाप्स्यथ। अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति। द्यौश्चदा मानुषे लोके दीर्घकालं स्वकर्म्मणा। भ्रान्तं तच्छिक्षीषांमि कृत्वो युष्मान् यदब्रवम्। न प्रजास्यति चाप्येष मानुषेषु महामनाः। भविष्यति च धर्म्मात्मा सर्वशास्त्रविशारदः। पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति। एवमुक्त्वा वसून् सर्वान् स जगाम महानृषिः। ततो मानुषजन्मुक्ते समेता वसवस्तदा। अवाचन्त च मां राजन्! वरं तत्र मया कृतम्। जातान् जातान् प्रक्षिपास्मान् स्वयं गङ्गे! त्वमम्भसि। एवं तेषामहं सम्यक् शप्तानां राजसत्तम!। मोक्षार्थं मानुषाल्लोकाद्यथावत्कृतवत्यहम्। अयं शापादनेकस्य एक एव नृपोत्तम। द्यौराजन्! मानुषे लोके चिरं वत्स्यति भारत!। वैशाम्पायन उवाच। एतदाख्याय सा देवी तत्रैवान्तरधीयत। आदाय च कुमारं तं जगामाथ यथेप्सितम्। स तु देवव्रतो नाम गाङ्गेय इति चाभवत्। द्युनाम्ना शान्तनोः पुत्रः शान्तनोरधिको गुणैः"।

"अथापगेयं भीष्मं तं रामेणेच्छामि धीमता। रणे विनिर्जितं द्रष्टुं कुर्य्यात्तदपि भार्गवः" "यदि त्वामापगेयो वै

ननश्येद्गजसाह्वयम्" इति च भा० उ० प० ७७ अ०।

आपच्चिक त्रि० आपदं चिक्कति कन्ति चिक्क-अण् पृ० कलोपः। आपत्कर्त्तरि। गौरा०स्त्रियां ङीष्।

आपटव न० न सन्ति पटवोऽस्य तस्य भावः अण्। पटुशून्यत्वे। न पटुरपटुरिति तत्पुरुषात्तु घञि उत्तरपदस्यैव वृद्धिः। अपाटवम्। "अपाटवाद्यौचाद्यैर्यदि विघ्नं प्रजायते" स्मृतिः।

आपण पु० आपण्यायन्ते विक्रीणन्त्यत्र आ+पण-नि० आधारे घ। १हट्टे, २क्रयविक्रेयद्रव्यशालायाञ्च। "शकटापणवेशाश्च वणिजोवन्दिनस्तथा। नराश्च नगवाशीलाः शतशोऽथ सहस्रशः" भा० व० प० २३८। "भक्ष्यमाल्यापणानाञ्च ददशुः श्रियसत्तमाम्" भा० स० प० ४ अ०। "अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकम्। सुहृद्बन्धुसकुल्यस्य न तद्भोगेन क्षीयते" दा० त० धृ०। "आपणः पण्यवीथिका" रघु० व्य० त०। "आपणो विक्रयस्थानम्" तेनैवोक्तम्। "पूर्णापणाविपणिनो विपणीर्विभेजुः" माघः। भावे घञ् आपाणः। क्रयविक्रयव्यवहारे पु०।

आपणिक त्रि० आपणादायस्थानादागतः ठक्। १हट्टस्थानादागते राजकरादौ। आपणस्य धर्म्यम् ठक्। २हट्टस्थवणिग्धर्म्ये। आपणस्यावक्रयः राज्यग्राह्यः ठक्। ३हट्टस्थे राजग्राह्ये द्रव्ये (तोला) आ+पण-ट्ठक्न्। ४वणिग्जने उज्ज्वलदत्तः।

आपतन न० आ+पत-भावे ल्युट्। १आगमने २प्राप्तौ ३ज्ञाने "क्वचित् प्राकरणिकादर्थादप्राकरणिकार्थास्यापतनम्" सा० द० दैववशात् ४पतने च।

आपति पु० आपतति आ+पत-इन्। सततगामिनि वायौ "आपतये त्वा परिपतये गृह्णामि" य० ५,५, आपतिः सततगतिर्वायुः" वेददी०। [२दैवायत्ते त्रि० उज्ज्वलदत्तः।

आपतिक पु० आपतति शीघ्रम् आ+पत-ट्ठक्न्। १श्येने

आपतित त्रि० आ+पत-क्त। १हठादागते २दैवायत्तपतने च

आपत्कल्प पु० आपदुचितः कल्पोविधिः ष० त०। आपत्कालिकविधौ स च विधिर्गौतमेनोक्तः यथा "आपत्कल्पोब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषाऽऽसमाप्तेर्ब्राह्मणोगुरुः याजनाध्यापनप्रतिग्रहाः सर्व्वेषां पूर्व्वः पूर्व्वोगुरुस्तद्लाभे क्षत्रवृत्तिस्तद्लाभे वैश्यवृत्तिः तस्यापण्यं गन्धरसक्षतात्रतिलशाणक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरञ्च सविकारं मूलफलपुष्पौषधमधुमांसलवणोदकायस्यानि पशवश्च हिंसासंयोगे पुरुषवशाकुमारीवेहतश्च नित्यं भूमिव्रीहियवाजाव्यश्च ऋषभधेन्वनड्वहश्चैके। विनिमयस्तु रसानां रसैः पशूनाञ्च न लवणक्षतान्नयोः, तिलानाञ्च समेनामेन तु पक्वस्य संप्रत्यर्घे सर्व्वधातृवृत्तिरशक्तावप्यूहेन तदप्येके प्राणसंशये, तद्वर्णसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत राजन्यवैश्यकर्म्म, राजन्यो वैश्यकर्म्म"

आपत्काल पु० आपद्युक्तः कालः ष० त०। आपद्युक्ते समये "अब्राह्मणाद्ध्ययनमापत्काले विधीयते" मनुः "आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुध्येत्तु द्रुपदां वा शतं जपेत्" प्रा० त० स्मृ०।

आपत्कालिक त्रि० आपत्काले भवः काश्या० ठञ् ञिठ् वा। आपत्कालभवे ठञि स्त्रियां ङीष् ञिठि तु टाबिति भेदः।

आपत्ति स्त्री आ+पद-क्तिन्। आपदि आपच्च रोगाद्यभिभूतावस्था सम्यग्वर्त्तनोपायानुपलब्धश्च। आपदि धर्म्माचरणञ्च या० स्मृ० दर्शितम् यथा

"ज्ञात्वेन कर्म्मणा जीवेद्विद्यां वाप्यापदि द्विजः। निस्तीर्य तामथात्मानं पावयित्वा न्यसेत् पथि। फलोपलक्षौमसोमगन्धमनुष्यापूपवीरुधः। तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम्। शस्त्रास्त्रवसधूच्छिष्टमधुलाक्षाश्च वर्ज्जयेत्। स्तृक्षुर्म्मपुष्पकृतपक्वेशृतक्रविषक्षितीः। कौशेयनीललवणमांसैकशफसीसकान्। शाकाद्यौषधिपिण्याकपशुगन्धांस्तथैव च। वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन। धर्म्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः। लाक्षालवणमांसानि पतनीयानि विक्रये। पयोदधि च मद्यञ्च क्षीरवर्णकराणि च। आपन्नतः सम्भृण्वन् भुञ्जानो वा यतस्ततः। न लिप्येतैनसा विप्रोज्वलनार्कसमो हि सः। ऋषिः शिल्पं प्रतिर्विद्या कुसीदं शकटं गिरिः। सेवानूपं नृपोभैक्षमापत्तौ जीवनानि तु। बुभुक्षितस्त्वहं स्थित्वा धान्यमब्राह्मणाद्धरेत्। प्रतिगृह्य तदाख्येयमभियुक्तेन धर्म्मतः। तस्य दत्तं कुलं शीलं श्रुतमध्ययनं तपः। ज्ञात्वा राजा कुटुम्बञ्च धर्म्मार्थं वृत्तिं प्रकल्पयेत्"। विस्तरस्तु भा० शा० प० आपद्धर्म्मपर्व्वणि द्रष्टव्यः। २प्राप्तौ। "स्थानापत्तेर्द्रव्येषु धर्मलाभः" कात्या० ४,२,१६ "इतरेतरभावापत्तिः" शा० भा० व्यतिरेकव्याख्या ३अर्थादेः सिद्धौ। अर्थापत्तिः ४अनिष्टप्रसङ्गे स च व्याप्यस्याहार्य्यारोपात् व्यापकस्याहार्य्यारोपः। यदि निर्वह्निः स्यात् निर्धूमः स्यादित्येवं रूपः।

आपत्य पु० अपत्याधिकारे विहितः अण्। पाणिन्यादिभिः

तस्यापत्यमित्यधिकारे विहिते प्रत्यये। "आपत्यस्य च तद्धितेऽनाति" पा०।

आपथि पु० अभिमुखः पन्थाः यस्य वेदे नि० इत् समा०। अभिमुखमार्गसम्बन्धिनि "आपथयोर्विपथयोऽन्तस्था अनुपथाः" ऋ० ५,५२ १०। आपथयः अभिमुखा मार्गा येषां तादृशाः" भा० स्त्रियां वा ङीप् "हिरण्ययेभिः पविभिः पयोदधः उज्जिघ्नन्त आपथ्यो न पर्व्वतान्" ऋ० १, १६४ ११।

आपद् स्त्री आ+पद्-सम्पदा० क्विप्। विपत्तौ आपत्तिशब्दे विद्वतिः" दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्" रघुः। "सम्पदो मे निरापदः" रघुः "अविवेकः परमापदां पदम्" किरा० "मन्त्रयक्तिविनिवारितापदः" माघः। "आपत्कल्पः आपत्काल्पः। आपत्प्राप्तः। आपन्नतः। आपद्ग्रस्तः। आपद्गर्मः" हलन्तत्वाद्वा टाप्। आपदाश्रयत्। आपत्काले न्यूनादपि विद्याधिगन्तव्या यथा द्रु० उ० "वाचा ह वै पूर्व्वं उपयन्ति सहोपायनकीर्त्योवास" अत्र भाष्यम् "वाचा ह किल पूर्व्वं ब्राह्मणाः विद्यार्थिनः सन्तः क्षत्रियान् वैश्यान् वा क्षत्रिया वैश्यानुपयन्ति शिष्यदत्त्या उपगच्छन्ति नोपायनशुश्रूषाभिः अतः स गौतम उपायनकीर्त्या उपगमनकीर्त्तनमात्रेणैव उवास ऋषिवान् नोपायनं चकार"। "आपदि समादधिकाद्वा विद्याप्राप्तिसम्भवावस्थायाम् उपायनमुपगमनं पादोपसर्पणम्" आन०।

आपदकाल पु० आपदा कृतोऽकालः। आपदा कृते दुष्टे काले "पीड़ा चापदकालस्य पत्तिज्ञानस्य पाण्डव!" भा० शा० प० ५६ अ०।

आपदेव पु० आपस्य जलसमूहस्य देवः। वरुणे।

आपद्धर्म्म पु० आपदि कर्त्तव्यो धर्म्मः। १आपद्यनुष्ठेये धर्म्मे आपद्धर्म्ममधिकृत्य कृतोऽध्यः अण्। भारतान्तर्गतशान्तिपर्वमध्यगते व्यासकृते २अवान्तरपर्वभेदे न० तच्च भा० शा० प० १३१ अध्यायादि १७३अध्यायपर्य्यन्तम्।

आपन न० आप+भावे ल्युट्। १प्राप्तौ। कर्मणि ल्युट्। २मरीचे शब्दच०। [मणौ २किराते च उज्ज्वलदत्तः।

आपनिक त्रि० आ+पन-स्तुतौ कर्मणि ठक्न्। १इन्द्रनीले

आपनेय त्रि० आ+अप+नी-कर्मणि यत्। समन्तादपनेये दूरीकार्य्ये "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ!" कठोप०। "श्रेयमार्गसम्प्रतिपाद्यात्मनि मतिः सैषा तर्केण खलुद्ग्भूयूहमात्रेण नापनेया नापनेतव्या न हन्तव्या। तार्किकोद्भावनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति अतएवच सेयमागमप्रसूता मतिः तार्किकादन्येनैवागमाभिज्ञेनाचार्य्येणैव प्रोक्ता सती-सुज्ञानाय भवति" भा०।

आपन्न आ+पद्-क्त। २आपद्ग्रस्ते "आपन्नः संसृतिं घोरां-यन्नाम विवशोऽग्रहीत्। ततः सद्योविमुच्येत यद्बिभेति स्वयं भयम्" भाग० "आपन्नाभयसत्त्वेषु दीक्षिताः खलु यौरवाः" शक्रु० "आत्मापराधादापन्नस्तत् किं भीमं जिघांससि" भा० स्त्री० प० १२अ० १प्राप्ते मेदि० आपन्नसत्त्वा

आपन्नसत्त्वा स्त्री आपन्नं प्राप्तं गर्भरूपेण सत्त्वं प्राणी यया। गर्भिण्यां स्त्रियाम् "समसापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः" रघुः। [निमयं दत्त्वा क्रीते।

आपमित्यक त्रि० अपमित्य परिवर्त्त्य निर्वृत्तम् कक्। वि-

आपया स्त्री आपेन जलपूरेण याति या+क। १जलपूरवाहि नदीभेदे "इमंहत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि" ऋ० ३,२३,४,। "आपया नाम काचित् नदी" भा० २आपगारूपनदीमात्रे च।

आपयित्र त्रि० आप+णिच्-इत्र। प्रापयितरि "आपयिता ह वै कामानां भवति यएवं विद्वानक्षरसद्गीथमुपास्ते" छा० उ०। "आपयिता ह वै कामानां यजमानस्य भवति" भा०। स्त्रियां ङीप्।

आपराधिक्य न० अप+राध-णिच् बा० ष्यञ्। अपराधकर्त्तृत्वे।

आपराह्णिक त्रि० अपराह्णे भवः ठञ्। १अपराह्णभवे २तद्व्यापके च स्त्रियां ङीप्। "पित्र्ये चापराह्णिकी" स्मृतिः।

आपर्त्तुक पु० ऋतुमधिकृत्य अध्यायः तत्र विहितः कल्पः। ऋतावध्यायबोधके छान्दसे कल्पग्रन्थभेदे। "ऋतावध्यायश्छान्दसः कल्प आपर्त्तुकः" कौशीतकिसूत्रम्।

आपव पु० आपुनाति स्वर्शमात्रेण आपु जलं तदधिष्ठाता वरुणोऽपि आपूः तस्यापत्यम्। कल्पभेदे वरुणस्यापत्ये १वशिष्ठे मुनौ तस्य व्रत उत्पत्तिकथा यथा भा० आ० प० ६६ अ० "यं लेभे वरुणः पुत्रं पुरा भरतसत्तम! वशिष्ठनामा स मुनिःख्यात आपव इत्युत" "तत्ते यागाद्विनिर्मुक्ता आपवस्य महात्मनः" इति च आपगेयशब्दे विद्वतिः। आपं जलपूरं वाति प्राप्नोति आश्रयत्वेन वा-क। २नारायणे परमपुरुषे। "आपोनारा इति प्रोक्ताः आपोवै नरसूनवः। अयनं तस्य ताः पूर्व्वं तेन नारा-

यणः स्मृत" इत्युपक्रम्य । "उच्चावचानि भूतानि गात्रेष्यस्तस्य जज्ञिरे । आपश्च प्रजासर्गे सृजतो हि प्रजापतेः" स सृष्ट्वा तु प्रजास्त्वेवमापो वै प्रजापतिः" इति च हरिवं० १,२अ० ।

आपस् न० आप-असुन् । जले । "आपोनिर्मार्ज्जनं कृत्वा" स्मृतिः । "अन्नमयं हि सोम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्" छा०उप० "सर्वमापोमयं जगत्" देवीभा० । "ब्रुवते कतमेऽपि नपुंसकमाप" इति वृत्तिधृतकोषात् क्लीवत्वम् । तुडभावे त्वसः अप इत्येव । तुट् पक्षे अप्स इत्यपि । कर्मणि ।

आपस्तम्ब पु० ऋषिभेदे स च कल्पसूत्रकारः धर्म्मशास्त्र कर्त्ता च "यमापस्तम्बसंवर्त्तौ कात्यायनबृहस्पती" इत्याद्यभिधाय "धर्म्मशास्त्रप्रयोजकाः" या० स्मृ० । तदीय संहिताच दशाध्यायी तस्यां प्रायश्चित्तविधानमात्रमुक्तम् । तस्यापत्यम् विदा० अञ् आपस्तवः तदपत्ये पुंस्त्री स्त्रियां ङीप् । आपस्तम्बसेदम् छ । आपस्तम्बीयः । तत्सम्बन्धिनि त्रि० आपस्तवेन प्रोक्तमधीयते अण् तस्य लुक् । आपस्तम्बप्रोक्ताधाध्येष्टसु ब०व० । आपस्तम्ब्यां भवः ढक् । आपस्तम्बेयः । आपस्तम्बापत्यस्त्रीभवे त्रि० ।

आपस्विनी पु०आपः सन्त्यस्मिन् सन्नभ-णिनि । लिङ्गिन्यां लतायाम् ।

आपाक पु०समन्तात् परिवेष्य पच्यतेऽत्र आ+पच-आधारे घञ् । १कुम्भकारस्य मृण्मयपात्रपचनस्थाने (पोयान) । भावे घञ् । २ईषत्पाके ३सम्यक्पाके ४पुटपाके च ।

आपाङ्क्त्य न० अपाङ्क्ते देयम् यत् । अपाङ्क्ते देये अङ्कने । "शलाकया दक्षिणेन क्षिप्तेकानीनमङ्कनम् । आपाङ्क्त्यं वा यथायोग्यं कुर्य्याच्चात्र गतागतम्" स्मृ० ।

आपात पु० हठात् अविवेकात् कारणान्तरसाचिव्याभावेऽपि आगत्य पातः । अविविच्यावगतौ "आपाततोयदर्थस्य पौनरुक्त्यावभासनम्" सा०द० २अवकिंतागमने । "गरुड़ापातविश्लिष्टभेषजादस्यबन्धन" रघुः । "तदापातभयात् पथि" कुमा० आपतत्यत्राधारे घञ् । ३तत्काले वर्त्तमानकाले "आपातरम्या विषयाः पर्य्यन्तपरितापिनः" किरा० "आपातरम्यास्तत्कालरमणीयाः" मल्लि० । ४उपक्रमे च "मध्वापातोविषास्वादः स धर्मप्रतिरूपकः" मनुः । "मध्वापातो मधुरोपक्रमः" कुल्लू० ।

आपातालिका स्त्री उत्तर० उक्ते मात्राभेदे "कथितेयं मात्रा गुरुकावत्र पूर्व्वमन्यत्" तल्लक्षणं अन्यत् वैतालीयगतम् तच्च "षड्विधमेऽष्टौ समे कलास्तासु समे स्युर्नोनिरन्तराः । न समात्र पराश्रिता कला" इत्येवं प्रथमं निवेश्यान्ते जगणं दत्त्वा गुरुद्वयं चतुर्षु चरणेषु देयमित्यर्थः ।

आपाततस् अव्य० आपात+तसिल् । १कारणं विनेत्यर्थे २अकस्मादित्यर्थे ३अनयधार्य्येत्यर्थे च । "एतच्चापाततः" जगदी० "आपाततो यदर्थस्येति" सा०द० ।

आपात्य त्रि० आपतति स्वयमाक्रमितुमागच्छति । "भव्यगेयेत्यादि" पा०नि० कर्तरि ण्यत् । १स्वयमाक्रमितुमागामिनि । "आपात्यसैनिकनिराकरणाकूलेन" माघः । भावे ण्यत् । २कर्तव्यापतने ३कर्मणि ण्यत् । आपात्ये देशादौ त्रि० आ+पत-णिच् ल्यप् । ४समन्तात्पातयित्वेत्यर्थे अव्य० ।

आपाद पु० आ+पद- घञ् । फललाभे "ध्यानापादांघा दृव" इ०उ० "ध्यानस्यापादनमापादः ध्यानफललाभः" इति भा० २आगतौ च पादपर्य्यन्तम् अव्ययी० । ३पादपर्य्यन्ते अव्य० ।

आपादन न० न० आ+पद-णिच्-ल्युट् । १आपत्तिविषयीकरणे आपादकज्ञानेन आपद्यनिश्चये" पद-भावे णिच्-ल्युट् । २सम्पादने "द्रव्यस्य संस्कारान्तरापादने" सि० कौ० ।

आपान न० आपीयते सम्भूय सुरा पीयतेऽत्र आधारे ल्युट् । सुरापानाय सम्भूयोपवेशनस्थाने । पानार्थसभायाम् (चक्र) "गन्धर्वापसरसोभद्रे ! मामापानगतं सदा" भा०व०प०२८०अ० । "आपाने पानकलिता दैवेनाभिप्रणोदिताः" ददर्श यदुवीराणामापाने वैशसं महत्" इति च भा०आ०प० २अ० । भावे ल्युट् । २सम्भूय सुरापाने । "ताम्बूलीनां दलैस्तत्र रचितापानभूमयः" रघुः । "यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु" कुमा० । स्वार्थे कन् । आपानकमपि पानगोष्ठ्याम् । सुरापाने च "आपानकमुत्सवः" काद० । [कर्त्तरि स्त्रियां ङीप् ।

आपायिन् त्रि० आपिबति आ+पा-णिनि । सुरापाने

आपालि पु० आ+पा-क्विप् तदर्थमलति अल-इन् । केशकीटे (उकुन्) सहि शीर्षस्थरुधिरापानप्रसक्तः

आपि पु० आप+णिच्-इन् । १धनादिप्रापके । "हुवे देवा यूयमिदापयः" ऋ०२,२६,४ । "आपयः धनस्य प्रापयितारः" भा० । आप्यते कर्म्मणि इन् । २आप्ते बन्धौ तस्य भावः आपित्वं बन्धुत्वे "आपित्वे नः प्रपित्वे" ऋ०८,७,३ । "आपित्वे बन्धुत्वे" भा० ।

आपिञ्जर न० ईषत्पिञ्जरं प्रा०स०। १स्वर्णे राजनि०। २ईषत्पिञ्जरवर्णे पु० ३तद्वति त्रि० "आपिञ्जराबद्वरजः-कणत्वात्" रघुः।

आपिशलि पु० अपिशलस्य मुनेरपत्यम् इञ्। आदि-भाव्हिके मुनिभेदे। "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिशाब्दिकाः" कवि क०। "वा सुप्यापिशलेः" पाणिनिनोक्ते स्तोऽप्यसादित्वम् स्त्रियां क्रोड्या०ष्यञ्। आपिशल्या तस्यस्त्र्यपत्ये स्त्री। आपिशिलिना प्रोक्तम् अण्। आपिशलम्। तदीये शास्त्रे न०।

आपी त्रि० आ+प्याय–क्विप् पीभावः। १आपीने दृढ्रिमति।

आपीड पु० आ+पीड–अच्। १शिखामाल्ये, २शिरोभूषणे, "तस्मिन् कुलापीडनिभे विपीड़ितम्" रघुः। "विचित्र-मुकुटापीड़ा विचित्रकवचध्वजाः" भा०व०प० १७२ अ० "बद्वापीड़ांश्चारूरूपांश्च यूनो व्यूढोरस्कांस्तालमात्रान् ददर्श" भा० आ०प० १६७अ०। ३दग्धवह्निर्निःसृतकाष्ठे च। ४आपीडकमात्रे त्रि०।

आपीडा स्त्री आ+पीड–अ। सम्यक्पीड़ने "तत्र तूर्णं गलापीडं कुर्याच्चाप्यधननम्" सुश्रु० गलस्यापीडा मर्दनं यत्रेति तदर्थः।

आपीडित त्रि० आ+पीड–क्त। १निष्पीडिते २निर्मृष्टे।

आपीत न० ईषत् पीतम् प्रा०त०। माक्षिके धातौ। २ईषत्पीतवर्णे पु० ३तद्वति त्रि०। ईषत् पानं क्षतं यस्य तादृशे ४जलादौ त्रि०।

आपीन न० आ+प्याय–क्त पीभावः तस्य नत्वम्। (मेड़) १गवादेः जघसि "आपीनभारोद्वहनप्रयत्नात्" रघुः २कूपे पु०। "आपीनभूषः आपीनोऽम्बुः" मुग्ध०। अन्योपसर्गपूर्व्वकत्वे तु संज्ञानद्यत्वेव आङ् पूर्वकस्यापि अम्बूधसो रेवार्थयोःपीभावो नान्यत्र।

आपूपिक त्रि० अपूपः शिल्पमस्य ठक्। १अपूपयाचके अपूपे अपूपभक्षणे साधु गुड़ा०ठक्। २अपूपभक्षणसाधने गुड़ादौ। अपूपो भक्तिरस्य अचित्तत्वात् ठक्। ३अपूपभक्षणासेवके। अपूपःपण्यमस्य ठक्। ४अपूपविक्रेतरि। अपूपस्तद्भक्षणं शीलमस्य ठक्। ५अपूपभक्षणशीले। अपूपस्तद्भक्षणं हितमस्य ठक्। दैहितत्वेन अपूपभक्षणकर्त्तरि। अपूपानां समूहः अचित्तत्वात् ठक्। ७अपूपसमूहे न०।

आपूप्य पु० अपूपाय साधुर्वा अ। अपूपसाधने चूर्णे त्रि०

आपूर पु०, आपूर्य्यतेऽनेन आ+पूर–घञ्। जलादि प्रवाहे "खेदापूरोयुवतिसरितां व्याप गण्डस्थलानि" माघः भावे घञ्। २सम्यक्पूरणे ३ईषत्पूरणे ४अभिव्याप्तौ च।

आपूरण न० आ+पूर–भावे ल्युट्। १"समन्तात्पूरणे आपूरयति ल्यु। २सम्यक्पूरणकर्त्तरि त्रि० ३नागभेदे पु० "कालिको मणिनागश्च नागश्चापूरणस्तथा" भा० आ०प० ३५अ०। [२अभिव्याप्ते च।

आपूरित त्रि० आ+पूर–क्त। यस्यापूरणं कृतं १तस्मिन्

आपूर्य्यमाण त्रि० आ+पूर–कर्म्मणि शानच्। सम्यक् पूर्य्यमाणे २समन्तात्प्रसृते "आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्" गीता। आधारे शानच्। सूर्य्यकिरणैः पूर्य्यमाणचन्द्रस्याधारे पक्षे। "उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदान विवाहाः" आश्व०गृह्य०। "अर्चिषोऽहरह्न आपूर्य्यमाणं पक्षम्" छा०उप०।

आपूष आ+पूष–इडौ करणे घञ्। रङ्गे (राङ्) धातुभेदे, तस्य पुष्टिसाधनत्वादिकमुक्तं भा० प्र० "रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि। खुरकं मिश्रकं चापि द्विविधं रङ्गमुच्यते। उत्तमं खुरकं प्रोक्तं मिश्रकं गर्हितं भवेत्। रङ्गं लघु सरं रूक्षमुष्णमेहकफापहम्। निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक्। सिंहो यथा हस्तिगणं निहन्ति तथैव वङ्गो ऽखिलमेहवर्गम्। देहस्य सौख्यम् प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्"।

आपृच् त्रि० आ+पृच–क्विप्। संसर्गयुक्ते। "मित्रकृवोयच्छसान न गावः पृथिव्या आपृगसुया स यत्ते" ऋ०१०, ८६,१४।

आपृच्छा स्त्री आ+प्रच्छ–अङ्। १आलापे, २जिज्ञासायाम् ३आभाषणे गतागतकाले ४शुभप्रश्ने ५आनन्दने च।

आपृच्छ्य त्रि० आ+प्रच्छ–वेदे नि०क्यप्। जिज्ञास्ये। "आपृच्छ्यं वरुणं वाज्यर्षति" सि०कौ०धृता श्रुतिः। आ+प्रच्छ–ल्यप्। २जिज्ञासित्वेत्यर्थे अव्य०।

आपेक्षिक त्रि० अपेक्षात आगतः ठक्। अपेक्षया प्राप्ते "किन्तु मध्यत्वमापेक्षिकम्" सि०कौ०। "अस्मृतमस्मृते रित्यापेक्षिकमस्मृतत्वम्" छा०उ०भा०। स्त्रियां ङीप्।

आपोक्लिम न० ज्योतिषोक्ते जन्मलग्नावधिघटतीव्रषष्ठ-नवमद्वादशस्थानेषु। "तृतीयं षष्ठनवमसन्यञ्चापोक्लिमं विदुः" ज्यो०त०। "आपोक्लिमे यदि खगाः स किले-

स्वरोन स्याच्छुभं कर्त्तुं ताजिकशास्त्रगीतम्" नी० ता०।

आपोमय त्रि० आपस्+विकारे प्राचुर्य्ये वा मयट्। १जलविकारे "आपोमयः प्राणस्तेजोमयी वाक्" छा० उ०। "आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत्" भा० आ० १८०अध्या० "नूमेर्गन्धगुणान् भुङ्क्ते पिबत्यापोमयान् रसान्" भा०आश्व० २८अ०। "मन्युजोऽग्निर्दहत्यापो लोकान्त्यापोमयाः स्मृताः" भा०आ०१८०। जलप्लाविते २जलप्रचुरे "विलोक्य ताभ्यां गदितः सर्व्वमापोमयं जगत्। आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता" देवीमा०।

आपोमूर्त्ति पु० खारोदधिस्थ मनोः १पुत्रभेदे। "हविष्मः सुकृतिर्ज्योतिरापोमूर्त्तिरयोनयः। प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्तथैव च। खारोदधिस्थ पुत्रास्ते मनोस्तात! महात्मनः" हरिवं० ६अ०। दशमे मन्वन्तरे आत्रेये सप्तर्षिमध्ये २ऋषिभेदे च "दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः। हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथात्रेयो वाग्विश्वाष्टकः स्मृतः" इति हरिवं० ७अ०

आपोऽशान न० आपसा जलेन अशानं अश-व्याप्तौ भावे वा० आनच्। जलेन उपरिष्टादधस्ताच्चास्तरणरूपे अन्नाच्छादनार्थे कर्म्मणि। "आपोऽशानेनोपरिष्टादधस्ताद्भुञ्जता तथा। अनग्नमकृतञ्चैव कार्य्यमन्नं द्विजात्मना" या०स्मृ०। "भुञ्जानेन द्विजन्मना उपरिष्टादधस्ताच्च आपोऽशानाख्येन कर्म्मणा अन्नमनग्नमकृतं च कार्य्यम्" मिता०। "आपोऽशानक्रिया पूर्व्वं सतृणतान्नमकृत्स्नयनं" या०स्मृ०। "आपोऽशानक्रिया पूर्व्वम् अस्तृतोपस्तरणमसि स्वाहेत्यादिकं कृत्वा" मिता० "आपोऽशानं कर्म्म कुरु" भवदेवः।

आप्त त्रि० आप-क्त। १प्राप्ते २प्रत्ययिते विश्वस्ते। ३यथार्थज्ञानयुक्ते ४युक्तियुक्ते च "आप्तश्रुतिराप्तवचनं तु" सां० का०। "आप्ता प्राप्ता युक्तेति यावत् आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतःप्रमाणम् अपौरुषेयवाक्यजनितत्वेन सकलदोषाशङ्कानिर्मुक्तत्वेन युक्तं भवति एवं वेदमूलकस्मृतीतिहासपुराणजनितज्ञानमपि युक्तम्। कपिलस्य कल्पादौ कल्पान्तराधीतस्मृतिस्मरणसम्भवः सुप्तबुद्धस्येव पूर्व्वेद्युरवगतार्थानामपरेद्युः। आप्तपदग्रहणेन चायुक्ताः शाक्यभिक्षुनिर्ग्रन्थिकसंसारमोचकादीनामागमाभासा निरस्ता भवन्ति अयुक्तत्वञ्चैतेषां विरागात् क्लिष्टमूलत्वात् प्रमाणविरुद्धार्थाभिधानात् कैश्चिदेव स्वेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्राह्यत्वाच्च" सां०त०कौ० "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सां०का०। यथार्थज्ञानविशिष्टरूपाप्तेनोक्तत्वनिश्चयस्य शाब्दबोधहेतुत्वमिति मीमांसकाः नैयायिकास्तन्न मन्यन्ते यथोक्तं शब्दख०प्र० "साकाङ्क्षत्वादिधीरिव वाक्यार्थगोचरज्ञानवदुक्तत्वरूपस्याप्तोक्तत्वस्यापि निश्चयः शाब्दधीहेतुरतोनैकपदार्थधर्म्मिकोऽपरपदार्थस्यान्वयबोधोऽनुमितिः सिद्धिसत्त्वे विनानुमित्यां तदसम्भवात् परन्त्वनुमितेरन्यएव किन्तुसौ स्वहीतप्राहित्वान्न प्रमा यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्यथार्थज्ञानस्यैवास्वहीतग्राहित्वेन प्रमात्वात् अतएव धारावाहिकप्रत्यक्षव्यक्तीनां समानाकारग्रहोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसन्तानां स्मृतीनामिति जरन्मीमांसकानां समाधानं निरस्यति। नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते। वाक्यार्थानामपूर्व्वत्वात् संशयेऽन्वयोदयात्। यद्येकपदार्थवदपरपदार्थपर्य्यवसन्नस्य वाक्यार्थस्य ज्ञानवदुक्तत्वरूपाया आप्तोक्ततायाः निश्चयः शाब्दमतेः कारणं स्यात् स्यादपि तेनैव रूपेण साध्यनिश्चयेन प्रतिबन्धादेकपदार्थधर्म्मिकायाः अपरपदार्थानुमितेरनुत्पादो नचैवं, शाब्दधियः पूर्व्वं वाक्यार्थस्योपस्थित्यनियमेन तद्गर्भस्याप्तोक्तत्वस्यापि मतेरनावश्यकत्वात् अन्यथा वेदस्याप्यनुवादकतापत्तेः एकपदार्थेऽपरपदार्थस्य शब्दे वाक्यार्थज्ञानवदुक्तत्वस्य संशयेऽपि शाब्दमतेरुत्पादाच्च। अतएवाप्तोक्तत्वस्य संशये व्यतिरेकनिश्चये वान्वयबुद्धेरनुत्पादादवश्यन्निश्चयस्तत्र हेतुरित्यपि प्रत्युक्तम् असिद्धेः"। ५कुशले "प्राज्ञकश्चेद्भवेदाप्तः" मनुः। "आप्तः कुशलः" कुल्लू०। ६सम्भ्रमे "यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः" मनुः ७अन्वौ "निष्पक्वात् खसुराप्तानां बधाच्च धनदानुजः" रघुः ८जटायां स्त्री हारा० ९सम्बन्धे १०लब्धे च त्रि० हेम०।

आप्तकाम त्रि० आप्तः प्राप्तःकामोयेन। १ब्रह्मात्मैक्यावगन्तरि यथा चाप्तकामत्वं तथोक्तं बृ०उप० भाष्ययोः। "तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्। तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। तद्वा अस्यैतदाप्तकाममकामं रूपं शोकान्तरम्। अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः। अत्र स्तेनो-

ऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पापेन तीर्णो हि तदा सर्व्वाञ्छोकान् हृदयस्य भवति" इ० उ० "इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्द्दिश्यते। यत्राविद्याकामकर्म्माणि न सन्ति तदेतत्प्रस्तुतं "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति"। तद्वा अस्य रूपम्। यः सर्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थः रूपपरत्वात्। छन्दः कामोऽतिगतः छन्दोऽस्मिन् रूपे तदतिच्छन्दं रूपम्। अन्योऽसौ असन्तः छन्दःशब्दो मायत्रादिच्छन्दोवाची। अयन्तु कामवचनोऽतः स्वरान्त एव। तथाप्यतिच्छन्दा इति पाठः स्वाध्यायधर्म्मो द्रष्टव्यः। अस्ति च लोके कामवचनप्रयुक्तः छन्दशब्दः स्वच्छन्दः परच्छन्द इत्यादौ। अतोऽतिच्छन्दमित्येवशुचितं कामवर्ज्जितमेतद्रूपमित्यस्मिन्नर्थे। तथाऽपहतपाप्मा पाप्मशब्देन धर्माधर्मावुच्यते। "पाप्मभिः संदृश्यते" "पाप्मनो विजहाति" इत्युक्तत्वात्। अपहतपाप्म धर्माधर्मवर्जितमित्येतत्। किञ्चाभयम् भयं हि नामाविद्याकार्य्यम् "अविद्यया भयं मन्यते" इति श्रुतम्। तत्कार्य्यद्वारेण कारणप्रतिषेधोऽयम् अभयं रूपमित्यविद्यावर्जितमित्येतत्। यदेतद्विद्याफलं सर्वात्मभावस्तदेतदतिच्छन्दापहतपाप्माभयं रूपं सर्व्वसंसारधर्म्मवर्ज्जितमतोऽभयं रूपमेतत्। इदञ्च पूर्व्वमेवोपन्यस्तमतोतानन्तरब्राह्मणसमाप्तौ। "अभयं वै जनक प्राप्तोऽसि" इत्यागमतः। इह तु तर्कतः प्रपञ्चितम् दर्शितागमार्थप्रत्ययदार्ढ्याय। अयमात्मा स्वयंचैतन्यज्योतिःस्वभावः सर्व्वस्वेन चैतन्यज्योतिषावभासयति। "स यत्तत्र किञ्चित्पश्यति रमते चरति जानाति च" इत्युक्तम्। अतः स्थितञ्चैतत्प्रायतो नित्यस्वरूपं चैतन्यज्योतिरयमात्मनः। स यद्यात्मात्माविनष्टः स्वेनैव रूपेण वर्त्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्वेमानि भूतानीति जात्यन्धस्यप्रयोरिव न जानातीत्युच्यते। दृष्टत्वाज्ज्ञानहेतुम् एकत्वमेवाज्ञानहेतुस्तत्कथम्? इत्युच्यते। दृष्टान्तेन हि प्रत्यक्षीभवति विवक्षितोऽर्थ इत्याह। तत् तत्र यथा लोके प्रियया इष्टया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तः कामयन्या कामुकः सन्न बाह्यमात्मनः किञ्चन किञ्चिदपि न वेद सत्तोऽन्यद्वस्त्रियं। न चान्तरमयमहमस्मि सुखी दुःखी चेति अपरिष्वक्तस्तु तया प्रविभक्तो जानाति। सर्व्वमेव बाह्यमाभ्यन्तरञ्च। परिष्वङ्गोत्तरकालन्त्वेकत्वापत्तेर्न जानाति। एवमेव यथादृष्टान्तोऽयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैन्धवखिल्यवत् प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्य्यकरणदृष्टे प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा सम्परिष्वक्तः सम्यक् परिष्वक्त एकीभूतो निरन्तरः सर्वात्मा न बाह्यं किञ्चन वस्वन्तरं नाप्यान्तरमात्मन्ययमहमस्मि सुखी दुःखी वेति वेद तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं क्षेत्रधर्मयोक्तः। एकत्वं यथा स्त्रीपुंसयोः सम्परिष्वक्तयोः। तत्रार्थाज्ञानात्व विशेषविज्ञानहेतुरित्युक्तं भवति। नानात्वे च कारणमात्मनोवस्वन्तरस्य प्रत्युपस्थापिकाविद्येत्युक्तं तत्र चाविद्याया यदा प्रविविक्तो भवति तदा सर्वैक्यैकत्वमेवास्य भवति। ततश्च ज्ञानक्षेत्रादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा सम्भवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि। यस्मादेवं सर्व्वैकत्वमेवास्य रूपमतस्तद्वै अस्यात्मनः स्वं ज्योतिः स्वभावस्यैतद्रूपमाप्तकामं यस्मात्मस्तमेतस्मात्कामा आप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति। यथा जागरितावस्थायां देवदत्तादिरूपम्। न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्तकामं भवति। किमन्यस्माद्वस्वन्तराच्च प्रविभज्यते आहोस्विदात्मैव तद्वस्वन्तरमत आह। नान्यदस्त्यात्मनः। कथम्? यतः आत्मकाममात्मैव कामा यस्मिन्रूपे येऽत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तेऽस्मात्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्ज्जितमित्यर्थः। प्रकृतः स्वयंज्योतिरात्मा अविद्याकामकर्म्मविनिर्म्मुक्त इत्युक्तम्। असङ्गत्वादात्मन आगन्तुकत्वाच्च तेषां, तत्रैवाशङ्का जायते चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव सम्परिष्वक्तयोरित्युक्तम्। तत्र प्रासङ्गिकमेतदुक्तं कामकर्मादिवत् स्वयं ज्योतिष्टमप्यात्मनो न स्वभावः। यस्मात् सम्प्रसादेनोपलभ्यत इत्याशङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैव स्वयंज्योतिष्टस्य सुषुप्तेऽप्यहरहर्गमेकीभावाद्धेतोर्न तु कामकर्मादिवदागन्तुकम्। इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति। अत्र चैतत्प्रकृत-

अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपम् । यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति तदेतद्यथाभूतमेवाभिहितं सर्वसम्बन्धाधीनमेतद्रूपमिति । तस्मादत्रैतस्मिन् सुषुप्तस्थानेऽतिच्छन्दापहतपाप्मभयमेतद्रूपं तस्मादत्र पिता जनकः तस्य च जनयितृत्वाद्यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणाऽयमस्मिन्काले, तस्मात्पिता पुत्रसम्बन्धनिमित्तस्य कर्मणो विनिर्मुक्तत्वात् पिताप्यपिता भवति । तथा पुत्रोऽपि पितृरपुत्रो भवतीति सामर्थ्यादुच्यते उभयोर्हि सम्बन्धनिमित्तं कर्म । तदयमतिक्रान्तो वर्त्ततेऽपहतपाप्मेति ह्युक्तम् । तथा माताऽमाता । लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसम्बन्धाभावाल्लोका अलोकाः । तथा देवाः कर्माङ्गभूतास्तत्कर्मसम्बन्धात्यया(त्)देवादेवाः । तथा वेदाः साध्यसाधनसम्बन्धविधायकाः ब्राह्मणलक्षणा मन्त्रलक्षणाश्चाभिधायकत्वेन कर्माङ्गभूता अधीता अध्येतव्याश्च कर्मनिमित्तमेव सम्बध्यन्ते पुरुषेण । तत्कर्मातिक्रमणादेतस्मिन् काले वेदा अवेदाः सम्पद्यन्ते । न केवलं शुभकर्मसम्बन्धातीतः । किन्तर्हि अशुभैरत्यन्तघोरैः कर्मभिरसम्बद्ध एवायं वर्त्तत इत्येतमर्थमाह अत्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणहासुरापाठाद्वगम्यते । स तेन घोरेण कर्मणैतस्मिन् काले विनिर्मुक्तो भवति । येनायं कर्मणा ब्रह्मापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूणहा तथा चाण्डालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः । किं तर्हि सहजेनाध्यात्मनिक्षिप्तजातिप्रापकेणापि विनिर्मुक्त एवायम् । चण्डालो नाम शूद्रेण ब्राह्मण्यासुत्पन्नः चण्डाल एव चाण्डालः स जातिनिमित्तेन कर्मणाऽसम्बद्धत्वाच्चाण्डालो भवति । पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायासुत्पन्नः । तथा सोऽप्यपौल्कसो भवति । तथा शुभलक्षणैश्च कर्मभिरसम्बद्धो भवतीत्युच्यते । श्रमणः परिव्राट् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वाच्छ्रमणः । तथा तापसो वानप्रस्थोऽतापसः । सर्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुना । अनन्वागतं न अन्वागतमनन्वागतमसम्बद्धमित्येतत् पुण्येन धार्मविहितेन कर्मणा । तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिङ्गम् । अभयं रूपमिति ह्यनुवर्त्तते । किं पुनरसम्बद्धत्वे कारणमिति तदेतदुच्यते । तीर्णोऽतिक्रान्तो हि ब्रह्मादेर्रूपमसदा तस्मिन् काले सर्वाञ्छोकान् शोकाः कामा इष्टविषयप्रार्थनाः ते हि तद्विषयवियोगे शोकत्वमापद्यन्ते । इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिन्तयानस्तद्गुणान् सन्तप्यते पुरुषोऽतः शोको रतिः काम इति पर्यायाः । यस्मात् सर्वकामातीतो ह्यतायं भवति । न कञ्चन कामं कामयते अतिच्छन्दा इति ह्युक्तं तत्प्रक्रियापतितोऽयं शोकशब्दः कामवचन एव भवितुमर्हति । कामश्च कर्महेतुर्वक्ष्यति हि । "स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते" इति अतः सर्वकामातितीर्णत्वाद्युक्तमुक्तमनन्वागतं पुण्येनेत्यादि । हृदयस्य हृदयमिति पुण्डरीकाकारो मांसपिण्डस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते तात्स्थ्यान्मञ्चाक्रोशनवत् । हृदयस्य बुद्धेर्ये शोका बुद्धिसंश्रया हि ते ॥ "कामः संकल्पो विचिकित्सेत्यादि" "सर्वं मन एव" इत्युक्तत्वात् वक्ष्यति च "कामा येऽस्य हृदि श्रिताः" आत्मसंश्रयभान्यथनोदाय हीदं वचनम् । "हृदि श्रिता हृदयकोशा" इति च । हृदयकारणसम्बन्धातीतश्चायमस्मिन् काले(ऽति)क्रामति हृत्योरुपाणीति ह्युक्तम् । हृदयसम्बन्धातीतत्वात्तत्संश्रयकामसम्बन्धातीतो भवतीति युक्ततरं वचनम् । ये तु वादिनः हृदि श्रिताः कामा वासनाश्च हृदयसम्बन्धिनमात्मानमुपसर्प्यापक्षिप्स्यन्ते । हृदयवियोगेऽपि चात्मन्यवतिष्ठन्ते पुटतैलस्थद्रव पुष्पादिगन्ध, इत्याचक्षते । तेषां "कामः संकल्पः" "हृदये ह्येव रूपाणि" "हृदयस्य शोका" इत्यादीनां वचनानामानर्थक्यमेव । हृदयकरणोत्पाद्यत्वादिति चेत् न हृदि श्रिता इति विशेषणात् । न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समञ्जसम् । हृदये ह्येव रूपाणि प्रतिष्ठितानीति च । आत्मविशुद्धेश्च विवक्षितत्वाद्दृच्छ्रयणवचनं यथार्थमेव युक्तम् । "ध्यायतीव लेलायतीवेति च" श्रुतेरन्यार्थसम्भवात् । "कामा येऽस्य हृदि श्रिता" इति विशेषणादात्माश्रया अपि सन्तीति चेत् न अनाश्रितापेक्षत्वात् न चाश्रयान्तरमपेक्ष्यते हृदीति विशेषणं किन्तर्हि ? ये हृदनाश्रिताः कामास्तानपेक्ष्य विशेषणम् । ये त्वप्ररूढा भविष्या भूताः स्वप्रतिपत्तेरनिष्टत्तास्ते नैव हृदि श्रिताः, सम्भावन्ते च ते । अतो युक्तं तानपेक्ष्य विशेषणम् । ये प्ररूढा वर्त्तमानादिविषये ते सर्वे प्रमुच्यन्ते इति । तथापि विशेषणानर्थक्यमिति चेत् न तेषु यत्नाधिक्याद्धेयार्थत्वात् । इतरथाऽश्रुतमनिष्टञ्च कल्पितं स्यादात्माश्रयत्वञ्च कामानाम् । "न कञ्चन कामं कामयते" इति

प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत् न "सुषुप्तः स्वप्नोभूत्वेति" परनिमित्तत्वात् कामाश्रयत्वप्राप्तेः असङ्गत्ववचनाच्च । न हि कामाश्रयत्वेऽसङ्गत्ववचनमुपपद्यते । सङ्गश्च काम इत्यवोचाम । आत्मकाम इति श्रुतेरात्मविषयेऽस्य कामो भवतीति चेत् न व्यतिरिक्तकामनाभावार्थत्वात्तस्याः, वैशेषिकादितन्त्रन्यायोपपन्नमात्मनः कामाद्याश्रयत्वमिति चेत् न हृदि श्रिता इत्यादिविशेषश्रुतिविरोधादनपेक्षास्तावैशेषिकादितन्त्रोपपत्तयः श्रुतिविरोधे न्यायाभासत्वोपगमात् स्वयंज्योतिष्ट्वबाधनाच्च । कामादीनाञ्च स्वप्ने केवलदृश्यिमात्रविषयत्वात् स्वयंज्योतिष्ट्वं सिद्धम् स्थितञ्च बाध्येतात्मसमवायित्वे । दृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषवत् । द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति द्रष्टुः स्वयंज्योतिष्ट्वं सिद्धम् तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्येत । सर्वशास्त्रप्रतिषेधाच्च । परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्वशास्त्रार्थजातं क्षुभ्येत । एतच्च विस्तरेण वस्तुर्थेऽवोचाम । महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्याः । आत्मनः परेणैकत्वशास्त्रार्थसिद्धेः । तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात् । यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न सङ्गच्छन्ते तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनान्नादरणीया" ।

"काममय एवायं पुरुष इति यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते" इत्युपक्रम्य "तदेव सक्तः सह कर्मणैति लिङ्गं मनोयत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" इति श्लोकमुदाहृत्य "इति तु कामयमान" इत्युक्त्वा कामयमानस्यैव जन्मादिहेतुत्वमुक्त्वा

"अथाकामयमानोयोऽकामोनिष्काम आप्तकाम आत्मकामोन तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इ० उप० । "इति तु एवं तु कामयमानः संसरति यस्मात् कामयमान एवैवं संसरत्यथ तस्मादकामयमानो न क्वचित् संसरति फलासक्तस्य हि गतिरुक्ता । अकामस्य हि क्रियानुपपत्तेः अकामयमानो मुच्यते । एवं कथं पुनरकामयमानो भवति ? । योऽकामो भवत्यसावकामयमानः । कथमकामता ? इत्युच्यते । यो निःकामो यस्मान्निर्गताः कामाःसोऽयं निष्कामः । कथं कामा निर्गच्छन्ति ? । य आप्तकामो भवति । आप्ताः कामा येन स आप्तकामः । कथमाप्यन्ते कामाः ? आत्मकामत्वेन यस्मात्नैव नान्यः कामयितव्यो वस्त्वन्तरभूतः पदार्थो भवति । आत्मैवान्तरो बाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्ङ्क न तिर्य्यङ्नाधः । आत्मनोऽन्यत्कामयितुम् "यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् शृणुयान्मन्वीत विजानीयाद्वा" एवं विजानन् किङ्कामयेत् ? । ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति । न चासावन्यो ब्रह्मविद् आप्तकामस्यास्ति । य एवात्मकामतयाऽऽप्तकामः स निष्कामोऽकामोऽकामयमानश्चेति मुच्यते । न हि यस्मात्नैव सर्वं भवति तस्यानात्मा कामयितव्योऽस्ति । अनात्मा चान्यः कामयितव्यः । सर्वञ्चात्मैवाभूदिति प्रतिषिद्धम् सर्वात्मदर्शिनः कामयितव्याभावात् कामानुपपत्तिः । ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि तेषां नात्मैव सर्वं भवति । प्रत्यवायश्च जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात् । येन चाशनायाद्यतीतो नित्यं प्रत्यवायासम्बद्धो विदित आत्मा तं वयं ब्रह्मविदं ब्रूमः । यश्च नित्यमेवाशनायाद्यतीतमात्मानं पश्यति । यस्माच्च जिहासितव्यमन्यमुपादेयं वा यो न पश्यति तस्य कर्म्म न प्रक्षयत एव सम्बन्धुम् । यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः । अतः कामाभावाद्कामयमानो न जायते मुच्यत एव । तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणा वागादयो नोत्क्रामन्ति नोर्ङ्क क्रामन्ति देहात् । स च विद्वानाप्तकाम आत्मकामतया दृष्टैव ब्रह्मभूतः । सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूपम् । "तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति" । तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंहियते । अथाकामयमान इत्यादिना । स कथमेवम्भूतो मुच्यते ? इत्युच्यते । यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमसुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणवागादयो नोत्क्रामन्ति। किन्तु विद्वान् स दृष्टैव ब्रह्म भवति यद्यपि देहवानिव लक्ष्यते । स ब्रह्मैव सन् ब्रह्माप्येति। यस्माच्चहि तस्याब्रह्मत्वपरिच्छदहेतवः कामाः सन्ति । तस्मादिहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम् । न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावः देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते । भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थ आत्मैकतास्यः स बाधितो

भवेत् । कर्महेतुकञ्च मोक्षःप्राप्नोति न ज्ञाननिमित्त इति । स चानिष्टःअनित्यत्वञ्च मोक्षस्य प्राप्नोति । न हि क्रियानिर्वर्त्तोऽर्थो नित्यो दृष्टः । नित्यञ्च मोक्षोऽभ्युपगम्यते । "एष नित्यो भक्तिमेति" मन्त्रवर्णात्" इ० उ०भा० । २परमात्मनि तस्य सर्व्वेषामात्मत्वेनान्यकामयितव्याभावात् आप्तकामत्वम्" आप्तः युक्तः उचितः कामः इच्छा यस्य इति विग्रहे तु । नैयायिकमतसिद्धे ३ईश्वरे च सद्विषयकेच्छाश्रयत्वादीश्वरस्य तथात्वम् ।

आप्तकारिन् त्रि० आप्तं युक्तं करोति कृ–णिनि दैत० । १युक्तकारके आप्तश्वासौ कारो । २प्रत्ययिते आप्तकारके भृत्यादौ । "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" मनुः । "भीष्मादीनाञ्च सर्वेषां सुहृदामाप्तकारिणाम्" "अन्विष्य दाहयामास पुरुषैराप्तकारिभिः" भा० । भा० आश्व० प० ११अ० ।

आप्तगर्भा स्त्री आप्तोगर्भो यया । गर्भिण्याम् स्त्रियाम् ।

आप्तवाच् स्त्री आप्ता युक्ता प्रमादादिदोषशून्या वाक् । १वेदे तन्मूले २स्मृतीतिहासपुराणादौ च "आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा" रघुः आप्तवचनाप्तवाक्यादयोऽप्यत्र न० । आप्ता युक्ता वाग् यस्य । प्रमादशून्यवाक्ये महर्षिप्रभृतौ त्रि० । आप्तवचनाप्तवाक्यादयोऽप्यत्र त्रि०

आप्तश्रुति स्त्री कर्म्म० । १वेदे २स्मृत्यादौ च आप्तशब्दे उदा० ।

आप्ति स्त्री आप–क्तिन् । १संयोगे, २संप्राप्तौ ३स्त्रीसंयोगे" मेदि० ४संबन्धे, ५लाभे हेम० दैसप्राप्तौ "कामस्याप्तिं जगतः प्रतिष्ठाम्" कठोप० । कामस्याप्तिं समाप्तिम् तत्र हि सर्व्वे परिकामाःसमाप्ताः" भा० ७सम्पदि च "सैवास्याप्तिर्वा सम्पत्" शत० ब्रा० । तत्र संबन्धे "मृत्योराप्तिमतिमुच्यते" शत० ब्रा० । लाभे "सर्वावाप्तै सर्वस्यावरुद्ध्यै" शत० ब्रा० "तपः किलेदं तदवाप्तिसाधनम्" कुमा० "दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये ततः" भा० आश्व० १८अ० । ८उत्तरकाण्डे आयतौ च त्रिकाण्ड० ।

आप्य त्रि० आपः-तत्र वेदे त्रि० । १आप्नेये "पनित आप्त्रो यजतः" ऋ०५,४१,६ । "आप्यः आप्नव्यः" भा० लोके तु आप्नव्य इत्येव । आप्निमर्हति यत् । २आप्नियोग्ये त्रि० ।

आप्यवान पु० अप्यवानस्य स्वार्थे अण् । अप्यवानशब्दार्थे वत्सगोत्र प्रवरे ऋषिभेदे ।

आप्य त्रि० अपामिदम् अण् चातु० स्वार्थे यञ् । १जलसम्बन्धिनि अपां विकारे तु अस्त्रयमित्येव" सि०कौ० आपयत् । २प्राप्ये त्रि० "योनोनेदिष्ठमाप्यम्" ऋ०७,१५२, ३चाक्षुषमन्वन्तरीये देवभेदे च । "चाक्षुषस्यान्तरे तात ! मनोर्देवानिमान् शृणु । आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः । लेखानाम महाराज पञ्च देवाः प्रकीर्त्तिता" हरिवं १७अ० । "मानुषा आशयाला अर्थते देवाश्चाप्याः साध्याः अन्वाध्या मरुतः" इति शत० ब्रा० कर्म्मभिराप्यत्वात्तेषामाप्यत्वम् द्रष्टव्यम् । ४(कुड)वृक्षे पु० रायमुकुटः ।

आप्यान न० आ+प्याय–भावे ल्युट् । १प्रीतौ २वृद्धौ च । कर्त्तरि ल्युट् । ३प्रीते ४वृद्धे च त्रि० ।

आप्यायन न० आ+प्याय-ल्युट् । १वृद्धौ, २प्रीतौ च । णिच् ल्युट् । ३तर्पणे प्रीणने ४वर्द्धने च "अग्नेः सोमस्यभ्यां च क्रत्वाप्यायनमादितः" मनुः । ल्यु । ५प्रीणनकर्त्तरि त्रि० । "पितृप्रसादमिच्छेयं तप आप्यायनं पुनः" भा० व० प० ८२अ० । "दैवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतम्" मनुः तन्त्रोक्ते दैदीक्षणीयमन्त्रसंस्कारभेदे "मन्त्राणां दशकथ्यन्ते संस्काराः सिद्धदायिनः । जननं जीवनं पश्चात्ताडनं बोधनं तथा । अथाभिषेको विमलीकरणाप्यायने तथा । तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः" इति विभज्य । "कुशोदकेन मन्त्रेण प्रत्यृचं प्रोक्षणं मनोः । तेन मन्त्रेण विधिवदेतदाप्यायनं मतम्" भा० ति० उक्तम् ।

आप्यायित त्रि० आ+प्याय–णिच्–क्त । १प्रीणिते २पूरिते ३वर्द्धिते च । "एषा सूर्य्यस्य वीर्य्येण सोमश्चाप्यायिता तनुः । पौर्णमास्यां स दृश्येत संपूर्णो दिवसक्रमात्" कू० पु० । ४आनन्दिते च ।

आप्र त्रि० आ+पॄ मूल० क । १पूरके । "स्वर्जेषे भर आप्रस्य वक्मनिः" ऋ० १,१३२,२ "चक्षुर्मित्रस्य वरुणस्याग्नेराप्रा द्यावा" सूर्य्योपस्थानमन्त्रः ।

आप्रच्छन न० आ+प्रच्छ–ल्युट् । गमनागमनसमये १बन्धूनामन्योन्यकुशलजिज्ञासायाम् २आनन्दसम्पादने च ।

आप्रच्छून त्रि० आ+प्र–च्छद–क्त । १अत्यन्तगुप्ते २दृष्टद्रुप्ते च अस्याप्रच्छूनार्थत्वोक्तिः शब्दकल्पद्रुमे प्रामादिकी हेमचन्द्रे आप्रच्छूनमित्येव पाठः द्वित्वनकारयुक्तपाठस्तु प्रमादिकः ।

आप्रपद अव्य० प्रपदं पदाग्रं तत्पर्य्यन्तम् अव्ययी० । पादाग्रपर्य्यन्ते

आप्रपदीन त्रि० आप्रपदं पादाग्रान्तं व्याप्नोति ख । पादाग्रान्तं लम्बमाने वस्त्रादौ । [दृष्टद्रुप्ते ।

आप्रवण त्रि० दृषत् प्रवणः । दृषद्भक्ते आ+प्रु–ल्युट् ।

आप्री स्त्री आप्रीणात्यनया आ–प्री–ड गौरा० ङीष् । प्रयाजयाज्यायाम् "प्रैषैभिः प्रैषेणाप्नोत्याप्रीभिराप्नोत्यैन्द्रस्य" यजु० १९,१९ । "आप्रीभिः प्रयाजयाज्याभिः"

वेददी० ताश्च याज्याः सूक्तविशेषात्मका गोत्रभेदेन भिन्नरूपाः "एकादश प्रयाजाः तेषां प्रैषाः प्रथमं प्रैषसूक्तमुक्तं द्वितीये। अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति प्रेषैर्होतारम्। होता यजत्याग्नीध्रः प्रैषलिङ्गाभि." इत्युपक्रम्य "समिद्धो अग्निरिति" शुनकानां "जुषस्व नः समिधमिति वशिष्ठानां, "समिद्धो अद्येति" सर्वेषाम् यथाऋषि वा" इति आश्व० श्रौ० गोत्रभेदेन सूक्तभेदस्योक्तेः। अत्र नारायणवृत्तिः। "यो यस्य ऋषिस्तदानुगुण्यं यथर्षिशब्देनोच्यते तथा वाऽऽग्नीसूक्तं ग्रहीतव्यम्। स्वयं वा ऋषिनामधेयस्यानुगुणा आम्नाः कर्त्तव्या इत्यर्थः। तत्र भगवता शौनकेन यथाऋषिपक्षे आग्नीविवेकार्थमेव श्लोक उक्तः। "कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च। वशिष्ठः कश्यपो वाभ्रव्यो जमदग्निरथोत्तमः"। तत्र दशानां सूक्तानां प्रथमं कण्वानाम् "समिद्धो न आवह" इति। द्वितीयं तद्वंशजातानामङ्गिरसाम्, "समिद्धो अग्न आवह" इति। तृतीयमगस्त्यानाम्, "समिद्धो अद्य राजसि" इति। चतुर्थं शुनकानाम्, "समिद्धो अग्निर्निहितः" इति। पञ्चमं विश्वामित्राणाम्, "समित्समित्सुमनाः" इति। षष्ठमत्रीणाम्, "ये समिद्धाय शोचिषे" इति। सप्तमं वशिष्ठानाम्, "जुषस्व नः समिध" इति। अष्टमं कश्यपानाम् "समिद्धो विश्वतस्पतिः" इति। नवमं वाभ्रव्यानाम्, "इमां मे अग्ने समिधं जुषस्वेड" इति। शुनकवाभ्रव्यानाम् भृगूणां दशमं, "समिद्धो अद्य मनुषो दुरोणः" इति यथर्षिपक्षे विवेकोऽयम्"।

आप्रीत त्रि० आ+प्री—क्त। १सम्यक्प्रीते २ईषत्प्रीते च। भावे क्त। सम्यक्प्रीतौ न०।

आप्रीतपा पु० आप्रीतं पाति पा—क। विष्णौ "अथ यद्याप्याय्यमानः किञ्चिदाप्रद्येत विष्णवआप्रीतपाय स्वाहेति जुहुयात् विष्णुर्हि स तस्मात्प्रीतपा भवत्यपापमानं कृत उपैनं यज्ञोनमति" शत०ब्रा०। किप्। आप्रीतपा अप्यत्र।

आप्लव पु० आ+प्लु—घञभावपक्षे अप्। १स्नाने, जलानां सर्वतः सङ्कुलने। ल्युट् आप्लवनम् तत्रैव न०।

आप्लवव्रतिन् पु० आप्लवः समावर्त्तनस्नानमेव व्रतमस्यास्य इनि। स्नातके गृहस्थभेदे वस्तु वेदानधीत्य दारपरिग्रहार्थं कृतसमावर्त्तनस्नानः दारलाभात् प्राक् स्नातं व्रतविशेषमाचरति तादृशे द्विजे "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृत्युक्तं व्रतं च दर्शितं विधानपा० यथा "स्नात्वैवं विधिना काले मासमात्रमपि द्विजः। अनाश्रमी न तिष्ठेत्तु सुखस्थस्तु प्रयत्नवान्। निःक्षीरोगार्दितोभीत आपद्योऽन्यैश्च कारणैः। स्नातकः प्रयतो वह्निं न त्यजेदिति वै श्रुतिः। नित्यदा ब्रह्मचारी स्यात् पञ्चयज्ञपरायणः। जपतीर्थरतोवा स्यात् स्नातकोलौल्यवर्जितः। श्राद्धे निमन्त्रितो गच्छेत् कुर्य्यात् षट्कर्म्म च द्विजः। येन केनाप्युपायेन व्रतचर्य्यां न लोपयेत्। शकलान् जुहुयात् प्रातः" स्मृतिः अत्र प्रातरितिविशेषणात् न सायम्। तेन प्रातः सन्ध्यासुपास्याग्निकार्य्यं कृत्वा शकलहोमः कार्य्यः तन्मन्त्राश्च तैत्तिरीयारण्यके पठिताः "दैवकृतस्यैनसोऽवयजनमसि स्वाहेत्यादिकाः। तदीयहोमद्रव्यविशेषोबौधायनेनोक्तः "सएष उपनयनप्रभृति व्याहृतिभिः षड्भिरेव समिद्भिः आ समावर्त्तनात्। समावर्त्तनप्रभृति आज्येनैव आ पाणिग्रहणात्। पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा व्यस्तेनैकेन यज्ञाङ्गतो जुहुयात्" "वैश्वदेवं गृह्यस्य प्रत्यहारभृतं भवेत्। स्नातकेनापि तत्कार्य्यं पृथक्पाको गृहे यदि" शौनकः। "यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्। कृत्स्नौष्णीषमाले च पादुके चाप्युपानहौ। रौक्मे च कुण्डले वेणुं कृत्तकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्यात् बहिर्माल्यञ्च धारयेत्। शुक्लाम्बरधरोनित्यं सुगन्धः प्रियदर्शनः। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्तमुल्बणं चान्यद्धृतं वासो न कन्थिकाम्" कूर्म्मपु०। "उपानहौ च वासश्च धृतमन्येन धारयेत्। उपवीतमलङ्कारं स्रजं कनकमेव च" मनुः। "स्नातः सन्वृहेत् कन्यां प्रव्रजेत्तद्विनिच्छुकः। वनस्थो वा भवेद्विप्रः सुखस्थो विधिना शुचिः। अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः। आश्रमेण विना तिष्ठन् प्रायश्चीयते हि सः" इति विधा पा० धृता स्मृतिः। तस्य कन्यालाभार्थं काम्यजप उक्त ऋग्विधाने "सुषमं प्रजपेत् सूक्तमथ सम्यक् शिवालये। अयुतं तु जपेत् कन्यां वरमासात् लभते नरः" इति।

अत्रानाश्रमदोषविषये किञ्चिदुच्यते स्नातको हि गृहस्थभेदोद्विजातिमात्रः समावर्त्तनस्नानस्य तेषामेव सम्भवात्। अतस्तद्विषयकमेवानाश्रमादिदोषोत्कीर्त्तनम्। तथा हि विधानपारिजातधृतयोः स्मृत्योः "स्नात्वैव विधिना काले" इत्यादौ स्नातः सन्वृहेत् कन्यामित्यादौ चोपक्रमे द्विजातिविषयकत्वावगमेन उपसंहारे अनाश्रमदोषकीर्त्तनं तद्विषयकमेव उपक्रमोपसंहारयोरेकविषयकत्वौचित्यात्। एतेन "क्षीकरोति यदा वेदं चरेद्वेद-

व्रतानि च । ब्रह्मचारी भवेदूर्द्धं ततः स्नातो भवेद्गृही । द्विविधो ब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः । उपकुर्व्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः । योऽग्निहोत्राश्रममस्थाय ब्रह्मचारी भवेत् पुनः । न यतिर्न वनस्थश्च सर्वाश्रमविवर्ज्जितः । अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः । जपे होमे तथा दाने स्वाध्याये च रतस्तु यः । नासौ तत्फलमाप्नोति कुर्व्वाणोऽप्याश्रमाच्युतः । तयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते । प्रातिलोम्येन योयाति न तस्मात् पापकृत्तमः" दक्षवचनमपि वेदाध्ययनोत्तरस्नातकानामेवोपक्रमे कीर्त्तनात् अन्ते च तयाणामाश्रमाणामानुलोम्यविधानाच्च द्विजमात्रविषयकम् यत्तु तद्वाक्यैकदेशमादाय रघुनन्दनेनानाश्रमी न तिष्ठेत्त्वित्यादि वाक्यं शूद्रोपलक्षणपरमुक्तं न तद्युक्तमुपक्रमोपसंहाराभ्यां द्विजमात्रविषयकत्वनिश्चयात् । किञ्च तयाणामानुलोम्योक्तेरपि न शूद्रविषयकत्वं तत्प्रदर्शितवामनपुराणवचने शूद्रस्यैकमाश्रमावगतेः तथा च येषामेव आश्रमचतुष्टयं तत्त्रयं तद्द्वयं वा सम्भवति तेषामेवानुलोम्यप्रातिलोम्यसम्भव एकमात्राश्रमस्य शूद्रस्य कथन्तरामानुलोम्यप्रातिलोम्यसम्भवः । एतेन "व्रतेषु लोपकोयश्च आश्रमाद्विच्युतश्च यः । संदंशयातनामध्ये पतत्स्वानुभावपि" इति भविष्यपुराणवचनेन दक्षस्मृतेः सङ्कोचनमपि परास्तम् "श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते । तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरेति" विधान पा० भृतव्यासवाक्येन पुराणापेक्षया स्मृतेर्वरत्वकीर्त्तनेन पुराणेन स्मृतेर्बाधस्यायोग्यत्वात् "विरोधे त्वनपेक्षमसति ह्यनुमानमिति" जैमिनिसूत्रेण श्रुतिस्मृत्योर्विरोधे स्मृतेरप्रमाणस्यैव स्मृतिपुराणयोर्विरोधेऽपि पुराणस्याप्रमाणस्यैवोचितत्वात् वस्तुतः नात्र विरोधः "सदृश्य तु विधेर्नान्यैरुपसंहार दृश्यते" इतिन्यायेनार्थक स्मृतौ द्विजपदस्य स्पष्टतया अन्योपसंहारकत्वासम्भवेन पौराणिकयच्छब्दस्यास्पष्टार्थकतया तत्परत्वकल्पनेनैवोपपत्तौ विरोधाभावात् तथा च भविष्यपुराणवचनमेव द्विजातिविषयकं न शूद्रविषयकमित्येव कल्पनीयमिति । अत्रेदं विवेक्तव्यं किं पौराणिकास्पष्टार्थकयच्छब्दस्य यावद्वर्णविषयकत्वमुत स्पष्टार्थकस्मृत्येकवाक्यतया त्रैवर्णिकमात्रविषयकत्वं तत्र पुराणेन स्मृतेर्बाधायोगेन पौराणिकयच्छब्दस्यैव स्मृत्युक्तिवर्णैवरत्वकल्पनं युक्तमित्युत्पश्यामः । यदपि "चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्त्तिताः । ब्रह्मचर्य्यञ्च गार्हस्थ्यं वानप्रस्थञ्च भिक्षुकम् । क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि । ब्रह्मचर्य्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः । गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्" वाम० पु० वाक्यं तत् शूद्रस्य गार्हस्थ्यमात्राधिकारबोधकम् । न तु तदकरणे पापजनकताबोधकमपि उचितमिति पदप्रहारस्यात् उचितपदस्य योग्यार्थकत्वात् तेनैव उद्वा० त० क्षणमुत्सवमिति व्याख्यानेन तदीयगृह्यास्त्रमस्योत्सवार्थकत्वोक्त्या काम्यत्वसूचनात् "चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि । स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः । अष्टाचत्वारिंशदब्दं वयोयावच्च पूर्य्यते । भार्य्यापुत्रवियुक्तस्य नास्ति यज्ञेऽधिकारितेति" भविष्यपुराणवचनमपि यज्ञेऽधिकारितामात्रप्रतिषेधात् द्विजविषयकमेव शूद्रस्य यज्ञेऽनधिकारात् । द्विजातीनामेव यज्ञीयाज्यावेक्षणादेः पत्नीसाध्यतया पत्न्यभावे कथमाज्यावेक्षणाद्यङ्गसिद्धिरिति युक्तः तेषामनधिकारः" यज्ञाधिकारे शूद्रस्य पर्य्युदस्ततया तदधिकाराभावकथनमनर्थकं स्यात् । अतो येषामेव यज्ञाधिकारस्तेषामेव भार्य्याराहित्ये अनधिकारिताप्रतिपादने वचनं सार्थकम् । तेन तदुद्विजविषयकमेव । एवं प्रागुक्तदक्षवचने जपेहोमे तथा दाने स्वाध्याये निष्फलत्वकथनमपि उपक्रमोपसंहाराभ्यां होमस्वाध्याययोर्द्विजातीनामेव सम्भवाच्च द्विजातिविषयकमेव । अतः शूद्राणां विवाहस्य उत्सवार्थतया काम्यत्वेनाकरणे न पत्यवाय इति सुस्थितम् । एतेन वह्निविवाहवादे मया दक्षवचनस्य द्विजपदस्योपलक्षणार्थकत्वं यत् खण्डितं तत् सुस्थितमेवेति द्रष्टव्यम् ।

आस्राव पु० आ+स्रु-घञ् । आस्रवशब्दार्थे । [व्याप्ते ।

आस्रावित त्रि० आ+स्रु-णिच्-क्त । जलादिप्रवाहेनाभि-

आस्राव्य त्रि० आ-स्रु-णि० कर्त्तरि ण्यत् । १आस्रवनकारके । भावे ण्यत् । २कर्त्तव्यास्रवने न० । कर्म्मणि ण्यत् । जलादिना २अभिव्याप्ये त्रि० ।

आस्रुत त्रि० आ+स्रु-क्त । १स्नाते २आर्द्रीभूते च ३स्नातके गृहस्थभेदे पु० । भावे क्त । ४स्नाने न० ।

आस्रुतव्रतिन् पु० आस्रुतस्य स्नातस्य व्रतमस्त्यस्य इनि । स्नातके गृहस्थभेदे । आस्रवव्रतिशब्दे विवृतिः ।

आस्रुत्य अ० आ+स्रु-ल्यप् । स्नात्वेत्यर्थे, २उत्स्रुत्य उल्लङ्घ्येत्यर्थे च ।

आस्रुष्ट त्रि० आ+स्रुष-क्त । १ईषद्दग्धे २सम्यग्दग्धे च ।

आप् पु० आप–वन् । वायौ सि०कौ० कण्ठस्थाने उज्ज्वल० वनुप्रत्ययाधिकारे उणादौ निपा० अदन्तश्चायम् । शब्दकल्पद्रुमे नान्तत्वकल्पनं चिन्त्यम् । [वैद्यकम् ।

आफूक न० ईषत् फूत्कारइव फेनोऽत्र पृ० तलोपः । अफेने

आबद्ध न० सम्यक् आबद्धम्+बन्ध–भावे क्त । दृढबन्धने । १आधारे क्त । २प्रेमणि । कर्मणि क्त । २बद्धे ४आप्ते ५प्रतिरुद्धे च त्रि० । "पयोधिमाबद्धचलज्जलाबिलम्" माघः "आबद्धभीभग्नकुटीकराजम्" भट्टिः । "स्यन्दनाबद्धदृष्टिषु" रघुः । ६भूषणे च । वा०करणे क्त । ७योक्त्रे ।

आबन्ध पु० आ+बन्ध–घञ् । १दृढबन्धे, करणे घञ् । २योक्त्रे आधारे घञ् । ३प्रेमणि च । ल्युट् आबन्धनमप्यत्र न० ।

आबर्ह पु० आ+बर्ह–हिंसायां घञ् । १उत्पाटने २हिंसने च ल्युट् । आबर्हणमप्यत्र न० ।

आबर्हिन् त्रि० आबर्होऽस्यास्य इनि । उत्पाटनयुक्ते "मूलमस्याबर्हि" पा० आबर्ह आबर्हणं तदस्यास्ति आबर्हि"सि०कौ० ।

आबाध पु० आ+बाध–घञ् । पीड़ायां "आबाधे" पा० "आबाधे पीड़ायाम्" सि०कौ० "यथासुखसुखः कुर्य्यात् प्राणाबाधभयेषु च" "न चैनं पादतः कुर्य्यान्न प्राणाबाधमाचरेत्" मनुः "तत्र मनःशरीराबाधकराणि शल्यानि" सुश्रु० नास्ति बाधा यस्य । ३पीड़ाशून्ये त्रि० ।

आबाधा स्त्री आ+बाध–भावे अ । १पीड़ायाम् २तापत्वे क्लेशे च । "आबाधामरणभयार्चिषा चिराय" किरा० लीलावत्युक्ते २अबाधाशब्दार्थे २२६पृष्ठे विवृतिः ।

आबिल त्रि० आ+बिल–भेदने क । १अस्वच्छे कालुष्ययुक्ते अस्वच्छस्य हि जलादेः सम्यग्दृष्टिप्रसारभेदनात्तथात्वम् । "पयोधिमाबद्धचलज्जलाबिलम्" माघः । २भेदके त्रि० ।

आबिलकन्द पु० आबिलोभूमेराभेदकः कन्दो मूलमस्य । मालाकन्दे क्षुपभेदे तस्य मालाकारकन्दतया भूमेः सम्यग्भेदनात्तथात्वम् ।

आबुत्त पु० आपनमाप् क्विप् आपे प्राप्यै उत्तास्यति उद्+तम–ड । नाड्योक्तौ भगिनीपतौ । बहुप्राप्तौ सन्तोषा भावेन दुःखित्वात्तस्य तथात्वम् । [२मेघसम्बन्धिनि च ।

आब्द त्रि० अब्दे मेघे भवः तस्येदम् इति वा अण् । १ मेघभवे

आभग पु० सम्यक् भगं माहात्म्यं यस्य । आभाग्यदेवे "सोमोमूत्यावपानेष्टा भगोदेवोदेवेष्वभगः" ऋ० १,३९,४

आभञ्जन न० आ+भञ्ज–ल्युट् । निरूपणे शब्दचि० ।

आभयजात्य पुंस्त्री अभयजातस्यापत्यं गर्गा० यञ् । अभयजातस्यापत्ये स्त्रियां ङीप् यलोपः । ततः कण्वा० अण् यलोपः । आभयजातः तदपत्ये पुंस्त्री स्त्रियां ङीप्

आभरण न० आ+भृ–कर्मणि ल्युट् । भूषणे । "किमित्यपास्याभरणानि यौवने" कुमा० "वेषाभरणसंशुद्धाः स्मृतेयुः सुसमाहिता" "वाहनानि च सर्वाणि शस्त्राण्याभरणानि च" मनुः "पाण्डवानां सभामध्येऽदुर्य्योधन उपागत । तस्मै गाञ्च हिरण्यञ्च सर्वाण्याभरणानि च" विदग्धमु० भावे ल्युट् । २सम्यक्पोषणे न० ।

आभरित त्रि० आभर आभरणं जातोऽस्य इतच् आ+भृ–बा० इतच् इट् च १पूरिते २अलङ्कृते । "हस्ताभरणपूर्णेन केयूराभरितेन च" हरिवं० १६अ० ।

आभर्म्मन् न० आ+भृ+मनिन् । १सम्यग्भरणे गर्भादेः २पोषणे

आभा स्त्री आ+भा–अङ् । १दीप्तौ, २शोभायाम् कान्तौ, ३उपमाने, आभा "वबूलपर्य्यायः कथितः कोविदैरिह" भा० प्र० उक्ते ४बबूले च । "आभाफलत्तिकैर्व्योमैः सर्वैरेभिः समीक्षितैः तुल्ययुग्गुरुरायोज्योभग्नसन्धिप्रसाधकः" चक्रद० ।

आभाति स्त्री आभाति तुल्यरूपतया आ+भा–क्तिच् । प्रतिबिम्बे राजनि० । तस्य बिम्बतुल्यतया दीप्तेस्तथात्वम् ।

आभाषण न० आ+भाष–ल्युट् । परस्परकथने २आलापे "सम्बन्धसाभाषणपूर्व्यमाहुः" रघुः । ३सम्बोधने च ।

आभाष्य त्रि० आ+भाष–ण्यत् । आमन्त्रणीये १संबोध्ये २आलाप्ये च "जनसाभाष्यसिमं न मन्यसे" रघुः । आ+भाष–ल्यप् । ५संबोध्येत्यर्थे अव्य० ।

आभास पु० आभासते आ+भास अच् । उपाधितुल्यतया भासमाने १प्रतिबिम्बे "आभासोरूपरूप्यवत्" भा०सू० "बुद्धिवृत्तिर्विदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्मरेत्" वेदा०का० । २दुष्टे हेत्वादौ "हेत्वाभासाश्च पञ्चधा" भाषा० । "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाहेत्वाभासाः" गौ० सू० । पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नोहेतुर्गमकः स इवाभासत इति हेत्वाभासस्तेन तद्भिन्नत्वे सति तद्धर्मवत्त्वम् पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेणाभासमानत्वं हेत्वाभासत्वमिति फलितार्थः "हेत्वाभासाश्च यथोक्ताः" गौ०सू० । एवं प्रमाणाभासः युक्त्याभासः आगमाभासश्चादावपि प्रामाण्याद्यभावत्वे सति प्रमाणादिरूपेणाभासमानत्वमर्थः । "एवं बहवो विप्रतिपन्नायुक्तिवाक्यतदाभाससमाश्रयाः सन्तः" भा०भा० ।

तथा च यद्वाचकपदोत्तरमाभासशब्दः प्रयुज्यते तस्य दुष्टत्वंतेन गम्यते । रसाभासादावपि तिर्य्यग्योन्यादिगतत्वेन परनायकगतत्वेन च दुष्टत्वाद्रसाभासत्वम् । पुनरुक्तवदाभासादौ च न दुष्टत्वम् किन्तु पुनरुक्ताभिन्नत्वेनाभासमानत्वात् वस्तुतोऽपुनरुक्तत्वमेव गम्यते इत्येव तत्र विशेषः । "रसत इति रस इति व्युत्पत्तिदर्शनात् भावतदाभासाद्योऽपि गृह्यते" सा०द० तत्र रसाभासः "मधु द्विरेफः कुसुमैकपात्रे"इत्यादि । "अत्र हि सम्भोग शृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासत्वम्"सा०द०।"आपाततोऽर्थस्य पुनरुक्तावभासनम् । पुनरुक्तवदाभासः" सा० द० । भावे घञ् । २तुल्यप्रकाशे । आभासतेऽनेन आ+भास–णिच्-करणे अच् । ग्रन्थावतारार्थं ४ग्रन्थाभिप्रायवर्णने व्याख्यानांशभेदे च ।

आभासुर त्रि० आ+भास-घुरच् । सम्यग्दीप्तिशीले ।

आभास्वर त्रि०आ+भास-वरच् । १सम्यग्दीप्तिशीले चतुःषष्टिमिते २गणदेवभेदे "आत्मा ज्ञाता दमोदान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधोमदोमोहो द्वादशाभास्वरा-द्रमे" इत्युक्ते ३द्वादशमिते गणभेदे च पु० । एषाञ्च स्वस्वदृत्त्याभास्वरत्वात्तथात्वम् ।

आभिचरणिक त्रि० अभिचरणं प्रयोजनमस्य ठञ् । अथर्ववेदादिप्रोक्ते शत्रुप्रभृतेर्मारणोच्चाटनवशीकरणादिरूपाभिचारसाधने १मन्त्रादौ तत्साधने २क्रियाभेदे च । "रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा पितृमातरमात्मानं चालभ्योपस्पृशेदपः" कात्या० १,१०,१४, "अभिचरणम् अभिचारः प्रयोजनमस्यासावाभिचारणिकः प्रयोजनमित्यर्थे ठञ् । "वधान देव ! सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्म सकमतोमा मौक्"यजु०१,२५,"द्विषतो वधोऽसि य०१२८ इत्यादि तत्र शत्रुनामादिसंयुक्तः अभिचाराधमेव प्रयुज्यमान आभिचरणिक इत्युच्यते तेनाभिचरणबुद्ध्यभावे मन्त्रस्याभिचरणप्रयोजनाभावाद्नाभिचरणिकत्वम् अतस्तदुच्चारणे तदङ्गस्पर्शाभाव" कर्कः । एवमन्येऽपि मन्त्रा अथर्ववेदोक्ता ज्ञेयाः । तद्विधानञ्च अथर्ववेदान्तर्गते आङ्गिरसकल्पे विस्तृतम् । एवं तन्त्रोक्ताभिचारविधानम् तन्त्रसारादौ विस्तृतम् । अभिचार+प्रयोजनार्थे ठञ् । आभिचारिकोऽप्यत्र । स्त्रियामुभयत्र ङीप् ।

आभिजन त्रि० अभिजनादागतः अभिजनस्येदं वा अण् । अभिजनाद्यादागते "तां पार्वतीत्याभिजनेन नाम्ना" कुमा० । २वंशसम्बन्धिनि च । [खिल्ये ३सौन्दर्य्ये च ।

आभिजात्य न० अभिजातस्य भावः ष्यञ् । १कौलीन्ये २पा-

आभिजित त्रि० अभिजिति नक्षत्रे जातः अण् । अभिजिन्नक्षत्रे जाते तस्य वा लुक् । अभिजिदपि तत्रैवार्थे । अभिजित इदम् अण् । गवामयनान्तर्गताभिजिन्नामकदिनसम्बन्धिनि सामादौ त्रि० । [अभिजिन्नक्षत्रे ।

आभिजित्य त्रि० अभिजिति भवः अण् ततः स्वार्थे यञ् ।

आभिधा स्त्री अभिधैव स्वार्थेऽण् । अभिधाशब्दार्थे १शब्दवृत्तिभेदे २कथने च

आभिधातक न० आभिधां तर्कति सहते अच् । शब्दे

आभिधानीयक न० अभिधानीयस्य भावः योपधगुरूपोत्तमत्वात् वुञ् । कथनीयत्वे

आभिप्लविक त्रि० अभिप्लवे विहितः ठक् । अभिप्लवविहित स्तुतसामादौ । अभिप्लवशब्दार्थस्य अभिप्लवशब्दे दृश्यः । तच्च साम "ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्यादि" स्तुते गेयम् । अभिप्लवाय हितः ठक् । गवामयनान्तर्गतषड्हभेदे पु० ।

आभिमानिक त्रि० अभिमानेन निर्वृत्तः ठक् । सांख्यमतसिद्धे अभिमानोत्पादिते उभयेन्द्रिये शब्दादिपञ्चमात्रे च । यथैषामभिमानिकत्वं तथोक्तं सां०प्र०भा० "तन्मात्रेन्द्रियाख्यभिमानवद्द्रव्योपादानकान्यभिमानकार्यद्रव्यत्वात् यन्नैवं तन्नैवम् यथा शुक्लादिरिति । नन्वभिमानवद्द्रव्यमेवासिद्धमिति चेत् अहं गौर इत्यादि दृत्युपादानतया चक्षुरादिवत् तत्सिद्धेः । अनेन चानुमानेन मन आद्यतिरेकिमात्रस्य तत्कारणतया साध्यत्वात् । अत्र चायमनुकुलस्तर्कः"यङ्ग स्यां प्रजायेयेत्यादि" श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्वकत्वाद् बुद्धिपूर्वकसृष्टौ कारणतयाभिमानः सिद्धः । तत्र चैकार्थसमवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात्"

आभिमुख्य न० अभिमुखस्य भावः ष्यञ् । अभिमुखत्वे आनुकूल्यार्थसम्मुखीभवने "प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" वाक्यप० । "अनुकूलत्वे २विशेषादाभिमुख्येन चरन्त्योऽभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नास्तथा स्थित्यङ्गञ्च तद्विदाः"सा०द०। तत्र यात्रादौ राहोराभिमुख्य निषेधः ज्यो०त० "पश्चादर्के विधौ वह्नौ सौम्यां च वायवे कुजे । रक्षोऽधीशे भृगौ याम्यां गुरावीशे शनौ दिने । राहुर्भ्रमति यामार्द्धादस्वगत्या च वामतः । प्रतीच्यां वह्निकोणे तु ततः सौम्यामतोऽग्नि । ततः प्राच्यामतोवायौ तस्माद्याम्यां ततः शिवे । रवावेवमन्यवारेषूह्यमेवं क्रमेण हि

द्यूते युद्धे विवादे च यात्रायां सम्मुखस्थितम्। राज्ञं विवर्ज्जयेत् यत्नाद्योच्छेत् कर्मणः फलम्" । एवं योगिन्याभिमुखेऽपि गमनं न शस्तम् यथा "प्रतिपन्नवमी पूर्वे रामा रुद्राश्च पावके । शरस्त्वयोदशी याम्ये वेदा मासाश्च नैर्ऋते । षष्ठी चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमे । द्वितीया दशमी यत्ने ऐशान्यामष्टमी कुहूः । योगिनो नवदण्डाश्च शेषा वर्ज्या विशेषतः । दक्षसम्मुखयोगिन्यां गमनं नैव कारयेदिति" ज्यो०त० । पीयूषधारायान्तु "पृष्ठतोदक्षिणे वापि योगिनीगमने हिता । वामसम्मुखयोर्नैव वायुमेवं चिन्तयेत्"जयकल्पलता वाक्ये तन्मूलके मुहूर्त्त० चि०वाक्ये च"नवभूम्यः शिववक्त्रयोऽब्धिविश्वेऽर्कलताः शक्रस्तुरङ्गतिथ्यः । द्विदशाभावसवश्च पूर्वतः खुत्तिथयः सम्मुखवामगा न शस्ताः" वामगाया अशुभत्वमुक्तम् । अनयोर्व्यवस्था देशभेदेन। कालपाशयोराभिमुख्येन यानमपि न शस्तम् "कौबेरीतो वैपतीत्येन कालो वारेऽर्कोद्ये सम्मुखे तस्य पाशः । यात्रायुद्धे सम्मुखे वर्ज्जनीयावेतौ रात्रौ व्यस्तसंस्थौ विचिन्त्यौ"मुहू०। रत्नं रत्नसारे "रवावुत्तरतः कालः सोम्ये वायव्यभागके। भौमे तु पश्चिमे भागे बुधे नैर्ऋतकोणके। जीवे च याम्य दिग्भागे भृगौ चाग्नेयकोणके। शनौ तु पूर्व्वदिग्भागे कालचक्रं प्रकीर्त्तितम्। पाशस्तत्सम्मुखदिशि" कालाभेदेन पञ्चमदिशि पाश इत्यर्थः यथा रवौ दक्षिणस्थां, सोमे आग्नेय्यां, भौमे पूर्व्वस्थां, बुधे ऐशान्यां, गुरावुत्तरस्थां, शुक्रे वायव्यां, शनौ पश्चिमायाम्। कालपाशयोराभिमुख्यं यात्रादौ निषिद्धं वामदक्षिणयोस्तु शुभाशुभफलकत्वं यथाह स्वरो० "दक्षिणस्तु शुभःकालः पाशोवामदिगाश्रयः । यात्रायां समरे श्रेष्ठस्ततोऽन्यत्र न शोभनः" "अन्यत्र सम्मुखपृष्ठभागयोः" पी०धा०। रात्रौ तु कालपाशयोर्विपर्य्यासेन स्थितेस्तदनुसारेणैव फलम्। पूर्व्वादिदिगभिमुखानि नक्षत्राणि। "पूर्व्वादिषु चतुर्ष्वेषु सप्त सप्तानलर्क्षतः"मुहू० तेन कृत्तिकादीनि सप्त पूर्व्वदिग्मुखानि ।मघादीनि सप्त दक्षिणाभिमुखानि। अनुराधादीनि सप्ताभिजित्कानि सप्त पश्चिमाभिमुखानि। धनिष्ठादीनि भरण्यन्तादीनि सप्त उत्तराभिमुखानि। तैस्तैर्नक्षत्रैस्तत्तद्दिगभिमुखगृहकरणं तत्प्रवेशश्च शुभाय। "यद्दिग्द्वारं मन्दिरं तद्दिग्गतैरक्षर्क्षैः स्यात् सन्निवेशो न सर्व्वैः" वशि० । पूर्व्वादिदिगभिमुखा राशयो यथा। "पूर्व्वादिदिक्षु मेषाद्याःक्रमाद्दिग्द्वारराशयः। दिग्द्वारराशयः सर्व्वे तद्दिग्यातुःशुभप्रदाः। तद्वर्गाश्च तदंशाश्च तद्दिग्यातुस्तथाविधाः" वशिष्ठः। "दिग्द्वारभे लग्नगते प्रशस्ता यात्रार्थदात्री जयकारिणी च। हानिं विनाशं रिपुतोभयञ्च कुर्य्यात् तथा दिक् प्रतिलोमलग्ने" इति मुहू०। शुक्राभिमुख्यं त्रिविधम् "उदयति दिशि यस्यां, याति गोलभ्रमाद्वा, विचरति च भचक्रे यत्र दिग्द्वारभेषु। त्रिविधमिह सितस्य प्रोच्यते सम्मुखत्वं मुनिभिरुदयएव ज्ञेयते तत्र यत्नात्" श्रीपतिः । "उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाथ भकुड्भचक्रे । त्रिधोच्यते सम्मुखएव शुक्रो यत्रोदितस्तां तु दिशं न यायात्" मुहू० । "शुक्रः यस्यां दिशि प्राच्यां प्रतीच्यां वा कालवशेनोदयं करोति तत्र गन्तुः पुंसः शुक्रः सम्मुखः अयमेकः प्रकारः। अथ गोलभ्रमात्उत्तर दक्षिणगोलभ्रमणवशेन यस्यां दिशि उत्तरस्यां दक्षिणस्यां वा याति तत्र गन्तुः शुक्रः सम्मुखः स्यादिति द्वितीयः प्रकारः । प्राच्यादिदिग्द्वारभक्तिकादिगतिवशेन यद्भिन्नलग्ने शुक्रश्चरति तत्र दिशि गन्तुः शुक्रः सम्मुखःस्यादिति तृतीयःप्रकारः । तत्रोदयशुक्रे दोषाधिक्यमिति" पी० धा० । अतएव वशिष्ठः "पश्चादभ्युदिते शुक्रे प्रतीचीं दक्षिणां दिशम्" इति उदयदिग्गतस्यैव शुक्रस्याभिमुख्येयात्रादि न्यषेधत्। अत्रापवादः "बुधोऽनुकूलो यदि तत्र संचलन् रिपून जयेच्चैव जयः प्रतोन्दुजे"मुहू०। शुक्राभिमुख्यादिदोषभङ्गा । "एवं विधेऽप्यास्फुजिते च यायाद्बुधोयदि स्यादनुकूलवर्त्ती"श्रीपतिः। अनुकूलः पृष्ठदिक्संस्थ" इति पी०धा०। अपवादान्तरम् "नीचगोऽरिगृहस्थो वा वक्रगोवा पराजितः। यात्रुर्भंगप्रदः शुक्रः स्वोच्चस्थश्चेद्धनप्रदः"इति नारदः। प्रतिशुक्रादिदोषोक्तौ प्रथमयात्रायां राज्ञां च विजय यात्रायामेव यथाह रैभ्यः । "प्रतिशुक्रादिदोषोऽयं नूतने गमने स्मृतः । राज्ञां विजययात्रायां नान्यदा दोषमावहेत्" चन्द्रस्य नक्षत्रविशेषस्थितौ तदपवादः । "यावच्चन्द्रः पूषभात् कृत्तिकाद्ये पादे शुक्रोऽन्यो न दुष्टोऽग्रहदर्शे" मुहू० । "मौष्णादिवह्निभाद्यार्द्धं यावत्तिष्ठति चन्द्रमाः । तावच्छुक्रो भवेदन्यः सम्मुखे गमनं हितम्" पराशरः । राज्ञां विजययात्रायां विशेषः । मध्यमार्गं मार्गवास्तेऽपि राजा तावत्तिष्ठेत् सम्मुखत्वेऽपि तस्य" मुहू० । अत्रत्यापदि शान्तिं कृत्वा यायात् । शान्तिश्च पी०धा० यात्राप्रकरणे दर्शिता ततएव ज्ञेया।

न्दपविजययात्रायां बुधकृजशुक्राभिसुख्यमपि निषिद्धम् । "प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतोऽपरः । बलेन शक्रक्रतुस्थोऽपि हतसैन्योनिवर्त्तते" इति वशिष्ठः ।

एतदभिप्रायेणैव कुमा० वर्णितम् । "दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे" इति । दिगीशाभिसुख्येगमनंशस्तं प्रातिसुख्येऽशस्तम् । तत्र दिगीशाः "सूर्य्यः शुक्रः क्षमापुत्रःसैंहिकेयः शनिः शशी । सौम्यस्त्विदशमन्त्री च पूर्व्वादीनां दिगीश्वराः । दिगीशाहे शुभा यात्रा पृष्ठाहे मरणं ध्रुवम्" ज्यो०त० ।

नववध्वागमनेऽपि शुक्राभिमुख्यनिषेधः सप्रतिबवः ज्यो० त० दर्शितो यथा ।

दीपिकायां "स्त्रीशुद्धालिघटाजसंगतरवौ काले विशुद्धे भृगु संत्यज्य प्रतिलोमगं शुभदिने यात्रा प्रवेशोचिते । त्यक्त्वाहस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्य्यादेकशुरादिषु प्रतिशुक्रगोनैंऋत्यि दोषं बुधाः" । पैठीनसिः "पैत्र्यागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धोन भवति यदा संसुखोवापि शुक्रः । मेषे कुम्भेऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नववधूं वेश्मवेन्मन्दिरं स्वम् । भर्त्तुर्गोचरशोभने दिनपतौ नास्तं गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे । हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा यानीता गुणशालिनी नववधूर्नित्योत्सवा मोदते । एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । पतिना नीयमानायाः पुरः शुक्रोन दुष्यति" । तथा "काश्यपेषु वशिष्ठेषु भृग्वत्रिभारद्वाजेषु च । भारद्वाजेषु वात्स्येषु प्रतिशुक्रोन दोषकृत्" शम्भोराभिसुख्यं पूजने निषिद्धं यथा "न प्राचीमयतः शम्भोर्नोदीचीं शक्तिसंस्थिताम् । न प्रतीचीं यतःपृष्ठमतोदक्षं समाश्रयेत्" रुद्रया० । "यजमानः शम्भोः प्राचीमवस्थितये न समाश्रयेत् । शम्भोर्जगत्संहारकस्याग्रतः सांमुख्यात् पञ्चवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम् एकवक्त्रपक्षे सुतरां तथा" ति०त० रघु० ।

आभिरूपक न० अभिरूपस्य भावः मनो० वुञ् । सौन्दर्य्ये

आभिरूप्य न० अभिरूपस्य भावः ष्यञ् । सौन्दर्य्ये "आभिरूप्याच्च विम्बानां देवः सन्निध्यदृच्छति" हय० रा० ।

आभिषिक्त त्रि० अभिषिक्तमभिषेकः तेन निर्वृत्तः सङ्घा० अञ् । अभिषेकनिर्वृत्ते ।

आभिषेचनिक त्रि० अभिषेचनं राज्याभिषेकः प्रयोजनमस्य ठञ् राज्ञाभिषेकसाधने द्रव्यभेदे "आभिषेचनिकं यत्ते रामार्थमुपकल्पितम् । भरतस्तद्वाप्नोतु" भा० व० २७५ अ० । तत्तद्द्रव्यादिविधानानि" भा० शा० प० ४० अ० युराकल्पव्याजेनोक्तानि यथा "ततः प्रकृतयः सर्वाः पुरस्कृत्य पुरोहितम् । दद्युर्धर्मराजानमादाय बद्धमङ्गलम् । पृथिवीञ्च सुवर्णञ्च रत्नानि विविधानि च । आभिषेचनिकं भाण्डं सर्वसम्भारसम्भृतम् । काञ्चनौदुम्बरास्तत्र राजताः पृथिवीमयाः । पूर्णाः कुम्भाः सुमनसोलाजा वर्हींषि गोरसम् । शमीपिप्पलपालाशसमिधो मधुसर्पिषी । स्रुव औदुम्बरः शङ्खस्रुचा हेमविभूषितः । दाशार्हेणाभ्यनुज्ञातस्तत्र धौम्य पुरोहितः । प्रागुदक्प्लवने वेदीं लक्षणेनोपलिख्य च । व्याघ्रचर्मोत्तरे शुक्ले सर्वतोभद्र आसने । दृढपादप्रतिष्ठाने कृताग्रनसमत्विषि । उपवेश्य महात्मानं कृष्णाञ्च द्रुपदात्मजाम् । जुहाव पावकं धीमान् विधिमन्त्रपुरस्कृतम् । ततउत्थाय दाशार्हः शङ्खमादाय पूजितम् । अभ्यषिञ्चत्पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरम् । धृतराष्ट्रञ्च राजर्षिः सर्व्वाः प्रकृतयस्तथा । अनुज्ञातोऽथ कृष्णेन भ्रातृभिः सह पाण्डवः । पाञ्चजन्याभिषिक्तश्च राजाऽऽहृतसुखोऽभवत् । ततोऽनु वादयामासुः पणवानकदुन्दुभीन् । धर्म्मराजोऽपि तत्सर्वं प्रतिजग्राह धर्म्मतः । पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः । ततो निष्कसहस्रेण ब्राह्मणान् स्वस्ति वाचयन् । वेदाध्ययनसम्पन्नान् वृतिशीलसमन्वितान्" । एतानि द्रव्यादीनि राजाभिषेचनिकानि ज्ञेयानि अधिकं राजाभिषेकशब्दे वक्ष्यते स्त्रियां ङीप् । अभिषेचनमधिकृत्य कृतोऽन्थः ठक् । अभिषेकाधिकारेण कृते २भारतान्तर्गते अवान्तरपर्वभेदे "आभिषेचनिकं पर्व्व धर्म्मराजस्य धीमतः" भा० आ० १ अ० । अभिषेचनं स्नानं प्रयोजनमस्य ठञ् । २स्नानार्थे विधाने तत्तत् ४द्रव्यमन्त्रादौ च स्नानविभाग पूर्वकं तत्तत्द्रव्यविधानमन्त्रा उच्यन्ते । तत्र स्नानं तावत् सप्तविधम्" मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् । "आपोहिष्ठादिभिर्मान्त्रम् मृदालम्भस्तु पार्थिवम् । आग्नेयं भस्मना स्नानं वायव्यं रजसा कृतम् । अङ्गिरातवर्षाभिः स्नानं तद्दिव्यमुच्यते । वारुणञ्चावगाहस्तु मानसं विष्णुचिन्तनम्" योगिया० तत्र विशेषस्तैनैवोक्तः" "यत्र आपस्तु द्रुपदा आपोहिष्ठामयभुवः । एतैस्तु पञ्च भिर्मन्त्रैर्मन्त्रस्नानं तदुच्यते" मन्त्राणां समुच्चयोविकल्पोवा शक्त्यपेक्षया । तत्र वारुणं स्नानं सुखसमसामर्थ्ये अन्यानि

स्नानानि "स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं स्मृतम्। नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितम्" व्यासोक्तेः तत्र नित्यादीन्यनुपदं वक्ष्यन्ते। "असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः जा० स्मृ०। "स्मृत्येऽपि च द्विजातीनां मन्त्रवत् स्नानमिष्यते। विधिलोपं न ते कुर्य्युः सामर्थ्ये सति कर्म्मसु" जैमि०स्मृ० "अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः प्रातर्नं तनुयात् स्नानं होमलोपोविगर्हितः"कात्या०स्मृ०। "प्रातः संक्षेपतः स्नानं शौचार्थं तु तदिष्यते। मन्त्रैस्तु विधिनिष्णात्यं मध्याह्ने तु सविस्तरम्"वशि०। अत्यन्ताशक्तौ। "अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्म्मिणाम्। आर्द्रेण वाससा वापि मार्जनं कापिलं विदुः। ऋताभिमन्त्रितैस्तोयैः प्रोक्षयेन्मूर्द्ध्नि सर्व्वतः। अनुकल्पमिदं स्नानं सर्व्वपापहरं नृणाम्" जाबा०स्मृ०। एकवाससाऽपि स्नानं कर्त्तुं शक्यते "एकेन वाससा स्नायाद्द्वाभ्यामनियमः स्मृतः। बहुवासोनिषेधश्च स्नाने फलमभीप्सतः" विष्णुः। नैकवासाः क्रियां कुर्य्यात् स्नानं कर्म्म विना क्वचित्" तदुक्तेश्च "अस्पृश्यस्पर्शने चैव वान्तायां पुत्रजन्मनि। एतद्द्विवाससा कार्य्यमन्यत्रैकेन वाससा"वसि० "न नग्नोनान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन न विकृतेन च स्नायात्"इत्याचारतिलकः। तत्र नित्यं प्रातःस्नानम्, "प्रातः समाचरेत् स्नानं तच्च नित्यमिति स्मृतम्"मार्क०पु०। चन्द्रसूर्य्योपरागे अशौचादौ अस्पृश्यस्पर्शने च स्नानं नैमित्तिकम्। "पुष्येऽर्के जन्मनक्षत्रे व्यतीपाते च वैष्टतौ। अमायाञ्च नदीस्नानं पुनात्या सप्तमात् कुलम्" इत्याद्युक्तं स्नानं काम्यम्। धर्म्मकर्म्म कर्त्तुं यत् पूर्व्वस्नानं तत्क्रियाङ्गम्। "मलापकर्षणं नाम स्नानमभ्यङ्गपूर्व्वकम्। मलापकर्षणायैव तत्प्रवृत्तिस्तु नान्यथा।" तत्र स्नानविधिश्च आत्र०स्मृ०परि०उक्तः यथा।

"अथ स्नानविधिस्तत्रातर्मध्याह्ने च गृहस्थः कुर्य्यादेकतरत्र वा प्रातरेव, ब्रह्मचारी यतिस्त्रिषु सवनेषु द्विः त्रिर्वा वानप्रस्थः। तत्र प्रातः सगोमयेन कुर्यात् ऋदा मध्यन्दिने साय मृद्भाभिरद्भिः। न प्रातःस्नानात् प्राक्सन्ध्यामुपासीत प्रातरुत्सृष्टं गोमयमन्तरिक्षस्थं सङ्गृह्य भूमिष्ठं वोपर्यधश्च संस्पृष्टं तोयमेत्य धौतपादपाणिमुख आचम्य मन्त्रोक्तवदात्माभ्युक्षणादि च कृत्वा हिराचम्य दर्भपाणिः संयतप्राणः कर्म सङ्कल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणं भागं प्रणवेन दिक्षु विक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं "मानस्तोक" इत्यृचाभिमन्त्र्य "गन्धद्वाराम्" इत्यनया मूर्द्धादिसर्वाङ्गमालिभ्य प्राञ्जलिः "वरुणं हिरण्यहङ्गमिति" द्वाभ्याम् "अवते हेड" इति द्वाभ्यां "प्रसम्राजे बृहदुचेति" सूक्तेन प्रार्थ्य "हिरण्यहङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्म्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः" इत्यथ "याः प्रवतो निवत उद्वत" इत्येतया तीर्थमभिमृश्यावगाह्य स्नातो हिराचम्य मार्जयेत् अग्नयोयन्त्वध्वभिः" इत्यष्टाभिः "आपोहिष्ठेति" च नवभिरथ तीर्थमङ्गुष्ठेन" "इमं मे गङ्गे" इत्यृचा त्रिःप्रदक्षिणमालोड्य प्रकाशपृष्ठमग्नौ अघमर्षणसूक्तं त्रिरावर्त्य निमज्योन्मज्यादित्यमालोक्य द्वादशकृत्व आप्लुत्य पाणिभ्यां शङ्खमुद्रया योनिमुद्रया वोदकमादाय मूर्ध्नि मुखे वाक्षोरसि चात्मानङ्गायत्र्याभिषिच्य "त्वन्नो अग्ने वरुणस्य विद्वानिति" द्वाभ्यां "तरत्समन्दीधावतीति" च सूक्तेन पुनः स्नायाच्चूर्ण्णि चाभिषिञ्चेत् "तद्विष्णोः परमम्पदम् "अग्नेरन्नाणो अंहसो यत्किञ्चेदं वरुणदैव्ये जने" इत्येताजपेत्, स्रोतोऽभिसुखः सरित्सु स्नायादन्यत्रादित्याभिसुखोऽथ सान्नताभिरद्भिः प्राङ्मुख उपवीती दैवतीर्थेन व्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीन्देवान् सकृत्सकृत्तर्पयित्वाथोदङ्मुखः निवीती सव्याभिरद्भिः प्राजापत्येन तीर्थेन कृष्णद्वैपायनादीन् ऋषींस्ताभिर्व्याहृतिभिर्व्यस्ताभिस्तर्पयित्वाथ दक्षिणाभिमुखः प्राचीनावीती पितृतीर्थेन सतिलमद्भिर्व्याहृतिभिरेव सोमः पितृमान् यमो अङ्गिरस्वानग्निस्वत्ताः कव्यवाहन इत्यादीं स्त्रींस्त्रींस्तर्पयेदेतत्स्नानाङ्गतर्पणमथ तीरमेत्य दक्षिणाभिमुखः प्राचीनावीती "ये के चास्मत्कुले जाता अपुत्रागोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति वस्त्रं निष्पीड्य यज्ञोपवीत्यथ उपसृज्य परिधानीयमभ्युक्ष्य परिधाय द्वितीयञ्चोत्तरीय पर्युक्षितं प्राश्य हिराचामेदथोक्तसन्ध्यामुपासीतेदं प्रातःस्नानविधानम्।

अथ मध्यन्दिने तीर्थमेत्य धौतपाणिपादमुखो हिराचम्यायतप्राणः स्नानं सङ्कल्प्य दर्भपवित्रपाणिः शुचौ देशे खनित्रेण भूमिङ्गायत्र्यस्त्रेण खात्वोपरिमृदङ्गुलरङ्गुलमुद्धाय तस्मान्मृदं तथा खात्वा गायत्र्यादाय गर्तमुद्धासितया

हृदा परिपूर्य हृदुपात्तां शुचौ देशे तोरे निधाय गायत्र्या प्रोक्ष्य तच्छिरसा त्रेधा विभज्यैकेन मूर्ध्नं आनाभेरपरेण चाधस्तादङ्गमनुलिप्याप्स्वाप्लुत्य चालयित्वादित्यश्चिरोक्ष्य तं ध्यायन् स्नायादेतन्मलस्नानमाङ्गरथ तीरे द्विराचम्य हृतीयमस्त्रेणादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणभागमस्त्रेण दिक्षु दशसु विनिक्षिप्योत्तरन्यौर्ध्वं क्षिप्त्वा हृतीयङ्गायत्र्याभिमन्त्रितमादित्याय दर्शयित्वा तेन मूर्ध्ना आपादात् गायत्र्या प्रणवेन वा सर्वाङ्गमनुलिप्य "शुमित्रियान आप ओषधयः सन्तु" सकृदद्भिरात्मानमभिषिच्य "दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं वयन्द्विष्म" इति मन्त्रेणमद्भिः क्षालयेदथ वरुणप्रार्थना तर्पणान्तेनोक्तेन विधिना स्नायात् । नाखिन् प्राक् ब्रह्मयज्ञतर्पणाद्वस्त्रं निष्पीड्येदपुलादयो ह्यन्ते तर्प्या इत्येष स्नानविधिस्तदेतद्-समवेऽद्भिरेव कुर्याद्वौमदिनादिषु च न गृह्णे हृदा स्नायान्न च शीतोदकेन शीतोष्णोदकेन गृह्णे स्नायान्मन्त्रविधिं वर्जयेद्वहिर्वा शुचौ देशे सर्वं पश्चात्कुर्यादिति । अथाग्नस्नस्य मन्त्रस्नानं शुचौ देशे शुचिराचान्तः प्राणानायम्य दर्भपाणिः सव्ये पाणावपः कृत्वा तिसृभिरापो हिष्ठीयाभिः पञ्चः प्रणवपूर्वं दर्भोदकैर्मार्जयेत् । पादयो र्मूर्ध्नि हृदये मूर्ध्नि हृदये पादयोर्हृदये पादयोः मूर्ध्नि चाथर्वर्चयो मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथ ऋक्यो हृदये पादयोर्मूर्ध्नि चाथ हृचेन मूर्ध्नीति मार्जयित्वा गायत्र्या दशधाभिमन्त्रिता अपः प्रणवेन पीत्वा द्विराचमेदेतन्मन्त्रस्नानम्" । शाखिभेदेनान्यविधविधानं तत्तत्सूत्रेषु द्रष्टव्यम् । ततश्च सूत्राद्युक्तद्रव्याणां तत्तत्र मन्त्राणां तद्विधानानाञ्चाभिषेचनिकत्वं बोध्यम् कर्मान्ते ५यजमानाभिषेकार्थे मन्त्रे च । ते च मन्त्राः वैदिकाः पौराणिकाश्च । तत्र मन्त्रास्तु मत्कृततत्तदादानादिपद्धतौ २०६ पृष्ठादौ द्रष्टव्याः । पौराणिकतान्त्रिकतत्तत्कर्म्मस्वधिकारसिद्ध्यर्थमाभिषेकस्य साधने ६मन्त्रादौ ७तद्द्रव्यभेदे ८तद्विधाने च तत्र पौराणिकाभिषेकद्रव्यविधानादि "शिवमन्त्राभिषेकं यः कुर्याच्छिष्यादिकश्चिये" इत्यारभ्य "अस्त्रराजाभिषेक" इत्यन्तेन अग्निपुराणे दर्शितम् । शाक्ताभिषेकद्रव्यविधानानि च तन्त्रे ज्ञेयानि । ९रुद्राभिषेकद्रव्ये १०तद्विधाने च तद्द्रव्यविधानादि च विधानपारिजाते रुद्रकल्पपद्धतौ च द्रष्टव्यम् ११ देवाभिषेकादिसाधनद्रव्यादौ

आभिहारिक त्रि० आभिमुख्येन हारः अभिहारः प्रयोजनमस्य तत्र साधुर्वा ठञ् । अभिहारसाधने उपढौकनीये (भेटी) इति जगतीप्रसिद्धे द्रव्ये ।

आभीक न० अभीकेन दृष्टं साम अण् । अभीकर्षिदृष्टे सामभेदे "आभीकमभिनिधनमाभीशवानि चैके काल्या० २५,१४, १५ । एके आचार्या आभीकाद्यान्यपि सामान्यावपन्ति" कर्क० ।

आभीक्ष्ण्य न० अभीक्ष्णस्य भावः ष्यञ् । सातत्ये पौनःपुन्ये आभीक्ष्ण्यञ्च अविच्छेदेनैकरूपक्रियोत्पादनम् । "नित्यवीप्सयोः" पा० सूत्रे "आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये" सि० कौ० । "बहुलमाभीक्ष्ण्ये" पा० "आभीक्ष्ण्ये णमुल्" पा० । "जल्पिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति" पा० ग० सू० ।

आभीर पु० समन्तात् भियं राति रा-क । गोपे सङ्कीर्ण जातिभेदे स हि अल्पभीतिहेतोरप्यधिकं बिभेतीतितस्य तथात्वम् "आभीरवामनयनाहृतमानसाय दत्तं मनोयदुपते ! तदिदं गृहाण" उद्भटः स च सङ्कीर्णवर्णः । "ब्राह्मणा दुग्धकन्यामाहृतोनाम जायते । आभीरोऽम्बष्टकन्यायामायोगव्यान्तु धिग्वणः" इति मनूक्तः । "श्रीकोङ्कणादधोभागे तापीतः पश्चिमे तटे । आभीरदेशोदेविधि ! विन्ध्यशैले व्यवस्थित" इति शङ्किसङ्गम० उक्ते २देशभेदे ३तद्देशवासिनि ४तद्देशराजे च ब०व० । "एकादशकलधारि कविकुलमानसहारि । हृदमाभीरमवेहि जगणमन्त्यमनुधेहि" इत्युक्तलक्षणे ५मात्रावृत्तभेदे न० ।

आभीरपल्लि(ल्ली) स्त्री ईत० वा ङीप् । गोपप्रधाने ग्रामे घोषे (गोयालपाड़ा) ।

आभीरी स्त्री आभीरस्य पत्नी आभीरजातिर्वा स्त्री ङीप् । १आभीरभार्य्यायाम् २गोपजातिस्त्रियां महाभूद्रुद्राम् ।

आभील न० समन्तात् भयं लाति ददाति ला-क । १कष्टे २दुःखे ३भयानके तद्वासि अच् । ४तद्वति त्रि० "आभीलानि प्राणिनः प्रत्यवश्यन्" माघः । "रात्रौ निशीथे साभीले गतेऽर्द्धसमये नृप" इति भा० व० य० ११अ० ।

आभीशव अभीशुना दृष्टं साम-अण् । सामभेदे "आभीकमभिनिधनमाभीशवानि चैके" कात्या० २५,१४,१५ । "आभीकाद्यानि सामान्यावपन्ति" कर्कः ।

आभु त्रि० समन्तात् भवतिआ+भू-डु । विभौ व्यापके "तच्छेनाभूषिहितं यदासीत्" ऋ० १०१२९,३ । "आभुर्व्यापकम्" भा० क्विप् आभूरत्यत्र "आभूभिरिन्द्रः प्रथयन्नभूवः" ऋ० १,५१,९ । [२६पद्धतौ ।

आभुग्न त्रि० आ+भुज कर्म्मकर्त्तरि क्त तस्य नः । १आकुञ्चिते

आभूति स्त्री आ+भू-क्तिन्। व्याप्तौ "आभूतिरेषा भूतिः" ऐ० ब्रा०

आभेरी स्त्री रागिणीभेदे हलायुधः।

आभोग पु० आ+भुज-आधारे घञ्। परिपूर्णतायां, यस्य यावद्भेक्षितं रूपं तत्पूर्णत्वे हि आभोगाधारतेति तस्य तथात्वम्। "अकथितोऽपि ज्ञायत एव यथायथमाभोगस्तत्प्रयोजनस्येति" भट्टिः। "पर्व्वताभोगवर्ष्माणमतिकायं महाबलम्" भा० व० १७८ अ० "क्तदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः आभोगवत्पर्वतत्वल्लक्षदेहमित्यर्थः। "यत्रैव कविनाम स्यात् स आभोग इतीरितः" इति सङ्गीतदामोदरोक्ते गानसमाप्तौ (भणिता) ख्याते २ कविनामख्यापने। आभुज्यतेऽनेन करणे घञ्। ३यत्ने यत्नादिनैव हि भोगः सम्यग् सम्पद्यते इति यत्नस्य तथात्वम्। "ना सुखोऽयं नवाभोगोधरणिस्थोहि राजसः" किरा० "नवाभोगः अभिनवोल्लाहः" मल्लि० सम्यक् भोगः प्रा० स०। ४सम्यक्सुखाद्यनुभवे "विषयाभोगेषु नैवादरः" शान्तिलक्ष। ५वरणस्य क्षत्रे च मेदि०।

आभोगय त्रि० आभोगं याति या-क। आपूर्णे "आभोगयं प्रयदिच्छन्त ऐतनापाकाः प्राञ्चो मम केचिदापयः" ऋ० १,११०,२।

आभोगि त्रि० आभोगं करोति आभोग+णिच्-इन्। विषयाभोगकारके "जिह्मश्ये चरितवे मघोन्याभोगय इष्टये" ऋ० १,११३,५।

आभोगिन् त्रि० आभोगोऽस्यास्य इनि। परिपूर्णे स्त्रियां ङीप्

आभ्यन्तर त्रि० आभ्यन्तरे भवः अण्। मध्यवर्त्तिनि "कश्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशाम्पते!" भा० स० प० ५ अ०। "वर्णोच्चारणे, प्रयत्नो द्विधा आभ्यन्तरो बाह्यश्च आद्यश्चतुर्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम् विवृतभूयिष्ठं स्वराणाञ्च ह्रस्वस्वावर्णस्य प्रयोगे संवृतं प्रक्रियादशायान्तु विवृतमेव" सि० कौ०। "एतेषाञ्चाभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात् "तथा हि नाभिप्रदेशात् प्रयत्नविशेषप्रेरितः प्राणवायुः कण्ठ्यमाक्रामन्नुरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वोत्पत्तिः तत्रोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि वर्णोत्पत्तिस्थानं तालादि यदा सम्यक् स्पृशन्ति तदा स्पृष्टता, ईषत्स्पर्शे ईषत्स्पृष्टता, समीपावस्थाने संवृतता, दूरावस्थाने विवृतता। अतएव इचुयशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चारयितव्ये जिह्वाग्रस्य तालुस्थानेन सम्यक्स्पर्शः, यकारे ईषत्स्पर्शः, शकारे, समीपेऽवस्थानम् इवर्णे तु दूरेऽवस्थानम्" मतङ्गतसरला।

आभ्यवहारिक त्रि० अभ्यवहाराय हितं ठक्। भोजनयोग्ये अन्नादौ। [ठक्। कुटुम्बभरणव्याप्ते हेम०।

आभ्यागारिक त्रि० अभ्यागारे तत्स्थकुटुम्बाभरणे व्याप्तः

आभ्यादायिक न० आभिमुख्येनादानमभ्यादानं तत्र नियुक्तः ठक्। पिठरमाढकुलादिप्राप्ते स्त्रीधनभेदे।

आभ्यासिक त्रि० अभ्यासे निकटे भवः ठक्। १निकटस्थिते "अल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितम्" भा० आ० २७६ अ०। अभ्यासात् पौनःपुन्यात् आगतः ठक्। २अभ्यासप्राप्ते दृढसंस्कारादौ।

आभ्युदयिक न० अभ्युदयः प्रयोजनमस्य ठक्। २दृद्धिनिमित्ते श्राद्धभेदे तत्र छन्दोगानामाभ्युदयिकश्राद्धविधिर्गोभिलस्तत्छन्दोगपरिशिष्टयोरुक्तः यथा।

गोभिलः। "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्। प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थैः सम्पन्नमिति दृष्टिप्रश्नः दधिबदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो दृद्धप्रमातामहेभ्यश्च प्रीयन्तां, न स्वधाञ्च प्रयुञ्जीत" इति। "आभ्युदयिके अभ्युदयनिमित्तके अभ्युदय इष्टलाभः विवाहादिः तदर्थं श्राद्धं आभ्युदयिकम्। तच्च भूतभविष्यद्भेदेन द्विविधं तत्र भूतं पुत्रजन्मादि भविष्यद्विवाहादि एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने दृद्धिश्राद्धत्वेन कर्म्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलाषे आभ्युदयिकश्राद्धमिति प्रयोक्तव्यम्। तत्र यवैस्तिलार्थदृत्यनेन पार्व्वणश्राद्धप्राप्तितिलस्थाने यवविधानादाभ्युदयिकस्यापि पार्व्वणप्रकृतिकत्वं प्रतीयते। अन्यथा तिलार्थदृत्युपादानं व्यर्थं स्यात्। ततश्च पार्व्वणप्रकृतिकत्वेन पित्र्यपक्षेऽयुग्मब्राह्मणप्राप्तौ तन्निरासाय पित्र्यपक्षे ब्राह्मणयुग्मत्वोपदेशः। दैवे युग्मत्वस्य पार्व्वणत्वेन प्राप्तत्वात् तदर्थोपदेशः "अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्" इति याज्ञवल्क्यवचनेन दैवकर्म्मानन्तरं पित्र्यकर्म्मकरणे प्राप्तवामोपचारनिरासाय प्रदक्षिणमुपचारस्तेन दैवपित्र्यकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यम्। द्विगुणभुग्नत्वनिरासाय ऋजवोदर्भा इति ऋजुत्वोपदेशः। दृष्टाः स्य इत्यनेन दृष्टिप्रश्ने सम्पन्नमिति प्रष्टव्यं योगप्रत्वात् सम्पन्नमिति प्राप्ते वक्ष्यमाणच्छन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्यु-

त्तरम् । एतद्धर्मसमवाप्तपक्षेऽप्यविवादितत्वाद्ग्राह्यम् । दधिबदराक्षततिलमिश्रादन्यतेन दध्यादिमिश्रणमावश्यकम् । अक्षतोयवः "अक्षताश्च यवाः प्रोक्ता भग्ना धाना भवन्ति ते" इति भट्टनारायणधृतकोषात् अतएव वक्ष्यमाणच्छन्दोगपरिशिष्टवचनेऽक्षतमनुक्त्वा "संयोज्य यवकर्कन्धूदधिभिरिति" निःसन्दिग्धमुक्तम् । स्वधावाचनप्रश्ननिष्टत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्य इति पित्रर्थपक्षएव प्रश्नः । अतएव तन्निवृत्तये दैव इति । दैवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च प्रीयन्तामिति । ततः पित्र्यपक्षे स्वधावाचनस्थानीयत्वेन वृद्धप्रमातामहेभ्यश्चेति चकारनिर्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् । प्रत्युत्तरञ्च अस्तु स्वेति वत् तत्रैवैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितरइत्यादि नान्दीमुखेभ्यः पितृभ्य इति निर्देशेन च "नान्दीमुखं पितृगणमिति" विष्णुपुराणेन च "मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव चेति" ब्रह्मपुराणे च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवत्वं ततश्चात्रापि प्रीयन्तामितिवच्चान्दीमुखेभ्यः प्रपितामहेभ्य इत्यादि वाच्यम्" आ० त० रघु० । छन्दोग० "कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः । प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु । अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः । कुशलग्नां वसोर्धारां सप्त वारान् घृतेन तु । कारयेत् पञ्च वारान् वा नातिनीचां नचोच्छ्रिताम् । आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः । षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् । वशिष्ठोक्तविधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः । अतःपरं प्रवक्ष्यामि विशेष इह यो भवेत् । प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा । उपवेश्य कुशान्दद्यात् ऋजूनेव हि पाणिना" तथा "निपातेन हि सव्यस्य जानुनो विद्यते क्वचित् । सदा परिचरेद्भक्त्या पितृनग्यत्र दैववत् । पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान् । गोत्रनामभिरामन्त्र्य पितृनर्घं प्रदापयेत् । नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते । पात्राणां पूरणादीनि दैवेनैव तु कारयेत् । ऋजोत्तरकरान् युग्मान् कराग्राग्रप्रवितकान् । कृत्वार्घं सम्प्रदातव्यं नैकैकस्मात् दीयते । मधुमध्विति यत्तत्र त्रिर्जपोऽग्नितुभिच्छताम् । गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः । नचाग्नौ तु जपेदत्र कदाचित् पित्र्यसंहिताम् । अन्यएव जपः कार्य्यः सोमसामादिकः शुभः । प्रकारोऽन्नस्य यस्तत्र तिलवद्दृश्यवत्तथा । उच्छिष्टसन्निधौ सोऽत्र पात्रेषु विपरीतकः । सम्पन्नमिति तृप्ताः स्थः प्रश्नस्थानु विधीयते । सुसम्पन्नमितिप्रोक्ते शेषमन्नं निवेदयेत् । प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत् । अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निखिलाः । द्वितीयञ्च हृतीयञ्च मध्यदेशाग्रदेशयोः । मातामहप्रभृतींस्तु एतेषामेव वामतः । सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च । संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्थितः । अवनेजनवत् पिण्डान् दत्त्वा बिल्वप्रमाणकान् । तत्पात्रक्षालनेनाथ पुनरभ्यवनेजयेत् । उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम् । भवेदधश्चाधरणमधोऽधः श्राद्धकर्मसु । तस्मात् श्राद्धेषु सर्वेषु दक्षिणस्तिरेषु च । मूलमध्याग्रदेशेषु दैघत्सङ्कांश्च निर्वपेत् । गन्धादीन्निःक्षिपेत् तूष्णीं तत आचामयेत् द्विजान् । अन्यत्राप्येषएव स्यात् यत्रादिरुक्तो विधिः । दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य तु । दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः । अथाग्नभूमिमासिञ्चेत् सुप्तप्रोक्षितमस्त्विति । शिवा आपः सन्त्विति च युग्मानेवोदकेन च । सौमनस्यमस्त्विति च पुष्पदानमनन्तरम् । अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत् । अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते । षड्भ्यो नित्यं तत् कुर्याच्चतुर्थ्या कदाचन । प्रार्थनासु प्रतिप्रोक्ते सर्वास्वेव द्विजोत्तमैः । पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् । युग्मानेव स्वस्तिवाचनाङ्गत्वमुक्तम् । कृत्वा धूर्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः" ।

अत्र षड्भ्य इति कीर्त्तनं छन्दोगानां मातृपक्षनिरासार्थम् अन्यवेदिनां तु मातृपक्षाधिक्यमतास्ति "मातृश्राद्धं तु पूर्वं स्यात् पितृणां तदनन्तरम् । ततो मातामहानाञ्च वृद्धौ वृद्धौ भवेत् तथा" आ० त० धातातपोक्तेः

कृत्व कृत्वाभ्युदयिकं कर्त्तव्यं तद्दर्शितं नि० सि० ब्राह्मे "जन्मन्यथोपनयने विवाहे पुत्रकस्य च । पितृव्यान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम् । वेदव्रतेषु चाधाम यज्ञपुंसवनेषु च । नवान्नभोजने स्नाने जटायाः प्रथमार्तवे । देवारामतडागादिप्रतिष्ठासूत्सवेषु च । राजाभिषेके वाजान्नभोजने वृद्धिसंज्ञकान् । वनस्थाद्याश्रमं गच्छन् पूर्व्वैद्युःस्वधया पितॄन् । पूर्वोक्तविधिना सम्यक् तर्पयेत् कर्मसिद्धये" । विष्णुपुराणे "यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः । पुत्रजन्मर्क्षयोगेषु वृद्धिश्राद्धं समाचरेत्" बह्वृचकारिका-

वाम् "स्यादाभ्युदयिकं श्राद्धं वृद्धियुक्तेषु कर्मसु । पुंसवनसीमन्तचौलोपनयनेषिह । विवाहे चानलाधेयप्रभृतिश्रौतकर्मणि । इदं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम् । अन्यैः षोड़शसंस्कारसरण्यादिषु पोष्यते । वाप्याद्युद्यापनादौ तु कुर्युः पूर्वनिमित्तकम्" वोपदेवकालादर्शौ "सीमन्तव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च । पुंसत्वावसथप्रवेशनसुताद्यास्यावलोकाश्वमखोत्कारक्षितिपाभिषेकदयिताद्यर्त्तौ च नान्दीमुखम्" श्राद्धकौस्तुभौ निर्णयामृते च मात्स्ये "अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके । पुंसवे च निषेके च नवश्रेयःप्रवेशने । देवदत्तजलादीनां प्रतिष्ठायां विशेषतः । दीर्घयात्राष्टषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् । तत्र गर्भाधाने आभ्युदयिकं छन्दोगेतरपरं यथोक्तं श्राद्धतत्त्वे छन्दो०प० । वृषोत्सर्गे वृद्धिश्राद्धं काम्य विषयम् । अशौचान्तद्वितीयादिनादिविहिते न वृद्धिश्राद्धमिति भेदः । "असक्तद्रव्यानि कर्माणि क्रियेरन् कर्मकारिणा । प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च । आधाने होमयज्ञे च वैश्वदेवे तथैव च । बलिकर्माणि दर्शे च पौर्णमासे तथैव च । नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः । एकमेव भवेत् श्राद्धमेतेषु न पृथक् पृथक् । नाटकास्तु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते । न सोष्यन्तीजातकर्म्म प्रोषितागतकर्म्मसु । विवाहादिः कर्म्मगणो य उक्तो गर्भाधानं शुश्रम यस्य चान्ते । विवाहादावेकमेवात्र कुर्य्यात् श्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात् । तथागणयः क्रियमाणेषु मातृभ्यः पूजनं सकृत् । सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु । यत्र यत्र भवेत् श्राद्धं तत्र तत्रैव मातरः" । इदं चावश्यकम् । "वृद्धौ न तर्पितायै वै पितरो गृह्यमेधिभिः । तद्दीनमफलं ज्ञेयमासुरोविधिरेव स" इति शातातपोक्तेः । "अष्टकामास्याभ्युदयास्तीर्थे पात्रोपपत्तयः । पितृणामतिरेकोऽयं मासिकाद्धात्ध्रुवः स्मृत इति देवी०पु०उक्तेश्च ध्रुव आवश्यक इति श्रा०त० रघु० । अत्र श्राद्धत्रयमाह शाता० । "मातृश्राद्धं तु पूर्व्वं स्यात् पितृणां तदनन्तरम् ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्" तत्कालजाह पृथ्वीचन्द्रोदये गार्ग्यः "मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकम् । मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्" । अत्राप्यशक्तौ स एव "पृथक्दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे । श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति" वृद्धमनुरपि "अलाभेऽभिन्नकालानां नान्दीश्राद्धत्रयं बुधः पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्" अत्र "महत्सु पूर्वेद्युरुक्तदहरल्पेष्विति" रघुनन्दनपरिगृहीतव्यवस्था ज्ञेया । कर्म्मादिवस एवेति गौडाचारः । तच्च प्रातरेव । "पार्वणश्राद्धमपराह्णे तु प्रातर्वृद्धिनिमित्तकमिति" निर्ण्णं० सि० शातातपोक्तेः । अत्र प्रातःशब्दः सार्द्धप्रहरपरः "प्रहरोऽप्यर्धसंयुक्तः प्रातरित्यभिधीत इति" गार्ग्योक्तेरिति पृथ्वीचन्द्रोदयः । "आवर्त्तनसमीपे वेवा,इक्तेः मध्याह्नावधिरिति" गौडाः । इदं च पुत्रजन्मातिरिक्तविषयम् तदाह्निकः "पूर्वाह्णे वैश्वदेवं वृद्धिविना जन्मनिमित्तकम् । पुत्रजन्मनि कुर्वीतश्राद्धं तात्कालिकं बुध इति" एतदनियतनिमित्तपरम् "नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम् । तेषामनियतत्वे तु तदानन्तर्यमिष्यत" इति लोगाक्षिस्मृतेः । आधानाङ्गं नान्दीश्राद्धं त्वपराह्णे एव "आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः । पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति" निर्णयामृते गालवोक्तेः "नान्दीमुखादयः प्रातराग्निकं त्वपराह्णत" इति विष्णूक्तेश्च । इदं च मातृपितृमातामहादिक्रमेण छन्दोगेतरैः नवदैवत्यं कार्य्यम् तत्र मातामहादयस्तु सपत्नीकाः "मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानामिति" पृथ्वीचन्द्रोदये गद्यरूपेण गारुड़वाक्यात् । हेमाद्रौ यङ्कः "नान्दीमुखे सत्यवसू संकोर्त्यौ वैश्वदेविके" । वृद्धपराशरः "नान्दीमुखेभ्योदेवेभ्यः प्रदक्षिणकुशासनम् । पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः" । श्राद्धे मालादान निषेधेऽपि वृद्धौ मालाविशेषदानं विहितम् । "मालत्याः शतपत्राया मल्लिकाकुब्जयोरपि । केतक्याः पाठलाया वा देया माला न लोहिता" कू०पु० उक्तेः । "कुशस्थाने च दूर्वाःस्युर्मङ्गल्यास्तिवृद्धय" इति हेमा० ब्रह्मा० पु० "वृद्धावोदर्भा इति प्रागुक्तं वाक्यं तु छन्दोगविषयम् । अत्राधिकारी निरूप्यते । "जातस्य जातकर्माणि क्रियाकाण्डमशेषतः । पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम्" विष्णु०पु० । "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु । पिण्डानोद्वहनात् तेषां तदभावेऽपि तत्क्रमात्" छन्दोग० । "जीवत्पितृकस्याप्यत्राधिकारः । अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि । वेद्य एव पिता दद्यात् वानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते मृडेते जीवतः पितुः । मैत्रायणपरिगृहीतम् "जीवतः जीवन्त

पितरमनादृत्य उल्लङ्घ्येत्यर्थः । प्रथमविवाहे एव पितुरधिकारः द्वितीयेतु स्वस्यैवेति भेदः।"नान्दीश्राद्धं पिता कुर्य्यात् आद्ये पाणिग्रहे बुध ।। अत ऊर्द्धं प्रकुर्वीत स्वयमेव तु नान्दिकम्"नि०सि० धृतस्मृतेः । छन्दोग० वाक्ये तदभावे तस्य पितृरभावे तत्क्रमात्"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैरिति"वा०यः कर्त्तृक्रमः तेन क्रमेण ज्येष्ठभ्राता-दद्यात् इति पृथ्वीचन्द्रोदयः । हेमाद्रिस्तु पितृरभावे यः पितृव्यमातुलादिः संस्कुर्य्यात् स तत्क्रमात् संस्कार्य्यः पितृक्रमात् न तु स्वपितृभ्य इति व्याचख्यौ । तेन अमुकस्येति संस्कार्य्यनामाभिधाय पितृरिति प्रयोज्यमेव मेने रघुनन्दनादयः । "दृष्टौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात् तेभ्यो दद्यात् स्वयं सुतः । कात्या० स्मृतेः जीवत्पितृकस्य तीर्थादौ विशेषः पितरि संन्यस्ते प्रोषिते पतिते वा यदाऽन्यस्तत्प्रतं धर्म्मं बुद्धा संस्कुर्य्यात् तदा संस्कार्य्यपितुः पित्रादिभ्यो दद्यात् न संस्कार्य्यपित्रादिभ्यः निर्ण० सि० । एवं जीवन्मातृकेणापि मातरमतिक्रम्य पितामह्यादीनां तिसृणाम् श्राद्धं छन्दोगेतरेण कर्त्तव्यमिति "योयो जीवति तस्मै तस्मै दद्यादिति" स्मृतौ पुंस्त्वस्याविवक्षितत्वात् । पित्रादित्रिकस्य जीवने तु तद्वर्गश्राद्धनिवृत्तिः किन्तु जीवद्भिरेव तैः तच्छ्राद्धं भोज्यं "पितामहो वा तत्श्राद्धं स्वयं भुञ्जीतेति" मनुवचनात् । एवं मातृादित्रयेऽपि बोध्यम् तेन जीवद्वर्गपरित्यागेनेतरवर्गश्राद्धं कर्त्तव्यम् "यदि जीवति वर्गस्तु तं वर्गं तु परित्यजेत्" नि०सि० वचनात् ।

आम्भिक त्रि० अम्भा खनति ठक् । काष्ठकुद्दालेन खनके ।

आम्भ्र त्रि०अम्भे आकाशे भवः कुर्व्वा०अण् । आकाशभवे ।

आम् अव्य० अम–गत्यादिषु णिच्–वा अन्नुखः किप् । १अङ्गीकारे २निश्चये ज्ञाने ३ स्मृतौ ४प्रतिवचने च ।

आम पु० । आम्यते ईषत्पच्यते आ+अम–कर्म्मणि घञ् । १ईषत्पक्के असिद्धे २पाकरहिते । अम–करणे घञ् । २रोगमात्रे । वैद्यकोक्ते षट्विधे अजीर्णे ३रोगभेदे च आमाटोपाग्निचोक्ष्मगुल्मामविकारिणाम्" सुश्रु० । तल्लक्षणादि यथा निदा० "आहारस्य रसः सारः योन पक्वोऽग्निलाघवात् । आमसंज्ञां स लभते बहुव्याधिसमाश्रयः । आमसङ्गरसं केचित् केचित्तु मलसञ्चयम् । प्रथम दोषदुष्टिं वा वदन्ति बहुपिच्छिलाम् । सादनं सर्व्वगात्राणामामभित्यभिशब्दितम्" "तेनामेन सदा युक्ता दोषा दुष्टाश्च तादृशाः । तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः" तेनास्य क्लीवत्वमपि । आमस्य निदानस्वरूपभेदादि निदाने उक्तम् "आमं विद्ग्धं विष्टब्धं तथा पित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः । अजीर्णं पञ्चमं केचिन्नित्यं दिनपाकि च । वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् । तत्रामे गुरुतोत्क्लेदः शोथो गण्डालिकूटकः । उद्गारश्च यथाभुक्तमविदग्धं प्रवर्त्तते" । तस्य चामनामत्वे कारणमप्युक्तम् तत्रैव । "भुक्तमन्नावशेषं यत् रसभूतत्व माचितम् । गतमामाशये यस्मात्तस्मादामं प्रचक्षते इति ।" अधिकमामाशयशब्दे वक्ष्यते ।

अपाकरूपामात् तृष्णाधिक्यं जायते तदुक्तम् सुश्रु० । "तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथाऽन्यामसमुद्भवा" च इत्यादिना सप्तविधास्तृष्णाविभज्य "त्रिदोषविड्रामसमुद्भवा च क्लेशक्लमनिष्ठीवनसादयुक्ताः । स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वन्नमेवातितृषीकरोति" आमस्यातिसाररोगादिहेतुत्वं सुश्रुते उक्तम् आमाजीर्णैः प्रद्रुताः क्षोभयन्तः कोष्ठं दोषाः संप्रदुष्टाः सभक्तम् । नानावर्णं नैकशः सारयन्ति क्षुच्छ्राज्जन्तोः षष्ठमेनं वदन्ति । संसृष्टमेभिर्दोषैस्तु मलमभ्युपसीदति । पुरीषं भृशदुर्गन्धं पिच्छिलं चामसंज्ञितम्"इति आमातिसारं लक्षयित्वा । अतः सर्व्वातिसारास्तु ज्ञेयाः पक्वामलक्षणैः तत्र लङ्घनमेवादौ पूर्व्वरूपेषु देहिनाम्" । तत्र लङ्घनस्य कर्त्तव्यतामुक्त्वा अनेन विधिना यामं यस्य नैवोपशाम्यति । हरिद्रादिं वचादिं वा पिबेत् प्रातः स मानवः । आमातिसारिणां कार्य्यं नादौ संग्रहणं नृणा"मित्यनेन विशेष उक्तः तेन अतिसारभेदे "यस्यं क्षेत्रगतं प्राहुः सतुषं धान्यसञ्चयम् । आमं वितुषमित्युक्तम् खिन्नमन्नमुदाहृतमिति" स्मृतिपरिभाषिते अपक्वे पुंसत्वेऽन्ने च । "आमं स्यूदस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" स्मृतिः । आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा "आमश्राद्धं द्विजैः कार्य्यं सूदेन तु न दैवतु" प्रचे० पाकस्य अग्निसंयोगात् कालवशात् वा वस्तुपरिणामविशेषः तत्राद्यादीनामामत्वमग्निविशेषसंयोगाभावात् । यथा आमाद्यघटादेः । यद्यत् फलादि यद्यत्कालं पच्यते तत्कालात् प्राक् तस्य पाकाभावे आमत्वम् यथाम्रादेः । तथा व्रणादेरपि परिपाकाभावे आमत्वम् कालिकम् । यथा "आमं विपच्यमानं च सम्यक् पक्वं च योभिषक्" व्रणपाकाभावे सुश्रुतः ।

आमगन्धि त्रि० आमस्यापक्वस्य गन्धइव गन्धो यत्र इत् समा० । अपक्वमांसादितुल्यगन्धाढ्ये । क्लीवमित्येके ।

आमज्वर पु० आमोऽपक्वः ज्वरः । अपक्वज्वरे नवज्वरे "खेद्यमामज्वरं प्राज्ञः कोऽन्यथा परिषिञ्चति" माघः ।

आमनस्य न० अप्रशस्तं मनो यस्य तस्य भावः ष्यञ् । दुःखे ।

आमन्त्र पु० आमादजीर्णात् त्रायते स्वफलतैलेन मलनिस्सारणात् त्रै-क पृषो० । १एरण्डवृक्षे राजनि० आमण्ड इति वा पाठः । तत्फलतैलपाने हि अजीर्णे मलनिस्सारणात्तथात्वम् आ+मन्त्र-अच् । २आमन्त्रणशब्दार्थे च ।

आमन्त्रण न० आ+मन्त्र-ल्युट् । १अभिनन्दने, २संबोधने, ३कामचारानुज्ञारूपे क्रियाभेदेषु प्रवर्त्तनव्यापारे च । "विधिनिमन्त्रणामन्त्रणेत्यादि" पा० । अवश्यकर्त्तव्ये नियोगो निमन्त्रणं यथा श्राद्धादिभोजने । यज्ञाकरणे प्रत्यवायोनास्ति तादृशव्यापारे, नियोजनमामन्त्रणम् यथा स्थलविशेषे शयनायामन्त्रणम् । नवपत्निकाप्रवेशपूर्व्वदिवसे सायं विस्तरोःसंबोधनरूपे ४व्यापारे च युच् आमन्त्रणाप्यत्र स्त्री

आमन्त्रित त्रि० आ+मन्त्र-क्त । १अनावश्यके कर्मणि नियोजिते २व्याकरणपरिभाषितायां सम्बोधनार्थकप्रथमाविभक्तौ न० "सामन्त्रितम्" पा० "सम्बोधने या प्रथमा सामन्त्रितसंज्ञा स्यात्" सि०कौ । "आमन्त्रितं पूर्व्वमविद्यमानवत्" नामन्त्रिते समानाधिकरणे सामान्यवचनम्" पा० । ३ निमन्त्रिते त्रि० "प्रातरामन्त्रितान् विप्रान्" छन्दोग० ।

आमन्त्र्य अव्य० आ+मन्त्र-ल्यप् । १सम्बोध्येत्यर्थे । "आद्यमामन्त्र्य पूर्व्ववत्" छन्दोग० आ+मन्त्र-कर्म्मणि यत् । २संबोधनीये आवश्यककार्य्ये ३नियोज्ये च त्रि० ।

आमन्द पु० आमं रोगं द्यति दो-ड बा० मुम् । वासुदेवे ।

आमन्दा स्त्री आमन्दमीषन्मन्दं करोति आमन्द+णिच्-अच् । खट्वाभेदे (नेआरेरखाट) शब्दच० ।

आमन्द्र पु० ईषन्मन्द्रः प्रा०स० । १ईषद्गम्भीरशब्दे "आमन्द्रमन्यध्वनिदत्ततालम्" भट्टिः । २तद्युक्ते त्रि० ।

आमपाक पु० आमस्य अजीर्णविशेषस्य पाकः । वैद्यकोक्ते शोफरोगाद्यङ्गे आमस्य पाकभेदे । तल्लिरुक्तमुक्तं सुश्रुते यथा "स यदा बाह्याभ्यन्तरैः क्रियाविशेषैर्न समावितः प्रशमयितुं क्रियाविपर्ययाद्वृद्धत्वाद्वा दोषाणां, तदा पाकाभिमुखो भवति । तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय । तत्र मन्दोष्मता त्वक्सवर्णता शीतशोफता स्थैर्य्यं मन्दवेगताल्पशोफता चामलक्षणसंहितम् । रूचिभिरिव निस्तुद्यते, दश्यत इव पिपीलिकाभिः, ताभिश्च संसृष्यत इव, छिद्यत इव शस्त्रेण, भिद्यत इव शक्तिभिः, ताड्यत इव दण्डेन, पीड्यत इव पाणिना, घट्ट्यत इव चाङ्गुल्या, दह्यत इव पच्यत इव चाग्निद्वाराभ्यामोषचोषपरीदाहाश्च भवन्ति दृश्चिकविद्ध इव च स्थानासनशयनेषु न शान्तिमुपैति आघ्मातवस्तिरिव । अतश्च शोफो भवति त्वग्वैवर्ण्यं शोफाभिहतत्वेश्वरदाहपिपासा भक्तारुचिश्च पच्यमानलिङ्गम् । वेदनोपशान्तिः पाण्डुतात्यशोफता बलीप्रादुर्भावस्त्वक्परिपुटनं निम्नदर्शनमङ्गुल्यावपीड्यते प्रत्युन्नमनं वस्तावित्युदकसञ्चरणं पूयस्य प्रपीड्यत्येकमन्तमन्ते चावपीड्यते मुहुर्मुहुस्तोदः कण्डूरनुन्नतता च व्याधेरुपद्रवशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गम् । कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषग्मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्थौल्यमल्परुजताग्रसदृशनता न तत्र मोहमुपेयादिति । भवन्ति चात्र । आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक् । जानीयात् स भवेद्वैद्यः शेषास्तस्करदत्तयः । वाताद्दते नास्ति रुजा, न पाकः पित्तादृते, नास्ति कफाच्च पूयः, । तस्मात्त्रयस्ताः परिपाककाले पचन्ति शोफांस्त्रय एव दोषाः" ।

आमपात्र न० कर्म्म० । अपक्वे पात्रे (काँचा) मृण्मयपात्रे "विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि" मनुः ।

आमय पु० आमं रोगं यात्यनेन या-करणे घञर्थे क आ+मीञ् हिंसायां करणे अच् वा । रोगे आमशब्दे तच्चिकित्सिर्दृश्या "आमयस्यति रागसम्भवः" रघुः "तद्युक्तं विविधैर्योगैर्निर्हन्यादामयान् बहून्" सुश्रुतः । अनामयः निरामयः । "समौ हि शिष्टैराम्नातौ वर्त्तुर्न्तावामयः स च" माघः ।

आमयाविन् आमयोऽस्यास्ति विनि दीर्घश्च । रोगयुक्ते । "श्यामयाव्यपचारिस्विन्नित्यक्षुत्क्षुत्कुलानि च" "अन्नकर्त्ताऽऽमयावित्वम्" इति च मनुः । [आमशब्दे विवृतिः ।

आमरक्त न० आमसहितं रक्तम् । रोगभेदे रक्तातिसारे

आमरणान्तिक त्रि० आमरणान्तं मरणरूपसीमापर्य्यन्तं व्याप्नोति ठञ् । मरणकालपर्य्यन्तव्यापके "अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः" मनुः ।

आमर्द पु० आ+मृद्-घञ् । बलात् निष्पीडने । "आमर्दकाले राजेन्द्र ! व्यपसर्पेत्तदः परम्" भा० आश्र० ५० १अ० । "अर्द्यमीतस्तनं मातुरामर्द्दक्लिष्टकेशरम्" शक्तु० भावे ल्युट् । आमर्द्दनमप्यत्र न० ।

आमर्हिन् त्रि० आ+मृह-णिनि। बलात्निष्पीड़के।

आमर्ष पु० आ+मृष-भावे घञ्। सम्यक्सर्षे। ल्युट्। आमर्षणमप्यत्र न०।

आमर्ष पु० न+मृष-घञ् "अन्येषामपि" पा० दीर्घः। १कोपे असहने। "निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनम्" नीतिसा० आ+मृष-घञ्। २सम्यग्विवेके च।

आमलक त्रि० आ+मल-कुन् स्त्रीत्वे गौरा० ङीष्। (आमला) १धात्रीवृक्षे। "त्रिष्वामलकमाख्यातं धात्री तिष्यफलाऽमृता। रक्तपित्तप्रमेहघ्नं पथ्यं दृष्यं रसायनम्। हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यतः। कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित्। यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम्। तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत्" भावप्रका० अस्य स्त्रीत्वपक्षेऽपि तस्याः इदम् फलमण् फले लुकि स्त्रीत्वमेवेति भेदः। "यः सदामलकैः स्नानं करोति स विनिश्चितम्। बलीपलितनिर्मुक्तो जीवेद्वर्षशतं नरः" वैद्य०। "श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः" गरुड़ पु०। गौरादिगणे आमलशब्दपाठात् आमलशब्दोऽयत्र स्त्रीत्वे गौरा० ङीष् आमली। बृहद्ध० पुराणे तु अमलात् कात् नेत्रजलादागतम् अण् ङीप्। इत्यभिप्रायेण निरुक्त्यन्तरम् दर्शितं यथा "सजये! विजये! देवि! नावेव स्रुतयोस्तदा। नयनेषु च जातानि अमलास्रुजलानि च। तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि!। ततो जाताद्रुमाः पृथ्व्यां चत्वारोविमलप्रभाः। ख्याता आमलकी नाम्ना जाता कादम्बाद्यतः। श्यामलच्छदवृन्दास्ते कर्व्वुर-स्कन्धमूलकाः। शिराग्रथितपत्राली भालाकलितपत्रकाः।" "माघे-मासि सितायां तामेकादश्यां समुद्भवाम् दृष्ट्वाह्यागत्य देवोऽत्र-दधारानन्दयुक्तनुम्। तेन धात्रीति नाम्नापि राजत्यामलकी पुनः" इति च "सर्व्वदामलकी यात्रा परित्यज्यरवेर्दिनम्"। "पयोधरैरामलकीवनाश्रिताः' माघः। "विल्वपत्रं चमाध्यञ्च तमालामलकीदलम्। कल्हारं तुलसी चैव पद्मञ्च सुनिपुष्पकम्। एतत् पर्य्युषितं न स्यात् यद्यान्यत् कलिकाल्पकम्" योगि० त०। "न धात्रीकाननं यत्र विष्णोस्तु तुलसीवनम्। तं म्लेच्छदेशं जानीयात् यत्र नो याति वैष्णवः। यत्र माहपरा मर्त्या यत्र द्वादशीक्षरः। तुलसीकानन धात्री तत्र विष्णुः शिवा सह। दूर्व्वा हरति पापानि धात्री हरति पातकम्" आह्नि० त० स्कन्द पु०।

आमवात पु० आमोऽपक्वहेतुः वातः। मा० प्र० उक्ते वात व्याधिभेदे तल्लक्षणाद्युक्तं तत्रैव "युगपत्कुपितावेतौ त्रिक सन्धिप्रवेशकौ। स्तब्धञ्च कुरुतो गात्रमामवातः स उच्यते" (एतौ वातश्लेष्माणौ) तस्य लक्षणमुक्तं निदा०। "अङ्गमर्दोऽरुचिस्तृष्णा ज्वातन्त्र्यं गौरवं ज्वरः। अपचीमूलजङ्घा-लमामवातः स उच्यते"। तत्र निदानादि यथा "विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतोऽध्यं व्यायामं कुर्वतस्तथा। वायुना प्रेरितोह्यामः श्लेष्मस्थानं प्रधावति। तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते। वातपित्तकफैर्भूयो दूषितः सोऽम्लजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः। जनयत्यग्निदौर्बल्यमिन्द्रियस्य च गौरवम्। व्याधीनामाश्रयोह्येष आमसंज्ञोऽनिलोह्ययम्" (श्लेष्मस्थानमामाशयसन्ध्यादि)। तेन श्लेष्मस्थानगमने पाकाभावात् दूषकता पित्तस्थानगमने तु तेन पाकसम्भवान्न दोषजनकतेति। अतिदृष्टस्य लक्षणमुक्तं तत्रैव "स कष्टः सर्वरोगाणाम् यदा प्रकुपितो भवेत्। हस्तपादशिरोगुह्यसन्धिजानूरुसन्धिषु। करोति सरुजं शोफं यत्र दोषः प्रपद्यते। स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव दृश्यते। जनयेत् सोऽग्निदौर्बल्यम् प्रसेकारुचिगौरवम्। उत्साहहानिं वैरस्यं दाहनं बद्धमूत्रताम्। कुक्षौ शूलं कठिनतां तथा निद्राविपर्य्ययम्। हृत्कण्ठहृद्-ग्रहमूर्च्छाश्च हृद्ग्रन्थिविड्विबद्धताम्। जाड्यान्द्रकूज नानारुजुष्टांश्चान्यानुपपद्यवान्"। तत्र दोषभेदे लक्षणानि "पित्ताद्दाहं सकाससञ्च सशूलं पवनात्मकम्। स्तिमितं गुरु कण्डूकं कफजुष्टं तमादिशेत्। एकदोषानुगः साध्योद्विदोषोयाप्य उच्यते। सर्वदोषगतः शोफः स कष्टः सान्निपातिकः" इति सुश्रु०।

आमश्राद्ध न० आमेन अपक्वेनान्नेन श्राद्धम्। "आमन्तु वित्तर्षं प्रोक्तमित्युक्तेन वित्तर्षेणापक्वेनान्नेन कर्त्तव्ये श्राद्धे" आप-द्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा। आमश्राद्धं द्विजैः कार्य्यं शूद्रेण च सदैव तु" प्रचे० अत्र विशेषः "निरग्नेरामश्राद्धे तु अन्नं न त्रालयेत् क्वचित्। हस्तौ च त्रालयेदन्नं संक्रमेऽग्रहणेषु च, ति० त० पु०।

आमहीय त्रि० आमहाय आगमनाय हितम् छ। आगमन-साधने मन्त्रभेदे "अपाम सोमम्" इत्यस्यामृचि स्त्री "उद्वय मित्युत्तेवोत्तरा आमहीयां जपन्तोगच्छन्त्यपाम सोमम-मृता अभूमागन्म ज्योतिरविदाम देवान् किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृतमर्त्यस्येति" का० १०,६,७,

"वासःपरिधानानन्तरम् उद्वयमित्यनेन मन्त्रेणोद्वेलोद्गीता जलमध्यात् वह्निर्निष्काशिताः सन्तऋत्विजः सयजमानाः आमहीयामित्येवंसंज्ञकाम् अपामेत्यैताम्ऋचं जपन्तः सर्वे देवयजनं प्रति गच्छन्ति" कर्कः ।

आमहीयव न० अमहीयुना ऋषिभेदेन दृष्टं साम अण् । सामभेदे तस्यतत्पाठता तत् सा०सं०भा० दर्शितम् यथा "तृतीयसवने सप्त-सूक्तानि तेषु नव सामानि गेयानि तत्र प्रथमे सूक्ते गायत्रमामहीयवं चेति द्वेसामनी" आम हीयवञ्च साम अहर्गाने अहर्गानारम्भे प्रथमं साम ।

आमाति(ती)सार पु० आमक्रतोऽतिति(ती)सारः । आमक्रते षष्ठे अतिसाररोगभेदे अतिसारशब्दे तस्य विवृतिः । अस्य निदानादि उक्तं सुश्रुते यथा । "अन्नाजीर्णात् प्रदुताः क्षोभयन्तः कोष्ठं दोषा धातुसंघान् मलांश्च । नाना-वर्णांश्चैकशः सारयन्ति मूलोपेतं षष्ठमेनं वदन्ति" आमा-तिसारे नो कार्य्यादौ संग्रहणं न्याम्" सुश्रु० ।

आमात्य पु० आमात्यएव स्वार्थे अण् । अमात्ये ।

आमानस्य न० अप्रशस्तं मानसमस्य अमानसः तस्य भावः ष्यञ् । दुःखे शब्दरत्ना० ।

आमावास्य त्रि० अमावास्यायां भवः सन्धिवेलादि० अण् । अमावास्याभवे "आमावास्येन हविषेष्ट्वा पौर्णमासेन वा" श्रु० ब्रा० । वा वुन् अमावास्यक इत्यपि तत्रैव त्रि० ।

आमाशय पु० आमस्यापक्वान्नस्याशयः । देहमध्यस्थे नाभेरूर्द्धस्थाने भुक्तापक्वान्नादिस्थाने । आशयाहि देहस्थाः सप्त सुश्रुते दर्शिता यथा "आशयस्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयः मूलाशयः स्त्रीणां गर्भाशयोऽष्टम इति आमाशयस्थानएव दोषरूप श्लेष्मस्थानं यथोक्तं सुश्रु० । "दोषस्थानान्यत ऊर्द्धं वक्ष्यामः तत्र समासेन वातःश्रोणिगुदसंश्रयः । श्रोणिगुदयोरुपर्य्या-नाभि पक्वाशयः पक्वाशयमध्यं पित्तस्य । आमाशयः श्लेष्मणः । तत्र स्थानं निर्णीतं भावप्र० यथा "अग्निवेग-वहः प्राणोगुदान्वे प्रतिहन्यते । स ऊर्द्धभागस्य पुनः सस्त-त्तिपति पावकम् । पक्वाशयस्त्वधोनाभ्यामूर्द्धमामाशयः स्थितः । नाभिमध्ये शरीरस्य प्राणा नित्यं प्रतिष्ठिताः" चरके तु "नाभिस्थानोत्तरं जन्तोराहुरामाशयं बुधाः" इति अत्र विशेषमाह "उरोरक्ताशयस्तस्मादधःश्लेष्माशयः स्मृतः । आमाशयस्तु तदधस्तदधोऽन्नाशयोमतः" इति अपक्वाशय प्रसङ्गात् आहारपाकप्रकारस्तावदुच्यते भावप्रकाशे सुश्रुतः "यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् सोऽन्तःप्रवेश्य गच्छेत्तं प्राणश्चावल-म्बते" इति तमाहारमामाशयस्थः क्लेदननामा कफः क्लेद-यति क्लेदनात् संहतिं भिनत्ति च उक्तं च सुश्रुते "स आहारःषड्रसोऽप्यामाशये माधुर्यं लभते आमाशयस्थस्य मधुरस्य कफस्य योगात् उक्तं च श्लेष्मस्वरूपं "श्लेष्मा श्वेतो-गुरुःस्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वा-दुर्विदग्धोलवणो भवेत् । फेनभावं च लभते जठरानल-तेजसा" । अत आह वाग्भटः "संधुक्षितः समानेन पच-त्यामाशयस्थितम् । औदर्य्याऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलमिति" प्राणवायुना प्रेरितस्ततः किञ्चिच्चलितः पाचकाख्यपित्तोष्मणेषत्पक्वो भवति उक्तं च "अथ पाचकपि-त्तेन विदग्धस्वाम्लतां व्रजेदिति" पाचकपित्तेन पाचकपित्त ोष्मणा ततः एवाहारोनाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितोयकृष्णीं प्रति याति उक्तं च । "ततःसमानम-रुता यकृष्णीमभिधावति" । यकृष्णीलक्षणमाह "षष्ठी पित्त-धरा नाम या कला परिकीर्त्तिता । आमपक्वाशयान्तःस्था यकृष्णी साभिधीयते" पित्तधरा पाचकाख्यं पित्तं यदग्न्य-धिष्ठानं तद्धारयति तत्र यकृष्यामामाशययपक्वाशय मध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च भवति तथा च "यकृष्यां पच्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः आहारोयकृष्यां कोष्ठवह्नि-ना यकृष्यीस्थितपाचकपित्तस्थेन च वह्निना पच्यते पच्यमानः स यकृष्यीस्थितस्य कटुरसस्य पित्तयोगात्कटुर्भवति एतदाहारपाके विशेषमाह शरीरं पाञ्चभौतिकं तत्र पञ्चसु भूतेषु पञ्चान्नयस्तिष्ठन्ति उक्तं च चरके "भौमाप्या-ग्नेयवायव्याः पञ्चोष्माणः । सनाभसाः पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्यतः" । अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनोत्से-जितेन शरीरवर्त्तिभूभागः पच्यते पक्वोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते तथा च सुश्रुते "पञ्चभूतात्मको देहः आहारः पाञ्चभौतिकः । विपक्वं पञ्चधा सन्यगुणानुत्खानभिवर्द्धयेदिति" गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदिति एवमहोरात्रेण पक्व आहारोमिष्टः कटुश्च मधुरो भवति अम्लोऽम्लो भवति कटुतिक्तःकषायश्च कटुर्भवति उक्तं च "मिष्टः कटुश्च मधुरोऽथाम्लोऽम्लः पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वाहारस्य सारो रसश्चेोयकृष्णीस्थो मल एव

मलः। अस्य जलभागः शिराभिर्वस्तिमीतोमूत्रं भवति उक्तं च "आहारस्य रसः सारःसारहीनोमलद्रवः। शिराभिस्तज्जलं नीतं वस्तिंमूत्रत्वमाप्नुयात्। शेषं कोष्ठं भवेत्तस्य तत् पुरीषं निगद्यते। समानवायुना नीतं तत्तिष्ठति मलाशये" तत्र मलाशयालयेनापानवायुना प्रेरितं मूत्रं मेढ्भगमार्गेण, पुरीषं गुदमार्गेण, शरीरादुद्धिर्याति। उक्तं च "मूत्रन्तूपस्थमार्गेण, पुरीषं गुदमार्गतः। अपानवायुना क्षिप्तं बहिर्याति शरीरतः"। उपस्थः शिश्नोभगञ्च। रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति उक्तं च "रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत्। केदारेषु यथा कुल्या पुष्णाति विविधौषधीः। तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः"। रसस्तु तत्र तत्र त्रिधा भिद्यते उक्तं च चरके "स्थूलसूक्ष्म मलैर्भेदैस्तत्रस्तत्र त्रिधा रसः"। अधिकआहारपाकशब्दे वक्ष्यते।

आमिक्षा स्त्री आमिक्ष्यते सिच्यते मिष-सक्। तप्ते पक्के दुग्धे दधियोगाज्जाते (छाना) पदार्थे। "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्योवाजिनम्" श्रुतिः "आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्" भट्टका०।

आमिक्षीय न० आमिक्षायै हितं छ। आमिक्षोपकारके दधि "आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम्" भट्टिः। ख आमिक्षीणमयत्र न०। यत् आमिक्ष्यमयत्र न०।

आमितौजि पुंस्त्री अमितौजसोऽपत्यम् बाह्वा० इञ् सलोपश्च। अमितौजसोऽपत्ये स्त्रियां ङीप्।

आमित्रि पुंस्त्री अमित्रस्यापत्यं इञ्। अमित्रापत्ये तत्र भवादि गर्गा० छ। आमित्रीयः तद्भवादौ त्रि० युवापत्ये तु नडा० फक्। आमित्रायणः अमित्रयुवापत्ये आमित्रेरपत्यम् तिका० फिञ्। आमित्रायणिः तदपत्ये। अमित्रस्येदम् अण्। आमित्रः शत्रोःसम्बन्धिनि त्रि० "न्नसामामित्रो व्यधिरादधर्षति" ऋ० ६,२८, ३।

आमिश्र त्रि० आ+मिश्र-घञ्। मिलिते संश्लिष्टे। "चेतोजन्मधरप्रस्खलनमधुभिर्व्यामिश्रतामाश्रयत्" नैष०। वेदे क्वचित् रस्वलः। आमिश्लः। "स सोम आमिश्लतमः" ऋ० ६,२६,४।

आमिष न० आमिषति स्नेहम् आ+मिष-सेचने क अमटिषच् दीर्घश्च, वा। १मांसे स्नेहातिरेकात्तस्य तथात्वम् २भोज्यवस्तुमात्रे ३उत्कोचे ४सुन्दररूपादौ ५लोभे ६लोभनीये विषये च। तत्र मांसे "उपानयत् पिण्डमिवामिषस्य" रघुः "आमिषं कलहं हिंसां-वर्षट्कारौ विवर्जयेत्" स्मृतिः "भुङ्क्ते यश्च निरामिषं स हि भवेज्जन्मान्तरे पण्डितः" ज्योति०। "जन्मान्तरे पाण्डित्यकामो जन्मतिथावामिषं न भुञ्जीतेति" गदाधरः। "कालशाकं महाशाकं खड्गलोहामिषं मधु" दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः" मनुः "सात्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" दुर्गो०त० पु० नाधीयीतामिषं जग्ध्वा" "तस्मादामिषेण कर्त्तव्यम्" इति च मनुः। लोभनीये "रत्नाद्यन्वेषणदक्षाणां द्विषामामिषतां ययौ" "आक्षिप्य सङ्गुणजुषा शुरसामिषेण" आनन्दकन्दा०। "प्राणानेवात्तुमिच्छन्ति नवाद्यामिषगर्द्धिनः" मनुः। "पलाण्डामामिषं पर्षुं जम्बीरञ्च फलेष्वपीति" स्मृतौ निरामिषव्रते आमिषतुल्यतया वर्ज्जनीये ७पर्षुं ८ जम्बीरफले च।

आमिषप्रिय पु० ईत०। १कङ्कपक्षिणि। २मांसाभिलाषिणि त्रि०।

आमिषाशिन् त्रि० आमिषमश्नाति अश-णिनि ईत०। मांसभक्षके "दिनोपवासी तु निशामिषाशी" हारा० स्त्रियां ङीप्। आमिषभुगादयोऽप्यत्र।

आमिषी स्त्री आमिषं तदाकारोऽस्यस्य जटायाम् अर्श०अच् गौरा० ङीष्। जटामांसयाम्। ततः चतुरर्थ्याम् भव्या० यत्। आमिष्यः आमिषीसन्निभदेशादौ त्रि०।

आमुक्त त्रि० आ+मुच-क्त। परिहिते "आमुक्तमुक्तालतमस्य वक्षः" माघः।

आमुक्ति स्त्री आ-मुच-क्तिन्। १परिधाने, मर्य्यादायाम् वा अव्ययी०। २मुक्तिपर्य्यन्ते अव्य० "आमुक्ति श्रियमन्विच्छेत्"। समासाभावे आ मुक्तेरित्येव।

आमुख न० आमुखयति अभिमुखीकरोति दर्शनार्थं परिषदोऽनेन आमुख+णिच्-करणे अच्। नाटकाङ्गभेदे "तत्तल्लक्षणभेदोदाहरणानि" सा०द०यथा "नटी विदूषकोवापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा। सूत्रधारसहत्वात् स्थापकोऽपि सूत्रधारउच्यते। तस्यानुचरः पारिपार्श्विकः। तस्मात् किञ्चिदूनोनटः"।

तस्य भेदाः पञ्च यथाह तत्रैव "उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा। प्रवर्त्तकावलगिते पञ्च प्रस्तावना भिदाः। तत्र। पदान्यन्यगतार्थानि तदर्थगतये नराः। योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते१। यथा मुद्राराक्षसे सूत्र०। "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात्" । अनन्तरं नेपथ्ये आकः एष मयि जीवति सति चन्द्रगुप्तमभिभवितुमिच्छति। अत्रान्यार्थवन्त्यपि पदानि हृदिस्थार्थावगत्या अर्थान्तरे संगमय्य पात्रप्रवेशः। सूत्रधारस्य वाक्यं वा समादायार्थस्य वा। भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते२। वाक्यं यथा रत्नावल्याम्। "द्वीपादन्यस्मादपि पश्चिमसिन्धुसंगमादपि। विधिरभिमुखीभूतः" इत्यादि। सूत्रधारेण पठिते नेपथ्ये एवमेतत् कः सन्देहः द्वीपादन्यस्मादपीत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः। वाक्यार्थं यथा वेण्याम्। "निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा नेपथ्ये। आः दुरात्मन्। दृश्यामङ्गलपाठक! कथं "स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः। ततः सूत्रधारोनिष्क्रान्तः भीमसेनस्य प्रवेशः। यदि प्रयोगएकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ३। यथा कुन्दमालायाम्। नेपथ्ये "कृतकृतोऽवतरत्वार्य्यो" सूत्र०। कोऽयं खलु आर्य्याङ्गानेन साकायकं मे सम्मादयति विलोक्य कटमतिकरुणं वर्त्तते। "लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदादपि गर्भगुर्व्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र सूत्रप्रयोगार्थं स्वभार्य्याङ्गानमिच्छता सूत्रधारेण "सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति" सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयानएव प्रयोगः प्रयोजितः। काव्यं प्रवृत्तमाश्रित्य सूत्रधृक् यत्र वर्णयेत्। तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्त्तकम् ४। यथा "आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तः। उत्खाय गाढतमसं घनकालमुग्रं रामोदयाद्रिमिव सज्जितबन्धुलोकः"। ततः प्रविशति यथा निर्दिष्टोरामः। यत्रैकत्र समावेशात् कार्य्यमन्यत्प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः५। यथा शाकुन्तले। सूत्र० यदीं प्रति "तवास्मि गीतिरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्मन्तः शारङ्गेणातिरंहसा"। ततोराज्ञः प्रवेशः। योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि। अत्र आमुखे उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमाणानि। नखकुट्टस्तु "नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा। समाश्रित्यापि कर्त्तव्यमामुखं नाटकादिषु"। एषामामुखभेदानामेकं कञ्चित्प्रयोजयेत्। तेनार्थमथ पात्रं वा समाश्रित्यैव सूत्रधृक्। प्रस्तावनान्ते निर्गच्छेत्ततोवस्तु प्रयोजयेत्। तत्र पूर्वं पूर्वरङ्गः सभार्चनमतः परम्। कथनं कविसंज्ञादेर्नाटकस्याभिधा ततः। रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। रूपकस्य कवेराख्यां गोत्राद्यपि च कीर्त्तयेत्। कृतञ्च कञ्चित्प्रवेशं भारतीं वृत्तिमाश्रितः। तस्याः प्ररोचना वीथी"।

आमुष पु० आमे पीड़ायै उष्यते वध–घञर्थे क। (वेडवास वंशुभेदे। [ऋ० ४,३१,६।

आमुर् त्रि०आ+मुर्च्छ–क्विप्। हिंसके। "राधोवरन्त आमुरः"

आमुष्मिक त्रि० अमुष्मिन् परलोके भवः ठक् सप्तम्याः अलुक् टिलोपः। परलोकभवे "कुर्य्यादामुष्मिकं श्रेयः" मनुः। स्त्रियां ङीप्। "नैवाखोच्य गरीयसीरपि चिरादामुष्मिकोर्य्यातनाः" सा०द०।

आमुष्यकुलक न०अमुष्यकुलस्य भावः मनोज्ञा० वुञ् अलुक्। प्रख्यातकुलत्वे "आमुष्यायणामुष्यपुत्रिकासुष्यकुलिका" इति वार्त्तिकोक्तेः अस्य स्त्रीत्वमपि।

आमुष्यकुलीन त्रि० अमुष्यकुले साधुः प्रतिष्ठ० खञ् तदुगणपाठात् षष्ठ्या अलुक्। अमुष्यकुले साधौ।

आमुष्यपुत्रिका स्त्री अमुष्य पुत्रस्य भावः मनोज्ञा० वुञ् अलुक्। अमुष्यपुत्रस्य भावे। आमुष्यकुलकशब्दे प्रदर्शितवार्त्तिकात् स्त्रीत्वम्।

आमुष्यायण न०अमुष्य ख्यातस्यापत्यम् नड्रा०फक् अलुक्। प्रख्यातवंशोद्भवे "आमुष्यायणोवै त्वमसि" श्रुतिः।

आमृष्ट त्रि० आ+मृष–क्त। १आधर्षिते २मर्दिते च "आमृष्टास्तिलकरुचः स्रजोनिरस्ताः" माघः। आ+मृज–क्त। ३परिमार्जिते ४विशोधिते च। आ+मृष–क्त ५संसृष्टे च

आमोक पु० आ+मुच–घञ्। परिधाने। ख्युट्। आमोचनमप्यत्र न०।

आमोद पु० आमोदयति आ+मुद–णिच्–अच्। १अतिदूरगे गन्धे "आमोदसूचिघ्रन्तौ स्वनिश्वासानुकारिणौ" रघुः "आमोदकर्म्मव्यतिहारमीयुः" माघः। उत्तमस्त्रीणां २सुखनिश्वासादिगन्धे च। "सुखामोदं मदिरया कृतानु-

व्याधसुद्गिरन्" माघः। आ+मुद्-घञ्। २प्रहर्षे ल्युट्। आमोदनमत्र न०।

आमोदन त्रि० आ+मुद्-णिच् ल्यु। प्रहर्षजनके सुगन्धिसम्मादने "अभुञ्जतामोदनमोदनं जनाः" नैष०। भावे ल्युट्। १प्रहर्षसम्मादने २सुगन्धसम्मादने च।

आमोदित त्रि० आ+मुद्-णिच्-क्त। १प्रहर्षिते २कृतामोदे ३सुरभीकृते च।

आमोदिन् त्रि० आमोदयति सुरभीकरोति आमोद+क्रयर्थे णिच्-णिनि। सुखवासने १कर्पूरादौ। आमोद+अस्त्यर्थे इनि। २आमोदयुक्ते स्त्रियां ङीप्। "नवकुटजवनस्यामोदिनो गन्धवाहाः"।

आमोष त्रि० आमुष्णाति-आ+मुष-घञ्वाद्यच्। सम्यगपहारके चौरादौ। आ+मुष-भावे घञ्। २अपहरणे। "यथा बिभ्यदामोषमीयात्" शत० ब्रा०।

आम्नात त्रि० आ+म्ना-क्त। १सम्यगभ्यस्ते २सम्यगधीते वेदादौ। ३कथिते च "समौ हि शिष्टैराख्यातौ" माघः भावे क्त। ४सम्यगभ्यासे न०

आम्नातिन् त्रि० आम्नातमनेन इष्टा० इनि। १कृतवेदाद्यभ्यासे २कृतवेदाध्ययने च स्त्रियां ङीप्। "आम्नातिभिर्नीतिषु बुद्धिमद्भिः" भट्टिः।

आम्नान न० आ+भावे ल्युट्। १वेदादिपाठे २तदभ्यासे च "विष्णुर्वामावाख्यायां हौत्राम्नानात्" कात्या० ६,३,२५।

आम्नाय पु० आ+म्ना-घञ्। १सम्यगभ्यासे २सम्यक्पाठे च अभ्यासस्य सम्यक्त्वं च नियमधारणपूर्वकत्वं गुरुमुखश्रवणपूर्वकत्वञ्च। कर्मणि घञ्। ३वेदे "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जैमि० "आम्नाये स्मृतितन्त्रे च" रघु० मल्लि०। "आम्नायवचनं सत्यमित्ययं लोकसंग्रहः-आम्नायेभ्यः पुनर्वेदाः प्रसृताः सर्वतोमुखाः भा० शा० २६१अ०। [वुञ्। आम्बरीषपुत्रविषयादौ।

आम्बरीषपुत्रक पु० अम्बरीषपुत्र+चतुरर्थां राजन्या०

आम्बष्ठ पुंस्त्री० अम्बष्ठस्यापत्यम् शिवा० अण्। अम्बष्ठापत्ये जातौ। आम्बष्ठ्यः। स्त्रियाम् चाप्।

आम्बिकेय पु० अम्बिकाया अपत्यं शुभा० ढक्। विचित्रवीर्य्यक्षेत्रे काशिराजस्य मध्यमकन्यायाम् अम्बिकायां व्यासेनोत्पादिते १धृतराष्ट्रे स हि अकाले दिवं गतस्य विचित्रवीर्य्यस्य अम्बिकाम्बालिकयोःपत्न्योर्मध्ये अम्बिकायां ज्येष्ठभार्य्यायां सत्यवत्यानियुक्तेन व्यासेनोत्पादितः तत्कथा यथा "ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवाग्ऋषिः। दीप्यमानेषु दीपेषु शयनं प्रविवेश ह। तस्य कृष्णस्य कपिला जटा दीप्ते च लोचने। बभ्रूणि चैव श्मश्रूणि दृष्ट्वा देवी न्यमीलयत्। संबभूव तया सार्द्धं मातुः प्रियचिकीर्षया। भयात् काशीसुता तन्तु नाशक्नोदभिवीक्षितुम्। ततो निष्क्रान्त मागत्य माता पुत्रमुवाच ह। अयक्ष्मां गुणवान् पुत्रोराजपुत्रो भविष्यति?। निशम्य तद्वचोमातुर्व्यासः सत्यवतीसुतः। प्रोवाचातीन्द्रियज्ञानो विधिना संप्रचोदितः। नागायुतसमप्राणो विद्वान् राजर्षिसत्तमः। महाभागो महौदार्यो महाबुद्धिर्भविष्यति। तस्य चापि शतं पुत्रा भविष्यन्ति महात्मनः। किन्तु मातुः स वैगुण्यादन्ध एव भविष्यति" इत्युपक्रम्य पाण्डुविदुरोत्पत्तिमुपवर्ण्य च "एते विचित्रवीर्यस्य क्षेत्रे द्वैपायनादृषेः। जज्ञिरे देवगर्भाभाः कुरुवंशविवर्द्धनाः" इत्युक्तम् भा० आ० प० १०६ अ०। अम्बिकायाश्च यथा विचित्रवीर्य्यभार्य्यात्वं तथोक्तं अम्बाशब्दे २२८पृष्ठे "आम्बिकेयेन दत्तेन राज्ञा दुर्योधनेन च" भा० व० प० १२अ० "परं श्रेयः पाण्डवेया। यथाह भीष्मस्तन्न श्रुतवानाम्बिकेयः" भा० व० प० ५अ०। अम्बिकायाः पार्व्वत्या अपत्यम् ढक्। २कार्त्तिकेये। तस्य तदुत्पत्तिकथा अग्निकुमारशब्दे ६५पृष्ठे दृश्या।

आम्भसिक पु० आम्भसा वर्त्तते ठक्। मत्स्ये सि० कौ०।

आम्भि त्रि० अम्भसो जातादि बाह्वा० इञ् सलोपश्च। अम्भोजातादौ।

आम्र पु० अम-गत्यादिषु रन् दीर्घश्च। १स्वनामख्याते वृक्षे तस्य फलम् अण् तस्य लुक्। २तत्फले च न०। आम्रस्य फलगुणादिगुणा उक्ता भा० म०। यथा "आम्रपुष्पमतीसारकफपित्तप्रमेहनुत्। असृग्दुष्टिहरं शीतं रुचिकृत् वाहि वातलम्। आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत्। तरुणं तु तदत्यम्लं रूक्षं दोषत्रयाकृत्। आम्रमामं त्वचा हीनमातपेऽतीव शोषितम् अम्लं स्वादु कषायं स्याच्छ्लेष्मलं कफवातजित्। पक्वन्तु मधुरं वृष्यं स्निग्धं शुक्रबलप्रदम्। गुरु वातहरं हृद्यं बल्यं शीतमपित्तलम्। कषायाम्लरसं वर्च्यं श्लेष्मशुक्रविवर्द्धनम्। तदेव वृक्षसम्पक्वं गुरु वातहरं परम्। मधुराम्लं सरं किञ्चित् भवेत् पित्तप्रकोपणम्। आम्रं कृत्रिमपक्वं यत्तच्छ्लेष्मपित्तनाशनम्। रसस्याम्लस्य हानेस्तु माधुर्य्यात्र विशेषतः। चूषितं तत् परं रुच्यं बलवीर्य्यकरं लघु। शीतलं शीघ्रपाकि स्याद्वातपित्तहरं सरम्। तद्रसोगालितो बल्यो गुरुर्वात

हरः सरः। अङ्कुरस्तर्पणोऽतीव दृंहणः कफवर्द्धनः। तस्य खण्डं गुरु परं रोचनं चिरपाकि च। मधुरं दृंहणं बल्यं शीतलं वातनाशनम्। वातपित्तहरं रुच्यं दृंहणं बलवर्द्धनम्। दृष्यं वर्णकरं स्वादु दुग्धाक्तं गुरु शीतलम्। मन्दानलत्वम् विषमज्वरञ्च रक्तामयं वह्नि गुदोदरञ्च। आम्रातियोगो नयनामयञ्च करोति तस्मादति तानि नाद्यात्। एतद्रसाम्रविषयं मधुराम्लं परं नत्र। मधुरस्य परं नेत्रहितत्वाद्या गुणायतः। शुण्ठ्यम्लस्तनुपानं स्वादाम्राणामतिभक्षणे। जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च। आम्रबीजं कषायं स्याच्छर्दातीसार नाशनम्। ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्। आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्"। पल्लवमत्र नव दलम्। अस्य शाकपाकप्रकारस्तत्रैव "स्निग्धा निष्पीड़िताः काम कोकिलाहारपल्लवाः। घृतसिन्धूत्थसंसिद्धा रुच्या रामठवासिताः। सर्षपा खण्डयुक्तास्ते तक्रिताम्राम्रपल्लवाः। लवङ्गार्द्रकसंयुक्ताभरीचै रुचिकारकाः"। अस्य पल्लवमुकुलानां पाकप्रकारस्तत्रैव "आम्रस्य चैव नवताम्ररुचिप्रवालाः खण्डीकृतालवणमिश्रितपिण्डिताश्च। वाल्लीकधूपनजुषोष्टदुग्धसिद्धाः सन्दीपयन्ति पवनस्य सखायमेते। मुकुलः सकषायाम्लिनः कृतखण्डीकृतसैन्धवान्वितः। दधिमन्थमरीचसंस्कृतस्थिरजातामरुचिं छिनत्ति हि। कफपित्तहरौ हृद्यौ मुखवैरस्य नाशनौ। वह्निसङ्जननौ रुच्यौ चूतजौ पुष्पपल्लवौ। आम्रजामं जलस्विन्नं मर्दितं दृढपाणिना। सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम्। प्रधानकमिदं श्रेष्ठं भीमसेननिर्म्मितम्। सद्योरुचिकरं बल्यं शीघ्रमिन्द्रिय तर्पणमिति"। [शाकभेदे राजनि०।

आम्रगन्धक पु० आम्रस्येव गन्धोऽस्य कप्। समशिलद्रुक्षे,

आम्रगुप्त पु० गोत्रप्रवर्त्तके ऋषिभेदे। तस्यापत्यम् उदीचां वृद्धे फिञ्। आम्रगुप्तायनिः पु० स्त्री० प्राचान्तु वृद्धे ढ्रञ्। तदपत्ये स्त्रि० कौ०।

आम्रपेशी स्त्रि० आम्रस्य पेशीव। शुष्काम्रकोषे (आमसी)

आम्रमय त्रि० आम्रस्य विकारः अवयवो वा दृढत्वात् मयट्। १आम्रविकारे। २तदवयवे च।

आम्ररसाकृति स्त्री आम्ररसस्येवाकृतिः स्वादो यस्याः। पीताख्य रसालाभेदे। तत्पाकप्रकारो यथा भा० प्र० "किञ्चित् कुङ्कुमसंयुक्तं विमस्तुदधिगालितम्। सशर्करं भवेत् पीता पक्वाम्ररससन्निभा। पीता शिखरणी या सा लघ्वी वर्ष्यवती हि सा। गुरुच्या मधुरा बल्या वातपित्तहरा-मता" अत्र पीताख्यशिखरिण्याः पक्वाम्ररसतुल्यत्वोक्त्या तथात्वम्। [दायाम्लके वने।

आम्रवण न० आम्रस्य वनम् नित्यं णत्वम्। आम्रदृक्षसमु-

आम्रात पु० आम्रमाम्ररसमतति अत—घञ्० अच्। (आमड़ा) १वृक्षे २तत्फले न०। तत्फलस्याम्लतुल्यरस-त्वात्तथात्वम्। "आम्रातमम्लं वातघ्नं गुरुष्णं रुचिकृत् परम्। सुपक्वं त्ववरं स्वादु रसपाकं हिमं स्मृतम्। तर्पणं श्लेष्मलं स्निग्धं रुच्यं विष्टम्भि दृंहणम्। गुरु बल्यं मरुत्पित्तघ्नदाहघ्नवाससृजित्" भा० प्र०।

आम्रातक पु० आम्र इवातति आम्रात् किञ्चिदूनरसफलक-त्वात् अत—ख्वुल्। (आमड़ा) १वृक्षे २तत्फले न०। आम्रेण तत्फलरसेन तकते प्रकाशते आ+तक—घञ्। शुष्काम्ररसनिर्म्मिते (आमट्) द्रव्यभेदे तत्-करणप्रकारः भावप्र० उक्तः। यथा "आम्रस्य सङ्-कारस्य कटे विस्तारितोरसः। घर्म्मशुष्को मुहुर्दत्त आम्रातक इति स्मृतः"।

आम्रातकेश्वर पु० आम्रातक इव ईश्वर ईश्वरलिङ्गमत्र। सिद्धस्थानभेदे। "आम्रातकेश्वरे स्थित्वा स्थित्वाख्या परमेश्वरी" देवीपु०।

आम्रावती स्त्री आम्र आम्ररसो विद्यतेऽस्यां मतुप् मस्य वः ङरा० दीर्घः। नदीभेदे। तस्या आम्रतुल्यरसतोययुक्तत्वात्तथात्वम्।

आम्रावर्त्त पु० आम्रइव तुल्यरसतया ईषत् वर्त्तते आ+वृत—अच्। १आम्रातकवृक्षे २तत्फले न०। आम्रेण आ-म्ररसेन आवर्त्यते निष्पाद्यते आ+वृत—णिच्-कर्मणि घञ् (आमट्) ख्याते ३पदार्थे आम्रातकशब्दे तत्करणप्रकार उक्तः "आम्रावर्त्तस्तृषाच्छर्द्दिवातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकात् लघुश्च स हि कीर्त्तितः" भावप्र०।

आम्रिमन् पु० अम्लोरसोऽस्यस्य प्रज्ञा० अण् दृढा० गण-पाठात् रस्य लः ततोभावे दृढा० इमनिच्। अम्लत्वे रसभेदे वा घञ्। आम्रामयत्व न०।

आम्रेडित त्रि० आ+म्रेड—उन्मादे अच् आम्रेडेन उन्मत्ते-नेवाचर्य्यते आम्रेड+आचारे क्विप् ततः क्त। उन्मत्तेन यथा कथितस्य पुनःपुनः कथनं क्रियते एवं द्विरुक्ति कथिते "आम्रेडितस्यान्यस्य तु वा" पा०।

आम्लवेतस पु० अम्लः अम्लरसयुक्तः वेतस इव। १अम्ल-वेतसवृक्षे राजनि० स्वार्थे संज्ञायां वा कन्। २तिन्तिड़ी-वृक्षे (तेतुल)।

आस्ना स्त्री० सम्यक् अस्नो रसो यस्याः । १तिन्तिड्याम् (तेतुल) स्वार्थे कनि आस्निकाप्यत्र । २अम्लरसयुक्ते त्रि० । मनोज्ञा०भावे वुञ् आस्निका । २अम्लरसे ३अम्लोद्गारे च शब्दमाला । अम्लरसोऽस्यस्य अण् ङीप् । आस्नीत्यपि तिन्तिड्याम् ।

आय पु० आ–इण्–अच् अय–घञ् वा । १लाभे २प्राप्तौ, "आयव्ययविशोधितात्" स्मृतिः आयव्ययौ च नियताकरान् कोषमेव च" मनुः । ३धनागमे, ज्योतिषोक्ते लग्नावधिके राश्यवधिके च ४एकादशस्थाने, ५वनितागारपालके च कर्मणि अच् घञ् वा । यामादितः स्वामिप्राह्यभागे, लभ्ये ६धनादौ "तदक्षिन् इष्टायलाभोपदा दीयते" पा० ग्रामेषु स्वामिग्राह्योभाग आयः" सि० कौ० लग्नायधिकैकादशस्थानस्यायत्वं च तत्स्थाने आयस्य चिन्तनीयत्वात् । तत्र वर्षलग्नावधिकैकादशस्थाने यहविशेषयोगादिभिरायोपायविवेकः । नीलकण्ठता० "अब्दे क्षेऽर्थगे लाभो वाणिज्यात् शुभदृग्युते । सैन्यिहेऽक्षिन् लग्नगे तु लाभः पठनलेखनात् । अक्षिन् षष्ठाष्टान्यगते सक्रूरे नीचकर्मतः । क्रूरेक्षणेन लाभोऽस्तंगतेन लिखनादिभिः । जीवेऽब्दे क्रूरहृते लग्ने हानिर्नष्टपाङ्गयम् । अक्षिन्नधिकृते द्यूने व्यवहाराद्धनाप्तयः । लग्नाधिपेनेत्यगते लाभः स्वजनगौरवम् । सर्वेऽपि लाभे विज्ञाप्या सबला निर्बला न तु । सवीर्योऽः सप्तषड्होलग्ने ऽर्थसहमे शुभम् । ददाति खादद्रव्यस्य लाभः पापदृशा न तु" । आयसहमन्तु सहमशब्दे वक्ष्यते आयभावानयनञ्च ५।१६पृष्ठे अष्टमभावशब्दोक्तदिशावसेयम् । जन्मभावधिकैकादशस्थाने यहस्थित्यादिभिरायविवेकः जातक० उक्तः यथा "स्वामिसदृग्यहयुतेक्षित आये सर्वलाभसहितः शुभवर्गे । क्रूरदृष्टिसहिते खलवर्गे नो शुभं खलशुभे च विमिश्रम् । सर्वखेचरयुतं त्वथ दृष्टं लाभभञ्जखलाभकरन्तु । तत्र यो बलयुतो निजदृष्ट्या खं धनं दिशति सम्यगतुङ्गम् । उच्चे स्वमित्रसुहृगोवलवांश्च पूर्णे, शत्रोर्गृहे तु खचरस्वरसं ददाति । नीचारिभांशकगतोऽर्कफलप्रदः स्यादस्तंगतोऽल्पकफलः खलु लाभभावे । लाभे रवियुतोक्षवर्गैः संयुते न्यूनचतुष्पदचौर्यैः । युद्धतोऽपि हि धनं विधुजैस्तोयदन्वितयुवतिप्रभवं स्यात् । लाभे कुजे क्षितियुते कुजवर्गयुक्ते वित्तं प्रवालमणिभूषणकाञ्चनाढ्यम् । स्यात् साहसैश्च गमनागमनैस्तथाग्नियन्त्रप्रपञ्चजनितैर्वैचक्षणानाम् । बुधदृष्टेऽथ वा युक्ते लाभे बुधवर्गेऽपि वा । वित्तं लिखनशिल्पाद्यैरङ्गवेसरकाव्यजम् । आये इन्दुस्थितियुतीक्षवर्गयुक्ते यन्त्रादिहेमसुतविक्रमनागरैः स्वम् । यौक्षेक्षणे गणयुते गमनाङ्गनाभ्योवाराङ्गनारजतपत्रमयं धनं स्यात् । शनियुक्ते लाभगृहे शनिदृष्टे शनेर्गणे । महिषी लोहक्षाम्बुयं धनं स्यावरकर्मभिः । निजाब्दकेऽर्कः प्रचुरार्थलाभं लक्ष्मीं कुजोऽजस्र धनं व्यये । भः पञ्चवेदे धनमिन्द्रपूज्यो लक्ष्मीं सितोऽर्के कुजवच्छनिस्तु" । राश्यवधिकैकादस्थाने च गोचरे सर्वे ग्रहाः शुभाः "सर्वेऽप्युपान्त्ये शुभाः" इत्युक्तेः अत्र विशेषो गोचरशब्दे वक्ष्यते ।

आयःशूलिक त्रि० अयःशूलेनार्थान् अन्विच्छति+अयःशूल+ठक् । "तीक्ष्णोपायेन योऽन्विच्छेत् स आयःशूलिको जन" इत्युक्ते तीक्ष्णकर्मणार्थकरे ।

आयजि त्रि० आभिमुख्येन इज्यते आ+यज–कर्मणि–इन् । १आभिमुख्येन इज्यमाने "आयजे ! त्वामनवे जातवेदसम्" ऋ० ८,२३,१७ भावे इन् । २आभिमुख्येन यागे ।

आयज्यु त्रि० आत्मन आयजिमिच्छति क्यच् उण् नि० इलोपः । आभिमुख्येन यागमिच्छति । "आयज्यवः सुमतिं विश्ववाराः" ऋ० ६,२७,२६ ।

आयत त्रि० आ+यम–क्त । १दीर्घे आयामयुक्ते "धनुरायतभोगवासुकिज्या" किरा० । आ+यम–अन्तर्भूतण्यर्थे कर्मणि क्त । २आकृष्टे "आरक्षितानायतबलगवन्धैः" माघः । "आयता आकृष्टा बलान्धायैः" मल्लि० । ३दूरेच आकृष्टे "प्रजविभिरायतन्तरङ्गैः" किरा० । "आयतं दूरमिति" मल्लि० । "भूयसी तव यदायतायति" माघः ४नियमिते च । "निर्जगेदायतप्राणः" योगिया० । प्राणनियमनञ्च यथेष्टप्राणवृत्तिनिरोधनम् । [त्रिका० ।

आयतच्छदा स्त्री आयतः दीर्घश्छदोऽस्याः । कदल्याम्

आयतन न० आयतन्तेऽत्र यत–आधारे ल्युट् । १देवादिवन्दनस्थाने, २आश्रये, "क्षेत्रेऽस्तदेकायतनं जगाम" कुमा० । "नरेन्द्रभूत्वायतना दनन्तरम्" रघुः । "रोगायतनमातुरम्' न जीर्णदेवायतने न वल्मीके कदाचन" "सीमासन्धिषु कार्याणि देवतायतनानि" इति च मनुः । ३विश्रामस्थाने ४यज्ञस्थाने च ।

आयतस्तु त्रि० आयतं स्तौति स्तु–क्विप् नि० दीर्घः । आयतस्तावके । "क्विब्वचिप्रच्छायतस्तूकटप्रजूश्रीणां दीर्घोऽसम्प्रसारणञ्च" वार्त्ति० ।

आयति(ती) त्रि० आ+या–क्तिन् वा ङीप् । १उत्तरकाले आगामिकाले २प्रभावे कोषदण्डजे तेजसि ३फलदानकाले च ।

"आयतिं सर्व्वकालानां तदात्वं च विचारयेत्" मनुः "भूयसी तव यदायतायति" माघः "नियता लघुता निरायतेः" किरा० । आ+यम–क्तिन् । ४आयामे दैर्घ्ये । "सीमानमत्यायतयोऽत्यजन्त" माघः । ५संयमे "केशनखानामायतिभङ्गः" कात्या० ६प्रापणे ७सङ्गमे च अत्र क्तिन्नन्तत्वात् न ङीबिति भेदः । ८कर्म्मणि च "हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते । यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम्" मनुः । "आयतिक्षमं कर्म्मक्षमम्" कुल्लू० ।

आयतोगव अव्य० आयन्ति गावोऽत्र तिष्ठद्गुप्र० अव्ययी० नि० । गोष्ठाद्गवागमनकाले । "आ तिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतोगवम्" भट्टिः ।

आयतौसम अव्य० आयन्ति समा अत्र तिष्ठद्गुप्र० नि० अव्ययी० । वत्सरागमनकाले ।

आयत्त त्रि० आ+यत–क्त । अधीने १वशीभूते "दैवायत्तं कुले जन्म ममायत्तं हि पौरुषम्" वेणी० । २कृतप्रयत्ने च ।

आयत्ति स्त्री आ+यत-क्तिन् । १स्नेहे, २वश्यत्वे, ३सामर्थ्ये, ४सौम्ये, ५यत्ने, ६प्रभावे ७आगतौ च उपाये च "अनायत्त्या च तत्कल्पनम्" भा० भा० ।

आयथातथ्य न० न यथातथं तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः । अनौचित्ये यस्य यद्रूपं नोचितं तद्रूपे । उत्तरपदवृद्धौ अयाथातथ्यमप्यत्र न० ।

आयथापूर्व्य न० पूर्व्वमनतिक्रम्य यथापूर्व्वं न०त० तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः । यथापूर्व्वाननुसारित्वे उत्तरपदवृद्धौ तु अयाथापूर्व्यमप्यत्र न० ।

आयन न० अयनमेव स्वार्थे अण् आ+अयनं वा प्रा०स० । १सम्यगामने "आयने ते परायणे दूर्व्वा रोहन्तु पुष्पिणीः" अ० १०,१४२,८ । अयनस्येदम् अण् । अहोरात्रयोर्दक्षिणोत्तरगमनरूपायनस्य २सम्बन्धिनि त्रि० तच्च आयनवलनायनवृत्तकर्म्मादि ज्योतिषप्रसिद्धं तत्रायनवलनं यथा सि० शि० "युतायनांशोद्भवकोटिघिड्नो जिनांशभौर्व्या १२९७ गुणिता विभाजिता । द्युजीवया लब्धफलस्य कार्म्मुकम् भवेच्छराङ्गायनदिक्कमायनम्" । "यस्य सायनांशस्य कोटिज्या जिनांशज्यया गुणा द्युज्यया भक्ता फलस्य चापमायनं वलनं भवति यस्मिन्नयने यहोवर्त्तते तस्मिन् भवति" प्रभिता० । आयनवृत्तकर्म्म सि० शि० उक्तं यथा । "आयनं वलनमस्फुटेषुणा संगुणं द्युगुणभाजितं हृतम् । पूर्णपूर्णधृतिभिर्भृतांशितव्यक्तभोदयहृदायनाः कलाः । अस्फुटेषुवलनाहृतिस्तु वा यष्टिहृत् फलकलाः खुरायनाः । ता यहेऽयनगुणत्कयोः क्रमादेकभिन्नककुभोर्हृणं धनम्" । "यहस्य यदायनं वलनं तदस्फुटशरेण संगुण्य तद्द्युज्यया भजेत् । फलमष्टादशशतैः १८०० संगुण्य यस्मिन् राशौ यहोवर्त्तते तस्य निरक्षोदयासुभिर्विभजेत् । फलमायनकला भवन्ति । अथ वायनवलनकला अस्फुटेन शरेण संगुण्य यच्छया विभजेत् । फलमायनकलाः खल्पान्तरा भवन्तीत्यनुकल्पः । यहो यस्मिन्नयने वर्त्तते तस्यायनस्य यहशरस्य च यद्येका दिक् तदा ता आयनाः कला यहे ऋणं कार्य्याः । यदि तयोर्भिन्ना दिक् तदा धनं कार्य्याः । एवं कृतायनवृत्तकर्म्मको यहो भवति । अत्रोपपत्तिर्गोले सविस्तराभिहिता । अथेहापि किञ्चिदुच्यते । क्रान्तिवृत्ते यद्गयहस्थानचिह्नं तद्यद्वा क्षितिजे लगति न तदा यहः । यतोऽसौ शराग्रे । शराग्रं हि कदम्बाभिमुखम् । यदोत्तरकदम्बः क्षितिजादुपरि भवति तदा तदुन्मुखेन शरेण यहः क्षितिजादुन्नाम्यते । क्षितिजकदम्बयोरन्तरं तदेवोत्तरमायनं वलनम् । यदा क्षितिजादधः कदम्बस्तदा शरेण यहो नाम्यते क्षितिजकदम्बयोरन्तरं तदा दक्षिणं वलनम् । अतो वलनवशेन यहस्योन्नामनं नामनं च । उन्नामितो यह आदावेवोदितः । नामितः पश्चादुदेष्यति । स च कियता कालेनेति तदायनं त्रैराशिकेन । यदि त्रिज्यातुल्ये कर्णे कदम्बक्षितिजयोरन्तरकला वलनसंज्ञा लभ्यन्ते तदा अस्फुटशरतुल्ये किमिति फलं यहादधोऽवलम्बरूपाः कला भवन्ति । यहस्थाने यद्द्युज्याकृतं तत्र ता जीवारूपाः । तासां त्रिज्याकृतपरिणामायान्योऽनुपातः । यदि द्युज्याकृतएतावती ज्या तदा त्रिज्याकृते कियतीत्येवं याः फलकलास्ता एवासवः । फलस्य धनुः खल्पत्वान्नोत्पद्यत इति न कृतम् । तैः क्रान्तिवृत्ते परिणामायान्योऽनुपातः । यदि निरक्षोदयासुभी राशिकला अष्टादश शतानि लभ्यन्ते तदैभिरसुभिः किमिति फलं क्रान्तिवृत्तपरिणताः कला भवन्ति । यदोत्तरं किल वलनमुत्तरस्य विक्षेपस्तदा तेन विक्षेपेणोन्नामितो यहो यावत् क्षितिजं नीयते तावत् क्रान्तिवृत्तयहस्थानात् पृष्ठतः क्रान्तिवृत्तं क्षितिजे लगति तदेव स्थानं कृतदुष्कर्म्मको यहः । किं बहुना गोले क्रान्तिमण्डले यथास्थानं विमण्डलं विन्यस्य तत्र यहं च दत्त्वा चिह्नं कार्यम् । अथ ध्रुवादुयहोपरि नीयमानं दृत्ताकारं स्रुत्रं यत्र क्रान्तिवृत्ते लगति तत्र

कृतदक्षकर्मको ग्रहः। एवं ध्रुवाङ्गीयमानेन स्फुटेन शरकृतं लम्बं भवति। क्रान्तिदक्षग्रहस्थानाद्गतः पृष्ठतो वा आयनकलातुल्येऽन्तरे तत् स्फुटं क्रान्तिदक्षे लगति। अत आयनकला भुजः, अस्फुटविक्षेपः कोटिः, शराग्रक्रान्तिदक्षयोरन्तरे यावत् स्फुटखण्डं स तत्र कर्णः। एतत् लम्बं वलनलम्बसंभवम्। अतस्त्रैराशिकेन वलनकलानामानयनम्। यदि यष्टिकोच्चा वलनकलाभुजो लभ्यते तदा अस्फुटविक्षेपकोच्चा किमिति फलमायनकला इति सर्वमुपपन्नम्" ग्रमिताक्षरा।

आयमन न० आ+यम–ल्युट्। १दैर्घ्ये णिच्–ल्युट्। २नियमने ३संयतकरणे दृढस्य संकुचितस्याङ्गस्य ४दीर्घीकरणे च। "यथा दृढस्य धनुष आयमनम्" ऋ०भ०।

आयल्लक पु० आयल्लिव लोयते अत्र लो–आधारे वा०ड ततः संज्ञायां कन्। उत्करणायाम् हेम०।

आयस त्रि० अयसो विकारः अण् स्त्रियां ङीप्। लौहमये। "शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा" "पुमांसं दाहयेत् पापं शयने तप्तआयसे" इति च मनुः। "स चकर्षपरस्कात् तत् अयस्कान्त इवायसम्" रघुः। "मूढबुद्धिमिवात्मानं हैमीभूतमिवायसम्" कुमा०। २लौहमयकवचे च ३अङ्कुरक्षिप्तायां जालिकायां स्त्री। अयएव स्वार्थे अण्। ४लौहे। ततः विकारेमयट् लोहमये त्रि० स्त्रियां ङीप्।

आयसीय त्रि० अयसः सन्निकृष्टदेशादि० कुत्वा० छण्। लौहसन्निकृष्टदेशादौ।

आयस्कार पु०अयस्कार एव स्वार्थे अण्। लौहकारे त्रिका०

आयस्त त्रि० आ+यस–क्त। १क्षिप्ते "आयस्तसिंहाक्रान्तिरुत्पपात" किरा०२क्लेशिते ३प्रतिहते ४तीक्ष्णीकृते ५आयासयुक्ते च।

आयस्थान न०ऐत०। १लाभस्थाने, राज्ञां २शुक्लध्वजकृष्णध्वजाद्याकरस्थाने "ठञ् ठगावायस्थानेभ्यः" पा०। ज्योतिषोक्ते ३लग्नादेकादशस्थाने च।

आयस्थूण त्रि० अयोमयी स्थूणायस्य तस्यापत्यं शिवा० अण्। अयस्थूणापत्ये स्त्रियां ङीप्। [त्वेत्यर्थे।

आयस्य अव्य० आ+यस–ल्यप्। आयासं कृत्वा भक्षं यति-

आयात त्रि० आ+या–क्त। आगते स्थानात् स्थानान्तरं प्राप्ते। "यामोयातस्तथापि नायातः" सा०द०। "आयाता मधुयामिनी" उद्भटः। "आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते" देवीभा०।

आयाति पु० आ+या+क्तिच्। "यातिर्व्यायातिः संयातिरायातिः प्रतियातिस्तथा। नहुषोजनयामास षट्सुतान् प्रियवादिनः" इति च हरि० उक्ते १नहुषसुतभेदे आ+या–भावे क्तिन्। २आगमने स्थानान्तरगमने।

आयान न० आ+या–ल्युट्। १ आगमने आयाति यावद्द्रव्यम् आ+या–ल्यु। २स्वभावे जटा० स्वभावस्य यावद्द्रव्यव्यायित्वात्तथात्वम्।

आयाम पु० आ+यम–भावे घञ्। दीर्घपरिमाणभेदे "अणुमहद्ह्रस्वदीर्घभेदात् परिमाणचातुर्विध्यमिति वैशेषिकादयः स्वीचक्रुः। अणुमहद्रूपं परिमाणद्वयमिति साङ्ख्याः ह्रस्वदीर्घयोर्महत्त्वएवान्तर्भावात्। तत्र अल्पसंख्यकावयवत्वमणुत्वम् अधिकावयवजन्यत्वं महत्त्वम् तेषु च अवयवप्रचयेषु ययोः पार्श्वयोराधिक्यं तत्र दीर्घत्वव्यवहारः यत्र च पार्श्वयोरल्पत्वं तत्र विस्तीर्णत्वं ह्रस्वत्वं च व्यवह्रियते "अस्थूलमनघह्रस्वमदीर्घमिति' श्रुतौ च अवान्तरभेदमाश्रित्यैव परिमाणचातुर्विध्योक्तिर्द्रष्टव्या अस्य गुणमात्रवाचित्वम् न तु अणुमहदादिवत् गुणगुणकृत्वभयवाचकत्वमपि इतिभेदः। "आयामवद्भिः करिणां घटाशतैः" माघः "यावानूर्द्ध बाहुकः पुरुषस्तावदायामः" आश्व०श्रौ० "यस्य चायामः" पा० "शीतोष्णतरायामास्त्रियामा यान्ति सास्मतम्" रामा०। आ+यम+णिच्–अच्। २नियमने प्राणायामः प्राणवायोर्नियमनम् "प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति" "एकाक्षरं परं ब्रह्म प्राणायामः परं तपः" मनुः। आयामोऽस्यास्ति वला० वा इनि पक्षे मतुप्। आयामी आयामवान् आयामयुक्ते त्रि० स्त्रियां ङीप्। यामयद्ध्याङ्ग मर्य्यादायाम् अव्ययीभावः। ३प्रहरपर्य्यन्ते अव्य०।

आयास पु० आ+यस–घञ्। अतियत्ने "स्नेहमूलानि दुःखानि देहजानि भयानि च। शोकहर्षौ तथायासः सर्वं स्नेहात् प्रवर्त्तते" भा०व० २०० अ० "रत्नायास मनस्तापक्षुत्पिपासादिसम्भवा" भा०द०।

आयासक त्रि० आ+यस–ण्वुल्। १आयासयुक्ते। णिच्–ण्वुल्। २आयाससम्पादके च।

आयासिन् त्रि० आयसति आ+यस–णिनि। आयासयुक्ते "कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि" शकु०।

आयिन् त्रि० आयोलाभोऽस्यास्य इनि। १लाभयुक्ते मतुप् आयवानप्यत्र त्रि०इण–णिनि। २गन्तरि स्त्रियां ङीप्।

आयु त्रि०"छन्दसीणः"उणा०इण–उण्। गमनशीले "ता अस्य

वर्षमायुर्योनेष्टुः सचत्त धेनव" ऋ०२,५,५ । "आयुर्यो-मन्त्रः" भा०उवङ् छान्दसः "अभि सोमास आयवः पवन्ते मद्यं मदम्" ऋ० ९,२३,४ । २आयुषि न० "कालः-क्रीड़ति गच्छत्यायुरित्युक्तेः कालगत्यैव तस्य गमित्वात्तथात्वम् । जीवनस्य कालरूपत्वे तु कालस्य सततगामित्वात्तथात्वं युक्तमेव "अग्ने जरस्व स्वापत्य आयुन्यूर्ज्जा" ऋ०२,३,७ । "वत्सं न पूर्व्वं आयुनि जातं रिहन्ति मातरः" ऋ० ९,१००,१ आयुनि आयुषि" भा० बाहुलकात् भाषा-यामपि उण् उज्ज्व० । तेन "वायुना जगदायुना" वर्ष्मि-विवेक । "मा बधिष्ठा जटायुं मम्" भट्टिः । "तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः" इति अभिनन्दः ।

आयुक्त त्रि० आ+युज-कर्म्मणि क्त । १सम्यग्व्यापारिते । "आयुक्तकुशलाभ्याञ्चासेवायाम्" पा० "आयुक्तः व्यापा-रितः" सि०कौ० । "कुशलोऽन्येषणस्याहमायुक्तो दूत-कर्म्मणि" भट्टिः २ईषद्युक्ते च "आसेवायां किम् ? आयुक्ता गौः शकटे ईषद्युक्तः" सि०कौ० । भावे क्त । ३सम्यग्नियोजने न० । आयुक्तमनेन इष्ट० इनि । आयुक्ती सम्यग्नियोजनकर्त्तरि त्रि० स्त्रियां ङीप् ।

आयुध न० आयुध्यतेऽनेन आ+युध-करणे घञर्थे क । शस्त्रमात्रे । तस्य भेदाः समासतस्त्रिधा प्रहरणहस्तमुक्त यन्त्रमुक्तभेदात् । तत्र हस्तस्थितैर्यैः प्रक्षिप्यते तानि प्रह-रणानि यथा खड्गादीनि । हस्तमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि । तेषां सर्व्वेषां युद्धसाधनत्वादा-युधत्वम् । "न मे त्वदन्येन विसोढमायुधम्" रघुः । "येऽपीन्द्रपाणितुलितायुधलूनपक्षाः" माघः । "न क्षुण्णं न विसन्नाहं न लग्नं न निरायुधम्" मनुः ।

आयुधधर्भिणी स्त्री आयुधस्येव धर्मोऽस्त्यस्या इनि ङीप् । जयन्तीवृक्षे शब्दच० । साहि रोगनाशने आयुधसमा

आयुधन्यास पु० आयुधानां न्यासः तत्तत्स्थानस्पर्शपूर्व्वकं तत्तन्मन्त्राणामर्पणबुद्ध्या स्थापनम् । श्रीविद्यापूजाङ्गे "एवं कामकलारूपं देवतामयमात्मनः । वपुर्विचिन्त्य शिव-योरायुधन्यासमाचरेत्" इत्यादिना तन्त्रसारोक्ते न्यासभेदे । तन्त्रसारे श्रीविद्यापूजाप्रकरणे विवृतिर्द्रष्टव्या ।

आयुधागार न० ६त० । राज्ञां प्रहरणस्थापनार्थे गृहे । "सङ्कल्पमायुधागारमिदं तस्य दुरात्मनः" । "आयुधागार-मादीप्य" इति च भा०आ०प०१४७,४८ अ० । "कोष्ठा-गारायुधागारदेवतागारभेदकान्" मनुः । आयुधागारे नियुक्तः ठक् । आयुधागारिकः तत्रनियुक्ते त्रि० । तल्ल-क्षणमुक्तं मात्स्ये । "स्थापनाजातितत्त्वज्ञः सततं प्रति-जाग्रतः । राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः" ।

आयुधिक पु० आयुधेन तद्व्यवहारेण जीवति ठञ् । शस्त्राजीवे पक्षे ङ्य आयुधीयोऽप्यत्र । आयुधाजीवादयोऽप्यत्र ।

आयुधिन् पु० आयुधमस्त्यस्य इनि । शस्त्रधारके ।

आयुध्य न० युद्धमिति युध-क न०त० ततो भावे अचतुरा-दिपाठात् ष्यञ् न त्वतलौ । १योद्भृभिन्नत्वे । आ+युध-ल्यप् । २सम्यग्युद्धं क्लृप्तेत्यर्थे अव्य० ।

आयुर्दाय पु० आयुषोदायः दानम् । बलविशेषस्थितियोगा-दिभिः ज्योतिषोक्ते रव्यादिभिः आयुषोदाने तद्विवरणं श्रीपतिपद्धतौ यथा

"आयुर्ज्ञानादेव होराफलानां कर्त्तुं यस्मान्निर्ण्ययः शक्य-तेऽतः । आयुर्दायः संप्रदायागतोऽयं सच्छिष्याणां प्रीतये कथ्यतेऽत्र । एकोनदोधितिसमादिह गच्छतो यद्भूपादि-रूपचयसंकलितद्वयं स्यात् । चेष्टोच्चरश्मिजमथ स्वमरी-चिभक्तं तज्जायतेऽत्र गुणकद्वितयं तदाख्यम् । जने भवे तां निजदोधितिभ्यः श्रेढीफले ते यदि रश्मियुक्ते । तदर्द्धिते स्वांशुभिरूद्धृते ते तद्घातमूलं गुणकः स्फुटः स्यात्" । इति गुणकानयनमभिप्रायं भेदस्तट्टीकायामुक्तः । "अल्पार्च्चे त् किरणाः सैकाश्चतुर्भक्ता भवेद्गुणः । अधिकार्च्चे त्रिरेकास्ते दलिता गुणको भवेत्" "वर्गोत्तमे स्वभवने स्वनवांशके च स्वोच्चांशके च गुणकोद्वितयं निरुक्तः । अर्ध्वर्क्षरूप २/२ मधिमित्रगृहे सुहृद्गे सत्रांशकं ४/२ समगृहे खलु रूपमेव । तत्र शोनितं २/२ रिपुगृहेऽध्यरिभे दलं १/२ स्यादेभ्योगुणो-भवति यः खलु कश्चिदेकः । वेदोद्धृतः सभगुणोगुणकैः प्रदि-ष्टोहोरादिवर्गगुणकस्तु भवेत्तदङ्कैः । एतेऽपि गुरुयागदि-तामहद्विरमेत्रयानन्तर ताडकानाम् । ७नगांशका११रुद्र-मिताश्चभोष्टराशौ सुहृद्गे श्वनि मूर्च्छनांशाः । १९नवाश्विनो १रूपसुदासराशौ २१कुज्यंशका १३विश्वसमा द्विषड्गे । त्रयो नगांशा अधियत्पुराणवेते भसंज्ञाश्च राशिवर्जम् । वर्गोत्तमात्त्रीज्यका नवत्रिभागस्थिते यद्गे तु द्वितयं २गुण-श्चेत् । एतैरभीष्टादिगुणैर्निहन्यादुदीरितैराशिगुणं पुन-स्तम् । गृहादिके वर्गगणे स्वकीये द्विकोगुणस्त्रिंशविवर्जितः सः । अभीष्टभे मित्रगृहे नवांशा विश्वेऽथ रूपञ्च समस्त गेहे । नवांशकाः पञ्च विरोधराशौ गुणांशकः स्यादधिवै-रिणोभे । पूर्वन्नपूर्व्वागुणकाय उक्ता वर्गेषु सप्तस्विह गु-णसंज्ञाः । गुणाद्यागुणैस्तैस्वधिकारलब्धैरुक्तौ गुणैः स्यादथ मिश्रितैस्तैः । स्फुटोबुधैराश्रयसञ्चितोऽयमस्य स्फुटस्यापि

वधो भवेद् यः । तस्यैव मूलं खलु कर्मतोऽस्य आयुर्विधाने गुणकार उक्तः । ग्रहस्य लिप्ताः खखखिद्र २४०० भक्ताः प्रोक्ताः कलाः शेषमिहायुषोऽत्र । लग्नं ग्रहोनं यदि षड्भटेभ्यो हीनं तदानीं हरसंभवः स्यात् । नैवाधिके तत्र खगोनलग्ने लिप्तीकृते राशिकला १८०० विभक्ते । आयुःकलानां स हरः स्फुटः स्यात् रूपाद्यदाल्पः सहरस्तदानीम् । रूपादिशुद्धोगुणकस्तु तासामेवं हि पापद्युचरोनलग्ने । शुभोनलग्ने तु हरोद्विनिघ्न आयुः कलाभ्योहरलब्धलिप्ताः । विशोधनीया यदि रूपकोनोहरस्तदानीं गुणकेन गुण्यः । चक्रार्द्धहानौ बहुषु द्वयोर्वा द्युचारिणोरेकभटस्थयोस्तु । सत्याभिधानस्य मतेन सत्यं खांशं हरत्येव बलोत्कटोयः । एवं कार्या चक्रपातार्द्धहानिरायुर्दाये ह्यंशजे पिण्डजे च" इत्यंशायुः "नैसर्गाख्ये जीवशर्मोदिते च हारं कृत्वात्रैककोनोगुणः स्यात्" निसर्गायुर्विशेषः । "आयुर्लिप्ताः स्वगुणगुणिता व्योमभून्यास्त्रि २०० भक्ता अब्दामासादिवसघटिकाः स्युर्विनाड्यः क्रमेण" "एवं यथायथं गुणकगुणिता आयुर्लिप्ताः २०० भक्ता अब्दा भवन्ति शेषं विकला द्वादशभिर्गुणयित्वा षष्ट्या विभज्य लब्धं कलासु संयोज्य पुनरपि ताः कला द्विघ्न्या विभजेत् तेन मासा भवन्ति । पुनः शेषं त्रिंशता गुणयित्वा कलासु संयोज्य द्विघ्न्या भागे दिवसा भवन्ति पुनः शेषं षष्ट्यागुण्य कलासु संयोज्य द्विघ्न्या विभज्य लब्धं घटिका भवन्ति । एवं पलानि च" । "एवं सर्वं द्युचरजनितं ह्यायुरनीय लग्नादायुः साध्यं कथितविधिना किन्तु लग्ने विशेषः" । "एवं द्युगणजनितमिति रव्यादिग्रहस्फुटितं तेन तत्तद्ग्रहदत्तायुरुच्यते इत्यर्थः" । "लग्ने तु वीर्याभ्यधिके भतुल्यैर्वर्षैर्युतं तत्र विधेयमायुः । भागादिकाद्यनुपातलब्धं मासादिना संयुतमेव कार्यम्" वीर्याधिके षडधिके इत्यर्थः । अनुपातस्तु लग्नभागादि द्विगुणं कृत्वा पञ्चभिर्भक्त्वा लब्धं मासाः शेषं त्रिंशतागुण्य पञ्चभिर्भक्त्वा लब्धं दिनानि शेषं षष्ट्यागुण्य पञ्चभिर्भक्त्वा लब्धं घटिका एवं पलादिकमुन्नेयम् । एवं लग्नायुः" अथ रव्यादीनां पिण्डायुः । "नन्देन्दवो १९ वाणयमाः२५ शरच्छा१५ दिवाकराः १२ पञ्चभवः१५ कुपक्षाः २१ । नखास्त्र२० भास्तत्प्रसुखग्रहाणां पिण्डायुषोऽब्दा निजहृद्भगानाम् । निजोच्चशुद्धः खचरोविशोध्योभभक्तलात् षड्वनोनकश्चेत् । यथा स्थिः षड्वनाधिकस्तु विप्रीक्षतः संगुणितो निजाब्दैः । तत्र खाभ्ररसचन्द्रविलोकै २१६०० हृते सति यदाप्यते फलम् । वर्षमासदिननाड़िकाद्यं तद्धि पिण्डभवमायुरिष्यते" इति पिण्डायुः । "त्र्यंशुकं हरति शत्रुभे ग्रहः स्वायुषोऽत्र न तु वक्रचारगः । सूर्यलग्नकिरणोऽर्द्धहारकः प्रोज्झ्य भार्गवदिनेशनन्दनौ । खचरोजायते योऽर्द्धत्र्यंशयोरपहारकः । आयुषः स हरेदर्द्धं त्र्यंशं शुक्रशनैश्चरौ । प्राग्वत्फलानि खचरैर्विधाय तदैक्यतो यत्ग्रहसंख्ययाप्तम् । तदत्र ह्रासं बलिनो ग्रहस्य जगौ मणित्थोहरिरित्यमेव । हरयुतिर्विहृताग्रहसंख्यया स च हरोपचयश्च ततः फलम् । अधिकवीर्यवतोऽम्बरचारिणो निगदतीति मुनिः किल देवलः । लिप्तीभूतैर्लग्नभागैर्निहन्यादादायुर्दायं खेचराणां पृथक्स्थम् । व्योमाकाशर्त्विन्दुपक्षै२१६००र्भजेत्तं स्वायुर्दायात् शोध्यमब्दादि लब्धम् । एवं क्रूरे लग्नगे सौम्यदृष्टे तस्मिन्दाये तत्फलार्द्धं विशोध्यम् । एतद्दाये नांशसंज्ञे विधेयं पिण्डायुर्वत् कर्म नैसर्गिकेऽपि, अत्र विशेषो लघुपद्धतौ । "लग्नेदृग्शुभस्तदोदयगत्वात् हित्वांशनिघ्नं फलं क्रूरस्योदयभावजं यदि तनौ द्वौ तल्लिप्तस्य च । चेत् साम्येऽधिकभावजेन बलयोस्तेन ग्रहायुः कला निघ्नाः खाभ्ररसेन्दुदृक्ष २१६००विहृता लब्धं त्यजेत् स्वायुषः" । लग्नगपापस्य लग्ने सत्त्वे तु न त्यागः "योयो भावः स्वामिदृष्टो युतो वेत्यादिना" तस्य पुष्टत्वाभिधनात्, "क्रूरःसोऽपि शुभेक्षितो यदि तदा लब्धस्य खण्डं त्यजेत् नैतत् कर्म विलग्नगे तनुगते क्रूरेऽपि नांशायुषीत्युक्तेश्च" ग्रहाणां बलं च बलशब्दे वक्ष्यते । नखाः २०गश्नी १द्वौ २ नवकं ९धृतिश्च१८ क्षितिः २० खवाणाः५० रविपूर्वकाणाम् इयं निरुक्ताक्रमशोग्रहाणां नैसर्गिके ह्यायुषि वर्षसंख्या" । इति नैसर्गिग्रहदत्तायुः इदानीमंशायुःग्रभृतीनां कस्य कुत आह्यता तदाह । "अंशोद्भवं लग्नबलात् प्रसाध्यमायुश्च पिण्डोद्भवमर्कवीर्यात् । नैसर्गिकं चन्द्रमसोबलेन त्रयस्त्रयाणामथ वीर्यसाम्ये । अंशोद्भवं लग्नबलेन हन्यात् पिण्डाख्यमायुश्च बलेन भानोः । नैसर्गिकं चन्द्रमसो बलेन सर्वायुरेकत्र विधाय तानि । विलग्नतिग्मांशुहिमद्युतीनां हरेद्बलैक्येन ततो यदाप्तम् । वर्षाद्यमायुस्तदिह स्फुटं स्यात् श्रीनीलकण्ठाद्य एवमूचुः । लग्नसूर्यशशिनोबलशून्याः स्युर्यदात्र परमायुरगांशम्" हीनबलत्वमाह दामोदरः रूपत्रयाल्पं किल षड्बलैक्यं भवेद्विलग्नस्य खगस्य यस्य । स्वस्वामिना नो सहितो न दृष्टः स हीनवीर्यः कथितो-

मुनीन्द्रैः" । कैशवोऽपि "बाल्ये हीनबली बली षडधिके वीर्ये ग्रहोदयः" । "सर्व एव खचरा ददतीदं जीवग्रहर्गदितं हि तदायुः । ग्रहः खोच्चहीनः स चेत् षड्गटहीनो भचक्राद्विगोध्योऽथ भागीकृतः सन् । कुवेदर्त्तुनागै ८६४१ र्हृतो वेदखाब्धै ५०४ र्विभक्तोदिनाद्यम्भवत्येवमायुः" अहोभ्यः खरामै ३० र्हृतेभ्योऽधिमासाः यतर्क्षैश्च तेभ्योभवेयुस्तदाढ्याः । भचक्रार्द्धहान्यादिकोऽन्योविधिर्यः सपिण्डोऽब्दवायुर्वदेवात्र कार्यः इति । आयुःस्वर्थैतेषु बलाढ्यलग्ने विहाय राशीन् क्रतलिप्तिकोऽत्र भक्ते द्विशत्या २०० फलमब्दपूर्वं यत्स्यात् विलग्नायुषि तच्च योज्यम् । लग्नार्कयोरर्कशशाङ्कयोश्च लग्नोडुपत्योरपि वीर्यसाम्ये । तदायुषोरैक्यदलं भवेद्यत् तत् श्रीधराद्यैः स्फुटमायुरुक्तम्" इति लग्नायुः ।"ये धर्मकर्मनिरता विजितेन्द्रियाये ये पथ्यभोजनजुषोद्विजदेवभक्ताः । लोकोत्तरन्द्धति ये कुलशीलशीलां तेषामिदं कृदितमायुरुदारधीभिः"। अष्टवर्गादपि आयुर्दायज्ञानं भवति तच्चाष्टवर्गशब्दे उक्तप्रायम् । ५२२ पृष्ठे द्रष्टव्यम् नक्षत्रायुःकेन्द्रायुःप्रभृतीनां विस्तरभयादिहानुक्तिराकरे तच्च द्रष्टव्यम् ।

आयुर्द्रव्य न० आयुःसाधनं द्रव्यम् ष० त० । १औषधे रत्नमा० २आयुःसाधने घृते च "आयुर्वै घृतमित्युक्तेः घृतस्यायुर्जनकत्वात्तथात्वम् ।

आयुर्योग पु० उचितस्यायुषोज्ञापकः योगः । ज्योतिषोक्ते ग्रहयोगभेदे सचायुःशब्दे द्रष्टव्यः ।

आयुर्वृद्धि स्त्री आयुषो वृद्धिः । द्रव्यविशेषसेवनेनायुषो वृद्धौ तानि च द्रव्याणि कतिचिदुच्यन्ते । रस एव तावत् सर्वापेक्षयायुर्वृद्धिकरः "अभ्रकं तव बीजन्तु मम बीजन्तु पारदः । अनयोर्भोजनं देवि ! मृत्युदारिद्र्यनाशनम्" इति सर्व०द०गौरीं प्रति शिववाक्यम्" कर्मयोगेन देवेशि ! प्राप्यते पिण्डधारणम् । रसस्य पवनस्येति कर्मयोगो द्विधा स्मृतः । मूर्च्छितो हरति व्याधीन् मृतो जीवयति स्वयम् । बद्धः खेचरतां कुर्यादसो वायुश्च भैरवि !" इति सर्व०द० तन्त्रवाक्यम् । यथा च वायोर्निरोधेनैव आयुर्वृद्धिः । तथोक्तं काश्यो० "संनियम्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः । मध्यमश्चोत्तमं चाथ प्राणायामसुपक्रमेत् । चले ऽनिले चलं सर्वं निश्चलं तत्र निश्चले । स्थाणुत्वमाप्नुयाद्योगीततोऽनिलनिरोधनात् । यावद्देहे स्थितः प्राणो जीवितं तावदुच्यते । निर्गते तत्र मरणं ततः प्राणं निरोधयेत् । प्राणायामेन युक्तेन सर्व्वव्याधिक्षयोभवेत् अयुक्ताभ्यासयोगेन सर्वव्याधिसमुद्भवः" ततश्च प्राणायामस्य सर्वव्याधिहरत्वादप्यायुर्वृद्धिकरत्वम् । अस्यचायुर्वृद्धिकरत्वेऽन्यदपि कारणम् तथा हि "षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता । षष्टिर्नाड्यस्त्वहोरात्रो जपसंख्याक्रमोमतः । एकविंशतिसाहस्रं षट्शतानि महेश्वरि ! । जपति प्रत्यहं प्राणीवि"तन्त्रोक्ता २१६०० एतन्मिताः श्वासरूपाः प्राणक्रियाः अहोरात्रे भवन्ति वत्सरसंख्यया ३६० गुणितास्ताः ७७७६००० एतन्मिता वत्सरे भवन्ति । "शतायुर्वै पुरुष" इतिश्रुत्या मनुष्याणां स्वाभाविकशतायुष्ट्वोक्तेः शतेन गुणितास्ताः ७७७६०००० एतन्मिताः प्राणक्रिया मनुष्याणां जीवनकाले भवितुमर्हन्ति तत्र प्राणायामादिना प्राणवायोर्निरोधे प्राणक्रियायामुत्पन्नेः प्राणक्रियारोधकाले च यावत्यः प्राणक्रिया भवितुमर्हन्ति तावन्तःकालाआयुषो वर्द्धन्त इति । उक्ताः प्राणक्रियाश्च सुस्थस्यैव भवन्ति रोगाद्युपसर्गे शीघ्रधावनादिपरिश्रमे च प्राणक्रियाधिक्यं भवति तेन स्वल्पकालमध्ये यावत्प्राणक्रिया अपेक्षितास्तेभ्योन्यूनकालमध्ये तासामुत्पन्नावायुःक्षयः । शतायुष्ट्वञ्च स्वाभाविकं कर्म्मवशात् ततोन्यूनताऽपि जात्वायुर्भोगानां कर्म्मविपाकत्वस्य योगशास्त्रे उक्तेः । तादृशात्प्रायुर्वृद्धिसूचको ग्रहविशेषयोगादिर्ज्योतिषे उक्तः । अत्रदोषादीनाञ्चात्प्रायुर्वृद्धप्रयोजकत्वं सूत्रयुक्तमदृष्टद्वारैव । वैद्यकोक्तापथ्यभोजनस्य तथात्वञ्च रोगोत्पत्तिद्वारेति भेदः। रोगोपसृष्टदेहं च जीवो दुःखहेतुत्वात् वज्रपाद्युपद्रुतदेहवत् शीघ्रं परित्यजतीति । तथा च देहो यथा न रोगादिभिरुपसृज्येत" तथा यतितव्यमित्येतदर्थं शास्त्रेषु पथ्योपदेशः इति बोध्यम् । एवं खेचरीमुद्रादीनामप्यायुर्वृद्धिकरत्वम् काशी० उक्तम् । "कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता-दृष्टिर्मुद्रा भवति खेचरी । न पीड्यते स रोगेण न च लिप्येत कर्म्मणा । बाध्यते न स कालेन योमुद्रां वेत्ति खेचरीम् । चित्तं चरति खे यस्माज्जिह्वा चरति खे गता । तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता । यावद्विन्दुः स्थिरोदेहे तावन्मृत्युभयं कुतः । यावद्बद्धा नभोमुद्रा तावद्विन्दुर्न गच्छति । उड्डीनं कुरुते यस्मादहोरात्रं महाखगः । उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते । जठरे पश्चिमं जानु नाभेरूर्द्ध्वञ्च धारयेत् । उड्डीयानं ह्ययं बन्धोमृत्योरपि भयं जयेत् । बध्नाति हि शिराजालं अधोगामि नभोजनम् । एष जालन्धरोबन्धः कण्ठे दुःखौघनाशनः । जालन्धरे कृते बन्धे कण्ठसंकोचलक्षणे ।

न पीयूषं पतत्यग्नौ न च वायुः प्रधावति। पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम्। अपानमूर्ध्वमाकृष्य मूलबन्धोऽभिधीयते। अपानप्राणयोरैक्यं क्षये मूत्रपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्"। एवमन्यान्यपि स्वास्थ्यानि कर्माणि आयुर्वृद्धिकराणि "मत्स्यान् मोचयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते""आयुष्यं प्राङ्मुखोभुङ्क्ते" इत्यादीनि।

रसवत् अन्यान्यपि द्रव्याणि सेवितानि आयुर्वृद्धिकराणि श्रुत्युक्तानि दर्शितानि तानि रसतुल्यतया रसायनानि यथा

"अथातः सर्व्वौषधातशमनीयं रसायनं व्याख्यास्यामः। पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम्। प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा। नाविशुद्धशरीरस्य युक्तो रसायनो विधिः। न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः। शरीरस्योपघाता ये दोषजा मानसास्तथा। उपदिष्टाः प्रदेशेषु तेषां वक्ष्यामि वारणम्। शीतोदकं पयः क्षौद्रं सर्पिरित्येकशो द्विशः। त्रिशः समस्तमथ वा प्राक् पीतं स्थापयेद्वयः। तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत शीततोयं चानुपिबेद्वेवमहरहर्मासं तद्वेव मधुयुक्तं भल्लातकक्वाथेन वा मधुद्राक्षाक्वाथयुक्तं वा मध्यामलकरसाभ्यां वा गुडूचीक्वाथेन वा। एवमेते पञ्च प्रयोगा भवन्ति जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन हृतवन्मोदनमश्नीयात्। एते खल्वग्नींश्च वपयन्ति क्रमोनुपघ्नन्ति अक्षणधारणशक्तिं जनयन्ति मासेमासे प्रयोगे वर्षशतमायुषोऽभिवृद्धिर्भवति। विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत्स्वेद्य विगतकषायं स्विन्नमवतार्य्य हृषदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्रावृषि भरराशावन्तर्गृहे चतुरो मासान्निदध्यात् वर्षाविगमे चोद्धृत्योपसंस्कृतशरीरः सकृत्सप्तसप्तताभिहुतं कृत्वा प्रातः प्रातर्यथाबलमुपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन हृतवन्मोदनमश्नीयात् पांशुशय्यायां शयीत। तस्य मासादूर्द्ध्वं सर्वाङ्गेभ्यः क्रमशो निःक्रामन्ति तानणुतैलेनाभ्यक्तस्य वंशविदलेना परहरेत्। द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत् चतुर्थे दन्तनखरोमाण्यवशीर्य्यन्ते पञ्चमे प्रशस्तगुणलक्षणानि जायन्ते। अमानुषं चादित्यप्रकाशं वपुरधिगच्छति दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति रजस्तमसी चापोह्य सत्वमधितिष्ठति। श्रुतिनिगाद्यपूर्वोत्पादो गजवल्लोऽजवः; पुनर्युवादौ वर्षशतान्यायुरवाप्नोति। तस्याणुतैलमभ्यङ्गार्थे। अजकर्णकषायमुत्सादनार्थे सौगीरं, कूपोदकं स्नानार्थे, चन्दनमुपलेपनार्थे, भल्लातकविधानवदाहारः परिहारश्च। काश्मर्य्याणां निष्कुलीकृतानामेष एव कल्पः पांशुशय्याभोजनवर्जम्। अत्र हि पयसा प्लुतेन भोक्तव्यम् आश्विनश्च पूर्वेण समानाः। शोणितपित्तनिमित्तेषु विकारेषु तेषामुपयोगः। यथोक्तमागारं प्रविश्य बलामूलार्द्धपलं पलं वा पयसालोड्य पिबेत्। जीर्णे पयः सर्पिरोदनइत्याहारः। एवं द्वादशरात्रमुपयुज्य द्वादश वर्षाणि वयस्तिष्ठति। एवं द्विःसप्ततमुपयुज्य वर्षशतं वयस्तिष्ठति। एवमेवातिबलानागबलाविदारीशतावरीणामुपयोगः। विशेषतस्त्वतिबलामुदकेन, नागबलाचूर्णं मधुना, विदारीचूर्णं वा क्षीरेण, शतावरीमप्येवं, पूर्वेणान्यत् समानमाश्विनश्च समाः। एतास्त्रीषधयो बलकामाणां शोणितं ऊर्द्धयतां विरिच्यमानानां चोपदिश्यन्ते। वाराहीमूलतुलाचूर्णं कृत्वा ततोमात्रां मधुयुक्तां पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदनइत्याहारः। प्रतिषेधोऽत्र पूर्ववत् क्रियाप्रयोगमुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चाक्षयताम्। एतेनैव चूर्णेन पयोऽवचूर्णहृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायम्प्रातरेककालं वा जीर्णे पयःसर्पिरोदन इत्याहारः। एवं मासमुपयुज्य वर्षशतायुर्भवति। जीर्णे पयः सर्पिरोदन इत्याहारः। चक्षुःकामः प्राणकामो वा बीजकसारारिष्टमन्यमूलं निःक्वाथ्य माषप्रस्थं साधयेत् तस्मिन्सिध्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागं ततः स्विन्नमवतार्य्य सकृत्सप्तसप्ताभिहुतं कृत्वा शीतीभूतं मधुसर्पिर्भ्यां सकृज्जोपयुञ्जीत यथाबलं लवणं परिहरन् भक्षयेत् जीर्णे मुद्गामलकयूषेणालवणेन हृतवन्मोदनमश्नीयात् पयसा वा मासमेवमाभ्यां प्रयोगाभ्यां चक्षुःसौपर्ण्यं वज्रवल्यनल्पबलो बलवान् स्त्रीषु चाक्षयो वर्षशतायुर्भवतीति। भवति चात्र। पयसा सह सिद्धानि नरः सनफलानि यः। भक्षयेत् पयसा सार्द्धं वयस्तस्य न शीर्य्यते।

अथातो मेधायुष्कामीयं रसायनं चिकित्सितं व्याख्यास्यामः। मेधायुःकामः श्वेतवल्लजफलान्यातपपरिशुष्काण्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सह समालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात् सप्तरात्रादुद्धृत्य हृतदोषस्य यथाबलं पिण्डं प्रयच्छेदुदिते सूर्य्ये उष्णोदकं चानुपिबेत्। भल्लातकविधान-

वेश्मागारप्रवेशो जीर्णौषधस्यापराह्णे हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टिकानां च पयसा शर्करामधुरेणौदनमश्नीयादेवं षण्मासानुपयुञ्ज्य विगतपाप्मा बलवर्णोपेतः श्रुतिनिगादी स्मृतिमानरोगो वर्षशतायुर्भवति। कुष्ठिनं पाण्डुरोगिणमुदरिणं वा क्षणाया गोर्मूत्रेणालोड्यार्द्धपलिकं पिण्डं विगतलौहित्ये सवितरि पाययेत, अपराह्णे चालवणेनामलकयूषेण सर्पिर्भुक्तमोदनमश्नीयात्। एवं मासमुपयुज्य स्मृतिमानरोगो वर्षशतायुर्भवति एष एवोपयोगश्चित्रकमूलानां, रजन्याश्चित्रकमूले विशेषो द्विपलिकं पिण्डं परं प्रमाणं शेषं पूर्ववत्।

हृतदोष एव प्रतिसंस्कृतभक्तो यथाक्रममागारं प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्मिताभिर्भृतं कृत्वा यथाबलं पयसालोड्य पिबेत् पयोऽनुपानं वा तस्यां जीर्णायां यथार्हं पयसोपयुञ्जीत तिलैर्वा सह भक्षयित्वा लोनमासान् पयोऽनुपानं जीर्णे पयः सर्पिरोदन इत्याहारः। एवमुपयुञ्जानः ब्रह्मवर्चसी श्रुतनिगादी भवति वर्षशतमायुरवाप्नोति त्रिरात्रोपोषितश्च त्रिरात्रमेनां भक्षयेत्। त्रिरात्रादूर्ध्वं पयःसर्पिरिति चोपयुञ्जीत। विल्वमात्रं पिण्डं वा पयसालोड्य पिबेदेवं दशरात्रमुपयुञ्ज्य मेधावी वर्षशतायुर्भवति। हृतदोष एवागारं प्रविश्य प्रतिसंस्कृतभक्तो ब्राह्मीस्वरसमादाय सहस्रसम्मितामिर्भृतं कृत्वा यथाबलमुपयुञ्जीव जीर्णौषधस्यापराह्णे यवागूमलवणां पिबेत् क्षीरसात्म्यो वा पयसा भुञ्जीत। एवं सप्तरात्रमुपयुज्य ब्रह्मवर्चसी मेधावी भवति। द्वितीयं सप्तरात्रमुपयुज्य अन्यमीप्सितमुत्पादयति। नष्टश्चास्य प्रादुर्भवति। तृतीयं सप्तरात्रमुपयुज्य द्विसहस्रजितं शतमध्यवधारयति। एवमेकविंशतिरात्रमुपयुज्यालक्ष्मीरपक्रामति मूर्त्तिमती चैनं वाग्देव्यनुप्रविशति सर्वाश्चैनं श्रुतय उपतिष्ठन्ति। श्रुतधरः शतवर्षशतायुर्भवति। ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं विड्भृतखण्डानां कुडवं द्वे द्वे पले वचात्रिफलायोर्द्वादश हरीतक्यामलकयोर्भीतकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा खनुगुप्तं निदध्यात्। ततः पूर्वविधानेन मात्रां यथाबलमुपयुञ्जीत जीर्णे पयःसर्पिरोदन इत्याहारः। एतेनोर्ध्वमधस्तिर्यक्कृमयो निःक्रामन्ति अलक्ष्मीरपक्रामति। पुष्करकर्ण-स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवत्येतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतग्रहेष्वन्येषु च संज्ञाव्याधिषु च संशोधनमादिशन्ति। हृतदोष एवागारं प्रविश्य क्वथ्यैकत्वा वचायाः पिण्डमामलकमात्रमभिभृतं पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदन इत्याहारः। एवन्दशरात्रमुपयुञ्जीत ततोऽस्य श्रोत्रं विप्रियते द्विरभ्यासात् स्मृतिमान् भवति त्रिरभ्यासाच्छतमादत्ते चतुर्दशरात्रमुपयुज्य सर्वं तरति किल्बिषं तार्क्ष्यदर्शनमुत्पद्यते शतायुश्च भवति। द्वे द्वे पले इतरस्या वचाया निःक्वाथ्य पिबेत् पयसा समानं भोजनं समाः पूर्ववेषाशिषश्च। वचाशतपाकंवा सर्पिर्द्रोणमुपयुज्य पञ्चवर्षशतायुर्भवति गलगण्डापचीक्ष्वीपदस्वरभेदांश्चापहन्तीति।

अथायुःकामीयं वक्ष्यामः। मन्त्रौषधसमायुक्तं संवत्सरफलप्रदम्। विल्वस्य चूर्णं पुष्ये तु हृतं वारान् सहस्रशः। श्रीसूक्तेन नरः कल्ये सशुवर्णं दिने दिने। सर्पिर्मधुयुतं लिह्यादलक्ष्मीनाशनं परम्। त्वचं विल्वस्य मूलस्य मूलकाथं दिने दिने। प्राश्नीयात् पयसा सार्द्धं स्नात्वा हुत्वा समाहितः। दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत्। हुत्वा त्रिशालाकाक्षायन्तु मधुलाजैश्च संयुतम्। अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतम्। सुवर्णपद्मबीजानि मधुलाजाः प्रियङ्गवः। गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत्। नीलोत्पलदलक्काथो गव्येन पयसा स्मृतः। सशुवर्णतिलैः सार्द्धमलक्ष्मीनाशनः स्मृतः। गव्यं पयः सुवर्णञ्च मधूच्छिष्टञ्च माक्षिकम्। पीतं शतसहस्राभिर्भृतं युक्तरथं स्मृतम्। वचाष्टसुवर्णञ्च विल्वचूर्णमिति त्रयम्। मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्द्धनम्। वासामूलत्वक्काथे तैलमावाप्य साधितम्। हुत्वा सहस्रमश्नीयान्मेध्यमायुष्यमुच्यते। यावकांस्तावकान्मूलेदभिभूय यवांस्तथा। पिप्पलीमधुसंयुक्तान् शिक्षाचरणवद्भवेत्। सध्यामलकचूर्णानि सुवर्णमिति च त्रयम्। प्राश्यारिष्टस्त्रीतोऽपि मुच्यते प्राणसंशयात्। शतावरीशतं सम्यगुपयुक्तं दिने दिने। सक्षौद्रं सशुवर्णं च नरेन्द्रं स्थापयेद्वशे। गोचन्दनामोचनिकामधूकं माक्षिकं मधु। सुवर्णमिति संयोगः श्रेयः सौभाग्यमिच्छता। पद्मनीलोत्पलक्काथे यष्टीमधुकसंयुते। सर्पिरासादितं गव्यं सशुवर्णं सदा पिबेत्। पयसानुपिबेत् सिद्धं तेषामेव समुद्भवे। अलक्ष्मीघ्नं सदायुष्यं राज्याय सुभगाय च। यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने। यद्दिष्टा तत्र सर्वत्र गायत्री त्रिपदी भवेत्। प्राणान् नाशयन्त्येता दश्युश्चौषधयः स्त्रियम्। कुर्युर्नागबलं चापि मनुष्यमरोपमम्। सततोऽध्ययनं वादः परतन्त्रावलोकनम्। तद्विद्याचार्यसेवा च बुद्धिमेधाकरोगणः। आयुष्यं भोजनं जीर्णे वैगाजाश्चाविधा-

रणम्। ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्जनम्"। एवम् "सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतसुण्ठोदकं चैव सद्यः प्राणकराणि षट्" इत्याद्युक्तानि सुश्रुते हिताहितीयाध्याये हिततया चोक्तानि च आयुर्वृद्धिकराणि।

आयुर्वेद पु० आयुर्विद्यते लभ्यतेऽनेन विद्–लाभे करणे घञ् आयुर्वेत्यनेन चिङ्ज्ञापनेन विद्–ज्ञाने करणे घञ् वा। चिकित्साशास्त्रे तच्चिरुक्त्यादिकं सुश्रुते दर्शितं यथा। "शल्यं शालक्यमित्यादि अष्टाङ्गशब्दे ५२२पृष्ठे उक्तमुपक्रम्य "इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यतेऽनेन वा आयुर्व्विन्दतीत्यायुर्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय। एतद्ब्राह्मं प्रथमं प्रागभिघातव्रणसंरोहाद्यत्रशिरःसन्धानाच्च। श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरःसन्धातव्यम्। तावूचतुरेवमस्विति। अथ तयोरर्थे देवा इन्द्रयज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरःसंहितमिति। अष्टाखपि चायुर्व्वेदतन्त्रेष्वेतदेवाधिकमभिमतमाशुक्रियाकरणाद्यन्त्रशस्त्रक्षाराग्निप्रणिधानात्सर्व्वतन्त्रसामान्याच्च। तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुर्ध्यं दृत्तिकरञ्चेति। ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेय मर्षिभ्यः प्रजाहितहेतोः। भवति चात्र। अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणाम्। शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूय इहोपदेष्टुम्"।

स चाथर्ववेदस्योपवेदः "विधाताथर्व्वसर्व्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमजम्" इति भावप्रकाशोक्तेः। चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्वेदः अथर्ववेदस्य तु शस्त्रशास्त्राणुपवेदः। स च षोडशधिप्रणीतत्वात् षोडशविधः यथोक्तं ब्रह्मवै० पु० "ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः। विचिन्त्य तेषामर्थं चैवायुर्वेदं चकार सः। कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः। स्वतन्त्रं संहितां तस्मात् भास्करश्च चकार सः। भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम्। प्रददौ पाठयामास ते चक्रुः संहितास्ततः। तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च। व्याधिप्रणाशबीजानि साध्वि! मत्तो निशामय। धन्वन्तरिर्हि दिवोदासः काशीराजोऽश्विनीसुतौ। नकुलः सहदेवार्कौ च्यवनो जनको बुधः। जाबालो जाजलिः पैलः करथोऽगस्त्यएव च। एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः। चिकित्सातत्त्वविज्ञानं नाम तन्त्रमनौपमम्। धन्वन्तरिश्च भगवान् चकार प्रथमे सति।। चिकित्सादर्पणं नाम दिवोदासश्चकार सः। चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः। चिकित्सासारतन्त्रञ्च भग्नं चाश्विनीसुतौ। तन्त्रं वैद्यकसर्वस्वं नकुलश्च चकार सः। चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम्। ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः। च्यवनो जीवदानञ्च चकार भगवान्ऋषिः। चकार जनको योगी वैद्यसन्देहभञ्जनम्। सर्वसारं चन्द्रसुतो जाबालस्तन्त्रसारकम्। वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः। पैलो निदानं करथस्तन्त्रं सर्वधरं परम्। द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः। चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श। व्याधिप्रणाशबीजानि बलाधानकराणि च। मथित्वा ज्ञानसन्धानैरायुर्वेदपयोनिधिम्। ततस्तन्त्राणुद्धृत्यहरुर्नवनीतानि कोविदाः। एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम्। आयुर्वेदं सर्व्वबीजं सर्व्वं जानासि सुन्दरि!। व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः। आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्। धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"। तस्य लक्षणं यथा भा० प्र०। "आयुर्हिताहितं व्याधिनिदानं शमनं तथा। विद्यन्ते यत्र विद्वद्भिः स आयुर्वेद उच्यते" तस्य निरुक्तिस्तत्रैव। "अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च। तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः"। "देहजीवयोर्योगोजीवनं तेनावच्छिन्नः काल आयुः आयुर्बोधद्वारा आयुष्याण्यनायुष्याणि द्रव्यगुणकर्म्माणि ज्ञात्वा तेषां सेवनत्यागाभ्याम् आरोग्येणायुर्विन्दति तेनैव हेतुना परस्यायुर्वेत्ति च येन तद्बोधद्वारा स आयुर्वेदः" भा० प्र० अथायुर्वेदवंशप्रादुर्भावस्तावदभिधीयते यथा भावप्र० "विधाताऽथर्व्वसर्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्नासंहिताञ्चक्रे लक्षश्लोकमयीमजम्। ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु। विधिधीनीरधिः साङ्गमायुर्वेदमुपादिशत्। अथ दक्षप्रादुर्भावः। अथ दक्षः क्रियादक्षः सर्वेद्योदेववल्लभः। वेदयामास विद्वांसौ सूर्य्यांशौ सुरसत्तमौ।

अथाश्विनप्रादुर्भावः "दक्षादधीत्य दक्षौ वितेनतुः संहितां क्षीयाम्। सकलचिकित्सकलोकप्रतिपत्तिविदग्धे धन्याम्। स्वयम्भुवः शिरश्छित्त्वा भैरवेण रुषाथ तत्। अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ। देवासुररणे देवा दैत्यैर्यै सङ्गताः कृताः। अक्षतास्ते कृताः सद्योदक्षाभ्यामङ्गुतं महत्। वज्रिणोऽभूद्भुजस्तम्भः स दक्षाभ्यां चिकित्सितः। सोमे निपतिते चेन्द्रस्ताभ्यामेव सुखीकृतः। विशीर्णदशनाः पूष्णोनेत्रे नष्टे भगस्य च। यज्ञिनोराजयक्ष्माभूदश्विभ्यान्ते चिकित्सिताः। भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः। वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा। एतैश्चान्यैश्च बहुभिः कर्म्माभिर्भिषजां वरौ। बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम्। अथेन्द्रप्रादुर्भावः। संदष्य दक्षयोरिन्द्रः कर्माण्येतानि यत्नवान्। आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः। नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ। आयुर्वेदं यथाधीतं ददतुः शतमन्यवे। नासत्याभ्यामधीत्यैष आयुर्वेदं शतक्रतुः। अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन्। अथात्रेयप्रादुर्भावः। एकदा जगदालोक्य गदाकुलमितस्ततः। चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः। किं करोमि क्व गच्छामि कथम् लोका निरामयाः। भवन्ति, सामयानेतान् शक्नोमि निरीक्षितुम्। दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः। एतेषां दुःखतोदुःखं ममापि हृदयेऽधिकम्। आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणाम्। इति निश्चित्य गतवानात्रेयस्त्रिदशालयम्। तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः। सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः। भासयन्तं दिशोभासा भास्करप्रतिमत्विषा। आयुर्वेदमहाचार्यं शिरोधार्य्यं दिवौकसाम्। शक्रस्तु तं निरीक्ष्यैव त्यक्त्वासिंहासनो ययौ। तदग्रे पूजयामास ह्यर्घं भूरितपस्यम्। कुशलं परिपप्रच्छ तथाऽऽगमनकारणम्। स मुनिर्वक्तुमारेभे निजागमनकारणम्। व्याधिभिर्व्यथिताल्लोकाः शोकाकुलितचेतसः। भूतले सन्ति, सन्तापं तेषां हर्त्तुं क्षमां कुरु। आयुर्वेदोपदेशं मे कुरु कारुण्यतो नुताम्। तथेत्युक्तः सहस्राक्षोऽध्यापयामास तं मुनिम्। मुनीन्द्र इन्द्रतः साङ्गमायुर्वेदमधीत्य सः। अभिनन्द्य तमाशीर्भिराजगाम पुनर्महीम्। अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः। स्वनाम्ना संहितां चक्रे नरचक्रानुकम्पया। ततोऽग्निवेशं भेड़ं च जातूकर्णं पराशरम्। सीरपाणिं च हारीतमायुर्वेदमपाठयत्। तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत्पुरा। ततोभेड़ादयश्चक्रुः स्वस्वतन्त्रं, कृतानि तु। श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम्। श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः। यथावत्पूजितस्तस्मात्प्रहृष्टास्तनयोऽभवन्। दिवि देवर्षयोदेवाः श्रुत्वासाध्विति तेऽब्रुवन्"। अथ भरद्वाजप्रादुर्भावः "एकदा हिमवत्पार्श्वे देवादागताः मुनयोबहवस्तांश्च नामभिः कथयाम्बभूवुः भरद्वाजोमुनिवरः प्रथमं समुपागतः ततोऽङ्गिरास्ततोगर्गो मरीचिर्भृगुभार्गवौ। पुलस्त्योऽगस्तिरसितोवशिष्ठः सपराशरः। हारीतोगौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च। जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च। नारदो वामदेवश्च मार्कण्डेयः कपिष्ठलः। माण्डिल्यः सह कौण्डिल्यः शाकुनेयश्च गौनकः। आश्वलायनसाङ्कृत्यौ विश्वामित्रः परीक्षितः। देवलोगालवोधौम्यः काप्यकात्यायनस्तथा। काङ्कायनो वैजवापः कुशिकोवादरायणिः। हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः। वैखानसाबालखिल्यास्तथैवान्ये महर्षयः। ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च। तपन्तस्तेजसा दीप्ताहूयमाना इवाग्नयः। सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमाम्। धर्म्मार्थकाममोक्षाणां मूलमुत्तमं कलेवरम्। तच्च संसिद्धये शक्तं भवेद्यदि निरामयम्। तपःस्वाध्यायधर्माणां ब्रह्मचर्य्यव्रतायुषाम्। हर्त्तारः पुरतीरोगा यत्र तत्र च सर्वतः। रोगाःकार्श्यकरावल्यक्षयकरादेहस्य चेष्टाहरा दृष्ट्यादीन्द्रियशक्तिसंक्षयकराः सर्वाङ्गपीड़ाकराः। धर्म्मार्थाखिलकामसंक्षिषु महाविघ्नस्वरूपाबलात्प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम्। तत्तेषां प्रशमाय कञ्चन विधिञ्चिन्त्योभवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिन्तेऽब्रुवन्। त्वं योग्यो भगवन्! सहस्रनयनं याह्येहि शीघ्रंक्रमादायुर्वेदमधीत्य यद्वदभयान्मुक्ता भवामोवयम्। इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः। भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम्। तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम्। दृष्टवान् दृतहन्तारं दीप्यमानमिवानलम्। सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्। ऋषीणां वचनं सम्यक् श्रावयामास सत्तमः। व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः। तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि। तमुवाच मुनिं साङ्गमायुर्वेदं शतक्रतुः। जीवेद्वर्षसहस्राणि देही नीरुङ्निशम्य यम्। सोऽनल्पारम्भिस्वभावमायुर्वेदं महामतिः। यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः। तेनायुः सुचिरं लेभे भरद्वाजो निरामयम्। अन्यानपि मुनीँश्चक्रे नीरुजः सुचिरायुषः।

तत्तन्मनजनितज्ञानचक्षुषा ऋषयोऽखिलाः। गुणान् द्रव्याणि कर्माणि दृष्ट्वा तद्विधिमाश्रिताः। आरोग्य लेभिरे दीर्घमायुश्च सुखसंयुतम्। आयुर्वेदोक्तविधिनाऽन्येऽपि सुर्मुनयो यथा"।

अथ चरकप्रादुर्भावः "यदा मत्स्यावतारेण हरिणा वेद उद्धृतः। तदा शेषश्च तत्रैव वेद साङ्गमवाप्तवान्। अथवाऽन्तर्गतं सम्यगायुर्वेदं च लब्धवान्। एकदा स महोदत्तं द्रष्टुं चर इवागतः। तत्र लोकान् गदैर्ग्रस्तान्व्यथया परिपीड़ितान्। द्रुमान् स्खलेषुपुष्पाढ्यान् म्रियमाणांश्च दृष्टवान्। तान् दृष्ट्वा तु दयायुक्तस्तेषां दुःखेन दुःखितः। अचिन्तयिन्तयामास रोगोपशमकारणम्। सचिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह। यतश्चर इवागतेन जातः केनचिद्यतः। तस्माच्चरकनाम्नाऽसौ विख्यातः क्षितिमण्डले। स भाति चरकाचार्यो देवाचार्यो यथा दिवि। सहस्रवदनस्यांशो येन ध्वंसोरुजां कृतः। आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्। मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम्। तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता। चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः। अथ धन्वन्तरिप्रादुर्भावः। एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीड़िताः। तान् दृष्ट्वा हृदयं तस्य दयया परिपीड़ितम्। दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह। धन्वन्तरे! सुरश्रेष्ठ! भगवन्! किञ्चिदुच्यते,। योग्योभवसि भूतानामुपकारपरोभव। उपकाराय लोकानां केन किं न कृतं पुरा। त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान्। तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपोभव। प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय। इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया। समस्तमायुषोवेदं धन्वन्तरिमुपादिशत्। अधीत्य चायुषोवेदमिन्द्राद्धन्वन्तरिः पुरा। आगत्य पृथिवीं काश्यां जातोबाल्जवेश्मनि। नाम्ना ततोऽभवत् ख्यातोदिवोदास इति क्षितौ। बालएव विरक्तोभूच्चचार च महत्तपः। यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्। ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते। हिताय देहिनां स्रोया संहिता विहिताऽनया। अयं विद्यार्थिनो लोकान् संहितां तामपाठयत्"। अथ सुश्रुतप्रादुर्भावः। अथ ब्रह्मदृशा विश्वामित्रप्रभृतयोऽवदन्। अयं धन्वन्तरिः काश्यां काशीराजोय उच्यते। विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान्। वत्स! वाराणसीं गच्छ विश्वेश्वरवल्लभाम्। तत्र नाम्ना दिवोदासः काशीराजोऽस्ति बाल्जः। स हि धन्वन्तरिः साक्षादायुर्वेदविदांवरः। आयुर्वेदं ततोऽधीष्व लोकोपकृतिहेतवे। सर्वप्राणिदयातीर्थमुपकारोमहामखः। पितुर्वचनमाकर्ण्य सुश्रुतः काशिकाङ्गतः। तेन सार्द्धं समध्येतुं मुनिसप्ततयो ययौ। अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम्। भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम्। काशीराजं दिवोदासन्तेऽपश्यन् विनयान्विताः। स्वागतं च इति स्माह दिवोदासोयशोधनः। कृशलं परिपप्रच्छ तथाऽऽगमनकारणम्। ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम्। भगवन्मानवान्दृष्ट्वा व्याधिभिः परिपीड़ितान्। क्रन्दतोम्रियमाणांश्च जातास्माकं हृदि व्यथा। आमयानां शमोपायं विज्ञातुं वयमागताः। आयुर्वेदं भवानस्मानध्यापयितुमर्हति। अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत्। व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयोमुदा। काशीराजं जयाशीर्भिरभिनन्द्य मुदान्विताः। सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकम्। प्रथमं सुश्रुतस्तेषु स्वतन्त्रं कृतवान् स्फुटम्। सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे। सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः। तस्माच्चत् सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले" चरके तु आयुर्वेदनिरुक्तिस्तत्प्रणेतृवंशोऽन्यथाभ्यधायि यथा "ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः। जग्राह निखिलेनादावश्विनौ तु पुनस्ततः। अश्विभ्यां भगवान् शक्रः प्रतिपेदे ह केवलम्। ऋषिप्रोक्तोभरद्वाजस्तस्माच्छक्रमुपागमत्" ब्रह्मादिभारद्वाजान्तवंशमुक्त्वा ततो यथा भरद्वाजस्य प्राप्तिस्तदपि तत्रैवोक्तम्। यथा कतिचिन्मुनीनुपक्रम्य 'ब्रह्मज्ञानस्य निधयोयमस्य नियमस्य च। तपस्तेजआदीप्राहूयमाना इवाग्नयः। सुखोपविष्टास्ते तत्र पृच्छां चक्रुः कथामिमाम्। धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्। रोगास्तस्यापहन्तारः श्रेयसोजीवितस्य च। प्रादुर्भूतोमनुष्याणामन्तरायोमहानयम्। क. स्मात्तेषां शमोपायइत्युक्त्वा ध्यानमास्थिताः। अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा। स वक्ष्यति शमोपायं यथावदमरप्रभुः। कः सहस्राक्षभवनं गच्छेत् द्रष्टुं शचीपतिम्। अस्मदर्थे नियुज्येयमत्रेति प्रथमं वचः। भरद्वाजोऽब्रवीत्तस्मादृषिभिः स नियोजितः। स शक्रभवनं गत्वा सुरर्षिगणमध्यगम्। ददर्श बलहन्तारं दीप्यमानमिवानलम्। सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्। प्रोवाच भगवान्धीमान् ऋषीणां वाक्यमुत्तमम्। व्याधयोहि समुत्पन्नाः सर्वप्राणिभयङ्कराः। तदुब्रूहि मे शमोपायं यथावदमरप्रभो!।

तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः। पदैरल्पैर्मतिं बुद्ध्वा विपुलां प्रेरमर्षये। हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्। त्रिस्कन्धं शाश्वतं पुण्यं बुबुधे यं पितामहः। सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः। यथावदधिरात् सर्वं बुबुधे तन्मना मुनिः। तेनायुरमितं लेभे भरद्वाजः सुखान्वितम्। ऋषिभ्योऽनधिकं तन्तु यशासानवशेषयन्। ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम्। दीर्घमायुश्चिकीर्षन्तो वेदं वर्द्धनमायुषः। तेनर्षयस्ते दृष्टार्थाश्चक्षुर्ज्ञानचक्षुषा। सामान्यञ्च विशेषञ्च गुणान् द्रव्याणि कर्म च। समवायञ्च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः। लेभिरे परमं धर्मं जीवितञ्चाप्यनश्वरम्। अथ मैत्रेयपरः पुण्यमायुर्वेदं पुनर्वसुः। शिष्येभ्योदत्तवान् षड्भ्यः सर्वभूतानुकम्पया। अग्निवेशश्च भेड़श्च जातूकर्णः पराशरः। हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः। बुद्ध्वा विशेषस्तत्रासौ चोपदेशान्तरं मुनेः। तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽतोऽभवत्। अथ भेड़ादयश्चक्रुः स्वं स्वं तन्त्रं। कृतानि च। आवयामासुरात्रेयं सर्षिसङ्घं सुमेधसः। श्रुत्वा च सूत्रमर्थानामृषयः पुण्यकर्मणाम्। यथावत् सूत्रितमिति प्रहृष्टास्तेऽनुमेनिरे"। एवमायुर्वेदसंज्ञा तस्य निरुक्तिस्तत्र दर्शिता यथा "हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्। मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते। शरीरेन्द्रियसत्त्वादिसंयोगधारि जीवितम्। नित्यगस्वानुबन्धश्च पर्यायैरायुरुच्यते। तस्यायुषः पुण्यतमो वेदो वेदविदां मतः। वक्ष्यते यन्मुष्याणां लोकयोरुभयोर्हितः"।

एवं बहूनामायुर्वेदानां सत्त्वेऽपि तेषां विरलप्रचारतया लुप्तप्रायत्वात् सुश्रुतचरकयोर्लोके प्रचाराच्च तत्तत्विषयास्तावत् संक्षेपेणोच्यन्ते। तत्र सुश्रुतस्यायुर्वेदस्याष्टाङ्गत्वम् तच्च अष्टाङ्गशब्दे ५२३ पृष्ठे शल्यं शालक्यमित्यादि दर्शितम्। तच्चास्यास्य प्रयोजनं रोगचिकित्सा सा च पुरुषविषयैवेति पुरुषस्वरूपतदुत्पत्तिगर्भादिक्रमेणाभिधाय तदीयशरीरसंस्थानं रोगनिदानरोगोपशमनद्रव्यादि दीनि क्रमेणोक्तानि। तदेतत् संक्षेपेण सुश्रुते उक्तम् "अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुषः इत्युच्यते। यस्मिन् क्रिया सोऽधिष्ठानम्, कस्मात्? लोकस्य द्वैविध्यात्। लोको हि द्विविधः स्थावरो जङ्गमश्च। द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात्। पञ्चात्मको वा। तत्र चतुर्विधो भूतग्रामः स्वेदजाण्डजोद्भिज्जजरायुजसंज्ञः। तत्र पुरुषः प्रधानं तस्योपकरणमन्यत्। तस्मात्पुरुषोऽधिष्ठानम्। तद्दुःखसंयोगा व्याधय इत्युच्यन्ते। ते चतुर्विधा आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति। तेषामागन्तवोऽभिघातनिमित्ताः। शारीरास्त्वन्नपानमूला वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः। मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतयश्चेच्छाद्वेषभेदैर्भवन्ति। स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः। त एते मनःशरीराधिष्ठानाः। तेषां संशोधनसंशमनाहाराचाराः सम्यक् प्रयुक्ताः निग्रहहेतवः। प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च। स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः। द्रव्याणि पुनरोषधयस्ताः द्विविधाः स्थावरा जङ्गमाश्च। तासां स्थावराश्चतुर्विधाः। वनस्पतयो वृक्षा वीरुध ओषधय इति। तासपुष्पाः फललन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः। प्रतानवत्यः स्तम्बिन्यश्च वीरुधः। फलपाकनिष्ठा ओषधय इति। जङ्गमास्त्वपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्पसरीसृपप्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः। तत्र स्थावरेभ्यस्त्वक्पत्रपुष्पफलमूलकन्दनिर्यासक्षीररसादयः प्रयोजनवन्तो जङ्गमेभ्यश्चर्मनखरोमरुधिरादयः। पार्थिवाः सुवर्णरजतमणिमुक्तामनःशिलाहरितालकपालादयः। कालकृतास्तु प्रवातनिवातातपच्छायाज्योत्स्नातमःशीतोष्णवर्षाहोरात्रपक्षमासर्त्वयनादयः संवत्सरविशेषाः। त एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकारहेतवः प्रयोजनवन्तश्च। भवन्ति चात्र। शारीराणां विकाराणामेष वर्गश्चतुर्विधः। चये कोपे शमे चैव हेतुरुक्तश्चिकित्सकैः। आगन्तवश्च ये रोगास्ते द्विधा निपतन्ति हि। मनस्यन्ये शरीरेऽन्ये तेषान्तु द्विविधा क्रिया। शरीरपतितानान्तु शारीरवदुपक्रमः। मानसानान्तु शब्दादिरिष्टो वर्गः सुखावहः। एवमेतत्पुरुषो व्याधिरौषधं क्रियाकाल इति चतुष्टयं समासेन व्याख्यातम्। तत्र पुरुषग्रहणात्तन्मात्रद्रव्यसमूहोभूतादिरुक्तस्तदङ्गप्रत्यङ्गविकल्पाश्च त्वङ्मांसशिरास्नायुप्रभृतयः। व्याधिग्रहणाद्वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः सर्व एव व्याधयो व्याख्याताः। ओषधिग्रहणात् द्रव्यगुणरसवीर्यविपाकप्रभावाख्यामादेयः। क्रियाग्रहणाच्छेद्यादीनि स्नेहादीनि च कर्माणि व्याख्यातानि। कालग्रहणात्सर्व-

क्रियाकालानामादेशः । भवति चात्र । बीजं चिकित्सितस्यैतत्समासेन प्रकीर्त्तितम् । सविंशमध्यायशतमस्य व्याख्या भविष्यति । तच्च सविंशमध्यायशतं पञ्चसु स्थानेषु । तत्र सूत्रस्थाननिदानशारीरचिकित्सितकल्पेषूर्ध्ववशात्संविभज्योत्तरे तन्त्रे शेषानर्थान् व्याख्यास्यामः"। चरके तु त्रिस्कन्धमित्युक्तम् तच्च हेतुलिङ्गौषधरूपस्कन्धत्रयं बोध्यम् । अयञ्चायुर्वेद अष्टादशविद्यान्तर्गतः । "आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रय" इति ५२५ पृष्ठे अष्टादशविद्याशब्दे उक्तवाक्यात् । अस्मिन् शास्त्रे द्विजानामेवाधिकारोनान्येषां यथाह सुश्रुतः । "अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानामन्यतममन्वयवयःशीलशौर्य्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्तायतऋजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत् । अतो विपरीतगुणं नोपनयेत्" ।

विप्रेण वैश्यकन्यायामुत्पन्नस्याम्बष्ठस्यापि द्विजधर्म्मतया उपनयनादिसंस्कारवत्त्वात् "अम्बष्ठस्य चिकित्सितम्" इति मनूक्तेश्च अत्राधिकार इति भेदः । तत्रायं विवेकः द्विजमात्राणां चिकित्सितेऽधिकारेऽपि तत्तत्प्रवृत्तिप्रकरणे तु तेषां निन्द्यतैव । "सूतं चिकित्सकस्यान्नमिति" मनुना निन्दितत्वात् । अम्बष्ठानां तु तद्वृत्तौ दोषाभावः मनुना "सूतानामश्वसारथ्यमम्बष्ठस्य चिकित्सितम्" इत्यनेन तेषां चिकित्साप्रवृत्तिकर्त्तव्येनाभिधानात् अम्बष्ठस्य च यथोपनयनेऽधिकारस्तथाऽम्बष्ठशब्दे ३२८ पृष्ठे निरूपितम् । अतएव- "भिषक् केशवनन्दनः । वोपदेवश्चचारेदं विप्रोवेदपदात्सदम्" । विप्रोपदेवस्य पितुः केशवस्य भिषक्त्वं स्वयमेव तेनोक्तम् । तस्य निन्दितत्वे तन्नोच्येत इति द्रष्टव्यम् । अन्यत्र चायुर्वेदस्य चतुर्व्यूहत्वमुक्तं रोगरोगनिदानरोगनिवृत्तितदुपायरूपविषयत्वात्तथात्वविधात्वात् । "सचायुर्वेदः नरगजाश्वगोवृक्षाधिकारभेदेन पञ्चविधः तत्र नरायुर्वेदः चरकसुश्रुतादिलोकप्रसिद्धः गजायुर्वेदोऽश्वायुर्वेदोऽपि शालिहोत्रतः तयोश्च लोके प्रचाराभावात् अग्निपुराणतः सङ्क्षिप्योद्धृत्यात्रतौ दर्श्येते तत्र गजायुर्वेदो यथा

"गजलक्ष्म चिकित्सां च लोमपाद! वदामि ते"इत्युपक्रम्य "पाकलेषु तु सर्वेषु कर्त्तव्यमनुवासनम् । घृततैलपरीपाकं स्नानं वातविवर्जितम् । स्नेहेषु च क्रिया कार्य्या तथा पाकलवणूप ! । गोमूत्रं पाण्डुरोगेषु रजनीभ्यां हृतं द्विज ! । आनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते । लवणैः पञ्चभिर्भिन्ना प्रतिपानाय वारुणी । विड्लवणक्षिफलाव्योषसैन्धवैः कवलान् कृतान् । मूर्च्छासु भोजयेन्नागं । क्षौद्रतोयञ्च पाययेत् । अभ्यङ्गः शिरसः शूले नस्यञ्चैव प्रशस्यते । नागानां स्नेहकटुकैः पादरोगानुपक्रमेत् । पश्चात्कल्ककषायेण शोधनञ्च विधीयते । शिखितित्तिरिलावानां पिप्पलीमरिचान्वितैः । रसैः समर्पयेन्नागं वेपथुर्यस्य जायते । बालं बिल्वं तथा लोध्रं धातकी सितया सह । अतीसारविनाशाय पिण्डीं भुञ्जीत कुञ्जरः । नस्यं कर्म्मणि देयं घृतं लवणसंयुतम् । मागधीनागराजाजीयवागूर्मण्ड, कान्विताः । उत्कर्षके तु दातव्यो वाराहश्च तथा रसः । दग्धमूलकुलत्थाश्वकाकमाचीविपाचितम् । तैलप्राशनसंयुक्तं गलग्रहगदापहम् । अष्टाभिर्लवणैः पिष्टैः प्रसन्नं पाययेद्घृतम् । मूलकंशेखरावीजं कथितं लवणस्य च । त्वग्दोषेषु पिबेच्चैव दधि वा कथितं द्विपः । गवां मूत्रविड्भ्यानि क्रमिकोष्ठेषु शस्यते । शृङ्गवेरकणाद्राक्षार्कराभिः हृतं पयः । घृतत्रयकरं पानं तथा मांसरसः शुभः । अक्षोदनं व्योषयुतमरूचौ तु प्रशस्यते । त्रिवृद्व्योषाग्निदन्त्यर्कश्यामाक्षीरेभपिप्पली । एतैर्गुल्महरः स्नेहः घृतश्चैव तथा रसः । भेदनद्रावणाभ्यङ्गस्नेहपानानुवासनैः । सर्वानेव समुत्पन्नान् विद्वान् समुपाचरेत् । यष्टिकं शृङ्गयूषेण सारदेन तथा पिबेत् । बालविल्वैस्तथा लेपः कुञ्जरोगे प्रशस्यते । विड्लवणेन्द्रयवौ हिङ्गु सबलं रजनीद्वयम् । पूर्वाह्णे पाययेत् पिण्डान् सर्वशूलोपशान्तये । प्रधानभोजने तेषां यष्टिकव्रीहिशालयः । मध्यमौ यवगोधूमौ शेषा दन्तिनि चाधमाः । यवश्चैव तथैवेक्षुर्नागानां बलवर्द्धनः । नागानां यवसं शुष्कं तथा वातप्रकोपणम् । सद्यःक्षीरस्य नागस्य पयः पानं प्रशस्यते । दीपनीयैस्तथा द्रव्यैः हृतोमांसरसस्ततः । वायसः कुरभस्योभौ काकोलूककुलाकृतिः । भवेत् क्षौद्रेण संयुक्तं पिण्डोयुद्धे मदाय हि । कटुमस्या विड्लवणं क्षीरकोषातकीपयः । हरिद्रा चेति धूमोऽयं कुञ्जरस्य जयावहः । पिप्पली तण्डुलास्तैलं माध्वीकं माक्षिकन्तथा । नेत्रयोः परिषेकोऽयं दीपनीयः प्रशस्यते । पुरोषं च कषायाश्च तथा पारावतस्य च । क्षीरवृक्षकरीरस्य प्रसन्नायेक्षमञ्जनम् । अनेनाञ्जितनेत्रस्तु करोति कदनं रणे । उत्पलानि च नीलानि सुक्तं तगरमेव च । तण्डुलोदकपिष्टानि नेत्रनिर्वापणं परम् । नखवृद्धौ नखच्छेदः तैलसेकश्च मासपि । शय्यास्थानं भवेच्चास्य करीषैः पांशुभिस्तथा । शरच्छिदा-

वयोः सेकः सर्पिषा च तथाप्यति" । इति गजायुर्वेदः

अथाश्वायुर्वेदः तत्रैव "अश्ववाहनसारं च वक्ष्येऽश्वस्य चिकित्सितम्" इत्युपक्रम्य "दृषो निम्बष्टहत्यौ च गुडुची च समाक्षिका । सिंहानकहरी पिण्डी खेदश्च शिरसस्तथा । हिङ्गुपुष्करमूलञ्च नागरं साम्लवेतसम् । पिप्पलीसैन्धवयुतं शूलघ्नसुखवारिणा । नागराऽतिविषा मुस्ता शानन्ता बिल्वमालिका । क्वाथमेषां पिबेद्वाजी सर्व्वातीसारनाशनम् । प्रियङ्गुलोध्रमधुभिः पिबेद्वृषरसं दयः । क्षीरं वा पञ्चकोलाढ्यं कासनाद्विप्रमुच्यते । विष्कन्धेषु च सर्व्वेषु श्रेष्ठ आदौ विशोधणम् । अभ्यङ्गावर्त्तनिस्नेहनस्यवर्त्तिक्रमः स्मृतः । त्वरितानां तुरङ्गाणां पयसैव क्रियाक्रमः । लोध्रकरञ्जयोर्मूलं मातुलाङ्गाग्निनागराः । कुष्ठं हिङ्गुवचाराम्ला लेपोऽयं शोथनाशनः । मञ्जिष्ठा मधुकं द्राक्षाष्टहत्यौ रक्तचन्दनम् । त्रपुषीबीजमूलानि भृङ्गाटककशेरुकम् । अजापयःघृतयुतं सशीतं शर्करान्वितम् । पीत्वा निरग्नेर्वाजी रक्तमेहात् प्रमुच्यते । मन्याहनुनिगालस्थशिरः शेफोगलग्रहः । अभ्यङ्गः कटुतैलेन तत्र तेषैव शस्यते । प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः । कृष्णाहिङ्गुयुतैरेभिः क्षतं नखं न सोदति । निम्बे ज्योतिष्मतो पाठा कृष्णकुष्ठं वचा मधु । जिह्वास्तम्भे च लेपोऽयं गुडमूलयुतोद्धितः । तिलैर्यष्ट्या रजन्या च निम्बपत्रैश्च योजिता । क्षौद्रेण शोधनी पिण्डी सर्पिषा व्रणरोपणी । अभिघातेन खञ्जन्ति येऽश्वास्तोद्भवेदनाः । परिषेककिया तेषां तैलेनाशु रुजापहा । दोषकायाभिघाताभ्यां तनुजे लिङ्गिते तथा । शालिमत्स्याम्बुवस्ताभ्यां पक्वमन्नमथ क्रमात् । अश्वत्थोडुम्बर प्लक्षमधूकवटवल्कलैः । प्रभूतनलिकाक्वाथः सुखोष्णो व्रणशोधनः । घृताक्ता नागरं रास्नामञ्जिष्ठाकृष्णसैन्धवैः देवदारुवचायुग्मरजनीरक्तचन्दनैः । तैलं सिद्धं कषायेण गुडुच्या पयसा सह । क्षतघ्नं वस्तिनस्ये च योज्यं सर्व्वत्र लिङ्गिते । रक्तस्रावो जलौकाभिर्नैवान्ये पित्तरोगिणः । खादिरोडुम्बराश्वत्थकषायेण च साधितम् । धात्रोडुरालभातिक्ताप्रियङ्गुकुसुमैःसमैः । गुडुच्या च कृतः क्वाथः कल्कोयुक्तो विलम्बिते । उत्पाते शिरिशिरे आम्रे मुष्ककशोथे तथैव च । क्षिप्रकारिणि दोषे च सद्योवेधनमिष्यते । गोघृतत्सर्ज्जिकाकुष्ठरजनीतिलसर्षपैः । गवां मूत्रेण पिष्टैश्च मर्द्दनं कण्डुनाशनम् । शीतोमधुयुतः क्वाथो नासिकायां सशर्करः । रक्तपित्तहरः पानादश्वकण्डूस्तथैव च । सप्तमे सप्तमे देयमश्वानां लवणं दिने । तथा भुक्तवतां देया अतिपाते तु वारुणी । जीवनीयैः समधुरैर्द्राक्षेक्षुशर्करायुतैः । सर्पिष्पिप्पलीकैः शरदि प्रतिपानं सपञ्चकैः । विडङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः । सचित्रकैस्तुरङ्गाणां प्रतिपानं हिमागमे । लोध्रप्रियङ्गुकायुक्ता पिप्पली विश्वभेषजैः । सक्षौद्रैः प्रतिपानं स्याद्वसन्ते कफनाशनम् । प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समशैषधैः । निदाघे सगुडा देया मदिरा प्रतिपानके । लोध्रकाष्ठं सलवणं पिप्पल्योविश्वभेषजम् । भवेत्तैलयुतैरेभिः प्रतिपानं घनागमे । निदाघेऽर्द्धकृताहाराः शरत्सु पुष्टयोषिताः । प्राग्वद्भिन्नपुरीषाश्च पिबेयुर्वाजिनोऽष्टमम् । पिबेयुर्वाजिनस्तैलं कफवायुधिकास्तु ये । स्नेहव्यापन्नदोषो येषां तेषां कार्य्यं विरूक्षणम् । लाजं यवागूकृत्वा स्वाद्भोजनं तक्रसंयुतम् । शरच्छिदाघयोः सर्पिस्तैलं शीतवसन्तयोः । वर्षासु शिशिरे चैव वस्तौ यमकमिष्यते । गुर्व्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् । वायुवर्षञ्च वाहस्य स्नेहनीयस्य वर्ज्जयेत् । स्नानं पानं सकृद्दृष्टमश्वानां सलिलागमे । अत्यर्थं दुर्दिने काले पानमेकं प्रशस्यते । युक्तं शीतातपे काले द्विः पानं भवनं सकृत् । ग्रीष्मे त्रिः स्नानपानं स्याच्चिरं तस्यावगाहनम् । निस्तुषाणामदातव्या यवानाञ्चतुराढकी । चणकव्रीहिमौद्गाणां, कलायान् वापि दापयेत् । अहोरात्रेण वाहस्य यवस्य तुला दश । अष्टौ शुष्कस्य दातव्या चतस्रोऽथ वृषस्य वा । दूर्व्वा पित्तं, यवः कासं, वृषश्च श्लेष्मसंज्ञकम् । नाशयत्यर्जुनःश्वासं, तथा शालिर्बलक्षयम् । वातिकाः पैत्तिकाश्चैव श्लेष्मजाः सान्निपातिकाः । न रोगा पीड़यिष्यन्ति दूर्व्वाहारं तुरङ्गमम् । द्वौ रज्जुबन्धौ दृष्टानां पञ्चयोरुभयोरपि । पश्चाद्बन्धस्य कर्त्तव्यो दूरकीलव्यपाश्रयः । वसेयुस्त्वाकृते स्थाने कृतधूपनभूमयः । घनोपन्यस्तयवसाः सप्रदीपाः सुरक्षिताः । कृतबन्धाश्च कपयोधार्य्याश्चाश्वगृहे खगाः" इत्यश्वायुर्वेदः अधिकं जयदत्तकृतेऽश्वशास्त्रे द्रष्टव्यम् ।

अथ गवायुर्वेदः अग्निपु० "गवाञ्चाहात्म्यमुक्तं हि चिकित्साञ्च तथा शृणु" इत्युपक्रम्य । "शृङ्गाग्रयेषु धेनूनां तैलं दद्यात् सशैन्धवम् । शृङ्गवेरबलामांसीकल्कसिद्धं समाक्षिकम् । कर्णमूलेषु शूलेषु मञ्जिष्ठाहिङ्गुसैन्धवैः । सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः । बिल्वमूलमपामार्गो धातकी च समाटला । कुटजं दन्तमूलेषु लेपोच्छूलनाशनः । दन्तशूलहरैर्द्रव्यैर्तं

वापि विपाचितम् । सुस्वरोगहरं क्षेयं जिह्वारोगेषु सैन्धवम् । शृङ्गवेरं हरिद्रे द्वे त्रिफला च गलग्रहे । हृच्छूले वस्तिशूले च वातरोगज्वरे तथा । त्रिफला घृतमिश्रा च गवां पाने प्रशस्यते । अतीसारे हरिद्रे द्वे पाठाञ्चैव प्रदापयेत् । सर्वेषु कोष्ठरोगेषु तथा सान्निपातेषु च । शृङ्गवेरञ्च भार्गीं च कासश्वासे च दापयेत् । दातव्या भग्नसन्धाने प्रियङ्गुर्लवणान्विता । तैलं वातहरं पित्ते मधुयष्टिविपाचितम् । कफे व्योषञ्च समधु संपिष्टकरजोऽन्वितम् । तैलाज्यं हरितालञ्च भग्नज्वरहरं ददेत् । माषास्तिलाः सगोधूमाः पशुक्षीरं घृतन्तथा । एषां पिण्डी सलवणा वत्सानां पुष्टिदा त्रियम् । बलप्रदा वृषाणां स्यात् यक्ष्मनाशाय धूपकः । देवदारुवचामांसीहिङ्गुगुग्गुल सर्षपाः । यक्षादिगदनाशाय एष धूपोगवां हितः । घण्टा चैव गवां कार्य्या धूपेनानेन धूपिता । अश्वगन्धातिलैः शुक्लैस्तेन गौः क्षीरिणी भवेत्" । इति गवायुर्वेदः

अथ वृक्षायुर्वेदस्तत्रैव "वृक्षायुर्वेदमाख्यास्ये मुक्तश्चोत्तरतः शुभः । प्राग्वटोयाम्यतश्चाम्र आम्रे ऽश्वत्थः क्रमेण तु । दक्षिणादिसमुत्पन्नाः समीपे कण्टकिद्रुमाः । उद्यानं वृक्षवासे स्यात्तिलानथथ पुष्पितान्" इत्युपक्रम्य "अरिष्टाशोकपुन्नागाः गिरीषाः सप्रियङ्गवः । अशोककदलीजम्बुस्तथा बकुलदाडिमाः । सायं प्रातस्तु घर्मान्ते शीतकाले दिनान्तरे । वर्षर्त्तौ तु भवः शोषे सेक्तव्या रोपिता द्रुमाः । उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम् । स्थानात् स्थानान्तरं कार्य्यं वृक्षाणां द्वादशान्तरम् । विफलाः सुधनावृक्षाः श्लेष्मणादौ हि शोधनम् । विड्भृतपक्वान्नान् सेचयेच्छोतवारिणा । फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः । घृतशीतपयःसेकः फलपुष्पाय सर्व्वदा । आविकाजशकृन्मूत्रं यवचूर्णं तिलानि च । गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत् । तत्सेकः सर्ववृक्षाणां फलपुष्पादिवृद्धिदः । मत्स्यान्नमासवसैकेन वृद्धिर्भवति शाखिनः । विड्भृतखड्गोपेतं मत्स्यं मांसं हि दोहदम् । सर्वेषामविशेषेण वृक्षाणां रोगमर्द्दनम्" । वृहत्संहितोक्तो वृक्षायुर्वेद आरामशब्दे दृश्यः ।

आयुर्वेदमधीते वेद वा अक्षा० ठक् । आयुर्वैदिकः आयुर्वेदाभिज्ञे त्रि० । आयुर्वैदे साधु कथा० ठक् । आयुर्वैदिकः आयुर्वैदे साधौ त्रि० । [न्तरौ ।

आयुर्वेदमय पु० आयुर्वेदेन प्रचुरः प्राचुर्य्ये मयट् । धन्व-

आयुर्वैदिन् त्रि० आयुर्वेदोवेद्यतया विद्यतेऽस्य इनि । आयुर्वेदाभिज्ञे चिकित्साशास्त्रस्य वेत्तरि वैद्ये ।

आयुषज् त्रि० आयुना सजते सन्ज-क्विप् षत्वम् । आयुःसम्बन्धे "सोमः पवत आयुषक्" ऋ० ९, २५, ५ । "पवस्व देवायुषगिन्द्रं गच्छतु ते मदः" ऋ० ९, ६३, २२ ।

आयुष्क पु० आयुषा कायति कै-क । आयुषा प्रकाशमाने प्रशस्तायुष्के ।

आयुष्काम त्रि० आयुः कामयते काम-णिङ्-अण् उप० स० । आयुरभिलाषुके "अथात आयुष्कामीयं रसायनम्" इति सुश्रुतः । "आयुष्कामेण वन्द्यं न जातु परयोषितः" मनुः ।

आयुष्कृत् त्रि० आयुः करोति कृ-क्विप् तुक् । आयुर्वृद्धिकरे रसरसायनादौ अयुर्वृद्धिशब्दे ७७५ पृष्ठे तान्युक्तानि । ट । आयुष्कर इत्यपत्र त्रि० स्त्रियां ङीप् ।

आयुष्टोम पु० आयुः साधनं स्तोमः शाक० त० षत्वम् । १ आयुःसाधने ऋक्सामसमुदायात्मके स्तोमभेदे २ तत्स्तोमयुक्ते यागभेदे च ।

आयुष्मत् त्रि० आयुर्विद्यतेऽस्य मतुप् । १ चिरजीविनि "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने" "आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम्" मनुः स्त्रियां ङीप् । २ विष्कम्भावधिके तृतीये योगे पु० । "विष्कम्भः प्रीतिरायुष्मान्" ज्यो० ति० । आयुरिति शब्दोऽस्यास्ति मतुप् । ३ आयुःशब्दयुक्ते मन्त्रभेदे "आयुष्मानिति शान्त्यर्थं जप्त्वा चैव समाहितः" कु० प० । तच्च आयुष्यसूक्तशब्दे दृश्यम् । भवदादिषु पाठात् तस्मिन् परे प्रथमार्थेऽपि तसिलादि । ततआयुष्मान् तत्आयुष्मान् ।

आयुष्य त्रि० आयुः प्रयोजनमस्य "स्वर्गादिभ्यो यत्" पा० भा० यत् । आयुःसाधने आयुर्वृद्धिशब्दोक्ते रसरसायनद्रव्यकर्म्मादौ । "आयुष्यं प्राङ्मुखोभुङ्क्ते ऋतभुङ्क्ते ह्युदङ्मुखः" "इदं यशस्यमायुष्यमिदं निःश्रेयसं परम्" "धन्यं यशस्यमायुष्यं स्वर्ग्यं ज्ञातिधिपूजनम्" इति च मनुः "आयुष्योहवा अस्यैष आत्मनिष्क्रयणो भवति" शत० ब्रा० ।

आयुष्यसूक्त न० कर्म्मधा० । "आयुष्मानिति शान्त्यर्थं जप्त्वा तत्समाहितः" कु० प० उक्ते "आभ्युदयिकश्राद्धादिषु जप्ये सूक्तभेदे तच्च सूक्तम् । "आयुर्विश्वायुर्विश्वमायुरग्नीभिः । प्रजान्त्वष्टधार निधेह्यस्मै शतं जीवेम शरदां वयन्ते । आयुषे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या दिवोजनित्राः । वृक्षन्त्वापोऽध्वरन्ती सोमोहोदुगाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्याद्यां अमुष्य राज्याय" भव-

देवभक्तिष्टम् अत्रानुक्तेऽपि यत्र षष्ठ्यन्तं संस्कार्य्यनामोल्लेखम् । सामवेदिनाञ्चैतत् पाठ्यं वेदभेदेऽन्यदाकरे ज्ञेयम् ।

आयुस् न० इण—असि णिच्च । जीवितकाले "आयुरारोग्य मतुलं देहि देवि । नमोऽस्तु ते" देवीस्तुतिः ।"आयुर्देहातिगैः पोतं रुधिरं च पतत्त्रिभिः" रघुः । "चतुर्थमायुषोभाग-मुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषोभागं कृतदारो-ऽहे वसेत्" मनुः "समारुरुक्षुर्दैवमायुषः क्षये" रघुः । "आयूंषि त्वच्छु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः।"अष्टमं चायुषः स्थानमष्टमाद्दुमञ्च यत्" इति पराशरोक्तेः जन्मलग्नावधिके अष्टमस्थाने हृतीयस्थाने च तद्विवेच्यम् । स्थानविशेषे च यद्विशेषयोगदृष्ट्यादिवशात् आयुर्विशेषः अष्टमस्थाने चिन्तनीयपदार्थसहितः"सर्वा०चिन्ता०दर्शितः। यथा "मरणाज्जीवितमरणं गुप्तस्थानं च मरणहेतुश्च । अन्त-सुखमरणदेशं परिभवमपि चिन्तयेत् प्राज्ञः। रन्ध्रेश्वरे पापयु-तेऽन्यराशावल्पायुरस्येति वदन्ति षष्ठे । तत्रापि लग्नेश्वर-योगजाते त्वल्पायुरस्येति वदन्ति सन्तः । स्वक्षेत्रसंस्थे सति रन्ध्रनाथे दीर्घायुराद्यर्मुनयोमहान्तः । मन्देन वा चिन्त्य-मशेषमायुः स्वक्षेत्रमित्रोच्चसुहृत्स्थितेन । रन्ध्रेश्वरेणापि युते विलग्ननाथे रिपौ वा व्ययराशियुक्ते । षष्ठान्त्यपे वा यदि लग्नयुक्ते दीर्घायुरभ्येति शुभेक्षितश्चेत् । कर्मेश्वरेणापि विचिन्त्यमायुर्दीर्घं सुहृत्स्वोच्चयुतेन तेन । केन्द्रस्थितैः कर्म-विलग्नरन्ध्रनाथैस्तथैवायुरुदाहरन्ति । प्रोक्तयहैर्व्योमचरै-स्त्रिभिर्वा सभानुजैः केन्द्रगतैस्तथैव । स्वक्षेत्रकोणादिग-तैर्विशेषाद्वदन्ति दीर्घायुरुदारचित्ताः । चतुरस्रे शुभैर्युक्ते लग्नेशे शुभसंयुते । गुरुणा दृष्टिसंयोगे पूर्णमायुर्विनि-र्दिशेत् । केन्द्रान्विते विलग्नेशे गुरुशुक्रसमन्विते । ताभ्यां निरीक्षिते वापि दीर्घमायुर्विनिर्दिशेत् । त्रिषड्रायगताः पापाः शुभाः केन्द्रत्रिकोणगाः । लग्नेशे बलसंयुक्ते पूर्णमायुर्विनिर्दिशेत् । षट्सप्तरन्ध्रभावेषु शुभेक्षसहितेषु च । त्रिषडायेषु पापेषु पूर्णमायुर्विनिर्दिशेत् । रन्ध्राधिपे विलग्नस्थे गुरुशुक्रेक्षिते युते । लग्नेशे केन्द्रराशौ वा दीर्घ-मायुर्विनिर्दिशेत् । रन्ध्राधिपे तु केन्द्रस्थे गुरुशुक्रेक्षिते युते । लग्नेशे बलसंयुक्ते दीर्घमायुर्विनिर्दिशेत् । लग्नाधिपो यदा केन्द्रे लग्नादेकादशालये । सर्वग्रहकृतं रिष्टमेकोऽपि विलयं नयेत् । उच्चान्वितैस्त्रिभिः खेटैर्लग्नरन्ध्रवशंयुतैः । रन्ध्रे पापविहीनैस्तैर्दीर्घमायुर्विनिर्दिशेत् । रन्ध्रस्थितैस्त्रिभिः खेटैः स्वोच्चमित्रखगेक्षगैः । लग्नेशे बलसंयुक्ते दीर्घमा० । पारावतादिभागस्थाः पापाः सर्वे शुभास्तथा । केन्द्रत्रिको-णनिलयाः पूर्णमायुर्विनिर्दिशेत् । षडाष्टमव्यये पापा लग्नेशे दुर्बले यदि । अल्पायुरनपत्यो वा शुभदृग्योगव-र्जिते । क्रूरषष्ठांशके वापि रन्ध्रेशे भानुजेऽपि वा । पापा-न्विते पापदृष्टे त्वल्पमायुर्विनिर्दिशेत् । चतुष्टयगते पापे शुभ-दृष्टिविवर्जिते । बलहीने विलग्नेशे त्वल्पमायुर्विनिर्दि-शेत् । व्ययार्थौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ । क्रूरषष्ठांशगौ वापि स्वल्पमायुर्विनिर्दिशेत् । आयुर्योगस्त्रिधा प्रोक्तः स्व-ल्पमध्यचिरायुषः । द्वात्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् । सप्तत्याः प्राक्, ततः पूर्णमायुरत्र वदन्ति हि । अल्पायुर्दिननाथस्य शत्रौ लग्नाधिपे यदा । समत्वे मध्य-मायुः स्यान्मित्रे दीर्घायुरादिशेत् । बलहीने विलग्नेशे जीवे केन्द्रत्रिकोणगे । षडाष्टमव्यये पापे मध्यमायुरुदाहृतम् । शुभे केन्द्रत्रिकोणस्थे शनौ बलसमन्विते । षष्ठे वाष्टमे पापे मध्यमायुरुदाहृतम् । लग्ने त्रिकोणे केन्द्रे वा मध्यमायुश्च निश्चिते । अल्पायुर्योगजातानां विपत्ता-के मृतिप्रदः । मध्यमे प्रत्यरिभेशान्मृतिं दद्याद्विशेषतः । अष्टमेशदृशा कष्टा पूर्णायुर्योगसंज्ञके । योगायुरिति निः-श्चित्य जातस्यैवं वदेद्बुधः । आयुर्विलग्नाधिपती बलेन हीनौ धराक्षूनचिहितेक्षयुक्तौ । युद्धे मृतिं तस्य वदन्ति तज्ज्ञाः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्गनाथौ यदि वा रिपुस्थौ राक्षान्वितौ केतुयुतौ समन्दौ । व्रणेन युद्धे मृतिमाहुरार्याः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्ग-नाथौ यदि वा रिपुस्थौ राक्षान्वितौ केतुयुतौ समन्दौ । तद्भुक्तिकालेऽथ वा विपाके शस्त्रेण चौरैर्मरणं प्रयाति । रन्ध्राङ्गपौ वाहननाथयुक्तौ तस्मात् मृतिं तस्य वदन्ति तज्ज्ञाः । मृतिं त्वजीर्णाद्गुरुसंयुतौ तौ देहेशजीवौ रि-पुगावजीर्णात् । लग्नेश्वरे वाहननाथयुक्ते वागीश्वरेणापि युते त्वजीर्णात् । देहेश्वरे वाहनविस्मृतावनाथान्विते वा मरणं त्वजीर्णात् । रन्ध्रेशयोगान्मरणं दशायामन्तर्दशायामथ वा वदन्ति । पित्रादिभावाधिपयोगदृष्ट्या पित्रादिकानां मरणं तथैव । मृत्यङ्गपौ भानुसुतेन युक्तौ दुस्थानगौ वा विषभक्षणेन । राहुध्वजाभ्यां सहितौ च दुस्थावुद्-बन्धनात्तस्य मृतिं वदन्ति । षष्ठेश्वरे भानुसुते सराहुकेतौ मृगाद्भीतिमुदाहरन्ति । जीवेन युक्ते गजभीतिमस्य जातस्य चन्द्रेण युतेऽम्बुभीतिम् । सूर्यान्विते ताडशभानुपुत्रे मृगात्स-र्पाङ्गात् शुनकात् सभौमे । षष्ठस्थिते भानुसुतेऽपि चैवं वि-ना स्वतुङ्गस्वगृहं सखेटे । सुखेशभाग्येषविलग्ननाथास्त्रि-कोणगाः केन्द्रगताश्च सर्वे । भुक्तौ यदा तत्परिपाककाले

पिता सहैवानुहतिश्च मातुः । रन्ध्रे शशाङ्के फणिनाथ युक्ते हीने त्वपस्मारयुतः समन्दे । तत्र स्थिते हीनबले शशाङ्के पिशाचपीड़ा च जलाद् द्विपाच्च । भौमाहिमन्दान्यतमेन युक्ते क्षीणे शशाङ्के निधनस्थितेऽपि । दुःस्थे त्वपस्मारभयान्मृतिःस्यात्पिशाचबाधादथ वा हृतिस्तु । रन्ध्रे सराहौ यदि वा सकेतौ चातुर्थिकापीड़नमाद्धरस्य । रन्ध्रेश्वरेणापि युते तथैव क्रूरादिषष्ठांशयुते तु सत्यम् । नीचस्थिते वाऽमरनायके वा षष्ठाष्टमस्थे यदि पापदृष्टे । रात्रौ प्रकोपानुसरणं पितुश्च तत्पीडया वित्तविनाशमेति" । अधिकमल्पायुःशब्दे ४१२पृष्ठे उक्तम् । अस्य पुरुषादिपूर्व्वपदकत्वे अच् समा० "पुरुषायुषजीविन्योः" रघुः तत्रायुषम् मनुष्यायुष मित्यादौ बा०अच् समासान्तः ।

आयुर्योगस्य सर्व्वा०चि०दर्शितः यथा "अथायुर्योगः । केचिद्योगं प्रशंसन्ति दशां केचिदृदन्ति हि । तद्विना चायुषां ज्ञानं न शक्यन्तु मनीषिभिः । त्रिविधश्चायुषो योगः स्वल्पायुर्मध्यमोत्तमः । द्वात्रिंशत्पूर्व्वमल्पन्तु तदूर्ध्वं मध्यमं भवेत् । आ सप्ततेस्तदूर्ध्वन्तु दीर्घायुरिति सम्मतम् । उत्तमायुः शतादूर्ध्वं मुनेः शंसन्ति तद्विदः । आ द्वादशाब्दाज्जन्तूनामायुर्ज्ञानं न शक्यते । जपहोमचिकित्याद्यैर्बालरक्षां तु कारयेत् । पित्रोर्हृदयैर्हृताः केचित्केचिद् बालग्रहैरपि । अपरे रिष्टयोगाच्च त्रिविधाऽकालमृत्यवः । जन्मतः प्रबलेनैव बालानां पुष्टिवर्द्धनम् । कथयेदवशेषं तु तथा योगोनिरूपितः । अल्पायुर्लग्नपे भानौ शतौ मध्यं तु मध्यमे । मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम् । अल्पायुर्योगजातस्य विपत्तारे मृतिं वदेत् । जातस्य मध्यमे योगे प्रत्यरौ तु हृतिर्भवेत् । दीर्घायुर्योगजातानां वधभे तु हृतिर्भवेत् । त्रिषु योगेषु सर्वेषु प्रत्येकं त्रिविधं भवेत् । अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं हृतम् । मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् । दीर्घायुषोऽल्पमध्ये तु पूर्णायुस्त्रिविधं भवेत् । एवन्नवविधं प्रोक्तमायुषां तु विनिर्णयः । पञ्चम्याराद्दशा हृत्युं दद्यात् षष्ठी गुरोस्तथा । शनेश्चतुर्थान्मृत्युः स्याद्दशा राहोश्च सप्तमी । विपन्नेऽदशा कष्टा प्रत्यरेऽशदशा तथा । वधभेऽदशा कष्टा पापा स्यादशुभेक्षिता । नीचारातिविमूढस्था विपत्यत्यरिनैधनाः । दशा दद्युर्हृतिं तस्य पापैर्युक्ता विशेषतः । राशिसन्धिषु ये जातास्ते बाला हृतजीविनः । पापदृष्टो युतो वाऽपि निःसंशयहृतिप्रदः । मरुद्धान्तेष्वजूको मर्त्यः पित्रमाद्यवलात्ततः । यदि जीवेत्खगेशपालो गजवाजिसमन्वितः । हृतोयगौ भानुनिशाकरौ वा क्रूरर्क्षगौ क्रूरनिरीक्षितौ च । व्याधिं नरस्यापि वदन्ति तज्ज्ञास्त्रिवर्षमात्रं त्वविलम्बमेतत् । चन्द्रात् क्रूरे वासरनाथभौमौ कुजादयो वा मरणं दशाहात् । उद्यद्रेक्काण जामित्रे यस्य स्याद्दारुणो ग्रहः । क्षीणचन्द्रे विलग्नस्थे सद्योहरति जीवितम् । आपोक्लिमे स्थिताः सर्वे ग्रहा बलविवर्ज्जिताः । एकमासं द्विमासं वा तस्यायुः समुदाहृतम् । विलग्नाधिपतिर्नीचे निधने चार्कसंयुते । क्षुच्क्रोधेन जीवनं विन्देन्मृतप्रायो भविष्यति । केतोरुदयः पूर्व्वे पश्चादुल्काग्निपवननिर्घातः । रौद्रे सति च मूहूर्त्ते प्राणेभ्यस्त्यज्यते जन्तुः । ग्रहणपरिवेशकाले जातः पापान्विते विलग्नस्थे । लग्नेशे बलहीने जीवति पञ्चत्रयं त्रिमासं वा । अंशाधिपतिर्जन्मपतिर्लग्नपश्चात्तमुपागतो यस्य । लग्नावसानमरणं भवेत् कतिपयाहेन । सन्धिचतुष्टयकाले जाते हृत्युं समादिशेत्तज्ज्ञः । पापयुते दृष्टे वा शीघ्रैः सौम्यैरदृष्टयुते । राहौ केन्द्रे पापयुक्तेक्षिते वा क्षिप्रं नाशं याति सौम्यैरदृष्टे । पापैः केन्द्रे वार्कलग्ने त्रिकोणे सौम्यैः षष्ठे चाष्टमेऽन्त्ये वदन्ति । जातः क्षीणे द्योतगौ लग्नसंस्थे पापैर्दृष्टे नाशमाशु प्रयाति । उच्चक्षेत्रे मेषराशिं च हित्वा राड्युक्तस्तेष्वपि प्राणनाशः । लग्नात्खान्त्यौ पापयुक्तौ यदि स्यातत्षष्ठान्त्ये वा विनश्येत् क्षणेन । लग्नाद्वाले चाष्टमे पापचारैः सोमे क्षीणे त्वष्टमाब्दं च जीवेत् । केन्द्रैश्चन्द्रात्पापयुक्तैरसौम्यैः स्वर्गे यानं प्रोच्यते वत्सरेण । जन्माधिपे लग्नगे क्रूरयुक्ते पश्यत्यार्किश्चाष्टमे जीववर्गे । षष्ठे वर्षे द्वादशे वाऽष्टमे वा सन्धौ राशेर्जातको हृत्युमेति । षष्ठेऽष्टमे वा हिमगौ च यस्य क्षीणे चन्द्रे पापयुक्तेऽथ वापि । सौम्यैर्दृष्टे त्वष्टमाब्दञ्च जीवेत् पापैः सौम्यैर्मिश्रितैस्तद्वयं स्यात् । जीवे विलग्ने मिथुने तुलायां शुक्रेण युक्ते शशिरन्ध्रनाथे च । पापैर्दृष्टे हृत्युराशिस्थिते वा जीवेद्वर्षं चाष्टमं चैव बालः । लग्ने क्षीणे शशिनि निधनं रन्ध्रकेन्द्रेषु पापैः पापान्तःस्थे निधनस्थिते क्षूनयुक्ते च चन्द्रे । एवं लग्ने भवति मदनच्छिद्रसंस्थे च पापे माता साकं यदि च न शुभैर्वीक्षितः पञ्चमस्थैः । राड्यस्ते शीतरश्मौ विलग्ने क्रूरे युक्ते चाष्टमे भूमिपुत्रे । माता सार्द्धं चन्द्रवद्भास्करेण यस्तो वा तेनाशु हृत्युं प्रयाति । अस्तङ्गते दिनपतौ रविजे विलग्ने भौमे ऽथ वापि निधनं व्रजति त्रिवर्षात् । एवं स्थितेऽपि हिमगावशुभैरदृष्टैराशुप्रदे च नियत

भवतीह चाष्टौ । बृहस्पतिभौमगटेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः। अन्यैस्त्रिभिर्भागैवदृष्टिहीनो लोकान्तरं प्रापयति प्रस्तुतम् । वक्री शनिर्भौमगटं प्रयातस्त्रिद्वे च षष्ठे च चतुष्टये वा । कुजेन संप्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रजातम् । सौरिस्मरस्थे यदि वा विलग्ने जन्मस्थलग्ने शशिदुस्थिते वा । सौम्येषु केन्द्रोपगतेषु सद्यो जातस्य मृत्युर्वचनोपदिष्टः । नीचस्थे देवपूज्ये तु भौमक्षेत्रगतेऽथ वा । सन्धिगतेऽपि जातस्तु मासान्मृत्युं स गच्छति । नक्षत्रसन्धौ तिथिराशिसन्धावेकत्र तावत्प्रसवस्त्रिपक्षात् । जातस्य मृत्युं सकुजैति सद्यः शुक्रेऽङ्गि जीवेदिति नन्दिकोक्तम् । षष्ठ्यां जातस्यार्कलग्ने कुजे वा गण्डान्ते वा मृत्युयोगेऽथ वापि । भौमे हन्ति प्राणिनां तत्क्षणेन जीवेत्क्षिते चेन्न भवेत् प्रजातः । भौमोदये तद्दिवसे क्षणेन्दौ होरेश्वरे वारभूते शशाङ्के । जातः सुखी ब्रह्मपदं प्रयाति प्रसाधनाद्यैरिह मन्त्रसिद्धा । वर्गोत्तमे लग्नगते कुलीरे केन्द्रे गुरौ भूमिसुते कलत्रे । सिंहासनांशे भृगुजे विशेषाद्दृक्षायनाद्यैरमितायुरेति । कर्मान्यलग्ने सबुधे कलत्रे जीवे यदा गोपुरभागयुक्ते । मृत्यंशके वा दिननाथपुत्रे जातस्त्रसंख्यायुरुपैति सूनुः । देवलोकांशके शुक्रे केन्द्रस्थे धरणीसुते । सिंहासनांशके जीवे केन्द्रे जातस्त्रसंख्यकः । उत्तमांशे भृगौ केन्द्रे शनौ पारावतांशके । स्वर्गलोके गुरौ केन्द्रे त्वौषधाधारसंख्यकः । गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके । त्रिकोणे कर्किलग्ने तु युगान्तं स तु जीवतिः । चापांशे कर्किलग्ने च तस्मिन् देवेन्द्रपूजिते । त्रिचतुर्भिर्मृदैः केन्द्रे जातो ब्रह्मपदं लभेत् । तृतीयैकादशे शुक्रे गोपुराख्यांशकान्विते । दृष्टे वर्गोत्तमे लग्ने ब्रह्मणः परमं पदम् । लग्ने शुक्रे गुरौ कामे कर्मावेऽमरनायके । चापमेषांशके लग्ने जातो याति परं पदम् । पञ्चमे बुधसंयुक्ते गोपुराख्यांशकान्विते। गुरौ घटे विलग्नेऽस्मिन् जातो ब्रह्मपदं लभेत् । केन्द्रे गुरौ लाभगतेऽर्कपुत्रे धने रवौ मन्दयुते कलत्रे । भाग्ये धरासूनुयुतेऽत्र जातो युगान्तकालं समसुपैति मन्दैः । त्रिकोणगौ जीवबुधौ विशेषाल्लग्ने दृष्टे तत्र युते धराजे । निशाकरे गोपुरभागयुक्ते जातः सहस्रहयवर्षमेति । पक्षे क्षिते जन्म यदाऽङ्गि काले केन्द्रे गुरौ वा शशिभे विलग्ने । दारे कुजे भानुसुते सुखस्थे जातस्तु जीवेदयुताब्दसंख्यम् । जीवमन्दारशुक्राणामन्योन्यं केन्द्रसंभवे । त्रिकोणे वा यदा याते जातस्त्रयुतवत्सरैः । शुभैर्युक्ते चतुष्केन्द्रे पापैः षट्त्रिभवान्वितैः । सिंहलग्ने यदा जातो जीवेत् षडयुतानि सः । कर्कादिस्थैर्यदैः सर्वैर्गुरुचन्द्रादिभिर्यदा । अन्यैः परमोच्चस्थैर्मुनिलग्नो भवेन्नरः । अन्यादिभौमपर्यन्ता लग्नादौ खचराः स्थिताः । वैशेषिकांशसंयुक्ताजातस्त्रसमरसन्निभः । आकल्पं जीवति नरो भृगे लग्ने कुजादिकाः । रव्यन्ताः खचराः सर्वे स्वोच्चे जीवेऽङ्गि जन्मनि । मेषान्यलग्ने सगुरौ भृगौ वा निशाकरे गोधनमध्यमांशे । सिंहासनांशे यदि वा धराजे जातस्त्रसंख्यायुरुपैति मन्त्रैः । स्थिरे रवौ सोमसुतेन युक्ते चन्द्रे वृषस्थेमिथुने च शुक्रे । गुरौ कुलीरे यदि वा विलग्ने शनौ तुलायां सुनिसाम्यमेति । देवलोकांशके मन्दे भौमे पारावतांशके । सिंहांशके गुरौ लग्ने जातो सुनिसमो भवेत् । मेषलग्ने रवौ भौमे जीवे स्वोच्चसमन्विते । त्रिषडायगते पापे जातो सुनिसमो भवेत् । इति चिन्तामणौ प्रोक्ता आयुःसंख्या मनीषिणाम् यदुक्तं पूर्व्वकैः सर्व्वैस्तदेव मयाऽधुना" । पारिजातांशाद्यास्तु सर्व्वा॰चिन्त दर्शिताः ।"मूलत्रिकोणकोणोच्चस्वर्क्षकेन्द्रोत्तमांशकाः । सप्तवर्गोद्भवाः स्वांशस्वाधिमित्रांशमित्रकाः । वर्गा इमे दश प्रोक्ताः पूर्व्वाचार्यैर्महर्षिभिः । वर्गद्वयादिसंयोगैः पारिजातादिसंज्ञकाः । उत्तमं तु त्रिवर्गैक्यं चतुर्वर्गं तु गोपुरम् । वर्गपञ्चकसंयोगे सिंहासनमिहोच्यते । वर्गद्वयं पारिजातं षट्कं पारावतांशकम् । सप्तकं देवलोकाख्यं स्वर्गलोकस्तथाऽष्टकम् । ऐरावतन्तु नवकं फलं तेषां पृथक् पृथक्" । जातकपद्धतौ तु रिष्टभङ्गसहितायुर्योगविशेषः गजाद्यायुःप्रमाण सहित उक्तः यथा

"लग्नसप्तमगौ पापौ चन्द्रः पापयुतो यदा । शुभपद्दैर्न दृष्टः स्यादचिरान्मृत्युकारकः । क्षीणेन्दौ व्ययगे पापे लग्नाष्टमनिवासिभिः । केन्द्राणि शुभहीनानि यदि क्षिप्रं तदा मृतिः । पापयुक्तः शशी लग्नसप्ताष्टद्वादशस्थितः । केन्द्रान्यस्थानगैः सौम्यैर्न दृष्टो मृत्युदायकः । पापे राशेरन्तगे सन्ध्याकाले होरा विधोर्यदा । मृत्युर्वा स्यात्सन्ध्रापापे र्युते सर्व्वचतुष्टये । कर्कान्त्यगे चक्रपूर्व्वं पश्चाद्वै पापदृग्युते । मृत्युर्वाष्टमकेन्द्रस्थैः पापैः क्षीणे विधौ तनौ । षष्ठद्वादशगैः पापैरथवा ह्यदृष्टसंस्थितैः । लग्ने वा पापमध्यस्थे सप्तमे वा मृतिं व्रजेत् । चन्द्रे षष्ठेऽष्टमे वापि मरणं पापवीक्षिते । शुभैरवेक्षिते वर्षाष्टकान्मिश्रैस्तदर्द्धतः । शुभैः षष्ठास्तगे पापैर्बलिभिः प्रविलोकिते । मासान् मृत्युः

सप्तमे वा लग्नेशे पापसंयुते। तुर्य्यसप्ताष्टगश्चन्द्रः पापान्तःस्थो मृतिप्रदः। क्षीण एवं लग्नगोऽपि पापे सप्ताष्टगे सति। शुभादृष्टे विधौ भान्ते केन्द्रकोणोपगैः खलैः। मृतिराशु सचन्द्रेऽङ्के पापैर्वा सप्तमैः स्थितैः। सपापोऽङ्के विधौ यस्ते समाष्टकाधिशोर्वधः। भौमेऽष्टमे रवावेवं विधे लग्ने तु शस्त्रजः। चन्द्रार्कौ वा तनौ पापैः सबलैरष्ट कोणगैः। शुभैर्न युक्तदृष्टश्चेन्मरणं बालकस्य हि। लग्नाष्ट नवमान्त्येषु कुजचन्द्रार्कसूर्य्यजैः। बलिभिर्युर्व्वदृष्टैः स्याज्जातस्य मरणं ध्रुवम्। पापयुक्तो विधुर्लग्नसप्तकोणान्त्यमृत्युगः। मरणाय बलिष्ठोऽस्तिकयुग् वीक्षितो न चेत्। योगकर्त्तृबलिष्ठेनाधिष्ठिते च बली विधुः। स्वभे वा लग्नभेऽल्पान्तः पापदृष्टस्तदा मृतिः। मेषालिगो गुरुर्मृत्यौ विशुक्रैरवलोकितः। त्रिवर्षान्मृत्युदोमन्दः स सूर्य्येन्दु र्नवाब्दतः। दृष्ट्याद्यन्ते सौम्यपापैर्लग्नं ज्ञनाविषुभिर्मृतिः। बुधः सार्कविधुः पापदृष्ट एकादशाब्दतः। लग्नेशो रिपुगोराशिमितैर्वर्षैर्मृतिप्रदः। मासैर्द्वैकांशनाथस्तु दिवसैरंशनायकः। लग्ने शनिः षोड़शाब्दात् पापदृष्टोऽथ संयुतः। मासाद्विशुद्धो वर्षान्तु शिशोर्मृत्युकरः स्मृतः। लग्नेऽर्ककुजमन्दाश्चेत् षष्ठे वा सप्तमे विधुः। क्षीणो न दृष्टो गुरुणा सप्तवर्षान् मृतिप्रदः। राशिलग्नेश्वरावस्तं यातौ षष्ठाष्टरिपुफगौ। राज्यङ्कृतल्यवर्षैस्तु मरणाय शिशोः स्मृतौ। राहुःपापेक्षितः केन्द्रसंस्थो मृत्युकरः शिशोः। वत्सरैर्दशभिः कैश्चित् स्मृतः षोड़शवत्सरैः। एकोऽपि पापोमृत्युस्थः शत्रुगेहे खलेक्षितः। अमरार्भकसप्तेवं वर्षान्मृत्युवयं नयेत्। शुक्रः कर्कस्थगारस्थोव्ययाष्टारिस्थितैः खलैः। सर्वैः प्रदृष्टः षड्वर्षैर्जातस्यारिष्टकारकः। बुधः कर्कस्थितः षष्ठेऽष्टमे वा चन्द्रवीक्षितः। वर्षैश्चतुर्भीरिष्टस्य कारकः कथितो बुधैः। सूर्य्यः कर्म्मणि धन्यारक्षेत्रस्थः पापवीक्षितः। मरणाय शिशोः केतूदयभं जन्मभं तथा। षष्ठाष्टमस्थाः शुभदाश्च पापाधर्म्मात्मजस्थाश्च यदा भवन्ति। पापैः प्रदृष्टा न शुभा प्रदृष्टा वर्षाष्टकान्मृत्युकराः प्रदिष्टाः। लग्नपः पापयुक् द्यूनेरिष्टद्वोधनस्थितः। नवाब्दैः सखलोऽब्धौ व्यये चेन्दोः खलेक्षितः। सूर्य्यशुक्रशनीनाञ्च योगो भवति जन्मनि। गुरुदृष्टोऽपि रिष्टाय प्रदिष्टो नववत्सरैः। गजैरङ्कैर्नेत्रनेत्रैर्द्विपक्षैः शरैरेककेनाब्धिभिर्वह्निनेत्रैः। गजाब्जैर्नखैः स्वर्गसंख्यैश्च दिग्भिर्विधोर्मेषतो भागवर्षैर्मृतिः स्यात्। कर्कलग्ने गुरौ चेन्दौ शुक्रौ केन्द्रगौ यदा। त्रिलाभारिगताः शेषा दृढायुरभितं स्मृतम्। आयुषो योगजस्यापि रिष्टं बाधकमत्र हि। तद्बाधकोरिष्टभङ्गः स चेद्वलिकतो भवेत्। शुभाश्चन्द्रात् षष्ठसप्ताष्टमस्था नो खलान्विताः। रिष्टनाशाय गदिताः प्रणामोक्तैरथा। शुभद्रेष्काणगैः सर्वैः शुभैर्युक्तोविधुः शिशोः। रिष्टहा परिपूर्णो वा द्वादशांशे शुभे स्थितः। सम्पूर्णाङ्कः शर्व्वरीनायकश्चेत् सर्वैर्दृष्टोरिष्टहा संप्रदिष्टः। उच्चस्थो वा मित्रभागस्थितो वा चन्द्रारिष्टं नाशयेत् शुक्रदृष्टः। केन्द्रे भृगुरशुक्राणामेकः कोणेऽथ वीर्य्यवान्। अरिष्टनाशकः केन्द्रे पापोऽपि परमोच्चगः। मित्रराशिगताः पापाः शुभाश्च नवपञ्चमाः। नाशं नयन्ति रिष्टानि क्षणोरिष्टासुरं यथा। बली जन्मेश्वरोमित्र शुभदृष्टो हि रिष्टहा। स सर्वमरिष्टहा हि षष्ठे रिष्टविनष्टिकृत्। वर्गोत्तमे शुभाः सर्व्वे स्वभे चारिष्टहानिदाः। शुभवर्गगता दृष्टाः सद्दृष्टा रिष्टनष्टिदाः। क्षत्तिकापुष्यदास्रेषु चन्द्रोवाथ त्रिपुष्करे। पूर्णोवर्गोत्तमगतः स्वीयरिष्टविनाशकृत्। मेषकर्कगतश्चन्द्रः केन्द्रे शुभनिरीक्षितः। अशुभं नाशयत्याशु हरिर्मत्तगजं यथा। शुक्लपक्षे निशायाञ्चेत् कृष्णेजन्म यदा दिवा। शुभाशुभेक्षितश्चन्द्रः षष्ठाष्टस्थोऽर्कः शिशोः। व्यतीपातेऽथ गण्डान्ते वैधृतौ रिष्टिसन्ध्ययोः। जातस्य रिष्टं नास्त्येव स्मृतिकर्त्तुर्मतं यथा"। इति चन्द्ररिष्टभङ्गः। "सवीर्य्ये गुरौ लग्नगे रश्मियुक्ते विनाशं तदैवाशुभं सर्व्वमेति"। बलिष्ठैः शुभैश्चाशुभैर्वीर्य्यहीनैः शुभर्क्षे तनुः सद्व्यहैर्वीक्षितं वा। त्रिषड़ेकादशे राहुः शुभदृष्टो यदा भवेत्। मृत्युनाशाय सविभुर्मृत्युञ्जय इवापरः। मेषोत्तकर्कलग्नस्थो राहुस्वायुदयो मुनेः। अगस्त्यस्य मुनीनां च सप्तानां रिष्टनाशकः। शीर्षोदयगतैः सर्वैर्मृत्युदोषो विनश्यति। प्रवक्ष्यैः सुखदैरापि नभोदिग्वह्निवायुभिः। मृत्युभं अष्टहीनं चेत् केन्द्रे पूर्णबले शुभे। त्रिंशद्वर्षं तदायुः स्याच्चत्वारिंशच्छुभेक्षिते। गुरुः स्वभे खड्गकाणे सप्तविंशतिवर्षकम्। स्वभस्थिताः शुभाश्चन्द्रे खोच्चेऽङ्कस्थे खषट्समाः। लग्ने गुरौ शुभैः केन्द्रस्थितैर्वर्त्तौ अष्टोच्चिते। सप्तत्यब्दं भवेदायुरष्टाङ्के तदवीक्षिते। कर्केऽङ्कगे गुरौ कोणस्थितैः सर्वशुभग्रहैः। अशीतिरायुषः काष्ठा केन्द्रे शुक्रे शतं समाः। सूर्य्ये बलिष्ठे पिण्डायुश्चन्द्रे स्यात्तु निसर्गजम्। लग्नेऽंशायुर्हीनबले त्रिकेऽस्मिन् जीवशर्म्मजम्। नन्देन्दुतत्त्वतिथ्यर्कतिथिस्वर्गनखा रवेः। वर्षाण्युच्चे भृगे नीचे स्वर्क्षे सध्येऽनुपातितः। नखैकद्व्यङ्कदृष्टयो विंशत्खाब्धा निस-

र्गजाः। समाः सूर्य्यात् पूर्ब्बवत् खादेभ्योऽप्यायुरर्थांशजे। दृष्टग्रहर्क्षवाक्लिन्ना दशभक्ताश्च यत् फलम्। वर्षमासादिकं ज्ञेयं भवेद्द्वादशभिः स्फुटम्। जैवे परायुः सप्तांशो ग्रहायुः परमोच्चगे। लग्नमशसमत्वायुर्दद्याद्वीर्य्युतं च भैः। सर्वमङ्गं हतोयोऽंशः प्रादः पञ्चाङ्गभागकौ। व्ययाद्धामं विभीयेत पापे त्वङ्गं शुभग्रहे। एकभावगतानां यो बली भागहरस्तु सः। अङ्गमस्तं गतोहन्ति त्यक्त्वा शुक्रशनैश्चरौ। कुजलग्यक्त्वा यत्नमस्यैक्षिभागो नाश्नते निजः। लग्ने सपापैः लग्नस्थनवांशभाङ्नृणायुषः। अष्टोत्तरः शतांशः स्याद्दीनः सौम्येक्षिते दलम्। उच्चचक्रगताक्लिन्नं द्विघ्नं खांशोत्तमादिगाः। ददत्यायुर्यहास्ते चेद्बली नित्यं स्वभादिगाः। अपि त्रिद्विकगुणदाः केन्द्रादाविति केचन। लग्ने सपापे हानिर्या नाशावंशभवायुषि। हानिद्वयेऽधिकैव स्यान्नृणोऽप्येवं वराहगोः। खार्काःपरायुर्नरदन्तिनोः १२० स्याद्दन्ता ३२ हयानां च जिना २४ दशादेः। खरोष्ट्रयोस्तत्त्वसमाः २५ शुनोऽर्का १२ व्याघ्राद्यजादेर्हिन्दवाः १६ परायुः। आयुर्वद्वत् समानीय स्वस्वपूर्णायुषा हृतम्। ल्पपरायुर्हृतं स्वष्टं गजाद्यायुर्भवेदिति। दीपस्तैलादियुक्तोऽपि यथा वाते विनश्यति। अजितेन्द्रियतापथ्यैरेवमायुर्विनश्यति"।

अत्र हयानां दन्तैर्वयायुर्ज्ञानं तथोक्तमश्वशब्दे ५०३ पृष्ठे जयदत्तकृतादश्वशास्त्रात्तद्विशेषोऽव गन्तव्यः। दन्ताद्वात्रिंशद्वर्षा इतीदृक्तम्

कृत्स्नमायुश्च सदाचारादेव, अपथ्याजितेन्द्रियादिभ्यस्तु आयुःसत्त्वेऽपि नाशः उक्तजातकपद्धतिवचनात् अतएव भा० आनु० प० १०४ अध्याये सदाचारादितएव आयुर्वृद्धिरुक्ता "शतायुरुक्त पुरुषः शतवीर्य्यश्च जायते। कस्मान्म्रियन्ते पुरुषा बाला अपि पितामह!। आयुष्मान् केन भवति अल्पायुर्वाऽपि मानवः। केन वा लभते कीर्त्तिं केन वा लभते श्रियम्। तपसा ब्रह्मचर्य्येण जपहोमैस्त्रयीषधैः। कर्म्मणा मनसा वाचा तन्मे ब्रूहि पितामह!। भीष्म उवाच। अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि। अल्पायुर्य्येन भवति दीर्घायुर्वाऽपि मानवः। येन वा लभते कीर्त्तिं येन वा लभते श्रियम्। यथा वर्त्तयन् पुरुषः श्रेयसा सम्प्रयुज्यते। आचाराल्लभते चायुराचाराल्लभते श्रियम्। आचाराल्लभते कीर्त्तिं पुरुषः प्रेत्य चेह च। दुराचारो हि पुरुषो नेहायुर्विन्दते महत्। यस्मात्त्रस्यन्ति भूतानि तथा परिभवन्ति च। तस्मात् कुर्य्यादिहाचारं यदीच्छेद्भूतिमात्मनः। अपि पापशरीरस्य आचारो हन्त्यलक्षणम्। आचारलक्षणो धर्म्मः सन्तश्चारित्रलक्षणाः। साधूक्तञ्च यथा दृत्तमेतदाचारलक्षणम्। अप्यङ्गष्टं श्रवादेव पुरुषं धर्म्मचारिणम्। भूतिकर्म्माणि कुर्व्वाणं तं जनाः कुर्व्वते प्रियम्। ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलङ्घिनः। अधर्मज्ञा दुराचारास्ते वरन्ति गतायुषः। विशोका भिन्नमर्य्यादा नित्यं सङ्कीर्णमैथुनाः। अल्पायुषो भवन्तीह नरा निरयगामिनः। सर्व्वलक्षणहीनोऽपि सदुदाचारवाञ्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति। अक्रोधनः सत्यवादी भूतानामविहिंसकः। अनसूयुरजिह्मश्च शतं वर्षाणि जीवति। लोष्टमर्द्दी तृणच्छेदी नखखादी च यो नरः। निष्ठोच्छिष्टः सङ्कुचको नेहायुर्विन्दते महत्। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्। उत्थायाचम्य तिष्ठेत पूर्ब्बां सन्ध्यां कृताञ्जलिः। एवमेवापरां सन्ध्यां सदुपासीत वाग्यतः। नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन। नोपरुद्धं न वारिस्थं न मध्यं नभसोगतम्। ऋषयो नित्यसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन्। तस्मात्तिष्ठेत्सदा पूर्ब्बां पश्चिमाञ्चैव वाग्यतः। ये न पूर्ब्बामुपासीरन् द्विजाः सन्ध्यां न पश्चिमाम्। सर्ब्बांस्तान् धार्मिको राजा शूद्रकर्म्माणि कारयेत्। परदारा न गन्तव्याः सर्व्ववर्णेषु कर्हिचित्। नह्रीदृशमनायुष्यं लोके किञ्चन विद्यते। यादृशं पुरुषस्येह परदारोपसेवनम्। यावन्तो रोमकूपाः स्युः स्त्रीणां गात्रेषु निर्मिताः। तावद्वर्षसहस्राणि नरकं पर्य्युपासते। प्रसाधनञ्च केशानामञ्जनं दन्तधावनम्। पूर्ब्बाह्णएव कार्य्याणि देवतानाञ्च पूजनम्। पुरीषमूत्रे नोदीच्यां नाधितिष्ठेत् कदाचन। नातिकल्यं नातिसायं न च मध्यन्दिने स्थिते। नाज्ञातैः सह गच्छेत नैकोन दृषलैः सह। पन्थादेयो ब्राह्मणाय गोभ्यो राजभ्य एव च। वृद्धाय भारतप्ताय गर्भिण्यै दुर्ब्बलाय च। प्रदक्षिणं प्रकुर्व्वीत परिव्राजान् धनस्नातीन्। चतुष्पथान् प्रकुर्व्वीत सर्व्वानेव प्रदक्षिणान्। मध्यन्दिने निशाकाले अर्द्धरात्रे च सर्व्वदा। चतुष्पथं न सेवेत उभे सन्ध्ये तथैव च। उपानद्भौ च वस्त्रञ्च धृतमन्यैर्न धारयेत्। ब्रह्मचारी च नित्यं स्यात् पादं पादेन नाक्रमेत्। अमावास्यां पौर्णमास्यां चतुर्दश्याञ्च सर्व्वशः। अष्टम्यां सर्वपक्षाणां ब्रह्मचारी सदा भवेत्।। तथा मांसं न खादेत दृष्टमांसं तथैव च। आक्रोशं परिवादञ्च पैशुन्यञ्च विवर्ज्जयेत्। नारुन्तुदः स्यान्न

न्दशंसवादी न हीनतः परमभ्याददीत । ययाऽस्य वाचा पर उद्विजेत न तां वदेदुषतीं पारलोक्याम् । वाक्-सायका वदनाच्निष्पतन्ति तैराहतः शोचति रात्र्यहानि । परस्य नो मर्म्मसु निष्पतन्ति तान् पण्डितो नावसृजेत् परेषु । रोहते सायकैर्विद्धं वनं परशुना हृतम् । वाचा दुरुक्तया विद्धं न संरोहति वाक्क्षतम् । कर्णिनालिका नाराचाच्निर्हरन्ति शरीरतः । वाक्शल्यस्तु न निर्हर्त्तुं शक्यो हृदिशयो हि सः । हीनाङ्गानतिरिक्ताङ्गान् विद्या-हीनान् विगर्हितान् । रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत् । नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् । द्वेषस्तम्भाभिमानञ्च तैक्ष्ण्यञ्च परिवर्ज्जयेत् । परस्य दण्डं नोद्यच्छेत् क्रुद्धो नैनं निपातयेत् । अन्यत्र पुत्राच्छिष्याच्च शिष्ट्यर्थं ताड़नं स्मृतम् । न ब्राह्मणान् परिवदेत् नक्षत्राणि न निर्द्दिशेत् । तिथिं पक्षस्य न ब्रूयात्तथाऽस्यायुर्न रिष्यते । कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः । पादप्रक्षालनं कुर्य्यात् स्वाध्याये भोजने तथा । त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते । संयावं कृसरं मांसं घृतकुल्या-ययासन्नथा । आत्मार्थं न प्रकर्त्तव्यं देवार्थन्तु प्रकल्पयेत् । नित्यमग्निं परिचरेद्विद्यां दद्याच्च नित्यदा । वाग्यतो दन्तकाष्ठञ्च नित्यमेव समाचरेत् । न चाभ्युद्वितशायी स्यात् प्रायश्चित्ती तथा भवेत् । मातापितरमुत्थाय पूर्व्व-मेवाभिवादयेत् । आचार्य्यमथ वाप्यन्यं तथायुर्विन्दते महत् । वर्ज्जयेद्दन्तकाष्ठानि वर्ज्जनीयानि नित्यशः । भक्षयेच्चास्वदृष्टानि पर्व्वस्वपि विवर्ज्जयेत् । उदङ्मुखस्य सततं शौचं कुर्य्यात् समाहितः । अकृत्वा पादशौचञ्च नाचरेद्दन्तधावनम् । अकृत्वा देवपूजाञ्च नाभिगच्छेत् कदाचन । अन्यत्र तु गुरुं दृष्ट्वा धार्मिकं वा विचक्षणम् । अवलोक्यो न चादर्शो मलिनो बुद्धिमत्तरैः । न चाज्ञातां स्त्रियं गच्छेन्नर्भिणीं वा कदाचन । उदक्शिरा न स्वपेत तथा प्रत्यक्शिरा न च । प्राक्शिरास्तु स्वपेद्विद्वानथवा दक्षिणाशिराः । न भग्ने नावशीर्णे च शयने प्रस्वपेत च । नान्तर्द्धाने न संयुक्ते न च तिर्य्यक्कदाचन । न चापि गच्छेत् कार्य्येण समयाद्वाऽपि नास्तिके । आसनन्तु पदाक्रम्य न प्रसज्येत्तथा नरः । न नग्नः कर्हिचित् स्नायाच्च निशायां कदाचन । स्नात्वा च नावसृज्येत गा-त्राणि सुविचक्षणः । न चानुलिम्पेदस्नात्वा स्नात्वा वासो न निर्द्धुनेत् । न चेवार्द्राणि वासांसि नित्यं सेवेत मानवः । स्रजञ्च नावकृष्येत न बहिर्द्वारयेत च । उदक्यया च संभाषां न कुर्व्वीत कदाचन । नोत्सृजेत पुरीषञ्च चेले ग्रामस्य चान्तिके । उभे मूत्रपुरीषे तु नाप्सु कुर्य्यात् कदाचन । अन्नं बुभुक्षमाणस्तु तिर्मुखेन स्पृशेदपः । भुक्त्वा चान्नं तथैव तिर्द्विः पुनः परिमार्ज्जयेत् । प्राङ्मुखो नित्यमश्नीयाद्दाग्यतोऽन्नमकुत्सयन् । प्रस्कन्दयेच्च मनसा भुक्त्वा चाग्निमुपस्पृशेत् । । आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः । धन्यं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उद-ङ्मुखः । अग्निमालभ्य तोयेन सर्व्वान् प्राणानुपस्पृशेत् । गात्राणि चैव सर्व्वाणि नाभिं प्राणितले तथा । नाधि-तिष्ठेत्तुषं जातु केशभस्मकपालिकाः । अन्यस्य चाप्यव-स्नातं दूरतः परिवर्ज्जयेत् । शान्तिहोमांश्च कुर्व्वीत सा-वित्राणि च धारयेत् । निषण्णश्चापि खादेत न तु गच्छन् कदाचन । मूत्रं नोच्छिष्टता कार्य्या न भक्ष्यानि न गोव्रजे । आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् । आर्द्रपादस्तु भुञ्जानो वर्षाणां जीवते शतम् । त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन । अग्निं गां ब्राह्मणञ्चैव तथा स्या-युर्न हीयते । त्रीणि तेजांसि नोच्छिष्ट उदीक्षेत कदा-चन । सूर्य्याचन्द्रमसौ चैव नक्षत्राणि च सर्व्वशः । ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति । अभ्यु-त्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते । अभिवादयेत वृद्धांश्च दद्याच्चैवासनं स्वयम् । कृताञ्जलिरुपासीत गच्छन्तं पृष्ठतोऽन्वियात् । न चासीतासने भिन्ने भिन्नकांस्यञ्च वर्ज्ज-येत् । नैकवस्त्रेण भोक्तव्यं न नग्नः स्नातुमर्हति । स्व-प्नव्यं नैव नग्नेन न चोच्छिष्टोऽपि संविशेत् । उच्छिष्टो न स्पृशेच्छीर्षं सर्व्वे प्राणास्तदाश्रयाः । केशग्रहं प्रहा-रांश्च शिरस्येतान् विवर्ज्जयेत् । न संहताभ्यां पाणिभ्यां कण्डूयेतात्मनः शिरः । न चाभीक्ष्णं शिरःस्नाया-त्तथाऽस्यायुर्नरिष्यते । शिरःस्नातस्य तैलेन नाङ्गं किञ्चि-दपि स्पृशेत् तिलपिष्टं न चाश्नीयात्तथाऽस्यार्नरि-ष्यते । नाध्यापयेत्तथोच्छिष्टो नाधीयीत कदाचन । वाते च पूतिगन्धे च मनसाऽपि न चिन्तयेत् । अत्र गाथा यमोद्गीताः कीर्त्तयन्ति पुराविदः । आयुरस्य निकृन्तामि प्रजास्तस्यादृते तथा य उच्छिष्टः प्रवदति स्वाध्यायञ्चाधि-गच्छति । यश्चानध्यायकालेऽपि मोहाद्भक्षयति द्विजः । तस्य वेदः प्रणश्येत आयुश्च परिहीयते । तस्मादुच्छि-ष्टो ह्यनध्याये नाधीयीत कदाचन । प्रत्यादित्यं प्रत्यनलं प्रति गाञ्च प्रति द्विजान् । ये मेहन्ति च पन्थानं ते भवन्ति

शतायुषः। उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ तथा ह्यायुर्न रिष्यते। त्रीन् क्षपाञ्चावजानीयाद्दोषमायुर्जिजीविषुः। ब्राह्मणं क्षत्रियं सर्पं सर्वे ह्याशीविषास्त्रयः। दहत्याशीविषः क्रुद्धो यावत् पश्यति चक्षुषा। क्षत्रियोऽपि दहेत् क्रुद्धो यावत् पश्यति तेजसा। ब्राह्मणस्तु कुलं हन्याद्ध्यानेनावेक्षितेन च। तस्मादेतत्त्रयं यत्नादुपसेवेत पण्डितः। गुरुणा चैव निर्बन्धो न कर्त्तव्यः कदाचन। अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर!। सम्यङ्मिथ्याप्रवृत्तेऽपि वर्त्तितव्यं गुराविह। गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः। दूरादावसथान्मूत्रं दूरात् पादावसेचनम्। उच्छिष्टोत्सर्जनं चैव दूरे कार्यं हितैषिणा। रक्तमाल्यं न धार्यं स्यात् शुक्लं धार्यन्तु पण्डितैः। वर्जयित्वा तु कमलं तथा कुवलयं प्रभो!। रक्तं शिरसि धार्यन्तु तथा वानेयमित्यपि। काञ्चनीयाऽपि माला या न सा दुष्यति कर्हिचित्। स्नातस्य वर्णकं नित्यमार्द्रं दद्याद्विशाम्पते!। विपर्ययं न कुर्वीत वाससो बुद्धिमान्नरः। तथा नान्यधृतं धार्यं न चापद्यन्मेव च। अन्यदेव भवेद्वासः शयनीये नरोत्तम!। अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि। प्रियङ्गुचन्दनाभ्याञ्च बिल्वेन तगरेण च। पृथगेवानुलिम्पेत केशरेण च बुद्धिमान्। उपवासञ्च कुर्वीत स्नातः शुचिरलङ्कृतः। पर्वकालेषु सर्वेषु ब्रह्मचारी सदा भवेत्। समानमेकपात्रे तु भुञ्जेन्नान्नं जनेश्वर!। आलोढ्या परिहृतं न भक्षयेत् कदाचन। तथा नोद्धृतसाराणि प्रोक्षितं नाप्रदाय च। न सन्निकृष्टो मेधावी नाशुचेर्न च सत्रु च। प्रतिषिद्धान्न धर्मेषु भक्ष्यान् भुञ्जीत पृष्ठतः। पिप्पलञ्च वटञ्चैव शणशाकं तथैव च। उडुम्बरं न खादेच्च भवार्थी पुरुषोत्तम!। आर्द्रं गव्यं तथा मांसं मायूरञ्चैव वर्जयेत्। वर्जयेच्छुष्कमांसञ्च तथा पर्य्युषितञ्च यत्। न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु। दधिसक्तून्न भुञ्जीत दृषामांसञ्च वर्जयेत्। सायं प्रातश्च भुञ्जीत नान्तराले समाहितः। बालेन तु न भुञ्जीत परश्राद्धं तथैव च। वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन। भूमौ सदैव नाश्नीयान्नानासीनो न शब्दवत्। तोयपूर्वं प्रदायान्नमतिथिभ्यो विशेषतः। पश्चाद्भुञ्जीत मेधावी न चाप्यन्यमना नरः। समानमेकपङ्क्त्यान्तु भोज्यमन्नं नरेश्वर!। विषं हलाहलं भुङ्क्ते योऽप्रदाय सुहृज्जने। पानीयं पायसं सक्तून् दधि सर्पिर्मधून्यपि। निरस्य शेषमेतेषां न प्रदेयन्तु कस्यचित्। भुञ्जानो मनुजव्याघ्र! नैव शङ्कां समाचरेत्। दधि चाप्यनुपानं वै कर्त्तव्यञ्च भवार्थिना। आचम्य चैकहस्तेन परिज्ञाप्यं तथोदकम्। अङ्गुष्ठं चरणस्याथ दक्षिणस्यावसेचयेत्। पाणिं मूर्द्धि समाधाय स्पृष्ट्वा चाग्निं समाहितः। ज्ञातिश्रैष्ठ्यमवाप्नोति प्रयोगकुशलो नरः। अङ्गैः प्राणान् समालभ्य नाभिं पाणितले तथा। स्पृशंश्चैव प्रतिष्ठेत न चाप्यादृष्टे पाणिना। अङ्गुष्ठस्यान्तराले च ब्राह्मं तीर्थमुदाहृतम्। कनिष्ठिकायाः पश्चात्तु दैवतीर्थमिहोच्यते। अङ्गुष्ठस्य च यन्मध्यं प्रदेशिन्याश्च भारत!। तेन पित्र्याणि कुर्वीत स्पृष्ट्वापो व्यायतस्तथा। परापवादं न ब्रूयान्नाप्रियञ्च कदाचन। न मन्युः कञ्चिदुत्पाद्यः पुरुषेण भवार्थिना। पतितैस्तु कथां नेच्छेद्दर्शनञ्च विवर्जयेत्। संसर्गं न च गच्छेत तथायुर्विन्दते महत्। न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम्। न चास्नातां स्त्रियं गच्छेत्तथायुर्विन्दते महत्। स्वे स्वे तीर्थे समाचम्य कार्यं सक्तुपकल्पिते। त्रिः पीत्वापो द्विः प्रमृज्य क्षतशौचो भवेन्नरः। इन्द्रियाणि सकृत् स्पृश्य शिरश्चाभ्युक्ष्य च मानवः। कुर्वीत पित्र्यं दैवञ्च वेददृष्टेन कर्मणा। ब्राह्मणार्थे च यच्छौचं तच्च मे शृणु कौरव!। पवित्रञ्च हितञ्चैव भोजनाद्यन्तयोस्तथा। सर्वशौचेषु ब्राह्मेण तीर्थेन सततस्पृशेत्। निष्टीव्य तु तथा क्षुत्वा स्पृष्ट्वापो हि शुचिर्भवेत्। दृष्ट्वा ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदपि। दृष्टे वास्तवितव्यास्ते धन्यमायुष्यमेव च। दृष्टे पारावता धन्याः शुकाश्च सहसारिकाः। दृष्टेष्टेते तु पापाय तथा वै तैलपायिकाः। उद्दीपकाश्च दृष्टाश्च कपोता भ्रमरास्तथा। निविशेयुर्यदा तत्र शान्तिमेव तदाचरेत्। अमङ्गल्यानि चैतानि तथोत्क्रोशा महात्मनाम्। महात्मनोऽतिगुह्यानि न वक्तव्यानि कर्हिचित्। अगम्यास्च न गच्छेत राज्ञः पत्नीं सखीं तथा। वैद्यानां बालवृद्धानां भृत्यानाञ्च युधिष्ठिर!। बन्धूनां ब्राह्मणानाञ्च तथा शारणिकस्य च। सम्बन्धिनाञ्च राजेन्द्र! तथायुर्विन्दते महत्। ब्राह्मणस्यातिथ्याञ्च निर्मितं यन्निवेशनम्। तदावसेत् सदा प्राज्ञो भवार्थी मनुजेश्वर!। सन्ध्यायां न स्वपेद्राजन्! विद्यां न च समाचरेत्। न भुञ्जीत च मेधावी तथायुर्विन्दते महत्। नक्तं न कुर्यात्पित्र्याणि भुक्त्वा चैव प्रसाधनम्। पानीयस्य क्रिया नक्तं न कार्या भूतिमिच्छता। वर्जयीयाच्च वै नित्यं सक्तवो निशि भारत!। शेषाणि चाव-

दातानि पानीयञ्चापि भोजने । सौहित्यं न च कर्त्तव्यं रात्रौ न च समाचरेत् । द्विजश्छेदं न कुर्वीत भुक्त्वा न चैवसमाचरेत् । महाकुले प्रसूताञ्च प्रशस्तां लक्षणैस्तथा । वयस्थाञ्च महाप्राज्ञः कन्यामावोढुमर्हति । अपत्यमुत्पाद्य ततः प्रतिष्ठाप्य कुलं ततः । पुत्त्राः प्रदेया ज्ञानेषु कुलधर्मेषु भारत ।। कन्या चोत्पाद्य दातव्या कुलपुत्राय धीमते । पुत्त्रा निवेश्याश्च कुलाद्वृत्त्या लभ्याश्च भारत ! । शिरःस्नातोऽथ कुर्वीत दैवं पित्र्यमथापि वा । नक्षत्रे न च कुर्वीत यस्मिन् जातो भवेन्नरः । न प्रौष्ठपद्योः कार्य्यं तथाग्नेये च भारत ।। दारुणेषु च सर्व्वेषु प्रत्यरिञ्च विवर्ज्जयेत् । ज्योतिषे यानि चोक्तानि तानि सर्व्वाणि भारत ! । प्राङ्मुखः प्रसृतकर्माणि कारयेत् सुसमाहितः । उदङ्मुखो वा राजेन्द्र ! तथाशुर्व्विन्दते महत् । परिवादं न च ब्रूयात्परेषामात्मनस्तथा । परिवादो ह्यधर्म्म्य प्रोच्यते भरतर्षभ ! । वर्जयेद्ब्रह्मिनीं नारीं तथा कन्यां नरोत्तम !। समार्षां व्यङ्गितान्चैव मातृ: सकुलजां तथा । दुष्टां प्रव्रजिताञ्चैव तथैव च पतिव्रताम् । अयोनिञ्च वियोनिञ्च न च गच्छेद्विचक्षणः । पिङ्गलां कुष्ठिनीं नारीं न त्वमावोढुमर्हसि । अपस्मारिकुले जातां निह्रीनाञ्चैव वर्जयेत् । क्षितिनाञ्च कुले जातां क्षयिणां मनुजेश्वर ! । लक्षणैरन्विता या च प्रशस्ता या च लक्षणैः । मनोज्ञा दर्शनीया च तां भवान् वोढुमर्हति । महाकुले निवेष्टव्यं सदृशे वा युधिष्ठिर !। अपरा पतिता चैव न ग्राह्या भूतिमिच्छता । अग्नीनुत्पाद्य यत्नेन क्रियाः सुविहिताश्च याः । वेदे च ब्राह्मणैः प्रोक्तास्ताश्च सर्व्वाः समाचरेत् । न चेर्ष्यां स्त्रीषु कर्त्तव्या रक्ष्या दाराश्च सर्व्वशः । अनायुष्या भवेदीर्ष्या तस्मादीर्ष्यां विवर्ज्जयेत् । अनायुष्यं दिवा स्वप्नं तथाऽभ्युदितशायिता । प्रगे निशामाशु तथा ये चोच्छिष्टाः स्वपन्ति वै । पारदार्य्यमनायुष्यं नापितोच्छिष्टता तथा । यत्नतो नैव कर्त्तव्यमभ्यासश्चैव भारत ! । सन्ध्यायां न च भुञ्जीत न स्नायाच्च पठेत्तथा । प्रयतश्च भवेत्तस्यां न च किञ्चित् समाचरेत् । ब्राह्मणान् पूजयेच्चापि तथा स्नात्वा नराधिप ! । देवांश्च प्रणमेत् स्नातो गुरूंश्चाभिवादयेत् । अनिमन्त्रितो न गच्छेत यत्र गच्छेत दूषकः । अनर्चिते ह्यनायुष्यं गमनं तत्र भारत !। न चैकेन परिव्रज्यं न गन्तव्यं तथा निशि । अनागतायां सन्ध्यायामागत्य च गृहे वसेत् । मातृः पितुर्गुरूणाञ्च कार्य्यमेवानुशासनम् । हितं वाऽहितं वाऽपि न विचार्य्यं कथञ्चन । धनुर्वेदे च वेदे च यत्नः कार्य्यो नराधिप ! । हस्तिपृष्ठेऽश्वपृष्ठे च रथचर्य्यासु चैव ह । यत्नवान् भव राजेन्द्र ! यत्नवान् सुखमेधते । अप्रष्टव्यञ्च यत्नेन भृत्यानां स्वजनस्य च । प्रजापालनयुक्तञ्च न क्षतिं लभते क्वचित् । युक्तिशास्त्रञ्च ते ज्ञेयं शब्दशास्त्रञ्च भारत !। गान्धर्व्वशास्त्रञ्च कलाः परिज्ञेया नराधिप ! । पुराणमितिहासाश्च तथाख्यानानि यानि च । महात्मनाञ्च चरितं श्रोतव्यं नित्यमेव च । पत्नी रजस्वला या च नाभिगच्छेन्न चाह्वयेत् । स्नाताञ्चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः । पञ्चमे दिवसे नारी षष्ठेऽहनि पुमान् भवेत् । एतेन विधिना पत्नीमुपागच्छेत पण्डितः । ज्ञातिसम्बन्धिमित्राणि पूजनीयानि सर्व्वशः । यष्टव्यञ्च यथाशक्ति यज्ञैर्विविधदक्षिणैः । अत ऊर्द्ध्वं नरश्रेष्ठ सेवितव्यं नराधिप ! । एष ते लक्षणोद्देश आयुष्याणां प्रकीर्त्तितः । शेषस्त्वैदिष्टदृष्टेभ्यः प्रत्याहार्य्यो युधिष्ठिर !। आचारो भूतिजनन आचारः कीर्त्तिवर्द्धनः । आचाराद्वर्द्धते ह्यायुराचारो हन्त्यलक्षणम् । आगमानां हि सर्व्वेषामाचारः श्रेष्ठ उच्यते । आचारप्रभवो धर्म्मो धर्म्मादायुर्विवर्द्धते । एतद्यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् । अनुकम्प्र सर्व्ववर्णान् ब्रह्मणा समुदाहृतम्" । अन्येचाचारा आचारशब्देऽ२०पृष्ठे उक्तास्तेऽपि आयुर्दृद्धिकराः। आयुःकालश्च स्वाभाविकः जीवभेदेन भिन्नः । तथा हि "ब्रह्मणोवर्षशतमिति" श्रुतेः ब्रह्मणोनिजपरिमाणेन वर्षशतायुः तच्च" सि०शि० दर्शितम् "चतुर्युगसहस्रेण ब्रह्मणो दिनमुच्यते । निजेनैव तु मानेन आयुर्वर्षशतं स्मृतम् । तत् पराख्यं तदर्द्धं तु परार्द्धमभिधीयते" "खर्य्याब्दसंख्यया द्विनिसागरैरयुताहतैः संध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम् । इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पोब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती । परमायुः शतं तस्य तयाहोरात्रसंख्यया" सू०सि०। तेन सौरैः४३२०००० वर्षैः चतुर्युगं तेन सहस्रगुणितेन ब्राह्ममहः ४३२०००००० रात्रिश्च तावतीति ८६४०००००० वर्षास्तस्याहोरात्रमानं तस्य २६० गुणने तस्य वर्षमानम् ३११०४००००००० एतच्चतुर्गुणितं तस्यायुर्मानम् अयमेव महाकल्पः "शतायुः सदानन्द एवं प्रदिष्टस्तदायुर्महाकल्प इत्युक्तमाद्यैः" सि०शि० उक्तेः । जैगीषव्यस्य च दशमहाकल्पजीविता "दशसु महाकल्पेषु

विपरिवर्त्तमानेन मयेति" सा०कौ० "तद्वाक्यात् तेन ब्राह्मायुःकाला दशगुणिताः"३१०४४०००००००००० तस्यायुः। अथ मनूनामायुःप्रमाणम्। "युगानां सप्ततिः सैका मन्वन्तरमुदाहृतम्" सू० सि०। चतुर्युगमानञ्च ४३२०००० तच्च७१गुणितम् ३०६७२०००० सौरवर्षा.ए-कैकमनूनामायुःकालः। मार्कण्डेयस्य सप्तकल्पान्तजीवितेत्युक्तेः ४३२०००००० सप्तभिर्गुणितम् ३०२४०००००० तस्यायुः कालः। देवानामायुस्तु ब्राह्मदिनमानम् "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति" मनूक्तेः ब्राह्मदिनपर्य्यन्तं तेषां स्थायित्वम् "कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः" इति मनुना कल्पादौ तेनैव तेषां सृष्टत्वोक्तेः प्रति-कल्पेऽपि तथैव सृष्टत्वमिति। एवं युगभेदेन नराणामायुर्भेदः मनुनोक्तः। "अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्वेतादिषु ह्येषामायुर्ह्रसति पादशः" तेन सत्ययुगे ४०० वर्षाः। त्रेतायां ३००वर्षाः। द्वापरे २००वर्षाः। कलौ शतं वर्षाः। पुराणान्तरे सत्यादिषु लक्षायुतसहस्रशतव-र्षायुष्टोक्तिः मनुविरोधादप्राह्यैव। सत्कर्म्मभिस्तु प्राणा-यामतपस्यादिभिः रसायनादिभिश्चायुर्वर्द्धते तच्चायुर्वृद्धिग्रन्थे ७७५ पृष्ठे उक्तम्। तेन दशरथादीनां दशवर्षसहस्राज्य-करणं रामायणोक्तं सङ्गच्छते। सत्कर्म्माभिप्रायेणैव पुराणवचनं लक्षाद्यायुष्टबोधकं मन्तव्यमिति तु युक्तम्। ततश्च जातकप० उक्तेः नरगजयोः,१२० वर्षाः। अश्वस्य दन्तसंख्यया। ३२वर्षा वा। गोमहिषादेः२४ वर्षाः खरो-ष्ट्रयोः २५ वर्षाः। शुनः १३ वर्षाः व्याघ्रादेः १६वर्षाः परमायुः। तत्र नरस्य शतायुष्टस्यात्युक्तावपि विंशोत्त-रीयविभागार्द्धमिह १२० वर्षोक्तिरिति बोध्यम्।

आयोग पु० आ+युज–घञ्। गन्धमाल्योपहारे, २व्यापारे ३रोधे ४सम्यक्सम्बन्धे च "शरैः कर्षिकारैश्च किंशुकैश्च सुपुष्पितैः। स देशोभ्रमरायोगःप्रदीप्त इव लक्ष्यते" रामा०

आयोगव पुंस्त्री० अयोगव एव स्वार्थे अण्। वैश्यकन्यायां शूद्रेणोत्पादिते जातिभेदे। "शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" "आयोगवोऽयं क्षत्ता च चाण्डालश्चाधमो-नृणाम्। प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः" इति च मनुः "मत्स्यघातो निषादानां तस्त्रियायोगवस्रेति" मनूक्तम् काष्ठतक्षणं तस्य वृत्तिः। स्त्रियां जातित्वात् ङीप्

आयोजन न० आ+युज–ल्युट्। १उद्योगे, २आहरणे च।

आयोजित त्रि० आ+युज–णिच्–क्त। १कृताहरणे २सम्यक् सम्पादिते च "कुसुमायोजितकार्मुकं मधुः" कुमा०।

आयोद पु० अयोदस्यापत्यम् वा० अण्। धौम्ये मुनौ। "एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यनामायोदस्तस्य शिष्यास्त्रयो बभूवुरुपमन्युरारुणिर्वैदश्चेति" भा०आ०३अ०।

आयोधन न० आ+युध+आधारे ल्युट्। १युद्धस्थाने। "आयोधने स्यायुधमस्त्रजातम्" भट्टिः "आयोधने क्षणगतिं सहायम्" रघुः। "आयोधनाग्रसरतां त्वयि वीर! यातेः" रघुः। भावे ल्युट्। २योधने, युद्ध-क्रियायाम्।

आर पु० आ+ऋ–कर्त्तरि संज्ञायां घञ्। १मङ्गलग्रहे, २शनिग्रहे, "आरे खस्थे चतुष्पाङ्गोभवम्" नील०ता०तत्र मङ्गलस्य वक्रगत्वात् शनेश्च स्वभावेन मन्दगतित्वात् तथात्वम् कुजस्य त्रिकोणाकारत्वादपि तथात्वम् ३मधुरास्लफले वृक्ष-भेदे च। ४प्रान्तभागे ईषद्गोलोहे ७पित्तले च न०। अरा इव स्वार्थे वा अण्। ८कीणे। कोणस्य चक्राकार-सदृशाकारवत्त्वात् तथात्वम्। द्वादशारचक्रं षोड़शार-चक्रम्। "विन्दुत्रिकोणवसुकोणदशारयुग्मम्–ओचक्रमेत-दुदितं परदेवतायाः" तन्त्रम्। "आरान्तरेणावपतत् संक्षि-प्याङ्गं क्षणेन हृ" इति भा०आ०२३अ०। भावे घञ्। ६गमने पु०। आ+ऋ–कर्म्मणि घञ्। १०दूरे च दूरस्य च वर्जयत्नेन प्राप्यत्वात् तथात्वम्। "इषुधिस्त-वारेऽस्मिन्निधेहि" यजु०१६,१२, "आरे दूरे" वेददी०। "आरेबाधस्व दुच्छुनाम्" य०१६,२८,

आरकूट पु०न०। आरं पित्तलं कूटयति रूपीकरोति अच् १पित्तलाभरणे। "किमारकूटाभरणेन न स्त्रियः" इति नैषधम्। आरमतिभृशं कूट्यते दंदह्यते कूट–दाहे कर्म्मणि घञ्। २पित्तलमात्रे च तस्यातिशयदाहस-हत्वात् तथात्वम्।

आरक्त पु० ईषत् रक्तः प्रा०स०। १ईषद्रक्तवर्णे २तद्वति ३सम्यगनुरक्ते च त्रि०। भावे क्त। ४अनुरागे न०

आरत्त पु० आ+रत्त–अच्। १हस्तिकुम्भाधःस्थले, "आर-त्तमग्नमवमत्य रुषिं शिताग्रैः" माघः २हस्तिमस्तक वर्म्मणि, ३सैन्ये च। ४रक्तके त्रि०। "शतसाहस्रमारत्तं मध्यगं रत्तसां कपिः" भट्टिः। "तेषामारत्तभूतन्तु पूर्व्वं दैवं नियोजयेत्" मनुः। भावे घञ्। ५रक्तायाम् पु०"रत्तांसि हि विलुम्पन्ति श्राद्धमारत्तवर्जितम्। भावे अ। आरत्ता तत्रार्थे स्त्री रत्ता च वैदिककर्म्मादौ श्वेतसर्षपादिच्छेदेन

मन्त्रस्तुत्यादिपाठेन विघ्नकारकनिवारणार्थोव्यापारः ।

आरग्वध पु० आ+रगे-शङ्कायां क्विप् आरगं रोगशङ्कामपि हन्ति अच् वधादेशश्च । (सोंदाल) इति ख्याते वृक्षे । "आरग्वधो गुरुः स्वादुः शीतलः स्वंसनोत्तमः । ज्वरकृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् । तत्फलं स्वंसनं रुच्यं कुष्ठपित्तकफापहम् । ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परम्" इति भावप्रकाशे तद्गुणा उक्ताः ।

आरग्वधाद्यतैलं श्वित्रहरं यथा । "आरग्वधं धवं कुष्ठं हरितालं मनःशिला । रजनीद्वयसंयुक्तं पचेत् तैलं विधानवत् । एतेनाभ्यङ्गयेच्छ्वित्री क्षिप्रं श्वित्रं विनश्यति" चक्रद० ।

आरग्वधतैलं रोमहरम् । "आरग्वधमूलं कर्षद्वितयं शङ्खचूर्णस्य । हरितालस्य च खरजे मूत्रप्रस्थे कटुतैलं पक्वम् । तैलं तदिदं शङ्खहरितालचूर्णितं लेपात् निर्मूलयति च रोमाण्यन्येषां सम्भवो नैव" चक्रद० ।

आरग्वधादिपाचनम् तत्रैव यथा "आरग्वधग्रन्थिकमुस्तपित्ता हरीतकीभिः क्वथितः कषायः । सामे समूले कफवातयुक्ते ज्वरे हितो दीपनपाचनश्च" ।

आरट त्रि० आरटति आ+रट-अच् । १सम्यक् शब्दकारके २नटे पु० स्त्रियां गौरा० ङीष् ।

आरट्ट पु० आरट्यते विख्याप्यते आ+रट टच् टस्य नेत्त्वम् । विशिष्टाश्वोत्पत्तिस्थाने (आरव) देशे । अश्वशब्दे विवृतिः ।

आरट्टज पु० आरट्टे देशे जायते जन-ड । (आरव) देशजाते घोटके । "आरट्टजवटुलनिष्ठुरपातसुखैः" माघः अश्वशब्दे ५०४तद्देशाश्वधर्म्मा ज्ञेयाः ।

आरणि पु० आ+ऋ-अनि । जलानां स्वयं भ्रमणे आवर्त्ते ।

आरणेय पु० अरण्यां भवः अरणी+ढक् । १शुकदेवे तस्यारणीसम्भवकथा अरणीसुतशब्दे २५६पृष्ठे विवृता । अरणिमरणिहरणमधिकृत्य कृतोग्रन्थः ढक् । भारतवनपर्वान्तर्गते अरणिहरणाधिकारेण व्यासेन कृते अवान्तरपर्व्वभेदे तच्च पर्व्व वनपर्वणि २११अध्यायावधि २१४ अध्यायपर्य्यन्तम् "आरणेयं ततः पर्व"भा० आ० १अ० अरण्याददं, स्वार्थे वा ढक् । अरणीसम्बन्धिनि ३वन्हिभेदे ४अरण्यां च "आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने । भा०व० २१३अ० ।

आरण्य त्रि० अरण्ये भवः यत् । वनभवे १पशुप्रभृतौ पशवश्च द्विविधा ग्राम्या आरण्याश्च यथाह पैठी० "ग्राम्यारण्याश्चतुर्दश गोरविरजोऽश्वोऽश्वतरोगर्द्भोमनुष्यश्चेति सप्त ग्राम्याः पशवः, महिषवानरकृष्णसरीसृपरुरुशशमृगाश्चेति सप्तारण्याः" एते च कर्मविशेषोपयुक्ता एतद्भिन्ना अन्येऽपि पशवः ग्राम्या आरण्याश्च अश्वमेधशब्दे ५०८ पृष्ठादौ उक्ताः । पशुत्वञ्चेह यागार्थालभ्यमानत्वसाम्यात् शकुनादीनामपि "उष्ट्रो वा यदि मेषश्छागो वा यदि हयः । पशुस्थाने नियुक्तानां पशुशब्दोविधीयते" इति यज्ञपार्श्वोक्तेः । अत एव अश्वमेधे "वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कान्" इत्यादौ पक्षिणामपि यज्ञे० २४अ० मन्त्रव्याख्याने "अथारण्याः पशव उच्यन्ते" वेददीपे उपक्रान्तम् अन्ते च कपिञ्जलादयः पृषतान्ताः आरण्याः पशव इत्युक्तं तच्च अश्वमेधशब्दे ५१०पृष्ठे द्रष्टव्यम् तत्र स्त्रीपशूनामहिंसत्वम् "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपीति" शास्त्रात् ति०त० यच्चिस्त्रीतं तत् अश्वमेधातिरिक्तविषयं तत्र स्त्रीपशूनां बहूनामालम्भनविधानात् तच्च अश्वमेधशब्दे द्रष्टव्यम् । "आरण्यानाञ्च सर्वेषां मृगाणां महिषं विना" । "आरण्यांश्च पशून् सर्व्वान्" इति च मनुः । "आरण्याःसुमनसऋषिरे नभङ्गैः" माघः "सप्त ग्राम्या ओषधयः सप्तारण्याः" तैत्ति० ब्रा० तद्विशेषाश्चौषधिशब्दे वक्ष्यन्ते २अकृष्टपच्यधान्यभेदे च । "यदकृष्टे पच्यते तेनारण्यम्" शत० ब्रा० । ज्योतिषोक्ते ३मकरादिमार्द्धे ४सिंहे दिवसे ५मेषे ६वृषे च राशौ च स च "मकरादिमार्द्धसिंहौवन्यौ दिवसेऽजवृषौ च, ज्यो० त० उक्तः ७अरण्यभवे गोमये पु० स्त्रि० कौ० । अरण्यमरण्यवासमधिकृत्य कृतोग्रन्थः अण् । युधिष्ठिरादीनां वनवासाधिकारेण व्यासेन कृते भारतार्गते पर्वभेदे । रामस्य वनवासाधिकारेण वाल्मीकिकृते रामायणान्तर्गते ६काण्डभेदे च ।

आरण्यक त्रि० अरण्ये भवः मनुष्यादिः वुञ् । १अरण्यभवे पथि अध्ययनेन्याये विहारे मनुष्ये हस्तिनि च एवार्थे वुञः साधुत्वं तद्भिन्ने न वुञ् किन्तु ष्ण एव । आरण्यः पशुः गोमये तु वा आरण्यकः पक्षे णः । तत्र मनुष्ये "आरण्यकोपात्तफलप्रसूतिः" रघुः । अध्ययने ऐतरेयारण्यकम् तैत्तिरीयारण्यकं बृहदारण्यकम् "अरण्येऽध्ययनादेव-आरण्यकमुदाहृत" मित्युक्तेरारण्यकत्वमेषाम् । तानि च तत्तद्वेदभागभेदाः । "आरण्यकमधीत्य च" मनुः । "आरण्यकञ्च वेदेभ्यश्चौषधिभ्योऽहृतं यथा" भा० १अ० । "ग्राम्ये चारण्यके गुरुः" भा० उद्यो० १७४ अ० । "अनुस्मृत्य तु ग्राम्याणि कवयः समवस्थिताः । अपीह स्यादपीह स्यात् सारसारदृढत्वया । वेदवादानतिक्रम्य

शास्त्राण्यारण्यकानि च । विपाच्य कदलीस्तम्भं सारं दर्शयिरे नते" इति भा०आ० १८अ० । ४अरण्यगेये सामभेदे च । स्वार्थे कन् । उक्तार्थे भारतान्तर्गते वनपर्व्वणि "एतदारण्यकं पर्व्व भा०आ०प०१अ० । आरण्यककाण्डम् । रामायणान्तर्गते ६काण्डभेदे

आरण्यकुक्कुट पुंस्त्री० अरण्ये भवः आरण्यः कुक्कुटः कर्म्म० । वनकुक्कुटे "आरण्यकुक्कुटः स्निग्धो दृंहणः श्लेष्मणोगुरु । वातपित्तक्षयवमीविषमज्वरनाशनः' इति भा० प्र०तन्मांसगुणा उक्ताः । स्त्रियां जातित्वात् ङीप् ।

आरण्यगान न० आरण्यं वनगेयं गानम् । सामवेदान्तर्गते गानग्रन्थभेदे तस्यारण्ये गेयत्वात् तथात्वम् ।

आरण्यपशु पु० कर्म्म० । स्मृत्युक्ते महिषादौ सप्तविधे ३पशौ आरण्यशब्दे विवृतिः ।

आरण्यमुद्ग पु०नि०कर्म० । वनमुद्गे । आरण्यमुद्गस्येवाकारः पर्णेऽस्याः अच् टाप् । (मुगानी) मुद्गपर्ण्यां स्त्री राजनि०

आरण्यराशि पु०नि०कर्म्म० । आरण्यशब्दोक्ते १सिंहे २मकरादिमार्गे द्विपे ३मेषे ४वृषे च राशौ ।

आरति स्त्री आ+रम–क्तिन् । १उपरमे, २निवृत्तौ च ।

आरत त्रि० आ+रम–क्त । १उपरते २विरते च "अनारतं तेन पदेषु लक्ष्मिताः" किरा० । [(एका)(वगी) प्रभृतौ ।

आरथ पु० ईषद्रथः प्रा०स० । एकाश्वेन गमनसाधने रथे

आरब्ध त्रि० आ+रध–क्त । संसिद्धे तिका० फिञ् । आरब्धायनिः तदपत्ये पुंस्त्री० ।

आरनाल न० आर्च्छति आ+ऋ–अच्, आरः नल–गन्धे घञ् आरो नालोगन्धो यस्य । काञ्जिके । "आरनालन्तु गोधूमैरामैः स्याच्चिरसुषीकृतैः । पक्वैर्वा सम्भितैस्तैस्तु सौवीरसदृशं गुणैः" भा०प्र० । "आरनालं दधि क्षीरं कन्दपक्वं च सक्तवः । स्नेहपक्वञ्च तक्रञ्च शूद्रस्यापि न दुष्यति" अत्रिस० । वा कप् । आरनालकमप्यत्र ।

आरब्ध त्रि० आ+रभ–क्त । कृतारम्भणे "प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः" सा०द० "अनारब्धकार्य्ये एव तु" इत्यादि भा०सू० । यस्य कियदंशं कर्त्तुमारेभे तादृशः पदार्थः आरब्धः । भावे क्त । २आरम्भे न० 'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । आरब्धे सूतकं न स्यादनारब्धेतु सूतकम्" तिथि०त० विष्णुः ।

आरब्धफलयोः सुकृतदुष्कृतयोः तत्त्वज्ञानोत्पत्तावपि यावत्फलसमाप्ति न नाशः इत्येतत् भा०सू०भा० स्थिरीकृतम् यथा "बन्धहेत्वोर्विद्यासामर्थ्यादशेषविनाशसिद्धेरवश्यं भाविनी विदुषः शरीरपातेन मुक्तिरित्यवधारयति । "अनारब्धकार्य्ये एव तु पूर्व्वे तदवधि" भा० सू० "पूर्व्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्य्ययोर्भवत्युत विशेषेणानारब्धकार्य्ययोरेवेति विचार्य्यते तत्र "उभे ह्येवैष एतेन तरतीत्येवमादि" श्रुताववविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्य्ये एव त्विति । अप्रवृत्तफले एव पूर्व्वे जन्मान्तरसञ्चिते, अस्मिन्नपि च जन्मनि प्राक्ज्ञानोत्पत्तेः सञ्चिते च सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्य्ये सोमिभुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनजन्म निर्म्मितम् । कुतएतत् ? "तस्य तावदेव चिरं यावन्न विमोक्ष्य इति" शरीरपातावधिकरणात् क्षेमप्राप्तेः । इतरथा हि ज्ञानादशेषकर्म्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षा नाचक्षीत । ननु वस्तुबलेनैवायमकर्त्तात्मबोधः कर्म्माण्यपचयन् कथं कानिचित् क्षपयेत् कानि चिच्छेषयेत्तेन नहि समानेऽग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति, उच्यते न तावदनाश्रित्यारब्धकार्य्यं कर्म्माशयं ज्ञानोत्पत्तिरुपपद्यते । आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम् । अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्म्माण्युच्छिनत्ति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्त्ततएव । अपि च नैवात्र विवदितव्यं ब्रह्मविदां कञ्चित् कालं शरीरं म्रियते न म्रियत इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणव्यापरेण प्रतिक्षेप्तुं शक्येत । श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्द्देशेनैतदेव निरूप्यते । तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः" भा० । "चक्रभ्रमणवद्धृतशरीरः" सांख्यसूत्रेण फलजनकस्य कर्मणोनाशेऽपि चक्रजन्यवेगस्य चक्रनाशेऽपि स्थितिवत् देहरूपस्य कर्मफलस्य संस्कारात्मनास्थितिरित्यवधारितम् । यथा च आरब्धफलस्य कर्म्मणो यावदधिकारस्थितिस्तथा निर्णीतं भा०सू०भा० ३अ०३पादे यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" भा०सू० "विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते । ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्द्देशः स्यान्नवेति नेयं चिन्तोपपद्यते । न हि पाकसाधनसम्पत्ता-

वोदनोभवेन्नवेति चिन्ता सम्भवति नापि भुङ्क्तानस्तृप्यति न वेति चिन्यते । उपपन्ना त्विय चिन्ता ब्रह्मविदामपि केषाञ्चिदितिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात् । तथा-ह्यपान्तरतमा नाम वेदाचार्यः पुराणर्षिः विष्णु नियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः सम्भूवेति स्मरन्ति । वशिष्ठश्च ब्रह्मणोमानसः पुत्रः सन्निमित्तापादपगतपूर्व्वदेहः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां, भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वारुणे यज्ञे पुनरुत्पत्तिः स्मर्य्यते । सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव । एवमेव दत्तनारदप्रभृतीनामपि भूयसी देहान्तरोत्पत्तिकथा तेन तेन निमित्तेन भवति स्मृतौ, श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते । ते च क्वचित् पतिते पूर्व्वदेहे देहान्तरमाददते, क्वचित्तु स्थितएव तस्मिन् योगैश्वर्य्यवशादनेकदेहादानन्यायेन । सर्व चैते समधिगतसकलवेदार्थाः स्मर्य्यन्ते । तदेतेषां देहान्तरोत्पत्तिदर्शनात् प्राग्ब्रह्मविद्यायाः पाप्मिकं मोक्षहेतुत्वमहेतुत्वं वेत्यत उत्तरमुच्यते । न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्त्तनादिकलोकस्थितिहेतुष्वधिकारेषु नियुक्तानामधिकारतन्त्रत्वात् स्थितेः । यथासौ भगवान् सविता सहस्रयुगपर्य्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति "अथात्र जर्ङ्ग उदेत्य नैवोदेता नास्तमेतैकलएव मध्ये स्थातेति" श्रुतेः । यथा च वर्त्तमाना ब्रह्मविदः प्रारब्धभोगक्षये कैवल्यमनुभवन्ति "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्म्माणो यावदधिकारमवतिष्ठन्ते तदवसाने चापदुच्यन्त इत्यविरुद्धम् । सकृत्प्रवृत्तमेव हि तेऽधिकारफलदानाय कर्म्माशयमतिवाहयन्तः स्वातन्त्र्येण शरीरादिव शरीरान्तरमन्यमन्यं देहं सञ्जरन्तः स्वाधिकारनिर्व्वर्त्तनायापरिमुषितस्मृतयएव देहेन्द्रियप्रकृतिवशित्वान्नियामकबलेन युगपत् क्रमेण वाऽधितिष्ठन्ति । नचैते जातिस्मरा इत्युच्यन्ते तएव त इति स्मृतिप्रसिद्धेः । यथा सुलभा ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहं, जानकं देहमाविश्य व्युह्य तेन, पश्चात्तं स्वमाविवेशेति स्मर्य्यते । यदि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्मान्तरं देहान्तरारम्भकारणमाविर्भवेत् ततोऽन्यदग्धमदग्ध बीजं कर्म्मान्तरं तद्वदेव प्रसज्यतेति ब्रह्मविद्यायाः पाप्मिकं मोक्षहेतुत्वमहेतुत्वं वाशङ्क्येत न तवेयमाशङ्का युक्ता ज्ञानात् कर्म्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात् । तथा हि श्रुतिः "भिद्यते हृदयग्रन्थिरित्येवमादिः" "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इति च । स्मृतिरपि "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन । । ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथेति" । "बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः । ज्ञानदग्धैस्तथाक्लेशैर्नात्मा सम्पद्यते पुनरिति" चैवमाद्या । नचाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्म्माशयस्यैकदेशदाहएकदेशप्ररोहश्चेत्युपपद्यते न ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते । प्रवृत्तफलस्य तु कर्म्माशयस्य सकृते शरीरवेगक्षयान्निवृत्तिः "तस्य तावदेव चिरमिति" शरीरपातस्योपकरणात् । तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः" भा० । अतएव वाचस्पत्ये उक्तम् "उपासनादिसंसिद्धितोषितेश्वरनोदितम् । अधिकारं समाप्यैव प्रविशन्ति परं पदम्" इत्यवरुद्धे "ध्वान्तं घनारब्धमिवार्द्धरात्रः" किरा० । "घनारब्धम् मेघावरुद्धम्" मल्लि० । घनारुद्धइत्येव ज्यायान् पाठः तेनास्य अवरुद्धार्थकत्वे प्रमाणाभावेऽपि न क्षतिरिति

आरभटी स्त्री० आरभ्यतेऽनया आ+रभ—अटि ङीप् । नाट्ये अर्थविशेषयुक्ते सा० दर्पणोक्ते रचनाभेदे सा च भेदोदाहरणसहिता सा० द० उक्ता यथा

"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । संयुक्ता पण्डिताद्यैरुद्भटाऽऽरभटी मता । वस्तूत्थापनसंफेटौ संक्षिप्तिश्च वपातनम् । इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः । मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते । यथोदात्तराघवे । "जीयन्ते जयिनोनिशान्ततिमिरव्रातैर्विधेयद्यापिभिर्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी । एते चोग्रकबन्धकण्ठरुधिरैराघ्रायमानोदराश्चञ्चन्नाननकन्दरानलमुचस्तीव्रान् रवान् फेरवः" इत्यादि । संफेटस्तु समाधाय युद्धसत्वरयोर्द्वयोः । यथा मालत्यां माधवाघोरघण्टयोः । संक्षिप्ता वस्तुरचना शिल्पैरितरथापि वा । संक्षिप्तिः स्यात् निहतौ च नेतुर्नेत्रान्तरग्रहः । उदयनचरिते किलिञ्जहस्तिप्रयोगः । द्वितीयं यथा । बालिनिहत्या सुग्रीवः यथा वा परशुरामस्यौद्धत्यनिहत्या शान्तत्वापादानं "पुण्या ब्राह्मणजातिरन्वयगुणः शास्त्रं चरित्रं च मे येनैकेन हृतान्यमूनि हरता चैतन्य मात्रात्मनि । एकः सन्नपि भूरिदोषगहनं सोऽयं त्वया

प्रेयसा वत्स । ब्राह्मणत्वलेन शमितः क्षेमाय दर्शनम" । प्रवेशश्वासनिष्क्रान्तिहर्षविप्लवसम्भवम्। अवपातनमित्युक्तम्। यथा कुमारसंभवे षष्ठेऽङ्के । प्रविश्य खड्गहस्तः पुरुष इत्यतः प्रभृति निष्क्रमणपर्य्यन्तम् । सर० क० उक्ते शब्दालङ्कारहपे २वृत्तिभेदे च सा च २८८पृष्ठे दृश्या । आरः सामर्थ्येन गामी भटः । २शूरे वीरे पु० हेमचन्द्रः ।

आरभ्य अव्य० आ+रभ–ल्यप् । १उपक्रम्यत्वर्थे "आरभ्य तस्यां दशमीञ्च यावत् प्रपूजयेत् पर्व्वतराजपुत्रीम्" दुर्गो०त०पु० अनारभ्याधीतत्वात्"मीमांसा । कर्मणि क्यप् । २आरम्भणार्हे आरम्भणीये त्रि० ।

आरमण न० आ+रम–भावे ल्युट् । १आरामे, विश्रामे आरम्यतेऽनेन करणे ल्युट् । आरतिसाधने "स आत्मन्नारमणं नाविन्दत्" तैत्ति० चक्षुषोरेवैते आरमणे कुरुतः" शत० ब्रा० ।

आरम्बण न० आ+लबि–ल्युट् वेदे लस्य रः । आलम्बने "तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परियन्ति" छा०उ० अनारम्बणानि अनालम्बनानि"भा०"यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानःस्वर्गलोकनाक्रमेत्" ब्रा०उ०

आरम्भ पु०आ+रभ घञ् सुम् । १उद्यमे २त्वरायां स्वार्थे परार्थे वा ३गृहादिसम्पादनव्यापारे ४उपक्रमे प्रथमकृतौ ५प्रस्तावने ६वधे ७दर्पे च । "अनारम्भेऽपि परगृहसुखी सर्पवत्" सा०सू०"आरम्भे कर्मणां विप्र! पुण्डरीकं स्मरेद्धरिम्" स्मृतिः "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते"गीता "मीनादिस्थेरविर्येषामारम्भःप्रथमक्षणे । इति म०त० व्यासः "अयथाबलमारम्भः" माघः । "आगमैः सदृशारम्भा आरम्भसदृशोदयः" इति रघुः क्रियाकूटात्मकयागादिक्रियाणां प्राथमिकव्यापारोपक्रमआरम्भः । नैतस्मार्त्तकर्म्मविशेषे अङ्गविशेषारम्भेऽपि प्रकृतकर्म्मारम्भत्वेन आरब्धत्वान्न स्मृतकादेः प्रतिबन्धकत्वम् । यथा "आरम्भोवरणं यज्ञे संकल्पोव्रतजप्ययोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया । तथा निमन्त्रणं श्राद्धे आरम्भः स्यादिति स्मृतिः आरब्धे स्मृतके नस्यादिति"ति०त०विष्णुः। द्रव्याणां द्रव्यान्तरेण गुणानां गुणान्तरेणोत्पादने वैशेषिकोक्ते व्यापारे "द्रव्यारम्भश्चतुर्षु स्यात्" भाषा० कर्मणि घञ् । ६आरभ्यमाणे"फलानुमेयाः प्रारम्भाः संस्कारा: प्राक्तना इव" रघुः । "चित्तार्पितारम्भइवावतस्थे" कुमा० ।

आरम्भक त्रि० आरभते आ+रभ–ण्वुल् सुम् । १आरम्भकारके वैशेषिकादिमतसिद्धे महत्त्वाद्युपचयाय अवयवानां २विजातीयसंयोगे च । "तत आरम्भकसंयोगनाशः" सुक्ता० आरम्भवादशब्दे शा०भा०उदा० ।

आरम्भण न० आ+रभ–ल्युट् सुम् । २आरम्भशब्दार्थे कर्मणि ल्युट् । २आरभ्यमाणे च । यथा "सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वमिदं मृण्मयं विज्ञातं भवति वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्"छा०उ० "तदनन्यत्वमारम्भणशब्दादिभ्यः"शा०सू०आरम्भणं प्रयोजनमस्य अनुग्रचना० अण् । ३आरम्भणप्रयोजनपदार्थे त्रि० । आरभ्यतेऽनेन करणे ल्युट् । ४उपादानकारणे"किं स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत्" यजु० १७,१८ । "लोके हि घटादि चिकीर्षुः कुलालो मृद्घटादिकं स्थानमधिष्ठाय मृदूपेणारम्भकद्रव्येण चक्राद्युपायैर्निर्म्मादयति ईश्वरस्य तदाचिख्यते । स्विदिति वितर्के द्यावाभूमी सृजतोविश्वकर्म्मणोऽधिष्ठानं किमासीत् निवासस्थानम्, अद्यतना निरधिष्ठानाः किमपि न कुर्वन्ति । स्विदिति वितर्के आरम्भणं कतमत् किमासीत् आरभ्यतेऽनेनेति आरम्भणमुपादानकारणम् मृदिव घटानाम्" वेददी० ।

आरम्भणीय त्रि० आ+रभ–शक्यार्थे अनीयर् सुम् । यस्य आरम्भःकर्त्तुं शक्यते तस्मिन् प्रयोजनादियुक्ते पदार्थे "तत्पुनः शास्त्रमारम्भणीयमिति" विवरणोपन्यासः ।

आरम्भवाद पु० आरम्भस्य वादः परीक्षापूर्व्वकः कथाभेदः । वैशेषिकाद्यभिमते परमाणुभ्य एव जगदुत्पत्तिनिर्णायके वादे । स च "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति"वै०सू०दर्शितः "आत्माकाशाणुसुखतः कारणं पूर्व्वमिष्यते । कुलालादिवदण्डन्तु घटवज्जन्मनाशभाक् । पृथिव्यम्भोऽग्निवायूनां कर्मसंयोजितास्त्रयः । द्व्यणुकादिक्रमेणाण्डमारभन्ते इदं सकृदिति" हि तेषां वादः । शा०भाष्ये तु तदेतन्मतमुत्थाप्य निराकृतं यथा "परमाणुकारणवादइदानीं निराकर्त्तव्यः । तत्रादौ तावद्द्व्यणुकारणवादिना ब्रह्मवादिनि दोष उद्भाव्यते स प्रतिसमाधीयते । तत्रायं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवायिनोगुणाः कार्य्यद्रव्यसमानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्य्ययाऽदर्शनाच्च । तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्य्येऽपि जगति चैतन्यं समवेयात् तददर्शनात्। न चेतनं ब्रह्म जगत्कारणमिष्टमर्हं-

तीति। इत्यमभ्युपगमन्तदीयर्यैव प्रक्रियया व्यभिचारयति। "महद्दीर्घवद्ध्रस्वपरिमण्डलाभ्याम्" सू०। "एषा तेषां प्रक्रिया परमाणवः किल किञ्चित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणास्तिष्ठन्ति। ते च पश्चाद्दृष्टादिपुरःसराः संयोगसचिवाश्च सन्तोद्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्तरम्। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयोद्व्यणुके शुक्लादीनारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यम् न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्त्तिनी परिमाणे वर्णयन्ति। यदापि त्रे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम्। अणुत्वह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभन्ते तदापि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात्मनोऽणु ह्रस्वञ्च द्व्यणुकं जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलम्। यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतोमहद्दीर्घञ्च त्र्यणुकादि जायते नाणुनोत ह्रस्वम् एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे तव किं क्लिश्नम्। अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादि ततोन्यारम्भकाणि कारणगतानि पारिमाण्डल्यादीनि इत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना कार्ये चेतनान्तरं नारभेत। नह्यचेतनानां चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात्। तस्मात् पारिमाण्डल्यादि वैधर्म्यात् प्राप्नोति चेतनाया आरम्भकत्वमिति, नैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वमेवं चैतन्यस्यापीत्यसांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणं प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारम्भकत्वोपपत्तेः आरब्धमपि कार्यं द्रव्यं प्राग्गुणारम्भात् क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भेऽप्यणि पारिमाण्डल्यादीनीत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यान्यहेतुकत्वाभ्युपगमात्। "कारणबहुत्वात् प्रचयविशेषाच्च महत्" "तद्विपरीतमणु"। "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित् कारणबहुत्वादीनि एवारभन्ते न पारिमाण्डल्यादीनीत्युच्यते द्रव्यान्तरे गुणान्तरे वाऽऽरभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात् यथा स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथा चेतनाया अपि द्रष्टव्यम् संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणमुदाजहार "प्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य पञ्चात्मकत्वं न विद्यते" इति। यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयन् संयोगोऽप्रत्यक्षः एवं प्रत्यक्षाप्रत्यक्षेषु पञ्चसु भूतेषु समवयत् शरीरमप्रत्यक्षं स्यात् प्रत्यक्षन्तु शरीरं दृश्यते तस्माच्च पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगोद्रव्यं शरीरम्। दृश्यतेत्विति चात्रापि विलक्षणोत्पत्तिः प्रपञ्चिता। नन्वेवं सति तेनैवैतदुक्तम्, नेति ब्रूमः तत्सांख्यं प्रत्युक्तं एतत्तु वैशेषिकं प्रति। नन्वतिदेशोऽपि समानन्यायतःकृतः "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इति सत्यमेतत् तस्यैव त्वयं वैशेषिकपरोक्षारम्भे तत्प्रक्रियानुगतेन निदर्शनेन प्रपञ्चः कृतः। "उभयथापि न कर्मातस्तद्भावः" सू०। इदानीं परमाणुकारणवादं निराकरोति। स च वादस्तं समुत्तिष्ठति। घटादीनि हि सावयवानि द्रव्याणि स्वानुगतैः संयोगसचिवैस्तत्त्वादिभिर्द्रव्यैरारभ्यमाणानि दृष्टानि तत्सामान्येन यावत्किञ्चित् सावयवं सर्वन्तत् स्वानुगतैरेव संयोगसचिवैस्तैस्तैर्द्रव्यैरारब्धमिति गम्यते। सचायमवयवावयविविभागोयतो निवर्त्तते सोऽपकर्षपर्य्यन्तगतः परमाणुः। सर्वञ्चेदं गिरिसमुद्रादिकं जगत् सावयवं सावयवत्वादाद्यन्तवत् न चाकारणेन कार्येण भवितव्यमित्यतः परमाणवोजगतः कारणमिति कणभुगभिप्रायः। तानीमानि चत्वारि भूतानि भूम्यप्तेजःपवनाख्यानि सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यन्ते। तेषाञ्चापकर्षपर्य्यन्तगतत्वेन परतोविभागासम्भवाद्विनश्यताञ्च पृथिव्यादीनां परमाणुपर्य्यन्तविभागो भवति स प्रलयकालः। ततः सर्गकाले च वायवीयेष्वणुष्वदृष्टापेक्षं कर्मोत्पद्यते तत्कर्म स्वाश्रयमणुमखन्तरेण संयुनक्ति ततो

द्व्यणुकादिक्रमेण वायुरुत्पद्यते एवमग्निः एवमापः एवं पृथिवी एवं शरीरं सेन्द्रियमित्येवं सर्वमिदं जगदणुभ्यः सम्भवति। अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि सम्भवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते। तत्रेदमभिधीयते वियोगावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगन्तव्यः कर्मवतां तन्त्वादीनां संयोगदर्शनात्। कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यम् अनभ्युपगमे निमित्ताभावान्नाणुष्वाद्यं कर्म स्यात्। अभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा यथादृष्टं किमपि कर्मणोनिमित्तमभ्युपगम्येत तस्यासम्भवान्नैवाणुष्वाद्यं कर्म स्यात् न हि तस्यामवस्थायामात्मगुणः प्रयत्नः सम्भवति शरीराभावात्। शरीरप्रतिष्ठे हि मनस्यात्ममनःसंयोगे सत्यात्मगुणः प्रयत्नो जायते। एतेनाभिघातादयपि दृष्टनिमित्तं प्रत्याख्यातव्यम्। सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं सम्भवति। अथादृष्टमाद्यस्य कर्मणोनिमित्तमिष्येत तत्पुनरात्मसमवायि वा स्यादणुसमवायि वा उभयथापि नादृष्टनिमित्तमणुषु कर्मावकल्पेत अदृष्टस्याचेतनत्वात्। नह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्त्तते प्रवर्त्तयति वेति साङ्ख्यपरीक्षायामभिहितम्। आत्मनश्चानुत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुषु कर्मणोनिमित्तं स्यात् असम्बन्धात्। अदृष्टवता पुरुषेणाद्यैरणूनां सम्बन्ध इति चेत् सम्बन्धसातत्यात् प्रदृत्तिसातत्यप्रसङ्गः नियामकान्तराभावात्। तदेवं नियतस्य कस्यचित् कर्मनिमित्तस्याभावान्नाणुष्वाद्यं कर्म स्यात् कर्माभावात् तन्निबन्धनः संयोगो न स्यात् संयोगाभावाच्च तन्निबन्धनं द्व्यणुकादि कार्यजातं न स्यात्। संयोगश्चाणोरणुन्तरेण सर्वात्मना वा स्यादेकदेशेन वा, सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसङ्गोदृष्टविपर्ययप्रसङ्गश्च प्रदेशवतोद्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्। एकदेशेन चेत् सावयवत्वप्रसङ्गः। परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत् कल्पितानामवस्तुत्वादवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायि कारणं न स्यात् असति चासमवायिकारणे द्व्यणुकादि कार्यद्रव्यं नोत्पद्येत। यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां सम्भवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमिति अतोनिमित्ताभावाच्च स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थञ्च कर्म। अतश्च संयोगविभागावत्तयोः सर्गप्रलययोरभावः प्रसज्येत। तस्मादनुपपन्नोऽयं परमाणुकारणवादः। "समवायाभ्युपगमाच्च साम्यादनवस्थितेः" सू०समवायाभ्युपगमाच्च तद्भाव इति प्रकृतेनाणुवादनिराकरणेन सम्बध्यते। द्वाभ्यामणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामसखोः समवैतीत्यभ्युपगम्यते भवता न चैवमभ्युपगच्छता शक्यतेऽणुकारणवादः समर्थयितुम्, कुतः? साम्यादनवस्थितेः। यथैव ह्यणुभ्यामत्यन्तभिन्नं सद् द्व्यणुकं समवायलक्षणेन सम्बन्धेन ताभ्यां सम्बध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव सम्बन्धेन समवायिभिः सम्बध्येत अत्यन्तभेदसाम्यात् ततश्च तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्था प्रसज्येत। नन्विह प्रत्ययग्राह्यः समवायो नित्यसम्बन्धएव समवायिभिर्गृह्यते नासम्बद्धः सम्बन्धान्तरापेक्षो वा ततश्च न तस्यान्यः सम्बन्धः कल्पयितव्योयेनानवस्था प्रसज्येत। नेष्यते। संयोगोऽप्येवं सति संयोगिभिर्नित्यसम्बन्ध एवेति समवायवन्नान्यं सम्बन्धमपेक्षेत। अथार्थान्तरत्वात् संयोगः सम्बन्धान्तरमपेक्षते, समवायोऽपि तर्ह्यर्थान्तरत्वात् सम्बन्धान्तरमपेक्षेत। स च गुणत्वात् संयोगः सम्बन्धान्तरमपेक्षते न समवायोऽगुणत्वादिति युज्यते वक्तुम् अपेक्षाकारणस्य तुल्यत्वात् गुणपरिभाषायाश्चातन्त्रत्वात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतां प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत तस्मादप्यनुपपन्नः परमाणुकारणवादः। "नित्यमेव च भावात्" सू०। अपि च अणवः प्रदृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वाऽभ्युपगम्येरन् गत्यन्तराभावात् चतुर्ष्वपि नोपपद्यते। प्रदृत्तिस्वभावत्वे नित्यमेव प्रदृत्तेर्भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वेऽपि नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभावत्वञ्च विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात् प्रदृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नित्यप्रदृत्तिप्रसङ्गः। अतन्त्रत्वेऽप्यदृष्टादेर्नित्यप्रदृत्तिप्रसङ्गः तस्मादप्यनुपपन्नः परमाणुकारणवादः। "रूपादिमत्त्वाच्च विपर्ययो दर्शनात्" सू०। नावयवानां द्रव्याणामवयवशोविभज्यमानानां यतः परोविभागो न सम्भवति ते चतुर्विधा रूपादिमन्तः परमाणवश्चतुर्विधस्य रूपा-

दिमतो भूतभौतिकस्यारम्भका नित्याश्चेति यद्वैशेषिका अभ्युपगच्छन्ति स तेषामभ्युपगमो निरालम्बन एव यतो रूपादिमत्त्वात् परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत परमकारणापेक्षया स्थूलत्वमनित्यत्वञ्च तेषामभिप्रेत विपरीतमापद्येतेत्यर्थः। कुतः ? एवं लोके दृष्टत्वात्। यद्धि लोके रूपादिमद्वस्तु तत् स्वकारणापेक्षया स्थूलमनित्यञ्च दृष्ट "तद्यथा पटस्तन्ननपेक्ष्य स्थूलोऽनित्यश्च भवति तन्तवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवन्ति। तथा चामी परमाणवोरूपादिमन्तस्तैरभ्युपगम्यन्ते तस्मात्तेऽपि कारणवन्तस्तदपेक्षया स्थूला अनित्याश्च प्राप्नुवन्ति। यच्च नित्यत्वे कारणं तैरुक्तं "सत्कारणवन्नित्यमिति"। तदप्येवं सत्यणुषु न सम्भवति उक्तेन प्रकारेण कारणवत्त्वोपपत्तेः यदपि नित्यत्वे द्वितीयं कारणमुक्तम् "अनित्यमिति च विशेषतः प्रतिषेधाभाव" इति। तदपि नावश्यं परमाणूनां नित्यत्वं साधयति यस्मिन् कस्मिंश्चिद्धेये वस्तुनि नित्यशब्देन नञः समासो नोपपद्यते न पुनः परमाणुनित्यत्वमेवापेक्षते तच्चास्त्येव नित्यं परमकारणं ब्रह्म। न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति प्रमाणान्तरसिद्धयोः शब्दार्थयोर्व्यवहारावतारात्। यदपि नित्यत्वे तृतीयं कारणमुक्तम्। "अविद्या चेति"। तदप्येवं विक्रियेत सतां परिदृश्यमानकार्याणां कारणानां प्रत्यक्षेणाग्रहणमविद्येति ततोऽणुकनित्यताप्यापद्येत। अथाद्रव्यवत्त्वे सतीति विशेष्यते तथाप्यकारणवत्त्वमेव नित्यतानिमित्तमापद्येत तस्य च प्रागेवोक्तत्वादविद्या चेति पुनरुक्तं स्यात्। अथापि कारणविभागात् कारणविनाशाच्चान्यस्य तृतीयस्य विनाशहेतोरसम्भवोऽविद्या सा परमाणूनां नित्यत्वं ख्यापयतीति व्याख्यायेत। नावश्यं विनश्यद्वस्तु द्वाभ्यामेव हेतुभ्यां विनंष्टुमर्हतीति नियमोऽस्ति संयोगसचिवे ह्यनेकस्मिंश्च द्रव्ये द्रव्यान्तरस्यारम्भकेऽभ्युपगम्यमाने एतदेवं स्यात् यदा त्वपास्तविशेषं सामान्यात्मकं कारणं विशेषवदवस्थान्तरमापद्यमानमारम्भकमभ्युपगम्यते तदा दृतकाठिन्यविलयनवत् भूत्यै वस्थाविलयनेनापि विनाश उपपद्यते। तस्माद्रूपादिमत्त्वात् स्यादभिप्रेतविपर्ययः परमाणूनां, तस्मादप्यनुपपन्नः परमाणुकारणवादः। "उभयथा च दोषात्" सू०। गन्धरसरूपस्पर्शगुणा स्थूला पृथ्वी, रसरूपस्पर्शगुणाः सूक्ष्मा आपः, रूपस्पर्शगुणं रूक्षतरं तेजः, स्पर्शगुणः सूक्ष्मतमोवायुरित्येवमेतानि चत्वारि भूतान्युपचितापचितगुणानि स्थूलसूक्ष्मतारतम्योपेतानि च लोके लक्ष्यन्ते तद्वत् परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन् न वा। उभयथापि तद्दोषानुषङ्गोऽपरिहार्य एव स्यात्। कल्प्यमाने तावदुपचितापचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्व प्रसङ्गः। नचान्तरेणापि मूर्त्युपचयं गुणोपचयो भवतीत्युच्येत कार्य्येषु भूतेषु गुणोपचये मूर्त्युपचयदर्शनात्। अकल्प्यमाने त्वपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत् सर्व्वएव एकैकगुणाएव कल्पेरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात् अप्सु रूपस्पर्शयोः, पृथिव्यां रूपरसस्पर्शानां, कारणगुणपूर्व्वकत्वात् कार्य्यगुणानाम्। अथ सर्वे चतुर्गुणाएव कल्पेरन् ततोऽप्सु पि गन्धस्योपलब्धिः स्यात् तेजसि च गन्धरसयोः, वायौ च गन्धरसरूपाणां, न चैवं दृश्यते। तस्मादप्यनुपपन्नः परमाणुकारणवादः"। एतेनादृष्टस्य सातत्येऽपि कालवशात् नियमसमर्थनम् परेषामकिञ्चित्करम्। महाकालस्यैकत्वेन नियामकत्वाभावात् खण्डकालस्य च तदानीं क्रियाद्यभावेन विशेषकत्वासम्भवात् क्रियायाः मूर्त्तद्रव्याधीनत्वान्मूर्त्तस्य चावयवसंयोगाधीनत्वेन सर्गोत्तरमेवोत्पत्तेस्तदाऽसत्त्वात्। यच्च निरवयवस्य परमाणोर्दिगवच्छेदेन संयोगसम्भवसमर्थनं तदप्यकिञ्चित्करं नित्यायादिशस्तदवच्छेदकत्वासम्भवात् दिग्विभागस्यैवावच्छेदकत्वस्य लोके दृष्टत्वात् दिग्विभाजकस्य चावयवभेदस्य परमाणोरसम्भवेन तत्त्वायोगात्। किञ्च "षट्केन * युगपद्योगात् परमाणोः षडंशतेत्यापत्तिश्च तथाहि दिगवच्छेदेन संयोगे हि पूर्व्वादिचतुर्दिग्भेदेन ऊर्द्ध्वाधोदिग्भेदेन च षट्सु दिक्षु विभिगमनाभावेन युगपद्योगापत्त्या परमाणोः षडंशतापत्तिरूपेण निरवयवत्वं तस्य न सिध्येत्। वस्तुतः प्राच्यादिव्यवहारस्य उदयगिर्य्यादिसम्बन्धाधीनत्वेन तस्य च सर्गोत्तरकालीनतया तदानीं तद्व्यवहारः सर्वथा न सम्भवत्येवेति दिगवच्छेदेन परेषां संयोगकल्पनं सर्व्वथा ऽयुक्तमेव। अधिकम् अवयविशब्दे ४३२४८४दौ द्रष्टव्यम्

आर(रा)व पु० आ+रु-अप् पक्षे घञ्। सम्यक्शब्दे। "वानराश्चक्रुरारवम्" रामा०। "उच्छ्रायवान् घनारावो वारणं जलदारवम्" भट्टिः।

आरस्य न० अरसस्य भावः चतुरादि० ष्यञ्। रसभिन्नत्वे नास्ति रसोयस्य बहु० तु त्वतलौ न ष्यञ्। अरसत्वसरसता वेत्येव "उच्चैरसति मन्द्तामरसतामिति" चन्द्रा०।

आरा स्त्री आ+ऋ-अच्। १चर्म्मभेदकास्त्रभेदे। (टेकी) इति

ख्याते २लौहाख्ये। "आराग्रमात्रो ह्यवरोऽपि दृष्टः" श्रुतिः ३प्रतोदे च "या पूषन् ब्रह्मचोदनीमारां बिभर्ष्याङ्गिरे" ऋ० ६,५३,८,। "उद्यम्यारामयत्कायोत्थितस्य" माघः। "आरां प्रतोदम्" मल्लिनाथः।

आराग्र न० आरायाः अग्रम्। १आरायाः अग्रे "आराग्रमात्रोह्यवरोऽपि दृष्टः" श्रुतिः। "अर्द्धचन्द्रक्षुरप्रादिधारायं सुखमुच्यते। आरायन्तु सुखं तेषां पुष्पपत्रादिभेदतः" इति हलायुधोक्ते २अर्द्धचन्द्राकारक्षुरप्राद्यस्त्रसुखे च।

आराज्ञी स्त्री सम्यक् राजते आ+राज–क्विन् ङीप्। देशभेदे घूमा० देशवाचित्वात् वुञ्। आराज्ञकः। तद्देशभवे त्रि०।

आरात् अव्य० आ+रा घा० अति। १दूरे, २समीपे च। आदातुं दयितमिवावगाढमारात्" माघः। "तमर्च्यमारादभिवर्त्तमानम्" रघुः "विचिन्तमुच्चैः प्लवमानमारात्" भट्टिः

आरात्रि पु० आ+रा–क्लिच्। शत्रौ। द्विरूपकोषः।

आरातीय त्रि० आराद्भवः जातः आगतो वा दृष्टत्वात् छ आराच्छब्दवर्जनात् नाव्ययस्य टिलोपः। १निकटदूरयोर्भवे २तत्र जाते ३ताभ्यामागते च।

आरात्रिक न० आरात्रमपि निर्वृत्तं ठञ्। (आरति) नीराजनकर्म्मणि। दीपो हि रात्रावेव प्रदर्श्यते इदं दिनेऽपि दर्श्यते इति तस्य तथात्वम् "ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयम्। महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः। प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा। आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकम्" हरि० विलासे तल्लक्षणादि। तस्य देहांशभेदे भ्रामणप्रमाणमपि तत्रोक्तं यथा "आदौ चतुःपादतले च विष्णोर्द्वौ नाभिदेशे सुखमण्डलैकम्। सर्वेषु चाङ्गेषु च सप्त वारान् आरात्रिकं भक्तजनस्तु कुर्य्यात्"। "शिरसि निहितभारं पात्रमारात्रिकस्य भ्रमयति मयि भूयस्ते कृपार्द्रः कटाक्षः" चतुःषष्ट्युपचारे शङ्करा०

आराधन न० आ+राध–ल्युट्। १पाके, २संसिद्धौ णिच्–ल्युट्। ३साधने ४अवाप्तौ ५तोषणे ६सेवने तोषणसेवनयोः संसिद्धिहेतुत्वात् तथात्वम् "साध्वसाराधनमपि रमणीयमस्याः" शकु०। "आराधनायास्य सखी समेताम्" कुमा०। आराध्यतेऽनेन णिच्–करणे ल्युट्। ७सेवासाधने "इदं तु ते भक्तिनम्रं सतामाराधनं वपुः" कुमा०। "सर्व्वत्र दैत्याः! समतामुपेत समत्वमाराधनमच्युतस्य" भाग० प्रह्लादोक्तिः। [सेवायाम्।

आराधना स्त्री आ+राध–णिच्–युच् स्त्रीत्वात् टाप्।

आराधनीय त्रि० आराधयितुम् शक्यः आ+राध–णिच्–शक्यार्थे अनीयर्। आराधनयोग्ये "सोऽहं कथं नाम तवाचरेयमाराधनीयस्य ऋषेर्विघातम्" रघु०।

आराधय पु० आ+राध–णिच्–बा० य। आराधनकारके ब्राह्म०भावादौ ष्यञ्। आराध्यमु आराधनकर्त्तरि त्रि०।

आराधयितृ त्रि० आ+राध–णिच्–तृच्। १परिचारके। २सेवके "नन्वयमेवाराधयिता जनस्तव समीपे वर्त्तते" शकु०।

आराधित त्रि० आ+राध–णिच्–क्त। सेविते। "नाराधितो यैः पुरुषः प्रधानः तेषां वृथा जन्म नराधमानाम्" भाग०।

आराम पु० आरम्यतेऽत्र आ+रम–आधारे घञ्। क्षत्रिमे वने १उद्याने "आत्मारामाविक्षितरतयोनिर्विकल्पे समाधौ" वेणी० आत्मा आराम इव। घञन्तस्य पुंस्त्वात् घासनात् क्लीवत्वोक्तिः प्रासादिकी। "वाप्यारामतडागकूपभवनारम्भप्रतिष्ठाव्रतेत्यादि" सुहृ०चि०। "क्षेत्रकूपतडागानामारामस्य गृहस्य च" "गृहं तडागमारामं क्षेत्रं वा भीषया हरन्" "तडागारामदाराणामपत्यस्य च विक्रयः" इति च मनुः "जलाशयारामसुरप्रतिष्ठा सौम्ययने जीवशशाङ्कशुक्रे। कृष्णे गृहर्क्षप्रचरध्रुवे स्यात् पक्षे सिते खर्क्षतिथिक्षणे वा रिक्तारवर्ज्ये दिवसेऽतिशस्ता" इत्तर०टी०उक्ते षोड़शभिश्च रगणैरारामः इत्युक्ते २दण्डकभेदे च। आ+रम–भावे घञ्। ३आरतौ "योऽन्तःसुखोऽन्तरारामः" गीता। अन्तरात्मनि आरामोयस्येति विग्रहः "अघायुरिन्द्रियारामोमोघं पार्थ! स जीवति" गीता। आरामकरणप्रकारः" बृहत् सं० उक्तः यथा "प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः। यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत्। गृहे भूः सर्वदृक्षाणां हिता तस्मात् तिलान् वपेत्। पुष्पितांस्तांश्च गृह्णीयात् कर्म्मैतत्प्रथमं भुवि। अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः। मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा। पनसाशोककदलीजम्बूलकुचदाडिमाः। द्राक्षापालीवताश्चैव बीजपूराति मुक्तकाः। एते द्रुमाः काण्डरोहा गोमयेन प्रलेपिताः। मूलच्छेदे ऽथवा स्कन्धे रोपणीयाः प्रयत्नतः। अजातशाखाञ्छिशिरे जातशाखान् हिमागमे। वर्षागमे च सुस्कन्धान् यथादिक् प्रतिरोपयेत्। घृतोशीरतिलक्षौद्रविड़ङ्गक्षीरगोमयैः। आमूलस्कन्धलिप्तानां कुङ्कुमेन विरोपणम्। शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानानुलेपनैः। रोपयेद्रोपितश्चैव पत्रैश्चैरेव जायते। सायं प्रातश्च

घर्म्मान्ते, शीतकाले दिनान्तरे। वर्षासु च भुवः शोषे सेक्तव्या रोपिता द्रुमाः। जम्बूवेतसवानीरकदम्बोदुम्बरार्जुनाः। बीजपूरकम्बद्वीकालकुचाश्च सदाडिमाः। वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा। तिमिरो ऽम्रातकश्चैव षोडशानूपजाः स्मृताः। उक्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्। स्थानात्, स्थानान्तरं कार्य्यं दक्षाणां द्वादशान्तरम्। अभ्यासजातास्तरवः संसृजन्तः परस्परम्। पत्रैर्मूलैश्च न फलं सम्यग्यच्छन्ति पीड़िताः। शीतवातातपैरोगो जायते पाण्डुपत्रता। अदृष्टिश्च प्रवालानां शाखाशोषो रसच्युतिः। चिकित्सितमथैतेषां यत्नेनादौ विशोधनम्। विड्भ्रष्टपत्रशाखान्तान् सेचयेत् क्षीरवारिणा। फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः। घृतशीतपयःसेकः फलपुष्पाभिवृद्धये। अविकाजशकृच्चूर्णखाढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणे गोमांसं तुलया सह। सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्लीगुल्मलतानां च फलपुष्पाय सर्वदा। वासराणि दश दुग्धभावितं बीजमाज्ययुतवस्त्रयोजितम्। गोमयेन वलयो विरूक्षितं क्रौड़मार्गपिथितैश्च धूपितम्। मत्स्यमूत्रकरञ्जसमन्वितं रोपितं च परिकर्मितावनौ। क्षीरसंयुतजलावसेचितं जायते कुसुमयुक्तमेव तत्। तिन्तिडीत्यपि करोति वल्लरीं व्रीहिमाषतिलचूर्णसंयुतैः। पूतिमांसरुधिरैश्च सेचिता धूपिता च सततं हरिद्रया। कपित्थवल्लीकरणाय मूलान्याम्लोदधातोधववासकानाम्। पलाशिनीवेतसचूर्ण्यवल्लीश्यामातिमुक्तैः सहितास्तमूलाः। क्षीरे हृते चाम्यनया सुगीते नालाशताख्यं तु कपित्थबीजम्। दिने दिने शोषितमर्कपाकैर्मांसं विधिस्त्वेष ततो ऽधिरोप्यम्। हस्तायतं तद्द्विगुणं गभीरं खात्वा ऽवटं प्रोक्तजलावपूर्णम्। शुष्कं प्रदग्धं मधुसर्पिषा तत् प्रलेपयेद्वृक्षसमन्वितेन। चूर्णीकृतैर्माषतिलैर्यवैश्च प्रपूरयेन्मृत्तिकयान्तरस्थैः। मत्स्यामिषाम्भःसहितं च हन्याद् यावद्घनत्वं समुपागतं तत्। उप्तं च बीजं चतुरङ्गुलाधो मत्स्यामिषा मांसजलैश्च सिक्तम्। वल्ली भवत्याशु शुभप्रवाला विक्षापनी मण्डपमाददाति। यतश्चोड्डीशसम्भूतफलकल्केन भावितम्। एतत्तैलेन वा बीजं क्ष्वेम्रातकफलेन वा। वापितं करिकोन्मिश्रं मृदि तत्क्षणजन्मकम्। फलभारान्विता शाखा भवतीति किमद्भुतम्। क्ष्वेम्रातकस्य बीजानि निष्कुलीकृत्य भावयेत्प्राज्ञः। अर्कक्षीरद्विजलाङ्किम्प्रायायां सप्त कल्वेषम्। माक्षिकगोमयदृष्टान्यस्य करीषे च तानि निक्षिप्य। करकाजलमृद्योगैर्न्युप्तान्यङ्का फलकराणि। ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाश्विनी हस्तम्। उक्तानि दिव्यदृग्भिः पादपसंरोपणे मानि"।

आरामशीतला स्त्री आरामे तन्नाम्नि शीतला। सुगन्धिपत्रयुक्ते वृक्षभेदे राजनि०। "आरामशीतला तिक्ता शीतला पित्तहारिणी" वैद्य०।

आरामिक त्रि० आरामे तद्रक्षणे नियुक्तः ठक्। उद्यानपाले

आराल त्रि० ईषदरालम् प्रा०स०। ईषत्कुटिले तारका० इतच्। आरालितः ईषत्कुटिलिते त्रि०।

आरालिक त्रि० अरालं कुटिलं चरति ठक्। १पाचके २कुटिलचारिणि च। धनलोभेन परप्रेरितोहि पाचको विषादिसंसृष्टं पचतीति तस्य कुटिलचारित्वम्। अतो राज्ञा यथाभूता याचकानियोज्यास्तदुदर्शितम् सुश्रुते यथा "रिपवो विक्रमाक्रान्ता ये च स्वेऽलयतां गताः। सिद्धयः क्रोधविषं विवरं प्राप्य तादृशम्। विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः। स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया। विषकन्योपयोगाद्वा क्षणाच्छ्रादस्फुरः। तस्माद्दैवेन सततं विषादृच्छो नराधिपः। यस्माच्च चेतोऽनित्यत्वमश्ववत् ग्रथितं नृणाम्। न विश्वस्यात्ततो राजा कदाचिदपि कस्यचित्। कुलीनं धार्म्मिकं स्निग्धं सुभृतं सततोत्थितम्। अलुब्धमग्रुं भक्तं कृतज्ञं प्रियदर्शनम्। क्रोधपारुष्यमात्सर्य्यमदालस्यविवर्जितम्। जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितम्। मेधाविनमसंभ्रान्तमनुरक्तं हितैषिणम्। पटुं प्रगल्भं निपुणं दक्षं मायाविवर्जितम्। पूर्व्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदम्। महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम्। प्रसन्नदिग्देशकृतं शुचिभाण्डं महच्छुचि। सजालकं गवाक्षाढ्यमात्मवर्गनिषेवितम्। विकृष्टसंसृष्टं सवितानं कृतार्च्चनम्। परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम्। तत्राध्यक्षं नियुञ्जीत प्रायोवैद्यगुणान्वितम्। शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः। संविभक्ताः सुमनसो नीचकेशनखाः शिराः। स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः। तस्य चाज्ञाविधेयाः स्युर्विविधाः परिकर्म्मिणः। आहारस्थितयश्चापि भवन्ति प्राणिनो यतः। तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्। आहारसिकवोढारः सौपौदनिकपौपिकाः। भवेयुर्वैद्यवर्गा ये चाम्यन्ये तु केचन। कुत्सितस्त्री मनुष्याणां

काक्चेष्टासुखवैक्लवैः। विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विवक्षन् मोहमेति च। अनर्थं बहु सङ्कीर्णं भाषते चापि मूढवत्। स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेदसेत्। वेपथुर्जायते तस्य तस्तस्यान्योऽन्यमीक्षते। म्लानो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि। आलभेतासकृद्दीनः करेण च शिरोरुहान्। निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः। वक्ति ते विपरीतस्तु विषदाता विचेतनः। केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया। असतोऽपि सतोऽपि चेष्टां कुर्वन्ति मानवाः। तस्मात् परीक्षणं कार्यं भृत्यानामादितो नृपैः। अन्ने पाने दन्तकाष्ठे तथाभ्यङ्गेऽवलेखने। उत्थादने कषाये च परिषेकेऽनुलेपने। खट्वासु वस्त्रेषु शय्यासु कवचाभरणेषु च। पादुकापादपीठेषु पृष्ठेषु गजवाजिनाम्। विषजुष्टेषु चान्येषु नस्यधूमाञ्जनादिषु। लक्षणानि प्रवक्ष्यामि चिकित्सामथनन्तरम्। हृत्यमक्षाद्वलिं न्यस्तं सविषं भक्षयन्ति ये। तत्रैव ते विनश्यन्ति मक्षिकावायसादयः। हुतभुक्तेन चान्नेन भृशं चटचटायते। मयूरकण्ठप्रतिमो जायते चापि दुःसहः। भिन्नार्चिस्तीक्ष्णधूमश्च न चिराच्चोपशाम्यति। चकोरखञ्जिवैराग्यं जायते क्षिप्रमेव तु। दष्टाश्च विषसंदुष्टं म्रियन्ते जीवजीवकाः। कोकिलः स्वरवैक्लव्यं क्रौञ्चस्तु मदमृच्छति। हृष्येन्मयूरोद्विग्नः क्रोशतः शुकसारिके। हंसः क्ष्वेडति चात्यर्थं भृङ्गराजस्तु कूजति। मूत्रतो विसृजत्यम्बु विष्ठां सृजति मर्कटः। सन्निकृष्टांस्ततः कुर्याद्रात्रस्तान् मृगपक्षिणः"।

आराविन् त्रि० आरौति आ+रु-णिनि। सम्यक्शब्दकारके उच्चैःशब्दकारके स्त्रियां ङीप्।

आरित्रिक त्रि० अरित्रे भवादि काश्या० ठञ् ञिठ् वा। अरित्रभवादौ स्त्रियां ठञि ङीष् ञिठि टाप्।

आरिन्द्मिक त्रि०अरिन्द्मे भवादि ठञ् ञिठ् वा। अरिन्द्मभवादौ स्त्रियां ठञि ङीष् ञिठि टाप्।

आरिष्ण्य त्रि० रिष-हिंसे मनु न०त० अरिष्णः अहिंसकः तस्य सन्निकृष्टदेशादौ कृषा० ष्यञ्। अहिंसकसन्निकृष्टदेशादौ।

आरोहणक त्रि० अरोहणेन निर्वृत्तं अरोहणादि० वुञ्। मत्वुधातकनिर्वृत्ते अरोहणेति गणपाठे निर्वृत्तेत्यात् दीर्घः।

आरु पु०ऋ-उण्। १हस्तिभेदे, २कर्कटे, ३शूकरे, च।

आरुज त्रि० आरुजति आ+रुज-क। १सम्यक्पीडके, २आभिमुख्येन हन्तरि च "विद्मा हित्वा धनञ्जयमिन्द्र! दृढा चिदारुजम्" ऋ०८ ४५,१२। "आरुजं शत्रूणामाभिमुख्येन भञ्जकम्" भा०। रावणपक्षीये २राक्षसभेदे पु०। "पर्व्वणः पतनोजस्काः खरः क्रोधवशो हरिः। प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः" भा०व० २८४अ०।

आरुणक त्रि० अरुणदेशे भवादि धूमा० वुञ्। अरुणदेशभवादौ।

आरुणि पु०अरुणस्यापत्यम् इञ्। १उद्दालके गौतमे मुनौ "उद्दालकोहारुणिः श्वेतकेतुं पुत्रमुवाच" छा०उ०। २वैशम्पायनान्तेवासिभेदे। तस्यान्तेवासिनश्च आलम्ब लङ्ग कमल कषाभारुणि ताण्ड्यश्यामायन कठ कलापिनोनवेति बोध्यम्। तेनाधीतं णिनि। ब्राह्मणे तस्य लुक्। आरुणिः। ३सामवेदब्राह्मणभेदे आयोदधौम्यशिष्ये ४मुनिभेदे आयोदधश्च उदा० ५अरुणमुनेरपत्ये पुंस्त्री स्त्रियां ङीप्। "यदारुणीषु तावधीरयुग्ध्वम्" ऋ०१,६४,७। अरुणस्येदम् इञ्। ६अरुणसम्बन्धिनि अरुणस्य सूर्य्यस्यापत्यम् इञ्। ७अरुणतनये अरुणसुतशब्दोक्ते यमादौ। अरुणस्यायमनुजातत्वात् इञ्। अरुणानुजे विनतायाः सुतभेदे। "तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबलः। अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" हरिवं० २२ अ० "अरुणश्चारुणिश्चैव तस्य प्राञ्जलयः स्थिताः" हरिवं० २६१अ०। अरुणस्य गरुड़ाग्रजस्यापत्यमु इञ्। ८गरुड़ाग्रजस्यापत्ये पुंस्त्री। स्त्रियां ङीप्।

आरुणिन् पु० ब०व० आरुणिना वैशम्पायनान्तेवासिना प्रोक्तमधीयते णिनि। वैशम्पायनान्तेवासिविशेषेण आरुणिना प्रोक्ताध्यायिषु।

आरुणेय पु०आरुणेरुद्दालस्यापत्यम् ढक्। उद्दालकपुत्रे श्वेतकेतौ। "उद्दालकोहारुणिः श्वेतकेतुं पुत्रमुवाचेति" छा० उ०"श्वेतकेतोरुद्दालकपुत्रत्वोक्तेरुक्तार्थत्वम्" "श्वेतकेतुरारुणेयः कं खिदेवापरीषु" "श्वेतकेतुरारुणेयोब्रह्मचारी" "श्वेतकेतुनारुणेयेन" इति च शत०ब्रा०।

आरुत न० आ+रु-भावे क्त। आरावे "शकुनं वायसारुतम्" शकुनशा०। कर्तरि क्त। २आरावयुक्ते त्रि०।

आरुद्ध त्रि०आ+रुध-क्त। प्रतिरुद्धे निरुद्धे वादिना कृतगति प्रतिरोधे प्रतिवादिनि।

आरुरुक्षु त्रि० आरोढुमिच्छति आ+रुह-सन्-उ। आरोढुमिच्छौ "आरुरुक्षोर्मुनेर्योगः कर्म्म कारणमुच्यते" गीता "कैलासगौरं वृषमारुरुक्षोः"। "समारुरुक्षुर्दिवमायुषः क्षये" इति च रघुः।

आरुषी स्त्री मनोः कन्याभेदे च्यवनपत्न्याम्। तत्कथा "तस्मिन्नि-युक्ते विधिना योगक्षेमाय भार्गवे। अन्यसुत्पादयामास पुत्रं भृगुरनिन्दितम्। च्यवनं दीप्ततपसं धर्मात्मानं यशस्विनम्। यः सरोषाच्च्युतोगर्भान्मातुर्मोचाय भारत!। आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः। और्व्वस्तस्यां समभवदूरुं भित्त्वा महायशाः" भा०आ०६६अ०।

आरुषीय त्रि० अरुषः व्रणस्य सन्निकृष्टदेशादिः छया०छण्। व्रणसन्निकृष्टदेशादौ।

आरूह त्रि० आ+रुह-क। आरोहणकर्त्तरि।

आरू पु० कृ-ऊ-णिच्। १पिङ्गलवर्णे २तद्युक्ते त्रि०। आरुग्वद्यर्थे ३कर्कटशृङ्गकरादौ च। ततः संज्ञायां कन्। (आड्) हिमाचलप्रसिद्धौषधीभेदे च।

आरूढ त्रि० आ+रुह-कर्त्तरि क्त। १आरोहणकर्त्तरि "आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" स्मृतिः "योगारूढस्य तस्यैव शमः कारणमुच्यते" गीता। "अत्यारूढो हि नारीणामकालज्ञोमनोभवः" रघुः। २उत्पन्ने "तदागमारूढगुरुप्रहर्षः" रघुः "आरूढ उत्पन्नः" मल्लि०। कर्मणि क्त। यत्रारोहणं कृतं तस्मिन् ३कृतारोहणे प्रासादादौ "आरूढकविताशाखं वन्दे वाल्मीकिकोकिलम्" रामा० भावे क्त। ४आरोहणे न०"अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः" रघुः।

आरूढि स्त्री आ+रुह-क्तिन्। आरोहणे। "अत्यारूढिर्भवति महतामप्यधश्चंशनिष्ठा" शुक्र०।

आरेक पु०आ+रिच-घञ्। १आकुञ्चने २अतिरेके च।

आरेचित त्रि० आ+रिच-णिच्-क्त। ईषदाकुञ्चिते "आरेचितभ्रूचतुरैः कटाक्षैः" कुमा०।

आरेवत पु०आरेवयति रेचयति मलं आ+रेव-णिच्-अतच्। अत्यन्तसारकफलके (सोन्दाल) १आरग्वधवृक्षे तस्य फलम् अण् तस्य णुक्। २तत्फले न०। तयोर्गुणादि आरग्वधशब्दे ७६४ पृष्ठे उक्तम्।

आरोग्य न० अरोगस्य भावः ष्यञ्। रोगशून्यत्वे "आरोग्यं वित्तसम्पत्तिर्गङ्गास्नानञ्च फलम्" प्रा०त०पु० वैद्यं क्षेमं समागम्य मूढ्मारोग्यमेव च" मनुः। "धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः" वैद्य०।

आरोग्यव्रत न०आरोग्यार्थं व्रतम्। वराहपुराणोक्ते माघशुक्लसप्तमीमारभ्य वत्सरपर्य्यन्तं प्रतिशुक्लसप्तमीतिथि कर्त्तव्ये सूर्य्यव्रतभेदे। यथा "अतःपरं महाराज! व्रतमारोग्यसंज्ञितम्। सितायां माघमासस्य सप्तम्यां सन्तुपोषितः" इत्युपक्रम्य "षष्ठ्याञ्चैव कृताहारः सप्तम्यामुपवासकृत्। अष्टम्याञ्चैव भुञ्जीत एष एव विधिर्मतः। अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम्। तस्यारोग्यं धनं धान्यमिह जन्मनि जायते" हेमा०ब्र० वरा०पु० इदमारोग्यसप्तमीव्रतत्वेन तत्रोक्तम्।

आरोग्यशाला स्त्री आरोग्यार्था शाला शा०त०। चिकित्सार्थं राजादिकारिते गृहभेदे तत्करणप्रकारो वैद्यके उक्तो यथा "धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः। अतस्तारोग्यदाता च नरो भवति सर्वदः। आरोग्यशालां कुर्वीत महौषधपरिच्छदाम्। विदग्धवैद्यसंयुक्तां बह्वन्नरससंयुताम्। वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः। ओषधीमूलतत्त्वज्ञः सम्भरणकालवित्। बलवीर्य्यविपाकज्ञः शालिमांसौषधीगणे। त्यागिवद्दहिनां तद्वदनुकूलः प्रियंवदः"

आरोग्यस्नान न०आरोग्ये रोगशून्यत्वे तन्निमित्तकं स्नानम्। रोगनिर्मुक्तौ कर्त्तव्ये स्नाने तत्र नक्षत्रादिकमुक्तं ज्यो०त०। "व्यादित्येषु चरेषु शक्रादिनक्षत्रपुष्योत्तरचन्द्रेषु च क्रूराहव्यतिपातविष्टिदिवसेष्विन्दावशस्ते तथा। केन्द्रस्थेष्वशुभेषु कामतिथिषु स्नानं गदोन्मुक्तितः शस्तं तत्र न शोभनारविभुजङ्गर्क्षेन्दुसद्वासराः" भुज०भीम० प०।

आरोधन न०आ+रुध-भावे ल्युट्। १अवरोधने २निरोधे "मध्य आरोधनं दिवः" ऋ०१,१०५,११। ल्यु। ३आरोधके त्रि० आरुध्यते कर्म्मणि ल्युट्। ४आरोधनीये। करणे ल्युट्। ५आरोधनसाधने "विदुष्टरोदिव आरोधनानि" ऋ०४,७,८। "आरोधनानि आरोधनसाधनानि" भा०।

आरोप पु० आ+रुह-णिच् करणे ल्युट्। अन्यपदार्थे अन्यधर्म्मस्यावभासरूपे मिथ्याज्ञाने। यस्मिन् यो धर्म्मो नास्ति तादृशधर्म्मस्य तत्र बुद्ध्या अर्पणाद्बुद्धेस्तथात्वम्। यथा शुक्तौ रजतत्वं तत्तादात्म्यं वा नास्तिबुद्ध्या च तत्र तयोरवगाहनेन तद्धर्म्मस्यारोपणं क्रियते इति तस्या आरोपत्वम्। तथा च अतद्वति तत्प्रकारकज्ञानमारोपः इति नैयायिकाः सचाध्यास इति वेदान्तिनः अध्यासे कारणमेव तत्र कारणम् तच्च अध्यासशब्दे १४०पृष्ठे विवृतम् स च द्विविधः आहार्यः अनाहार्यश्च यत्र बाधनिश्चयसत्त्वेऽपि दुरुच्छया तथाज्ञानम् स आहार्य्यः। स च दुरुच्छाप्रयोज्य एव दृढतरबुद्धेर्बाधनिश्चयप्रतिबध्यत्वात्। स च प्रत्यक्षत्व शाब्दोऽपि यथा मुखं चन्द्र इति रूपकयुक्तवाक्यजबोधः तत्र हि मुखे चन्द्रत्वाभावनिश्चयेऽपि चन्द्राभेदेन मुखस्य बोधनादाहार्यत्वम्।

"परोक्षज्ञानमनाहार्यं निश्चयश्चेति सिद्धान्त" इति प्रवादस्तु शब्दबोधातिरिक्तपरः । एतदभिप्रायेणैव "रूपकं रूपितारोपादित्यादिकं रूपकलक्षणम्" "सारोपात्मकलक्षणाभेदकथनञ्च सा०दर्पणोक्तं वेदितव्यम् यथा । "विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिरूपा सारोपा स्यात्" इति सा०द० । "विषयस्यारोप्यस्य अनिगीर्णस्य स्फुटतया प्रतिभासमानस्यान्यतादात्म्यप्रत्ययाभेदस्य प्रतीतिजनकत्वेन लक्षणायाः सारोपात्वम् । "आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोपः इति"चित्रा० । "एवं वस्तुन्यवस्त्वारोपः इति"वेदान्तसारः ।

आरोपक पु० आ+रुह-णिच्-ण्वुल् । दृष्टादीनां वापके "दृष्टसंवेशकोदूतो दृष्टारोपक एव च" मनुः ।

आरोपण पु० आ+रुह-णिच्-ल्युट् । १आरोपशब्दार्थे २आरोहणसम्पादने च । "आर्द्रज्यतारोपणमन्वभूताम्" कुमा० रघुश्च ।

आरोपित त्रि० आ+रुह-णिच्-क्त । यत्रारोहणं कारितं १तादृशे पदार्थे । "आरोपितं यदु गिरिप्रपेन पश्चात्" "तं देशमारोपितपुष्पचापः" इति च कुमा० २आसञ्जिते च । "आरोपितपर्याणञ्च त्वरिततुरगपरिचारकोपनीतमिन्द्रायुधम्"काद० । [आरोप्ये वस्तुनि

आरोपणीय त्रि० आ+रुह-णिच्-अनीयर् । आरोपार्हे

आरोप्य त्रि० आ+रुह-णिच्-कर्मणि यत् । १आरोपणीये यथा सुखं चन्द्र इत्यादौ सुखे चन्द्रत्वमारोप्यम् । २अध्यासविषये च इयांस्तु भेदः आरोप्यसन्निकृष्टस्थाने अन्यथाख्यातिः यथा जवासन्निकृष्टे स्फटिकादौ लोहित्यस्य भ्रान्तिः तदसन्निकृष्टस्थले तु अध्यासः असत्ख्यातिरेव यथा इदं रजतमित्यादौ वेदान्तिनः । वे०प० विवरणं द्रष्टव्यम् । नैयायिकास्तु उभयत्रान्यथाख्यातिः ।

आरोह पु० आ+रुह-घञ् । १आक्रमणे २नीचस्थानादूर्द्ध्वदेशगमने ३अङ्कुरादिप्रादुर्भावे शब्दच० ४गजवाजिनां सुपरिगमने ५दीर्घत्वे ६उच्चत्वे च ७नितम्बे । "वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी" इत्यमरः "सारमानवरारोहा" उद्भटः । "आरोहैर्निविडस्तनैश्चितम्बबिम्बैः" माघः ।

आरोहक त्रि० आ+रुह-ण्वुल् । आरोहणकर्त्तरि ।

आरोहण न० आ+रुह-ल्युट् । १नीचस्थानादूर्द्ध्वस्थानगमने "आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्" कुमा० २अङ्कुरादिप्रादुर्भावे च आरुह्यतेऽनेन करणे ल्युट् । सोपाने च "आरोहणं स्यात् सोपानम्" अमरः ।

आरोहणीय त्रि० । आरोहणं प्रयोजनमस्य अनुप्र० छ । १आरोहणसाधने पदार्थे । आ+रुह-कर्मणि अनीयर् । आरोढुं योग्ये २त्र्यादौ ।

आरोहवत् त्रि० आरोहोविशिष्टनितम्बस्थानमस्त्यस्य मतुप् पक्षे इनि । प्रशस्तनितम्बयुक्ते स्त्रियां ङीप् ।

आरोहिन् त्रि०आ+रुह-णिनि । १आरोहणकर्त्तरि नीचादूर्द्ध्वस्थानगामिनि स्त्रियां ङीप् । सा च यहाणां १नक्षत्र दशाभेदे । सा च अवरोहिशब्दे ४४२पृष्ठे लक्षितलक्षणा । यहविशेषाणामारोहिण्याः दशायाः फलमुक्तं सर्व्वा० चि० यथा ।

सूर्य्यस्य "आरोहिणी वासरनायकस्य दशा महत्त्वं कुरुते च सौख्यम् । परोपकारं सुतदारभूमिं गोवाजिमातङ्गकृषिक्रियादीन्"।

चन्द्रस्य "आरोहिणी चन्द्रदशा प्रपन्ना स्त्रीपुत्रवित्ताम्बरसौख्यकान्तिम् । करोति राज्यं सुखभोजनञ्च देवार्चनं भूसुर तर्पणञ्च"।

कुजस्य "आरोहिणी भूमिसुतस्य सौख्यं दशा तनोत्यत्र नरेशपूजाम् प्रधानतां धैर्य्यमनोभिलाषं भाग्योत्तरं गोगजवाजिसंघम्"

बुधस्य "आरोहिणी सौम्यदशा प्रपन्ना यज्ञोत्सवं गोद्विपवाजिसंघम् । मृद्वन्नभूषाम्बरपानलाभं वाणिज्यभूस्यर्थपरोपकारम्"

गुरोः "आरोहिणी देवगुरोर्महत्त्वं दशा प्रपन्ना कुरुतेऽर्थभूमिम् गानक्रियास्त्रीसुतराजपूजां स्वनीर्य्यतः प्राप्नुयशःप्रतापम्"।

शुक्रस्य "आरोहिणी शुक्रदशा प्रपन्ना धामाम्बरालङ्कृतिकान्तिपूजाम् । प्रवृत्तिसिद्धिं स्वजनैर्विरोधं साधुर्दिनाथं परदारसङ्गम्"। कुरुते इत्यनुषङ्गः सर्व्वत्र ।

शनेः "आरोहिणी वासरनायसूनोर्दशा विपाके नृपलब्धभाग्यम् । वाणिज्यलाभं कृषिभूमिलाभं गोवाजिलाभं सुतदारलाभम्"।

आर्कलूष पु० अर्कलूषस्य ऋषिभेदस्यापत्यम् विदा० अञ् । अर्कलूषापत्ये स्त्रियां ङीप् । ततोयूनि अपत्ये हरिता० फञ् । आर्कलूषायणः । तदपेक्षया कन्यापत्ये । [वैरपत्ये ।

आर्कलूषि पुंस्त्री अर्कलूषस्यापत्यं बाह्वा० इञ् । अर्कलूष-

आर्कायण त्रि० अर्कस्य गोत्रम् हरिता० फञ् । अर्कस्य १गोत्रे । ततः चतुरर्थ्यां अश्वा० फिञ् । आर्कायणिः तत्सन्निकृष्टदेशादौ० त्रि० अर्कस्यायनाय सूर्य्यलोकस्य प्राप्तये हितम् अण् पूर्व्वपदादिति णत्वम् । सूर्य्यलोकगतिसाधने २यज्ञादौ । "आर्कायणैः षोडशभिश्च ऋङ्मन्त्रैषां फलेनेह च नागतोऽस्मि" भा० आनु० १०४अ० ।

आर्कि पु० अर्कस्यापत्यम् इञ्। अर्कपुत्रे १यमे २शनौ, ३वैवस्वतमनौ ४सुग्रीवे ५कर्णे च अर्कसुतशब्दे तत्सुतत्वकथा।

आर्क्षोद पु० ऋक्षोदः पर्व्वतोऽभिजनोऽस्य अण्। ऋक्षोदपर्व्वतस्थाने पित्रादिक्रमेण वासिनि द्विजभेदे सि०कौ०।

आर्क्ष त्रि०ऋक्षस्येदम् अण्। नक्षत्रादिनादौ स्त्रियां ङीप्।

आर्क्ष्य त्रि० ऋक्षे भवः गर्गा० यञ्। नक्षत्रभवे स्त्रियान्तु लोहिता० भ्रुकः षित्वात् गौरा० ङीष्। आर्क्ष्यायणी

आर्गय(ण)न त्रि० ऋगयनस्य व्याख्यानोऽन्यः तत्र भवो वा अण् गिरिनद्या० वा णत्वम्। १ऋगयनव्याख्याने ग्रन्थे २तत्रभवे च।

आर्गल क्ली०न० अर्गलमेव स्वार्थे अण् स्त्रीत्वे ङीप्। अर्गलशब्दार्थे द्वाररोधककाष्ठभेदे हिरूपकोषः। [शब्दच०।

आर्गवध पु० आरग्वधस्येदम् (सोन्दाल)

आर्घा स्त्री आ+अर्घ–अच्। पीतवर्णायां दीर्घतुण्डायां षट्पदाभायां मधुमक्षिकायाम् राजनि०।आर्घ्यशब्दे विवृतिः।

आर्घ्य न० आर्घया निर्वृत्तं यत्। १आर्घाख्यमक्षिकानिष्पादिते २जरत्कार्य्याश्रममधूकवृक्षनिर्य्यासरूपे च मधुनि। तद्विवृतिः भाव०प्र० "मधूकवृक्षनिर्य्यासं जरत्कार्य्याश्रमोद्भवाः। स्वल्पार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः। तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः। आर्घास्तास्तत्कृतं यत् स्यादार्घ्यमित्यपरे जगुः। आर्घ्यं मधुरतिचाक्षुष्यं कफपित्तहरं परम्। कषायकटुकं पाके तिक्तञ्च बलपुष्टिदम्"।

आर्च त्रि० अर्चाऽस्यास्य अङ्गार्चाभ्योगः" पा०ण। अर्चायुक्ते

आर्चभिन् पु०ब०व० ऋचाभेन वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते णिनि। ऋचाभेन प्रोक्ताध्यायिषु। "कार्त्तकौजपादि० आर्चाभिनोमौद्गला इत्यत्र पूर्व्वपदप्रकृतिस्वरत्वम्।

आर्चायण त्रि० ऋचिभवः नडा०फक्। ऋचिभवे सामादौ।

आर्चिक त्रि० ऋचि भवः ऋचो व्याख्यानो ग्रन्थो वा ठञ्। ऋचिभवे १सामभेदे २तद्ग्रन्थभेदे च तत्र हि ऋचि योनौ तत्तत् साम गीतमिति तस्य तथात्वम् यथा आर्चिकः उत्तरार्चिकः एष च सामवेदग्रन्थभेदः। ३तद्व्याख्याने ग्रन्थे च।

आर्चीक त्रि० ऋचीके पर्व्वते भवः अण्। १ऋचीकपर्व्वतभवे स्वार्थे अण्। २तत्पर्व्वते च। स च पर्व्वतः पुष्करतीर्थे सन्निकृष्टः यथोक्तं भा०व०१२५अ०।

"पुष्करेषु महाराज! सर्व्वेषु च जलं स्पृश। स्थाणोर्मन्त्राणि चजपन् सिद्धिं प्राप्स्यसि भारत!। सन्धिर्द्वयोर्नरश्रेष्ठ! त्रेतायाः द्वापरस्य च। अयं हि दृश्यते पार्थ! सर्व्वपापप्रणाशनः। अतोपस्पृश्य चैव त्वं सर्व्वपापप्रणाशने। आर्चीकः पर्व्वतश्चैष निवासोऽत्र मनीषिणः। सदाफलः सदास्रोतो मरुतां स्थानमुत्तमम्। चैत्याश्चैते बहुविधास्त्रिदशानां युधिष्ठिर!। एतच्छ्रेष्ठं तीर्थमृषयः पर्युपासते। वैखानसा बालखिल्याः पावका वायुभोजनाः। शृङ्गाणि त्रीणि पुण्यानि त्रीणि प्रस्रवणानि च। सर्व्वाण्येतानि परिक्रम्य यथाकामं स्पृशेत्। शान्तनुस्तात राजेन्द्रः पुनरेव नराधिपः। नरनारायणौ चोभौ स्थानं प्राप्ताः सनातनम्। इह नित्यशया देवाः पितरश्च महर्षिभिः। आर्चीकपर्व्वते तेषुस्नान् यजस्व युधिष्ठिर!। इह ते वै चरन् प्राप्तृषयश्च विशाम्पते!। यमुना चात्रयस्रोताः कृष्णश्चेह तपोरतः। यमौ च भीमसेनश्च कृष्णा चामित्र कर्षण। सर्व्वे चात्र गमिष्यामस्त्वयैव सह पाण्डव। एतत् प्रस्रवणं पुण्यमिन्द्रस्य मनुजेश्वर!। यत्र धाता विधाता च वरुणश्चोर्द्ध्वमागताः। इह तेऽभ्यवसन् राजन्! त्रात्नाः परमधर्म्मिणः। मैत्राणामृजुबुद्धीनामयं गिरिवरः शुभः। एषा सा यमुना राजन्! महर्षिगणसेविता। नानायज्ञचिता राजन्! पुण्या पापभयापहा"

आर्जव न० ऋजोर्भावः अण्। १सरलतायां "दूरं यात्युदरञ्च रोमलतिका नेत्रार्जवं धावति" सा०द०२परप्रतारणाराहित्ये सारल्यं च दैहिकं मानसञ्च। तत्र दैहिकं कुटिलसंयोगराहित्यम्। मानसञ्च बाह्याभ्यन्तरे विहितनिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिमत्त्वम् बाह्ये यथा प्रवृत्तिनिवृत्तौ अन्तरेऽपि तथैव न पुनः अन्तरन्यं भावमप्रकाश्य बाह्ये अन्यथापादनम्। तथा स्वाधिगतार्थागोपनेन यथाज्ञातार्थप्रकाशनञ्च मानसं सारल्यं वाचिकमार्जवमपि मनोधीनत्वात् मानसमेव आर्জ্জवं च समचित्तत्वेन लक्षितम् आ०त० भारतवाक्येन। "क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता"। आर्जवञ्च महत्त्वसम्पादकोगुणविशेषः यथोक्तं भा० १प्र० १६ अ० "सत्यं शौचं दया शान्तिस्त्यागः सन्तोषआर्জ্জवम्। शमोदमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्। ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यं तेजोबलं स्मृतिः। स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं मार्दवमेव च। प्रागल्भ्यं प्रश्रयः शीलं सहओजोबलं भगः। गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिमानोऽनहङ्कृतिः। एते चान्ये च भगवन्नित्या यत्र महागुणाः। प्रार्थ्यामहत्त्वमिच्छद्भिः"

एतज्ज्ञानसाधनं यथोक्तं गीतासु "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्। आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः। इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्। असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु। नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु। मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि। अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतज्ज्ञानमिति प्रोक्तम्" ज्ञानं ज्ञायतेऽनेनेति व्युत्पत्तेर्ज्ञानसाधनमित्यर्थः स्वार्थे अण्। २सरलेऽपि। "सनं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम्" "किं व्याजेनार्जवे जने" रामा०।

आर्जीक त्रि० ऋजीकस्येदम् अण्। ऋजीकदेशसम्बन्धिनि "सुशोमे शर्य्याणावत्यार्जीके" ऋ० ८,७,२६। "ऋजीकोदेशभेदस्तत्सम्बन्धिनि" भा०।

आर्जुनायान पुं स्त्री० अर्जुनस्य गोत्रापत्यम् अश्वा० फञ्। अर्जुनगोत्रापत्ये स्त्रियां टाप्। तस्य विषयोदेशः। राजन्या० वुञ्। आर्जुनायनकः। तद्विषये देशे।

आर्जुनावक त्रि० अर्जुनवे देशे भवः धूमा० वुञ्। अर्जुनावनामदेशभवे।

आर्जुनि पु० अर्जुनस्यापत्यं बाह्वा० इञ्। अर्जुनापत्ये अभिमन्यौ। तदुत्पत्तिकथा "ततः सुभद्रा सौभद्रं केशवस्य प्रिया स्वसा। जयन्तमिव पौलोमी ख्यातिमन्तमजीजनत्। दीर्घबाहुं महोरस्कं वृषभाक्षमरिन्दमम्। सुभद्रा सुषुवे वीरमभिमन्युं नरर्षभम्। अभीश्च मन्युमांश्चैव ततस्तमरिमर्दनम्। अभिमन्युमिति प्राहुरार्जुनिं पुरुषर्षभम्" भा० आ०प० २२१ अ०। स च वर्चोनामसोमपुत्रस्यावतारः यथोक्तं भा० आ० ६७अ०। "यस्तु वर्चा इति ख्यातः सोमपुत्रः प्रतापवान्। सोऽभिमन्युर्बृहत्कीर्त्तिरर्जुनस्य सुतोऽभवत्। यस्यावतरणे राजन्! सुरान् सोमोऽब्रवीदिदम्। नाहं दद्यामिमं पुत्रं मम प्राणैर्गरीयसम्। समयः क्रियतामेष न शक्यमतिवर्त्तितुम्। सुरकार्य्यं हि नः कार्य्यमसुराणां क्षितौ वधः। तत्र यास्यत्ययं वर्चा न च स्थास्यति वै चिरम्। ऐन्द्रिर्हरस्तु भविता यस्य नारायणः सखा। सोऽर्जुनेत्यभिविख्यातो पाण्डोः पुत्रः प्रतापवान्। तस्यायं भविता पुत्रो बालोभुवि महारथः। ततः षोड़शवर्षाणि स्थास्यत्यमरसत्तमाः!। अस्य षोड़शवर्षस्य स संग्रामो भविष्यति। यत्रांशा वः करिष्यन्ति कर्म वीरनिसूदनम्। नरनारायणाभ्यां तु स संग्रामो विना कृतः। चक्रव्यूहं समास्थाय योधयिष्यन्ति वः सुराः!। विसुखाञ्छात्रवान् सर्वान् कारयिष्यति मे सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति। महारथानां वीराणां क्रन्दनञ्च करिष्यति। सर्व्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति। दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्वीरैः समेत्य बहुशोरणे। दिनक्षये महाबाहुमया भूयः समेष्यति। एकं वंशकरं पुत्रं वीरं वै जनयिष्यति। प्रनष्टं भारतं वंशं स भूयोधारयिष्यति। एतत् सोमवचः श्रुत्वा तथाऽस्त्विति दिवौकसः। प्रत्यूचुः सहिताः सर्व्वे ताराधिपमपूजयन्। एवं ते कथितं राजंस्तव जन्म पितुः पितुः" अभिमन्युशब्देऽस्य युद्धचर्य्या २६५ पृष्ठे उक्ता।

आर्ज्जुनेय पु० अर्जुन्या अपत्यं ढक्। अर्जुनीपुत्रे "कौत्से कृषौ" "अहं कुत्समार्ज्जुनेयं न्यृञ्जेऽहम्" ऋ०४,२६,१ "आर्जुनेयमर्जुन्याः पुत्रं कुत्सम्" भा०। आर्जुनी च गार्भीः कुत्सस्य गार्भ्या प्रतिपालितत्वेन तत्पुत्रत्वात् तथात्वम्।

आर्त्त त्रि० आ+ऋ-क्त। १पीड़िते, २दुःखिते, ३अशुद्धे च। अप्राप्तलिङ्गसंज्ञकस्यैवधातोर्द्वित्वं वदन् दुर्गादासः आर्त्तपदसिद्धिं कर्त्तुमशक्नुवन् प्रत्याख्येयः। आर्त्तरवः आर्तनादः इत्यादि। "द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्" "तुलसेनार्त्तरवेण वेजिताः"। "बलमार्त्तभयोपशान्तये" "तदीयमाक्रन्दितमार्त्तसाधोः"। "राजापि यद्वियोगार्त्तः" "आभिमेदे निदाघार्त्तौ" इति च रघुः। "न दुर्वहश्रोणिपयोधरार्त्ता" कुमा० "विदितवात्तावार्त्तौ" दश० अत्र विदितवार्त्तौ आर्त्तौ इत्येव च्छेदः साधुः तद्व्याख्यानेऽस्माभिर्व्यदन्यथाच्छेदमभिप्रेत्य व्याख्यातं न तत् साधु। "नार्त्तोऽप्यवदेद्विप्रान्" मनुः। "सुखेनार्त्तेन वा दत्तं आवितं धर्मकारणात्" शु०त० स्मृतिः "आर्त्तार्त्ते मुदिता हृष्टे प्रवासे मलिना कृशाः" शु०त० स्त्री० पु० "आर्त्तिनामोऽस्यस्य अच्"। ४विनाशिनि "अतोन्यदार्त्तम्" वृह० ७०। "अतएतस्माद् ब्रह्मणोऽशनायाद्यतीतात्मस्वरूपाच्चित्यत्प्राद्यदन्यदविद्याविषयमेषणालक्षणं वस्त्वन्तरम् तद् आर्त्तं विनाशि, आर्तिपरिगृहीतम्" शाङ्क०भा०।

आर्त्तगल पु० आर्त्तं दुःखं गलति गल-अच्।

आर्त्तपर्णि पु० कृतपर्णस्यापत्यम् इञ्। कृतपर्णनृपस्यापत्ये सुदासि सूर्य्यवंश्ये नृपभेदे। "भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः। अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्। अयुताजित्तु दायादः सिन्धुद्वीपस्य वीर्य्यवान्। अयुताजित्सुतादा-

सीदतपर्णो महायशाः । दिव्याच्चहृदयात्तोवै राजा नलसखो बली । ऋतपर्णस्य तस्यासीदार्त्तपर्णिर्महीपतिः । सुदास-स्तस्य तनयो राजा इन्द्रसखोऽभवत्" हरिवंशे १५ अ०

आर्त्तभाग पुंस्त्री ऋतभागस्य ऋषेर्गोत्रापत्यम् विदा० अञ् । ऋतभागर्षेर्गोत्रापत्ये । स्त्रियां ङीप् ।

आर्त्तव त्रि० ऋतुरस्य प्राप्नः अण् । ऋतुभवे ऽपुष्पादौ "आर्त-वान्यप्रभुञ्जना पुष्पाणि च फलानि च" रामा० "स्वयमङ्गेषु ममेदमार्त्तवम्" कुमा० स्त्रियां ङीप् । "अभिभूय विभूति-मार्त्तवीम्" रघुः । ऋतुर्मासद्वयात्मकः हेमन्तादिः कालः "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः" इति मनूक्तः स्त्रीणां मध्यस्थशोणितदर्शनयोग्यः षोड़श रात्रिकः कालश्च । स कालोयस्य प्राप्नः तादृशे स्त्रीणां रजसि च । "नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने" । तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम्" मनुः । स्त्रीणामार्त्तवं (शोणितविशेषः) पुंसः शुक्रमिव मासेन रस पाकेन जायते यथोक्तं सुश्रुते । "एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवम्" । यथा च रसस्य पाकस्तथाऽसृक्-शब्दे ४६२ पृष्ठे उक्तम् । बाल्येतस्यसत्त्वेऽपि बालस्य शुक्रप्रादुर्भावाभाववत् न तस्यावस्थायामभिव्यक्तिर्यथोक्तं सुश्रुते "यथा हि पुष्पसुकुमारस्योगन्धोन शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भावानामभिव्यक्तिरिति कृत्वा केवलं सौक्ष्म्यात्तस्याभिव्यज्यते स एव गन्धो विदग्धपत्रकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयःपरि-णामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽस्यार्त्तवाद-यश्च विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भोदयोन्मिषद्भिः"

"तदभिव्यक्तिकालादिकं तद्दर्शने दम्पत्योरितिकर्त्तव्य-तासहितम्" भाव० प्र० दर्शितं यथा ।

"द्वादशाद्वत्सरादूर्द्धमापञ्चाशत्समं स्त्रियः । मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् । आर्त्तवस्रावदिवसाद्ऋतुं षोड़श रात्रयः । गर्भग्रहणयोग्यस्तु सएव समयः स्मृतः । सर्वेषामेव वर्णानां स्त्रीणां सर्वादिसंमतः" । स एव पूर्व्वोक्तः समयः । अन्यान्तरे वर्णभेदात् विशेषः । तद्यथा "स्रा-दिवसाद्दुर्द्धं द्वादशरात्रावधिब्राह्मण्याः दशरात्रावधिः क्षत्रियायाः । अष्टरात्रावधिर्वैश्यायाः षड्रात्रावधिः शूद्रायाः गर्भधारणशक्तिः" । अथ स्त्रीणां नियममाह "आर्त्तवस्राव दिवसात् त्र्याह सा ब्रह्मचारिणी । शयीत दर्भशय्यायां प्रभ्रेदपि पतिं न च । करे शरावे पर्णे वा हविष्यं त्र्याह-माचरेत् । अस्नुपातं नखच्छेदमभ्यङ्गमनुलेपनम् । नेत्र-योरञ्जनं स्नानं दिवास्वापं प्रधावनम् । अत्युच्चशब्दस्रवणं हसनं बहुभाषणम् । आयासं भूमिखननं प्रवातं च विवर्जयेत् । एतस्मान्नियमाकरणे दोषमाह । "अज्ञानाद्वा प्रमादाद्वा लौल्याद्वा दैवतस्य वा । सा चेत् कुर्य्यान्निषि-द्धानि गर्भदोषांस्तदाप्नुयात् । एतस्मारोदनाद्गर्भो भवेद्वि-कृतलोचनः । नखच्छेदेन कुनखी कुष्ठी स्यादभ्यङ्गतो भवेत् । अनुलेपात्तथाज्ञानाद्दुःखशीलोऽञ्जनादन्धक् । स्वापशीलो दिवास्वापात् चञ्चलःस्नात्रधावनात् । अत्युच्चशब्दस्रवणा-द्बधिरः खलु जायते । तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत् । प्रलापी भूरिकथनादुन्मत्तस्तु परिश्रमात् । खलतिर्भूमिखननादुन्मत्तो वातसेवनात् । अथ रजस्वला-कृत्यम् "ततश्चतुर्थे दिवसे स्नाता सद्वसनादिभिः । भूषिता सुमनाःपश्येद्भर्त्तारं समलङ्कृतम् । पूर्व्वं पश्येद्यदिस्नाता यादृशं नरमङ्गना । तादृशं जनयेत्पुत्रं ततः पश्येत्पतिं प्रियम् । प्रियमिति भर्त्तुर्व्यवहारे पुत्रादिकमपि पश्येत् । चतुर्थ-दिवसेऽपि रजोनिवृत्तौ स्त्री पत्या सङ्गच्छेत न तु रजो-ऽनुवृत्तौ यत आह । "प्रवृत्तसलिले क्षिप्तं द्रव्यं गच्छ-त्यधो यथा । तथा वहति रक्ते तु क्षिप्तं वीर्य्यमधोव्रजेत् । अथ भर्तृकृत्यम् । अथ गर्भाधाने निषिद्धं विहितञ्च कालं तयोः फलञ्चाह । "आयुःक्षयभयाद्भर्त्ता प्रथमे दिवसे तथा । द्वितीयेऽपि दिने भर्त्ता त्यजेद्रजसतीं स्त्रियम् । तत्र यस्याहितो गर्भो जायमानो न जीवति । आहितो य-स्तृतीयेऽह्नि स्वल्पायुर्विकलाङ्गकः । अतश्चतुर्थी षष्ठी स्यादष्टमी दशमी तथा । द्वादशी चापि या रात्रिस्तासां तां विधिना भजेत् । विधिना गर्भाधानविधिना । अत्रो-त्तरोत्तरं विद्यादायुदारोग्यमेव च । प्रजाः सौभाग्यमै-श्वर्य्यं बलं चाभिगमात् फलम् । युग्मायुग्मरात्रीणां फल-माह । "युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु" । तत्र दम्पत्योः संभोगे यादृक् पुमान् युक्तस्तादृगुच्यते "स्नात-स्वन्नलिप्ताङ्गः सुगन्धसुमनोऽञ्चितः । भुक्तदध्यःसुवसनः सुवेषः समलङ्कृतः । ताम्बूलवदनस्तस्यामनुरक्तोऽधिकस्मरः, । पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे" । तत्रायोग्यं पुरुषमाह "अत्याशितोऽतिदुःखी क्षुद्वान् सद्यश्रमार्त्तः पिपा-सितः । बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् । तत्र स्त्री यादृशी योग्या तादृशमुच्यते । "पुरुषस्य गुणैर्युक्ता विहितन्नभोजना । नारी ऋतुमती पुंसा सङ्गच्छेत सुतार्थिनी । तत्रायोग्यां स्त्रियमाह । "रजस्वला व्याधि-

मती विशेषाद्योनिरोगिणी । वयोऽधिका च निष्कामा मलिना गर्भिणी तथा । एतासां सङ्गमात् पुंसां वैगुण्यानि भवन्ति हि" तत्र रजस्वला दिनत्रयं यावदतौ निषिद्धा यत उक्तम् । "प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी पुंसा यथा वर्ज्या तथाङ्गना । व्याधिमती वर्ज्या तत्र स्त्रीणां व्याधयः । प्रदरादयः तदुक्ता निषिद्धा तत्रापि विशेषाद्योनिरोगिणी" भावप्रकाशः।

आर्त्तवदोषाश्च सचित्साः सुश्रुते दर्शिता यथा ।

"आर्त्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैर्वोपसृष्टमबीजं भवति तदपि दोषवर्णवेदनादिभिर्विद्येयम् । तेषु कृष्णपर्यन्थिपूतिपूयक्षीणमूलपुरोषप्रकाशमसाध्यं साध्यमन्यङ्गवति । भवन्ति चात्र । तेष्वाद्यान् शुक्रदोषांस्त्रीन् स्नेहस्वेदादिभिर्जयेत् । क्रियाविशेषैर्मतिमांस्तथा चोत्तरवस्तिभिः । पाययेत नरं सर्पिर्भिषक् कृष्णपरेतसि । धातकीपुष्पखदिरदाड़िमार्जुनसाधितम् । पाययेद्वथ वा सर्पिः शालसारादिसाधितम् । ग्रन्थिभूते ग्रहीसिद्धे पालाशे वापि भस्मनि । परूषकवटादिभ्यां पूयप्रस्थे च साधितम् । प्राग्युक्तं वक्ष्यते यच्च तत् कार्य्यं क्षीणरेतसि । विट्प्रभे पाययेत् सिद्धं चित्रकक्षीरद्विङ्मुभिः । स्निग्धं वान्तं विरिक्तञ्च निरूढमनुवासितम् । योजयेच्छुक्रदोषार्त्तं सम्यगुत्तरवस्तिना । विधिस्तूत्तरवस्त्यन्तं कुर्यादार्त्तवशुद्धये । स्त्रीणां स्नेहादियुक्तानां चतस्रष्वार्त्तवार्त्तिषु । कुर्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च । ग्रन्थिभूते पिबेत् पाठां त्रिवृषणं दन्तकाणि च । दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे । पिबेद्वृश्चिवः क्वाथञ्चन्दनक्वाथमेव च । शुक्रदोषहराणाञ्च यथास्वमवचारणम् । दोषाणां शुद्धिकरणं शेषास्वार्त्तवार्त्तिषु । अन्नं शालियवं मद्यं हितं मांसञ्च पित्तलम् । स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च । शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तथा । यशाशुक्प्रतिमं यत्तु यद्वा लाक्षारसोपमम् । तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् । तदेवातिप्रसङ्गेन प्रदुष्टमदुष्टावपि । अशुद्गदरं विजानीयादतोऽन्यद्रक्तलक्षणात् । अशुद्गदरो भवेत् सर्वः साङ्गमर्दः सवेदनः । तस्यातिदुष्टौ दौर्बल्यं भ्रमो मूर्च्छा तमस्तृषा । दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः । तरुण्या स्तितसेविन्यास्तदल्पोपद्रवं भिषक् । रक्तपित्तविधानेन यथावत्तूपाचरेत् । दौर्बैराद्दतमार्गत्वादार्त्तवं नश्यति स्त्रियाः । तत्र मत्स्यकुलत्थाम्लतिलमाषसुरा हिताः । पाने मूलसुदञ्चिञ्च दधि शुक्तञ्च भोजने । क्षीणं प्रागीरितं रक्तं सलक्षणचिकित्सितम् । तथाप्यत्र विधातव्यं विधानं नष्टरक्तवत्" ।

इत्थं दोषापसारणेन शुद्धे आर्त्तवे भोजनादिनियमवत्यां दिवसविशेषे स्त्रिया सह संवेशादि कर्त्तव्यं यथोक्तं सुश्रुते । एवमदुष्टशुक्रः शुद्धार्त्तवा ऋतौ प्रथमदिनात्प्रभृति ब्रह्मचारिणी दिवास्वप्नाञ्जनास्रुपातस्नानानुलेपनाभ्यङ्गनखच्छेदनप्रधावनहसनकथनातिशब्दश्रवणावलेखनानिलायासान् परिहरेत् । किङ्कारणम्—दिवा स्वपन्त्याः स्वापशीलोऽञ्जनाद्भयो रोदनाद्विकृतदृष्टिः । स्नानानुलेपनाद्दुःखशीलस्तैलाभ्यङ्गात् कुष्ठी नखापकर्त्तनात् कुनखी प्रधावनाच्छ्लो हसनाच्छ्यावदन्तौष्ठतालुजिह्वः प्रलापी चातिकथनादतिशब्दश्रवणाद्बधिरोऽवलेखनात् खलतिर्मारुतायाससेवनादुन्मत्तो गर्भो भवतीत्येवमेतान् परिहरेत् । दर्भसंस्तरशायिनीं करतलशरावपर्ण्यन्यतमभोजिनीं हविष्यं त्रिरहश्च भर्तुः संरक्षेत् । ततः शुद्धस्नातां चतुर्थेऽहन्यहतवाससमलङ्कृतां कृतमङ्गलस्वस्तिवाचनां भर्तारं दर्शयेत् । तत् कस्य हेतोः? । पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना । तादृशं जनयेत् पुत्रं भर्तारं दर्शयेदतः । ततो विधानं पुंस्त्रीयसूपाध्यायः समाचरेत् । कर्मान्ते च क्रमं श्लेनमारभेत विचक्षणः । ततोऽपराह्णे पुमान् मासं ब्रह्मचारी सर्पिः स्निग्धः सर्पिः क्षीराभ्यां शालीदनं भुक्त्वा मासं ब्रह्मचारिणीं तैलस्निग्धां तैलमाषोत्तराहारां नारीमुपेयाद्रात्रौ सामादिभिरभिविश्वास्य विकल्पयैवञ्चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां चोपेयादिति पुत्रकामः । एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च । प्रजासौभाग्यमैश्वर्यं बलञ्च दिवसेषु वै । अतः परं पञ्चम्यां सप्तम्यां नवम्यामेकादश्याञ्च स्त्रीकामः । त्रयोदशीप्रभृतयो निन्द्याः । तत्र प्रथमे दिवसे चतुर्थ्यां मैथुनगमनमनायुष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स प्रसवमानो विसुच्यते । द्वितीयेऽह्येवं स्रुतिकाग्रहे वा तृतीयेऽह्येवमस्य मूर्खाङ्गोऽल्पायुर्वा भवति चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं शुक्रकरं भवति यथा नद्यां प्रतिस्रोतःस्थापि द्रव्यं प्रतिच्छिन्नं प्रतिनिवर्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मात्रियमवतीं विरात्रं परिहरेत् अतःपरमुपेयात्" ।

दिनविशेष आर्त्तवकालगमने पुत्रादिविशेषजननमुक्तम्" नि०सि० व्यासेन "रात्रौ चतुर्थ्यां पुत्रःस्यादल्पायुर्बलवर्जितः । पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु सभ्रमः ।

सप्तम्यां सप्रजा योषिदष्टम्यामीश्वरः पुमान् । नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः । एकादश्यामधर्म्मा स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता पापा वर्ण्णसङ्करकारिणी । धर्म्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः । प्रजायते चतुर्दश्यां, पञ्चदश्यां पतिव्रता । आयुषः सर्व्वभूतानां षोड़श्यां जायते पुमान्" । मनुवचने स्वाभाविक ऋत्युक्तेः रोगादन्यत्र कालेऽप्यार्त्तवं भवति तेन तत्राशुद्धौ विशेषःनि० सि० व्यवस्थापितो यथा "प्रथमरजोदर्शनात् सप्तदशदिनपर्य्यन्तं पुनरजोदर्शने स्नानमात्रम्, अष्टादशे एकरात्रम्, एकोनविंशे द्वयं, विंशतिप्रभृतिदिनेषु त्रिरात्रमशुचिर्भवति । "ऊर्द्धं चतुर्दशदिनादशुचित्वं न विद्यते" इति वाक्यन्तु स्नानदिनावधिचतुर्दशदिनमध्ये पुनरजोदर्शनेऽशुचित्वाभावपरम्" "रोगेण यत् रजः स्त्रीणामन्यत्र हि प्रवर्त्तते । नाशुचिस्तु भवेत्तेन यस्माद्वैकारिकं मतमिति" वचनात्। रोगजे रजसि शुद्धावपि धर्माधिकारिता रजोनिवृत्तावेव । "साध्वाचारा न तावत् स्यात् स्नातापि स्त्री रजस्वला । यावत् प्रवर्त्तमानं हि रजोनैव निवर्त्तते इति" हेमा० श्रा० ख० शङ्खोक्तेः ।

आर्त्ति स्त्री आ+ऋ–क्तिन् । १पीड़ायाम् २मनोव्यथायाञ्च । "आर्त्तिं न पश्यसि पुरूरवसस्तदर्थाम्" विक्रमो० । "पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः" नारदः । "यदि दीक्षितमार्त्तिर्विन्देत्" शत० ब्रा० । "न विद्यमानेष्वर्थेषु नास्त्यर्थमपि यत्नतः" "नचार्त्तिमृच्छति क्षिप्रम्" इति च मनुः "दाहातिसारपित्तास्रक्षूर्च्छामद्यविषार्त्तिषु" सुश्रु० २विनाशे च ।

आर्त्नि(त्नी) स्त्री आ+ऋ–बा० नि आर्त्तभावश्च वा ङीप् । गतिकर्त्तॄणाम् । "संविदाने आर्त्नी इमे" ऋ० ६, ७५, ४ । "अत्रैव वोऽपिनह्यामि योनौ आर्त्नी इव ज्यया" ऋ० १०, १६६, २।

आर्त्विज त्रि० ऋत्विज इदम् अण् । ऋत्विक्सम्बन्धिनि ।

आर्त्विजीन पु० ऋत्विजं तत्कर्म्मार्हति खञ् । स्वयं यजमाने" सि० कौ० । "दक्षिणयदिष्टं कृतमार्त्विजीनैः" भट्टिः "वयं वा आर्त्विजीनाःस्मोवयं दक्षिणीयाम्" शत० ब्रा० ।

आर्त्विज्य न० ऋत्विजोभावः कर्म्म वा यञ् । ऋत्विक्कर्म्मणि याजने "स मा सर्व्वैरार्त्विज्यैर्वृणीते" "सहोवाच भगवन्तं वा सर्व्वैरार्त्विज्यैः" इति च" छा० उ० ।

आर्थ त्रि० अर्थादागतः अण् । अर्थतः प्राप्ते वाक्यार्थमर्य्यादया प्राप्ते" स्त्रियां ङीप् । सा च अलङ्कारोक्तायामर्थसम्भवायां २व्यञ्जनायाम् । तल्लक्षणादि सा० द० । यथा एवं शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह "वक्तृबोद्धव्याकाङ्क्षानामन्यसन्निधिवाच्ययोः । प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च । वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसम्भवा"। व्यञ्जनेति सम्बध्यते तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा । "कालोमधुः कुपितएष च पुष्पधन्वा धीरावहन्ति रतिखेदहराः समीराः । केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य" । अत्रैतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचित् द्योत्यते । बोद्धव्यवैशिष्ट्ये यथा । "निःशेषच्युतचन्दनं स्तनतटं निर्द्दृष्टरागोऽधरोनेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि । दूति ! बान्धवजनस्यात्रातपीडागमे । वापीं स्नातुमितोगतासि, न पुनस्तस्याधमस्यान्तिकम्" । अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यं तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यदूतीवैशिष्ट्याद्बोध्यते । अन्यसन्निधिवैशिष्ट्ये यथा "उच्चं शिञ्चल शिष्मन्द्भिसिणीपत्तम्मि रेअइ बलाआ । णिम्मलमरगअभाअण–परिट्ठिआ संखसुत्ति व्व" । उत्र बलाकाया निस्यन्दत्वेन विश्वस्तत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थाननिर्ज्जनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम् । भिन्नकण्ठध्वनिर्धीरैः काकरित्यभिधीयते । इत्युक्तप्रकारायाः काकोर्भेदाः आकरादिभ्योज्ञातव्याः । एतद्वैशिष्ट्ये यथा । "गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतोगन्तुम् । अलिकुलकोकिलललिते नेष्यति सखि ! सुरभिसमयेऽसौ" । अत्र नेष्यति अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते । चेष्टावैशिष्ट्ये यथा । "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया । हसन्येत्यार्पिता कूतं लीलापद्मं निमीलितम्" । अत्र सन्ध्यासङ्केतकाल इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते । एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् । त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता । अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्व्वा अपनन्तरोक्ताव्यञ्जनास्त्रिविधाः तत्र वाच्यार्थस्य व्यञ्जना यथा । कालोमधुरित्यादि । लक्ष्यार्थस्य यथा । निःशेषच्युतचन्दनमित्यादि । व्यङ्ग्यार्थस्य यथा उच्चं शिञ्चलेत्यादि" ।

भाट्टमते २भावनाभेदे । भावना हि भावयितुर्व्यापारः सा च द्विविधा श्रौतो आर्थी च । तत्र प्रयोजनसाधनतया तदिच्छाविषयनिष्पादको व्यापारःआर्थी भावना सा चाख्यातेनोच्यते आख्यातसामान्यस्य व्यापारवाचित्वात् । सा चां-

शक्तयवती किं भावयेत्, केन भावयेत् कथं भावयेदित्याकाङ्क्षात्रयोदयात्। तत्रमोक्षणीयमंशक्तयश्च साध्यं साधनमिति-कर्त्तव्यता चेति। तथा च किंभावयेदिति साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति, साधनाकाङ्क्षायां यागादिः-साधनत्वेन, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यतात्वेन। तेन प्रायाजाद्यङ्गजातेतिकर्त्तव्यताकेन यागेन स्वर्गादिफलं साधयेदिति विधिवाक्यार्थ बोधः इति भाट्टा मन्यन्ते।

आर्थिक त्रि० अर्थं गृह्णाति ठक्। १अर्थग्राहके। अर्थश्चेह अभिधेयं प्रयोजनं धनञ्च। अर्थादागतः ठक्। २अर्थादागते वाक्यार्थमर्य्यादया प्राप्ते च। [ङीष्।

आर्द्र त्रि० आ+अर्द्द–अच्। सम्यक्पीड़के स्त्रियां गौरा०

आ(अ)र्द्धकंसिक त्रि०अर्द्धकंसेन क्रीतम् ठक् "अर्द्धात् परिमाणस्येति" पा० उत्तरपदस्य वृद्धेः"पूर्व्वपदस्य चेति" च प्राप्तौ नातः परस्येति" पा० निषेधात् नोत्तरपदवृद्धिः "कंसाट्ठिठन्" पा०इति तु न प्रवर्त्तते समासे तदन्तविधिप्रतिषेधात्। अर्द्धकंसक्रीते। एवं आ(अ)र्द्धप्रस्थिकः। अर्द्धप्रस्थक्रीते आ(अ)र्द्धकौड़विकः आ(अ)र्द्धद्रौणिकः इत्यादौ अदन्तत्वाभावात् उत्तरवृद्धिः। अर्द्धकुड़वादिक्रीते त्रि०।

आर्द्धधातुक न० "आर्द्धधातुकं शेषः" पा० परिभाषिते तिङ्शिदङ्गभिन्ने धात्वधिकारविहिते प्रत्ययभेदे "आर्द्धधातुकस्येड्वलादेः" "सार्व्वधातुकार्द्धधातुकयोः" इति च पा०।

आर्द्धपुर न०अर्द्धं पुरस्य एकदेशित० स्वार्थे अण्। पुरस्य समानेऽर्द्धे प्रतिपूर्व्वस्य तत्पुरुषे अश्वादि० नान्तोदात्तता।

आर्द्धरात्रिक त्रि० अर्द्धरात्रे भवः ठञ्। अर्द्धरात्रभवे।

आर्द्धवाहनिक त्रि० "अर्द्धवाहनेन जीवति वेतना० ठक्। अर्द्धवाहनेन जीविनि।

आर्द्धिक पुंस्त्री "वैश्यकन्यासुतपन्नो ब्राह्मणेन तु संस्कृतः। आर्द्धिकः स तु विज्ञेयोभोज्योविप्रैर्न संशयः"इति पराशरोक्ते १अम्बष्ठवर्णे स्त्रियां जातित्वात् ङीप्। अर्द्धं क्षेत्रं यस्यार्द्धमर्हति ठक्। क्षेत्रयस्यार्द्धस्य वेतनरूपतया स्वामिस्वकाभात् याहके २क्षपकभेदे पु०। "आर्द्धिकः कुलमित्रं च गोपालोदासनापितौ। एते शूद्रेषु भोज्यान्नायस्वात्मानं निवेदयेदिति"मनुनाऽऽर्द्धिकस्य शूद्रत्वेन कीर्त्तनात् अम्बष्ठस्य च शूद्रभिन्नत्वेनास्य पराशरोक्तार्द्धिकाद्भिन्नत्वं प्रतीयते। एतदभिप्रायेणैव" मिता०धृता अर्द्धसीरिशब्दे दर्शित याज्ञवल्क्यस्मृतिव्याख्याने क्षपिफलग्रस्यार्द्धहारिण एव शूद्रेषु भोज्यान्नतोक्ता।

आर्द्र त्रि० अर्द्द–रक् दीर्घश्च। १क्लिन्ने २सरसे ३सजले वस्तुनि तन्त्रेदाश्च वैद्य०दर्शिताः।"आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा। सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते। वास्तूकं सार्षपं शाकं निर्गुण्ड्यै रण्डसार्षकम्। धत्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते। वटाश्वत्थकरीराद्यमार्द्रं द्रव्यं तु नीरसम्। सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात्। शातलाबज्रसीहण्डसौरिण्याद्यास्तु तीक्ष्णकाः। दुग्धिकाक्षीरिण्याद्याश्च मृदुदुग्धाः प्रकीर्त्तिताः"। आर्द्रीकृतारोपणमन्वभूताम्"कुमा०रघुश्च।"तेषां गुर्वीक्षाद्य शीता पिपृपल्यार्द्रा कफावहा" आर्द्रा कुसुम्भरी कुर्य्यात् स्वादुसौगन्ध्यबृंहणाम्"सुश्रु० "धूपोष्मणा त्यजितमार्द्रभावम्" कुमा०। "४काठिन्यशून्ये आनुगुण्ययुक्ते च "धनुर्भूतोऽप्यस्य दवार्द्रभावम्"रघुः। अश्विन्यवधिके राशिचक्रस्थे मिथुनराशिघटके ५षष्ठे नक्षत्रे स्त्री न०। "कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा। नवम्यां बोधयेद्देवीं यथाविभव विस्तरैः" इ०त०। लिङ्ग पु०। "इषे माससिते पक्षे नवम्यामार्द्रयोगतः" बोधनमन्त्रः। "आर्द्रादयादि विशाखान्तं रविचारेण वर्षति" ज्यो० मृगशिरसोऽर्द्धं चार्द्रा पुनर्वसुतिपादं मिथुनम्" ज्यो० आर्द्रास्वरूपयोगतारादिकम् अस्मच्छब्दे ४६७ पृष्ठे उक्तम् अस्याधिष्ठाता शिवः।

आर्द्रक न० अर्द्दयति रोगान् अर्द्द–अन्तर्भूतण्यर्थे रक् वीर्घश्च संज्ञायां कन् आर्द्रायां भूमौ जातं वा वुन् आर्द्रयति जिह्वां आर्द्र+णिच्–क्वुन् वा। (आदा) मूलप्रधाने वृक्षभेदे आर्द्रिकाशब्द स्त्री। "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा, ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः। भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्। अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्। कुष्ठे पाण्डुमये कृच्छ्रे रक्तपित्ते कफज्वरे। दाहे निदाघे शरदि नैव पूजितमार्द्रकम्" भा०प्र०। "चक्षुष्यं रोचनं स्वर्य्यं विकाशि विशदं सरम्। स्निग्धाटोषामिलघ्नञ्च लवणार्द्रकभक्षणम्। गुडार्द्रकं वातहरं चक्षुष्यं पित्तनाशनम्। ज्वरघ्नं चातितृष्णघ्नं वर्च्चोभेदिकफापहम्। कृत्वाचारहितमङ्गुरतः सत् क्षालितं विमलकैर्बहुतोयैः। सिक्थितं लवणनिम्बपयोभिर्बालमार्द्रकमुपैति योग्यताम्। तैलाम्लशुरीरजनिसिन्धुजपङ्कसङ्गिप्रस्यन्दमाननवनिम्बुरसप्रसक्तम्। स्वादूत्तरं शिशिरवासरभोजनेषु कस्तैतिं वस्तु नपथं खलु वृद्धवैरम्"। वृष्योष्णं दीपनं हृद्यं सस्नेहं

लघु पाचनम् । रोचनं तर्पणं बल्यं चार्द्रकं परिकीर्त्तितम् । वातपित्तकफेभानां शरीरवनचारिणाम् । एक एव निहन्त्यस्ति लवणार्द्रकशेखरी" वैद्य० ।

आर्द्रपदी स्त्री आर्द्रौ पादौ यस्याः कुम्भपद्या० नि० पाङ्गावः ङीष् च पदादेशः । आर्द्रचरणायां स्त्रियाम् । [राजनि० ।

आर्द्रमाषा स्त्री० नित्यकर्म० । (माषाणी) माषपर्ण्यां

आर्द्रम् अव्य० आ+अर्द्र-बा० रसु साच्चादादिगणपाठात् नि० मान्तत्वं वा । सरसत्वे । आर्द्रीकृत्य आर्द्रे कृत्वा ।

आर्द्रशाक न० आर्द्रं शाकमस्य । आर्द्रके ।

आर्द्रवृक्ष पु० कर्मधा० । सरसवृक्षे ततः उत्करा० चतुर्थ्यां क । आर्द्रवृक्षीयः तद्वृक्षसन्निकृष्टदेशादौ त्रि० ।

आर्द्रालुभक पु० आर्द्रानन्तरे तत्सन्निकृष्टस्थाने लुब्धकवत् । केतुग्रहे फलायुधः ।

आर्भव पु० ऋभुणा दृष्टं साम ऋभुर्देवतास्य वा अण् । तृतीयसवने गेये पञ्चस्तुक्तात्मके सप्तसामात्मके पवमानभेदे । "आग्नीमवशब्दे ७३३ पृष्ठे विवृतमेतत् । "अथ तृतीयसवने आर्भवे पवमान उद्गातारमन्वारभमाणाः ऋभुरसि जगच्छन्दाः" शत० ब्रा० । "पञ्चच्छन्दा आवाप आर्भवः पवमानः सप्त सामा" सा० सं० भा० श्रुता श्रुतिः ।

आर्य पु० ऋ-ण्यत् । १स्वामिनि, २गुरौ, ३कुलवृद्धे च । ४श्रेष्ठकुलोत्पन्ने ५पूज्ये, ६त्रैवर्णिके, ७सज्जाते, नाद्योक्तौ दृश्यन्ते, ८उदारचरिते, १०शान्तचित्ते "कर्त्तव्यमाचरन् कार्य्यमकर्त्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः" इत्युक्तलक्षणे ११जने च त्रि० । "गृहीतमार्य्यान् परिचर्य्यया मुहुः" माघ । "त्यजेदेकस्यात्, पतिरार्य इष्टः" "वर्णापेतमविज्ञातं नरं कलुषयोनिजम् । आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत्" "जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः । जातोऽप्यनार्यादार्यायामनार्यवृत्ति निश्चयः" । "अनार्य आर्यकर्माणमार्यं चानार्यकर्मिणम्, । संप्रधार्यो ब्रवीदेतौ न समौ नासमाविति" इति च मनुः ।

आर्यत्वेन सम्भाषणे नाटके नियमविशेषाः सा० द० उक्ता यथा "राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च । स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः" विप्रेतरैर्विप्रः आर्येति वाच्यः "वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम्" । नटी सूत्रधारः आर्येति वाच्यः सूत्रधारेण च नटी आर्या इति वाच्या । "वयस्येत्युचमैर्वाच्योमध्यैरार्येति चाधमैः" । "आर्यबालचरितप्रस्तावनादिङ्गम" इति वीरच० रामचरितवर्णने लक्षणोक्तिः । "वत्स ! पुत्रक तातेति संज्ञागोत्रेण वा युतः । शिष्योऽनुजश्च वक्तव्योऽमात्य आर्येति चेतरैः" इतरैरमात्य आर्येति वक्तव्यः "वृत्तेन हि भवत्यार्यो न धनेन न विद्यया" भा० उ० ८६ अ० उक्तेः सदाचारेणैव नराणामार्यत्वम् । आर्याऽयस्यन्ती तत्र व्यापारं कर्त्तुमर्हति" कुमा० १२प्राकृतभाषायां स्त्री "सुखबाहूरुपज्जानां या लोके जातयो बहिः । म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः" मनुः । १३श्वशुरे पु० । आर्यपुत्रः पतिः "आर्यो ब्राह्मणकुमारयोः" पा० उक्तेः कर्मधारये ब्राह्मणकुमारयोः परतः प्रकृतिस्वरः ।

आर्यक त्रि० आर्य+स्वार्थे कन् । आर्यशब्दार्थे स्त्रियां टापि वा अत इत्त्वम् आर्यका-आर्यिका । संज्ञायां कन् । २पितामहे पु० । "बालां मामार्यकस्तुभ्यं क्रीड़न्तीं कन्दुकस्त्रिकाम् । अदात्तु कुन्तिभोजाय सखा सख्ये महात्मने" भा० उ० प० ८६ अ० तुभ्यमार्यकः तवार्यकः पितामह इत्यर्थः । कर्णं प्रति तत्पितृसखः कृत्वा वाक्यमिदम् ।

आर्यगृह्य त्रि० आर्यस्य गृह्यः पक्ष्यः । आर्यपक्षीये । "तमार्यगृह्यं निर्गृह्यतधेनुः" रघुः ।

आर्यदेश पु० आर्याणां वासार्हो देशः । आर्यावर्त्तादौ देशे

आर्यधर्म पु० आर्यस्य धर्मः । सदाचारे ।

आर्यपथ पु० आर्याणां पन्थाः अच् समा० । सदाचारे आर्यमार्गादयोऽत्र । [पुते च ।

आर्यपुत्र पु० आर्यस्य श्वशुरस्य पुत्रः । १भर्तरि २मान्यस्य

आर्यप्राय पु० आर्यः प्रायो बहुलोऽत्र । आर्यावर्त्तादौ देशे "जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् । वज्रयमानतसामन्तं स्वाजीव्यं देशमावसेत्" मनुः ।

आर्यभट्ट पु० ज्योतिषग्रन्थविशेषकारके विद्वद्भेदे सहि "प्रणिपत्यैकमनेकं सत्यां देवतां परं ब्रह्म । आर्यभट्टस्त्रीणि वदति गणितं कालक्रियां गोलम्" इत्युपक्रम्य गणितकालक्रियाभूगोलं निरूपितवान् । भूगोलखगोलशब्दयोः तन्मतमुदाहरिष्यते । तस्य च जन्मकालः स्वग्रन्थेएव तेनोक्तः "षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः । अधिका विंशतिरब्दास्तदिह मम जन्मनोऽतीताः" । तेन कलेः ३६२० वर्षेषु गतेषु तस्य जन्म । तन्मतमुत्थाप्य च सि० शि० क्वचित् क्वचित् दूषितमिति तस्य भास्कराचार्यात् प्राचीनत्वम् । [पत्र विज्ञापयामि" प्रबो० ।

आर्यमिश्र पु० कर्म० । गौरवान्विते "एवमार्यमिश्रान् प्रणि-

आर्यवृत्त न० आर्यस्य वृत्तम् । १सदाचारे "सत्यधर्मार्यवृत्ते

च शौचे चैवारभेत् सदा" मनुः। आर्य्यं श्रेष्ठं वृत्तमस्य। २सदाचारयुते त्रि० "रक्षणाद्यार्यवृत्तानां कण्टकानाञ्च शोधनात्" मनुः। [वेशोऽस्य। २आर्य्यलिङ्गधारिणि त्रि०

आर्य्यवेश पु० आर्यस्य वेशः। १साधूनां वेशे। आर्य्यस्येव

आर्य्यव्रत न० आर्यस्य व्रतं नियमः। आर्यस्य कर्त्तव्ये १नियमभेदे। आर्य्यस्येव व्रतमस्य। २श्रेष्ठव्रतधारिणि "आर्य्यव्रतश्च पाञ्चाल्यो न स राजा धनप्रियः" भा० आ० २०१अ०।

आर्य्यश्वेत पु० आर्यं श्रेष्ठं श्वेतं चरितं यस्य। श्रेष्ठचरिते ततः शिवादि० अपत्ये अण्। आर्यश्वेतस्यापत्ये पुंस्त्री स्त्रियां ङीप्।

आर्य्यहलम् अव्य० आर्यं हन्ति हन-ड तस्मिन् लीयते ली-आ० डसु। बलात्कारे बलात्कारस्य आर्यहन्तरि समाश्रयनियमात् तथात्वम् स्वरा० अव्ययत्वम्।

आर्य्या स्त्री ऋ-ण्यत्। पार्वत्याम् आर्याशतकम्। २स्त्रियां श्रेष्ठायां ३स्त्रियाञ्च ४मात्रावृत्तभेदे "लक्ष्मैतत् सप्तगणा गोपेता नेह भवति विषमे जः। षष्ठोजश्च नलघू वा प्रथमेऽर्द्धे नियतमार्यायाः। षष्ठे द्वितीयतुरीये सप्तमके नूने सुखलाञ्च सयति पदनियमः। चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठोलः" वृत्त०र०उक्ते ५ छन्दोभेदे स्त्री। साचार्या नवविधा यथा "पथ्या विपुला चपला मुखचपला जघनचपला च। गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधा चार्या" इति। तासां लक्षणम् वृत्तर०। "विषमेषु पादो दलयोरादेषु दृश्यते यस्याः। प्रथ्येति १नाम तस्याः प्रकीर्त्तितं नागराजेन। उल्लङ्घ्य गणचतुष्टयमादिमं प्रकलयोर्द्वयोर्भवति पादः। यस्यास्तां पिङ्गलनागो विपुलामिति २ समाख्याति। उभयार्द्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः। चपलेति ३नाम तस्याः प्रकीर्त्तितं नागराजेन। आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः। शेषे पूर्वजलक्ष्मा मुखचपला ४सोदिता मुनिना। प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः। लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ५सा। आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः। दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः। आर्याद्वितीयकेऽर्द्धे यद्गदितं लक्षणं तत् स्यात्। उभयोरपि दलयोरुपगीतिं तां मुनिर्भूते। आर्याश्चपलद्वितयं व्यत्ययरचितं भवेद् यस्याः। सोद्गीतिः किल गदिता तद्दृग्भेदसंयुक्ता। आर्यापूर्व्यार्द्धे यदि गुरुणैकेनाधिकेन निधने युक्तम्। इतरत्सदृन्निखिलं यदीयमुदितेयमार्यागीतिः" ६। "पादे द्वादश विषमे मात्राष्टादश द्वितीये हि। पञ्चदश चेत् तुरीये कथिता गाथा तथैवार्या" अन्यान्तरे यथाकथञ्चिद्दृद्वादशाष्टादशाचरादिमात्रात्मकपादत्वोक्तावपि उत्तरत्राकरोक्तैर्गणनियमोऽस्त्येव सामान्यशास्त्रतोऽपवादशास्त्रस्य प्रबलत्वात्। तेन यथाकथञ्चित्तथामात्रानिवेशोऽनुचितएव। "शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः। संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्" सां०का०"क्वचिदत्र भवेदार्या क्वचिदुद्गीतिपवक्त्रके" सा०द०कथालक्षणम्। "आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्" सा०द०। "अतिस्फुटवर्णसंस्कारवत्या गिरा राजानमुद्दिश्यार्यामिमां पपाठ" काद०। [भेदे आर्याशब्दे तल्लक्षणमुक्तम्।

आर्य्यागीति स्त्री आर्या गीतिरिव। इवार्थे उक्ते मात्रावृत्त-

आर्य्यावर्त्त पु० आर्या आवर्त्तन्ते अत्र आ+वृत-आधारे घञ्। देशभेदे स च देशोमनुना दर्शितः। "आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः" इति तयोः विन्ध्यहिमाचलयोः "कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः" मनुः।

आर्य्याविलास पु० आर्याणां प्राकृतभाषायुतमात्रावृत्तानां विलासो वाहुल्यम् यत्र। प्राकृतभाषया रचिते "भाषा विभाषानियमात् काव्यं सर्गसमुज्झितम्। एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितमिति" सा०दर्पणोक्तलक्षणयुक्ते प्राकृतकाव्यभेदे। ऐत०। आर्यायादुर्गायाविलासे च।

आर्ष त्रि० ऋषेरिदम् अण्। १ऋषिसम्बन्धिनि तत्कृतपुराणकाव्यादौ। "धर्म्मो यस्मिन् सङ्कुचः स्यादर्थं वाऽर्थलालसः। वेदात् स्मृत्वा ब्रवीयात् स लोकादजरामरात्" भा० व०प० २१अ०। आर्षं मन्वादिमतं यस्मिन्नङ्कुरमित्यर्थः "अक्षिप्तार्थे पुनःसंज्ञा भवेदाख्यानसंज्ञका": सा०द०। "इत्यार्षे रामायणे" इत्येवं रामायणसर्गसमाप्तौ भूरिप्रयोगः। ऋषिणा जुष्टम्। २ऋषिसेविते वेदे पु०। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः" मनुः।

ऋषिर्वेदस्तस्येदम् अण्। ३वैदिके। "सम्बुद्धौ शाकल्यस्येतावनार्षे" पा० "अनार्षे अवैदिके" सि०कौ०। "आर्षं प्रमाणमुत्क्रम्य धर्म्मं न प्रतिपालयन्" भा०व०प०३१अ०। ऋषेरयं वाचकः अण्। ५ऋष्यभिधायिनि "गोत्रक्षत्रियजातीयूनि अणिञोः" पा०(आर्षात्) "ऋष्यभिधायिनः" सि०कौ० संस्कारहीनत्वेपि ऋषिणा प्रयुक्तः अण्।

व्याकरणोक्तानुशासनसुल्लङ्घ्य ऋषिणा प्रयुक्ते असाधुन्यपि साधुत्वेनाभिमते पुंशब्दभेदे। आर्षः प्रयोगः। ऋषीणां समूहः प्रवरगणभेदः अण्। गोत्रप्रवर्त्तकमुनीनां ७व्यावर्त्तकप्रवर्षिसमूहे न०"अरोगिणीं भ्रातृमतीमसामानार्षगोत्रजाम्"या०। मिता० तु ऋषेरिदमार्षं नाम प्रवर इति व्याख्यातम् ऋषिर्वेदस्तत्र विहितः अण्। ७विवाहभेदे "यज्ञस्थायर्त्विजे दैव आर्षं आदाय गोयुगम्। चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्" या० "अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत। ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः" इत्युपक्रम्य "एकं गोमिथुनं द्वे वा वरादादाय धर्मतः। कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते" मनुस्मृतौ धर्म्म इत्युपादानात् कन्याशुल्कार्थं गोयुगग्रहणेऽपि न दोषः। अतएव मनुना तादृशस्य गोमिथुनग्रहणस्य स्वभोगसाधनत्वाभावेन शुल्कत्वमेव निराकृतम् "आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तदिति" "आर्षेाढाजः सुतस्त्रीन् त्रीन्" मनुः।

गोत्रभेदे प्रवरभेदाश्च विश्वादर्शे दर्शिता यथा। "अत्र गोत्रप्रवराणां स्वरूपं महाप्रवरपाठादवगन्तव्यम्। तत्र महान्तः प्रवरा एकद्वित्रिपञ्चार्षेया जमदग्न्यादयस्ते च सप्तानां गोत्राणां गणश उच्यन्ते। तावतैवापेक्षितसिद्धेः। यथा वत्सानां भार्गवच्यवनाप्नुवानौर्वजामदग्न्येति १ विदानां भार्गवच्यवनाप्नुवानौर्वविदेति २। आर्ष्टिषेणानां भार्गवच्यवनाप्नुवानौर्वार्ष्टिषेणेति२। जामदग्न्यानां भार्गवच्यवनाप्नुवानौर्वजामदग्न्येति ४। एते समानप्रवराः। अर्षाधिकर्षितुल्यत्वात्। याज्ञानां भार्गववैतहव्यसावेदसेति ५। मित्रयुवाणां भार्गववाध्र्यश्वदैवोदासेति६। वैण्यानां भार्गववैण्यपार्थेति७। एते भार्गवानुवृत्तावपि न मिथः समानप्रवराः भृगु सुक्षेति वचनात्। शुनकानां शौनकेति वा गार्त्समदेति वा। अत्र गोत्रप्रवरभेदोपयोगित्वेन पक्षे प्रवरैक्यादविवाहः। एते सप्त भृगवः। अथाङ्गिरसा गौतमा भारद्वाजाः शुद्धाश्चेति त्रिविधाः। तेषु गौतमास्तावत्। आयास्यानामाङ्गिरसायास्य गौतमेति १। शारद्वतानामाङ्गिरसशारद्वतगौतमेति२। कौमण्डकानामाङ्गिरसौदक्यकाक्षीवत गौतमकौमण्डेति३। दीर्घतमसानामाङ्गिरसौदक्यकाक्षीवतगौतमदैर्घतमसेति४। कारेणुपालानामाङ्गिरस गौतमकारेणुपालेति ५। वामदेवानामाङ्गिरसगौतमवामदेवेति६। औशसानानामाङ्गिरसौशसनगौतमेति७। एते सप्त गौतमाङ्गिरसाः समानप्रवराः अर्षाधिकर्षितुल्यत्वात्। भारद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति १। रौक्षायणानामाङ्गिरसबार्हस्पत्यभारद्वाज चान्दनभात्ववचसेति। गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यशैन्येति। आङ्गिरसगार्ग्यशैन्येति वा २। त्रय एते भरद्वाजाङ्गिरसाः समानप्रवराः अर्षाधिकर्षितुल्यत्वात्। गार्ग्याणां त्वार्षेयपक्षेऽर्षाधिकर्षितुल्यत्वाभावेऽपि पक्षे समानप्रवरत्वाद्भारद्वाजैरविवाहः। विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्न्येति १। काण्वानामाङ्गिरसाजमीढकाण्वेति २। हरितानामाङ्गिरसाम्बरीष यौवनाश्वेति ३। सांकृतीनामाङ्गिरससांकृत्यगौरवीतेति४। रथीतराणामाङ्गिरसवैरूप्यरथीतरेति५। सुन्नतानामाङ्गिरस भार्म्याश्वसौभरेति ६। कपीनामाङ्गिरसमान्धव्यवार्द्धयेति७। एते सप्त शुद्धाङ्गिरसाः भिन्नप्रवराः आङ्गिरसानुवृत्तावपि आङ्गिरसमुक्तेति वचनात्। अत्रीणामात्रेयार्चनानसश्यावाश्वेति १। गविष्ठिराणामात्रेयार्चनानसगविष्ठिरेति२। बभ्रूदकानामात्रेयार्चनानसबभ्रूदकेति३। सुन्नतानामात्रेयार्चनानसपौर्वातिथेति" ४। एते चत्वारः समानप्रवराःऋष्यर्षित्वात्। काश्यपानां काश्यपावत्सारनैध्रुवेति १। रेभाणां काश्यपावत्साररैभेति २। धाण्डिक्यानां काश्यपावत्सारधाण्डिक्येति३। काश्यपावत्सारवैदेति वा काश्यपावत्सारासितेति वा धाण्डिक्यासितदेवलेति वा इति चतुर्धा प्रवराः। लौगाक्षीणां काश्यपावत्सारवासिष्ठेति५। एते समानप्रवराः। काश्यपानुवृत्तेः चतुर्थप्रवरे काश्यपानुवृत्त्यभावेऽपि त्रिभिः प्रवरैः समानप्रवरत्वात् काश्यपैरविवाहः। लौगाक्षीणां वासिष्ठपदानुवृत्त्या द्व्यामुष्यायणत्वाद्वसिष्ठैरविवाहः। वसिष्ठानां वासिष्ठेति १। कुण्डिनानां वासिष्ठमैत्रावरुण कौण्डिन्येति २। उपमन्यूनां वासिष्ठेन्द्रप्रमदभारद्वस्तिति३। पराशराणां वसिष्ठशक्तिपाराशरेति ४। एते वासिष्ठाश्चत्वारः समानप्रवराः वसिष्ठानुवृत्तेः। कुशिकानां वैश्वामित्रदैवरातौदलेति १। रौहितानां वैश्वामित्राष्टकरौहितेति २। रौत्यकानां विश्वामित्ररौत्यकरैवतेति ३। विश्वामित्राणां वैश्वामित्रारसदेवतरसेति ४। सौञ्जायनानां विश्वामित्रमधुच्छन्दसौञ्जेति५। धनञ्जयानां वैश्वामित्रमाधुच्छन्दसधनञ्जयेति ६। कतकानां वैश्वामित्रकात्याक्षीलेति ७। इन्द्रकौशिकानां विश्वामित्रेन्द्रकौशिकेति ८। अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति९। पौराणां

वैश्वामित्रपौराणेति १०। एतेषां दशानां कुशिकानां विश्वामित्रपदानुवृत्तेर्मिथः समानप्रवरत्वम्। अगस्तीनामगस्तिदार्ढ्यच्युतेध्मवाहेति। दार्भवाहानामगस्त्यागस्त्यदार्ढ्यच्युतदार्भवाहेति १। साम्भवाहानामागस्त्यदार्ढ्यच्युतसाम्भवाहेति २। सोमवाहनानामागस्त्यदार्ढ्यच्युत सोमवाहेति ३। यज्ञवाहानामागस्त्यदार्ढ्यच्युतयज्ञवाहेति ४। चतुर्णामगस्तीनामागस्त्यपदानुवृत्त्या मिथः समानप्रवरत्वमिति प्रवरनिर्णयः। अत्र संग्रहश्लोकाः। "एकोऽपि च मुनिर्येषां प्रवरेष्वनुवर्त्तते। सगोत्रास्ते मिथोज्ञेया भृगुमङ्गिरसं विना। शुनकाः स्युर्त्समदैः काश्यपैः शाण्डिल्या अपि। भारद्वाजास्तथा गर्गाः पक्षे तुल्यर्षिदर्शनात्"। यद्वा। "च्यवनो गोतमोऽगस्त्योभरद्वाजोऽत्रिकश्यपौ। विश्वामित्रोवशिष्ठश्च यद्गणप्रवरेष्वमी। वर्त्तन्ते ते सगोत्राः स्युः कश्यपैः शाण्डिल्यास्तथा। शुनकाःस्युर्त्समदैर्भारद्वाजैश्च गर्गकाः" इति। अत्र प्रमादेन समानगणगोत्रप्रवरकन्योद्वाहे ज्ञानोत्तरकालं मातृवदेनामिभजेयात्। गर्भस्थे दुत्पन्नः स न दुष्यति। काश्यपो भवति गोत्रेण। ज्ञात्वा गच्छन् गुरुतल्पगः। तदुत्पन्नश्चण्डालवद्भवति। आद्यमपि सगोत्रप्रवराय न देयमित्याहुः। प्रवरविज्ञानात् विहीनो भवति एतत्समस्तं संप्रधार्य निश्चितं दास्यामीति तेषामुक्ते ते गृहङ्गच्छन्ति"।

तत्रैव अथ मतान्तरम्। "सर्वे समानगोत्राःस्युरिति गाणगारिः। कथं ह्याप्रोक्तानि भवेयुः। कथं प्रयाजा इत्यपि। नानागोत्राः स्युरिति शौनकः। तन्त्राणां व्यापित्वात् गृहपतिगोत्रान्वयाविशेषात्। तस्य राद्धिरनुराद्धिः। सर्वेषां प्रवरास्त्वावर्त्तेरन् आवापधर्मित्वात्। जामदग्न्या वत्साद्रयः पञ्चार्षेयाः। यथा भार्गवाप्नवानौर्वजामदग्न्येति। वत्सश्रीवत्सयोश्च तथैव। आर्ष्टिषेणानां भार्गवच्यवनाप्नुवानौर्वार्ष्टिषेणेति। विदानां भार्गवच्यवनाप्नुवानौर्ववित्तेति। वाल्मवाधूलमौलमौकशार्कराक्षिसार्ष्टिसावर्णिशालङ्कायनदैवन्त्यायनानां भार्गववैतहव्यसावेदेति। शैन्यानां भार्गवशैन्यपार्थेति। मित्रयूनां भार्गवदैवोदासवाङ्ग्रश्वेति। शुनकानां भार्गवशौनकगार्त्समदेति। गौतमानामाङ्गिरसायास्यगौतमेति उतथ्यानामाङ्गिरसौतथ्यगौतमेति। राङ्गणानामाङ्गिरसराङ्गणगौतमेति। सोमराजिकीनामाङ्गिरससौमराजिगौतमेति। वामदेवानामाङ्गिरसवामदेवगौतमेति। बृहदुक्थानामाङ्गिरसबार्हदुक्थगौतमेति। पार्षदश्वानामाङ्गिरसपार्षदश्ववैरूपेति। अष्टादंष्ट्रा इत्येके ब्रुवते अतीत्याङ्गिरसम्। अष्टादंष्ट्रापौरुकुत्सत्रासदस्ववेति। कृच्छ्राणामाङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातृवचसेति। कक्षीवतामाङ्गिरसगौतमौशिजकाक्षीवतेति। दीर्घतमसामाङ्गिरसौतथ्यदैर्घतमसेति। भारद्वाजाग्निवेश्यानामाङ्गिरसबार्हस्पत्यभारद्वाजेति। सुङ्गानामाङ्गिरसभार्म्यश्वमौद्गल्येति। तार्क्ष्यं चैके ब्रुवते अतीत्याङ्गिरसं तार्क्ष्यभार्म्यश्वमौद्गलेति। विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्ववेति। गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगर्गशैन्येति। आङ्गिरसशैन्यगार्गेति वा। हरितकृत्स्नपिङ्गशाङ्कृदर्भभैसगवानाम् आङ्गिरसाम्बरीषयौवनाश्वेति सङ्कृतिपूतिमाषतरिक्षशङ्खभौमगवानाम् आङ्गिरसगौरवीतसांकृत्येति। शाङ्खगौरवीत सांकृत्येति वा। काण्वानामाङ्गिरसाजमीढकाण्वेति। घोरमिश्चैके ब्रुवते अतीत्याजमीढम्। आङ्गिरसघोरकाण्वेति। कपीनामाङ्गिरसामहत्यवार्क्ष्येति। अथ शौङ्गशैशिरयः। भरद्वाजाः स्युः शुङ्गाः कताः शैशिरयः। तेषामुभयतः प्रवृणीते एकमितरोद्वावितरः त्रीनितरः। न हि चतुर्णां प्रवरोऽस्ति न पञ्चानाम्। आङ्गिरसबार्हस्पत्यभारद्वाजेत्यादि। कपौ प्रसिद्धावुदितावित्र द्वौ स्वतन्त्रा एकस्वपरोऽस्वतन्त्रः। तत्र स्वतन्त्रस्य कपेर्विवाहं मिथो भरभाजकुलेन चाहुः। अथात्रीणामात्रेयार्चनानसश्यावाश्वेति। गविष्ठिराणामात्रेयगाविष्ठिरपौर्वातिथेति। विकितगालवकालवमनुतन्तुकुशिकानां वैश्वामित्रदेवरातौदलेति। औमतकामकायनानां वैश्वामित्रदैवश्रवसदैवोदासेति। धनञ्जयानानां वैश्वामित्रमाधुच्छन्दस धानञ्जयेति। अजानां वैश्वामित्रमाधुच्छन्दसरौहिणेति। पूरणवारिधापयन्तानां वैश्वामित्रदेवरातपौराणेति। कतानां वैश्वामित्रकात्याक्षीलेति। अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति। रेणूनां वैश्वामित्रगाथिनरैणवेति। वेणूनां वैश्वामित्रगाथिनवैणवेति। शालङ्कायनशालाक्षलोहितात्रलोहितजङ्घनां वैश्वामित्रमाधुच्छन्दसधानञ्जयेति शालङ्कायनकौशिकेति वा। काश्यपानां काश्यपावत्सारासितेति। निध्रुवाणां काश्यपावत्सारनैध्रुवेति। रेभाणां काश्यपावत्सारैरभ्येति। शाण्डिल्यानां काश्यपावत्सारदैवलेति शाण्डिल्यासितदैवलेति वा। वासिष्ठवसिष्ठानां योऽन्यऽपमन्युपराशरकुण्डिनेभ्यः। उपमन्यूनां वासिष्ठाभरद्वस्विन्द्रप्रमदेति। पराशराणां वासिष्ठशक्तिपराशरेति। कुण्डिनानां वासिष्ठमैत्रावरुण-

कौण्डिन्येति । अगस्तीनामागस्त्यदार्ढाच्युतेध्मवाहेति । सोमवाहानामागस्त्यदार्ढाच्युतसौमवाहेति । पुरोहितप्रवरो राज्ञाम् । अथ यदि सार्ष्टिं प्रहणीरन् । मानवेड़ पौरुरवःकुत्सेति ग्रस्तानि । तान्यदक्षिणानि । तेषामन्ते ज्योतिष्टोमः पृष्ठ्यशमनीयसहस्रदक्षिणः । अन्यो वा प्रजातदक्षिणः । दक्षिणावता पृष्ठा शमनीयेरन्निति विज्ञायते । स एव हेतुः प्रकृतिभावे । "भृगूणां न विवाहोऽस्ति चतुर्षाभादितोमिथः । शैनाद्यस्त्रयस्तेषां विवाहो मिथ इष्यते । यस्मात् वै गौतमादीनां विवाहोनेष्यते मिथः । दीर्घतमस्त्रयौतथ्याः कक्षीवांश्चैव गोत्रजः । भरद्वाजाग्निवेश्यार्षाः शौङ्गाः कात्याश्च शैशिराः । एते समानगोत्राः स्युर्गर्गानेके वदन्ति वै । पृषदश्वाश्वलाविष्णुवृद्धाः काण्वोऽगस्त्यो हारितः सङ्कृतिश्च । यस्कस्यैषां मिथ इष्टोविवाहः सर्वैरन्यैर्जामदग्न्याद्भिश्च । ह्यार्षेयाणां त्र्यार्षेयसन्निपाते न विवाहः । त्र्यार्षेयाणां पञ्चार्षेयसन्निपाते न विवाहः । "एते समानगोत्राः स्युर्विश्वामित्रोऽनुवर्त्तते । अत्रयश्च वसिष्ठाश्च कश्यपाश्च पृथक् पृथक् । जमदग्निर्गौतमश्च भरद्वाजोऽत्रयस्तथा । विश्वामित्रः कश्यपश्च वसिष्ठोऽगस्त्योऽष्टमाः" । सप्तानामृषीणामगस्त्यष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते "एकएव ऋषिर्यावत् प्रवरेष्वनुवर्त्तते । तावत् समानगोत्राः स्युर्भृगुमङ्गिरसं विना । वसिष्ठो द्वौ च विज्ञेयौ ब्रह्मयुतोऽथ व्यापतः । मैत्रावरुणिरित्येव वासिष्ठोविप्रकान्तरात् । ब्रह्मात्मजाच्छक्तिपराशरव्यासशुकादयः । श्रेयो विवेकस्त्वनयोर्द्वितीयात् कुण्डिनादयः । अतएव भिन्नशरीरत्वात् भिन्नगोत्रप्रवरत्वाच्च वसिष्ठवासिष्ठगणयोर्विवाहः । जामदग्न्यविश्वामित्राणां देवरातवर्जं सर्वत्र विवाहः । अत्रिविश्वामित्राणां धनञ्जयवर्जं सर्वत्र विवाहः इति" प्रवरनिर्णयः ।

अथ सौत्रप्रवराः तत्रैव "जामदग्न्यावीतहव्यागार्त्समदा वाध्यश्वावैन्या गौतमाः भरद्वाजाः कपयोहारीताः काण्वा विरूपा मौद्गला विष्णुवृद्धा आत्रेया विश्वामित्राः काश्यपा वासिष्ठा आगस्त्या इत्यष्टादश गणाः स्युः । आदितः पञ्चगणा भृगवो भवन्ति । भृगुजामदग्न्या वत्सश्रौवत्सच्यवनाप्नवानाः । और्वसावर्णिजीवन्निजावाल्मीकिशाट्यायनवैरोहित्यावटमरुड्प्राचीनयोग्यार्ष्टिषेणानां भृगवो न मिथो विवाह्याः । वीतहव्यगार्त्समदौनकौ भार्गवौ न मिथो विवाह्यौ । वाध्यश्वमित्रयवौ भार्गवौ न मिथो विवाह्यौ । वैरूपपार्थौ भार्गवौ न मिथो विवाह्यौ । आङ्गिरसायास्यौतथ्यौशिजकाक्षीवतवामदेवबृहदुक्थ्यान्ता गौतमा न मिथो विवाह्याः । आङ्गिरसबार्हस्पत्यभारद्वाजकुकुटाग्निवेश्यौज्जायनसंवर्त्तसम्वर्त्तसप्तयुङ्कुतपैशिरिपञ्चिक्तवान्दनमाढवचसस्रुतन्तकपिगार्ग्यकपिशैन्यान्ता भरद्वाजा न मिथो विवाह्याः । आङ्गिरसकण्वमहायोद्वाजः कण्वस्था न मिथो विवाह्याः । आङ्गिरसमौद्गपिताम्बरीषयौवनाश्वमान्धातृशङ्खपिङ्गदर्भकुत्सहारिताः न मिथो विवाह्याः । आङ्गिरसाजमीढकण्वा न मिथो विवाह्याः । आङ्गिरसविरूपपृषदश्वरथीतराधादंष्ट्रा विरूपाः न मिथो विवाह्याः । आङ्गिरसमौद्गल्यकक्षीवोद्गला न मिथो विवाह्याः । आङ्गिरसविष्णुवृधन्वासदस्यवाघमर्षणभद्रणमद्रणवादरायणौपमित्यौपगविसात्यकिसात्यकाम्यारुणिनितुन्द्याविष्णुवृधा न मिथो विवाह्याः आत्रेयार्चनानसश्यावाश्वगविष्टिरधनञ्जयातिथिसुमङ्गलवामरथ्यवीजवाप्यसङ्गलान्ता आत्रेया न मिथो विवाह्याः । विश्वामित्रदेवरातचिकितमनुदन्त्यौलकिवालकियज्ञवल्कोलूकलट्टहृदग्निवभ्रुशालङ्किश्यालायनश्यालङ्कायनकालव वौद्रश्रौमतकामकायनदैवश्रवसाज्यमाधुच्छन्दसधनञ्जयाष्टकलोहितपूरणपारिधाद्यावाघमर्षणकौशिककतस्रुतपनसधूच्यजठरवावलौकहव्याग्निदैव्यन्ता विश्वामित्रा न मिथो विवाह्याः । काश्यपावत्सारनैध्रुवरेभसाण्डिल्यशाण्डिल्यदैवरातासितान्ताः काश्यपा न मिथो विवाह्याः । वसिष्ठशक्तिपराशरवासिष्ठा न मिथो विवाह्याः । आगस्त्यदार्ढाच्युतेध्मवाहदार्भवाहसाम्नवाहसोमवाहयज्ञवाहान्ता अगस्त्यो न मिथो विवाह्याः" । एवं प्रवरज्ञानस्य विवाहोपयोगितोक्ता । अस्य होमविशेषोपयोगिताऽपि आर्षेयशब्दे वक्ष्यते । निर्णयसिन्धौ अत्र कश्चिद्विशेष उक्तो यथा । "अथ गोत्राणि प्रवरांश्चोच्यन्ते । तत्र बौधायनः गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च जनपञ्चाग्रदेवैषां प्रवरा ऋषिदर्शनात्" ।

"तत्र सप्त भृगवः वत्सा विदा आर्ष्टिषेणा यस्का मित्रयवावैन्याः शुनका इति ७। वत्सानां भार्गवच्यवनाप्रवानौर्वजामदग्न्येति१ । भार्गवौर्वजामदग्न्येति वा भार्गवच्यवनाप्रवानेति वा । विदानां पञ्च भार्गवच्यवनाप्रवानौर्वेत्येति२ । भार्गवौर्वजामदग्न्येति वा एतौ

द्वौ जामदग्न्यसंज्ञौ । आर्ष्टिषेणानाम् भार्गवच्यवनाप्रवानार्ष्टिषेणानूपेति । भार्गवार्ष्टिषेणानूपेति वा । एषान्त्रयाणां परस्परमविवाहः । वात्स्यानाम् भार्गवच्यवनाप्रवानेति वत्सपुरोधसयोः पञ्च भार्गवच्यवनाप्रवानवात्स्यपौरोधसेति । वैजवननिमतिथयोः पञ्च भार्गवच्यवनाप्रवानवैजवननैमतिथेति । एते त्रयः क्वचित् एषामपि पूर्वैरविवाहः । अत्र तत्तद्गणस्थाक्षयोऽन्यस्य विशेषस्तत्तद्गते प्रवरदर्पणे ज्ञेयः । यस्कानाम् भार्गववैतहव्यसावेदसेति । मित्रयूनाम् भार्गववाध्यश्वदिवोदासेति । भार्गवच्यवनदिवोदासेति वा वाध्यश्वेत्येको वा । वैन्यानां भार्गववैन्यपार्थेति । एतएव श्यैताः । शुनकानां शुनकेति वा गार्त्समदेति वा भार्गवगार्त्समदेति द्वौ वा भार्गवशौनहोत्रगार्त्समदेति त्रयो वा । वेदविश्वज्योतिषां भार्गववेदवैश्वज्योतिषेति । शाठरमाठराणां भार्गवशाठरमाठरेति एतौ द्वौ क्वचित् यस्कादीनां स्वगणत्यक्त्वा सर्वैर्विवाहः । तदुक्तं स्मृत्यर्थसारे "यस्कामित्रयवावैन्याः शुनकाः प्रवरैरमी । स्वं स्वं हित्वा गणं सर्वे विवहेयुः परापरैरिति" ।

"अथाङ्गिरसः ते गौतमाः भरद्वाजाः कैवलाङ्गिरसश्चेति त्रिधा । अत्र गोतमा दश आयास्याः भरद्वन्तः कौमण्डादीर्घतमसः औशनसः कारेणुपालाः राङ्गणाः सोमराजकाः वामदेवाः बृहदुक्थाश्चेति तत्रायास्यानाम् आङ्गिरसायास्यगौतमेति भरद्वतां आङ्गिरसगौतमभारद्वतेति । कौमण्डानां आङ्गिरसौतथ्यकाक्षीवदिति गौतमकौमाण्डेति वा । आङ्गिरसानामायास्यौशिजगौतमकाक्षीवदिति वा आङ्गिरसौतथ्यगौतमौशिजकाक्षीवदिति वा । आङ्गिरसौशिजकाक्षीवदिति त्रयो वा । दीर्घतमसाम् आङ्गिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति आङ्गिरसौतथ्यदैर्घतमसेति त्रयो वा । औशनसानाम् आङ्गिरसगौतमौशनसेति त्रयः । कारेणुपालानाम् आङ्गिरसगौतमकारेणुपालेति त्रयः राङ्गणानां आङ्गिरसराङ्गणगौतमेति । सोमराजकानाम् आङ्गिरससोमराजकगौतमेति । वामदेवानाम् आङ्गिरसवामदेव्यगौतमेति बृहदुक्थानाम् आङ्गिरसबार्हदुक्थगौतमेति । आङ्गिरसवामदेववार्हदुक्थेति वा । उतथ्यानामाङ्गिरसौतथ्यगौतमेति । औशिजानामाङ्गिरसौशिजकाक्षीवदित्यापस्तम्बः । आङ्गिरसायास्यौशिजगौतमकाक्षीवदिति कात्यायनः । एतौ द्वौ क्वचित् रघुवाणाम् । आङ्गिरसरात्रुवन गौतमेति केचित् । तत्र मूलं चिन्त्यम् । एषां सर्वेषां गौतमानामविवाहः ।

अथ भरद्वाजाः ते चत्वारः । भरद्वाजा गर्गाः कृच्छ्राःकपय इति भरद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति त्रयः । गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजशैन्यगार्ग्येति पञ्च । आङ्गिरसशैन्यगार्ग्येति वा अन्त्ययोर्व्यत्ययो वा । भारद्वाजगार्ग्यशैन्येति वा । गर्गभेदानाम् आङ्गिरसतैत्तिरकापिभुवेति कृच्छ्राणां कपिलानां चाङ्गिरसबार्हस्पत्यभरद्वाजवान्दनमातृवचसेति पञ्च । आङ्गिरसवान्दनमातृवचसेति त्रयो वा । कपिलानामाङ्गिरसामहोयवकृत्स्नयसेति । आत्मभुवाम् आङ्गिरसभारद्वाजबार्हस्पत्यमन्त्रवरात्मभुवेति पञ्च । अयं क्वचित् भरद्वाजानां सर्वेषामविवाहः ।

अथ कैवलाङ्गिरसः हरितानाम् आङ्गिरसाम्बरीषयौवनाश्वेति । आद्योभान्धाता वा । कृत्सानाम् आङ्गिरसमान्धातृकौत्सेति । कण्वानामाङ्गिरसाजमीढकाण्वेति आङ्गिरसघोरकाण्वेति वा । रथीतराणामाङ्गिरसवैरूपराथीतरेति आङ्गिरसवैरूपपार्षदश्वेति वा । अष्टादंष्ट्रपार्षदश्ववैरूपेति वा । अन्त्ययोर्व्यत्ययो वा । सुन्हलानामाङ्गिरसभार्म्याश्वमौद्गल्येति आद्यस्याश्वौ वा आङ्गिरसताविमौद्गल्येति वा । विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्वेति । एषां स्वगणं विहाय सर्वैर्विवाहो भवति । हरितकृत्स्नयोस्तु न भवति ।

अथात्रयः ते चत्वारः आत्रेयाः वाङ्गुतकाः गविष्ठिराः सुन्हला इति । आद्यानामात्रेयार्चनानसश्यावाश्वेति । वाङ्गुतकानाम् आत्रेयार्चनानसवाङ्गुतकेति । धनञ्जयानाम् आत्रेयार्चनानसधानञ्जयेति क्वचित् । गविष्ठिराणामात्रेयार्चनानसगविष्ठिरेति । आत्रेयगाविष्ठिरपौर्वातिथेति वा । सुन्हलानामात्रेयार्चनानसपौर्वातिथेति । वामरथ्यसुमङ्गलवैजवापानामात्रेयार्चनानसतिथेति आत्रेयार्चनानसगाविष्ठिरेवि वा । सुमङ्गलानाम् अत्रिसुमङ्गलश्यावाश्वेति केचित् । अत्रेः पुत्रिकापुत्राणाम् आत्रेयवामरथ्यपौर्वातिथेति । अत्रीणां सर्वेषामविवाहः ।

अथ विश्वामित्राः ते दश कुशिकाः कौशिकाः रौद्रकाः कासकायनाः कताः धनञ्जयाः अघमर्षणाः पूरणाः इन्द्रकौशिका इति कुशिकानां विश्वामित्रदेवरातौदलेति । कौशिकानां विश्वामित्राष्टकलौशिकेति । अन्त्ययोर्व्यत्ययो वा वैश्वामित्रसाधुच्छन्दसाष्टकेति वा । विश्वा-

मित्राष्टकेति द्वौ वा। रौक्षकाणां वैश्वामित्रगाथिनरैक्षेति वैश्वामित्ररौक्षकरैक्षेति वा। कामकायनानां वैश्वामित्रदेवश्रवसदैवतरसेति वा। अजानां वैश्वामित्रमाधुच्छन्दसाजेति वैश्वामित्राश्वरथवाधूलेति वा अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति। पूरणानां वैश्वामित्रपौरणेति द्वौ वा। वैश्वामित्रदेवरातपूरणेति वा इन्द्रकौशिकानां विश्वामित्रेन्द्रकौशिकेति द्वौ। धनञ्जयानां विश्वामित्रमाधुच्छन्दसधानञ्जयेति। वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा कतानां वैश्वामित्रकात्यात्त्रीलेति एते बौधायनोक्ताः। रौहिणानां वैश्वामित्रमाधुच्छन्दसरौहिणेति। रेणूनां वैश्वामित्रगाथिनरैणवेति। जन्हूनां वैश्वामित्रशालङ्कायनकौशिकेति। आश्वरथ्यानां वैश्वामित्राश्वरथ्यवाधूलेति। वेणूनां वैश्वामित्रगाथिनवैणवेति एते आश्वलायनामात्योक्ताः अन्यैस्त्वन्येऽपि षड्गणा उक्ताः तेऽन्यत्र तत्कृतौ ज्ञेयाः एषां विश्वामित्राणामविवाहः।

अथ कश्यपाः ते पञ्च निध्रुवाः कश्यपाः ध्रुविलाः रेभाः लौगाक्षयश्च। निध्रुवाणां काश्यपावत्सारनैध्रुवेति। कश्यपानां काश्यपावत्सारासितेति। रेभाणां काश्यपावत्सारैभेति। ध्रुविलानां काश्यपावत्सरध्रुविलेति। अन्यस्थाने देवलोवासितो वा। ध्रुविलासितदैवलेति वा। कश्यपासितदैवलेति वा। अन्ययोर्व्यत्ययो वा देवलासितेति द्वौ वा। लौगाक्षीन् वक्ष्यामः। एषां काश्यपानामविवाहः।

अथ वसिष्ठाः ते पञ्च वसिष्ठाः कुण्डिनाः उपमन्यवः पराशराः जातूकर्ण्याश्चेति। वासिष्ठेन्द्रप्रमदाभरद्वसिति वासिष्ठैत्येक वा। कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति। उपमन्यूनां वासिष्ठेन्द्रप्रमदाभरद्वसिति। वासिष्ठाभरद्वसिन्द्रप्रमदेति वा। आद्ययोर्व्यत्ययो वा पराशराणां वासिष्ठाक्ष्यपाराशर्येति। जातूकर्ण्यानां वासिष्ठानां सर्वेषामविवाहः। अन्यस्माऽत्रिभिश्च।

अथागस्त्याः ते चत्वारः दृढ्युवाहाः साह्यवाहाः सोमवाहाः यन्नवाहाश्चेति आद्यानाम् आगस्त्यदार्ढ्यच्युतैध्मवाहेति आगस्त्येको वा। सोमवाहानाम् आगस्त्यदार्ढ्यच्युतसोमवाहेति। साभवाहानां साभवाहोऽन्त्यः आद्यौ पूर्वकावेव सोमवाहानां तदन्त्यः दर्भवाहानां तदन्त्यः।

अगस्तीनामागस्त्यसाहेन्द्रमायोभुवेति पूर्णमासानाम् आगस्त्यपौर्णमासपारणेति। हिमोदकानाम् आगस्त्यहैमवर्चिहैमोदकेति। पाणिकानामागस्त्यपैनाह्यक पाणिकेति। एते षट् क्वचित्। अगस्तीनां सर्वेषामविवाहः।

अथ द्विगोत्राः शौङ्गगैरिणीनाम् आङ्गिरसबार्हस्पत्यभारद्वाजकात्यात्त्रीलेति पञ्च कात्यात्त्रीलयोः स्थाने शौङ्गगैरिणी वा आङ्गिरसकात्यात्त्रीलेति त्रयो वा एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः। एवं कपिलानां कतानाञ्च संकृतिपूतिमाषादीनाम् आङ्गिरसगौरुवीतसांकृत्येति शालगौरुवीतसांकृत्येति वा एषां स्वगणस्थैर्वसिष्ठैः शौङ्गगैरिणैर्लौगाक्षिभिश्चाविवाहः। काश्यपैरपीति प्रयोगपारिजाते। लौगाक्षीणां काश्यपावत्सारवासिष्ठेति काश्यपावत्सारासितेति वा एतेऽर्वसिष्ठा नक्षं काश्यपाः एषां वसिष्ठैः काश्यपैः संकृताद्यैश्चाविवाहः। देवरातस्य जामदग्न्यैर्विश्वामित्रैश्चाविवाह इति प्रयोगपारिजाते यदुक्तं बह्वृचश्रुतौ "यद्यैवाङ्गिरसः सनुमेयात्तव पुत्रताम्। आङ्गिरसोजन्मनास्याजीगर्तिः शुनःकविरित्यङ्गिरसगणस्थत्वेन भार्गवजामदग्नत्वस्मृतेर्बाधात्। तेन प्रत्यक्षश्रुत्या हरिवंशादिस्मृतेश्च बाधात् तेन द्वौ देवरातौ एक आङ्गिरसः श्रुत्युक्तः अन्यो भार्गवः तयोः कल्पभेदेऽप्याङ्गिरसेन देवरातेन जामदग्न्यैर्भवत्येव विवाहः भार्गवेण तु नेति तत्त्वम्। धनञ्जयानां विश्वामित्रैरत्रिभिश्चाविवाहः जातूकर्ण्यानां वसिष्ठैरत्रिभिश्चाविवाहः एवं दत्तक्रोतकत्रिमस्वयंदत्तपुत्रिकापुत्रादीनाम् उत्पादकपालकयोः पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमञ्जरी नारायणवृत्तिप्रयोगपारिजातादयः। अत्र सर्वत्रोपपत्तयः मूलं च तत्कृते प्रवरदर्पणे ज्ञेयमिति दिक्। क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरावेवेति सर्वसिद्धान्तः यद्यपि बह्वृचपरिशिष्टे कपिभरद्वाजयोर्विवाह उक्तस्तथापि "भरद्वाजाश्च कपयो गर्गाश्चायणा इमे। चत्वारोऽपि भरद्वाजगोत्रैक्याच्चान्वियुर्मिथः। कपिगर्गभरद्वाजामिथोरौक्षायणा द्विजाः। नोद्वहेयुः सगोत्रत्वात् प्रवरैक्याच्च कुत्रचिदिति" स्मृत्यर्थसाराद्युक्तेरविवाह एव तयोरिति प्रवरमञ्जर्यां यद्यपीदमुक्तम् तथापि भृग्वङ्गिरोगणेषु तु भवत्येव यथा बह्वृचपरिशिष्टे बौधायनः "एक एवऋषिर्यावत्प्रवरेष्वनुवर्तते। तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात्" माधवीये स्मृत्यन्तरं "पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः। भृग्वङ्गिरोगणेष्वेवं ज्ञेयेष्वेकोऽपि वारयेदिति" एवं विश्वादर्शप्रयोगपारिजाताचारमाधवीय-

निर्णयसिन्धु प्रभृतिषु भृग्वङ्गिरोगणेषु पञ्च प्रवराणां मध्ये त्रिषु साम्ये । त्रिषु प्रवरेषु द्वयोः साम्येऽपि भेदगोत्राणामेकर्षिसाम्येऽपि समानप्रवरत्वादविवाह्यत्वं सिद्धमेतेन अनूनानतिरिक्तसंख्यार्षेयाकत्वेन समानार्षत्वं यत् रघुनन्दनेनोक्तं तन्निर्मूलत्वादग्राह्यं बौधायनादिस्मृति विरुद्धत्वात्तदर्शनविजृम्भितत्वाच्च एवं वत्ससावर्णिगोत्रप्रवरेषु आप्नुवत्प्रवरत्वकथनमपि प्रवरध्यायाज्ञानविलसितम् । अधिकमार्षेयशब्दे वक्ष्यते । ऋषेरयं अण् । ऋषिकृतस्मरणे । वेदे यन्मन्त्रं येन ऋषिणा कल्पादौ स्मृतं तन्मन्त्रस्य तदार्षत्वम् । "आर्षं छन्दश्च दैवतं विनियोगस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः" योगिया० । [शब्दे २उक्तआर्षविवाहे च ।

आर्षधर्म्म पु० न० कर्म्म० । १मन्वादिप्रोक्ते धर्म्मे । आर्ष-

आर्षभ त्रि० ऋषभस्य इषस्येदम् अण् । इषसम्बन्धिनि । "यदन्यगोषु इषभो वत्सानां जनयेच्छतम् । गोमिनामेव तत् सर्वं गोषं स्कन्दितमार्षभम्" मनुः ऋषभदेव चरिते न० । [ऋषभदेवे ।

आर्षभि पु० ऋषभस्यापत्यम् इञ् । ऋषभदेवपुत्रे चक्रवर्त्तिनि

आर्षभी पु० ऋषभस्येयं प्रिया अण् ङीप् । १कपिकच्छाम् राजनि० । ऋषभस्येयम् तुल्याकारत्वात् अण् ङीप् । वायुपुराणोक्ते मध्यमार्गस्थवीथीत्रयमध्येवीथीभेदे ऐरावतीशब्दे विवृतिः

आर्षभ्य पु० ऋषभस्य प्रकृतिः ञ्य । इषभतायोग्ये वत्से वत्सो हि वयःक्रमेण इषभतां प्राप्नोतीति तस्य इषभ प्रकृतित्वात् तथात्वम् [यक् । ऋषिधर्म्मे

आर्षिक्य न० ऋषिरेव ऋषिकः ऋषिकस्य भावः ष्यञ् । ऋषिकत्वे

आर्षिषेण पु० स्त्री ऋषिषेणस्य गोत्रापत्यम् षिदा० अञ् । ऋषिषेण ऋषेर्गोत्रापत्ये स्त्रियां ङीप् । ऋष्टिषेण इति वा भणे पाठे आर्ष्टिषेणस्तदपत्ये आर्षशब्दे प्रवरनिर्णये उदा० ।

आर्षेय न० ऋषीणां समूहः ढक् । ऋषिगणरूपे प्रवर भेदे तज्ज्ञानस्य विवाहोपयोगिता आर्षशब्दे उक्ता । होमभेदोपयोगिताऽपि प्रवराध्याये दर्शिता यथा । "प्रवरान् व्याख्यास्याम आर्षेयं इषीते बन्धोरेव नैत्यथो सन्तत्या इति विज्ञायते तद्वै न मनुष्यैरार्षेयं इषीत ऋषिभिरेवार्षेयं इषीत इति विज्ञायत आर्षेयमन्वाचष्ट ऋषिणा हि देवाः पुरुषमनुबुध्यन्त " इत्यृक्थस्य । "योवा अन्यःसन्नन्यस्यार्षेयं प्रइषीते स वा अस्यत ऋषिरिष्टं वीतं इङ्क्त इति विज्ञायते । त्रीन् इषीते मन्त्रकृतो इषीते यथर्षिमन्त्रकृतो इषीत इति विज्ञायतेऽथैकेषामेकं इषीते द्वौ इषीते त्रीन् इषीते न चतुरो इषीते न पञ्चातिप्रइषीत इति विज्ञायते । तत ऊर्द्ध नध्वर्युर्इषीते सुतरेवाचोहोतेति विज्ञायते । पुरोहितस्य प्रवरेण राजा प्रइषीत इति विज्ञायते । भृगूणामेवाग्नेव्याख्यास्यामो जामदग्न्यावत्यास्तेषां पञ्चार्षेयः प्रवरो भार्गवच्यवनाप्नवानौर्वजामदग्न्येति जमदग्निवदूर्ववदाप्नवानवच्च्यवनवद्भृगुवदिति त्र्यार्षेयसप्तैके भार्गवौर्वजामदग्न्येति जमदग्निवदूर्ववद्भृगुवदित्येव वा विकृतः । सावर्णिजीवन्तिजाबालैतिशायनवैरोहित्यावटमण्डप्राचीनयोग्यानामथार्ष्टिषेणानां पञ्चार्षेयो भार्गवच्यवनाप्रवानार्ष्टिषेणानूमेति । अनूपवदृष्टिषेणवदाप्नुवानवच्च्यवनवद्भृगुवदिति त्र्यार्षेयसप्तैके भार्गवार्ष्टिषेणानूमेति अनूपवदृष्टिषेणवद्भृगुवदिति । अथ वीतहव्या वाक्षवाधूलमौनमौकास्तेषां त्र्यार्षेयो भार्गववीतहव्यसावेदसेति सवेदोवद्वीतहव्यवद्भृगुवदिति । गार्त्समदाः शुनकास्तेषामेकार्षेयो गार्त्समदेति होता वदति गृत्समदवत् इत्यध्वर्युः अथ वाध्र्यश्वमित्रयवास्तेषामेकार्षेयो वाध्र्यश्वेति होता वदति वध्र्यश्ववदित्यध्वर्युः । अथ वैन्याः पार्थास्तेषां त्र्यार्षेयो भार्गववैन्यपार्थिव्येति । पृथिवीवद्वेनवद्भृगुवदिति । इमे भृगवोव्याख्याताः । अथातोऽङ्गिरसामायास्यगोतमास्तेषां त्र्यार्षेयआङ्गिरसायास्यगोतमेति । गोतमवदयास्य वदङ्गिरोवदिति । अथौ तथ्यागौतमास्तेषां त्र्यार्षेय आङ्गिरसौतथ्यगौतमेति गोतमवदुतथ्यवदङ्गिरोवदिति । अथौशिजागोतमास्तेषां त्र्यार्षेयः आङ्गिरसौशिजकाक्षीवदिति कक्षीवदुशिजवदङ्गिरोवदिति । अथ वामदेवा गौतमास्तेषां त्र्यार्षेयः आङ्गिरसबार्हस्पत्यभारद्वाजेवार्हदुक्थेति बृहदुक्थवद्बामदेववदङ्गिरोवदिति । अथ भरद्वाजानां त्र्यार्षेय आङ्गिरसबार्हस्पत्यभारद्वाजेति भरद्वाजवद्बृहस्पतिवदङ्गिरोवदित्येष वा विकृतः । कुक्कुटाग्निवेश्योल्लायनानां सर्वेषां च स्तम्बस्तम्बशब्दानामथ द्वासुध्यायणानां कुलानाम् । यथा शुङ्गशैशिरयोः भारद्वाजाः शुङ्गाः कताः शैशिरयस्तेषां पञ्चार्षेयआङ्गिरसबार्हस्पत्यभारद्वाजकात्याक्षीवदिति अक्षीवत्कतवद्भरद्वाजवद्बृहस्पतिवदङ्गिरोवदिति त्र्यार्षेयसप्तैके आङ्गिरसकात्याक्षीवदिति अक्षीवत्कतवदङ्गिरोवदिति । अथ रुक्षाणां पञ्चार्षेय आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमाढवचसेति । माढवचोवद्वान्दनवद्भरद्वाजवद्बृहस्पतिवदङ्गिरोवदिति त्र्यार्षेयसप्तैके आङ्गिरसवान्दनमाढवचसेति माढवचोवद्वान्दनवदङ्गिरोवदिति । अथ

कपोनां त्रार्षेय आङ्गिरसामहीयवौरुक्षयेति उरुक्षयवदमहीयुवदङ्गिरोवदिति। अथ गर्गाणां त्रार्षेय आङ्गिरसगार्ग्यशैन्येति शिनिवदुगर्गवदङ्गिरोवदिति। भरद्वाजसुहैकोऽङ्गिरसःस्थाने भरद्वाजगार्ग्यशैन्येति शिनिवदुगर्गवद्भरद्वाजवदिति। अथ हरितानां त्रार्षेय आङ्गिरसाम्बरीषयौवनाश्वेति युवनाश्ववदम्बरीषवदङ्गिरोवदिति। मान्धातारसुहैकोऽङ्गिरसःस्थाने मान्धातृाम्बरीषयौवनाश्वेति। युवनाश्ववदम्बरीषवन्मान्धातृवदिति। अथ कुत्सानां त्रार्षेय आङ्गिरसमान्धातृकौत्सेति। कुत्सवन्मान्धातृवदङ्गिरोवदिति। अथागमोढाः काण्वास्तेषां त्रार्षेय आङ्गिरसाजमीढकाण्वेति काण्ववदजमीढवदङ्गिरोवदिति। अथ विरूपा रथीतरास्तेषां त्रार्षेय आङ्गिरसवैरूपपार्षदश्वेति पृषदश्ववद्विरूपवदङ्गिरोवदिति अष्टादंष्ट्रसुहैकोऽङ्गिरसःस्थान आष्टादंष्ट्र वैरूपपार्षदश्वेति पृषदश्ववद्विरूपवदष्टादंष्ट्रवदिति। अथ सुन्नलानां त्रार्षेय आङ्गिरसभार्म्यश्वमौद्गलेति सुन्नलवद्भर्म्यश्ववदङ्गिरोवदिति। दृच्चसुहैकोऽङ्गिरसःस्थाने तार्क्ष्यभार्म्यश्वमौद्गल्येति सुन्नलवद्भर्म्यश्ववत्तृत्तवदिति। अथ विष्णुवृद्धानां त्रार्षेय आङ्गिरसपौरुकुत्सत्रासदस्वेति। त्रसदस्युवत्पुरुकुत्सवदङ्गिरोवदित्येष एव विकृतः। अघमर्षणमदूष्णमदूष्णवादरायणौपमित्यौपगविसात्यकिसात्यकाम्याश्वरथिनित्नुन्दीनामथालीनां त्रार्षेयआत्रेयार्चनानसश्यावाश्वेति श्यावाश्ववदर्चनानसवदत्रिवदिति। अथ गर्विष्ठिराणां त्रार्षेयआत्रेयार्चनानसगाविष्ठिरेति गविष्ठिरवदर्चनानसवदत्रिवदिति। अथातिथीनां त्रार्षेय आत्रेयार्चनानसातिथेयेति अतिथिवदर्चनानसवदत्रिवदित्येष एव वा विकृतो वामरथ्यसुभङ्गलवीजवापीनाम्। अथ विश्वामित्राणां देवरातऽश्चिकितमनुतन्वौलकिबालखिल्ययज्ञवल्कोलूकदृढदग्निबभ्रुशालङ्किशालावतशालङ्कायनकालवालेषां त्रार्षेयो वैश्वामित्रदेवरातौदलेति। उदलवद्देवरातवद्विश्वामित्रवदिति। अथ औमन्तकामकायनानां त्रार्षेयो वैश्वामित्रदैवश्रवसदैवतरसेति देवतरसवद्देवश्रवोवद्विश्वामित्रवदिति। अथाजानां त्रार्षेयो वैश्वामित्रमाधुच्छन्दसाज्येति। अजवन्माधुच्छन्दोवद्विश्वामित्रवदिति। अथ धानञ्जयानां त्रार्षेयो वैश्वामित्रमाधुच्छन्दसधानञ्जयेति धनञ्जयवन्माधुच्छन्दोवद्विश्वामित्रवदिति। अथाष्टकालोहितास्तेषां द्वार्षेयो वैश्वामित्राष्टकेति। अष्टकवद्विश्वामित्रवदिति। अथ पूरणपारिधायन्तास्तेषां द्वार्षेयो वैश्वामित्रपौरणेति पूरणवद्विश्वामित्रवदिति। अथ कतानां त्रार्षेयो वैश्वामित्र कात्याक्षीलेतिअक्षीलवत्कतवद्विश्वामित्रवदिति। अथाघमर्षणाः कुशिकास्तेषां त्रार्षेयो वैश्वामित्राघमर्षणकौशिकेति कुशिकवदघमर्षणवद्विश्वामित्रवदिति। अथ काश्यपानां त्रार्षेयः काश्यपावत्सारनैध्रुवेति निध्रुववद्वत्सारवत्काश्यपवदिति। अथ रैभास्तेषां त्रार्षेयः काश्यपावत्सारैरेभेति। रैभवदवत्सारवत्काश्यपवदिति। अथ शाण्डिलानां द्वार्षेयो दैवलासितेति। असितवद्दुदेवलवदिति। त्रार्षेयसुहैके काश्यपदैवलासितेति असितवद्दुदैवलवत्काश्यपवदिति द्वार्षेयास्त्वेवं न्यायेनैकार्षेया वसिष्ठा अन्यत्र पराशरेभ्यो वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरुस्यार्षेयसुहैके वासिष्ठैन्द्रप्रमदाभरद्वसवेति अभरद्वसुवदिन्द्रप्रमदवद्वसिष्ठवदिति। अथ पराशराणां त्रार्षेयो वासिष्ठशाक्त्यपाराशर्येति पराशरवच्छक्तिवद्वसिष्ठवदिति अथ कुण्डिनानां त्रार्षेयो वासिष्ठमैत्रावरुणकौण्डिन्येति। कुण्डिनवन्मित्रावरुणवद्वसिष्ठवदिति। अथ संकृतिपूतिमाषाणां त्रार्षेयःशाक्त्यसांकृत्यगौरवीतेति। गुरुवीतवत्संकृतिवच्छक्तिवदिति। अथागस्त्यानाम् एकार्षेय आगस्त्येति होताऽगस्त्यवदित्यध्वर्युरुस्यार्षेयसुहैके आगस्त्यदार्दच्युतेध्मवाहेति दृध्मवाहवद्दृढच्युतवदगस्तिवदिति। अथ क्षत्रियाणां बहवृचसार्षे प्रहणीरन्नेष एवैषां प्रवरो मानवेडपौरुरवसेति पुरुरवोवदिडवन्मनुवदिति अथ येषामुह मन्त्रकृतो न स्युः पुरोहितप्रवरास्ते प्रहणीरन् अथ येषां स्युः पुरोहितप्रवरास्ते पुरोहितप्रवरार्षे यास्तेषां न्यायेनैकार्षेया एव विशां वात्र प्रेति होता। वत्सप्रीवदध्वर्युः। अथाप्रज्ञातबन्धुराचार्यांश्चोपायणमनु प्रब्रवीताचार्यप्रवरं प्रहणीताद्धुह तार्ष्णिड एकार्षेयं सार्ववर्णिकं समामनन्ति मानवेति होता मनुवदित्यध्वर्युर्मानव्यो हि प्रजा इति हि ब्राह्मणम्"। एवं प्रवरभेदं निर्णीय होमविशेषोपयोगिता तदुत्तरग्रन्थेनोक्ता। "आर्षेयाणि गृहपतेः प्रवरित्वात्मादीनां मुख्यानाम्" आश्व० श्रौ० "आर्षेयवरणे गृहपतेः प्रथमं वरित्वा आत्मादीनां मुख्यानां प्रहणीते" इति वृत्तिः। ऋषिं कृटस्थऋषिमारभ्य अयं प्रवरइत्यर्थः ढकि मूलपुरुषावधिप्रवरर्षिभेदार्थेयाएवायः यथोक्तं "अथार्षेयं प्रहणीते ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्योयो यज्ञं प्रापदिति। तस्मादार्षेयं प्रहणीते परस्तादर्वाक् प्रहणीते। परस्ताद्ध्य वांच्यः प्रजाः प्रजायन्ते ज्यायस्यस्तय उ चैवैतं निरुतदृदं हि पित्रैवाग्रेऽधापुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक् प्रहणीते। स आर्षेयसुवाह" इत आ०। "कौत्सकर्ण

प्रवरो विधीयते । *तत्र धर्म्मविशेषमाह परस्तादिति तस्मिन्नार्षेयप्रवरणे कूटस्थऋषिमारभ्य तत्पुत्रपौत्रादि क्रमेणावांचीनं वरणं कर्त्तव्यम् । यथा आङ्गिरसबार्हस्पत्यभारद्वाजेत्यादि । तथा च ज्येष्ठस्य पतये एवैतं निङ्क्ते अनेन प्रवरणेन निवेदयति भा०" । "असमानार्षेयां कन्यां वरयेत्" विष्णुः । "प्रवरस्तु गोत्रप्रवर्त्तक मुनेर्व्यावर्त्तको मुनिगणः" इति माधवाचार्यः ।

ऋषिरेव स्वार्थेढक् । ३मन्त्रद्रष्टरि ऋषौ "प्रजापतिः प्रथमां चितिमपश्यत्" प्रजापतिरेव तस्या आर्षेयं, देवा द्वितीयां चितिमपश्यन्देवा एव तस्या आर्षेयम्, इन्द्राग्नी च विश्वकर्म्मा च तृतीयां चितिमपश्यंस्त एव तस्या आर्षेयम् ऋषयश्चतुर्थीं चितिमपश्यन्नृषय एव तस्या आर्षेयं परमेष्ठी पञ्चमीं चितिमपश्यत् परमेष्ठ्येव तस्या आर्षेयं स यो हैतदेवं चितीनामार्षेयं वेदार्षेयवत्यो हास्य वन्धु मत्यश्चितयो भवन्ति" इति श०ब्रा० ।

आर्ष्टिषेण पु० १चन्द्रवंश्ये भजन्दपात्मजे नृपभेदे "क्षत्र वृद्धात्मजस्यास्य सुनहोत्रोमहाबलाः । सुनहोत्रस्य दायादा स्त्रयः परमधार्म्मिकाः । काश्यः शलश्च द्वावतौ तथा गृत्समदः प्रभुः । पुत्रोगृत्समदस्याथ शुनकोयस्य शौनकः । ब्राह्मणाः क्षत्रियाश्चैव वैश्याःशूद्रास्तथैव च । शलात्मजस्यार्ष्टिषेणस्तनयस्तस्य काश्यपः" । हरि०वं०२०१अ० । आर्ष्टिषेणोदिलीपश्च महात्मा चायुरेवनरः" स०भा०प० । २गोत्रप्रवरभेदे आर्षशब्दे उदा० ।

आर्ष्टिषेणाश्रम न० ६त० । तीर्थभेदे तच्च व०प० १५५अध्याये दर्शितं यथा । "अनेनैव पथा राजन् ! प्रतिगच्छ यथागतम् । नरनारायणस्थानं बदरीत्यभिविश्रुतम् । तस्माद्व्यासर्षि कौन्तेय ! सिद्धचारणसेवितम् । बहुपुण्यफलं रम्यमाश्रमं दृषपर्वणः । अतिक्रम्य च तं पार्थ ! चार्ष्टिषेणाश्रमे वसेः" ।

आर्हत त्रि० अर्हत इदम् अण् । १जैनसम्बन्धिनि । २तन्मते न० तन्मतञ्चार्हच्छब्दे ३८२ पृष्ठे दर्शितम् ।

आर्हन्ती स्त्री न०अर्हतो भावः ब्रह्म०ष्यञ् तुम् च पित्त्वात् ङीष् यलोपः। योग्यतायाम् । "औत्तार्हन्तीचरणरेणुभिर्मेदुरिभिरर्हन्निग्रम्" सि० कौ० । स्त्रीत्वाभावपक्षे । आर्हन्त्यमित्यपि तत्रार्थे न० ।

आर्हायण स्त्री अर्हस्यापत्यम् अश्वा० फञ् । अर्हन्नामकऋषेर्गोत्रापत्ये । स्त्रियां ङीप् ।

आर्हीय पु० अर्हमभिव्याप्य आर्हम् तत्र विहितः तस्येदम् वा ढञ्त्वात् छ । "आर्हात् इत्यारभ्य "तदर्हति" इत्यन्त सूत्रजातेन तत्तदर्थेषु पाणिनिविहिते १प्रत्ययभेदे । २तद्वोध्ये तत्तदर्थे च । "आर्हीयेष्वर्थेषु" सि०कौ० ।

आल न० आलति भूषयति आ+अल–भूषादौ अच् । १हरिताले तद्धि वर्णोत्कर्षेण स्वयुक्तपदार्थं भूषयतीति तस्य तथात्वम् । "ततो हरिद्राञ्जनभृमरोधपलाङ्गचूर्णैः समनःशिलालैः" । "मनःशिलालमधुककुष्ठचन्दनपद्मकैः" "रसाञ्जनं चन्दनसैन्धवञ्च मनःशिलाले लशुनञ्च तुल्यम्" सुश्रु० । हरितालभेदगुणाद्युक्तम् भा० प्र० । "हरितालं तु तालं स्यादालं तालकमित्यपि । हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञितम् । तयोराद्यं गुणश्रेष्ठं ततोहीनगुणं परम् । स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् । पत्राख्यं तालकं विद्याद् गुणाढ्यं तद्रसायनम् । निष्पत्रं पिण्डसदृशं खल्वसत्वं तथा गुरु । स्त्रीपुष्पहारकं खल्व गुणैः तत् पिण्डतालकम् । हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् । कण्डूकुष्ठास्रदोषाभ्रकफपित्तक व्रणान् । हरति च हरितालं चारुतां देहजातां सृजति च बहुतापानङ्गसङ्कोचपीड़ाः । वितरति कफवातौ कुष्ठरोगं विदध्यादिदमधितमशुद्धं मारितं वाप्यसम्यक्" । आ+अल–पर्याप्तौ अच् । २अनले ३त्रेष्टे च त्रि० ।

आलक्षि त्रि०आ+लक्ष–इन् । ज्ञातरि स्त्रियां गौरा०ङीष् ।

आलक्षित त्रि०आ+लक्ष–क्त । १सम्यग्ज्ञाते, २लिङ्गेन ज्ञाते च

आलक्ष्य त्रि० आ+लक्ष-यत् । १सम्यग्ज्ञेये २लक्षणेन वेद्ये च "आलक्ष्यपारिप्लवसारसानि" रघुः । आलक्ष्यादैव पुरुषाः कुले जाता महागुणाः भा०व०२०७ । ल्यप् । ३सम्यक् ज्ञात्वेत्यर्थे अव्य० ।

आलगर्द्द पु० अलगर्द्द एव स्वार्थे अण् । जलसर्पे । [ङीष्

आलजि त्रि० आ+लज–इन् । आसाधके स्त्रियां गौरा०

आलब्ध त्रि० आ+लभ–क्त । १संसृष्टे २संयुक्ते "चन्दनेन समालब्धे कुङ्कुमेन विलिपिते" दुर्गाचंमन्त्रः । ३स्पृष्टे ४हिंसिते च । [क्तिन्नन्तेऽपि गौरा० वा ङीष् ।

आलब्धि स्त्री आ+लभ–क्तिन् । स्पर्शे २हिंसायां च

आलभन न० आ+लभ–ल्युट् । १हिंसायां २स्पर्शे । पक्षे तुम् ३अर्हने च । 'तिला भक्षयितव्याश्च सदा त्वालम्भनञ्च तैः" भा०आ० प०ऽ८अ० । तत्रार्थे "आलम्भनम्" कात्या०६,२,१८ ।

आलभनीय त्रि० आ+लभ–अनीयर् । १स्पृश्ये २हिंसनीये च तुम् । ३अर्हनीये "सङ्कल्पालम्भनीयानि प्राग्नीया-

नृपस्करान्" । यागादौ आलम्भनीयः पशुः ।

आलभ्य त्रि० । आ+लभ–यत् । १स्पृश्ये २हिंस्ये आ+लभ–ल्यप् । ३स्पृष्ट्वेत्यर्थे ४हिंसित्वेत्यर्थे च अव्य० ।

आलम्ब पु० आ+लबि–कर्मणि घञ् । आश्रयणीये, "निरालम्बोलम्बोदरजननि ! कं यामि शरणम्" जगन्नाथः "इह हि यततां नास्त्यालम्बो न चापि निवर्त्तनम्" शान्ति० ग "रामे सलक्ष्मणे याते सीतां शून्ये यथासुखम् । निरालम्बां हरिष्यामि" रामा० । २वैशम्पायनान्तेवासिभेदे आरुणिशब्दे ८० २पृष्ठे विवृतिः । भावे घञ् । ४आश्रयणे

आलम्बन न० आ+लबि–कर्मणि–ल्युट् । १आश्रयणीये "यस्मादेष विभावादिसमूहालम्बनात्मकः" सा० द० उक्ते २रसालम्बने नायकादौ । "आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्" इति तस्यालम्बनशब्दार्थत्वेकारणमुक्तं तत्रैव । रसभेदे आलम्बनभेदाश्च "सा० द० उक्तायथा शृङ्गारे "परोढां वर्जयित्वा तु वेश्यामाननुरागिणीम् । आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः" । रौद्रे "आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्" । हास्ये "विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः । तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्" । करुणे । "शोच्यमालम्बनं मतम्" । वीरे "आलम्बनविभावास्तु विजेतव्यादयोमताः" भयानके । "यस्मादुत्पद्यते भीतिस्तदेवालम्बनं मतम्" । जुगुप्सायाम् । "दुर्गन्धमांसपिशितत्वदेवालम्बनं मतम्" । विस्मये । "विस्मये च वस्तु लोकातिगमालम्बनं मतम्" शान्ते "अनित्यत्वादिनाऽशेषवस्तुनोऽसारतां तु या । परमात्मस्वरूपं वा तस्यालम्बनमिष्यते" । ४बौद्धमतसिद्धे प्रत्ययभेदे च "चत्वारः प्रत्ययाः प्रसिद्धा आलम्बनसमनन्तरसहकार्य्यधिपतिरूपा" इति विभज्य "तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलोल्लेखिप्रत्ययत्वात् नीलाकारता भवतीति" सर्वदर्श० । अधिकमालयविज्ञानशब्दे वक्ष्यते ।

आलम्बि स्त्री आलम्बस्य ऋषिभेदस्यापत्यम् इञ् । वैशम्पायनान्तेवासिन आलम्बर्षेरपत्ये स्त्रियां गौ० ङीष् । सा च शुक्लयजुर्वेदान्तर्गतवंशमाता "आलम्बीपुत्रात् आलम्बीपुत्रः" शत० ब्रा० । इञन्तात् यूनि फञ् । आलम्बायनः तस्य युन्यपत्ये स्त्रियां ङीप् । सा च शुक्लयजुर्वेदवंशान्तर्गतर्षिभेदमाता । "आलम्बायनीपुत्रादालम्बायनीपुत्रः" शत० ब्रा०

आलम्बित त्रि० आ+लबि–क्त । १धृते २गृहीते च ।

आलम्बिन् त्रि० आ+लबि–णिनि । आश्रयिणि । "गजाजिनालम्बि दुकूलधारि वा" कुमा० "देवस्तनभुजालम्बी-जैत्रमध्यास्त राघवः" रघुः । "आलम्बिभिश्चन्द्रकिणां कलापैः" माघः स्त्रियां ङीप् । आलम्बेन वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते णिनि । आलम्बप्रोक्ताध्यायिषु ब० व० ।

आलम्भ पु० आ+लभ–घञ् मुम् । संज्ञायां । वर्ज्यवेदित्यनुषङ्गे "स्त्रीणाञ्च प्रेक्षणालम्भनुपघातं परस्य च" मनुः २हिंसने च । "अश्वालम्भं गवालम्भं संन्यासं पल पैतृकम्" आदिपु० । "क्षुज्जानामोषधीनां जातानाञ्च स्वयं वने । दृष्ट्वालम्भोऽनुगच्छेद्गां दिनमेकं पयोव्रतम्" मनुः" । "शास्त्रे प्रीतान्यमालम्भायानुमन्यते तयानुमतमालभते" शत० ब्रा० । "आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ । महर्षयो महाभाग ! बभूवुः कृपयान्विताः" भा० आ० ६१ अध्याये । [गौः" सि० कौ"

आलभ्य त्रि० आ+लभ–तुम् ण्यत् । हिंस्ये । "आलभ्यो

आलय पु० आलीयतेऽस्मिन् आ+ली–आधारे अच् । "गृहे २आधारे च, "हिमालययोनाम नगाधिराजः" कुमा० "तत्राभरालयमरालमरालकेशी" नैष० । "न हि दुष्टात्मनामार्य्या निवसत्यालये चिरम्" रामा० "आलयं देवगन्धर्वा सुघोरं खाण्डवं वनम्" भा० आ० २२३ अ० । भावे घञ् । ३संश्लेषे मर्य्यादायामव्ययी० । ४लयपर्य्यन्ते अव्य० । "पिबत भागवतं रसमालयम्" भाग० ।

आलयविज्ञान न० आलयं लयपर्य्यन्तस्थायि विज्ञानम् । बौद्धमतसिद्धे अहमास्पदे विज्ञानभेदे । "तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत् स्यात् प्रवृत्तिविज्ञानं यच्चीलादिकं सुल्लिखेत्" तेषां मते हि विज्ञानातिरिक्तो बाह्यपदार्थो नास्ति, ज्ञानस्यैवाकारविशेषः अर्थोल्लेखी । आलयविज्ञानस्य सदातनत्वेऽपि कदाचित् नीलाद्युल्लेखिता तथा हि विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखनाः काचित्कत्वात् इति विज्ञानस्य कादाचित्कत्व सिद्धिः "तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्वाच्योऽर्थो बाह्य एव न, वासनापरिपाकप्रत्ययस्य कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम् । विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्य्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्व्वक्षणः कल्पीक्रियते सन्तानान्तरनिबन्धत्वानङ्गीकारात् । ततश्च प्रवृत्तिज्ञानजनकालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्व्वेऽप्यालयविज्ञानवर्त्तिनः

क्षणाः समर्था एवेति वक्तव्यम् । न चेदेवं कोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात् । सर्व्वे समर्था इति पक्षे कार्य्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्व्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षड़पि प्रत्ययाश्चत्वारः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेवानिच्छताप्यङ्गीकर्त्तृमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम् । ते चत्वारः प्रत्ययाः प्रसिद्धाः आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः । तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद्बोधरूपता, सहकारिप्रत्ययादालोकात्, चक्षुषोऽधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमः । विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपत्योपलम्भात् । एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि । एवं चित्तचैत्तात्मकस्कन्धः षड्विधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः । तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः । आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः । प्रागुक्तस्कन्धत्रयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः । गौरित्यादिशब्दोल्लेखिविज्ञानप्रवाहः संज्ञास्कन्धः वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्म्माधर्म्मौ च संस्कारस्कन्धः" सर्व्वद० विज्ञानानां क्षणिकत्वेऽपि पूर्व्वपूर्व्वक्षणिकविज्ञानसंस्काराणामुत्तरोत्तरविज्ञाने संक्रमः तत्संक्रमाच्च स्मरणं, सुषुप्तौ च आलयविज्ञानस्य सत्त्वात् तत्रैव सर्व्वसंस्काराणामवस्थितेः सुप्तोत्थितस्य स्मरणसम्भव इत्यतो बौद्धैः आलयपर्य्यन्तं क्षणिकविज्ञानव्यक्तिधाराणां स्थायित्वमङ्गीक्रियते ।

आलर्क न० अलर्कस्येदम् अण् । चिप्रकुक्कुरविषे । "निहन्तिविषमालर्कं मेघवृन्दमिवानिलः" सुश्रु० ।

आलवण न० न लवणं त०न० अलवणस्य भावः ष्यञ् । लवणरसभिन्नत्वे । नास्ति लवणं यत्र बहु० तत् त्व वा न ष्यञ् । अलवणता स्त्री अलवणत्वं तु न० लवणशून्यत्वे

आलवाल न० समन्तात् लवं जलवमालाति आ+ला–क । वृक्षमूले सेकार्थं मृदादिनिर्म्मिते जलाधारे सेतौ । "विश्वासाय विहङ्गानामालवालाम्बुदायिनाम्" रघुः । "विपुलालवालस्थतवारिदर्पणः" माघः । भू०वस्त्रवः वर्ष्मधोऽपि "जरद्वृक्षहस्तुनिभिरिव जटालबालकमण्डलधरैः" (पादपैः) काद०

आलस त्रि० आलसति ईषत् व्याप्नियते अच् । १क्रियामान्द्ये अलसस्यापत्यम् विदा० अञ् । २अलसापत्ये पु०स्त्री०यून्यपत्ये हरिता०फञ् । आलसायनः तस्य यून्यपत्ये पुंस्त्री० ।

आलस्य न० अलसस्य भावः ष्यञ् । विहितक्रियाकरणायानुत्साहे आलस्यञ्च "किमालस्यं च कः शोकः" इति यक्षप्रश्ने "धर्म्मनिष्क्रियतालस्यं शोकस्त्वज्ञानमुच्यते" भा०व० ३१२ अ० युधिष्ठिरेण लक्षितम् । "भक्तस्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते" सुश्रुतेन लक्षितञ्च बोध्यम् "सा०द० उक्ते व्यभिचारिभावभेदे च "आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" यथा "न तथा भूषयत्यङ्गं न तथा भाषते सखीम् । जृम्भते मुहुरासीना बाला गर्भभरालसा" सा०द० "आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" मनुः । भारतोक्तधर्म्मक्रियाशून्यत्वरूपम् अत्रालस्यम् ।

आलात न० अलातमेव स्वार्थेऽण् । अलाते वह्निदीप्ताङ्गारे ।

आलान न० आलीयतेऽत्र आ–ली–ल्युट् । १गजबन्धनस्तम्भे करणे ल्युट् । २तद्बन्धनरज्ज्वाम् भावे ल्युट् । ३बन्धनमात्रे च । तत्र स्तम्भे । "अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः" रघुः । "द्रुमदमलिनमालानस्तम्भयुगलम्बपरिसलमिवोरुदण्डद्वयेन" काद० "तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" बन्धने "गजालानपरिक्लिष्टैराक्षोटैः शाद्वलानताः" रघुः ।

आलानिक त्रि० आलानमिव स्वार्थे विनयादि० ठक् । १आलाने । आलानं बन्धनं प्रयोजनमस्य ठक् । गजबन्धनसाधने काष्ठादौ "आलानिकं स्थाणुमिव द्विपेन्द्रः" रघुः

आलाप पु० आ+लप–करणे–घञ् । स्वरसाधनाक्षरे सारिगमादौ (आलापचारी) "आलापैरिव गान्धर्व्वमदीयत पदातिभिः" माघः "आलापैः स्वरसाधनैरक्षरविशेषैः" मल्लि० । भावे घञ् । २कथनमात्रे च" "काव्यालापाश्च ये केचित् गीतकान्यखिलानि च" विष्णुपु० आ+लप–णिच्–अच् । ३परस्परकथने । "अये दक्षिणेन पुष्पवाटिकामालापइव श्रूयते" शकु० । एकस्य कञ्चित् प्रति कथने तेन तत्कथनप्रेरणात् तं प्रति कथ्यते इति परस्परकथनस्य इतरेतरकथनप्रयोज्यत्वात्तथात्वम् ।

आलापन न० आ+लप–णिच्–करणे ल्युट् । १परस्परकथोपकथने आभाषणे आलापशब्देऽस्य प्रवृत्तिहेतुत्वमुक्तम् "स्यादालापनमाभाषः इत्यमरः २स्तुतिवाचने च "मङ्गलालापनैर्हौमैः" रामा० [२आभाष्ये

आलाप्य त्रि० आ+लप–कर्म्मणि ण्यत् । १कथनीये णिच्–यत् ।

आलाबु(बू) स्त्री अलाबु पु० पूर्व्वपदोदर्घः वा ऊङ्। (लाउ) तुम्बीफले शब्दरत्नावली।

आलावर्त्त न० आलं पर्य्याप्तमावर्त्यतेऽत्र आ+वृत–णिच् कर्मणि–अच्। वस्त्रनिर्म्मिते व्यजने हेम०।[सम्यग्वृत्ते न०

आलास्य पु० आलं पर्य्याप्तमास्यं यस्य। कुम्भीरे। मा०स०।

आलि पु०आलति दंशे समर्थो भवति आ+अल–पर्य्याप्तौ इन्। १दष्टिके २भ्रमरे ३तज्जातिस्त्रियां स्त्री ङीप्। आलयति भूषयति अलभूषणे–णिच्+इन्। ४सख्यां वयस्यायाम् "असम्भवद्घनरसा शतालिपरिषेविता। करं न सहते राजन्। भूमिर्नववधूरिव" उद्भटः वा ङीप्। आलोत्यधत्त। "आलीव पश्य प्रतिषेधतीयं कपोतङ्कारगिरा वनाली" नैष०। "तत्कालमालीभिरहस्यतालम्" नैष० "ममालि। प्राचीनैः प्रत्तरसुकृतैरद्य फलितम्" उद्भटः। "निवार्य्यतामालि। किमयं वटुः" कुमा०"स्मित-सुभगतामालीं दृष्ट्वा सलज्जमवाञ्चितम्" सा०द०। "आलति वारयति जलम् आ+अल–इन् वा ङीप्। आगन्तुकस्य क्षेत्रस्यस्य च जलस्य निवारके ५सेतौ"। "शतालिपरिषेवितेति" आ+अल–पर्य्याप्तौ इन् वा ङीप्। ६सन्ततौ श्रेण्यौ च वनाली नैष० "तोयान्तर्भास्करालीव रेजे सुनिपरम्परा" कुमा० लीनामालीभिव तरवोबिभ्राणाः"माघः। ७रेखायाञ्च स्त्री वा ङीप् "विषमहरिचन्दनालिना" माघः। ८शुद्धान्तःकरणे० ९अनर्घे च त्रि० मेदि०।

आलिगव्य पुंस्त्री अलिगोरपत्यं गर्गा० यञ्। अलिगुसुनेरपत्ये स्त्रियां यञन्तत्वात् फक्। फिञ्चात् गौरा० ङीष्। आलिगव्यायनी।

आलिङ्गन न० आ+लिगि–ल्युट्। आश्लेषणे अङ्गेनाङ्गसंयोजनभेदे। "आलिङ्गनान्यधिकृताः स्फुटमाकुरेव"माघः "प्रियालिङ्गननिर्वृतिम्" रघुः। तच्च सप्तधा। आमोदालिङ्गनं सुदितालिङ्गनं प्रेमालिङ्गनं मानसालिङ्गनं रूढ्यालिङ्गनम् मदनालिङ्गनम् विनोदालिङ्गनमिति भेदात्।

आलिङ्गित त्रि०आ+लिगि–कर्म्मणि क्त। १आश्लिष्टे "तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः" सा०द० टीकाधृतप्रहेलिका "योगोनाभ्यसितोव्रतं न चरितम्–नालिङ्गिता कामिनी दृष्टं जन्म निरर्थकं क्षितितलेऽरण्ये यथा मालती" सा०द०। "विंशत्यक्षरोक्तिर्भद्रर्णीयः स्यादालिङ्गितो ह्यसौ" तन्त्रसारोक्ते विंशत्यक्षरावधि त्रि० मदक्षरके २मन्त्रे भेदे पु०

आलिङ्गिन् त्रि० अ–लिगि–णिनि। आलिङ्गनकर्त्तरि स्त्रियां ङीप्।

आलिङ्ग्य पु० आ+लिग–ण्यत्। आलिङ्गनीये प्रियादौ २आलिङ्ग्य वादनीये मृदङ्गभेदे पु० स च "चतुरङ्गुलहीनोऽङ्गान्मुखे चैकाङ्गुलेन यः। यवाकृतिःस आलिङ्ग्य आलिङ्ग्य स हि वाद्यते" इति शब्दार्णवोक्तलक्षणः। आ+लिगि–ल्यप्। ३आश्लिष्येत्यर्थे अव्य०

आलिङ्ग्यायन पु० आलिङ्ग्यस्य मृदङ्गभेदस्यायनं यत्र। १ग्रामभेदे तस्मादूरभवं नगरम् अण् वरणा०तस्य लुप्। तद्ग्रामस्यादूरभवे नगरे। "लुपि व्यक्तिवचने" प्राणिन्युक्तेः नगरेऽपि पुंस्त्वम्। [इक्षुत्पाते त्रिका०।

आलिञ्जर पु० अलिञ्जर एव स्वार्थे अण्। (जाला) मृण्मये

आलिन्द्र पु० अलिन्द्र एव स्वार्थे अण्। १बहिर्द्वारप्रकोष्ठे २गृहाभ्यन्तरगत्यार्थवेद्याञ्च शब्दर०३गृहैकदेशे अमरमा०। स्वार्थे कन्। आलिन्द्रकः तेष्वर्थेषु पु०।

आलिप त्रि० आ+लिप–क। आलेपनकारके।

आलिप्त त्रि० आ+लिप–क्त। १कृतालेपने २दग्धादीपने च

आलिम्पन न० आ+लिप–ल्युट् पृ०सुम्। तण्डुलचूर्णमिश्रितोदकेन मङ्गलार्थं दीयमाने आलेपने आदीपने। (आलिपना,) त्रिका०।

आलीढ त्रि० आ+लिह–क्त। १आस्वादिते २कृते"सेव्यान्यमालीढमिवासुरास्त्रैः" रघुः। "स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम्। त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति। अन्वर्थं स्यात् समपदमालीढं तु ततोऽग्रतः। दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्य्ययः" इत्युक्तलक्षणे अग्रतो दक्षिणं पादं व्यवस्थाप्य वामपादाकुञ्चनेन स्थितिरूपे २युद्धार्थे धन्विनां स्थानभेदे न०।"अतिष्ठदालीढविशेषशोभिना" रघुः। "पायान्नीलोत्पलाभा रविरथिविलसत्कुण्डलालीढपादा" तन्त्रसा० रत्नावलीध्या० अग्निपुराणे तु समपदादीन्यन्यथा निरुक्तानि यथा "अङ्गुष्ठगुल्फपार्ष्ण्यङ्घ्रि श्लिष्टाःस्युः सहिता यदि। इष्टं समपदं स्मृतमेतल्लक्षणतस्तथा। बाह्याङ्गुलिस्थितौ पादौ स्तब्धजानुकमायतौ। त्रिवितस्त्यन्तरे स्थानमेतद्धि धानुषमुच्यते। हंसपक्ष्माकृतिसमे दृश्येते यत्र जानुनी। चतुर्वितस्त्या विच्छिन्ने तदिदं मण्डलं स्मृतम्। भग्नवामपदं पश्चात्, स्तब्धजानूरुदक्षिणम्। वितस्त्योः पञ्च विस्तारे तदालीढं प्रकीर्त्तितम्। एतदेव विपर्य्यस्तं प्रत्यालीढं प्रकीर्त्तितम्" विकटादिस्थानं धन्विस्थानशब्दे वक्ष्यते।

"नतांसमाकुञ्चितसव्यपादम्" कुमा० टी० मल्लिनाथेन आकुञ्चितसव्यपादत्वेन आलीढस्थानके स्थितमिति व्याख्यातम् । स्वार्थे कन् तत्रैव । शुभ्रा० पाठात् ढक् । आलीढेयः तद्वति त्रि० । संज्ञायां कन् । आलीढकम् । वत्सानां स्थलेषु क्रीड़नभेदे न०

आलीन त्रि० आ+ली–कर्त्तरि क्त । १आश्लिष्टे भावे क्त । २संश्लेषे न० । तत्र साधु अण् । ३वङ्गे धातुभेदे तस्य धात्वन्तरसंश्लेषकारकत्वात् तथात्वम् संज्ञायां कन् । तत्रैव । तद्गुणादि रङ्गशब्दे वक्ष्यते ।

आलु पु० आलाति आ+ला–मित० डु । कृ–उ णिच्च रस्य लः वा । १प्रेक्षके २भेलके शब्दरत्ना० खल्ववारिधानिकायां सनाले ३जलपात्रभेदे (झारी) स्त्री० । ४कन्दभेदे न० राजनि० । तस्य भेदा नानाविधाः "कन्दो बहुविधो लोके आलुशब्देन भण्यते । कच्चालु चैव षष्टालु पिण्डालु शर्करादिकम् काष्ठालु चैवमाद्यं स्यात् तस्य भेदा अनेकशः" । इत्युक्तेः । आलुकशब्दे विवृतिः ।

आलुक पु० आ+लाति गृह्णाति कासरोगं वा आ+ला–मित० डु संज्ञायां कन् । १शेषनागे २कासालौ च । आलु+स्वार्थे कन् कन्दभेदे न० तद्भेदगुणादि भा०प्र० उक्तं यथा । "आलुकमप्यालूकं तत् कथितं वीरसेनश्च । काष्ठालुकञ्च ह्रस्वालुकं दीर्घालुकानि कथ्यन्ते । पिण्डालुकमप्यालुकरक्तालुकानि कथितानि" तत्र काष्ठालुकं काठिन्ययुक्तं (कठारु) यङ्खालुकं श्वेततायुक्तं यङ्खाकारम् (शंखआलु) ह्रस्वालुकं दीर्घतायुक्तं महाशरीरम् (चुवड़ोआलु) पिण्डालुकं वर्त्तुलाकारं (सुथनी) मध्यालुकं माधुर्य्ययुतं दीर्घमुखं शर्करालु(शकरकन्द)रक्तालुकं रक्ततायुक्तं(रतालु)तेषां गुणास्तत्रोक्ताः "आलुकं शीतलं सर्वं विष्टम्भि मधुरं गुरु । वृष्यमूत्रमलं रूक्षं दुर्जरम् रक्तपित्तनुत् । कफानिलकरं बल्यं दृष्यं स्तन्यविवर्द्धनम्" । गौरा० ङीष् । दीर्घाकारशुङ्गयुक्तरक्तालुके स्त्री । "रक्तालुभेदो वा दीर्घा तन्वी च ग्रथितालुकी । आलुकीबलकृत् स्निग्धा गुर्व्वी हृत्कफनाशिनी । विष्वम्भकारिणी तैले तलिताऽतिरुचिप्रदा" भावप्र०

आलुञ्चन न० आ+लुचि ल्युट् । उत्पाटने । केशादेः बन्धराहित्ये च । [आलुञ्चितभूर्जा" ।

आलुञ्चित त्रि० आ+लुचि–क्त । उत्पाटिते असंयते केशादौ

आलुण्टन आ+लुटि–ल्युट् । बलादपहरणे (लुट्) ।

आलुल त्रि० आ+लुल–क । उन्मुक्ते चलीभूते । भृशा० क्यार्थे क्यङन्त–आलुलायितः असंयते त्रि० ।

आलू पु० आलूनाति आ+लू–क्विप् । आलुशब्दार्थे स्वार्थे कन् तत्रैव । "आलुकमप्यालूकमिति" भाव० प्र० । "आलूकं शीतलं सर्व्वमिति" भाव० प्र० पाठान्तरम् ।

आलून त्रि० आ+लू–क्त । १ईषच्छिन्ने २सम्यक्छिन्ने च "तेनामरबधूहस्तैः सद्यआलूनपल्लवाः" कुमा० । [लेखपत्रे ।

आलेख पु० आ+लिख–घञ् । १सम्यक्लेखने । आधारे घञ् ।

आलेखन न० आ+लिख–भावे ल्युट् । १सम्यग्लेखे । आलिखति ल्यु । २आलेखनकर्त्तरि त्रि० । ३ आचार्य्ये पु० तस्योपदेशकर्त्तृत्वात्तथात्वम् । "संस्थिते ऽपायतोऽवश्यं गमयेयुरितीत्यालेखनः" । आश्व० औ० । आलेखन आचार्य्यः "इत्तिः । करणे ल्युट् लेखनसाधने स्त्रियांङीप्

आलेख्य त्रि० आ+लिख–ण्यत् । चित्रादौ लेख्यदेवादिप्रतिबिम्बे "विधातुमालेख्यमशक्नुवन्तः" माघः "इति संस्मितो वाणीबलस्यालेख्यदेवता." माघः । "अहोरूपमालेख्यस्य" शकु० २लेखनीये त्रि० । आधारे ण्यत् । ३चित्रे ।

आलेख्यशेष त्रि० आलेख्यं चित्रमेव शेषो यस्य बहु० । मृते, क्षेम० । मृतस्य हि चित्रे एव प्रकृतिरूपेण अवस्थानात् तथात्वम् । "आलेख्यशेषस्य पितुर्विवेश" । रघुः ।

आलेप पु० आ+लिप–घञ् । १उपलेपे २आलिम्पने च । (आलिपना) ल्युट् तत्रैवार्थे न० । "जातातङ्कारचयति चिरं चन्दनालेपनानि" सा० द० । आलिप्यते कर्म्मणि ल्युट् । ३आलिप्यमाने च ।

आलोक पु० आलोक्यतेऽनेन आ+लुक–लोक–वा करणे घञ् । (आलो) १सूर्य्यादिप्रकाशे, "भवेदालोकोद्भूतरूपयोः" भाषा० उक्तेः आलोकसंयोगस्य द्रव्यचाक्षुषप्रत्यक्षे कारणत्वम् इति नैयायिकाः अन्धकारस्य द्रव्यत्वादिनां मते तद्भिन्नद्रव्यप्रत्यक्षे कारणत्वमिति भेदः । तथाहि पेचकादिचाक्षुषस्य आलोकसंयोगमन्तरेणैव उत्पत्तिदर्शनात् आलोकसंयोगस्य न सर्व्वत्र कारणत्वमित्यतोऽन्धकारेऽपि तथा कल्पनमिति । एतदभिप्रायेणैव "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय इति" देवीभा० केषांचिद्दिवान्धत्वोक्तिः । "आलोकमार्गं सहसा व्रजन्त्या" कुमा० रघुश्च । भावे घञ् । २दर्शने । "आलोकमात्रेण सुरानशेषान्" कुमा० । "वत्सालोकप्रवर्त्तिना" रघुः । "वैधर्म्यं कम्पवैरस्यमार्त्तालोकास्रशोषकृत्" सा० द० । "स्त्रीणां प्रियालोकफलो हि वेषः" कुमा० । "मलिनो हि यथादर्शो रूपालोकस्य

सक्षमः" या० स्मृ० "यदालोके सूक्ष्मं व्रजति सहसा तद्विप्लुतताम्" भक्तु०। "जनास्तदालोकपथात् प्रतीयुः" रघुः।

आलोकन न० आ+लुक-लोक-वा भावे ल्युट्। दर्शने "ततस्तदालोकनतत्पराणाम्"। "भुवनालोकनप्रीतिः खर्गिभिर्नानुभूयते" कुमा० "व्रजति हि सफलत्वं वल्लभालोकनेन" माघः।

आलोकनीय त्रि० आ+लुक-लोक-वा अनीयर्। दर्शनीये द्रष्टुं योग्ये "चित्रन्यस्तादृव गताः प्रकामालोकनीयताम्" कुमा०।

आलोकित त्रि० आ+लोक-क्त। दृष्टे। [ङीप्।

आलोकिन् त्रि० आ+लुक्-लोक-वा-णिनि। दर्शके स्त्रियां

आलोक्य त्रि० आ+लोक-ण्यत्। दर्शनीये। ल्यप्। दृष्ट्यर्थे अव्य०

आलोचक त्रि० आ+लुच-णिच् ण्वुल्। आलोचनाकारके।

आलोचन न० आ+लुच-णिच्-भावे ल्युट्। १विशेषधर्म्मादिना १विवेचने नैया० सामान्यविशेषशून्यतया इन्द्रियजन्ये निर्विकल्पकस्थानीये सांख्यमतसिद्धे २अन्तःकरणवृत्तिभेदे। यथोक्तं सां०कौ० आलोचितमिन्द्रियेण भवति इदमिति सम्मुग्धम्। इदंनेदमिति एवं कल्पनया विशेष्यविशेषणभावेन विवेचयतीति यथाऽऽहः। "सम्मुग्धं वस्तुमात्रन्तु प्राक्प्रत्यक्षणजन्यविकल्पितम्। तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः"। तथा हि "अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं मुग्धवस्तुकमिति। ततःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया। बुद्ध्यावसीयते सा हि प्रत्यक्षत्वेन सम्मता"। तच्च विशेष्यविशेषणसंसर्गानवगाहि ज्ञानम् "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः" सां०का० णिच्-युच्। आलोचनायत्व स्त्री २दर्शने च। "पश्यार्थैश्चानालोचने" इश्वरेनालोचने कञ् च" पा०। ४लोचनपर्य्यन्ते अव्य० "आलोचनान्तं अवणं वितत्य" रघुः।

आलोचित त्रि० आ+लुच्-णिच्-क्त। आलोचनाविषयीभूते विशेषदर्शनादिना कृतालोचने "आलोचितमिन्द्रियेणेति" सां०कौ०। कृतिकर्त्तव्यतया २अवधारिते च

आलोच्य त्रि० आ+लुच्-ण्यत्। आलोचनार्हे आलोचनाविषयीकार्य्ये। आ+लुच्-णिच्-ल्यप्। आलोचनं कृत्वेत्यर्थे अव्य०।

आलोडन न० आ+लुड-मन्थे-ल्युट्। १विलोडने २मर्द्दने मन्थने "भावनालोडने चास्य कर्त्तव्ये भेषजैर्हितैः" सुश्रु०।

आलोडित त्रि० आ+लोड़-क्त। १मथिते २मर्द्दिते ३चूर्णीकृते च "अलोडितः काञ्चनभूपरागः" इति माघः।

आलोल त्रि० ईषत् लोलः प्रा०स०। ईषच्चञ्चले "आलोलपुष्करसुखोल्लसितैरभीक्ष्णम्" माघः। "क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयन्त्यः मेघदूतम्।

आलोलित त्रि० आ+लुल-णिच्-क्त। ईषच्चञ्चलीकृते

आलोष्टी अव्य० ईषत् लोष्टमिव करोत्यनेन आलोष्ट+णिच्-वा०ई उर्य्यादि। हिंसायां गणर०।

आलोहायन त्रि० अलोहे भवः नड़ा० फक्। अलोहभवे

आवक त्रि० अवति अव-ण्वुल्। रक्षके।

आवट्य पुंस्त्री अवटस्य ऋषेर्गोत्रापत्यम् गर्गा० यञ्। अवटर्षेर्गोत्रापत्ये स्त्रियाम् "आवट्याच्चाम्" पा० चाप्। आवट्या। अवटस्य प्रवरभेदः आर्षेयशब्दे दृश्यः।

आवनतीय त्रि० अवनतस्य सन्निकृष्टदेशादिः कृपा० छण्। अवनतसन्निकृष्टदेशादौ।

आवनेय पु० अवन्या अपत्यं ढक्। मङ्गलग्रहे तस्य महीत उत्पत्तिकथा काशी० १७अ०। "उत्पत्तिश्चास्य वक्ष्यामो भूस्रुतोऽयं यथाऽभवत्। पुरा तपस्यतः शम्भोर्दक्षायज्ञा विधोगतः। भालस्थलात् पपातैकः स्वेदबिन्दुर्महीतले। ततः कुमारः संजज्ञे लोहिताङ्गोमहीतलात्। स्नेहसंवर्द्धितः सोऽथ धात्रा धात्रीस्वरूपया। माहेय इत्यतः ख्यातिं परामयं गतस्ततः" अतएव तस्य कुजभौमेत्यादिसंज्ञा

आवन्त पु० अवन्तेरयं राजाअण्। अवन्तिदेशाधिपे चन्द्रवंश्ये नृपभेदे। "कुन्तेर्धृष्टःसुतोजज्ञे रणधृष्टः परान् प्रति। धृष्टस्य जज्ञिरे शूराश्चयः परमधार्म्मिकाः। आवन्त्यश्चदशार्हश्च बली विषहरश्च यः" हरि० ३७अ०। "दृङ्वेत्कोसलाजादाञ्ञ्यः" पा० ञ्यविधानात् आवन्त्य एवेति पाठः उचितः आवन्त इति तु लिपिकरप्रमादात्।

आवन्त्य त्रि० अवन्तिषु भवः तस्य राजा वा वृद्धत्वात् ञ्य। १अवन्तिदेशभवे २तद्राजे च बहुषु लुक् अवन्तयः। विन्दानुविन्दावावन्त्यौ सैन्येन महताऽवृतौ" भा० व० प० ३०अ०। "विन्दानुविन्दावावन्त्यौ दन्तवक्रश्च वीर्य्यवान्" हरि० व० ६२अ०। ब्रात्याद्ब्राह्मणात् सवर्णायामुत्पन्ने ३वर्णभेदेऽपि। आवन्त्यवाटधानौ च पुष्यधःशैख एव च" मनुः।

आवपन न० ओप्यते स्थाप्यतेऽत्र आ+वप-आधारे ल्युट्। १धान्यस्थापनपात्रे (धल्ला) इति ख्याते। "गोणी आवपनञ्चेत्" सि०कौ० आ+वप-भावे ल्युट्। २भूमौ बीजादेर्निधाने (बोना) "अथात आस्तरणाभेवावपनस्य" कात्या०।